श्रीमद्ब्रह्मसूत्राणुभाष्यम्

श्रीमद्वल्लभाचार्यचरणप्रणीतम्

AṆUBHĀṢYA
ON
THE BRAHMASŪTRA

WITH THE COMMENTARY
BHĀṢYAPRAKĀŚA
AND
THE SUPER- COMMENTARY
RAŚMI ON THE BHĀṢYAPRAKĀŚA

VOLUME 1
ADHYAYA 1

EDITED WITH INTRODUCTION BY
MULCHANDRA TULSIDAS TELIWALA

WITH A NEW INTRODUCTION BY
GOSWAMI SRI SHYAM MANOHARJI MAHARAJ

Ācārya Śrī Vallabha, the founder of the *Śuddhādvaita* school of *Vedānta* tradition is said to be of a divine origin imbued with spiritual insight. His philosophy is called pure-non-dualism undefiled by *Māyā*. He was born in *Vikram Saṁvat* 1535 (1479 A.D.), to Śrī Lakṣmaṇa Bhaṭṭa, a Telugu Brahmin and Illammāgāru, a family which had learning towards Vedic rituals and the worship of Gopālakṛṣṇa. He travelled extensively to the religious places such as Vijyanagar, Kāśī and Aḍail (near Prayāga). At these places, he developed his literary and religious activities. His firm faith in lord Kṛṣṇa's commandment led him to devote to the task of a faithful interpretation of the sacred texts like the *Upaniṣad, Gītā* and *Brahmasūtra*. He found that the essential reality is *Śuddha* (pure) unalloyed with *māyā,* and non-dualism (*Advaya*). He advocated the *Puṣṭi* (divine grace), as the most powerful and unfailing method for attaining Supreme Bliss. His *Siddhānta* is known as *Śuddhādvaita-Brahmavāda-Nirguṇa-Puṣtibhakti Mārga*.

Ācārya Vallabha has written a commentary on the *Brahmasūtra,* known as *Aṇubhaṣya* which is available only in the summary form upto III.2.33, the remaining part was supplemented by his second son Śri Viṭṭhalanātha.

Ācārya differs from the earlier Ācāryas viz. Śaṁkara, Rāmānuja, Madhva, and Nimbārka with regard to the interpretation of the nature of Reality. According to Vallabha, Reality is *Brahman* which is *Sat* (existence), *Cit* (conscious), *Ānanda* (bliss)

Continued on back flap

ISBN 81-88643-08-4 (Vol.1)
ISBN 81-88643-07-6 (Set)

Rs. 3700
(Set of 4 Vols.)

continued from front flap

which is denominated as *Rasa* (sentiment). He is *Pūrṇa Puruṣottama*. Among his divine characteristics *Jñāna* and *Kriyā* are important. He is *Kartā* (doer) and *Bhoktā* (enjoyer). For *Līlā*, He creates the universe out of Himself. Vallabha propagates the path of *Puṣṭi Bhakti* (Divine grace) in order to enjoy the union with the Supreme. The *Puṣṭi* can be realised as in the case of gopi's of Vṛndāvan who, in fact, opened the gateway to realize everything with lord Kṛṣṇa. He is for *Svarūpānanda,* instead of *Brahmānanda*. Lord is full of *Rasa* in which love is most important. This brings enjoyment of the Bliss of the Union with Divine.

The present commentaries on *Aṇubhāṣya* known as *Prakāśa* written by Śrī Puruṣottama Caraṇa, a descendent of Śrī Vallabhācārya and another on the same known as *Raśmi* by Śrī Yogi Gopeśvara, of the same lineage, provide excellent and appropriate interpretation of the tradition. In fact, *Aṇubhaṣya* of Vallabhācārya with these two commentaries given by Śrī Puruṣottamacaraṇa and Gopeśvarajī is the most authentic text for providing illuminating interpretation of the *Brahmasūtra*.

This edition was originally printed by Nirnaysagar Press, Bombay, an institution known for publishing and printing the authentic editions. This work was published some eighty years ago, now printed again with a new Introduction by one of the greatest scholars of modern times in the tradition.

MAHĀPRABHU ŚRĪ VALLABHĀCHĀRYA'S

AṆUBHĀṢYA

ON

THE BRAHMASŪTRA

WITH THE COMMENTARY

BHĀṢYAPRAKĀŚA

OF

GOSVĀMI ŚRĪ PURUṢOTTAMAJI

AND

THE SUPER- COMMENTARY

RAŚMI ON THE BHĀṢYAPRAKĀŚA

OF

GOSVĀMI ŚRĪ GOPEŚVARJI

EDITED WITH INTRODUCTION AND APPENDICES ETC. BY
MULCHANDRA TULSIDAS TELIWALA

WITH A NEW INTRODUCTION BY
GOSWAMI SRI SHYAM MANOHARJI MAHARAJ
ṢAṢṬHAPĪṬHĀDHĪŚVARA,
MANDIRA ŚRĪ MUKUNDARĀYAJĪ ŚRĪ GOPĀLALĀLAJĪ, KĀŚĪ.

VOLUME ONE
ADHYĀYA 1

AKSHAYA PRAKASHAN
DELHI

First published: Bombay, 1935-41

Reprint: Delhi 2005

ISBN 81-88643-07-6 (set)

ISBN 81-88643-08-4 (vol.1)

Published by:
Harish Chandra for Akshaya Prakashan,
208, M.G. House, 2 Community Centre,
Wazirpur Industrial Area, Delhi - 110052
Email: harish@busyinfotech.com
Fax: 011-27374358
Phone: 011-55195949, 27377342

Printed at:
D.K.Fine Arts Press (Pvt.) Ltd.,
A-6,Nimri Community Centre,
Ashok Vihar, Phase IV, Delhi - 110052.

श्रीकृष्णाय नमः

श्रीमद्ब्रह्मसूत्राणुभाष्यम्

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम्
दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशेन
सम्पूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वरजिचरणप्रणीत-
भाष्यप्रकाशरश्मिना
च परिबृंहितम्
मूलचन्द्रतुलसीदासतेलीवाला
इत्यनेन संशोधितम्
काशीस्थ-श्रीमुकुन्दरायजी-श्रीगोपाललालजीमन्दिराधिष्ठित-
षष्ठपीठाधीश्वर-गोस्वामिश्रीश्याममनोहरपाद-
विरचितया नवीनभूमिकया समुल्लसितम्

प्रथमो भागः

प्रथमोऽध्यायः

देहलीस्थ-
अक्षयप्रकाशननेन
प्रकाशितम्

CONTENTS

(विषय सूची)

New Introduction by
Shri Shyam Manoharji Maharaj
in English and Sanskrit ... i-lxxi

1. प्रथमाध्यांये प्रथमः पादः

अधि. 1 सू. 1 — अधि. 3 सू. 3 ... 1-206

2. प्रथमाध्याये प्रथमः पादः

द्वितीयोः भागः

अधि. 4 सू. 4 — अधि. 10 सू. 30 ... 207-413

3. प्रथमाध्याये द्वितीयोः पादः

अधि. 1 सू. 1 — अधि. 8 सू. 32 ... 415 – 606

4. प्रथमाध्याये तृतीयः पादः

अधि. 1 सू. 1 — अधि. 13 सू. 43 ... 607 - 828

5. प्रथमाध्याये चतुर्थः पादः

Editor's Note

वेदान्ताधिकरणमाला–श्री पुरुषोतमविरचिता ... 829 - 880
अधि. 1 सू. 1 — अधि. 9 सू. 28 ... 881 - 1042

अधि. — अधिकरण (Section)
सू. — सूत्र (Sūtra)

श्रीमद्वल्लभाचार्या कारिका ... 1043 - 1044
अधिकरणानां सूचीपत्रम् ... 1045 - 1046
श्रीमद्वल्लभ भाष्यपाठानुसारतः श्रीमद्बादरायणप्रणीत ब्रह्मसूत्राणां वर्णानुक्रमः ... 1047 - 1054
श्रीमदणुभाष्योद्धतानां प्रमाणवाक्यानां सूचीपत्रम् ... 1055 - 1067

6. द्वितीयाध्याये प्रथमः पादः

अधि. 1 सू. 1 – अधि. 12 सू. 37 ... 1069 - 1170

7. द्वितीयाध्याये द्वितीयः पादः

अधि. 1 सू. 1 – अधि. 8 सू. 45 ... 1173 - 1291

8. द्वितीयाध्याये तृतीय-चतुर्थः पादोः

तृतीयः पादः

अधि. 1 सू. 1 – अधि. 16 सू. 53 ... 1297 - 1439

चतुर्थः पादः

अधि. 1 सू. 1 – अधि. 10 सू. 22 ... 1447 - 1509

9. तृतीयाध्याये प्रथमः पादः

Preface ... 1520
Note ... 1521
Introduction: Sri Vallabhāchārya and his Aṇu Bhāṣya ... 1522- 1536
अधि. 1 सू. 1 – अधि. 8 सू. 27 ... 1537 - 1603

10. तृतीयाध्याये द्वितीयः पादः .

अधि. 1 सू. 1 – अधि. 11 सू. 41 ... 1609 - 1728

11. तृतीयाध्याये तृतीयः पादः

Coloured photograph of
Srimad Goswami Purushottam Charan
अधि. 1 सू. 1 – अधि. 25 सू. 66 ... 1729 - 1965
परिशिष्टम ... 1969 - 1997
Editor's Note ... 1998 - 2000

12. तृतीयाध्याये चतुर्थः पादः

Shri Vitthaleshvara and Aṇu Bhāṣya ... 2001 - 2020
The Late Editor Mr. Mulchandra Tulsidas
Teliwala ... 2021 - 2032
अधि. 1 सू. 1 – अधि. 9 सू. 51 ... 2033 - 2113

13. चतुर्थध्याये प्रथम-द्वितीयो पादोः

प्रथमः पादः

अधि. 1 सू. 1 – अधि. 7 सू. 19 ... 2119 - 2169

द्वितीयः पादः

अधि. 1 सू. 1 – अधि. 7 सू. 21 ... 2173 - 2210
Editor's Note ... 2212 - 2214

14. चतुर्थध्याये तृतीय-चतुर्थ पादोः

तृतीयः पादः

अधि. 1 सू. 1 – अधि. 5 सू. 17 ... 2215 - 2266

चतुर्थः पादः

अधि. 1 सू. 1 – अधि. 5 सू. 22 ... 2273 - 2327
Introduction ... 2346 - 2358
परिशिष्टम ... 2359 - 2460
परिशिष्टविषययानुक्रमः ... 2461 - 2462

Śrīman Mukundarāyo Jayati
Śrī Gopālalālo Jayati
O Śyāma illumine the heart of mine with thy grace always

INTRODUCTION

The Sixth Pīṭhādhīśwar Goswāmī Śrī Śyāma Manoharjī Mahārāj (Kāśī), Vārāṇasī

Prākṛtadharmānāśrayamaprākṛta nikhila dharmarūpamiti ।
Nigamapratipādyam yattatcchuddham sākṛtistaumi ॥
(*Sarvottamastotre*)

In this *śloka* of *Sarvottama-stotra*, Śrīmad Viṭṭhalaeśa-prabhucaraṇa, while hailing the transcendental personality of *Śrimadāchārya*, in the work written by him, *Vallabhāṣṭaka*, after establishing the nature of his *Āchāryasvarūpa*, at the end – establishing Śrīmad Vallabhāchārya's complete identity with Puruṣottama, delineates his characteristic in the *Saptaślokī*. In this, Śrīmad Prabhucaraṇa, who has occupied the throne of the undivided empire of *Suddhādvaita-brahmavāda-nirguṇa-puṣṭi-bhakti-mārga*, addressing the whole universe, narrates as:

> "*kvacid pāṇḍityam cen-na nigamagatih sā'pi yadi*
> *na kriyā sā sā'pi syād-yadi na hari-mārge paricayaḥ* ।
> *yadi syāt-so'pi śri-vrajapatiratir-neti nikhilair-*
> *guṇairanyaḥ ko vā vilasati vinā vallabhavaram* ॥"

While describing the characteristics, it is told, above all, by the word "*kvacid*" the divine nature, whereby all the other characteristics depend themselves on this one special nature; *Paṇḍā* means knowledge; the possessor of knowledge is *Paṇḍita*; the state of being thus is *pāṇdityam*; that is, one who is knowledgeable of all that has happened and all that will happen. This kind of *pāṇḍitya*, though perceivable among the *Bauddhas* and *Naiyāyikas*, is devoid of the knowledge of the *Vedas*; bacause they do not admit the validity of the *Vedas*. Whereas the *Naiyāyikas* admit the validity of the *Vedas*, they lack in the observance of the practices propounded in the *Vedas*.

Knowledge and practices as ordained in the *Vedas* are to be seen among the followers of *Advaita* propounded by Śrimat Śankarāchārya, which, according to them, are valid only in the day-to-day mundane activities; they do not get the exposure to the path of *Hari*. Because they do not follow the *Bhagavat Śāstra* (*Pāñcarātra āgama* practices). Even though practised to perfection, if *Dharma* does not result in generating pleasure in hearing the descriptions of *Viṣvaksena* (Lord Viṣṇu), the efforts are in vain; desire-less action, without offering it to *Achyuta*, does not make the knowledge shine. This kind of knowledge is useless because they are not following the *Hari mārga* i.e. *bhakti mārga* as propounded in the *Bhagavat Śāstra*.

One may say that there are people following the method of worship as also practising the rituals ordained in the *Vedas*, even there we find that they lack in taking pleasure in *vrajapati*; they worship the form of his *vibhūti*, which is not his original form but only a reflection of *Brahman* and thus, they do not serve the *Brahman* with *Bhakti*. In fact, as per the Vedic sentence – " *tadeva Brahma tvam viddhi nedam yadidam upāsate*" it is said that what is being worshipped is not the real *Brahman* but only a symbol; therefore, they do not realise that what is being worshipped is the *vibhūti* – an emanation – and *bhakti* shown there is not the *sevā* to *Vrajapati*; the real state of being *Brahman* is only in *vrajapati*. Āchārya has said – *"param Brahma tu kṛṣṇo hi"* –it is only KṚṢṆA THAT IS THE ULTIMATE BRAHMAN. Thus, it is only in Āchārya Vallabha that all the above qualities are seen and not in any one else.

There are many works of the above said Vallabhācārya;

among them, the most venerable one is only the AṆU BHĀṢYA. In this *Bhāṣya*, following the footsteps of Vyāsa, and in agreement with him, the Āchārya established the *Śuddhādvaita-Brahma-vāda-darśana.*

Two systems of *Darśana* i.e. *āstika darśanam* and *nāstika darśanam*. *Āstika darśanam* again is mainly divided into six varieties – *Sānkhya, Pātañjala, Pūrva-mīmāmsā, Uttara-mīmāmsā, Tarka* and *Nyāya*. Here the *Sānkhya* is as told by Kapila in *Śrī Bhāgavata*. *Pātañjalam* means the *Yogaśāstra*. *Pūrva-mīmāmsā* is as composed by Jaimini; *Uttara-mīmāmsā* is as composed by Kṛṣṇa-Dvaipāyana Vyāsa, consisting of four chapters, named the *Jñāna Kānda; Tarka* means that composed by Kaṇāda, is also called *Vaiśesika*; *Nyāya* is as composed by Gautama, the *Nyāya Śāstra.*

Likewise, the *Nāstika Darśana* also is of six varieties - the *Cārvāka-Sautrāntika-Vaibhāṣika-Yogācāra-Mādhyamika – Ārhata*. Now we will deal with the topic of *Uttara-mīmāmsā*, one of those included in the *āstika darśanas*. *Uttara-mīmāmsā – Vedānta darśanam*. Among the several views on Vedānta, five systems are predominent; they are – *Kevala-advaita; Viśiṣṭādvaita; Dvaita; Dvaitādvaita; Śuddhādvaita*. Among these, the *Kevalādvaita darśana* was propounded by Āchārya Śankara, an incarnation of Śankara. *Viśiṣṭādvaita* was propounded by Āchārya Rāmānuja, an incarnation of Śeṣa. *Dvaita darśana* was propounded by Āchārya Madhva, an incarnation of Vāyu. *Dvaitādvaita darśana* was propounded by Āchārya Nimbārka, an incarnation of Hamsa. *Śuddhādvaita darśana* was revealed by Bhagavān Śrī Vallabhāchārya, the follower of the system of Vedavyāsa, incarnation of Śrī *Bhagavān*'s visage and the incarnation of Vaiśvānara.

Now, what is Śuddhādvaita ?

Śuddhādvaita jñeyaḥ samāsaḥ karmadhārayaḥ ।
Advaitam Suddhayoḥ prāhuḥ ṣaṣthī-tatpuruṣam budhāḥ ॥

Māyāsambandha-rahitam śuddhamityucyate budhaiḥ I
Kāryakāraṇarūpam hi śuddham brahma na māyikam II

(Su.Ma. śloka 27/28)

Śuddham ca tat advaitam ca – karmadhāraya samāsa. Or, Śuddhayoḥ advaitam – *Ṣaṣṭhi tatpuruṣa samāsa* is to be understood. In this system, the combination of *Māyā* with *Brahman* is done away with; therefore, one should not take it as *Brahman* covered with *Māyā* as the cause of this world; but, only the pure *Brahman* as the cause of this world is to be understood. It is told in the *Siddhānta* that *Māyā* also has been described as a form of *Bhagavat Śakti*, viz. "*mama Māyā duratyayā*" (Gītā 7-14); therefore, the relation of *Māyā* here is not like the one in the other *Siddhāntas*. Here, while discussing the *Kārya-Kāraṇa* – effect and cause – the Śānkaras take the world as false and therefore, ephemeral. In their *Siddhānta*, the world is the transformation of *Māyā*, and they say that its cause also has to have similar nature, as cause and effect are of similar nature. By saying that the world is unreal, they establish that the *jīva* itself is *Brahman*; To refute this, Āchārya has said in his *Nibandha* – "*prapañca* is the creation of *Bhagavān*"; *Prakāśa* on this – " this world is not a transformation of *Prakṛti*; not also born by the combination of atoms; nor is it an appearance; neither born due to the unseen power; not a reality born out of unreal; but it is the creation of *Bhagavān*. Created by the efforts of an entity which is the highest one. Therefore the conclusion is that the pure *Brahman* alone is the cause of the world.

"*Niṣkalam, niṣkriyam, Śāntam; Niravadyam, nirañjanam*"; "*indro māyābhiḥ puru-rūpa īyate*"; "*vācārambhaṇam vikāro nāmadheyam; mṛttiketyeva satyam*"; "*athāta ādeśo neti neti*" – these statements express that *Śuddha Brahman* is *nirviśeṣa*; therefore the pure *Brahman* cannot be the cause of the world. Moreover, if pure *Brahman* is accepted as the cause of the world, then it becomes *saguṇa*, i.e. with qualities; in that case, such Vedic sentences which describe the *Brahman* as possessing qualities have to be established as valid as in the system of *vivarta-vāda;* because, *Vedas* are *upajīvya,* i.e. the *Siddhānta* depends on the *Vedas* and the dependent cannot go against its own supporter. Thus, there will be no real doership in the *Brahman* and the Vedic sentences which attribute characteristics to *Brahman* also stand vindicated. Similarly, in the Upaniṣads, sentences describing *Brahman* as devoid of characteristics become *upajīvya* and those sentences which qualify *Brahman* with some attributes become *upajīvaka.* And they cannot say something against their own nourishers.

Śruti means sounds and words; *Brahman* without attributes cannot be described by such words; there being no trait in *Brahman,* it is described in a negative fashion in the *Śrutis.* First the *Brahman* is described with attributes; thereafter, by sentences like "*asthūlam*" etc., the *śruti* denies those attributes; because, the absence of something can be established only after establishing what is being denied. In this manner, it is first established as "*dve vāva Brahmaṇo rupe mūrttam chaivāmurttam cha*"– *Brahman* has two forms – one with forms and the other, without forms; in this manner qualified *Brahman* was explained, and after that, it was denied as - "*athāta ādeśo neti neti*".

Here, the attributes imagined in *Brahman* by the *Śruti* were actually imposed by the *avidyā* as in the case of silver in the mother-of-pearl; thus, in this system of *Māyāvāda,* the sentences describing *Śṛṣṭi* become incoherent.

On this objection, the *māyāvādi* says – "there is cogency and it is called the *adhyāropa-apavāda* coherence. The pure *Brahman* cannot be grasped; to make one understand that, the creation of the world etc. are described, and through *upāsanā,* once the qualified *Brahman* is grasped by the *Buddhi,* according to *Śākā-arundhati nyāya,* the false experiences of earlier *śruti* sentences get erased due to the *nirviśeṣa-śruti-vākyas;* after this erasure of false understanding, the subtle, the most subtle and the fourth state of *caitanya* are grasped. Thus the earlier understanding of transformations of *Māyā* gets removed, and then the unqualified *Brahman* is understood – that is the second-less *ātman*; being one, bacause of the effect of *upādhi*, appears as many; in this manner, *Brahman* with the qualifying agent becomes the cause of the world, and none else. *Jagat* is the effect of *Māyā* and it is pure void; the cause also should be of similar nature; cause and effect are always seen to be of a similar nature." To this, it is replied as follows:

Abhedād-anupādhitvāt-jagadapratyayāptitaḥ I
Sarvādhāratvataḥ-tāvat-Śaktitvāt-nāsya bādhanam II

Abhedād – saviśeṣa-nirviśeṣayoh bhedābhāvāditi; anupādhitvātiti – there is no *upādhi* in *Brahman*; sarvādharatvataḥ – *sarva-viruddha-dharmāśrayatvātiti*; thus, *saviśeṣa-nirviśeṣa śruti-vākyas*, being equally *śruti*, to nullify one set of sentences is not proper; in that case, Veda becomes invalid. How? In this manner: *Brahman* is to be known only through *śruti*, and not by any other means of knowledge. *Siddhānta* accepts the entire *śruti* as infallibly valid. Therefore, in which manner *Brahman* has been understood from these *śruti-vākyas*, that has to be taken as it is; not an iota of it is to be imagined differently, (causing a defect in exegetical science) as explained by Āchārya. "*Yo anyathā santamātmānam anyathā pratipadyate kim tena na kṛtam pāpam caureṇa-ātmāpahāriṇa*"; "*naiṣā tarkeṇa matirāpaneya*"; these Vedic injunctions say so. Therefore, "*sa haitāvānāsa*"; "*tadātmānam svayamakuruta*"; "*ātmaivedam sarvam*"; "*yato vā imāni bhūtāni jāyante*" – these Vedic statements; and, "*janmādyasya yataḥ; śāstra-yonitvāt; tattu samanvayāt*" these *sūtras* affirm the above principle of exegesis.

"*Aham sarvasya jagataḥ prabhava pralayastathā*"; "*janmādyasya yatonvayād-itarataḥ*" – these *smṛti vākyas* confirm that the pure *Brahman* alone is the creator and enjoyer of everything; "*attā carācara-grahaṇāt*" – this doership is inborn and not ephemeral as in the system of Śankara. "he, being lonely, did not find happiness; he desired a second" *śruti* says. "*krīdārtham ātmanah idam trijagat kṛtam te*" – this *smṛti vākya* also says – *Brahman* itself, for its enjoyment, expanding itself in the form of world, plays there; without undergoing any change in itself, it takes these forms. We may see examples for this kind of creation without undergoing change – *kāmadhenu, chintāmaṇi, kalpavṛkṣa*, etc. "*Prakṛtiśca pratijñā dṛṣṭānta-anuparodhāt*" (1-4-23) – this *sūtra* states that *Brahman* alone is the material and efficient causes of this world. "*yathā ekena mṛtpiṇḍena sarvam mṛnmayam vijñātam bhavati*" – by this sentence, refuting the falsity of creation, it further says – "*mṛttiketyeva satyam*". Therefore, *prapañca* is the creation of *Bhagavān* and not created by *Māyā*. But, in this matter, some ignorant people, devoid of the knowledge of difference between *samsāra* and *prapañca*; identifying *samsāra* and *prapañca* as one, say that equally *samsāra* and *Jagat-prapañca* as the effect of *Māyā* and consider them as false; that is not right.

> "*Prapañco bhagavat-kāryas-tadrūpo māyayā-abhavat* ।
> *Tacchaktyā-avidyayā-tvasya jīva-samsāra ucyate* ॥"

Here the *Prakāśa* – "*Avidyayeti – avidyāpi tacchaktiḥ*; having been counted as one among the prominent twelve *śaktis*. "*śriya-puṣṭyā-gireti*" *vākyāt*. Therefore, "*sa vai naiva reme; taśmād-ekākī na ramate; sa dvitīyamaicchat; sa haitāvānāsa*" – in this *śruti*, it is said that the transformation in the form of the world is for enjoyment; because this is not possible without some wonderful power, it is said that by the *śakti* of *Bhagavān* called *avidyā*, *jīva* suffers *samsāra*, and it is not born. This is called *abhimati*. It is also counted as non-existence. *Ajñānam, Bhramaḥ, Asat* – these words are used in the *samsāra*, within the frame-work of *Aham* and *Mama*, and not in *prapañca*. Because, that is the *Brahman* itself. Therefore, in *Siddhānta*, by the rule of *sūtra* "*Tadananyatvam Ārambhaṇa-śabdādibhyaḥ*" (Br.Su.2-1-14) – the non-difference of *Jagat* and *Brahman* is accepted. *Jagat* that is of *prapañca* is not of *Māyā*, but it is the nature of *Ādhibhautika* of *Brahman*; the *Ādhyātmika* nature of *Brahman* is *Akṣara-Brahman*; likewise, the *Ādhi-daivika* nature is *Para-Brahman*. In this manner, the non-difference of *Brahman* and *Jagat* is to be understood; effect is non-different from the cause; it is not false. Therefore, it is to be accepted that the pure *Brahman* alone is the substratum, the cause; and the created beings, the effect.

According to *Māyāvādi* – *Bhagavān* Vyāsa has started the enquiry of unqualified *Brahman* which is devoid of any quality and without a form with the first aphorism *"Athā'to brahma-jijñāsā"* and the following *sūtras* "janmādyasya" etc., explain the *Brahman* with the quality of creating the world. Thus, after making a statement of proving a quality-less *Brahman*, a *Brahman* with quality was explained; this amounts to imputing that Vyāsa has faultered in his statement. And the *sūtras* also, (giving up the original position and accepting un-wanted position) are to be interpreted. Therefore, if the intermediary agent called *avidyā* is accepted, both these constructs, i.e. *Brahman* and *avidyā*, being beginningless, the *avidyā*-covered *Brahman* also becomes beginning-less; and that being the doer, the creation will become eternal and there will be no occasion for dissolution. Therefore, one would like to ask the *Māyāvādi* – if this kind of *kārya-kāraṇa* with the help of *Māyā* is accepted as having been stated in the *śrutis* and *Smṛtis* – *"asya mahato bhūtasya niḥśvasitametaddya-dṛgvedo Yajurvedaḥ"*, *"yo brahmāṇam vidadhāti pūrvam"*; *"yo vai vedānśca prahinoti tasmai"*; *"vedo nārāyanaḥ sākṣāt svayambhūriti śuśruma"*; *"vedaiśca sarvairahameva vedyaḥ"* – by these statements, do Vedas intimate that *Brahman* is *ajñāna-kalpita?* i.e. imaginary doer by the effect of *ajñāna ?*

According to your position, one understands first that the *Vedas* are eternally valid; later on, by a correct interpretation of the same Vedas, one has to understand that the Vedas are imaginary due to the effect of *avidyā*; and then one understands by the teachings of the *guru* –*"na mātā pitā vā na devā na lokā na Veda; na śāstā na śāstram na śiṣyo na śikṣā"* by these un-real means of knowledge, how the eternally true knowledge of *Brahman* results? Knowing this, no one will enter upon the study of this *śāstra*. Due to the absence of a follower of the path elucidated by the Vedas, they become invalid and the system will die out. Therefore, the entire Vedic lore is to be accepted as valid. The fact is – *Brahman* is not to be known by the worldly means of knowledge; it is beyond our thinking and is endowed with extra-ordinary powers; is to be known only through the Vedas; and the statements of the world are not to be mingled with them; that will be the right method. Thus, it would be proper to accept that only the pure *Brahman* alone is the material and efficient cause of the world.

***Siddhānta*:**

> "*utpatti-sthiti-nāśānām jagataḥ kartṛ vai bṛhat* ।
> *Vedena bodhitam tad hi nānyathā bhavitum kṣamam* ॥"
>
> *(A.Bha. Ka.1/1)*

Jagat and *samsāra* are different in *siddhānta*: the *jagat* of *prapañca* is different; the thought *Aham* and *Mama* belongs to *samsāra*; there is a subtle difference here; no āchārya has stated thus except Śrī Vallabhāchārya, by reconciling the various statements of *śruti*, *smṛti*, *sūtra*, *Bhāgavata* etc., by reasonings acceptable to *śāstra* – this truth has been elucidated. The definitions of *jagat* and *samsāra* are different; It is told in the *śāstras* that, by the desire of *Bhagavān*, the aspects of *cit* and *ānanda* get covered, and the *sad-aṁśa* shines forth. And this is called the *Jagat*; that which is imagined by the *jīva* due to *avidyā* i.e. the thoughts "*aham* and *mama*" – this is *samsāra*. This *avidyā* has five states –

> *svarūpajñānamekam hi parva dehendriyāsavaḥ* ।
> *Antaḥ karaṇameṣām hi caturdhāndhyās a ucyate* ।
> *Pañca-parva tvavidyeyam yad-baddho yāti samsṛtim* ॥
>
> (Śā.Pra.Kā.36)

As per the words of Āchārya – *Svarūpajñānam*, *dehādhyāsaḥ*, *indriyādhyāsaḥ*, *prāṇādhyāsaḥ* and *antaḥ-karaṇādhyāsaḥ*. *Jīva*, bound by this *avidyā*, gets into *samsāra* called *saṃsṛti*. *Saṃsṛti* is the imagined state due to *avidyā* and is removable by *jñāna*. *Jagat*, being of *Brahman*, is not destroyable. *Avidyā*'s transformations are the multiplicities; being so, if argued that they are false, the answer is no. Multiplicity is not due to *avidyā*, but was created by *Brahman*'s desire, say the *śrutis* - "*sa ekākī na ramate; saḥ dvitīyamaicchat*"; "*tadātmānam svayamakuruta*"; but, the knowledge pertaining to this i.e. *dvaita-jñāna* – is of *avidyā*. By this knowledge of *dvaita*, only the *jīva* gets bound and not the *Brahman*. Here, the *avidyā* does not inhere in *Brahman*.

First of all, in *Māyāvāda*, we ask – *upādhi* and *upādheya* i.e. the limiting factor and the limited, i.e. *avidyā* and *Brahman*, both being eternal, what kind of relation between them is accepted in your *siddhānta?* If it is *samyoga* etc., they also have to be all-pervading, and thus eternal, there will be no chance for *mokṣa*. Neither is it *adhyāsa*, there being no such imposition. Moreover, in pure *Brahman*, it is impossible to posit a relation with the *upādhi avidyā;* in that case, *Brahman* will become *ajña;* therefore, *avidyā* has to inhere in *jīva* and not in *Brahman*.

Ekasyaiva mamāmśasya jīvasyaiva mahāmate I
Bandho'asyā, avidyayā, anādir vidyayā ca tathetaraḥ II

Therefore, in the statement "*ajñānena-āvṛtam jñānam tena muhyanti jantavah*" – *jivotpatti* is not due to *avidyā* but, due to the desire of Bhagavān, for his happiness, the part of *ānanda* gets covered and he gets bound by the *avidyā*. Here too it is only the desire of Bhagavān. In this state, he is called *samsārī*. Thus, *samsāra* is of the nature of *Aham* and *Mama*, born out of *avidyā* and is thus destroyable by *jñāna*. It is thus: The material and efficient cause of the world is *Brahman*; *samsāra* is imaginary; *avidyā* is its efficient cause. *Samsāra* is false and it stands prior to the rise of *jñāna*. Therefore, it is destroyed in *mukti;* but not the *prapañca*; that being the creation of Bhagavān.

Samsārasya layo muktau na prapañcasya karhicit I
(Śā.Pra.kā. 28)

Therefore, if *samsāra* recedes, it is *jīvanmukti*. In that state, the imaginary knowledge of entities like the body and the senses get removed, but not the body and senses, because they are part of this *jagat*. The substratum for pleasures and sufferings is *samsāra*, and not the world. Here, the example is *jīvanmuktas*. This kind of several *jīvanmuktas* have taken birth in this land of Bhārata, whose bodies and senses, though real, do not experience pleasure and pain. Therefore, *jagat* is real and *samsāra* is unreal; this is the difference between *jagat* and *samsāra* as explained by Śrī Vallabhāchārya.

The nature of Jīva according to Siddhānta

"Jivastvārāgramātro hi gandhavat vyatirekavān"
(Śā.Pra.Kā.57)

"sa ikṣāñ cakre"; *"eko'ham bahusyām prajāyeya"*; *"sa ekākī na ramate"*; *"sa dvitīyamaicchat"*; *"tadātmānam svayamakuruta"* – according to these statements, *Brahman*, by its own volition, for its sport, covering its own blissful nature, takes the form of *jīva*. In this manner of desiring to become many, from *Brahman* – *"yathā'gneḥ kṣudraḥ visphuliṅgāḥ vyuccaranti"* – subtle, limited and of the form of knowledge, *jīva* – parts emanate. This *jīva's* size is atomic – *"ārāgramātraḥ"* – *"ārāgramātro hyavaropi dṛṣṭaḥ"* is the *śruti*. If the *jīva* is atomic in size, then how he spreads himself in the entire body; to this question, the answer is – *"gandhavat vyatirekavān"* –just like the smell of the flowers goes beyond the periphery of the flower, likewise, though small in size like atom, knowledge extends to all parts of the body. Therefore, *"mamaivāṁśo jīvaloke jīvabhūtah sanātanaḥ"*; *"aṁśo nānāvyapadeśāt"* – by these means of knowledge, one is to understand that *jīva* is a part of *Brahman* itself. If *jīva* is accepted as part of *Brahman*, then *Brahman* becomes composed of parts;

therefore, according to the theory of reflection, the existence of *jīva* is to be accepted.

The premise that *Jīva* is the reflection of *Brahman* is not at all rational. If this *pratibimbavāda* is accepted, *Brahman* becomes possessor of perceivable nature; and if *jīva* is the reflection, *bimba* and *prati-bimba* do not appear at the same place; in that case, the theory goes against the *śruti* "*samānam vṛkṣam pariṣasvajāte*"- here the existence of *jīva* and *Brahman* at one place is stated. Therefore, *jīva* is to be accepted as an *aṁśa* – part – of *Brahman*. For this, the validity is *śruti* itself and not any other means of knowledge as in the world. Hence, it is said by Āchārya –

"*alaukiko hi vedārtho na yuktyā pratipadyate* I
Tapasā Veda-yuktyā tu prasādāt paramātmanaḥ II
(Aṇu.Bha.Ka.1/1)

Knowledge derived from the Vedas is not through sense-perception; therefore it cannot be grasped by reasonings. Then, how are we to grasp it? By the reasonings shown in the Veda itself, as in Ch.Upa. "*nyagrodha-phalamāhara*" etc. Here the Āchārya says – "by imagining the meanings of Veda by one's own intelligence, one cannot discuss or analyse them; in what manner *Brahman* has been explained in the Vedānta, has to be accepted as it is. Changing even an iota of its purport will incur fallibility." Therefore, as per the logic of *viṣphulinga*, the insentient and the souls come out of *Brahman* – just like the sparks from the fire. When the insentient forms emanate, the knowledge and blissful aspects of *Brahman* remain covered; when the souls come out, the blissful nature of *Brahman* remains covered.. In this manner, *sat* – reality; and *cit* – knowledge aspects – both are non-different from *Brahman* and they are the forms of *Brahman*. Because of this, the *śruti* states that by the knowledge of one, the knowledge of all is derived.

If this explanation is accepted, then the sufferings being experienced by the individual souls will be of *Brahman* also.

No; the *śruti* says – "the other shines forth without enjoying"; "one who is the indweller of all living beings, does not get affected by the external worldly sufferings"; "not also gets attached to the results as in the case of water on the lotus leaf." These *śruti* and *smṛti* sentences declare in clear notes that *Brahman* is un-affected; as in the case of sun-light, which does not get affected by the defects in objects like the pot and the cloth. The defects in the individual souls do not affect the *Brahman*. Thus, while discussing the relation between the *jīva* and *Brahman*, it is conclusively proved that the *jīva* is merely an *aṁśa* – part – of *Brahman* and not different from it. *"aṁśo nānā-vyapadeśāt-"* This *sūtra* also confirms this.

In this matter, in his work *Vidvan-maṇḍana*, Prabhucaraṇa commands – *"nānā-vyapadeśāt – nānāvidho yo vyapadeśaḥ* – as *Brahman* at places; as born at other places; as of the nature of knowledge; as of the form of *cid* at places; somewhere, as under the control of *Īśwara;* as atomic and also as all-pervading; having been explained in this manner, the one and the same entity having opposing qualities in itself, can be possible only in *Brahman* and nowhere else; hence, the *jīva* is none other than a part of the *Brahman*. Alternatively, *"nānā-vyapadeśāt* – having been explained as quite distinct from each other" – here, the purport is – *jīva* is the inter-mingled form of *Brahman*, and its nature of being part of *Brahman* is merely an eulogy; and it is only a reflection and of false nature; so this is not to be construed, as they are beyond the ken of sense-perception. *Brahman* is to be known only through the means of Vedas'; therefore, it is to be accepted as explained therein; *śruti* says – *"naiṣā tarkeṇa matirāpaneyā"* – this knowledge is not to be obtained through reasonings. Likewise, the *smṛti* says – *"alaukikāstu ye bhāvāḥ na tāṅsa tarkeṇa yojayet"* – what realities are there, they are not to be subjected to arguments."

Brahman's blissful nature shines in full; whereas it is hidden in the case of *jīva*. When the God, by His sympathy and desire, uncovers the blissful nature in *jīva*, then they both become one; there is no need to apply here the implied meaning called *"jahadajahallakṣaṇā"* because, *śruti* says – *"sarve vedā yat padam-āmananti"*; all the Vedas have one purpose i.e. to teach the unfathomable nature of *Brahman*. When the *jīva's* blissful nature is covered, then he is devoid of the nature of *Brahman*; *"adhikam tu bheda nirdeśāt"* – it is so said in this *sūtra*. Here the *Bhāṣya* is – "by the word '*tu*' the position is reverted; if *Brahman* is only of that much nature, then this defect arises; but, then, that is more than *jīva* and *jagat*; why? *Bheda-nirdeśāt* – because it is explained as distinct from that." From this it becomes clear that there is no equal or superior to that. *"na tat samaśca abhyadhikaśca dṛsyate"* is the *śruti*. Thus, the non-differentiation between *Brahman* and *jīva* described in the *śrutis* is on the basis of *aṁśa-aṁśi* status. Whereas the *Māyāvādins*, depending solely on the sentence *"tat-tvam-asi"* assert that *jīva* himself is *Brahman*.

In this context, we may quote the verse describing the different systems of philosophy –

> *"kecit-tatvamasīti vākya-viṣaye tat-tvam pade lakṣaṇām;*
> *kecid tatra ṅaso lukam vidadhate Bhāṣyam tu kecid jaguḥ* I
> *kecid cid-viṣayāt-abhedam-apare cchindantyatatvam padam;*
> *siddhānte tu suvarṇavaj-jagadidam brahmaiva jīvastathā* II"

Meaning of this *śloka* is: *Kecid* – Śankarācāryaḥ; the word '*tat*' denotes *sarvajñam Brahma*; *"tvam"* denotes *jīva* with limited knowledge; these two cannot be one and the same; therefore, as in the statement 'this Devadatta is that same person' – *jahad-ajahad-lakṣaṇa* is accepted.

Kecid – Rāmānuja-Mādhva-Śaivāḥ – 'tat-sambandhitvamiti manyamānāḥ – they accept the disappearance of the suffix *'ṅg'* meaning *'tasya tvam'* – you are of him – related with it.

Kecid–Nimbārkāḥ accept identity because of the similarity of *jñāna*. *Apare – Mādhvaikadeśinaḥ* – one sect of the Mādhvas – break the word as *'atat-tvamasi"* meaning 'you are *jīva*' – not that.

In *siddhānta*, as in the case of gold particles being gold itself, parts of *Brahman* also are *Brahman* itself; the *sat* part of *Brahman* is the world; the *cit* part of *Brahman* is *jīva*. In fact, as in the other sect, *'tat-tvam-asi'* is not the only *mahā-vākya;* the whole context is to be taken as conveying one meaning. The interpretation of *Vedas* is to be done, taking into consideration the whole context as told in the *sūtra "prakaraṇācca";* the meaning is to be construed as per the purport of the context, and not by skipping the context, giving the interpretation as one would like.

This *jīva* has three stages of being – the pure, the liberated and the bound. After the *jīvas* get separated from the *Brahman* as sparks from fire, their blissful nature gets obliterated, and before they get covered by the *avidyā*, in that state, they are called the pure *jīvas*; i.e. the purity here is the absence of connection with *Māyā*. The *sūtra "Parā-abhidhyānāt-tu-tirohitam; tato hi asya bandha-viparyayau"* (3-2-5) is supporting this view. *Parasya* - Of *Bhagavān; abhito dhyānam* means desire to enjoy in all manners; thus, the part of *ānanda* is obliterated; thus the state of being *jīva*. Thus, the four qualities – *aiśwarya, vīrya, yaśas,* and *śrī* – having been covered, the binding takes place; *jñāna* and *vairāgya* - knowledge and detachment – having been obliterated, the opposite nature. In this state, in the case of some individuals, *Bhagavān* makes available divinity, which makes them eligible for *mukti;* only at this state they become qualified for *mukti*. Whereas, the *jīva* bound by the five-stage *avidyā*, attains *samsāra*. Then he undergoes experiences of the *samsāra*; by the grace of *Bhagavān* and by the association with pure souls, they get the five-stage *vidyā* and attain *mukti*, of the nature of highest bliss.

"Vairāgyam sānkhya-yogau ca tapo bhaktiśca keśave;
Pañca-parveti vidyeyam yayā vidvān harim viśet ||"

(Sā. Pra.Kā. 48)

By this *śloka*, it is said that till one does not get *vidyā*, until then he is called *samsārī*. Thereafter he is called *mukta*. These *muktas* also are of two kinds – *Jīvanmuktas* and *Muktas*. *Jīvanmuktas* – Sanaka and others; *muktas* – those who have reached the *Akṣara-Brahman*. Here also, the *jīvas* originally are of two kinds - of godly nature and of un-godly nature. The godly natured are of two kinds – those who follow the path of *Maryādā*, and those who follow the *Puṣṭi-mārga*. There is difference in the *mukti* of these two categories; that will be shown later.

The system of change without undergoing transformation:

Śrīmad Āchārya has established mainly the system of *Brahman* with name and form as his philosophy. Because, there is no second entity other than *Brahman* according to the *prasthāna* i.e. the *Brahma-sūtra*, the *Upaniṣads* and the *Bhagavad-gītā*. The *prameya* – objects of knowledge; *sādhana* – means; *phala* – the end result; and, according to all *śāstras* - all go to prove the *Brahman* only; this is the *siddhānta*. This *Brahman*, without undergoing changes, like the gold, the clay, the *Kāmadhenu*, the *Cintāmaṇi*, the *Kalpa-vṛkṣa* – transforms itself in the form of the world; this is the *siddhānta*. The gold, even in its transformations like the bracelet and ear-rings, does not change but remains as gold; likewise the *Brahman* also, while changing into the world, does not undergo any material change. This is what is called the *Avikṛta-pariṇāma-vāda* in the *śrutis, smṛtis, sūtras, Śrī Bhāgavata* etc. The one cause which does not undergo transformation becomes the effect in various forms. Because of this only, it becomes possible to get the knowledge of everything by the knowledge of one thing. The statement of *Vedānta* that the knowledge of one produces the knowledge of everything, becomes intelligible only then, when we accept that the pure *Brahman* alone is the cause of this world i.e. material and efficient cause. This argument is of the *Vaidika* system. Now, we shall show some sentences elucidating the system of thought of un-changing transformation.

In the *śrutis* – *"Ekam sat viprā bahudā vadanti;" "Asad vā idam-agra-āsīt; tato vai sad-ajāyata;"*

These two satements speak that the invisible *jagat* became visible. *"Brahma viśvamidam jagat;" "tameva bhāntamanubhāti sarvam; tasya bhāsā sarvamidam vibhāti;" "sarvakāmaḥ, sarva-gandhaḥ, sarva-rasaḥ, sarva-kartā, sarva-bhoktā yaḥ sa sarva-vit;" "parā-asya śaktir-vividheva śrūyate; svābhāvikī jñāna-bala-kriyā ca;"* – by these *śrutis* the doership of everything is stated as in-born nature. *"aṇoraṇīyān mahato mahīyān"* – by this *śruti* it is stated that opposing qualities inhere in *Brahman*. *"ekamevādvitīyam Brahma; eko'ham bahu-syām; prajāyeya; sa ekākī na ramate; sa dvitīyam aicchat"; "sa haitāvānāsa"* – by these *śrutis*, the un-changing transformation system of thought is told.

"Aitadātmyam idam sarvam; tat satyam; sa ātma; tat-tvam-asi"; "eṣa hyevānandayāti"; "eko devo sarva-bhuteṣu gūḍhaḥ" – by these *śrutis* the in-dwelling aspect of *Brahman* in all things is described. Likewise, these sentences also – *"sarvam khalu idam Brahma;" "katham asataḥ sat jāyeta;" "tat satyam ityācakṣate".*

In the *Smṛtis* – *"aham sarvasya jagataḥ prabhavah pralayastathā;" "mama yonir-mahad-Brahma; tasmin garbham dadhāmyaham;" "aham bījapradaḥ-pitā;" "vāsudevaḥ sarvamiti"* these sentences;

And in the *sūtras* – *"Janmādyasya yataḥ; śāstra-yonitvāt; tat-tu-samanvayāt; ātma-kṛteḥ; pariṇāmāt; yoniśca hi gīyate; tad-ananyatvam-ārambhaṇa-śabdādibhyaḥ; sarva-dharma-upapatteśca; prakṛtaitāvatvam hi pratiṣedhati; tato braviti ca bhūyah; Prakāśa-āśrayavad-vā tejastvāt"* these *sūtras*;

In Śrī Bhāgavata – *"Janmadyasya yato'nvayad itaratah;" "tvayyagra āsit;" "Krīḍārthamātmanaḥ idam trijagat kṛtam te;" "viśvasya kartā; bhuvanasya goptā"* sentences like these and others.

This has to be understood here:

Others - like Āchārya Śankara and others, to establish their systems of philosophy, took recourse to *Prasthānatrayī* as the source of knowledge viz. *Upaniṣad, Bhagavad-gītā* and the *Vyāsa Sūtras*. Whereas, our Āchārya took recourse to four *Prasthānas*. They are –

> "*Vedas; Śrī Krishna's spoken words; and Vyāsa's Sūtras* I"
> *Samādhibhāṣā Vyāsasya pramāṇam tac-catuṣṭayam* II
> *Uttaram pūrva-sandeha-vārakam parikīrtitam*."

(Sā.Pra.Kā.7/8)

Here, the *Prakāsa* – "Vedaḥ – all that is contained in the two *Kāṇḍas*, including the *Arthavāda;* the words of Kṛṣṇa are spoken of separately, though Vedic in nature, because it is classified as *Smṛti; Vyāsa sūtras* include the *Jaimini sūtras* also. All these have to be taken only in consonance with *Vyāsa sūtras;*

Vyāsasya Samādhi-bhāṣā – Bhāgavatam. ....experiencing himself in *Samādhi*, and explained later. These four sources, reconciled to prove one school of thought, are the generators of knowledge.

Śrī Bhāgavata has been taken as one of the *Prasthānas* by the Āchārya. Here, the posterior statements are to be taken as clarificatory statements of the anterior ones. This results in saying that *Śrīmad Bhāgavata* is the remover of all doubts. "*Nigama-kalpataroḥ galitam phalam*" – Śrī Bhāgavata is the fruit from the tree that is the *Nigama-kalpataruḥ*.

Evolution and Involution *(Āvirbhāva-Tirobhāva)*

> *Tadetad akṣayam nityam jagan-munivarā-akhilam* I
> *Āvirbhāva-tirobhāva-janma-nāśa-vikalpavat* II

(Vi.Pu.Am.Pra.)

Āvirbhāva and *Tirobhāva* (Evolution and Involution) are in fact the two powers (*śaktis*) of the *Brahman* – "*āvirbhāva-tirobhāvau śaktirvai muravairiṇaḥ*". These two śaktis are non-different from *Brahman* and sub-servient to *Brahman*. "*sarvam* *khalu idam Brahma*" is the *śruti* which says that everything is the form of *Brahman;* by its own desire, *Brahman* attains the form of the world without undergoing any material change; and, again, by its own desire, takes all within itself. This Evolution and Involution only are called the *utpatti* and *vināśa* by the world. In reality – "*na-asato vidyate bhāvo; na-abhāvo vidyate sataḥ*" (Gītā); by this sentence it is said – *asataḥ bhāvaḥ nāsti* – there is no existence for that which does not exist; that which exists does not cease to exist. In the school of thought which accepts *Brahman*, it is experienced in everything and hence, there is no question of its absence anywhere. Well, in that case, there should be no experience as a thing of the past and of the future; in that case, all the worldly dealings such as anterior non-existence, posterior non-existence, the absence of one object in the other, and the complete absence of a non-existing thing etc., are being negated; no; in all these cases, the desire of *Bhagavān* is the ultimate controller.

In that case, the statement "at that point of time when it is called dissolution, it is the intention of *Bhagavān* that there should be no experience of any object" – i.e. under which point of time all objects are experienced, that is called the time of created world; i.e. everywhere, the inimitable desire of *Bhagavān* is the controller and thus, there is no occasion for any defect in the system. (*Vidvan-maṇḍana*).

Thus it is that the Unqualified, un-changing, eternally powerful *Brahman*, by its desire, sports in the form of *Akṣara*, *jīva* and *jagat* by this evolution and involution. Therefore, the absenses as anterior etc., are all involuted in this. Everything being of the form of *Brahman*, there is no absolute absence of anything in *siddhānta*. "Being so, at this point of time, and at this place, this creation be so" – in this manner the desire takes the form of evolution; likewise, "there be no such thing – desire of this nature is involution." (*Vidvan-maṇḍana*). That is why it is said – being eligible to be experienced is called evolution; the absence of that is called involution. These two states are defined by the existence of objects; and it is not possible for false appearances to be such limiting factors; because, they are abstract concepts and need a substratum to appear upon (*Vidvan-maṇḍana*). Therefore, the creation and dissolution of the world are due to this evolution and involution; the word creation means evolution; the word dissolution means involution. "*Ātmataḥ āvirbhāva-tirobhāvau*" is the *Chāndogya śruti;* these evolutions and involutions are not to be construed as ephemeral.

Brahman the substratum of contradicting features:

If it is accepted that *Brahman* is the substratum of all the attributes, thus acceding that contradictory attributes also do inhere there, one and the same object, at a particular point of time and at a particular point of space, cannot appear as two different objects; therefore, the *Brahman* has to be accepted as devoid of attributes, names and forms. That it is appearing as possessing qualities and with forms due to the effect of *māyā*; this is not so. *Brahman* is known only through the *śruti*; mere reasoning is not useful in this; and the *śruti* states – "*yato vāco nivartante aprāpya manasā saha*" – that *Brahman* does not possess qualities; again, in that very context, it states – "*ānandam brahmaṇo vidvān; na bibheti kutahcana*" the existence of bliss in *Brahman*. That is why, in the *Vyāsa sūtra* – "*darśanācca*" – it is stated that all the opposite qualities are seen in *Brahman*; therefore, *Brahman* is the substratum of all dissimilar qualities is stated in *śruti*, *smṛti* and *pratyakṣa*..

"*Prakṛtaitāvatvam hi pratiṣedhati; bravīti ca tato bhūyaḥ*" (3/2/22) – by this *sūtra*, in reality and also as per *śāstras*, the contradiction is removed; and by reasoning also, the contradiction is removed. What is called "that much" in *Brahman?* It means the qualities born of *prakṛti* that are denied; thereafter, it talks of the existence of *aprākṛta* qualities. Thus, contradictory qualities also inhere in *Brahman*, but they are not of the *prakṛti* and not of this world. These qualities are of its very nature, and not due to *māyā*; *"ubhaya vyapadeśāt; ahi-kuṇḍalavat"* (3/2/27); *"prakāśa-āśrayavad vā; tejastvāt"* (3/2/28) – by these *sūtras*, it is to be accepted that *Brahman* is the substratum of opposing qualities. Opposing qualities inhere in *Brahman* is declared in *śruti* – *"aṇoraṇīyān mahato mahīyān;" "samo nāgena; samo maśakena;" "na tat samaśca; abhyadhikam tu dṛṣyate;"* by many such *śāstra* sentences, in *Brahman* whose nature is inexplicable, all opposing qualities do appear by its very nature. At one and the same time, *Brahman* can be seen in two different forms. Likewise, *Brahman* can appear at several places simultaneously; as was seen by Nārada - the sixteen thousand *mahiṣīs* in the *antaḥpura*. Therefore, by the validity as experienced by Nārada, *Brahman* is the substratum of all opposing qualities; it is capable of doing, un-doing and doing variously. Even in this world, we see in one person, the opposing qualities like sympathy in the case of one and the killing instinct in the case of another; this we see at one and the same time in one and the same person; this being so, what to talk of the other-worldly things and happenings. Here Śrī Purusottamacaraṇa:

"Therefore, if we analyse on the strength of verbal testimony, then we come to the conclusion that *Brahman* is the substratum of all the opposing qualities and features. If analysed according to the reasonings shown in the *śrutis*, then it is devoid of all worldly qualities and is full with all un-worldly qualities etc. If analysed on the strength of the meanings, it is the conglomerate of all opposing qualities. To teach this, it was analysed in these three methods." Therefore, if *Brahman* is the abode of opposing qualities, it is not a blemish but adds to its merit. In this same manner, the qualities of being partial between individuals and not showing pity in the case of suffering people etc., are not to be construed as defects in *Brahman* because they are created by *Brahman* itself. Hence, says the Āchārya – *"ātma-śṛṣṭeḥ na vaiṣamyam nairghṛṇyam cāpi vidyate."*

Bhagaval-lilā:

In the discussion, "Is the *Bhagaval-līlā* the product of *māyā* or not", this being only in *Bhagavān*, being based in *Brahman* which is of the nature of *Sat-cit-ānanda*, and being not different from its nature, it is not the effect of *māyā*. This *Bhagaval-līlā* does not proceed with a view to achieving any specific purpose; *"na prayojanavatvāt"*– this *sūtra* illustrates this. But, it is like the sporting activities of the world; see *sūtra "lokavat-tu-līlā kaivalyam"*; it is merely a sport; self-experience is *mokṣa*. It is told in the *Bhāṣya* that its (*līlā's*) mere mention will give *mokṣa*. *Līlā* is in the nature of *Brahman* itself, has been produced by *Bhagavān* and it is un-worldly; therefore, it cannot be contended, that it is not the product of *māyā*. The answer to this objection is: "The definition of this sport in *Subodhinī* – "instigated by happiness, being performed without tiring efforts, the act is called sport"; alternatively, without tiresomeness, and with pleasure, the act performed is *līlā*."

Now, another objection: This *līlā* is seen here in this world's mountains and forests, and being in the midst of *prapañca*, it is fleeting or ephemeral; no; *prapañca* itself is the creation of *Bhagavān* as told by Āchārya; *līlā* being part of this *prapañca* which is the creation of *Bhagavān* –

> "*jayati jananivāso devakī janmavādo*
> *yaduvaraparișat-svair-dorbhirasyan-adharmam* I
> *sthira-cara-vṛjinaghnaḥ susmita-śrīmukhena*
> *vrajapura-vanitānām vardhayan kāmadevam* II"
>
> (Bhāgavata 10/10/48)

As per this statement of *Śrī Bhāgavata* the fourth *prasthāna*; In this *śloka*, the present tense used in the word *"jayati"* denotes the *līlās* performed in *Vraja* in the past, and the *'śatṛ'* suffix in the word *"vardhayan"* denotes that at that time of the story and at that instant, there existed all the unseen sports. Therefore, as can be seen in the context of naming the child, Garga's statement in the *Bhāgavata* – *"bhagaval-līlānām* *trikālātītatvam, nitya-vartamānatvam-pravartamānatvañca jñāpyate"* i.e. the sports of *Bhagavān* are beyond the three tenses, past, present and future – it is ever in the present – and will also be in future – is denoted.

> *"bahūni santi nāmāni rūpāṇi ca sutasya te* I
> *guṇa-karmānurūpāṇi tānyaham Veda no janāḥ* II"
>
> (Bhāga.10/8/15)

Here, the word *"santi"* is used; it is evident from this that the *līlā* is eternally present.

No; we see in the world that a cook or a teacher is so called even when he is not engaged in that specific act; here too, it is to be so interpreted and not otherwise. The answer is – "not so". The un-worldly sport is beyond this world's ken of knowledge, and even though the *līlā* spoken of here is connected with this world, it should not be established by the example of this world. In this world, even a timid person is praised as a lion among men; whereas the above statement is not so. Here, according to the statement of Garga, as the name denotes, the qualities are to be construed; as per the acts, the form is to be seen; i.e. one who rears the cows is cow-herd; one who gives *mukti* is *Mukunda;* etc.

No; at the time of naming the child, the sports were yet to take place; then, how was it possible to name the child according to the non-existing sports? This doubt does not arise; because the sports of *Bhagavān* are eternal and they are going on eternally. In this manner, sports like *Pūtanā-śakaṭa-bhañjana-Kāliya-damana* etc. were already known, but were not performed at that instant by the desire of *Bhagavān*. Therefore, the sports of *Bhagavān* are eternal and are not limited by time and space; they are there at all places, at one place, in all forms and in various forms by the mere desire of *Bhagavān* and therefore, they are not the product of *māyā* at any time.

Let the un-worldly sports of *Bhagavān* be not the product of *māyā*; but, as in the world, on the question "are the sports the products of *māyā* or not", the answer is an emphatic 'no'. As shown in the *sūtra "Tat-tvabhāve sandhyavad-upapatteh"* (Br.Su.4/4/13), to delude the non-divine people, *Bhagavān* shows Himself as ordinary human beings, but in truth, He is not so. For those whose thoughts are clouded and are non-divine, as described in the *Bhagavadgītā* (16/18-20) – *"mama-ātma-para-deheṣu pradviṣanto-abhyasūyakāḥ"... "tato yānti-adhamām gatim"* – these people are of non-divine nature and are not fit for emancipation.

In this manner, showing the reasons for finding fault in the sports of *Bhagavān*, in the following *sūtra* the reasons are shown for seeing the praise-worthiness of the sports of *Bhagavān* – *"bhāve jāgradvat"* (Br.Su.4/4/14). As per this *sūtra*, the meaning of the word "*līlā*" and in the act of *līlā* itself, which appear as of this world, what the devotees see is non-worldly; as in the case of a person who gets rid of his clouded vision, and gets the correct vision. In this manner, *Bhagavān*, by his own desire, removes the effect of *māyā* from the minds of his devotees, and to make them enjoy the different experiences of his different sports, enacts them as such.

In certain cases, He performs false sports also as in the battle of Saubha. Therefore, to delude the un-godly people, He performs sports as in the world. Here the *Bhāṣya* – *"ata eva līlāyaḥ anekarūpatvāt, brahmaṇaśca śrutau Saindhava dṛṣṭānte, naikarasatva-nirūpaṇāt, suddha-brahma-dharmatvam na sambhavatīti śankā-nirāsāya kaivalyam ityuktam" ("lokavat-tu-līlā-kaivalyam").*

"*sākṣī cetā kevalo nirguṇaśca*" in these *śrutis*, the pure state, devoid of any other attribute, that is stated is also of the nature of sports. The pure *param-brahman* is of sportive nature only, and not, at any time, devoid of it is intended here. From this it can be concluded that the sports are in the nature of *Brahman*, and thus, they are eternal. (Br.Su.4/4/14 *Bhāṣya*).

The attribute of smell occurs in earth only and not in water i.e. its appearance at one place and non-appearance at another place. Likewise, the experience of *Bhagaval-līlā* is seen in the devotees and not in the haters of God. Even now, similar experience of *Bhagaval-līlā* of those times by the devotees are being heard, by the desire and condescendence of God. Thus, *Bhagavān* is always combined with his sports at all times and all places. The Lord Govardhanadhara for protecting his devotees, just to fulfil the desires of His devotees, by this desire and sympathy, appears and disappears.

Therefore, this is the conclusion in the system that *Bhagavān*'s sports are not product of *māyā* at any time.

> "*prabhoreva phalatvam nirdoṣatvañ-ca varṇyate* I
> *līlā-nityavataḥ pūrṇa-guṇatvam ca tato-akhilam* II"
>
> (Āchārya kārikā)

Bhakti Nirūpaṇam

Definition of *Bhakti* has been given by Āchāryacaraṇa in his *Nibandha* as –

> "*Māhātmya-jñānapūrvastu sudṛḍhaḥ sarvato-adhikaḥ* I
> *Sneho bhaktiriti proktah tayā muktir nacānyathā* II"
>
> (Śā.pra.kā.45)

Bhakti-svarūpa has been explained by Āchārya by this *kārikā*. *Sneho bhaktiḥ*. When one understands that *Bhagavān* is the soul, *sneha* – affection – takes place. "*Gauṇascenna ātmaśabdāt* (Br.Su.1/1/5) – as per this *sūtra* the word '*gauṇa*' should not be interpreted as attached with *guṇa, ātma-śabdāt* – Here the *Bhāṣya* says – *ātma śabdaḥ punaḥ sarveṣu vedānteṣu nirguṇa-parabrahma-vācakatvenaiva siddhaḥ. Tasyaiva Jagat-kartṛtvam śrutirāha.*" This sentence means, *nirguṇa-sākāra-parabrahman* only is the Creator of this world; He only is the indwelling soul; He only is *Bhagavān Śrī Kṛṣṇa*. "*Kṛṣiḥ* means '*Bhū*'; '*ṇaḥ*' means riddance. The identity of these two denotes *param-Brahma Kṛṣṇaḥ*"; this is how the *Gopālatāpaniyopaniṣad* describes. Śrī Kṛṣṇa, the one brought up in the laps of Yaśodā, is *Param-Brahma* – this is made clear in all the *śruti, smṛti śāstras*; therefore, the word '*bhakti*' means *sneha* in Śrī Kṛṣṇa; this is the primary meaning; its use in other places is redundant.

Sat-cit-ānandam Brahma sports in the world in three ways; here, the *jagat* is *'ādhibhautikam'*; *Akṣara-Brahman* is *ādhyātmikam; Ādhi-daivikam param Brahma, "puruṣaśca-adhi-daivatam" smṛti* says. Likewise, there are three ways for the sports of *Bhagavān* – *ādhi-bhautika mārga*, i.e. *karma; ādhyātmika mārga*, i.e. *jñānam; ādhi-daiviko mārgaḥ*, i.e. *bhaktiḥ*. Here, the first one, *ādhi-bhautikaḥ* – the *karma mārga* is restricted to world; the second, *jñāna mārga* ends in *Akṣara;* third, the *bhakti mārga* ends in *Puruṣottama para-Brahman*. The *jñānis* think that the ultimate end is *Akṣara Brahman*; but, *bhaktas* consider this *Akṣara Brahman* as the *dhāma* – residence – of *Para-Brahma, Pūrṇa Puruṣottama*. The evidence for this is –

> *"avyakto'Akṣara ityuktaḥ tamāhuḥ paramām gatim* I
> *yām prāpya na nivartante tad-dhāma paramam mama* II
>
> (Gītā 8/21)

Likewise –

> *"yasmāt kṣaram-atīto'ham akṣarādapi cottamaḥ* I
> *ato'smi loke vede ca prathitaḥ puruṣottamaḥ* II"
>
> (Gītā 15/18)

by these testimonies, the meaning of the Vedas and the *śāstras* is known as *bhakti*. Well, how do you come to the conclusion that the meaning of the Vedas and other *śāstras* is *bhakti*? The answer is - *"yatra nānyat paśyati; nānyat śruṇoti; nānyat vijānāti; sa bhūmā; sa vā eṣa evam paśyan evam manvānaḥ evam vijānan, ātma-ratiḥ; ātma-krīdaḥ; ātma-mithunaḥ; atmānandaḥ; sa svarāḍ bhavati;" "parambrahmaitad yo dhyāyati, rasati, bhajati, so amṛto bhavati;" "nāham vedair, na tapasā, na dānena, na cejyayā śakya evam vidho draṣṭum dṛṣṭavānasi mām yathā;" "bhaktyā tvananyayā śakyaḥ;" "aham bhakta-parādhīnaḥ;" "bhaktyā tutoṣa Bhagavān gajayūthapāya"* – by these *śruti, smṛti* testimonials, only *bhakti* has been elucidated. By these the *sarvātma-bhāva* nature of *bhakti* only is conveyed.

In *Chāndogya*, the Sanatkumāra-Nārada dialogue of *Bhūmavidyā*, by the words *"yatra nānyat paśyati"* etc. talks of the absence of any other element; this very *vidyā* again talks of that state of separation from *Bhagavān* wherein, by the ultimate longing, forgetting the *prapañca*, at all places, only the *Bhagavat svarūpa* is experienced, by these words – *"sa eva adhastāt, sa eva upariṣṭād, sa paścāt"* etc. Thereafter, the experiences in the state of separation from *Bhagavān* are described as not the necessary concomitants, and to remind this, the *"ahaṅkāra ādeśa"* – *"ahameva adhastāt, ahameva upariṣṭād"* etc. are given; then comes the *ātmādeśa* – *"ātmaiva adhastāt, ātmopariṣṭād"* etc. Likewise, still further, by the words *"ātma-ratiḥ; ātma-krīḍaḥ; ātma-mithunaḥ"* etc. it extols the *Bhagavān* as of the nature of *"rasa"*. Here, the word *"ātma"* is taken to mean *"pūrṇa puruṣottama"* in the *siddhānta* and not the *Akṣara* or *jīva*. This is evident from the *sūtra "gauṇaścen-na-ātmaśabdāt"*; by this *sūtra*, that thing which is the ultimate existence, is what is told mainly in all the Vedānta. By this, the *sarvātma-bhāva* nature of *bhakti* only is conveyed and this is the main purport.

This *bhakti* is achieved only through the grace of God; it is so told in the *śruti* – *"na-ayam ātmā pravacanena labhyah; na medhayā; na bahunā śrutena; yameṁvaiṣa vṛṇute tena labhyaḥ; tasyaiṣa ātmā vivṛṇute tanūm svām"* (Kaṭho.1/2/23). Here, the word *ātma* means *Puruṣottama*; *"pravacanena* means *'sasvara vedādhyayanena'*. By this it is clear that the *'puṣṭi-bhakti'* can be attained only by the desire of *Bhagavān*. The word *"sva"* means self, and when desired as one's own self, He gives the *'puṣṭi-bhakti"* of the nature of *'sarvātma-bhāva'*. Here the *Bhāṣya* – "for all individual souls, *Bhagavān*, naturally is the master; but, then, whom He desires as His own, him He protects even as a husband would his wife; *bhakta* also protects Him due to the affection generated by the *varaṇa;* He, like the *Bhakta*, protects him in Himself. (Aṇu Bhāṣya 4/4/15).

This statement of the *Bhāṣya* indicates that *'sneha'* affection is the important and chief element of *bhakti*; that is why Vyāsa has shown the example of *'pradīpa'* – lamp (*Dīpaka*) – instead of *'ayo-golaka'* – heated iron ball – in his *sūtra "pradīpavad-āveśah; tathā hi darśayati"*. This *'sneha'* has *'śṛṅgāra'* as its chief element as shown by the damsels of Vraja whose *'sthāyi-bhāva'* was nothing but *'rati'* and hence, *bhakti-rasa* also means the same *'śṛṅgāra'*. This experience is non-worldly and is of the nature of *'samyoga'* – togetherness – and *'viprayoga'* – separation. This *alaukika śṛṅgāra* – non-worldly love, though similar to the worldly love, is not the same; because, it is known through the non-worldly means of knowledge, and not known through the worldly means of knowledge.

In fact, in this *bhakti*, the mere doubt of its being this worldly is meaningless. *Ṛṣis* like Vātsyāyana and others wrote their treatises just to elucidate this *bhagavat-bhāva* experience. *Ṛṣis* intentions are not to convey the worldly experiences at any time. That is why, it is said – *"tadetat brahmacaryeṇa parameṇa samādhinā vihito lokayātrārtham na rāgārtho'asya samvidhiḥ; rakṣan dharmārthakāmānstrīn saṁpaśyam-lokavartinām; asya śāstrasya tatvajño bhavatyeva jitendriyaḥ"*. If the intention of those writers were to be of this world, then they would not have said the end-result as *' jitendriya-bhavana'* – becoming one who has won over his senses. This meaning has been elaborately shown by the Āchārya in his *Bhāṣya* on *"liṅgabhūyastvādhikaraṇa"* and in *"kratuvaj-jyāyastvādhikaraṇa"*. Likewise by Śrī Puruṣottamacaraṇa in his Prakāśa and by Śrī Gopeśacaraṇa in his *Raśmi*.

The nature of this *bhakti* is *'śṛṅgāra'* and it is of the nature of togetherness and separation; separation generates a suffering of longing; how then can it be of the nature of pleasure and that too, immeasurably? The answer is the *śruti "yo vai bhūma tat sukham"*; therefore, it is of the nature of only pleasure. In Vedānta, at all places, *mukti* has been described as of the nature of enjoyment of pleasure. In the *Puṣṭi mārga* also, the nature of *Bhagavān* being of *ānanda*, His *prāpti* – attainment – is the attainment of *paramānanda* – inestimable pleasure and not the attainment of suffering. On this point, the author of *Raśmi*, Yogi Gopeśwara enjoins – *"asyaiva ca-upapatteh ūṣmā"* – in the *Bhāṣya* of this *sūtra*, *'tathā hi; asya ānandātmaka-rasa-rūpasya bhagavataḥ eva ayam dharmaḥ; ūṣmā – viraha-tāpaḥ;* though the all-pervading *Bhagavān* is present at all places, because he disappears by His *māyā*, separation and longing of His company is common for all; but, then, it is not felt by all, but only by those in whose hearts the experience of blissful nature of *Bhagavān* takes place, and only in his heart the suffering, born out of non-attainment of Him is experienced; this is in tune with the syllogism – "other things being there, it will be there; they being not there, it will not be there." Therefore, only that object which is of the nature of pleasure can be such; the suffering also here will be of the nature of pleasure."

From the above it is clear that the suffering described here is not born out of *karma;* if it were to be born out of *karma*, then its riddance called *mokṣa*, of the nature of pleasure, will also be shattered. That is why it is said in the *śruti* – *"na paśyo mṛtyum paśyati na rogam no'ta duḥkhatām"* – here the nature of this *bhakti* is described as not of the nature of suffering; but is the cause of suffering though; But, being the means to attain the real *Puruṣottama* – *ānanda-prāpti*, it is of the nature of pleasure. If not so, in the state of separation, the *śruti* would not have said as – *'citte sphurāyamāṇam ānandatvam'*; *"ko hi-evānyāt kaḥ prāṇyāt"* – this *śruti* means – "in the state of separation, the *Bhagavad-rūpa* shining in the heart is the cause for the continuity of life". Likewise, in the *Bhāgavata* also –

"*tāḥ manmanaskā mat-prāṇā madarthe tyakta-daihikāḥ*
māmeva dayitam preṣṭhamātmānam manasā gatāḥ I
ye tyakta-loka-dharmāśca madarthe tān bibharmyaham I
(Bhāga. 10/46/4)

"Thus, that which is given by *Bhagavān*, who is one's most-dear, that which has some connection with *Bhagavān* and which is attained by the devotees, all that will be of the nature of pleasure; therefore, for the naive that you are, the un-earthly nature of pleasure of *Bhagavān* will be the cause of suffering even as the nail-marks of the lover on the bulging breasts of his love, comparable to the pricking of thorns! Let us suffice it at this."

Thus, by the *śruti "yo vai bhūma tat sukham; na-alpe sukhamasti"* the pleasure that is described is of *Brahman* only since that is of that nature, and all that is of the nature of pleasure, end by connoting *Brahman*. In fact, *Brahman* only is the desired object of *jīva*. This is what is told in *Śrī Bhāgavta:*

"ahamātmā ātmanām dhātaḥ preṣṭhaḥ san preyasāmapi ।
ato mayi ratim kuryād dehādir yat-kṛte priya ।।"

Here, this should be understood: In *Siddhānta*, *Para-Brahman* is of the nature of pleasure *'rasa'*; is the substratum of all opposing qualities; and with form; thus the *śruti "ātmaiva pūrvamāsīt puruṣa-vidhaḥ"*. The end-result to be attained is *Brahmānanda*. In the *śruti "param-brahmaitad yo dhyāyati rasati bhajati so'amṛto* bhavati" the connection of each word with *Brahman* is to be understood.

This *bhakti* is of the nature of end-result; its definition is – *"para-Brahma śri kṛṣṇa-snehatvam"*. Here, by the *varaṇa śruti "yameva eṣa vṛṇute tena labhyaḥ"* the *varaṇa* is of two varieties viz. *maryādā* and *Puṣṭi*. In the case of *maryādā bhakti*, the means prescribed in the *śāstras* are many and that also, is of bodily, mental and verbal nature. Whereas, in the *Puṣṭi mārga*, *varaṇam* is the only means. In this *mārga*, only by the grace of God is the destruction of all the sins. This is so said –

"svapāda-mūlam bhajataḥ priyasya
tyaktānya-bhāvasya hariḥ pareśaḥ
vikarma yaccotpatitam kathañcit
dhunoti sarvam hṛdi sanniviṣṭaḥ" ।।

(Bhāga.11/5/42)

"praviṣṭaḥ karṇa-randhreṇa svānām bhāva-saroruham
dhunoti samalam kṛṣṇaḥ padmapatramivāñjasā"||

In this manner, only by *varaṇa (paramātma's* desire) – *puṣṭi-bhakti* is attained by the *puṣṭi-bhakta;* whereas *bhaktas* attain through *bhakti-mārga* – go near to *Bhagavān*; there, if *Bhagavān* appears, gets *rasānanda;* i.e. through all the senses, relation is established with *bhagavat-svarūpa.* This is told in *Bhāgavata* – *"akṣanvatām phalamidam na param vidāmaḥ";* all kinds of such mental longings are fulfilled by the grace of *Bhagavān*; *"brahmaiva san Brahma apyeti"; "so'śnute sarvān Kāmān saha brahmaṇā"* these *śrutis* are the evidence. This experience of *rasa* is the highest. By the statement of the Āchārya *"brahmānandāt samuddhṛtya bhajanānandayojane,"* the *akṣara-brahma-ānanda* is counted-pleasure and the *bhajanananda* is uncounted pleasure. Evaluating between these two, *jñāna* and *bhakti, Bhakti* is superior.

1) In *Bhakti*, drinking of the *rasa* of *kṛpānanda* is the result; in *jñāna*, it is merely the absence of suffering.
2) In *Bhakti*, experience of pleasure in full is the result; in *jñāna*, dissolving one's self and that too completely, without differentiation – is the result.
3) In *Bhakti*, the existence of duality made so by *Bhagavān* and experience of its pleasure is the result; in *jñāna*, since there is no differentiation, experience of pleasure does not arise.
4) In *Bhakti*, from the very beginning, there is limitless pleasure; in *Jñāna*, there is suffering in the beginning, and at the end, attainment of limited *ānanda*.
5) In *Bhakti*, it is the attainment of Pūrṇa Puruṣottama; in *jñāna*, it is the attainment of *Akṣara*.

In this manner, while comparing *jñāna* and *bhakti, bhakti* excels.

"ātmārāmāśca munayaḥ nirgranthā apyarukrame I
kurvantyahautikīm bhaktimltthambhūtaguṇo hariḥ II"

(Bhā.1/7/10)

"The great contemplators and renunciates undertake unearthly *bhakti* in respect of That of big-strides, just for the sake of self-pleasure, because *Hari* is of those qualities not experienced anywhere else.

Therefore, even after getting the *brahma-bhāva*, one can practise *parā bhaktiḥ*. This is the unfathomable excellence of *Bhagavān, Pūrṇa-Puruṣottama Śrī Kṛṣṇa* and the superiority of *bhakti*. That is why learned people, capable of understanding the *rasa* and of emotional nature, offering themselves through *bhakti*, unto *Bhagavān Śrī Gopījana-vallabha*, become immersed in the experience of pleasure. Therefore, by the sentence "*sarva-dharmān parityajya*" only *Bhagavān* is to be accepted as the resort. Only by His grace, *Bhagavān* makes happen all that is wanted by the devotees. That is why the definition of *Puṣṭi* is told in *Śrī Bhāgavata* as – "*poṣaṇam tadanugrahaḥ*". In *Puṣṭi-mārga*, it is only the *Bhagavad-anugraha*, the controller.

Bhakti is of two varieties as *Maryāda* and *Puṣṭi*. *Maryādā-bhakti* means *bhakti* in *Bhagavat-caraṇāravinda*. *Puṣṭi-bhakti* means *bhakti* in *Bhagavat-mukhāravinda*. *Maryādā-bhakti* is not independent. *Puṣṭi-bhakti* is independent. The end-result in *Maryādā-bhakti* is *sāyujyam* i.e. attaining similarity with *Bhagavān* in qualities. In *Puṣṭi*, it is becoming *Bhagavān* Himself. Thus, in whose case the grace of *Bhagavān* descends, he comes into the *Puṣṭi*; and that grace is inferred by the craving (*ruci*) etc., shown by the devotee in that *mārga*.

That craving means *Bhakti* itself. The result of pure *Puṣṭi-bhakti* means entering into the *Nitya-līla* and attainment of *Puruṣottama*. All this has been elaborately explained by the Āchārya in *Śrīmad Aṇu-Bhāṣya*; it has been vividly explained in his *Prakāśa* by Śrī Purusottamacaraṇa and by Śrī Gopeśwaracaraṇa in his *Prakāśa-Raśmi* still more elaborately delineated.. One has to understand all this from there.

Now, describing the root of *Brahman* and its nature we conclude here –

> "*kṛṣir bhū-vācakaḥ sabdo; ṇaśca nirvṛtti vācakaḥ;*
> *tayoraikyam param Brahma kṛṣṇa ityabhidhīyate* ||
> *Om Tat Sat Param Brahma Kṛṣṇātmako Nityānandaika-svarūpaḥ* || is the *śruti.*

The letter "*kṛ*" denotes earth; the letter "*ṇaḥ*" means "redemption"; when these two letters become one Word, it denotes the *param-Brahma* called *Kṛṣṇa*. This is confirmed by the *śruti* sentence quoted. Therefore,

> *Paripūrṇatamaḥ kṛṣṇo vaikuṇṭho gokulaḥ svayam* |
> *Caturbhujaśca vaikuṇṭhe gokule dvibhujaḥ svayam* |
>
> (Bra.vaivartapu.)

Kṛṣṇa is the most full-potential god; Gokula is *Vaikuṇṭha* itself; He only is with four hands in *Vaikuṇṭha,* and with two hands in Gokula. In this manner, in respect of all the *śāstras,* the opinion of Śrī Vallabhācārya was explained in short.

Therefore, *paramānandapūrṇa-Puruṣottama-Parabrahma* is Śrī Kṛṣṇa only. What is known from all the *Nigamas, Āgamas* and others is the *para-brahma-svarūpa* Śrī Kṛṣṇa and He alone is to be realized and that is the ultimate *puruṣārtha* and this is the *Śuddhādvaita-Brahma-vāda.* This attainment is not possible without *bhakti,* vide the *śruti* – "*nāyamātmā balahīnena labhyah.*" Here, the word "*bala*" means *bhakti.* Therefore, in the pure *puṣṭi-bhakti,* love is the deciding factor. *Bhakti,* i.e. love without any conditioning factor, is the *Sarvātma-bhāva.* Only this is the chief means for the attainment of *Pūrṇa-Puruṣottama.* In whom the grace of god descends, only he becomes fit for this *puṣṭi-mārga.* Therefore, to establish this *puṣṭi-mārga,* the *prameya,* un-opposed to the *pramāṇa,* was shown by the Āchārya and hence, as delineated by the Āchārya, the *Puṣṭi* path is to be followed.

"jānīta paramam tatvam yaśodotsanga-lālitam I
tadanyaditi ye prāhūrāsurāñstān aho budhāḥ II"

(Śrī Prabhucaranāḥ Bhāṣya)

Śrīmad Āchāryacaraṇānām Veda-śraddhā:

In this *Bhāṣya*, the glory of this *Puṣṭi-bhakti* has been elaborately described and thus, Āchārya has shown his extraordinary belief in respect of the Vedas. Śrī Vallabhācārya does not accept variation even in a single letter of the Vedas. *"uttaram pūrva-sandeha-vārakam parikīrtitam"* – as per this rule of interpretation, *"pūrva-pūrva-prasthāna-sandeha-vārakatvam uttarottara-prasthānasya"* – the earlier basic texts forming the basis for a *siddhānta*, if ambiguous, should be got clarified by the statements in the later texts – Āchārya has upheld this principle.

For example, the Veda says – *"apāṇi-pādo javano gṛhītā";* here a doubt arises as to, whether *Brahman* is devoid of this earthly hands and feet; or, it denies the existence of hands and feet in general? This doubt is cleared by the sentence of the Gītā – *"sarvataḥ pāṇi-pādāmātam"* i.e. *Brahman* is having hands and feet everywhere. Similarly, the Gītā says – *"nityaḥ sarvagataḥ sthāṇuḥ"*; *"mamaivāṁśo jīvaloke"* etc. Here, the doubts that arise are cleared by the *Brahmasūtras* – *"utkrānti-gatyāgatibhiḥ"*; *"aṁśo nānā-vyapadeśāt"* etc. Similarly, in the *sūtra* – *"janmādyasya yataḥ"* – the doubt arises that the *jagat-kāraṇatvam* told of the *Brahman* is the material cause or the efficient cause. The conclusion is derived by the sentence of *Śrī Bhāgavata* – *"anvaya-vyatirekābhyām yaḥ syāt sarvatra sarvadā"*. It is how the homogeneity of all the four *prasthānas* is to be achieved. Here, the Āchārya has accepted validity of the entire Veda consisting of two *kāṇḍas*, and not the Upaniṣad only as told by others - *'vedanto nāma upaniṣad pramāṇam'*; says Āchārya – *"vedasya Akṣara-mātrasya anyathā-kalpane'pi doṣaḥ syāt"* – imagining even a letter of the Veda differently will amount to defective reasoning.

Therefore -

"vedoktād-aṇumātre'pi viparītam tu yad bhaved I
Tādṛśam vā svatantrañca ubhayam mūlato mṛṣā II"

(A.Bha.Ka.)

Likewise -

"yajñarūpo hariḥ pūrvakāṇḍe Brahma-tanuḥ pare I
Avatārī hariḥ kṛṣṇaḥ Śrī Bhāgavata īryate II"

(Sa.pra. 11)

"agnihotram tathā darśa-pūrṇamāsaḥ paśus-tathā I
cāturmāsyāni somaśca kramāt pañcavidho hariḥ II"

(Tatva. 2/2)

"asandigdho'pi vedārthaḥ sthūṇā-khananavan-matam I
mīmāmsānirṇayaḥ prājñe durbuddhestu tato dvayam II
Jaiminiḥ karma-tattvajño nirṇayam pūrva uktavān I
Vyāsaḥ svayam hi sarvajñaḥ uttare nirṇayam jagau II"

(Tatva.2/29/30)

In respect of Purāṇa, Āchārya's faith –

"Purāṇam vedavat pūrvasiddham sarvopayogi tat"

(Tatva.2/48).

In respect of Mahābhārata –

"sarvanirdhāraṇārthāya vyāso bhāratamuktavān"

(Tatva.2/57);

On the subject Jyotiṣa –

"darśādikālanirddhāro jyotiḥ śāstraphalam smṛtam"

(Tatva.2/75)

On Vyākaraṇa –

"vyākritiḥ Pāṇinīyam hi Prātiśākhyam tu śabdag

(Tatva.2/77):

On Āyurveda etc. –

"Ārogye dharmasiddhih syād rakṣā ca dhanuṣo bhavet I
Udvegahānir-gāndharve sthāpatyam ca srugādiṣu II

Kāvyādīnām asatyatvāt nopayogaḥ kathañcana ||
Dharme-kartuḥ kvacid kīrttir-naipuṇyam pāṭhataḥ kvacit ||"
(Tatva.2/79-80)

On Rāmāyaṇa –

" *Rāmāyaṇamanantam hi purāṇamiva sanmatam* |
Vyāsaḥ pūrvamanekokto vālmīkiḥ sāmpratam kila |
Samādhi-bhāṣayā prāha pramāṇam sarvathaiva tat ||"
(Sar.pra.81)

In this manner, in respect of all the *śāstras*, the opinion of Śrī Vallabhācārya was clarified in short.

In respect of Saṁnyāsa:

Saṁnyāsa is not to be taken in the paths of *karma* and *jñāna* due to the defects of *Kali*, to avoid regret later. But, in *Bhakti mārga*, it should be taken. The sacrifice, just for the sake of experiencing the separation of *Bhagavān* only, is praise-worthy. All this Āchārya has elaborately explained in his work *Saṁnyāsa-nirṇaya*. From this it is evident that Āchārya's preference is in *bhakti-mārga* over the *karma-jñāna mārgas*.

In his *Bhāṣya*, Āchārya shows his keen interest in repudiating the *māyā-vāda*. Even while repudiating the *Bauddha-mata*, he shows his penchent for the repudiation of *māyā-vādi*.

In *Brahma-sūtra*, the other Āchāryas have accepted the *Catuḥ-sūtrī* consisting of the *sūtras* – (1) *Athā'to Brahma-jijñāsa;* (2) *Janmādyasya yataḥ;* (3) *Śāstra-yonitvāt;* (4) *Tat-tu-samanvayāt;* whereas, as per Śrī Vallabhācārya, *'janmādyasya yataḥ; śāstra-yonitvat'* appear as one *sūtra*. That is why, in *Śuddhādvaita*, it is called as *'tri-sutri'*.

This *Aṇu Bhāṣya* was written by Śrīmad Vallabhācārya upto *sūtra* 33 of second quarter of third chapter. From *sūtra* 34 onwards it was commented by Śrī Viṭṭhalanātha. Even in the earlier part of the *Bhāṣya*, in *'Ānandamayādhikaraṇa'* the second *varṇaka* was written by Śrī Viṭṭhaleśa. In this matter, the statement of author of *Prakāśa* on *Bhāṣya* Śrī Puruṣottama is the authority. It is written: *"ita ārabhya prabhūṇāmiti (Śrī Viṭṭhaleśānām) pratibhāti; "sthāna-viśeṣāt prakāśādivat"* – (Br.Su.3/2/34) – in this *sūtra-bhāṣya-prakāsa*. Likewise, in *Ānandamayādhikaraṇa* – *"sāmpratam tu Prabhucaranaiḥ"*. Similarly, in the ending verse of the fourth chapter,

> *"Bhāṣya-puṣpāñjaliḥ śrīmadācārya-caraṇāmbuje* I
> *niveditastena tuṣṭā bhavantu mayi te sadā* II"

Here, in the Bhāṣya-prāmāṇya-prakāśa, Śrī Puruṣottamāḥ: *"guṇopasaṁharapādamārabhya sārddhādhyāyasya svayam karaṇāt tad ācāryeṣu nivedayantaḥ samāptau maṅgalam kartavyamiti śiṣṭācārañca śikṣayantaḥ ācāryāṇām prasādam āśāsate"*; from this, it is clear that after writing the remaining part of the *Bhāṣya*, it was dedicated at the feet of Śrī Vallabhācārya. But, here some learned persons think that the entire *Bhāṣya* was written by Ācārya himself. In that case, the meaning of '*Śrī Ācārya-caraṇāmbujam*' should be taken to mean as *Vyāsācārya-caraṇāmbujam*. See Ācārya's sentence *"vyāso'smākam guruḥ"*. In this manner, at other places also explanations are given.

Moreover, some people say – "there is another elaborate *Bhāṣya* of the Ācārya; from that, some short passage is available today; this *Bhāṣya* is the abridged version of that *Bhāṣya*." However, what Śrī Puruṣottamacaraṇa has said in his *Prakāśa* is to be accepted as the only part available and there should be no doubt about this. Whatever works of Śrī Vallabhācārya are there, in those cases there are commentaries on them by Śrī Puruṣottama. Where there is no commentary of Puruṣottama, that work is of Śrī Vallabhācārya or not is doubtful.

In this *Bhāṣya*, there are four chapters; they are - svarūpa; *matāntara-nirāsa; sādhana;* description of *phala* – respectively. In each chapter, there are four quarters; in the first chapter, *Vedānta vākyas* describing the nature of *Brahman* are discussed. Here, in the first quarter, sentences describing the effect (creation); in the second quarter, sentences describing the *antaryāmi;* in the third quarter, sentences describing the form of *upāsya* (that which is to be meditated upon); and in the fourth quarter, other disconnected sentences are discussed – this is the short description of the first chapter.

In the second chapter, the view points of other systems are repudiated; without repudiating the other systems, discussions on the means and the end-result will not serve the purpose. Here also, in the first quarter of the second chapter, the non-opposing nature of *śruti* and *smṛti* is upheld. In the second quarter, the systems of *Nyāya*, *Māyāvāda* atc., are refuted. In the third quarter, the opposing nature of *śruti* sentences are reconciled. In the fourth quarter, discussion on *prāṇa* etc. that reside in the body of the *jīvas* is made. This is the essence of the second chapter.

The third chapter deals with the means; here, in the first quarter, the discussion revolves round the birth of the *jīva* useful for *brahma-jñāna*. In the second quarter, the qualification of *jīva* for *mukti*; here itself, removing the oppositions, *Brahma-svarūpa* also is decided; in the third quarter, *'guṇopasaṁhāra'* – qualities described at different places differently are to be taken together is called *guṇopa-saṁhāra* – is done; in the fourth quarter, the subsidiary nature of rituals is discussed. This is the short description of the third chapter.

The fourth chapter describes the *phala* – the end result – objective. Here, in the first quarter, discussions of *śravaṇa* etc. are carried on. In the second quarter, the dissolution of all the senses is discussed. In the third quarter, the path of *krama-mukti* etc. is discussed. In the fourth quarter, differentiating between *Puṣṭi* and *Maryādā*, the *phala* and the eternal nature of *līlā* etc. are discussed.

The division of *Adhikaraṇas* are –

First chapter - 1st quarter - ten *adhikaraṇas;*
2nd quarter - eight *adhikaraṇas;*
3rd quarter - thirteen *adhikaraṇas;*
4th quarter - nine *adhikaraṇas;*
Second chapter - 1st quarter - twelve *adhikaraṇas;*
2nd quarter - eight adhikaraṇas'
3rd quarter - sixteen *adhikaraṇas;*
4th quarter - ten *adhikaraṇas;*
Third chapter - 1st quarter - eight *adhikaraṇas;*
2nd quarter - eleven adhikaraṇas'
3rd quarter - twenty four *adhikaraṇas;*
4th quarter - nine *adhikaraṇas;*
Fourth chapter - 1st quarter - seven *adhikaraṇas;*
2nd quarter - six *adhikaraṇas'*
3rd quarter - five *adhikaraṇas'*
4th quarter - five *adhikaraṇas.*

The abstraction of the contents of *Bhāṣya* and the *Adhikaraṇas* was thus described.

Śrī Vallabhācārya's short life history:

In the Telugu speaking region of south India, there is a village called Kāṅkarvāḍ; there was a family with the title Dīkṣita, followers of the *Taittirīya* branch of the Kṛṣṇa - yajurveda. In this family, all the persons born became *Soma Yājis.* The progenitor of this family was Śrī Nārāyaṇa Yajvā. In this family was born Śrī Laksmaṇa Bhaṭṭa. This gentleman, with his wife, once undertook the pilgrimage to Kāśī; during this time, on the way, at the place called Campāraṇya in Madhyapradeśa, from the womb of his wife Illammāgāru, (vikrama saṁvat 1535), on Vaiśākha Kṛṣṇa -ekādaśi, Śrī Vallabhācārya's appearance took place. Thereafter, Śrī Lakṣmaṇa Bhaṭṭa, along with his wife and son, resided in Kāśī for about twelve years. Śrī Vallabhācārya's thread ceremony etc. took place in Kāśī itself. Śrī Vallabha very quickly studied the Vedas and the *śāstras*. Thereafter, all the three came back to their native place. Then, Śrī Lakṣmaṇa Bhaṭṭa passed away; and again, Śrī Vallabhācārya undertook a pilgrimage. During this pilgrimage, Śrī Vallabhācārya had *śāstraic* discussions with many learned personalities and they were won over. Śrī Ācārya made round trips thrice, of the country, and preached his *Siddhānta*. During this time, in Vijayanagara, at the court of Śrī Kṛṣṇadevarāya, he defeated all the opposing debaters, and established his *siddhānta*, called the *Sūddhādvaita-Brahma-vāda-nirguṇa-puṣṭi-bhakti mārga.*

During his *yātrā*, at the Govardhana mountain, Śrī Kṛṣṇa, called Śrī Nāthjī, *Para-Brahma*, *Bhagavān*, by His own desire, appeared before Śrī Vallabhācārya and showed His form and commanded him to undertake His *sevā*. This was the *Puṣṭi-mārga* preached by Śrī Vallabhācārya. During one such pilgrimages, as per the directions of *Bhagavān* Śrī Pāṇḍūraṅga Viṭṭhalanātha, and with his mother's permission, at Kāśī, married the befitting daughter of a learned Telugu Brahmin by name Madhumaṅgala. Here, two sons were born to him by name Śrī Gopīnātha and Śrī Viṭṭhalanātha – first on Āśvina Kṛṣṇa 12, vi.sam.1568; the second on Miti Pau.Kr.9th, vi.sam.1572. In this manner, after crossing the three stages of life, took *tridaṇḍa saṁnyāsa* as approved by the *śāstras*; here in Kāśī, at the well-known Hanumānghāṭ, on Āṣāḍha su.2, vi.sam. 1587, on a Sunday, in the afternoon, entered into the waters of Gaṅgā; in this manner, deluding the non-believers, he left his mortal coil and entered the *Bhagavad Dhāma* in reality.

There are many works written by Śrī Vallabhācārya, the *jagadguru*. They are both short treatises and elaborate works; the bigger ones are - (1) Brahma-sūtra Aṇu Bhāṣya; (2) Tatva-dīpa-nibandhaḥ; (3) Nibandha Prakāśa; (4) Śrīmad Bhāgavata Subodhinī; (5) Pūrva-Mīmāmsā Bhāṣyam; (6) Gāyatrī Bhāṣyam etc.

Short treatises – (1) Śrī Yamunāṣṭakam; (2) Bālabodhaḥ; (3) Siddhānta-muktāvalī; (4) Puṣṭi-pravāha Maryādā-bhedhaḥ; (5) Siddhānta Rahasyam; (6) Navaratnam; (7) Antaḥ-karaṇa-prabodhah; (8) Viveka Dhairyāśrayaḥ; (9) Kṛṣṇāśrayaḥ; (10) Catuḥ-ślokī; (11) Bhakti-varddhini; (12) Jalabhedaḥ; (13) Pañcapadyāni; (14) Saṁnyāsa-nirṇayaḥ; (15) Nirodha lakṣaṇam; (16) Sevā-phalam. Similarly, Puruṣottama Sahasranāma; Paribṛḍhāsṭakam; Patrāvalambanam; Trividha Nāmāvalī; Śikṣā śloka etc. Śrīmad Bhagavadgīta Bhāṣya written by Śrīmad Vallabhācārya is not available due to the vagaries of time or due to some other reasons, think the research scholars.

Śrīmad Vallabhācārya's first son was Śrī Gopīnāthaḥ; he had only one son Puruṣottamaḥ. Thereafter, there are no descendents. Āchārya's second son was Śrī Viṭṭhaleśaḥ; His works are – *Aṇu Bhāṣya Uttarārdhaḥ; Vidvan-maṇḍanam; Sṛṅgāra-rasa-maṇḍanam; Subodhinī ṭippaṇī; Bhakti Hamsa; Bhakti Hetu-nirṇayaḥ* etc. He had seven sons – they were respectively Śrī Giridharaḥ; Śrī Govindarāyaḥ; Śrī Bālakṛṣṇaḥ; Śrī Gokulanāthaḥ; Śrī Raghunāthaḥ; Śrī Yadunāthaḥ; and Śrī Ghanaśyāmaḥ.

Śrīmad Viṭṭhaleśwara's third son's (Śrī Bālakṛṣṇa's) fourth-generation was Śrī Pītāmbara Goswāmī; his son Śrī Puruṣottamacaraṇa was a great scholar, establishing his reputation in all directions, took to his uncle Śrī Śyāmala's son, Vrajarāyajī mahārāj. This Puruṣottamacaraṇa was born in Vi.sam.1724 Mi.Bha.Su.11. Among his commentorial works, the most celebrated one *Nibandha* is *Aṇubhāṣya Prakāśa*. This has no parallel. Scholars like Śrī Puruṣottamacaraṇa are very rare indeed. His works total upto nine lac *ślokas;* some people say, though nine lac ślokas are known today, many are the ones lost. Works written by Śrī Puruṣottamacaraṇa - *Subodhinī Prakāśaḥ; Upaniṣad-dīpikā; Āvaraṇabhaṅgaḥ; Prasthāna-ratnākaraḥ; Suvarṇasūtram; Ṣodaṣagrantha vivṛttiḥ;*

Vādāvaliḥ etc. Many works are full of erudition; in respect of him, there are two well-known *ślokas* –

> "*Śrīmad vallabha dīkṣitāhvayaharer vandyānvaye saptamaḥ*
> *-tatkāruṇya sudhābhiṣeka vikasad-saubhāgya bhūmodayaḥ*।
> *dṛśyad-durmada-vādi-vidvad-ibha-duṣkūṭokti-kumbhasthalī*
> *sadyo-bhañjana keli-kesarapatiḥ Pitāmbarasyātmajaḥ* ।। 1 ।।
> *nāsīd-yenasamaḥ samasta-nigama-smṛtyādi tatvārthavid;*
> *vaktā ca apratimaḥ sadassu viduṣamadyāpi bhūmau budhaḥ* ।
> *yaḥ sarvam navalakṣa-padyaka-mita-prauḍha-prabandha vyadhāt;*
> *sa śrīmān puruṣottamo vijayatām āchāryacuḍāmaṇiḥ* ।। 2 ।।

Thus, his elaborate biography has to be seen from '*Puruṣottama Digvijaya*' if anyone wants more details. His equal scholars in other systems or in the whole world, are very rare indeed!

On the *Prakāśa* of *Aṇu Bhāṣya*, a vivrtti '*Raśmi*' was written by Śrī Yogi Gopeśwaraḥ, the offspring of third son of Śrī Viṭṭhaleśa. This scholar came to the family of the second son of Śrī Viṭṭhaleśa, Śrī Govindarāya, as *Dattaka* son. He was a well-known scholar. By this scholar a commentary on *Bhāṣya Prakāśa* was written called *Raśmi Bhāṣya*, an elaborate work; it is extolled by scholars.

The lineage of Śrī Gopeśwaracaraṇa and the lineage of his *Dattaka-vaṁsa* is given here in short: Śrīmad Viṭṭhaleśwara's third son, Śrī Bālakṛṣṇa's fourth son was Śrī Pitāmbara; in this line, Śrī Śyam Lālji, his son, Śrī Vrajarāyajī, his *Dattaka-putra* Śrī Puruṣottamacaraṇāḥ, the well-known in all directions; his *dattaka-putra* Śrī Puruṣottamaḥ;(Go.A.Tr.Gṛ.1); his son Śrī Govardhaneśji (second); his *dattaka-putra* Śrī Gokulotsavjī; (Go.Aye Dvi.Gṛ.1); his son Śrī Yogi Gopeśwara, the scholar and author of *Raśmi*, (Go.Gaye.dvi.gr.1) of Śrī Viṭṭhaleśarāyajī; his son Śrī Kṛṣṇarāya mahābhāgaḥ; this is the lineage of Yogi Gopeśwara.

Hereafter, his *dattaka-vaṁśa paramparā*: the second son of

Śrīmad Viṭṭhaleśa Śrī Govindarāya; his son Śrī Kalyāṇarāya; his son Śrī Hari Rāya, *Śikṣāpatra's* author. His *dattaka-putra* Śrī Giridharjī mahodayāḥ; (Go.Aye.Pr.Gṛ.1); his son Śrī Raghunāthjī; his son, Śrī Govindarāyajī the second; his son Śrī Viṭṭhalesarāyajī; his dattaka-putra Śrī Yogi Gopeśwarjī the scholar (Go.Aye.Tr.Gṛ.2) this is the *dattaka-vaṁsa paramparā* of Śrī Yogi Gopeswarāḥ. By this scholar *Bhakti-mārtanda* etc. works, full of essence, were written.

Brahmasūtra is the basic text for all *Vedānta*. When these *Vedānta sūtras* were composed cannot be told definitely because of the lapse of a long time; however, since it is known as having been written by Maharṣi Bādarāyaṇa Vyāsa, the period of its writing may be at the end of *Dvāpara Yuga* and the beginning of *Kaliyuga;* thus, it can be inferred that its time should be about 5000 years ago. *Brahmasūtra* was composed in very early times according to our forefathers. But, as per the present-day Westerners' opinion, this should have been composed around 400 B.C. According to our legends, as per the story in the first *Skandha* of *Śrīmad Bhāgavata*, it is learnt that these *sūtras* should have been composed little earlier than *Śrīmad Bhāgavata*. In *Śrīmad Bhāgavata*, Bhagavān Śrī Kṛṣṇa 's sports are described; and Bhagavān Śrī Kṛṣṇa was on this earth some 5000 years before. Therefore, the period of *Brahmasūtras* composed by Veda Vyāsa also should have been the same. Even in *Śrīmad Bhagavadgītā*, in the *śloka 'brahmasūtra-padaiścaiva'* we come across mention of *Brahmasūtra* by name; from this it is clear that these *sūtras*" period of composition should have been earlier than *Śrīmad Bhagavadgītā.*

In the *Brahmasūtra*, the number of *sūtras* are differently stated by the different *Bhāṣyakāras*; chief among them are–

	Bhāṣyakāraḥ	No. of *Sūtras*	No.of Adhikaraṇas
1.	Āchārya Śankara	555	199
2.	Āchārya Rāmānuja	545	160

3.	Āchārya Madhva	364	223
4.	Āchārya Nimbārka	549	161
5.	Āchārya Vallabha	554	171

Thus, as shown by Jagadguru Śrīmad Āchāryacaraṇa, *sākāra-brahma-vāda*, variously called *'Śuddhādvaita-brahma-vāda-nirguṇa-puṣṭi-bhakti-mārga'* is the only true system; there is no difference of opinion on this. As shown by Śrīmad Āchāryacaraṇa and by Śrīmad Prabhucaraṇa, only by His grace, following his line of thought, this Introduction to *Śrīmad Brahmasūtra Aṇubhāṣya*, along with the *Prakāśa* and *Raśmi* on that, was written by me. Let scholars, without inhibitions, correcting the mistakes that might have occurred during its delineation, read this and grace me.

Thanks:

By the supreme grace of *Bhagavān* Śrī Mukunda Prabhu and Śrī Gopāla Prabhu, who was brought up in the laps of Śrī Yaśodā, and who was Śrī Gopījanavallabha, this deep philosophical treatise called the *Aṇu Bhāṣya-Prakāśa-Raśmi* – the *Triveṇi* confluence is being re-printed by Śrī Harish Chandra with his body, soul, and money; by Śrī Saroj Kumar Goel (residents of Delhi) and by Śrī Dev Kumar Agrawal, Śrī Ghanaśyāmajī Shah, the superior Vaiṣṇavas (residents of Kāśī) deserve all the commendations.

(Translated by Śrī Bhāṣyāchārya, Vidvad-Uttama Prof. Sampannārāyaṇāchārya, Nyāya-Mīmāmsā-Vedānta Vidvān, Vedānta Śiromaṇi).

Abbreviations

Aśvi. kṛ. - Āśviṇa Kṛṣṇa
A. Bh. ka - Aṇu Bhāśya Kārikā
Br. Su. - Brahmasūtra
Bha. Śu. - Bhādrapada Śukla
Br. Vai. pu. - Brahma Vaivarta Purāṇa
Bhāga. - Śrīmad Bhāgvata
Ch. Upa. - Chāndogya-Upaniṣad
Kaṭho. - Kaṭhopaniṣad
Mi. Pau. kṛ - Mithuna Pauṣa Kṛṣṇa
Mi. Asa. Śu. - Mithuna Āṣāḍha Śukla
Sā. pra. kā. - Śāriraka-prakāśa Kārikā
Vi. pu. - Viṣṇupurāṇa
Vi. Sam - Vikrama Samvat

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णयितृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिचरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

उपोद्घातः

'भगवद्धर्मपरायणसद्गतशेठ्जिगोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतः 'प्राप्तभगवत्पद-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्एल्. बी.,
वकील, हाइकोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४५७. संवत् १९९२.
मार्गशीर्ष कृष्ण ९.

मूल्यं रूप्यकत्रयम् ।

॥ श्रीमन्मुकुन्दरायो जयति ॥
॥ श्रीगोपाललालो जयति ॥
।। श्यामः सदा दीव्यतु मानसे मे ।।

उपोद्घातः

षष्ठपीठाधीश्वर गोस्वामी श्री श्याममनोहरजी महाराज (काशी), वाराणसी

प्राकृतधर्मानाश्रयमप्राकृतनिखिलधर्मरूपमिति ।
निगमप्रतिपाद्यं यत्तच्छुद्धं साकृतिस्तौमि ।।

(सर्वोत्तमस्तोत्रे)

अत्र श्रीमद्विठ्ठलेशप्रभुचरणाः सर्वोत्तमस्तोत्रे श्रीमदाचार्याणामलौकिकनामानि प्रकटयन्तः स्वरचित- वल्लभाष्टकग्रन्थे स्वाचार्यस्वरूपं निरूप्य समापने "निखिलबुधजनाः गोकुलेशं भजन्ते" इत्यादिना जगद्गुरुश्रीमद्वल्लभाचार्याणां पूर्णपुरुषोत्तमत्वं निरूप्य सप्तश्लोक्यां तद्गुणान्निरूपयन्ति । अत्र श्रीमत्प्रभुचरणास्तु श्रीमद्वल्लभाचार्यचरणार्जितशुद्धाद्वैतब्रह्मवादनिर्गुणपुष्टिभक्तिमार्गाखण्डसाम्राज्यसिंहासनसमधिरूढाः अखिलं ब्रह्माण्डं सम्बोधयन्तः श्रावयन्ति —

क्वचित्पाण्डित्यं चेन्न निगमगतिः साऽपि यदि न
क्रिया सा साऽपि स्याद्यदि न हरिमार्गे परिचयः ।
यदि स्यात्सोऽपि श्रीव्रजपतिरतिर्नेति निखिलै-
र्गुणैरन्यः को वा विलसति विना वल्लभवरम् ।।

अत्र गुणान्निरूपयन्तः सर्वाधिकासाधारणाखिलगुणाश्रयत्वमाहुः क्वचिदिति । पाण्डित्यं नाम पण्डा बुद्धिर्यस्येति । अर्थात् आगन्तुकानागन्तुकबुद्धिमान् हि पण्डितः तस्य भावः पाण्डित्यम् । तात्पर्यंबौद्धनैयायिकादौ पाण्डित्ये सत्यपि न निगमगतिः नाम वेदानुकूला गतिर्नास्तीति भावः । बुद्धेन तद्दूषणात् । कदाचित् साऽपि नाम, निगमगतिरपि पाण्डित्येन सह भवेत्तदापि वेदोदिता चरणरूपा, निगमाभिमता क्रिया नेति । पाण्डित्यनिगमगतिसहिता क्रियाऽपि श्रीमच्छङ्कराचार्यप्रतिपादिताद्वैतसिद्धान्ते व्यावहारिकसत्तया यदि स्यात्तदाऽपि न हरिमार्गे परिचयः । तेषां भगवच्छास्त्रे अप्रवृत्तत्त्वात् । "धर्मः स्वनुष्ठितः पुसां विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्" तथा च "नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्" इत्यादि वाक्याद्धरिमार्गपरिचयाभावात्तद्वैफल्यमिति। ननु पूजादिमार्गानुवर्त्तिनः बहवः निगमगतिक्रियासहिताः सन्तः विद्वांसः सन्तीति चेत् सत्स्वपि तेषु न व्रजपतिरतिः । ते तु तद्विभूतिरूपस्य परम्परया तद्रूपत्वं प्रतीकत्वेनादाय पूजादिकं विदधति न साक्षाद् ब्रह्मणः स्नेहात्मिकां सेवां कुर्वन्ति । वस्तुतस्तु "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति श्रुतेः प्रतीकमेवतत् अतः पूज्यस्य विभूतित्वेनाज्ञानात् तत्र

स्नेहात्मिकाया: सेवाया अभावान्न व्रजपतिरति: । साक्षाद्ब्रह्मत्वं तु व्रजपतेरेवेति। "परं ब्रह्म तु कृष्णो हि" इत्याचार्यवाक्यात् । अत: निखिलैरेतैर्गुणैस्समल-ङ्कृतादाचार्यवल्लभादितर: क: न कोऽपीत्यर्थ:।

एतादृशानां श्रीवल्लभाचार्यचरणानां ग्रन्था: बहव: सन्ति । तत्र सर्वोत्तमो ग्रन्थोऽणुभाष्यमेव । अस्मिन् भाष्ये व्याससरणिमाश्रित्य तदनुसारेणैव शुद्धाद्वैतब्रह्मवाददर्शनस्य स्थापनं कृतमाचार्यैरिति ।

दर्शनं हि नाम अपरोक्षं ज्ञानं साक्षात्कारो वा। तच्च द्विविधम्। आस्तिकदर्शनं नास्तिक- दर्शनञ्चेति । तत्र आस्तिकदर्शनं मुख्यत्वेन षड्विधम्- 'सांख्यपातञ्जलपूर्वमीमांसोत्तरमीमांसातर्कन्यायभेदेन। तत्र साख्यं कापिलं श्रीभागवतोक्तम् । पातञ्जलं योगशास्त्रम् । पूर्वमीमांसा जैमिनि कृता । उत्तरमीमांसा कृष्णद्वैपायनव्यासकृता, चतुरध्यायात्मकं ज्ञानकाण्डम् । तर्क: कणादकृत: वैशेषिकम् । न्याय: गौतम प्रणीतम् न्यायशास्त्रम् । तथा च नास्तिक दर्शनमपि षड्विधम्-चार्वाकसौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकार्हतभेदात्' ।

अत्रास्तिकदर्शनान्तर्गतोत्तरमीमांसाया: प्रकृतविषयत्वात्प्रकृतमनुसराम:। उत्तरमीमांसा-वेदान्त दर्शनम् । तत्र वेदान्तोपजीव्येषु नानामतेषु पञ्चैव प्रमुखा: ते च केवलाद्वैतविशिष्टाद्वैतद्वैतद्वैताद्वैतशुद्धाद्वैताख्या: सिद्धान्ता:। तत्र केवलाद्वैत दर्शनं शङ्करावतारैराचार्यशंकरै: प्रणीतम् । विशिष्टाद्वैतदर्शनं शेषावतारैराचार्यरामानुजै: कृतम् । द्वैतदर्शनं वाय्ववतारै: आचार्यमाध्वै: रचितम् । द्वैताद्वैतदर्शनं हंसावतारैराचार्यनिम्बार्कै: प्रणीतम् । शुद्धाद्वैतदर्शनं वेदव्यासमतानुवर्त्तिभि: श्रीभगवन्मुखावतारै: वैश्वानरावतारैश्च भगवद्भि: श्रीवल्लभाचार्यप्रकटितम् ।

अत्र शुद्धाद्वैतं नाम किमिति प्रश्ने —

शुद्धाद्वैतपदे ज्ञेय: समास: कर्मधारय: ।
अद्वैतं शुद्धयो: प्राहु: षष्ठीतत्पुरुषं बुधा: ।।
मायासम्बन्धरहितं शुद्धमित्युच्यते बुधै: ।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम् ।।

(शु.मा.श्लो. २७/२८)

अत्र शुद्धं च तदद्वैतं चेति कर्मधारय:। शुद्धयोरद्वैतमिति षष्ठीतत्पुरुषो वा बोध्य:। अत्र मायासम्बन्धरहितत्वकथनेन मायाशबलितं ब्रह्म जगत्कारणमिति न, अपि तु शुद्धब्रह्म एव जगत्कारणमिति तात्पर्यम् । सिद्धान्ते मायाया अपि "मम माया दुरत्यया" (गी. ७।१४) इत्यादि वाक्याद्भगवच्छक्तित्वेनोक्तत्वान्नास्त्यत्र परमतवन्मायासम्बन्ध: । अत्रैव कार्यकारणविचारे शांकरा: घटपटाद्यात्मकं जगन्मायिकमत एव नश्वरमिति मन्यन्ते । एतेषां मते प्रपञ्चस्य मायिकत्वेन तस्य कारणस्यापि तादृशत्वनैव भवितव्यमिति, कारणसजातीयत्त्वात्कार्यस्येति । एवं प्रपञ्चं मायिकमित्युक्त्वा जीवो ब्रह्मैवेति ते साधयन्ति । तन्निराकरणार्थमाचार्यै: निबन्धे उक्तम् - "प्रपञ्चोभगवत्कार्य:" तत्प्रकाशे च "अयं प्रपञ्चो

न प्राकृत: । नापि परमाणुजन्य:। नापि विवर्त्तात्मा । नाप्यदृष्टादिद्वारा जात: । नाप्यसत: सत्तारूप: । किन्तु भगवत्कार्य: । परमकाष्ठापन्न वस्तु कृतिसाध्य: ।'' अत: शुद्धस्यैव ब्रह्मण: जगत: कारणत्वमिति सिद्धान्त:।

ननु शुद्धब्रह्मण: "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'' "इन्द्रोमायाभि: पुरुरूप ईयते'' "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' "अथात आदेशो नेति नेति'' इत्यादिभि: प्रमाणै: निर्विशेषत्वेन श्रुतिषु प्रतिपादनात् शुद्धब्रह्मण: जगत्कारणत्वं न संगच्छते । शुद्धब्रह्मण: जगत्कर्तृत्वाङ्गीकारे तु तस्य सगुणता स्यादतो विवर्तवादमतमवलम्ब्य सविशेषश्रुतीनां निर्वाह उपजीव्यत्वन्यायेन कर्त्तव्य: तेन ब्रह्मणि वास्तवं कर्तृत्वं न स्यात् सविशेष श्रुतीनां वैय्यर्थ्यमपि न स्यादिति । एवम् उपनिषत्सु सविशेषश्रुतीनां निर्विशेषश्रुत्युपजीव्यत्वन्यायेन ग्रहणम्। श्रुतिर्हि शब्द:। निर्धर्मकस्य तस्य ब्रह्मणश्च शब्देन निरूपणमशक्यम् । तत्र च धर्माभावात्तन्निरूपणमभावमुखेन क्रियते श्रुतिषु । पूर्वं धर्मान्निरूप्य तत: अस्थूलादि वाक्यैर्धर्मान्निशेधति श्रुति:। अभावस्य प्रतियोगिनिरूपणाधीननिरूपणत्वात्। एवं प्रथमं "द्वे वाव ब्रह्मणो रूपे मूर्त्तं चैवामूर्तं च'' इति विशेषं निरूप्य तत: "अथात आदेशो नेति नेति'' इति निषेधति ।

अत्र ब्रह्मणि श्रुतिभि: कल्पितानां विशेषाणां शुक्तिरजतवदविद्याकल्पितत्वात्तव मते तु (मायावादिमते तु) सृष्टिनिरूपकाणि वाक्यान्यसंगतानि स्युरिति । अत्र मायावादी कथयति —

नन्वस्ति अध्यारोपापदलक्षणा संगति:। शुद्धब्रह्मण: दुर्ज्ञेयत्वेन तज्ज्ञापनाय जगज्जननादिकं प्रतिपाद्य उपासना द्वारा औपाधिके ब्रह्मणि बुद्धौ सिद्धायां शाखाऽरुन्धतीन्यायेन पूर्वपूर्वश्रुत्यनुभवाभ:सानामुत्तरोत्तरनिर्विशेषश्रुत्यनुभवबलात्तत्तन्निराकरणपूर्वकसूक्ष्मातिसूक्ष्म-तुरीयचैतन्यस्वरूपावबोधनेन पूर्वोक्तं मायिकमपोह्य निर्विशेषं ब्रह्म पश्चाद्बोध्यते स एवात्माऽद्वितीय एक: उपाधिना बहुधा भासते । एवमौपाधिकस्यैव ब्रह्मण: जगत: कारणत्वं नान्यस्येति । जगत: मायाकार्यत्वात् कार्यस्य तुच्छत्वेन तत्कारणेनाऽपि तुच्छत्वेन भाव्यम् । कारणसजातीयत्वात्कार्यस्येति चेन्मैवम् —

अभेदादनुपाधित्वाज्जगदप्रत्ययाप्तित: ।
सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम् ।।

(विद्व. ३. का.)

अत्र अभेदादिति । सविशेषनिर्विशेषयोर्भेदाभावादिति। अनुपाधित्वादिति। ब्रह्मण: उपाधिरेव नास्तीत्यर्थ:। सर्वाधारत्वत:। सर्वविरुद्धधर्माश्रयत्वादिति । तथा च सविशेषनिर्विशेषश्रुतिवाक्ययो: श्रुतित्वाविशेषान्नैकतरबाधो युक्त: अप्रामाण्यापत्ते:। तथा हि । ब्रह्म श्रुत्येक समधिगम्यं न तु प्रमाणान्तरगम्यम् । सिद्धान्ते च सर्वासां श्रुतीनामविकलं प्रामाण्यम् । "ब्रह्म पुनर्यादृशं वेदान्तेष्ववगतं तादृशमेव मन्तव्यं, अणुमात्रमन्यथा कल्पनेऽपि दोष: स्यात्'' इत्याचार्यवचनात् । "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न

कृतं पापं चौरेणात्मापहारिणा'' ''नैषा तर्केण मतिरापनेया'' इत्यादि श्रुतेश्च । अतः ''स हैतावानास'' ''तदात्मानं स्वयमकुरूत'' ''आत्मैवेदं सर्वं'' ''यतो वा इमानि भूतानि जायन्ते'' इत्यादि श्रुतीनाम् । ''जन्माद्यस्य यतः शास्त्रयोनित्वात्'' ''तत्तु समन्वयात्'' इत्यादि सूत्राणाम् । ''अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा'' ''जन्माद्यस्य यतोन्वयादितरतः'' इत्यादिस्मृतिप्रमाणैः शुद्धब्रह्मण एव सर्वकर्तृत्वं सर्वभोक्तृत्वम् ''अत्ता चराचर ग्रहणात्''। तत्कर्तृत्वं स्वाभाविकमेव न तु शाङ्करमतवन्मायिकमिति । ''स एकाकी न रमते स द्वितीयमैच्छत्'' इति श्रुतेः ''क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते'' इति स्मृतेश्च ब्रह्मैव रमणार्थं जगद्रूपेणाविर्भूय तत्र लीलां करोति, स्वयं च अविकृतमेव सत् परिणमते । तत्र दृष्टान्तः कामधेनुचिन्तामणिकल्पवृक्षप्रभृतयः स्पष्टाः। ''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'' (१।४।२३) इति सूत्रात् ब्रह्म एव जगतः निमित्तसमवायिकारणमिति। ''यथा एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं भवति'' अत्र अलीकत्वनिवारणाय ''मृत्तिकेत्येव सत्यमिति'' उक्तम् । अतः प्रपञ्चो भगवत्कार्यः न तु मायाकार्यः। किन्त्वत्र केचिन्मुग्धाः संसारप्रपञ्चयोः भेदज्ञानशून्याः संसारं प्रपञ्चं च एकमेव मन्यमानाः संसारेण सह प्रापञ्चिकं जगदपि मायाकार्यं कथयन्तः मिथ्या मन्यन्ते तन्नयुक्तम् —

प्रपञ्चो भगवत्कार्यस्तद्रूपो मायया ऽभवत् ।
तच्छक्त्या ऽविद्ययात्वस्य जीवसंसार उच्यते ।।

(त.दी.नि. शा.प्र. २७)

इत्यत्र प्रकाशे ''।।अविद्ययेति।। अविद्यापि तच्छक्तिः। मुख्यासु द्वादशशक्तिषु गणनात् । श्रियापुष्ट्या गिरेति वाक्यात् । एवं सति ''स वै नैव रेमे, तस्मादेकाकी न रमते स द्वितीयमैच्छत्, स हैतावानासेति'' श्रुतौ रमणार्थमेव प्रपञ्चरूपेणाविर्भावोक्तेर्वैचित्र्यं विना तदसम्भवो यतः। तस्माद्धेतोरस्य भगवतः शक्त्या अविद्यया जीवस्य संसार उच्यते न तु जायते। अभिमत्यात्मकत्वात् । असत्त्वेनास्य गणनात्। अज्ञानं भ्रमः असदित्यादिशब्दा अहं ममेति रूपे संसार एव प्रवर्त्तन्ते, न तु प्रपञ्च इत्यर्थः। तस्य ब्रह्मात्मकत्वात्।'' अतः सिद्धान्ते ''तदनन्यत्वमारम्भणशब्दादिभ्यः'' (ब्र.सू. २।१।१४) इति सूत्र न्यायेन जगतो ब्रह्मणश्चाभेदः। प्रापञ्चिकजगतः मायिकत्वं नास्ति किन्तु ब्रह्मणः आधिभौतिकस्वरूपं जगत्, ब्रह्मणः आध्यात्मिकं स्वरूपमक्षरब्रह्म, तथैव आधिदैविकं स्वरूपं परब्रह्म। एवमनेन प्रकारेण ब्रह्म जगतोरनन्यत्वमिति । कार्यस्य कारणानन्यत्वं, मिथ्यात्वं न भवति ।

अतः एकस्यैव शुद्धब्रह्मणः आधाराधेयत्वं कारणकार्यत्वादिकं स्वीकर्त्तव्यम्। तथा च मायावादिमते तु भगवान्व्यासः ''अथातो ब्रह्मजिज्ञासा'' इति निर्गुणनिराकारब्रह्मविषयकजिज्ञासां प्रतिज्ञाय ''जन्माद्यस्येत्यादि सूत्रैर्जगत्कर्तृत्वविशिष्टं ब्रह्म प्रतिपादयति । अतः भवद्विवक्षित-निर्विशेषब्रह्मजिज्ञासाप्रतिज्ञानन्तरं सविशेषब्रह्मप्रतिपादनात् व्यासप्रतिज्ञाहानिरूपमहान्दोषापत्तिः, सूत्रेषु च कृतहान्यकृताभ्यागमदोषप्रसङ्गः। तथा चाविद्योपाधिस्वीकारे अविद्याब्रह्मणोरुपाध्युपाधेय-योरुभयोरनादित्वेनोपहितस्याप्यनादितया तादृशमायोपहितस्यैव च त्वन्मते कर्तृत्वेन स्वीकारादनवरतं सर्ग एव स्यान्न प्रलयः कदाचन ।

तथा चात्र मायावादी प्रष्टव्यः। यद्भवताऽत्र एतादृशी मायिकी कार्यकारणादि व्यवस्था कुत्रतः कृता, यदि श्रुतितः तर्हि तु "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः" इत्यादिः "यो ब्रह्माणं विदधाति पूर्वं" "यो वै वेदांश्च प्रहिणोति तस्मै, वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम" "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादि श्रुतिस्मृतिभ्यां वेदः किमु स्वस्यैवाज्ञानकल्पितत्वं वदति ?। तथा च त्वन्मतानुसारेण तु प्रथमं वेदानां पारमार्थिकसत्त्वं ज्ञात्वा तदनन्तरञ्च श्रुत्यादीनामौदासीन्येन सम्यगध्ययनेन च श्रुतेः श्रुतित एवाज्ञानकल्पितत्वं श्रुत्वा गुरूपदेशादिकैः "न माता पिता वा न देवा न लोका न वेदा" तथा च "न शास्ता न शास्त्रं न शिष्यो न शिक्षा" इत्यादि प्रमाणैः असत्तुल्यैः परमार्थरूपं ब्रह्मज्ञानं कथं फलिष्यतीति विचार्य न कोऽपि प्रवर्तेत । अप्रवर्त्तनेन च वेदमार्गोच्छेदापत्तिः। अतः समग्रवेदस्य प्रामाण्यमविशेषेणैव ग्राह्यम् । वस्तुतस्तु ब्रह्मणोऽलौकिकत्वादचिन्त्यैश्वर्यत्वाच्छ्रुत्येकसमधिगम्यत्वाच्च विशेषतो लोकयुक्तीनां तत्राप्रवेश एवेत्युक्तम् । तस्माच्छुद्धं ब्रह्मैव जगन्निमित्तसमवायिकारणमिति सिद्धम् ।

सिद्धान्तस्तु - **उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत् ।**
वेदेनबोधितं तद्धि नान्यथा भवितुं क्षमम् ।। (अ.भा.का. १।१।)

।। सिद्धान्ते जगत्संसारयोर्भेदः ।।

सिद्धान्ते प्रपञ्चः - जगद् भिन्नः, अहंताममतात्मकः संसारः भिन्नः। अयं सूक्ष्मभेदः केनाप्याचार्यैः न कृतः। एतयोः पृथक्त्वं श्रीवल्लभाचार्यचरणैरेव श्रुतिस्मृतिसूत्रभागवतवाक्यानां समन्वयेन शास्त्रीययुक्त्योपपाद्य प्रकटीकृतम्। जगत्संसारयोः लक्षणम् पृथक् । भगवदिच्छया चिदानन्दांशतिरोभावेन सदंशादाविर्भावितं यत्तज्जगदिति कथ्यते शास्त्रेषु । अविद्यया जीवेन कल्पितोऽहंताममातात्मकः यः सः संसार इति उच्यते शास्त्रेषु । अस्या अविद्यायाः पञ्चपर्वाणि—

स्वरूपाज्ञानमेकं हि पर्व देहेन्द्रियासवः ।
अन्तःकरणमेषां हि चतुर्धाऽध्यास उच्यते ।
पंचपर्वा त्वविद्येयं यद्बद्धो याति संसृतिम् ।।

(शा.प्र.का. ३६)

इत्याचार्यवचनात् — स्वरूपाज्ञानं, देहाध्यासः, इन्द्रियाध्यासः, प्राणाध्यासः अन्तःकरणाध्यासश्चेति पञ्चपर्वाणि । अनयाऽविद्यया बद्धो जीवः संसृतिं नाम संसारं प्राप्नोति । अतः संसृतेः अविद्याकल्पितत्वाज्ज्ञानेन नाशः। ब्रह्मरूपत्वाज्जगतस्तु न नाशः। ननु द्वैतमाविद्यकं मिथ्या इति चेन्न । "स एकाकी न रमते स द्वितीयमैच्छत्" "तदात्मानं स्वयमकुरूत" इत्यादिश्रुतेः द्वैतं नाविद्यकं, ब्रह्मेच्छया उद्भूतत्वात्, किन्तु द्वैतज्ञानमाविद्यकम् । अनेन द्वैतज्ञानेन जीव एव बध्यते न तु ब्रह्म । अत्र अविद्यायाः ब्रह्मगतत्वं न सम्भवति । तत्र प्रथमन्तु मायावादे उपाध्युपाधेययोरविद्याब्रह्मणोर्द्वयोरनादित्वेन तयोर्मध्ये

सम्बन्धः कः त्वया स्वीक्रियते ? तत्र संयोगादिसम्बन्धे स्वीक्रियमाणे तयोर्विभुत्वसामान्यात् नित्यसम्बन्धाऽऽपत्त्याऽनिर्मोक्षप्रसङ्गः। तथा च नाप्यध्यासः तस्याप्यभावात् । शुद्धब्रह्मणि अविद्योपाधिसम्बन्धः सर्वथाऽशक्यवचनः तस्य अज्ञत्वापादकत्वात् । अतः अविद्यायाः जीवगतत्वमेव न तु ब्रह्मगतत्वमिति—

''एकस्यैव ममांशस्य जीवस्यैव महामते ।
बन्धोऽस्याऽविद्ययाऽनादिर्विद्यया च तथेतरः ।।''

(श्रीमद्भागवत)

तथा च—''अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव:'' इत्यत्र जीवोत्पत्तौ अविद्यायाः न कारणत्वं किन्तु भगवदिच्छयारमणार्थमानन्दांशतिरोभावे सोऽविद्यया बध्यते। तत्रापि भगवदिच्छैव । तदा सः संसारीत्यभिधीयते । एवमहम्ममतात्मकः संसारः अविद्याजन्यः अतः ज्ञानेन नश्यति। तथा हि। जगतः निमित्तसमवायिकारणं ब्रह्म । संसारस्य कल्पितत्वात् अविद्या तन्निमित्तकारणम् । संसारस्य मिथ्यात्वेन स ज्ञानोत्पत्तेः प्राक् अवतिष्ठते । अतएव मुक्तौ तल्लयः— नाशः, न तु प्रपञ्चस्येति, भगवत्कार्यत्वात् ।

''संसारस्य लयो मुक्तौ न प्रपञ्चस्य कर्हिचित्''

(शा.प्र.का. २८)

अतः संसार निवृत्तौ जीवन्मुक्तिः। तत्र देहेन्द्रियादीनामध्यासमात्रस्य निवृत्तिः न तु देहेन्द्रियादीनाम् । यतस्ते जगदन्तः पातिनः। सुखदुःखाद्यधिष्ठानं संसारः न तु जगत् । तत्र दृष्टान्तः जीवन्मुक्ताः। एतादृशाः बहवो जीवन्मुक्ताः अस्यां भारतभूमौ संजाता, येषां देहेन्द्रियादीनां सत्यत्वेपि न सुखदुःखानुभवः। अतः जगत्सत्यं संसारो मिथ्या इति जगत्संसारयोर्भेदः श्रीवल्लभाचार्यैरेव प्रकटितः इत्यलं विस्तरेण ।

।। सिद्धान्ते जीवस्वरूपम् ।।

''जीवस्त्वाराग्रमात्रो हि गन्धवद् व्यतिरेकवान्''

(शा.प्र.का. ५७)

''स ईक्षां चक्रे'' ''एकोऽहं बहुस्यां प्रजायेय'' ''स एकाकी न रमते'' ''स द्वितीयमैच्छत्'' ''तदात्मानं स्वयमकुरुत'' इत्यादिश्रुते ब्रह्म स्वेच्छयैव क्रीडनार्थं स्वकीयमानन्दाशं तिरोभावयित्वा जीवस्वरूपं गृह्णाति । एवं बहुभवनेच्छया ब्रह्मणः सकाशाद् ''यथाग्नेः क्षुद्राः विस्फुलिङ्गाः व्युच्चरन्ति'' तथैव सूक्ष्मपरिच्छिन्नाः चित्प्रधानाः जीवांशाः निर्गच्छन्ति । तस्य जीवस्य परिमाणमाराग्रमात्रोऽणुः ''आराग्रमात्रो ह्यपरोऽपि दृष्टः'' इति श्रुतेः। ननु आराग्रमात्रत्वे कथं सर्वदेहव्यापीति प्रश्ने—गन्धवद् व्यतिरेकवानिति । यथा पुष्पगन्धः पुष्पापेक्षयाऽधिकदेशं व्याप्नोति तथैवाणुमात्रमपि चैतन्यं सर्वदेहव्यापीत्यर्थः। अतः ''ममैवांशो जीवलोके जीवभूतः सनातनः'' ''अंशो नानाव्यपदेशात्'' इत्यादि प्रमाणाज्जीवो ब्रह्मणोंश एवेति । ननु जीवस्याशंत्वस्वीकारे ब्रह्म सावयवं भवेज्जीवस्यावयववत्वादतः प्रतिबिम्बवादानुसारेण जीवस्थितिः

स्वीकर्तव्येति चेन्न । ब्रह्म प्रतिबिम्बो जीव इति पक्षस्तु सर्वथा न यौक्तिक:। प्रतिबिम्बवादस्वीकारे ब्रह्मणि दृष्टृत्वापत्ति:, जीवस्य प्रतिबिम्बत्वे च बिम्बप्रतिबिम्बयोरेकत्र स्थितिर्न भवतीति, श्रुतौ तयो: जीवब्रह्मणो: "समानं वृक्षं परिषस्वजाते" इति वाक्येन एकत्र स्थितिप्रतिपादनाच्छ्रुतिव्याकोप: अत: जीवस्तु ब्रह्मणोंश एव । यतोऽत्र श्रुतीनामेव प्रामाण्यं ग्राह्यम्। न तु लौकिकयुक्तीनाम् । उक्तञ्चाचार्यै: —

अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेद युक्त्या तु प्रसादात् परमात्मन: ।।

(अणु भा०का० १/१)

अत्र हि वेदार्थस्यालौकिकत्वात्तस्य युक्त्या न प्रतिपत्ति:। कथं तर्हि प्रतिपत्तिरिति प्रश्ने—वेदयुक्त्या, न्यग्रोधफलमाहरेत्यादिरूपया वेदोक्तयुक्त्या प्रतिपत्तव्यमिति । अत्र आचार्या: "नहि स्वबुद्धया वेदार्थं परिकल्प्य तदर्थं विचार: कर्तुं शक्य: ब्रह्म पुनर्यादृशं वेदान्तेष्ववगतं तादृशमेव मन्तव्यम् । अणुमात्रान्यथाकल्पनेऽपि दोष: स्यात्"। अत: विस्फुलिङ्गन्यायेन जडजीवानां निर्गमनम्। जडनिर्गमने चिदानन्दांशयोस्तिरोभाव:। जीवनिर्गमने आनन्दांशतिरोभाव:। एवं सच्चिदात्मकं उभयं ब्रह्माभिन्नं ब्रह्मरूपञ्च । अत एक विज्ञानेन सर्वविज्ञानमिति श्रुतिप्रतिज्ञा । नन्वेवमंशभूतस्य जीवस्य दु:खमशिन: ब्रह्मणोऽपि स्यादिति चेन्न । "अनश्नन्नन्यो अभिचाकशीति" "एकस्तथा सर्वभूतान्तरात्मा, न लिप्यते लोकदु:खेन बाह्य:" "न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा" इत्यादि श्रुतिस्मृतिप्रमाणैर्ब्रह्मणो निर्लेपत्वमुद्घोष्यते यत: सूर्यप्रकाशस्थघटपटादिवस्तुनो दोषेण यथा सूर्य प्रकाशो न दुष्यते तथैव जीवस्थ दु:खादि दोषैरंशि ब्रह्मापि न लिप्यते । अत: जीवब्रह्मसम्बन्धविचारे ब्रह्मणोंऽश एव जीव इति निर्णीयते । कुत: "अंशो नानाव्यपदेशात्" इति सूत्रात्—अत्र विद्वन्मण्डने प्रभुचरणा: आज्ञापयन्ति, "नानाव्यपदेशाद्, नानाविधो यो व्यपदेश:। क्वचिद्ब्रह्मत्वेन क्वचिदुत्पन्नत्वेन, क्वचिद्ज्ञत्वेन, क्वचिच्चिद्रूपत्वेन, क्वचिदीशितव्यत्वेन, अणुत्वेन च व्यापकत्वेन च, निरूपणादेकस्यैव विरूद्धधर्माश्रयत्वं ब्रह्मातिरिक्तस्य न सम्भवतीति ब्रह्मांश एव जीव इत्यर्थ:। अथवा नाना व्यपदेशाद्भेदेन व्यपदेशात्तथेत्यर्थ:" तात्पर्यं जीवस्य ब्रह्मोपाधिकत्वमौपचारिकमंशत्वमङ्गीकृत्य प्रतिम्बिम्बत्वेन अलीकत्वं न कल्पनीयम् । ब्रह्म वेदैकसमधिगम्यम् अत: यथा तत्र निरूपितं तथैव मन्तव्यम् "नैषातर्केण मतिरापनेया" "अलौकिकास्तु ये भावा न तास्तर्केण योजयेत्" इत्यादि श्रुते: स्मृतेश्च ।

ब्रह्म पूर्णप्रकटानन्दम् जीवस्तु तिरोहितानन्द:। यदा भगवत्कृपया इच्छया च जीवे भगवान् आनन्दाशमाविर्भावयति तदोभयोर्जीवब्रह्मणोरभेद:। अत्र जहदजहल्लक्षणादिकानामावश्यकता नास्ति "सर्वे वेदायत्पदमामनन्ति" इति श्रुते: सर्वेवेदा ब्रह्मणोऽनवगाह्यमाहात्म्यमेव बोधयितुं प्रवृत्ता:। यदा जीव: तिरोहितानन्द: तदा तत्र ब्रह्मत्वं नास्ति "अधिकं तु भेद निर्देशादिति" (२।१।२२) सूत्रात् । अत्र भाष्यम् "तु शब्द: पक्षं व्यावर्तयति । यदि ब्रह्म तावन्मात्रं भवेत् तदायं दोष:। तत् पुनर्जीवाज्जगतश्चाधिकम्। कुत: ?। भेदनिर्देशाद्"।

अनेन स्पष्टं भवति यत् तत्साम्यमाधिक्यराहित्यं अस्ति । “नतत्समश्चाप्यधिकश्चदृश्यते” इति श्रुतेः। एवं चाशांशिभावेनैव जीवब्रह्मणोरभेदः श्रुतौ पठ्यते । अत्र मायावादिनः “तत्त्वमसी” त्येतन्मात्रं महावाक्यं मन्वानाः जीवमेव ब्रह्मेति कथयन्ति । अत्र प्रसङ्गप्राप्तः सर्वमतसंग्रहश्लोकः —

“केचित्तत्त्वमसीति वाक्यविषये तत्त्वम्पदे लक्षणां,
केचित्तत्रङसो लुकं विदधते भाष्यं तु केचिज्जगुः ।
केचिच्चिद्विषयादभेदमपरे छिन्दन्त्यतत्त्वं पदं,
सिद्धान्ते तु सुवर्णवज्जगदिदं ब्रह्मैव जीवस्तथा ।।”

अस्यार्थस्तु केचित्=शङ्कराचार्याः तत् पदेन सर्वज्ञं ब्रह्म त्वम्पदेन अल्पज्ञं जीवस्तयोरभेदो न सम्भवत्यतः ‘सोऽयं देवदत्त’ इति वज्जहदजहल्लक्षणां स्वीकुर्वन्ति । केचिद् रामानुजमाध्वशैवाः तत्सम्बन्धीत्वमिति मन्यमानाः ङसो लुकं विदधते । तस्य त्वमसि । तत्सम्बन्ध्यसीति । केचिद् निम्बार्काश्चित्वसाधर्म्यादभेदः। अपरे माध्वैकदेशिनः ‘अतत् त्वमसि’ अर्थात् जीवोऽसि इति पदं छिन्दन्ति । सिद्धान्ते यथा सुवर्णांशाः सुवर्णरूपाः तथा ब्रह्मणोंऽशा ब्रह्मरूपाः। ब्रह्मणः सदंशः जगत् चिदंशो जीवः इति । वस्तुतः मतान्तरवत् ‘तत्त्वमसी’ त्येतन्मात्रं महावाक्यमिति न किन्त्वखिलं प्रपाठकम् ग्राह्यम् । वेदानामर्थानुसंधानं प्रकरणेन कार्यम् “प्रकरणाच्च” इति सूत्रात् प्रकरणानुरोधेनैव अर्थः ग्राह्यो न तु प्रकरणं हित्वा स्वानुकूलोऽर्थः कार्य इति ।

अस्य जीवस्य त्रिविधाऽवस्था भवति। शुद्धः मुक्तः संसारीति भेदात् । व्युच्चरणोत्तरमानन्दांशतिरोभावे सति अविद्यासम्बन्धात्पूर्वा याऽवस्था तस्यामवस्थायां शुद्धजीव इति कथ्यते। मायासम्बन्धरहितत्वं शुद्धत्वम् । “पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्ध विपर्ययौ” (३।२।५) इति तत्वसूत्रात् । परस्य भगवतोऽभितोध्यानं नाम् सर्वतो भोगेच्छा तेनानन्दांशः तिरोहितः येन जीवभावः । ततश्चतुर्णामैश्वर्यवीर्ययशश्रीरूपाणां धर्माणां तिरोभावाद्बन्धः, ज्ञानवैराग्यतिरोभावाद्विपर्ययः। तदा भगवान् केषुचिज्जीवेषु मुक्त्यधिकाररूपं दैवत्वं सम्पादयति तदैव जीवाः मुक्तियोग्याः भवन्ति। पञ्चपर्वात्मिकयाऽविद्यया बद्धः जीवः संसृतिं याति । ततः संसारधर्माननुभवन् भगवत्कृपया सत्संगादिना पञ्चपर्वात्मिकां विद्यां प्राप्य परमानन्दलक्षणभूतां, मुक्तिं प्राप्नोति ।

वैराग्यं सांख्ययोगौ च तपो भक्तिश्च केशवे ।
पञ्चपर्वेति विद्येयं यया विद्वान् हरिं विशेत् ।।

(शा.प्र.का. ४८)

इति वाक्यात् यावत् विद्यां न प्राप्नोति तावत् संसारीति व्यवह्रियते । तदग्रे मुक्त इति । मुक्ता अपि द्विविधाः जीवन्मुक्ताः मुक्ताश्चेति । जीवन्मुक्ताः सनकादयः। मुक्ताः अक्षरब्रह्मप्राप्ताः। अत्रापि मूलतः जीवाः द्विविधाः। दैवाः आसुराश्च:। तत्र दैवाः द्विविधाः, मर्यादामार्गीयाः पुष्टिमार्गीयाश्च । एतयोः मुक्तौ भेदः वर्त्तते तं चाग्रे दर्शयिष्यामः ।

।। अविकृतपरिणामवादः ।।

श्रीमदाचार्यचरणैर्हि साकारब्रह्मवादः प्रामुख्येन स्वसिद्धान्तत्वेन संस्थापितः। प्रस्थानतः प्रमेयतः साधनतः फलतः सर्वशास्त्रतश्च ब्रह्मातिरिक्तपदार्थाभावात् सर्वसमन्वयो ब्रह्मण्येवेति सिद्धान्तः। तच्च कनकमृत्कामधेनुचिन्तामणिकल्पवृक्षादिरिव स्वयमविकृतमेव स्थितं सत् जगद्रूपेण परिणमतेति सिद्धान्तः। यथा कनकं कटककुण्डलादिपरिणामदशायां कनकत्वान्न विक्रियते तथैव ब्रह्मापि जगद्रूपेण परिणामेप्यविकृतम् । अयमेव श्रुतिस्मृतिसूत्र-श्रीभागवतप्रतिपादितः अविकृतपरिणामवादः। एकमेवाविकृतं कारणं नानाकार्यरूपं भवति । तेनैव एकविज्ञानेन सर्व विज्ञानं भवति । एक विज्ञानेन सर्वविज्ञानरूपवेदान्तानां प्रतिज्ञा तदैव सफला भवति यदा शुद्धब्रह्म एव जगत्कारणं (निमित्त समवायिकारणं) भवेत्। अयं वादः वैदिक इति राद्धान्तः। अतः अविकृतपरिणामवादसाधकानि वचांसि अधुना किंचित् प्रदर्श्यन्ते ।

श्रुतिषु "एकं सद्विप्रा बहुधा वदन्ति" "असद्वा इदमग्र आसीत्ततो वै सदजायत" (आभ्याम् श्रुतिभ्याम् जगदव्यक्तं व्यक्तमभूदित्युक्तम्भवति) "ब्रह्म विश्वमिदं जगद्" "तमेव भान्तमनुभान्ति सर्वं तस्य भासा सर्वमिदं विभाति" सर्वकामः सर्वगन्धः सर्वरसः सर्वकर्त्ता सर्वभोक्ता य स सर्वविद" "परास्य शक्तिर्विविधैवश्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (आभिः श्रुतिभिः सर्वकर्तृत्वादीनां स्वाभाविकधर्मत्वं उक्तम्) "अणोरणीयान्महतो महीयान्" (अनया श्रुत्या ब्रह्मणो विरुद्धधर्माश्रयत्वं बोध्यते) "एकमेवा द्वितीयं ब्रह्म, एकोऽहं बहुस्यां प्रजायेय, स एकाकी न रमते स द्वितीयमैच्छत्", "स हैतावानास" (आभिः श्रुतिभिः अविकृतपरिणामवादो बोध्यते) "एतदात्म्यमिदं सर्वम् तत्सत्यं स आत्मा तत्वमसि" "एष ह्येवानन्दयति" "एकोदेवो सर्वभूतेषु गूढः" (आभिः श्रुतिभिः सर्वान्तर्यामित्वम्) "सर्वं खल्विदं ब्रह्म" "कथमसतः सज्जायेत" 'तत्सत्यमित्याचक्षते" इत्यादीनि ।

स्मृतिषु = "अहं सर्वस्यजगतः प्रभवः प्रलयस्तथा" मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्" "अहं बीजप्रदः पिता" "वासुदेवः सर्वमिति" इत्यादीनि ।

सूत्राणि = "जन्माद्यस्य यतः शास्त्रयोनित्वात्" (१।१।२) तत्तु समन्वयात् (१।१।३) आत्मकृतेः परिणामात् (१।४।२६) योनिश्च हि गीयते (१।४।२३) तदनन्यत्वमारम्भणशब्दादिभ्यः (२।१।१४) सर्वधर्मोपपत्तेश्च (२।१।३७) प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः (३।२।२२) प्रकाशाश्रयवद्वा तेजस्त्वात् (३।२।२८) इत्यादीनि ।

श्रीभागवते = "जन्माद्यस्य यतोन्वयादितरतः०" "त्वय्यग्र आसीत्०" "क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते०" "विश्वस्य कर्त्ता भुवनस्य गोप्ता०" इत्यादीनि ।

इदमत्रावधेयम् = अन्यैः आचार्यशङ्करप्रभृतिभिराचार्यैः स्वस्वसिद्धान्तसाधने प्रमाणत्वेन प्रस्थानत्रयी स्वीकृता उपनिषद्, भगवद्गीता व्याससूत्राणि च । किन्तवस्माकमाचार्यैः प्रमाणत्वेन प्रस्थानचतुष्टयम् स्वीकृतम् तच्च —

"वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ।।
उत्तरं पूर्वसन्देहवारकं परिकीर्त्तितम् ।।"

(शा.प्र.का.७।८)

अत्र प्रकाशः ="वेदाः सर्व एव काण्डद्वयस्थिताः। अर्थवादादिरूपा अपि । स्मृतित्वेन कृष्णवाक्यानि वेदत्वेऽपि पृथगुक्तानि। व्याससूत्राणि चकाराज्जैमिनिसूत्राणि च । एवकारेण व्याससूत्राविरोधेनैव तदङ्गीकरणम् । ....व्यासस्य समाधिभाषा भागवतम् । ....यावत् समाधौ स्वयमनुभूय निरूपितं सा समाधिभाषा । एतच्चतुष्टयमेकवाक्यतापन्नं प्रमाजनकमित्यर्थः।"

आचार्यैः श्रीभागवतस्यापि प्रस्थाने ग्रहणं कृतम् । अत्र उत्तरोत्तरं पूर्वपूर्वसन्देहवारकम् । अर्थात् सर्वसन्देहवारकत्वं श्रीमद्भागवते फलितम् । श्रीभागवतस्य "निगम कल्पतरोर्गलितं फलम्" इत्यनेन फलरूपत्वादिति।

।। आविर्भावतिरोभावः ।।

तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत् ।।

(विष्णु०पु०अं०प्र०)

वस्तुतः आविर्भावतिरोभावौ ब्रह्मणः शक्ती । "आविर्भावतिरोभावौ शक्तिर्वै मुरवैरिणः" एते शक्ती ब्रह्मतोऽभिन्ने ब्रह्माधीने च । "सर्वं खल्विदं ब्रह्मेति" श्रुतेः सर्वस्य ब्रह्मरूपत्वेन ब्रह्म स्वेच्छया जगद्रूपेणाविकृतपरिणामं प्राप्य पुनः स्वेच्छयैव सर्वमन्तर्भावयति । इमावेवाविर्भावतिरोभावौ उत्पत्तिविनाशावित्युच्येते लोकैः। वस्तुतस्तुः="नासतो विद्यते भावो नाभावो विद्यते सतः" (गीता) इति वाक्यात् असतः भावः नास्ति सतः अभावः नास्ति । ब्रह्मवादे सर्वत्र ब्रह्मस्फूर्त्याऽभावस्य प्रश्न एव नास्ति । ननु तदा भावित्वेन भूतत्वेन वस्तुनोः सत्ता न स्यात् तथा च घटादेः प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावादि निषेधात् सर्वव्यवहारोच्छेदः। इति चेन्मैवम् । सर्वत्र भगवदिच्छाया एव नियामकत्वात् —

"एवं सति यत्कालावच्छेदेन सर्वेषां मिथोऽनुभवाविषयत्वं भगवदभिमतं स प्रलयकाल इति निगद्यते। यदवच्छेदेन सर्वेषां मिथोऽनुभवविषयत्वं तथा स सृष्टिकाल इत्युच्यते। सर्वत्र विशिष्टेच्छैव नियामिकेति सर्वमनवद्यम्"। (विद्वन्मण्डने)

एवं च निर्गुणमविकृतं नित्यशक्तिमद्ब्रह्माविर्भावतिरोभावाभ्यामक्षरजीवजगद्रूपैः स्वेच्छया क्रीडति इति । अतः प्रागभावादयः सर्वे अत्रैव अन्तर्निहिताः सर्वस्य ब्रह्मात्मकत्वसिद्धान्तेऽत्यन्ताभावाभावः । "एवं सत्यस्मिन्कालेऽस्मिन्देशे इदंकार्यमेवं भवत्वितीच्छाविषयत्वमाविर्भावः तदा तत्र तन्मा भवत्वितीच्छा विषयत्वं तिरोभावः"। (विद्वन्मण्डने)

अत: एवोच्यते "अनुभवविषयत्वयोग्यता आविर्भाव:। तदविषयत्वयोग्यता तिरोभाव:। ते च वस्तुसत्त्वेनैवावच्छिद्येते । न ह्यलीके ते सम्भवत: तयोर्धर्मत्त्वेन निराश्रयत्वासम्भवात्"। (विद्वन्मण्डने)

तस्मात् "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यमि" त्यादिश्रुते: भगवत्कार्यरूपप्रपञ्चस्यापि ब्रह्मात्म त्वे नावगमात्पुरुषस्य नित्यत्वेन तदात्मकस्यापि नित्यवर्तमानत्वेन स्थितत्त्वाज्जगत: उत्पत्तिनाशौ आविर्भावतिरोभावाभ्यामेव संगच्छेते । अत: आविर्भावतिरोभावेनैव जगतो जन्मनाश इति । जन्म आविर्भाव वाचक: नाश: तिरोभाववाचक:। "आत्मत आविर्भावतिरोभावौ" इति छान्दोग्यश्रुते: एतयोराविर्भावतिरोभावयोरनित्यत्वादिकं न शङ्कनीयमिति ।

।। ब्रह्मण: विरुद्धधर्माश्रयत्वम् ।।

ननु ब्रह्मणि सर्वधर्मयुक्तत्वस्वीकारे तत्र विरूद्धधर्माणामपि समावेशात् एकमेव वस्तु एकस्मिन्नेव समये एककालावच्छेदेन द्विधा भवितुं न शक्नोत्यत: निर्धर्मकं निर्विशेषं निराकारमेव ब्रह्म स्वीकार्यम्, तत्तु केवलं मायावशात्सगुणं साकारं प्रतिभासत इति चेन्न। केवलश्रुतिप्रतिपाद्ये ब्रह्मणि केवलयुक्त्युपयोगस्यानुपयुक्तत्वाच्छ्रुतौ च "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्यादिना ब्रह्मणि धर्मान्निषिध्य पुनस्तत्प्रकरणे एव "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" इत्यादिना आनन्दधर्मस्य कथनम् । अत एव व्याससूत्रे "दर्शनाच्च" इति सूत्रात् भगवति सर्वे विरुद्धधर्मा: दृश्यन्ते अत: ब्रह्मण: सर्वविरुद्धधर्माश्रयत्वं श्रुतिस्मृतिप्रत्यक्षसिद्धम् । तथा च "प्रकृतैतावत्त्वं हि प्रतिषेधति ब्रवीति च ततो भूय:" (३।२।२२) इत्यनेन परमार्थत: शास्त्रत: विरोधपरिहारं कृत्वा युक्त्याऽपि विरोधपरिहार: क्रियते । ब्रह्मणि प्रकृतैतावत्वं नाम प्राकृतधर्मान्निषिध्य तत: तदनन्तरं भूय: पुन: अप्राकृतधर्मान् ब्रवीति इति । एवं च ब्रह्मणि सर्वे अप्राकृता: अलौकिका: विरुद्धा अपि धर्मा: सन्ति । किन्तु ते स्वाभाविका एव न तु मायिका:। "उभयव्यपदेशादहि कुण्डलवत्" (३।२।२७) प्रकाशाश्रयवद्वा तेजस्त्वात्" (३।२।२८) इत्यादिना ब्रह्मणि विरुद्धधर्मवत्वस्वीकार:। ब्रह्मणि विरुद्धधर्मवत्वन्तु श्रुति सिद्धमेवास्ति । "अणोरणीयान्महतो महीयान्" "समो नागेन समो मशकेन" "न तत्समश्चाभ्यधिकं तु दृश्यते" इत्याद्यनेकै: शास्त्रवाक्यै: अनवगाह्यमाहात्म्ये ब्रह्मणि सर्वे विरुद्धधर्मा सहजतया विराजन्ते। एकस्मिन्समये एककालावच्छेदेन ब्रह्म द्विधा भवितुमपि शक्नोति तथा च एककालावच्छेदेन एकमेव ब्रह्म अनेकत्रस्थातुमपि शक्तम् । यथा षोडशसहस्रमहिषीनामन्त:पुरे । अयमनुभव: श्रीनारदेन प्रत्यक्षीकृत:। अत: नारदानुभवप्रामाण्यादपि ब्रह्म विरुद्धसर्वधर्माश्रय:, कर्तुं अकर्तुं अन्यथा कर्तुं समर्थम् एवञ्च लोकेऽपि विरुद्धदयामारकत्वादीनि विषयभेदेनैकस्मिन् क्षणे एकस्यामेवव्यक्तौ प्रतीयन्ते तदाऽलौकिके किमु । अत्र श्रीपुरुषोत्तमचरणा: "एवञ्च शब्दबलविचारेण विरुद्धसर्वधर्माश्रयो ब्रह्मेति निर्णय:। श्रुत्युक्तयुक्त्या विचारे तु लौकिकधर्मशून्यमलौकिकसर्वधर्मयुक्तमिति निर्णय:। अर्थबलविचारे तु विरुद्धसर्वधर्मरूपमिति निर्णय इति बोधनार्थमत्र त्रेधा विचारितम् ।" अतो ब्रह्मणो विरुद्धधर्मवत्वं न दूषणाय अपितु भूषणाय भवति। एवमेव ब्रह्मणि वैषम्यनैर्घृण्यादय:

न सम्भवति आत्मसृष्टत्वादिति उच्यते च "आत्मसृष्टेर्न वैषम्यं नैर्घृण्यं चापि विद्यते" इत्याचार्याः।।

।। भगवल्लीला ।।

किमु भगवल्लीलायाः मायिकत्वमुत न वेति विचारे भगवत्येकनिष्ठत्वात् सच्चिदानन्दात्मके ब्रह्मण्यनन्यत्वेन स्थितत्वात् स्वरूपात्मकत्वान्न मायिकत्वमिति । भगवल्लीला किमपि प्रयोजनमधिकृत्य न प्रचलति "न प्रयोजनवत्वात्" (ब्र.सू. २।१।३२) इति सूत्रन्यायेन । किन्तु "लोकवत्तु लीला कैवल्यम्" (ब्र.सू. २।१।३३) इति सूत्रात् सा लीलैव कैवल्यं मोक्षः। तस्याः कीर्त्तनेऽपि मोक्षः। इति भाष्ये प्रतिपादनाल्लीलायाः स्वरूपात्मकत्वाद्भगवत्कृतत्वादलौकिकत्वाच्च न सर्वथा मायिकत्वमिति वाच्यम् । अस्याः लीलायाः लक्षणं यथा सुबोधिन्याम् = "कौतुकाधिष्ठितेन अनायासत्वेन क्रियमाणं कर्म लीला" यद्वा "अनायासेन हर्षात्क्रियमाणा चेष्टा लीला" इति । नन्विहैव दृश्यमानगिरिगह्वरकाननादि- सम्बन्धि लीलायाः प्रपञ्चमध्यपातित्वादनित्यत्वमिति चेन्न । "प्रपञ्चोभगवत्कार्यः" इत्याचार्यवचनात् प्रपञ्चस्य भगवत्कार्यत्वेन भगवत्कार्यरूपप्रपञ्च-सम्बन्धिनीनां लीलानां —

"जयति जननिवासो देवकी जन्मवादो
यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रजपुरवनितानां वर्धयन् कामदेवम् ।।

(भागवते १०/९०/४८)

इति चतुर्थप्रस्थानश्रीभागवतप्रमाणात्—श्लोके 'जयतीति' वर्त्तमानप्रयोगेणातीतानां व्रजलीला-नामपि वर्त्तमानत्वं बोधयन् श्लोकसमाप्तौ 'वर्धयन्निति' पदेन शतृप्रत्ययेन तस्मिन्कथाकाले तस्मिन् क्षणे तत्रैव सर्वपरोक्षलीलानां स्थितिः उच्यते । तथा च भगवतः नामकरणप्रसङ्गे भागवते गर्गवाक्येनापि भगवल्लीलानां त्रिकालातीतत्वं नित्यवर्त्तमानत्वं प्रवर्त्तमानत्वञ्च ज्ञाप्यते ।

"बहूनि सन्ति नामानि रूपाणि च सुतस्य ते ।
गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ।।

(भागवते १०/८/१५)

इत्यत्र 'सन्तीति' पदप्रयोगदर्शनाल्लीलानां नित्यवर्त्तमानत्वं स्पष्टमेव। ननु लोके पाचकपाठकवद् भवतु नाम, यथा पाठनकार्ये अप्रवृत्तेऽपि पाठकोऽयमिति प्रयोगदर्शनादत्रापि तथैवास्त्वति चेन्नैतत् । लोकासिद्धत्वादलौकिकीलीलालोकसम्बन्धिन्यपि लोकदृष्टान्तेन न साधनीया । लोके तु भीरुपुरुषेऽपि नरसिंहवीरवरेत्यादिनामनिदर्शनान्न तथा । अत्र तु गर्गवाक्यानुसारेण यथा नाम, तथा गुणाः, यथा च कर्म तथा रूपमिति । तच्च गां

पालयतीति गोपाल:, मुक्तिं ददातीति मुकुन्दः इत्यादिः। तथा हि नामकरणसमये लीलानाम्भावित्वाल्लीलानुसारिनामकरणमसम्भवमिति न शङ्क्यम्, भगवल्लीलायाः नित्यत्वान्नित्यप्रवर्त्तमानत्वाच्चेति । एवं पूतनाशकटभञ्जनकालियदमनादिलीलानां पूर्वमेव सिद्धत्वादपि भगवदिच्छयाऽनाविर्भाव:। अतः भगवल्लीलानां नित्यसिद्धत्वात्कालाद्यनवच्छिन्नत्वात्सर्वत्रैकत्र च सर्वरूपेण भिन्नभिन्नरूपेण च यथा तथा भगवदिच्छयैव स्थितत्वान्न कदापि मायिकत्वमिति । ननु भवतु नाम अलौकिकीनां भगवल्लीलानाममायिकत्वं किन्तु लोकवल्लीलानां तु मायिकत्वं भवति न वेति प्रश्ने सर्वथा तदपि नेत्युत्तरम् । "तत्त्वभावे सन्ध्यवदुपपत्तेः" (ब्र.सू. ४।४।१३) इति सूत्रन्यायेन भगवानासुरव्यामोहनार्थं स्वस्य प्राकृतत्वं प्रदर्शयति न तु तथा भवति । तत्र दूषितदृष्टीनामासुराणां कृते, यथा—श्रीमद्भगवद्गीतायाम्—"मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः" (१६।१८) इत्यत आरभ्य "ततो यान्त्यधमां गतिम्" (१६।२०) इत्यन्तमुक्तम् । एतेषामासुरत्वेन मुक्त्यनधिकारादिति । एवं भगवल्लीलायां दोषादर्शने उपपत्तिमुक्त्वा अग्रिम सूत्रेण गुणदर्शने उपपत्तिमाह "भावे जाग्रद्वद्" (ब्र.सू. ४।४।१४) इति सूत्रन्यायेन लौकिकवद्भासमाने भगवल्लीलापदार्थे लीलायाञ्च भक्तानां यद्दर्शनं तत्त्वलौकिकत्वेनैव। यथा मोहनिवृत्तस्य पुरुषस्य सत एवार्थस्य दर्शनम् । एवं भगवान् स्वेच्छयैव भक्तानां मायापसारणेन तत्तद्रसानुभवार्थं तत्तल्लीलां तथा तथा करोति । तथा च कुत्रचित् मोहलीलामपि करोति यथा सौभयुद्धे। तथा चासुराणां व्यामोहनार्थं लोकवल्लीलां करोतीति । अत्र भाष्ये = "अत एव लीलाया अनेकरूपत्त्वाद् ब्रह्मणश्च श्रुतौ सैन्धवदृष्टान्तेनैकरसत्वनिरूपणाच्छुद्धब्रह्मधर्मत्वं न सम्भवतीति शङ्कानिरासाय ("लोकवत्तु लीला कैवल्यम्") कैवल्यमित्युक्तम् । साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिषु याऽन्यधर्मराहित्यलक्षणा केवलतोक्ता सा लीलात्मिकैव लीलाविशिष्टमेव शुद्धं परं ब्रह्म, न कदाचित् तद्रहितमित्यर्थः पर्यवस्यति । तेन स्वरूपात्मकत्वं लीलायाः पर्यवस्यति । तेन च नित्यत्वम् ।" (ब्र.सू. ४।४।१४ भाष्ये) एवं यथा पृथिव्यामेव गन्धरूपेणाविर्भावः न जलादौ । एवमेवाविर्भावतिरोभावाभ्यां भगवल्लीलायाः अनुभवः अननुभवश्च भक्तानामभक्तानाञ्च कृते भवतः। अधुनाऽपि क्वचिद् क्वचिद् भगवदिच्छया कृपया च तादृशे भक्ते परोक्षलीलानामनुभवः श्रूयते । एवं भगवांस्तु नित्यलीलाविशिष्ट एव सर्वदा सर्वत्र विराजते । श्रीगोवर्धनधरः भक्तमनोरथपूरणार्थमिच्छया कृपया चाविर्भवति तिरोभवति च। तस्माल्लीलायाः कदापि मायिकत्वं सर्वथा नेति सिद्धान्तः।

"प्रभोरेव फलत्वं निर्दोषत्वञ्च वर्ण्यते ।
लीलानित्यवतः पूर्णगुणत्वं च ततोऽखिलम् ।।"

(इत्याचार्यकारिका)

।। भक्तिनिरूपणम् ।।

भक्तेर्लक्षणमाचार्यचरणैरुक्तं निबन्धे —

"माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।
स्नेहोभक्तिरिति प्रोक्तस्तयामुक्तिर्न चान्यथा ।।

(शा.प्र.का. ४५)

अनया कारिकया आचार्यैः भक्तिस्वरूपमुक्तम्। स्नेहो भक्तिः। स्नेहस्तु भगवत्यात्मत्वेन ज्ञाते भवति। "गौणश्चेन्नात्मशब्दात्" (ब्र.सू. १।१।५) इति सूत्र न्यायेन गुण युक्तत्वाद्गौणः इति न वक्तव्यम्, आत्मशब्दात्। अत्र भाष्ये—"आत्मशब्दः पुनः सर्वेषु वेदान्तेषु निर्गुणपरब्रह्मवाचकत्वेनैव सिद्धः। तस्यैव जगत्कर्तृत्वं श्रुतिराह।" इति वचनात् निर्गुणसाकारपरब्रह्म एव जगत्कर्त्ता स एवात्मा स एव भगवान् श्रीकृष्णः। "कृषिर्भूर्वाचकः शब्दो णश्च निर्वृति वाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इति गोपालतापनीयश्रुतेः भगवतः श्रीयशोदोत्संगलालितस्य श्रीकृष्णस्यैव परब्रह्मत्वं श्रुतिस्मृत्यादिशास्त्रेषु सर्वत्र उद्घोष्यतेऽतः भक्तिपदं श्रीकृष्णस्नेहे मुख्यमन्यत्र तु तत्प्रयोगो भाक्त इति। सच्चिदानन्दात्मकं परब्रह्म त्रिविधं जगति क्रीडति। तत्र आधिभौतिकं जगत्। आध्यात्मिकं अक्षरब्रह्म। आधिदैविकं परं ब्रह्म "पुरुषश्चाधिदैवतम्" इति स्मृतेः। एवमेव रमणार्थं मार्गत्रयम्—आधिभौतिकमार्गः कर्म, आध्यात्मिकमार्गो ज्ञानम्, आधिदैविको मार्गो भक्तिः। तत्र प्रथमः आधिभौतिकः कर्ममार्गः लोकपर्यवसायी, द्वितीयो ज्ञानमार्गः अक्षर पर्यवसायी, तृतीयो भक्तिमार्गः पुरुषोत्तम (परब्रह्म) पर्यवसायीति। ज्ञानिनस्तु अक्षरब्रह्मैव परमफलत्वेन मन्यन्ते। भक्तास्तु अक्षरब्रह्म परब्रह्मपूर्णपुरुषोत्तमस्य धामेति स्वीकुर्वन्ति। तत्र प्रमाणम् —

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम ।।

(गीता ८।२१)

तथा च – यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।।

(गीता १५/१८)

इत्यादि प्रमाणैर्वेदादिशास्त्राणामर्थो भक्तिरिति ज्ञायते ।

ननु वेदादि शास्त्राणामर्थो भक्तिरिति कथम्प्रतिपाद्यते भवद्भिरिति चेदुच्यते। "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति, स भूमा स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीडआत्ममिथुन आत्मानन्दः स स्वराड् भवति" "परं ब्रह्मैतद्यो ध्यायति रसति भजति सोऽमृतो भवति" "नाहं वेदैर्न तपसा न दानेन न चेज्यया, शक्य एवं विधो दृष्टुं दृष्टवानसि मां यथा"। "भक्त्या त्वनन्यया शक्यः०" "अहं भक्तपराधीनो" "भक्त्या तुतोष भगवान् गजयूथपाय०" इत्यादि श्रुतिस्मृतिप्रमाणैर्भक्तिरेव प्रतिपाद्यते। एतेन सर्वात्मभावरूपा भक्तिरेवोच्यते। छान्दोग्ये सनत्कुमारनारदसंवादे भूमविद्यायां यत्र

नान्यत्पश्यतीत्यादिनाऽन्यदर्शनादिराहित्यस्योक्तत्वाद्भगवद्विरहावस्थायां प्रपञ्चविस्मृतिपूर्विका या परमाऽऽसक्तिस्तया विगाढभावेन सर्वत्र भगवत्स्वरूपमेव स्फुरतीति स एवोच्यते "स एवाघस्तात्स एवोपरिष्टात्सपश्चादित्यादि" तदनन्तरं भगवद्विरहभावगतस्फूर्तिरूपाणां ज्ञानानां व्यभिचारिभावत्वेनानियतत्त्वं ज्ञापयितुमहंकारादेश: "अहमेवाधस्तादहमेवोपरिष्टादित्यादि:" तत आत्मादेश: इति । "आत्मैवाधस्तादात्मोपरिष्टादित्यादि:"। तथा चाग्रे आत्मरत्यादि पदै: "आत्मरति: आत्मक्रीड आत्ममिथुन" इत्यादिभि: रसरूपं भगवन्तं भक्तो भजति ।

अत्रात्मशब्देन सिद्धान्ते पूर्णपुरुषोत्तम एवोच्यते। नत्वक्षरं जीवो वेति । "गौणश्चेन्नात्मशब्दादिति" सूत्रन्यायेन परमकाष्ठापन्नं यद्वस्तु तदेव सर्वत्र वेदान्तेषु मुख्यतया प्रतिपाद्यम् । अनेन परब्रह्मणि सर्वात्मभावरूपा व्यसनात्मिका भक्ति: सैव मुख्या । सा च भगवदनुग्रहैकसाध्या । तच्चोक्तम् श्रुतौ —

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन
यमेवैष वृणुते तेन लभ्य:
तस्यैष आत्मा विवृणुते तनुं स्वाम्" ।।

(का. १/२/२३)

अत्र आत्मशब्द: पुरुषोत्तमवाचक:, प्रवचनेन नाम सस्वरवेदाध्ययनेनेति । अनेन पुष्टिभक्ते: केवलं भगवद्वरणलभ्यत्वमेव । अत्र स्वपदस्यात्मीयवाचकत्वेन स्वीयत्वेन वरणे सर्वात्मभावरूपा पुष्टिभक्ति: प्रयच्छति । भाष्ये च "निसर्गत: सर्वेषां जीवानां भगवान् भवत्येव प्रभुर्यद्यपि तथापि यं स्वीयत्वेन वृणुते तस्य विवाहित: पतिरिव भर्त्ता सन् वरणजस्नेहातिशयेन भक्तेनापि ध्रियमाण: सन्, स भक्त इव स्वयमपि तं स्वस्मिन् बिभर्त्ति"। *(अ.भा. ४/४/१५)*

इत्यनेन भक्तौ स्नेहस्यप्राधान्यादयोगोलकादि दृष्टान्तं विहाय प्रदीप दृष्टान्तमुक्तवान् व्यास: "प्रदीपवदावेशस्तथा हि दर्शयति" (४।४।१५) । स स्नेहस्तु व्रजसीमन्तिनीनां रतिस्थायिभावत्वेन मुख्यत्वाच्छृंगार एव भक्तिरस: इति वक्तुं शक्यते । स चालौकिक एव । तस्य च संयोगविप्रयोगात्मकत्वम् । अलौकिक शृंगारस्य लौकिकसदृशत्वेऽपि न लौकिकत्वमलौकिकप्रमाणप्राप्तत्वाल्लौकिकप्रमाणाप्राप्तत्वाच्च । वस्तुतस्तु अत्र लौकिकत्वशङ्का निरर्थका इति । वात्स्यायनादिऋषिभिरपि भगवद्भावभावनार्थमेव शास्त्रप्रणयनम् । न तु ऋषीणां कदापि लौकिके तात्पर्यं भवति। अत एवोक्तम्—"तदेतद् ब्रह्मचर्येण परमेण समाधिना विहितो लोकयात्रार्थं न रागार्थोऽस्य संविधि:, रक्षन् धर्मार्थकामांस्त्रीन् सम्पश्यंल्लोकवर्त्तिनाम्। अस्य शास्त्रास्य तत्त्वज्ञो भवत्येव जितेन्द्रिय:"। इति लौकिके तात्पर्ये सति शास्त्रकार: जितेन्द्रियभवनरूपफलं न वदेत् । अर्थोयम् लिङ्गभूयस्त्वाधिकरणे, क्रतुवज्ज्यायस्त्वाधिकरणे च विस्तरेण प्रपञ्चितमाचार्यैर्भाष्ये, श्रीपुरुषोत्तमचरणै: प्रकाशे श्रीगोपेशचरणैश्च रश्मौ । ननु भक्ते: शृंगाररसरूपत्वात् शृंगारस्य च संयोगविप्रयोगात्मकत्वाद्विप्रयोगस्य विरहात्मकत्वेन

दुःखरूपत्वात्कथं सुखरूपत्वमिति चेदुच्यते भूम्नश्च । "यो वै भूमातत्सुखं" इति श्रुतेः सुखरूपत्वमेव । सर्वत्र वेदान्तेष्वपि मुक्तेः सुखरूपत्वमेव । पुष्टावपि भगवत्स्वरूपस्यानन्दमयत्वात्तल्लाभे परमानन्दलाभ एव न तु दुःखलाभ इति । अत्र = रश्मिकाराः योगिगोपेश्वरा आज्ञापन्ति = "अस्यैव चोपपत्तेरूष्मेति सूत्रभाष्ये । तथाहि अस्यानन्दात्मकरसरूपस्य भगवतः एवायं धर्मः। ऊष्मा विरहतापः। व्यापकस्य भगवतः सर्वत्र सत्त्वेऽपि मायया तिरोधानात्तद्विरहः सर्वसाधारणस्तथापि, न सर्वाऽनुभवगोचरोऽपि तु यस्य हृदि रसरूपभगवदाविर्भावो भवति तस्यैव तदप्राप्तिजतापानुभवो गोचरीभवतीत्यन्वयव्यतिरेक रूपोपपत्तेः। तथा च रसरूपस्य वस्तुन एव तथात्वात् स तापोऽपि रसात्मक एवेति"। अनेन सिद्ध्यति यत् अस्य दुःखस्य न कर्मजन्यत्वम्, कर्मजन्यत्वे सति अस्य मोक्षसुखमपि विलुप्येत। अत एवोक्तम्—"न पश्यो मृत्युं पश्यति न रोगं नोत् दुःखतामिति" श्रुत्या तादृशभक्तेः दुःखादिरूपत्वं निषिध्यते अतोस्य दुःखहेतुत्वेऽप्यनन्यलभ्यसाक्षात्पुरुषोत्तमानन्दप्राप्तिहेतुत्वेन सुखरूपत्वमेवेति । अन्यथा वियोगावस्थायां चित्तेस्फुरायमाणमानन्दत्वमिति न वदेत् । "को ह्येवान्यात्कः प्राण्यादि'ति, श्रुतेः वियोगावस्थायां हृदिविराजमानस्य भगवद्रूपस्यैव जीवनहेतुत्वमिति । तथैव श्रीभागवतेऽपि —

"ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ।
ये त्यक्तलोकधर्माश्च मदर्थे तान् विभर्म्यहम् ।।

(भा. १०/४६/४)

अतः स्वपरमप्रियभगवद्दत्तं भगवत्सम्बन्धि यत्किमपि भक्तैः प्राप्यते तत्सर्वं सुखरूपमेव भवत्यतः भगवदलौकिकरसवार्त्ताऽनभिज्ञस्य तव कृते तु कण्टकवेधदृष्टान्तवत्कामिनीकुचकुम्भे प्रणयप्रसङ्गे रसोत्कर्षे प्रियकृतनखवेधस्यापि दुःखहेतुत्वं भविष्यतीत्यलं प्रलापेन ।

एवं "यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति" श्रुत्या परब्रह्मण एव सूखरूपत्वात्प्रतीयमानं प्रियत्वादि ब्रह्मण्येव पर्यवस्यति । वस्तुतः जीवस्य प्रियं ब्रह्म एव। एतदेव श्रीभागवते उक्तम् —

"अहमात्माऽऽत्मनां धातः प्रेष्ठः सन् प्रेयसामपि ।
अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रिय ।।इति।।

अत्रेदं बोध्यम् । सिद्धान्ते रसात्मकं विरुद्धधर्माश्रयं साकारमेव परब्रह्म । "आत्मैव पूर्वमासीत् पुरुषविध" इति श्रुतेः । फलं च ब्रह्मानन्दः । तथा च "परं ब्रह्मैतद्यो ध्यायति रसति भजति सोऽमृतो भवति" इत्यस्य प्रत्येकं सम्बन्धो ज्ञेयः। इयं च भक्तिः फलरूपा । तल्लक्षणं तु परब्रह्मश्रीकृष्णस्नेहत्वमिति । तत्र "यमेवैष वृणुते तेनलभ्यः" इति वरणश्रुत्या वरणस्य मर्यादा पुष्टिभेदेन द्वैविध्यम् । मर्यादापक्षे विहितानि साधनानि शास्त्रेषु बहूनि सन्ति तेषां कायिकवाचिकमानसिकरूपप्रभेदाः । पुष्टौ तु वरणमेव साधनमिति । पुष्टौ भगवदनुग्रहणैव सर्वपापक्षयः ।

तच्चोक्तम् — "स्वपादमूलं भजतः प्रियस्य
त्यक्तान्यभावस्य हरिः परेशः
विकर्म यच्चोत्पतितं कथञ्चिद्
धुनोति सर्वं हृदि सन्निविष्टः" ।।
(भा. ११/५/४२)

"प्रविष्ट कर्णरंध्रेण स्वानां भावसरोरुहम्
धुनोति शमलं कृष्ण पद्मपत्रमिवाम्भसा" ।।

एवं वरणेनैव पुष्टिभक्तेः प्राप्तिः। पुष्टिभक्तेः वरणैक लभ्यत्वात् । एवं भक्तिमार्गेण भक्ताः भगवत्समीपं गच्छन्ति । तत्र भगवत्प्राकट्ये रसानन्दप्राप्तिः। सर्वैरिन्द्रियैर्भगवत्स्वरूपेण सह संयोगादिलाभः। अतएवोक्तम् भागवते "अक्षण्वतां फलमिदं न परं विदामः"। स च सर्वो मनोरथः भगवता पूर्यते । "ब्रह्मैव सन् ब्रह्माप्येति" "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा" इत्यादि श्रुतेः। अयं रसानुभवः श्रेष्ठः। "ब्रह्मानन्दात्समुद्धृत्य भजनानन्दयोजने" इत्याचार्यवाक्यात् अक्षरब्रह्मानन्दस्य गणितानन्दत्वात् भजनानन्दस्य चागणितानन्दत्वादिति । अनयोः ज्ञानभक्त्योः तारतम्ये भक्तिः श्रेष्ठा ।

(१) भक्तौ कृपानन्दरसपानं च फलम् । ज्ञाने दुःखाभावमात्रं फलम् ।
(२) भक्तौ पूर्णानन्दानुभवः फलम् । ज्ञाने स्वरूपेण प्रकर्षतो लयः फलम् ।
(३) भक्तौ भगवत्कृतद्वैतस्थित्यानन्दानुभवः फलम् । ज्ञाने भेदाभावस्थितेरानन्दानुभवो न संगच्छते ।
(४) भक्तौ प्रारम्भतः एव निरतिशयानन्दः। ज्ञाने प्रथमतः कष्टमन्ते गणितानन्दप्राप्तिश्च ।
(५) भक्तौ पूर्णपुरुषोत्तमप्राप्तिः। ज्ञाने अक्षरप्राप्तिः ।

एवं ज्ञानभक्त्योः तारतम्ये भक्तेः अतिशयितत्वमिति ।

आत्मारामाश्च मुनयः निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ।।
(भा. १/७/१०)

अतः ब्रह्मभावानन्तरमपि परा भक्तिरनुष्ठातुं शक्यते । इदमेव भगवतः पूर्णपुरुषोत्तमस्य श्रीकृष्णस्य अनवगाह्यमाहात्म्यम् । भक्तेरुत्कृष्टत्वञ्च । अत एव विद्वांसः रसज्ञाः भावुकाः भक्त्यैवात्मानं भगवते श्रीगोपीजनवल्लभाय समर्प्य रसानन्दनिमग्नाः भवन्ति । अतः "सर्वधर्मान्परित्यज्य" इति वाक्याद्भगवानेव शरणीकरणीयः। भगवान् स्वानुग्रहेणैव भक्तानां सर्वं साधयति । अत एवोक्तं श्रीभागवते—"पोषणं तदनुग्रहः" इति पुष्टेर्लक्षणम् । पुष्टिमार्गे भगवदनुग्रहस्यैव नियामकत्वम् ।

भक्तिः मर्यादापुष्टिभेदेन द्विधा भवति । मर्यादाभक्तिः भगवच्चरणारविन्दभक्तिः। पुष्टिभक्तिः भगवन्मुखारविन्दभक्तिः। मर्यादा भक्तिः अस्वतन्त्रा । पुष्टि भक्तिः स्वतन्त्रा ।

मर्यादाभक्तौ फलं सायुज्यम् । पुष्टौ साक्षाद्भगवान् । एवं यस्मिन् भगवत्कृपा भवति स पुष्टौ आयाति । सा च कृपा तन्मार्गरुच्यादिभिरनुमीयते । सा रुचिः भक्तिरेव । शुद्धपुष्टिभक्तिफलं तु नित्यलीला प्रवेशः पुरुषोत्तमलाभश्च । इत्यादिकं श्रीमदणुभाष्ये आचार्यैः विस्तरेण प्रतिपादितं पुरुषोत्तमचरणैश्च तत्प्रकाशे विस्तरेणालोडितं गोपेश्वरचरणैश्च तत्प्रकाशरश्मौ अतिविस्तरेण विवरितम् । अतः तत्रतोऽवगन्तव्यम् ।

अधुनात्र ब्रह्मणः मूलम् स्वरूपं विविच्य समाप्यते ।

तत्र — "**कृषिर्भूवाचकः शब्दो णश्च निर्वृति वाचकः**
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ।।
ॐ तत्सत्परं ब्रह्म कृष्णात्मको नित्यानन्दैकस्वरूपः ।। इति श्रुतेः

तथा च — **परिपूर्णतमः कृष्णो वैकुण्ठो गोकुलः स्वयम् ।**
चतुर्भुजश्च वैकुण्ठे गोकुले द्विभुजः स्वयम् ।।
(ब्रह्मवैवर्त पु०)

अत एव परमानन्दः पूर्णपुरुषोत्तमः परब्रह्म श्रीकृष्ण एव । अतः निखिलनिगमागमाधिगम्यमानस्वरूपः परब्रह्मश्रीकृष्ण एव प्रापणीयोऽयमेव परमपुरुषार्थः शुद्धाद्वैतब्रह्मवाद इति । तत्प्राप्तिः भक्त्या विना नेति । "नायमात्मा बलहीनेन लभ्यः" इति श्रुतेः। अत्र बलं भक्तिः। अतः शुद्धपुष्टिभक्तौ स्नेह एव नियामकः। निरुपधिस्नेहात्मिका भक्तिरेव सर्वात्मभावः। अयमेव पूर्णपुरुषोत्तमप्राप्तौ मुख्यं कारणम् । यस्मिन् भगवत्कृपा भवति स एव पुष्टिमार्गाधिकारी भवति । तस्मात् श्रीमदाचार्यचरणैः पुष्टिमार्गस्थापनाय प्रमाणानुरुद्धः प्रमेयमार्गः प्रकटीकृतः। अतः श्रीमदाचार्यानुग्रहीतेन पुष्टिपथेनानुसर्त्तव्यमिति ।

"जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम् ।
तदन्यदिति ये प्राहुरासुराँस्तानहो बुधाः ।।
(श्रीप्रभुचरणाः भाष्ये)

।। श्रीमदाचार्यचरणानां वेदश्रद्धा ।।

भाष्येऽस्मिन् पुष्टिभक्तिमाहात्म्यमतीव विस्तरेण वर्णितं तथा च वेदविषये भाष्यकृद्भिः निरतिशया श्रद्धाऽपि स्थापिता । श्रीवल्लभाचार्याः वेदस्याक्षरमात्रस्याप्यन्यथाकल्पनम्, वेदेऽर्थवादं च नाङ्गीकुर्वन्ति । "उत्तरं पूर्वसन्देहवारकं परिकीर्त्तितम्" इति न्यायेन पूर्वपूर्वप्रस्थानसन्देहवारकत्वमुत्तरोत्तरप्रस्थानस्येति वर्णयन्त्याचार्याः ।

यथा वेदे - "अपाणिपादोजवनो ग्रहीता" इत्यत्र किं ब्रह्म प्राकृतपाणिपादरहितं यद्वा सामान्यनिषेधः, इति सन्देहे "सर्वतः पाणिपादान्तम्" इत्यादि गीतावाक्यं सन्देहवारकम् । गीतायाञ्च "नित्यः सर्वगतः स्थाणु०" "ममैवांशो जीवलोके" इत्यादौ सन्देहे "उत्क्रान्तिगत्यागतिभिः" "अंशो नानाव्यपदेशात्" इत्यादि सूत्रैर्निर्णयः। तथा च तत्वसूत्रे "जन्माद्यस्य यतः० इत्यत्र ब्रह्मणः जगत्कारणत्वं निमित्तत्त्वेनोपादानत्वेन वा इति सन्देहे "अन्वयव्यतिरेकाभ्यां

यः स्यात्सर्वत्र सर्वदा'' इत्यादि श्रीमद्भागवतवाक्यान्निर्णयः। एवं चतुर्णां प्रस्थानानामेकवाक्यत्वम्। अत्राचार्यैः समग्रस्य वेदस्योभयकाण्डात्मकस्य प्रामाण्यं स्वीकृतम् न तु 'वेदान्तो नाम उपनिषत्प्रमाणम्' इतिवत् केवलस्य उपनिषद् भागस्येति ज्ञेयम्। ''वेदस्याक्षरमात्रान्यथा कल्पनेऽपि दोषः स्यात्'' इत्याचार्याः।

तथा च — **वेदोक्तादणुमात्रेऽपि विपरीतं तु यद्भवेत्।**
तादृशं वा स्वतन्त्रं च उभयं मूलतो मृषा॥
(अ.भा.का.)

तथा च — **यज्ञरूपो हरिः पूर्वकाण्डे ब्रह्मतनुः परे।**
अवतारी हरिः कृष्णः श्रीभागवत ईर्यते॥
(शा.प्र. ११)

अग्निहोत्रं तथा दर्शपूर्णमासः पशुस्तथा।
चातुर्मास्यानि सोमश्च क्रमात् पञ्चविधो हरिः॥
(तत्व. २/२)

असन्दिग्धोऽपि वेदार्थः स्थूणाखननवन्मतम्।
मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वयम्॥
जैमिनिः कर्मतत्त्वज्ञो निर्णयं पूर्व उक्तवान्।
व्यासः स्वयं हि सर्वज्ञ उत्तरे निर्णयं जगौ॥
(तत्व. २/२९-३०)

पुराणविषये आचार्याणां श्रद्धा —

पुराणं वेदवत् पूर्वसिद्धं सर्वोपयोगि तत्'
(तत्व. २/४८)

महाभारतविषये —

''सर्वनिर्द्धारणार्थाय व्यासो भारतमुक्तवान्''
(तत्व. २/५७)

ज्यौतिषविषये —

''दर्शादिकालनिर्द्धारो ज्योतिः शास्त्रफलं स्मृतम्''
(तत्व. २/७५)

व्याकरणविषये —

''व्याकृतिः पाणिनीयं हि प्रातिशाख्यं तु शब्दगम्''
(तत्व. २/७७)

आयुर्वेदादिविषये —

''आरोग्ये धर्मसिद्धिः स्याद्रक्षा च धनुषो भवेत्
उद्वेगहानिर्गान्धर्वे स्थापत्यं च स्रुगादिषु ।
काव्यादीनामसत्यत्वान्नोपयोगः कथञ्चन ।
धर्मे कर्त्तुः क्वचित् कीर्त्तिर्नैपुण्यं पाठतः क्वचित् ।

(तत्व. २।७९-८०)

रामायणविषये —

''रामायणमनन्तं हि पुराणमिव सन्मतम्
व्यासः पूर्वमनेकोक्तो वाल्मीकिः साम्प्रतं किल ।
समाधिभाषया प्राह प्रमाणं सर्वथैव तत् ।

(सर्व.प्र. ८१)

एवं सर्वशास्त्राणां विषये श्रीवल्लभाचार्याणां मतमुपरि संक्षेपेण स्पष्टीकृतम् ।

संन्यासविषये—कलिदोषात्कर्ममार्गे ज्ञानमार्गे च संन्यासो न कर्त्तव्यः, किन्तु पश्चात्तापनिवृत्यर्थं भक्तिमार्गे कर्त्तव्यः। भगवद्विरहानुभवैकार्थः परित्यागः प्रशस्यते । इत्यादिकं सर्वं आचार्यैः स्वकृतसन्यासनिर्णयग्रन्थे विस्तरेण विवृतम् । एवं कर्मज्ञानमार्गापेक्षया भक्तिमार्गे आचार्याणां समादरः विशेषः सिद्ध्यति ।

भाष्येऽस्मिन् आचार्याणां मायावादि खण्डने अतीव निर्बन्धः। बौद्धमतखण्डनप्रसंगेऽपि मायावादिखण्डनं निर्दिश्यते । ब्रह्मसूत्रे अन्ये आचार्याः (१) "अथातो ब्रह्मजिज्ञासा" (२) "जन्माद्यस्य यतः" (३) "शास्त्रयोनित्वात्" (४) "तत्तु समन्वयात्" इति सूत्रचतुष्टयात्मिकां चतुःसूत्रीं स्वीकुर्वन्ति । तथाहि श्रीवल्लभाचार्याः (१) अथातो ब्रह्मजिज्ञासा (२) जन्माद्यस्य यतः शास्त्रयोनित्वात् (३) तत्तु समन्वयात् इति सूत्रत्रयात्मिकां त्रिसूत्रीं स्वीकुर्वन्ति । श्रीवल्लभाचार्याणां मते 'जन्माद्यस्य यतः शास्त्रयोनित्वात्' इत्यभिन्नमेव सूत्रं वर्त्तते । इदमणुभाष्यम् तृतीयाध्यायद्वितीयपादस्य चतुःत्रिंशत् (३४) सूत्रतः प्राक् श्रीमद्वल्लभाचार्यरचितम् । तदनन्तरं श्रीविट्ठलनाथानां कृतिः। प्राक्तनभाष्येऽपि 'आनन्दमयाधिकरणे' द्वितीयवर्णकं श्रीविट्ठलेशरचितमेव । इत्यत्र भाष्यप्रकाशरचयितॄणां श्रीपुरुषोत्तमानामुक्तिरेव प्रमाणम् । तथा हि—"इत आरभ्य प्रभूणामिति (श्रीविट्ठलेशानाम्) प्रतिभाति" इति "स्थानविशेषात्प्रकाशादिवत्" (ब्र.सू. ३।२।३४) इति सूत्रभाष्यप्रकाशेउल्लिखितम् । तथा च "साम्प्रतं तु प्रभुचरणौ;" इत्यानन्दमयाधिकरणे । तथाहि—चतुर्थाध्यायसमाप्ति श्लोके —

''भाष्यपुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे ।
निवेदितस्तेन तुष्टा भवन्तु मयि ते सदा ।।

इत्यत्र भाष्यप्रकाशे श्रीपुरुषोत्तमाः—"गुणोपसंहारपादमारभ्य सर्द्धाध्यायस्य स्वयं करणात्तदाचार्येषु निवेदयन्तः समाप्तौ मङ्गलं कर्त्तव्यमिति शिष्टाचारं च शिक्षयन्त आचार्याणां प्रसादमाशासते" इति लिखन्ति अनेन स्पष्टं प्रतीयते यत् अवशिष्टं भाष्यं निर्माय

श्रीवल्लभाचार्यचरणयोः समर्पितमिति । अत्र केचिद्विद्वांसः सम्पूर्णं भाष्यमाचार्यकृतमेवेति मन्यन्ते । तत्र श्रीमदाचार्यचरणाम्बुजमित्यस्यार्थो व्यासाचार्यचरणाम्बुजमिति ग्राह्यम् । "व्यासोऽस्माकं गुरुः" इत्याचार्यवाक्यात् । एवमेवान्यत्रापि समादधते । अन्यच्च श्रीमदाचार्याणामन्यदेकं बृहद्भाष्यमस्ति तन्मध्यस्थोऽनतिविस्तृतो भागोऽधुना नोपलभ्यते तस्यैव भाष्यस्य संक्षेपभूतमिदं भाष्यमित्यपि केचिद् वदन्ति । वस्तुतस्तु श्रीपुरुषोत्तमचरणैः प्रकाशे यदुक्तं तदेवास्त्यविचिकित्सितमिति । या या कृतिः श्रीवल्लभाचार्याणामस्ति तत्र तत्र श्रीपुरुषोत्तमानां टीकादिकमपि वर्त्तते । यत्र यत्र पुरुषोत्तमानां टीकादिकं किमपि नास्ति सा कृतिः श्रीवल्लभाचार्याणामस्ति नवेति सन्दिग्धोऽर्थः।

भाष्येऽस्मिन् चत्वारः अध्यायाः। ते च क्रमशः स्वरूपमतान्तरनिराससाधनफलप्रतिपादकाः। तत्रापि प्रत्येकाध्याये पादचतुष्टयम् । अत्र प्रथमाध्याये ब्रह्मस्वरूपबोधकवेदान्तवाक्यानां विचारः। तत्रापि प्रथमपादे—कार्यप्रतिपादकानि वाक्यानि, द्वितीयपादे—अन्तर्यामिप्रतिपादकानि वाक्यानि, तृतीयपादे—उपास्यरूपप्रतिपादकानि वाक्यानि, तथा चतुर्थपादे—प्रकीर्णानि वाक्यानिति । इत्येवं प्रथमाध्यायपदार्थसंग्रहः।

द्वितीयाध्याये मतान्तरनिराकरणम् । विना मतान्तरनिराकरणेन साधनफलयोरनुपयोगादिति । तत्रपि द्वितीयाध्यायस्य प्रथमपादे—श्रुतिस्मृत्योः अविरोधः प्रदश्यते । द्वितीयपादे—न्यायमायावादादिमतानां निराकरणम् । तृतीयपादे श्रुतिवाक्ययोः परस्परविरोधपरिहारः। चतुर्थपादे—जीवशरीरमध्यवर्त्तिप्राणादीनां विचारः। इति द्वितीयाध्यायपदार्थसंग्रहः ।

तृतीयाध्यायः साधनाध्यायः। तत्र प्रथमपादे—जीवस्य ब्रह्मज्ञानोपयोगिजन्मविचारः। द्वितीयपादे—जीवस्य मुक्तियोग्यता, अत्रैव विरोधपरिहारेण ब्रह्मस्वरूपनिरूपणञ्चेति । तृतीयपादे—गुणोपसंहारः। चतुर्थपादे—कर्माद्यङ्गविचारः। इति तृतीयाध्यायपदार्थसंग्रहः ।

चतुर्थोऽध्यायः फलाध्यायः। तत्र प्रथमपादे—श्रवणादेर्विचारः। द्वितीयपादे—सर्वेन्द्रियलयादि विचारः। तृतीयपादे—क्रममुक्तिमार्गादिनिरूपणम् । चतुर्थपादे—पुष्टिमर्यादाभेदेन फलस्य लीलानित्य-त्वादिकस्य च निरूपणम् ।

अथ प्रतिपादमधिकरणानि वर्ण्यन्ते —

तत्र प्रथमाध्यायस्य प्रथमपादे दशसंख्यात्मकान्यधिकरणानि ।
तत्र प्रथमाध्यायस्य द्वितीयपादे अष्टसंख्यात्मकान्यधिकरणानि ।
तत्र प्रथमाध्यायस्य तृतीयपादे त्रयोदशसंख्यात्मकान्यधिकरणानि ।
तत्र प्रथमाध्यायस्य चतुर्थपादे नवसंख्यात्मकान्यधिकरणानि ।
द्वितीयाध्यायस्य प्रथमपादे द्वादशसंख्यात्मकान्यधिकरणानि ।
द्वितीयाध्यायस्य द्वितीयपादे अष्टसंख्यात्मकान्यधिकरणानि ।
द्वितीयाध्यायस्य तृतीयपादे षोडशसंख्यात्मकान्यधिकरणानि ।
द्वितीयाध्यायस्य चतुर्थपादे दशसंख्यात्मकान्यधिकरणानि ।
तृतीयाध्यायस्य प्रथमपादे अष्टसंख्यात्मकान्यधिकरणानि ।
तृतीयाध्यायस्य द्वितीयपादे एकादशसंख्यात्मकान्यधिकरणानि ।

तृतीयाध्यायस्य तृतीयपादे चतुर्विंशतिसंख्यात्मकान्यधिकरणानि ।
तृतीयाध्यायस्य चतुर्थपादे नवसंख्यात्मकान्यधिकरणानि ।
चतुर्थाध्यायस्य प्रथमपादे सप्तसंख्यात्मकान्यधिकरणानि ।
चतुर्थाध्यायस्य द्वितीयपादे षष्ठसंख्यात्मकान्यधिकरणानि ।
चतुर्थाध्यायस्य तृतीयपादे पञ्चसंख्यात्मकान्यधिकरणानि ।
चतुर्थाध्यायस्य चतुर्थपादे पञ्चसंख्यात्मकान्यधिकरणानि ।
इत्येवमतिसंक्षेपेण भाष्यपदार्थसंग्रहः प्रतिपादमधिकरणानि च वर्णितानि ।

।। श्रीमद्वल्लभाचार्याणां संक्षिप्तचरितम् ।।

दक्षिणप्रदेशे तैलङ्गदेशे 'कांकरवाड' नाम्निग्रामे दीक्षितसंज्ञासंज्ञितकृष्णयजुर्वेदीयतैत्तिरीयशाखिनां प्रथितं कुलमासीत् । तस्मिन्कुले सर्वे कुलपुरुषाः सोमयाजिनः बभूवुः। अस्य कुलस्य मूलपुरुषाः श्रीनारायणयज्वाः। अस्मिन्नेव कुले श्रीलक्ष्मणभट्टाः प्रादुर्बभूवुः। ते स्वपत्न्या सह एकवारं काशीयात्रार्थमगच्छन् । तदैव मार्गमध्ये मध्यप्रदेशे चम्पारण्यस्थले तत्पत्न्याः इल्लम्मागारोः कुक्षौ । (वि.सं. १५३५) वैशाखकृष्णैकादश्यां श्रीवल्लभाचार्याणां प्राकट्यमभवत् । तदा भवतां पितृचरणाः श्रीलक्ष्मणभट्टाः भार्यापुत्राभ्यां सह द्वादशवर्षाणि यावत् काश्यामवसन् । तदा काश्यामेव श्रीवल्लभाचार्याणां यज्ञोपवीतादयः संस्काराः अभवन् । श्रीवल्लभः निखिलान् वेदान् सर्वशास्त्राणि च झटिति अधीतवान् । ततः स्वदेशमागतास्ते त्रयः। ततः श्रीलक्ष्मणभट्टाः दिवं याताः। ततः पुनः श्रीवल्लभाचार्याः तीर्थयात्रार्थं प्रस्थिताः। तदा तीर्थयात्रायां श्रीवल्लभाचार्याणां बहुभिर्विद्वद्भिः सह शास्त्रचर्चा जाता यत्र विद्वांसः पराजिताः । आचार्याः त्रिवारं पृथ्वीपरिक्रमां विधाय स्वसिद्धान्तप्रचारं कृतवन्तः तत्रैव विजयनगरे श्रीकृष्णदेवरायनृपतेः राजसभायां सर्वान् वादीन् पराजित्य विधिवत् 'शुद्धाद्वैतब्रह्मवादनिर्गुणपुष्टिभक्तिमार्गाभिधं स्वसिद्धान्तं संस्थापितवन्तः । तत्र यात्रा मध्य एव श्रीगोवर्धनपर्वते श्रीनाथजीत्यपरपर्यायः परब्रह्म भगवान् श्रीकृष्णः श्रीवल्लभाचार्यसन्निधौ स्वेच्छया स्वयं प्रादुर्भूयात्मानं दर्शयामास । स्वसेवाकरणार्थमाज्ञापयच्च । स एव पुष्टिमार्गः श्रीवल्लभाचार्यैः प्रवर्तितः। तत्रैव तीर्थयात्राप्रसङ्गे श्रीवल्लभाचार्यचरणाः भगवतः पाण्डुरंगविट्ठलनाथस्याज्ञया काश्यां च स्वमातुरनुमत्या च स्वजातीय मधुमंगलनामकतैलङ्गविद्वान्ब्राह्मणस्य सुयोग्यकन्यया सह विधिपूर्वकं विवाहं चक्रुः । तत्र श्रीगोपीनाथविट्ठलनाथाख्यौ द्वौ सुतौ यथाक्रमं (वि.सं. १५६८ आश्वि. कृ.१२ तथा वि.सं. १५७२ मि.पौ.कृ. ९) जन्म लेभाते । एवमाश्रमत्रयं प्रोत्तीर्य सर्वशास्त्रसम्मतं त्रिदण्डसंन्यासं परिगृह्य काश्यां हनुमानघाटेति प्रसिद्धस्थले वि.सं. १५८७ मि. आषा.शु. २ रविवासरे मध्यान्ह काले सुरसरित्प्रवाहे आत्मानं प्रवेशयामासुः। एवमासुराणां व्यामोहनार्थं स्वशरीरत्यागं कृतवन्तः। वस्तुतस्तु ते साक्षाद्भगवद्धाम प्रापुः ।

जगद्गुरुश्रीवल्लभाचार्यविरचिताः अनेके ग्रन्थाः सन्ति । ते च बृहदग्रन्थलघुग्रन्थभेदेन द्विविधाः। तत्र बृहद् ग्रन्थाः - (१) ब्रह्मसूत्राणुभाष्यम् । (२) तत्त्वदीपनिबन्धः। (३)

निबन्धप्रकाशः। (४) श्रीमद्भागवतसुबोधिनी । (५) पूर्वमीमांसाभाष्यम् । (६) गायत्रीभाष्यम् इत्यादयः ।

लघु ग्रन्थाः - (१) श्रीयमुनाष्टकम् । (२) बालबोधः । (३) सिद्धान्तमुक्तावली । (४) पुष्टिप्रवाहमर्यादाभेदः। (५) सिद्धान्तरहस्यम् । (६) नवरत्नम् । (७) अन्तःकरणप्रबोधः। (८) विवेकधैर्याश्रयः। (९) कृष्णाश्रयः। (१०) चतुःश्लोकी । (११) भक्तिवर्द्धिनी । (१२) जलभेदः। (१३) पञ्चपद्यानि । (१४) संन्यासनिर्णयः। (१५) निरोधलक्षणम् । (१६) सेवाफलम् ।

तथा च = पुरुषोत्तमसहस्रनाम । परिवृढाष्टकम् । पत्रावलम्बनम् । त्रिविधनामावली । शिक्षाश्लोका इत्यादयः ।

श्रीमद्वल्लभाचार्यविरचितं श्रीमद्भगवद्गीताभाष्यमनुपलब्धम् । कालवशाद्वा कस्माच्चित्कारणाल्लुप्तमिति मन्यन्ते ऐतिह्यज्ञाः ।

श्रीमद्वल्लभाचार्याणां प्रथमपुत्राः श्रीगोपीनाथाः। तेषामेक एव सुताः श्रीपुरुषोत्तमाः। तदग्रे वंशविस्तारो नास्ति ।

आचार्याणां द्वितीयसुताः श्रीविट्ठलेशाः। एतेषां ग्रन्था :- अणुभाष्योत्तरार्धः। विद्वन्मण्डनम् । शृंगाररसमण्डनम् । सुबोधिनी टिप्पणी । भक्तिहंसः। भक्तिहेतुनिर्णयः। इत्यादयः। एतेषां सप्तसुताः। ते च क्रमशः श्रीगिरिधराः, श्रीगोविन्दरायाः, श्रीबालकृष्णाः, श्रीगोकुलनाथाः, श्रीरघुनाथाः, श्रीयदुनाथाः श्रीघनश्यामाश्च ।

श्रीमद्विट्ठलेश्वर तृतीय सूनु श्रीबालकृष्णतः पुरुषगणनया चतुर्थवंश्यश्रीपीताम्बरगोस्वामिनामात्मजाः श्रीपुरुषोत्तमचरणाः दशदिगन्तविजयिनः स्वपितृव्याणां श्रीश्यामलसुतव्रजरायजीमहाराजानामुत्सङ्गे गताः। एतेषां श्रीपुरुषोत्तमचरणानां जन्म वि.सं. १७२४ मि.भा.शु. ११ अभूत् । ऐषां टीकाग्रन्थेषु सर्वश्रेष्ठः अणुभाष्यप्रकाशाभिधनिबन्धः। एषः निबन्धः अद्वितीयः । श्रीपुरुषोत्तमचरणसदृशाः विद्वांसः सुदुर्लभाः। एतद्विरचिताः ग्रन्थाः। नवलक्षश्लोकपरिमिताः सन्ति । तत्र केचित्कथयन्ति यन्नवलक्षसंख्यकाः ग्रन्थाः सन्ति । किन्त्वधुना तेषु अधिकग्रन्थाः लुप्ताः । श्रीपुरुषोत्तमचरणरचितेषु ग्रन्थेषुसुबोधिनीप्रकाशः, उपनिषद्दीपिका, आवरणभङ्गः, प्रस्थानरत्नाकरः, सुवर्णसूत्रम्, षोडशग्रन्थविवृतिः, वादावलिः इत्यादयः बहवो ग्रन्थाः पाण्डित्यपूर्णतया निबद्धाः एतेषां विषये साम्प्रदायिकौ श्लोकौ प्रसिद्धौ —

श्रीमद्वल्लभदीक्षिताह्वयहरेर्वन्द्यान्वयेसप्तम-
स्तत्कारुण्यसुधाभिषेकविकसत्सौभाग्यभूमोदयः ।
दृप्यद्दुर्मदवादिविद्वदिभदुष्कूटोक्तिकुम्भस्थली-
सद्योभञ्जनकेलिकेसरपतिः पीताम्बरस्यात्मजः ।।१।।
नासीद्येन समः समस्तनिगमस्मृत्त्यादि तत्त्वार्थविद्
वक्ता चाप्रतिमः सदःसु विदुषामद्यापि भूमौ बुधः ।

य: सर्वं नवलक्षपद्यकमितप्रौढप्रबन्धं व्यधात्
स श्रीमान् पुरुषोत्तमो विजयतामाचार्यचूडामणि: ।।२।।

एवमेतेषां विस्तृतं चरित्रं 'पुरुषोत्तमदिग्विजये' द्रष्टव्यं विशेषजिज्ञासायाम् । एतादृशा:, उत्कृष्टविद्वांस: सम्प्रदायान्तरे भूतलेऽपि च विरला एवेति ।

अणुभाष्यप्रकाशोपरि 'रश्मि' विवृति लेखका: श्रीयोगिगोपेश्वरा: श्रीविट्ठलेशतृतीयसुनुवंशोद्भवा: परन्तु श्रीविट्ठलेशद्वितीयसुनुश्रीगोविन्दरायवंशे दत्तकत्वेन समागता: विद्वद्वरेण्या:। एते प्रसिद्धा पण्डिता:। एभि: भाष्यप्रकाशोपरि रश्मिनामिका भाष्यात्मिका ग्रन्थाकारा वा टीका निरमायि, सा विद्वन्मान्या । श्रीगोपेश्वरचरणानां स्ववंशपरम्परा दत्तकवंशपरम्परा च संक्षेपेणात्र प्रदर्श्यते—श्रीमद्विट्ठलेश्वरतृतीयसुनु श्रीबालकृष्णानां चतुर्थपुत्रा: श्रीपीताम्बरा: तस्यान्वये क्रमेण श्रीश्यामलजित:, तत्पुत्रा: श्रीव्रजरायजित: तद्दत्तकपुत्रा: श्रीपुरुषोत्तमचरणा: दशदिगन्तविजयिन: तद्दत्तकपुत्रा: श्रीपुरुषोत्तमा: (गो.आ.तृ.गृ.१ से) तत्पुत्रा: श्रीगोवर्धनेशजित: (द्वि०) तद्दत्तकपुत्रा: श्रीगोकुलोत्सवजित: (गो. आये द्वि.गृ.१.से) तत्पुत्रा: श्रीयोगिगोपेश्वरा: पण्डितप्रवरा: रश्मिकारा: (गो.गये.द्वि.गृ.१. में विट्ठलेशरायजी के) तत्पुत्रा: श्रीकृष्णरायमहाभागा:। इति योगिगोपेश्वराणां स्ववंशावलि:। अत: परं तेषां दत्तकवंशपरम्परा—श्रीमद्विट्ठलेश्वर द्वितीयसूनुश्रीगोविन्दराया: तत्पुत्रा: श्रीकल्याणराया: तत्पुत्रा: श्रीहरिरायां: शिक्षापत्ररचयितार: तद्दत्तकपुत्रा: श्रीगिरिधरजीमहोदया: (गो.आये.प्र.गृ.१. से.) तत्पुत्रा: श्रीरघुनाथजित: तत्पुत्रा: श्रीगोविन्दरायजित: (द्वि.) तत्पुत्रा: श्रीविट्ठलेशरायजित: तद्दत्तकपुत्रा: श्रीयोगिगोपेश्वर महाभागा: विद्वत्प्रवरा: (गो. आये. तृ.गृ.२.से. प्रा.वि.सं. १८३५ मि.ज्ये.शु. ८) इति श्रीयोगिगोपेश्वराणां दत्तकवंशपरम्परा । किं चैभि:' भक्तिमार्त्तण्डादय: अन्येऽपि ग्रन्था: सारगर्भिता: लिखिता:।

ब्रह्मसूत्रमिदं समग्रवेदान्तानां आकरग्रन्थ:। ब्रह्मसूत्रेदं कदा निर्मितमित्यतिचिरन्तनवृत्तत्वाद्यद्यपि निश्चयेन वक्तुं न शक्यते तथापि महर्षिबादरायणव्यासरचितत्वादस्य रचनाकाल: द्वापरयुगस्यान्तिमो भाग: कलिकालस्य च प्रारम्भ: अत: सम्भवत: पञ्चसहस्रवर्षाणि यावत् पूर्वमस्य काल: निश्चेतुं शक्यते । ब्रह्मसूत्ररचनाकाल: अतिप्राचीन: इति प्राञ्चां मतम् । आधुनिकपाश्चात्यानामतानुसारेणास्य रचनाकाल: चतु: शती ई०पू० वर्त्तते । अस्माकमैतिह्यानुसारेण श्रीमद्भागवतप्रथमस्कन्धोपाख्यानेन ज्ञायते यच्छ्रीमद्भागवतनिर्माणत: पूर्वमेव रचितमिति । श्रीमद्भागवते भगवत: श्रीकृष्णस्य लीलावर्णनमस्ति भगवान् श्रीकृष्णस्योद्भव: किञ्चिदधिक पञ्चसहस्राब्देभ्य: पूर्वतने काले आसीदिति । अत: श्रीवेदव्यासरचित- ब्रह्मसूत्रस्यापि काल: स एवेति निश्चीयते । एवमेव श्रीमद्भगवद्गीतायामपि "ब्रह्मसूत्रपदैश्चैव" इत्यादि श्लोके ब्रह्मसूत्रस्य नामोल्लेखात्स्पष्टं निश्चीयते यत्तत्त्वसूत्रस्य रचनाकाल: श्रीभगवद्गीतात: अपि पूर्वमस्तीति ।

ब्रह्मसूत्रेऽस्मिन् सूत्रसंख्याऽपि विविधा तत्तद्भाष्यकारैर्निश्चिता । तत्र प्रमुखमतानि —

		सू.सं.	अधि.सं.
(१)	भाष्यकारा: आचार्यशङ्करा:	५५५	१९१

(२)	भाष्यकारा: आचार्यरामानुजा:	५४५	१६०
(३)	भाष्यकारा: आचार्यमाध्वा:	३६४	२२३
(४)	भाष्यकारा: आचार्यनिम्बार्का:	५४९	१६१
(५)	भाष्यकारा: आचार्यवल्लभा:	५५४	१७१

एवं जगद्गुरुश्रीमदाचार्यचरणैकदर्शित: साकारब्रह्मवादापरपर्याय: "शुद्धाद्वैतब्रह्मवादनिर्गुणपुष्टिभक्तिमर्गो" नाम सन्मार्ग इत्यविचिकित्सितम्। श्रीमदाचार्यचरणै: श्रीमत्प्रभुचरणैश्च प्रदर्शितरीत्या तत्कृपयैव तत्सिद्धान्तसरणिमनुसृत्य श्रीमद्ब्रह्मसूत्राणुभाष्यस्य प्रकाशरश्मिसहितस्योपोद्घातोऽयं मया विलिखित: । अत्र निर्मत्सरा: विद्वांस: गच्छत: स्खलनन्यायेन प्राप्तामशुद्धिं संशोध्य पठन्तु, मयि चोपकुर्वन्त्विति ।

।। धन्यवाद ज्ञापनम् ।।

भगवत: श्रीयशोदोत्संगलालितस्य श्रीगोपीजनवल्लभस्य श्रीमुकुन्दप्रभो: श्रीगोपालप्रभोश्च परमानुग्रहेण परमगहनस्यास्य तत्वसूत्रस्याणुभाष्यप्रकाशरश्मिरूपत्रीवेणिसङ्गमस्वरूपबृहद्ग्रन्थस्य पुन: प्रकाशने प्रयतमाना: सतनुवित्तदत्तचित्ता: श्रीहरिश्चन्द्रमहोदय:, श्रीसरोजकुमारगोयल: (एतौ दिल्लीवास्तव्यौ) श्रीदेवकुमार अग्रवालमहोदय:, श्रीघनश्यामजीशाहमहोदय: (एतौ काशीवास्तव्यौ) एते सर्वे शतश: धन्यवादार्हा:। इत्यलं विस्तरेणेति ॥

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णवेतृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिचरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

प्रथमाध्यायप्रथमपादस्यादिमसूत्रत्रयात्मकम्

(त्रिसूत्रीभाष्यम्)

‘भगवद्धर्मपरायणसद्गृहस्थश्रेष्ठिगोवर्धनदास सुन्दरदास’ इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतः ‘प्राप्तभगवत्पद-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्एल्. बी.,
वकील, हाइकोर्ट’ इत्येतेषां सुहृद्भिः
संशोध्य ‘निर्णयसागर’ मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४५७. संवत् १९९२.
मार्गशीर्ष कृष्ण ९.

मूल्यं रूप्यकद्वयम् ।

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sagar' Press,
26-28, Kolbhat Lane, Bombay 2.

Published by Dhirajlal Vrajdas Sanklia, B.A., LL.B., Advocate
at Khakhar Building, C. P. Tank, Bombay 4.

श्रीकृष्णाय नमः ।
श्रीगोपीजनवल्लभाय नमः ।
श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ प्रथमोऽध्यायः ।

प्रथमः पादः

भाष्यप्रकाशः ।

॥ श्रीकृष्णाय नमः ॥

संगीतं श्रुतिमूर्धभिस्तदविदां वागाद्यतीतं विदां

रश्मिः ।

श्रीकृष्णाय नमः । साकारब्रह्मवादस्थापकेभ्यः श्रीमदाचार्येभ्यो नमः ।

उद्धर्तुं ज्ञानरहितान्, मादृशानपराधिनः ।
कृतश्रम इवाभासि यतस्त्वं विठ्ठलेश्वरः ॥ १ ॥
जयति जगति वाणी वेदवेदान्तयुक्ता विविधमहिमशुद्धाद्वैतविद्याकृतेऽलम् ।
प्रभवति खलु वादे मायिनीतीह यस्य जयति विजितमायः श्रीमदाचार्यवर्यः ॥ २ ॥
पितृचरणोदितसरणौ साकारब्रह्मस्थापिकायां तु ।
आदिमूर्तिभजनेषु प्रतिनिधीन् विठ्ठलान् नमामि ॥ ३ ॥
गुणत्रयातीतगुणाढ्यगेहे कृष्णाश्रयाद्याः सुरवर्यवृक्षाः ।
तदन्तरा मूलसुखार्थसारं शाखाद्विषट् शब्दसहस्रपर्णम् ॥ ४ ॥
मुक्तालिवृन्दैरभितः स्तुतं च जुष्टं रसाकाङ्क्षिशुकादिभक्तैः ।
दिव्यं पुराणं च सहस्रनामकल्पद्रुमं नौमि रसार्थकामी ॥ ५ ॥
श्रीवल्लभाचार्यपदाब्जयुग्मसंशोधिताशेषविशेषबुद्धिः ।
वेदान्तिहृत्पद्मविकासनेऽलं भाष्यप्रकाशे वितनोमि रश्मिम् ॥ ६ ॥
विविधदुरितपाशं व्याहतीकृत्य नस्त्वं प्रविश हृदयकञ्जं किंच योगं विधेहि ।
कथमिह खलु रश्मिर्मान्यतां पण्डितानां सदसि जलजपाणे लप्स्यते त्वन्यथायम् ॥ ७ ॥
भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्तथा ।
तथापि यामि तत्पारं कृपानौकासमाश्रितः ॥ ८ ॥
यदि भाष्यप्रकाशीयं रहस्यं वेत्तुमिच्छथ ।
तदा पश्यत विद्वांसो रश्मिं स्पष्टचमत्कृतिम् ॥ ९ ॥

अतिगूढार्थं भाष्यं विवरीतुं शास्त्रार्थत्वेनानिर्वचनीयं वस्तु निर्दिशन्ति संगीतमित्यादिना । संगीतमिति । शिवादयोपि गीता इति तद्व्युदसितुं समिति । तथा च शेषितया गीतमित्यर्थः । श्रुतिमूर्धभिरिति । वेदान्तैरित्यर्थः । 'ऋचां मूर्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां मुण्ड-

---

१. नामरूपयोर्भजने, यथा नामभजने श्रीमदाचार्यास्तथा स्वरूपभजने श्रीविठ्ठलेश्वराः । २. पद्येति पाठः । ३. 'अलं वयं ते महिमानुवर्णने' इति श्रीभागवतचतुर्थस्कन्धेऽलंयोगे चतुर्थीस्थले सप्तम्यपि दृश्यते ।

भाष्यप्रकाशः ।

दूरं साधनसंपदां निरुपधिस्नेहैः सुखापं वृतैः ।
रासोल्लासवशंवदव्रजवधूवृन्दे वसन्तं सदा
दासक्लेशहरं मुदा परतरं श्रीकृष्णदेवं श्रये ॥ १ ॥
मन्दान् वीक्ष्य जनान् विभुः श्रुतिगणं व्यस्याऽथ कारुण्यतः
स्त्रीशूद्रादिहिताय भारतमुखेनोक्त्वा तदर्थं पुनः ।
बुद्धिं शोधयितुं चकार सुविदां यो ब्रह्मसूत्रात्मकं

रश्मिः ।

मुण्डम्'इति कौषीतकिश्रुतेः । एतेन मुख्यं प्रमाणं प्रदर्शितम् । समन्वयरूपः प्रथमाध्यायार्थश्च दर्शितः । **तदविदां वागाद्यतीतमिति** । वेदान्ताविदां वागाद्यतीतं, न तु सर्वथेत्यर्थः । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्युक्त्वा 'आनन्दं ब्रह्मणो विद्वान्' इति श्रुतेः । 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेश्च । 'विदूरकाष्ठाय मुहुः कुयोगिनाम्'इति स्मृतेश्च । तेन मतान्तरनिराकरणरूपो द्वितीयाध्यायार्थ उक्तः । **विदामित्यादि** साधनानां संपद्येषां तेषां विदां दूरमित्यर्थः । 'यस्यामतं तस्य मतं मतं यस्य न वेद सः' इति श्रुतेः । 'नायमात्मा प्रवचनेन लभ्यः' इति श्रुतेश्च । तर्हि किमपि साधनं नास्तीत्याकाङ्क्षायामस्तीत्याहुः **निरुपधिस्नेहैरिति** । निरुपधिः स्नेहो येषां तैरित्यर्थः । 'नायमात्मा बलहीनेन लभ्यः' इति श्रुतेः, बलं भक्तिरिति सिद्धान्तः । 'वशीकुर्वन्ति मां भक्त्या' 'भक्त्याहमेकया ग्राह्यः' इत्यादिस्मृतिशताच्च । किंच 'ब्रह्मविदाप्नोति परम्' 'तमेव विदित्वातिमृत्युमेति' इत्यादावपि स्नेह एवोच्यते । प्रियत्वप्रकारकबुद्धेरेव स्नेहपदार्थत्वात् । पुत्रे स्निह्यतीत्यादौ पुत्रविषयिणीं प्रियत्वप्रकारां बुद्धिं करोतीति प्रत्ययात् । तेन साधनं दर्शितम्, तृतीयाध्यायार्थश्चोक्तः । कर्मधारयपक्षे तु बहुवचनं परिकरस्यापि साधनत्वाय । तेन भक्त्यंशानां साधनत्वम्, न तदतिरिक्तानामित्युक्तम् । तत्रापि प्रेम्णि विशेषमाहुः **सुखापमिति** । अधिकारिण आहुः **वृतैरिति** । 'यमेवैष वृणुते तेन लभ्यः' इति श्रुतेस्तथेत्यर्थः । फलाध्यायार्थमाहुः **रासोल्लासेत्यादि** । रसानां समूहो रासस्तत्र तेन वा य उल्लासः परस्परमाश्लिष्य क्रीडा स रासः, रससमूहत्वात्, भावे घञ् वा, उत्तरोत्तररमणेच्छा वा । तेन **वशंवदे व्रजवधूवृन्दे सदा वसन्तमि**त्यर्थः । सप्तम्यत्राभिव्यापकाधारे बोध्या । 'तिलेषु तैलं दधनीव सर्पिः' इति श्रुतेः, सर्वस्मिन्नात्मास्तीति लौकिकः । तादृशोपि भक्तोन्मुख इति भजनीयत्वमाहुः **दासक्लेशहरमिति** । **सदे**त्यत्राप्यन्वेति । **परतरमिति** । 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति श्रुतेः । **श्रीकृष्णदेवमिति** । एतच्च फलाध्यायतृतीयपादे 'समान एवं चाभेदात्' इति सूत्रे उपपादितम् । अतिधृतिरत्र जातिः । शार्दूलविक्रीडितं छन्दः । 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणात् । दासक्लेशहरमितिपदेनाभिव्यज्यमानस्य भक्तनिष्ठभावस्य ग्रन्थकर्तृभावपोषणात् । भावस्य भावाङ्गत्वेन प्रेयोऽलंकारः । रसो भक्तिः । स च तृतीयाध्यायतृतीयपादे 'व्यतिहारो विशिंषन्ति हीतरवत्' इति सूत्रभाष्य उक्तः । यथास्या अतिरिक्तरसत्वं तथोपपादितं मया भक्तिमार्तण्डस्य प्रमेयप्रकरणे, एतद्ग्रन्थे चैतद्वक्ष्यते ॥ १ ॥

उपष्टम्भकं स्तुवन्तो व्यासं नमन्ति युगलेन **मन्दान्वीक्ष्येत्यादि** । **तदर्थमिति** वेदार्थमित्यर्थः । **बुद्धिं शोधयितुमिति** 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः' इति श्रुतेरित्यर्थः । **चकारेति** भारतकरणसूत्रकरणयोः पूर्वापरीभावस्तु 'कृतवान् भारतं यस्त्वम्' 'जिज्ञासितमधीतं च' इति पाठक्रमात् । सोयं पूर्वतन्त्रे दशमस्य पञ्चमे पादे 'ऐन्द्रवायवस्याग्रवचनाद्

भाष्यप्रकाशः ।

वेदान्तार्थविकासकाद्भुतपदं शास्त्रं गुणैरुज्ज्वलम् ॥ २ ॥
एवं सर्वहितं चरन्नपि यदाखिद्यत्तदा नारदात्
तत्रोपायमवेत्य खेदहतये दृष्ट्वा समाधौ हरिम् ।
श्रीमद्भागवतेन संशयमहन् भक्तिप्रचारोद्यत-
स्तं कृष्णं मुनिमानमामि करुणं ज्ञानावतारं हरेः ॥ ३ ॥
सर्गादौ स्वमतं समस्त विषये यं ब्रह्मवादं जगौ
कौन्तेयोद्धवयोः प्रकाश्य च पुनर्वेदान्तसारं हरिः ।
तं व्यासाशयगोचरं प्रथयितुं यैर्भाष्यमाभाषितं
तानाचार्यवरान्नमामि करुणान् श्रीवल्लभाख्यान् प्रभून् ॥ ४ ॥
श्रीवल्लभप्रतिनिधिं तेजोराशिं दयार्णवम् ।
गुणातीतं गुणनिधिं श्रीगोपीनाथमाश्रये ॥ ५ ॥
श्रीविठ्ठलेशपादाब्जनखचन्द्ररुचः सदा ।
अलंकुर्वन्तु मत्स्वान्तं मायावादतमोहराः ॥ ६ ॥

रश्मिः ।

दितः प्रतिकर्षः स्यात्' इत्यधिकरणे चिन्तितः । ज्योतिष्टोमे 'उपांश्वन्तर्यामौ धाराग्रहौ' धारया गृह्णातीत्युक्तेर्विधाय, ऐन्द्रवायवो ग्रहस्तृतीयः 'ऐन्द्रवायवाग्रा ग्रहा गृह्यन्ते' इति श्रूयते । स न तयोः पूर्वं गृह्यते पाठक्रमाच्च नायमग्रताविधिः, किंतु ग्रहविधिरतः स्वस्थानस्यैवैन्द्रवायवस्य ग्रहणमिति । गुणैरुज्ज्वलमिति व्यञ्जनाकाङ्क्षाप्रभृतिभिरुज्ज्वलमुत्तममित्यर्थः ॥ २ ॥

यदाखिद्यदिति । यदाखिद्यत्तदा नारदात् तत्रोपायमवेत्य खेदहतये भक्तिप्रचारोद्यतो जात इत्यन्वयः । तेन हेतुहेतुमद्भावाभावाच्च लङ्लिङौ ॥ ३ ॥

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ, तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' इतिश्रुतिमनुसंदधानाः सर्वाचार्यशिरोमणित्वेन ब्रह्मवादप्रवर्तकानाचार्यान्नमन्ति सर्गादावित्यादि । यं ब्रह्मवादमिति । द्वितीयस्कन्धे नवमे चतुःश्लोक्यां ब्रह्मवित्पाठके च प्रसिद्धम्, नृसिंहोत्तरतापिनीये चेत्यर्थः । प्रकाश्येति व्यस्येत्यर्थः । अदृश्यत्वाधिकरणे स्फुटीकृत्येति यावत् । आचार्यवरानिति । 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्' इति सूत्रेण बहुवचनम् । एकस्मिन्नर्थे वर्तमानः शब्दो बहूनामर्थानां वचनं बोधको भवतीत्यतिदेशोऽयम् । परंतु भावप्रत्ययं विना जातेः प्राधान्येनाख्यामपेक्ष्यते । जातौ शक्त्यङ्गीकारे चेदमेव मानम् । तथा च महाभाष्यं 'यावद्ब्रूयादेकोर्थो वा बहुवद्भवतीति तावदेकस्मिन्बहुवचनमिति' इति शेखरे स्पष्टम् । 'एकत्वं न प्रयुञ्जीत गुरावात्मनि चेश्वरे' इति वाक्याच्च । 'अत एव प्राणाः' इति श्रीव्याससूत्रेषु प्राणपदोत्तरबहुवचनदर्शनात्प्रमाणभूताच्च एवमेव प्रयोक्तव्यमस्तु ॥ ४ ॥

आचार्यज्येष्ठपुत्रानाश्रयन्ति श्रीवल्लभेत्यादि । वितानं छन्दः । 'वितानमाभ्यामन्यत्' इति लक्षणात् । आभ्यामित्युपलक्षणम् । विद्युन्मालादिभ्योऽखिलेभ्यो यदतिरिक्तमनुष्टुब्वृत्तं तदेव वितानमिति ॥ ५ ॥

मायावादतमोहरा इति । 'स्थानविशेषात्प्रकाशादिवत्' इति सूत्राष्टकसहितसार्धाध्यायस्य श्रीमद्विठ्ठलेश्वराचार्यप्रणीतत्वादितिभावः ॥ ६ ॥

भाष्यप्रकाशः ।

तत्पुत्रान् सह सूनुभिर्निजगुरून् श्रीकृष्णचन्द्राह्वयान्
भक्त्या नौमि पितामहं यदुपतिं तातं च पीताम्बरम् ।
वन्दे च व्रजराजमन्वयमणिं यद्रोचिषा मादृशो-
ऽप्यासीन्मूर्ध्नि कृपापरः प्रभुवरः श्रीबालकृष्णः स्वयम् ॥ ७ ॥
श्रीवल्लभाचार्यपदाम्बुजाते भक्त्या मुदाऽन्तर्हृदि संनिवेश्य ।
भाष्यप्रकाशे प्रयतेऽतिदीनो निःसाधनस्तत्करुणाबलेन ॥ ८ ॥
आचार्यवाचः प्रणमामि भाष्यसुबोधिनीस्था इतराश्च यास्ताः ।
मत्स्वान्त आगत्य कृपाप्लुतास्ता मदीयवाचां रचयन्त्वलंकृतिम् ॥ ९ ॥

अथ स्वालौकिकानुभावप्रकटनहृदयस्य भगवत आज्ञया तदर्थमाविर्भूताः श्रीमदाचार्या-

रश्मिः ।

सर्वानेव मान्यान् नमन्ति तत्पुत्रानिति ॥ ७ ॥

ग्रन्थकरणे स्वप्रतिभाहेतुं वदन्तस्तत्करणं प्रतिजानते श्रीवल्लभाचार्येत्यादि । त्रिष्टुब्जातिः । इन्द्रवज्राछन्दः । 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति तल्लक्षणात् । भाष्यप्रकाश इति । प्रकाशशब्द आतपं वक्ति । भाष्यसमाप्तौ 'आविष्कृतोऽयं भुवि भाष्यभास्करः' इति भाष्यस्य भास्करत्वोक्तेः । निमित्तत्वं सप्तम्यर्थः ॥ ८ ॥

'मूर्तैर्महद्भिः' इति न्यायेन प्रार्थयन्ते आचार्यवाच इत्यादि । उपजातिः । 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इति लक्षणात् । गाथाछन्दः । वस्तुतस्तु रचयन्तु भूषामिति पाठः प्रतिभाति । तथा चाख्यानकीछन्दः 'आख्यानकी तौ जगुरू गमोजे जतावनोजे जगुरू गुरुश्चेत्' इतिलक्षणात् । ओजे विषमे पादे । अनोजे समे । हस्ताक्षरपुस्तके त्वयमपाठः, अन्याक्षरैर्लिखितश्च । आगत्य कृपाप्लुता इत्यनेन वाचामाधिदैविकत्वं ध्वन्यते ॥ ९ ॥

भाष्यमवतारयन्ति अथेत्यादिना । भाष्ये परसवर्णाभावस्तु वैकुण्ठस्थतास्फोरकः, न व्याकरणविरोधाधायकः । सत्यलोक एव परसवर्णश्रवणात् । आकाशवाणीवत् । तथाहीति निदर्शनार्थसोल्लेखस्तु ब्रह्मभावात् । यतः सत्यलोकमभिव्याप्यैव तथाहीति प्रयोगो मया श्रुतः पूर्ववदेव । सोपि भाष्ये क्वचिदेव दृश्यते । वैकुण्ठस्थता तु श्रीमदाचार्याणां ब्रह्मभावेन सर्वरूपत्वात् स्फुटैव ।

'नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् ।
लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधिम्' इति-

दशमश्रीसुबोधिनीप्रारम्भश्लोकात्, असंधिस्तु शिवादिभिरपि अकरणात् तस्याः । युक्ता सेति सारोऽत्र । अथेति, अथशब्दः आरम्भार्थकः, । न त्वानन्तर्यार्थकः, आचार्यैः सूत्रपाठात् पूर्वं मङ्गलाकरणात् । तथा चाहुराचार्याः सुबोधिन्यामथ व्याख्या इति । निबन्धाद्यानन्तर्यं वा तदर्थः । स्वालौकिकानुभावो ब्रह्मवादलक्षणो (पत्रावलम्बनोक्तः) मायावादव्यतिरिक्तः । स्वस्य ब्रह्मणोऽलौकिको लोकोत्तरोऽनुभावो ब्रह्मज्ञानमनु पश्चाद्भावो भक्तिः प्रेम च यौगिकोर्थः, रूढो भिन्नः । कीदृगित्याकाङ्क्षायां ब्रह्मणो वादो यत्र त्वलौकिकानुभावेन 'ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः परः' इति

भाष्यप्रकाशः ।

स्वस्यानुभावस्य सर्ववेदान्ततात्पर्यगोचरत्वज्ञापनाय वेदार्थतामरसतरणेर्भगवतो बादरायणस्य सूत्राणि व्याकरिष्यमाणाः,

रश्मिः ।

निबन्धाद्यज्ञानमनु ब्रह्मभावो भक्तिः लक्ष्यते तेन लक्षणं, ब्रह्मवादो लक्षणं यस्य स्वालौकिकानुभावस्य लक्ष्यस्य स तथोक्तः । अनुभावस्वरूपं प्रथमे सुबोधिन्यां सप्तदशाध्याये 'इत्थंभूतानुभावः' इत्यत्रास्ति । मृतोपि जीवन् तिष्ठतीत्थंभूतानुभावः इति । [तथा चायं निष्कर्षः । उक्ते प्रतीतस्याप्रतीतस्य चार्थस्य स्वस्य ब्रह्मण आचार्याणां चालौकिको लोकानधिगतो योयमनुभावः । मानुषीं तनुमाश्रितस्य सन्मनुष्याकृतेश्च जगज्जन्मादिकर्तृत्वं सकलमतनिरासपूर्वकं अध्यायद्वयप्रतिपाद्यं साधनफलत्वे च । आचार्याणां तत्प्रतिपादकत्वं चतुर्षु अध्यायेषु स प्रथमस्कन्धारूढो यौगिकश्चेति यौगिको ज्ञानमनुभावो भक्तिस्वरूपोपि । तदुक्तं वल्लभाष्टके 'तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया' इति । व्याख्यातं च टीकाकृद्भिः] सर्ववेदान्तेति सर्ववेदान्तानां तात्पर्यगोचरत्वस्य ज्ञापनाय । अत्रेदं ज्ञेयम् । शक्तिलक्षणातात्पर्येषु तिसृषु वृत्तिषु तात्पर्यवृत्तिगोचरत्वमित्यम् । ननु तात्पर्यवृत्तिरेव नास्ति । तात्पर्यानुपपत्तेर्लक्षणाबीजत्वस्य 'यष्टीः प्रवेशय' 'काकेभ्यो दधि रक्ष्यताम्' इत्यादिषु स्पष्टतया वृत्तेर्वैयर्थ्यादिति चेत्, सत्यम्, वृत्तिद्वयपक्षोप्यस्ति । परेषामालंकारिकाणां वृत्तित्रयपक्षस्तु,

'भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य,
यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्' इत्यादौ

व्यञ्जनावृत्तिमन्तरेण निर्वाहाभावादिष्टः । न चात्र लक्षणयैव निर्वाह इति वाच्यम् । राजासंबन्धिनि गजे तदयोगात् । दूषणानां यौक्तिकत्वेन 'युक्तं च सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा' इति कृष्णवाक्यान्मुख्यार्थस्य बाधाभावाच्च । स्फुटमन्यत्प्रस्थानरत्नाकरे । एवं च वृत्तिद्वयपक्षेपीदं युक्तम् । तथा हि प्रस्थानरत्नाकरे द्वेधावृत्तिप्रपञ्चे व्यञ्जनास्थले तात्पर्यवृत्त्या निर्वाहाभिधागौणीतात्पर्यरूपास्तिस्रो वृत्तय आलंकारिकरीत्या वृत्तिपदसहिता व्यवस्थापिता इति 'भद्रात्मनः' इत्यादौ अभिधामूलव्यञ्जनास्थलेऽभिधामूलतात्पर्यवृत्तिस्वीकारः । दार्ष्टान्तिके तु तात्पर्यमात्रं न वृत्तिः । एवं च 'साद्धान्तिको लाक्षणिकः शब्दोत्र व्यञ्जकस्तथा' इत्यत्र 'साद्धान्तिको लाक्षणिकः शब्दस्तात्पर्यवांस्तथा' इत्येवं राद्धान्तिकपाठेपि 'यतो वाचो निवर्तन्ते' इति श्रुत्याऽस्यापि शब्दस्य निवृत्तेः । अतो मूले तात्पर्यमात्रमुक्तं, न वृत्तिपदम् । नन्वेवमप्यभिधामूलव्यञ्जनास्थले अभिधैव व्यापारो नातिरिक्ता व्यञ्जनेत्यादि उपपाद्य यथासंभवं तात्पर्यवृत्त्यर्थः धर्माभिधास्वन्तर्भावान्नातिरिक्ता व्यञ्जनेति पठनाद् 'भद्रात्मनः' इत्यादिस्थलेऽभिधादिवृत्तिप्राप्त्या दार्ष्टान्तिकेऽप्यभिधादिवृत्त्यावश्यकत्वात् त्रिविधशब्दस्य यच्छब्दार्थमूलब्रह्मणो निवृत्तिरिति चेत् मैवम् । ['यतो वाचः' इत्यस्या इदमित्यतया तत्स्वरूपे निरूपणनिषेधेन परत्वमत्रैव भाष्य ईक्षत्यधिकरणे वाक्शब्दत्वनिषेधेन सामान्यतो यच्छब्दार्थे ब्रह्मणि निर्गुणानन्दमात्रयच्छब्दाभिधायाः स्वीकारात् । नन्वेवं सति तात्पर्यगोचरत्वज्ञापनायेति मूलाशुद्धिरिति चेत्, न, सर्ववेदान्तपदपरत्वान्मूलस्य । एकापेक्षया बहूनामनुग्रहस्य न्याय्यत्वात् । 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः' इति गीतावाक्यादोमादाय सर्वाभिधादानं रभसात् । 'इदं सर्वं तस्योपव्याख्यानम्' इति श्रुतावुपोपसर्गेण पूर्वोक्तायादरणात् । यत उपे-

भाष्यप्रकाशः।

'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः' ॥

रश्मिः।

त्यस्य समीपार्थकत्वम्। अन्यथा यत इति श्रुतिभाष्यविरोधापातः। नन्वेवं सति विराजि नारायणादिरूपेषु 'नारायणादिरूपाणि'इत्यादिवक्ष्यमाणा वेदस्य वेदान्तानां चाभिधावृत्तिर्विराजि प्रमेयम्। 'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्। एतावान् सर्ववेदार्थः' इत्येकादशे निरुक्तात् जगद्व्यापारवर्जाधिकरणे यद्रूपमुक्तम्, तत्तु परं भावं जानतां तात्पर्यं, तदगोचरत्वं च। तत्र नूनं परस्मिन्भावेऽभिधावृत्तिर्गौणी वोह्यारोपव्याख्यानरूपत्वात्, सर्वस्य शब्दजातस्य घटादौ शक्तिसंकोच इत्याद्युपपादयिष्यते त्वया। किंच, तात्पर्यानुपपत्तिरूपबीजस्य सत्त्वाल्लक्षणया भवितव्यमिति चेत् न। परस्मिन्वृत्तिद्वयासंगतेः। 'यतः' इति श्रुत्येदमित्थतया वागप्राप्ये तद्व्यापारद्वयासंभवादिदमित्थतांशे। एवं च भाष्यप्रकाशोक्तवाक्येषु मूर्ता तस्य परं पदे श्रीमहाविष्णावभिधया वृत्त्या प्रवृत्तानां वैदिकानां शब्दानां परब्रह्मनिर्गुणानन्दमात्राधिपदशक्त्यै तेषां

'संयोगो, विप्रयोगश्च, साहचर्यं, विरोधिता,।
अर्थः, प्रकरणं, लिङ्गं, शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती, देशः, कालो, व्यक्तिः, स्वरादयः' इति

काव्यप्रकाशोदितैः प्रकरणादिभिः विशेषस्मारकैः परमस्मिन्तात्पर्येणान्येषां पदानां वैदान्तिकानां पुरुषोत्तमे प्रवृत्तिः। यथा 'भद्रात्मनः' इत्यादौ वारणपदसामर्थ्येन तात्पर्यव्यापकेनाभिधया वृत्त्या राज्ञि प्रवृत्तानामपि तात्पर्यवृत्तिर्वारणे इति। ननु व्यञ्जनावृत्तिर्वारणे न तात्पर्यवृत्तिः, सा त्वभिहितान्वयवादिनां मतम्। आकाङ्क्षायोग्यतासंनिधिवशाद्वक्ष्यमाणानां पदानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोपि वाक्यार्थः समुल्लसति। तत्रेति ये 'घटमानय, गामानय, शुक्लां दण्डेन देवदत्त' इत्यादौ पदानि स्वार्थमभिधायान्वितानि भवन्तीति वदन्ति तेऽभिहितान्वयवादिन इति चेत् न। यत् किंचित् घटमानय दुष्टां गामानयेत्यादौ यत्किंचित्त्वांशे दुष्टत्वांशे च तात्पर्यवृत्त्या पूर्वोक्तयैव निर्वाहात्। नन्वेवं सति जिज्ञासालक्षणसमन्वयेक्षत्यधिकरणेषु सामान्येषु विचाराभावेप्यानन्दमयाधिकरणेपि न विचारकः। परन्त्वन्तस्तद्धर्माधिकरणे सवितृमण्डलमध्यवर्तिनि शक्तिः, वैदिकानां पदानां नारायणादिरूपाणां न तात्पर्यम्। तल्लिङ्गाधिकरण आकाशादिपदानां सा, न तत्। अतिदेशाधिकरणे प्राणादिपदानां सा, न तत्। ज्योतिश्चरणाधिकरणे ज्योतिरादिपदानां शक्तिः, न तत्। अनुगमाधिकरणे प्राणपदस्य सा, न तत्। तात्पर्यं तु फलाध्याये ब्रह्मणि नित्यलीलाविशिष्टेऽतः प्रारम्भेऽभिधालक्षणशक्त्या विचारात् स्वालौकिकानुभावस्य तात्पर्यगोचरत्वं कथमिति चेत्, सत्यम्। उपासनया शुद्धान्तःकरणानां पुंसां भक्त्या पुरुषोत्तमाविर्भाव इति सिद्धान्तादुपासनाविषयाणां विभूतीनां भक्तिविषयस्य पुरुषोत्तमस्य अभिधया प्रतिपाद्यत्वेपि बाधकाभावात्। लौकिकानुभावत्वात्। नित्यलीलायां भक्तमनोरथपूरकस्य रसरूपस्य श्रीपुरुषोत्तमस्य तात्पर्यगोचरत्वमलौकिकानुभावत्वात्। यद्वा। निर्गुणात् सृष्टिरिति राद्धान्तात्तात्पर्यगोचरत्वमेवातिव्याप्तिवारणायेतराण्यधिकरणानीति निर्गुणत्वात् तेषां वाच्यांशे तात्पर्यगोचरत्वमेव। ननु सर्वैरेव भाष्यकृद्भिरेवं व्याख्यानात्

भाष्यप्रकाशः ।

इति भाष्यलक्षणात् सूत्रोपन्यास एवानुसरणसिद्धेः स्वकृतेरादित एव भाष्यत्वाय सूत्री-

रश्मिः ।

कथं स्वालौकिकानुभावप्रकटनमिति चेन्मैवम् । तैः सगुणब्रह्मणः सकाशात् सृष्टिरिति निरूपणान्न तात्पर्यविषयत्वम्, किंतु ह्यभिधेयत्वमिति, लौकिकत्वात् । तत्र ब्रह्मनिर्गुणादिपदानामभिधामूलं तात्पर्यम्, ब्रह्मणि नारायणादिपदानां कथमु तात्पर्यं, लक्षणाया अप्यभावेन लक्षणामूलव्यञ्जनापरपर्यायतात्पर्यस्याप्यभावादिति चेन्न । जन्यजनकभावसंबन्धस्य शक्यसंबन्धस्य सत्त्वेन लक्षणा गौणीरूपा भविष्यति, सति प्रमाणे तात्पर्यं त्वलौकिकपरमोत्कृष्टत्वे, यथा 'गङ्गायां घोष' इत्यत्र शक्यस्य प्रवाहस्य संबन्धः संयोगः, तस्य तीरे सत्त्वात्तीरे लक्षणा, शैत्यपावनादौ तदभावात्, तात्पर्यवृत्तिरालंकारिकाणां तथा तात्पर्यम् । फलं तु बृहद्वामनपुराणे उत्तरखिले च शाब्दं बोधरूपम् ।

'श्रुतय ऊचुः—नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत ।

सगुणं ब्रह्म सर्वेदं वस्तुबुद्धिर्न तेषु नः ॥ १ ॥
ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम् ।
वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तत् ॥ २ ॥
आनन्दमात्रमिति यद्वदन्ति हि पुराविदः' इति ।

अत्रायं नारायण इत्यादौ ह्यभिधावृत्त्याऽखिलभागवतोक्तधर्मवत्त्वेन नारायणज्ञानमीप्सितम् । परं तु नराणां समूहो नारं तदयनं यस्येति सगुणनारायणपदविग्रहाभावे नारा आपः ता अयनं यस्येति विग्रहे, ब्रह्मेदमित्यादौ न तथापि तु ब्रह्मत्वेन ज्ञानमिति ह्यशेषतत्स्थधर्मवत्त्वेनाज्ञानमेव । तात्पर्यवृत्त्या तु ज्ञानमेव । 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र दध्युपघातकज्ञानवत् । प्रस्थानरत्नाकरे तु स्वमतनिरूपणावसरे यदुक्तमभिधामूलव्यञ्जनास्थलेप्यभिधैव व्यापारो नातिरिक्ता व्यञ्जना । वक्ता स्वविवक्षितबोधोत्पादनाय संयोगाद्यैस्तस्या एकत्र नियमनेप्यभिधेयान्तराभिधाविषयकसंस्कारस्य सदृशादिभिरुद्बोधे तयैवाभिधेयान्तरस्फूर्तिसिद्धौ वृत्त्यन्तरकल्पनस्य व्यसनमात्रत्वात् । न च संयोगादीनां संस्कारोद्बोधप्रतिबन्धकत्वं शक्यवचनम् । 'अस्याननं योनिरुदारवाचाम्' इत्यत्र पदान्तरसाहचर्येप्यश्लीलानुसंधानजन्यजुगुप्साया अनुभूयमानत्वादिति । तत्तु 'भद्रात्मनः' इत्यादौ विलक्षणबोधस्य गजांशेऽनुभूयमानस्य तथाङ्गीकारमाश्रित्य, पूर्वोक्तं तु तमाश्रित्येति ज्ञेयम् । प्रकृतमुच्यते । द्वेधावृत्तिपक्षेपि जुगुप्सितावाचकत्वे तत्प्रतीतिजनकत्वस्य तात्पर्यवृत्तिलक्षणत्वात् फललक्षणादिव्यञ्जनान्तानां तात्पर्यवृत्तावेवाभिनिवेशेन शक्तिगौणीरूपं वृत्तिद्वयमस्माकं शक्तिलक्षणात्मकं तु परेषाम् । परंतु तात्पर्यस्याभिधायामन्तर्भावे, अनन्तरभावे तु वृत्तित्रयम् ।] इति भाष्यलक्षणादिति । अत्र सूत्रानुसारित्वे सति यद्वाक्यघटकं स्वपदवर्णकं तत्त्वं भाष्यलक्षणं पर्यवसन्नम् । तच्च 'साङ्गोऽध्येयः' इत्यादि स्वोक्तस्य 'अर्थज्ञानार्थम्' इत्यादिना वर्णनादत्र समन्वितम् । महाभाष्येपि 'अथ शब्दानुशासनम्' इत्यादिस्वोक्तस्य 'अथेत्ययं शब्दोऽधिकारार्थः' इत्यादिना वर्णनात् समन्वितम् । गुरञ्जनोपाख्यानेऽतिव्याप्तिवारणाय सत्यन्तम् । वृत्तावतिव्याप्तिवारणाय विशेष्यम् । सूत्रानुसारित्वं च न सूत्रानुगुणत्वम् । तथा सति 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' इत्यादिश्रुतौ 'चमसवदविशेषात्' इति सूत्रानुगुणायामतिव्याप्तिः, अतः सूत्रानुसारिव्याख्यानत्वं तदर्थः । प्रसिद्धश्रुतावपि ज्ञेयम् । 'ब्रह्मविदाप्नोति परम्' इत्यादौ । तथा च सूत्राणां

अथातो ब्रह्मजिज्ञासा ॥ १ ॥ (१-१-१)

भाष्यप्रकाशः।

याथशब्देनैव मङ्गलसिद्धेश्च सूत्रमेवादौ पठन्ति अथातो ब्रह्मजिज्ञासेति। नच मङ्गलाचरणान्तरादर्शनाच्छिष्टाचारविरोधः शङ्कनीयः। महाभाष्ययोगभाष्ययोर्ग्रन्थकृत्कृतस्याथशब्दाति-

रश्मिः।

श्रुत्यनुसारित्वान्नातिव्याप्तिः आर्थिकार्थस्पर्श्यध्यासभाष्येपि न सेति। यत्तु शंकराचार्यैः 'शास्त्रयोनित्वात्' इति सूत्रांशं प्रथमान्तत्वेनानन्दमयाधिकरणं च भङ्क्त्वोत्सूत्रं व्याख्यातम्, 'भावे चोपलब्धेः' इति सूत्रं 'भावाच्चोपलब्धेः' इति पाठं भित्त्वा व्याख्यातम्, माध्वरामानुजभास्कराचार्यैः 'सामाव्यापत्तिरुपपत्तेः' इति सूत्रं 'स्वामाव्यापत्तिः' इत्येवं पाठं भित्त्वा व्याख्यातम्' तत्राव्याप्तिर्न दोषाय, अन्यत्र तु गौण्या निर्वाहः। सूत्रमेवेति। सर्वतः सारभूतार्थबोधकत्वे सूचकत्वे च सति स्वल्पाक्षरपदत्वमिति सूत्रलक्षणम्। 'खल्वहं ब्रह्म सूत्रं' सूचनात्सूत्रम्' इत्यारुणिश्रुतेः।

'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च, ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः' ॥

इति स्मृतेश्च। वस्तुतस्तु यत्राभियुक्तानां सूत्रत्वव्यवहारस्तानि सूत्राणीति। अतो महति 'अचतुरविचतुर'इत्यस्मिन्पाणिनीये सूत्रे नाव्याप्तिः ॥

अथातो ब्रह्मजिज्ञासेति इति ॥ १ ॥ प्रतीकमिदम्, क्रियाविशेषणं तृतीयान्तव्यतिरिक्तम्। तृतीयान्तं तु करणमिति विवेकः। ननु ब्रह्मपदेन किमुच्यते प्राणो वा ब्रह्मैव वा। तथाहि 'एष उ एव बृहस्पतिः' इति श्रुतेः प्राण एष प्राण इत्यर्थात्। न च प्राणेत्यनया श्रुत्या बृहस्पतित्वं विहितम्, न ब्रह्मत्वमिति वाच्यम्। 'ब्रह्म वै देवानां बृहस्पतिः' इत्यारण्यकसमाप्तिग्रन्थस्थश्रुतेरिति चेत्, मैवम्। द्वितीयाध्याये चतुर्थचरणे 'श्रेष्ठश्च' इत्यधिकरणे 'न वायुक्रिये पृथगुपदेशात्' इति सूत्रे प्राणस्योपपादिततत्त्वान्तरकत्वात्। न च ब्रह्मापेक्षया ब्रह्मणस्पतिजिज्ञासा प्रस्तोतव्येति शङ्क्यम्। बृहदारण्यके 'एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एषे पतिस्तस्मादु ब्रह्मणस्पतिः' इतिश्रुत्योर्ब्रह्मपदेन वाग्ग्रहणेनादोषात्, तत्त्वान्तरत्वाच्चेति। अत एव जिज्ञासासूत्रे ब्रह्मपदेन वेदान्ता गृहीताः। 'वाग्वै ब्रह्म' इति श्रुतेः। न च शुकादिप्रभृतीनां जिज्ञासा जैमिनिसूत्रानुसारेणाधिकर्तव्येति वाच्यम्। पौर्वतन्त्रीयत्वात्। 'न च वेदादृते किञ्चिच्छास्त्रं ब्रह्माभिधायकम्' इति महाकौर्म्यात्। 'नन्वेवमपि स दोषस्तदवस्थ एवेति चेत्, न। जैमिनेर्भगवतो व्यासस्य शिष्यत्वाच्छास्त्रभेदाच्च। न च वेदजिज्ञासाधिकर्तव्या नामाख्यातोपसर्गनिपातादिभिर्धर्मजिज्ञासया षडङ्गैरितराङ्गैश्च तस्या निराकाङ्क्षत्वात्। इतरत् सर्वं साधनाध्यायतुर्यपादेऽचीकृपन्नाचार्याः अतस्ततोऽवधेयम्। शङ्कनीय इति तर्कितव्य इत्यर्थः। आङ्पूर्वस्याप्ययमर्थः। ग्रन्थकृत्कृतस्येति। तत्र ग्रन्थो नाम संबन्धप्रयोजनज्ञानाधीनशुश्रूषाजन्यश्रुतिविषयः संदर्भः।

'सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते।
शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजनः' ॥

---

१. अस्मत्सविधे द्वित्राणि रश्मेः पुस्तकानि सन्ति, तेषां रश्मिकारसंशोधितं पुस्तकं शुद्धं समीचीनं च। तत्र इत आरभ्य एकोनविंशतिः पत्राणि न लभ्यन्ते तदर्थमतीव प्रयतितेऽपि तत् संपादने न सफलप्रयत्ना वयम्। ग्रन्थान्तराणि तु अशुद्धिपुञ्जदूषितानि न विश्वसनीयानि तथापि तदवलम्बनेन ग्रन्थसंशोधने कृते बहूनि स्खलितानि नयनपथातिथीनि भवन्ति तानि विद्वद्भिः संशोध्यानि इत्यभ्यर्थ्यते शुद्धिकृद्भिः। 8

इदमत्र विचार्यते । वेदान्तानां विचार आरम्भणीयो न वेति ।

भाष्यप्रकाशः ।

रिक्तस्य मङ्गलस्यादर्शनेन, शाबरभाष्ये च 'अथातो धर्मजिज्ञासा' इति सूत्रमेवोपन्यस्य भाष्यारम्भदर्शनेन च विरोधाभावादिति । अस्यारम्भसूत्रत्वादत्राधिकारिविषयसंबन्धप्रयोजननिरूपणद्वारा शास्त्रारम्भः समर्थनीयः । शास्त्रप्रवृत्त्यावश्यकत्वहेतुरूपा संगतिश्च निरूपणीया । अन्यथा प्रेक्षावत्प्रवृत्त्यभावेन शास्त्रवैयर्थ्यं स्यात् । शास्त्रस्य वैधत्वमपि विचारणीयम् । अन्यथा वेदान्तानुपयुक्तत्वं, प्रामाणिकानादरणीयत्वं च स्यात् । गदिदं सर्वं हृदि कृत्वा भगवता श्रीबादरायणाचार्येणेदमधिकरणरूपं सूत्रं प्रणीयते, न तु ब्रह्मविचारप्रतिज्ञामात्रमत्र क्रियत इत्याशयेनाहुः इदमित्यादि ।

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
संगतिश्चेति पञ्चाङ्गं शास्त्रेधिकरणं स्मृतम्' ॥

इति लक्षणाद् विषयादिपञ्चकघटितं वाक्यमधिकरणम् । तेनास्मिन् सूत्रे, इदं वक्ष्यमाणं बुद्धिस्थं विचार्यते । अग्रिमसूत्रेषु वेदान्तानां विचारणीयत्वादुपोद्घातेन चिन्त्यत इत्यर्थः । विषयादिकमाहुः वेदान्तानामित्यादि । नन्वत्रायं विषयाद्युपन्यासो न युक्तः, असौत्रत्वात् ।

रश्मिः ।

इत्युक्तेः शुश्रूषायाः संबन्धप्रयोजनज्ञानाधीनत्वम् । तर्ह्यथेति मङ्गलेनापि भाव्यं तत्राहुः शाबरभाष्ये चेति । अन्यथेति वैधत्वाभाव इत्यर्थः । प्रणीयत इति । स्येति शेषः । उपोद्घातेनेति । तेनोपोद्घातोत्र संगतिरित्युक्तम् । तत्त्वं च प्रकृतसिद्ध्यनुकूलचिन्ताकालावच्छेदेन प्रकृतानुकूलत्वं प्रकृतोपपादकत्वं वा । एवमपि विशेषलक्षणसमन्वयेपि सामान्यलक्षणस्यानन्तर्याभिधानघटितत्वेनास्य सूत्रस्य च प्राथम्यान्न नैयायिकलक्षणसमन्वयः । किंतु, अधिकरणस्य पञ्चावयवत्वेन 'अथातो ब्रह्मजिज्ञासा' इति सावधानपुरुषप्रयुज्यमानवाक्यप्रयोजनकप्रकृतोपपादकत्वावच्छेदकेन ब्रह्मभक्तिविचारत्वेन रूपेण स्मृतस्य ब्रह्मभक्तिविचारस्योपेक्षानर्हत्वमित्येवं संगतिसिद्धान्तलक्षणसमन्वय इति बोध्यम् । इदं चेक्षत्यधिकरणे संगतिग्रन्थनिरूपणावसरे स्फुटमुपपाद्यम्, इयं चाध्यायानां पादानां च संगतिः । त्रिपदं जिज्ञासासूत्रं अथातो ब्रह्मजिज्ञासेति । तत्र अतःशब्दार्थः स्वयमग्रे वक्तव्यः । तस्याधिकरणरचनानुपयोगात् । ब्रह्मशब्दार्थो वेदान्तानामिति । जिज्ञासाशब्दार्थो विचारः । अथशब्दार्थः आरम्भः । कर्तव्यादिपदाध्याहारापेक्षयारम्भो घञन्तादिरत आरम्भणीयो रभिरनीयर्प्रत्ययान्तः । अत उक्तं वेदान्तानां विचार आरम्भणीयो नवेति । अत्र प्रतीतार्थग्राहित्ववादी तु शङ्कते नन्वत्रेति । असौत्रेति । सौत्रः प्रतीतोर्थः तद्भिन्नत्वात् । तद्विषयादिकमाहुः विषयादिकमाहुरिति । सूत्रे ब्रह्मपदस्य वेदेपि वृत्तिदर्शनेन तत्संबन्धिवेदान्तानां सूचनेन ब्रह्मपरत्वेपि ब्रह्मजिज्ञासेति शेषषष्ठ्या समासस्य वक्ष्यमाणत्वेन च जिज्ञासापदस्य विचारार्थकत्वस्य च तथात्वेनाथशब्दस्यारम्भापरपर्यायाधिकारार्थत्वस्यापि तथात्वेनायमेव विषयादिरित्याशयेन विषयादिकमाहुरित्यर्थः । वेदान्तानां विचार आरम्भणीयो न वेति भाष्यात् । आरम्भार्थ उद्यम एवोत्तरत्रानुवृत्तिरूपाधिकारनिवेशाच्चेति । तथाहि, उद्यमत्वे सत्युत्तरत्रानुवृत्तिरासमन्तात् तादृशारम्भार्थः । भाष्ये विचार इति । सूत्रैर्वस्तुतत्त्वपरीक्षणमित्यर्थः । मीमांसेति यावत् । शेषे षष्ठी । अन्यथा, 'स्मृतेश्च' इत्यादिसूत्रेषु स्मृतीनां विचारकर्मता

भाष्यप्रकाशः ।

किंतु ब्रह्मजिज्ञासा कार्या न वा, ब्रह्म जिज्ञास्यं न वा, इत्येवं सूत्रानुसरणाद् युक्त इति चेन्न। तथोपन्यासे, ‘तपसा ब्रह्म विजिज्ञासस्व’ इतिश्रुत्या तपस एवोपदेशात् तद्विहाय व्यासपादैः किमिति वेदान्तवाक्यानि विचार्यन्ते, तपः कुतो नोपदिश्यत इत्याशङ्का स्यात्, श्रुतिविरुद्धत्वं च भायात् । एवमुपन्यासे त्वधीतवेदस्य, ‘वेदान्तविज्ञानसुनिश्चितार्थाः’ इति श्रुतिस्फुरणादस्यां च श्रुतावर्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुताकथनात् तस्य च विचारसाध्यत्वात् तत्स्फूर्त्याशङ्कानुदयाद् युक्त इति ।

किंच । जिज्ञासापदस्य च यौगिकार्थ एव प्रायः प्रसिद्ध इति ब्रह्मज्ञानेच्छा कर्तव्या न वा, ब्रह्म ज्ञानेच्छाविषयं कार्यं न वेति प्रथमतो बोधे, ततस्तावन्मात्रस्यापुरुषार्थत्वात् तत्रानुपपत्तौ भातायां पश्चाद् विचारं लक्षयित्वा ततस्तत्कर्तव्यत्वादिकं विचार्यम् । तदपि वेदान्तैरेव वक्ष्यमाणरीत्या विचार्यम् । अन्यथाकस्मिकता स्यात् । अत आवश्यकत्वादपि युक्तः ।

रश्मिः ।

न स्यात् । स्मृतयो विचार्यन्त इति । कर्मषष्ठ्या स्मृतीनां विचाराकर्मत्वात् । तथाच कर्मषष्ठीपरिग्रहे प्रतिज्ञाहान्याख्यनिग्रहस्थानापत्तिः । प्रकृते किंतु ब्रह्मेति । ब्रह्मपदेन वेदान्ताः । अन्वयोनुपपत्त्या अध्याहारनिवृत्तये वा पक्षान्तरमाहुः ब्रह्म जिज्ञास्यं न वेति । तपसेति । नन्वियं श्रुतिः ब्रह्मप्रत्यक्षात्मकज्ञानसाधनविचारसाधनं तपः संतापात्मकमाह, द्वितीयस्कन्धनवमाध्याये तथोक्तेः । वेदान्तवाक्यानि तूपाङ्गत्वेन विचार्यन्त इति उपाङ्गविषयत्वाभावादिति चेत् तत्राहुः इत्याशङ्केति । तथा च तर्कस्यान्यथाज्ञानत्वादुपाङ्गविषयेपि प्रत्यक्षसाधकविचारसाधनतपःप्रतिपादकश्रुतिस्फुरणमिति भावः । विचार्यन्त इति । सूत्रान्तरेषु विचार्यन्त इत्यर्थः । श्रुतिस्फुरणादिति । नन्वितिकरणाभावात् कथं वेदान्तानामिति पदस्य ‘वेदान्तविज्ञाने’ति श्रुतौ वेदान्तानामित्यन्तर्वर्तिविभक्तिमाश्रित्य वाक्यप्रतीकत्वमिति चेन्नैवम् । ‘यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकम्’ इत्युपक्रम्य ‘सर्वं विष्णुमयं गिरोङ्गवदजः सर्वस्वरूपो बभौ’ इति प्रक्षिप्ताध्यायश्लोके सर्वं विष्णुमयमिति पदद्वयस्येतिकरणाभावेपि सर्वं विष्णुमयं जगदिति वाक्यप्रतीकतायाः श्रीधरैः स्वीकारात् । आचार्यैरप्येवमिति । नन्वेवमपि सूत्रेण ‘तपसा ब्रह्म विजिज्ञासस्व’ इति श्रुतिस्फुरणस्य दुर्वारत्वेन तस्यां च तपसो ब्रह्मजिज्ञासाकारणतोपन्यासेन वेदान्तश्रुतिस्फुरणात्, तस्यां चार्थविचारस्य वेदान्तज्ञानकारणता, एवं चोभयोरर्थयोः स्फुरणमधिकम्, न तु शङ्कानुदय इत्यरुच्याहुः किंचेति । ब्रह्म, ज्ञानेच्छाविषयं कार्यं न वेति । क्रियाविशेषणत्वाद्द्वितीयान्तम्, आर्दिं पचतीतिवत् । सार्थकप्रत्ययान्तधातूपस्थाप्यक्रियाविशेषणानां कर्मत्वमिति व्युत्पत्तेः । उभयलिङ्गता वा विषयपदस्य । तत्रेति यौगिकार्थ इत्यर्थः । लक्षयित्वेति स्वसाध्यत्वाख्यसंबन्धेन लक्षयित्वेत्यर्थः । नन्वेवमपि स्फुरितश्रुतिविरोधो नापैतीति चेत् न । तपो न मुख्यसाधनमित्यानन्दमयाधिकरणे वक्ष्यमाणत्वादिति, करणाभावश्रुतेरस्फुरणमेव वा । न्यायस्य कापि-

---

१. अन्वयेति पाठः ।

भाष्यप्रकाशः।

किंच। व्यासप्रवृत्तिबीजबोधनार्थत्वेनापि युक्तः। तथाहि। प्रथमस्कन्धे चतुर्थाध्याये 'द्वापरे समनुप्राप्ते' इत्यारभ्य, 'एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः' इत्यन्तेन सर्वेषां श्रेयोऽर्थं प्रवृत्तिर्व्यासचरणानामुक्ता। पञ्चमे च, 'जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनम्' इति नारदेन ब्रह्मविचारान्तायाः कृतेस्तथात्वं बोधितम्। तथाच ज्ञानविधिनार्थज्ञानार्थं प्रवृत्तानपि यदा जैमिनीयादिदर्शनैरेकदेशीयविरुद्धज्ञानवतो दृष्टवांस्तदा भारतकरणोत्तरमत्र प्रवृत्तः वेदार्थनिश्चयो वेदान्तार्थनिश्चयं विना न भविष्यतीति। अत एवात्राग्रे वेदान्तवाक्यैरेव ब्रह्मविचारदर्शनं ब्रह्मणि सर्ववेदार्थत्वस्याग्रे स्थाप्यत्वाच्च। तदर्थं वेदान्तविचारावश्यकत्वमवश्यं साधनीयम्। तेन तत्र हेत्वाकाङ्क्षोपशमात्। अतस्तदुपोद्घाततयायं विचारोऽपि शेषषष्ठ्यन्तब्रह्मपदादेव बोध्यत इति सौत्रत्वाद् युक्त इति।

रश्मिः।

स्कत्वात्। वस्तुतस्तु निबन्धे विद्यापर्वसु विचाररूपतपोग्रहणादाह तपसा ब्रह्म विजिज्ञासस्वेति। अनशनादेर्विचारसाधकत्वात्। तस्मान्न विरोध इति। तत्त्वं तु तपसेति श्रुतिः प्रत्यक्षज्ञानसाधनं तपोरूपसंतापमाह। द्वितीयस्कन्धे नवमाध्याये यद्ब्रह्म कृतं नोपाङ्गरूपवेदान्तविचारोपयुक्तं किंचिदाह। 'अन्नं ब्रह्मेति व्यजनात्' इत्यादौ प्रत्यक्षज्ञानस्वीकारादत्र तु शाब्दमिति न 'तपसा'इत्यस्याः श्रुतेर्विषय इति। तथाप्यसौत्रत्वापरिहारो वेदान्तविचारस्येति पक्षान्तरमाह किंचेति। ज्ञानविधिनेति। ज्ञेयश्चेत्यनेनेत्यर्थः। वेदार्थेत्यादि। तथा च संहितानुक्रमणिकायां।

'रहस्यमूलं ऋक्पर्णो यजुःपुष्पप्रवालवान्।
यज्ञकर्मफलः श्रीमान् विप्रभ्रमरसेवितः॥
छन्दःस्कन्धः शाखाशाखो ब्राह्मो वृक्षः साक्षादेषः।
यस्तं विद्वान् महर्षिर्विप्रवर्य स स्वर्गं गच्छेदाप्त्वा कीर्तिम्।' इति। रहस्यं वेदान्ताः।

तत्रेति। अग्रिमसूत्रेषु वेदान्तविचार इत्यर्थः। युक्त इतीति। उपलक्षणमेतत्। ब्रह्म वेदवेदान्तौ, जिज्ञासा विचार इत्येवं सौत्रत्वस्य। एवं च 'जिज्ञासितमधीतं च यत् तत् ब्रह्म सनातनम्' इति वाक्यात् सूत्रेण वेदान्तानां विचार आरम्भणीयो[1] न वेति ब्रह्मपदाद् वेदवाचकादेव लभ्यते संशयः। वेदान्तत्वेन ब्रह्मोपादाने तु द्वितीयकोटौ बीजाभावमापद्येत। यद्यपि ब्रह्मशब्दो वेदे प्रयुक्तः उक्तवाक्ये, तथापि वेदपदमपहाय यद् ब्रह्मपदमुक्तं तेनार्थरूपब्रह्मजिज्ञासापि ध्वन्यते। तद्ध्वनितार्थमादाय भाष्यप्रकाशे संदर्भः कियान्प्रवृत्तो रश्मेरुत्तरोपि। इत्थं च यस्मात् कर्मादिभ्यो ज्ञानं माहात्म्यैक्यज्ञानरूपां भक्तिं व्यापारीकृत्य यद्वा गीतोक्तं ज्ञानं पुरुषार्थस्य दुःखाभावस्य सुखस्य च साधनमतः कारणान्माहात्म्यैक्यरूपज्ञानायाथवा गीतोक्ताय ब्रह्मणां वेदान्तानां विचारः, वेदान्तानामिति शेषे षष्ठी, तथा च वेदान्तप्रतिपाद्यवस्तुतत्त्वपरीक्षणमिति वेदान्तप्रतिपाद्याभिन्नविचार इति बोधः। प्रतिपाद्यप्रतिपादकभावसंबन्धे षष्ठीति सर्वं सुष्ठु। विचारान्तःप्रविष्टवस्तुरूपार्थमादायोत्तरः संदर्भो रश्मेः प्रपत्स्यते इति। पूर्वतःप्रसिद्धं विषयलक्षणमाहुः

---

[1] आरम्भणीयानारम्भणीयविचारः।

किं तावत् प्राप्तम् । नारम्भणीय इति । कुतः ।
साङ्गोऽध्येयस्तथा ज्ञेयो वेदः

भाष्यप्रकाशः ।

तत्र विषयो नामापाततः प्रतिपन्नः संदिग्धोऽर्थः । तादृशश्चात्र वेदान्तविचारो न तु वेदान्ताः । तेषामग्रिमसूत्रेषु विचार्यत्वात् । विशयः संशयः । एकधर्मिकविरुद्धकोटिद्वयावगाहि ज्ञानम् । तदाकारश्चात्र, आरम्भणीयो न वेत्यनेनोक्तः । पूर्वपक्षः प्रतिवादिमतम् । तदाहुः नारम्भणीय इति । तत्र पृच्छति कुत इति । 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति श्रुतावर्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुताबोधनाद् विचारं विना च तदसंभवात् स आवश्यक इति कुतो नेत्युच्यत इत्यर्थः । एवं प्रश्ने प्रतिवादी अनारम्भणीयतामुपपादयन् गृह्णाति साङ्ग इत्यादि । अयमर्थः । वेदान्तविचारस्यारम्भणीयत्वं वदता सिद्धान्तिना विधिप्रयुक्तयारम्भणीयत्वं वक्तव्यम् । तत्र विचारे प्रत्यक्षविधेरदर्शनात् कथंचिद् कुतश्चिद् वैधत्वं साधनीयम् । ततश्च कर्मादिविधिभ्यस्तत्सिद्ध्यसंभवादध्ययनादिविधिभ्यः साधनीयम् । तत्र, 'स्वाध्यायोऽध्येतव्यः' इत्येकः । 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इत्यपरः । 'साङ्गो वेदोऽध्येयो ज्ञेयश्च' इत्यन्यः । एते त्रयः पूर्वकाण्डस्थाः । 'श्रोतव्यः' इत्यादिरुत्तरकाण्डस्थश्चेतरः ।

तत्र भाट्टास्तावदेवं मन्यन्ते । अध्ययनविधेरक्षरग्रहणमात्रपर्यवसानेऽदृष्टकल्पनापत्तेरर्थज्ञानरूपदृष्टफलार्थतैव युक्ता । न च विमतं वेदाध्ययनमर्थज्ञानहेतुरध्ययनत्वाद् भारताध्ययनवदित्यनुमानेनाध्ययनस्य स्वाध्यायसंस्कारद्वाराऽर्थज्ञानहेतुत्वप्राप्तेर्न तावत्पर्यन्तं विधिव्यापारो युक्त इति वाच्यम् । विमतं वेदाध्ययनं नार्थज्ञानहेतुर्वेदाध्ययनत्वादाधुनिकाध्ययनवदिति प्रत्यनुमानेन तद्बाधात् । न च लोकेऽवगतसामर्थ्यानां शब्दानां वेदेऽपि बोधकत्वाल्लिखितपाठादिनाऽप्यर्थज्ञानसंभवाच्चार्थबलादेव तत्प्राप्तेरर्थज्ञानांशे तस्यापूर्वविधित्वाभावाच्च तत्पर्यन्तं विधिव्यापारो युज्यत

रश्मिः ।

तत्र विषय इत्यादि । वेदान्तविचार इति । 'जन्माद्यस्य यतः' इत्यारभ्य 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इत्यन्तसूत्रजातं ब्रह्मविचारशास्त्रं तत्तादृशमित्यर्थः । वेदान्तविज्ञानेति बुद्धिर्विज्ञानं मन्तव्यमिति प्रसिद्धश्रुतिमपहाय श्रुत्यन्तरोपन्यासोनेकश्रुत्यनुगृहीतत्त्वार्थः । तदसंभवादिति । वेदान्तविज्ञानजन्यनिश्चितार्थे सुष्ठु (असंदिग्धोपि वेदार्थ इति भाष्येप्याह) तस्यासंभवादित्यर्थः । गृह्णातीति हेतून् संगृह्णातीत्यर्थः । यदि च प्रतीकमत्र कर्मत्वेनान्वेति तदा तु शेषोपि पूरणीयः । प्रथमप्रतीकेपि सूत्रविशेषणं भवितुमर्हति प्रतीकं 'अथातो ब्रह्मजिज्ञासा' इति सूत्रमेवादौ पठन्तीति । तथा च त्रेधान्वयः प्रतीकस्य कर्मत्वेनाऽभेदेन करणत्वेन चेति सिद्धम् । तत्र स्वाध्याय इत्यादि । अत्राद्यं वाक्यं तैत्तिरीयब्राह्मणस्थम्, अन्यद्वाक्यद्वयं शाखान्तरीयम् । अध्यापयीतेत्यत्राध्यापयेदिति केचित् पठन्ति, तृतीयं च 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति पठन्ति । स्वाध्यायसंस्कारद्वारेति । 'अपहतपाप्मा स्वाध्यायो देवपवित्रमिति' श्रुतेरपहतपाप्मत्वमादिपदोक्तमयातयामत्वं च तद्रूपसंस्कारद्वारेत्यर्थः । अथवा स्वाध्याय एव संस्कारस्तद्द्वारेत्यर्थः । अध्ययनं वेदे स्वाध्यायतासंपादनं यदर्थज्ञानहेतुरिति यावत् । विधिव्यापार इति शाब्दी प्रवर्तनेत्यर्थः । दृष्टान्तवैषम्यान्नियमविधिमाक्षिपन् शङ्कां निषेधति

भाष्यप्रकाशः ।

इति वाच्यम् । अर्थज्ञानांशेऽस्य नियमविधित्वाङ्गीकारात् । न च यथाऽवघातनिष्पन्नैरेव तण्डुलैर्दर्शपूर्णमासापूर्वसिद्धिर्न पेषणादिनिष्पन्नैस्तथाऽध्ययनावगतेनैवार्थेन क्रत्वपूर्वसिद्धिर्न तु प्रकारान्तरावगतेनेति फलांशे नियमविधित्वं न युक्तम्, अनारभ्याधीतत्वेन श्रुत्याद्यभावेन च क्रत्वर्थताया अशक्यवचनत्वादिति वाच्यम् । वैदिकशब्दानां विलक्षणत्वेन पूर्वोक्तरीत्या सम्यगर्थज्ञानाभावे गृहस्थादीनां द्रव्यादियज्ञासिद्धेः सर्वधर्मलोपप्रसङ्गात् । अतः पूर्वोक्तदूषणेनापूर्वविधित्वनियमविधित्वयोरशक्यवचनत्वेऽपि, 'वसन्ते ब्राह्मणमुपनयीत' इत्यादिवाक्येषु द्वितीयानिर्देशेन तेषां संस्कार्यत्वावगमात् संस्कारस्य च कार्यान्तरयोग्यतासंपादनरूपत्वादुपनयनसंस्कृतानां त्रैवर्णिकानां कार्यान्तरापेक्षत्वेन तत्संनिधिपठितस्याध्ययनस्य चानिर्दिष्टकर्तृकतया कर्त्रपेक्षत्वेन परस्पराकाङ्क्षासंनिधियोग्यत्वैस्त्रैवर्णिकानां यज्ञरूपकार्यान्तराधिकारनियमार्थत्वस्याध्ययनविधौ सुखेन संभवात् । एवं चाधानाग्निहोत्रादिविधयस्त्रैवर्णिकेषु विद्वत्सु सत्सु तानेवाधिकुर्वन्ति । अन्यथा चतुर्थादेरप्याक्षिपेरन् । सोऽयमधिकारो वक्ष्यमाणेऽपशूद्राधिकरणेऽध्ययनविधिप्रसादलभ्य इत्यध्ययनविधिरर्थज्ञानपर्यवसायीति ।

प्राभाकरास्तु, 'संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' इत्याचार्यकरणे विहितेनोपनयीतेत्यात्मनेपदेनोपनयनरूपस्य माणवकसंस्कारस्याचार्यत्वसिद्धिप्रयोजनताप्रत्ययेऽपि,

रश्मिः ।

न च यथेति । **दर्शपूर्णमासापूर्वसिद्धिरिति** । अवान्तरापूर्वद्वारेण दर्शपूर्णमासपरमापूर्वसिद्धिरित्यर्थः । **श्रुत्याद्यभावेनेति** । निरपेक्षो रवः श्रुतिः । आदिना लिङ्गादयः । **वैदिकेत्यादि** । स्वरादिकृतं वैलक्षण्यम् । स्फुटं प्रस्थानरत्नाकरे इदम् । **द्रव्यादियज्ञासिद्धेरिति** । 'द्रव्ययज्ञास्तपोयज्ञाः' इति गीतोदितास्त इत्यर्थः । **सर्वधर्मलोपप्रसङ्गादिति** । अतोऽनारभ्याधीतत्वेपि क्रत्वर्थतावश्यमभ्युपेयेत्यर्थः । **अत इति** । क्रत्वर्थत्वादित्यर्थः । सर्वधर्मलोपप्रसङ्गादित्यर्थो वा । एतच्च यज्ञरूपेत्यादिनान्वेति । **पूर्वोक्तदूषणेनेति** लिखितपाठादिनार्थज्ञानसंभवरूपेण दृष्टान्तवैषम्यरूपेण चेत्यर्थः । **संस्कार्यत्वावगमादिति** । आप्यत्वोत्पाद्यत्वयोरसंभवेन तथात्वावगमादित्यर्थः । **यज्ञरूपकार्यान्तरेति** । स्वाध्यायब्राह्मणे 'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तत् ब्रह्मयज्ञः संतिष्ठते' इत्युपक्रम्य 'तस्मात्स्वाध्यायोऽध्येतव्यः' 'यं यं क्रतुमधीते तेन तेनास्येष्टं भवति'इति तदुत्तरश्रुतेरिति भावः । **एवं चाधानाग्निहोत्रादिविधय इति** । 'वसन्ते ब्राह्मणोग्निमादधाति', 'यावज्जीवमग्निहोत्रं जुहोति,' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'इत्येवमाद्या विधय इत्यर्थः । **तानेवाधिकुर्वन्तीति** । उक्तविधयस्तावद्विद्यार्जनमाक्षिपन्त्यनुपपत्त्या । यदा तु स्वाध्यायविधिविहिताध्ययनोपात्तविद्या द्विजन्मानो लभन्ते तदा तैरेव लब्धात्मानो न चतुर्थस्य विद्यामाक्षिपन्ति, अनुपपत्तिक्षयात् । यद्यपि चैवं विहितोपायसिद्धज्ञानवत एव विधयोऽधिकुर्वन्ति, तर्हि तदेव ज्ञानमकर्मकालोपात्तमप्यग्निवत् क्रत्वङ्गमिति तच्छून्यस्य स्वाच्छन्द्येन विद्यामर्जयतः शूद्रस्याधिकारो न सिध्यतीति त्रैवर्णिकानेवाधिकुर्वन्तीत्यर्थः । **अन्यथेति** अध्ययनविध्याक्षिप्तत्वाभावे इत्यर्थः । **चतुर्थादेरिति** । अधिकारमिति शेषः । संबन्धसामान्यविवक्षया षष्ठी वा । इदमत्र श्रीजैमिन्यभिप्रायं निश्चित्य संमत्यर्थमाहुः **सोऽयमित्यादि** । **अपशूद्राधिकरण इति** । इद-

भाष्यप्रकाशः ।

'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते' ॥

इति स्मृतौ क्त्वाप्रत्ययेनोपनयनस्याध्यापनाङ्गताप्रतीतेस्तत् कथमध्यापनस्योपकरोतीत्यपेक्षायां, 'शिष्यम्' इति, 'तमध्यापयेत्' इति च द्वितीयोक्तकर्मत्वलिङ्गादुपनेयासत्तिद्वारेति निश्चीयते। उपनीतोऽपि नाकिंचित्करोऽङ्गमिति तद्व्यापारापेक्षायां वाक्यान्तर उपनयनं प्रक्रम्य विहितं वेदाध्ययनमेवाध्यापनोपकारकत्वादुपनीतव्यापारतयाऽध्यवसीयते । तदेवं स्वाङ्गमुपनयनं प्रयुञ्जानोऽध्यापनविधिस्तद्द्वारेणाध्ययनं प्रयुङ्क्ते । ततश्चाध्ययनस्यापि प्रयोजने विचार्यमाणे स्वसमवेतत्वेनान्तरङ्गत्वादर्थज्ञानमेव तथात्वेन निश्चीयते, न त्वाचार्यत्वसिद्धिर्बहिरङ्गत्वात् । न च प्रथमावगतत्वेनाचार्यत्वसिद्धिरेवाध्ययनप्रयोजनं, न तु पश्चादवगतमर्थज्ञानमिति वाच्यम् । तत्सिद्धिं विनाऽप्यध्ययनानुष्ठानसंभवेन प्रथमं तदनवगमात् । न च शब्दादवगतो नियोग एव प्रयोजनमस्त्विति वाच्यम् । अर्थज्ञानस्यापि प्रतीयमानत्वेन त्यागायोगात् । नन्वेवमध्ययनस्यार्थज्ञानार्थत्वेऽध्ययनविधिनैवार्थज्ञानप्राप्तिः किमिति नाद्रियत इति शङ्क्यम् । अध्ययनविधेरधिकारशून्यत्वादाचार्यकरणविधिप्रयुक्त्याप्यात्मलाभानङ्गीकारे विश्वजिदादिवन्नियोज्यकल्पनापत्तेः । अतोऽध्यापनविधिप्रयुक्तमेवाध्ययनमर्थज्ञानं च, नाध्ययनविधिप्रयुक्तमित्याहुः ।

एवं मीमांसकमतद्वयेऽप्यर्थज्ञानस्य वैधत्वात् तदाक्षिप्तविचारस्यापि वैधत्वम् ।

रामानुजाचार्यास्तु, अध्ययनविधिना स्वाध्यायाख्यस्य वेदस्याक्षरराशेर्ग्रहणं विधीयते। तत्रेतिकर्तव्यताकाङ्क्षायामध्यापनविधिना,

'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्' ॥

रश्मिः ।

मधिकरणं षष्ठस्य षष्ठेस्ति । **द्वितीयोक्तकर्मत्वलिङ्गादिति** । तत्सामर्थ्यादित्यर्थः । **स्वेत्यादि** । स्वमात्मास्मन्मते मनस्तत्समवेतत्वेन स्वल्पापेक्षत्वरूपान्तरङ्गत्वादित्यर्थः । **बहिरङ्गत्वादिति** प्रयोगोपाधित्वेन तथात्वादित्यर्थः । तथाहि, संमाननेत्याद्युक्तसूत्रे उत्सञ्जनज्ञानव्ययविगणनानि नयतेर्वाच्यानि । इतरे तु प्रयोगोपाधयः । उत्सञ्जने दण्डमुन्नयते उत्क्षिपतीत्यर्थः । 'ब्राह्मणमुपनयीत' विधिनात्मसमीपं प्रापयेदित्यर्थः । उपनयनपूर्वकेणाध्यापनेनोपनेतरि ह्याचार्यत्वं क्रियत इति । **आत्मलाभानङ्गीकार इति** अधिकारिस्वरूपलाभानङ्गीकार इत्यर्थः । **विश्वजिदादिवदिति** । एतच्चतुर्थस्य तृतीयपादे 'चोदनायां फलाश्रुतेः कर्ममात्रं विधीयेत नह्यशब्दं प्रतीयते' इत्यधिकरणे 'विश्वजिता यजेत' इत्यत्र फलाश्रवणेपि अध्याहृतफलान्वयमङ्गीकृत्य तत्किमित्यपेक्षायां 'सः स्वर्गः स्यात् सर्वान् प्रत्यविशेषात्'इत्यधिकरणे स्वर्गः फलमिति चिन्तितं, तेन स्वर्गकामो नियोज्य इति सिद्धं, तद्वदित्यर्थः । **अत इति** । प्रयोगोपाधिनाप्याचार्यत्वकामात्मलाभेन लाघवादित्यर्थः । **तदाक्षिप्तेति** । अविचारिताश्च शब्दा नार्थं प्रत्याययन्तीति भाष्यात् । 'येन विना यदनुपपन्नं तद् तेनाक्षिप्यते' इति । **प्रौष्ठपद्यामिति** भाद्रपद्याम् । **उपाकृत्येति** उपकारं कृत्वेत्यर्थः । उपाकर्म कृत्वेति वार्थः । **अर्धपञ्चमानिति** । अर्धपञ्चमः पौषो माघो वा येषु भाद्रपदाश्विनकार्तिकमार्गशीर्षेषु आश्विन-

भाष्यप्रकाशः ।

इत्यादिभिश्चापेक्षितानि विधीयन्ते । तेनाचार्योच्चारणानूच्चारणरूपमध्ययनमक्षरराशिग्रहणफलकमित्यवगम्यते। तत्र चतुर्वर्गफलस्य विधिवाक्ये कर्मत्वेन बोधितस्य स्वाध्यायस्य कार्यान्तरयोग्यतासंपादनरूपः संस्कारः । तेनाध्ययनविधिरक्षरग्रहणमात्रपर्यवसायी । अध्ययनगृहीतं च स्वभावादेवार्थबोधकमिति स्वाध्यायस्यापि तथात्वात् तत्रापाततोऽवगम्यमानानामर्थानां स्वरूपप्रकारविशेषनिर्णयाय वेदवाक्यविचाररूपमीमांसाद्वयश्रवणेऽधीतवेदः पुरुषः स्वत एव प्रवर्तते । तत्र कर्मस्वरूपनिरूपणे तेषामल्पास्थिरफलत्वं दृष्ट्वाऽध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चाऽमृतत्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलकवेदान्तविचाररूपशारीरकमीमांसायामधिकरोतीत्याहुः ।

शैवस्तु, अध्ययनविधेरक्षरग्रहणमात्रपरत्वमङ्गीकृत्याध्ययनेनाऽऽपाततोऽर्थप्रतीतेस्तदनु ब्रह्मस्थूलोपासनभूतज्योतिष्टोमादिविधायकानां सूक्ष्मोपासनभूतदहरादिविद्याविधायकानां चेतरेतरविरोधाभासं पश्यँस्तद्विचारे पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्ततेऽतो नानिबन्धनो विचार इत्याह ।

भट्टभास्कराचार्यास्तु स्वाध्यायविधेरर्थावबोधपर्यवसितत्वेऽपि ब्रह्मज्ञानं तेनाक्षेप्तुं न शक्यम् । 'यज्ञेन दानेन' इति, 'शान्तो दान्त उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वा आत्मन्येवात्मानं पश्येत्' इति श्रुत्या ब्रह्मज्ञानस्योपायान्तरसापेक्षत्वात् । कर्मावबोधनसमर्थेषु पुरुषेष्वध्ययनविधेः कृतार्थत्वेनोपायान्तराक्षेपाक्षमत्वात् । 'श्रवणायापि बहुभिर्यो न लभ्यः' इत्यादिश्रुतेर्ब्रह्मणो दुर्ज्ञेयत्वाच्च । अतो ब्रह्मजिज्ञासा न तत्कारिता किंतु, 'श्रोतव्यो मन्तव्यः', 'सोन्वेष्टव्यः स विजिज्ञासितव्यः', 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इत्यादिवेदान्तविधिकारिता वास्त्वित्याहुः ।

तत्राध्ययनविधेरर्थज्ञानार्थत्वकल्पनमसंगतम् । 'यं यं क्रतुमधीते तेन तेनास्येष्टं भवति' इतिवाक्येनाक्षरग्रहणमात्रेऽपि फलबोधने तदतिहाय फलान्तरकल्पनस्यायुक्तत्वात् ।

रश्मिः ।

कार्तिकमार्गशीर्षपौषेषु वा तादृशान् मासानित्यर्थः। चतुर्वर्गे त्वत्र बहुव्रीहिः। विधीति। 'स्वाध्यायोऽध्येतव्यः' इति वाक्ये । गृहीतं चेति शास्त्रमित्यर्थः। इत्याहुरिति। तेनात्राक्षरग्रहणमधिकमिति पूर्वस्माद्विशेषः । विरोधेत्यादि । 'आभासत्वे विरोधस्य विरोधाभास इष्यते' इत्यलंकारं लक्षयित्वा 'विनापि तन्वि हारेण वक्षोजौ तव हारिणौ' मनोहारिणौ इत्युदाहरणम्। 'घटाद्विना घटीयो धनेशः संराजतेऽधुने'ति चोदाहरणम्, तत्र प्रश्लेषादाभासः। एवं चैकशास्त्राद्विरोधः। साधनयोरेकत्र सहानवस्थानलक्षणः आभासो विरोधस्यैवं कर्माणि ज्ञानप्रयोजकतया मोक्षे समुच्चीयन्त इति वक्ष्यन्ति । भगवांश्चैवाचार्य इति गुणकर्मत्वादङ्गत्वं ज्योतिष्टोमादीनामिति। इत्याहेति । तेनैतन्मते विचारसार्थक्यमात्रम्, न तु तस्य वैधत्वावैधत्वविवेचनमिति। ग्रामं गच्छतीत्यादौ ग्रामसंयोगोऽवान्तरसंयोगान् गृह्णातीति तदनुसारेणाध्ययनस्याक्षरग्रहणमात्रं फलमित्याशयेनाहुः तत्रेति। दूरान्वयदोषोपि मीमांसकमते यः सोपि न। अक्षरग्रहणमात्र इति। दृश्यमाने इष्ट इत्यर्थः। इदानीं 'लभ्यमाने फले दृष्टे नादृष्टफलकल्पना। विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यति' इति वाक्यात्। स्वर्गब्रह्मज्ञानादि तु साधनान्तरयागविज्ञानादिभिरिष्टत्वेनोक्तं भवति ।

भाष्यप्रकाशः ।

वाक्यबलेनाऽदृष्टद्वारकत्वस्याप्यदुष्टत्वात् । तेन तेन क्रत्वध्ययनेनास्याध्येतुरिष्टं मनोवाञ्छितं भवतीति दृष्टफलार्थत्वस्यापि शक्यवचनत्वाच्च । नच प्रत्यक्षविरोधः । इदानीन्तनाध्ययनस्य व्यङ्ग्यत्वेनादोषात् । नच व्यङ्ग्यत्वे मानाभावः । स्वाध्यायपदस्य वेदे योगरूढ्या सुष्ठुसमन्ताद्ध्यायो यस्येति योगस्यापि ग्राह्यत्वे देशकालगुरुशिष्यनिष्ठानां शोभनगुणानां पाठार्थानुष्ठानेषु शङ्काराहित्यरूपस्य समन्तत्वस्य च ग्रहणेन स्वाध्याय इति समाख्याया एव तत्र मानत्वात् । नचैवं सत्यर्थज्ञानस्यापि प्राप्तेः कथं तदर्थत्वकल्पनस्यासंगतिरिति शङ्क्यम् । नैस्तस्य माणवकाधिकार-

रश्मिः ।

ननु तत्राधीत इत्यध्ययनस्य स्वर्गब्रह्मज्ञानपर्यन्तमस्थानादिष्टपदोक्तसाध्यसाधनभावव्याहतिरित्याशङ्क्याहुः **वाक्यबलेनेत्यादि** वाक्यं यं यं क्रतुमिति । अभ्युपगम्याहुः **तेन तेनेति** दृष्टफलार्थत्वेन । **इष्टफलार्थत्वस्येष्टार्थत्वस्येति** यावत् । **इति योगस्यापीति** । पूर्वकाण्डविषयत्वेन रूढे शब्दे । **देशकालेत्यादि** । यज्ञाद्यनुष्ठापका देशादयः । पूर्वतन्त्रे एकादशस्य द्वितीये पादे 'एकदेशकालकर्तृत्वं' इत्यधिकरणे समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजतीति समत्वपौर्णमासीत्वे देशकालयोर्गुणौ चिन्तितौ । गुरुशिष्ययोस्त्वत्रैव स्पष्टा इति । **समाख्याया इति** । यौगिकस्य शब्दस्येत्यर्थः । तन्मतमनुस्मृत्य दूषयन्ति **नैस्तस्येति** । मीमांसकैरित्यर्थः ।

सिद्धान्तस्तु प्राथमिकमध्ययनमध्यापनविधिप्रयुक्तम्, माणवकोपनयनस्याध्यापनाङ्गत्ववदध्ययनाङ्गत्वेपि तस्य बालत्वेन स्वतोध्ययने प्रवर्तनादर्शनात्, किंच 'द्वितीयं प्राप्यानुपूर्व्या जन्मोपनयनं द्विजः' इत्युपनीतमुपक्रम्य 'आचार्यं मां विजानीयात्' इति तस्याचार्ये भगवद्बुद्धिकरणं विहितम् । तथा 'गच्छेदाचार्यसंसदि' इति स्मृत्यन्तरे चाचार्यसंसद्गमनं च विहितम् । तदुभयमपि क्रीडनासक्तस्य बालस्य न संभवति । तस्माच्छ्रुतिचोदितोऽध्ययनज्ञानयोर्विधिर्न माणवकमधिकरोति । अपि च । त्रैवर्णिकाः कर्तव्यमपेक्षमाणा अध्ययनं च कर्तारमपेक्षमाणमुभये सापेक्षा अन्योन्यं भवन्ति । तत्र विद्वत्तायोग्यतदयोग्यौ कर्तारावपेक्षतेऽध्ययनम् । नाद्यः । फलोपधायकयोग्यमपेक्षमाणं न माणवकमपेक्षेत, नेतरः तादृशफलानिष्पत्तेः । न चैवं त्रैवर्णिकाधिकारनियमभङ्ग इति वाच्यम् । अष्टवर्षवाक्ये उपनयनाध्यापनयोः संनिधानादध्ययनं विना चाध्यापनासिद्धेस्तदाक्षिप्तेनैवाध्ययनेनोक्ताधिकारनियमसिद्धेः । न च स्वाध्यायवाक्यवैयर्थ्यमिति शङ्क्यम्, वेदस्य स्वाध्यायत्वबोधनेन तस्य कृतार्थत्वात् । एतेनाध्ययनविध्यभावे माणवकस्याध्ययनार्था प्रवृत्तिर्न स्यादिति प्रत्युक्तम् । स्वस्याचार्यत्वसिषाधयिषुणैव तेऽध्यापनीया इति । न च किमनेन निर्बन्धेन अध्ययनविधिरेव माणवकं प्रवर्तयत्विति शङ्क्यम्, विधिव्यापारकौण्ठ्यप्रसङ्गात् । यत्तूपनीतव्यापारापेक्षायामुपनयनमुपक्रम्य विहितमध्ययनमध्यापनोपकारकत्वेन तदङ्गं नार्थज्ञानाङ्गं साध्यद्वयस्यैकत्रासंभवादित्युक्तं तदपि न । एकस्यापि वाहनकरणकयानस्य सुखोद्देशदेशप्राप्त्योरङ्गत्वात् । तदप्यध्यापनाक्षिप्तमध्ययनं लौकिकमेवोररीकार्यम्, तावताप्यध्यापनसंभवात्; विहितस्यापि तत एवाङ्गीकारे तूद्देशाभावात् ततो नापूर्वं सिध्येदित्युक्तम्, तदपि तथा । लौकिकेन तेनाचार्यत्वासिद्धेः । वेदाध्ययनेनैव तत्स्मरणात् । न चापूर्वासिद्धिरिति वाच्यम्, आचार्यकृतोद्देशेनापि तत्सिद्धेः । पूर्वतन्त्रीयचतुर्थतार्तीयस्य 'फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात्' इत्यधिकरणचिन्तितजातेष्टौ पितृकृतोद्देशवदिति दिक् ।

भाष्यप्रकाशः ।

स्येनाङ्गीकारात् । वेदस्य गुरुमुखात् ग्रहणदशायां तं प्रति स्वाध्यायत्वस्य भावित्वेन तदानीमभावात् । 'वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति, सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमद', इति तैत्तिरीयाणां शिक्षोपनिषच्छ्रुत्या तथानिश्चयात् । आधानाग्निहोत्रादिविधीनामपि तत्र तदाक्षेपकत्वस्याध्ययनविधिप्रसादलभ्यत्वोपगमेन प्रसादस्य च माणवके सामर्थ्याभावादभावेन तेषामप्याक्षेपकतायां कौण्ठ्याच्च । आश्रिते चैकवाक्यत्वे, ज्ञेयश्चेति विध्यन्तरस्यापि संप्राप्तत्वात् तद्बलादेवार्थज्ञानमङ्गीकार्यम् । अन्यथा तद्वैयर्थ्यादिति । अत एव प्राथमिकाध्ययनस्यापि तदर्थत्वमसंगतम् । किंत्वध्यापनप्रयुक्तत्वं यदुक्तं तन्मात्रं युक्तम् । ज्ञातुर्नियोज्यस्याचार्यत्वकामिनस्तत्रैव विधौ सत्त्वेन लिङ्प्रयोगेण च तत्र विधित्वस्यासंदिग्धत्वात् । कृत्यानां त्वावश्यकार्थेऽप्यनुशासनात् । वयसा जातस्यात्रयाणां त्रैवर्णिकानामध्ययनस्यावश्यकत्वबोधनेन वाक्यस्यार्थक्यसिद्धेः । एवंच यद्यप्यध्यापनविधावध्यापनमात्रं श्रुतं, तथापि, 'साङ्गो वेदोऽध्येयो ज्ञेयश्च' इतिश्रावणात् गुरुणाङ्गापाठनेर्थाज्ञापने च तदसिद्ध्या वैयर्थ्ये वाक्यस्य प्रसक्ते तद्वारणाय तथाध्यापनमङ्गीकरणीयम् । आचार्यलक्षणस्मृतौ वेदस्य 'सकल्पं सरहस्यं च' इति विशेषणाच्च ।

रश्मिः ।

प्रकृतमनुसरामः । दूषणमाहुः वेदस्येत्यादि । अभावादिति । तथा च माणवकं प्रति स्वाध्यायसमाख्यासामर्थ्यविरहेणार्थज्ञानस्याप्यनुपलब्धेर्न तदर्थत्वकल्पनमिति भावः । ननु स्वस्यासाधारण्येन पितृपितामहादिपरंपराप्राप्ता शाखा स्वाध्याय इति योगस्य सायणीयेऽङ्गीकारात्, पूर्वोक्तं न साधीय इति शङ्कामपनुदन्तो वेदे स्वाध्यायत्वस्य भावित्वं श्रौतमित्याहुः वेदमनूच्येत्यादि । तथानिश्चयादिति वेदे स्वाध्यायत्वस्य भावित्वनिश्चयादित्यर्थः । अन्यथा स्वाध्यायमनूच्येत्येव वदेदिति भावः । तदाक्षेपकत्वस्येति विद्वत्त्रैवर्णिकाक्षेपकत्वस्येत्यर्थः । आक्षेपकतायामिति अर्थज्ञानाक्षेपकतायामित्यर्थः । अतः परमवशिष्टमर्थज्ञानांशे नियमविधित्वम्, तदपि प्राभाकरमतदूषणेन दूषितं भविष्यतीत्याशयेनाहुः आश्रिते चेति । इतीति । अयमत्र प्रकर्षं ब्रूते । तथा च विधिवैयर्थ्यं प्रकृष्टो हेतुरित्यर्थः । प्रत्यक्षश्रुतिलभ्यत्वसंभवे चोदकप्राप्तत्वस्वीकारस्यानुचितत्वादित्यपरः । एतच्च पूर्वतन्त्रे द्वादशस्य चतुर्थे पादे 'विप्रतिषेधे परम्' इत्यधिकरणे चिन्तितम् । यत्रार्त्विज्ययाजमानयोः कर्मणोर्युगपदात्मलाभस्तत्र ये यजमानास्ते ऋत्विज इति विहितमार्त्विज्यं चोदकप्राप्तयाजमानाद् बलीय इति । विधाविति उपनयीतेति विधावित्यर्थः । पूर्वतन्त्रे अपूर्वत्वोपात्तसाक्षादध्ययनविधिप्रयोजनमाहुः कृत्यानामित्यादि । अनुशासनादिति । 'आवश्यकाधमर्णयोर्णिनि'इत्येतदनन्तरं 'कृत्याश्च'इत्यनुशासनादित्यर्थः । वाक्यसार्थक्यसिद्धेरिति । तेन नात्र नित्यानुवादगन्धोपीत्याशयः विधिपक्षेप्युपादेय इति वक्ष्यन्ति । न चैवमनधीयाना व्रात्या भवन्तीति वाक्यवैयर्थ्यम् । 'तयोरेव कृत्यक्तखलर्थाः' 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च'इत्यादिसूत्रैरनेकार्थेषु प्राप्तस्य तव्यस्यावश्यकार्थत्वावेदकत्वात् । वाक्यत्रयैकवाक्यतया यत्सिद्धं तदाहुः एवं चेत्यादि । विशेषणाच्चेति । अनेनाध्यापनविधौ नियोज्याभावादध्यापनसमभिव्याहृतेनोपनयीतेत्यात्मनेपदेनाचार्यकरणलाभे तत्कामिना नियोज्याकाङ्क्षा पूरणीया । तथा सत्यध्यापनस्याचार्यत्वसिद्धिः प्रयोजनं नत्वर्थज्ञापनमपि, ततश्च सिद्धे आचार्यत्वे तस्यार्थज्ञापनस्यानावश्यकत्वान्माणव-

THE ASIATIC SOCIETY KOLKATA

भाष्यप्रकाशः ।

एवं साङ्गेऽधीते ज्ञाते च तस्य स्वाध्यायः सिद्ध्यति । तदोक्तं फलमपि संपद्यत इति वाक्यत्रयैकवाक्यतयावसीयते तस्मात् प्राथमिकाध्ययनमध्यापनप्रयुक्तम्, अर्थज्ञानं च प्रत्यक्षश्रुतिलभ्यमिति भाट्टप्राभाकरयोः पूर्वोक्तकल्पना असंगतैव । कृत्यप्रत्यययोर्विध्यर्थकत्वपक्षेप्युक्त एव प्रकारो युक्तः । अन्यथा विधिकौण्ठ्यप्रसङ्गात् । एवंच रामानुजाचार्यैरध्ययनविधेरक्षरग्रहणपर्यवसायित्वं, स्वाध्यायस्य च स्वभावादर्थबोधकत्वं यदुक्तं तदप्युक्तदिशैव युक्तम् । नत्वन्यथापि । एवमेव भास्कराचार्योक्ते स्वाध्यायविधेरर्थावबोधपर्यवसितत्वेपि बोध्यम् । शैवस्तु विचारसार्थक्यमात्रमाह, न तु शास्त्रप्रयोजकं कंचन विधिमपीति तन्मते वैधत्वमेवायाति । तेन तदुदासीनप्रायम् । एवं वेदान्तस्थविधावपि श्रवणपदेन शब्दग्रहणं मननपदेनाववोधोऽन्वेषणविजिज्ञासापदाभ्यां चेच्छा विधीयत इति बोद्धव्यम् । नचेच्छाया अविधेयत्वम् । 'तिस्रः खलु एषणा एषितव्याः' इति चरके पतञ्जलिनाऽभिधानात् । अतः शंकराचार्यादृतस्तद्विजिज्ञासस्व तद् ब्रह्मेति विधिरपि तथा । एवंच भैक्षवे ये विधय उक्ताः, 'आत्मेत्येवोपासीत,' 'स म आत्मेति विद्यात्' 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति । तेऽपि ज्ञान एव, न विचारे । ये चापि मध्वाचार्यैर्जिज्ञासासूत्रे, 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च' इति तेऽपि सर्वे ज्ञान एव पर्यवस्यन्ति ।

यत्तु शैवः । किमयं श्रोतव्य इति विधिर्नियमः परिसंख्या वा । नाद्यः । वेदान्तश्रवणं

रश्मिः ।

कस्याविद्वत्तायां यज्ञाद्यनधिकार इत्याशङ्कापास्ता । **फलमिति** 'तेन तेनास्येष्टं भवति' 'अग्नेर्वायोरादित्यस्य वा सायुज्यं गच्छति' इति फलमित्यर्थः । **वाक्यत्रयैकवाक्यतयेति** । सा चेत्थम् । अष्टवर्षमिति वाक्योक्तमध्यापनप्रयुक्तमध्ययनं स्वात्मलाभाय 'साङ्गः' इति वाक्योक्तसाङ्गत्वज्ञेयत्वासक्तमवगम्यते । तदनु शङ्काद्यपनुत्त्या स्वाध्याय इति । सिद्धमाहुः **तस्मादिति** । **उक्त एव प्रकार** इति वाक्यत्रयैकवाक्यताप्रकार एवेत्यर्थः । **विधिकौण्ठ्यप्रसङ्गादिति** 'स्वाध्यायो' 'ज्ञेयश्च' इति विधिकौण्ठ्यप्रसङ्गादित्यर्थः । **एवं चेति** । 'ज्ञेयश्च' इति प्रत्यक्षविधेरकौण्ठ्यस्यावश्यकत्वे चेत्यर्थः । **विचारेति** आपाततः प्रतीतार्थे तत्पोषकविचारः युक्तत्वायुक्तत्वपोषणनिरासाभ्यां युक्तत्वायुक्तत्वार्थाभ्यां सह वर्तमानो विचारः सार्थकः, तस्य भावः सार्थक्यम्, सार्थक्यमेव सार्थक्यमात्रम् । **शास्त्रमिति** शास्त्रं वेदान्तरूपं तदुपाङ्गं मीमांसा सापि शास्त्रमवयवी अनङ्गीकारात् । तस्य प्रयोजको विधिस्तम् । **अवैधत्वमिति** । न च श्रोतव्य इत्यत्र ब्रह्मवाचकपदानां ब्रह्मणि शक्तितात्पर्यनिर्धारः श्रवणमिति कथं अवैधत्वमिति शङ्क्यम्, अस्य विधित्वस्य तैरनङ्गीकारात् । सोऽत्रैवाग्रे स्फुटः संग्राह्यत्वात् । भास्करमतीयमविरुद्धमंशं व्याकुर्वन्ति **एवं वेदान्तस्थेति** । **तथेति** इच्छाविधायकत्वेन प्रकारेणेत्यर्थः ।

श्रोतव्य इत्यस्य विधित्वं निर्णेतुं तावच्छैवमतं प्रसङ्गादाहुः **यत्तु शैव** इति । **विधिरिति** अपूर्वविधिरित्यर्थः । प्रमाणान्तरेण यस्य यदर्थत्वमप्राप्तं तदर्थत्वेन तस्य विधिः सः । 'यजेत स्वर्गकामः' इति, यथा प्रमाणान्तरेण यागस्य स्वर्गार्थत्वानवगमाल्लक्षणसंगतिः । **नियम इति** पक्षे, अप्राप्तस्य विधिः सः । व्रीहीनवहन्ति इति । यथा नखविदलनादिना वितुषीकरणपक्षेऽप्राप्तस्यावहननस्य विधानात् । स चाप्राप्तांशपूरणात्मकः **परिसंख्येति** । उभयस्य युगपत् प्राप्तौ इतरव्या-

शब्दाश्च बोधकाः ।
निःसंदिग्धं तदर्थाश्च लोकवद् व्याकृतेः स्फुटाः ॥

भाष्यप्रकाशः ।

स्वविषयमात्रावगतिसाधनं शास्त्रश्रवणत्वाद् वैद्यकशास्त्रश्रवणवदित्यनुमानेनापि प्राप्ततयाऽपूर्वत्वाभावात् । न द्वितीयः । अवघातवद् दृष्टफलस्योपायान्तरस्याप्राप्तत्वात् । नेतरः । तथा सति श्रोतव्या एव वेदान्ता नाध्येया इति स्यात् । ततश्च विचारस्याप्ययोगात् पुरुषार्थासंभवः । एवं च वेदाध्ययनादिरपि निवर्तेतेति महानेवानयः स्यादिति विकल्पितवान् । तत्तुच्छम् । हेतोः साधारणत्वेनानुमानतोऽप्राप्तावपूर्वविधित्वस्य स्थिरत्वात् । कथं साधारणतेति चेद् वेदान्तश्रवणं न स्वविषयावगतिसाधनं शास्त्रश्रवणत्वात् सूत्रश्रवणवदित्येवमवधेहि । किंच, श्रवणपदं शब्दग्रहणमात्रपरं वा, वाक्यार्थज्ञानपरं वा । आद्ये विधिवैयर्थ्यापत्तिः । स्वाध्यायविधिनैव चारितार्थ्यात् । नचाध्ययननियमाभावाय पुनर्विधानमिति वाच्यम् । आचारविरोधात् । त्रैवर्णिकाधिकारस्यापि त्यागापत्तेश्च । द्वितीये तु निराबाधं विधित्वम् । अन्यथा वाक्यवैयर्थ्यापत्तेरिति ।

अतः पूर्वकाण्डविधेरर्थज्ञानमात्रार्थत्वेनोत्तरकाण्डीयस्यापि ब्राह्मणश्रमणन्यायेन विशेषार्थतया विचारस्यावैधत्वाभारम्भणीयः । ननु संदेहाभावायाध्ययनादिविधौ विचार आक्षेप्य इत्यत आह शब्दाश्चेत्यादि ।

रश्मिः ।

वृत्तिपरो विधिः सा, पञ्च पञ्चनखा भक्ष्या इति । यथा । भक्षणस्य रागप्राप्तत्वात् पक्षेप्राप्तत्वाभावाच्च नापूर्वनियमोऽन्यपञ्चनखभक्षणनिवृत्तिपरत्वात् पञ्चनखापञ्चनखभक्षणस्य युगपत् प्राप्तत्वात् परिसंख्या । अत्र श्रुतस्य पञ्चनखभक्षणस्य हानाच्छ्रुतहानिः । अपञ्चनखभक्षणनिवृत्तिकल्पनादश्रुतकल्पना । अपञ्चनखभक्षणस्य बाधनात् प्राप्तबाध इति दोषत्रयवती । **ततश्चेति** अध्ययनाभावाचेत्यर्थः । अनुभयस्य युगपत्प्राप्तावितरव्यावृत्तेरित्यर्थः । **एवं चेति** । पूर्वोक्तपरामर्शेनाध्यापनविधावपि परिसंख्यापत्त्येत्यर्थः । **श्रवणपदमिति** । इदं तव्यान्तप्रकृतिरूपं ज्ञेयम् । **विधिवैयर्थ्यापत्तिरिति** श्रोतव्य इति विधिवैयर्थ्यापत्तिरित्यर्थः । **चारितार्थ्यादिति** शब्दग्रहणस्यैवाध्ययनपदार्थत्वेन तथात्वादित्यर्थः । **न चेत्यादि** । श्रोतव्य इति पुनर्विधानं श्रवणेध्ययनानन्तर्यनियमाभावायेत्यर्थः । तथैवाचारमाशङ्क्य हेत्वन्तरमाहुः **त्रैवर्णिकेत्यादि** । अध्ययने त्रैवर्णिकाधिकारात् तस्य चाभावाच्छ्रवणविधिः सर्वानप्यधिकुर्यादित्यर्थः । **निराबाधमिति** । वाक्यार्थज्ञानस्याध्ययनविधिनानुपलब्धेर्निराबाधं श्रोतव्य इत्यस्य विधित्वमित्यर्थः । द्वितीयार्थादरे युक्तिमप्याहुः **अन्यथेति** । **ब्राह्मणश्रमणन्यायेनेति** । ब्राह्मणाश्चेत् श्रमणास्तेन न्यायेनेत्यर्थः । यथा ब्राह्मणः सन् श्रमणो भवति, पश्चाद्भूतपूर्वगत्या श्रमण इत्युच्यते तथा । **विशेषार्थेति** । वेदान्तार्थज्ञानपरतयेत्यर्थः । एतावता 'साङ्गोऽध्येयस्तथा ज्ञेयः' इति भाष्यं हेतुद्वयसमर्पकं विवृतम् । **शब्दाश्चेति** । शब्दाश्च निःसंदिग्धं **बोधकाः लोकवत् व्याकृतेर्व्याकरणात्तदर्थाश्च स्फुटा** इत्यर्थः । व्याकरणत्वं च महाभाष्ये लक्ष्यलक्षणसमुदायत्वम् । लक्ष्याः प्रयोगाः सुध्युपास्यादयः । लक्षणानि सूत्राणि अइउणित्यादीनि वृद्धिरादैजित्यादीनि च । एवं लौकिकशब्दविषयं व्याकरणम् । अलौकिकशब्दविषयं तु विकल्पनादिविधिमल्लक्ष्यलक्षणसमुदायरूपम् । ननु ये एव लौकिकाः शब्दास्ते एव वैदिका इति शाबरभाष्ये शब्दाभेदाल्लक्षणभेदः कुत इति चेन्, न । निबन्धटीकायां वैदिकशब्दानां स्वरादिना

अर्थज्ञानार्थं विचार आरम्भणीयः। तस्य च ब्रह्मरूपत्वात् तज्ज्ञाने पुरुषार्थो भवतीति न मन्तव्यम्। विचारं विनापि वेदादेव साक्षादर्थप्रतीतेः।

भाष्यप्रकाशः।

विशेषबोधनाय स्वोक्तं विभजते अर्थज्ञानेत्यादि। सर्वोऽपि प्रयोजनमुद्दिश्य कार्यमारभते। तत्रास्य विचारस्य प्रयोजनं वेदार्थज्ञानं वाऽन्यद् वा। तत्रान्यस्यादर्शनाद्, 'वेदान्तविज्ञानसुनिश्चितार्थाः' इतिवाक्यबोधितमाद्यमेवादर्तव्यम्। तत्रापि तस्य स्वतोऽपुरुषार्थत्वात् प्रयोजनान्तरमेष्टव्यम्। तच्च प्रयोजनमनन्तविधमप्यैहिकामुष्मिकपुरुषार्थेऽन्तर्भूतत्वात् पुरुषार्थरूपम्। तच्च वेदार्थज्ञानेन भवतीति तदर्थं विचार आरम्भणीयो, न तु स्वतःपुरुषार्थत्वात्। वेदार्थश्च, 'सर्वे वेदा यत्पदमामनन्ति' इति, 'वेदैश्च सर्वैरहमेव वेद्यः,'

'वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, परोक्षवादा ऋषयः परोक्षं च मम प्रियम्'

इत्यादिश्रुतिस्मृतिभिर्ब्रह्मरूपः। नच 'वेदोऽखिलो धर्ममूलम्'इत्यादिस्मृतिभिर्धर्मरूप इति वाच्यम्। 'यज्ञो वै विष्णुः' इति, 'धर्मो यस्यां मदात्मकः' इति श्रुतिस्मृतिभ्यां धर्मस्यापि ब्रह्मरूपत्वबोधनात् तद्रूपेणैवार्थत्वात्। ब्रह्मणस्तु ज्ञानादेव पुरुषार्थसिद्धिः। 'ब्रह्मविदाप्नोति परम्' 'आनन्दं ब्रह्म'इत्युपक्रम्य, 'य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या'। दहरविद्यायां दहरपुण्डरीकवेश्मस्थितस्याकाशस्यैतदमृतमभयमेतद् ब्रह्मेत्यनेन ब्रह्मत्वमुक्त्वा, एवंवित् स्वर्गं लोकमेतीत्येवंविधेषु वाक्येष्वैहिकामुष्मिकपुरुषार्थस्य ज्ञानमात्रेणैव श्रावणात् तावतापि पुरुषार्थसिद्धेर्ब्रह्म न मन्तव्यं न विचार्यमित्यर्थः।

रश्मिः।

भेदकथनात्। महाभाष्येपि 'व्यत्ययो बहुलम्' इति योगविभागेन 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति परिभाषासाधितोक्तवेदेषु विकल्पनादिविधिमल्लक्ष्यलक्षणसमुदायसत्त्वे शब्दाद्वैदे आयान्त्येव। तथा वेदेषु योगरूढिः, वेदान्ते तु योगः। तदुक्तं पत्रावलम्बने

'लौकिको वैदिकश्चैव व्यवहारो द्विधा मतः।
लोकसिद्धं पुरस्कृत्य वैदिको बोध्यते यथा॥
लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम्।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्॥
ब्रह्मवादे निरुक्तिस्तु न वक्तव्यैव कुत्रचित्।
वस्तुतो ब्रह्म सर्वं हि व्यवहारस्तु लोकतः॥
ये धातुशब्दा यत्रार्थ उपदेशे प्रकीर्तिताः।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित्॥

इति योगकथनात्। पूर्वमीमांसाकारिकासु तु लौकिकवैदिकव्यवहारकथनावसरे 'जलाभ्योरिव संरक्षा तयोः कार्या मनीषिभिः' इत्युक्तम्। 'विचारो योगरूढितः' इत्यपि तत्र। स्वोक्तमिति स्वेन कारिकयोक्तमित्यर्थः। प्रयोजनमिति फलमित्यर्थः। तस्य इति वेदार्थज्ञानस्येत्यर्थः। तस्य चेत्यादिभाष्यं विवृण्वन्ति वेदार्थश्चेत्यादि। मीमांसकाशङ्कामनूद्य निषेधन्ति न चेत्यादि। तज्ज्ञान इत्यादि भाष्यं विवृण्वन्ति ब्रह्मणस्त्विति। वाक्यान्तरेण प्राप्तं ब्रह्मविचारं प्रत्याख्याति

नचार्थज्ञानमविहितम्, अविचारिताश्च शब्दा नार्थं प्रत्याययन्तीति वाच्यम्, ज्ञेयश्चेति विधानात् ।

'गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः'

इति बाधोपलब्धिश्च । शब्दश्चक्षुरादिवन्न संदिग्धार्थप्रतिपादकः । तदर्थश्च

भाष्यप्रकाशः ।

न च श्रोतव्य इति विधिना श्रवणं विधाय तदर्थमननाय मन्तव्य इति विध्यन्तरदर्शनादवबोधसामान्यस्य तदर्थत्वेनाशक्यवचनत्वाद् युक्तिभिरनुचिन्तनमेव मननपदार्थो वक्तव्य इति विचारोऽपि प्राप्त एवेति वाच्यम् । तस्य शारीरपरत्वात् । प्रियत्वलिङ्गेन तथा निश्चयात् । नच वाक्यार्थः शारीरः परमात्मा वेति संदेहे लिङ्गादिभिस्तन्निश्चितार्थबोधार्थमेव विचार आक्षेप्य इति वाच्यम् । वेदे साङ्ग इति विशेषणादधीतनिगमनिरुक्तव्याकरणस्य विचारं विनापि तैरेव तत्संभवात् । तेषु श्रुतीनामेवोदाहृतत्वात् । न च मास्तु वाक्यार्थज्ञानार्थं विचारापेक्षा । पदार्थज्ञानार्थं त्वावश्यकः । शब्दानां प्रायशोऽनेकार्थत्वेनानेकवृत्तिकत्वेन च कया वृत्त्या कमर्थमत्र बोधयन्तीति निश्चयाभावात्, तदर्थज्ञानस्य चाविहितत्वेन तदविचारादिति शङ्कनीयम् । ध्येयत्ववत् साङ्गस्य ज्ञेयत्वविधानेन गुरुमुखादेव पदार्थज्ञानस्यापि सिद्धेः । नच विध्यभावाद् गुरुणार्थो न वक्तव्य इति शङ्का कार्या । वाक्यान्तरे बाधोपलब्धेः । तदिदमुक्तं, नचार्थेत्यादिना । नापि संदेहाभावाय तदपेक्षा । शब्दस्य निःसंदिग्धार्थबोधकत्वात् । न हि गौरित्युक्ते सत्त्वान्तरबोधो भवति ।

रश्मिः ।

न चेत्यादि । तस्येति । 'आत्मा वा अरे' इति वाक्यस्येत्यर्थः । अत्रोपक्रमं नियामकं करोति प्रियत्वेति । मैत्रेयीब्राह्मणे 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' इत्यात्मानमुपक्रम्यास्य निर्देशेन शारीरपरत्वनिश्चयादित्यर्थः । अत्र मैत्रेय्याः स्त्रीत्वेन तदधिकारानुसारेण जीवोपक्रमात्तस्य पूर्वपक्षग्रन्थत्वान्न वाक्यान्वयाधिकरणविरोधः । तत्संभवादिति शारीरः परमात्मा वेति संदेहानुपपत्तिसंभवादित्यर्थः । तेष्विति निगमनिरुक्तव्याकरणेष्वित्यर्थः । स्पष्टम् । यदा तु समाहारद्वन्द्वात्, निगमे व्याकरणं यथा, अत्र च 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति निगमस्तत्र । न च जीवो द्रष्टव्यः श्रोतव्यः, कर्तृत्वात्, आत्मनश्च कर्मत्वादिति व्याकरणम् । एवमन्यत्रापि ।

'अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि ।
अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः' इति ।

भगवद्वाक्यमप्युपलक्षणविधया ज्ञेयम् । न चार्थज्ञानेत्यादिभाष्यमवतारयन्ति न च मास्त्विति । कारिकास्थं तथापदं विवृण्वन्तो 'ज्ञेयश्च' इति विधानादिति भाष्यार्थमाहुः ध्येयत्ववदिति । 'गीती शीघ्री' इति भाष्यमवतारयन्ति न चेति । वाक्यान्तरं पाणिनीयशिक्षास्थम् । यद्वा 'ज्ञेयश्च' इति वाक्यादन्यद्वाक्यं गीतीति वाक्यान्तरम् । बाधेति अधमत्वावहनं बाधः । बाधश्च विपरीतप्रमेति नैयायिकाः । भेदवादमाहुः । अधमत्वनिवृत्त्यर्थं गुरुणार्थो वक्तव्य इति प्रमाया विपरीतप्रमा । तदिदमिति । न च मास्त्वित्यारभ्य विवृतमित्यर्थः । शब्दश्चक्षुरित्यादिभाष्यमवतारयन्ति नापीति । नहीति । यथेति भाष्यतात्पर्यम् । तदर्थश्चेत्यादिभाष्यं

व्याकरणादिना निश्चीयते। यथा लौकिकवाक्ये तथा वेदेऽपि। न च तद्विरुद्धं निर्णेतव्यम्, । अप्रामाणिकत्वप्रसङ्गात् । तस्माद् वेदार्थज्ञानार्थं विचारो नारम्भणीयः।

स्यादेतत्

भाष्यप्रकाशः ।

अतोऽनेकार्थत्वादिसंकटेपि व्याकरणोक्तस्वरादिना सुखेन तन्निरासात्। किंच। लोके प्रत्यक्षादिसंक्रमाच्च तथा व्याकरणापेक्षेति तद्विरुद्धमपि क्वचिन्निर्णीयते। अत एव लौकिकशब्दार्थनिर्णायकत्वेऽपि न तत्र तेषामङ्गत्वप्रसिद्धिः। वेदे तु तेषामङ्गत्वस्य शास्त्रप्रसिद्धत्वात् प्रमेयस्य चात्यन्तालौकिकत्वेन विचारवादिनोऽपि तेषामाश्रयणीयत्वात् तद्धेतुन्यायेन तैरेवार्थज्ञानसिद्धेः कृतमजागलस्तनप्रायेण विचारेणेति। तदिदमुक्तं नचेत्यादिना।

अत्रैकदेशी स्वमतेन विचारकर्तव्यतामुपपादयति स्यादेतदिति वक्ष्यमाणप्रकारेण विचार-

रश्मिः ।

विवृण्वन्ति अत इति। व्याकरणेत्यादि। तथा च शिक्षायाम्।

'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्' ॥ इति ।

यथा दत्त इत्युक्ते, प्रत्ययार्थसहितं दानं संज्ञाश्चेति। संकटे आद्युदात्तत्वात्संज्ञाशब्दोऽयमिति तथा च सूत्रम् 'निष्ठा च द्व्यजनात्' इति। अथवा 'इन्द्रशत्रो' इत्यत्र स्वरेण समासनिर्णय आद्युदात्तत्वाद् बहुव्रीहिरिति, आदिना पदान्तरसमभिव्याहारादि पदान्तरसमभिव्याहार आदिर्येषां सामर्थ्यादीनां, पदान्तरसमभिव्याहारस्यादयः पदान्तरसमभिव्याहारादयः संयोगादयः, ते च ते तेषां समाहारः पदान्तरसमभिव्याहारादि, तेन 'सशङ्खचक्रो हरिः' इत्यत्र हरिशब्दो विष्णुवचन इति। न चेत्यादिभाष्यतात्पर्यमाहुः किंचेति। क्वचिदिति घटपटकालीनादिप्रयोगेषु इत्यर्थः। व्याकरणे तु घट चेष्टाभासचलनपरिमाणेषु, पट गतिभासप्रभृतिषु, कालाद्वञ् इति। तेषामिति। छन्दःकल्पशिक्षानिरुक्तज्योतिषव्याकरणानामित्यर्थः। तद्धेतुन्यायेनेति। 'हेतुहेतुमतो हेतौ तद्धेतोरेव हेतुता' इत्यर्थः। तदिदमिति। किंचेत्यारभ्य विवृतमित्यर्थः। अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति वदन्तो विप्लववादिनो निरसितुमिदमित्याहुः। यद्वा। केवलवैदिककृतपूर्वपक्षे षडङ्गैर्निर्वाहः, परंतु 'स्वाध्यायोऽध्येतव्यः' इति श्रुतिविरोधः, वक्ष्यमाणभाष्यार्थाध्ययनाभावात्। इति केवलवैदिकं प्रति वैदिकश्चेत् मीमांसकः, स एकदेशी तस्याक्षेपस्यमाहुः अत्रैकदेशीति। ब्रह्मपुच्छश्रद्धालुत्वाभ्यासी पूर्वमीमांसको वैदिकैकदेशीति भावः।

न वेदार्थज्ञानमात्राय विचारः । किंतु ब्रह्मज्ञानाय । तस्य स्वात्मरूपत्वात्

भाष्यप्रकाशः ।

स्यारम्भणीयत्वमुपपद्यतामित्यर्थः । तदाह न वेदार्थेत्यादि । तस्येति ब्रह्मणः । 'पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहा' इत्यादिषु विशेषणमात्रस्यापि तत्पदेन ग्रहणदर्शनात् । अयमर्थः । अनुपपद्यमानत्वान्मास्तु वेदार्थमात्रत्वेन ब्रह्मज्ञानाय विचारः, परं स्वात्मत्वेन ब्रह्मज्ञानाय

रश्मिः ।

न वेदार्थेत्यादीति । अत्र **न वेदार्थज्ञानमात्राय विचार** इति भाष्ये । अयं षडङ्गमात्रेण वेदार्थकर्ता वैदिकः । अस्य भेदः मीमांसकपूर्वकषडङ्गैरर्थकर्ता वैदिकः । उक्तास्त्रयो विषयो वेदे यद्यपि, तथापि 'स्मृतेश्च' इति सूत्रभाष्ये वेदान्तानामपि वेदत्वोक्तेः वेदान्तेपि समानाः । अत एव वेदान्तमीमांसाया वेदविधिविचारः । अत एव वेदान्ती यस्य मन्तव्य इति विधेस्त्यागः द्रष्टव्य इति प्रथमविधेः दर्शनानन्तरं प्रवर्तते । किंतु ब्रह्मज्ञानायेति भाष्ये वेदान्ते ब्रह्मोक्तं तस्य ज्ञानाय तत्र ब्रह्मणि प्रकारद्वयम् । श्रुत्युदासीनात्मत्वं वेदार्थभूतात्मत्वं चेति भाष्यार्थो भविष्यति । तत्पदस्य पूर्वपरामर्शकत्वेन ब्रह्मज्ञानस्येत्यर्थेन भाव्यमित्याकाङ्क्षायां दृष्टान्तमाहुः **पटोलपत्रमिति** । **वेदार्थमात्रत्वेनेति** । पूर्वमीमांसका अङ्गीकुर्वन्ति वेदार्थमात्रत्वश्रुत्युदासीनात्मत्ववेदार्थभूतात्मत्वानि ब्रह्मणि धर्मान्, परंतु औपाधिकास्ते । तथाहि । पूर्वमीमांसाकारिकासु वैदिका उक्ताः, तैत्तिरीये अलूक्षा विमर्शिनः, पूर्वे उक्तास्ते पूर्वमतार्किकाः श्रद्धाऽभावात्, पद्मपुराण तर्कानादराच्च । तत्रापि व्याकरणपदपदार्थकज्ञानवन्तः । 'अलौकिको हि वेदार्थः' इति सिद्धान्तात् । श्रुत्येकशरणाः पूर्वमीमांसां नकृतवन्तः । मीमांसायाः पूर्वं जैमिनिसूत्रमात्रत्वाच्छबराचार्यप्रभृतिभिः करणात् । ते हि मीमांसारहितषडङ्गाष्टोपाङ्गपरिशिष्टविचारकाः पुरःस्फूर्तिकनिर्गुणं स्वीकुर्वन्तोपि वेदार्थमात्रत्वमङ्गीकुर्वन्ति । अन्यथा ब्रह्मज्ञानप्रसङ्गान्नापि व्यक्तिशक्तिमङ्गीकुर्वन्ति, प्रस्थानरत्नाकरस्याधुनिकत्वात् । अन्ये पुनर्मीमांसां कुर्वन्तस्तर्कं मीमांसायुतं कुर्वन्ति । तदा श्रुत्युदासीनात्मत्वमङ्गीकुर्वन्ति । भाट्टदीपिकायां मन्त्रमय्येव देवता, प्रातिपदिकार्थस्तु यः कश्चिद्भवतु । मम तु वदतोप्येवं वाणीं दूष्यतीत्युक्तत्वात् । शांकरादीनां वेदान्ते तु 'यतो वाचो निवर्तन्ते' इति श्रुत्या तथा, अन्यासामर्थवादत्वाङ्गीकारात् । किंच, वेदार्थे न निष्पन्नात्मत्वं स्वीकुर्वन्ति निर्गुणत्वेपि । पूर्वं तादृशकुचोद्याभावात् । सोपाधिकत्वप्रसिद्धेरेवमुपपद्यमानत्वादिति । भाट्टनैयायिकाश्च भाष्यं भाष्यप्रकाशे सुबोधिन्यनुसारेण विवृण्वन्ति । सुबोधिनी तु ब्रह्मत्वं ब्रह्मेति निर्विकल्पकज्ञानं ब्रह्मत्वविशिष्टब्रह्मेति ज्ञानं, सविकल्पकमात्मेत्युच्यते । तत्र पूर्वं निर्विकल्पकं, केवलवैदिकत्वात् । पश्चात् सविकल्पकं, मीमांसाया सत्वात् । तदुक्तं पूर्वम्, तथा च वेदार्थमात्रत्वावच्छिन्नब्रह्मत्वं ब्रह्मेति स्यादेतदित्यस्मात्पूर्वभाष्यस्य विषयः । मीमांसासहितस्य साङ्गोपाङ्गसपरिशिष्टवेदार्थत्वावच्छिन्नब्रह्मत्वविशिष्टब्रह्मेति ज्ञानमात्मा स स्यादेतदित्यादिभाष्यविषयः । **अनुपपद्यमानत्वादिति** । षडङ्गैरेव वेदार्थसंभवात् मीमांसाप्रयोजकत्वेनुपपद्यमानो वेदार्थत्वेन ब्रह्मज्ञानाय विचारः । न च वेदार्थत्वं षडङ्गसाध्यत्वं तज्ज्ञानमात्राय विचारः ।

---

१. क्षणिकविज्ञानवादैकदेशीति भावः ।

भाष्यप्रकाशः ।

विचारो न प्रतिक्षेप्तुं शक्यः। नच संदिग्ध एव विषये विचारस्य प्रवृत्तेरात्मनश्चाहंप्रत्ययगोचरत्वेनासंदिग्धत्वादेवमप्यविचार्यत्वमेवेति शङ्क्यम्। अहंप्रत्ययस्य स्थूलोऽहं कृशोऽहं बधिरोऽहं गच्छाम्यहं श्वसिम्यहं जानाम्यहमित्यादौ देहाद्युपाधिगोचरत्वेन विपर्यस्तत्वात् तेन

रश्मिः ।

न प्रतिज्ञातत्वेपि चरममीमांसाबाधकत्वाभावादिति भाष्यार्थे संभवान्मास्तु वेदार्थमात्रत्वेत्यादिः कुत इति वाच्यम्। वेदा वेदान्तास्तदर्थज्ञानं तदपि ब्रह्म 'वेदैश्च सर्वैरहमेव वेद्यः' इति वाक्यात्। तथा च वेदार्थमात्रत्वेन ज्ञानमात्राय ब्रह्मज्ञानाय विचारः इत्यर्थः संपन्नः। यद्वा, जैमिनिर्व्यासशिष्य इति धर्मजिज्ञासाया भाविनीत्वाद्वेदार्थकार्त्स्न्येन ज्ञानमात्ररूपाय ब्रह्मज्ञानायेत्यर्थः। अयमेव भाष्यार्थः। कर्ममार्गस्यापि भाष्ये दर्शनात्। यथा व्याकरणकार्त्स्न्यं निरुक्ते तथा वेदार्थकार्त्स्न्यं ब्रह्मज्ञाने तस्मै विचार इत्यर्थः। व्याख्यानतो विशेषप्रतिपत्तेर्न हि संदेहादलक्षणमिति महाभाष्यात्। इदमपि मास्तु बहुदेशसत्त्वेपि पूर्वमीमांसावत् सर्वविचाराभावात्। न चैतावदेव विचारः विस्तृतविचारस्य पूर्वमीमांसायां दर्शनेनोत्तरमीमांसाविचारमात्रायैतावतोऽसंभवात्। किंतु ब्रह्मेत्यादिभाष्यार्थमाहुः परंत्विति। नन्वत्रापि प्रतिज्ञातब्रह्मज्ञानायेति भाष्यार्थः संभवतीति चेन् न। ब्रह्मशब्दः सोपि वेदान्तरूपः सोपि ब्रह्म, तद्ब्रह्मावृत्त्यर्थत्वादित्याहुरात्मत्वेनेति। ब्रह्म आत्मा, तस्य चात्मरूपत्वादिति भाष्यात्। ब्रह्म ब्रह्मत्वमिति निर्विकल्पज्ञानं ब्रह्म, ब्रह्मब्रह्मत्वब्रह्मत्वस्वत्वरूपसंबन्धावगाहि ज्ञानमात्मा। तथा च ब्रह्मणो वेदार्थत्वेपि तत्त्वेन ज्ञानं नासंभावनाविपरीतभावनानिवर्तकं मीमांसासहितमात्मत्वेन, ब्रह्मज्ञानं तु ह्यसंभावनाविपरीतभावनानिवृत्त्युत्तरत्वेन तन्निवर्तकम्। आत्मत्वेनेति 'आत्मा देहो मनो ब्रह्म' इति विश्वात् ब्रह्म प्रोक्तम्। तथाध्यात्मदेवजातिषु सूरिभिरिति च। अहंप्रत्ययेति। सुखी अहमिति प्रत्ययगोचरत्वेनेत्यर्थः। अहंप्रत्ययस्याहंकारविषयत्वमपि यतः कर्ताहमिति प्रत्ययात्। स चिदचिद्ग्रन्थिरूपः। देहादीति। स्थूलोहं कृशोहमिति देहाध्यासः; बधिरोहमिति इन्द्रियवैकल्यम्, गच्छाम्यहमिति कार्याध्यासः, श्वसिम्यहमिति प्राणाध्यासः, त एत आत्माधिष्ठानकाः। जानाम्यहमिति अहंकारे चिदध्यासः आत्मनो ज्ञानाश्रयत्वात्। 'कामः संकल्पः' इति बृहदारण्यकात्। जीवेऽन्तःकरणाध्यासो वा तदायमप्यात्माधिष्ठानकः। अहंकारानतिरिक्तजीववादिमतेनाह। जगदान्ध्यापत्तिभिया नायमहंकारमात्राश्रयः। अहंकारमात्राश्रयत्वे जडत्वेनाहंकारस्य तथा जडाश्रितस्य गोलकाश्रितव्यतिरिक्तस्याप्रकाशकत्वनियमात्। यद्वा, अहंकारस्य 'आत्मा मनसा संयुज्यते' इत्यादिप्रणाड्यभावात्, तेन जानाम्यहमित्यत्र ज्ञानकर्ताहमिति बुद्धिर्नतु ज्ञानाश्रयोऽहमिति। अन्त्यायां प्रत्यगात्मविषयत्वात्। पूर्वस्याहंकारविषयत्वात्। विपर्यस्तत्वादिति। 'शङ्खः पीतः' इतिवत् 'घटो भ्रमति' इतिवच्च करणदोषविषयदोषजन्यसंप्रयुक्तभिन्नार्थमात्रप्रतिपादकब्रह्मज्ञानत्वादित्यर्थः संशयः। स्मृत्योर्वारणाय मात्रबाधपदे। अत्र विषयदोषजन्यत्वं त्यक्तुं शक्यम्। आवश्यकत्वलाघवाभ्यां तावतैव सिद्धेरिति सिद्धान्ते विशेषः। क्वचिद्विषयदोषोभ्युपेयते, यथा जीवपरमाण्वोरध्यासो दोष इति। एतच्च द्वितीयाध्याये तर्कपादे 'उभयथापि न कर्मातस्तदभावः' इति सूत्रभाष्यप्रकाशे 'चरमः सद्विशेषाणाम्' इति श्लोकार्थकथनावसरे

तस्य चाविद्यावच्छिन्नत्वाद् देहात्मभावदृढप्रतीतेस्तदतिरिक्तस्य ब्रह्मणोऽभावाच्च

भाष्यप्रकाशः ।

संदेहनिवृत्तेरभावात् । नच देहादिरेवात्मेति युक्तम् । देहस्यावस्थाभेदेषु परिणामान्तरदर्शनेन नश्वरत्वनिश्चयात् । अहंवित्तिवेद्ये त्वात्मनि, यः कृशः पूर्वं स इदानीं स्थूल इति पूर्वापरकाले ऐक्यभानेन तदभावात् । नच सोऽहमिति प्रत्यभिज्ञया देहादेरात्मत्वं वक्तुं शक्यम् । प्रत्यभिज्ञायाः सोयं दीपस्तदिदं जलमितिवत् सजातीयविषयत्वेन पूर्वापरकालकतदैक्यानिश्चायकतया तदविषयत्वात् । एवं तत्तदिन्द्रियनाशेऽपि जीवनदर्शनाच्छ्वासोच्छ्वासयोर्बहिरागच्छतः प्राणस्यापि ज्ञानादर्शनेनाचेतनत्वनिश्चयाद् बुद्धिमनसोरपि करणत्वेन सिद्धतया कर्तृत्वेनासिद्धत्वाद् विषयपार्थक्यस्य सर्वानुभवसाक्षिकत्वात् सर्वेषामिदंकाराऽऽस्पदत्वाच्च । नचेदंकारास्पदानामात्मत्वं युज्यते । पुरोऽवस्थित एव विषये तथाप्रयोगदर्शनात् । आत्मनश्च प्रत्यग्वित्तिवेद्यत्वेन तथात्वाभावात् । नचैवं सिद्धे देहादिभ्यो विवेके संदेहाभावादजिज्ञास्यत्वम् । तस्याविद्यावच्छिन्नत्वाद् विदुषां शास्त्रपरिपक्वबुद्धीनामप्यहंप्रत्यये विविक्ततत्स्वरूपस्यागोचरत्वात् सुखदुःखादीनां

रश्मिः ।

वक्तव्यम् । गृह्यमाणारोप इति केचित् । स च परेण गृह्यमाणस्योत स्वयं गृह्यमाणस्य । आद्येऽतिप्रसङ्गो, ज्ञानस्य त्रिक्षणावस्थायित्वस्वीकारात् । द्वितीये तस्यैव बाधादिति । अन्यत्र गृह्यमाणस्यारोप इति चेत्, न । आन्यत्रिकग्रहणस्य तदानीं विरहाद् गृह्यमाणत्वस्याशक्यत्वात् । न च देहादिरिति । प्राणेन्द्रियक्रियाबुद्धिमनोविषया आदिशब्दवाच्याः । आत्मनोऽभेदे प्रत्यभिज्ञां प्रमाणयन्ति अहंवित्तीति । प्रत्यभिज्ञाया ऐक्यनियामकत्वे साम्यशङ्कामादाय निषेधन्ति न च सोऽहमिति । नेत्याह प्रत्याभिज्ञाया इति । पूर्वापरेति । पूर्वापरौ कालौ यस्य देहस्य तस्यैक्यानिश्चायकतया पूर्ववदैक्याविषयत्वान्न साम्यमित्यर्थः । तेन व्यक्त्यवलम्बिना प्रत्यभिज्ञा ऐक्यमवगाहते 'सोयं घटः' इतिवत् । या तु जातिमवलम्बते न सैक्यमवगाहते, प्रवाहे तदिदं जलमितिवदित्युक्तम् । तेन च देहो नात्मेत्युक्तम् । तर्हीन्द्रियनिकुरम्बः प्रत्येकमिन्द्रियं वा प्राणादिर्वात्मा भविष्यति तत्राह एवमिति । सकलेन्द्रियनाशोऽपेरर्थः । करणत्वेनेति । बुद्ध्या पदार्थान् जानातीति प्रत्ययेन, सुखसाक्षात्कारः सकरणकः, जन्यसाक्षात्कारत्वात् । चाक्षुषसाक्षात्कारवदित्यनुमानेन च बुद्धिमनसोः करणत्वेन सिद्धतया ज्ञानाश्रयत्वेनासिद्धत्वादित्यर्थः । विषयेति भूतपाषाणादिपार्थक्यस्येत्यर्थः । साधारणं हेतुमाह सर्वेषामिति । नासावात्मेदंकारास्पदं पुरोवस्थितत्वाभावादित्याह आत्मनश्चेति । प्रत्यग्वित्तीति । प्रातिलोम्येन जडादिसर्ववैलक्षण्येनं सच्चित्सुखात्मतयाञ्चति प्रकाशत इति प्रत्यक् जीवः, श्रीधर्यां तथा व्याख्यानं तृतीयस्कन्धे, तद्वित्तिविषयत्वेनेत्यर्थः । सा चाहं प्रत्यगिति । तस्य चाविद्यावच्छिन्नत्वादिति भाष्यमवतारयन्ति न चैवं सिद्ध इति । विविक्ततत्स्वरूपाज्ञाने हेतुमाहुः अगोचरत्वादिति । सुखदुःखादीनामिति ।

निबन्धे 'तत्रासावपि नो मुक्तिर्जाग्रत्स्वप्नवदुद्भवः ।
अविद्याविद्ययोस्तस्माद्भजनं सर्वथा मतम्' ॥ इति शास्त्रार्थे

वेदमात्रादसंभावनाविपरीतभावनानिवर्तकं ज्ञानमुत्पद्यते । प्रत्युत देहात्मभावदृढप्रतीतेः श्रुतेरुपचरितार्थत्वं स्तुतित्वं वा कल्पयिष्यतीति ।

मैवम् ।

भाष्यप्रकाशः ।

प्रादेशिकत्वस्य चाभिमानेन तथा निश्चयात् तेषामपि देहात्मभावदृढप्रतीतेरविद्यासंबन्धरहितस्य केवलस्यात्मनः प्रत्ययाभावेन दर्शनान्तरेऽपि व्यापकतया प्रतिपन्नस्य तस्यैव बृहत्त्वेन बृंहणत्वेन च तदतिरिक्तस्य ब्रह्मणोऽभावाद् विविक्ततत्स्वरूपज्ञानाय विचार आवश्यकः । न च वेदमात्राद् विविक्तात्मस्वरूपविषयासंभावनाविपरीतभावनानिवर्तकं ज्ञानं सिद्ध्यति । प्रत्यक्षापेक्षया शब्दस्य निर्बलत्वात् । प्रत्युत प्रबलप्रमाणेन देहात्मभावदृढप्रतीत्या शास्त्रपक्वबुद्धिरपि दर्शनान्तराभिमानेन विविक्तात्मस्वरूपबोधिकायाः श्रुतेः कल्पनोपदेशतयोपचरितार्थत्वं वा, उपासनाशेषतया स्तुतित्वं वा कल्पयिष्यति । अतोसंभावनाद्यपनयनेन श्रुतावुपचारादिनिवृत्त्यर्थं वेदार्थभूतात्मत्वेन ब्रह्मज्ञानाय विचार आवश्यक इति ।

एवमुक्तमेकदेशिमतं चोदकः प्रतिक्षिपति मैवमिति । यदुक्तं, न वेदार्थज्ञानमात्राय विचारः,

रश्मिः ।

तत्प्राप्तौ विद्याप्राप्तौ, तथा चाविद्योद्भवेनागोचरत्वात् आत्मगुणानाम् । **प्रादेशिकत्वस्येति** प्रदेशे भवत्वस्येत्यर्थः । अध्यात्मादेराकृतिगणत्वाट्ठञ् । **तथेति** अविद्योद्भवत्वस्य निश्चयात् । न चाणोर्जीवस्य धर्माणां प्रादेशिकत्वेप्यक्षतिरिति शङ्क्यम् । परमात्मविचारादणुभाष्यत्वेपि । **देहात्मेत्यादि** । न च सुखदुःखजनकपूर्वजन्मीयधर्माधर्माधारतया तस्य शरीरातिरिक्तत्वसिद्धिरिति वाच्यम् । मयूरचित्रादिवत् तयोरपि स्वाभाविकतया तज्जनकधर्माधर्मासिद्धौ तदाधारस्यात्मनोप्यसिद्धेरिति प्रत्यक्षैकप्रमाणवादिनो लोकायतिका आहुः, तेनाविद्यास्वरूपमप्युक्तम् । अभिमानस्याविद्याकार्यत्वेनाज्ञानरूपं तत्स्वरूपमुक्तम् । **दर्शनान्तर** इति शैवमते भास्कराचार्यमते च । **विविक्तेति** । सच्चिदानन्दं ब्रह्म स्वेच्छया सदानन्दरूपं, तस्य जगज्जन्मादिकर्त्री शक्तिः चिच्छक्तिर्व्यापिका, तस्या व्यामोहिका शक्तिरित्येवमिच्छायाः पूर्वमुत्तरं च विविक्ततत्स्वरूपज्ञानाय । तेन अविद्यास्वरूपमप्युक्तम् । **न वेदमात्रादिति** भाष्यं विवृण्वन्ति **न च वेदेति** । असंभावना देहातिरिक्तात्मासंभावना । विरुद्धसर्वधर्मानाधारत्वभावना विपरीतभावना 'अज्ञानमन्यथाज्ञानं ब्रह्मगं विनिवार्यते । कृष्णगमपीति भावः । मीमांसकास्तु प्रातिपदिकार्थः कश्चिदस्तु शब्दमयी देवतेत्याहुः । **निर्बलत्वादिति** । न हि शब्दशतेनापि दृश्यमानो घटो वारयितुं शक्यते । **प्रत्युतेति** भाष्यं विवृण्वन्ति **प्रत्युतेति** । **श्रुतेरिति** तत्त्वमस्यादिश्रुतेरित्यर्थः । **कल्पनेति** कल्पनोपदेशसूत्रे स्पष्टम् । **उपासनेति** मनोव्यापारविशेषो रामानुजाचार्यमतेन्यत्रापि । **स्तुतिः**रुत्कर्षाधायकगुणवर्णनम् । अत्र पक्षे नोपचारः । **वेदार्थभूतात्मत्वेनेति** स्वबुद्ध्या वेदार्थं परिकल्प्य तादृशवदार्थभूतात्मत्वेन । [अत्रैव श्रुत्युदासीनात्मत्वेन ब्रह्मज्ञानाय विचारोप्यग्रे भाष्यप्रकाशेनूष नोदकप्रतिक्षेपे दूषयिष्यन्ति । अधस्तनरश्मौ तु तुर्यपङ्क्तौ । अधस्तनरश्मौ व्यवहारे वयं भाट्टा इति वदतो मते भाट्टीयब्रह्मज्ञानाय] । **चोदक** इति । केवलवैदिकः साङ्गोपाङ्गसपरिशिष्टवेदैः कृतमर्थं प्रतिक्षिपदेकदेशिमतम् । सिद्धान्त्येकदेशीत्यर्थः । तस्य च सच्चिदानन्दात्मकं ब्रह्म निराकारमेव,

अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या तु प्रसादात् परमात्मनः ॥

भाष्यप्रकाशः ।

किंतु ब्रह्मज्ञानायेति । तत्र किं दर्शनान्तरवच्छ्रुत्युदासीनात्मत्वेन ब्रह्मज्ञानाय वेदान्तविचारः । ततश्च वेदार्थज्ञानमानुषङ्गिकमिति तव मनीषितम्, उत वेदार्थभूतात्मत्वेन तदर्थं स इति । तत्राद्यस्तु दर्शनान्तरैरेव सिद्धो, न विवक्षितपदवीमधिरोहति । द्वितीयश्चेत् तदापि तन्न संगच्छत इत्यर्थः । उक्तरूपस्यात्मनो वेदार्थत्वाभावे हेतुं कारिकया गृह्णाति **अलौकिक इति** । **हिशब्दो हेतौ** । अलौकिकत्वादित्यर्थः । किं तेनेत्याह **न युक्त्येति** । कथं तर्हि तत्प्रतिपत्तिरित्यत आह **तपसेत्यादि** । तपोऽनशनादिरूपम् । **वेदोक्ता** युक्तिर्वेदयुक्तिः न्यग्रोधफलमाहरेत्यादिरूपा । **परमात्मप्रसादो** मुख्यं साधनम् । अन्यथा 'तेषां प्रकृतिवैचित्र्याच्चित्रा

रश्मिः ।

सर्वभवनसामर्थ्यसंपृक्तं निमित्तान्तरमन्तरेणैवांशतो धर्मरूपेण, तदनु क्रियारूपेण, ततः प्रपञ्चरूपेण संभवतीति मतम् । तदेतत्' 'अरूपवत्' सूत्रे तृतीयाध्याये वक्ष्यते । तेनात्रैवं ज्ञेयम् । भाष्ये आधिदैविकादिभेदेन नारम्भणीयः, स्यादेतत्, मैवमित्यादिग्रन्थैः त्रेधा पूर्वपक्षः । केवलवैदिककृतो नारम्भणीय इत्यादिग्रन्थविषयः । मीमांसकश्चेत् पूर्वोक्तस्तत्कृतः स्यादेतदित्यादिग्रन्थविषयः । सिद्धान्त्येकदेशिकृतो मैवमित्यादिग्रन्थविषयः । प्रथमपूर्वपक्षी वेदार्थमात्रत्वमङ्गीकरोति । द्वितीयः श्रुत्युदासीनात्मत्वमङ्गीकरोति । स्वबुद्ध्या वेदार्थं परिकल्प्य तादृशवेदार्थभूतात्मत्वं च । तृतीयस्तु वेदार्थभूतात्मत्वेन 'नाहं वेदैः' इत्यादिभिः वेदार्थभूतस्य 'वेदैश्च सर्वैरहमेव वेद्यः' इति स्वेच्छया विरुद्धसर्वधर्माधारत्वेन वा वेदार्थभूतात्मत्वमङ्गीकरोति, स एव सिद्धान्तः । प्राज्ञादप्याधिक्यात् । मुख्यमतं कृष्णमतमित्युपनिषदोत्तरत्र [चिमनभातेपि अमतमित्वत्र मते रुचप्रचिवीति भानं ज्ञेयम् ।] **प्रतिक्षिपतीति** षडङ्गवेदविचारितब्रह्मौदासीन्येन स्वबुद्धिपरिकल्पितवेदार्थभूतात्मत्वे ब्रह्मज्ञानमापततीत्यरुच्या भ्रान्तत्वेन प्रतिक्षिपतीत्यर्थः [**प्रति**[2]**क्षिपतीति** । मीमांसाया अपि न स्वातन्त्र्यं येन देवताप्रतिपादिकोऽर्थो यः कश्चिदस्तु हीति युज्यतेऽपि तु 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेस्तर्कैः अप्रतिपाद्यवेदानुकूलमीमांसायुततर्कैः प्रतिपाद्यरूपवेदार्थभूतत्वेन प्रतिपाद्यमित्येवं प्रतिक्षिपतीत्यर्थः] **दर्शनान्तरवदिति** । कणभक्षाक्षचरणशास्त्रवद्युक्त्या वेदान्तविचार इत्यन्वयाज्जीवः पराभिन्नः सच्चिदानन्दरूपत्वात्परमात्मवदित्यनुमानसाध्यात्मत्वेनेव साध्यार्थातिरिक्तार्थवादश्रुत्युदासीनात्मत्वेनेत्यर्थः । अत्राहमस्मि प्रिये जानामीति प्रतीतेः सच्चिदानन्दलक्षणो जीवः, शांकराणामपि अहं ब्रह्म इत्यनुमितिः अहं पराभिन्न इत्यनुमितिः। **आनुषङ्गिकमिति** । स्वबुद्ध्या वेदार्थान् परिकल्प्य तदर्थविचारे तदनुषङ्गेण दीव्यतीत्यानुषङ्गिकं 'तेन दीव्यति खनति जयति जितम्'इति ठक् । **वेदार्थेति** । **स्वबुद्ध्या** वेदार्थं परिकल्प्य तादृशवेदार्थभूतात्मत्वेनेत्यर्थः । श्रुत्युदासीनात्मत्वेन ज्ञानं निरीश्वरहतमिति सांख्ययोगनैयायिकभाट्टादीनाम् । **न विवक्षितेति** । वेदवेदान्तदर्शनपदवीं नार्हतीत्यर्थः । विचारान्तरतां नार्हतीत्यर्थः । **न संगच्छत** इति यौक्तिकत्वान्न संगच्छते । आचार्यमतत्वेपि तपआदिरहितं न संगच्छते, पञ्चगीतं विना न संगच्छत इत्यर्थः । **अनशनादीति** । आदिना वेदार्थत्वेति उक्तवेदार्थत्वाभावे (चिकाय)वेदार्थत्वं त्वस्यैव गीतोक्तम् । **न्यग्रोधेत्यादि** । छान्दोग्ये

---

१. न्यग्रोधफले न्यग्रोधलता ब्रह्मणि सर्वमितिभावः ।

२ अर्थान्तरं स्यादिदम् ।

न हि स्वबुद्ध्या वेदार्थं परिकल्प्य तदर्थं विचारः कर्तुं शक्यः।

भाष्यप्रकाशः।

वाचः स्रवन्ति हि'इतिन्यायेनान्यदेव बुद्ध्येतेति। एतदेव विभजते न हीत्यादि। अयमर्थः। भवान् हि श्रुतीनामनुपचरितार्थत्वाय दर्शनान्तरे आत्मगमकत्वेन स्वीकृतस्याहंप्रत्ययस्य प्रादेशिकग्राहकत्वं प्रदर्श्य तस्याविद्याख्योपाध्यवच्छिन्नात्मग्राहकत्वेन भ्रमत्वं च प्रदर्श्य तेन तन्निश्चयाभावात् कर्तृत्वभोक्तृत्वाद्यंशेऽपि तस्य भ्रमत्वं साधयितुं चिदेकरसस्यात्मनो ज्ञानाविषयत्वं च साधयितुमध्यासभाष्यसूचितां विषयत्वेन जडत्वेन व्याप्तिमङ्गीकृत्यैवमाह। अहंवित्तौ प्रकाश-

रश्मिः।

'भूय एव मा भगवान् विज्ञापयतु'इति पुत्रेण श्वेतकेतुना पृष्ट आरुणिः 'तथा सोम्येति होवाच न्यग्रोधफलमाहरेतीदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामेकैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति त९ होवाच यं वै सौम्यैतमणिमानं न निभालयसे एतस्य वै सौम्यैषोणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सौम्येति स एषोणिमतैदात्म्यमिद९ सर्वं तत्सत्य९ स आत्मा तत्त्वमसि श्वेतकेतो' इत्येवंरूप इत्यर्थः। भगव इति संबोधनं, निभालयसे पश्यसि। मुख्यमिति चरणद्वारापि। न्यायेनेति एकादशस्कन्धोक्तेन तेनेत्यर्थः। प्राज्ञश्च केवलवैदिकैकदेशी त्वचोदकश्च तेषां वाचकानि पक्षाणि, तैरुपात्तान् तान् प्राज्ञकेवलवैदिकैकदेशिपदोपात्तान्। एकदेशीयवस्तुसूचितशांकरं प्रत्याह। तपआदीनि वेदार्थभूतात्मवादी। भवानिति शांकरः कश्चित्। अनुपचरितेति। अनुपचरितार्थत्वं यथाशास्त्रदृष्टार्थत्वं तेन अर्थवादत्वने पूर्वोक्तपक्षे अनुपचरितार्थत्वाभावेपि अरुचिः। शंकराचार्यमतेऽपि व्यवहारे भाट्टप्रतारणादर्शवादत्वं वक्ष्यमाणपक्षेऽनुपचरितार्थत्वं तस्या इति वा। दर्शनान्तर इति वैदिकशास्त्रादन्यस्मिन् शांकरादिशास्त्रे। प्रादेशिकेति। सुख्यहमिति हृद्देशे भगवत्त्वस्याग्राहकत्वम्। अविद्योपाध्यवच्छिन्नविषयग्राहकत्वेन भ्रमत्वम्। तेन तन्निश्चयाभावादिति भ्रमात्मकेनाहंप्रत्ययेनात्मनिश्चयाभावादित्यर्थः। कर्तृत्वेत्यादि। प्राकृतिकं कर्तृत्वादिकमात्मन्यारोपितमिति तथा। अध्यासभाष्यसूचितामिति अध्यासभाष्यस्य तत्त्वमस्यादिवाक्यावेदितैक्यविद्याप्रतिपत्तिप्रयोजनाहितजडमिथ्यात्वमवगमयितुमात्मनि अस्मत्प्रत्ययमात्रगोचरे जडतद्धर्माध्यासः कल्पितः, शुक्तौ रजतमिव। स चाविद्यास्वरूपो वस्तुस्वरूपावधारणेन विद्यारूपेण नश्यतीति। अधिष्ठानावधारणे रजतमिव। अस्यानर्थस्य प्रहाणाय वेदान्तारम्भ इति वाच्योऽर्थः। व्याप्तिस्तु संभावनापरेण न चायमस्ति नियमः पुरोवस्थित एव विषये विषयान्तरमध्यसितव्यमित्यादिभाष्येण तात्पर्यरूपया व्यञ्जनयोच्यत इत्यर्थः। सिद्धान्ते च बुभुत्सितार्थावाचकत्वे तत्प्रतीतिजनकत्वम्। तत्प्रतीतीच्छयोपचरितत्वं तात्पर्यमित्यालंकारिकाः, वृत्तेर्द्वैविध्यात्। तेन फललक्षणादिव्यञ्जनान्तानां तात्पर्ये निवेशः। एवमिति वक्ष्यमाणप्रकारेणेत्यर्थः। अनर्थप्रहाणफलका वेदान्तास्तादृशारम्भकत्वे अध्यासभाष्यशक्यार्थः। अत्रानर्थप्रहाणे जडो विषयत्वात् मिथ्याजडत्वादित्यनुमानयोः प्रविष्टत्वेनैतत्प्रतीतीच्छयोपचरितत्वमनर्थप्रहाणफलबोधमरूपारम्भे वर्तते। अन्यथा तत्प्रहाणे जडमिथ्यात्वमवगमयितुमिति जातो धर्माध्यासः कल्पित इति न वदेत्। अयं बुभुत्सितोर्थोपि भवति, तदवाचिकत्वे तत्प्रतीतिजनकत्वमपि तादृशार्थप्रतीतिजनकत्वमपि। ननु रूपारम्भे तत्प्रतीतिजनकत्वं नास्ति, किंत्वनर्थप्रहाणवाचकभाष्ये इति चेन्न, न ह्यारम्भः पृथगेव वाच्यः, किंतु

भाष्यप्रकाशः ।

शमानस्यात्मनो ज्ञानान्तरविषयत्वेन जडत्वापत्तिः । सर्वास्वर्थवित्तिषु प्रकाशाश्रयत्वेन सिद्धस्यात्मनो घटमहं जानामीत्यादौ विषयत्वायोगः । चैत्रो ग्रामं गच्छतीत्यादौ क्रियाफलस्य संयोगस्योभयनिष्ठत्वेऽपि ग्रामादौ परसमवेतक्रियाफलशालित्वस्य कर्मत्वेन स्वसमवेतक्रियाफलशालिन आत्मनः परत्वाभावेन आत्मानमहं जानामीत्यादौ ज्ञानविषयस्यात्मनः कर्मलक्षणानाक्रान्ततया कर्मत्वायोगः । तस्य कर्तृभेदाङ्गीकारे कर्मभूतस्य तस्यानात्मत्वप्रसङ्गः । अप्रकाशमानत्वस्यैव जडत्वेन स्वस्मिन्नप्रकाशमानतयापि जडत्वापत्तिः । अनुभवबलेन कर्मकर्तृविरोधे परिहृते सिद्धे चाभेदे प्रकाशाश्रयरूपकर्तृत्वेनैव प्रकाशत इत्यङ्गीकारेऽपि यस्मिन्नर्थात्मानौ प्रकाशेते तस्य ज्ञानरूपप्रकाशस्य स्वयमप्रकाशमानतया जडत्वे विषयाप्रकाशकत्वप्रसङ्गः । तस्या-

रश्मिः ।

तस्यानर्थस्य प्रहाणेन सहैकीकृतस्यार्थजातस्य वाचकभाष्यस्य नयतीति जघन्यत्वात् । अध्यासभाष्यसूचितामिति भाष्यप्रकाशात् । एवं च काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातकत्वस्य काकेषु सत्त्वाद्भद्रात्मनः इति काव्यप्रकाशस्य वरवारणस्येत्यत्र समासान्तरस्य सत्त्वात्तद्वदत्राप्यध्यासभाष्ये तादृशारम्भत्वसत्त्वेपि अवगमयितुमित्यनेन ज्ञानबोधनेपि जडमिथ्यात्वादिपदसमभिव्याहारेणानुमितिसूचनादशु(भ)मिति । विशिष्टत्वसत्त्वमयीति तेन रूपेणाध्यासभाष्यस्यानुमितिविशिष्टे लक्षणा तादृशभाष्येऽनुमितिविशिष्टायां व्याप्तौ चानुमितिसत्त्वादिति । एवमिति अवधारितमाहेत्यर्थः । तमाह अहंवित्ताविति अहं ब्रह्मास्मीत्याकारिकायामित्यर्थः । जडत्वापत्तिरिति आत्मा जडो विषयत्वात् घटवदित्यनुमानेन तथात्वापत्तिरित्यर्थः । प्रथमान्तानीमानि पदानीत्यतः फलरूपा संवित् स्वयंप्रकाशाभ्युपेतव्येत्यनेनानुपपत्तिः । स्वप्रकाशकं घटमहं जानामीत्याकारकं च सर्वमेव ज्ञानं घटादिकमिव स्वात्मानं स्वाधिकरणमात्मानं च गोचरीकुर्वत् त्रिपुटीप्रत्यक्षतां प्रवादयति । मितिमातृमेयविषयत्वात् स्वस्येति । प्राभाकरमतमाक्षिपन्ति सर्वास्विति । अहं घटं जानामि घटज्ञानो घटं ज्ञातवान् ज्ञातो घट इत्येवंरूपासु घटविषयकज्ञानाश्रयोऽहमित्यादिबोधात् प्रकाशाश्रयत्वेन सिद्धस्येत्यर्थः । विषयत्वायोग इति । स्वर्गमिच्छतीत्यादौ कर्तुस्तथात्वादर्शनात्तथेत्यर्थः । नैयायिकादीनाक्षिपति चैत्र इति । उभयनिष्ठत्वेपीति कर्तृकर्मनिष्ठत्वेपीत्यर्थः । तथाच क्रियाफलशालित्वस्य कर्मलक्षणस्यातिव्याप्तत्वमिति भावः । तन्निवृत्तये परसमवेतविशेषणविशिष्टलक्षणमित्याह ग्रामादाविति । तत्राव्याप्तमित्याह स्वसमवेतेति । परत्वाभावेनेति । कर्मभूतात्मास्मदर्थाध्यस्तात्मनोरैक्यात्तथेत्यर्थः । ननु 'आत्मानमात्मना वेत्ति' इतिवदुपपद्यतामित्यत आह तस्येति । अनात्मत्वप्रसङ्ग इति जीवद्वयाङ्गीकारस्य निर्यौक्तिकत्वेनानात्मप्रसङ्ग इत्यर्थः । जडत्वापत्तिरूपं तत्फलमाह अप्रकाशेति । स्वस्मिन्निति । स्वविषयकप्रकाशकर्तृत्वाभावेनापि । अनुभवबलेनेति प्रमाणीभूतेनेत्यर्थः । प्रकाशत इति । कर्मापीति शेषः । यस्मिन्निति अहं जीव इत्यस्मिन् बुद्ध्याद्युपाधिप्रकारकात्मविशेष्यके ज्ञाने इत्यर्थः । स्वयमिति अर्थरूपविषय-

भाष्यप्रकाशः ।

प्रकाशमानत्वेऽपि निलीयचक्षुरादिवत् प्रकाशकत्वे तत्फलस्यैवैतत्फलस्यैव स्वयम्प्रकाशताया आस्थेयतयाऽस्य जडत्वापत्तिः । पूर्वज्ञानफलस्यैतस्य जडत्वे एतज्ज्ञानफलस्याग्रिमस्यापि जडत्वापत्तिः । परंपराङ्गीकारेऽनवस्था जगदान्ध्यापत्तिश्चेत्यतः फलरूपा संवित् स्वयंप्रकाशाऽभ्युपेतव्या, न तु निलीयचक्षुरादिवत् प्रकाशिका । ततश्च स्वयंप्रकाशत्वस्यैव चेतनत्वेन तदाश्रयतया प्रकाशमानस्यात्मनो विषयत्वेन जडत्वापत्तिस्तदवस्था । नचार्थात्मानौ विना केवलायाः संविदः प्रकाशाभावात् संविदर्थात्मनां परस्परप्रकाशकत्वमेवेति परतःप्रकाशत्वमेव चेतनत्वम्, ततश्च संवित्तुल्यत्वादात्मनोऽपि जडत्वमिति शङ्क्यम् । तथा सत्यर्थस्यापि चेतनत्वापत्तेः । अथ संविदर्थात्मनां परस्पराविनाभावादात्यन्तभेद इति विभाव्यते, तदा तु संविद इव तयोरपि स्वयंप्रकाशत्वं सिद्धमित्यर्थात्मनोः संविदतिरेकेणानिर्वाच्यत्वात् संविदेव केवला सिद्ध्यति, न

रश्मिः ।

जनकत्वेन संसर्गजन्यत्वेन च स्वयमप्रकाशमानतयेत्यर्थः । **निलीयचक्षुरिति** । लीङ् श्लेषणे निपूर्वः । ल्यबन्तस्तु न भवति । 'अचो यत्' 'शकि लिङ्च'इति सूत्रे चकारेण शक्यार्थविधानात् नितरां लातुं शक्यं चक्षुरित्यर्थः । गुणाभावस्तु चिन्त्यः । यद्वा । अव्ययमिति योगविभागाल्ल्यबन्तेन समासः । विषयेण नितरां संबध्य यच्चक्षुस्तद्वदित्यर्थः । अत्रापि यत्तदोरध्याहारो लक्षणा वा । निलीयेति विशेषणं तु अतथाभूतस्य चक्षुषो दृष्टान्तार्थकत्वात् । यद्वा । निलीय विषयतामप्राप्य चक्षुः आदिना श्रोत्रादि तद्वदित्यर्थः । **प्रकाशकत्व इति** । अभिमत इति शेषः । **तत्फलस्येति** चक्षुःफलस्य जन्यज्ञानस्यैवैतत्फलस्यार्थात्मविषयकस्याहं जीव इति ज्ञानस्य यत्फलमनुव्यवसायरूपं तस्यैव स्वयंप्रकाशता स्यात् । अस्यार्थात्मविषयकज्ञानस्य जडवत्संवित्प्रकाश इति ततश्च स्वयंप्रकाशत्वस्यैव चेतनत्वेन तदाश्रयतया प्रकाशमानस्यात्मनो विषयत्वेन जडत्वापत्तिस्तदवस्था । नचार्थात्मानौ विना केवलायाः संविदः प्रकाशाभावात् संविदर्थात्मनां परस्परप्रकाशकत्वमेवेति परतः प्रकाशमेव चेत् संवित्प्रकाश इति नैयायिका विरुद्धं मन्यन्ते । ननु जडत्वं नाम प्रकाशकतावच्छेदकं चक्षुरादौ व्यभिचारादित्याशङ्क्याह **जडत्वापत्तिरिति** । **पूर्वज्ञानफलस्येति** । इदं हि विशिष्टं ज्ञानम् । विशेषणज्ञानाधीनं दण्डीतिज्ञानवत् । तथा च बुद्ध्यादिज्ञानफलस्याहं जीव इति ज्ञानस्य जडत्व एतज्ज्ञानफलस्य बुद्ध्यादिनाहं ज्ञानाश्रय इत्यादिज्ञानस्याग्रिमस्य जडत्वापत्तिः । पूर्वसजातीयत्वलिङ्गकानुमानादित्यर्थः । जन्यं ज्ञानं विषयात् पूर्वं न भवतीत्यर्थात्मविषयकं ज्ञानं पूर्वज्ञानशब्देन (न) गृहीतम् । **जगदान्ध्येति** । ज्ञानस्यापि जडत्वे प्रकाशाभावात् तथेत्यर्थः । **इत्यत इति** । जडत्वापत्तेर्जगदान्ध्यापत्तेश्चेत्यर्थः । **फलरूपेति** अन्तःकरणपरिणामनिवृत्तावरणकरूपा संविदित्यर्थः । तदुक्तं 'अहं ब्रह्मास्मि' 'ब्रह्मैवाहमस्मि' इत्यखण्डाकारवृत्तितया वृत्त्यविज्ञाने निवृत्तेऽब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात् प्रत्यगात्मनोऽखण्डानन्दस्वरूपावस्थितिर्भवतीति । **ननु निलीयेत्यादि** । स्वयं स्वाप्रकाशतामावहन्ती प्रकाशिकेत्यर्थः । इदानीं तस्याः स्वप्रकाशत्वाय यतते । **ततश्चेति** । परतः प्रकाशादित्यर्थः । **तथा सतीति** परतः प्रकाशत्वस्य जडत्वनिवर्तकत्वे सतीत्यर्थः । नैयायिका ज्ञानं निर्विषयकं न मन्यन्ते तद्रीत्याह **अथेति** । **विभाव्यते** नैयायिकवद्विभाव्यते । **संविदतिरेकेणेति** संविद्रूपकारणसत्ताव्यतिरेकेण । तयोरर्थात्मनोरनिर्वाच्य-

भाष्यप्रकाशः ।

त्वर्थात्मभ्यां सहिता । वस्तुतस्तु संविदोऽर्थसहभावोऽपि न नियतः, अतीतानागतस्थले व्यभिचारात् । नच तत्राभाव एव विषय इति वाच्यं, तस्यासत्त्वात् । नच सोऽपि सन्निति वाच्यं, सत्त्वस्य निर्वक्तुमशक्यत्वात् । सत्त्वं हि सत्ताख्यसामान्यं समवायो वा, अर्थक्रियाकारित्वं वा प्रकाशमानत्वं वाऽभ्युपेयम् । तत्र नाद्यौ । सत्तायां सत्तासमवायाभावेन अर्थक्रियाकारित्वेऽर्थक्रियाकारित्वाभावेन च तयोरसत्त्वे तद्योगिनोऽप्यसत्त्वसिद्धेः । सत्तान्तराद्युपगमेऽनवस्थापाताच्च । न तृतीयः । मरुमरीचिकादेरपि तोयाद्यात्मना सत्त्वापातात् । नच मरुमरीचिकादीनां तोयाद्यात्मना असत्त्वेऽपि स्वरूपेण सत्त्वात् प्रकाशमानत्वं नानुपपन्नमिति वाच्यं तथापि सत्त्वस्य प्रकाशमानत्वातिरिक्तधर्मान्तरत्वेन प्रकाशमानत्वस्य तत्त्वाभावात् । अथ भावधर्म एव सत्त्वम् । अभावोऽपि भाव एव 'भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्'इति भावस्यैव भावान्तरात्मनाऽभावरूपत्वादिति विभाव्यते । तदापि स भावधर्मः को वा । व्यवहारयोग्यत्वमिति चेत् । को नाम तत्र व्यवहारः । अभिलाप इति चेत् । तद्योग्यत्वस्य खपुष्पेऽपि तुल्यत्वात् । अतोऽभावस्य खपुष्पतुल्यत्वेनातीतानागतस्थलेऽर्थवियुक्तैव संवित् । एवमर्थसहभावानियमे सिद्धे यत्र सहभावाभिमानस्तत्राप्यर्थसत्ताया निर्वक्तुमशक्यत्वादर्थस्यानिर्वाच्यत्वमेव । तथैवात्मनो व्यापकत्वेनाहंप्रत्यये प्रादेशिकत्वस्थूलत्वकृशत्वादिना भासमानस्य चन्द्रसद्भावे चन्द्रान्तरवद् भानात् तस्याप्यनिर्वाच्यत्वम् । तच्च सतो बाधाभावादसतश्चाभानात् सत्त्वासत्त्वयोरेकत्र विरोधेन सदसद्रूपताया अशक्यवचनत्वात् सदसद्विलक्षणत्वमेव । तथाच सति विषयत्वेन भासमानानां मरुमरीचितोयतुल्यत्वात् संविदेव केवला सती सिद्ध्यतीति सैवात्मा । तस्या अविषयत्वेऽपि तत्रैव कर्तृत्वभोक्तृत्वादयोऽऽध्यस्यन्ते, अप्रत्यक्ष आकाशे मालिन्यवदिति ।

रश्मिः ।

त्वमाविधकत्वेन खपुष्पादिवदनिर्वाच्यत्वं तस्मात् । एवं संविदोऽर्थसहभावं दृष्टं अङ्गीकृत्य तस्याध्यस्तत्वमन्तरेण स्वयंप्रकाशतासंभवात् स्वयमर्थो मिथ्येत्युक्तम् । इदानीमर्थाभावेपि संवित्प्रकाश इति मन्यते **वस्तुतस्त्विति** । **न च तत्रेति** । घटो भविष्यति, घटो ध्वस्त इत्यादिप्रत्यये इत्यर्थः । अभावोऽस्तीति प्रतीत्याशङ्क्य पराकरोति **न च सोपीति** । **सत्तायामिति** । अनङ्गीकारादसंभवाच्च । तत्र तयोरभावेन तयोः सत्ताख्यसामान्यसमवायार्थक्रियाकारित्वयोरसत्त्वेन तद्योगिनोऽभावस्याप्यसत्त्वसिद्धिरित्यर्थः । तयोः सत्ता स्वीक्रियत इत्यत आह **सत्तान्तरेति** । **भावान्तरमिति** । अभावो भावान्तरम्, नान्यः कश्चित्, अनिरूपणादित्यर्थः । **तच्चेति** अनिर्वाच्यमित्यर्थः । **सैवात्मेति** । श्रुत्युदासीनात्मत्वेन वेदार्थभूतात्मत्वस्वरूपेणात्मेत्यर्थः । **अध्यस्यन्त** इति । परत्र परावभासोऽध्यासः । आरोप्यात्यन्ताभाववत्त्वं परत्वमधिकरणत्वं त्वलोऽर्थः । अवभास्यते इत्यवभासो रजतादिः । एवं चैकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववति अवभास्यत्वमिति बुद्धिनिष्कर्षः । कपिसंयोगीत्यत्र संयोगेऽतिव्याप्तिवारणायैकावच्छेदेन इति । तस्य स्वसंसृज्यमाने स्वात्यन्ताभाववति इतरावभास्यत्वेपि स्वस्याभावयोर्मूलाग्रावच्छेदकभेदेनैकावच्छेदकत्वाभावात् । पूर्वं स्वाभाववति भूतले पश्चादानीतो घटश्चकास्तीति घटेऽतिव्याप्तिवारणाय स्वसंसृज्यमान इति अभावकाले प्रतियोगिसंसर्गस्य वर्तमानत्वं तदर्थः । भूत्वावच्छेदेनावभास्ये गन्धेऽ-

भाष्यप्रकाशः ।

तदसंगतम् । विषयत्वेन जडत्वेन व्याप्तेः प्रत्यक्षबाधितत्वात् । आत्मनश्चेतनत्वस्योभयसंमतत्वात्, तस्य च प्रत्यग्वित्तिवेद्यत्वात्, प्रत्यग्वित्तिगोचरत्वेन विषयत्वस्य व्यापकतया जडत्वेन विषयत्वेन व्याप्तेरेव प्रत्यक्षसिद्धत्वाच्च । नच प्रत्यग्वित्तेश्चिदेकरसात्माग्राहकतया तदविषयत्वमेवेति वाच्यम् । तेन रूपेणाविषयत्वेऽपि प्रत्यक्त्वादिना रूपान्तरेण विषयत्वात् । अन्यथा विषयाभावेन तद्वित्तिलोपप्रसङ्गात् । 'सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यग्रसः प्रमाणैरेतैरवगतः'इति तापनीये प्रत्यक्त्वस्यापि तत्प्रमाणत्वेनैव श्रावणाच्च । नच तत्राहंकारस्यैव विषयत्वं, नात्मन इति वाच्यम् । न्यायादिमते आत्मन एव तथा भानात् । सांख्यादिमते च तस्य जडत्वेन तस्यां प्रतीतावहंत्वचैतन्ययोः सामानाधिकरण्याभानप्रसङ्गात् । भासमाने च सामानाधिकरण्ये तस्यामहंकारविषयताया निवृत्तत्वात् प्रत्य-

रश्मिः ।

तिव्याप्तिनिरासाय स्वात्यन्ताभाववतीति । शुक्ताविदंत्वावच्छेदेन रजतसंसर्गकालेऽत्यन्ताभावोऽस्तीति नाव्याप्तिरिति व्याख्यानम् । नच बन्धस्य ज्ञाननिवृत्तयेऽध्यासवर्णना व्यर्थैव नित्यस्यापि नाशसंभवादिति वाच्यम् । पापादेः श्रद्धानियमादिसंपृक्तज्ञानानामनाश्यत्वेन ज्ञानमात्रनाश्यबन्धेऽत्र मूलस्यैवामूलत्वादिति । तदेतन्निरस्यति वेदार्थभूतात्मत्वेनात्मनो विचारकः तदसङ्गतमिति । प्रत्यग्वित्तीति । तथा च यदि विषयत्वं जडत्वं निवृत्तसामानाधिकरणं स्यात् प्रत्यग्वित्तौ विषये जीवे जडत्वं भायात्, यतो न भाति ततो हि प्रत्यक्षबाधिता सेत्यर्थः । विषयत्वमपि साधारणो हेतुरित्याहुः प्रत्यग्वित्तिगोचरत्वे चेति । आत्मन इत्यर्थः । एवेति 'व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्' इति ह्यभिलापात् । व्याप्तेरिति सा च नियतधर्मसाहित्ये उभयोरेकतरस्य वा व्याप्तिरिति सांख्यप्रवचनसूत्राद्धेतोर्नियतसामानाधिकरण्यरूपा तदेव व्यापकसामानाधिकरण्यमिति व्याप्तेः स्वरूपं मुक्तावल्यामित्यलमतिप्रसङ्गेन । विशेषस्तु प्रस्थानरत्नाकरे उपपादितः । हेतोः साधारणतां वारयन् शङ्कते न चेति । विषयत्वरूपहेतावपि विषयत्वमेवेति साध्यवदन्यवृत्तित्वाभावाच्च साधारणत्वं विषयत्वरूपहेताविति भावः । अविषयत्वमेवेति साध्यवदन्यवृत्तित्वाभावात् न साधारणता इति भावः । तत्प्रमाणत्वेनेति प्रमापयति विषयत्वेन प्रमां जनयतीति प्रमाणं प्रत्यक्षादि । नन्वादित्वाहुः । आत्मविशेष्यकप्रमाप्रकारत्वेनेत्यर्थः । प्रमीयतेऽनेन प्रत्यक्त्वेनेति करणत्वोपचारो वा । यद्वा, तस्याः प्रत्यग्वित्तेः प्रमाणत्वेन प्रत्यक्त्वस्य शब्दस्य श्रावणादित्यर्थः । प्रत्यग्वित्तिलोपशङ्कां पराकरोति न च तत्राहमिति । अध्यासस्योक्तत्वात्तस्य

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते' ॥

इतिवाक्योक्तत्वान्निम्बार्काचार्यसंमतत्वादेवकारः । न्यायादिमत इति । अध्यक्षो विशेषगुणयोगत इति न्यायमतम् । आदिपदेन शांकरमते माध्वमते च । तथा च निम्बार्कमतं न्यायादितर्कहतं मध्वाचार्यानभिमतं चेति निम्बार्कमतं सांप्रतं निर्बलमिति नेति भावः । तस्येति अहंकारस्येत्यर्थः । सामानाधिकरण्येत्यादि । ननु चैतन्यसामानाधिकरण्ये किं मानमिति चेन्न

भाष्यप्रकाशः ।

कृत्वेनेतराविषयतया पारिशेष्यादात्मविषयत्वस्यैव सिद्धेः । नचैवं सति तत्स्वरूपयाथात्म्यभानप्रसङ्गः । साधनान्तरवैकल्येन तथाऽऽपादयितुमशक्यत्वात् । लोकेऽपि मणिपरीक्षादौ तथा निर्णयात् । अन्यथा सांख्यादिशास्त्रतो नित्याऽनित्यवस्तुविवेकस्याप्यसंभवे त्वदभितविचाराधिकारस्याप्यसंभवापत्तेः । अतोऽनिच्छतापि प्रत्यग्वित्तिवेद्यत्वमात्मनोऽङ्गीकार्यम् । नचैवं परतःप्रकाशत्वेन जडत्वापत्तिः । इदानीं तथात्वेऽपि, अत्रात्मा स्वयंज्योतिर्भवतीति श्रुतेः स्वप्न एव तस्य स्वतःप्रकाशत्वेन जाग्रति तदभावेऽपि भस्मच्छन्नाग्निवददोषात् । जाग्रति तथाऽभ्युपगमस्योक्तश्रुतिविरुद्धत्वाच्छ्रौते मते चित्स्वरूपत्वे सति स्वयंप्रकाशसंविदाश्रयत्वस्यैव चेतनत्वात्, तेनै-

रश्मिः ।

अहमित्यस्याभिमाने योगाद् ब्रह्मणि रूढिरिति माध्वोक्तेः । वस्तुतस्तु असन्निवृत्तिकृतः पुरुषविधस्याहमिति सत्तारूपधर्मेणाविर्भावः । अस्तेभुवोर्थकस्य शतरि कृते रूपमिदमिति । तर्हि अहमिति सत्ताकृत् स्वरूपं सत्तानित्यत्वे तत्कारणेच्छायां व्यापारः । व्यापारः कर्म स्वयमेवेति ब्रह्मणि योगः इति वेदान्तत्वादुपपन्नतरः । मीमांसाकारिकासु वेदान्ते योगमात्रादरात् । अहंकारेत्यादि अहंकारो विषयो यस्याः सा अहंकारविषया तस्याः भावो अहंकारविषयता तस्या इत्यर्थः । प्रत्यक्त्वेन रूपेण ज्ञानता कर्तृत्वादयो ये इतरे ते विषया यस्याः सेति पूर्ववत् । एवं सतीति आत्मविषयिण्या अभ्रमत्वे सतीत्यर्थः । साधनान्तरेति । मनः करणं 'एषो अणुरात्मा चेतसा वेदितव्यः' इति श्रुतेः, योगेन साधितमेव पश्यति, 'अन्तरेव च पश्यति' इति श्रुत्यन्तरात् 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' इति स्मृतेश्च योगादिसाधनान्तरवैकल्येनेत्यर्थः । तथेति माने प्रकारस्य याथात्म्यस्येत्यर्थः । नासौ न भ्रमः । अग्रे बाधादिति । तथा निर्णयादिति । वज्रयोगानन्यमनस्त्वादीनि साधनान्तराण्यत्र । अन्यथेति प्रत्यग्वित्त्यविषयत्वे प्रकारे । नित्यानित्येति नित्यानित्यवस्तुविवेकः शमदमादि वैराग्यं मुमुक्षुत्वं चेति साधनचतुष्टयवानधिकारी तत्र प्रकारो नित्यानित्येति, अविकारिशरीरे विशेषणत्वेन निविष्टस्येत्यर्थः । सिद्धमाह अत इति । एतावता व्याप्तेर्वैपरीत्यमङ्गीकारितमधुना दूषयितुमुपक्रमः । उक्तज्ञानान्तरविषयत्वे जडत्वापत्तिरित्यनुवदति न चेति । भस्मच्छन्नेति । भस्मस्थानीयं अविद्यादेहादि । उक्तश्रुतीति । अत्र आत्मा स्वयंज्योतिरिति श्रुतिविरुद्धत्वात् । एवं आत्मसंविदोः स्वयंप्रकाशत्वेन प्राप्तं तौल्यं निषिद्धम् । 'सत्यं ज्ञानम्' 'यः सर्वज्ञः' इति श्रुतिद्वयसिद्धं लक्षणमाह श्रौते मते इति । जीवजडयोरतिव्याप्तिवारणाय दलद्वयम् । स्वयंप्रकाशश्चासौ संविदाश्रयश्चेति कर्मधारयः ततः षष्ठीतत्पुरुषः । तेनैवेति संविदि विशेष्यशून्यत्वेन संविदात्मनोरर्थयोस्तौल्यस्य परिहारादित्यर्थः । यत्तु प्राभाकरमतमाक्षिप्तं तत्तु इष्टमेव । एकसत्त्वे द्वयं नास्तीति प्रतीत्याध्यापनविधिप्रयुक्ताध्ययनस्य सिद्धान्ते सत्त्वादिति । अर्थज्ञानस्य अध्ययनविधिप्रयुक्तत्वाभावात् स्वाध्यायादिविधिप्रयुक्तत्वस्यार्थज्ञाने सत्त्वात् । प्राभाकरमते ज्ञानविषययोरर्थः कश्चिद्भवतु । किंच ज्ञातता भट्टमते प्रत्यक्षेण, मुरारिमिश्रमते तु व्यवसायज्ञानेन ज्ञातता भवति तत्रानुव्यवसायानुक्तिः । किंच नात्मनश्चाक्षुषाध्यक्षविषयता आकाशे चाक्षुषग्रहवारणायोद्भूतरूपस्य कारणत्वात् । तस्य चात्मन्यभावात् । अपि च ज्ञानेन ज्ञानप्रामाण्यगृहीतिरपि न सांप्रतम् । तथा सति दूराहितज्ञाने प्रामाण्यसंशयानुदयप्रसङ्गात् । ज्ञानस्य ज्ञातत्वेन तन्निष्ठप्रामाण्यस्यापि ग्रहादिति । ज्ञातत्वाभावे च धर्म्यज्ञानात् संशयानुदय इति । अतो

भाष्यप्रकाशः ।

वार्थतौल्यस्य परिहारात्, कर्मकर्तृविरोधस्यानुभवबलेनैव परिहृतत्वाच्च । एवमाश्रयाश्रयिभावेन सिद्धे आत्मसंविदोर्भेदे विषयत्वेनार्थोऽपि भिन्न एव । नच सत्त्वस्यानिर्वाच्यत्वात् तद्योगिनोस्तयोरनिर्वाच्यत्वं शङ्क्यं, सत्त्वनिर्वचनस्य तवाप्यावश्यकत्वात् । अन्यथा संविदोऽप्यसत्त्वापातात् । प्रकाशस्वरूपत्वमेव सत्त्वमितिचेत् सिद्धमेव तर्हि तद्योगित्वादात्मनः सत्त्वं, असत आश्रयत्वायोगात् । नच तत्प्रकाशस्वरूप एवात्मा, न तु तद्योगीति वक्तुं युक्तम् । प्रत्यक्त्वस्य तत्राभानात् । अहं जानामीति, ज्ञानवानहमित्येवमात्मधर्मत्वेनैव तस्य भानाच्च । एवं सिद्धं प्रकाशभिन्नस्यात्मनः सत्त्वम्, सिद्धं चानारोपितरूपेण विषयत्वादर्थस्यापि सत्त्वम् । असतोऽविषयत्वात् ।

रश्मिः ।

गुरुमतं पर्यवसितं ग्राह्यम् । स्वतो ज्ञानग्राहकसामग्रीग्राह्यं स्वतोग्राह्यमिति । सिद्धान्ते तु 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इति वाक्यमपि । नैयायिकमताक्षेपं वारयन्ति कर्मकर्त्रिति । तथाचानुभवबलेनैवात्मानमहं जानामीत्यत्र कर्मलक्षणसंगतिरिति भावः । पुनर्जडत्वापत्तिस्तु दत्तोत्तरा । यस्मिन्नर्थात्मानाविति ग्रन्थमाक्षिपन्नाह एवमिति । भेदे इति । नैयायिकास्तु संविदो निर्विषयत्वे ज्ञानत्वाभावः, सविषयत्वेपि जगतो विषयतो[1] यस्यकस्यचित् । आद्ये सर्वज्ञतापत्तिः । द्वितीये विनिगमकाभावः, सुषुप्तिरपि निर्विषया न स्यात् । तदानीं निराकारचित्संततिस्वीकारस्तु तस्याः स्वयंप्रकाशत्वे प्रमाणाभावं द्रढयति । निर्विषयिण्या ज्ञानत्वे घटादीनामपि ज्ञानत्वापत्तिरत आत्मा ज्ञानभिन्न इत्याहुः । आत्मद्रव्यज्ञानं बुद्धिर्गुणः । ननु प्रकृतेपि परिहरणीयमेतन्न इत्याह विषयत्वेनेत्यादि । ब्रह्मत्वेनाभेदादवच्छेदकोक्तिः । सर्वभवनसमर्थत्वादचिन्त्यशक्तेश्च जातोर्थो भिन्न एवेत्यर्थः । तथा च नित्यज्ञानस्य प्रपञ्चविषयत्वे न सार्वज्ञ्यम् । अनित्यस्य यो विषयस्तद्विषयकत्वम् । सुषुप्तौ सामग्रीविरहाददोष इति न पूर्वोक्तं किंचिदिति भावः । अथवा । ननूक्तं विषयादिजन्यत्वे संविदो अहं जीव इत्याद्याकारिकाया जडत्वापत्तिरिति, तत्राह विषयत्वेनेति । तथा च चिदचिद्ग्रन्थिरूपाहंकारवैशिष्ट्येपि पुरुषविधब्राह्मणोक्तात्मरूपब्रह्मत्वेनाभेदात्तदन्यत्वेप्यक्षतेरिति हृदयम् । वस्तुतस्तु आविर्भावः विपरीतव्यासेन । एतेन पूर्वज्ञानफलस्येत्यादिनोक्ता जडत्वापत्तिर्जगदान्ध्यापत्तिश्च निरस्ता । संविदोपि कैवल्यं नास्त्येवेति विषयाविनाभावं नन्दयति । तेन वस्तुतस्त्वित्यादिनोक्तमर्थवियुक्तैव संविदिति तदप्युक्तप्रायम् । अहंवित्तौ सत्ताया इवान्यत्र दृश्यमानघटादीनामपलपितुमशक्यत्वादिति । ब्रह्मैव तदाकारतया चकास्तीति चेन्न अपसिद्धान्तापत्तेः । अत्रानिर्वचनीयां ख्यातिमाशङ्क्य निषेधति न च सत्त्वस्येति । तयोरिति आत्मार्थयोरित्यर्थः । सत्त्वस्वरूपमाह प्रकाशेति । ॐइत्याह सिद्धमेवेति । असत इति अनिर्वाच्यस्येत्यर्थः । तत्रेति ज्ञाने इत्यर्थः । आत्मनि सत्त्वस्याप्यभातत्वमाशङ्क्याह अहं जानामीति । ज्ञानानुकूलव्यापारवानहमित्यत्रास्मत्प्रत्ययगोचरस्यात्मनो धर्मः सत्तास्वच्छन्दे रूढेः । तत्कर्तृसमभिव्याहारे अहंकारो योगाभावान्नाहंकार इति तस्य सत्त्वस्य भानात् । अहंकारस्य सत्तासमभिव्याहारताकथनस्य सत्त्वमस्त्येव न सर्वान्तरत्वरूपप्रतीतित्वरूपप्रत्यक्त्वभानात् विशेष इति भावः । सिद्धमाह एवं सिद्धमिति । तदर्थस्यापीति । ब्रह्मकार्यत्वादिति भावः । युक्तिमाह असत इति । संहितायामित्यधिकारात्तस्याश्चात्राविवक्षितत्वादसंधिः । तदुक्तम्—

---

१. तदर्थेति रश्मौ ।

भाष्यप्रकाशः ।

खपुष्पं पश्याम्यनुभवामि प्रत्येमीत्याद्यप्रत्ययात् मरीचितोयादीनां चारोपितरूपेण विषयत्वात् ।

रश्मिः ।

'संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते' इति ।

असतोपि तोयादेर्विषयत्वं दृश्यते इति चेत्तत्राह **मरीचीति** । **आरोपितरूपेणेति** । अयं भावः । भाट्टास्तावद्भ्रमः स्मृतेर्नातिरिच्यत इत्यख्यातिं वदन्ति, संस्कारजन्यत्वाविशेषात् । न च तत्तास्फुरणापत्तिरिति शङ्क्यम् । कर्तृदोषेण तत्प्रमोषात् । दोषाभावे तु रजतस्फूर्तिरधिष्ठानस्फूर्तिर्वा भवेत् । दोषाश्च रागादयः क्वचित्प्रबलालोकादिना विवेकासामर्थ्यं क्वचिदन्यचित्ततेत्येवमादयो अननुगतास्तथातथादर्शनादुन्नेयाः । अतः प्रमुष्टतत्ताका स्मृतिरेव भ्रमस्थले ज्ञेया । प्राभाकरास्तु रजतमनुभवामीत्यनुव्यवसायबाधं स्मरामीत्यनुव्यवसायापत्तिं च पश्यन्तो ग्रहणस्मरणात्मकं ज्ञानद्वयमगृहीतासंसर्गकमत्र ख्यातिरूपमिति वदन्ति । स्मृतिप्रमाणभेदेन ज्ञानस्य द्वैराश्यात् । न चानुव्यवसायद्वयापत्तिरिति वाच्यम्, स्मरणाभिमानस्य दोषेण प्रमोषात् । तस्माद्विविक्तज्ञानद्वयाङ्गीकारे न कोपि दोष इति । अत्राप्येकज्ञानतौल्येन ज्ञानद्वयस्याशक्यवचनत्वात् । न च तौल्यं नास्तीति वाच्यम् । यद्यगृहीतासंसर्गकं ज्ञानद्वयं स्यात्, एकज्ञानतुल्यता न स्यात्, यदि न स्यात् सा व्यवसायानुव्यवसाययोर्नोपलभ्येतेति तर्केण तन्मूलभूतव्यवसायानुव्यवसायाभ्यां चैकज्ञानतुल्यत्वनिश्चयात् । अपि च, ज्ञानद्वैराश्याग्रहेणात्र ज्ञानद्वयाङ्गीकारे सर्वत्र विशिष्टज्ञानोच्छेदः । घटोयमिति प्रमायामप्यगृहीतासंसर्गकवद्गृहीतज्ञानद्वयस्य शक्यवचनत्वात् । द्वैराश्ये मूलस्य चिन्त्यत्वाच्चेति मतद्वयेपि दोषान् पश्यता भवतानिर्वचनीया ख्यातिरादृता । इत्थं हि त्वदीयं व्युत्पादनम् । प्रमा द्वेधा । तत्र तत्त्वमस्यादिवाक्योत्था पारमार्थिकी, संसारप्रमा व्यावहारिकी । साचेत्थं एकैव संविच्चातुर्विध्यं धत्ते । तत्रान्तःकरणवैशिष्ट्येन प्रमातृताम्, अन्तःकरणवृत्तिवैशिष्ट्येन प्रमाणताम्, घटादिवैशिष्ट्येन विषयताम्, अन्तःकरणवृत्त्यभिव्यक्तत्वेन फलतामिति । पूर्वमिन्द्रियार्थसन्निकर्षः, ततश्चान्तःकरणस्य चक्षुरादिद्वारा विषयदेशगमनम्, तेन संयोगस्तदाकारेण परिणामो वृत्त्यात्मकः । यथा तडागोदकं छिद्रान्निर्गत्य कुल्याद्वारा केदारं प्रविश्य चतुःकोणाद्याकारेण परिणमते । तत्र परिणामे विषयसंवित्प्रतिफलनं भवति । तदैकदा वृत्तिविषययोरवस्थितिरेकदेश इति तत्प्रयुक्तभेदस्याकिंचित्करत्वात् तत्संविदोरैक्यम् । तदिदं प्रत्यक्षप्रमा तया च वृत्त्यावरणसहिताज्ञाननिवृत्तिः । ततोऽन्तःकरणविशिष्टसंविदा विषयस्फुरणमिति । यदा तु इन्द्रियविषययोर्दोषः, तदा भ्रमः । स च सदसद्विलक्षणत्वादनिर्वचनीय इति ।

तदिदं खपुष्पोल्लासमात्रम् । आरोपितरूपेण बुद्धिरूपेण विषयत्वात् । तथा हि । अहंकारभेदरूपा बुद्धिः स्थिरा मूर्ता सच्चिदानन्दब्रह्मभिन्ना ख्यायत इति अन्यख्यातिरेवोचितेति । एतद्वैशिष्ट्यज्ञानप्रनाडीनां द्वितीयाध्यायोपान्ते 'प्राणवता शब्दात्' इत्यधिकरणे विस्तृतिनिरस्ती वक्तव्ये इति ते अत्र नोच्येते । नन्वभावे सत्त्वस्य वक्तुमशक्यत्वादतीतानागतस्थलेऽर्थवियुक्तैव संवित्तद्वद्वर्तमानकालेप्यर्थो मिथ्या दृश्यत्वाच्छुक्तिरजतवदिति अनुमानेनार्थोऽनिर्वचनीय इति नार्थे नियामकतेति शङ्कते न चेति । ननु चाभावत्वेन प्रत्ययात्सोतिरिच्यत इति चेत्, न । घटे ध्वस्ते तद्द्रव्यं

भाष्यप्रकाशः ।

न चाभावे सत्ताव्यभिचारः । तस्यापि भावत्वात् । भावान्तरात्मना अननुभूयमानप्रतियोगिरूपेणैव तत्राभावव्यवहारात् । अन्यथा निष्प्रतियोगिकत्वेनापि तस्य प्रत्ययापत्तेः । नचैवं संविदोऽर्थाव्यविनाभावेऽर्थं विना संविदप्रकाशात् स्वतःप्रकाशत्वहानिः । दीपादेस्तेजोरूपत्वस्येव संविदः प्रकाशस्वरूपत्वस्यैव स्वतःप्रकाशपदार्थत्वात् । अत एवात्मनोऽपि तथात्वात् । नचात्मनो व्यापकत्वेन सर्वत्र सत्त्वात् तत्रारोप्यमाणस्य शरीरादेर्मरीचिकादावारोप्यमाणतोयादेरिव सत्त्वदेशस्याशक्यवचनत्वादसत्त्वमास्थाय प्रतीयमानत्वमात्रेण सदसद्विलक्षणत्वमनिर्वाच्यत्वं चास्थीयत इत्यपि सांप्रतम् । वस्तुपरिच्छेदास्यातुर्मते तत्समवाय्यादीनां सत्त्वेन तेषामेव देशत्वसिद्धेः । तदनाख्यातुर्मते च ब्रह्मकार्यत्वात् ब्रह्मण एव तथात्वसिद्धेः । एवं सिद्धे देशे शरीरादीनां च सिद्धत्वे तेषामात्मन्यारोपोऽपि सुकरः । अन्यथा खपुष्पादेरिव दुष्करः स्यात् । अप्रत्यक्ष आकाशे मालिन्याध्यासवदप्रत्यक्ष आत्मनि शरीराद्यध्यासोपपादनमप्यसंगतम् । बालानामवकाशरूपेण बुद्धानां वस्तुस्वभावेनैव चाकाशस्यापि प्रत्यक्षत्वात् । अतः कल्पनाया असंगतत्वात् ‘तदेषां प्राणानां विज्ञानेन विज्ञानमादाय’इति, ‘भोक्ता भोग्यं प्रेरितारं च मत्वा’इत्यादिश्रुतिविरोधाच्च, न कर्तृत्वभोक्तृत्वादिरहित आत्मा । नच स वेदार्थः । ब्रह्मणो वेदार्थत्वात् । किंतु स्वबुद्ध्या तथा कल्पित इति, न तदर्थं विचारः शक्यवचनः । तदिदमुक्तं न हीत्यादि ।

रश्मिः ।

कपालत्वेनावतिष्ठते संज्ञानिवृत्तिमात्रं परम्, एवं कपाले ध्वस्ते तच्छकलात्मता ततोपि चूर्णीभावः ततश्च बहिःप्रक्षेपे पृथिव्यामेकीभावः, पुनः कपालं घटश्चेत्येवं भ्रमणेनानुभूयमानप्रतियोगिरूपेण कपालादिनाप्यभावप्रत्ययनिर्वाह इति । प्रत्यक्षविरोधस्य सहने फलाभावादिति । न चेह घटो ध्वस्त इत्याधाराधेयभावव्याघातः । घटाभावे घटाभाव इतिवदुपपत्तेः । तदाह भावान्तरात्मनेति । ‘यदस्ति यन्नास्ति तदेव विष्णुः’ इति विष्णुरूपभावान्तरात्मत्वमभावस्य, न अनुभूयमानोऽननुभूयमानस्तादृशः प्रतियोगी संबन्धनिरूपको यस्येति । मुख्यधर्मेणैव व्यवहार इत्यत्र युक्तिमाह अन्यथेति । निर्गतः प्रतियोगी यस्मात् तत्त्वं भावान्तरधर्मस्तेन रूपेणेत्यर्थः । ‘इदुदुपधस्य चाप्रत्ययस्य’ इति षत्वम् । तद्रहितपाठस्तु प्रामादिकः । तेन खपुष्पेऽभिलापयोग्यत्वेपि अस्त्यादिक्रियान्वितत्वरूपसत्त्वाभावेन तदतौल्यमपि सूचितम् । तथैवात्मनेत्यादिनिरुक्तमनुवदन्तीं शङ्कामपाकुरुते न चात्मन इति । सदसद्विलक्षणत्वमिति । अनिर्वचनीयत्वमेव सदसद्विलक्षणत्वमास्थीयत इति योजना । दूषयति वस्त्विति । वस्तुतो ब्रह्मणो वैश्वानराधिकरणे प्रादेशत्वाभिमानत्वरूपाङ्गीकारेणैव परिच्छेदास्यातुर्भगवतो व्यासस्य मते शरीरादिसमवाय्यादीनामित्यर्थः । तदनाख्यातुरिति प्रस्तुत एकदेशिनो मते इत्यर्थः । ब्रह्मण इति सर्वशक्तिमतो ब्रह्मण एकदेशत्वसिद्धेरित्यर्थः । तथाप्येवमावश्यकमित्याह एवं सिद्ध इति । तथा चानिर्वाच्यत्वनिरुक्तिर्निष्प्रयोजनेति भावः । दृष्टान्ताप्रसिद्धिमाह बालानामिति । आकाशस्यापीत्यादि । इदं चाग्रे व्युत्पाद्यम् । तदेषामिति श्रुत्यर्थस्तु, विज्ञानमयस्य सुप्तस्य विज्ञानराहित्ये अजातशत्रुणा हेतुरुच्यते तदेषामिति । एषामात्मप्राणादीनां विज्ञानं स्वविषयप्रकाशनसामर्थ्यं विज्ञानेन स्वचैतन्येन जीव आदायोपादाय हृदयाकाशे शेत इति । न च स वेदार्थ इति स्वात्मा न वेदार्थ इत्यर्थः । यदप्यध्यासलक्षणं तदप्यव्याप्तम् । न चेदंत्वावच्छेदेन तदसम्प्रकाशकोऽस्तीति स्वतस्त्वाभावप्रसक्ति स्वतःप्रकाशकं

ब्रह्म पुनर्यादृशं वेदान्तेष्ववगतं तादृशमेव मन्तव्यम् । अणुमात्रान्यथाकल्पनेऽपि दोषः स्यात् ।

'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा' ॥

'नैषा तर्केण मतिरापनेया' इति श्रुतेश्च ।

भाष्यप्रकाशः ।

अथ 'सत्यं ज्ञानमनन्तं ब्रह्म,' 'अस्थूलमनणु'इत्यादिश्रुतिभ्योऽधिगत इति वदति तत्राह ब्रह्मेत्यादि । यथा हीदमस्थूलत्वादिकं वेदान्तेषूच्यते, तथा 'सर्वकामः सर्वगन्धः सर्वरसः, विश्वतश्चक्षुरुत विश्वतोमुखः' इत्यादिकमप्युच्यत इति तादृशमपि मन्तव्यं न तु निर्विशेषमात्रम् । न च तत्र स्वस्यान्यथाकल्पनं युज्यते, प्रतिज्ञाहानिदोषात् प्रतारकत्वापत्तेश्च । नच श्रोतुर्मन्दत्वे कश्चिदुपायो विधेय इति तदर्थं किंचित्कल्पनेऽप्यदोष इति वाच्यम् । तथा सति श्रुत्यभिप्रेतात्मस्वरूपाज्ञानेन श्रोतुः 'योऽन्यथा सन्तम्' इतिश्रुत्युक्तदोषापत्तेः । तथा वक्तुरपि, नैषा तर्केणेति श्रौतनिषेधातिक्रमदोषापत्तेः । श्रुतिविरोधदोषापत्तेश्च । तदिदमुक्तम् अणुमात्रान्यथेत्यादि । ननु

रश्मिः ।

ज्ञानं तत्रात्यन्ताभावो निविष्टः, भावोऽस्तीति नाव्याप्तिरिति वाच्यम् । इदंत्वस्य पुरोवर्तित्वरूपस्य शुक्तिनिष्ठत्वे सदसत्ख्यात्यापत्तिः, अनुभवविरोधश्च । विशेषणानुभवो रजत इति । रजतनिष्ठत्वे तु प्रतिबन्धकोऽत्यन्ताभावं विघटयिष्यतीति । बन्धस्य नित्यता तु 'बन्धोस्याविद्यानादिः' इति वाक्यादविद्याकार्यत्वेन मिथ्यात्वात् । व्यावहारिकी माध्वैर्बन्धमिथ्यात्वखण्डने खण्डितेति । ननु कारणान्तरसमवधानान्न बन्धस्य विद्यामात्रनिवर्त्यत्वमिति चेन्न, एकेनैव दण्डादिना घटनाशदर्शनेन दृष्टान्तसंभवाच्च । 'असंदिग्धोपि वेदार्थः' इत्यत्र अस्य पक्षस्य संग्रहात् । सिद्धान्तपक्षमाहुः तादृशमपीति । निर्गुणमेव पश्चादनारोपितगुणसंपृक्तमित्यर्थः । इदमुभयव्यपदेशाधिकरणे तृतीयाध्याये स्पष्टीभविष्यति । अणुमात्रेत्यादि भाष्यं विवृण्वन्ति स्म न च तत्रेत्यादि । ब्रह्मणि धर्माणामध्यस्तत्वकल्पनमित्यर्थ. । कुतः, अणुमात्रान्यथाकल्पनमपि नेष्यत इत्यर्थः । प्रतिज्ञेति 'अथातो ब्रह्मजिज्ञासा' इति निर्गुणब्रह्मजिज्ञासां प्रतिज्ञाय 'जन्माद्यस्य यतः' इति वदतो व्यासस्य प्रतिज्ञाहानिदोषादित्यर्थः । अध्यस्तत्वेपि लक्षणतोपपत्तेराह प्रतारकत्वेति । केवला संवित्तदित्यसूत्रयतो भगवतो व्यासस्य तत्त्वापत्तेश्चेत्यर्थः । अत एव द्वितीयस्य नवमाध्याये इच्छानन्तरं सदानन्दस्य जगत्कर्त्री शक्तिः, चितस्तु व्यामोहिका शक्तिरिति विभाग उक्तः । अणुमात्रेत्यादि भाष्यमवतारयन्ति न च श्रोतुरिति । मन्दत्व इति तावदवधानशून्यत्व इत्यर्थः । योऽन्यथा सन्तमिति । अत्र प्रतिपद्यत इत्यस्य जानाति, प्रतिनिधिं पद्यते गच्छति प्रतिपत्तिं शरणागतिं कुरुते इति त्रयोऽर्थाः । प्रतिनिधिः कृष्णः प्रतिकृतिश्च । तदुक्तं सुबोधिन्यां 'नैश्चिन्त्यं वाचि पूर्ववत्' इति कृष्णविषये, प्रतिकृतिविषये तु 'हरिमूर्तिं प्रियां कृत्वा' इति । पुरुषोत्तमप्रतिष्ठायां गोस्वामि-

नच विरुद्धवाक्यानां श्रवणात् तन्निर्धारार्थं विचारः । उभयोरपि प्रामाणिकत्वेनैकतरनिर्धारस्याशक्यत्वात् । अचिन्त्याऽनन्तशक्तिमति सर्वभवनसमर्थे ब्रह्मणि विरोधाभावाच्च ।

अत एवोपनिषत्सु तत्तदुपाख्याने बोधाभावे औपाधिकबोधे च तपस

भाष्यप्रकाशः ।

विरुद्धवाक्यश्रवणे श्रोता संदेग्धि । संदेहे चावश्यमनिष्टम् । 'अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति' इति स्मरणात् । 'यस्य स्यादद्धा न विचिकित्सा'इति इति श्रुतेश्च । अतस्तन्निवारणार्थं निर्धार आवश्यकः । स च विचाराधीन इति तदर्थं स कार्य एवेत्यत आह नचेत्यादि । विचारः कथं कार्यः किमेकतरबाधेन, किंवोभयसामञ्जस्येन । यद्याद्यः पक्षस्तदा तद्बाधनायाप्रामाणिकत्वं तस्य वक्तव्यम् । तथा सत्यन्यत्रापि तदापात इत्युपचारनिवृत्त्यर्थं यतमानस्याऽप्रामाणिकत्वापत्त्या वृश्चिकभिया पलायमानस्य विषमाशीविषमुखे निपातः । अथ द्वितीयस्तदा, 'परास्य शक्तिर्विविधैव श्रूयते,' 'स हैतावानास' इत्यादिश्रुतिभिर्ब्रह्मसामर्थ्येनैव विरोधस्य परिहारे विचारस्य वैफल्यमेवेति युक्त्या वेदार्थः सर्वथा न प्रतिपत्तुं शक्यः, इत्यतो वेदार्थज्ञानायोपायान्तरमेष्टव्यम् । तदपि श्रुत्यविरुद्धम् । तत्र प्रमाणमाह अत एवेत्यादि । तैत्तिरीये भृगोर्बोधाभावे वरुणेन 'तपसा ब्रह्म विजिज्ञासस्व' इति, छान्दोग्ये इन्द्रप्रजापतिसंवादे इन्द्रस्यौपाधिकबोधे प्रजापतिना, 'वस द्वात्रिंशतं वर्षाणि ब्रह्मचर्यम्'इति साधनान्तरस्य तपस एवोपदेशः

रश्मिः ।

नोपि 'ततः श्रीपुरुषोत्तमात्मकतायां जातायां स्वरूपे भगवान् श्रीगोकुलेशः श्रीकृष्णोयमिति बुद्धिः कर्तव्या, न स्वरूपादिबुद्धिः' इत्याहुः । नैषा तर्केणेति भाष्यं विवृण्वन्ति तथा वक्तुरिति । एषेति ब्रह्मविषयिणीत्यर्थः । अयमर्थः । द्वितीयाध्यायेऽणुकारणवादे वक्ष्यते । काठके इयं श्रुतिः । सा च 'अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् न ह्यतर्क्यमणुप्रमाणात्,' 'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ' इत्यादिः । अनन्यः आचार्यः । 'अत एव चानन्याधिपतिः' इति सूत्रात् । अन्येन आगमाभिज्ञाचार्येण । 'नाहं किंचित्करोमि' इति वाक्यात् । न अन्यो भिन्नो विद्यते यस्येत्यागमाभिज्ञेन । तदिदमिति । न चं तत्रेत्यादिना विवृतमित्यर्थ इति । न च श्रोतुरित्यादिना विवृतमित्यर्थः । आरणे 'अन्धो मणिमविन्दत् तमनङ्गुलिरावयत् । अग्रीवः प्रत्यमुञ्चत् । तमजिह्व असश्चत्' । 'ऊर्ध्वमूलमवाक्छाखं वृक्षं यो वेद संप्रति । न स जातु जनः श्रद्दध्यात्' इति मृत्युर्मा मारयात्' इति । 'अणोरणीयान्महतो महीयान्' इति वेदान्ते । अविन्दत् ज्ञातवान् । परस्मैपदात्, लब्धवान्वा विरुद्धधर्माश्रय उक्तः । तमनङ्गुलिरिति 'अपाणिपादो जवनो ग्रहीता' इत्युक्तः । अग्रीव इति । सर्वतो हि शिरोमुखमित्युक्तः । तमजिह्व इति लिह आस्वादने आस्वादकर्तृरहितः । 'निर्गुणो गुणभोक्ता च' इति गीतोपबृंहिका । श्रुतिविरोधेति । यस्य स्यादद्धेति । यस्य विचिकित्सा संशयो नास्ति तस्याद्धा प्रत्यक्षं स्यादित्यर्थः । तस्येति उभयोरेकतरस्येत्यर्थः । विषमाशीविषमुख इति । विषमाशीविषः सर्पविशेषः । एतावता 'अलौकिको हि वेदार्थः' इत्यर्धकारिका व्याख्याता । उत्तरार्धं विवरीतुं संबन्धार्थमाह इत्यत इति । बोधाभाव इति । अन्नब्रह्मज्ञानानन्तरं 'तद्विज्ञाय पुनरेव च वरुणं पितरं उपससार अधीहि भगवो ब्रह्मेति, तꣳहोवाच तपसा ब्रह्मविजिज्ञासस्व' इति बोधाभाव इत्यर्थः । औपाधिकबोध इति । छान्दोग्ये च दशम-

एवोपदेशः । नच तपःशब्देन विचारः । तस्य पूर्वानाधिक्यात् तप एव । नचोपाख्यानानां मिथ्यात्वम् । तथा सति सर्वत्रैव मिथ्यात्वं भवेद् विशेषाभावात् ।

भाष्यप्रकाशः ।

कृत इत्यर्थः । ननु तप संताप इतिवत्, तप आलोचन इत्यपि धातुरिति तन्निष्पन्नोऽयं शब्दो विचारार्थक एव मन्तव्यः । तथा सति श्रुत्यैव विचारस्य प्राप्तिरित्यत आह **नच तप** इत्यादि । **तप एवेति** तप एव तपःशब्देनोच्यत इत्यर्थः । अयं भावः । विचारो ह्येकतरबाधेन वा, ब्रह्मणः सामर्थ्यादिप्रदर्शनेन वा साधनीयः । न तु श्रोतरि तेन कोऽपि विशेषः संपाद्यः । तथा सति पठितवेदस्य साधनान्तरश्रवणं विनाऽपि विचारे वेदार्थः स्फुरेदेवेति पूर्वानाधिक्यादुपसदनवैयर्थ्यापत्तिः । गुरुवाक्योत्तरं विचार इत्यङ्गीकारे गुरोः खलत्वापत्तिः । उपसदनोत्तरमपि तस्यैवायासोपदेशेन दयाराहित्यप्राकट्यात् । तपसोऽङ्गीकारे तु तेन शिष्ये विशेषाधानादधिकारसंपत्तौ साङ्गवेदवाक्येभ्य एव स्फूर्तिर्नच कोऽपि पूर्वोक्तदोष इति तपःशब्दो रूढ एवादरणीयः । तदेतदुक्तं, **तप एवेति** । अन्यथा छान्दोग्यविरोधस्यापरिहार इत्यपि बोधयितुं सावधारणमुक्तम् । ननु सत्यमुपनिषत्सु तप उपदिश्यते, तथाप्युपाख्यानेषु न तु ज्ञानसाधनत्वेन क्वापि पृथग् विधीयते । उपाख्यानानि तु विद्यास्तुत्यर्थमसदपि बोधयन्तीति, न तदनुरोधे निर्बन्धः कार्य इत्यत आह **नचोपे**त्यादि । तथाच श्वेतकेतूपाख्यानस्थयुक्तीनां त्रिवृत्करणादीनां

रश्मिः ।

प्रपाठके ब्रह्मजिज्ञासुभ्यामिन्द्रविरोचनाभ्यां नोदितः प्रजापतिरुवाच ‘साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथाम्’ इति । ततश्च तथा कृते ‘एष आत्मेति होवाच ततस्तौ शान्तहृदयौ प्रवव्रजतुः’ । तयोरिन्द्रस्तु शरीरालंकारनाशादिना तन्नाशाद्यनुसंधाय, ‘नाहमत्र भोग्यं पश्यामि’ इति पुनः प्रजापतिमुपजगामेत्यौपाधिकबोधे इत्यर्थः । तस्य विचारस्य श्रोतरि पूर्वापेक्षया विशेषरूपाधिक्यासंपादकत्वात् तपःशब्देनानशनादिरूपं विशेषाधायकं तप एवोच्यते इत्याशयमभिसंधाय विवृण्वन्ति **अयं भाव** इति । **तेनेति** विचारेणेत्यर्थः । ननु विचारेणाप्युत्तरोत्तरं प्रतिभारूपो विशेषः संपाद्य एवेति चेत्, तत्राहुः **तथा सतीति** । **इति पूर्वानाधिक्यादिति** इति हेतोः पूर्वोपसदनापेक्षया ब्रह्मोपसदनविषये विशेषरूपाधिक्यासंपादकत्वात् । विशेषश्चान्नादिब्रह्मबोधानुकूल्यमेव । ननु विचारेऽप्येवं वक्तुं शक्यमित्यत आह **उपसदनेति** । भृगोर्वरुणोपसरणवैयर्थ्यापत्तिः । विचारेणैव विशेषाधानाद्गुरोरप्रयोजकत्वादित्यर्थः । शिष्ये **विशेषाधानादिति** । ‘अन्नं ब्रह्मेति व्यजानात्, प्राणो ब्रह्मेति व्यजानात्, मनो ब्रह्मेति व्यजानात्, विज्ञानं ब्रह्मेति व्यजानात्, आनन्दो ब्रह्मेति व्यजानात्’ इत्येवमुत्तरोत्तरं फलवैजात्यात् साधनवैजात्याय शिष्ये विशेषाधानावश्यकत्वादित्यर्थः । तदुक्तं—

‘अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः’ ॥ इति ।

तपःशब्द इति । तपःशब्दः अरूढ इति पदच्छेदः । ‘तप संतापे’ इति धातुपाठात् । तेन वेदान्ते योगाङ्गीकारस्य न विरोधः । यद्वा तपःशब्दो रूढः शक्तिसंकोचवान् । अत्र तपो भगवानिति द्वितीयस्कन्धनवमाध्याये निरूपणान्न विचारः । ततः ‘स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम’ इति वाक्यात्तप एव । ‘तदुक्तं तपसा ब्रह्म विजिज्ञासस्व’, ‘तपो ब्रह्म,’ इति । ‘अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते । तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः’ इत्यत्र तप उक्तम् । न च वेदयुक्तिविचारः । अस्तु तथा, परंतु द्वितीयसुबोधिन्यां तपसंतापस्वीकारात्, ‘स्वयमेवात्म-

न ह्यप्रामाणिकोक्ते विधौ वा उपाख्याने वा ब्रह्मस्वरूपे वा कस्यचिदपि विश्वासो यथा लोके । तस्माद् वेदे अक्षरमात्रस्याप्यसत्यार्थ(ज्ञान)स्याभावाद् वैदिकानां न संदेहोऽपि किं पुनर्विरुद्धार्थकल्पना । विद्यासु च तदश्रुतेः । यदि वेदार्थज्ञाने विचारस्योपयोगः स्यात्, अङ्गत्वेन व्याकरणस्येव विद्यासु श्रवणं स्यात् । स्वातन्त्र्ये च पुराणादेरिव मीमांसाया अपि प्रकारभेदेन प्रतिपादकत्वं स्यात् । 'तं त्वौपनिषदं पुरुषं पृच्छामि'इति तु तेषां निषेधः । अन्यथाज्ञानं नोपनिषदुक्तं फलं समर्पयति । तस्मान्नारम्भणीय एव ब्रह्मविचारः ।

भाष्यप्रकाशः ।

च मिथ्यात्वं स्यात् । तथा च सर्वो वेद एवोच्छिद्येतेत्यर्थः । तत्र हेतुमाह न हीत्यादि । सिद्धं वदन् स्वोक्ते प्रत्यक्षसंवादमप्याह तस्मादित्यादि । वैदिकानामिति प्राज्ञवैदिकानाम् । प्रकारान्तरेणापि विचारानर्थक्यमाह विद्यास्वित्यादि । स्वोक्तं व्याचष्टे यदीत्यादि । चरणव्यूहे, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गान्युक्त्वा, 'तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते' इत्येवोच्यते । तस्मात् 'साङ्गो वेदोऽध्येयो ज्ञेयश्च' इति विधावपि नाक्षेपो युक्त इत्यर्थः । एवं विधित्रयेऽपि विचाराक्षेपस्याशक्यवचनत्वाद् विधिप्रयुक्त्यारम्भणीयत्वं निवारितम् । ननु मास्त्वङ्गमध्यपातस्तथापि पुराणादिवत् स्वातन्त्र्येणैवारम्भणीयः । नचाऽप्रामाणिकत्वम् । प्रतिपदमनुपदं, छन्दो, भाषा, धर्मो, मीमांसा, न्यायस्तर्क इत्युपाङ्गानीति तत्रैवोपाङ्गेषु पाठात्, स्मृतावपि ।

'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश' ॥ इति ।

विद्यासु गणनाच्चेति चेत्तत्राह स्वातन्त्र्ये चेत्यादि । तस्मादिति वेदार्थज्ञानार्थं ब्रह्मज्ञानार्थं चाऽनुपयोगात् ।

रश्मिः ।

ना'इति वाक्यात् विचारस्याप्राप्तिः, अभगवत्त्वात् । तथा च तस्य विचारस्य अभगवत्त्वेन पूर्वस्मात्संतापात्मकात्तपसो भगवद्रूपादस्यानाधिक्यात्तपःसन्तापात्मकमेव ग्राह्यमिति भाष्यार्थः । आधिक्यं स्वयं प्रकाशाविघटकत्वम् । एकरसत्वं वा एकरसत्वेन पूर्वस्मादनाधिक्यं वा । मुख्यं हेतुमाह अन्यथेति तपसो विचारार्थकत्व इत्यर्थः । अपरिहार इति अपरिहारो मुख्यो हेतुरित्यपि बोधयितुमित्यर्थः । उपाख्यानानीति । एतच्च पूर्वतन्त्रे द्वितीयस्य द्वितीयपादे चिन्तितम् । त्रिवृत्करणादीनामिति । 'यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति । अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुः तत्पुरीषं भवति, यो मध्यमस्तन्मांसम्, योऽणिष्ठस्तन्मनः, आपः पीतास्त्रेधा विधीयन्ते, तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति, यो मध्यमस्तल्लोहितम्, योऽणिष्ठः स प्राणः, तेजो अशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुस्तदस्थि भवति, यो मध्यमः स मज्जा, योऽणिष्ठः सा वाक्, अन्नमयं हि सौम्य मनः, आपोमयः प्राणः, तेजोमयी वागिति' त्रिवृत्करणश्रुतिः । भाष्ये । असत्येति । न च सर्वरस इति श्रुतिविरोधे रस शब्द इति धातुपाठात् शब्दस्यासत्यार्थादिति शङ्क्यम् । क्षराक्षरपुरुषोत्तमभेदेनासत्यार्थ-

अनेन धर्मविचारोऽप्याक्षिप्त एव । न ह्येतन्निराकर्तुं सोऽयमतिभार इति पूर्वःपक्षः ।

सिद्धान्तस्तु ।

भाष्यप्रकाशः ।

ननु मास्तु ब्रह्मविचारस्यारम्भणीयत्वं,धर्मविचारे तु दोषाभावात् तदारम्भे को दोष इत्यत आह अनेनेत्यादि । 'स तृतीयमतप्यत, स एतं दीक्षितवादमपश्यत्'इत्यादौ तपस एव कथनेनेत्यर्थः । नन्विदमपि शास्त्रमृष्युक्तत्वात् प्रामाणिकमतः कथं निराक्रियत इत्यत आह नहीत्यादि । गुरोर्मते एव निराकृते शिष्यस्य का वा गणनेत्यर्थः । एवं च यथा मीमांसाकरणात् पूर्वमङ्गैरेव संदेहनिवृत्तिस्तथेदानीमपि भविष्यतीति व्यर्थं तत्करणमिति केवलवैदिककृतः पूर्वपक्षो निरूपितः ।

उत्तरं वक्तुं गृह्णन्ति सिद्धान्त इत्यादि । ननु शब्दस्य निःसंदिग्धमर्थप्रतिपादकत्वात्

रश्मिः ।

वाचकानां क्षराक्षरसंबन्धित्वेन पुरुषोत्तमनिःश्वासे वेदे असत्यार्थस्याभावात् । तेजो घृतादि । अर्थविधुराणां वैदिकानां धर्म्यज्ञानात्संशयो न घटत इति विशिंषन्ति प्राज्ञेति । प्रज्ञ एव प्राज्ञः ते वेदार्थभूतात्मत्वज्ञाः । पूर्वमीमांसाकारिकाणां भावार्थपादभाष्यस्य च तद्विषयकविचारो लाघवादत्रैव युक्त इत्याशयेनानेन इत्यादि भाष्यमित्याशयेन विवृण्वन्ति स्म स तृतीयमिति । इयं श्रुतिः संहितातृतीयाष्टकेऽस्ति । स प्रजापतिस्तृतीयं तपो अतप्यत तदन्वेतं दीक्षितवादं ज्ञातवानित्यर्थः । पूर्वं प्रकाशे प्राज्ञेति स्वयं विशेषणोक्तेः । ननु मीमांसकान्तरोत्थापकग्रन्थाभावात् पूर्वपक्षोपन्यासोऽयं दुर्बोध इति चेन्न, नात्र ब्रह्मपदेन भ्रमितव्यम् । ब्रह्मपदस्य 'जिज्ञासितमधीतं च यत्तद्ब्रह्म'इत्यत्र वेदे प्रयुक्तत्वात् । वेदत्वेन वेदान्तविचारेपि संहतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति वदतां ब्रह्मसूत्राणां प्राचीनवृत्तिकृतां वेदगतिप्रदर्शनार्थं ब्रह्मपदग्रथनस्य सत्त्वान्न ग्रन्थाभाव इति । सिद्धान्तग्रन्थमवतारयन्ति उत्तरमित्यादि । गृह्णन्तीति पूर्ववत् । भाष्ये संदेहवारकमिति द्वितीयाधिकरणे—

'संदेहवारकं शास्त्रं वेदप्रामाण्यवादिनाम् ।
क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते' ॥

इति वक्ष्यते । तत्र ज्ञानशक्तिक्रियाशक्ती किंनिष्ठे इति विशेषजिज्ञासाजनकत्वात् विशेषवेदार्थजिज्ञासा भवति । तर्हि कोऽत्र वेदार्थः यत्र संशयोदयः । ज्ञानशक्तिक्रियाशक्ती संदिह्येते परस्थिते इति भाष्यात् ज्ञानशक्तिक्रियाशक्तिविषयकः संशयः तस्योदय इत्यर्थः । अत्र ब्रूमः ।

'श्रुतिवृन्दैः सदा जुष्टं श्रुतिवृन्दैः सदाद्भुतम् ।
श्रुतिवृन्दैः सदा सन्तं श्रौतं श्रीकृष्णमाश्रये' ॥

इत्युक्तम् । अथ पुनर्यादृशमित्यादिः फलिष्यति । 'शतं शुक्राणि यत्रैकं भवन्ति, सर्वे वेदा यत्रैकं भवन्ति, सर्वे होतारो यत्रैकं भवन्ति, स मानसीन आत्मा जनानाम्, वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन्यदास्ते' इत्यत्र पूर्वस्यां शुक्रवेदज्योतिषामुत्पत्त्यादिमतां यत्रैकीभावः, स आत्मा जनानां, मनसि भव इति निरुक्तेर्मानसीनत्वस्य च रसानतिरिक्तानन्दलिङ्गत्वमित्यानन्दो ब्रह्म । द्वितीयस्यां चानन्दस्यैव पुरु-

संदेहवारकं शास्त्रं बुद्धिदोषात् तदुद्भवः ।
विरुद्धशास्त्रसंभेदादङ्गैश्चाशक्यनिश्चयः ॥
तस्मात् सूत्रानुसारेण कर्तव्यः सर्वनिर्णयः ।
अन्यथा भ्रश्यते स्वार्थान्मध्यमश्च तथादिमः ॥

परंपरया पाठवदर्थस्यापि गुरुमुखादेव श्रवणेऽपि मन्दमध्यमयोः संदेहो भवेत् समानधर्मदर्शनात् पदादिपाठवत् । तत्र यथा लक्षणानामुपयोग एवमेव मीमांसाया अपि ।

भाष्यप्रकाशः ।

संदेह एव कथमित्यत आहुः बुद्धीत्यादि । तन्निवृत्तिर्व्याकरणादिभिरेव भविष्यतीत्यत आहुः विरुद्धेति । सर्वनिर्णय इति पूर्वोत्तरकाण्डार्थनिर्णयः । कथमिदमित्यपेक्षायां व्याचक्षते परंपरयेत्यादि । समानधर्मदर्शनादिति अर्थे समानधर्मदर्शनात् । यथा 'अक्ताः शर्करा उपदधाति' इत्यत्राञ्जनकरणत्वं घृततैलवसादिषु समानम् । तथाच यथा संहिताध्ययनदशायां, 'देवाय ते यजमानाय शीकाय ते स्वाहा' इत्यादौ संदेहाभावेऽपि पदादिपाठकाले, देवय ते शीकय त इति ह्रस्वश्रुत्या संदेहे, अथादावुत्तरे विभागे ह्रस्वव्यञ्जनपर इत्यधिकारस्थस्य, देवाशीकेत्यादेः ।

रश्मिः ।

षत्वनिरवधित्वतेजोनिचयत्वरूपधर्मवत्त्वं तस्य साकारस्य तमसस्तु पार इत्यनेन निरविद्याजराधिकरणकत्वनिर्वचनेनाविद्यास्पर्शगन्धविरहं निरुच्य उत्तरार्धे सर्वरूपविचयननामकरणतदभिवदनानामभिवदतः स्थितेश्च श्रावणाद्रूपविचयादिलीलानां तत्संबन्धिनां तत्कर्तुर्महापुरुषस्य स्थितिं महत्त्वेन रूपादीनां तदभिन्नत्वं, धीरत्वेनाधिकारं, तुना कर्तृकर्मकरणानुसंधानरहितता । अयमर्थो द्वितीयनवमाध्याये चिन्मात्रोहं इति भावना तया च ब्रह्मभावलक्षणो मोक्ष इति मायावादनिरस्तिं च श्रावयति । तथा तैत्तिरीयोपनिषदि ब्रह्मवित्प्रपाठके रसरूपस्यैव आनन्दस्य परब्रह्मत्वं श्रुतम् । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद् बहून् शब्दान्वाचो विग्लापनं हि तत्' इति सर्वात्मभावं विदधती साधनमाह । तथा छान्दोग्ये नारदसनत्कुमारसंवादेप्येतदेव साधनमाह । तथा च तेजोमयो व्यापक आनन्द एव रसः कमनीयः साकारो अचिन्त्यानेकशक्तिवृतः सर्वाश्रयः पुरुषः परं ब्रह्म सर्वात्मभाववद्भक्ते स्वे महिम्नि प्रतिष्ठितो रूपादिविचयादिलीलां चरीकुर्वन्वरीवर्तीति । यथायमर्थः सर्वेषां वेदान्तानां तथास्यां ब्रह्ममीमांसायां विशदयिष्याम इति । तन्मतेऽवस्थिते विरुद्धेति विरुद्धानां योगसांख्यवैष्णवतन्त्राणां नैयायिकशांकररामानुजशास्त्राणां संभेदान्मिश्रणादित्यर्थः । एवं च वेदार्थभूतात्मत्वेन ब्रह्मणि ज्ञानशक्तिक्रियाशक्तिव्यापकत्वादेरिति संदेहः । तद्बीजं तु विरुद्धशास्त्रसंभेदः तेन ज्ञानशक्तिक्रियाशक्ती स्तः न स्तो वा, व्यापकोऽव्यापको वेति । 'समान एवं चाभेदात्'इति सूत्रभाष्येऽव्यापकत्वमुपपादितम् । अयमर्थो द्वितीयनवमाध्यायेविरोधेन स्फुटमन्यत्रातिपादितमिति संक्षेपः । प्रकृते । परंपरया पाठवदित्यादिभाष्यं विवृण्वन्ति तथा च यथेति । देवाशीकेत्यादि । षष्ठ्यन्तमिदं तस्येत्यध्याहरणीयम् । सूत्रविशेषणत्वादिति प्रतिभाति । यथा सूत्रस्येत्यनेनान्वेति । सूत्रस्य भाष्यम् । आदौ पदादौ उदात्ताकारे पदान्ते च वर्तमानः संहितायां यो दीर्घः असौ पदविभागपदसमे व्यञ्जनपरः सन् ह्रस्वमापद्यते । व्यञ्जनपरत्वं यथा

तदुक्तम् ।

असंदिग्धेऽपि वेदार्थे स्थूणाखननवन्मतः ।
मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वयम् इति ॥

भाष्यप्रकाशः ।

'त्रपुश्च मे मिथुश्चरन्तं सुश्चन्द्रदस्म' इत्यादेः पदपाठे, त्रपु च मिथु चरन्तं, सुचन्द्रेति पाठात् संदेहे, त्रपुमिथुपूर्वः शकारश्च परः, सुपूर्वश्चन्द्रपर इति । उत स्वानासो दिविष॰तु, आपो हि ष्ठा मयोभुव इत्यादेः पदपाठे, उत स्वानासः, दिवि सन्तु, आपः हि स्थ इति पाठात् संदेहे, स्वानासो दिव्यापोहीत्यादिसूत्रस्योपयोग इति लक्षणानां प्रातिशाख्यसूत्राणां संदेहनिवृत्तावुपयोगः । तथाऽर्थश्रवणेऽपि वाजिभ्यो वाजिनमित्यत्र किमामिक्षाऽश्नवन्तो विश्वेदेवा वा वाजिनामानोन्ये वा वाजिनयागदेवताः । गायत्र्यां सविता, सूर्यो वा परब्रह्म वा । आकाशादेव समुत्पद्यन्त इत्यत्र भूताकाशो वा ब्रह्म वेति संदेहः समानधर्मदर्शनान्मन्दादीनां भवेदिति । तन्निवृत्त्यर्थं मीमांसाद्वयस्याप्युपयोग इति ज्ञानविधावुपाङ्गभूतयोस्तयोरप्याक्षेपो युक्त एवेत्यर्थः ।

अस्मिन्नर्थे प्राचां संमतिमाहुः तदुक्तमित्यादि । द्वयमिति संदेहाभावो दार्ढ्यं चेत्यर्थः ।

रश्मिः ।

संहितास्थं ज्ञेयम् । व्यञ्जनमस्मात्परं इति व्यञ्जनपर इति । देवाशीकासुस्वाप्वतायमुनाहृदयोत्याशुद्धेति सूत्रे अत्र भाष्यम् । देवाशीका इत्यादिषु ग्रहणे । अवग्रहेषु अन्त्यस्वरो विभागे ह्रस्व आपद्यते यथा देवाय त इत्यादि । यथा वा शीकाय ते स्वाहा शीकाय त इति शीकय ते स्वाहा इदं सप्तमाष्टके स्तुभयन्तो हवामहे इत्यादिषु लक्षणम् । **त्रपुमिथ्विति** इति सूत्र, उपयुक्तं इति शेषः । यद्वा इति च सूत्रस्योपयोग इत्युत्तरत्रान्वयः । त्रपुमिथू पूर्वौ यस्य, चकारः परो यस्यैतादृशः शकारो भवति, सुः पूर्वो यस्य चन्द्रः परो यस्य तादृशः शकारो भवतीति सूत्रार्थः । त्रपुमिथुभ्यां परस्य चस्य सोः परस्य चन्द्रस्य च सुण् न भवतीति फलितोर्थः । अन्यत्र तु तृतीयेऽध्याये चन्द्रे सुशकारेणेति सूत्र्यते । चन्द्रे प्रत्यये सुशब्दशकारेणाव्यवधीयत इति च । भाष्ये । **उपयोग** इति । संतुस्थयोः सकारस्य शकारे उपयोग इत्यर्थः । **मीमांसाद्वयस्याप्युपयोग** इति । तत्राक्ताः शर्करा इत्यत्र तु तेजो वै घृतमिति वाक्यशेषोपयोगः । अर्थवादत्वेपि विशेषार्थतया विध्यविरुद्धत्वात्प्रामाण्यमिति पूर्वतन्त्रे प्रथमाध्यायोपान्ते 'संदिग्धेषु वाक्यशेषात्' इत्यधिकरणे चिन्तितम् । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्'इत्यपि, द्वितीयस्य द्वितीये पादे 'गुणश्च न पूर्वसंयोगे वाक्ययोः समत्वात्' इत्यधिकरणे चिन्तितम् । घनीभूतपिण्ड आमिक्षापदार्थः, जलं वाजिनपदार्थः । तत्र वाज आमिक्षाद्रव्यमेषामस्तीति वाजिनो विश्वेदेवास्तदनुवादेन वाजिनद्रव्यरूपो गुणो विधीयते । आमिक्षाद्रव्येणास्य समुच्चयो विकल्पो वेति प्राप्तम् । तत्रोत्पत्तिशिष्टामिक्षया निवृत्तान्यकाङ्क्षे वैश्वदेवयागे उत्पन्नशिष्टं वाजिनद्रव्यं प्रवेशमलभमानं वाजिशब्दस्य देवतान्तरार्थतां वक्ति । एवं च द्रव्यदेवताभेदाद्धितकर्मान्तरतास्येति । यथा 'निष्कलं निष्क्रियं' 'यतो वा इमानि भूतानि जायन्ते' इति संदेहे जन्माद्यधिकरणम् । यथा गायत्र्यामित्यादिसंदेहे रूढेः सवितृप्राप्तिः तत्र इत्यत्रैवान्तस्तद्धर्माधिकरणे उक्तं भविष्यति । आकाशादेवेत्यादेस्तु तल्लिङ्गाधिकरण इति । ज्ञानविधाविति । ज्ञेयमेतस्मिन् स्वाध्यायविधौ वेदाय । उपाङ्गेति । प्रतिपदमनुपदं छन्दो भाषेति

तथाच निर्णये येन केनचिद्दुरुक्तव्ये हरिः स्वयं व्यासो विचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति। ब्रह्मजिज्ञासा कर्तव्येति व्यासोक्तत्वादपि कर्तव्यता। कर्तव्यपदाध्याहारे स्वातन्त्र्यं न भवति। अन्यथा, 'अथ योगानुशासनम्' इतिवत् स्वतन्त्रता स्यात्। तथाच ज्ञानानुपयोगः। तथाहि। 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति केवलोपनिषद्वेद्यं ब्रह्म, न शास्त्रान्तरवेद्यम्। तद् यदि मीमांसा स्वतन्त्रा स्यात् तज्जनितं ज्ञानं न ब्रह्मज्ञानं भवेत्।

भाष्यप्रकाशः।

एतेन शास्त्रप्रयोजनमारम्भसमर्थनायोक्तम्। विचारकर्तव्यतासमर्थनेनोपोद्घातरूपा अधिकरणसंगतिरपि बोधिता। अतः परं प्रयोजनवत्त्वेऽपीदं शास्त्रं कया संगत्या आगतम्। श्रुतौ च तपस उपदेशात् तदेव च कुतो नोक्तमित्याकाङ्क्षायां शास्त्रसंगतिं वदन्त एव सूत्राक्षराणि व्याकुर्वन्तः प्रथमतो वाक्यार्थमाहुः तथाचेत्यादि। उक्तरीत्या वेदार्थनिर्णयस्यावश्यकत्वात् तन्निर्णये येनकेन चिद्दुरुक्तव्ये यदा कालवशात् तपआदीनामसंभवं व्यक्ततया तेषामसाधकत्वं च दृष्टवाँस्तदा जगद्दुःखदूरीकरणार्थं हरिः स्वयं व्यासरूपेणावतीर्य वेदव्यासादिकार्यं कृत्वा सर्ववेदार्थनिर्णयार्थं ब्रह्मविचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति ब्रह्मजिज्ञासा कर्तव्येति। धर्मादिवद् व्यासोक्तत्वादपि कर्तव्यता। अत इदानीं तपो न वेदार्थज्ञानसाधनं किंत्विदमेव साधनम्। किंच तापसानामृषीणामपि स्वभावभेदाल्लोकानां संदेहं यदा दृष्टवाँस्तदा करुणया कृतवानिति तदुक्तरीत्या प्रयतने प्रसादोऽपि भविष्यति, तेन वेदार्थबोधश्चेति नास्य गतार्थत्वम्। कृपैव च संगतिरित्यर्थः। ननु सूत्रे कर्तव्यपदाभावादध्याहारस्य च दोषत्वात् किमित्येवं व्याख्यायत इत्याकाङ्क्षायामाहुः कर्तव्यपदेत्यादि, भवेत् इत्यन्तम्। अत उक्तदोषनिवृत्त्यर्थमध्याहृत्य व्याख्यायत इत्यर्थः। अत्र सर्वसंमतत्वादेवमध्याहारपक्ष उक्तो वाक्यार्थश्च।

रश्मिः।

चरणोपाङ्गेष्वष्टसु मीमांसकोक्तेः। तयोरिति मीमांसयोरित्यर्थः। भाष्ये। वेदार्थ इति। ननु वेदार्थे ज्ञानक्रियाशक्तिरूपे वेदार्थभूतात्मरूपे उक्ताः संदेहाः संभवन्ति। तदन्वसंदिग्धो वेदार्थो भवति। सामान्ये अर्थे विशेषार्थे शत९शुक्राणीत्याद्युक्ते तु मीमांसानिर्णयः कथमिति चेन्न। ससंबोधो मोक्षो निःसंबोधो मोक्षो वेति संदेहे संपद्याविर्भावादिसूत्राणि वाक्यशेषरूपाणीति मुख्यः ससंबोधो मोक्ष इति मीमांसानिर्णयसत्त्वात्। स्थूणाखननवदिति। स्थूणा हि शङ्कुः सीम्नि निखन्यते निखातापीति तद्वदित्यर्थः। प्रकृते। शास्त्रप्रयोजनमिति। संदेहाभावरूपं दार्ढ्यरूपं चेत्यर्थः। उपोद्घातरूपेति पूर्वोक्ता तु अध्यायादेः संगतिरिति न पुनरुक्तिः। स्वयमिति। पाक्षिकप्रामाण्यप्रहाणायेदम्। वाक्यानि त्वग्रे वक्तव्यानि। ननु वेदार्थविचारेऽलौकिको हि वेदार्थ इत्यस्योपस्थित्या कालवरणतपआदीनामित्यत्र आदिशब्देन भेदबुद्धिः परमात्मप्रसादश्चेत्युभयं ग्राह्यम्। तदा तपआदीनामित्यत्र बहुवचनं विरुद्धम्। साधनान्तरग्रहणगौरवम्। वेदार्थे उक्तसाधनातिरिक्तसाधनग्रहणापत्तिश्चेत्यरुच्याहुः किंचेति। दृष्टवानिति वक्ष्यमाणपुराणप्रसिद्धम्। असंदिग्धमिति सूत्रविशेषणात् तापसानां ऋषीणामपि स्वभावभेदाल्लोकानां संदेहं विना विशेषणानुपपत्तेः। करुणयेति तपसा चेत्यपि द्रष्टव्यम्। कृतवानिति वेदोपयुक्तं मीमांसाशास्त्रं कृतवान्। कृपैवेति एतत्प्रथमस्कन्धे चतुर्थेऽस्ति। 'व्यासः कृपणवत्सलः' इति। एतच्च

अथवा, अध्याहारकरणापेक्षयाथशब्द एवाधिकारे व्याख्येयः । वेदाध्ययनानन्तर्यं तु सिद्धमेव । न ह्यनधीत एव विचारमर्हति तत्रैतत् स्यात् स्वतन्त्रतेति । तत्र प्रतिविधास्यामः । वेदार्थब्रह्मणो वेदानुकूलविचार इति । किमत्र युक्तम् ।

भाष्यप्रकाशः ।

अतः परं पदानामर्थं वदिष्यन्तः पूर्वोक्तः पक्षो वक्ष्यमाणदोषग्रासान्न साधुरित्याशयेन पक्षान्तरमाहुः अथवेत्यादि । अधिकारो नाम नियमविशेषः इति केचित् । यथा, 'आकडारादेका संज्ञा' इति । प्रारम्भ इत्यन्ये । यथा, 'अथ योगानुशासनम्' इति । प्राधान्येन निरूपणमित्यपरे । प्रस्ताव इति कैयटे, 'अथ शब्दानुशासनम्' इत्यत्र व्याख्यातः तत्रेदृशनियमस्य पूर्वप्रकृतसापेक्षत्वात् पूर्वं च कस्याप्यप्रकृतत्वात् सोऽत्र न युज्यते, अतः प्रारम्भादेः प्रस्तावाव्यतिरेकात् प्रस्तावे व्याख्येयः । तथाच ब्रह्मजिज्ञासारूपं शास्त्रमधिक्रियते प्रस्तूयत इति व्याख्याने कल्पनाराहित्यादिदं तदपेक्षया ज्याय इत्यर्थः । नन्वधिकारार्थत्वे आदृते कर्तव्यपदाध्याहाराभावेन ब्रह्मजिज्ञासाया विध्यनाक्षिप्तत्वात् वैदिकाधिकारिणोऽप्यप्राप्तेः शूद्रादिरनधीतवेदोऽपि ब्रह्मजिज्ञासायामधिकुर्यादिति कथं ज्याय इत्यत आहुः वेदेत्यादि । अग्रे वेदवाक्यानामेव विचारदर्शनादेतद्विचारकस्येदानीन्तनस्यापि वेदाध्ययनानन्तर्यं त्वर्थादेव सिद्धमिति न वैदिकाधिकारिणोऽप्राप्तिरित्यतो ज्याय इत्यर्थः । ननु तथापि विध्यनाक्षिप्ततया पुराणादिवत् स्वातन्त्र्यं तु सिद्धम् । तथा सति पूर्वोक्तो ज्ञानानुपयोगरूपो दोषस्तु स्यादित्याकाङ्क्षायां, तत्रैतत् स्यादित्यादिना तदनूद्य प्रतिविधानप्रकारमाहुः तत्रेत्यादि । अनुपदमेव वक्ष्याम इत्यर्थः । ननु प्रक्षालनपङ्कन्यायेनैतदपेक्षया तदादरणमेव युक्तमित्यत आहुः वेदार्थेत्यादि । वेदार्थभूतं यद्ब्रह्म

रश्मिः ।

संगतिलक्षणोपपादनावसरे ईक्षत्यधिकरणे स्पष्टम् । भाष्ये । न भवतीति वेदवेदान्तसंदेहवारणाय ब्रह्ममीमांसा कर्तव्येति विध्याक्षिप्तत्वेन पृथगारम्भाभावात् न भवतीत्यर्थः । अन्यथेति आरम्भार्थकत्व इत्यर्थः । स्वतन्त्रतेति प्रकारभेदेन प्रतिपादकतया वेदाङ्गता स्यादित्यर्थः । तथा च वेदाङ्गत्वमस्वातन्त्र्यं वेदानङ्गत्वं स्वातन्त्र्यमिति हृदयम् । प्रकृते । वक्ष्यमाणदोषग्रासादिति अधिकाकाङ्क्षेत्यादिदोषचतुष्टयग्रासादित्यर्थः । आक्षेप्यबोधनायावतरणमाहुः नन्वधीति । अधिकुर्यादिति अधिकारं प्राप्नुयादित्यर्थः । अत्र वैदिकानां वेदाध्ययनानन्तर्यमिति संशक्तकानां मीमांसा सदितोच्यते तदग्रे अपाकरिष्यते । वक्ष्याम इति वयमित्यध्याहारः । 'अस्मदो द्वयोश्च' इति सूत्रेण एकत्वेपि बहुवचनम् । प्रतिविधानं वक्ष्यामः । प्रक्षालनपङ्कन्यायेनेति 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायेनेत्यर्थः । एतदपेक्षयेति अधिकारेध्याहारादरणापेक्षया । तदादरणमध्याहारादरणं युक्तमङ्गत्वे विधेः । एव इति न्यायानुरोधादेवकारः । इत्यत आहुरिति इत्यतः शङ्कापूर्वाङ्गत्वादाहुरिति । ईश्वरमीमांसा सार्वविभक्तिकस्तसिः । इत्यतः शङ्का । ननु दोषतौल्ये कुतस्तदादरणमिति चेन्न । शङ्काग्रन्थत्वात् । भाष्ये । वेदार्थशब्दो न वेदार्थत्वेन ब्रह्मज्ञानाय विचार इत्याशुकः प्रथमवैदिकपूर्वपक्षोक्तार्थबाधकः । गौणमुख्यन्यायविरोधात् । अतो वेदार्थो मुख्यपूर्वपक्षोक्तः । वेदपदस्य 'स्मृतेश्च' इति सूत्रे वेदान्तपरत्वोक्तेरत आहुः वेदार्थभूत-

भाष्यप्रकाशः ।

तत्संबन्धी सपरिकरतज्ज्ञापको वेदानुकूलो वेदवाक्यानां विरोधपरिहारादिना तेषूपचारादिदोषनिवर्तको विचारो मीमांसारूप इति हेतोः । अत्र हि सर्ववेदार्थत्वेन ब्रह्म जिज्ञास्यम्, अन्यथा वेदवेदान्तयोरैकशास्त्र्यं न स्यात् । तदभावे च जैमिन्याद्युक्तदिशा मुमुक्षुप्रवृत्तिप्रतिघाते शास्त्रवैयर्थ्यमापद्येत । विचारस्य च यदि वेदानुकूल्यं न स्यात् तदाप्यास्तिका न प्रवर्तेरन् । अत आवश्यकत्वात् स्वातन्त्र्येऽपि विरोधाभावादानुकूल्येन तज्जनितज्ञानस्य ब्रह्मज्ञानरूपत्वात् प्रतिविधानमेव युक्तमित्यर्थः । अयं प्रकारो माध्वानामपि संमतः तद्बोधकस्कान्दवचनोपन्यासादवगन्तव्यः । अध्याहारपक्षेऽप्येवं वक्तुं शक्यत्वात् । तज्ज्यायांसं मन्यमानोऽनुयुङ्क्ते किमत्र युक्तमिति । स्वतन्त्र-

रश्मिः ।

मिति । सर्ववेदार्थत्वेनेति च । मुख्यपूर्वपक्षोक्तं मुख्यपूर्वपक्ष्यर्थत्वेनेति चार्थः । सपरिकरेति विशेषणं निःसंबोधमोक्षनिरासाय आत्मनो मोक्षत्वात् । विरोधनिराकरणादिरपि परिकरः । वेदान्तरूपपदं व्याचख्युः वेदवाक्यानामिति । आदिशब्देन साधनं मुख्यत्वादिकं फलं च संबोधत्वं चेति गृह्यते । तेन विरोधपरिहारोक्तोध्यायद्वयार्थः । आदिशब्दोक्तोध्यायद्वयार्थश्चेत्यध्यायचतुष्टयार्थः । तेष्वित्यध्यायेषु चतुर्षु । आदिशब्देनाकाङ्क्षायोग्यतासंनिधयः । इति हेत्वोरिति । न तदादरणमेव युक्तं, अध्याहृत्याध्याहारशेषनिवर्तनात् । दोषनिवर्तनं ततोपि अध्याहारदर्शनात्सर्वत्र । सर्ववेदेति । ननु वेदार्थत्वेनापि विद्यात्मत्वेन पूर्वस्य पुराणेपि सत्त्वात् द्वितीयस्यापि निरीश्वरमीमांसाविषयत्वात् । अत्र सूत्रे ब्रह्मपदेन वेदोक्तवेदार्थत्वेन ब्रह्म जिज्ञास्यम्, वेदार्थो ब्रह्म इति प्रतीतेः । यथा घटः पृथ्वीत्वेन घटप्रतीतेः । तथा च वेदार्थो ब्रह्म तस्य न तु पुराणाद्यर्थः पृथ्व्यर्थब्रह्मणो वेदानुकूलविचार इति भाष्यार्थः । ब्रह्मशब्देन वेदमात्राग्रहणे युक्तिमाहुः अन्यथेति । ऐकशास्त्र्यमिति । तच्चाग्रे भाष्ये वक्ष्यते । श्रुत्योरप्युक्तम् । 'यदेव विद्यया करोति' इति । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति च । वृत्तिकृद्बौधायनोप्याह 'संहतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेन' । जैमिन्याद्युक्तदिशेति । यथाहुः 'चोदनालक्षणोर्थो धर्मः' इति सूत्रे कार्यरूप एव वेदार्थः, न तु सिद्धरूपः इति, द्वितीयपादे च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' इत्यधिकरणेऽर्थवादानां क्रियार्थत्वाभावेन स्वार्थे तात्पर्यविधुराणां स्तावकत्वमिति धर्मनिर्णयः । चतुर्लक्षण्या चोपासनात्मकधर्मनिर्णय इति । न च ब्रह्मज्ञाने उपयोग इति वाच्यम् । 'आत्मा वा अरे द्रष्टव्यः,' 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' इति, श्रुतिस्मृतिभ्यां तस्य धर्मत्वात् । न च सृष्ट्यादिवाक्यार्थं निर्णेतुमपेक्षत इति वाच्यम् । 'ब्रह्मिष्ठो ब्रह्मा तं दर्शपूर्णमासयोर्वृणीते' इति कल्पसूत्रात्

'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन' ॥

इत्युक्तेर्विध्येकवाक्यतयार्थवादत्वात् । किंच नवमे तृतीयचतुर्थयोः 'फलदेवतयोश्च' 'देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्' इत्यधिकरणयोर्न देवता विग्रहवती, किंतु शब्दमात्रं देवता । अर्थस्तु प्रातिपदिकानुरोधाच्चेतनो वा कश्चित्स्वीक्रियते, न तु विग्रहादिमान् । उपासनादौ परं ध्यानमात्रमध्याहार्यमिति । अनया दिशेत्यर्थः । आदिना क्षणिकवादी ग्राह्यः । युक्तमित्यर्थ इति । वैधत्वस्य 'ज्ञेयश्च' इति विधिना प्राप्तत्वादिति भावः । तद्बोधकेत्यादि । स्कान्दे वचनानि त्विमानि ।

व्याख्यानमिति । व्याख्यानतो विशेषप्रतिपत्तेः । यथा कर्मणि 'दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः' । 'अथातो दर्शपूर्णमासौ व्याख्यास्याम' इति ।

अथवैतर्हीमानि सिद्ध्यन्ति प्रयोजनानि । अधिकाकाङ्क्षा न भवेत् । अध्याहारश्च । पुरुषार्थश्च सिद्ध्येत् । उच्छेदश्च न भवेदिति । कथम् । अथशब्दोऽर्थचतुष्टये वर्तते, मङ्गले, अधिकारे, आनन्तर्ये, अर्थान्तरोपक्रमे च । तत्र श्रुतिमात्रेणैव

भाष्यप्रकाशः ।

ताप्रतिविधानस्यात्राप्यपेक्षितत्वेन प्रतिपत्तिगौरवदोषस्यात्रापि सत्त्वादध्याहारकरणाथशब्दव्याख्यानपक्षयोर्मध्ये किं युक्तं, तद्वक्तव्यमित्यर्थः । तत्रोत्तरमाहुः व्याख्यानमिति । अथशब्दव्याख्यानपक्ष एव युक्त इत्यर्थः । तत्र हेतुमाहुः व्याख्यानत इत्यादि । ननु कात्र विशेषप्रतिपत्तिरित्यत आहुः यथेत्यादि । तथाच यथा कल्पसूत्रेण प्रयोगप्रकारादिबोधनात् तत्तत्पदार्थसंदेहनिवृत्तिस्तथानया मीमांसया ब्रह्मणीति, तत्र यथाऽधिकारेऽथशब्दस्तथात्रापीति कल्पसूत्रतौल्यरूपविशेषस्य प्रतिपत्तिरित्यर्थः ।

नन्वध्याहारपक्षेऽपीदं सुवचमतः सर्वसंमतत्वादध्याहारपक्ष एव युक्तो नाऽथशब्दस्याधिकारव्याख्यानपक्ष इत्यत आहुः अथवेत्यादि । एतर्हीति व्याख्यानपक्षे । अत्र चोदयति कथमिति । स्वोक्तं विभजन्ते अथेत्यादि । तत्र मङ्गले,

'ओँकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिष्क्रान्तौ तेन माङ्गलिकावुभौ' ॥ इति ।

अधिकारे, यथा, 'अथैष ज्योतिः' इति वेदे । 'अथ योगानुशासनम्' इत्यादि च

रश्मिः ।

'नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किंचित्तदन्यथा जातं त्रेतायां द्वापरे खिलम् ॥
गौतमस्य ऋषेः शापात् ज्ञाने त्वज्ञानतां गते । संकीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ॥
शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥
अवतीर्णो महायोगी सत्यवत्यां पराशरात् । उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम् ॥
चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः । शतधा चैकधा चैव तथैव च सहस्रधा ॥
कृष्णो द्वादशधा चैवं पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥
अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥
निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः । यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥
सविशेषणसूत्राणि ह्यपराणि विदो विदुः । मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः ॥
इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः । सूत्रेषु येषु सर्वेपि निर्णयाः समुदीरिताः ॥
शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः । एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः ॥
ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु । ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः' ॥ इति ।

अधिकारे अथैष ज्योतिरिति । एतच्च पूर्वतन्त्रे द्वितीयस्य द्वितीये पादे 'संज्ञा चोत्पत्तिसंयोगात्' इत्यधिकरणे चिन्तितम् । तत्र ज्योतिष्टोमं प्रकृत्येदं श्रूयते । अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति । तत्रैतच्छब्देन प्रकृतं ज्योतिष्टोमं परामृश्यत

मङ्गलसिद्धेरर्थान्तरस्य च पूर्वोक्तस्याभावान्नात्र तत्कल्पनम् । अथाऽवशिष्यते आनन्तर्ये वाऽधिकारे वेति । आनन्तर्ये त्वध्ययनस्य स्वतःसिद्धत्वादधिकाकाङ्क्षा भवति । तथा सति तदभावान्न विचारः सिद्ध्येत् ।

भाष्यप्रकाशः ।

लोके । आनन्तर्ये यथा, भुक्त्वा अथ व्रजतीति । अर्थान्तरोपक्रमे यथा, पूर्वं किंचिदुक्त्वा पुनर्विकल्पांन्तरे क्रियमाण उच्यते, अथायमाशय इति । यद्यपि कोशे,

'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इति
'अथाथो संशये स्यातामधिकारे च मङ्गले ।
विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये' ॥

इत्यर्थान्तरमप्युक्तम् । गौडो भवान् अथेति ब्रूम इति प्रतिज्ञायामपि दृश्यते । तथापि प्रच्छकस्य संदेग्धुश्च कस्याप्यनुक्तत्वेन अथ शक्तोऽसि भोक्तुमित्यादिवत् प्रश्नसंशयव्यञ्जकवाक्याभावेन च प्रश्नसंशययोर्वक्तुमशक्यत्वात् स्वसंशयस्य स्वतोनिष्टृत्त्यभावेन, स्वसंशयस्य, 'अविज्ञातं विजानताम्' इति श्रुतेः कृत्स्नस्य ब्रह्मणो विचारयितुमशक्यत्वेन कार्त्स्न्यस्य च प्रकृतविरुद्धत्वाद् विकल्पस्य पक्षान्तरात्मकत्वेनारम्भस्योपक्रमात्मकत्वेन चार्थान्तरोपक्रमानतिरेकात् समुच्चयनियमरूपाधिकारयोरप्यर्थान्तरसापेक्षत्वेन विकल्पतुल्यकक्षत्वादुपयुक्तविचारकार्त्स्न्यप्रतिज्ञयोरपि प्रस्तावाव्यतिरेकादथशब्दोऽत्रार्थचतुष्टये संभावितो वर्तते । तत्रान्यार्थकृतस्य पटहमृदङ्गादिध्वनेरिवाथशब्दस्यापि श्रवणमात्रेण मङ्गलसिद्धेः स्मृतिव्याकोपपरिहारात् तस्याः स्वरूपश्रवण-

रश्मिः ।

इत्याशङ्कायां अथशब्देन प्रकृतव्यवच्छेदोत्पत्तिसंयोगात्संज्ञया कर्मान्तरमिदमिति । एष इति तु प्रतिज्ञायमानकर्मान्तरवाचक इति । सुषुप्त्युत्क्रान्त्योर्भेदेनेति सूत्रे विशिष्य वक्तव्योयम् 'त्रयाणामेव चैवमुपन्यासः प्रश्नश्च' इति सूत्रे मध्वाचार्याः । 'अविज्ञातप्रार्थनं वा प्रश्न इत्यभिधीयते' इति वाक्यात् अविज्ञातप्रार्थनं प्रश्नः । तुः प्रतिज्ञायमानकर्मान्तरवाचक इति । (तथा च एष याग इत्यर्थः ।) अथेत्यस्य अधिक्रियत इत्यर्थः । लोक इति छन्दोवत्सूत्राणि भवन्तीति, लोके इत्यसंगतमिति यद्यपि तथापि चतुर्थचरणे सांख्यस्यावैदिकत्वमुक्तं 'एतेन योगः प्रत्युक्तः' इति चोक्तमतो लोक इति संगतम् । आदिशब्दार्थो द्रष्टव्यः । अथ व्रजतीति भोजनानन्तरं व्रजतीत्यर्थः । अथायमिति अर्थान्तरोपक्रमादयमाशय इत्यर्थः । तथा च एष याग इत्यर्थः । येषां यथायथमसंभवान्तर्भावाभ्यामवक्तव्यत्वमाहुः तथापीति । अथ शक्तोसीति । तृप्तं प्रति तृप्त्यनन्तरं भोक्तुं प्रवर्तमानं प्रति च वचनम् ।' प्रश्नसंशयेति परेच्छाप्रतिपत्तिफलकं वाक्यं प्रश्नः । स्वरसतो अथशब्दस्य प्रश्नसंशयार्थताभानात् तद्व्यञ्जकवाक्येत्युक्तम् । स्वत इति प्रतिज्ञातसंशयविषयग्रन्थात् । स्वसंशयस्येति वक्तुमशक्यत्वादिति पूर्वेणान्वयः । ननु कृत्स्नार्थको अथशब्दो विचारान्वयी न तु ब्रह्ममात्रान्वयीत्यत आहुः उपयुक्तेति । तत्र श्रुतीत्यादि भाष्यं विवृण्वन्ति स्म तत्र अन्यार्थमिति । वृत्त्यान्यार्थम् । अथशब्दस्येति अधिकारार्थे कृतस्य । स्मृतीति शिष्टाचारप्राप्तस्मृतीत्यर्थः । स्वरूपेति स्वरूपं मङ्गलश्रवणविषयः तदेव मङ्गलम् । मात्रपा प्रतिपाद्यत्वयोगव्यवच्छेदः क्रियते, न तु प्रतिपाद्यत्वेन यन्मङ्गलं तदाचरणेन तन्मात्रं कार्य-

भाष्यप्रकाशः ।

मात्रकार्यत्वेन मङ्गलस्यार्थान्तरबोधनाप्रतिरोधकत्वाच्च न तन्मात्रकल्पनं युक्तम् । पूर्वं कस्याप्यर्थस्यानुक्तत्वादर्थान्तरोपक्रमस्यापि कल्पनं न युक्तम् । यत् पुनरानन्तर्यप्रस्तावरूपमर्थद्वयमवशिष्यते, तत्रानन्तर्ये यस्य कस्यचिदानन्तर्यं तु स्वभावादेव प्राप्तमिति, न तस्य वक्तव्यत्वम् । यदि च शाबरभाष्योक्तमध्ययनानन्तर्यमङ्गीक्रियते, नह्यनधीतवेदो विचारेऽधिकरोतीति । तदा तस्य विचारार्थकजिज्ञासापदेनैवार्थात् सिद्धेरथशब्दोक्तानन्तर्यप्रतियोगिनोऽधिकाकाङ्क्षा भवति, अध्ययनातिरिक्तात् कस्मादनन्तरं ब्रह्म विचारयितव्यमिति । तस्यां च सत्यामध्ययनातिरिक्तस्य कस्यापि तन्मतेऽदर्शनाच्च प्रकृतविचारसिद्धिरित्यर्थः । ननु 'संहतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेन' इति वदद्भिः प्राचीनवृत्तिकारैर्द्वयोर्मीमांसयोरैकशास्त्र्यमङ्गीकृतम् । ततश्चाग्नेयादिषट्कभेदवदध्यायभेदवच्चावान्तरप्रमेयभेदेन भेदेऽपि प्रयोजनैक्याद्, 'अथाऽतो धर्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दात्' इत्यन्तमेकं शास्त्रमतः कर्मविचारानन्तर्यमस्येति रामानुजाचार्याः ।

आराधनाराध्यभूतयोर्धर्मब्रह्मणोः प्रतिपादकत्वेनैकशास्त्र्यं । 'अथाऽतो ब्रह्मजिज्ञासा' इति पृथगारम्भस्त्वथातः शेषलक्षणमित्यादिवदवान्तरपरिच्छेदार्थ इति तदेकदेशी नव्यः शैवः ।

पूर्वं धर्मजिज्ञासा कार्या, पुरुषमात्रविषयत्वात्, ब्रह्मज्ञानं तु कस्यचिदेव मुमुक्षोरिति धर्मविचारानन्तरं चतुर्णां प्रतिपन्नाश्रमान्तराणां सा । 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति सूत्रयतः सूत्रकारस्यापि ज्ञानकर्मसमुच्चयादेव मोक्षप्राप्तिरभिप्रेतेति ज्ञायते, अपरिज्ञाते, च कर्मणि केन समुच्चयः, केन नेति न ज्ञातुं शक्यम्, ज्ञाते तु तस्मिन् नित्यकाम्यनिषिद्धानां हेयोपादेयविभागविज्ञानात् काम्यनिषिद्धे हेये, नित्येन समुच्चय इति सुखेन ज्ञातुं शक्यते । किंच । तृतीये, कर्मसमृद्ध्यर्थानामुद्गीथाद्युपासनानां चिन्तनात् तेषां च कर्माधिकृतपुरुषमात्रविषयत्वात् कर्माविज्ञानेन तच्चिन्ताया अप्यनुपपत्तिरतोऽपि तदानन्तर्यमिति भट्टभास्कराचार्याः ।

रश्मिः ।

मवश्यं कार्यं यस्याः तत्त्वेन इत्यर्थः । **अर्थान्तरेति** । मङ्गलस्य विचारकर्तव्यतारूपे वाक्यार्थे कर्तृत्वादिनान्वयाभावादिति शंकरभाष्योक्तहेतुसंग्राहकश्चकारः । एवं मङ्गलविधिरधिकारपक्षेपीति ज्ञेयम् । मङ्गलस्य शक्यार्थत्वे वाक्यभेदश्च स्यात् । **अर्थात्सिद्धेरिति** आक्षेपात्सिद्धेरित्यर्थः । **अथशब्दोक्तेति** अथशब्दोक्तानन्तर्यनिरूपकस्येत्यर्थः । आकाङ्क्षास्वरूपमाहुः **अध्ययनातिरिक्तादिति** । **तथा सतीति** भाष्यं विवृण्वन्ति स्म **तस्यां चेति** । **कस्यापीति** आनन्तर्यनिरूपकस्येत्यर्थः । **षोडशलक्षणेनेति** द्वादशलक्षणान्यध्यायाः कर्मकाण्डे, चत्वारोध्यायाः उपासनाकाण्ड इत्येवं षोडशलक्षणेनेत्यर्थः । **प्राचीनवृत्तिकारैरिति** । बोधायनप्रभृतिभिरित्यर्थः । **प्रमेयेति** प्रमाणभेदशेषत्वप्रयुक्तिक्रमाधिकारसामान्यातिदेशविशेषातिदेशोहबाधतन्त्रप्रसङ्गरूपप्रमेयं पूर्वतन्त्रे । उत्तरतन्त्रे तु समन्वयविरोधनिराकरणसाधनफलरूपमिति ज्ञेयम् । **प्रयोजनेति** आराधनाराध्यभूतयोर्धर्मब्रह्मणोः प्रतिपादनरूपप्रयोजनैक्यात् । **ऐकशास्त्र्यमिति** तच्च पूर्वोक्तैकशास्त्रनिष्ठम् । **अथातः शेषलक्षणमिति** इदं च पूर्वतन्त्रे तृतीयाध्यायस्यारम्भसूत्रम् । **अवान्तरपरिच्छेदार्थ** इति अवान्तरविचारविशेषार्थ इत्यर्थः । **कर्मसमृद्धिरिति** । तमेतमिति वचनेन ब्राह्मणा विविदिषन्तीति श्रुतिरत्रानुसंधेया । **तदानन्तर्यम्** धर्मविचारानन्तर्यम् । 'यस्य-

तथा हि, न तावद्धर्मविचारानन्तर्यम्। विपर्ययसंभवात्।

भाष्यप्रकाशः।

किंच, 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति श्रुतौ तर्कोपकरणेन शब्देन परमात्मानं सम्यग् ज्ञात्वा प्रज्ञाख्यभावनाविधानात्, पतञ्जलिनाऽपि, 'स तु दीर्घकालादरनैरन्तर्यसत्काराऽऽसेवितो दृढभूमिः'इति सूत्रयता दीर्घकालासेवितस्याव्यवधानासेवितस्य ब्रह्मचर्यतपःश्रद्धायज्ञादिरूपसत्कारासेवितस्य योगस्य दृढभूमित्वकथनाच्च क्रियमाणाया भावनाख्योपासनाया दृढत्वाय यज्ञोपयोगः कैश्चिदिष्यते।

तत्तत्फलार्थं विहितानामपि कर्मणां, 'तमेतं वेदानुवचनेन'इत्यादिश्रुत्या, 'एकस्य तूभयत्वे संयोगपृथत्त्वम्'इतिन्यायेन क्रत्वर्थखादिरत्वस्य वीर्यार्थत्ववद्ब्रह्मभावनार्थत्वं कैश्चिदिष्यते।

तथापरैः श्रेयःपरिपन्थिकल्मषनिबर्हणद्वारा यज्ञोपयोग इष्यते।

अन्यैः पुनः 'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः,' 'यस्यैतेऽष्टाचत्वारिंशत् संस्कारा' इति स्मृत्या यज्ञादिसंस्कृतस्य पुरुषस्य दीर्घकालादरनैरन्तर्यैर्ब्रह्मभावनामासेवमानस्य समूलकाषमविद्यावासनानिवृत्त्या प्रत्यगात्मवैशद्यात् पुरुषसंस्कारद्वारा यज्ञोपयोग इष्यते।

तथेतरैः 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेद्' इति स्मृत्या ऋणत्रयापाकरणेन कर्मणां ब्रह्मज्ञानोपयोग इष्यते इति नाना मतानि वाचस्पत्ये लिखितानि। अतः कर्मज्ञानसमुच्चयस्य बहुवादिसंमतत्वात् पूर्वोक्तरीत्या धर्मविचारेणाधिकाकाङ्क्षापूरणसंभवात् तदनन्तरं सुखेन ब्रह्मविचारसिद्धिरित्याकाङ्क्षायामाहुः तथाहि, नेत्यादि। तदुक्तरीत्या समुच्चयाङ्गीकारेऽपि धर्मविचारानन्तर्यं नोपपद्यते कुतः विपर्ययसंभवात्। 'हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः' इतिवद् वेदवेदान्ताध्ययनक्रमनियामकप्रमाणाभावात्। नच कर्त्रैक्यात् क्रमनियमः शङ्क्यः।

रश्मिः।

केणानुसंधत्ते' इति 'तं त्वौपनिषदं पुरुषं पृच्छामि'इति च श्रुतिद्वयमनुकूलयन्ति तर्कोपकरणेन शब्देनेति। इत्यादिश्रुत्येत्यादि तेन उपसर्पति इति शेषः। ब्रह्मपावनमिति वचनेत्यादिश्रुत्या। 'एकस्य तूभयत्वे' इति पूर्वतन्त्रेयं न्यायश्चतुर्थस्य तृतीयपादे चिन्तितः। एकस्योभयशेषतानिमित्तं पृथक् संयोग इति न्यायार्थः। स यथा खादिरेग्नीषोमीयपशुबन्धोत्त्यनन्तरं खादिरं वीर्यकामस्य यूपं कुर्वीतेति पृथक् श्रुतिसंयोगाद्वीर्यार्थत्वे तद्वदित्यर्थः। समूलकाषमित्यादि। वासना लक्षणं तु—

दृढभावनया त्यक्तं पूर्वापरविचारणम्।
यदादानपदार्थस्य वासनेति प्रकीर्तिता॥

प्रत्यगात्मा जीवः। ऋणत्रयेति देवपितृमनुष्याणामृणत्रयेत्यर्थः। हृदयस्येत्यादि इदं पूर्वतन्त्रे चतुर्थस्य प्रथमे पादे चिन्तितम्। अग्नीषोमीयं पशुमालभेतेति प्रकृत्य श्रुतम्। इतिवदिति इत्यत्र संख्यारूपस्थानं क्रमनियामकं यथा तद्वत्। नच कर्त्रैक्यादिति। अत्र वयं 'अथातो धर्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दात्' इत्यन्तमनेककर्तृकमपि परंतु वेदनिश्वसितुः कृष्णावतारत्वेन वेदान्तानामपि निश्वसितकर्तृकत्वमित्येककर्तृकं शास्त्रमिति मन्महे। क्रमनियम इति क्रमेण स्थानेन नियम इत्यर्थः। स्थानं क्रमपर्यायकम्। तदुक्तम्

'क्रमो हि द्विविधैर्वेद्यो देशसामान्यलक्षणः।
पाठानुकारसादेश्याद्विनियोगस्य कारणम्' इति॥

भाष्यप्रकाशः ।

आघारदर्शपूर्णमासवत् कर्मब्रह्मविचारयोरेकाङ्गिप्रयुक्ताङ्गत्वेन वा, पञ्चप्रयाजवदेकाङ्गिप्रयुक्तानेकाङ्गत्वेन वा, गोदोहनादिवदधिकृताधिकारत्वेन वा, षड्यागवत् फलैक्येन वा कर्त्रैक्यं येन

रश्मिः ।

स्थाने पठनीयक्रमपाठः । स्थानं च यथासंख्यपाठः संनिधिपाठः अनुष्ठानसादेश्यं च । प्रकृते तु यथासंख्यपाठरूपं स्थानम् । तथा च प्रथमस्य धर्मविचारस्य प्रथमप्राप्तिः । द्वितीयस्य ब्रह्मविचारस्य पश्चादित्येवं विनियोगः । न च अथशब्दः शास्त्रं विभजन्पूर्वोक्तं कर्त्रैक्यं विघटयिष्यतीति वाच्यम् । अथातः शेषलक्षणमिति तृतीयाध्यायसूत्रवत् अथशब्दस्य अविभाजकत्वात् । संनिधिपाठरूपं स्थानं च वैकृतान्यङ्गानि यत्र प्राकृताङ्गाननुवादेन विहितानि तेषां विकृतौ विनियोजकम् । तेषां कैमर्थ्याकाङ्क्षायाः मूलसिद्धविकृत्यविकृतिप्रीतादेवतासंबन्धेन पूर्वसंबन्धेनैवोपशमात् । अनुष्ठानसादेश्यरूपं स्थानं तु पशुधर्माणामग्नीषोमीयार्थत्वं प्रयोजयति । औपवसथ्येऽहनि अग्नीषोमीयः पशुरनुष्ठीयते तस्मिन्नेव दिने ते धर्माः पठ्यन्ते, अतस्तेषां कैमर्थ्याकाङ्क्षायामनुष्ठानसदेशत्वेन उपस्थितं पशुः पशुप्रीतदेवता च पशुदेवताप्रीतिरेव वा अपूर्वमेव भाव्यत्वेन संबध्यते इति । **तत्रापि तथेति** भाष्यं विवृण्वन्तः कर्त्रैक्ये प्रमाणाभावमाहुः **आघारेत्यादि** । षष्ठ्यन्ताद्वतिः । 'आघारमाघारयति । ऊर्ध्वमाघारयति । ऋजुमाघारयति' । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'इति श्रुतयोरेवाङ्गीप्रयुक्ताङ्गत्ववदित्यर्थः । आघारइदमग्निहोत्राधिकरणे द्वितीयस्य द्वितीयपादे चिन्तितम् । दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति तु सोमद्रव्यस्य दर्शाङ्गतामप्रुवन्दर्शादिकालः सोमे विधीयत इति चतुर्थस्य तृतीये पादे 'उत्पत्तिकालविशये कालः स्याद्वाक्यस्य तत्प्रधानत्वात्'इत्यधिकरणे चिन्तितम् । **पञ्चप्रयाजवदिति** । द्वितीयस्य द्वितीयपादे दर्शपूर्णमासयोः श्रूयन्ते 'समिधो यजति,' 'तनूनपातं यजति,' 'इडो यजति,' 'बर्हिर्यजति,' 'स्वाहाकारं यजति,' इति पञ्चप्रयाजाः तेषां यजत्यभ्यासाद्भेद इति चिन्तितम्, तद्वदित्यर्थः । **गोदोहनादिवदिति** । चमसेनापः प्रणयेदिति दर्शपूर्णमासाङ्गमपां प्रणयनमाश्रित्य गोदोहनेन पशुकामस्येति विहितस्यापां प्रणयनेधिकृताधिकारकस्य गोदोहनस्येवेत्यर्थः । तदिदं चतुर्थे 'यस्मिन्प्रीतिः पुरुषस्य लिप्सार्थलक्षणाविभक्तत्वात्'इत्यधिकरणे चिन्तितमन्यैः । **षड्यागवदिति** । त एवं द्वितीयस्य द्वितीयपादे, 'प्रकरणं तु पौर्णमास्यां रूपावचनात्'इत्यधिकरणे चिन्तिता आग्नेयादयः षड्यागाः । 'य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते' इत्याम्नातम् । तत्र यदाग्नेयोष्टाकपालोमावास्यायां च पौर्णमास्यां चाच्युतो भवतीति । तावब्रूतामग्नीषोमावाज्यस्य एवं तावुपांशु पौर्णमास्यां यजन्निति । ताभ्यामेकमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छदिति । ऐन्द्रं दध्यमावास्यायामिति । ऐन्द्रं पयोमावास्यायामिति प्रकृताः षडनूद्यन्ते । तत्राप्याग्नेयोपांशुयाजाग्नीषोमीयाणां पौर्णमासीकालविहितानां सह प्रयोगः । एवमितरत्रापि । एतौ समुदायौ पौर्णमास्यमावास्यापदाभ्यामुपलक्ष्येते इति नानुवादकतानुपपत्तिः । तेषां सर्वेषां दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्येन फलसंबन्धः । तदिदं वाक्यं चैकादशे 'प्रयोजनाभिसंबन्धात्पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात्'इत्यधिकरणे । अत्र श्रुतं फलं सतां यागानां पृथगुत्पन्नतया पृथगेव फलाभिसंबन्धात्प्रत्येकं संबध्यत इति पूर्वपक्षं संगृह्य दर्शपूर्णमासरूपैकशब्दाभिसंयोगा-

भाष्यप्रकाशः ।

बोध्येत तादृशप्रमाणस्याप्यनुपलम्भात् । न च, 'विद्यां चाविद्यां च यस्तद् वेदोभयं सह,' 'सत्येन लभ्यस्तपसा ह्येष आत्मा' इत्यादिश्रुतिरेव क्रमे प्रमाणमिति वाच्यम् । समुच्चयमात्रबोधनेन चारितार्थ्यात् । किंच । धर्मो न यथाकथंचिज्ज्ञातो विद्यया समुच्चेयोऽपि तु निर्णीतस्वरूपः । निर्णयस्तु यथा कर्मस्वरूपविषयकः पूर्वतन्त्रात्, तथा कर्मशेषभूतपुरुषस्वरूपविषयकस्तदाराध्यभूतब्रह्मस्वरूपविषयकश्चोत्तरतन्त्रात् । अतोऽभ्यर्हितत्वात् पूर्वं वेदान्तविचारेण तदवगन्तव्यम् । नानावादैरात्मस्वरूपे ब्रह्मस्वरूपे च विप्रतिपन्ने वैदिकानां वेदवाक्यैरेव तन्निरासस्यावश्यकत्वात् । ज्ञाते तयोः स्वरूपे कर्मणि सुखेन प्रवृत्तिसंभवादिति । नचाध्ययनादिविधेः कर्मावबोधनसमर्थेषु पुरुषेषु चरितार्थत्वेन, शान्तो दान्त इत्यादिश्रुत्युक्तसाधनान्तरसापेक्षब्रह्मज्ञानोपायभूतशमाद्याक्षेपासामर्थ्यात् पूर्वं धर्मविचारस्यैव प्राप्तिरिति वाच्यम् । शान्तो दान्त इति श्रुतौ पश्येदितिपदाच्छमादीनां दर्शनसाधनत्वेन विचारे तदपेक्षाभावात् । प्रह्लादकव्यादिवदाबाल्यान्मुमुक्षाशमादिमत्सु तदप्रवृत्तौ तेषां विचारमात्राप्रसक्तेर्यथाकथंचित् प्रवृत्तौ वाऽभ्यर्हितस्यैव प्राप्त्या नियमभङ्गाच्च तदेतदुक्तम् ।

रश्मिः ।

दैककर्म्यं समुदितस्यैव फलमिति चिन्तितं तद्वदित्यर्थः । अत्र क्रियत इति व्युत्पत्त्या कर्मफलं ऐककर्म्यमेकफलत्वम्, क्वचित्तु सूत्रे पृथक्त्वं ततः स्यादिति पठ्यते । सत्तामिति न पठ्यते । नचेत्यादि । अविद्यां कर्मरूपमित्यर्थः । ज्ञानमेवेच्छां प्रयुञ्जानो यत्नं संपादयतीत्यालोच्याहुः किंचेति । कर्मशेषेत्यादि । एतच्च तृतीये 'द्रव्यगुणसंस्कारेषु बादरिः' इत्यधिकरणे चिन्तितम् । पूर्वमिति 'अभ्यर्हितं च'इति सूत्रेणेत्यर्थः । ननु मीमांसायाः न किमपि प्रयोजनं पश्यामः, आदिज्ञानस्यान्यत एव संभवादित्यत आहुः नानावादैरिति । विप्रतिपन्न इति विविधप्रकारैर्ज्ञात इत्यर्थः । वेदवाक्यैरिति वेदवेदान्तवाक्यैः विचारविषयैः मीमांसासूत्रविषयवाक्यैरित्यर्थः । तन्निरासस्येति विप्रतिपत्तिगतसंशयनिरासस्यापि । प्रवृत्तीति, इच्छाद्वारा प्रवृत्तिसंभवात्, जानाति इच्छति यतत इति नैयायिकप्रवादात् । दृष्टानुवादिनीं 'शान्तो दान्तउपरतस्तितिक्षुश्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येत्' इंति श्रुतिमनुरुध्य विपर्ययाभावशङ्का तामपाकुर्वते न चाध्ययनेत्यादि । पूर्वं धर्मविचारस्यैवेति । वैधत्वादिति भावः, अन्यथा श्रुतिविरोध इति भावः । विचारितधर्मेण विशेषचित्तशुद्धिः शमदमादिकारणम् । तदपेक्षाभावादिति शमाद्युपेतत्वेपि दर्शनानपेक्षत्वादित्यर्थः । तेन शमदमाद्युपेतसूत्र(श्रुत्यविरोधात्)विरोधः । तथा च श्रुतिविरोधाद्वेदविचारविधिस्तदन्तेपि प्रवर्तते, न तु विध्यन्तरमादरणीयं संभवेपीत्याशयः । तदप्रवृत्ताविति । शान्त्यादिकमुत्पाद्य आत्मानं पश्येदिति श्रुतिस्फूर्तेः शान्त्याद्युत्पादनाय विध्यप्रवृत्ताविर्त्यर्थः । सत्तामात्रभवत्यर्थादेव पूर्वोक्तनिरस्तिं मन्यमाना आहुः यथाकथंचिदिति । भक्तिमार्गीयाणां स्वत एव शमादिसत्त्वेन वैधशमादिसत्तामात्रं भवत्यर्थाद्भक्तिमार्गीयाणां शमादिविधिप्रवृत्तौ । नियमभङ्गाच्चेति । धर्मब्रह्ममीमांसयोः पूर्वापरीभावनियमभङ्गाच्चेत्यर्थः । तदेतदुक्तमिति । तथा हि न तावद्धर्मविचारानन्तर्यम्, विपर्ययसंभवादिति भाष्येणेत्यर्थः । तत्रापि तथा

नच पाठतो नियमः । तत्रापि तथा । नचाऽऽचाराद् व्यवस्था । तत्राप्यनियमसंभवात् । प्रत्यवायाश्रवणात् । संभवेपि न वक्तव्यत्वमध्ययनवत् । तथाच ततोऽन्याकाङ्क्षा भवेत् । नच वैराग्यशमदमादिः पूर्वसिद्धः ।

भाष्यप्रकाशः ।

ननु पूर्वं धर्मकाण्डं पठ्यते, अनन्तरं ज्ञानकाण्डमिति पाठस्य क्रमनियामकत्वमस्त्विति चेत् तत्राहुः नचेत्यादि । पाठक्रमे विद्यमानेऽपि पूर्वकाण्डं न सर्वैरादित आरभ्य पठ्यते । अपि तु यतःकुतश्चित् । अतोऽवान्तरकाण्डक्रमानियमवज्ज्ञानकाण्डक्रमानियमस्यापि शक्यवचनत्वात् तत्रापि तथेत्यर्थः । ननु पाठः शिष्टाचारादनियतोऽस्तु, न तु विचारोऽपीत्यत आहुः नचाचारेत्यादि । प्रत्यवायाश्रवणस्योभयत्र तौल्यात् तथेत्यर्थः । ननु धर्मस्य ब्रह्मबोधहेतुत्वात् तद्विचारोपयुक्तानां श्रुतिलिङ्गादीनां वेदचोदनार्थवादस्मृत्यादिप्रामाण्यप्रतिपादनानां ब्रह्मविचारोपयुक्तत्वाच्च धर्मविचारानन्तर्यं ब्रह्मविचारस्य नियमेन संभवतीति चेत् तत्राहुः संभवेपीत्यादि । स्फुटार्थमेतत् ।

ननु तर्हि, नित्यानित्यवस्तुविवेकः, ऐहिकामुष्मिकभोगविरागः, शमदमादिसाधनसंपन्मुमुक्षुत्वं चेति शंकराचार्योक्तं साधनचतुष्टयानन्तर्यमाद्रियतामित्याशङ्कायां, भास्कराचार्यैर्यद्यपि शमदमादयोऽन्तःकरणधर्माः पूर्वं न प्रकृताः स्वशब्देन चानिर्दिष्टा इति सूत्रकारस्य न विवक्षिता इत्येव दूषणं दत्तम् । रामानुजाचार्यैश्चैषां पूर्वमीमांसोक्तकर्मफलकरणेतिकर्तव्यताधिकारिविशेषनिश्चयानन्तरभावितदनित्यत्वज्ञानाऽऽत्मनित्यत्वज्ञानाधीनतया शास्त्रद्वयविचारोत्तरभावित्वं दूषणमुक्तम् । तथापि तन्न तथा स्फुटमिति प्रकारान्तरेण दूषणमाहुः नचेत्यादि । तदानन्तर्यं तदा

रश्मिः ।

इत्यादि भाष्यं विवृण्वन्ति स्म ननु पूर्वमिति । तत्रापि तथेत्यर्थ इति पाठतो नियमेपि विपर्ययसंभवादित्यर्थः । तेन तत्रापि तथेति भाष्यमपि विवृतम् । उभयत्रेति पाठे विचारे चेत्यर्थः । ब्रह्मविचारेति । यथानिरपेक्षो रवः श्रुतिः साच 'अथातो ब्रह्मजिज्ञासा' इत्यत्र विग्रहदशायां ब्रह्मण इति शेषषष्ठीश्रुत्या ब्रह्मसंबन्धिनां जिज्ञासार्थत्वमिति विनियोगः । 'आकाशस्तल्लिङ्गात्' इत्यत्र लिङ्गं, 'वाक्यान्वयात्'इत्यत्र वाक्यं, 'प्रकरणाच्च' इत्यत्र प्रकरणं, देशकालौ प्रकरणमिति निबन्धकारिकाविरोधेन, स्थानं द्रष्टव्यं, 'स्वपीति इत्याचक्षते स्वमपीतो भवति'इति अत्र अतिदेशसामान्यरूपात्स्थानात् स्वमित्यस्य स्वमपीतोऽर्थः, न तु स्वापनिमित्तकारणरूपकर्तेत्यर्थः । समाख्या यौगिकश्च शब्दः सापि 'अथातो ब्रह्मजिज्ञासा' इत्यत्र बृहत्त्वात् बृंहणत्वाच्च ब्रह्मेति योगात् यौगिकः शब्दः । स्ववाक्यस्वरूपलक्षणोक्तपदार्थानां ब्रह्मणश्च संनिधिं कल्पयति संनिहितयोः परस्पराकाङ्क्षयोरेकवाक्यत्वं प्रकल्प्य सामर्थ्यं चालोच्य ब्रह्मणा सत्यादिपदानां सामानाधिकरण्यं कुर्यादिति श्रुतिकल्पनेन ब्रह्मयौगिकार्थस्य तत्पदार्थैक्यं बोधयति । स्फुटेति अनन्यलभ्यस्य शब्दार्थत्वात् । अत्र अथशब्दार्थत्वेन वक्तव्यधर्मस्याक्षेपलभ्यत्वादित्येवं स्फुटार्थम् । भाष्ये । तथा च ततोपीत्यादि आक्षेपलभ्यत्वे च तं श्रुतिलिङ्गादिकमानन्तर्यनिरूपकमुपलभ्याप्यधिकाकाङ्क्षा भवेदित्यर्थः । प्रकृते । स्वशब्देन चेति शमादिवाचकशब्देन चेत्यर्थः । पूर्वमीमांसेत्यादि पूर्वमीमांसोक्ताः कर्म च फलं च करणं चेतिकर्तव्यता चाधिकारिविशेषश्चैतेषां निश्चयानन्तरभाविनी यद्

तेषामेवाभावात् । न च यदैव संभवस्तदैव तत् कर्तव्यमिति वाच्यम् । तदसंभवापत्तेः । तथाहि । ब्रह्मणः परमपुरुषार्थत्वे ज्ञाते तज्ज्ञानस्यैव साधनत्वेऽवगते तच्छेषत्वे च यागादीनामवगते तदर्थकर्मकरणे चित्तशुद्धौ सत्यां वैराग्यादि । इदं च वेदान्तविचारव्यतिरेकेण न भवतीत्यन्योन्याश्रयः ।

भाष्यप्रकाशः।

युज्येत 'यदि तत्सत्ता पूर्वं स्यात् । सा त्वतिदुर्लभा । न हि नित्यानित्यवस्तुविवेकमन्तरेणेहामुत्रार्थभोगात् पुरुषो विरज्यते । न वा सांख्यदर्शनात्यन्ताभ्यासतदुदितसाधनाद्यन्तरेण तादृशविवेक उदेत्युदिते वा सर्वः शाम्यति दाम्यति वा । दुर्वासःप्रभृतिष्वपि तदभावस्य स्मरणात् । कथंचित् किंचित् कस्यचित् कदाचित् संभवेऽपि न सर्वसाधनानि तथा । तदेतदुक्तं, **तेषामेवाभावादिति** । तथाच समुदितसाधनचतुष्टयसंपदत्यन्तदुर्लभेति तदानन्तर्यमत्र न शक्यवचनमित्यर्थः । सांख्याद्यभ्यासाभावेऽपि लौकिकदुःखादिना विरज्यमाना दृश्यन्ते । किंचित्कामनयापि शाम्यन्ति दाम्यन्ति चेत्युक्तविवेकरहितवैराग्याद्यानन्तर्यमप्यत्र न युक्तम् । तदपायस्य भूयोदर्शनादित्याशयेन वैराग्यादीनामेव ग्रहणम् । ननु केषांचित् पूर्वं वैराग्याद्यभावेऽपि पश्चात् तानि दृश्यन्त इति तदानन्तर्यादरणे को दोष इत्यत आहुः **न च यदैवेत्यादि** । **तदसंभवापत्तेरिति** वैराग्यादेर्विचारस्य चासंभवापत्तेरित्यर्थः । कथमिदमित्याकाङ्क्षायामेतदेव विभजन्ते **तथाहीत्यादि** । दर्शनान्तराभिमानिनां ज्ञानकर्मसमुच्चयवादात् तत्तदुक्तज्ञानानां च भिन्नविधत्वात् तत्तदभिमतरीत्या साधनीभूतयागाद्यनुष्ठाने विवक्षितविचारोपयोगिचिशुद्ध्यभावात्

रश्मिः ।

आत्मातिरिक्तानित्यत्वज्ञानात्मनित्यत्वज्ञाने तदधीनतयेत्यर्थः । **कथंचिदिति** ज्योतिषपञ्चाङ्गादिप्रकारेण । **कस्यचिदिति** । नित्यानित्यवस्तुविवेकादौ यस्यकस्यचित् । **कदाचिदिति** अस्मदादिर्दृष्टान्तः । **तथेति** सर्वत्वेन प्रकारेण संभवन्तीत्यर्थः । नन्वाशङ्काभाष्ये न च नित्यानित्यवस्तुविवेकवैराग्यशमदमादिरिति वक्तुं युक्तम्, प्रथमत्यागे मानाभावादित्याकाङ्क्षायामभूतपूर्वोक्तविवेकवैराग्यादिरपि नानन्तर्यनिरूपक इति बोधयितुं तथोपन्यास इत्याहुः **सांख्याद्यभ्यासेत्यादि** । **कामनयेति** शमजन्यफलकामनया, दमजन्यफलकामनया च । **भूयो दर्शनादिति** । अस्मदादिर्दृष्टान्तः । **तानीति** वैराग्यादीनीत्यर्थः । **असंभवेति** अन्योन्याश्रयस्य द्विनिष्ठत्वात् द्वयस्यासंभव उक्तविकल्पेन । **इदमिति** पूर्वोक्तम् । **एतदिति** समीपतरवर्तिभाष्यम् । **विभजन्ते** व्याकुर्वते । धर्मविचारस्य ब्रह्मशब्दसूचितस्य भाष्ये विचारात् समुच्चये स्फुरिते तेन सहैवाहुः **दर्शनेति** । **भिन्नविधत्वादिति** । स्मृत्यात्मकं ज्ञानं भक्तिरूपं साधनमिति रामानुजाचार्यमतम् । मध्वमते ज्ञानं भक्त्यात्मकम् । नैयायिकैस्तु 'द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुः तच्चेश्वरनोदनाभिव्यक्ताद्धर्मादेवेत्युच्यत' इति भिन्नविधत्वादित्यर्थः । **साधनीभूतेत्यादि** । अयमर्थः । चित्तशुद्धिकारणता यागादेर्न सामान्यरूपेण, तथा सति विलक्षणचित्तशुद्ध्यनुत्पत्तिप्रसङ्गोपि तु तृणारणिमणिन्यायेन तत्तच्चित्तशुद्धिजनकत्वरूपेणेति तत्तन्मतीयविचारोपयोगिचित्तशुद्ध्युदयात् सिद्धान्तविचारोपयोगिचित्तशुद्ध्यभावादिति । एवमेव विचारचित्तशुद्ध्योरपि कार्यकारणभावः । **विवक्षितेति** । 'यदेकमव्यक्तमनन्त-

निर्धारिते तु वेदान्ते विचारो व्यर्थ एव । न च साक्षात्कारस्तत्फलम् । तस्य शब्दशेषत्वेन तत्कल्पनायां प्रमाणाभावात् । 'दशमस्त्वमसि' इत्यादौ प्रत्यक्ष-

---

भाष्यप्रकाशः ।

ब्रह्मणः परमपुरुषार्थत्वज्ञानार्थं, ज्ञानस्य केवलस्यैव साधनत्वज्ञानं चावश्यकमिति तदर्थं चैकदेशिना वेदान्तविचारः पूर्वं मृग्यः । तथा सत्युक्तरीत्या तत्करणमिति चक्रकान्योन्याश्रय इति तदसंभवापत्तिरित्यर्थः । नन्वध्ययनदशायां गुरुमुखात् साधनान्तराद्वा वेदान्तार्थे निर्धारिते सुखेन तत्संभवान्नान्योन्याश्रय इति शङ्कायां दूषणान्तरमाहुः निर्धारित इत्यादि । विचारो ह्यर्थनिर्धारार्थः अर्थनिर्धारश्च वैराग्यादिप्रयोजकतया यदि पूर्वमभ्युपेतस्तदा फले जाते निःप्रयोजनत्वान्निःसंदिग्धविषयत्वाच्च स व्यर्थ इत्यर्थः । एवकारेण तदर्थकप्रवृत्तिविघातोपि संगृह्यते । नन्वर्थे निर्धारितेऽपि न विचारवैफल्यं, तस्यात्मसाक्षात्कारार्थत्वादित्यत आहुः न चेत्यादि । विचारस्यार्थज्ञानजनकतया शब्दाङ्गत्वेन तदुपकारकत्वस्यैव प्रत्यक्षसिद्धत्वेन तस्यात्मसाक्षात्कारफलकत्वकल्पनायां प्रमाणाभावादित्यर्थः । ननु दशमस्त्वमसीत्यादेः शब्दादपि दशमोऽहमित्याकारकात्मसाक्षात्काररूपं फलं विचारद्वारा दृश्यत इति तथा कल्पनायां दृष्टमेव प्रमाणमस्तीति कथं प्रमाणाभाव इत्याकाङ्क्षायां दृष्टान्तवैषम्यं स्फुटीकुर्वन्ति दशम इत्यादि । अयमर्थः । उक्तवाक्यदृष्टान्तेन विचारद्वारा आत्मसाक्षात्कारः कस्यापाद्यते । किं देहविशिष्टात्मवेदिनो वा देहात्मवेदिनो वा । तादृशस्यापि चक्षुष्मतोऽन्धस्य वा विविक्तात्मवेदिनो वा । तत्र नाद्यः । व्यामुग्धादिषु परेण बोध्यमानस्य दशमत्वस्य बाह्यत्वेन तद्विशिष्टस्य बाह्यस्यैव देहादेस्तथात्वसिद्ध्योक्तरीत्या तस्य ज्ञानस्यात्मविषयकत्वाभावात् । अत एव न द्वितीयः । अन्धस्येतराऽज्ञा-

रश्मिः ।

रूपम्'इति श्रुतेस्तत्तन्मार्गीयज्ञानानामनन्तरूपान्तर्गतत्वे तस्य मार्गाप्रविष्टस्यानन्तरूपान्तररूपान्तराविघटकतया स्वात्मप्रविष्टविवक्षितविचारेत्यादिः । एकदेशिनेति । उक्तार्थमेतत् । चक्रकान्योन्याश्रय इति । वेदान्तविचारेण साक्षात् वैराग्याद्याश्रीयते, वैराग्यादिभिस्तु साक्षात् परंपरयेति चक्रकम् । तौल्ये त्वन्योन्याश्रय इति भावः । भाष्ये तु विशेषो नाभ्युपगत इति बोध्यम् । साधनान्तराद्वेति तपआदिरूपात् व्याकरणादिरूपाद्वा तस्मादित्यर्थः । तस्यात्मसाक्षात्कारार्थत्वादिति । 'तत्त्वमसि'आदिवाक्यस्य ब्रह्मविचारस्य वा 'अहं ब्रह्मास्मि'इत्याकारकसाक्षात्कारफलकत्वादित्यर्थः । इत्यत आहुरिति इतीदमाशङ्क्य प्रतिविधानमाहुरित्यर्थः । आशङ्काभाष्यस्याभास एव विवृतत्वात् तस्येत्यादिप्रतिविधानभाष्यं विवृण्वन्ति विचारस्येत्यादि । शब्दाङ्गत्वेनेति । आकाङ्क्षायोग्यतासंनिधिवत् । 'अविचारिताश्च शब्दा नार्थं प्रत्यायन्ति' इति भाष्यात् । दशमेति । दशम इति वक्तव्ये दशमेति प्रतीकमुभयसाधुतायै । दृष्टमिति साक्षात् कारणत्वेन दृष्टं शब्दरूपम् । तत्र नाद्य इति । चक्षुष्मतो देहविशिष्टात्मवेदिनो देहात्मवेदिनो वापाद्यत इति न वक्तुं शक्यमित्यर्थः । व्यामुग्धादिष्विति । कस्तावदस्मासु दशम इत्येवं तथाभूतेष्वित्यर्थः । बाह्यत्वेनेति चाक्षुषत्वात् तथात्वेनेत्यर्थः । उक्तरीत्येति भाष्योक्तरीत्येत्यर्थः । तर्हि चक्षुष्मतो देहस्य प्रत्यक्षीकरणादस्तु तज्ज्ञानस्यात्माविषयकत्वम्, अन्धेन तु तथा करणात् तज्ज्ञानस्यात्मविषयकत्वं दुर्वारमित्यत आहुः अत एवेति । दशमत्वस्य चाक्षुषत्वेन बाह्यत्वादेवान्धस्य देहविशिष्टात्मवेदिनो देहात्मवेदिनो वापाद्यत इत्यपि न वक्तुं शक्यमित्यर्थः । अन्धस्येत्यादि । नवान्यान् पश्यत एव स्वस्मिन् दशमत्वबुद्धिरिति भावः ।

सामग्र्या बलवत्त्वाद् देहादेः प्रत्यक्षत्वात् स्वदेहमपि पश्यन् दशमोहमिति मन्यते । न तथा प्रकृते । मननिदिध्यासनविधीनामानर्थक्यप्रसङ्गात् ।

भाष्यप्रकाशः ।

नात् । तस्य प्रज्ञाचक्षुष्ट्वेन तया ज्ञायमानस्यापि चाक्षुषकल्पत्वाच्च न तृतीयः । तस्यात्मविस्मृत्यभावेन तत्र शब्दस्याऽकारणत्वात् । न च पूर्वविकल्पोक्तानामात्मनिष्ठमान्तरमेव दशमत्वं शब्दाद् भासत इति वाच्यम् । दशमत्वस्य वक्रपेक्षाबुद्धिजन्यत्वेन तस्यां च बुद्धौ संख्याघटकानां परात्मनां भानाभावेन स्वस्यापि दशमत्वाभानप्रसङ्गात् । अतो नवमत्वादिवद् दशमत्वस्यापि बाह्यत्वमेव । कृशोहमितिवद् दशमोहमितिप्रत्यग्वित्त्यापि देहस्यैव वेद्यत्वाच्च । प्रकृते विचारे तु वेदान्तवाक्यैर्ब्रह्मत्वेनात्मसाक्षात्कारस्य तवाभिप्रेतत्वेन न तथा धर्मधर्मिणोरुभयोरप्यान्तरत्वाच्च दृष्टान्तसाम्यम् । न हि समीपवर्तिभिरिन्द्रियैरग्राह्य आत्मा तद्ग्राह्येण बाह्येन शब्दप्रमाणेन ग्राहयितुं

रश्मिः ।

ननु स्पर्शेनानुमानेन वा नवान्यान् ज्ञास्यतीति, तत्राहुः **तस्येत्यादि** । प्रज्ञा लिङ्गपरामर्शो व्याप्तिज्ञानं वा । **चाक्षुषकल्पत्वाच्चेति** । त्वाचत्वेनानुमितित्वेन च त्वदिष्टाभावादीषदूनचाक्षुषत्वादित्यर्थः । अन्यथान्धस्य पुरोवस्थितो घटोऽस्तीति शब्दात् घटसाक्षात्कारापत्तिः । शब्दस्य कारणत्वे ततः पूर्वमात्मविस्मृतिः स्यादिति शब्दो न कारणमित्याहुः **तस्यात्मेत्यादि** । अभ्युपगमवादेनाशङ्कां निषेधन्ति **न च पूर्वेत्यादि** । चक्षुष्मतो देहविशिष्टात्मवेदिनोऽन्धस्य तथावेदिनो विविक्तात्मवेदिनश्चेत्यर्थः । **भानाभावेनेति** । परमनोव्यावृत्तमनस एवात्मप्रत्यक्षजनकत्वोपगमात् तथेत्यर्थः । **देहस्यैवेति** । ननु नापेक्षाबुद्धेः सजातीयविषयत्वनियम इति चेत्, तत्राहुः **कृशोऽहमित्यादि** । अन्यथात्मनो दशमत्वकृशत्वाद्यापत्तिरिति भावः । तेन दशमादेरहमो विशेषणत्वादस्मच्छब्दवाच्यात्मन एव दशमत्वमित्यपि निरस्तम् । **न तथा प्रकृत** इति भाष्यं विवृण्वन्ति **प्रकृत** इत्यादि । विषयत्वेन प्रकृते वेदान्तीये 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति श्रुतावतिप्रविष्टे च विचारे वाक्यैः'आत्मा वा अरे' इति 'दशमस्त्वमसि'इत्यादिभिरित्यर्थः । **न तथेति** भाष्यानुवादं वर्णयन्ति **धर्मधर्मिणोरिति** ब्रह्मत्वात्मनोरित्यर्थः । **तद्ग्राह्येणेति** श्रोत्रग्राह्येणेत्यर्थः । अत्र **भाष्ये** । **प्रत्यक्षसामग्र्या** इति । अयमर्थः । अत्र दशमोऽहमिति प्रतीतौ शब्दसामग्र्याः प्रत्यक्षसामग्र्याश्च सत्त्वेपि शब्दसामग्र्यैव प्रत्यक्षं किं न स्यात् । शब्दात् प्रत्येमीत्यनुव्यवसायात् न भविष्यति । घटं पश्यन् घटशब्दं शृण्वन् घटं पश्यामीत्यनुव्यवसायं प्राप्नोतीति सार्वजनीनम् । तथा च प्रत्यक्षसामग्री शब्दसामग्रीः प्रतिबध्नातीति मन्तव्यम् । यथा समाने विषये एकदा लौकिकप्रत्यक्षसामग्रीसत्त्वेऽनुमितिसामग्रीसत्त्वे लौकिकप्रत्यक्षमेवोत्पद्यते । तदनन्तरं साक्षात्करोमीत्यनुव्यवसायात् । अतः समानविषयेऽनुमितिं प्रति लौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकता । समानविषयत्वं च पर्वतोद्देश्यकसंयोगसंसर्गकवह्निविधेयकानुमितिं प्रति पर्वतोद्देश्यकसंयोगसंसर्गकवह्निप्रकारकलौकिकप्रत्यक्षसामग्रीत्वेन प्रतिबन्धकत्वम् । स्फुटमेतत् सामग्रीवादे । तथा च दशमः क इति संदिहानेषु दशमोऽहमिति पश्यत्सु दशमत्वानवच्छिन्नदेहमात्रं पश्यत्सु दशमस्त्वमसीति शब्दसामग्री प्रतिबध्यते । एवं च शब्दसामग्रीत्वेन समानविषयकप्रत्यक्षसामग्रीत्वेन प्रतिबध्यप्रतिबन्धकभावात् प्रत्यक्षसामग्र्या बलवत्त्वादिति । शब्दात् प्रत्येमीत्यध्यवसायस्तु भ्रमः । व्यामुग्धेषु दशमस्त्वमित्यस्य शब्दस्य दशमत्वसंदेहवारकत्वेन दशमत्वांशेपि चाक्षुषसं-

नचाधिकारिभेदः कल्पनीयः। शब्दज्ञाने तत्कल्पनायां प्रमाणाभावात्।

भाष्यप्रकाशः।

शक्यते। अथ दर्शनाव्यवधानेन श्रवणस्य विधानाच्छक्यत इत्युच्यते तदा मनननिदिध्यासनविधिवैयर्थ्यम्। तथाच दृष्टान्तवैषम्यान्मनननिदिध्यासनविधिविरोधाच्चात्मसाक्षात्कारस्य न श्रवणफलत्वं विचारफलत्वं वा वक्तुं शक्यमित्यर्थः। ननु मुख्याधिकारिणः शब्दादपरोक्षं भवति, न तु मन्दादेरिति तादृशेषु मननाद्युपयोगाच्च तद्विध्यानर्थक्यमिति चेत्तत्राहुः न चेत्यादि। शब्दजन्ये ज्ञानेऽधिकारिभेदस्तदा कल्प्यो यदि स विधिवैयर्थ्यं समादध्यात्। न तु तथा। मन्दस्य पदशक्त्यादिज्ञानशून्यतया मननाद्यसामर्थ्येन, मध्यमस्य च विदितपदपदार्थसंसर्गतयाऽऽकाङ्क्षादिबलेन दशमादिवदपरोक्षभवनसौकर्ये मननाद्यनुपयोगेन ताभ्यां तदसमाधानात्। तत्कल्पनायां श्रुतार्थापत्तिरूपप्रमाणाभावादित्यर्थः। ननु विदितपदपदार्थसंसर्गस्यापि वाक्यतात्पर्याज्ञाने दशमादि-

रश्मिः।

श्रयात्। ननु 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुत्यनुकूलं शाब्दापरोक्षमित्येवमाशङ्कामुखेन मननेत्यादिभाष्यमवतारयन्ति अथ दर्शनेत्यादि। शक्यत इति शब्दादपरोक्षं शक्यते। आशङ्काप्रतिविधानभाष्यं विवृण्वन्ति नन्वित्यादि। तादृशेष्विति भिन्नाधिकारिष्वित्यर्थः। न चेत्यादीति। न चाधिकारिभेदः कल्पनीय इत्यादिर्यस्येत्यतद्गुणसंविज्ञानो बहुव्रीहिः। समाधानभाष्यं व्याकुर्वन्ति शब्दजन्य इत्यादि। ननु तथेति। अधिकारिभेदो विधिवैयर्थ्यं तु न समादधातीत्यर्थः। ताभ्यामिति मन्दमध्यमाभ्याम्। मननादिविध्यानर्थक्यासमाधानादित्यर्थः। श्रुतार्थापत्तिरूपेति। प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरमन्तरेणानुपपद्यमानस्योपपत्तयेऽर्थान्तरकल्पनमर्थापत्तिः। सा च प्रमाणान्तरमिति मीमांसकाः। लाघवादनुमानमिति नैयायिकाः। अर्थान्तरकल्पनया समाधेयत्वेनोच्यमानस्य प्रमाणसिद्धस्यार्थस्य मिथः[1] प्रतिघातरूपान्यथानुपपत्तिस्तत्र कारणम्। तात्पर्यवृत्तावन्तर्भाव इति मम प्रतिभाति। जीवन्देवदत्तो गृहे नास्तीत्यस्य बहिःसत्त्वप्रतीतीच्छयोच्चारितत्वाद् गृहाधिकरणको जीवनविशिष्टबहिःस्थितदेवदत्तप्रतियोगिको भाव इति सुखेन बोधात्। अथवा। गृहाधिकरणकजीवनविशिष्टबहिःस्थितदेवदत्तनिष्ठा सत्ता तत्प्रतियोगिको भावस्तन्निष्ठा सेति बोधः। एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रादृष्टार्थानुपपत्तावपि पीन इत्यस्य नक्तं भोजनानुषञ्जकपीनत्वे तात्पर्यात् न दोष इति। तस्मादन्यथानुपपत्तावर्थापत्त्यां निवृत्तायां प्रमितयोः संसृष्टबुद्धिः प्रमेयप्रमारूपा भवतीति ज्ञेयम्।

तथा च 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यत्र प्रमाणसिद्धस्य आत्मा वा अरे द्रष्टव्यः श्रोतव्यः इति अंशस्यार्थान्तरकल्पनया समाधेयत्वेन उच्यमानस्य मन्तव्यो निदिध्यासितव्य इत्यस्यांशस्य च मिथः शेषशेषिभावे[2] प्रतिघातः, श्रवणेनैवात्मदर्शनात्[3]। इत्यमन्यथाऽनुपपत्तावर्थापत्तिकारणभूतायां प्राप्तायामत्र मन्तव्यो निदिध्यासितव्य इतिशब्देन प्रमितस्य मनननिदिध्यासनरूपस्यार्थस्य भिन्नाधिकारिरूपार्थान्तरमन्तरेणानुपपद्यमानस्योपपत्तये भिन्नाधिकारि-

---

[1] जीवनसंसृष्टत्वगृहाधिकरणकाभावयोर्मिथः प्रतिघातः। [2] दर्शनस्य न श्रवणशेषित्वं शाब्दाऽपरोक्षाप्तेः, किंतु प्रेमशेषित्वं प्रेम्णा दर्शनमिति। [3] मननस्य मीमांसारूपस्य न निदिध्यासनशेषित्वं किंतु अन्यथाभावनाविपरीतभावनानिवर्तकत्वात् तच्छेषित्वम्।

अत्यन्तासत्यप्यर्थे शब्दस्य ज्ञानजननात् प्रमाणसंकरापत्तिश्च ।

भाष्यप्रकाशः ।

वाक्यादप्यपरोक्षादर्शनान्मननादिना तज्ज्ञाने च तद्दर्शनात् तात्पर्यज्ञानशून्येनाधिकारिणा तत्समाधातुं शक्यत एवेति कथं प्रमाणाभाव इत्यत आहुः अत्यन्तेत्यादि । शब्दस्येति षष्ठ्या करणत्वं बोध्यते । तथाच खपुष्पं सुरभीत्युक्तेऽत्यन्तासतोऽपि ज्ञानं जायते । एवं गुर्वादिनोक्तवेदान्तवाक्ये अगोचरस्याप्यात्मनस्त्वदभिमतं ज्ञानं भविष्यतीत्युक्तविधिवैयर्थ्यं दुर्वारमतः प्रमाणाभाव इत्यर्थः । ननु विधिबलादेव ज्ञायते सर्वेषां न भवतीत्यतो न तदभाव इत्यत आहुः प्रमाणेत्यादि । संकरो मर्यादाभङ्गेन जायमानं कार्यम् । यथा वर्णसंकर इति । तथाच तत्र यथा न वर्णत्वमेवमत्रापि दशमस्त्वमसीतिवाक्यस्य युष्मत्पदस्मारितपदार्थोल्लङ्घनेनासत्पदार्थविषयकज्ञानजनने तस्य ज्ञानस्य प्रमाणत्वं न स्यादिति तादृशज्ञानोपपादनप्रयासवैफल्यम् । किंचैवं भग्नायां प्रमाणमर्यादायां तं

रश्मिः ।

कल्पनम् । तेन दर्शनमननादिरूपयोः प्रमितयोः शेषशेषिभावेन संसृष्टबुद्धिरिति समन्वयः । सेयमधिकारिणि मननादिविध्यानर्थक्यस्य परिहर्त्र्येव भवति तादृशस्य तु प्रकृतेऽलाभाच्छ्रुतार्थापत्तिरूपप्रमाणाभावादित्यर्थः । तज्ज्ञान इति तात्पर्यज्ञाने चापरोक्षदर्शनादित्यर्थः । तदिति विध्यानर्थक्यमित्यर्थः । शब्दस्य ज्ञानजननादिति पाठं मत्वा आहुः षष्ठ्येत्यादि । फलानां तृप्त इति दृष्टान्तः । ज्ञानं जायत इति । अत्रैवं ज्ञेयम् । वाक्यं च सिद्धार्थं साध्यार्थं च, यद्यपि सर्वमेव वाक्यं सिद्धार्थं भवति । भावित्वभूतत्वयोर्धर्मत्वेन निराश्रयत्वासंभवाद्वर्तमानकाले भाविभूतयोर्वस्तुनोः सत्ता स्वीकार्येति । न च कालस्तदाश्रयो भवतीति शङ्क्यम् । भावी कालो भूतः कालः इति प्रतीत्यापत्तेरित्यादिकं स्थितं विद्वन्मण्डने । तथापि कारणकलापनिष्पाद्यव्यवहारनिबन्धनोयं साध्यत्वव्यवहार इति । वाक्ये द्वैविध्यम् । तत्र सिद्धार्थस्य वाक्यस्य संनिकृष्टे विषये प्रत्यक्षसहकारित्वात् प्रत्यक्षहेतुत्वमेव । विप्रकृष्टविषये तु तदानींतनार्थसत्तायाः संदिग्धत्वेन संभावनात्मकस्यैव ज्ञानस्य शब्दत्वेन संदिग्धमेव प्रामाण्यम् । बालादिवाक्येपि तथा । प्रतारकवाक्ये तु श्रोतुर्विश्वासजाड्यं प्रामाण्यबुद्ध्युत्पादकं न तु शब्दः । वक्तुरनाप्तत्वेन तत्र शब्दत्वविरहात् । भ्रान्तः सन् प्रतारको यद्वाक्यं प्रयुङ्क्ते तत्र तथा । प्रवृत्तिसामर्थ्ये तु वक्तृप्रतारकत्वबुद्ध्यभावहेतुका प्रामाण्यधीः प्रमेयबलेन श्रोतुर्जायत इति विश्वासजाड्यकृतत्वं तत्रेति । तस्य प्रतारकत्वज्ञानानन्तरं तु या प्रवृत्तिः सापि न शब्दकालाभ्यां किंतु अननुगतादेव कारणविशेषादिति न सापि प्रामाण्यावेदिका । भ्रान्तवाक्यस्य तु शब्दत्वेऽपि न तज्जन्यं ज्ञानं प्रमाणं, वक्तृदोषात् । अतः सिद्धार्थानि वाक्यानि गौणमेव प्रामाण्यं बिभ्रति । साध्यार्थे तु वाक्यार्थो बुद्धिपरिकल्पितः । संसर्गिण्याः क्रियायास्तदानीमभावेन तत्संसर्गस्याप्यभावात् । तस्माद्वक्तुर्दृष्टार्थवादित्वाभावेन तद्वाक्यस्याप्रामाण्यं यद्यपि तथापि प्रवृत्तिसामर्थ्यात् प्रमेयबलेनैव प्रामाण्यमिति । अत एव 'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि' इति अभियुक्तोक्तिः । प्रमाणत्वं न स्यादिति । शाब्दबोधे पदजन्यपदार्थोपस्थितेः तन्त्रत्वादितिभावः । न च तत्र विपरीतलक्षणयैवोपस्थितिरिति वाच्यम् । यथा

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे ! सुखितमास्स्व ततः शरदां शतम्' ॥

मनसा तज्जननेऽपि तथा । तस्मात् प्रथमं शाब्दमेव ज्ञानमिति मन्तव्यम्, अनुभवसिद्धत्वात् । इदानीन्तनानामपि शमादिरहितानां निर्विचिकित्सितवेदार्थज्ञानोपलब्धेः । संन्यासानुपपत्तिश्च ।

भाष्यप्रकाशः ।

घटमानयेत्यत्रापि वाक्यार्थज्ञानं प्रत्यक्षं स्यात् । आत्मन इव घटस्यापि पूर्वमनुभूतत्वात् । चीत्कारेण गजानुमितिरपि न स्यात् । यद्वा, प्रमाणे ज्ञानेऽनुव्यवसीयमानयोः प्रत्यक्षत्वपरोक्षत्वयोर्जातित्वबाधकसंकरापत्तिः स्यात् । नचेष्टापत्तिः । व्यवहारे भट्टनयमुपगच्छतस्तथा वक्तुमयुक्तत्वात् । भारत आजगरेऽपि,

'जातिरत्र महासर्प मनुष्यत्वे महामते ।
संकरात् सर्ववर्णानां दुष्परीक्ष्येति मे मतिः' ॥ इति ।

युधिष्ठिरेण ब्राह्मणत्वजातिबाधकतया संकरस्योपगतत्वाच्च । अतोनेकदूषणग्रासादधिकारिभेदशब्दापरोक्षयोः कल्पनमेवायुक्तमित्यर्थः । ननु मास्तु शब्दादपरोक्षं, तथाऽपि दशमस्त्वमितिवाक्यसहकृतचक्षुषा दशमोऽहमितिवन्मनसैवानुद्रष्टव्य इति श्रुतेस्तत्त्वमस्यादिवाक्यसहकृतमनसैव विविक्तात्मसाक्षात्कारो भावीत्यधिकारिभेदो नायुक्त इति चेत्तत्राहुः मनसेत्यादि । वाक्यसहकृतमनसा यदि सर्वेषां साक्षात्कारस्तदा मननादिविधिवैयर्थ्यम् । यदि कस्यचिद् तदा यस्य न साक्षात्कारस्तस्य वेदान्तार्थनिर्धार एव विचारफलत्वेन वाच्यस्तथा सत्युक्तरीत्या वैराग्यादिसंपादकत्वेन तस्य प्रागेवापेक्षितत्वात् पूर्वोक्तान्योन्याश्रयादिदोषतादवस्थ्यमित्यर्थः । सिद्धमाहुः तस्मादित्यादि । मन्तव्यमिति सर्वेषां भवतीति मन्तव्यम् । अनुभवसिद्धत्वं विशदयन्ति इदानीमित्यादि । तथाच पूर्वोक्तं दूषणं दुरुद्धरमित्यर्थः । उक्तदार्ढ्याय दूषणान्तरमाहुः संयासेत्यादि । 'गृहाद्वा प्रव्रजेद् वनाद्वा प्रव्रजेद्' इतिश्रुतौ तत्तदाश्रमानन्तर्यकथनाद् दृढं वैराग्यं

रश्मिः ।

इत्यपकारिणं प्रति विपरीतलक्षणयोक्तिः । अपकारिणि उपकारित्वरूपेण मुख्यार्थे बाधिते सति विरोधरूपसंबन्धेन अपकारित्वलक्षणादिति वाच्यम् । तथा सति पारोक्ष्यापत्त्या प्रतिज्ञाव्याहतेः । वाक्यार्थज्ञानमिति वाक्यार्थस्य घटानयनस्य ज्ञानं प्रत्यक्षात्मकं स्यादित्यर्थः । पुरोवर्तिवाक्यार्थस्य ज्ञानं निशामनं भवतीति परोक्षवाचितत्पदेन घटो विशेत इति ज्ञेयम् । गजानुमितिरिति । शब्दापरोक्षप्रतिज्ञा गजवान् देश इत्यनुमितिरित्यर्थः । किंतु गजप्रत्यक्षं स्यादिति भावः । परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः संकरः इति नैयाकिकोक्तं लक्षणमनुसृत्याहुर्यद्वा इति । प्रमीयत इति प्रमाणमिति । भावव्युत्पत्तिमत्त्वमाहुः प्रमाणे ज्ञान इति अहं ब्रह्मास्मीति ज्ञाने इत्यर्थः । अनुव्यवसीयेति ब्रह्म अहं जानामीति अनुव्यवसीयमानयोरित्यर्थः । अत्र ज्ञानानुकूलो व्यापार इत्यत्र ज्ञानस्य शाब्दत्वप्रत्यक्षत्वाभ्यां बोधः, न ज्ञानत्वेन प्रकारेण अन्वेषमाणे ज्ञानत्वस्य तत्रैव पर्यवसानात् । अयुक्तत्वादिति आकृत्यधिकरणविरोधेन तथात्वादित्यर्थः । यद्वा न भावव्युत्पत्तिः । करणव्युत्पत्तिरेव । तथा च व्यवसायज्ञानस्यानुव्यवसायकारणत्वात् प्रमीयतेऽनेन व्यवसायेन तत् प्रमाणं ज्ञानं ब्रह्म इत्याकारकं तस्मिन् सति अनुव्यवसीयमानयोरनुव्यवसायप्रत्यक्षत्वपरोक्षत्वप्रकारकज्ञानं विषयतासंबन्धेन तस्य कर्त्रोः । अत्र धात्वर्थफलमात्रं कृतिमत्त्वं कर्तृत्वं फलानुकूलव्यापारश्चानेकधा । भाष्ये इदानीमिति । 'अलौकिको हि वेदार्थः' इति श्रुत्युक्तसाधनवतामिति विशेषणीयम् । निर्विचिकित्सेत्यादि । विचिकित्सा तु संशयः । प्रकृते । पूर्वोक्तमिति अनुभवविरोधरूपमित्यर्थः । तत्तदाश्रमानन्तर्येति ।

किंच। अध्याहारश्च कर्तव्यः। स च कर्तव्यादिपदानाम्। यदि तत् स्वार्थं, व्यर्थमेव वाक्यं स्यात्। परार्थत्वे त्वशक्यं, न हि तैर्विचारः कर्तुं शक्यते। स्वकृतिवैयर्थ्यं च। असंगतिश्चास्य सूत्रस्य भवेत्।

किंचाधिकारपक्षे पुरुषार्थः सिद्ध्यति, नानन्तर्यपक्षे उक्तन्यायात्।

किंच, तादृशस्याधिकारिणः श्रवणमात्रेण कृतार्थस्य समाधिनिरतस्य प्रवचनासंभवाच्छास्त्रोच्छेदः शास्त्रविरोधश्च। साधनानामग्रे स्वयमेव वक्तव्यत्वात्। अतोऽनेकदोषदुष्टत्वादधिकारार्थ एव श्रेयान्।

भाष्यप्रकाशः।

संन्यासाङ्गमिति ज्ञायते।श्रुत्यन्तरे च ‘वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः’ इति वेदान्तार्थनिश्चयोत्तरं संन्यासस्योक्तत्वात् तदङ्गभूतवैराग्यस्य वेदान्तार्थनिश्चयोत्तरत्वमेवायाति। ततः पूर्वभावित्वं च विचारस्येति तत्तदभावे दृढवैराग्याभावात् संन्यासानुपपत्तिः। तथाचानन्तर्यपक्षे तन्निरूपकस्य वक्तुमशक्यत्वात् किमनन्तरमित्याकाङ्क्षायाः कथमपि न पूरणमित्यर्थः।

द्वितीयं दूषणं विवृण्वन्ति किंचेत्यादि। तदिति विचारकरणम्। तथाच स्वयमेव मनसि विचार्यमिति स्वार्थत्वे शास्त्रानर्थक्यमित्यर्थः। अशक्यमिति अशक्योपदेशरूपम्। तथाच फलाऽभावाद् वैयर्थ्यमित्यर्थः। असंगतिरिति परैः कर्तव्यमितिप्रतिज्ञाया अग्रिमसूत्रीयस्वयंकृतिविरुद्धत्वादसंगतिरित्यर्थः।

तृतीयं विवृण्वन्ति किंचाधिकारेत्यादि। उक्तन्यायादिति तदसंभवापत्तेरित्यनेनोक्तान्यायात्। विचारव्यतिरेकेण ब्रह्मणः परमपुरुषार्थत्वज्ञानाद्यभावात् तदभावे चित्तशुद्ध्याद्यभावेन विचाराभावात् तथेत्यर्थः।

चतुर्थं विवृण्वन्ति किंच, तादृशस्येत्यादि। तादृशस्येति साधनचतुष्टयसंपन्नस्य। साधनानामिति वैराग्यादिसाधनानाम्। अग्रे इति, तृतीयाध्याये। तथाचानन्तर्यनिरूपकतया पूर्वसिद्धानां पुनः कथनानर्हत्वात्, कथनेन च पूर्वं तदभावनिश्चयात् सिद्धत्वाङ्गीकारे व्याख्येयशास्त्रविरोध इत्यर्थः। एतेन यन्माध्वैर्जातिकृतं गुणकृतं च ब्रह्मविद्यायामधिकारत्रैविध्यमङ्गीकृत्य तदानन्तर्यमथशब्दार्थो, न त्वध्ययनमात्रानन्तर्यमिति साधनाध्यायानुसारेणाङ्गीक्रियते, तदपि

रश्मिः।

‘ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत्’ इति आश्रमक्रमेण संन्यासः। गृहाद्वेति श्रुतौ तु अनियततत्तदाश्रमानन्तर्यकथनेनाश्रमा न संन्यासाङ्गानि अपि तु आश्रमानियमात् ‘यदहरेव विरजेत् तदहरेव प्रव्रजेत्’ इति श्रुत्यन्तराच्च दृढवैराग्यमित्यर्थः। तदङ्गभूतेति। हेतुगर्भं विशेषणमिदं तेन संन्यासाङ्गभूतत्वादित्यर्थः। एवायातीति। यथा भुक्त्वा पयः पिबतीत्यत्र पयःपानोपयोगिपात्रमपि भोजनोत्तरमेवायाति तद्वदित्यर्थः। तत इति वैराग्यादित्यर्थः। तत्तदभावे इति विचारवेदान्तविज्ञानाद्यभाव इत्यर्थः। द्वितीयमिति। अध्याहारश्चेति भाष्योक्तमित्यर्थः। अशक्येत्यादि। वैराग्याद्यनन्तरं साक्षात्काराभिनिष्पत्तये ब्रह्मजिज्ञासा कर्तव्येति तथाविधित्वं न स्यादिति भावः। तथा च सांख्यप्रवचनसूत्रं ‘नाशक्योपदेशविधिरुपदिष्टेऽप्यनुपदेशः’ इति। न च मात्र मूढविधिरिति वाच्यम्। स्वाध्यायोध्येतव्य इत्यत्र भाट्टैरङ्गीकारेण तथाप्यावश्यकत्वात्। तृतीयमिति। पुरुषार्थश्च सिध्येदिति भाष्योक्तमित्यर्थः। न्यायादिति अन्योन्याश्रयादित्यर्थः। तमेवाहुर्विचारेत्यादि। चित्तशुद्ध्यादीति। आदि-

न च ज्ञातुमिच्छा जिज्ञासा नाधिकर्तुं शक्येति वाच्यम् । जिज्ञासापदस्य विचारार्थत्वात् ।

भाष्यप्रकाशः ।

प्रत्युक्तम्, विचारब्रह्मविद्ययोरैक्याभावात् । अतो न तदुपन्यस्तश्रुतिस्मृतीनामपि विरोधः ।

एवमथशब्दार्थं निर्णीय जिज्ञासाशब्दार्थं निश्चेतुमधिकारार्थविरुद्धं मतान्तरीयं तदर्थमनूद्य परिहरन्ति न चेत्यादि । ज्ञातुमिच्छा जिज्ञासेति 'धातोः कर्मणः' इति धातुवाच्यस्यार्थस्येप्सितत्वस्मरणाज्ज्ञानप्रधानेयमिच्छा प्रस्तोतुमशक्येत्यर्थः । विचारार्थत्वादिति जिज्ञासितं सुसंपन्नमपि ते महदद्भुतम्' इति, 'जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनम्' इति, 'अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत्' इति, 'जिज्ञासायां संप्रवृत्तो नाद्रियेत् कर्मचोदनाम्' इत्यादिषु जिज्ञासितजिज्ञासापदयोरिष्टेच्छावाचकत्वे वाक्यार्थेऽनन्वयेन तत्र विचारार्थकत्वनिश्चयेन तथात्वात् । तथाचैवंविधाप्तवाक्य-

रश्मिः ।

पदेन वैराग्यशमदमादिः । चतुर्थमिति । उच्छेदश्च न भवेदिति भाष्योक्तमित्यर्थः । सिद्धस्येत्यादि । आनन्तर्यनिरूपकत्वाङ्गीकारे साधनाध्यायविरोध इत्यर्थः । जातिकृतमित्यादि । ब्राह्मण्यादिजातित्रयकृतं सेवा(वैराग्या)दिगुणत्रयकृतं चेत्यर्थः । अधिकारश्चोक्तो भागवततन्त्रे ।

'मन्दमध्योत्तमत्वेन त्रिविधास्त्वधिकारिणः ।
तत्र मन्दा मनुष्येषु य उत्तमगुणा मताः ॥
मध्यमा ऋषिगन्धर्वा देवास्तत्रोत्तमा मताः ।
इति जातिकृतो भेदस्तथान्यो गुणपूर्वकः ॥
भक्तिमान्परमे विष्णौ यस्त्वध्ययनवान्नरः ।
अधमः शमादिसंयुक्तो मध्यमः स उदाहृतः ॥
आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम् ।
विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः ॥
स उत्तमोऽधिकारी स्यात् संन्यस्ताखिलकर्मवान् ॥

इति स्मृतयो माध्वभाष्ये । ऐक्याभावादिति । हेतुहेतुमद्भावेन तथात्वादित्यर्थः । तदुपन्यस्तेति । 'शान्तो दान्त उपरतः' इति 'परीक्ष्य लोकान् कर्मचितान्' इति 'नास्त्यकृतः कृतेन' इति 'यमेव' इति 'यस्य देवे' इति श्रुतयः । स्मृतयस्तूक्ताः । विरोध इति । ब्रह्मविद्यापरत्वादिति भावः, भागवततन्त्रे विचाराभावात् । मतान्तरीयमिति । शंकराचार्यादिमतीयजिज्ञासापदार्थमनूद्य इत्यर्थः । अथशब्द आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति । ज्ञातुमिच्छा जिज्ञासा इति च तद्भाष्यम् । अत्र भाष्याशयवर्णकः । जिज्ञासापदं ज्ञानेच्छां वक्ति विचारं लक्षयति वा । नाद्यः । अथशब्दस्यारम्भार्थत्वे ब्रह्मज्ञानेच्छाया अनारम्भ्यत्वात्सूत्रार्थासंगतिः । प्रत्यधिकरणविचारकरणेनेच्छाकरणाभावादिति । नापरः । कर्तव्यपदाध्याहारं विना अन्वयानुपपत्त्यभावेन विचारलक्षकत्वायोगात् । तदध्याहारे तु अथशब्दवैयर्थ्यम् । तेनैवारम्भोक्तेरिति भाष्याशय इति एतदुभयमालोच्याहुः धातोः कर्मण इति । 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सूत्रम् । 'इषिकर्मणः इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम्' इति वृत्तिः । असंदेहाय पुष्कलवाक्यान्याहुः जिज्ञासितमित्यादि । वाक्यार्थे इत्यादि । नारदकृतव्यासाभिनन्दनरूपे भारतादिकरणरूपस्वाभाविकधर्मेपि विशेष-

अत एव जिज्ञासितुमिच्छेदिति पुराविदां वचनानि। जिज्ञासापदेन चैतज्ज्ञापयति ब्रह्मज्ञानं पुरुषार्थसाधनत्वादिष्टम्। तदिच्छापूरणाय विचार आरभ्यत इति। यस्मात् कर्मादिभ्यो ज्ञानमेव पुरुषार्थसाधनमित्यतस्तज्ज्ञानाय विचारोऽधिक्रियत इति

भाष्यप्रकाशः।

ग्राहितां रूढिमनादृत्य वृथा यौगिकादरणमप्रयोजकमित्यर्थः। अत्र शाबरभाष्यसंमतिमाहुः अत एवेत्यादि। ननु विचारे प्रारम्भणीये, अथातो ब्रह्मविचार इत्येव कुतो नोक्तमित्याशङ्कायामाहुः जिज्ञासापदेनेत्यादि। भृगुप्रपाठके, 'अधीहि भगवो ब्रह्म' इतिश्रुतेर्ब्रह्मज्ञानेच्छयोपसन्नाय भृगवे, 'यतो वा इमानि' इति ब्रह्मलक्षणकथनपूर्वकं तद्विजिज्ञासस्वेतिपदेन तदिच्छापूरणाय विचारोपदेशादिहापि तथैव विचार आरभ्यत इति ज्ञापयतीत्यर्थः। नचात्र तपोऽनुपदेशाच्छ्रुतिविरोधः शङ्क्यः। तपस इदानीमसाधनतायाः प्रागुपपादितत्वात्। नच विचारस्याश्रौतत्वं शङ्क्यम्। लक्षणवत्तदुपयोगस्य प्रागुपपादितत्वात्। नच मन्तव्यादिप्रत्ययविधिमूलकत्वं परित्यज्य किमिति ज्ञानविध्याक्षिप्तमङ्गीक्रियत इति वाच्यम्। तथा सति तत्रात्मादिपदात् तावन्मात्रत्वेनैव विचार्यत्वापत्त्याऽग्रिमसूत्राणां विरोधाद्यापत्तेः। तस्मादेतावदेवात्रार्थत्वेन ग्राह्यमित्येव युक्तम्। एवं जिज्ञासाशब्दार्थं निश्चित्य सिद्धान्तरीत्या सिद्धं वाक्यार्थं वदन्तोऽतःशब्दार्थमाहुः यस्मादित्यादि। अत्र केचन, क्षेमः सुभिक्षोऽयं देशोऽतोहमस्मिन् वसामीत्यादौ स्वोक्तस्य गम्यमानस्य वा वृत्तस्य हेतुभावे अतःशब्दप्रयोगदर्शनात् प्रकृते च कर्मज्ञानं पूर्वं वृत्तमिति तस्य हेतुत्वमतःशब्दोऽत्रोपदिशतीत्याहुः। अन्ये तु बृहदारण्यकीयसप्तान्नब्राह्मणस्थायाम्, 'अथाऽतो व्रतमीमांसा' इत्यादिश्रुतौ,

'अथाऽतो गोभिलोक्तानामन्येषां चैव कर्मणाम्।
अस्पष्टानां विधिं सम्यग् दर्शयिष्ये प्रदीपवत्' ॥ इति।

कात्ययनादिस्मृतौ चातःशब्दस्य पूर्वावधौ प्रयोगदर्शनादत्राप्यतःशब्देन पूर्वावधिरेवोच्यते।

रश्मिः।

रूपे च इत्येवमादौ वाक्यार्थे इष्टेच्छाया अभिनन्दनाय साधकतयाऽनन्वयेनेत्यर्थः। यौगिकादरणमिति। ज्ञातुमिच्छा जिज्ञासा इत्यत्र आकृतेरजहल्लक्षणया फलभूतज्ञानलक्षकत्वम्। प्रत्ययस्य इच्छासाध्यविचारलक्षकत्वं कर्तव्यपदान्वयानुरोधादिति शांकराचारटनमित्यर्थः। एवंविध आप्तवादादन्यत्रापि प्रयोगो दृश्यते इत्याहुरत्र शाबरेति। तदिच्छापूरणायेति ब्रह्मज्ञानविषयिण्या इच्छायाः पूरणायेत्यर्थः। शाब्दं चैतज्ज्ञानमिति वेदितव्यम्। लक्षणवदिति प्रातिशाख्यसूत्रवदित्यर्थः। तथासति तत्रेति। 'आत्मा वा अरे' इत्युपक्रम्य श्रोतव्यमन्तव्यादिविधावित्यर्थः। अग्रिमसूत्राणामिति ब्रह्मविचारकाणामग्रिमसूत्राणां विरोधादनुपयोगापत्तेरित्यर्थः। एतावदेवेति ब्रह्मविचारमात्रमित्यर्थः। अत्र केचनेति रामानुजशंकराचार्यादय इत्यर्थः। अत इति तादृशदेशत्वादित्यर्थः। स्वोक्तस्येत्यादि। क्षेमदेशसंबन्धिनः सुभिक्षदेशसंबन्धिनश्च सुखिनो वयं जाता भविष्याम इत्यादिवत्सुभिक्षदेशस्येत्यर्थः। कर्मज्ञानमिति उपलक्षणं चैतत्। अथशब्दार्थस्तु साधनचतुष्टयसंपदः। पूर्वावधाविति। अथोपासनोक्त्यनन्तरं यतो जिज्ञासाया सत्यमत एषां कर्मादीनां मध्ये कस्य कर्म व्रतत्वेन धारयितव्यमिति मीमांसा प्रवर्तत इत्यर्थावगमादित्यर्थः।

अतःशब्दार्थः ।

भाष्यप्रकाशः ।

तथाच, अतः—अस्मात्सूत्रादारभ्येत्यर्थमाहुः । तत्र पूर्वस्मिन् मते देशदृष्टान्ताद्धर्मज्ञानस्य न तेन रूपेण हेतुत्वं, किंतु वृत्तत्वेन वाच्यम्, तच्चानन्तर्यपक्षदूषणादेवापास्तम् । धर्मज्ञानत्वेन हेतुत्वं तु प्रत्यक्षबाधितम् । द्वितीये तु, स्मृतौ कर्मणामस्पष्टत्वेन विशेषितत्वात् तदेवातःशब्देन गोचरीक्रियते, न तु पूर्वावधिरनुक्तसिद्धत्वात् । एवं श्रुतावपि पूर्वं, त एते सर्व एव समाः सर्वेऽनन्ता इत्यनेन प्राणानां वाङ्मनःप्राणानां साम्यबोधनादुपासकेन कस्य कर्म व्रतत्वेन धार्यमित्यपेक्षायां यस्य व्रतमुत्कृष्टं तन्निश्रायनार्थं व्रतमीमांसायाः प्रवर्तितत्वेन तदुत्कर्षज्ञापनमेव हेतुत्वेनाभिप्रेयते, न तु पूर्वावधिरिति बोध्यम् । तेन मतद्वयमप्ययुक्तमितिज्ञापनायोक्तमिति । अतःशब्दार्थ इति तथा च

रश्मिः ।

अस्मादिति कर्मज्ञानाधिकारादित्यर्थः । धर्मज्ञानस्येति । यद्यपि कर्मज्ञानमुक्तं पूर्वं 'देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' इति यजुःसंहिताश्रुतेः, तथापि 'धर्मं चर' इति शिक्षाश्रुतेः धर्मज्ञानं पूर्वमित्याशयेनोक्तमत एव 'अथातो धर्मजिज्ञासा' इत्युक्तम् । 'कर्मैके तत्र दर्शनात्' इति सूत्रं त्वग्रे । न तेन रूपेणेति दृष्टान्ते देशत्वरूपेण हेतुत्वाभावादत्रापि न कर्मज्ञानत्वरूपेण हेतुत्वं किंतु क्षेमत्वेन सुभिक्षत्वेन च तद्वदत्रापि पूर्ववृत्तत्वेन वाच्यमित्यर्थः । आनन्तर्यपक्षदूषणादेवेति । अथातः साङ्गशिरसो वेदस्याधिगताल्पास्थिरफलके चलकर्मज्ञानतया संज्ञता मोक्षाभिलाषस्यानल्पस्थिरफलब्रह्मजिज्ञासास्यनन्तरभाविनीति तथात्वादित्यर्थः । तथा यदुक्तं 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति धर्मस्यापि नित्यफलमवगच्छतो विवेकाद्यसंभवादानन्तर्यसंभावनां ब्रूते अतःशब्द इति । तथा चोक्तश्रुतिः 'यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते' इति श्रुतिबोधितेति । अतो विवेकादिसंभवादित्यर्थः । तस्यापि तथात्वादिति प्रत्यक्षबाधितमिति । धर्मजिज्ञासायाः प्रागपि अधीतवेदस्य ब्रह्मजिज्ञासोपपत्तेस्तथेत्यर्थः । कर्मत्वं तु क्रियासाधारणधर्मत्वं च चोदनालक्षणोऽर्थ इति विभेदः । सूचीकटाहन्यायेनाहुः द्वितीये तु । स्मृताविति । तदेवेति अस्पष्टत्वमेवेत्यर्थः । अन्यथा विशेषणवैयर्थ्यापत्तिरिति भावः । त एत इति वाङ्मनःप्राणा इत्यर्थः । कर्म व्रतत्वेनेति व्यापारो व्रतत्वेनेति निश्चयविषयत्वेनेत्यर्थः । इत्यपेक्षायामिति । एतदग्रे यस्य व्रतमुत्कृष्टं तन्निश्रायनार्थमित्यपि दृश्यते । तदुत्कर्षेति यस्य व्रतमुत्कृष्टं तदुत्कर्षज्ञापनमित्यर्थः । तथा अत इत्यस्योत्कर्षज्ञापकत्वादित्यर्थः । उत्कृष्टश्च प्राणः 'यतश्चोदेति सूर्यः अस्तं यत्र च गच्छति' इति, 'प्राणाद्वा एष उदेति प्राणेस्तमेति' इति श्रुतेः । भाष्ये ज्ञानमेवेति । सर्वात्मभावाख्यः सर्वत्र विगाढभावहेतुकप्रेमानुभवादिकार्यकः प्रियत्वानुभव इत्यर्थः । अयमेव स्नेहः । एतच्च 'अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम्' इति सूत्रविचारे साधनाध्याये स्पष्टयितव्यम् । अधिक्रियत इति । अधिकार उत्तरत्रानुवृत्तिः । अत एव 'उत्क्रमिष्यत' इति सूत्रभाष्यलिङ्गमित्यनुवर्तत इति । ननु तथाप्येवं सति भाष्ये एवं स्फुटमुक्तं स्यात्, नैवम् । जिज्ञासापदज्ञापितस्य भगवज्ज्ञानसाध्यगोचरस्य ज्ञानस्यैतादृशस्योल्लेखात् । 'पुरुषार्थोऽतःशब्दात् इति बादरायणः' इति सूत्रात् । अतः सर्वात्मभावात् । नच प्राणो वै बलमिति चेदत्र ब्रवीमि । स्मृतित्वानङ्गीकारात्, न च श्रुतिविरोधस्तदङ्गत्वात् । न च प्रमाणाभावः 'भक्त्या

भाष्यप्रकाशः।

धर्मो यशःप्रदः सुखदश्चातः करोमीत्यादाविष्टेऽप्यतःपदप्रयोगदर्शनादयमेवार्थो न त्वन्यविध इत्यर्थः। नन्वस्य प्रथमसूत्रत्वादत्र प्रेक्षावत्प्रवृत्तिसिद्ध्यर्थमधिकारिविषयसंबन्धप्रयोजनानि

रश्मिः।

संजातया भक्त्या' इति वाक्यानुभवात्। न च प्रमाणाभावः 'नायमात्मा बलहीनेन लभ्यः' इति श्रुतिलाभात्। बलं भक्तिरिति भाष्यम्। न च प्राणो वै बलमिति शङ्क्यम्, अप्रकरणित्वात्। न च ज्ञानं तत्, 'ब्रह्मविदाप्नोति' इति श्रुतेः। नैवम्। 'भक्तिरहस्यभजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन्मनःकल्पनम्' इति उद्देश्यविधेयभावात्। ज्ञानत्वेन सर्वात्मभावमुद्दिश्य ज्ञानंतु गीतायां विहितमिति। किं च 'भक्त्याहमेकया ग्राह्यः' इति स्मृतिर्वेदविरोधाभावात्स्वमूलं श्रुतिं ज्ञापयिष्यति। ननु 'ब्रह्मविदाप्नोति परम्' 'तमेव विदित्वा' इत्यादिप्रत्यक्षश्रुतिविरोधात् न ज्ञापयिष्यति। एतद्भक्तौ निवेशयिष्यामहे, रसत्वात्तु तस्याः। वैपरीत्यमिति चेन्नेति ब्रवीमि, अरसत्वात्तस्य। ऐक्यमिति चेन्नेति ब्रवीमि, 'सत्यं विज्ञानमानन्दं ब्रह्म' इति भेदात्। आनन्दादुच्यते, नैष दोषः। 'रसँ ह्येवायं लब्ध्वानन्दी भवति' इत्यैक्यं श्रूयते। अपि च 'तस्य प्रियमेव शिरः' इति श्रूयते। एवं तर्ह्युपासेत्युच्यते। नेति ब्रवीमि 'सर्वेषां मदुपासनम्' इति प्रक्रम्य 'भक्तिं विन्दते' इति अरसत्वाच्चेति। तदानीं वैपरीत्यं प्रवर्त्स्यामहे। अरसत्वात्तस्या नेति ब्रवीमि। प्रज्ञेति चेन्न, स्मरणात्मकत्वेन तन्निवर्त्यत्वात्। श्रद्धेति चेन्न, साधारण्यात्। शाण्डिल्यसूत्रार्थस्तत्र स्पष्टः। अतो भक्तिरेव साधनमिति प्रतिज्ञायते यत्सुसंसिद्धम्। द्वेषादीनामप्येतर्हि तत्संश्लिष्टानां तदिति च। तत्संश्लिष्टानां मनःकल्पनरूपभक्तिसंश्लिष्टानाम्। प्रमेयबलं चैतत्। आनन्त्याधिपत्यात् 'यस्य देवे परा भक्तिः' इति साक्षाच्छ्रुतिं चोत्पश्यामः। न च 'योगाश्रयः' इति वाक्यविसंवादः। अहीनन्याये एतदुक्तं बहुकर्तृके सत्रे यजमानेषु यः कोऽपि शुक्रग्रहं स्पृशतु विशेषस्यावधारयितुमशक्यत्वादिति। न चात्र द्वादशचतुर्थपादीयाहीनन्यायेनाचार्यप्रवृत्तिरिति संभावयामः। स्मृतेर्निर्णीयत इति 'प्रेम्णोऽन्यत्साधनं लोके नास्ति' इति सर्वनिर्णयाच्च। गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति न्यायेन वाक्ये भक्तिर्मुख्या गृह्यते। ज्ञानं वा मुख्यं चतुःश्लोकीप्रोक्तं गृह्यते, भगवानेवाग्रे मध्ये पश्चाच्चेत्याकारकं, तयोरपि मार्गत्वात्। सर्वात्मभावो मुख्यभक्तिः। भजनानन्दः फलम्। श्रवणादिभक्तिमार्गो ज्ञानमार्गश्च तदपेक्षया गौणः। विशेषस्मृतिहेतुभिः संयोगविप्रयोगसाहचर्यादिभिः काव्यप्रकाशोक्तैर्वाच्योऽर्थः। तत्त्वज्ञानं तु भक्तिफलं, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इति वाक्योक्तम्। एवं सति देह्यनुवादः सुष्ठु संगच्छते इत्यलम्। अथवा दृष्ट एव स्नेह इत्युपपत्तेर्ज्ञानमेव भक्तिसाधकम्। अतस्तज्ज्ञानाय इत्यर्थः। तच्च शाब्दं माहात्म्यविषयकमैक्यविषयकं च ज्ञानमिति ज्ञेयम्। व्यापारीभूतभक्तिसाधकमित्यर्थः। यद्वा कर्मादिभ्य इति वेदपञ्चरात्रसांख्ययोगपाशुपतमतरूपपञ्चशास्त्रोक्तेभ्यः कर्मादिभ्यः। ज्ञानं त्रिविधम्। तथाहि। 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इति श्रुत्युक्तं सर्वात्मभावरूपम्। 'भक्त्या जानाति चाव्ययम्' इति श्रुत्युक्तम्, 'ब्रह्मविदाप्नोति परम्' इति श्रुत्युक्तं च। 'ब्रह्मविदाप्नोति परम्' इत्यत्र भक्तेर्व्यापारत्वं ज्ञानस्य व्यापारित्वमत एवकारः। प्रकृते। प्रेक्षावदिति सूक्ष्मदृष्टिमत्प्रवृत्तिसिद्ध्यर्थमित्यर्थः।

---

१. भावना। २. इदञ्च सर्वनिर्णयवाक्यस्यानुवादः। ३. इत उपक्रम्यते रश्मिकाराणां हस्ताक्षर लिखितो ग्रन्थः। ४. पण्डित।

अधिकारी तु त्रैवर्णिक एव। न हि वेदविचारस्य वेदाधिकार्यतिरिक्तः शक्यते कल्पयितुम्। न हि मन्दमतेर्वेदो नायातीति त्रैवर्णिके मतिमत्त्वमधिकारिविशेषणं कल्प्यते। अन्धपङ्ग्वादीनामिव कर्मणि, गृहाद्यासक्तस्य मननाद्यसंभवात् साक्षात्कारो न भविष्यति।

नच धर्मन्यायेन गतार्थत्वमस्य। अप्रतिज्ञानादनुपलब्धेश्च। न च जगत्कारणं परमात्मा वा प्रकृतिर्वा परमाणवो वेति संदेहे किंचिदधिकरणमस्ति।

भाष्यप्रकाशः ।

व्याख्यानि। तत्रानन्तर्यपक्षे विचारितधर्मो वा शमादिमान् वाधिकारी प्राप्यते। अधिकारपक्षे तु तदप्राप्त्या शास्त्रस्यानर्थक्यप्रसङ्गः, सर्वाधिकारकत्वं वा स्यादित्याशङ्कायामाहुः अधिकारी त्वित्यादि। तथाच ब्रह्मणो वेदार्थत्वात् तद्विचारेऽधिकृते ब्रह्मजिज्ञासापदादेव तत्प्राप्तेर्न पूर्वोक्तो दोष इत्यर्थः। नन्वेवं त्रैवर्णिकाधिकारोपगमे तेषां सर्वेषामधिकारप्राप्त्या, शान्तो दान्त इति श्रुतिविरोधात् तत्संकोच आवश्यक इति शमाद्यानन्तर्यपक्ष एव श्रेयानित्यत आहुः नहि मन्देत्यादि। तथाच तत्र यथा मतिमत्त्वस्यार्थात् प्राप्तिस्तथात्राप्युपयुक्तस्य विशेषणस्य प्राप्तिरिति संकोचस्यानावश्यकत्वादधिकारो न दुष्यतीत्यर्थः। ननु यद्येवं स्याच्छ्रुतिः किमिति वदेदित्याकाङ्क्षायामाहुः अन्धेत्यादि। तथाच तेषां यथाज्यावेक्षणविष्णुक्रमक्रमणादिकरणाशक्त्या तत्कृतकर्मणो व्यङ्गत्वात् फलाजनकत्वं, तथैतदीयशाब्दज्ञानस्यापि व्यङ्गत्वात् साक्षात्काराजनकत्वमिति बोधयितुं फलोपकाराय वदति, आत्मन्येवात्मानं पश्येदिति। अतो विचारे स्वरूपोपकारार्थं शमाद्यनङ्गीकारेऽपि न श्रुतिविरोध इत्यर्थः। ननु यदि त्रैवर्णिकाधिकारेणार्थादध्ययनानन्तर्यसिद्ध्या तदर्थं वेदार्थभूतब्रह्मविचारः प्रतिज्ञात इत्यायाति तदा शास्त्रवैयर्थ्यापत्तिः। धर्मजिज्ञासेत्यत्र धर्मशब्दस्य वेदार्थमात्रोपलक्षकतया पूर्वतन्त्रन्यायेनैव वेदार्थज्ञानसिद्धेरित्यत आहुः नचेत्यादि। धर्मन्यायेनेति पूर्वमीमांसया। अप्रतिज्ञानादिति जैमिनिना ब्रह्मविचारस्याप्रतिज्ञानात्। अनुपलब्धेरित्यस्यैव विवरणम्, न च जगदित्यादि।

रश्मिः ।

प्राप्यत इति यथायथं रामानुजशंकराचार्यमते प्राप्यत इत्यर्थः। तत्प्राप्तेरिति त्रैवर्णिकाधिकारप्राप्तेर्गीतोक्तजिज्ञासुप्राप्तेश्चेत्यर्थः। अधिकारो नाम ब्रह्मानन्दज्ञातृत्वम्। 'मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः' इति श्रोतुर्विशेषणान्मतिमत्त्वम्। 'शान्तो दान्तः' इति श्रुत्युक्तमित्यादिशब्दः तृतीयाध्याये विचारयिष्यते। तत्संकोच इति त्रैवर्णिकानामधिकारविशेषसंकोच इत्यर्थः। तथा च तत्रेति पूर्वतन्त्र इत्यर्थः। अर्थादिति ज्ञानिनो विधेयत्वेन भक्तस्य स्वतःसिद्धत्वेन शमादय इति तत्रैवोक्तम्। एवं चाक्षेपादित्यर्थः। एवं स्यादिति अनावश्यकत्वं स्यादित्यर्थः। तेषां यथाज्येत्यादि। इदं पूर्वतन्त्रे षष्ठे 'फलार्थत्वात्तु कर्मणः शास्त्रं सर्वाधिकारं स्यात्' इत्यधिकरणे चिन्तितम्। व्यङ्गत्वादिति भावनाद्यसंभवाद्व्यङ्गत्वाद् 'अनियमः सर्वासाम्' इत्यधिकरणे महन्माहात्म्यवत्यां भक्तेरन्वङ्गं साधनत्वोक्तेः साक्षात्कारो न भविष्यतीत्यर्थः। न श्रुतिविरोध इत्यर्थ इति दर्शनविधिशेषत्वात्तस्या इत्यर्थः। तथा च शमादिसहकृतमननादित्वेनात्मसाक्षात्कारत्वेन कार्यकारणभावः। विचारत्वेन शाब्दत्वेन च कार्यकारणभाव इति भावः। ननु मुख्यफलाभावे व्यर्थो विचार इत्याशङ्का तु अग्रे फलकामनाया अनुपयोगादिति भाष्य-

स्यादेतत्। अथातो धर्मजिज्ञासेति धर्मविचारं प्रतिज्ञाय नोदकवाक्यार्थस्य धर्मत्वमुक्त्वा प्रामाण्यपुरःसरं सर्वे संदेहा निवारिताः। तत्र ब्रह्मज्ञानस्यापि धर्मत्वम् 'आत्मेत्येवोपासीत' 'आत्मानं श्लोकमुपासीत' 'तद् ब्रह्मेत्युपासीत' 'आत्मा वा अरे द्रष्टव्यः' इत्यादिनोदनावाक्यार्थत्वात्। 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' इति स्मृतेश्च। सृष्ट्यादिवाक्यानां त्वर्थवादत्वम्। आरोपाप-

---

भाष्यप्रकाशः।

एवमानन्तर्यपक्षे निरस्ते पूर्वमीमांसकोऽस्यात्रैवर्णिकाधिकारकत्वं सर्ववेदार्थज्ञानार्थत्वं च श्रुत्वा प्रत्यवतिष्ठते स्यादेतदित्यादि। यदि त्रैवर्णिक एवाधीतवेदोऽधिकारी, यदि च सर्ववेदार्थ एव ज्ञातुमिष्टस्तदा वक्ष्यमाणमेवाङ्गीकार्यमित्यर्थः। प्रामाण्यपुरःसरमिति औत्पत्तिकसूत्रे शब्दस्यान्यानपेक्षप्रामाण्यव्यवस्थापनपूर्वकम्। सर्वे इति शब्दस्वरूपविषयकास्तदर्थविषयकाश्च। ननूक्तं, जगत्कारणविचारो न कृत इति तन्निश्चायनार्थत्वान्न गतार्थत्वमिति तत्राह सृष्ट्यादीत्यादि। तथाच पूर्वमीमांसकानां मते प्रवाहनित्यतोपगमेन जगतः स्वातन्त्र्यात् कर्तुरभावेनोपासना-

रश्मिः।

विवरणे स्वयमेवापाकरिष्यते। गतार्थत्वं निषिध्य बोधायनवृत्त्या परस्परानुपयोगं निषेधतीत्याशयेन भाष्यमवतारयामासुरेवमिति। निरस्त इति धर्मन्यायेन गतार्थत्वे निरस्ते इत्यर्थः। मीमांसक आधुनिको ज्ञेयः। सर्ववेदेति जिज्ञासासूत्रे ब्रह्मशब्दादिति भावः। प्रत्यवतिष्ठत इति ब्रह्मजिज्ञासेत्यत्र वेदवाचकब्रह्मशब्दप्रयोगात् प्रत्यवतिष्ठते। तदुक्तं बोधायनवृत्तौ 'संहतमेतच्छास्त्रं जैमिनीयेन षोडशलक्षणेन' इति। अत्रार्थविचारेण ब्रह्मशब्दो वेदान्तपरो नतु वेदपर इति फलिष्यति। अतो वेदान्तानां विचार आरम्भणीयो न वा इति भाष्यस्य दुर्बोधत्वं न। वेदान्तशब्दं विहाय ब्रह्मशब्दस्तु सर्ववेदसूचकः। तेन 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इत्यादौ नाप्रतिज्ञातार्थत्वम्। 'समवप्रविभ्यः स्थः' इति सूत्रेणात्मनेपदम्। यदि च असंहतेभ्य एव परस्य स्थ आत्मनेपदं तदा तु 'प्रकाशनस्थेयाख्ययोश्च' इत्यनेनात्मनेपदम्। आशयं प्रकाशयतीत्यर्थः। पूर्वपक्षिणा पूर्वमाक्षिप्तमीमांसाद्वयस्य परस्परमङ्गाङ्गीभावं सिद्धान्ते प्रकाशयितुं 'संशय्य कर्णादिषु तिष्ठते यः' इत्यत्र स्थेयाख्ये, कर्णादीन् निर्णेतृत्वेनाश्रयतीत्यर्थात्। औपत्तिकसूत्र इति। 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति सूत्रे शब्दस्यार्थेन समं संबन्धः औत्पत्तिको नित्यः। तस्य प्रत्यक्षादिभिरनवगतस्याग्निहोत्रादिलक्षणस्य धर्मस्य निमित्तम्। कथं उपदेशो हि भवति, विशिष्टस्य शब्दस्योच्चारणमुपदेशः। अव्यतिरेको ज्ञानस्य। नहि तदुत्पन्नं ज्ञानं विपर्येति यच्च नाम ज्ञानं न विपर्येति न तच्छक्यते वक्तुम्। नैतदेवमिति तस्मात्तत्प्रमाणापेक्षत्वात् नह्येवं सति प्रत्ययान्तरमपेक्षितव्यं पुरुषान्तरं वा स्वयं प्रत्ययो ह्यसौ शुक्तिका रजतवत्प्रकाशते यतस्तेन हि प्रत्यक्षं व्यभिचरति तन्मूलत्वाच्चानुमानादीन्यपि। तत्रापरीक्ष्य प्रवर्तमानोऽर्थाद्विहन्येत। अनर्थं च प्राप्नुयात् कदाचिन्नैतदेवं यत्प्रत्यक्षं तन्न व्यभिचरति यद्व्यभिचरति तन्न प्रत्यक्षमिति। बादरायणग्रहणं बादरायणस्येदं मतं कीर्त्यते। बादरायणं पूजयितुं नात्मीयं मतं पर्युदसितुमित्यर्थाच्छब्दस्यान्यानपेक्षत्वादि। शब्दस्वरूपविषयका इति। 'कर्मैके तत्र दर्शनात्' इत्यधिकरणे शब्दस्य नित्यताव्यवस्थापनायेत्यर्थः। तत्र शब्दे प्रयत्नानन्तर्यदर्शनात्कर्म क्रिया तत्साध्यत इत्यर्थः। अनित्यतेति यावत्। इत्येके वदन्तीति सूत्रार्थः। तदर्थविषयका इति। आकृत्यधिकरणे आकृतिवाचकत्वव्यव-

वादविषयधर्मप्रतिपादकत्वेन विधेयोपासनाविषयस्तावकत्वात् ।

नच ज्ञानादीनामविधेयत्वं प्रमाणवस्तुपरतन्त्रत्वेनाकृतिसाध्यत्वादिति वाच्यम् । न हि सर्वात्मना असाध्यम् । प्रकारभेदस्त्वप्रयोजकः । सर्वस्यापि कारणेषु पुरुषव्यापृतिः । तदत्र वृत्तिसंपादने प्रमाणासंपादने वा पुरुषकृतिसाध्यत्वम् ।

भाष्यप्रकाशः ।

विषयस्यात्मनः प्रशंसार्थं क्वचित् कर्तृत्वमारोप्यते, अन्यत्र च तदपोह्यते । क्वचित् सर्वकामत्वादिकं प्रतिपाद्यते, अन्यत्रापोह्यते । यदि तद्वास्तवं स्यान्नापोह्येतेति तर्केणारोपापवादविषयो यः कर्तृत्वादिधर्मस्तत्प्रतिपादकत्वेन तेषां विधेयस्तावकत्वनिश्चयात् । सिद्धेऽर्थवादत्वे तेषां स्वार्थे तात्पर्याभावेन ब्रह्मणि विरुद्धधर्माधारत्वादिकल्पनस्याप्रयोजकत्वात् । तदर्थत्वेऽपि गतार्थत्वमित्यर्थः । ननूपासनावाक्यशेषाणामस्त्वर्थवादत्वं, न तु ज्ञानवाक्यशेषाणामपि । ज्ञानस्य प्रमाणवस्तुभ्यां जायमानत्वेन तदर्थं कृत्यपेक्षाभावेन तस्य विध्यर्थत्वाभावात्, कृतिसाध्यत्वस्यैव विध्यर्थत्वात् । नच तव्यविरोधः आवश्यकार्थेऽपि जायमानत्वात् । अतस्तच्छेषाणां स्तावकत्वाभावेन तद्विचारस्यावश्यकत्वात्तस्या गतार्थत्वमिति । शमाद्यानन्तर्यवादिनः शङ्कायामाह नचेत्यादि । आदिपदेनेच्छाप्रयत्नौ । तेन 'तदन्वेष्टव्यम्', 'तद्विजिज्ञासितव्यम्', 'मन्तव्यो निदिध्यासितव्यः' इत्यादीनां संग्रहः । तद् दूषयति नहीत्यादि । सन्निकर्षादिजनककृत्यपेक्षायास्तत्रापि सत्त्वात् तथेत्यर्थः । ननु तथापि कर्मवत् साक्षात्कृतिसाध्यत्वाभावात् कथं ज्ञानादीनां विधेयत्वमित्यत आह प्रकारेत्यादि । ज्ञानादेरविधेयत्वसाधनायैवं प्रकारभेदो यः कल्प्यते सत्वविधेयताप्रयोजको न भवति । यतो धर्मस्यापूर्वात्मकत्वेन तस्य सर्वस्यापि कारणीभूते क्रियाकलाप एव यत्नात्मा पुरुषव्यापारो दृश्यते, न तु साक्षात् । तत्तस्मादत्र ज्ञानादौ वृत्तिसंपादने बुद्धिजन्यायाः पदार्थान्तररूपाया बुद्ध्यवस्थाविशेषस्थापनात्तथेत्यर्थः ।

रश्मिः ।

अयं हीति निश्चयेन । परो मीयते ज्ञायते येन तादृशो धर्मः स कः यद्योगः स च कर्मसु कौशलं ब्रह्मसेवारूपं भगवता स्वैश्वर्यस्य निर्विषयत्वपरिजिहीर्षया जीवाय दत्तं तेनात्मदर्शनं ब्रह्मबोधनमिति योजना, इदमवान्तरफलं मुख्यमन्यदिति, सिद्धान्तमुक्तावल्यां स्फुटम् । क्वचिदिति 'यतो वा इमानि' इत्यादावित्यर्थः । आरोप्यत इति अध्यस्यत इत्यर्थः । अन्यत्रेति निष्कलं निष्क्रियमित्यादावित्यर्थः । क्वचिदिति सर्वकाम इत्यादावित्यर्थः । अन्यत्रेति अकाम इत्यादावित्यर्थः । विधेयस्तावकत्वेत्यादि विधेया योपासना तद्विषयीभूतात्मस्तावकत्वनिश्चयादित्यर्थः । ननु न प्रतीतं निषेधामत आह तदर्थत्वेऽपीति । विरुद्धधर्माधारत्वार्थत्वेऽपि, अर्थवादत्वेन गतार्थत्वमित्यर्थः । ज्ञानवाक्यशेषाणामिति । 'आत्मा वा अरे द्रष्टव्यः' इत्याद्युक्तानां ज्ञानानां वाक्यशेषा 'मैत्रेय्यात्मनो वा दर्शनेन श्रवणेन मत्या विज्ञानेन इदं सर्वं विदितम्' इत्याद्यास्तेषामित्यर्थः । प्रमाणवस्तुभ्यामिति इन्द्रियविषयाभ्यामित्यर्थः । शङ्कायामाहेति शङ्कायां प्राप्तायां न चेत्यादिनिषेधमाहेत्यर्थः । तथेति सर्वात्मना असाध्यत्वाभावनिश्चय इत्यर्थः । तदित्यव्ययमित्याशयेनाहुः तत्तस्मादिति । वृत्तिसंपादनेति पूर्वोक्तभाष्यं व्याकुर्वन्ति बुद्धिजन्याया इति । पदार्थान्तरेत्यादि । व्याख्यातमेतत् । सांख्यैराहंकारिके तत्त्वान्तररूपत्वमङ्गीक्रियते इति पदार्थान्तररूपायाः । तृतीयसुबोधिन्यनुसारेणाहुः बुद्ध्यवस्थेति ।

अन्यथा सिद्धान्तेऽपि मननादिशास्त्रवैफल्यापत्तेः। साधनप्रतिपादकश्रुतिविरोधश्च। येनापि सर्वक्रियाफलत्वं निराकार्यं तेनापि गुरूपसत्त्यादिना यतितव्यमेव ज्ञानार्थे। तस्माद् यत्रापि विध्यश्रवणं, तत्रापि विधिं परिकल्प्य तत्रत्यानां तच्छेषत्वं कल्प्यमिति, नार्थोऽनया मीमांसया। अन्यथा विरोधोऽपि।

स्यादेतत्। ब्रह्मविचार एवारम्भणीयो, न धर्मविचारः। सर्ववेदव्यासकर्त्रा वेदव्यासेनाकृतत्वात् तुच्छफलत्वाच्च। कल्पोक्तप्रकारेण निःसन्दिग्धं करण-

भाष्यप्रकाशः।

रूपाया वा तस्या उत्पादने प्रमाणसंपादने वा, 'आवृत्तचक्षुरमृतत्वमिच्छन्' इति, 'अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा' इत्यादिश्रुतेस्तादृशचक्षुरादिसंपादने वा तथात्वमिति, न ज्ञानादेरविधेयत्वमिति तव्योऽपि विधावेवेत्यर्थः। अविधेयत्वोपगमे दूषणमप्याह अन्यथेत्यादि। साधनप्रतिपादकश्रुतयस्तु, 'तपसा ब्रह्म विजिज्ञासस्व,' 'वसाऽपराणि पञ्च वर्षाणि,' 'शान्तो दान्तः' इत्याद्याः। तत्रत्यानामिति वाक्यानां ब्रह्मादिपदानां चेत्यर्थः। अन्यथेत्यादि विध्यकल्पने ऐक्यार्थ्याभावेन वाक्यभेदापत्तावैकशास्त्र्यविरोधः। अपिशब्दात् कर्मप्रतिपादनतन्निन्दनकृतो विरोधो वेदोऽखिलो धर्ममूलमित्यादिस्मृतिविरोधश्च संगृह्यते। अत्रैकदेशी वितण्डया प्रत्याह स्यादेतद्ब्रह्मेत्यादि। **सर्ववेदेत्यादि**। तथाच जैमिनिस्तच्छिष्यः सामगो, न सर्वज्ञ इति तदुक्तं न प्रमाण-

रश्मिः।

तस्या इति वृत्तेर्नयनान्तरभूतायाः। नैयायिकास्तु नयनकिरणानां निर्गतेन न विषयसंनिकर्षाज्ज्ञानं तेन यावता संस्काराख्यं गुणान्तरं चरमस्मृतिनाश्यमात्मन्यङ्गीकुर्वन्तो वृत्तिपदार्थमेव नेच्छन्ति। **प्रमाणसंपादनेति** भाष्यमिदं अग्रे व्याख्यातम्। **तथात्वमिति** परंपरया कृत्यसाध्यत्वम्। भाष्ये **अन्यथेत्यादि** परंपरयापि कृतिसाध्यत्वाभावे। द्रष्टव्य इति उपक्रम्य पठितस्य युक्तिभिरनुचिन्तनरूपमननादिशास्त्रस्य वैफल्यापत्तेरित्यर्थः। श्रवणेनैव दर्शनाङ्गीकाराद्विरोध इति प्रोक्तम्। स्वयमर्थवादत्वस्य विधिवाक्यातिरिक्तेऽङ्गीकारादपिपदम्। **येनापि सर्वक्रियाफलत्वमिति**। शब्दमात्रेण साक्षात्कारमङ्गीकुर्वतापि वैयाकरणेनापीति वा सर्वविधिव्यापारसाध्यत्वमित्यर्थः। **यतितव्यमिति** तथा चानिच्छतापि अनुभवबलात्परंपरया कृतिसाध्यत्वं स्वीकार्यमिति भावः। अन्यथासिद्धत्वं तु नैयायिकमते न तु मीमांसकमते 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते'। **यत्रापीति**। 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इत्यत्र विधिश्रवणेपि यत्र मैत्रेयीब्राह्मणे 'आत्मा वा अरे द्रष्टव्यः' इत्यादौ तत्रापि तव्यादिं विधावङ्गीकृत्य 'न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति'. इत्यादीनामर्थवादत्वम्। आत्मा यत्र प्रियः किमुत वाच्यमात्मनोऽपि आत्मा प्रिय इति प्रियत्वाच्छीघ्रफलदाता स श्रोतव्य इत्येवं तत्रत्यानां तच्छेषत्वं विधिशेषत्वं कल्प्यमित्यर्थः। प्रकृते, **ऐकार्थ्याभावेनेति**। उभयोर्मीमांसयोरित्यर्थः। तथा चायं मीमांसकत्वोक्ति न संगच्छतीत्यर्थः। संहृतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति बोधायनसूत्रात्। **तन्निन्दनेति** कर्मविच्छेदकस्य निन्दनं दुर्ब्राह्मणत्वादिरूपं तत्कृत इत्यर्थः। अत्र तत्पदं कर्मपरामर्शविच्छेदकं लक्षयति। अत्र **वितण्डयेति** वादभेदेन स्वपक्षदोषमनुद्धृत्य परपक्षदोषदानरूपेण प्रतिकूलमाहेत्यर्थः। **सामग** इति 'सामगो जैमिनिः कविः' इति वाक्यादि-

संभवाच्च । आचारपरंपरयापि करणसम्भवाच्च । एतर्ह्यपि संदेहे सूत्रभाष्ययाज्ञिकानामेवानुवृत्तिः क्रियते, न मीमांसकस्य । तस्मात् साङ्गवेदाध्येतुर्निःसंदेहकरणसंभवाच्च पूर्वयाऽपि कृत्यम् ।

किंच परमकृपालुर्वेदः संसारिणः संसारान्मोचयितुं कर्माणि चित्तशुद्ध्यर्थं बोधितवानिति कूपेऽन्धपातनवदप्रामाणिकत्वमिथ्यावसीयते । विपरीतबोधिका तु पूर्वमीमांसा तस्मादपि न कर्तव्येति ।

मैवम् । किं विचारमात्रं न कर्तव्यं, पूर्वकाण्डविचारो वा । नाद्यः । तुल्यत्वात् समर्थितत्वाच्च ।

द्वितीये सामान्यन्यायेन संदेहे निवार्ये लक्षणवत्तदुपयोगः । अनिष्टतया निरूपणं न मीमांसादोषः । किंतु विचारकाणां स्वभावभेदात् ।

भाष्यप्रकाशः ।

मित्यर्थः । उपासनायामप्यनुपयोगमाह आचारेत्यादि । सूत्रभाष्येति कल्पसूत्रभाष्येत्यर्थः । पूर्वयापीत्यत्रापिशब्दः पूर्वपक्षिगर्हार्थः । शेषमतिरोहितार्थम् ।

एवं केवलवैदिकरीत्या विचारे आक्षिप्ते पूर्ववादी समाधत्ते मैवमित्यादि । पूर्वयापि न कृत्यमिति न वक्तव्यम् । कुत इत्याकाङ्क्षायामपिशब्दस्य समुच्चायकत्वं मन्वानः पक्षद्वयं विकल्प्य प्रथममुभयनिषेधाभावे हेतू आह तुल्यत्वादिति । ‘यत्रोभयोः समो दोषः’ इति न्यायेन परिहारसाम्यात् तवापीष्टसिद्धेरभावेन दूषणसाम्याद्वा, अप्रतिज्ञानादित्यादिभिस्त्वया समर्थितत्वाच्चेत्यर्थः । सामान्यन्यायेन संदेह इति ‘अक्ताः शर्करा उपदधाति,’ ‘निर्मन्थ्येनेष्टकाः पचन्ति’इत्यादौ घृततैलवसानां चिरनिर्मथिताऽचिरनिर्मथितप्रभृतीनां चाञ्जनपाककरणयोग्यतादेः सामान्येन जाते संदेहे । ननु तुच्छफलत्वान्नोपयोग इत्युक्तं तत्राह अनिष्टतयेत्यादि । स्वभावभेदादिति

रश्मिः ।

त्यर्थः । अनुपयोगमिति चतुर्लक्षण्या[1] अनुपयोगमित्यर्थः । पूर्वपक्षीति उभयोः करणाक्षेपाद्दार्ढ्यसंदेहयोरभावानिवृत्तिभ्यां तथेत्यर्थः । भाष्ये कूपेऽन्धपातनवदिति । कूपेन्धपातनवद्विषयेषु विषयिपातनादप्रामाणिकत्वं तत्संबन्धिनी भीस्तया परमकृपालुरित्याद्यवसीयते इत्यर्थः । प्रकृते । केवलवैदिकेति श्रुत्वा केवलवैदिकरीत्या । केवलवैदिकस्य रीतिः पूर्वमङ्गीकृता इति । अपिशब्दस्य न पूर्वयापि कृत्यमित्युक्तं तत्रत्यापिशब्दस्येत्यर्थः । यत्रोभयोरिति ।

‘यत्रोभयोः समो दोषः परिहारश्च तत्समः ।
नैकः पर्यनुयोज्यः स्यात्तादृगर्थविचारणे ॥’

इति न्यायेनेत्यर्थः । तथा च तव पूर्ववादिनोपि विचाराकर्तव्यतापत्तिः ‘स्वाध्यायोऽध्येतव्यः’ इति श्रुतिविरोधादिति तु नोक्तम् । पुनः पूर्वोक्तयोरुभयत्र मण्डनखण्डनयोः प्राप्तेः । समर्थितत्वाच्चेति उभयोः समर्थितत्वाच्चेत्यर्थः । निर्मन्थ्येनेत्यादि । पूर्वतन्त्रे प्रथमस्य चतुर्थे तथा निर्मन्थ्येत्यधिकरणे चिन्तितम् । निर्मन्थ्यपदं वह्नित्वे रूढं यौगिकं योगरूढं वेति संशये निष्पन्नाग्नौ योगव्यभिचारः तदानीं निर्मन्थनकर्माभावात्, भूतपूर्वयोगस्यापि प्रतिक्षणमन्यान्यत्वाद्वह्नौ प्रवृत्त्यसामर्थ्यं, निर्मन्थननिष्पन्नस्याग्नेस्तदैव नाशात् आकृतेस्त्वव्यभिचाराद्रूढमिति प्राप्ते लौकिकनिर्मथनेन

---

[1] १. द्वादशलक्षण्या ।

किंच । आवश्यकत्वादपि । निवृत्तानामपि यागादिज्ञानस्यावश्यकत्वं चित्तशुद्ध्यर्थत्वात् । परमाश्रमभेदेन प्रकारभेदः कायिकादिभेदात् । तत्राद्यस्य वाचिको द्वितीयतृतीययोः कायिकश्चतुर्थस्य मानसिक इत्याश्रमिणाम् । तस्मादेकेनैव चरितार्थत्वात् किं द्वितीयेनेति प्राप्ते । उच्यते । उपासनाया धर्मत्वेऽपि न ब्रह्मणो धर्मत्वं ज्ञानरूपत्वात् । धर्मस्य च क्रियारूपत्वात् ।

भाष्यप्रकाशः ।

‘तेषां प्रकृतिवैचित्र्यात्’इत्येकादशस्कन्धीयवाक्योक्तरीतिकात् तस्मात् । अनुपयोगरूपं दूषणमुत्तरमीमांसायां हृदि कृत्वाह किंचेत्यादि । आवश्यकत्वं विवृणोति निवृत्तेत्यादि । तथाच त्रैवर्णिकाधिकारपक्षे शास्त्रवैयर्थ्यस्यापरिहार्यत्वात् तद्विहाय पूर्वतन्त्रमेवादरणीयमित्यर्थः ।

अत्र समादधते उच्यते । उपासनाया इत्यादि । त्रैवर्णिकाधिकारपक्षे स्यातां ब्रह्ममीमांसाया गतार्थत्वानुपयोगौ, यद्युत्तरकाण्डस्य मुख्यतयोपासनारूपधर्मप्रतिपादकत्वं स्यात् । तदेव तु न । किंतु ब्रह्मप्रतिपादकत्वं, ब्रह्मण एव सर्ववेदार्थत्वात् । ‘सर्वे वेदा यत्पदमामनन्ति,’ ‘वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे’, मां विधत्तेऽभिधत्ते माम्’ ‘इत्यादिवाक्येभ्यः । किं बहुना, धर्मोऽपि ब्रह्मात्मकत्वेनैव प्रतिपाद्यः’ । ‘धर्मो यस्यां मदात्मकः’ इति वाक्यात् । जैमिनिस्तु पुरःस्फूर्तिक-

रश्मिः ।

चिरमथनेन च उत्पन्नमग्निं निषेद्धुं पङ्कजपदवद्योगरूढम् । नावनीतवत् । यथा घृतं प्राचीनं नवं च नवनीतोत्पन्नमपि नवमेव नावनीतत्वेनोच्यते । चिरनिर्मन्थितस्त्वाधानकाले निर्मन्थ्य गार्हपत्ये धृतो वह्निः अलौकिकमथनेन सद्यः संभूतोचिरनिर्मन्थितः । भूतपूर्वमपि योगं निमित्तीकृत्य प्रयोग इति । अत्र प्रभृतीनामित्यारभ्य आदिशब्दान्तस्य किं प्रयोजनमिति चेच्छृणु । अनेककोट्यवगाहिज्ञानस्य संशयत्वेन विवक्षितत्वात्प्रभृतीनामित्युक्तम् । तथा च चिरनिर्मथिताचिरनिर्मथितवह्निवह्नित्वलौकिकालौकिकभेदभिन्नानां च । एतेषां संदेह इत्यनेनान्वये विषयत्वं घृतादीनां स्यात्तदविवक्षितं, किंतु तत्संबन्धि अञ्जनं च पाककरणं च तयोर्योग्यतादिशब्देन भावस्तयोः संदेहविषयत्वं विवक्षितं तदाहुरञ्जनेत्यादि । तेषामञ्जनादियोग्यतादेः संदेहे जात इत्यन्वयः । घृतं वसा तैलं वेत्यादयः संदेहाकाराः । अत्र दूरत्वस्थानापन्नमाहुः **सामान्येनेति** । यथा स्थाणुर्वा पुरुषो वा इत्यत्र दूरत्वं तथात्र समानत्वं संदेहकारणं, भाष्ये तु सामान्यं न करणं ज्ञानिनामखण्डब्रह्मभाने तस्य घटपटादिसाधारण्यादतो विचारे सखण्डब्रह्मभाने सामान्यस्य यो न्यायो रीतिस्तेन न्यायेनेति करणत्वोपपादनम् । भाष्ये **लक्षणवदिति** उक्तार्थमेतत् । प्रकृते । **आहेति** उपयोगमाहेत्यर्थः । **शास्त्रवैयर्थ्यस्येति** उत्तरमीमांसावैयर्थ्यस्येत्यर्थः । भाष्ये । **एकेनेति** पूर्वकाण्डविचारेणेत्यर्थः । प्रकृते । **गतार्थत्वेति** । गतः पूर्वमीमांसया प्राप्तः अर्थः उपासनारूपः यया । यज्ञाद्युपासनायाः मनोव्यापाररूपाया उप समीपे स्थित्वा यथायोग्यकरणरूपाया वा पूर्वया प्राप्तत्वात् । उपासनायाः पूर्वमीमांसायां स्वमते शेषे वेदरूपसंकर्षणे प्रतिपादके विषयिणीत्वात् । ‘स सर्पानसृजत’ इति तृतीयाष्टके ‘तस्मात् समानाः प्रजाः प्रजायन्ते’ इति संहितायाम् । अतो नोपासनायां प्रतिपाद्यवृक्षपक्षिवृषभाणां विषयताप्रतिपादकत्वरूपेण मुख्याब्रह्मत्वेपि कृष्णाजिनं ब्रह्मेति संहिता । कृष्णाजिनस्य शेषत्वं दृष्टम् । अत उपासनायां ब्रह्ममीमांसाया अनुपयोगः । **मुख्यतयेति** । विषयत्वाभावादिति भावः । **किंतु ब्रह्मेति** । विषयत्वेन मुख्यत्वादिति भावः । **पुरःस्फूर्तिकमिति** यथा ‘यत्सत्यपत्यसुहृदा-

भाष्यप्रकाशः ।

मेवोवाचेति न दोषः । ब्रह्म च न शारीरमात्रं, येन सृष्ट्यादिवाक्येषु वाचो धेनुत्ववत् तस्मिन् जगत्कर्तृत्वादीनामसंभवतां धर्माणामारोपापवादादिभिर्विधेयोपासनाविषयस्तावकतयोपासनाशेषता संभवन्ती गतार्थत्वानुपयोगौ दृढीकुर्यात् । किंचोपासनाविषये आत्मनि निरङ्कुशजगत्कर्तृत्वादयो ये धर्माः स्तुत्यर्थमारोप्यन्ते, ते किमत्यन्तासन्तः खपुष्पवद्, उत क्वचित् सन्तो रजतवत् । तत्राद्ये आरोप एव बाधितः । द्वितीये तु सिद्धमतिरिक्तेन ब्रह्मणा । तच्च पूर्वकाण्डे परोक्षवादत्वान्न स्फुटं प्रतिपादितमिति तत्प्रतिपादकमुत्तरकाण्डं न धर्मप्रतिपादकम् । अत उपासनाया धर्मत्वेऽपि नोत्तरमीमांसाया गतार्थत्वमित्यर्थः । नन्वस्त्वेवं, तथापि सृष्ट्यादिवाक्यानां विधिमन्त्रादिरूपत्वाभावादर्थवादत्वमेव वक्तव्यम् । ततश्च ब्रह्मस्तावकत्वात् तेषां न स्वार्थे प्रामाण्यमिति तद्विचारशास्त्रस्य

रश्मिः ।

मनुवृत्तिरङ्ग' इति श्लोकोक्तो धर्मः । अत एव धर्मजिज्ञासां चकार न तु कर्मजिज्ञासाम् । 'देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' इति संहितोक्तत्वेपि निरोधलक्षणग्रन्थोक्ताधिदैविकश्रवणादिरूपमर्यादासेवात्वेन श्रुत्यधिकारिधर्मत्वात् । यथा 'अस्त्वेवमङ्ग उपदेशपदे त्वयीशे' इत्युक्त्वा 'प्रेष्ठो भवान् तनुभृतां खलु बन्धुरात्मा' इति श्रुत्यधिकारि यद्वाक्यं तदुक्तो धर्म आधिदैविकः । तथा च यथा 'धर्मं चर' इत्याचार्योपदेशेन भक्ता अपि भगवद्वाक्यानि पूर्वपक्षयाञ्चक्रुस्तथाचार्योपदेशेन धर्मजिज्ञासां चकार । कर्मणस्तूक्तस्य सर्वानधिकारान्मुख्यत्वेऽपि कर्मणे न कर्मजिज्ञासा इत्युवाच । अग्रे 'कर्मैके तत्र दर्शनात्' इति सूत्रं चकार । तथा चाध्यात्मिकमेवोवाचेत्यर्थः, आध्यात्मिकस्तु 'धर्मः प्रोज्झितकैतवोऽत्र' इति वाक्यादेकादशैकोनविंशाध्यायोक्तश्रवणादिसरणिरूपो धर्मः । **गतेति** । ब्रह्ममीमांसा यतः । **बाधित** इति । तादृशस्यादर्शनादिति भावः । **अतिरिक्तेनेति** सद्धर्माश्रयस्य वक्तव्यत्वात्तथेत्यर्थः । **परोक्षवादत्वादिति** 'परोक्षवादो वेदोयम्' 'परोक्षं च मम प्रियम्' 'परोक्षप्रिया इव हि देवाः' इति वाक्यनिकुरम्बात् । **न धर्मप्रतिपादकमिति** । अपूर्वप्रतिपादकं नेत्यन्ये । सिद्धान्ते धर्मस्यैव फलपर्यन्तावस्थानोपगमात् । एतदेवाग्रे पूर्वखण्डने स्फुटिष्यति । तथाचोक्तम्—

'किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
एतस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥
मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् ।
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ॥
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' ॥ इति

नच वेदो मां स्वव्यापारावधिं कृत्वा भिदां मायामात्रमित्यनूद्य 'नेह नानास्ति किंचन' इति प्रतिषिध्य भेदं, प्रसीदति निवृत्तव्यापारो भवतीति निरुणद्धि इति वाच्यम् । सर्वसामर्थ्यस्य ब्रह्मणो मायाकृतां विपर्यस्तबुद्धिकृतां नेदं ब्रह्मकार्यमित्याकारिकां भिदामनूद्य प्रतिषेधति कार्यभावात्पूर्वं रूपं वक्तीत्येकदेशिनः । विरुद्धसर्वधर्माश्रयस्य आनन्दस्य प्रतीयमानां भिदां मायामात्रं क्रीडार्था माया या मुख्या शक्तिस्तन्मात्रं, नतु आविद्यकमित्यनूद्य प्रतिषेधति । ब्रह्मैव सर्वं, भेदो बुद्धिदोषाद्भातीति सिद्धान्तः । प्रकाशाश्रयाधिकरणे स्फुटमिदम् । न च मायाविद्ययोरेकीभाव इति सांप्रतम् । 'विद्याऽविद्यया शक्त्या मायया च निषेवितम्' इति वाक्येन भेदावगमात् । भाष्ये । **ज्ञानरूपत्वादिति**

रश्मिः ।

क्रियारूपत्वखण्डने तात्पर्यादेवमुक्तम्, आनन्दस्यैव त्रिषु मुख्यत्वात् । न च द्वैतापत्तिः । द्वैतं हि द्वयोर्भाव उच्यते 'प्रज्ञादिभ्यश्च' इत्यणा, ब्रह्मैव सर्वमिति क द्वौ । न ह्येकस्मिन्दीपे द्वाविति प्रतीतिरस्ति । तदुक्तम्—

'कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् ।
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते' ॥ इति सप्तमस्कन्धे ।

यदपि द्वयोर्भावो द्विता तत्र भवं द्वैतं संशयरूपं ज्ञानं, द्वाभ्यामितं प्रकारद्वयेन विरुद्धत्वाद्भिन्नाधारवर्तिना युक्तं वस्तु द्वीतं तत्र भवं द्वैतं तदेव संशयज्ञानमिति कैयटानुरोधे त्वद्वैतं संशयाभावः । अतश्च ब्रह्मैव सर्वमिति निश्चय इति तदप्यविरुद्धम् । अथवा यथाश्रुतोर्थः एकादशस्कन्धे सांख्यनिरूपणे स्फुटत्वात्, भाष्ये तु स्तुत्यानन्द आनन्दमये विश्रान्त इत्यदोषः । तत्र ज्ञानं दशधा इति तृतीयसुबोधिन्यां 'अथ ते तदनुज्ञाता' इत्यत्र निरूपितम् । एतच्च ज्ञानं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेर्ब्रह्मात्मकम् । तल्लक्षणं तु 'त्रितयं तत्र यो वेद स ह्यात्मा स्वाश्रयाश्रयः' इति वाक्ये आधिदैविकादित्रिकव्यतिरिक्तत्वे सति तत्त्रितयज्ञातृत्वमिति सिध्यति । स्वाश्रयश्चासौ आश्रयः इति कर्मधारय एवोद्देश्यविधेयभावात्स्वरूपकथनपूर्वकं लक्ष्यनिर्देशः, तच्च भावनयाभिव्यज्यते 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति श्रुतेः । जीवानामपि अत्रैवाभिनिवेशः सजातीयत्वात् । तद्गुणोऽपि चैतन्यं तत्रैव निविशते तदविनाभूतत्वात् 'जीवस्यानुस्मृतिः सती' इत्युत्तरार्धे तत्स्वरूपमुक्तम् । पूर्वापरानुसंधानरूपा स्मृतिश्चैतन्यमिति । व्युच्चरणात्पूर्वमभेदेन, व्युच्चरणोत्तरमविद्यासंबन्धात्प्राक्कालवर्तिनो ज्ञानस्य सोहमिति पूर्वापरानुसंधानरूपस्यैव सिद्धत्वात् तत्त्वमस्याद्युपदेशोत्तरमपि तथैव प्रतिसंधानादजपायामपि तथात्वात्तादृशत्वनिश्चयः । अयमेव स्वरूपलाभो विद्यया संपाद्यः विस्मृतकण्ठमणिन्यायात् । तथापि नित्यम् । 'सत्त्वशुद्धौ ध्रुवा स्मृतिः' इति श्रुतेः । पूर्वोक्तमेव ज्ञानं धर्मात्मकप्रकाशरूपेणाविर्भवद् भगवद्गुणतां श्रयति सूर्यप्रकाशवत् । तदनित्यमपि 'तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात्' 'युक्तं भगैः स्वैरितरत्र चाध्रुवैः' इत्यादिवाक्येभ्यः । चैतन्यमप्यत्रैव वा निविशते इति द्वितीयं, तृतीयं तु वेदशरीरं दधद्भवति ।

'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥'

इत्येकादशस्कन्धात् सृष्ट्यै भगवन्मनोमयादिसरण्या दधाति, तथाहि ब्रह्मणो हृदयाकाशे स्वयं ब्रह्म आसन्येन करणतामापन्नेन नादरूपं दधदाविर्भवति, तदुक्तं घोषेण गुहां प्रविष्टः इत्यन्तेन । स पूर्वमव्यक्त एव ततो नानावर्णादिसंकल्पकमनोमयं सूक्ष्मरूपमुपेत्य ब्रह्ममुखतः प्रकटः सन्मात्रास्वरवर्णात्मना स्थूलरूपेण शब्दब्रह्मात्मकवेदरूपश्चकास्ति । स च नादोऽस्मदादिष्वपि प्राणघोषरूपेण वर्तते व्यापकत्वात्, श्रावणस्तदनुभवस्तु श्रोत्रवृत्तिनिरोधसंपाद्यो भगवतैव कृत्वा जीवेन । नान्यः प्रकारः श्रावणे जीवानुभवे । जीवानुभवस्तु भगवतेति निरुद्धद्वारनिष्ठजीवो न कार्यं करोतीति । अयमेव नादः स्फोट इत्युच्यते स्फुटति वागनेनेति व्युत्पत्तेः । तदुक्तम्—

---

१. अनुभवजन्यत्वेऽपि ।

रश्मिः ।

'समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः । हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥
शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक्। येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥
स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्' ॥ इति ।

तेन स्फुटत्यर्थोऽनेन इति स्फोट इति वैयाकरणोक्तं प्रत्युक्तम्। नैयायिकास्तु स्फोटं नाद्रियन्ते। तथा हि। घट इत्युक्ते घकाराकारटकाराकारविसर्जनीयैरर्थप्रत्ययाभावाद्वर्णानां क्रमिकत्वेन पदवाक्यरूपवर्णसमुदायाभावेन ततोऽप्यर्थाप्रत्ययात्पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतान्तिमवर्णादप्यनेकादृष्टसंस्कारकल्पनागौरवप्रस्तादर्थप्रत्ययाभावाद्वर्णाभिव्यङ्ग्योऽतिरिक्तः स्फोटाख्यः शब्दार्थं प्रत्याययति । एवं पदस्फोटो वाक्यस्फोटश्च । इति प्राञ्चो वैयाकरणाः । आधुनिकास्तु स एवायं घकार इति प्रत्यभिज्ञाबलाद्वर्णरूपः स्फोटः तथा पदवाक्यस्फोटावपि । न चेयमेकार्थबोधकत्वमवलम्ब्यत इति शङ्क्यम्। जलाहरणादिरूपैकार्थजनकत्वस्य सोऽयं घट इत्यादौ शक्यवचनत्वादिति मन्यन्ते तन्न, तादृशसहकारिसंपन्नोऽन्तिमवर्ण एव वाचक इति स्फोटकल्पनायामपि गौरवतौल्याच्च । अपि च वर्णव्यङ्ग्यो यत्किंचिद्वर्णव्यङ्ग्यो वा तावद्वर्णाभिव्यक्तिव्यङ्ग्यो वा नेमौ। क्रमिकाणामाशुविनाशिनां यौगपद्यासंभवात् घकारमात्रोच्चारणे पदस्फोटप्रत्ययेऽर्थप्रत्ययापत्तिवर्णान्तरवैकल्याभ्यां तदसंभवाच्च । अथ पूर्ववर्णसंस्कारसहितचरमवर्णोपलम्भः तद्व्यञ्जक इति उच्यते तर्हि स एवार्थप्रत्यायकोऽस्तु कृतं स्फोटेन। न च पदप्रतीतिः स्फोटसाधिका तावद्वर्णगोचरप्रत्ययाभावेपि तावद्वर्णगोचरसंस्कारात्समूहालम्बनतावद्वर्णगोचरस्मरणसंभवात्क्रमविशेषवत्तावद्वर्णगोचरत्वेन स्फोटासाधकत्वात्। नहि वर्णमात्रं पदं सरोरसयोः नदीदीनयोः अविशेषापत्तेः। किंतु आनुपूर्वीविशेषविशिष्टतावद्वर्णरूपम्। नचाप्रत्ययः घोत्तरं शृणोमीति प्रत्ययात् घोत्तरत्वं हि टस्यानुपूर्वीति। ततः सृष्टिश्च 'शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्' इति सूत्रभाष्ये स्फुटिष्यति। तादृशशरीरयुक्तमपि रूपं 'अनन्ता वै वेदाः' इति तैत्तिरीयब्राह्मणश्रुत्या अनन्तं विराडिव । तुरीयं तु इदमेव शरीरविशिष्टं भगवदाश्रितमेव पाश्चात्त्यां विश्लिष्टशक्तिमापद्य व्यष्ट्य इव विकृतास्तत्रासकरवालेत्यादिरूपाः सर्वे शब्दा भवन्त्यादिसृष्टौ । तथा हि पूर्वोक्तो नादः सुषुम्णामार्गेण आधारहृत्कण्ठमुखेषु संचरन् परापश्यन्तीमध्यमावैखरीरूपेणाविर्भवतीति । एतत्प्रामाण्योपपादनावसरे स्फुटमुपपाद्यम् । एतच्चतुर्विधं नित्यम् । ततः तादृशवेदविकृतशब्दात्मकद्विविधशरीरविशिष्टमेव तल्लोके प्रकटीभवितुं समवायित्वेन प्रमातारं निमित्तत्वेन प्रमेयं चाश्रयते । न च प्रमाणविरहः शङ्कनीयः । पश्यन्त्याख्यशब्दावस्थापोषकश्रुतिसद्भावात् । 'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति' इति श्रुतिः । आधारनाभिहृदयवदनरूपाणि चत्वारि पदानि स्थानानि । तत्र परापश्यन्तीमध्यमावैखरीरूपाश्चतस्रः शब्दावस्थास्तासु त्रीणि परापश्यन्तीमध्यमाख्यानि गुहायां निहितानि । अतः नेङ्गयन्ति न जानन्ति, तुरीयं वैखर्याख्यं अत एव केषांचित् ।

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते' ॥ इति ।

प्रमेयाश्रयत्वं तु ज्ञानस्य शब्दानुविद्धत्वाच्छब्दस्य च नित्यमर्थसंबद्धत्वाच्छब्दविशिष्टस्यैव,

नचार्थवादानां धर्म इव ब्रह्मण्युपयोगः कर्तुं शक्यः। उत्पत्तिप्रकारफल-

---

भाष्यप्रकाशः।

कोपयोग इत्यत आहुः नचेत्यादि। स्यात् स्वार्थे अप्रामाण्यं, यदि कर्मणीव ब्रह्मण्युपयुज्येरन्। कर्मणि हि त्रेधा तेषामुपयोगः। यथा, असावादित्यो न व्यरोचतेत्यादीनां सौर्याद्युत्पत्तौ।

रश्मिः।

तादृशानुव्यवसायाकारात्। परमत्र शब्दोऽर्थश्च न्यग्भूतो भासते, पूर्वत्र तु ज्ञानं न्यग्भूतमिति विशेषः। न च अनेडमूकीयज्ञानस्य शब्दावैशिष्ट्यमिति शङ्क्यम्। अभिनयस्यैव तत्र शब्दस्थानापन्नत्वेन शब्दविशेषमनुसंधायैव बोधकेनाभिनयदर्शनात्परंपरया तस्यापि शब्दवैशिष्ट्यात्। इदं पञ्चमम्। प्रमातरि तु अन्तःकरणेन्द्रियाश्रयणात्पञ्चधा तत्रेन्द्रियेष्वेकधा, अन्तःकरणे चतुर्धा। मनसा जायमानं संशय इति व्यवह्रियते। संकल्पविकल्पात्मकत्वात्तस्य। अत एव शङ्कापिशाच्या उत्तरोत्तरं भिन्नभिन्नविरुद्धकोटिविधायिन्या अनिवृत्तिः। कथं तर्हि आत्मानं गृह्णाति इति चेद्दौरात्म्यनिवृत्तौ प्रमास्यति। अहंकारेण कृता शरीराभिमतिस्तु बुद्ध्याश्रया। विपर्यासनिश्चयस्मृतीनां बुद्धिवृत्तित्वाद्बुद्ध्याश्रयत्वम्। यदा तु शरीराभिमतिर्मोक्षशास्त्रीयसाधनैर्नाशमेति तदा तन्मूलास्तेऽपि नश्यन्ति। ज्योतिर्ब्राह्मणे आत्मज्योतिष्ट्वमुपक्रम्य स समानः सन् इति अहंकारसमानत्वेन सधियः स्वप्नात्मकबुद्ध्यवभासकतया स्वप्नात्मकत्वादहंकारो बुद्ध्या सहितः स्वापं पश्यतीति स्वप्नज्ञानमहंकाराश्रयम्। चित्तं तु सुषुप्तावात्मानं पश्यत्यैक्येन अन्यदा तु लीनमिति निर्विषयं ज्ञानं चित्ताश्रयमेवं दशधा। तदिदं षड्विधं जन्यमन्तःकरणधर्मः 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति श्रुतेः। स्थिरं च घटादिवत् न च त्रिक्षणावस्थायित्वम्। 'प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते,' 'स्थिरबुद्धिरसंमूढः,' 'ज्ञानं यथा न नश्येत' इत्यादिवाक्येभ्यः। न चैकज्ञानं सार्वदिकं स्यादिति शङ्क्यं, विषयान्तरज्ञानसामग्र्या जातेन ज्ञानेन तद्बाधात्। नचैवमस्थिरत्वं शङ्क्यं, संस्काराख्यसूक्ष्मरूपेणावस्थानोपगमात्। न चैवमनुव्यवसायापत्तिस्तस्येति वाच्यम्। व्याप्तस्यापि गन्धस्य घ्राणेन ग्रह एव स्फुरणवन्मनसा तस्य ग्रहण एव स्फुरणात्। न च गन्धस्यागन्तुकत्वेन दृष्टान्तासाम्यमिति वाच्यं, रजसा व्यापारान्तरावेशेनोपपत्तेः। तमसा तदावरणाच्च तथा। न चैवं स्मृत्यजनकस्याप्यनुभवस्य स्थिरत्वापत्तिः। इन्द्रियैर्बुद्धिजननोत्तरं पौनःपुन्याद्यभावेन अदार्ढ्यात्, ज्ञानस्य तु लोकशास्त्राहितात्सिद्धिः। न चाधिष्ठानानिर्वाच्यता प्रयुक्ता तत्स्थित्यशक्यवचनेति वाच्यम्। अन्तःकरणाधिष्ठानकत्वात्। अनिर्वचनीयत्वस्य निरस्तत्वात्। विरुद्धवृत्तितिरोभाव्यत्वाङ्गीकारान्न तन्नाशानुपपत्तिरिति प्रासङ्गिकं ज्ञेयम्। प्रकृते। **विधिमन्त्रादीति। आदिना ब्राह्मणम्। यथाऽसावित्यादि।** न व्यरोच्यत मेघाद्याच्छन्नोसावादित्यो न विगतदीप्तिमान्जात इति 'सौर्यं चरुं ब्रह्मवर्चसकामो निर्वपेत्' इति सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः इत्यस्योत्पत्तौ सौर्यप्रथमाङ्गस्यैव तज्जनकवाक्यस्योपयोग इत्यर्थः। इदं पूर्वतन्त्रे सप्तमस्य चतुर्थे पादे 'इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम्' इत्यधिकरणे चिन्तितम्। यदि च 'असौ आदित्यो न विशेषेण दीप्तिमान्जातः' इति पक्षोपि विभाव्यते, तदापि स एवार्थः। चरुस्तु दशमे 'चरुर्हविर्विकारः स्यादिज्यासंयोगात्' इत्यधिकरणे ओदनविशेषो न तु स्थाली, 'सौर्यम्' इति देवतासंयोगादिति चिन्तितम्। यच्चोक्ता स्थाली चरुरिति पर्यायतावाचकं निघण्टुवचनं तदपि 'हव्यपाके चरुः पुमान्' इति निघण्ट्वन्तराद-

भेदानामभावात् । प्रकृते तु माहात्म्यज्ञानार्थं तदुपयोगः । तस्य च ज्ञानोपयोगो

भाष्यप्रकाशः ।

यथावाप वै सोमेनेजानादित्यत्राष्टाक्षरा गायत्रीत्यस्याग्नेयपुरोडाशीयेऽष्टाकपालत्वरूपे प्रकारे । यथा च, वायुर्वै क्षेपिष्ठेत्यादीनां भूत्यादिरूपे फले । न तथा ब्रह्मणि । नित्यत्वात् सदैकरसत्वात् स्वस्यैव फलत्वाच्च । अस्ति तु माहात्म्यज्ञानार्थमुपयोगः । माहात्म्यं च सदेव ज्ञातं फलाय, न त्वसत् । असत्त्वे तदधिष्ठानस्यासमर्थतायां ततः फलाभावप्रसङ्गात् । तदाहुः तस्य चेत्यादि । माहात्म्यज्ञानेन भक्तिद्वारा साक्षात्कारोपयोग इति फलाध्याये प्रथमपादे, 'आदित्यादिमतयः' इतिसूत्रे वक्ष्यत इत्यर्थः । नन्वस्तु ब्रह्मणि माहात्म्यज्ञानार्थं सृष्ट्यादिवाक्योपयोगस्तथापि तेषां विध्युपयोगोवश्यं वक्तव्यः । नोचेदुपासनादिविधीनां प्ररोचनाभावेन व्यापारकौण्ठ्ये वाक्यवैयर्थ्यापत्तेः । एवं सिद्धे तेषां विधिशेषत्वे तेषु निरूप्यमाणं ब्रह्मापि तच्छेषमेवेत्युत्तरकाण्डस्य न तत्प्रतिपादकत्वम् ।

रश्मिः ।

विरुद्धम् । **यथावापेति** । एवं श्रूयते 'आग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन्यदष्टाकपालो भवति अष्टाक्षरा गायत्री' इति । अन्यत्र च 'आप वै सोमेनेजानाद् देवताश्च यज्ञश्च क्रामन्त्याऽग्नेयं पञ्चकपालमुदवसानीयं निर्वपेत् अग्निः सर्वा देवताः' इति, तथापि अप वा इत्याद्यष्टाक्षरेषु गायत्रीत्वकल्पना । यथा यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति इत्यत्र अष्टत्वादिसंख्यासामान्यात्पुरोडाशानां गायत्रीत्वकल्पना । प्रथमस्य चतुर्थे 'पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नायः' इत्यधिकरणेऽस्ति यतोऽष्टाक्षराण्यतोऽष्टाक्षरा गायत्री अतोऽष्टाकपालमिति संख्यातात्पर्यकथनेनोपयोग इत्यर्थः । **यथा च वायुरित्यादि** । प्रथमस्य द्वितीयपादे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' इत्यधिकरणे 'वायुर्वै क्षेपिष्ठा' इत्यस्य 'वायव्यं श्वेतमालभेत भूतिकामः' इत्युपयोग इति चिन्तितम् । अत्र प्रथमोर्थवादो निन्दारूपेण विधिशेषभूतः प्राशस्त्येन वा विधिशेषभूतः । द्वौ प्राशस्त्येनैव विधिशेषभूतौ तथा नार्थवादलक्षणं 'प्राशस्त्यनिन्दान्यतररूपेण विधिशेषभूतं वाक्यमर्थवादः' इति मीमांसार्थप्रदीपे । **न तथा ब्रह्मणीति** । त्रेधा तेषामुपयोग इत्यन्वयः । अत्र हेतूनाहुर्नित्यत्वादिति । प्रथमज्ञप्तिष्वपि सत्यमित्यादिवाक्येनोत्पत्तिवाक्यत्वम् । प्रथमज्ञप्तेः साध्यविषयिण्या विवक्षितत्वात् उत्पत्तिपदस्वारस्यात् । अत उक्तं **नित्यत्वादिति** । **सदैकरसत्वात्प्रकाराभावः, स्वस्यैव फलत्वाच्च** फलान्तराभावः । अतो न धर्म इव उपयोग इत्यर्थः । तदानीं कथमुपयोगो ब्रह्मणि इत्यपेक्षायां **प्रकृते त्वित्यादि** भाष्यं विवृण्वति **अस्ति त्विति** । तत्त्वमस्यादिवाक्योक्तमैक्यमपि माहात्म्यमिति न पृथगुक्तम् । **तस्य चेत्यादि** भाष्यमवतारयन्ति **माहात्म्यं चेति** । **असमर्थतायामिति** निर्गुणत्वेन फलदातृत्वरूपगुणस्याप्यभावेनासमर्थतायामित्यर्थः । **तत इति** फलदातृत्वशून्यादित्यर्थः । **भक्तिद्वारेति** इदं च तत्रैवोपपादयिष्यते । **प्ररोचनाभावेनेति** अर्थवादाभावेन । यः स्तूयते स विधीयते इति नियमप्रवृत्त्यभावाद्विधिरूपव्यापारस्य छान्दसत्वेनान्यनिष्ठत्वरूपे कौण्ठ्ये इत्यर्थः । **वाक्येत्यादि** उपासनादिविधिवाक्यस्य निष्फलत्वरूपवैयर्थ्यापत्तेरित्यर्थः । **तच्छेषमिति** उपासनाविधिशेषमित्यर्थः । **नेति** ब्रह्मणं उपासनायाः सकाशान्मुख्यत्वेऽनधिगतार्थगन्तृत्वाभावेनाप्रामाण्यापत्त्या नेत्यर्थः ।

यथा तथा वक्ष्यते चतुर्थे । उपासनादर्शनादिपदानां मनोव्यापारत्वमेव । विचारस्यापि यथा ज्ञानोपयोगित्वं, तथाग्रे वक्ष्यते ।

किंचौपनिषदज्ञानस्यापि कर्मोपयोगित्वम् । 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवति'इति। अत एव ब्रह्मविदामेव जनकादीनां

भाष्यप्रकाशः ।

ततश्च सिद्धावुत्तरमीमांसाया गतार्थत्वानुपयोगावित्याकाङ्क्षायामाहुः उपासनेत्यादि । अस्त्वेवम् । तथापि विधेयानामुपासनाज्ञानादीनां मनोव्यापाररूपतया सविषयत्वेन विषयाधीनत्वात् तद्विषयस्य ब्रह्मणो न मुख्यत्वं हीयते । अहीयमाने च तस्मिन्नितरप्रमाणागोचरस्य तस्य ज्ञानायोत्तरकाण्डविचारस्यावश्यकत्वाच्च तन्मीमांसाया गतार्थत्वानुपयोगावित्यर्थः । ननु तथापि ब्रह्मण आसंसारं प्रसिद्धानुभावत्वात् तज्ज्ञाने विचारस्यानुपयोगाद् वैयर्थ्यमस्य शास्त्रस्यानिवार्यमित्यत आहुः विचारस्येत्यादि । अग्रे वक्ष्यत इति तृतीयस्य द्वितीयपादे, उभयव्यपदेशाद्यधिकरणेषु वक्ष्यते ।

उपासनाद्यर्थमेव न ब्रह्म जिज्ञास्यं, किंतु पूर्वकाण्डोक्तेपि कर्मणि मुख्यफलाद्यर्थं तदवश्यं जिज्ञास्यमिति, नास्यागतार्थत्वानुपयोगावित्याहुः किंचौपनिषदेत्यादि । निगदव्याख्यातमेतत् । तथाच त्रैवर्णिकाधिकारपक्षो दोषरहित इत्यर्थः ।

रश्मिः ।

गतार्थत्वानुपयोगाविति जैमिनीयचतुर्लक्षण्यास्तथेत्यर्थः । अस्ति ससग्रहाणां ब्रह्मत्वोपपादिका जैमिनीयचतुर्लक्षणी वैयासिकी वा । अस्त्वेवमित्यादि भाष्ये पदशब्दो व्यवसितौ 'पदं व्यवसितत्राण' इत्यमरात् । तथा च उपासनादर्शनादिनिश्चितानां 'आत्मेत्येवोपासीत,' 'आत्मा वा अरे द्रष्टव्यः,' 'य एवं वेद' इत्यादि श्रुतिनिश्चितोपासनादर्शनज्ञानानामिति यावत् । इत्येवं भाष्यार्थं मत्वाहुः विधेयानामिति। निश्चयेन विधेयानां न तु उप समीपे स्थित्वा यथायोग्यकरणरूपायास्तस्या अविहितत्वमपीति । मन इति 'कामः संकल्पः' इत्यारभ्य 'सर्वं मन एव' इति श्रुतेः । न च धियो व्यापारत्वं श्रुत्या सिद्ध्यति न तु उपासनायाः उप समीपे स्थित्वा यथायोग्यकरणरूपाया इति वाच्यं, धीवत् तस्या अपि व्यापारसापेक्षत्वात् । इतरप्रमाणागोचरस्येति । 'मनसैवानुद्रष्टव्यम्' इति श्रुतेस्तथेत्यर्थः । अनुमानाद्यगोचरस्येति वा। ज्ञानायेति । शेषितया शाब्दज्ञानायेत्यर्थः । वक्ष्यत इति विरुद्धधर्माश्रयत्वस्य आसंसारमप्रसिद्धस्य स्थापनं वक्ष्यत इति । तदर्थं इदं शास्त्रं इति वैयर्थ्यं निवार्यमित्यर्थः । मुख्यफलाद्यर्थमिति 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति श्रुतमक्षय्यं ब्रह्मलोकाख्यं फलं तदाद्यर्थमित्यर्थः । ज्ञानद्वारेति ज्ञेयम् । एतदक्षरधियामित्यधिकरणे वक्ष्यते । तेन न फलव्यभिचारो भक्तेः । एतेन अन्योन्याश्रयोपि नेति ज्ञापितम् । अनुष्ठाने तु श्रुतिभ्यामन्योन्याश्रयो वर्तत एव प्रमितावुक्तान्योन्याश्रयपरिहारोत्राप्यारोप्यः' ब्रह्मजिज्ञासया धर्मजिज्ञासा नाश्रीयत इति धर्मविचारानन्तर्यस्य प्राक्खण्डनात् । निगदेत्यादि । निगदेन व्यक्तरवेण 'यदेव विद्यया' इत्यादिना भाष्ये व्याख्यातम् । किंचौपनिषदज्ञानस्यापि कर्मोपयोगित्वमित्येतदित्यर्थः । तथा चेति । उभयोर्मीमांसयोरेवंविधैकशास्त्र्ये चेत्यर्थः । दोषरहित इति । कर्माधिकृताधिकारित्वादुत्तरमीमांसायां चतुरोपि वर्णाननधिकुर्यादिति दोषरहित इत्यर्थः ।

---

१. व्यक्तरवेण पाठमात्रेण ।

कर्मणि सर्वदेवसान्निध्यम् । अन्यथा आभासत्वमेव । नच ब्रह्मरूपात्मविज्ञाने देहाद्यध्यासाभावेन कर्तृत्वाभावात् कर्मानधिकार इति वाच्यम् । निरध्यस्तैरेव देहादिभिः कर्मकरणसंभवात् । अत एव जीवन्मुक्तानां सर्वे व्यापाराः । तथाच स्मृतिः ।

'नैव किंचित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' ॥ इति ।

अतो ब्रह्मविदामेव कृतं कर्म शुभफलं भवति । अतो धर्मविचारकाणामपि ब्रह्म जिज्ञास्यमेव । तस्मान्न गतार्थत्वानुपयोगौ ।

ननु फलप्रेप्सुरधिकारी । फलं च विचारस्य शाब्दं ज्ञानं, तस्य मननादिद्वारानुभवः, तस्य चानर्थनिवृत्तिपूर्वकपरमानन्दावाप्तिः । तथाच विरक्तोऽनर्थजिहासुः परप्रेप्सुश्चाधिकारी कस्मान्न भवति ।

'शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि ।
श्रमस्तस्य फलं मन्ये ह्यधेनुमिव रक्षतः' ॥

भाष्यप्रकाशः ।

एवं त्रैवर्णिकाधिकारपक्षे स्थिरीकृते आनन्तर्यवादी पुनः शङ्कते नन्वित्यादि । सिद्धान्ते ज्ञानविधिनार्थज्ञानप्राप्तेस्तत्र कैमर्थ्याकाङ्क्षायामुक्तप्रणाड्या, 'ब्रह्मविदाप्नोति परम्' इतिश्रुत्युक्तपरप्राप्तिरूपफलार्थमिति वक्तव्यम् । अन्यथा प्रवृत्तिविघातापत्तेः । तत्कथने च सिद्धमस्मदुक्तेनाधिकारिणा । तदेतदुक्तं कस्मान्न भवतीति । अथ वक्तव्यं, सूत्रे ब्रह्मजिज्ञासापदात् तज्ज्ञानस्यैव फलत्वं लभ्यत इति प्रणाडीसिद्धफलपर्यन्तता किमर्थमङ्गीकार्येति । तथा सति श्रीभागवतोक्तकेवलार्थविन्निन्दाशास्त्रविरोधापत्तिः । अतस्तदभावायोक्तफलपर्यन्तताऽवश्यमभ्युपेया । ततश्च सिद्धमुक्तेनाधि-

रश्मिः ।

भाष्ये सर्वदेवसान्निध्यमिति एतच्च श्रीभागवते स्फुटम् । अन्यथेति ब्रह्मवित्त्वाभावे इत्यर्थः । तथैवानुभवादेवकारः । देहाद्यध्यासाभावेनेति देहेन्द्रियादित आत्मनोऽविवेकाभावेनेत्यर्थः । तत्त्वविदिति जीवप्रत्यक्षज्ञानवानित्यर्थः । धर्मविचारकाणामिति मुख्यफलप्रेप्सूनामित्यर्थः । विशेषणमिदं न त्वर्थः । प्रकृते । आनन्तर्येति । आनन्तर्यवादी व्यवहारे भाट्टः । ननु फलप्रेप्सुरित्यादि युष्मदुपपादितं तथा चैवंविधे सिद्धान्ते कस्माद्विरक्तोनर्थजिहासुः परप्रेप्सुरधिकारी न भवतीति योजनां मन्वाना आहुः सिद्धान्त इत्यादि । कैमर्थ्याकाङ्क्षायामिति । कोर्थः प्रयोजनं यस्येति किमर्थस्तस्य भावः कैमर्थ्यं तस्याकाङ्क्षायामित्यर्थः । वक्तव्यमिति सर्वात्मभावेन भजनानन्दोपि वक्तव्यः । अन्यथेति फलाभावे इत्यर्थः । तत्कथने इति फलकथने इत्यर्थः । अस्मदुक्तेनेति वैराग्यशमदमादिमतेत्यर्थः । शब्दब्रह्मणीति भाष्यमवतारयन्ति अथ वक्तव्यमित्यादिना । श्रीभागवत इत्यादि । श्रीभागवतोक्तं यत्केवलार्थविषयकशाब्दज्ञानवतो निन्दाशास्त्रं

इति भगवद्वचनात् केवलस्य निन्दाश्रवणादिति चेत् । न । फलकामनाया अनुपयोगात् । अन्येनैव तत्समर्पणात् । नित्यत्वादप्यर्थज्ञानस्य न फलप्रेप्सुरधिकारी । निन्दार्थवादस्तु मननादिविधिशेष इति मन्तव्यम् ।

भाष्यप्रकाशः ।

कारिणेत्यनङ्गीक्रियमाणोऽपि वैराग्याद्यानन्तर्यपक्षोऽधिकारिबलादापतित इत्यर्थः ।

•अत्र समादधते नेत्यादि । विचाराधिकारत्वेन फलकामना तदोपयुज्येत, यदि ब्रह्म जिज्ञासापदात् प्राप्येत । तत्तु न । अनन्यलभ्यस्य शब्दार्थत्वात् । अतस्त्रैवर्णिकोऽर्थजिज्ञासुरेवाधिकारी । फलकामना तु, ब्रह्मविदाप्नोति परमित्यादिवाक्यार्थे ज्ञात उत्पद्यत इति तेन समर्पिता । फलं चार्थज्ञानस्य नैकम् । भार्गव्यां विद्यायामन्यत्र च, य एवं वेद प्रतितिष्ठतीत्यादिफलान्तराणामपि श्रावणात् । ततश्च भवदभिमताधिकार्यङ्गीकारेऽन्येषामनधिकारेण विचारे प्रवृत्तौ विहितायां तच्छास्त्रमेव व्यर्थं स्यात् । अतस्तदभावायार्थजिज्ञासोरेवाधिकारित्वं वक्तव्यम् । अर्थज्ञानं च नित्यम् । 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्' इत्यादिष्वनर्थज्ञनिन्दाश्रवणात् । अतोऽर्थज्ञानस्य नित्यत्वं ज्ञात्वा यो जिज्ञासति स एव मुख्योऽधिकारी । नच निन्दार्थवादविरोधः । तस्य मननविधिशेषत्वात् । शब्दब्रह्मणि निष्णातकथनोत्तरं तत्कथनेन तथार्थस्य लाभात् । विचारं विना

रश्मिः ।

शब्दब्रह्मणीत्यादि तस्य विरोधापत्तिरित्यर्थः । निष्णातोऽर्थविषयकशाब्दज्ञानवान्परं साधनैर्न निशामयेत् । अधेनुमप्रसूतिं गां रक्षतः श्रम इवेति वाक्यविषमपदार्थः । अत इति जिज्ञासापदादित्यर्थः । एवेति 'तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्' इति वाक्यादेवकारः । अन्येनैवेत्यादि भाष्यं विवृण्वन्ति फलकामनेत्यादि । ज्ञात उत्पद्यत इति फलकामनाया फलेच्छारूपत्वेन जानाति इच्छति यतते इति ज्ञाते उत्पद्यते । एवकारसाफल्याद्युक्तिमप्याहुः फलं चेत्यादि । फलान्तराणामिति । प्रतिष्ठाऽन्नवत्त्वान्नादत्वादीनामित्यर्थः । अन्येषामिति परप्रेप्सोरतिरिक्तानां प्रतिष्ठादिप्रेप्सूनामित्यर्थः । तच्छास्त्रमिति । 'य एवं वेद प्रतितिष्ठति' इत्यादि फलान्तरनिरूपकं शास्त्रमित्यर्थः । युक्तिस्तु यदि अर्थजिज्ञासुरधिकारी स्यात् फलान्तरनिरूपकं शास्त्रं व्यर्थं स्यादिति । नित्यत्वादित्यादि भाष्यं विवृण्वन्ति अर्थज्ञानं च नित्यमित्यादि । निन्दार्थवाद इति भाष्यं विवृण्वन्ति न च निन्दार्थवादेत्यादि । तस्य मननेत्यादि तस्य निन्दार्थवादस्य । 'नहि निन्दा निन्द्यं निन्दितुं प्रवर्तते अपि तु विधेयं स्तोतुम्' इति न्यायेन परं मन्वीत इत्याक्षिप्तस्य विधेः शेषत्वात् । तथा च अर्थज्ञानवतः पराद्रष्टुः श्रमः श्रमफल इति परं द्रष्टुं मन्वीतेति । यथा 'प्रातः प्रातरनृतं वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्' इत्यस्यानुदितहोमनिन्दार्थवादस्योदितहोमस्तावकत्वं तद्वत् । ननु शब्दब्रह्मपाठी तदर्थज्ञानवान्न भवेत्तदा दोष इति वदत्कथं परे व्याप्नोतीति चेत्तत्राहुः शब्दब्रह्मणीत्यादि । तथार्थस्येति उक्तार्थस्येत्यर्थः । तथा च निष्णातपदमहिम्ना परे व्याप्नोतीति भावः । नन्वेतर्ह्यपि दर्शनविधिशेषत्वमस्तु तत्राहुः विचारमिति । तथा चावश्यकत्वान् मननविधिशेषत्वमित्यर्थः । अथवा 'आत्मा वा अरे' इति श्रुत्युक्तमननविधिशेषत्वादित्यर्थः । विधिशब्देन पूर्वं पूर्वमीमांसायां तव्यो विधौ न त्वावश्यके, आनन्तर्यवादिनो व्यवहारे वयं भाट्टा इति वक्तुत्वात् । भाष्ये तु

---

१. य एवं वेद प्रतितिष्ठतीत्यादिफलान्तरनिरूपकं शास्त्रम् ।

ननु ब्रह्मणो विचारे प्रतिज्ञाते विरोधनिराकरणादीनामप्रतिज्ञातार्थत्वम् । नचावक्तव्यत्वम् । निर्विचिकित्सज्ञानानुदयप्रसङ्गादिति चेत् । न ।

ब्रह्मण इति न कर्मणि षष्ठी, किंतु शेषषष्ठी । तथाच ब्रह्मसंबन्धि

भाष्यप्रकाशः ।

परनिष्णातासंभवादिति । एवमत्राधिकारी प्रयोजनं चोक्तम् ।

अतः परं विषयसंबन्धौ वक्तुमाशङ्कामुखेन मतान्तरमाहुः नन्वित्यादि । ब्रह्मजिज्ञासेत्यत्र, 'कर्तृकर्मणोः कृति' इति विशेषविधानात् कर्मषष्ठ्यङ्गीकार्या यद्यपि, 'प्रतिपदविधाना षष्ठी न समस्यते' इति निषेधाद् ब्रह्मणे जिज्ञासेति चतुर्थीसमासः शङ्क्यते तथापि, 'कृद्योगा च षष्ठी समस्यते' इति प्रतिप्रसवात् समाससिद्धेरत्र कर्मषष्ठ्यां गृहीतायां ब्रह्मविचार एव प्रतिज्ञातो भवति । नच शेषषष्ठी युक्ता । यद्यपि संबन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षतया ब्रह्मणः कर्मतालाभस्तथाप्याक्षेपतः प्राप्त्यपेक्षया आभिधानिकग्रहणस्यैव ज्यायस्त्वात् । तथा सति तद्व्यतिरिक्तानां विरोधनिराकरणादीनां ज्ञानपरिकरतया सिद्धावप्यप्रतिज्ञातार्थत्वम् । प्रतिज्ञा हि साध्यविशिष्टपक्षप्रतिपादकं वाक्यम् । तदत्र प्रथमसूत्रम् । तत्र च ब्रह्मण एव कर्मत्वेन जिज्ञास्यतया प्रतिज्ञानात् तदन्येषां तथात्वाभावात् । नचेष्टापत्तिः कर्तुं शक्या । तथा सति तेषामवचने निर्विचिकित्सब्रह्म-

रश्मिः ।

व्यवहिताव्यवहितसाधारणं शेषत्वं स्वीकृत्य मननादिविधिशेष इत्युक्तमिति भावः । एवमत्रेत्यादि पूर्वोक्तसरण्यात्राधिकरणे ब्रह्मजिज्ञासापदेनाधिकारी प्रयोजनं चोक्तमित्यर्थः । मतान्तरमिति शंकराचार्यरामानुजादिमतमित्यर्थः । चतुर्थीसमास इति धर्माय जिज्ञासा धर्मजिज्ञासा इति वदाशङ्क्यतेत्यर्थः । प्रतिप्रसवादिति कर्तृकर्मणोः कृतीति षष्ठीत्यस्य निषेधस्य कुण्ठितप्रवृत्तेः पुनः प्रवृत्तिजननादित्यर्थः । तथा च शेषे षष्ठी वक्तव्या सापि न संभवतीत्याहुः न च शेष इति । सामान्यतो विशेषो बलीयानिति । तद्व्यतिरिक्तानामिति ब्रह्मव्यतिरिक्तांशं द्वितीयाध्यायार्थम् । विरोधनिराकरणादीनामित्यर्थः । अयमर्थः फलाध्याये परनिरूपणमप्रतिज्ञातं स्यात् । 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तमम्' इत्यक्षरपर्यवसानात्, तथा सति अन्यमतविशेषोपि, इदमिदमित्थतायाः प्रतिपादनं साकारत्वं च निःसंदिग्धं न स्यादतोन्यमततुल्यत्वपरिजिहीर्षुभिराचार्यैः शेषषष्ठ्यादृता । अन्यथा तन्मतदूषणानि वक्ष्यमाणानि व्यर्थानि स्युः । ततश्चाधाराधेयभावो जीवैरक्षरस्योपपाद्योपपादकरूपो विरोधनिराकरणेन प्राप्यप्रापकभावः साधनेनाधाराधेयभावः परेण संभवति । अदृश्यत्वाधिकरणेऽक्षराभिन्नत्वमक्षरे प्रतिष्ठितत्वं वक्ष्यमाणमिति । न चाक्षराभेदमादायापि परविचारस्य प्रतिज्ञातत्वसिद्ध्या शेषषष्ठी अक्षरत्वेन विरोधनिराकरणादीनां दृष्टानां कर्मत्वेपि बाधकाभावान्न युक्तेति शङ्क्यम् । भेदपक्षेऽप्रतिज्ञातत्वापत्तेः वैलक्षण्याच्चागणितानन्दत्वेन । 'नाणुरतच्छ्रुतेः' इति सूत्रात् । अत एव गीतात्रयोदशे ब्रह्मसूत्रपदैश्चेति क्षेत्रमुक्त्वाऽध्यात्मज्ञाननित्यत्वमुक्तम् । अध्यात्मत्वं तु परस्य जीवभाव एव, ब्रह्माण्डस्यापि जीवत्वं 'अग्नेः शिखाया मध्ये परमात्मा व्यवस्थितः । स हरिः सेन्द्रः सोक्षरः परमः स्वराट्' इति श्रुतेः । अतो गीताऽविरोधेन शारीराणुभाष्यस्वमपि । अप्रतिज्ञातार्थत्वं पुनः स्फुटयन्ति प्रतिज्ञा हीत्यादि । न्यायप्रसिद्धमेतत् । यथाह पर्वतो वह्निमानिति प्रतिज्ञेति । तद्धेति साध्यमानमस्यां मीमांसायां ब्रह्मविचारे पक्षेपि कर्तव्यत्वसाधनादत इत्यन्त इति प्रथम-

भाष्यप्रकाशः ।

ज्ञानानुदयेन प्रतिज्ञावैयर्थ्यप्रसङ्गात् । तथाच कर्मषष्ठ्यङ्गीकारे द्वितीयाध्यायादीनामाकस्मिकत्वम् । शेषषष्ठ्यङ्गीकारे व्याकरणविरोधो, ब्रह्मण इतरतौल्याद् गौणत्वापत्तिश्चेत्युभयतःपाशारज्जुरित्यर्थः ।

अत्र समादधते नेत्यादि । कृद्योगे कर्मणिषष्ठ्यनुशासनेऽपि विभक्तीनां विवक्षाधीनत्वात् समासस्य सामर्थ्यमात्रापेक्षितत्वाच्च ब्रह्मणः कर्मत्वे अविवक्षिते कर्मषष्ठ्यभावेन शेषषष्ठ्यामपि सामर्थ्यात्·समाससिद्धेर्व्याकरणविरोधाभावः । सर्वेषां प्रतिज्ञातत्वसिद्ध्या न कस्याप्याकस्मिकत्वम् ।

रश्मिः ।

सूत्रमित्यर्थः । तथा च ब्रह्मजिज्ञासाधिक्रियते इति पदार्थफलकभाष्यम् । अधिकारार्थ एव श्रेयानिति । अवचन इति । प्राप्त इत्यत्र ज्ञेयम् । व्याकरणविरोध इति 'कर्तृकर्मणोः कृति' इति सूत्रविरोध इत्यर्थः । उभयतःपाशारज्जुरिति उभयतो बन्धनरज्जुरश्वादिर्यथा उभयदेशे निवृत्तव्यापारो भवति तथा संपन्नमित्यर्थः । अथवा उभयतः पाशौ बन्धनसाधने ग्रन्थी यस्याः सोभयतःपाशा तादृशी रज्जुर्जलाहरणविशेषादौ प्रसिद्धा क्वचित् । विवक्षाधीनत्वादिति षष्ठ्याहुः कर्मादीनामपि संबन्धमात्रविवक्षायां षष्ठ्येवेति । सामर्थ्यमात्रेत्यादि 'समर्थः पदविधिः' इति सूत्रादित्यर्थः । समासादिवृत्त्यवृत्तित्वेन सामर्थ्यमिह व्यपेक्षा नास्ति अपित्वेकार्थीभावः । स च विशेषणविशेष्यभावावगाह्युपस्थितिजनकत्वं संसृष्टार्थं समर्थमिति भाष्योक्तेरिति शेखरे । पदविधिरिति पदमुद्दिश्य यो विधीयते समासादिः स समर्थ इत्युच्यते तथा च सामर्थ्यमित्यवसेयम् । तद्विग्रहवाक्यार्थाभिधाने शक्तत्वमिदमेव एकार्थीभाव इति व्यवह्रियते, व्यपक्षेति नैयायिकाः, तत्र एतौ अजहत्स्वार्थायां जहत्स्वार्थायां चान्तर्भवतः । पदानि स्वाभिधेयानि न जहति यस्यां साऽजहत्स्वार्था सा चावगतसामर्थ्यानां शब्दानां समासघटकानां शक्तिलक्षणाभ्यां वाक्यार्थबोधाद्भवति । अत्र न समासादौ अन्या शक्तिः क्लृप्तशक्त्यैव निर्वाहात् तत्त्यागापत्तेश्च । इयमेव व्यपेक्षा इति । तच्च मतान्तरमिति महाभाष्यकृत् । 'सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न' इति वार्तिकान् न ऋद्धस्य राजपुरुष इति प्रयोगापत्तिरत्र । एतद्विपरीता तु जहत्स्वार्था । तत्र वृषभयावकादिपदेषु वृषयवादि पदवत् समासघटकपदानां पुनर्बोधकतां विहाय समासे शक्तिः तयैव च राजसंबन्धिपुरुषबोध इति एकार्थीभावः । अन्यथा ऋद्धस्य राजपुरुष इत्यापद्येत । इत्येवंविधसामर्थ्यमात्रापेक्षित्वादित्यर्थः । अविवक्षित इति सर्पिषो जानीते इतिवदविवक्षित इत्यर्थः । कर्मषष्ठ्यभावेनेति । 'यतो वाचो निवर्तन्ते' इति श्रुतेः कारकत्वाभावादपि कर्मषष्ठ्यभावेनेत्यप्यर्थोऽत्र बोद्धव्यः । समाससिद्धेरिति 'कृद्योगा च षष्ठी समस्यते' इत्यत्र शेषे षष्ठ्यपि कृद्योगेति समाससिद्धेः । सर्वेषामिति ननु सर्वेषामित्यत्र निविष्टपुरुषमुख्यत्वेप्यक्षरस्य वेदार्थत्वेन वेदवाचकब्रह्मपदोपादानात्तत्पुरःसरं सर्वेषां प्रतिज्ञातत्वसिद्धेः परस्य पुरुषोत्तमस्य जगद्व्यापारवर्ज्याधिकरणस्यापि विषयस्याप्रतिज्ञातार्थत्वमिति चेन्न । ब्रह्मपदवाच्यवेदाभिधेयत्वस्याक्षर एव तात्पर्यवृत्त्या प्रतिपाद्यत्वस्य परे सत्त्वात् । 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतेः । तथाच ब्रह्मजिज्ञासेत्यस्य प्राचीभिन्ना ब्रह्मसंबन्धिनी जिज्ञासेति बोधः । तथा चोक्तम् ।

'जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ।
भेदः संसर्ग उभयं वेति वाच्यव्यवस्थितेः' । इति भूषणे ।

अर्थस्तु त्रैविध्यं वदत्यत्र भेद इत्यादि । भेदः अन्योन्याभावः । व्यर्थोयं प्रयास इति चेन्न ।

तज्ज्ञानोपयोगि सर्वमेव प्रतिज्ञातं वर्णितव्यम् । न च गौणतापत्तिरजिज्ञास्यत्वं च स्यादिति वाच्यम् । ब्रह्ममात्रे संदेहाभावात् । संदिग्धस्यैव जिज्ञास्यता । गौणत्वं तु शब्दत एव, न त्वर्थतः ।

भाष्यप्रकाशः ।

तर्हि गौणत्वाजिज्ञास्यत्वे त्वापद्येतामित्यत आहुः नचेत्यादि । केन प्रकारेणाजिज्ञास्यत्वमापाद्यते । किं ब्रह्मत्वेन, उत रूपान्तरेण । तत्राद्ये त्वोमिति ब्रूमः । अध्ययनादिदशायां, 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिवाक्यार्थावधारणादेव तत्स्वरूपे सत्तायां च संदेहाभावात् । किंतु यद् वेदे लक्षितं ब्रह्म, तत् किम् । येन वेदे नानापदार्थानां लक्षितत्वेऽप्याम्नायव्याख्यानरूपे भारते विवृतत्वेऽप्येत-

रश्मिः ।

राजपुरुषः सुन्दर इतिवद्राजपुरुषो देवदत्तस्य इति वारणायाभ्युपगमात् । भेदस्य वाच्यत्वे तु तद्विरुद्धोयमप्रयोगः । संबन्धस्यैव सार्वजनीनत्वादाह संसर्ग इति । एतदुभयं वाच्यमस्तु विनिगमनाविरहादस्वामिकेपि राजपुरुष इत्यापत्तेश्चेत्याह उभयं वेति । तथाचाराजकीयभिन्नो राजसंबन्धवांश्चायमिति बोधः । व्यपेक्षावादिनस्तु राजपुरुष इत्यत्र राजसंबन्ध्यभिन्नः पुरुष इति बोधः । राजपदस्य राजसंबन्धिनि लक्षणेत्यभ्युपगमात् । सविशेषणराजपदस्य सविशेषणतत्संबन्धिनि लक्षणोपगमात् । न शोभनराजपुरुष इत्यादौ एकदेशे राज्ञि शोभनान्वयानुपपत्तिः । उक्तं त्विष्टमेव । एवं सति पूर्वतन्त्रीयो निषादस्थपतिं याजयेदित्यत्र लक्षणादोषग्रस्तो न षष्ठीसमासः किंतु कर्मधारय इति सिद्धान्तः संगच्छते इति वदन्ति । तथा च ब्रह्मसंबन्धिनी जिज्ञासेत्येव बोधः । इत्यत आहुरिति इति इदमाशङ्क्य प्रतिविधानमाहुरित्यर्थः । ब्रह्ममात्र इत्यादि भाष्यं विवृण्वन्ति केनेत्यादि । रूपान्तरेणेति वेदलक्षितत्वेन सर्ववेदार्थनिर्वाहकरूपेण सर्वविरुद्धधर्माश्रयत्वेनेत्यर्थः । तत्स्वरूपे सत्तायां चेति सत्यज्ञानानन्दाः स्वरूपभूताः 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुतेः सत्ता । यथा चन्द्रमसि द्वये चित्स्वरूपे आनन्दस्वरूपता, यज्जनकं तत्तद्गुणकमिति वक्ष्यमाणव्याप्तेः । दृष्टान्तत्वात्त्वानन्दगुणकता अत एव साकारता । तथाच श्रुत्यन्तरं 'सत्यं ज्ञानमानन्दं ब्रह्म' इति 'आनन्दरूपममृतं यद्विभाति' इति च । इदानीं शेषषष्ठीपक्षं समर्थयन्तः संदिग्धस्येत्यादि भाष्यं विवृण्वन्त अन्यद्रूपमाहुः किंतु यदित्यादि । यद्वेदे जगत्कर्तृत्वादिना रूपान्तरेण लक्षितं ज्ञापितं ब्रह्म तदजिज्ञास्यमिति वक्तव्यमिति सशेषा योजना । किं स्विति वितर्के । तथा च वेदलक्षितत्वेन रूपान्तरेण तत्राजिज्ञास्यत्वमापादनीयमित्यर्थः । अत्र पृच्छन्ति किमिति तत्किमित्यर्थः । देहलीदीपन्यायेन तदित्यस्योभयान्वयित्वात् । एवमापादनं किंहेतुकमिति प्रश्नः न संभवतीति फलितोर्थः । तत्र हेतुमाहुः येन वेद इत्यादि । येनेत्येतज्जिज्ञासेत्यनेनान्वेति । तथा च वेदे नानापदार्थानामन्नादीनां जगत्कर्तृत्वेन लक्षितत्वेप्याम्नायव्याख्यानरूपे भारते विवृतत्वेपि येन हेतुनैतस्य लक्षितब्रह्मणो जिज्ञासा प्रस्तूयते अतोस्य संदिग्धत्वेन जिज्ञास्यत्वमित्यर्थः । तथा चान्नादि ब्रह्म आनन्दो वा ब्रह्म इत्येवं संदिग्धस्यैव जिज्ञास्यतेति भाष्यार्थः । अथवा प्रकृत्यादिगतं जगत्कर्तृत्वं ब्रह्मगतं वा तत् । अथवा 'क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते' इति हृदयम् । लक्षितजिज्ञासाप्रस्तावस्तु जन्माद्यस्य यत इति सूत्राद् बोध्यः । यदीत्यादि यदि ब्रह्मज्ञानस्य मोक्षसाधनत्वेन हेतुना एतज्जिज्ञासैव प्रस्तूयते इति मन्यते तर्हि कथमन्नादिज्ञानेषु ब्रह्मज्ञानस्यैव मोक्ष-

---

१. चित्स्वरूपे ब्रह्म । २. संदेहाभाव ।

भाष्यप्रकाशः ।

जिज्ञासैव प्रस्तूयते । यदि तज्ज्ञानस्य मोक्षसाधनत्वेन, तर्हि कथं तज्ज्ञानस्यैव तथात्वम् । यदि वेदार्थत्वेन तज्ज्ञानस्य तथात्वं, तदा धर्मविचारेणैव गतार्थता । षोडशलक्षण्या सर्वस्यैव तस्य निर्णीतत्वात् । अत एव न वेदान्तार्थत्वेन । अतः सर्ववेदार्थतानिर्वाहकवक्ष्यमाणरीतिकगुणवत्तया जिज्ञास्यत्वं वक्तव्यम् । ततश्च तादृशगुणवत्त्वेनैतस्य जिज्ञास्यतासिद्धेर्नाजिज्ञास्यत्वम् । नापि गौणत्वापत्तिः । गुणजातस्य ब्रह्मसंबन्धित्वेन जिज्ञास्यतया ब्रह्मणो मुख्यत्वस्यैव सिद्धेः । शब्दतो गौणत्वं

रश्मिः ।

साधनत्वमित्यर्थः । ब्रह्मण एव वेदार्थत्वादुपपन्नमित्याह **यदि वेदार्थत्वेनेत्यादि** । अतस्तज्जिज्ञासैव प्रस्तूयत इति पूर्वेणान्वयः । अथापि नतरां जिज्ञास्यमित्याहुः **तदा धर्मेत्यादि** । **षोडशलक्षण्येति** उक्तार्थमेतत् । **अत एवेति** धर्मविचाराङ्गतया ब्रह्मविचारस्य प्रविष्टत्वादुक्तहेतोरेवेत्यर्थः । सिद्धमाहुरत्र इति । लक्षितजिज्ञासायाः वितर्कासंभवादित्यर्थः । **वक्ष्यमाणरीतिकेति** अग्रिमाधिकरणवक्ष्यमाणरीतिकेत्यर्थः । तथा च यदि कर्मणिषष्ठी परिगृह्यते तदा ब्रह्म यदि प्रसिद्धं, तर्हि जिज्ञासाकर्मतानुपपत्तिः । अप्रसिद्धं चेत्सुतरां तदनुपपत्तिः । नह्यप्रसिद्धमुद्देश्यं भवति । यदि च प्रसिद्धत्वेपि चैतन्यविशिष्टं देहमात्रमात्मेति **प्राकृतलोकायतिकयोः** प्रसिद्धिः । चेतनानीन्द्रियाणि आत्मेति **तदेकदेशिनः** । मन इत्यपि । तथा क्षणिकविज्ञानमात्रमित्यपि, एवं शून्यमित्यपि । देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेति **वैशेषिकाः**, भोक्तैव केवलं न कर्तेति **सांख्याः**, अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तीरिति **योगिनः** । एवंविधप्रतिपन्नात्मविलक्षणस्य जीवस्य स्वरूपभूतात्मनः प्रतिपत्तये विचारात्कर्मताऽविरोधान्नानुपपत्तिरिति विभाव्येत तदापि ब्रह्म नात्ममात्रमिति जिज्ञासाकर्मतानुपपत्तिः पदार्थविरोधश्च । न च 'अयमात्मा ब्रह्म' इति श्रुतेर्न स इति वाच्यमंशत्वेनोपपत्तेः, अतः शेषषष्ठी युक्ता, अन्वयोपपत्तेरिति सूक्ष्मदृशावधेयम् । तेन प्रसिद्धकर्मत्यागेपि न पिण्डमुत्सृज्य करं लेढीति न्यायप्रसरः । **गौणत्वं त्वित्यादि** भाष्यं विवृण्वन्ति **नापीत्यादि** । न च अत्र ब्रह्मसंबन्धिनी जिज्ञासेत्यर्थात् ब्रह्मसंबन्धिसंबन्धिजिज्ञासाभावात्कथं गौणत्वापत्तिरिति वाच्यं, गुणजातस्याशेषस्य ब्रह्मत्वात् । न चैवं कर्मषष्ठीपरिग्रह एव श्रेयानित्यायातीति वाच्यं, ब्रह्मण एव ईप्सिततमत्वप्राप्त्या तच्छक्तीनां भेदपक्षेऽविचार्यतापत्तेः असंभवाच्चेत्युक्तम् । ननूक्तं तेषां ब्रह्मत्वमिति चेत्, न, अंशत्वादुपपत्तेः । ननु 'तद्विजिज्ञासस्व तद्ब्रह्म' इति श्रुत्या ब्रह्मणः कर्मत्वात् कर्मषष्ठीपरिग्रहो ज्यायानिति चेन्न विरोधनिराकरणादीनामप्रतिज्ञातार्थत्वापत्त्या तस्याः श्रुतेरविषयत्वात् । किंतु 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतेर्विषयः । मननस्य पदज्ञानपूर्वकत्वात् 'स्वाध्यायोऽध्येतव्यः' इति पूर्वमीमांसाकारिकासु तदुक्तं पूर्वम् । ननु एवमपि आत्मनः कर्मत्वात्कर्मषष्ठ्यापत्तिरिति चेन्न । जिज्ञासापदस्याकर्मकज्ञानेच्छाप्रकृतिकत्वात् । ज्ञा अवबोधने । ज्ञातुमिच्छा जिज्ञासा इतिभावे घञ् । ननु घटं जानातीति सकर्मकत्वमिति चेन्न । अत्र फलव्यधिकरणव्यापारबोधकत्वादस्तु सकर्मकत्वमत्र तु फलसमानाधिकरणव्यापारबोधकत्वेनाकर्मकत्वात् । न चात्रापि फलव्यधिकरणव्यापारोस्तु इति शङ्क्यम् । जिज्ञासापदस्य विचारे शक्तेः । विचारस्य च युक्तिभिरनुचिन्तनरूपस्य ब्रह्मविषयत्वात् । 'ज्ञानशक्तिक्रियाशक्ती संदिशेते परस्मिंते'

---

१. आदिशब्देनाभोक्तृत्वोपि । २. संबन्धिसंबन्धिनोपि ।

वेदप्रामाण्यं तु प्रतितन्त्रसिद्धत्वान्न विचार्यते ।

भाष्यप्रकाशः ।

तु न स्वरूपमुख्यत्वविघातकम् । पुत्रः पित्रा सहागत इत्यादौ तथादर्शनादिति । नन्वस्त्वेवं, तथापि वेदार्थस्य ब्रह्मणो वेदानुकूलो विचारोऽत्र प्रतिज्ञात इति तदर्थं वेदप्रामाण्यमपि विचारणीयम् । तदत्र कुतो न विचारितम् । यतो न विचारितं, ततो न वेदार्थत्वेन विचार इति पक्षो न युक्त इत्यत आहुः वेदेत्यादि । प्रतितन्त्रसिद्धत्वादिति आस्तिकं तन्त्रमात्रं लक्ष्यीकृत्य सिद्धत्वात् । न हि नास्तिकनिग्रहायाचार्यस्य विचारे प्रवृत्तिः, किंत्वास्तिकशिक्षणाय । ते तु सर्वे वेदप्रामाण्ये निर्विचिकित्सा इति प्रयोजनाभावान्न विचार्यते । तावता न वेदानुकूलविचारत्वहानि-

रश्मिः ।

इति भाष्यकारिकायाः 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेर्ब्रह्मणोऽसंदिग्धत्वात् । अत एव 'जन्माद्यस्य यतः' इत्यधिकरणे क्रियाशक्तिर्निरूपिता । ततश्च ब्रह्मण इति शेषषष्ठी न कर्मणि । 'तद्विजिज्ञासस्व' इतिश्रुतौ जिज्ञासाया विचारार्थकत्वे तच्छब्दात्षष्ठ्या लुक् ब्रह्मणः कर्मत्वाभावात् । किंतु ज्ञानशक्तेः क्रियाशक्तेर्वेदस्य कर्तृत्वम् । यद्वा तद्विजिज्ञासस्व इत्यर्थविषया अन्नादिरूपार्थब्रह्मपरत्वात् सूत्रे वेदान्तशब्दविषये न प्रवर्तत इति । तथादर्शनादिति पित्रेति सहार्थतृतीयान्तशब्दस्य पितृस्वरूपमुख्यत्वविघातत्वकाभावदर्शनादित्यर्थः । न वेदार्थत्वेनेति वेदानुकूलत्वान्न वेदार्थत्वेनेत्यर्थः । न युक्त इति प्रमाणवेदार्थत्वरूपप्रतियोगिज्ञानाभावान्न युक्तः । निर्विचिकित्सा इति । अत्र वदन्ति वैशेषिकाः शाब्दं हि उपनीतं मन्तव्यम् । श्रोत्रमात्रजन्यत्वात् । पदानां चोपनायकत्वात् । अन्वयधीरप्यनुमितिः एते पदार्थास्तात्पर्यविषये मिथःसंसर्गवन्तः आकाङ्क्षादिमत्पदस्मारिततद्योग्यतासत्तिमत्त्वे सति संसर्गापरपदस्मारितत्वाद्वेत्यनुमानात् । घटोस्तीत्यत्र घटोऽस्तित्ववान् तद्योग्यत्वात् पटवदित्यनुमानाद्वा । न चान्वयव्यतिरेकाभ्यां शब्दस्य कारणतेति वाच्यम् । हेतुशरीरघटकत्वेन हेतुत्वेन वान्वयव्यतिरेकानुविधानोपपत्तेस्तस्यातिरिक्तकारणताग्राहकत्वाभावात् । तस्मान्न शब्दः पृथग्मानं, अतो वेदस्योपनायकतामात्रमिति । अत्र नैयायिकास्तिष्ठन्ते, स्वाशयं प्रकाशयन्तीत्यर्थः । 'प्रकाशनस्थेयाख्ययोश्च' इति सूत्रेणात्मनेपदम् । बाधकप्रमाणाभावो योग्यता सा च न लिङ्गविशेषणम् । प्रमामात्रविरहस्य सर्वत्र निश्चेतुमशक्यत्वात् । तत्संशयेपि शब्दादन्वयबोधाच्च । शब्दप्रामाण्ये योग्यतायाः संशयसाधारणं ज्ञानं प्रयोजकमिति शब्दप्रमाणमिति । किंचाकाङ्क्षाया हेतुशरीरनिविष्टायाः अन्वयबोधानुकूलानुपूर्वीपर्यवसायिन्या न भूतपूर्वत्वमतो न तद्घटितो हेतुः । नहि मिथःसंसर्गाज्ञातुर्देवदत्तो ग्रामं गच्छतीति वाक्यस्यान्वयबोधानुकूलायाः ग्रामं गच्छति देवदत्त इत्येवं विधानुपूर्व्या ज्ञानमस्ति, तथायोग्यत्वहेतुकानुमानेपि अज्ञातस्य तस्यानुपयोगात्, स्वरूपसत्ताया अकारणत्वेन हेतुतायास्तज्ज्ञाने पर्यवसानात्तज्ज्ञानं लिङ्गमिति वाच्यं, तत्तु बाधाभावनिश्चयमात्रं जनयित्वा कृतार्थमिति न हेतुतां निर्वोढुमलम् । अपि च अस्तित्वव्याप्ययोग्यतावान् गौरित्यनुमानस्यान्वयबुद्धित्वे घटः कर्मत्वमित्यादिस्थलीयस्य घटः कर्मत्वमानयनं कृतिस्तद्व्याप्ययोग्यत्ववान् युष्मदर्थः इत्यनुमानस्यापि शाब्द-

---

१. [illegible] ।

बुद्धित्वापातः। किंच। योग्यतायाः संशयविषयिण्याः अप्यन्वयबुद्धिविघटकत्वाभावदर्शनादनुमितिविघटकत्वदर्शनाच्च वैलक्षण्याहितो भेदः। तेनान्यान्येप्याकाङ्क्षाघटितलिङ्गकानि गौरस्तित्ववान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितत्वात् घटवत्। गौरिति पदं अस्तिमद्गोज्ञानपूर्वकं अस्तिपदसाकाङ्क्षगोपदत्वात् यन्नैवं तन्नैवमाकाशवत्। लौकिकानि पदानि वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वात् घटमानयेति पदकदम्बवत्। इतीमान्यनुमानानि प्रयुक्तानि। किंच व्याप्तिज्ञप्तिविधुरेणापि शाब्दबोधोनुभूयते इत्यविवादं नापि तत्र व्याप्तिज्ञप्तेः कल्पनं शब्दश्रवणानन्तरं द्रागेव बोधात्। सर्वेषु शाब्देषु व्याप्तिज्ञानकल्पनमिव यावदनुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोधस्यापि सुकरकल्पनत्वाच्च। अस्तु तर्हि श्रावणप्रत्यक्षता। मैवम्। हेतुसंस्कारयोरपि साकाङ्क्षपदवत् उपनायकतायाः शक्यवचनत्वेन तदुपस्थापितस्याप्युपनयमर्यादया भानापत्तेः। न चेष्टापत्तिः आकाङ्क्षादिमत्पदस्मारितत्वादिरूपाद्धेतोः पदजन्यसंस्काराद्वा प्रत्येमीत्यापत्तेः। भवति तु शब्दात् प्रत्येमीत्याद्यनुव्यवसायः। ननु तत्तदर्थविषयकशाब्दबुद्ध्यनुव्यवसायं प्रति शाब्दबुद्धेस्तावत् तत्तदर्थकसाकाङ्क्षपदजन्यतत्तदर्थगोचरशाब्दत्वेन विषयविधया हेतुताद्रियतेऽतः शाब्दस्यैवोपनयमर्यादया भानं न हेतुसंस्कारयोरिति चेन्न गौरवात्, घटेन जलमाहरेत्यादौ इतरबाधलब्धच्छिद्रेतरत्वादेरर्थाक्षिप्तस्यापदार्थस्यापि शाब्दबोधेवगाहात् प्राप्तस्य तद्विषयकानुव्यवसायस्य बाधाप्रसक्तेर्गवादेरिवास्तित्वादौ गत्वादेरपि भानप्रसङ्गात्। अपि च शाब्दज्ञानस्य श्रवणजन्यत्वाभ्युपगमे पदार्थान्वयबोधदशायामपदार्थानामपि स्वसामग्रीबलेन प्रत्यक्षतापत्तिः। ननु श्रावणप्रत्यक्षसामग्री अपदार्थानां श्रावणप्रत्यक्षे प्रतिबन्धिका भविष्यतीति चेन्न प्रत्यक्षसामान्यं प्रति शाब्दसामग्र्याः प्रत्यक्षसामग्रीकोटिनिविष्टतया प्रतिबन्धकताऽसंभवात्। न च शाब्दान्यप्रत्यक्षत्वावच्छिन्नं प्रति तस्यास्तथात्वकल्पनाददोष इति वाच्यं, गौरवात्। तदपेक्षया शाब्दज्ञानस्य प्रत्यक्षभिन्नत्वकल्पनमेव लघीय इति। अतोन्वयबुद्धेः श्रवणेन्द्रियजन्यत्वाभावान्न प्रत्यक्षता। तस्माद्घटोस्ति गामानयेत्यादौ स्वस्वपदजन्यपदार्थोपस्थित्यनन्तरं घटादावस्तित्वाद्यन्वयविषयकस्य विलक्षणबोधस्यान्वयव्यतिरेकाभ्यामाकाङ्क्षादिमच्छब्दकारणकस्य नोपनीतभानता। नचान्वयबोधो नास्त्येवेति व्यर्थः प्रयास इति शङ्क्यम्। अनुभवविरुद्धत्वात् तस्यासाधकत्वेऽनुमितिरपि न स्यात्। न च वक्तव्यं पदजन्यसंस्कारजन्यत्वात् शब्दसिद्धिः स्मृतिरूपास्तु शब्दात्प्रत्येमीत्यनुव्यवसायविरोधात्। किंच घटास्तित्वयोर्गोकर्मत्वानयनानामेवोपस्थित्या तद्विषयकस्यैव संस्कारस्य जननेऽन्वयविषयस्याजननात्स्मृतित्वं न शक्यवचनमतः शब्दोऽतिरिक्तां प्रमाणतां दधाति। परंतु शब्दशतादपि प्रत्यक्षविरुद्धं प्रतिपादयितुमशक्यमिति शब्दः प्रत्यक्षमुपजीवति तेनानाप्तोक्ते न प्रामाण्यमिति। किंच। श्रोत्रसापेक्षः शब्दः। स्वस्वरूपलाभेपीतः प्रत्यक्षं प्रबलमिति। अत्रापि अयं विशेषः। शब्दस्यैव प्राबल्यमिति स्थितमाकरे। तथाहि प्रामाण्यांशे श्रोत्रसापेक्षताभावेन स्वरूपलाभे सापेक्षता न प्राबल्यं विघटयति। श्रुतमात्रशब्दश्चक्षुरादितिरस्कुर्वन्नेव पदार्थमुपस्थापयतीति। एवं च प्रत्यक्षं नोपजीवति शब्दः, वेदे तदभावात्। लोकानधिगतस्याप्यग्निहोत्रादेर्विधानात्। न च सोपि योगिनां प्रत्यक्षः। मानाभावात्। योगादेर्मानान्तरेण धर्मादिप्रत्यक्षजननसामर्थ्यस्याज्ञानात् तदर्थप्रवृत्त्यनुपपत्तेश्च। न चादृष्टं प्रवर्तकं, सत्कर्मकरणेन तदुत्पत्तेः। परंपराप्यादिसर्गवादादवक्तव्या। अनादिसर्गप्रवादिभिस्तु वेदोऽपौरुषेयो धर्मप्रमितिं

तस्माद् ब्रह्म जिज्ञासितव्यमिति सिद्धम् ॥ १ ॥

॥ इति प्रथमाध्याये प्रथमपादे प्रथमं जिज्ञासाधिकरणम् १ ॥

भाष्यप्रकाशः।

रित्यर्थः। सिद्धमाहुः तस्मादित्यादि। ब्रह्मसंबन्धिनां विचारेऽपि ब्रह्मणो विषयत्वस्यार्थतः सिद्धत्वात् तादृशगुणकत्वेन ब्रह्म जिज्ञास्यमिति सिद्धमित्यर्थः। अपेक्षितगुणवत्तयैवात्र ब्रह्म जिज्ञास्यं, न त्वशेषविशेषशून्यतयेति शेषषष्ठ्येव युक्तेत्यत्र गमकमप्याहुः किंच इत्यादि', इतीत्यन्तम्। तथा च प्रथमसूत्रे ब्रह्मविचारं प्रतिज्ञाय ब्रह्मणो येन रूपेण वेदार्थता तानि रूपाणि प्रकाराँश्च वक्तुमग्रिमे कार्यलक्षणं प्रमाणं च वदतीत्यतस्तथेत्यर्थः। एवं विषये निर्द्धारिते प्रतिपाद्यप्रतिपादकभावः संबन्धोऽप्यनुक्तसिद्ध एवेति प्रेक्षावत्प्रवृत्त्युपयुक्तं सर्वमत्र निरूपितम्। प्रकारभेदेन काण्डद्वयस्यापि ब्रह्म-

रश्मिः।

जनयतीति स्वीकाराच्च। नापि स्वभावः प्रवर्तकः। तस्यापि मूलविमर्शे वेद एव विश्रान्तेः। ईश्वरेच्छयेत्यपि न युक्तं, शब्दं विना तस्या एवासिद्धेः। तदग्रे स्फुटिष्यति। निःश्वसितश्रुतेरबुद्धिपूर्वकमेवाभिव्यञ्जनान्नेश्वरप्रत्यक्षोपजीवकत्वं, तेन वेदः प्रमाणम्। इदं चौत्पत्तिकसूत्रतात्पर्यार्थकथने उक्तमपि स्पष्टप्रतिपत्तिप्रयोजनकम्। अस्मदादिमुखेनापि ब्रह्मैव क्रीडयितुं वाक्यं वदति इति सर्वाणि वाक्यानि वेदतुल्यानि ब्रह्मवाक्यत्वादिति सिद्धान्तः। 'स एष जीवो विवरप्रसूतिः' इत्यत्र 'एवं गतिः' इति श्रुतिदेशात्। अत्र श्रोत्रं प्रमाणकं शब्दस्त्वतिग्रहः 'श्रोत्रं वै ग्रहः स शब्देनातिग्रहेण गृहीतः श्रोत्रेण शब्दाञ्छृणोति' इति बृहदारण्यकश्रुतेः। 'चक्षुर्वै ग्रहः स रूपेणातिग्रहेण गृहीतः रूपं पश्यति' इतिवदानुपूर्व्या अभावात्। अत एव शब्दगुणकमाकाशमित्याकाशलक्षणे शब्दप्रवेशः। उष्णस्पर्शवत्त्वं तेजस्त्वमिति तेजोलक्षणेन रूपप्रवेशः कृत इति शुभम्। न चैवं सकलवाक्येषु निर्दुष्टत्वं स्यात्। न। योग्यावयवैरेव वाक्यनिर्माणोपगमात्, योग्यावयवैरेव पदार्थनिर्माणवत्। अन्यथा घोटकस्य निर्मातुः शृङ्गनिर्माणमप्यापद्येत। क्रीडैव प्रयोजिकेति तु तत्त्वम्। एवं निःसंदेहा इत्यर्थः। यथादर्शनमाहुः ब्रह्मसंबन्धिनामित्यादि। न च ब्रह्मपदस्य वेदान्तवाचकत्वं 'वेदान्तानां विचार आरम्भणीयो न वेति' भाष्येण सिद्ध्यति। ततश्च वेदान्तानां विचार आरम्भणीय इति सिद्धमिति भाष्यमस्तु। न तु ब्रह्मजिज्ञासितव्यमितिभाष्यं सिद्धकथनभाष्यत्वादिति वाच्यं 'षडङ्गो वेदोध्येयो ज्ञेयश्च' इतिश्रुतेः। षडङ्गैरेव निर्वाहे मीमांसाया अनङ्गत्वेन वेदान्तविचारानावश्यकत्वेऽस्य शास्त्रस्यानुपयोगेनारम्भणीयतास्य स्यात्तन्निवृत्त्यर्थमारम्भणीयताप्रतिपादनपुरस्कारेण वेदान्तेषु मुख्यतया प्रतिपाद्यस्फोरणाय अथातो वेदान्तविचारः' इत्यसूत्रयित्वा 'अथातो ब्रह्मजिज्ञासा' इति सूत्रणादत्रैव सूत्रान्त इति करणसामर्थ्यात्किंचेत्यस्यान्यच्चेत्यर्थात् च पूर्वशेषतायाः संभवदुक्तिकत्वाद्देहलीदीपन्यायेनाभासमवतारयन्ति अपेक्षितेत्यादि। अतस्तथेत्यर्थः। उक्तग्रन्थसंवादाच्छेषषष्ठ्येव युक्तेत्यर्थः। एतेन 'तद्विजिज्ञासस्व तद्ब्रह्म' इति श्रुत्येकवाक्यतायै कर्मणि षष्ठी युक्तेत्यपि प्रत्युक्तम्। स्वरूपलक्षणं परित्यज्य कार्यलक्षणकथनेन शेषषष्ठ्यामेव व्यासचरणानां तात्पर्यात्। प्रतिपाद्यप्रतिपादकभावसंबन्ध इति मीमांसाब्रह्मधर्मयोः स संबन्ध इत्यर्थः। अत्रेति जिज्ञासाधिकरण इत्यर्थः। प्रकारभेदेनेति क्रियाज्ञानत्वभेदेनेत्यर्थः।

---

१. द्वितीयसूत्रविवरणे द्रष्टव्यम्।

भाष्यप्रकाशः ।

प्रतिपादकतयैकवाक्यत्वसमर्थनान्मीमांसाद्वयस्यैकशास्त्रत्ववचनेन वृत्तिकाराविरोधोऽपि बोधितः ।

शांकरास्तु ब्रह्म जिज्ञास्यं न वेति संदेहे, अहंवित्तिवेद्यत्वेन प्रत्यक्षस्यात्मन एव ब्रह्मत्वान्न जिज्ञास्यमिति पूर्वपक्षे कर्तृत्वादिशून्यनिर्विशेषचिदेकरसत्वेन जिज्ञास्यत्वमङ्गीकृत्य केवलज्ञानादेव मोक्षं चाङ्गीकृत्य मोक्षं प्रति केवलज्ञानस्यैव हेतुत्वाज्ज्ञानकर्मसमुच्चयं नाङ्गीकुर्वन्ति । तन्मते पूर्वोत्तरकाण्डयोः स्वर्गमोक्षरूपप्रयोजनभेदात् कर्मब्रह्मरूपाभिधेयभेदाच्छेषशेषिभावाद्यभावेन परस्पराकाङ्क्षाभावाच्चैकवाक्यत्वाभावे उत्तरकाण्डस्य वेदान्त इति समाख्याया विरोधः । नापि कर्मशेषभूतकर्तृस्वरूपप्रतिपादकत्वेनापेक्षा । कर्मानुपयुक्तकर्तृभोक्तृभावशून्यात्मप्रतिपादकताभ्युपगमात् । नापि कर्मपौष्कल्यजनकविद्याप्रतिपादकत्वेन सा । 'यदेव विद्यया करोति तदेवास्य वीर्यवत्तरं भवति' इति वाक्यस्योद्गीथविद्यामुपक्रम्य पठितत्वेन तन्मात्रस्य त्वन्मते तथात्वबोधकतया सर्वस्य काण्डस्य तथात्वसंपादनाक्षमत्वात् । मानवी ऋचौ धाय्ये कुर्यादितिवत् । न च वैदिकाभिधाने स्वरादिनियमयोगेनैकवाक्यत्वमिति शङ्क्यं अप्रयोजकत्वात्, सूत्रोक्तैकवाक्यलक्षणविरोधात् । न च

रश्मिः ।

वृत्तिकारेति संहृतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति ब्रुवतो वृत्तिकारस्याविरोध इत्यर्थः । आत्मन एवेति जीवस्यैवेत्यर्थः । सेति पूर्वकाण्डस्योत्तरकाण्डापेक्षेत्यर्थः । त्वन्मत इति अस्मन्मते तु यत्तदिति सामान्यनिर्देशस्य विवक्षितत्वान्न तथात्वमिति बोध्यम् । तन्मात्रस्येत्यादि उद्गीथविद्यामात्रस्य । कर्मपौष्कल्यजनकत्वबोधनात् न तया सर्वस्योत्तरकाण्डस्य कर्मपौष्कल्यजनकविद्याप्रतिपादकत्वसंपादनाक्षमत्वादित्यर्थः । न च किंचौपनिषदज्ञानस्येत्यादि भाष्येऽप्ययं दोषः इति शङ्क्यं 'विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत्' इति न्यायमनुसृत्य श्रुतौ विद्याशब्दो न संकोचसहिष्णुरिति भाष्याशयात्, अत एवात्र त्वन्मत इत्युक्तम्' एवं च

'यदेव विद्ययेत्याह ब्रह्मा ब्रह्मिष्ठ एव च ।
तज्ज्ञानं तेषु हि प्रोक्तं कर्तृशेषा यतस्तु ते' ॥

'ज्ञाननिष्ठाय देयानि कव्यानि' इति यथा तथेति पक्षावलम्बने विवरणे चास्या उद्गीथप्रकरणावरुद्धत्वेन विद्यान्तरासंग्राहकत्वं यदुक्तं तदप्युक्तदिशैव 'त्वन्मते' इति कथनादिति ध्येयम् । मानवीत्यादि इयं श्रुतिर्द्वितीयाष्टकेऽस्ति विकृतिरूपे सौमारौद्रे चरावतिदेशतः प्राप्तासु सामिधेनीषु मध्ये द्वौ धाय्यासंज्ञिकौ मन्त्रौ प्रक्षेप्तव्यौ तौ मानवौ कर्तव्यावित्यर्थः । 'प्रवो वाजा अभिद्यव' इत्याद्या अग्निसमिन्धनार्था ऋचः सामिधेन्यस्तासु द्वयोरेव मानवीऋक्त्ववद्विद्यासूद्गीथविद्याया एव कर्माङ्गत्वमिति भावः । मतान्तरमुपक्षिप्य वारयन्ति न च वैदिकेत्यादि । वैदिकानामभिध्यानं वेदान्तेषु वेद इति वर्तते यतस्ते स्वरपूर्वकमनध्यायादित्यजन्तः वेदान्तान्पठन्ति पाठयन्ति च । अत एकवाक्यत्वं धर्मातिरिक्तब्रह्मप्रतिपादनादिति शङ्क्यमित्यर्थः । अत्र हेतुमाहुरप्रयोजकेत्यादि । ब्रह्मप्रतिपादकताया उक्तत्वाद्वेद इति प्रसिद्धिमात्रेण तयोरेकवाक्यताया असिद्धेस्तथात्वादित्यर्थः । अत्रापि हेतुमाहुः सूत्रोक्तेत्यादि । द्वितीयाध्यायस्य 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति सूत्रोक्तेत्यर्थः । उदाहरणं तु ।

---

१. किंचेति विकल्पे ।

भाष्यप्रकाशः ।

यज्ञानां विविदिषोत्पादकत्वेन पूर्वस्योत्तरकाण्डशेषतायामेकवाक्यत्वसंभव इति वाच्यम् । सन्प्रत्ययोक्तेच्छायामिष्यमाणपर्यन्तत्वं वादेन जिगीषतीत्यादौ दृष्टं, केवलाया अपुरुषार्थत्वं चेति तावन्मात्रान्तत्वस्यासंगतत्वात् । इष्यमाणपर्यन्तत्वस्य चानुपगमात् । अत एव वदता, 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति' इति पृथक्समाप्तिश्रुतेः, 'वेदाः साङ्गोपनिषदः' इति पौराणिकपृथङ्निर्देशाच्चात्यन्तभेद एवास्थेयः । नचैवं वैदिकप्रसिद्धेर्वेदान्तशब्दो रूढ एवेति वाच्यम् । तथा सति स्वाध्यायादिविधौ तदनिवेशेन तदध्ययनार्थज्ञानविचाराणामवैधत्वापत्तेः । न च तद् विजिज्ञासस्व, तद् ब्रह्मेत्यादिविधिना विचारप्राप्तौ तेनाध्ययनाद्याक्षेपान्न दोष इति वाच्यम् । तथा सति जिज्ञासुमात्रप्राप्तौ त्रैवर्णिकाप्राप्त्या अधिकारविरोधापत्तेः । अतस्तन्मते उपनिषदां वेदान्तत्वं न कथमपि सिद्ध्यतीत्यवधेयम् ।

रामानुजाचार्यास्तु ब्रह्मपदस्य निर्दोषपूर्णगुणपुरुषोत्तमवाचकत्वं, तस्य च स्थूलसूक्ष्मचिदचिच्छरीरविशिष्टतया वेदान्तार्थत्वेन जिज्ञास्यत्वं चोपगम्य यज्ञादीनां विविदिषोपयोगमात्रभावेऽपि व्यासपादैः 'आप्रायणात्तथापि हि दृष्टम्' इत्यादिसूत्रेषु यावज्जीवं तत्करणबोधनाद् ध्रुवानुस्मृतिरूपोपासनाभक्त्यादिनामकदर्शनसमानाकारज्ञानजनकत्वेन भावनात्मकोपासनया समुच्चयमङ्गीकुर्वन्ति ।

भास्कराचार्यास्तु ब्रह्म प्रसिद्धं न जिज्ञास्यम् । अथाप्रसिद्धं नतरामिति पूर्वपक्षे, 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यादिषु जगत्कारणताश्रावणेन प्रसिद्धमपि ब्रह्म स्मृतिकारैस्त्रिगुणस्य प्रधानस्य परमाणूनां च तथात्वाङ्गीकाराद् विप्रतिपन्नमिति तन्निवृत्त्यर्थमत्र कारणकार्यजीव-

रश्मिः ।

देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इति ।

सर्वाणीमानि पदानि निर्वापप्रकाशार्थानि विभागे च साकाङ्क्षाणीति । एकवाक्यत्वेत्यादि यावन्ति पदानि तानि ब्रह्मप्रकाशार्थानि विभागे च साकाङ्क्षाणीति एकवाक्यत्वसंभव इत्यर्थः । तावन्मात्रेति । विविदिषेत्यत्रेच्छामात्रान्तत्वस्येत्यर्थः । तथा च वादेन विजिगीषतीत्यत्र इवेच्छाविषयपर्यन्तत्वं वाच्यं, तत्राहुरिष्यमाणेत्यादि । एवं वदतेति । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यत्र यज्ञानां विविदिषोत्पादकत्वं वदतेत्यर्थः । आस्थेय इति, वेदवेदान्तयोरास्थेय इत्यर्थः । न चैवमिति । वैदिकाभिध्यानेत्याद्युक्तदिशेत्यर्थः । तदनिवेशेनेति । वेदस्यान्त इति योगाभावेन तथेत्यर्थः । न कथमपीति । तदुक्तं पत्रावलम्बने । ननु वेदान्तत्वं कथमिति सिद्धान्ते तु एवं लोकसिद्धस्य जगतो लोकप्रतीतिं बाधित्वा ब्रह्मत्वेनालौकिकत्वं संपाद्यत इति अर्धजरतीयन्यायात्तदन्तत्वं यथा लोकसिद्धस्य व्रीह्यादेर्लोकप्रतीतिं बाधयित्वा प्रोक्षणादिनाऽलौकिकत्वं क्रियते तद्वत्, प्रोक्षणवत्साधनानुक्त्याऽर्धजरतीयत्वम् । रामानुजाचार्यास्त्विति एते विशिष्टाद्वैतवादिनः । समानाकारं ज्ञानं विविदिषति विविदिषेत्यत्र सनर्थस्य तद्भाष्ये अविवक्षितत्वाद्वेदनमात्रं समानाकारं ज्ञानम् । भावनेत्यादि वेदान्तोक्तया तज्जनकयज्ञादिकस्य समुच्चयम् । ध्रुवानुस्मृतीत्यादि ध्रुवानुस्मृतिरूपं यदुपासनाभक्त्यादिनामकं दर्शनेन समानाकारं ज्ञानं तज्जनकत्वेनेत्यर्थः ।

भास्कराचार्यास्त्विति । एते भेदाभेदवादिनः समन्वयाधिकरणे भेदाभेदनिरूपणेऽस्ति । विप्रतिपन्नमिति संदिग्धमित्यर्थः । ननु सांख्ये प्रसङ्गः कुतः । परमाणुवादिनां स्वोपादानगोचरापरोक्ष-

भाष्यप्रकाशः ।

रूपैः वेदान्तोक्तेश्वररूपं जिज्ञास्यमित्युपगम्य पूर्ववत् समन्वयमङ्गीकुर्वन्ति । सूत्राणि च शारीरकपदेनोपवर्षादिमतमनुसृत्य विशिंषन्ति । तन्मते पूर्वोत्तरकाण्डयोरभिधेयभेदेऽपि प्रयोजनैक्यादैकशास्त्र्यात्, 'सर्वे वेदा यत्पदमामनन्ति,' 'वेदैश्च सर्वैरहमेव वेद्यः,'

'वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे ।
परोक्षवादा ऋषयः परोक्षं च मम प्रियम् ॥
मां विधत्तेभिधत्ते मां विकल्प्यापोह्यते ह्यहम् ।
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ।
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' ॥

इति श्रुतिस्मृतिविरोधो दुर्वारः । गीतायां, ब्रह्मसूत्रपदैरित्युक्तेस्तद्विरोधश्च ।

भिक्षुभाष्ये तु, आत्मेत्येवोपासीतेत्यादिविहितज्ञानविषयं किं ब्रह्म, किं वा तस्य ब्रह्मतानिर्वाहकं गुणजातं, कीदृशं तस्य ज्ञानं, कीदृशं च तस्य ज्ञानस्य फलमित्यादिकं विशिष्य मुमुक्षूणां जिज्ञासितं भवतीत्येवं जिज्ञासामुखेन संशयमधिकारिणं चोपन्यस्य शाखाभेदेन श्रुतिष्वन्योन्यविरुद्धार्थतायाः प्रतिभासनादिति जिज्ञासाजनकसंशयहेतुं चोपन्यस्य तन्निर्णयार्थं ब्रह्ममीमांसाशास्त्रस्यापेक्षितत्वमुक्त्वा ब्रह्मज्ञानस्य चोदनालक्षणतया, 'अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्' इत्यादिस्मृत्या च धर्मत्वेऽपि न पूर्वमीमांसया ब्रह्ममीमांसाया गतार्थत्वं कल्पसूत्रवदशेषतन्निर्धारणार्थत्वादित्यनेन धर्मस्य सर्ववेदार्थत्वं, ब्रह्ममीमांसायाः पूर्वमीमांसाशेषत्वं च प्रकटीकृत्य, 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतिसिद्धत्वाद् ब्रह्मस्वरूपे जिज्ञासा नोपपद्यत इत्याशङ्क्य, ब्रह्मस्वरूपज्ञानं किं सांख्यसिद्धं जीवचैतन्यं, किं वा चैतन्यान्तरमिति जिज्ञासासत्त्वादाकाङ्क्षितं ब्रह्ममीमांसाशास्त्रं वेदव्यासः प्रतिजानीत इत्युक्तम् ।

तन्मतेऽपि पूर्वोक्तवाक्यविरोधो जैमिनेरकुशलत्वापत्तिश्च । किंचेदं शास्त्रं धर्मविशेषविचारार्थं

रश्मिः ।

ज्ञानचिकीर्षाकृतिमानीश्वर इति । प्रधानादेः संशयकोटौ कथं निवेश इति चेत्, न असङ्गपुरुषादेर्युक्त्याऽप्रयोजकत्वात्पूर्ववदिति, स्वभाष्ये पूर्वस्मिन्यथातथाऽयं समुच्चयोऽत्रैवाग्रे वक्तव्यः । एवं च कार्यकारणजीवजिज्ञासेति सूत्रयितुं युक्तं, अन्यथा धर्मजिज्ञासया गतार्थत्वं स्यादत आहुः सूत्राणि चेत्यादि । स्फुटमिदं तद्भाष्ये । अत एव उपवर्षाचार्येणोक्तं प्रथमपादे, आत्मवादं तु शारीरके वक्ष्याम इति रूपे, अतः उपदेशविचारार्थत्वं संबन्धः न तु संहतत्वम् । अतः शारीरकाणि सूत्राणीति विशिंषन्ति अभिधेयभेदेऽपीति कर्मोपासनारूपाभिधेयभेदेपीत्यर्थः । गीतायामित्यादि त्रयोदशे इत्यर्थः । 'बहुधा गीतम्'इत्यन्वयः ।

भिक्षुभाष्ये त्विति । अयमविभागाद्वैतमङ्गीकुरुते यथा मधु मधुकृतो निस्तिष्ठन्तीति अथास्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते इति छान्दोग्यश्रुतिदर्शनात् । इदं द्वितीयस्य तृतीयपादे 'यावद्विकारं तु विभागो लोकवत्' इति सूत्रे वक्ष्यन्ति । अधिकरणमिति एतावद्ब्रह्मजिज्ञासुमित्यर्थः । श्रौतं विस्पष्टमेव भवेत्याकाङ्क्षायामाह शाखाभेदेनेत्यादि । श्रुतिष्विति अधिकरणान्तरविषयभूतास्वित्यर्थः । जिज्ञासाजनकेत्यादि संशयो जिज्ञासाजन्मेति तथा । चोदनेत्यादि आत्मेत्येवोपासीतेति चोदना । अकुशलत्वापत्तिरिति । निश्शेषधर्मविचारस्याकृतत्वापत्तेरित्यर्थः ।

भाष्यप्रकाशः।

प्रवर्तितमुत ब्रह्मविचारार्थम्। आद्ये धर्मविशेषजिज्ञासा ब्रह्मज्ञानजिज्ञासेति वा प्रतिज्ञां कुर्यात्। प्रकरणिन एव ज्ञेयत्वेन तस्यैव प्रतिज्ञातव्यत्वात्। तदकरणेन व्यासस्याप्यकौशलमापद्यते। द्वितीये तु प्रतिपाद्यभेदात् पूर्वशेषत्वाभावेन कल्पसूत्रन्यायविरोधः। सिद्धान्ते तु ब्रह्मणः सर्ववेदार्थत्वाज्जैमिन्युक्तधर्मस्य तथात्वमपासितुं तथा शङ्कानिरासावावश्यकावित्यदोषः। तस्मादिदमपि पूर्वतुल्यम्।

यत्तु शैवो रामानुजमतैकदेशमादायाराधनाराध्यभूतधर्मब्रह्मप्रतिपादकयोर्मीमांसाशास्त्रयोः फलैक्यादैक्यम्। यथा हि व्रीहिप्रोक्षणं दर्शपूर्णमासोत्पत्त्यपूर्वहेतुतया स्वर्गे समुच्चीयते, तथा कर्माणि ज्ञानप्रयोजकतया मोक्षे समुच्चीयन्तेऽतो गुणकर्मत्वादङ्गत्वं ज्योतिष्टोमादीनाम्। नच नित्यविधिप्राप्तानां तेषामितिकर्तव्यताविरोधात् कथं संस्कारतासिद्धिरिति शङ्क्यम्। करणतया स्वतन्त्रविध्यन्तरविहितसौत्रामणीबृहस्पतिसवादेरग्निचयनवाजपेयाद्यङ्गत्ववदुभयविधिबलादुभयसिद्धेः। अतो ज्ञानोदयावधि कर्माणि कर्तव्यानि। नच विविदिषन्तीति श्रुत्या विविदिषोत्पत्तिपर्यन्तत्वं कर्मणां शङ्क्यम्। इच्छाया अपुरुषार्थत्वात्। अतः पूर्ववदेव शास्त्रैक्यमित्यङ्गीकृत्य ततो रामानुजाचार्यधृतेषु वाक्येषु परीक्ष्य लोकान् कर्मचितानित्यादिवाक्यत्रयं विषयत्वेनोपन्यस्य ब्रह्म विचारार्हं न वेति संदेहे, अयमात्मा ब्रह्मेतिश्रुतिरहंविधिप्रत्यक्षसिद्धमात्मानं ब्रह्मेत्युपदिशतीति संदेहाभावात्। किंच, विचारफलं विषयपरिच्छेदः। वेदान्तविचारजन्यं ज्ञानं चेद् ब्रह्म परिच्छिनत्ति तदा परिच्छेदातीतत्वभङ्गप्रसङ्गः। यदि न परिच्छिनत्ति, तदा प्रकाशाभावाद् ब्रह्मविषयज्ञानस्यासंभवः।

रश्मिः।

कल्पसूत्र इत्यादि बौधायनकल्पसूत्रन्यायस्य दृष्टान्ततायां विरोध इत्यर्थः। ननु सिद्धान्ते कथमित्यत आहुः सिद्धान्ते त्वित्यादि। जैमिन्युक्तमिति वैशेषिकाद्यन्तर्गतपुराणप्रसिद्धजैमिन्युक्तवैशेषिकादितुल्येश्वररूपस्य धर्मस्य तथात्वं सर्ववेदार्थत्वमित्यर्थः। शङ्केत्यादि 'जैमिनीये च वैय्यासे न विरोधोस्ति कश्चन' इतिपुराणोक्तवेदाविरुद्धजैमिनिमतस्थापनाय भगवद्भिक्षूक्तशङ्कानिरासौ आवश्यकाविति। तस्मादिति प्रयोजनैक्यादेकशास्त्र्यात्। पूर्वतुल्यमिति 'सर्वे वेदाः' इत्यादिपूर्वोक्तवाक्यविरोधब्रह्मसूत्रपदैरितिगीताविरोधाभ्यां धर्माभ्यां भास्कराचार्यमतसदृशमित्यर्थः। शैव इति अयमपि विशिष्टाद्वैतवादी शिवो ब्रह्मेति। तदाह यथा हीत्यादिना। एतच्च पूर्वतन्त्रे द्वितीयाध्याय उक्तम्। दर्शपूर्णमासाभ्यामुत्पत्तिर्यस्यापूर्वस्य तद्धेतुतयेत्यर्थः। गुणकर्मत्वादिति व्रीहीनवहन्तीतिवत्संस्कारकत्वादित्यर्थः। तेषामित्यादि प्राशस्त्यज्ञानस्य शाब्दभावनायामितिकर्तव्यत्वात् ज्योतिष्टोमादीनामर्थभावनायां करणत्वेन तद्विरोधात् कथं 'आत्मेत्येवोपासीत' इति भावनायामितिकर्तव्यतारूपसंस्कारकर्मतासिद्धिरित्यर्थः। उभयविधिबलादिति ज्योतिष्टोमविधिः 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति उभयविधिबलात् ज्ञानस्वर्गोभयरूपफलसिद्धेः करणतासंस्कारतयोर्वा सिद्धेरित्यर्थः। पूर्ववदेवेति फलैक्यादेवेत्यर्थः। वाक्येष्विति 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' 'अन्तवदेवास्य तद्भवति' 'न ह्यध्रुवैः प्राप्यते हि ध्रुवम्' 'प्लवा ह्येते अदृढा यज्ञरूपाः' 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन' 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' 'ब्रह्मविदाप्नोति परम्' 'न पुनर्मृत्यवे तदेकं पश्यति' 'न पश्यो मृत्युं पश्यति' 'अकर्मपश्यो न स्वराड् भवति' 'तमेवं विद्वानमृत इह भवति' 'तमेव विदित्वातिमृत्यु-

---

भाष्यप्रकाशः ।

तस्मान्न विचार्यमिति पूर्वपक्षमुक्त्वा, विचारयोग्यं ब्रह्म, 'अयमात्मा ब्रह्म' इति श्रुत्याऽहंकारबद्धस्य संसारिण आत्मनो ब्रह्मत्वाभिधानादेव संदेहसंभवात् । निरस्तसमस्तोपप्लवकलङ्कस्य निरतिशयज्ञानानन्दादिशक्तिमहिमातिशयवत्त्वं हि ब्रह्मत्वम्, अनाद्यज्ञानवासनावष्टम्भविजृम्भितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेशनिर्गमव्यापारपरवशनिःसीमतापसहिष्णुत्वं जीवत्वमिति तयोर्लक्षणेनेतरेतरभेदनिश्चये तयोरैक्यदार्ढ्यस्फूर्तेः । किंच । अन्नं ब्रह्म, मनो ब्रह्म, विज्ञानं ब्रह्म, आदित्यो ब्रह्म, नारायणं परं ब्रह्म इत्यादयोऽन्यमन्यमर्थं ब्रह्म इत्याहुः । तत्र किं ब्रह्मेत्येवं संदेहादपि विचारार्हं ब्रह्म । नचापरिच्छिन्नत्वाद् ब्रह्मणस्तद्विषयं ज्ञानं न संभवतीति शङ्क्यम् । ईदृगिदमिति ब्रह्मणः परिच्छेदासंभवेऽपि लक्षणमुखेनेतरव्यावृत्ततामात्रेण परिच्छेदसंभवात् लक्षणेन परिच्छेदो हि सर्वत्र लक्ष्यविषयकेतरव्यावृत्तताज्ञानरूप एव दृष्ट इत्यदुष्टः । अत उपदिष्टस्य ब्रह्मणो लक्षणे वेदान्तवाक्यैर्निरूपिते परीक्षिते च सति तल्लक्षणशून्येभ्यः सजातीयविजातीयेभ्यः सर्वेभ्यो व्यावृत्तं ब्रह्म विज्ञायत इति तदर्थं युक्तः शास्त्रारम्भ इत्याह । एतन्मतेऽपि तेषां वाक्यानां विरोधः पूर्ववदेव । जीवलक्षणं तु जीवप्रकरणे दूषयिष्यामः । किंच । 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति,' 'ईशं तं ज्ञात्वा अमृता भवन्ति,' 'तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्,'

'आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनादेव पाशं दहति पण्डितः' ॥

'ज्ञात्वा देवं मुच्यते सर्वपाशैः' इतिश्रुत्युक्तमोक्षप्राप्तिलिङ्गेन शिवस्य परब्रह्मत्वं यत्तेनोपगतं, तदप्यसंगतम् । 'ब्रह्मविदाप्नोति परम्' इति तदुपन्यस्ते फलवाक्ये, नारायणं परं ब्रह्मेति श्रुत्युक्तनारायणरूपग्रहणस्यैव युक्तत्वात् । उभयत्रापि परब्रह्मपदोपबन्धसाम्यात् । लिङ्गापेक्षया

रश्मिः ।

मेति नान्यः पन्था अयनाय विद्यते' 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' इति वाक्येष्वित्यर्थः । **अहंकारबद्धस्येत्यादि** अयमित्यस्य तात्पर्यकथनमिदम् । **निरस्तसमस्तेति** आधाराभिधानमिदम् । **अनादीति** अनादिरज्ञानवासना सैवावष्टम्भः प्रारम्भः तेन विजृम्भितं उज्जृम्भितं चेष्टितमुत्फुल्लं वा यच्चित्रकर्मफलं तस्य भोगः साक्षात्कारः तस्यानुगुणानि बहूनि शरीराणि तेषु प्रवेशनिर्गमौ तावेव व्यापारौ ताभ्यां परवशस्य निःसीमतापः निरवधितापः तस्य सहिष्णुत्वम् । **लक्ष्यविषयकेत्यादि** । यमाकाशमितरव्यावृत्तमित्याकाशलक्षणेन ज्ञायते इति परिच्छेदो हीतरव्यावृत्तताप्रकारकलक्ष्यविषयकज्ञानरूप एवेति । **जीवप्रकरण** इति द्वितीयाध्याये तृतीयपाद इत्यर्थः । **आत्मानमित्यादि** मनसि प्रणवस्य भावनादेवं ज्ञात्वा मुच्यत इति फलितोर्थः । **मोक्षप्राप्तीत्यादि** । यदि शिवः परं ब्रह्म न स्यात्तर्हि तज्ज्ञानेन मोक्षो न स्यादिति मोक्षप्राप्तेर्लिङ्गं सामर्थ्यं तेनेत्यर्थः । **नारायणमित्यादि** नारा आपस्ता एवायनं यस्येति जलशायिनमित्यर्थः । दृष्टं यथावर्षजलशायिसूर्यमण्डलस्थं ब्रह्म यथा वा वर्षजलशायिमेघो गर्जति तथा ब्रह्म । अत उक्तं युक्तत्वादिति । **हेत्वन्तरमाहुः उभयत्रेत्यादि** । ननु लिङ्गस्य का गतिरत्राहुः **लिङ्गापेक्षयेत्यादि** ।

---

१. मिथुन ।

भाष्यप्रकाशः।

श्रुतेर्बलिष्ठत्वात्। 'ऋतं सत्यं परं ब्रह्म' इतिवाक्यस्यापि संदिग्धत्वात्। शिवेशादिपदानां च भगवद्वाचकत्वमेवेत्यादिकमस्माभिः प्रहस्ते निपुणतरमुपपादितम्। पुनरग्रेऽपि तत्र तत्रोपपादयिष्यते।

माध्वास्तु शास्त्रे प्रवर्तनीया ब्रह्मजिज्ञासा विषयः, कर्तव्या न वेति संदेहः। तत्र प्रमाणाभावेन जीवव्यतिरिक्तस्य ब्रह्मणोऽभावाज्जीवस्य स्वप्रकाशत्वादहंवित्तौ प्रकाशमानत्वात् तस्यापि ज्ञायमानत्वेनानुभवान्तरान्वेषणेऽनवस्थाप्रसङ्गात् क्वचित् विश्रान्त्यङ्गीकारे आत्मन्येव तथात्वौचित्यात्। न च स्वप्रकाशसंविदाश्रयतयाऽऽत्मा भासत इति युक्तम्। औत्तरिकानुस्मृतिसिद्धसौषुप्तिकानुभवाभावप्रसङ्गात्। तत्र संविदाश्रयत्वेनात्मप्रतीतेरभावात्। अतः स्वप्रकाशात्मानतिरिक्तस्य ब्रह्मणः संदिग्धत्वाभावेनाविषयतया तज्जिज्ञासाया अपि तथात्वान्न कर्तव्येति पूर्वः पक्षः। सिद्धान्तस्तु, भवेदेतदेवं, यदि स्वप्रकाशजीवाभिन्नं ब्रह्म स्यात्। न त्वेवम्। जिज्ञास्ये ब्रह्मपदप्रयोगात्, तद्धि जिज्ञासस्व, तद् ब्रह्मेति ब्रह्मशब्दस्य गुणपूर्णतां वक्ति। 'अथ कस्मादुच्यते ब्रह्मेति, बृहन्तो ह्यस्मिन् गुणाः' इति श्रुतेः। तथाच कथं तस्य जीवाभेदः। जीवस्याल्पगुणत्वेनानुभवात्। न च ब्रह्मणि गुणाध्यासः। परमार्थतोऽब्रह्मत्वप्रसङ्गात्। न च देशाद्यपरिच्छिन्नत्वं ब्रह्मत्वम्, उक्तश्रुतिविरोधात्। देशाद्यपरिच्छेदेनापि जीवभेदसिद्धेः। जीवाणुत्वस्य वक्ष्यमाणत्वात्। जीवस्य स्वप्रकाशत्वेपि तद्भिन्नब्रह्मणः संदिग्धत्वाद्विषयत्वम्। अतस्तज्जिज्ञासा कर्तव्येत्याहुः। ब्रह्मशब्दश्च विष्णावेव रूढः। 'यमन्तःसमुद्रे कवयोऽवयन्ति, यदक्षरे परमे प्रजाः, यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यचसर्ज भूम्याम्' इत्युक्त्वा, 'तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्' इति श्रुतौ समुद्रान्तःस्थत्वलिङ्गिते जगत्कर्तरि परब्रह्मत्वविधानात्। 'यो देवानां नामधा एक एव' इति श्रुतावेवकारेणैकस्य सर्वनामधारकत्वमुक्त्वाऽग्रे, 'अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः' इति विश्वाधारपद्मस्य नाभ्यर्पितत्वश्रावणात्।

रश्मिः।

बलिष्ठत्वादिति। एतच्च तृतीयस्य तृतीयपादे 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इत्यधिकरणे चिन्तितम्। 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्युदाहरणम्। ननु परब्रह्मपदोपनिबन्धः शिवपरेपि वाच्ये दृश्यत इत्यत आहुः **ऋतं सत्यमिति**। कथं तर्हि ज्ञात्वा शिवमित्यादि तत्राहुः **शिवेत्यादी**त्यादि। द्वितीये वादे वस्तुतः सर्वेषां शब्दानां सर्वार्थत्वस्य महाभाष्याद्यभिमतत्वेन ब्रह्मवाचकत्वस्यैवाभिप्रेतत्वात्। प्रतिनियततावन्मात्रकार्यकरणेन भगवदनुकारितया व्यवहारार्थमेव शक्तिसंकोचेन शिवादिषु रुद्रवाचकत्वदर्शनेपि ब्रह्मवाचकत्वस्यापर्यवस्थेयत्वात्। इत्येवं निपुणतरमुपपादितमित्यर्थः। महाभाष्ये पस्पशाह्निके। आदिपदोक्ते वाक्यपदीये तु

'संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु। जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते। सा नित्या सा महानात्मा तामाहुस्त्वतलादयः'॥

इति स्फुटम्। इति तट्टीकायाम्।

माध्वास्त्विति एते भेदवादिनः। नन्वहंवित्तौ विषयत्वेन प्रकाशमानस्य कथं स्वप्रकाशत्वं तत्राहुः **तस्यापीत्यादि**। **तथात्वौचित्यादिति** स्वप्रकाशत्वौचित्यादित्यर्थः। **औत्तरिकेत्यादि** सुषुप्त्यौत्तरिकेत्यर्थः। तादृशानुस्मृतिः न किंचिदवेदिषमित्याकारिका तया कार्यभूतया सिद्धो यः कारणात्मा। 'सुखमहमस्वाप्सम्' इत्याकारकः सौषुप्तिकानुभवः तस्याभावप्रसङ्गात्। **तत्रेति** सुखमहमस्वाप्सं न किंचिदवेदिषमित्यौत्तरिकानुस्मृतावित्यर्थः। **तथात्वादिति** अविषयत्वादित्यर्थः।

भाष्यप्रकाशः।

'वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते'॥

इति हरिवंशवाक्याच्चेत्यप्याहुः। तन्मतेऽपीज्यत्वेनैव वेदार्थत्वाङ्गीकारान्मां विधत्त इतिवाक्यविरोधः। यत्तु कर्मविधात्री श्रुतिर्मां प्रत्येव तद्विधत्ते, इन्द्राद्यभिधात्री च मामभिधत्ते, चत्वारि वागितिश्रुत्या अहं त्रिविधरूपत्वेन कल्प्यो, न सुरां पिबेदित्यादिश्रुत्याहमेवाप्रियादपोह्य इति व्याख्यातम्। तदप्यध्याहारवृत्तिसंकोचलक्षणादोषसंभवाच्चिन्त्यम्। प्रकृतमनुसरामः। एवंचात्र सूत्रे शेषषष्ठ्या ब्रह्मसंबन्धिनां जिज्ञास्यताबोधनेन साधारणाधिकारे ज्ञानकर्मसमुच्चयः उत्कृष्टाधिकारे च भक्तिमार्गीयः सर्वात्मभावः साधनमिति बोधितम्॥ १॥

इति प्रथमं जिज्ञासाधिकरणम्॥ १॥

रश्मिः।

इज्यत्वेनैवेति विष्णुत्वेनैव न तु कर्मत्वेन। 'यज्ञो वै विष्णुः'इति श्रुतेः। अस्वरसमाहुः तदप्यधीत्यादि। तद्विधत्त इति कर्माध्याहारः। इन्द्राद्यभिधात्रीणां भगवदभिधाने वृत्तिसंकोचः। चत्वारि वागित्यादौ वागादिलक्षणेत्येवं ज्ञेयम्। पादसेवनन्यायेन भक्तिमीमांसेयमिति बोधयितुं सूत्रनिष्कर्षार्थमाहुरेवं चेति। ब्रह्मणोऽजिज्ञास्यत्वेन शेषषष्ठ्यामेव व्यासचरणतात्पर्ये चेत्यर्थः। विरोधनिराकरणस्यामुख्यसाधनसंबद्धत्वात्साधनाध्यायान्ते साक्षाद्ब्रह्मसंबन्धिन आहुः साधारणेत्यादि। ज्ञानकर्मसमुच्चयः 'यदेव विद्यया' इति 'तमेतम्' इति श्रुतिभ्यामुक्तः। द्वितीयः सर्वोत्तममार्गे कर्मणा चित्तशुद्ध्या भक्तिरिति। सर्वात्मभाव इति तन्निर्धारणाधिकरणे व्युत्पाद्यम्। अयमर्थः। सच्चिदानन्दस्य ब्रह्मणः सदंशस्य धर्मः कर्म, चिदंशस्य ज्ञानं, आनन्दस्य प्रेमा, आनन्दमयमुपक्रम्य 'तस्य प्रियमेव शिरः' इति श्रुतेः। तथा च सर्वात्मभावप्रतिज्ञासूत्रमिदं पूर्वाध्याये भक्तेर्विषयरूपं ब्रह्म प्रतिपाद्यते समन्वयप्रतिपादनद्वारा, द्वितीये तत्परिशोधः क्रियते, तृतीये प्रतिज्ञातः सर्वात्मभावो बोध्यते, चतुर्थे तत्फलमिति भक्तिमीमांसेयमिति सूत्रनिष्कर्षः। अथातो भक्तिजिज्ञासेति सूत्रयितुं युक्तं यद्यपि तथापि विषयस्य कारणत्वात्तत्पुरःसरं प्रतिज्ञातं वेदितव्यमिति। किंच न भक्तिज्ञानकर्मभिरेव मोचयति किंतु अवतारदशायां स्वरूपेणापीति सकलरूपब्रह्मसंबन्धिनां जिज्ञासार्थे ब्रह्मजिज्ञासा इत्येव युक्तमिति शुभम्। अत्र 'नानामतध्वान्तविनाशन' इति भाष्यान्ते वक्ष्यमाणत्वात् नानामतान्युक्त्वा ध्वान्तनाशनं कृतमिति ज्ञेयम्॥ १॥

इति प्रथमं जिज्ञासाधिकरणम्॥ १॥

किंच, तत्र किं लक्षणं किं प्रमाणकमिति जिज्ञासायामाह सूत्रकारः ।

भाष्यप्रकाशः ।

एवं पूर्वाधिकरणे वेदार्थभूतब्रह्मणो जिज्ञास्यत्वे साधिते कथं जिज्ञास्यमिति प्रकारविशेषाकाङ्क्षायां समन्वयाविरोधाभ्यां तस्य वक्तव्यत्वात् तद्बोधकमग्रिमसूत्रमवतारयन्ति तत्रेत्यादि । तेषु वक्तव्येषु तदुपजीव्यतया उक्तजिज्ञासायां लक्षणप्रमाणात्मकं प्रकारद्वयं पूर्वमाहेत्यर्थः ।

रश्मिः ।

पूर्वाधिकरणे ब्रह्मजिज्ञासापदेन त्रैवर्णिकोर्थजिज्ञासुरधिकारी, ब्रह्मसंबन्धी विषयः, प्रतिपाद्यप्रतिपादकभावः संबन्धः, शाब्दं ब्रह्मज्ञानं च फलम्, तस्याप्यानन्दावाप्तिः फलमित्यनुबन्धचतुष्टयमुक्तम् । अन्यथ षडङ्गैरेव वेदार्थनिश्चयस्य संभवादधिकाकाङ्क्षायाश्च तपःप्रभृतिभिरेव पूरणात् वेदान्ता अजिज्ञास्या इत्याशङ्क्य ऋषिप्रणीतशास्त्रपार्थक्यबाहुल्यात् तच्छ्रवणे बुद्धिदोषान्मन्दानां संदेहे तन्निवृत्तये इदं शास्त्रं कर्तव्यम् । यद्यपि 'सर्वे वेदा यत्पदमामनन्ति' इत्यादिना ब्रह्मण एव वेदार्थता तथापि 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति पुरुषरूपता 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति वेदान्तानामर्थनिश्चायकता चाम्नायते । तस्मात् तपःप्रभृतीनामसंभवाद् वेदान्तविचारेणैव वेदार्थभूतब्रह्मस्वरूपनिश्चय इति ब्रह्मसंबन्धिविचारः श्रीमद्बादरायणाचार्यैः प्रस्तूयत इत्युक्तम् । अतो वक्ष्यमाणानि यावन्त्यधिकरणानि समाप्तिपर्यन्तानि तावन्त्यस्यैव विषय इत्युक्तं भवति । अतो विषयविषयिभावसंगत्याधिकरणमवतारयन्ति एवं पूर्वेत्यादिना । साधित इति 'वेदार्थब्रह्मणो वेदानुकूलविचार इति' इति भाष्येऽस्माभिः भूतपदं समावेश्य वेदार्थभूतं ब्रह्म वेदार्थब्रह्म इति समस्य साधित इत्यर्थः । साधनं तु वेदार्थावेदार्थभूतत्वेपि वेदार्थभूतत्वेन ब्रह्मग्रहणाद् भक्त्येकलभ्यत्वेवेदार्थत्वम् । अवेदार्थत्वे तु वेदानुकूलविचाराविचाराविषयत्वापत्तेः । नन्वेतस्य प्रकाशे सर्वपदं समावेश्य व्याख्यानं सर्ववेदार्थत्वेन ब्रह्म जिज्ञास्यमिति ग्रन्थेनेति चेन्न, सर्ववेदार्थत्वस्य वेदार्थमात्रपर्यायत्वेन वेदार्थभूतेत्याद्यनुपदस्योक्तप्रकाशविरोधापत्तेः । तेन सर्ववेदार्थत्वं न वेदार्थमात्रत्वं किंतु वेदार्थभूतत्वं सर्ववेदार्थत्वप्रयोजकं[1] लक्षणयेति । एतेन 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यपि व्याख्यातं, सर्ववेदार्थत्वं वेदार्थभूतत्वं विना न संभवतीति । प्रकारविशेषाकाङ्क्षायामिति । सामान्यप्रकारकजिज्ञासाया विशेषप्रकारकजिज्ञासाजनकत्वात् तादृशाकाङ्क्षायां सामान्यप्रकारेण बृहत्त्वबृंहणत्वरूपब्रह्मत्वेनाजिज्ञास्यत्वाद् विशेषपदोपादानम् । तस्येति प्रकारविशेषस्य कर्तृत्वलक्षणस्य । इदमध्यायद्वये स्पष्टम् । तद्बोधकमिति लक्षणप्रमाणबोधकम् । सर्वविरुद्धधर्माश्रयत्वरूपप्रकारविशेषस्य वक्तव्यत्वाद् ब्रह्मणो निमित्तत्वादिबोधकमित्यर्थः । तत्रेत्यादीति । अत्र किंच तत्रेत्यादीति वक्तव्येपि अवतरणान्तराभावेनान्यथेत्यर्थासंभवादारम्भो वक्तव्यः, स च कर्मानध्याहरन् न समर्थ इति अध्याहाराभावायैतावदेवोपात्तम् । किंचेति त्यक्तं तद्बीजं पूर्वमुक्तम् । तेषु वक्तव्येष्वित्यति तत्र ब्रह्मणीति पूर्वत्रार्थः । अत्राभासे तु प्रकारविशेषेषु वक्तव्येषु इति तत्रेत्यस्यार्थः । तेच समन्वयसूत्रादारभ्याभिन्ननिमित्तोपादानतादयो विशेषप्रकाराः । संगतिमधिकरणयोराहुः तदुपजीव्यतयेति । लक्षणप्रमाणाभ्यां सामान्यप्रकाराभ्यां वस्तुसिद्धेर्वस्तूपजीव्याश्च तन्निष्ठाः प्रकाराः सामान्यविशेषरूपा इति तयेत्यर्थः । सधर्मकस्य निर्धर्मकाभिन्नत्वेनोक्तजिज्ञासाविषयत्वमत उक्तमुक्तजिज्ञासायामिति उक्तजिज्ञासाविषये अधोक्षजपादेपि । लक्षणप्रमाणात्मकमित्यादिः । अतस्तदुपजीव्यता प्रकारविशेषोपजीव्यता तत्कारणता तया, तेनोपजीव्योपजीवकभावः संगतिरित्यर्थः ।

---

१. 'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी' इति [illegible] ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥ (१-१-२)

भाष्यप्रकाशः ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥ अत्र सर्वेऽपि योगविभागेन शास्त्रयोनित्वादिति सूत्रं भिन्नमभ्युपगच्छन्ति । तन्न युक्तम् । अग्रिमसूत्रेषु साध्यहेतुनिर्देशपूर्वकमेवाधिकरणरचनस्य दर्शनेनात्रापि तथैव युक्तत्वात्, सांख्ये ब्रह्मपदस्य प्रकृतौ प्रयुक्तत्वेन तद्वारणाय विवक्षितब्रह्मणि शास्त्रोक्तकर्तृत्वप्रतिपादनस्यावश्यकत्वाच्च । नच सूत्रभेदेऽप्यधिकरणस्य सूत्रत्रयात्मकत्वाङ्गीकारात् प्रथमसूत्रे विशेषतः प्रमाणानुक्तावप्यथशब्देन धर्मविचारानन्तर्ये ब्रह्मविचारस्य बोधिते ब्रह्मणो वेदान्तवेद्यतोपस्थितेः सुखेनोक्तदोषपरिहारात् सूत्रैक्यं न युक्तमिति वाच्यम् । अथशब्दस्यानेकार्थत्वेनानन्तर्यस्याप्यनेकविधत्वेन धर्मविचारानन्तर्यस्योपपादनसापेक्षत्वेन चाहत्य ब्रह्मणो वेदान्तवेद्यत्वानुपस्थित्या जन्माद्यधिकरणरचनायामनाश्वासप्रसङ्गात् । अतः सूत्रैक्यमेव युक्तमिति । ये तु जन्माद्यधिकरणं, शास्त्रयोनित्वाधिकरणं च भिन्नमङ्गीकुर्वन्ति तेषां मते प्रथमस्य हेतुशून्यत्वाद् द्वितीयस्य च साध्यशून्यत्वात् साकाङ्क्षतयाऽतिक्लिष्टत्वेन तद्विवक्षितप्रमेयासाधकत्वं बोध्यम् ।

रश्मिः ।

जन्माद्यस्य यतः शास्त्रयोनित्वादिति ॥ २ ॥ अत्रापीति अस्मिन् सूत्रेपि तथा । साध्यहेतुप्रतिपादकत्वप्रकारस्यैव युक्तत्वादित्यर्थः । आवश्यकत्वाच्चेति । चकारेण—

‘ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः’ ॥

इति स्मृत्यनुग्रहः संगृहीतः । अत्र ब्रह्मसूत्रपदमुपनिषत्परमिति शांकराः । तत्र सूत्रपदप्रवृत्तिर्मृग्या । रामानुजानां भास्कराणां चाशङ्कामनूद्य निषेधमाहुः न च सूत्रेत्यादि । किंचेति त्यक्त्वा तत्रेत्याभासो राद्धान्ते अधिकरणं सूत्रद्वयात्मकं वा । सूत्रत्रयेति । वेदान्तवेद्यतेति धर्मस्य वेदवेद्यत्वे ब्रह्मणो वेदान्तवेद्यत्वं क्रियाकाण्डं ज्ञानकाण्डमिति समाख्याभ्याम् । उपपादनेति शंकराचार्यैः साधनचतुष्टयानन्तर्याङ्गीकारात् क्वचिदधिकारार्थताङ्गीकारादुपपादनेत्यादि । अनाश्वासेति शाखान्तरेभावात् संशयात्तथा । युक्तमितीति । किंच शास्त्रयोनित्वादितिसूत्रानतिप्रयोजननिवर्तकत्वेनापि सूत्रैक्यं युक्तम् । तथाहि एतस्य शंकरभाष्ये यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत् स्वरूपाधिगम इत्याद्युक्त्वा शास्त्रमुदाहृतं पूर्वसूत्रे ‘यतो वा इमानि भूतानि जायन्ते’ इत्यादीति चोक्त्वा किमर्थं तर्हीदं सूत्रं यावता पूर्वसूत्र एव एवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितमित्याशङ्क्य तत्र सूत्राक्षरेण विस्पष्टं शास्त्रस्यानुपादानात् जन्मादिसूत्रेण केवलमनुमानमुपन्यस्तमित्याशङ्क्येत तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते शास्त्रयोनित्वादितीति । समाधानग्रन्थेनानतिप्रयोजनत्वसूचनादिति । माध्वानां मतमाहुः ये त्वित्यादि । आसत्तिविरहादप्रमाणमित्याहुः तेषां मत इत्यादि । साध्येति जगज्जन्मादिकर्तृत्वं साध्यम् । अतीति यथाकथंचित्साधने सूत्रभेदः किमर्थः गीताविरोधश्चेत्‌····शब्दः । तन्वीति ‘कृष्णायाक्लिष्टकारिणे’ इति श्रुतेः तस्य व्याख्यानमाह विषयाविषयोपमर्ददशायां जातत्वेन आचार्यचरितत्वाभावापत्त्या आचार्यविवक्षितं मोक्षसाधकं यत्प्रमेयं तस्य स्मृतिसहायाज्जन्मरूपहेतुसाध्यकसा-

ननु कथमत्र संदेहो यावता, सत्यं ज्ञानमनन्तं ब्रह्मेत्याह श्रुतिरेव।

विरुद्धं चैतत्। स्वरूपलक्षणाकथने कार्यलक्षणस्य वक्तुमशक्यत्वात्। विवादाध्यासितत्वाच्च। न हि ब्रह्मणो जगत्कर्तृत्वं सर्वसंमतम्। न चागमोदितमिति वेदमात्रस्य ब्रह्मप्रमाणकत्वं वक्तुं शक्यते।

भाष्यप्रकाशः।

लक्षणे शङ्कते नन्वित्यादि। यत् संदिग्धं तत् सम्यक् परिच्छेत्तुं लक्षणीयम्। अत्र ब्रह्मणि कथं संदेहः। यावतेत्यवधारणे हेत्वर्थे वा। तथाच ब्रह्मणः सत्ता स्वरूपलक्षणं च श्रुतित एव सिद्धम्। तदवधारणे ततो हेतोर्वा ब्रह्मणोऽखिलविशेषशून्यत्वेन सिद्ध्या संदेहप्रयोजकप्रकाराभावात् संदेह एव न घटत इत्यर्थः।

प्रकारान्तरेणापि तदभावमाह विरुद्धमित्यादि। यद्धि लोकाप्रसिद्धं तदलौकिकया श्रुत्या निर्णेयम्। श्रुतिस्तु पूर्वं स्वरूपलक्षणमुक्त्वाऽग्रिमे प्रपाठके कार्यलक्षणं वक्ति। अतः प्रथममेव तत्कथनं श्रुतिविरुद्धम्। न च स्वरूपलक्षणे संदेहाभावात् कार्यलक्षणमेवोच्यत इति युक्तम्। अन्नप्राणादिष्वपि तस्यातिप्रसङ्गदर्शनेन स्वरूपलक्षणाकथने केवलतत्कथनस्याप्रयोजकत्वात्। कैश्चिन्मायाशबलस्यान्यैः शुद्धसत्त्वात्मकशरीरविशिष्टस्येतरैः सत्त्वादिगुणत्रयात्मकस्य प्रधानस्यापरैर्नित्यज्ञानेच्छाप्रयत्नधर्मकस्य तथात्वाङ्गीकारेण तस्य विवादाध्यासितत्वाच्च। तदेव विभजति न हीत्यादि। ननु ब्रह्मणः कर्तृत्वस्य सर्वसंमतत्वाभावेऽपि वेदस्य प्रमाणमूर्धन्यत्वात् तदुक्तकोटेरौत्कट्यात् संदेहाभावाय लक्षणविचार उचित इति चेत् तत्राह न चेत्यादि। चोऽवधारणे। कर्ता आगमेन वेदरूपेण

रश्मिः।

साधकत्वमित्यर्थः। यावतेत्युक्तसंबन्धार्थं तच्छब्दघटितफक्किकामाहुः तदवेति। अखिलेति सत्यत्वाद्यभावानामधिकरणरूपत्वेन परेषां तथा। संदेह इति संदेहे दूरत्वं कारणं स्थाणुर्वा पुरुषो वेत्यत्र स्थाणुत्वपुरुषत्वादिकं प्रयोजकं तद्वदत्र तदभावात्। तदभावमिति संदेहाभावमित्यर्थः। स्वरूपेत्यादि भाष्यं विवृण्वन्ति स्म यद्धीति। लोकाप्रेति अनधिगतार्थगन्तृत्वं श्रुतिप्रामाण्यं यतः। श्रुतिस्त्वित्यादि। तैत्तिरीयाणां ब्रह्मोपनिषदीत्यर्थः। अग्रेत्यादि। 'अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिश्रुतिभिः कार्यलक्षणस्यातिव्याप्तिरेवं तु स्वरूपलक्षणलक्षिते कार्यलक्षणं विवक्षितमिति नातिव्याप्तिः। अन्नादीनां सत्यादिप्राधान्यान्न प्रकटसच्चिदानन्दत्वमिति नातिप्रसङ्ग इति भावः। हेतुभाष्यमवतारयितुं शङ्कानिषेधावाहुः न च स्वरूपेत्यादि। केवलतत्कथनस्येति कार्यलक्षणकथनस्येत्यर्थः। अप्रयोजकत्वादिति। इदमशक्यत्वादित्यस्य विवरणम्, तथाहि कार्यलक्षणस्य किमन्यद् ब्रह्मज्ञानजनकमिति जिज्ञासया प्रवृत्तत्वेन जिज्ञासायाः स्वरूपलक्षणलक्षितब्रह्मघटितत्वेन विशेषणज्ञानाभावप्रयुक्तजिज्ञासाभावात् कारणविघटनेनाकारणकत्वरूपाप्रयोजकत्वमशक्यत्वमिति। विवादेत्यादिभाष्यं विवृण्वन्ति कैश्चिदिति। शांकरैरित्यर्थः। अन्यैरिति रामानुजशैवभास्करमाध्वैरित्यर्थः। इतरैरिति सांख्यैरित्यर्थः। अपरैरिति नैयायिकैरित्यर्थः। तथात्वाङ्गीकारेणेति भूतादिकर्तृत्वाङ्गीकारेणेत्यर्थः। तस्येति भूतादिकर्तृत्वस्येत्यर्थः। तदेवेति विवादाध्यासितत्वमेवेत्यर्थः। तदुक्तेति वेदोक्तायाः कर्तृत्वकोटेः। लक्षणेति कार्यलक्षण-

---

१. कार्यलक्षणाभावमित्यर्थः।

किंच व्यर्थश्चैवं विचारः । लक्षणप्रमाणाभ्यां हि वस्तुज्ञानं भवति । तच्च स्वरूपलक्षणेनैव भवतीति किमनेन । तस्मादयुक्तमुत्पश्याम इति ।

उच्यते ।

संदेहवारकं शास्त्रं वेदप्रामाण्यवादिनाम् ।
क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते ॥

न हि श्रुतिं व्याख्यातुं प्रवृत्तः सूत्रकारः किंतु संदेहं वारयितुम् । तत्र, 'सत्यं ज्ञानमनन्तम्', 'नित्यशुद्धमुक्तस्वभावम्' इतिश्रुत्या कर्तृत्वादिप्रापञ्चिकधर्मराहित्यं प्रतीयते । 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति' इति कर्तृत्वं च ।

भाष्यप्रकाशः ।

मूलशास्त्रेणोदित इत्येतावता कृत्स्नस्य वेदस्यैव ब्रह्मणि प्रमाणत्वं न वक्तुं शक्यते । कल्पनोपदेशस्यापि तत्र शक्यवचनत्वादनुमानस्यापि तत्र प्रमाणत्वाच्चेत्यर्थः । अत्र ब्रह्मप्रमाणत्वमिति पाठः प्रतिभाति । अथ वेदोक्त एवाग्रहस्तदा दूषणान्तरमाह किंचेत्यादि । अयुक्तमिति सूत्रोक्तं लक्षणमयुक्तमित्यर्थः । शेषमतिरोहितार्थम् ।

अत्र समाधातुं गृह्णते उच्यत इत्यादि । प्रकारान्तरेणात्र संशय उच्यते । वेदप्रामाण्यवादिनाम् । 'सर्वे वेदा यत् पदमामनन्ति' इति श्रुत्यनुसारेण ब्रह्मण्येव सर्वस्य वेदस्य प्रामाण्यमन्यत्र प्रमाणाभासत्वमितिवादिनां वेदे यः संदेहस्तद्वारकमिदं वैयासं शास्त्रम् । तत्र कः संदेह इत्यपेक्षायां, परस्थिने 'ब्रह्मविदाप्नोति परम्' इत्यत्राप्नोतिकर्मभूतो यः पर उक्तस्तत्स्थिते क्रियाशक्तिज्ञानशक्ती स्वरूपलक्षणविरुद्धत्वाद् ब्रह्मणि संदिह्येते, स्तो न स्तो वेत्येष संदेह इत्यर्थः । गृहीतं विभजन्ते न हीत्यादि । यदुक्तं स्वरूपलक्षणाकथन इत्यादि, तदसंगतम् । यदि सूत्रकारः श्रुतिं व्याख्यातुं प्रवृत्तः स्याद् यथाक्रमं प्रतिपदं च व्याकुर्यात् । न तु तथा । किंतु संदेहं वारयितुम् । ततश्च यत् संदिग्धं तद्विवृणोति, व्याख्येयसमानार्थकैरन्यैश्च पदैर्विपक्षसपक्षबाधक-

रश्मिः ।

विचारः । कल्पनेति यथा 'वाचो धेनुमुपासीत' इत्यत्र वाचो धेनुत्वकल्पने कल्पनयोपदेशः । तत्रेति कृत्स्ने वेदे । प्रतिभातीति । एतेन ब्रह्मणि, प्रमाणं भावे ल्युट्, प्रमा येनेति व्यधिकरणपदो बहुव्रीहिः कप् साधक इत्यसूचि । 'यतो वाचो निवर्तन्ते' इति श्रुतेरज्ञाते कं साधयित्वा ब्रह्मणीदमित्थतांशे ज्ञानप्रमाणकत्वं वार्थः । यद्वा केनोपनिषदि 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते' इति श्रावणाद्ब्रह्म प्रमाणं यस्येत्येव बहुव्रीहिः । वेदोक्तेति वेदोक्तावेदोक्तयोर्वेदोक्तलक्षण इत्यर्थः । एवकारेण व्याख्यानव्यवच्छेदः । प्रकारान्तरेणेति प्रकारस्तु वेदोक्तस्वरूपलक्षणं व्याख्यानोक्तमसर्वाङ्गीकृतकर्तृत्वलक्षणं वा ब्रह्मेति । तत्स्थित इति अधोक्षजे परे स्थिते । अधोक्षजत्वान्न विचारस्तस्य । अत एव शेषषष्ठी । आर्थिकार्थमाहुः ततश्च यदित्यादि । विवृणोतीति विवृण्वन्ति । व्याख्येयेत्यादि । यद्यप्याचार्याः यत इत्यादौ आचार्य इवाचरणं करोति इति व्याख्येयसमानार्थकैः पदैरेव विवरणं दृश्यते, तथापि प्रकृतोपयोगि विवरणमिदं ज्ञेयम् । यथात्रैव सूत्रे समपदानि अन्यानि च । एवं सर्वत्राध्याये । द्वितीयाध्याये विपक्षो निश्चितसाध्याभाववान् यथा सांख्यानामसंगपुरुषः भूतकर्तृत्वरूपनिश्चितसाध्याभाववान् । तस्य बाधक-

तत्र संदेहः। किं ब्रह्म कर्तृ, आहोस्विदकर्तृ। किं तावत् प्राप्तम्। अकर्तृ।

भाष्यप्रकाशः।

साधकतर्कोपन्यासेन संदेहमपाकरोति। तत्र, सत्यमित्यादिके स्वरूपलक्षणे, यतो वेत्यादिकार्यलक्षणे, च ब्रह्मपदादेकस्यैव लक्षणद्वयमुतोभयत्र सामान्यशब्दप्रयोगेऽपि लक्ष्यस्वरूपभेदेन तदवच्छेदकभेदाद् ब्रह्मभेदः। तत्र यदि भेदस्तदा कस्य वेदार्थत्वं कस्य न, उतोभयोर्वेति पुनः संदेहसंभव इति तद्वारणार्थमेकं ब्रह्म वक्तव्यम्। तथा सत्युक्तरीतिकाद् विरोधात् संदेह इति प्रकारप्रश्नोत्तरत्वेन संदेहबीजमुक्तम्। स्वरूपलक्षणस्य दृढीकरणादकथनेऽप्यदोषश्च बोधितः। संदेहाकारमाहुः तत्रेत्यादि। तथा च परस्परविरुद्धार्थबोधकाभ्यां लक्षणाभ्यामेव संदेहाल्लक्षणकरणं युक्तमित्यर्थः। पूर्वपक्षं विवृण्वन्ति ब्रह्मेत्यादि। अयमर्थः। शेषलक्षणे, कर्म फलार्थत्वादित्यने-

रश्मिः।

स्तर्कस्तदा सांख्यस्मृत्यनवकाशः स्यादिति तस्योपन्यासः। सपक्षो निश्चितसाध्यवान् स च प्रकृतिसमवायिपरमाणुभिन्नेश्वरदृष्टान्तादिरूपस्तद्बाधकस्तर्को यद्येवं स्यात् सिद्धान्तरूपस्तस्योपन्यासस्तेन। संदेहास्तत्रतत्रोक्ताः अत्रत्योऽत्रैव वाच्यस्तत्र सत्यमित्यादिना। यद्यपि उक्तरीतिकतर्कोपन्यासो नास्ति तथापि सामान्यन्यायेन बोध्यः। अत्रत्यसंदेहमाहुः तत्र सत्यमिति। ब्रह्मपदादिति 'तद्विजिज्ञासस्व तद्ब्रह्म' इति कार्यलक्षणे ब्रह्मपदं, तेन कार्यलक्षणलक्षितं स्वरूपलक्षणे परविपश्चित्पदाभ्यां परिधापितं ब्रह्म जिज्ञासासंबन्धीत्युक्तम्। तत्र जिज्ञासा विचाररूपा अधोक्षजत्वात्परे विपश्चिति न प्रवर्तते, यौगिकी तु प्रवर्तते विचारस्याशेषधर्मसापेक्षत्वेन इदमित्थतांशेऽभावेऽपि आहार्यज्ञानविषयिण्या इच्छाया अधोक्षजत्वेऽपि अबाधात्। धर्मत्वसामान्यप्रत्यासत्त्या सर्वे धर्मा इति ज्ञानसत्त्वात् विचारे त्वस्याप्रयोजकत्वात्। विचारस्य सर्वधर्मस्वरूपज्ञानसापेक्षत्वात्। अतः तद्विजिज्ञासस्व इत्यत्र तदिति लुप्तषष्ठीकं पदं विचारार्थपक्षे, द्वितीये तु यथोक्तम्। एकस्येति ब्रह्मण इत्यर्थः। उभयत्रेत्यादि कार्यलक्षणलक्षिते स्वरूपलक्षणलक्षिते चेत्यर्थः। ब्रह्मशब्दप्रयोगेपि लक्ष्यस्य कार्यलक्षणनिर्णयवाक्येन 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दे प्रयन्त्यभिसंविशन्ति' इत्यनेन आनन्दत्वनिर्वचनाल्लक्ष्य आनन्दः, स्वरूपं सत्यज्ञानानन्तरूपमिति भेदेन आनन्दत्वसंबृहत्त्वरूपशक्यतावच्छेदकभेदात् ब्रह्मभेद इत्यर्थः। बृहत्त्वबृंहणत्वे व्यापकत्वपोषकत्वरूपेऽवच्छेदकत्वेनोक्ते। सत्यज्ञानानन्तत्वमपि स्वरूपतावच्छेदकं ज्ञेयम्। तत्रेति लक्ष्यस्वरूपयोरित्यर्थः। एकं ब्रह्मेति विद्वन्मण्डने स्पष्टम्। तथासतीत्यादि एकस्मिन्ब्रह्मणि कार्यस्वरूपलक्षणलक्षिते सति। एकस्यैव लक्षणद्वयमित्युक्ता रीतिर्यस्मिन् संशयवर्णने तस्माद्विरोधात्कर्तृ आहोस्विदकर्तृ इत्येवंविधसंशयगतविरोधात्। अथवा भाष्योक्तरीतिकात्स्वरूपलक्षणविरोधात्कारिकोक्तः क्रियाशक्तिज्ञानशक्ती स्तः न स्तो वा इत्येवं संदेह इति। उच्यत इत्यस्यार्थकथने प्रकारान्तरेणेत्युक्तं तत्र प्रकारप्रश्नो भेदप्रतियोगिप्रकारः क इति आक्षेपलभ्यस्तदुत्तरत्वेन भाष्ये श्रुत्येति कार्यलक्षणफक्किकायामावृत्य श्रुतिबोधितत्वाविशेषरूपं कर्तृत्वांशे कोटिबीजमिति स्वरूपलक्षणविरोधरूपं च संदेहबीजमुक्तमित्यर्थः। भगवता व्यासेन स्वरूपलक्षणानुक्तौ हेतुमाहुः स्वरूपेत्यादि। अधोक्षजत्वादपि स्वरूपलक्षणं दृढीकृतम्। तत्रेत्यादीति कर्तृ ज्ञानक्रियाशक्तिमत्, अकर्तृ तद्रहितं तेन ज्ञानशक्तिक्रियाशक्ती संदिह्येते इति कारिकाविरोधो न। नहि परमस्ति न वेति संदेह उपपद्यतेऽसत्त्वप्रसङ्गात्। तथा चेति एकस्यैव लक्षणद्वयमित्येवं संशये नाकृतौ। पूर्वपक्षमिति अकर्मेति पूर्वपक्षमित्यर्थः। कर्म फलार्थत्वादिति। इदं सूत्रं पूर्वतन्त्रे तृतीयेऽस्ति।

कथम् । ‘ब्रह्मविदाप्नोति परम्’ इति प्रधानवाक्यम् । फलसंबन्धात् । श्रुत्यापि विवृतम् । ‘सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता’ इति । फलार्थं च ब्रह्मज्ञानम् । फलं च फलवाक्योक्तधर्मज्ञानादेव, नान्यथा । कर्तृत्वं च परविवरणतयोक्तम् । परं किमित्युक्ते यः सर्वान्तर आनन्द इति । कथं सर्वान्तरमित्याकाङ्क्षायां परिचयार्थं

भाष्यप्रकाशः ।

नोपलक्षणविधया ज्ञानस्यापि फलशेषत्वे सिद्धे प्राधान्यं फलस्यैवेति तत्संबन्धादुक्तमेव प्रधानवाक्यं, न तु कार्यलक्षणवाक्यं तथा । न चैवं पूर्वकाण्डेऽस्तु, उत्तरकाण्डे तत् किमित्युपेयमिति वाच्यम् । श्रुत्यापि विवृतम् । यदि तस्य प्राधान्यं न स्यात् किमिति विवृणुयादतोऽत्रापि तदादृतम् । तथा सति ज्ञानं फलार्थं, फलं च फलवाक्योक्तधर्मज्ञानात् परत्वज्ञानादेव । अतः परत्वज्ञानार्थं कर्तृत्वं परविवरणतयोक्तम् । स्वरूपलक्षणे प्रापञ्चिकधर्मराहित्यप्रतीतेर्ब्रह्मणि कर्तृत्वस्याशक्यवचनत्वात् । तस्माद्वा एतस्मादित्यादिना यत् कर्तृत्वमुक्तं तज्ज्ञेयात् फलरूपं परं पृथक्कृत्य तं विवरीतुमुक्तम् । ततस्तत्स्वरूपजिज्ञासायां सर्वान्तरत्वकथनपूर्वकमानन्द इति स्वरूपमुक्तम् । अन्यथा तन्निरूपणमसंगतं स्यात् । सर्वान्तरत्वं च तस्य परत्वनिर्वाहकतयोक्तम् । तत्रापि कथं-

रश्मिः ।

‘कर्माण्यपि जैमिनिः फलार्थत्वात्’ इति तदर्थकथनमिदम् । तथेति प्रधानत्वेनेत्यर्थः । श्रुत्यापीत्यादि भाष्यमवतारयन्ति न चैवमित्यादि । न चैवमिति पूर्वतन्त्रीयन्यायादरणमित्यर्थः । यदि तस्येत्यादि यदि उत्तरकाण्डे फलसंबन्धिवाक्यस्य प्राधान्यं न स्यादित्यर्थः । अत्रापीत्यादि उत्तरकाण्डेऽपि फलसंबन्धात्प्राधान्यमादृतमित्यर्थः । फलार्थं चेत्यादि भाष्यं विवृण्वन्ति तथा सतीत्यादि । कोऽसौ धर्मो यज्ज्ञानात्फलमित्यत आहुः परत्वज्ञानादिति । ब्रह्मणो विशेषधर्माणां चाधोक्षजत्वेन यतो वाच इति श्रुत्या चानुक्तिः । भाष्ये । एवकारेण ब्रह्मत्वेऽपि सर्वेषां कार्यकारणभावाभावादन्यफलकारणं व्यवच्छिद्यते । भाष्ये । नान्यथेति नान्यधर्मज्ञानैः कार्यकारणभावाभावादित्यर्थः । प्रकृते । कर्तृत्वं चेत्यादि भाष्यं विवृण्वन्ति अतः परत्वेत्यादि । उक्तमिति । ‘परमे व्योमन्’ इत्यन्तेन ‘ब्रह्मवित्’ इत्यंशविवरणं कृत्वा ‘सोश्नुते’ इत्यादि परविवरणे ब्रह्मणेति सहार्थेऽप्रधाने तृतीयया कर्तृत्वमुक्तमशनस्याप्रधानं मुख्यं तु कर्तृत्वम् । ‘तस्माद्वा एतस्मादात्मन आकाशः संभूतः’ इत्यादिनोक्तं विवरीतुमिति ‘यथाग्नेः क्षुद्रा विस्फुलिङ्गाः’ इत्यादिश्रुत्युक्तमक्षरकर्तृत्वं तु ‘कदाचित्पुनरन्यथा’ इति निबन्धावरणरूपाक्षरद्वारेति फलितम् । तदेव साधयन्ति स्वरूपलक्षणेत्यादि । ज्ञेयादिति ब्रह्मविदित्युक्तादित्यर्थः । परं किमित्यादि भाष्यं विवृण्वन्ति ततस्तदित्यादि । अत्र यद्यपीति शेषः । परं किमिति तत्स्वरूपजिज्ञासा ज्ञातुमिच्छा । प्रच्छ ज्ञीप्सायाम् । किमः प्रश्ने । तथा च भाष्यं जिज्ञासापदेनेत्यादि । उक्तमिति ब्रह्मवित्प्रपाठके उक्तम् । स्वरूपमुक्तमिति ‘तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयः’ इति स्वरूपमुक्तमित्यर्थः । ननु स्वरूपलक्षण आत्मानन्दस्याभावात् कथमेवमित्याकाङ्क्षायामाह अन्यथेत्यादि । प्रकृते तु व्याख्येयव्याख्यानरूपा संगतिरिति ज्ञेयम् । शेषं तद्भविष्यतीत्याशङ्कामपाकुर्वन्तः कथं सर्वान्तरमित्यादिभाष्यं विवृण्वन्ति सर्वान्तरत्वं चेत्यादि । तथा चानन्द एव स

भूतभौतिकसृष्टिमुक्त्वा गौणानन्तर्यं परिहृतम् । गौणोपासनाफलं च प्रधानशेषतयोक्तम् । तत्रान्यगतकर्तृत्वारोपानुवादोऽपि संभवति । ततश्च भृगुर्वै वारुणिरित्युपाख्यानेऽपि परिचायकत्वाद् गौणकर्तृत्वमेवानूद्यते, फलाश्रवणादिति पूर्वः पक्षः ।

सिद्धान्तस्तु ।

उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत् ।
वेदेन बोधितं तद्धि नान्यथा भवितुं क्षमम् ॥
न हि श्रुतिविरोधोऽस्ति कल्पोऽपि न विरुध्यते ।
सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवद् बृहत् ॥

भाष्यप्रकाशः ।

भावाकाङ्क्षायां तन्निष्कर्षार्थमाकाशादीनां भूतानामोषध्यादीनां भौतिकानां च सृष्टिकथनेन कर्तृत्वं प्रतिपाद्य तस्य सर्वान्तरत्वकथनेन चरमत्वाद् गौणमपर्यवसन्नं प्राणादीनामिवानन्तर्यं निवारितम् । 'सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासते' इत्यादिनाऽन्नब्रह्माद्युपासनाफलं प्रधानशेषतया, 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इत्यादिनानुवाकचतुष्टयेन कथितस्य सत्त्वब्रह्मानन्दावाप्तिसर्वभयाभावरूपप्रधानफलस्य शेषतया सर्वोत्कृष्टत्वज्ञापनायोक्तमिति कर्तृत्वं परस्मिन् सिद्ध्यति । तथापि स्वरूपलक्षणविरोधात् पूर्वकाण्डोक्तप्रजापतिगतस्य प्रकृतिगतस्य वा कर्तृत्वस्यारोपेणानुवादोऽपि संभवतीति द्वितीयप्रपाठकेऽपि फलाश्रवणेनामुख्यत्वात् तत्राप्येवं नेतव्यम् । तथा च नास्य लक्षणत्वमिति पूर्वपक्षार्थः ।

सिद्धान्तमाहुः उत्पत्तीत्यादि । तदिति कर्तृत्वम् । अन्यथेति गौणम् । कल्प इति कल्पसूत्रम् । सर्वभावः सर्वभवनम् । तत्र समर्थत्वादकर्त्रपि कर्त्रित्यर्थः । गृहीतं विभजन्ते वेदेनेत्यादि । स्यादन्यगतकर्तृत्वारोपानुवादः कार्यलक्षणे यदि स्वरूपलक्षणं विरुध्येत । तदेव तु न ।

रश्मिः ।

इति भावः । लिङ्गं तु विज्ञानमयरूपजीवादप्यान्तरत्वम् । तत्रापीति अन्नादिसर्वान्तरत्वेपि मुख्यं तद्गौणं वेति कथंभावाकाङ्क्षायामित्यर्थः । गौणोपासनेत्यादि भाष्यं विवृण्वन्ति सर्वं वा इत्यादि । शेषत्वं विवृण्वन्ति अस्ति ब्रह्म इति । उक्तेनानुवाकेन सत्त्वं, असद्वा इदमित्यनुवाकेनापि सत्त्वं, भीषास्माद्वातः पवते इत्यनुवाकेन ब्रह्मानन्दावाप्तिः, 'यतो वाचो निवर्तन्त' इत्यनेन सर्वेषां वातादीनां भयाभावः । सर्वोत्कृष्टत्वेत्यादि सर्वेभ्य उपासनाफलेभ्यः परप्राप्तेरुत्कृष्टत्वेन ज्ञापनार्थम् । तथापि नेत्याहेति वदन्तस्तत्रान्येत्यादि भाष्यं विवृण्वन्ति तथापीत्यादि । आरोपेणेति परस्मिन्नित्यर्थः । ततश्च भृगुर्वा इत्यादिभाष्यं विवृण्वन्ति द्वितीयप्रपाठक इति । यतो वा इत्यादिषु गौणं कर्तृत्वमुच्यते तद्ब्रह्मेति श्रावणेन पररूपफलाश्रवणादित्यर्थः । तथा चेत्यादि एवंविधेन विरोधेन प्रजापत्यादिगते कर्तृत्वेऽङ्गीकृते न भूतादिकर्तृत्वस्य लक्षणत्वमित्यर्थः । गौणमिति गौणत्वेन प्रकारेण गौणम् । कल्पसूत्रमिति तत्र कर्ता कारयिता हरिरिति वक्ष्यमाणम् । ननु लक्षणं न बृहतः किंतु परस्येत्यत आहुः तत्र समर्थत्वादिति । तथा चाक्षरस्य चरमत्वात् पुरुषविधस्य विरुद्धधर्माश्रयत्वात् न विरुद्धं जन्मादिकर्तृत्वं लक्षणमिति भावः

वेदेनैव तावज्जगत्कर्तृत्वं बोध्यते । वेदश्च परमाप्तोऽक्षरमात्रमप्यन्यथा न वदति । अन्यथा सर्वत्रैवाविश्वासप्रसङ्गात् । नच कर्तृत्वे विरोधोऽस्ति । सत्यत्वादि-

---

भाष्यप्रकाशः ।

विवरणार्थे परस्य तृतीयान्तेन ब्रह्मपदेनैव विवृतत्वात् । नच तत्र वेदहिरण्यगर्भब्राह्मणजातिजीवा अर्थत्वेन ग्रहीतुं शक्याः । परपदविवरणात् सान्तत्वादिना ब्रह्मापेक्षयोत्कर्षस्य तेष्वशक्यवचनत्वात् । परशब्दस्यान्यार्थकत्वोपगमेऽपि विवरणोक्तब्रह्मशब्दानुरोधादेत एव परत्वेन ग्राह्याः । तत्प्राप्तिस्तु कर्मणापीति साधनान्तरेण ज्ञानेन को वा विशेषः स्यात् । अत उत्कृष्टार्थकत्वमादरणीयम् । उत्कृष्टं च किमित्यपेक्षायां विवरणानुरोधाद् ब्रह्मान्तरं कल्प्यम् । तच्चाप्रसिद्धं, स्वरूपलक्षणहीनं च । न च प्रकृतिः । सांख्यमतेऽपि ज्ञानात्मकपुरुषापेक्षया तस्या हीनत्वात् परार्थत्वाच्च । अश्रौतत्वस्य वक्ष्यमाणत्वाच्च । अतो ब्रह्मापेक्षयान्यस्य परत्वेन वक्तुमशक्यत्वादुक्तलक्षणविशिष्टस्यैव ब्रह्मणः कर्तृत्वं वेदेन बोध्यते । नच तदारोपितमिति शक्यवचनम् । निरङ्कुशस्य तस्याऽन्यत्रासिद्धताया अनुपदमेव वक्ष्यमाणत्वात् ।

किंच । वेदः परमाप्तत्वादक्षरमात्रमपि मिथ्या न वदति । यदि क्वापि तथा वदेत्, स्वर्गकामो यजेतेत्यादिविध्यंशे स्वरूपलक्षणाद्यंशे चाविश्वसनीयः स्यात् । ततश्च सन्मार्गमात्रमुच्छिद्येत । अतो यद्यद्यथा वदति तत्तथेति मन्तव्यम् । तेन कर्तृत्वं वेदोक्तत्वादपि वास्तवमित्येव सिद्ध्यति । नच कर्तृत्वाङ्गीकारे स्वरूपलक्षणविरोधोऽस्ति, येन तदनुरोधादवास्तवत्वं तस्य कल्प्येत । तदुक्तसत्यत्वादिधर्मवत् कर्तृत्वस्याप्युपपत्तेः । नच ब्रह्म यावद्धर्मरहितमिति वक्तुं शक्यम् । स्वरूपलक्षणविरोधात् । तत्र ब्रह्मणि सत्यत्वादिधर्माङ्गीकारात् । नचासत्यजडसान्तव्या-

रश्मिः ।

कारिकायाम् । तृतीयान्तेनेति 'ब्रह्मणा विपश्चिता' इति तृतीयान्तेन । विविधभोगकर्तृत्वस्य सृष्टिमन्तरेणानुपपद्यमानस्य सामर्थ्याज्जगत्कर्तृत्वं न स्वरूपलक्षणविरुद्धमित्यर्थः । यत्तूपनिषद्भाष्ये विपश्चिता मेधाविना सर्वज्ञेनैवेत्यर्थः इति शंकराचार्यास्तदपि सर्वमन्तरेण सार्वज्ञ्यानुपपत्त्या सर्वकर्तृत्वं द्रढयति । न च भोगकर्तृत्वापेक्षया अशनकर्तृत्वं ज्याय इति शङ्क्यम् । अश्नुत इत्युक्ताशनस्य भोगत्वात् । अत्राप्रधानकर्तरि तृतीया 'सहयुक्तेऽप्रधाने' इति सूत्रेण । क्वचिदप्रधाने कर्मादौ तथाचाप्रधान इत्यस्य विभक्त्यर्थे अप्रधाने इत्यर्थः । न च तत्रेति तृतीयान्ते ब्रह्मपदे इत्यर्थः । यद्यपि ते परत्वमाश्रयन्ते तथापि ज्ञेयब्रह्मापेक्षया नाश्रयन्त इत्याहुः सान्तत्वादिनेत्यादि । आदिना सर्वोत्कृष्टत्वम् । ब्रह्मापेक्षयेति परविवरणब्रह्मापेक्षयेत्यर्थः । ननु परस्यान्यत्रानात्मवैरिदूरकेवलेष्वपि वृत्तिदर्शनात्तेऽर्थाः सन्तु इत्याशङ्का नेत्याहुः परशब्दस्येत्यादि । एत एवेति वेदादय इत्यर्थः । तथा सति ब्रह्मविदिति विशेषासमर्पकं भवेदित्याहुः तत्प्राप्तिस्त्वित्यादि । वक्ष्यमाणत्वाच्चेति आनुमानिकमप्येकेषामित्यानुमानिकाधिकरणे वक्ष्यमाणत्वादित्यर्थः । अन्यत्र सिद्धस्यैवारोपो दृष्टः प्रकृते तु तदभावादारोपोऽशक्यवचन इत्याहुः निरङ्कुशस्येत्यादि । अनुपदमिति अत्रैव सत्यत्वादिधर्मवदित्यादिना विशेषेण तु द्वितीयाध्यायद्वितीयपादे । वेदश्चेत्यादि भाष्यं विवृण्वन्ति किं च वेदेत्यादि । अन्यथेति भाष्यं विवृण्वन्ति स्म यदीति । न च कर्तृत्व इत्यादिभाष्यं विवृण्वन्ति न च कर्तृत्वेत्यादि । सर्वथेत्यादिभाष्यं विवृण्वन्ति न च ब्रह्मेत्यादि । ननु न सत्यत्वादिधर्मो ब्रह्मण्युपेयते अपित्वसत्यत्वादेरभावोऽधिकरणात्मकोऽभ्युपेयते इति निर्धर्मकं ब्रह्मेत्याशङ्कां निषेधन्ति न चासत्येत्यादि ।

धर्मवत् कर्तृत्वस्याप्युपपत्तेः। सर्वथा निर्धर्मकत्वे सामानाधिकरण्यविरोधः। सत्यज्ञानादिपदानां धर्मभेदेनैव तदुपपत्तेः। न च कर्तृत्वं संसारिधर्मो, देहाद्यध्यासकृतत्वादिति वाच्यम्। प्रापञ्चिके कर्तृत्वे तथैव। न त्वलौकिककर्तृत्वे। अत एवास्येत्याह । अस्येति पुरोवर्ती प्रपञ्च इदमा निर्दिश्यते। अनेकभूतभौतिकदेवतिर्यङ्मनुष्यानेकलोकाद्भुतरचनायुक्तब्रह्माण्डकोटिरूपस्य मनसाप्याकलयितुमशक्यरचनस्यानायासेनोत्पत्तिस्थितिभङ्गकरणं न लौकिकम्।

भाष्यप्रकाशः ।

वृत्तत्वेनैक एवार्थः सत्यादिपदैरुच्यत इति वक्तुं युक्तम्। व्यर्थपौनरुक्त्यापत्तेः। तत्तद्भेदधर्मकत्वसिद्ध्या घटकुट्यां प्रभाताच्च। अतः सत्यादिपदानां स्वार्थत्यागोऽपार्थ एव। तदेतदुक्तं धर्मभेदेनैव तदुपपत्तेरिति। स्फुटमग्रिमम्।

ननु लक्षणद्वयस्यैकपरत्वे सर्वासु श्रुतिष्वेकमेव ब्रह्म प्रतिपाद्यम्। तदा, अस्थूलादिवाक्येष्वपि तदेव निरूप्यत इति निर्धर्मकत्वं बलादापतितमतः कर्तृत्वनिषेध एव युक्त इत्यत आहुः

रश्मिः ।

व्यर्थेत्यादि असत्यमात्रव्यावृत्त्या जडादिव्यावृत्तिसिद्ध्या तथेत्यर्थः। नैयायिकोक्तदूषणग्रासान्नाभावोधिकरणानतिरिक्तः इत्याशयेनाहुः तत्तद्भेदेत्यादि। असत्यमात्रव्यावृत्त्या इत्यत्र व्यावृत्तिर्भेदः स च ब्रह्मणीति तत्रासत्यादिव्यावृत्तयस्तत्तद्भेदास्तद्धर्मकत्वसिद्ध्या। न्यायमाहुः घटकुट्यामिति द्वितीयाध्यायोपान्तेस्ति ज्ञानप्रक्रियायाम्। प्रहस्ते चास्ति श्वेताश्वतरस्य शिवपरत्वखण्डने च। यथा कस्यचिद्भ्रमतः संन्यासिनः स्तेयकृतो वा मूलमलभमानस्य घटकुट्याः समाधिभेदकुम्भदास्या इभशिरःकुम्भदास्या निर्गतस्य तत्रैव प्रभातं तथा धर्मनिषेधाय भ्रमतो धर्म एव पर्यवसितिरित्यर्थः। अत्र विश्वकोशः 'घटः समाधिभेदेभशिरःकूटकुटेषु च। कुटः कोटे घटे गेहे शिलाकुट्टकपूरुषे। स्यात्कुटीकुम्भदास्यां च सुरायां चित्रगुच्छके' इति समाधिगेहान्निर्गतस्येत्यर्थः। अपार्थ एवेति एवकारस्तु सर्वत्र ग्रन्थेषूपपादनान्निर्धर्मकत्वव्यवच्छेदकः। तदेतदिति। न चासत्येत्यादिना विवृतमित्यर्थः। सत्यत्वादिधर्मभेदेनैव भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वरूपसामानाधिकरण्योपपत्तेरिति भाष्यार्थः। स्फुटमित्यादि तथाहि। भाष्ये। न चेत्यादि। अहन्ताममतात्मकः संसारः सोस्यास्तीति संसारी तस्य धर्मः यतोऽहं कर्तेत्यादिप्रतीत्याहंकारसमानाधिकरणं कर्तृत्वं, संसाराभावे तु अहं मुक्तो न कर्तेति अस्मत्प्रत्ययगोचरे कर्तृत्वतदभावौ। देहाद्यध्यासः प्रधानकार्यत्रिगुणात्मकदेहाद्यध्यासोहं कर्तेति।

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥'

इति वाक्याद् देहादिधर्मस्थौल्यादिकर्तृत्वं स्वस्मिन्नध्यस्यते भोक्तृत्ववत्। भोक्तृत्वमानन्दधर्मः 'आनन्दभुक्' इति श्रुतेरित्यर्थः। शङ्कितमनुमानं सत्प्रतिपक्षमित्याशयेनाहुः प्रापञ्चिक इत्यादि। तथा च कर्तृत्वं न संसारिधर्मः ब्राह्मत्वात् सत्यत्वादिवत् इति प्रतिपक्ष इति भावः। हेतुर्व्याप्यत्वासिद्ध इत्यपि लौकिकं कर्तृत्वमुपाधिः। सूत्रकारस्याप्ययमेव आशय इत्याहुः अत एवेत्यादि। अलौकिककर्तृत्वादेवेत्यर्थः। ब्रह्मणो भविष्यति नेत्याहुः अनेकेत्यादि। तथाच हिरण्यगर्भस्यापि स्रष्टृत्वे प्रमाणाभावोनायासेनेत्यर्थः। अतएव निरध्यस्तैरेव देहादिभिः कर्मकरणसंभवादितिपाध्यम्। एवमग्रिमं स्फुटमित्यर्थः। प्रकृते। निर्धर्मकत्वमिति श्रौतधर्मनिषेधादस्थूलादि-

प्रतीतं च निषेध्यम्। नाप्रतीतं, न श्रुतिप्रतीतम्। सत्यत्वादयश्च लौकिकाः। ततः सर्वनिषेधे तदज्ञानमेव भवेत्। नच सत्यत्वादिकं लोके नास्त्येव व्यवहारमात्रत्वात्, कारणगतमेव सत्यत्वं प्रपञ्चे भासत इति वाच्यम्। तर्हि कर्तृत्वं तथा कुतो नाङ्गीक्रियते। स्मृतिश्च स्वीकृता भवति 'कर्ता कारयिता हरिः' इति।

नचारोपन्यायेन वक्तुं शक्यम्। तथा सत्यन्यस्य स्यात्। तत्र न प्रकृतेः। अग्रे स्वयमेव निषिध्यमानत्वात्। न जीवानामस्वातन्त्र्यात्। न चान्येषामुभय-

---

भाष्यप्रकाशः।

प्रतीतमित्यादि। युक्तः प्रतिषेधः। परंत्वस्थूलादिवाक्ये लोकप्रतीता एव प्रतिषिध्यन्त इत्यत्रापि प्रतीतमेव प्रतिषेध्यम्। अत एव नाप्रतीतम्। प्रसञ्जयितुमशक्यत्वेन प्रतिषेधानर्हत्वाच्च। न श्रुतिप्रतीतम्। तुल्यबलत्वात् प्रत्यायनवैयर्थ्यापाताच्च। श्रुत्युक्ताः सत्यत्वादयोऽपि यदि लौकिकत्वेनादृतास्ततो लोकश्रुतिप्रतीतसाधारण्येन सर्वनिषेधे ब्रह्माज्ञानमेव भवेत्। तथाच स्वरूपलक्षणवैयर्थ्यं सर्वनाशश्च स्यात्। नच तदभावाय लोकस्य व्यवहारमात्रत्वात् तत्रापि कारणगतमेव सत्यत्वमतो न तत् प्रतिषेध्यं, किं तु कर्तृत्वमेवेति वाच्यम्। तदा तु धर्मसंकोचस्य तौल्यात् कर्तृत्वमपि तथाङ्गीकार्यम्। तेन कल्पस्मृतिस्वीकाररूपगुणोऽपि भविष्यति। नन्वगत्या सत्यत्वं तथास्तु, न तु कर्तृत्वमपि। आरोपन्यायेन तस्य शक्यवचनत्वादित्यत आहुः न चेत्यादि। अन्येषामिति अभावकालस्वभावभूतग्रहलोकपालादीनाम्। ननु प्रकृते फलवाक्यविचारो भवतापि

रश्मिः।

श्रुतिभिः। अत इति कर्तृत्वाकर्तृत्वयोः प्राप्तौ युक्तत्वादित्यर्थः। इत्यत्रापीति नित्यशुद्धबुद्धमुक्तस्वभावमित्यादिष्वित्यर्थः। प्रसञ्जयितुमिति अभावस्य प्रसक्तिं कर्तुम्। प्रतिषेधानर्हत्वाच्चेति। यथाहुः अभावलौकिकप्रत्यक्षं प्रति प्रतियोगिज्ञानस्य हेतुत्वमन्यथा प्रतियोगिज्ञानशून्यकाले नेत्याकारकप्रतियोग्यमिश्रिताभावलौकिकप्रत्यक्षं स्यादिति प्राञ्चो नैयायिकाः। तुल्यबलत्वादिति।

उपजीव्यत्वतः श्रौतवाक्यतोन्यपरत्वतः।
'अन्तरङ्गत्वतश्चापि तुल्यमत्रोभयोर्बलम्' इत्यर्थः।

यथाहि निर्गुणप्रतिपादिकासु आधारनिरूपकत्वेनोपजीव्यत्वं कारणत्वमत एवान्यपरत्वं निर्गुणप्रतिपादकत्वरूपमत एवान्तरङ्गत्वं धर्मनिरपेक्षत्वेन स्वल्पापेक्षत्वरूपम्। एवं सगुणप्रतिपादिकास्वपि विरहप्रतियोगिनिरूपकत्वेनाधारनिरूपकत्वेन चोपजीव्यत्वमन्यपरत्वं च। कार्यस्वरूपयोरेकब्रह्मलक्षणत्वात् धर्मनिरपेक्षत्वस्य स्वरूपलक्षणेपि प्रकाशाश्रयन्यायेन वक्तव्यत्वात्प्रकृतेपि तत्संभवेनान्तरङ्गत्वं च तुल्यं, एवमप्युपपादनसौष्ठवाच्छ्रौता धर्मा निषेध्या इत्याकाङ्क्षायां हेत्वन्तरमाहुः प्रत्यायनेत्यादि। तथा सति प्रक्षालनपङ्कन्यायेन धर्मान्न प्रत्याययेदित्यर्थः। सत्यत्वादय इत्यादि भाष्यं विवृण्वन्ति श्रुत्युक्ता इत्यादि। सर्वनाश इति ब्रह्माज्ञाने तद्विषयकस्य दृढभक्त्यादेरुच्छेदात्तथा स्यादित्यर्थः। न च सत्यत्वेत्यादि भाष्यं विवृण्वन्ति न च तदित्यादि। तथाङ्गीकार्यमिति कारणगतमेव कर्तृत्वं लोकेऽङ्गीकार्यमित्यर्थः। स्मृतिश्चेत्यादिभाष्यं विवृण्वन्ति तेनेत्यादि। कल्पस्मृतीति भाष्योक्तकल्पस्मृतीत्यर्थः।

भाष्ये तथासतीति आरोपोऽन्यगतधर्मस्येति कर्तृत्वस्यान्यधर्मत्वे सतीत्यर्थः। अग्र इति यथा बर्हिर्देवसदनं दामीत्यत्र बर्हिर्लवनसामर्थ्यं दामीति शब्दादालोच्यानेन लवनं विदध्यादिति श्रुतिं कल्पयित्वा लवनाङ्गत्वं मन्त्रस्य। प्रकृते। अभावेत्यादि अभावो नास्तिकानां, कालस्वभावौ श्वेताश्वतरे, भूतो-

निषेधादेव । तस्माद् ब्रह्मगतमेव कर्तृत्वम् । एवं भोक्तृत्वमपि । न वा काचिंच्छ्रुतिः कर्तृत्वं निषेधति । विरोधभानात् कल्प्या तु लौकिकपरा । फलवाक्येऽप्यश्रुतानां गुणोपसंहारः कर्तव्यः । तथाचायं सूत्रार्थः । जन्म आदिर्येषामित्यवयवसमासादतद्गुणसंविज्ञानो बहुव्रीहिः ।

भाष्यप्रकाशः ।

स्वीकृतस्तथा सति तद्विवरणोक्तं भोक्तृत्वं तत्रास्तु, कर्तृत्वं तु कथमङ्गीकर्तुं शक्यमित्यत आहुः गुणोपसंहार इति सूत्रकृताग्रे तथाङ्गीकारात् तथेत्यर्थः । तस्माद् ब्रह्म कर्तृ इति सिद्धम् । एवं सिद्धान्तं व्याख्याय तस्य सूत्राविरोधित्वं बोधयितुं सूत्रं व्याकुर्वते तथाचेत्यादि । एवं कर्तृत्वे सिद्धे वक्ष्यमाणरीतिकः सूत्रार्थ इत्यर्थः । अत्र सर्वेऽपि तद्गुणसंविज्ञानं बहुव्रीहिमङ्गीकुर्वन्ति । तत्रोपसर्जनत्वेन पूर्वप्रयोगार्हस्यादिशब्दस्य परत्वाय राजदन्ताद्याकृतिगणीयत्वं कल्पनीयमित्यरुच्या प्रकारान्तरेण व्याकुर्वन्ति जन्मेत्यादि । जन्म आदिः प्रथमोऽवयवो येषां ते जन्मादि । सुपां सुलुगिति जसो लुगित्यवयवसमासादिति भावप्रधानो निर्देशः । तथाचादिपदविशेष्यकावयवसमासत्वादतद्गुणसंविज्ञानो बहुव्रीहिरित्यर्थः । न च, 'अङ्गं प्रतीकोऽवयवः' इति कोशादवयवपदस्याङ्गवाचकत्वेनात्र च तदभावेन कथमवयवसमासत्वमिति शङ्क्यम् । एकदेशेऽप्यवयवपदप्रयोगात् । यथा पञ्चावयवमनुमानवाक्यमिति । कैयटेऽपि, 'एकाचो द्वे प्रथमस्य' इत्यत्र, एकोऽज् यस्य स एकाजिति विशिष्टावयवोपलक्षितस्यावयविन इत्यादिना, अज्झल्विशिष्टस्य शब्दस्यैकोऽज-

रश्मिः ।

न्यप्रविष्टः, ग्रहाः सूर्यादयः ज्योतिषे, एवं लोकपाला अपि । आदिशब्देन कामः 'असत्यमप्रतिष्ठं ते' इति वाक्यात् । **भोक्तृत्वमिति** द्वितीयाध्याये द्वितीयपादे 'रचनानुपपत्तेश्च' इत्यधिकरणेऽन्यत्र चेत्यर्थः । **भाष्ये । अस्वातन्त्र्यादिति** 'स्वतन्त्रः कर्ता' इत्यनुशासनात् कर्तृत्वे स्वातन्त्र्यस्य प्रयोजकत्वमिति भावः । **उभयनिषेधादिति** चिज्जडनिषेधादित्यर्थः । सिद्धमाहुः **तस्मादित्यादि** । आत्यन्तिकत्वाभावेनारोपाभावादित्यर्थः । अतिदिशन्ति **एवमिति** । अश्रुत इत्युक्तं भोक्तृत्वं मुक्तजीवीयमपि सहार्थकतृतीयान्तप्रतिपाद्यब्रह्मगतमेवेत्यर्थः । इच्छया जीवे प्रधानीभूय भासत इत्यर्थः । **कल्प्या त्विति** कर्तृत्वनिषेधकत्वेन लिङ्गात्कल्प्या तु लौकिककर्तृत्वनिषेधपरेत्यर्थः । अथवा किमनया कुसृष्ट्येति वक्ष्यमाणत्वाद्यथाकथंचिद्व्याख्यायते । **प्रकृते** । अश्रुत इत्यस्याश्नातीत्यर्थाद्भोक्तृत्वम् । **अत्र** इति तृतीयस्य तृतीयपादे इत्यर्थः । **तथेति** भोक्तृत्वम् । सिद्धमाहुः **तस्मादित्यादि** । तृतीयस्य द्वितीयपादे उभयव्यपदेशाधिकरणे स्पष्टम् । **अत्रेति** । **पूर्वप्रयोगार्हस्येति** 'उपसर्जनं पूर्वम्' इति सूत्रात्पूर्वेत्यादिः । जन्मादीतिपदे इत्यर्थः । **कल्पनीयमिति** पाणिनीयगणपाठे राजदन्तादिषु जन्मादिशब्दपाठाभावेपि तत्त्वं कल्पनीयमित्यर्थः । तर्हि बहुवचनं स्यादित्याकाङ्क्षायामाहुः **सुपामित्यादि** । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' इति वैदिकीप्रक्रियायां सप्तमेध्याये सूत्रमुदाहरणानि च तत्रैव । **भाष्ये । इत्यवयवसमासेति** अवयवानां जायतेऽस्ति विपरिणमत इत्यादीनां समसनात् जन्मादीनां वा समसनात् । एवं चात्रावयवावयविनोरत्र समासाभावादतद्गुणत्वम् । **प्रकृते । पञ्चावयवमिति** प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । **उक्तसूत्र** इति षष्ठाध्यायप्रथमपादस्य प्रथमाह्निकस्य उक्तसूत्र इत्यर्थः । **विशिष्टावयवेति** अज्झल्विशिष्टावयवोपल-

भाष्यप्रकाशः ।

वयव इत्यङ्गीकाराच्च । तत्रैकस्याचो विशिष्टावयवत्ववदत्र आद्यादीनां समूहावयवत्वेन तद्वाचकपदानां समासेऽवयवसमासत्वस्य सुखेन संभवात् ।

एतस्यातद्गुणसंविज्ञानत्वं त्वेवम् । तथाहि । उक्तसूत्रे कैयटेन तद्गुणसंविज्ञानपदं द्वेधा व्याख्यातम् । तस्य अन्यपदार्थस्य गुणो विशेषणं तस्य संविज्ञानं येनेति । स वर्तिपदार्थो गुणो यस्यान्यपदार्थस्य तस्य संविज्ञानं येनेति च । तत्रोदाहरणं तु शुक्लवाससमानयेति । तत्र शुक्लवासःसंयुक्तपुरुषानयने पृथगचोदितान्यपि वासांसि संबन्धसामर्थ्यादानयनेन संबद्ध्यन्त इत्युक्तम् । इदं च लम्बकर्णमानयेत्यादावपि तुल्यम् । एवं सत्यन्यपदार्थविशेषणस्य यत्र संबन्धसामर्थ्यात् कार्यसंबन्धस्तत्र तद्गुणसंविज्ञानः । यत्र तस्य संबन्धसामर्थ्यात् कार्ये संबन्धाभावस्तत्रातद्गुणसंविज्ञानः । यथा चित्रगुमानयेत्यत्र । अत्र हि पुरुषानयने समासवर्तिपदार्थभूतानां चित्राणां गवां सन्निधानाभावान्न कार्येण सह संबन्ध इति । एवं सति प्रकृतेऽन्यपदार्थभूतानां प्रधानानां स्थितिप्रलयाभिसंवेशानामेकदेशतया तद्विशेषणीभूतो य आदिस्तस्य प्रथमान्तरव्यावर्तकतया जन्म विशेषणम् । स्वयं तु वर्तिपदार्थे विशेष्यः । तस्य धर्मरूपं यत्प्राथम्यं तदपेक्षाबुद्धिजन्यम् । तस्य निरूप्यत्वमपि स्थित्यादिजन्यमतः सोऽत्र सूत्रेऽर्थादायातायां ब्रह्मकर्तृकभवनक्रियायां न सं-

रश्मिः ।

क्षितस्य । **आद्यादीनामिति** आदेरादि जन्म आद्यादि, आदिरादिर्येषां स्थितिलयाभिसंवेशानां त आद्यादयः, आद्यादि च आद्यादयश्च आद्यादयः तेषामाद्यादीनाम् । येनेतीति येनेति तृतीयान्तान्यपदार्थकथनं तु तस्यान्यपदार्थस्य गुणो विशेषणं तस्य संविज्ञानं स वर्तिपदार्थो गुणोऽवयवो वा यस्यान्यपदार्थस्य तस्य संविज्ञानमित्यस्याग्रे संनिहितविशेषणस्यान्यपदार्थस्य विशिष्टसंबन्धाश्रयेण केनचिद्बहुव्रीहिणाभिधानादित्यर्थः । इत्युत्तरग्रन्थसूचितं ज्ञेयम् । शब्दरत्ने तु तस्यान्यपदार्थस्य गुणा विशेषणानि संज्ञायन्ते कार्यित्वादिना यत्रेति 'सर्वादीनि सर्वनामानि' इत्यत्र व्याख्यातम् । **तद्गुणसंविज्ञान** इति तथाच प्रायः संयोगसमवायान्यतरसंबन्धेन संबन्धी यत्र अन्यपदार्थस्तत्र तद्गुणत्वमिति शब्दरत्नोक्तं लक्षणं पर्यवसितं ज्ञेयम् । **नैयायिकास्तु** लक्ष्यतावच्छेदकस्य विशेष्यान्वय्यन्वयित्वं लक्षणमाहुः यत्र तस्येति । इदमपि संयोगसमवायातिरिक्तस्वस्वामिभावादिसंबन्धेन संबन्धी यत्रान्यपदार्थः तत्र तद्गुणत्वमिति शब्दरत्नोक्तं लक्षणं नातिवर्तते । **नैयायिकास्तु** लक्ष्यतावच्छेदकस्य विशेष्यान्वय्यनन्वयित्वं लक्षणमाहुः । अत्रैतावान् विशेषः । समासशक्तिवादिनां विशेषणस्य विशेष्यान्वय्यन्वयित्वे तदनन्वयित्वे उक्तसंबन्धो नियामकः । लक्षणावादिनां नैयायिकानां तु शब्दस्वभाव एव तन्त्रमिति । **सन्निधानाभावादिति** अत एव नागयज्ञोपवीती भोज्यतामित्यादौ यज्ञोपवीतस्य कार्यित्वाभावेपि तत्सन्निधानात्तद्गुणत्वमिति हरिग्रन्थः । नैयायिकानां मते तु अतद्गुणसंविज्ञान एव । **प्रधानानामिति** विशेष्याणामित्यर्थः । **स्थितीत्यादि** । **अभिसंवेशः** सुषुप्तिस्तत्सुखमित्यर्थः । **प्रथमान्तरेति** जन्मतः प्रथमान्तरेत्यर्थः । **स्वयं स्थिति** आदिस्त्वित्यर्थः । **तस्येति** आदेरित्यर्थः । **अत इति** प्राथम्यस्य निरूप्यत्वस्य चापेक्षाबुद्धिजन्यत्वेन स्थित्यादिज्ञानजन्यत्वेन च साक्षाद्ब्रह्मजन्यत्वाभावादित्यर्थः । **ब्रह्मकर्तृकेत्यादि** यतो

---

१. कार्यकारणभावसंबन्धाश्रयेण । २. अभिधावृत्तिः पदधर्मः 'पदज्ञानं तु करणम्' इति भाषापरिच्छेदात् ।
३. कार्यकारणभावसंबन्धस्तृतीयान्तान्यपदं सूचयतीति ग्रन्थसूचितम् । ४. विशेष्यान्वयवत्त्वं कार्यत्वम् ।

भाष्यप्रकाशः ।

भजन्ते । तदसंबन्धे तद्द्वारा जन्मनोऽपि न संबन्ध इत्यस्य समासस्यातद्गुणसंविज्ञानत्वम् । इदं च तद्गुणसंविज्ञानस्य प्रथमलक्षणादरे बोध्यम् । द्वितीयलक्षणादरे तु तद्गुणकस्य विशेष्यस्यान्यपदार्थस्य संविज्ञानं समायाति । तच्च चित्रगुरित्यत्रापि वर्तत इति तद्वारणाय विशेषणसंबन्धपूर्वक एव तस्य क्रियासंबन्धो वक्तव्यः । तदाप्यत्र विशेष्यभूतानां स्थित्यादीनां विशेषणसंबन्धपूर्वको न क्रियासंबन्ध इति पूर्ववदेवातद्गुणसंविज्ञानत्वम् । यदि च संविज्ञानपदेन वर्तिपदार्थस्य तद्विशेष्यस्य वा प्रव्यक्तीभाव एवाद्रियते तदा तु विशेष्यविशेषणयोर्ज्ञातत्वेनास्माकं तत्प्रव्यक्तीभावाभावाद् भाववृत्तसूक्ते, 'सोअङ्ग वेद यदि वा न वेद' इति श्रावणाच्चातद्गुणसंविज्ञानत्वमिति न कोऽपि शङ्कालेशः । अत्रैतत्समासादरेण भाववृत्तसूक्ते, यदि वा नेतिवाक्यबोधिताऽनाधानपक्षसूचना-

रश्मिः ।

जन्मादयोस्य भवन्तीति सूत्रान्वयाज्जन्मादिकर्तृका भवनक्रिया तथापि सूत्रे यत इति पञ्चमी 'जनिकर्तुः प्रकृतिः' इति सूत्रादित्याशयः । तदसंबन्ध इत्यादि आदेः प्राथम्यवाचकस्यापेक्षाबुद्धिजन्यत्वेन ब्रह्मजन्यत्वाभावात् तद्धेतुकभवनक्रिययाऽसंबन्धे तद्विशिष्टजन्मनोपि संबन्धेनो न विशेषणसंबन्धाभावप्रयुक्तो विशिष्टाभाव इत्यस्य समासस्यातद्गुणसंविज्ञानत्वमित्यर्थः । बोध्यमिति अन्यपदार्थस्य स्थित्यादेर्गुणो जन्म तस्यासंविज्ञानमत्रेत्येवं बोध्यमित्यर्थः । तद्गुणकस्येति समासवर्तिपदार्थगुणकस्यान्यपदार्थस्य स्थित्यादेरित्यर्थः । एवं कैय्यटोक्तलक्षणद्वयसमन्वयमुक्त्वा तद्गुणसंविज्ञान इत्यत्रान्यपदार्थगुणानां कार्यित्वादिना संविज्ञानमिति पक्षे संविज्ञानपदस्यान्वयलक्षकत्वं लक्ष्यतावच्छेदकस्य विशेष्यान्वय्यन्वयित्वमिति पक्षेपि तथेति वक्तव्यं तथा सति तद्गुणान्वय इति वक्तव्ये संविज्ञानपदकथनेन तस्य तद्गुणानां च प्रव्यक्तीभाव एवाभिप्रेत इत्याशयेन प्रकारान्तरमाहुः यदि चेत्यादि । तद्विशेष्यस्य वेति वर्तिपदार्थविशेष्यस्याऽन्यपदार्थस्य चेत्यर्थः । वाकारश्चकारार्थः । एतत्पक्षे प्रकृतेऽतद्गुणे संविज्ञानत्वं निगमयन्ति तदा त्वित्यादि । षड्भावविकाररूपयोर्जन्मप्राथम्यरूपयोर्वा विशेष्यविशेषणयोर्जनितत्वेन जगद्धर्मत्वेन साक्षाद्ब्रह्मणस्तद्विषयकसंविज्ञानत्वाभावादित्यर्थः । शांकराणां सर्वस्य मायिकत्वादस्माकमित्युक्तम् । नन्वसार्वज्ञ्यापत्तिरेवं भवेदित्यतः श्रुतिं प्रमाणयन्ति भाववृत्तेत्यादि । इयं श्रुतिर्ब्राह्मणस्य द्वितीयाष्टकेस्ति तत्रैतस्याः पूर्वं 'नासदासीन्नो सदासीत्तदानीम्' इत्याद्युक्त्वा 'तम आसीत्तमसा गूढमग्रेऽप्रकेतम् । सलिलꣳसर्वमा इदम्' इत्यादिना सृष्टिं च । ततः 'को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनाय । अथा को वेद यत आबभूव । इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न । यो अस्याध्यक्षः परमेव्योमन्' इति श्रूयते । तथा च सोध्यक्षो विसृष्टिं जन्म वेद यदि वा विसृष्टिं न वेदेति जन्मनो ज्ञानाविषयत्वेनातद्गुणत्वमित्यर्थः । यदीत्यस्या यदा भगवान् सच्चिदानन्दरूपो धर्मरूपेणाविर्भवतीत्यादिक्रमेण ततो जाता तदा तु धर्मरूपेणादधे, यदा तु स्वयमेव तथाविर्भूतस्तदा न दधे । सर्वस्य ब्रह्मानतिरेकादित्यर्थः । तथा च विकारान्तरज्ञानदशायां जन्मनः प्रव्यक्तत्वाभावात्तदसंविज्ञानं नैतावताऽसार्वज्ञ्यमिति भावः । न कोपीति । या तु 'यस्मिन्निदꣳसं च विचैति सर्वम्' इति श्रुत्या जन्मनः सिद्धत्वेन श्रौतत्वात् तद्गुणसंविज्ञान एव युक्त इत्याशङ्का सापि नेत्यर्थः । जन्मनो ब्रह्मकर्तृकत्वेपि श्रौतात्संदेहादज्ञानमुक्तम्, विरुद्धधर्माश्रयत्वेन माहात्म्यज्ञानं च द्योतितम् । अनाधानपक्षेति

अथवा जन्मप्रभृति सर्वे भावविकारा आदिशब्देन गृह्यन्ते। तथाच जन्म च आदिश्चेत्येकवद्भावः। आदिशब्दश्च धर्मवाची। स च स्वसंबन्धिनं लक्षयति। तस्योभयसापेक्षत्वादुत्पत्तेर्विद्यमानत्वादन्यानेव भावविकारानुपलक्षयतीत्यादिशब्देनान्ये भावविकाराः।

भाष्यप्रकाशः।

जन्मस्थितिभङ्गादीनामाविर्भावादिरूपत्वबोधनेन भगवानेव तत्तद्रूपः क्रीडाविस्तिरश्च भवतीति पुष्टिसृष्टिप्रकारो बोधितः। तथाच जन्म आविर्भाव आदिर्येषां प्रकाराणामित्यर्थो बोध्यः। प्रवाहसृष्टिबोधनाय प्रकारान्तरमाहुः अथवेत्यादि। प्रभृतिशब्दः पूर्वावधिवाचकः। सर्व इति जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते नश्यतीतिप्रतीतिसिद्धा यास्कोक्ताः षट्। कथं गृह्यन्त इत्यपेक्षायामाहुः तथाचेत्यादि। सर्वोऽपि द्वन्द्वो विभाषैकवद्भवतीत्येकवद्भावः। आदिशब्दश्च प्राथम्यरूपधर्मवाची। पूर्वतन्त्रे शब्दानां धर्मवाचकत्वस्य सिद्धत्वात्। स च स्वसंबन्धिनं लक्षयति। तत्र कं लक्षयतीत्याकाङ्क्षायां तस्य यथोत्पत्तावाधारता तथाग्रिमेषु निरूपकता। प्राथम्यस्योभयसापेक्षत्वात्। अत उत्पत्तेरत्र कण्ठोक्तत्वेन विद्यमानत्वादन्यानेवोपलक्षयतीति तथेत्यर्थः। तेन विषयवाक्योदितौ स्थितिभङ्गौ प्रत्याहारन्यायेनान्येषामपि बोधकौ। कालादिगतमपि कर्तृत्वं भगवदीयमेव, न तु स्वतन्त्रमिति च बोधयितुमत्रादिपदोक्तिरिति तात्पर्यं सूचितम्। एवं व्याख्याने आदिपदस्य लाक्षणिकत्वम्। तथादिपदेन आदित्वधर्मवत्तया जन्मनोऽपि संग्रहीतुं शक्यत्वाज्जन्मपदवैयर्थ्या-

रश्मिः।

स्वस्यैव सर्वरूपत्वेन धारणपक्षेत्यर्थः। पुष्टिसृष्टिप्रकार इति अत्रैव कार्यकारणरूप इति प्रकार इत्यर्थः। 'पुष्टिं कायेन निश्चयः' इति पुष्टिप्रवाहमर्यादाग्रन्थवाक्यात्। अत्र पक्षे सर्वस्यानन्दरूपतया विकारविरहादर्थमाहुः तथा च जन्मेत्यादि। प्रकाराणामिति। 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेन लौकिकभावविकारसदृशप्रकाराणामित्यर्थः। प्रवाहेत्यादि प्रवाहः प्रवहणम्। सर्गपरंपराया अविच्छेद इति यावत्। 'द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च' 'द्वया ह प्राजापत्या देवाश्चासुराश्च' इति श्रुतिस्मृतिभ्याम्। अत्र समवायी मायामनोरूपः 'द्वे अस्य बीजे' इत्यारभ्य 'मायामयं वेद स वेद वेदम्' इति भगवद्वाक्यात्। मायामात्रस्यैव मिथ्यात्वं न सर्वस्य। प्रवाहस्य सदसद्ग्रन्थिरूपत्वात्। संध्याधिकरणे स्फुटिष्यतीदम्। प्रभृतीत्यादि तथा च जन्मपूर्वावधिकसर्वे भावविकारा इति भाष्यार्थः। यास्कोक्ता इति निरुक्तप्रसिद्धो यास्कर्षिः। सर्वोपीत्यादि परिभाषेयम्। आदिशब्द इति भाष्यं विवृण्वन्तिस्म आदिशब्दश्चेति। पूर्वतन्त्र इति आकृत्यधिकरण इत्यर्थः। स्वसंबन्धिनमाश्रयं, तं विना स्थातुं धर्मो न शक्नोतीति भावः। लक्षणायां संबन्धं वक्तुमाहुः तत्र कमित्यादि। तस्य यथेत्यादि प्राथम्यस्य यथा जन्मन्याधारता तथाग्रिमेष्वस्त्यादिषु निरूपकता, प्राथम्यस्यास्त्यादिनिरूप्यत्वात्। उभयसापेक्षत्वादिति आधारनिरूपकसापेक्षत्वादित्यर्थः। उपलक्षयतीति निरूपकतासंबन्धेनोपलक्षयतीत्यर्थः। ननु कथं तर्हि आदिशब्दप्रयोग इत्यत आहुः तेनेत्यादि। प्रत्याहारन्यायेनेति 'आदिरन्त्येन सहेता' इति सूत्रसिद्धेनेत्यर्थः। अन्येषामिति विपरिणामवर्धनापक्षयाणामित्यर्थः। कर्तृत्वमिति कालेन विपरिणमतीत्यादिप्रतीत्या विपरिणामादिकर्तृत्वमित्यर्थः। भगवदीयं तृतीयस्कन्धवाक्यात् कालादीनामीश्वराधीनकर्तृत्वात्। तथा चादि जन्मादि कर्तृत्वं सूचयितुमादिपदेनास्त्याद्युपलक्षणमिति भावः।

अथवा जन्मनो नादित्वम् । तदाधारस्य पूर्वमविद्यमानत्वात् । अन्ये त्वादिमन्तः । तदाधारस्य पूर्वं विद्यमानत्वात् । अत आदिशब्दः स्वाधारसद्धर्मवाची तद्धर्माणामुपलक्षकः । अथवा गमनप्रवेशयोर्भेदाज्जन्म आदिर्येषामिति

भाष्यप्रकाशः ।

पत्तिरित्यरुच्या प्रकारान्तरेण व्याकुर्वन्ति अथवा जन्मन इत्यादि । बहिर्विद्यमाने जन्माधारे पश्चाज्जन्म चेत्तदा जन्म प्रत्याधारस्य तद्गतधर्मस्य चादिता संभवति । प्रकृते तु तन्नास्तीति जन्मनो नादित्वम् । अन्येषां तु भावविकाराणामुक्तयुक्त्यादिमतो हेतोरादिशब्दः स्वाधारसद्धर्मवाची आदित्वाधारभूतोऽस्तिपदवाच्यो धर्मस्तस्यान्यापेक्षया प्राथम्यात् तत्पूर्वकमेव तं वदन्नादित्वस्य सापेक्षतया तद्धर्माणां विपरिणामादीनामुपलक्षक इति न स्वार्थत्यागदोषो, नापि जन्मपदवैयर्थ्यदोष इत्यर्थः । अस्मिन् पक्षे असत्कार्यवाद आपतति । तथापि यदेतस्य कथनं तन्नृसिंहोत्तरतापिन्याद्युक्तमायिकसृष्टिं प्रत्यपि भगवत एव कारणत्वमिति बोधयितुं, न तु पूर्वोक्तं पक्षं निराकर्तुमिति बोध्यम् । अथ मर्यादासृष्टिसंग्रहाय तद्गुणसंविज्ञानपक्षमभिसंधायाहुः अथवा गमनेत्यादि । गमनप्र-

रश्मिः ।

बहिरिति तेन 'सत इदमुत्थितं सदिति चेन्न नु तर्कहतम्' इत्यस्य विषय इति ज्ञापितम् । तेन

'सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत् ।
भ्रान्त्या सद्बुद्धिरत्रेति सन्तं कृष्णं भजेद्बुधः' ॥

इति तृतीयोध्याये विषयत्वेन सन् कृष्णः सिद्धः स च जगति त्वतलादिवाच्यस्तदा निरावरणसेवा भवति शुक्तिज्ञानवत् । **जन्माधार** इति आद्यक्षणसंबन्धो जन्म तदाधारे घटादावित्यर्थः । तदा सृष्ट्यन्तरपक्षे जन्मसंबन्धरूपजन्मस्वरूपस्योभयसापेक्षत्वात् तत्प्रत्याधारस्य जगतः विशिष्टे शक्त्या तद्गतधर्मो जगत्त्वादिरूपस्तस्य, चकाराज्जन्मनोप्यादिता संभवति । **प्रकृते त्विति** प्रवाहसृष्टावित्यर्थः । **तन्नास्ति** भ्रान्त्या सद्बुद्धिस्तद्विषयभूतं जगदाधाररूपं नास्ति ततो जन्मापि **नास्तीति** अस्त्याद्यपेक्षया **जन्मनो नादित्वमिति** एतादृशसर्गपरंपरयास्त्यादीनामप्यादित्वसंभवात् जन्मनो न तथात्वमित्यर्थः । **उक्तयुक्त्येति** हेतुभाष्योक्तयुक्त्येत्यर्थः । **भाष्ये** । **तदाधारस्य** जन्माधारस्य । **प्रकृते** । **धर्म** इति सत्ताख्य इत्यर्थः । अत्र न विशिष्टे शक्तिः, आधारस्य सत्त्वात् । अतोस्तिपदवाच्यो धर्मः स आत्मा वाक्यपदीयात् । 'सत इदम्' इति श्लोके पूर्वमुक्तम् । **तत्पूर्वकमित्यादि** प्राथम्यपूर्वकमेव सत्ताख्यं धर्मं शक्त्या वदन् लक्षणया विपरिणामादीनां निरूपकाणामुपलक्षक इत्यादिपदस्य शक्यार्थस्वीकारेण न स्वार्थत्यागदोषो नापि जन्मपदवैयर्थ्यदोषो जन्मनोनादित्वेनादिपदवृत्तिद्वयासंभवादित्यर्थः । अत्राजहत्स्वार्थलक्षणायां कृतायां यथायोग्यं तीरे घोषः प्रवाहे मत्स्य इत्यन्वयो मञ्जूषायाम् । नच युगपद्वृत्तिद्वयविरोध इति वाच्यं, गङ्गायां घोषमत्स्यौ स्तः इतिवदुपपत्तेः । तथा चादित्वेन सत्तारूपात्मत्वेन सता भ्रान्तिविषयसज्जन्माक्षेपोत्र नापि तु वाक्षेप्यजन्मोक्तिः । **अस्मिन् पक्ष** इति प्रवाहपक्ष इत्यर्थः । **नृसिंहेत्यादि** 'सैषाविद्या जगत्सर्वम्' इत्यादिः । **अथ मर्यादेति** कर्मज्ञानादितत्तत्प्रकारनियमो मर्यादा, सा तु विभागसार्थक्यादस्ति सचैवम् । विधिमन्त्रनामधेयनिषेधार्थवादात्मना हि विभक्तो वेद इति । तत्सृष्टिस्तु 'वचसा वेदमार्गं हि'

---

१. श्रीभागवतदशमे गुणप्रकरणे वेदस्तुतिरूपे तृतीयाध्याये ।

जात्यपेक्षयैकवचनम् । जन्म तु श्रुतत्वात् सिद्धम् ।

अथवा किमनया कुसृष्ट्या । जन्म आद्यस्य आकाशस्य यत इति ।

भाष्यप्रकाशः ।

वेशयोः पूर्वोत्तरावधिभूतसंचरप्रतिसंचरयोर्मध्ये कार्यस्वरूपस्य कारणतो भेदाज्जन्मादयो भवन्तीति जन्म आदिर्येषां तत्तज्जातीयं जन्मादि । जातिरत्र विकारत्वं क्रियात्वं वा । अत्र, 'ब्राह्मणो जन्मतः श्रेयान्', 'न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम्' इत्यादाविव जात्यपेक्षयैकवचनम् । तथाच यद्यपि, सुपां सुलुगिति जसो लोपे जन्मादीति सिध्यति तथापि विकारान्तरसंग्रहस्तेन न भवत्यतस्तदुपेक्षितम् । नपुंसकं तु सामान्ये । एतत्पक्षसंग्रहे बीजमाहुः जन्म तु श्रुतत्वात् सिद्धमिति । जन्म तु, 'यस्मिन्निद१ँ सं च वि चैति सर्वम्' इति तैत्तिरीये श्रुतत्वाद् व्ययनात्मकबहिर्गमनरूपं सिद्धम् । तच्च सजातीयसंवलनवियोगादि संगृह्णत् समयनरूपं प्रवेशं च स्मारयतीति तद्गुणसंविज्ञानोऽपि युक्त इत्यर्थः ।

एवं पक्षत्रयेण व्याख्यायैतेषामत्र बोधनस्यानतिप्रयोजनत्वात् प्रतिपत्तिगौरवाच्चारुचिं सूचयन्तः प्रकारान्तरेण सूत्रं व्याकुर्वन्ति अथवा किमित्यादि । नन्वेवं सत्याकाशजनकत्वस्यैव

रश्मिः ।

इति मनःपूर्वकं वचसा वेदमार्गं सृष्टवानित्यर्थः । शब्दादर्थोत्पत्तिश्च शब्द इति चेदित्यादि सूत्रभाष्ये स्फुटिष्यति । अत्र समवाय्यक्षरम् ।

'मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः' ॥

'अव्यक्तोऽक्षर इत्युक्तः' 'अव्यक्ताद्व्यक्तयः सर्वाः' इति वाक्येभ्यः । गमनं सच्चिदानन्दस्य भगवतो धर्मरूपेण भवनोत्तरं स्वस्मिन् लयः यत्प्रयन्तीत्युक्तः प्रवेशस्त्वभिसंविशन्तीत्युक्त इत्याशयेन गमनप्रवेशौ व्याकुर्वन्ति गमनेत्यादि । प्रतिसंचरः प्रतिनिधिसंचरः । तथा च पूर्वोत्तरावधिभूतयोः जननजीवनयोर्यौ संचरप्रतिसंचरौ तयोर्मध्ये । कारणत ब्रह्मण इति इत्यर्थः । जन्मादय इति विकारा इत्यर्थः । न भवन्तीति यतो वा इति श्रुतौ जननगमनप्रवेशयोर्मध्ये स्थितिमात्रोपादानान्न भवतीत्यर्थः । सामान्य इति दृढभक्तिरितिवत् । यद्यपीदमनियतलिङ्गविषयकमत एवार्दिं पचतीत्येव प्रयोगस्तथापि बहुव्रीहौ त्वनियतलिङ्गत्वादुपपन्नम् । सिद्धमिति ब्रह्मणः सिद्धमित्यर्थः तथाच तद्गुणसंविज्ञाने श्रुत्यनुकूलतैव बीजमित्यर्थः । व्ययनात्मकेति व्यवहिताश्चेति छन्दसि व्यवधानेपि प्रयोगात् समेति व्येतीत्यर्थात्तथेत्यर्थः । संगृह्णदिति तात्पर्योपलक्षणविधयापि गृह्णत् । स्मारयतीति संविज्ञानस्य शक्यार्थपक्षमाश्रित्येदम् । युक्त इति अस्मिन् पक्षे विग्रहस्त्वयमेव सर्वं आदिर्येषामितिवत् । इह आदिशब्दस्यावयववाचित्वादुद्भूतावयवभेदः समुदायः समासार्थः । उद्भूतावयवभेदत्वं चारोपितावयवगतसंख्यत्वम् । तस्य च समुदायस्य युगपत्क्रियान्वयासंभवात् तदन्तर्भूतानामवयवानामेव पृथगन्वयः । शांकराचार्यैस्तु जन्मादिर्यस्येति विगृहीतम् ।

एवं पक्षत्रयेणेति 'स आत्मान१ँ स्वयमकुरुत' इति 'सोऽकामयत बहु स्याम्, प्रजायेय' इति 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति तैत्तिरीयोक्तपुष्टिप्रवाहमर्यादाबोधकपक्षत्रयेणेत्यर्थः । एतेषामिति पुष्टिप्रवाहमर्यादानामित्यर्थः । भाष्ये । कुसृष्ट्येति कुसृष्टित्वं तु अवयवसमासपक्षे जन्मग्रहणप्रयासः अतद्गुणसंविज्ञान एव । अवयविसमासपक्षे तु समुदायस्य युगपत्क्रियान्वयक्लेशः । द्वन्द्वे तु आदिशब्दस्य अप्रयोजकत्वं [illegible]

'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्येव विचार्यते । फलसंबन्धित्वात् । तेनैकत्र सिद्धः शास्त्रार्थः प्रकारान्तरेऽपि । यतो वा इमानि भूतानीत्यत्र विस्फुलिङ्गवत् सर्वोत्पत्तिः । अत्र तु क्रमेणेति विशेषः । एतेन सर्वे एव प्रकाराः

भाष्यप्रकाशः ।

लक्षणत्वमायाति, न तु सर्वभूतजनकत्वस्य तत्स्थित्यादिकर्तृत्वस्य च । तथा सति वाक्यान्तरे ब्रह्मभेदापत्तिरितिशङ्कायामाहुः तेनेत्यादि । यदा, यतो वेति वाक्यं विषयत्वेनादरणीयं तदाप्ययं न्यायस्तु सर्वथाङ्गीकार्य एव । अन्यथा आकाशवाक्येऽपि ब्रह्मान्तरापत्तिः स्यात् । अतो जननप्रकारस्यैव भेदो न तु ब्रह्मण इति न कोऽपि दोष इत्यर्थः । यतो वेतिश्रुतौ, यत् प्रयन्त्यभिसंविशन्तीत्यस्य भागस्य यद् ब्रह्म प्रयन्ति प्रकर्षेण सृष्टिसामयिकदुःखराहित्येन प्रलये गच्छन्ति, अभितः संविशन्ति स्वपन्ति सुषुप्ताविव सत्संपन्ना भवन्तीत्यर्थो बोध्यः । एवं पक्षत्रयेण व्याख्याने बीजमाहुः एतेनेत्यादि । सूत्रे एवं श्लिष्टप्रयोगेण वेदोक्ताः सर्वे प्रकारा व्यासचरणैः संगृहीता ज्ञेयाः । तथाच क्वचित् साक्षात्, क्वचित् तटस्थत्वेन, क्वचित् किंचिद्द्वारा क्रमेणेति बोधनायास्माभिरपि

रश्मिः ।

चापचत इति । न च यथा कतन्तेभ्यः कण्वादिभ्य इत्यत्र कतस्यान्तः कतन्तः शकन्ध्वादित्वात् पररूपम् । कतः अन्तो येषां ते कतन्ताः कतन्तश्च कतन्ताश्च कतन्तास्तेभ्य इत्येकशेषः । कण्व स्यादिः कण्वादिः कण्व आदिर्येषां ते कण्वादयः ततः पूर्ववदेव बहुव्रीहितत्पुरुषयोरेकशेषः । तद्वज्जन्म चादिर्जन्मादि जन्म आदिर्येषां तज्जन्मादि जन्मादिश्च जन्मादि च जन्मादि । नपुंसकमनपुंसकेनेति स्वरभिन्नानां यस्योत्तरस्वरः स शिष्यत इति वा बहुव्रीहेः शेषः । तथा च जन्मनस्तदादीनां च ग्रहणं भविष्यतीति वाच्यम् । एवं तर्हि जन्मादिरित्यत्र सारूप्यार्थमेवादिशब्द उपादीयतेन्यस्य प्रयोजनस्याभावात्, तथा च गौरवग्रस्तार्थबोधकत्वाच्छ्लिष्टार्थत्वमिति बोध्यम् । फलसंबन्धित्वादिति 'ब्रह्मविदाप्नोति परम्' इति फलमुपक्रम्य पठितत्वेन तत्पदेन फलरूपपदस्यैव परामर्शेन फलसंबन्धित्वादित्यर्थः । अत्रैवं प्रतिभाति सुगमव्याख्या । अवयवसमासे येषामिति बहुवचनं विकाराभिप्रायेण समर्थनीयं तदनुपपन्नमभिसंविशन्तीत्यनेनोक्ताभिसंवेशस्याविकारत्वात् सुषुप्तिसुखत्वेन विकाराणां यथायथं 'जन्मस्थितिभङ्गेष्वन्तर्भावाज्जगतः स्थितिकाले संभाव्यमानत्वाच्चेत्याशङ्क्या द्वन्द्वपक्ष उक्तः । अस्मिन्नपि पक्षे जगतो नित्यत्वापत्त्या लक्षणत्वव्याघातः । अवयविसमासे च समासार्थस्य समुदायस्य क्रियान्वयक्लेशः इति पूर्वोक्तमेव लक्षणं समर्थयन्त आहुः अथवा गमनेत्यादि । श्रुतौ प्रयन्तीति गमनमभिसंविशन्तीति प्रवेशः तयोर्गमनसुषुप्तिरूपत्वेन भेदात् जन्म आदिर्येषां स्थितिगमनप्रवेशानामित्यवयवसमास इत्यर्थः । तथा च बहुवचनं स्यादित्याशङ्कामाहुः जात्यपेक्षयेति । एवं तर्हि जन्मासंग्रहस्तु स्यादतद्गुणसंविज्ञानपक्ष इत्याशङ्कामाहुः जन्मेत्यादि । यथा देवदत्तशालायां ब्राह्मणा आनीयतामित्युक्ते देवदत्तो यदि ब्राह्मणश्चेत्तदा सोप्यानीयत एव, एवं स्थित्यादिकर्तृत्वसिद्धौ जन्मकर्तृत्वमपि श्रुतत्वात् सिद्धमिति । अस्मिन् पक्षे पक्षद्वयं ज्ञेयम् । इतोपि लाघवमाहुः अथवा किमित्यादि । भाष्ये । फलसंबन्धीति ब्रह्मवित्पाठके 'ब्रह्मविदाप्नोति परम्' इति फलमुपक्रम्य पठितत्वेन तत्पदेन फलरूपपरस्यैव परामर्शेन फलसंबन्धित्वात् । प्रकृते । ब्रह्मभेदापत्तिरिति जगत्कर्तृ ब्रह्म आकाशकर्तुर्भिन्नं स्यादित्यर्थः । न कोपीति एतेन 'जन्मस्थितिभङ्गनिरूपितं कारणत्वत्रयं मिलितं सदेव लक्षणमिति बोधयितुं सूत्रे समाहारो बोधित इति परास्तमित्यर्थः । श्लिष्टप्रयोगेणेति जन्माद्यस्येति श्लिष्टप्रयोगेणेत्यर्थः । तटस्थत्वेनेति । तल्लक्षणं तु 'ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिरहविशिष्टतयोपलक्ष्यमाणः सर्व-

सूचिता वेदितव्याः । ब्रह्मविचारे ब्रह्मणोऽप्यधिकृतत्वाद् ब्रह्मेत्यायाति । न त्वध्याहारः ।

शास्त्रे योनिः शास्त्रयोनिः । शास्त्रोक्तकारणत्वादित्यर्थः । शास्तीति शास्त्रं वेदः । सामान्यग्रहणं पूर्वकाण्डे पूर्वसृष्टिवाक्यानां संग्रहार्थम् । यथाऽस्यैव कारणत्वं, नान्यस्य तथोपरिष्टाद् वक्ष्यामः । मतान्तरवज्जन्मादीनां न विकारित्वं किंत्वाविर्भावतिरोभावावेव तथोत्तरत्र वक्ष्यते, तदनन्यत्वाधिकरणे । नामलीलाया अपि न पृथङ् निरूपणं प्रपञ्चमध्यपातात् ।

भाष्यप्रकाशः ।

तदाशयं स्फुटीकर्तुं पक्षत्रयेण व्याख्यातमित्यर्थः ।

नन्वत्र लक्ष्यानिर्देशात् प्रतिज्ञायां च संबन्धिविचारस्यैवाधिकृतत्वेन ब्रह्मणोऽनधिकृतत्वादत्र ब्रह्मानुवृत्तेरशक्यवचनत्वेन ब्रह्मपदं ब्रह्म वाऽध्याहार्यम् । कर्मषष्ठीपक्षे तु प्रकृतत्वादेव तत्प्राप्तेर्नायं दोष इत्यत आहुः ब्रह्मेत्यादि । तथाचार्थादेव तत्प्राप्तेर्नोक्तदोष इत्यर्थः ।

एवं लक्षणबोधकं सूत्रांशं व्याख्याय प्रमाणबोधकमंशं व्याकुर्वन्ति शास्त्रे इत्यादि । शास्त्रे इति सप्तम्या वैषयिकमधिकरणं बोध्यते । शास्त्रविषयो योनिः शास्त्रयोनिः । विषयत्वं प्रतिपाद्यत्वम् । तदेतदभिसंधायाहुः शास्त्रोक्तेत्यादि । शास्तीति राजवदाज्ञापयति । एतेन तद्विरोधेऽपराधोऽपि बोधितः । नन्वत्रोत्तरकाण्डार्थ एव विचार्यत इति शास्त्रशब्दस्य कुतः प्रयोग इत्यत आहुः सामान्येत्यादि । पूर्वसृष्टिवाक्यानामिति । भाववृत्तसूक्तादीनाम् । एतेन वेदार्थतयैवात्र सूत्रकृतो ब्रह्म विवक्षितमिति स्वोक्ते बीजं प्रदर्शितम् । ननु योनिशब्दो निमित्तवाची प्रायो दृश्यते इति साधारणेन कारणपदेन कुतो व्याख्यायत इत्यत आहुः यथेत्यादि । उपरिष्टादिति अग्रिमसूत्रे, तथाचातो व्याख्यात इत्यर्थः । अत्र कश्चिज्जन्मादिसूत्रस्थेन यत इति पदेनैव विषयश्रुतेः स्मारणात् सिद्धे शास्त्रप्रमाणकत्वे, शास्त्रयोनित्वसूत्रं व्यर्थमित्याह । तन्न । यत इत्यस्य हेतुकोटौ प्रवेशे जन्माद्यस्येतिभागस्य प्रपञ्चवृत्तान्तपरतया ब्रह्मलक्षणत्वायोगेनासंगतत्वप्रसङ्गात् । न च लक्षणे प्रविष्टस्यैव यतःशब्दस्योक्तश्रुतिस्मारकत्वमित्यपि युक्तम् । श्रुतौ भूतानीति बहुवचनेन

रश्मिः ।

प्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते' इति सर्वोपनिषदि । अष्टविशिष्टता 'भूमिरापोऽनलः' इति गीतायामष्ट तद्विशिष्टता । संबन्धीति ब्रह्मशब्देन वेदः तत्संबन्धिविचारस्य । एवकारेण ब्रह्मरूपार्थव्यवच्छेदः क्रियते । मीमांसकमतेनार्थाध्याहारमाहुः ब्रह्म वेति । तत्प्राप्तेरिति ब्रह्मरूपलक्ष्यप्राप्तेरित्यर्थः । भाववृत्तेत्यादि ब्राह्मणस्य द्वितीयाष्टकस्थानामित्यर्थः । आदिपदेन संहितोक्तानां 'प्रजापतिरकामयत प्रजाः सृजेय' इत्यादीनाम् ।, एतेनेति शास्त्रपदोपादानेनेत्यर्थः । निमित्तवाचीति 'तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता' इति मातृरूपत्वबोधनादित्यर्थः । अत इति अभिन्ननिमित्तोपादानत्वादित्यर्थः । हेतुकोटावित्यादि यत इत्यादिश्रुतेरित्येवं हेतुकोटौ प्रवेशस्य प्रपञ्चस्य जन्मादि भवतीत्येवं प्रपञ्चवृत्तान्तपरतया ब्रह्मलक्षणत्वायोगेन सूत्रस्याभासेनासंगतत्वप्रसङ्गादित्यर्थः । न च यतः शास्त्रयोनित्वात् इति हेतुकोटिप्रवेशोऽस्त्विति शङ्क्यं परैरप्यनङ्गीकारात् । अन्त्यपक्षं समर्थयितुमप्याशङ्कामाहुः न च लक्षण इत्यादि । जगज्जन्मादिप्रपञ्चवृत्तान्ते आर्थिके लक्षणे प्रत्ययांशस्य प्रविष्टत्वेन यतःशब्दस्यापि प्रविष्टस्यैवेत्यर्थः । आभासोक्तपक्षे तु जन्माद्यस्य यत इति

केचित् पृथग्रूपनामप्रपञ्चकर्तृत्वं योगविभागेन प्रतिज्ञाय समन्वयादिसूत्रेष्वेव हेतून् वर्णयन्ति। अन्वयसिद्ध्यर्थं च अतति व्याप्नोतीत्यत्। शास्त्रे योनित्वं प्राप्तं तदिति नैतत् सूत्रकारसंमतमिति प्रतिभाति।

भाष्यप्रकाशः ।

लक्षणस्य तद्विरुद्धत्वापत्तेः । नच जात्यपेक्षयैकवचनान्न विरोध इति वाच्यम् । तथा सति वाक्यान्तरासंग्रहेण ब्रह्मभेदापत्तेः । तस्माच्छास्त्रयोनित्वादित्यवश्यं प्रणेतव्यम्। ननु तथापि साधारणशब्देन व्याख्यानमयुक्तम् । जन्मादीनामादिमत्तया असत्त्वेनाग्रिमसूत्रेऽपि तटस्थकारणताया एव सिद्धेरित्यत आहुः मतान्तरेत्यादि । न्यूनत्वरूपं प्रतिज्ञादोषं परिहरन्ति नामेत्यादि ।

शांकरमतमनुवदन्ति केचिदित्यादि । तन्मते दशसूत्रं जन्माद्यधिकरणम्। तत्र द्वाभ्यां प्रतिज्ञा। तत्र द्वितीयसूत्रे पञ्चम्यनन्वयादन्वयसिद्ध्यर्थं तथा वर्णयन्तीत्यर्थः । तद् दूषयन्ति नैतदित्यादि । शास्त्रयोनिरित्येतावतैव प्रतिज्ञासिद्धावपि त्वादित्यधिककथनादग्रिमसूत्रे पुनः साध्यपरामर्शाच्च तथेत्यर्थः। यत्पुनः शास्त्रस्य योनिरिति षष्ठीतत्पुरुषमङ्गीकृत्य, महत ऋग्वेदादिशास्त्रस्य सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य संभवो, न सर्वज्ञादन्यतः संभवतीत्येवं ब्रह्मणः सर्वज्ञत्वं समर्थितम्। 'अस्य महतो भूतस्य निःश्वसितं यद् ऋग्वेद' इत्यादिबृहदारण्यकीयश्रुतिमादाय पुरुष-

रश्मिः ।

लक्षणे प्रविष्टस्य । उक्तश्रुतिर्यत इति श्रुतिस्तत्स्मारकत्वं न तु 'तस्माद्वा एतस्मात्' इति श्रुतिस्मारकत्वम् । लक्षणस्येति आकाशमात्रभूतकर्तृत्वस्यान्तिमलक्षणस्य श्रुतिविरुद्धत्वापत्तेरित्यर्थः । अथवा एकजगज्जन्मादिकर्तृत्वस्य वसुभूतादिजन्मादिकर्तृत्वरूपश्रौतलक्षणादानुपूर्व्यंशेविरुद्धत्वापत्तेरित्यर्थः । न च जातीति भूतत्वरूपनित्यधर्मापेक्षयेत्यर्थः । यद्वा द्रव्यत्वापेक्षयाद्यस्येत्येकवचनादित्यर्थः । तथासतीति लक्षणवाक्ये यत इति श्रुतिसंग्रहे विस्फुलिङ्गवत्सर्वोत्पादकाद्ब्रह्मणो वाक्यान्तरे क्रमसृष्टिबोधके ब्रह्मभेदापत्तेरित्यर्थः। यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादेवं सर्वोत्पादकाद्ब्रह्मणः 'तस्माद्वा एतस्मात्' इति क्रमेणोत्पादक आत्मा भिद्यते यत इति श्रुत्यसंग्रहात्, आद्यस्याकाशस्य जनकत्वात्, इत्येवं ब्रह्मभेदो ज्ञेयः। शंकरभाष्ये तु जन्माद्यस्य यत इत्यत्र प्रदर्शितानुमानस्य स्वातन्त्र्यं मा भूदिति शास्त्रयोनित्वादित्युक्तमित्युक्तम् । तटस्थकारणताया इति जिज्ञास्यब्रह्मणो निर्गुणत्वेन जगत्कारणत्वं कथं लक्षणं संभवतीत्याशङ्क्य यज्जगत्कारणं तद्ब्रह्मेति कल्पितं कारणत्वं तटस्थं सदेव ब्रह्मलक्षणं यद्रजतं सा शुक्तिरिति शुक्तेर्लक्षणं रजतं तद्वदित्येवं तथेत्यर्थः। भाष्ये। उत्तरत्रेति द्वितीयाध्याय इत्यर्थः। तथा च 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इति वाक्याद् ब्रह्मशक्तित्वेनादिमत्त्वाभावेनासत्त्वाभावान्न तटस्थलक्षणतेति भावः । दृष्टान्तासिद्धेश्च । प्रकृते। न्यूनत्वरूपमिति नामप्रपञ्चाकथनरूपं सूत्रे न्यूनत्वं तद्रूपमित्यर्थः। दशसूत्रमिति यद्यप्यन्यत्रान्यथा दृश्यते तथापि शंकरभाष्ये सर्वज्ञं ब्रह्मेत्युपक्षिप्तं तदेव द्रढयन्नाहेति शास्त्रयोनित्वसूत्रस्य तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते इति समन्वयसूत्रस्येदं सूत्रमारभ्यते इति ईक्षतिसूत्रस्यावतरणदर्शनाद् दशसूत्रमित्यर्थः । साध्यपरामर्शादिति तदिति साध्यपरामर्शादित्यर्थः। हेतूनां वर्णने स न स्यादिति भावः। एतच्च तद्ब्रह्मैव समवायिकारणमिति

भा०

निःश्वासवद् वेदसंभवश्च तत उक्तः । तत्तु मध्वभाष्यव्याख्यात्रा जयतीर्थेनैव दूषितम् । इदं शास्त्रस्य निर्मितत्वं किमर्थमुपलभ्य रचितत्वं वा, निःसृतमात्रत्वं वा, नाद्यः । कणादाक्षचरणानुसरणप्रसङ्गात्, श्रुत्यादिविरोधाच्च । न द्वितीयः । शास्त्रयोनित्वस्य सार्वज्ञ्यसाधकत्वाभावप्रसङ्गादिति । इदमपि युक्तम् । पूर्वविकल्पे वेदस्यानित्यत्वप्रसङ्गात् । द्वितीये निःश्वासस्याबुद्धिपूर्वकत्वेन तथात्वादिति । एतेन, विमतं ब्रह्म वेदगतसर्वविषयप्रकाशनशक्त्याधारः । वेदोपादानत्वात् । दीपगतप्रकाशनशक्त्याधारदीपोपादानवह्निवदिति विवरणोक्तमनुमानं, निःश्वासात्मकवेदोपादानत्वेनाबुद्धिपूर्वकनिःश्वासोपादानपुरुषदृष्टान्तसनाथेन प्रतिसाधनेनापास्तम् ।

यत्तु भामतीनिबन्धे, वर्णनित्यत्वपक्षेऽपि पदानामानुपूर्वीविशिष्टवर्णात्मकत्वाद् वाक्यानां च तादृशपदात्मकत्वादानुपूर्व्याश्च व्यक्तिधर्मत्वादानुपूर्व्युपगृहीतानां नित्यानामपि वर्णानां पदत्ववाक्यत्वयोरनित्यत्वेन लोके वेदे च न तयोः पौरुषेयत्वे विवादः । किं तु वेदवाक्ये पुरुषस्वातन्त्र्यास्वातन्त्र्ययोः । तत्र स्वातन्त्र्यकोटिः काणादादीनाम् । द्वितीयां तु जैमिनीया वेदाध्ययनं प्रति गुरुशिष्यपरंपरानादित्वेन समर्थयन्ति । वैयासास्तु, अनाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्य परमात्मनो वेदजनकत्वेऽपि पूर्वपूर्वसर्गानुसारितादृक्तादृगानुपूर्वीविरचनेन । अतः पुरुषास्वातन्त्र्यमात्रमेव वेदे अपौरुषेयत्वमित्युक्तम् । तदप्यसंगतम् । वर्णवद् वैदिकपदादीनामपि नित्यत्वात् । वाचा विरूपनित्ययेति, वेदो नारायणः साक्षात् स्वयंभूरिति शुश्रुम, वेदस्य चेश्वरात्मत्वादित्यादिश्रुतिपुराणवाक्येषु वेदपदादानुपूर्वीवैशिष्ट्य एव वेदत्वेन तादृशस्यैवेश्वरात्मकत्वात् । ईश्वरस्याविद्योपधानेन सार्वज्ञ्यलब्धेरप्यभ्युपगमैकशरणत्वात् । तादृशानुपूर्वीरचनया अस्वातन्त्र्ये राजाज्ञानुवादकराजदूतवदानुपूर्वीरचनामात्रेणेश्वरसार्वज्ञ्यासिद्ध्या व्याख्येयग्रन्थविरोधाच्च । अतः स्थितस्य गतिचिन्तनमात्रायायं प्रयासः । जगत्कर्तृत्वेनैवोभयविधतत्कर्तृत्वस्य, तेनैव सार्वज्ञ्यस्यापि सिद्धौ भाष्यकारस्याप्यपार्थ एव प्रयास इति दिक् ।

अन्यैस्तु शास्त्रं योनिः कारणं प्रमाणमस्येति व्याचक्षाणैर्बहुव्रीहिरङ्गीकृतः । सोऽप्ययुक्तः । लक्षणाप्रसङ्गात् । स्वारसिकार्थत्यागाच्च ।

रश्मिः ।

भाष्यस्य पुरःस्फूर्तिकमन्वयमादृत्योक्तं ज्ञेयम् । तेन तदनुभूतं प्रसिद्धं वा ब्रह्मैव, समवायिकारणं ब्रह्मैवेत्यन्वयः इति पक्षपरामर्शकस्य भाष्यप्रकाशस्य न विरोधः । मृष तितिक्षायां चुरादिः । यत्र तु तालव्यान्तं, तत्र मृक्ष आमर्शने तुदादिर्बोध्यः तथाचानित्यः स्यादित्याहुः कणादेत्यादि । निःश्वसितरूपस्य निरपेक्षरवस्य तत्सामर्थ्यस्य च विरोध इत्याहुः श्रुत्यादीत्यादि । आदिपदेन लिङ्गम् । श्रुतिस्मृतिविरोधाच्चेति वार्थः । प्रतिसाधनेनेति ब्रह्म वेदगतसर्वविषयप्रकाशनशक्त्यनाधारः निःश्वासात्मकवेदोपादानत्वात् अबुद्धिपूर्वकनिःश्वासोपादानपुरुषवदित्येवं प्रतिसाधनेनेत्यर्थः । पुरुषेत्यादि । विवाद इति संबन्धः । स्वातन्त्र्यं च कर्तृत्वं वेदवाक्यनिरूपितं पुरुषगतं कर्तृत्वमित्यर्थः । विरूपेति विविधरूपेत्यर्थः । विरूपेति देवतासंबोधनं वा । व्याख्येयेति व्याख्येयग्रन्थः सांख्यादिभाष्यं व्यासकृतं, तस्य प्रथमब्रह्मपदस्य विरोधात् । अत इति सर्वत्र शैथिल्यात् । उभयविधेत्यादि रूपनामविभिन्नजगत्कर्तृत्वस्येत्यर्थः ।

अन्यैस्त्विति रामानुजप्रभृतिभिरित्यर्थः । लक्षणेति योनिपदस्य स्वसंबन्धिनि लक्षणा तस्या आपत्तेः । नायं वैयाकरणमत इत्यत आहुः स्वारसिकेत्यादि योनेरित्यर्थः ।

तस्मात् सर्वज्ञत्वं सर्वशक्तिमत्त्वं च सिद्धं निरङ्कुशजगत्कर्तृत्वेन ।

भाष्यप्रकाशः ।

विज्ञानेन्द्रभिक्षुणा तु शास्त्रं योनिः मूलप्रमाणं यस्मिन्निति सप्तम्यर्थे बहुव्रीहिमङ्गीकृत्योक्तम् । अत्र शास्त्रादिति वक्तव्ये यच्छास्त्रयोनित्वादित्युक्तं, तच्छास्त्राविरुद्धानुमानस्मृतियोगिप्रत्यक्षादिसंग्रहाय । अत एवाग्रे, उपपत्तेश्चेत्यादावनुमानम् । स्मृतेश्चेत्यादौ स्मृतिः । आचारदर्शनाच्चेत्यादावाचारदर्शनमुखेन योगिप्रत्यक्षादिकं च संगृहीतमिति । तदत्रैवाग्रे मया दूष्यम् ।

उक्तार्थं निगमयन्ति तस्मादित्यादि । तथाचात्र निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वमिति लक्षणं सिद्धमित्यर्थः । तत्र धर्मादेर्वारणाय तृतीयान्तम् । प्रकृत्यादिवारणाय शेषम् । तेन लक्षणे विवादाध्यासितत्वदोषपरिहारः । प्रजापत्यादिवारणाय निरङ्कुशेति ज्ञेयम् ।

अत्रानादिसृष्टिवादिनो मीमांसका बीजाङ्कुरदृष्टान्तेन सृष्टिप्रवाहानादित्वं वदन्तस्तपोयज्ञाद्युपचितपुण्यविशेषलब्धशक्तीनां प्रजापतिप्रभृतीनां क्षेत्रज्ञानामेव तत्तत्कल्पेषु कारणत्वमभिमन्यमाना

रश्मिः ।

तथाचात्रेति । लक्षणं निरङ्कुशत्वं चानन्याधीनत्वं निष्क्रान्तमङ्कुशादिति 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' इति समासः । जगज्जन्मादिकर्तृत्वेनेत्युक्तावसंभव इति जगज्जन्मकर्तृत्वेनेत्युक्तौ स्थितिप्रलयकर्तर्यव्याप्तिर्जन्मादीति सौत्रादिपदासंग्रहश्चेति च दूषणप्रसरोऽतो जगत्कर्तृत्वेनेत्युक्तम् । न च कर्तृत्वं जन्मकर्तृत्वं जन्मादिकर्तृत्वं वा वाच्यमित्युभयथोभयदोषतादवस्थ्यमिति शङ्क्यं निरङ्कुशजगज्जन्मकर्तृत्वेन निरङ्कुशजगत्स्थितिकर्तृत्वेन निरङ्कुशजगल्लयकर्तृत्वेनेत्येवं प्रातिस्विकरूपेण लक्षणघटकतृतीयान्ताङ्गीकारात् । नन्वङ्कुशप्राप्तिरीश्वरीये कर्तृत्वे कुत इति चेन्न, ईश्वरे आत्तगजेन्द्रलीलत्वात् । अङ्क्यतेऽनेन, अकि लक्षणे 'सानसिवर्णसि' इति साधुः । अङ्कुशः । धर्मादेरिति यागज्ञानयोरित्यर्थः । ननु शास्त्राणि षट् वेदवेदान्तसांख्ययोगपाञ्चरात्रपाशुपतानि । तत्र तृतीयान्तपददानेपि लक्षणगमनादतिव्याप्तिरिति चेन्न, इष्टापत्तेः । 'एकं सद् विप्रा बहुधा वदन्ति' इति 'त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम्' इति । 'यदेकमव्यक्तमनन्तरूपम्' इति च श्रुतिः । परमनेकरूपेष्वाचार्या नियामकाः 'आचार्यवान् पुरुषो वेद' 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ति' इति च । प्रकृत्यादीति प्रकृतिः स्वरूपं 'प्रकृतिमगन् किल यस्य गोपवध्वः' इति वाक्यात् । आदिपदेन शिवमायाकामाः । ननु 'अचेतनत्वेपि क्षीरवच्चेष्टितं प्रधानस्य' इति कापिलसांख्यप्रवचनसूत्रवृत्तेः सांख्यशास्त्रमादाय लक्षणस्य प्रकृतावतिव्याप्तिरिति चेन्न, प्रथमाध्याये प्रकृतेः कारणत्वाभावस्योपपादनात् । 'उपरागात् कर्तृत्वं चित्सांनिध्याच्चित्सांनिध्यात्' इति सूत्रमेकार्थीभावसामर्थ्येपीति ज्ञेयम् । ननु निरङ्कुशपदेनैव प्रकृत्यादिवारणे किं शेषेणेत्यत आहुः तेनेत्यादि । तथा च ये निरङ्कुशजगत्कर्तृत्वं प्रकृतौ मन्यन्ते तेप्यत्र पिहितमुखा इत्यर्थः । ननु भाष्ये निरङ्कुशपदाभावात् किं दृढमावश्यकत्वमत आहुः प्रजापत्यादीति । वेदोक्तत्वेप्युपबृंहिते वेदोक्तेर्ये आदरः सूचितः । 'ऐकं सद् विप्रा बहुधा वदन्ति' इति वेदान्ते प्रजापतावपि तपोरूपब्रह्मणः स्रष्टृत्वात्, शब्दार्थयोरभेदात् । [प्रजापत्यादीति पुराणे ।

'सृजामि तन्नियुक्तोहं हरो हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्' इति वाक्यात् ।

---

१. प्रच्छन्ननास्तिकाः । २. 'एकः सन्' इतिपाठः ।

ननु न सर्वो वेदो ब्रह्मणो जगत्कर्तृत्वे मानम् । तपोयज्ञादियुक्तप्रजापतिप्रभृतीनामेव जगत्कारणत्वस्य पूर्वकाण्डे तत्तदुपाख्यानेष्ववगम्यमानत्वात् । नचावान्तरकारणत्वम् । परस्याश्रवणात् । उत्तरकाण्डे तु द्वयप्रतिपादनाद् विरोधः संदेहश्च । मीमांसायाः संदेहनिवारकत्वेऽप्येकांशस्याप्रामाण्यं स्यात् । उभयसमर्थने शास्त्रवैफल्यं वा । वेदप्रामाण्यादेव तत्सिद्धेः । बाधितार्थवचनं वेदे नास्तीत्यवोचाम ।

किंच । वेदान्ताः किं वेदशेषा, वेदा वा । नाद्यः । अनुपयोगात् । अनारभ्याधी-

---

भाष्यप्रकाशः ।

ब्रह्मणो निरङ्कुशं जगत्कर्तृत्वमसहमानाः प्रत्यवतिष्ठन्ते ननु नेत्यादि । तत्तदुपाख्यानेष्विति 'प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत स सर्पानसृजत'इति । 'आपो वा इदमग्रे सलिलमासीत् । तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरत्'इत्यादिषु । तथैव पौराणेष्वपीत्यर्थः । परस्येति प्रजापत्यादिव्यतिरिक्तस्य । तथाच न पूर्वकाण्डस्य तत्र प्रामाण्यम् । ननु यथोपक्रमस्य संदिग्धत्वे निर्णय उपसंहारेण भवति, तथात्रोत्तरकाण्डेन निर्णय इति शङ्कायामाह उत्तरेत्यादि । द्वयप्रतिपादनादिति यतो वा इमानीत्यादौ ब्रह्मणः कर्तृत्वस्य, नित्यशुद्धबुद्धेत्यादावकर्तृत्वस्य प्रतिपादनाद्विरोध उभयत्रापि श्रौतत्वस्य साधारण्यादेकतरपक्षपातस्याशक्यत्वेन संदेहश्चेति तस्याः प्राबल्यान्नोत्तरकाण्डेन तन्निर्णय इत्यर्थः । तर्हि तन्मीमांसया निर्णयोऽस्त्वित्यत आह मीमांसाया इत्यादि । तथाच मीमांसायाः कर्तृत्वाकर्तृत्वान्यतरप्रसाधकत्वे अप्रसाधितांशबोधकवेदान्ताप्रामाण्यापत्तिरुभयप्रसाधकत्वे मीमांसाया एव वैयर्थ्यमित्युभयथापि कौण्ठ्यान्न तस्या निर्णायकत्वमिति सर्वस्मिन्नपि वेदे निरङ्कुशं जगत्कर्तृत्वं कुत्रापि कस्यापि न सिध्यतीत्यनादिसृष्टिवाद एवादरणीय इत्यर्थः ।

एवं ब्रह्मस्वरूपविचारेण जगत्कर्तृत्व आक्षिप्तेऽपि यदि तद्बोधकप्रमाणप्राबल्यं स्यात् तदानुपलब्धस्य धर्मस्येव तत्सिद्धिः स्यादिति वेदान्तानां प्रामाण्यमाक्षिपति किंचेत्यादि । यदि वेदशेषाः

रश्मिः ।

आदिशब्देन हरविष्णू ।] क्षेत्रज्ञानामिति जीवानाम् । प्रजापतिरिति, इयं संहितातृतीयाष्टकेस्ति । आपो वा इत्यादि, इयं सप्तमाष्टकेस्ति । पूर्वकाण्डे तत्तदुपाख्यानेषु चावगम्यमानत्वादिति भाष्येऽन्वयं मत्वाहुः पौराणेष्वपीति । तत्रेति ब्रह्मणः कर्तृत्व इत्यर्थः । उपसंहारेणेति । यथा छान्दोग्ये 'ॐमित्येतदुद्गीथमुपासीत'इत्युद्गीथोपासना ॐमितिपदात् ब्रह्मोपासना वेति संदिग्धत्व उपक्रमस्य 'स य एतमेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथामुष्मिन् लोके' इत्युपसंहारेण परोवरीयस्त्वस्य परमात्मत्वस्य पूर्वोक्तस्वरप्राणादेः सकाशादतिशयेन परः परोवरीयानिति योगेन फलत्वकथकेन ब्रह्मोपासनापरत्वमुपक्रमस्य निर्णीयते । एवं पूर्वकाण्डे संदिग्धं कर्तृत्वं ब्रह्मण्युत्तरकाण्डे निर्णीयत इत्यर्थः । भाष्ये शास्त्रवैफल्ये हेतुः वेदेत्यादि । तत्सिद्धेरिति उभयसमर्थनसिद्धेरित्यर्थः । विचारमन्तरा कथं तत्सिद्धिरित्यत आहुः बाधितार्थेत्यादि । प्रकृते । धर्मस्येवेति अग्निहोत्रादेरिव कर्तृत्वसिद्धिः स्यादिति हेतोरित्यर्थः । कर्तृत्वसिद्धिस्तु वेदान्ताभावे गहना स्यात् ।

'कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः । अकर्मणोपि बोद्धव्यं गहना कर्मणो गतिः' ॥

इति गीतानुसंधेया । आक्षिपतीति अनादिसृष्टिवादी जगत्कर्तृत्वं कुत्रापि कस्यापि न सिध्यतीत्येतदर्थमाक्षिपति वेदानामन्ताभावादित्यर्थः । अनुपयोगादिति भाष्यं विवृण्वन्ति यदि

तत्त्वेन तदुपयोगित्वे पूर्वकाण्डविचारेणैव गतार्थत्वम्। विद्याप्रवेशश्च। न द्वितीयः। यज्ञाप्रतिपादनात्। मन्त्रब्राह्मणत्वाभावाच्च। तस्माद् वेदोषरा वेदान्ता इति

भाष्यप्रकाशः ।

स्युस्तदा द्रव्यदेवतादि प्रकाशयन्त इतिकर्तव्यतां वा बोधयन्तो वेदार्थे यागे क्वचिदुपयुक्ताः स्युः। तत्तु न दृश्यते। अथानारभ्याधीता अपि स्मृतयो गृह्यसूत्राणि च यथा, 'मानवी ऋचौ धाय्ये कुर्याद्' 'यद्वै किंच मनुरवदत्तद्भेषजम्' इति, 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इत्यादिवाक्येनाग्निसमिन्धनादावुपनयनादौ चोपयुज्यमानाः शेषभावं भजन्ते। तथैते वेदान्ता अपि, 'यदेव विद्यया करोती'त्यादिवाक्येन वेदोक्तकर्मसूपयुज्यमाना वेदशेषा इत्युच्यते तदा पूर्वमीमांसायां तृतीये शेषशेषिभावस्याद्ये स्मृतिपादे तत्प्रामाण्यस्य च विचारितत्वात् तयैव गतार्थत्वाद् व्यर्थैवोत्तरमीमांसा वेदान्तानां च स्मृतिवद् विद्यास्वेव प्रवेशो, न वेद इति। नापि धर्माद्यन्यतमपुरुषार्थप्रकाशकत्वेन तत्र प्रवेशः। स्मृतावपि तौल्यात्। अत एव शिक्षोपनिषदि 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति'इति वेदानुवचनानन्तरमुपनिषदनुशासनं पठितम्। पुराणेऽपि साङ्गोपनिषद इति वेदेभ्यः पृथक् तन्निर्देशश्चेति युज्यत इति विद्याप्रवेशश्चेति चकारेण समुच्चीयते। यदि वेदास्तदा, 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'इति, 'तद्भूतानां क्रियार्थेन समाम्नायः' इत्यादिपूर्वतन्त्रवाक्याद् 'वेदोऽखिलो धर्ममूलम्'इत्यादिस्मृतिवाक्याच्च यागतच्छेषान्यतरप्रतिपादकाः स्युः। यथा, 'अग्निहोत्रं जुहोति'इत्यादयः। 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा', 'वारणो यज्ञावचरः' इत्यादयश्च। ब्रह्म तु ज्ञानशेष इति नोभयरूपमिति तत्प्रतिपादकानां कथं वेदत्वम्।

किंच। वेदो हि मन्त्रब्राह्मणसमुदायात्मकः। तत्र मन्त्रा नाम प्रयोगकालेऽनुष्ठानौपयिकार्थस्मारकाणि वाक्यानि। तद्भिन्नं च ब्राह्मणमिति, 'तच्चोदकेषु मन्त्राख्या', 'शेषे ब्राह्मणशब्दः' इति सूत्राभ्यां तल्लक्षणं निर्णीतम्। वेदान्तेषु तु विध्यनङ्गीकारेण प्रयोगाद्यभावात् तद्वाक्येषु मन्त्रत्वाद्यभावः। अत आर्यप्रसिद्धिमात्रेण वक्तव्ये वेदत्वे तेषामूषरभूमिवद् वेदोषरत्वेनापार्थत्वात् तेषां

रश्मिः ।

वेदेत्यादि। इतिकर्तव्यतामिति इतिशब्दः प्रकारं वदति। कर्तव्यता च क्रियाम्। तथा च क्रियाप्रकारमित्यर्थः। सामान्यस्य च भेदको विशेषः प्रकार इति तद्विदः। तत्त्विति क्वचिदप्युपयुक्तत्वं त्वित्यर्थः। अनारभ्येत्यादि भाष्यं विवृण्वन्ति अनारभ्येत्यादि। मानवी ऋचाविति व्याख्यातैषा। मनोरुक्तेर्भेषजत्वेन तत्स्मृतयोग्निसमिन्धनादावुपयुज्यन्ते। उपयुज्यमाना इति विद्यापौष्कल्यजनकतयोपयुज्यमाना इत्यर्थः। स्मृतिवदित्यादि इतिहासपुराणमित्यपरविद्यायां श्रावणाद् 'यदेव विद्यया करोति श्रद्धया उपनिषदा वा'इति श्रुत्या तद्विद्यास्वेव प्रवेशो भवेन्न वेद इत्यापत्तिः। धर्मादीति, आदिपदेन ब्रह्माक्षरे, यद्वा आदिपदेनार्थकाममोक्षाः। तत्रेति वेदे इत्यर्थः। न द्वितीय इत्यादिभाष्यं विवृण्वन्ति यदि वेदा इत्यादि। पूर्वतन्त्रेत्यादि प्रथमाध्यायस्थसूत्राभ्यामित्यर्थः। 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' 'तद्भूतानां क्रियार्थेन समाम्नायोर्थस्य तन्निमित्तत्वात्' तेष्वेव पदार्थेषु भूतानां वर्तमानानां पदानामित्यर्थः। उभयोरेकतिङ्को दर्शनाद्वाक्यादित्युक्तम्। आमिक्षेति घनीभूतः पिण्ड इत्यर्थः। यज्ञावचर इति यज्ञप्रचारहेतुः। इत्यादयश्चेति यागतच्छेषप्रतिपादका इत्यर्थः। नोभयरूपमिति न यागतच्छेषरूपमित्यर्थः। सूत्राभ्यामिति द्वितीयाध्यायस्थाभ्यामित्यर्थः। प्रथमे 'शिष्टकोपे विरुद्धमिति

तेषां किं स्यादिति चेत् । नैवम्। अस्ति तावद् वेदत्वम् । अध्ययनादिभ्यः स्मरणाच्च। प्रमाणं च सर्वोऽपि वेदः स्वार्थे। स च न यज्ञमेव ब्रह्म भवतु । न चैतावता अवेदत्वम्। अतिप्रसङ्गात्। शक्यते ह्यग्निहोत्रादीनामन्यतरदनन्तर्भाव्य

भाष्यप्रकाशः ।

विचारे किं फलं स्यात्। सर्वोऽपि प्रयोजनोद्देशेनैव प्रवर्तत इति फलाभावात् प्रवृत्तिविघाते तन्मीमांसाऽप्यपार्थेति तत्साधिते ब्रह्मणो जगत्कर्तृत्वेऽत्यन्ताभिनिवेशो न कार्य इत्यर्थः ।

अत्र समादधते नैवमित्यादि । न वेदान्तेषु वेदोपरत्वं, किंतु वेदत्वमेव । अध्ययनाध्यापनज्ञानविधिभिर्वेदं पठन्तः पाठयन्तोऽर्थं चावगच्छन्त आर्याः स्वरपूर्वकमनध्यायशूद्राऽश्रवणादिनियमान् पालयन्त एव तथा कुर्वन्तीत्याचारपरंपरया,

‘स्वयंभूरेष भगवान् वेदो गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः’ ॥ इति

पुराणोक्तस्य स्मरणस्यात्रापि तुल्यत्वेन च तन्निर्धारात् । किंचौत्पत्तिकसूत्रे बादरायणग्रहणं पूजार्थं कृत्वा अलौकिकेऽर्थे परानपेक्षं वेदस्य प्रामाण्यं जैमिनिना प्रतिपादितम् । ततश्च सोऽलौकिकोऽर्थः को वेत्यपेक्षायां यथा तन्मते यज्ञस्तथा व्यासमते ब्रह्म । अनुपलब्धार्थत्वस्योभयत्रापि तौल्यात् ।

किंच । यागप्रतिपादकत्वेन वेदत्वं मन्वानो भवान् ब्रूताम् । किं यावद्यज्ञप्रतिपादकत्वं वेदत्वम्, उत यत्किंचित्तत्प्रतिपादकत्वम्, अथवा यथाकथंचित् तत्प्रतिपादकत्वमिति । नाद्यः । अग्निहोत्रादिप्रतिपादकस्य भागस्य तदितरयज्ञाप्रतिपादकत्वेनावेदत्वप्रसङ्गात् । न द्वितीयः । सर्वस्य तथात्वप्रसङ्गात् । मनुः पुत्रेभ्यो दायं व्यभजदित्याद्यर्थवादस्यापि तथात्वप्रसङ्गाच्च । तृतीयश्चेत् सिद्धं ब्रह्मप्रतिपादकत्वेऽपि वेदत्वम् । वक्ष्यमाणरीत्या तेषामपि यज्ञार्थत्वेन तथात्वादिति । तदेतदुक्तं शक्यते हीत्यादिना । अत्रान्यतममिति वक्तव्ये अन्यतरदिति प्रयोगस्तु, महाभाष्ये ‘प्रत्ययः’ ‘परश्च’ इत्यत्र निमित्तविचारं प्रकृत्य तदुदाहरणे तद्यथा बहुष्वासीनेषु कश्चित् कंचित् पृच्छति, कतरो देवदत्त इत्यत्रोपाध्यनङ्गीकाराद् बोध्यः ।

रश्मिः ।

चेत्’ ‘न, शास्त्रपरिमाणत्वात्’इत्यधिकरणे। आचारस्यापि प्रामाण्यादाहुः अध्ययनेत्यादि। प्रमाणं चेत्यादि भाष्यं विवृण्वन्ति किंचौत्पत्तिकेत्यादि । अनुपलब्धेति अनधिगतार्थगन्तृत्वं प्रमाणमिति लक्षणस्मारकपदम् । अवेदत्वप्रसङ्गादिति । एतेनातिप्रसङ्गादिति भाष्यं विवृतम् । शक्यते हीत्यादिभाष्यस्यातिप्रसङ्गादिति भाष्यविवरकत्वात् । तथात्वादिति यथाकथंचिद्यज्ञप्रतिपादकत्वादित्यर्थः । तदेतदिति किंच यागेत्यादिना विवृतमित्यर्थः । न चैतावता ब्रह्मप्रतिपादकत्वेनावेदत्वमग्निहोत्रादिप्रतिपादकवेदभागेषु । अतिप्रसङ्गादवेदत्वप्रसङ्गात् । यतोग्निहोत्रदर्शपूर्णमासादीनां मन्त्रविधिनिषेधनामधेयार्थवादसंबन्धिनां मध्येन्यतरद् एकतरद् वेदेनन्तर्भाव्य वेदाद्बहिःकृत्य वेदे वेदत्वं वक्तुं शक्यतेऽपि तु न, तस्मादतिप्रसङ्ग इति भाष्यार्थः । अग्निहोत्रादिषु लक्षणापर्याप्तिं मत्वा न प्रति तद्वेदलक्षणं न वक्तव्यमतो यथाकथंचित्तत्प्रतिपादकत्वं वेदत्वं तच्च वेदान्तेष्वपीति फलितोऽर्थः । उपाध्यनङ्गीकारादिति । अत्रायमाशयः । कतरकत-

तथा वक्तुम् । तस्मात् ब्रह्मापि प्रतिपादयन्तो वेदान्ता वेदत्वं न व्यभिचरन्तीति । मन्त्रब्राह्मणरूपत्वं चोपपादयामः । ऋगेव मन्त्रः ।

भाष्यप्रकाशः ।

स्वरूपतः संदेहं वारयन्ति मन्त्रेत्यादि । तच्चोदकेत्यादिसूत्राणां विचारे ह्याम्नातत्वे सति कर्मसाधनत्वेन विधिबोधितोच्चारणकः शब्दो मन्त्रः । तथात्वे सति मन्त्रभिन्नः शब्दो ब्राह्मणमिति तयोर्लक्षणम् । तदुभयात्मकत्वं च वेदलक्षणं सिद्ध्यति । न तु विधेयार्थस्मारको मन्त्र इति लक्षणम् । तस्य, वसन्ताय कपिञ्जलानालभेतेत्यत्राऽव्याप्तेः । एवं मननहेतुर्मन्त्र इत्यस्य

रश्मिः ।

मौ हि 'किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्' 'वा बहूनां जातिपरिप्रश्ने डतमच्' इति सूत्राभ्यां विहितौ तत्रैतादृशमहाभाष्यप्रयोगात् बहूनां निर्धारणेपि डतरचः इष्टत्वात्पूर्वसूत्रे द्वयोर्ग्रहणं प्रायोभिप्रायम् । तथा च वार्तिकम् 'किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यानर्थक्यम्' इति अत्र कैयटः द्वयोरिति जातिपरिप्रश्ने इति च न कर्तव्यमिति भावः । इतीति मनोरमायामुक्तम् । अन्यतरान्यतमशब्दौ तु स्वभावादेव द्विबहुविषये निर्धारणे वर्तेते । तत्र हेतुस्तु किंयत्तद्भ्य एव तयोर्विधानादिति शेखरे उक्तः । तथा च सूत्रे द्वयोर्ग्रहणं प्रायोभिप्रायमिति स्वभावाद् द्विबहुविषये निर्धारणे वर्तेते इत्यत्रापि द्विशब्दोपादानं प्रायोभिप्रायमिति बहूनां निर्धारणेप्यन्यतरदिति प्रयोगः साधुरेवेति । द्वयोर्बहूनामिति चोपाधी तयोर्नाङ्गीकारादित्यर्थः । तथाच भागवतैकादशे भगवद्वाक्यं

'आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम्' इत्युपक्रम्य,

'वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ।
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोभिधीयते' ।

इत्यत्र तयोरन्यतम इति । न च किमोस्मिन् विषये डतरजपीत्यनेन बहूनां निर्धारणे किमः एव डतरजिति नियम्यत इति शङ्क्यम् । न तत्सूत्रं किंतूक्तमहाभाष्यसिद्धं वाक्यमित्यदोषात् । स्वरूपत इति मन्त्रब्राह्मणे वेदस्य स्वरूपे 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति । स्वमतं व्याकर्तुं मीमांसकमतेनाहुः तच्चोदकेत्यादिसूत्राणामिति पूर्वतन्त्रे द्वितीये 'तच्चोदकेषु मन्त्राख्या', 'शेषे ब्राह्मणशब्दः', 'अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात्', इति सूत्राणां विचार इत्यर्थः । यद्यपि शास्त्रदीपिकायां यत्राभियुक्तानां मन्त्र इति प्रसिद्धिः स मन्त्रः अवशिष्टं ब्राह्मणमिति लक्षणं तृतीयसूत्रे चोहप्रवरनामधेयानामभियुक्तप्रसिद्ध्यभावादेवामन्त्रत्वमिति स्थितं तथापि सूत्रत्रयविचारे त्विदमेव लक्षणमिति विचारपदसामर्थ्यम् । तथाचाम्नातेष्विति सूत्रभाष्यं 'आम्नातत्वे सति तच्चोदकेषु मन्त्राख्या तथात्वे सत्येव शेषे ब्राह्मणशब्दः' तदाह आम्नातेषु विभागो द्विविधः इति 'पत्नि कति ते जाराः' इत्यादिप्रश्नोत्तरीभूतलौकिकवाक्यानां संकल्पस्य च मन्त्रत्ववारणाय सत्यन्तम् । अध्ययनविधिना सर्वमेवोच्चारणं प्रेरितमिति ब्राह्मणेतिव्याप्तिवारणाय तृतीयान्तम् । विविधमनुष्ठानं यत्र विधिना बोध्यते तत्र मन्त्रस्य साधनत्वेन बोधनादनेनेदं कुर्यादिति । तत्त्वेन चोदका इति न चास्य लक्षणस्य प्रलगाशीर्मन्त्रादिष्वव्याप्तिः, विषयत्वेन तेषामपि अपसाधनत्वात् । मीमांसकानां सिद्धान्तलक्षणं वक्तुं तन्मतमनुवदन्ति न त्विचत्यादि

भाष्यप्रकाशः ।

ब्राह्मणेऽतिव्याप्तेः । अस्यन्तस्त्वान्त उत्तमपुरुषान्त इत्यादीनां परस्परं प्रयोगकरणभूतः शब्द इत्यस्य प्रत्यगाशीर्मन्त्रे चाव्याप्तेः । किंत्वभियुक्तानां यत्र मन्त्र इति समाख्यानं स मन्त्र इति लक्षणमङ्गीक्रियते । यदि तु चरणव्यूहानुरोधेन वसन्तायेत्यादीनां ब्राह्मणत्वमङ्गीकृत्य प्रयोगकरणभूतः शब्दो मन्त्र इति सौत्रमेव लक्षणमाद्रियते, तदापि जपोपासनादिप्रयोगं प्रत्यपि प्रत्यगाशीःप्रभृतिमन्त्राणां विषयत्वादिना करणत्वमस्त्येवेत्यदोषः । तच्चर्क्सामयजुःष्वेव प्रसिद्धम् । निगदादीनामपि तत्रैव निवेशः । ब्राह्मणलक्षणमप्यत एव सिद्धम् । वेदान्तेषु च, सत्यं ज्ञानमि-

रश्मिः ।

अङ्गीक्रियते इत्यन्तम् । अव्याप्तेरिति अस्य मन्त्रस्य विधिरूपत्वेन विधेयार्थाभिधायकत्वेन तत्त्वाभावात् । अस्यन्त इत्यादि 'विप्रुषाꣳ शान्तिरसी'त्यसिपदान्तः, 'इषे त्वे'ति त्वान्तः, वाचा त्वा होत्रा प्राणेनोद्गात्रा चक्षुषाध्वर्युणा मनसा ब्रह्मणा श्रोत्रेणाग्नीध्रेणैतैस्त्वा पञ्चभिर्दैव्यैर्ऋत्विग्भिरुद्धरामीत्युत्तमपुरुषान्तः, बर्हिर्देवसदनं दामीति च । परस्परमिति अव्याप्तिरिति शेषः । त्रिषु परस्परमेकलक्षणप्रवेशेन लक्षणान्तराप्रवेशात् । प्रत्यगाशीरिति 'आयुर्घृतम्', 'अग्ने आयुर्मे देहि' इति मन्त्रे इत्यर्थः । अङ्गीक्रियत इति मीमांसकैरिति शेषः । दूषणं तु भावार्थपादेऽनाम्नातेष्विति सूत्रभाष्ये उक्तम् । तथा हि इदं लक्षणं प्रकरणभेदेन स्थितयोः ऋक्सामयोरेव संभवति न तु कृशररूपयजुःशाखान्तरेपि । वाजसनेयके ब्राह्मणे ब्राह्मणं वसन्ताय कपिञ्जलानालभेत ग्रीष्माय कलविङ्कानिति न मन्त्रौ । ननु कथं मन्त्रमध्ये पठितयोरमन्त्रत्वमिति चेन्न त्रिगुणपाठाय यजुष्ट्वार्थममन्त्रयोरपि तत्र प्रक्षेपात् ।

त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह ।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः ॥

इति चरणव्यूहवाक्यादिति तद्विवरणे चैतदतिरिक्तस्थले विधायकत्वं न क्वापि मन्त्रे दृष्टम् । अत्र च मन्त्रत्वं संदिग्धम् । ब्राह्मणे तु विधायकत्वं प्रसिद्धमिति लिङ्गभूतं लिङ्गं च स्थानाद्बलिष्ठमिति । अत उक्तमेव लक्षणं ज्याय इति । ननु कथं तर्हि चोदकेषु मन्त्राख्येति सूत्रे अतः कर्मणि यागजपादौ यः साधनभूतः शब्दः स मन्त्रः कर्मकरणः शब्दो मन्त्र इत्युक्तं भवतीति भाष्यमित्याशङ्क्य तत्रेष्टमापादयन्ति यदि त्वित्यादि । चरणव्यूहस्तु 'त्रिगुणं पठ्यते यत्र' इति वाक्यम् । आद्रियत इति द्रा कुत्सितगतौ 'घुमास्थे'तीत्वम् । जपोपासनेति आदिशब्देन किंचिद्ध्यानम् । विषयत्वादिनेति आदिशब्देनाशिष्टम् । अदोष इति तथा चोभयमपि सिद्धान्तलक्षणमिति हृदयम् । तथेति मन्त्रलक्षणं चेत्यर्थः । निगदादीनामिति परप्रत्यायनार्था मन्त्रा निगदाः प्रोक्षणीरासादय इध्माबर्हिरुपसादय इन्द्र आगच्छ हरिव आगच्छ इत्यादयः । आदिपदेन निविन्मन्त्राः अग्ने महानसि ब्राह्मणभारतेत्येवंरूपाः । तत्रैवेति । 'यजूꣳषि वा तद्रूपत्वात्' इति सूत्रेण यजुःष्वेवेत्यर्थः । ब्राह्मणेत्यादि अत एव पत्नि कति ते जारा इत्यादिलौकिकवाक्यानां संकल्पस्य च ब्राह्मणत्ववारणस्यावश्यकत्वादेव सिद्धान्तलक्षणं सिद्धमित्यर्थः । सत्यन्ताभावे लौकिकवाक्ये संकल्पे चातिव्याप्तिरिति भावः । नापीति करणबहुलं ब्राह्मणं इत्यददाः इत्ययजथा, इत्यपचथा इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेतिव्याप्तेः । इत्याहेति वाक्योपनिबद्धं ब्राह्मणमित्यपि न । राजाविषं भगं भक्षीत्याह यो वां रथाः शुचिरस्मीत्याहेत्यनयोरतिव्याप्तेः । आख्यायिकारूपं ब्राह्मणमित्यपि न, यमयमीसंवादसूक्तादावतिव्याप्तेः । नापि हेत्वाद्यन्यतमत्वं तत्त्वं; मन्त्रेष्वपि हेत्वादिसत्त्वात् । ब्राह्मणे तेन ब्रह्म क्रियते इति हेतुः । तदङ्गो दधित्वमिति निर्वचनं,

ब्रह्मप्रतिपादकं ब्राह्मणम्, तच्छेषाः सृष्ट्यादिप्रतिपादकाः। यद्यपि न विधीयते, तथापि तादृशमेव ज्ञानं फलायेति युक्तमुत्पश्यामः। पूर्ववैलक्षण्यं तु भूषणाय।

भाष्यप्रकाशः।

त्यादीनामृचाम्, अच्युतमसीत्यादीनां यजुषां, हाउ हाउ हाउ इत्यादीनां साम्नां च विद्यमानत्वात् तान्येव मन्त्राः। ऋगित्युपलक्षणम्। तद्भिन्नं ब्रह्मप्रतिपादकं ब्राह्मणम्। ब्रह्मप्रतिपादकभागशेषाः सृष्ट्यादिप्रतिपादका भागा ब्राह्मण एव निविशन्ते। ततश्च मन्त्रब्राह्मणसमुदायरूपत्वात् सिद्धं वेदान्तानां वेदत्वमिति। तर्हि वेदोषरत्वं कथं निवर्ततामित्यत आहुः यद्यपीत्यादि। तथाच वेदे बाधितार्थवचनस्याभावाद्विधीयमानमपि ज्ञानं यथोक्तं फलं जनयिष्यत्येवेति नोषरत्वमित्यर्थः। ननु पूर्वमीमांसायां विहितस्यैव फलवत्त्वं साधितमिति कथं तथेत्यत आहुः पूर्वेत्यादि। तथाच, गुणे त्वन्यायकल्पनेति तत्रैवोक्तत्वात् वेदगुणभूतस्य जैमिनीयस्यैव निर्णयस्य हीनाधिकारिपरत्वं वेदविरोधे कल्पनीयमित्यर्थः।

रश्मिः।

अमेध्या वै माषा इति निन्दा, वायुर्वै क्षेपिष्ठा देवतेति प्रशंसा, तद्विचिकित्सन् जुहवानीति संशयः, यजमानेनेत्यादि विधिः, माषानेव मह्यं पचतेति परकृतिः, पुरा ब्राह्मणा अनैषुरिति पुराकल्पः, यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुःकपालान्निर्वपेदिति विशेषावधारणकल्पना। एवं मन्त्रेपि इन्द्वो वामुशन्ति हीति हेतुः, उदानिषुर्महीरिति तस्मादुदकमुच्यते इति निर्वचनं, मोघमन्नं विन्दते अप्रचेता इति निन्दा, अग्निर्मूर्धा दिवः ककुत्पतिरिति प्रशंसा, अधःस्विदासीदुपरिस्विदासीदिति संशयः, कपिञ्जलानालभेत इति विधिः, सहस्रमयुतं ददिति परकृतिः, यज्ञेन यज्ञमयजन्त देवाः इति पुराकल्पः। ऋगेव मन्त्र इति भाष्यं व्याकुर्वन्ति वेदान्तेषु चेत्यादि। ऋचामिति 'तेषामृग्यत्रार्थवशेन पादव्यवस्था' इति सूत्रोक्तमर्थवशेन व्यवस्थितपादत्वरूपं लक्षणमन्त्रानुस्यूतमिति ऋचामित्यर्थः। तेषामित्यस्य मन्त्राणामित्यर्थः। अर्थवशेनेत्यनेन छन्दोनुरोधेन मगणादिकृता 'पादव्यवस्था व्यावर्तिता। यजुषामिति 'शेषे यजुःशब्दः' इति सूत्रोक्तमृक्सामातिरिक्तमन्त्रत्वरूपं लक्षणमन्त्रानुस्यूतमिति यजुषामित्यर्थः। साम्नामिति 'गीतिषु सामाख्या' इतिसूत्रोक्तं ऋक्षु यद्गानं तद्रूपत्वरूपं लक्षणमन्त्रानुस्यूतमिति साम्नामित्यर्थः। तान्येव मन्त्रा इति मन्त्रपदोत्तरं यदेकत्वं तत्प्रकृत्यर्थावच्छेदके मन्त्रत्वेऽन्वेति मन्त्रत्वं च ऋग्यजुःसामनिष्ठमेकमेवेति नायोग्यता। न च पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधः। अनेकव्रीहिव्यक्तितात्पर्यके संपन्नो व्रीहिरितिवाक्येप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वादित्यन्यत्र विस्तरः। ननु भाष्ये ऋगित्युक्तेः कुतो यजुःसाम्नोर्ग्रहणमित्यत आहुः ऋगित्यादि। ब्रह्मप्रतीत्यादि भाष्यं विवृण्वन्ति तद्भिन्नमित्यादि। साधितमिति द्वितीयाधिकरणे साधितमित्यर्थः। तथाच शाबरभाष्यम् 'यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते' इति। तत्रैवेत्यादि पूर्वतन्त्रे नवमस्य तृतीयपादे 'विप्रतिपत्तौ विकल्पः स्यात् समत्वाद् गुणे त्वन्यायकल्पनैकदेशत्वात्' इत्यधिकरणे अदितिः पाशं प्रमुमोक्तेतुं अदितिः पाशान् प्रमुमोक्तेतानिति पाशमन्त्रावेकवचनान्तबहुवचनान्तौ तत्र बहुवचनान्तः किंप्रकृतावेवाग्नीषोमीये निविशते उत बहुपाशकेषु पशुगणेषूत्कृष्यते नोत्कर्षः किंतु गुणे कारकगतसंख्याभिधायित्वेन गुणभूते बहुवचने लक्षणाकल्पना पाशावयवगतैव बहुत्वं लक्ष्यते इति। एवमुपाङ्गेषु गणनाद्वेदगुणभूतायां पूर्वमीमांसायामेव तत्त्वं कल्पनीयमित्यर्थः। उपलक्षणाद्वैलक्षण्यमस्मद्भेदरूपं भूषणायेति

काण्डद्वयस्यान्योन्योपकारित्वाय साधारणग्रहणम् । 'यदेव विद्यया करोति' इत्यादिना पूर्वशेषत्वं सर्वस्य । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यादिना सर्वस्योत्तरशेषत्वम् । कर्मब्रह्मणोः क्रियाज्ञानयोर्धर्मिपरत्वेनैक्यात् कर्तृवाक्येषु सर्वत्र न विरोधः । तस्माच्छास्त्रयोनित्वं सिद्धम् ।

भाष्यप्रकाशः ।

एवं भाट्टादिकृतं पूर्वपक्षं परिहृत्य काण्डद्वयस्यैकवाक्यत्वबोधनाय शास्त्रपदप्रयोग इति पर्यवसितं तदर्थमाहुः काण्डेत्यादि । एकवाक्यत्वप्रकारमाहुः यदेवेत्यादि इदं चतुर्थाध्याये, 'यदेव विद्ययेति हि' इतिसूत्रे व्युत्पादयिष्यते । ऐक्यादिति अभिधेयप्रयोजनयोरैक्यात् । तथाच, 'यज्ञो वै विष्णुः' इति श्रुतेर्धर्मो यस्मां मदात्मकः,

'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्,
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ।
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' ॥

इत्येकादशस्कन्धे भगवद्वाक्याच्च ब्रह्मवादेन सर्वस्य ब्रह्मात्मत्वावगतिरुपनिषत् 'विद्यात्मनि भिदाबाधः' इति वाक्याद् भेदबुद्धिबाधो विद्या तत्पूर्वकं यज्ञादिकरणे कर्मपौष्कल्यम् । ते च वेदान्ताधीने इति पूर्वकाण्डस्य वेदान्तापेक्षित्वं, वेदानुवचनयागादिसाधनैर्भगवत्प्रसादाच्छुद्धे चेतसि विद्योदेतीति साधनावबोधकवेदभागापेक्षित्वं वेदान्तानाम् । यद्यप्युभयत्र पुरःस्फूर्त्या कर्म ज्ञानं च यथायथं प्रतीयते, तथापि पूर्वोक्तश्रुतिस्मृतीनां वक्ष्यमाणानां च तासां विचारे क्रियाज्ञानयोर्धर्म्यात्मकत्वेनाभिधेयस्यैक्यम् । समुच्चिताभ्यां ताभ्यां यथाधिकारं ब्रह्मभावः, परप्राप्तिश्च फलमिति प्रयोजनस्याप्यैक्यमित्येवं सिद्ध एकवाक्यत्वे

रश्मिः ।

न व्याख्यातम् । भाट्टादीति पूर्वमीमांसायां विहितस्यैवेत्यादिना पूर्वं कृतम् । काण्डद्वयस्येत्यादि भाष्यमारभ्य विवृतम् 'अभिधेयप्रयोजनयोरैक्या'दित्यन्तं स्फुटीकुर्वन्ति स्म तथाचेति । ब्रह्मात्मकस्येति श्रुत्यन्तरे च 'यो वा एतदक्षरमविदित्वा गार्गि अस्मिन् लोके जुहोति ददाति तपस्तप्यपि बहूनि वर्षसहस्राण्यन्तवानेवास्य स लोको भवति' इति बृहदारण्यके, 'य एवास्मि स सन् यजे' इति ब्रह्मात्मकत्वावगतिर्यज्ञाङ्गम् । उप समीपे सीदतीत्युपनिषत् । ते चेति उपनिषद्विधे इत्यर्थः । यदेव विद्ययेति भाष्यं स्फोटयित्वा तमेतमिति भाष्यं स्फुटीकुर्वन्ति वेदानुवचनेति वेदानुवचनानि यागादीनि साधनानि तैः 'तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्' इति श्वेताश्वतरे दर्शनसाधनत्वेन प्रसाद उक्तः । स शुद्धिहेतुरित्याशयेनाहुः भगवदिति । सप्तम्यन्तचेतःपदोपादानेन दर्शनं सर्वात्मभावरूपं विवक्ष्यते तस्य 'स मानसीन आत्मा जनानाम्' इतिश्रुत्या चेतसि विद्यात्मकस्योदय इति मुख्यविद्या । सर्वत्र तु यागादिसाधनैः शुद्धमनसि ज्ञानं भक्तिर्वोदेतीति । कर्मब्रह्मणोरित्यादिभाष्यं विवृण्वन्ति यद्यपीत्यादि । अभिधेयस्येति पूर्वोत्तरकाण्डाभिधेयस्य कर्मज्ञानरूपस्य धर्मिणैक्यम् । ताभ्यामिति कर्मज्ञानाभ्याम् । समुच्चयोऽत्र न रामानुजभाष्याभिमतः सिद्धान्तग्रन्थत्वात् । तथाचोक्तभाष्योक्तसमुच्चय एवं च यथाधिकारमाधिदैविकाध्यात्मिकचित्तशुद्धी अनतिक्रम्य ब्रह्मभावः । ज्ञानद्वारा ब्रह्मत्वं, भक्तिद्वारा परप्राप्तिः । अप्यैक्यमिति 'ते प्राप्नुवन्ति मामेव' इति गीतावचः । अक्षरात्मनां स्वमात्मत्वोक्तेः । कर्तृवाक्ये-

केचिदत्र जन्मादिसूत्रं लक्षणत्वादनुमानमिति वर्णयन्ति ।

भाष्यप्रकाशः ।

सर्वत्र कर्तृत्वेनोच्यत इति न पूर्वोत्तरकाण्डयोर्विरोधः । शेषशेषिभावस्याविशिष्टत्वेऽपि पुरुषकर्मफलेषु यथा आशंसायाः फले पर्यवसानात् फलमेव पूर्वकाण्डे मुख्यं तथात्राऽपीति फलवाक्यवद् वेदान्तानामेव मुख्यत्वज्ञापनाय कौषीतकिब्राह्मणे 'ऋचां मूर्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां मुण्डमुण्डम्' इति मूर्धत्वादि श्राव्यते । तस्मादुपरतगन्धस्याप्यभावाद् ब्रह्मणः शास्त्रोक्तकारणत्वं निःप्रत्यूहमित्यर्थः ।

एवं सिद्धान्तमुक्त्वा आधुनिकानामन्येषां भाष्यकृतां ब्रह्मणः कर्तृत्वस्य शास्त्रैकप्रमाणकत्वांशे विप्रतिपत्त्यभावात् तन्मतानुवादमकृत्वा केषांचिद् वैशेषिकाद्यनुसारिणां मतमनुवदन्ति केचिदित्यादि । अत्रैवं बोध्यम् । वैशेषिकादिदर्शनाभिमानिनस्तावद् बाह्यानां मीमांसकानां कापिलानां च निरासाय निखिलजगदेककर्तारमीश्वरमनुमानेनैव साधयन्ति । तथाहि । जगत् कार्यं सावयवत्वाद्, महत्त्वे सति क्रियावत्त्वाद्, महत्त्वे सति मूर्तत्वाच्च घटादिवदिति जगतः कार्यत्वे सिद्धे, जगद् बुद्धिमत्कारणपूर्वकं कार्यत्वाद् घटादिवदिति साधनेन जगतस्तथात्वे सिद्धे, स बुद्धिमान् को वेत्यपेक्षायामत्र जगत्त्वेन क्षित्यादिवायुपर्यन्तानां विचित्राणां महाभूतानां संग्रहात् तादृशां तेषां जगत्त्वेन तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञः कश्चिदेकः पुरुष आस्थेयः । कार्यत्वस्य तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञकर्तृकत्वव्याप्तत्वात् । एवं च क्षेत्रज्ञानां तादृशाभिज्ञत्वाभावेन प्रकृतेश्चेतनत्वाभावेन च जगत्कर्तृत्वनिवृत्तौ सुखेन जगत्कर्तुरीश्वरस्य सिद्धिरिति । एवं प्रमाणान्तरेणेश्वरस्य तज्जगत्कर्तृत्वस्य च सिद्धौ जन्मादिसूत्रस्यापि लक्षणत्वात् तदितरभेदसाधने पृथिवीत्ववदीश्वरश्चेतनान्तरव्यतिरिक्तः, जगज्जन्मादिकर्तृत्वाद्

रश्मिः ।

च्चित्यंशं व्याचक्षुः सर्वत्रेति । ब्रह्मैवेति धर्म्येव । विरोध इति ज्ञानक्रियाशक्तिप्रतिपादनविरोधः । अत्रान्योन्याश्रयाभावायाहुः शेषशेषीति । पूर्वकाण्ड इति इदं तृतीयस्य प्रथमपादे 'द्रव्यगुणसंस्कारेषु बादरिः' 'कर्माण्यपि जैमिनिः फलार्थत्वात्'इत्यादिसूत्रेषु चिन्तितम् । आशंसा-इच्छा तस्याः । मूर्धत्वादीति आदिशब्देनोत्तमाङ्गत्वादिः । तस्मादिति मन्त्रब्राह्मणरूपत्वे सति अविहितज्ञानस्य फलसाधकत्वात् । तथाच ज्ञप्तावन्योन्याश्रयो नास्तीति भावः । वस्तुतस्तु शास्त्रमेकमेवेति नान्योन्याश्रयशङ्का । निःप्रत्यूहमिति निष्प्रत्यूहमिति पाठो भाति 'इदुदुपधस्य चाप्रत्ययस्य' इतिसूत्रात् । निर्भिन्नस्येदुदुपधस्य वा वाच्यम् 'निःप्रत्यूहो महान् भोगः' इति सेवाफले श्रीमदाचार्यप्रयोगात् । पौराणप्रयोगो वा बोध्यः । भाष्ये । तस्मादिति कर्तृज्ञानयोर्धर्मिरूपत्वेन ग्रहणात् । सिद्धमिति ब्रह्मणः । प्रकृते । वैशेषिकादीति वैशेषिकाः प्रमाणद्वयवादिनः । आदिशब्दोक्ता नैयायिकाः प्रमाणचतुष्टयवादिनः । मूर्तत्वाच्चेति तत्त्वं च परिच्छिन्नपरिमाणवत्त्वम् । तथात्व इति बुद्धिमत्कारणपूर्वकत्व इत्यर्थः । तदुपादानेत्यादि तस्य कार्यस्योपादानं चोपकरणं च संप्रदानं च प्रयोजनं चेति द्वन्द्वोत्तरं षष्ठीतत्पुरुषोपि तेष्वभिज्ञ इति सप्तमीसमासः । लक्षणेति इतरभेदसाधने हेतुः । लक्षणत्वमितरभेदसाधकत्वमिति । तदितरेत्यादि तस्येश्वरस्येतरस्माद्भेदसाधने पृथिवीत्ववत् पृथिवी इतरेभ्यो

भाष्यप्रकाशः ।

यन्नैवं तन्नैवमित्यनुमानरूपं सूत्रमित्येकं मतम् । तदसंगतम् । जगत्कर्तृसाधकस्य कार्यत्वस्य हेत्वाभासत्वात् । यथाहुर्भास्कराचार्याः । जगत् न बुद्धिमत्कारणपूर्वकं कार्यत्वाद् बीजोत्पन्नाङ्कुरवदिति साधारणो हेतुः । किं च जगता सहेश्वरसंबन्धस्यात्यन्तापरिदृष्टत्वेन साध्यस्य पक्षधर्मत्वाभावादयं विरुद्धोऽपि । यस्यकस्यापि बुद्धिमतः साधने सिद्धसाधनत्वं च । तथा घटादिदृष्टान्तबलेन कार्यत्वसमानाधिकरणस्यानीश्वरासर्वज्ञशरीरेन्द्रियादिमत्कर्तृकत्वस्य सिद्ध्या विवक्षितेश्वरासिद्धिश्च । तादृशजीवसिद्ध्याऽर्थान्तरत्वेनापि तदसिद्धिश्च । नचैवं घटादिदृष्टान्तेन शब्दे कृतकत्वादनित्यत्वसाधने दृष्टान्तीयानां पाक्यत्वादीनामापत्त्याऽनुमानोच्छेदप्रसङ्गः । लिङ्गिनः शब्दस्य प्रमाणान्तरगोचरत्वेन शब्दे पाक्यत्वादीनां निवृत्त्या तदनुच्छेदात् । अत्यन्तापरिदृष्टे ब्रह्मणि त्वन्वयव्यतिरेकपरिशुद्धानां तेषां निवर्तकस्याभावेन तादृशधर्मापत्तेरनिवार्यत्वात् । अतः शास्त्रैकसमधिगम्यं ब्रह्मेति ।

रामानुजाचार्यास्त्वेतेषु दूषणेषु शैथिल्यं प्रदर्श्य प्रकारान्तरेण शास्त्रैकसमधिगम्यत्वं

रश्मिः ।

भिद्यते गन्धवत्त्वात् इत्यनुमानलिङ्गवदित्यर्थः । यन्नैवं तन्नैवमिति देवदत्तवदित्यर्थः । अनुमानरूपमिति अस्येति जगतो जन्मादि यत इति 'जनिकर्तुः प्रकृतिः' इतिसूत्रेण पञ्चम्यन्तम् । तस्य लक्षणत्वाद्धेतुत्वं तत एव इतरभेदसाधकत्वमित्यनुमानरूपत्वं जगज्जन्मादिकर्तृत्वसिद्धौ हि तेन चेतनान्तरव्यतिरिक्तत्वं साधनीयं तत्सिद्धिस्तु जगत् बुद्धिमत्कारणपूर्वकं कार्यत्वात् घटवदित्यनुमानसाध्या । तदेवानुमानं दुष्टं किंतरामेतदित्याशयेनाहुः जगत्कर्त्रित्यादि । साधारण इति साध्यवदन्यवृत्तित्वं विपक्षवृत्तित्वं वा साधारणत्वम् । साध्यं बुद्धिमत्कारणपूर्वकत्वतदभावस्तद्वान् बीजोत्पन्नाङ्कुरादिस्तदन्यो घटादिस्तद्वृत्तित्वं कार्यत्व इति । विपक्षो बीजाङ्कुरादिः तद्वृत्तित्वं कार्यत्व इति च लक्षणसंगतिः । तथाचान्वयव्याप्त्या साध्यतदभावयोः साधकः साधारण इति फलितम् । यथा धूमवान् वह्नेरिति । तत्रायोगोलके साध्याभावसाधकत्वं बोध्यम् । साध्यस्येति बुद्धिमत्कारणपूर्वकत्वस्येत्यर्थः । विरुद्धोपीति विरुद्धत्वं तु साध्यासामानाधिकरण्यं तथाच साध्यानधिकरणे बीजाङ्कुरादौ कार्यत्वस्य सत्त्वात्तदसामानाधिकरण्यम् । दूषकताबीजभेदादुभयोर्भेदः । बाधितोपीति वक्तुं युक्तम् । पक्षे साध्यशून्यत्वस्य तल्लक्षणत्वात् । यथा जलादिपक्षे वह्न्यभावः जलं वह्निमज्जलत्वात् इत्यत्र बाधवत् साधारणोपि हेतुः । साध्यवान् पर्वतादिः तदन्यो जलह्रदादिस्तद्वृत्ति जलत्वं साध्यवदन्यत्वादिगतो हेतुः । ननु दृष्टोन्यबुद्धिमत्संबन्धो जगतीति न विरुद्ध इति चेत्तत्राहुः यस्यकस्यापीति । तथेति यथा घटादिदृष्टान्तबलेन कार्यत्वलिङ्गेन च बुद्धिमत्कारणपूर्वकत्वसिद्धिस्तथेत्यर्थः । सिद्ध्येति जगद् अनीश्वरासर्वज्ञशरीरेन्द्रियादिमत्कर्तृपूर्वकं कार्यत्वात् घटवदित्येवं सिद्ध्येत्यर्थः । ननु नैवं सिद्धिर्भवित्री क्षित्यादिवायुपर्यन्तानां विचित्राणां महाभूतानां जगत्त्वेन तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञो नानीश्वरासर्वज्ञादिरित्यत आहुः तादृशजीवेत्यादि । उपासोपचितसार्वज्ञ्यादिशक्तिमतो जीवस्य सिद्ध्येत्यर्थः । न चैवमिति दृष्टान्तबलेन दृष्टान्तीयाशेषधर्माणां पक्षवृत्तित्वाङ्गीकारे इत्यर्थः । तेषामित्यादि अनीश्वरासर्वज्ञत्वादीनां श्रवणवन्निवर्तकस्य चक्षुरादिप्रमाणान्तरस्याभावेनेत्यर्थः । अत इति प्रत्यक्षस्य तन्मूलकानुमानस्य चाप्रवृत्तेः शब्दस्य पराक्रमप्रतिपादनद्वारा प्रवृ-

भाष्यप्रकाशः ।

साधयन्ति । तथाहि । सावयवत्वादिलिङ्गकैः पूर्वोक्तानुमानैः कृत्वा सिद्धत्वेन जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते । नच जगदकार्यम्, अशक्यक्रियत्वात् अशक्योपादानादिविज्ञानत्वाच, आकाशवदिति प्रतिपक्षसद्भावात् प्रत्याख्यातुं शक्यमिति वाच्यम् । आकाशे निरवयवत्वस्यानुकूलतर्कस्य सत्त्वेन तस्याकार्यत्वेऽपि जगद्रूपेषु महीमहीधरादिषु वाय्वन्तेषु तदभावेन तयोरप्रयोजकतयाकाशदृष्टान्तेन तेष्वकार्यत्वस्य साधयितुमशक्यत्वात् । एवं निरवयवत्वेनोपाधिनैव क्षित्यादिवायुपर्यन्तानि अकार्याणि महाभूतशब्दवाच्यत्वात् आकाशवदित्यपि प्रत्यनुमानं निरस्तम् । एवं सिद्धे कार्यत्वे शक्यक्रियत्वशक्योपादानादिविज्ञानत्वयोरपि कार्यत्वेनैव सिद्ध्या तयोरपि प्रतिपन्नत्वमेव । तथाहि । घटमणिकादिषु कृतेषु कार्यदर्शनानुगतकर्तृगततन्निर्माणशक्तिज्ञानः पुरुषोऽदृष्टपूर्वं विचित्रसन्निवेशं नरेन्द्रभवनमालोक्य अवयवसन्निवेशविशेषेण तस्य कार्यत्वं निश्चित्य तदानीमेव कर्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोति । अतस्तु भुवनादेः कार्यत्वे सिद्धे

रश्मिः ।

त्तेश्चेत्यर्थः । **प्रतिपक्षेति** साध्याभावसाधकहेत्वित्यर्थः । सावयवादिहेतूनां सत्प्रतिपक्षत्वमिति भावः । साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः । **अनुकूलतर्कस्येति** यद्यकार्यं न स्यान्निरवयवो न स्यात् इति शङ्कानिवर्तकस्य निरवयवत्वं यद्यकार्यत्वव्यभिचारि स्यान्निरवयवत्वमकार्यसाधकं न स्यात् इति व्याप्तिग्राहकस्य चानुकूलतर्कस्य सत्त्वेनेत्यर्थः । **तदभावेनेत्यादि** निरवयवत्वरूपानुकूलतर्काभावेनाशक्येत्यादिहेत्वोरप्रयोजकतयेत्यर्थः । **तेष्विति** जगद्रूपेषु महीमहीधरादिष्वित्यर्थः । **उपाधिनेति** साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वमत्राकाशमादाय साधनव्यापकत्वमिति चेन्न । यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमुपाधिरिति लक्षणस्य विवक्षितत्वात् यद्धर्मः कार्यत्वत्वं तथा चाकार्यत्वत्वावच्छिन्नसाधनं नाकाशमिति नाकाशमादाय साधनव्यापकत्वमिति भावः । यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपाधिः लाघवादिति नव्याः । स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वमुपाधिः शाकपाकजत्वाभाववति घटादौ श्यामत्वसत्त्वाच्छ्यामत्वव्यापकत्वाभावेपि मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकत्वात् । एवं प्रकृतेपि यद्धर्मावच्छिन्नोकार्यत्वव्यापकं निरवयवत्वमाकाशादौ तद्धर्मावच्छिन्नमहाभूतशब्दवाच्यत्वाव्यापकं निरवयवत्वं पृथिव्यादाविति लक्षणसंगतिः । एवं यथार्द्रेन्धनाभावेनार्द्रेन्धनवत्पर्वताद्यन्यत्वेन साधनवति वह्निमत्ययःपिण्डे धूमाभाव उन्नीयते इत्यार्द्रेन्धनमुपाधिस्तद्वत् निरवयवत्वाभावेन निरवयवत्ववदाकाशाद्यन्यत्वेन वा साधनवति क्षित्यादिषु साध्यस्याकार्यत्वस्याभाव उन्नीयत इति । **कार्यत्वेनेति** कार्यत्वलिङ्गेन घटादिदृष्टान्तसनाथेनेत्यर्थः । **तयोरपीति** तयोः शक्यक्रियत्वशक्योपादानादिविज्ञानत्वयोरपि प्रतिपन्नत्वं प्राप्तत्वं प्रागल्भ्यं चैवेत्यर्थः । तथा चाशक्यक्रियत्वाशक्योपादानादिविज्ञानत्वयोर्हेत्वोरप्यसिद्धिरिति भावः । **घटमणिकेति** मणिकः गुर्जरदेशे गृहे मिष्टजलार्थं स्थलं 'टांका' इत्युच्यते । **कार्यदर्शनेत्यादि** कार्यदर्शनेनानुमिते कर्तृगते कार्यनिर्माणस्य शक्तिज्ञाने येनेत्यर्थः । **अदृष्टपूर्वमिति** न दृष्टं पूर्वं यत्तददृष्टपूर्वम् । **विचित्रः** स्थलविशेषसन्निवेशो यत्र तथाविधं चेत्यर्थः ।

---

१. अकार्यत्वधर्मावच्छिन्नेत्यर्थः ।

भाष्यप्रकाशः ।

तावत्सर्वसाक्षात्कारतन्निर्माणादिनिपुणः कश्चित् सिद्ध्यत्येव । विवादाध्यासितं भूभूधरादिकं स्वनिर्माणसमर्थकर्तृपूर्वकं कार्यत्वात् सार्वभौमसदनवदिति प्रयोगात् । किंच सर्वचेतनानां सुखदुःखभोगस्य धर्माधर्मसाध्यत्वेऽपि धर्माधर्मयोरचेतनत्वाच्चेतनाधिष्ठानमन्तरेण तयोः फलहेतुत्वानुपपत्तेः सर्वकर्मानुगुणसर्वफलदानचतुरः कश्चिदास्थेयः । वर्धकिनानधिष्ठितस्य वाश्यादेरचेतनस्य देशकालाद्यनेकपरिकरसन्निधानेऽपि यूपादिनिर्माणसाधनत्वादर्शनात् । तथाच प्रयोगः । धर्माधर्मौ चेतनाधिष्ठितत्वेनैव फलोपधायकौ अचेतनत्वात् वाश्यादिवदिति । नच पूर्वानुमाने कार्यत्वस्य हेतोर्बीजोत्पन्नाङ्कुरदृष्टान्तेन साधारणत्वं शङ्क्यम् । अङ्कुरादौ संदेहस्यानन्याहितत्वेन पक्षसमतया पक्ष एवान्तर्भावात् । एतेनैव सुखादिदृष्टान्तोऽपि प्रत्युक्तः । नच लाघवादुभयवादिप्रतिपन्नक्षेत्रज्ञानामेवाधिष्ठातृत्वमत्र कल्पयितुं शक्यम् । तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनाशक्तिनिश्चयात् । कल्पनाया दर्शनानुसारित्वस्यैव युक्तत्वात् । नचेश्वरेऽप्येतादृगशक्त्यापत्तिः । तत्र तन्निश्चायकप्रमाणाभावात् । अतः प्रमाणान्तरतो न तत्सिद्ध्यनुपपत्तिः । तथाचोक्तानुमानेन सिद्ध्यन् स्वाभाविकसर्वार्थसाक्षात्कारतन्नियमनसामर्थ्यसंपन्न एव सेत्स्यतीति न तस्मिन्नन्वयव्यतिरेकपरिशुद्धमप्यनैश्वर्याद्यापादयितुं शक्यम् । समर्थकर्तृपूर्वकत्वनियतकार्यत्वरूपहेतुबलादेव तन्निवृत्तेः । तथाहि, केनचित् क्रियमाणं किंचित् स्वोत्पत्तये कर्तुः स्वनिर्माणसामर्थ्यं स्वोपादनोपकरणविज्ञानं च निर्वाहकत्वेनापेक्षते । न त्वन्यासामर्थ्यमन्याज्ञानं वा । हेत्वभावात् । उक्तसामर्थ्योक्तज्ञानाभ्यामेवोत्पत्त्युपपन्नायां संबन्धितया दृष्टानामकिंचित्कराणामन्येषां कल्पनायोगात् । अन्यथानुमानोच्छेदप्रसङ्गात् । अथ तदप्युपयोगीति चेत्, किं क्रियमाणवस्तुव्यतिरिक्ताज्ञानादिकं सर्वविषयं क्रियोपयोगि, उत कतिपयविषयम् । नाद्यः । कुलालादेरपि क्रियमाणवस्तुव्यतिरिक्त-

रश्मिः ।

साधारणत्वमिति भूभूधरादिकं स्वनिर्माणसमर्थकर्त्रपूर्वकं कार्यत्वात् बीजोत्पन्नाङ्कुरवदित्येवं साध्यतदभावयोः साधकत्वमित्यर्थः । संदिग्धसाध्यवत्त्वं पक्षत्वमिति लक्षणं मत्वाहुः अङ्कुराद्याविति । अनन्याहितत्वेनेति कर्त्रनुपलम्भमात्रोत्पन्नतया उपाधिसत्प्रतिपक्षादिदोषानाहितत्वेनेत्यर्थः । न अन्यः पक्षभिन्नः अङ्कुरादिः पक्षरूप इत्यर्थस्तदाहितत्वेन । एतेनैवेत्यादि पूर्वोक्तरीत्या पक्ष एवान्तर्भावेन वायूपनीतचन्दनादिगन्धजन्यसुखादिदृष्टान्तोपीत्यर्थः । पक्षभिन्नत्वस्य दृष्टान्ते तन्त्रत्वादित्यर्थः । धर्माधर्माविति । द्वितीयानुमानेपि किंचिदाहुः न च लाघवादिति । क्षेत्रज्ञानामिति जीवानामित्यर्थः । अत्रेति धर्माधर्मयोरित्यर्थः । द्वितीयानुमाने इति वा । अत इति अनुमाननिर्दुष्टत्वात् शब्दप्रमाणादन्यत्प्रमाणमनुमानरूपम् । तत्सिद्धीत्यादि ईश्वरसिद्ध्यनुपपत्तिरित्यर्थः । समर्थेत्यादि समर्थकर्तृपूर्वकत्वस्य साध्यस्य यो नियतसहचारी कार्यत्वरूपो हेतुस्तद्बलादेवानैश्वर्यादिनिवृत्तेरित्यर्थः । स्वनिर्माणसमर्थकर्तृपूर्वकं कार्यत्वात् सार्वभौमसदनवत् इति पूर्वोक्तानुमानमनुसंधेयम् । स्वोत्पत्तय इति स्वस्य क्रियमाणस्योत्पत्तय इत्यर्थः । हेत्वभावादिति कल्प्यमानहेतूनामन्यथासिद्धत्वेनाभावात् । अकिंचिदिति अन्यथासिद्धानाम् । अन्येषामिति अन्याज्ञानान्यासामर्थ्यादीनामित्यर्थः । अन्यथेति अनुपयोगिसाधकत्वे घटः पृथ्वी गन्धवत्त्वादिति सद्धेतुना पृथ्वीत्ववत्तावत्परिमाणलिङ्गतत्कर्तृकत्वानां सिद्ध्यापत्त्यानुमानोच्छेदप्रसङ्गादित्यर्थः । तदपीति अन्यदप्युपयोगि सिद्ध्यतु नाम न तावत्परिमाणादीतिचेदित्यर्थः ।

भाष्यप्रकाशः ।

ज्ञानाद्यदर्शनात् । नापरः । सर्वेषु कर्तृषु तत्तदज्ञानाशक्त्यनियमेन सर्वेषामज्ञानादीनां व्यभिचारात् । नच निर्वाहकापेक्षाङ्गीकारे ईश्वरेऽपि शरीरेन्द्रियाद्यापत्तिरिति शङ्क्यम् । संकल्पमात्रेण परशरीरगतभूतवेतालगराद्यपगमदर्शनात् । नच कथमशरीरस्य प्रवर्तनरूपः संकल्प इति शङ्क्यम् । संकल्पस्य मनोजन्यत्वेन शरीरानपेक्षत्वात् । मनसस्त्वीश्वरेऽप्युपगमात् । पूर्वोक्तहेतुनैव ज्ञानशक्तिवन्मनसोऽपि प्राप्तत्वात् । नच मानसोऽपि संकल्पः सशरीरस्यैव, तस्यैव समनस्कत्वादिति वाच्यम् । मनसो नित्यत्वेन देहाद्यपगमेऽपि तत्सद्भावेनानैकान्तिकत्वात् । अत ईदृशस्य विचित्रस्य जगतो निर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न समर्थ इति तद्विलक्षण ईश्वरः संकल्पमात्रेण सर्वकरणसमर्थोऽनुमानेन सिद्ध्यति । प्रयोगान्तरेण च । जगद् एकचेतनाधीनम्, अचेतनारब्धत्वान्नीरोगस्वशरीरवदिति । तस्माच्च पूर्वोक्तप्रकारेण शास्त्रैकसमधिगम्यत्वं ब्रह्मणः सिद्ध्यति ।

कथं तर्हि तत्सिद्धिरितिचेद्, उच्यते । नाचेतनारब्धत्वेन हेतुना ईश्वरसिद्धिः । तथाहि । यदत्र साध्यतया निर्दिष्टं, किं तदेकचेतनाधीनत्वम् । न तावदेकचेतनायत्तोत्पत्तिस्थितिकत्वम् । दृष्टान्ते साध्यवैकल्यात् । अरोगस्यापि शरीरस्य पितृपुत्राद्यनेकचेतनाभोग्यत्वात् तत्तददृष्टजन्यत्वेन तदुत्पत्तिस्थित्योस्तदधीनत्वेनैकचेतनाधीनत्वाभावात् । किं च । शरीरस्य स्थितिरपि, किं स्वावयवसमवेतता, उत प्राणनम् । आद्ये अवयवाधीनत्वाच्च चेतनापेक्षा, घटादिवत् । द्वितीये क्षित्यादीनां शरीररूपत्वाभावेन पक्षे असंभव इति पक्षसपक्षानुगतस्थित्यनुपलम्भः । नाप्येकचेतनाधीनप्रवृत्तिकत्वं तत् ।

रश्मिः ।

व्यभिचारादिति कुलालत्वेन घटादित्वेन हि कार्यकारणभावः तत्रान्याशक्त्यान्याज्ञाने सहकारिणी तत्रान्यपदार्थो हि पटादिस्तथा च पटादिज्ञानवता कुलालेन क्रियमाणे घटादौ अन्याज्ञानादिनियतसहचरितत्वव्यभिचारादित्यर्थः । उपयोग्यभावेपि कार्यदर्शनात् । परशरीरेत्यादि तथाच संकल्प एव निर्वाहको न तु शरीरादिरतो नेश्वरे तदापत्तिरित्यर्थः । पूर्वोक्तेत्यादि स्वनिर्माणसमर्थकर्तृपूर्वकत्वनियतकार्यत्वहेतुनैवेत्यर्थः । प्राप्तत्वादिति समर्थपदेन तथात्वादित्यर्थः । तस्यैवेति सशरीरस्यैवेत्यर्थः । अनैकान्तिकत्वादिति साधारणाद्यन्यतमत्वमनैकान्तिकत्वं सशरीरः समनस्कः संकल्पवत्त्वात् क्षेत्रज्ञवत् । इत्यत्र समनस्कत्वस्य संकल्पाभाववति मुक्तात्मनि सत्त्वात् । इत्यनैकान्तिकत्वादनुपसंहारित्वादित्यर्थः । अनुपसंहारी च तद्वन्निष्ठात्यन्ताभावप्रतियोगिसाध्यकादिः तथाचानुपसंहार्यनैकान्तिकत्वादित्यर्थः । अनुमानेनेति । अचेतनेति कामबीजाद्यारब्धत्वात् । तत्सिद्धिरिति शास्त्रैकसमधिगम्यत्वसिद्धिरित्यर्थः । उच्यत इति अस्मामी रामानुजाचार्यैरुच्यते । सूचीकटाहन्यायेन प्रथमतो द्वितीयमनुमानं दूषयन्ति नाचेतनेत्यादि । तत्रेति । एकचेतनायत्तेति आयत्ते यति प्रयत्ने आसमन्तात् प्रयत्नविषये उत्पत्तिस्थिती यस्य जगतस्तत्कत्वम् । उपलक्ष्यते लयः । साध्यवैकल्यमेव साधयन्ति अरोगस्येत्यादि । साध्यलक्षणघटकीभूता स्थितिः शरीरनिष्ठा वाच्या । तथाच यत्सिद्धं तदाहुः शरीरस्येत्यादि । असंभव इति जीवनासंभव इति सपक्षरूपनीरोगस्वशरीरानुगतजीवनरूपस्थित्यनुपलम्भः पक्ष इति बाधित इत्यर्थः । सपक्षेति निश्चितसाध्यवत्त्वं सपक्षत्वम् । अनुपलम्भ इति पक्षेऽनुपलम्भः । तदिति एकचेतनाधीनत्वरूपं साध्यमित्यर्थः ।

भाष्यप्रकाशः ।

पक्षान्तर्भूतेषु गुरुतररथशिलामहीरुहादिष्वनेकचेतनसाध्यप्रवृत्तिकत्वेन व्यभिचारात् । नापि चेतनमात्राधीनत्वम् । सिद्धसाधनत्वात् । किं च । उभयवादिसिद्धानां जीवानामेव नियामकत्वाभ्युपगमो युक्तः । लाघवात् । नच जीवानां पूर्वोक्तरीतिकोपादानादिविज्ञानतन्निर्माणशक्त्यभावः शङ्कनीयः । तपोयागादिभिस्तेष्वपि तादृशज्ञानसामर्थ्ययोरुपगमे बाधकाभावात् । एतदपेक्षयेश्वराख्यपुरुषकल्पनस्य तत्र सामर्थ्यविशेषकल्पनस्य चात्यन्तापरिदृष्टत्वेनातिगुरुत्वात् । अतोऽचेतनारब्धत्वलिङ्गकानुमानेन नेश्वरसिद्धिः ।

नापि कार्यत्वलिङ्गकेन । महीमहार्णवादीनां सावयवत्वेन कार्यत्वेऽप्यनेकत्वात् ते सर्वे एकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात् । न चैकघटवत् सर्वेषामेककार्यत्वं, येनैकदैवैकः कर्ता स्यात् । पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यस्य नियन्तुमशक्यत्वात् । नच जीवानां तादृशनिर्माणशक्त्यदर्शनेन तन्निवृत्तौ कार्यत्वबलेनैव तत्सिद्धिरिति वाच्यम् । पूर्वमशक्तानामपि पश्चात् पुण्यविशेषोपचयेन शक्तिदर्शनात्, तद्विशेषोपचयेनातिशयितादृष्टसंभावनया च तादृशविलक्षणकार्यकर्तृत्वस्यापि संभवादित्युक्तम् । किं च । युगपत् सर्वोच्छित्तिः सर्वोत्पत्तिश्च न प्रमाणपदवीमधिरोहतः । अदर्शनात् । क्रमेणैवोत्पत्तिविनाशयोः कल्प्यमानयोर्दर्शनानुगुण्येन तथा कल्पनायामपि विरोधाभावाच्च । अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्यत्वस्यानैकान्तिकत्वम् ।

रश्मिः ।

व्यभिचारादिति साध्याभाववत्सु गुरुतररथादिषु स्वसमवाय्यारब्धेषु साध्यशून्येषु हेतोर्व्यभिचारादित्यर्थः । साधारणो हेतुरित्यर्थः । साध्यं प्रकारान्तरेण लक्षयित्वा दूषयन्ति **नापीत्यादि** । **सिद्धेत्यादि** । शरीरादौ तथात्वादित्यर्थः । अयं दोषः पक्षताविघटकः । सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता । एतच्च हेत्वाभासान्तरं जगति नायमित्यतो दूषणान्तरमाहुः **किंचेत्यादि** । कार्यत्वलिङ्गकं स्वरूपासिद्धत्वमित्याहुः **महीत्यादि** । तथाच पक्षे व्याप्यत्वाभिमतस्येश्वरसाधकस्य कार्यत्वस्य विरहात् स्वरूपासिद्धत्वमित्यर्थः । सावयवत्वं लिङ्गमपि बाधितमिति कार्यं सावयवत्वादित्यनुमानमपि दुष्टमिति भावः । पक्षे साध्याभावो बाधः इति तल्लक्षणात् । प्रतिज्ञान्तररूपं निग्रहस्थानं वा व्याख्येयम् । **सर्वेषामित्यादि** महीमहार्णवादीनामेकस्य कार्यत्वमित्यर्थः । **तत्सिद्धिरिति** स्वनिर्माणसमर्थकर्तृपूर्वकत्वसिद्धिरित्यर्थः । **संभवादिति** यथा प्रियव्रतः 'प्रियव्रतकृतं कर्म कोनुकुर्याद्विनेश्वरम्' इतिवाक्यात् । **दर्शनेति** न्यायशास्त्रानुगुण्येन । **तथाकल्पनायामिति** पुण्यविशेषोपचयेनातिशयितादृष्टसंभावनया च तादृशविलक्षणकार्यकर्तृत्वकल्पनायाम् । **अत इति** विवादाध्यासितं भूभूधरादिकं बुद्धिमदेककर्तृपूर्वकं कार्यत्वात् । घटादिवदित्यनुमाने तथेत्यर्थः । **अनैकान्तिकत्वमिति सार्वभौमसदनेति** च विवादाध्यासितं भूभूधरादिकं बुद्धिमदनेककर्तृपूर्वकं कार्यत्वात् सार्वभौमसदनवदित्यनेन बुद्धिमदनेककर्तृकत्वे सिद्धे एतत्साध्याभाववति भूभूधरादिके कार्यत्वरूपहेतोर्वृत्तेः साधारणानैकान्तिकत्वमित्यर्थः । तथाच सार्वभौमसदनदृष्टान्तेन बुद्धिमदनेककर्तृत्वे सिद्धे एतत्साध्याभाववति भूभूधरादिके कार्यत्वरूपहेतोर्वृत्तेस्तथात्वावगमात् साधारण्यानैकान्तिकत्वावगमादिति सार्वभौमेतिफक्किकार्थः । कार्यत्वं बुद्धिमदेककर्तृकत्वसाधकं घटनिष्ठत्वात् पटनिष्ठकार्यत्ववदित्यनुमानमपि । कार्यत्वं न बुद्धिमदेककर्तृकत्वसाधकं महादिभूतसमूहनिष्ठत्वात् घटपटस्तम्भसमूहनिष्ठकार्यत्ववदित्यनुमानेन सत्प्रतिपक्षमित्याहु

भाष्यप्रकाशः ।

सार्वभौमसदनदृष्टान्तेन तथाऽवगमात् । मह्यादिभूतसमूहनिष्ठत्वाच्च घटपटस्तम्भसमूहनिष्ठकार्यत्ववत् । साध्यतावच्छेदकराहित्येन दृष्टान्तस्य साध्यविकलत्वं च । सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः । पक्षस्याप्रसिद्धविशेषणत्वं च । तादृशसाध्याप्रसिद्ध्या विवादाध्यासाभावात् । बुद्धिमत्कर्तृकत्वमात्रे साध्ये सिद्धसाध्यत्वं च । किं च । सार्वज्ञ्यसर्वशक्तियुक्तस्य कस्यचिदेकस्य साधकमिदं कार्यत्वं, युगपदुत्पद्यमानसर्ववस्तुगतं वा, क्रमेणोत्पद्यमानसर्ववस्तुगतं वा । आद्ये, आश्रयासिद्धत्वम् । द्वितीयेऽनेककर्तृकत्वसाधनाद् विरुद्धत्वम् । अपिच । सर्वेषां कार्याणां शरीराणां सुखाद्यन्वयदर्शनेन तन्मूलभूतं सत्त्वादिकमवश्याश्रयणीयम् । पुरुषस्य तद्योगश्च कर्मभिरन्तःकरण-

रश्मिः ।

मह्यादीत्यादि । तथाचाभासोक्तरीत्या सत्प्रतिपक्षत्वमिति भावः । **साध्यतावच्छेदकेत्यादि** कार्यत्वलिङ्गकानुमाने क्षित्यादेः पक्षस्य विजातीयद्रव्यसमूहकत्वाद् घटादिवदिति दृष्टान्तेपि विजातीयद्रव्यसमूहस्यैव दृष्टान्तत्वेन प्रवेशात् । तत्र साध्यतावच्छेदकस्य कर्त्रैक्यस्य प्रत्यक्षविरुद्धतया राहित्येनेत्यर्थः । तथाच दृष्टान्ताभाव इति भावः । साध्याप्रसिद्धिरग्रे वाच्या । किंच कार्यत्वलिङ्गकमनुमानमाश्रयासिद्धमित्याहुः **सर्वनिर्माणेत्यादि** । सार्वभौमसदने सर्वनिर्माणचतुराणामनेकेषां दर्शनादेकस्याप्रसिद्धेश्च विवादाध्यासितत्वाभावेन भूभूधरादेः पक्षस्य तथात्वमित्यर्थः । यथा काञ्चनमयः पर्वतो वह्निमानिति तथा च पक्षे पक्षतावच्छेदकाभावात् आश्रयासिद्धत्वमिति भावः । किंच व्याप्यत्वासिद्धमपीति सूचयन्तस्तत्र हेतुमप्याहुस्तादृशेत्यादि । **साध्याप्रसिद्ध्येति** । साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः यथा काञ्चनमयवह्निमान् धूमात् इति । तथा च बुद्धिमदेकत्वस्य साध्यतावच्छेदकस्य कर्तर्यभावाद्व्याप्यत्वासिद्धत्वमित्यर्थः । ननु साध्ये एकपदं न निवेश्यते एवं च न साध्ये साध्यतावच्छेदकाभाव इत्यत आहुः **बुद्धिमदित्यादि** । **सिद्धसाध्यत्वमिति** बुद्धिमत्कर्तृपूर्वकत्वस्य सर्वत्र सिद्धत्वात् । **आश्रयासिद्धत्वमिति** युगपदुत्पद्यमानस्य सर्वस्य केनापि लौकिकप्रमाणेनासिद्धत्वात्तथात्वमित्यर्थः । किंच संदिग्धसाध्यत्वं पक्षत्वमिति लक्षणेन साध्यासंदेहात्पक्षे संदिग्धत्वरूपपक्षतावच्छेदकाभावात् । पक्षे पक्षतावच्छेदकाभावरूपाश्रयासिद्धिः । तथा सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता । तस्याः पक्षेऽभावादाश्रयासिद्धिः । **अनेकेत्यादि** क्रमिकाणामनेककर्तृकत्वस्य प्रत्यक्षादिसिद्धत्वात्तथेत्यर्थः । **विरुद्धत्वमिति** साध्याभावसाधकहेतुर्विरुद्ध इति तल्लक्षणाद्विरुद्धत्वमित्यर्थः । सांख्यमतमनुसृत्य दूषयन्ति **अपि चेत्यादि** । **तन्मूलभूतमित्यादि** । शरीरमूलभूतं सत्त्वादिगुणान्यतमं

'अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ।
प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥
स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ।
यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥
गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ।
विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥
एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ।
कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥
तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम् ।

भाष्यप्रकाशः।

विकारद्वारेण भवतीति विचित्रकार्यविशेषारम्भायैव ज्ञानशक्तिवत् कर्मसंबन्धोऽप्यवश्याश्रयणीयः। ज्ञानशक्तिवैचित्र्यस्यापि कर्ममूलत्वाच्च। इच्छायाः कर्मारम्भहेतुत्वेऽपि विषयविशेषितायास्तस्याः सत्त्वादिमूलत्वेन कर्मसंबन्धोऽवर्जनीयः। एवं सिद्धे कर्मसंबन्धे क्षेत्रज्ञा एव कर्तारः सिद्ध्यन्ति, न तु तद्विलक्षणः कश्चिदनुमानात् सिद्ध्यति।

भवन्ति चात्र प्रयोगाः। तनुभवनादिकं क्षेत्रज्ञकर्तृकं, कार्यत्वाद् घटवत्। ईश्वरः कर्ता न भवति प्रयोजनशून्यत्वाद् मुक्तात्मवत्। तथा, अशरीरत्वात् तद्वदेव। न च क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः। तत्राप्यनादेः सूक्ष्मशरीरस्य भावात्। विमतिविषयः कालो न लोकशून्यः कालत्वाद् वर्तमानकालवत्। किंच। ईश्वरः किमशरीरः सशरीरो वा कार्यं करोति। नाद्यः। मनसो नित्यत्वेऽपि अशरीरेषु मुक्तेषु मानसकार्यादर्शनादीश्वरेऽप्यकर्तृत्वापत्तेः। नेतरः। विकल्पासहत्वात्। तन्नित्यमनित्यं वा। न तावन्नित्यम्। सावयवस्य नित्यत्वे जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः। नाप्यनित्यम्। तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात्। नच स्वयमेव हेतुरिति युक्तम्। अशरीरस्य तदयोगात्। नाप्यन्यशरीरेण शरीरवान्। अनवस्थानात्। किंच। सव्यापारो निर्व्यापारो वा। नाद्यः। अशरीरस्य तदसंभवात्।

रश्मिः।

भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥
कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः।
भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम्' ॥
'प्रकृतिस्थोपि पुरुषो नाज्यते प्राकृतैर्गुणैः।
अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत्' ॥
'यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्।
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्' ॥
'एतद्भगवतो रूपं ब्रह्मणः परमात्मनः।
परं प्रधानं पुरुषं दैवं कर्म विचेष्टितम्' ॥

इत्यादि पुराणप्रामाण्यादवश्यमाश्रयणीयमित्यर्थः। सत्त्वाद्याश्रयेण यद्भवति तदाहुः पुरुषस्येत्यादि। ईश्वराख्यस्यात्मनः सत्त्वादियोग इत्यर्थः। अवश्येत्यादि लोके तथा दर्शनात्तथेत्यर्थः। विचित्रकार्यारम्भो न ज्ञानवैचित्र्यात् किं तु इच्छावैचित्र्यात् तस्याश्चाकर्ममूलत्वाददोष इत्यत आहुः इच्छाया इत्यादि। इच्छाया हेतुत्वेऽपि न सामान्यरूपेण तथा सति सृष्टीच्छया प्रलयः स्यादतः सृष्टिविषयिणीच्छात्वेन सृष्टिहेतुत्वमेवमन्यत्रेत्येवं आत्मप्रसादजसुखं स्यादित्येवं विषयविशेषितायास्तस्या हेतुभूतायाः सत्त्वादिरूपप्रधानाभिपत्तिमूलत्वेनेति सत्त्वादिहेतुकर्मसंबन्धो वर्जनीय इत्यर्थः। ननु सृष्ट्यादौ शरीराणामनुत्पन्नत्वात्क्षेत्रज्ञानां स्वशरीराधिष्ठानासंभवे कर्तृत्वव्यभिचार इत्याशङ्क्य पराकुर्वन्ति न च क्षेत्रज्ञानामित्यादि। प्रवाहानादित्वमभिप्रेत्य स्थूलशरीरसत्तासाधनायाहुः विमतीत्यादि। प्रवाहानादित्वसादित्वरूपविविधमतिविषयः। मनस इति करणभूतस्य मनस इत्यर्थः। तदिति शरीरमित्यर्थः। तद्व्यतिरिक्तस्येत्यादि ईश्वरव्यतिरिक्तस्येश्वरशरीरहेतोः सृष्टिप्राक्कालेऽभावादित्यर्थः। क्षेत्रज्ञव्यतिरिक्तस्य क्षेत्रज्ञशरीरहेतोः सृष्टिप्राक्कालेऽभावादित्यर्थो वा। स्वयमिति ईश्वर इत्यर्थः। तदयोगादिति हेतुत्वायोगादित्यर्थः। अनवेत्यादि अवस्थानं शरीरस्थिति-

भाष्यप्रकाशः ।

न द्वितीयः । मुक्तात्मवदकर्तृत्वापातात् । कार्यं जगत् इच्छामात्रव्यापारिकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वम् । दृष्टान्तस्य साध्यहीनता च । अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः परमेश्वरः परब्रह्मभूतः पुरुषोत्तमः । शास्त्रं तु सकलेतरप्रमाणापरिदृष्टं समस्तविजातीयं सार्वज्ञ्यसत्यसङ्कल्पत्वादिभिश्चानवधिकातिशयापरिमितगुणोदारं निखिलहेयप्रत्यनीकं स्वरूपं प्रतिपादयतीति, न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषप्रसङ्ग इति ।

अत्रोदयनाचार्यैरीश्वरसाधने नवानुमानानि कुसुमाञ्जलौ दर्शितानि ।

‘कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः’ ॥

इति । अत्र कार्यादिपदानि भावप्रधानानि । तानि चैवं व्याख्यातानि । आयोजनं सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म । धृतिर्धारणं गुरुत्ववतो ब्रह्माण्डादेः पतनाभावः । आदिपदात् ब्रह्माण्डादेर्नाशः । पदं घटादिसंप्रदायव्यवहारः । घटादिपदप्रयोगो वा । प्रत्ययो वेदजन्यं धर्मादिज्ञानम् । श्रुतिर्वेदः । वाक्यं पदसमूहः । संख्याविशेषः सर्गादौ परमाणुनिष्ठद्वित्वादिसंख्याजन्यं परिमाणमित्यादि । प्रयोगास्तु क्षित्यादिकं कर्तृजन्यं कार्यत्वात् घटवत् । अन्ये तु जन्यत्वादित्यपि प्रयुञ्जते । तथा, क्षितिः, उपादानगोचरापरोक्षज्ञानोपायेच्छा तादृशकृतिजन्या, ज्ञानजन्या, इच्छाजन्या, कृतिजन्या वा, जन्यत्वात् घटादिवदित्यपि । पूर्वोक्तं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वात् अस्मदादिशरीरजन्यक्रियावत् । उक्ता धृतिः,

रश्मिः ।

स्तदभावादित्यर्थः । कार्यमिति हेतुगर्भं विशेषणमिदं, कार्यत्वादित्यर्थः । अप्रसिद्धेत्यादि तादृशस्य कर्तुरप्रसिद्धत्वाज् जगतो विशेषणं कार्यं तदप्यप्रसिद्धमित्यर्थः । दृष्टान्तस्येति घटादेरित्यर्थः । तथा च दृष्टान्ताभाव इति भावः । नैयायिकानुमानानि सांख्यशास्त्रपराहतानीति वदन्तः सिद्धमाहुः अतो दर्शनेत्यादि । दर्शनं सांख्यशास्त्रम् । न प्रमाणान्तरेति शब्दादन्यत्प्रमाणं प्रमाणान्तरं ततोवसितं निश्चितं वस्तु ब्रह्मास्यं तत्साधर्म्यं कर्तृत्वादिना तत्प्रयुक्तो दोषः ज्ञानिनामपि श्रवणमात्रेण पातित्यं तस्य प्रसङ्गः ।

इत्यादीति इत्यादि यथा स्यात्तथा व्याख्यातानि इति पूर्वेणान्वयः । तेन पदव्याख्यानत्वात् हेतुसमुदायपतितस्यायोजनस्य पक्षत्वेपि न क्षतिः । अन्ये त्वायोजनं कर्मेत्याहुः तेन न प्रायपाठविरोधः । गोपीनाथमौनी तु परमाणुः अपरोक्षज्ञानचिकीर्षाकृतिविषयः कार्यात् कपालवत् इति यथाश्रुतं व्याचक्रे । अत्र हेतुतावच्छेदकसंबन्धः समवायः । उक्तानुमाने साधारण्यं मन्यमानानां विजातीयद्रव्यसमूहस्य पक्षत्वे पूर्वोक्तरीत्या कर्त्रैक्यदौर्घट्यादेकैकं द्रव्यं पक्षत्वेन प्रयुञ्जानानां च मतमाहुः अन्ये त्वित्यादि । जन्यत्वं जननशालित्वं तच्च ध्वंसप्रतियोगित्वशालित्वं स्वीकृतं चिकीर्षासत्त्वात्. अंशतः साधारणत्वमतो जन्यत्वादित्यपि प्रयुञ्जते, ध्वंसस्य जन्यत्वात् तथाच ध्वंसे साधारणत्ववारणाय प्रयुञ्जत इत्यर्थः । अस्वरसस्तु पक्षे ध्वंसाप्रवेशः । तथात्वे सति पक्षे पक्षतावच्छेदकध्वंसाप्रवेशादाश्रयासिद्धमनुमानमिति । उपादानेत्यादि उपादानविषयकं यदपरोक्षज्ञानं उपायेच्छा उपादानविषयिणी कृतिश्च तज्जन्येत्यर्थः । कार्यमात्रं प्रति ज्ञानत्वेनेच्छात्वेन कृतित्वेनान्वयव्यतिरेकाभ्यां पृथक्कारणत्वं यौगपद्यासंभवादित्याशयेनाहुः ज्ञानजन्येत्यादि । इत्यपीति प्रयुञ्जत इत्यन्वयः । पूर्वोक्तमिति सर्गाद्यकालिकद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकमित्यर्थः । उक्तेति गुरुत्ववद्ब्रह्माण्डादिपतनाभावात्मिकेत्यर्थः । पूर्वोक्तमिति वेदजन्यधर्मादिज्ञानरूपमित्यर्थः ।

भाष्यप्रकाशः।

चेतनप्रयत्नपूर्विका धृतित्वाद् वियति विहङ्गमधृतिवत्। ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत्। उक्तव्यवहारः स्वतन्त्रप्रयोज्यः, व्यवहारत्वाद् आधुनिकलिप्यादिव्यवहारवत्। पूर्वोक्तं ज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत्। वेदः पौरुषेयो वेदत्वाद् यन्नैवं तन्नैवम्, आकाशवत्। वेदः पौरुषेयो वाक्यत्वाद् भारतादिवत्। त्र्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयारब्धघटपरिमाणवदिति। अत्र प्रथमे प्रयोगे कर्तृजन्यत्वं तु स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमददृष्टाद्वारकजन्यत्वम्। अत्रादृष्टाद्वारकेतिविशेषणान्न जीवात्मनिरूपितादृष्टद्वारकजन्यत्वेन सिद्धसाधनमर्थान्तरं वा। जीवानां क्षित्याद्युपादानीभूतपरमाण्वादिगोचरापरोक्षज्ञानाभावेन तज्जन्यत्वे बाधान्न तैरपि तथा। नच क्षितिघटादिसाधारणस्यैकस्य साध्यस्याभावेन स्वपदार्थाननुगमात् कथं व्याप्तिग्रह इति वाच्यम्। स्वपदार्थाननुगमस्यादोषत्वात्। अन्यथेच्छादिना ज्ञाना-

रश्मिः।

परिमाणेत्यादि परिमाणं च प्रचयश्च परिमाणप्रचयौ ताभ्यामजन्यत्वे। प्रचयः शिथिलसंयोगः तज्जन्यं परिमाणं तूलकादौ। एवं च स्थलभेदेन परिमाणप्रचयसंख्याभिः परिमाणं जन्यते। कार्यत्वं प्रागभावप्रतियोगित्वम्। एवं सति पक्षे ध्वंसे ध्वंसप्रतियोगित्वशालित्वरूपं जन्यत्वाभावेन साध्याभाववति पक्षे तस्य लिङ्गस्य परिमाणस्य स्वोत्कृष्टपरिमाणजनकत्वनियमादेतादृशं परिमाणं नाणुपरिमाणजन्यं किंतु संख्याजन्यमित्याशयेन दृष्टान्तमाहुः **तुल्यपरिमाणे**त्यादि। तथाच तादृशपरिमाणं कपालपरिमाणादुत्कृष्टत्वाभावात्संख्याजन्यमिति भावः। **इन्नी**ति एतस्याग्रे आश्रये सिद्धे द्व्यणुकपरिमाणजनिका संख्या अपेक्षाबुद्धिजन्या, एकत्वान्यसंख्यात्वात्, अयमेकोऽयमेक इमौ द्वौ इति द्वित्वसंख्यावदित्यनुमानेऽस्मदाद्यपेक्षाबुद्धिजन्यत्वबाधात्तदाश्रयत्वेनेश्वरसिद्धिरित्येतावती त्रुटिरत्रास्ति। तेन परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वादित्यनुमानेनेश्वरासिद्धावपि न क्षतिः। न च द्व्यणुकपरिमाणं परिमाणजन्यमेवास्त्विति वाच्यम्। द्व्यणुकपरिमाणं न परिमाणजन्यं, अणुपरिमाणत्वात् परमाणुपरिमाणवदित्यनुमानेन तस्य परिमाणाजन्यत्वादित्यर्थः। **विशेषणा**दिति जन्यत्वविशेषणादित्यर्थः। **जीवे**ति जीवश्चोपास्यासिद्धात्मा तन्निरूपितेत्यादिः। **अर्थान्तरं वे**ति ईश्वरसाधने यतमानस्य जीवसिद्ध्यार्थान्तरमित्यर्थः। अत्र ज्ञानलक्षणासामान्यलक्षणायोगजधर्मैर्यत्किंचिदुपादानगोचरत्वविवक्षणेन च तादृशज्ञानादिमतां जीवानां कर्तृत्वान्न स्वोपादानेत्यादिविशेषणेन तद्धेतुत्वनिवृत्तिः। स्वोपादानेत्यादिविशेषणप्रयोजनमाह **जीवाना**मित्यादि। **तथे**ति। सिद्धसाधनमर्थान्तरं वेत्यर्थः। मीमांसकस्यानादिसृष्टिवादित्वात् तद्वारणायेदमुक्तम्। **अभावेने**ति घटादीनां कुलालादिकर्तृकत्वस्य प्रत्यक्षात्। स्वपदार्थाननुगमात्। स्वपदेन क्षित्यादिसंग्रहे दृष्टान्ते साध्यस्याभावेन घटादिसंग्रहे तु पक्षे तदभावेन पक्षनिष्ठात्यन्ताभावप्रतियोगिनः स्वोपादानेत्यादिसाध्यस्य हेतुः कार्यत्वमित्यनुपसंहारिकार्यत्वम्। तत्फलं च व्याप्तिज्ञानप्रतिबन्ध इति कथं व्याप्तिग्रह इत्यर्थः। न च तद्वन्निष्ठात्यन्ताभावप्रतियोगिसाध्यकादित्वमनुपसंहारित्वम्। एवं च स्वपदेन घटादिग्रहवेलायां पक्षस्य साध्यत्वाभावेन कथं तद्वन्निष्ठत्वमत्यन्ताभावस्येति शङ्क्यम्। स्वपदेन क्षित्यादिसंग्रहे तद्वत्त्वसत्त्वादिति। **अदोषत्वा**दिति इच्छादिना ज्ञानानुमाने यो यदिच्छावान् स तज्ज्ञानवानित्येवं व्याप्तिग्रहे यत्तत्पदाभ्यां विवक्षितमेव गृह्यते तदेवात्र स्वपदेनोक्तमिति प्रातिस्विकरूपेण व्याप्त्यग्रहेऽपि विवक्षितत्वेन रूपेणानुगमाददोषत्वादित्यर्थः। **अन्यथे**त्यादि तस्य दोषत्वे, अयं

भाष्यप्रकाशः ।

धनुमानं न स्यात् । स्वविशेष्यकस्वत्वप्रकारकज्ञानत्वादिनैव तत्र कार्यकारणभावात् । अत्र च सकर्तृकत्वादिसाध्यकानुमाने कर्तृत्वेनैव कारणता, ज्ञानजन्यादिसाधके च ज्ञानत्वादिना । एवं कार्यतापि कार्यत्वेन जन्यत्वेन च । नच शरीरगौरवेणाप्रयोजकत्वं शङ्क्यम् । अवच्छेदककोटौ घटत्वादीनां प्रवेशे आनन्त्यगौरवाद्, ध्वंसस्य जन्यत्वेन तस्य च जन्याभावत्वेनावच्छेदकतया प्रवेशे शरीरगौरवाच्च । एवं तु विवक्षितविवेके जन्याभावत्वैकदेशस्य जन्यत्वस्यैव प्रवेश इति शरीरलाघवात् सामान्यलाघवादेकत्वलाघवात् कल्पनालाघवादुपस्थितिलाघवाच्च जन्यत्वेनैव कार्यता, न घटत्वादिना । कार्यत्वं च स्वसमवायिजन्यताख्येन परंपरासंबन्धेन कृतित्वमेवेति, न तत्रापि गौरवम् । नच विशिष्यान्वयव्यतिरेकाभ्यां घटत्वकुलालत्वादिना विशिष्यकार्यकारणभावस्यावश्यकत्वात् सर्वमेतद्विरुद्धमिति वाच्यम् । कार्यमात्रवृत्तीनां जातीनां कार्यतावच्छेदकत्वमिति सिद्धान्तसमुद्घोषात् । नचाङ्कुरादौ हेतोर्विपक्षगामित्वेनानैकान्तिकत्वं शङ्क्यम् ।

रश्मिः ।

स्वज्ञानवान् स्वेच्छावत्त्वात् देवदत्तवदित्यनुमानं न स्यादित्यर्थः । आदिशब्देन स्वेच्छावान् स्वयत्नाद् देवदत्तवत् ! **स्वविशेष्यके**त्यादि आदिना स्वविशेष्यकस्वत्वप्रकारकेच्छात्वतादृशयत्नत्वे ग्राह्ये । अन्ये त्वेतद्दोषभिया स्वपदरहितं साध्यमङ्गीकुर्वन्ति तदुक्तं **अत्रे**त्यादि । पूर्वोक्तानुमानद्वयमध्य इत्यर्थः । सकर्तृकत्वं पर्यायत्वेनादिर्यस्य कर्तृजन्यत्वस्य तदादिसाध्यमस्मिन् अनुमाने । द्वितीयानुमान आहुः **ज्ञानजन्यादी**ति । आदिना इच्छाजन्या कृतिजन्येति साध्यद्वयम् । **एवमि**ति कारणतावदित्यर्थः । नन्वेवं सामान्यतः कार्यकारणभावे कार्यत्वं कृतिसाध्यत्वरूपं प्रागभावप्रतियोगित्वरूपं वा । जन्यत्वं जननशालित्वरूपं च कार्यतावच्छेदकद्वयं शरीरगौरवग्रस्तं कृतिसाध्यत्वस्य प्रागभावप्रतियोगित्वरूपत्वात् । जननशालित्वस्य ध्वंसप्रतियोगित्वशालित्वरूपत्वात् । कम्बुग्रीवादिमत्त्वरूपघटत्वेन कार्यतायां लाघवमित्याशङ्क्य निराकुर्वन्ति **न च शरीरे**त्यादि । **आनन्त्यगौरवा**दिति घटत्वपटत्वादीनामानन्त्यात् कार्यतावच्छेदकानन्त्येनानन्त्यगौरवादित्यर्थः । अन्यदपि साध्य आह **ध्वंसस्ये**त्यादि । **तस्य चे**ति ध्वंसस्य चेत्यर्थः । **अवच्छेदकतये**ति साध्यतावच्छेदकतया । **एवं त्वि**ति जन्यत्वेन रूपेण विवक्षितस्य हेतोर्विवरण इत्यर्थः । **विवक्षिते**ति कार्यता कार्यत्वेनैव चेत्तर्हि पूर्वोक्तसाधारण्यं, तन्निवृत्त्यर्थं जन्यत्वेनैव कार्यता तर्ह्याश्रयासिद्धिः पूर्वोक्तेति तदुभयनिवृत्तये कार्यता कार्यत्वजन्यत्वान्यतररूपेण विवक्षितेति विवक्षितविवेकस्तस्मिन् । **शरीरलाघवा**दित्यादि कार्यताव्यवच्छेदकशरीरलाघवात् कृतित्वेन जन्यत्वेन कार्यत्वेन च कार्यकारणभावे यत्र जन्यत्वं कार्यत्वं च तत्र कृतित्वमिति सामान्यव्याप्तिलाघवाद् घटत्वावच्छेदकानन्त्यापेक्षया सामान्यावच्छेदकैकत्वे लाघवादित्यर्थः । कार्यत्वस्य शरीरगौरवं परिहरन्ति **कार्यत्वं चे**त्यादि । स्वं कृतिस्तत्समवायी-आत्मा तज्जन्यत्वं यथा कार्यस्य तथा कृतेरपीति तादृशेन परंपरासंबन्धेनेत्यर्थः । **विरुद्ध**मिति अनावश्यकत्वादसंगतमित्यर्थः । **जातीना**मिति सामान्यानां धर्माणामित्यर्थः । **सिद्धान्ते**त्यादि तथा च कार्यत्वेन कर्तृत्वेन सामान्यकार्यकारणभावानङ्गीकारे कार्यमात्रवृत्तिमहापृथिवीत्वस्य कार्यतानवच्छेदकत्वप्रसङ्गेन सैद्धान्तिकनियमभङ्गापत्तिरिति तदभावाय सोऽप्यावश्यक इत्यर्थः । **विपक्षगामित्वेने**त्यादि हेतोरङ्कुरादौ साध्याभाववद्गामित्वेन । क्षितिः कर्त्रजन्या कार्यत्वादङ्कुरादिवदिति विरुद्धगर्भितसाधारणानैकान्तिकत्वमित्यर्थः ।

भाष्यप्रकाशः ।

तत्र साध्यसंदेहस्यानन्याहितत्वेन तस्य पक्षसमत्वात् । नच शरीरजन्यत्वस्योपाधेर्विद्यमानत्वाच्छरीराजन्यत्वस्य प्रतिसाधनस्य सत्त्वाच्च साध्यसंदेहस्यान्याहितत्वेनानैकान्तिकत्वं सिद्धमिति शङ्क्यम् । कर्त्रादिजन्यतायामपि गुरुभूतस्य शरीरजन्यत्वस्यानवच्छेदकत्वाल्लघुभूतस्य जन्यत्वमात्रस्यैवावच्छेदकत्वेन तस्य च साधनव्यापकत्वेनानुपाधित्वे हेतोरदुष्टत्वात् । एवं च कर्त्रादिजन्यतायामिव शरीरजन्यतायामपि जन्यत्वस्यैवावच्छेदकत्वादीश्वरे नित्यज्ञानादिकमिव नित्यशरीरवत्त्वस्याप्यङ्गीकारेण प्रतिसाधनदोषस्याप्यभावात् । अनुमानं च, क्षित्यादिकं शरीरजन्यं जन्यत्वाद् घटवत् । ईश्वरः शरीरी कर्तृत्वात् कुलालवदिति । अनुकूलतर्कश्चात्र कर्तृत्वजन्यत्वाभ्यामिव शरीरित्वजन्यत्वाभ्यामपि पूर्वोक्तयुक्तितुल्ययुक्तिकः कार्यकारणभाव एव । श्रुतिश्च, 'यतो वा इमानि भूतानि जायन्ते' इत्यादि, 'सहस्रशीर्षा पुरुषः' इत्यादि, 'आकाशशरीरं ब्रह्म' इत्यादि च । श्रुतीनां चानुकूलतर्कविधया स्वतन्त्रतया च ब्रह्मणि प्रामाण्यमिति नवीनमतम् ।

सांप्रदायिकमते शरीरस्य कुलालशरीरत्वादिनैव कारणत्वं, नतु शरीरत्वेनेतीश्वरस्यानित्यं शरीरं लोकानुग्रहेण व्यवहारप्रवर्तनार्थम् । अतोऽस्मदाद्यदृष्टजनिते रामकृष्णादिनामके शरीरे भूतावेशन्यायेनावेशः । कार्यकरणानन्तरं च त्याग इति ।

अभिनवमते तु महेश्वरस्य विश्वमेव शरीरम् । तच्च नित्यानित्यपुञ्जघटितमित्यनित्यांशविरामेऽपि नित्यांशमादाय नित्यमेव । आकाशात्मकं च नित्यमेव । रामकृष्णादिनामकं त्वाविर्भावतिरोभावशालि भक्तानुग्रहेण कदाचित् क्वचिदाविर्भवति तिरोभवति च । अत एव तत्त्ववादिभिर्मूर्तमपि तन्नित्यं विभु चेत्यङ्गीक्रियते । सर्वत्र सर्वदा तथाभूतभक्तभावनया भक्तैः साक्षात्क्रियमाणत्वात् । तादृशसाक्षात्काराणां प्रमात्वे संभवति भ्रमत्वकल्पनस्यान्याय्यत्वात् । तदुक्तम्, औत्सर्गिकं धियां प्रमात्वमिति । विश्वात्मकं तु योगिप्रत्यक्षगम्यमपि विश्वरूपदर्शनादिषु श्रूयत

रश्मिः ।

साधारणानैकान्तिकत्वमात्रं वा । तत्रेत्यादि विपक्षे अङ्कुरादौ कर्तृजन्यत्वसंदेहस्य कर्त्रनुपलम्भमात्रोत्पन्नतयोपाधिसत्प्रतिपक्षादिदोषानाहितत्वेनाङ्कुरादेः पक्षसमत्वेन पक्षानतिरेकात् । उपाधेरिति घटादौ कर्तृजन्यत्वसाध्यवति शरीरजन्यत्वाभावाभावात्साध्यव्यापकत्वं क्षित्यादौ च साधनवति शरीरजन्यत्वाभाव इति साधनाव्यापकत्वं चात उपाधेरित्यर्थः । प्रतिसाधनस्येति क्षितिः कर्त्रजन्या शरीराजन्यत्वात् अङ्कुरादिवद् इति प्रतिसाधनस्येत्यर्थः । अनैकान्तिकत्वमिति अङ्कुरादेः पक्षसमत्वाभावेन तत्र साधारणानैकान्तिकत्वमित्यर्थः । गुरुभूतस्येति पदार्थान्तरप्रवेशेन गुरुभूतस्येत्यर्थः । तस्य चेत्यादि जन्यत्वस्य च जन्यत्वरूपसाधनव्यापकत्वेनेत्यर्थः । एवं चेति लाघवाज्जन्यत्वस्यैवावच्छेदकत्वे सतीत्यर्थः । अभावादिति तथाचैवं रामानुजोक्तं दूषणमपि निरस्तं भवतीत्यर्थः । रामानुजाचार्यैः सांख्यमवलम्ब्य दत्तं सत्कर्मसंबन्धिरूपं दूषणं परिहरन्ति श्रुतिश्चेत्यादि । लोकानुग्रहेणेति लोकानुसारेणेत्यर्थः । रामकृष्णादीति आदिपदेन महाक्षितिजनकत्वाय चतुर्मुखादिशरीरस्य संग्रहः ।

उक्ते मते उक्तानां शरीराणां जन्यत्वादशरीरस्येश्वरस्य तदकर्तृत्वापत्त्या व्यवहारप्रवर्तकत्वासंभवात् सांप्रदायिकमतं विहायाभिनवमतं वदन्ति अभिनवेत्यादि । तत्त्ववादिभिरिति कृष्णानुसारिभिः 'तत्त्वान्युक्तानि मे नव' इत्येकादशे । 'भूमिरापोऽनलः' इति गीतायाम् । औत्सर्गिक-

भाष्यप्रकाशः ।

एव सहस्रशः । एवं श्रुत्यादिभिः शरीरेऽङ्गीकृते तदनुसारिसकर्तृकत्वानुमानं निर्दुष्टमेव । एवमेकेनेश्वरेण सकलक्षित्यादिकार्यसंभवे सति प्रमाणाभावाद् गौरवाच्च नानेकेश्वरसिद्धिः । किंचानेकेश्वराङ्गीकारे तेषामैकमत्यं वैमत्यं वा स्यात् । तत्राद्ये स्वातन्त्र्याभावादैश्वर्यहानिः । द्वितीये तु कार्यासिद्धिरिति कार्यदर्शनाद्, 'एकमेवाद्वितीयं ब्रह्म' इत्यादिश्रुतिभ्यस्तादृशैः पुराणैश्चैकस्यैव सिद्धिरिति न पूर्वोक्तं किमपि दूषणम् । एवमेकेश्वरसिद्धौ कर्मत्वादिलिङ्गकान्यप्यनुमानानि तमेकमेव साधयन्तीति न कोऽपि क्वापि दोष इति **मैथिलभयदेवमिश्राः** ।

ज्ञानेन्द्रभिक्षुस्तु, बुद्धिप्रभृतिकार्यम्, उपादानगोचरप्रत्यक्षजन्यं कार्यत्वाद् घटादिवत् । यदि चोपादानगोचरापरोक्षवृत्तेरेव कार्यहेतुत्वं लाघवात् । न तु चैतन्यस्य गौरवादिति । तदा तु

रश्मिः ।

मिति धियां ज्ञानानां प्रमात्वमौत्सर्गिकं स्वाभाविकं भ्रमत्वादि त्वनौत्सर्गिकमित्यर्थः । पुञ्जान्मदशक्तिवददृष्टपुञ्जात्क्षित्यादिकार्याङ्गीकारे बाधकमाह **किं चानेकेत्यादि** । **साधयन्तीति** । न चान्तिमस्येश्वरासाधकत्वं शङ्क्यम् । तेन द्व्यणुकपरिमाणस्य संख्याजन्यत्वे सिद्धे द्व्यणुकपरिमाणजनिका संख्याऽपेक्षाबुद्धिजन्या एकत्वान्यसंख्यात्वात् । अयमेकः अयमेकः इमौ द्वौ इति द्वित्वसंख्यावत् इत्यस्मदाद्यपेक्षाबुद्धिजन्यत्वबाधात्तदाश्रयत्वेनेश्वरसिद्धेः । न च द्व्यणुकपरिमाणं परिमाणजन्यमेवास्तु इति वाच्यम् । द्व्यणुकपरिमाणं न परिमाणजन्यं अणुपरिमाणत्वात् परमाणुपरिमाणवदित्यनुमानेन तस्य परिमाणाजन्यत्वात् । **मैथिलभयदेवमिश्रा** इति । एवमेतेषु मतेषु कार्यत्वलिङ्गकानुमाने शरीराजन्यत्वस्य दूषणस्य प्रबलत्वात्तत्परिहारायेश्वरे सशरीरत्वमावश्यकम् । शरीरस्यापि नित्यानित्यविकल्पकृतदोषपरिहाराय श्रुत्यालम्बनमावश्यकम् । अन्यथा नैयायिकादिभिरपि न तेनेश्वरसिद्धिरिति बोध्यम् । **उपादानेत्यादि** प्रकृते उपादानं प्रकृत्यंशरजःसत्त्वं तत्र तद्विषयकं प्रत्यक्षं यस्य तज्जन्यमित्यर्थः । तादृशप्रत्यक्षाश्रयत्वेनेश्वरसिद्धिरिति भावः । **यदि चेति** उपादानगोचरापरोक्षं च तद्वृत्तिः कर्मधारयः । **चैतन्यस्येति** उक्तप्रत्यक्षाश्रयत्वेनाक्षेप्यस्य बहुव्रीहिप्राप्तस्य वा । **गौरवादिति** उपादानगोचरप्रत्यक्षाश्रयत्वस्य साध्यतावच्छेदकत्वे शरीरगौरवादित्यर्थः । अत्र विभाव्यते इति शेषः । तथा चानेनानुमानेनोपादानगोचरप्रत्यक्षकृतिसिद्धेर्नेश्वरसिद्धिरिति भावः । **कार्यहेतुत्वमिति** कार्यं कार्यत्वं हेतुर्यस्येति तथोक्तम् । कार्यायोजनेति कारिकया कार्यपदं दत्तम् । यद्यपि तादृशप्रत्यक्षाश्रयत्वेनेश्वरसिद्धिरनुमानान्तरेण भवति तथापि प्रकारान्तरेण साधनायानुमानान्तरमाह **तदा त्वित्यादि** । न च स्वरूपासिद्धिरत्रेति वाच्यम् । उपादानगोचरप्रत्यक्षं साधिष्ठानं गुणत्वाद् रूपादिवदित्यनुमानेन तदधिष्ठानसिद्धौ तादृशाधिष्ठानं जन्यं कार्यत्वात् घटवदित्यनुमानेन तद्वारणसंभवादेवं चोपादानगोचरप्रत्यक्षपदं तादृशाधिष्ठाने गौणम् । उपादानगोचरप्रत्यक्षाधिष्ठानवृत्तीच्छाकृतिमज्जन्यत्वादिति हेतुः । वृत्तिः पदार्थान्तररूपा नात्र । नन्वेवमपि प्रकृतिसिद्धावसङ्गपुरुषे व्याप्यत्वाभिमतस्य पक्षेऽभावः स्वरूपासिद्धिः । यथा ह्रदो द्रव्यं धूमादित्यत्र ह्रदे धूमाभावः । 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतोक्तेः स्वरूपासिद्धिस्तदवस्थेति चेन्न, उपादानगोचरप्रत्यक्षवृत्तीच्छाकृतिमत्त्वस्य समवायसमवाय्युपरागान्यतरसंबन्धेन विवक्षितत्वात् । न चैवमपीश्वरे हेतोः साध्याभाववद्वृत्तित्वेन साधारण्यमिति वाच्यम् । स्वरूपासिद्धिनिवृत्तिमात्रप्रयोजनकत्वेन वृत्त्यनियामकसंबन्धस्य तत्र साधारण्यसंपादकत्वाभावात् । व्याप्तिग्रहवेलायां

अन्ये पुनः श्रुत्यनुवादकमाहुः । सर्वज्ञत्वाय श्रुत्यनुसार्यनुमानं च ब्रह्मणि प्रमाणमिति ।

तत्तु, 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति केवलोपनिषद्वेद्यत्वादुपेक्ष्यम् ।

भाष्यप्रकाशः ।

क्षित्यादीनि सकारणकानि, उपादानगोचरप्रत्यक्षप्रवृत्तीच्छाकृतिमज्जन्यत्वाद् घटादिवदित्येवं कारणीभूतसत्त्वस्य सिद्ध्यनन्तरं, तत्कारणसत्त्वं परस्य भोग्यम्, इच्छादिमत्त्वाज्जीवोपाधिवदिति कारणसत्त्वभोक्तृतयेश्वरोऽनुमेय इत्याह ।

एवं चाभिनवोक्तरीत्याऽनुमानस्य श्रुत्यनुसारित्वेन प्रामाण्याद् व्यासचरणानां च श्रुत्यर्थनिर्णयाय प्रवृत्तत्वात् सूत्रमनुमानोपष्टम्भकश्रुत्यनुवादकम् । अनुमानस्य ब्रह्मणि प्रामाण्येऽनङ्गीकृते, यतो वेत्यादिश्रुतौ केवलं कर्तृत्वस्योक्तत्वादुपादानादिगोचरापरोक्षज्ञानवत्त्वस्यासिद्धेः । अङ्गीकृते तु तस्मिन् कर्तृत्वस्योक्तज्ञानव्याप्तत्वात् सुखेन सर्वज्ञत्वस्य सिद्धेरिति ।

द्वितीयं मतमनुवदन्ति अन्य इत्यादि । तदुभयमेकहेलया दूषयन्ति तत्त्वित्यादि । अयमर्थः । बृहदारण्यके शाकल्यब्राह्मणे उदानप्रतिष्ठोत्तरश्रवणानन्तरं तूष्णींभूते शाकल्ये तं प्रति याज्ञवल्क्येन, 'स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्जते न व्यथत इत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ पुरुषाः स यस्तान् पुरुषान् व्युदुह्य प्रत्युह्यात्यक्रामीत् तं त्वौपनिषदं पुरुषं पृच्छामि' इति वाक्ये मूर्तामूर्तब्राह्मणवदेतावत्त्वादिनिषेधपूर्वकं

रश्मिः ।

गौणमुख्यन्यायेन समवायस्यैव ग्रहणात् । इत्याहेति सांख्यादिमतमवलम्ब्याहेत्यर्थः । नैयायिकस्यान्येषां च मतेन भाष्ये यत्सिद्धं तत्सिद्धान्ते यादृक् तादृशं वक्तुमाहुः एवं चेति । अयमर्थः । भाष्ये केचिदिति नैयायिकमतमुक्त्वान्येषां मतोक्तौ संगत्यर्थं प्रकाश एवं चेत्युक्तम् । शुष्कानुमानिकपक्षस्य वेदान्तानुपयोगस्य द्वितीयाध्यायद्वितीयपादे वक्ष्यमाणत्वात् । तथा च एवं चेत्यस्य शुष्कानुमानोक्तौ सत्यां चेत्यर्थः । वेदान्तापेक्षायामन्यमतेऽभिनवोक्तरीत्या श्रुतिप्रवेशाय हेतुभाष्यस्य श्रुत्यनुसार्यनुमानमित्यादेरर्थः प्रामाण्यादित्यन्तेन प्रकाशेनोक्तः । इतिर्हेतौ व्याकृतः । श्रुत्यनुवादकमिति भाष्यं तु व्यासेत्यादिप्रकाशेन व्याकृतम् । आहुरित्यत्रान्वेति । अनुमानस्येत्यादिप्रकाशेन सर्वज्ञेत्यादि भाष्यं व्याकृतम् । कर्तृत्वस्येति ईश्वरः उपादानादिगोचरापरोक्षज्ञानवान् कर्तृत्वात् कुलालवदित्येवं कर्तृत्वस्योक्तज्ञानव्याप्तत्वं तस्मात् । उक्तज्ञानेति उपादानादिगोचरापरोक्षज्ञानवान् कर्तृत्वात् इत्येवमुक्तज्ञानव्याप्तत्वात् । इति द्वितीयमिति एवंप्रकारकं द्वितीयमित्यर्थः । एकहेलयेति एकेनावज्ञानेन विलासेन वेत्यर्थः । तदित्थं पूर्वोक्तेषु मतेषु कार्यत्वलिङ्गकानुमाने शरीराजन्यत्वस्य दूषणस्य प्रबलत्वात् तत्परिहारायेश्वरे सशरीरत्वमावश्यकम् । शरीरस्यापि नित्यानित्यविकल्पकृतदोषपरिहाराय श्रुत्यालम्बनमावश्यकम्, अन्यथा महानैयायिकादिभिरपि न तेनेश्वरसिद्धिरिति । अत उक्तं भाष्ये उपेक्ष्यमिति । उदानेत्यादि कस्मिन्नुदानः प्रतिष्ठितः इति समान इति उदानप्रतिष्ठोत्तरश्रवणानन्तरमित्यर्थः । अत्रापि समानोऽन्तर्यामिणि प्रतिष्ठितः सोऽप्यक्षर इत्यर्थस्योन्नेयत्वाद् ब्रह्मणः स्वरूपमाहेत्याशयेन व्याकुर्वन्ति मूर्तामूर्तेत्यादि । मूर्तामूर्तब्राह्मणे हि मूर्तामूर्ते ब्रह्मणो रूपे उक्त्वोच्यते 'अथात आदेशो नेति नेति' इति तत्र निषेधो 'द्वे वा व ब्रह्मणो रूपे' इति षष्ठ्या श्रावितस्य भेदस्य रूपद्वयनिराकरणे 'सर्वतः पाणिपादं तत्' इत्यादयो विरुध्येरन् । तथाच रूपद्वयं ब्रह्मैव न तु ब्रह्मण इति सिध्यति । तद्वदत्रापि नेति नेत्यनेन

भाष्यप्रकाशः ।

करणाद्यग्राह्यो नित्योऽसङ्गो निर्दुःखः शारीराद्यानष्टौ पुरुषान् पृथिव्याद्यायतनेषु तत्तल्लोकेषु च विशेषेणोच्चैः स्थापयित्वा पुनस्तत उपसंहृत्य, योऽतिक्रान्तवानेतादृश उपनिषद्वेद्यः पुरुषः पृष्टः । तत्रागृह्यपदे यदि केवलेन्द्रियाग्राह्यत्वं विवक्षितं भवेत् तदानुमानादिनापि वेद्यत्वादौपनिषदपदमनतिप्रयोजनं स्यादतस्तत्र यावत्प्रमाणागोचरत्वमेवास्थेयम् । तथासत्यौपनिषदपदे(न) प्रतिप्रसव एवोपनिषदां सिद्ध्यतीति ब्रह्मणः केवलोपनिषद्वेद्यत्वमेव श्रुतिविवक्षितम् ।

यत्तु भैक्षवे, उपनिषन्मूलप्रमाणकमुपनिषन्महातात्पर्यविषयं वा औपनिषदं, 'सर्वे वेदा यत्पदमामनन्ति', 'वेदैश्च सर्वैरहमेव वेद्यः' इतिश्रुतिस्मृतिभ्यामित्युक्तम् । तस्मिन्नपि पक्षे अगृह्यपदोक्तप्रतिषेधस्य तुल्यत्वान्नेतः कोऽपि विशेषः सिद्ध्यति । किंतूक्तश्रुतिस्मृत्योर्मध्ये वेदपदात् पूर्वकाण्डवेद्यत्वमात्रमधिकमायातीत्यगृह्यपदविरोधः पूर्ववदेव । नचाधिकागमने केवलोपनिषद्वेद्यत्वहानिः शङ्क्या । 'सर्वे वेदाः' इतिवाक्यस्याप्यौपनिषदत्वेन 'मनसैवानुद्रष्टव्य' इत्युक्तमनोवेद्यत्ववत् सर्ववेदवेद्यत्वस्याप्युपनिषन्मात्रसिद्धत्वात् । एवं च मनसोऽपि श्रुत्युक्तसाधनैः शुद्धस्य एव दर्शनकरणत्वं, वेदानामपि वेदान्तविज्ञानसुनिश्चितार्थानामेव वेदनकरणत्वमित्युपनिषद एव मूलप्रमाणत्वमिति, न केवलोपनिषद्वेद्यत्वहानिः । अतः प्रमाणान्तरावेद्यत्वात् सूत्रस्यानुमानत्वकथनमप्रयोजकम् । श्रुतिविचारार्थमेव सूत्रकृतः प्रवृत्तेरिति । एतदेवाभिप्रेत्य भट्टभास्करादिभिरनुमानानि दूषितानीति युक्त्या विचारे ईश्वरपक्षकं पूर्वोक्तमितरव्यतिरिक्तसाध्यकानुमानमप्याश्रयासिद्धमेव ।

अथ नव्याभिनववादिमतमालम्ब्य शरीरिण ईश्वरस्य कर्तृत्वमङ्गीक्रियते तदापि नानुमानस्य श्रुत्यनुसारित्वम् । कर्तृत्वनिर्वाहकतयाज्ञानादिवच्छरीरस्यापि जगत्पूर्ववर्तिताया आवश्य-

रश्मिः ।

पूर्वोक्तैतावद्ब्रह्मनिषेधपूर्वकमित्यर्थः । शारीराद्यानित्यादि शारीरादित्यस्थवायुस्थचन्द्रस्थाग्निस्थच्छायामयाप्प्रतिष्ठपुत्रमयान्पुरुषान् पृथिवीरूपाकाशकामतेजस्तमोरेतोरूपेष्वायतनेषु 'पृथिव्येव यस्यायतनं रूपाण्येव यस्यायतनं' इत्यादिश्रुतिभिः तत्तल्लोकेषु चक्षूरूपेषु सर्वत्र चक्षुर्लोक इति श्रावणात् । अग्निर्लोक इत्यादिपाठे तु अग्न्यादिरूपेषु व्युदुह्य विशेषेणोच्चैः स्थापयित्वा प्रत्यूह्य पुनस्तत उपसंहृत्य अत्यक्रामीद्योऽतिक्रान्तवानित्यर्थः । अगृह्यः करणागोचर इति व्याख्यां दूषयितुमाहुः तत्रागृह्येत्यादि । तत्र यावदिति अगृह्यपद इत्यर्थः । तुल्यत्वादित्यादि केवलेन्द्रियाग्राह्यत्वपरत्वेन तुल्यत्वाच्च शांकरव्याख्यानतः कोपि विशेषः सिद्ध्यतीत्यर्थः । पूर्ववदेवेति अनुमानादिवेद्यत्वेनौपनिषदमनतिप्रयोजनं स्यादतोऽगृह्यपदविरोध औपनिषदपदेनेति तादृशविरोधपराकरणायास्मदुक्त एवार्थ इत्यर्थः । श्रुतिस्मृत्योर्विरोधं सिद्धान्ते पराकुर्वन्ति न चाधिकेत्यादि । मनसैवेत्यादि मनसैव भक्तिभावनादेरनु पश्चाद्धृदयादौ द्रष्टव्योऽयमर्थः । अप्रयोजकमिति शुष्कानुमानस्य तर्कत्वेपि वेदयुक्तित्वाभावेन मीमांसातर्कत्वे न तु प्रयोजकम् । पूर्वोक्तमिति वैशेषिकमतोपन्याससमाप्तिस्थल उक्तम् । आश्रयासिद्धमिति इन्मीत्ववदीश्वर इति पक्षे पृथिवीत्ववत्तद्रूपपक्षतावच्छेदकाभावात् । काञ्चनमय-

भाष्यप्रकाशः ।

कत्वेन तदानींतनस्य तस्य नित्यानित्यपुञ्जात्मकविश्वरूपरूपताया वक्तुमशक्यत्वात् । नच नित्यांशमादाय सिद्धिः । तेषां नानात्वेन तेषु शरीरत्वस्य प्रत्येकपर्याप्त्या तद्धर्मैः सूक्ष्मत्वानवयवत्वादिभिर्जगत्करणप्रतिबन्धापत्तेः । नच नित्यपुञ्जात्मकमेव तदङ्गीकार्यमिति वाच्यम् । यस्य पृथिवी शरीरमित्यादौ पृथिव्यादिगतैकत्वव्याकोपात् । 'सर्वतः पाणिपादं तत्'इत्यादिविरोधापत्तेः । सृष्टिप्रकरणेषु सच्चिदानन्दातिरिक्तनदनुक्त्या तद्विरोधापत्तेश्च । अतो नव्यादिमतीयानुमानस्यापि न श्रुत्यनुसारित्वम् । एतेनैव भैक्षवमपि दत्तोत्तरम् । प्रथमानुमानस्य नैयायिकतुल्यकक्षत्वात् । द्वितीयेऽपि प्रयोगे यदालम्ब्य सत्त्वस्य कारणत्वेन सिद्धिः क्रियते तेषु प्रकरणेषु सत्त्वस्य सर्वकारणताया अनिश्चायितत्वेनानुमानस्याप्रयोजकत्वात् । नच स्मृत्या तत्परिहरणीयमिति वाच्यम् । श्रुतिविरुद्धायास्तस्या एवानादरणीयत्वात् । मैत्रायणीयश्रुतौ, 'तमो वा इदमग्र आसीदेकं तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपम्' इत्येवं परप्रेरणेन रजसः सत्त्वस्य च भवनकथनात् । तृतीयेऽपि प्रयोगे सत्त्वस्य परभोग्यत्वेनोपाधित्वाङ्गीकारात् तदुत्पत्तेः पूर्वं परस्य निरुपाधिकत्वेनेच्छाद्यभावात् प्रेरणस्याप्यसंभवापत्तेः । नैयायिकादिवन्नित्यज्ञानेच्छादीनामीश्वरसमवेतत्वाङ्गीकारे शरीराभावप्रयुक्तदोषतादवस्थ्यात्, सांख्यादिमतालम्बनाडम्बरवैयर्थ्याच्च । अतः श्रुत्यनुसारित्वाभावान्नानुमानं ब्रह्मप्रमितिजननायालम् । नापि योगिप्रत्यक्षम् । 'विदूरकाष्ठाय मुहुः कुयोगिनाम्' इति द्वितीयस्कन्धवाक्यात् । 'यमेवैष वृणुते' इति, 'धातुः प्रसादात्'इति श्रुतेश्च । नच गीतोक्तविश्वरूपदर्शनादिविरोधः । तस्य मूलरूपत्वाभावात् । कालोऽस्मीति तत्रैव निर्धारणात् । तत्रापि, 'रूपं परं दर्शितमात्मयोगात्' इति वाक्येन तस्यापि भगवद्बलेनैव दर्शनेन योगस्याप्रयोजकत्वाच्च । उपपत्तेश्चेत्यादौ यदुपपत्त्युपन्यसनं, तदपि न ब्रह्मस्वरूपज्ञापकतया, किंतु हेत्वाभासैः परान्तरशङ्कानिरासकतयेति वक्ष्यते ।

रश्मिः ।

पर्वत इतिपक्षे काञ्चनमयत्ववत् । **अशक्यत्वादिति** अनुत्पन्नतया तथात्वादित्यर्थः । **सिद्धिरिति** तदानींतनशरीरसिद्धिरित्यर्थः । **सूक्ष्मेति** आदिशब्देनैक्यभ्रमजनकत्वम् । **नित्यपुञ्जात्मकमिति** । नतु प्रत्येकपर्याप्त्येत्यर्थः । एवं सति श्रुत्यनुसारित्वमुद्घोषयतस्तव शरीरत्वस्य प्रत्येकपर्याप्तिबोधकश्रुतिविरोध इत्याहुः **यस्य पृथिवीत्यादि** । **सच्चिदित्यादि** । एतदतिरिक्तशरीरानुक्त्येत्यर्थः । **नैयायिकेत्यादि** बुद्धिप्रभृति कार्यं नोपादानगोचरप्रत्यक्षजन्यं कार्यत्वादङ्कुरवत्, इति साधारणविरुद्धत्वाभ्यां हेतोस्तथेत्यर्थः । **यदालम्ब्येति** सांख्यमालम्ब्येत्यर्थः । **अप्रयोजकत्वादिति** निश्चितसर्वकारणताकसत्त्वातिरिक्तकारणसिद्ध्याप्रयोजकत्वादित्यर्थः । **स्मृत्येति** 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः' इति स्मृत्या । **तदुत्पत्तेरिति** सत्त्वोत्पत्तेरित्यर्थः । **इच्छाद्यभावादिति** आदिना ज्ञानयत्नौ । **प्रेरणस्येति** सत्त्वप्रयोजकस्य तमसः प्रेरणस्येत्यर्थः । **द्वितीयेत्यादि** तथाच 'अनागतमतीतं च' इत्यत्रापि ब्रह्मभिन्नमिति वाच्यमिति भावः । **कालोऽस्मीति** श्वेताश्वतरे 'कालः स्वभावो नियतिर्यदृच्छा' इत्यत्राचिन्त्यत्वेनोक्तोऽस्मीति तात्पर्येण कालकर्मस्वभावशक्तिषु श्रीभागवतोक्तासु निवेशात् । ननु 'सदेव सोम्येदमग्र आसीत्' इत्यत्राद्वितीयत्वाय कालस्यापि ब्रह्मत्वसाधनेपि काल उपदेश इति धातुपाठाद्योग आवश्यकः सिद्धान्त इति कथमेवमिति चेत्तत्राहुः **तत्रापीत्यादि** । **अप्रयोजकत्वादिति** उपदेशस्य शक्तिपरत्वेपि

अनधिगतार्थगन्तृत्वात् प्रमाणस्य । मननिदिध्यासनयोः श्रवणाङ्गत्वम् ।

भाष्यप्रकाशः ।

'आचारदर्शनात्' इति सूत्रं तु कर्मविषये, न तु ब्रह्मविषय इति न किंचिदेतत् । अतस्तदुपेक्ष्यमेव ।

ननु श्रुत्युक्तं सच्चिदानन्दात्मकं शरीरमङ्गीकृत्यानुमानदोषनिरासे दोषाभावात् कथमुपेक्ष्यत्वमित्यत आहुः **अनधीत्यादि** । तथाच सिद्धसाधनत्वाच्छ्रुत्युक्तसकलविशेषविषयकप्रमित्यजनकत्वाच्चाप्रामाण्यमित्यर्थः । ननु 'मन्तव्यः' इति श्रुत्या मननं विहितम् । तच्च युक्तिभिरनुचिन्तनम् । युक्तयश्चानुमानरूपा इति श्रुत्यनुकूलानुमानस्य प्रामाण्यं श्रुत्यैव सूच्यत इति कथं पूर्वोक्तमतस्योपेक्ष्यत्वमुच्यत इत्याशङ्कायामाहुः **मननेत्यादि** । तथाच मननादेरङ्गत्वबोधनादनुमानादेः सहकारित्वं न निवार्यते, किंतु करणत्वमतस्तदंशे उपेक्ष्यत्वम् नच सर्वज्ञत्वासिद्धिः । विपश्चित्त्वश्रुतेः 'यः सर्वज्ञः सर्ववित्' इति श्रुत्यन्तराच्च तत्सिद्धेरिति 'उपपत्तेश्च' इत्यादिसूत्रेष्वप्यत एव

रश्मिः ।

संभवेन मूलरूपत्वसाधनेऽप्रयोजकत्वात् । **अतस्तदिति** नैयायिकतुल्यत्वाद् भैक्षवमपीत्यर्थः । **शरीरमिति** आनन्दस्याकारसमर्पकत्वात्तथा । **सिद्धसाधनत्वादित्यादि** श्रुतिसिद्धानां साधनत्वाद्धेतुष्वनुमानानां च श्रुत्युक्तसकलविषयकप्रमित्यजनकत्वाच्चाप्रामाण्यमत् उपेक्ष्यत्वमित्यर्थः । इदं च लक्षणं वाक्यमात्रप्रामाण्यापेक्षं तेन गगनकुसुममित्यादौ वाक्येऽप्रमाणे नातिव्याप्तिः । तेनेश्वरसिद्ध्यधीनं वेदप्रामाण्यं वेदप्रामाण्याधीनेश्वरसिद्धिरित्यन्योन्याश्रयोपि व्याख्यातः । आप्तोक्तं वाक्यं प्रमाणमितिलक्षण एव तत्प्रसरात् । प्रमाणेन शब्देन श्रोत्रेण वानधिगतस्य स्वर्गादिसाधनत्वस्य यागादावर्थस्य गन्तृत्वमर्थविषयकप्रमाकरणत्वात् प्रापकत्वम् । न चैवं वैयाकरणव्युत्पत्तिविरोधः । प्रमीयते अनेनेति प्रमाणमिति करणे ल्युट् । ननु प्रमाकरणं प्रमाणमिति प्रसिद्धलक्षणं कुतो नादृतम् । अन्योन्याश्रयान्नादृतमिति चेद्धारणया वृत्त्यानुगमिष्यतीति चेन्न । तस्य व्याकरणादिप्रसिद्धत्वेऽपि 'परोक्षवादो वेदोयम्' इति 'परोक्षं च मम प्रियम्' इति च कथनादनधिगतार्थस्य परोक्षत्वात् । न च फलांशे परोक्षवादो यथा 'स्वर्गकामो यजेत' इत्यत्रात्मसुखमादाय स्वर्गपदेऽर्थ इति वाच्यम् । निबन्धटीकाया विष्णुस्वामिमतीयत्वाद् एतस्यैकादशसुबोधिनीमतत्वादोम् । **मननमित्यादीति** श्रुतौ श्रवणं नाम भगवद्वाचकपदवाक्यानां ब्रह्मणि शक्तितात्पर्यनिर्धारः । स च मनननिदिध्यासने विना न संभवतीति श्रवणाङ्गत्वं निदिध्यासनद्वारा मननस्येत्यर्थः । अथवा मनननिदिध्यासननिरूपितं श्रवणस्याङ्गत्वम् । स्मरणं हि मननं श्रुतस्य भवतीति श्रवणमननयोः कार्यकारणभावबोधकस्मर्यमाणसूत्रभाष्यात् । न तु मननमात्राङ्गत्वं श्रवणनिदिध्यासनयोरतो निदिध्यासनाङ्गं मननं न विरुद्धमित्यर्थः । न चैवं मननस्य निदिध्यासनाङ्गत्वमित्येवं भाष्येऽत्र तु मनननिदिध्यासनयोः श्रवणाङ्गत्वमितीति शङ्क्यम् । श्रवणानन्तरं मननं पुनश्च श्रवणं निदिध्यासनं चेत्यर्थद्वारा निदिध्यासनदार्ढ्ये तात्पर्यात् तावन्मात्रोक्ते साधनसरण्या तात्पर्याज्ञानात् । द्वितीयपादेऽप्येवं वक्ष्यन्ति सर्वत्र प्रसिद्धोपदेशाधिकरणे । **तदंश इति** करणत्वाभ्युपगमांशे इत्यर्थः । एतेन—

'अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम् ।
गृह्यमाणगुणैर्लिङ्गैरग्राह्यमनुमानतः' ॥

इति श्रीभागवतवाक्यमपि व्याख्यातम् । **अत एवेत्यादि** साधनाध्याये द्वितीयपादे सहकारि-

संदेहवारकत्वाच्छास्त्रस्यापि तदङ्गत्वमिति ॥ २ ॥

इति प्रथमाध्याये प्रथमपादे द्वितीयं जन्माद्यधिकरणम् ॥ २ ॥

भाष्यप्रकाशः ।

तन्निर्देशो, न तु करणत्वेनेत्यर्थः । एतदेवोपकारकत्वं स्मृत्यादिष्वपीत्यतिदेष्टुमाहुः संदेहेत्यादि । तदङ्गत्वमिति मननाङ्गत्वम् । अत एव, 'स्मृतेश्च' इत्यादिसूत्राणि ।

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं चालयिष्यति' ॥

॥ इत्यादिवाक्यानि च । एतस्यैव निष्कर्षो निबन्ध उक्तः ।

'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ।
उत्तरं पूर्वसंदेहवारकं परिकीर्तितम्' ॥

इति । तथाच संदेहवारकतया कल्पसूत्रवद् व्याख्यानरूपत्वान्नानुवादकत्वमित्यर्थः । कारिकार्थस्तु तद्विवरणग्रन्थाद् बोध्यः ।

इति द्वितीयं जन्माद्यधिकरणम् ॥ २ ॥

एवं जिज्ञास्यस्य ब्रह्मणो लक्षणं तत्र प्रमाणं च निर्णीय तस्य किं ब्रह्मणः कारणतामात्रे तात्पर्यमुत तद्विशेषविशिष्टायां तस्यामिति संशयमपनेतुमग्रिममधिकरणमित्याशयेन तदवतारयन्ति

रश्मिः ।

त्वादेव युक्तिनिर्देश इत्यर्थः । स्मृत्यादिष्विति । आदिशब्देन मीमांसा । तदङ्गत्वमितीति शास्त्रस्य मीमांसारूपस्यापि श्रवणाङ्गत्वं भाष्यात् । अपिशब्देनेतिहासपुराणे । तत्पक्षे तदङ्गत्वपदार्थमाहुः मननाङ्गत्वमिति । स्मृतेश्चेति इमानि सूत्राणि द्वितीयपादे वक्ष्यन्ते, स्मृतिर्मीमांसारूपापि । चैव हीति चकारेण जैमिनिस्मृतिः । संदेहेत्यादिभाष्यनिष्कर्षमाहुः तथा चेत्यादि । नानुवादकत्वमिति स्मृतिशास्त्रस्य जन्मादिसूत्रस्य वा नानुमानोपष्टम्भकश्रुत्यर्थानुवादकत्वमित्यर्थः । तद्विवरणेत्यादि तत्त्वदीपादावरणभङ्गाच्चेत्यर्थः । तत्र ननु चतुर्णां कोपयोगः एकेनैव चरितार्थत्वाच्चेत्याशङ्क्याहुः उत्तरमित्यादि उत्तरोत्तरं पूर्वपूर्वस्य संदेहवारकं प्रकर्षेण कीर्तितम् । यथा 'अपाणिपादो जवनो ग्रहीता' इत्यत्र किं प्राकृतपाणिरहितं ब्रह्म आहोस्वित् सामान्यनिषेध इति संदेहे सर्वतःपाणिपादान्तमित्यादि गीतावाक्यं निर्णायकं, तथा गीतायां 'नित्यः सर्वगतः स्थाणुः' 'ममैवांशो जीवलोके' इत्यादिषु संदेहे सूत्रैर्निर्णयः । 'उत्क्रान्तिगत्यागतीनाम्' इत्यादिभिः । तथा 'जन्माद्यस्य यतः' इति संदेहे 'अन्वयव्यतिरेकतः' इति भागवतेन, निर्णय इति तत्त्वदीपे । उत्क्रान्त्यादिसूत्रैरंशत्वनिर्णयः अन्वयव्यतिरेकत इति । श्रीभागवतवाक्ययोः 'अन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा' 'समन्वयेन व्यतिरेकतश्च' इति द्वितीयैकादशस्थयोरर्थकथनम् । तथाचैतयोर्वाक्ययोर्जन्मादिसूत्रे शबलस्य ब्रह्मणो वा कार्यलक्षणमिति संदेहे निर्णायकत्वमित्यावरणभङ्गे । 'जन्माद्यस्य यतोन्वयादितरतः' इति वाक्यमपि संग्रहीतुं शक्यम् । तदुक्तं कौर्म्ये 'न च वेदादृते किंचिच्छास्त्रं ब्रह्माभिधायकम्' इति ।

॥ इति द्वितीयं जन्माद्यधिकरणम् ॥ २ ॥

प्रसङ्गसंगत्या हेतुतासंगत्या वाधिकरणमवतारयन्ति एवमित्यादि । तस्येति लक्षणस्येत्यर्थः । तद्विशेषेत्यादि तद्विशेषः समवायित्वनिमित्तत्वकर्तृत्वरूपस्तद्विशिष्टायां कारणतायामित्यर्थः ।

तत्रैतत् स्यात्। तत्र किं समवायि निमित्तं कर्तृ वा। किमतो यद्येवम्। एवमेतत् स्यात्। यद्येकमेव स्यात् तदा क्रियाज्ञानशक्त्योर्निरतिशयत्वं भज्येत। मृदादिसाधारण्यं च स्यात्।

मतान्तरवत् कथमेवं संदेहो यावता, 'यतो वा इमानि'इत्यादिभ्यो निःसंदेहश्रवणात्। एवं हि सः। पञ्चमी श्रूयते यत इति। पञ्चम्यास्तसिलिति[1]। आत्मन इत्यपि पञ्चमी, निमित्तत्वे न संदेहः। पञ्चम्या निमित्तत्वकथनात्। उपादानत्वे

भाष्यप्रकाशः।

तत्रैतत् स्यादित्यादि संदेहवारकेऽस्मिञ्छास्त्रे वक्ष्यमाणं विचार्यं स्यात् । तदाहुः तत्र किमित्यादि। तत्रेति श्रुतौ। मम तु तदिति प्रथमान्तपाठोऽत्र प्रतिभाति। चोदयति किमतो यद्येवमिति । कारणतामात्रादरेणैव जगत्कारणीभूतब्रह्मप्रमित्या प्रमाणसाफल्ये जाते पुनः संशयपङ्के निपात्य तन्निरसनार्थकात् प्रयासात् किं फलान्तरं संपाद्यमित्यर्थः । तत्रोत्तरमाहुः एवमेतत् स्यादिति । वक्ष्यमाणेन विचारेण वक्ष्यमाणदोषनिवृत्तिरूपं फलं स्यादित्यर्थः । तदुपपादयन्ति यद्येकमित्यादि । यदि कारणतामात्रादरेण प्रमितेः पूर्तिरङ्गीकार्या तदैकं निमित्तादिषु वक्तव्यम्। तत्र यदि दण्डादिवन्निमित्तं, यदि वा प्रयोज्यवत् कर्तृ, तदा यथायथं क्रियाशक्तेर्ज्ञानशक्तेश्च निरतिशयत्वभङ्गः । दण्डाद्यपेक्षया कर्तरि क्रियाशक्तेः प्रयोज्यापेक्षया प्रयोजके ज्ञानशक्तेराधिक्यदर्शनात्। यदि मृद्वत् समवायित्वं, यदि वा कुलालादिवत् कर्तृत्वं, तदा तत्साधारण्यं, विकृतत्वमनाप्तकामत्वं चेति। तथाचैतद्दोषनिरासः फलमित्यर्थः। अत्र चोदयति मतान्तरवदित्यादि सांख्यन्यायादिरूपस्य मतान्तरस्य स्मृतिरूपत्वात् तज्जनकानुभवे दुष्टत्वस्य संभावितत्वात् तत्रोचितः संदेहः। अत्र तु तदभावान्न तस्य संभावनेत्यर्थः। संदेहोत्पत्तिप्रकारमाहुः एवमित्यादि। निमित्तत्वकथनादिति 'विभाषा गुणेऽस्त्रियाम्' इत्यत्राकारप्रश्लेषे अगुणादपि हेतोः पञ्चम्यङ्गीकृता। यथा धूमाद् वह्निमानित्यादौ। एवं प्रकृतेऽपि

रश्मिः।

सामानाधिकरण्येऽन्वयसौष्ठवादाहुः मम त्वित्यादि। कर्तुरपि निमित्तत्वेन पृथङ्निर्देशानुपपत्तिमाशङ्क्य तयोर्भेदसाधनायाहुः तत्र यदीत्यादि। 'स्वतन्त्रः कर्ता' 'साधकतमं करणम्' इति लक्षणभेदात् कर्ता करणं हेतुरिति संज्ञाभेदात् कारकपञ्चकत्वापत्तेश्च कर्ता पृथक्। न च गौरवमिति शङ्क्यम्। 'शिक्षा कल्पो व्याकरणम्' इतिश्रुतेर्नैयायिकलाघवस्यायुक्तत्वादसमवायिकारणस्य निमित्तत्वाच्च । मृदादीत्यादि भाष्यमवतारयन्ति यदि मृद्वित्यादि। साधारण्यमेवाहुः विकृतत्वमित्यादि। एतद्दोषेति मृत्कुलालादिसाधारण्यदोषनिरास इत्यर्थः। मतान्तरेति भाष्यं देहलीप्रदीपन्यायेनोत्तरत्रापि मतान्तरे ब्रह्मणि विकृतत्वाद्यनङ्गीकाराद् दृष्टान्तः परत्रेति मतान्तरवत्कथमित्यादि चोदकं भाष्यमित्याशयेनावतारयन्ति अत्रेत्यादि। स्मृतिरूपत्वादिति लोकप्रमितार्थान् स्मृत्वा युक्त्या यथाबुद्धि संशोध्य शास्त्रप्रणयनेन तथात्वादित्यर्थः । संभावितत्वादिति करणदोषेण बुद्धिदोषरूपेण तथात्वादित्यर्थः। तदभावादिति श्रुत्यवलम्बनान्मानसीनानुग्रहेण चक्षुरादिकरणे दोषाभावादित्यर्थः । [वस्तुतस्तु सांख्यमते प्रकृतेरिव ब्रह्मणोऽपि विकृतत्वापातः इति मतान्तरवदिति भाष्यं यथाश्रुतमेव साधीयः] भाष्ये। श्रूयत इति सूत्रविषयवाक्ययोः श्रूयते इत्यर्थः। प्रकृते। अकारेत्यादि। इदं च बाहुलकं

---

१. तसिरिति।

कर्तृत्वे च संदेहः । तद्वाचकाश्रवणात् कल्पनायां प्रमाणाभावात् । समवायित्वे पुनः सुतरां संदेहः । एवं प्राप्त आह ।

तत्तु समन्वयात् ॥ ३ ॥ (१।१।३)

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । निमित्तत्वस्य श्रुतिसिद्धत्वाद् मतान्तरनिराकरणत्वेनाग्रे वक्ष्यते । तद् ब्रह्मैव समवायि कारणम् । कुतः । समन्वयात्

भाष्यप्रकाशः ।

तत्कथनात् । तथाच तावन्मात्राङ्गीकारे उक्तरीत्या क्रियाज्ञानशक्त्योर्निरतिशयत्वभङ्गप्रसङ्गः । तन्निवृत्त्यर्थमुपादानत्वकर्तृत्वयोरप्यङ्गीकारे प्रमाणाभावात् संदेहः । समवायस्याग्रे दूषितत्वात् समवायित्वे विकृतत्वस्यापत्तेश्च तत्र सुतरां तथेत्येवं समवायित्वेऽत्यन्तं संदिग्धे सूत्रमाहेत्यर्थः । एतेनास्याधिकरणस्य पूर्वेण सह सामान्यविशेषभावः संगतिरपि दर्शिता ।

तत्तु समन्वयात् ॥ ३ ॥ एवं पक्षत्रयेऽपि दोषा इति तान् विहाय श्रुत्युपपत्त्यर्थं केवलं तटस्थकारणत्वमादरणीयमित्याशयेन पूर्वपक्षयुक्तिमाहुः निमित्तत्वस्येत्यादि । ननु तुशब्दो विशेषावधारणपूजाव्यावृत्तिपादपूरणाद्यर्थहेतुषु दृष्टस्तत् कथं व्यावृत्त्यर्थ एवात्र गृह्यत इत्यत आहुः मतान्तरेत्यादि । 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इत्यादौ तथा दर्शनादत्रापि तथेत्यर्थः । तद् ब्रह्मैव समवायिकारणमिति तद् अनुभूतं प्रसिद्धं वा समवायिकारणं ब्रह्मैवेत्यन्वयः ।

रश्मिः ।

प्रकृतेस्तदनुदृष्टेरिति वार्तिकप्रयोगाद्गुणेऽस्त्रियामिति प्रायिकमित्यन्य इति शेखरे केषांचिन्मतमनूदितं तदनुसारेण बोध्यम् । तथाचाकारप्रश्लेषाद्धूमाद्वह्निमानित्यस्य अस्त्रियामित्यत्राकारप्रश्लेषे नास्ति घटोऽनुपलब्धेरित्यस्य च प्रयोगस्य सिद्धिरित्याशयः । यद्वा उभयत्रापि अकारप्रश्लेषाप्रश्लेषाभ्यां जाड्येन जाड्याद्वा बद्धः धूमाद्वह्निमान् नास्ति घटोनुपलब्धेरिति प्रयोगत्रयसिद्धिरित्याशयः । दीक्षितैस्तु हरदत्तग्रन्थानुसारेण विभाषेति योगं भङ्क्त्वा अगुणे स्त्रियां च पञ्चमी साधितेति ध्येयम् । यथा धूमादिति धूमपदं स्वज्ञाने वह्निमत्पदं स्वज्ञानविषये लाक्षणिकमत्र ज्ञेयम् । हेतुहेतुमद्भावोपपत्तये । उपादानत्व इत्यादिभाष्यं विवृण्वन्ति तन्निवृत्तीत्यादि । भाष्ये । ननु मृदः कुलालाच्च घट इति प्रयोगात् कर्तृत्वोपादानत्ववाचकपञ्चमीश्रवणं यत इति आत्मन इति चेति कथं तद्वाचकाश्रवणमत आहुः कल्पनायामित्यादि । प्रकृते । समवायित्व इत्यादि भाष्यं विवृण्वन्ति समवायस्येत्यादि । अग्र इति द्वितीयाध्यायद्वितीयपादे 'समवायाभ्युपगमाच्च साम्यादनवस्थितेः' इति सूत्र इत्यर्थः । तथेति संदेहत्वेन प्रकारेण संदेह इत्यर्थः । सामान्येत्यादि प्रसङ्गस्यावान्तरभेदो हेतुताख्य इत्यर्थः ।

तत्तु समन्वयात् ॥ ३ ॥ दोषा इति निमित्तत्वे क्रियाज्ञानशक्त्योर्निरतिशयत्वभङ्गः, कर्तृत्वे प्रमाणाभावः, उपादानत्वे विकृतत्वमिति दोषा इत्यर्थः । निमित्तत्वस्येत्यादीति ल्यब्लोपे पञ्चम्यत्र निमित्तत्वमात्रस्य श्रुतिसिद्धत्वमङ्गीकृत्य समवायित्वे कर्तृत्वे च ब्रह्मणो न संदेग्धव्यमित्येतत्तुशब्द आहेति वृत्त्यनुसारेणार्थः । विशेषेत्यादि समुच्चयोऽप्युपलक्षणीयः । तथा च विश्वः 'तुः पादपूरणे भेदे समुच्चयेऽवधारणे' इति । अत्र तत्पदेन ब्रह्मपरामर्शभ्रमं वारयन्तोऽधिकारसूत्रलभ्यत्वात्, पर्वतो धूमादिति प्रयोगादर्शनात् वह्निमान्धूमादिति दर्शनात्, रूपादावंशतो बाधसंभवात् । समवायित्वस्य साध्यताभ्रममनुमानत्वाय वारयन्ति तदित्यादि । ब्रह्मैव तत्समवायिकारणमिति योजना । समन्वयपदसमभिव्याहारात् सूत्रे सोपसु-

---

१. पक्षे [illegible] [illegible] पक्षः । [illegible] ।

सम्यगनुवृत्तत्वात् । अस्तिभातिप्रियत्वेन सच्चिदानन्दरूपेणान्वयात् ।

भाष्यप्रकाशः ।

ननु सम्यगनुवृत्तत्वमनारोपितानागन्तुकरूपेण सर्वं लक्ष्यीकृत्य वर्तमानत्वम् । तज्जगति ब्रह्मणः कथम् । न हि जगति ब्रह्मणोऽनारोपितानागन्तुकेन ब्रह्मत्वेन रूपेणान्वयोऽवगम्यते, यथा पटे तन्तोर्घटे वा मृद इत्याकाङ्क्षायां तदाहुः अस्तीत्यादि । तेषु तेषु वस्तुषु तत्तत्पुरुषप्रतीतिविषयेणास्तित्वादिधर्मेणावगम्यमानात् सदादिरूपेणान्वयात् । यो हि यदन्वितः स स्वस्मिंस्तद्विषयां प्रतीतिमाधत्ते, यथा घटादिः पृथिवीत्यादिप्रतीतिम् । तथात्र सर्वमस्तीत्यादिप्रतीतिजनकत्वात् सदाद्यन्वितम् ।

रश्मिः ।

ज्यते न ब्रह्मेत्यनुवर्तते, तथा च भाष्येऽनुमानप्रतीतावपि औपनिषदत्वविघटिकेति न सोपयुज्यते । एवं मदुक्तप्रकारेण योजने नानुमानप्रतीतिः । तथाहि । अत्र समवायिकारणमिति न पक्षः । तथा सति समवायिनो द्रव्यमात्रस्य ब्रह्मत्वसिद्ध्या ब्रह्मणस्तदतिरिक्तस्यापि समवायित्वासिद्धेः पर्वतो धूमादिति प्रयोगापत्तेश्च । नाप्यनुभूतं स्वप्ने तदंशस्य मायारूपस्य पक्षत्वं, अथ कार्ये प्रसिद्धं श्रुत्यादौ च प्रसिद्धं ब्रह्मैव पक्षः 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीताप्रामाण्यानुरोध्यागामिभाष्यानुरोधेन ततो विशेषितत्वे तु समवायिकारणस्य पूर्वसूत्रवासनया जगतः समवायिनि वक्तव्ये जगत्समवायी पक्षः । ब्रह्मत्वं साध्यम् । एवकारः प्रकृत्यादिकं व्यवच्छिनत्ति । पक्षत्वे त्रिषु व्याख्यानेषु मध्ये भाष्यीयं मध्यमं व्याख्यानम् । अस्तिभातिप्रियात्मकेनानागन्तुकानारोपितरूपेण सर्वत्रानुवृत्तत्वं हेतुः । यत्रानारोपितानागन्तुकरूपेण समन्वितत्वं तत्र तदात्मकत्वमिति सामान्यव्याप्तिः । यथा मृदोऽनारोपितानागन्तुकेन मृत्त्वेन रूपेण समन्वितत्वात् मृदात्मकत्वं घटस्य । रूपादौ च घटादेर्घटत्वेन रूपेणानुवृत्त्यभावान्न रूपादौ घटाद्यात्मकत्वम् । अत्र स्वरूपासिद्धिं शङ्कते नन्वित्यादि । अनारोपितेत्यादि । आरोपितमध्यस्तम्, आगन्तुकं रूपित्वादि । यदि चाध्यस्तमप्यागन्तुकं तर्ह्येकमेवोपादत्तं, द्वितीयं त्ववस्तुत्वादुपादत्तमप्यनुपादत्तम् । इदं तादात्म्येन संबन्धेन वर्तते । तदाहुरिति अनारोपितानागन्तुकरूपेण वर्तमानत्वमाहुरित्यर्थः । अस्तित्वेत्यादि । अत्र भाष्ये द्वन्द्वान्ते श्रूयमाणं त्वप्रत्ययं प्रत्येकं संबध्यास्तित्वादीत्युक्तम् । तत्रास्तित्वाद्याश्रये ब्रह्मणि सति अस्तित्वादिना समन्वयाभावाज्जगति ब्रह्मसत्त्वासिद्धेः । नन्वेकत्वात् साध्यस्याधिकदेशवृत्तित्वं व्यापकत्वान्नानुमानदोषकरमिति चेद् ब्रह्मत्वास्तिभात्यादिसमन्वययोः कार्यकारणभावोऽस्त्येव तस्य ग्राहकावन्वयव्यतिरेकौ तयोरेवाभावात् । ब्रह्मत्वे सत्युक्तसमन्वयेऽब्रह्मत्वाभावे सति समन्वयाभाव इति । ब्रह्मणि तदुभयाभावान्न साध्यहेतुभाव इति दोषो न । अथवा स्वप्नसृष्टिमायाकृतभेदव्यतिरिक्तसृष्टिदृष्टोपादानभेदे वा ब्रह्मत्वरूपसाध्याभाववति हेतोः सत्त्वात्साधारण्यम् । अत्रोच्यते धर्मधर्मिणोरभेदात् सदादिरूपेणावगम्यमानादन्वयादिति योजना । पृथिवीत्यादि पृथ्वीत्वान्वितत्वात् पृथिवीत्वविषयामित्यर्थः । तथात्र सर्वमित्यादि सर्वमिति पक्षः, सदाद्यन्वितत्वं साध्यं, अस्तीत्यादिहेतुः, यन्नैवं तन्नैवं खपुष्पवदिति दृष्टान्तः । अस्तीत्यादिप्रतीतिजनकत्वं त्वेवं साधितम् । 'अन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा' इत्यस्य सुबोधिन्याम् । तथाहि । घटः सन् पटः सन् भासते इति प्रिय इति च सर्वत्रैवैकस्य ब्रह्मणोऽन्वयः, अन्यथा एकशब्दानुवृत्तिः प्रतीत्यनुगतिश्च न स्यात् । विशेषेणातिरिच्यत इति व्यतिरेकः घटादिभ्यः किमतिरिच्यते घटस्तु घटान्नातिरिच्यते तथा पटः

---

१. हेतौ हेतुतावच्छेदकाभावः स्वरूपासिद्धिः । अन्वयत्वापेक्षया समन्वयत्वस्य गुरुतया हेतुतावच्छेदकत्वाभावात्, बीजमूलत्वस्य ।

नामरूपयोः कार्यरूपत्वात् ।

भाष्यप्रकाशः ।

ततश्च सदाद्यात्मकं सच्चिदानन्दात्मकं च ब्रह्मेति तेन रूपेण ब्रह्मान्वयोऽवगम्यत एवेत्यर्थः । ननु जगत्यस्त्यादिसमन्वयो न ब्रह्मणः समवायित्वगमकः । नामरूपयोरपि समन्वयात् । नच तयोर्नानात्वान्नान्वय इति शङ्क्यम् । तयोः प्रतिनियतरूपेणानन्वयेऽप्यवच्छेदकावच्छेदेनान्वयस्य निराबाधानुभवात् । नच रूपस्य व्यभिचारः शङ्क्यः । तस्य व्यवहार्यत्वपरत्वात् । अवकाशादिरूपेण व्यवहार्यत्वस्याकाशादावपि सत्त्वादिति चेत् तत्राहुः नामरूपयोः कार्यरूपत्वादिति । नामरूपे कर्मणोऽप्युपलक्षके । 'त्रयं वा इदं नाम रूपं कर्म' इति श्रुतेः प्रपञ्चस्यैतत्त्रयात्मकत्वात् । तथाच, 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति श्रुतेर्नाम्नां रूपेषु नियमने कृत एव जगतः

रश्मिः ।

पटात् किं तु सद्घटादप्यतिरिच्यते पटादपि, एवं सर्वत्र, यत्सर्वं सत्सर्वस्मादतिरिच्यते तद्ब्रह्म । नन्वेकमेव ब्रह्मत्वसाधकमस्तु किं द्वाभ्यामिति चेन्न । अन्वयेन ब्रह्मत्वं न सिद्ध्यति जगति जगतोऽप्यन्वयात् । यद्यपि घटादेर्व्यतिरिच्यते जगत्तथापि जगतो न व्यतिरिच्यते, खपुष्पादिकं तु जगतो व्यतिरिच्यते परं नान्वेति, सज्जगतो व्यतिरिच्यते भगवतोपि सत्त्वात्, कारणस्याक्षरस्यापि सत्त्वात्, अतो यस्यान्वयव्यतिरेकौ तदेव सर्वमिति । तत्र यदि सर्वमस्तीति प्रतीतिजनकं घटोस्ति भूतले घटाभावोस्तीत्यादिप्रतीतेर्ननु भातिप्रियत्वप्रतीतिजनकं घटो ज्ञानं घटो जानाति घटः प्रीणातीत्याद्यप्रतीतेः । घटो भासते इत्यत्र तु नाश्रयत्वं तदर्थः किं तु विषयत्वमित्यागृह्यते, तदा तु अत्रैव युक्तिनिरूपणे भातिप्रियत्वयोरपि घटादिवृत्तित्वस्य मया व्युत्पाद्यत्वाद् घटादीनां तद्धर्मकत्वे सिद्धे तदप्रतीतावप्यक्षतिः । जीवे आनन्दांशस्य जडे चिदानन्दयोरप्राकट्यस्य वक्ष्यमाणत्वात् । अतो न पद्मसरसि भृङ्गे झङ्कृतिपराकृतमशकशुङ्कारः । हेतुघटिका प्रतीतिश्च प्रत्यक्षानुमित्यन्यतरपरा । तेन सदन्वयः प्रतीतिसाक्षिकश्चिदानन्दयोस्त्वानुमानिक इति ज्ञेयम् । **तेनेति** सच्चिदानन्दरूपेणेत्यर्थः । नन्वस्त्यादयो यथा ब्रह्मधर्मास्तथा नामरूपे अपीति नामरूपरूपेणान्वयः कुतो न स्यादित्याशङ्कते **ननु जगतीत्यादि** । **समवायित्वेत्यादि** भाष्यप्रकाशीययथाश्रुतव्याख्यानपक्षे समवायित्वस्य साध्यत्वाभावाद्गमक इत्युक्तम् । समवायिनि ब्रह्मत्वे सिद्धे ब्रह्मणः समवायित्वं गमयतीत्यर्थः । **समन्वयादिति** तथा च जगतोऽपि जगत्समवायित्वं स्यादिति प्रश्नः । **नान्वय इति** घटनामरूपयोः पटे नान्वयः । तन्नामरूपयोर्भिन्नत्वादित्यर्थः । **प्रतिनियतेत्यादि** देवदत्तविष्णुमित्रत्वादिरूपेण नीलत्वपीतत्वरूपेण चेत्यर्थः । **अवच्छेदकेत्यादि** नामत्वरूपत्वरूपेणेत्यर्थः । पदार्थतावच्छेदकं गुणत्वं तस्यावच्छेदो द्वैधीकरणं येन नामत्वरूपत्वरूपेण करणे प्रत्ययः । उपदेश आद्योच्चारणमित्यत्रोपदेशपदात्प्रत्ययवत् करणनिष्ठव्यापारो वा धात्वर्थः । पचादेराकृतिगणत्वादच् । **व्यभिचार** इति आकाशादौ रूपव्यभिचार इत्यर्थः । **व्यवहार्येत्यादि** रूपवान् विशेषतो व्यवहार्यो भवतीति कार्यताख्यसंबन्धेन व्यवहार्यत्वलक्षकत्वादित्यर्थः । **श्रुतेरिति** बृहदारण्यकेऽस्ति नामरूपयोरागन्तुकरूपत्वान्न तयोर्ब्रह्मसमवायित्वबाधकत्वमिति वदन्तो भाष्ये द्वयोपादाने उपपत्तिमपि वदन्ति स्म **तथाचेत्यादि** । नामरूपकर्मणां प्रपञ्चरूपत्वे सति । **व्याकरणेत्यादि** । **अनेनेत्यादि**व्याकरणश्रुतेर्जीवरूपेण प्रवेशकरणोत्तरमित्यर्थः ।

भाष्यप्रकाशः ।

कार्यत्वेन प्रतीतेस्ते एव कार्यस्य कार्यताव्यञ्जकस्वरूपभूते । यदा हि पृथुबुध्नोदराकारोऽर्थो भवति तदा तत्र तादृशं रूपं घट इति नाम च भवति । तदपि न स्वतः किंतु व्याकरणश्रुतेस्तत्करणोत्तरम् । यथा हि बालके जाते तदवयवानालोक्य व्यक्तौ निश्चितायां नाम नियमयति, एतन्नामाऽयमिति तद्वत् । अतः कर्मापि मूलवस्तूत्तरकालीनं कार्यस्वरूप एव प्रविशतीत्यागन्तुकत्वान्न तत्समन्वयः, किंत्वन्वयमात्रं तेषामतो न ब्रह्मणः समवायित्वबाधकमित्यर्थः ।

ननु तथाप्यस्त्यादिसमन्वयस्य न ब्रह्मसमवायितागमकत्वम् । कार्यमात्रे प्रकृत्यात्मकानां सत्त्वरजस्तमसामनुवृत्तिदर्शनात् । यथाहुः सांख्याः ।

‘प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः’ ॥

इति गुणानां स्वरूपं वृत्तीश्चोक्त्वा

‘सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः’ ॥ इति ।

एतदर्थस्तु सत्त्वादयो गुणाः सुखदुःखमोहस्वरूपाः प्रकाशप्रवृत्तिनिग्रहफलका यथाक्रमं बोध्याः । ते पुनरन्योन्याभिभवनान्योन्याधारत्वान्योन्यजननान्योन्यमिथुनक्रियावृत्तयः स्वत एव सन्तो यथा वर्तितैले अग्निविरोधिनी सहाग्निना रूपप्रकाशनं कार्यं कुरुतो यथा वा वातपित्तकफा दोषाः परस्परविरुद्धा अपि शरीरधारणलक्षणं कार्यं कुर्वन्ति, तथैते परस्परविरुद्धा अप्यनुवर्तन्ते, कार्यं च कुर्वन्तीति । तथाच प्रयोगः । महदादिकार्यं सुखदुःखमोहगुणकद्रव्यजन्यं कार्यत्वे सति सुखदुःखमोहगुणकद्रव्यत्वात् । यथैका रूपयौवनशीलवती स्त्री भर्तुः सुखदा, सपत्नीनां दुःखदा, पुरुषान्तरस्य मोहदेति, तद्वदिति । नच सुखादीनामान्तरत्वेनानुभवात् रूपादीनां सुखादिगुणकत्वे मानाभावः शङ्कनीयः । स्त्रीचन्दनादिजन्यस्य सुखस्य तत्तदवयवेषु

रश्मिः ।

अत इति धर्मत्वादित्यर्थः । मूलवस्त्वित्यादि ऋतुप्रयोगादिमांसपिण्डाद्युत्तरकालिकं प्रसिद्धमित्यर्थः । समवायित्वेत्यादि अन्वयमात्रमित्यर्थः । तदित्थं पूर्वोक्तानुमाने न ब्रह्मणि समवायित्वं सिद्ध्यति तदप्यनागन्तुकानारोपितरूपेणानुवर्तनात् । जगति जगत्त्वं खलु जङ्गन्ति परमागन्तुकरूपेणेति जगतो यथान्वयेपि न तत्समवायित्वबाधकत्वमेवं ब्रह्मणोप्यन्वये तु न । समवायित्वमित्येवंविधबाधकत्वं नेत्यर्थः । अत्र प्रयोगः ब्रह्म न भूतादिसमवायि अन्वयात् नामरूपादिवत् इति विरुद्धरूपहेत्वाभासोत्थापनेन । गुणा इत्यस्यार्थमाहुः सत्त्वेत्यादि । प्रीतीत्यादेरर्थमाहुः सुखेत्यादि । प्रदीपवच्चेत्येतद्विवृण्वन्ति यथा वर्तितैले अग्नीत्यादि अत्राकारो लेखककरदोषात्पतितः प्रमाद्वा पूर्वसवर्णदीर्घः । ‘ईदूदेद्द्विवचनं प्रगृह्यम्’ इति सूत्रात्प्रगृह्यसंज्ञायां प्रकृतिभावात् । अग्निनेति दीपरूपेणेत्यर्थः । चकारार्थमाहुः यथा वेत्यादि । सुखेत्यादि । तादृशं द्रव्यं प्रकृत्यात्मकम् । कार्यत्वे सतीति प्रकृतेस्तादृशद्रव्यजन्यत्वापत्तिवारणायेदम् । ‘प्रकृतिपुरुषयोरन्यत्सर्वमनित्यम्’ इति पञ्चमाध्यायस्थसांख्यप्रवचनसूत्रात् । तथाच सत्यन्ताभावे प्रकृतौ साधारणानैकान्तिकत्वम् । तद्वदितीति व्यतिरेके केवलचेतनवदिति दृष्टान्तः । रूपादीनामिति बाह्यानामाधिभौतिकानामित्यर्थः । मानाभाव इति आध्यात्मिकादीनामाधिभौतिकेत्यादिधर्मत्वे

भाष्यप्रकाशः ।

बहिरेवानुभवेन तज्जनकेषु स्त्र्यादिष्वपि तस्य बहिरेव सत्तानिश्चयात् । नच तस्यानुभवस्य भ्रान्तत्वं शक्यवचनम् । तथा सति देहे मे सुखं, शिरसि मे वेदनेत्याद्यनुभवान्तरस्यापि बाधप्रसङ्गात् । एवं तु स्त्रीसुखं चन्दनसुखमित्याद्यभिलापोऽपि युज्यते । आन्तरत्वेनानुभवस्तु मानसस्यैव । एवं सिद्धे तेषां बाह्यत्वे स्त्र्यादिसंसर्गेण बहिरेव तेऽभिव्यज्यन्ते । घृतद्रवत्वादिवत् । तथाच प्रयोगः । विमताः सुखादयो न साक्षादात्मधर्माः । बाह्यत्वे सत्यात्मनि प्रतीयमानत्वात् । गौरत्वादिवदिति । तथा, स्त्र्यादयः सुखादिगुणकाः सुखादिजनकत्वात् । यद् यज्जनकं तत् तद्गुणकं, प्रकाशशैत्यादिजनकवन्हिचन्दनादिवदिति च । एवं सिद्धे तेषां तद्गुणकत्वे तेषां द्रव्याणां तद्गुणात्मकत्वमप्यनुमेयम् । तथाच प्रयोगः । विमताः सुखाद्यात्मकाः, सुखाद्यविनाभूतत्वात् । तन्मात्राविनाभूतमहाभूतवत् । तथा, सुखादयो द्रव्यसूक्ष्मावस्थारूपाः । तदविनाभूतत्वे सति तज्जनकत्वात् । महाभूताविनाभूततज्जनकतन्मात्रवदिति । नच प्रथमे क्षणे द्रव्यं यावद्गुणशून्यमेवोत्पद्यत इति वाच्यम् । प्रत्यक्षबाधितत्वात् । अपाकजस्य रूपादेरुत्पत्तिदशायामप्यनुभवात् । एवं सुखादावपि बोद्धव्यम् । पुत्राद्युत्पत्तिकाल एव पुरुषभेदेन सुखदुःखाद्युत्पत्तिदर्शनतस्तस्य बालादेस्तदानीमपि तज्जनकतया तद्गुणकत्वतदविनाभावयोर्निश्चयादिति । एवं मैत्रायणीये, 'तमो वा इदमेकमेवाग्र आसीत् तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयाति' इति । श्वेताश्वतरेऽपि, 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इति तमःशब्दवाच्यायाः प्रकृतेर्गुणानां च सृष्ट्यादौ सत्ताश्रावणात् पुराणेषु मन्वादिषु

रश्मिः ।

मानाभाव इत्यर्थः । तस्येति । घृतेत्यादि वह्निसंसर्गेणेत्यादिः । विमता इति स्त्र्यादयः सुखादिगुणकाः आध्यात्मिकस्य सुखादेरित्यर्थः । गौरत्वेत्यादिभास्वरं गौरत्वमात्मनीति दृष्टान्तः । तन्मात्रेति तेन यद् यदविनाभूतं तत् तदात्मकं इति व्याप्तिः सामान्या । तज्जनकत्वादिति द्रव्यजनकत्वात् । न च रूपादिवदन्यथासिद्धत्वमिति वाच्यम् । घटादिकं प्रति दण्डादिकस्य रूपवन्न भवत्यन्यथासिद्धत्वम् । द्रव्यस्य सुखत्वेनाकारणकत्वापत्तेः कार्यस्य । प्रथमक्षणिकद्रव्यमादाय हेत्वोरंशतः स्वरूपासिद्धत्वमाशङ्क्य पराकुर्वन्ति न च प्रथम इत्यादि । तथाच पक्षैकांशतः ह्रदे पर्वते चाद्यक्षणावच्छेदेन सुखाद्यविनाभूतत्वरूपहेत्वभावाद् ह्रदो द्रव्यं धूमादितिवत् पक्षे हेत्वभावात्स्वरूपासिद्धिः सिद्धान्तमुक्तावल्युक्ता, पर्वते सुखादिरूपे आद्यक्षणावच्छेदेन हेतुतावच्छेदकस्य तदविनाभूतत्वसमानाधिकरणतज्जनकत्वरूपस्य गौरवेणाभावात् स्वरूपासिद्धिर्मञ्जर्युक्ता । अपाकेत्यादि पाकोऽग्निसंयोगः । निश्चयादिति तथाच प्रथमक्षणावच्छेदेनापि द्रव्यस्य सगुणत्वात् न हेत्वोः स्वरूपासिद्धत्वमिति भावः । पुराणेष्विति एकादशे—

'तमो रजः सत्त्वमिति प्रकृतेरभवन् गुणाः ।
मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च ॥
तेभ्यः समभवत्सूत्रं महान् सूत्रेण संयुतः ।
ततो विकुर्वतो जातो योहंकारो विमोहनः' ॥

इत्यादिष्वित्यर्थः । मन्वादिष्विति ।

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।

प्रकृतेरपि स्वमते तदंशत्वात् । अज्ञानात् परिच्छेदाप्रियत्वे । ज्ञानेन बाध-

---

भाष्यप्रकाशः ।

तथा चरणात् सिद्धे प्रकृतेः सत्त्वे सर्वस्य त्रिगुणत्वेन गुणमय्याः प्रकृतेरेव समन्वयस्य सिद्धत्वाच्च ब्रह्मणः समवायित्वसिद्धिरित्यत आहुः प्रकृतेरित्यादि ।

'आसीज्ज्ञानमयो ह्यर्थ एकमेवाविकल्पितम् ।
यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे ॥
तन्मायाफलरूपेण केवलं निर्विकल्पितम् ।
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ॥
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते' ॥

इत्याद्येकादशस्कन्धीयभगवद्वाक्यैस्तस्या अंशत्वे जन्यत्वे च निश्चिते तद्रूपस्याप्यागन्तुकत्वेन तदन्वयस्यापि समन्वयत्वाभावाच्च तेन ब्रह्मणः समवायित्वभङ्ग इत्यर्थः । ननु भवत्वेवं, तथापि तदन्वयस्य सांख्यैः साधितत्वात् तेनैव रूपेण ब्रह्मान्वयोऽस्तु किमस्त्यादिरूपान्वयाग्रहेणेत्याशङ्कायामाहुः अज्ञानादित्यादि । अयमर्थः । प्राकृती या प्रीतिः सा आज्ञानिकी, न तु वास्तवी । तत्र गमको देशतः कालतश्च परिच्छेदः । यथा कस्यचित् किंचित् प्रियं किंचिन्न । तदपि कदाचित् प्रियं, कदाचिन्न । तथा सति तस्या औपाधिकत्वम् । मैत्रेयीब्राह्मणे तथैव सिद्धत्वात् ।

रश्मिः ।

'अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ।
ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः' ॥

इत्यादिष्वित्यर्थः । प्रकृतेरेवेति अस्त्यादीनामपि प्राकृतत्वसंभवादेवकारः । न ब्रह्मण इति ब्रह्म न समवायि सत्त्वादिना समन्वयादिति । अस्त्यादिसमन्वयरूपहेतोः सत्प्रतिपक्षत्वात्तथा । ज्ञानमय इति 'ज्ञानमयो ह्यर्थः' इत्यपि पाठः । कार्त्स्न्यमयोश्शब्दार्थः । अयुग इति युगेभ्यः पूर्वं प्रलये चेत्यर्थः । तन्मायेत्यादि माया तत्फलं दृश्यं सर्वं तद्रूपेणेत्यर्थः । उभयात्मिकेति कार्यकारणरूपिणीत्यर्थः । तद्रूपस्येति मायारूपस्य सत्त्वरजस्तमोरूपस्य धर्मस्येत्यर्थः । समवायित्वभङ्ग इति । एतच्च चतुर्थपादे 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यधिकरणे स्फुटम् । यद्यप्येवं ब्रह्मणः समवायित्वे सिद्धे परिच्छेदाप्रियत्वे विरुद्धे इत्याशङ्क्याहुः अज्ञानादिति । इत्येवं तथापि ब्राह्मणानां संतोषो न भवति सुगमव्याख्यान इति विस्तरेणाहुः ननु भवत्वित्यादिना । तदन्वयस्येति प्रकृत्यन्वयस्येत्यर्थः । तेनैवेति प्राकृतप्रियत्वादिरूपेणेत्यर्थः । देशतः परिच्छेदमाहुः यथेत्यादि । कालतः परिच्छेदमाहुस्तदपीत्यादि । तस्या इत्यादि प्रीतेर्धनसौन्दर्यादियुक्तशुद्धदेशशुद्धानुद्वेजककालरूपोपाध्याहितत्वमित्यर्थः । मैत्रेयीत्यादि । एतच्च चतुर्थपादे वाक्यान्वयाधिकरणे स्पष्टम् । तथा चाज्ञानाद्ब्रह्मात्मकानन्दे परिच्छेदोऽप्रियत्वं च लोके भवतो न तु प्राकृतं प्रियत्वमस्ति, तथा च श्रुतिः 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति । तथा च प्राकृतप्रियत्वस्यैवाभाव इति दूरे तेन रूपेण समन्वय इति भावः । व्यतिरेकमुखेन ज्ञानेन

भाष्यप्रकाशः ।

वास्तवस्य नैसर्गिकतायां वस्तुसद्भावे ज्ञानेन तद्बाधायोगाच्च । अतो वास्तवं प्रियत्वमात्मन्येवेत्यात्मन एव दर्शनादिकमावश्यकमिति बोधयित्वा 'इदं सर्वं यदयमात्मा' इत्यनेन सर्वस्यात्माभिन्नत्वं श्रावयति । तथा तैत्तिरीये, 'आनन्दं ब्रह्मणो विद्वान्'इत्युपक्रम्य, 'एतꣳ ह वाव न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवम्'इति 'स य एवं विद्वानेते आत्मानꣳ स्पृणुते' इत्यात्मत्वानुसंधानेन तत्कृततापाभावं च श्रावयति । अत एवमात्मानन्दज्ञानेन प्राकृतिकप्रियत्वादौ बाधदर्शनाच्च तद्रूपेणान्वय आद्रियते किं त्वात्मत्वेन । सर्वस्मिन्निरुपधिप्रियत्वस्य बोधनादबाधितेनैव रूपेण श्रुत्यविरोध इति तदन्वय एवाद्रियत इत्यर्थः । ननु यद्येवं तदा नानात्वमपि नादर-

रश्मिः ।

बाधदर्शनादिति भाष्यं विवृण्वन्ति वास्तवस्येत्यादि । भाष्ये । सुगमव्याख्या त्वेवं बोध्या । तथाहि । प्रतिपादितोऽस्तिभातिप्रियत्वेन ब्रह्मसमन्वयोऽनुपपन्नः परिच्छेदाप्रियत्वयोर्दर्शनादित्याशङ्कामाहुः अज्ञानादित्यादि । तथा च न ते वास्तवे इति तत्प्रतीतावपि न समन्वयानुपपत्तिरित्यर्थः । किंच नायं नियमो यदुपादानधर्माणां उपादेये भानमिति । विभागेनापरिच्छेदतिरोभावस्य सांख्येप्यङ्गीकारात् । संयोगेन महत्त्वस्य नैयायिकैरप्यङ्गीकाराच्च । तयोरवास्तवत्वे हेतुमाहुः ज्ञानेनेत्यादि । वाचारम्भणवाक्योक्तरीतिकज्ञानेन विकल्पबुद्धेर्बाधस्य श्वेतकेत्वादिषु दर्शनादित्यर्थः । प्रकृते सिद्धमाहुः अत इत्यादि यतः सर्वत्रौपाधिकी सा, अत इत्यर्थः । बोधयित्वेति सहोवाचेत्याद्यनुवाकद्वयं 'न वा अरे' इत्यारभ्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम्' इत्यंशेन बोधयित्वा 'ब्रह्म तं परादात्' इत्यारभ्य 'इदं सर्वं यदयमात्मा' इत्यन्तेनांशेन सर्वस्यात्माभिन्नत्वं श्रावयतीत्यर्थः । तथाचान्यत्र प्रतीयमानं प्रियत्वं तदंश इति भावः । एतमित्यादि पूर्वोक्तानन्दविदं न तपति नोद्वेजयति समे एते साध्वसाधुनी एवं तापहेतू इति विद्वान् आत्मानं स्पृणुते स्नेहयतीत्यर्थः । स्पृ प्रीतिपालनयोः स्वादिः । बाधदर्शनादिति 'किमहꣳ साधु नाकरवम्'इत्यादिश्रुतेस्तथेत्यर्थः । बोधनादिति 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' इत्यादिना बोधनादित्यर्थः । एवाद्रियत इति एवकारेण प्राकृतानां सत्त्वरजस्तमसां व्युदस्तिः । तथाहि । माभूत् प्राकृतसत्त्वरजस्तमोरूपेण ब्रह्मान्वयः परंतु भागवतद्रूपेण तु स्यात् ।

'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ।
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः' ॥

इति वाक्यात् मैवम् । एतेषामप्यागन्तुकत्वादेतस्य सुबोधिन्यां सद्रूपेण निर्गतं सत्त्वमित्युच्यते, केवलचिद्रूपेण निर्गतं क्रियाशक्तिप्रधानत्वात्सदानन्दानन्दाभावाच्च रज इत्युच्यते, आनन्दांशाच्च तमः, ते भगवद्रूपा एव भगवता सृष्टाः । न च ते पूर्वं भगवति स्थिताः इति प्रतिपादनात् । अबाधितेन नानात्वेन धर्मेण प्रकृतेरन्वयात् तस्या अपि समवायित्वं निर्दुष्टमित्याशङ्कामुखेनाभासमाहुः नन्वित्यादि । अथवा ननु यदि ब्रह्मोपादेयता प्रपञ्चे स्यात् तदा ब्रह्मण एकरसत्वेन तद्वै-

दर्शनात् । नानात्वं त्वैच्छिकमेव । जडजीवान्तर्यामिष्वेवैकैकांशप्राकट्यात् । कथमेवमिति चेत् । न । सद्रूपे घटरूपक्रियास्विव तारतम्येनाविर्भाववज्जडेपि मानत्वादिप्रतीतेस्तारतम्येनाविर्भावोऽङ्गीकर्तव्यः । भगवदिच्छाया नियामकत्वात् ।

भाष्यप्रकाशः

णीयम् । तस्यापि प्राकृतिकत्वादित्यत आहुः नानात्वमित्यादि । 'बहु स्याम्' इति श्रावणात् तन्न प्राकृतिकमित्यर्थः । ननु यदीदमप्राकृतं स्यादत्रास्त्याद्यंशत्रयानुवृत्तिरनुभूयेत, सा तु न दृश्यतेऽतो न तथेत्यत आहुः जडेत्यादि । जडे सदंशस्य, जीवे 'ज्ञानं त्वन्यतमो भावः' इति वाक्याज्ज्ञानांशस्यान्तर्यामिण्यानन्दांशस्य प्राकट्यात् । तथाच प्राकट्याभावहेतुकमदर्शनं नानुवृत्तिबाधकमित्यर्थः । अत्र चोदयति कथमित्यादि । सर्वत्र त्रितयसद्भावेऽपि तत्र तत्रैकैकांशप्राकट्यं कयोपपत्त्याङ्गीक्रियत इत्यर्थः । अत्र समादधते नेत्यादि । एवमाक्षेपो न युक्तः । यतोऽस्तीतिप्रत्ययगोचरे सद्रूप एकस्मिन्नेवार्थे घट इति गुणित्वेन, रूपमिति तदुपसर्जनतया गुणत्वेन, क्रियेति त्रिक्षणावस्थायितयाऽऽशुतरविनाशित्वेन यथा सदंशस्य तारतम्येनाविर्भावस्तथा जडेऽपि मानत्वप्रियत्वयोस्तारतम्येनाविर्भावोऽङ्गीकार्यः । नन्वेवमङ्गीकारे का वा युक्तिरितिचेद् उच्यते । श्रीभागवते कंसस्यारिष्टदर्शनस्थले, 'अदर्शनं स्वशिरसः प्रतिरूपेषु सत्स्वपि' इत्यासन्नमृत्योः शिरःप्रतिबिम्बादर्शनमुक्तम् । तथा द्वितीयस्कन्धे, 'घ्राणं च गन्धः' इत्यादिवाक्यैरिन्द्रियाणां सजातीयग्राहकत्वं च बोधितम् । एवं सत्युक्तस्थले यच्छिरसोऽग्रहणं तत्र हेतुत्वेन विषयस्य चक्षुषो वा आवरणं वक्तव्यम् । तत्र न शिरसः । तस्यान्येन दर्शनात् । नापि चक्षुषः । तदानीं तेन विषयान्तरदर्शनात् । अत उभयोपपत्त्यर्थं विषयनिष्ठज्ञानांशस्य तच्चक्षुः प्रत्येवावरणमिति वक्तव्यम् । एवं लोकाञ्जनस्थले वैषयिकज्ञानांशावरणम् । सदंशावरणे तु स्पार्शनमपि तस्य न स्यादिति । एवमेकत्र

रश्मिः ।

त्यर्थः । न प्राकृतिकमिति तथा च तेन रूपेणापि ब्रह्मण एवान्वयान्न प्रकृतिसमन्वय इति भावः । ऐच्छिकत्वेनागन्तुकत्वान्न समन्वयः । अत्रेति ऐच्छिकनानात्वावच्छिन्ने जगतीत्यर्थः । न दृश्यत इति । किं तु सदंशमात्रस्य दृश्यत इत्यर्थः । न तथेति नानात्वमप्राकृतिकं नेत्यर्थः । अदर्शनमिति चिदानन्दयोरित्यर्थः । क्रियेतीति कृतिजन्या क्रियेति प्रथमं भगवदिच्छया क्रिया, ततो द्वितीयक्षणे स्थितिः, ततस्तृतीयक्षणेधःसंयोगेनाशुतरविनाशित्वं ज्ञेयम् । प्रतिरूपेष्विति दर्पणादिष्वित्यर्थः । विषयस्य न संभवतीत्याहुः तत्र नेत्यादि । चक्षुष इति करणस्य । तदानीमिति स्वमकाल इत्यर्थः । उभयोपपत्त्यर्थमिति स्वस्य शिरःप्रतिबिम्बादर्शनविषयकरणोभयतः अग्राहकत्वं चक्षुर्दोषस्तस्योपपत्त्यर्थमित्यर्थः । तच्चक्षुरिति स्वमद्रष्टुश्चक्षुरित्यर्थः । एवं लोकेत्यादि यादृशाञ्जनेन तमन्यो न पश्यति तादृशस्थल इत्यर्थः । सर्वोपि तं न पश्यतीति शरीरावरणमेव तत्र वक्तव्यं किं ज्ञानांशावरणकल्पनयेत्यत आहुः सदंशेत्यादि । स्पार्शनमिति प्रत्यक्षमित्यर्थः । एवं सदंश उपपाद्य ज्ञानप्रियत्वांशयोराहुः एवमेकत्रेति सदंशे । अन्यत्र ज्ञानांशे । तथेति नित्यज्ञानरूपे मानरूपक्रियास्विव तारतम्याभावेपि विषयताविषयकज्ञानेन ज्ञानमिति गुणित्वेन रूपमिति तदुप-

---

१. चिति सदानन्दयोरानन्दे सचितोरदर्शनमित्यर्थः । २. सन्निविष्टेन ।

भाष्यप्रकाशः ।

ज्ञानांशसिद्धावन्यत्रापि तथा सिद्ध्यति । एवं प्रियत्वांशेऽपि बोध्यम् । यद्वा पदार्थमात्रस्य ज्ञानेनैव प्रकाशाज्ज्ञानजनकत्वाच्च सांख्योक्तप्रकारेणैव ज्ञानाविनाभावसिद्धौ ज्ञानात्मकत्वस्यापि सिद्धिः । परंतु तत्र जडे सदंशवत् प्रकटम् । सन् घटः, सन् पट इतिवज्ज्ञानं घट इति सामानाधिकरण्याप्रतीतेः । प्रियत्वे तु ततोऽप्यप्रकटम् । तत्तदसाधारणत्वात् । जीवे तु चिदंशस्यापि प्राकट्यम् । चेतनत्वेनैव सदा प्रतीयमानत्वात् । सदंशस्तु न्यग्भूतः । विशेषणतयैव प्रतीयमानत्वात् । प्रियत्वं तु ततो न्यग्भूतम् । उक्तयुक्तेः । अन्तर्यामिणि तु प्रियत्वमेव मुख्यमन्यदुभयं न्यग्भूतम् । तद्द्रष्टृणां प्रियत्वेनैवानुभवगोचरत्वादिति । अत्र नियामिका तु, प्रजायेयेति भगवदिच्छैव । अन्यथा पूर्वोक्ताकारेणैव नानाभावात् सृष्टिसिद्धावेतदाकारान्तर-

रश्मिः ।

सर्जनतया गुणत्वेन क्रियेति त्रिक्षणावस्थायित्वेन आशुतरविनाशितया ज्ञानांशस्य तारतम्येनाविर्भावः । ज्ञानस्य विषयताविषयकस्य त्रिक्षणावस्थायित्वात् । तदुक्तं तथा सिद्ध्यतीति । प्रियत्वेतिदिशन्तिस्म एवमिति । बोध्यमिति पुत्रादौ बोध्यमित्यर्थः । आत्मनि प्रियरूपे प्रियरूपक्रियास्विव तारतम्याभावेपि पुत्रादौ प्रिये प्रिय इति गुणित्वेन रूपमिति तदुपसर्जनतया गुणत्वेन क्रियेति त्रिक्षणावस्थायित्वेनाशुतरविनाशितयाऽऽनन्दांशस्य तारतम्येनाविर्भावः । यथा सूर्ये रूपं श्यामं सूर्यत्वं च तदाच्छादिका क्रिया त्रिक्षणावस्थायिनी । दीपादावपि प्रसिद्धम् । अन्वयव्यतिरेकाभ्यामित्यस्य सुबोधिन्यनुसारेण पक्षान्तरमाहुः यद्वेत्यादि । ज्ञानेनैवेत्यादि घटो भासत इत्यादिप्रतीतेस्तथेत्यर्थः । ज्ञानजनकत्वादिति विषयविधयेति बोध्यम् । सांख्योक्तेत्यादि । घटादयो ज्ञानगुणकाः ज्ञानजनकत्वात् प्रकाशशैत्यादिजनकवह्निचन्दनादिवदित्यनुमानेनेत्यर्थः । ज्ञानात्मेत्यादि विमता घटादयः ज्ञानात्मकाः ज्ञानाविनाभूतत्वात् । तन्मात्राविनाभूतमहाभूतवदित्येवं ज्ञानात्मकत्वस्यापीत्यर्थः । किंच चित्त्वं व्यापकं घटादिवृत्ति वा मुख्यब्रह्मधर्मत्वात्, सत्त्ववत् इति । पटादौ व्यभिचारवारणाय मुख्येति हेतुविशेषणम् । सत्यादित्रयान्यतमत्वं तदर्थः । तथाच मुख्यब्रह्मधर्मत्वेन व्यापकत्वेन घटादिवृत्तित्वेनानुकूलस्तर्क एव युक्तिः । सामानेत्यादि भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वं सामानाधिकरण्यं तदप्रतीतेरित्यर्थः । प्रियत्वमिति प्रीतिजनकत्वदर्शनेन । घटादयः, प्रियत्वगुणकाः प्रीतिजनकत्वात्, प्रकाशशैत्यादिजनकवह्निचन्दनादिवत् । घटादयः प्रीत्यात्मकाः प्रीत्यविनाभूतत्वात् । तन्मात्राविनाभूतमहाभूतवदित्यनुमानाभ्यां घटाद्यात्मकं प्रियत्वमित्यर्थः । किंच प्रियत्वं व्यापकं घटादिवृत्ति वा मुख्यब्रह्मधर्मत्वात् सत्त्ववदित्यपि ज्ञेयम् । आनन्दो घट इत्यप्रतीतिस्तु तमस्स्वभावत्वाप्रतीतिवत् । सिद्धान्तमुक्तावलीटीकायां स्फुटमेतत् । तत्तदित्यादि इन्दुत्वाद्यसाधारणधर्मत्वादित्यर्थः । न्यग्भूत इति गुणभूत इत्यर्थः । उक्तयुक्तेरिति तत्तदसाधारणत्वादित्यर्थः । तद्द्रष्टृणामिति 'आनन्दो ब्रह्मेति व्यजानात्' इति श्रुतेर्भृग्वादीनामित्यर्थः । भगवदित्यादिभाष्यं विवृण्वन्ति अत्रेत्यादि । सा तु यथाकार्यं भगवदिच्छानुमेयेति भावः । पूर्वोक्तेत्यादि 'एकोऽहं बहु स्याम्' इतीच्छाकारेणैव । नानाभावात्सृष्टिसिद्धावेतदाकारान्तरकथनस्य 'प्रजायेय' इतीच्छाकारान्तरकथनस्य

भाष्यप्रकाशः ।

कथनस्य वैयर्थ्यापत्तेः । उच्चनीचभावादिनाऽऽविर्भावस्यैव प्रकर्षपदार्थत्वेन विवक्षितत्वादिति । एतेन दुष्टत्वादिप्रतीतावपि भगवदिच्छैव हेतुरिति न तयापि समवायित्वे दोषप्रसक्तिः । क्रीडार्थे तथैव बुद्ध्युत्पादनात् । एतदप्येकादशस्कन्धीयविंशैकविंशाध्यायस्थैर्गुणदोषदर्शनस्य कर्मनियमार्थत्वबोधकवाक्यैरवसीयत इति नात्रापि शङ्कालेशः । अत एव न कश्चिदपि कुत्सितत्वं ब्रह्मविदां भासते । अत एवैकादश एवोक्तम्,

'किं वर्णितेन बहुना लक्षणं गुणदोषयोः ।
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः' इति ॥

नचैवं ब्रह्मणः समवायित्वे, 'सैषाऽविद्या जगत् सर्वम्' इत्यादितापिनीयश्रुतिविरोधः शङ्क्यः । तस्याग्रे, न विलक्षणत्वाधिकरणे समाधेयत्वात् । तत्रापि तस्मादात्मन एव त्रैविध्यं सर्वत्र योनित्वमपीति वक्ष्यमाणत्वादिति । अत एव श्रीभागवतारम्भश्लोकेऽपि ब्रह्मणः समवायित्वं

रश्मिः ।

वैयर्थ्यापत्तेरित्यर्थः । विवक्षितत्वादितीति 'गर्दभीतराभवद्गर्दभ इतरः' इति श्रुत्यन्तरे तथादर्शनादिति भावः । इतरा शतरूपा, इतरो मनुः । भाष्योक्तहेतुसमासावितिशब्दः । एतेनेति एतादृशप्रकर्षपदार्थेनेत्यर्थः । क्रीडार्थमिति एतच्च द्वितीयेऽध्याये 'लोकवत्तु लीलाकैवल्यम्' इति सूत्रे स्पष्टम् । कर्मनियमेत्यादि ।

'विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ।
अवेक्षतेरविन्दाक्ष गुणं दोषं च कर्मणाम्' ॥ इत्यादिना
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः' । इत्युक्तमाक्षिप्तम् । ततो भगवता
'स्वे स्वेधिकारे या श्रद्धा स गुणः परिकीर्तितः ।
कर्मणां जात्यशुद्धानामनेन नियमः कृतः ॥
गुणदोषविधानेन सङ्गानां त्याजनेच्छया' । इति विंशे, एकविंशे च
'शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु ।
द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥
धर्मार्थं व्यवहारार्थं यात्रार्थमिति चानघ ।
दर्शितोयं मयाचारो धर्ममुद्वहतां धुरम्' ॥

इति कर्मनियमार्थत्वबोधकवाक्यैः क्रीडार्थत्वमवसीयत इत्यर्थः । वाक्यार्थस्तु श्रीधर्यां स्फुटः । शङ्कालेश इति एतच्च द्वितीयाध्याये स्फुटतरमिति न शङ्कालेश इत्युक्तम् । कश्चिदिति लोके कुत्सितत्वेन प्रतीयमानेपीत्यर्थः । ब्रह्मविदामिति निरस्ताविद्यानां भरतादीनामित्यर्थः । साविद्यानां प्रतीतिस्त्वविद्याकृतेति न प्रपञ्चवास्तविककुत्सितत्वसंपादनायालम् । शङ्खादौ वास्तवपीतत्वसंपादने सकामलस्य प्रतीतिरिवेति भावः । एकादश इति एकोनविंश इत्यर्थः । अग्रे इति द्वितीयाध्याय इत्यर्थः । तत्रापीति तापिनीय इत्यर्थः । त्रैविध्यमिति ब्रह्मविष्णुशिवरूपत्वमित्यर्थः । इतिवक्ष्यमाणत्वादिति इत्यात्मनः समवायित्वस्य वक्ष्यमाणत्वादित्यर्थः । समवायित्वमिति अभिन्ननिमित्तोपादानत्वयोर्मध्य इत्यर्थः । अतोऽभिन्ननिमित्तोपादानं जगद् ब्रह्मकारणक-

नच साधारण्येन सर्वजगत् प्रति परमाण्वादीनामन्वयः संभवति ।

भाष्यप्रकाशः ।

ग्राहयितुं, 'जन्माद्यस्य यतोऽन्वयात्' इत्यनेनान्वय एव हेतुत्वेनोक्तः । नच तत्रेतरत इत्यनेन व्यतिरेकस्याप्युक्तत्वात् तस्यात्र कुतो नोक्तिरिति शङ्क्यम् । ब्रह्मणो व्यापकत्वेनाभावरूपस्य व्यतिरेकस्याभावाद्विशेषेणातिरिक्तत्वरूपो व्यतिरेकः कृत्स्नप्रसक्तिवारणायात्र विवक्षितः । स त्वनारोपितानागन्तुकरूपबोधकेन समुपसर्गेणैव बोधित इत्यतः पृथगनुक्तेः । एवं चतुःश्लोक्यामप्यन्वयव्यतिरेकाभ्यामित्यत्रापि बोध्यम् । एतदेवैकादशस्कन्धीये,

'यथा हिरण्यं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत्' ॥

इति वाक्येऽपि निष्कृष्य दृष्टान्तेन बोधितं ज्ञेयम् । प्रकृतमनुसरामः । नन्वेतादृशोपपादनसापेक्षब्रह्मान्वयोपगमापेक्षया तदनपेक्षः परमाणूनां भूतानां वान्वयो ज्यायान् प्रतिपत्तिसौकर्यात् । तदर्थमेव सर्वेषां प्रयत्नादित्याशङ्कायामाहुः नचेत्यादि । परमाण्वादीनामित्यादिपदेन, 'कालः स्वभावो नियतिर्यदृच्छा' इति श्रुत्युक्तानां कालादीनां संग्रहः । जगदन्तःपातिषु दिगाकाशादिषु परमाणूनामन्वयाभावात् । तेषां नित्यत्वाभ्युपगमेऽपि स्वभावान्वयस्त्ववश्यं वाच्यः । एवं मतान्तरे कालस्य प्रकृतेश्च वाच्यः । तथा सति विप्रतिपन्नानामनेकेषां परमाणूनां चानेकेषाम-

रश्मिः ।

मित्युक्तं भवतीति सुबोधिनीस्वारस्यात् । अत एव तथा चैवं विचारे ब्रह्मणः सर्वविधं कारणत्वं श्रुतिवाक्याभ्यां प्रमाणाभ्यां सिद्धमिति भाष्ये वक्ष्यते । व्यतिरेकस्येति निमित्तकारणत्वरूपस्येत्यर्थः । व्यतिरेक इति निमित्तकारणमित्यर्थः । इतरन् निमित्तकारणमिति सुबोधिनीस्वारस्यात् । कारणत्वे सति विशेषेणातिरिक्तत्वं निमित्तस्यैवेति । स त्विति निमित्तकारणरूपो व्यतिरेक इत्यर्थः । अनारोपितेति 'विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' इत्यत्र असांप्रतमित्यस्य न युज्यते इत्यर्थान् निपातानां वाचकत्वमपीष्टमिति भावः । वस्तुतस्तु द्योतकेनेत्यर्थः । अनागन्तुकनारोपितरूपस्य व्यञ्जनया बोधकेनेत्यर्थात् । बोधित इति व्यतिरेके सति ब्रह्मणो जगत्यन्वयः स्यात्तदैव समन्वयः, अस्त्यादिनान्वयः । अन्यथा तु कृत्स्नस्य ब्रह्मणो जगत्त्वप्रसक्तिरिति समन्वयो न स्यादिति भावः । एवं चतुरिति एतच्चैतस्य सुबोधिन्यां व्याख्यातं प्रागुक्तं च । तदर्थमिति समन्वयसंपादनार्थमित्यर्थः । काल इत्यादि श्वेताश्वतरेऽस्ति । तेषामिति दिगाकाशादीनाम् । नित्यत्वेत्यादि तच्चैकं विभु नित्यं चेति तर्कसंग्रहे इत्यभ्युपगमपदम् । स्वभावान्वयो नित्येष्वपि वाच्य इत्यर्थः । अन्यथा शब्दगुणकत्वं न स्यात् । मतान्तर इति व्याहृति ब्रह्मवादे सांख्ये चेत्यर्थः । व्याहृति ब्रह्म कालः । द्वितीयाध्याये दशमस्य कालात्मा संकर्षण उक्तः । स वेदः । काल उपदेश इति धातुपाठात् । आत्मशब्दस्तु 'कालोस्मि' इति गीतावाक्यात् । मतं तु

'प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ।
तृतीयं सर्वभूतस्थं यज्ज्ञात्वा मुच्यते बुधः' ॥

इत्यत्र व्याहृति ब्रह्म । अण्डसंस्थितं द्वितीयम् । वाच्य इति अन्वयो वाच्यः । एकस्मिन्नित्यादि भाष्यं विवृण्वन्ति तथा सतीत्यादि । विप्रतिपन्नानामिति दीधितिकृ-

---

१. पदार्थतत्वविवेचनाख्ये ग्रन्थे ।

एकस्मिन्ननुस्यूते संभवत्यनेककल्पनाया अन्याय्यत्वात् । लोके कर्तृविशेषवदुपादानविशेषग्रहणेऽपि न ब्रह्मणि व्यभिचारः । अलीकप्रतीतेऽस्तित्वादिप्रतीतावपि सम्यगन्वयाभावान्न कार्यत्वव्यभिचारौ । तस्माद् ब्रह्मण एव समवायित्वम् ।

भाष्यप्रकाशः ।

न्वयकल्पनस्य न्यायविरुद्धत्वं प्रतिपत्त्यसौकर्यात् । किंत्वेकस्मिन् ब्रह्मणोऽन्वये संभवति तस्यैवानुस्यूतस्य समवायित्वं युक्तमित्यर्थः । एकस्मिन् समवायिनीति वार्थः । नन्वनेकसमवायिकल्पनस्यान्याय्यत्वे मृत्तन्त्वादेरपि समवायित्वं न स्यात् । तथाच प्रत्यक्षविरोध इत्यत आहुः लोक इत्यादि । तथाच यथा लोके कुलालादीनां चतुर्मुखान्तानां कर्तृत्वेऽपि तत्तन्मते प्रकृतेरीश्वरस्य च सर्वनियामकत्वान्न कर्तृत्वं हीयते एवं लोके तन्त्वादीनां परमाण्वन्तानां प्रकृत्यन्तानां वोपादानत्वेन ग्रहणेऽप्यसन्मते ब्रह्मणो मूलकारणत्वान्न समवायित्वहानिरित्यर्थः । ननु शुक्तिरजतादौ स्वाप्निकेषु चास्तित्वं प्रतीयत इति तेषु सदन्वयो वक्तव्यस्तथा सति तस्यापि ब्रह्मकार्यत्वे जगत्तुल्यतया सत्यत्वं स्यात् । तत्तु विशेषदर्शनबाधितत्वादशक्यवचनम् । ततश्च न तस्य ब्रह्मकार्यत्वमपि । अतोऽकार्येऽपि सदन्वयान्न तेन ब्रह्मणः समवायित्वसिद्धिरित्यत आहुः अलीकेत्यादि । तथाचान्वयस्य न गमकत्वमपि तु समन्वयस्य । समन्वयस्त्वनारोपितानागन्तुकरूपेणान्वयः । अलीकप्रतीतरजतादौ तु सत्ता आरोपितेति सत आरोपितरूपेणान्वयान्न तस्य ब्रह्मकार्यतागमकत्वम् । तस्यैवाभावाच्च न ब्रह्मणोऽपि समवायित्वव्यभिचार इत्यर्थः । सिद्धमाहुः तस्मादित्यादि । नामरूपयोः कर्मणः सुखदुःखमोहानां चागन्तुकत्वेन, परमाण्वादीनां चासाधारणत्वेन, कालादेस्तथात्वे विप्रतिपन्नत्वेन, अलीकप्रतीतेः सत्त्वस्यारोपितत्वेन तेषामन्वयस्यासम्यक्तया प्रकटाप्रकटानां वास्तविकानां सच्चिदानन्दानामेव समन्वयाद् ब्रह्मण एव समवायित्वं निश्चेयमि-

रश्मिः ।

तापि परमाणुद्व्यणुकयोश्च प्रमाणाभाव इति वदता त्रसरेणावेव विश्रान्त्यङ्गीकारेण संदिग्धानामित्यर्थः । यद्वा चकारान्न विशेष्यविशेषणभावोऽतो विप्रतिपन्नानां कालादीनाम् । विप्रतिपत्तिर्नैयायिकप्रसिद्धा । अनेकेषामिति परमाणुस्वभावकालादीनामित्यर्थः । प्रतिपत्तीत्यादि गौरवात्तथेत्यर्थः । कालादीनां तु किं कारणं ब्रह्म कुतोऽस्य जाता जीवाम इति कारणजिज्ञासायां 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति श्रुतावेव चिन्त्यत्वनिर्वचनादेव कारणत्वस्य निरासादिति । एकस्मिन्निति अत्र संभवतीत्यन्तेन एकस्मिन्ननुस्यूते संभवतीति भाष्यं विवृतम् । तस्यैवेत्यादिनानेककल्पनाया अन्याय्यत्वादिति भाष्यस्य फलितार्थकथनमिति बोध्यम् । तत्तन्मत इति सांख्यनैयायिकादिमत इत्यर्थः । समन्वयलक्षणस्यानारोपितपदकृत्यं वक्तुं हेतोर्व्यभिचारित्वं शङ्कामुखेनाहुः नन्वित्यादि । विशेषदर्शनेत्यादि दोषनिवृत्तौ नेदं रजतमिति नेमे स्वाप्निका इति च विशेषदर्शनेत्यर्थः । ततश्चेत्यादि सत्यत्वाभावाच्चेत्यर्थः । तेनेति व्यभिचरितेन समन्वयेन हेतुनेत्यर्थः । ब्रह्मण इत्यादि उभयपक्षेपीति बोध्यम् । आरोपितेति पूर्वमसत्त्वात्तथेत्यर्थः । तस्येति आरोपितरूपेणान्वयस्येत्यर्थः । ब्रह्मकार्यतेति अनुमानपक्षेणेदमुक्तम् । भाष्ये तु व्याख्यानपक्ष इति न गमकशब्दः । तेन ब्रह्मकार्यतासाधकत्वमित्यर्थः । न कार्यत्वव्यभिचाराविति भाष्यीयकार्यत्वशब्दं व्याकृत्य व्यभिचारशब्दं व्याकुर्वन्तिस्म तस्यैवेत्यादि । आरोपितरूपेणान्वयस्य शुक्तिरजतादिवदभावाच्चेत्यर्थः । व्यभिचारो हानिः । असाधारणत्वेनेति आकाशाद्यवृत्तित्वेन तथेत्यर्थः । तथात्व इति कारणत्व इत्यर्थः ।

एतत् सर्वं श्रुतिरेवाह । 'स आत्मानꣳ स्वयमकुरुत' इति । निमित्तत्वं तु स्पष्टमेव सर्ववादिसंमतम् ।

भाष्यप्रकाशः ।

इत्यर्थः । नन्वेवं वादिविसंमताग्रहे किं बीजमत आहुः एतदित्यादि । पूर्वाधिकरणोक्तं कर्तृत्वं शास्त्रप्रमाणकत्वम्, एतदधिकरणोक्तं समवायित्वं च कर्तृकर्मत्वबोधकविभक्तिभ्यामेकस्यैव श्रुतिर्वदतीत्येतदेव बीजमित्यर्थः । अन्यथा श्रुतानुपचारापत्तेः । एवंच, यत इत्यत्र हेतौ या पञ्चमी सा, 'जनिकर्तुः प्रकृतिः' इत्यत्र प्रकृतिपदेन समवायिरूपं कारणं परामृश्य विहितेति निमित्तवदुपादानमपि सैव वक्तीति वाचकशब्दश्रवणमप्रत्यूहम् । तथाचैवं विचारे ब्रह्मणः सर्वविधं कारणत्वं श्रुतिवाक्याभ्यां प्रमाणाभ्यां सिद्धम् । तत्र स्वस्यैव समवायित्वेन कर्तृदोषभूतमनाप्तकामत्वं, क्रियाज्ञानयोः सातिशयत्वं च वारितम् । कर्मणि आत्मपदेनाविकृतत्वबोधनाद् विकृतत्वं च वारितम् । तेन दोषरहिता ब्रह्मणः सर्वविधा कारणतेत्यनेनाधिकरणेन निर्णीतम् । समन्वयपदव्याख्यानेनात्र समवायस्वरूपमपि बोधितम् । अनारोपितानागन्तुकरूपेणानुवृत्तिरेव समवाय इति । इदमेव च तादात्म्यम् । आगन्तुकरूपेण भेदसहिष्णुत्वेऽप्यनागन्तुकरूपेणाभेदादिति । न तु

रश्मिः ।

कर्त्रित्यादि ताभ्यां विभक्तिभ्यामित्यर्थः । अन्यथेति पूर्वोक्तत्रयानङ्गीकार इत्यर्थः । उपचारेति । ञविति तच्छब्दे । कर्ता वाच्यः समवाय्यभिन्नकर्तरि लक्षणापत्तेरित्यर्थः । परामृश्येति प्रकृतिपदमुपादानमात्रपरमिति भाष्यकैय्यटमतमिति मनोरमायामुक्तत्वात् तथेत्यर्थः । निमित्तवदिति वृत्तिकृन्मते प्रकृतिपदस्य हेतुमात्रपरत्वादिति भावः । सैव वक्तीति 'जायमानस्य हेतुरपादानं स्यात्' इति वृत्तौ हेतुपदं भाष्यकैय्यटसंमत्या स्वभावेन चाभिन्ननिमित्तोपादानं वक्तीत्यर्थः । श्रुतीति यत इति विभक्तिरूपा विनियोक्त्री श्रुतिः 'यतो वा इमानि भूतानि' इति साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणरूपसमभिव्याहारात्मकं वाक्यं ताभ्यामित्यर्थः । समवाय इति न चानारोपितानागन्तुकरूपेण घटत्वादिना रूपादौ घटादीनामनुवृत्तेरभावात्समवायित्वं न स्यादिति शङ्क्यं, तादात्म्यस्वीकारात् । एतच्च द्वितीयस्य द्वितीयपादे स्फुटिष्यति समवायेत्यादिसूत्रे । आगन्तुकेत्यादि यथागन्तुकरूपेण घटत्वादिना मृदो भेदसहिष्णुत्वेपि अनागन्तुकरूपेण मृत्त्वेनाभेदात् । तथागन्तुकेन रूपेण रूपनामादिना ब्रह्मणो भेदसहिष्णुत्वेपि अनागन्तुकरूपेण सत्यत्वादिनाभेदादित्यर्थः । तथा च प्रत्ययः । मृद् घटो न, घटो मृत्, ब्रह्म जगन्न, अधिकत्वात्, जगद् ब्रह्मेति भेदस्यैच्छिकत्वान्न तयोर्विरोधः । नागेशभट्टोपीदं लक्षणं मञ्जूषायामनुमेने । शब्दार्थयोस्तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । अभेदसाध्यत्वाच्च न तयोर्विरोधः । तत्र भेदस्योद्भूतत्वविवक्षयार्थस्यायं वाचकः उञः प्रगृह्यं तस्य वाचकः प्रणव इत्यादौ षष्ठी । अभेदस्य तत्त्वविवक्षया तु प्रथमा 'वृद्धिरादैच्' 'ओमित्येकाक्षरं ब्रह्म' इत्यादिषु । अत एवार्थे शब्दधर्मत्वव्यवहारः । अत्यन्ताभेदेऽवप्लुतयोरिव तद्व्यवहाराभावात् । नात्यन्तभेदे सः ।

भाष्यप्रकाशः ।

वैशेषिकप्रतिपन्न इति न कोऽपि विरोधः । एतस्य संबन्धत्वमैच्छिकमेदोत्तरं द्विनिष्ठत्वे विशिष्टबुद्धिनियामकत्वाज्ज्ञेयम् ।

विज्ञानेन्द्रभिक्षुस्तु जन्मादिसूत्रे अधिष्ठानकारणमतिरिक्तमङ्गीकृत्य, यत्राविभक्तं येनोपष्टब्धं च सत् उपादानकारणं कार्याकारेण परिणमते तदधिष्ठानकारणम् । यथा सर्गादौ जलाविभक्ताः पार्थिवसूक्ष्मांशास्तन्मात्राख्या जलेनैवोपष्टम्भात् पृथिव्याकारेण परिणमन्त इत्यतो जलं पृथिव्या अधिष्ठानकारणमिति । अत्र प्रमाणं तु,

‘आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च’ ।

रश्मिः ।

घटे स्वधर्मत्वव्यवहाराभावादिति । न कोऽपीति समवायदूषकस्य ‘समवायाभ्युपगमाच्च साम्यादनवस्थितेः’ इति सूत्रस्यापि न विरोध इत्यर्थः । अत्र वदन्ति तादात्म्यं न संबन्धः किं तु नीलं घटमानयेत्यादौ विशेषणीभूतनीलादिपदोत्तरं विभक्त्यर्थकर्मत्वं तस्य नान्वयः क्वापि । विशेष्यपदोत्तरं विभक्तेः साधुत्वार्थं प्रयोगात् । अभेद एव वा विशेषणविभक्तेरर्थः । अयमेव तादात्म्यम् । अभेदस्य संसर्गमर्यादया भानं तु समासस्थल एव । लुप्तविभक्त्यनुसंधानाभावेपि शाब्दबुद्धेरानुभाविकत्वात् । न च विशेषणविभक्तेरभेदार्थकत्वं न संभवति, घटे नील इत्यादावप्यभेदान्वयबोधापत्तेः । धान्येन धनमस्येत्यादौ तृतीययाऽभेदबोधनात् । नाभेदप्रकारकबोधे विरुद्धविभक्तिराहित्यं प्रयोजकमिति शङ्क्यम् । द्वितीयादिनाभेदबोधने द्वितीयान्तविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजकताभ्युपगमादिति तदमञ्जुलम् । अभेदस्य संसर्गता नीलो घट इत्याद्यसमस्तस्थलेप्यविरुद्धा गौरवाभावात् । एवंचासमस्तस्थले विशेषणविभक्तेरभेदे शक्तिकल्पनमनुचितम् । ननु विशेषणविभक्तेरभेदे शक्तिभ्रमस्थलेऽभेदस्य संसर्गतावादिमतेऽभेदस्य प्रकारतावादिमते च नीलो घट इति वाक्यादभेदप्रकारकबोधः संभवति । एवं च द्वितीयादिनाऽभेदबोधने द्वितीयान्तविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वं यदभ्युपगतं तदभेदस्य संसर्गतया शक्त्या च बोधनद्वये हेतुरिति हेतुताद्वयकल्पने गौरवम्, अभेदस्य संसर्गतावादिनः इत्यादीति चेन्न । अभेदे शक्तिभ्रमस्थलेपि तत्संसर्गबोधस्यैवोपगमादभेदस्य संसर्गतावादिनेति तद्व्यक्तित्वावच्छिन्नभेदाभाव एव नीलत्वादिप्रकारेण भासमानानां तत्तद्व्यक्तीनां स्वस्मिन्संबन्धतया भासत इति भट्टगदाधरः । तदेतदाहुः एतस्य संबन्धत्वमिति । द्विनिष्ठत्व इत्यादि ब्रह्मजगन्निष्ठत्वे जगद् ब्रह्मेति । विशिष्टबुद्धिनियामकत्वाज्ज्ञेयमित्यर्थः । अत्रेयं लिपिर्बोध्या । तच्छोधितावरणभङ्गे तज्ज्ञानफलमिति दर्शनात्, तेन जकारञकारयोर्योगे ज्ञ इत्युच्चारणमात्रं न त्वस्य वर्णान्तरत्वमिति श्रुतं भवत्येवेति कथं नात्र तदिति कुचोद्यं निरस्तम् । अथवा मातृकाविद्यायां पञ्चाशद्वर्णा इति पक्षः । तत्र षोडश स्वराः पञ्चविंशतिः स्पर्शाः याद्योऽष्टौ क्षकारोन्तिमः । संयुक्ताक्षरत्वेपि पृथगुपादानं भिन्नश्रुत्या क्षकारस्याप्युपलक्षकमिति ज्ञकारचवर्गयोर्योगाभावाच्च श्रुत्यम् । शिक्षोक्तचतुःषष्टिपक्षत्रिषष्टिपक्षयोस्तु क्षज्ञयोर्भिन्नाक्षरत्वे न संदेहः । एवमेकपञ्चाशद्द्विपञ्चाशत्पक्षेपि बोध्यम् । एतच्च ‘पञ्चाशद्वर्णरूपश्च’ इति निबन्धे स्पष्टम् । अतोस्मिन्पक्षे मनोरमोक्तं श्रुत्वं भवत्येवेत्येवामञ्जुलमेवेति ध्येयम् । शुद्धस्यैव कारणत्वं कूटाकूटयोः कूटस्यैव प्राधान्यमिति वक्तुं विशेषतुं मतान्याहुः विज्ञान इति । तन्मात्रमेति कल्पकत्वा । जातेन भासकरूपेण । जन्मेति मायायोऽधिष्ठानकारणत्व इत्यर्थः ।

भाष्यप्रकाशः ।

‘एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी’ ॥

इति कैवल्योपनिषद्वाक्यम् ।

‘यस्य यत् कारणं प्रोक्तं तस्य साक्षान्महेश्वरः ।
अधिष्ठानतया स्थित्वा सदैवोपकरोति च’ ॥

इति पुराणान्तरवाक्यं च । एतादृशकारणत्वमेवाधिष्ठानकारणत्वमिति मूलकारणत्वमिति चोच्यते । ब्रह्मणश्च स्वाविभक्तप्रकृत्याद्युपष्टम्भकत्वं साक्षितामात्रेणेति जगत्कारणत्वेऽपि ब्रह्मणो न विकारित्वम् । न वा प्रकृतिपुरुषादिष्वतिप्रसङ्गः । सर्गात् पूर्वमन्येषां साक्षित्वासंभवात् । अत एवाविकारिचिन्मात्रत्वेऽपि ब्रह्मणो जगदुपादानत्वं, जगदभेदश्चोपपद्यते । विकारिकारणवदधिष्ठानकारणस्याप्युपादानत्वव्यवहारात् । कार्याविभागाधारत्वस्यैवोपादानसामान्यलक्षणत्वात् । अविभागश्चाधारतावत् स्वरूपसंबन्धविशेषोऽत्यन्तसंमिश्रणरूपो दुग्धजलाद्येकताप्रत्ययनियामकः । तत्र समवायसंबन्धेन यत्राविभागस्तद्धि विकारिकारणम् । यत्र कार्यस्य कारणाविभागेनाविभागस्तदधिष्ठानकारणम् । यथा जलं पृथिव्या इति । न हि जलस्य पृथिवी साक्षादेव विकारः । तन्मात्राणां भूतप्रकृतित्वश्रुतिस्मृतिविरोधात् । नच द्वयोरेवोपादानत्वम् । विजातीयानामनारम्भकत्वात् । एवमाकाशादीनां वाय्वाद्युपादानत्वमप्यधिष्ठानतयैव द्रष्टव्यम् । संभवत्यविरोधे सृष्टिप्रक्रियायां वैशेषिकसांख्ययोरुभयोरप्यत्र विरोधानौचित्यादिति । वैशेषिकादिभिरपीदृशं ब्रह्मणः कारणत्वमिष्यत एव । परंतु तैरिदमपि निमित्तकारणत्वमिति परिभाष्यते । अस्माभिस्तु समवाय्यसमवायिभ्यामुदासीनं निमित्तकारणेभ्यश्च विलक्षणतया चतुर्थमाधारकारणत्वमिति । ब्रह्मणश्च जगत्कर्तृत्वं स्वोपाधिमायौपाधिकम् । परिणामित्वरूपोपादानत्वं च प्रकृतितत्कार्याद्यौपाधिकमित्याह ।

तदसंगतम् । ‘आत्मैवेदमग्र आसीत्’ इत्यादिश्रुतिषु दृश्यमानस्य जगतः पूर्वमात्मरूपत्वादिबोधनेनेतराभावसिद्धावविभागाख्यस्य स्वरूपसंबन्धस्य तदानीं वक्तुमशक्यत्वेन लक्षणेऽव्याप्तेः । गार्गीब्राह्मणे भूतभव्यस्याकाशे आकाशस्य चाक्षरे ओतप्रोतत्वकथनेन तादृशत्वस्य च, ‘ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः’ इत्यादावुपादानतागमकत्वेन, आथर्वणानां गोपथब्राह्मणारम्भे ‘ब्रह्म ह वा इदमग्र आसीत् स्वयं त्वेकमेव तदैक्षत महद् वै यक्षं तदेकमेवास्मि

रश्मिः ।

अतिप्रसङ्ग इति अधिष्ठानकारणत्वस्येत्यर्थः । दुग्धजलादीति आदिशब्देनोदकसैन्धवखिल्यादिग्रहणम् । कार्येत्यादि सामान्यलक्षणं योजयते तत्रेत्यादि । यत्रेत्यादि च । जलं पृथिव्या इति अद्भ्यः पृथिवीति श्रुतेः । भूतेति । श्रुतिस्मृतिकैवल्योपनिषत्पुराणान्तररूपे पूर्वोक्ते । द्वयोरिति जलतन्मात्रयोरित्यर्थः । विजातीयेत्यादि । तथाच विजातीयजलस्य पृथिव्यनारम्भकत्वमिति भावः । वाय्वादीत्यादि ‘आकाशाद्वायुः । वायोरग्निः’ इत्यादिश्रुतावित्यर्थः । विरोधानौचित्यादिति परस्परं वैशेषिकसांख्ययोर्विरोधो बोध्यः । स्वोपाधिमायेति माया शुद्धसत्त्वप्रधाना । प्रकृतिः सत्त्वरजस्तमःसाम्यावस्था । इत्यादीति आदिशब्दार्थसङ्ग्राह्ये ग्रन्थः । दृश्यमानस्येति

भाष्यप्रकाशः ।

हन्ताहं मदेव मन्मात्रं द्वितीयं तदेव निर्मम' इति द्वितीयस्य ब्रह्ममात्रत्वभावनपूर्वकं सृष्टिकथनेन

'विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ।
यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम्' ॥

इति तृतीयस्कन्धे विश्वस्य ब्रह्मतन्मात्रत्वकथनेन च द्वितीयस्य विश्वस्य च साक्षादुपादेयत्वे ब्रह्मण उपादानत्वस्यादण्डवारितत्वाच्च । नचोक्तकैवल्यश्रुतिविरोधः । तस्या अवान्तरसृष्टिविषयकत्वात् । एवकाराग्रपदाद्यभावेन पुरत्रयलयलिङ्गेन च तथा निश्चयात् । नापि स्मार्तसदापदविरोधः । प्राथमिकसृष्ट्यनन्तरं तथात्वेऽप्यविरोधात् । उक्तश्रुताविवेहापि प्राथमिकसृष्ट्यारम्भकालगमकस्याभावात् । उक्तदृष्टान्तोऽप्यसंगतः । पृथिव्यादितन्मात्रस्यैव साक्षाज्जलादिजन्यत्वात् ।

'रसमात्राद् विकुर्वाणादम्भसो दैवनोदितात् ।
गन्धमात्रमभूत् तस्मात् पृथ्वी घ्राणस्तु गन्धगः' ॥

इत्यादितृतीयस्कन्धवाक्यैस्तथानिश्चयात् । विजातीयारम्भस्यात्रापि तादवस्थ्यात् । न च विजातीयानामनारम्भकत्वम् । तन्तुत्वपटत्वयोर्भेदेन तत्रैव विजातीयारम्भदर्शनात् । द्रव्यत्वादिना साजात्यस्य भवदनभिमतेऽपि सत्त्वात् । नच द्रव्यत्वव्याप्यजातिभिरेव साजात्यं विवक्षितमिति वाच्यम् । अप्रयोजकत्वाद् गोमयादिभ्यो वृश्चिकाद्युत्पत्तिदर्शनात् । चलत्यनिले भस्मानलेनापि यत्र महान् दावानलस्तत्रानलावयवानां स्वल्पत्वेन ततो महानलस्याशक्यवचनतयाऽनिलेनैव तदुत्पत्तेः सार्वजनीनत्वाच्च । 'यत्र क्वचन स्विद्यति शोचते वा पुरुषस्तेजस एव तदध्यापो जायन्ते' इत्यादिश्रुतिभिरपि तथा निश्चयाच्च । सांख्यवैशेषिकादीनां परस्परावि-

रश्मिः ।

णत्वं लेखकप्रमादात् । द्वितीयस्येति जगत इत्यर्थः । अदण्डेत्यादि दण्डो दुष्टगोरानयनेऽस्ति दोषात्तद्वदुपादानत्वेपि विकारित्वादिदोषावचनाच्चेति दण्डेन हेयत्वापत्त्या वारितं भवत्येव । 'वाचो धेनुमुपासीत' इति श्रुत्या शब्दात्मनो धेनुत्वेनोपासनमत्र ज्ञेयम् । क्लृप्तकारणभावेनैव निर्वाहेऽतिरिक्तकल्पनायां गौरवमिति चकारार्थः । अवान्तरेति 'तम (एवाग्र) आसीत्तमसा गूढमग्रे प्रकेतम्' इति श्रुत्यावान्तरेत्यादिः । 'आपमापामपः सर्वाः' इति श्रुतिवत् । पुरत्रयेत्यादि तमोधिष्ठातुस्त्रिपुरारेर्हि लिङ्गमिदमिति, अन्यथा लोकत्रयमित्युक्तं स्यात् । स्मार्तसदेत्यादि अधिष्ठानतया स्थित्यधिष्ठानकारणं तत्कृतस्य सर्वकालबोधकस्मार्तसदापदेत्यर्थः । तथात्व इति अधिष्ठानतया स्थित्वा सदोपकार इत्यर्थः । प्राथमिकेत्यादि अग्रपदादेरिवेत्यर्थः । विजातीयस्यानारम्भकतामुपगम्य जलस्य न साक्षाद्विकारः पृथिवीत्युक्तं तन्नेत्याहुः उक्तेत्यादि । यथा जलं पृथिव्या इत्युक्तदृष्टान्तः । विजातीयेत्यादि । अत्रापीति त्वयाप्यभ्युपगते गन्धरूपतन्मात्रस्य पृथिव्युपादानत्वेपीत्यर्थः । गन्धत्वपृथिवीत्वाभ्यां वैजात्यं बोध्यं पुराणे । नैयायिकः प्रत्यवतिष्ठते नचेत्यादि । तत्रैवेति प्रसिद्धयोस्तन्तुपटयोरेव । भवदित्यादि तन्तुपटयोः कार्यकारणभाव इत्यर्थः । तथाच तन्तुभ्यो घटोप्युत्पद्येतेति भावः । न च द्रव्यत्वेत्यादि पृथिवीत्वास्वादिभिरित्यर्थः । अप्रयोजकेति द्रव्यत्वव्याप्या जातिः पृथिवीत्वं तस्य तन्तुपटयोः सत्त्वेन विजातीयानारम्भासाधकत्वात् । हेतौ हेतुमाहुः गोमयेत्यादि । एतच गोमयस्यापृथ्वीत्वे । गोमयस्य पृथ्वीत्वाद्धेत्वन्तरमाहुः चलतीत्यादि । तथाच द्रव्यत्वव्याप्या जातिरनिलत्वं तेनानले साजात्याभावादप्रयोजकत्वादिति भावः । स्विद्यतीत्यादि स्वेदयुक्तो भवत्यम्बूनि मुञ्चतीत्यर्थः । तथेत्यादि द्रव्यत्वव्याप्यतेजस्त्वेनापां

भाष्यप्रकाशः।

शेषाग्रहस्य प्रकृतानुपयोगित्वेन तथायासस्यापार्थत्वाच्च। एवं ब्रह्मणो मायौपाधिकं कर्तृत्वं प्रकृतितत्कार्यौपाधिकं परिणाम्युपादानत्वमप्यवान्तरसृष्टिविषयकमेव। 'आनन्दरूपममृतं यद्विभाति,' 'सच्चिदानन्दरूपाय' इत्यादिश्रुतिभिः 'आनन्दमात्रकरपादमुखोदरादिः' इत्यादिस्मृतिभिश्च ब्रह्मण आनन्दाकारत्वे सिद्धे मूलरूपस्यौपाधिकत्वकल्पनाया असंगतत्वात्। नच विकारित्वादि शङ्क्यम्। तस्याग्रे तदनन्यत्वाधिकरणे परिहरणीयत्वात्। एवमन्यदपि यद्यद् विरुद्धमविरुद्धं वा तत्सर्वं प्रसङ्गे व्यवस्थापयिष्यामः।

भट्टभास्कराचार्यास्तु ब्रह्मण एवोपादानत्वमङ्गीकृत्य कार्यस्य जगतः कारणाद् भेदाभेदौ प्रतीत्या व्यवस्थापयन्ति। तथाह्याहुः—

'एकस्यैकत्वमस्तीति प्रमाणादवगम्यते।
नानात्वं तस्य तत्पूर्वं कस्माद् भेदोऽपि नेष्यते॥
यत्प्रमाणैः परिच्छिन्नमविरुद्धं हि तत् तथा।
वस्तुजातं गवाश्वादि भिन्नाभिन्नं प्रतीयते'॥

नह्यभिन्नं भिन्नमेव वा क्वचिद् दर्शयितुं शक्यते। सत्ताज्ञेयत्वद्रव्यत्वादिसामान्यात्मना सर्वमभिन्नं, व्यक्त्यात्मना तु परस्परवैलक्षण्याद् भिन्नम्। तथाहि—

'प्रतीयते चेदुभयं विरोधः कोऽयमुच्यते।
विरोधे चाविरोधे च प्रमाणं कारणं मतम्॥
एकरूपं प्रतीतत्वाद् द्विरूपं तत् तथेष्यताम्।
एकरूपं भवेदेकमिति नेश्वरभाषितम्'॥

रश्मिः।

सात्म्याभावेऽप्युपादानत्वबोधनेनाप्रयोजकत्वनिश्चयादित्यर्थः। तथेति अविरोधप्रकारस्येत्यर्थः। अवान्तरेति 'माया च तमोरूपा' इति नृसिंहतापनीयात्। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरित्युभयमपि तमसः सृष्टिरवान्तरसृष्टिस्तद्विषयकम्। व्यवस्था सर्वसंमतेत्येवकारः। अग्र इति द्वितीयाध्याय इत्यर्थः। प्रमाणादिति चक्षूरूपादित्यर्थः। तत्पूर्वमिति एकत्वपुरःसरमतो हेतोस्तथेत्यर्थः। एकैव मृद्नानाघटाद्याकारेण भवतीति निदर्शनमत्र बोध्यम्। यत्प्रमाणैरिति प्रमाणैश्चक्षुरादिभिर्यद्वस्तु परिच्छिन्नं यद्विशिष्टं निश्चितं यथैकस्मिन् घटे द्रव्यत्वपृथ्वीत्वघटत्वादयः रूपरसपरिमाणादयश्च प्रमाणनिश्चिता इति तद्विशिष्टं घटरूपं वस्तु तत्तथैवाविरुद्धम्। निश्चितोयमर्थ इति हिशब्दार्थः। तथैव गवाश्वादिवस्तुजातं वक्ष्यमाणरीत्या भिन्नाभिन्नं प्रतीयतेऽतो भिन्नत्वाऽभिन्नत्वावच्छिन्नमेव वस्तुजातमविरुद्धमित्यर्थः। उपपादयन्ति नहीत्यादि। एवेति अयमभिन्नमित्यत्रापि। सर्वमिति अन्ये सत्तादिकं सर्वत्र मन्यन्ते। परस्परेत्यादि परस्परं घटपटाद्याकारवैलक्षण्यादित्यर्थः। एवं भेदाभेदयोरविरोधमुक्त्वा प्रकृते योजयन्ति तथाहीत्यादि। तत्तथेष्यतामिति तद्ब्रह्म यथाप्रतीतत्वात् श्रुत्यैकरूपं तथा चक्षुषा प्रतीतत्वाद् द्विरूपमप्यनिष्पक्षतेष्यतामित्यर्थः। ननु एवं सति 'एकमेवाद्वितीयं ब्रह्म' इतीश्वरभाषणविरोध इति चेत्तत्राहुः एकरूपमित्यादि। एवं एक-

भाष्यप्रकाशः ।

ननु शीतोष्णयोर्यथा परस्परं विरोधस्तथा भेदाभेदयोः, किमिदमुच्यते नास्ति विरोध इति । अत्रोच्यते । भवतः प्रज्ञापराधोऽयं, न वस्तुविरोधः । कथम् । सहानवस्थानं, छायातपवद्भिन्नदेशवर्तित्वं वा शीतोष्णवद्विरोधो नाम । एतदुभयमिह कार्यकारणयोर्ब्रह्मप्रपञ्चयोर्नास्ति । तत्र उत्पत्तेस्तत्रैवावस्थितेस्तत्रैव प्रलयात् । विरोधे हि त्रयमेतन्नोपपद्यते । नहि कृशानुनाङ्कुरोत्पत्त्यादिलक्षणः संबन्धो दृश्यते । कारणेन हि मृत्सुवर्णादिना कार्यं सर्वदानुस्यूतं दृश्यते । तत्राक्षिणी निमील्य परस्परासंगतिलक्षणो विरोधो वैयात्याद् वक्तव्यो भवेत्, प्राथमिकश्रोत्रियश्रोत्रप्रतारणार्थं वा । शीतोष्णयोर्भिन्नाधारवर्तिनोर्न कदाचिदुत्पाद्योत्पादकलक्षणः संबन्धो, नाधाराधेयलक्षण इति युक्तस्तयोः परस्परविरोधः । तस्माच्छीतोष्णवदित्ययुक्तं दृष्टान्ताभिधानम् । अत्र प्रागल्भ्यात् कश्चिदाह । यथा संशयज्ञानं स्थाणुर्वा पुरुषो वेत्यप्रमाणं, तथा भेदाभेदज्ञानमिति । तदसत् ।

'परस्परोपमर्देन न कदाचित् सह स्थितिः ।
प्रमेयानिश्चयाच्चैव संशयस्याप्रमाणता' ॥

अत्र पुनः कारणं पूर्वसिद्धं मृत्सुवर्णादिलक्षणम् । ततः कार्यं पश्चाज्जायमानं तदाश्रितमेव जायते । कारणसमानार्थतया हि कार्यबुद्धिः । न कारणस्वरूपोपमर्देन देशतः कालतो वा

रश्मिः ।

रूपमेव भवेदितीश्वरभाषितं न किंतु एकोहं बहु स्यामिति एकं बहुरूपं भवेदितीश्वरभाषितमित्यर्थः । यद्वा । गोपालतापिनीये कथं चतुर्भिरेको देवो भवेदिति प्रश्ने एकमेवाद्वितीयं ब्रह्मेत्युत्तरात्तथा । कृशानुनेति निमित्तकारणेन वह्निनेत्यर्थः । कारणेनेति समवायिनेत्यर्थः । दृश्यत इति तथा च न जगतो ब्रह्मणा सहानवस्थानं नापि भिन्नदेशवर्तित्वमित्यर्थः । तत्राक्षिणी इत्यादि उभयविधलक्षणासंभवे सति भवज्ज्ञानशक्तिं तिरोभाव्येत्यर्थः । वैयात्यादिति गत्यन्तरविरहात्तद्विरुद्धं तदसंगतमिति दर्शनाच्चेत्यर्थः । एतदपि ब्रह्मजगतोर्गवाश्वादेश्च नास्तीति तत्प्रयोजनमाहुः प्राथमिकेत्यादि । साङ्गोपाङ्गवेदमात्रेण वेदार्थमवगच्छन्तः पूर्वकालीनशिष्टानुयायिनः छन्दोध्येतारः श्रोत्रियास्तेषां श्रोत्राणि भेदाभेदबोधकशब्दानेव गृहीतवन्तीति तेषामुक्तरीत्याऽसंगतिलक्षणविरोधप्रदर्शनेन दुर्बुद्ध्युत्पादनार्थमित्यर्थः । वक्तव्य इत्यादि पूर्वेणान्वेति । उत्पाद्येति ब्रह्म जगद्वदित्वादिः । तस्मादिति विरोधलक्षणाभावेपि विरुद्धत्वादित्यर्थः । प्रागल्भ्यादिति प्रतिभातिशयादित्यर्थः । धार्ष्ट्याद्वा । गल्भ धार्ष्ट्ये इति । अप्रमाणमिति भावे ल्युट्, अप्रमेत्यर्थः । अत्र भेदाभेदवादी किंचिदाह तदसदिति । अत्रापि विषमो दृष्टान्त इत्याशयेनाहुः परस्परेत्यादि । स्थाणुत्वपुरुषत्वादीनां तमसत्वेन तथेत्यर्थः । तथा प्रमेयानिश्चायकत्वात्संशयस्याप्रमात्वं चेत्यर्थे भावे ल्युट् । विषमत्वमुपपादयन्ति अत्र पुनरित्यादि । तदाश्रितमिति कारणसमवेतमित्यर्थः । दृष्टान्ते तु स्थाणुत्वपुरुषत्वयोर्न कदाचित्सहस्थितिरित्यर्थः । एतद्विषयकं ज्ञानमपि प्रमात्मकमित्याहुः कारणेत्यादि । कारणं पूर्वसमानः कृत्स्नेनार्थो विषयत्वेन यस्यां तथा हि घटो मृदिति बुद्धिः कार्यबुद्धिः । तेषामपि एकैव घटे न मृत् कस्मिन्काले घटो न मृदिति च न पृथग्भूतं कार्यं

भाष्यप्रकाशः ।

पृथग्भूतं कार्यं दृश्यते । तस्मान्न किंचिदेतत् । तदयं संग्रहश्लोकः—

‘कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा’ ॥ इति ।

अत्र वाचस्पतिमिश्रा उक्तां कारिकामुपन्यस्याहुः—कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत् । परस्पराभाव इति चेत् किमयं कार्यकारणयोः कटकहाटकयोरस्ति न वा । न चेत् एकत्वमेव वास्तवं न भेदः । अस्ति चेत् भेद एव, नाभेदः । न च भावाभावयोरविरोधः । सहासंभवात् । संभवे वा कटकवर्धमानकयोरपि तत्त्वेनाऽभेदप्रसङ्गः । भेदस्याभेदाविरोधात् । अपि च । कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्ते, एवं कटकात्मना न भिद्येरन् । कटकस्य हाटकादभेदात् । तथाच हाटकत्वमेव वस्तु सन्न कटकादयोऽभेदस्याप्रतिभासनात् । अथ हाटकत्वेनैवाभेदो, न कटकत्वेन । तेन तु भेद एव कुण्डलादेः । यदि हाटकादभिन्नः कटकः, कथमयं कुण्डलादिषु नानुवर्तते । नानुवर्तते चेत् कथं हाटकादभिन्नः । ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव । यथा सूत्रात् कुसुमभेदाः । नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः । तस्मात् तेऽपि हाटकाद्भिन्ना एवेति । सहानुवृत्त्या च सर्ववस्त्वनुगमे, इदमिह नेदमस्मादिदमिदमिदानीं नेदमिदमेवं नेदमेवमिति विभागो न स्यात् । कस्यचित् क्वचित् कदाचित् कथंचित् विवेकहेतोरभावात् ।

रश्मिः ।

दृश्यत इत्यर्थः । तस्मादिति कार्यस्य कारणाश्रितत्वेन तज्ज्ञानस्य यथार्थत्वेन च दृष्टान्तस्य विरुद्धत्वादित्यर्थः । तदयमिति तदित्यव्ययं हेत्वर्थकम् । नानात्वमिति भेद इत्यर्थः । तस्य नानात्वनिबन्धनत्वात् । अभेद इति कुण्डलं सुवर्णमिति सामानाधिकरण्यप्रतीतेरभेद इत्यर्थः । भिदेति सुवर्णं कुण्डलं नेति प्रतीतेर्भिदेत्यर्थः । न चेदिति कटकसुवर्णयोरन्योन्याभावो यदि न तर्हि एकस्मिन् घटे स्वभेदाभाववति एकत्वमिवैकत्वमेव । तथा कटकं सुवर्णमिति प्रतीतेः सुवर्णं कटकं नेति प्रतीतिसत्त्वेपि न भेद इत्यर्थः । नाभेद इति अन्योन्याभाववतोर्घटपटयोरिव नाभेद इत्यर्थः । संभव इति घटतदत्यन्ताभावयोरिव संबन्धाभावदशायां भेदतदभावयोः संभवे वा कटकशरावयोः परस्पराभाववतोरपि कटकत्ववर्धमानकत्वरूपेण तथेत्यर्थः । ननु तथाप्रतीत्यभावान्नाभेद इति चेत्तत्र दूषणान्तरमाहुः अपि चेत्यादि । भेदस्येति हाटको न कटक इति भेदेऽस्यात्यन्ताभावरूपस्य भेदाभावस्याभेदस्याप्रतिभासमानत्वात् । अयं, न कटकादय इत्यत्र हेतुः । यद्वा कटकं हाटकमिति प्रतीत्याभेदस्याप्रतिभासनादित्यर्थः । कुण्डलादेरिति । इति विभाव्यते तदा इति शेषः । अयमिति कटक इत्यर्थः । ननु कटकत्वं हाटकत्वं न व्यभिचरतीति कथं भिन्ना इति चेत्तत्राहुः सहानुवृत्त्येत्यादि । अनुगम इति । सर्वत्रेति शेषः । इदमित्यादि इह क्षीरं इदं दधि नेदं तैलमिति संसर्गतदभावव्यवस्था न स्यात् । तथा कुड्यादिदं पटादिकं भिद्यते इदं कुड्यमस्मात्कुड्यान्न भिद्यते इत्यसंकरो न स्यात् । एवमिदं कोकिलरुतमिदानीं वसन्तसमयेस्ति, इदमम्बुदध्वानं नेति व्यवस्था न स्यात्, तथेदं पटादि एवं कम्बुग्रीवत्वादिप्रकारकं इदं पटादिकं एवं नेति प्रकारासंकरो न स्यादित्यर्थः । उक्तासव्यवस्थायां हेतुमाहुः कस्यचिदित्यादि । कुतश्चिदपीति ध्येयम् । अभावादिति सर्वस्यैव भिन्नाभिन्नत्वेन

भाष्यप्रकाशः ।

अपि च । दूरात् कनकमित्यवगते, न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन् । कनकादभेदात् तेषाम् । तस्य च ज्ञातत्वात् । अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽपि अज्ञातास्ते । नन्वभेदोऽप्यस्तीति, किं न ज्ञाताः । प्रत्युत ज्ञानमेव तेषां युक्तम् । कारणाभावे हि कार्याभाव औत्सर्गिकः । स च कारणसत्तयाऽपोद्यते । अस्ति चाभेदे कारणसत्तेति । कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः । तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत् ततो भिद्यते । यथा करभे गृह्यमाणे अगृह्यमाणो रासभः करभात् । गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः । तस्मात् ते हेम्नो भिद्यन्ते । कथं तर्हि हेम कुण्डलमिति सामानाधिकरण्यमिति चेत् । नह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम् । अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम् । न खल्वभेद ऐकान्तिकेऽनैकान्तिके चैतदुभयमुपपद्यते यत इत्युक्तम् । तस्माद् भेदा-

रश्मिः ।

तथेत्यर्थः । तस्येति हाटकस्येत्यर्थः । तस्य चेति कनकस्य चेत्यर्थः । तेषामिति कुण्डलादीनामित्यर्थः । एवं युक्त्या भेदापवादेनाभेदं व्यवस्थाप्य श्रुत्यापि भेदं कारणत्वेन निराकुर्वन्तिस्म अभेदो हि वास्तवो भेदोऽनिर्वचनीय इति । अथेत्यादि । कारणाभाव इति कारणं हि 'अथात आदेशो नेति नेति' इति श्रुत्या मूर्तामूर्तापोदितं ब्रह्म तदद्वैतमभावः, तस्मिन् हि सति कार्यभेदो मायामात्रं तद्रूपोऽभावः । स चेति कार्याभाव इत्यर्थः । अपोद्यत इति उक्तश्रुत्यापोद्यते । अस्ति चेति अभेदेऽद्वैते सति । एवं कनकाभेदे कटकादिकारणे सत्तोन्नेया । ज्ञाता एवेति एवकारस्तु एकविज्ञानेन सर्वविज्ञानश्रुत्यनुरोधात् । तज्जिज्ञासेत्यादि तेषां कुण्डलादीनां जिज्ञासा ज्ञानानि चेत्यर्थः । कार्यकारणयोरभेदाभावं सप्रमाणमुपसंहरन्ति तेनेत्यादि । अपोह्य कार्ये भेदं दर्शयन्ति स्म यथेति । कारणेपि भेदं दर्शयितुं दृष्टान्तेपि भेदं दर्शयन्ति स्म गृह्यमाण इति । दूरत इति समीपतस्तु शास्त्रदृष्टिकैर्गृह्यन्त इत्यभेदवादाज्ञोक्तं सूचितं परम् । कुण्डलहाटकयोर्भेदाभेदावेव वाच्यौ सामानाधिकरण्यानुरोधात्, न ह्यत्यन्तभेदे तदस्ति, कुण्डलकटकयोरदर्शनात्, अत्यन्ताभेदेपि न हेमहेमेत्यनुपलम्भादिति । भास्कराचार्योक्तमनुवदन्ति कथं तर्हीत्यारभ्य–इत्युक्तमित्यन्तेन । ननु न हेम कुण्डलमिति प्रतीतिरत आहुः सामानेत्यादि । भिन्नप्रवृत्तिनिमित्तत्वे सति एकार्थबोधकत्वं सामानाधिकरण्यं, तथा च नेयं प्रतीतिः किं तु सामानाधिकरण्योक्तिरिति भावः । यद्वा सामानाधिकरण्यमेकदेशवृत्तित्वम् । नहीति हेमकुण्डलयोर्नाधाराधेयभावः, ब्रह्मजगतोस्तु वर्तते इति दृष्टान्तवैषम्यम्, घटकपालयोस्तु वर्तते आधाराधेयभावः स न दृष्टान्तः । शीतोष्णयोर्भिन्नाधारवर्तित्वेन समानाश्रयत्वं नास्ति ब्रह्मजगतोस्तु वर्तते 'स आत्मा स्वाश्रयाश्रयः' इति वाक्यादित्याहुः समानाश्रयत्व इति । उक्तं उक्तप्रायम् । यदि हेम्नः सकाशात् कुण्डलादीनां भेदाभेदौ स्यातां तर्हि तेषामनुवृत्तहेम्नः सकाशादभेदादितरेतरव्यावृत्तिर्न स्यान्न स्याच्च हेम्नि निर्णीते संशय इति प्रतितर्केण मिथोविरोधाख्येन सामानाधिकरण्यानुपपत्तिरूपं तर्कं वितण्डया दूषयन्ति अथानुवृत्तीत्यादि । इदमिह नेदमित्यादिनोक्तेत्यर्थः । नन्वत्यन्ताभेदे मा भूदनुवृत्तिव्यावृत्तिव्यवस्था मा भूच्च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा भेदाभेदमते ते किं न स्यातामित्याशङ्क्य पूर्वोक्तमविनिगममुत्सर्गापवादं च स्मारयन्ति न खल्वित्यादि । ऐकान्तिक इति भेदाभाववद्वृत्तिनि अभेदे तदभाववर्तिनि चानुवृत्तिव्यावृत्तिव्यवस्था कुण्डलादिजिज्ञासा चेत्येतदुभयमित्यर्थः । स्वमतेन सामानाधिकरण्यमुपपादयन्ति तस्मादित्यादि

भाष्यप्रकाशः ।

भेदयोरन्यतरस्मिन्नहेये । अभेदोपादानैव भेदकल्पना, न भेदोपादाना अभेदकल्पनेति युक्तम् । भिद्यमानतन्त्रत्वाद् भेदस्य, भिद्यमानानां च प्रत्येकमेकत्वात् । एकाभावे नानाश्रयस्य भेदस्यायोगात् । एकस्य च भेदानधीनत्वात् । नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वादेकत्वग्रहस्य चान्यानपेक्षत्वादभेदोपादानैवानिर्वचनीयकल्पनेति सांप्रतम् । तथा च श्रुतिः, 'मृत्तिकेत्येव सत्यम्' इति । तस्मात् कूटस्थनित्यतैव पारमार्थिकी, न परिणामिनित्यतेति सिद्धमिति । तदनवधानविजृम्भितमेव । उक्ते मते भेदाभेदयोर्नानात्वैकत्वरूपतया भेदस्यान्योन्याभावरूपत्वानङ्गीकारेण तदादाय तन्मतदूषणस्य गगनकुसुमसौरभ्यकल्पत्वात् । परस्पराभावरूपत्वेऽपि घटतदत्यन्ताभावयोर्घटतद्भेदयोश्च भूतल एव सहावस्थानदर्शनेन भेदस्य तदभावेनाभेदेन सह न विरोधः । अत्यन्ताभावस्य नित्यव्यापकत्वेन सर्वत्र सत्त्वात् । प्रतियोग्यानयनोत्तरं तदभावबुद्धिप्रतिबन्धमात्रपरम् । एवं सति यत्र भेदस्तत्राप्यभेदो वर्तत एवेति तयोः सहासंभवाद्विरोधकथनस्यापि तथात्वम् । एवं, संभवे वेत्यादिना कटकवर्धमानकयोरभेदप्रसञ्जनस्यापि तथात्वम् । अविरोधस्यैक्यापादकतायाः क्वाप्यदृष्टत्वात् । यदपि, कटकस्य हाटकादित्यादिना कटकादीनां हाटकाद् भेदव्युत्पादनं, तदपि तथा । तेषां तदवस्थारूपत्वात् । अवस्थानां चावस्थावतः सकाशतो भिन्नाभिन्नत्वात् । पद्मपद्यां समुद्रतरङ्गयोस्तथात्वस्य

रश्मिः ।

उभयप्रत्ययादित्यर्थः । अहेय इति तेनाभेदस्थापनेऽभिप्रायो न तु भेदखण्डने इति द्योतितम् । विरोधादन्यतरबाधेऽप्यभेदो बाध्य इति सौगतमतमाशङ्क्याहुः अभेदेत्यादि । नानाश्रयस्येति नानानिमित्तप्रयुक्तत्वेन तथेत्यर्थः । यथा घटः पटो न, कुड्यं पटो न, कुसूलं पटो नेत्यादि । अयोगादिति तथाचैक्यरूपाभेदतन्त्रत्वाद्भेदस्य न भेदोपादानाऽभेदकल्पनेत्यर्थः । एकस्य चेति भिद्यमानस्येत्यर्थः । भिद्यमानतन्त्रत्वं स्पष्टयन्ति नायमित्यादि । अयं घटः नायं पटो नेत्यर्थः । अनिर्वचनीयेति अध्यस्तभेदकल्पनेत्यर्थः । सांप्रतमिति युज्यत इत्यर्थः । सत्यमिति वाचारम्भणं घटादिर्विकार इति भावः । कूटस्थेति ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिरर्थविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते इति सर्वोपनिषदुक्तकूटस्थनित्यता । परिणामीति प्रकृतिपरिणामिनित्यतेति । सिद्धान्ते अद्वैतेपि व्यासपादसंगृहीतैकदेशिमते अनुकूलमिदमिति । पूर्वतन्त्रे षष्ठस्य तृतीयपादे द्रव्यकर्मणोस्तादात्म्यं भेदाभेदावङ्गीकृत्य वर्णिताविति स्वयमङ्गीकाराच्च । मतान्तरं समर्थयन्ति तदनवेत्यादि । तदिति वाचस्पत्युक्तम् । अन्योन्येति ऐच्छिकमपि नानात्वमन्योन्याभावजन्यमित्युपलक्षणायै उक्तम् । तदादायेति भेदस्यान्योन्याभावरूपत्वमादायेत्यर्थः । भूतल इति घटवद्भूतलं घटो नेति प्रतीतेस्तथेत्यर्थः । तस्येति घटस्येत्यर्थः । अभेदेनेति पाठे तु भेदात्यन्ताभावेन सह तस्य भेदस्य न विरोध इत्यर्थः । अत्र हेतुं वक्तुमत्यन्ताभावेन सह प्रतियोगिनः स्थितिमाहुः अत्यन्तेत्यादि । तथा च सति घटे घटो नास्तीति प्रतीत्यापत्तिः किं न स्यात्तत्राहुः प्रतियोगीत्यादि । तदभावेत्यादि । तद्वत्ताज्ञानस्य तदभाववत्ताज्ञानं प्रति प्रतिबन्धकत्वात् प्रतियोग्यत्यन्ताभावेत्यर्थः । एवं सतीति अत्यन्ताभावस्य नित्यव्यापकत्वे सतीत्यर्थः । अभेद इति भेदात्यन्ताभावरूपः । तथात्वमिति गगनकुसुमसौरभ्यकल्पत्वमित्यर्थः । क्वापीति तथा सति घटत्वद्रव्यत्वादीनामभेदापत्तिरिति भावः । तथात्वस्येति भेदाभेदस्येत्यर्थः ।

---

१. भूमिरापोऽनलोवायुरित्यादि । २. व्यातता ।

भाष्यप्रकाशः ।

शंकराचार्यैरेवोक्तत्वात् । अतः परं सहानुवृत्त्यादिनोक्तो दूषणत्वेन प्रतीतिविरोधो वक्तव्यः । स चेद् विद्यमानेऽपि कुण्डलादिना भेदे कनकत्वेनाभेदः प्रतीयते तदा न प्रतीतिविरोधोऽपि । प्रमाणेनाधिगमात् । प्रमिते च तस्मिन्, दूरात् कनकमित्यादिनोक्तानां विकल्पानामनवसरपराहतत्वादिति प्रतीयते चेदुभयमितिकारिकयैवोक्तं व्युत्पादितं च । अतो मुकुटकटकादीनामवस्थात्वेन हेमसामानाधिकरण्यस्य सामयिकत्वेन च व्यावृत्तिव्यवस्थाजिज्ञासाजनकत्वयोरुपपत्तेर्भेदस्यागन्तुकत्वमेव, न त्वनिर्वचनीयत्वम् । नच श्रुतिविरोधः । उक्तश्रुतौ परिणामिनो मृदादीनेव दृष्टान्तीकृत्य, एवꣳ सौम्य स आदेशो भवतीति दार्ष्टान्तिकेऽतिदेशेन परिणामिनित्यताया एव श्रुत्यभिप्रेतत्वात् । नचात्र कारणे सत्यत्वस्य कार्ये वाचारम्भणत्वस्य चोक्तत्वेन कार्यमिथ्यात्वसिद्धौ कूटस्थनित्यत्वमेव सेत्स्यतीति वाच्यम् । घटः पट इत्यादिवाचारम्भणरूपस्य विकारस्यैव नामधेयत्वाभिधानेन नामधेयस्य विकारत्वविधानेन वा स्वरूपमिथ्यात्वस्य श्रुत्यनभिप्रेतत्वात् । यदि कार्यस्वरूपस्यापि वाङ्मात्रतामभिप्रेयात्, वाचारम्भणं नामधेयमिति पदद्वयं न ब्रूयात् । एकेनैव चारितार्थ्यात् । इदं यथा तथा तदनन्यत्वाधिकरणे प्रपञ्चयिष्यते । सिद्धान्ते यो विशेषः सोऽपि तत्रैव व्युत्पादयिष्यते । तस्मादस्मिन्नंशे भास्कराचार्यमतमदुष्टमेव ।

रामानुजाचार्यास्तु, 'अस्मान्मायी सृजते विश्वमेतत् । तस्मिंश्चान्यो मायया संनिरुद्धः' ।

रश्मिः ।

'सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः' ॥

इत्यनेनेत्यर्थः । तेन कार्यसमवायिनोरेव भेदाभेदावङ्गीकृतौ इति यथा करभे गृह्यमाणे इत्यादिदृष्टान्तासंगतिरपि द्रष्टव्या । प्रतीतिविरोध इति । इदमिहेत्यादि विभागाभावात्तादृशप्रतीतिविरोध इत्यर्थः । तस्मिन्निति भिन्नाभिन्नत्व इत्यर्थः । तथा च प्रत्यक्षतस्तर्कस्य नैर्बल्यात् प्रतीत्यनुरोधेन भेदाभेदावेवास्थेयावित्यर्थः । व्यावृत्तीत्यादि हेम्नि गृह्यमाणेपि कुण्डलाद्यग्रहणात्कुण्डलादिव्यावृत्तिर्यासां न भेदनिबन्धना, अपि तु मुकुटादीनामवस्थात्वेन हेम्नस्तदवस्थाभावनिबन्धना सामानाधिकरण्यस्य कार्यतासमयजन्यत्वेन तदानीं सामानाधिकरण्याभावाच्च तन्निबन्धना च । एवं कुण्डलादिविशेषजिज्ञासापि न भेदनिबन्धना एवं तयोरुपपत्तेरित्यर्थः । न त्वनिर्वचनीयत्वमिति दृष्टान्ताभावान्मानाभावात्खण्डितत्वाच्चेत्यर्थः । यदप्यभेदोपादानेनैवेत्यादिनाऽभेदस्य भेदानधीनत्वं भेदस्य चाभेदाधीनत्वमित्युक्तं तदपि न मञ्जुलम् । अभेदस्य भेदाभावरूपत्वेन भेदरूपप्रतियोगिसापेक्षत्वादित्यपि ध्येयम् । स्वरूपेत्यादि घटादिस्वरूपेत्यर्थः । तथा च घटः पट इत्यादिनामधेयमेव मिथ्या न तु कम्बुग्रीवाद्याकारोपीति भावः । एवेति पूर्वतन्त्रे षष्ठस्य तृतीयपादे द्रव्यकर्मणोस्तादात्म्यं भेदाभेदावङ्गीकृत्य वर्णितौ वैयाकरणानामपि तौ संमतावित्येवकारः । प्रकृते तु भेदाभेदौ पूर्वतन्त्र एव विधेः प्रेरकत्ववत् न तूत्तरतन्त्रे 'प्रवर्तकत्वं कृष्णस्य न विध्यर्थस्य कर्हिचित्' इतिवाक्यात्तद्वदभेदः । अस्मानित्यादि नक्षत्राणामुदयो यतो भवत्यस्मात्प्रत्यक्षात् । अस्मानित्यादि शसन्तं पदं वा, अन्यः संनिरुद्ध इत्युक्तसंनिरोधार्थम् । अन्य इति अस्मत्पदार्थो जीवः । संनिरुद्धः 'अपश्यत् पुरुषं पूर्णं मायां च तदपाश्रयाम् । यया संमोहितो जीवः' इतिवाक्यान्मुग्धः । श्वेताश्वतरस्य चतुर्थाध्यायस्य

भाष्यप्रकाशः।

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'इत्यादिश्रुतिष्वचिद्वस्तुचिद्वस्त्वीश्वराणां यथायथं भोग्यत्वभोक्तृत्वनियन्तृत्वैः स्वरूपविवेकात् त्रयोऽपि भिन्नाः। तथा, 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः' इत्यारभ्याऽऽपोऽग्निरन्तरिक्षं वायुर्द्यौरादित्यो दिशश्चन्द्रतारकमाकाशस्तमस्तेजः सर्वाणि भूतानि प्राणा वाक् चक्षुः श्रोत्रं मनस्त्वग् विज्ञानं रेत इत्येतानि काण्वपाठेन, विज्ञानस्थाने, आत्मा लोकयज्ञवेदाश्चाधिका माध्यन्दिनपाठेन, वाजसनेयके बृहदारण्यकेऽन्तर्यामिब्राह्मणे ब्रह्मशरीरत्वेनोक्ता ब्रह्मण आत्मत्वं चोक्तम्। सुबालोपनिषदि तु वाजसनेयक उक्ताः पृथिव्यादयस्तत्रानुक्ताश्च बुद्धिचित्ताव्यक्ताक्षरमृत्यवश्च शरीरत्वेनोक्ताः। 'यः पृथिवीमन्तरे संचरन् यस्य पृथिवी शरीरं यं पृथिवी न वेद एष सर्वभूतान्तरात्मा दिव्यो देव एको नारायणः' इत्यारभ्य 'यस्य मृत्युः शरीरम्' इत्यन्तेन तथोक्तम्। तेन पृथिव्यादीनां स्थूलानामव्यक्तादीनां सूक्ष्माणां च शरीरत्वश्रावणात्। स्थूलसूक्ष्मभेदेन द्विविधस्याप्यचिद्वस्तुनो ब्रह्मशरीरत्वम्। अव्यक्तादीनि त्वव्यक्ताऽक्षरतमांसि गुणत्रयसाम्यावस्थारूपायाः प्रकृतेरेव सूक्ष्मपरिणामविशिष्टानि रूपान्तराणि तेषु मूलभूतरूपं तमः। सुबालोपनिषद्येव प्रलयप्रकरणे, 'पृथिवी अप्सु लीयते आपस्तेजसि तेजो वायौ वायुराकाशे आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ भूतादिर्महति महान् अव्यक्ते अव्यक्तमक्षरे अक्षरं तमसि लीयते तमः परे देव एकीभवति' इत्यविभागापत्तिदशायां विभागव्यपदेशानर्हरूपेण तस्यैवावस्थानात्। शरीरकथनप्रस्तावे च तमःस्थाने मृत्योः श्रावणान्मृत्युशब्देनात्र तम उच्यत इति निश्चीयत इति तस्यापि शरीरत्वं निर्बाधम्। एवं काण्वोक्तविज्ञानस्थाने आत्मनः श्रावणाच्चिद्वस्तुनोऽपि ब्रह्मशरीरत्वमसंदिग्धम्। एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एवेति 'सदेव सोम्येदमग्र आसीत्' 'सत्यं चानृतं च सत्यमभवत्' इत्यादौ जगतो ब्रह्मत्ववादः। प्रपञ्चरूपे

रश्मिः।

श्रुतिरेव। श्रुत्यंशमायिमायापदे व्याकरोति मायां त्वित्यादि। अचिदित्यादि विश्वमित्यचित्, मायया संनिरुद्धोऽन्यश्चित्, मायीश्वरस्तेषां यथायथं श्वेताश्वतरपञ्चमाध्याये

'वालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते'॥

इत्युपक्रम्य कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसंपद्यते 'स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति' इति भोग्यत्वभोक्तृत्वे 'सर्वाधिपत्यं कुरुते महात्मा' इति नियन्तृत्वं चोक्तं तैरित्यर्थः। आदिशब्दार्थभूतां श्रुतिमाहुः यः पृथिव्यामित्यादि। आपोग्निरित्यादि 'योऽप्सु तिष्ठन् अपामन्तरः' इत्यादि। एवं 'अग्नौ तिष्ठन्नग्नेरन्तरः' इत्यादिः। एवमग्रेपि। बुद्धिश्चित्तेति यो बुद्धिमन्तरे संचरन् यस्य बुद्धिः शरीरमित्यादिः। एवमग्रेपि। श्रुतिमाहुः यः पृथिवीमित्यादि। तथोक्तमिति पृथिव्यादीनि शरीरत्वेनोक्त्वा ब्रह्मण आत्मत्वं चोक्तम्। इति भोग्यभोक्तृनियन्तृत्वान्युक्तानि। तस्यैवेति तमस एवेत्यर्थः। अत्यन्तविस्मरणरूपमृत्योः कथं शरीरत्वमित्यतो मृत्योः शरीरत्वं कथयन्ति शरीरेत्यादि। अत्रेति शरीरप्रस्ताव इत्यर्थः। तस्यापीति मृत्योरपीत्यर्थः। अन्यथा सुबालोपनिषच्छरीरकथनप्रलयप्रकरणयोरेकवाक्यता न स्यादिति भावः। सत्यं चानृतं चेति चिच्चाचिच्चेत्यर्थः।

भाष्यप्रकाशः ।

शरीरे प्रलयदशायां तमःशब्दवाच्यातिसूक्ष्माचिद्वस्त्वेकशेषे सति तमसि च स्वशरीरतया विनिर्देशानर्हातिसूक्ष्मदशापत्त्या स्वस्मिन्नेकतापन्ने सति तथाभूततमःशरीरं ब्रह्म पूर्ववत्, विभक्तनामरूपचिदचिन्मिश्रप्रपञ्चरूपः स्यामिति संकल्प्याप्ययक्रमेण जगच्छरीरतयाऽऽत्मानं परिणामयतीति सर्वेषु वेदान्तेषु परिणामोपदेशः । अतः स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति जगतो ब्रह्मोपादानकत्वेऽपि सूक्ष्मचिदचिदीश्वरसंघातस्यैवोपादानत्वेन चिदचितोर्ब्रह्मणश्च भोक्तृत्वभोग्यत्वनियामकत्वरूपस्वभावासंकरोऽप्युपपन्नतरः । शुक्लकृष्णरक्ततन्तुसंघातोपादानके चित्रपटे तत्तत्तन्तुप्रदेश एव शौक्ल्यादिवत् तत्र तत्र भोक्तृत्वादीनां शक्यवचनत्वात् । एतावान् परं विशेषः । तन्तूनां पृथक्स्थितियोग्यत्वात् पुरुषेच्छया कदाचित् संघातात् कारणत्वं कार्यत्वं च कादाचित्कम् । इह तु चिदचितोः सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात् सर्वदा सर्वैः शब्दैस्तत्प्रकारः परमपुरुष एव वाच्य इति । 'अहमिमास्तिस्रो देवता अनेन जीवेनात्माऽनुप्रविश्य नामरूपे व्याकरवाणि' इत्यत्र तिस्रो देवता इत्यनेन सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात् सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तमिति विशिष्टाद्वैतवादमङ्गीकृत्य चिदचिद्विशिष्टस्यैवोपादानत्वं रोचयन्ते ।

तदपि चिन्त्यम् । आदिसृष्टिप्राक्काले सूक्ष्मचिदचिच्छरीरवैशिष्ट्यस्य वक्तुमशक्यत्वात् । 'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयम्' इत्यत्रैवकारादिभिरितरव्यवच्छेदात् । न च तैः शरीर्यन्तरं मुख्यान्तरं मिषदन्तरं च व्यवच्छेद्यते, न तु शरीरममुख्यममिषद्वेति वाच्यम् । पुरुषविधब्राह्मणे, 'आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्' इत्यनुवीक्षाया अन्यदर्शननिषेधस्य च विरोधापत्तेः । नच तत्राप्यन्यपदेन शरीर्येव

रश्मिः ।

सन्नासच्चेति वार्थः । प्रलयदशायां विशिष्टाद्वैतं साधयन्ति प्रपञ्चेत्यादि । पूर्ववदिति पूर्वसृष्टाविवेत्यर्थः । अप्ययक्रमेणेति पृथ्वी अप्सु लीयत इत्याद्युक्तक्रमेणेत्यर्थः । संघातादिति संघातभावं प्राप्येत्यर्थः । इमा इति अनुप्रवेशकर्मशब्देन स्थूलसूक्ष्मचिदचित्प्रकारब्रह्मेतिशब्देन । शब्दस्येति स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यमिति शब्दस्य सामानाधिकरण्यं भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वरूपम् । अयं न ब्रह्माद्वैतवाद इतीमं पक्षं दूषयन्ति तदपीत्यादि । आदिसृष्टीत्यादि हिरण्यगर्भसृष्टेरादिसृष्टिः वक्ष्यमाणा । तैरिति सदिदमग्रैकाद्वितीयपदैरित्यर्थः । तत्र सदिदंपदाभ्यां शरीर्यन्तरं, सच्चेदं चैवासीदित्यर्थात् । मुख्यवाचिनैकपदेन मुख्यान्तरमद्वितीयमित्यनेन द्वितीयं, सव्यापारं वस्तु यत्र नास्तीति मिषदन्तरमिति । नन्वित्यादि इदं जगत् सदात्मनैवासीन्न तु पृथगित्यर्थेन शरीररूपजगद्व्यवच्छेद्यते । एकमेवेत्यनेनामुख्यमद्वितीयमित्यनेन सव्यापारमिति नार्थ इत्यर्थः । आत्मैवेदमित्यादि । अग्रे सृष्टिप्राक्काले अनुवीक्ष्य स्वस्मिन् लयात्पश्चादात्मानं वीक्ष्येत्यर्थः । विरोधेत्यादि तमोविशिष्टात्मानुवीक्षणेनान्यसत्त्वेन च विरोधापत्तेरित्यर्थः । शरीर्येवेत्यादि तथाचान्यत् शरीरि चिदचिद्विशिष्टं वा नापश्यदित्यर्थान्न विरोध इत्यर्थः । एवकारेण शरीरं द्वितीयैवकारेण वैशिष्ट्यं चिदचिद्विशिष्टान्तरं वा व्यवच्छिद्यते । यथात्मनः शरीरित्वं चिदचिद्विशिष्टत्वं वा सिद्ध्येत्तदात्मनोऽन्यच्छरीरि चिदचिद्विशिष्टं वा नापश्यदित्यर्थो भवेत्

भाष्यप्रकाशः ।

विशिष्ट एव वा परामृश्यतेऽतो न विरोध इति वाच्यम् । तत्र तादृशपरामर्शस्याशक्यवचनत्वात् । तथाहि–तत्रात्मा किं स्वशरीरं विशेषणत्वेन शरीरत्वेन वा अभिन्नत्वेन वा परामृशत्यात्मत्वेन वा । नाद्यः । तस्य पार्थक्ये सत्यात्मानुवीक्षणस्य तदन्यादर्शनस्य च यथायथं भ्रमत्वाज्ञतापादकत्वयोरापत्तेः । तमस एकीभावस्य स्वशरीरतया विनिर्देशानर्हातिसूक्ष्मदशापत्तिरूपताङ्गीकारेण तदानीं पार्थक्यस्य शरीरत्वस्य वानभिमतत्वाच्च । न तुरीयः । आत्मत्वेन परामर्शे तेन प्रमाणज्ञानेनैवाभेदसिद्धौ भेदापादकप्रमाणाभावेन वैशिष्ट्याभावे केवलब्रह्माद्वैतवादस्यैव सिद्धेः । नच सुबालोपनिषद्यन्येषां प्रलयकथनात् तमसस्तदनुक्त्वैकीभावकथनादन्येभ्यः कश्चिद्विशेषो वक्तव्यः । स च स्वरूपातिरोभावपूर्वकाविभागापत्तिरूप एव युक्तः । अन्यथा शब्दान्तरवैयर्थ्यप्रसङ्गात् । सिद्धे चैवं तमःस्वरूपातिरोभावे तदानीं वैशिष्ट्यस्याविलोपादुत्पत्तौ च, 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' इति प्रतिसृष्टिपूर्वतुल्यताश्रावणेन सर्वदा सृष्टिप्रलयक्रमस्यैकरूप्ये सृष्टावपि शरीरित्वेन वैशिष्ट्याद् विशिष्टाद्वैतवादस्यैव सिद्धिर्न केवलब्रह्माद्वैतवादस्येति तदानीं विशिष्टेतरादर्शनमेव तदर्थ इति वाच्यम् । उक्तश्रुत्योरवान्तरयत्किंचित्प्रलयसृष्टिविषयत्वेनाप्युपपत्तौ सर्वदैकरूप्यस्य नियन्तुमशक्यत्वात् । 'यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति विस्फुलिङ्गन्यायेन सहोत्पत्तिप्रलयश्रावणात् । सूर्याचन्द्रमसाविति लिङ्गेनास्या अवान्तरविषयत्वावगमात् अनुवीक्षणादिश्रुत्यनुरोधेन सौबालवाक्येऽपि तथात्वस्य वक्तुं युक्त-

रश्मिः ।

तदेव पुनर्न संभवतीति वक्तुमात्मनः शरीरित्वं विकल्प्य दूषयन्ति तत्रात्मेत्यादि । चिदचिच्छरीरविशिष्ट आत्मेत्यत्र शरीरे विशेषणत्वं शरीरत्वमात्मत्वं व्यापारराहित्यं च सृष्टिप्राक्कालीनत्वादस्ति, आनन्दरूपत्वे त्वात्मत्वम् । अनुवीक्ष्येत्यस्य कर्मत्वेनार्थादात्मैवान्वेतीत्याशयेनाहुः आत्मानुवीक्षणस्येति । भ्रमत्वेत्यादि तमोविशिष्टे आत्मनि द्रष्टव्ये आत्ममात्रदर्शनस्य भ्रमत्वमात्मान्यस्य सत्त्वात् । तददर्शनेऽज्ञतेति बोध्यम् । स्वमते तु शुद्धात्मनो विषयत्वेन ज्ञानस्य विषयताविषयत्वात् तथात्वापत्तेः । तेनेति आत्मत्वप्रकारेणेत्यर्थः । प्रमाणमात्मा 'अत्र प्रमाणं भगवान्' इतिवाक्यात् । तथाच प्रमाणविषयकज्ञानेन प्रमाणेत्यत्र भावे ल्युट् प्रमेत्यर्थः । प्रमात्मकज्ञानेनेत्यर्थः । वैशिष्ट्येत्यादि वैशिष्ट्यस्य भेदनिबन्धनत्वाद्वैशिष्ट्याभाव । इत्यर्थः । तदनुक्त्वेति प्रलयमनुक्त्वेत्यर्थः । अन्येभ्य इति पृथिव्यादिभ्यस्तमसि विशेषः इत्यर्थः । स चेति तमोनिष्ठो विशेष इत्यर्थः । शब्दान्तरेत्यादि लीयत इति शब्दादन्य एकीभवतीति शब्दस्तस्य वैयर्थ्यप्रसङ्गादित्यर्थः । मयूरव्यंसकादेराकृतिगणत्वात्समासः पूर्वपदार्थप्रधानः । तदर्थ इति नान्यदपश्यदित्यस्यार्थ इत्यर्थः । उक्तेत्यादि पृथिव्यप्सु लीयते इत्यादिसूर्याचन्द्रमसावित्यादिश्रुत्योरित्यर्थः । अवान्तरसृष्टिप्रलयविषयत्वे हेतुमाहुः यथेत्यादि । सहेत्यादि तथाचादिसृष्टौ सहोत्पत्तिप्रलयाविति क्रमसृष्टिप्रलयाववान्तरावित्यर्थः । पूर्वाधिकरणान्तिमवर्णके क्रमसृष्टिर्ब्रह्मण उक्तेति कथमेवमित्यरुच्या हेत्वन्तरमाहुः सूर्येत्यादि । लिङ्गेनेति सामर्थ्येन शक्यार्थेनेति यावत् । अवान्तरेत्यादि अन्यथा सर्वेषां कर्मत्वमुक्तं स्यादित्यर्थः । अनुवीत्यादि अत्रेदं हृदयम् । इदमात्मैवेत्यत्रैवकारोऽन्ययोगव्यवच्छेदकः विशेष्यसंगतत्वात् । तथाचात्मान्यस्मिन्निदंत्वव्यवच्छेद आत्मनि चेदंत्वं प्रतीयते । एवं चात्मातिरिक्तमिदं जगन्न भवतीति फलति । कथं तर्हि जगदन्तर्गततमःसत्त्वेति । एवमनुरोधेनेत्यर्थः । सौबालेत्यादि तमः परे देव एकीभव-

भाष्यप्रकाशः ।

त्वाच्च । अस्तु वा सौबालवाक्यस्यादिसृष्टिविषयत्वं, तथापि न तदानीं वैशिष्ट्यसिद्धिः । पृथिव्यादीनां नादेयसामुद्रसलिलैक्यवदविभागापत्तिरूपप्रलयस्य तमसश्च करकाणां जलैक्यवत् पूर्वभावापत्तिरूपस्य ब्रह्मैक्यस्य शक्यवचनत्वात् । आत्मपदस्य केवलात्मवाचित्वेन विशेषणान्तरसंग्रहाक्षमत्वात् । अन्यथा देहविशिष्टात्मप्रत्ययस्यापि प्रामाण्यापत्तेः । नच निर्विशेषत्वापत्तिः । सच्चिदानन्दरूपाकारस्य 'कृत्स्नः प्रज्ञानघनः', 'आनन्दरूपममृतं यद् विभाति' इत्यादिश्रुतिभिस्तत्सिद्धेः । तस्मात्, 'सदेव सोम्य' इत्यत्र सच्छब्देन केवलं ब्रह्मैव परामृश्यत इति मन्तव्यम् । आत्मपदवत् सत्पदस्यापि केवलब्रह्माभिधायित्वात् । 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीतावाक्येन तथा निर्णयात् । एवं तैत्तिरीयेऽपि सत्यज्ञानादिलक्षणं ब्रह्म प्रकृत्य तत एव सर्वज्ञादाकाशादिक्रमेण सृष्टिमुक्त्वा, उपादानतां च, 'सोऽकामयत बहु स्यां प्रजायेय' इति स्थिरीकृत्य केवलस्यैवोपादानत्वाय 'तदात्मानं स्वयमकुरुत' इत्यात्मन एव कर्मत्वं कर्तृत्वं च श्राव्यते । 'सत्यं चानृतं च सत्यमभवत्' इति केवलब्रह्मवाचकसत्यपदेन प्रपञ्चस्यापि ब्रह्मता विधीयत इति तत्रापि पूर्वोक्त एवार्थ इति प्रथमसृष्टौ शुद्धं ब्रह्मैवोपादानम् ।

किंच । श्रुतौ हि प्रकारद्वयेन निरूपणम् । आत्मत्वेन ब्रह्मत्वेन च । आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वमिति । इदं च पदद्वयं व्याप्तिं बृंहणत्वं चापेक्ष्य । यद्यप्युभयोः स्वरूपमानन्दस्तथापि सप्रकार आत्मा, निष्प्रकारं ब्रह्मेति भेदः । तत्रायमात्मा ब्रह्म विज्ञानमय इत्यात्मनोऽपि ब्रह्मत्वविधानाद् व्यासेनापि ब्रह्मजिज्ञासाया एव प्रतिज्ञानाच्च निष्प्रकारमेव मुख्यम् । तस्यैव चाग्रे कारणत्वविचारणमित्यतोऽपि तादृशमेवोपादानम् ।

किंच । अन्तर्यामिब्राह्मणे सुबालोपनिषदि च, 'यं पृथिवी न वेद, यं मृत्युर्न वेद,' इत्येवं सर्वावस्थावस्थितस्याचिद्वस्तुनोऽवेत्तृत्वं श्रावितम् । तच्च वेदनयोग्यत्व एव घटते, यमात्मा न

रश्मिः ।

तीति वाक्येपि तथात्वस्यावान्तरविषयत्वस्येत्यर्थः । श्रुतित्वाविशेषाद्विपरीतं किं न स्यादित्याशङ्क्याहुः अस्तु वेत्यादि । तदानीमिति प्रलयदशायामित्यर्थः । शब्दान्तरप्रयुक्तितात्पर्यमाहुः पृथिवीत्यादि । अन्यथेति आत्मनो विशिष्टत्व इत्यर्थः । प्रामाण्यापत्तेरित्यस्य प्रमात्वापत्तेरित्यर्थः । तत्सिद्धेरिति प्रसिद्धसिद्धेरित्यर्थः । एतदानन्दमयाधिकरणे स्फुटिष्यति । तस्मादिति सकलश्रुतिस्वारस्यादित्यर्थः । विधीयत इति न तु सर्वावस्थावस्थितचिदचिद्वस्तुशरीर ईश्वर इति जगतो ब्रह्मत्वप्रवादोऽनया क्रियत इति भावः । पूर्वोक्त इति सदेव सोम्येत्यत्रोक्त इत्यर्थः । निष्प्रकारमिति एतच्चारूपवदेव हीति पञ्चसूत्र्युक्तमेकदेशिमतमप्यङ्गीकुर्वता व्यासेन निर्णीतं पूर्ववद्वेति सूत्रे तदनुसारेण ज्ञेयम् । तदेतत्तृतीयाध्याये स्फुटम् । अथवा भौतिकशरीरराहित्येन केवलानन्दरूपमित्यर्थः । इदं रूपद्वयं प्रयोगे । द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्तीति गृह्यसूत्रात् । अचिपूजने । द्वन्द्वं स्रुक्स्रुवादिरूपमेवं ब्रह्मात्मेति द्वन्द्वम् । स्वरूपलक्षणयुक्तं ब्रह्म समष्टिः । 'सदेव सोम्य' इत्यत्र 'तत्तेज ऐक्षत' 'आनन्दाद्ध्येव खल्विमानि' इत्यादौ व्यष्टिः । व्याहृतिर्ब्रह्म, श्रीभागवतद्वितीयस्कन्धे । ब्रह्मादिपञ्चविरहानुभवार्थमित्यानन्दमयाधिकरणे, वायुः प्रत्यक्षं ब्रह्म । मुख्यनिष्प्रकारकमिति निर्गता प्रकाराः सत्त्वादयो यस्मात् । द्वितीयस्कन्धनवमाध्याय उपबृंह्यमिदं मतमित्येवकारः । मत-

केचिदत्र शास्त्रयोनित्वपूर्वपक्षनिराकरणाय, तत्तु समन्वयादिति योजयन्ति। तत् पूर्वपक्षसिद्धान्तयोर्द्वयोरप्यसंगतत्वादुपेक्ष्यम्।

भाष्यप्रकाशः।

वेदेतिवत् न त्वयोग्यत्वे। घटो न वेदेत्यादिप्रयोगादर्शनात्। अतः सर्वत्र चिदन्वयोऽवश्यमुपेयः। सदन्वयस्तु प्रत्यक्षसिद्ध आनन्दान्वयश्चेत्यतोऽपि ब्रह्मैवोपादानम्। नच मृदब्रवीदित्यादाविद्याभिमानिनमादाय तथोक्तिरिति वक्तुं शक्यम्। जीवानुप्रवेशकृततद्वैशिष्ट्यस्य पाश्चात्यत्वेन पूर्वं युष्माभिस्तथा वक्तुमशक्यत्वात्। अनुप्रवेशश्रुतिविरोधेन सर्वदा वैशिष्ट्यस्याशक्यवचनत्वात्। सदैवाविनाभावे चिदचिदविवेकप्रसङ्गात्। आत्मा न वेदेति पृथङ्निर्देशवैयर्थ्यप्रसङ्गाच्च। अत उक्तलिङ्गेनापि ब्रह्मण एव केवलस्य परिणामनिश्चयादुपादानत्वम्। नच स्वभावसांकर्यप्रसङ्गः। प्रजायेयेतीच्छयैवोच्चनीचादिभावसिद्धौ सांकर्याभावात्। सृष्टिप्राक्काले त्वितराभावेनैवाशङ्कानुत्थानात्। अतो विशिष्टाद्वैतवादस्यार्वाचीनत्वात्। सर्ववस्तूनां ब्रह्मपरिणामत्वेन ब्रह्माभिन्नतयैव पदार्थत्वात् सर्वैः शब्दैस्तत्तद्रूपं ब्रह्मैवोच्यत इति कारणावस्थब्रह्मवाचिना शब्देन कार्यवाचिनां शब्दानां सामानाधिकरण्यमुपपादनमन्तरेणापि मुख्यवृत्तमिति राद्धान्तपन्थाः।

प्रकृतमनुसरामः। अस्मिन् सूत्रे रामानुजाचार्यादिमतमुपक्षिपन्ति केचिदित्यादि। ते हि पूर्वपक्षसिद्धान्तावेवमाहुः। तथाहि। यद्यपि शास्त्रयोनित्वसूत्रे ब्रह्मणः शास्त्रमात्रप्रमाणकत्वं साधितं तथापि तन्नोपपद्यते। 'चोदनालक्षणोऽर्थो धर्मः,' 'तस्य ज्ञानमुपदेशः', 'तद्भूतानां क्रियार्थेन समाम्नायः', 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति जैमिनिना तत्र तत्र

रश्मिः।

एव मुख्यमिति। अत इति प्रसक्तस्य निषेधायोगादित्यर्थः। आनन्देत्यादि स्त्रीपुत्रादयः प्रिया इति प्रतीतेः प्रत्यक्षसिद्ध इति शेषः। तथोक्तिरिति यं पृथिवी न वेद इत्याद्युक्तिरित्यर्थः। तद्वैशिष्ट्यस्येति अभिमानिवैशिष्ट्यस्येत्यर्थः। पूर्वमिति जीवप्रवेशात्पूर्वमित्यर्थः। ननु सर्वावस्थावस्थितं विशिष्टमिति चेत्तत्राहुः अनुप्रवेशेत्यादि। अनुप्रवेशो हि भूतपूर्वे अचिद्वस्तुनि चितः पश्चात्प्रवेशः स च सर्वदा वैशिष्ट्ये न घटत इत्यर्थः। ननु तिस्रो देवता इत्यनुप्रवेशश्रुतौ श्रावणाद्देवताविशिष्टे एवाचिद्वस्तुनि जीवप्रवेशे नानोरनर्थकत्वात्सर्वदा वैशिष्ट्यं शक्यवचनमिति चेत्तत्राहुः सदैवेत्यादि। ननु पृथिवीशरीरयोरात्मवैशिष्ट्येन मा भूद्विवेकः परं तु शारीरशरीरयोस्तु विवेको भविष्यतीति कथंचिदचिदविवेकप्रसङ्ग इति चेत्तत्राहुः आत्मेत्यादि। पृथगित्यादि अचितः पृथिव्या इत्यर्थः। तथाच पृथिवी न वेदेत्यत्राचित्त्वमेव विवक्षितमिति भावः। उक्तलिङ्गेनेति अचितोऽवेत्तृत्वकथनसामर्थ्येनेत्यर्थः। ब्रह्मण इति सच्चिदानन्दानां कार्ये दर्शनाद्ब्रह्मण एव न त्वात्मन इत्यर्थः। स्वभावेति चित्त्वादिस्वभावेत्यर्थः। सच्चिदानन्देषु क्रमेण नीचोच्चतरेषु सांकर्यं नीचत्वादिभ्यामुच्चतरसांकर्यं मेलनम्। परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः संकरोप्ययम्। सांकर्येति दुष्टसांकर्याभावात्। इतरेति अचिदित्यर्थः। अत इति चि(स)दानन्दयोः फलत्वात्। अर्वाचीनेत्यादि अचिदधीनत्वेन सृष्टेः पाश्चात्यत्वादित्यर्थः। सर्वैः शब्दैरिति 'ॐमित्येतदक्षरमिद९ सर्वं तस्योपव्याख्यानम्' इति माण्डूक्यश्रुतेः। तत्तद्रूपमिति 'यदेकमव्यक्तमनन्तरूपम्' इति श्रुतेः मुख्यवृत्तमिति आकाशस्तल्लिङ्गादधिकरणेषु स्फुटमेतत्। भाष्ये। शास्त्रेत्यादि शास्त्रयोनित्वे पूर्वपक्षः शास्त्रयोनित्वपूर्वपक्षः पात्रे समितादीनामाकृतिगणत्वात् 'पात्रे समितादयश्च' इतिसूत्रेण समासः। सुप् सुपेति वा समासः। प्रकृते। ते हीति रामानुजभास्करशंकराचार्या इत्यर्थः। तत्र तत्रेत्यादि [illegible] प्रकरणा-

भाष्यप्रकाशः ।

वेदस्य प्रवृत्तिनिवृत्तिजनकक्रियापरताया एवानुक्रान्तत्वाद् ब्रह्मरूपसिद्धार्थपरत्वे प्रयोजनशून्यत्वप्रसङ्गात्। नच प्रत्यक्षादीनां वस्तुयाथात्म्यावबोधपर्यवसानदर्शनाच्छास्त्रेऽपि तथात्वमस्त्विति शङ्क्यम्। लोके वेदे च प्रयोजनरहितवाक्यप्रयोगस्यादर्शनात् । प्रयोजनं च प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमेवोपलब्धम् । तदनुद्दिश्य न केनापि किंचिद्वाक्यं प्रयुज्यते श्रूयते वा । अतो वेदेऽपि तथात्वं युक्तम् । नच पुत्रस्ते जातो, नायं सर्पो रज्जुरेषेत्यादिषु लौकिकवाक्येषु हर्षभयनिवृत्त्यादिरूपपुरुषार्थान्वयदर्शनात् सिद्धार्थपराणामपि वाक्यानां प्रयोजनवत्त्वं शङ्कनीयम् । तत्रापि वाक्यार्थज्ञानादेव तत्प्राप्तेर्वाक्यस्य प्रतारणया प्रयोगेऽपि तत्संभवाद् वाक्यस्यार्थपरताया निश्चेतुमशक्यत्वात् । किंच । पचति गच्छतीत्यादिप्रयोगस्य प्रमाणान्तरेणावगमोत्तरमेव दर्शनात्। सिद्धार्थवाक्यानां गृहीतग्राहित्वात् प्रामाण्यमपि न । साध्यार्थपराणां तु गामानयेत्यादीनां प्रयोजनवत्त्वमगृहीतग्राहित्वं चाविवादम् । अतो लोकवद् वेदेऽपि वाक्यानां प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजन एव पर्यवसानमिति परिनिष्पन्ने ब्रह्मणि तात्पर्याभावाच्च वेदान्तानां ब्रह्मणि तात्पर्यमित्येकः पूर्वपक्षः ।

तथाऽन्योऽपि । तथाहि । वेदान्तवाक्यान्यपि कार्यपरतयैव ब्रह्मणि प्रमाणभावमनुभवन्ति । अद्वितीयं ज्ञानैकरसं परिनिष्पन्नमपि ब्रह्म अनाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्यादिति ब्रह्मणः प्रपञ्चविलायनद्वारेण विधिविषयत्वात्। स च विधिः, 'न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथा' इत्येवमादिर्बोध्यः। तत्र द्रष्टृदृश्यभेदशून्यं ब्रह्म कुर्या-

रश्मिः ।

ध्याय इत्यर्थः । प्रथमपादे द्वितीयपादे चेति वार्थः। तथात्वमिति सिद्धार्थब्रह्मयाथात्म्यावबोधपर्यवसानं प्रयोजनमस्त्वित्यर्थः। प्रवृत्तीत्यादि प्रवृत्तिनिवृत्तिभ्यां साध्यौ इष्टानिष्टयोः प्राप्तिपरिहारौ यौ तदात्मकमित्यर्थः । अर्थार्थी राजकुलं गच्छेत्, मन्दाग्निर्नाम्बु पिबेत्, स्वर्गकामो यजेत, न कलञ्जं भक्षयेदित्यादिषु द्रष्टव्यम्। तत्प्राप्तेरिति हर्षस्य भयनिवृत्त्यादेश्च प्राप्तेरित्यर्थः। तत्संभवादिति हर्षभयनिवृत्त्यादिसंभवादित्यर्थः । अर्थेत्यादि प्रयोजनपरताया इत्यर्थः । प्रमाणेत्यादि प्रत्यक्षप्रमाणेनेत्यर्थः । अवगमेत्यादि पाककर्तुर्गमनकर्तुश्चेत्यर्थः । गृहीतेत्यादि चक्षुषा गृहीतं यत्पात्ररज्ज्वादि तद्ग्राहित्वादित्यर्थः। नेति अनधिगतार्थगन्तृत्वस्य प्रमाणलक्षणत्वादिति भावः। अगृहीतेत्यादि अगृहीतं साध्यं गवां नयनादि तद्ग्राहित्वम्। वाक्यानामित्यादि सिद्धार्थपराणां साध्यार्थपराणां च । प्रवृत्तीत्यादि व्याख्यातम्। प्रयोजन एवेति ब्रह्मज्ञानमपि फलं साध्यमिति प्रयोजन एव तत्तु सिद्धमित्यर्थः । ब्रह्मणीति सिद्धार्थे । वेदान्तेत्यादि ब्रह्मणीत्यत्र सप्तम्या विषयत्वमर्थः। तथा च ब्रह्मविषयकप्रमाजनकत्वं वेदान्तवाक्यान्यनुभवन्त्याश्रयन्ते धातूनामनेकार्थत्वादित्यर्थः । निष्प्रपञ्चमित्यादि द्रष्टृदृश्यरूपप्रपञ्चविलयद्वारेण ज्ञानैकरसं ब्रह्म कुर्यात् भावयेद् ज्ञानविषयीकुर्यादित्यर्थः। विधीत्यादि सिद्धस्यापि घटस्य निर्जलं (सजलं) घटं कुर्यादिति विधिविषयत्ववत्तथेत्यर्थः । द्रष्टृदृश्येत्यादि दृशिमात्रं ब्रह्म कुर्यादित्यर्थः, गुणविधिरयं ब्रह्मणः सिद्धत्वात्, दध्ना जुहोतीतिवत्। तत्र धात्वर्थस्य दृशेः भावनायां कर्मत्वेनान्वयः, न तु करणत्वेन । गुणकामाधिकरणे दध्नेन्द्रियकामस्य जुहुयादित्यनाश्रयत्वेन

भाष्यप्रकाशः ।

दित्येवमर्थसिद्धेः । अतः स्वनिबन्धनाया उपाधिनिबन्धनायाश्च कर्तव्यतायाः प्रामाण्ये विशेषाभावात् सिद्धस्यापि ब्रह्मणोऽनिष्पन्नतारूपेण साध्यत्वाविरोधात् वेदान्तानां ब्रह्मणि कार्यपरतयैव प्रामाण्यं, न स्वातन्त्र्येणेति द्वितीयः पूर्वपक्षः ।

तथाऽपरोऽपि । यद्यपि वेदान्तवाक्यानां स्वातन्त्र्येण सिद्धरूपब्रह्मस्वरूपपरतया न प्रामाण्यं, तथापि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः,' 'य आत्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः,' 'आत्मेत्येवोपासीत,' 'आत्मानमेव लोकमुपासीत' इत्यादिध्यानविषयो नियोगः स्वविषयभूतध्यानस्य ध्येयैकनिरूपणीयतया ध्येयमाक्षिपन्, 'सत्यं ज्ञानमनन्तं ब्रह्म,' 'सदेव सौम्येदमग्र आसीत्,' 'इदं सर्वं यदयमात्मा,' 'अयमात्मा ब्रह्म सर्वानुभूः' इत्यादिस्वरूपतद्विशेषपरवाक्यनिर्दिष्टस्वरूपमेवात्मानमाक्षिपतीत्येषां वाक्यानां ध्यानविधिशेषतयैव प्रामाण्यात्, तद्विधिविषयीभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपेऽपि तात्पर्याद्, ब्रह्मस्वरूपमपि सिद्ध्यत्येवेति चेन्न । प्रवृत्तिनिवृत्तिप्रयोजनविधुराणां वेदान्तवाक्यानां ध्यानविधिशेषत्वेऽपि ध्येयविशेषस्वरूपसमर्पणमात्रपर्यवसानात् तत्र स्वातन्त्र्येऽपि बालातुराद्युपच्छन्दनवाक्य-

रश्मिः ।

धात्वर्थान्वयस्वीकारेण तस्यानियतत्वात् । यद्यप्यत्र कर्मत्वबोधकद्वितीयाभावस्तथापि भावनायां धात्वर्थ(प्रेक्षण)संबन्धस्य प्रतीतेः स साध्यत्वेन स्वीक्रियत इति कर्मत्वेनान्वयो निराबाधः । द्रष्टारमित्यस्य धात्वर्थेन सहाश्रयतासंसर्गेणान्वयः द्रष्टुः प्रेक्षणाश्रयाभेदात् । दृष्टेरित्यत्र पञ्चम्या भेदोर्थः । नञस्त्वभावरूपोर्थः । दृष्टिपदं स्वविषये स्वाविनाभूते दृश्ये लाक्षणिकं सद् दृश्यमात्रोपलक्षकम् । तद्भेदस्य द्रष्टृदृश्यभेदरूपस्य प्रतियोगितासंबन्धेन नञर्थेऽभावेऽन्वयः । तस्य च स्वीयसंबन्धेन धात्वर्थेऽन्वयः । एवं न मतेर्मन्तारमित्यत्रापि द्रष्टव्यम् । तदाहुः एवमर्थसिद्धेरिति । एवं च दृष्टेर्न इत्यंशस्य द्रष्टृदृश्यभेदशून्यमित्यर्थः । द्रष्टारमित्यस्य ब्रह्मेत्यर्थः । चक्षुराद्यपेक्षया ब्रह्मणो द्रष्टृत्वात् । पश्येत् द्रष्टृदृश्याधारं पश्येत् । द्रष्टृदृश्यभेदरूपाधेयशून्यं कुर्यादित्यर्थः । अतः स्वेत्यादि साध्यस्थले स्वनिबन्धना सिद्धस्थले तूपाधिनिबन्धना निष्प्रपञ्चादिधर्मनिबन्धनेत्यर्थः । अनिष्पन्नेत्यादि उक्तरीतिकज्ञानविषयत्वेन रूपेणेत्यर्थः । पूर्वपक्षायाशङ्कते यद्यपीत्यादि । न प्रामाण्यमिति गृहीतग्राहित्वान्नेत्यर्थः । साध्यस्वरूपपरत्वान्नेति वा । ध्यानेति निदिध्यासनं तन्मते ध्यानं तदेकवाक्यतया विजिज्ञासादीनां ध्यानत्वमतो ध्यानविषय इत्यर्थः । नियोग इति विधिरित्यर्थः । ध्येयैकेति ध्येय आत्मैव एको मुख्यस्तेन निरूपणीयतया, ज्ञानविशेषत्वेन घटादिज्ञानवत् । श्रुतावयमात्मा जीवात्मा । तद्विशेषेति जीव इत्यर्थः । ध्यानविधीति पारार्थ्यं शेषलक्षणम् । विध्यर्थतव्यलिङादीनां प्रामाण्यं तव्यादिविशिष्टवाक्यानां तु विधिशेषतयैव प्रामाण्यमिति प्रामाण्यपदमुक्तमन्वयपदं विहाय । तद्विधीति आत्मविषयकं निदिध्यासनमित्यादिरूपे ध्यानशरीरे अपिशब्दौ विधिशेषेण साकं ब्रह्मस्वरूपसमुच्चायकौ । ध्यानमनु पश्चान्निरूपकतयानुप्रविष्टेत्यर्थः । प्रवृत्तीत्यादि द्विपदद्वन्द्वं कृत्वा प्रयोजनशब्देन कर्मधारयस्ततस्ताभ्यां विधुराणामिति तत्पुरुषः । ध्येयविशेषेति मात्रशब्देन ध्यानव्यवच्छेदः । बालेत्यादि यद्यौपचकद्वतायामपि

भाष्यप्रकाशः ।

वज्ज्ञानमात्रेणैव पुरुषार्थतासिद्धेः परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावाद् ब्रह्मणः शास्त्रप्रमाणकत्वं न संभवतीति तृतीयः पूर्वपक्षः ।

सिद्धान्तस्तु, समन्वयः सम्यगन्वयः पुरुषार्थतयाऽन्वयः । तथाच, 'यतो वा इमानि भूतानि जायन्ते,' 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्,' 'तदैक्षत बहु स्यां प्रजायेय' इति,' 'तत्तेजोऽसृजत्,' 'ब्रह्म वा इदमेकमेवाग्र आसीत्,' 'आत्मा वा इदमेकमेवाग्र आसीत्,' 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः,' 'एको ह वै नारायण आसीत्' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिषु परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयाऽन्वयाच्छास्त्रप्रमाणकत्वं ब्रह्मणः सिद्ध्यत्येवेत्यर्थः । अन्यथा सर्वप्रमाणानां यत् स्वविषयावबोधपर्यवसायित्वं, तच्छास्त्रानिवर्तमानं शास्त्रस्याबोधकत्वरूपमप्रामाण्यमादध्यात् । नच प्रवृत्तिनिवृत्त्यन्वयविरहिणः प्रयोजनशून्यत्वं, पुरुषार्थान्वयप्रतीतेः । स्वरूपपरस्यापि पुत्रस्ते जातः, नायं सर्पो रज्जुरेषेत्यादेर्वाक्यस्य हर्षभयनिवृत्त्यादिरूपप्रयोजनदर्शनाच्च । अयमर्थः । अनादिकर्मरूपाविद्यावृतपरावरतत्त्वयाथात्म्यस्वस्वरूपज्ञानानां देवादिदूर्वान्तानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसंभवे स्वरूपगुणविभावचेष्टितैर्निरवध्यानन्दजननं ब्रह्मास्तीति बोधयदेव वाक्यंप्रयोजनपर्यवसायि । प्रवृत्त्यादिनिष्ठं तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि । एवंभूतं कथं लभ्यत इत्यपेक्षायां तत्प्राप्त्युपायतया, 'ब्रह्मविदाप्नोति परम्', 'आत्मानमेव

रश्मिः ।

बालादियथार्थाशनाय नेदं कटुरिति वाक्यवदित्यर्थः । पुरुषार्थेत्यादि पुरुषेणार्थ्यते प्रार्थ्यते इति पुरुषार्थ आनन्दः साध्यत्वं वा तस्यान्वयप्रतीतिसिद्धेरित्यर्थः । परिनिष्पन्नेत्यादि विधिविषयभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपं परिनिष्पन्नवस्तु । सिद्ध्यत्येवेति अत्यन्तायोगव्यवच्छेदकैवकारप्रयोगः कृतः । अन्यथेति पूर्वपक्षरीतिकशास्त्रार्थत्वे । अबोधकत्वेति योग्यताविरहप्रयुक्तमबोधकत्वरूपं वह्निना सिञ्चतीतिवाक्याप्रामाण्यवदप्रामाण्यमादध्यादित्यर्थः । न च प्रवृत्तीति प्रवृत्तिश्च निवृत्तिश्च स्वर्गान्वयश्च तेषामभाववतो वेदान्तस्य । पुरुषार्थेति निरवध्यानन्दान्वयस्य प्रतीतेः । स्वरूपपरस्येति सिद्धस्वरूपपरस्य । वेदशास्त्राच्छास्त्रान्तरवेदान्ते प्रवृत्तिनिवृत्त्योः स्वर्गान्वयात्प्रसिद्धाद्भिन्नस्य प्रयोजनीभूतानन्दान्वयस्य दुरुपपादत्वादाहुः अयमर्थ इति । अनादीत्यादि अनादिकर्मरूपयाऽविद्यया आवृतपरावरतत्त्वयाथात्म्यरूपस्य स्वस्वरूपस्य ज्ञानं येषां तेषामित्यर्थः । व्यवस्थितेत्यादि इदं क्षेत्रज्ञानामेव विशेषणं न मुक्तानामसंभवात् ।अत्र धारको ब्रह्मा ब्रह्मन् पुंसि चेति सूत्रात् । पोषको विष्णुः । शिवो नोक्तः । अनुभवसंभव इत्यस्य कर्तरि षष्ठ्या । तमसोनुभवावरकत्वात् शिवस्य तामसत्वात् । भोग्यविशेषा दूर्वास्तेषाम् । स्वस्येत्यादि मुक्तानां वा स्वस्य विशेषेणानुभवसंभव इति योजना । कर्मणि षष्ठी अनुभवसंभव इत्यस्य स्वस्येत्यत्रानुभवविषयमाहुः स्वरूपेति । स्वरूपमालम्बनविभावः, गुणाः अनुभावा, विभावाः संचारिणो वैराग्यादयः, चेष्टितमुद्दीपनविभावस्तैः निरवध्यानन्दो रसात्मकः तस्य जननं यस्मात् ब्रह्मण इति बहुव्रीहिः । वाक्यमिति पुत्रस्ते जातः नायं सर्पो रज्जुरेषेत्यादिरूपम् । यावदित्यादि स्वर्गादिरूपपुरुषार्थान्वयबोधमनतिक्रम्येत्यव्ययीभावः । वर्तत इति शेषः । नेत्यादि न निरवध्यानन्दपर्यवसायीत्यर्थः । आनन्द-

भाष्यप्रकाशः ।

लोकमुपासीत' इति वेदनादिशब्दैरुपासनं विधीयते । यथा वेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा पश्चात् तदुपादाने प्रयतते । यथाच कश्चिद् राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनाभिष्क्रान्तो मार्गभ्रष्टो नष्ट इति राज्ञा विज्ञातः स्वयं चाज्ञातपितृकः केनचिद्विवर्धितोऽधिगतवेदशास्त्रः षोडशवर्षो गुणसंपन्नस्तिष्ठन् केनचिदभियुक्तेन प्रयुक्तं 'पिता ते सर्वलोकाधिपतिः प्रशस्तगुणः पुरवरे त्वामेव नष्टं पुत्रं दिदृक्षुस्तिष्ठति' इति वाक्यं शृणोति चेत्तदानीमेवाहं तावज्जीवतः पुत्रोऽस्मत्पिता च सर्वसंपत्समृद्ध इति महाहर्षान्वितो भवति । राजा च स्वपुत्रं जीवन्तं सकलगुणसंपन्नं श्रुत्वाऽवाप्तसर्वार्थो भवति पश्चात्तावुभौ संगच्छेते च । यत्तु परिनिष्पन्नवस्तुगोचरवाक्यार्थज्ञानमात्रेणापि पुरुषार्थपर्यवसानाद् बालातुराद्युपच्छन्दनवाक्यवन्नार्थसद्भावे प्रामाण्यमित्युक्तम् । तदसत् । निश्चितेऽर्थाभावे पूर्वं ज्ञातस्याप्यर्थस्य पुरुषार्थानुपयोगात् । बालातुरादीनामप्यर्थसद्भावभ्रान्त्या पूर्वं हर्षाद्युत्पत्तावपि पश्चात् तदभावनिश्चये हर्षादिनिवृत्तिदर्शनात् । एवमौपनिषदेष्वपि वाक्येषु ब्रह्मसत्तायां तात्पर्याभावे निश्चिते पूर्वमुत्पन्नमपि ब्रह्मज्ञानं न पुरुषार्थपर्यवसायि स्यात् । तस्माद्, 'यतो वा इमानि' इत्यादिवाक्यं स्वोक्तप्रकारकब्रह्मास्तित्वं बोधयदेव प्रमाणं भवतीति सिद्धमिति रामानुजाचार्याः ।

भास्कराचार्यास्तु प्रपञ्चप्रविलायनद्वारेण ब्रह्मणः शास्त्रप्रमाणकत्वं न स्वत इति पूर्वपक्षे एवं प्रत्युत्तरमाहुः । तथाहि । ब्रह्मण आत्मत्वेन नित्यत्वेन चाभ्युपगतस्य कथं कार्यत्वम् । नित्यत्वकार्यत्वयोर्विरोधात् । नचोपाधेर्विद्यमानत्वात् तद्विलायनेनोपधाननिवृत्तेस्तद्द्वारा कार्यत्वमिति वाच्यम् । तथा सति घटे कृते नभसोऽपि कार्यत्वापत्तेः । नचोक्तदूषणभयात् प्रपञ्चप्रविलायनं कुर्यादिति वाक्यं कल्पनीयमिति वाच्यम् । पुरुषमात्रेण महदादीनां महाभूतानां विलायनस्य कर्तुमशक्यत्वेन विधेर्वैयर्थ्यात् । समाधौ सुषुप्तौ च सर्वतिरोधानेऽपि व्युत्थानदशायां सर्वस्य पुरो-

रश्मिः ।

मीमांसायां तैत्तिरीये स्पष्टम् । एवंभूत इत्याद्युक्तदृष्टान्तमाहुः यथेत्यादि । ब्रह्मविदाप्नोति परमित्याद्यभियुक्तप्रयुक्तवाक्यस्थानीयम् । तृतीयपूर्वपक्षं दूषयितुमनुवदन्ति स्म यत्तु इत्यादिना । बोधयदिति । वाक्ये शक्तेरिति भावः । रामानुजेति । अत्रैव पूर्वपक्षभर इति प्रथमद्वितीयौ पक्षौ नानूदितौ रामानुजाचार्यमते । पूर्वोक्तेषु द्वितीयं पूर्वपक्षमाहुः प्रपञ्चेत्यादि । तद्द्वारेति उपधानकार्यत्वनिवृत्तिद्वारा यद्वा उपाधिद्वारेत्यर्थः । उपाधिरुपधेय उपधानं च । उपधीयतेऽनेन व्यापारेणेत्युपधानम्, करणे ल्युट्, तादृशोपधाननिवृत्तेः कार्यत्वात्तदाश्रयब्रह्मणोपि कार्यत्वमित्यर्थः । एवं युक्त्या प्रत्युत्तरमनूद्य नियोगविचारेण प्रत्युत्तरमनूदितुमाहुः शङ्कां मीमांसकस्य । न चोक्तदूषणेत्यादि इमानि दूषणानि प्रथमपूर्वपक्ष उक्तानि द्वितीये पक्षे वा । प्रपञ्चेति वाक्यकल्पने विधिस्तु पूर्वोक्तो न दृष्टेर्द्रष्टारं पश्येदित्यादिः । अत्र द्रष्टृदृश्यभेदशून्यब्रह्मकरणे नञादीनां सामर्थ्यमालोच्य प्रपञ्चप्रविलयनं कुर्यादित्यभिधात्री श्रुतिः कल्प्यते सा वाक्यशब्देनोच्यते । अत्र तया नञर्थस्य भेदेनान्वयात्तदङ्गत्वं बोध्यते । दृष्टिपदस्य लक्षणाङ्गत्वं बोध्यत इत्यर्थगतसामर्थ्यम् । शब्दगतसामर्थ्यं तु पश्येदितिशब्दात् द्रष्टृदृश्यभेदशून्यब्रह्मकरणे सामर्थ्यमालोच्यानेन प्रपञ्चप्रविलायनं कुर्यादिति श्रुतिं कल्पयति । ततश्च दर्शनाङ्गस्य बोधनमिति । नियोज्यासंभवाद्विधिवैयर्थ्यं भवेदित्याहुः पुरुषेत्यादि । ननु एवं प्रविलायनकर्तृत्वमिति चेत्तत्राहुः समाधावित्यादि । तथा च एतादृशं प्रविलायनकर्तृत्वम-

भाष्यप्रकाशः ।

ऽवस्थानात् । प्रपञ्चप्रविलायने उपायाभावाच्च । प्रपञ्चेनैव प्रपञ्चप्रविलायनेऽनवस्थाप्रसङ्गाच्च । प्रपञ्चस्य साधारणत्वेन तत्प्रविलायने सर्वमुक्तिप्रसङ्गादिदानीं जगदप्रतीतिप्रसङ्गाच्च । अथात्मीयबन्धकारणस्याविद्याकामकर्मलक्षणस्य नाशनमेव प्रपञ्चप्रविलायनमिति मन्यसे तत्र न विसंवादः । किंच । नियोगस्य नियोज्यसापेक्षत्वेन तदाकाङ्क्षायां यदि तादृशप्रपञ्चकर्ता नियोगकर्ता वा नियोज्यः स्यात् तर्हीदानीं नियोज्याभावान्नियोगो न क्रियेत । किंचात्र प्रतीतिवेलायां प्रपञ्चविलयोऽभ्युपगम्यते । अग्निहोत्रादौ तु प्रतीतिकालोऽनुष्ठानकालश्च भिन्नस्तदप्यसंगतम् । अत्रैव तत्रापि प्रतीतिमात्रेणैव नियोगसिद्धावनुष्ठानलोपप्रसङ्गात् । किंच प्रविलायनं व्यापारो वा अभावो वा । नाद्यः । तस्य सत्त्वेन प्रपञ्चतादवस्थ्यात् । न द्वितीयः । तस्यावस्तुत्वेन प्रतिज्ञानाच्छशविषाणतुल्यत्वेन तद्विषयकनियोगानुपपत्तेः । अथात्मज्ञानविषयो नियोगः परिकल्प्यते, आत्मज्ञानं कुर्यादिति । तदप्यसंगतम् । ज्ञानस्य प्रमाणप्रमेयाधीनत्वेन क्रियावत् पुरुषेच्छानधीनतया नियोगविषयत्वस्य तत्राशक्यवचनत्वात् । नच द्रष्टव्यादिविधिविरोधः । तस्योपायपरत्वात् । श्रोतव्यादिपदैस्तस्यैव विवरणात् । नचाध्ययनविधिनाऽर्थज्ञानं विधीयत इति

रश्मिः ।

प्रविलायनकर्तृत्वमित्यर्थः । ननु दण्डादिप्रपञ्चेन घटादिप्रपञ्चः प्रविलीयतामिति चेन्नेत्याहुः प्रपञ्चेनेत्यादि । अनवस्थेति बहुभिरपि कर्तुमशक्यत्वादनवस्थेत्यर्थः । यद्वाऽविलायकप्रपञ्चविलायकप्रपञ्चकल्पनेन व्यवस्था योगसंपन्नतनुयोगेन करिष्यतीति चेन्नेत्याहुः प्रपञ्चस्येत्यादि । साधारणत्वेनेति प्रविलायकाप्रविलायकसाधारणत्वेनेत्यर्थः । न विसंवाद इति । स्यादिति शेषः । नियोज्यविचारेण दूषयन्ति किंचेति । न क्रियेतेति नियोज्यस्यैव विलायनत्ववाक्यकल्पकत्वस्यापि संभावयितुं शक्यत्वान्नियोज्येनैव विलयसिद्धौ विधेर्निरर्थकत्वभियेदानीं न क्रियेतेत्यर्थः । इदानींतनो नियोज्योऽस्त्वित्याकाङ्क्षायां दूषणान्तरमाहुः किंचात्रेत्यादि । प्रतीतीत्यादि समष्ट्या व्यष्ट्याश्च प्रतीतेः काल इत्यर्थः । भिन्न इति उदिते जुहोत्यनुदिते जुहोतीत्याद्युक्तः । न हि प्रतीतिमात्रेण नियोगसिद्धिरिहेष्यते किंतु तत्तत्तिथिवारनक्षत्रादिका स इति भिन्नः । इत्थं चेदानींतननियोज्यं प्रत्यपि नियोगो न क्रियेत प्रतीतिमात्रसिद्ध्या नियोगसिद्धेरभावादिति भावः । तदपीत्यादि अथात्मीयेत्यादिनोक्तम् । अत्रैव तत्रापीति प्रतीतिकाल इवानुष्ठानकाले । प्रतीतीति ज्ञानकाण्डत्वादिति भावः । गीतायां ज्ञानयज्ञादिस्मृतेरित्येवकारः । तथा च स्वसंबन्धनाशनस्य प्रपञ्चप्रविलायनत्वाङ्गीकारे ब्रह्मणो निष्प्रपञ्चतायाः सिद्धिः । तथाच वेदान्तवाक्यानां कार्यपरतया ब्रह्मणि प्रमाणत्वमिति यत् प्रतिज्ञातं तदसंगतं भवेदिति निग्रहस्थानप्राप्त्यासंगतमित्यर्थः । नियोगसिद्धाविति नियोगोऽत्र विधिस्तस्य सिद्धावित्यर्थः । अयं प्रलाप इदानींतनब्रह्मविन्नियोज्यमनतिक्रम्य ज्ञेयः । सत्त्वेनेति तादृशनाशानुकूलव्यापारस्य मुक्तात्मन्यनङ्गीकारे प्रविलायनाभावापत्त्या सत्त्वमवश्यं वाच्यं, व्यापारश्च प्रपञ्चांश इति प्रपञ्चतादवस्थ्याप्रविलयविरुद्धसत्त्वावस्थत्वादित्यर्थः । प्रलयविषयनियोगविचारस्य वृत्तत्वात् भिन्नप्रक्रमेणाहुः अथात्मेति । आत्मज्ञानमिति दृश्यभिन्नद्रष्टृविषयकज्ञानं कुर्यात्, स्वं सर्वस्यात्मविषयकं ज्ञानं कुर्यादित्यर्थः । क्रियावदित्यादि क्रियाया इव क्रियावदत्र जानातीच्छति यतते इति परंपरा बोध्या । तत्रेति ज्ञान इत्यर्थः । न चेत्यादि । तस्य ज्ञानस्य पुरुषेच्छाधीनत्वादिति भावः । श्रोतव्यादीत्यादि तथाच द्रष्टव्य इत्यस्यैवार्थः श्रोतव्यो

भाष्यप्रकाशः ।

शङ्क्यम् । तत्रार्थज्ञानरूपफलायाक्षरग्रहणरूपाध्ययनस्य विधानात् फलस्याविधेयत्वात् । किंच । नियोगविषयभूतमात्मज्ञानं यद्यनुत्पन्नं तदा यागवत् साध्यत्वाभावाद् विषयत्वासिद्ध्या तद्विषयकनियोगस्यासिद्धिः । यदि च श्रवणाद्युत्पन्नं तदा श्रवणादिनैवात्मज्ञानसिद्धेः किमन्तर्गडुना नियोगेन । नच फलार्थं तदपेक्षा । 'तमेव विदित्वा' इति श्रुतौ नियोगनिरपेक्षाज्ज्ञानादेव मुक्तेरुक्तत्वात् । किंच । ज्ञाननियोगयोः परस्परमसंबन्धे वाक्यानर्थक्यात् संबन्धोऽवश्यं वक्तव्यः । स च गुणप्रधानभावेनैव दृष्ट इत्येकस्यावश्यं प्राधान्यं वक्तव्यम् । तद्यदि ज्ञानस्येत्युच्यते तदा नियोगस्य वाक्यार्थतया प्राधान्यं सर्वत्र यत्प्रतिज्ञातं तद्धीयेत । यदि नियोगस्यैव तदुच्यते तदा ज्ञानस्य नियोगार्थत्वान्मुक्त्यर्थत्वं न स्यात् । तस्योभयार्थत्वे प्रमाणाभावात् । नच नियोगो मुक्त्यर्थः । अश्रुतत्वात् । तमेव विदित्वेति ज्ञानस्यैव साक्षात्तदुद्देशेन श्रुतत्वादिति । एतदग्रे च, यो रामानुजमतोपन्यासेऽस्माभिः द्वितीयःपूर्वपक्ष उक्तो, यद्यपि 'शास्त्रयोनित्वात्' इत्यादिना, यश्च तृतीय उक्तो यद्यपि वेदान्तवाक्यानामित्यादिना, तदुभयमुपन्यस्य ततः पूर्ववदेव सृष्टिवाक्यप्रभृतीनां सम्यगन्वयः समन्वय इति समन्वयपदार्थमुक्त्वा युक्तीरेवमाहुः । नच तेषां ब्रह्मपराणामर्थान्तरकल्पना युक्ता । श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । नच कार्य एव प्रामाण्यं प्रतिपत्तुं युक्तम् । स्वरूपावबोधेऽपि प्रामाण्यस्याविशिष्टत्वात् । अपौरुषेयत्वस्यैव प्रामाण्ये तन्त्रत्वात् । नचाग्निहोत्रादिवाक्येषु कार्यावगतिः प्रामाण्ये तन्त्रमिति शङ्क्यम् । तस्य चैत्यवन्दनादिवाक्येऽपि तुल्यत्वात् । अथापौरुषेयत्वे सत्यनपेक्षत्वं तन्त्रमिति विभाव्यते । तदा तु वेदान्तेऽपि तस्य तुल्यत्वात् स्वरूपपरत्वेऽपि प्रामाण्यमक्षुण्णमेव । किंच । पदानां स्वार्थप्रत्यायनेऽनपेक्षत्वं लोकवेदसाधारणम् । वाक्यानां तु लोके परापेक्षमेव प्रामाण्यम् । अन्यथा सपुष्पं तिष्ठति पश्येत्यादीनामपि तत् स्यात् ।

रश्मिः ।

मन्तव्य इत्यादिः । दर्शनस्य प्रत्यक्षेतरत्वादिति भावः । विधानादिति न तु ज्ञानस्य विधानात् । फलस्य ज्ञानस्य । अनुत्पन्नमिति श्रवणादिभिस्तथेत्यर्थः । किंतु सिद्धमिति भावः । श्रवणादिनेति विधिविषयेण । आत्मज्ञानसिद्धिरौषधफलवत् । अन्तरिति व्यर्थं न द्रष्टव्य इति । नियोगेन विधिना । तदपेक्षेति नियोगापेक्षेत्यर्थः । नियोगेत्यादि विदित्वेत्यत्र लिङ्लोट्तव्यादीनां विरहेण तथेत्यर्थः । असंबन्ध इति संबन्धः सहोच्चारणं असंबन्धोऽसहोच्चारितत्वं तस्मिन् सति । आनर्थक्यमप्रामाण्यं तस्मात् । दृष्ट इति धवखदिरौ छिन्धीत्यत्र धवखदिरादिव्यतिरिक्तस्थले दृष्ट इत्यर्थः । धवखदिरयोर्गुणप्रधानभावाभावात् । माभून्मुक्त्यर्थत्वं ज्ञानस्य नियोगस्य तद्भविष्यतीत्याशङ्क्य निषेधन्ति न च नीत्यादि । निषेधे हेतुमाहुः अश्रुतेत्यादि । तदुद्देशेनेति मुक्त्युद्देशेनेत्यर्थः । पूर्ववदिति रामानुजसिद्धान्तवदित्यर्थः । युक्तीरिति धर्मे (ब्रह्मणि) एव समन्वये युक्तीरित्यर्थः । अपौरुषेयत्वस्यैवेति एवकारेण कार्यावगतिव्यवच्छेदः । तन्त्रत्वं प्रयोजकत्वं तस्मात् । कार्यावगतिरिति जुहुयादिति होमे कृतिसाध्यत्वावगतिः । तस्येति कार्यावगतिरूपतन्त्रस्य चैत्यवन्दनं कुर्यादिति वाक्येपीत्यर्थः । स्वरूपेति स्वरूपावबोधकत्वेपीत्यर्थः । परापेक्षमिति आकाङ्क्षायोग्यतासंनिध्यपेक्षमित्यर्थः । स्वघटकपदार्थसत्त्वापेक्षं वा । सपुष्पमिति पश्य शशो धावतीतिवदन्वयः । तत्स्यादिति प्रामाण्यं

भाष्यप्रकाशः ।

वेदे तु तेषामप्यपौरुषेयत्वात् प्रमाणान्तरानधिगतमूलकारणगमकत्वे तदनपेक्षमेव । मीमांसकमते प्रमाणान्तरानधिगतार्थगन्तृत्वस्यैव प्रामाण्ये तन्त्रत्वाङ्गीकारात् । श्रौतानां तथैवेष्टत्वाच्च । अतः प्रत्यक्षवत् सृष्टिवाक्यस्यापि प्रामाण्यं तुल्यमेवेत्यादिभिर्बहुधा नियोगपरत्वं वाक्यानां दूषयित्वा शरीरेन्द्रियमनसामात्माधिष्ठितानां चेष्टाविशेषः प्रयत्नः सर्वधात्वर्थसाधारणः । स एव च साध्यत्वाद् वाक्यार्थो लोकवेदयोः । नियोगस्तु न वाक्यार्थः । पूर्वमीमांसाभाष्ये पूर्वोत्तरतन्त्रसूत्रयोश्च तत्सूचकाक्षराभावात् । किंतु प्रवृत्तौ निमित्तमात्रं सः । रागादिवत् । भावना तु भवति वाक्यार्थः । ये प्राहुः किमपि भावयेदिति ते स्वर्गकामपदसंबन्धात् स्वर्गं भावयेदिति ब्रूयुरिति भावार्थाधिकरणभाष्ये स्पष्टत्वात् । कृतप्रयत्नापेक्षस्त्विति व्याससूत्रेऽपि स्पष्टत्वाच्चेति वाक्यार्थविषये भावनामादृतवन्तः । यत् पुनर्वेदान्तानां कर्तृप्रतिपादनपरत्वं वा जपार्थत्वं वेति नियोगवादिभिरुक्तं, तत्तु सर्वजगत्कारणस्य ब्रह्मणो नियोज्यत्वाभावान्नियोज्यस्य जीवस्य सत्ताया अहमिति प्रत्यक्षेणैव सिद्धेरात्मवादे साधितत्वाच्च न वेदान्तस्य तत्परत्वं, प्रकरणाद्यभावाच्च न कर्मशेषजपार्थत्वमित्येवं नियोगवादिनं दूषयित्वा ततो भेदाभेदवादं स्थापयित्वा ततो मायावादिमतं दूषयित्वा ज्ञानकर्मसमुच्चयं स्थापितवन्तः । एवमुक्ते मतद्वये त्रिसूत्र्या जन्माद्यधिकरणसमाप्तिः ।

शंकराचार्यमतेऽप्येत एव पूर्वपक्षाः । सिद्धान्तस्तु मायावादेन निर्विशेषब्रह्मजीवैक्यप्रतिपादनपरः । अधिकरणसमाप्तिस्तु श्रुतत्वाच्चेति दशमे सूत्रे ।

शैवमतेऽप्येत एव पूर्वपक्षाः । सिद्धान्ते तु समन्वयो नामोपक्रमादिभिर्लिङ्गैस्तात्पर्यनिर्णय इत्युक्त्वा तैः शिवपरत्वं वेदान्तवाक्यानामित्युक्तम् ।

रश्मिः ।

स्यादित्यर्थः । तेषामिति वाक्यानामित्यर्थः । मूलकारणेति एकप्राणरूपमूलकारणवद् ब्रह्मरूपमूलकारणगमकत्वे । तदित्यादि आकाङ्क्षाद्यनपेक्षमित्यर्थः । स एवेत्यादि आर्थीभावनारूपः प्रयत्न एव शाब्दीभावनासाध्यत्वादित्यर्थः । पूर्वतन्त्रे द्वितीयेऽध्याये यजेतेत्याख्यातान्तेनापूर्वं प्रतिपाद्यते पदान्तरं तु तच्छेषतां भजत इति । अपूर्वं वा अर्थं इति स्थितं तद्दूषयन्ति नियोग इति अपूर्वमित्यर्थः । विधिर्वा । पूर्वोत्तरेत्यादि व्यासजैमिनिसूत्रयोरित्यर्थः । नियोगेति सर्वैः पूर्वमीमांसकैः नियोगरूपभावनायाश्चिरक्षणावस्थायित्वेन नियोगो न विधिविषयः किंत्वपूर्वमिति नियोगवादिनः । तत्परत्वमिति नियोज्यपरत्वमित्यर्थः । तत्परत्वे चाप्रामाण्यापत्तिरिति भावः । 'जन्माद्यस्य यतः' इत्यारभ्य श्रुतत्वाच्चेत्येवमन्तैः सूत्रैः यान्युदाहृतानि वेदान्तवाक्यानि तेषां सर्वज्ञः सर्वशक्तिरीश्वरो जगतो जन्मस्थितिलयकारणमित्येतस्यार्थस्य प्रतिपादकत्वमिति भाष्यस्वारस्यादुक्तत्वाच्च दशसूत्रमधिकरणमिदम् । तदीयाधिकरणमालायां या ईक्षत्यधिकरणसमाप्तिरस्मिन् सूत्र उक्ता सा स्वप्रज्ञाविलास इत्याशयेनाहुः अथेत्यादि । यद्वा ईक्षत्यधिकरणसमाप्त्या सप्तसूत्रमेवाधिकरणम् । भास्कराचार्यमते चेत्यादिः तथाच भास्करभाष्यम् । सांख्यास्तु त्रिगुणमचेतनं प्रधानं जगत्कारणमनुमीय तत्रैव वेदान्तवाक्यानि योजयन्तः प्रत्यवतिष्ठन्ते । चेतनस्य ब्रह्मणो जगत्कारणत्वे यत्प्रतिज्ञातं शास्त्रयोनित्वं 'सदेव सोम्येदमग्र आसीत्' इत्यादिवाक्यसमन्वयात्तदसिद्धं, सच्छब्दो वस्तुमात्रवाची प्रधानेऽप्यवकल्पतेऽतो न चेतनं जगत्कारणमिति प्राप्ते ब्रवीति 'ईक्षतेर्नाशब्दम्' इति । सूत्रस्य दशमत्वं तु 'जन्माद्यस्य यतः शास्त्रयोनित्वात्' इत्यनेकसूत्रमितिपक्षे । तैरिति उपक्र-

तथाहि । जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय तत्प्रतिपादकस्य पूर्वकाण्डस्य समन्वयमाह ।

अवान्तरवाक्यानां प्रकारशेषत्वात् । न च सर्वस्मिन् वेदे धर्म एव जिज्ञास्यः । तद्गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात् ।

भाष्यप्रकाशः ।

तत्र सिद्धान्तानामसंगतिः पश्चाद् व्युत्पाद्या । पूर्वं तु सर्वो वेदः क्रियापर इति पूर्वपक्षस्यासंगतिं व्युत्पादयन्ति तथाहीत्यादिना । समन्वयमिति धर्मे सर्ववाक्यानां तात्पर्यलिङ्गैः संदेहनिरसनपूर्वकं संबन्धम् । अवान्तरवाक्यानामिति अर्थवादमन्त्रादिरूपाणाम् । साधकत्वमिति प्रमितिजनकत्वम् । अयमर्थः । पूर्वकाण्डे ह्यग्निहोत्रादीनि कर्माणि प्रतिपाद्यन्ते । तेषां च न तेन रूपेण तदभिधेयत्वम् । शास्त्रभेदप्रसङ्गात् । किं तु धर्मत्वेनेत्येतद् बोधनाय जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय धर्मप्रतिपादकस्य पूर्वकाण्डस्य धर्मे समन्वयम्, आम्नायस्य क्रियार्थत्वादित्यादिभिः सूत्रैराह । तत्र मन्त्रार्थवादादीनां कथं क्रियार्थत्वमित्याकाङ्क्षायां तेषामवान्तरवाक्यानां धर्मप्रकारभूतद्रव्यदेवताकर्मस्तुत्यादिप्रकाशकत्वेन धर्मशेषत्वात् सर्वस्य पूर्वकाण्डस्य तत्रैव समन्वयः । न च तेष्वाम्नायादिपदात् सर्वस्मिन् वेदे धर्म एव जिज्ञास्य इति शङ्क्यम् । तद्गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात् । न च व्यासस्य तद्गुरुत्वे संदेहः । मार्कण्डेयपुराणारम्भ एव ।

‘व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ।
यस्याग्रे भारताख्यानं व्यासेनोक्तं महात्मना’ । इति ॥

श्रीभागवतेऽपि द्वादशस्कन्धे व्यासशिष्यान् प्रस्तुत्य, ‘साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम्’ इति कथनात् । न च सोऽन्य एवेति शङ्क्यम् । औत्पत्तिकसूत्रे, बादरायणस्यानपेक्षत्वादिति पूजार्थं बादरायणग्रहणेनापि तथावगतेः । न च ब्रह्मजिज्ञासायाः क्रत्वर्थपुरुषार्थजिज्ञासावदवान्तरशेषविशेषविषयत्वं शङ्क्यम् । तथा सति जैमिनिरेव क्रत्वर्थादिजिज्ञासावत्

रश्मिः ।

मादिलिङ्गैरित्यर्थः । माध्वास्तु शास्त्रयोनित्वलक्षणस्य ब्रह्मशिवादिष्वतिव्याप्तिरित्यलक्षणमिदमिति पूर्वपक्षे, तच्छब्दस्य विष्णुवाचकत्वमङ्गीकृत्यान्वयादुपक्रमादिलिङ्गसमुदायाद् विष्णुरेव जगज्जन्मादिकारणत्वेन शास्त्रयोनिर्न तु हिरण्यगर्भादिरिति सिद्धान्तयन्ति । तदेतन्मतं ‘अनुकृतेस्तस्य च’ इत्यधिकरणे सर्वेषां ब्रह्मण्यनुकरणत्वस्य व्यवस्थाप्यत्वादत्रैतच्चिन्तनस्यानुपयुक्तत्वान्नानूदितमिति ज्ञेयम् । धर्मे इत्यादि अयं समुपसर्गार्थः । संबन्धमित्यन्वयपदस्यार्थः । अर्थवादेति आदिशब्देन विधिनिषेधनामधेयानि । प्रमितीति मन्त्रब्राह्मणयोर्वेदनामधेयमिति ब्राह्मणे एव धर्मप्रमितिजनकत्वमिति नेति भावः । जैमिनिर्धर्मजिज्ञासामित्यादि अप्रामाण्यं स्यादित्यन्तं भाष्यं व्युत्पादयन्ति अयमर्थ इत्यादि । तेनेति अग्निहोत्रत्वादिरूपेण पूर्वकाण्डाभिधेयत्वमग्निहोत्रप्रतिपादकाग्निष्टोमप्रतिपादकयोर्वेदयोर्भेदप्रसंगात् प्रतिपाद्यभेदस्य प्रतिपादकभेदकत्वादित्यर्थः । प्रतिज्ञायेति ‘अथातो धर्मजिज्ञासा’ इति प्रतिज्ञायेत्यर्थः । अवान्तरेत्यादि भाष्यं विवृण्वन्ति तत्रेत्यादि । तत्रैवेति धर्म एवेत्यर्थः । न चेत्यादि भाष्यं विवृण्वन्ति न च तेष्वित्यादि सूत्रेष्वित्यर्थः । अपीति अपिर्मार्कण्डेयश्रीभागवताभ्यामौत्पत्तिकसूत्रस्य समुच्चये । तथावगतेरिति व्यासशिष्यत्वावगतेः । क्रत्वर्थेत्यादि

संदेहमात्रवारकत्वाज्जिज्ञासयोः। न त्वलौकिकार्थसाधकत्वम्। तथा सति वेदानामन्याधीनत्वेनाप्रामाण्यं स्यात् वेदजिज्ञासेत्येवोक्तं स्यात्।

भाष्यप्रकाशः।

तामपि प्रतिजानीयात्। तस्या अपि शास्त्रपूर्त्यर्थमवश्यमपेक्षितत्वात्। अतः कर्तृभेदाद् भिन्ने एवोभे अपि जिज्ञासे। ते च पूर्वोत्तरकाण्डाभ्यां प्रमिते धर्मे ब्रह्मणि च मन्दमध्यमयोर्बुद्धिदोषात् संदेहसंभवमालोच्यैव कृते, न त्वन्योऽन्यमतदूषणाय। जैमिन्युक्तानामभ्यासादीनां व्यासपादैरुपन्यासाद् व्यासाभिप्रेतस्यानपेक्षत्वस्य जैमिनिनोपन्यासात्। नापि धर्मब्रह्मप्रमितिजननाय। यदि तथा स्यात् तदा मीमांसाऽधीने वेदस्य प्रमितिजनकत्वे उभावपि वेदस्य प्रामाण्येऽनपेक्षत्वं न ब्रूयाताम्। अत इदमपि सर्वस्य वेदस्याक्रियार्थत्वगमकम्। तदेतदुक्तं संदेहेत्यादि, अप्रामाण्यं स्यादित्यन्तेन। अथ यदि कर्मार्थतैव वेदस्य जैमिन्यभिप्रेता स्यात् तदा बादरायणमतं जानानेन तदनादराय वेदजिज्ञासेत्येवं प्रतिज्ञावाक्यमुक्तं स्यात्। अत उक्तहेतुत्रयात् सर्वस्य वेदस्य क्रियार्थत्वं न जैमिन्यभिप्रेतम्। किं चाम्नायस्येति तु पूर्वपक्षसूत्रं, तद्भूतसूत्रस्थं क्रियार्थपदं तु तिङन्तवाचकं, न तु साध्यार्थपरम्। तेन तदर्थं जैमिनिसूत्रानुसरणमपार्थमेवेति।

रश्मिः।

चतुर्थेध्याये 'अथातः क्रत्वर्थपुरुषार्थत्वयोः जिज्ञासा'इति सूत्रेणेत्यर्थः। अवान्तरेत्यादि अङ्गविशेषविषयत्वमित्यर्थः। नास्तिक्यनिराकरणाय ब्रह्मत्वार्थं च कर्मणि ब्रह्मज्ञानस्यापेक्षितत्वादिति भावः। तामिति ब्रह्मजिज्ञासामित्यर्थः। संदेहेत्यादि 'संदेहवारकं शास्त्रं बुद्धिदोषात्तदुद्भवः' इति पूर्वकारिकयोक्तम्। जैमिन्युक्तानामिति द्वितीयस्य द्वितीयपादे उक्तानामित्यर्थः। उपन्यासादिति 'आनन्दमयोभ्यासात्' इति सूत्र उपन्यासादित्यर्थः। आदिशब्देन श्रुत्यादि। व्यासेत्यादि अत्रैव तृतीयपादे 'शब्द इति चेन्न' इत्यादिसूत्रेऽभिप्रेतस्येत्यर्थः। उपन्यासादिति 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशो व्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति सूत्रे इत्यर्थः। तथा च शाबरभाष्यं बादरायणग्रहणं बादरायणस्येदं मतं कीर्त्यते बादरायणं पूजयितुं नात्मीयं मतं पर्युदसितुमिति। न त्वित्यादि भाष्यं विवृण्वन्ति नापीत्यादि। ब्रह्मेत्यादिः अलौकिकार्थेत्यस्यार्थः। प्रमितीत्यादिः साधकत्वमित्यस्यार्थः। जिज्ञासे इति बोध्यम्। तथेत्यादिति भाष्यं विवृण्वन्ति यदीत्यादि। उभाविति व्यासजैमिनी इत्यर्थः। इदमपीति भिन्नकर्तृकत्वमपीत्यर्थः। तदेतदिति न च ब्रह्मजिज्ञासाया इत्यारभ्योपपादितमित्यर्थः। वेदेत्यादिभाष्यं विवृण्वन्ति अथेत्यादि। उक्तेत्यादि जैमिनेर्व्यासशिष्यत्वात्, मीमांसयोर्भिन्नकर्तृकत्वात्, अथातो वेदजिज्ञासेत्यप्रतिज्ञानाच्चेति हेतुत्रयादित्यर्थः। उक्ते धर्मे समन्वयेऽधिकां युक्तिमाहुः किंचेत्यादि। तदेतद्भाष्यशास्त्रदीपिकादौ प्रसिद्धम्। सिद्धान्तसूत्रं तु 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति। तिङन्तेत्यादि 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्' इति सूत्रम्। तेष्वेव पदार्थेषु भूतानां वर्तमानानां पदानां क्रियार्थेन तिङन्तेन समुच्चारणमर्थस्य पदनिमित्तत्वादिति सूत्रार्थः। साध्यार्थेत्यादि साध्योर्थो अन्ययागस्तत्परत्वं नेत्यर्थः। अयमर्थः लिङादिप्रयोगे आख्यातत्वलिङ्त्वाभ्यां भावनैवोच्यते। सा च भवितुर्भवनानुकूलो भावकव्यापारविशेषः तत्र शाब्दी भावना आर्थी भावना च। पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः शाब्दी भावना लिङाख्या, अयं मां प्रवर्तयति प्रवृत्त्यनुकूलव्यापारवानयमिति लिङ्श्रवणे प्रत्-

किंच ।
साधनं च फलं चैव सर्वस्याह श्रुतिः स्फुटम् ।
न प्रवर्तयितुं शक्ता तथा चेश्वरको न हि ॥
प्रवर्तकस्तु सर्वत्र सर्वात्मा हरिरेव हि ।

भाष्यप्रकाशः ।

ननु तथापि पूर्वकाण्डस्य क्रियार्थत्वे तु न विवादः । तथा सत्यैकशास्त्र्यानुरोधादुत्तरकाण्डस्यापि पूर्वशेषतैव येन केनापि प्रकारेणादरणीया । नच विपरीतमाशङ्कनीयम् । सिद्धे ब्रह्मणि साध्यार्थानां वाक्यानामन्वयायोगात् । नच प्रापकत्वेनान्वयः । तत्तद्वाक्यगतफलोक्तिबाधप्रसङ्गात् । अतो वेदस्य साध्यार्थपरतां निश्चित्य तच्छेषतैवोत्तरकाण्डार्थस्यादरणीया । यदि चोपासनाशेषत्वं ज्ञानशेषत्वं वाङ्गीक्रियते तदापि तयोर्विधेयत्वेन धर्मत्वादुत्तरार्थस्य ब्रह्मणः प्रवर्तकश्रुतिवाक्यशेषता दुर्वारैवेति सर्वस्य वेदस्य धर्मार्थत्वमर्थादेव सिद्धमित्यत आहुः किंचेत्यादि । चकारद्वयं व्यापारस्य स्वरूपस्य च समुच्चायकम् । सर्वस्येति कर्मणः । सर्वस्यैव स्फुटमाहेत्यन्वयः । सर्वत्रेति विहिते निषिद्धे च । सर्वात्मेति 'स आत्मानꣳ स्वयमकुरुत'

रश्मिः ।

यात् । यथा गोशब्दश्रवणे गोत्वं प्रतीयते इति गोत्वं गोशब्दार्थः । स च व्यापारविशेषः । वेदे पुरुषाभावाल्लिङादिशब्दनिष्ठ एव । अतः शाब्दीभावना । तस्याश्च साध्यसाधनेतिकर्तव्यतारूपांशत्रयापेक्षिण्या अंशत्रयोपेतार्थीभावना साध्यत्वेन संबध्यते, न तु संख्यादयोऽयोग्या भावयितुम् । एवं च साध्यार्थ आर्थीभावना तत्परत्वं नेति । क्रियार्थपदस्य प्रकृतिप्रत्ययरूपतिङन्तवाचकत्वं, न तु लिङादिमात्रप्रत्ययार्थपरत्वमिति पर्यवसन्नोर्थः । तेनेत्यादि जैमिनिसूत्रविचार एतत्सूत्रद्वयं क्रियार्थत्वसाधकं वक्तव्यं तस्य तु तथात्वाभावेन सर्वस्य वेदस्य क्रियार्थत्वार्थत्वमित्यर्थः । किंच साधनमित्यादिभाष्यं विवरीतुमाभासमाहुः ननु तथेत्यादि । क्रियार्थस्य इति स्वाध्यायविधिना तु सर्वो वेदः पुरुषार्थाय नीयते । तदर्थमर्थवादानां भूतार्थप्रतिपादनेन प्रयोजनविधुराणामयं प्राशस्त्यरूपो लक्ष्यमाणोर्थः क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति । अन्यथा प्रयोजनवदर्थपर्यवसानं न स्यादतो विधिना अर्थवादानां प्राशस्त्ये तात्पर्यं बोध्यते । तात्पर्याच्च लक्षणा । ततश्चैककार्यकरत्वरूपैकवाक्यत्वं विधीनाम् । विधिमन्तरेण पुरुषप्रवर्तनासंभवात् । अतश्चार्थवादाः प्रयोजनपर्यवसायिनः स्युरिति सिद्धान्तसूत्रार्थात् क्रियार्थत्वे श्रुति'र्न प्रवर्तयितुं शक्ता तथा चेश्वरको नहि' हिर्हेतावतो हेतोः साधनं चेत्यादिरित्यन्वयं मन्वाना आहुः वेदस्येति । विधिविषययागार्थत्वे तु न विवाद इत्यर्थः । विपरीतमिति पूर्वकाण्डस्योत्तरशेषतेत्यर्थः । प्रापकत्वेनेति अन्तःकरणशुद्धिद्वारा ब्रह्मप्रापकत्वेन कर्मणां ज्ञानभक्त्योरन्वय इत्यर्थः । तत्तदित्यादि यजेत स्वर्गकामः, तरति तरति ब्रह्महत्यां योश्वमेधेन यजते, इत्यादिवाक्येत्यर्थः । अन्तःकरणशुद्धिद्वारा ज्ञानभक्तिस्वर्गादिकं चेत्युभयं फलत्वं नार्हेदिति भावः । अङ्गीक्रियत इति कर्मणोङ्गीक्रियत इत्यर्थः । तयोरिति ज्ञानोपासनयोः । विधेयत्वेनेति आत्मेत्येवोपासीतेति प्रज्ञां कुर्वीत इत्युभयोर्विधिकर्मत्वेन विध्यर्हत्वेन । धर्मत्वादिति 'चोदनालक्षणोर्थो धर्मः' इति जैमिनिसूत्रोक्तधर्मलक्षणाक्रान्तत्वात् । प्रवर्तकेत्यादि आत्मेत्येवोपासीत 'आत्मा वा अरे द्रष्टव्यः' इत्यादिवाक्यशेषतेत्यर्थः । यद्वा विधिवाक्यशेषता । व्यापारस्येति देवताप्रीतिरूपस्येत्यर्थः । इदं तृतीयाध्याये स्फुटीकरिष्यते । स्वरूपस्येति ब्रह्मप्राप्तिफलवद् ब्रह्मणोपि फलत्वं 'भगवानेव हि फलम्' इति निरोधलक्षणग्रन्थात् । स्फुटमाहेति क्रियाविशेषणत्वात् । कारिका उप-

यज्ञ एव हि पूर्वत्र चोद्यते स्वर्गसिद्धये ॥

भाष्यप्रकाशः ।

इति श्रुतेः सर्ववस्तुस्वरूपोऽन्तर्यामिब्राह्मणात् सौबालश्रुतेश्च सर्वान्तर्यामी। अयमर्थः। वेदस्य या साध्यार्थपरता त्वयाङ्गीकृता सा श्रुतेः प्रवर्तकत्वानुरोधात्। तत्र श्रुतेर्यत् प्रवर्तकत्वं तत् किं यावदधिकारिणः प्रति साधारणं, किं वा असाधारणम्। आद्ये कस्यापि त्रैवर्णिकस्य नरको न स्यात्। तथा राजदण्डादेरपि लोके कोऽपि विषयो न स्यात्। रोगी च नोपलभ्येत। अविहितनिषिद्धाच्च निवृत्तेरपि तत एव संभवात्। तदभावे नरकादेरप्यसंभवात्। अथ पूर्वकर्मजन्यदुरदृष्टवशादविहितादौ प्रवृत्तिः। तर्हि तादृशेन शुभादृष्टेन विहितेऽपि प्रवृत्तिसंभवान्न श्रुतेः प्रवर्तकत्वसिद्धिः। अथासाधारणम्, तर्हि तदसाधारण्यं स्वभावतो वक्तुमशक्यं, हेत्वन्तरसाहाय्येन साधनीयम्। तत्र कालादेः साधारणत्वात् तत्तज्जीवादृष्टस्य तथात्वं कल्पनीयम्। तथा सति तेनैव प्रवृत्तिसंभवान्न श्रुतौ प्रवर्तकत्वनिर्धारः कर्तुं शक्यः। अथ प्रवृत्तेः शब्दश्रवणान्तरभावित्वदर्शनाददृष्टादेः सहकारित्वेनैव प्रवेशो, न करणत्वेनेति विभाव्यते, तर्ह्यदृष्टसंपादितदृष्टसामग्रीसत्तायां प्रवृत्तिरकुण्ठितैव स्यात्। अवतमसे चाक्षुषदर्शनेन सहकारिदौर्बल्येऽपि कार्योत्पत्तिनिर्धारात्। अतः कौण्ठ्यदर्शनात् फलमुखं प्रवर्तकत्वं न श्रुतेः शक्यवचनम्। तेन

रश्मिः ।

पादयन्ति अयमर्थ इत्यादि। साध्यार्थपरतेति 'चोदनालक्षणोऽर्थो धर्मः' इति सूत्रे कार्ये धर्मे चोदना प्रमाणमिति कार्यपरत्वं वेदप्रामाण्यव्यापकमिति साध्यार्थपरतेत्यर्थः। प्रवर्तकत्वेत्यादि। अयमर्थः। 'यजेत स्वर्गकामः' इत्यादौ यजेतेत्यत्रास्त्यंशद्वयं प्रकृतिप्रत्ययरूपम्। तत्राख्यातत्वलिङ्त्वाभ्यां प्रत्ययो युक्तो भवति। ताभ्यां भावनैवाभिधीयते, विधिनिमन्त्रणेत्यादिशासनात्। विधिः प्रेरणं, भावना च भवितुर्भवनानुकूलो भावकव्यापारविशेषः। सा च शाब्दीभावनार्थीभावना च। तत्र पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः शाब्दीभावना लिङ्वाच्या। अयं मां प्रवर्तयति प्रवृत्त्यनुकूलव्यापारवानयमिति लिङ्श्रवणे प्रत्ययात्। यथा गोशब्दश्रवणे गोत्वं प्रतीयते इति गोत्वं गोशब्दार्थः। ननु स च व्यापारविशेषो न विध्यर्थोऽपि तु इष्टसाधनत्वं तदर्थ इति चेन्न। यागस्तु इष्टसाधनं तस्मात्तं त्वं कुरु इति सहप्रयोगात्। पर्यायतायां तु सहप्रयोगो न स्यात्। स च लोके पुरुषनिष्ठः। वेदे तु पुरुषाभावाच्छब्दनिष्ठ एव सः। अतो वेदः प्रवर्तयति। एतादृशप्रवर्तकत्वं तु वेदस्य साध्यार्थपरत्वे, न तु सिद्धार्थपरत्वे इति प्रवर्तकत्वानुरोधात्तथेत्यर्थः। साध्यार्थे प्रवृत्तिर्न तु सिद्धार्थे इति भावः। तत एवेति विधित एवेत्यर्थः। तदभाव इति अविहितनिषिद्धाचरणभाव इत्यर्थः। श्रुतेरिति विधिश्रुतेरित्यर्थः। तथात्वमिति हेतुत्वमित्यर्थः। संभवादिति प्रवृत्तिसंभवादित्यर्थः। तर्ह्यदृष्टेति अदृष्टसंपादितदृष्टसामग्रीसत्तायामित्यत्र सामानाधिकरण्यं सप्तम्यर्थः। तथाच तादृशसत्तासमानाधिकरणा शब्दश्रवणानन्तरं जायमाना प्रवृत्तिरकुण्ठितैव स्यादित्यर्थः। नन्वदृष्टं तथा न प्रबलमिति कुण्ठिता प्रवृत्तिरिति चेत्तत्राहुः अवेत्यादि। अवहीनं तमः अवतमसं 'अवसमन्धेभ्यस्तमसः' इति सूत्रेणाच् तस्मिन्नित्यर्थः। सहकारीत्यादि आलोकसंयोगदौर्बल्येऽपीत्यर्थः। निर्धारादिति शब्दश्रवणमन्तरेणापि बालस्यादृष्टवशात् स्तनपाने प्रवृत्तिदर्शनाच्चेत्यपि द्रष्टव्यम्। फलमुखेति फलमिष्टमनिष्टं च तदुपायभूतप्रवर्तकत्वम्। न श्रुतेरिति प्रकृतस्य चान्यस्य वा वक्तव्यमिति भावः। पूर्वार्धे साधनं करणमुक्तमतो व्यापाररूपः। फलपदं फलत्वावच्छिन्ने योगरूढमतो ग्रामादिकमपि फलमित्याहुः तेनेति। द्वितीयां

सिद्ध एव हि सर्वत्र वेदार्थो वेदवादिनाम् ।

भाष्यप्रकाशः ।

साधनव्यापारफलस्वरूपाणि कर्मणां श्रुतिर्बोधयतीत्येतावन्मात्रमङ्गीकार्यम् । नच प्रवृत्तिनिवृत्त्यनुपपत्तिः । ईश्वरस्यैव प्रवर्तकस्य निवर्तकस्य सत्त्वात् । नचात्र कल्पना । 'एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष उ एवासाधु कारयति तं यमधो निनीषति' इत्यादिश्रुतेः । नच वैषम्यनैर्घृण्यापातः । आत्मसृष्टेरेव श्रुत्यभिप्रेतत्वेन भेदाभावादिति वैषम्यनैर्घृण्यसूत्रे व्युत्पादयिष्यामः । अतः श्रुतेः प्रवर्तकत्वाभावेन साध्यार्थपरतैवासंगता । नच तर्हि पूर्वकाण्डे यज्ञबोधनं व्यर्थमिति शङ्क्यम् । तस्य स्वर्गसिद्ध्यर्थत्वात् । विध्यादीनां क्रीडेच्छाव्यापारत्वाच्च तद्वैयर्थ्यमिति कृतप्रयत्नापेक्षसूत्रे व्युत्पादयिष्यामः । एवं सिद्धे विध्यादीनां क्रीडेच्छाव्यापारत्वे तदर्थानां तत्फलानां च क्रीडाशेषतैवेति तत्प्रतिपादकत्वेनैवोभयोरैकवाक्यं, न कर्मप्रतिपादकतयेति मन्तव्यम् । पुरःस्फूर्तिकमादाय क्रियापरत्वाङ्गीकारेऽपि तेन पूर्वकाण्डस्यैव धर्मार्थत्वसिद्धिर्न सर्वस्य वेदस्येति तावन्मात्रस्य साध्यार्थतोपगमेन पूर्वमीमांसकमतं द्वाभ्यां दूषितम् । अतः परं पूर्वकाण्डस्यापि साध्यार्थत्वमनुपगम्य दूषयन्ति सार्धेन सिद्ध एवेत्यादि । सर्वत्रेति काण्डद्वये । पूर्वत्रेतिपाठे अपेरध्याहारः । वेदवादिनामिति सर्ववेदप्रामाण्यज्ञान-

रश्मिः ।

कारिकां विवृण्वन्ति न च प्रवृत्तीत्यादि । अत्रेति ईश्वरस्य प्रवर्तकत्वे निवर्तकत्वे चेत्यर्थः । श्रुतेरिति उपलक्षणमेतत् । लोकदृष्टान्तेनेश्वरे संभवति प्रवर्तकत्वादौ शब्दे दृष्टान्ताभाव इति । यज्ञ एवेत्युत्तरार्धं विवरीतुमाहुः न च तर्हीति । साध्यो यज्ञस्तत्परत्वाभाव(काल)इत्यर्थः । स्वर्गेत्यादि न तु प्रवृत्त्यर्थत्वमिति भावः । विधिनिमन्त्रणेति सूत्रे पुरुषनिष्ठमेव प्रेरणं लिङाभिधीयते । नन्वीश्वरोऽदृष्टद्वारेण प्रवर्तयिष्यति किं विहितप्रतिषिद्धविधानेनेति चेत्तत्राहुः विध्यादीनामित्यादि । तद्वैयर्थ्यमिति विहितप्रतिषिद्धवैयर्थ्यमित्यर्थः । व्युदिति द्वितीयाध्यायतृतीयपादे व्युत्पादयिष्याम इत्यर्थः । क्रीडेच्छेत्यादि तज्जन्यत्वे सति तज्जन्यजनको हि व्यापारः । इच्छाजन्यत्वे सति व्यापारत्वमिच्छाजन्यक्रीडाजनकत्वं, क्रीडेच्छाया व्यापारत्वम् । तदर्थानामिति विध्याद्यर्थानामित्यर्थः । क्रीडाशेषता ब्रह्मविषलीलार्थता, पारार्थ्यं शेषलक्षणमिति । तथा च क्रीडा यागादिस्तदर्थः विध्यर्थः प्रेरणादिः । एवकारस्तु, ननु यागादिर्जीवधर्मः इति जीवक्रीडा नात्मक्रीडा तच्छेषता चेन्न, परात्तु तच्छ्रुतेरिति ईश्वरक्रीडा तच्छेषता चेति । क्रीडा । तच्छेषतेतरव्यवच्छेदकः । यद्वा न यागादिः किंतु 'यतो वा इमानि भूतानि जायन्ते' इत्याद्युक्ता सर्गादिर्वेदान्ते तच्छेषता विध्याद्यर्थे प्रेरणादौ इत्यर्थः । तत्प्रतीति ब्रह्मविषलीला तच्छेषप्रेरणादिप्रतिपादकत्वेन । साध्यार्थपरताया दूषितत्वादेवकारः । उभयोर्वेदवेदान्तयोः । ऐकवाक्यं तु 'यदेव विद्यया करोति' इति 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इतिश्रुतिभ्याम् । न कर्मेति साध्यार्थपरतया नेत्यर्थः । मन्तव्यमिति मननार्हम् । 'क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते' इतिवाक्यात् । न चैवमीश्वरः प्रवर्तयतीति मतं दृष्टविरोधीति 'चोदना पुनरारम्भः' इतिसूत्रस्य भाष्यविरोध इति वाच्यम् । लौकिकानुग्रहाय जैमिनेः प्रवृत्तत्वेन दृष्ट एव तेषां विश्वासात् तत्र विधेः प्रवर्तकत्वोक्तेरिति । यद्वा 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा' इति श्रुतिप्राप्तविकल्पोक्तानुष्ठानकरणे तथैव वर्तते । अधुना तु 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इतिश्रुत्युक्तानुष्ठानमिति न किंचिदेतच्छास्त्रभेदात् । ननु न तथा प्रतीयत इतिचेत्तत्राहुः पुर इत्यादि । तावदित्यादि पूर्वकाण्डमात्रस्येत्यर्थः । द्वाभ्यामिति कारिकाभ्याम् । अध्याहार इति । उत्तरकाण्डसंग्रहायेति भावः ।

मन्त्राणां कर्मणां चैव दर्शनश्रवणाच्छ्रुतौ ।
कृतिश्च सिद्धतुल्यत्वं वेदः स्वार्थे च सन्मतः ।

'प्रजापतिरकामयत प्रजायेय' इति । 'स एतदग्निहोत्रं मिथुनमपश्यत्' । 'प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत् तावानग्निष्टोम' इत्यादि । न सूपाख्यानानां मिथ्यार्थत्वं बुद्धजन्मनः पुरोक्तं युक्तं वा । तथा सति वेदानामप्रामाण्यमेव स्यात् । मिथ्योपाख्यानप्रतिपादकलोकवत् ।

भाष्यप्रकाशः ।

पूर्वकं तदनुसारिणाम् । चैवेति चकारो 'अपश्यत् पुरोडाशं कूर्मं भूतं सर्पन्तम्' इति द्रव्यादीनां दर्शनस्य समुच्चायकः । मन्त्राणां दर्शनं तु, 'स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्, स एतं दीक्षितवादमपश्यत्' इत्यादिषु बोध्यम् । स्वार्थे चेति चोऽप्यर्थे । अतः स्तुतिं समुच्चिनोति । उक्तं विभजन्तो दर्शनस्य श्रुती आहुः प्रजापतिरित्यादि । अत्राद्या तैत्तिरीयब्राह्मणस्था । अस्यामपश्यदित्यस्य ज्ञानार्थताया अपि शक्यवचनत्वात् सिद्धार्थत्वं न निःसंदिग्धं स्यादित्यतो द्वितीयस्या उपन्यासः । सा च संहिताप्रथमाष्टकस्था । तत्रोक्तस्योन्मानस्य कर्मणामसिद्धत्वेऽशक्यवचनत्वादिति । न हीत्यादिकं विभागभाष्यम् । तेनायमर्थः । व्यासादधीतवेदः श्रुतभारतः स्वयमृषिर्जैमिनिर्यदि धर्मरूपायाः क्रियायाः सिद्धत्वं नाभिप्रेयात् तदा भावार्थाधिकरणे, 'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत' इत्यनेन सिद्धाव-

रश्मिः ।

कर्मदर्शनश्रुतेर्भाष्ये वक्तव्यत्वान् मन्त्रदर्शनश्रुतेश्चानुक्तत्वात्तां दर्शयन्ति मन्त्राणामित्यादि । भाष्ये । कृतेश्चेति कृतिर्यज्ञस्तस्य नित्यत्वेपि क्रीडार्थमाविर्भावतिरोभावाभ्यां साध्यत्वभानेपि सिद्धतुल्यत्वं, सर्वस्य नित्यत्वादिति । प्रकृते । दर्शनश्रुती इति दर्शनश्रुती इति द्विवचनान्तमिदम् । ज्ञानार्थताया इति एवं भविष्यतीति ज्ञातवानित्येवं साध्यज्ञानार्थताया उक्तप्रकारेण वा इत्यर्थः । उक्तस्येति उदमिमीतेत्युक्तस्येत्यर्थः । इतीति । नहि साध्यस्य घटस्योन्मानं संभवतीति भावः । विभागभाष्यमिति 'वेदः स्वार्थे' इत्यादिकारिकैकदेशव्याख्याभूतोर्व्याख्यानभाष्यम् । विभागशब्दस्तावद्व्याख्यानेषु प्रयुज्यते विशिष्य तु भाष्यविभागे प्रतिविधास्यामः इति सृष्टिभेदवादे कथनात् । अर्थपरोत्र विभागशब्दः । स्वरूपपरो यथाह 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यमवरं स्मृतम्' इत्यत्राव्यङ्ग्यमधममभिप्रेत्यैतावदधमकाव्यलक्षणमितरद्विभागपरमिति । तथात्र नहीत्यादि वेदस्वरूपपरं न भवति किंतु व्याख्यानभाष्यमित्यर्थः । तथापि स एवार्थः । यद्वा । यथा संहिता एकप्राणस्य योगः । वायुः शब्दतामापद्यते इति प्राञ्चः । तद्वद्भगवद्व्यासस्य सूत्राणि तदीयैकप्राणयोगः एकस्य विभज्य धारणार्थं विभागस्य भाष्यं युक्तमिति । अत एव शैवभाष्ये व्याख्यायते इति वक्तव्ये विभज्यत इत्युक्तम् । तेनेति एकदेशभाष्यस्य पूर्वकारिकाव्याख्यानसापेक्षत्वेनेत्यर्थः । वेदस्वरूपेतरपद्व्याख्यानं तत्परत्वेनेति वार्थः । अयमिति मीमांसकादिनिरासको वक्ष्यमाणोर्थ इत्यर्थः । तदर्थं सार्धकारिकार्थमाहुः व्यासादित्यादि । भावार्थेत्यादि द्वितीयाध्याये इत्यर्थः । सिद्धेत्यादि भावार्था इत्यत्र भावशब्दस्तावद् 'भावे घञ्' इति सूत्रनिष्पन्नः

---

१. 'कृतिश्च' इति भाष्यपाठे रश्मिकारैः कृतेश्चेति स्वीकृत्य व्याख्यातोऽस्ति ।

भाष्यप्रकाशः ।

स्यापन्नधात्वर्थाभिधायकानां नामपदानां क्रियाप्रत्यायकत्वं न वदेत् । नच तत्र भावार्थपदेन भावनार्था इत्येवोच्यत इति वाच्यम्। तथा सति कर्मशब्दपदवैयर्थ्यापत्तेः । भावार्थैः क्रिया प्रतीयेतैतावतैव चारितार्थ्यात् । तथा 'सर्वेषां भावोऽर्थ इति चेत्'इत्यग्रिमसूत्रं च न वदेत्। क्रियाबोधकाख्यातपदानां भावनार्थत्वस्य सर्वजनीनत्वेन सर्वेषां भावोऽर्थ इति संदेहस्यैवानुदयात् । तथा अग्रिमसूत्रद्वये क्रमेण नाम्नां पुरुषानपेक्षक्रियाप्रतिपादकत्वम्, आख्यातानां तु पुरुषापेक्षक्रियाप्रतिपादकत्वमिति विभागं च न कुर्यात् । साध्यैकस्वभावक्रियावादे पुरुषानपेक्षक्रियाया एवाभावात् ।

किंच । यागादिधर्मरूपा क्रिया यदि सर्वदा साध्यावस्थैव स्यान्न कदापि सिद्धावस्था, तदा तन्निष्पत्तेः कदाप्यभावाच्चोदनापि नोच्येत । 'चोदना पुनरारम्भ' इति लक्षणमपि तस्या न क्रियेत ।

रश्मिः ।

इति तथेत्यर्थः । मीमांसकाभिमानिशङ्कामनूद्य निषेधन्ति न च तत्रेत्यादि । भावनार्था इति । भावनार्था आख्यातशब्दास्तेभ्योऽपूर्वं प्रतीयत इतिसूत्रार्थात् । यथाहुः—

'द्रव्यादिशब्दतोऽपूर्वधीर्भावार्थपदादुत ।
द्रव्यादीनां फलार्थत्वात् तच्छब्देन ह्यपूर्वधीः' ॥
'क्रियाद्वारमृते द्रव्यं फलेन नहि युज्यते ।
भावनावाचिनोऽपूर्वमाख्यातादवगम्यते' ॥

इति 'सोमेन यजेत' 'हिरण्यमात्रेयाय ददाति' इत्यादौ भावार्थस्य यागदानादेः साध्यत्वेन फलं प्रति असाधनत्वान्नापूर्वप्रत्यायकत्वं किंतु सोमादिद्रव्यादीनामिति पूर्वपक्षः । क्रियामन्तरेणाफलवन्तो भवन्तो द्रव्यादयः काष्ठादिदृष्टान्तमनुरुन्धाना भावनावाचितां समर्पयन्ति । यजति ददातीत्यादीनामपूर्वबोधकतामाख्यातानाम् । धात्वर्थव्यतिरिक्ता सर्वधात्वर्थसंबद्धकरोत्यर्थरूपा भावनेति । चतुःसूत्रमधिकरणमिदं द्वितीये त्वेकसूत्रे 'चोदना पुनरारम्भ' इत्यस्मिन्नधिकरणेऽपूर्वसदसद्भावे संशयः । यागस्य क्रियारूपत्वेन त्रिक्षणावस्थायितया कालान्तरभाविफलजननासामर्थ्यान्मध्ये व्यापाररूपमपूर्वद्वारं कल्प्यतेऽतोऽपूर्वमस्तीति सिद्धान्तयन्ति, तदिदं सूत्रं विरुणद्धि । सूत्रेष्वपूर्ववाचकपदाभावात् न च यागस्य करणत्वानुपपत्तिः । आख्यातानां क्रियासामान्यवाचितया समानपदोपात्तस्य धातोश्चातीन्द्रियक्रियाविशेषवाचितया तन्निष्ठस्य करणत्वस्य देवताप्रीतिरूपव्यापारेण सिद्ध्यनुपपत्त्यभावात् । साधकतमं करणमिति करणलक्षणाङ्गीकारे तु स्वरूपेण निर्वाहान्न व्यापारापेक्षात आख्यातपदैस्तत्कल्पनस्याशक्यत्वात् । पुरुषप्रवृत्तिस्तु न यागः तदभिव्यञ्जकतया तदेकदेशत्वात् । यथाहि उद्यमननिपतनरूपपुरुषव्यापारसहकृतेन परशुनाघातात्मकवृक्षसंयोगद्वारा छिदा साध्यते तथा चोदनाप्रयुक्तपुरुषव्यापाराभिव्यक्तयागेन देवताप्रीतिद्वारा फलं साध्यते, अतः प्रवर्तकत्वेनाप्यपूर्वकल्पनमशक्यमिति । एतद्दूषणं स्फुटमिति प्रकारान्तरमाहुः तथासतीत्यादि । अग्रिमेत्यादि 'येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि तस्मात्तेभ्यः पराकाङ्क्षा भूतत्वात्स्वे प्रयोगे' । 'येषां तूत्पत्तौ अर्थे स्वप्रयोगो न विद्यते तान्याख्यातानि तस्मात्तेभ्यः प्रतीयेताश्रितत्वात्प्रयोगस्य' इति सूत्रद्वये इत्यर्थः। चोदनापीति 'चोदनालक्षणोऽर्थो धर्मः' इति सूत्र इत्यर्थः । क्रियायाः प्रवर्तकं वचनं चोदनेत्युच्यते तस्याश्च कृदन्तत्वमिति सिद्धावस्थाबोधिका सा नोच्येत धर्मलक्षणत्वेनेत्यर्थः । तस्या इति चोदनाया इत्यर्थः । न क्रियेतेति

भाष्यप्रकाशः ।

अतो जैमिनेरपि वेदस्य सिद्धार्थपरतैवाभिप्रेता । इदं यथा तथा भावार्थाधिकरणभाष्ये व्युत्पादितमाचार्यचरणैः । मयापि तद्विवरणे निपुणतरं प्रपञ्चितमिति नात्र लिख्यते ।

रश्मिः ।

सिद्धावस्थापन्नधात्वर्थबोधकघञन्तारम्भपदेन न क्रियेतेत्यर्थः । न च स्वर्गादिरारभ्यते येन तदपूर्वमारम्भः इति न घञन्तमिदमिति वाच्यं 'चोदनालक्षणोर्थो धर्मः' इत्यत्रानन्वयात् अपूर्वानङ्गीकारात् स्फुटीभविष्यति चैतदुपरिष्टात् । न च करणत्वोपपत्तये व्यापारावश्यकतेति शङ्क्यम् । देवताप्रीतेर्व्यापारत्वात् । न च वैयधिकरण्यम्, विषयतासंबन्धेन यजमाने सत्त्वात्तस्याः । अत इति धर्मलक्षणं चोदना तस्याश्च घञन्तारम्भपदेन विवरणादित्यर्थः । व्युत्पादितमिति अत्र स्पष्टप्रतिपत्तये तद्विवरणेन सहार्थं उपादीयते । तथाहि 'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते' इति सूत्रं न सर्वेषु धर्मोपि तु केषुचिदेव पदेषु इत्यत्र हेतुनिर्णयाय प्रववृते । अस्यार्थः क्रियावाचिनां धातुत्वानुशासनात्सर्वधातुष्वनुगतरूपं यत्क्रियासामान्यं स भावः, सोर्थो विधेयो येषां ते भावार्थास्तादृशा ये शब्दाः ते कर्मवाचका इत्यर्थः । इदमेवानुगतरूपं क्रियासामान्यमितिभाष्यम् । तथाच यजत्यादयो धातुत्वेन रूपेण क्रियासामान्यं यजतित्वादिना प्रतिनियतरूपेण क्रियासामान्यव्याप्यं यागसामान्यरूपं विशेषं प्रतिपादयन्तीत्यर्थः पर्यवसन्नः । ननु किं क्रियाया रूपद्वयनिरूपणेन पूर्वोक्त एवार्थोस्तु सूत्रस्येति चेन्न, पुरुषक्रियामात्रस्य धर्मत्वाभावात् वेदैकसमधिगम्यातीन्द्रियस्थिरयागस्यैव धर्मत्वात् । स्थिरत्वस्य च यजतिना यागसामान्यबोधन एव संभवात् सामान्यस्य च नित्यत्वात् । अतो रूपद्वयनिरूपणस्यावश्यकत्वात् । ननु क्रिया प्रत्यक्षा यजतीतिप्रत्ययाभिलापयोः क्रियाविशेषं कुर्वाणं दृष्ट्वैव संभवादतीन्द्रियत्वं कथमिति चेन्न, द्रव्यदेवतासंबन्धो हि यागः । चतुर्थेध्याये 'यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्' इति सूत्रे द्रव्यदेवताक्रियासमुदायस्य तल्लक्षणत्वात् द्रव्यदेवते यागस्य रूपमिति–आमिक्षाधिकरणे सिद्धत्वाच्च, तयोश्च संबन्धः प्रीतिहेतुत्वेन स्वीकारः,

'देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' ॥

इति वाक्यात् । स च देवताया अतीन्द्रियत्वात्परात्मधर्मत्वाच्चातीन्द्रिय इति । न च देवता यजतीति प्रयोगापत्तिः । तादृशस्वीकारस्य देवनिष्ठत्वादिति वाच्यम् । तादृशव्यापारस्य फलत्वेन कर्मनिष्ठत्वात् । तेन देवदत्तो यजतीति प्रयोगानापत्तिरपि दत्तोत्तरा । ऋत्विजो यजन्तीति त्विष्टमेव योधा युध्यन्तीतिवत् । प्रैषे होतर्यजेति प्रयोगात् । अतः फलरूपो यागोऽतीन्द्रियः 'चातुर्होत्रं च सत्तम' इति क्रियायाः पुरुषावयवेषु गणनाच्च । ननु देवतोद्देशेन द्रव्यत्याग एव यागोस्तु अग्नय इदं न ममेति त्यागवाक्यानुरोधाद्दानस्यापि यजत्यर्थत्वाच्चेतिचेन्न, परस्वत्वापादनरूपदानस्याप्यतीन्द्रियत्वात् । लोकप्रयोगस्तु न तात्त्विकः, शास्त्रदृष्ट्यभावात् । न च 'व्रीहीनवहन्ति' 'अग्नीषोमीयं पशुमालभेत' इत्यादिक्रियाणां प्रत्यक्षत्वादेतद्दृष्टान्तेन यागोपि प्रत्यक्षो भवतु इति शङ्क्यम् । मन्त्रेण चावघातो, देवपत्न्यश्च कर्त्र्यः, लौकिके 'हविष्कृदेहि' 'उभौ हि वै देवानाꣳशमितारौ' इत्यादिभिस्तदावाहनादतीन्द्रियत्वात् । फले संपन्नेऽलौकिकक्रियायाः कर्तुश्च तिरोभावः । न च नार्हति स्वीकारो नित्यो भवितुं द्रव्यस्य व्रीह्यादेरनित्यत्वेन तजन्यहोमोत्तरभावित्वादिति शङ्क्यम् । 'अप-

रश्मिः ।

घयन् पुरोडाशं कूर्मं भूतꣳसर्पन्तम्' इत्याद्यर्थवादेषु द्रव्यस्यालौकिकत्वकथनात् । किं च पुरुषसूक्तविवरणाध्याये—

'इति संभृतसंभारः पुरुषावयवैरहम् ।
तमेव यज्ञं पुरुषं तेनैवायजमीश्वरम्' ॥

इतिवाक्याद्द्रव्यादीनामलौकिकत्वं निराबाधम् । 'यज्ञेन यज्ञमयजन्त देवाः' इति श्रुतेश्च । ते प्रोक्षणादिसंस्कारैरिदानीं लौकिकेषु द्रव्यादिषु संनिधाप्यन्ते, मूर्तौ देवतावत् । लौकिकैरेव यागनिष्पत्तौ तु संस्कारा व्यर्थतां गच्छेयुः । अतो ये क्षणिकत्वमदृष्टं वा कल्पयन्ति ते न यागपदार्थं विदुः । अतःपरमेष ह्यर्थो विधीयत इति सूत्रशेषार्थः । एष योऽतीन्द्रियत्वादिधर्मवान् सोर्थः । लौकिकस्तु संसारहेतुत्वादनर्थ इत्यर्थः । स्थिरत्वेन विद्यमानत्वादेव विधीयते चोदनया पुरुषः प्रवर्तते तत्र । प्रलये तु 'स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतेर्नित्यक्रियाया ईश्वरधर्मत्वेन तन्निष्ठता, तेन धर्मानित्यत्वादिना क्रियात्वादिजातौ पदशक्तिरङ्गीकार्या । सा च धर्म इति तत्स्थित्यर्थं धर्मिणः प्रावाहिकी सत्ताभ्युपगन्तव्या । अहोरात्रन्यायेन कल्पस्य कल्पपूर्वकत्वात्तद्रात्रिरूपे प्रलये सर्वनाशात् । ये पुनर्जीवन्ति ते स्वापाच्च क्रियाप्रवाहोपरमे तस्या जातेरनाधारत्वापत्त्या कालादौ तत्स्थितिर्निराधारत्वं वा कल्पनीयम् । शाब्दबोधसमये च क्रियायाः आक्षेपलभ्यत्वं कल्पनीयं, कर्मदर्शनादिश्रुतीनां च स्वार्थे तात्पर्यराहित्यं कल्पनीयमिति वरं धर्मनित्यत्वमित्यलम् । उक्तेर्थे शङ्कते सर्वेषां भावोर्थ इतिचेत् । यदि भावार्थेभ्य एव धर्मः प्रतीयत इति उच्यते तदा सर्वे शब्दाः भावार्थाः क्रियावाचकाश्च सर्वे धातुजाः । कृत्प्रत्ययेन च भावोभिधीयत इतीत्यर्थः । न सर्वे शब्दाः धर्मवाचकाः धर्मस्य पुरुषार्थत्वात् । भावार्थशब्दैर्नामभिस्तु धर्मः प्रत्याय्यते परंतूदासीनतया न तु पुरुषार्थतया अतो धर्मप्रमितिसंपादने भावार्थकर्मशब्दत्वमेव न प्रयोजकं किं तु पुरुषस्यापेक्षापीतः सापेक्षानपेक्षविभागं वदन्परिहरति येषां तूत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि तस्मात्तेभ्यः पराकाङ्क्षा न भूतत्वात्स्वे प्रयोगे, स्व इति षष्ठ्यर्थसप्तम्यन्तं स्वीयत्वेनार्थवाचि । तथाच येषां शब्दानामर्थस्योत्पत्तौ सत्यां प्रयोगकाले रूपोपलब्धिर्जायते तानि नामानि । निरुक्ते नामाख्यात इत्यादिशब्दविभागवचनात् । अतः स्वयं नमन्ति कारकतया क्रियाशेषा वाक्ये भवन्ति नामयन्ति, स्वार्थमाख्यातार्थं प्रति, स्वार्थमाख्यातार्थप्रयोजनाय शेषभूतं कुर्वन्तीति नामसंज्ञा तेषां शब्दानामर्थस्य परार्थत्वज्ञापिका । अतः परार्थत्वेन स्वातन्त्र्याभावाद्वाक्यार्थबोधावसरे नामभ्यो धर्मः पुरुषार्थतया न प्रमीयत इत्ययमर्थो नामशब्दार्थकथनेन बोध्यते । तच्छ्रवणानन्तरं पुरुषाकाङ्क्षा न भवति । यथा पचतीत्युक्ते कः इत्याकाङ्क्षा, न तथा घट इत्युक्ते, नापि पाक इत्युक्ते । अतःपरं भूतत्वात्स्वे प्रयोगे इति सूत्रांशः, स्वप्रयोगकाले भूतत्वात् सिद्धत्वादित्यर्थः । अतस्तन्निष्पादनार्थं न पुरुषापेक्षेति भावः । तथाच नामभ्योऽनपेक्षत्वेन स्थिरत्वेन धर्मप्रमितावपि पुरुषार्थत्वेन न प्रमीयत अतो भावार्थकर्मशब्दत्वं तत्स्वरूपप्रमित्युपयोग्येव न तु पुरुषार्थरूपत्वघटिततत्प्रमित्युपयोगीति सिद्धम् । येषां तूत्पत्तावर्थे स्वप्रयोगो न विद्यते तान्याख्यातानि तस्मात्तेभ्यः क्रिया प्रतीयेताश्रितत्वात्प्रयोगस्य । यथा नामभ्यः पुरुषार्थत्वेनाप्रवृत्तिस्तथाख्यातेभ्योपीति शङ्कां वारयति तुशब्दः । उत्पत्ताविति सतिसप्तमी आनन्तर्यज्ञापिका । अर्थे इति विषयसप्तमी । स्वप्रयोग इति शब्दप्रयोगः । तथा चायं सूत्रार्थः, येषां शब्दानामर्थोत्पत्त्यनन्तरमर्थे

भाष्यप्रकाशः ।

किंच । अर्थवादाधिकरणेऽर्थवादानां विधेयस्तावकत्वेन प्रामाण्यकथनादपि तथा । यदि हि बालातुराद्युपच्छन्दनवदर्थवादानां स्तावकत्वमभिप्रेयात् प्रामाण्यं तेषां न ब्रूयात् । तदुपच्छन्द-

रश्मिः ।

प्रयोगो न विद्यते अर्थं प्रदर्श्य प्रयोगो न विद्यते यथा अयं घट इति उत्पत्तिसमये प्रयोगो नात्र निषिध्यते तेषामाख्यात इति संज्ञा, यैर्धर्म आख्यायत इति ज्ञापनार्थम् । तस्मादविद्यमानार्थत्वात्स्वनिष्पत्त्यर्थं पुरुषाकाङ्क्षाया विद्यमानत्वात्तेभ्यः पदेभ्यो धर्मः कर्तव्यत्वेन प्रतीयेत । किंचाश्रितत्वात्प्रयोगस्येति प्रतीतौ हेत्वन्तरम् । प्रयोगो ह्यनुष्ठानं तत्पुरुषाश्रितं भवति । पुरुषप्रयत्नव्यतिरेकेण धर्मो न निष्पद्यते । आख्यातार्थश्च भावना उत्पादनात्मिका क्रिया पुरुषधर्मः । अतः स्वनिष्पत्त्यर्थं पुनः पुनः प्रयोगार्थं च पुरुषोऽपेक्ष्यते इति पुरुषार्थो धर्मस्तेभ्यः प्रतीयत इत्यर्थः । नामभ्यस्त्वौदासीन्येनेत्युक्तम् । एवमाख्यातस्य धर्मप्रत्यायकत्वे सिद्धे आख्यातविशेषो लिङ् तदर्थे प्रवर्तकत्वं वदन् चोदनालक्षणोऽर्थो धर्म इति पूर्वमुक्तं तत्र चोदनास्वरूपमाह 'चोदना पुनरारम्भ' इति न त्विदमधिकरणान्तरं पूर्वशेषत्वात् विषयान्तरादर्शनाच्च । चोदना तु प्रथमतः प्रवृत्तिजनकत्वादारम्भ इत्यर्थः । पुनःशब्दो हि त्वर्थः । चोदना हि प्रवर्तकं वाक्यं तेन चाख्यातपदोक्ता भावना विधीयते, अयं मां प्रवर्तयतीति प्रेरणया नियोज्ये प्रवृत्तिरूपारम्भजननात् । तथाच विधेयत्वेन चोदनाविषयोऽर्थो धर्म इति । अतस्तस्य वाक्यस्य धर्मत्वज्ञापकत्वमतो भावार्थैः कर्मशब्दैर्यागो दानं होम इत्यादिभिः यथा सिद्धत्वेन धर्मः प्रतिपाद्यते, यथा चाख्यातैर्विशेषणत्वेन यागेन भावयेदिति यजेतेत्यस्यार्थात् तथानेन वाक्येन विशेष्यत्वेन धर्मो न प्रतिपाद्यते, पुरुषविशेषणत्वेनैव धर्मप्रमितिः विशेषणं चौदासीनप्रच्युत्या आरम्भः पुरुषविशेषणं पुरुषधर्मस्तन्निष्ठ इति यावत् । आरम्भस्तद्योग्यो धर्म इति पुरुषविशेषणमारम्भ इति । स च निष्पादनार्थं प्रवृत्तिरित्येतावान् लिङर्थे विशेषः । न च प्रवर्तकवाक्यस्य धर्मत्वज्ञापकत्वे धर्माज्ञापकत्वादव्याप्तिर्लक्षणे शङ्क्या । आरम्भ्यत्वेन धर्मप्रमितेरपि भवनात् । नन्वाख्यातत्वाविशेषेपि लिङर्थे विशेष इत्यत्र को हेतुरिति चेन्मैवं, यथाख्यातानां भावनालक्षणः क्रियारूपोऽर्थनिष्ठो व्यापारोऽभिधेयः तथा लिङोऽभिधानलक्षणः अङ्गैः कर्म भावयेत् कर्मणा फलं भावयेत् इति पूर्वापरीभावापन्नः शब्दनिष्ठो व्यापारोऽभिधेयः । तादृशेन शब्दनिष्ठव्यापारेण पुरुषः कर्मणि प्रवर्तत इति तस्य पुरुषे प्रेरणासंबन्ध इति । न चात्र विप्रतिपत्तव्यम् । लोके घटमानय इत्यादिशब्दश्रवणानन्तरभाविन्यां प्रवृत्तौ अयं मां प्रवर्तयतीति प्रतीतेस्तदनुरोधेन वेदेपि तथा कल्पनात् । न चैवं एषउ एव साधुकर्म कारयतीति श्रुत्युक्तमीश्वरस्य प्रवर्तकत्वं कथं घटते इति शङ्क्यम् । ईश्वरः प्रवर्तयतीति मतं शास्त्रानुसारीति लौकिकानां दृष्टे विश्वस्तानामत्र संमुखीकरणार्थत्वात् । अतोऽस्मिन्नधिकरणे सिद्धावस्थापन्नधात्वर्थरूपक्रियात्मको धर्म उदासीनो नामपदेभ्यः प्रतीयते, साध्यावस्थापन्नधात्वर्थः क्रियात्मकः पुरुषापेक्षः पुरुषार्थरूप आख्यातेभ्यः । तत्रापि लिङंशेनारम्भ्यतया । अतः पुरुषार्थतया तदारम्भ्यतया च प्रतीतिजननादाख्यातपदानि भजन्ते प्रमितिजननेन मुख्यतां, नामपदानि तु सिद्धतद्बोधकतया तदुपकारकाणीति सिद्धम् । एवं व्युत्पादितं प्रपञ्चितं चेत्यर्थः । एवं सिद्ध एवेत्याद्यर्थकारिका विवृता । मन्त्राणामित्यादि विवरीतुं मन्त्रादीनामर्थवादत्वमपीति तदंशं विचारयन्ति किंचार्थेत्यादि । अर्थवादेत्यादि इदमधिकरणं पूर्वतन्त्रे प्रथमस्य द्वितीयपादेऽस्ति । तथेति अर्थवादानां सिद्धार्थ-

भाष्यप्रकाशः ।

नस्य प्रतारणरूपत्वात् । ननूपच्छन्दनवाक्यस्य फलांश एव प्रतारणरूपत्वं, न प्रवर्तनांश इति, न तत्रैवात्रापि दोष इति चेन्न । स्वर्गादिरूपस्य फलस्याप्रत्यक्षत्वेन विधिवाक्योक्तफलांशेऽपि तथात्वप्रसङ्गात् । अत उपाख्यानानां मिथ्यार्थप्रतिपादकत्वकथनं ताथागतवासनावलम्बनमेव । नच—

'परोक्षवादो वेदोऽयं बालानामनुशासनम् ।
कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा' ॥ इति,
'फलश्रुतिरियं नृणां न श्रेयो रोचनं परम् ।
श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनम्' ॥

इतिपुराणवाक्यादुपच्छन्दनन्यायेन मिथ्यात्वमाद्रियत इति वाच्यम् । तत्रैवमर्थाभावात् । सर्वथा सन्मार्गविमुखानां नानाकामानां सहसा कामानिवृत्तिमालोच्य ताँस्ततो निवर्तयितुं स्वर्गादिरूपं तदभीष्टं सदेव नश्वरं फलं प्रदर्श्य तेन तेषां सन्मार्गवर्तित्वविधानेन कर्ममोक्षेऽधिकारिणः कर्तुं कुसुमरूपं तदिति तत्र मिथ्यात्वगन्धस्यापि वक्तुमशक्यत्वात् । 'फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि' । 'पुष्पेषु फलबुद्धयः' इत्यादिवाक्यैस्तथानिश्चयात् । अतस्तत्र विश्रान्त्या मायावादेन वा ये भ्रान्तास्तेषामेव वेदार्थे तथा भानं, न वेदवादिनामित्यर्थवादा अपि स्वार्थप्रमितिं जनयन्त एव स्तावका इति निश्चेयम् ।

किंच । अग्निहोत्रमिथुनदर्शनोत्तरं पठ्यते । 'तदुदिते सूर्येऽजुहोत्,' 'यस्यैवं विदुष उदिते सूर्येऽग्निहोत्रं जुह्वति प्रैव जायते' इति । उन्मानानन्तरं च पठ्यते, 'य एवं विद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति' इति । एताभ्यां च विद्वद्वाक्याभ्यामर्थवादश्रावितार्थविषयकज्ञानस्य फलाङ्गता बोध्यते । यदि स उपच्छन्दनाय मिथ्या श्रावितः स्यात् ततो विद्वद्वाक्यमपि मुधा स्यात् । एवमन्यत्रापि । ततश्च सर्वस्य वेदस्य प्रामाण्यमपि विलूयेत । अतस्तदभावाय सत्यार्थकथनेनैवोपच्छन्दनमुपगन्तव्यम् । तेन श्रुतिपुराणयोरुभयोरपि सामञ्जस्यात् । ततः कर्मादि-

रश्मिः ।

बोधकता न तु प्रतारकतेत्यर्थः । फलांश इति कटूनि मधुरत्वरूपफलांश इत्यर्थः । ताथागतेत्यादि ताथागता बौद्धभेद इति प्रतिभाति । कर्ममोक्षायेति कर्ममोचन इत्यर्थः । तथेत्यादि पूर्वोक्तार्थाभावनिश्चयादित्यर्थः । तत्रेति स्तुतिमात्र इत्यर्थः । स्वार्थेत्यादि अत एव ग्रावाणः प्लवन्ते इत्यस्याः सेतुबन्धे संवादोपि संगच्छते । क्वचिद्देशे ग्राव्णां त्रयाणां पूजार्थं तरणेनागमनमितिश्रुतमपि । प्रैवेति प्रजायते एवेत्यर्थः । विद्वदित्यादि विद्वत्पदघटितवाक्याभ्यामित्यर्थः यदि स इति अर्थवाद इत्यर्थः । श्रावितः स्यादिति 'वा शरि' इत्यस्य वैकल्पिकत्वात् पक्षे 'विसर्जनीयस्य सः' इति सत्वम् । विद्वद्वाक्यमिति परोक्षवादो वेदोयमितिवाक्यम् । अन्यत्रापीति गोअश्वा एव पशवो अन्ये त्वपशव, आदित्यो यूप, इत्यादावपि । त्रयः पशूना[2]हस्तादानाः पुरुषो हस्ती मर्कटः पशुपतिः पशूनां चतुष्पदामुत च द्विपदामित्यादिश्रुत्यन्तरेऽन्येषां पुरुषादीनामपि पशुत्वश्रावणात् तद्विरोधेनापशवः इत्यत्र पशुपदगौण्या उचितत्वात् । एवमादित्यो यूप इत्यादिषूह्येयम् । सच्चिदानन्दरूपयूपस्य संस्कारेण चित्प्राधान्यात् । इदानींतनानां सर्ववेदादर्शित्वात् । ततश्चेति मिथ्यार्थकथनाच्चेत्यर्थः । तेन श्रुतीत्यादि 'परोक्षप्रिया इव हि देवाः' इतिश्रुतिः पुराणं तूक्तं तयोरित्यर्थः । एतावता प्रकृते किमायतमित्यपेक्षायामुपयोगं मन्त्राणां कर्मणामित्यत्र स्फुटयन्तः सिद्धमाहुः ततः कर्मे-

---

१. विद्वत्पदघटित इति. २. अप्रशस्ताः प्रशवः ।

तस्मात् पूर्वमीमांसानभिज्ञाः क्रियापरत्वं सर्वस्यापि वेदस्य वदन्तो मूर्खा

भाष्यप्रकाशः ।

दर्शनश्रुतीनां स्वार्थे प्रामाण्यमकलङ्कमिति पूर्वकाण्डस्यापि सिद्धार्थपरत्वमेव । नच जुहुयाद् यजेतेत्यादीनां साध्यकृतिबोधकपदानां व्याकोपः । सिद्धस्य कर्मणः प्रकारज्ञानपूर्वकं करणे फलसंबन्धं बोधयता विद्वद्वाक्येनातिदेशसिद्ध्या कृतेः सिद्धतुल्यत्वेन साध्यकृतिव्यञ्जकस्य सिद्धस्यैव धर्मस्य तत्र विवक्षिततया बालोपच्छन्दनायोक्ते साध्यार्थे तात्पर्याभावनिश्चयात् । एकत्र दृष्टः शास्त्रार्थोऽपरत्रापि तथेति न्यायेन विद्वद्वाक्यशून्यस्थलेऽपि तथाऽवसायाच्च । अतः पूर्वकाण्डस्य साध्यार्थपरत्वमयुक्तमेव । उत्तरकाण्डस्य तु ज्ञानादिप्रतिपादकत्वेऽपि ज्ञानोपासनादीनां विषयभूतब्रह्मणैव स्वरूपलाभेन ज्ञानादिभिर्ब्रह्मण एव प्राप्यतया फलत्वेन च तस्यैव शेषित्वम् । पूर्वकाण्डोक्तफलस्याप्येतस्यैवानन्दस्यान्यानीतिश्रुतेस्तदंशत्वाच्च । कर्म फलार्थत्वादितिन्यायात् । इदं फलत्वमप्युपाख्यानगम्यमिति । तदेतदुक्तं **नहीत्यादिना** । **सिद्धमाहुः तस्मादित्यादि** । यस्मादुक्तरीत्या विचारे न सर्वस्याम्नायस्य क्रियार्थत्वं, न वा पूर्वकाण्डस्य साध्यार्थपरत्वं तस्मात् ते तथेति तद्वाक्येन शास्त्रयोनित्वव्याकुलीभावाभावात् पूर्वपक्षोऽसंगत

रश्मिः ।

त्यादि । **तत इति** अर्थवादानां स्वार्थप्रमितिजनयतामेव स्तावकत्वादित्यर्थः । **इतीति** इति हेतोस्तत्र साध्यस्य दर्शनायोगेन सिद्धस्य कर्मणो दर्शनात्तथेत्यर्थः । **कृतिश्चेत्यादि** भाष्यं विवरीतु माहुः **न चेत्यादि** । **साध्यकृतीति** पुरुषनिष्ठा शाब्दीभावनासाध्यार्थीभावनेत्यर्थः । **अतिदेशेत्यादि** ।

अन्यत्रैव प्रतीतायाः कृत्स्नायाः धर्मसन्ततेः ।
अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयते ॥
प्राकृतात्कर्मणो यस्मात्तत्समानेषु कर्मसु ।
धर्मप्रवेशो येन स्यात् सोऽतिदेश इति स्मृतः ॥

इति द्विधालक्षितातिदेशस्यान्यत्राग्निहोत्रे प्रतीतायाः प्रकारज्ञानपूर्वककरणरूपायाः धर्मसन्ततेरन्यत्र जुहुयात् सोमेन यजेत इत्यादावतीन्द्रिययागादौ कार्यतः फलसंबन्धार्थं प्राप्तेः सिद्धानश्वरस्य फलासंबन्धादाख्यातबोधितकृतेः सिद्धतुल्यत्वेनेत्यर्थः । 'यज्ञो वै विष्णुः' इतिश्रुतेः सिद्धतुल्यत्वाभावे तया विष्णुद्रव्यसंबन्धरूपातीन्द्रिययागोऽभिव्यक्तो न स्यात् । 'स्वयमेवात्मनात्मानम्' इतिवाक्यविषयत्वात् । अतिदेशे विद्वद्वाक्यं प्रमाणमुक्तं 'परोक्षवादो वेदोयम्' इत्यादि । **सिद्धस्येति** अतीन्द्रियस्य । **तत्रेति** जुहुयात् यजेत इत्यादावित्यर्थः । किमत्रातिदेशकमित्यपेक्षायामाहुः **एकत्रेत्यादि** तथाच पूर्वत्रापि न्यायेनातिदिश्यत इत्यर्थः । **अत इति** फलसंबन्धस्याहेयत्वादित्यर्थः । **तस्यैवेति** ब्रह्मण एवेत्यर्थः । पञ्चप्रकृतियागानामात्मसुखमेव फलं न स्वर्गलोकाख्यं 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति श्रुतेः । इदं यथा तथा प्रतिपादितं सर्वनिर्णये इति तद्दृदिकृत्याहुः **पूर्वकाण्ड इत्यादि** । **कर्मेत्यादि** 'कर्मण्यपि जैमिनिः फलार्थत्वात्' इति सूत्रस्यार्थकथनमिदम् । एतच्च तृतीयाध्याये चिन्तितम् । **इदमित्यादि** । आनन्दस्य फलत्वमिदमुपनिषद्गम्यमिति तन्न्यायेन न मिथ्यार्थत्वमुपाख्यानानामित्यर्थः । **तदेतदिति** कारिकाव्याख्यानव्याख्येयमित्यर्थः । **ते इति** पूर्वमीमांसाभिज्ञा इत्यर्थः । **भाष्ये** । **मूर्खा इति** बन्धहेतौ प्रवृत्तत्वेन बन्धाज्ञानान्मूर्खा इत्यर्थः । 'पण्डितो

---

१. कृतेश्चेति पाठः २. धर्मोपदेशो येन इति पाठः ।

एव। उत्तरवादिनोऽपि पूर्वाज्ञानमङ्गीकृत्य पूर्वानुपयोगित्वं ब्रह्मज्ञानस्य वदन्तो वेदानभिज्ञा एव। 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवति' इत्युपनिषज्ज्ञानस्य श्रुतिसिद्धैव कारणता।

भाष्यप्रकाशः।

इत्यर्थः। एवं पूर्वपक्षासंगतिमुद्धाट्य सिद्धान्तासंगतिमुद्धाटयन्तः पूर्वं शंकरमतस्यासंगतत्वमाहुः उत्तरेत्यादि। अनभिज्ञा इत्यन्तं ग्रहणकभाष्यम्। तत्रायमर्थः। सर्वस्य वेदस्य क्रियापरत्वमभिसंधाय शुद्धबुद्धोदासीनभूतब्रह्माभिधायके वेदान्ते भागे प्रयोजनशून्यतयाऽऽनर्थक्यं प्रत्यक्षादिसमानविषयतया लौकिकवाक्यवदनुवादकतायामनपेक्षप्रामाण्यभङ्गं च दर्शयतां स्वाध्यायविधिगृहीतत्वेन तत्सार्थक्याय दूरतरयज्ञादिकर्मोपेक्षितकर्तृदेवतादिप्रतिपादकत्वेन क्रियार्थत्वं वा, सन्निहितोपासनादिक्रियापेक्षितविषयप्रतिपादकत्वेन तादर्थ्यं वाभिमन्यमानानां पूर्वेषां वादिनां तदनुसारिणां च वेदान्ताज्ञानमङ्गीकृत्य शुद्धबुद्धोदासीनस्य ब्रह्मणः प्रमाणान्तरानधिगतत्वादितरनैरपेक्ष्येण तद्बोधकतया प्रामाण्यं हेयोपादेयशून्यब्रह्मात्मावगमादेवावस्तुभूताविद्यासमारोपितसकलक्लेशनिवर्तकतया सार्थक्यं च वेदान्तेषु प्रदर्श्य तत्सिद्धस्य ब्रह्मज्ञानस्य यज्ञानुपयोगित्वं वदन्तो वेदज्ञानरहिता इत्यर्थः। नन्वेवं युक्तियुक्तमर्थं वदन्तः कथं तथेत्याकाङ्क्षायां छान्दोग्यारम्भदेशस्थश्रुत्युपन्यासेन तदुक्तं दूषयन्तो विभजन्ते यदेवेत्यादि प्रवृत्तिरित्यन्तम्। कारणतेति सहकारकारणता। अस्यां श्रुतौ विद्यापदेनात्मभिदाबाधकं ज्ञानम्। श्रद्धापदेन वेदोक्ते आस्तिक्यबुद्धिः। उपनिषत्पदेन परमात्मस्वरूपविषयकं रहस्यज्ञानमुच्यते। तेन तत्संयुक्तो यत् कर्म वेदोक्तं करोति तदेव कर्म वीर्यवत्तरमनश्वरफलं मोक्षपर्यवसायि भवतीत्यर्थः। यत्तु कैश्चिद् विद्या विज्ञानं, श्रद्धा कर्मश्रद्धा, उपनिषद् योग इति व्याख्यातम्। तन्न। विद्यापदस्य विज्ञाने उपनिषत्पदस्य योगे च शक्त्यदर्शनात्। 'विद्याऽऽत्मनि भिदाबाधः' इत्येकादशस्कन्धवाक्येन, उपनिषद् रहस्यविद्येति शंकराचार्यविद्यारण्यादिव्याख्यानेन चोक्तार्थ एव

रश्मिः।

बन्धमोक्षवित्' इतिवाक्यात्। पूर्वाज्ञानमिति पूर्वं कर्म, अज्ञानमविद्या, पूर्वायामज्ञानाख्यं कर्म वा तत्पूर्वाज्ञानं पूर्वस्य कर्मणः अनुपयोगोस्यास्तीति अनुपयोगि तस्य भावस्तत्त्वम्। प्रकृते। ग्रहणकेत्यादि परमतीयत्वाद् ग्रहणकभाष्यमित्यर्थः। द्वितीयाध्याये 'स्मरन्ति च' इति सूत्रे स्मरन्ति च ऋषय इति भाष्यवत्। दूषणार्थं ग्रहणाद् ग्रहणकम्। स्वार्थे कः। गृह्यते परमते सूत्रापेक्षितं येन तद्ग्रहणकं न तु व्याख्यानं 'करणाधिकरणयोश्च' इतिसूत्रेण ल्युट्। कस्य सूत्रांशस्येदं ग्रहणमिति ग्रहणकम्। 'अज्ञाते' इतिसूत्रेण कप्रत्ययो वा। प्रत्यक्षादीत्यादि अग्निर्हिमस्य भेषजमिति वाक्यमुदाहरणम्। स्वाध्यायेत्यादि वेदान्तानामित्यादिर्बोध्यः। वेदानामर्थे शङ्काराहित्यांशे वेदान्तानां स्वाध्यायविधिगृहीतत्वं बोध्यम्। तदित्यादि वेदान्तसाफल्यायेत्यर्थः। काण्डभेदादाहुः दूरतरेति। संनिहितेति 'आत्मेत्येवोपासीत' इत्यादीनामेकवाक्योदितेत्यर्थः। आत्मानं लोकमुपासीतेति। तादर्थ्यमिति क्रियार्थत्वमित्यर्थः। पूर्वेषामिति मीमांसकानामित्यर्थः। ननु यागः क्रिया तत्र च कारकं कारणमिति कथमेवमित्यत आहुः सहकारीत्यादि। कारणं तु प्रोक्तप्रक्रमपठितप्रयाजादिकं तदाहुः अस्यामिति। भवतीति। न च 'यदेव विद्ययेति हि' इतिसूत्रभाष्यविरोधः। एतद्भाष्यास्वरसेनैव तत्र पक्षान्तरोक्ते-

नच बाधितत्वात् त्यज्यत इति वाच्यम् । ब्रह्मात्मज्ञानवत एव वशिष्ठादेर्यज्ञाधिकारात् । नचैवं किमनेनेति वाच्यम् । इत्थंभूतत्वाद्यज्ञस्य ।

भाष्यप्रकाशः ।

युक्तिनिश्चयाच्च । तथाच परमात्मरहस्यज्ञानात्मकब्रह्मज्ञानस्य श्रुतिसिद्धकारणताया अज्ञानाद् वेदानभिज्ञा इत्यर्थः । ननु सिद्धे फले साधनान्तरस्यानुपयोगेन, उत्कृष्टस्य निकृष्टशेषताया असंगतत्वेन तस्याः श्रुतिसिद्धाया अनादराज्ञानभिज्ञत्वमिति समाधिं दूषयन्ति नचेत्यादि । त्यज्यत इति नाद्रियते । अधिकारपदेनात्र मुख्याधिकारो विवक्षितः । तथाच यदि ज्ञानमात्रेणाविद्यानिवृत्त्यादि स्याद् वशिष्ठादिर्ज्ञानी यागादिकं न कुर्यात् । यदि स ज्ञानित्वेन भवदभिमतो न स्यात् तद्वचनानि नाद्रियेरन् । अतः पुराणादिप्रसिद्धैर्भवदादृतैरपि यागादिकरणेन तत्रादरद्योतनात् तद्विरोधेन ज्ञानस्य सहकारितानादरे सुतरामनभिज्ञतेत्यर्थः । ननूपनिषदात्मकज्ञानपूर्वकेण वशिष्ठाद्यधिकारेण वेदान्तविचारे किं सिद्ध्यति, येनैवमाग्रहः क्रियत इत्याकाङ्क्षायामाहुः न चैवमित्यादि । अयमाशयः । 'यज्ञो वै विष्णुः' इति श्रुतेर्यज्ञोऽप्येकं ब्रह्मण एव क्रियात्मकं रूपम् । नच तत्राधिष्ठातृत्वमेव बोध्यते, न तु क्रियात्मकत्वमपीति शङ्क्यम् । 'धर्मो यस्यां मदात्मकः,' 'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्, एतावान् सर्ववेदार्थः' इत्याद्येकादशस्कन्धीयभगवद्वाक्यैस्तथात्वस्यापि निश्चयात् । स च द्रव्यदेवतायजमानयज्ञावयवादिभिरभिव्यज्यते । स चेल्लौकिकैरेवाभिव्यज्येत तदा प्रोक्षणादिसंस्कारा अवहननादीनां च नियमा मुधैव स्युः । अतो वेदोक्तफलसिद्ध्यर्थं यथा ते तथा मोक्षफलार्थमुपनिषदप्युपयुज्यते । तदभावे तु साङ्गस्य यज्ञस्य लौकिकेष्वर्थेष्वध्यस्यमानत्वात् तदङ्गानां लौकिकत्वे तैराधिदैविकयज्ञस्वरूपानाविर्भावात् । उपनिषदा त्ववगते सर्वस्य ब्रह्मत्वे ब्रह्मभूतैरङ्गैराधिदैविकयज्ञा-

रश्मिः ।

स्यात् । शक्तीत्यादि तेन विद्या उद्गीथाद्यंशमात्रविषया, श्रद्धा तात्पर्यं, उपनिषद् देवताविषयोपासनेति विश्वेश्वरव्याख्यानमपि परास्तम् । मात्रशब्दपरित्यागे तु युक्तम् । यदेव विद्ययेत्यादिभाष्यविरोधाभावात्, तथास्तिक्यबुद्धिः श्रद्धेति बहुस्थलेषु प्रसिद्धेः । तथैवोपनिषच्छब्दरूपा न तूपासनारूपार्थरूपेत्यपि प्रसिद्धमिति च । उत्कृष्टस्येति आत्मज्ञानस्येत्यर्थः । तस्या इति कारणताया इत्यर्थः । समाधिमित्यादि बाधितत्वात्त्यज्यत इति समाधिमिति न च वाच्यमित्यनेन दूषयन्तीत्यर्थः । मुख्याधिकार इति । गौणमुख्यन्यायादिति भावः । तेन काम्यकर्माधिकाराज्ञानात् पूर्वं न विरुध्यन्त इति बोध्यम् । नाद्रियेरन्निति द्वितीयाध्याये 'स्मरन्ति च' इति सूत्रे स्मरन्ति च व्यासादयः इति नाद्रियेरन्नित्यर्थः । तत्रेति श्रुतिसिद्धकारणतायामित्यर्थः । उपनिषदात्मकज्ञानेति अर्थे ज्ञान उपनिषच्छब्दः आशङ्काग्रन्थत्वात् । तत्रेति विष्णावित्यर्थः । तथात्वस्येति यज्ञात्मकत्वस्येत्यर्थः । अपि च अधिष्ठातृत्वबोधने लक्षणाप्यापद्येत । स च द्रव्येति । यज्ञावयवो यज्ञप्रचारहेतुः । यथा त इति । यथा प्रोक्षणादिसंस्कारा इत्यर्थः । तदभाव इति 'तं त्वौपनिषदं पुरुषं पृच्छामि' इतिश्रुतेरुपनिषच्छब्दरूपकारणाभावे । यज्ञस्यावयविनः लौकिकेष्ववयवेष्वङ्गेषु । अध्यस्यमानस्येति कारणाभावाद्यज्ञाविर्भावाभावे यज्ञ इति प्रतीतिर्भ्रम इत्यध्यस्यमानत्वं तस्मात् । अत्र हेतुमाहुः तदङ्गाना-

किंच । कर्मफलवद् ब्रह्मफलस्यापि लौकिकत्वात् । 'य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या' इति । अत्यन्ताविद्यावतो यज्ञानधिकारात् तन्निषेधार्थं ज्ञानमुपयुज्यते ।

भाष्यप्रकाशः ।

विर्भावः । तथा तादृशां यज्ञे यज्ञाधिष्ठातुर्भगवतोऽप्याविर्भावः । यथा विश्वसृजां सहस्रसमे हिरण्मयशकुनिरूपस्य ब्रह्मणस्तथैव पृथुनाभिप्रभृतीनां यागेषु रूपान्तरेण । तदभावादेव नेतरेषां यागेषु तदाविर्भावः । तथा यागस्य विद्योपयोग आचार्यस्यापि संमत इति तु, सर्वापेक्षा च यज्ञादिश्रुतेरित्यादिसूत्रप्रणयनादेव गम्यते । नच मोक्षस्य जन्यत्वम् । ब्रह्मण आप्यत्वस्य वक्ष्यमाणत्वात् । अतो मुमुक्षूणां यज्ञस्यावश्यकत्वात् तत्रेत्थंभूतमधिकारं बोधयितुमयमाग्रह इति । तदेतदुक्तम् । ननु मुमुक्षूणां यज्ञा नावश्यकाः । कर्मफलस्य लौकिकत्वात् । अधिकारिभेदेऽपि मनुष्यादिब्रह्मान्तानां शरीरवतामेव तद्भोगकथनेन तथानिश्चयात् । नच किं तेनेति वाच्यम् । 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति श्रुत्या दुःखसंभेदकथनेन तस्य संसाररूपत्वबोधनात् । अतो मुमुक्षूणां शरीरसंबन्धस्यानाकाङ्क्षितत्वाद् यज्ञानां कारणता श्रुतिसिद्धापि नाद्रियत इत्याशङ्कायामाहुः किंच, कर्मेत्यादि । ब्रह्मफलस्येति ब्रह्मज्ञानफलस्य । श्रुतिस्तु तैत्तिरीयाणां भृगूपनिषदि भार्गव्या विद्यायाः समाप्तिस्था । तत्र, 'सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता य एवं वेद प्रतितिष्ठति' इति । अत्र परमे व्योम्नि

रश्मिः ।

मित्यादि । यज्ञाधिष्ठातुरिति 'यज्ञेन यज्ञमयजन्त देवाः' इत्यत्र द्वितीयान्तयज्ञपदोक्ताया यज्ञाधिदैविकयज्ञाद्व्यतिरिक्तातीन्द्रिययज्ञाधिष्ठातुः । आदिना आधिदैविकयज्ञेन समुच्चयः । विश्वसृजामिति 'विश्वसृजः प्रथमाः सत्रमासत' इतिश्रुतेः । हिरण्मयेत्यादि 'ततो ह जज्ञे भुवनस्य गोपाः हिरण्मयः शकुनिर्ब्रह्म नाम' इतिश्रुतेराविर्भाव इत्यर्थः । पृथुनाभीत्यादि एतच्च श्रीभागवते स्फुटम् । आधुनिकानामधिष्ठात्राधिदैविकानाविर्भावे हेतुमाहुः तदभावादेवेति उपनिषच्छन्दरूपकारणाभावादेव नाधिष्ठात्राधिदैविकाविर्भावः । आचार्यस्येति व्यासस्य । जन्यत्वमिति जन्यत्वात्साध्यत्वं घटादिवत् सिद्धत्वेन जन्याप्यविकारिसंस्कार्येषु कर्मसु मोक्षरूपब्रह्मणः आप्यकर्मत्वेन जन्यकर्मत्वाभावान्न जन्यत्वमित्याहुः आप्यत्वस्येति 'ब्रह्मविदाप्नोति परम्' इत्यादौ परमित्यादेः क्रियाजन्यफलशालित्वरूपाप्यकर्मत्वादित्यर्थः । वक्ष्यमाणत्वादिति अधिकरणसमाप्तावित्यर्थः । इत्थंभूतत्वादिति भाष्यं विवृण्वन्तिस्म तत्रेत्थमिति । तदेतदुक्तमिति अयमाशय इत्यारभ्य व्याख्यातं न चैवं किमनेनेतिवाच्यम् इत्थंभूतत्वाद्यज्ञस्येति भाष्येणोक्तमित्यर्थः । शरीरवतामिति 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' इति 'विदेहं सन्तमात्मानं सुखदुःखे न स्पृशतः' इति वदन्त्याः शरीरवतामेव कर्मफलयोः सुखदुःखयोर्भोगकथनेनेत्यर्थः । किं तेनेति शरीरवतामेव तद्भोगकथनेन किं स्यादिति प्रश्नः । दुःखेत्यादि दुःखमिश्रीभावकथनेनेत्यर्थः । ब्रह्मज्ञानेति ब्रह्म च तज्ज्ञानं चेति कर्मधारयः, ब्रह्मज्ञानं च तत्फलं च ब्रह्मज्ञानफलं, तस्येत्यर्थः । परमे व्योमन्निति 'सुपां सुलुक्' इति सप्तम्या लुक् । परमव्योम्नीति परो मीयते ज्ञायतेऽनेनेति परमं तस्मिन् । आकाशशरीरं ब्रह्मेति श्रुतेः । श्रुतौ एकतिङ्वाक्यमिति प्रतिवाक्यमाश्रयभेद इत्याशयेनाहुः

नच देहाध्यासस्य कारणत्वम् । ब्रह्मार्पणं ब्रह्महविरित्यादिस्मृतेः । तस्मादन्योन्योपयोगित्वे न कोऽपि दोषः ।

भाष्यप्रकाशः ।

प्रतिष्ठाकथनेनास्या विद्याया अत्युत्कृष्टत्वं दुर्लभत्वं च बोध्यते । विद्यापदोक्त्या फलेषूपासनाफलत्वभ्रमो निवार्यते । तत्तत्फलकथनमुखेन गृहस्थाद्यधिकारश्च बोध्यते । तेनायमर्थः । कर्मणो विद्यायाश्च फलस्येतरेतरवैलक्षण्यं प्रदर्श्य कर्मफलस्य शरीरिभोग्यतया संसारात्मकत्वात् तादृशफलजनकत्वेन तस्य विद्याजनकत्वमनादृत्य यदि कर्म त्यज्यते, तदा तस्य दोषस्य ब्रह्मविद्यायामपि तौल्यात् तस्या अपि त्याज्यत्वापत्तिः । अथ यद्यधिकारजाघन्यात् त्यज्यते, तदा तूक्तश्रुत्या विद्यासाहित्यबोधनेन जाघन्यस्य निवारितत्वान्न कर्मणस्त्याग उचितः । यदि च विद्यावत्त्वेऽपि देहाध्यासस्यानिवृत्तत्वात् तस्यैव कर्मकारणत्वमिति विभाव्यते, तदा तु ब्रह्मार्पणमित्यादिस्मृत्या, 'य एवास्मि स सन् यजे' इत्यादिश्रुत्या चाध्यासस्य कारणतानिवारणात् तासामेव विरोध इति वेदानभिज्ञत्वमनिवार्यमेवेत्यर्थः । एवं विद्यास्वातन्त्र्यवादिशांकरमतमपास्यान्येषामेकदेशिनां संग्रहायाहुः तस्मादित्यादि । वेदानभिज्ञत्वस्य विद्यास्वातन्त्र्यवादिन्येव पर्यवसानात् कर्मणां विद्याकारणत्वस्योपनिषदश्च कर्मसहकारित्वस्य श्रुत्यैव बोधनान्मूर्खोक्तावित इतरेतराश्रयदोषोऽपि व्यक्तिभेदादेव निवृत्तः । नच छान्दोग्य औषस्त्य अविदुषामपि

रश्मिः ।

दुर्लभत्वमिति भक्त्येकलभ्यत्वात् शुद्धभावप्रसादाच्च । **उपासनाफलत्वभ्रम** इति ।

'उपास्तिं मन्यन्ते मधुमथनभक्तिं निजकृता-
र्थतां तत्रोपास्यं परमपुरुषं चापि सुविदः ।
द्वयोः सारूप्यात्तद्भ्रमहतिकृते मानसगतं
मुदा भक्तेर्हंसं प्रकटमकरोद्विट्ठलकृती ॥' इति भक्तिहंसात् ।

गृहस्थादीत्यादि प्रतिष्ठान्नवत्त्वान्नादत्वप्रजापशुवत्त्वानि गृहस्थाधिकारं बोधयन्ति ब्रह्मवर्चसं ब्रह्मचार्यधिकारं, कीर्तिस्तु 'मोक्षकाम उदारधीः' इतिवाक्यात् वानप्रस्थसंन्यासाधिकारमिति विभागः । **प्रदर्श्येति** तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिस्थावरान्तेषु प्रसिद्धे । अतएवानुष्ठेयफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति भाष्येण प्रदर्श्येत्यर्थः । **तस्येति** शरीरभोग्यस्य प्रतिष्ठादेः फलस्य संसारात्मकस्य यज्जनकत्वं तस्येत्यर्थः । **अत्यन्ते**त्यादिभाष्यं विवरीतुमाहुः **अथ यदी**त्यादि । विवृण्वन्ति **तदा त्वि**त्यादि । तदा त्वत्यन्ताविद्यावतो यज्ञानधिकारमालोच्य ज्ञानरहितस्याधिकारनिषेधार्थं यज्ञे ज्ञानमुपयुज्यते इति वदन्त्या उक्तश्रुत्या तथेत्यर्थः । **न च देहे**त्यादि भाष्यं विवृण्वन्ति **यदि चे**त्यादि । **य एवे**त्यादि यः प्रकटश्चिदंशोऽस्मि स एव सन् यजे यागं कुर्वे इत्यर्थः । **व्यक्तिभेदा**दिति अयमर्थः । न वयं कर्मस्वरूपज्ञाने ब्रह्मज्ञानस्य कारणत्वं ब्रूमः । न वा ज्ञानस्वरूपज्ञाने कर्मस्वरूपज्ञानस्य येन हलन्त्यमिति न्यायेनान्योन्याश्रयो दोषाय भवेत् किंतु ब्रह्मज्ञाने यज्ञानां कारणत्वं यज्ञे चात्मभिदाबाधकं ज्ञानं जीवस्वरूपज्ञानं सहकारिकारणमिति विषयभेदभिन्नज्ञानव्यक्तिभेदादित्यर्थः । न च जिज्ञासाधिकरणस्यार्किंचोपनिषदेत्यादिभाष्येणास्यार्थस्योक्तेः पुनरुक्तिः शङ्क्या तस्य ब्रह्मजिज्ञासायाः आवश्यकत्वसाधनपरत्वात् । अत्र तूत्तरवादिदूषणाय तदुपक्षेपस्यावश्यकत्वाच्च । **औषस्त्येति** तृतीयप्रपाठक इत्यर्थः । चक्रस्यापत्यमुष-

---

१. प्रदर्श्य इति प्रकाशे ।

क्रियाज्ञानयोः स्वातन्त्र्येण पुरुषार्थसिद्ध्यर्थं भिन्नतया शास्त्रप्रवृत्तिः ।

किंच । वेदान्तवाक्यानामस्मिञ्छास्त्रे समन्वय एव प्रतिपाद्यते संदेहनिराकरणद्वारा । तत् कथं सिद्धवद्धेतुत्वेन निर्देशः । अग्रिमवैयर्थ्यं च स्यात् ।

भाष्यप्रकाशः ।

यजमानादीनां श्रावणात् कर्मणामविद्वदधिकारकत्वमेवेति शङ्क्यम् । तत्राप्यविद्वत्तायां मूर्धविपातश्रावणेनात्यन्ताविदुषामनधिकारस्यैव बोधनात् । अतः पूर्वसूत्रभाष्य उक्ते ज्ञानकर्मसमुच्चये न कोऽपि दोषः । तेन मायावादिव्यतिरिक्ता अस्मिन्नंशे सर्वेऽप्येकदेशिनो वेदाविरुद्धवादिन इत्यर्थः । नन्वेवं परस्परसाकाङ्क्षत्वे ऐकशास्त्र्यमेव स्यान्न तु शास्त्रभेदः । ततश्च वेदमनूच्येत्यादिपृथक्समाप्तिश्रावणव्याकोप इति शङ्कायामाहुः क्रियेत्यादि । तथा च त्रिवर्गसाधन उभयोरपि स्वातन्त्र्यात् सिद्धे शास्त्रभेदे पूर्वोक्तदोषस्य न लेश इत्यर्थः ।

एवं वेदानभिज्ञत्वं शांकराणां बोधयित्वा सूत्रार्थानभिज्ञत्वं सर्वेषामेव बोधयन्ति किंच वेदान्तेत्यादि । अयमर्थः । शंकराचार्यैर्हि, सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं ब्रह्म वेदान्तशास्त्रादवगम्यत इति प्रतिज्ञाय, समन्वयादिति हेतुः सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानीत्येवं व्याख्यातः । तत्रोक्तधर्मवत्त्वसाध्यकं ब्रह्मपक्षकं वाक्यसमनुगतत्वहेतुकमनुमानमभिसंहितं प्रतीयते ।

भास्कराचार्यैस्तु ब्रह्मस्वरूपं शास्त्रमवबोधयति, न केवलं कार्यमेव । कुतः । समन्वयात् । समन्वितानि हि ब्रह्मस्वरूपप्रतिपादनपरत्वेन सृष्टिप्रकरणगतानि वाक्यानीत्येवं हेतुर्व्याख्यातः । तेन तन्मते शास्त्रपक्षकम् । तथैव शैवस्य च मते ।

रामानुजाचार्यास्तु समन्वयः सम्यगन्वयः पुरुषार्थतयाऽन्वय इति हेतोरर्थमुक्त्वा परम-

रश्मिः ।

स्तिर्नाम तत्संबन्धिनीत्यर्थात् । यजमानादीनामिति । आदिशब्देन प्रस्तोता । श्रावणादिति 'मा भगवानवोचत् कतमा सा देवतेति प्राण इति होवाच' इत्यादिश्रुतिभिस्तथेत्यर्थः । कतमा सेतिशब्देन यजमानस्याविद्वत्त्वम् । मूर्धेत्यादि 'स ह प्रस्तोतारमुवाच प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रस्तोष्यति मूर्धा ते विपतिष्यति' इत्यादिना तथेत्यर्थः । इदानीं जिज्ञासाधिकरणे उक्तोऽप्ययमर्थो नोपपादितोऽत्रोपपादित इति न पुनरुक्तिरिति वदन्ति अतः पूर्वेत्यादि । दोष इति अन्योन्याश्रयदोषः । अन्योन्याश्रये गते पूर्वोक्तमितरदोषनिवारणं सूपपन्नमिति । न कोपीति दोषविशेषणम् । एकदेशिन इति आचार्यमतस्य सर्वोत्तमस्य सर्वोत्तमत्वे ज्ञाते न्यूनाधिकभावेनैकदेशित्वं बोध्यम् । तेन भेदाभेदमते भेदोऽधिकः । भेदमतयोर्नित्यक्रीडास्य इवार्थे भेदे प्रापञ्चिकत्वमपीत्याधिक्यम् । विशिष्टाद्वैतयोर्वैशिष्ट्यस्य पदार्थान्तरत्वादाधिक्यम् । एवमविभागाद्वैतेऽपि वैपरीत्यम् । पूर्वं यदेकमव्यक्तमनन्तरूपं पश्चादेकमेवेति नानावृक्षरसानामेकत्ववत् । त्रिवर्गेति । फलयोस्त्वङ्गाङ्गिभाव इतिभावः । पूर्वोक्तदोषस्येति आभासोक्तशंकारूपस्य । उक्तधर्मेत्यादि सर्वज्ञशक्तिमत्त्वसाध्यकमित्यर्थः । ब्रह्म सर्वज्ञशक्तिमत् वाक्यसमनुगतत्वात् कम्बुग्रीवादिमान् घट इतिवाक्यसमनुगतघटवदित्यनुमानम् । कार्यमेवेति धर्ममात्रमित्यर्थः । शास्त्रेति शास्त्रं ब्रह्मस्वरूपप्रतिपादकं सृष्टिप्रतिपादकवाक्यानां ब्रह्मस्वरूपप्रतिपादनपरत्वेन समन्वयात् । हेतुः शोधितोऽग्रे वाच्यः । एवं रामानुजाचार्यमतेऽपि ज्ञेयम् । शैवस्य चेति

अथ प्रतिज्ञागर्भितहेतुत्वम् । अनुपयोगात् । गौणमुख्यभावे परं विवादः ।

भाष्यप्रकाशः ।

पुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयान्वयाच्छास्त्रप्रमाणकत्वं सिद्ध्यत्येवेति व्याचख्युः । तत्र शांकरे व्याख्याने यथावस्थिते हेतोः स्वरूपासिद्धत्वम् । अतस्तत्रापि शास्त्रपक्षकमेवानुमानं वक्तव्यम् । ततश्च वेदान्तशास्त्रं ब्रह्मस्वरूपस्य प्रतिपादकं, तद्वाक्यानामेतदर्थप्रतिपादने समनुगतत्वात् यदीयं वाक्यं यदर्थप्रतिपादने तात्पर्येण समनुगतम्, तच्छास्त्रं तस्यार्थस्य प्रतिपादकम् । क्रियार्थप्रतिपादकपूर्वकाण्डवदित्यनुमानं मतत्रयेऽपि कर्मवादिवारणाय प्रयुक्तमिति फलति । तत्रेदं विवेचनीयम् । किमयं हेतुरविप्रतिपन्नः सिद्ध उत साध्यः । तत्राविप्रतिपन्न इति तु न वक्तुं शक्यम् । तथा सति पूर्वपक्षस्यैवानुत्थानप्रसङ्गात् । नापि सिद्धः । अस्मिञ्छास्त्रे संदेहनिराकरणद्वारा तस्यैव प्रतिपाद्यत्वात् । सिद्धत्वेऽग्रिमस्य समन्वयसाधकग्रन्थस्य वैयर्थ्यप्रसङ्गाच्च । अतस्तस्य सिद्धत्वनिर्देशो न युक्त इति । अथ बुद्धिस्थं यथा प्रतिज्ञायते, तथा बुद्धिस्थमत्र हेतूक्रियत इति समन्वयसाधनप्रतिज्ञागर्भितस्य हेतोः सिद्धत्वनिर्देशेऽपि न दोष इति विभाव्यते तदाप्ययुक्तमित्याहुः नचेत्यादि । भवद्भिर्हि भाट्टप्राभाकरयोस्तदनुसारिण एकदेशिनश्च निराकरणायायं हेतुरेवं व्याख्यायते । तत्र प्रतिज्ञाया बुद्धिस्थत्वेन वादिनिग्रहवेलायां साधनस्याभावेन हेतोः साध्यसमतया तदनिग्राहकत्वादनुपयोगः । किं च । तैरपि वेदान्तानां ब्रह्मप्रतिपादकता न स्वीक्रियते इति तु न । किं तु गौणत्वेन । तथा सति गौणमुख्यभाव एव विवादो न तु प्रतिपादकत्व इति विवक्षितासाधकत्वादप्यनुपयोगः । अथ सम्यक्त्वबुद्धौ मुख्यतां निवेश्य ब्रह्मणो मुख्यतया प्रतिपादनेऽनुगतत्वादित्येवं विभाव्यते, तदापि शांकराणां शैवानां च मतमयुक्तमित्याहुः

रश्मिः ।

चकारेण माध्वस्य । स्वरूपासिद्धत्वमिति समनुगतत्वस्य शास्त्रनिष्ठतया पक्षधर्मत्वाभावात्तथेत्यर्थः । तत्रापीति शांकरमतेपीत्यर्थः । मतत्रय इति । प्रसिद्धोपात्ताभिप्रायोऽयं ग्रन्थः, कर्मवादिवारणं त्रयाणामेव वा । अयमिति समन्वयादिति हेतुः । अविप्रतिपन्न इति निःसंदिग्ध इत्यर्थः । तथासतीति ब्रह्मप्रतिपादने निःसंदिग्धत्वे सति साध्यार्थपर एव वेदो न सिद्धार्थपर इति पूर्वपक्षस्य ब्रह्मणि समन्वयनिःसंदिग्धत्वेनानुत्थानप्रसङ्गादित्यर्थः । वेदान्तवाक्यानामित्यादिभाष्यं विवृण्वन्ति अस्मिन्नित्यादि । तस्यैवेत्यादि समन्वयस्यैव साध्यत्वादित्यर्थः । अग्रिमेत्यादिभाष्यं विवृण्वन्ति सिद्धत्व इत्यादि । तत्कथमित्यादिभाष्यं विवृण्वन्ति अतस्तस्येति । साध्यत्वात्समन्वयरूपस्य हेतोरित्यर्थः । यथेति 'वैयाकरणसिद्धान्तकौमुदीयं विरच्यते' इति यथा प्रतिज्ञायते इत्यर्थः । एकदेशिन इति ब्रह्मपरित्यागादेकदेशित्वम् । साध्यसमेति हेतोः साध्यत्वेन साध्येन समता । अनुपेति उपलक्षणमेतत् । 'जन्माद्यस्य यतः' इत्यत्र सूत्र एव यच्छब्दार्थे कारणे प्रकृतिर्यच्छब्दार्थः कर्तृ कारणं प्रत्ययस्येत्यर्थः समवायिकारणं प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येनेति नियमादतोऽनुपयोगादित्यस्य । गौणमुख्येत्यादिभाष्यं व्याचक्षते किं च तैरित्यादि । गौणत्वेनेति नियोज्यप्रतिपादकत्वात् नास्तिक्यनिराकरणाच्च धर्माङ्गतयेत्यर्थः । अनुपयोगादिति भाष्यमावृत्त्या योजयन्ति विवक्षितेत्यादि । गौणत्वेन ब्रह्मप्रतिपादकत्वासाधकत्वेन भाट्टादिनिराकरणासाधकत्वाद्धेतोरनुपयोग इत्यर्थः । अन्यस्त्वनुपयोगः समन्वयो हि मुख्यतयानुगतत्वं न च तैर्मुख्यतयानुगतत्वमङ्गीक्रियते इत्याहुः अथ मुख्यमित्यादि । विभाव्यत इति । हेतुत्वेनेत्यर्थः । अयुक्तमिति आनन्दमयाधिकरणभाष्य-

नच येन रूपेण समन्वयो मतान्तरस्थैर्विचारितस्तथाग्रे सूत्रेषु निर्णयोऽस्ति ।

भाष्यप्रकाशः ।

नच येनेत्यादि । शांकरैर्हि जगत्कारणरूपे वाक्यानां समनुगतत्वं व्याख्यायाग्रे उच्यते । नच तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते, तत् केन कं पश्येदिति क्रियाकारकफलनिराकरणश्रुतेरिति । ततश्च तन्मते यावद्धर्मशून्ये रूपे समन्वयो विचारितो भवति । तेन रूपेण समन्वयविचारस्त्वाध्यायसमाप्त्याशास्त्रसमाप्तिवाचकेष्वपि सूत्रेषु न दृश्यते । सर्वत्र तत्तद्धर्मपुरःसरं कर्त्रादिरूपेणैव तेषां तेषां वाक्यानां ब्रह्मप्रतिपादकताया निर्णीतत्वात् । अतोऽपि व्याख्याताकारस्य हेतोरनुपयोगः । एवं चानुपयोगादिति गृहीतो हेतुरस्तीत्यन्तेन विभक्तो बोध्यः । एवं शैवमतस्याप्यसंगतिर्बोध्या । शिवरूपेणापि निर्णयस्य सूत्राक्षरेष्वनुपलम्भात् । तन्मतमर्वाचीनमित्याचार्यैर्न तदर्थं किमप्युक्तम् । मया तु प्रहस्ताख्ये भिन्दिपालाख्ये च वादे शिवतत्त्वविवेकादिग्रन्थदूषणेन निपुणतरं दूषितमिति न तदर्थमिह संरम्भः क्रियते । तथापि तत्र तत्र प्रसङ्गेन दूषयिष्यामि । तत्र तावत्, सदेव सौम्येदमग्र आसीदित्युपक्रमस्तत्त्वमसीत्युपसंहारः शिवरूपगमक इति यत् तदसंगतम् । 'ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीतायां ब्रह्मवाचकत्वस्यैवोक्तत्वेन तयोः शिवाकारगमकत्वाभावात् । नापि, 'धातुः प्रसादान्महिमानमीशम्'इति, 'यः परः स महेश्वरः' इत्यनयोरुपक्रमोपसंहारयोः । उपक्रमे 'अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोकः' इति पादत्रयोत्तरं, 'धातुः प्रसादात्' इति तुरीयपादः । तत्र तमित्यनेन पूर्वोक्तं महतो महीयांसमात्मानं दर्शनकर्मतया परामृश्य तद्विभूतिरूपमीशं पश्यतीत्याह । अन्यथा पौनरुक्त्यापत्तेः । महिमपदस्य विभूतिवाचकत्वं च, 'गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दास-

रश्मिः ।

च्छिवरूपप्रतिपादनाभ्यामयुक्तम् । भास्कररामानुजाचार्यौ तु नानन्दमयखण्डकौ नापि शिवरूपप्रतिपादकौ अतस्तन्मते नोक्ते । क्रियेति व्यापारः, कारके कर्मकरणे फलम् । तेनेति यावद्धर्मशून्यत्वेनेत्यर्थः । आध्यायेत्यादि आशास्त्रसमाप्तीतिच्छेदः । अत्राप्यनुपयोगादिति भाष्यमावर्तयन्ति अतोपीत्यादि । अव्यवहितहेतोरपि । संरम्भ इति उद्यम इत्यर्थः । मयापि ग्रन्थविस्तृतिभिया न वितन्यते तथापि संक्षिप्तवरयुक्तयस्तु वक्तव्या इत्याहुः तथापीत्यादि । एवं प्रासङ्गिके दूषयितव्ये प्रकृतेऽपि तत्पदं शिववाचकमिति यत्तदपि दूष्यमिति तत्पदार्थस्य शिवरूपत्वं यदभ्युपगतं तदनुवदन्ति तत्रेत्यादि । तयोरिति सत्तत्पदयोरित्यर्थः । तत्रेति मन्त्र इत्यर्थः । अत्र विशेषणविशेष्यभावप्रतीतेश्चकारानुक्तेश्च नायमर्थः साधीयानिति शङ्कामपनेतुं महिमपदस्य महत्वावच्छिन्नमर्थं परित्यज्य विभूतिपरत्वोपवर्णने च युक्तिमाहुः अन्यथेत्यादि । अन्यथेति तथा व्याख्यान इत्यर्थः । अत्रेदं बोध्यम् । महत इति महान्, शतृ, अतिशयेन महान्, महीयान्; ईयसुन् । एवं महतीति मंहत इति वा महिमेति वक्तव्यं, महिमशब्दस्य ब्रह्मपरत्वं वदता । तत्रेमनिचो 'हृभृधृसृस्तृशृभ्य इमनिच्', 'जनिमृङ्भ्यामिमनिन्', 'वेञः सर्वत्र' इति सूत्रैर्विशेषविहितत्वेन महेः 'उणादयो बहुलम्' इति सूत्रेणेमनिच् साधनीयः । एवमप्यतिशयमात्राधिक्ये पुनरुक्तिरिति । 'पृथ्वादिभ्य इमनिज्वा' इति 'वर्णदृढादिभ्यः ष्यञ्च' इति भावे विहित इमनिच् तु श्रुत्यनुगृहीतोऽपीत्याहुः महिमेत्यादि । तथाच महतो भावो महिमेति विभूतिरेवार्थ इति भावः । ईयसुनोऽतिश[illegible]

भाष्यप्रकाशः ।

मार्यम्' इति छान्दोग्यश्रुतौ सिद्धम् । किंचेशमहेश्वरशब्दौ रूढौ शिवे । वैयासे तु दर्शने लिङ्गादिभिर्निर्णयस्याभिप्रेतत्वं तल्लिङ्गाद्यधिकरणेषु दृश्यत इति रूढिरप्रयोजिका । किंच,

'नारायणः शिवो विष्णुः शंकरः परमेश्वरः ।
एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' ॥

इति वाराहपुराणवाक्ये रुद्रादिशब्दानां परब्रह्मनामत्वेनैव व्यवस्थापनात् त्रिलोचनादिविशिष्टरूपस्य ततोऽप्यसिद्धेः । नृसिंहतापनीये नृकेसरिशक्तिगणनायां 'श्रियं लक्ष्मीमौपलामम्बिकां गाम्' इति श्रावणात् । वाराहे, ॐमित्येकाक्षरीभूताया उमाया नारायणदारत्वेन कथनाच्च । नाम्बिकापत्युमापतिपदाभ्यामपि तत्सिद्धिः । नापि 'यो वै रुद्रः स भगवान्' इत्यथर्वशिरोवाक्येन । 'अथर्वशिरःशिखाध्यायिशतमेकमेकेन मन्त्रराजजापकेन तत्समम्' इति पूर्वतापनीये नृसिंहमन्त्रराजजापकस्योत्कर्षश्रावणाद् विद्यावदुत्कर्षस्य च विद्योत्कर्षाधीनत्वाद् विद्योत्कर्षस्य च वेद्योत्कर्षाधीनत्वान्मन्त्रराजवेद्ये नृकेसरिण्येवोत्कर्षविश्रान्तेरथर्वशिरःशिखावेद्यस्य ब्रह्मरूपत्वेऽपि तत्र परत्वस्यापर्यवसानात् । एवमन्यत्रापि द्रष्टव्यम् । ब्रह्मरूपत्वं सर्वविद्येशानत्वं सर्वदेहीश्वरत्वं गुरुत्वोपाधिना मोक्षदातृत्वं तु तत्तच्छ्रुतिपुराणानुसारेणानुमन्यामह इति दिक् ।

रश्मिः ।

न पुनरुक्तिरित्यत आहुः । किंचेशेत्यादि । अप्रयोजिकेति अत एव सायणीये रुर्वैदिकः शब्दस्तं द्रवति प्राप्नोतीति रुद्रः इति योगेन ब्रह्मपरत्वमुक्तम् । योगस्तु ईष्ट इति ईशः महांश्चासावीश्वरश्चेति । तत्रेश् ऐश्वर्ये चेश्वरस्य भावः ईश्वरश्च व्यापकः, 'अश्नोतेराशुकर्मणि वरट् च' इति सूत्रेण चकारेणोपधाया ईत्वं, विदधता निष्पन्नत्वात् । यदि चेष्ट इतीश्वरस्तदा 'स्थेशभासपिसकसो वरच्' इति सूत्रेण वरच् । नन्वयं योगोऽपि शिवे वर्तते 'एको हि रुद्रो न द्वितीयाय तस्थुः य इमान् लोकानीशत ईशनीभिः' इतिश्रुतेरिति चेत्तत्राहुः किंचेत्यादि । ततोऽपीति श्रुतितोऽपीत्यर्थः । अपी रूढीं समुच्चिनोति तेन सर्वा श्वेताश्वतरोपनिषद् ब्रह्मपरेत्युक्तम् । यः परः स महेश्वर इत्युपसंहारोऽपि ब्रह्मपर इति च 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासशास्त्रात्पूज्यत्वस्येश्वरशब्देनैवोपस्थापनान्महच्छब्दो निरतिशयं पूज्यत्वमाचष्टे इति । इदानीं महानारायणोपनिषदि 'अम्बिकापतय उमापतये नमो नमः' इतिश्रुत्या प्रत्यवतिष्ठमानं प्रत्याहुः नृसिंहेत्यादि । तत्सिद्धिरिति त्रिलोचनादिविशिष्टरूपसिद्धिरित्यर्थः । तेन महानारायणीयोपनिषदपि निष्प्रत्यूहं नारायणपरत्वे गर्जति । अथर्वशिरसः शिवप्रतिपादकत्वमपि जलधिशायिनृकेसरितोपकृष्टत्वेनेत्याहुः नापीत्यादि । अतिदिशन्ति एवमित्यादि । अन्यत्रेति महोपनिषदि—

'ऋतं सत्यं परं ब्रह्म पुरुषं नृकेसरि-
विग्रहं कृष्णपिङ्गलमूर्ध्वरेतं विरूपाक्षं शंकरम् ।
नीललोहितमुमापतिं पशुपतिं पिनाकिं ह्यमितद्युतिम्' ॥

इत्यादावित्यर्थः । ऋतमनारोपितं, पिङ्गं तडिद्गौरं व्रजभक्तरूपं लाति गृह्णातीति पिङ्गलः, कृष्णश्चासौ पिङ्गलश्च कृष्णपिङ्गलस्तं निष्कामत्वादूर्ध्वरेतसं विशिष्टं सुन्दरं रूपं निरुपमं ययोस्तादृशेऽक्षिणी यस्य तं, शं कल्याणं करोतीति शंकरस्तं, नीललोहितं मेघश्यामं पशुपतिं गोपतिं पिनाकिं पिनाकादयश्चेति 'पातेराक् इत्वं नुम्च' इति विषमपदव्याख्या । ननु तर्हि ब्रह्मरूपत्वादिबोधिका अप्यन्यथा नेया इति चेन्नेत्याहुः ब्रह्मेत्यादि । तत्तच्छ्रुतीत्यादि ताश्च 'यो वै रुद्रः स भगवान् अथ कस्मादुच्यते प्रणवो यस्मादुच्चार्य-

शास्त्रारम्भस्तु प्रथमसूत्र एव समर्थितः। तस्मात् समवायिकारणत्वमेवानेन

भाष्यप्रकाशः ।

प्रकृतमनुसरामः । ननु भवन्मते सर्वस्य वेदस्य सिद्धार्थपरत्वेन सिद्धस्वरूपब्रह्मप्रतिपादकत्वे संदेहाभावाच्च तदर्थं शास्त्रारम्भो वक्तुं शक्यः । ज्ञानकर्मसमुच्चयस्याप्यङ्गीकारेण कर्मण्यपि गौणतात्पर्यस्य विद्यमानत्वाच्च तदर्थमपि । ब्रह्मणः कारणतायास्तेषु तेषु रूपेषु पर्यायेणाङ्गीकरिष्यमाणत्वाच्च न विष्णुशिवादिव्यतिरिक्तस्य ब्रह्मत्वनिरासार्थम् । अभिन्ननिमित्तोपादानवादिनो यावन्तस्तैः सर्वैरपि जन्मादिसूत्रविषयवाक्यविचारेणैव सर्वविधकारणतायाः समर्थनाच्च तद्विशेषनिर्धारार्थमपीति भवन्मते शास्त्रारम्भवैयर्थ्यम् । नैवमन्यमते । तत्तदन्यस्मिन् वेदान्ततात्पर्याभावसमर्थकतया सार्थक्यादिति शङ्कायामाहुः शास्त्रेत्यादि । प्रथमसूत्र इति । तत्र शेषषष्ठीसमर्थनस्थले, नच गौणतापत्तिरजिज्ञास्यत्वं चेत्यादिना । तन्मया विवृतं, केन प्रकारेणेत्यारभ्य दर्शनादितीत्यन्तेनेति ततो बोध्यम् । सिद्धमाहुः तस्मादित्यादि । शास्त्रारम्भस्य प्रथमसूत्र एव समर्थितत्वाद् द्वितीयसूत्रविषयवाक्ये, यतो

रश्मिः ।

माण एव ऋग्यजुःसामाथर्वाङ्गिरसो ब्रह्मब्राह्मणेभ्यः प्रणामयति नामयति च तस्मादुच्यते प्रणव' इति । 'अथ कस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव स सूक्ष्मो भूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृशति तस्मादुच्यते सूक्ष्मम् । अथ कस्मादुच्यते तारं यस्मादुच्चार्यमाण एव गर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयति त्रायते तस्मादुच्यते तारमिति' । तथा महानारायणोपनिषदि 'तन्नो रुद्रः प्रचोदयात्' इत्युक्त्वा 'ईशानः सर्वविद्यानाम्'इति श्रूयते, जाबालेच 'रुद्रस्तारकं ब्रह्म व्याचष्टे'येनासावमृतीभूत्वा मोक्षीभवतीति गुरुत्वोपाधिना मोक्षदातृत्वं विस्पष्टं श्रूयते । पुराणे श्रीभागवते चतुर्थस्कन्धे ब्रह्मकृतशिवस्तुतौ 'यत्तद्ब्रह्म निरन्तरम्' इति अष्टमे मोहिनीस्वरूपदर्शनानन्तरं भवानीं प्रति भववाक्यं 'अहं कलानामृषभो विमुह्ये' इति पुनश्चतुर्थस्कन्धे रुद्रगीते 'शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने' इति कर्तृकरणकर्मशक्तित्रयसमेताहंकाररूपेण सर्वदेहीश्वरत्वं अन्यत्रापि द्रष्टव्यम् । तत्रैव प्रचेतसां मोक्षदातृत्वं

'इदं विविक्तं जप्तव्यं पवित्रं मङ्गलं परम् ।
निःश्रेयसकरं चापि श्रूयतां तद्वदामि वः' ॥

इति शिववाक्यमिति । तदर्थमिति गौणत्वेन सिद्धधर्मज्ञानार्थमित्यर्थः । ब्रह्मण इत्यादि अस्य तत्पदेनाप्यन्वयाद्रूपेभ्यो भेदः । तेष्विति सच्चिदानन्देष्वित्यर्थः । तत्तु जन्माद्यधिकरणसमन्वयाधिकरणाभ्यां सद्रूपे लक्षणं योजितम् । ईक्षत्यधिकरणे च चिद्रूपे लक्षणं योजयिष्यन्ति । आनन्दमयाधिकरणे चानन्द इति कथं तेषु तेषु कारणतेति चेन्न 'सत्त्वं रजस्तम' इत्यस्य सुबोधिन्यां 'सद्रूपेण रजः आनन्देन तमः' इति निरुक्तेः । ननु किमतो यद्येवं मैवं

'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञां श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः'इति तत्तद्गुणसंबन्धे तत्तद्रूपतोपपत्तेः सामञ्जस्यात् । तथा च सद्रूपनिर्गतसत्त्वतनुर्विष्णुरिति सद्रूपे कारणतायोजनं विष्णावेव योजनमेवमन्यत्रापीति न दोषः । तद्विशेषेति कारणताविशेषसमवायित्व इत्यर्थः । शास्त्रारम्भ इति शास्त्रं सूत्रं तदारम्भवैयर्थ्यम् । तस्मादित्यादि तेभ्यस्तेभ्यो निर्गुणगुणत्रयविशिष्टविष्णुशिवपुरुषोत्तमेभ्योऽन्यस्मिन्नित्यर्थः । संज्ञोपसर्जनीभूतत्वाभावात्स्मायादि । ननु वृक्षो घट इतिवत् यत इति पञ्चम्या समवायित्वनिर्णयो भविष्यतीति चेत्तत्राहुः द्वितीयेत्यादि । ननु कथम्

सूत्रेण सिद्धम्। ननु कारणत्वमेवास्तु ब्रह्मणः। किं समवायिकारणत्वेन। विकृतत्वं च स्यात्। अनर्थरूपत्वेन कार्यस्यायुक्तता च। तस्मादनारम्भणीयमेवैतत् सूत्रमिति

भाष्यप्रकाशः ।

चेत्यादेः कारणतामात्रबोधनेऽपि चारितार्थ्येन, 'यत् प्रयन्त्यभिसंविशन्ति' इत्यस्याधारतामात्रबोधनेऽपि चारितार्थ्येन, 'सदेव सौम्येदमग्र आसीत्' इत्यत्रापि, तत्तेजोऽसृजतेत्यादिना कर्तृत्वस्यैवासंदिग्धतया उपादानत्वं केवलस्य वा शरीरद्वारा वेति संदेहानपायात् । सौत्रस्य योनिशब्दस्यापि कारणमात्रवाचकत्वेन प्रमाणाबोधकत्वादुपादानत्वनिर्द्धारणासमर्थत्वाच्चेतः पूर्वसूत्रयोरुपादानत्वस्यासिद्धत्वादनेनैव सूत्रेण युक्तिनिर्देशात् तत्सिद्धमित्यर्थः । नन्वत्रोपादानपदं परित्यज्य समवायिपदेन कुतो व्यवहार इति चेदुच्यते । लोके उपादानपदेन कर्तृक्रियया व्याप्तस्य परिच्छिन्नस्यैवाभिधानदर्शनात् । 'प्रकृतिर्ह्यस्योपादानम्' इति, 'पुरुषस्तदुपादानमात्मानं लीलयाऽसृजत्' इति श्रीभागवतेऽपि भगवता मैत्रेयेण च तादृश एवोपादानपदस्य प्रयुक्तत्वाच्चेति जानीहि ।

अत्र ब्रह्मस्वरूपस्य समवायित्वममन्वानाः प्रत्यवतिष्ठन्ते नन्वित्यादि । अयमर्थः । समन्वयसूत्रे ब्रह्मस्वरूपस्य समवायित्वायाग्रहो यः क्रियते, स न पूर्वसूत्रोक्तकारणत्वासमर्थनार्थः । शास्त्रयोनित्वेनैव समर्थितत्वात् । नापि शास्त्रयोनित्वसमर्थनार्थः । त्वया तथाऽनङ्गीकारात् । किं तु कारणत्वे विशेषान्तरस्यापि बोधनार्थः । स न युक्तो विकृतत्वादि-

रश्मिः ।

ध्वंसरूपत्वेन कपाले घटो ध्वस्त इतिवत् ब्रह्मणि जगल्लीनमिति प्रतीत्या ब्रह्मणः समवायित्वमस्त्विति चेत्तत्राहुः यत्प्रयन्तीत्यादि । पूर्वं मृदेव घट इति प्रतीतिवत् सदेवेदमिति श्रुत्या तद्भविष्यतीति किमनेनेति चेन्नेत्याहुः सदेवेत्यादि । योनिशब्दादपि न निर्णय इत्याहुः सौत्रस्येत्यादि । प्रमाणेत्यादि । समवायित्व इत्यादि । समवायस्य द्वितीये दूषणात्तदस्तित्वप्रयुक्तं समवायित्वमपि न वक्तुं शक्यमित्युपादानपदमत्र भाष्ये वक्तव्यमिति पृच्छति नन्वत्रेत्यादि । कुतो व्यवहार इति अस्य मीमांसाशास्त्रस्य पृथक्त्वान्मित्रवत् कुतो व्यवहार इति । ननु प्रश्नश्चेत् यदीत्यर्थः । उच्यत इति न घटत इत्युच्यत इत्यर्थः । लोक इति स्मृतौ । परिच्छिन्नस्यैवेति सूत्रमृत्पिण्डादिरूपतूलांशमृदंशादेरेवेत्यर्थः । अन्यथा सूत्रमृत्पिण्डादिभावमनापन्नैरपि तूलादिभिः पटघटाद्युत्पद्येत इति भावः । ननु नैयायिकैः परिच्छिन्नेऽपि समवायित्वव्यवहारः क्रियते व्यासचरणैरपि समन्वयादित्युक्तत्वाच्च कैतादृशाक्रोशः प्रसिद्ध इत्यत आहुः प्रकृतिरित्यादि । स्वव्यतिरेकेणासृज्यत्वादात्मानमिति । तादृश इति परिच्छिन्नप्रधाने परिच्छिन्नपुरुषावतारे चेत्यर्थः । जानीहीति तथा च ब्रह्मणोपरिच्छिन्नत्वमपीति नोपादानपदप्रयोग इति भावः । यः परिच्छिन्नांशः स उक्तः । समवायश्च तादात्म्यमित्युक्तम् । उपलक्षणमेतत् दूषितेपि प्रसिद्धिप्राबल्यात्तदर्थे प्रयोगानर्हत्वं नेति भाष्येण ज्ञाप्यते इत्यस्य । अमन्वाना इति नैयायिकाः । यथाहुः 'संसारमहीरुहस्य बीजाय' निमित्तकारणाय इत्यर्थ इति मुक्तावल्यां विश्वनाथाः । शास्त्रेत्यादि । सूत्रांशेनेत्यर्थः । त्वयेति सिद्धान्तिनेत्यर्थः । विकृतत्वमित्यादि अयुक्तता चेत्यन्तं भाष्यं विवृण्वन्ति स नेत्यादि । अत इति कार्यस्यानर्थरूपत्वेन तत्समवायित्वस्य ब्रह्मण्ययुक्ततायाः

चेन्नैवम् । सर्वोपनिषत्समाधानार्थं प्रवृत्तः सूत्रकारः । तद्यदि ब्रह्मणः समवायित्वं न ब्रूयाद् भूयानुपनिषद्भागो व्यर्थः स्यात् । 'इदं सर्वं यदयमात्मा,' 'आत्मैवेदꣳ सर्वम्' । 'स सर्वं भवति,' 'ब्रह्म तं परादात्' इत्यादि, 'स आत्मानꣳ स्वयमकुरुत,' 'एकमेवाद्वितीयम्,' 'वाचारम्भणं विकारः' इत्यादि । एवमादीनि वाक्यानि स्वार्थे बाधितानि भवेयुः ।

भाष्यप्रकाशः ।

दोषापादकत्वात् । अतः शरीरस्य वोपाधेर्वा भिन्नाया एव प्रकृतेर्वा तथात्वं वक्तव्यम् । तथा सति स्वरूपसमन्वयस्याभावादनारम्भणीयमेवैतत् सूत्रं तव मते स्यादिति । अत्र समादधते नैवमित्यादि । व्यर्थः स्यादित्यत्र हेतुः बाधितानि भवेयुरिति । अयमर्थः । समवायित्वं यन्निषिध्यते, तत् किं पूर्वसूत्रस्य निराकाङ्क्षत्वादुत दोषोत्पादकत्वात् । नाद्यः । व्यासस्य सर्वोपनिषदां यथावस्थितार्थबोधनार्थं प्रवृत्तत्वेन भूयस उपनिषद्भागस्य वैयर्थ्ये जन्मादिसूत्रस्यविशेषाकाङ्क्षाया अनिवृत्तेः । नेतरः । तदभावस्याप्यनुपदं व्युत्पाद्यत्वात् । स भागस्त्विदं सर्वमित्यादिरूपः । अत्राद्यं वाक्यं मैत्रेयीब्राह्मणस्थम् । तत्र हि 'आत्मनि वा अरे दृष्टे श्रुते मते विज्ञाते सर्वमिदं विदितम्' इत्यनेनात्मज्ञानादिभिः सर्वज्ञानरूपं फलं दर्शयित्वा, तज्ज्ञानं किं प्रकारकमित्याकाङ्क्षायां, 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद' इत्यादिना 'योऽन्यत्रात्मनः सर्वं वेद' इत्यन्तेन ब्रह्मादिसर्वान्तेष्वात्मभिन्नत्ववेत्तुः कैवल्याभावरूपममृतत्वाभावरूपं वा पराभवं प्रदर्श्य 'इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे यज्ञा इमानि भूतानीदं सर्वं यदयमात्मा' इत्युपसंहारे ज्ञानप्रकारदर्शनेन सर्वस्यात्माभेदं दर्शयति । तस्मिंश्चाभेदे सर्वस्यात्मोपादेयत्वमन्तरेणाघटमाने वाक्यमेव बाधितार्थं भवेत् । एवं द्वितीयवाक्यमपि, छान्दोग्ये सनत्कुमारसंवादे । तत्राप्यग्रे, 'आत्मनः प्राण आत्मन आशा' इत्यादि श्राव्यते । तदप्यात्मनः समवायित्वं विना नोपपद्यते । तदतिरिक्तस्योपादानस्याश्रावणात् । तृतीयं तु पुरुषविधब्राह्मणस्थम् । तत्रापि 'आत्मैवेदमग्र आसीत्' इति सृष्टिपूर्वकाले केवलात्मसत्तामुक्त्वा, ततः 'सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्' इत्यनेन सृष्ट्यनन्तरमन्यदर्शनमुपक्रम एव निषेधति । मध्ये च, किमुत ब्रह्मावेद् यस्मात् तत्सर्वमभवदिति प्रश्ने, 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात् तत्सर्वमभवत्' इत्युत्तरमुक्त्वा तदिदमप्येतर्हि 'य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति' इति सर्वा-

रश्मिः ।

इत्यर्थः । शरीरस्येत्यादि । नैयायिकशंकराचार्यसांख्यानां मते यथाक्रमम् । तथात्वमित्यादि । समवायित्वं तत्तन्मतीयमङ्गीकार्यमित्यर्थः । तस्मादित्यादि भाष्यं विवृण्वन्ति तथा सतीत्यादि । तथा चास्थूलेत्यादिभाष्यसंग्रहाय कोठ्यन्तरं निवेशमाना. विकल्पमाहुः अयमर्थ इति । भाष्ये यत्फलितं तदाहुः जन्मादीत्यादि । शास्त्रयोनित्वांशे जन्मादिसूत्रस्य समवायित्वप्रतिपादकशास्त्रप्रतिपाद्यसमवायित्वरूपविशेषाकाङ्क्षाया अनिवृत्तेरित्यर्थः । अनुपपन्नमिति तथाचास्थूलेत्यादिभाष्येणेत्यर्थः । इदमित्यादि भाष्यं विवृण्वन्ति स भाग इत्यादि । तज्ज्ञानमिति सर्वज्ञानमित्यर्थः । ज्ञानप्रकारेति सर्वविशेष्यके ज्ञान आत्माभिन्नत्वरूपप्रकारेत्यर्थः । द्रव्यादीनां विद्यमानसमवायिकत्वनियमादाहुः तदपीत्यादि । सृष्टस्येदमा निर्देशनादग्र इतिपदेन सृष्टिपूर्वकालस्य बोधनाच्च वीक्षणं नात्मविषयकमतोऽत्र न प्रत्यानन्तरमर्थस्तदाहुः सृष्ट्यनन्तरमन्येत्यादि । अवेदिति ।

भाष्यप्रकाशः ।

त्वभावरूपं फलमाह । समवायित्वानङ्गीकारे तदपि सर्वं बाधितं भवेत् । तुरीयं तु तद्भिन्नत्ववेत्तु उक्तरूपं पराभवं वक्तीत्युक्तम् । मध्ये वाक्यद्वयं तु सर्वत्रैकवाक्यतार्थम् । पञ्चमं तु तैत्तिरीये ब्रह्मवित्प्रपाठके । तत्रापि करोतिकर्मत्वेनात्मनः श्रावणात् तस्यैवोपादानोपादेयभावः स्फुटति । सोऽपि तथा भवेत् । एकमेवेत्यादिकं तु छान्दोग्यस्थम् । तत्राप्येकमेवेति विशेष्यान्वितेनैवकारेणान्यसत्त्वे व्यवच्छिन्नेऽपि 'एके मुख्यान्यकेवलाः' इति कोशादेकशब्दस्य नानार्थत्वेनात्र मुख्येतरव्यवच्छेद एवाभिसंहित इति । श्रुत्यन्तरे, 'नान्यत् किंचन मिषत्' इति कथनाद् व्यापारं कुर्वतो वान्यस्य निषेधोऽभिसंहित इति वा शङ्का स्यादिति तन्निवारणायाद्वितीयपदेन द्वित्वसंख्यापूरकस्य निषेधः सृष्ट्यादौ क्रियते । सोऽपि सदितरस्य समवायिनः सत्त्वे बाध्येत । वाचारम्भणवाक्ये तु मृण्मयादिभिर्दृष्टान्तैः स्फुटमेव समवायित्वमवगम्यते । तथा द्वितीये गार्गीब्राह्मणे कस्मिन् वा आकाश ओतश्च प्रोतश्चेति प्रश्ने, एतद्वै तदक्षरं गार्गीत्यादिना अक्षरे ओतप्रोततामाकाशस्य वदति । सा च समवायित्वस्यैव लिङ्गम् ।

'नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे ।
ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग ! यथा पटः' ॥

इत्यादिपुराणवाक्यैस्तन्निश्चयात् । नच, 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति गीतावाक्यान्नैवमिति शङ्क्यम् । तत्र केवलप्रोतत्वस्यैवोक्तत्वेऽप्यग्रे, 'रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः' इत्यादिभिः स्वस्य भूतसूक्ष्मत्वादिबोधनेनौतत्वस्यापि सूचिततया तत्राप्यैवमर्थ्येनोक्ततौल्यात् । तथा

'त्वय्यग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे ।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात्' ॥

इत्यष्टमस्कन्धीयब्रह्मवाक्येऽपि समवायित्वस्योपबृंहणात् । आथर्वणानां गोपथब्राह्मणारम्भे च, 'ब्रह्म वा इदमग्र आसीत् स्वयंभ्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवाऽस्मि हन्ताहं मन्मात्रं द्वितीयम्' इत्यादि श्राव्यते । तृतीयस्कन्धे च 'विश्वं वै ब्रह्म तन्मात्रम्' इति । एवंजातीयकानि

रश्मिः ।

लब् । तदपीति सूत्रानन्तरमात्मान्यादर्शनादपीत्यर्थः । वेत्तु उक्तेति वेत्तुरुक्तेति पाठः प्रतिभाति । तादृशस्य कैवल्याभावरूपममृतत्वाभावरूपं वा पराभवमित्यर्थः । ननु प्रथमतुरीयाभ्यामेव समवायित्वसिद्धेः किं मध्यस्थेन वाक्यद्वयेनेत्यत आहुः मध्य इत्यादि । मैत्रेयीब्राह्मणेन साकं छान्दोग्यपुरुषविधब्राह्मणयोरेकवाक्यताप्रतिपत्तिः प्रयोजनम् । एवमन्यत्रापीति सर्वत्रेत्युक्तम् । तत्रापीति तदात्मानमिति श्रुतौ स आत्मानमित्यपि क्वचित्पाठः । उपादानेत्यादि यथा कुलाले मृदं घटमकुरुतेति प्रयोगो न तु दण्डं घटमकुरुतेति । मृदो दण्डस्येति वा मृदं घटात्मना करोति न तु दण्डं घटात्मना करोतीति वा, एवं प्रकृतेपि प्रयोगादुपादानोपादेयभाव इत्यर्थः । व्यवच्छिन्न इति यथा पार्थ एव धनुर्धर इत्यत्र । निषेध इति श्रुत्यन्तरैकवाक्यतयात्र निषेध इत्यर्थः । सत्त्व इति दोषापादकत्वेन ब्रह्मणोसमवायित्वे जगतः पूर्वं समवाय्यपेक्षया सत्त्व इत्यर्थः । अन्यान्यपि श्रुतिपुराणवाक्यान्यादिपदार्थत्वेनाहुः तथेत्यादि । नैवमिति सूत्रमणिगणयोरुपादानोपादेयभावाभावान्नैवमित्यर्थः । ऐवमर्थ्येनेति 'सह सुपा' इति समासः । ब्राह्मणादित्येतत् स्पष्टम् ।

नन्वेवं निःसंदिग्धत्वात् कथं सूत्रप्रवृत्तिः। उच्यते। अस्थूलादिवाक्यान्यपि सन्ति सर्वत्र प्रपञ्चतद्धर्मवैलक्षण्यप्रतिपादकानि। ततोऽन्योऽन्यविरोधेनैकस्य मुख्यार्थबाधो वक्तव्यः। तत्र स्वरूपापेक्षया कार्यस्य गौणत्वात् प्रपञ्चरूपप्रतिपादकानामेव कश्चित् कल्पयेत्। तन्माभूदिति जन्मादिसूत्रवत् समन्वयसूत्रमपि सूत्रितवान्। तथाचाऽस्थूलादिगुणयुक्त एवाविक्रियमाण एवात्मानं करोतीति वेदान्तार्थः संगतो भवति। विरुद्धसर्वधर्माश्रयत्वं तु ब्रह्मणो भूषणाय।

भाष्यप्रकाशः।

वाक्यान्यादिपदेन संगृह्यन्ते। अतः पूर्वसूत्राकाङ्क्षापूरणायेदं सूत्रमावश्यकमित्यर्थः।

पुनश्चोदयति नन्वेवमित्यादि। एवमिति पुरःस्फूर्तिकयथाश्रुतार्थग्रहणे। तथाच सूत्रकारो हि वेदान्तार्थं दुर्बोधमाकलयँस्तत्रान्येषामृषीणामपि शुक्रादिकृतं बुद्धिमोहमवधार्य लोकाननुजिघृक्षुँस्तदर्थं व्यक्तीकर्तुं प्रवृत्तो यद्येवं समवायित्वमसंदिग्धमेव जानीयात् समन्वयसूत्रं न प्रणयेत्। अतः सूत्रप्रवृत्तिरेव समवायित्वाभावं बोधयतीत्यर्थः। अत्रप्रवृत्तिमुपपादयन्तः समादधते उच्यत इत्यादि। अर्थस्तु निगदेनैव व्याख्यातः। जन्मादिसूत्रवदिति यथा जन्मादिसूत्रं कर्तृत्वादिधर्मनिर्धारणेन निर्विशेषमात्रतानिराकरणार्थं तथेदमपि समवायित्वनिर्धारणेन तदर्थं, न तु सांख्यं निराकर्तुम्। तस्याग्रे वक्ष्यमाणत्वादिति भावः। एतेन पूर्वचोदितस्य द्वितीयदूषणस्यापि निवृत्तिं बोधयन्ति तथाचेत्यादि। संगतो भवतीति। उक्तदूषणस्योद्धृतत्वादसंदिग्धो भवति। तथा चैतत्सूत्राभावे उक्तसंदेहानपायात् तदर्थं सूत्रप्रवृत्त्या समवायित्वमावश्यकमित्यर्थः। नन्वविक्रियमाणस्य समवायित्वं काल्पनिकम्। कल्पना तु लोकाविरुद्धैव प्रामाणिकसमाजे शोभते। तत इदमसंगतमित्याशङ्कायामाहुः विरुद्धेत्यादि। भूषणायेति 'तदेजति तन्नैजति'। 'आसीनो दूरं व्रजति शयानो याति सर्वतः'। 'अपाणिपादो जवनो ग्रहीता' इत्याद्यनेकश्रुतिसिद्धत्वाद् भूषणाय। ब्रह्मणः श्रुत्येकसमधिगम्यत्वस्य सर्वेषामेव संमतत्वादित्यर्थः।

ननु फलार्थं सर्वः प्रवर्तते। तस्यैव पुरुषशेषत्वात्। तदैहिकं मोक्षरूपं वा यद् यस्या-

रश्मिः।

अन्तर्यामिपरत्वे पूर्वतौल्यात्। निगदेनेति अभिधानेनैवेत्यर्थः। तदर्थमिति निर्विशेषमात्रतानिराकरणार्थमित्यर्थः। किंचिन्निराचक्षते न त्वित्यादि। प्रकृतिः समवायिनीति सांख्यमित्यर्थः। तस्याग्र इति सांख्यनिराकरणस्य चतुर्थपाद इत्यर्थः। पूर्वचोदितस्येति समवायित्वं यन्निरूप्यते इत्यादिनोक्तविकल्पोक्तस्येत्यर्थः। धातूनामनेकार्थत्वात्। तज्ज्ञापयत्याचार्य इत्यत्र ज्ञा नियोग इत्यस्य ज्ञानार्थत्वं यथा, न तु ज्ञा अवबोधने इत्यस्य, नापि ज्ञाने ज्ञापने च वर्तमानस्य ज्ञपेः प्रयोगः। पूर्वस्य मारणतोषणनिशामनेषु ज्ञा इत्यनेन मित्त्वाद् ह्रस्वे ज्ञपेस्तु 'ज्ञपमिच्च' इत्यनेन मित्त्वात् 'मितां ह्रस्वः' इत्यनेन ह्रस्वे ज्ञपयतीति प्रयोगात्। निशामनं ज्ञानम्। उद्धृतत्वादिति नैवं सर्वेत्यादिभाष्येणोद्धृतत्वादित्यर्थः। उक्तेत्यादि उपादानत्वे कर्तृत्वे च संदेह इत्यादिभाष्योक्तसंदेहानपायादित्यर्थः। नैयायिकः शङ्कते नन्वित्यादि। तस्यैवेत्यादि 'फलं च पुरुषार्थत्वात्' इति सूत्रादित्यर्थः। इदं तृतीयस्य तृतीयाधिकरणे चिन्तितम् 'द्रव्यगुणसंस्कारेषु बादरिः' इत्यत्र। तत्र

किंच । अन्यपदार्थस्रष्टौ वैषम्यनैर्घृण्ये स्याताम् । कर्माधीनत्वे त्वनीशता । ततः कर्तृत्वमपि भज्येत । ततः सर्वमाहात्म्यनाश एव स्यात् ।

नन्वेवमेवास्तु, अपवादार्थत्वात् । रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः ।

भाष्यप्रकाशः ।

भीदं तत् सर्वं, ब्रह्मोपासनया वा तज्ज्ञानेन वा सर्वस्य यथाधिकारं ब्रह्मणि सर्वकर्तृत्वं सर्वेश्वरत्वादिकं चानुसंदधानस्य सेत्स्यत्येव । नच समवायित्वानुसंधानस्यावश्यकत्वम् । शरीरद्वारापि तदङ्गीकारे पूर्वोक्तमाहात्म्यानपायेन तथानुसंधानस्यानावश्यकत्वात् । अतोऽपार्थप्रयासात् तव मते एतत्सूत्रवैयर्थ्यमेवापद्येतेत्यत आहुः किंचेत्यादि । तत इति अनीशत्वे । तत इति कर्तृत्वभङ्गे । तथाच वैषम्यादिवारणेन कर्तृत्वादिसमर्थनार्थमप्यावश्यकत्वान्न वैयर्थ्यमतस्तवापि निर्दोषनिखिलगुणगणालंकृतब्रह्माङ्गीकर्तुरावश्यकमित्यर्थः ।

अत्र विरुद्धधर्माश्रयत्वमसहमानो निर्विशेषमात्रवादी पुनः शङ्कते नन्वित्यादि । अयमर्थः । अस्तु कर्तृत्वादिभङ्गः । अस्थूलादिवाक्यैः स्वरूपस्य निर्विशेषत्वे निश्चिते तेषां कर्तृत्वादीनामविद्याकल्पितत्वेनापवादार्थत्वात् । न चैवं मिथ्यार्थकथने वाक्यप्रामाण्यभङ्गः । यथा ह्यतिचपले बाले तस्य भीत्युत्पादनाय रज्जुः सर्प इति प्रदर्श्यते, ततो विनीते तस्मिन् रज्जुरियमिति स्वरूपं कथ्यते । तथा संसारासक्तेषु भीत्यर्थं माहात्म्यं कर्तृत्वफलदातृत्वनियामकत्वादिरूपमुच्यते । ततो वैराग्याद्युत्पत्तौ स्वरूपं बोध्यत इति रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः । तत्र तात्पर्याभावात् । अथेदं सर्वं यदयमात्मेत्यादीनां स्वार्थत्यागादस्यासंगतत्वं विभाव्यते । तदबोधात् । गीतायां विश्वरूपं पश्यता पार्थेनैव सर्वव्याप्त्या सर्वत्वकथनेन तदर्थनिश्चयादसंगत्यभावादिति ।

रश्मिः ।

स्फ्यकपालादिद्रव्यं, अरुणिमादिर्गुणः, अवघातप्रोक्षणादिः संस्कारः । एतेषु त्रिष्वेवोपकारित्वरूपं शेषत्वम् । फलपुरुषकर्मसु न शेषत्वमुपकारित्वाभावात्, इति बादरिर्मन्यते, जैमिनिस्तु पारार्थ्यं शेषलक्षणमुररीचकार उपकारित्वस्य प्रधाने स्वामिन्यपि दर्शनेनातिव्याप्तत्वादिति । तथा च 'कर्माण्यपि जैमिनिः फलार्थत्वात्', 'फलं च पुरुषार्थत्वात्', 'पुरुषश्च कर्मार्थत्वात्', इति सूत्रत्रयादेतेष्वपि पारार्थ्याच्छेषत्वं ज्ञेयम् । एवकारेण प्रमाणप्रमेयसाधनव्यवच्छेदः । शरीरद्वारापीति नव्यमते विश्वमेवेश्वरशरीरमित्यनादरेऽपिशब्दः । एवं द्वितीयोऽपिशब्दः । अनावश्यकत्वादिति प्राचां नैयायिकानामिव प्राचस्तवाप्यनावश्यकत्वादित्यर्थः । नैयायिकयुक्तिपराहतत्वादनावश्यकत्वादिति वा । अनीशत्व इति सार्वविभक्तिकस्त्रसिरिति भावः । कर्तृत्वं 'स्वतन्त्रः कर्ता' इत्यनुशासनात्तदपि तदभावे भज्येत । तवापीति । नैयायिकस्यापीत्यर्थः । तेन रामानुजा अप्याक्षिप्ता ज्ञेयाः । अत्रेत्यादि मध्ये नैयायिकाशङ्काया उक्तत्वात् पुनरिति । रज्जुः सर्पवदिति भाष्यं विवृण्वन्ति स्म न चैवमिति । तत्रेति कर्तृत्वाद्ययुक्तार्थकथन इत्यर्थः । सर्वमित्यादि भाष्यं विवरीतुमाहुः अथेदमित्यादि । अस्येति आरोपापवादस्येत्यर्थः । सर्वव्याप्त्येति सूत्रं

'सर्वं समाप्नोषि ततोऽसि सर्वः' इति स्मृतेश्चेति चेत् मैवम्। तथा सति पाषण्डित्वं स्यात्। एतादृशशास्त्रार्थाङ्गीकर्तुरासुरेषु भगवता गणितत्वात्।

'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत् कामहैतुकम्' इति।

भाष्यप्रकाशः।

अत्र समादधते मैवमित्यादि। तथा सतीति सर्वधर्मापवादे कृते सति। पाषण्डित्वमिति पापलिङ्गवत्त्वम्। 'तानि पापस्य षण्डानि लिङ्गं षण्डमिहोच्यते' इति श्रीभागवतवाक्यात्। गीतावाक्यार्थस्तु, ते आसुराः, असत्यं नास्ति सत्यं वेदपुराणादिप्रमाणं यस्मिंस्तदसत्यम्। वेदादिस्वरूपसत्त्वेऽपि तत्प्रामाण्यानभ्युपगमाद् विशिष्टाभावः। अत एव नास्ति धर्माधर्मरूपा प्रतिष्ठा हेतुव्यवस्था यस्येत्यप्रतिष्ठम्। तथा नास्ति शुभाशुभफलदातेश्वरो नियन्ता यस्येत्यनीश्वरं जगदाहुरिति। यद्वा। सत्यं सत्यशब्दनिर्दिष्टं ब्रह्म, तदुपादेयत्वेन तदात्मकत्वे जगदपि सत्यं भवति, तद्विरुद्धमसत्यम्। न विद्यते ब्रह्मणि प्रतिष्ठा यस्येत्यप्रतिष्ठम्। न विद्यते नियामकः सत्यसंकल्प ईश्वरो यस्येत्यनीश्वरमिति। किंच, सर्वं पशुमनुष्यादिकं योषित्पुरुषयोः परस्परसंबन्धेन जातमुपलभ्यते। अनेवंभूतमपरस्परसंभूतं तादृशमन्यत् किं, न किमपि। अत इदं सर्वं कामहेतुकमिति। यद्वा। यतः सर्वमेवमतोऽदृष्टं कारणं किमपि नास्ति। अदृष्टाङ्गीकारेऽपि क्वचिद्गत्वाऽन्ततः स्वभाव एव पर्यवसानात् स्वाभाविकमेव जगद्वैचित्र्यमस्तु। दृष्टे संभवत्यदृष्टकल्पनानवकाशात्। अतः काम एव प्राणिनां कारणं, नान्यददृष्टेश्वरादीत्याहुरिति। इयं च लौकायतिकदृष्टिरिति। ततश्चायमर्थः। धर्माणामपवादमातिष्ठतस्तद्विशिष्टस्येश्वरस्य काल्पनिकत्वेन वस्तुतस्तदभावात् प्रच्छन्नानीश्वरवादितया स्वभाववाद एव विश्रान्त्या लौकायतिककल्पत्वाद् पाषण्डित्वस्य गीतोक्तलक्षणकत्वादासुरत्वस्य चापत्तिर्वेदस्यापि कल्पितत्वापत्त्या तस्यानर्थक्यम्। कथंचित्प्रामाण्याङ्गीकारेऽपि संसारभ्रमस्यौत्पत्तिकत्वात् तद्भ्रमनिवारणाय स्वरूपमात्रस्यैव वक्तव्यत्वेन शेषशास्त्रस्य प्रक्षालनपङ्कन्याया-

रश्मिः।

समाप्नोषीत्यनेनेत्यर्थः। योऽन्यथेति श्रुत्यनुकूलमर्थमाहुः पापेत्यादि। तत्प्रामाण्यादिति अविद्यावद्विषयत्वादिति भावः। इदं चाध्यासभाष्ये स्फुटम्। विशिष्टेत्यादि जगति वेदसत्त्वेऽपि प्रामाण्यरूपविशेषणाभावात् प्रमाणं वेदादिर्जगति न विद्यते इति विशेषणाभावप्रयुक्तो विशिष्टाभाव इत्यर्थः। नास्तीति। औपाधिकत्वादिति भावः। जगति सर्वेषां कामहेतुकत्वाभावात्किमन्यदित्याद्यंशं प्रकारान्तरेण योजयन्ति यद्वेत्यादि। प्राणिनामिति गोमयोत्पन्नवृश्चिकघटादिनिष्ठजलजन्यजन्त्वादिव्यतिरिक्तानामिति वाच्यम्। शांकरैर्यथाकथंचिदीश्वराङ्गीकारान्नास्तिकैस्तु तदनङ्गीकारादाहुः इयं चेत्यादि। कथं तर्ह्यस्य निर्विशेषमात्रवादिशङ्कानिराकरणाय भाष्ये उपक्षेप इत्याकाङ्क्षायां निर्विशेषमात्रवादिनो नास्तिकतौल्यादुपक्षेप इति वक्तुं तत्तौल्यं स्फुटयन्ति ततश्चेत्यादि। आपत्तिरिति एतदन्तं तथासतीत्यारभ्य कामहेतुकमित्यन्तस्य भाष्यस्य फलितोऽर्थः। शास्त्रानर्थक्यं चेति भाष्यं विवृण्वन्ति वेदस्यापीत्यादि। तद्भ्रमेति संसारात्मकभ्रमेत्यर्थः। स्वरूपस्यैवेति विशेषज्ञानरूपस्य। एवकारेण कार्यलक्षणप्रतिपादकभागव्यवच्छेदः। शेषशास्त्रं माहात्म्यप्रतिपादकं तस्येत्यर्थः। आरोपापवादे प्रक्षालनेत्यादि। ननु कर्तृत्वादिप्रतिपादकस्य

शास्त्रानर्थक्यं च । सर्वं समाप्नोषीत्यप्यसंगतं स्यात् । वस्तुपरिच्छेदात् । नहि वेदो निष्प्रपञ्चरूपकथनमुक्त्वा स्वोक्तं जगत्कर्तृत्वं निषेधति । तस्मादध्यारोपा-

---

भाष्यप्रकाशः ।

दानर्थक्यम् । स्वस्वमतकल्पितरूपस्य चेतनविशेषस्येश्वरस्य सर्वैरेवाङ्गीकारेण तत्सत्तासाधनायाप्यनुपयोगात् । अपवादार्थमेवारोपितमेव सर्वमुच्यत इत्यङ्गीकारे, सर्वं समाप्नोषीत्यस्याप्यसंगतिः । पदार्थान्तरस्य व्याप्यस्याभावेनावस्तुनश्चाव्याप्यत्वेनास्य वस्तुपरिच्छेदबोधकस्यार्थबाधापत्तेः । असंगतत्वं विभजन्त एव तदुपपादकमाहुः न हीत्यादि । यदि हि निष्प्रपञ्चकथनं मुक्त्वा जगत्कर्तृत्वं ब्रह्मणि निषेधेत्, तदा कर्त्रन्तरादिमत्तया जगदपि सर्वं स्यात् । तदा व्याप्यसिद्धौ सर्वं समाप्नोषीति वाक्यं संगतं स्यात् । यथा तात्त्विकभेदवादिनां मते । तव मते तु निष्प्रपञ्चत्वकथनपूर्वक एव कर्तृत्वादिनिषेध इति त्वन्मत इदं वाक्यमसंगतमेवेत्यर्थः । एवं तन्मतमपास्य तमुपहसन्ति तस्मादित्यादि । तस्मादिति युक्तिप्रमाणविरुद्धत्वात् । तथाचैवंविधव्याख्यानरोगेण स्वयंनिवृत्तदैवभावैरासुरत्वरूपमरणप्राप्त्या अस्पृश्यैर्वेदान्ता अपि शवतिलापो यथा अमङ्गला अस्पृश्यास्तथा कृता इत्यर्थः । अत एव प्रबोधचन्द्रोदयनाटकेऽपि बौद्धोक्तिः ।

‘प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः । वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते’ ॥

इति । ‘असद्वा इदमग्र आसीत्, ततो वै सदजायत’ इति श्रुतिच्छायायास्तादृशैरप्यालम्बनात् । अत एव पाद्मोत्तरखण्डेऽप्युक्तम्—

‘मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा’ ॥

रश्मिः ।

शेषशास्त्रस्य नानर्थक्यं कर्तृत्वस्यापि नैयायिकादिभिरङ्गीकारेण तत्प्रतिपादनस्यावश्यकत्वादित्याशङ्कां निराचिकीर्षवो हेतुमप्याहुः **स्वस्वमत इत्यादि** । **सर्वं समाप्नोषीत्यादि** भाष्यं व्याकुर्वन्ति **अपवादेत्यादि** । असंगतौ हेतुभूतं भाष्यं विवृण्वन्ति **पदार्थेत्यादि** । तथा च वस्तुपरिच्छेदं समाश्रित्य यच्छास्त्रं सर्वं समाप्नोषीति तदप्यसंगतं स्यादिति भाष्यार्थः । **उपपादकमिति** तर्कमित्यर्थः । **निःप्रपञ्चेत्यादि** निर्गुणरूपप्रतिपादकं वाक्यप्रबन्धं मुक्त्वेत्यर्थः । क्त्वस्तु भावोर्थः अव्ययकृतो भाव इति वार्तिकात् । ‘समानकर्तृकयोः पूर्वकाले’ इत्यादिसूत्रैः द्योत्यं समानकर्तृकत्वादिकमित्युच्यत इति भूषणे स्थितम् । पूर्वोत्तरभावः सामानाधिकरण्यं च संसर्गः । तथा च तादृशवाक्यप्रबन्धवचनसमानाधिकरणमुत्तरकालिकं कर्तृत्वनिषेधं कुर्यादित्यर्थः । **कर्त्रन्तरादिसत्तयेति** सगुणादिरूपकर्त्रन्तरेत्यर्थः । **यथेत्यादि** नैयायिकानां यथा घटादि कर्त्रन्तरसत्तया प्रत्यक्षसिद्धया जगद्रूपव्याप्यसिद्धौ सर्वं समाप्नोषीति संगतं भवति तथा स्यादित्यर्थः । त्वं तु निष्कलं निष्क्रियं शान्तमित्यादिभिः निःप्रपञ्चत्वं प्रपञ्चविरहवैशिष्ट्यं कथयन्नेव कर्तृत्वं निषेधतीति मन्यसे इति कर्त्रन्तरसत्ताऽसिद्ध्या व्याप्यासिद्धेरिदमसंगतमेव स्यादित्याहुः **तव मत इत्यादि** । **आसुरत्वेत्यादि** ‘मृत्युरत्यन्तविस्मृतिः’ इति वाक्यात् स्वरूपविस्मारकत्वेनासुरत्वं मृत्युः । **तथाकृता इति** । भगवन्माहात्म्यनाशकत्वादिति भावः । **अत एवेति** अनुभूय युक्तिप्रमाणातिक्रमादेवेत्यर्थः । **किमपराध्यत इति** तादृशवाक्यानां सर्वेषामप्रामाण्यात्कोऽपराध इत्यर्थः । सर्वोऽपि वेदो नाङ्गीक्रियत इत्यपराध इत्यत आहुः **असद्वेत्यादि** । यथा अस्थूलादिश्रुतिर्निर्वि-

पवादपरत्वेन व्याख्यातृभिर्वेदान्तास्तिलापः कृता इति मन्यामहे। सर्ववाक्यार्थबाधात्। यथा निर्दोषपूर्णगुणविग्रहता भवति तथोपरिष्टाद् वक्ष्यामः।

ननु पुरुषार्थार्थानि शास्त्राणि। इदं च शास्त्रं मोक्षरूपपुरुषार्थसाधकम्। मोक्षश्चाविद्यानिवृत्तिरूप इति युक्तम्। अविद्या चाज्ञानं ज्ञानेनैव नश्यति। ततो ज्ञानोपयोगित्वेन व्याख्यातव्ये वेदान्तेऽध्यारोपापवादव्यतिरेकेण व्याख्यानमयुक्तम्। अतो यथाकथंचिद् व्याख्यानेऽपि पुरुषार्थसिद्धेर्न कोऽपि दोष

भाष्यप्रकाशः।

इत्यादि। ननु ब्रह्मणः प्रपञ्चसमवायित्वमयुक्तम्। कार्यस्य कारणसाजात्यनियमेन प्रपञ्चगतदोषाणां ब्रह्मण्यापातादित्याकाङ्क्षायामाहुः यथा निर्दोषेत्यादि। उपरिष्टादिति अन्तस्तद्धर्माधिकरणे।

अपवादार्थत्वे उक्तान् दोषानसहमानो निर्विशेषवादी पुनः प्रत्यवतिष्ठते नन्वित्यादि। युक्तमिति 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः' इति गौतमसूत्रे मिथ्याज्ञानापायस्य मोक्षसाधकत्वेन कथनाद्युक्तम्। अविद्या चाज्ञानमिति। 'अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या' इति पतञ्जलिसूत्र उक्तं भावरूपमज्ञानं, न तु ज्ञानाभावः। योगभाष्ये, अमित्रो न मित्रं, न वा मित्राभावः, किंतु मित्रविरुद्धसम्पदिति दृष्टान्तेन व्यासपादैरेव भावरूपताया उक्तत्वादिति। ततश्चायमर्थः। शास्त्रस्य स्वार्थाबाधने य आग्रहः क्रियते स शास्त्रस्वरूपं विचार्य कार्यः। न हि शास्त्रत्वेन शास्त्राणामुपादेयता येन स युक्तः स्यात्। किंतु पुरुषार्थार्थत्वेन। पुरुषाश्च नानास्वभावाः स्वस्वोपयोगिशास्त्रमाद्रियन्ते। तत्रेदं शास्त्रं मोक्षसाधकं मुमुक्षूपयोगि। मोक्षस्त्वभियुक्तैरविद्यानिवृत्तिसाध्यतयोक्तत्वादविद्यानिवृत्तिरूप एवात्र वक्तव्यो न तु स्वरूपात्मकः। तस्याजन्यत्वात्। तत्र च साधनानामनुपयोगेन तदुपदेशवैयर्थ्यप्रसङ्गाच्च। नचाविद्यानिवृत्तेर्जन्यत्वे कदाचित् तन्नाशः शङ्क्यः। ध्वंसरूपत्वात्। अत एव जन्यभावत्वेन नश्वरत्वेन व्याप्तिराद्रियते, न तु केवलं जन्यत्वेन। ततश्च साधनसाध्यो मोक्षोऽविद्यानिवृत्तिरूप एवेत्यविवादम्। तत्र साधनविचारे यद्यपि दर्शनान्तराभिमानिभिः साधनान्तराणि कर्मसमुच्चिततत्तद्विधज्ञानरूपाण्युक्तानि तथापि श्रौतेऽस्मिन् वेदान्तदर्शने केवलं ज्ञानमेव साधनम्। अविद्याया अज्ञानरूपत्वस्य साधितत्वात्। विवक्षितज्ञानमात्रेणैव तन्निवृत्तिसिद्धौ साधनान्तराणां समुच्चयस्य चापार्थत्वात्। ततो ज्ञानोपयोगित्वेनैव वेदान्तव्याख्याने कर्तव्येऽध्यारोपापवादपक्षमपहाय स्वार्थपरत्वेन व्याख्यानं नाभियुक्तजनरुचिरम्। अतो यथाकथंचिद्व्याख्यानेऽपि ज्ञानोत्पत्त्या अज्ञाननिवृत्तौ, 'ब्रह्म वेद ब्रह्मैव भवति' इतिरूपस्वरूपावस्थात्मकपुरुषार्थसिद्धेरप्रत्यूहत्वात् पाषण्डित्वासुरत्वशास्त्रानर्थक्यादिरूपाणां दोषाणां लेशस्याप्यभावादनुचितोऽयमुपहास इति। एवं तेन स्वोपहासे विनिवारिते तस्यापत्रपत्वं बोधयन्तः स्वोक्तं स्थिरीकर्तुं तदुक्तं

रश्मिः।

क्षेपवादिनावलम्ब्यते तथेयं तैरवलम्ब्यते इति लोकायतिकतौल्यमिति भावः। दुःखजन्मेत्यादि। इदं सूत्रं शंकराचार्यैरुपन्यस्तं भाष्ये। साधनपादस्थं सूत्रमाहुः अनित्येत्यादि। स्वरूपात्मक इति ब्रह्मस्वरूपात्मक इत्यर्थः। अत एवेति ध्वंसस्य जन्यत्वे सत्यनश्वरत्वादेवेत्यर्थः। जन्यभावत्वेनेति

इति चेत् । न । पुरुषार्थस्य शास्त्रार्थस्य वा स्वरूपं शास्त्रैकसमधिगम्यं, न स्वबुद्धिपरिकल्पितम् । अतः स्वबुद्ध्या शास्त्रार्थं परिकल्प्य तत्र वेदं योजयन्तो महासाहसिकाः सद्भिरुपेक्ष्याः ।

पुरुषार्थः पुनर्यथा वेदान्तेष्ववगतः । 'ब्रह्म वेद ब्रह्मैव भवति', 'ब्रह्म-

---

भाष्यप्रकाशः ।

निषेधन्तः प्रामाणिकप्राचीनरीतिमाहुः नेत्यादि । अयमर्थः । यदुक्तं, पुरुषार्थार्थानि शास्त्राणीत्यादिना, तदङ्गीकुर्मः । परंतु पुरुषार्थः शास्त्रार्थश्च कीदृशो विवक्षित इति विचारणीयम् । किं स्मार्त उत श्रौतः ? । तत्र नाद्यः । विरुद्धानां शास्त्राणां व्यासेनैव निराकरणात् । वाक्याभासयुक्त्याभासावष्टम्भाः पूर्वपक्षवादिन इहोत्तिष्ठन्ति । तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्त इति भवद्भाष्यकृतापि तन्निराकरणाङ्गीकारात् । अतो द्वितीय एवादरणीयः । तथा सति पुरुषार्थस्य शास्त्रार्थस्य च स्वरूपं श्रुत्येकसमधिगम्यं, न तु दर्शनान्तरवाक्यादरणेन स्वबुद्धिकल्पितमिति सिद्धम् । एवं सति पदवाक्यप्रमाणनिष्णातेनाचार्येण कार्यलक्षणस्यैव पूर्वं विचारितत्वादग्रे तत्तद्धर्मादिविचाराच्च धर्मविशिष्टब्रह्मज्ञानमेव शास्त्रार्थो, न त्वध्यारोपापवादेन यावद्धर्मशून्यब्रह्मावगतिः । अतः स्वबुद्ध्या तथा शास्त्रार्थं कल्पयित्वा तत्र वेदस्यैकवाक्यत्वं बोधयन्तो लोकान्तरीयभयराहित्येन महासाहसकर्तृत्वात् सद्भिर्वेदानुसारिभिरसंभाष्या इति । मोक्षस्याविद्यानिवृत्तिरूपत्वव्युदासायाहुः पुरुषार्थ इत्यादि । तथाचाविद्यानिवृत्तिरूपो मोक्षः कुत्रापि नोक्त इति त्वन्मतीयः पुरुषार्थोऽपि काल्पनिक इत्यर्थः । एतदेव बोधयितुं वाक्यान्युदाहरन्ति ब्रह्म वेदेत्यादि । अत्र प्रथमे ब्रह्मभावो, द्वितीये परब्रह्मप्राप्तिरेव च फलत्वेनोच्यते । तृतीये च संसारावृत्त्यभावः । चतुर्थे गीतावाक्ये आप्तिस्वरूपं निष्कृष्यते । पञ्चमे च वैयासे सूत्रे तृतीयवाक्यार्थनिर्धारणेन जन्यभावत्वनश्वरत्वयोर्व्याप्तिर्निराक्रियते । अत्रायमाशयः । भवद्भाष्ये न्यायसूत्रोपन्यासेनाविद्यानिवृत्तेरूर्ध्वं सरूपत्वादनश्वरत्वं यदसूचि, तद् आश्रमवासिके भारतीये पर्वणि महता प्रबन्धेन, त्यक्तदेहानां कुरुपाण्डवसैन्यानां व्यासेन पुनर्दर्शितानां स्वस्वपत्नीभिः

रश्मिः ।

न तु जन्यत्वेनेति भावः । ध्वंसस्य जन्यत्वेऽपि नश्वरत्वाभावात् । **निराकरणादिति** । द्वितीयाध्याये तथेत्यर्थः । 'ईक्षतेर्नाशब्दम्' इति सूत्रस्थं शांकरभाष्यं संमतये आहुः **वाक्याभासेत्यादि** । एवं पीठिकामुक्त्वा व्याकुर्वन्ति स्म **तथा सतीत्यादिना** । **स्वबुद्धीति** भाष्यं विवृण्वन्ति स्म **न त्विति** । **अत** इत्यादिभाष्यं विवरीतुमाहुः **एवं सतीत्यादि** । **आप्तिस्वरूपमिति** परमाप्नोतीत्युक्तमाप्यं कर्म ब्रह्म तन्निष्ठाप्तिस्वरूपमित्यर्थः । भक्त्या हृदि प्रकटे प्रवेश आप्तिरिति निष्कर्षः । **निराक्रियत** इति यदीयं व्याप्तिः प्रामाणिकी स्याच्छ्रुतिष्वादृता स्यात् इति तर्केण तथेत्यर्थः । एवं सामान्यतः सिद्धान्तग्रन्थं व्याख्याय प्रेक्षावत्प्रवृत्तये शंकरभाष्यं पूर्वपक्षकोटौ निवेशयितुमाशयं वर्णयन्ति **अत्रायमित्यादि** । **असूचीति** नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यत इत्युक्त्वा 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिजालमुपन्यस्यैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानफलं दर्शयन्तीति निरुच्यास्योपन्यासेन तत्स्वीकृतं तथात्वमसूचीत्यर्थः । स्मार्तं स्मार्तेनैव दूष्यमित्याशयेनाहुः **तदाश्रमेत्यादि** । **वाक्यानि तु**

विद्याप्नोति परम्’, ‘न स पुनरावर्तते’, ‘ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्’, ‘अनावृत्तिः शब्दादनावृत्तिः शब्दात्’ इत्येवमादिभिः श्रुतिस्मृति-

---

भाष्यप्रकाशः।

सहैकरात्रिकृतविहारामन्त्रणादिकथनाद् ध्वंसस्याप्यनश्वरत्वं प्रायिकमेव, न तु नियतमतस्तद्वद्विद्याकृताविद्यानिवृत्तेरपि स्वप्नप्रबोधन्यायेन च निवृत्तिसंभवान्नानश्वरत्वं, गुणानामन्योन्याभिभवजननमिथुनवृत्तितया सत्त्वेन रजस्तमसोरिव ताभ्यां सत्त्वस्याप्यभिभवे पुनरप्यविद्योत्पत्तिसंभवादसंगतम्। अतस्तद्विहाय श्रौत एव ब्रह्मप्राप्तिरूपः पुरुषार्थ आदर्तव्यः। नच तस्य नश्वरत्वं शङ्क्यम्। ‘न स पुनरावर्तते’ इति ब्रह्मप्राप्तस्यानावृत्तिबोधनेन तस्यानश्वरत्वनिश्चयात्। जन्यभावत्वेन नश्वरत्वेन व्याप्तेर्लौकिकत्वबोधनायैव सूत्रे शब्दादित्यस्य हेतोरुपन्यासात्। नच ब्रह्मणः सर्वगतत्वेन नित्याप्तस्वरूपत्वादनाप्यत्वं शङ्क्यम्। आप्तस्वरूपत्वेऽप्युक्तगीतावाक्ये आप्तिस्वरूपविवरणेनेदानीं तस्याभावादाप्यत्वस्यापि सत्त्वात्। एतदर्थापत्त्यैवान्तस्त्वबहिष्ट्वयोरपि तत्र मन्तव्यत्वात्। नच श्वेताश्वतरोपनिषदि, ‘भूयश्चान्ते विश्वमायानिवृत्तिः’ इतिमायानिवृत्तेर्मोक्षरूपत्वश्रावणादविद्यानिवृत्तेरप्यनश्वरत्वं श्रौतत्वं च शङ्क्यम्। मायाऽविद्ययोर्भेदात्।

‘विद्याऽविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्। मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते’॥

इति भगवता तयोः कार्यकारणभावबोधनात्। माया चाविद्या च स्वयमेव भवतीति तापनीयश्रावितद्वैरूप्यपक्षेऽपि तयोर्भेदेन तन्नाशयोरपि भिन्नत्वान्मायानिवृत्तेरेव मोक्षत्वं, नाविद्यानि-

रश्मिः।

विद्वन्मण्डने सन्ति। अनुभवमप्याहुः **स्वप्नप्रबोधेत्यादि**। अविद्यया विद्यानिवृत्तिं व्युत्पादयन्ति स्म **गुणानामिति**। **असंगतमिति** यदसूचि तदसंगतमित्यर्थः। **अतस्तदिति** स्मृत्यनुभवसूत्रविरुद्धत्वात्स्मार्तमित्यर्थः। अत्र यस्य तूत्पाद्यो मोक्षस्तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षते इति युक्तं, तथा विकार्यत्वे च तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। नहि दध्यादिविकार्यमुत्पाद्यं वा घटादि नित्यं दृष्टं लोके इति शंकरभाष्योक्तमाशङ्क्य निराकुर्वन्ति **न चेत्यादि**। स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं, सर्वगतत्वेन नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मण आकाशस्येवेति शंकरभाष्योक्तमाशङ्क्य निषेधन्ति **न च ब्रह्मण इत्यादि**। **तस्येति** प्रवेशस्येत्यर्थः। तथा च लोकन्यायेनोपष्टब्धत्वाच्चायमेवार्थस्तात्त्विक इति भावः। **एतदित्यादि** अभिहितानुपपत्तिरूपयेत्यर्थः। इदमिह तत्त्वं गीतावाक्यावगतोऽर्थः प्रवेशरूपो ब्रह्मणो व्यापकत्वेन नित्याप्तस्वरूपत्वादनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं सान्तस्त्वबहिष्ट्वरूपं कल्पयतीति, यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र यागस्य क्षणिकत्वेन स्वर्गसाधनतानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते तद्वत्। श्रुतीनामेकवाक्यत्वायाहुः **मायानिवृत्तिरित्यादि** ‘मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते’ इति स्मृतिरप्येतेन संगृहीता। तदुक्तम्।

‘ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥
भक्त्याहमेकया ग्राह्यो यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्’। इति।

मायातरणोत्तरं ब्रह्मभाव इति वस्तुस्थितिः।

‘अपश्यत्पुरुषं पूर्णं मायां च तदुपाश्रयाम्। यया संमोहितो जीव आत्मानं त्रिगुणात्मकम्॥
परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते। अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे’। इति समाधिभाषायाः।

ब्रह्मणो व्यतिरिक्तत्वमाश्रित्यानाप्यत्वं यदुक्तं तद्दूषितमिदानीं तु स्वात्मरूपत्वे सत्यनाप्यत्वादिवि

न्यायैर्ब्रह्मप्राप्तेरेव पुरुषार्थत्वम्। ब्रह्म च पुनर्न जीवस्यात्ममात्रम्। अज्ञानवद्वा। ‘एकस्यैव ममांशस्य जीवस्यैव महामते। बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरः’

इति भगवता जीवस्यैवाविद्यावत्त्वप्रतिपादनात्। तस्मान्न्यायोपबृंहितसर्ववेदान्तप्रतिपादितसर्वधर्मवद् ब्रह्म। तस्य श्रवणमनननिदिध्यासनैरन्तरङ्गैः शमदमादिभिश्च बहिरङ्गैरतिशुद्धे चित्ते स्वयमेवाविर्भूतस्य स्वप्रकाशस्य सायुज्यं परमपुरुषार्थः। तस्मात् सर्वे वेदान्ताः स्वार्थ एव युक्तार्था इति न्यायैर्वक्तव्यत्वाद् ब्रह्मणः समवायित्वाय समन्वयसूत्रं वक्तव्यम् ॥ ३ ॥

इति प्रथमाध्याये प्रथमपादे तृतीयं समन्वयाधिकरणम् ॥ ३ ॥

**इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीब्रह्मसूत्राणुभाष्ये
प्रथमाध्याये प्रथमपादस्यादिमत्रिसूत्रीभाष्यं समाप्तम् ॥**

भाष्यप्रकाशः।

वृत्तेः। मायानिवृत्तिश्च मोक्षस्य पूर्वा कक्षेति परममोक्षत्वं ब्रह्मप्राप्तेरेव निश्चेयम्। तदेतदुक्तं ब्रह्मप्राप्तेरेव पुरुषार्थत्वमिति। यदपि मोक्षस्य स्वात्मस्वरूपत्वेनानाप्यत्वमुक्तं यच्च ब्रह्मणोऽविद्याशाबल्यादज्ञानवत्त्वं तदप्यसंगतमिति ज्ञापनायाहुः ब्रह्म चेत्यादि। आत्ममात्रमिति ‘मात्रं कार्त्स्न्येऽवधारणे’ कृत्स्नमात्मस्वरूपम्। तथाचाऽस्मिन् वाक्ये जीवस्यांशत्वकथनेन स्वस्यांशित्वं बोधयता भगवता ब्रह्मणो जीवात्ममात्रत्वे निवारिते मोक्षस्यात्मरूपत्वेनानाप्यत्वं निवारितम्। जीवस्याविद्यया बन्धकथनेन ब्रह्मणोऽविद्यावत्त्वमपि निवारितमतस्तदप्यसंगतमित्यर्थः। सिद्धमाहुः तस्मादित्यादि। तस्मादिति एकदेशिमतस्योपबृंहणविरुद्धत्वात्। तस्येति सर्ववेदान्तप्रतिपादितधर्मविशिष्टस्य ब्रह्मणः। स्वयमाविर्भूतस्येति नायमात्मेतिश्रुत्या साधनाधीनत्वे ब्रह्माविर्भावस्य वारिते आविर्भावः स्वोक्तकरणेन प्रसादादेव भवतीति तेन स्वयमाविर्भूतस्य। तथाच श्रौतानां स्मार्तानां च ब्रह्मविषयाणां साधनानां चित्तकषायशोषण एव पर्यवसानात् तैरतिशुद्धे चित्ते परमव्योमात्मके सति तत्राविर्भूतस्य ब्रह्मणः, ‘सोऽश्नुते’ इतिश्रुत्युक्तं सायुज्यमेव सर्वोत्कृष्टः पुरुषार्थो ध्वंसाप्रतियोगित्वात्। न तु ब्रह्मात्मावगतिमात्रम्। अतस्तादर्थ्येन यथाकथंचिद् वेदान्तव्याख्यानमयुक्त-

रश्मिः।

भाष्ये ब्रह्मैक्यादनाप्यत्वं यदुक्तं तदनुवदन्ति यदपीत्यादि। स्वयंपदात्पुष्टिमार्गं व्याचक्षते स्म नायमात्मेतीति। ननु पुष्टिमार्गबोधकं किं पदं श्रुताविति चेन्न ‘वृणुते’ इति पदसत्त्वात्। साधननिषेधपूर्वकं, वृङ् संभक्तौ इति धातुपाठात् स्वीयत्वेन स्वीकारस्तु संभक्तिरूपपुष्टिसंबन्धित्वेन तत्त्वात्। तेनेति प्रसादेन दर्शनसाधनेन ‘तमक्रतुं पश्यति वीतशोको धातुः प्रसादात्’ इति श्रुत्युक्तेनेत्यर्थः। आविर्भूतस्येति लोकरीत्याविर्भूतस्येत्यर्थः। तत्राविरिति व्योमात्मके शरीरे आविर्भूतस्यानन्दस्य। ‘आकाशशरीरं ब्रह्म’ इतिश्रुतेः। अदृश्यत्वाधिकरणात्। यद्यपि सेवाफलविवृतिविवृतौ सायुज्यं ‘भक्त्यामामभिजानाति’ इति स्मृत्युक्तः प्रवेश इत्युक्तं, तथाप्यत्र परमपुरुषार्थपदसमभिव्याहारादलौकिकसामर्थ्यरूपं मुख्यं फलं सह युनक्तीति सयुक् सयुजो भावः सायुज्यमिति व्युत्पत्त्या संयोगानुभवरूपं सायुज्यं विवक्षितमित्याशयेनाहुः सोश्नुते इतीति। तादर्थ्येनेति स्वसैद्धान्तिकपुरुषार्थार्थत्वेनेत्यर्थः। इदमत्र बोध्यम्। निमित्तत्वस्य श्रुतिसिद्धत्वादित्युक्तम्। अत्र च समवायित्वाय समन्वयसूत्रं वक्तव्यमित्युक्तम्। अतो निमित्तत्वे सति समवायि ब्रह्म इत्युक्तं भवति।

भाष्यप्रकाशः ।

मित्यर्थः । एवमेकदेशिमतानि व्युदस्य पूर्वोक्तं सूत्रप्रयोजनं निगमयन्ति तस्मादित्यादि ।

इति तृतीयं समन्वयाधिकरणम् ॥ ३ ॥

इति श्रीवल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य श्रीपीताम्बरात्मजस्य
पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे प्रथमाध्याये प्रथमपादस्यादिम-
त्रिसूत्रीप्रकाशः समाप्तिमगमत् ॥

रश्मिः ।

अतएव द्वितीयस्कन्धे 'अन्वयव्यतिरेकाभ्याम्' इत्यस्य सुबोधिन्यां अभिन्ननिमित्तोपादानं जगत् ब्रह्मकारणकं इत्युक्तं भवतीत्युक्तम् । तदिदं लोकाप्रसिद्धमिति चिन्त्यते समवायश्च तादात्म्यं न तु वैशेषिकमतप्रतिपन्नमिति द्वितीयाध्याये समवायदूषणावसरे व्युत्पाद्यं, तत्र कृत्स्नस्यांशस्य वा, अंशस्येति सिद्धान्तः । तथा च 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इतिश्रुतिव्याकोपः । नैवं 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इत्याशङ्क्य 'श्रुतेस्तु शब्दमूलत्वात्' इति भगवता व्यासेनैव तन्निराकरणात् । अत एव । अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ इति स्मृतिः । तस्य निमित्तत्वं दुरुपपादम् । समवाय्यसमवायिभिन्नत्वे सति कारणत्वस्य तल्लक्षणत्वात् । नैतत् निमित्तकारणलक्षणस्यैकांशेन समवायिन्यविरुद्धत्वात् । अवयवभेदस्यावयविनि सत्त्वात् । तथा चैषा प्रक्रिया । ब्रह्माविकृतमेवैकांशेन समवायि, दृष्टान्ताभावो भूषणाय 'न तत्समः' इति श्रुतेः धेनुविशेषवद्वा, तदेव प्रकृतिरूपं, कश्चित्कालरूपं स्वांशमुपादानं करोति । प्रमाणं तु पूर्वमुक्तम् । उपादानं च द्विविधम् । परिणाम्युपादानं विवर्तोपादानं च । तत्राद्यं स्वसमानसत्ताकं कार्याकारेणाविर्भवति । उपादानसमसत्ताकोऽन्यथाभावः परिणामः । स च विकृताविकृतभेदेन । द्विविधः । तत्राद्यो यथा मृदो घटशरावादिः । द्वितीयस्तु यथा सुवर्णस्य कटककुण्डलादिः । विवर्तस्तूपादानविषमसत्ताकोन्यथाभावः । यथा रजतादिरूपेण शुक्तेः भानं । यद्यपि समवायिकारणभिन्नं यत्कारणं तन्निमित्तकारणम् । असमवायि कारणस्यातिरिक्तकारणताकल्पने प्रयोजनाभावात् । कारणसामग्र्यामन्तर्भाव इत्युक्तं तथैव एतदुक्तमाचार्यचरणैः 'प्रपञ्चो भगवत्कार्यस्तद्रूपो माययाभवत्' इति शास्त्रार्थप्रकरणे । तथा च शरीरि, प्रसिद्धकर्तृत्वात् कुलालवदिति साकारत्वसिद्धिः । पृथ्वी जलं शोषयति तेजः पिबतीत्यादि कर्तृत्ववारणाय प्रसिद्धेति हेतुविशेषणम् । अन्यद्विद्वन्मण्डने स्फुटम् ।

इति तृतीयं समन्वयाधिकरणम् ॥ ३ ॥

इति श्रीविठ्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण
संपूर्णवेत्ता विठ्ठलरायजित्पुत्रश्रीगोकुलोत्सवात्मजगोपेश्वरजिता
कृते भाष्यप्रकाशस्य रश्मौ प्रथमाध्याये प्रथमपादस्यादिम
त्रिसूत्री रश्मिः संपूर्णतामगमत् ॥

श्रीकृष्णाय नमः।

श्रीमद्ब्रह्मसूत्राणुभाष्यम्।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम्।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णवेणुश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिच्चरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम्।

प्रथमाध्यायप्रथमपादस्येक्षत्यधिकरणमारभ्य पादसमाप्त्यन्तो
द्वितीयो भागः

'भगवद्धर्मपरायणसद्गतश्रेष्ठिगोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतः 'ब्राह्मणज्ञातीय-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्एल्. बी.,
वकील, हाइकोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम्।

श्रीवल्लभाब्दाः ४५८. संवत् १९९३.
श्रीकृष्णप्रादुर्भावोत्सवः

मूल्यं रूपकत्रयम्।

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sagar' Press,
26-28, Kolbhat Street, Bombay 2.

Published by Dhirajlal Vrajdas Sanklia, B. A., LL. B., Advocate
at Khakhar Building, C. P. Tank, Bombay 4.

श्रीकृष्णाय नमः ।
श्रीगोपीजनवल्लभाय नमः ।
श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ प्रथमोऽध्यायः ।

एवं ब्रह्मजिज्ञासां प्रतिज्ञाय किं लक्षणकं ब्रह्मेत्याकाङ्क्षायां जन्मादिसूत्रद्वयेन वेदप्रमाणकं जगत्कर्तृ समवायि चेत्युक्तम् । एवं त्रिसूत्र्या जिज्ञासालक्षणविचारकर्तव्यता सिद्धा ।

भाष्यप्रकाशः ।

अतः परं प्रस्तोष्यमाणग्रन्थावतरणाय पूर्वोक्तस्य शास्त्रार्थसंग्रहरूपत्वं बोधयन्तः तदर्थमनुवदन्ति एवं ब्रह्मेत्यादि । तेन सिद्धमाहुः एवं त्रिसूत्र्येत्यादि । कर्तव्यतापदस्य जिज्ञासादिपदैः प्रत्येकं संबन्धः । सिद्धेति सूचिता । तथाच पूर्वसूत्रे जिज्ञासापदमहिम्ना ज्ञाने-

रश्मिः ।

अतः परं चिद्रूपेऽव्याप्तिवारकं प्रकृतिपरमाण्वादावतिव्याप्तिवारकं च सप्तसूत्रमीक्षत्यधिकरणभाष्यमाक्षेपसंगत्या पूर्वमवतारयन्ति अतः परमित्यादि । संगतिस्तु पूर्वपक्षभाष्ये स्फुटिष्यति 'क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते' इति भाष्यकारिकाया ज्ञानशक्तिसंदेहोत्र । त्रिसूत्र्येति । करणत्वबोधकतृतीयानुरोधादत्र द्वन्द्व इति सूचयन्त आहुः कर्तव्यतेत्यादि । प्रत्येकमित्यादि । द्वन्द्वान्ते श्रूयमाणत्वादिति भावः । जिज्ञासासूत्रे कर्तव्यपदानध्याहाराज्जन्मादिसूत्रे च लक्षणपदानुक्तेः समन्वयसूत्रेपि कारणविशेषविचारानुक्तेराहुः सूचितेति । सूचकपदेन सिद्धेत्यर्थः । साचेयं नार्थव्यञ्जना किंतु शब्दव्यञ्जनेत्याहुस्तथाचेत्यादि । जिज्ञासापदमहिम्नेति । अयमर्थः । यथा—

'भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत्' । इत्यत्र

भद्रात्मनोऽनाक्रमणीयमूर्तेः, विस्तीर्णे वंशे कुले उन्नतिरभ्युदयो यस्य, कृतः शरसंग्रहो येन, अनुपप्लुता मण्डूकवद्गतिर्यस्य, वैरिनिवारकस्य, एतादृशस्य यस्य राज्ञो हस्तः सततं दानोदकसेकसुन्दरोऽभूदिति मुख्यो वाच्योर्थः । इदानीं व्यङ्ग्योर्थः । अत्युन्नतयाऽनाक्रमणीयस्य, विशाला पृष्ठवंशस्योन्नतिर्यस्मिन्, कृतभ्रमरसंग्रहस्य, अनुपप्लुतगतेः, एवंविधस्य परवारणस्य, पर उत्कृष्टो वारणस्तस्य, हस्तः शुण्डादण्डः, 'मदोदकसेकसुभगोभूदिति । अत्र व्यञ्जनया गजप्रतीतिः । राज्ञो वाच्यत्वस्य प्रकरणनियतत्वात् उक्तव्यञ्जनाद्वारा व्यञ्जकशब्दं लक्षयति । शब्दस्यार्थविशेषयुक्तस्य व्यञ्जकत्वादर्थोपि सहकारित्वेन व्यञ्जको बोध्यः । तद्वत्प्रकृतेपि । तथाहि ।

तत्र ब्रह्मणि चतुर्धा विचारः। स्वरूपसाधनफलप्रतिपादकानि वेदान्तवाक्यानि त्रिविधानि मतान्तरनिराकरणं च । तत्र स्वरूपे विचारिते मतान्तरनिरासव्यतिरेकेण साधनफलयोरनुपयोगात् । अतः प्रथमं स्वरूपनिर्णयः । तदनु मतान्तरनिरासः । तदनु साधनानि फलं चेति । तत्र प्रथमेऽध्याये स्वरूपवाक्यानि विचार्यन्ते । तानि द्विविधानि । संदिग्धानि, निःसंदिग्धानि च । तत्र निःसंदिग्धानां निर्णयो न वक्तव्यः । संदिग्धानि पुनश्चतुर्विधानि । कार्यप्रतिपादकान्यन्तर्यामिप्रतिपादकान्युपास्यरूपप्रतिपादकानि प्रकीर्णकानि चेति । तत्र प्रथमपादे कार्यवाक्यानां निर्णय उच्यते । सच्चिदानन्द-

---

भाष्यप्रकाशः ।

च्छासारणेन, ‘अविज्ञातं विजानतां विज्ञातमविजानताम्’ इति ब्रह्मस्वरूपमर्यादाबोधनाद् ब्रह्मज्ञानोत्तरमपि तस्याः करणावश्यकता सूचिता । द्वितीये स्वरूपलक्षणमनुक्त्वैव कार्यलक्षणकथनेन तस्य गौणत्वनिवारणात् तत्करणावश्यकता सूचिता । तृतीये समवायित्वनिर्णायकहेतुकथनेन विरुद्धधर्माश्रयत्वबोधनाद् विचारकरणावश्यकता च सूचितेति त्रिसूत्र्युक्त एवार्थोऽग्रे विशेषाकारेण बोधनीय इत्यर्थः । तमेव वैशेषिकं बोधयितुं प्रकारमाहुः तत्र ब्रह्मणीत्यादि । अत्राध्यायार्थक्रमनियमे तत्तदुपजीव्योपजीवकभावं हेतुत्वेनाहुः तत्र स्वरूप इत्यादि । तथाचैवं चतुर्धा विचारः शास्त्रार्थः । तत्तद्विधाविचारस्तत्तदध्यायार्थ इत्यर्थः । प्रथमाध्यायस्य विशेषाकारेणार्थमाहुः तत्र प्रथम इत्यादि । निःसंदिग्धानीति ‘सत्यं ज्ञानमनन्तं ब्रह्म’ ‘विज्ञानमानन्दं ब्रह्म’ इत्यादीनि । न वक्तव्य इति निर्णयस्य संदेहनिरासार्थत्वात् तेषु च तस्याभावान्न वक्तव्यः । तथाच स्वरूपनिरूपकत्वेऽपि संदेहाजनकत्वादेव तद्विचारो व्यासेन न क्रियत इत्यर्थः । पादसंख्यायां हेतुभूतां विधामाहुः संदिग्धानीत्यादि । प्रथमपादार्थमाहुः तत्रेत्यादि । निर्णेतव्यानां वाक्यानां विधां वदन्ति सच्चिदित्यादि । सच्चिदानन्दरूपेण कारणं निर्दिश्य कार्यप्रतिपादकानि, आकाशवायुतेजोवाचक-

रश्मिः ।

‘संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः’ ॥ इति ।

संयोगादयो विशेषस्मृतिहेतव उक्तास्तत्र जिज्ञासासूत्रे ब्रह्मपदसांनिध्येन विचारस्य वाच्यत्वे नियमिते ज्ञानेच्छाकरणावश्यकताव्यञ्जकः शब्दो लाक्षणिकस्तस्य व्यङ्ग्योऽर्थस्तत्करणावश्यकतारूप इत्यर्थः । ‘ज्ञानी चेद्भजते कृष्णम्’ इति वाक्यात् । नैयायिकास्तु लक्षणयैव निर्वाहयन्ति । विजानतामिति इदमित्थतयाऽस्माभिर्ब्रह्म ज्ञातमित्यभिमानवतामित्यर्थः । अविजानतामिति तादृशाभिमानशून्यानामित्यर्थः । करणेत्यादि । जन्मादिसूत्रेषु ज्ञानेच्छाधिकारादर्शनात् व्यङ्ग्यार्थे विवक्षिते कर्तव्यपदस्यार्थस्य वाध्याहार इति भावः । कर्तव्यपदप्रत्ययार्थत्वेन तदैवावश्यकत्वाप्रतीतेः । भाष्ये कर्तव्यतापदाच्च व्यङ्ग्येऽर्थेऽधिकारक्रियानन्वयो दोषाय । तस्येति जन्मादिकर्तृत्वस्य निर्वाहकसंगत्या निरूपणेनेत्यर्थः । वैशेषिकमिति विशेषेण संसृष्टमित्यर्थः । ‘संसृष्टे’ इति सूत्रेण ठक् । तस्येति

भाष्यप्रकाशः ।

शब्देन कारणं निर्दिश्य कार्यप्रतिपादकानीत्येवं षड्विधान्याद्ये पादे निर्णीयन्त इत्यर्थः । नन्वन्यवाचकैः शब्दैः कुतो निर्देश इति शङ्कानिरासायाहुः अन्यत्रेत्यादि । तथाच तेषां नैसर्गिकशक्तिबोधनेन भूताकाशादिषु ब्रह्मलक्षणस्यातिव्याप्तिपरिहारायैवं निर्देश इति बोधयितुमयं निर्णय इत्यर्थः । एवमुपोद्घातेनार्थकथनादिदं बोधितम् । विचारस्य शास्त्रार्थत्वाज्जिज्ञासासूत्रस्य सर्वत्र विषयिविषयभावः संगतिः । शास्त्रस्याध्यायेषु तेषां स्वपादादिषु पादानां स्वावयवेषु सामान्यविशेषभावः । अधिकरणानां परस्परमन्यान्या एव संगतय उन्नेया इति । संगतिस्त्वनन्तराभिधानप्रयोजकाकाङ्क्षाजनकज्ञानविषयोऽर्थः । इदं वाक्यमेतद्वाक्यानन्तरं कस्मादुक्तमीदृशी या जिज्ञासा सा अनन्तराभिधानप्रयोजकाकाङ्क्षा । तज्जनकं तत्स्वरूपयोगि यज्ज्ञानं तत्र विषयत्वेन योऽर्थः प्रकाशते सोऽर्थः संगतिशब्दवाच्यः । तद्भेदाश्च षट् ।

'सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा ।
निर्वाहकैककार्यत्वे षोढा संगतिरिष्यते' ॥

रश्मिः ।

संदेहस्येत्यर्थः । तेषामित्यादि आकाशादिपदानां नैसर्गिकशक्तेर्ब्रह्मणि बोधनेनेत्यर्थः । स्वावयवेष्विति अधिकरणेष्वित्यर्थः । अन्यान्या इति तत्तदधिकरणे वक्तव्याः । आनन्तर्यपदघटितत्वं दीधितिकृतोपगतं संगतिलक्षणस्य तथापि गदाधर्या चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञमभिधायोत्तरार्थत्वमात्रं व्याख्यातमिति तदाहुः अनन्तरेत्यादि । विशिष्यावयवानर्थमाहुः इदमित्यादि । यथा प्रत्यक्षनिरूपकवाक्यनिरूपणानन्तरमनुमाननिरूपकवाक्योक्तिस्तत्रानुमाननिरूपकमिदं वाक्यं प्रत्यक्षनिरूपकवाक्यानन्तरं कस्मादुक्तमीदृश्या अनन्तराभिधानहेतुविषयकं यज्ज्ञानं तद्विषयिणी या इच्छा तद्रूपाया जिज्ञासायाः स्वरूपं ज्ञानेच्छारूपं तत्रोपयोगिज्ञानपूर्वकत्वेन कार्यत्वमनुमानमिति तन्निरूपकवाक्ययुक्तमित्येवमुपयोगि यज्ज्ञानं कार्यत्वत्वेनोपस्थितं कार्यत्वं तद्विषयज्ञानं तत्र विषयत्वेन ज्ञाननिरूपितविषयतावच्छेदकविशेषात्मकेन कार्यत्वत्वेन प्रकाशमानस्य धर्मस्योपजीव्योपजीवकत्वस्य संगतित्वमिति । एवं कारणत्वस्यापि न तु कारणत्वस्यैव । अत्र प्रत्यक्षोपजीवकज्ञानमुपजीवकत्वत्वेनोपस्थितोपजीवकत्वसामान्यप्रकारेण ततः कार्यविशेषान्वेषणनिवृत्तिस्त्वनन्तरमनुमानपददर्शनात् । एवं हि स्वरूपोपयोगः स्यात् । अनुमाननिरूपकमिदं वाक्यं प्रत्यक्षनिरूपकवाक्यानन्तरं कस्मादुक्तमिति पूर्वोक्तजिज्ञासायां ततश्चानुमानं प्रत्यक्षस्य कार्यत्वात्तदनन्तरमुक्तम् । इति विशेषावधृतिरिति । इयं च जिज्ञासा व्याख्यातुरेव न तु निरूपयितुः । निरूपयितुरपि वा ग्रन्थकरणानन्तरं मया कस्मादुक्तमिति जिज्ञासासंभवात् न च निरूपितप्रत्यक्षानुमानयोः संभवतीयम् । उक्तमिति क्तान्तपदघटितत्वादिह त्वनुमानस्य निरूपयिष्यमाणत्वादिति वाच्यम् । तत्कालीनप्रत्यक्षानुमानयोर्निरूपयितुरपि वा ग्रन्थकरणानन्तरं मया कस्मादुक्तमिदं स्यादिति जिज्ञासासंभवात् । वस्तुतस्तु 'धातुसंबन्धे प्रत्ययाः' इति सूत्रेण भविष्यत्काले लुङ् स्यादित्यध्याहारः । मनोरमायां विशेषानुल्लेखात् तथाप्युदाहरणानुरोधेन श्रूयमाणतिङन्तस्थले एव सूत्रप्रवृत्तिस्तदा तु उक्तमित्यत्र वचनीयं स्यादिति वक्तव्यम् ।

---

१. ज्ञानेच्छा जिज्ञासा, ज्ञानं यद्यपि हेतुरूपविषयेण पूरितं तथापि विशेषहेतुना न पूरितमिति इच्छाविषयज्ञानविषयत्वेनेत्यर्थः । २. हेतुविशेषावधृतं विषयविधया हेतुः ।

रश्मिः ।

बुद्धिस्थं यद्विचारितं तत्पर्यायोक्तमिति । वस्तुतस्तु अस्य वाक्यस्यैतद्वाक्यानन्तरं निरूपणे को हेतुः स्यादित्येव जिज्ञासा । एवं चानुमानस्येत्यस्य स्पष्टप्रतिपत्तिप्रयोजनकतया तत्रोपयोगिज्ञानागोचरत्वम् । तथा ज्ञानविषयेत्यत्र हेतुभिन्नेति वक्तव्यत्वेन नेत्यर्थस्य हेतोर्गोचरत्वमिति कार्यत्वस्य संगतित्वमित्यपि न । कार्यत्वमनुमानस्येत्यत्र कार्यत्वमित्येतावतैव जिज्ञासापूर्तेरिति ध्येयम् । सामान्यहेतोर्विशेषकार्यत्वरूपहेतुत्वादित्यपि ध्येयम् । तथा तज्जनकमित्यस्य कार्यज्ञानमिष्टसाधनमिति ज्ञानमिति विवरणं गदाधरभट्टकृतम् । कारणस्य कार्यमावश्यकमिति कार्यत्वरूपेण कार्यसामान्यज्ञानमिति विवरणं भवानन्दरामनाथकृतम् । तत्र गदाधरकृतव्याख्यानेभिधातुः पूर्वोक्तं ज्ञानं संभावितं न तु निश्चितं दीधितिकृतानुल्लेखात् । अस्मदुक्तज्ञानजिज्ञासयोरपि संभवाच्च विषयताविशेषस्य विवक्षा चेति दूषणद्वयम् । इतरयोस्तु शिष्यस्य प्रतिभाविरहेण तद्विरहेण च शिष्यज्ञानयोर्वक्तुमशक्यतया ज्ञाने व्याख्यातुरभिधातुर्वा ग्राह्यते संभाविते न अपि तु निश्चिते दीधितिकृतोल्लेखात् । अतस्तज्जनकं तत्रोपयोगीति व्याख्यातम् । तथा तत्रोपयोगिज्ञाननिरूपितविषयतावच्छेदकं कार्यत्वत्वोपस्थितकार्यत्वावच्छिन्नकार्यानुमाननिरूपकवाक्यवद्यपि वक्तुं शक्यते तथापि कार्यत्वं कण्ठरवेणोक्तं झटिति बुद्धावारोहति । एवं च उपयोगिज्ञाननिरूपितविषयतावच्छेदकं कार्यत्वत्वमिति ज्ञेयम् । गदाधरभट्टास्तु प्रत्यक्षानन्तरमस्य किमुपजीवकमित्यादिजिज्ञासां प्रति उपजीवकत्वादिज्ञानं हेतुरित्यनुमानस्य प्रत्यक्षानन्तरमभिधाने प्रयोजिका किमस्योपजीवकमिति जिज्ञासा तज्जनकं कार्यज्ञानमिष्टसाधनमिति उपजीवकत्वविषयकज्ञानं तद्विषयत्वमुपजीवकत्व इति लक्षणसंगतिः । एवमुपजीव्येपि बोध्यम् । तथा च कारणत्वस्य कार्यत्वस्य च संगतित्वं न तु कार्यत्वस्यैव जनकज्ञानविषयेत्यनेन जनकीभूतेष्टसाधनताज्ञानीयज्ञाननिष्ठविशेष्यतायां विषयतासंबन्धेन यदवच्छेदकत्वं तन्निरूपितावच्छेदकतात्मकविषयताविशेषस्य विवक्षितत्वात् । न ज्ञाननिष्ठेष्टसाधनत्वेतिव्याप्तिर्भवति च्चोपजीवकज्ञानमिष्टसाधनमित्यत्रेष्टसाधनताज्ञानैकदेशज्ञाने या विशेष्यता उपजीवकत्वप्रकारकज्ञाननिष्ठेष्टसाधनताविषयकं ज्ञानमिति बोधात् । तादृश्यां विशेष्यतायां विषयितासंबन्धेन यदवच्छेदकत्वं इष्टसाधनतावच्छेदकत्वं इष्टसाधनतानिष्ठविषयता निरूपिता तद्द्वारा विषयितासंबन्धेन विशेष्यतायाः इष्टसाधने सत्त्वात् तादृशेष्टसाधनतानिरूपितमवच्छेदकत्वमुपजीवकत्वे इष्टसाधनताधिकरणे ज्ञाने विषयतासंबन्धेनोपजीवकत्वस्य सत्त्वात्तदात्मकस्य विषयताविशेषस्योपजीवकत्व एव सत्त्वादतिव्याप्तिवारणम् । भवानन्दभट्टास्तु प्रत्यक्षस्य कारणत्वज्ञाने कारणस्य कार्यमावश्यकमिति क्रमेण कार्यस्वरूपेण कार्यसामान्यज्ञानं ततः सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वात् किमस्य कार्यमित्याकारिका शिष्यजिज्ञासा, ततः शिष्यस्य किमस्य कार्यमिति शब्दप्रयोगः, ततः शिष्यजिज्ञासाज्ञानं गुरोः, तत इष्टसाधनताज्ञानेनानन्तराभिधानमिति क्रमेण जिज्ञासायामनन्तराभिधानप्रयोजकत्वमिति वदन्ति । रामनाथस्तु आनन्तर्याभिधानप्रयोजकशिष्यज्ञानगोचरतदिच्छाजनकीभूतशिष्यज्ञानविषयत्वमेव संगतिरित्याह । प्रत्यक्षनिरूपणानन्तरं कारणस्य कार्यमावश्यकमिति शिष्यस्य कार्यत्वसामान्यज्ञानं ततश्च किमस्य कार्यमिति शिष्यजिज्ञासायां गुरुणानुमानाभिधानं क्रियते इति शिष्यज्ञानजिज्ञासे अनुमानाभिधानावसरे शिष्यजिज्ञा-

---

१. कान्तपदाव्याह ।

रूपेणाकाशवायुतेजोवाचकवाक्यानि षड्विधान्यपि निर्णीयन्ते । अन्यत्रान्यवाचकान्यपि वेदान्तेषु भगवद्वाचकानीति ।

रश्मिः ।

सायाः प्रतिभाविरहेण तद्विरहेण च वक्तुमशक्यतया जिज्ञासा चानन्तराभिधातुरेवेति गदाधराः । घटत्वादिप्रत्यक्षेण को घट इति जिज्ञासोदयात् घटत्वादौ प्रत्यक्षसंगतित्ववारणाय प्रयोजकान्तम् । नन्वेवमपि न निस्तारः । प्रत्यक्षादौ निरूपिते स्वसामग्रीवशात् को घट इति कस्यचिज्जिज्ञासया केनचिद् घटो निरूपितः तादृशनिरूपणप्रयोजकतथाविधजिज्ञासामादाय, घटत्वादावपि प्रत्यक्षादिसंगतित्वप्रसक्तेः प्रयोजकान्तमुपादायाप्यशक्यवारणत्वात् । अथ तत्र घटत्वादेः संगतित्वमिष्टमेव प्रसङ्गमध्ये तस्यान्तर्भावनीयत्वाच्च । अन्यथा तादृशनिरूपणं संगत्यभावेनाबद्धप्रलापः स्यात् । आकाङ्क्षिताभिधाने तु स न स्यादिति । एवं च घटत्वादीनां लक्ष्यत्वेन प्रयोजकान्तमनर्थकमित्युच्यते तदा तु यन्निरूपणानन्तरं कदाचिदपि कस्यचिद्धर्मस्यावान्तरधर्मप्रकारकज्ञानेच्छा न जायते अपि तु कालान्तरे जायते, तदा तस्य तत्संगतित्ववारणाय प्रयोजकान्तोपादानात् । न च तादृशधर्म एव दुर्लभः । तादृशधर्मसंभावनयातिव्याप्तिसंदेहेनातिव्याप्तिवारकविशेषणदानौचित्यात् । यद्वा यन्निरूपणानन्तरं यद्धर्मावच्छिन्नस्य यस्य पुंसो विशेषजिज्ञासा न जाता अपि त्वन्याभिधानानन्तरमेव, तद्धर्मस्य तं प्रति तत्संगतित्ववारणाय प्रयोजकान्तमुपादेयम् । अस्तु तदर्थानन्तराभिधानप्रयोजकज्ञानविषयत्वं सा प्रयोजकजिज्ञासाजनकेत्यधिकं मैवं पटादिकं निरूप्य प्रतिपाद्यस्य जिज्ञासामन्तरेणैव यत्रासंबद्धघटाद्यभिधानं कृतं केनचित् तत्रास्य घटज्ञानं भवत्वित्याकारकेच्छाजनकीभूतं वक्तृघटादिज्ञानं तद्विषयघटत्वादावतिप्रसङ्गः । घटविषयकज्ञानस्यापि घटादिबुबोधयिषाद्वारा पटाद्यभिधानानन्तरं घटाद्यभिधानप्रयोजकत्वादतो जनकान्तरमप्युपादेयम् ।

न चैवमपि पटघटादिनिरूपणोत्तरं घटसंबन्धेन दण्डादिस्मरणे को दण्ड इत्यादिजिज्ञासया दण्डादिनिरूपणं तत्र तादृशजिज्ञासाजनकज्ञानविषयस्य पटनिरूपितसंगतित्वापत्तिरिति वाच्यम् । यदभिधानानन्तराभिधानप्रयोजकजिज्ञासायां तदभिधानप्रयोज्यत्वस्य निवेशनीयत्वादिति पदकृत्यं गदाधर्याम् । निवेशप्रकारस्तु यदभिधानानन्तराभिधानप्रयोजनकतदभिधानाप्रयोज्यजिज्ञासाजनकज्ञानविषयोर्थः संगतिरिति बोध्यः । पटाभिधानानन्तरं दण्डादिनिरूपणाभावान्न पटनिरूपितसंगतित्वं दण्डादिनिरूपणे अस्य लाघवाय जिज्ञासा निरूपिता ज्ञानमिष्टविषयतावच्छेदकत्वविशेषः संगतिर्लाघवात् । भवति च जिज्ञासा तत्स्वरूपैकदेशभूतेच्छा तन्निरूपिता या तद्द्वितीयदलज्ञाननिष्ठायोग्यता तदवच्छेदकमनुमानं विषयविधया तत्ता चानुमाने तदवच्छेदकमनुमानत्वमपि परंत्ववच्छेदकत्वविशेषः कार्यत्वमिति लक्षणसमन्वयः । जिज्ञासा चात्र किमनुमानं कार्यभूतमित्येव विचारः । तादृशजिज्ञासयैवानुमाननिरूपणादिति स्थितं गदाधर्याम् । गदाधरव्याख्यानमनुवदन्ति तत्रेत्यादि । स्मृतस्य पूर्वाभिहितवस्तुसंबन्धेन स्मृतस्योपेक्षानर्हत्वम् । विरोधो नञर्थः । द्वेष्यज्ञानविषयता चोपेक्षार्हत्वम् । एवं च द्वेष्यज्ञानविषयताविरोधि यद्रूपं तत्, जिज्ञासाविषयतावच्छेदकरूपमिति यावत् । स्मृतस्येत्यभिधानं जिज्ञासाया आनन्तर्याभिधानप्रयोजकत्वलाभाय । उपोद्घातादिपञ्चकभिन्नत्वे सतीति पूरणीयम् । तथाचोपोद्घातादिपञ्चकभिन्नसंगतिः प्रसङ्ग इति पर्यवसितार्थः । तेनाधेयत्वाधिकरणत्वघटत्वादीनामत्रैवान्तर्भावः । उपेक्षान-

---

१. चक्षुःसन्निकर्षादिसामग्रीवशात् । २. जिज्ञासाया अजनकीभूतो यच्छब्दार्थः तत्संगतिरित्यर्थः । ३. वक्ष्यमाणा ।

भाष्यप्रकाशः ।

इत्यभियुक्तोक्तेः । तत्र स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः । प्रकृतार्थसाधकत्वमुपोद्घातः । उपजीव्योपजीवकभावो हेतुता । सा सापेक्षत्वादुभयसंग्राहिका । प्रतिबन्धकीभूतजिज्ञासानिवृत्तावश्यवक्तव्यत्वमवसरः । निर्वाहप्रयोजकता निर्वाहकत्वम् । एकजातीयकार्यजनकत्वमेक-

रश्मिः ।

र्हत्वं च विभाजकमात्रमतस्तादृशधर्माणां मुमुक्षानर्हत्वादिरूपाणां निरूपणप्रयोजकजिज्ञासाविषयतावच्छेदकत्वविरहेपि न क्षतिः । उदाहरणं त्वाधारनिरूपणेन स्मृतस्याधेयस्योपेक्षानर्हत्वज्ञानेन किमाधेयमिति जिज्ञासयाधेयनिरूपणमिति । प्रकृतार्थेत्यादि । तदुक्तं 'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः' इति । प्रकृतसिद्ध्यर्थां प्रकृतोपपादकत्वविषयिणीं किमस्योपपादकमिति चिन्तामुपोद्घातसंगतित्वनिर्वाहिकां विदुरित्यर्थः । तादृशजिज्ञासामादायैवोपोद्घातत्वे लक्षणसमन्वयात् । अर्थसाधकत्वं च उपपादकत्वं तच्च निर्वाहकत्वं तच्च क्वचित् तद्घटकतया क्वचित्तदघटकतयेति । तत्राद्यं विशिष्टपरामर्शत्वस्यानुमितिजनकतावच्छेदकत्वं परामृश्यमानलिङ्गलिङ्गपरामर्शान्यतरव्यापारकज्ञानकरणकं ज्ञानमनुमितिरित्यनुमितिलक्षणघटकतयानुमितिलक्षणोपपादकम् । परामर्शज्ञानेन विना परामर्शघटितलक्षणानिर्वाहादिति परामर्शव्यवस्थापने उपोद्घातः संगतिः । द्वितीयं तु सामान्यप्रत्यासत्तेरनुमितिपूर्वं नियमतो विशिष्टपरामर्शनिर्वाहकतया विशिष्टपरामर्शत्वावच्छिन्ना यानुमितिकारणता तन्निर्वाहकत्वादेव परामर्शघटितानुमितिलक्षणोपपादकत्वं न त्वनुमितिलक्षणघटकतयेति द्विविधमुपपादकत्वम् । उपजीव्येत्यादि इयं विवेचिता । ननु कार्यत्वं षोढात्वं व्याहन्निष्यतीत्याकाङ्क्षायां हेतुतापदमजहत्स्वार्थवृत्त्या कार्यत्वकारणत्वोभयसाधारणेन केनचिद्रूपेण तदुभयपरमिति नाधिक्यमित्यनुवदन्ति सा सापेक्षेत्यादि । प्रतिबन्धकीत्यादि । अत्र किमिदानीं वक्तव्यमिति जिज्ञासाजनकज्ञानविषयत्वमादाय लक्षणसमन्वयः । यद्यपि तादृशजिज्ञासाविषयतायां जिज्ञासानिवृत्तिघटितं नावच्छेदकमिति तेन रूपेण संगतित्वं नास्ति अपि तु निवृत्त्युपलक्षिततत्कालवक्तव्यत्वरूपेणैव तथापि न क्षतिः । यादृशस्य संगतित्वं तादृशस्यैव विभाजकत्वमित्यनियमात् । जिज्ञासानिवृत्तेर्विभाजकधर्माघटकत्वे बाधकाभावादिति । इयं च प्रत्यक्षोत्तरोपमाने संगतिः । अत्र प्रतिबन्धकीभूतानुमान जिज्ञासा किमनुमानमिति तस्या अनुमाने उपमानापेक्षया प्राथमिकजिज्ञासाविषयत्वप्रयोजकबहुवादिसंमतत्वकथनेन नानुमाननिरूपणाद्विषयसिद्धानिवृत्तौ सत्यामुपमानमवश्यं वक्तव्यमिति जिज्ञासया किमिदानीं वक्तव्यमिति जिज्ञासया चोपमाननिरूपणात् । निर्वाहेत्यादि । उदाहरणं तु व्याप्तिपक्षधर्मतयोर्ज्ञानस्यानुमितिजनकत्वेन तादृशव्याप्तिनिरूपणानन्तरं किमनुमितिनिर्वाहप्रयोजकमिति जिज्ञासया पक्षधर्मतानिरूपणमिति । पक्षधर्मताज्ञानं कारणमिति पक्षधर्मता निर्वाहप्रयोजिका । एकजातीयेत्यादि । उदाहरणं तु अनुमानस्येश्वरसिद्ध्यपवर्गयोः संगतिरत्रैकजातीयं येन केनापि धर्मेणेश्वरसिद्ध्यपवर्गाख्यं कार्यं तज्जनकत्वमनुमान इति । सामान्यत एकजातीयानेककार्यजनकत्वज्ञाने ईश्वरसिद्ध्यनन्तरं किमन्यकार्यजनकत्वमिति जिज्ञासयापवर्गरूपकार्यनिरूपणात् सामान्यलक्षणसमन्वयः । भवानन्दभट्टस्तु नैयायिकेनेश्वरसिद्ध्यनन्तरं शक्तिं निरस्य परमप्रयोजनं त्वनुमानस्यापवर्ग इत्यनेनेश्वरसिद्ध्यपवर्गयोरनुमानजन्यत्वलक्षणैककार्यत्वसंगतिः सूचिता । एकस्य कारणकार्यतायाः तदर्थ-

---

१. विशिष्टे बाधितो विधिर्विशेषणमुपसंक्रामति शिखी न इतिवत् । एवं चोपमाननिष्ठवक्तव्यत्वे संगतित्वम् ।

भाष्यप्रकाशः ।

कार्यत्वम् । इदं च संगत्यभिधानमात्रोपयोगित्वात् स्वरूपकथनमात्रम् । लक्षणं तु प्रसङ्गाद्यन्यतमत्वमेव । तेन पूर्वस्येष्टसाधनत्वाधाराधेयभावादावव्याप्तावपि न दोष इति नैयायिका

रश्मिः ।

स्त्वादित्युक्तम् । इदानीं भवानन्दोक्तमनुवदन्ति इदं चेत्यादि । विभाजकं चेत्यर्थः । सामान्यलक्षणं चेति वार्थः । लक्षणफलमनुवदन्ति तेन पूर्वस्येत्यादि । इष्टसाधनत्वेति इदं त्विह वक्तव्यं इष्टसाधनत्वस्य कार्यकारणभावात्मकत्वं कैश्चित्स्वीकृतं तन्मतं भवानन्दादावनूदितं तत्राव्याप्तिः । नैयायिकैस्तत्र संगतित्वानङ्गीकारात् । नैयायिका इति अस्य 'क्रतूक्थादिसूत्रान्ताद् ठक्' इति ठकि नैयायिका इत्येव । अतः परं पूर्वोक्तं संगतिसामान्यलक्षणमुपजीवकत्वे न संभवति किं प्रत्यक्षोपजीवकमिति जिज्ञासयानुमाननिरूपणाभावात् । अपि तु किमनुमानमिति जिज्ञासयैव निरूपणं तस्य । इयं च जिज्ञासानिरूपयितुः अनुमाननिरूपणात्पूर्वं संभवात् । या तु प्रत्यक्षग्रन्थानन्तरं मया कस्मादुक्तमिदमिति पूर्वोक्ता जिज्ञासा सानुमाननिरूपणानन्तरं निरूपयितुर्विचारसामयिकी । नचात्र किं मानमिति वाच्यम् । अनुमानस्वरूपलक्ष्यतावच्छेदकविशिष्टे लक्षणप्रतिपादकस्य तत्करणमनुमानमित्युत्तरस्य संगतेरेव मानत्वात् । अन्यथा पूर्वोक्तजिज्ञासास्वीकारे तु यद्धर्मप्रकारकयद्विषयिणी जिज्ञासा तद्धर्मावच्छिन्नतदुद्देश्यकं लक्षणादिनिरूपणमिति नियमस्य को घटः कम्बुग्रीवादिमान् घटः इत्यादिषु दर्शनात् उपजीवकमनुमानमित्युत्तरस्य प्रसङ्गात् । ननु पूर्वोक्तां जिज्ञासां स्वीकृत्योपजीवकपदमध्याहृत्योत्तरस्योपजीवकमनुमानं तच्च तत्करणमित्यर्थात् संगतिरिति चेन्न । किं प्रत्यक्षोपजीवकमिति जिज्ञासायाः प्रत्यक्षोपजीवकत्वविशिष्टेऽनुमितिकरणत्वरूपविशेषधर्मबोधकोत्तत्करणमित्यादिवाक्यादेव निवृत्तेः । तथा चानन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपसंगतित्वं प्रकृते नोपजीवकत्वे संभवति । किंतु निरूप्यतावच्छेदकेऽनुमानत्वे इत्यनन्तराभिज्ञानप्रयोजकजिज्ञासाजनकनिरूप्यतावच्छेदकधर्मप्रकारकस्मरणप्रयोजकनिरूप्यनिष्ठसंबन्धः संगतिरित्येव लक्षणं युक्तम् । प्रत्यक्षानुमानपदार्थयोरुपजीव्योपजीवकभावसंबन्धज्ञानादनुमानपदार्थस्वरूपप्रकृतलक्षणलक्ष्यतावच्छेदकप्रकारेणानुमानस्मरणादनुमानपदार्थः क इति विशेषजिज्ञासयानुमितिकरणमनुमानपदार्थ इति निरूपणादुपजीवकत्वे संगतित्वनिर्वाहात् । एवं च पूर्वापरनिरूपणविषययोः संबन्ध एव संगतिः । न तु निरूप्यतावच्छेदक इति । इदं यद्यपि साधीयः संगतमित्यत्र संबद्धमिति व्यवहारात् तथाप्यवश्यवक्तव्यत्वस्य संबन्धत्वविरहावसरे व्याप्यतावच्छले हेतुतासंबन्धाश्रयणात् । किंच यत्र गां पश्यन् सास्नादिमतीयं गौरिति प्रयुङ्क्ते तत्र संगतेप्यानन्तर्याभिधानाभावादव्याप्तिः । किंच शरीरगौरवं लक्ष्यतावच्छेदकगौरवं च । अपि च जिज्ञासाधिकरणसंगतौ लक्षणस्याप्रवेशः । आनन्तर्याभिधानघटितत्वात् । अधिकरणस्य प्राथम्येनानन्तराभिहितत्वात् । अन्यच्च प्रतिपत्तिगौरवं चेति मत्वा

---

१. विशेषणज्ञानस्य कारणत्वादिति भावः । २. यद्यपि तु संगतेरपि स्वस्याजन्मादिसूत्रस्याजातत्वेनानन्तर्याभिधानप्रयोजकजिज्ञासाजनकत्वाप्रवेशनादुरपि चेति ।

भाष्यप्रकाशः ।

आहुः । वयं तु, सावधानपुरुषप्रयुज्यमानवाक्यप्रयोजकत्वेन स्मृतस्योपेक्षानर्हत्वमेव संगतिः ।

रश्मिः ।

संगतमित्यत्रोपेक्षानर्हमिति व्यवहारारम्भं वा लक्षणान्तरमाहुः वयं त्वित्यादि । इति रोचयामह इति संबन्धः । प्रयुज्यत इति प्रयुज्यमानमुच्चार्यमाणमित्यर्थः । एतादृशवाक्यस्य प्रयोजकं परंपरया कारणं यद्धेतुतादिस्तदवच्छेदकत्वेनानुमानवाक्यत्वादिना स्मृतिविषयोनुमानवाक्यादिः । अवच्छेदकत्वं तृतीयार्थः । उपेक्षानर्हता च क्वचिद्धेतुतया क्वचिदुपोद्घातेनेत्येवं ज्ञेया । तथा च सावधानाभिन्नपुरुषकर्तृकप्रयोगकर्मीभूतवाक्यनिरूपितप्रयोजकतावच्छेदकरूपेण कर्तृनिष्ठस्मृतिनिष्ठविषयितानिरूपितविषयताशालिवाक्यपदान्यतरनिष्ठोपेक्षानर्हत्वं संगतिः । अत्रेदं हृदयम् । सावधानपुरुषप्रयुज्यमानं वाक्यमथातो ब्रह्मजिज्ञासेति तत्प्रयोजकं प्रकृतोपपादकत्वमस्य जातित्वविरहाद्धर्मत्वेन प्रकृतोपपादकरूपत्वात्तत्तावच्छेदकेन ब्रह्मभक्त्यादिविचारप्रतिज्ञावाक्यत्वेन स्मृतस्य ब्रह्मभक्त्यादिविचारप्रतिज्ञावाक्यस्योपेक्षानर्हत्वं संगतिः ।[1] बुद्धिस्थमेव सर्वोपि प्रयुङ्क्त इति दृष्टानुयायिनः । तादृशावच्छेदकस्य संगतित्वविरहात् तत्रातिव्याप्तिवारणाय विशेष्यम् । अनुभवविषयीभूतघटादिसंबन्धेन स्मृतस्य दण्डादेरुपेक्षानर्हत्वं द्वेष्यज्ञानविषयताविरोधिरूपात्मकमिति तत्रातिव्याप्तिः तद्वारणाय विशेषणद्वलम् । दण्डः संगत इत्यव्यवहाराद्वाक्यधर्म एव संगतिः । प्रयुक्तवाक्यनाशोत्तरं कालान्तरे तदुपपादकत्वेन स्मृतस्योपेक्षानर्हत्वं संगतिः स्यात् तत्रातिव्याप्तिवारणाय प्रयुज्यमाने इति । यदि च तादृशस्थले संगतित्वव्यवहारः प्रामाणिक एव तदा तु स्पष्टप्रतिपत्तिः प्रयोजनं वाक्येत्यादितृतीयानां तूपेक्षानर्हताप्रयोजकस्फूर्त्यै । प्रकृतोपपादकत्वावच्छेदकब्रह्मभक्त्यादिविचारप्रतिज्ञावाक्यत्वादिना वाक्यादिस्फुरणे सत्युपेक्षानर्हता वाक्यादेर्यतः । पुरुष इति तु वक्तव्यमेव योग्यत्वात् । तत्त्वं च जीवेशत्वं तच्च स्त्रीपुरुषसाधारणं तेन स्त्रीप्रयुज्यमानवाक्यप्रयोजकत्वेन स्मृतस्योपेक्षानर्हत्वे नाव्याप्तिः । केनचित्प्रतिष्ठायै पुरुषेण प्रयुज्यमानं वाक्यमानन्तर्यावच्छेदकावच्छेदेन प्रतिपत्स्यमानावच्छेदकमित्याद्यनर्थकं तादृशवाक्यप्रयोजकत्वेनासंबद्धोच्चारणे पदप्रतारणाय यदुपेक्षानर्हत्वं तत्रातिव्याप्तिवारणाय सावधानेति । स चानवधानपुरुष इति नासंबद्धेऽतिव्याप्तिः । किं च सावधानेत्यनुक्तौ भ्रान्तपुरुषोपि संगृह्येतेति सावधानेत्यवश्यं वक्तव्यमेव । तर्हि स्मृतस्येत्यवक्तव्यं, वक्तव्यं तत् । सावधानपुरुषप्रयुज्यमानवाक्यप्रयोजकत्वेनाधारत्वेनोपेक्षानर्हत्वस्य कालेपि सत्त्वात् । स्मृतस्येत्युक्ते तु स्मरणविषयत्वविरहात् काले नातिव्याप्तिः तादृशप्रयोजकत्वेन स्मृतत्वमेव संगतिरिति तु न । स्मरणविषयतायां संगतित्वव्यवहाराभावादतिव्याप्तिप्रसङ्गात् । अथवात्र भगवान् व्यासः सर्वमपि ब्रह्मभक्तिविचारं स्मृत्वेदं सूत्रं प्रणिनिनायेति । सावधानपुरुषप्रयुज्यमानवाक्यं 'जन्माद्यस्य यतः' इत्यारभ्य'अनावृत्तिः शब्दात्'इत्यन्तं तत्प्रयोजकत्वेन तदुपपादकत्वेन स्मृतस्य ब्रह्मभक्तिविचारवाक्यस्योपेक्षानर्हत्वं संगतिः । पूर्वत्र तु स्मर्यमाणप्रयुज्यमानयोः वाक्ययोः संगतिरत्र तु प्रयुज्यमानयोरेव । एवं स्मर्यमाणयोरपि ज्ञेया । झटिति बुद्ध्यारोहणेन प्रतिपत्तिगौरवमपि नास्ति ।

---

[1] जन्मादिसूत्रस्याप्यातत्वेपि बुद्धिस्थत्वात्तदादावानन्तर्याभिधानप्रयोजकजिज्ञासादिसंभवस्तु 'सिद्धान्तकौमुदीयं विरच्यते' इत्यादौ दृष्टत्वात्तदनुयायिनः ।

भाष्यप्रकाशः ।

हेतुतावद्यः सर्वे उपेक्षानर्हत्वस्यैव प्रयोजका धर्मास्ते तद्बोधकतया संगतित्वेनोच्यन्ते ।

रश्मिः ।

शक्यतावच्छेदकलाघवं स्फुटम् । शरीरलाघवं च । स्मृतस्योपेक्षानर्हत्वं संगतिरित्यन्यस्य परिष्कारत्वात् । ईश्वरलिङ्गापितं पञ्चम्यन्तम् । यत्र गां पश्यन्नित्याद्युक्तस्थलेपि सावधानपुरुषप्रयुज्यमानं साक्षादिमती गौरियमिति वाक्यं तत्प्रयोजकत्वेन हेतुत्वेन स्मृतस्य वाक्यस्योपेक्षानर्हत्वं संगतिरिति नाव्याप्तिः । अत्र गां पश्यन्नित्यनुभवस्थले गां पश्यामीत्येवं वाक्यं स्मृत्वा स्मर्यमाणोच्चार्यमाणयोर्वाक्ययोः संगतिर्ज्ञेया । अत्र यद्यप्युच्चार्यमाणवाक्यं संगतमिति प्रतीतेः संगतिरत्रापेक्ष्यते तथापि स्मर्यमाणत्वोच्चार्यमाणत्वमात्राहितभेदावच्छिन्नत्वान्न दोषः । अथवा भारतकरणोत्तरं ब्रह्मसूत्रप्रणयनेन सावधानपुरुषप्रयुज्यमानं वाक्यं भारतरूपं वर्तमानत्वाविवक्षणात् । तत्प्रयोजकत्वेन भारतार्थवेदार्थनिर्वाहकत्वेन स्मृतस्य ब्रह्मभक्तिविचारस्योपेक्षानर्हत्वं संगतिः । एवमन्येन सावधानपुरुषेण प्रयुक्तं यद्वाक्यं घटोयमिति तदुपपादकत्वेनेतरेण स्मृतस्य प्रयुक्तस्य च नीलोयं घटोतः प्रत्यक्ष इति वाक्यस्योपेक्षानर्हत्वं संगतिः । प्रथमवाक्ये तु तद्घटकपदानां वाक्यत्वमाश्रित्य पदधर्मः संगतिर्वाक्ये चकास्तीति । यद्यपि गदाधरभट्टैः यद्यप्युपोद्घातादिपञ्चकभेदमनिवेश्य सर्वा संगतिः प्रसङ्ग एवान्तर्भावयितुं शक्यते तथापि विभाजकस्य स्वतन्त्रेच्छाकृततया न पर्यनुयोगावसर इति सामान्यलक्षणं प्रसङ्गलक्षणमित्युक्तं तथापि तद्विशेषणरहितमिति ततोपि वैलक्षण्यं ज्ञेयम् । न च जिज्ञासानिरूपिताज्ञाननिष्ठविषयतावच्छेदकतावच्छेदकत्वविशेषः संगतिरस्तु किमनेनेति वाच्यम् । निरूप्यतावच्छेदकस्य संगतित्वविरहात् । अवच्छेदकत्वविशेषपदेन यत्रावच्छेदकत्वे संगतित्वव्यवहारस्तन्मात्रविवक्षणेपि जिज्ञासाविरहेण गोदर्शनानन्तरं साक्षादिमती गौरिति संगतवाक्येऽव्याप्तिः । नापि प्रसङ्गाद्यन्यतमत्वं, निरुक्तलक्षणमनुसरतामुपेक्षानर्हतापदेनोपेक्षानर्हतावच्छेदकोपस्थितेरावश्यकत्वात् । अन्यथा निरुक्तसामान्यलक्षणेनैकवाक्यतानापत्त्यास्याव्याप्तिरापद्येत । तथा सति निरूप्यतावच्छेदकस्य संगतित्वविरहेणासंभव एव दूषणम् । अवच्छेदकत्वविशेषग्रहणेपि पूर्वोक्तस्थलेऽव्याप्तिः । आनन्तर्यघटितनिरुक्तसामान्यलक्षणमनुसरतां तु प्रसङ्गादिलक्षणान्यानन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वघटितान्यावश्यकानि । अन्यथा यत्रानन्तर्याभिधानं जातं न भवति तत्रत्यस्यापि स्मृतनिष्ठोपेक्षानर्हत्वादेः प्रसङ्गादिसंगतित्वापत्तेः । संगतिसामान्यलक्षणानाक्रान्ततया संगतत्वेन प्रतीतेष्वपि संगतत्वशून्यत्वाभ्युपगमात् । नन्वेवमपि सर्वत्र हेतुतादिषु संगतित्वव्यवहाराय विशेषलक्षणान्यपि वक्तव्यानीत्याशङ्कायां तत्र लाक्षणिको व्यवहार इति तानि न वक्तव्यानीत्याहुः हेतुतावद्य इति । एतेन तत्र तत्र तद्व्यवहारे नियामकमप्युक्तम् । एवं हि प्रयोजकास्तथाहि सावधानपुरुषप्रयुज्यमानवाक्यमाधारनिरूपकं तत्प्रयोजकत्वेनाधेयत्वेन स्मृतस्याधेयनिरूपकवाक्यस्योपेक्षानर्हत्वं भवतीति आधेयत्वस्य प्रसङ्गान्तर्गतस्योपेक्षानर्हत्वप्रयोजकत्वम् । तथा सावधानपुरुषप्रयुज्यमानवाक्यमनुमितिनिरूपकं तत्प्रयोजकत्वेनानुमितिलक्षणोपपादकत्वेन स्मृतस्य परामर्शस्योपेक्षानर्हत्वं भवतीति उपोद्घातस्य प्रयोजकता । एवं सावधानपुरुषप्रयुज्यमानवाक्यं प्रत्यक्ष-

---

१. विशेषणनिष्ठो धर्मः। २. भूतले घटवद्भूतलमित्यत्र।

तत्र लक्षणविचार एव सद्रूपाणां वाचकता निर्णीता। चिद्रूपस्य ज्ञानप्रधानस्य निर्णयार्थमीक्षत्यधिकरणमारभ्यते सप्तभिः सूत्रैः। सप्तद्वारत्वाज्ज्ञानस्य।

भाष्यप्रकाशः।

तत्रेयत्तानियामकस्यादर्शनेऽनुक्तत्वादन्येषामपि संग्रहो न दुष्ट इति रोचयामहे। तत्र जन्माद्यधिकरणे जगदुत्पत्त्यादिरूपसदात्मककार्यनिरूपणेन सामान्यतः कारणतया विशेषतः कर्तृतया च स्वरूपं निरूपितम्। समन्वयाधिकरणे च सर्वत्र ब्रह्मणः समनुगतत्वादुपादानतया विशेषतस्तन्निरूपितम्। तत्र यत् सामान्यतः सिद्धं तदनुवदन्ति तत्रेत्यादि। उक्तविधेषु वाक्येषु पूर्वसूत्राभ्यां कृते लक्षणविचार एव। सद् रूप्यते यैस्तेषां 'सदेव सोम्येदमग्र आसीत्' इत्यादिवाक्यगतानां पदानां ब्रह्मवाचकता निर्णीता। कार्यस्य सदात्मकत्वेन तत्कारणभूतं ब्रह्मैव सच्छब्दैर्वाक्येषूच्यत इति निर्णयः कृत इत्यर्थः। अतः परमग्रिमाधिकरणप्रयोजनमाहुः चिद्रूपस्येत्यादि। निर्णयप्रयोजनमग्रिमसूत्रे स्फुटीभविष्यति। सप्तद्वारत्वादिति पञ्च चक्षु-

रश्मिः।

निरूपकं तत्प्रयोजकत्वेन कार्यत्वेन स्मृतस्यानुमानवाक्यस्योपेक्षानर्हत्वं भवतीति हेतुताकार्यतयोः प्रयोजकता। एवं सावधानपुरुषप्रयुज्यमानवाक्यं प्रत्यक्षनिरूपकं तत्प्रयोजकत्वेनावसररूपनिरूपणीयतावच्छेदकेनावश्यवक्तव्यत्वेन स्मृतस्योपमानवाक्यस्योपेक्षानर्हत्वं भवतीति अवसरस्य प्रयोजकता। एवं तादृशवाक्यं व्याप्तिनिरूपकं तत्प्रयोजकत्वेन तत्कार्यनिर्वाहकत्वेन स्मृतस्य पक्षधर्मतानिरूपकवाक्यस्योपेक्षानर्हत्वं भवतीति निर्वाहकस्य प्रयोजकता। एवं तादृशवाक्यमीश्वरनिरूपकं तत्प्रयोजकत्वेन तत्सजातीयत्वेन स्मृतस्यापवर्गनिरूपकस्योपेक्षानर्हत्वं भवतीति एककार्यत्वस्य प्रयोजकता। अथवा तादृशवाक्यमपवर्गनिरूपकं तत्प्रयोजकत्वेनेश्वरसिद्धिसजातीयकार्यजनकत्वेन स्मृतस्यानुमानवाक्यस्योपेक्षानर्हत्वं भवतीति एकजातीयकार्यजनकत्वस्य प्रयोजकता। नन्वेवं घटत्वादावपि उपेक्षानर्हताप्रयोजकत्वदर्शनेन कथमिमे षडेव प्रयोजका इत्याकाङ्क्षायां तत्त्वे इष्टमभ्युपगच्छन्ति तत्रेत्यादि। उपेक्षानर्हत्वप्रयोजकेष्वित्यर्थः। अन्येषामिति उपेक्षानर्हत्वप्रयोजकानां घटत्वादीनामित्यर्थः। तस्मादव्याप्त्यतिव्याप्त्यसंभवविरहाच्छोभनमिदं लक्षणमिति सुधीभिराकलनीयम्। संगतिव्यवहारस्तु तत्रतत्र स्पष्टत्वाय हेतुतादिभिः प्रयोजकधर्मैरेव वक्तव्य इत्यपि ज्ञेयमित्यलं विस्तरेण। एवं संगतिं निरूप्य भाष्यमवतारयन्ति जन्माद्यधीत्यादि। जगदित्यादि जगदुत्पत्त्यादिना रूप्यते व्यवह्रियते यत्सदात्मकं कार्यं तस्य निरूपणेनेत्यर्थः। यद्यपि मृदो घट इति समवायित्वेपि पञ्चमी दृष्टा तथापि विकृतत्वापादकत्वेन न तथा वक्तुं शक्येति मत्वाहुः विशेषतः कर्तृतयेति। उपादानतयेति समन्वयपदसामर्थ्यात्तयेत्यर्थः। निर्णयप्रयोजनमिति ब्रह्मणः सच्चिदानन्दरूपत्वेन पूर्वाधिकरणाभ्यां सद्रूपे लक्षणसमन्वय उक्तः। चिद्रूपे लक्षणसमन्वयनिरूपणेनाव्याप्तिपरिहाररूपं तदित्यर्थः। उपलक्षणमेतत्। संगतिरपि निर्वाहकत्वरूपा स्फोटयिष्यति। सप्तद्वारत्वादिति मनसोधिकरणत्वेन द्वारत्वमिव ब्रह्मणश्चिद्रूपांशो जीव इति द्वारत्वम्। चक्षुरादिद्वारा मनसा जीवस्य ग्रहीतृत्वमिव जीवद्वारा ब्रह्मणो ग्रहीतृत्वात्। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रुतेः। न च ग्राह्यत्वम्। स्वस्मै चिद्रूपतानुभवात्।

---

१. इदं हेतुतया वाक्यम्। २. हेतुता। ३. ज्ञातम्।

तत्रैवं संदेहः। ब्रह्मणः स्वप्रकाशत्वेन सर्वप्रमाणाविषयत्वात् 'यतो वाचो निवर्तन्ते' इति श्रुतेश्च विचारः कर्तुं न शक्यते । स्वप्रकाशत्वविरोधाच्छ्रुतिविरोधाच्च ।

भाष्यप्रकाशः ।

रादीनि मनो जीवश्चेत्येवं सप्तद्वारत्वात् । तथाचान्यत्र गुणवाचका अपि ज्ञानादिशब्दा वेदान्तवाक्यविशेषेषु ब्रह्मवाचका इति बोधनाय सप्तसूत्राणीत्यर्थः । संशयस्याकारमाहुः तत्रैवमित्यादि । स्वप्रकाशत्वेनेति । 'तमेव भान्तमनुभाति विश्वम्' इतिश्रुत्या स्वप्रकाशत्वेन । स्वप्रकाशत्वविरोधादिति प्रमाणविषयत्वे तज्ज्ञानस्य प्रमाणतन्त्रत्वेन स्वप्रकाशत्वाभावेन तद्विरोधात् । श्रुतिविरोधादिति विचारस्य मनोवाग्विषयत्व एव संभवेनोक्तश्रुतिविरोधात् ।

रश्मिः ।

ब्रह्मवाचका इति । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति बृहदारण्यकात्सप्तस्वरूपाणि वक्ष्यमाणानि, प्रज्ञां स्मरणात्मकानि कुर्वीत कार्यकारणवस्त्वैक्यमर्षणेन पटतन्तुवत् । ततो ज्ञानैकब्रह्मवाचका इत्यर्थः । ज्ञानस्येतिभाष्यात् । सप्तसूत्राणीति सूत्रसंख्यातात्पर्योक्तिरियं पुत्रेष्टिन्यायेन । तथाहि । पुत्रेष्टौ श्रूयते 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इत्युपक्रम्य 'यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नव कपालं त्रिवृतैवास्मिन् तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति । अत्रोत्पन्नशिशोर्गायत्र्यादिजनितपूततासिद्ध्यर्थमष्टादिसंख्याककपालसंस्कृतपुरोडाशा न न्यूनाधिकसंख्याककपालसंस्कृतपुरोडाशाः । एवं त्रिवृदादिवाक्येष्वपि तत्तत्संख्याबोधने किं गमकमिति चेत् मैवं गायत्रीपादस्याष्टाक्षरत्वेनाष्टाकपालसंस्कृतपुरोडाशप्रचारे उत्पन्नशिशोर्गायत्र्यैव पावित्र्यं नन्दयितुमर्हति नान्यथापि । तथा च श्रुतिः 'गायत्री चतुर्विंशत्यक्षरा त्रिपदा' इति एतदभिप्रायेणैवाचार्यैः पुरुषोत्तमसहस्रनामस्तोत्रे 'गायत्री च तथा छन्दो देवता पुरुषोत्तमः' इति द्वात्रिंशदक्षरेषु गायत्रीत्वमुक्तं श्लोकस्य चतुष्पात्त्वात् । किंच गायत्र्याश्चतुर्थोपि पादोस्ति बृहदारण्यके गायत्र्युपासने 'अष्टावक्षरꣳह वा एकं गायत्र्यै पदम्' इत्यादिना पादत्रयमुक्त्वा 'अथास्या एतदेव तुरीयं दर्शितं पदम्' इतिश्रुतेः । एतदित्यस्य पादत्रयात्मकमित्यर्थः । तथा च गायत्र्यास्त्रिपादीत्वेनैकैकस्य पादस्याष्टाक्षराणि भवन्तीति गायत्रीजन्यपावित्र्यापेक्षायामष्टाकपालसंस्कृतपुरोडाशप्रचारो युक्त इति । एवमन्यत्रापि । एतच्च स्फुटं 'त्वमेव पूर्वसर्गेऽभूः' इत्यस्य सुबोधिनीटिप्पण्याम् । अन्यत्र यथा 'आत्मना प्रथमा लीला मनसा तु ततः परा' इत्याद्युक्ते सप्तके । आत्मा जीवः यशः मनः चक्षुः लीलाः क्रियाः, ज्ञानं पञ्चरात्रात् ऐश्वर्यं वाक् भागवतरसनं 'स्वादु स्वादु पदे पदे' इति भागवतात् धर्मो, प्राणः त्वक् वैराग्यं, प्राणवैराग्ययोर्भगवत्त्वात्, इन्द्रियं घ्राणः श्रीः । अत्र चक्षुर्मनो वा वक्तव्यमिन्द्रियमुख्यत्वात्तथापीन्द्रियश्रीः शृङ्गारं विना न भवतीति पृथ्वीः श्रीतन्मात्रा, गन्धस्तु ग्राहकघ्राणः शरीरं श्रोत्रं वीर्यं नभस्त्वात्, रूपं समष्टिः । ब्रह्मरूपाणि कृतकृत्यीकुर्वन्तीति । अथाष्टाकपालत्वादयो गुणाः कर्मान्तरविधायकाः, उत वैश्वानरस्तावका वेति संशये कर्मान्तरविधायका इति पूर्वपक्षे कृते पञ्चाशदिति न्यायेन द्वादशकपालेष्वष्टादीनां संभवात्स्तावका एवेति प्रथमस्य तृतीयपादे 'पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये'

आहोस्विद् विरोधपरिहारेण शक्यत इति । किं तावत् प्राप्तम् । न शक्यत इति । कुतः ।

ज्ञापनार्थं प्रमाणानि सन्निकर्षादिमार्गतः ।
सर्वथाऽविषयेऽवाच्येऽव्यवहार्ये कुतः प्रमा ॥

ऐहिकामुष्मिकव्यवहारयोग्ये हि पुरुषप्रवृत्तिः । प्रवृत्त्यर्थं हि प्रमाणानि । ब्रह्म पुनः सर्वव्यवहारातीतमिति । नन्वेतदपि वेदादेवावगम्यत इति चेत् तर्हि

भाष्यप्रकाशः ।

विधिकोटिस्तु स्फुटैव । पूर्वपक्षयुक्तिं गृह्णन्ति ज्ञापनार्थमित्यादि । सन्निकर्षादिमार्गत इति । आदिपदेन सहकारीणि । मार्गं उपायः । सर्वथाऽविषय इति स्वप्रकाशत्वेन मनोनिवृत्तिश्रुत्या च सर्वप्रमाणाविषये । अवाच्य इति वाङ्निवृत्तिश्रुत्या सत्यज्ञानादिपदैरपि लक्ष्यत्वादवाच्ये । अव्यवहार्यत्वं विभजन्ते ऐहिकेत्यादि । व्यवहारो नाम मनोमात्रेन्द्रियप्राणजन्यपुरुषप्रवृत्तिरूपो व्यापारः । सर्वव्यवहारातीतमिति लौकिकवैदिकव्यापारानर्हम् । एतदिति अविषयत्वादिकम् । वेदादिति । ‘न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यात्’ । ‘अन्यदेव तद्विदितादथो अविदितादधि’ इत्यादिरूपात् । अयमर्थः । प्रमाणैर्हि द्रव्यगुणक्रियादिरूपाः पदार्था लौकिकालौकिकसन्निकर्षेण यथार्हं प्रमीयन्ते । ब्रह्म त्वस्थूलादिवाक्यैरतद्रूपत्वादसंगत्वेनासन्निकृष्टत्वाच्च सर्व-

रश्मिः ।

इत्यधिकरणे पूर्वतन्त्रसिद्धान्तः । न च संख्यायाः पुरोडाशविशेषणतया श्रावणेन पुरोडाशेष्टाकपालत्वादिरूपतद्धर्मे वा पर्यवसानान्नेदं संगच्छत इति वाच्यम् । अप वै सोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसनीयं निर्वपेत्, अग्निः सर्वा देवताः, पाङ्क्तो यज्ञो देवताश्चैव यज्ञं चावरुन्धे गायत्रो वाग्निर्गायत्रच्छन्दस्तं छन्दसा व्यवर्धयति यत्पञ्चकपालं करोति । अष्टकपालः कार्योऽष्टाक्षरा गायत्री गायत्रो वा अग्निः गायत्रच्छन्दः स्वेनैवैनं छन्दसा समर्धयति पङ्क्तौ याज्यानुवाक्ये भवतः पङ्क्तो यज्ञः तेनैव यज्ञान्नैतीत्युदवसानीयविधायकश्रुतेस्तथानिश्चयात् । तत्र हि अष्टाकपालपुरोडाशविधाने तस्मिन् पञ्चकपालत्वस्य सत्त्वेपि तदनादृत्य याज्यानुवाक्ययोः पञ्चसंख्याकत्वविधानेन पञ्चसंख्याकयज्ञादनपगमविधानतस्तथानिश्चयो ज्ञेयः । अतः संख्यायाः सतात्पर्यकत्वमपेक्षितस्थले निश्चेयम् । अनपेक्षितायाः निस्तात्पर्यकत्वमितिदिक् । ब्रह्मवाचका इति उक्तरीत्या व्यस्ता समस्ता च । तमेवेति काचित्कोयं पाठः । पुस्तकान्तरे मुण्डके श्वेताश्वतरे च ‘तमेव भान्तमनुभाति सर्वम्’ इति पाठात् । उक्तश्रुतीति भाष्योक्तश्रुतिविरोधात् । विधिकोटिरिति विरोधपरिहारेण शक्यते इति विचारः कर्तव्य इति विधिकोटिः । लोके लेटोऽदर्शनात् । लटो विध्यर्थत्वाभावात् । यद्वा छन्दोवत्सूत्राणि व्याख्यानं चेति शक्यते इति लेट् । लक्ष्यत्वादिति सत्यज्ञानानन्तजगज्जन्मादिकर्तृपदानां वाङ्निवृत्तिश्रुत्या शक्यार्थे बाधे सत्यपदं सत्यत्वमनभिदधच्छक्यार्थमभेदेनासत्त्वाभावरूपलक्ष्यार्थं वक्तीत्यभेदसंबन्धो लक्षणा । एवं लक्षणाद्वये ज्ञानादिपदानामभेदसंबन्धो लक्षणेति ज्ञेयम् । मन इत्यादि ‘व्यवहारः संनिपातो मनोमात्रेन्द्रियासुभिः’ इत्येकादशस्कन्धात् । द्रव्य-

बाधितार्थप्रतिपादकत्वान्न वेदान्ता विचारयितव्या इति प्राप्ते उच्यते ।

ईक्षतेर्नाशब्दम् ॥ ४ ॥ (१।१।४)

न विद्यते शब्दो यत्रेत्यशब्दं सर्ववेदान्ताद्यप्रतिपाद्यं ब्रह्म न भवति । कुतः । ईक्षतेः । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेय' इति । 'तत्तेजोऽसृजत' । तथाऽन्यत्र । 'आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किंचन मिषत्' । 'स ऐक्षत लोकान्नु सृजा' इति ।

भाष्यप्रकाशः ।

प्रमाणाविषयम् । अतद्रूपत्वादेव च नामाख्यातनिपातोपसर्गरूपचतुर्विधपदजाताप्रतिपाद्यतया अवाच्यम् । अवाच्यत्वादेव वैदिकव्यवहारादप्यतीतम् । तदेतत्सर्वमभिप्रेत्य, 'यतो वाचः' इत्यादयस्ततो वागादीनां निवृत्तिं तस्य विदिताविदितान्यत्वं च श्रावयन्तीत्यतस्तदविचार्यम् । तस्याविचार्यत्वादेव तत्प्रमितिफला वेदान्ता अप्यविचार्याः । अथ ब्रह्मण एवंरूपतापि वेदादेवावगम्यत इति तस्याप्रमेयत्वज्ञानायैव विचार्या वेदान्ता इति विभाव्यते, तदा तु स्वव्यापारेण तत्समर्पयन्तस्तस्य तथात्वं बोधयन्तीति, मम माता वन्ध्येतिवाक्यवद् बाधितार्थप्रतिपादकत्वादेवाविचार्या इति । एवं पूर्वपक्षमुक्त्वा सिद्धान्तं वक्तुं सूत्रं पठन्ति ।

ईक्षतेर्नाशब्दम् ॥ ४ ॥ व्याकुर्वन्ति नेत्यादि । ननु ब्रह्मणो वेदान्ताद्यात्मकशब्दप्रतिपाद्यत्वे ईक्षतिधातुनिर्देशस्य कथं हेतुत्वमित्याकाङ्क्षायां विषयवाक्यान्युदाहरन्ति सदेवेत्यादि । अत्र प्रथमं वाक्यं छान्दोग्यस्थम् । द्वितीयमाश्वलायनानामैतरेयोपनिषत्स्थम् । तृतीयं प्रश्नोपनिषदः षष्ठप्रश्नस्थम् । मिषदिति व्यापारं कुर्वत् । आदिपदेनादिसृष्टिविषयकेक्षणघटितानां, 'ब्रह्म वा इदमग्र आसीत् स्वयंभ्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवास्मि हन्ताहं मदेव मन्मात्रं द्वितीयं तदेव निर्मम' इत्यादीनां संग्रहः । तथाच, न केवल ईक्षतिर्ब्रह्मणो वेदान्तशब्दप्रतिपाद्यत्वे हेतुभूतः, किं तु वाक्यगतः । तेन च स्वार्थप्रत्यायने वाक्येषु ब्रह्मकर्तृका ईक्षा प्रतीयते । ईक्षा च पर्यालोचनम्, एवं करिष्यामीत्यध्यवसायः । सोऽत्रैतादृश

रश्मिः ।

गुणेति आदिशब्देन विशेषसमवायाभावाः पूर्वपक्षग्रन्थत्वात् । अतद्रूपत्वादिति अद्रव्यादिरूपत्वादित्यर्थः । तर्हीत्यादि भाष्यं विवरीतुमाहुः अथ ब्रह्मण इति । विवृण्वन्ति स्म तदा त्विति । स्वव्यापारेणेत्यादि 'यतो वाचो निवर्तन्ते' 'न तत्र चक्षुर्गच्छति' इत्यादिवेदान्तः स्वीयवागप्राप्यचक्षुरप्राप्यमनोऽप्राप्यरूपार्थिकपदानामभिधारूपव्यापारेण प्रमेयत्वं समर्थयन्नेव ब्रह्मणोप्रमेयत्वं बोधयतीति तथेत्यर्थः । अथवा यथा अशेषनिषेधशेषपदाभ्यामभिधावृत्त्या ब्रह्मप्रमापकाभ्यामेवाप्रमेयत्वं बोध्यते । इत्यभ्युपगमवादवदस्थूलादिपदानामभिधारूपव्यापारेण प्रमेयत्वं समर्थयन् वेदान्तो ब्रह्मणस्तैरेव पदैरप्रमेयत्वं तात्पर्येण बोधयतीति तथेत्यर्थः ।

ईक्षतेर्नाशब्दम् ॥ ४ ॥ ब्रह्म वेदः अशब्दं न विद्यते शब्दः बोधकव्यापारवान् पदसमूहो यत्रेत्यशब्दं सर्ववेदान्ताद्यप्रतिपाद्यं न भवति ब्रह्मकर्तृकेक्षाप्रत्ययादिति सूत्रार्थः । यथा 'तदैक्षत' इत्यादिवाक्यं शब्दार्थयोर्नित्यसंबन्धादर्थोपि ब्रह्मपक्षः । सोऽत्रेति ईक्षाकर्तापो-

भाष्यप्रकाशः ।

इति कार्यबलादुन्नीयते । अत एतादृशेक्षाबोधकेनेक्षतिना यत्र यत्रैवं पूर्वमव्यवहार्यत्वेऽपि पश्चाद् व्यवहार्यत्वेन प्रतिपाद्यत्वाभावस्तत्र तत्रैवमीक्षणकर्तृत्वेन प्रतिपाद्यत्वाभाव इति

रश्मिः ।

क्षजस्तच्छब्दार्थः । न चाधोक्षजोपि शब्द इति तस्याप्यविषय इति वाच्यं ईक्षतेः । तथा चेदमित्थतयाधोक्षजशब्दविषयो भवत्येव । अथवा विरुद्धधर्माश्रयत्वात् विषयोविषयो वान्यथा 'न कोपि भग' इति छान्दोग्यीयसच्छब्दाविषयत्वे ब्रह्माज्ञानमेव भवेदिति महानेवान्यायः स्यात् । न च 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्' इति श्रुत्या शब्देतरमनसा ब्रह्मज्ञानं भवतीति शब्दाविषयत्वेप्यक्षतिरिरिति वाच्यम् । भक्तिरूपमनोनुद्रष्टव्यत्वेन प्रमाणप्रस्तावे तद्विचाराप्रसक्तेः । भक्तिरस्य भजनमितिश्रुतिः भक्तिरूपमनसा द्रष्टव्यत्वं वक्ति ततश्च प्रकृतेः प्रमाणबलेनाविषयः स्वेच्छया विषयश्च । एतादृश इति लोकदृष्टिद्वारा व्यवहार्यो भविष्यामीति भाष्योक्ताकारक इति विचक्षणस्य ब्रह्मणोस्तिमातिप्रियत्वेनात्र व्यवहाररूपकार्यबलादुन्नीयते तर्क्यत इत्यर्थः । तथा च श्रुतौ ऐक्षतेत्यस्य बहुत्वज्ञानेक्षो जात इत्यर्थः । बहु स्यां प्रजायेयेतीच्छाकारावेदकश्रुतिप्रामाण्यात् । ईक्ष दर्शन इति धातुः, अत्र त्वीक्षापर्यालोचनमित्युक्तं तद्दर्शनार्थमादायेत्यविरोधः । यत्र यत्रैवमिति ब्रह्मरूपार्थः पक्षस्तत्र । एवमिति । वेदान्तशब्दैः प्रतिपाद्यत्वाभाव इति प्रतिपाद्यत्वसंबन्धेनाशब्दत्वाभावः । एवमिति भाष्योक्तरीत्या वाक्यगतेक्षणकर्तृत्वेनेत्यर्थः । प्रतिपाद्यत्वाभाव इति प्रतिपाद्यत्वसंबन्धेन ब्रह्मव्याप्यीभावः । व्याप्तिरिति यदि च यथा तेजः इति दृष्टान्तेनान्वयव्याप्तिरपीति विभाव्यते तदा तद्वाक्यगतेक्षणकर्तृत्वेन प्रतिपाद्यत्वसंबन्धेन ब्रह्मव्याप्यं हेतुर्बोध्यः । ब्रह्मपक्षः ज्ञानप्रधानः । 'तत्तेज ऐक्षत' इति छान्दोग्यमन्त्रानुसंधेयम् । प्रकृते पूर्वमव्यवहार्यत्वेपि पश्चात्प्रतिपाद्यत्वसंबन्धेन व्यवहार्यत्वमशब्दत्वरूपं व्यापकं साध्यम् । एवमीक्षणकर्तृत्वेन रूपेण प्रतिपाद्यत्वसंबन्धेन ब्रह्मव्याप्यं हेतुः । अतः साध्यत्वेपि व्याप्यत्वात् पूर्वं वचनं व्यतिरेकव्याप्तित्वाद्वा । सा च 'नियतधर्मसाहित्ये उभयोरेकतरस्य वा व्याप्तिः' इति सांख्यप्रवचनसूत्रादव्यभिचारविशिष्ट्य हेतुनिष्ठा साध्याधिकरणवृत्तिता । सूत्रार्थस्तूभयोः समव्याप्तिकयोः कृतकत्वानित्यत्वादिरूपयोः एकतरस्य विषयव्याप्तिकस्य धूमादेः नियतधर्मसाहित्येऽव्यभिचरितधर्मरूपे सामानाधिकरण्ये व्याप्तिः व्याप्तिशब्दः शिष्टैः प्रयुज्यत इति । अव्यभिचारस्तु यत्र यत्र हेतुस्तत्र तत्र साध्यं यत्र साध्याभावस्तत्र हेत्वभाव इति नियमः । सिषाधयिषायां सत्यां साधकत्वेनोपादीयमानत्वं हेतुत्वं, सिषाधयिषाविषयत्वं साध्यत्वं, घनगर्जितेन मेघानुमाने सिषाधयिषास्त्येव विनापि तं तथानुमानमानुभाविकमिति चेदस्तु तर्हि सिषाधयिषाविषयत्वयोग्यत्वात्साध्यत्वम् । एवं च- वह्निमान् धूमादित्यादौ धूमनिष्ठं तादृशाव्यभिचारविशिष्टं वह्निसामानाधिकरण्यमस्तीति लक्षणसमन्वयः । धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय विशेषणदलम् । अयःपिण्डादौ वह्नेः साध्यव्यभिचारान्नातिव्याप्तिः । हेतुसाध्यपदे तु व्याप्त्यस्वरूपभूते यद्यपि तथापि सामानाधिकरण्यस्य ससंबन्धिकतया संबन्धिबोधनायोपात्ते विशेषाकाङ्क्षानिवृत्त्या

रश्मिः ।

विशेषणस्वरूपपरिनिष्ठायै विशेष्यम् । अव्यभिचरितं हेतोः साध्यमित्यलक्षणम् । व्याप्तेर्हेतुधर्मत्वात् । कथंचिद्गुणभूतत्वेन व्यवह्रियमाण आधेयोऽर्थो हेतुः । न चैवमव्याप्तिः । पर्वतीयधूमे महानसीयवह्निसामानाधिकरण्याभावादिति वाच्यम् । हेतुसाध्ययोर्हेतुतावच्छिन्नसाध्यतावच्छिन्नत्वाभ्यां विशेषणीयत्वात् । न च धूमावयवेषु धूमसत्त्वाद्वह्नेश्चासत्त्वादन्वयव्यभिचारः । समवायसंबन्धेन वह्न्यभाववति महानसादौ धूमसत्त्वाद्व्यतिरेकव्यभिचारश्च शङ्क्यः । हेतुतावच्छेदकसाध्यतावच्छेदकसंबन्धावच्छिन्नत्वाभ्यामपि तयोर्विशेषणीयत्वात् । नाप्येतत्क्षणीये धूमे पूर्वक्षणवृत्तित्वविशिष्टवह्निसामानाधिकरण्याभावादव्याप्तिरिति वाच्यम् । तत्र वैशिष्ट्यानवच्छिन्नत्वस्यापि विशेषणीयत्वात् । वस्तुतस्तु सिषाधयिषोदयानन्तरं हेतुसाध्यभावेन ततः पूर्वं तदभावात्तस्य वह्नेरसाध्यत्वेन तदसामानाधिकरण्येऽप्यदोषात् । सिषाधयिषोत्तरक्षणात्मकक्षणात्पूर्वक्षणत्वविवक्षयाऽव्याप्त्युद्भावनं तु काकदन्तविचारमनुहरति । आप्राकृतमापण्डितं च पूर्वोक्तरीतिकव्याप्तिज्ञानमात्रेणानुमितिदर्शनस्य सार्वजनीनत्वात् । एतादृशदर्शनेनैव वह्निघटोभयावच्छिन्नप्रतियोगिताकवह्न्यभाववति केवलवह्निदेशे धूमदर्शनेन व्यतिरेकव्यभिचारग्रासात्प्रसिद्धानुमाने व्याप्तिशङ्कापि निरस्ता वेदितव्या । व्यासज्यवृत्तिधर्मावच्छिन्नाभावस्थले साध्यदर्शनेन सविशेषणे हीति न्यायादभावस्योभयत्व एव विश्रान्तेश्च । ज्ञेयं वाच्यत्वादित्यादौ केवलान्वयि साध्यके हेतुनिष्ठा साध्यसमानाधिकरणताऽव्यभिचरितेति ध्येयम् । एवं सत्तावान् जातेरित्यत्रापि ज्ञेयम् । एवं च साध्यवदन्यावृत्तित्वं साध्यात्यन्ताभाववदवृत्तित्वं च नातिदुष्टम् । ब्रह्मणि ज्ञेयत्वाद्यभावेन सर्वत्रापि केनचिद्रूपेण ज्ञेयत्वाद्यभावेन प्रमेयत्वे प्रमेयत्वस्य वाच्यत्वे वाच्यत्वस्यानवस्थात्माश्रययोः यथासंभवं भियाऽभावेन च केवलान्वयिसाध्यकानुमानस्यैवाभावात् । मीमांसकानामपीदमिष्टम् । न चाव्याप्यवृत्तिसाध्यके कपिसंयोगी एतद्वृक्षत्वादित्यादौ साध्यात्यन्ताभाववदवृत्तित्वस्याव्याप्तत्वं शङ्क्यम् । दृष्टे कपिसंयोगे सिद्धसाधनत्वेनादृष्टे चाहेतुत्वेन तस्य दुरनुमानत्वात् । न च दृष्टेपि कपिसंयोगे सिषाधयिषयानुमितिसंभवात्तादृशस्थले सिद्धसाधनस्य दोषत्वात् । सदनुमानमेवेदं यथाहुः प्रत्यक्षेण परिकल्पितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका इतीति शङ्क्यम् । एतद्वृक्षत्वस्यैकव्यक्तिमात्रवृत्तित्वेनान्यत्र सहचारग्रहस्य व्याप्त्यानुग्राहकस्याभावेन मूलावच्छेदेन व्यभिचारज्ञानाद्व्याप्तिप्रतिबन्धात् । न चैवं संयोगे द्रव्यत्वादित्यादावपि सहचारग्रहाभावाद्व्याप्तिप्रतिबन्धो भवेदिति शङ्क्यं पक्षैकदेशे सहचारग्रहसत्त्वेनादोषात् । अस्तु व्यतिरेकव्याप्तिग्रहः परं तु सिषाधयिषा तु न भवत्येव । इच्छाया ज्ञानानुरूपकार्यत्वात् । अत एव ज्ञाते इच्छानुदयात् । तथाचानुमितप्रकारकमपि संयोगज्ञानात्पूर्वमभावात्कथमनुमित्सा । न च कपिसंयोगज्ञानमात्रमिच्छोदये प्रयोजकं न तु विचारणावच्छिन्नं तस्य च पूर्वं सत्त्वादनुमित्सोदय इति वाच्यम् । अयं घट इति ज्ञानादनुमित्सोदयप्रसङ्गात् । अतो यत्र पूर्वमनुमितिविषयत्वस्य यद्धेतुकत्वस्य च ज्ञानं तत्र सिद्धौ सत्यां सिषाधयिषा तया चानुमानं नात्र तथेति । महानसादिवह्न्यनुमितौ तथादर्शनादिति ध्येयम् । परं तु सत्तावान् जातेरित्यत्र साध्यवदन्यस्मिन् सामान्यादौ जात्यभावादव्याप्त्यभावेपि हेतुतावच्छेदकसंबन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिरिति नातिदुष्टं लक्षणद्वयम् । एवं च कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिपरिहाराय यच्चिन्तामणौ प्रति-

'स इमाँल्लोकानसृजत' इति। 'स ईक्षाञ्चक्रे'। 'स प्राणमसृजत' इत्येवमादिषु सृष्टिवाक्येषु ब्रह्मण ईक्षा प्रतीयते।

किमतो यद्येवम्। एवमेतत् स्यात्। सर्वव्यवहारप्रमाणातीतोऽपि ईक्षाञ्चक्रे लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीति। अतो यथा यथा कृतवाँस्तथा तथा

भाष्यप्रकाशः।

व्याप्तिर्बोध्यत इतीक्षतेर्हेतुत्वमित्यर्थः। एवं सर्वत्र हेतुशोधनप्रकारो बोध्यः। ननु प्रतीयतामीक्षा, तावता पूर्वोक्तविरोधस्य कथं परिहार इति पृच्छति **किमतो यद्येवमिति**। समादधते **एवमित्यादि**। तथाच ब्रह्मणः पूर्वोक्तरूपत्वस्येक्षायाश्च श्रुतिसिद्धत्वाच्छ्रौतत्वेनैकतरबाधस्याप्यनुचितत्वाद् विरुद्धधर्माधारत्वस्य ब्रह्मणि भूषणत्वात् तस्यापि 'अन्यदेव तद्विदितादथो अविदितात्', 'तदेजति तन्नैजति' इत्यादिश्रुतिसिद्धत्वादभिन्ननिमित्तोपादानवादमुपगच्छता तस्याप्यङ्गीकाराच्चैवमीक्षाकारसिद्धौ सुखेन सिद्ध्यति विरोधपरिहारे ब्रह्मणो विचार्यत्वस्यापि सिद्धि-

रश्मिः।

योगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यं व्याप्तिरिति प्रतियोगिव्यधिकरणो यः साध्यसमानाधिकरणात्यन्ताभाव इति प्रतियोगिव्यधिकरणत्वेनाभावो विशेषितस्तदपि मुधैव। तस्य दुरनुमानत्वात्। यदपि मञ्जरीकारः हेतुसमानाधिकरणा यावन्तस्ते साध्यसमानाधिकरणास्तत्त्वं व्याप्तिरिति। तदपि न रुचिरम्। यावत्त्वस्यानेकपदार्थघटितत्वेनापेक्षाबुद्धिविशेषविषयत्वरूपयावत्त्वाङ्गीकारेपि अपेक्षाबुद्धेरयमयमयमेते सर्वे इत्याकारकत्वेन तत्पदार्थविषयकतयानेकपदार्थघटितत्वानपायेन प्रतिपत्तिगौरवग्रासात्। यावत्त्वस्य व्यापकत्वरूपत्वेपि व्यापकत्वस्य तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वरूपतया भावद्वयनिवेशेनोक्ततुल्यकक्षत्वादित्यलं पल्लवितेन। यद्यप्यत्र न विशेषस्तथापि सिद्धान्तादेतलक्षणबोधायेदम्। आत्मशब्दादित्यादिहेतुष्वतिदिशन्ति **एवं सर्वत्रेत्यादि**। अनुमानं तु ब्रह्म पूर्वं सर्वव्यवहारप्रमाणाद्यतीतमपि पश्चात्तद्विषयः। एवमीक्षितृत्वात् यन्नैवं तन्नैवं जीववदिति व्यतिरेकी हेतुः। न च केवलान्वयित्वमस्य। जीवस्यैवंप्रकारेण श्रुत्याद्यनुक्तत्वेन दृष्टान्ताभावाद् व्यतिरेकी हेतुरित्यत उक्तं शोधनप्रकार इति। **पूर्वोक्तविरोधस्येति** पश्चाद्व्यवहार्यत्वे स्वीकृते पूर्वपक्षोक्ताव्यवहार्यत्वविरोधस्येत्यर्थः। **विरुद्धधर्मेति** सर्वव्यवहारप्रमाणातीतोपि ईक्षांचक्रे लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीति भाष्योक्तस्य तस्य। भाष्यार्थस्तु व्यवहाराश्च प्रमाणानि च व्यवहारप्रमाणानि सर्वाणि च तानि व्यवहारप्रमाणानि सर्वव्यवहारप्रमाणानि तेभ्योतीतः अतिक्रम्य गतः 'यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि' इत्यादि केनोपनिषदा वागादीन्द्रियाविषयः स सर्वप्रमाणातीतः। व्यवहार इन्द्रियादिकार्यं तदतीतः। तत्रैकत्रेक्षतिर्हेतुः। गौणश्चेत्यादिसूत्रैः साधितः। स्वतन्त्रहेतूनां स्वाप्ययादीनां सर्वव्यवहारातीतत्वं साध्यं बोध्यम्। **उपगच्छतेति** सिद्धान्तिनेत्यर्थः। सिद्ध्यतीति सप्तम्यन्तमिदम्। **अतो यथेत्यादिभाष्यं** विवृ-

---

१. पर्वतत्वादयः।

स्वयमेवोक्तवान्। पूर्वरूपं फलरूपं च सृष्टस्वांशपुरुषार्थत्वाय। ततश्च प्रमाणबलेनाविषयः, स्वेच्छया विषयश्चेत्युक्तम्।

ननु सर्वप्रमाणविषयत्वे दूषिते केवलवेदविषयत्वं कथं सिद्धान्तीक्रियते। उच्यते। चक्षुरादीनां प्रामाण्यमन्यमुखनिरीक्षकत्वेन, न स्वतः। भ्रमानुत्पत्ति-

---

भाष्यप्रकाशः।

स्तादृग्ब्रह्मकृतिबोधकत्वेन वेदान्तानामप्यबाधितार्थत्वात् तेषामपि विचार्यत्वसिद्धिरित्यर्थः। एवं करणकथनयोः प्रयोजनमाहुः पूर्वमित्यादि। स्वांशा जीवास्तदुपयोगिपुरुषार्थत्वं तेजःप्रभृतीनां भवत्वितीच्छया पूर्वं प्रथमतो रूपं प्रजादिशब्दवाच्यं शरीरं फलरूपं लोकादिकं च सृष्टम्। तथाचैतेषां पुरुषार्थत्वेन जीवाशास्त्वायैवं कृत्वा तत्कर्तृतया फलदातृतया च स्वस्य व्यवहार्यत्वं च कृतवानिति तत्संपादनं प्रयोजनमित्यर्थः। तेन सिद्धमाहुः तत इत्यादि।

अत्र प्रत्यवतिष्ठते नन्वित्यादि। केवलवेदविषयत्वं कथमिति सर्वप्रमाणानां तुल्यत्वेनाविशेषात् केवलवेदवेद्यत्वं ब्रह्मणः कथोपपद्येतेत्यर्थः। अत्र समाधातुमुपपत्तिमाहुः उच्यत इत्यादि। न हि प्रमाणानां प्रामाण्यं तुल्यम्। तथा सति शुक्तिरजतादिविषयकश्चाक्षुषादिभ्रमो न स्यात्। हेतुषु चाभासता न स्यात्। शब्देषु च वाक्यप्रामाण्याप्रामाण्यविभागो न स्यात्। अतश्चक्षुरादिमनोऽन्तानां तदुपजीविनां च प्रामाण्यं न स्वतः, किंतु परमुखनिरीक्षकत्वेना-

रश्मिः।

ण्वन्ति स्म एवं करणेत्यादि। एवं सृष्टिकरणं वेदान्तेषु व्यासाद् भागवताच्चत्कथनं च तयोरित्यर्थः। तेजःप्रभृतीनामिति बृहदारण्यके दृप्तबालाकिब्राह्मणे 'स होवाच गार्ग्यः य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपासे' इत्यादि। यद्वा। छान्दोग्ये 'तत्तेज ऐक्षत' 'तदाप ऐक्षन्त' इति च पुरुषार्थत्वम्। तत्संपादनेति करणकथनसंपादनप्रयोजनमित्यर्थः। वेदान्तेषु ब्रह्मकृत्यबोधने पूर्वोक्तरूपेण व्यवहार्यत्वं कृतं न स्यात्। लोकानां शास्त्रादेव ब्रह्मज्ञानं भवतीति भावः। तत इत्यादीति यथा गोवर्धननाथजित्। आभासता न स्यादिति व्याप्तिज्ञानरूपप्रमाणकजन्यहेत्वाभासता धूमवान् वह्नेरित्यत्र न स्यात्। उपमानस्यामानान्तरत्वादनुक्तिः। सादृश्यातिदेशवाक्यार्थस्मरणसहकारेण चक्षुरादिनैव संज्ञासंज्ञिपरिच्छेदोपपत्तौ सादृश्यज्ञानादेर्मानान्तरत्वकल्पनस्यायुक्तत्वात्। अन्यथा घटाभाववति घटोपलब्धावपि इन्द्रियसंबद्धविशेषणतायाः सत्त्वेन घटाभावप्रतीतिः स्यात्तद्वारणायाभावग्रहे हेतुतया स्वीक्रियमाणाया योग्यसहकारिसंपन्नानुपलब्धेरुपयोग्यानुपलब्धेरपि मानान्तरत्वप्रसक्तेः। न चैवं सति परोक्षत्वं व्याहन्येतोपमितेरिति वाच्यम्। इष्टापत्तेः। न च चक्षुर्व्यापारापगमेपि जायमानत्वान्नैवमिति वाच्यम्। पूर्वं जातस्य ज्ञानस्य करणव्यापारोपरमेप्यनुपरमस्यानुभवसाक्षिकस्य सत्त्वात्पुनर्जननकल्पनस्यायुक्तत्वात्। उपेक्षान्यज्ञानस्य त्रिक्षणावस्थायित्वकल्पनस्याभ्युपगमैकशरणत्वात्। मानसं वा तदस्तु। अतिदेशवाक्यालक्षणत्वेन पूर्वं ज्ञातस्य ततः पदार्थस्फुरणेन स्फुरितस्य सादृश्यस्य संस्कारेण शब्दाभिव्यक्तौ दृष्टसंवादनिश्चितप्रामाण्यस्य च वाक्यस्य च सहकारेण मनसाप्ययं गवयपदवाच्य इति संज्ञासंज्ञिपरिच्छेदस्य प्रसिद्धपदसमभिव्याहृतवाक्यस्मरणसहकृतमनसा मधुकरादिशक्तिग्रहस्येवोपपत्तेः। तदुत्तरमेतत्पदवाच्यत्वेनैनं जानामीत्यनुव्यवसायेन मानसत्वनिश्चयाच्चेति। तत्रापि सादृश्यप्रमो ज्ञेयः। चक्षुरादीनामिति भाष्यं विवृण्वन्ति स्म अतश्चेति। तदुपजीविनामिति अनुमानादीनामित्यर्थः।

प्रसङ्गात् । सत्त्वसहितानामेव चक्षुरादीनां प्रामाण्यात् । अतो निरपेक्षा एव भगवन्निःश्वासरूपवेदा एव प्रमाणम् । संकेतग्रहस्तु वैदिक एव वेदविद्भिः कृतः ।

भाष्यप्रकाशः ।

न्याधीनम् । यदधीनं स तु सत्त्वगुण एव प्रकाशकत्वात् । तत्सहितानामेव तेषां प्रामाण्यात् । तस्य यदा गुणान्तरेणोपमर्दस्तदानुग्राहकाभावेन तेषां नैर्बल्यादप्रामाण्यमेव । सत्त्वशुद्धिस्तु वेदोदितयथावस्थितसाधनैरेवेति तेषां सर्वेषां सुदूरवर्तिनोऽपि वेदस्यैव स्वसार्थकत्वार्थमपेक्षा । वेदस्य तु न कथमपि तदपेक्षा । जैमिनीयादिनये तस्यापौरुषेयत्वात् । काणादादिनये चेश्वरजन्यत्वात् । अतोऽन्यनिरपेक्षा वेदान्तनये भगवन्निःश्वासरूपत्वेनैव सिद्धा आस्तिकमात्रमते अविप्रतिपन्ना वेदा एव प्रमाणम् । अतः सर्वप्रमाणाविषयत्वेऽपि सर्वनिरपेक्षत्वाद्भगवन्निःश्वासरूपत्वात् सर्वास्तिकोपजीव्यत्वाच्च वेदैकविषयत्वं सिद्धान्तीक्रियते । तथा चैषा युक्तिरित्यर्थः । नन्वेवंरूपत्वेऽपि वेदस्य न सर्वनिरपेक्षत्वं शब्दत्वात् । शब्दस्य बोधकतायाः पदपदार्थसंबन्धग्रहाधीनत्वात् तद्ग्रहस्य च प्रयोजकप्रयोज्यव्यवहाराधीनत्वाद्, वस्तुतस्तु ब्रह्मणोऽव्यवहार्यत्वेन तत्र संबन्धग्रहस्य दौर्घट्याद् बोधकताया अभावेन वेदविषयत्वसाधनमप्यनर्थकमेवेत्याशङ्कायामाहुः संकेतेत्यादि । नैवमबोधकत्वं सापेक्षत्वं वा शङ्कनीयम् ।

रश्मिः ।

एवेति अनुभवसाक्षिकत्वादेवकारः । सत्त्वेत्यादिभाष्यं विवृण्वन्ति यदधीनमिति । तेषामिति चक्षुरादीनामित्यर्थः । वेदोदितेत्यादि । 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः' इत्यभिप्रेतश्रुत्येकदेशप्रामाण्यात्तथेत्यर्थः । अतो निरपेक्षा इति भाष्यं विवृण्वन्ति अतोन्येति । अत्र विशेषणसंगतैवकारद्वयमयोगव्यवच्छेदकं शङ्खः पाण्डुर एवेति । तथा च भगवन्निःश्वासरूपवेदाः निरपेक्षत्वायोगव्यवच्छेदवन्तः प्रमाणं भगवन्निःश्वासरूपवेदत्वायोगव्यवच्छेदवदिति बोधो भाष्ये । पदपदार्थेति वाक्ये तु ह्याकाङ्क्षादिग्रहाधीनापि । प्रयोजकेत्यादि पूर्वतन्त्रे प्रथमे 'चोदनालक्षणोऽर्थो धर्मः' इत्यधिकरणे प्रयोजकस्य तत्प्रयोज्यस्य च पुरुषस्य यो व्यवहारो गामानयेति वाक्ये गवानयनरूपमध्यमप्रवृत्तिरूपस्तमवलोक्य सर्वैर्गोशब्दस्य सास्नादिमति पिण्डे संगतिर्गृह्यते इति तदधीनत्वमिति स्थितम् । तत्रेयं प्रनाडी गामानयेति प्रयोजकवृद्धेनोक्तः प्रयोज्यवृद्धस्तदर्थमवगत्य गामानयति तत्पश्यन् बालस्तया क्रियया तस्य प्रयत्नमनुमिनोति प्रयत्नवान् क्रियायाः यथाहमिति तेनेच्छामिच्छावान् प्रयत्नाद्यथाहमित्यनुमिनोति तदनन्तरं गोविषयकज्ञानवान् तद्विषयकेच्छाया यथाहमितीच्छया तद्विषयकं ज्ञानमनुमिनोति ततस्तत्र हेत्वाकाङ्क्षायामुपस्थितत्वाच्छब्दमेव कारणत्वेन कल्पयति ततो गवादिपदानां प्रत्येकमावापोद्वापाभ्यां गोपदं गोधीजनकमित्यादि कल्पयति क्लृप्ते च तस्मिन्नतिप्रसङ्गभङ्गभिया तज्जननानुकूलं शक्तिरूपं संबन्धं कल्पयति तदुत्तरं च क्वचिद्व्यवहारात् क्वचिदुपमानात् क्वचिच्छब्दाद्व्याकरणादिरूपाद्भवतीति । संबन्धग्रहस्येति प्रतिपाद्यप्रतिपादकभावस्य । आशङ्कायामिति शांकराशङ्कायामित्यर्थः । इदानीं ब्रह्मलोको व्यापकः सर्वोपरि वरीवर्ति 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा विजिज्ञासितव्यम्' इतिश्रुतेः । अग्रे च तस्य पुरत्वसंपादनार्थं किं तत्र वर्तते यदन्वेष्टव्यं यद्वा विजिज्ञासितव्यमिति प्रश्ने 'यावान् वायमाकाशः तावानेषोन्तर्हृदय आकाशः उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' इत्या-

भाष्यप्रकाशः ।

यतः सदेवेत्यादिसंदर्भ एव तेजःप्रभृतिसृष्ट्युत्तरमेव श्राव्यते । 'तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम्' इति । 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति । नहि तदानीं वैदिक्या इतरा कापि सृष्टिर्न वा वेदविद्भ्य इतरे पुरुषाः, न वा भगवतोऽन्यः कश्चिच्छिक्षक इति प्रथमतः संकेतग्रहो वैदिक एव

रश्मिः ।

दिनाग्निर्वायुः सूर्यचन्द्रविद्युन्नक्षत्राण्युक्त्वा 'यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्' इति श्राव्यते । अनित्यतानिवृत्त्यै च ब्रह्मपुरे जीर्णे ध्वस्ते वा तदाश्रितं किमवशिष्यते इति प्रश्ने 'नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिताः एष आत्मा अपहतपाप्मा' इत्यादि श्राव्यते । तेन ब्रह्मपुरशब्देन शरीरं परामृशन्तः परास्ताः । ब्रह्म तु विरुद्धसर्वधर्माधिकरणमित्युपपन्नतरमेतत् । उपबृंहितं च द्वितीये—

'तस्मै स्वलोकं भगवान् सभाजितः संदर्शयामास परं न यत्परम् ।
व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥
प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः' ॥ इति ॥

किंच परिदृश्यमान आदित्यलोके नित्यत्वमस्मदाद्यपेक्षया दृष्टम् । शरीराणां तैजसत्वेन उत्कर्षश्चेति नैयायिका अप्यनुमन्यन्ते । ततोप्युत्कृष्ट आनन्दात्मा ब्रह्मलोकोनुमास्यतेऽतो ब्रह्मपुरं निःसंदिग्धं गर्जति सा वैदिकी सृष्टिरस्याः प्रपञ्चात्मिकायाः व्यतिरिच्यत एवैतत्सर्वं हृदि कृत्याहुः यतः सदेवेत्यादि । तेजःप्रभृतीत्यादि 'तत्तेज ऐक्षत बहु स्यां प्रजायेय' इति । 'ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि' इति ईक्षाश्रावणात् तेजोपां व्यस्तानां ब्रह्मार्चनताबोधनेनोपलक्षणस्य सदेवेत्यत्र वारणार्थं तेजःप्रभृतिसृष्ट्युत्तरमेव श्राव्यत इत्यर्थः । एतद्ग्रन्थप्रयोजनं सदेवेत्यत्रोपलक्षणवारणमुक्तं बीजभेदात्सृष्ट्योर्भेद उक्तः । तदानीमिति ब्रह्मांशसन्निकृष्टां जायमानत्वेनोपलभ्यमानेदानींतनसृष्टेः सदात्मकतापत्तिकाले वैदिक्या ब्रह्मलोकरूपायाः इतरा कापि सृष्टिर्न वक्तुं शक्येत्यर्थः । संकेतग्रह इति साधुत्वापरपर्याया अनादिवाचकत्वरूपाया अर्थबोधाविर्भावकशक्तेर्ग्रह इत्यर्थः । अन्यत्र ब्रह्मणः संकोचस्य शक्तित्वम् । सा च शक्तिरतिरिक्तेति मीमांसकाः । तदेव सिद्धान्तेप्यविरुद्धत्वात् । न त्वतिरिक्तशक्तिकल्पने गौरवादर्थसापेक्षं शब्दस्वरूपमेव वाचकत्वापर्नामकं शक्तिः कारणत्वादिवदिति वैयाकरणोक्तमादरणीयमिति चेन्न । आविर्भावकशक्तिसत्त्वेन तस्या एवार्थबोधार्थं शब्देपि स्वीकारेणातिरेकस्यादोषत्वात् । तदाधारत्वस्य च बोधरूपकार्यादेव सिद्धत्वात् । ननु केयमाविर्भाविका शक्तिरिति चेन्न । उपादानस्य कार्यस्य व्यवहारगोचरत्वसंपादिका शक्तिः सेति । आविर्भावस्य व्यवहारयोग्यतात्मकत्वात् । न च किमनयेति शङ्क्यम् । तदाधारत्वस्य कारणलक्षणत्वात् । यत्तु अनन्यथासिद्धनियतपूर्ववर्तित्वं कारणत्वं तन्न । पूर्ववर्तित्वस्य कार्यसापेक्षत्वात् कार्यस्य च नियतपश्चाद्भावित्वात् अन्योन्याश्रयग्रासात् । अनन्यथासिद्धत्वस्यान्यथासिद्धभिन्नत्वेनान्यथासिद्धेश्चान्यत्र गृहीतकारणताकत्वरूपत्वेन तत्राप्यस्यैव कारणलक्षणस्य वक्तव्यत्वादात्माश्रयापत्तेश्च । गौर-

भाष्यप्रकाशः

प्रपञ्चे वेदविद्भिर्भगवच्छिक्षया वा भगवद्दत्तमनीषया वा भगवदिच्छामात्रेणैव वा कृत इति तथा गृहीतसंबन्धस्य वेदस्य नाबोधकत्वम्, न वा लौकिकसापेक्षत्वमित्यर्थः। एवमेव पुरुषसूक्तेऽपि सहस्रशीर्ष्णो महापुरुषाद्विराजस्तन्मध्यगानां च सृष्ट्यादिकं श्रावयित्वा,

'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते' ॥

इत्यादि मन्त्रत्रयं पठ्यते । तत्रास्मिन् मन्त्रे हेतुः पूर्वपक्षनिरासे । अस्मिन् प्रपञ्चेनादित्वं परमाणुजन्यत्वगुणजन्यत्वादिशङ्का महति पुरुषे च शबलत्वादिशङ्का न कार्या । तत्र हेतुः, 'तमसः पारे' इति । अस्य पदद्वयस्य महापुरुषे सर्वेषु रूपेषु च देहलीदीपन्यायेन संबन्धः । यदास्त इति यत्पदं हेतुबोधकम् । तेनास्मिन् मन्त्रे छान्दोग्यवदेव सर्वं सृष्टिस्वरूपमभिवदितृत्वेन भगवत एव शिक्षकत्वं च बोधितम् । ततो द्वितीये,

'धाता पुरस्ताद् यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।
तमेवंविद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' ॥

इति मन्त्रे धातुः प्रथमं तदुबोद्धृतया तदुक्तृत्वं शक्रस्य दिशां देवतानां श्रोतृत्वं चोक्त्वा उत्तरार्धे केवलस्यैव सर्वकर्तृत्वेन सर्वात्मकत्वेन यद्वेदनं तस्य फलमाह । ततस्तृतीये,

रश्मिः ।

वाच । नापि कारणं कारणमित्यनुगताकारप्रतीतिसंज्ञिकजातिविशेषस्तत् । अभावेपि तस्याङ्गीकारेण जातेरेवाशक्यवचनत्वात् । अखण्डोपाधित्वं त्वगतिकगतिः । नापि कार्यानुकृतान्वयव्यतिरेकित्वं तत् । मूलकारण आकाशादौ च व्यभिचारात् । तत्तन्मते तस्य तस्य नित्यविभुत्वेन कालतो देशतश्चाव्यतिरेकात् । नन्वीश्वरेच्छासंकेतः । मैवम् । शब्दवृत्तित्वाभावात् । संबन्धान्तरस्याप्रयोजकत्वात् । अतस्तद्देशकालविभेदेनास्माभिरुच्चार्यमाणोयं शब्द इममेवार्थं बोधयतु न त्वन्यमितीश्वरेच्छाकृतनियमशक्तिसंकोच एव संकेतः । तत्रत्यानामपि न सर्वदा प्रत्यक्षमिति ध्वनयन्तः पक्षान्तरमाहुः भगवद्दत्तेत्यादि । पूर्वं भगवद्दीक्षयेत्यत्राप्तवाक्याच्छक्तिग्रह उक्तः । इदानीं विवृतेर्वेदन्तीत्युच्यते यत्तदुच्यते भगवद्दत्तमनीषां विना विवृत्यसंभवात् । वक्ष्यमाणभगवदिच्छामात्रेणेत्यत्र व्याकरणाच्छक्तिग्रहः । 'अनागतमतीतं च' इतिवाक्याद्वेदविदां व्याकरणदर्शनेच्छाविषयत्वात् । न च विपरीतं कुतो न स्यादिति वाच्यम् । मात्रप्रत्ययेन भगवद्दत्तमनीषाव्यवच्छेदात् । दत्तमनीषाया इच्छाविषयमनीषातिरिक्तत्वात् । महाराजाधिराजत्वेनोपपत्तेः । ब्रह्मलोकेप्युत्तममध्यमनिकृष्टव्यवहारोस्तीत्यपि सूचितमनेन । अन्यथा लीलानुपपत्तेः । तदुक्तम्— 'तेने ब्रह्म हृदा य आदिकवये' इति । पूर्वपक्षेति 'सहस्रशीर्षा' इति ग्रन्थस्मारितपूर्वपक्षनिरासे । अस्मिन्निति परिदृश्यमानेपीत्यर्थः । न कार्येति विधेरपि स्रष्टृद्रष्टृत्वादस्य प्रपञ्चस्य तत्स्रष्टृद्रष्टृत्वाच्च मीमांसकनैयायिकसांख्यैर्न कार्येत्यर्थः । संबन्ध इति यतस्तमसोऽविद्यायाः पारे धीरः सर्वाणि रूपाणि विचित्य नामानि कृत्वाभिवदन्नास्तेऽतस्तमसः पारे महान्तं पुरुषमादित्यवर्णमेतमहं वेदेत्यर्थान्वयेत्यर्थः । प्रकर्षश्चाधिदैविकतेत्याहुः देवतानामिति । प्रविद्वानित्यस्यार्थमाहुः श्रोतृत्वमिति । एवमित्यस्यार्थमाहुः सर्वकर्तृत्वेनेत्यादि । फलमिति अमृत इह भव-

आकृतिमात्रार्थं लोकापेक्षा। अनधिगतार्थगन्तृ च प्रमाणं, लोकानधिगत इत्यर्थः। यज्ञब्रह्मणोरलौकिकत्वं सिद्धमेव। लौकिको व्यवहारः सन्निपात-

---

भाष्यप्रकाशः।

'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः'॥

इतिमन्त्रे तादृशे यज्ञे सिद्धानामेव धर्माणां प्राथम्यं तत्फलं चाह। तेनापि पूर्वोक्त एवार्थः सिद्धः। एतदेव श्रीभागवतद्वितीयस्कन्ध उपबृंहितम्।

'यदास्य नाभ्यान्नलिनादहमासं महात्मनः।
नाविदं यज्ञसंभारान् पुरुषावयवादृते॥
तेषु यज्ञस्य पशवः सवनस्पतयः कुशा'। इत्यारभ्य,
'तमेव यज्ञपुरुषं तेनैवायजमीश्वरम्'॥

इत्यन्तेन। अतो वेदैकसमधिगम्यत्वसाधनं नानर्थकमिति। ननु भवत्वेवं तदानीन्तनानां, तावतेदानीन्तनानां कथं संकेतग्रह उपायाभावात्। तथा सतीदानीं तु स दोषस्तदवस्थ इत्यत आहुः आकृतीत्यादि। आकृतिमात्रार्थमिति आकृत्यवधारणार्थम्। सिद्धमेवेति तव मतेऽपि सिद्धमेव। तथाच यथा दारवमार्तिकाद्युपकरणे गृहीतसंकेताः सौवर्णेऽपि तस्मिंस्तया आकृत्या संकेतमवधारयन्ति, तथात्राप्तवाक्याद् यादृशो लौकिकस्तादृशे वैदिकेऽपि प्रपञ्चे संकेतमवधारयिष्यन्तीतिबोधनार्थम्, 'यथा सौम्यैकेन मृत्पिण्डेन' इत्यादीनां लौकिकदृष्टान्तानां श्रुतावप्यादरणादिति लौकिकानां पुरुषाणामेव परापेक्षत्वं, न वेदस्य। यदि चैवमपि सापेक्षत्वमेवेति विभाव्यते तदा तु धर्मब्रह्मणोरपि बोधने लोकप्रसिद्धपदादिसमभिव्याहारसापेक्षत्वादनपेक्षतायै तिलाञ्जलिरेव प्रदीयताम्। तथानधिगतार्थगन्तृत्वस्यापि। प्रसिद्धपदसमभिव्याहारशून्यतायामबोधकताया एवापत्तेर्धर्मोऽपि न युज्येतैव। तथा निषेधावधिभूतब्रह्मस्वरूपमपि लोकप्रसिद्धमर्थमेव निषिध्य बोध्यत

रश्मिः।

तीत्यमृतरूपं फलमित्यर्थः। तानीत्यस्य यज्ञेन पुरुषावयवेन यजनं यत्तत्परामर्शकत्वात्तदर्थमाहुः सिद्धानामेवेति। तत्फलमिति महिमानो भगवद्विभूतिरूपाः नाकं स्वर्गं सचन्ते 'षच समवाये' संबध्नन्तीति धर्मफलमित्यर्थः। पूर्वोक्त इति वैदिक्येव सृष्टिर्वेदविद् एव पुरुषा भगवानेव शिक्षक इति वैदिकसृष्टौ वेदशब्दानां संकेतग्रह इत्युक्त इत्यर्थः। 'यज्ञेन यज्ञमयजन्त' इत्यंशमुपष्टभ्नन्ति एतदेवेत्यादि। स दोष इति संकेताग्रहरूपदोष इत्यर्थः। आकृतीति 'मात्रं कार्त्स्न्येऽवधारणे' इति कोशात्। तव मत इति पूर्वोक्तलक्षणाङ्गीकर्तुर्मीमांसकशांकरादेर्मतेपि। आप्तवाक्यादिति तेन पूर्वोक्ता प्रनाडी संगृहीतेति बोधितम्। प्रस्थानरत्नाकरे तु प्रगल्भातिबालानुपादाय प्रत्यक्षविरोधो दत्त इत्यदोषः। आदरणादिति एतेनैवकारो बहुश्रुत्युपष्टम्भस्यालौकिकसिद्धत्वव्यवच्छेदकः। परापेक्षत्वमिति लौकिकपदेष्वाकाङ्क्षादिरूपपरापेक्षत्वमित्यर्थः। वेदे पुरुषाभावादाहुः वेदस्येति। एवमपीति आकृतिमात्रार्थे लोकापेक्षायामपीत्यर्थः। निषेधावधीति निषेधश्चासाववधिरिति कर्मधारयः तद्भूतेत्यर्थः। निषेधशेषभूतब्रह्मस्वरूपमि-

---

१. वैदिक्येव सृष्टिः वेदविदेव पुरुषः भगवानेव शिक्षकः इति वैदिकसृष्टौ वेदशब्दानां संकेतग्रह इति.

रूपत्वात् पुरुषार्थासाधक एव । तर्हि शब्दमात्रस्य कथं ग्रहणम् । वेदव्याख्यातृवाग्विषयत्वादिति ब्रूमः ।

भाष्यप्रकाशः ।

इत्यस्ति तद्बोधनेऽपि लोकापेक्षेति । तदभावे तदपि न बुध्येत । अथ तत्र प्रसिद्धान्यपि पदादीनि वैदिकान्येवेति न दोष इति चेत् तर्ह्यत्रापि व्यवहारं वैदिकमेवानुसंधत्स्व । इदानीं विधूयमानेऽपि तस्मिन् भगवता,

'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् ।
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ।
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' ॥

इति श्रीभागवते कथनात् । अतो धर्मब्रह्मबोधन इव वैदिकप्रपञ्चबोधने आकृतिमात्रार्थं लोकापेक्षायामपि न दोष इत्यर्थः । तदेतदुक्तं, सिद्धमेवेत्यन्तेन । नन्वेवं सति लौकिकव्यवहारस्याप्यादरे को दोष इत्यत आहुः लौकिक इत्यादि । एकादशस्कन्धे,

'सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः ।
व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः' ॥

इति भगवता प्राकृतगुणान् प्रकृत्य मनआदिव्यवहारस्य सन्निपातत्वकथनाल्लौकिकव्यवहारस्य सन्निपातकार्यत्वेनाऽप्रामाणिकत्वात् पुरुषार्थासाधक इत्यतो नाद्रियत इत्यर्थः । एवं ब्रह्मणो वैदिकव्यवहारविषयत्वमसहमानश्चोदयति तर्हीत्यादि । यदि सूत्रकृत एवं ब्रह्मणो वैदिकव्यवहारविषयत्वमभिप्रेतं स्यात् तर्हि शब्दमात्रस्य नाशब्दमित्यनेन कथं ग्रहणं कुर्यात् । नावेदं, नावेदान्तमित्येव वदेत् । अतो नायं सूत्रार्थ इत्यर्थः । अत्र समादधते वेदेत्यादि । "अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि' इति मैत्रेयीब्राह्मणे श्रावणाद् वेदव्याख्यातृवाचामपि तथात्वेन ब्रह्मणस्तद्विषयत्वमपि सूत्रकृतोऽभिप्रेतमित्यतः शब्दशब्दग्रहणमिति ब्रूमः । तथा चैवमभिप्रेतत्वादयमेव सूत्रार्थो, नान्यः । सांख्यनिरा-

रश्मिः ।

त्यर्थः । तदभाव इति लोकाभावे । तदपि निषेधावधिब्रह्मस्वरूपमपीत्यर्थः । दोष इति सापेक्षत्वलक्षणः । तत्रेति वेद इत्यर्थः । सिद्धमेवेत्यन्तेनेति । भाष्ये । अनधिगतेति अनधिगतो योर्थो यागब्रह्मात्मकः तस्य गन्तृत्वप्रतिपादकत्वेन प्रापकत्वं प्रमाकरणत्वं तु नोक्तमनधिगतार्थप्रमाकरणत्वेन संशयविपर्यासकरणत्वाभावापत्त्या संशयविपर्यासप्रतिपादकवेदेऽप्रामाण्यप्रसङ्गात् । अधिगतार्थगन्तृत्वं वेदभागेपि पुनर्दर्शने भवति तद्वारणायाहुः लोकानधिगत इति । यागब्रह्मणोः पुनः पुनर्ज्ञानेपि वेदाधिगतत्वेपि लोकानधिगतत्वान्नाव्याप्तिरित्यर्थः । इदं लक्षणं दूष्यत्वेन जयराम्यामपि शिरोमणिटीकायामादृतम् । दूषणं तु लोकानधीति भाष्याभासोक्तम् । परिहारस्तु भाष्यम् । प्रकृते । अप्रामाणिकत्वादिति द्वैतापादकत्वेन दृव्याद्वैतप्रमाऽजनकत्वात्तथा । तथात्वेनेति ब्रह्मप्रतिपादकत्वेनेत्यर्थः । नान्य इति अशब्दशब्दोत्र प्रकृतिवचन इति शंकराचार्यप्रभृतयः । सोन्यः सूत्रार्थः । स नेत्यर्थः । एवकारव्यवच्छेद्योप्ययमर्थः । अन्यैः सांख्यमत्र निरस्तमित्युक्तम् । तस्यानतिप्रयोजकत्वे हेतुमाहुः सांख्येत्यादि ।

एतेन 'मनसैवानुद्रष्टव्यम्' इत्यपि समर्थितम् । तस्मात् सृष्ट्यादिप्रतिपादका अपि वेदान्ताः साक्षाद् ब्रह्मप्रतिपादका इति सिद्धम् ॥ ४ ॥

भाष्यप्रकाशः ।

करणस्याग्रे आनुमानिकाधिकरणे करिष्यमाणत्वेनात्र तत्प्रयोजनाभावात् । अतो गृहप्रविष्टचौरतुल्यस्य मिथ्यावादिन एव निराकरणायेदं सूत्रमित्यर्थः । नन्वेवं सति सूत्रत्वव्याख्यानत्वादीनां सूत्रान्तरादिष्वपि सत्त्वाद् तद्व्याख्यानादिकमपि कुतो न संगृह्यत इति चेद्, उच्यते ।

'किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन' ॥

इत्येकादशस्कन्धे 'वेदान्तकृद्वेदविदेव चाहम्' इति गीतायां च भगवद्वाक्याद् यथावस्थितवेदार्थवेत्ता भगवानेव । स तु, मां विधत्त इत्यादि, 'वेदैश्च सर्वैरहमेव वेद्यः' इति च वक्ति । तथा,

'वदन्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ।
तेषां विकल्पप्राधान्यमुताहो एकमुख्यता' ॥ इत्युद्धवप्रश्ने,
'कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ।
मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥
तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ।
ततो भृग्वादयोऽगृह्णन् सप्त ब्रह्ममहर्षयः ॥
तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः ।
मनुष्याः सिद्धगन्धर्वाः सविद्याधरचारणाः ॥
किंदेवाः किन्नरा नागा रक्षःकिंपुरुषादयः ।
बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः ॥
याभिर्भूतानि भिद्यन्ते भूतानां मतयस्तथा ।
यथाप्रकृति सर्वेषां चित्रा वाचः स्रवन्ति हि ॥
एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम् ।
पारंपर्येण केषांचित् पाषण्डमतयोऽपरे ॥
मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ।
श्रेयो वदन्त्यनैकान्त्याद् यथाकर्म यथारुचि' ॥ इत्याद्याह,

अत्रागृह्णन्नित्यस्य किंपुरुषादय इत्यन्तं पृथक्संबन्धः । बह्वीनां प्रकृतीनां चित्रवाङ्निर्गमहेतुत्वम् । शेषं तु स्फुटमेव । तेन भगवदुक्तिविरुद्धस्य वेदव्याख्यानत्वप्रतीतावपि तस्य व्याख्यानत्वाभाव एव सिद्ध इति तन्न संगृह्यत इत्यवधेहि । एवं शब्दब्रह्मोक्तिं साधयित्वा तेन सिद्धमाहुः एतेनेत्यादि । एवं वैदिकशब्दप्रतिपाद्यत्वसमर्थनेन मनसैवानुद्रष्टव्यमिति श्रुतिसिद्धं कामवि-

रश्मिः ।

अग्र इति चतुर्थपाद इत्यर्थः । चित्रवागिति वाचश्च वेदव्याख्यानरूपा ज्ञेयाः । एतेनेति पर्वी उक्तः । कामपदं क्रोधोपलक्षकम् । वेदव्याख्यातृवाग्विषयत्वेन तत्साध्यत्वारसेन ।

स्यादेतत्। कर्तृत्वमकर्तृत्वं च वेदे प्रतीयते ब्रह्मणः। 'यतो वा इमानि भूतानि जायन्ते', 'स आत्मान५ स्वयमकुरुत,' 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्,' 'असङ्गो ह्ययं पुरुषः' इत्येवमादिवाक्येषु। तत्र द्वेधा निर्णयः संभवति। सर्वभवनसमर्थत्वाद्विरुद्धसर्वधर्माश्रयत्वेन, अन्यतरबाधाद्वा। अलौकिकापेक्षया लौकिकस्य जघन्यत्वात् कर्तृत्वादेर्लोकसिद्धत्वात् कर्तृत्वबाध एव युक्तः। ईक्षत्यादिकं तु प्रकृतिगुणसंबन्धादपि ब्रह्मणो युज्यते। तस्मादलौकिकसर्वभवनसमर्थत्वादिकल्पनापेक्षया लौकिक एवान्यतरबाधो युक्तः। ततश्च सत्यस्वरूपादन्यदेवैतदिति स्वयमेवाशङ्क्य परिहरति सूत्रकारः।

भाष्यप्रकाशः।

वर्जितातिशुद्धमनसानुद्रष्टव्यमिति समर्थितम्। अपिशब्दात्, 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्' इत्यादीनामपि संग्रहः। एवं व्यवस्थया विरोधपरिहारेण ब्रह्मणः सर्वप्रमाणाविषयत्वतद्विषयत्वयोः समर्थनेन यत् सिद्धं तन्निगमयन्ति तस्मादित्यादि। एवं ब्रह्मणोऽलौकिकप्रमाणगम्यत्वाद्वेदान्तानां ब्रह्मप्रतिपादकत्वेन विचारणीयत्वं सिद्धमित्यर्थः॥ ४॥

अतः परं, गौणश्चेन्नात्मशब्दादिति द्वितीयं सूत्रमवतारयन्ति स्यादेतदित्यादि। कर्तृत्वमकर्तृत्वं चेति चकारादुपादानत्वमनुपादानत्वं च। अत्र पूर्वश्रुतौ हेतुत्वमात्रं प्रतीयते। तत्प्रकारान्तरेणापि संभवतीत्यतो द्वितीयश्रुत्युपन्यासः। तत्र कर्तृत्वं स्फुटमिति तद्विरुद्धं निष्क्रियत्वं शान्तत्वं च। तृतीयश्रुतौ तथैवोपादनत्वविरुद्धं निष्कलत्वं निरवद्यत्वं च। चतुर्थ्यामसङ्ग इत्यनेनासक्तेः संसर्गस्य च निषेधः क्रियां विकारित्वं च विरुणद्धि। युक्त इति उत्पत्तिशिष्टोत्पन्नशिष्टन्यायेनोपजीव्योपजीवकभावेन च बुद्धावारोहाद्युक्तः। एतदिति शबलं स्वरूपम्।

रश्मिः।

समर्थितमिति न यत्र मनो निविशत इतिवाक्येन मनोऽविषये मनसैवेति बृहदारण्यकविरुद्धमतो विमतं ब्रह्म वेदो व्याख्यातृमनोविषयं वेदव्याख्यातृवाग्विषयत्वात्। अस्मदादिवाग्विषयवत्। तथा च श्रुतिः 'यन्मनसा ध्यायति तद्वाचा वदति' इति। एवं समर्थितमित्यर्थः। भक्तेर्दुर्लभत्वादप्रकरणत्वाच्च। 'भक्तिरस्य भजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन्मनःकल्पनमेतदेव च नैष्कर्म्यम्' इतिश्रुतेर्विषयः। अत एवाहुः अपीति। अत्र धीरत्वेन प्रत्यगात्मदर्शनत्वे कार्यकारणभावः सोपि भक्तिमार्गविषयः। विवेकधैर्याश्रयग्रन्थस्य भक्तिमार्गीयत्वात्। आदिशब्देन 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इतिश्रुतिः मैत्रेयीब्राह्मणस्थत्वाद्भक्तिमार्गीयत्वम्। एवं 'तरति शोकमात्मवित्' इत्यत्र सर्वात्मभावप्रकरणीयत्वात्। तस्मादुक्तश्रुतिरत्रेति ज्ञेयम्। व्यवस्थेति प्रमाणबलेनाविषयः स्वेच्छया विषयः। ब्रह्मप्रतीति स्वरूपलक्षणवन्निर्वाहकसंगत्या साक्षाद्ब्रह्मप्रतिपादकत्वेनेत्यर्थः। तेन चिद्रूपे लक्षणाव्याप्तिः परिहृता। तेनैव प्रकृतिपरमाण्वादावतिव्याप्तिरपि निवारिता॥ ४॥

अवतारयन्तीति प्रसङ्गसंगत्यावतारयन्तीत्यर्थः। प्रकारान्तरेणेति निमित्तत्वमात्रेणेत्यर्थः। उत्पत्तिशिष्टेत्यादि द्वितीयस्य द्वितीयपादे 'गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात्' इतिसूत्रे वैश्वदेव्यामिक्षेति यागं विधायाम्नायते वाजिभ्यो वाजिनमिति। तत्रोत्पत्तावामिक्षारूपद्रव्ययुक्तं कर्मावधारितमिति न तत्र वाजिनरूपद्रव्यान्तरसंबन्धापेक्षेति वाजिनं तत्र प्रवेशमलभमानं सत् कर्म भिनत्ति इति स्थितम्। तेन न्यायेनेत्यर्थः। उपजीव्येत्यादि एतच—

'उपजीव्यत्वतः श्रौतवाक्यैश्चान्यपरत्वतः। अन्तरङ्गत्वतश्चापि निर्विशेषं निरूप्यते'॥

इत्यादिपूर्वपक्षग्रन्थे विद्वन्मण्डने स्फुटम्। एतदितीति स्यादेतदिति भाष्यान्वय इत्यर्थः।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥

ईक्षत्यादियुक्तः परमात्मा गौणः प्रकृतिगुणसत्त्वसंबन्धवानिति चेन्न तथा वक्तुं न शक्यते । कुतः । आत्मशब्दात् । 'आत्मा वा इदमेक एवाग्र आसीत्' इत्युपक्रम्य, 'स ऐक्षत' इत्युक्तम् । आत्मशब्दः पुनः सर्वेषु वेदान्तेषु निर्गुणपरब्रह्मवाचकत्वेनैव सिद्धः । तस्यैव जगत्कर्तृत्वं श्रुतिराह । ननु चोक्तमन्यतरबाधो युक्त इति । न युक्तः । स्वातन्त्र्याभावेन सगुणस्य कर्तृत्वायोगात् । वेदाश्च प्रमाणभूताः । ततः सर्वभवनसामर्थ्यमेव श्रुतिबललभ्यमङ्गीकर्तव्यम् ।

भाष्यप्रकाशः ।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥ अयुक्तत्वे हेतुमाहुः स्वातन्त्र्याभावेनेत्यादि । कारकमात्रस्य स्वव्यापारं प्रति स्वातन्त्र्ये सत्यपि यत् कर्तृलक्षणतया स्वातन्त्र्यस्य कीर्तनं तत् कारकान्तरनियामकतयैवातो गुणानामुपादानत्वे वा करणत्वे वाऽवश्यं कर्तृनियम्यतैव युक्ता, न तु प्रयोजकता । तथा सति तेषामेव सृष्ट्यादिकार्ये स्वातन्त्र्येण ब्रह्मनियामकतया सगुणस्य स्वातन्त्र्याभावेन कर्तृत्वायोगादित्यर्थः । ननु गुणानां जडत्वेन चेतनाधीनत्वान्न सगुणस्य स्वातन्त्र्यहानिरतो गुणसंबन्धिन्येव कर्तृत्वं युक्तमित्यत आहुः वेदाश्चेत्यादि । अनपेक्षत्वाद्भगवन्निःश्वासरूपत्वाच्च वेदाः स्वतः प्रमाणभूताः । ते च, 'सदेव सौम्येदमग्र आसीत्', 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यादिषु विशेष्यान्वितेनैवकारेणेतरयोगं व्यवच्छिन्दन्तस्तदानीं केवलस्य शुद्धस्यैवात्मनः कर्तृत्वमावेदयन्ति । नच कालवाचकाग्रपदेन तत्सत्ताया अपि बोधनादेवकारो नान्ययोगव्यवच्छेदक इति शङ्क्यम् । बोधनार्थमेव तथोक्तेः । कथमेतदितिचेदित्थम् । इयं हि श्रुतिः सर्वापेक्षया प्राथमिकं वृत्तान्तं वक्ति । तत्रैवकारेण सदितरयावद्व्यवच्छेदे भिन्नविधप्रमाणान्तरस्यापि व्यवच्छिन्नत्वात् तस्याप्यभावेनाग्रपदे प्रमाणान्तरसिद्धकालानुवादकतया वक्तुमशक्यत्वेन, एतस्यैव वाक्यस्य कालसत्ताबोधकत्वे चात्मासीत् कालोऽप्यासीदित्येवं वाक्यभेदप्रसङ्गेन कालसत्ताया अशक्यवचनत्वे केवलस्यात्मनोऽपि निरूपणमशक्यमिति वाक्यस्याबोधकत्वे प्रसक्ते सृष्ट्युत्तरव्यवहारानुसारेण सर्वाधारतया प्रतीयमानो यः कालस्तदुपरञ्जनेन पूर्ववृत्तान्तं वक्तीत्येवं बोधनार्थत्वं जानीहि । अत एव सृष्ट्युत्तरमपि केवलं ब्रह्मैवेति बोधनाय सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्येवं श्रुत्यन्तरेऽप्युच्यते । एवं तदानीमितराभावे गुणानां सत्ता तदानीं वक्तुं न शक्यत इति न सगुणः कर्ता । नचोत्पत्तिशिष्टन्यायस्योपजीव्यन्यायस्य वा

रश्मिः ।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥ **कीर्तनमिति** 'स्वतन्त्रः कर्ता' इति सूत्रे कीर्तनमित्यर्थः । **गुणानामिति** प्राकृतानामित्यर्थः । **निःश्वासेत्यादि** व्यासादिभिरुच्चार्यमाणा वेदाः परंपरया निःश्वासा इति वक्तव्यम् । **एवकारेणेत्यादि** सदन्ययोगव्यवच्छेदवदिदमिति । एकान्ययोगव्यवच्छेदवानात्मेति च यथायथं बोधात्तथेत्यर्थः । **नान्ययोगेत्यादि** किंत्वयोगव्यवच्छेदक इति भावः । तथा च सत्त्वावच्छिन्न इदंत्वावच्छिन्नायोगव्यवच्छेदवान् तथैकत्वावच्छिन्न आत्मायोगव्यवच्छेदवानिति च बोधात्कालसत्तायामपि न क्षतिरिति भावः । **वाक्यभेदेत्यादि** वाक्यभेदस्य दोषत्वं गौरवप्रसञ्जकतया पौरुषेयत्वं वा दूषकताबीजं पुरुषाणां दोषत्वस्य संभावितत्वात् ।

किंच । अस्तिभातिप्रियत्वादिधर्मवद्ब्रह्मगतकर्तृत्वं लोके प्रतीयते । कार्यत्वात् । तस्मादात्मशब्दप्रयोगाद् गुणातीतमेव कर्तृ ॥ ५ ॥

भाष्यप्रकाशः ।

प्रवृत्तिरत्र शङ्कनीया । विरुद्धधर्माधारत्वेन बाध्यबाधकभावाभावात् । ततः श्रुतिबललभ्यं, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपेषु षट्सु प्रमाणेषु श्रुतिबलसिद्धं ब्रह्मणः सर्वभवनसामर्थ्यमेवाङ्गीकर्तव्यमित्यर्थः ।

ननु मास्त्वेवं कर्तृत्वादिबाधस्तथापि कर्तृत्वस्य लौकिकत्वं नापैतीति तत एव तद्बोधोऽस्त्वित्यत आहुः किंचेत्यादि । प्रियत्वादीत्यादिपदेनापहतपाप्मत्वसंग्रहः । तथाच ब्रह्मधर्मस्य

रश्मिः ।

विरुद्धेत्यादि । साधनाध्यायद्वितीयपादे 'अम्बुवदग्रहणात्' इत्यधिकरणे वक्ष्यमाणेन विरुद्धधर्माधारत्वेन बाध्यबाधकभावाभावेन निर्गुणे धर्मप्रवेशस्य संभवेनोपजीव्यत्वादीनां सगुणप्रतिपादकास्वपि सत्त्वेन न न्यायप्रसर इत्यर्थः । ततः सर्वेत्यादि भाष्यं विवृण्वन्ति ततः श्रुतीत्यादि । तत्र 'निरपेक्षो रवः श्रुतिः' 'सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते' इति पदार्थे लिङ्गं 'समभिव्याहारो वाक्यम्' 'उभयाकाङ्क्षा प्रकरणम्' 'देशसामान्यं स्थानम्' समाख्या यौगिकः शब्दः तत्र यजेत इत्याद्या विधात्री श्रुतिः । व्रीह्यादिरूपा अभिधात्री विनियोक्त्री च । स यस्य शब्दस्य श्रवणमात्रेण संबन्धप्रत्ययः । सा च त्रिधा विभक्तिरूपा, एकाभिधानरूपा, एकपदरूपा चेति । 'व्रीहिभिर्यजेत' इत्यत्र विभक्तिरूपया तृतीयया श्रुत्या व्रीहीणां यागाङ्गत्वम् । पशुना यजेत इत्यत्रैकत्वपुंस्त्वयोः समानाभिधानरूपया श्रुत्याङ्गत्वम् । यजेत इत्याख्याताभिहितसंख्याया भावनाङ्गत्वम् । समानाभिधानश्रुतेरेव पदश्रुत्या च यागाङ्गत्वं 'बर्हिर्देवसदनं दामि' इत्यस्य लवनाङ्गत्वलिङ्गेनायं मन्त्रो लवनं प्रकाशयितुं समर्थः । वाक्येन यस्य पर्णमयी जुहूर्भवतीत्यत्र पर्णताया जुह्वङ्गत्वम् । साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चरणरूपवाक्यसत्त्वात् । प्रकरणेन प्रयाजादिषु समिधो यजतीति । अत्रेष्टविशेषस्यादर्शनात्समिधा योगेन किमित्यस्त्युपकार्याकाङ्क्षा । दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत् कथमित्यस्त्युपकारकाकाङ्क्षा तया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् । स्थानेन यथासंख्यपाठरूपेण 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् वैश्वानरं द्वादशकपालं निर्वपेत्' इत्येवं विहितेष्टिषु इन्द्राग्नी रोचनादिव इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं विनियोगाः संनिधिपाठरूपेण स्थानेन वैकृतानामङ्गानां प्राकृताङ्गाननुवादेन विहितानां विकृत्यर्थत्वम् । तेषां कैमर्थ्याकाङ्क्षायाः फलवद्विकृत्यपूर्वस्य भाव्यत्वेन संबन्धादेव पूरणात् । अनुष्ठानसादेश्यरूपेण स्थानेन पशुधर्माणामग्नीषोमीयार्थत्वं समाख्यया वैदिक्या होतृचमस इति होतुश्चमसभक्षणाङ्गत्वं लौकिक्याध्वर्यवसमाख्ययाध्वर्योस्तत्तत्पदार्थाङ्गत्वम् । एवेति लिङ्गादिषु प्रत्यक्षस्य विनियोजकस्य शब्दस्याभावात्ते श्रुतितो निर्बला इत्येवकारः । अत एव गार्हपत्यमुपतिष्ठत इत्यत्र लिङ्गादैन्द्या इन्द्रोपस्थानार्थत्वं कल्प्यते । तावत्प्रत्यक्षया श्रुत्या गार्हपत्योपस्थानार्थत्वं प्राप्यत इति दृश्यते मीमांसायाम् । अपैतीति अप आ एतीति पदच्छेदः तेन नात्र वृद्धिदोषः न पररूपं, वृद्ध्यनन्तरं तथास्तु । तथाचेति अस्तिभातिप्रियत्वाश्रयत्वेन-

नन्वात्मशब्दोऽपि लोकवद् गौणोऽस्तु । लोके हि केनचित् पृष्टो विष्णुमित्र आह, यज्ञदत्तो ममात्मेति । अत्र गौणत्वमुपचार इत्येवं प्राप्तेऽभिधीयते ।

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥

एवं हि श्रूयते । 'असद्वा इदमग्र आसीत्, ततो वै सदजायत,' 'तदात्मानꣳ स्वयमकुरुत' इत्युपक्रम्य, 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति' इति । प्रापञ्चिकधर्मरहिते ब्रह्मणि एतस्मिन् पूर्वोक्तजगत्कर्तरि परिनिष्ठितो मुक्तो भवतीत्यर्थः । तत्र यदि जगत्कर्ता गौणः स्यात् तन्निष्ठस्य संसार एव स्यान्न मोक्षः ॥ ६ ॥

भाष्यप्रकाशः ।

कर्तृत्वस्य लोके प्रत्ययेन तस्य कार्यासाधारण्याभावान्न लौकिकत्वमिति न तत्प्रयुक्तोऽपि बाध इत्यर्थः । सिद्धमाहुः तस्मादित्यादि । केनापि प्रकारेण बाधस्य वक्तुमशक्यत्वादात्मशब्दश्रुतिरूपमुख्यप्रमाणप्रमितत्वाच्च तथेत्यर्थः ॥ ५ ॥

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥ एवं द्वितीयसूत्रं व्याख्याय, 'तन्निष्ठस्य मोक्षोपदेशात्' इति तृतीयसूत्रमवतारयन्ति नन्वात्मेत्यादि । लोकवत्पदं विभजन्ते लोके हीत्यादि । तथाच मास्तु गुणसंबन्धाद् गौणत्वमात्मनस्तथाप्यात्मपदश्रुतेर्मुख्यौपचारिकसाधारण्येन संदिग्धत्वान्नानया निर्णय इति पूर्वपक्षाशयः । अत्र सूत्रं पठित्वा समादधते एवं हीत्यादि । असदिति लौकिकविलक्षणमव्याकृतम् । यदा ह्येवेत्यस्यार्थस्तु, यदा यस्मिन् काले, ह्येव निश्चयेनैव, एष साधक, एतस्मिन् पूर्वोक्ते ब्रह्मणि, अदृश्ये नामरूपशून्ये, अनात्म्ये आत्मन इदमात्म्यं शरीरं तद्रहिते, अनिरुक्ते विकारो हि विशेषवशान्निरुच्यते नत्वविकार इति विकारशून्यत्वाद् विदिताविदितात् परत्वेन निर्वक्तुमशक्यत्वाद्वा अनिरुक्ते, एवं भूते ब्रह्मणि अभयं यथा स्यात् तथा प्रतिष्ठां स्थितिं विन्दते 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति' इत्येवंरूपां प्राप्नोति, अथ तदनन्तरमेव स साधकः, अभयं गतो मुक्तिं प्राप्तो भवतीति । तदाहुः प्रापञ्चिकेत्यादि । सूत्रसिद्धं निर्णयमाहु-

रश्मिः ।

कुलालादिषु ब्रह्मकार्यत्वेन ब्रह्मत्वे सतीत्यर्थः । अथवा ब्रह्मास्तीत्यादिप्रत्ययात् सत्तादिकर्तृत्वे विवादे ब्रह्मगते लोके प्रतीयमाने सतीत्यर्थः । एतद्बोधनायैव भाष्येऽस्तिभातीत्यादिकं ब्रह्मविशेषणम् । **कार्यासाधारण्येत्यादि** कार्यमात्रवृत्तित्वाभावादित्यर्थः । **आत्मशब्देति** आत्मशब्दरूपा श्रुतिः । निरपेक्षस्वरूपा तद्रूपेत्यादिः । **अवतारयन्तीति** हेतूपपादकत्वेनोपोद्घातसंगत्यावतारयन्तीत्यर्थः । **गुणसंबन्धादिति** प्राकृतगुणसंबन्धादित्यर्थः । **भाष्ये** । लोके यादृशं गौणत्वं तदाहुः अत्रेत्यादि ॥५॥

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥ प्रकृते । पञ्चमस्कन्धे 'योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवे तन्निमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः' इतिगद्यात् । स्थितिश्च सर्वात्मभावस्तस्यैव फलजनकत्वादित्याशयेनाहुः यत्र नान्यदित्यादि । तदुक्तम् ।

'ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ।
यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे' ॥ इति ।

किंच ।

हेयत्वावचनाच्च ॥ ७ ॥

इतोऽपि निर्गुण एव जगत्कर्ता । वेदान्तेषु सर्वत्र साधनोपदेशो पुत्रादिवज्जगत्कर्ता हेयत्वेन नोपदिश्यते । यदि सगुणः स्यात् प्राकृतगुणपरिहारार्थं मुमुक्षुभिर्जगत्कर्ता नोपास्यः स्यात् पुत्रादिवत् । अत ईक्षत्यादयो न सगुणधर्माः । सूत्रत्रयस्य ईक्षतिहेतुसाधकत्वाच्चकारः । एवं सूत्रचतुष्टयेन ईक्षतिहेतुना जगत्कर्तृत्वोपपत्त्या सृष्टिवाक्यानां ब्रह्मपरत्वमुपपादितम् ॥ ७ ॥

भाष्यप्रकाशः ।

स्तत्रेत्यादि । तथाचास्यां श्रुतावुपक्रमगतं कर्तृभूतं ब्रह्मैवेति तस्मिन्नित्यनेन परामृश्य तस्यैव प्रापञ्चिकधर्मराहित्यबोधनेन विरुद्धधर्माधारत्वं निगमयित्वा तादृशे तस्मिन् परिनिष्ठितस्य मुक्तिं वदन्ति । तथान्यत्रापि, सदेव सौम्येदमित्यादिना कर्तृत्वादिविशिष्टं ब्रह्मोक्त्वा, 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति । अतस्तादृशब्रह्मनिष्ठस्य मोक्ष उपदिश्यत इति सृष्टिप्रकरणोक्तं फलमेव तत्रत्यात्मशब्दस्यौपचारिकत्वनिवर्तकं तात्पर्यलिङ्गत्वादिति सूत्राशय इत्यर्थः ॥ ६ ॥

हेयत्वावचनाच्च ॥ ७ ॥ आत्मशब्दस्यात्र गुणातीत एव कर्तरि तात्पर्यमिति बोधयन्तश्चतुर्थसूत्रमाहुः किंच । हेयत्वावचनाच्चेत्यादि । अर्थस्तु निगदव्याख्यातः । तथा चात्रोपपत्ति-

रश्मिः ।

तथान्यत्रेति छान्दोग्येऽष्टम इत्यर्थः । पुरुषो वेदेति पुरुषः स्त्री वेहेत्यर्थः । संपत्स्य इति भक्तिफलबोधकपदसमभिव्याहारात् । चिरमिति सत्संपत्तौ विलम्ब इत्यर्थः । तदाहुः अत इत्यादि । तत्रत्येति आत्मा वा इदमिति श्रुतिभवेत्यर्थः । न 'चात्मा वा इदम्' इत्यादिश्रुतिरन्यत्र वर्तते । 'असद्वा इदम्' इत्यादिश्रुतिः तैत्तिरीय आनन्दवल्ल्यामित्यन्यत्रोक्तं फलमुपचारनिवर्तकं कथं कथं चास्य तन्निवर्तने हेतुतेति शङ्के पराकुर्वन्ति तात्पर्येत्यादि । तथा च तदात्मानमित्यत्रात्मशब्दस्यानुपचरित एवात्मनि तात्पर्यमिति फलेन स्वसमभिव्याहारद्वारा बोधनात्तादृशतात्पर्ये लिङ्गत्वादुपचारनिवर्तने हेतुत्वं तैत्तिरीयस्थात्मनोनुपचरितत्वसमर्थनेनान्यत्रात्मा वा इदमिति श्रुतावपि तदुपचारनिवर्तनादित्यर्थः । भाष्ये । किं चेति हेत्वन्तरनिरूपणमारभ्यत इत्यर्थः ॥ ६ ॥

हेयत्वावचनाच्च ॥ ७ ॥ भाष्ये । निर्गुण इति प्रकृतिगुणसंबन्धरहित इत्यर्थः ।

'आत्ममायामृते राजन् परस्यानुभवात्मनः ।
न घटेतार्थसंबन्धः स्वप्नद्रष्टुरिवाञ्जसा' ॥

इति वाक्येवस्थितमतस्थेष्यात्ममाया सा शुद्धसत्त्वरूपास्त्येव 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः' इति वाक्यात् । सर्वत्रेति बृहदारण्यकादिषु 'किं प्रजया करिष्यामः अमृतत्वस्य तु नाशास्ति' इत्यादिनेत्यर्थः । सगुण इति प्राकृतगुणसत्त्वसहित इत्यर्थः । नोपास्यः स्यादिति 'तज्जलान् शान्त उपासीत' इत्यादिषु तथा न स्यादित्यर्थः । न च शुद्धसत्त्वप्रधाना माया तत्र प्रतिबिम्बितं चैतन्यमीश्वरपदवाच्यं मलिनसत्त्वप्रधानाऽविद्या तत्र प्रतिबिम्बितं चैतन्यं जीव इत्युपाधिभेदकृतविशेषेण हेयत्वोपादेयत्वोपपत्तिरिति शङ्क्यम् । प्रतिबिम्बपक्षस्य

अतः परं स्वतन्त्रहेतूनाह, 'स्वाप्ययाद्', 'गतिसामान्यात्', 'श्रुतत्वाच्च' इति सूत्रत्रयेण ।

ननु किमर्थं हेत्वन्तराणि । साधकत्वे एकेनापि नतिसिद्धेः । असाधकत्वे शतेनाप्यसिद्धेरितिचेत् । मैवम् । रूपभेदार्थं हेत्वन्तराणि । नानाविधान्नभोजनतृप्तिवत् । तद्यथा आत्मशब्दात्, तन्निष्ठस्य मोक्षोपदेशाद्, हेयत्वावचनाच्चेति निर्गुणस्य स्वरूपपरतया कार्यपरतया च । कार्यस्य पुनर्विधिनिषेधभेदाद् द्विरूपतेति । एवमुत्तरत्रापि प्रपञ्चयिष्यते ।

तत्र सृष्टिवाक्यानामीक्षतिहेतुना भगवत्परत्वमुक्तम् । इदानीं प्रलयवाक्यानामाह ।

भाष्यप्रकाशः ।

रूपात् तात्पर्यलिङ्गादप्यात्मशब्दस्य गुणातीतवाचकत्वेन निर्णयादीक्षत्यादयो न सगुणधर्मा इत्यर्थः । शेषं स्फुटम् ॥ ७ ॥

अग्रिमसूत्राण्यवतारयन्ति अतः परमित्यादि । स्वतन्त्रहेतूनिति वेदान्तवाक्यानां ब्रह्मपरत्वप्रतिपादने प्रत्येकं समर्थान् हेतून् । एतेषां हेतूनां वैयर्थ्यमाशङ्कते नन्वित्यादि । समादधते मैवमित्यादि । रूपभेदार्थमिति ब्रह्मणो व्यवहार्यत्वे केवलं सृष्टिरेव न द्वारं, किंतु द्वारान्तराण्यपि सन्ति तानि तत्तद्रूपनियतानीति तेषां रूपाणां विशेषस्य ज्ञापनार्थम् । एवं तात्पर्योक्तौ गमकमाहुः तद्यथेत्यादि । तथाच चतुःसूत्र्यामाद्येनेक्षतिं सामान्यत उक्त्वा द्वितीयो हेतुः स्वरूपपरतया ततोऽग्रिमौ द्वौ कार्यपरतया चेति हेतुत्रयमुक्तम् । तथाग्रे त्रिसूत्र्यामपि कार्यान्तरपरतयेत्यर्थः । कथं कार्यान्तरपरतेत्यत आहुः कार्यस्येत्यादि । द्विरूपतेतीति । इति अस्माद्धेतोर्हेत्वन्तराण्युच्यन्त इत्यर्थः । एवमेवात्र तात्पर्यमित्यत्र गमकमाहुः एवमित्यादि ।

रश्मिः ।

द्वितीयाध्याये दूष्यत्वात् । इदं च भाष्यं साक्षाद्भक्तिर्नास्त्येव दृष्ट एव स्नेह इत्युपपत्तेरिति पक्षमनुग्रहीतुम् । अदृष्टेपि मनोव्यापाररूपोपासासंभवात् । सौत्रश्चकारः समुच्चयं द्योतयतीत्याहुः सूत्रेत्यादि । एवं सूत्राद्यर्थो निगदेन व्याख्यात इत्यर्थः । प्रकृते । सिद्धमाहुस्तथाचेत्यादि । तात्पर्यलिङ्गादिति । षष्ठीतत्पुरुषः उपपत्त्या तात्पर्यं वक्तुरिच्छा लिङ्ग्यते प्राप्यत इति । शेषमिति सूत्रत्रयेत्यादिभाष्यमित्यर्थः । घञजपाः पुंसीत्यस्य प्रायोवादत्वान्नपुंसकत्वमपि । हेतूनिति । साध्यं तु नाशब्दमित्येव । एतदेवाहुर्वेदान्तवाक्यानामित्यादि । द्वारान्तराणीति लयमोक्षसाम्यसर्वकार्यरूपाणीत्यर्थः । तेषामिति स्वाप्ययत्वगतिसामान्यश्रुतत्वानामित्यर्थः । द्विरूपतेतीति विधिनिषेधरूपविषयिभेदान्मोक्षहेयत्वरूपविषयस्य भेदः । एवमित्यादीति । उत्तरत्रेति अत्रैवाग्रे तेनात्र त्रिसूत्र्याम् । यथा गौणश्चेदिति सूत्रे ब्रह्मशब्दं विहाय आत्मशब्दो निर्गुणस्य स्वरूपपरतयोक्तः । द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्तीति गृह्यसूत्रात् प्रयोगेधोक्षजब्रह्मस्थल आत्मशब्दप्रयोगोधोक्षजत्वेपि हिरण्यगर्भप्रयोगे तथादर्शनात् ।

---

१. द्वितीयसुबोधिन्याम् ।

स्वाप्ययात् ॥ ८ ॥

ब्रह्मणो न सर्वव्यवहारातीतत्वम् । कुतः स्वाप्ययात् । स्वस्मिन्नप्ययात् । तत्र चित्प्रकरणत्वाज्जीवस्योच्यते । एवं हि श्रूयते । 'यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति तस्मादेनं स्वपिति' इत्याचक्षते । स्वं ह्यपीतो भवतीति ।

स्वपितीति न क्रियापदं, किंतु जीवस्य नाम । तदेव स्वपितिनामत्वं यदा सता संपद्यते । सति स्वशब्दवाच्ये अपीतिं लयं प्राप्नोतीत्यर्थः । अहरहर्जीवो ब्रह्म संपद्य ततो बलाद्यधिष्ठानं प्राप्य पुनर्नव इव समायाति । वासनाशेषात् । स्वशब्देन चाभेदः । अर्थतः सच्छब्दसामानाधिकरण्यान्निर्गुणत्वम् ।

भाष्यप्रकाशः ।

स्वाप्ययात् ॥ ८ ॥ एवं सूत्रत्रयप्रयोजनमुक्त्वा पूर्वसंगतिज्ञापनाय तत्रोक्तमनुवदन्तः स्वाप्ययसूत्रमवतारयन्ति तत्रेत्यादि । व्याकुर्वन्ति तत्र चिदित्यादि । उच्यत इति लय उच्यते । श्रूयत इति छान्दोग्ये श्वेतकेतूपाख्याने श्रूयते । श्रुतिं व्याकुर्वन्ति स्वपितीति । नेत्यादि तथाच सत्संपत्तिरहितस्वापदशायां तु स्वपितीति यत्र प्रयोगस्तत्रास्य क्रियापदत्वमेव । सत्संपत्तिदशायां तु स्वशब्दस्यात्मवाचकत्वेन सति स्वशब्दवाच्य आत्मनि अपीतिं लयं प्राप्नोति । तदा तस्मिन् पितिर्लयो यस्यासौ स्वपितिः । पृषोदरादित्वादकारनाश ईकारस्य विकृतौ च सत्यां स्वपितिनाम्नः सिद्धिः । वस्तुतस्तु केवलयौगिकत्वे नामत्वाभावाद् योगरूढोऽयं शब्द इत्यर्थः । एवंप्रकारेण हेतुकथनस्य प्रयोजनमाहुः अहरहरित्यादि । अयमर्थः । सुषुप्तिस्तावद् द्विधेति तदभावो नाडीष्वित्यत्र वक्तव्यम् । तथा छादोग्य एव श्राव्यते 'तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तोऽपि न विन्देयुरेवमेवेमाः सर्वाः प्रजा

रश्मिः ।

'ब्रह्मन् पुंसि च' इति व्याकरणसूत्रात् । कार्यं मोक्षो हेयत्वं च ते सूत्रद्वये तथात्र स्वाप्ययादित्यत्र निर्गुणस्य स्वरूपपरतया सूत्रद्वये मोक्षः सर्वकार्यत्वं चेत्येवं कार्यपरतया तत्राप्यस्य प्रपञ्चः करिष्यत इति । पूर्वसंगतीति निर्वाहकत्वसंगतिज्ञापनायेत्यर्थः । ननु भाष्ये प्रसङ्गसंगतेः सूचनान्नायं प्रकाशार्थ इति चेन्न । सामान्यलक्षणस्य गौरवग्रस्तत्वेनास्यार्थस्यानतिरेकात् । भाष्ये तु सूत्रयोः संगतिरुक्ता प्रसङ्गरूपा । सा सामान्यलक्षणम् । किमन्यं नाशब्दत्वनिर्वाहकमिति जिज्ञासया त्रिसूत्र्यवतारात् । एवं च सामान्यसंगतेः सूचितत्वेनाभिहितमुक्तम् । तत्रेत्यादीति । प्रलय इति ब्रह्मविद्योपनिषदि 'यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरात्' इत्यत्रोत्पत्त्यनन्तरं लयोक्तेरत्रापि लय उक्तः । स्थितिस्तु चशब्दार्थ इत्यकथनेऽप्यदोषः ॥ ७ ॥

स्वाप्ययात् ॥ ८ ॥ भाष्ये । ब्रह्मण इत्यादि, अग्रे व्युत्पाद्यम् । तत्र चिदित्यादीति चित्प्रकरणं चिद्रूपस्य ज्ञानप्रधानस्येत्यादिभाष्येणोक्तमेव । प्रकृते । अपितेः पितिरूपतां संपादयन्ति पृषोदरेत्यादि । विकृताविति ह्रस्वेकाररूपायामित्यर्थः । नामत्वाभावादिति पाचकपाठकादिवत्तथात्वादित्यर्थः । योगरूढ इति पङ्कजादिपदवदित्यर्थः । स्वं ह्यपीतो भवतीत्यस्य यः प्रकृतः सच्छब्दवाच्यस्तमपीतो भवत्यपिगतो भवतीत्यर्थः । वक्तव्यमिति तृतीयस्य द्वितीयपादे

ननु प्रलये वक्तव्ये कथं सुषुप्तिः । मोक्षातिरिक्तदशायां तथाकर्मसंबन्धाभावादिति ब्रूमः ॥ ८ ॥

भाष्यप्रकाशः ।

अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दत्यनृतेन हि प्रत्यूढाः' इति । तत्र नाड्यां दुःखाभावमात्रम्, ब्रह्मणि सुषुप्तौ तु तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्माऽभयं रूपमशोकान्तरमिति बृहदारण्यके श्रावणाद् ब्रह्मसंपत्त्या बलादिरूपं यदधिष्ठानं, करणे ल्युट्, देहनियमनसाधनं तत् प्राप्य तथा समायातीति बोधनमेकम् । च पुनः स्वशब्द आत्मवाचकोऽत्र प्रयुक्तस्तेन पूर्वोपक्रान्तस्य सत आत्माऽभेदबोधनमपरम् । किंचात्र विभक्त्यन्तरप्रयोगेण शब्दतः सामानाधिकरण्याभावेऽप्युपक्रमे सत एव निर्दिष्टत्वेनार्थतः सच्छब्दसामानाधिकरण्यात् सतो निर्गुणत्वबोधनं चेति तृतीयं प्रयोजनमिति । तथाचैवंप्रकारेण गुणातीतस्य प्रलयकारणतां बोधयितुमेवं हेतुनिर्देश इति हृदयम् । अत्र सूत्रस्य विषयवाक्यस्य च विरोधमाशङ्कते नन्वित्यादि । समादधते मोक्षेत्यादि । मोक्षातिरिक्तदशायां कर्मसंबन्धे सत्यपि यथा जाग्रत्स्वप्नयोः कर्मसंबन्धस्तथा सुषुप्तौ प्रलये च नास्ति, किंतु वासनामात्र इति प्रलयसाम्यात् तत्कथनमिति ब्रूम इत्यर्थः । एवं चात्र ब्रह्म न सर्वव्यवहारातीतं, सुषुप्तिप्रलययो-

रश्मिः ।

वक्तव्यमित्यर्थः । **भाष्ये** । **वासनेति** कर्मवासनावशात् । कर्मजसंस्कारो वासना । **प्रकृते** । **स्वशब्देन चाभेद** इति भाष्यं विवृण्वन्ति **च** पुनरित्यादि । **अत्रेति** चतुर्ष्वर्थेषु मध्येत्र सूत्रे प्रयुक्त इत्यर्थः । **पूर्वेत्यादि** श्रुतौ 'सता सोम्य' इत्यनेनेत्यर्थः । **आत्माभेदेत्यादि** । एतादृशबोधनफलं तु सच्छब्दस्य जडपरत्वनिवृत्तिः । **अर्थत** इत्यादि भाष्यं विवृण्वन्ति **किंचात्रेत्यादि** । ननु भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वरूपं सामानाधिकरण्यं सच्छब्दस्यात्मवाचकत्वाच्छब्दतोपीत्यर्थत इति भाष्यांशोऽसंगत इत्याकाङ्क्षायामाहुः **विभक्त्यन्तरे**त्यादि । अयमर्थः । सतेति तृतीया विभक्तिः सहार्था तथा चात्मसाहित्यवानिति तस्यार्थः । स्वमित्यत्र कर्म द्वितीयार्थः । आत्मा संयोगाश्रय इत्यर्थः । सूत्रेपि व्यपेक्षालक्षणसामर्थ्यपक्षे स्वस्मिन्नित्यस्य आश्रय आत्मेत्यर्थः । एवं सति निरुक्तं सामानाधिकरण्यमत्र विशेष्याभावान्नास्तीत्यर्थः । ननु तथापि कथमर्थतः सामानाधिकरण्यं यावता प्रवृत्तिः शब्दत इति चेन्न । एकार्थविशेष्यकप्रतीतिजनकत्वमात्रस्य तल्लक्षणत्वात् । अत एव युगपदधिकरणवचनतापेक्षपटीमृद्व्यावित्यत्र पुंवत्त्वमाशङ्क्य वृत्तौ वृत्तेः प्राक् यत्र सामानाधिकरण्यं तत्रैव तत्प्रवृत्तिः । प्रकृते च न ततः प्राक्सामानाधिकरण्यमित्युत्तरितं द्वन्द्वसूत्रभाष्ये 'नामन्त्रिते समानाधिकरणे' इतिसूत्रभाष्ये च सामान्यवचनमित्यस्याभ्ये देवि सरस्वति इति पर्यायेषु प्रत्युदाहरणं दत्तमिति स्थितं 'स्त्रियाः पुंवद्भाषितपुंस्कात्' इति सूत्रस्य शब्देन्दुशेखरे । एवं चोक्तरूपस्यैकार्थबोधकत्वस्य सामानाधिकरण्यस्य शब्दप्रयुक्ताभावप्रतीतावप्यर्थस्य विषयविधया कारणत्वेन ततः सामानाधिकरण्यादित्यर्थः । **निर्गुणत्वेत्यादि** । **तेनैतत्सिद्धम्** । गुणातीतोयमात्मा यत्र लीयते तत्सत्पदवाच्यं ब्रह्म गुणातीतमेव । नह्येतादृशस्य स्वसंबन्धेन कर्मसंबन्धविनिर्मुक्तपरमसुखानुभवसंपादकं सगुणं भवितुमर्हतीति । अतः स्वाप्ययसंपादकत्वात् न सर्वव्यवहारातीतं नापि सगुणमित्यतस्तथेत्यर्थः । **वासनामात्र** इति । कर्मसंबन्ध इति शेषः । **प्रलयसाम्यादिति**

मुक्तिवाक्यानामाह ।

गतिसामान्यात् ॥ ९ ॥

गतौ सामान्यात् । गतिर्मोक्षः । समानस्य भावः सामान्यम् । मोक्षे सर्वस्यापि भगवतापि तुल्यत्वात् । एवं हि श्रूयते । 'स यथा सर्वासामपां समुद्र एकायनम्' इत्युपक्रम्य वागेकायनमिति दृष्टान्तार्थं निरूप्य, 'स यथा सैन्धवखिल्य

भाष्यप्रकाशः ।

जीवाधारत्वेन श्रुतत्वाद्, यद् यदा यदाधारत्वेन श्रुतं तद् तदा तत्प्रयुक्तव्यवहारविषयमित्येवमनुमानं बोध्यम् । ततश्च यस्मिँल्लयं याति पुरत्रयं चेत्यादौ जडलयाधारत्वेन श्रावणात् तत्प्रयुक्तव्यवहारविषयत्वादपि सर्वव्यवहारातीतत्वाभावः सेत्स्यति । तेनायं हेतुर्लक्षणवाक्यस्थस्य यत्प्रयन्तीति भागस्य समर्थनार्थ इति बोधितम् । प्रलयवाक्यानां ब्रह्मणि समन्वये वक्तव्ये सुषुप्तिवाक्योदाहरणं सूत्रे स्वाप्ययपदसूचितव्यासाशयज्ञापनार्थम् । अग्रिमसूत्रे मुक्तिवाक्यविचारात् पूर्वस्मिन् प्रलयोऽपि सूच्यत इति ज्ञायते । अन्यथा न्यूनता स्यादिति ॥ ८ ॥

गतिसामान्यात् ॥ ९ ॥ गतिसामान्यादिति षष्ठं सूत्रमवतारयन्ति मुक्तीत्यादि । तेषां ब्रह्मपरत्वमाहेत्यर्थः । गतिर्मोक्षः । गतिशब्दः फले रूढः । 'अन्ते या मतिः सा गतिः', 'सा काष्ठा सा परा गतिः' इत्यादौ तथा दृष्टत्वात् । अत्र चाप्ययोत्तरमभिसंवेशस्यैव समर्थनीयत्वात् तथेत्यर्थः । श्रूयत इति बृहदारण्यके मैत्रेयीब्राह्मणे श्रूयते । दृष्टान्तार्थमिति लयाधिकरणदृष्टान्तार्थम् ।

रश्मिः ।

तथा च सूत्रेणैव विषयवाक्यं स्मार्यत इति भावः । एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति न्यायात् । यथा मोक्षे कर्मसंबन्धाभावस्तथा मोक्षातिरिक्तदशायां सुषुप्त्यकामभगवद्रूपायां तथा कर्मसंबन्धाभावः प्राप्तः स नेति प्रलयसाम्यम् । एवं चेति स्वाप्ययहेतुसमर्थनेन सर्वव्यवहारातीतसाध्यस्य न्यूनतारूपदोषनिवारणाय ग्रहणे च । तत्प्रयुक्तेत्यादि तत्प्रयुक्तव्यवहारविषयं यथा भवति तथा ज्ञेयमिति क्रियाविशेषणत्वेन द्वितीयान्तमिदम्, आर्दिं पचतीतिवत् । तेन 'घाजन्तश्च' इति सूत्रेण विषयशब्दस्य नियतपुंस्त्वेपि न दोषः । यथा वियति विहंगम इत्यत्र विहंगमाधारत्वेन वियति विहंगमप्रयुक्तो यस्तदाधारत्वव्यवहारः तद्विषयत्वमिति दृष्टान्तः । अनुमानमिति पूर्वं तु ब्रह्म नाशब्दं वाक्यगतेक्षतेः । यन्नैवं तन्नैवं, जीववत् । वेदान्तशब्दप्रतिपाद्यं नाशब्दम् । अन्वयव्याप्तिरपि तेजोदृष्टान्तेन । स्वाप्ययपदसूचितव्यासाशयमाहुः अग्रिमेत्यादि । सूच्यत इत्यादि स्वाप्ययपदेन सूच्यत इति । 'यत्प्रयन्त्यभिसंविशन्ति' इतिश्रुतेः कर्मसंबन्धार्हदशायामपि तदभिभूय तादृशसुखसंपादकत्वसामर्थ्यरूपव्यासाशयो ज्ञायत इत्यर्थः । 'बुद्धिप्रेरककृष्णस्य पादपद्मं प्रसीदतु' इति 'अतः सेवापरं चित्तं विधाय स्थीयतां सुखम्' इति च । अत्र युक्तिमाहुरन्यथेत्यादि । प्रलयवाक्यानां ब्रह्मणि समन्वयाप्रतिपादनेऽस्य समन्वयाध्यायत्वं न्यूनं स्यादित्यर्थः ॥ ८ ॥

गतिसामान्यात् ॥ ९ ॥ उक्तभाष्यं समर्थयन्ति स्म गतिशब्द इति । अभिसंवेशस्य इति लक्षणवाक्यस्थस्याभिसंविशन्तीतिभागाभिहितस्येत्यर्थः । बृहदिति स्पष्टा सूत्र-

उदके प्रास्त' इत्यादिना लयदृष्टान्तं निरूप्य, 'न प्रेत्य संज्ञास्ति' इति प्रतिपाद्य तन्निरूपणार्थं 'यत्र हि द्वैतमिव भवति तदितर इतरम्' इत्यादिना सर्वस्य शुद्धब्रह्मत्वं प्रदर्शितम् ।

भाष्यप्रकाशः ।

इत्यादिनेति प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीतेति ग्रन्थेन, न प्रेत्य संज्ञास्तीति प्रतिपाद्येति, विमुक्त्यनन्तरं भोक्तृभावादिनिवृत्त्या जीवादिसंज्ञाराहित्यं प्रतिपाद्य । तन्निरूपणार्थमिति संज्ञाभावनिरूपणार्थम् । सर्वस्येति जडस्य जीवस्य च । अत्रायमर्थः । यथाऽबादीनामंशानां कार्याणामबाद्यात्मकाः समुद्रादयो लयाधिकरणभूतास्तथा सदात्मकस्य सर्वस्य सदात्मकं कारणभूतं ब्रह्मैव लयाधिकरणभूतम् । नच स्पर्शादीनां त्वगाद्यंशत्वस्य प्रत्यक्षबाधितत्वात् केवलं लयस्थानत्वमेव विवक्षितं न तु तस्य कारणत्ववैशिष्ट्यमपीति शङ्क्यम् । त्वगस्य स्पर्शवायोश्चेति ।

'मुखतस्तालुनिर्भिन्नं जिह्वा तत्रोपजायत ।
ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते' ॥

इत्यादिश्रीभागवतद्वितीयस्कन्धवाक्येषु तथादर्शनेनात्र वैराजानामेव तेषां दृष्टान्तत्वेन विवक्षितत्वात् । यथा सदंशानां कार्याणां लयस्थानं ब्रह्म तथा चिदंशानां जीवानामपि लयस्थानं ब्रह्मैवेति वक्तुं स यथा सैन्धवेत्यादिना यथा सामुद्रलवणशकल उदके प्रक्षिप्त उदकमेव लक्षीकृत्य विलीयते, न तु खिल्यत्वेन ग्रहणाय कोऽपि समर्थः संभाव्यते, किंतु यस्माद्यस्माद्देशादादीयते तत्र तत्र लवणरस एवास्वाद्यत इति तत्र तत्सत्ता निश्चीयत इत्येवं लयदृष्टान्तं निरूप्य, एवं वा अरे इदं महद्भूतमनन्तपारम्, अरे मैत्रेयि, इदं जीवात्मत्वेनानुभूयमानं महत् पूर्वोक्तेभ्योऽबादिभ्य उत्कृष्टम्, अनन्तम्—अविनाशि, अपारम्—अनादितत्त्वं विज्ञानघने चिदेकस्वरूपे ब्रह्मण्येवैतेभ्यः स्थूलसूक्ष्मशरीरात्मकेभ्योऽनुपलक्षितेभ्यो भूतेभ्यः सेमुत्थाय पृथग्भूय तान्येव भूतान्यनु तल्लयोत्तरं विनश्यति विशेषेणादर्शनं प्राप्नोति ब्रह्मणः पृथक् न ज्ञायते । तत्र हेतुः । न प्रेत्य संज्ञाऽस्तीति । लयोत्तरं जीवसंज्ञैव निवर्तते, ब्रह्मैव भवतीति । ततो लवणरसस्य सर्वत्रो-

रश्मि ।

संगतिरत्र । प्रास्त उदकमिति तेन नवसु पदेषु मोक्षे लवणमुदके निधायेत्याद्युपदेश इति ज्ञापितम् । तेन जीवेऽणुत्वं वास्तविकमित्युपदेशः । तेन मोक्षे नान्यविधत्वमत्र प्रयोजनम् । तेन मैत्रेयीब्राह्मणे भक्तिप्रतिपादनात्तत्रत्या मुक्तिरप्युपदेशः । अबादीनामिति अप्स्पर्शगन्धादीनाम् । तत्रत्यश्रुत्युक्तानामंशानां सदंशानां कार्याणां न तु चिदानन्दांशानामबादीनां तिरोहितत्वेन प्रकटसदंशत्वेन तथेति । अत्र कार्यार्थकानामंशानामिति त्याज्यमिति वक्तुमबादीनामित्यादिपदार्थे किंचिदाशङ्क्य निषेधन्ति न च स्पर्शेत्यादि । 'स यथा सर्वासामपाꣳसमुद्र एकायनमेवꣳसर्वेषाꣳस्पर्शानां त्वगेकायनमेवꣳसर्वेषां गन्धानां नासिके एकायनम्' इत्यादिश्रुतिष्वेतद्बोध्यम् । तस्येति लयस्थानस्य । तथेति 'तस्माद्वा एतस्मादात्मनः' इति श्रुतिकारणत्ववैशिष्ट्यप्रदर्शनं तेन । अत्रेति छान्दोग्ये मैत्रेयीब्राह्मणे च । उपष्टम्भकत्वात्पुराणानामेवकारः । तथाच 'तस्माद्वा एतस्मादात्मनः' इत्यत्रोपष्टम्भकमिदं पुराणमिति विकल्पः । इति वक्तुमिति सैन्धवखिल्यस्य जलीयसदंशत्वमिव जीवस्याणुप्रभावसंबन्धेन मुहुः पुनः पुनः पेपीय-

आदिमध्यावसानेषु शुद्धब्रह्मण एवोपपादानात् । सर्वेषां वेदान्तानां ब्रह्मसमन्वय उचित इति ॥ ९ ॥

किंच ।

श्रुतत्वाच्च ॥ १० ॥

'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशि-

भाष्यप्रकाशः ।

दकेऽनुभवाल्लवणत्वेन वर्तत एवोद्ग्रहणमिति कुतो निषिध्यते संज्ञेत्येवं मैत्रेय्या मोहे पुनः संज्ञाभावनिरूपणार्थं, यत्र हि द्वैतमित्यादिना भेदकधर्मसत्तायां द्वैतदर्शनकथनपूर्वकं, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येज्जिघ्रेदभिवदेच्छृणुयान्मन्वीत विजानीयाद् येनेदं सर्वं विजानाति तं केन विजानीयाद् विज्ञातारमरे केन विजानीयात्' इत्यन्तेन, यत्र तु यस्मिन्नधिकरणे अस्य संबन्धि सर्वं स्थूलं सूक्ष्मं चात्मैवाभूद् आत्मरूपमेवाभूत् तत् तदा करणस्य विषयस्य च लयादैकरूप्ये करणविषयभावापगमात् केन कं पश्येदित्यादि । ननु यद्यप्यन्यल्लीनं, तथापि विज्ञाता तु तिष्ठति स यथा स्वप्ने स्वयंज्योतिः पश्यत्येवं स्वयं कुतो न विजानातीत्याकाङ्क्षायां विज्ञातुः स्वरूपस्यापि समुद्रे लवणस्येवात्मत्वं स्मारयति, विज्ञातारमित्यादिना । तथाच तदा विज्ञातापि न विज्ञातृरूपेणास्ति, किंतु गुणातीतेनात्मरूपेणातो न विजानातीत्युत्तरमुखेन सर्वस्य ब्रह्मतौल्यं च निरूपितम् । एवं च ब्रह्म न सर्वदा सर्वव्यवहारातीतं मोक्षे तथात्वेन श्रावितत्वाद् यदेवं तदेवं मैत्रेयीब्राह्मणश्रावितसर्ववदित्येवमत्रानुमानसिद्धेरस्य हेतुत्वं बोधितम् । तेनात्र यतो वेतिश्रुतिस्थोऽभिसंविशन्तीति भागः समर्थितः । किं चैतेनैव सर्वस्य शुद्धब्रह्मत्वमपि दर्शितमिति । तेन फलितमाहुः आदीत्यादि । आदावमृतत्वलिङ्गेन, मध्ये आत्मदर्शनादिना सर्ववेदनप्रतिज्ञामारभ्य, वागेकायनमित्यन्तेनावसाने सर्वस्यात्मभावकथनेन च तेषु शुद्धब्रह्मण एव सर्वरूपत्वेन सर्वकर्तृत्वेन चोपपादनाद् ये केऽपि वेदान्तास्ते सर्वे येनकेनचिद्रूपेण ब्रह्मैव वदन्तीति सर्वेषां वेदान्तानां ब्रह्मणि तात्पर्येणान्वय उचित इत्यर्थः ॥ ९ ॥

श्रुतत्वाच्च ॥ १० ॥ सप्तमं सूत्रं पठित्वा तद्विषयवाक्योपन्यासेनैव व्याकुर्वन्ति पूर्णमि-

रश्मिः ।

मान इति परंपरितजीवसंबद्धत्वमपीति छान्दोग्यीयेन 'अस्य सोम्य महतो वृक्षस्य' इत्याद्युपदेशेन सिद्ध्यति । तत्केन कमिति जिघ्रेदित्यादिष्वेतत्पठनीयम् । अधोक्षजे सर्वव्यवहारातीतत्वेनेति वक्तुं सर्वदेति । तथात्वेनेति सामान्येनेत्यर्थः । मैत्रेयीति 'यत्र त्वस्य सर्वमात्मैवाभूत्' इति पूर्वोक्तमैत्रेयीत्यादिः । अस्येति गतिसामान्यस्येत्यर्थः । आदाविति 'येनाहं नामृता स्यां किमहं तेन कुर्याम्' इति श्रुतावित्यर्थः । ननु तर्हि घटादिभ्योपि ब्रह्मबोधो भवेदिति चेत्तत्राहुः येनकेनेति । तेन घटत्वादिभिर्बोधे न ब्रह्मबोधः । ब्रह्मत्वेन बोधे तु ब्रह्मबोधो भवत्येव । तात्पर्येणेति पत्यादिकेषु अभिधयान्वयः इति भावः ॥ ९ ॥

श्रुतत्वाच्च ॥ १० ॥ अभिसंवेशविचारमनुपूर्तौ सप्तसूत्रमिति भाष्यविरोधोतः सप्तममिति । पठित्वेति सर्वभाष्यरीत्या । तद्विषयेति तत्प्रसिद्धमुपबृंहितं विषयवाक्यं तस्योपन्यासेन । उपबृंहणं समाधिभाषा तेनाभिसंवेशनकथनेपि यत इत्यस्यार्थाकथनात् नाभिसंवेशान्ताधिकरणपूर्तिः । व्याकुर्व-

भाष्यप्रकाशः ।

त्यादि । अयं बृहदारण्यके द्वितीयवंशब्राह्मणानन्तरं परिशिष्टलक्षणखिलकाण्डारम्भे वर्तते । अस्मिन् मन्त्रे तु सर्वस्य ब्रह्मात्मैकत्वनिर्णयार्थम् 'आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्'इत्यादिश्रुत्यर्थ एवोपसंह्रियते । व्याख्या तु, पूर्णमदः, अदः परोक्षं ब्रह्म पूर्णम्, आकाशवद् व्यापि निरन्तरं निरुपाधिकम् । पूर्णमिदम्, इदं नामरूपाभ्यां व्यवह्रियमाणमवतारादिरूपमपि पूर्णं पूर्वोक्तरूपमेव । एवं व्यवहार्याव्यवहार्यस्वरूपयोर्निरुपाधिकत्वमुक्त्वा कार्यरूपेऽपि तथात्वमाह पूर्णात् पूर्णमुदच्यते । पूर्णात् कारणात्मनः सकाशात् पूर्णमुत् पूर्णानन्दं सद् अच्यते, पूर्णं सद् उदच्यते वा । अञ्चु गतिपूजनयोः, अच इत्येक इति पाणिनिः । पूज्यते उद्गच्छति वा । एवं स्थितिदशायां कार्यस्य ब्रह्मरूपतामुक्त्वा प्रलयदशायां तथात्वमाह । पूर्णस्य ब्रह्मणः पूर्णं निरुपाधिकमेकरसत्वलक्षणं स्वभावं प्रलयदशायामादाय पूर्णं ब्रह्मैव सदवशिष्यते अव्यवहार्यत्वेन रूपेण तिष्ठतीति । तथाचानया श्रुत्याऽसंदिग्धं यथा स्यात् तथा सर्वकार्यरूपत्वं ब्रह्मणः प्रतिपादितम् । तेन पूर्णज्ञानिनां व्यवहारदशायामपि कार्यं गुणातीतं ब्रह्माभिन्नमेव । व्यवहारस्तु भगवतः सत्यसङ्कल्पत्वाद् 'बहु स्यां प्रजायेय' इत्यादिरूपया इच्छयैव । नचात्र सर्वत्र पूर्णपदादुद्गतस्य कार्यस्यांशस्य च पूर्णैश्वर्यादिमत्त्वं शङ्क्यम् । ऐश्वर्यप्रकरणाभावात् । पूर्णैश्वर्यादिबोधकस्य भगवच्छब्दस्य भगवत्येवानुपचारिकत्वमिति विष्णुपुराणे सिद्धत्वात् । नच परममोक्षदशायां ब्रह्मैक्ये तत्र तथात्वं शङ्क्यम् । दशमस्कन्धे श्रीवसुदेवं प्रत्यखण्डाद्वैतोपदेशे, खं वायुरितिश्लोके भगवता सच्चिदानन्दधर्मतारतम्यादिकृतनानात्वाविरुद्धैकत्वस्यैव प्रतिपादनेन पूर्णैश्वर्यादीनां स्वस्मिन्नेव निय-

रश्मिः ।

न्तीत्यस्य विवृण्वन्ति स्मेत्यर्थः । अयमिति मन्त्रः । एवेति उत्तराधिकरणादेवेति । यत इत्यस्य पूर्णार्थकत्वानुक्तेः विषयवाक्यमिव विषयवाक्यमित्युपचारस्तत्प्रयोजनं तु 'सदेव सोम्य' इत्यत्र सच्छब्दार्थनिर्णयद्वारा 'यतो वा' इत्यत्र यच्छब्दार्थनिर्णयः । विषयवाक्यं तु समाधिभाषा उपष्टम्भिका न वेति संदेहेनेति प्राप्तं सापेक्षत्वापत्तेर्वेदस्येति । उपष्टम्भिकेति सिद्धान्तः । 'इतिहासपुराणैस्तु वेदं समुपबृंहयेत्' इतिवाक्यात् । प्रामाणिकी सापेक्षतापि न दोषायेति । तथा चैवकारेण मुख्यविषयवाक्योपन्यासव्यवच्छेदः । अत्र सूत्रं विवृण्वन्तीति वक्तव्ये सप्तममित्यादेरयमर्थः । 'विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यग्व्यवस्थितम् । सत्यं पूर्णम्' इति द्वितीयस्कन्धादाहुः सप्तममिति । अन्यथास्या एव श्रुतेर्ग्रहणे मानाभावापत्तिः । एवं तु सच्छब्दार्थपूर्णग्रहणार्थं सूत्रम् । तमेवोपसंहारं दर्शयन्ति व्याख्या त्वित्यादि । परोक्षमिति ।

'इदमः प्रत्यक्षगं रूपं समीपतरवर्तिनि चैतदो रूपम् ।
अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात्' ॥ इति

विष्णुपुराण इति ।

'ऐश्वर्यस्य समस्तस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' ॥

इतिवाक्य इत्यर्थः । पूर्णैश्वर्यादीति पूर्णत्वं बृहदारण्यकोक्तं ज्ञेयम् । स्वजायाधनपुत्रकर्मात्मकमलौकिकं प्राणाग्निहोत्रोपनिषदि । प्रमाणबलेनाविषयः स्वेच्छया विषयश्चेति भाष्यादाहुः

च्यते' इति श्रुत्यैवासंदिग्धं सर्वकार्यत्वं प्रतिपादितम् । 'सर्वे वेदा यत्पदमामनन्ति' इति च । चकारोऽधिकरणसंपूर्णत्वद्योतनाय ।

भाष्यप्रकाशः ।

मितत्वाच्च । अतः सर्वव्यवहारातीतत्वमनपहायैव सर्वव्यवहारविषयं ब्रह्मेत्यर्थः संपद्यते । एतेन फलितमाहुः सर्वे वेदा इत्यादि । तथाचाभिधया वृत्त्यापि सर्वे शब्दा ब्रह्मवाचका इति सर्वेषां वेदान्तानामभिधया तात्पर्येण च ब्रह्मण्येव समन्वय इत्यर्थः । अत्रेदं बोध्यम् । इयं श्रुतिः काठके द्वितीयवल्लीस्था, 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत् पश्यसि तद्वद' इति प्रश्ने मृत्युनोक्ता । 'सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्' इति पदं पदनीयं प्राप्तव्यमिति यावत् । आमनन्ति प्रतिपादयन्ति । यद्वदन्ति यत्प्राप्त्यर्थानि । संग्रहेण संक्षेपतः । तदेव संक्षेपत आह, ओमित्येतदिति । तथाचोङ्कारेण यत् संक्षेपत उच्यते तदेव सर्वैर्वेदैर्विस्तरेणोच्यत इत्यर्थः । एतदेव द्वादशस्कन्ध उपबृंहितं, 'समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः' इत्यारभ्य,

'ततोऽभूत् त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् ।
स्वधाम्नो ब्रह्मणः साक्षाद् वाचकः परमात्मनः ।
स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्' ॥

इत्यादिभिः । तथाच बीजशक्तिरेव सर्ववृक्षे प्रसरतीत्योङ्कारस्य या परमात्मवाचकता सैव सर्वस्मिन् वेदतरौ प्रसृतेति सर्वे वेदा अभिधया प्रतिपादयन्तीति युक्तम् । किं च । जैमिनीये नये सर्वे शब्दाः प्रायेण धर्मवाचका एव । धर्मश्च घटत्वादिरूपः । त्वप्रत्ययश्च भावे । भाव इति भूधातोर्घञि रूपम् । भूधातुश्च सत्तायां व्याप्तौ वा । उभयथापि सतो व्यापकस्य वा धर्मो घटत्वादिरिति सिद्ध्यति । तादृशश्च धर्मी भगवानेवेति धर्मद्वारा भगवद्वाचका एव सर्वे शब्दाः । वैयाकरणमतेऽप्येवम् ।

'संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः' ॥ इति वाक्यपदीयात् ।

रश्मिः ।

अत इति । अधोक्षजत्वेन निषेधेन च प्राप्तं सर्वव्यवहारातीतत्वम् । भाष्योक्तस्वेच्छया विषयदशायामाहुः अभिधयेत्यादि । प्रमाणबलपर्यालोचने त्वाहुस्तात्पर्येणेति । तपांसि पुराणानि । वदव्रज गताविति गत्यर्थकाद्वदतेः शतरि रूपमिदं न तु क्रियापदमित्याशयेनाहुः यत्प्राप्त्यर्थानीति । नय इति मते । यद्यपि 'प्रयोगचोदनाभावादर्थैकत्वमविभागात्स्यात्' इत्यादिसूत्रेषु प्रथमाध्यायस्थेषु आकृतावेव शक्तिरिति स्थितं शास्त्रदीपिकायाम् । तथापि सर्वेषां न संभवति यथा 'यः सिक्तरेताः स्यात् स प्रथमामुपदध्यात्' इत्यादिश्रुतौ । सिक्तरेतस्त्वादेराकृतित्वाभावेन व्यक्तौ [illegible] [illegible] तैरप्युपगन्तव्यः । वैदिकपदार्थानां नित्यत्वेन न व्यक्त्यनित्यत्वप्रयुक्तं

भाष्यप्रकाशः ।

नैयायिकादिमतेन विशिष्टवाचकत्वपक्षेऽप्येषैव व्यवस्था । घञ् चात्र स्वार्थे । अन्यथाऽनवस्था स्यादिति । एवं पदवद्वर्णा अपि स्वभावतो भगवद्वाचका एव ।

'वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः' ॥

इति शिष्टवैदिकप्रसिद्धवाक्यात् । वाक्यानि तात्पर्येण बोधयन्तीति सर्वस्य वेदस्य भगवद्वाचकत्वमप्रत्यूहमिति । सौत्रस्य चस्य प्रयोजनमाहुः चकार इत्यादि । एवमत्र त्रिसूत्र्यां सुषुप्तिविचारेण दैनन्दिनप्रलयकर्तृत्वं, द्वितीये मोक्षविचारेणात्यन्तिकतत्कर्तृत्वं, तृतीये सर्वकार्यकर्तृत्वप्रतिपादनेन नैमित्तिकादितत्कर्तृत्वं बोधितमिति प्रतिभाति ।

रश्मिः ।

संबन्धानित्यत्वम् । अत एव व्यक्तावेव संबन्ध इति सिद्धान्त इति प्रस्थानरत्नाकरे । एतदभिप्रेत्याहुः प्रायेणेति । व्याप्तौ वेति भू प्राप्ताविति धातुपाठात् । एषैवेति जातिधर्मान्यतरविशिष्टवाचकत्वरूपेत्यर्थः । अत्रेति । 'तस्य भावस्त्वतलौ' इति सूत्रे सिद्धावस्थापन्ने धात्वर्थे घञ् न तु प्रकृतिजन्यबोधे प्रकारतयाभिमत इत्यर्थः । यद्यपि वृत्तौ सिद्धावस्थापन्ने धात्वर्थे वाच्य इति विस्पष्टमुपलभ्यते तथापि प्रकृतिजन्यबोधे प्रकारो भाव इत्यस्यापि संभाव्यतयोक्तिरियम् । अनवस्थेति स्वस्यार्थो भावः भावश्च घञा निष्पन्नो भावान्तर इत्यनवस्थेत्यर्थः । भगवद्वाचका इति न च न तथाप्रतीतिरिति वाच्यम् । संकेताग्रहेणाबाधकत्वात् । तदाहुः वेदाक्षराणीत्यादि । ननु 'यतो वा इमानि' इत्यादि वाक्यानां यद्धेतुका प्रत्यक्षभूतनिष्ठोत्पत्तिरित्याद्यर्थात् कथं ब्रह्मबोधकत्वमित्यत आहुः वाक्यानीत्यादि । तात्पर्यनिर्णयलिङ्गभूतैरुपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तिभिः 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिस्मृतेश्च भगवदिच्छया ब्रह्म बोधयन्तीत्यर्थः । ननु पूर्वं सृष्टेरुक्तत्वात् ब्रह्मणो व्यवहार्यत्वमपि लयाधारत्वेनैव वाच्यम् । इति सुषुप्तिमोक्षसर्वकार्यत्वविचारोऽप्रासङ्गिक इति चेत् तत्राहुः एवमत्रेत्यादि । दैनंदिनेत्यादि तत्स्वरूपं द्वादशस्कन्धे चतुर्थेऽस्ति ।

'नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप । उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥
कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा । परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ॥
अनाद्यन्तवतानेन कालेनेश्वरमूर्तिना । अवस्था नैव दृश्यन्ते वियति ज्योतिषामिव' ॥ इति ।

तथा च देहादेर्दिने दिने ध्वंसो दैनंदिनप्रलयः । सुषुप्तिरपि दैनंदिनेति तादृशप्रलयकर्तृत्वं बोधितमित्यर्थः । तथा च सुषुप्तौ दिने दिने च ब्रह्मण्यप्यय इति सूत्रार्थः । आत्यन्तिकेत्यादि । अयं च मोक्षात्मा तदुक्तम्—

'यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबन्धनम् ।
छित्त्वाच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकमङ्ग संप्लवम्' ॥ इति ।

गतेः प्रलयरूपताकथनेनाप्रासङ्गिको मोक्षविचार इति परास्तम् । नैमित्तिकादिति । ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलय इत्यर्थः । तदुक्तम्—

'चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते । स कल्पो यत्र मनवश्चतुर्दश विशांपते ॥
तदन्ते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता । त्रयो लोका इमे यत्र कल्पन्ते प्रलयाय हि ॥
एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् । शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चात्मभूः' ॥

भाष्यप्रकाशः।

अत्रैकदेशिन इमानि सूत्राणि सांख्यनिरासकतया व्याकुर्वते। तथाहि। सांख्यपरिकल्पितं प्रधानं जगत्कारणत्वेन नाश्रयितुं शक्यम्। अशब्दं हि तत्। कथमशब्दम्। ईक्षतेः। 'सदेव सोम्येदमग्र आसीत्'इत्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेय'इति 'तत्तेजोऽसृजत'इति जगत्कारणस्येक्षणकर्तृत्वश्रावणात्। तथाऽन्यत्रापि। 'आत्मा वा इदमेक एवाग्र आसीदित्युपक्रम्य, स ईक्षत लोकान्नुसृजा' इति। क्वचिच्च पोडशकलं प्रस्तुत्य, स ईक्षाञ्चक्रे स प्राणमसृजतेति। ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया। विपयिणा विषयलक्षणात्। यथा यजतेः। तेन 'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः, तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते' इत्यादीनां सर्वज्ञेश्वरकारणपराणामपि वाक्यानां संग्रहः। नच सत्त्वधर्मेण ज्ञानेन प्रधानस्यापि सर्वज्ञताया ईक्षितृत्वस्य च शक्यवचनत्वान्नानेन प्रधानवारणमिति वाच्यम्। तस्य प्रधानावस्थायां गुणसाम्यात् सत्त्वधर्मस्य ज्ञानस्य तदानीमशक्यवचनत्वात्। तदा तदादरे रजस्तमोधर्मस्याप्यवर्जनीयत्वेन ज्ञानप्रतिबन्धस्यापि संभवेन किंचिज्ज्ञत्वस्याप्यापत्तेश्च। किंचासाक्षिकाऽसत्त्ववृत्तिर्न क्वापि जानाति, नाभिधीयत इत्यचेतनस्य प्रधानस्य सार्वज्ञ्यमनुपपन्नम्। नच योगिवदिति वाच्यम्।

रश्मिः।

इति। आदिना प्राकृतिकः प्रलयः। महदहंकारपञ्चतन्मात्राणां सप्तप्रकृतीनां तत्कार्यस्य ब्रह्माण्डस्य लयात्प्राकृतिकः। तदुक्तम्।

'द्विपरार्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय वै॥
एष प्राकृतिको राजन् प्रलयो यत्र लीयते। आण्डकोशस्तु संघातो विघात उपसादिते'॥

इति द्विपरार्धं ब्रह्मायुस्तेनास्मिन् सूत्रेप्यप्रासङ्गिको विचार इति परिहृतम्। **एकदेशिन** इति। तथाहि ब्रह्मैकदेशस्य पुच्छरूपस्य ब्रह्मताङ्गीकारात् प्रमाणैकदेशस्य 'यतो वाचो निवर्तन्ते' इत्यस्य प्रमाणत्वेन स्वीकारात्। 'एवं कदाचिद्भगवान् साक्षात्सर्वं करोत्यजः' इत्यादिना षड्भेदभिन्ना सृष्टिरुक्ता निबन्धे। तत्रैकदेशस्यान्तरालिकसृष्टिरूपस्य स्वीकारादेकदेशित्वम्। **स ईक्षत** इति स ऐक्षितेति पाठः। (बृहदारण्यके तु स ऐक्षत इत्येव)। **षोडशकलमिति**। पुरुषमिति शेषः। स प्राणमसृजत प्राणात्खं वायुर्ज्योतिरापःपृथिवीन्द्रियं मनोन्नमन्नाद्वीर्यं तपोमन्त्राः कर्मलोकनाम चेति रत्नप्रभाकारेणोक्ताः षोडशकलाः। नन्वीक्षतेरिति धातुनिर्देशो भवति इक्श्तिपौ धातुनिर्देश इति कात्यायनस्मरणान्न तु धात्वर्थनिर्देश इत्यत आहुः **ईक्षतेरितीति** विषयी धातुः विषयो धात्वर्थः प्रतिपाद्यतासंबन्धेनेति यावत्। **यथा यजतेरिति**। यजतेरर्थपरत्वम्। 'इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम्' इति जैमिनिसूत्रे यजतिपदेन लक्षणया धात्वर्थस्य यागस्य कथनाद् बोध्यम्। **ज्ञानमयमिति** ज्ञानमीक्षणं तद्विकार इव विकार एव तप इत्यर्थः। **सत्त्वधर्मेणेति** प्रधानस्य त्रिगुणात्मकत्वेन ज्ञानस्य च 'सत्त्वात्संजायते ज्ञानम्' इतिस्मृतेः। सत्त्वधर्मत्वेन तथेत्यर्थः। **सत्त्वधर्मस्येति** सत्त्ववृत्तेरित्यर्थः। केवलसत्त्ववृत्तेर्ज्ञानत्वं स्वीकृत्य प्रधानस्य सर्वज्ञत्वं निरस्तम्। इदानीं जडवृत्तिर्ज्ञानशब्दार्थो न भवति किं तु साक्षिबोधविशिष्टा वृत्तिः वृत्तिव्यक्तबोधो वा ज्ञानं तज्जडस्य प्रधानस्य न संभवतीत्याहुः **किं चासाक्षिकेति**। **क्वापीति** देवदत्तो जानातीत्येव न तु घटो जानातीति। **योगिवदिति** सत्त्वोत्कर्षनिमित्तं सर्वज्ञत्वमिति शेषः। **सेश्वरसांख्यमतमाहुः**

भाष्यप्रकाशः ।

तेषां चेतनत्वेनादृष्टान्तत्वात् । यदि च तप्तायःपिण्डस्य दग्धृत्ववत् साक्ष्यधिष्ठितस्य प्रधानस्येक्षितृत्वं कल्प्यते, तदा तु यन्निमित्तं प्रधानस्येक्षितृत्वं तस्यैव सर्वज्ञत्वाज्जगत्कारणत्वं वक्तव्यम् । तद्धेतोरेवेति न्यायात् । नच ब्रह्मणो नित्यज्ञानत्वेन विवक्षितत्वादीक्षणात्मकज्ञानक्रियां प्रति स्वातन्त्र्यासंभवात् कथं सर्वज्ञत्वमिति वाच्यम् । प्रततौष्ण्यप्रकाशेऽपि सूर्ये सविता दहति प्रकाशत इति प्रयोगदर्शनादिहापि तद्वत् सत्यमति च ज्ञानकर्मभूते विषये नित्यज्ञानतया तादृशप्रयोगोपपत्तेः । नच प्राक् सृष्टेः पदार्थान्तराभावादीक्षणात्मकस्येश्वरज्ञानस्य निर्विषयत्वं शङ्क्यम् । तत्त्वान्यत्वाभ्यामनिर्वाच्ययोर्नामरूपयोर्व्याचिकीर्षितत्वेन तयोरेव विषयत्वात् । नच तयोरनागतत्वेनाविषयत्वं शङ्क्यम् । अतीतानागतविषयकज्ञानस्य योगिषु दर्शनात् तद्ध्येये ईश्वरे तादृशाशङ्काया एवासंगतत्वात् । नच प्राक् सृष्टेर्ब्रह्मणोऽशरीरित्वादीक्षितृत्वमनुपपन्नमिति शङ्क्यम् । सवितृप्रकाशवद् ब्रह्मणो नित्यज्ञानस्वरूपत्वेन ज्ञानसाधनानपेक्षत्वात् । 'न तस्य कार्यं करणं च विद्यते' इति, 'अपाणिपादो जवनो ग्रहीता' इतिमन्त्राभ्यामपि तथा निश्चयात् । नच चैतन्यैक्यवादिनो जीवेश्वरभेदाभावात् संसारिणो जीवस्यापि तथाज्ञानापत्तिरिति शङ्क्यम् । घटगिरिगुहाद्युपाधिभेदेन व्योम्न इव ब्रह्मचैतन्यस्याप्युपाधिभेदेन भेदस्याप्यङ्गीकारेणोक्तदूषणाभावादित्यादि । तज्जयतीर्थेन माध्वेनैवं दूष्यते । सांख्यप्रतिपन्नं प्रधानं न श्रौतं जगत्कारणं, तदैक्षतेतीक्षतिश्रवणादशब्दं तदिति यद् व्याख्यातं तदयुक्तम् । तथाहि । अत्राशब्दमित्यनेनोक्तमश्रौतत्वं न सांख्यस्य प्रतिवादिनः सिद्धम् । तेन वैदिकत्वाभ्युप-

रश्मिः ।

यदि चेत्यादि । **तद्धेतोरेवेति** हेतुहेतुमतोर्हेतुत्वे तद्धेतोरेव हेतुता इति न्यायादित्यर्थः । सर्वज्ञत्वं नाम ज्ञानकर्तृत्वमिति मत्वाशङ्क्य निषेधन्ति **न च ब्रह्मण** इत्यादि । **ज्ञानक्रियामिति** ईक्ष दर्शनाङ्कनयोरिति धातुपाठाज् ज्ञानस्य धात्वर्थत्वेन क्रियात्वम् । भूवादयो धातवः क्रियावाचिन इति । नित्यस्यापि ज्ञानस्य तत्पदार्थोपहितत्वेन ब्रह्मस्वरूपाद् भेदं कल्पयित्वा कार्यत्वोपचाराद् ब्रह्मणस्तत्कर्तृत्वव्यपदेशः साधुरिति सदृष्टान्तमाहुः **प्रततेत्यादि** । **तद्वदिति** दाहप्रकाशयोः कर्मभूते विषये सत्यसति च प्रयोगवत् । **ज्ञानकर्मेति** । **सर्वं जानातीत्यत्र नित्येति** । नित्यत्वं ज्ञाने विषयाविनाभूतत्ववत् विषयविनाभूतत्वमपीति । **तादृशेति** सर्वं जानातीति प्रयोगोपपत्तेरित्यर्थः । **तत्त्वान्यत्वाभ्यामिति** सतोऽबाधात् सत्त्वेनानिर्वाच्ययोरसतोप्रत्ययादसत्त्वेनानिर्वाच्ययोरित्यर्थः । ईश्वरत्वेश्वरान्यत्वाभ्यामिति वार्थः । सत्तामात्रत्वान्नामरूपयोः प्राक् सृष्टेरिति भावः । गङ्गानिष्ठशुक्लत्वनीलत्वाभ्यां गङ्गात्वगङ्गातीरत्वाभ्यां सर्वात्मत्वदशायामनिर्वाच्ययोर्वा नामरूपयोः । **घटगिरीति** मलिनसत्त्वप्रधानाऽविद्या जीवोपाधिः शुद्धसत्त्वप्रधाना मायेश्वरोपाधिः । यत्र मते त्वणुत्वं वास्तविकं यत्तदेव भेदकम् । **इत्यादीति** आदिना यदप्युक्तं प्रधानस्यानेकात्मकत्वात् मृदादिवत्कारणत्वोपपत्तिर्नासंहतस्य ब्रह्मण इति तत्प्रधानस्याशब्दत्वेनैव प्रत्युक्तम् । यथा तु तर्केणापि ब्रह्मण एव कारणत्वं निर्वोढुं शक्यते न प्रधानादीनां तथा प्रपञ्चयिष्यति 'न विलक्षणत्वादस्य' इत्येवमादिनेति भाष्यसंग्रहः । अशब्दपदेन प्रधानं न ग्रहीतुं शक्यमित्याह **अत्राशब्दमित्यादि** । **इतीति** तथाच सगुणस्य कारणता न स्यात् किं तु

भाष्यप्रकाशः।

गतेः। नापि स्वन्यायेन तदुक्तिः। अजामेकामित्यादौ प्रधानस्य श्रुतत्वात्। नच तत्रान्यत् कल्प्यम्। नाममात्रे विवादादर्थान्तरस्य चाभावात्। किं च ब्रह्मणोऽपि श्रौतत्वं न युक्तम्। अवाच्यत्वात्। अवाच्ये वृत्त्यन्तरायोगात्। नापि तस्येक्षितृत्वम्। तस्येक्षतिस्वरूपत्वात्। नच मायावच्छिन्नस्य जगत्कारणस्येक्षितृत्वं संभवतीति वाच्यम्। जिज्ञास्यस्यैव जगत्कारणताया उक्तत्वात्। नहि जिज्ञास्यं मायावच्छिन्नम्। तज्जिज्ञासाया अप्रयोजकत्वात्। किंच माययेक्षितृत्वं भवत्युपचर्यते वा। आद्ये दृश्यत्वाद्यपि किं न स्यात्। द्वितीये प्रधानेऽपि तत्संभवादिति।

मम त्वन्यदपि स्फुरति। सूत्रव्याख्याने यदुक्तम्, ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया विषयिणा विषयलक्षणाद् यथा यजतेरिति तदपि फल्गिवति। सूत्राणां वेदान्तवाक्यकुसुमग्रथनार्थत्वस्य पूर्वं स्वयमेव कथनादत्रापि पूर्वं विषयवाक्योपन्यासाद्वाक्यविशेषगतत्वेन स्वार्थप्रत्यायकस्यैव धातोर्निर्देशस्य सूत्रकाराशयगोचरतया लक्षणाया अत्राविवक्षितत्वात्। किंच पञ्चशिखवृत्तौ ब्रह्मपदस्य प्रधानवाचकताङ्गीकारात् तेन चेत् तत् स्मरेत् तदा प्रसङ्गे जात आनुमानिकादिसूत्राण्यप्यत्रैव वदेत्। जन्मादिसूत्रविषयश्रुत्या तु न वक्तुं शक्यम्। तत्र तत्प्रसङ्गाभावात्। श्रुत्यन्तराणां त्वानुमानिकपाद एव विचारादिति। सूत्रान्तरव्याख्यानं तु नातिविरुद्धमित्युपरम्यते। हेयत्वावचनसूत्रे चकारं प्रतिज्ञाविरोधाभ्युच्चयार्थमाहुः श्रुतत्वाच्चेति। चकारप्रयोजनं न किमप्याहुः।

रश्मिः।

शुद्धसत्त्वप्रधानमायामात्रस्य। पूर्वमिति जन्मादिसूत्र इत्यर्थः। अविवक्षितत्वादिति तेन 'यः सर्वज्ञः सर्ववित्' इत्यादीनां संग्रहो य उक्तः सोप्यसंगत इति भावः। अधुनास्मिन् प्रधाननिरूपणरूपपूर्वपक्षोत्थानमसंगतमित्याहुः किंचेत्यादि। अत्र प्रधानस्मारकपदाद्यभावेन प्रसङ्गसंगतेर्वक्तुमशक्यत्वात्। उपोद्घातादीनां चासंभवादसंगतमिदं स्यात्। यदि च ब्रह्मपदस्य प्रकृतिवाचकत्वं सांख्यसंमतमिति जिज्ञासासूत्रेण प्रधानं स्मरेदिति नासंगतं प्रधाननिरूपणरूपपूर्वपक्षोत्थानमिति विभाव्यते तदा दूषणान्तरमाहुः पञ्चशिखेत्यादि। सूत्राणीति चतुर्थपादे वक्ष्यमाणानि। जन्मादीत्यादि 'यतो वा इमानि भूतानि' इतिश्रुत्या जन्मादिसूत्रेण चेत्यर्थः। तथा च जगत्कर्तृत्वेनार्थेन प्रधानस्मरणं वक्तुं शक्यं प्रधाने जगत्कर्तृत्वस्य सांख्याभिमतत्वादित्यपि नेत्यर्थः। तत्प्रसङ्गेति किं तु 'अधीहि भगवो ब्रह्म' इति ब्रह्मण एवोपक्रान्तत्वात्तत्संगतिरिति भावः। जन्मादिसूत्रविषयश्रुतिपदस्योपलक्षकत्वात्। श्रुत्यन्तराणामिति 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' इत्यादीनामित्यर्थः। विचारादिति जीवप्रकरणेन जीवपरत्वोपपादनरूपाद्विचारात्। तथा चात्र सूत्रे प्रधानस्मरणाभावात्पूर्वपक्षोऽसंगत एवेति भावः। ईक्षतिसूत्रे प्रधानस्मरणस्यासंगतत्वेनाग्रेपि तत्स्मरणस्यासंगतत्वमित्याशयेनाहुः नातिविरुद्धमिति। प्रतिज्ञेत्यादि यथारुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां ताराममुख्यां प्रथममरुन्धतीं ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति तद्वन्मुख्यमात्मानमुपदिदिक्षुः प्रधानस्य हेयत्वं वदेत् स आत्मा तत्त्वमसीत्यत्र न चैवमवोचदिति सूत्रं व्याख्याय 'उत तमादेशमप्राक्षो येनाश्रुतम्' इत्याद्युपक्रमे श्रावणात् कारणविज्ञानेन

भाष्यप्रकाशः ।

भास्कराचार्या अप्येतदधिकरणं प्रधानकारणतानिरासायैवेति व्याचक्रुः ।

रामानुजाचार्यास्तु, मुख्यतया प्रधानकारणवादनिरासं व्याख्याय निर्विशेषचिन्मात्रब्रह्मवादोऽप्येताभिर्युक्तिभिः सूत्रकारेण निरस्यते । पारमार्थिकमुख्येक्षणादिगुणयोगिजिज्ञास्यं ब्रह्मेति स्थापनात् । निर्विशेषवादे हि साक्षित्वमप्यपारमार्थिकम् । वेदान्तवेद्यं ब्रह्म च जिज्ञास्यतया प्रतिज्ञाय तच्चेक्षतेर्नाऽशब्दमित्यादिसूत्रैश्चेतनमिति प्रतिपाद्यते । चेतनत्वं नाम चैतन्यगुणयोगः । अत ईक्षणगुणविरहिणः प्रधानतौल्यमेव । किंच निर्विशेषप्रकाशमात्रब्रह्मवादे तस्य प्रकाशत्वमपि दुरुपपादम् । प्रकाशोऽपि नाम स्वस्य परस्य च व्यवहारयोग्यतामापादयन् वस्तुविशेषः । निर्विशेषवस्तुनस्तदुभयरूपत्वाभावाद् घटादिवदचित्त्वमेवेति । अथ तदुभयरूपत्वाभावेऽपि तत्क्षमत्वमस्तीति चेन्न । तत्क्षमत्वं हि तत्सामर्थ्यवत्त्वम् । तत्सत्त्वे निर्विशेषत्वहानेः । अथ श्रुतिप्रामाण्यादयमेको विशेषोऽभ्युपगम्यते, हन्त तर्हि सर्वशक्तित्वादयोऽन्येऽपि तथेति निर्विशेषवाद एव त्यक्तः स्यादित्याद्याहुः ।

शैवस्तु रामानुजमतस्यैव चौरो मध्वमतस्य च क्वचित् क्वचित् तद्विरुद्धां शैवश्रुतिमुदाहरन् भिन्नं प्रस्थानमभिमन्यते। तन्मते ईक्षत्यधिकरणं जन्माद्यधिकरणोक्तलक्षणस्य प्रधानेऽतिव्याप्तिवारणाय । आनन्दमयाधिकरणं च जीवेऽतिव्याप्तिवारणायेति ।

मध्वाचार्यास्तु, 'यतो वाचः', 'अशब्दमस्पर्शमरूपमव्ययम्', 'अवचनेनैव प्रोवाच' 'यद्वाचानभ्युदितम्' इत्यादिषु श्रुतिषु वाच्यत्वनिषेधाद् ब्रह्मणः शास्त्रयोनित्वसूत्रोक्तं शास्त्रप्रमाणकत्वं न युज्यत इति पूर्वपक्षनिवृत्त्यर्थमीक्षत्यधिकरणम् । तत्र विषयवाक्यं तु, 'स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते', 'आत्मन्येवात्मानं पश्येत्', 'विज्ञाय प्रज्ञां कुर्वीत' इत्यादि । एतेष्वीक्षणीयत्वश्रावणाद् वाच्यमेव ब्रह्म । न चेक्षणस्य दर्शनात्मकत्वात् कथं तेन वाच्यत्वसिद्धिरिति शङ्क्यम् । 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति वाक्यान्तरे उपनिषदेकगम्यत्वश्रावणेन प्रत्यक्षाद्यवेद्यत्वे सिद्धे वचनेनैवेक्षणस्य विवक्षितत्वात् । नचाऽवचनेनोवाचेत्यादिश्रुतिविरोधः । तत्र साकल्येनावचनस्य विवक्षितत्वात् ।

'अप्रसिद्धेरवाच्यं तद् वाच्यं सर्वागमोक्तितः ।
अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृतम्' ॥

इति गारुडेन तथानिश्चयादिति व्याख्यायाग्रे प्रधानस्याश्रौतत्वं न सांख्यमतसिद्धमतस्तस्याशब्दत्वव्यवस्थापनमसंगतमिति सूचयन्ति । ततो गौणश्चेत्यादिसूत्रेषु जीवात्मनीक्षणीयत्ववाच्यत्वादिश्रौतगुणयोगं नानाश्रुतिस्मृत्युपन्यासेन निराकुर्वन्ति । समाप्तौ च पुनरपि

रश्मिः ।

सर्वविज्ञानमिति प्रतिज्ञानस्य विरोधः । नहि सच्छब्दवाच्ये प्रधाने भोग्यवर्गकारणे हेयत्वेनाहेयत्वेन वा ज्ञाते भोक्तृवर्गो विज्ञातो भवतीति । चकारं प्रतिज्ञाविरोधसमुच्चयार्थमाहुरित्यर्थः । **चौर** इति भगवाञ्चौर इत्यर्थः । **अतिव्याप्तीति** तेनैतन्मते मध्वरामानुजमतोक्तं ज्ञेयम् । **तथेतीति** प्रमाणभूतश्रुतिबोधिता इति निश्चयादित्यर्थः । **नानाश्रुतिस्मृतीति** ।

'यो गुणैः सर्वतो हीनो यश्च दोषविवर्जितः ।
हेयोपादेयरहितः स आत्मेत्यभिधीयते' ॥

भाष्यप्रकाशः ।

सिंहावलोकनन्यायेन ब्रह्मणोऽवाच्यत्वमेव युक्त्यन्तरैर्दूषयन्ति ।

तत्रेदमवधेयम् । तथाहि । द्विविधं कपिलसूत्रप्रसिद्धं सांख्यम् । समासरूपमष्टाविंशतिसूत्रम् । तदुपरि पञ्चशिखर्षेर्वृत्तिः । प्रवचनसूत्रात्मकं च षडध्याययुक्तम् । तत्राद्ये तु शास्त्रप्रतिपाद्यानामर्थानामुद्देशमात्रं नान्यत् । द्वितीये तु, 'सत्त्वरजस्तमःसाम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहंकारोऽहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति । पञ्चविंशतिर्गणः' इत्येकस्मिन् सूत्रे सर्वानुद्दिश्य ततोऽग्रे 'स्थूलात् पञ्चतन्मात्रस्य', 'बाह्याभ्यान्तराभ्यां तैरहंकारस्य', 'तेनान्तःकरणस्य', 'ततः प्रकृतेः', 'संघातपरार्थत्वात् पुरुषस्य' इति पञ्चसूत्र्या स्थूलभूतानि प्रत्यक्षसिद्धान्यादाय तेभ्यः कार्येभ्य उपरितनानामानुमानिकत्वमेव कपिलाचार्यैरादृतम् । ततोऽग्रे यद्यपि 'प्रधानाज्जगज्जायते' इति श्रुतिं सूत्राकारेण पठन्ति त्रिविधं प्रमाणं चाङ्गीकुर्वन्ति, तदप्युक्तोपष्टम्भायैव, न तु शब्दस्य प्राधान्याय । अत एव व्यासचरणैरप्यानुमानिकसूत्रे तथैव तन्मतं सूचयित्वा दूष्यते । तेन सांख्यमते प्रकृतेर्मुख्यतया शब्दगम्यत्वाभावेनाशब्दत्वमेव सिद्ध्यति । शब्दगम्यत्वस्यानुमानिकपादे निराकरणेन तस्याभिमानिकत्व एव पर्यवसानादिति । अत एतद्व्यतिरिक्तं सर्वं

रश्मिः ।

'एतदन्यस्वभावो यः स नात्मेति सतां मतम् ।
अनात्मन्यात्मशब्दस्तु सोपचारः प्रयुज्यते' ॥

इति वामन इति स्मृतिः 'द्वे वा व ब्रह्मणो रूपे आत्मा चैवानात्मा च तत्र यः स आत्मा स नित्यः शुद्धः केवलो निर्गुणश्च अथ ह योऽनीदृशः सोऽनात्मा' इति तलवकारश्रुतिः । **युक्त्यन्तरैरिति** न ह्यशब्दः श्रूयते न चाप्रसिद्धं कल्प्यं सर्वशब्दावाच्यस्य लक्षणायुक्तेरित्येवं युक्त्यन्तरैरित्यर्थः । प्रधानस्याश्रौतत्वं न सांख्यमतसिद्धमिति भागोऽसंगतः । तन्मते प्रधानादीनामानुमानिकत्वेनाश्रौतत्वात् । अन्यत्सर्वं संगतमित्याहुः **तत्रेदमित्यादि** । **नान्यदिति** । तथा च तस्य प्राथम्येपि विस्पष्टप्रतीत्यजनकत्वान्नोच्यत इति भावः । **द्वितीये त्वित्यादि** प्रवचनसूत्रात्मके । सत्त्वरजस्तमसामिति व्यस्तोपि पाठः । **आनुमानिकत्वमिति** 'कार्यात्कारणानुमानं तत्साहित्यात्' । 'अव्यक्तं त्रिगुणाल्लिङ्गात्' । 'तत्कार्यतस्तत्सिद्धेर्नापलापः' । 'सामान्येन विवादाभावात्' 'धर्मवदनुमानम्' इति सांख्यप्रवचनसूत्रेषु सत्त्वादिधर्मवदव्यक्तस्यानुमानेन तथेत्यर्थः । अथवा 'अचाक्षुषाणामनुमानेन बोधो धूमादिभिरिव वह्नेः' इति सूत्रे तथेत्यर्थः । तथा च स्थूलभूतातिरिक्तानां प्रकृत्यादीनामानुमानिकत्वमेवेति भावः । ननु 'प्रधानाज्जगज्जायत इति' इतिसूत्रे प्रधानं श्रौतमित्यप्यादृतं तत्राहुस्ततोऽग्र इति । स्थूलादित्याद्यारभ्य त्रयोदशसूत्रीपठनानन्तरमित्यर्थः । **श्रुतिमिति** इतिशब्दान्तां श्रुतिम् । **त्रिविधमिति** 'त्रिविधं प्रमाणं तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः' इति सूत्रेणेत्यर्थः । तच्च प्रत्यक्षानुमानशब्दात्मकम् । **उक्तोपष्टम्भायेति** प्रकृत्यादीनां यदुक्तमानुमानिकत्वं तदुपष्टम्भायेत्यर्थः । 'प्रधानाज्जगज्जायते' इति जगता प्रधानमनुमातव्यमिति श्रुतिमात्रप्रामाण्ये पूर्वोक्तं न सिद्ध्येदिति प्रमाणत्रयमङ्गीकृतमिति हृदयम् । **प्राधान्यायेति** तथा च प्रधानादित्यादिसूत्रं प्रधानस्य जगत्कर्तृत्वबोधने परिसमाप्तं न तस्य श्रौतत्वबोधनायालमिति भावः । **तथैवेत्यादि** । **आनुमानिकमिति** प्रकृत्यादि-

भाष्यप्रकाशः ।

सम्यगेव । अत एव भाष्यान्तरेऽपि प्रकृतेस्तथात्वस्यैवादरणमिति दिक् ।

विज्ञानेन्द्रभिक्षुस्तु, ननु यदि प्रलये प्रधानादिसमन्वयो ब्रह्मण्युपगतस्तर्हि तस्यैव श्रुत्युक्तं जगत्कारणत्वमस्तु । भवदभिमतब्रह्मकल्पने तस्य जगदधिष्ठानकारणत्वकल्पने च गौरवात् । सांख्यसूत्रेष्वीश्वरस्य निराकृतत्वात् । ब्रह्मशब्दश्च व्यापकत्वात् प्रधानजीवयोरुपपद्यत एव । अधिष्ठानकारणत्वं च जीवानामेवास्तु । समस्तकार्याणामदृष्टद्वारा जीवकार्यत्वस्य अदृष्टवदात्मसंयोगजन्यतया जीवाधेयत्वस्य च सर्वास्तिकसंमतत्वात् । 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' इति, 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि,' 'येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि' इति जीवप्रकरणस्थश्रुतिस्मृतिभ्यामपि तथावसायाच्च । अतः शास्त्रस्य नित्येश्वरपरत्वे शास्त्रयोनित्वादितिहेतुराश्रयासिद्धः । कार्येश्वरपरत्वे च पृथक् शास्त्रारम्भवैफल्यम् । सांख्यादिभिरेव तथाविधब्रह्मनिरूपणादिति शङ्कायामिदं सूत्रं प्रवर्तते । ईक्षतेर्नाशब्दमिति । विवादास्पदप्रधानादिभ्योऽतिरिक्तं ब्रह्म न अशब्दं, न अशास्त्रयोनि, न जगत्कारणश्रुत्यप्रतिपाद्यमिति यावत् । कुतः । ईक्षतेः । इतरावृत्तिश्रुत्युक्तेक्षतिधर्मकत्वात् । तथाच कारणश्रुतिः पराभिमतप्रधानाद्यन्यविषया, तदवृत्तिधर्मप्रकारेण बोधकत्वात् । आकाशाद् वायुरित्यादिश्रुतिवदिति । अथवा तज्जगज्जन्मादिकारणं ब्रह्म चेतनमचेतनं वा । चेतनत्वेऽपि स्वयंभूस्तदतिरिक्तो वेति विशेषाकाङ्क्षायां प्रवर्तते ईक्षतेर्नाशब्दमिति । जगत्कारणं ब्रह्म ना पुरुष एव । कुतः ईक्षतेः । ईक्षणश्रुतिगोचरत्वाद् । अत एवेक्षणात् तद् ब्रह्म अशब्दं शब्दब्रह्मणो हिरण्यगर्भादतिरिक्तं च भवति, सुतरां पुरुषान्तरेभ्य इत्यर्थः । हिरण्यगर्भस्य वेदमयत्वेन वेदगर्भत्ववच्छब्दब्रह्मत्वमपि स्मर्यते

'पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत् ।
कल्पो यत्राऽभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः' ॥

इति भागवतादिष्विति । एवं द्विधा सूत्रं व्याख्याय, तदैक्षत बहु स्यामितिविषयवाक्यं दर्शयित्वा ।

रश्मिः ।

विशेषणदानेनानुमानिकं प्रकृत्यादीति तन्मतं सूचयित्वेत्यर्थः । भाष्यान्तर इति अनुव्याख्यानसंज्ञके मध्वभाष्य इत्यर्थः । तथात्वस्यैवेति मुख्यतयात्राऽशब्दत्वस्यैवेत्यर्थः । यथाहुः ।

'न च सांख्यनिराकृत्यै सूत्राण्येतान्यचिक्लृपत् ।
भगवान् न ह्यशब्दत्वं प्रधानेऽङ्गीकरोत्यसौ' ॥

इति । तस्यैवेति अविभक्ततया स्थितस्य ब्रह्मणः 'अविभक्तं च भूतेषु' इति वाक्यात् । भवदभीति प्रायोपाधिक इत्यर्थः । पदार्थद्वयकल्पने गौरवात् । प्रकृत्यविभक्तं तु क्लृप्तमेवेति गौरवम् । जगदधिष्ठानेति एतदुपपादितम् । सांख्यसूत्रेष्विति 'ईश्वरासिद्धेः' इत्यादिष्वित्यर्थः । 'मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः' । 'उभयथाप्यसत्कारत्वम्' । 'मुक्तात्मनः प्रशंसा उपासासिद्धस्य वा' इति सूत्रेष्वित्यर्थः । अधिष्ठानेत्यादि उक्तसूत्राग्रे 'तत्संनिधानादधिष्ठातृत्वं मणिवत्' इतिसूत्रात्तथेत्यर्थः । 'विशेषकार्येपि जीवानाम्' 'सिद्धरूपबोद्धृत्वात् वाक्यार्थोपदेशः' 'अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वम्' इतिसूत्राण्यालोच्याह समस्तेत्यादि । शास्त्रयोनित्वहेतोरीश्वरेऽभावाज्जीवेनादावाहुः आश्रयेति । शास्त्रारम्भेति । शास्त्रं वेदान्तः । नेति चेतन

---

१. अनुव्याख्याने । २. तप्तायःपिण्डवद् ।

भाष्यप्रकाशः ।

'सर्गकाले तु संप्राप्ते ज्ञात्वा तं कालरूपकम् ।
अन्तर्लीनविकारं च तत् स्रष्टुमुपचक्रमे ।
तस्मादव्यक्तमुत्पन्नं ततश्चापि महानभूत्' ॥

इति स्मृतिं च दर्शयित्वाह । नहीदमीक्षणं प्रधानादीनामचेतनानां संभवति । ईक्षणध्यानचिन्तनादिशब्देषु चैतन्यस्य विशेष्यत्वात् । ईक्षणादिशब्दस्योपाधिवृत्तिवाचकत्वेऽपि प्रकृतिस्वातन्त्र्यवादिभिरपि प्रधाने तत्पूर्विकाया वृत्तेरनङ्गीकाराच्च । नापि जीवानां, महदादिसृष्टेः पूर्वं करणाभावेन तेषां चैतन्यफलोपधानाभावात् । नचेयमीक्षणपूर्विका सृष्टिर्महत्तत्त्वसृष्टेः पश्चादिति वक्तुं शक्यम्, तथा सतीक्षणात् पूर्वमपि द्वैतापत्त्या, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इतीक्षणाव्यवहितपूर्वश्रुत्यनुपपत्तेः । ततश्चापि महानभूदिति स्मृतिविरोधाच्च । नच तत् पूर्वसर्गीयमिति वक्तुं शक्यम् । सर्गकाले तु संप्राप्ते ज्ञात्वेति सर्गसमकालीनज्ञानावगमादित्यादि । ततः शांकरमतीयं सूत्रव्याख्यानं, मायां तु प्रकृतिं विद्यादिति श्रुतिव्याख्यानं च दूषयित्वा ततः सांख्ययोगयोर्वेदाविरुद्धत्वं च साधयित्वा रजस्तमःसंमिश्रतया मलिनं कार्यसत्त्वं परमेश्वरस्य नोपाधिः, किंतु केवलं नित्यज्ञानेच्छानन्दादिमत् सदैकरूपं कारणसत्त्वमेव तस्योपाधिः । 'न स्थानतोऽपि परस्योभयलिङ्गम्' इत्यागामिसूत्रात् । ब्रह्मविष्णुमहेश्वरास्तु सृष्टिस्थितिसंहाराधिकारिणः कार्यसत्त्वाद्युपाधिका महदाख्या अवान्तरेश्वरा एव । तेषां च कार्योपाधित्वम् ।

'गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो देवा विजज्ञिरे ।
एका मूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ।
सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्' ॥

इति मात्स्यादिभ्यः । बुद्ध्याख्यसमष्टिमहत्तत्त्वं हि त्रिगुणात्मकरज्जुवत् त्रिगुणात्मकमेकमेव । सत्त्वाद्यंशभेदेन त्रयाणां देवानां च शरीरं भवतीत्येका मूर्तिरित्युच्यते हरिहरात्मकदेहवत् । अत एव चैतत्सूक्ष्मशरीराधारभूतं विराडाख्यं स्थूलशरीरमेकमेवेति त्रयाणामेव विश्वरूपत्वमुपपद्यते । त्रयश्च देवाश्चेतनरूपा भिन्ना एव । अत एव त्रयाणामेकपिण्डतया वातपित्तकफवत् परस्परसापेक्षत्वाच्च ।

रश्मिः ।

इत्यर्थः । विशेष्यत्वादिति आश्रयतयाऽपेक्षणीयत्वेन तथात्वादित्यर्थः । ईक्षणादिमच्चैतन्यमिति प्रयोगोऽत्र । नन्वीक्षणादेर्द्वित्वादिवद्व्यासज्यवृत्तित्वेन शबलवृत्तित्वात् प्रधानज्ञानवाचकत्वमपि निर्दुष्टमिति शङ्कायामाहुः ईक्षणेत्यादि । तत्पूर्विकाया इति चैतन्यवृत्तिपूर्विकायाः प्रधानवृत्तेरित्यर्थः । उपाधिपूर्विकाया वा, वृत्तिर्ज्ञानविशेषः । नापीत्यादि ईक्षणं संभवतीति योजना । करणेत्यादि शरीरेन्द्रियादिरूपस्य करणस्याभावेनेत्यर्थः । चैतन्येत्यादि जीवानां चैतन्यस्य फलं कार्यं तस्य यदुपधानं जननयोग्यत्वं तदभावादित्यर्थः । 'मनोमात्रमिदं ज्ञात्वा' इत्यादिवाक्यान्महत्तत्त्वाख्यं मनो ब्रह्मण्यन्तर्भाव्याशङ्कते न चेयमिति । द्वैतापत्त्येति महदादिसर्जनार्थं शरीराद्यपेक्षणादिति भावः । महत्तत्त्वेन द्वैतापत्तिर्वा । इतिस्मृतीत्यादि महत्सृष्टेः पूर्वमीक्षणबोधकस्मृतिविरोधाच्चेत्यर्थः । ततश्चेत्यादि तत इत्यनेनाव्यक्तपरामर्शादिति भावः । तत्पूर्वेति । तदिति स्मृत्युक्तं महत्सर्जनम् । सर्गसमेति 'समानकर्तृकयोः पूर्वकाले' इति क्त्वो विधायकसूत्रात्तथेत्यर्थः । संमिश्रतयेति

भाष्यप्रकाशः ।

'अन्योन्यमनुरक्तास्ते ह्यन्योन्यमनुजीविनः ।
अन्योन्यं प्रणताश्चैव लीलया परमेश्वराः' ॥

इति मत्स्यादिवाक्यमप्युपपन्नम् । एतेन त्रयाणां भेदाभेदावपि व्याख्यातौ वेदितव्यौ । ननु तेषां कार्योपाधिकत्वेऽपि, 'त्रिधा कृत्वाऽऽत्मनो देहं सोऽन्तर्यामीश्वरः स्थितः' इति स्मृतेर्योगिकायव्यूहवल्लीलावतारत्वमेवाऽस्तु, किमर्थं विष्ण्वादीनां चेतनान्तरत्वं कल्प्यत इति चेन्न । कौर्मे—

'प्रधानं पुरुषं चैव प्रविश्याशु महेश्वरः ।
क्षोभयामास योगेन परेण परमेश्वरः ॥
प्रधानात् क्षोभ्यमाणाच्च तथा पुंसः पुरातनात् ।
प्रादुरासीन्महद्बीजं प्रधानपुरुषात्मकम्' ॥

इत्यनेन, तथा विष्णुपुराणादिषु च पुरुषान्तरेण सह प्रकृतिं संयोज्यैव परमेश्वरस्तदुभयात्मकं देवतात्रयरूपं महान्तं सृजतीत्यवगमात् ।

'ब्रह्मादीनां त्रयाणां तु स्वहेतौ प्रकृतौ लयः ।
प्रोच्यते कालयोगेन पुनरेव समुद्भवः' ॥

इति मात्स्यादिभ्यस्तेषामुत्पत्तिलयसिद्धेश्च । अस्मिन् कूर्मवाक्ये ईश्वरप्रवेशो जीवस्य ज्ञानेच्छाप्रयत्नव्यापनरूपः । क्षोभश्च गुणद्वारा । योगश्चैकाग्र्यम् । अयं च क्षोभः संयोगविशेषद्वारा महतो हेतुः । एवं पुराणान्तरेभ्योऽपि न तेषां साक्षादवतारत्वम् । किंच । मनुना

'यत् तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति गीयते' ॥

इत्यनेनाव्यक्तब्रह्मकार्यस्यापि लौकिकब्रह्मत्वमुक्त्वा, 'आपो नारा इति प्रोक्ताः' इत्यादिना योगेन तस्यैव नारायणत्वमुक्तमतो नारायणादप्यतिरिक्त एव परमेश्वर इति । नच नारायणादिशब्दानामुपाधिमात्रपरत्वमिति वाच्यम् । तथा सति लक्षणापत्तेरिति । अत एव विष्ण्वादिदेवतायाः कृष्णाद्यवतारेषु न पुरुषान्तरप्रवेशः श्रूयते, फलवान् वा भवतीत्यतोंऽशावतारत्वमेव । अत एव भागवते ऋष्यादीन् प्रकृत्य स्मर्यते,

रश्मिः ।

मिश्रतया । ननु 'प्रधानं पुरुषं चैव प्रविश्य' इत्युक्तौ जीवद्वयमेकत्र देहे स्यादित्यत आहुः अस्मिन् कूर्मवाक्य इति । प्रधानपुरुषयोः संचालनसंभवेन कर्मत्वानुपपत्तिमाशङ्क्याह क्षोभश्चेति । तथा च गुणान् संचालयामासेत्यर्थः । धात्वर्थमाह अयं चेति तथा च गुणानां मुख्यगौणभावेन संयोगं कृतवानित्यर्थः । उपाधिमात्रेति मात्रचा शुद्धस्वरूपव्यवच्छेदः । तथा चाविभागाद्वैतहानिरिति भावः । लक्षणापत्तेरिति जहदजहल्लक्षणापत्तेरित्यर्थः । नारायण इत्यत्र नारा आपस्तासां त्यागोऽयमात्रमात्मा नारायणान्तर्गतीयोऽस्वसंबन्धस्य त्यागः । अस्वात्मनोरैक्यम् । एवं तत्त्वमसीत्यत्र मायाविषयोस्त्यागः ब्रह्मविष्ण्वोरप्येवम्, एतन्मते त्वविभक्तत्वेनैवाद्वैतम् । गीतोक्तसात्त्विकविषयम् । अत आपस्तिशब्दः । अत एवाविभागाद्वैतं सिद्धम् । पुरुषेति विष्णुपुरुषादन्यः पुरुषः पुरुषान्तरं तस्मिन् प्रवेशः । किंतु स्वस्मिन् विष्ण्वंश एव कृष्णे । फलं कार्यं तद्वान् पुरुषान्तरप्रवेशः । अंशेति विष्ण्वंशावतारत्वमित्यर्थः । 'सर्वं तं परादात्' इत्युक्तश्रुत्यैवकारः । अत्र प्रमाणमाहुः अत इति ।

भाष्यप्रकाशः ।

'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे' ॥ इति ।

अत्र कृष्णो विष्णुः स्वयं परमेश्वरः, तस्य पुत्रवत् साक्षादंश इत्यर्थः । ऋष्यादीनामंशांशिवचनादिति । न चैवं सति, 'मत्तः परतरं नान्यत् किंचिदस्ति धनञ्जय' इति गीतावाक्यविरोध इति वाच्यम् । तथाविधवाक्यानां व्यक्तपरत्वात् । ईश्वरस्य चाव्यक्ततया व्यवहार्यत्वाभावात् । एतेनापि विष्ण्वादीनां परमेश्वरत्वादिकं व्यक्तापेक्षया बोध्यम् । नित्यत्वं च 'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' इति स्मृतेर्बोध्यम् । अथवा, 'यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' इतिश्रुतेर्विष्णुदेवताया औत्पत्तिकब्रह्मात्मभावान्मत्तः परतरं नास्तीत्यादिवचनोपपत्तिः । वक्ष्यति चाऽऽचार्यः, 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इति । अत एवानुगीतायां, 'परं हि ब्रह्म कथितं योगयुक्तेन तन्मया' इति श्रीकृष्णवचनाद् भगवद्गीतायां परब्रह्मैव कार्यब्रह्मणा श्रीकृष्णेनाहमित्युपदिष्टमिति निर्णीतम् । किंच । अन्येषामपि ज्ञानिनां ब्रह्मभावेऽपि विष्णावेव मुख्यतो ब्रह्मभावान्मत्तः परतरं नास्तीति वचनमुक्तं, नान्यस्य । तस्य सर्वज्ञानिमुख्यत्वमुक्तं मोक्षधर्मे,

'अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः ।
एकस्तद्वेद भगवान् धाता नारायणो विभुः ॥
नारायणादृषिगणः' इत्यादिना ।

तथा शिवस्यापि मत्तः परतरं नास्तीति वचनं बोद्धव्यम् । किंच । योगयुक्ता ये जीवाः पूर्वपूर्वेषु सर्गेषु करणवर्गेण सह च सायुज्यमुक्त्या परमेश्वरतां गतास्ते वासुदेवव्यूहेऽन्तर्भवन्ति । तत्र च व्यूह एक एव वासुदेवो नित्येश्वर इतरे तदंशा वासुदेवाः । तथा संकर्षणप्रद्युम्नोऽनिरुद्धाख्यव्यूहरूपिणो विभूतिगणाः पूर्वसिद्धाः । त एते यथायोग्यं महदादिविराडन्तरूपेण ब्रह्मविष्णुरुद्ररूपेण चांशावताराः परमेश्वरस्य भवन्ति । 'आगच्छन्ति यथाकालं गुरोः संदेशकारिणः' इति मोक्षधर्मात् । तथाच ये हरिहरादयः परमेश्वरकोटयस्तेषां, मत्तः परतरं नास्तीति वचनमुपपद्यत एव । यद्यपि तेषां जगद्व्यापारवर्जमेवैश्वर्यं तथापि परमेश्वरात्मकतया सर्वस्रष्टृत्वसर्वाधारत्वा-

रश्मिः ।

मृडयन्तीति सुखयन्तीत्यर्थः । अत्रार्थे प्रमाणमाहुः ऋष्यादीनामिति । वाक्येंऽशस्य कला इति समासं मत्वाहुः अंशांशीति । तथा चांशस्यापेक्षणात्कृष्णोंऽश इत्यर्थः साधुः । ऋष्यादीनामंशाः पुत्रादयस्ते सन्त्येषां तेंऽशिन इत्यर्थः । व्यक्तपरत्वादिति तथा च व्यक्तं 'मत्तः परतरं नान्यत्' इत्यर्थः । परमेश्वरत्वबोधकानां संगतिमाह एतेनेति । विष्ण्वादिनित्यत्वबोधकानां संगतिमाह नित्यत्वं चेत्यादि । एकस्यांशांशिभावः उक्तः स विरुद्ध इति पक्षान्तरमाहुः अथवेति । 'प्रत्यबुध्यत' यथावदात्मानं प्रतिबोधितवान् । औत्पत्तिकेति नित्यब्रह्मात्मभावस्तत्कृतः स कृष्णस्तदभिन्नान्मत्तः इत्यर्थः । तर्ह्यन्येषामपि ब्रह्मभाव एतादृशः स्यात्कृष्णवत्तये आत्मनोप्यविभाग इति । ब्रह्मात्मभावादित्यत्रात्मशब्दोऽधिक इत्यत आह किं चेत्यादि । ब्रह्मभावादिति कृष्णरूपात् । वचनमिति तस्य वचनमुक्तं नान्यस्यर्षेः । योगयुक्ता इति । स्वमार्गेपि मानसीसेवाया योगत्वेन व्याख्यानात् । अन्ये तु 'पतन्त्यधो नादृतयुष्मदङ्घ्रयः' इतिवाक्यविषयाः । करणेति सूक्ष्मदेहेन । द्वितीयस्कन्धेस्ति । इतर इति कृष्णान्याः । परमेति परमेश्वर आत्मा येषां अंशानां

भाष्यप्रकाशः ।

ह्युपदेशोऽपि तेषु युज्यत एव । ननु यद्येवं तदा गीतादिषु विष्ण्वादिदेवतैश्वर्यमेव कुत उक्तं, न परमेश्वरस्तदैश्वर्यं वेति चेन्न ।

'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः' ॥

इति प्रश्नप्रतिवचनाभ्यां विष्णुदेवाद् भेदेन परमेश्वरकथनात् । 'अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते' इत्यादिना च परमेश्वरस्यैश्वर्यादिकथनादिति । ये त्वीश्वरस्यान्तर्याम्यतिरिक्तविषयापि योगिनामिव लीलाशरीरमिच्छन्ति, तेषां मते, 'न तस्य कार्यं करणं च विद्यते', 'अप्राणो ह्यमनाः शुभ्रः', 'अक्षरात् परतः परः' इत्यादिश्रुतीनां, 'अरूपवदेव हि तत्प्रधानत्वात्' इत्यागामिसूत्रस्य च विरोधः । कार्यं शरीरम् । करणं बुद्ध्यादि । बुद्ध्यादिना हि शरीरं प्रेर्यत इति । 'सर्वदेहविवर्जितः' 'अशरीरः शरीरेषु सर्वेषु निवसत्यसौ' इति, 'देहद्वयस्थितो नित्यः सर्व देहविवर्जितः' । इति भारतादिष्वीश्वरस्य देहद्वयप्रतिषेधात् । अतो विष्ण्वादिदेवानामेव स्थित्यादिलक्षणस्वाधिकारपालनाय मत्स्याद्यो लीलावताराः । ते च परब्रह्मणः प्रकृष्टशक्तितया आवेशावतारतया वा परमेश्वरत्वेनोपास्या इति । तथाच श्रुतिः—

'यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' ॥
'यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम्' ॥

इति । नन्वेवं परब्रह्मणः सकाशाद् विष्ण्वादिदेवानां भिन्नत्वे विष्णुशिवप्रकरणस्थानि सुब्बादिवाक्यानि ब्रह्मनिरूपणे साध(क)नतया विचारकैः किमित्युपन्यस्यन्त इति चेत्तयोरीश्वरकोटितया परमेश्वरेण सह व्यवहारसाम्यादिति गृहाण । अत एव, 'त्रयाणामेकभावानां यो न पश्यति वै भिदाम्' इत्यादिभिस्त्रयाणामेव देवानां स्वाभाविकब्रह्मात्मभावसाम्यात् सर्वोपनिषत्सु त एवोपासनार्थं ब्रह्मतयोपदिश्यन्त इति । परब्रह्मणश्च स्वतो नामरूपाद्यभावः ।

'न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः ।
सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे ॥
नामरूपे न यस्यैको योऽस्तित्वेनोपलभ्यते' ।

इत्यादिरूपविष्णुपुराणादिवाक्यात् । आत्मनः पर इति जीवादतिरिक्ते । अतः परब्रह्मणो नामरूपाद्यभावान्मुख्यविकारयोर्हरिहरयोर्नामरूपाभ्यामेव शास्त्रेषु प्रायशो व्यपदेशः । अत एव वैष्णवाः शैवाश्च विष्ण्वाद्यतिरिक्तं परमेश्वरमविद्वांसो ब्रह्ममीमांसाशास्त्रं विष्ण्वादिपरतया व्याचक्षाणा अविवेकिन एवेति मन्तव्यम् । एवं पञ्चसूत्र्यां संक्षेपतः प्रदर्शितः शास्त्रार्थ इतः परं प्रपञ्च्यत इत्याह ।

रश्मिः ।

तत्फलं वा । अविभागाद्वैतादेवेति । ऐश्वर्यादीति अहं परं यस्येति बहुव्रीहिणेत्यर्थः । अन्तर्यामीति अन्तर्यामिब्राह्मणे स्फुटमिदम् । देहद्वयेति स्थूलसूक्ष्मदेहद्वय इत्यर्थः । व्यष्टिसमष्ट्यात्मकदेहद्वयेति वा । व्यवहारेति अविभागाद्वैतेन तथा । पञ्चसूत्र्यामिति एतत्सूत्रपर्यन्तायां जन्माद्यस्येति

भाष्यप्रकाशः ।

तदप्यविचाररमणीयमेव । सदेव सोम्येदमग्र आसीदित्यनेन निरूपिताया आदिसृष्टेः पूर्वं केवलं ब्रह्मैव, नान्यदित्यस्यार्थस्य साधने तदभिमताविभागलक्षणाद्वैतस्याऽवान्तरसृष्टिप्राकालविषयत्वव्युत्पादनेन तदानीं तदभिमतप्रकारेण प्रधानादिसमन्वयस्याशक्यवचनतया जीवादृष्टस्याप्यभावेन प्रथमव्याख्यानगतपूर्वपक्षस्यैवासंगतत्वेन तदपाकरणाय सूत्रप्रवृत्तेर्वक्तुमशक्यत्वात् । द्वितीयव्याख्यानं तु न दुष्टम् । सांख्ययोगयोः सर्वांशेन श्रुत्यविरुद्धत्वोपपादनं त्वसंगतमेव ।

'अक्षपादप्रणीते च काणादे सांख्ययोगयोः ।
त्याज्यः श्रुतिविरुद्धोंऽशः श्रुत्येकशरणैर्नृभिः ॥
जैमिनीये च वैयासे न विरोधोऽस्ति कश्चन' ।

इति पराशरोपपुराणीयवाक्यविरोधात् । नच योऽभ्युपगमवादत्वेनोक्तो नित्येश्वरदूषणादिः स एव त्याज्योऽस्त्विति वाच्यम् । तदुक्तषडध्याय्यां तस्याभ्युपगमवादत्वगमकानुपलम्भात् । नित्यानित्यवस्तुविवेकव्यतिरिक्तांशान्तरेऽपि तथात्वात् । 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति श्रुत्या तथा निश्चयात् । एवं योगेऽपि द्रष्टव्यम् । जीवात्मज्ञानमात्रेण मोक्षाङ्गीकारस्यापि तथात्वात् ।

'येऽन्येऽरविन्दाक्ष ! विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः' ॥

इति श्रीभागवते विविक्तजीवात्मज्ञानाद्विमुक्तमानिनां पातकथनेन तथा निश्चयादिति । तथा परमेश्वरस्य ब्रह्मविष्णुमहेश्वरातिरिक्तस्य कारणसत्त्वोपाधिकत्वस्थापनमप्यसंगततमम् । शिवतत्त्वविवेकस्थापितस्योङ्कारवाच्यस्य गुणसाम्योपाधिकस्य सर्वेश्वरस्येव कारणसत्त्वोपाधिकस्यापि

रश्मिः ।

सूत्रद्वयमिति । एतदपि विशिष्टाद्वैततुल्यमिति दूषयन्ति तदपीत्यादि । तदभिमतेत्यादि त्रिगुणात्मकरज्जुवत्त्रिगुणात्मकब्रह्मविष्णुशिवात्मकमेकमेव नित्यज्ञानेच्छानन्दादिमत्सदैकरूपकारणसत्त्वोपाधिकं ब्रह्मकार्यं तत्कारणं ब्रह्म इत्येवं तदभिमतेत्यादि । तदानीमिति प्रथमसृष्टिकाल इत्यर्थः । अतीतार्थमात्रपरत्वकल्पनेपि साकारप्रतिपादकत्वेनादोषादाहुः द्वितीयेति । अभ्युपगमवादत्वेनेति आग्रहवादो युक्तिरहितोऽभ्युपगमवादः । ननु किं तेनेत्यत आहुः नित्यानित्येत्यादि । तथात्वादिति श्रुतियुक्तिविरुद्धत्वेनाभ्युपगमवादत्वादित्यर्थः । तदर्थं श्रुतिविरोधमाहुः काल इत्यादि । अत्र योनिवादनिरासात्प्रधानवादोप्यभ्युपगमवाद इति निश्चयादित्यर्थः । 'एतेन योगः प्रत्युक्तः' इतिसूत्रादष्टाङ्गयोगे किंचिदाहुः एवं योग इति । षडङ्गयोगस्यौपनिषदत्वात् । शिवतत्त्वेत्यादि 'अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति नाभिर्हृदयं कण्ठं मूर्धा तत्र चतुष्पादं ब्रह्म विभाति जागरिते ब्रह्मा सुप्ते विष्णुः सुषुप्तौ रुद्रस्तुरीयमक्षरं स आदित्यो विष्णुश्च' इति ब्रह्मादिभ्यः परमक्षरशब्दं सर्वदेवतात्मकं तत्त्वान्तरं दर्शितम् । स एव 'न तत्र देवा ऋषयः पितर ईशते' इति श्रुत्यानन्येश्वरः । 'एको देवः सर्वभूतेषु गूढः' इति श्रुत्यान्तर्यामी चेति ब्रह्मोपनिषदि । अपि च जगत्कारणं ब्रह्म मायोपाधिकचैतन्यमित्यविवादं ब्रह्मविष्णुरुद्रास्तु तदीयगुणविशेषोपाधिचैतन्यरूपाः' सैषा चित्रा शुक्ला महङ्करा स्वयं गुणभिन्नाङ्गेष्वपि गुणभिन्ना सर्वत्र ब्रह्मविष्णुशिवरूपिणी' इति श्रुतेः । ततश्चोपा-

भाष्यप्रकाशः ।

निरुपाधिकपरमेश्वरप्रतिनिधित्वेनैव ब्रह्मोपनिषन्नृसिंहतापनीयमैत्रायणीयाथर्वशिखासु सिद्धत्वात् । इदं यथा तथा ब्रह्मवादाख्ये वादे निपुणतरमुपपादितमिति नेह प्रपञ्च्यते । नच निरुपाधिकस्य निराकारत्वं शङ्क्यम् । 'आनन्दरूपममृतं यद्विभाति' इति मुण्डके, 'अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ओँकारं सर्वेश्वरं द्वादशान्ते आनन्दाऽमृतरूपं प्रणवं षोडशान्ते' इति तापनीये, 'आनन्दमात्रकरपादमुखोदरादिः' इति पञ्चरात्रस्मृतौ, 'अथवा परमात्मानं परमानन्द-

रश्मिः ।

धिभेदे उपहितभेदस्यौचित्यात्, गुणमूर्तिभ्यः परं मायोपाधिकं जगत्कारणं ब्रह्मेति सिद्धम् । तच्चोमासहायं परमेश्वरं प्रभुम्, 'ऋतं सत्यं परं ब्रह्म' इति कैवल्योपनिषच्छ्रुतेरेतद्वपुरित्यप्पयदीक्षितास्तत्र वदन्ति तादृशेश्वरस्येवेत्यर्थः । प्रतिनिधित्वेनेति अत्रैवं ज्ञेयम् । यन्मूर्तित्रयातीतं तुरीयं तत्त्वं परं ब्रह्मेति प्रत्यपादि तन्मन्दम् । ब्रह्मोपनिषद्येव पूर्वोक्तानन्तरं पठ्यते तेषां मध्ये यत्परं ब्रह्म विभाति स्वयममनस्कमश्रोत्रमपाणिपादं ज्योतिर्वर्जितं नेत्यक्षरस्वरूपं निरुच्य तस्य ब्रह्मलोकत्वप्रसिद्ध्यै 'तत्र लोका न लोका देवा न देवा वेदा न वेदा यज्ञा न यज्ञा माता न माता पिता न पिता स्नुषा न स्नुषा चाण्डालो न चाण्डालः पौल्कसो न पौल्कसः श्रमणो न श्रमणः पशवो न पशवस्तापसो न तापसः इत्येकमेव परं ब्रह्म विभाति' इत्यनेन तत्र लोकादीनां ब्रह्मत्वमुच्यते न तु लोकादयो निषिध्यन्ते । एकेनैव लोकादिपदेन चारितार्थ्यात् । ततो हृद्याकाशे तद्विज्ञानमाकाशं तत्सुषिरमाकाशमित्यनेन तस्य भक्तहृदयाकाशत्वलोकादीनां ब्रह्मत्वोक्तेर्निरुच्य प्रायपाठानुरोधप्राप्तप्रथमार्थसप्तम्या ततस्तादृशहृदि वेद्यं पूर्णं ब्रह्म ज्ञपयितुं तद्वेद्यं हृद्याकाशे 'यस्मिन्निदं सं च विचरति' 'यस्मिन्निदं सर्वमोतप्रोतमिति तल्लक्षणमुक्तम् । तथा च ब्रह्म प्रतिनिधीयतेऽस्मिन् इति प्रतिनिधिरक्षरं तत्त्वेनेत्यर्थः । नृसिंहतापनीयेत्यादि यदप्यप्पयदीक्षितेन 'अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये' इति नाभिहृदयभ्रूमध्येष्वकारादिमात्रात्रयवाच्यानां ब्रह्मादीनामुपासाविधानानन्तरं ओँकारं सर्वेश्वरं द्वादशान्त इति द्वादशान्तोपास्यं तेभ्यः परं तत्त्वान्तरं तापिनीये दर्शितमित्युक्तम् । तत्रापि तदनन्तरं सप्तात्मानं चतुरात्मानं चतुःसप्तात्मानं चतुरात्मानमानन्दामृतरूपं प्रणवषोडशान्तर इति भक्तेसाहित्यलिङ्गेन प्रतिनिधेरेवोक्तेर्युक्तत्वात् । यदपि तेन मैत्रेयोपनिषदि 'तमो वा इदमेकमास' इत्यारभ्य 'तत्परेणेरितं विषमत्वं प्रयात्येतद्वै रजसो रूपम्' इत्यादिना तपोधिष्ठातुः परस्य संकल्पेनाविष्पाख्यस्य तमसो गुणविभागं निरूप्य तस्य प्रागुक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरिति 'अथ यो ह खलु वा वास्य राजसोंऽशो योयं ब्रह्माथ यो ह खलु वा वास्य तामसोंऽशोऽसौ योयं रुद्रोथ यो ह खलु वा वास्य सात्त्विकोंऽशोऽसौ योयं विष्णुः' इति तेभ्यः परं तत्त्वान्तरं दर्शितमित्युक्तम् । तत्रापि ततः पूर्वं ब्रह्मणो वा एता अग्र्यास्तनवः परस्यामृतस्याशरीरस्येत्युक्तत्वात् तस्येव तमोभवनादिरुच्यते इति प्रतिनिधिरेव तत्त्वान्तरम् । यत्त्वथर्वशिखायां शिव उच्यत इति तदप्योंकारप्रणवनाम्नो निर्वचनाद् ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते इति वचनात् प्रतिनिधित्वेन सिद्धम् । नात्र प्रसवविरोधः संपद्याविर्भावात् । तदुक्तं मैत्रायणीये 'ब्रह्मणो वा एता अग्र्यास्तनवः परस्यामृतस्याशरीरस्य तस्यैव लोके प्रतिमोदन्ति' इति । एतदेवाहुः निपुणतरमुपपादितमिति । यस्तत्पदाध्याहारे गौरवं मत्वाहुः किंचेति । अग्रिमाधिकरणे

---

१. आविला भासा वा । २. ओँकारो भक्तः, साहित्यं प्रतिपाद्यप्रतिपादकभावसंबन्धेन ।

भाष्यप्रकाशः

विग्रहम्' इति योगियाज्ञवल्क्यस्मृतौ चानन्दाकारस्यैव सिद्धत्वात् । नच, 'न तस्य कार्यं करणं च विद्यते' इत्यस्य विरोधः । तस्य तत्संबन्धि यत् तत् कार्यं जन्यं न, किं त्वजन्यमेव । किंच, तस्येति षष्ठ्या भेदो निरूप्यते । तथाच जीववत् स्वरूपातिरिक्तं ज्ञानक्रियादिषु करणमिन्द्रियादिकं च तस्य नास्ति । अथवा नित्यत्वादाकारस्य तद्धेतुभूतं करणं क्रिया, सापि नास्ति । अत एव, न तत्सम इत्यादीति तदर्थात् । एतेनैव 'अप्राणो ह्यमनाः शुभ्रः' इत्यस्याप्यविरोधः सिद्धः । नाप्यरूपवत्सूत्रस्य विरोधः । तत्रापि रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं तद्युक्तं रूपवद्विश्वम् । ब्रह्म तु तद्विलक्षणम् । यद्वा रूप्यते व्यवह्रियतेऽनेनेति रूपं करचरणादि तद्वत् तद्युक्तं ब्रह्म न, किंतु तद्विलक्षणम् । करादेरपि ब्रह्माभेदाद्रूपरूपं ब्रह्मैव, नतु रूपवदिति । ननु कुत एतदवगम्यत इत्याकाङ्क्षायां तद्विनिगमकं सूत्रशेषेणाह 'तत्प्रधानत्वात्' इति । सर्वेषां वेदान्तानां प्राधान्येन ब्रह्मप्रतिपादकत्वात् । तथाच ब्रह्मप्रकरणे निरूपित आकारो ब्रह्माभिन्न एवेति । नचाऽऽकारनिरूपकाणां ब्रह्मपरिचायनार्थत्वात् तेषां ब्रह्माभिन्नकराद्याकारनिरूपकत्वेऽपि न प्राधान्येन ब्रह्मप्रतिपादकत्वप्रतिरोध इति शङ्क्यम् । 'स यथा सैंधवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञान(घन) एव' इतिश्रुतौ बाह्याभ्यन्तरभेदराहित्यबोधने ज्ञानाकारत्वस्यैव सिद्धत्वात् । आकारभूतकरादिराहित्येन केवलज्ञानात्मकतायां बाह्याभ्यन्तरत्वप्रतीतिराहित्येन तन्निषेधानुपपत्तेः । अकृत्स्नादिप्रतीतिराहित्येन कृत्स्नघनपदयोर्वैयर्थ्यापत्तेश्च । अतः केवलसच्चिदानन्दात्मकब्रह्माभिन्नकरचरणाद्याकाराङ्गीकारे न कस्यापि विरोधः । यत् पुनस्तलवकारादिश्रुत्या परमेश्वरस्य साक्षादुपास्यत्वाभाव उक्तः स तु तामेव श्रुतिं विरुणद्धि । पूर्वार्धे मनःप्रवृत्तिरहितं तत्प्रेरकं यदुक्तं, तदेव ब्रह्म त्वं विद्धि, नेदं प्रेर्यत्वेनानुभूयमानं जीवात्मरूपं न विद्धि । यत् प्रेरकं तत् किमित्यत आह । यदिदं सच्चिदानन्दाकारमुपासते वैदिकोपासका इति तत्रार्थात् । अनुपास्यत्वेऽभिप्रेते तु द्वितीयेदंकारं न वदेदेव । नेदं यदुपासत इत्येतावतैव चारितार्थ्यात् । 'यस्यामतं तस्य मतम्' इत्यत्रापि, 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्' इति वरणहेतुकतनुविवरणस्य श्रुत्यन्तरे श्रावणाद् वरणाभावे यस्यामतमविदितं तस्य मतं, यस्य पुनस्तदभावेऽपि मतं स न वेदेति । यद्वा, अनिरुक्तश्रुतौ ब्रह्मणो वाक्यपरिच्छेद्यत्ववारणाद् यस्यामतमनिरुक्तत्वात् सम्यक्तया अज्ञातं तस्य मतम् । यस्य पुनस्तद्विपरीतं स न वेदेति । अविज्ञातं करचरणादिविशिष्टतया जानतां, विज्ञातं तदभिन्नतया

रश्मिः ।

वक्ष्यन्ति च ब्रह्मणि त्विन्द्रियाद्यभावादानन्देनैव कार्यं क्रियते इति । अविरोध इति आकारहेतुभूतः प्राणादिर्नास्तीत्यविरोध इत्यर्थः । एवेतीति करादीनां प्रत्येकं सच्चिदानन्दात्मकत्वादेवकारः । सर्वेषामिति समासस्तु तस्य प्रधानत्वं तत्प्रधानत्वं तस्य ब्रह्मणः प्रधानत्वात् मुख्यत्वादिति भाष्यात् । अविभागाद्वैतवादी शङ्कते न चाकारेति । बाह्याभ्यन्तरेत्यादि । कृत्स्नेति शेषः । यद्वा सप्तम्यन्तं पदं तृतीयान्तं वा । उक्त इति तथा च श्रुतिरित्यादिनोक्तः । अस्मिन् व्याख्याने वरणाभावेपि ब्रह्मावबोध आयाति स सिद्धान्तविरुद्ध इति भिन्नां व्याख्यामाहुः यद्वेत्यादि । अनिरुक्तेत्यादि तन्निष्ठस्येत्यादिसूत्रविषयभूतायामित्यर्थः । सम्यक्तयेति इदमित्थतयेत्यर्थः ।

भाष्यप्रकाशः ।

जानतामित्यर्थादिति । अतो न परब्रह्मणोऽनुपास्यत्वाज्ञेयत्वादिकं युक्तम् । यदपि परब्रह्मणः स्वतो नामाद्यभावसाधनाय विष्णुपुराणादिवाक्यमुपन्यस्तं तत्रापि कल्पनापदात् काल्पनिकनामादिनिवृत्तिरेवाभिप्रेता, न यावन्नामादिनिवृत्तिः । 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' । ॐकारं प्रकृत्य 'स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः' । 'तस्य वाचकः प्रणवः' इति गीताश्रीभागवतपातञ्जलसूत्राणां विरोधात् । वाचकस्यैव नामत्वात् । एवं सिद्धे सदादिनामकत्वे,

'नारायणः शिवो विष्णुः शंकरः परमेश्वरः ।
एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' ॥ इतिवाराहपुराणवाक्यात्,
'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ॥

इत्यादिश्रुतिभ्यश्च नामान्तरस्वीकारेऽप्यदोषात् । 'अनादिमत्परं ब्रह्म' इति स्वलिखितगीतावाक्याग्रिमगीतावाक्य एव सर्वतःपाणिपादान्तमित्यादिना परमेश्वररूपस्याप्युक्तत्वेन तस्याप्यङ्गीकार्यत्वात् । ज्ञेयं प्रस्तुत्यैव तस्य कथनेनोपासनागन्धस्याप्यभावात् । अतो नामरूपे न यस्येति द्वितीयवाक्येऽपि काल्पनिकनामाद्यभाव एवास्थेय इति परमेश्वरस्य लीलाविग्रहाङ्गीकारे दोषाभावान्मत्स्यादीनां परमेश्वरलीलावतारत्वेऽपि न दोषः । द्वितीयस्कन्धे, 'लीलावतारान् पुरुषस्य भूम्नः' इति प्रतिज्ञाय ब्रह्मणा मत्स्यादीनां कथनात् । न च 'एते चांशकलाः पुंसः' इति प्रथमस्कन्धविरोधः । तेषामेतद्भिन्नत्वात् । त्वदुपगतनित्यकार्यवासुदेवनामरूपादिसाम्येऽपि भेदस्योपक्रमोपसंहाराभ्यां यथायथमवगन्तुं शक्यत्वात् । गीतायां श्रीभागवते च विभूतिमध्ये

रश्मिः ।

तद्विपरीतमिति इदमित्थतया ज्ञातम् । युक्तमिति न च मन्त्रोपासनेति भक्तिहंसविरोध इति वाच्यं मन्त्रोपासनेत्येकपदात् । वस्तुतस्तु भक्त्येकसमधिगम्यं 'नेदं यदिदमुपासते' किं तु यदिदं भजन्त इति भावः । तस्य वाचक इत्यादि । अस्य सूत्रस्य समाधिपादे 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इतिसूत्रमुपक्रम्य पाठात्तत्पदेनेश्वरपरामर्शादिति भावः । तस्यापीति तथा चैतत्स्वारस्येनाहं परो यस्येति बहुव्रीहिर्ज्ञेयः । ननूपासनास्पृश्यत्वलिङ्गेन नायं समासः साधीयानित्यत आहुः ज्ञेयमित्यादि । उपासनागन्धस्येति । त्रयोदशे 'ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते' इति पूर्वार्धात् 'एवं सतत' इत्यादेर्द्वादशस्थत्वात्तथेत्यर्थः । लीलावतारत्वेपीति लीलावतारपदं योगरूढं साक्षात्सच्चिदानन्दरूपाणामैश्वर्यादिगुणसहितानां मुख्यानां भगवदवताररूपाणां वाराहयज्ञकपिलदत्तसनकादिनरनारायणध्रुवादीनां नाम । अवतारशब्दार्थस्तु ।

'सत्त्वरूपशरीरेषु ब्रह्मणः संक्रमः स्मृतः ।
अशुद्धशुद्धभावेन शरीराणामतो द्विधा ।
कार्यकाले संक्रमणमावेशः सर्वदा परम्' ॥ इति ।

एतच्च 'स एव प्रथमं देवः'इत्यस्य सुबोधिन्यां प्रथमस्कन्धे स्फुटम् । न दोष इति यथाविभवादिकार्यकर्तृत्वेन विष्ण्वाद्यवतारत्वं भगवतो भिक्षोर्मते तथा भक्तैः सह निगूढभावकरणाऽभावेपि लीलाक्षरं तत्कार्यकर्तृत्वेन लीलावतारत्वेपि निगूढभावाकरणं दोषो नेत्यर्थः । नन्वक्षराद् विविधा भावाः प्रजायन्ते तत्रैव चापियन्ति नैवमन्यत्रेति चेन्न । तत्पुराणादिषु तेभ्योपि जननप्रलयाद्युक्तेः । अंशकला इति धर्मावेशिन इत्यर्थः । तेषामिति मत्स्यादीनामित्यर्थः । भेदकमाहुः त्वदुपगतेत्यादि । उपक्रमेत्यादि द्वितीयस्कन्धे

भाष्यप्रकाशः ।

वासुदेवस्य गणनाच्च । यत्पुनः, 'कृष्णस्तु भगवान् स्वयम्' इत्येतत्स्वयंपदस्य पुत्रवत् साक्षात् परमेश्वरांशः । ऋष्यादीनामंशांशिवचनादित्युक्तम् । तदप्यसंगतम् । भूभारहारकं कृष्णमंशेषूक्त्वा तदंशित्वेन पुमांसं चोक्त्वा ब्रह्माण्डात्मकपुंरूपताभ्रमवारणाय तुशब्दोक्तिपूर्वकं स्वयं भगवत्त्वविधानस्याबोधात् । 'कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्' इति, 'वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः' इत्यादिवाक्यानामप्यविचाराच्च । गीतायां तु

'परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे' ॥

इति वाक्यमपि प्रायो नावलोकितं, येन 'मत्तः परतरम्' इतिवाक्यस्य वामदेववच्छास्त्रदृष्ट्या ज्ञानिमुख्यवाक्यत्वेन गतिश्चिन्तिता । नहि परब्रह्मत्ववक्तार ऋषयः सर्वे भ्रान्ता येनैवं भगवदुक्ते गौणीं वृत्तिं ब्रह्मदृष्टिं च नावगच्छन्ति । तथा व्यक्तपरत्वेन गतिरप्यसंगतैव । अव्यक्तस्याक्षरत्वेन भगवद्धामतयैव सिद्ध्या भगवतस्ततोऽपि परत्वात् । नच व्यवहार्यत्वान्नेश्वरत्वमिति युक्तम् । तस्य सूत्रव्याख्यान एवोपपादितत्वात् । यदपि मोक्षधर्मवाक्येन नारायणाङ्गिभत्वं

रश्मिः ।

'प्राधान्यतो यानृष आमनन्ति लीलावतारान् पुरुषस्य भूम्नः ।
आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान् सुपेशान्' ॥ इत्युपक्रमः ।

'सोयं तेभिहितस्तात भगवान् विश्वभावनः ।
समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ॥
इदं भागवतं नाम यन्मे भगवतोदितम् ।
संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु' ॥ इत्युपसंहारः ।

अत्र पुरुषस्य भूम्न इत्यनेन भगवदवतारत्वमुपक्रमे । उपसंहारेपि भगवान् विश्वभावनः इत्यनेनैतेषां भगवत्त्वं सिद्ध्यति । प्रथमस्कन्धे तु 'एतन्नानावताराणां निधानं बीजमव्ययम्' इत्यनेन वक्ष्यमाणानामवताराणां मत्स्यादिरूपाणां पुरुषावतारे स्थानत्वमुद्गमहेतुत्वं चोक्तमिति पुरुषावतारत्वमुपक्रमे उपसंहारे च 'एते चांशकलाः पुंसः' इत्यनेन पुंसो विराजोवतारत्वं सिद्ध्यतीत्युभयेषां भेदः । तथा च लीलावतारा भूमपुरुषस्यान्ये पुरुषस्य । गणनाच्चेति तथा चैक एव वासुदेवो नित्येश्वर इतरे तदंशा वासुदेवा इति भागः संमत इति भावः । अंशेष्विति ।

'एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम्' ॥

इत्यनेन तेषूक्ता इत्यर्थः । पुमांसमिति 'एते चांशकला पुंसः कृष्णस्तु भगवान् स्वयम्' इत्यनेनेत्यर्थः । गौणीमिति आत्मीयवाचकत्वे स्वयमित्यत्र गौणी, पुत्रपितृगुणयोगाद्गौणी । सिद्ध्येति

'अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' ॥

भाष्यप्रकाशः ।

परमेश्वरस्योक्तं, तत्र तु नारायणपदं यौगिकमेव । धातृपदविशेषितत्वात् । न तु रूढम् । अतो यत्र नारायणपदेन परमेश्वर उच्यते तत्र रूढ्यैवोच्यते यथा महोपनिषदि । तत्र हि 'एको ह वै नारायण आसीन्न ब्रह्मा न ईशानो नापो नाग्नीषोमौ' इत्यादिना ब्रह्मादिसर्वनिषेधेऽपामपि निषेधात् । स एकाकी नर एवेत्यनेन पुरुषाकारस्योक्ततया निराकारत्वस्यापि वारणात् । तस्य ध्यानान्तस्थस्य यज्ञस्तोममुच्यते, तस्मिन् पुरुषाश्चतुर्दशाऽजायन्तैका कन्येति प्रस्तुत्य, दशेन्द्रियाणि मन एकादशं तेजो द्वादशमहंकारस्त्रयोदशः प्राणाश्चतुर्दश आत्मा पञ्चदशी बुद्धिरिति तेषां स्वरूपकथने तेजःपदेन महत्तत्त्वस्य गणितत्वात् ।

'विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः ।
स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः' ॥

इति पुराणे तस्य तेजोरूपत्वावगमात् । अतो यत्किंचिदेकदेशमालम्ब्य सकलशास्त्रविप्लावनं

रश्मिः ।

इत्यत्र सिद्धेत्यर्थः । तस्येति ब्रह्मणो व्यवहार्यत्वस्येत्यर्थः । यौगिकमेवेति पूर्वमीमांसाकारिकास्वाचार्यैर्वेदान्ते योगमात्राङ्गीकारादेवेति । धातृपदेत्यादि 'धाता नारायणो विभुः' इति । नतु रूढमिति । ननु रूढेः स्वमतेऽभावादप्राप्ताया निषेधः कुत इति चेन्न । स्वमते शक्तिसंकोचलक्षणायाः रूढेः प्रस्थानरत्नाकरेऽङ्गीकारात् । तथा च न परमेश्वरभिन्ने नारायणपदं शक्तिसंकोचयुक्तमिति । रूढ्यैवेति अपां सत्यज्ञानानन्तेऽक्षरे संकोचः । अक्षरं नारं जीवसमूहः अयनं यस्येति न तत्राधोक्षजेऽघटितयोगः संभवतीत्येवकारः । नारमयनं यस्येति योगाबाधं वदन्तो हेतुमाहुः यथेति । तेनाऽघटितविग्रहे रूढिरित्युक्तम् । ननु सर्वेषां शब्दानां परमेश्वरे योगोऽङ्गीकृतः प्रस्थानरत्नाकरे इति चेन्न भैक्षवबोधनपरत्वाद् ग्रन्थस्य । अपामपीति तथा च नारा अयनं यस्येति योगस्य तदानीमभावान्नारायणपदं रूढमेवेत्यर्थः । तेन सर्वशक्तिमत्यधोक्षजे रूढिरपि युक्ता कदाचिदिति ध्वनितम् । एकाकीति 'एकाकी त्वेक एककः' 'एकादाकिनित्' । इदानीं तेन यन्महतो देवतात्रयात्मकत्वमुक्तं तन्निराकुर्वन्तः साकारत्वे प्रमाणान्तरमाहुः तस्य ध्यानेत्यादि । तेषामिति ते पुरुषाश्च सा कन्या चात्र विवक्षितास्तथा च ते च सा च ते तेषामित्यर्थः । नस्तोममिति नासिकासमूहः वायुस्थानम् । अग्रे वायवीसृष्टिमिति भावः । तेजोरूपत्वेति येन तमसा पूर्वं महत्तत्त्वं प्रस्वापितं लयं प्रापितमासीत्तन्मूलभूतं तमो महत्तत्त्वेन पीयते इति तृतीयस्कन्धसुबोधिन्या इति शेषः । इमं न्यायं यदप्यप्पयदीक्षितेन 'उमासहायं परमेश्वरं प्रभुं ऋतं सत्यं परं ब्रह्म' इति श्रुत्या ।

य एकः शाश्वतो देवो ब्रह्मवन्द्यः सदाशिवः ।
त्रिलोचनो गुणाधारो गुणातीतोऽक्षरोऽव्ययः ॥
जाता सिसृक्षा तस्यापि वीक्ष्यात्मस्थं गुणत्रयम् ।
वेदत्रयमिदं ज्ञेयं गुणत्रयमिदं हि यत् ॥
पृथक्कृत्यात्मनस्त्रीद्धि तत्र सारं विभज्य च ।
दक्षिणेनासृजत्पुत्रं ब्रह्माणं वामतो हरिम् ॥
मध्यदेशे महेशानं मीढ् प्रमानन्दजलप्रभुः ।

एवं चिद्रूपस्य कारणतानिरूपणेन वेदान्तानां ब्रह्मपरत्वं निरूपितम् ॥ १० ॥

इति प्रथमाध्याये प्रथमपादे चतुर्थमीक्षत्यधिकरणम् ॥ ४ ॥

अतः परमानन्दरूपस्य कारणत्वोपपादनेन तद्वाक्यानां ब्रह्मपरत्वमुपपाद्यते, आनन्दमयाद्यष्टभिः सूत्रैः । तत्र तैत्तिरीयशाखायां ब्रह्मभृगुप्रपाठकद्वयेन ।

भाष्यप्रकाशः ।

न सतां मार्ग इति बोध्यम् । एवं शिवरूपेऽपि ज्ञेयम् ।

‘यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ।
तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्’ ॥

इति श्रुतेरनन्तरूपः परमेश्वरः कदाचिच्छिवाकारेणैव सर्वं जगत् करोतीति । अतो विचारकाणां विष्णुशिवप्रकरणीयवाक्यलिखनमस्मदुक्ताभिप्रायेण, न तु त्वदुक्तेनेति गृहाण । एतावान् परं विशेषो यन्नृसिंहतापनीये, ‘अनुपनीतशतमेकमेकेनोपनीतेन तत्समम्’ इत्यादिना गृहस्थवानप्रस्थयतिरुद्रजापकाथर्वशिरःशिखाध्यायिपर्यन्तमुक्त्वा अथर्वशिरःशिखाध्यायिशतमेकमेकेन मन्त्रराजजापकेन तत्सममिति नृसिंहमन्त्रराजजापके उत्कर्षविश्रान्तिबोधनात् तद्विद्यावेद्यरूप एवोत्कर्षविश्रान्तिः । एतदपि प्रहस्ताख्यवादादेवावगन्तव्यमिति दिक् । अतः परं प्रकृतमनुसरामः ।

ईक्षत्यधिकरणप्रयोजनमाहुः एवमित्यादि । वेदान्तवाक्येष्वव्यवहार्यत्वादिना बोधितस्य चिद्रूपस्य कारणतासमर्थनेन सर्वेषां वेदान्तानां कार्यद्वारा ब्रह्मस्वरूपनिरूपकत्वाद् ब्रह्मपरत्वं ब्रह्मणि तात्पर्येण समन्वितत्वं निरूपितम् । तथा चेदमधिकरणप्रयोजनमित्यर्थः ॥ १० ॥

इति चतुर्थमीक्षत्यधिकरणम् ॥ ४ ॥

नन्वीक्षत्यधिकरणे सर्वेषां वेदान्तानां ब्रह्मपरत्वं सिद्धमेवेत्यग्रिमाधिकरणस्य किं प्रयोजनमित्याकाङ्क्षायां तद्वदन्तस्तदवतारयन्ति अतः परमित्यादि । तद्वाक्यानामिति आनन्दप्रतिपादकवाक्यानाम् । तथाच लक्षणगताव्याप्त्यादिदोषपरिहारायेदमधिकरणम् । अत्रापि सामान्यविशेषभावगर्भोऽवसर एवाधिकरणसंगतिरित्यर्थः । तानि कानीत्याकाङ्क्षायां विषयवाक्यानां बाहुल्यादाकरमेव प्रदर्शयन्ति तत्रेत्यादि । आनन्दकार्यं प्रतिपाद्यत इति शेषः । तानि विषय-

रश्मिः ।

इति शिवराघवसंवादस्थस्मृतिमिश्च यस्तु क्वचित्क्वचिच्छ्रुतिपुराणादौ विष्णोरुत्कर्षः प्रतिपादितः स तु प्रतर्दनाख्यायिकायामिन्द्रस्येव तदन्तर्यामिण्येव परशिवे पर्यवस्यतीति शिव एव परं ब्रह्मेत्युक्तं तत्रापि प्रसङ्गादतिदिशन्ति एवं शिवेत्यादि । अस्मदुक्तेति अव्यवहितपूर्वोक्ताभिप्रायेण । अवगन्तव्यमिति एतच्च ‘समान एवं चाभेदात्’ इति सूत्रे वक्तव्यं साधनाध्याये । तथा चेदमिति चेतनेऽव्याप्तिवारणम् ॥ १० ॥ इति चतुर्थमीक्षत्यधिकरणम् ॥ ४ ॥

तद्वदन्त इति प्रयोजनं वदन्तोधिकरणमवतारयन्तीत्यर्थः । लक्षणेति आदिशब्देनानन्दप्रतिपादकवेदान्तासमन्वयादध्यायार्थे न्यूनताख्यनिग्रहस्थानं गृह्यते । सामान्येत्यादि सामान्यतश्चिन्निरूपकाणां पूर्वाधिकरणे निरूपणादानन्दप्रसङ्गेन विशेषतश्चिन्निरूपणस्य वक्ष्यमाणत्वात्सामान्यविशेषभावगर्भोवसरः । आनन्दनिरूपणे प्रतिबन्धकीभूता जिज्ञासा किमत्र चिन्निरूप्येति जिज्ञासा तस्याश्च लक्षणवाक्ये प्रथमनिर्देशेनानन्दापेक्षया प्राथमिकजिज्ञासाविषयत्वात् चिद्रूपतानिरूपणाद्विषयसिद्ध्या निवृत्तौ सत्यामानन्दतावश्यं वक्तव्येति जिज्ञासया किमिदानीं वक्तव्यमिति जिज्ञासया आनन्दरूपतानिरूपणादित्यर्थः । तानि कानीति श्लोकं व्याकुर्वन्ति स्म तानीति ।

तत्रानन्दमय इति मयट्प्रत्ययान्तस्याब्रह्मत्वेनाजगत्कर्तृत्वे ब्रह्मप्रपाठकस्याब्रह्मपरत्वं स्यादिति तन्निराकरणार्थमानन्दमयाधिकरणम् । षडिन्द्रियस्वरूपद्वयानन्दभेदेनानन्दस्याष्टविधत्वादष्टसूत्राणि ।

ननु कथं संदेहः, कथं वास्याब्रह्मत्वे प्रपाठकासंगतिरिति । उच्यते । ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय ज्ञेयांशे कारणत्वायानन्दांशमप्रवेश्य जडत्वपरिहाराय सर्वज्ञानन्दरूपं फलमुपपाद्य तन्निरूपणार्थं सर्वोऽपि प्रपाठक आरब्धः। तत्र साधनशेषब्रह्मणो वाक्यादेव निःसंदिग्धप्रतीतेः फलस्य ब्रह्मत्वं प्रतिपादनीयम् ।

भाष्यप्रकाशः ।

वाक्यानीत्यर्थः । नन्वेतद्वये ब्रह्मणः कार्यमुच्यते । सत्यज्ञानानन्तलक्षणकं ब्रह्म प्रस्तुत्य 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यादिना कार्यकथनात् । तथाग्रिमेऽपि, 'यतो वा इमानि' इति ब्रह्म लक्षयित्वा, 'आनन्दाद्ध्येव खल्विमानि भूतानि'इत्यादिना ब्रह्मण एव निष्कर्षाच्चानन्दकार्ये संदेह एव न भविष्यतीति व्यर्थोऽधिकरणारम्भ इत्यत आहुः तत्रानन्दमय इत्यादि । तत्रेति ब्रह्मप्रपाठके । मयट्प्रत्ययान्तस्येति मयट्प्रत्ययान्तप्रतिपाद्यस्य । तथाचानन्दरूपेणात्र जगत्कर्तृत्वस्य प्रतिपिपादयिषितत्वान्मध्ये च संदिग्धशब्दनिवेशात् तन्निवृत्त्यर्थमयमारम्भ इत्यर्थः । नन्वानन्दरूपेणैवात्र कारणताप्रतिपिपादयिषितेत्यत्र किं गमकमित्याकाङ्क्षायामधिकरणसूत्रसंख्यैव गमिकेत्याशयेनाहुः षडित्यादि । षडिन्द्रियात्मपरमात्मभिर्हि लोके कार्यं क्रियते । ब्रह्मणि त्विन्द्रियाद्यभावादानन्देनैव कार्यं क्रियत इति तत्तदात्मक आनन्द एवेत्यानन्दस्यैवाष्टविधत्वात् तावन्ति सूत्राणीति सैव तथेत्यर्थः । एवमधिकरणारम्भे साधिते आनन्दमयस्याब्रह्मत्वेनापि प्रपाठकस्य ब्रह्मपरत्वं मन्वान एकदेशी चोदयति ननु कथमित्यादि । एवं प्रश्ने संदेहादिकं व्युत्पादयति । उच्यते । ब्रह्मविद इत्यादि । 'ब्रह्मविदाप्नोति परम्' इति वाक्ये ब्रह्मविदः परप्राप्तिं प्रतिज्ञायैतद्वाक्यविवरणभूतायामृचि आनन्दांशस्य कारणत्वबोधनाय 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद' इति लक्षणवाक्योक्तज्ञेयांशस्य साधनशेषत्वेन तदपेक्षया फलस्योत्कृष्टत्वात् फलभूतमानन्दांशं तत्राप्रवेश्य कारणस्य प्रकृत्यादेर्लोके जडत्वदर्शनात् तद्विलक्षणत्वमानन्दांशे

रश्मिः ।

आकरमिति वाक्यनिकुरम्बोत्पत्तिस्थानमित्यर्थः । अग्रिम इति भृगुप्रपाठक इत्यर्थः । मयट्प्रत्ययान्तत्वं शब्दस्य संभवति । तत्राब्रह्मत्वेनेत्यादिरापत्तिर्न संभवतीति लक्षणयार्थपरत्वेन व्याकुर्वन्ति मयडित्यादि । भाष्ये तु शब्दार्थात्यन्ताप्रविवेकपक्षः । तथाप्रतिज्ञानादिति भावः । तदपि जैमिनिसूत्रप्रामाण्यात् । संदिग्धशब्देति मयडादिशब्दानां निवेशात् । आत्मोपनिषदाहुः षडिन्द्रियेति । षडिन्द्रियाण्यन्तरात्मा, आत्मा बाह्यात्मा, परमात्मा चेति त्रयं तैरित्यर्थः । इन्द्रियाद्यभावादिति 'न तस्य कार्यं करणं च विद्यते' इति श्रुतेरित्यर्थः । सैवेति अष्टसंख्यैव । ननु कथमित्यादीति मयडादौ संदेहः । ऋचीति 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति ऋचीत्यर्थः । अनन्तपदप्रवेशस्य तात्पर्यमाहुः आनन्दांशस्येत्यादि । कारणत्वं जगतः । भाष्ये । अकारणत्वायेति छेदे तु अकारणत्वायेत्यस्य फलसाधनत्वाभावाय किं तु फलत्वायेत्यर्थः । साधनेत्यादि वेदेत्युक्तवेद-

तत्राऽन्नप्राणमयादितुल्यवचनात् सुखवाचकशब्दानामेव वचनाच्च संदेहः । आनन्दांशस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् तदभावे प्रपाठकवैयर्थ्यं च । फलस्य नैकट्यप्रतिपादनायात्मपदप्रयोगेण फलरूपेण जगत्कारणतामुक्त्वा

भाष्यप्रकाशः ।

बोधयितुं तस्य जडत्वपरिहाराय विपश्चिद्ब्रह्मपदाभ्यां सर्वज्ञानन्दरूपं फलमृगुत्तरार्धे, सोश्नुते सर्वान् कामान् सहेत्यनेनोपपाद्य तस्य सर्वज्ञानन्दरूपस्य फलस्य निरूपणार्थं सर्वोऽपि प्रपाठक आरब्धः । तत्रर्चि साधनशेषस्य ज्ञेयब्रह्मणो लक्षणवाक्यादेव निःसंदिग्धं स्वरूपावगमात् फलस्य ब्रह्मत्वं प्रतिपादनीयम् । प्रतिज्ञावाक्ये परपदात् तस्य च ऋगुत्तरार्धेन विवरणे भिन्नविभक्तेर्भिन्नपदवचनयोश्च कथनेन परपदार्थानिश्चयाद् ऋग्व्याख्यानरूपे प्रपाठकेऽवश्यं कारणत्वादिना ब्रह्मत्वमुपपादनीयमित्यर्थः । एवं प्रपाठकार्थमुक्त्वा संदेहबीजमाहुः तत्राऽन्नेत्यादि । अन्नप्राणमयादीति अन्नरूपं यदन्नमयादीत्यर्थः । एवं संदेहमुपपाद्य प्रपाठकासंगतिमुपपादयन्ति आनन्दांशस्यैवेत्यादि । सदेव सोम्येति, 'स ऐक्षत लोकान्नु सृजै' इत्यादिश्रुत्यन्तरे सच्चिदंशयोः कारणत्वस्य प्रतिपादितत्वेन तत्सहचरितस्यानन्दांशस्यापि तथात्वेन तस्यान्यत्र कारणत्वाकथनात् तदभावे कार्यानुसारिलक्षणस्याव्यापकत्वप्रसक्तेरत्र तस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् तदभावे तद्वैयर्थ्यमित्येवमसंगतिरित्यर्थः ।

ननु कारणतावाक्ये 'तस्माद्वा एतस्मादात्मनः' इत्यात्मपदादात्मा वा इदमेक एवेत्यादाविवात्रापि चिदंशकारणताप्रतिपादनस्य संभवदुक्तिकत्वात् कथमत्रानन्दांशकारणताप्रतिपादनविनिगमनेत्याकाङ्क्षायामात्मपदोक्तितात्पर्यं वदन्तस्तद्विनिगमकयुक्तिमाहुः फलस्येत्यादि । यथा मलय-

रश्मिः ।

व्यापारकज्ञानरूपसाधनविषयत्वेनेत्यर्थः । फलस्येति परस्येत्यर्थः । भिन्नेत्यादि 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायाम्' स इत्यनेन प्रतिज्ञावाक्यगतं ब्रह्मविदितिपदं विवृतम् । आप्नोति परमित्यस्य अश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति व्याख्यानं, तत्र परमित्यत्र द्वितीया विभक्तिः । परपदमेकवचनं च । विवरणे तु सर्वान् कामान् इति सर्वपदं कामपदं च बहुवचनं च । ब्रह्मणा विपश्चितेत्यत्र तृतीयाविभक्तिर्ब्रह्मपदं विपश्चित्पदं चेति विभक्तेः पदवचनयोश्च भिन्नत्वम् । भाष्ये । तुल्यवचनादिति अवयवित्वेन तथात्वादित्यर्थः । तर्हि ब्रह्मत्वमसंदिग्धं स्यात् तन्निवृत्तय आहुः सुखेत्यादि । 'तस्य प्रियमेव शिरः' इत्यादिना तथात्वादित्यर्थः । प्रकृते । संदेहबीजमिति अन्नमयादितुल्यवचनं विभूतित्वगमकं सुखवाचकशब्दवचनं ब्रह्मत्वगमकमत्रत्यबीजत्वेन बीजग्रहणाद् बीजद्वयमित्यर्थः । अन्यत्रेति भृगुप्रपाठकादन्यत्र । तदभाव इति कारणत्वाभाव इत्यर्थः । कार्यानुसारीति निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वरूपलक्षणस्येत्यर्थः । कार्यं जगत् तदनुसारि यत्स्वरूपं तस्य लक्षणमिति । सगुणनिर्गुणाभेदं वक्तुं कार्यलक्षणमित्यनुक्त्वा कार्यानुसारिलक्षणस्येत्युक्तम् । यथान्येषां सास्नादिमत्त्वं गोलक्षणमस्मन्मते सास्नावत्त्वम् । अव्यापकत्वस्येत्यादि हेतौ पञ्चमी तथा चास्माद्धेतोः अत्राधिकरणे तस्यैवानन्दस्येत्यर्थः । ब्रह्मत्वेत्यादि प्रपाठकस्येति शेषः । तद्वैयर्थ्यमिति प्रपाठकवैयर्थ्यमित्यर्थः । असंगति-

तस्यैव मध्ये सर्वान्तरत्वं प्रतिपादितं 'तस्माद् वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः' इति। अन्ते च, 'एतमानन्दमयमात्मानमुपसंक्रामति' इति आदिमध्यरूपे अनूद्य फलत्वेनोपपादितम् । तन्निरूपकस्यापि तत्तुल्यफलत्वं वक्तुमन्नमयादीनामपि ब्रह्मत्वेनोपासनमुक्तम् ।

तत्र पूर्वपक्षेऽन्नमयादेरिवानन्दमयस्यापि न ब्रह्मत्वम्। अन्नमयादितुल्यवचनात् तथैव फलसिद्धेरिति । एवं प्राप्तेऽभिधीयते ।

आनन्दमयोभ्यासात् ॥ ११ ॥ (१।१।५)

आनन्दमयः परमात्मा, नान्नमयादिवत् पदार्थान्तरम् । कुतः । अभ्यासात् ।

भाष्यप्रकाशः

जस्याभीष्टत्वेऽपि दूरत्वात् तदर्थं न पुरुषप्रवृत्तिस्तथात्र मा भूदिति तदर्थं फलस्य नैकट्यप्रतिपादनायात्मपदप्रयोगेण तदेतत्पदाभ्यां सन्निहितपरामर्शात् फलरूपेण जगत्कारणतामुक्त्वा तस्यैवानन्दस्य मध्ये सर्वान्तरत्वमन्ते फलत्वं चानन्दमयपदाभ्यामुक्तम्। तेनादिमध्यावसानेषु कारणत्वसर्वान्तरत्वफलत्वानि तत्रैव साधितानि । तथान्नमयादीनां ब्रह्मत्वेनोपासनकथनात् तदान्तरत्वनिरूपकाणां यदा तत्तुल्यं फलत्वं, तदाऽऽनन्दमयस्य सर्वान्तरस्य फलत्वं किं वाच्यमित्याशयेन फलत्वमेव दृढीकृतम्। तथाच यदि केवलमात्मपदमेव कारणताप्रतिपादकवाक्ये स्यात् तदा त्वदुक्तं स्यादपि । न त्विह तथा किंतु तदेतत्पदसमभिव्याहृतम् । तथा सत्यात्मपदं नैकट्यमेव बोधयति, नतु तेन रूपेण कारणताम् । सा च प्रतिपिपादयिषिते पर्यवस्यतीति संपूर्णवाक्यविचारादवसीयते । अतः पूर्वोक्ताः फलत्वादय एतद्विनिगमकयुक्तिरूपा इत्यर्थः । एवं विनिगमकबोधनेन परोक्तं प्रतिक्षिप्य प्रकृते पूर्वपक्षमाहुस्तत्रेत्यादि । तथैवेति ब्रह्मत्वेनोपासनेनैव । सूत्रं व्याकुर्वते अभिधीयत इत्यादि ।

आनन्दमयोभ्यासात् ॥ ११ ॥ ननु हेतुना साध्यसिद्धिर्व्याप्तिनिश्चये सति भवति । प्रकृते

रश्मिः ।

रिति स्वरूपलक्षणप्रतिपादकानन्दकर्तृत्वप्रतिपादकप्रपाठकयोरसंगतिरित्यर्थः । तदर्थमिति प्रवृत्त्यर्थमित्यर्थः । तदेतदिति 'तस्माद्वा एतस्मादात्मनः' इतिश्रुतौ । फलरूपेणेति ब्रह्मविदाप्नोति परमिति सन्निहितश्रुत्युक्तेनेत्यर्थः । तस्येति विपश्चिद्ब्रह्मणः । इदं फलमत आहुरानन्दस्येति । आनन्दमयपदाभ्यामिति 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमयः' 'एतमानन्दमयमात्मानमुपसंक्रामति' इति श्रुतिद्वयघटकाभ्यामित्यर्थः । तन्निरूपकस्यापीत्यादिभाष्यं कैमुतिकन्यायेन व्याकुर्वन्ति तथान्नमयेत्यादि । एतद्विनिगमकेत्यादि । 'तस्माद्वा एतस्मादात्मनः' इति श्रुतावात्मपदेनानन्दांशकारणताप्रतिपादनविनिगमकेत्यर्थः । नन्वानन्दस्य कारणत्वेप्यक्षरानन्दस्य वक्तव्यम् । धर्मिणो भक्तैः सह निगूढभावकरणस्य दशमसुबोधिन्यामुक्तेस्तद्रूपानन्दस्य जगत्कारणताभावादिति चेन्न । अदृश्यत्वाधिकरणोक्ताक्षराभेदमादायोपपत्तिसंभवात् । पुरुषविधब्राह्मणस्यात्र वक्तव्यत्वात्तत्र पञ्चांशसत्ताया अभावात् । अत एषापि सदानन्दस्य जगज्जन्मादिकर्त्री शक्तिरित्युक्तं द्वितीयस्कन्धनवमाध्याये । उपासनेति प्रायपाठादेवकारः ।

आनन्दमयोभ्यासात् ॥११॥ भाष्ये । अभ्यस्यत इत्यादि । एतेन विधेरविशेषेण पुनः श्रवणमभ्यासः इति शास्त्रदीपिकोक्तलक्षणं विधिपदरहितं युक्तं 'एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं

अभ्यस्यते पुनः पुनः कीर्त्यत इत्यभ्यासस्तस्मात् । अभ्यासस्य भेदकत्वं पूर्वतन्त्रसिद्धम् ।

यथा पूर्वतन्त्रे शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयानां षण्णां

भाष्यप्रकाशः ।

चाभ्यासत्वेन परमात्मबोधकत्वेन व्याप्त्यभावादसिद्धोऽयं हेतुरित्यत आहुः **अभ्यासस्येत्यादि** । पूर्वतन्त्रे हि,'समिधो यजति,' 'तनूनपातं यजति,' 'इडो यजति,' 'बर्हिर्यजति,' 'स्वाहाकारं यजति' इति पञ्चकृत्वो यजत्यावृत्तौ मीमांसितं, किमत्र तनूनपादादिषु चतुर्षु पूर्वयागानुवाद उत यागान्तरविधानमिति । तत्र पूर्वपक्षिणा धात्वर्थप्रत्यभिज्ञानादिडादिगुणविधानार्थं समिद्यागानुवादेऽङ्गीकृते सिद्धान्तितम् । भेदाभेदसाधारण्या यजिश्रुत्या यागमात्रप्रत्यभिज्ञानेन श्रुतेर्यागान्तरपक्षे तुल्यत्वाद् गुणविधानपक्षेऽपि चतुर्थीतद्धितयोरभावेन देवतायास्तृतीयाया अभावेन द्रव्यस्य च वक्तुमशक्यत्वाद् द्वितीयया चाग्निहोत्रं जुहोतीत्यादिवत् तेषां कर्मनामत्वनिश्चयात् पदान्तरसमभिव्याहृतेन यजतिना यागान्तरमेव बोध्यत इति । तथाच यत्र यत्र वाक्ये पदान्तरसमभिव्याहृतस्य यस्य पदस्याभ्यासस्तत्र तत्र तस्य पदस्य पूर्वस्मादर्थान्तरगमकत्वमिति व्याप्तेः पूर्वस्मादर्थान्तरत्वेन परमात्मसाधनान्नासिद्धो हेतुरित्यर्थः । नन्वभ्यासस्य भेदकत्वमात्रं सिद्धम् । तस्य फलमितरभेदः सोऽत्र शब्दान्तरादेव सिद्धो वाक्यान्तरसिद्धमसभिहितमभ्यासं स्वलाभाय नापेक्षते । तथा सति कथं तेन परमात्मावगतिरित्यत आहुः **यथेत्यादि** । तथाच शब्दान्तरेण सिद्धेऽपि भेदे वैलक्षण्यमभ्यासः साधयति । सिद्धाच्च वैलक्षण्यादन्नमयादिभ्य आनन्दमयस्यातुल्यत्वं सिद्ध्यति । तेन ब्रह्मात्माव-

रश्मिः ।

हि स्यात्' इति सूत्रे विधिपदाश्रवणात् । अत एव विधिभिन्नस्याप्यविशेषेण पुनः श्रवणेऽभ्यासत्वव्यवहार इति बोधितम् । **प्रकृते** । **परमात्मेत्यादि** । इदं चाधिकारसूत्राद् ब्रह्मेत्यनुवृत्तौ लभ्यते । तेन पक्षहेतुनिर्देशोपि सूत्रे न दोषाय । **पूर्वतन्त्र** इति द्वितीयस्य द्वितीयपादे 'एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात्' इत्यधिकरण इत्यर्थः । **पूर्वयागेति** समिद्यागानुवाद इत्यर्थः । **धात्वर्थेत्यादि** । करणीभूतधात्वर्थभेदेपि शब्दैकत्वेनार्थैकत्वस्य दृढतरप्रत्यभिज्ञानादित्यर्थः । प्रत्यभिज्ञानं च तत्तेदन्ताप्रकारकं ज्ञानं स एवायं यजतिरित्याकारकम् । **इडादीत्यादि** । अत्र तनूनपादादीत्यनूदितव्ये इडादीत्यनुवादः शास्त्रदीपिकादौ तनूनपादादीति पदमसंगतमिति ध्वनयति । **तथाहि** । तनूनपादादीत्यत्रातद्गुणसंविज्ञानो बहुव्रीहिः संभवति । अन्यपदार्थस्य संयोगसमवायातिरिक्तसंबन्धेन संबन्धित्वात् । पञ्चानामपि यागानां भिन्नत्वात् । लक्ष्यतावच्छेदकस्य विशेष्यान्वय्यन्वयित्वाभावात् । नैयायिकलक्षणस्याप्यसमन्वयात् । तथा च चतुर्णां यागानां संग्रहायेडादीत्येव वक्तव्यम् । आदि चेड् चेडादी 'अल्पाच्तरं पूर्वम्' इतीडः पूर्वनिपातः । इड् आदिर्ययोरित्यतद्गुणसंविज्ञानो बहुव्रीहिः । इडादी च इडादी चेडादय इत्येकशेषः । तथा चेडादीनां तनूनपादिड्बर्हिःस्वाहाकाराणां देवतारूपाणां द्रव्यरूपाणां वा गुणानां विधानार्थमित्यर्थः । **चतुर्थीत्यादि** अग्नये जुष्टं निर्वपामि, आग्नेयोष्टाकपालः, इतिवत् । **तृतीयाया** इति दध्ना जुहोतीतिवत् । **इतरभेद** इति यथा पृथिव्या भेदकस्य गन्धवत्त्वस्य जलादिभेदसाधकत्वाज्जलादिभेदः फलं तद्वदित्यर्थः । **शब्दान्तरादिति** द्वितीयस्य द्वितीयपादे 'शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्' इत्यधिकरणे सोमेन यजेत हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोति इत्यत्र यजत्यादीनां शब्दान्तरत्वात् कर्मभेदकत्वमिति चिन्तितम् । **तद्वदत्राप्यन्नमयादिशब्दान्तरादेवेतरभेदः सिद्धः किमभ्यासेनेत्यर्थः** । तथा **चानन्दमयः शब्दान्तरादिति**

कर्मभेदकत्वमेवमेवानन्दमयस्याप्यभ्यासात् पूर्ववैलक्षण्यम् । अतोऽतुल्यत्वाद् ब्रह्मत्वम् । एवमभ्यासः श्रूयते 'को ह्येवान्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्' । 'एष ह्येवानन्दयाति' इत्यर्थतोऽभ्यासः ।

भाष्यप्रकाशः ।

गतिरित्यर्थः । नन्वभ्यासस्यान्नमयादिवाक्येष्वपि दर्शनादत्रैव कथं वैलक्षण्यसाधकत्वमित्यत आहुः **एवमभ्यास इत्यादि** । अयमर्थः । पूर्वानुवाकेष्वन्नादीनां प्रशंसामुक्त्वापि, को ह्येवान्यादिति वाक्ये किंशब्दद्वयेन पूर्वोक्तं सर्वं परामृश्यते । तेन तदननादिकं प्रति व्यतिरेकमुखेनानन्दस्यैव हेतुता श्राव्यते । तेनान्नादीनामपि यत्स्वकार्ये सामर्थ्यं तस्यानन्दसापेक्षता बोध्यत इति सर्वोपजीव्यत्वेन स्तुत्या सर्वत्राऽऽनन्दोऽर्थतोऽभ्यस्यत इति स्तावकत्वेन वैलक्षण्यसाधकत्वमित्यर्थः । ननु स्तावकाभ्यासस्य पूर्वेष्वपि सत्त्वाद् वैलक्षण्यस्य तेष्वपि सिद्धेर्वैलक्षण्यं नानन्दमयस्य परमात्मत्वनिर्णायकम् । लिङ्गेन सिद्ध्यतस्तस्य मयट्श्रुत्यपेक्षया दुर्बलत्वात् । अर्थान्तरत्वेऽपि प्रायपाठेन तुल्यत्वनिश्चयात् । किं चायं विकारे मयट् । 'द्व्यचश्छन्दसि' इति नियमस्य, मृण्मयं गृहं राजन्नहं गममित्यादिमन्त्रेषु व्यभिचारात् । तेन विकारार्थे द्व्यचो भवत्येव । अन्यस्मात्तु विकारार्थे भवति, न भवति चेति व्यवस्थितविकल्पाश्रयणेन त्र्यचोऽप्यानन्दशब्दात् तस्य विकारार्थे

रश्मिः ।

सुवचमिति शङ्कितुराशयः । **इत्यर्थ इति** तथा च प्रकृतोपयोगिहेतुत्वस्याभ्यास एव सत्त्वान्न तत्सुवचमिति भावः । तथा चेदं प्रथमस्य शब्दान्तरस्य त्यागे मानमिति भावः । नन्वेवमप्यभ्यासस्य पूर्वतन्त्रे भेदकत्वमात्रं सिद्धमिति कथमत्र वैलक्षण्यसाधकत्वमस्येत्याशङ्कते **नन्वभ्यासस्येति** । **एवमभ्यास इत्यादीति** । एवं पूर्वोक्तेभ्यो विलक्षण इत्यर्थः । नन्वभ्यासस्वरूपं पूर्वतन्त्रसिद्धमेवेत्येवमभ्यासः श्रूयते इति भाष्यस्य किं प्रयोजनमित्याशङ्कायां प्रयोजनं वदन्तः पूर्वतन्त्राद्विलक्षणोयमभ्यास इत्याहुः **अयमर्थ इति** । अस्य भाष्यस्येदं प्रयोजनमित्यर्थः । **परामृश्यत इति** सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शकत्वादिति भावः । प्रसिद्धवाचका इति सुबोधिन्यां तत्र तत्र तच्छब्दस्य यच्छब्दस्य व्याख्यानात् । अभ्यासे चाप्राधान्यबोधकतृतीयाभावात् सर्वमित्युक्तम् । **श्राव्यत इति** आनन्दत्वाभावात्कः पूर्वोक्तोन्नमयादिरन्यात्प्राण्याच्च यत एष आकाश आनन्दोतोयमेव अनिति प्राणिति चेत्येवं श्राव्यत इत्यर्थः । **बोध्यत इति** सूच्यते व्यङ्ग्यतया बोध्यत इत्यर्थात् । अत्र सुबन्तस्यानन्दपदस्यैकवारं कीर्तनादानन्दमयपदाभावाच्चाहुः **अर्थतोभ्यस्यत इति** । **स्तावकत्वेनेति** पूर्वतन्त्रोक्तस्य तस्यास्तावकत्वेनास्य स्तावकत्वेनेत्यर्थः । एतेन पूर्वतन्त्रेभ्यासस्य भेदकत्वमात्रं सिद्धं कथमत्र वैलक्षण्यसाधकत्वमस्येति शङ्कापि परास्ता । **पूर्वेष्विति** अन्नमयादिष्वित्यर्थः । अन्नं न निन्द्यात्तद्व्रतं प्राणो वा अन्नमित्यादिभिरिति शेषः । **लिङ्गेनेत्यादि** स्तावकाभ्याससामर्थ्येन । **सिद्ध्यतः** परमात्मत्वनिर्णायकवैलक्षण्यस्य अपरमात्मत्वनिर्णायकविकारमयट्श्रुत्यपेक्षयेत्यर्थः । यथैन्द्र्या गार्हपत्यमुपतिष्ठते इति श्रुतौ यावल्लिङ्गादैन्द्र्या इन्द्रोपस्थानार्थत्वं कल्प्यते तावत्प्रत्यक्षया गार्हपत्यमिति श्रुत्या गार्हपत्योपस्थानार्थत्वं क्रियते इत्यैन्द्री गार्हपत्योपस्थानाङ्गं तद्वत् । नन्वानन्दशब्दकृतं वैलक्षण्यं परमात्मत्वं साधयिष्यतीत्याकाङ्क्षायामाहुः **अर्थान्तरत्व इति** । प्राचुर्यविकारान्यतरत्वे विकारप्रायपाठेनान्नमयादितुल्यत्वनिश्चयात् । अभ्यासात्पूर्वहेतोर्भेदसाधकस्य शब्दान्तरस्यार्थान्तरत्वोक्तिरत्र । **तेनेति** व्यभिचारदर्शनेनेत्यर्थः । **व्यवस्थितेत्यादि** । सर्वे विधयश्छन्दसि विकल्पन्ते इति न्यायादिति भावः ।

स्तुत्या मयडर्थत्वप्रकृतिस्तु तुल्या। पुनर्वचनेनाभ्यासेन प्रवाहाद् भेदे साधिते

भाष्यप्रकाशः ।

सुवचत्वात् । तथा सति न तेन वैलक्षण्यसिद्धिर्वैलक्षण्यसिद्धावपि न तेन परमात्मत्वसिद्धिरित्यत आहुः **मयडर्थेत्यादि** । मयट् प्रत्ययः । अर्थत्वमर्थान्तरत्वम् । ताभ्यां सहिता प्रकृतिर्मयडर्थत्वप्रकृतिः शब्दान्तररूपा । सा तुल्या व्यवस्थितविकल्पाश्रयणेऽपि पदार्थान्तरपक्षे परमात्मपक्षे च साधारणा । यद्वा स्तुत्या तुल्या यादृशी स्तुतिस्तादृशमर्थान्तरं बोधयति । अतो न तयाऽवान्तरप्रायपाठेन वा विकारार्थाग्रहो युज्यते । तदपेक्षयाऽसाधारणस्य लैङ्गिकाभ्यासस्यैव ज्यायस्त्वादित्यर्थः । तेन सिद्धमाहुः **पुनरित्यादि** । किमः पुनर्वचनेन बोधितो य आर्थिकोऽभ्यासस्तेन मयडर्थान्तरयोः प्रवाहाद् भेदे आनन्दमयस्य साधिते तस्य ब्रह्मत्वं सिद्धमित्यर्थः ।

रश्मिः ।

ननूक्तं पूर्वस्माद्विलक्षणोत्राभ्यास इति तत्राहुः **वैलक्षण्यसिद्धावपीति** । **तेनेति** सिद्धेन वैलक्षण्येन दुर्बलेन लिङ्गेन वेत्यर्थः । **अर्थान्तरत्वमिति** प्राचुर्यविकारान्यतरत्वम् । **शब्दान्तररूपेति** उभयोरेकतरानन्दमयशब्दान्तररूपा । **साधारणेति** स्तुत्येत्यत्रान्वेति । तथा च प्रायपाठेपि स्तुत्या तेन साधारणेत्यर्थः । तथा चानन्दमयशब्दमहिम्नैव परमात्मत्वसिद्धिरित्याशयः । मुख्ये प्राचुर्यार्थे संभवति गौणविकारार्थानौचित्यात् । इदानीं प्रायपाठविरोधं परिहरन्तः **स्तुत्येति** पदमत्र योजयन्तोऽर्हार्थिकप्रत्ययान्त तुल् उन्मान इति धातुनिष्पन्नस्य तुल्येत्यस्योन्मातुं योग्येति यौगिकार्थं हृदिकृत्य पक्षान्तरमाहुः **यद्वेति** । **अत इत्यादि** सर्वोत्कृष्टस्तुत्यानन्दमयस्यान्नमयादिभ्य उत्कर्षात् न तया स्तुत्येत्यर्थः । **लैङ्गिकेति** आर्थिकाभ्यासस्येत्यर्थः । केचित्तु मयटोर्थो वाच्यं प्राचुर्यं पूर्वापेक्षयाप्याधिक्यं यत्र प्राचुर्यविशिष्टानन्दे स मयडर्थः तस्य भावो मयडर्थत्वं, प्राचुर्यं विशेषणीभूतं तस्य या प्रकृतिरानन्दशब्दात्मिका सा त्वानन्दमयशब्दनिष्ठा स्तुत्या कृत्वा प्रदर्श्यमानवाक्यनिष्ठानन्दशब्देनैकार्थवाचकत्वेन तुल्या । प्रदर्श्यमानवाक्ये स्तुतिर्वाक्यार्थः । आनन्दमयशब्दे तु प्रत्ययार्थ इति तुल्यत्वमिति व्याचक्षते । (अस्मिन् पक्षे स्तुत्या इति षष्ठ्यन्तम् । निरूपितत्वं षष्ठ्यर्थः ।) अन्ये तु को ह्येवान्यादिति श्रुतौ आनन्दस्याभ्यासः न त्वानन्दमयस्येत्यभ्यासाभावादानन्दमयो न ब्रह्मेत्याशङ्कायामाहुः **अर्थतोभ्यास इति** । शब्दत आनन्दस्याभ्यासेप्यर्थतः आनन्दमयस्यैवाभ्यास इत्यर्थः । अर्थतः कथमभ्यास इत्याशङ्कायामाहुः **स्तुत्या मयडर्थत्वमिति** । एवं सानुस्वारपाठोङ्गीकृतः । स्तुत्या 'को ह्येवान्यात्' इत्यादिरूपया । मयडर्थत्वं मयटोर्थः प्राचुर्यं यस्मिन् स मयडर्थ इति व्यधिकरणपदबहुव्रीहिणा मयडर्थ इत्यस्यानन्दमय इत्यर्थः । तथा च को ह्येवान्यात् इत्यादिस्तुत्यानन्दस्य मयडर्थत्वमानन्दमयत्वमित्यर्थः । स्तुतौ प्राचुर्यस्य प्रयोजकत्वात् । प्रभवो धनादिमन्त एव स्तूयमाना दृश्यन्ते इति । अतोत्र स्तुत्या प्राचुर्यं ज्ञाप्यते । एवं सति 'को ह्येवान्यात्' इत्यत्र स्तूयमान आनन्द एवेत्यानन्दप्रचुरस्यानन्दमयस्यैवाभ्यास इति भावः । **प्रकृतिस्तु तुल्येति** आनन्दशब्दरूपेत्यर्थः । आनन्दमयपदे मयटा प्राचुर्यं बोध्यते को ह्येवान्यादित्यादौ आनन्दस्तुत्या प्राचुर्यं बोध्यते । आनन्दशब्दस्त्वानन्दशब्दे आनन्दमयशब्दे च तुल्य इति भाव इत्याहुः तदेतद्भाष्ये प्राचुर्येण प्रस्तुतेर्थेनुशासिते मयट्येकदेशं प्राचुर्यमादाय वक्ष्यमाणसूत्रानुसारेण व्याख्यातव्यम् । मयडर्थत्वेत्यादेर्भाष्यस्यानुमानपक्षेर्थः । नन्वानन्दमयः परमात्मा अभ्यासात् इडादियागान्तरवत् । एवं सूत्रे पक्षहेतुनिर्देशापत्त्या वह्निमान् धूमादितिवत् साध्यहेतुनिर्देशस्य प्रसिद्धस्य त्यागोतः परमात्मानन्द-

ब्रह्मत्वम् । न तु द्वयापत्तिः । उत्तरस्य साधकत्वात् । तस्मात् आनन्दमयं ब्रह्मैव ।

भाष्यप्रकाशः ।

नन्वानन्दमयस्य ब्रह्मत्वे द्वैतापत्तिः । 'तस्य प्रियमेव शिरः' इत्यादिसंबन्धषष्ठ्या तस्य भेदबोधनात् । तथा सति ब्रह्मत्वस्याप्यसिद्धिः । नेह नानास्तीत्यादौ ब्रह्मणि भेदनिषेधादित्याशङ्कायामाहुः न त्वित्यादि । उत्तरस्यैतदभ्यासवाक्यादग्रिमस्य 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति' इत्यन्तरशब्दवाच्यभेदकृतिनिन्दावाक्यस्य राहोः शिर इत्यादिवदभेदषष्ठीसाधकत्वान्न द्वयापत्तिरित्यर्थः । सिद्धमाहुः तस्मादित्यादि । चोद्याभावात् तथेत्यर्थः । उपचयापचयशङ्किताब्रह्मत्वपरिहारस्तु गुणोपसंहारपादे प्रियशिरस्त्वादिसूत्रे आचार्येण विधेय एवेति न चोद्यावसर इति बोधयितुमेवकारः । एवमस्मिन् वर्णकेऽन्नमयादीनां ब्रह्मकार्यत्वेन पदार्थान्तरत्वमङ्गीकृत्य आनन्दे फलत्वस्य वक्तव्यत्वात् साधनशेषभूते ज्ञेये ब्रह्मण्यानन्दं चानिवेश्यार्थिकाभ्यासादानन्दमयस्य तेभ्यो भेदः साधितः ।

रश्मिः ।

मयः अभ्यासादित्युक्तेऽपि हेतुः स्वरूपासिद्धः पक्षे व्याप्यत्वाभिमतस्य हेतोरभावादित्याशङ्क्य स्वरूपासिद्धत्वं वारयन्ति स्म **स्तुल्या मयडिति** । स्तुल्या मयडर्थः प्राचुर्येण प्रस्तुतः प्रकृष्टप्रकृत्यर्थः । प्राचुर्यं यत्राभ्यासवाक्ये तन्मयडर्थे प्रकृतिप्रत्ययौ सहार्थे भूतस्तयोस्तु प्रत्ययः प्राधान्येनेति । तस्य भावस्तत्त्वं प्रकृतिरानन्दरूपा तु तुल्या अन्नादिभिस्तुल्या ब्रह्मत्वेनेत्यर्थः । तेन पक्षे हेत्वभावाभावात् न स्वरूपासिद्धत्वं हेतोरिति भावः । **प्रवाहादिति** विकारप्रवाहात् । **न त्विति** भाष्यं विवृण्वन्ति **न त्विति** । **उत्तरस्येति** भाष्यं विवृण्वन्ति स्म **उत्तरस्येति** । **उदरमिति** स्वल्पमित्यर्थः । **गुणोपेति** । साधनाध्यायतृतीयपाद इत्यर्थः । गुणानामुपसंहारो यत्रेति समासात् । तेनानन्दाधिष्ठातरि विधातर्यव्याप्तिः परिहृता । यत ईक्षतिसूत्रे सद्रूपं सत्यं 'सत्यं परं धीमहि' इति मङ्गलाचरणात् । मूर्त्या तस्य परं पदं विष्णुर्ज्ञानं तत्त्वेन सत्यं अनन्तत्वेन च तत्प्रतिपादकवेदात्यन्तामिलनात् । अत एवानन्दत्वेनापि सत्यं तत्राव्याप्तिरत्र परिहृता । ब्रह्मादिषु लक्षणसमन्वयस्यावश्यकत्वात् । यतो मुण्डके कर्मादित्रयं मुण्डकत्रयेणोक्त्वा प्रश्ने परब्रह्मान्वेषणे प्राणविद्योक्ता तदनु विद्योपनिषदि ।

'ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमाम् ।
यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरात्' ॥

इत्युक्तं ततः । **अत्रैवं बोध्यम्** । 'मायेत्यसुराः' इति श्रुतेः 'असत्यमप्रतिष्ठं ते' इति स्मृतेश्चासुरसिद्धान्तस्य जाघन्यात् साकारं व्यापकं ब्रह्म तदेव विरुद्धानामणुत्वादिधर्माणामाश्रयः पुरुषोत्तमश्चाद्यमूर्तिः । श्रौतं स्मार्तं च प्रमेयं भिन्नं 'योगिनः प्रति स्मर्यते स्मार्ते चैते' इति चतुर्थाध्यायस्थसूत्रे तथैव सूचनात् । श्रौतं ज्ञानं भक्तिर्वा साधनं, स्मार्ते तु भक्तिरेवेति श्रीमदाचार्याणां सिद्धान्तः । एष चात्र निबन्धे च स्फुटः । श्रीमद्विठ्ठलेश्वरदीक्षितानां तु पुरुषोत्तमो यशोदोत्सङ्गलालित एव ब्रह्म, विरुद्धानां व्यापकत्वादिधर्माणामाश्रयः । 'समान एवं चाभेदात्' इति तृतीयाध्यायस्थसूत्रे तथैव व्यासपादानामभिप्रायव्यवस्थापनेन सूत्रसमाप्तौ—

'एवं विचारचातुर्यवद्भिः सद्भिर्व्रजाधिपे ।
आनन्दमयतानन्दसंदोहायावधार्यते' ॥

अथवा 'स नैव रेमे, तस्मादेकाकी न रमते स द्वितीयमैच्छत्, स हैतावानास' इत्यादिश्रुतिभिरेष उ एवेतिश्रुतेश्च तानि तानि साधनानि कारयित्वा तानि तानि फलानि ददद् भगवान् स्वक्रीडार्थमेव जगद्रूपेणाविर्भूय क्रीडतीति वैदिकैर्निर्णीयते। एतदेव काण्डद्वयेऽपि प्रतिपाद्यते।

भाष्यप्रकाशः।

सांप्रतं तु प्रभुचरणैरखण्डब्रह्मवादेन पूर्वं सिद्धं कार्यस्यापि ब्रह्मत्वमनूद्यानन्दस्य साधनशेषत्वेऽपि रूपभेदेन फलत्वानपायाज्ज्ञेयकोटावानन्दं निवेश्यापि तेभ्य आनन्दमयभेदः 'तस्यैष एव शारीर आत्मा' इत्यादिवाक्याभ्यासाद् वर्णकान्तरेणाधिदैविकवादमाश्रित्य साध्यते अथवेत्यादि। तदर्थं पूर्वं सर्वश्रुतीनां ब्रह्मपरत्वेनैकवाक्यत्वाय प्रतीयमानस्य द्वैतस्य बाध्यताप्रकारबोधनाय च सृष्टिप्रक्रियास्मारणपूर्वकमखण्डब्रह्मवादस्वरूपं सप्रमाणं निरूप्यते स वै नैवेत्यादि। वैदिकैरिति प्राचीनौपनिषदैः। एतेन संमतिरपि शिष्टानामुक्ता। एतेन सृष्टीच्छायां प्रयोजिका क्रीडेच्छेति बोधितम्। एतदेव काण्डद्वयेऽपि प्रतिपाद्यत इति 'शाब्दस्य हि ब्रह्मण एष पन्थाः' इत्यनेन

रश्मिः।

इति श्लोकेन भाष्यसमाप्तौ च—

'जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम्।
तदन्यदिति ये प्राहुरासुरांस्तानहो बुधाः' ॥

इति श्लोकेन च तथैवोक्तत्वात्। भक्तिरेव साधनं श्रौतस्मार्तं च प्रमेयमेकमेव 'स्मृतेश्च' इति सूत्रेण श्रौतस्याप्यर्थस्य व्यासपादैः स्मृत्योपबृंहणादित्येतावान् मतभेदः। अन्यत्समानमित्याशयेन भाष्यं भिन्दन्ति सांप्रतमित्यादि। प्रभुचरणैरिति श्रीमद्विट्ठलेश्वरदीक्षितैरित्यर्थः। तेन पूर्ववर्णकस्यापि मुख्यत्वं न तु तत्र किमप्यस्वारस्यमिति ध्वनितम्। एवं तत्र तत्र मतभेदो द्रष्टव्यः। प्राकरणिकग्रन्थनिबन्धाद्येकवाक्यतायां विचार्यमाणायां तु एकमेव मतमिति वस्तुस्थितिस्तत्त्वं त्वेति विभावनीयं महद्भिः। 'पितृप्रवर्तितपथप्रचारसुविचारकः' इति नामरत्नग्रन्थनाम्नः प्रभूणाम्। अत एव मिलितयोरेवाचार्यत्वम्। अखण्डब्रह्मवादेनेति नात्राखण्डब्रह्मवादो 'अखण्डं कृष्णवत्सर्वं' इति निबन्धोक्तः, तस्य ज्ञानमार्गीयत्वात् 'भजनं सर्वरूपेषु' इत्यस्य तत्त्वदीपे तथाकथनात्। किं तु लीलासामग्रीसहितमेकमखण्डं ब्रह्मेति परमभागवतेन वादेनेत्यर्थः। एतत्स्वरूपं द्युभ्वाद्यायतनाधिकरणे 'प्रकरणात्' इति सूत्रे वक्ष्यति। रूपभेदेनेति गणितत्वागणितत्वकृतेनेत्यर्थः। द्वैतस्येति संशयरूपस्य संख्यारूपस्य वा बाध्यताप्रकारसूचनाय सर्वस्य ब्रह्मत्वबोधनेनेत्यर्थः। निरूप्यत इति। यत्तु शंकरपादा अतः परस्य ग्रन्थस्य किमुत्थानमुच्यते द्विरूपं हि ब्रह्मावगम्यते इत्यादिना सोपधिकनिरुपाधिकभेदेन श्रुतिव्यवस्थामाहुः तत्तात्त्विकत्वातात्त्विकत्वाभ्यां द्वेधा भेदस्य विद्वन्मण्डने निपुणतरं खण्डनात्। ग्रन्थोत्थाने प्रकारान्तरमुपदिशद्भिरिति शेषः। स वै नैवेत्यादीति इदं प्रजापतिपरमिति शांकरा व्याचक्षते तदशोभनं 'सर्वान् पाप्मन औषत् तस्मात्पुरुषः' इति पुरुषनिर्वचनश्रुतेः अपहतपाप्मत्वस्य ब्रह्मलिङ्गस्य तत्र सत्त्वेन विराडात्मकप्रजापतेर्ग्रहीतुमशक्यत्वात्। किं च सोऽबिभेदित्यपि भयं न बाधकं बाललीलायां तत्स्वीकारात् भक्तानुरोधेन। माहात्म्यं चैतद्ब्रह्मणो यद्भक्तवश्यत्वम्। अत एकोप्यसाधारणो धर्मो विद्यमानः शिष्टान् संदिग्धानपि ब्रह्मधर्मानेव गमयति इति 'अन्तस्तद्धर्मोपदेशात्' इत्यधिकरणभाष्याच्च। न च 'ततः पतिः पत्नी चाभवताम्' इत्यनन्तरं ततो मनुष्या-

अन्यथा जीवस्य साधनफले निरूपयन्त्याः श्रुतेर्जीवपरत्वमेव स्यान्न ब्रह्मपरत्वम् । कर्मब्रह्मणोरपि जीवशेषत्वं नापेयात् ।

एवं सति पूर्वकाण्डेऽवान्तरफलान्युक्त्वा ‘एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति’ इतिश्रुतेर्निरवध्यानन्दात्मकमेव परमं फलमिति तद्विवक्षमाणा पूर्वं सामान्यत आह, ससाधनं तैत्तिरीये ‘ब्रह्मविदाप्नोति परम्’ इति । अक्षरब्रह्मवित् परं ब्रह्माप्नोतीत्यर्थः । अत्र परशब्दस्य पूर्वपरत्वे तदित्येव वदेत् ।

भाष्यप्रकाशः ।

द्वितीयस्कन्धे उक्तार्थस्यैवोपबृंहणात् क्रीडनमेव प्रतिपाद्यत इत्यर्थः । तेन सृष्टीच्छा क्रीडेच्छारूपैवेति निर्णीयोक्तोपबृंहणेऽन्यस्याप्यर्थस्य संभवदुक्तिकत्वात् तदनुक्त्वा विपक्षे बाधकं तर्कमेवाहुः अन्यथेत्यादि । अन्यथेति भगवतः सर्वरूपत्वाभावे । नापेयादिति पारार्थ्यस्य शेषलक्षणस्य फलद्वारा तत्र सत्त्वान्नापेयादित्यर्थः । नच जीवशेषत्वमेव काण्डद्वयस्यास्तु बाधकाभावादिति वाच्यम् । ‘सर्वे वेदा यत् पदम्’, ‘ॐमित्येतदक्षरम्’, ‘इदं सर्वम्’, ‘यस्यात्मा शरीरम्’ इत्यादिषु वेदादेर्भगवत्परत्वस्य भगवतो जीवशेषित्वस्य च श्रावणेन तद्विरोधस्यैव बाधकत्वात् । तस्मान्नात्र शङ्कालेशः । एवमखण्डब्रह्मवादस्यैव श्रौतत्वादुक्तरीतिक एवार्थ इति हृदिकृत्याधिदैविकवादेन भेदं साधयितुं विषयवाक्यं व्याकरिष्यन्तः सिद्धमनूद्य तदवतारयन्ति एवं सतीत्यादि । एवं सतीति उक्तदोषपरिहारायोक्तरीत्या श्रुतीनां ब्रह्मपरत्वे सति । इति श्रुतेरिति । आनन्दान्तरस्यैतदंशत्वादिति शेषः । सामान्यत इति संक्षेपेण । विषयवाक्यप्रतीकं धृत्वा व्याकुर्वन्ति ब्रह्मेत्यादि । साधनशेषाद् ब्रह्मणः परस्यातिरिक्तत्वे गमकमाहुः अत्रेत्यादि । तथाच शब्दान्तरेण निर्देश एव भेदगमक इत्यर्थः । एतेन निरवधिसत्यज्ञानात्मकत्वे

रश्मिः ।

प्रजायन्त’ इति श्रुत्या पतिर्मनुः पत्नी शतरूपेति व्याख्यायेत इति वाच्यम् । मनुशब्दस्य मुख्यवृत्तिर्ब्रह्मण्येवेति मनुष्यपदोपपत्तेः । किं चोपसंहारेत्र ह्येते सर्वमेकं भवन्ति तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा अनन्त इत्येतत्सर्वं वेद इति सर्वपरायणत्वं सर्वपदनीयत्वं तज्ज्ञानेन सर्वज्ञत्वं तैर्ब्रह्मलिङ्गैरुपक्रमस्य निःसंदिग्धं ब्रह्मपरत्वं, अतोऽन्तस्तद्धर्माधिकरणन्यायेनाकाशस्तल्लिङ्गाधिकरणन्यायेनातिदेशाधिकरणन्यायेनास्य ब्रह्मपरत्वात् । चतुर्थचरणे समाकर्षाधिकरणेऽप्युपपादयिष्यते । क्रीडन-

वेति। फलोपकार्यन्तरङ्गसाधनत्वात् शुद्धौ सत्यामेव चित्ते भगवत्प्रादुर्भावसम्भवात् विधीयन्त इति पूर्वः पक्षः। तादृशस्य ते न विधीयन्त इति सिद्धान्तः । तत्र हेतुमाह । हि यस्माद्धेतोः, सैव भक्तिरेव सत्यादिसर्वसाधनरूपा । तस्यां सत्यां सत्यादयो ये ज्ञानमार्गे विहितत्वात् कष्टेन क्रियन्ते मुमुक्षुभिः, ते भक्तहृदि भगवत्प्रादुर्भावात् स्वत एव भवन्तीति न विधिमपेक्षन्त इत्यर्थः ॥ ३८ ॥

भाष्यप्रकाशः ।

साधयतीत्याशयेनाधिकरणं वदन्तोऽवतारयन्ति अथेत्यादि । यथा 'सत्यं परं परꣳसत्य'मित्यादौ ज्ञानार्थम्, यथाच 'शान्तो दान्त' इत्यादौ ज्ञानोत्तरं सत्यशमदमादयो विधीयन्ते, तथा प्राप्तभक्तेः पुरुषस्य भक्त्युत्तरं ते विधीयन्ते, न वेति संशये, फलोपकार्यन्तरङ्गसाधनत्वात् फलस्य भगवत्प्राप्तेरुपकारी मुख्यं साधनं भगवदाविर्भावः, तस्यान्तरङ्गा चित्तशुद्धिः, तस्याः साधनानि सत्यादीनि, तस्मात् । एतदेव विवृणोति शुद्धौ सत्यामेव चित्ते भगवदाविर्भावसम्भवादिति । अतो यथा सम्परायाधिकरण उपन्यस्तैर्वाक्यैर्भक्तेः पूर्वं ते विधीयन्त इत्युन्नीयते, तथा भक्त्युत्तरमपि ते विधीयन्ते इति पूर्वपक्षः । तादृशस्य प्राप्तभक्तेस्ते सत्यादयो न विधीयन्ते, 'भक्त्या त्वनन्यये'ति वाक्ये अन्यसाधननिरपेक्षयैव भक्त्या ज्ञानदर्शनप्राप्तीनामुक्तत्वात् तयैव संसिद्धेरिति सिद्धान्तः । तत्र सिद्धान्ते युक्तिमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति हीत्यादि । 'यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । योगेन दानधर्मेण श्रेयोभिरितरैरपि । सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसे'ति । 'धर्मः सत्यदयोपेतो विद्या वा तपसान्विता । मद्भक्त्यापेतमात्मानं न सम्यक्प्रपुनाति ही'ति च एकादशे भगवद्वाक्यात् सैव भक्तिरेव सर्वसाधनरूपा । अतस्तथेत्यर्थः ।

रश्मिः ।

साधनत इति । ज्ञानमार्गे साधनानि सत्यशमदमादीनि । ज्ञानानन्तरमनुवर्तनात् । वेदान्तशब्दस्तु प्रमाणं न साधनम् । प्रमाणावगतसाधने प्रवर्तते यतः । अतः सत्यशमदमादिभिः शाब्दापरोक्षं तद्वन्न भक्तिमार्गे, न सत्यशमदमादयो भगवद्रूपे फले साधनम्, किन्तु भक्तिरेवेति साधनतः सत्यशमदमादितोपि । **तत्** उत्कर्षम् । तदित्यव्ययम् । भक्त्युत्कर्षम् । तत्सर्वरूपत्वं भक्तेः, न तु भक्तिरूपत्वं सत्यशमदमादीनां ज्ञानसाधनत्वेप्यत्रेत्येवं साधनतोपि तत्साधयतीत्यर्थः । **यथेत्यादि** विचारो यथेत्यर्थः । भाष्यसूचितं विषयवाक्यमाहुः **सत्यं परमिति** । इदं विषयवाक्यम् । 'सदेव सौम्येदमग्र आसीत्' 'सत्यं परं धीमहि' 'सत्यव्रतं सत्यपरं त्रिसत्य' मित्यादिषु सत्यज्ञानानन्तेषु सत्योपादानात् । अन्ययोरुपलक्ष्यत्वात् । 'शान्तो दान्त' इति शारीरब्राह्मणेस्ति । 'अणुः पन्था विततः पुराणः' इति द्वितीयाध्याये भोक्त्रापत्तिसूत्रेऽणुः पठितः । महत उपासनमाह । तथा चोपक्रमः । 'विरजः पर आकाशात् अज आत्मा महान्ध्रुवः' । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' । 'नानुध्यायाद्बहून्छब्दान्वाचो विग्लापनं हि त'दिति । उपसंहारश्च 'स वा एष महानज आत्मा अजरोऽमरोऽभयोऽमृतो ब्रह्माभयं वै ब्रह्माभयꣳ ह वै ब्रह्म भवती'ति । **ज्ञानोत्तरमिति** । 'तस्मादेवंविच्छान्तो दान्त' इति पाठाविदो विशेषणीभूतज्ञानानन्तरम् । यतो वेत्तीति वित् ज्ञानानुकूलव्यापारवान् । ज्ञानं च साधनचतुष्टयसाध्यमिति विषयश्रुतौ सत्यशमदमादयः ज्ञानोत्तरं पूर्वं वा विधीयन्ते, तथा ज्ञानशब्दस्य भक्तिपरत्वे प्राप्तभक्तेर्भक्तेः पूर्वं स्वतःसिद्धसत्यशमदमादयो भक्त्युत्तरं विधीयन्ते न वेति संशय इत्यर्थः । फलेतिभाष्यं विवृण्वन्ति स्म **फलेति** । **त** इति । तर्तव्यपापादयः । **त** इति । सत्यशमदमादयः । तादृशस्येतिभाष्यं विवृण्वन्ति स्म **तादृशस्येति** । **युक्तिमिति** हेतुशब्दार्थः । **अतस्तथेति** । सैव भक्तिरेव सत्यादिसर्वसाधनरूपा ।

---

१. भगवदाविर्भाव इति प्रकाशपाठः ।

भाष्यप्रकाशः ।

अत्र शङ्करभास्कराचार्यौ, इदमेकसूत्रमधिकरणमङ्गीकृत्य, बृहदारण्यकोपान्ते, 'स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मे'त्युपक्रम्य, 'जयतीमान् लोका'निति फलमुक्तम् । अग्रे च 'आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्ते'ति प्रकृत्यानन्तरमुच्यते, 'तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषः, यश्चायं दक्षिणेक्षन् पुरुष' इत्यादि, ततो 'हन्ति पाप्मानं जहाति चे'ति फलमुच्यते, तत्र फलभेदाद्विद्याभेद इति प्राप्ते, सैव पूर्वोक्तैवेयं विद्या, हिर्हेतौ, सत्यादयः पूर्वप्रकृता एवात्र 'तद्यत्तत्सत्य'मित्यनेन परामृश्यन्ते । स्थानविशेषसम्बन्धाच्चैकविद्यम् । फलं तूपनिषदो'रहरित्यह'मिति चोक्तयोः, न तु विद्यायाः, तस्माददोष इत्याहतुः ।

तदयुक्तम् । सौत्रस्यादिपदस्यासङ्गतेः । उत्तरस्मिन् वाक्ये हि 'तद्यत्तत्सत्य'मिति तत्पदेन सत्यमात्रमाकृष्यते, न त्वन्यत्किञ्चिदादिपदबोधितं तस्मात् । नच पूर्ववाक्ये स्थानविशेषोक्तिर्येन तदैक्यादैक्यं सम्भाव्यम्, किञ्च, सर्ववेदान्तप्रत्ययाधिकरणे शाखान्तराधिकरणोक्तास्त्रयो हेतव ऐकविद्यार्थमादृतास्तत्कथं तत्रानुक्तात् स्थानविशेषात् तत्सिद्धिः । नापि केवलाद्रूपैक्यात्, 'चोदनाद्यविशेषा'दित्यस्य व्यभिचारित्वापत्तेः । किञ्च, इयं सत्यविद्या पूर्वमुपनिषदोः प्रसङ्गे विचार्यमाणा पूर्ववाक्योक्तया स्वैक्यमस्मारयन्ती कथमकस्मादत्र स्मारयेत् । अतः काल्पनिक एवायं विचार इत्युपेक्ष्यः ।

रामानुजाचार्यास्तु, 'न वा विशेषा'दित्यत्राक्ष्यादित्यस्थानभेदेन विद्याभेदस्योत्तरवाक्ये साधितत्वादत्र च वाक्यद्वये फलभेदस्य दृश्यमानत्वादवस्थाभेदेन रूपभेदस्यापि सत्त्वादुत्तरवाक्य उपासनभेदे सति कथं पूर्ववाक्योक्तेनास्याभेदः सम्भवति, किञ्च, एकविद्यात्वे फलभेदस्योपनिषद्गुणनिबन्धनत्वम्, तस्य तन्निबन्धनत्वेन बाधकनिवृत्तौ चैकविद्यात्वमित्यन्योन्याश्रय इति दूषणमाहुः ॥३८॥

रश्मिः ।

बृहदिति । बृहदारण्यकचतुर्थप्रपाठकोपान्ते यक्षपूज्यम् । **फलभेदादिति** । लोकजयपाप्महननभेदात् । **स्थानेति** । स्थानविशेषसम्बन्धैक्यप्राप्तमेकविद्यमित्यर्थः । फलभेदाद्विद्याभेदं वारयतः स्म त्रय इति । तृतीयान्त एकः । अधिकारादिति द्वितीयः । चकारोक्तस्तृतीयः । एवं त्रय आदृताः । पूर्वतन्त्रद्वितीयाध्यायीयशाखान्तराधिकरणे संयोगादयश्च तस्य हेतव उक्तास्तेष्वेकं संयोगं विहाय त्रय आदृता इत्यर्थः । **रूपैक्यादिति** । विद्यारूपैक्यात् । प्रासङ्गिकोऽयं हेतुः । **व्यभिचारित्वेति** । सर्ववेदान्तप्रत्ययत्वसाध्याभाववति सत्यत्वादिधर्मवति चोदनाद्यविशेषहेतोर्वृत्तित्वेनासाधारण्यात्तथा । फलं त्वित्याद्युक्तं प्रत्युत्तरयन्ति स्म **किञ्चेयमिति** । उपनिषदोः प्रसङ्गे सत्यविद्या पूर्वं विचार्यमाणेत्यन्वयः । **पूर्ववाक्येति** । हृदयब्राह्मणोक्तया हृदयब्रह्मणः सर्वत्वेन अक्षरत्वेनोपासनं सर्वात्मभावरूपं त्र्यक्षरं तद्विषयकम् । पूर्ववाक्यं 'य एवं वेदे'ति । तदुक्तया हृदयविद्यया । **स्वैक्यमिति** । स्वस्या हृदयविद्यायाः पूर्वायाः तदुत्तरसत्यब्राह्मणीयायाः 'तद्वैतदेतदेव तदा सत्यमेवे'ति श्रुतेः प्राप्तं स्वस्याः सत्यविद्याया ऐक्यम् । श्रुतेस्तु तत् हृदयं ब्रह्म । तदास्थेत्यत्र तत् ब्रह्मेत्यर्थः । **अकस्मादिति** । वाक्यं विना । **अग्रेति** । अग्रेतन 'आप एवेदमग्र आसु'रिति ब्राह्मणे । **स्मारयेदिति** । नच 'ता आपः सत्यमसृजन्ते'ति 'ते देवाः सत्यमित्युपासत' इति । 'तदेतत्त्र्यक्षरꣳसत्य'मितीति प्रत्यभिज्ञानमतो नाकस्मादिति वाच्यम् । पूर्ववाक्योक्तया स्वैक्यस्यास्मारणे प्रश्नपर्यवसानात् । **उत्तरवाक्य इति** । 'आप एवेदमग्र आसु'रिति महावाक्ये । **अत्र चेति** । अधिकरणेयम् । **अवस्थेति** । बाल्यतदितररूपावस्थाभेदेन । **पूर्वेति** । सत्योपासनेन । अस्य द्वितीयवाक्योक्तोपासनस्य अभेद इत्यर्थः । फलभेदो विद्यैक्ये बाधकः । तस्य एकविद्यात्वे निवृत्तिरुपनिषद्गुणे ऐक्येपि फलभेदसाधकः । अत एकविद्यात्वे फलभेदस्य तथा । **तस्येति** । उपनिषद्गुणस्य फलभेदनिबन्धनत्वं तेन । **बाधकेति** । बाधकः फलभेदस्तस्य निवृत्तौ ॥ ३८ ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

पूर्वसूत्रे शास्त्रोक्ताखिलसाधनरूपत्वं भक्तेरुक्तम् । तद्दार्ढ्यार्थमधुना मुक्तिप्रतिबन्धकत्वेन हेयत्वेनोक्तानां कामादीनामपि भगवत्सम्बन्धान्मुक्तिसाधकत्वमुच्यते । भक्तिस्तु विहिताविहिता चेति द्विविधा । माहात्म्यज्ञानयुतेश्वरत्वेन प्रभौ निरुपधिस्नेहात्मिका विहिता । अन्यतोऽप्राप्तत्वात् कामाद्युपाधिजा सा त्वविहिता । एवमुभयविधाया अपि तस्या मुक्तिसाधकत्वमित्याह । इतरत्र विहितभक्तेरिति शेषः । कामाद्युपाधिजस्नेहरूपायां कामाद्येव मुक्तिसाधनमित्यर्थः । भगवति चित्तप्रवेशहेतुत्वात् । आदिपदात् पुत्रत्वसम्बन्धित्वादयः । स्नेहत्वाभावेऽप्यविहितत्वभगवद्विषयकत्वयोरविशेषात् द्वेषादिरपि संगृह्यते । तेन भगवत्सम्बन्धमात्रस्य मोक्षसाधकत्वमुक्तं भवति । तत्र विहितभक्तावित्यर्थः । शास्त्रे सर्वथा हेयत्वेनोक्ता हि गृहाः । सर्वनिवेदनपूर्वकं गृहेषु भगवत्सेवां कुर्वतां तदुपयोगित्वेन तेभ्य एव मुक्तिर्भवतीत्यर्थः । एतादृशानां गृहा भगवद्गृहा एवेति ज्ञापनायायतनपदम् । तेषु तथा प्रयोगप्राचुर्यात् । आदिपदेन

भाष्यप्रकाशः ।

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥ सूत्रप्रयोजनमाहुः पूर्वेत्यादि । तद्दार्ढ्यार्थमिति । कैमुतिकन्यायेन तदर्थम् । तेनास्य प्रासङ्गिकत्वं बोधितम् । सूत्रं व्याकर्तुं पूर्वोक्तं विभजन्ति भक्तिरित्यादि । अन्यतोऽप्राप्तत्वादिति । शास्त्रव्यतिरिक्तहेत्वन्तरादप्राप्तत्वात् । व्याकुर्वन्ति इतरत्रेत्यादि । कामादेः कथं मुक्तिसाधनत्वमित्यपेक्षायां 'कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा । नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते' इति दशमस्कन्धवाक्यानुसारेण हेतुमादिपदस्यार्थं तत्कथनतात्पर्यं चाहुः भगवतीत्यादि । सूत्रशेषं व्याकुर्वन्ति तत्रेत्यादि । एतदग्रे, चकारार्थबोधिका माहात्म्यज्ञानेत्यादिका फक्किका उक्ता, सा लेखकप्रमादात् पश्चात्पतितास्तीति ज्ञेयम् । ननु कामादीनां कथं तथात्वमित्याकाङ्क्षायां सौत्रं हेतुं व्याकुर्वन्ति शास्त्र इत्यादि । इदं चाग्रे 'गृहिणोपसंहार'सूत्रे सेत्स्यतीति ज्ञेयम् । अत्रायमेवाशय इत्यत्र गमकमाहुः एतादृशानामित्यादि । प्रयोगप्राचुर्यादिति । 'अण्डमुत्पादयामासुर्ममाय-

रश्मिः ।

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥ कैमुतिकेति । यत्सम्बन्धेन कामादीनां मुक्तिसाधनत्वं तत्सम्बन्धेन सत्यशमदमादीनां मुक्तिसाधनत्वे किमु वक्तव्यमित्येवं कैमुतिकन्यायेन । **पूर्वोक्तमिति ।** सूत्रे पूर्वमुक्तं कामादि इतरत्रेति च । न च विभागोऽस्त्येवेति वाच्यम् । ग्रन्थप्रयोजनं प्रपञ्च्य विभागे इत्याशयात् । सौत्रकामादीतरत्रेत्यनयोः सप्रपञ्चं विभागं करे कुर्वन्तीत्यर्थः । **विहितेति ।** विधिविषया । 'तं भजेदि'ति । विधिरपूर्व इति । **भाष्ये ।** तदर्थमत्यन्ताप्राप्तिमाहुः **शास्त्रेति ।** **तत्कथनेति ।** तेन **भगवदि**त्यादिभाष्येणादिशब्दकथनतात्पर्यम् । **भाष्ये । भगवत्सम्बन्धमात्रस्येति ।** प्रमेयबलस्येति यावत् । **उक्तेति ।** भाष्ये उक्ता । अत्र चकारोक्तेस्तत्सम्बन्धस्य युक्तत्वात् । **शास्त्र इत्यादीति ।** 'गृहं सर्वात्मना त्याज्य'मित्यादिशास्त्रे । **गृहा इति** पुंस्त्वं स्मार्तम् । **तेभ्य इति ।** आयतनादिभ्यः । 'मद्वार्तायातयामानां न बन्धाय गृहा मता' इति वाक्यात् । **एतादृशानामित्यादीति । भगवद्गृहा इति ।** एतेनैतादृशाः महाराजोपचारेण भक्तार इत्युक्तम् । महाराजो यावत्पर्यन्तं तिष्ठति

---

१. रश्मौ उक्तेति पाठः ।

स्त्रीपुत्रपश्वादयः संगृह्यन्ते । एतेन ज्ञानादिमार्गादुत्कर्ष उक्तो भवति । बाधकानामपि साधकत्वात् । माहात्म्यज्ञानपूर्वकस्नेहे सत्येव भर्तृत्वेन ज्ञाने कामोपि सम्भवतीति ज्ञापनाय चकारः ॥ ३९ ॥

इति तृतीयाध्याये तृतीयपादे त्रयोदशं भैव हि सत्यादय इत्यधिकरणम् ॥ १३ ॥

भाष्यप्रकाशः ।

तनमुत्तमम् ।' 'पञ्चायतनपूजे'त्यादौ तथात्वात् । पूर्वोक्तं प्रयोजनं निगमयन्ति एतेनेत्यादि । एतेनेति । पूर्वसूत्रे भगवद्भक्तिबलस्य, अत्र च 'गोप्यः कामा'दित्यादिसप्तमस्कन्धवाक्यात् कामादीनामविहितभक्तिहेतूनाम्, 'भक्तिरस्य भजन'मित्युक्त्वा, 'एतदेव च नैष्कर्म्य'मिति विहितभक्तेः संन्यासरूपतायास्तापनीये श्रावणात्, 'मद्वार्तायातयामानां न बन्धाय गृहा मता' इति वाक्यात् गृहादीनां च मुक्तिसाधनत्वस्य कथनेन । चकारसूचितमर्थमाहुः **माहात्म्येत्यादि** । **इतिज्ञापनायेति** । इतिहेतोर्विहितभक्त्या कामादपीति ज्ञापनाय । अत्रोभयोर्भक्त्योः .स्वरूपबलसाधनयोर्विचारेण पुष्टिभक्त्याश्रितमर्यादाभक्तिबोधकं वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहं स्थितमिति विशेषणं प्रतिपादितं ज्ञातव्यम् ।

अन्ये तु, 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाश' इत्युपक्रम्य, 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः

रश्मिः ।

तावत्पर्यन्तं तद्गृहमिति । **स्त्रीपुत्रेति** । प्रमेयबलविषया एव । **निगमयन्तीति** । तस्मात्तथेतिवत् । **अविहितेति** । अस्य मुक्तिसाधनत्वस्येत्यनेनान्वयः । **विहितेति** । भजनस्य 'तं भजे'दिति गोपालतापिनीये विहितत्वात् । **संन्यासेति** । नैष्कर्म्यं संन्यासो भवतीति तथा । निर्गतः कर्मणः निष्कर्मा संन्यासी तस्य भावो नैष्कर्म्यं संन्यासः । उपनिषद् आवर्तयेत् आरणं वेति सकलकर्मनिषेधात् । गृहा इति बहुवचनार्थमाहुः **गृहादीनामिति** । आदिपदेन स्त्रीपुत्रपश्वादयः संगृह्यन्ते । दम्पत्योः सहाधिकारात्स्त्रीः । भगवत्सेवार्थं वध्वानयनम् । 'पुत्रेण लोकं जयती'ति पुत्रः । 'पुत्रे कृष्णप्रिये रति'रिति । 'पयसाग्निहोत्रं जुहोती'ति । 'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मन' इति । अत्राप्यादिपदेनारामोपवनादिः । अव्ययानां द्योतकत्वमाश्रित्याहुः **चकारेति** । **विहितेति** । 'माहात्म्यज्ञानपूर्वस्तु सुदृढ' इति वाक्याद्विहितत्वम् । **कामादपीति** । **तत्र चेति** सूत्रांशात्कामादपीत्यर्थः । षोडशाधिकरण्या अर्थमाहुः **अत्रोभयोरिति** । विहिताविहितयोः । स्वरूपबलं साधनं च तयोः । स्वरूपबलं बाधकानां साधकत्वम् । पूर्वसूत्रे शास्त्रोक्ताखिलसाधनरूपत्वम् । **पुष्टीति** । अविहितभक्तिकामाद्याश्रितायां मर्यादाभक्तेर्विहितभक्तेर्बोधकम् । बोधकत्वं तु 'भवत्पदाम्भोरुहनावमत्रे'त्यत्र भगवत्पादयोर्भक्तित्वमुक्तम्, तत्र वाम ऊरुः पादसहित इति पुष्टिभक्त्याश्रितत्वस्य । 'दक्षिणाङ्घ्रिसरोरुह'मिति मर्यादाभक्तेः । अत्र पूर्ववाक्योक्तयेति भाष्यप्रकाश उक्तम्, तेन हृदयब्राह्मणोक्तभूमसर्वात्मभावयोरुपासनासूचि । तथाहि । 'एष प्रजापतिर्यद्धृदय'मित्युपक्रमः । अत्र हृदयस्य प्रजापतित्वं विधीयते । कथमेवं स्यात् हृदयं सर्वात्मभावत्वेन वक्ष्यमाणं प्रजापती रजोधिष्ठातेति । एवं तु स्यात् । हृदि अयं रजोधिष्ठाता । वेदान्तत्वात् योगे तु प्रजानां पतिर्भगवान् । भूमा प्रजापतिः सर्वात्मभावकरणेन सर्वात्मभावत्वाद्भूमा । 'एतद्ब्रह्मैतत्सर्व'मिति ब्रह्मलिङ्गम् । सर्वात्मभावरूपत्वमाह 'तदेतत्त्र्यक्षरꣳहृदयमिती'ति । 'हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेदे'ति । स्वाश्चेत्यत्र शसो डा । **अन्ये चेति** । हृ । सम्प्रदाने प्रत्ययः । हृञ् हरणे इत्यस्मात् । हृदः सान्निध्यात् । स्वाश्चानिन्द्रियाणि वसवोऽभिमुखाभिहरन्त्यन्ये तदनुसारिणः । सर्वेन्द्रियाणां भगवत्परत्वं सर्वात्मभावः निरोधलक्षण-

भाष्यप्रकाशः ।

सत्यसङ्कल्प' इति छान्दोग्य आम्नायते । 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु,' 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशान' इति वाजसनेयके । तयोरैकविद्यं परस्परगुणोपसंहारो भवेन्न वेति सन्देहे, कामादिसूत्रेणैकविद्यमुपसंहारं च सिद्धान्तीकुर्वन्ति । कामादीत्यत्र कामपदं 'देवदत्तो दत्तः' 'सत्यभामा भामे'तिवन्नामैकदेशरूपम् । तेन सत्यकामाद्या वाजसनेयके वशित्वाद्याश्छान्दोग्ये उपसंहार्याः । हृदयायतनस्य, वेद्यस्येश्वरस्य, लोकासम्भेदप्रयोजनकसेतुत्वरूपेश्वरधर्मस्य च समानत्वादिति चाहुः ।

तच्चिन्त्यम् । श्रुतौ सत्यकामपदस्य यौगिकत्वेन नामत्वाभावात् तदेकदेशस्य कामादिपदस्य नामैकदेशताया वक्तुमशक्यत्वात् । अथ रूढत्वम्, तदापि तदेकदेशेन कामादिपदेन ब्रह्मैव समर्पणीयम्, न तु तद्गुणा अपि । दृष्टान्ते तथैव दर्शनात् । अथ योगरूढत्वम्, तदापि कामपदस्य सर्वकामादिपदैकदेशतायास्तुल्यत्वान्मनोमयादिवाक्योक्ता अपि धर्मा वाजसनेयके कुतो नोपसंह्रियेरन्, कुतो वा तस्यानेनैकविद्यात्वाभावः । हृदयस्यायतनस्य वेद्यस्येश्वरस्य सत्यसंकल्पत्वाकाशात्मत्वस्य समानधर्मस्य सत्त्वात् । किञ्च । यद्यायतनादिकमेतदैकविद्यत्वादिसम्पादकत्वेन व्यासचरणानामभिप्रेतं स्यात्, तदा कामादीतरत्र वशित्वादि तत्रेति ब्रूयुः, न त्वेवं सन्दिग्धं वदेयुः । किञ्च । सर्ववेदान्तप्रत्ययाधिकरणे 'चोदनाद्यविशेषा'दित्यनेन शाखान्तराधिकरणोक्ताश्चत्वारस्त्रयो वा हेतवो विद्यैक्यार्थं संगृहीताः । तत् यद्यायतनादिभिरङ्गीक्रियेत, तदा

रश्मिः ।

ग्रन्थेपि । 'य एवं वेदे'त्युपासनम् । एवं 'द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेदे'त्यत्र । तथैव 'यमित्येकमक्षरमेति स्वर्गलोकं य एवं वेदे'त्यत्र । स्वर्गलोक आत्मसुखम् । व्युत्पत्तिस्तु एतीति यम् । एरच् । एकविधमित्यस्य कारणं **परस्परेति** । **इति सन्देह** इति । इति सन्देहो यस्मिन् ऐकविद्यमिति पूर्वपक्षे स तथोक्तस्तस्मिन् । नैकविद्यं कार्यं न उपसंहारं कारणमस्ति । **वाजसनेयक** इति । उपसंहार्या इत्यन्वयः । सौत्रेतरत्र पदार्थः । **छान्दोग्य** इति । सौत्रतत्रपदार्थः । आयतनादिभ्य इत्यस्यार्थः । **हृदयेति** । हृदयमायतनं यस्येश्वरस्य । आदिपदार्थमाहुः **लोकेति** । 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाये'त्युक्तो लोकासम्भेदः प्रयोजनमस्य सेतुत्वस्य तत्तथोक्तम् । तेन रूप्यते व्यवह्रियते यः स ईश्वरधर्मस्तस्य । समानत्वं छान्दोग्यवाजसनेयकयोर्ज्ञेयम् । सूत्रे कामशब्दो न नामैकदेश इत्याहुः **श्रुताविति** । **नामत्वेति** । पाचकपाठकवत् नामत्वाभावात् । विशेषणत्वात्तथेति नोक्तम् । विष्णुरातः परीक्षित् इत्यत्र न विशेषणत्वेपि नामत्वात् । एवं वेदान्ते योगमादायोक्तम् । बाहुलकाग्रहवादिनं प्रत्याहुः **अथेति** । स्वमते रूढ्यभावः । **दृष्टान्ते** इति । 'देवदत्तो दत्त' इत्युक्ते पूर्वस्मिन् । वेदान्ते 'स्मृतेश्चे'तिसूत्रभाष्यानुरोधेन वेदत्वाग्रहवादिनं प्रत्याहुः **अथ योगेति** । स्वमते योगरूढिर्वेद एव, न वेदान्ते । **सर्वकामादीति** । छान्दोग्ये पञ्चमप्रपाठके 'मनोमयः प्राणशरीरो भारूपः (सत्यकामः) सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मा हृदये' इत्यत्र सर्वकामादिपदानि तेषामेकदेशतायाः । **मनोमयेति** । वाक्यमव्यवहितपूर्वमुक्तम् । **तस्येति** । मधुविद्यान्तर्गतस्योक्तवाक्यार्थस्य । **अनेन** वाजसनेयकार्थेन । एका विद्या एकविद्या तस्या भाव एकविद्यत्वं तस्याभावः । अत्र दहरविद्या निर्गुणविषया वाजसनेयकोक्ता सगुणविषया तयोर्भेद उपसंहारः परस्परं तत्र विद्याभेदो विरुध्यते 'अभेदादनुपाधित्वा'दित्यादिविद्वन्मण्डनेन तदविरोधाय सर्ववेदान्तप्रत्ययप्रपञ्चरूपत्वनिषेधमाहुः **किञ्च सर्वेति** । **चत्वार** इति । संयोगेन सह । **त्रय** इति । अत्रैव व्याख्यातम् । **तद्यदीति** । **तत्** विद्यैक्यम् । **आयतनादिभिरिति** । **चोदनाद्यविशे-**

आदरादलोपः ॥ ४० ॥ (३-३-१४.)

ननु नित्यानां वर्णाश्रमधर्माणां भगवद्धर्माणां चैककाले प्राप्तौ युगपदुभयोः करणासम्भवादन्यतरबाधे प्राप्ते, कस्य स्यान्न कस्येति स्यात् संशयः । तत्र कर्मणां स्वस्वकाले विहितानामकरणे प्रत्यवायश्रवणादितरत्रातथाश्रवणादन्यदापि तत्कृतिसम्भवात् सावकाशत्वेन तेषामेव बाधो युक्तः, न तु निरवकाशानामिति पूर्वः पक्षः ।

भाष्यप्रकाशः ।

तस्य हेतोर्व्यतिरेकव्यभिचारः प्रसज्येत, कतिपयैरङ्गीकारे यत्किञ्चिद्धेतुसत्त्वस्य यत्र क्वापि सौलभ्याद्विद्याभेदश्चोच्छिद्येत । प्रकृते च चोदना भिद्यते, एकत्र 'अन्वेष्टव्यं विजिज्ञासितव्य'मिति वाक्यात्, अन्यत्र च 'य एवं वेदे'ति वाक्यात् । आख्या च भिद्यते, वाजसनेयके दहरविद्येत्याख्याया अप्रसिद्धत्वात् । तत्तद्गुणकस्येश्वरस्य वेद्यत्वे तु रूपमपि भिद्यते इति कथं विद्यैक्यम् । अथ यथाकथञ्चित् ते चत्वारस्त्रयो वा हेतव आनेयाः, तदा तत एव ऐकविद्यसिद्धेरेतत्सूत्रसार्थक्यं दुरुपपादमित्यगतिकगतिकं तत्प्रपञ्चरूपत्वमस्येत्यवधेयम् ॥ ३९ ॥ इति त्रयोदशं सैव हि सत्यादय इत्यधिकरणम् ॥ १३ ॥

आदरादलोपः ॥४०॥ पूर्वाधिकरणेषु सात्त्विकानां वृतानां ज्ञानासक्तिवारणाय ज्ञानमार्गाद्भक्तिमार्गस्य फलतः साधनतः स्वरूपतः सम्बन्धतश्चोत्कर्षः प्रतिपादितः । अतः परं ये वृता राजसास्तेषां ज्ञाने रुच्यभावेपि कर्मणि रुचेर्विद्यमानत्वात्तन्निरासार्थं कर्मकरणनिर्णयायाधिकरणमारभत इत्याशयेन सूत्रमवतारयन्ति नन्वित्यादि । कस्य स्यादिति । कस्य बाधः स्यात् । इतरत्रेति ।

रश्मिः ।

येन्तर्भूतैस्तैः । तस्य हेतोरिति । चोदनाद्यविशेषहेतोः । अत्र सर्ववेदान्तप्रत्ययत्वाभावो न वर्तते चोदनाद्यविशेषाभावोत्रास्तीति व्यतिरेकव्यभिचारप्रसङ्गः । ततश्च व्याप्तिग्रहप्रतिबन्धः फलम् । कतिपयैरिति । चोदनाद्यविशेषान्तर्भूतायतनेषु कतिपयैः । सर्वैस्तु विद्ययोर्भेद इत्यङ्गीकार इत्यर्थः । यत्किञ्चिदिति । अभेदसाधकयत्किञ्चिद्धेतुसत्त्वस्य । यत्र क्वापीति । पक्षे दृष्टान्ते च । च पुनः विद्याभेदो विद्वन्मण्डनेनोच्छिन्नः पुनरत्रोच्छिद्येत । एकत्रेति । छान्दोग्ये दहरविद्यायां विधातव्यः । अन्यत्रेति वाजसनेयके । अप्रसिद्धत्वादिति । किन्तु ब्राह्मणमिति प्रसिद्धिः । कथमिति । चोदनाद्यविशेषान्तर्भूतायतनादिभिः विद्यैक्यं कथमिति प्रश्नः । तत्प्रपञ्चेति । सर्ववेदान्तप्रत्ययाधिकरणप्रपञ्चरूपत्वम् ॥ ३९ ॥ इति त्रयोदशं सैव हीत्यधिकरणम् ॥ १३ ॥

आदरादलोपः ॥४०॥ वृत्तानामिति । मुक्तावधिकारिणाम् । वृत्तपदं ख्याते व्याख्यातम् । 'वृत्तोऽतीते दृढे ख्याते वर्तुले विधृतेऽमृते । वाच्यवद्वर्तने वृत्तं चरित्रच्छन्दसोरपी'ति विश्वः । भवान्तसम्भवत्वाज्ज्ञानासक्तिस्तस्या वारणाय । तेन 'सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः । भवान्तसम्भवा दैवात्तेषामर्थे निरूप्यत' इति निबन्धः स्मारितः । फलत इति । 'अक्षरधिया'मित्यत्र । साधनतो गताधिकरणे । स्वरूपतोन्तराधिकरणे । सम्बन्धतोऽक्षरधियामित्यत्र 'सामान्यत' इति हेतुव्याख्याने । राजसा इति । 'राजसं कर्मबहुल'मितिवाक्यात्कर्मबहुलाः । रुचीति । 'सत्त्वात्सञ्जायते ज्ञान'मिति वाक्यात्सात्त्विकानां ज्ञाने रुचिः, न राजसानाम् । नन्वित्यादीति । प्रत्यवायेति । 'धर्म चरे'ति विध्युल्लङ्घने । एकादशस्कन्धोक्तं 'वेदोक्तं नाचरेद्यस्त्वि' त्याद्युक्त्वा 'मृत्योर्मृत्युमुपैति स' इति प्रत्यवायः तस्य श्रवणात् । इतरत्रेति । भगवद्धर्माकरणे । अन्यदा अन्यस्मिन् काले । तत्कृतीति । भगवद्धर्मकृतिसम्भवात् । तेषामिति । भगवद्धर्माणाम् । निरवकाशानां वर्णाश्रमधर्माणाम् । उत्कर्षयेदिति-

तत्र सिद्धान्तमाह आदरादिति। ब्रह्मयज्ञप्रकरणे तैत्तिरीयकैः पठ्यते 'ॐमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरं तदेतदृचाभ्युक्तमृचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुर्यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत' इति। अत्र ऋक्सम्बन्धित्वेन वर्णात्मके, वस्तुतस्तु परमव्योमात्मके अक्षरे ब्रह्मण्योङ्कारे वर्तमानं तल्लोकवेदप्रसिद्धं परं ब्रह्म यो न वेद, स किं ऋचा करिष्यतीत्यनेन तदज्ञाने वेदाध्ययनस्य निष्फलत्व-

---

भाष्यप्रकाशः।

भगवद्धर्मेषु। सिद्धान्तं विशदयितुं सूत्रं विवृण्वन्ति ब्रह्मयज्ञेत्यादि। ब्रह्मयज्ञप्रकरण इति। तैत्तिरीयाणामारण्यके स्वाध्यायब्राह्मणे।

श्रुत्यर्थस्तु, ब्रह्मयज्ञेन यक्ष्यमाण ॐमिति प्रतिपद्यते, प्रणवाक्षरं प्रथममुच्चारयेत्। प्रतिपद्यत इति पञ्चमो लकारः। पूर्वोच्चारणे हेतुः। एतद्वै यजुस्त्रयीं विद्यां प्रति, अयं यजूरूपः प्रणवमन्त्रस्त्रयीं विद्यां लक्षीकृत्य प्रतिनिधिरूपो यतोऽस्ति। तच्चाथर्वणे स्फुटम्, 'तस्य वै प्रणवस्य पूर्वा मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदोऽथ द्वितीयान्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदस्तृतीया द्यौः स मकारः स सामभिः सामवेद' इति सायणभाष्ये। वस्तुतस्तु आथर्वणानां गोपथब्राह्मणे इन्द्रप्रजापतिसंवादे प्रजापतिना वेदत्रये एकाक्षरोऽथर्ववेदे मात्राभिर्युक्त इति व्यवस्थापनात्, तैत्तिरीये बृहन्नारायणे 'ॐमित्येकाक्षरं ब्रह्मे'तिश्रावणादग्रामात्र एव। नच त्रयीप्रतिनिधित्वविरोधः। द्वादशस्कन्धे 'स सर्वमन्त्रोपनिषद्वेदबीजं सनातन'मिति बीजत्वबोधनात् यथा पुस्तकलिखनोत्तरं तन्मूलपुस्तके प्रतिव्यवहारः, तथा त्रयीमूलत्वात् प्रतित्वम्। एकादशस्कन्धे 'वेदः प्रणव एवाग्रे' इति प्रथमकृतयुगे तन्मात्रबोधनात्तदा सर्वं कार्यं प्रणवेनैवेति वा तस्य त्रयीप्रतिनिधित्वमित्यदोषात्। 'एषा वा'गिति सर्ववाग्बीजत्वात् सर्ववाग्रूपम्। तथाच छन्दोगा आमनन्ति 'तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णान्येवमोङ्कारेण सर्वा वाक् सन्तृण्णे'ति। 'अश्वत्थादिपत्रेषु दृश्यमानास्तन्तुसदृशा अवयवाः शङ्कवस्तैर्यथा कृत्स्नानि पर्णानि व्याप्तानि, तद्वदोङ्कारेण सर्वा वाग्व्याप्ते'ति सायणभाष्ये। 'एतत्परममक्षर'मिति। 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं पर'मिति काठकश्रुतेः। तदेतदृचाभ्युक्तमिति। तदेतत्परमं ब्रह्मरूपमक्षरं वक्ष्यमाणयर्चा स्पष्टमुक्तमित्येवं ज्ञेयः।

ऋचं पठित्वा व्याकुर्वन्ति अत्रेत्यादि। ऋक्सम्बन्धित्वेन वर्णात्मके, वस्तुतस्तु 'एतद्ध्येवे'ति काठकश्रुत्या 'यो वेद निहितं गुहायां परमे व्योम'न्निति तैत्तिरीयश्रुतेश्च परमव्योमात्मके ॐकारे, 'यस्मिन् देवा अधि विश्वे निषेदु'रिति देवनिषदनस्थानत्वाल्लोकात्मके अक्षरे ब्रह्मणि,

रश्मिः।

विधिव्याख्यानादाहुः प्रतिपद्यत इति। पञ्चम इति। लेट्। तच्चेति। प्रतिनिधिरूपत्वं च। आथर्वणमाहुः तस्य वा इति। अत्रेति। तैत्तिरीयके स्वाध्यायब्राह्मणे। एकाक्षरमिति। समष्ट्यविकृतम्। एतदर्थं वस्तुतस्तुपक्षः। प्रतीति। प्रतिनिधिव्यवहारः। प्रतित्वं प्रतिनिधित्वम्। 'प्रतिप्रतिनिधिप्रतिदानयो'रिति सूत्रादर्थः। श्रुतौ ऋच इति षष्ठ्यन्तम्। ऋक्सम्बन्धिनि वर्णात्मके इत्यर्थः। तदाहुः ऋक्सम्बन्धित्वेनेति। अर्थपरत्वेन वस्तुतस्तु पक्षेणाक्षरे परम इति श्रुतिं व्याकुर्वन्तीत्याशयेनाहुः वस्तुतस्त्विति। एतद्ध्येवेति। 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्। एतद्ध्येवाक्षरं ज्ञात्वा यो

मुच्यते । एवं सति तदुक्तकर्मणोपि तथात्वमायाति । एतेन 'भक्त्या मामभिजानाती'ति वाक्यात् परब्रह्मस्वरूपज्ञानं भक्त्यैवेति भक्ताः सन्तः पुरुषोत्तमविदो ये, तेषामेव वेदाध्ययनादिकं फलप्रदम्, नान्येषामित्युक्तं भवति । अत एव श्रीभागवतेप्युक्तं 'ऋषयोपि देव युष्मत्प्रसङ्गविमुखा इह सञ्चरन्ति,' 'संसरन्ती'ति वा । अन्वये निदर्शनम् । ये इत् ईश्वरत्वेन तत् पूर्वोक्तं परं ब्रह्म विदुः, त इमे भक्ताः सर्वापेक्षया सम्यक्प्रकारेण भगवन्निकटे श्रीगोकुलवैकुण्ठादिष्वासत इति । तेनान्येषां सम्यगसत्त्वमर्थाक्षिप्तं भवति । पुरःस्थितार्थवाचीदंशब्दप्रयोगेण चान्येषामसत्तुल्यत्वं श्रुतेरभिमतमिति ज्ञायते । ऋक्शाखायामपि 'तमु स्तोतारः पूर्व्यं यथाविद् ऋतस्य गर्भं जनुषा पिपर्तन, आस्य जानन्तो नाम चिद्विवक्तन

भाष्यप्रकाशः ।

उक्तश्रुतौ निहितत्वेन श्रावणाद्गीतायां 'तद्धाम परमं ममे'ति वाक्याच्च तत्र प्रतिपाद्यत्वेन स्वरूपेण च वर्तमानम्, तं 'अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति गीतावाक्याल्लोकवेदप्रसिद्धं परं ब्रह्म यो न वेद, स किं ऋचा, ऋगिति वेदमात्रोपलक्षकम्, वेदेन किं करिष्यतीति । शेषं स्फुटम् । 'ऋषय' इति वाक्यं तु तृतीयस्कन्धे नवमाध्याये । अन्वये निदर्शनमिति । तदज्ञातुर्वेदाध्ययनसद्भावेपि तन्मुख्यफलाभावादन्वयव्यभिचारे निदर्शनं श्रुतिः श्रीभागवतवाक्यं चाहेत्यर्थः ।

अथवा, इदमग्रिमेण सम्बध्यते । तथाच वक्ष्यमाणेन वाक्यशेषेण श्रुतिर्ज्ञानवतां भगवत्प्राप्तिलक्षणं निदर्शनमाहेत्यर्थः । तदेव श्रुतिशेषं व्याकुर्वन्ति ये इदित्यादि । इदित्यवधारणे । तथाच प्रणवार्थभूतस्य भगवतो यज्ज्ञानं तस्यावश्यकत्वं तदज्ञानेऽध्ययनादिनैष्फल्यं च बोधयन्त्यानयर्चा भगवज्ज्ञानसाधनीभूतायां वरणसाध्यायां भक्तावादरो दर्शितः । एवं श्रुत्यन्तरे साधनभक्तावप्यादरः श्राव्यते इत्याशयेनाहुः ऋगित्यादि । अर्थस्तु, हे स्तोतारो मदुत्कर्षवर्णनपराः । इयं वेदानामुक्तिः । तं लोकवेदप्रसिद्धम्, पूर्व्यं पूर्वस्य कारणस्य सम्बन्धि सर्वकारणकारणरूपम्, यथाविदः यथावत्तत्स्वरूपवेत्तारो भवन्तः, ऋतस्य सूनृतवाणीरूपस्य वेदस्य, गर्भं अन्तर्निहितम्, जनुषा स्वस्य सम्पूर्णजन्मना यावज्जीवमिति यावत्, पिपर्तन पूर्तियुक्तं सन्तुष्टं कुरुत, सन्तोषयत । अत्र यथावित्त्वोक्त्या पूर्णज्ञानानां देहेन्द्रियप्राणान्तःकरणजीवविनियोगं भगवत्तोषार्थं दर्शयति श्रुतिरिति भगवद्धर्मेषु श्रुतेरादरः स्फुटति । अथ भगवत्तोषाभावे किमपि न सिध्यतीत्याशयेन पूर्वोक्तकरणाशक्तावनुकल्पमाहोत्तरार्धेन । आसमन्तात् अस्य परमपुरुषस्य नाम अखण्डशब्दब्रह्मरूपत्वेन जानन्तः, विवक्तन विशेषेण वदत । नाम्नः स्वरूपं

रश्मिः ।

यदिच्छति तस्य त'दिति श्रुत्या । उक्तश्रुताविति । तैत्तिरीयश्रुतौ । शेषमिति । एवं सतीत्यारभ्य वेत्यन्तं व्याख्येयम् । अत्र तदुक्तेति । वेदोक्तकर्मणः । 'पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहे'त्यत्रेवात्रापि वेदाध्ययने वेदमात्रग्रहणम् । तथात्वं निष्फलत्वम् । एवं शेषं स्फुटम् । अन्वयेति । यत्र यत्र तदज्ञातुर्वेदाध्ययनसद्भावस्तत्रतत्र पुरुषोत्तमरूपमुख्यफलमित्यन्वयः, तस्य व्यभिचारे सति निदर्शनं दृष्टान्तम् । श्रीभागवतवाक्यं कर्तृ । निदर्शनमाहेत्यर्थः । निदर्शनं त्वेवम् । यत्र भक्ते संसाराभावस्तत्र पुरुषोत्तमप्रसङ्ग इति । निदर्शनं न दृष्टान्तः, किंतु भगवत्प्राप्तिः करणव्युत्पत्त्या तत्राहुः अथवेति । अग्रिमेणेति । श्रुतिशेषेण । वाक्यशेषोऽप्ययम् । श्रुतिः 'ऋचो अक्षरे परमे व्योम'न्निति । य इदित्यादीति । य एवेश्वरत्वेन तत्पूर्वोक्तमित्यादिः । इम इतीदमः प्रत्यक्षगे रूपमत आहुः श्रीगोकुलेति । वैकुण्ठस्थेषु गोकुलस्थत्व एवेम इति प्रयोगः । प्रणवार्थेति । अयमर्थो गायत्र्यर्थकारिकासु श्रीमद्गोस्वामिभिः स्पष्टी-

महस्ते विष्णो सुमतिं भजामहे' इत्यादृग्भिरन्येभ्यो धर्मेभ्यः सकाशाद्भगवद्धर्मेष्वादरः श्रूयते इति तेषां अलोप एवेत्यर्थः। एतेन 'अकरणे प्रत्यवायश्रवणा'दित्यादि यदुक्तम्, तदपि प्रत्युक्तं वेदितव्यम्। करणेपि वैयर्थ्यात्तदपरिहारात्। एवं सति यदकरणे प्रत्यवायकथनम्, तेन तस्मादवकाशं प्राप्य गौणकालेप्यकरणे तथेति तस्याशय इति ज्ञायते ॥ ४० ॥

नन्वेवं तात्पर्यकत्वे श्रुतेरुपनयनादिवत् कर्मोपयोगित्वं भक्तितज्ज्ञानयोः स्यादिति कर्मण एव प्राधान्यम्, न तु भक्तेः सिध्यतीत्याशङ्क्य, भक्तितज्ज्ञानावश्यकत्वबोधकश्रुतितात्पर्यमाह।

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥

भाष्यप्रकाशः।

विष्या तदेव कीर्तयत। अनुकल्पेन कथं सन्तोष इत्यतो नामस्वरूपमाह चिदिति। उपलक्षणमेतत्। सच्चिदानन्दात्मकम्। तथाच नाम्नो ज्ञानरूपत्वात्तद्द्वारा भगवतोपि ज्ञानं भविष्यति, तेन तोषोपि भविष्यतीत्यर्थः। नामस्वरूपस्याप्यज्ञाने तदुपायं गुरूपसत्तिरूपमाह। हे विष्णो ते त्वत्सम्बन्धिनं महः तेजोरूपम्, समभिव्याहारात् त्वत्तेजोरूपम्, सुमतिं निर्दोषपूर्णगुणत्वेन भगवन्तं जानन्तम्। सुबुद्धिं भक्तमिति यावत्, तं भजामहे। तथाचान्यो भजतु, मा वा, वयं तु भजामह इति श्रुतयः स्वकार्तिं दर्शयन्ति। अनेन तदुपायेप्यादरो दर्शितः। तेन भगवद्धर्माणामत्यावश्यकत्वं बोधितमिति ज्ञेयः। इत्यादृग्भिरित्यादिपदेन, 'प्रतत्ते अद्य शिपिविष्ट नामे'त्यादीनां संग्रहः। एवं श्रुतिद्वयेन भगवद्धर्मेष्वादरे श्रुतेः सिद्धे तेषामेव मुख्यकाले करणं सिद्धमिति तेन पूर्वपक्षयुक्त्युत्तरसिद्धिं स्मारयन्ति एतेनेत्यादि। तर्हि प्रत्यवायश्रवणस्य का गतिरित्याकाङ्क्षायां तामाहुः एवं सतीत्यादि। तेनेति। कथनेन। तस्मादिति। भगवद्धर्मात्। तथेति। प्रत्यवायः ॥ ४० ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥ सूत्रमवतारयन्ति नन्वेवमित्यादि। उक्तश्रुतिभ्यां

रश्मिः।

कुतस्ततोऽवसेयः। वरणेति। पुष्टिभक्तौ। अनुकल्पमिति। विध्यन्तरम्। कथमिति। मुख्यकल्पानाश्रयणजदुःखसत्त्वात्क(थ)मिति प्रश्नः। 'कल्पः स्यात्प्रलये न्याये शास्त्रे ब्रह्मदिने विधा'विति विश्वः। ज्ञेय इति। पूर्वेणार्थस्त्वित्यनेनान्वेति। प्रतत्त इति। प्रनाम पूर्णम्। प्रा पूरणे। तत् सच्चिदानन्दरूपं ते तव शिपिविष्टनामेति। यथावत् शिपिविष्टनामेति ज्ञेयम्। 'शिपिविष्टस्तु खलतौ शिवे दुश्चर्मणि स्मृत' इति विश्वः। आदिनर्ग्वेदोपनिषन्मण्डूकनाम्नी। भगवद्धर्मेष्विति। क्रिया वर्णाश्रमधर्मः। ज्ञानं भगवद्धर्मः। तच्च यथावत् भगवद्धर्मविषयकम्। 'ज्ञानशक्तिः क्रियाशक्तिः संदिष्टेते परस्थिते' इति भाष्यकारिका। ते च ज्ञानावच्छेदका धर्माः 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'ति वाक्याद्भक्तिप्रधानाः। भक्तयो नवविधाः प्रेम सर्वात्मभावश्च। ऐश्वर्यादयः। पादार्घ्याव्याप्तिरपि स्मारिता। आदर इति। उक्तश्रीभागवतवाक्यादादरः। एतेनेत्यादीति। करणेपीति। 'वेदं कृत्वा वेदिं करोती'त्यत्र 'क्षुत आचामे'दित्यत्र पूर्वं वेदिकरणे क्षुतनिमित्ताभावेप्याचमने·कृते वेद्याचमनयोर्वैयर्थ्यं यथा, तथा भगवद्धर्मकाले वर्णाश्रमधर्मकरणे तस्य वैयर्थ्यं तस्मात्। तस्य प्रत्यवायश्रवणस्यापरीहारात्। परेर्दीर्घः। प्रत्यवायः 'मृत्योर्मृत्युमुपैति स' इत्येकादशोक्तः। भाष्ये। तस्येति। प्रत्यवायवाक्यस्य ॥ ४० ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥ उक्तेति। 'तमु स्तोतारः' 'प्रतत्ते' इति श्रुतिभ्याम्।

---

१. रश्मौ तदपरीहारादिति पाठः।

तयोर्युगपत्करणेऽनुपस्थितेपि यदि पूर्वं भगवद्धर्मकरणमुच्यते, तदा त्वदुक्तं स्यात्, नत्वेवम्, किन्तूभयोर्युगपत्करण उपस्थिते बलाबलविचारे क्रियमाणे,

---

भाष्यप्रकाशः ।

भगवद्धर्मादरे बोधिते भगवद्धर्मकरणे श्रुत्युक्तानां कर्मणां सार्थक्यं नान्यथेत्येवं श्रुतेस्तात्पर्येण उपनयनादिवदङ्गत्वादेस्तदङ्गत्वं कर्मणश्च प्राधान्यं सिध्यतीत्याशङ्क्य भक्त्याद्यावश्यकत्वबोधनतात्पर्यमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति तयोर्युगपदित्यादि । यजुर्ब्राह्मणश्रुतौ भगवज्ज्ञानस्यावश्यकत्वं बोध्यते । तेन स्वाध्यायावर्तनदशायामपि तदावश्यकता आयाति । ऋक्संहिताश्रुतावपि 'यथाविद' इति 'जानन्त' इति च स्तोतृविशेषणाद्विधेयस्य भगवद्धर्मस्य करणे ज्ञानस्याधिकारप्रयोजकत्वं लभ्यते । मन्त्राणां विधायकत्वं तु 'वसन्ताय कपिञ्जलानालभेते'त्यत्र परैरसहतम् । 'वसन्ताये'त्यादीनां न मन्त्रत्वमिति स्वपक्षेपि मन्त्राणां स्वार्थे प्रामाण्यस्याङ्गीकाराद्विधिशक्तिकौण्ठ्याभावे विधायकत्वं न हीयते । अतो मुमुक्षूणां भगवद्धर्मा आवश्यकाः । कर्माणि तु 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण यज्ञेन तपसा श्रद्धया अनाशकेने'ति श्रुतेर्विविदिषायामेवोपक्षीणानि । ज्ञानपर्यन्तत्वपक्षेप्यारादुपकारकाणीति विविदिषोक्त्यैव लभ्यत इति दूरापास्तं तत्प्राधान्यम् । एवं ज्ञानोत्तरं यत्र कथञ्चिद्वर्णाश्रमधर्मा भगवद्धर्माश्च युगपत्प्राप्ताः, तत्र प्रत्यवा-

रश्मिः ।

सार्थक्यमिति । 'यदेव विद्यये'तिश्रुतेः पूर्वमीमांसकाशङ्का । श्रुतेरिति । यजुर्ब्राह्मणश्रुतेः 'ॐमिति प्रतिपद्यत' इत्यादेः । सिध्यतीति । 'त इमे समासत' इत्यत्र यज्ञायेति शेषं पूरयित्वा सिध्यति । भक्त्यादीति । भक्तितज्ज्ञानावश्यकत्वबोधनस्य तात्पर्यं ज्ञानकाण्डत्वा'त्तमेत'मिति श्रौतं ज्ञानकाण्डीयं तात्पर्यमाहेत्यर्थः । तयोरित्यस्यार्थं ऋक्संहितायजुर्ब्राह्मणश्रुत्योरित्याहुः यजुर्ब्राह्मणेति । बोध्यते इति । यज्ञे बोध्यते । आयातीति । ब्रह्मयज्ञत्वादायाति । स्तोत्रिति । ज्ञानस्याधिकारेत्यादौ हेतुः । विधेयस्येति । पिपर्तनेतिविधिविषयस्य भगवतोऽधोक्षजत्वाद्भगवद्धर्मस्य करणे ज्ञानस्य स्तोतृविशेषणस्य । पिपर्तनेतिमध्यमपुरुषान्मन्त्रत्वम् । पूर्वतन्त्रे मध्यमपुरुषान्तस्य मन्त्रत्वोक्तेः । तदाहुः मन्त्राणामिति । स्वपक्ष इति । भावार्थपादभाष्ये । एतावता तयोरित्यस्यार्थ उक्तः । अत इति । कर्मणा पूर्तियुक्तं कुरुतेति पिपर्तनेत्यस्यार्थेपि ज्ञानकाण्डत्वेन 'तमेतं वेदानुवचनेने'ति श्रुतिविषयत्वेन सेवाख्यकर्मणा पूर्तियुक्तं कुरुतेत्यर्थादित्यर्थः । भगवद्धर्मा उक्ता ज्ञानविषयाः । आभासे श्रुतेरुपनयनादिवदित्यादि यदुक्तं तत्राहुः कर्माणि त्विति । 'विविदिषन्ती'त्यत्र रामानुजाचार्यवत्सनर्थाविवक्षायामाहुः ज्ञानपर्यन्तत्वेति । आरात् समीप उपकारकाणि कर्माणीति । विविदिषोक्तिर्व्यञ्जनया । सनर्थाविवक्षोक्तेः । तत्प्राधान्यं कर्मप्राधान्यम् । भाष्यविवरणं तु अनुपस्थितेपीति । अपिनोपस्थिते । त्वदुक्तं कर्मणः प्राधान्यं स्यात्, शास्त्रस्य प्राथम्यात्, नत्वेवम्, शास्त्रप्राथम्यापेक्षया श्रुतिद्वयस्य प्राबल्यात् । 'तमेतं वेदानुवचनेने'ति 'यदेव विद्यये'ति श्रुतिद्वयम् । प्रकृते । किन्तूभयोरिति भाष्यविवरणमाहुः एवं ज्ञानेति । कर्माप्राधान्यज्ञानोत्तरम् । कथञ्चिदिति । कारणत्वेन प्रकारेण भगवति लोकसंग्राहका वर्णाश्रमधर्माः क्रियाशक्तिरूपाः भगवद्धर्मा ज्ञानशक्तिविषयभक्तिरूपाः । 'भगवान्भक्तभक्तिमानि'तिवाक्यात् । ज्ञानशक्तेः सविषयत्वात् भगवान्विषय इति चेदुक्ता अपि सन्तु, 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'ति वाक्यात् । प्राप्ता इति । भगवति प्राप्ताः । जीवे कथञ्चिन्मार्गाग्रहेण प्राप्ताः । प्रत्यवायेति । यथा बलदेवे सूतवधानन्तरम् । आदिना 'मृत्योर्मृत्युमुपैति स' इति जीवविषये

अत आदराद्धेतोस्तद्वचनाद्भगवद्धर्माणां बलवत्त्वेनालोपवचनात् न कर्माङ्गत्वमेतेषां सिध्यतीत्यर्थः ॥ ४१ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्दशमादरादलोप इत्यधिकरणम् ॥ १४ ॥

भाष्यप्रकाशः।

यादिबोधकवाक्यैः प्रबलदुर्बलभावे वैपरीत्येन भाते तदपवादायादरः प्रकाश्यते । ततश्च भगवद्धर्माणां बाधाभावः सिध्यति । तथा सतीतरेषामादराभावेपि प्रत्यवायश्रवणवैयर्थ्यपरिहाराय तेषां गौणकाले करणमर्धाधानवद्व्यवस्थाप्यते, अतो न भक्त्यादीनां कर्माङ्गत्वमित्यर्थः। अत्र कर्मणामनादरव्युत्पादनेन भगवद्धर्माविरुद्धरीत्या तत्करणस्य व्युत्पादनेन च निष्कामनित्यकर्मकृतिबोधकं अपाश्रितार्भकाश्वत्थमिति विशेषणं प्रतिपादितं ज्ञेयम् ।

रश्मिः ।

एकादशवाक्योक्तमृत्युप्राप्तेर्निन्दा । **वैपरीत्येनेति** । बलाबलविचारे ज्ञानकाण्डत्वादुपनयनादिवदित्याभासोक्तं वैपरीत्यम्, तेन 'यदेव विद्यये'ति श्रुत्या भाते 'तमेत'मितिश्रुत्या ज्ञानकाण्डत्वेन च तस्य वैपरीत्यस्यापवादाय 'ऋषयोपि देव युष्मत्प्रसङ्गविमुखा इह सञ्चरन्ती'त्युपष्टम्भाद्भगवद्धर्मेष्वादरः प्रकाश्यते, नतु वर्णाश्रमधर्मे । **इतरेषामिति** । वर्णाश्रमधर्माणाम् । **अर्धाधानेति** । अर्धाधाने कृते कामनासमाप्तावपि विधिबलादर्धाधानं क्रियते तस्यैव । गौणकालोऽनधिकारकालो विधिलभ्यः । तदेतत्षष्ठस्य द्वितीयपादे तृतीयाधिकरणे स्पष्टम् । सूत्राणां न्यायरूपत्वात् । 'असमाप्यं समाप्यं वा काम्यं कामे निवर्तिते । आद्यः प्रयोजनाभावादन्त्यो निन्दादिसंश्रवा'दिति । अत्र 'चित्रया यजेत पशुकामः' 'कारीर्या यजेत वृष्टिकामः' इत्यादिषु कामप्रेरितेन पुरुषेण कर्मोपक्रान्तम्। तस्य च समाप्तेः प्रागेव केनापि निमित्तेन तत्तत्फलप्राप्तौ दोषदर्शनेन कामो निवर्तते । तदा कर्मानुष्ठाने प्रयोजनाभावात् न समापनीयमिति चेत् । मैवम् । प्रक्रान्तस्य कर्मणोऽसमाप्तौ निन्दाप्रायश्चित्तयोः श्रवणात् । 'देवताभ्यो वा एष प्रावृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते' 'त्रैधातवीयेन यजेत न देवताभ्य आवृश्च्यते'ति तदुभयं श्रुतं तस्मात्समापनीयमित्यर्थः । ओ व्रश्चू छेदने । **अत इति** । वैपरीत्यापवादात् । **तत्करणस्य** कर्मकरणस्य । **निष्कामेति** । 'कर्माणि साधनत्वेन निरूपयती'ति सुबोधिन्याभासात् । 'अपाश्रितः आश्रितः अर्भकाश्वत्थो येन। आश्रितः पश्चादिति वा। अर्भाणां कं सुखं यस्मात् । बालकसुखदायी। अर्भकरूपः कोमलः अश्वत्थो वा । तस्यैवारणी भवतः । कर्माणि सर्वाणि तत्साधनान्येव । अपाश्रयपदेन च साधनत्वेनैव कर्मणामपेक्षा, नतु तद्गतं फलमप्यपेक्षत इति सूचितम्। अपाश्रिता अर्भका यस्मिन्निति बालाधिकारः कर्मणि सूचित' इति सुबोधिनी । आभासे साधननिरूपणं लोकसंग्रहार्थम् । **पश्चादिति** । मायाया निवृत्तेः पश्चात् । स चाश्वत्थो धर्मरूपोपि ह्यैश्वर्यधर्मरूपः अन्यथाकरणसमर्थः । अन्यथा ब्रह्मणा प्रार्थितोपि न स्वरूपमन्यथयेत् । वीर्यं तु नास्थेयम् । 'नैच्छद्वपु'रितिवाक्यात् । ननु नित्यानन्दे प्रभासलीलानुपपन्नेत्यत आहुः **अर्भाणामिति** । ऐश्वर्याविष्टोऽधोक्षजो बाल इति न नित्यानन्दत्वविरोधः । धर्मोऽश्वत्थः 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येक' इति । स एवैश्वर्यमित्यर्भकरूपः । अधुना लोकसंग्रहार्थं कर्माश्रयणरूपं तेन बृहदारण्यकोक्तोश्वत्थः कालात्मा भगवाञ्जातोऽश्वत्थादग्निरूपोपि, अश्वत्थे धर्मे तन्निष्ठाग्नौ च तिरोभवतीत्यश्वत्थाश्रयणेच्छाया आहुः **तस्यैवेति** । महीधर्यां वेदटीकायामश्वत्थगर्भशमीशाखाहरणोक्तेः । तत्साधनानीत्यरणिकाष्ठानयनसाधनानि साक्षात्परम्परयेति बोध्यम् । अपाश्रित आश्रित इत्यर्थ उक्तोऽपपरी अनर्थकाविति सूत्रात् । अधुनाऽपार्थं हीनं वदन्ति **अपाश्रयेति** । **कर्मणा-**

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिवन्धः फलम् ॥ ४२ ॥ (३-३-१५.)

अथेदं विचार्यते । पुरुषोत्तमविदः कर्म कर्तव्यम्, न वेति ।

तत्र मार्गत्रयफलात्मके तस्मिन् सम्पन्ने पुनस्तस्य स्वतोऽपुरुषार्थस्य करणमप्रयोजकमिति न कर्तव्यमेवेति पूर्वपक्षः ।

तत्र सिद्धान्तमाह तन्निर्धारणेत्यादिना । अत्रेदमाकूतम् । भक्तिमार्गे हि मर्यादापुष्टिभेदेनास्ति द्वैविध्यम् । तत्र मर्यादायां पुष्टौ चैताहशस्य न कर्मकरणं सम्भवति । अत एव तैत्तिरीयकोपनिषत्सु पठ्यते 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने'ति । 'एतꣳ ह वा व न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवमिती'ति । श्रूयते चोभयविधानामपि कर्मकरणमम्बरीषोद्धवपाण्डवा-

---

भाष्यप्रकाशः

शङ्करभास्कराचार्यौ तु वैश्वानरविद्योक्तस्य प्राणाग्निहोत्रस्य भोजनलोपे लोपो न वेति शङ्कायां लोपं सिद्धान्तयतः । तत्रोदासीना वयम् ।

रामानुजाचार्यास्तु, इदं सूत्रद्वयं कामादिसूत्रशेषत्वेनाङ्गीकृत्य तत्र मोक्षार्थिनां निर्विशेषोपासकानां सत्यकामत्वादिवद्वशित्वादिकमपि लुप्यते इति शङ्कानिवृत्तये आद्यम्, छान्दोग्योक्तं 'सर्वेषु लोकेषु कामचार' इति फलं सांसारिकमिति शङ्कानिरासाय द्वितीयमिति मन्यन्ते । अयं च परविषयो विचार इति पूर्वोक्तमतद्वयापेक्षयायमेव युक्तः ॥ ४१ ॥ इति चतुर्दशमादरादलोप इत्यधिकरणम् ॥ १४ ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ ननु यद्येवं तर्हि गौणमुख्यन्यायेन कर्मणामप्रयोजकत्वात् परमहंसेष्विव भक्तेष्वपि तत्प्राप्तिरेव न सम्भवतीति व्यर्थः पूर्वोक्तो विचार इत्याकाङ्क्षायां पाक्षिकप्राप्तिं हृदिकृत्य तत्प्रयोजनबोधनायेदमधिकरणमित्याशयेन संशयपूर्वपक्षौ वदन्तस्तदवतारयन्ति अथेत्यादि । तस्मिन्निति । पुरुषोत्तमज्ञाने । सिद्धान्तं वदन्तः सूत्रं व्याकुर्वन्ति अत्रेदमित्यादि । एताहशस्येति । पुरुषोत्तमविदः सर्वदा भगवदानन्दमनुभवतो वा । श्रूयते चेति । गोपालोत्तरतापनीयेऽतिथिपूजारूपो गृहस्थधर्मो

रश्मिः ।

मिति । अश्वत्थरूपधर्माश्रयणरूपकर्मात्र । बहुवचनमन्यापेक्षम् । हीनाश्रयणान्नतु तद्गतं फलमप्यपेक्षत इत्यर्थः । **अपाश्रिता** इति । मुख्यतया तु वैदिका आश्रिताः । अतो बालस्यैश्वर्याविष्टस्याधिकारः प्रभासलीलायां कर्मणि सूचित इत्यर्थः । **वैश्वानरेति** । प्राणाग्निहोत्रोपनिषदि स्फुटम् । **उदासीना** इति । पूर्वतन्त्रे द्वारलोपात्कार्यलोपस्य सिद्धत्वे तत एव सिद्धेरुदासीनाः । **परविद्ययोरिति**[1] । 'अथ परा यया तदक्षरमधिगम्यत' इति श्रुतेः पूर्वा परा । छान्दोग्यं तु नारदसनत्कुमारसंवादस्थं सर्वात्मभावविद्याविषयमिति परविद्या ॥ ४१ ॥ **इति चतुर्दशमादरादलोप इत्यधिकरणम्** ॥ १४ ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ **पाक्षिकेति** । कर्मकरणे भगवदिच्छानिर्धारणपाक्षिकेत्यर्थः । **तत्प्रयोजनेति** । अग्रे स्फुटम् । **भाष्ये** । **मार्गेति** । कर्ममार्गेण चित्तशुद्धौ ज्ञानं ज्ञानिनो भक्तौ सत्यां 'भक्त्या जानाति चाव्यय'मितिश्रुत्युक्ते फलात्मके । **आकूतमिति** ।........। **प्रकृते** । 'अम्बरीषोद्धवपाण्डवादी'नामित्यत्रादिपदार्थत्वेन शुकजडादयो भाष्ये व्याकृतप्रायाः । **गोपालेत्यादि** । गान्धर्वीप्रभृतीनां पुष्टिमार्गीयत्वं स्फुटम् । 'अह्नयापृतं निशि शयान'-

---

[1] परविषय इत्यत्र परविद्ययोरिति पाठः रश्मौ ।

वीनाम्। एवं सत्युभयविधानां मध्ये, मम कर्मकरणे प्रभोरिच्छास्तीति यो निर्धारयति, स करोति। य एतद्विपरीतम्, स न करोति। यथा शुकजडादिः। एतन्निर्धारश्च भगवदधीनः, अतो भक्तेष्वपि तन्निर्धारणानियमः, अतः कर्म कर्तव्यमेवातन्निर्धारणे त्वाधुनिकानाम्। एवं सतीच्छाज्ञानवता तत्सन्देहवता च कर्म कर्तव्यमिति सिद्धम्। तत्रोभयोः फलं वदन्नादावाद्यस्याह तद्दृष्टेः। तस्या भगवदिच्छाया दृष्टिर्ज्ञानं यस्य स तथा। तस्य जीवकृतकर्मफलात् पृथक् भिन्नमीश्वरकृतकर्मणो यत्फलं वेदमर्यादारक्षा लोकसंग्रहश्च तत्फलमित्यर्थः। हिशब्देन 'सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत। कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रह'मिति भगवद्वाक्यरूपोपपत्तिः सूचिता। द्वितीयस्य मध्यमाधिकारात् कालेसङ्गादिजनितचित्तमालिन्येन भगवत्सांनिध्ये प्रतिबन्धः स्यात्, तन्निवृत्तिस्तत्कृतकर्मणः फलमित्यर्थः।

भाष्यप्रकाशः।

गान्धर्वीप्रभृतीनाम्। चकारात् स्मृतौ। उभयविधानामिति। मर्यादायां पुष्टौ चाङ्गीकृतानां भक्तानाम्। एतद्विपरीतमित्यत्रापि निर्धारयतीति सम्बध्यते। तथाच निर्धारणानियमपदस्य हेतुगर्भतया एवं कर्मप्रसक्तेर्विद्यमानत्वान्न पूर्वाधिकरणोक्तविचारवैयर्थ्यमित्यर्थः। ननु भवत्वेवं पुरुषोत्तमविदः कर्मकरणम्, तथापि किं तस्य फलमिति विचारणीयम्, न तावल्लौकिकम्, तदनभीष्टत्वात्। नापि प्रत्यवायपरिहारादिः, 'स्वपादमूलं भजत' इति वाक्याद्भगवतैव तत्सिद्धेरित्याकाङ्क्षायां सूत्रशेषमवतारयन्ति तत्रेत्यादि। एवं सिद्धे कर्मकरणे ज्ञातेच्छतत्सन्देहवतोः फलं वदन्निश्चितेच्छस्य फलं तद्दृष्टेः पृथगित्यनेन पूर्वमाहेत्यर्थः। द्वितीयस्य विवृण्वन्ति द्वितीयस्येत्यादि। तथाच तादृशोरपि कर्मणः साफल्यस्य सत्त्वान्न पूर्वोक्तविचारवैयर्थ्यमित्यर्थः।

रश्मिः।

मितिवाक्यात्। तथाच पुष्टिमर्यादामार्गीया भक्ता अप्यादिपदार्थः। अत्र गान्धर्वीप्रभृतीनां श्रूयते चेत्यन्वयो न भवति। गोपालतापिनीये गान्धर्वीप्रभृतिष्वम्बरीषादीनामग्रहणात्। तथाच श्रूयते चेत्यस्य वेदोपाख्यानेष्वित्यर्थः। अन्वयान्तरमाहुः स्मृताविति। स्मृतौ श्रूयते श्रावणविषयीक्रियते। नच स्मर्यते चेति पठनीयमिति वाच्यम्। 'इतिहासः पुराणं वेदानां पञ्चमो वेद' इति श्रुत्या पुराणेष्वपि स्मर्यते चेत्यस्य बाधात्। स्मृतयस्तु नवमस्कन्धे 'स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः। स्वधर्मेण हरिं प्रीणन्सङ्गान्सर्वान् शनैर्जहा'वित्यम्बरीषस्य कर्मकरणे। दशमस्कन्धे 'क्रतुराजेन गोविन्द राजसूयेन पावनीः। यक्ष्ये विभूतीर्भवत' इति पाण्डवानां कर्मकरणे। एकादशस्कन्धे 'यथोपदिष्टं जगदेकबन्धुना तपः समास्थाय हरेरगाद्गति'मित्युद्धवस्य कर्मकरणे एकोनत्रिंशाध्यायस्था। मर्यादायामिति। मर्यादायामम्बरीषादयः। पुष्टिमर्यादायां गान्धर्वीप्रभृतयः। पुष्टौ 'केवलेन हि भावेन गोप्यो गावः खगा मृगाः। येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे'तिवाक्योक्ता गोप्यादयः। 'स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः। विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि सन्निविष्ट' इति। मर्यादेत्यादि। मर्यादायामम्बरीषादयः भक्तेः ससाधनत्वात्। पुष्टौ गोप्यादयः निःसाधनभक्तिमत्त्वात्। पुष्टिमर्यादायां गान्धर्वीप्रभृतयः गोपालतापिनीये ससाधनभक्तेः, 'अह्नयाप्त'मिति निःसाधनभक्तेश्च कथनात्। शुकजडादयो ज्ञानिभक्ताः। प्रथमस्कन्धे शुकस्य पञ्चमस्कन्धे जडस्य ज्ञानित्वेन प्रसिद्धेः।

---

१. एतावन्निर्धारणमिति पाठः। २. कामसङ्गेति पाठः।

अथवा । पूर्वसूत्राभ्यां भगवद्धर्मकृतेरावश्यकत्वमुक्तम् । सर्वात्मभाववतो

भाष्यप्रकाशः ।

अत्र भगवत्स्वरूपविषयकपूर्णज्ञानवतामेव तदिच्छया वर्णाश्रमधर्मकरणतदकरणयोर्विभजनात् पूर्णज्ञानप्राप्यत्वबोधकं अकृशमिति विशेषणं प्रतिपादितं ज्ञेयम्। न कृशं यस्येति तदर्थादिति ।

एवमेतत्सूत्रव्याख्याने प्रत्यवायश्रवणादिना गौणकालेऽप्यवश्यकर्तव्यतया पूर्वाधिकरणे साधितानां कर्मणां वैयर्थ्यपरिजिहीर्षया फलस्य वक्तव्यत्वेन पृथग्घ्यप्रतिबन्धः फलमिति सूत्रभागसार्थक्यमायाति, न सम्पूर्णस्य सूत्रस्येत्यरुच्या व्याख्यानान्तरार्थं सूत्रमवतारयन्ति अथवेत्यादि । पूर्वसूत्राभ्यां भगवद्धर्माणां मोक्षफलानां श्रवणादीनां कृतेः करणस्यावश्यकत्वमुक्तम्, यः पुनः सर्वात्मभाववान्, तस्य तूक्तभगवद्वचनात्, तं प्रति मोक्षसाध-

रश्मिः ।

भगवदिति। इच्छाया भगवन्निष्ठत्वेन तन्निष्ठसत्ताया अपि परम्परया भगवन्निष्ठत्वेन विषयविधया भगवदधीनत्वम्, मुख्यत्वात्, इतरयोश्च विशेषणत्वात्। ननु प्रभोरिच्छास्तीत्यत्र प्रभुसम्बन्धीच्छानिष्ठः सत्तानुकूलो व्यापार इति वैयाकरणबोधोतः कथमितरयोर्विशेषणत्वमिति चेत् । न । अनौचित्याद्भगवतो विशेषणत्वे सखण्डब्रह्मवादेन । एतद्भगवदधीनपदेन सूच्यते । एतत्फलमाहुः अतो भक्तेष्विति । येषां पुनर्भगवान् साधनं फलं च तेष्वपीत्यर्थः । तादृशेष्विच्छासत्तयोरभावात् । तथा चैतन्निश्चयस्य ज्ञानरूपस्य सकलभक्तसाधारणं भगवदधीनत्वमुररीकार्यमिति भावः। नचान्योन्याश्रयः भगवदधीनो निर्धारः निर्धाराधीनो भगवान् साधनमिति ज्ञानमिति वाच्यम् । पूर्वं कर्मकरणनिर्धारेण कार्येणाधीनस्य भगवान्साधनमस्ति कारणं विना कार्याभावादिति भगवान्साधनमिति पश्चाज्ज्ञानस्य सम्भवेनान्योन्याश्रयाभावात् । भाष्ये । वेदेत्यादि । इदं गीतातृतीयाध्याये 'लोकसङ्ग्रहमेवापि संपश्यन्कर्तुमर्हसी'ति लोकसङ्ग्रहः। 'यद्यदाचरति श्रेष्ठ' इत्यारभ्य 'उपहन्यामिमाः प्रजा' इत्यन्तेन वेदमर्यादारक्षा । ननु 'न कुर्यां कर्म चेदह'मितीश्वरं प्रति व्यतिरेकमुखेन विधिरस्ति तत्र गीतायां अर्जुनं प्रति लोकसंग्रहकथनवद्वेदमर्यादारक्षाप्युक्ता न सर्वान्प्रत्याज्ञसेत्याकाङ्क्षायां हिकारस्यार्थमाहुः हीति । अत्र विद्वांसं प्रत्याज्ञास्तीति नोक्तदोष इत्यर्थः । भगवद्वाक्येन रूप्यते व्यवह्रियत इति भगवद्वाक्यरूपा उपपत्तिः युक्तिः। यदीदं भगवद्वाक्यं न स्यात्, उक्तदोषः स्यादिति अव्ययानां वैयाकरणमते द्योतकत्वात्सूच्येतेति । प्रकृते । भगेत्यादि । पूर्णेति। 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत' इति श्रुत्या पूर्वं पूर्णं भगवता भक्तमनोरथानुरूपं पूर्तिकर्मज्ञानं तद्वताम्, विभजनात् अम्बरीषाद्युदाहरणसमर्थितात् । अकृशमिति। (अकृशमिति ज्ञानम्, पूर्णत्वात्, अन्येषां परिच्छेदरूपत्वात्। अनेन पूर्णमेव ज्ञानं साधनमिति, न तु खण्डब्रह्मज्ञानानि शारीरकादीनि । सर्वेषां भक्तानामुपसंहृतत्वात् दौर्बल्यमाशङ्क्य निराकृतम् । भक्तानां तत्रैव प्रवेशात् । अनेनान्येपि दैहिका धर्मा निवारिताः । उत्पत्तिकार्यतपस्यादीनि चाक्षरसाम्यात् निवारितानि । 'अस् भुवि' 'डुकृञ् करणे' 'शम उपशमे' इति धात्वादयो गृहीताः । प्रपञ्चकर्मज्ञानानि वा ज्ञानसाधनानि, ततः ससाधनं ज्ञानमुक्तं भवति ।) तथाचाय सूत्रार्थः । मम कर्मकरणेऽकरणे वा भगवदिच्छास्तीति निर्धारणानियमादाधुनिकानाम्, अतस्तैर्निष्कामतया कर्म कर्तव्यमेव । तद्दृष्टेः । तस्या भगवदिच्छाया दृष्टिर्ज्ञानं यस्याम्बरीषोद्धवयुधिष्ठिरादेस्तस्य पृथक् जीवकृतकर्मणो यत्फलं तस्माद्भिन्नं सन्मार्गरक्षालोकसङ्ग्रहादिकं तदेव फलम्, न तु स्वर्गादिकम् । पूर्वोक्तनिष्कामकर्मकर्तुस्तु अप्रतिबन्धः कर्मजप्रतिबन्धाभावः फलं युक्तमिति । इदानीं मुख्यायाः एकादशसर्वस्वत्वेन सर्वनिर्णये उक्तायाः न्यूनताख्यनिग्रहस्थाननिवारिकायाः प्रसङ्गतः प्रस्तावनामाहुः य इति। उक्तेति ।भाष्योक्तभग-

'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह'ति भगवद्वचनाद्विधेयाभावादसम्भवाच्च कर्मज्ञानयोर्विहितभक्तेश्च करणं न सम्भवतीति तस्य किं फलमित्याकाङ्क्षापूरणाय तदनुवदति तन्निर्धारणेत्यादिना । तस्मिन् धर्मिण्येव, न तु धर्मेष्वपि दृष्टिर्यस्य स तथा। दृष्टिपदेन ज्ञानमात्रमुच्यते। तेन अन्यविषयकदर्शनश्रवणादिज्ञानाभाव उक्तो भवति । एतादृशस्य प्रभुसङ्गममात्रमपेक्षितम् । तत्र भगवदुक्तस्वसङ्गमावधिकस्य भक्तस्य सङ्गमसमयनिर्धारो भवति । अतादृशस्य तस्य स नेति तन्निर्धारणानियमः । एतेन फलप्राप्तेः प्रागवस्थोक्ता भवति । फलस्वरूपमाह पृथक्फलमिति । अस्यानिर्वचनीयत्वादनुभवैकवेद्यत्वान्मोक्षान्तं यत्फलं शास्त्र उक्तं तस्माद्भिन्नमित्युक्तम् । अन्यत्र हि धर्माणां साधनत्वम्, यत्र फलमेव साधनम्,

भाष्यप्रकाशः ।

नानामविधानस्य सत्याद्यधिकरण उपपादितत्वेन विधेयानां तेषामभावात्, तद्भावस्वभावेन तेषां कर्तुमशक्यतया असम्भवाच्च कर्मज्ञानविहितभक्तीनां करणं सर्वात्मभाववतो न सम्भवति, तदभावे च न मोक्षोपीति तस्य किं फलमित्याकाङ्क्षायां तस्य यत्फलं तदनेन सूत्रेणानुवदतीत्यर्थः । व्याकुर्वन्ति तस्मिन्नित्यादि । एतेनेति । तन्निर्धारणानियमपदेन । अन्यत्रेति । मोक्षपर्यन्ते फलान्तरे । तथाच भगवत्सङ्गमाभिलाषौत्कट्येन तदेकतानस्य भगवतानुक्तस्वसङ्गमावधिकस्य 'यतो वाचो निवर्तन्त' इति श्रुत्युक्तमगणितानन्दरूपं फलम्, तत्प्राप्तिपूर्वदशायां तद्भावप्रति-

रश्मिः ।

वद्वचनात् । **विहितभक्तीति** । तेन सर्वात्मभावेऽविहितभक्तेः कामाद्युपाधिना चिन्तनरूपायाः करणं सम्भवतीत्युक्तम् । **भाष्ये** । नन्वत्र पक्षे इदं सूत्रं नाधिकरणमिति वक्ष्यते । तथाच तस्याः श्रुतेर्दृष्टिदर्शनम् । तस्या इति षष्ठीतत्पुरुषोस्त्विति चेत् । सत्यम् । सर्वात्मभावे 'यत्र नान्यत्पश्यती'त्यादिश्रुतेर्दर्शनं वर्तते, तथापि यत्र यस्मिन्नधिकरणेऽन्यधर्मादिदर्शनादिनिषेधाद्धर्मिण्येव दृष्टिः सूच्यते इत्याशयेनाहुः **तस्मिन्निति** । श्रुतावन्यदर्शननिषेधाद्विग्रहवाक्ये एवकारः समासघटको न । **ज्ञानमात्रमिति** । मात्रं कार्त्स्न्ये । **प्रभ्विति** । प्रभोः सम्यक् गमः अपर्यालोचितोऽध्वा पुष्टिमार्गस्तन्मात्रम् । मात्रमवधारणे । 'मात्रं कार्त्स्न्येऽवधारण' इति कोशात् । **अपेक्षितमिति** । विप्रयोगभावोदय एव स भावो ज्ञातो भवतीति । तत्र प्रभुसङ्गमातिरिक्तमनपेक्षितम् । **स्वसङ्गमेत्यादि** । वैराग्यं न श्रेयो भवेदित्युक्ते विषयवैतृष्ण्यसंज्ञं वैराग्यं न श्रेयः विषयतृष्णा श्रेयः भगवदुक्तः स्वस्य सङ्गमस्यावधिः पूर्वावस्था विषयतृष्णारूपा यस्य भक्तस्य तादृशस्य अपर्यालोचिताध्वनः पुष्टिदास्ययुक्तप्रेम्णः समयः कालः तस्य निर्धारो निश्चयः भगवत्सङ्गकालनिश्चयो भवति । यदि भगवत्सङ्गकालनिश्चयो न स्यात्, 'सत्सङ्गान्मामुपागता' इत्येकादशे द्वादशाध्याये भगवान्न वदेत् । अतादृशस्य धर्मादिदृशेः सङ्गमसमयनिर्धारो न, सर्वात्मभावैकलभ्यत्वात्तस्य । **प्रागवस्थेति** । यथा 'वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले' इति प्रागवस्था, 'परामृतात्परिमुच्यन्ति सर्वे' इति फलस्य । **शास्त्र इति** । मर्यादाभक्तिशास्त्रेपीत्यर्थः । **फलमित्यादि** । ननु कथं फलमेव साधनं फलत्वसाधनत्वयोर्विरोधादितिचेन्न । फलं भगवान् स्वस्यानन्दावेशं तिरोभाव्य कृपावेशं कृतवानित्यविरोधात् । 'कृपाविष्टः साधनम्, आनन्दाविष्टः फल'मिति भाष्यात् । **प्रकृते** । **अगणितेत्यादि** । अगणितानन्देनागणित आनन्दो यत्र विषयतया सोऽगणितानन्दः पूर्वोक्तरसात्मकपुरुषोत्तमभजनानन्दानुभवस्तेन रूप्यते व्यवह्रियतेऽर्थादुत्तरकाले

तत्फलस्यानिर्वाच्यता युक्तैवेति हिशब्देनाह । ज्ञानमोक्षादिना तद्भावाप्रतिबन्धश्च फलमित्यर्थः । प्रासङ्गिकमेतत्सूत्रम् ॥ ४२ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चदशं तन्निर्धारणाधिकरणम् ॥ १५ ॥

भाष्यप्रकाशः ।

बन्धाभावश्च फलमिति भक्तिविचारे मुख्यभक्तेरपि स्मृत्या प्रसङ्गत उक्तमित्यर्थः । अस्मिन् इदं केवलं सूत्रमेव, न त्वधिकरणम् । एतज्ज्ञापनायोक्तमेतत्सूत्रमिति ।

अत्रान्ये तु, 'ओमित्येतदक्षरमुद्गीथमुपासीते'त्यादीनि कर्माङ्गान्युपासनानि तत्तत्कर्मसु जुहूपर्णतादिवन्नित्यं क्रतुसम्बन्धीनि न वेति शङ्कायां न नित्यानीति सिद्धान्तयन्ति । 'अङ्गेषु यथाश्रयभाव' इत्यन्तिमाधिकरणं चैतस्यैव प्रपञ्च इत्याहुः । तत्तेनैवास्य गतार्थत्वाद्वैयर्थ्यमस्य सूत्रस्य तन्मते दुर्वारमिति ज्ञेयम् ॥ ४२ ॥ इति पञ्चदशं तन्निर्धारणाधिकरणम् ॥ १५ ॥

रश्मिः ।

ज्ञायते यदकुतोभयं तदगणितानन्दरूपं फलमित्यर्थः । भगवदुक्ताकुतोभयपदस्येत्याद्यग्रेतनसूत्रभाष्यात् । **तद्भावेति** । तद्भावे सर्वात्मभावे प्रतिबन्धो ज्ञानमोक्षादिना ज्ञानमैक्यज्ञानं मोक्षः सायुज्यं आदिना वैराग्यं पुरुषोत्तमज्ञानस्य तैरपकर्षवत्तया ज्ञानं तदभावरूपं च फलम् । **मुख्यभक्तेरिति** । मुख्यत्वं 'तस्मात्त्वमुद्धवोत्सृज्य नोदने' त्युपक्रम्य 'याहि सर्वात्मभावेने'त्युक्त्वा 'आत्मानं च स्वयं वेद तस्मादन्यवचो मृषे'ति निबन्धोक्तैकादशसर्वस्वत्वम् । **स्मृत्या** न्यूनताख्यनिग्रहस्थाननिवृत्त्यै स्मृत्या । तथाचैष सूत्रार्थः । तद्दृष्टेः पुरुषोत्तमदृष्टेः सर्वात्मभाववत इति यावत् । तन्निर्धारणानियमः सङ्गमसमयनिर्धारणानियमोऽतः पृथक्फलं अप्रतिबन्धश्च फलं हि फलस्यानिर्वाच्यता युक्तैवेति । 'उपस्थितेऽतस्तद्वचना'दिति सूत्रादत इत्यनुवर्तते । 'कामादीतरत्रे'ति सूत्राच्चकारः । ननु पुरुषोत्तमदृष्टेस्तन्निर्धारणानियमः कथं सङ्गमसमयनिर्धारो भवतीति भाष्यविरोधादिति चेत् । न । पुरुषोत्तमस्य सर्वात्मभावरूपत्वेन सर्वात्मभावे चाहङ्कारादेशस्य सत्त्वेन तद्दृष्टेरित्यत्राहङ्काररूपधर्मदृष्टेः कादाचित्क्या अपि सत्त्वेन तामादाय तन्निर्धारणाभावात्तन्निर्धारणानियमः, सार्वदिकस्तु तन्निर्धारात्तन्निर्धारणनियम इति भाष्याविरोधात् । अहङ्कारस्य दैन्यविरुद्धत्वेन दैन्यजपुरुषोत्तमात्मकसङ्गमसमयनिर्धाराविर्भावविरोधः । **एतत्सूत्रमितीति** । तेनात्र न षोडशकलाषोडशाधिकरणीप्राप्तं विशेषणमुक्तमिति भावः । नन्वत्रान्यादृतः सूत्रार्थः कुतस्त्यक्त इत्याकाङ्क्षायामाहुः **अत्रान्ये त्विति** । विषयमाहुः **ॐमित्येतदिति** । छान्दोग्येऽस्ति । विशयमाहुः **तत्तदीति** । **जुह्वित्यादि** । यथा जुह्वां पर्णता पर्णमयीता । 'यस्य पर्णमयी जुहूर्भवती'ति श्रुतेः । आदिना गोदोहनम् । 'गोदोहनेन पशुकामस्ये'ति श्रुतेः । यथा गोदोहनं तथा नवेति योजना । नित्यानि अप्रकरणपठितानामपि जुह्वादिद्वारेण क्रतुप्रवेशात्प्रकरणपठितवन्नित्यतैवमुद्गीथाद्युपासनानामिति पूर्वपक्षः । सिद्धान्तमाहुः **नेति** । **तन्निर्धारणानियमः** । उद्गीथादिकर्मगुणयाथात्म्यनिर्धारणानि रसतमप्राप्तिः समृद्धिर्मुख्यप्राण इत्येवमादीनि नैतासां नित्यवत्कर्मसु नियमः । **कुतस्तद्दृष्टेः** । तस्या नियमस्य दर्शनात् । 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदे'त्यविदुषोपि क्रियाभ्यनुज्ञानात् । अपिचैवञ्जातीयकस्य कर्मव्यपाश्रयस्य विज्ञानस्य पृथगेव कर्मणः फलमुपलभ्यते । कर्मफलसिद्ध्यप्रतिबन्धं तत्समृद्धिरतिशयविशेषः कश्चित् । 'तेनोभौ कुरुतः नाना तु विद्या चाविद्या च यदेव विद्यया करोती'ति । तत्र नाना त्विति विद्वदविद्वत्प्रयोगयोः पृथक्करणात् वीर्यवत्तरमिति च, तरप्प्रत्ययप्रयोगाद्विद्याविहीनमपि कर्म वीर्यवदिति गम्यत इत्येवं सिद्धान्तयन्तीत्यर्थः ॥ ४२ ॥ **इति पञ्चदशं तन्निर्धारणाधिकरणम् ॥ १५ ॥**

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ (३-३-१६.)

अथेदं विचार्यते। सर्वात्मभावो विहितकर्मज्ञानभक्तिसाध्यः, न वेति। तत्र पुराणे 'तस्मात् त्वमुद्धवोत्सृज्ये'त्युपक्रम्य, 'मामेकमेव शरणमात्मानं सर्वदेहिनाम्। याहि सर्वात्मभावेन यास्यसे ह्यकुतोभय'मिति वाक्ये मुक्त्यात्मकाकुतोभयसाधनरूपशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनेन स्वप्रयत्नसाध्यत्वं गम्यते। अतः साधनसाध्य इति पूर्वः पक्षः।

तत्र सिद्धान्तं वक्तुं तदुपदेशस्वरूपमाह प्रदानवदिति। यद्ययं साधनोपदेशः स्यात्, स्यात्तदा साधनत्वेन सर्वात्मभावेन शरणप्राप्तेः स्वकृतिसाध्यत्वम्, न त्वेवम्, किन्तु, तदुक्तं भगवदुक्तम्। प्रदानवत्। प्रकृष्टं दानं प्रदानं वरदानमिति यावत्, तद्वदेवेत्यर्थः। वरेण हि स्वकृत्यसाध्यमपि सिध्यतीति तथा। शत्रुसंहारभयादिनापि शरणाप्तिर्भवति, तत्र न तस्याः पुरुषार्थत्वम्, किन्तु तन्निवृत्तेरेव। प्रकृतेपि सर्वात्मभावे स्वरूपप्राप्तिविलम्बासहिष्णुत्वेनात्यार्तौ स्वरूपातिरिक्ता-

भाष्यप्रकाशः।

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ एवं राजसानां कर्मासक्तिवारणायाधिकरणद्वयं प्रणीय मुख्यभक्त्युत्कर्षज्ञापनेन तदभिलाषोपजननाय तत्कृतकर्म फलं च प्रदर्शितम्। अतः परं मुख्यभक्तिः केन भवतीत्याकाङ्क्षायामिदमधिकरणमारभत इत्याशयेनावतारयन्ति अथेत्यादि। व्याकुर्वन्ति यदीत्यादि। स्यात्तदा साधनत्वेनेत्यादि। सर्वात्मभावकरणकशरणप्राप्तिसाधनत्वेन रूपेण सर्वात्मभावस्य स्वकृतिसाध्यत्वं स्यात्। तन्निवृत्तेरिति। शत्र्वादिभयनिवृत्तेः। नन्वेतद्वाक्योक्तस्यार्थस्य कथं प्रदानतुल्यत्वमित्याकाङ्क्षायां तदुपपादयन्ति प्रकृतेपीत्यादि। एतच्चेति। एतादृशं शरणगमनम्। नन्वेवं स्वकृत्यसाध्यत्वेऽस्य भावस्य प्रदानत्वमेव सिध्यति, न तु

रश्मिः।

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ एवमिति। पूर्वोक्ताधिकरणद्वयपरामर्शेनेत्यर्थः। चात्रेति। मुख्यभक्तिफलं चकारार्थः। अत्राधिकरणद्वये। प्रवृत्त्यर्थं दर्शितम्। प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजनसम्बन्धाधिकारिणां सर्वत्र प्रदर्शनात्। भाष्ये। तत्रेति। तादृशसंशये सतीत्यर्थः। विषयवाक्यं तु 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'ति छान्दोग्यस्थम्। तेन सर्वात्मभावोक्तेः। अत्र च 'सर्वात्मभावो विहिते'त्यादिभाष्येण तत्प्रतिपादकोक्तश्रुतिस्मारणात्। पुराणस्य श्रुत्युपबृंहकत्वेन पुराणेन श्रुतिमुपबृंहयन् पूर्वपक्षमाह पुराण इत्यादि। प्रकारत्वेनेति। सर्वदेहिनामेकमात्मानं मां सर्वात्मभावेनैव शरणं याहीत्येवं विशेषणत्वेन याहीति क्रियापदे गमनानुकूलव्यापारसाध्यत्वं गम्यत इत्यर्थः। ननु गमनं शरणनिष्ठं तदनुकूलव्यापारश्चोद्धवनिष्ठ इति कथं सर्वात्मभावस्य स्वप्रयत्नसाध्यत्वमिति चेत्। न। सर्वात्मभावेन शरणनिष्ठं गमनं तदनुकूलव्यापार इत्यर्थात्। अतएव गम्यत इत्युक्तम्, नतूच्यत इति। तदुपेति। तस्य सर्वात्मभावस्य उपदेशः कथनं तस्य स्वरूपम्। (याहीति लोटाज्ञा प्रतीयते तद्विषयत्वेन शरणगमनं प्रतीयते, तत्र प्रकारत्वेन सर्वात्मभावः। स च 'मुक्तिं ददाति कर्हिचित्स्म न भक्तियोग'मिति वाक्यात्कस्मैचिदेव दानेन सिद्ध इति तस्य स्वरूपमित्यर्थः। नच कदाप्यदाप्यदानमिति वाच्यम्। सर्वात्मभाववद्भक्तानां दर्शनात्। न चेदं सर्वात्मभावाविषयमिति वाच्यम्। मर्यादाभक्तेः साधनतोपि सिद्ध्या पुष्टेरनुग्रहेणैव सिद्ध्या दानानपेक्षणादस्य वाक्यस्य निर्विषयत्वापत्तेः।) तदुक्तमिति व्याख्येयम्। भगवतैकादशसर्वस्वत्वेन रूपेणोक्तम्। निबन्धे सर्वनिर्णये स्फुटम्। प्रदानवदिति व्याकुर्वन्ति

---

१. चात्र दर्शितमिति रश्मौ पाठः।

स्फूर्त्या तद्भावस्वाभाव्येन गुणगानादिसाधनेषु कृतेष्वप्यप्राप्तौ स्वाशक्यत्वं ज्ञात्वा प्रभुमेव शरणं गच्छति, एतच्च न स्वकृतिसाध्यमिति सुष्ठूक्तं प्रदानवदिति। भक्तस्येप्सितोऽर्थो हि वरो भवति। सर्वात्मभावस्यानुभवैकवेद्यत्वेन

भाष्यप्रकाशः ।

तत्तुल्यत्वमित्याकाङ्क्षायामाहुः **भक्तस्येत्यादि** । स्पष्टम् । नन्वेवमपि शरणगतेरेव स्वकृत्यसाध्यत्वं

रश्मिः ।

स प्रकृष्टमिति । अयं न विग्रहः एकादशसर्वस्वत्वेनोक्तार्थजातस्य प्रकृष्टदानकर्मत्वेन प्रकृष्टदानतुल्यत्वाभावादत आहुः **वरेति** । वरस्य सिद्धस्य न तु साधनसाध्यस्य दानं वरदानमिति षष्ठीतत्पुरुषः । तथाच वरस्य सिद्धस्य कथनरूपदानमिव तदुक्तं भगवदुक्तं भगवत्कथनमिति यावदित्यर्थः । नच प्रकृष्टस्य दानमिति भाष्यापत्तिरिति वाच्यम् । प्रकृष्टं दानं वरस्य दानमित्यनयोः पर्यायत्वात्। **एवेति**। 'आत्मानं च स्वयं वेद तस्मादन्यवचो मृषे'ति निबन्धात्। ननु वरदानं साधनमेव तेनापि फलवता वर्त्यंत इति चेत्, तत्राहुः **वरेणेति**। स्वकृतिसाध्यसाधनत्वं साधनत्वम्। स्वकृत्यसाध्यसाधनत्वं तु न । अनुग्रहवद्वरदानस्यापि भगवद्धर्मत्वात् । सर्वात्मभावे स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पादनं दानं न यतः । **प्रकृष्टं** अभीष्टमिति यावत् । भगवतोऽभीष्टम् । 'ईप्सितत्वासम्भवेपी'ति वक्ष्यमाणभाष्यात् । **तथेति** । साधनेतरत्वप्रकारेण वरकथनरूपं दानम् । 'युक्तं भगैः स्वैरितरत्र चाध्रुवै'रिति वाक्यात् । वरदानं भगवन्निष्ठं साधनं भक्तनिष्ठमिति विभेदः । प्रायस्तत्तत्फलं प्रति तत्तन्निष्ठस्यैव साधनत्वम् । क्वचिदेव पितृनिष्ठप्रायश्चित्तेन पुत्रनिष्ठा शुद्धिः । ननु मुख्यभक्तावपि दार्ढ्यार्थं 'कामादीतरत्र'सूत्रोक्तकामादीनां तेभ्य एव मुक्तिसाधकानां का गतिरिति चेत्, तत्राहुः **शत्र्वित्यादि**। शत्रुसंहाराभ्यां भयं तदादिना, आदिना द्वेषः। **न पुरुषार्थत्वमिति** । किन्तु क्रत्वर्थत्वम्, क्रतुपौष्कल्याय विधीयते, या प्रयाजादिवत् शरणाप्तिः, सा क्रत्वर्था भगवत्सम्बन्धरूपक्रत्वर्था । मुख्यभक्तिदार्ढ्यार्थत्वेन मुख्यभक्तिरूपक्रत्वर्था वा । ननु क्रतुर्धर्मो यज्ञ इति यावत्, तत् कथं मुख्यभक्तेः क्रतुत्वमिति चेत्, न, 'अप्रतीकालम्बन'सूत्रे तत्क्रतुपदस्य 'प्राचीनभगवद्भजनलक्षणक्रतुश्च नीयत' इति भाष्यात् । नहि भयादिना शरणाप्त्या पुरुषस्य कश्चित् प्रीतिविशेष उत्पद्यते, येन पुरुषार्था भवेत् । मुख्यभक्तिलक्षणक्रतुस्तु न क्रत्वर्थः, स्वस्यैव क्रतुत्वात् । पुरुषप्रीतये विधीयमानाः पुरुषार्थाः यथा मुख्यभक्त्यादयः । **प्रकृते** । **शत्र्वादीति** । पुरुषार्थत्वमित्यन्वयः । यथा गोदोहनादेः पुरुषार्थत्वम्, न क्रत्वर्थत्वम्, चमसेनापि क्रतुपौष्कल्यसिद्धेर्गोदोहनाभावेपि । एवं शत्र्वादिभयनिवृत्त्यभावेपि तद्भयेन मुख्यभक्तिलक्षणक्रतुपौष्कल्यसिद्धेः। एतच्च पूर्वमीमांसायां चतुर्थाध्याये स्फुटम् । **अर्थस्येति** । सर्वात्मभावेन मुक्त्यात्मकाकुतोभयसाधनरूपशरणप्राप्तिकथनरूपसुप्तिङ्चयरूपवाक्यस्योक्तं कथनं स एवार्थस्तस्य । एकतिङ्वाक्यमिति पक्षे वाक्यद्वयोक्तार्थस्य । **प्रदानेति** । वरस्य यद्दानं तत्तुल्यत्वम् । यथा वरस्य सिद्धस्य दानं कथनं 'मयेमा रंस्यथ क्षपाः' इति कथनम् । तथा तादृशशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनमिति प्रदानतुल्यत्वम् । **एतादृशमिति** । 'तानि पर' इति सूत्रभाष्योक्तं भगवन्मतसिद्धं च शरणगमनं सर्वात्मभावस्य स्वकृत्यसाध्यत्वेन तत्पूर्वकरीत्या, न स्वकृतिसाध्यमित्यर्थः । **प्रदानवदित्यत्र** । डुदाञ् दाने भावे घञ् । प्रथमान्ताद्वतिः । तेन सर्वात्मभावेन मुक्त्यात्मकाकुतोभयसाधनरूपशरणप्राप्तिकथनरूपवाक्यस्योक्तं कथनम्, स एवार्थो वरदानेन 'मयेमा रंस्यथ क्षपा' इति वरस्य कथनेन तुल्यः । **अस्येति** । भावस्यास्येति योजना । भावस्य सर्वात्मभावस्य सम्बन्धिनोऽस्य प्रत्यक्षस्य कथनस्येत्यर्थः । प्रदानत्वं वरस्य दानत्वं कथनत्वरूपम् । **स्पष्टमिति** । ईप्सितत्वासम्भवे भक्तेन मह्यं सर्वात्मभावं देहीति स्वानुम-

पूर्वमज्ञानेनेप्सितत्वासम्भवेपि स्वत एव कृपया दानमिति वदित्युक्तम् । अथवा । 'सर्वात्मभावेन मां याही'ति सम्बन्धः ।

यद्वा । प्रदानवदित्यस्य पूर्ववदेव व्याकृतिः । तत्र साधनासाध्यत्वे प्रमाणमाह तदुक्तमिति । 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्य' इति श्रुत्या वरणातिरिक्तसाधनाप्राप्यत्वमुच्यत इति तत्तथैवेत्यर्थः ।

भाष्यप्रकाशः ।

सिध्यति, न तु सर्वात्मभावस्येत्यतो वाक्यस्य योजनान्तरमाहुः **अथवेत्यादि** । शरणपदं मामित्यस्य विशेषणम् । तथाच सर्वात्मभावस्यैव प्रदानतुल्यत्वं निराबाधमित्यर्थः । यद्यपि 'गतेरर्थवत्त्व'मित्यारभ्य सर्वोपि वरणश्रुतेरेव प्रपञ्चः, तथाप्यत्र पुराणवाक्यमात्रस्य विषयत्वेनोपन्यासेनापाततः पौराणत्वशङ्का अस्य विचारस्य स्यादिति तन्निरासाय सूत्रांशं प्रकारान्तरेण व्याकुर्वन्ति **यद्वेत्यादि** । **तत्तथैवेत्यर्थ इति** । परमात्मनो लभ्यत्वं वरणजन्यसर्वात्मभावसाध्यमेवेति सर्वात्मभावो वरणैकलभ्यः, न त्वितरसाधनसाध्य इत्यर्थः । तथाच सर्वात्मभाव-

रश्मिः ।

त्वप्रकाशनात्तस्मै न दद्यादित्यदानम्, तथापि स्वानुमत्यप्रकाशनेऽपि कृपया दानं दानवद्भवत्येव । न च भाष्ये स्वानुमतिप्रकाशनं कुतो नोक्तमिति चेत्, न । भगवतो भक्तमनोरथपूरकत्वात्, भक्तस्य चेप्सीतत्वाभावात् । ईश्वरस्य नियमो नास्ति यद्भक्तेष्टव्यतिरिक्तं न देयमेवेति । एवं स्पष्टमित्यर्थः ।

एवमपीति । एवमिति तृतीयान्तम् । पूर्वोक्तविमर्शे एतच्चेत्यस्य शरणगमनमिति विमर्शेनेत्यर्थः । नन्वेतादृशमिति शरणगमनविशेषणम्, तत्र सर्वात्मभावस्यापि सर्वात्मभाव इत्यादिना सत्त्वेन कथं शरणागतेरेव स्वकृत्यसाध्यत्वमिति चेत्, न । सर्वात्मभावे सतीत्यर्थे सति सप्तम्या सामानाधिकरण्यबोधनात् तत्समानाधिकरणकान्यत्यार्तिस्वरूपातिरिक्तस्फूर्ति–गुणगानादिसाधनकरण–प्रभ्वप्राप्ति–स्वाशक्यत्वज्ञान–प्रभुशरणगमनानि, न तु सर्वात्मभावादिर्विशेष्यं शरणगमनमिति शरणागतेरेव स्वकृत्यसाध्यत्वात् । **शरणपदमित्यादि** । 'मुमुक्षुर्वै शरणमनुव्रजे'दिति श्रुतेर्वक्ष्यमाणरीत्याप्युपपत्तेरस्मत्पदार्थस्य विशेष्यत्वोपपत्तेश्च शरणपदं मामित्यस्य विशेषणमित्यर्थः । सर्वात्मभावदानं प्रकृष्टदानं न स्वानुमतिप्रकाशनाभावात्, किन्तु एकदेशविकृतत्वात् प्रदानतुल्यत्वं निराबाधमित्यर्थः । **आपातत इति** । शाबरभाष्याद्यनवलोकनकालत्वमासाद्य स्यादित्यर्थः । 'आपातस्तदात्व' इति विश्वात् । ल्यब्लोपे पञ्चमी । शाबरभाष्ये षष्ठाध्याये द्वितीयपादे 'तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन्' इत्यधिकरणे प्राङ्मुखो भुञ्जीत, उदङ्मुखो मूत्रं कुर्यात्' इत्येवमादयः । तत् प्रभुरूपसर्वात्मभावः । **तथैव वरणलभ्यत्वप्रकारेणैवेत्यर्थमाहुः परमात्मन[1] इति** । परमात्मनः लभ्यत्वमितिप्रयोगोऽवैदिकः । दृशि चेत्यस्याप्राप्तिः । आहुण इत्यस्य च वाक्यत्वेन संविधाया विवक्षाभावात् । श्रुतौ सर्वात्मभावनिवेशो वाराहे भक्तिनिवेशस्य 'आत्मा वा अर' इति श्रुतौ कृतत्वात् क्रियते स्म **वरणजन्यसर्वात्मभावेति** । तथा च वाराहीयचातुर्मास्यमाहात्म्ये सप्तविंशाध्याये 'श्रवणानन्तरं कार्यं मननं भक्तिपूर्वकम्' इति । वरणं स्वीयत्वेन स्वीकारः । तस्याधिकारः स दानपात्रं तस्मै सर्वात्मभावादिकथनम्, प्रदानवत् वरस्य दानवत् । ननु वरकथनवदित्यनुक्त्वा यत् प्रदानवदित्युक्तम्, तेन दानस्य स्वस्वत्वेत्यादिपूर्वोक्तलक्षणमपि कचिदभिप्रेतमिति चेत् । न । यत्र महावाक्योपदेशादौ स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पादनमनुभूयते, तादृशवरदा-

---

[1] परदानादौ ।

भाष्यप्रकाशः ।

साधनकस्वप्राप्तिबोधकमेकादशस्कन्धीयं भगवद्वाक्यं वरणलभ्यत्वबोधकश्रुत्यर्थनिर्णायकत्वादुपन्यस्तम्, अतो न विचारस्याश्रौतत्वमित्यर्थः । एवं चात्र सर्वात्मभावोक्तिसन्दर्भे 'रामेण सार्ध'मित्यत्र 'मय्यनुरक्तचित्ता' इति भक्तविशेषणादिभ्योऽनुरागात्मा भगवददर्शने तीव्रवियोगाधिप्रभृतिजनको विगाढभावः परमासक्तिरूपो य उक्तः, स सर्वात्मभावः शरणागतिकारणत्वे-

रश्मिः ।

नाभिप्रायकत्वात् । **वरणेत्यादि** । वरण(लभ्य)लभ्यत्वं मध्यमपदलोपी समासः । उक्तवाराहवाक्यात् । तद्बोधकश्रुत्यर्थनिर्णायकत्वादित्यर्थः । ननु 'याहि सर्वात्मभावेने'ति वाक्ये सर्वात्मभावपदेनैकादशसर्वस्वकथनान्तर्गतेनैकेन कथं श्रुतीनां बह्वीनां सर्वात्मभावपरत्वम्, सर्वात्मभावपदस्य समासान्तरैरन्यविधसर्वात्मभावपरत्वे प्रकृतसर्वात्मभावानुपोद्बलकत्वादित्याशङ्कायामेकादशद्वादशाध्यायसन्दर्भमाहुः **एवं चेत्यादि** । तथा च सर्वात्मभावोक्तिसन्दर्भो वर्तत इत्यदोषः । उपपादयांबभूवुः **रामेणेति** । अत्र समासनिश्चयोपि भविष्यति। **परमासक्तिरूप** इति । 'आसक्तिः प्रेम्णो भावकन्दलरूपादुत्तरं तादृशे प्रेम्णि तत्करणेन तदुत्कर्षावस्था रागादिरूपे'ति भक्तिवर्धिनीविवृतौ श्रीपुरुषोत्तमकृतायाम् । 'स्वविषये विविधमनोरथजनको भाव आसक्ति'रिति श्रीकल्याणरायाः । बद्धधीर्वा अत्र सन्दर्भ इति पदद्वये द्वादशाध्यायोक्तेः । अत्रातिव्याप्तिवारणाय **परमेति** । परमत्वं परज्ञानकरणत्वं अनुषङ्गत्वं वा 'अनुषङ्गबद्धधिय' इति द्वादशाध्यायवाक्यात् । एवमपि परज्ञानकरणाक्षरज्ञानासक्तावतिव्याप्तिः । द्वितीयपक्षे अतिव्याप्तिः स्फुटा । 'क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसा'मिति गीतायाः अक्षरासक्तिरस्ति । तद्वारणायानुरागात्मेति 'मय्यनुरक्तचित्ता' इति वाक्यविशेषणोक्तः । 'सा परानुरक्तिरीश्वर' इति शाण्डिल्यसूत्रात् । परेति न लक्षणघटकमिति श्रीगोकुलनाथजिट्टीकायां भक्तिवर्धिन्या एव । एवमपि संयोगभक्तावतिव्याप्तिस्तन्निराकरणाय **भगवदित्यादि** । अदर्शने तीव्रवियोगाधयो मनःपीडा विप्रयोगे । वैकुण्ठस्थाक्षरब्रह्मादर्शनेपि पूर्वोक्तं भवतीति । **भगवददर्शन** इति । विप्रयोग उक्तः । मे तीव्रवियोगाधय इति विशेषणात् । विप्रयोगेतिव्याप्तिस्तद्वारणाय **विगाढभाव** इति । विशेषेण गाढो दृढः कामादिभिः भावः प्रेमा । विगाढभावेनेत्युक्तेः । पुष्टिमार्ग उक्तः । भाष्यमत्र 'कामादी'ति सूत्रस्य 'माहात्म्यज्ञानपूर्वकस्नेहे सत्येव भर्तृत्वेन ज्ञाने कामोपि सम्भवतीति ज्ञापनाय चकार' इति । एवं पुष्टिमार्गस्य दृढविप्रयोगेऽतिव्याप्तिः। तद्वारणायार्तिं प्रापयेत् । अतिविगाढभाव इत्यर्थः। 'अतिविगाढभाव' इति लिङ्गभूयस्त्वसूत्रभाष्यात् । 'धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चने'ति भ्रमरगीतवाक्यात् । भ्रमरगीतेपि सर्वात्मभावोक्तेः सत्त्वात् । एवं चातिविगाढभाववत्यः अतिकृच्छ्रवतीत्वादित्यनुमेयमिति । एवमप्यतिव्याप्तिस्तदवस्थैवेति विशेष्यमाहुः **स** इति । 'न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाये'ति वाक्येऽन्यविषयकदर्शननिषेधेन 'स यत्र नान्यत्पश्यती'ति श्रुतिप्रसिद्धः स सर्वात्मभाव इत्यर्थः । अत्रातिविगाढभावज्ञाप्यत्वेन सर्वस्मिन्नात्मभाव आत्मत्वमात्मस्फूर्तिरिति यावत् । अस्य समासस्य विरोधं स्वयं परिहरिष्यन्ति **तेनेत्याद्यग्रिमग्रन्थेन** । श्रीधरोक्तसमासस्तु क्रियाकलापविशेषणत्वे । सर्व आत्मा सर्वात्मा तस्य भावस्त्वतल्वाच्यः । प्रकृतिजन्यबोधे प्रकारात्मा स सर्वात्मभावः प्रेमकारणमेकादशैकोनविंशे 'सर्वभूतेषु मन्मति'रित्युक्त्वा, 'एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम्, मयि सञ्जायते भक्ति'रिति वाक्यात् न प्रदानसाध्यः कारणात्मा, अयं तु फलकारणाभ्यां व्यतिरिक्तः । सर्वेषामात्मभाव इत्यस्य पूर्वोक्तसमासार्थाभेदेन पूर्वसमासपर्यायत्वात् । सर्व आत्मनां भाव इत्यपि वक्ष्यमाणसमासप्रायः । सर्वश्चात्मा च सर्वात्मानौ जडजीवौ तयोर्भाव आत्मरूप इति द्वन्द्वगर्भितषष्ठीतत्पुरुषे 'अभ्यर्हितं पूर्वम्'

भाष्यप्रकाशः।

नोपदिष्ट इति सिध्यति। तत्र परमासक्तिश्चानन्दजन्यैव। लोके आनन्दजनक एवासक्तिदर्शनात्। एवं च यत् यज्जनकम्, तत्तद्गुणकं तत्तदात्मकं चेति व्याप्तेः पूर्वं सिद्धत्वात्। 'सर्वोपि आत्मनो भाव' इति सुबोधिन्यां व्याख्यानात्। श्रुतौ निरवध्यानन्दरूपत्वेन रसरूपत्वेन पुत्रादिभ्योपि प्रेयस्त्वेन च सिद्धस्यात्मनो यो भावो धर्मः प्रियत्वाख्य आनन्दात्मा, यन्मात्रां सर्वं उपजीवन्ति, स सर्वस्तदंशिभूतो भगवद्धर्म ऐश्वर्यादिवदतिरिक्त एव ज्ञेयः। तस्य दानं चानुभावनम्। युक्तं चैतत्। अन्यथा सर्वेषामेव तथा स्फुरेदिति। अतो विगाढभावेन

रश्मिः।

इति सूत्रेण आत्मसर्वभाव इत्यापत्तिः। सर्वं च आत्मा च भावश्चेत्येतेषां समाहार इति समाहारद्वन्द्वोपि न। नपुंसकत्वापत्तेः। अव्ययीभावोपि न। अव्ययीभावश्चेत्यव्ययप्रसङ्गात्। द्विगुरपि न। सङ्ख्यापूर्वत्वाभावात्। **शरणेति**। पूर्वोक्तशरणेत्यर्थः। अधिभौतिकं नवमस्कन्धोक्तं भाष्ये वक्ष्यमाणं च सुबोधिन्युक्तं च सर्वात्मभावं प्रपञ्चयन्ति स्म तत्रेत्यादिना। दानलक्षणं सङ्घटयितुं स्वस्वत्वं ध्वंसप्रतियोगि व्युत्पादयाम्बभूवुः **परमेति**। अनुषङ्गबद्धधीरूपा परमासक्तिः। चकारात् श्रुतिप्रसिद्धो निरोधलक्षणोक्तः। उभयोपादानम्। निरोधस्कन्धे स श्रुतिप्रसिद्धः 'मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रयाः' इति श्रीनन्दवाक्ये प्रसिद्धः प्रपञ्चविस्मृतिपूर्वकभगवदासक्तित्वेन रूप्यते व्यवह्रियते इति परमासक्तिरूप उपात्तः। श्रुतिप्रसिद्धश्च अपरिहेय इत्युभयमुपात्तम्। आनन्दजनके पुंसः स्त्रियां स्त्रियाः पुंसि। सर्वात्मभावान्तर्गतसर्वपदार्थानाहुः एवं चेत्यादि। यत्स्त्र्यादिकं यस्य सुखादेर्जनकं तत्स्त्र्यादिकं तत्सुखादयो गुणा यस्य तत्तत्तद्गुणकं च पुनस्तदात्मकं तत्सुखादिकमात्मा स्वरूपं यस्य तादृशम्। पूर्वमिति। समन्वयाधिकरणे। सुबोधिन्यां 'सर्वात्मभावोधिकृतो भवतीनामधोक्षज' इत्यस्य भ्रमरगीते। श्रुताविति। जात्यभिप्रायेणैकवचनम्। 'यतो वाच' इत्यस्यां 'रसो वै स'इत्यस्यां रसरूपत्वेन मैत्रेयीब्राह्मणे पुत्रादिभ्योपि प्रेयस्त्वेन धर्मस्तद्वृत्तिः। **आनन्देति**। आनन्दधर्मत्वादिति भावः। 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति व्याससूत्रात्। **तदंशीति**। मात्रारूपांशांशिभूतो भगवद्धर्म इत्यनेन शुद्धस्नेहस्तत्र स्वस्य भगवतः सत्त्वमिति दानलक्षणघटकं ध्वंसप्रतियोगि व्युत्पादितम्। **अतिरिक्त इति**। न च गौरवं शङ्क्यम्। 'परास्य शक्तिर्विविधैव श्रूयत' इति श्रुतौ धर्मासङ्कोचात्। सर्वपदार्थश्चोक्तः। व्युत्पादितस्य स्वस्वत्वस्य ध्वंसपूर्वकपरस्वत्वोत्पादनं संघटयितुमाहुः **तस्येति**। सर्वात्मभावस्यानुभावने स्फूर्त्याख्यानुभवस्य प्रेरणे हि स भक्तनिष्ठ इति स्वस्वत्वध्वंसपूर्वकपरस्य भक्तस्य स्वत्वोत्पादनाद्दानत्वमित्यर्थः। भक्तनिष्ठत्वे सर्वस्मिन् आत्मभावः सर्वात्मभाव इति प्रियत्वाख्यसर्वात्मभावस्य स्फूर्तौ समासः। वरकथनवत्सर्वात्मभावकथनरूपं दानं तु स्फूर्तिरहितस्य सर्वात्मभावस्य। युक्तिमाहु युक्तमिति। **एतत्**। स्फूर्तिमादाय दानसमर्थनम्। युक्तिमाहुरन्यथा ज्ञानरूपां **अन्येति**। अन्यथा अनुभावनस्य दानत्वाभावे प्रकारे सति। स्फुरेदिति। यतो न स्फुरति, अतोऽनुभावने दानत्वं प्रकार इत्यर्थः। एवं सर्वात्मभावपदस्य द्वेधा व्युत्पन्नस्य प्रथमव्युत्पन्नो भक्तनिष्ठो दानेन यदा भवति, तदा विगाढभावसंज्ञो भवति, तदाहुः **अत** इत्यादि। लिङ्गभूयस्त्वाधिकरणभाष्याद्भगवन्निरोधात्मकसर्वात्मभावविरहेतिविगाढभावेन तत्स्फूर्तेर्निरोधादुत्तरकालिकत्वेन साधनमुख्यत्वात् प्रदर्शितात्। तादृशस्तत्सदृशोऽनुभवभिन्नत्वे सत्यनुभवगतभूयोधर्मवान्। प्रियत्वं भगवद्धर्मस्तदाविर्भावितविगाढभावाविर्भावितोऽनुभवः प्रियत्वानुभवः मध्यमपदलोपी समासः। तेन भग-

भगवदुक्ताकुतोभयपदस्य न मुक्तिरर्थः, किन्तु 'यतो वाच' इत्यादिनानन्दस्य स्वरूपमुक्त्वा 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने'ति श्रुत्युक्तं यत्पूर्वोक्तं रसात्मकपुरुषोत्तमभजनानन्दानुभवोत्तरकालीनमकुतोभयं तदर्थः ॥ ४३ ॥

इति तृतीयध्याये तृतीयपादे षोडशं प्रदानवदित्यधिकरणम् ॥ १६ ॥

भाष्यप्रकाशः।

सर्वत्र तथानुभवरूपं यत्कार्यं तादृशः प्रियत्वानुभवः सर्वात्मभाव इति फलति । तेन भगवद्धर्मविगाढभावतथास्फूर्तिषु सर्वात्मभावप्रयोग आधिदैविकादिभावो ज्ञेयः । ननु पूर्वोक्तवाक्ये अकुतोभयसाधनत्वेन शरणागतेर्वा सर्वात्मभावपूर्वकस्वप्राप्तेर्वोपदेशः । अकुतोभयं चाक्षरप्राप्तिरूपा मुक्तिरेव । 'अभयं वै जनक प्राप्तोऽसी'त्यादिश्रुत्या निश्चीयते । एवं सति सर्वात्मभावस्यापि मुक्तिसाधनत्वमेव पर्यवस्यति, वामदेवादिसार्वात्म्ये तथा दर्शनात्, पुरुषोत्तमप्राप्तेरपि साधनकोटिनिवेशेन तदपेक्षया मुक्तेरेवोत्कर्षश्च सिध्यतीति पूर्वोक्तं सर्वं द्रविडमण्डकन्यायमनुसरतीत्याशङ्कायामकुतोभयपदार्थमाहुः भगवदुक्तेत्यादि । तथाचास्याः श्रुतेरानन्दमीमांसायां ब्रह्मानन्दस्य गणितानन्दत्वकथनोत्तरमानन्दमयश्लोकेषूक्तत्वादानन्दमीमांसातः पूर्वानुवाके परस्य

रश्मिः।

वद्धर्मविगाढभावानुभवेषु सर्वात्मभावपदमिति फलितम् । तदेवाहुः तेनेत्यादि । तेन भगवद्धर्मविगाढभावयोः सुबोधिन्युक्ता व्युत्पत्तिः, तथा भगवत्त्वेन स्फूर्तौ तु सर्वस्मिन्नात्मभावः सर्वात्मभाव इति । ननु विग्रहे भावपदं भक्तिवाचकं 'भक्तिः प्रवर्तिते'ति वाक्यात्, अत्र त्वनुभवपदमिति वैरूप्यमिति शङ्क्यम् । भावादीनां सर्वात्मभावे सत्यनुभूतानां भक्तिहंसोक्तदिशा भावत्वात् । ननु विरहे मुख्यलक्षणे तु भावपदं तदनुरोधेन तस्मिन्सति भक्तिहंसदिगवकाशोऽन्यत्र लक्षणगतभावपदाननुगमेऽसम्भव इति चेन्न । भक्तिमार्तण्डे विस्तरात्सर्वात्मभावनिरूपणे । परन्तु विगाढभावरूपसर्वात्मभावो विजातीययोगादिसंवलितो ज्ञेयो भक्तनिष्ठ एव । मार्गत्वात् । 'याहि सर्वात्मभावेने'ति वाक्यात् । एकादशस्कन्धसुबोधिन्यां शुद्धस्य भगवद्धर्मत्वं न मार्गत्वमित्युक्तेः । आधीति । स्तोश्नुनाश्नुरित्यस्याप्राप्तिः । स्मृतिष्वेतादृशप्रयोगबाहुल्यात् । तदनुकरणेन । एवं सुबोधिनीसमासो विगाढभावस्फूर्तौ व्याकृतो भ्रमरगीते विरहनिरूपणात् । यत्त्वग्रे भाष्ये तत्प्रकाशे च सर्वात्मभावस्य कार्यस्वरूपलक्षणे तत्रापीदं सुबोधिनीव्याख्यानं प्रकारान्तरेण योज्यम् । आत्मन इति श्लिष्टप्रयोगात् । 'स्वर्गकामो यजेते'त्यत्र स्वर्ग इति श्लिष्टप्रयोगवत् । यथा तत्र स्वर्गात्मसुखरूपमर्थद्वयमेवमत्रापि विगाढभावस्फूर्तिलिङ्गभूयस्त्वसूत्रोक्तयद्दर्शनादिकयदन्यादर्शनादिकरूपमर्थद्वयम् । तद्भक्तिमार्तण्डे स्फुटम् । अग्रे भाष्यप्रकाशे च स्फुटम् । सुबोधिनीस्थात्मन इत्यस्य मनस इत्यर्थात् । संयोगे । संयोगविप्रयोगभेदेन सुबोधिन्या द्वेधा व्याख्यानम् । नन्वनुभवो ज्ञानमिति सर्वात्मभावो ज्ञानं किं तस्मादिति चेन्न । भक्त्यन्तःपातित्वात् । यथापेक्षितसमर्पणं दर्शनं दास्यम् । एतच्च भक्तिहंसे स्फुटम् । विहितकर्मज्ञानभक्त्यसाध्योपि सर्वात्मभावो भक्तिरेव । भक्तिमुपक्रम्य भ्रमरगीते 'सर्वात्मभावोऽधिकृत' इति वाक्यात् । 'सर्वात्मभावरूपाया मुख्यभक्ते'रिति भाष्यप्रकाशाच्च । अन्यत् भक्तिमार्तण्डे स्पष्टम् । वामदेवेति । पुरुषविधब्राह्मणेऽस्ति । सर्वात्मभावनिरूपणे ज्ञानप्रकारविशेषनिरूपणाशङ्कायाः पूर्वविकल्पसूत्रे भाष्ये वक्ष्यमाणत्वा'दहं ब्रह्मास्मी'ति प्रकारस्य वामदेवसार्वात्म्ये दर्शनात्तद्वदत्रापि ज्ञानप्रकारविशेषनिरूपणे भवतु हीत्यर्थः । द्रविडेति । व्यर्थक्रमबोधकन्यायमित्यर्थः । द्रविडदेशे गोधूमाभावान्मण्डका न भवन्ति इति तद्देशीयास्तं भोक्तुं कर्तुं च न विदन्ति । मध्यदेशादावागतो द्रविडः कथं मण्डका भोज्या इति पृष्टे केनचिदुपहसितः पदयोर्मध्यात्पृष्ठाच्च हस्तपरिवर्तनं कृत्वा पश्चादूर्ध्वं मुखं विधाय भोज्या इति । तृतीयसुबोधिन्यां षष्ठाध्यायेऽस्ति

भाष्यप्रकाशः ।

रसरूपतायाः प्रतिपादितत्वादस्याः श्रुतेरुक्तविध एवार्थ इति निश्चीयते । ततश्च तत्र योऽर्थो 'न बिभेति कुतश्चने'ति वाक्येनोक्तः, सोऽत्राकुतोभयपदेनोच्यत इति नात्र त्वदुक्तमुक्तिगन्धोपि । किञ्च । भगवद्वाक्येपि 'अथैतत्परमं गुह्यं शृण्वतो यदुनन्दन । सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत् सखे'ति तादृशेऽधिकारिणि परमगोप्यकथनं स्वत एव प्रतिज्ञाय, 'केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे'ति श्लोके भावेन बहूनां स्वप्राप्तिमुक्त्वा, ततः को भाव इत्याकाङ्क्षायाम्, 'रामेण सार्धं मथुरां प्रणीत' इत्यादिश्लोकचतुष्टयेन भावस्य भक्तिरूपं स्वरूपं ज्ञापयितुं विगाढभावात्मिकां तत्काष्ठाम्, तया काष्ठया परब्रह्मरूपस्वप्राप्तिं स्वरूपज्ञानाद्यभाववतां बहूनामुक्त्वा, तदनन्तरं 'तस्मा'दित्यादिवाक्यद्वयेन स्वप्राप्त्यकुतोभयाप्ती अवदत् । तेनोक्तश्रुत्युक्तरसात्मकब्रह्मानुभवोत्तरकालीनतैवाकुतोभयस्य स्फुटतीति न पूर्वोक्तार्थे द्रविडमण्डकमित्यर्थः । अत्र सर्वात्मभावस्य वरणातिरिक्तसाधनासाध्यत्वनिरूपणेन इतरत्र वैराग्यबोधकस्य त्यक्तपिप्पलमित्यस्य विशेषणस्यार्थो बोधितो ज्ञेयः ।

अन्ये तु । वाजसनेयकादौ व्रतमीमांसादावध्यात्माधिदैवतयोः श्राविती प्राणवायू पृथगुपगन्तव्यावपृथग्वेति सन्देहे, तत्त्वाभेदादपृथगिति प्राप्तौ, आध्यानार्थादुपदेशभेदात् पृथगिति सिद्धान्तयन्ति । स च निरूपणप्रकारभेदेन 'नानाशब्दा'दिति सूत्रेण च सिध्यतीति नेदं सूत्रमाकाङ्क्षतीति दिक् ॥ ४३ ॥ **इति षोडशं प्रदानवदित्यधिकरणम् ॥ १६ ॥**

रश्मिः ।

तल्लेखे विवृतोऽयं न्यायः । रसरूपताया इति । 'रसो वै स' इति श्रुत्येत्यर्थः । 'रस आस्वादने' इत्यस्य रूपम् । व्याख्यानान्न तु 'रस शब्द' इत्यस्य । अस्तु । ईश्वरत्वात् । तादृशे भृत्यादिसदृशे । स्वत एवेति । उद्धवप्रश्नं विना प्रतिज्ञा कृपालुत्वं द्योतयति । तत्काष्ठामिति । भावप्रकर्षम् । 'काष्ठा दारुहरिद्रायां कालमानप्रकर्षयो'रिति विश्वात् । परब्रह्मेति । 'मत्स्वरूपाविदोबलाः । ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रश' इति वाक्याद्बहूनां शतसहस्राणामित्यर्थः । नेति । मुक्तिस्कन्धसर्वस्वत्वाच्च । वरणेत्यादि । वरणजसर्वात्मभावातिरिक्तानि साधनानि तैरसाध्यत्वनिरूपणेनेत्यर्थः । मध्यमपदलोपी समासः । इतरत्रेति । साधनेषु षोडशाधिकरण्या विशेषणमाहुः त्यक्तेति । त्यक्तं पिप्पलं कर्मफलं येन वैराग्यमेतत् । कर्मफलत्वं पिप्पलस्य सुबोधिन्यामुक्तम् । अन्ये त्विति । शङ्कराचार्यादयः । तत्त्वेति । 'यः प्राणः स वायु'रितिश्रुतेः । आध्यानेति । आध्यानार्थोऽयमाध्यात्मिकाधिदैवविभागोपदेश इति शङ्करभाष्यात् । ननु निरूपणं प्रकारभेदेपि 'यः प्राण' इत्युक्तश्रुतेः प्राणवाय्वोर्निरूपणप्रकाराभेदान्न सिध्यतीति पाक्षिकदोषशङ्कायामाहुः नानेति । इदं सूत्रं वक्ष्यमाणम् । न च नानाशब्दादिभेदादिति सूत्रे यः प्राणः स वायुरितिवदुपास्यभेदो नास्तीति शङ्क्यम् । तत्रोपास्याभेदेपीति भाष्यात् । सूत्रार्थस्तु प्राणवायू आध्यानार्थं पृथगुपगन्तव्यौ एकादशकपालप्रदानवत् । यथा 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञ' इत्यत्र पुरोडाशिन्यामिष्टौ राजादिगुणभेदात् यथान्यासमेव देवतापृथक्त्वात् प्रदानपृथक्त्वं भवति । एवं तत्त्वाभेदेपि आध्येयांशपृथक्त्वात् आध्यानपृथक्त्वम् । तदुक्तं संकर्षे 'नाना वा देवता पृथग्ज्ञाना'दिति । संकर्षो देवताकाण्डं तत्रेत्यर्थः । वाकारोऽवधारणे ॥ ४३ ॥ **इति षोडशं प्रदानवदित्यधिकरणम् ॥ १६ ॥**

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥ (३-३-१७.)

ननु प्रतिबन्धककालादृष्टादिसद्भावेपि वरणकार्यं स्यात्, उत तन्निवृत्ताविति संशये, प्रतिबन्धकाभावस्य सर्वत्र हेतुत्वात् तन्निवृत्तावेव तथेति पूर्वपक्षे, सिद्धान्तमाह लिङ्गेत्यादिना ।

सामोपनिषत्सु नवमे प्रपाठके सनत्कुमारनारदसंवादे प्रथमत एव मुख्या ब्रह्म-

---

भाष्यप्रकाशः ।

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥ पूर्वाधिकरणे सर्वात्मभावरूपाया मुख्यभक्तेर्वरणैकलभ्यत्वं स्थापितम्, वरणश्रुतौ तु परमात्मनो वरणैकलभ्यत्वमुच्यते, न तु सर्वात्मभावस्येति कथमस्य तत्प्रपञ्चत्वमिति शङ्कायां तस्य वरणैकलभ्यत्वं पुनर्दृढीकर्तुं तत्स्वरूपं च श्रुत्या विवेक्तुमधिकरणान्तरं प्रणयतीत्याशयेन तदवतारयन्ति नन्वित्यादि । प्रतिबन्धका ये कालादृष्टस्वभावाः तेषां विद्यमानत्वे वरणकार्यभूतः सर्वात्मभावो जीवस्य भवेत्, नवेति संशये, वरदानस्यापि तपआदिभिः साधनैस्तोषे सत्येव प्रसिद्धेः पूर्वाधिकरणोक्तरीत्या सर्वात्मभावस्य भगवता वरवद्दानेपि तत्कारणस्यावश्यवक्तव्यतया प्रतिबन्धकाभावस्य सर्वत्र कारणत्वदर्शनात् प्रतिबन्धकसत्तायां च कार्यादर्शनात्तन्निवृत्तिरवश्यं मृग्येति प्रतिबन्धकानां निवृत्तावेव वरणात् सर्वात्मभावो भवतीति तस्य वरणैकलभ्यत्वं न साधीय इति पूर्वपक्षे, सिद्धान्तमाहेत्यर्थः । सूत्रं व्याकर्तुं लिङ्गभूयस्त्वबोधिकां श्रुतिं प्रदर्शयन्तस्तदर्थं प्रकटयन्ति सामोपनिषत्स्वित्यादि । प्रसिद्धस्थलनिर्देशो विप्रतिपत्तिनिरासाय । स च संवादो 'अधीहि भगव इति होपससाद सनत्कुमारं नारद' इत्यारभ्यान्तं ज्ञेयः । तत्र 'अधीही'त्यन्तर्भावितण्यर्थः । अध्यापय । 'बुधयुधनशजनेङ्प्रुद्रुस्तुभ्यो णे'रिति ण्यन्तादिङः परस्मैपदम् । णिजर्थेऽप्यत्र पदव्यत्ययः । अत्र सर्वात्मभावस्य वरणैकलभ्यत्वमुपपादयन्तः 'तं होवाचे'ति सनत्कुमारवाक्यस्य तात्पर्यमाहुः प्रथमत इत्यादि ।

रश्मिः ।

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥ कारणत्वेन कारणानां सर्वात्मभावे त्वथार्थासिद्धत्वमुक्त्वा प्रतिबन्धकाभावत्वेन कारणानामन्यथासिद्धत्वमाहुः तथापि कारणत्वात् पूर्वाधिकरणेनैव प्रतिबन्धकाभावस्यापि विचारितप्रायत्वात् सर्वात्मभावस्वरूपं संयोगसामयिकमाहुः पूर्वेति । **अस्येति** । सर्वात्मभावप्रतिपादकस्यास्य लिङ्गभूयस्त्वाधिकरणस्य तस्या वरणश्रुतेः सर्वात्मभावाप्रतिपादिकायाः प्रपञ्चत्वं कथमिति प्रश्नः । **तस्य** सर्वात्मभावस्य । **प्रसिद्धेरिति** । कठवल्ल्यां 'तिस्रो रात्रीर्यदवात्सीत् गृहे मे अनश्नन् ब्रह्मन्नतिथिर्नमस्य' इति अनशनरूपतपसा तुष्टाग्नि वरप्रसिद्धेः । वृकासुरप्रसङ्गे श्रीभागवते ब्रह्माण्डपुराणे उत्तरस्थाने खिले च स्तुतितुष्टं भगवन्तं प्रति । 'यदि देयो वरो हि न' इति वाक्यात् । आदिपदेन तपआदिभिरित्यत्र होमस्तुत्योर्ग्रहणात् । **प्रसिद्धेति** । प्रथमतृतीयपादस्थभूमाधिकरणप्रसिद्धस्थलनिर्देशो विप्रतिपत्तिः । **प्रतिपत्तिः** प्रबोधो भूमत्वेन सर्वात्मभावप्रबोधः तस्य विरुद्धोऽभावस्तन्निरासाय । अस्य विस्पष्टस्य प्रपाठकस्य उपनिबन्धो 'न सामान्यादप्युपलब्धेर्मृत्युवत् नहि लोकापत्ते'रिति वक्ष्यमाणसूत्रे अस्य प्रपाठकस्य लोकमृत्युवददर्शनात् । भगवद्रूपत्वात् सर्वात्मभावस्येति वक्ष्यमाणभाष्यात् । **आन्तमिति** । अन्तं चरमवर्णध्वंसं आ मर्यादीकृत्य आन्तम् । **णिजर्थ इति** । **इङ्** अध्ययने अदादिरात्मनेपदी अनिट् । उक्तसूत्रात् आत्मनेपदव्यत्ययः परस्मै-

विद्योपदेशार्हो न भवतीति ज्ञात्वा, सनत्कुमारो नारदाधिकारं च ज्ञातुं 'यद्वेत्थ तेन मोपसीदे'त्युक्तो नारदः स्वयं विदितमृग्वेदादिसर्पदेवजनविद्यान्तमुक्त्वा, 'सोऽहं भगवो मन्त्रविदेवास्मी'ति स्वाधिकारमुक्त्वा, आह 'नात्मविच्छ्रुतꣳ ह्येवमेव भगवद्दृशेभ्यस्तरति शोकमात्मविदिति, सोऽहं भगवः शोचामि तं

भाष्यप्रकाशः

'उपसीदे'ति श्रौतस्य पदस्य 'तं होवाचे'ति श्रौतेनैव पदेनान्वयः। 'यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति होवाच।' यत्त्वं जानासि तत्कथनेन मदुपसन्नो भव, स्वाधीतं वद, ततोऽतिरिक्तं तुभ्यं कथयिष्यामीत्युक्तवान्। तदा इत्युक्तः सनत्कुमारेण नारदः स्वविदितं ऋग्वेदादिसर्पदेवजनविद्यान्तं आह। अत्र ऋग्वेदादिपुराणान्तं प्रसिद्धम्, अग्रे तु वेदानां वेदो व्याकरणम्, पित्र्यं श्राद्धकल्पः, राशिर्गणितम्, दैवं उत्पातज्ञानम्, निधिर्महाकालादिनिधिशास्त्रम्, वाकोवाक्यं तर्कशास्त्रम्, एकायनं नीतिशास्त्रम्, देवविद्या निरुक्तम्, ब्रह्मविद्या शिक्षाकल्पछन्दश्चितयः, भूतविद्या भूततन्त्रम्, क्षत्रविद्या धनुर्वेदः, नक्षत्रविद्या ज्योतिषम्, सर्पविद्या गारुडम्, देवजनविद्या गन्धर्वोक्तयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि ज्ञातव्यानि। 'एतद्भगवोऽध्येमि'। एतत्पूर्वोक्तं हे भगवन् अध्येमि, स्मरामीत्युक्त्वा, 'सोऽहं भगवो मन्त्रविदेवास्मि', शब्दार्थमात्रवित्त्वादापाततः परोक्षज्ञानवानेवास्मीति स्वाधिकारमुक्त्वा, 'अनात्मवि'दित्यादि 'तारयत्वि'त्यन्तमाह, तथाचाप्तवाक्यप्रामाण्याच्छोकेन लिङ्गेन स्वस्यानात्मवित्त्वमनुमायात्मज्ञापनेन शोकतारणायोपसन्नोऽस्मीत्याशयवता नारदेनोक्तः सनत्कुमारस्तदधिकारमवगत्य, मुख्यब्रह्मविद्योपदेशयोग्यत्वसम्पादनाय 'यद्वै किञ्चाध्यगीष्ठा नामैवैत'दित्यादिना नारदोक्तानां सर्वेषां नामत्वबोधनपूर्वकं नाम्नो ब्रह्मत्वेनोपासनमुपदिश्य, 'यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवती'ति तत्फलं शोकतरणायोक्तवान्, तदा नारदः केवलं नामोपासने उक्तफलाभावम्, तस्य ब्रह्मत्वेनोपासने तूक्तं फलम्, तदपि नामगतिपरिच्छिन्नमिति विमृश्य, तेन शोकातरणं च निश्चित्य, ततोऽधिकं जिज्ञासमानः 'अस्ति भगवो नाम्नो भूय' इति पप्रच्छ, तत्र 'नाम्नो वाव भूयोऽस्ती'त्युत्तरिते, 'तन्मे भगवान् ब्रवीत्वि'त्येवं नारदेन पूर्वस्मात् पूर्वस्मा'द्भूयो भूयो वदे'ति पृष्टः सनत्कुमारो 'वाग्वा नाम्नो भूयसी'त्यादिना नामरूपविज्ञापकत्वं वाङ्माहात्म्यमुक्त्वा, वाचो

रश्मिः।

पदम्। उपेति। अन्वयमाहुः यद्वेत्थेति। 'ततस्ते ऊर्ध्वं वक्ष्यामी'ति वाक्यान्तरितोऽन्वयः। ब्रह्मविद्येत्यादि। चितिर्ज्ञानं शिक्षाकल्पच्छन्दसां ज्ञानानि। 'छन्दोविचित्ति वेदिमि'रित्यत्र वृत्तरत्नाकरे प्रस्तावे व्याख्यातम्। अध्येमि परस्मैपदकथनादिक्स्मरणे ईत् इत्यस्य अदादेः परस्मैपदिनो रूपमित्याहुः स्मरामीति। तथाचेति। आप्तवाक्यं 'तरति शोकमात्मवि'दितिश्रुतिः। अनुमायेति। अहं नात्मवित् शोकात्, शूद्रवत् इत्येवं प्रयोगः। अहमनात्मविदित्यनुमाय स्वार्थानुमानेन यत्र यत्र शोकः, तत्र तत्र अनात्मवित्त्वमिति व्याप्तिज्ञानात्मकेनानुमितिं विधाय। मुख्येत्यादि। मुख्यब्रह्मविद्योपदेशार्थम्। श्लिष्टप्रयोगेणाधिकजिज्ञासासंपादनाय 'यत् वै किञ्च अध्यगीष्ठा नाम एव एतत्' इति पदच्छेदः। उक्तफलं यथाकामचारस्तदभावम्। विमृश्येति। श्रुतिप्रामाण्याद्विमृश्य। निश्चित्येति। 'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवती'ति श्रुत्यामेवकाराभावेप्यश्रुतकल्पनस्य दोषत्वान्निश्चित्येत्यर्थः। नामेत्यादि। नामरूपयोः शब्दज्ञानविषयकारकत्वम्। 'वाग्वा ऋग्वेदं ज्ञाप-

मां भगवाञ्छोकस्य पारं तारयत्वि'ति नारदेनोक्तः सनत्कुमारः पूर्वस्मात्पूर्वस्मात् भूयो वदेति पृष्टः, भूयःपदमधिकार्थकम्, नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नापस्तेजआकाशस्मराशाप्राणान् ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वा, प्राणो-

---

भाष्यप्रकाशः ।

ब्रह्मत्वेनोपासनं तत्फलं च पूर्ववदुवाच, तत्र भूयःपदं न बाहुल्यार्थकम्, नापि पुनरर्थकम्, किन्त्वाधिक्यार्थकम्, आधिक्यमुत्कर्षस्तदर्थकमिति तत्तन्माहात्म्यकथनादवसीयते, एवं नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नापस्तेजआकाशस्मराशा उक्ताः । तत्र नामवाचौ प्रसिद्धौ, मनो मननव्यापारविशिष्टमन्तःकरणम्, मननव्यापारश्च विवक्षाद्यात्मकः । सङ्कल्पोपि कर्तव्याकर्तव्ययोर्विषयसमर्थनरूपस्तादृशान्तःकरणस्यैव वृत्तिविशेषः । चित्तं चेतयितृत्वं प्राप्तकालानुसन्धानवत्त्वम्, अतीतानागतविषयप्रयोजननिरूपणसामर्थ्यं च । ध्यानं शास्त्रोक्तदेवतालम्बनो विजातीयानन्तरितः प्रत्ययसन्तान एकाग्रतापरपर्यायः । चिरकालस्थायिज्ञानवादे तु तादृश एक एव प्रत्ययो बोध्यः । विज्ञानं शास्त्रार्थविषयकं विशिष्टज्ञानम् । बलं अन्नभक्षणजनितं मनसो विज्ञेयविभावनसामर्थ्यम् । अन्नमापस्तेज आकाशश्च प्रसिद्धाः । स्मरः स्मरणं अप्रयत्नश्चित्तव्यापारः । आशा अप्राप्तवस्त्वाकाङ्क्षा तृष्णाकामाद्यपरपर्याया । एवमेतेषां स्वरूपमुपनिषद्व्याख्यानादवगन्तव्यम् । एतेषामत्र ब्रह्मत्वेनोपासनमुक्तम्, प्राणस्य त्वाशातो भूयस्त्वं माहात्म्यं चोक्त्वा, 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी'त्यनेन तद्दर्शनादिमतोऽतिवादित्वं यद्यप्युक्तम्, तथापि तत्र विद्याया अपर्यवसानादग्रे जन्यप्रायपाठे 'आत्मतः प्राण' इति श्रावणाच्च सोत्र परत्वेन नाभिप्रेतः, किन्त्वासन्यत्वेन । स चोक्तमाहात्म्यवत्त्वादपहतपाप्मत्वाच्चान्येभ्य उक्तेभ्य उत्कृष्ट इति तेभ्योऽस्योत्कृष्टवादित्वमेवातिवादित्वम्, न तु परमकाष्ठापन्नोत्कृष्टवादित्वरूपं तदिति सोऽपि ब्रह्मत्वेनोपास्यतयैवाभिप्रेतः । तदेतदभिसन्धाय भाष्ये प्राणोपि तथोपास्यमध्ये गणितः प्राणान् ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वेति । श्रुतौ तथानुक्तिस्तु नारदस्य मुख्यविद्याग्रहणयोग्यता जाता न वेति परीक्षार्थम् । अत एवाग्रे 'तं चेत् ब्रूयुरतिवाद्यसीति, अतिवाद्यसीति ब्रूयान्नापह्नुवीते'त्युक्त्वा, 'एष तु वा अतिवदति, यः सत्येनातिवदती'ति

रश्मिः ।

यती'ति श्रुतेः । 'दिवं च पृथिवीं च वायुं चाकाशं चे'ति श्रुत्या रूपविज्ञापकत्वम् । वाङ्माहात्म्यं वाग्देवत्वम् । ब्रह्मत्वेनेति । 'तत्रास्य कामचारो भवति, यो वाचं ब्रह्मेत्युपास्ते' इति श्रुतेः । अत्र भूयःपदं 'भूयः पुनः पुनः स्यातं प्रभूतार्थे त्वनव्ययम् । निश्चये च निषेधे च साकल्यातीतयोरपी'ति विश्वादनेकार्थकमिति तदर्थं निश्चिक्युः तत्रेति । अत्रेति । तथा च श्रुत्या पूर्वोक्तार्थबाधात् नामनारायणादितो लक्षणया वोत्कर्षार्थकमिति भावः । विषयेति । विषयो यस्य यो ज्ञातः स तस्य प्रयोजनं फलम् । प्रत्ययसन्ताने स्वमतमाहुः चिरेति । बलमिति । विज्ञानानन्तरं स्नेहरूपबलस्यापि वक्तुं शक्यत्वेपि ह्यनुग्रहादीनां विशेषकारणानामनुक्तेः प्रसिद्धमेव बलमुरीकृतम् । तथा च भाष्यम् । ज्ञात एव स्नेह इति । बलं भक्तिरिति च । यद्वा । अन्नासेजआकाशस्मरणाशाकाङ्क्षाणामग्र आधिक्येन वक्ष्यमाणत्वात् तेषां चानन्दमयाधिकरणोक्तरीत्या वक्तव्यत्वात् बलं भक्तिर्वा । जगति भक्तिः स्वांशबलत्वेन भवति । च प्रसिद्धा इति । चकारेणानन्दमयाधिकरणे प्रसिद्धाः । न चाप्रयोजकत्वम् । शास्त्रार्थविषयकविशिष्टज्ञानाद्भूयस्त्वात् । माहात्म्यमिति । देवत्वम् । अतिवादित्वमिति । अग्रे स्पष्टम् । अपरीति । अग्रे ततोपि भूयः प्रश्नोत्तराभ्याम् । तथेति । ब्रह्मत्वेन । वदानीति लडर्थे लोट्

पासकस्यातिवादित्वं सत्यवादित्वेनोक्त्वा, विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिश्रद्धानिष्ठाकृतिसुखानि पूर्वपूर्वकारणत्वेनोत्तरोत्तराण्युक्त्वा, सुखस्वरूपजिज्ञासायामाह 'यो वै भूमा तत्सुख'मिति । भूम्नः स्वरूपजिज्ञासायामाह 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'ति ।

भाष्यप्रकाशः ।

प्राणोपासकस्यातिवादित्वं सत्यवादित्वेनोक्तम् । यद्येवं श्लिष्टप्रयोगेऽस्याधिकजिज्ञासोत्पत्स्यते, तदा योग्यः, नो चेदयोग्य इत्येतदर्थमेवमुक्त्वा, ततो नारदेन प्राणस्य तत्त्वं न प्राणः, किन्त्वन्यदिति बुद्ध्वा, 'सोऽहं भगवः सत्येनातिवदानी'ति स्वाभिप्राय उक्तः, तत्र 'अतिवदानी'त्यन्तर्भावितसनर्थः । सत्येनातिविवक्षामीत्याशयात् । तदा सनत्कुमारः 'सत्यं त्वेव विजिज्ञासितव्य'मित्यादिना तस्य सत्यादिजिज्ञासामुत्पाद्य, विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिनिष्ठाकृतिसुखानि पूर्वपूर्वकारणत्वेनोत्तरोत्तराण्युक्तवान् । तत्र सत्यं अर्थमनतिक्रम्य स्थितं वस्तुस्वरूपम्, विज्ञानं तद्विषयकं विशिष्टज्ञानम्, मतिस्तर्केण तदर्थस्वरूपविचारः, श्रद्धा आस्तिक्यबुद्धिः, निष्ठा तद्विषयक आदरस्तत्परत्वरूपः, कृतिस्तद्विषयसाधनानुकूल इन्द्रियव्यापारः, सुखं अनुकूलबुद्धिवेद्य आन्तरो धर्म इत्येवं लौकिकसमानाकारं तत्स्वरूपं ज्ञातव्यमिति सत्यादिषु कृत्यन्तेषु विशेषाकथनादायातीति तथोक्त्वा, ततः सुखे विशेषं वक्तुं सुखस्वरूपजिज्ञासायामाह । 'यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य' इति भूम्नो विचार्यत्वमुक्तम् । तेन प्राणस्य सत्यवदनादीनां च स एव कारणं तत्त्वं च, अतस्तमेव कृत्यादिप्रणाड्या ज्ञात्वा, सत्यवदनेऽतिवादित्वम्, नान्यथेत्यवगत्य, किंस्वरूपो विचार्य इत्याकाङ्क्षायां पप्रच्छ 'भूमानं भगवो विजिज्ञास' इति । एवं नारदस्य भूमस्वरूपजिज्ञासायामाह 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'ति । इह यच्छब्दगतसप्तम्या अधिकरणार्थत्वे ब्रह्मणो व्यापकत्वेन सर्वेषां तदुपश्लिष्टतया तद्व्याप्यतया च सर्वेषां सर्वदान्यज्ञानाभावापत्तेः सप्तम्याः सत्यर्थत्वेपि ब्रह्मणः सर्वत्र सत्त्वेन सर्वस्य तथात्वापत्तेश्चात्र कश्चिद्विशेषो वाच्यः । तथाच यस्मिन् दृष्टे श्रुते विज्ञाते सति द्रष्टुः

रश्मिः ।

छान्दसः । विवक्षामीति व्याख्यानात् । उपनिषद्व्याख्यानाच्च । कृत्यादीति । कृतेरादिभूतया प्रणाड्या । ज्ञात्वेति । 'भूमा त्वेव विजिज्ञासितव्य' इत्यत्रैवकारः सर्वत्र, नत्वेवंकारः । अतः कृत्यादिप्रणाड्या तदुक्तिवैयर्थ्यपरिजिहीर्षया ज्ञात्वा विजिज्ञास इत्यत्रेच्छाविषयज्ञानं यत् तद्विषयीकरणं भूम्नः प्रतीयत इति । आहेति । भूमलक्षणमाह । औपश्लेषिकवैषयिकाभिव्यापकाधारेषु वैषयिकाधाराङ्गीकारो न सम्भवति, ह्यन्यपदार्थस्य विषयत्वादिति शङ्कायां यत्रेति सप्तम्याः सतिसप्तमीत्वं समर्थयाम्बभूवुः इहेत्यादिना । अन्यज्ञानाभावापत्तेरिति । न च ब्रह्मणो ह्युपश्लिष्टत्वेपि व्याप्यत्वेपि 'पश्यन् चक्षुर्भवती'त्यादिरीत्या चिक्रीडिषया वा पुराणमते मायया वा न सर्वेषां सर्वदान्यज्ञानाभावापत्तिरिति वाच्यम् । भूमाधिकरणे भूम्नो ब्रह्मत्वेन सिद्धस्यात्र ज्ञानप्रकारविशेषनिरूपणे ज्ञानेनाज्ञाननिवृत्त्या तथात्वापत्तिः जीवस्य ब्रह्माभेदात् । भेदे तु अचलत्वसूत्रोक्ताभासे भक्तमनोरथपूरकत्वात् भगवतश्चक्षुर्भवनादीनां नित्यलीलास्थाना'मात्मत आविर्भावतिरोभावा'विति श्रुतेर्भक्ताधीनात्मतो भवनाद्ब्रह्मस्वरूपस्यात्मनो लीलास्थसकलपदार्थरूपत्वेन लीलास्थानां सर्वेषां सर्वदान्यज्ञानाभावापत्तिः, न तु प्रपञ्चस्थानामपीत्यदोषात् । तथात्वे । पूर्वोक्तदिशा सर्वस्य निरविद्यस्य नित्यलीलास्थस्य च तथात्वं सर्वदान्यज्ञानाभावापत्तिमत्त्वं तस्यापत्तेः । कश्चिद्विशेष इति । आशोक्ततरणोपपादनं वाच्यः । तथा चेति । पूर्वोक्तप्रकारे सति । सतीति । न च 'फले सप्तमी यत्रे'त्यत्र यत्फलकोन्यदर्शनाभाव इति कर्मणोऽ-

भाष्यप्रकाशः ।

श्रोतुर्विज्ञातुरन्यविषयकदर्शनश्रवणविज्ञानाभावो भवति, स भूमेति लक्षणकथनेन नित्यनिरवधिसुखरूपं तत्स्वरूपं स्वेतरस्मिन् सुखत्वसुखसाधनत्वज्ञानाभावजननं तत्कार्यं चेति सिध्यति । तेनैवं स्वरूपकार्यलक्षणयुक्तं विचार्यमिति फलति । तत्र भूम्नि दृष्टे श्रुते विज्ञातेऽन्यदर्शनादिकं कुतो न भवति, किं विशेषदर्शने रजतादिकमिवान्यन्नश्यति, उत कारणे कार्यमिव भूम्न्यन्यल्लीयते, अथवा सूर्यतेजोनक्षत्रादिकमिव भूमा अन्यत्तिरस्करोतीति शङ्कायामाह 'अथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्, यो वै भूमा तदमृतम्, अथ यदल्पम् तन्मर्त्य'मित्यनेन । अनित्यत्वे सति सावधिसुखरूपत्वे सत्यन्यत्र सुखत्वसुखसाधनत्वज्ञानजनकत्वमल्पसुखत्वमिति सिध्यति । तथाच न पूर्वविकल्पितं किञ्चिद्भवति, अपि तु भूम्नि दृष्टे श्रुते विज्ञाते तदानन्दैकतानतया अन्यदल्पं न सुखत्वेन सुखसाधनत्वेन च पश्यति, न शृणोति न विजानातीत्यर्थः सिध्यति । तत्र ननु यदि भूम्नो दर्शनश्रवणविज्ञानेष्वन्यतमेनैवं भाव आनन्दैकतानस्वरूपः, तर्हि शृण्वतो मम कुतो नास्ति । अथ समुदितैस्तैस्तदा यत्र भूमा स्वरूपं स्वकार्यं च प्रकाशयँस्तिष्ठति, तस्यैव भावो नान्यस्येत्याशयः, तदा स आधारो वक्तव्य इत्याशयेन पृच्छति 'स भगवः कस्मिन् प्रतिष्ठित' इति, उक्तरीत्या कमभिव्याप्य स्थित इत्यर्थः । तत्रोत्तरमाह 'स्वे महिम्नी'ति । स्वविभूतौ । अत्रापि को महिमेत्याशङ्का भविष्यतीति तद्वारणाय स्वयमेवाह

रश्मिः ।

न्यस्य फलेन यच्छब्दार्थेन समवायादिति वाच्यम् । अन्यदर्शनाभावस्य सुषुप्तावपि सत्त्वेनात्मा फलं स्यादिति तत्फलं तु भक्त्येकसाध्यत्वात् । न च भक्तिप्रकरणादन्यदर्शनाभावो भक्तिरेवेति तस्यात्मा फलं कथं न भवतीति वाच्यम् । अत्रार्थेऽन्येषां रामानुजाचार्यादीनामसंमतेर्वक्ष्यमाणत्वात् । 'सर्वं हि पश्यः पश्यती'ति श्रुतिविरोधाच्च । न च सुषुप्तिलक्षणे दृष्टे विज्ञाते इति कुतो लब्धमिति वाच्यम् । एतादृशविशेषमन्तरा कस्मिन्नर्थे सप्तमीत्यपि वाच्यम् । सत्यर्थे सप्तमीति चेत् । सुषुप्तिर्व्याक्रियताम् । ननु सुषुप्तौ व्याक्रियमाणायां शङ्करभाष्यपूर्वपक्षस्य सिद्धान्तीकरणात् सम्प्रदायप्रदीपोक्ता भगवदाज्ञा सेत्स्यति शङ्कराचार्यमतस्था मन्मतं पूर्वपक्षयन्ति तत्त्वं सिद्धान्तयेत्याकारिकेति चेत्, न । अहङ्कारादेशात् । 'अथाहङ्कारादेश' इति वक्ष्यमाणश्रुतेः । तस्य तुरीयग्राहकत्वं प्रतिभाति । चित्तस्य सुषुप्तिग्राहकत्वात् । तथाच 'अशक्ये हरिरेवास्ति मोहं मा गाः कथञ्चन' इति वाक्यान्न दोषः । किञ्च । सर्वस्य तथात्वापत्तेश्चेत्युक्तदोषाच्च । तथाच श्रुतिः 'सर्वं हि पश्यः पश्यती'ति । अत्र रामानुजमाध्वभास्कराचार्या भिक्षुशैवौ च भगवन्तौ 'यत्र नान्यत् पश्यत्यादे'र्भूमातिरिक्तयावद्दर्शननिषेधो नार्थः, किन्तु निरवधिसुखरूपे ब्रह्मण्यनुभूयमाने ब्रह्मस्वरूपतद्विभूत्यन्तर्गतत्वात् कृत्स्नस्य वस्तुजातस्यैश्वर्यविशिष्टब्रह्माभिन्नत्वेन न पश्यतीति । एतदेवोपपादयति वाक्यशेषः । 'स वा एवं पश्यन्नेवं मन्वान' इत्यादिः । अग्रे 'न पश्यो मृत्युं पश्यति, न रोगं नोत दुःखताम्, सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश' इति मन्त्रश्चेति वदन्ति । पूर्वोक्ताविरुद्धमेतत् । भूमाधिकरणभाष्यप्रकाशे एतदुक्तम् । इतीति । इति स्वरूपलक्षणं कार्यलक्षणं च सिध्यतीत्यर्थः । किमित्यादि । विशेषदर्शनम् । नेदं रजतमित्याकारकं रजतादिकम्, शुक्ताविदं रजतमिति । आदिना रज्जौ सर्पोऽयमिति । नायं सर्पः, रज्जुरेषेति विशेषदर्शनम् । कारणे जले कार्यं पृथिवी । स्वेति । विभूत्यध्यायोक्तायाम् । अत्रापीति ।

---

१. संपद्यते । २. तदेकतानतारूपः ।

भाष्यप्रकाशः।

‘यदि वा न महिम्नीति गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानी’ति। तथाचैतेषु तत्प्रतिष्ठाया अदर्शनात्कथमेतदिति शङ्कां मा कृथाः। तत्र हेतुमाह ‘नाहमेवं ब्रवीमी’ति। एतादृशे महिम्नि प्रतिष्ठित इत्यहं न ब्रवीमि। तर्हि क्व प्रतिष्ठित इत्यत आह ‘ब्रवीमीति होवाच अन्यो ह्यन्यस्मिन् प्रतिष्ठित’ इति। अत्र ‘इति होवाचे’ति श्रुतिवाक्यम्, शेषं सनत्कुमारस्य। तथाच गोअश्वादिभ्योऽन्यो महिमा तस्मिन् प्रतिष्ठित इति। तथाच लौकिकमहिमभिन्नः स्वे आत्मीये वृते भक्ते योऽथवा स्वाभिन्नो यो महिमा तस्मिन्नुक्तरीत्या स्थित इत्यर्थः। अतस्तेनापि प्रकारेण विचार्य इत्यर्थतः सिध्यति। तर्हि स कीदृग् येन तत्रैव प्रतिष्ठित इत्याकाङ्क्षायां तं विवृणोति ‘स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदं सर्व’मित्यारभ्याग्रेऽहंकारादेशं तत आत्मादेशं च पूर्ववत् ‘आत्मैवेदं सर्व’मितीत्यन्तम्। तथाच यस्य पूर्वं ‘स एवाधस्ता’दित्याद्युक्तरीत्या सर्वदिक्षु भूमभानं सर्वं परिदृश्यमानं भूमेति च भानम्। अथ तदनन्तरम्, अत एतस्माद्भानाद्धेतोरहङ्कारादेश एव पूर्ववद्भूमाभिन्नस्वभानम्। अथ तदनन्तरम्, अतस्तादृशभानाद्धेतोरात्मादेश एव पूर्ववद्भूमाभिन्नात्मभानमिति। एवंप्रकारकभानवान् यः स पुरुषस्तत्र यो महिमा

रश्मिः।

विभूतिष्वपीत्यर्थः। अस्येति। नारदस्य। स्वयं सनत्कुमारः। यदि वा नेति। यदि वा परमार्थत आधारं पृच्छसि तर्हि ब्रूमः। महिम्नि गो अश्वं गवाश्वं तदादिरूपे महिम्नि। नेति। न प्रतिष्ठित इतीत्यर्थः। कथमेतदिति। कथं केन प्रकारेण। ‘स्वे महिम्नी’ति श्रुतिवाक्यमित्यर्थः। न ब्रवीमीति। अन्ये ज्ञानिनस्तु ब्रुवन्तीत्यर्थः। अन्यज्ञानिनां परमार्थः गीताविभूत्यध्याये। ‘धेनूनामस्मि कामधुक्’ ‘उच्चैःश्रवसमश्वानाम्’ ‘ऐरावतं गजेन्द्राणाम्’ ‘श्रीमदूर्जितमेव वा’ ‘रुद्राणां शङ्करश्चास्मि’ ‘देवर्षीणां च नारदः’ ‘सिद्धानां कपिलो मुनिः’ ‘कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्’ इत्येतेषु वाक्येषु गवाश्वादीनां श्रीकृष्णजिदभेदः। अत एव ‘ह्यन्यो ह्यन्यस्मिन् प्रतिष्ठित’ इति श्रुतेर्ज्ञानिनो भूमा तु स्वतो न भिन्न इति भावं वदन्ति। सर्वात्मभावरूपमुख्यभक्तिप्रकरणाद्भक्तानामुक्तश्रुतिप्रतिपाद्यपरमार्थमाहुः तथा चेति। गवाश्वादिभ्योऽन्यो महिमा यस्तस्मिन् तद्रूपेऽन्यस्मिन् प्रतिष्ठित इति। हि युक्तश्चायमर्थः। ज्ञानमार्गीयादर्थाद्भिन्नः। ननु ज्ञानमार्गीयार्थो भक्तिमार्गीयो वेति चेत्। न। महाभाष्ये ‘चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्ये’ति श्रुतेर्निरुक्तावाशुशुक्षणिपरत्वेन व्याख्यातापि शब्दपरत्वेन व्याकरणादत्रापि ज्ञानमार्गपरत्वेन व्याकृता भक्तिमार्गपरत्वेन व्याकृतेति। स्वाभिन्न इति। स्वं भगवान्। उक्तेति। उक्ता ‘अन्यो ही’त्यादिश्रुत्योक्ता रीतिस्तया। श्रुतिप्रामाण्यात् स्वस्मिन्नपि (स्वयं) स्थित इत्यर्थः। अस्मिन् पक्षे ‘अन्यो ही’त्यादिश्रुत्यर्थः स्पष्टः। भूमा तु स्वतो न भिन्न इति भावः। स इति। महिमा। श्रुतौ स इति भूमा। पूर्ववदिति। ‘अहमेवाधस्ता’दित्यादिपूर्ववत्। ‘आत्मैवाधस्ता’दित्यादि पूर्ववच्च। भूमेति। यथाधस्ताद् घट इत्यत्राधस्तनघटभानम्। इदम्पदार्थमाहुः परीति। इदमस्तु प्रत्यक्षगे रूपमिति। स्वेति। भूमाभिन्नानां स्वेषां भानम्, ‘कृष्णोऽहं पश्यत गति’मित्यत्र यथा भूमा भगवान् तत्त्वेन स्वेषां भक्तानां भानम्। हेतोरिति। सञ्चारिभावरूपादित्यर्थः। आत्मपदं मुख्यात्मपरम्। अहङ्कारादेशस्य सञ्चारिभावत्वज्ञापनाय पुनर्भूमाभिन्नात्मज्ञानमित्यर्थः। एवमग्रे भाष्ये स्फुटम्। महिमेति। सस्फूर्तिसर्वात्मभावस्तस्मिन् प्रसिद्धे

एतेन सर्वात्मभावस्वरूपमेवोक्तं भवति । तत्र विरहभावेऽतिविगाढभावेन

भाष्यप्रकाशः ।

तस्मिन् भूमा प्रतिष्ठित इत्यर्थः सिध्यति । तस्य तत्र प्रतिष्ठितत्वे गमकमाह ‘स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवती’ति । तथाचोक्तप्रकारकदर्शनमननविज्ञानवानुक्तप्रकारकरत्यादिमान् भवतीत्येते धर्मास्तत्र भूमप्रतिष्ठागमका इत्येतैर्लक्षणैर्भूममहिमाधारः पुमान् ज्ञातव्य इत्यर्थः । एतच्च महिमस्वरूपमग्रे अनुबन्धादिसूत्रभाष्ये स्फुटीभविष्यति । एवं तत्स्वरूपं निष्कृष्य तादृशस्य शोकतीर्णत्वं पूर्वपृष्टोत्तरत्वेनाह ‘स स्वरा’डित्यादिना । सः भूमात्मरत्यादिमान् स्वस्मिन्नेव राजते, स्वस्मिन् भूमानं रञ्जयति वा, तस्य नामाद्याशाप्राणपर्यन्तलोकेषु कामचारः स्वातन्त्र्यं भवतीति सर्वप्राप्त्या शोकपारतीर्णो भवतीत्यर्थः । एवमेतं परिचाययित्वा तेनैव शोकतरणादितरोपायवतो निन्दति ‘अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति, तेषां सर्वेषु लोकेष्वकामचारो भवती’ति । रञ्जयतीति राजा । अन्यो रञ्जयिता येषां तेऽन्यराजानः । तथाच ये इतोऽन्यथा विदुरन्यासक्तास्ते तथेतिसन्दर्भार्थः ।

एतस्य तात्पर्यं स्फुटीकर्तुं गृह्णन्ति एतेनेत्यादि । एतेन भूम्नः कार्यलक्षणवाक्ये-

रश्मिः ।

वृतभक्ते भूमा भूमाधिकरणोक्तो भगवान् प्रतिष्ठित इत्यर्थः । भगवतो भूमत्वेनोपादानं सुखरूपत्वाय । ननु भगवति सर्वात्मभावरूपा भक्तिः, भक्तौ तु न भगवानिति चेत् । न । महिम्नीति सप्तम्या अभिव्यापकाधारोऽर्थः । न त्वौपश्लेषिक आधारः । तथा च महिमानं सस्फूर्तिसर्वात्मभावमभिव्याप्य प्रतिष्ठित इत्यर्थात् । न च महिमपदं ‘एतावानस्य महिमा’ इत्यत्र विश्ववाचकमिति वाच्यम् । विश्वान्तर्गतसस्फूर्तिकैतादृशभावे विश्ववाचकस्य सङ्कोचात् । ‘सर्वे ब्राह्मणा भोजयितव्या’ इत्यत्र सर्वपदवत् । **तथा चोक्तेति** । ‘अनुबन्धादिभ्य’ इति सूत्रभाष्योक्तप्रकारकेत्यादिः । एत इति । उक्तप्रकारकरत्यादिरूपा धर्माः । उक्तप्रकारकदर्शनादिधर्मास्तु भूमगमकाः, न तु भूमप्रतिष्ठागमका इत्यनुबन्धादिभ्य इति सूत्रभाष्यात् । **महिम्नेति** । ‘स एवाधस्ता’दित्युक्तम् । ‘स वा’ इत्युक्तं च । व्याकरणस्य वेदाङ्गत्वात् श्रीभागवतस्य वेदत्वात् तच्चतुर्थस्कन्धोक्तं लक्षणमाहुः **स्वस्मिन्निति** । ‘रञ्जयतीति राजे’ति पृथुचरित्रे व्युत्पत्तिः । **तेनैवेति** । भूम्नैव । इत इति । श्रुत्यन्तर्गतस्मात इत्यस्यार्थः । **कार्यलक्षणेति** । स्वरूपलक्षणं तु ‘सत्यं ज्ञानमनन्तमानन्दं ब्रह्मे’ति ब्रह्मोपनिषदुक्तम् । **सर्वात्मभावेति** । ननु विगाढभावस्य विरह एव भाष्ये उक्तेः ‘यस्मिन् दृष्टे श्रुते विज्ञाते’ इति लक्षणश्रुतिविवरणे प्रकाश एवोक्तसंयोगे सर्वात्मभावपदस्यैकदेशविरह एव प्रवृत्तस्य कथं जीवेश्वरभेदेनाधिभौतिकादिभेदेन संयोगविप्रयोगभेदेन च द्वादशप्रकारेषु प्रवृत्तिरिति चेत् । न । भाष्येऽतिविगाढभावपदेति पदार्थस्य विवक्षितत्वात् । तथा च वि विशेषेण गाढो दृढः बलं बलपदवाच्यो भावः प्रेमा विगाढभावः । तस्य ज्ञापको निरोधलक्षणग्रन्थोक्तो निरोधः । तदुक्ते तु सर्वात्मभावे सर्वः सर्वेन्द्रियसम्बन्धी आत्मनोऽन्तःकरणस्य भाव इति । आत्मनो भाव इति षष्ठीतत्पुरुषं विधाय सर्व आत्मभाव इति कर्मधारयः । ‘सर्वेन्द्रियाण्यन्तःकरणस्य वृत्तय’ इति पञ्चमस्कन्धे निरूपितम् । ‘एकादशामी मनसो हि वृत्तय आकूतयः पञ्चधियोऽभिमान’ इति । तदुक्तमाचार्यैः ‘सर्वात्मभावोऽधिकृतो भवतीनामधोक्षजे । विरहेण महाभागा महान् मेऽनुग्रहः कृत’ इति श्लोके ‘सर्वोप्यात्मनो भावो भगवत्येवाधिकृत उत्तरोत्तरं वृद्ध्यर्थं आरब्ध इवे’ति सुबोधिन्या । ननु विरहेणेत्युक्तौ पुष्टिमार्गीयत्यागवतीनां विरहसामयिकसर्वात्मभावपदनिर्वचनम्,

सर्वत्र तदेव स्फुरतीति 'स एवाधस्ता'दित्यादिनोक्त्वा, कदाचित् स्वस्मिन्नेव भगवत्त्वस्फूर्तिरपि भवतीति 'अथाहङ्कारादेश' इत्यादिना तामुक्त्वा, एतेषां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनः सर्वत्र भगवत्स्फूर्तिमाह 'अथात

भाष्यप्रकाशः ।

न यदुद्धवं प्रति सर्वात्मभावस्वरूपं स्वस्मिन् विगाढभावात्मकं भगवतोक्तं तदेवोक्तमित्यर्थः । कथमित्याकाङ्क्षायामेतदग्रिमोक्तकार्यान्यथानुपपत्त्यार्थादुक्तं भवतीति वक्तुमेतद्विभजन्ते तत्रेत्यादि ।

रश्मिः ।

न तु संयोगसामयिकसर्वात्मभावपदनिर्वचनमिति संयोगीयान्यन्निर्वचनमिति चेत् । न । संयोगविप्रयोगभेदेनैकस्या एव भक्तेर्द्वैविध्यात् । न च संयोगे मानाभाव इति वाच्यम् । विहितभक्त्यसाध्यत्वेन भक्तिपदं सर्वात्मभावेऽर्धदलवाचकं स्यादिति । न चास्त्वेवमिति वाच्यम् । विशिष्टे शक्तिवादिनां घट इत्युक्ते हि न घटत्वाविषयकप्रत्ययो भवतीति तथा वक्तुमशक्यत्वात् । तथा च प्रत्ययः । प्रतिमादिं पश्यतो भगवन्तं पश्यामीति चक्षुःसंयोगे । विप्रयागे तु दैहिकपारतन्त्र्यं देशैक्येपि । तदा न पश्यामीति प्रत्ययः । तथा च प्रयोगः । विगाढभाववान् निरोधादाचार्यवदिति । एवं सर्वस्मिन् भाव इति सर्वात्मभाव इति लालूभट्टकृतसर्वात्मभावविवेके । सा व्युत्पत्तिरतिविगाढभावेन वक्ष्यमाणस्फूर्तौ । तथा चैतादृशः सर्व आत्मनो भावो यत्र विगाढभावे स विगाढभावः सर्वात्मभावः । द्वितीयदले त्वतिविग:ढभावः अतिपदार्थोऽनुभवसाक्षिको विरहे संयोगापेक्षयातिशयरूपः । तत्र सर्वस्मिन्नात्मभावो यत्रातिविगाढभावे स सर्वात्मभावः । तदुक्तं **सर्वात्मभावस्वरूपं स्वस्मिन् विगाढभावात्मकमिति** । अन्यस्मिन् कामुकेऽयं भावः सर्वात्मभावः स्यात्, तद्व्यावृत्त्यर्थं स्वस्मिन्निति । विगाढभावात्मकसर्वात्मभावान्निरोधात्मकस्तस्मादतिविगाढात्मके स्फूर्त्यात्मकः सर्वात्मभावः । एवं संयोगे द्विविधोपि त्रिविधः आध्यात्मिकाधिदैविकयोरभेदात् । अतिविगाढभावतदुद्भवस्फूर्तिरूपो द्विविधोपि विरहे त्रिविधः । उक्ताभेदात् । एवं षड्विधो जीवे । ईश्वरेप्येवं षड्विधः कारणरूपः । तदुक्तं प्रदानवत्सूत्रभाष्यप्रकाशे 'तेन भगवद्धर्मे'त्यादिना । व्युत्पत्तिस्तु सुबोधिन्या एव 'सर्वोप्यात्मनो भावः' इत्यस्याः श्रुतौ निरवध्यानन्दरूपत्वेन रसरूपत्वेन पुत्रादिभ्योपि प्रेयस्त्वेन च सिद्धस्य आत्मनो यो भावो धर्मः प्रियत्वाख्य आनन्दात्मा यन्मात्रां सर्व उपजीवन्ति स सर्वस्तदंशिभूतो भगवद्धर्म ऐश्वर्यादिवदतिरिक्तः । ननु स दत्तो जीवेष्वपि तादृश इति चेत् । न । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुत्या प्रदानवत्सूत्रोक्तरीत्या भगवद्धर्मात्मकसर्वात्मभावदानेपि भगवद्धर्मसर्वात्मभावस्योक्तविधत्वमपि । मात्रारूपत्वेन परिणामात् । एतेन प्रदानवत्सूत्रोक्तभाष्यप्रकाशोक्तलक्षणकसर्वात्मभावनिर्वचनाभावात् तद्विरोध इत्यपास्तम् । तत्र भगवद्धर्मात्मकसर्वात्मभावनिर्वचनात् । आध्यात्मिकाधिभौतिकस्फूर्तिविगाढभावयोर्मात्रात्वादुक्तविधत्वम् । पुराणमतेन तु प्रदानवदेवेति सूत्रभाष्यप्रकाशेऽनुरागात्मेत्यादिविशेषणविशिष्टः सर्वात्मभावो ज्ञेयः । तथा चैतेन श्रुतिवाक्येन सर्वः सर्वेन्द्रियसम्बन्धी आत्मनोऽन्तःकरणस्य भावः 'कामः सङ्कल्प'इत्यादिश्रुत्युक्तस्तस्य विधारूपस्य स्वरूपं 'दर्शनाच्चे'ति वक्ष्यमाणसूत्रादुक्तमित्यर्थः । निरोधलक्षणोक्तविधारूपमिति यावत् । श्रीवल्लभजित्कृतसर्वात्मभावनिरूपणे सर्वात्मभावपदस्यायमर्थकः । भक्तिमार्तण्डे च । 'नन्दगोपव्रजस्त्रीणां' नन्दगोपसर्वात्मभावत्वेन 'मनसो वृत्तयो नः स्यु'रिति भ्रमरगीतीयवाक्योक्तेन सर्वात्मभावनिरूपणस्य युक्तत्वात् । उक्तश्रुतेश्चेति

भाष्यप्रकाशः ।

अयमर्थः । अत्र व्याख्यातरीत्या यो भूममहिमाधाररूपः पुमान् परिचाययिष्यते, तस्य या स्फूर्तिः, सा नाखण्डब्रह्मज्ञानरूपा, 'तत् केन कं पश्ये'दित्यादिवत्तदाकाराभावात्, किन्तु सखण्डतद्रूपा, षण्णां दिशां परिदृश्यमानस्य सर्वस्य चानुवादपूर्वकं तत्स्फूर्तिकथनात् । सापि न वामदेवादिस्फूर्तिव'न्मनुरभवमहं सूर्यश्चे'त्यादिसर्वत्राहङ्ग्रहरूपा, अहङ्कारादेशोत्तरं पुनरात्मादेशकथनेन तस्याः व्यभिचारबोधनात् । अतः सा द्विविधाया अपि ज्ञानिस्फूर्तेर्विलक्षणेति तद्वानपि तेभ्यो विलक्षणः । 'स यदि पितृलोककामो भवती'त्यादिवदस्य कामानामनुक्तत्वाद्दहराद्युपासकेभ्योपि विलक्षणः । मर्त्यसुखानभीप्सुत्वाल्लोकतोपि विलक्षणः । किन्तु सत्यवदनादिकारणभूतकृत्यादिजनकसुखलाभवत्त्वस्य भूमप्रतिष्ठाप्रश्नोत्तराभ्यां तन्महिमाधारत्वेनोक्तत्वात् पूर्वं भूमलाभवानुक्तः, तेन दृष्टश्रुतविज्ञातभगवत्कः परमभक्तस्तत्र ततोऽन्यदर्शनादिराहित्यस्योक्तत्वाद्विरहभावे प्रपञ्चविस्मारकपरमासक्तिरूपो योऽतिविगाढभावस्तेन सर्वत्र तदेव आसक्तिविषयं

रश्मिः ।

भाष्यार्थः । भाष्यीयैवकारव्यावर्त्यमाहुः **अयमर्थ** इति । 'सा सा सा सा जगति सकले कोऽयमद्वैतवाद' इत्यत्रायं भावः कामुकस्योपवर्णितः । क्वचित् तत्रापि संभोगविगाढभावनिरोधविप्रयोगातिविगाढभावस्फूर्तीनां सत्त्वात् लौकिकः सर्वात्मभावो रूपप्रपञ्चान्तर्गतो बन्धको रूपप्रपञ्चस्य बन्धकत्वात् 'सर्वग्रन्थीनां प्रविमोक्ष'इति श्रुतिविरोधाच्चेत्यत आहुः **मर्त्येति** । तथाच लौकिके सर्वात्मभावे मर्त्यसुखाभीप्सुरधिकारी, अलौकिके तु शुद्धाहारी । 'प्राणपोषको ह्याहारः, तस्य सदोषत्वे तु न किञ्चित् सिध्यती'ति भाष्यात् । 'न पश्यो मृत्युं पश्यती'ति मृत्य्वस्पृष्टसुखत्वात् सर्वात्मभावस्यामर्त्यसुखाभीप्सुरधिकारी । एतेन वैष्णवस्य स्वस्त्रियामेतादृशभाववतो भावेपि न क्षतिः । आत्मविषयत्वाच्च । न चायोग्ये भावकल्पनमिति वाच्यम् । 'यद्यदिष्टतम'मिति वाक्यात् । 'लोकवत्तु लीलाकैवल्य'मिति सूत्राच्च । आत्मविषयकः कैवल्यरूपः । स्त्र्यादिविषयकोऽकैवल्यरूपः । **सत्येत्यादि** । सत्यवदनविज्ञानमतिश्रद्धानिष्ठाः सुखादयः तासां कारणीभूता कृतिरादिः कृत्यादिसुखस्यादिः । तस्या जनकेत्यर्थः । ननु 'सत्यवदनादिजनके'त्येतावतैव चारितार्थ्ये कारणभूतकृत्यादीत्यधिकमिति चेत्, न । एतदनुक्तौ सत्यवदनादिसकलजनकेति भ्रमः स्यात्, तन्निवृत्तये कारणभूतायाः सुखस्यादिरूपायाः कृतेर्जनकत्वनिश्चयार्थं कारणभूतकृत्यादीत्यस्यानाधिक्यात् । उक्तत्वादिति । 'यदा वै सुखं लभतेऽथ करोती'ति श्रुत्येत्यर्थः । **दृष्टेति** । भूमलक्षणश्रुतिव्याख्याने विशेषरूपेण लब्धः । **परमेति** । दृष्टश्रुतविज्ञातभ(ग)वत्कत्वमेव परमभक्तत्वम् । संयोगविगाढभावयोस्तु प्राकृतयोरनुवादात् । संयोगविगाढभावनिरोधानां वक्ष्यमाणत्रयप्रतिपादकग्रन्थानुरोधेन वक्तव्यत्वात् । अत्र सत्यवदनादीनां संनिवेशप्रकारः । सर्वात्मभावे 'भक्तिः प्रवर्तिता दिष्ट्ये'ति वाक्यं भ्रमरगीते, भक्तिवर्धिन्यां च 'सेवायां वा कथायां वे'ति वाक्यं विविदिषोर्भक्तस्य सत्यवदनादिजनककृतिर्गुरूपसत्तिः । अस्य पुष्टित्वं सन्दर्भस्यैकादशद्वादशाध्यायोक्तस्यैतन्निबन्धे उक्तत्वात् स्फूर्तिनिरोधयोः सर्वात्मभावपदं भाष्ये श्रीभागवते चोक्तमिति । अनुग्रहमात्रेण कृतिः पुष्टित्वात् । ततो निष्ठा, ततः श्रद्धा, ततो मतिः, ततो विज्ञानम्, ततः सत्यं सत्यवदनं कथा कथनादिरूपमुक्तश्रुतिप्रामाण्याज्ज्ञेयम् । **तत्र** भूमलक्षणे । **ततः** दर्शनश्रवणविज्ञानाद्यनन्तरम् । **उक्तेति** । एतस्य विरहभावलिङ्गत्वम् । न च प्रेमलक्षणे संयोगे वियोगवर्तनं प्रेमेत्युक्तत्वात् वियोगवर्तनं संयोगेऽस्त्विति शङ्क्यम् । प्रेमलक्षणत्वात् । सर्वात्मभावस्य प्रदानमात्रसाध्यत्वात् । **परमासक्तीति** । परः सर्वोत्कृष्टो मीयते ज्ञानस्य स्फूर्त्यात्मकस्य विषयीक्रियते यस्यामेतादृश्यासक्तिरनुषङ्गवद्धीरूपा तया रूप्यते

भाष्यप्रकाशः।

भगवत्स्वरूपमेव सर्वत्र स्फुरतीति 'स एवाधस्तादित्या'दिनोक्त्वा, एतेषां विरहभावकृततत्तत्स्फूर्तिरूपाणां ज्ञानानां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनरहङ्कारादेशात् पूर्वं निरूपित-

रश्मिः।

व्यवह्रियते ज्ञायते इति तद्रूपोऽतिविगाढभाव इत्यर्थः। 'मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रया' इति भ्रमरगीतोक्तसर्वात्मभावे निरोधस्कन्धोक्ते निरोधस्य प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपस्य संनिवेशो भाष्यस्य आवश्यकः। तेनातिविगाढभावे वक्तव्येऽस्य विशेषणस्य किं प्रयोजनमिति कुचोद्यं निरस्तम्। **व्यभिचारीति**। विरहेत्यादितत्तत्स्फूर्तयोऽधःस्थत्वादिप्रकारकास्मद्विशेष्यका बोध्याः। ते तु त्रयस्त्रिंशत्। 'चिन्ता स्मृतिर्हर्ष औत्सुक्यमपस्मारो विबोधो मतिरुन्मादो मरण'मित्येतेषु मतिरत्र सम्भवति। तस्या लक्षणं शास्त्रोपदेशमन्त्राद्यैरर्थनिर्धारणं मतिरिति। 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यत' इति गीतातः व्यभिचारित्वमस्या भक्तिरसात् पूर्वभावित्वेनोत्तरभावित्वेन च, भक्तिमार्गे उन्मादो वा। तस्य लक्षणम्, 'सन्निपातग्रहादित उन्मादश्चित्तविभ्रमः।' तदुक्तं 'उत्तमानां विप्रलम्भो भवेत् प्रियवियोगतः। नीचानां विभवभ्रंशात् सर्वेषां सन्निपातत' इति। अत्रापि वाक्यं 'इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः' इति। अत्र भक्तिपदवाच्यत्वात् षट्सु सर्वात्मभावपदव्युत्पत्तिः। संयोगः परस्परालिङ्गनपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य इत्येक एव। सर्व आत्मनो भावः परम्परया यत्र संयोगे स तथोक्तः। संयोगे परम्परया निरोधकारणत्वात्। वि विशेषेण गाढो दृढः बलपदवाच्यो भावः प्रेमा। 'दृढः स्थूलबलयो'रिति पाणिनिसूत्रात्। न च भावपदार्थो रतिर्वाच्य इति वाच्यम्। रतेर्भगवद्ग्राहकत्वात्। 'वशे कुर्वन्ति मां भक्त्ये'ति वाक्यात्। 'तं भजे'दिति श्रुतेश्च। न च प्रेमपदोपसन्दाने विहितकर्मज्ञानभक्तिसाध्यो न वेति शङ्कित्वा प्रदानसाध्यत्वं सर्वात्मभावस्योक्तम्, तद्भङ्गः, प्रेमपदेन विहितभक्तिलाभो न, अन्यसाधनसाध्यत्वादिति वाच्यम्। भाष्ये विहितपदाच्चित्तशुद्ध्यादीनां मर्यादाभक्तिसाधकत्वे पुष्टौ प्रदानसाध्यत्वे बाधकाभावात्। न च प्रदानसाध्यत्वेऽनुग्रहासाध्यत्वापत्त्या भक्तिहेतुविरोध इति वाच्यम्। सर्वात्मभावोक्तिसन्दर्भरूपे द्वादशाध्याये पुष्टिमार्गकथनानन्तरं 'याहि सर्वात्मभावेने'ति वाक्यात् पुष्टिभक्तित्वेपि सुबोधिन्याः सर्वः सर्वेन्द्रियसम्बन्धी आत्मनोऽन्तःकरणस्य भावः, 'कामः सङ्कल्प' इतिश्रुत्युक्तो वा, 'एकादशामी मनसो हि वृत्तय' इति पञ्चमस्कन्धोक्तो वा भवनं भगवति सत्ता वर्तनं तत्परत्वेनावस्थापनं वेत्यर्थिकायाः सिद्धस्य वक्ष्यमाणस्य विद्यारूपस्य निरोधस्य दानेनाभ्युपगमात्। इतरस्याध्यात्मिकाधिभौतिकस्यानुग्रहसाध्यस्य पुष्टित्वादनुग्रहेणोपगमात्। श्रौतस्य प्रदानसाध्यता, पौराणस्य तु अनुग्रहसहकृतप्रदानसाध्यता सर्वात्मभावस्य निरोधात्मकस्य। वक्ष्यमाणनिरोधात्मकस्य। विगाढभावे सर्व आत्मनोऽन्तःकरणस्य भाव उक्तो यत्रेतिव्युत्पत्तिः। 'नासतो विद्यते भावो नाभावो विद्यते सत' इति गीतायाः। निरोधे व्युत्पत्तिः। सर्वः सर्वेन्द्रियसम्बन्धी भावः 'कामः सङ्कल्प' इति श्रुत्युक्तः। भाष्ये भूमपदवाच्यो यः। 'एतेन सर्वात्मभावस्वरूपमेवोक्तं भवती'ति भाष्यात्। भाष्यमते इयं मुख्या व्युत्पत्तिः सर्वात्मभावस्य। भूमलक्षणश्रुतिसिद्धत्वात्। पञ्च तु सर्वात्मभावव्युत्पत्तिशून्याः सर्वात्मभावान्तःपातित्वात् सर्वात्मभावा इत्युच्यन्त इति भक्तिहंसदिशा ज्ञायते। अथापि व्युत्पत्तिर्विरहे। विशिष्टो रहो विरहः। अन्तःसंवेदनम्। विरहो, 'विरहे ये विविधा भक्तिभावा उत्पद्यन्ते, ते न सङ्गमेपी'ति वैशिष्ट्यम्। स च चक्षूरागः। प्रथममित्यवस्थाप्रकारेण विकलत्वास्वास्थ्यरूपः। नन्वन्तःसंवेदनेपि चक्षूराग इति चेत्। न। 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदा-

भाष्यप्रकाशः ।

स्यावृत्त्या सर्वत्र भगवत्स्फूर्तिमाह 'अथात आत्मादेश' इत्यादिना ।

विधात्रयसमाप्तौ च 'स वा एष एवं पश्य'न्नित्यादि कथयति । तत्र 'स' इत्यनेन पूर्वोक्तं परामृश्य, 'एष' इत्यनेन महिमानं निगमयति । तत्रायमर्थः । पूर्वं विधात्रयस्योक्तत्वात्तासां प्रत्येकमहिमरूपत्वे, 'स वा एष' इत्यत्र बहुवचनापत्तिः । समुदितस्य तथात्वे पूर्वविधापरामृष्टस्य भूम्नोपि महिमत्वापत्तिः, अतस्तदुभयमत्र नाभिप्रेतम्, कि'न्त्वेवं पश्य'न्नित्यादिनोक्तासु दर्शनादिक्रियासु पूर्वोक्तविधात्रयं कर्मत्वेनैवाभिप्रेत्यैवंपदेन परामृशति, दर्शनादिमतश्चाग्रे फलं

रश्मिः ।

वृत्तचक्षुरमृतत्वमिच्छ'न्नितिश्रुत्यान्तःसंवेदने चक्षूरागोक्तेः । आत्मदर्शनं 'सा परानुरक्तिरीश्वरे' इति शाण्डिल्यसूत्रेण रागमन्तरासम्भवच्चक्षूरागरूपां भक्तिमाह । द्विषति चक्षुःस्वकारणनिर्वाहाय । न चास्तु चक्षूरागः संयोगवद्विरहेपि, रागस्य भक्तिलक्षणत्वात्, परन्तु सम्यक् ज्ञानं तस्य श्रुतौ न सम्भवति, प्रत्याशादिभिस्तिरस्कारादिति बोध्यम् । 'भवतीनां वियोगो मे न हि सर्वात्मना क्वचि'दित्यस्मात् । 'दुस्त्यजस्तत्कथार्थे' इत्यस्माच्च रागप्राप्तेः । लक्षणोक्तस्य भानावश्यकत्वाच्च । अन्यथा लक्षणत्वापलापप्रसङ्गः । ननु 'कामाद्गोप्यः', 'अलमन्यविचारेण, प्रेमेच्छेति स्थितं मत'मिति वाक्याभ्यां इच्छा ममेति चेत् । न । 'अनाविष्कुर्वन्नन्वया'दितिसूत्रे भक्तिरसस्य गुप्तस्यैवाभिवृद्धिस्वभावत्वेन कामादीनां गौणप्रेमत्वात् । अतः 'कामस्तस्य दिदृक्षैवे'ति 'नैव इच्छा तु साधारण्या'दिति कारिकाशाण्डिल्यसूत्रयोरिच्छायां विशेषस्य दूषणस्य चोक्तेः । अतः बहुविधोपि विरहोत्रैक एव गण्यते, संयोगवदिति सिद्धम् । ननु विप्रलम्भ इति वक्तव्ये तदेकदेशोपादानं भाष्ये कुत इति चेत् । न । विप्रयोगस्याभिलाषविरहेर्ष्याप्रवासशापहेतुकत्वेन पञ्चविधस्य सङ्गमप्रत्याशाकालीनास्तदनुत्पादो विप्रलम्भ इति लक्षणलक्षितस्याद्यावयवोऽभिलाष इच्छारूपः द्वितीयो विरहः । देशैक्येपि गुर्वादिपारतन्त्र्यम् । अन्यासङ्गिनि प्रिये कोप ईर्ष्या । प्रवासो वैदेश्यम् । उत्पादिकोपनियन्त्रणं शापः वाग्दण्डः । विप्रलम्भलक्षणे प्रत्याशा प्राप्तिनिश्चयः । तत्रोद्धवस्य 'अत्रागतोऽहं विरहातुरात्मे'ति वाक्याद्विरहेऽन्तर्भावि सर्वं भवतीति विरहस्य भागवतमते मुख्यत्वात् । अन्यथा प्रवासहेतुके विप्रलम्भे विरहहेतुकत्वं विरुद्धमुक्तं स्यात् । सर्वस्मिन्नात्मभावः परम्परया यत्र विरहे स सर्वात्मभावः । संयोगवद्विप्रयोगेपि सर्वात्मभावं वक्तुं **तत्रेत्यारभ्य इत्यादिनेत्यन्तं** भाष्यं **ततः संयोगभाव** इत्यादिभाष्येण सुखान्वितमपि ह्यग्रेतनश्रुत्या तदेव भाष्यं संयोज्य 'सर्वात्मभावस्वरूपमेवोक्तं भवती'ति भाष्यमावृत्त्या पुनर्योजयन्तिस्म **विधेति** । विधात्रयमात्मादेशाहङ्कारादेशात्मादेशरूपम् । अहङ्कारस्य पुरुषविधब्राह्मण आत्मतः प्रथममुत्पत्तिदर्शनात् । जीववाचकस्याहङ्कारस्य प्रयोगः, न तु सन्निपातलक्षणैकदेशस्यास्मत्पदवाच्यस्य हेयस्य । लक्षणं तु 'सन्निपातस्त्वहमिति ममेत्युद्धव या मति'रिति । न चोक्तोन्मादोत्पादकः सन्निपातोऽस्त्विति शङ्क्यम् । भेदांशे तस्याविरोधात् । भक्तानामन्तराभूतस्याभेदस्यादानादयं ब्रह्माभिप्रेतोऽहेय एव । तदुक्तं सुबोधिन्यां 'कृत्वाऽतरन् वत्सपदं स्म यत्प्लवा' इत्यस्य । भेदः संसारः । सुबोधिन्यां **भूम्नोपीति** । न च निरोधलक्षणोक्तनिरोधस्य भूमपदवाच्यत्वेन स्फूर्तिविषयस्य कथं भूमपदवाच्यत्वमितिशङ्क्यम् । भक्तिहंसोक्तदिशा सर्वात्मभावान्तःपातिनोपि स्फूर्तिविषयस्य भूमत्वात् । **पूर्वोक्तेति** । एवंपदेन पूर्वोक्तेत्यादिरित्यन्वयः । पूर्वपरामर्शार्थिक एवकारः । **फलमिति** । 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः, स स्वराड् भवती'ति श्रुत्या

आत्मादेश' इत्यादिना। ततः संयोगभावे सति पूर्वभावेन सर्वोपमर्दिना स्वप्राणादिसर्वतिरोधानेनाग्रिमलीलानुपयोगित्वं न शङ्कनीयम्, यतो भगवत एव सर्वसम्पत्तिरित्याशयेन 'तस्य ह वा एतस्यैवं पश्यत' इत्युपक्रम्य 'आत्मत एवेदꣳ सर्व'मित्युक्तवान्। ततः श्लोकैस्तद्भावस्वरूपमुक्त्वैतस्य मूलकारणमाह 'आहारशु-

भाष्यप्रकाशः।

वदति, तेन 'कर्म फलार्थत्वा'दिति न्यायात्तादृशफलजनकं यद्विधात्रयकर्मकं ज्ञानं तदत्र महिमत्वेन फलति। तथाचात्राग्रे आत्मरत्यादिपदै रतिक्रीडामिथुनानन्दानां रसरूपं भगवन्तं भजत एव धर्माणामुक्तत्वात् दृष्टश्रुतविज्ञातभगवत्को रसस्य संयोगविप्रयोगाभ्यां द्विधानुभवविषयत्वाद्विरहभावेऽतिविगाढभावेनोक्तरीत्या सर्वत्र तत्स्फूर्तिमान् भक्तो भूममहिमाधारत्वेन सिद्ध इति तस्य या स्फूर्तिः सोक्तरीतिकसर्वात्मभावव्यभिचारिभावरूपैव, नान्यविधेति तेन भगवति विगाढभावरूपं तत्स्वरूपमेवात्रोक्तं भवतीत्यर्थः।

एतदेव फलतोपि निगमयितुं, 'तस्य ह वा एतस्ये'त्यादेर्ग्रन्थस्य तात्पर्यमाहुः तत इत्यादि। तथाच विरहभावानन्तरं संयोगभावे असति पूर्वभावेन विरहात्मकेन तथेति वृथैवेदं सर्वमिति शङ्कानिरासाय 'तस्य वा एतस्ये'त्यादिना भगवत एव सकाशात् सर्वस्थितिमुक्तवान्, अतो विरहेण सर्वोपमर्दाभावाल्लीलोपयोगसिद्धिरिति, सापि तादृशभक्ततद्भावयोर्गमिकेत्यर्थः। एतदेव सङ्ग्रहग्रन्थतात्पर्यकथनेन दृढीकुर्वन्ति ततः श्लोकैरित्यादि। श्लोकास्तु 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्। सर्वꣳ हि पश्यः पश्यति सर्वमाप्नोति सर्वश इति। स एकधा भवति त्रिधा भवति पञ्चधा। सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः। शतं च दश चैकश्च सहस्राणि च विꣳशतिः। आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिप्रतिलम्भे

रश्मिः।

फलमित्यर्थः। **न्यायादिति**। अयं न्यायः पूर्वमीमांसायां तृतीयाध्याये वर्तते 'कर्माण्यपि जैमिनिः फलार्थत्वा'दिति सूत्रसिद्धः। कर्माण्यपि शेषाणि फलार्थत्वात् पारार्थ्यस्य शेषलक्षणत्वादिति जैमिनिः सिद्धान्तवक्ता आहेति सूत्रार्थः। **विधात्रयेति**। 'एवं पश्य'न्नित्यस्य विधात्रयं पश्यन्नित्याद्यर्थात् विधात्रयेत्यादिः। ज्ञानं क्रिया कर्मेति यावत्। ननु कथं ज्ञानं कर्मेति चेत्। न। 'भूवादयो धातव' इत्यस्य सूत्रस्य 'क्रियावाचिनो भ्वादय' इत्यर्थात्। **अत्रेति**। विरहे। **उक्तेति**। भाष्योक्तरीतिकनिरोधात्मकसर्वात्मभावेत्यर्थः। **तेनेत्यादि**। विगाढभावस्यातिविगाढभावस्य रूपं व्यवहारो ज्ञानं येन सर्वात्मभावेनेति बहुव्रीहिः। **विरहभावेपीत्याद्युक्तग्रन्थात्**। **विरहभावेऽतिविगाढभावेनेति** पाठः। तत्र विरहभावेऽतिविगाढभावेनेति भाष्यात्। **तत्स्वरूपं** सर्वात्मभावस्वरूपम्। एवकारेण 'सर्वात्मभावं विदध'दिति नवमस्कन्धवाक्ये 'सर्वस्मिन्नात्मभावो यत्र क्रियाकलाप' इति श्रीधरीग्रन्थेन सर्वस्मिन्नात्मभाव इति समासावेदकश्रीभागवतेन चास्यार्थस्येतरार्थापेक्षया प्रामाणिकत्वादितरेऽर्था व्यावर्त्यन्ते। **यथैतेनेत्यादि**भाष्ये एवकारेण 'मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रया' इत्यादिना भ्रमरगीतोक्तश्रीनन्दसर्वात्मभावस्य 'वन्दे नन्दव्रजस्त्रीणा'मित्यत्र नन्दव्रजस्त्रीत्वेन तासामपि वक्तुं शक्यत्वेन 'आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति श्रुत्या च सर्वः सर्वेन्द्रियसम्बन्धी आत्मनोऽन्तःकरणस्य भाव इति षष्ठीतत्पुरुषगर्भितकर्मधारयार्थस्येतरार्थापेक्षया प्रामाणिकत्वादितरेऽर्था व्यावर्त्यन्ते, तद्वत्। **अर्थ** इति। तत्रायमर्थ इत्यत्रत्यार्थमुद्दिश्यैतादृशार्थत्वं विधीयत इति तत्रायमर्थ इति न वाक्यान्तरमिति न वाक्यभेदः। **गमिकेति**। तादृशभक्तभाववान् आत्मतः पुष्टिमार्गीयप्राणादिसर्वसम्पत्तेः।

द्धा'वित्यादिना । प्राणपोषको ह्याहारः, तस्य सदोषत्वे तु न किञ्चित् सिध्यति ।

भाष्यप्रकाशः

सर्वग्रन्थीनां प्रविमोक्ष' इति । अर्थस्तु, पश्यः उक्तविधया भूमदर्शनवान् मृत्युरोगौ न, दुःखभावं च न पश्यति, उतेति पादपूरणे, अथवा पक्षान्तरे, दुःखसत्तामेव न पश्यति, का वार्ता मृत्युरोगयोः । तत्र हेतुमाह । हि यतो हेतोः सर्वं भूमात्मकं पश्यो भूमद्रष्टा पश्यति । तेन दुःखादिकं न पश्यतीति । तस्य फलमाह । सर्वशः सर्वेण सर्वमाप्नोतीति न तस्य पुनः शोकः । प्राप्तौ, प्रकारमाह 'स एकधे'त्यादि । अनेन 'आत्मत आविर्भावतिरोभावा'विति यत्पूर्वमुक्तम्, तस्य प्रकार आविर्भावप्रकारोक्तिद्वारा विवृतः । स भूमैव उक्तप्रकारैः प्रकटो भवन् पश्यस्य सर्वं प्रापयतीति । अथवा । पश्य एव भगवतः सकाशात्तत्तदनुभवार्थं तथा प्रकटीभवतीति बोध्यः । मध्ये, द्विधा चतुर्धा षोढा अष्टधा दशधेत्यादिप्रकारत्यागस्तु तिरोभावप्रकारबोधनार्थः । विशेषतस्तु तादृशाधिकाराभावान्न विवेचितुं शक्य इति नोच्यते । तेन विरहसामयिकदशैव बोध्यत इति हृदयम् । एवमग्रेपि भगवत्कृपया बोध्यम् । एतस्य सर्वस्य मूलकारणमाहारशुद्धिः । सा च 'त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तव मायां जयेमही'तिप्रकारेण भगवद्दत्तप्रसादेन भवन्ती सत्त्वं शोधयति । तच्छुद्धौ सत्यां ध्रुवा पूर्वावस्थास्मृतिः । तस्याः प्रतिलम्भे अविद्याकामकृतानां सर्वासां ग्रन्थीनां प्रकृष्टो ज्ञानितोऽप्यधिको विमोक्ष इति ज्ञेयः । अतः परं श्रुतिरेतस्य ज्ञानस्य यस्मैकस्मैचिददेयत्वायाह 'तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमार' इति । तथाच सोपि दर्शयति, न

रश्मिः ।

आत्मसृष्टौ ह्यात्मतस्तादृशभक्तभावरहितानामप्यात्मतः प्राणादिसर्वसम्पत्तेर्हेतोः साधारण्यवारणाय **पुष्टिमार्गीयेति** । 'निपातः पादपूरणे' इति निरुक्तेनोतपदार्थमुक्त्वा ग्रन्थान्तरानुरोधेनाहुः **अथवेति** । भूमात्मकं सुखात्मकम् । **सर्वेणेति** । उपनिषद्व्याख्यानेपि 'बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्' इति पाणिनिसूत्रात् सर्वदाता सर्वशःपदार्थो बहुशःपदार्थ इति सर्वेणेत्यस्य सर्वदातृत्वेनापि प्रकारेणेत्यर्थः । **तिरोभावेति** । श्रुतार्थापत्त्या तिरोभावप्रकारबोधकः । पूर्वमाविर्भावादेकधा सत्यज्ञानानन्तानन्दरूपम् । इह तु 'सच्चिदानन्दता स्वत' इति निरोधलक्षणग्रन्थवाक्यादेकधा । पश्चाद्द्विधा सत्यानन्दत्वप्रकाराभ्यां तिरोभावः । ज्ञानमात्रप्रकाराभ्यां स्थितिः । एकधायां लीलाविशिष्टत्वविधाभक्तिविशिष्टविधयोः प्रवेशे त्रिधा । तेजोऽबन्नरूपेण वा । सर्वात्मभावे संयोगोपि वर्तत इति गौरत्वश्यामत्वातिश्यामत्वप्रकारैर्वाविर्भवति । एवमग्रेपि । न च 'स्वप्राणादिसर्वतिरोधानेने'ति भाष्यात् प्राणादिप्रकारो वक्तुं योग्य इति शङ्क्यम् । पूर्वं भक्तस्य सायुज्यादिदशायां तथात्वेन पञ्चधा भवनादौ तन्निवेशस्य सुकरत्वाददृष्टः कथं कल्प्येत । **विवेचितुमिति** । महाकविप्रयोगोऽयं काव्यप्रकाशे । अतो विवेक्तुमिति नोक्तम् । विगतं वं सुखं यस्मिन्निति विवः प्रपञ्चः तस्मिन् अचितुं पूजयितुमिति वा । **नोच्यते इति** । विशेषाकाङ्क्षायां 'सदा सर्वात्मभावेन भजनीयो व्रजाधिप'इति वदद्भिः प्रभुभिस्तथैव सेवित इति तद्ग्रन्थात् तर्कणीयो विशेषः । **तेनेति** । प्राणादिसर्वतिरोधायकप्रकारबोधनेन । **पूर्वेति** । 'जातिं स्मरति पौर्विकी'मिति मनुः । 'सोऽह' मित्याकारिका व्युच्चरणात् पश्चादविद्यासम्बन्धात् पूर्वेति **प्रस्थानरत्नाकरे** 'जीवस्यानुस्मृतिः सती'ति वाक्यात् । 'स्मृतिर्भक्ति'रिति रामानुजाचार्याः । **ग्रन्थीनामविद्याजनितरागादिग्रन्थीनाम्** । सर्वात्मभावफलत्वेन 'स स्वराड् भवती'ति श्रुत्युक्तोऽर्थो व्याख्यातः, पूर्वं 'सर्वग्रन्थीनां प्रविमोक्ष'स्तु सिद्धान्तमुक्तावल्यां 'ततः संसारदुःखस्य निवृत्ति' रित्यनेनोक्तः ।

एवं सति भगवदतिरिक्तस्य स्वतो निर्दोषत्वाभावाद्भगवानेव चेत्प्राणपोषको भवेत्, तदा सर्वं सम्पद्यते। स च सर्वात्मभावे सत्येव भवति। स च तथा तद्वरणं विना न भवति। तथोक्तकार्यानुमेयमिति वरणलिङ्गं सर्वात्मभावः, तस्यैव

भाष्यप्रकाशः।

तु दातुं शक्नोति, एतस्य भगवत्परमकृपाप्राप्यत्वात्। तर्हि कथनमपि कुत इत्याकाङ्क्षायां सनत्कुमारस्य कृपालुत्वमाह 'तं स्कन्द इत्याचक्षत' इति। योऽसौ वरदानेन शिवस्य पुत्रोपि जातस्तेन तथेत्यर्थः। द्विरुक्तिः समाप्त्यर्था। तदेतत् सर्वं हृदिकृत्य आहुः एवं सतीत्यादि। एवं श्रुतितात्पर्यमुक्त्वा सूत्रं व्याकर्तुमाहुः स चेत्यादि। स भगवांश्च प्राणपोषकः सर्वात्मभावे सत्येव भवति। स सर्वात्मभावश्च तथा अत्यनुग्रहेण तस्य जीवस्य वरणं विना न भवति, तत् वरणं च भगवत्कृतप्राणपोषणानुमितसर्वात्मभावरूपकार्यानुमेयमिति वरणलिङ्गं सर्वात्मभावः

रश्मिः।

सोऽवान्तरफलमिति तट्टीकायाम्। परमेति। विरहसामयिकसर्वात्मभावदातृत्वं पारम्यं कृपायाम्। तथा च प्रदानवत्सूत्रभाष्यम्, 'सर्वात्मभावस्यानुभवैकवेद्यत्वेन पूर्वमज्ञानेनेति तत्त्वासम्भवेपि स्वत एव कृपया दान'मिति। वरदानेनेति। क्वचित् प्रसिद्धं पुत्रभवनम्। द्विरिति। 'वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेष्वि'ति सूत्रेण सम्मतौ द्विर्वचनं वाक्यादेरामन्त्रितस्य। 'स्कन्दिर् गतिशोषणयोः'। भ्वादिरनिट्। स्कन्दस्य शिवपुत्रत्वे। वरदातुः पितुर्वा शोकशोषकत्वम्। तद्योगरूढ्या। रूढ्यभावे तु नागयज्ञोपवीतिन्यपि स्कन्द इति प्रयोगापत्तिः पुराणमते, श्रौते तु मते वेदान्तत्वेन योगमात्रादरणात् स्कन्दति प्रकरणात् शोकम्, शोषकः 'तरति शोकमात्मवि'दिति श्रुतेः शोकस्य। इति न रूढ्यपेक्षा। इत्थं च द्विरुक्तिश्चरमवर्णध्वंसरूपसमाप्त्यर्था, श्रौतपौराणमतातिरिक्तमताप्रतिपाद्यत्वात्। श्रुतितात्पर्यमिति। यथाहुरुपनिषद्व्याख्यानकारा विश्वेश्वराः 'पूर्वप्रपाठके श्रेष्ठाधिकारिणं प्रत्येवं ब्रह्मात्मतत्त्वमुपदिष्टम्, अथोत्तरप्रपाठके मध्यमाधिकारिणः प्रति शाखाचन्द्रन्यायेन ब्रह्मणि बुद्धिस्थिरीकरणार्थं सोपानारोहणन्यायेन बोधनार्थं नामादिप्राणान्तसङ्कीर्तनद्वारा भूमाख्यं निरतिशयं तत्त्वं निरूप्यते' इति प्रपाठकाभासे। तद्भाष्ये पूर्वविकल्पसूत्रस्य निराक्रियते, तथापि 'अधीहि भगवो ब्रह्मे'त्यादिप्रपाठके नामादिप्राणान्तसङ्कीर्तनेन माहात्म्यज्ञानस्याक्षुण्णतया पूर्वप्रपाठकेनात्माभेदज्ञानस्य जातत्वेन सर्वात्मभावरूपमुख्यभक्तौ तात्पर्यम्। 'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया, तदध्यवसत् कूटस्थो रतिरात्मन्यतो भवे'दिति शास्त्रार्थनिरूपके द्वितीयस्कन्धे वाक्यात्। न च यत्र 'नान्यत् पश्यती'त्यादेस्तु श्रुतेर्मुख्यभक्तावभिधावृत्तिरस्तु, किं तात्पर्येणेति चेत्, न। उक्तश्रुत्यभिधावृत्तिप्रतिपाद्यसर्वात्मभावेऽन्यासां श्रुतीनां तात्पर्यमुक्त्वेत्यर्थात्। अत्रीति। सर्वात्मभावोक्तिसन्दर्भे पुष्टिभक्तेरपि सत्त्वात् पुष्टिभक्तिकारणं सर्वात्मभावस्यापीत्याशयेनोक्तं सामान्यतो विशेषाकाङ्क्षायाम्। परमकृपयेति बोध्यम्, 'स्वत एव कृपया दान'मित्युक्तभाष्यात्। क्वचिद्भाष्ये तेन प्रकारेणेत्यर्थ इति तथापदार्थोपि दृश्यते। विनेति। 'यमेवैष वृणुत' इति श्रुतेः। भंगेत्यादि। सर्वात्मभाववान् भगवत्कृतप्राणपोषणात्। इत्येवमनुमितः भक्तः सर्वात्मभाववानित्यनुमितिविषयीकृतः सर्वात्मभावस्तद्रूपं कार्यं तेनानुमेयं वरणवान् सर्वात्मभावादित्येवमनुमातुं योग्यमिति हेतोस्तथा। तस्येत्यादिभाष्यं विवृण्वन्ति स्म। 'प्रभूतार्थे त्वनव्यय'मिति विश्वादाहुः सर्वत इत्यादिभाष्यार्थम्। भूयस्त्वादिति। पदेनानेन भूधातुघटितेन 'फलमत उपपत्ते'रिति सूत्रसंवादार्थं एकादशसर्वस्वसर्वात्मभावमनुभवतां भूम-

भूयस्त्वात् सर्वतोऽधिकत्वात्तद्वरणमेव सर्वतः कालादेर्बलीय इत्यर्थः । यल्लिङ्गमेव सर्वतोऽधिकम्, तस्य तथात्वे किं वाच्यमिति कैमुतिकन्यायोपि सूचितः । ज्ञानमार्गीयज्ञानेन प्रतिबन्धशङ्कायामाह तदपीति । उक्तमिति शेषः । ‘अन्तरा भूतग्रामवत्स्वात्मन’ इति सूत्रेण । तत्रोपपादितमस्माभिः ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥

तत्राह, नात्र वरणलिङ्गभूयस्त्वं निरूप्यते, किन्त्वात्मज्ञानप्रकारविशेष एव । तथाहि । पूर्वप्रपाठक आत्मना सहाभेदः सर्वस्य निरूपितः श्वेतकेतूपाख्यानेन, अग्रिमे च ‘सोऽहं भगवो मन्त्रविदेवास्मि नात्मवि’दित्यादिना नारदस्यात्मजिज्ञासैवोक्ता । एवं सत्युत्तरमपि तद्विषयकमेव भवितुमर्हति, अत आत्मप्रकरणत्वादुभयोः प्रपाठकयोः पूर्वस्मिन् यदभेद उक्तः, तस्यैव स्वरूपं ‘आत्मत एवेदꣳ सर्व’-

---

भाष्यप्रकाशः ।

सर्वतोऽधिक इति तस्य वरणमेव कालादिभ्यो बलिष्ठम् । अतः कालादिरूपप्रतिबन्धकसद्भावेपि तत्कार्यं भवत्येवेत्यर्थः । एवमत्र प्रदानवत्सूत्रोक्तसर्वात्मभावस्वरूपं सफलं श्रुत्या विवेचितं बोध्यम् । हिशब्दसूचितमर्थमाहुः यल्लिङ्गेत्यादि । सूचित इति । निश्चयार्थकहिशब्दप्रयोगेण सूचितः । सूत्रशेषमवतारयन्ति ज्ञानमार्गीयेत्यादि । आत्मादेशे ‘आत्मैवेदं सर्व’मिति सर्वस्यात्मत्वेन भानं श्रावितम् । तथा सति स्वात्मन्यपि तदभेदो भासत्येव । भाते च तस्मिन् विरहभावप्रतिबन्धादुक्तरूपः सर्वात्मभावो ज्ञानमार्गीयज्ञानप्रतिबद्धो नोदेष्यतीति शङ्कायामाहेत्यर्थः । समाधिं व्याकुर्वन्ति अन्तरेत्यादि । पूर्वं भजनानन्दरूपफलदित्सायां सत्यां हि भगवता विरहभावः सम्पाद्यत इति तत्प्रतिबन्धकं न क्रियत इति तस्मिन्नधिकरण एवोपपादितमिति सा शङ्का तदनुसन्धानेनैव निवार्येत्यर्थः ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥ पूर्वोक्तमर्थं दृढीकर्तुं सूत्रद्वयेनाशङ्कते इत्याशयेनावतारयन्ति तत्राहेत्यादि । उक्त इतीत्यन्तम् । तत्राहेति । उक्तेऽर्थे पूर्वपक्षी चोदयति निरूपित इति । ‘ऐतदात्म्यमिदं सर्व’मिति महावाक्ये निरूपितः । उत्त-

रश्मिः ।

लक्षणं स्मार्यते । तेन विषयः प्रपाठको भवति । भूमपदस्य भूधातुघटितत्वात् । सर्वत इति । इतिहेतौ । तस्य भक्तस्य तत् वरणमेव वक्ष्यमाणकैमुतिकन्यायप्राप्तमेव । कालादिभ्य इत्यत्रादिपदेनादृष्टशीघ्रबोधोक्तसेवाचक्रादि संगृह्यते । भवत्येवेत्येवकारोऽन्यत्रादृष्टसिद्धान्तेऽयोगव्यवच्छेदकः । नीलं सरोजं भवत्येवेतिवत् । एवमित्यादि । विवेचितमिति । महाकविप्रयोगादिदृ । विवे अचितमिति वा । ‘अञ्च गतिपूजनयोः ।’ ‘अच इत्येके’ इत्यस्य सेट्त्वात् । हीति । ननु सर्वात्मभावनिरूपणस्योपक्रान्तत्वात् सर्वात्मभावस्य कालादिभ्यो बलिष्ठत्वेन तत् सर्वात्मभाव एव कालादेर्बलीय इति भाष्यपाठापत्तिः, सा च सर्वात्मभावस्य पुल्लिङ्गत्वादयुक्ता । तत्पदस्याव्ययत्वेन तदनुरोधेन बलीय इत्येव नपुंसकत्वसमर्थने बलीयःपदस्य विशेष्यनिघ्नत्वेन बलीयानिति भाष्यपाठापत्तिरिमामाशङ्कां परिजिहीर्षवो हीत्यादिः । सूचितमिति । वाच्यार्थं तु निश्चयात्मकं स्वयमेव वक्ष्यन्ति तस्मिन्निति । सायुज्यात्मकाभेदातिरिक्तेऽभेदे । ज्ञानमार्गीयेति । ज्ञानविशेषणाद्भाष्ये ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥ तत्राहेति । क्वचिद्भाष्येऽत्राहेति पाठः । अर्थस्त्वेक एव । चोदयतीति । स्मेति शेषः । भाष्ये आहेति लिडन्तप्रयोगात्

मित्यन्तेनोक्तमिति पूर्वोक्तप्रकारादन्येन प्रकारेणात्माभेद एव सर्वस्योक्तः । तदेवाह । पूर्वस्य पूर्वप्रपाठकोक्तात्माभेदज्ञानस्य विकल्पः प्रकारभेद एवाग्रेपि निरूप्यते । तत्रोपपत्तिमाह प्रकरणादिति । एतत्तूपपादितम् । अत्र सिद्धान्तिसम्मतमेव दृष्टान्तमाह तद्धृदयसंवादार्थं क्रियामानसवदिति । यथा पूजनप्रकरणे बाह्यं तत्क्रियारूपमुच्यते, आन्तरं तु मनोव्यापाररूपमुच्यते । न ह्येतावतान्यतरस्य तद्भिन्नत्वं वक्तुं शक्यम् । प्रकरणभेदात् । तथेहापीत्यर्थः ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥

नामरूपात्मकं हि जगत्, तत् पूर्वं सर्वशब्देनानूद्य तस्मिन् ब्रह्माभेदो निरूपितः, अग्रे तु ऋगादिविद्या अनूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते ।

भाष्यप्रकाशः ।

रमिति । सनत्कुमारोक्तं प्रत्युत्तरम् । व्याकुर्वन्ति तदेवाहेत्यादि । अग्रेपीति । नवमेऽस्मिन् प्रपाठके । उपपादितमिति । अवतारणग्रन्थ उपपादितम् । बाह्यं तदिति । बाह्यं पूजनम् । तद्भिन्नत्वमिति । पूजनभिन्नत्वम् ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥ व्याकुर्वन्ति नामेत्यादि । नामरूपात्मकं हि जगत्, तत् पूर्वं पूर्वस्मिन् प्रपाठके ‘ऐतदात्म्यमिदं सर्व’मिति सर्वपदेनानूद्य, तस्मिन् ब्रह्माभेद ऐतदात्म्यपदेन निरूपितः । अग्रे अस्मिन् प्रपाठके तु, ‘यद्वै किञ्चाध्यगीष्ठा’ इत्यादिना नारदोक्ता ऋगादिविद्या

रश्मिः ।

अस्य च तद्व्याख्यानत्वात् । धातूनामनेकार्थत्वात् । भाष्ये । अन्येनेति । शाखासदेशे चन्द्रशाखाशब्दवज्जीवान्तर्यामितया जीवसदेशे ब्रह्मणि त्वमिति व्यपदेशः । ‘य आत्मनि तिष्ठ’न्नित्यादिश्रुतेरिति प्रकारेणेत्यर्थः । यद्वा । ‘ब्राह्मणोऽस्य मुखमासी’दितिवत्ततो जातत्वात्तदिति व्यपदेशः । ‘इग्यणः सम्प्रसारण’मित्यत्र ‘काकात् जातः काकः, श्येनात् जातः श्येनः, एवं सम्प्रसारणात् जातो वर्णः सम्प्रसारण’मिति महाभाष्योक्तेः । ‘सन्मूलाः सौम्येमाः सर्वाः प्रजाः’ इति वाक्यशेषाच्च । ‘ब्राह्मणो मुखमित्येवं मुखात् जातत्वहेतुतः । यथावदच्छ्रुतिस्तद्वज्जीवो ब्रह्मेति वा भवे’दितिस्मृतेश्चेति प्रकारेणेत्यर्थः । अन्येपि प्रकारा भक्तिमार्तण्डे सन्तीति ततोऽवधेयाः । परन्तु शाखाचन्द्रन्यायः शाङ्कराणां प्रसिद्धः । ततो जातत्वनिबन्धनं तदिति पक्षोपि ‘आत्मत एवेद५ सर्व’मिति श्रुतिमापातत उपजीवति । ततो द्वौ प्रकारौ युक्तौ ।

प्रकृते । नवम इति । नवमप्रपाठक इति वाक्यात् । अङ्कतः सप्तमः । अत्रेति । तत्राहेत्याद्यवतारणग्रन्थ इत्यर्थः । क्वचित्पुस्तके ‘तथाचायमर्थ[1] इत्याद्याहे’त्यन्तो ग्रन्थः, स उपेक्ष्यः, मूलपुस्तकेऽदर्शनात् । सर्वात्मभावप्रकरणानादरे बीजाभावात् । ज्ञानप्रकरणस्य पूर्वपक्षिसम्बन्धित्वेपि ‘हि आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये’ति समासिस्थश्रुतेः ‘एतज्ज्ञानमिति प्रोक्त’मित्यव्यभिचारिणीं भक्तिं मध्येकृत्य गीतावाक्याच्च ‘यत्र नान्यत् पश्यती’त्यस्या असन्दिग्धत्वान्महाप्रकरणाविरोधात् सर्वात्मभावस्य गीतामते ज्ञानत्वेन । एतदेवेति । महाप्रकरणत्वमेव । स्पष्टत्वान्न व्याक्रियते ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥ ऋगादिविद्येति । अत्र छान्दोग्ये विद्यापदाभावेपि मुण्डके ‘द्वेविद्ये

---

[1] ‘तथाचायमर्थः । अत्र हि चरणलिङ्गं सर्वात्मभावो न भूमलक्षणवाक्यमात्रेण सिध्यति, येन प्रकरणमनादृत्य स गृह्येत, किन्तु तदारभ्य ‘आत्मत एवेदं सर्वं’मित्यन्तेन सन्दर्भेण, अतः सन्दर्भो यथा सर्वात्मभावबोधकमवान्तरप्रकरणम्, तथा प्रपाठकद्वयात्मबोधकं महाप्रकरणम् । तदा भूमलक्षणवाक्यस्य सन्दिग्धत्वात् प्रपाठकद्वयरूपं महाप्रकरणमेवानुसर्तव्यमित्यर्थः । एतदेव द्रढीकर्तुं हेत्वन्तरमाह ।’ अयं भागः श्रीपुरुषोत्तमैः स्वयमेकवारं लिखित्वा पश्चात् लोपितो मूलपुस्तके दृश्यते ।

'नामैवैतन्नामोपास्स्वे'ति। इतोपि हेतोर्ज्ञानप्रकारभेद एवाग्रे निरूप्यत इत्यर्थः ॥४६॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥

तुशब्दः पूर्वपक्षं व्यावर्तयति । यदुक्तं सनत्कुमारनारदसंवाद आत्मज्ञानप्रकारविशेष एव निरूप्यत इति, तन्न, किन्तु विद्यैव निरूप्यत इति ।

अत्रेदमाकूतम् । 'नायमात्मे'ति श्रुतिरितरसाधननिषेधपूर्वकं वरणस्य

भाष्यप्रकाशः ।

अनूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते । तथैव मनःप्रभृतिरूपात्मकं जगत्तत्तच्छब्देनानूद्य तत्तदात्मकब्रह्मत्वं तत्रादिश्यते । अतो यथा कौण्डपायिनां सत्रे 'मासमग्निहोत्रं जुहोती'त्यग्निहोत्रनाम्ना प्राकृताग्निहोत्रधर्मास्तत्रादिश्यन्ते, तथात्र 'नामोपास्स्वेति स यो नाम ब्रह्मेत्युपास्त' इत्यादिवाक्यैर्नामादीञ्जगद्रूपाननूद्य नामादिशब्दैस्तत्तदात्मकब्रह्मत्वं तेष्वतिदिश्यत इत्यतिदेशादपि हेतोर्ज्ञानप्रकारविशेष एवाग्रेऽस्मिन् प्रपाठके निरूप्यत इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥ उक्तं पूर्वपक्षं सूत्रव्याख्यानेन निरस्यन्ति **तुशब्द** इत्यादि । ननु विद्याशब्दो ज्ञानसामान्ये प्रसिद्धः, सर्वात्मभावस्वरूपे ज्ञानविशेषे कथं नियम्यत इत्याकाङ्क्षायां तदुपपादनाय वरणादिश्रुत्येकवाक्यतया प्रकृतश्रुतितात्पर्यं वक्तुं पूर्वं वरणश्रुतिं व्याकुर्वन्ति **अत्रे**त्यादि । अस्यां उक्तायां श्रुतौ वरणश्रुत्यविरुद्धं तात्पर्यं तस्माद्वरणश्रुत्यर्थ उच्यत इत्यर्थः । वरणश्रुतिस्तु 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते

रश्मिः ।

वेदितव्ये' इत्युपक्रम्य, 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद' इति श्रुतेर्विद्यापदप्रयोगोऽस्ति । **अतिदिश्यत** इति । 'नामैवैतन्नामोपास्स्वे'ति श्रुत्यातिदिश्यत इत्यर्थः । नन्वत्र नामत्वमतिदिश्यते, न नामात्मकब्रह्मत्वमिति चेत् । न । 'स यो नामब्रह्मेत्युपास्त' इति पूर्वार्थानुवादकश्रुत्या नामोपासनस्य नामात्मकब्रह्मोपासनत्वात् । अतिदेशस्तु अन्यत्र । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति प्रतिपाद्ये ब्रह्मणि प्रतीतस्य ब्रह्मत्वस्यान्यत्र नाम्नि कार्यत उपासनायाः प्राप्तिः । तदुक्तं पूर्वाचार्यैः । 'अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः । अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयत' इति । प्राकृताद्ब्रह्मोपासनाख्यात् तत्समानेषु नामोपासनकर्मसु धर्मप्रवेश आज्ञाविषयप्रवेशो 'नामैवैतन्नामोपास्स्वे'त्यनेन स्यात् स वेदो वातिदेशः । 'प्राकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु । धर्मप्रवेशो येन स्यात् सोतिदेश इति स्मृत' इति तैरेव । **तत्तच्छब्देनेति** । मनःप्रभृतिशब्देन तच्छब्दस्य द्विरुक्तावप्यर्थस्यैक्यात् । स च स चेति विग्रहे एकशेषापत्तिः । **तत्तदिति** । मनःप्रभृत्यात्मकब्रह्मत्वम् । **अत** इति । अतिदेशात् । **मासमिति** । अत्यन्तसंयोगे द्वितीया । **अग्निहोत्रेति** । द्वितीयलक्षणादेरणातिदेशरूपेण । **तत्रेति** । मासाग्निहोत्रे । **अतिदिश्यन्त** इति । प्रथमलक्षणेन पूर्वतन्त्रे सप्तमस्य तृतीये पादे उक्ताधिकरणेऽतिदेशा धर्मनिष्ठाः क्रियन्ते । सूत्रं तु उक्तम्, 'क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्या'दिति । चतुःसूत्रमिदमधिकरणं भाष्ये प्रसिद्धम् । भाष्ये 'सायमग्निहोत्रं जुहोती'ति पपाठ भाष्यकृत् । **ज्ञाने**त्यादि । ब्रह्मत्वप्रकारकनाममनःसङ्कल्पादिविशेष्यकज्ञानप्रकारविशेष इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥ इदम्पदार्थमाहुः **वरणेति** । आकूतपदार्थमाहुः **तात्पर्यमिति** । भिन्नवाक्यत्वार्थं शेषं पूरयन्ति स **तस्मादिति** । **उक्त्वेति** । श्रुतिरुक्त्वा वृत-

साधनत्वमुक्त्वा वृतलभ्यत्वे हेतुं[1] वदन् वरणविषयमप्याह 'तस्यैष आत्मा वृणुते तनुं स्वा'मिति । तस्य वृतस्यात्मन एष भगवानात्मा, अत एव तत्तनूरूपः स जीवात्मा । तद्वरणस्यावश्यकत्वज्ञापनाय स्वामिति । सर्वो हि स्वकीयां तनुमात्मी-

---

भाष्यप्रकाशः ।

तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वा'मिति मुण्डके कठवल्ल्यां चास्ति । विवृणुत इति पाठान्तरं चास्ति । उक्त्वेति पादत्रयेणोक्त्वा । अत एवेति । भगवतो वृतात्मात्मत्वादेव । तथाच तस्यैष आत्मा सम्बर्थात्तं स्वां तनुं वृणुत इत्यन्वयः । ननु माध्यन्दिनानामन्तर्यामिब्राह्मणे 'यस्यात्मा शरीर'मिति सामान्यत आत्ममात्रस्य ब्रह्मशरीरत्वश्रावणात् कथं वृतस्यैव तत्तनूरूपत्वमित्याकाङ्क्षायामाहुः तद्वरणस्येत्यादि । तथाच यद्यपि तत्र सामान्यत आत्ममात्रस्य शरीरत्वं श्रावितम्, तथापि 'य आत्मानमन्तरो यमयती'ति नियन्तव्यत्वायैव साधारण्येनैव श्रावितम्, न तु स्वकीयत्वकथनपूर्वकम् । अतः सर्वेषु शरीरत्वे साधारणेपि यं स्वीयत्येनालोचितवाँस्तमेव वृणुत इत्यर्थः । विवृणुते इति पाठेपि विशेषेण वृणुत इत्यर्थः ।

ननु विवरणपदस्य प्रकाशनार्थकत्वाद्विवृणुत इति पाठेऽयमर्थो न लभ्यते, किन्तु यं वृणुते तस्य स्वां तनुं प्रकाशयतीत्येवार्थो लभ्यत इति चेत् । मैवम् । तस्मिन्नपि पक्षे तनुविवरणलिङ्गेनोक्तस्यार्थस्य लाभात् । तथाहि । सर्वेषां जीवानां तौल्येऽप्यत्र 'यं वृणुत' इति विशेषकथनाद्वरणीये कश्चिद्विशेषो विवक्षितः । सोपि न जीवे साधारणशास्त्रीयसाधनजन्मा, पूर्वाधिकरणसङ्गत्यापत्तेः । नापि साधनाभावजन्मा, पामरपशुकीटमात्रेषु तदापत्तेः, साधनशास्त्रवैयर्थ्यापत्तेश्च । अतोन्यथानुपपत्त्या भगवदालोचनजन्मैव वाच्यः । सोपि न ज्ञानिभक्तसाधारणः । भावभेदानुपपत्तेः । 'स्वं विवृणुत' इत्येतावतैव चारितार्थ्येन तनुपदवैयर्थ्यापत्तेश्च । अतस्तनुपदानुरोधात् साकारस्यैव प्रकाशो वक्तव्यः । स तु प्रायो भक्तानामेवेति वरणविषयतया सुखेनैव भक्तो लभ्यते ।

रश्मिः ।

लभ्यत्वे हेतुं स्वात्मत्वम्, स्वात्मा ज्ञानिप्रभृतिभिर्लभ्यत इत्यलभ्यस्य लाभो वृतभक्तस्योक्तः । वदन्निति छान्दसं पुंस्त्वम् । श्रुतीनां वा सर्वात्मभावकरणात् भगवत्सेवानुकूल्यरूपं पुंस्त्वं जातमिति लीलायां प्रसादशक्तेः श्रुतिषु सत्त्वेन स्त्रीत्वविशिष्टशक्त्यवच्छिन्नश्रुतिः पुंस्त्वविशिष्टवदनकर्त्री समानाधिकरणेत्यर्थः । तादृशं पुंस्त्वं टिप्पण्यां तदादाय वेदाः प्रमाणम्, शतं ब्राह्मणा इतिवदुपपाद्यम् । सामानाधिकरण्यं च भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वम् । 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति सूत्रेण वदन्नित्यत्र शता शाब्दबोधेपि सामानाधिकरण्यमुपपादयति । वरणविषयं तनुम् । द्वितीयाया विषयार्थकत्वात् । अत्रैव श्रुतिर्वदन्निति प्रयोगः साधुः । अन्यथा मर्यादाभङ्गप्रसङ्गात् । भाष्यप्रामाण्याद्वैतादृशः प्रयोगः । वृणुत इत्यर्थ इति । न च सिद्धान्तान्तर एकव्यापकजीवपक्षस्योक्तत्वादवृतानामप्यात्मनां शरीरत्वेन वृतलभ्यालभ्यलाभापत्तिरिति शङ्क्यम् । अरूपवत्सूत्रसिद्धसिद्धान्तान्तरेपि वृतत्वाच्छेदेनालभ्यलाभाङ्गीकारात् । स्वमिति । आत्मीयम् । स्वामित्युक्ते स्त्रीत्वविशिष्टस्य स्यात्, तनुविशेषणत्वे तु भिन्नलिङ्गस्यादर्शनेन स्वामित्येव । सामान्ये नपुंसकत्वस्या(स)गतिकगतित्वात् । प्राय इति । सिद्धान्तमुक्तावलिटीकाप्रामाण्यात् 'ज्ञानिभक्तौ चेद्विशेषतोऽनुगृह्णाति पुष्टिमार्गीयां भक्तिं प्राप्नुतः । आदाविति भक्त्या व्यवधानम्, तथापि नलकूबरमणिग्रीववत् कदाचित् तयाऽव्यवधानेपि साकारप्रकाशः । कर्मठस्य सुरज्येष्ठस्यासुरव्यामोहलीलासामयिकसाकारप्रकाशः, अतः प्राय इत्युक्तम् । एवकारो 'नैषा

---

[1] हेतुत्वम् ।

यत्वेनात्मत्वेन च वृणुते, तद्विशिष्ट एव भोगान् भुङ्क्ते । अत एव तैत्तिरीयकोपनिषत्स्वपि 'ब्रह्मविदाप्नोति पर'मिति सामान्यतो ब्रह्मविदः परब्रह्मप्राप्तिमुक्त्वा, अग्रिमर्चा विशेषतोऽवदन् । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति परब्रह्मस्वरूपमुक्त्वा, 'यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'त्युक्तम् । एतद्यथा तथानन्दमयाधिकरणे प्रपञ्चितमस्माभिः ।

भाष्यप्रकाशः ।

यत्तु केचिदस्मिन् मन्त्रे 'यमेव परनात्मानमेष विद्वान् वृणुते प्राप्तुमिच्छति, तेन वरणेन एष परमात्मा लभ्यः, नान्येन साधनान्तरेण । नित्योपलब्धस्वभावत्वात् । कीदृशोऽसावात्मलाभ इति, उच्यते । तस्य एष आत्माऽविद्यासंछन्नः स्वां परां तनुमात्मतत्त्वस्वरूपं प्रकाशयति । प्रकाशे घटादिरिव विद्यायां सत्यामाविर्भवतीति मुण्डके व्याचक्रुः । यदपि काठके यमेव स्वमात्मानमेष साधको वृणुते प्रार्थयते तेनैवात्मना वरित्रा स्वयमात्मा लभ्यः ज्ञायते इत्येतत् । निष्कामश्चात्मानमेव प्रार्थयते । आत्मनैवात्मलाभ इत्यर्थः । कथं लभ्यत इति । उच्यते । तस्यात्मकामस्यैष आत्मा विवृणुते प्रकाशयति पारमार्थिकीं तनुं स्वां स्वकीयाम् । स्वं याथार्थ्यमित्यर्थ इति । तत्रापि तनुपदवैयर्थ्यस्य दुर्वारत्वात् वरणीयवरित्रोरभेदाङ्गीकाराच्च व्याख्येयविरोधः स्फुट एव । किञ्च । गीतायां 'एवं सततयुक्ता य' इत्यर्जुनप्रश्ने, भगवता 'मय्यावेश्य मनो ये मा'मित्युत्तरेण, 'चतुर्विधा भजन्ते मा'मिति भजनमुपक्रम्यैव, 'ज्ञानी त्वात्मैव मे मत'मिति ज्ञानिभक्तस्यैवात्मकत्वकथनेन, 'तपस्विभ्योऽधिको योगी'ति सन्दर्भे शुष्कज्ञान्यपेक्षया योगिन उत्कर्षमुक्त्वा, 'श्रद्धावान् भजते यो मां स मे युक्ततमो मत' इति भक्तोत्कर्षकथने चास्मदुक्तार्थस्यैवोपोद्बलनाच्च तदसङ्गतम् । अतो विवरणपदस्य प्रकाशनार्थकत्वपक्षेपि तनुप्रकाशलिङ्गेन भक्तस्यैव वरणविषयत्वं निश्चीयत इति तेष्वेव स्वीयत्वं सिध्यतीति पूर्वोक्तप्रकारे न कश्चिद्दोष इति हृदिकृत्योक्तार्थदार्ढ्याय श्रुत्यन्तरमाहुः अत एवेत्यादि । तथाच यदि लाभपदार्थः प्रकाशनरूपः श्रुत्यभिप्रेतः स्यात्, तदास्यामृचि प्राप्तिपदार्थः कामभोगरूपो नोच्येत । अतो न पूर्वोक्तेऽर्थे विप्रतिपत्तव्यमित्यर्थः । एतच्छ्रुतावपि विप्रतिपत्तिश्चेत्, तदा पूर्वग्रन्थमवलोक्य सा निरसनीयेत्याशयेन आहुः एतदित्यादि । आनन्दमयाधिकरणे अक्षरादुत्तमस्य रसरूपस्यैव

रश्मिः ।

तर्केण मतिरापनेये'ति विरोधकम् । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इत्यादिश्रुतौ वाराहवाक्याद्भक्तिप्रवेशवत् वरणश्रुतावपि भक्तिप्रवेशस्य न्याय्यत्वेन तर्काभावाद्भूते । 'वृङ् सम्भक्तौ' क्र्यादिः संविभजनार्थ इति स नोपात्तः । ननु परेषामयमर्थः, न तु वैयाकरणानाम्, सम्यक् सेवारूपसर्वात्मभावः सम्भक्तिपदार्थोऽस्तु, श्रुतौ विकरणव्यत्ययोऽस्त्विति चेत् । न । भक्तिमार्गे यद्वरणं स्वीयत्वेनाङ्गीकाररूपमिति भाष्ये विकरणव्यत्ययानङ्गीकारात् । न चेदमप्रयोजकमिति वाच्यम् । 'आचार्यवान् पुरुषो वेदे'ति श्रुतेः । इच्छतीति । ज्ञानवान् इच्छात इति ज्ञानमनुमेयम् । य इच्छति, स यतिष्यत एव । इतीति । इमं प्रश्नरूपं हेतुं विचार्य श्रुत्योच्यते इत्यर्थः । प्रकाश इति । सति सप्तमी । घटादिरिति । पूर्वं विद्यमान एवात्मतत्त्वं प्रकाशयति, तद्वत् । घटादेरुपादानविषमसत्ताकान्यथाभावरूपविवर्तत्वात् । अभेदेति । ननु भवतामप्यभेदाङ्गीकारोऽस्त्येवेति चेत् । न । भावाद्वैतेन पटस्तन्तव इत्यभेदप्रत्ययेपि तन्तवः पट इत्यप्रत्ययात् तादृशभेदमादायोपपत्तेः । नन्वभेदमादाय पाक्षिको दोष इति चेत् । न । उपष्टब्धत्वादित्याहुः किञ्चेति । रसरूपस्येति । एतेनानन्दमयाधिकरणोक्तः प्राप्तिपदार्थः, न

भाष्यप्रकाशः ।

परशब्दार्थत्वेन निर्णीतत्वात् परमव्योमत्वेन चाक्षरस्य तद्धाम्नो निर्णीतत्वाद्वरणेनैव तत्प्राप्तेरपि विचारितत्वात्तथेत्यर्थः ।

ननु वरणश्रुतिः काठके 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वदे'ति प्रश्ने, 'सर्वे वेदा यत्पदमामनन्ती'त्यादिना, 'एतद्ध्येवाक्षरं ब्रह्मे'ति प्रकृत्य पठिता । मुण्डकेपि 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्य'मित्यक्षरमेवोपक्रम्य पठिता । एवं सति पुरुषोत्तमप्रसङ्गस्य कुत्राप्यदर्शनात् कथमत्रैवं भगवत्परत्वेन व्याख्यायत इति चेत् ।

अनवधाय वदसि । काठके सर्ववेदवेद्यत्वं परस्यैवोच्यते । तत्र वाच्यवाचकाभेदविवक्षया प्रणवे वक्तुमक्षरपदेन प्रणवं परामृश्य, तत्र ब्रह्मत्वमुपासनासाधनत्वाय विधीयते मन्त्रद्वयेन । ततो 'न जायते न म्रियते वे'ति मन्त्रद्वयेनोपासकस्वरूपमुक्त्वा, 'अणोरणीयान् महतो महीया'नित्यादिमन्त्रत्रयेण तस्य परस्यात्मनो विरुद्धधर्माश्रयत्वादिकमुक्त्वा, तस्य ज्ञानं कथमित्याकाङ्क्षायां 'नायमात्मे'ति पठ्यते । अतो नात्र तद्गन्धः । मुण्डकेपि प्रथमे मुण्डके 'यत्तदद्रेश्यमग्राह्य'मित्यादिना सर्वकारणत्वेनाक्षरं प्रस्तुतम्, द्वितीयेपि 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गा' इति मन्त्रेण तस्मात् सजातीयविजातीयसृष्टिमुक्त्वा, 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर' इति मन्त्रे पूर्वोक्तादक्षरात् परतः परोऽतिरिक्त उक्तः । तृतीयेपि 'द्वा सुपर्णे'त्यनेनान्तर्यामितया तमेव परामृश्य ततो 'जुष्टं यदा पश्यत्यन्यमीश'मित्यादिना तद्दर्शनफलमुक्त्वा, ततो 'ज्ञानप्रसादेने'त्यनेन निष्कलध्यानात्तद्दर्शनमुक्त्वा, ततो ज्ञानप्रसादेपि न स्वसा-

रश्मिः ।

तु व्यापनरूप इति ध्वन्यते । न च कामिनामालिङ्गने कामिन्यादिव्याप्तीच्छासत्त्वा'दश्रुत' इत्यत्र रसरूपत्वेपि व्याप्त्यर्थोऽस्त्विति वाच्यम् । 'लोकवत्तु लीलाकैवल्य'मिति सूत्रात् तावत्याः शरीरप्रतिबद्धाया व्याप्तेः स्वीकारात् । अनवेति । 'एतद्ध्येवाक्षरं ब्रह्म, एतद्ध्येवाक्षरं पर'मिति श्रुतौ ब्रह्मपरयोः शब्दवैलक्ष्याहितवैलक्षण्यमनवधाय । परस्यैवेति । अनिदमित्थतयेति शेषम् । ईक्षत्यधिकरण उपपादनादेवकारोऽवधारणे । न'न्वेतद्ध्येवाक्षरं ब्रह्मे'त्यनेन सर्ववेदवेद्यत्वमक्षरेपि श्रुत्योच्यते, तत्राहुः तत्रेत्यादि । प्रणव इति । 'नवीनभावजनक' इत्यादिगायत्र्यर्थकारिकातस्तादृशोऽर्थो ध्वन्यते । अकार उकारो मकारोऽर्धमात्रा चेत्येतच्चतुष्टयात्मके ब्रह्मरुद्रविष्णुकृष्णरूपे वाचक इत्यर्थः । विधीयते, नत्वारोप्यते । तथा च परस्येक्षत्यधिकरणे कृष्णस्य 'यतो वाचो निवर्तन्ते' इति श्रुतिप्राप्ताशब्दत्वं निषिध्यते तद्द्वारानिदमित्थतया सर्ववेदवेद्यत्वं इतरत्र तु वर्तत एवेदमित्थतया सर्ववेदवेद्यत्वम् । श्रुतिश्च 'ॐमित्येतत् । एतद्ध्येवाक्षरं ब्रह्म, एतद्ध्येवाक्षरं पर'मिति । परं कृष्णरूपम् । परपदार्थस्यानन्दमयाधिकरणे निरूपणात् । एतच्चादृश्यत्वाधिकरणे समन्वयाध्यायद्वितीयपादे निपुणतरमुपपादितम् । मन्त्रेति । 'एतद्ध्येवाक्षरं ब्रह्म, एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छसि तस्य तत् । एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते' इति मन्त्रद्वयेन । तस्य प्रणवार्थमात्राप्रतिपाद्यस्य । ज्ञानमिति । फलात्मकम्, न तु साधनात्मकम् । सर्वेति । तथा च सर्वकारणे निरङ्कुशजगज्जन्मादिकर्तृत्वेन शास्त्रप्रतिपाद्यत्वरूपलक्षणसङ्गत्या परमे ब्रह्माक्षरात्मकं प्रस्तुतमित्यर्थः । अतिरिक्त इति । गोकुले नित्यलीलाकर्ता । 'तानि परे तथा ह्याहे'ति व्याससूत्रात् । इतीति । शङ्करभाष्ये प्रतिपाद्यान्तराभावादिति भावः । छान्दोग्ये सामशाखायां काठकं यजुःशाखायां मुण्डकं शाखान्तरम् ।

किञ्च । पुरुषोत्तमलाभे हेतुभूतं तु भक्तिमार्गे यद्वरणं स्वीयत्वेनाङ्गीकाररूपं

भाष्यप्रकाशः ।

मर्थ्येन पश्यति, किन्तु तत्सामर्थ्येनैवेत्याशयेन 'नायमात्मे'त्यादिकं पठ्यते । तेनोभयत्रापि पुरुषोत्तम एव प्रकृत इत्यनवद्यम् ।

एतदेव गीतायामुपबृंहितम् । 'द्वाविमौ पुरुषौ लोक' इत्यारभ्य, 'प्रथितः पुरुषोत्तम' इत्यन्तेन ।

ननु तथापि शाखान्तरस्थस्य वाक्यस्य कथमेतच्छेषत्वमिति चेत्, ऐकार्थ्यादिति ब्रूमः । 'हानौ तूपायने'ति सूत्रे, कुशाच्छन्दःस्तुत्युपगानदृष्टान्तेषु भाल्लविनां 'कुशा वानस्पत्या स्थिता मा पाते'ति निगमस्थवाक्यशेषत्व'मौदुम्बर्यः कुशा' इति शाट्यायनिवाक्ये सर्वैर्भाष्यकारैरादृतम् । जैमिनिना च बाधलक्षणे 'अपि तु वाक्यशेषः स्यादन्याय्यत्वात् विकल्पस्य विधीनामेकदेशः स्या'दिति सूत्रे 'नानुयाजेष्वि'ति वाक्यस्य 'आश्रावयाऽस्तु श्रौषट् यज ये यजामहे वष'डितिदूरस्थवाक्यशेषत्वमादृतम् । तस्मान्नात्र शङ्कालेशः ।

ननु तथापि तेषु तेषु भक्तेषु वरणमपि तत्तदनुरूपमनेकविधमिति रसमार्गीयमेवात्र कथं ग्रहीतुं शक्यत इत्याकाङ्क्षायामाहुः किञ्चेत्यादि । तथाचाग्रिमश्रुत्या तथावसीयत इत्यर्थः । श्रुतिस्तु

रश्मिः ।

कुशेति । 'कुशा च छन्दश्च स्तुतिश्चोपगानं च कुशाच्छन्दस्तुत्युपगानानि तेषु तद्वत् । सप्तम्यन्ताद्वतिः । अयं सूत्रैकदेशस्य भाष्यकाराणां समासः । भाल्लविनामिति । एतेषां क्वचित् प्रसिद्धा शाखा । कुशेति । 'भो कुशा यूयं वानस्पत्या वनस्पतियोनयः ख्याता इत्थंभूता यूयं मा मां पात रक्षते'त्यर्थः । शाट्येति । खाण्डिकेयानां पञ्चभेदा भवन्ति । कालेताः शाट्यायनी हिरण्यकेशी भारद्वाज्यापस्तम्बी चेति । शाट्यायनिनस्तैत्तिरीयशाखास्थाः । छन्द आदिषु तु श्रुत्यन्तरगतविशेषान्वयो वक्ष्यते । यथा 'नवाक्षराणि छन्दांस्यासुराणि, अन्यानि दैवतानि, तेषां क्वचित् छन्दोभिः स्तुवते' इत्यत्राविशेषप्राप्तौ 'देवछन्दांसि पूर्वाणी'तिपैङ्ग्याम्नानाद्विशेषग्रहः प्रतीयत इत्यर्थः । यथातिरात्रे षोडशिनो ग्रहस्याङ्गभूतं स्तोत्रं कदेति छान्दोगादीनामाकाङ्क्षायामुदयसमयाविष्टे सूर्ये षोडशिनः स्तोत्रमिति समयाध्युषिते सूर्य इत्यार्चश्रुतेः कालविशेषग्रह इत्यर्थः । ऋचो धीयत इत्यार्चाः । 'यथार्त्विज उपगायन्ती'ति विशेषश्रुतेर्नाध्वर्युरुपगायतीति श्रुत्यन्तराद्ध्वर्युभिन्ना ऋत्विज उपगायन्तीत्यर्थविशेष इति भाल्लविनः । ननु भवद्भिः किं विचारितमित्यत आहुः **जैमिनिनेति** । इदं सूत्रं दशमस्याष्टमे पादेऽस्ति । पर्युदासाधिकरणसिद्धान्तसूत्रम् । सूत्रार्थस्तु, यज्ञमात्रे ये यजामहे इति प्रयोक्तव्यमिति श्रुतम् । नानुयाजेषु ये यजामहं करोतीत्यपि श्रुतम् । तत्र नकारस्य निषेधार्थकत्वेऽतिरात्रे षोडशिग्रहणाग्रहणयोरिवानुयाजेषु यज्ञत्वाविशेषात् प्रयोक्तव्यम्, निषेधान्न प्रयोक्तव्यमिति विकल्पः स्यात्, तस्यान्याय्यत्वाद्ये यजामहविधेरेव नानुयाजवाक्यमेकदेशः स्यात्, पर्युदासवृत्त्या विधिवाक्यशेषः स्यादिति यावत् । तथा चानुयाजभिन्नेषु यागेषु 'ये यजामह' इति प्रयोक्तव्यमित्येकवाक्यतेति । ननु ये यजामहे वषडिति वाक्ये 'ये यजामहे' इति प्रयोक्तव्यमिति कथं श्रुतमिति चेत् । न । नानुयाजेष्विति निषेधस्य प्राप्तिपूर्वकत्वेनानुयाजसम्बद्धेन नेत्यनेन शब्देनानुयाजव्यतिरिक्तेषु 'ये यजामहः कर्तव्य' इति श्रुत्यर्थे ये यजामहस्य कर्तव्यतानुयाजेषु प्राप्तानुयाजव्यतिरिक्तयागेषु प्राप्यत इति ये यजामह इति प्रयोक्तव्यमित्यस्य लाभात् । न च नेत्ययंशब्दः करोतिना सम्बध्नात्विति वाच्यम् । तदा ये यजामहं न करोतीत्येवं प्रतिषेधः स्यात्, तस्यानिष्टत्वात् । पर्युदासः सदृग्ग्राही तदर्थको नशब्दः । करोतीत्यस्याधिकरणमालायां कर्तव्य इति

तदेव, न त्वन्यादृशमपीति ज्ञापनायाग्रे वदति 'नायमात्मा बलहीनेन लभ्य' इति। बलकार्यं हि प्रभुवशीकरणम्। तच्च 'अहं भक्तपराधीनः' 'वशे कुर्वन्ति मां

भाष्यप्रकाशः।

मुण्डके 'नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गा'दिति। ननु श्रुतौ बलशब्दो वर्तते, न तु भक्तिशब्द इति कथं तेन तन्निश्चय इत्याकाङ्क्षायां बलशब्देन तत्प्राप्तिमुपपादयन्ति बलकार्यमित्यादि। नच बलशब्दस्य शरीरसामर्थ्ये प्रयोगदर्शनाद्भक्तौ तस्य लाक्षणिकत्वं स्यादिति शङ्क्यम्। वशीकारके यस्य कस्यापि सामर्थ्ये तत्प्रयोगदर्शनात्। तृतीयस्कन्धे कपिलवाक्ये 'बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम्। या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवल'मिति भ्रूविजृम्भसामर्थ्येपि तत्प्रयोगात्। अतः कार्यादिशब्दवत्सापे-

रश्मिः।

विवरणात् लेडाश्रयणम्। तेषां तव्यदादीनां विधौ विधानात्। लेटोपि लिङर्थे विधानात्। आश्रावयेतिश्रुतौ श्रौषट् वषडिति हविर्धानार्थकाव्ययौ। अनेकेति। यथा 'तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च। पुलकाङ्ग्युपगूह्यास्ते योगीवानन्दसम्प्लुते'ति फलप्रकरणे निर्गुणभक्तवरणं योगिवत् कामसम्बन्धव्यतिरेकेण। रसेति। विवादाभावाय काव्यप्रकाशादौ स्नेहमार्गैक्येन रसशास्त्रं प्रपञ्चितमित्युभयोरैक्याभिप्रायेण। तदुक्तं 'कामाद्द्वेष्य' इति। वस्तुतस्तु 'आत्मकाम' इति श्रुत्युक्तो वेदयोग्य एव कामो वाक्ये ग्रहीतुं शक्यः, भगवतः श्रीकृष्णस्यात्मत्वात्। तत्र काचित् श्रीकृष्णप्रेमवती काचिद्वेदान्तश्रुतिर्वैराग्योत्कर्षवती श्रीकृष्णे शृङ्गारवती। कोशे प्रेमशृङ्गारयोर्नाम्नां भेदात्। 'प्रेमा-नाप्रियताहार्द' मित्यादौ 'शृङ्गारः शुचिरुज्वल' इत्यत्र च। तथापि 'ओमित्येकाक्षरं ब्रह्म, अग्निर्देवता ब्रह्म' इत्यार्षं गायत्र्यं छन्दः परमात्मं स्वरूपं सायुज्यं विनियोगमायातु वरदा देवी, अक्षरं ब्रह्म सम्मितं गायत्र्यं छन्दसां मातेदं ब्रह्म जुषस्व म' इति सन्ध्याश्रुतेः 'स्त्रीद्वारा पुरुषे भवे'दिति स्त्रीणां कामावश्यकतया भेदो युक्त उभयेषाम्। अग्रे 'वशे कुर्वन्ति मां भक्त्ये'ति भाष्याच्च। तत्र 'सत्स्त्रियः सत्पतिं यथे'ति दृष्टान्तात्। यदि च 'आश्चर्यवत् पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्य' इति जीवप्रकरणगीतायाः रुयप्यकामुकीति प्रेमवत्याः कामाभावे शृङ्गारवतीतो भिन्ना, तदा तु भक्तिमार्ग इति भाष्यं पुष्टिभक्तिमार्ग इत्यर्थकम्, प्रकरणात् दर्शनाच्चेतिसूत्राच्च। तत्र पुष्टिमार्गीयभक्तोदाहरणात्। भ्रूविति। भ्रूविजृम्भः सामर्थ्यं भ्रूविजृम्भसामर्थ्यमिति कर्मधारयः। कार्यादीति। यथा कस्य कार्यम्, कस्य शब्दः इत्यत्र कुंविदस्येत्याद्युक्तौ कार्यं पटत्वेन घटत्वेन कुड्यत्वेन कुसूलत्वेन गृह्यते, यथा वा किं कार्यम्, कः शब्दः, को घटः इत्यत्र पटः कार्यम्, घटः कार्यम्, कुड्यं कार्यम्, कुसूलं कार्यमित्युक्तौ कार्यत्वेन घटादीनां ग्रहणम्, पटः पृथ्वी ताम्रपटस्य पृथ्वीत्वेन ग्रहणवत्। आकाशस्येत्याद्युक्तौ आकाशतन्मात्रत्वेन पार्थिवत्वेन शब्दो गृह्यते, यथा वा ध्वनिः शब्दः 'श्रोत्रग्राह्यो गुणः शब्द' इत्यत्र शब्दत्वेन ध्वन्यादीनां ग्रहणम्। को घट इत्यत्र 'घटः पृथिवी'त्युक्तौ पृथिवीत्वेन घटस्य। एवं कस्य बलं किंबलमित्यत्र भक्तस्य मायाया इत्युक्तौ भक्तित्वेन भ्रूविजृम्भत्वेन बलं गृह्यते, एवं भक्तिर्बलम्, भ्रूविजृम्भो बलमित्युक्तौ बलत्वेन भक्तेर्भ्रूविजृम्भस्य ग्रहणमिति कुम्भपदेन घटग्रहणवद्बलपदेनाभिधया वृत्त्या भक्तिग्रहणमिति बलपदस्य भक्तमायाभक्तिभ्रूविजृम्भैः सापेक्षा वृत्तिरभिधाख्या यस्य तत्त्वात्। सामर्थ्यं भक्तिरूपं बलरूपं वा तद्रूपत्वं भक्तावादाय भक्तित्वेन बलत्वेन वा बलपदप्रयोगः। बलभक्तिविधं सामर्थ्यमेकमिति भक्तिस्थाने बलपदप्रयोग इति नार्थः, 'सिंहो माणवक' इतिवत् गौण्या-

'भक्त्ये'त्यादिवाक्यैर्भक्त्यैवेति बलशब्देन भक्तिरुच्यते । अन्यथा पूर्ववाक्य एवेतरनिषेधस्य कृतत्वात् पुनर्बलाभावनिषेधं न कुर्यात् । वरणमात्रस्य हेतुत्वमुक्त्वा

भाष्यप्रकाशः ।

क्षवृत्तिकत्वात् सामर्थ्यरूपत्वमादाय तथा प्रयोग इति न लाक्षणिकत्वगन्धोपि । नचैते वाक्ये गुणावतारस्य विष्णोः, न तु भगवत इति कथमेताभ्यां भक्तौ पुरुषोत्तमवशीकारकत्वसिद्धिरिति शङ्क्यम् । एकादशस्कन्धीयचतुर्दशाध्याये 'न साधयति मां योगो न सांख्यं धर्म उद्धव । न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिते'ति भगवद्वाक्येपि साधयतिना स्ववशीकारस्यैव बोधनादस्यैवार्थस्य सिद्धेः । तद्वाक्योपन्यासस्तु स्फुटार्थत्वात् गुणावतारेपि मूलधर्मसमानधर्मताबोधनार्थत्वाज्ज्ञेयः । ननु तथाप्यत्र भक्तिरूपमेव बलं विवक्षितम्, न इतरदात्मनिष्ठाजनितवीर्यादिरूपमित्यत्र किं गमकमित्यत आहुः **अन्यथेत्यादि** । तथाच पूर्ववाक्योक्तनिषेधेनैव साधनजनितबलस्याभावे प्राप्तेपि यः पुनर्बलाभावनिषेधः, तदन्यथानुपपत्तिरेवात्र भक्तेर्विवक्षितत्वगमिकेत्यर्थः । ननु पूर्ववाक्ये प्रवचनादीनां त्रयाणामेव निषेधः, नेतरेषामिति तत्प्राप्त्यर्थमत्र बलाभावनिषेधान्न तदनुपपत्तिरित्याकाङ्क्षायां तन्निवारणाय हेत्वन्तरमाहुः **वरणे**त्यादि । तथाच तत्रोत्तरार्ध एवकारेण वरणस्यैवात्मलाभहेतुतानिश्चायनात् पूर्वार्धोक्तानां प्रवचना-

रश्मिः ।

पत्त्या 'न लाक्षणिकत्वगन्धोपी'त्यस्याग्रेतनग्रन्थस्य विरोधात् । न च घटस्य कलशत्वेनोपादानवत् पर्यायभूतसामर्थ्यरूपत्वमादाय बलपदप्रयोग इति वाच्यम् । घटे वक्तव्ये कलशपदप्रयोगवत् सामर्थ्ये वक्तव्ये बलपदप्रयोग इत्यत्र गमकाभावात् । न च श्रुतिरेव गमिकेति वाच्यम् । उक्तस्थले घटस्य कलशत्वेनेव सामर्थ्यस्य बलत्वेन ग्रहणापत्तेः 'सामर्थ्यरूपत्वमादाये'ति ग्रन्थविरोधात् । अत एव 'बलशब्देन भक्तिरुच्यत' इति भाष्येण बलत्वेन भक्तिरुक्ता । घटः कलशत्वेन यथा । बलभक्त्योः पर्यायता भाष्ये उपपादिता । बलभक्तिसामर्थ्यानां भाष्यप्रकाशे । **गुणेति** । नवमस्य निबन्धे 'ब्रह्मण्योपि हरिस्तस्य व्रतार्थं न व्यमोचय'दित्यत्र हरिर्गुणावतारो विष्णुः । आवरणभङ्गे 'त्रिभिर्देवैरक्षणे हेतुमाहु'रित्याभासात् । 'विष्णुचक्रोपतापितः' 'विष्णुचक्रं सुदर्शन'मिति शुकवाक्याभ्यां च । 'ततो निराशो दुर्वासाः पदं भगवतो ययौ । वैकुण्ठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सहे'ति वाक्यादक्षराधिष्ठातुः श्रीपुरुषोत्तमस्येति यदि विभाव्येत, तदा तु न शङ्कावकाशः । **आत्मेति** । उपनिषद्भाष्याद्युक्तम् । **तदिति** । तस्य बलाभावनिषेधस्यान्यथानुपपत्तिः, सा च अर्थान्तरकल्पनया समाधेयत्वेनोच्यमानप्रमाणसिद्धयोर्द्वयोरर्थयोः परस्परं प्रतिघातः । **प्रस्थानरत्नाकरे** द्वारमित्यादावेकस्यैव प्रमितत्वाद् द्वयोरर्थयोरिति द्वित्वं त्याज्यमिति स्थितम् । तथा च भक्तिरूपार्थान्तरकल्पनया समाधेयत्वेनोच्यमानप्रमाणसिद्धं बलाभावनिषेधम्तस्य पूर्ववाक्योक्तेतरनिषेधेन प्रतिघातः । तत्समाधानाय भक्तिरूपार्थान्तरकल्पनमर्थापत्तिः, एवं तदन्यथानुपपत्तिर्भक्तेर्विवक्षितत्वगमिकेत्यर्थः । नन्वन्यथानुपपत्तिः प्रमाणम्, अत्र बलं भक्तिरिति प्रमायां नार्थापत्तिरिति चेत् । न । प्रमाकरणत्वाभावादन्यथानुपपत्तेस्तादृशप्रमाकारणत्वेनाभ्युपगमात् । अर्थापत्तेः शब्दरूपप्रमाणानुग्राहकत्वेन 'नायमात्मा बलहीनेन लभ्य' इति शब्दप्रमितार्थो बलरूपः, तस्य ज्ञानं भक्तित्वेन तस्य दार्ढ्यहेतुत्वात् । अभ्यासादिवत् । न चार्थापत्तेः प्रमाणत्वविरोध इति वाच्यम् । शब्दलक्षणप्रमाणानुग्राहकत्वरूपप्रामाण्यात् । अभिहितानुपपत्तिरियम्, 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यत्र वाक्यगतज्योतिष्टोमस्य परेषां क्षणिकतया स्वर्गसाधनतानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यत इति वेदान्तपरिभाषाकारोक्तेः । विशेषप्रपञ्चस्तु प्रस्थानरत्नाकरे वर्तत एव । **वरणस्येति** । न च 'यमेवैष'

बलस्य तथात्वं च न वदेत् । एतादृशस्य हृदि भगवत्प्राकट्यं भवतीत्याह 'एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामे'ति । अस्यार्थस्त्वेष आत्मा आत्मनोऽप्यात्मा पुरुषोत्तमः ब्रह्म अक्षरब्रह्मात्मकं धाम विशते इति । धामपदं पुरुषोत्तमस्याक्षरं ब्रह्म सहजं स्थानमिति ज्ञापनार्थमुक्तम्, अन्यथा न वदेत्। तेन तद्धृदये स्वस्थानमाविर्भावयित्वा स्वयं तत्र प्रकटीभवतीति

भाष्यप्रकाशः ।

दीनां जीवकृतयावत्साधनोपलक्षकत्वे सिद्धे बलाभावानुपपत्तितादवस्थ्येऽस्मिन् बलाभावनिषेधमुखेन बलहेतुताबोधनात्तद्बलं लौकिकमार्यादिकबलाभ्यामतिरिक्तं भगवदनुग्रहजन्यं पुष्टिमार्गीयमेव ग्राह्यम् । तच्चोक्तरीत्या भक्तिरूपमेवेत्यतः सैवात्र गृह्यते । बलपदस्य सामर्थ्यसामान्ये शक्तत्वेऽप्युक्तयुक्त्या तद्विशेष एव पर्यवसानादित्यर्थः।एवञ्चैतदग्रे प्रमादस्यालिङ्गतपसश्च यो निषेधः, तेनाप्रमादस्य सलिङ्गतपसश्च सहकारिता बोध्यते । तत्राप्रमादो भगवदिच्छानुरूपसेवाकरणादिरूपः । सलिङ्गं तपश्च सर्वात्मभावसहितविरहभावरूपं ज्ञेयम् । एतदुत्तरार्धमवतार्य व्याकुर्वन्ति एतादृशस्येत्यादि । तद्धृदय इति । तस्यैवं यतमानस्य हृदये । ननु भवत्वेवं श्रुतिद्वयार्थः, तथापि पूर्वसूत्राभ्यां यदस्यात्मप्रकरणादिना जीवब्रह्माभेदपरत्वमाशङ्कितम्, तस्य कथं परिहार इत्याकाङ्क्षायां

रश्मिः ।

इत्यत्र यमेव वृणुते तेन लभ्य इत्यर्थः, तदुक्तम्, 'केवलेन हि भावेने'त्युपक्रम्य, 'येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे'ति, तस्मान्नायमवकारान्वय इति शङ्क्यम् । एवमन्वये पुष्टिभक्तिमात्रसङ्ग्रहे मार्यादिकानां भक्तानामसङ्ग्रहापत्तेः । नन्वेवमेव विवक्षितं सिद्धान्तमुक्तावलीटीकायाम्—'ज्ञानिभक्तौ चेद्विशेषतोऽनुगृह्णाति, तदा पुष्टिभक्तिं प्राप्नुतः आदा'विति ग्रन्थात्, वक्ष्यन्ति च 'फलमत उपपत्ते'रिति सूत्रभाष्ये इति चेत् । न । येन केनापि लभ्य इति प्राप्तौ तदर्थं वृणुत इत्यस्यावश्यवक्तव्यत्वेन तत्रान्वयौचित्यात् । न चैवमपि वरणकर्त्रान्वयोस्तु, तावतापि पुष्टिभक्तिप्राप्तेर्वृणुत इत्यस्य 'वरणं कुरुत' इत्यर्थाद्वरणरूपप्रकृत्येकदेशान्वयोऽनुचित इति शङ्क्यम् । यमेव वरणमेव वरणकर्तैवेति त्रेधान्वयेपि वरणस्यैव मुख्यत्वात् । 'वरणमात्रस्य हेतुत्वमुक्त्वे'ति भाष्यात् । अस्मिन्निति । 'नायमात्मा बलहीनेन लभ्य' इति वेदे । उक्तेति । अन्यथानुपपत्तिरूपकारणकजन्यावलम्बभक्तिरूपमेवेत्याकारकप्रमेत्युक्तरीत्येर्थः । उक्तेति । भाष्योक्तयुक्त्येत्यर्थः । 'पुनर्बलाभावनिषेधं न कुर्यात्', 'बलस्य तथात्वं न वदे'दित्यन्यथाज्ञानरूपयेत्यर्थः । 'स्वामिनः फलश्रुतेरित्यात्रेय' इति सूत्रे भाष्ये बलं सर्वात्मभाव इत्यात्रेयः । बोध्यते इति । 'भक्त्या जानाति चाव्यय'मित्यादौ भक्तौ कारणता, इतरयोः भक्त्या सहकारितेत्यर्थः.। प्रमादोऽनवधानता, तदभावोऽप्रमादः स ईदृशो विवक्षित इत्याहुः तत्रेत्यादि । सेवाकरणकथास्वस्थित्यादिरपि प्रमादकः । भगवदिच्छानवधानात् । अतो विशेषणं भगवदिच्छेति । मतान्तरीयोऽर्थो लौकिकपुत्रपश्वादिविषयासङ्गनिमित्तात् प्रमादादिति 'शमदमाद्युपेतः स्या'दिति सूत्रे स ज्ञानमार्गीयः।भजनस्य द्वितीयदलमाहुः सलिङ्गमिति । 'भक्त्याहमेकया ग्राह्य' इति वाक्ये एकपदेन मुख्यभक्तेरुक्तेः । भाष्येऽप्यादिपदेनास्या अप्युक्तेः । अतो विशेषणं सर्वात्मभावेत्यादि । अत्र सर्वस्मिन्नात्मभाव इति समासः स्फूर्त्या विवक्षितत्वात् सा लिङ्गं भवति, तया तपोरूपविगाढभावानुमानात् । विगाढभाववान् स्फूर्तेरिति । इतरद्व्याख्यानं तपोत्र ज्ञानं लिङ्गं संन्यास इति । तत्तु ज्ञानस्य सञ्चारिभावत्वेनात्मलाभाहेतुत्वेन संन्यासस्य 'दर्शनाच्चे'ति सूत्रे व्रजसीमन्तिनीनामुदाहरणेन तासां त्यागोऽङ्गमिति सर्वात्मभावाङ्गत्वेन पूर्वं सिद्धत्वात् ज्ञानमार्गीयम्। 'सोऽध्यक्ष' इति सूत्रे भाष्येऽभ्युप-

ज्ञाप्यते । प्रकृते श्वेतकेतूपाख्याने परोक्षवादेन ब्रह्माभेदबोधनेन पुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते । अग्रे तु न ह्येतावतैवाधिष्ठानात्मकाक्षराविर्भावो भवति, पुरुषोत्तमस्य वा । तथा सति ज्ञानिनां सर्वेषां परप्राप्तिः स्यात्, नत्वेवम्, 'भक्त्याहमेकया ग्राह्य' इत्यादिवाक्यैः, किन्तु भगवदनुग्रहेण भक्तसङ्गेन च भक्तौ सत्यामिति ज्ञापनाय भक्त एव तद्बोधाधिकारीत्यपि ज्ञापयितुं भक्तस्य नारदस्य भगवदावेशयुक्तस्य सनत्कुमारस्य च संवाद उक्तः । तत्रात्मशब्देन पुरुषोत्तम उच्यते । भक्तिमार्गे तु निरुपधिस्नेहविषयः स एव यतः । स तु सर्वात्मभावैकसमधिगम्य इति सर्वात्मभाव एव विद्याशब्देनोच्यते । परमकाष्ठापन्नं यद्वस्तु, तदेव

भाष्यप्रकाशः ।

पूर्वस्यास्य च तात्पर्यमाहुः प्रकृत इत्यादि । प्रकृते छान्दोग्यस्थ आत्मवाक्ये श्वेतकेतूपाख्याने, अन्यार्थमन्यकथनरूपो यः परोक्षवादस्तेन जीवस्याक्षरब्रह्माभेदबोधनेन पुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते, अग्रे तदग्रिमप्रपाठके तु 'न ह्येतावते'त्युक्तरीत्या योग्यतामात्रेण न सः, किन्तु भगवदनुग्रहभक्तसङ्गाभ्यां जातायां भक्तौ स इति ज्ञापयितुं तयोः संवाद उक्तः, तस्य च संवादस्य भक्तिमार्गीयलिङ्गवत्तया तथात्वात् तत्रत्यात्मशब्देन तन्मार्गे निरुपधिप्रीतिविषयः पुरुषोत्तम एवोच्यते, न जीवात्मा, नाप्यक्षरब्रह्म, पुरुषोत्तमस्तु सर्वात्मभावैकप्राप्य इति स एव सर्वात्मभावो विद्याशब्देनोच्यते । किञ्च, 'परमकाष्ठापन्न'मित्याद्युक्तरीत्या वेदान्तस्यापि पुरुषोत्तम एव तात्प-

रश्मिः ।

गमादिभ्य' इत्यत्रादिपदात् भगवद्वशीकरणसमर्थः स्नेहः । प्रश्नविनिङ्गितार्थत्यागस्तदनुरूपं भजनं चाप्रमादसलिङ्गतपो बलपदार्थत्वेन व्याकृतम् । तत्र भगवद्वशीकरणसमर्थः स्नेहो बलं सर्वात्मभावपदवाच्यमुख्यभक्तिः । प्रश्नविनिङ्गितार्थत्यागस्तदनुरूपं भजनं च बलमप्रमादः । इङ्गितपदेन कोशे काल उक्तः, अत्र त्विच्छोक्ता । कोशे कियतां शब्दानां नामनारायणादिकोशेषु पाठात् । **पूर्वस्येति** । जीवब्रह्माभेदपरत्वस्य । **परोक्षेति** । आनन्दमयाधिकरणे विवृतः । **पुरुषोत्तमेति** । भक्तिरसत्वात् स्पष्टं नोक्तम् । **भगवदित्यादि** । भक्तिहेतौ स्पष्टम् । **अग्रे त्वित्यादिभाष्यं विवृण्वन्ति स्म अग्रे तदिति** । **भक्तेति** । ननूपासनामार्गीया भक्तिः 'सत्सङ्गलब्धया भक्त्या मयि मां य उपासते' इति वाक्यादिति चेत् । न । उपासनामार्गस्य गोपालतापिनीय उक्तवात् गोपालतापिनीयस्य सर्ववेदान्तप्रत्ययाधिकरणादावुदाहृतत्वात् पाठक्रमस्य भक्तिनिरूपणोत्तरमुपासनानिरूपणात् तथात्वात् । यद्वा । मुख्यभक्तिप्रकरण उपासनाया अयुक्तत्वात् 'सत्सङ्गान्मामुपागता' इति पुष्टिप्राकरणिकवाक्योक्तसत्सङ्गो गृह्यते, अत एव सत्सङ्गपदं विहाय भक्तसङ्गपदम् । **स त्वित्यादिभाष्यं विवृण्वन्ति स्म पुरुषोत्तम इति** । **तथेति** । उक्तज्ञापकत्वात् । **तयोरिति** नारदसनत्कुमारयोः । **तत्रेत्यादि** भाष्यं विवृण्वन्ति स्म **तस्य चेत्यादिना** । **यत इति** भाष्यीयपदस्यार्थोऽयम् । विद्यापदमक्षराधिगमके मुण्डके उक्तं पुरुषोत्तमाधिगमके सर्वात्मभावपदे विद्यापदं कुत इत्यपेक्षायां **परमेत्यादिभाष्यं** विवृण्वन्ति स्म **किञ्चेति** । इत्यादिवक्ष्यमाणभाष्योक्तरीत्या । **तात्पर्यमिति** । 'सर्वे वेदा यत्पदमामनन्ती'ति श्रुतौ हीदमित्थतया निरूपणं 'यतो वाच' इति श्रुतिविरुद्धम्, अतोऽनिदमित्थतया 'सर्वे वेदा' इत्यादि । अतः परमकाष्ठापन्ने पुरुषोत्तमाख्ये वस्तुनि तात्पर्यवृत्तिः, अन्यत्राभिधा । तथा च **प्रतिपाद्यमिति** भाष्यं तात्पर्यवृत्त्येदमित्थतया प्रति-

हि वेदान्तेषु मुख्यत्वेन प्रतिपाद्यम् । अक्षरब्रह्मादिकं तु तद्विभूतिरूपत्वेन तदुपयोगित्वेन मध्यमाधिकारिफलत्वेन च प्रतिपाद्यते । तेन तत्र विद्याशब्दप्रयोग औपचारिकः, सर्वात्मभाव एव मुख्यः । युक्तं चैतत् । अक्षरविषयिण्या विद्यायाः सकाशात्तत उत्तमविषयिण्यास्तस्या उत्तमत्वम् । एवं सति पूर्वप्रपाठकस्याक्षरप्रकरणत्वादुत्तरस्य पुरुषोत्तमप्रकरणत्वात्त्वद्धेत्वसिद्धिश्च, अत उक्तन्यायेन विद्यैवाग्रिमप्रपाठके निरूप्यते, न तु पूर्वोक्तात्मज्ञानप्रकारविशेषः । अत्र हेतुमाह

भाष्यप्रकाशः ।

र्थम् । यद्यपि मुण्डके 'अथ परा यया तदक्षरमधिगम्यत' इत्यक्षरविद्यायाः परविद्यात्वमुक्तम्, तथाप्यग्रे 'अक्षरात् परतः पर' इति पुरुषस्य ततः परत्वश्रावणात्तद्विद्यायामेव परविद्यात्वं विश्राम्यतीत्यक्षरविद्यायां नान्तरीयकतया विद्याशब्दप्रयोगः परत्वोपचारादेवेति सर्वात्मभाव एव विद्यापदप्रयोगो मुख्यः । तस्या एव च विद्याया उत्तमत्वम् । एवं सत्युभयत्र प्रतिपाद्यभेदेन प्रकरणभेदात्त्वदुक्तस्य प्रकरणैक्यस्वरूपस्य भवदभिमतात्मविद्याप्रकारविशेषतासाधकस्य हेतोरसिद्धिरित्यस्मदभिप्रेत-

रश्मिः ।

पाद्यार्थकम् । पुरुषोत्तमे तात्पर्यवृत्तिः इति भक्ति(मार्तण्डे स्पष्टम्)........। तदुक्तं 'भगवान् ब्रह्म कार्त्स्न्येने'त्यत्रात्मपदं पुरुषोत्तमपरमिति। **श्रावणादिति** । न च शङ्करभाष्योक्तोऽर्थोऽस्त्विति शङ्क्यम् । गीतायामक्षरपदस्य तत्राशक्तेः । ननु पुराणमतं भवदुक्तार्थेऽक्षरात् परत्वं श्रीभागवते ततः परत्वं वाराहे इति चेत् । न । अदृश्यत्वाधिकरणोक्तश्रुत्या 'तानि परे तथा ह्याहे'तिसूत्रोक्तश्रुत्या चास्य विषयस्य श्रौतत्वात् । कियतामर्थानां पौराणिकसदृशत्वात् । अक्षरेत्यादिभाष्यं विवृण्वन्ति स्म **यद्यपीति** । अत्र भाष्ये **तद्विभूतिरूपत्वेनेत्यादि** । तत्र विभूतिरूपत्वमुत्कृष्टत्वे सत्यवरत्वरूपमुक्तश्रुतावेव विभूतिनिरूपणाध्याये 'अक्षराणामकारोऽस्मी'ति 'अकारो विष्णु'रित्यन्यत्र कोशादौ । अदृश्यत्वाधिकरणोक्त(त)स्य साधिष्ठानत्व उपयोगित्वेन 'अक्षरधिया'मिति सूत्रोक्तरीत्या मध्य(म)ाधिकारी ज्ञानाधिकारी तस्य फलत्वेनेति त्रयाणां तृतीयान्तपदानामर्थान्वयः । **विश्राम्यतीति** । आधिदैविकादिभेदेन विश्राम्यति । युक्तमित्यादि । **विषयिण्या** इत्यन्तभाष्यार्थः । एतेन भाष्यीयाक्षरब्रह्मादिकमित्यादिपदं व्याकृतम् । **नान्तरीयकेति** । गौणतया । परत्वोपचारः सिंहो माणवक इतिवत् । **उत्तमत्वमिति** । विद्यानामनियतत्वादुत्तमविषयिण्या उत्तमत्वमुचिततरमेव । **तेन तत्रेति** भाष्यार्थमाहुः **इत्यक्षरेति** । **इतीति** तेन पदार्थकः । सर्वात्मभावसमासो लक्षणश्रुत्युक्तः प्रसिद्धः । 'नातः परतरा विद्ये'ति निरोधलक्षणवाक्यात् । तैत्तिरीयशीक्षायां 'अथाधिविद्य'मित्यादि आयुष्ये अव्ययं विभक्तीतिसूत्रेणाव्ययीभावः । विद्यास्विति विग्रहः । आचार्यः पूर्वरूपम् । आचार्यः सनत्कुमारः । अन्तेवास्युत्तररूपम् । अन्तेवासी नारदः । विद्या सन्धिः । विद्या सर्वात्मभावः । प्रवचनꣳसन्धानम् । प्रवचनं प्रपाठकः । विद्या प्रायपाठपठितत्वाच्च विद्या । **एवं सतीत्यादिभाष्यमवतारयामासुः एवं सतीति** । **प्रतिपाद्येति** । प्रतिपाद्येत्यादिकं पूर्वतन्त्रे द्वितीयाध्यायेऽस्ति । **हेतोरिति** । प्रपाठक आत्मविद्याप्रकारविशेषवान् प्रकरणैक्यात्, नात्मविद्याप्रकारविशेषवान् प्रकरणभेदादिति प्रत्यनुमानेन साध्यसाधकत्वेनासिद्धिः । न चासिद्धिरूपहेत्वाभासः इत्यर्थः शङ्क्यः । 'प्रकरणभेदा'दिति भाष्यप्रकाशेनास्य हेतोः सत्प्रतिपक्षत्वस्फोरणात् । **अस्मदिति** । अस्मदभिप्रेतः सर्वात्मभावो विद्योच्यते निरूप्यते उक्तन्यायेन प्रकृतसूत्रेण प्रमाणेन । एवकारेण 'ननु प्रसिद्धा ब्रह्मविद्योपनिषदुक्ता विद्याधिकरणविषयवाक्यमस्तु, स्पष्टत्वात्, किमनेन प्रपाठ-

निर्धारणादिति । 'सुखं त्वेव विजिज्ञासितव्य'मित्युक्त्वा, सुखस्वरूपमाह 'यो वै भूमा तत्सुखम्, नाल्पे सुखमस्ति, भूमैव सुखम्, भूमा त्वेव विजिज्ञासितव्य' इति । अक्षरपर्यन्तं गणितानन्दत्वात् पुरुषोत्तमस्यैवानन्दमयत्वेन निरवधिसुखात्मकत्वात् स एव भूमा, तस्यैव विजिज्ञासितव्यत्वेन निर्धारणादित्यर्थः । भूम्नो

भाष्यप्रकाशः ।

मेवात्रोच्यते, न तु त्वदुक्तमित्यर्थः । एवं प्रकरणभेदे सत्यतिदेशोऽप्यकिञ्चित्कर एव । अतिदेशमात्रेण तदवान्तरभेदत्वस्य क्वाप्यसिद्धत्वादिति । हेतुं व्याकुर्वन्ति सुखं त्वेवेत्यादि । तथाच पूर्वत्र 'सदेव सौम्ये'ति सद्रूपमात्मानं प्रकृत्य तदभेदज्ञानमुपदिष्टम् । इह तु भूमपदोक्तं निरवध्यानन्दरूपं जिज्ञास्यत्वेन निर्धारयति । यद्यत्र पूर्वप्रकृत आत्मा बोधनीयः स्यात्, तदात्रापूर्वं भूमशब्दं न वदेत्, वदति तु भूमपदम् । अतः शब्दान्तरेण पूर्वस्मादात्मनः सकाशाद्भूमपदोक्तस्य भेदे सिद्धे विषयभेदान्नात्र पूर्वोक्तं ज्ञानमुच्यते, किन्तु मुख्या सर्वात्मभावरूपैव विद्योच्यते । यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिश्रावणात्त्रयाणामविनाभावः, तथापि सावधिनिरवधित्वाभ्यामानन्दस्य भेदात् पूर्वत्र गणनापरिच्छिन्नस्यैव तस्य सिद्धिः, न तु निरवधेः । अतो भूमपदेनात्र तस्यैव निर्धारणात् तथेत्यर्थः । ननु भूमात्र जिज्ञास्यत्वेनोच्यते, तावता सर्वात्मभावः कथं लभ्यत इत्याकाङ्क्षायामाहुः भूम्न इत्यादि । तथाच भूमलक्षणस्थेन 'यत्रे'तिपदेन पूर्वोक्तरीत्या भूमज्ञानसत्ताप्रच-

रश्मिः ।

केने'ति शङ्काव्यवच्छेदः । सन्दिग्धानामेव श्रुतिवाक्यानामधिकरणविषयवाक्यत्वात् । **अनिदेशेति** । 'अतिदेशाच्चे'ति सूत्रोक्तः । **तदिति** । ज्ञानप्रकारविशेषरूपस्य । भेदपदं विशेषवाचकम् । 'भेदो द्वैधे विशेषे स्या'दिति विश्वात् । प्रपाठको ज्ञानप्रकारविशेषप्रतिपादकोऽतिदेशादिति । ज्ञानप्रकारावान्तरभेदो विद्यतेऽस्य प्रतिपाद्यत्वेन स प्रपाठकः ज्ञानप्रकारावान्तरभेदस्तस्य भावस्तत्त्वम् । **क्वाप्यसिद्धत्वादिति** । ननु वैकृताङ्गेषु यत्रातिदेशो वर्तते, तत्र वैकृताङ्गत्वेन ज्ञानप्रकारविशेषो वर्तते एव, उक्तानुमाने च वर्तते, अतः कुत उच्यते **क्वापीति** चेत् । न । अतिदेशमात्रेणेत्युक्तेः । तथाहि । सर्वात्मभावनिरूपकत्वे प्रपाठकस्य सिद्धे प्रपाठको न ज्ञानप्रकारावान्तरभेदप्रतिपादकः, अतिदेशादिति पूर्वोक्तहेतोर्विरुद्धत्वात् साध्याभावसाधको हेतुर्विरुद्ध इति । तथा विकृतावतिदेशो वर्तते, तत्रातिदिष्टानामेव वैकृताङ्गत्वेन ज्ञानप्रकारविशेषाभावात् । विकृतावुद्दिष्टानामङ्गानामपि वैकृतत्वेन ज्ञानात् । तत्र चातिदेशाभावात् । **हेतुमिति** । अन्यहेतूक्तेः सौत्रं हेतुमित्यर्थः । **तथा चेति** । पूर्वत्रप्रपाठके । कृष्णस्य सदानन्दत्वादानन्दांशमाहुः सदंशस्योक्तत्वात् **इहेति** । **पूर्वेति** । 'स आत्मा तत्त्वमसि श्वेतकेतो' इत्येवं पूर्वप्रपाठके प्रकृत आत्मा । **अपूर्वमिति** । न पूर्वप्रपाठकेऽभिधायकत्वेनास्तीत्यपूर्वो भूमशब्दस्तम् । **किन्त्वेति** । एवकारेणान्यविद्याव्युदासः । यथा 'कर्ण एव दाते'त्यत्र । न च विद्यापदं ज्ञानसामान्यवाचकमित्युक्तत्वात् ज्ञानकाण्डत्वाच्च कथं सर्वात्मभावो विद्येति चेत् । न । मुख्यभक्तेरपि सर्वात्मभावरूपायाः छान्दोग्ये विद्याप्रायपाठपठितत्वात् ज्ञानकाण्डपठितत्वाच्च विद्यात्वमविरुद्धम् । भक्तिप्रायपाठपठितत्वादर्चनस्य कर्मणो भक्तित्वमिव । अक्षरेत्यादिभाष्यमवतारयांबभूवुः **यद्यपीति** । **तस्य** आनन्दस्य । **तस्यैव** निरवध्यानन्दस्यैव । तथा तत्प्रापिका सर्वात्मभावत्वप्रकारिकैव विद्योच्यते, 'फलमत उपपत्ते'रिति सूत्रे सर्वात्मभावस्यैव तत्प्रापकत्वोक्तेः । **भूमेति** । 'आनन्दमयोऽभ्यासा'दितिसूत्रोक्तः । 'पुरुषोत्तमस्यैवे'त्याद्युक्तभाष्यात् । **सर्वात्मेति** । पूर्वोक्तः । **पूर्वेति** । लिङ्गभू-

लक्षणमग्रे उच्यते 'यत्र नान्यत् पश्यती'त्यादिना । यस्मिन् ज्ञाते सति नान्यत् पश्यतीत्यर्थः । तथा सति सर्वात्मभाववतः प्रभुदर्शने सत्यपि लीलोपयोगिवस्तुदर्शनादिकमनुपपन्नमिति शङ्का तु 'तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः[1] प्राणा' इत्यादिना निरस्ता वेदितव्या । तैः सह लीलां चिकीर्षतः प्रभुत एव सर्वं सम्पद्यते, न तु भक्तसामर्थ्येनेति भावेन तदुक्तेः ॥ ४७ ॥

भाष्यप्रकाशः ।

मात्तज्ज्ञानरूपस्य सर्वात्मभावस्य लाभ इत्यर्थः । ननु भूमलक्षणे तदितरदर्शनं निषिध्यते, सर्वात्मभाववतां तु तत् दृश्यते इति कथं तेन तल्लाभ इत्यत आहुः तथा सतीत्यादि । तथा सतीति । सर्वत्र भूमदर्शने सति । तैः सहेति । प्राणादिभिर्धर्मैः सह । तथाच तादृशलीलोपयोगिपदार्थदर्शनं प्रभुसामर्थ्यकारितम्, भगवदिच्छाया एव तथात्वात्, न तु स्वकृतम्, अतस्तेषां भगवदेकद्रष्टृत्वं निर्बाधम्, अतः सुखेन तल्लक्षणात्सर्वात्मभावलाभ इत्यर्थः ॥ ४७ ॥

रश्मिः ।

यस्त्वसूत्रोक्तरीत्या । **भूमेति** । यत्रेति सति सप्तम्या दर्शनादिविशेषे व्याख्याते भूम्नो ज्ञानं चाक्षुषादित्वस्य सत्तासूचनात् । **तज्ज्ञानेति** । तस्य भूम्नो ज्ञानं भूमा ज्ञायतेऽनेन तत् तद्रूपस्य । **लाभ इति** । **यत्रेति** भूमलक्षणश्रुतौ 'भगवद्रूपत्वात् सर्वात्मभावस्ये'ति भाष्यादेकरूपत्वाल्लाभ इत्यर्थः । ननु 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्मे'ति श्रुतेर्ब्रह्मैतादृक्, स भूमा सर्वात्मभावस्तु सर्वोऽप्यात्मनो भावरूप आनन्दधर्म इति कथमुभयोरेकरूपतेति चेत् । न । प्रकाशाश्रयन्यायेनैक्यात् । तथा च भूमाधिकरणभाष्यं 'भावशब्दस्यापि सर्वत्वात् भगवति वृत्तेरदोष' इति । मन्प्रत्ययार्थस्य भावत्वेन भाववाचकशब्दस्यापीत्यर्थः । ननु लक्षणसङ्क्रमनं कथम्, इत्थम् । भूम्नि स्पष्टत्वात् सर्वात्मभाव उच्यते । यत्रेति यच्छब्दार्थस्य भूमत्वेप्यानन्दमयत्वात् तस्य स्वरूपात्मकात्मना ग्रहणम्, 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इति वाक्यादानन्दमयत्वे सर्वात्मभावस्य यच्छब्दार्थता । ननु पृथगेव लक्षणं कुतो न कृतमिति चेत् । न । 'उत्तमश्लोकजनेषु सख्य'मिति वाक्यात् । अत्र शास्त्रार्थरूपभगवान् भक्तसंवलित एव फलतीत्येकलक्षणलक्षितत्वम् । इदं पुष्टिमार्गीयमोक्षनिरूपणे उपपादितम् । ननु निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वरूपं ब्रह्मलक्षणं कथम् । एतस्यैव जिज्ञास्यत्वेन 'अथातो ब्रह्मजिज्ञासे'त्यत्राप्यस्यैव ब्रह्मपदार्थत्वात् । अरूपवत्सूत्रेप्येवं प्रतिपादितमिति विद्वन्मण्डने स्पष्टम् । 'यदेकमव्यक्तमनन्तरूपमि'तिश्रुतेः । सर्वात्मभावे यथायोग्य.......... । **तदितरेति** । भूमेतरेत्यर्थः । सुषुप्ताविव । तत् भूमेतरत् । **तेनेति** । भूमपदेन सर्वात्मभावस्य लाभः दर्शनसहितस्य कथमित्यन्वयः । **तथेति** । एतस्यैव विवरणं 'प्रभ्वि'त्यादिभाष्ये भाष्यत्वात् स्वपदानि वर्णितानि । **भाष्ये** । **अनुपपन्नमिति** । 'नान्यत् पश्यती'तिश्रुतेः । **प्रकृते** । **स्वकृतमिति** । आत्मीयभक्तकृतम् । लीलाविष्करणमात्रं भक्तेच्छाकृतम् । 'अचलत्वं चापेक्ष्ये'ति सूत्राभासात् । यद्वा । 'न तु भक्तसामर्थ्येने'(ति)भाष्ये भक्तबलं निषिद्धम्, न तु भक्तेच्छा, तेन नाचलत्वसूत्राभासविरोधः । **भगवदित्यादि** । स्वेच्छाविर्भावितलीलोपयोगिपदार्थकभगवदेकद्रष्टृत्वमित्यर्थः । तथा च स्वेच्छाविर्भावितलीलोपयोगिपदार्थेऽन्तरदर्शनादिकं 'नान्यत् पश्यती'त्यादिना निषिध्यते इति भावः । **तदित्यादि** । तस्य भूम्नो लक्षणात् तदितरदर्शनरहितात् तदितरदर्शनरहितसर्वात्मभावलाभः सुखेनेत्यर्थः ॥ ४७ ॥

---

[1] आत्मनः ।

दर्शनाच्च ॥ ४८ ॥

दृश्यते च सर्वात्मभाववतां भक्तानां व्रजसीमन्तिनीप्रभृतीनां पूर्वमितरविस्मृतिर्भगवत्स्पर्शादिनाग्रे सर्वसामर्थ्यमिति व्यासः स्वानुभवं प्रमाणत्वेनाह । उक्तं च श्रीभागवते ताभिरेव 'चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये, पादौ पदं न चलतस्तव पादमूला'दित्यादिना । तेन ज्ञानशक्तिक्रियाशक्तितिरोधानमुक्तं भवति । अग्रे तदाविर्भावादिकं स्फुटमेव ॥ ४८ ॥

ननु सनत्कुमारनारदसंवादात्मकमान्तमेकं वाक्यम्, तत्रोपक्रमे 'मन्त्रविदेवास्मि नात्मविच्छ्रुतꣳ ह्येवं मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति, सोऽहं भगवः शोचामी'त्यादिना स्वात्मज्ञानस्यैवोपक्रमादुपसंहारोपि तमादायैवोचितः । अग्रे चेत् आत्मपदानामीश्वरपरत्वं स्यात्, वाक्यभेद उपक्रमविरोधश्च स्यात्, तस्माद्वाक्यानुरोधात् पूर्वज्ञानप्रकारविशेष एवायमिति मन्तव्यमित्यत उत्तरं पठति ।

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

भाष्यप्रकाशः ।

दर्शनाच्च ॥४८॥ शब्देनान्यादर्शनं साधयित्वा प्रत्यक्षेणापि साधयतीत्याशयेन व्याकुर्वन्ति दृश्यते इत्यादि । स्वानुभवमिति । स्वयं समाधावनुभूतम् । शेषं निगदव्याख्यातम् ॥ ४८ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥ सूत्रमवतारयन्ति नन्वित्यादि । ननु मास्त्वस्य पूर्वप्रकरणशेषत्वम्, तथाप्यस्य प्रपाठकस्यान्तमेकवाक्यत्वं तु निःसन्दिग्धम्, विषय-

रश्मिः ।

दर्शनाच्च ॥ ४८ ॥ शब्देनेति । 'नान्यत् पश्यती'त्यादिशब्देन । दृश्यत इत्यादि । सर्वात्मभावो व्रजसीमन्तिनीनां 'सर्वात्मभावोऽधिकृतो भवतीनामधोक्षज' इत्यत्र भ्रमरगीते 'गोपगोपाङ्गनावीत'मिति गोपालतापिनीये 'गोप्यो नाम विष्णुपत्न्यः स्यु'रिति गोपीचन्दनोपनिषदि । पुराणहृदयैरत्र सर्वेन्द्रियव्यापारा भगवत्परा उन्नेयाः । ननु दर्शनं शाब्दं व्यासानामस्त्विति चेत् । न । पुनरुक्त्यापत्तेः । समाधाविति । 'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षज' इति समाधिभाषोक्तभक्तिः समाधावनुभूता, तत्प्रपञ्चः 'चित्तं सुखेने'त्यादिस्तदात्मक एव । भाष्ये ज्ञानशक्तितिरोधानं चित्तहरणेन । न च 'मनसैवानुद्रष्टव्य' इति श्रुतेर्मनसः क(ा)रणत्वमिति शङ्क्यम् । 'नेह नानास्ति किञ्चने'त्यग्रेतनश्रुत्या तस्याभेदज्ञानकरणत्वात् । अतो ज्ञानमार्गीयं करणं विहाय चित्तं सुषुप्तिग्राहकं भूम्नः सुषुप्तित्वाद्भूमाधिकरणपूर्वपक्षे तद्ग्राहकं गृहीतम् । 'करावपी'त्यादिना क्रियाशक्तितिरोधानम् ॥ ४८ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥ व्यवहारे वयं भाट्टा इति वदतां वेदान्तिनां मायावादिनामाशङ्कामाहुरित्याशयेनाहुः नन्वित्यादि । आन्तमित्यादि । अन्तं आ अभिव्याप्य आन्तम् । एकवाक्यत्वं स्वार्थबोधे समाप्तानां 'नात्मवित्, तरति शोकमात्मवि'दित्यादीनां वाक्यानां 'यत्र नान्य'दिति भूमलक्षणवाक्यस्याङ्गाङ्गित्वाद्यपेक्षया पुनरेकवाक्यत्वं संहत्य जातं पूर्वतन्त्रिणं निःसन्दिग्धं तृतीये तृतीयपादे निःसन्दिग्धम् । विषयस्य श्रीपुरुषोत्तमस्य भेदौ क्षराक्षरात्मकौ, तयोरत्र निरूपणीयत्वेनाभावात् । विषयनिष्ठोऽक्षरस्य वा भेदस्तस्याभावात् । विषयोऽक्षरो नेत्यन्योन्याभावविषयिणी प्रतीतिः ।

---

१. एकमेव ।

भाष्यप्रकाशः ।

भेदाभावात्, तत्र चोपक्रमे 'सोऽहं भगव' इत्यादिनात्मैव पृष्टः, उपक्रमश्चासञ्जातविरोधत्वादुपसंहारात् प्रबल इति पूर्वतन्त्रे स्थितम्, अत उपसंहारोऽप्युपक्रममादायैव नेतुमुचित इति तत्रत्या आत्मशब्दास्तत्परा एव युक्ताः, अग्रे चेत् 'अथात आत्मादेश' इत्यादीनामात्मपदानामीश्वरपरत्वं स्यात्, तदा ऐकार्थ्याभावात् 'अथात आत्मादेश' इत्यादिकं भिन्नं वाक्यं स्यात्, उपक्रमविरोधश्च स्यात्, अत उपक्रमगतात्मवाक्यानुरोधात् पूर्वप्रकरणोक्तात्मज्ञानस्य प्रकारविशेष एवायमिति ।

रश्मिः ।

आत्मैवेति । परमतप्रतिपन्नः । श्रीपुरुषोत्तमश्चात्मपदार्थः । आत्मशब्दा 'आत्मतः प्राण' इत्याद्याः । तत्परा निर्गुणब्रह्मपराः । अग्रे चेदिति भाष्यं विवरांचक्रुः अग्रे चेदिति । ईश्वरेति । न च कोशादीश्वरः शिव इति शङ्क्यम् । कोशस्य 'वेदाः श्रीकृष्णवाक्यानी'त्यत्र निबन्धे सर्वथा प्रामाण्याभावात् । भिन्नमिति । अर्थभेदात् प्रश्नविषयात्मभिन्नात्मप्रतिपादकमुत्तरवाक्यं भिन्नं स्यात् । शङ्करभाष्येऽस्य सूत्रस्याभासे प्रकरणात् लिङ्गमपास्य क्रियाशेषत्वमध्यवसायितम् । तत्र क्रियास्थले ज्ञानप्रकारविशेषं निवेशयाम्बभूवुः किञ्चेति ।

अत्रैवं ज्ञेयम् । भाष्ये वाक्यमात्रं वाक्यानामेकवाक्यतात्मकं जगृहुराचार्याः, तत्प्रसिद्धग्रन्थानुरोधेनोदाहरणमात्रम्, अन्यथा 'वाक्याद्बलीयस्त्वाच्च न बाध' इति सूत्रकरणापत्तेः । अतो वाक्यप्रकरणाभ्यां बलीयस्त्वं लिङ्गस्य बोध्यते इति । न च स्थानसमाख्ययोरग्रहणे 'वाक्यप्रकरणाभ्यां बलीयस्त्वाच्च न बाध' इति सूत्रकरणापत्तिरिति वाच्यम् । स्थानस्य देशसामान्यरूपस्यानुष्ठानदेशसामान्याभावात् पाठदेशसामान्यं भवति । पाठदेशसामान्येपि यथासंख्यरूपपाठदेशसामान्यं नास्ति । यथासङ्ख्यमनु(ष्ठान)देशः समानां(श)स्तस्याभावात् । सन्निधिपाठरूपपाठदेशसामान्यस्यानारभ्याधीतविषयत्वाभावात् । वाक्यस्यानारभ्याधीतकविषयत्वात् । एवं स्थानस्याग्रहणम् । समाख्याया यौगिकशब्दरूपायाः स्ववाच्यपदार्थानामङ्गाङ्गित्वबोधिकात्वाद्वाक्येऽनुपयुक्तत्वात् । एवं समाख्याया अग्रहणम् । उभयाकाङ्क्षाप्रकरणम् । तस्य तु 'नात्मवित्, तरति शोकमात्मवित्', 'यत्र नान्यत् पश्यति, नान्यत् शृणोती'त्यादीनामन्योन्याकांक्षा वर्तते एव, सर्वात्मभावस्योपकारकस्यात्मज्ञानस्योपकार्यस्य चाकांक्षा । परन्त्विदं क्रियामात्रविषयम्, न ज्ञानप्रकारविशेषविषयम् । तथा च भाट्टभास्करे राणकः तेन सिद्धस्य समिधादेः क्रियाद्वारेण ग्रहणेन तेन क्रियाया एव प्रकरणेन ग्रहणम् । तत्राप्यारादुपकारिकाया एव प्रयाजादिरूपायाः यस्याः श्रुतिलिङ्गवाक्यैर्नान्यसंयोगो यागार्थत्वात् । संनिपत्योपकारिकायास्त्ववघातादिरूपायाः द्रव्यदेवतार्थत्वेन श्रुतिलिङ्गवाक्यैर्विनियोगान्न प्रकरणग्रहणमिति । न च क्रियास्थाने ज्ञानं प्रक्षिप्य उक्तन्यायेन ज्ञानप्रकारविशेषविषयं प्रकरणमस्त्विति शङ्क्यम् । देवताविषयत्वेन प्रकरणाग्रहणात् । अवघातादिक्रियावत् । परन्तु वाक्याद्बलीयस्त्वादिसूत्रप्रसङ्गात् प्रकरणमुपात्तम् । न च वाक्यस्यानारभ्याधीतवाक्याङ्गाङ्गिभावोपयोगितयात्र प्रपाठके आरभ्याधीतत्वेन 'नात्मवित्, तरति शोकमात्मवि'दित्यादिवाक्यानां नाङ्गाङ्गिभावो भूमलक्षणवाक्येनेति वाच्यम् । नामादिप्राणपर्यन्तं ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वा जिज्ञासितव्यत्वेन सत्यादिसुखान्तमुक्तम् । 'यो वै भूमा तदमृतम्, अथ यदल्पं तन्मर्त्य'मिति श्रुतावथेति भिन्नप्रक्रमेणाल्पानां मर्त्यत्वविधानात् नामादीनामुपासनाप्रकरणेन शोकतरणमनुपलभमानः सत्यादीनां जिज्ञासाविषयाणां शोकतारकत्वं 'स स्वराड् भवती'त्यादि 'न पश्यो मृत्युं पश्यति, न रोगम्, नोत दुःखता'मित्यनयोक्तमिति सर्वात्मभावबोधकया 'यत्र नान्य'दिति श्रुत्याङ्गाङ्गिभावो 'नात्मवित्, तरति शोकमात्मवि'दित्यादिश्रुतीनां भवत्येव ।

नैवं वाक्यानुरोधाद्वरणजसर्वात्मभावलिङ्गभूयस्त्वं बाधितव्यम् । वाक्यापेक्षया श्रुतिलिङ्गयोर्बलीयस्त्वात् । एतद्बलीयस्त्वं तु 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्य'मिति जैमिनीयसूत्रे सिद्धम् । प्रकृत इतरसाधननिषेधपूर्वकं 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वा'मिति श्रुतिर्वरणमात्रलभ्यत्वमाह । एतदग्रे च 'नायमात्मा बलहीनेन लभ्य' इत्युपक्रम्य, 'एतैरुपायैर्यतते यस्तु विद्वाँस्तस्यैष आत्मा विशते ब्रह्मधामे'ति श्रुतिः पठ्यते ।

भाष्यप्रकाशः ।

यमिति मन्तव्यम् । किञ्च, अत्र हि वरणलिङ्गं सर्वात्मभावो न भूमलक्षणवाक्यमात्रेण सिध्यति, येन प्रकरणमनादृत्य स गृह्येत, किन्तु तदारभ्य 'आत्मन एवेदं सर्व'मित्यन्तेन सन्दर्भेण । अतः सन्दर्भो यथा सर्वात्मभावबोधकमवान्तरप्रकरणम्, तथा प्रपाठकः सर्व आत्मबोधकं महाप्रकरणम्, मतो भूमलक्षणवाक्यस्य सन्दिग्धत्वात् प्रपाठकरूपं महाप्रकरणमेवानुसर्तव्यमित्यत उत्तरं सूत्रं पठतीत्यर्थः । सूत्रं व्याकुर्वन्ति नैवमित्यादि । भूयस्त्वमिति । परमोत्कर्षः । तत्र किं श्रुत्यादिकमित्यपेक्षायां पूर्वं श्रुतेरुक्तत्वात्तां स्मारयन्तो लिङ्गं स्फुटीकुर्वन्ति प्रकृते इत्यादि ।

रश्मिः ।

आत्मशब्दानां 'नात्मवि'दित्यादीनां 'आत्मैवाधस्ता'दित्यादिश्रुत्युक्तात्मविषयत्वात् । ननूक्तमनारभ्याधीतत्वमङ्गाङ्गिभावे तन्त्रमिति चेत् । न । अनारभ्याधीतत्ववदेकार्थविषयत्वस्यापि तन्त्रत्वात् । यथा चातुर्मास्यप्रकरणपठितस्य 'द्वयोः प्रणयति द्वाभ्यामग्निं प्रणयती'ति वाक्यस्य शाखान्तरीयस्य वा 'आहवनीयादध्वर्युप्रतिप्रस्थातारौ सहाग्नी प्रणयत' इति वाक्यस्यैकवाक्यतया चातुर्मास्यान्तर्गतयोर्वरुणप्रघाससाकमेधसंज्ञयोः पर्वणोरीदृशं प्रणयनमङ्गत्वेन ज्ञायते । 'सामर्थ्यमालोच्य प्रणयनेन पर्वद्वयं भावये'दिति । द्वयोरित्यस्यैतत्पर्वद्वयविषयत्वं तस्मात् । तदेतदेकवाक्यत्वमुक्तं तन्निर्धारणानियमाधिकरणे 'तस्मात् त्व'मित्युपक्रम्य, 'याहि सर्वात्मभावेने'त्यत्र, 'सर्वात्मभावेन मां पुरुषोत्तमं याहि, अभयं यास्यस' इति । पुरुषोत्तमप्राप्तिस्तु फलात्मकज्ञानद्वारा, तदुक्तं 'तरति शोकमात्मवि'दिति । तदेकवाक्यतयोपसंहारस्य 'स स्वराड् भवती'त्यस्य बलेन निर्णयाद्वाक्यविनियोगोऽयम् । अधिकरणमालायां जैमिनीयन्यायमालाविस्तरोपनामिकायां तु उक्ततन्त्रविशेषः कश्चिन्नोपगतः । तृतीयस्य तृतीयपादारम्भे उपक्रमोपसंहारैकवाक्यताबलेन निर्णयाद्वाक्यविनियोगो भवतीति विशेषातिरिक्तः । तेन वाक्यप्रकरणे उभे गृहीते । प्रसिद्धग्रन्थानुरोधात् ।

तदाहुः किञ्चेति । वरणेति । इदं भाष्ये स्पष्टीभविष्यति । सन्दिग्धत्वादिति । 'सर्वात्मभावोऽधिकृतो भवतीनामधोक्षज' इत्यस्य पुराणमतत्वात् । न च 'आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति छान्दोग्यसमाप्तिस्थश्रुतिविचारेणासन्देह इति वाच्यम् । 'आत्मनि हार्दे ब्रह्मणि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'त्यर्थेन 'कृष्णमूर्तिः सदा ध्येये'त्याद्यर्थाभावात् । उत्तरमिति सूत्रविशेषणम् । उत्तरसूत्रेण पठतीत्यस्य पर्यायत्वम् । यदि चैवं व्याख्यातपूर्वपक्षोत्थानमेव न सम्भवति, पूर्वतन्त्रिणां मायावादिनां च लिङ्गभूयस्त्वं श्रुत्वा वाक्यचिन्तास्फुरणात् श्रुतिचिन्ता तु स्यात्, तेषां लिङ्गाच्छ्रुतेः प्राबल्याद्वाक्यस्य तु लिङ्गात् दुर्बलत्वादिति विभाव्येत, तदा तु ह्युपनिषद्व्याख्यान्तर्गतस्य कस्यचित् तर्कितुः शङ्कया व्याख्यानमित्युन्नीयेत । भाष्ये । जैमिनीयसूत्र इति । तृतीयस्य तृतीयपादस्थे । पूर्वमिति । विधैवेति सूत्रे श्रुतेर्वेदरूपायाः लिङ्गं शब्दसामर्थ्यम् ।

---

१. किञ्चेत्यारभ्य, अनुसर्तव्यमित्यन्तः पाठः ३७८ पृष्ठे टिप्पणे निवेशितस्तत उद्धृत्य श्रीपुरुषोत्तमैरत्र योजित इति ।

भाष्यप्रकाशः ।

अयमर्थः । सत्यमिदमात्मबोधकमान्तमेकं वाक्यम्, उपक्रमश्च बलीयान्, तथापि स नाश्वप्रतिग्रहेष्टिवाक्य इव निःसन्दिग्धः । तत्रत्यात्मपदस्य जीवाक्षरपुरुषोत्तमसाधारण्यात् । तथा सति तत्र को वा ग्राह्य इति विमर्शे, नारदस्य शोकतारकात्मज्ञानार्थं प्रष्टुं प्रवृत्तत्वेन तादृश एवात्मा ग्राह्यः । स च निरवधिसुखरूपत्वात् पुरुषोत्तम एव, न जीवः, नाप्यक्षरम् । आद्यस्य दुःखित्वादन्यस्य गणितानन्दत्वात् । अतो निरवधिसुखरूपात्माभिधायिका या भूमश्रुतिः, सा वाक्यात् बलीयसी । बुभुत्सितात्मस्वरूपनिर्णायकत्वात् । किञ्च । 'आत्मलाभान्न परं विद्यत' इति श्रुत्यन्तरे आत्मलाभस्य परमलाभत्वश्रावणाच्छोकतारकोऽप्यात्मा लभ्यमान एव शोकं तारयति, न त्वलभ्यमानः । लाभश्च न ज्ञानमात्रम्, किन्तु स्वाधीनतापुरस्कृतम् । प्रकृते च 'यदा वै सुखं लभत' इत्यादिकथनाल्लभ्यमानस्यैव निरवधिसुखरूपस्य भूम्नः शोकतारकत्वमभिसंहितम् । तस्य च 'इतरनिषेधे'त्याद्युक्तरीत्या वरणश्रुतिस्तन्मात्रलभ्यत्वमाह । एतदग्रे च 'नायमात्मे'ति भक्तिलभ्यत्वबोधिका श्रुतिः पठ्यते । अत आत्मज्ञानस्य ज्ञायमानस्यात्मनो वा शोकतारकत्वसम्पादिका 'लभत' इति लाभश्रुतिश्च तादृशी । तथा 'यमेवैष' इति श्रुतिर्वरणमात्रलभ्यत्वमात्मन आह । तदग्रिमा च भक्त्यादिलभ्यत्वम् । तानि च वरणस्यैव व्यापारभूतानि । एत-

रश्मिः ।

इतरेत्यादिभाष्ये कस्य इतरनिषेधेत्यादीत्यपेक्षायां भूम्नः सर्वात्मभावरूपस्येत्याहुः अयमर्थ इति । अश्वेति । इयं तृतीयस्य चतुर्थचरणे चतुर्दशाधिकरणेऽस्ति । भूमेति । 'नायमात्मे'त्यत्र बलं निरपेक्षरवरूपं भूमश्रुतिः 'तपसो वाप्यलिङ्गा'दित्यत्र निरपेक्षरवरूपं वा भूमश्रुतिः, प्रकृते तु 'स भूमे'ति भूमरूपा निरपेक्षरवरूपा श्रुतिः उपक्रमगतात्मवाक्याद्बलीयसी । न च विनियोगविधेरभावात् कारणाभावे सहकारिषण्णां कारणानां कथमुपयोग इति वाच्यम् । पूर्वतन्त्रवत् कारणत्वाभावात् । तत्रत्यबलाबलमात्रादरणात् । न च श्रुतिर्वेदः सूत्र इति शङ्क्यम् । जैमिनेर्व्यासशिष्यत्वेन फलाध्याये 'परं जैमिनिर्मुख्यत्वा'दित्यादिसूत्रे तन्नामग्रहणात् । अन्यथा वेदादिबलीयस्त्वादित्येव सूत्रयेत् । बुभुत्सितेति । बोद्धुमिष्टस्यात्मनः । 'सुखं भगवो विजिज्ञास' इति श्रुतेः । शोकमिति । ननु पञ्चम्या भाव्यम्, तरणेऽपादानत्वात् । मैवम् । जीवः शोकं तरति, तं जीवं शोकं तारयतीति प्रेरणायां णिच् । तारयतीत्यस्य हारयतीत्यर्थात् । 'दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थ्मुषाम् । कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहा'मित्यत्र निञादीनां चतुर्णामर्थग्रहणात् । एवमपेक्षितोक्त्या सिद्धापेक्षितेन समं भाष्यान्वयमाहुः तस्य चेत्यादि । आत्मज्ञानस्यालाभत्वादाहुः ज्ञायमानस्येति । लाभेति । लाभप्रतिपादको निरपेक्षो रवः । तादृशी 'यदा वै सुखं लभत' इति वाक्याद्बलीयसी । भूमपदस्य सर्वात्मभावार्थकत्वपक्षमुक्त्वा तस्य भगवदर्थकत्वपक्षमाहुः तथेति । आत्मनो भगवतः 'भगवद्रूपत्वात् सर्वात्मभावस्ये'ति भाष्यात् । 'यमेवे'ति सावधारणश्रुत्या भक्त्यादीनामप्रयोजकत्वमाशङ्क्याहुः तानीति । प्रमादाभावसर्वात्मभावसहितविरहभावबलानि भक्त्यादीनि । एतदिति । वरणमात्रलभ्यत्वं सर्वात्मभावदानद्वारा लिङ्गं शब्दसामर्थ्यरूपम्, 'फलमत उपपत्ते'रित्यत्र तथा व्याख्यानात् । सर्वात्मभावस्य तु वरणमात्रलभ्यत्वं प्रधानवदधिकरणे सिद्धम् । अर्थद्वयं भगवत्सर्वात्मभावरूपं बहुषु स्थलेषु वर्तते । तत्रत्ये विचारे मात्रपदं

एतच्च 'विद्यैव तु निर्धारणा'दित्यत्र निरूपितम्।

अपरं च, 'नात्मवित्, तरति शोकमात्मवि'दितिनारदवाक्यानुवादयो-

भाष्यप्रकाशः।

दपि पुरुषोत्तमस्य लिङ्गम्। 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यये'ति गीतावाक्यात्। एतल्लिङ्गं चकारात् भूमादिश्रुतिः उभयमपि 'विद्यैवे'ति सूत्रे निरूपितम्। अत्र श्रुतिबोधको ग्रन्थः प्रायस्त्रुटित इति प्रतिभाति।

पूर्वोक्तस्य लिङ्गस्य श्रुत्यन्तरस्थत्वात् प्रकृतसन्दर्भस्थं लिङ्गं दर्शयन्ति अपरं चेति। नारदवाक्यानुवादयोरिति। नारदवाक्ये तदनुवादे च। उत्तमप्रश्नात्मकेनेति। 'अस्ति

रश्मिः।

कार्त्स्न्ये एकत्र, अन्यत्रावधारणे बोध्यम्। गीतेति। सर्वात्मभावस्य लिङ्गं तु 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति वाक्यात्। भूमेति। भूमरूपनिरपेक्षो रवः आदिना पुरुषोत्तमरूपनिरपेक्षो रवः। विद्येतिसूत्रे पुरुषोत्तमरूपनिरपेक्षो रवो नास्ति। सर्वात्मभावरूपो रवश्चेत्याहुः अत्रेति। 'नायमात्मे'ति आत्मरवः पुरुषोत्तमवाची, 'तपसो वाप्यलिङ्गा'दिति सर्वात्मभाववाची। तथाप्युपपादनसापेक्ष इति प्राय इत्युक्तम्। श्रुत्यन्तरेति। मुण्डकश्रुत्यन्तरेत्यर्थः। काठकश्रुत्यन्तरेत्यर्थश्च। अत्र 'नायमात्मे'त्यादिवाक्यस्यात्मलाभसामर्थ्यं 'लभ्य' इति पदादालोचितम्। तनुविवरणसामर्थ्यं 'विवृणुत' इति शब्दादालोचितम्। द्वितीयस्य 'नायमात्मे'त्यादिवाक्यस्य धामवेशनसामर्थ्यं 'विशत' इति शब्दादालोचितम्। तयोः स्वार्थबोधे समाप्तयोर्वाक्ययोः पुनराकाङ्क्षावशेनैकवाक्यतया वरणाल्लिङ्गं सर्वात्मभावः 'वरणजसर्वात्मभावे'ति भाष्यात्। तथा च निःसाधनो यः कोप्युक्तभक्तेरङ्गम्। वरणमात्रस्य साधनत्वमुक्त्वा पुनर्बलाभावनिषेधेनात्मलाभवाक्यस्य बलाप्रमादयोर्वाक्यस्य च सामर्थ्यमालोच्य परस्पराकाङ्क्षयैकवाक्यतया 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत' इति वाक्याद्विविधश्रेयोवानुक्तभक्तेरङ्गम्। 'एतैरुपायै'रिति श्रुतावुपायपदान्न पुष्टिमार्गीयः, अपि तु मर्यादामार्गीयः। भक्तिहंसे स्पष्ट एवायमर्थः। तथा च यः कोपि वरणेन सर्वात्मभावं लभेतेति श्रुतिं कल्पयति पूर्वं लिङ्गम्। द्वितीयं तु लिङ्गं विविधश्रेयोवान् बलाप्रमादाभ्यामात्मानं लभेतेति श्रुतिं कल्पयति। एवञ्च यत्पूर्वपक्षिणोक्तं वाक्यात् ज्ञानप्रकारविशेषः प्रकरणाल्लिङ्गस्य सन्दिग्धस्य बाध इति। तन्नोपपद्यते। लिङ्गस्यासन्दिग्धत्वात् तेन दुर्बलवाक्यान्न ज्ञानप्रकारविशेषः, प्रकरणं तु दुरापास्तम्। तथा च यथा तृतीयस्य तृतीयपादेऽष्टमाधिकरणे 'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान' इति। अस्य मन्त्रस्यार्थः। मोः पुरोडाश ते तव स्योनं समीचीनं सदनं स्थानं कृणोमि। विकरणव्यत्ययान्न तनादिकृञ्भ्यउः, किन्तु जुहोत्यादिभ्यः श्लुः शपोपवादः। करोमीत्यर्थः। तव स्थानं घृतस्य धारया सुष्ठु सेवितुं योग्यं सुशेवं कल्पयामि। भो व्रीहिसारभूत त्वं व्रीहीणां मेध सुमनस्यमानः समाहितमनस्कस्तस्मिन् समीचीने उपविश्य तत्र स्थिरो भवेत्यर्थः। तत्र 'तस्मिन्' इत्यनेन पूर्वोत्तरयोरेकवाक्यत्वे सति सर्वोप्ययं मन्त्रः स्थानकरणस्याङ्गम्। तत्र विनियोजिका श्रुतिरेवं कल्पनीया सर्वेणानेन मन्त्रेण स्थानं कर्तव्यमिति। तथा सर्वेण मन्त्रेण पुरोडाशः स्थापनीय इत्यपि कल्पनीया। सदनाङ्गत्ववत् प्रतिष्ठापनाङ्गत्वस्यापि तद्वाक्यबोधितत्वात्। तथा सति सदनस्थापनयोरस्य मन्त्रस्य विकल्पः समुच्चयो वा स्वेच्छया भविष्यतीति प्राप्ते, सिद्धान्तितम्। यदेतत्पूर्वोत्तरार्धयोः परस्परान्वयेन सम्पन्नमेकवाक्यं तदेतदुत्तरार्धस्य

रात्मपदमुत्तमप्रश्नात्मकेन लिङ्गेन पुरुषोत्तमपरमिति ज्ञायते । स हि सर्वेभ्य उत्तमोऽतो ब्रह्मेत्युपास्यत्वेन सनत्कुमारोक्तप्रतिरूपं ततस्ततो भूयोऽस्तीत्य-

---

भाष्यप्रकाशः ।

भगवो नाम्नो भूय' इत्यादिरूपाधिक्यप्रश्नात्मकेन । एतदेव विभजन्ते स हीत्यादि । स पुरुषोत्तमो हि निश्चयेन 'स उत्तमः पुरुष' इति श्रुतेः 'अतोऽस्मि लोके वेदे चे'ति स्मृतेः

रश्मिः ।

सदनकरणे शक्तिमकल्पयित्वा कृत्स्नं मन्त्रं सदने विनियोक्तुं नार्हति । तथा पूर्वार्धस्य स्थापने शक्तिमकल्पयित्वा न तत्र प्रभवति । तथा सति लिङ्गेन वाक्यबाधादर्धद्वयमुभयोर्व्यवस्थितमिति व्यवस्थापितम् । तद्वत् 'नायमात्मे'तिवाक्यद्वयं स्वार्थबोधसमासम् । तत्र पूर्वं वरणमात्रलभ्यत्वमाह श्रुतिः । भाष्ये भक्तिहेतुग्रन्थस्योद्देशात् तत्र चानुग्रहस्य वरणकारणत्वेन निवेशादनुग्रहेण वरणमात्रलभ्यत्वमाह भक्तिहेतुः । भाष्यत्वाद्वरणानुग्रहयोः कार्यकारणभावः । अत्रेतरसाधननिषेधपूर्वकवरणादिमात्रलभ्यत्वात् पुष्टिः । अत्रापि स्वरूपबलेन मुक्तिः, ज्ञानभक्त्यादि दत्वा मुक्तिः । तत्र द्वितीयपक्षे पुष्टावपि सर्वात्मभावप्रवेश इति सर्वात्मभावमपेक्षते । स द्वितीयश्रुतौ लिङ्गपदेन श्रुतोऽश्रुतापेक्षया प्रबलोऽनुकृष्यते । 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययात् ।' 'मुख्यभक्तिरि'ति सर्वात्मभावसमाख्या । 'याहि सर्वात्मभावेने'त्येकादशसर्वस्वं निबन्धोक्तं श्रीभागवते एकादशस्कन्धे द्वादशाध्याये पुष्टिमार्गनिरूपणे यतः । श्रुतयश्च 'भक्तिरहस्यभजन'मित्यादि । अत्र मनःपदादेकादश मनसो वृत्तयो ग्राह्याः । 'आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति । 'यत्र नान्यत् पश्यती'ति । 'श्रुतेश्चे'तिसूत्रमत्रैव चतुर्थचरणे । द्वितीयस्यां मर्यादाभक्तिः । 'न च प्रमादा'दिति भक्त्युपायकथनात् । अप्रमादाद्बलं तपश्च । लिङ्गं तु प्रदानवत्सूत्रोक्तरीत्या प्राप्यते । अत्रापि वरणमनुग्रहश्च योज्यः । किञ्च, 'पुरुषोत्तमलाभहेतुभूतं तु भक्तिमार्ग' इत्यादि 'विधैवे'ति सूत्रभाष्यात् । भक्तिहेतुग्रन्थरीत्यानुग्रहोपि । श्रुतयोपि 'आत्मा वा अर' इत्यादि 'तं भजेत् तं रसेत्' 'भक्त्या जानाति चाव्ययम्' । तथा च दृष्टान्तानुरोधात् यथा 'स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यती'त्यत्र स्रुवादीनां सामर्थ्यमालोच्य 'द्रवं मांसं कठिन'मिति श्रुतिं कल्पयित्वा स्रुवस्य द्रवावदाने स्वधितेर्मांसावदाने हस्तस्य कठिनावदानेऽङ्गत्वं विधिरर्थगतसामर्थ्यरूपलिङ्गमालोच्य बोधयति, तथा प्रकृते 'तदज्ञाने सर्वमौढ्यं तेन तद्धृदयं स्मृत'मिति निबन्धात् पुराणविदो विगतसर्वमोहा यावद्वाक्याभ्यामुभयश्रुतिभ्यां एकं मार्गमुपगच्छन्ति, तावत् 'मार्गास्त्रयो मया प्रोक्ताः' इति वाक्याद्वरणसामर्थ्यं तस्यात्मलाभहेतुत्वं ज्ञात्वात्मा लभ्यो भक्तिमार्गात्, सा भक्तिरपि पुष्टिः सर्वात्मभावरूपा, श्रुतौ वरणमात्रोपादानात् । अतः स्वेन वृतेन सर्वात्मभावेनात्मा लभ्य इति श्रुतिं प्रकल्प्य पुष्टिमार्गीयस्य पूर्वश्रुत्युक्तमार्गाङ्गत्वम् । द्वितीयश्रुतौ भक्त्यादेर्बलादिपदवाच्यस्य सामर्थ्यमालोच्य तस्य वरणमन्तराऽसम्भवं 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति वाक्यादालोच्य वरणेन बलादि भक्तिरिति श्रुतिं प्रकल्प्य मर्यादामार्गीयस्य द्वितीयश्रुत्युक्तमार्गाङ्गत्वं च बोधयतीति । लिङ्गस्येति । वरणसामर्थ्यस्य भक्त्यादेर्बलादिपदवाच्यस्य सामर्थ्यस्य च । लिङ्गमिति । आत्मपदस्य उत्तमप्रश्नात्मकत्वं लिङ्गम् । सर्वात्मभावस्य 'स एवाधस्ता'दित्यादिनोक्तो भावो लिङ्गम् । स भगवतो नारदस्योत्तमत्वं 'यो यच्छ्रद्धः स एव स' इति वाक्यात् पुरुषोत्तमप्रयुक्तं उपनिषदि, अन्यथा नित्ये वेदेऽस्तीति अनित्यस्य नारदस्य श्रीभागवते मध्यमाधिकारिण उत्तमत्वानवच्छिन्नस्य संयोगापत्त्या स नारद इत्यर्थमनादृत्य भाष्यं व्याकुर्वन्ति स्म स पुरुषोत्तम इत्यादि ।

पृच्छत् । अन्ते सर्वाधिकत्वेन सुखात्मकत्वेन भूमानं श्रुत्वा तथा नापृच्छत्, किन्तु तत्प्राप्त्यर्थमत्यार्त्या 'कस्मिन् प्रतिष्ठित' इत्यपृच्छत् । तदा सर्वात्मभाववत्स्वेव प्रतिष्ठित इत्याशयेन सर्वात्मभावलिङ्गात्मकं भावं 'स एवाधस्ता'दित्यादिनोक्तवान् ॥ ४९ ॥

भाष्यप्रकाशः

सर्वेभ्यो नामादिप्राणपर्यन्तेभ्योऽक्षराच्चोत्तमः । अतो नामाद्याशान्तेषु ब्रह्मेत्युपास्यत्वेन कथनात् सनत्कुमारोक्तप्रतिरूपं सनत्कुमारेण 'नाम्नो वाव भूयोऽस्ती'त्याद्युक्ते 'तन्मे ब्रवीतु भगवा'नित्येवं तल्लक्षितरूपं तत'स्ततो भूयोऽस्तीति'ति ज्ञात्वा अपृच्छत् । अन्ते पश्चात् सर्वाधिकं भूमानं श्रुत्वा, तथा 'अस्ति ततोऽपि भूय' इत्येवं नापृच्छत्, किन्तु तदधिष्ठानमपृच्छत् । तथाचैतत्प्रश्नद्वयसामर्थ्येनाप्युपक्रमगतमात्मपदं पुरुषोत्तमपरमिति निश्चीयते । वाक्याल्लिङ्गस्यापि बलीयस्त्वादित्यर्थः । नन्वस्त्वात्मपदं पुरुषोत्तमपरम्, तथापि विवक्षितसर्वात्मभावबोधकस्यात्रादर्शनात् कथं न तद्भूयस्त्वबाध इत्यत आहुः तत्रेत्यादि । तथाच द्वितीयप्रश्नोत्तरे सर्वात्मभावलिङ्गस्य दर्शनान्न तद्बाध इत्यर्थः । एतेनावश्यकोपपत्तिरत्र वाक्यतात्पर्यनिर्णायिकेत्युक्तम् ॥ ४९ ॥

रश्मिः ।

त्यदादीनामुत्सर्गतः प्रधानपरामर्शित्वेन स पुरुषोत्तमः, न तु नारदः । अपृच्छदित्यत्र तु नारदः कर्ता । ननु स नारदो हि निश्चयेन श्रौतत्वादुत्तमः, मध्यमाधिकारित्वस्य श्रीभागवतीयत्वेन भगवन्मतत्वात् । श्रौतत्वाभावात् । अतः सर्वोत्तमत्वात् । सनत्कुमारोक्तप्रतिकूलरूपम्, अन्यत् समानं व्याख्यानमिति व्याख्यानं कुतो नादृतम्, अन्यथा स हि सर्वेभ्य उत्तम इति भिन्नं वाक्यं स्यादिति चेत् । न । पूर्वोक्तदोषाणामवर्जनीयत्वेन वाक्यभेदस्यादोषत्वात् । तल्लक्षितेति । प्रति लक्षणे 'लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनव' इति पाणिनिसूत्रात् । नारदलक्षितं रूपम् । तथा चेति । पूर्वोक्तप्रकारेण च प्रश्नद्वयम्, ततो 'भूयोऽस्ती'ति ज्ञानेन प्रश्नः अधिष्ठानप्रश्नश्च । वाक्यात् 'सोहं भगवो मन्त्रविदेवास्मि, नात्मवि'दिति वाक्यात् लिङ्गस्य ततो भूयस्त्वेन ज्ञातस्य ज्ञानविषयिणीच्छारूपस्य तदधिष्ठानज्ञानविषयिणीच्छारूपस्य च अपिपदेनात्मरूपनिरपेक्षत्वस्य बलीयस्त्वात् । तद्भूयस्त्वबाधो लिङ्गभूयस्त्वबाधः । ननु वाक्यार्थजीवात्मरूपस्य प्रतीतस्य बाधाद्वाक्याप्रामाण्यापत्तिरिति चेत्, तत्राहुः एतेनेति । उपपादनादावश्यिका युक्तिः, पुरुषोत्तमपर आत्मशब्दो न स्यात्, वाक्यप्रश्नसामर्थ्यश्रुतयो न स्युरित्येवंरूपा वाक्यस्य तात्पर्यं तस्य पुरुषोत्तमे निर्णायिकेत्येतेन भाष्येणोक्तम् । वक्तुरिच्छा तु तात्पर्यम् । तस्य शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतुत्वम्, 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः । सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादय' इति काव्यप्रकाश आदिपदात् । यद्यप्यादिपदार्थोऽभिनयादयः, इदं च नाभिनयः । अभिनयादय इत्यत्रादिशब्देन हृदयनिहितहस्तो गृहीतः । 'यथा 'इतः स दैत्यः प्राप्तः श्रीर्नेत एवार्हति क्षय'मित्यत्रात्मनिर्देशो हृदयनिहितहस्तेन प्रतीयते । तथाप्यादिपदार्थत्वं तात्पर्यस्याप्यविरुद्धम् । जीवेऽभिधावृत्तिः, पुरुषोत्तमे तात्पर्यवृत्तिस्तस्या निर्णायिकेति वार्थः । परं वाकारोऽनादरे । तस्य वाक्यस्य सन्दिग्धत्वादिति वक्ष्यमाणभाष्यप्रकाशात् । सन्दिग्धेऽर्थे काव्यप्रकाशकारिकाप्रवृत्तेरुचितत्वात् ॥ ४९ ॥

नन्वेतया श्रुत्या न सर्वात्मभावलिङ्गात्मको भाव उच्यते, किन्तु व्यापकत्वेन सर्वरूपत्वेन स्वभिन्नाधिकरणाभावादन्यत्राप्रतिष्ठितत्वमेवोच्यत इत्यत उत्तरं पठति ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् ॥ ५० ॥

भूमस्वरूपं श्रुत्वा 'स भगवः कस्मिन् प्रतिष्ठित' इति प्रश्ने 'स्वे महिम्नी'त्युत्तरम् । तदर्थस्तु स्वीयत्वेन वृते भक्ते यो महिमरूपः सर्वात्मभावस्तस्मिन्निति । स्वरूपात्मके महिम्नीति वा । भगवदात्मकत्वात् सर्वात्मभावस्य । तदितरस्य साक्षात्पुरुषोत्तमाप्रापकत्वादस्यैव तत्प्रापकत्वात् परमकाष्ठापन्नमहित्वरूपोऽयमेव भाव इति महिमशब्देनोच्यते । स तु विप्रयोगभावोदये सत्येव सम्यक् ज्ञातो

भाष्यप्रकाशः ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् ॥ ५० ॥ सूत्रमवतारयन्ति नन्वित्यादि । तथाच पूर्वमुपक्रमगतवाक्यबलेन प्रत्यवस्थाने तस्य वाक्यस्य सन्दिग्धार्थकत्वादुपसंहारगतत्वेऽप्यसन्दिग्धाभ्यां ततः प्रबलाभ्यां श्रुतिलिङ्गाभ्यामेतद्वाक्यार्थनिर्णयेनात्र ताभ्यामात्मपदस्य पुरुषोत्तमपरत्वेऽप्येतया द्वितीयप्रश्नश्रुत्या यत् सर्वात्मभावसमर्थनम्, तन्न युक्तम् । तदुत्तरश्रुतौ पुरुषोत्तमस्य स्वप्रतिष्ठताया एव सिद्ध्या भवदुक्तसर्वात्मभाववद्भक्तस्याधिकरणताया असिद्धौ सर्वात्मभावस्यात्र प्रतिपत्तुमशक्यत्वादित्याशङ्कायामिदं सूत्रं पठतीत्यर्थः । उक्ताशङ्कानिवारकं सौत्रं हेतुमुक्तश्रुतिविचारमुखेन व्याकुर्वन्ति भूमेत्यादि । यदुक्तमत्र सर्वात्मभावलिङ्गात्मको भावो नोच्यत इति । तन्न । यतोऽत्र भूमस्वरूपश्रवणानन्तरं तदाधारप्रश्ने सनत्कुमारेण 'स्वे महिम्नी'त्युत्तरमुक्तम् । तत्र स्वपदस्यात्मीयवाचकत्वे स्वीयत्वेन वृतो यो भक्तस्तन्निष्ठो यो महिमा सर्वात्मभावरूप उत्कर्षस्तस्मिन्नित्यर्थो भवति । यदि च स्वपदमात्मवाचकम्, तदा स्वरूपात्मके महिम्नीत्यर्थो भवति । स च महिमा सर्वात्मभाव एवेत्युभयथापि तस्य महिम्नो भगवत्स्वरूपात्मकत्वात्स्वपदं न विरुध्यते । नच तस्य स्वरूपात्मकत्वे कथं महिमरूपत्वमिति शङ्कनीयम् । सेतुत्ववदुपपत्तेः । तदितरस्य पुरुषोत्तमभिन्नस्य तत्प्रापकत्वाभावादस्य तदात्मकभावस्यैव तत्प्रापकत्वादयमेव सर्वोत्कृष्ट इत्ययमेव महिमपदेनोच्यते । स तु विप्रयोगभावोदये सत्येव सम्यक् परमत्वेन रूपेण व्यभिचारिभावैर्ज्ञातो भवति । ते त्वनियतस्वभावा इति ज्ञापयितुं त्रिविधाः

रश्मिः ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् ॥ ५० ॥ उत्तरेति । तस्य प्रश्नस्य उत्तरश्रुतौ 'स्वे महिम्नी'ति श्रुतौ । सौत्रमिति । अनुबन्धरूपम् । सर्वात्मेति । वृतपदसमभिव्याहारात्तदुत्तरश्रुत्युक्तलिङ्गपदार्थरूपसर्वात्मभावरूप इत्यर्थः । सर्वेति । 'तपसो वाप्यलिङ्गा'दिति श्रुतेः । तदितरस्येत्यादिभाष्यं विवरांचक्रुः न चेत्यादिना । तत्प्रापकस्येति । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'ति 'भक्त्या जानाति चाव्यय'मिति भक्तिपरमात्मनोः स्वज्ञानसाधनत्वादैक्योक्तेः पुरुषोत्तमभिन्नस्य तत्प्रापकत्वाभावात् । प्रवेशसाधनत्वात् द्वयोरैक्यं वा । 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर'मिति वाक्यात् । भाष्ये साक्षात्पदं प्रत्यक्षे तुल्ये वा । 'साक्षात् प्रत्यक्षतुल्ययो'रिति विश्वात् । स त्विति भाष्यं विवरांबभूवुः स त्विति । परेति । ननु सर्वात्मभावत्वेन सर्वात्मभावः कुतो न ज्ञातो भवतीति चेत् । न । परो मीयते ज्ञायते तेनाधिष्ठानेनेति परमस्तत्त्वेना-

भवति व्यभिचारिभावैः । ते त्वनियतस्वभावा इति ज्ञापयितुं त्रिविधाः । 'स एवाधस्ता'दित्यादिना, 'आत्मैवेदꣳ सर्व'मित्यन्तेन निरूप्य, भूमप्रतिष्ठाधिकरणप्रश्ने, यदुत्तरितं 'स्वे महिम्नी'ति, तमेवानुबध्नाति, 'स वा एष' इत्यनेन, तच्छब्दस्य पूर्वप-

---

भाष्यप्रकाशः ।

तदादेशाहङ्कारादेशात्मादेशरूपास्तिस्रो विधास्तस्य भावस्य ज्ञापकाः प्रकारास्तांस्त्रीन् प्रकारान् 'स एवाधस्ता'दित्यारभ्य 'आत्मैवेदं सर्व'मित्यन्तेन निरूप्य, भूमप्रतिष्ठाप्रश्ने यदुत्तरितं 'स्वे महिम्नी'ति, तं महिमपदोक्तं भावमेवानुबध्नाति, 'स वा एष' इति तच्छब्दस्योक्तमहिमपरामर्शित्वात् तस्मिन् भक्ते 'एवं पश्य'न्नित्यादिना तत्कर्मकदर्शनादिकर्तृताबोधनेन तद्भाववैशिष्ट्यं बोधयँस्तमेव भावं महिमपदेऽनुषञ्जयति । तथाच, अनुबध्नातीत्यनुबन्धः पचाद्यच् । पूर्वं स्वपदेनार्थबलेन वा उक्तं भावमनुलक्षीकृत्य बध्नाति नियमयतीत्यनुबन्धः, 'स एष एवं पश्य'न्निति वाक्यस्थः । स इति पूर्वपरामर्शः । आदिपदेन त्रिविधभावबोधकाः पश्यदादयो धर्माः । स च तदादयश्चेत्यनुबन्धादयः । द्वन्द्वः । तेभ्योऽनुबन्धादिभ्यश्चतुर्भ्यो हेतुभ्यः सर्वात्मभाव एव दृढीक्रियत इति

रश्मिः ।

धिष्ठानत्वेन ज्ञातो भवति, 'स्वे महिम्नी'ति श्रुतिसमाकलनवेलासत्त्वात् । अन्यत्र कालेपि श्रुतिसमाकलनजन्यसंस्कारोद्बोधे परमत्वेन न ज्ञातो भवति, अतो न सम्यक्, अधिष्ठानत्वेन, किन्तु सर्वात्मभावत्वेन, श्रुतिसन्दर्भाभावात् । तथा च 'महिम्नी'त्युक्ते सर्वात्मभावप्रतीतिर्यत्र, तत्र परमत्वेनाधिष्ठानत्वेन ज्ञानमहिम्नीत्यधिष्ठानसप्तम्याः । यत्र तु महिम्नीत्याद्यधिष्ठानप्रतीतिर्नास्ति, तत्र सर्वात्मभावत्वेन सर्वात्मभावः प्रतीयते । राजकीयपुरुष इत्यत्र राजकीयत्वेन पुरुषप्रतीतिवत् । अनुबध्नातीति । ननु तद्भावलिङ्गानुबन्धो दृश्यते, पूर्वं ब्रतीति भाष्येण, न तु सर्वात्मभावानुबन्ध इति चेत् । न । लिङ्गानुबन्धे तद्भावोऽनुबद्ध एव । लिङ्गेन सर्वात्मभावानुमानादित्याशयात् । अन्यथा महिमरूपः सर्वात्मभाव इति भाष्यविरोधः । 'यदुत्तरितं 'स्वे महिम्नी'ति तमेवानुबध्नाती'ति भाष्यविरोधश्चेति । तच्छब्दस्येति भाष्यं विवरामासुः स वा इति । दर्शनादीत्यादि । 'पश्य'न्नित्यत्र कर्तरि लटः शतृप्रत्ययः, मन्वान इत्यत्र शानच् । विजानन्नित्यत्र शता । एवं दर्शनादिकर्तृता । सा च दर्शनाद्यनुकूलव्यापारवत्ता । दर्शनाद्याश्रयतेति नैयायिकाः । तस्या बोधनेनेत्यर्थः । तद्भाववैशिष्ट्यं लिङ्गात्मकभाववैशिष्ट्यं बोधयन् तं लिङ्गात्मकं भावं महिमपदे सर्वात्मभाववाचकेऽनुषञ्जयति । षञ्ज सङ्गे भ्वादिः (प्रेरणा) णिजन्तः सर्वात्मभावस्य प्रतिपादकतासङ्गमनुपश्चाल्लिङ्गात्मको भावः सजति तत्वात् । तर्हि स कीदृक् येन तत्रैव प्रतिष्ठित इत्याकाङ्क्षायां तं विवृणोतीति लिङ्गभूयस्त्वसूत्रभाष्यप्रकाशात् तं भावं 'स एवाधस्ता'दित्यादिश्रुतिरनुषञ्जयति, महिमपदवाच्यसर्वात्मभावव्याख्यात्री यतः । ननु प्रतिपादकतासङ्गो व्याख्यात्र्या श्रुत्या, न तु महिमपदेन, अतः कथं महिमपदेन श्रुतिरनुषञ्जयतीति चेत् । न । अर्थाभेदात् । यथा कलशपदार्थो हि कम्बुग्रीवादिमान् घटपदेपि सजति, अर्थाभेदात् तं कलशपदमनुषञ्जयति । पचेति । 'नन्दिग्रहिपचादिभ्यो ल्युणि न्यच' इति सूत्रेण । स्वपदेनेति । 'स्वे महिम्नी'ति स्वपदेनार्थबलम्, तदितरेतिभाष्योपपादितं तेन वेत्यर्थः । बध्नातीति । 'स एवं पश्य'न्नित्यादिश्रुतिस्थं दर्शनादिकर्तारं श्रुतिः सैव बध्नातीत्यर्थः । स चेति । 'स एवाधस्ता'दित्यादिदर्शना'दिकर्ता तदादय आत्मादेशाहङ्कारादेशात्मादेशरूपास्तिस्रो विधाः । अतो वक्ष्यते चतुर्भ्यो हेतुभ्य इति । दृढीक्रियते इति । तदितरेत्यादिभाष्योपपादितो महिमरूपः सर्वात्मभाव एव श्रुत्यानुबन्धात् । ननु

---

१. करणक ।

भाष्यप्रकाशः ।

तस्य न बाध इति सूत्रे योजना । न बाध इति पूर्वसूत्रस्थमत्राप्यनुषज्जते । वस्तुतस्त्वत्र 'प्रज्ञान्तरपृथक्त्ववदिति दृष्टान्तबोधितं भावपृथक्त्वमेव साध्यम् । तथाच प्रज्ञान्तरस्य यथा पृथक्त्वमस्ति, तथास्य भावस्यापि पृथक्त्वम् । यदि हि 'स्वे महिम्नी'त्यत्रान्यत्राप्रतिष्ठितत्वादिकमभिप्रेतं स्यात्, न भावपृथक्त्वम्, तदानुबन्धादिकं न कुर्यात्, करोति च तत्, अतस्तथेत्यर्थः । पृथक्त्वप्रकारस्त्वग्रे भाष्य एव 'मुमुक्षुभक्तस्ये'त्यादिरूपे तद्विवरणे स्फुटः । एवं स्वोक्तं व्यवस्थाप्य परोक्तं

रश्मिः ।

न नूनं सर्वात्मभावानुबन्धः 'स एवाधस्ता'दित्यादिश्रुत्युक्तसर्वात्मभावलिङ्गभावरूपं यद्दर्शनादि तत्कर्त्रनुबन्धादिति चेत् । न । नूनं सर्वात्मभावानुबन्धो लिङ्गेपि सर्वस्मिन्नात्मभावः सर्वात्मभावः इति व्युत्पत्तिनिरूपणात् । लिङ्गभूयस्त्वाधिकरणे भाष्यप्रकाशे 'तर्हि स कीदृक् येन तत्रैव प्रतिष्ठित इत्याकाङ्क्षायां तं विवृणोति । 'स एवाधस्ता'दित्यादि'रूपग्रन्थाल्लिङ्गलिङ्गिनोरभेदोक्तेश्च । कर्त्रनुबन्धस्य भावाधीनबन्धाच्च । भावं लक्ष्यीकृत्य कर्तुर्बन्धात् । अन्यथा बन्धादिभ्य इत्येव सूत्रयेत् । तथा च सर्वात्मभाववतोऽनुबन्धात् सर्वात्मभावबन्धात् महिमपदेन सर्वात्मभाव उच्यते इत्यनुबन्धहेतुना स भावो दृढीकृतः । ननु महिमशब्दस्य क्व शक्तिः, न तावज्जगति, 'एतावानस्य महिमे'ति श्रुतिनिरुक्तशक्तिः । 'गो अश्व महिमे'त्यादिना जगदेकदेशगवाश्वादिषु महिमपदशक्तिमनूद्य 'नाहमेवं ब्रवीमी'ति शक्तिनिषेधात् । किन्तु 'महिमानमीश'मिति श्रुतेः शिवे शक्तिः, स तु 'ज्ञानेन भक्ते'ति श्रुतेः सर्वात्मभाववान् । भक्तेत्यत्र भक्तेः सर्वात्मभावरूपमुख्यभक्तिरूपत्वसम्भवात् । अत्रापि महिमपदशक्तावपि सर्वात्मभावस्याप्रसिद्धेर्दर्शनाच्चेतिसूत्रे व्रजसीमन्तिन्य उदाहृताः । प्रहस्ते महिमपदस्य सामर्थ्यं शक्त्युक्तेः । श्रुतिपूद्धारकत्वरूपसामर्थ्यस्य महिमत्वात् । प्रकृत उद्धारकत्वस्य सर्वात्मभावरूपत्वात् । 'दर्शनाच्चे'ति सूत्रात् । अत्र महिमपदं वेदान्तविषयत्वेन योगाद्वर्तते । योगस्तावत् । 'मह्‌ वृद्धौ' भ्वादिरात्मनेपदी, 'मह पूजने' भ्वादिः परस्मैपदी, 'मह्‌ भासे' चुरादिः परस्मैपदी, मंहति वृद्धिं कुरुत इति महो भगवान् तस्य भावो वृद्धिर्जगद्रूपेति जगदेतावान् महिमा । मंहयति भासते यो भगवान्, स महः, तस्य भावो महिमा शिवो भासारूपो 'महिमानमीश'मिति श्रुत्युक्तः । महति पूजयति यः सत्याख्यो भगवान् स महः, तस्य भावो महिमा पूजनाख्या 'यत्र नान्यत् पश्यती'त्यादिश्रुत्युक्ता । तद्धितान्तः । इम निच् । टिलो पः सर्वत्र । नन्दीति सूत्रेणाच् सर्वत्र । उंदित्त्वान्नुम् । उदितो नुम्धातोः । ननु 'सत्यं ज्ञान'मित्यादिस्वरूपलक्षणे सत्यनिष्ठा पूजा कथं स सर्वात्मभावरूपेति चेत् । न । भक्तेति श्रुतेः सत्याख्ये शिवादौ मुख्यभक्तिसर्वात्मभावरूपपूजाया युक्तत्वात् प्रकृतेऽन्यत्र तु यथावस्तुप्रपञ्चमित्येकेनानुबन्धरूपहेतुना स भावो दृढीकृतः । एवमात्मादेशाहङ्कारादेशात्मादेशैर्लिङ्गैः सर्वात्मभावोऽनुमितिविषयीकृतो दृढीकृतः । भक्तः सर्वात्मभाववान् आत्मादेशादहङ्कारादेशादात्मादेशाच्च । स स स स जगति सकले पश्यन्ती विरहिणीवदित्यत्र भक्तः सर्वात्मभाववानित्यनुमितिः । एवं चतुर्भिर्हेतुभिर्दृढीकृतेन सर्वात्मभावेन पूजयतीत्यत्र सर्वात्मभावाभिन्नं पूजनं करोति, 'प्रकृत्यादिभ्य उपसंख्यान'मिति वार्तिकेन तृतीयाऽभेदे । हेतौ तृतीयायां तु सर्वात्मभावेन पूजां सत्कारं करोतीत्यर्थः । भक्तिवर्धिनीटीकायां श्रीगोकुलनाथजिद्भिः 'पूजया श्रवणादिभि'रित्यत्र पूजापदं 'पूजां दधुः सप्रणयावलोकै'रित्यत्रेव व्याकृतमिति । न चैवं महिमपदे क्लिष्टकल्पनेति वाच्यम् । मीमांसाशास्त्रस्य विचारशास्त्रत्वाद्विचारस्य चैवंविधत्वात् । तस्य न बाध इति ।

---

१. 'उदित्त्वान्नुमुदितोर्द्वयोर्धात्वोः' इति मूलपाठः । २. इदं लक्षणं समन्वयद्वितीयपादे विचारितम् । ३. लिङ्गात्मकभावः ।

रामर्शित्वात्। एवं सति त्वदुक्तमन्यत्राप्रतिष्ठितत्वं चेदिह प्रतिपाद्यं स्यात्, तदोक्तरीत्यानुबन्धं न कुर्यात्, अहङ्कारादेशादिकं च न कुर्यात्, उक्तप्रश्नोत्तरं स्वान्यवस्त्वभावात् 'न क्वापी'त्येव वदेत्। तस्मादस्मदुक्त एव मार्गोऽनुसर्तव्यः। आदिपदात् त्रिविधा ये भावा उक्ताः, तेषामपि स्वरूपं 'एवं पश्यन्नेवं मन्वान एवं विजान'न्निति क्रमेण यन्निरूपितं तदुच्यते। पूर्वं स्थतिविगाढभावेन तदितरास्फूर्त्या तमेव सर्वत्र पश्यति। एतदेवोक्तं 'एवं पश्य'न्नित्यनेन। ततः किञ्चिद्बाह्यानुसन्धानेऽहङ्कारावेशो भवति। स त्वहमेव सर्वतः स्वकृतिसामर्थ्येन तं प्रकटीकरिष्य इति मनुते।

भाष्यप्रकाशः।

दूषयन्ति एवं सतीत्यादि। एवं सतीति। अनुबन्धादिस्वरूपविचारेणोक्तरीत्या श्रुतेः सामञ्जस्ये सति। एवं सतीत्यस्य तस्मादित्यनेन सम्बन्धः। तथाचैवं श्रुतिसामञ्जस्ये सति तस्मात्। अनुबन्धकरणाहङ्कारादेशादिकरण'न क्वापी'त्यवदनरूपाद्धेतुत्रयात् तथेत्यर्थः। ननूक्तहेतुत्रयात् यद्यपि पूर्वपक्ष्यभिमतं बाध्यते, तथापि त्रिविधभावैः सिद्धान्त्यभिमतं कथं सिध्यतीत्याकाङ्क्षायामादिपदोक्तानां स्वरूपं व्याख्यातुं प्रतिजानते आदीत्यादि। तदुच्यत इति। तत् व्याख्यायते। व्याकुर्वन्ति पूर्वमित्यादि। एतदेवेति। एतादृशं दर्शनमेव। स त्विति। अहङ्कारादेशवाँस्तु।

रश्मिः।

अनुबन्धादिभ्य आत्मरत्यादि भवत्यतस्तस्य सर्वात्मभावस्य न बाध इत्यर्थः। ननु 'ततोऽतिदैन्येने'त्यादिवक्ष्यमाणभाष्यादनुबन्धादिभ्य आत्मरत्यादि भवतीत्येव सूत्रमस्त्विति वाच्यम्। 'नन्वेतया श्रुत्या न सर्वात्मभावलिङ्गात्मको भाव उच्यते' इति प्रकृतसूत्राभासोक्तस्य कारणत्वात् सूत्रपठने। अतोऽनुबन्धादिभ्यः सर्वात्मभावलिङ्गात्मकभावस्य न बाध इति युक्तमेव। उक्तेति। कर्तृद्वारा सर्वात्मभावानुबन्धरीत्या सर्वात्मभावलिङ्गत्रयकथनरीत्या च श्रुतेः 'स्वे महिम्नी'त्यस्याः प्रतिपाद्यसामञ्जस्य इत्यर्थः। न चानुबन्धादिभ्योऽन्यत्राप्रतिष्ठितत्वं सिध्यति। तस्यार्थस्य ज्ञानमार्गीयत्वात्। आत्मादेशादेरसम्भवाच्च। श्रुत्यादिबलीयस्त्वादिति सूत्रे ज्ञानप्रकारविशेषदूषणाच्च। भक्तिमार्गीयव्याख्याने तु 'व्यतिहार' इति सूत्रोक्तसञ्चारिरूपस्य सुखेन सर्वात्मभावलिङ्गत्वसम्भवाच्च। तथेति। अस्मदुक्तमार्गोऽनुसर्तव्यत्वेन प्रकारेणेत्यर्थः। अतोऽस्मदुक्तोऽस्माभिः 'तन्निर्धारणानियम' इत्यधिकरण उक्तः, कृत्यविषयोपि मार्गो भक्तिमतां भक्तिमार्गमनु पश्चात् सर्तव्यः प्राप्तुं योग्यः। 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रेण उक्तमार्गोनुसर्यत इति वार्थः, कर्मणि तव्यस्वद्वा। भाष्य एवकारस्तु कर्ममार्गस्य हिरण्यगर्भातिरिक्तामोचकत्वेन ज्ञानमार्गस्याक्षरमात्रप्रापकत्वेन भक्तिमार्गस्यैव मार्गत्वात्। तदुक्तं तृतीयसुबोधिन्यां पञ्चविंशाध्याये सिद्धान्तान्तरनिरूपणोक्तिपुरस्कारेण चतुश्चत्वारिंशे श्लोके 'सर्वं शास्त्रार्थं निरूप्य परलोकार्थं यततां अस्मिन् लोके एतावानेव निःश्रेयसोदयः, तच्चेत् स्थिरीभवति, तदा कृतार्थता, तत्स्थिरीकरणार्थं भक्तिरेव, केनापि प्रकारेण भगवति स्थिरं मनः परमपुरुषार्थसाधकमिति योगसिद्धान्तः। तत्र भक्तिरेव स्थिरीकरणे हेतुरिति स्वसिद्धान्तानुसारेणापि भक्तिर्निरूपिता, भागवतानुसारेणापि। तस्माद्भक्तिः सर्ववादिसम्मतेति सैव कर्तव्ये'ति। इयं भक्तिमार्गस्य कृतिविषयस्य विषयीकुर्वाणा मुख्यभक्तिरूपसर्वात्मभावमपि सिद्धान्तविषयीकरोति। कैमुतिकन्यायेन 'इत्येकादशसर्वस्वं भगवान् स्वयमुक्तवा'निति सर्वनिर्णयोपान्त्ये उक्तं कृत्यविषयमपि। 'तस्मादन्यवचो मृषे'ति सर्वनिर्णयात्। अनुभवाच्च। एतादृशमिति। एवंपदादिति भावः। न तु ज्ञानमार्गीयाभेददर्शनम्, एवंपदेन पूर्वविमर्शात्। पूर्वत्र

करोति च तथा । अत एवान्वेषणगुणगाने कृते ताभिः । एतदेवोक्तं 'एवं मन्वान' इत्यनेन । ततो निरुपधिस्नेहविषयः पुरुषोत्तम आत्मशब्देनोच्यते इति तदादेशो भवति । तदा पूर्वकृतस्वसाधनवैफल्यज्ञानेनातिदैन्ययुक्तसहजस्नेहजविविधभाव-

---

भाष्यप्रकाशः

तथाचाहङ्कारादेशोक्तरीत्या स्वभाने स्वस्मिन् सामर्थ्यविशेषभानादहमेव सर्वैः प्रकारैः 'स्वसामर्थ्येन तं प्रकटीकरिष्य इति मनुत' इत्यादिकयानया फक्किकयाहङ्कारादेशफलमुक्तम्, प्रामाणिकत्वाय परिचायितं च । 'ततो निरुपधी'त्यादिना चात्मादेशभानफलमुक्तम् । एवं विधात्रयोक्तानां स्वरूपं

रश्मिः ।

मम तत्स्वाम्युपरिष्टादित्यादिस्फूर्तौ षष्ठ्या भेदावगाहिन्या आक्षेपात् । 'अन्तरा भूतग्रामवत् स्वात्मन' इति सूत्रे भक्तानां भेदस्यादोषत्वोक्तेः । अत एवकारोपि । **स्वभान** इति । व्यापकत्वेन भाने । नन्वस्त्वभिन्नानां भक्तानां व्यापकत्वम्, आधुनिकानामणूनां जीवानां तु व्यापकत्व'मानन्दादयः प्रधानस्ये'ति सूत्रविरुद्धमिति चेत् । न । सायुज्ये तदीयव्यापकत्वस्य जीवेष्वङ्गीकारात् । **तमिति** । व्यापकमपि । **मनुत** इति । 'मन्वान' इति श्रुतौ 'मनु अवबोधन' इत्यस्य तनोत्यादिगणस्थस्योपादानम् । न तु मन्यत इति दिवादिगणस्थस्य, 'मन ज्ञान' इत्यस्य नवा 'मानयत' इति चुरादिगणस्थ'मनि स्तम्भ' इत्यस्य मन्यमान इति मानयान इति चाप्रयोगात् । अवबोधत इत्यर्थः । भाष्ये भागवतमतेनाहुः **करोति चेति** । अहं करिष्य इत्यत्र । ब्रह्महृदे नीतानां मग्नानां ब्रह्मभूतानामहमः प्राकट्यस्य 'ततोऽहं नामाभव'दिति पुरुषविधब्राह्मणाद्वक्तव्यतया 'करोति च तथे'त्युक्तम् । ननु श्रौतं 'मनुत' इत्येतावदेव भणतीत्यलं भागवताय करोतीत्यस्मैपदायेति चेत्, तत्राहुः **अत एवेति** । कृष्णोपनिषदि 'तस्मान्न भिन्ना एतास्ता आभिर्भिन्नो न वै विभु'रित्यभिन्नत्वेन तच्छब्दाभिहिताभिः कृते फलप्रकरणे इति श्रौते ते, मनुत इति श्रौते पूरणीये इत्यर्थः । **एतदेवेति** । एवकारेण 'मन ज्ञाने' इत्यस्यानिटो मन्तव्य इत्यस्य युक्तिभिरनुचिन्तनरूपमननस्य व्यवच्छेदः । 'मनु अवबोधन' इति सेटस्तदर्थाभावात् । दर्शनसाधनत्वाच्च युक्तिभिरनुचिन्तनरूपमननस्यास्य प्रकृतमननस्य दर्शनानन्तरभावित्वाच्च । एवंपदाच्च । **प्रकृते** । **फलमिति** । 'अहमेवाधस्ता'दित्यादिस्फूर्ते'रहमेव सर्वैः प्रकारै'रित्यादिफक्किकयोक्तं फलं '**अत एवे**'त्यादिभाष्येण परिचायितमित्यर्थः । **तत इति** । अन्वेषणस्य प्रकटीकरणार्थत्वेन गुणगानस्य दोषनाशार्थत्वेन दोषनाशानन्तरं 'नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत' इति वाक्योक्तन्यायान्निरुपधिस्नेहस्तद्विषयस्तु पुरुषोत्तमः । भक्तेः सर्वात्मभावत्वात् । 'इन्द्रियाणि जुहोती'तिश्रुतेः । न च तृतीयमार्गत्वमिति वाच्यम् । श्रुतीनां वैराग्यशमदमतितिक्षामुमुक्षुत्वानामवर्जनीयत्वात् । साधनचतुष्टयवतां भक्तानां तृतीयमार्गत्वं चिन्त्यम् । विरहकालेऽन्वेषणपूर्वकृतगुणगानसाधनानां भगवत्प्राकट्ये वैफल्यं तस्य ज्ञानस्य दैन्यकारणत्वम्, न तु वैफल्यस्य, अतो ज्ञानपदम् । तेनातिदैन्यं कातरत्वं आर्तिरूपाधिकारिरूपं रसनिविष्टं स्नेहे विविधभावोत्पत्तौ कारणं भवतीति स्नेहे तद्युक्तत्वमुक्तम् । सहजपदेनानुग्रहजन्यत्वसूचनात् स्नेहे पुष्टिभक्तित्वम् । साधनजन्यत्वे स्नेहस्य सहाविर्भावो न स्यात् । स्नेहस्य तु स्वभाव एव यद्विविधभावजनकत्वम् । अतिरिक्तत्वेऽत्र गौरवम् । एतेन भाष्येण 'विजान'न्नितिश्रुतौ विविधभावप्रादुर्भाव उक्तः । 'जनी प्रादुर्भाव' इति धातोः । 'ज्ञा अवबोधन' इत्यस्य रूपं विजानन्निति, तदा तु विविधभावविषयकज्ञानवत्त्वेन विविधभाववान् ज्ञानद्वारेति भाष्यार्थः । **तत इति** । इदमेवात्मादेशभानफलं

वान् भवति । तदेतदुक्तं 'एवं विजान'न्नित्यनेन । अत एवोपसर्ग उक्तः । ततोऽतिदैन्येनाविर्भावे सति या अवस्थाः, ता निरूपिता 'आत्मरति'रित्यादिना । अत्रात्मशब्दाः पुरुषोत्तमवाचका ज्ञेयाः । अन्यथौपचारिकत्वं स्यात् । मुख्ये सम्भवति तस्यायुक्तत्वात् । ननु सर्वात्मभावस्यापि मुक्तौ पर्यवसानम्, उत नेति संशयनिरा-

---

भाष्यप्रकाशः ।

व्याख्यायाग्रिमग्रन्थं योजयन्ति ततोऽतिदैन्य इत्यादि ।

सूत्रांशमवतारयन्ति नन्वित्यादि । ननूक्तयुक्तिभिरत्र भवतु सर्वात्मभावः, तथाप्यत्र फलत्वेन सर्वग्रन्थिप्रविमोक्षस्यैवोक्तत्वात्तस्य च 'भिद्यते हृदयग्रन्थि'रिति श्रुत्यन्तरस्वारस्येन परावरदर्शनस्य यत्फलं तस्यैवात्र ग्राह्यत्वात्तस्य च 'तमेवं विद्वानमृत इह भवती'त्यादिश्रुत्यन्तरेषु मुक्तिरूपस्यैव सिद्धत्वादस्य भावस्यापि मुक्तावेव पर्यवसानमिति फलतो न कश्चिद्विशेषः । अथ, न, तदोक्तस्य फलवाक्यस्य विरोध इत्यस्यापि फलबलेन पूर्वज्ञानविशेषत्वमेवादर्तव्यमितिशङ्कानिरासाय दृष्टान्तमाहे-

रश्मिः ।

तदुक्तमित्यर्थः । **अग्रिममिति** । अनुबन्धादिभ्यः किं भवतीत्याकाङ्क्षायामात्मरत्यादि भवतीति सूत्रं योजयितुमग्रिममित्यादिः । **तत** इत्यादि । ननु 'भक्त्याहमेकया ग्राह्य' इति वाक्येन सर्वात्मभावस्य पुरुषोत्तमाविर्भावकारणत्वोक्तेरतिदैन्यस्याविर्भावकारणत्वं कथमिति चेत् । न । भक्तित्वेनेति वदामः । यतोत्र भाष्येऽतिदैन्यस्याविर्भावहेतुत्वोक्तिर्भक्त्यन्तःपातित्वेन भक्तित्वात् । अत एव भगवदाविर्भावे भक्तदुःखं 'भूमिर्माता तथा चान्ये दुःखभाजो हरिप्रिये'ति कारिकया हेतुत्वेनोक्तम् । **सूत्रांशमिति** । प्रसङ्गसङ्गत्या सूत्रांशेऽग्रेतनसूत्रेषु त्रिषु च फलं विचारयन्तः सूत्रांशमित्यर्थः । प्रदानवत्सूत्रे सर्वात्मभावसाधनं लिङ्गभूयस्त्वादिसूत्रे प्रमाणप्रमेये विचार्य फलं विचारयितुं सूत्रांशादारभ्य विचारः । चतुर्भिर्विचार एकादशस्कन्धसर्वस्वत्वात् सर्वात्मभावस्य । तथाचानुबन्धादिभ्य आत्मरत्यादि भवति, अतः सर्वात्मभावस्य न बाधः । आत्मरत्यादिना तज्जनकत्रिविधस्फूर्तेः सर्वात्मभावरत्यादिजनकत्रिविधस्फूर्त्या सर्वात्मभावस्यानुमानात् । पुष्टिमार्गीयात्मरत्यादिजनकस्फूर्तिवारणाय सर्वात्मभावरत्यादिजनकेति विशेषणम् । **अथ नेति** । न मुक्तौ पर्यवसानमपि त्वतिदैन्येनाविर्भावे सति या अवस्था आत्मरत्यादयस्ता एवेत्युत नेति भाष्यं व्याकृतम् । **विरोध** इति । सन्देग्धुर्वचः । अत- 'स्ततः श्लोकैस्तद्भावस्वरूपमुक्त्वैतस्य मूलकारणमाहाहारशुद्धा'वित्यादिनेति भाष्यस्य न विरोधः । **पूर्वज्ञानेति** । पूर्वप्रपाठकोक्ताभेदज्ञानेत्यर्थः । **शङ्केति** । ननु शङ्का तर्कः संशयो विरुद्धकोट्यवगाहि ज्ञानमिति भाष्यस्थसंशयपदविवरणं शङ्केत्यनुपपन्नमिति चेत् । न । एतादृशव्याख्याने शङ्कापदस्य संशयाविवरणत्वात् । संशयस्याथ नेत्यन्तग्रन्थे परिसमाप्तेः । **दृष्टान्तमिति** । मुक्त्यपर्यवसाने दृष्टान्तम् । ननु आत्मरत्यादिजनकसर्वात्मभावलिङ्गात्मकभावे दृष्टान्तमित्यर्थः कुतो न कृत इति चेत् । न । सूत्राणामल्पाक्षरत्वात् । 'अल्पाक्षरमसन्दिग्ध'मित्यादिवाक्यात् । स्फुटं सर्वनिरूपणे त्वल्पाक्षरत्वं भज्येत । संशयपदात् । 'आत्मरतिः आत्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवती'ति विषयः सूचितः । संशयस्तु सर्वात्मभावस्य मुक्तौ पर्यवसानम्, उतात्मरत्यादावेव, तथा च 'स स्वराड् मुक्तो वा स्वेन रूपेण राजत' इति भजनानन्दवान् वा । स्वेन भगवता राजत इति । कर्तरि क्विप् । तत्र पूर्वपक्षः स्वराड् मुक्त एव, कुत इत्यत उक्तं भाष्यप्रकाशे तदेत्यादि । तदा संशयकाल उक्तस्याहारशुद्धावित्यस्य फलवाक्यस्य विरोध इत्यस्यापि फलबलेन पूर्वज्ञानशेषत्वमेवादर्तव्यमिति । सिद्धान्तस्तु, न मुक्तौ पर्यवसानम्, किन्तु भजनानन्द इत्यवान्तराधिकरणकम् । तदाहुः **दृष्टान्तमिति** ।

साय दृष्टान्तमाह प्रज्ञान्तरपृथक्त्ववदिति । मुमुक्षुभक्तस्य स्वेष्टदातृत्वेन भगवद्विषयिणी या प्रज्ञा, सा सर्वात्मभाववद्भक्तप्रज्ञातः प्रज्ञान्तरमित्युच्यते । तत्र कर्मज्ञानतदितरभक्तप्रज्ञाभ्यः पार्थक्येन तदिष्टमेव साधयति यथा, तथा सर्वात्मभाववतो भक्तस्य यत्प्रकारिका भगवद्विषयिणी प्रज्ञा, तमेव प्रकारं स भावः साधयति, नान्यमिति न मुक्तौ पर्यवसानमित्यर्थः । अत्र व्यासः स्वानुभवं प्रमाणत्वेनाह दृष्टश्चेति । उक्तभाववतो भक्तस्य प्रभुस्वरूपदर्शनाद्यतिरिक्तफलाभावोऽस्माभिरेव दृष्ट इत्यर्थः । एतादृशा अनेके दृष्टा इति नैकस्य नाम गृहीतम् । अत्र शब्दमपि प्रमाणमाह तदुक्तमिति । भगवतेति शेषः । श्रीभागवते दुर्वाससं प्रति 'अहं भक्तपराधीन' इत्युपक्रम्य, 'वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथे'ति । यो हि यद्वशीकृतः, स तदिच्छानुरूपमेव करोति, अतो न सायुज्यादिदानम्, किन्तु भजनानन्ददानमेव । तेषां मुक्त्यनिच्छा तु 'मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् । नेच्छन्ति

भाष्यप्रकाशः ।

त्यर्थः । दृष्टान्तं व्याकुर्वन्ति मुमुक्षुभक्तस्येत्यादि । तथाच अन्या प्रज्ञा प्रज्ञान्तरम्, तत्कृतं पृथक्त्वं प्रज्ञान्तरपृथक्त्वम्, षष्ठ्यर्थे वतिः । अतः प्रज्ञान्तरफलस्येवैतत्फलस्यापि पृथक्त्वमेवेति नैतस्य बाध इत्यर्थः । नच फलोक्तिविरोधः । दर्शनस्य प्रागेव जातत्वेन अविद्याकामकर्मजन्यहृदयग्रन्थिभेदस्य प्रागेव जातत्वादत्र ततोऽतिरिक्तस्यैव फलस्य सर्वेषां एकत्वपर्यन्ताशास्यत्वरूपाणां ग्रन्थीनां प्रकृष्टो विलक्षणो यो मोक्षः पुनस्तदनुद्भवरूपस्तस्याभिप्रेतत्वेनाविरोधात् । अग्रिमं शेषद्वयमवतारयन्ति अत्र व्यास इत्यादि । अत्र शब्दमित्यादि च । तादृशीं मुक्तिपर्यन्तानिच्छां निगमयितुमाहुः तेषां मुक्त्यनिच्छेत्यादि । तथाच ज्ञानमार्गीयभगवद्दर्शने हृदयग्रन्थिभेदनं नानाविधवृत्त्यनुदयरूपम्,

रश्मिः ।

प्रज्ञान्तरेति । अत्र पृथक्पदार्थः फलत्वेन गृहीतः । प्रज्ञान्तरकृतपृथक्पदार्थफलस्येवेत्यर्थः । न च प्रज्ञान्तरपृथक्त्वस्येवेति वक्तव्यमिति वाच्यम् । पृथक्फले तात्पर्यात् । कीदृशोऽद्भुतो घट इति वक्तव्ये कीदृशमद्भुतं घटत्वं येनेदृशो घट इति तात्पर्येण कीदृशमद्भुतं घटत्वमिति प्रयोगवत् । एतत्फलस्येति । सर्वात्मभावफलस्य । नैतस्येत्यत्र पूर्वसूत्रादनुवर्तितमत्राप्यनुषञ्जितम् । तेन प्रज्ञान्तरपृथक्त्ववन्न बाध इति वाक्यभेदः । वाक्यभेदस्य सूत्रेऽदोषत्वं अल्पाक्षरत्वसारवत्त्वाभ्याम् । भाष्ये । यत्प्रकारिका भजनानन्ददातृत्वप्रकारिका । तमेव भजनानन्ददातृत्वं भजनानन्द एव । तथा च भजनानन्दमेव । प्रकृते । फलेति । आहारशुद्धाविति श्रुत्युक्तफलोक्तीत्यर्थः । प्रागेवेति । 'मुक्तोपसृप्यव्यपदेशा'दिति व्याससूत्रात्तथा । तथा च पाठक्रममनादृत्यार्थक्रमेणाहारशुद्ध्यादिना मुक्तः सर्वात्मभाववानुपसर्पति भगवन्तमिति पाठक्रमानादरे हेतुरुक्तः । तथा च भाष्यं ततः श्लोकैरित्यादि लिङ्गभूयस्त्वसूत्रस्य । अत्रेति । भक्तिमार्ग इत्यर्थः । पुनरिति । 'भजते नैव तादृश'·इति निबन्धादविद्यानुद्गमेन तथा । अपीति । प्राग्जातत्वाविरोधात् । न च पूर्वापरभावविरोधः । पाठक्रममनादृत्यार्थक्रमादरार्थं 'अग्निहोत्रं जुहोति यवागूं पचती'तिवत् पूर्वापराविरोधात् । अत्र व्यास इति । दृष्टः समाधिभाषोक्तसमाधौ । अनेके जैमिन्यौडुलोमिप्रभृतयः सूत्रप्रसिद्धा अस्माभिर्दृष्टा इत्यर्थो भाष्यस्य दृष्टानेकदृष्टपदानाम् । प्रमाणमिति भाष्यं नैयायिकप्रसिद्ध्या, अन्येषां श्रौतप्रामाण्यात् । दर्शनेति । ज्ञानमार्गीयत्व-

सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम् । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः । सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जना'इत्यादिवाक्यसहस्रैर्निर्णीयते ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥

ननु 'नान्यत् पश्यती'त्यारभ्य सर्वस्य प्रपाठकस्य सर्वात्मभावनिरूपकत्वोक्तिरनुपपन्ना । अत एवात्मपदानां पुरुषोत्तमपरत्वोक्तिश्च । यतस्तस्य मुक्तावपि कामाभावः प्रतिपाद्यते । अत्र तु तस्य 'सर्वेषु लोकेषु कामचारो भवती'ति श्रुतिः पठ्यते । एवं सति न तन्निरूपणमत्रेति वा वाच्यम्, तद्भाववतोऽप्यन्यकामवत्त्वमिति वा । द्वितीयस्योक्तप्रमाणपराहतत्वेनाद्यपक्ष एवाश्रयणीय इति पूर्वपक्षं

भाष्यप्रकाशः ।

अत्र तु सर्वग्रन्थीनां प्रविमोक्षो भगवद्विषयकनानावृत्त्युदयेपि एकत्वपर्यन्तानिच्छारूप इति दर्शनभेदात् फलभेदस्तत्क्रतुन्यायादप्युपपन्न इत्यर्थः ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥ सूत्रमवतारयन्ति नन्वित्यादि । प्रतिपाद्यत इति । श्रीभागवते कपिलादिवाक्यैः प्रतिपाद्यते । अत्र त्विति । श्रौते सनत्कुमारवाक्ये तु । एवं सतीति । स्मृतिश्रुत्योर्विरोधे सति । **उक्तप्रमाणपराह-**

रश्मिः ।

भक्तिमार्गीयत्वधर्माभ्यां 'तस्मिन् दृष्टे परावरे' इति श्रुत्युक्तदर्शनभेदात् फलस्य हृदयग्रन्थिभेदस्य लिङ्गदेहभेदस्य भेदः । तत्क्रतुन्यायः 'सर्वत्र प्रसिद्धोपदेशा'धिकरणसिद्धः । तत्र क्रतुभेदात् फलभेदः । **भाष्ये । वाक्यसहस्रैरिति** 'सहस्राणी'ति श्रुतेर्बहुवचनं विंशत्याद्याः सदैकत्व इत्यन्यत्र । योजनातः सहस्राणीति लोके तृतीयस्कन्धे । तथा चैष सूत्रार्थः । अनुबन्धादिभ्यश्चतुर्भ्यो हेतुभ्योऽत्र चकारो लुप्तषष्ठीकोऽनुक्तसमुच्चये वर्तते । चस्यार्थस्यात्मरत्यादिजनकसर्वात्मभावलिङ्गात्मकभावस्य सूत्रानुक्तरूपस्य न बाधोऽस्ति । प्रज्ञान्तरपृथक्त्ववत् सर्वात्मभावफलस्यापि न बाधोऽस्ति । भजनानन्दो व्यासपादैर्दृष्टो भवति समाधिभाषायाम् । भगवतोक्तं चास्ति । अथ चतुर्णां वाक्यानां दण्डान्वयः । तदुक्तं दृष्टः प्रज्ञान्तरपृक्त्ववन्मुक्त्यपर्यवसानार्थस्तद्युक्तोऽनुबन्धादिभ्यश्चकारार्थांश आत्मरत्यादिस्तज्जनकसर्वात्मभावलिङ्गात्मकभावस्य न बाध इति । चादीनां वाचकत्वमपि **प्रस्थानरत्नाकरे**ऽस्ति । मुक्त्यपर्यवसानरूपोऽर्थोपि चकारार्थः ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥ पूर्वपक्षं निरस्यन्तीति वक्ष्यमाणभाष्यत्रिसूत्राधिकरणसन्देहं वारयन्ति सूत्रमिति । त्रिसूत्रे अधिकरणे, सूत्रमिति वा । **श्रीति** । 'अकाम'इति श्रुत्या उपलक्षकः प्रकाशः । वाक्यानि तु 'सालोक्यसार्ष्टिसामीप्ये'त्यादि । 'मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः' । 'आत्मनो धर्ममदोग्धा निःकाम' इत्यर्थ इति श्रीधरी । 'सालोक्यसार्ष्टिसामीप्य'मिति । आदिपदेन 'मत्सेवया प्रतीतं चे'ति भगवद्वाक्यं सार्धम् । **स्मृतीति** । स्मृतिपदं श्रुतेरप्युपलक्षकम् । **उक्तस्मृतीति** । उक्तश्रुतिमुपलक्षयति । **उक्तानि** 'दर्शनाच्चे'तिसूत्रभाष्येण 'तदुक्त'मिति सूत्रांशेन चोक्तानि स्मृतिवाक्यानि तैः पराहतत्वम्, श्रीभागवतस्य वेदवेदान्तसारत्वात् । **स्मृतीनां** सर्वात्मभावप्रकरण उदाहृतत्वेन तद्विरुद्धश्रुत्यर्थः स्यात्, मत्रिकत्वद्योतनं वा

निरस्यति। नेति। तत्र हेतुमाह सामान्यादप्युपलब्धेरिति। तत्समानधर्मयोगादपि तत्प्रयोगः श्रुतावुपलभ्यतेऽनेकशो यतः। प्रकृतेपि विविधानां लोकानां विविधसुखप्रधानत्वाद्भगवत्सम्बन्धिषु सर्वेषु सुखेषु कामचारो भवतीति श्रुतेरर्थो ज्ञेयः। ननु यथाश्रुत एवार्थोऽस्तु, तत्राह न हि लोकापत्तिरिति। सर्वात्मभाववत इति प्रकरणात् 'नान्यत् पश्यती'त्यादिधर्मविशिष्टस्यात्मनः प्राणादिसर्ववतो

भाष्यप्रकाशः।

तत्त्वेनेति। उक्तस्मृतिवाक्यपराहतत्वेन। व्याकुर्वन्ति नेतीत्यादि। नेति। यदुक्तमत्र सर्वात्मभावो नोच्यत इति, तन्न युक्तमित्यर्थः। हेतुं विवृण्वन्ति तदित्यादि। अनेकश इति। यथा 'अजामेका'मित्यत्र, 'सृष्टीरुपदधाती'त्यादौ च। तथाच यत एवम्, अतः प्रकृते कामचारवाक्येपि विविधानां लोकानां विविधसुखप्रधानत्वात्तेन साधर्म्येण भगवत्सम्बन्धिषु पूर्वोक्तेषु रतिक्रीडादिषु सुखरूपेषु पदार्थेषु लोकपदप्रयोग इति 'तेषु कामचारो भवती'ति श्रुतेरर्थो ज्ञेयः, न नामादिलोकपरः। भगवत्सम्बन्धिनस्तु सर्वात्मभाववत इष्टा एव, तद्भिन्नास्तु मुक्तिपर्यन्तं नेष्टा इति नैतेनात्र सर्वात्मभावाभावः शक्यशङ्क इत्यर्थः। यथाश्रुतार्थस्याग्रहणे युक्तिबोधनाय दृष्टान्तं

रश्मिः।

श्रुतिपराहतत्वम्। 'इतिहासपुराणैस्तु वेदं समुपबृंहये'दिति वाक्यात्। पूर्वपक्षमिति। इदं ध्वन्यते। 'तस्य सर्वेषु लोकेषु कामचारो भवती'ति विषयवाक्ये। अत्र न सर्वात्मभावनिरूपणं तद्भाववतोऽप्यन्यकामवत्त्वं वेत्यत्र संशये च पूर्वपक्षमित्यर्थकः। यदुक्तमिति। 'न तन्निरूपणमत्रे'ति भाष्येण यदुक्तम्। ननु न सर्वात्मभावलिङ्गात्मको भाव उच्यते इत्यनुबन्धादिभ्य इति सूत्राभासेन यदुक्तमिति चेत्। न। तस्य सूत्रस्य निवृत्तत्वात्। तदिति। 'गौण्यसम्भवा'दिति सूत्रे गौण्यङ्गीकारादाहुः यथेति। अनेकश इत्यत्र शस्। बहवो ह्यनेकाः प्रवृत्तीर्ददाति यः प्रयोग इत्यर्थः। 'अजा'मित्यादिश्रुतिः कल्पनोदेशसूत्रे विचारिता प्रथमस्य चतुर्थपादे। सृष्टीरित्यादिश्रुतिः पूर्वतन्त्रे प्रथमस्य चतुर्थपादे। अजाशब्देनाद्या सृष्टिः कल्पनयोच्यते। 'यथा ह्यजा वर्करसहिता सवत्सा स्वामिहिता, तथेय'मिति। सृष्टिशब्दोपेता मन्त्रा यासामिष्टकानामुपधाने विद्यन्ते ता इष्टकाः सृष्टय इत्युच्यन्ते। सृष्टिमानास्तासामुपधाने मन्त्रे इति विगृह्य तद्वानासामुपधान इति व्याकरणसूत्रसिद्धप्रक्रियया तन्निष्पादनात्। 'प्रजासृज्यत', 'भूतान्यसृज्यन्ते'त्यादयः सृष्टिशब्दोपेता उपधानमन्त्राः। आदिना 'वाचो धेनुमुपासीते'ति, 'आदित्यो देवमधु'। द्युलोकादीनां चाग्नित्वं पञ्चाग्निविद्यायाम्। नेति। परमतेनोपनिषद्व्याख्यानेन सिद्धोऽर्थो नेत्यर्थः। 'लोकृ दर्शने विविधसुखज्ञानेष्वि'त्यर्थः। वेदान्ते योगरूढ्योर्योगादरणात्। न च योगादरे प्रकरणादात्मविषयकत्वेन लोकपदार्थदर्शनसिद्धेर्गौण्या किं प्रयोजनमिति शङ्क्यम्। वादिबुद्ध्यनुसारित्वादस्य सूत्रस्य। 'लोके शब्दार्थसम्बन्धो रूपं तेषां च यादृशम्। न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्। ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः। तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचि'दिति पत्रावलम्बनात्। ननु 'छन्दोवत् सूत्राणि भवन्ती'ति महाभाष्यात् 'ये धातुशब्दाः' इति कारिकया योगमात्रमस्त्विति चेत्। न। सूत्रे लोकापत्तिदानेन लोकशब्दार्थौ योगरूढितः पूर्वकाण्डोक्तौ गृहीतौ, अनूदितौ वेत्यदोषात्। सर्वात्मभाववत इति भाष्यं प्रपञ्चयामासुः भगेत्यादि। सर्वात्मभाववत इति प्रकरणात् सम्बध्यते। तथाच सर्वात्मभाववतो लोकापत्तिर्नहीति योजना। 'भगवत्सेवोपयोगिदेहो वैकुण्ठादिष्वि'ति सेवाफलग्रन्थात् भगवत्सम्बन्धिनो लोकास्तु सर्वात्मभाववतः

लोकसम्बन्धो युक्तिसहोऽपि नेति ज्ञापनाय हिशब्दः । किञ्च । एतदग्रे, 'न पश्यो मृत्युं पश्यती'ति श्रुत्या यथा मृत्युनिषेधः क्रियते, तथा 'आत्मत एवेदꣳ सर्व'मितिश्रुत्यैवकारेणात्मातिरिक्तव्यवच्छेदः क्रियत इति मृत्युवल्लोकोपि न सम्बध्यत इत्याह मृत्युवदिति । तत्र रोगादीनामपि दर्शननिषेधे सत्यपि मृत्योरेव यन्निदर्शनमुक्तम्, तेन भक्तानां लोकान्तरसम्बन्धस्तत्तुल्य इति ज्ञाप्यते, अत एव 'नोत दुःख'मिति दुःखसामान्यनिषेधोऽग्रे कृतः ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५२ ॥

अत्र हेत्वन्तरमाहास्मिन्नेव श्लोके, 'सर्वमाप्नोति सर्वश' इति परेण पादेन

भाष्यप्रकाशः ।

व्याकुर्वन्ति किञ्चेत्यादि । अतिरिक्तव्यवच्छेद इति । प्रापञ्चिकसर्वव्यवच्छेदः । सूत्रे मृत्युवदिति षष्ठ्यर्थे वतिः । तथाच मृत्योरिव लोकानामप्यापत्तिर्नेत्यर्थः । अन्यद्विहायैतस्यैव कथनेन यत् सूच्यते, तत् तत्र गमकं चाहुः तत्रेत्यादि ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५२ ॥ एतत्सूत्रप्रयोजनमाहुः अत्रेत्यादि । लोकापत्त्यभावरूपस्यार्थस्य ग्राह्यत्वे 'न पश्य' इति श्लोकस्थं हेत्वन्तरमाहेत्यर्थः । तमेव हेतुं सूत्रव्याख्यानेन व्याकुर्वन्ति सर्वमित्यादि । एतच्छ्लोकस्थेन परेण तुरीयेण 'सर्वमाप्नोति सर्वश' इत्यनेन पादेन, शब्दस्य 'सर्वेषु लोकेषु कामचारो भवती'त्यस्य श्रुतिवाक्यस्य

रश्मिः ।

षष्ठ्यन्तम्, इष्टा एव । भगवत्सम्बन्धिभिन्ना लोका मुक्तिपर्यन्तं यथा भवति, तथा नेष्टाः, निषेधात् । एतेन 'तस्य सर्वेषु लोकेषु कामचारो भवती'ति वेदेन । अत्र यद्यपि 'लोका न लोका' इति श्रुतौ लोकानां निषेधः कृतः, तथापि भक्तमनोरथपूरकत्वेन सर्वात्मभाववद्भक्तेच्छा लोकनिरूपणे ज्ञेया । भक्तेच्छाभावे तु सर्वात्मभाववतो भगवत्सम्बन्धिनो भक्तेष्टा ज्ञेया लोकेतरे । प्रापञ्चिकेति । 'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्चे'ति व्याससूत्रात् । तत्रेत्यादीति । अत एव लोकान्तरसम्बन्धाभावादेव दुःखस्य सामान्यं नित्यमेकमनेकानुगतमात्मरूपं वा । 'एतꣳह वाव न तपती'ति श्रुतेः 'यत्र त्वस्य सर्वमात्मैवाभूत्, तत् केने'त्यादिश्रुतेश्च । आत्मलोके कर्माभावात् । 'ध्यानप्राप्ताच्युताश्लेषनिर्वृत्त्या क्षीणमङ्गला' इति वाक्यात् । 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुने'ति वाक्याच्च । दुःखसाज्ञानजन्यत्वाच्च । ननु दुःखं न पश्यतीति वक्तव्ये दुःखतामित्यत्र वर्णागमः कुतो नाङ्गीकृत इति चेत् । न । दुःखसत्तामेव न पश्यतीत्यत्र तात्पर्येणैतावतोऽर्थस्य विवक्षितत्वाद्वर्णागमाभावात् । असङ्गतौ वर्णागमस्वीकारात् । तथा च तद्भाववतोप्येतत्कामवत्त्वमिति सिद्धान्तः ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥५२॥ परेण चतुर्थपादेन 'सर्वमाप्नोती'त्यनेनोपसंहृतत्वादर्थनिर्णायकेन । सर्वदातृवाचकेन 'सर्वश' इति पदेन वा शब्दस्य 'तस्य सर्वेषु लोकेषु कामचारो भवती'तिश्रुतिवाक्यस्य ताद्विध्यं तस्य 'आत्मत एवेदं सर्व'मित्यस्य विधता समानार्थकत्वमुपलब्धं यद्यपि पूर्वसूत्रात् प्रत्ययविपरिणामेनोपलब्धेरित्यस्य रूपमन्वेति, तथापि प्रथमोत्पत्त्यर्थं प्रतीयत इत्यध्याहार्यम् । चकारात् तस्मात् न लोकापत्तिरित्यनुवृत्त्यार्थः । पुनश्चकारोऽनुक्तसमुच्चय इत्यनुक्तोऽर्थो 'नन्वात्मत एवेदं सर्व'मिति वाक्येनैवैतदर्थलाभे पुनः 'सर्वेषु लोकेषु कामचारो

शब्दस्य श्रुतिवाक्यस्य 'आत्मत एवेदꣳ सर्व'मिति यत् पूर्वं श्रुतिवाक्यं तद्विधतैव प्रतीयते इति न लोकसम्बन्धो वक्तुं शक्य इत्यर्थः । ननु 'आत्मत एवेदꣳ सर्व'मिति वाक्येनैवैतदर्थलाभे पुनस्तदुक्तिर्नोचितेत्याशङ्कायां तत्र हेतुमाह । तुशब्दः शङ्कानिरासे । भूयस्त्वाद्धेतोः । उक्तेऽर्थे हेतूनां बाहुल्ये तद्दार्ढ्यं भवतीत्याशयेनोक्तार्थस्यैव श्लोकेनानुबन्धः कृत इत्यर्थः । अथवा । भूयःपदमाधिक्यार्थकम् । तथाच स्वकृतसाधनसाधितफलापेक्षया स्वयमुद्यम्य भगवता साधितफले निरवधिरुत्कर्ष इति ज्ञापनाय पुनः श्लोकेन तथेत्यर्थः ॥ ५२ ॥

भाष्यप्रकाशः ।

ताद्विध्यम्, 'आत्मन एवेदꣳ सर्व'मित्येवं रूपं यत् श्लोकात् पूर्वं श्रुतिवाक्यं तद्विधता तत्समानार्थकत्वमेव प्रतीयते, एतस्य पद्यश्लोकस्य 'तदेष श्लोक' इत्यनेन पूर्वोक्तसर्वार्थसंग्राहकतयोक्तत्वात्, पूर्वं चात्मन एव सर्वस्य निगमितत्वात् सर्वैः प्रकारैरात्मन एव पूर्वोक्तं सर्वमाप्नोतीत्यर्थस्य सिद्धेर्न प्रापञ्चिकलोकसम्बन्धो वक्तुं शक्य इत्यर्थः । सूत्रशेषमवतार्य व्याकुर्वन्ति तुशब्द इत्यादि । अनुबन्धः कृत इति । अनु पूर्वोक्तं लक्ष्यीकृत्य बध्यते सम्बध्यत इत्यनुबन्धः स कृतः । समासव्यासधारणस्य लोके विदुषामिष्टत्वादनेन श्लोकेन कृत इत्यर्थः । उक्तरीत्या व्याख्याने अपुष्टार्थत्वमित्यरुच्यार्थान्तरमस्याहुः अथवेत्यादि । तथेति । अनुबन्धः ॥ ५२ ॥

रश्मिः ।

भवती'त्यत्रोक्तिर्नोचितेति । तुरस्याः शङ्काया निरासः । कुतः । भूयस्त्वात् । हेतूनां भूयस्त्वात् । उक्तार्थस्य हेत्वन्तररूपस्यानुबन्धः कृत आधिक्याद्वानुबन्धः कृत इति सूत्रार्थः । पादेनेति । तेन भाष्ये परेण पादेनेति पाठः । पदेनेति प्रामादिकः पाठः । तदेष इति । तत् पूर्वोक्तमर्थं सङ्ग्रहेण प्रतिपाद्यत्वेनाभिमुखीकृत्यैष श्लोको भवतीत्यर्थः । तदित्यव्ययम् । सर्वैरिति । सर्वश इत्यस्यार्थः । सर्वदातृभिः सर्वमाप्नोतीत्यर्थव्यक्तेः सर्वैः प्रकारैरिति पर्यवसितोऽर्थः । बहुभिः प्रकारैरित्यर्थः । 'बह्वल्पार्थेभ्य' इति शस् । न प्रेति । पूर्वसूत्रादनुवर्तितस्य न लोकापत्तिरित्यस्यार्थकथनम् । बध्यत इति । भावे प्रत्ययः । अनुबन्ध इति । भावे घञ् । ननु पूर्वं व्यासस्य विद्यमानत्वात् श्लोकोक्तसमासस्य किं प्रयोजनमिति चेत्, तत्राहुः समासेति । 'धर्मादिष्वनियम' इति समासशब्दस्य पूर्वनिपातः । इष्टत्वादिति । यथात्रैव 'साङ्गोऽध्येय' इति प्रारम्भे । अपुष्टार्थत्वमिति । ननु लिङ्गभूयस्त्वप्रतिज्ञानाल्लिङ्गभूयस्त्वसूत्र इति पुनरुक्तेऽर्थेऽप्यपुष्टत्वं नेति चेत् । न । अपुनरुक्तलिङ्गभूयस्त्वस्य सूत्राशयगोचरत्वात् । 'अनवद्य'मिति सूत्रलक्षणात् । भाष्ये । स्वकृतेति । मर्यादायामात्मसायुज्ये 'अचलत्वं चापेक्ष्ये'ति सूत्राभासोक्तभक्तेच्छा मार्यादिकसाधनयुक्ता स्वकृतं साधनं तत्साधितं फल'मात्मत एवेदं सर्व'मिति श्रुत्युक्तमपि तस्यापेक्षया प्रदानवत्सूत्रोक्तदिशा स्वयमुद्यम्य वरवद्दासता भगवता साधितं फलं पश्यस्य सर्वात्मभावस्तस्मिन्नित्यर्थः । हेतावाधिक्यान्न पुनरुक्तिकृतमपुष्टत्वमिति भावः । अनुबन्ध इति प्रकारे वाल् । अनुबन्धत्वेन प्रकारेणानुबन्ध इत्यर्थः ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

उक्तेऽर्थे श्रुत्यन्तरसम्मतिमप्याह । एके शाखिनस्तैत्तिरीयाः, शरीरे भक्तशरीरे हृदयाकाश इति यावत्, तत्र आत्मनो भगवतो भावादाविर्भावात् तेन सह सर्वकामोपभोगं वदन्तीं श्रुतिं पठन्ति 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति । अत्रोपक्रमे 'ब्रह्मविदाप्नोति पर'मिति श्रुतिरक्षरब्रह्मविदः परब्रह्मप्राप्तिं सामान्यत उक्त्वा, विशेषतः कथनार्थं 'तदेषाऽभ्युक्ते'तिवाक्यं तद्ब्रह्मप्रतिपाद्यत्वेनाभिमुखीकृत्यैषा वक्ष्यमाणा ऋक् परब्रह्मविद्भिरुक्तेत्युक्त्वैवमुक्तवती 'सत्यं ज्ञान'मिति । परब्रह्मस्वरूपमनुभवैकवेद्यम्, न शब्दादिभिर्वेद्यमिति ज्ञापनाय स्वयं तत्स्वप्रतिपादिकाप्यन्यमुखेनोक्तवती । अत्र ब्रह्मणा सह सर्वकामोपभोग उक्त इत्येतदेकवाक्यतायै 'सर्वेषु लोकेषु कामचारो भवती'ति श्रुतेरप्युक्त एवार्थो

भाष्यप्रकाशः ।

एक आत्मनः शरीरे भावात् ॥ ५३ ॥ सूत्रप्रयोजनमुक्त्वा व्याकुर्वन्ति एके इत्यादि । भाष्यमत्र निगदव्याख्यातम् । एवमनेनाधिकरणेनाविहितभक्तिरूपस्य सर्वात्मभावस्य स्वरूपं तस्य सर्वेभ्यः साधनेभ्य उत्कृष्टत्वं तत्फलं च निर्धारितम् ।

शाङ्करे भास्करीये च भाष्ये इदं नवसूत्रमेकमधिकरणम् । तत्र चाग्निरहस्ये, 'नैव वा इदमग्रे सदासी'दित्यस्मिन् ब्राह्मणे मनोऽधिकृत्य, 'षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्म-

रश्मिः ।

एक आत्मनः शरीरे भावात् ॥ ५३ ॥ निगदेति । भक्तशरीर इति । ननु भक्तेति विशेषणं कुतो लब्धमिति चेत् । शृणु । 'ब्रह्मविदाप्नोति पर'मित्यत्र ब्रह्मविदुक्त्या परमाप्नोतीति भाष्येऽर्थाद्भक्तलाभ इति । भक्तेर्ज्ञानव्यापारत्वात् । 'अकृश'मिति विशेषणं षोडशाधिकरण्या नोक्तं तथापि ज्ञेयम् । पूर्णसाधनत्वात् । तथा च सुबोधिनी—'अकृश'मिति ज्ञानम् । पूर्णत्वात् । अन्येषां परिच्छेदरूपत्वात् । अनेन पूर्णमेव ज्ञानं साधनमिती'ति । न चात्र नेदं विशेषणमिति वाच्यम् । प्रभासलीलायाम'प्यपाश्रितार्भकाश्वत्थ'मिति विशेषणे पूर्वाधिकरणोपान्ते ऐश्वर्याविष्टस्य कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वेनोपदेशकाभावादासुरव्यामोहलीलोपयोगात् । एवं निगदव्याख्यातमित्यर्थः । निर्धारितमिति । प्रमाणं 'तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फल'मित्यधिकरणे । साधनं प्रदानवत्सूत्र उक्तमिति सर्वं शुभम् । एवेति । उक्तोर्थ एव, नान्यः, विकल्पापत्तेरित्यर्थः । विकल्पस्त्वेकवाक्यत्वाभाव इति भावः । नन्वग्निरहस्योक्तसम्पादिकाग्नीनां क्रियामयत्वं प्रकरणाद्भविष्यति, न ज्ञानमयत्वमिति चेत् । तत्राहुः शाङ्कर इत्यादि । श्रुत्यर्थस्तु—नैव वा इदमुत्पत्तेः पूर्वमासीत् । नाप्यसदित्युपक्रम्य मनसः प्रादुर्भावमुक्त्वा 'तन्मन आत्मानमैक्षते'त्यात्मेक्षणपूर्वकमग्नीनपश्यदिति मनोऽधिकृत्य आत्मनः स्वस्य सम्बन्धित्वेन, अग्नीन् किंभूतान् पुरुषायुष्ट्वेन शतवर्षान्तरगतैः षट्त्रिंशत्सहस्रैरहोरात्रैरवच्छिन्नतया एकस्मिन्नहोरात्रे उत्पन्नसर्वमनोवृत्तिष्वहोरात्रगतैकत्वारोपेण मनोवृत्तीनामसंख्येयानामपि षट्त्रिंशत्सहस्रत्वम् । इष्टिकात्वेन च सम्पाद्यन्ते । 'षट्त्रिंशत्सहस्राणी'त्यादिना । मन एव स्ववृत्तिरूपान् अग्नीन् अर्कान् ऋक्पूजायां अर्च्यान् । अत एव मनोविकारान् । मनश्चितः मनसा चीयन्ते सम्पाद्यन्ते इति

---

१. उक्त्वा तामिति पाठः । २. शब्दादिवेद्यम् ।

भाष्यप्रकाशः।

नोमयान्मनश्चित' इति यद्वाक्यं तद्विचार्य, तेषामग्नीनां न क्रियामयत्वम्, किन्तु विद्यामयत्वमेवेति सिद्धान्तितम्।

रामानुजाचार्यमते त्विदमेकसूत्रम्। तत्र, तैत्तिरीयमहानारायणोपनिषत्स्थः 'सहस्रशीर्षं देव'मिति सर्वोऽनुवाको विषयवाक्यम्। तत्र किं पूर्वानुवाके 'दहरं विपाप'मिति यद्दहरोपासनं विहितम्, तद्विषयो निर्धार्यते, उत सर्ववेदान्तोदितपरविद्योपासनानां विषय इति संशये, दहरोपास्यविशेष एव निर्धार्यते प्रकरणात्। पूर्वस्मिन्ननुवाके 'दहरं विपापं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्। तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तरस्तदुपासितव्य'मिति दहरविद्या प्रकृता। अस्मिंश्चानुवाके 'पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुख'मित्यादिना हृदयपुण्डरीकाभिधानम्। एतस्य नारायणानुवाकस्य दहरविद्योपास्यनिर्धारणार्थत्वमुपोद्बलयतीत्येवं प्राप्ते, उच्यते। लिङ्गभूयस्त्वादिति। अस्यानुवाकस्य निखिलपरविद्योपास्यविशेषनिर्धारणार्थत्वे बहूनि लिङ्गानि दृश्यन्ते। तथाहि। परविद्यासु अक्षरशिवशम्भुपरंब्रह्मपरंज्योतिःपरतत्त्वपरमात्मादिशब्दनिर्दिष्टमुपास्यं वस्त्विह तैरेव शब्दैरनूद्य, तस्य नारायणत्वं विधीयते, भूयसीषु विद्यासु श्रुतावनूद्य नारायणाभिधानभूयस्त्वं नारायण एव सर्वविद्यासूपास्यमस्थूलत्वादिविशेषितानन्दगुणकं परं ब्रह्मेति विशेषनिर्णये भूयो बहुतरं लिङ्गं भवति। लिङ्गशब्दश्चिह्नपर्यायः। चिह्नभूतं वाक्यं बहुतरमस्तीत्यर्थः। तद्धि प्रकरणाद्बलीय इति पूर्वतन्त्रे सिद्धम्। यत्पुनः 'पद्मकोशप्रतीकाश'मित्यादिवचनमस्य दहरविद्याशेषत्वमुपोद्बलयतीत्युक्तम्। तत्र। लिङ्गात्मकेन बलीयसा प्रमाणेन सर्वविद्योपास्यनिर्धारणार्थत्वेऽवधृते सति दहरविद्यायामपि तस्यैव नारायणस्योपास्यत्वमित्यर्थकतया तद्वचनोपपत्तेः। नच 'सहस्रशीर्ष'मित्यादिद्वितीयानिर्देशेन पूर्वानुवाकोदितोपासनासम्बन्धः शङ्कनीयः। तस्मिन् 'यदन्तस्तदुपासितव्य'मित्युपासिगतेन कृत्यप्रत्ययेन उपासिकर्मणोऽभिहितत्वात्तदुपास्ये द्वितीयानुपपत्तेः। 'विश्वमेवेदं पुरुषः' 'तत्त्वं नारायणः पर' इत्यादिप्रथमानिर्देशाच्च प्रथमार्थे द्वितीया वेदितव्या। 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः। तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वरा'डिति निर्देशैः सर्वस्मात् परो नारायण एव सर्वत्रोपास्य इति निर्णीयमानत्वाच्च प्रथमार्थे द्वितीयेति निश्चीयत इत्युक्तम्।

मम त्वत्रान्यदपि प्रतिभाति। सहस्रशीर्षादिषु त्रिषु मध्यममन्त्रे तुरीयपादे यत् 'उपजीवती'ति क्रियापदम्, तत्र कर्मत्वेन द्वितीयान्तपदान्यन्वयं प्राप्नुवन्ति, तन्मन्त्रारम्भे 'विश्वत' इत्यनेन यज्जगद्रूपं विश्वमुक्तम्, तदिदं विश्वमेव पुरुषः क्षरः परमं विश्वं नारायणं हरिमुपजीवतीत्येवं पदसम्बन्धे बाधाभावात्। एवमन्यान्यपि पदानि तत्रैव योजनीयानि। बाहुलकाभ्र-

रश्मिः।

मनंश्चितस्तान् मनोऽपश्यदिति। न क्रियेति। अग्निचयनप्रकरणवत् क्रियामयत्वं तत् न, किन्तु प्रकरणाल्लिङ्गस्य बलीयस्त्वाद्विद्यामयत्वमित्यर्थः। लिङ्गभूयस्त्वादग्नीनां ज्ञानमयत्वं तल्लिङ्गं प्रकरणाद्बलीयः। तदपि 'श्रुतिलिङ्गवाक्यप्रकरणे'त्यादिजैमिनिसूत्रे उक्तमिति सूत्रार्थः। पूर्वतन्त्र इति। उक्तसूत्रे सिद्धम्। द्वितीयेति। कर्तुरुपासनाक्रिययेप्सिततमत्वात्। दहरविद्यायामभिहितकर्मणो द्वितीयानुपपत्तिमाहू रामानुजाचार्याः तस्मिन्नित्यादि। द्वितीयेति। 'सहस्रशीर्ष'मित्यादि। प्रथमार्थे इति।

---

१. रामानुजभाष्येऽत्र क्वचित् क्वचित् पाठभेदः। 1946

भाष्यप्रकाशः ।

यापेक्षया व्यवहितान्वयपक्षस्य लघुत्वादिति । अग्रे तु तैरष्टसु सूत्रेषु शङ्कराचार्याद्युपन्यस्तैव विद्या विचारिता ।

तन्मतच्चोरः शैवस्तु, तद्वदेवैकसूत्रेऽस्मिन्नधिकरणे, महानारायणोपनिषत्स्थं 'सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रः सन्महो नमो नमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु' इति मन्त्रमुदाहृत्य, तदग्रिमं 'कद्रुद्राये'ति मन्त्रं त्यक्त्वा, 'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतये उमापतये पशुपतये नमो नम' इति मन्त्रं चाग्र उदाहृत्य, अत्र किं सर्वात्मत्वादिभिरुमापतित्वेन च श्रूयमाणं परं ब्रह्म पूर्वप्रकृते सवितृमण्डलविद्यामात्र उपास्यम्, उत सर्वासु परविद्यास्विति सन्देहे, प्रकरणाद्यप्राप्तिमुद्भाव्य, परविद्यालिङ्गसम्बन्धवाक्यभूयस्त्वात् सर्वासु परविद्यास्विति सिद्धान्तयित्वा, 'सर्वो वै रुद्र' इति वाक्ये 'सर्वं खल्विदं ब्रह्मे'ति शाण्डिल्यविद्योपास्यलिङ्गम्, 'पुरुषो वै रुद्र' इत्यत्र पुरुषसूक्तोपकोसलविद्याद्युपास्यलिङ्गम्, 'स'दित्यत्र सद्विद्योपास्यस्य, 'मह' इत्यत्र 'मह इति तद्ब्रह्म अङ्गान्यन्या देवता' इति व्याहृतिविद्योपास्यस्य, कद्रुद्रमन्त्रे 'शंतमꣳ हृदे'ति हृदयद्योतनाद्दहरविद्योपास्यस्य,' हिरण्यबाहव' इति हिरण्यरूपत्वं सवितृमण्डलोपास्यस्य, 'उमापतय' इति सर्वपरविद्योपास्यस्येत्यूचिवान् ।

तन्मन्दम् । आद्यायां परविद्यालक्षणाभावात् । 'अथ परा यया तदक्षरमधिगम्यत' इत्यक्षरप्रापकत्वस्य तद्गमकत्वस्य वा तल्लक्षणत्वात् । अस्यास्तु सर्वप्रतीकतया तत्क्रतुन्यायात् क्षरप्रापकत्वेनाक्षराप्रापकत्वात्, सर्वस्य ब्रह्मकारणकत्वमात्रभावनेनादृश्यत्वादिलक्षणकाक्षराज्ञापकत्वाच्च । द्वितीयेपि वाक्ये पुरुषशब्दस्य गौणत्वात्, 'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च वर्तेते वासुदेवे सनातने' इति विष्णुपुराणवाक्येन 'स एव वासुदेवोऽयं साक्षात्पुरुष उच्यते । स्त्रीप्रायमितरत् सर्वं जगद्ब्रह्मपुरःसरम् । स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः । प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद्वैभवादपी'ति नारसिंहवाक्याभ्यां च पुरुषशब्दस्य भगवत्येव मुख्यवृत्तत्वेन तदभिमते शिवे तथात्वस्य बाधितत्वात् । अत एव तृतीयवाक्येपि 'सन्मह' इत्येकं पदम्, सतो महस्तेजः सन्मह इति चैकपद्ये तदर्थः, तेन तयोरपि पदयोः सद्विद्याव्या-

रश्मिः ।

'छन्दसि बहुल'मिति सूत्रात् । तैरिति । रामानुजैः । सूत्रार्थस्तु । पूर्वेण इष्टिकचिताग्निना विकल्प्यन्ते मनश्चितादयोऽग्नय इति तेषां विकल्पः प्रकरणात् क्रियाप्रकरणात् क्रिया क्रियारूपाश्च ते चितरूपा तामग्निचितादीनामपि क्रियामयक्रत्वनुप्रवेशेन क्रियामयत्वं मानसग्रहवदुपपद्यते, यथा द्वादशाहेपि वाक्ये दशमेऽहनि मानसग्रहस्य मनोनिष्पाद्यग्रहस्य उत्पादनस्तोत्रशस्त्रप्रत्याहरणभक्षणत्वेन विद्यारूपस्यापि क्रियामयक्रत्वङ्गतया क्रियारूपत्वम्, तथेहापीति । शैव इति । भगवानिति शेषः । उमेति । परब्रह्मत्वस्यात्र पर्यवसितेः । विष्णुसमानशीलव्यसनवत्त्वं पर इति । तदुत्कर्षासहनं हृत्वा विष्णावुत्कर्षमाहुः तदिति । आद्यायामिति । श्रुतौ । अस्यास्तु 'सर्वो वै रुद्र' इत्यस्यास्तु सर्वेषां जगत्स्थपदार्थानां प्रतीकताङ्गता, 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग'दिति गीतातस्तयाङ्गस्य क्षरत्वेन तत्क्रतुन्यायो यादृशः क्रतुस्तादृशं फलमिति क्रतोः सेवायाः सर्वस्य रुद्रत्वेन भावनारूपायाः क्षरविषयतया तत्त्वात् । सर्वस्येति । क्षरस्य । वाक्य इति । 'पुरुष' इत्यादिश्रुत्यन्तर्गतं वाक्यं पदसमूहः । साक्षादिति । साक्षात्प्रत्यक्षतुल्ययोः । वैभवात् विभुरेव वैभवस्तस्मात् । भावप्रधानो निर्देशः । अत इति । मुख्यपुरुषमहिमत्वादेव । सतो ब्रह्मणो महस्तेजः । ऐकपद्य इति । एकपदत्वेन सन्महः-

मन्तव्यः ॥ ५३ ॥

इति तृतीयाध्याये तृतीयपादे सप्तदशं लिङ्गभूयस्त्वाधिकरणम् ॥ १७ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ (३-३-१८.)

ननु 'ब्रह्मविदाप्नोति पर'मिति श्रुत्या अक्षरब्रह्मविदः परब्रह्मप्राप्तिरुच्यते। तत्रेतरसाधनसापेक्षं ब्रह्मज्ञानं परं प्रापयति, उत तन्निरपेक्षमिति भवति संशयः। अत्र श्रुतौ तन्मात्रोक्तेरितरनिरपेक्षमेव तत्तथेति पूर्वः पक्षः। सिद्धान्तस्त्वेवं सति ज्ञानमार्गीयाणामपि परप्राप्तिः स्यात्। सा त्वनेकप्रमाणबाधितेति पूर्वमवोचाम।

भाष्यप्रकाशः ।

हृतिविद्योपास्यलिङ्गत्वाभावात् । 'हिरण्यबाहव' इत्यस्य सवितृमण्डलोपास्यत्वगमकताप्यक्षिद्वित्वलिङ्गविरुद्धेत्यस्य 'अन्तस्तद्धर्मो'धिकरण एवास्माभिरुपपादितत्वात् । उमापतिपदस्य कस्यामपि निःसन्दिग्धायां परविद्यायामदर्शनाच्च । इदं यथा तथा मया प्रहस्ताख्ये वाद उपपादितत्वान्नात्र विशिष्योच्यते । दहरविद्योपास्यत्वं तु क्रममुक्तौ प्राप्यविभूतिमध्येपि शिवस्य सत्त्वादनुमोदामह इति दिक् ॥ ५३ ॥ इति सप्तदशं लिङ्गभूयस्त्वाधिकरणम् ॥ १७ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ पूर्वाधिकरणान्तिमसूत्रे तैत्तिरीयश्रुतिः सम्मतित्वेन प्रदर्शितेति प्रसङ्गात्तदर्थविचारायाधिकरणान्तरमारभत इत्याशयेन तद्विषयादिकं वदन्तस्तदवतारयन्ति ननु ब्रह्मेत्यादि । प्रकृते सहकार्यनुक्तिः केवलाक्षरविदां तदप्राप्तिदर्शनं च सन्देहबीजम् । पूर्वपक्षसिद्धान्तौ तु स्फुटौ । सा त्वनेकेत्यादि । ज्ञानमार्गीयाणां परप्राप्तिस्तु 'यमेवैष वृणुते' 'नायमात्मा बलहीनेन' 'भक्त्या मामभिजानाति' 'भक्त्याहमे-

रश्मिः।

पदार्थः । अक्षीति। छान्दोग्यस्थे 'यथा कप्यासं पुण्डरीकमेवमक्षिणी' इति वेदे। अग्नीनां ज्ञानरूपत्वव्यवस्थापनम्, 'ब्रह्म तर्हि अग्नि'रित्युत्तरार्धसुबोधिन्युक्तश्रुत्याऽसन्दिग्धम् । प्रकरणस्याग्निश्रुतितत्पदसामर्थ्याभ्यां प्रकरणस्य नैर्बल्यान्नैर्बल्यम् । यद्वा । सूत्राणां न्यायरूपत्वेनाग्निरहस्येपि प्राप्तिः । न च भवन्नये यस्य भूयांसि लिङ्गानि तत्तच्छब्दवाच्यं यथा तत् वरणमेव बलीय इति, अन्यत्र तु तत् लिङ्गमेव बलीय इति तत्पदार्थाननुगम इति वाच्यम् । तत्पदार्थत्वेन वरणादीनां ग्रहणे तत्पदार्थत्वस्यानुगमात् । अन्यथा सूत्रेषु विश्वतोमुखत्वस्य लक्षणांशस्याव्याप्तेः ।

माध्वास्तु । अनुव्याख्याने तु । तट्टीकायां न्यायसुधायाम् । 'विद्यैवे'ति सूत्रमुपन्यस्य यद्यपीदमधिकरणमनुबन्धादिभ्य इत्यतः पूर्वम्, तथाप्युपासनस्वरूपावगमे सत्येव तत्सार्थक्यसमर्थनस्यावसरः; नान्यथेति व्युत्क्रमेण व्याख्यानमित्युक्त्वोपपादितं तथाहीत्यादिग्रन्थेन । ते 'अनुबन्धादिभ्य' इत्यादौ उपासनास्वरूपं 'विद्यैव तु निर्धारणा'दित्यादौ तत्सार्थक्यमुच्यते ।

भिक्षुभाष्येपीदं द्रष्टव्यम् ।

तत्र रामानुजाचार्यमतमपि न्यायसञ्चारेण गतार्थतां भजते । माध्वभिक्षुभाष्ये सम्यगालोच्य तदधिकरणार्थपर्यवसानमालोच्यम् ॥ ५३ ॥ **इति सप्तदशं लिङ्गभूयस्त्वाधिकरणम् ॥ १७ ॥**

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ प्रकृत इति । श्रुतौ । सन्देहबीजमिति । व्युत्क्रमेण सन्देहबीजम् । **स्फुटाविति । ज्ञानमार्गीयाणामिति ।** साधना-

किञ्च । ज्ञानशेषभूतब्रह्मापेक्षया फलात्मकस्य परस्य मुख्यत्वात् 'तदेषाभ्युक्ते'ति श्रुतिस्तदेव प्रतिपाद्यत्वेनाभिमुखीकृत्य ऋगुक्तेत्याह । तेन तत्र ब्रह्मपदे पुरुषोत्तमपरे ज्ञायेते । तथाच । गुहायां यत्राविर्भूतं परमं[1] व्योम पुरुषोत्तमगृहात्मकमक्षरात्मकं व्यापिवैकुण्ठं भवति, तदा तत्र भगवानाविर्भवतीति तत्प्राप्तिर्भवतीत्युच्यते 'यो वेद निहितं गुहायां परमे व्योम'न्नित्यनेन । तथाच । ज्ञानिनां गुहासु परमव्योम्नो व्यतिरेक एव, तत्र हेतुः, तद्भावाभावित्वादिति । 'यमेवैष वृणुत' इतिश्रुतेर्वरणाभावे भगवद्भावस्यासम्भवात्, ज्ञानिनां तथा वरणाभावाद्भगवद्विषयको भावो न भावीति तथेत्यर्थः । ननु ज्ञानविषयत्ववदाविर्भावोऽप्यस्तु, किञ्च, तदतिरिक्तमाविर्भावमपि न पश्याम इत्याशङ्कायामाह न तूपलब्धिवदिति । उपलब्धिर्ज्ञानम्, तद्वद्गुहायामाविर्भावो न भवतीत्यर्थः । यस्मै भक्ताय यल्लीलाविशिष्टं स्वस्वरूपमनुभावयिता प्रभुर्भवति, तद्गुहायां तल्लीलाश्रयभूतमक्षरस्वरूपं वैकुण्ठलोकवदाविर्भावयतीति नोक्तशङ्कालेशोपि । यत्र पुरुषोत्तमस्य

भाष्यप्रकाशः ।

कया ग्राह्य' इत्यादिप्रमाणबाधितेति इतः पूर्वाधिकरणेष्ववोचामेति नात्र सिद्धान्ते सन्देग्धव्यमित्यर्थः । ननु भवत्वेवम्, तथाप्ययमर्थः प्रकृतश्रुतेः सूत्राच्च कथं लभ्यत इत्याकाङ्क्षायां पूर्वं श्रुतेस्तल्लाभमाहुः किञ्चेत्यादि । तेन तत्रेति । तेनास्यामृचि । ज्ञायेते इति । आनन्दमयाधिकरणद्वितीयवर्णकस्थेन 'अथवा अक्षरे ब्रह्मण्यानन्दात्मके' इत्यादिव्याख्यानान्तरेण ज्ञायेते । ऋचि 'परमं व्योमे'ति पदद्वयं ज्ञानशेषभूतब्रह्मपरमित्याशयेन ऋक्सिद्धमर्थमाहुः तथाचेत्यादि । उच्यत इति । अस्यां ऋच्युच्यते । तथाचास्यां श्रुतौ गुहायां परमव्योमनि परप्राप्तिरुक्ता, परमव्योमाविर्भावस्तु न ज्ञानमार्गीयगुहायाम्, अतः परमव्योमपदादत्र सोऽर्थो लभ्यत इत्यर्थः । सूत्रात्तद्विवृण्वन्ति तथाचेत्यादि । व्यतिरेक इति । अभावः । सूत्रशेषमवतारयन्ति ननु ज्ञानेत्यादि । ज्ञानविषयत्ववदिति । अक्षरस्य ज्ञानविषयत्ववत् । तदतिरिक्तमिति । ज्ञानविषयत्वातिरिक्तम् । व्याकुर्वन्ति उपलब्धिरित्यादि । अनाविर्भावे हेतुं स्फुटीकुर्वन्ति यस्मा इत्यादि । लोकवदिति । लोकयुक्तम् । तथाच ज्ञानमार्गीयान् प्रति तादृशतदनुभावनेच्छाया अभावान्न परमव्योमात्मकाक्षरस्वरूपस्याविर्भावः । स चाविर्भावो दर्शनविषयत्वयोग्यतारूपः, न तु ज्ञानविषयत्वमात्रम् । अतो भगवतस्तथेच्छाभावेन केवलाक्षरज्ञानिनो वरणात्मकसहकारिशून्यत्वान्न परप्राप्तिरिति ज्ञानिभक्तस्यापि वरणात्मकसहकारिसापेक्षमेव ज्ञानं परप्राप्तिजनकमिति सिद्धान्तो निर्विचिकित्स इत्यर्थः । ननु श्रुतावक्षरस्यादृश्यत्वादिगुणकत्वस्योक्तत्वात् समन्वयाध्याये

रश्मिः ।

न्तरभक्तेरपेक्षाभावोक्तेः । एवं सिद्धान्तः स्पष्ट इत्यर्थः । किञ्चेत्यादीति । ज्ञानशेषेति । 'ब्रह्म वि'दित्यत्र ज्ञानविशेषणीभूतं यद्ब्रह्म तदपेक्षया । ब्रह्मपदे इति । 'ब्रह्मवि'दित्यत्रत्याद्ब्रह्मपदादग्रेतने ब्रह्मपदे । सोऽर्थ इति । इतरसाधनसापेक्षं ब्रह्मज्ञानं परं प्रापयतीत्यर्थः । भाष्ये । तथेत्यर्थ इति । तद्भावाभावित्वादित्यर्थ इत्यर्थः । वैकुण्ठलोकोऽस्त्यस्मिन्निति वैकुण्ठलोकवत् । द्वितीयान्ताद्वतिर्नोक्त इत्याशयेनाहुः लोकयुक्तमिति । दर्शनविषयत्वेति । आविर्भावतिरोभाववादे स्फुटः । नन्त्वित्विति । उपेक्षाज्ञानविषये आविर्भूतेनाविर्भावप्रसङ्गात्तथा । ननु श्रुताविति ।

---

[1] परं ।

चाक्षुषत्वम्, तत्र ततोऽधःकक्षस्य तस्य तथात्वे का शङ्का नाम। एतदुपपादितं[1] पूर्वम्, विद्वन्मण्डने च। ननु ज्ञानिज्ञानविषयभक्तगुहाविर्भूताक्षरयोर्भेदोऽस्ति, न वा। नाद्यः। मानाभावादेकत्वेनैव सर्वत्रोक्तेः। न द्वितीयः। निरवयवस्य क्वचिल्लोकरूपत्वातद्रूपत्वाभ्यामेकत्वानुपपत्तेरिति चेत्। मैवम्। लोकरूपत्वस्य पश्चाद्भावित्वे हीयमनुपपत्तिः, न त्वेवम्, किन्त्वक्षरस्वरूपमेव तथेति श्रुतिराह। 'अम्भस्यपारे भुवनस्य मध्य' इत्युपक्रम्य 'तदेव भूतं तदु भाव्यमा इदं तदक्षरे परमे व्योमन्।' एतदग्रे च, 'यमन्तःसमुद्रे कवयोऽवयन्ति यदक्षरे परमे प्रजा' इत्यादिरूपा। स्मृतिरपि 'परस्तस्मात्तु भावोऽन्योऽव्यक्तो व्यक्तात् सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति। अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' इत्यादि तु गीतासु। श्रीभागवतेपि 'दर्शयामास लोकं स्वं गोपानां तमसः परम्। सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम्। यद्धि पश्यन्ति मुनयो गुणापाये समाहिता' इति दशमे। द्वितीये च 'तस्मै स्वलोकं भगवान् समाहितः सन्दर्शयामासे'त्युपक्रम्य, कालत्रिगुणमाया[2]दिसम्बन्धराहित्यमुक्त्वा, भगवत्पार्षदानुक्त्वा, विमानप्रमदा उक्त्वा, श्रीरुक्ता। तथाच श्रुतिस्मृत्येकवाक्यतायां तादृक्स्वरूपमेवाक्षरमिति निर्णयो भवति। एवं सति सच्चिदानन्दत्वदेशकालापरिच्छेदस्वयम्प्रकाशत्वगुणातीतत्वादिधर्मवत्त्वेनैव ज्ञानिनामक्षरविज्ञानम्, भक्तानामेव पुरुषोत्तमाधिष्ठानत्वेन तथेति ज्ञेयम्। 'मल्लानामशनि'रिति श्लोकोक्तरीत्या पुरुषोत्तमस्येव। प्रभुणा ये

भाष्यप्रकाशः।

तथा निर्णीतत्वाच्च नेदं साधीय इति शङ्कायामाहुः यत्रेत्यादि। तथाच वरणेन पुरुषोत्तमस्वरूपस्य चाक्षुषत्वं वरणश्रुतौ 'भक्त्या त्वनन्यये'ति गीतास्मृतौ चोक्तम्, अक्षरस्यापि 'कश्चिद्धीर' इति श्रुतावुक्तम्, तच्च पुरुषोत्तमादधःकक्षम्, अतः साधनविशेषसम्पत्तौ कैमुतिकन्यायावतारात् सर्वादृश्यतायामपि दृश्यत्वे विरोधाभावान्न सन्देह इत्यर्थः। अत्राक्षरस्वरूपविचारेण चोदयति

रश्मिः।

अक्षरधियामित्यधिकरणे 'एतद्वै तदक्षर'मित्यादिश्रुतावुक्तत्वात्। **समन्वयेति**। 'अक्षरमम्बरान्तधृते'रित्यत्र निर्णीतत्वात्। इदमिति। सहकारिसापेक्षं ज्ञानं परप्राप्तिजनकमिति साधीयः। **उक्तमिति**। 'प्रत्यगात्मानमैक्ष'दिति प्रत्यगात्मरूपाक्षरज्ञानमुक्तम्। **का शङ्का नामे**तिभाष्यविवरणं **कैमुतिकेति**। **भाष्ये**। **पूर्वमिति**। 'न तूपलब्धिव'दित्यत्र। **विद्वन्मण्डन** इति। 'अभेदादनुपाधित्वा'दित्यत्र सगुणत्वेनाभिमताभेदोपपादनात्तथा। **शब्दापेक्षयेति**। पूर्वपक्षत्वाद्धादरिमतमुक्तम्, तस्यार्थप्रधानत्वात्। भगवतो व्यासस्य शब्दप्राधान्यात्। **उत्तानेति**। 'अम्भसी'त्यत्र लोकत्रयनिरूपणमिति न साङ्कर्यम्। **गीतास्विति**। तन्माहात्म्यं भागवतापेक्षया बहुवचनम्। **देशकालेति**। परिच्छिन्नत्वं मध्यमपरिमाणवत्त्वम्। भक्तानां तु देशकालकृतपरिच्छेदो वर्तते। श्रीगोवर्धनदेशाद्यमुनादेशः परः, यमुनादेशाच्छ्रीगोवर्धनदेशोऽपरः। प्रातःकालीना लीला न मध्याह्ने इत्येवं कालकृतपरिच्छेदः। लीलासु मध्यमपरिमाणरूपपरिच्छेदः, 'एकं रूपं रसात् पृथ'गितिवत्। **तथेतीति**। अक्षरज्ञानम्। एकस्यानेकत्वे दृष्टान्तमाहुः **मल्लानामिति**। पुरुषोत्तमस्यानेकत्वेन दर्श-

---

[1] चोपपादितम्। [2] मायासम्बन्धः।

यथा विचारिताः सन्ति, ते तथा भवन्तीति तद्विचार एव सर्वेषामधिकाररूप इति 'कृतप्रयत्नापेक्षस्त्वि'त्यत्र निर्णीतम् ॥ ५४ ॥

अस्मिन्नर्थे कैमुतिकन्यायकथनार्थं निदर्शनत्वेनोत्तरं पठति ।

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

यागे तत्तदृत्विङ्नियतकर्तव्यान्यन्वाधानादीन्यङ्गानि । तत्रावबद्धाः सर्व एवर्त्विजो यजमानेन । अवबन्धनं नाम 'अध्वर्युं त्वां वृणे,' 'होतारं त्वां वृणे,' 'उद्गातारं त्वां वृण' इत्यादिरूपं वरणमेव, अन्यथा सर्वकर्मविदुषां तत्कृतिपटूनामेकत्राधिकारः, नान्यत्रेति नियमो न स्यात् । तस्य तस्य तथा वरणे तु यजमानेच्छैव हेतुः । ते च तदा न सर्वासु शाखासु विहितान्यङ्गानि कर्तुं सर्वेपि शक्ताः, किन्तु यजमानवरणनियमिता एव तथा । तत्र हेतुमाह । हि यतः कारणात् प्रतिवेदं नियमितान्यङ्गानि, 'हौत्रमृचा, आध्वर्यवादि यजुषा, उद्गात्रं साम्ने'ति । तथाचालौकिके वैदिके कर्मणि जीवेच्छापि नियामिका भवति यत्र, तत्र किमु वाच्यं प्रतिरोमकूपं सावकाशममितब्रह्माण्डस्थितिमतस्तदीशितुरिच्छैव नियामिका तत्तत्साधनफलसम्पत्ताविति ॥ ५५ ॥

भाष्यप्रकाशः ।

नन्वित्यादि । तथाच शब्दापेक्षयार्थस्य बलिष्ठत्वादर्थस्वरूपविचारे पूर्वोक्तमनुपपन्नमित्यर्थः । तत्र समादधते मैवमित्यादि । निर्णीतत्यमित्यन्तेन । इयमिति । उक्तविकल्परूपा । न त्वेवमिति । न तु रूपभेदः । शेषमुत्तानार्थम् । तथाच स्वरूपस्योक्तरूपत्वाद्भगवदिच्छयाधिकारभेदेन तस्य तस्य तथा भानान्न काप्यनुपपत्तिरित्यर्थः ॥ ५४ ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥ सूत्रमवतारयन्ति अस्मिन्नित्यादि । व्याकुर्वन्ति याग इत्यादि । इत्यादिरूपं वरणमिति । तत्तत्कर्मकर्तृतानियमनरूपं सम्भजनं विभाग इति यावत् । शेषं स्फुटम् । तथाचाक्षरस्य तत्सर्वरूपत्वेपि ज्ञानिषु तथानाविर्भावे भक्तहृदये च तथाविर्भावे उक्तरीत्या कैमुतिकन्यायाद्भगवतस्तेषां तेषां तादृक्तादृक्फलदित्सैव नियामिकेत्यर्थः ॥ ५५ ॥

रश्मिः ।

नमधिकारभेदात् । यथेति । 'कामाद्गोप्यो भयात् कंस' इति षडुपाधिभिर्भिन्नत्वेन विचारिताः । तद्विचार इति । भगवद्विचारः । सर्वेषामधीति । विषयतासम्बन्धेन तथा । भगवति तु विचारः समवायसम्बन्धेन । सिद्धमाहुः तथा चेति । स्वरूपस्येति । अक्षरस्वरूपस्य । भाष्योक्तरूपत्वात् । तस्य तस्येति । ज्ञानिनो भक्तस्य च । कापीति । क्वचिल्लोकरूपातद्रूपाभ्यामेकत्वानुपपत्तिरूपा भाष्योक्ता । उपासनादिविषयभगवद्धर्मरूपषोडशकला निवृत्ताः । अग्रेऽष्टाधिकरण्यां षड्धर्मा धर्मी समष्टिश्चेति संख्यातात्पर्यम् ॥ ५४ ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥ सम्भजनमिति । 'वृङ् संभक्ता'विति धातुपाठात् । शेषमिति । आध्वर्यवादीति । आदिना प्रतिप्रस्थातुः प्रतिप्रस्थात्रम् । एवं स्फुटं शेषम् ॥ ५५ ॥

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥

ननु पूर्वं कर्मज्ञाननिष्ठानामपि पुंसामग्रे भक्तिमार्गीयत्वं यत्र भवति, तत्र तथैव भगवद्वरणमिति हि सिद्धान्तः । ऋत्विजस्त्वेकस्मिन् याग एकत्र वृतस्य नापरत्रापि तथेति विरुद्धो दृष्टान्त इत्यरुच्या निदर्शनान्तरमाह । यथैक एव कश्चिन्मन्त्रो बहुषु कर्मसु सम्बध्यते, कश्चित् द्वयोः, कश्चिदेकत्रैव, तथैव विधा-

---

भाष्यप्रकाशः ।

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥ सूत्रमवतारयन्ति नन्वित्यादि । तथैव भगवद्वरणमिति । तत्तदनन्तरमेतं भक्तिमार्गे प्रवेशयिष्यामीत्येवं विचारितत्वात्तत्तदनन्तरमेव भगवद्वरणम् । ऋत्विज इति षष्ठी । नापरत्रापि तथेति । नान्यकार्ये विनियोगः । सूत्रं व्याकुर्वन्ति यथैक एवेत्यादि । उदाहरणं त्वाद्यस्य 'देवस्य त्वा सवितुः प्रसव' इत्यादिरनुषङ्गमन्त्रः । द्वितीयस्य सूर्योपस्थाने मन्देहादिनिवारणे च गायत्रीमन्त्रः । तृतीयस्य 'तेजस्वी भूयास'मिति । एवमन्यदपि द्रष्टव्यम् । कर्मोदाहरणं ज्योतिष्टोमादि जयन्तीव्रतादि च द्रष्टव्यम् । कर्मोदाहरणमन्यदप्याहुः

रश्मिः ।

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥ अनुषङ्गेति । उदाहरणमित्यनुषङ्गः । अनुषङ्गो वाक्यपरिसमाप्तिः । वाक्यस्य परिसमाप्तिर्येन । अनुषङ्गोपि मन्त्रभेदकः । अनुषज्यत इत्यनुषङ्गः । सम्बद्धमन्त्रः । 'देवस्य त्वा सवितुः प्रसव' इत्यसिदमादायेत्येकोऽनुषङ्गः । एवमितरावपि । यथाऽमृताभिषेके । भैषज्ये च 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।' भैषज्येनेति । द्वितीयस्येति । द्वयोः कर्मणोः सम्बद्धस्य । 'आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्मयेन सविता रथेन देवो याति भुवनानि पश्य'न्नित्यत्र । मन्देहेति । आरणे सह वै पन्नायाम् । 'तदुह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्रियाभिमन्त्रिताम्भसो अप ऊर्ध्वं विक्षिपन्ति । ता एता आपो वज्रीभूत्वा तानि रक्षांसि मन्देहारुणे दीपे प्रक्षिपन्ती'तिश्रुत्या स्पष्टं मन्देहादिनिवारणम् । मन्देहद्वीपे निवारणं मन्देहादिनिवारणम् । तस्मिन् । गायत्रीव गायत्री । आसत्येन रजसेति । स्थानसाम्यं सम्बन्धो लक्षणा । मन्त्रत्वमभियुक्तप्रसिद्ध्या । अस्यन्तत्वान्तमध्यमपुरुषान्तत्वाभावेपि । सूत्रादिमावार्थपादभाष्ये । तृतीयस्येति । एकत्र कर्मणि सम्बद्धस्य मन्त्रः 'तेजस्वी भूयास'मिति होमे उदाहरणम् । अन्यदपीति । 'इषे त्वोर्जेत्वे'ति । शाखाच्छेदनेऽनुमार्जने । 'इषे त्वे'ति शाखायां 'छिनत्त्यूर्जेस्वेत्यनुमार्ष्टि वे'ति कल्पसूत्रात् । तथा प्राणापानयोः प्रत्यगसने । 'प्राणमूर्ध्वमुन्नयत्यपानं प्रत्यगस्यती'ति काठकात् । वेदार्थे द्वितीयपर्याये । तथा क्षुत्पिपासाभिवृद्धिकर्त्र्यै शक्त्यै औषधिपालने विचारकारणभूतशक्त्यै च । 'इषे पीपिहि ऊर्जे पीपिही'त्यारणात् । 'हरिः ऊ'मिति च । बहुषु कर्मसु । द्वयोः कर्मणोः 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती'त्युदाहरणम् । यागे पापश्लोकश्रवणाभावे च कर्मणोः । पापश्लोकश्रवणाभावस्यापि कर्मत्वम् । कर्मान्तःपातात् । एकत्र कर्मणि 'कारीर्या यजेत वृष्टिकामः' इत्युदाहरणम् । वृष्टिकामोपि कर्म, 'कर्ता कर्म च करणं चे'ति गीतावाक्यात् । आदिपदादिति भाष्यविवरणं कर्मोदाहरणमित्यादि । ज्योतिष्टोमादीति । 'ज्योतिष्टोमोऽग्निष्टोमः' । इदं कर्म तत्रैकत्र कर्मणि एको ब्रह्मा कर्तृकर्मरूप उपयुज्यते । 'परमेष्ठिनो वा एष यज्ञोऽग्रे आसीद्यदग्निष्टोम इति, तेन स परमां काष्ठामगच्छ'दिति । 'कर्मणा ब्रह्मैवमुच्यत' इति सुबोधिनी । आदिशब्दार्थोऽग्रे वक्तव्यः । स्मार्तोदाहरणं जयन्तीत्यादि । जयन्तीव्रतं सेवाकर्मार्थं भगवदावेशार्थं च । आदिना प्रायश्चित्तं कर्म शुद्ध्यर्थम् । एकं पितृकृतं प्रायश्चित्तं कर्मानेककालशुद्ध्यर्थम् ।

नात्, तथात्रापीत्यर्थः । आदिपदात् कर्मोच्यते । यत्र काम्येनैव नित्यकर्मनिर्वाहः, तत्र कामितार्थसाधकत्वे प्रत्यवायपरिहारेऽप्येकमेव तदुपयुज्यते । यथाच सर्वतोमुखेऽनेकहोतृप्रवरेऽध्वर्युप्रवरे च गृह्यमाणे 'देवाः पितर' इत्यादिना यजमानकर्तृकानुमन्त्रणमेकमेव सर्वत्र सम्बध्यते, तथैव विधेः, तथात्रापि तावद्विधं यदेकमेव वरणम्, तेन तत्तन्निष्ठानन्तरं भक्तिनिष्ठेति न दृष्टान्तविरोध इत्यर्थः ।

अथवा । ॐमित्युदाहृत्यैव मन्त्राणामुच्चारणान्मन्त्रादिरोङ्कारः । स यथा ब्रह्मात्मकत्वेनैक एव सर्वमन्त्रेषु सम्बध्यते, तथा वरणमपीति तथेत्यर्थः । यद्यपीतरनिष्ठानन्तरभूतभक्तिनिष्ठावतोपि वरणं तथाभूतमेकमेवेति नोक्तदोषः, तथाप्युत्कृष्टमार्गे वृतस्य नीचकक्षापादनमनुचितमिति मत्वा पक्षान्तरमुक्तम् । वस्तुतस्तु साधनमर्यादया यत्र भक्तिर्दित्सिता, तत्र तथेति नानुपपत्तिः काचित् ॥५६॥

इति तृतीयाध्याये तृतीयपादे अष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

भाष्यप्रकाशः ।

यथाचेत्यादि । सर्वतोमुखः कश्चिद्यागविशेषः । तावद्विधमिति । क्रमिकतत्तत्प्रकारकम् ।

मन्त्रादिपदं तद्गुणसंविज्ञानबहुव्रीहिणा व्याख्याय षष्ठीसमासपक्षेण प्रकारान्तरमाहुः अथवेत्यादि । ननु पूर्वव्याख्याने को दोषो येन व्याख्यानान्तरमत्रोक्तमित्याकाङ्क्षायां तदुक्तमङ्गीकृत्य सम्भावितं दोषमाहुः यद्यपीत्यादि । तथाभूतमिति । यादृशं केवलभक्तिमार्गीयस्य तादृशम् । पक्षान्तरमिति । ॐकारनिदर्शनपक्षः । तथाच ब्रह्मात्मकत्वेनोत्कृष्टस्याप्योङ्कारस्य तत्तन्मन्त्रसाङ्गत्वाय तत्तत्सम्बन्धो न दोषावहः, तथा वृतस्यापि तत्सम्बन्धो मर्यादामार्गरक्षार्थत्वान्न दोषावह इत्यर्थः । युक्त्या समाधाय सिद्धान्तेन समाधानमाहुः वस्तुत इत्यादि । तथाच भगवदिच्छाविचारादेवानुपपत्तिपरिहारः, निदर्शनं तु वादिनिग्रहायेति सूत्रकाराशय इत्यर्थः ॥ ५६ ॥ इत्यष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

रश्मिः ।

आदिपदार्थमाहुः कर्मोदेति । अन्यदिति । बह्वर्थकमेकं कर्म । द्व्यर्थमेकं कर्म तु यत्र काम्येनैवेत्यादिभाष्येणोक्तम् । काम्येन पशुकामनया कृतेन । एवकारो भगवत्प्रेरणया कृतकर्मव्यवच्छेदकः । नित्यकर्माग्निहोत्रादि । कामितार्थः पश्वादिः । प्रत्यवायेति । 'धर्मेण पापमपनुदती'ति श्रुतेस्तथा । तदिति काम्यं कर्मेति भाष्यार्थः । तथैव विधेरिति । विधिस्तत्रैव । क्रमिकेति । क्रमप्राप्तो यो होतृत्वाध्वर्युत्वरूपः प्रकारः यस्मिन् वरणे सम्भजने तत् क्रमिकतत्तत्प्रकारकं वरणम् । भाष्ये । तत्तन्निष्ठेति । कर्मज्ञाननिष्ठानन्तरम् । प्रकृते । मन्त्रादीति । सौत्रम् । तद्गुणेति । मन्त्र आदिर्यस्य कर्मण इति तद्गुणसंविज्ञानो बहुव्रीहिः । प्रथमान्ताद्वतिः । उपयुज्यत इत्येकक्रियान्वयेन विशेष्यान्वय्यन्वयित्वरूपतद्गुणसंविज्ञानबहुव्रीहिलक्षणसत्वात् । तेन तद्गुणसंविज्ञानबहुव्रीहिणा । षष्ठीति । मन्त्रस्यादिः मन्त्रादिरोंकारः । प्रथमान्ताद्वतिः । भाष्ये । तथेत्यर्थ इति । दृष्टान्ताविरोध इत्यर्थ इत्यर्थः । प्रकृते । दोषमिति । कर्मज्ञानसम्बन्धरूपम् । अनुचितमित्यन्तेन भाष्येणाहुः यद्यपीत्यादीति । नोक्तदोष इति । सम्भावितो दोषः । नन्वयं दोषो भाष्ये क्वोक्त इति चेत्, शृणु । यद्यपीत्यादिग्रन्थस्य दोषं हृदिकृत्वा तत्परिहाराय प्रवृत्तत्वादित्याक्षेप्यत्वेन व्यञ्जनावृत्त्योक्त इति जानीहि । ॐकारेति । निदर्शनं दृष्टान्तः । तत्सम्बन्धः कर्मज्ञानसम्बन्धः । वस्तुत इत्यादीति । तत्र तथेति । तत्र भक्ते तथा कर्मज्ञाननिष्ठानन्तरं भक्तिमार्गीयवरणमित्यर्थः । अनुपपत्तिरिति । कर्मज्ञानसम्बन्धः ॥ ५६ ॥ इत्यष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

---

१. अनेकत्र ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५७ ॥ (३-३-१९.)

ननु सुखस्वरूपजिज्ञासायां 'यो वै भूमा तत् सुख'मित्युक्तम्, भूमस्वरूपजिज्ञासायां 'यत्र नान्यत् पश्यती'त्यादिना तन्निरूपितं तत्सर्वात्मभावस्वरूपमिति यदुक्तम्, तन्नोपपद्यते । भूम्नो हि सुखरूपतोच्यते । सर्वात्मभावे तु विरहभावे दुःसहदुःखानुभवः श्रूयते । तेन मोक्षसुखमेव 'यो वै भूमे'त्यादिनोच्यते। 'यो वै भूमा तदमृत'मिति वाक्याच्च । अग्रे च, 'स वा एष एवं पश्य'न्नित्याद्युक्त्वा, 'तस्य सर्वेषु लोकेषु कामचारो भवती'ति फलमुच्यने । तच्च मोक्षानन्तरमसम्भवि, अतः स भावो मोक्षो वात्रोच्यत इति संशयः ।

तत्र कामचारोक्तेर्मुक्तिपूर्वदशायां तन्माहात्म्यनिरूपणार्थत्वादमृतशब्दाच्च मुक्तिरेव भूमपदेनोच्यत इति पूर्वः पक्षः ।

तत्र भूमशब्देन स भाव एवोच्यत इति सिद्धान्तः । तत्र दुःखदर्शनानुपपत्त्या सर्वाधिकत्वलक्षणं भूमत्वमनुपपन्नमिति शङ्कां परिहरति । भूम्नः सर्वात्मभावस्य ज्यायस्त्वं सर्वस्मान्मन्तव्यम् । तत्रोक्तानुपपत्तिपरिहारार्थं दृष्टान्तमाह क्रतुवदिति । दर्शपूर्णमासप्रकरणे तैत्तिरीयके पठ्यते 'परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्तेन स परमां काष्ठामगच्छ'दित्युपक्रम्य, 'य एवं विद्वान् दर्शपूर्णमासौ

भाष्यप्रकाशः ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५७ ॥ प्रासङ्गिकं विचार्य पुनः प्रकृतशेषमेव विचारयतीत्याशयेनाधिकरणमवतारयन्तः संशयं व्युत्पादयन्ति नन्वित्यादि । तद्यदिति । भूमस्वरूपम् । श्रूयते इति । पुराणवाक्येभ्यः श्रूयते । तेनेति । सुखस्य दुःखविलक्षणत्वेन । यो वै भूमा तदमृतमिति वाक्याच्चेति । इदमपि 'तन्नोपपद्यत' इत्यत्र 'मोक्षाङ्गीकारे' च हेत्वन्तरम् । तत्रानन्तरं दुःखसद्भावेन सुखस्यामृतत्वाभावात्, मोक्षे चानन्तरं दुःखाभावेन सुखस्यामृतत्वादिति । एवं मोक्षकोटिर्व्युत्पादिता । अग्रे चेत्यादिना असम्भवीत्यन्तेन सर्वात्मभावकोटिव्युत्पादनम् । अत उभयबीजसद्भावादेवं संशय इत्यर्थः ।

पूर्वपक्षमाहुः तत्रेत्यादि । कामचारोक्तेरिति षष्ठी ।

सिद्धान्तमाहुः तत्र भूमेत्यादि । सम्प्रसादाधिकरणे भूमशब्देन परमात्मनो निर्णीतत्वाच्छिन्नभूयस्त्वाधिकरणे सर्वात्मभावस्यापि निर्णीतत्वादत्र भूमलक्षणवाक्ये भूमपदेन स भावः सर्वात्मभावसहित एव परमात्मोच्यते । यथा 'घटेन जलमाहरे'त्यादौ घटादिपदेन छिद्रेतरत्वादिसहितो घटादिः, तद्वदिति सिद्धान्त इत्यर्थः । एवं सिद्धान्तं सामान्यत उक्त्वा तं व्युत्पादयितुं सूत्रमवतारयन्ति तत्र दुःखेत्यादि । व्याकुर्वन्ति भूम्न इत्यादि । सर्वात्मभावस्येति । इदं षष्ठ्यर्थस्य विवरणम् । भूमसम्बन्धिनः सर्वात्मभावस्येत्यर्थः । अत्र लौकिकतन्निरासायैव कथनमिति बोध्यम् । तत्रेति । ज्यायस्त्वप्रतिज्ञायाम् । दर्शपूर्णमासप्रकरण इति । संहिताप्रथमाष्टकषष्ठ-

रश्मिः ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५७ ॥ प्रकृतेति । सर्वात्मभावशेषम् । पुराणेति । भ्रमरगीतोक्तिभ्यः । श्रुतिवाक्यं तु 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति सामान्यम् । तत्रेति । सर्वात्मभावे । भाष्ये । उक्तानुपपत्तीति । दुःखदर्शनानुपपत्त्या सर्वाधिकत्वलक्षण-

यजते परमामेव काष्ठां गच्छती'ति । यथा व्रतादिदुःखात्मकत्वेपि परमकाष्ठालक्षणफलगमकत्वेन दर्शपूर्णमासयोः सर्वक्रतुभ्योऽधिकत्वं वक्तुं 'अग्र आसी'दिति स्तूयते, तथा दुःखहेतुत्वेप्यनन्यलभ्यसाक्षात्पुरुषोत्तमानन्दप्राप्तिहेतुत्वेन सुखरूपत्वमुच्यत इत्यन्येभ्यः सर्वेभ्यो ज्यायस्त्वं मन्तव्यमित्यर्थः । अत्रोपपत्तिमाह । तथाहि दर्शयति । श्रुतिस्तु 'स एवाधस्ता'दित्याद्युक्त्वा, 'अथाहङ्कारादेश' इत्याद्युक्त्वा, 'अथात्मादेश' इत्याद्युक्तवती, अग्रे चैतादृशस्य 'आत्मत एव प्राणाशास्मरादिसर्व'मिति च दर्शयति । एतत्सर्वात्मभाववत्येव सर्वमुपपद्यते, न तु मुक्तस्य । वृत्तिभेदाभावात् प्राणाद्यभावाच्च । जीवन्मुक्तिदशायां प्राचीनानामेव सत्त्वात्, 'आत्मतः प्राणा' इत्यादि न वदेत् ।

भाष्यप्रकाशः ।

प्रपाठकनवमानुवाके । अग्र आसीदिति । 'परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्' । उच्यत इति । भाविस्वरूपमादायोच्यते । तथाच परमकाष्ठाप्रापकत्वात्तथेत्यर्थः । ननु भाविस्वरूपमादायैवोच्यते, न विद्यमानं स्वरूपमादायेत्यत्र किं गमकमित्याकाङ्क्षायामाहुः अत्रोपपत्तीत्यारभ्य, न वदेदित्यन्तम् । तथाच भूमपदेन यदि मोक्षावस्थामभिप्रेयात्, तदैवं त्रिविधा वृत्तीर्न वदेत्, प्राणादीनां नामान्तानां तत्र सम्बन्धं च न वदेत्, तदानीं तदुभयाभावात्, अतस्तदन्यथानुपपत्त्या भूमलक्षणे सर्वात्मभावभाविस्वरूपमेवोच्यत इति सर्वात्मभावसहित एव भूमा, न तु मोक्षावस्था । नापि जीवन्मुक्तावस्थेति युक्तम् । तां चेदभिप्रेयात्, तदा 'आत्मतः प्राणा' इत्यादि न वदेत्, तस्यामवस्थायां प्रारब्धवशादेव पूर्वप्राणादीनां सत्तायाः सत्त्वात्, अतो द्विविधस्यापि मोक्षस्यात्रादातुमशक्यत्वात् सर्वात्मभावोत्र ग्राह्य इत्यर्थः ।

रश्मिः ।

भूमत्वानुपपत्तिपरिहारार्थम् । **प्रकृते** । **भावीति** । परमकाष्ठापन्नस्वरूपमादाय । **तथेत्यर्थ इति** । ज्यायस्त्वमित्यर्थ इत्यर्थः । **विद्यमानमिति** । दुःखरूपम् । **त्रिविधेति** । 'स एवाधस्ता'दित्युक्ता । अहङ्कारादेशरूपा । आत्मादेशरूपा च । एतच्च **प्राणाद्यभावाच्चेति** भाष्याग्रे **न वदेदित्यस्य** सम्बन्धं कृत्वा योजितं ज्ञेयम् । **जीवन्मुक्तीत्यादि**भाष्ययोजना **प्राणादीनामित्यादि** । **प्राचीनानामित्यस्य** विशेषणमपीदम् । च पुन'स्तस्य वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशे'त्यादि । मध्ये 'आत्मत आविर्भावतिरोभावा'विति । उपान्ते 'आत्मतो नामे'ति । अन्ते 'आत्मतो मन्त्राः, आत्मतः कर्माणि, आत्मत एवेदं सर्व'मिति । अत्र नामान्तानां तत्र जीवन्मुक्ते तथा । **तदानीमित्यादि** । सर्वात्मभावेन भावि फलं तस्य स्वरूपं तस्य काले इत्यर्थः । **तदुभयेति** । निःसम्बोधमोक्षजीवन्मोक्षोभयं तदभावात् । **तदन्यथेति** । प्राणादिनामान्तसम्बन्धस्य सर्वात्मभावभाविस्वरूपकल्पनं विनानुपपत्त्या । एवकारस्तु ब्रह्मवित्प्रपाठके आनन्दमयान्तानि रूपाण्युक्त्वा श्राव्यते । 'अथातोऽनुप्रश्नाः । उता विद्वानमुं लोकं प्रेत्य कश्चित् समश्नुते ।' 'सोऽकामयते'त्याद्युक्त्वा तत्र दशरसात्मकजगदित्युक्तम् । मध्ये 'रसो वै स' इत्युक्त्वा 'स य एवंवित् । अस्माल्लोकात् प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामती'त्याद्युक्त्वा 'एतमानन्दमयमात्मानमुपसंक्रामति, तदप्येष श्लोको भवति । यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति श्रुतेः । **तामिति** । मोक्षावस्थां जीवन्मुक्तावस्थां वा । **तस्यामिति** । जीवन्मुक्तावस्थायाम् । **न वक्तुं शक्यमिति**

यद्वा। ननु लोकेपि श्रृङ्गाररसभाववति पुंसि नार्यां च त्ववुक्तभावसम्बन्धिव्यभिचारिभावाः श्रूयन्ते। सैव सर्वत्र, स एव सर्वत्रेति। एवं सति लौकिकसधर्मवत्त्वान्न त्ववुक्तभावस्यालौकिकज्ञानादिभ्य आधिक्यं वक्तुं शक्यम्, अलौकिकविषयत्वाल्लौकिकत्वमपि न तथेति भवति संशयः। तत्र मनुजत्वरिपुत्वादिज्ञानानामिव कामादिभावेन स्नेहभावस्यापि सम्भवान्नास्यालौकिकत्वमिति पूर्वः पक्षः।

सिद्धान्तस्त्वस्य भावस्य लौकिकेभ्यो ज्यायस्त्वं मन्तव्यम्। ननूक्तं लोकसाधारण्यं बाधकमिति शङ्कानिरासाय निदर्शनमाह क्रतुवदिति। यथा दर्शादिषु दोहनाधिश्रयणातञ्चनव्रीह्यवघातादिपुरोडाशभक्षणादीनां लौकिकक्रियातुल्यत्वेन दर्शनेपि न लौकिकत्वम्, लौकिकप्रमाणाप्राप्तत्वादलौकिकतत्प्राप्तत्वात्, तथोक्तप्रमाणरूपवरणलभ्यत्वेन श्रुत्युक्तत्वान्न लौकिकत्वमस्य भावस्येति दिक्।

वस्तुतस्तु ग्रामसिंहस्य सिंहस्वरूपत्वेपि न ताद्रूप्यं वक्तुं शक्यम्। तथा लौकिकपुंसि नार्यां वा तदाभासो रसशास्त्रे निरूप्यते, तद्दृष्टान्तेन भगवद्भाववद्भक्तरीतिभावनार्थम्, न तु ऋषीणां लौकिके तात्पर्यं भवितुमर्हति। अत्रोपपत्ति-

---

भाष्यप्रकाशः।

एतस्यार्थस्य पूर्वाधिकरणस्थेन सामान्यसूत्रार्थविचारेणापि सिद्धप्रायत्वमित्यरुच्या वर्णकान्तरेण सूत्रं व्याकुर्वन्ति यद्वेत्यादि। श्रूयन्त इति। साहित्यग्रन्थेषु भरतसूत्रादौ चोच्यन्ते। अलौकिकज्ञानादिभ्य इति। लोकविलक्षणेभ्योऽक्षरज्ञानमुक्तिजीवन्मुक्तिभ्यः। न तथेति भवति संशय इति। न वक्तुं शक्य इति लौकिकसजातीयधर्मवत्त्वालौकिकविषयत्वाभ्यां हेतुभ्यां भवति संशय इत्यर्थः। पूर्वपक्षमाहुः तत्रेत्यादि। तत्रेति। भगवति। सिद्धान्तं वदन्तः सूत्रं व्याकुर्वन्ति सिद्धान्त इत्यादि। प्रतिज्ञायां हेतुं वक्तुं नन्वित्यादिना बाधकमाशङ्क्य दृष्टान्तं व्युत्पादयन्ति यथेत्यादिं। उक्तप्रमाणरूपवरणलभ्यत्वेनेति। अलौकिकप्रमाणरूपतल्लभ्यत्वेन। तथाच सर्वात्मभावो लौकिकसदृशत्वेपि न लौकिकः, अलौकिकप्रमाणप्राप्तत्वात्, लौकिकप्रमाणाप्राप्तत्वाच्च, यागीयदोहनाधिश्रयणादिवत्, यन्नैवम्, तन्नैवम्, लौकिकतद्वदिति हेतुसिद्ध्या न प्रतिज्ञायां दोष इत्यर्थः। एतादृश्यश्च सादृश्यदर्शनजाः शङ्का अविचारकस्यैवोद्यन्ति, न तु विचारकस्येत्याशयेनाहुः वस्तुत इत्यादि। तथाच विचारकस्तु लोकेपि तथा तदभावं पश्यन्नैवं शङ्कत इत्यर्थः। ननु यदि न सादृश्येन ताद्रूप्यम्, तदा ऋषिभिर्भरतादिभिरलौकिकभावधर्मसादृश्यं लौकिके रसे कुतो निरूप्यते, अतस्तद्दर्शनाद्विचारकस्यापि शङ्का तूदेत्येवेत्याकाङ्क्षायामृषीणां तथा तन्निरूपणस्य तात्पर्यमाहुः तथा लौकिकेत्यादि। भग-

रश्मिः।

तयेनीत्यस्यार्थः। सजातीयेति। सधर्मत्वादित्यस्यार्थः। तत्रेत्यादीति। कामादीति। आदिना भयादिपञ्चकम्। 'कामाद्द्वेषाद्भयात्स्नेहात्' इति वाक्योक्तम्। प्रतिज्ञायामिति। अस्य भावस्य लौकिकेभ्यो ज्यायस्त्वं मन्तव्यमित्यस्याम्। निरूप्यत इति। शास्त्रान्ते 'परमेण समाधिना' प्रकरणोक्तेः। तथा तन्निरूपणस्येति। अलौकिकभावधर्मसादृश्येन लौकिकरसनिरूपणस्य।

माह तथाहीत्यादि । पूर्वोक्तभाववत आत्मतः प्राणादिकं सर्वं दर्शयति श्रुतिः 'तस्य ह वा एतस्यैवं पश्यत' इत्यादिना । इतः पूर्वमपि 'स वा एष एवं पश्य'न्नित्युपक्रम्य, 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति, सर्वेषु लोकेषु कामचारो भवती'ति श्रुतिश्च । न हि लोके एवं सम्भवति, आत्मपदानां भगवद्वाचकत्वादिति सर्वोत्तमविषयकभावस्यैव तथात्वं युक्तमिति चोपपत्तिर्हिशब्देन सूच्यते ॥ १७ ॥

इति तृतीयाध्याये तृतीयपादे एकोनविंशं भूम्न इत्यधिकरणम् ॥ १९ ॥

भाष्यप्रकाशः ।

यद्भावयद्भक्तकरीतिभावनार्थमिति । भगवति विगाढभाववान् यो भक्तस्तद्रीतिभावनार्थम् । ननु ऋषीणां तथैव तात्पर्यमित्यत्र किं गमकम्, अत आहुः नत्वित्यादि । तदुक्तं कामसूत्रसमाप्तौ वात्स्यायनेन 'तदेतद्ब्रह्मचर्येण परमेण समाधिना । विहितं लोकयात्रार्थं न रागार्थोऽस्य संविधिः । रक्षन् धर्मार्थकामाँस्त्रीन् सम्पश्यन् लोकवर्तिनीम् । अस्य शास्त्रस्य तत्त्वज्ञो भवत्येव जितेन्द्रिय' इति । तथाच यदि लौकिके तात्पर्यं स्यात्, एतच्छास्त्रतत्त्वज्ञस्य जितेन्द्रियभवनरूपं फलं न वदेत् । एवं भरतोक्ते सङ्गीतशास्त्रेपि ज्ञातव्यम् । उपवेदत्वात् । अतः पूर्वोक्त एव निश्चयः । सूत्रशेषमवतारयन्ति अत्रेत्यादि । उक्तस्यार्थस्य प्रकृतश्रुत्यभिप्रेतत्वे उपपत्तिमाहेत्यर्थः । उपपत्त्यन्तरं बोधयितुं हिशब्दार्थमाहुः सर्वोत्तमेत्यादि । तथात्वमिति । सर्वसाधनज्यायस्त्वम् ।

अत्रान्ये, वैश्वानरविद्यामुदाहृत्य, किमिहोभयथाप्युपासनं स्यात् व्यस्तस्य समस्तस्य च, उत समस्तस्यैव वेति सन्देहे, व्यस्तस्यापि विहितत्वात् फलस्यापि कथनादुभयथेति प्राप्ते, समस्तस्यैव न्याय्यम् । आन्तमेकवाक्यत्वात् । यथा 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात' इत्यत्र । 'मूर्धा ते व्यपतिष्यन्मां नागमिष्य' इत्याद्यनर्थस्य व्यस्तोपासने दर्शितत्वाच्चेत्याहुः ।

रश्मिः ।

विगाढेति । षडुपाधिजन्यभाववान् । पूर्वोक्त इति । सर्वात्मभावविषयः । उक्तस्येति । ससम्बोधमोक्षरूपस्य सर्वात्मभावस्य । प्रकृतश्रुतिः 'तस्य ह एवं पश्यत' इत्यादिः । भाष्ये । लोके एवमिति । इह लोके जीवन्मुक्तस्य सम्भवति । प्रकृते । सर्वोत्तमेत्यादीति । उपपत्तिरिति । युक्तमित्यस्य युक्तिरुपपत्तिस्तद्विषयमित्यर्थात् तद्विशेषणीभूतोपपत्तिः । सर्वात्मभावस्य भूमत्वेपि मुख्यभक्तित्वमादाय पादार्थसङ्गतिर्धर्मत्वादिति बोध्यम् । वैश्वानरेति । 'प्राचीनशाल औपमन्यव' इत्यस्यामाख्यायिकायां व्यस्तस्य समस्तस्य वैश्वानरस्योपासनं श्रूयते । व्यस्तोपासनं तावत्, 'औपमन्यव कं त्वमात्मानमुपास्स' इत्यादि । 'दिवमेव भगवो राजन्निति होवाच, एष वै सुतेजा आत्मा वैश्वानरोऽयं त्वमात्मानमुपास्स' इत्यादि । तथा समस्तोपासनमपि । 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथ्व्येव पादा'वित्यादि । एवं वैश्वानरविद्याम् । फलस्येति । 'तस्मात् तव सुतं प्रसुतमासुतं कुलं दृश्यत' इति फलस्य । आन्तमिति । अन्तं 'तस्य ह वा एतस्ये'ति समस्तोपासनवाक्यम्, तदभिव्याप्य आन्तं एकवाक्यत्वसमस्तस्य वाक्यत्वं तस्मात् । 'तस्य ह वा' इत्यत्र तच्छब्देन व्यस्तपरामर्शं कृत्वा एतस्येत्यनेनोक्तसमस्तस्याभेदोक्तेः । यथा वैश्वानरमिति । प्रथमस्य द्वादशाधिकरणे चतुर्थपादे । 'वैश्वानरं द्वादशकपालं निर्वपेत्, पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाती'त्यादि इष्टिविधायके वाक्ये येयं द्वादशसङ्ख्या तस्यामष्टत्वादिसङ्ख्यानामन्तर्भाव उक्त इत्यान्तमेकं वाक्यम् । मां नागमिष्य इति । मां प्रति विशेषं

नाना शब्दादिभेदात् ॥ ५८ ॥ (३-३-२०.)

पूर्वाधिकरणैः सर्वात्मभावस्वरूपादिनिर्णयं कृतवान्, अथ मत्स्यादिरूपाणां भगवदवतारत्वमविशिष्टमिति सर्वेषां समस्योपासना कार्या, उत पार्थक्येनेति विचारयति । अत्रोपास्याभेदेपि रूपभेदादेकत्रोपासकस्यान्यत्रानुपासनलक्षणावज्ञासम्भवादस्या अप्यसिद्धिसम्भवादपि समस्यैव सा कार्येति प्राप्ते, सिद्धान्त-

---

भाष्यप्रकाशः ।

तन्नास्माकं रोचते । पूर्वकाण्डे उदवसानीयाख्ये कर्मणि 'अप वै सोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्ती'त्यादिना देवतायज्ञावरोधार्थं पूर्वं पञ्चकपालं विधाय, ततो 'गायत्रो वा अग्नि'रित्यादिना तद्दोषदर्शनेन दूषयित्वा 'अष्टाकपालमाग्नेयं पुरोडाशं पञ्चसङ्ख्याके याज्यानुवाक्ये चोपसंहारे विहिते' इति पूर्वविधानस्यानभिप्रेतत्वबुद्धेः शीघ्रमुदयेन न पूर्वप्रकारकरणशङ्कोदयः, तथात्रापि शङ्काया एव पराहत्यानुदयेन पूर्वपक्षानुदयादिति ॥ ५७ ॥ इत्येकोनविंशं भूम्न इत्यधिकरणम् ॥ १९ ॥

नाना शब्दादिभेदात् ॥ ५८ ॥ सङ्गतिं बोधयन्तोऽधिकरणमवतारयन्ति पूर्वेत्यादि । 'प्रदानव'दित्यादिभिः पूर्वाधिकरणैर्मुख्याधिकारिणामर्थे सर्वात्मभावस्वरूपस्य तदुत्कर्षस्य तत्फलस्य तदधिकारिणां च निर्णयं कृतवान्, अथ तदनन्तरं पुराणोक्तानां मत्स्याद्युपासनानामपि नित्यानुमेयवेदमूलत्वादिदानीमपि केषाञ्चिद्वामनहयग्रीवाद्युपासकानां दर्शनात् तादृशानामर्थे उपासनान्तरनिर्णयस्यावश्यकत्वात्, मत्स्यादिरूपाणां भगवदवतारत्वमविशिष्टम्, यथा सुतेजःप्रभृतीनां वैश्वानरावयवत्वमिति तेषां सर्वेषां समस्य भगवतैकीकृत्योपासना कार्या, उत सुतेजःप्रभृतीनां व्यस्तोपासने दोषश्रवणवदत्र दोषस्याश्रवणाद्व्यस्ततया कार्येति शङ्कायां प्रसङ्गाद्विचारयतीत्यर्थः । पूर्वपक्षमाहुः अत्रेत्यादि । अस्या अप्यसिद्धिसम्भवादिति । रूपा-

रश्मिः ।

प्रष्टुं न आगमिष्य इत्यर्थः । दोषेति । 'अग्निर्गायत्रः, अष्टाक्षरा गायत्री, तत्सम्बन्धी, अतः पञ्चकपालत्वं दोषः । तद्दर्शनेन । आग्नेयं पुरोडाशमिति । अग्ने तस्येति शेषः । पञ्चसङ्ख्याक इति । पञ्चकपाले । 'उपसंहारस्तस्मिन् विहिते' इति 'उदवसानीयाख्ये कर्मणी'त्यनेन पूर्वेणान्वयः । कर्मणि विहित इति । सतिसप्तमी । इतिः समाप्तौ । तत्समानाधिकरणः पूर्वविधानस्य पञ्चकपालसम्बन्धिनोऽनभिप्रेतत्वबुद्धेः शीघ्रमुदयः तेनेत्यर्थः । अत्रापीति । अधिकरणेपि ॥ ५७ ॥ इत्येकोनविंशं भूम्न इत्यधिकरणम् ॥ १९ ॥

नाना शब्दादिभेदात् ॥ ५८ ॥ सङ्गतिमिति । कृष्णावतारस्य 'समान एवं चाभेदा'दित्यधिकरणे निरूपणात् मुख्याधिकारिणो वृताः, तेभ्यः सर्वात्मभावं ददातीति । सर्वात्मभावनिरूपणानन्तरं स्मृतावताराणां निरूपणं धर्मत्वात् । किं पुनर्ब्रह्माण्डान्तर्मायादूरीकरणे प्रकटे कृष्णेऽप्यवतारव्यवहाराद्धर्मकत्वम् । इवार्थे कन् । अतो न पादार्थाव्याप्तिः । सर्वात्मभावस्वरूपस्य प्रदानवदेवाद्यधिकरणेषु, तदुत्कर्षस्य 'भूम्नः क्रतुव'दित्यधिकरणे, तत्फलस्य 'आत्मरतिरात्मक्रीड' इत्यादिभाष्येणात्रैवाधिकरणे तदधिकारिणां एतत्फलप्रेप्सूनामर्थात् प्राप्तानाम् । दोषेति । 'मूर्धा ते व्यपतिष्य'दित्याद्युक्तदोषश्रवणवत् । अत्रेति । मत्स्यादिरूपाणां व्यस्तोपासने । प्रसङ्गादिति । स उक्तः । अत्रेत्यादीति । उपास्याभेदस्तु यथा रामो हास्यावतारः, वामनः कटिसूत्रावतारः, एवमलौकिकार्थत्वेनोपास्याभेदेपि ।

---

१. तद्व्यतिरिक्तानामर्थे उपासनान्तरनिर्णयस्यावश्यकत्वात् ।

माह । सर्वेष्ववतारेषु नानैवोपासना कार्या । तत्र हेतुः शब्दादिभेदादिति । तत्तत्स्वरूपवाचकशब्दानां मन्त्राणां चादिपदादाकारकर्मणां च भेदादित्यर्थः । एतेनैव मिथोविरुद्धानामाकारकर्मणामेकत्र भावनस्याशक्यत्वमयुक्तत्वं चेति भावः सूचितः ॥ ५८ ॥

इति तृतीयाध्याये तृतीयपादे विंशं नानाशब्दादिभेदादित्यधिकरणम् ॥ २० ॥

भाष्यप्रकाशः ।

न्तरावज्ञारूपापराधकृतप्रतिबन्धेनासम्भवात् । तथाचात्र दोषाभवणेप्युक्तरीत्या दोषसम्भवान्न कार्येत्यर्थः । सिद्धान्तं बोधयितुं सूत्रं व्याकुर्वन्ति सर्वेष्वित्यादि । तदवज्ञादोषस्य कथं निवृत्तिरित्यत आहुः एतेनेत्यादि । एतेनैवेति । उपासनभेदस्थापनेनैव । अयुक्तमिति । विरुद्धत्वादयुक्तम् । तथाच शक्यस्य युक्तस्याकरणे ह्यपराधः, न त्वशक्यस्यायुक्तस्याकरणे । अतोऽनुपासनस्य तत्रापराधाप्रसञ्जकत्वेन प्रतिबन्धाभावान्नासिद्धिरित्यर्थः । एतेन यत् पूर्वं 'न भेदादिति चे'दितिसूत्रेऽधिकगुणोपसंहारौचित्यमुक्तम्, तत्प्रकारोत्र दर्शितः । तत्तद्रूपप्राधान्येन ब्रह्मोपासकस्याधिका अपि गुणा अविरुद्धाः एवोपसंहार्याः, न त्वन्येपीति । तस्मात्तेषां व्यस्तोपासनमेव कर्तव्यमिति सिद्धम् ।

अन्ये तु, अत्र यासु यासु विद्यासु श्रुतिनानात्वेऽप्यर्थैक्याद्वेद्यैक्यम्, यथा 'मनोमयः प्राणशरीरः', 'कं ब्रह्म', 'सत्यकामः सत्यसङ्कल्प' इत्यादौ । यथा च, 'प्राणो वा व संवर्गः', 'प्राणो वा व ज्येष्ठः श्रेष्ठः', 'प्राणो ह पिता प्राणो माते'त्यादौ च । तत्र श्रुतिनानात्वस्य गुणान्तरपरत्वात्, विद्याभेदेन विद्यैक्याच्च, स्वपरशाखोक्तं गुणजातं विद्याकार्त्स्न्यार्थमुपसंहार्यमिति पूर्वपक्षे, शब्दादिभेदाद्विद्याभेदं सिद्धान्तयन्ति । पूर्वतन्त्रे शब्दान्तरादीनां कर्मभेदकत्वेन सिद्धत्वात्, प्रकृते च 'वेद' 'उपासीत' 'क्रतुं कुर्वीते'त्यादिशब्दभेदात् । आदिपदेन यथासम्भवं गुणादीनामपि भेदस्य सङ्ग्रहाच्च । नच शब्दभेदेपि 'यजति' 'जुहोती'त्यादिवत् 'वेदोपासीते'त्यादावर्थभेदाभावान्न भेद इति वाच्यम् । तथाप्येकस्मिन्नेव वेद्ये प्रतिप्रकरणमितरेतरव्यावृत्तगुणोपदेशरूपानुबन्धभेदेन तस्यां तस्यां विद्यायां तादृक्तादृग्गुणविशिष्टस्यैवोपास्यतया विद्याभेदोपपत्तेः । एवं स्थितेपि 'सर्ववेदान्तप्रत्यये'त्यादि द्रष्टव्यमिति चाहुः ।

रश्मिः ।

सुबोधिन्यां संनिवेशोऽवताराणां स्पष्टः । उक्तरीत्येति । अव्यवहितपूर्वोक्तरीत्या । तत्प्रकार इति । व्यस्तोपासनायामपराधाभावजनकत्वमवतारेऽधिकगुणोपसंहारो दर्शितः । किञ्च, अविरुद्धेत्यादिः प्रकारः । तेषामिति । मत्स्यादीनाम् । आभरणादिरूपत्वे तत्तद्वाचकशब्दानां मन्त्राणां चादिपदादाकारकर्मणां च भेदादेवकारः । शब्दान्तरेति । आदिनाभ्याससंज्ञे । वेद इति । अमः सुः । वेदम् । गुणादीनामिति । वेदत्वादिगुणाः । आदिना संज्ञारूपे । वेदोपासीतेति । वेदशब्दादमोऽश्रवणम् । वेदमुपासीतेति । अर्थभेदेति । 'यज देवपूजासङ्गतिकरणदानेषु' । 'हु दानादनयोः' । अत्र दानरूपार्थभेदवत् 'वेदोपासनं कुर्वीत' 'क्रतुं कुर्वीते'त्यर्थभेदाभावात् । प्रतिकरणमिति । करणं करणं शब्दं शब्दम् । वीप्सायां प्रतिः । इतरेतरस्मिन् मनोमयादौ व्यावृत्ता ये गुणा मनोमयत्वादयः तेषामुपदेशरूपोऽनुबन्धः मुख्यानपायी तस्य भेदस्तेन । 'अनुबन्धः प्रकृत्यादेर्दोषोत्पादे विनश्वरे । मुख्यानपायिनि शिशौ प्रवृत्तस्यानवर्तन' इति विश्वः । स्थितेपीति । विद्याभेदे । सर्वेति । आविषयकत्वाद्विशेषदर्शनेन

---

१. अयुक्तं प्रकाशे । २. रश्मौ प्रतिकरणम् ।

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥ (३-३-२१.)

पार्थक्येनोपासनानि कर्तव्यानीति स्थिते विचार्यते । किमग्निहोत्रदर्शपूर्णमासादिवदेषां समुच्चयः, उत फलविकल्प इति । तत्र विधिफलयोः समानत्वात् समुच्चय इति प्राप्ते, निर्णयमाह । उपासनानां विकल्प एव । तत्र हेतुः । अविशिष्टफलत्वात् । मुक्तिफलकत्वं हि सर्वेषामुपासनानामविशिष्टम् । एवं सत्येकेनैव तत्सिद्धावपरस्याप्रयोजकत्वादग्निहोत्रादिवन्नित्यताबोधकश्रुत्यभावात्तदर्थिनो विकल्प एव ॥ ५९ ॥

इति तृतीयाध्याये तृतीयपादे एकविंशं विकल्पाधिकरणम् ॥ २१ ॥

भाष्यप्रकाशः ।

तदसङ्गतम् । सर्ववेदान्तप्रत्ययसूत्रोक्तचोदनाद्यविशेषरूपहेत्वभावादेवोक्तस्थलेषु विद्याभेदस्य सिद्धत्वेनैतत्सूत्रारम्भवैयर्थ्यप्रसङ्गात् । नचोपसंहारनिवृत्त्यर्थत्वान्नानर्थक्यमित्यपि युक्तम् । ऐक्यहेत्वभावादेव सिद्धे विद्याभेदे उपसंहारप्राप्तेरेवाभावात् विद्यासूचकनानापदविरोधाच्चेति ॥ ५८ ॥ इति विंशं नानाशब्दादिभेदादित्यधिकरणम् ॥ २० ॥

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥ अधिकरणमवतारयन्ति पार्थक्येनेत्यादि । विचार्यत इति । उपोद्घातसङ्गत्या विचार्यते । संशयमाहुः किमित्यादि । तथाच विधिसामान्यात् क्रमेण कार्याणीत्येवं समुच्चयः, उत फलतौल्याद्विकल्प इत्यर्थः । पूर्वपक्षमाहुः तत्रेत्यादि । विधिः फलं च सर्वत्र तुल्यम् । यथाग्निहोत्रादीनाम् । तथा सति यदेव न क्रियते, तत्फलाभावेन न्यूनतापत्तेर्विकल्पस्य प्राप्तप्रामाण्यपरित्यागादिदोषवत्तया तदादरे तत्संसर्गाच्च समुच्चय एव ज्यायानित्यर्थः । सिद्धान्तमाहुः उपासनानामित्यादि । तथाचाग्निहोत्रादितौल्यस्याभावाच्चित्रोद्भिदादितौल्यस्य सत्त्वाद्विकल्पस्यादुष्टत्वेन स्वर्गादिवद्विश्वमायानिवृत्तिरूपायां तत्तदवतारसायुज्यरूपायां

रश्मिः ।

द्र(द्र)ष्टव्यम् । सर्ववेदान्तेति । चोदनाविशेषदर्शनात् तथा । नानेति । उपसंहारे वेद्यैक्येन विद्यैक्ये तथा । अत्र चकारेण हेत्वन्तरं सूचितम् । स हेतुः । उपसंहारोऽर्थाभेदादिति । यथा कथञ्चित् समस्तोपासना ॥ ५८ ॥ इति विंशं नानाशब्दादिभेदादित्यधिकरणम् ॥ २० ॥

विकल्पोऽविशिष्टफलत्वात् ॥५९॥ उपोद्घातेति । प्रकृतं पार्थक्येनोपासनं तत्सिद्ध्यर्था फलविकल्पचिन्ता उपोद्घातः स सङ्गतिः तथा । किमित्यादीति । अग्निहोत्रेति । अग्निहोत्रादिमतो दर्शपूर्णमासाधिकारात् समुच्चयः । विधीति । पञ्चमस्कन्धे 'ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम' इतीत्यत्र 'अस्त्वि'ति विधेः कूर्माद्यवतारभक्तिविधिभ्यः सामान्यात् । क्रमेणेति । 'मत्स्यकूर्मवराहे'त्यादि पाठक्रमेण । फलतौल्यादिति । सामान्यतो विश्वजिन्न्यायेन मुक्तिः फलं तस्य तौल्यात् । सर्वत्रेति । मत्स्याद्यवतारभक्तिषु । यथाग्नीति । 'अग्निहोत्रं जुहुयात्' 'दर्शपूर्णमासाभ्यां यजेते'त्यादयो विधयः । प्रत्यवायपरिहारः फलम् । प्राप्तप्रामाण्येति । 'विकल्पोऽष्टदोषदुष्ट' इति पूर्वतन्त्रे परिसंख्याविधावस्ति । तदादर इति । विकल्पादरेऽष्टदोषसंसर्गाच्चेत्यर्थः । समुच्चय इति । पाठक्रमेण समुच्चयः । चित्रोद्भिदादीति । पूर्वतन्त्रप्रसिद्धम् । 'उद्भिदा यजेत पशुकामः' अन्यत्र 'चित्रया यजेत पशुकाम' इति प्रथमस्य चतुर्थपादे । स्वर्गादिवदिति । आदिना वृष्टिः ।

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥ (३-३-२२.)

येषु तूपासनेषु भिन्नानि भिन्नानि फलान्युच्यन्ते, तत्र त्वनेकफलार्थिनस्तत्तत्फलकोपासनानि समुच्चीयेरन्, अविशिष्टफलत्वाभावात्। यत्र त्वेकस्यैवोपासनस्य स्वकामितानेकफलत्वं श्रूयते, तत्र तथैव चेदुपासनं करोति, तदा न समुच्चीयेरन्नपि। स्वकामितेष्वेकतरस्य तदन्यफलवैशिष्ट्येनाविशिष्टफलत्वाभावादिति पूर्वहेत्वभावादितिश्लिष्टप्रयोगाभिप्रायेणोक्तमिति ज्ञेयम्।

अथवा। कामैक्ये नियतफलकानि तानि न समुच्चीयेरन्। अत्र हेतुः स्पष्टः॥६०॥

इति तृतीयाध्याये तृतीयपादे द्वाविंशं काम्याधिकरणम् ॥ २२ ॥

भाष्यप्रकाशः।

च मुक्तौ विशेषाभावेन च फलस्याविशिष्टत्वात् समुच्चये अप्रयोजकत्वदोषापत्तेश्च विकल्प एव ज्यायानित्यर्थः। एतेनैव ब्रह्मप्राप्तिफलानां सद्विद्यादहरविद्योपकोसलविद्याशाण्डिल्यविद्याऽक्षरविद्यादीनां एकफलानां प्राणादिविद्यानां च विकल्पोऽवगन्तव्य इत्यपि बोधितम्। अत्र सर्वेऽप्येवमेवाहुः ॥ ५९ ॥ इत्येकविंशं विकल्पाधिकरणम् ॥ २१ ॥

काम्यास्तु यथाकामं समुच्चीयरेन् न वा पूर्वहेत्वभावात् ॥ ६० ॥ 'अविशिष्टफलत्वा'दित्यस्य विकल्पहेतोः प्रत्युदाहरणमिदम्। एवं मुक्तिफलिका उपासना विचार्य, काम्यासु पक्षद्वयस्य सम्भवात् ताः पृथक् विचारयतीत्याशयेन सूत्रं पठित्वा व्याकुर्वन्तस्तत्र तत्तत्फलानां काम्यत्वादुपासनानां समुच्चयपक्षं व्याकुर्वन्ति येष्वित्यादि। येषु, 'स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति', 'सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासत' इत्यादिषु तथेत्यर्थः। एवं समुच्चयपक्षं व्याख्याय 'न वा' इति पदाभ्यामुक्तमसमुच्चयपक्षं व्याकुर्वन्ति यत्र त्वित्यादि। श्रूयते इति। यथा भार्गव्यां विद्यायां 'य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्ये'ति श्रूयते। तत्र तथैव चेत्। तदुक्तस्वकामितसकलफलसाधकतया चेत्तदुपासनं करोति, तदा तत्फलकान्यन्यानि 'तत्प्रतिष्ठेत्युपासीत' 'तन्मह इत्युपासीते'त्यादीनि तत्तद्गुणकान्युपासनानि न समुच्चीयेरन्नपि। अत्रापि हेतुः पूर्वहेत्वभावादिति। तं विवृण्वन्ति स्वकामितेष्वित्यादि। स्वकामितफलेष्वेकतरस्य फलस्य तदन्यफलवैशिष्ट्येन अविशिष्टफलत्वाभावादिति। तथाच समुच्चये अविशिष्टफलत्वाभा-

रश्मिः।

नित्यानां प्रत्यवायपरिहारः, ज्योतिष्टोमस्य स्वर्गः। कारीर्या वृष्टिः। तद्वदुपासनानां न, किन्तु मुक्तिफलकत्वं अविशिष्टत्वं सर्वासूपासनासु तस्मात्। अप्रयोजकत्वमपरोपासनायाः, अतोऽप्रयोजकत्वदोषापत्तेः॥५९॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥ विकल्पहेतोरिति। पूर्वसूत्रोक्तस्य। प्रत्युदेति। नित्येषु कर्मसु विकल्प उक्तः। काम्येषु समुच्चय उच्यते। तत्र विधिफलयोः समानत्वहेतुः, अपरस्याप्रयोजकत्वदोषापादकत्वान्नाद्रतः। तत्राविशिष्टमुक्तिमात्रफलत्वात्। अत्र काम्येषु तु विशिष्टस्य मुक्तिमात्रस्य फलस्याभावरूपात् पूर्वहेत्वभावरूपहेतोः प्रतिकूलमुदाहरणम्। विधिफलयोः समानत्वेऽपरस्याप्रयोजकत्वम्, विधिफलयोरसमानत्वेऽपरस्य प्रयोजकत्वम्, परन्तु कामनानियतमिति। तत्रेति। काम्येषु। समुच्चयेति। यथा सेवायां न पुत्रेण नापि पशुना कार्यम्, किन्तु समुच्चितेन पुत्रादिना, अतः समुच्चयपक्षम्। स य इति। सः यः इतिच्छेदः। इत्यादीति।

---

१. फलकत्वम्। २. ब्रह्मप्राप्तिफलानाम्।

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ (३-३-२३.)

प्रधानेषु निर्णयमुक्त्वाङ्गेषु तमाह । एकार्थसाधकानामुपासनानां भेदेनाङ्गभेदेऽप्येकतरोपासने फलैक्यादङ्गानि तत्र समुच्चीयेरन्न वेति संशये, निर्णयमाह । उपासनाङ्गानां तदेवाश्रयः, तथाच यदङ्गं यदुपासनाश्रितम्, तत्रैवास्य भाव इत्यर्थः ॥६१॥

भाष्यप्रकाशः ।

योऽनेकफलत्वात्, समुच्चयाभावे त्वविशिष्टफलत्वाभावस्तत्फलस्यान्यफलविशिष्टत्वादिति भेदेपि 'पूर्वहेत्वभावा'दिति यत्सूत्र उक्तम्, तत्तथेत्यर्थः । अत्र व्याख्यानक्लेशात् पक्षान्तरमाहुः अथवेत्यादि । कामैक्ये इति । एकमात्रविषयत्वेन तदैक्ये । अत्र हेतुः स्पष्ट इति । अस्मिन् पक्षे तेषां फलभेदेन विशिष्टफलतया अविशिष्टफलत्वाभावरूपः पूर्वहेत्वभावः स्फुट इत्यर्थः ।

अत्रापि मध्वाचार्यभिक्षुव्यतिरिक्तानां सर्वेषामैकमत्यम् । अस्माकं त्वेतावान् विशेषः । अत्र सूत्रे काम्यपदादुद्गीथाद्युपासना अपि संग्रहीतुं शक्यन्ते । तास्वपि 'यदेव विद्यया करोती'त्यादिभिः फलश्रवणात् । कामपदाभावेपि रात्रिसत्रन्यायेन काम्यत्वस्य शक्यत्वादिति ॥ ६० ॥

इति द्वाविंशं काम्याधिकरणम् ॥ २२ ॥

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ कर्माङ्गत्वेपि स्वव्यापारेण फलसाधने उपासनान्तरानपेक्षत्वात् प्रधानानामुद्गीथाद्युपासनानामपि काम्यत्वेन यथाकामं समुच्चयविकल्पयोः पूर्वसूत्रेणैव सिद्धत्वादत्र विषयान्तरं बोधयन्तोऽधिकरणमवतारयन्ति प्रधानेत्यादि । अन्यानपेक्षतया स्वव्यापारद्वारा फलजनकानि प्रधानानि, तेषु समुच्चयादिनिर्णयमुक्त्वा, अन्यापेक्षतया तथा फलजनकेष्वङ्गेषु निर्णयमाहेत्यर्थः । ननु किं प्रयोजनं येन पृथगारम्भ इत्यत आहुः एकार्थेत्यादि । एकोऽर्थः एकं फलम्, तत्साधकानामनेकेषामुपासनानां रूपादिभेदेन भेदेपि तेषां मध्य एकतरोपासनेऽन्येषामस्य च फलैक्यात् तत्फलार्थं यान्यङ्गानि तत्र तत्रोक्तानि, तान्येकस्मि-

रश्मिः ।

अन्यत्र द्रष्टव्यानि । तथेत्यर्थ इति । भिन्नानि भिन्नानि फलान्युच्यन्त इत्यर्थः । भाष्ये । अविशिष्टेति । सूत्रे पूर्वहेत्वभावादित्युक्तम्, अत एवेति चोक्तम् । 'अत एव प्राण' इत्यतिदेशाधिकरणवत् । अतोऽस्य प्रयोगस्याभिप्रायवर्णनं क्लिष्टप्रयोगत्वात् करिष्यन्ति । प्रकृते । असमुच्चयेति । 'न वा समुच्चीयेर'न्निति योजनासिद्धं पक्षम् । तदुक्तेति । यथा 'अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं पर'मित्यत्र तीव्रभक्तियोगः । तत्र नान्यकर्मसमुच्चयः । तत्तथेति । क्लिष्टप्रयोगाभिप्रायेणोक्तमित्यर्थः ॥ ६० ॥ इत्येकविंशं विकल्पाधिकरणम् ॥२१॥

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ उपासनेति । अवयव्यतिरिक्तोपासनान्तरानपेक्षत्वात् अवयविनश्चावयवमात्रत्वादवयव्यनङ्गीकारेण । काम्यत्वेनेति । 'आपयिता ह वै कामानां भवति, य एतदेवं विद्वानक्षरमुद्गीथमुपास्त' इति श्रुतेस्तथा । फलसम्बन्धित्वं प्रधानत्वमङ्गेष्वपीति प्रधानलक्षणान्तरमाहुः अन्यानपेक्षेति । एकतरेति । महाभाष्यप्रयोगाद्बहूनां निर्धारणे डतरच् ।

---

१. तस्य । २. श्रीपुरुषोत्तमैर्भाष्यप्रकाशस्यान्तिमघोषे 'काम्यास्तु' इति सूत्रं पृथगधिकरणत्वेन निर्दिष्टम् । अतस्तदनुसारेण 'काम्यास्तु' इत्यादि द्वाविंशमधिकरणं भवति । श्रीकृष्णचन्द्रैः श्रीगोपेश्वरैश्च 'काम्यास्तु' इति पृथगधिकरणत्वेन न निर्दिष्टम् । तैश्च तस्यैकविंशे विकल्पाधिकरणेऽन्तर्भावः कृतः । श्रीपुरुषोत्तमैरपि पूर्वमेवमेव निर्दिष्टम् । वेदान्ताधिकरणमालायां तस्मिन् पादे पञ्चविंशत्यधिकरणानि, भावप्रकाशिकावृत्तौ चतुर्विंशत्यधिकरणानि । अतः प्रकाशे पञ्चविंशत्यधिकरणानि, रश्मौ च चतुर्विंशतिरित्यस्याभिप्रायेण योजितमिति ।

अत्र हेतुमाह ।

शिष्टेश्च ॥ ६२ ॥

तत्तदुपासनं तत्तदङ्गविशिष्टमेव वेदे शिष्यत इति तथेत्यर्थः । चकाराद्व्यतिरिक्तकरणे प्रायश्चित्तोक्तिरपि बाधिकेति सूच्यते ॥ ६२ ॥

इति तृतीयाध्याये तृतीयपादे त्रयोविंशमङ्गेषु यथाश्रयभावाधिकरणम् ॥ २३ ॥

भाष्यप्रकाशः

ष्वुपासने समुच्चीयेरन्नवेति संशये, उपसंहारसूत्रेऽर्थाभेदपदस्य फलाभेदवाचकत्वे फलैक्यात् समुच्चयप्राप्तौ, वक्ष्यमाणहेतुभ्यां निर्णयमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति उपासनाङ्गानामित्यादि । तदेवेति । उपासनमेव । तथाच आश्रयमनतिक्रम्य यथाश्रयम्, भावः सत्ता, यथाश्रयं भावो यथाश्रयभाव इति सूत्रयोजना । उदाहरणं तु छान्दोग्ये 'मनो हिङ्कारो वाक्प्रस्ताव' इत्यादिभिर्दशभिर्वाक्यैर्गायत्र-रथन्तर-वामदेव्य-बृहत्-वैरूप-वैराज-शक्वर्य-रैवत्य-यज्ञायज्ञीय-राजननामग्रहणपूर्वकं विहितानि दश सामोपासनानि, तेषु ह्येकमेकमसाधारणं फलमुक्त्वा, तदुत्तरं 'सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्ये'ति सर्वोपासनेषु साधारणं फलमुक्त्वा, क्रमेण 'महामनाः स्यात् तद्व्रतम्, न प्रत्यङ्ङग्निमाचामेन्न ष्ठीवेत् तद्व्रतम्,' एवं 'न काञ्चन परिहरेत्', 'न तपन्तं निन्देत्, न वर्षन्तं निन्देत्', 'नर्तूनिन्देत्', 'न पशूनिन्देत्', 'संवत्सरमज्ञो नाश्नीयात्', 'ब्राह्मणान्न निन्देत्' इति तत्तदुपासनाङ्गभूतानि व्रतान्युक्तानि । तथाच तस्य व्रतस्य तत्तदुपासन एव सम्बन्धः, नान्यत्रेति बोध्यम् । एवञ्जातीयमन्यदपि । न्यायस्य साधारणत्वात् । यथा भार्गव्या आनन्दविद्याया अङ्गभूतेषु त्रिष्वन्नप्रतिष्ठितत्वोपासनेषु प्रतिष्ठादीनां फलानामैक्यं तत्तदुपासनाङ्गभूतानां 'अन्नं न निन्द्यात् तद्व्रतम्, अन्नं न परिचक्षीत तद्व्रतम्, अन्नं बहु कुर्वीत तद्व्रत'मिति तत्तद्व्रतानां भेद इति ॥ ६१ ॥

शिष्टेश्च ॥ ६२ ॥ अत्र भाष्यं स्फुटम् ॥ ६२ ॥ इति त्रयोविंशमङ्गेषु यथाश्रयभावाधिकरणम् ॥ २३ ॥

रश्मिः ।

वक्ष्यमाणेति । शिष्टिप्रायश्चित्तोक्तिभ्याम् । उपासनमिति । अव्ययंवि । यथाश्रयमित्यव्ययीभावः । ततः कर्मधारयः । भाष्ये । तत्रैवास्येति । उपासनेऽस्याङ्गस्य भावः सत्तेत्यर्थः । प्रकृते । सर्वमायुरिति । शतवर्षं आयुः । ज्योक् । टीकायां स्पष्टम् । अग्रेपि । आनन्देति । आनन्दब्रह्मज्ञानानन्तरं 'सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिते'त्यानन्दविद्या तस्याः । अङ्गेति । अङ्गभूतत्वं प्रतिष्ठावत्त्वान्नादत्वादीनामानन्दविद्याफलानां 'पुनरन्नं न निन्द्यात्, तद्व्रत'मित्युपक्रम्योक्तेः साङ्गविद्यायाः पूर्वोक्तफलवत्त्वात् । 'एवमन्नं न परिचक्षीत तद्व्रत'मित्यत्र, 'अन्नं बहु कुर्वीत तद्व्रत'मित्यत्र चेत्येवमङ्गभूतेषु त्रिषु । अन्नेति । 'अन्नं न निन्द्यात् तद्व्रत'मित्यत्र 'स य एतदन्नमन्ने प्रतिष्ठितं वेदे'त्युक्तम् । तथा 'अन्नं न परिचक्षीत तद्व्रत'मित्यत्र 'स य एतदन्नमन्ने प्रतिष्ठितं वेदे'त्युक्तम् । तथैव 'अन्नं बहु कुर्वीत तद्व्रत'मित्यत्र 'स य एतदन्नमन्ने प्रतिष्ठितं वेदे'त्युक्तमित्यन्नप्रतिष्ठितत्वोपासनानि तेषु । तत्तदुपासनेति । अन्नप्रतिष्ठितत्वोपासनाङ्गभूतानाम् ॥ ६१ ॥

शिष्टेश्च ॥ ६२ ॥ उदाहरणं द्रष्टव्यम् । प्रायश्चित्तेति । यथा 'आश्विनं धूम्रललाममालभेत, यो दुर्ब्राह्मणः सोमं पिपासे'दिति । अत्र सर्वे षट्सूत्रमधिकरणमङ्गीकुर्वन्ति, तदग्रे स्पष्टीभविष्यति ॥ ६२ ॥ इतिद्वाविंशं यथाश्रयभावाधिकरणम् ॥ २२ ॥

समाहारात् ॥ ६३ ॥ (३-३-२४.)

कर्ममार्गीयोपासने निर्णयमुक्त्वा ज्ञानमार्गीयोपासने तमाह । अथर्वोपनिषत्सु नृसिंहोपासनादिषु मत्स्यकूर्मादिरूपत्वेनापि स्तुतिः श्रूयते । श्रीभागवते च, 'नमस्ते रघुवर्याये'त्यादिरूपा स्तुतिर्व्रजनाथे । एवं सति रूपभेदेपि भगवदवतारस्याविशिष्टत्वादेकस्मिन् रूपे रूपान्तरसमाहारो दृश्यत इति सर्वरूपत्वेनैकत्रोपासनमपि साध्वित्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

ऐश्वर्यवीर्यादिगुणानां सर्वेष्ववतारेषु साधारण्यं श्रूयते । तेन धर्मिधर्माणामैक्यात् पूर्वोक्तं साध्वित्यर्थः ॥ ६४ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्विंशं समाहाराधिकरणम् ॥ २४ ॥

भाष्यप्रकाशः ।

समाहारात् ॥ ६३ ॥ सूत्रप्रयोजनमाहुः **कर्ममार्गीयेत्यादि** । कर्माङ्गतया कर्ममार्गीयेषु सामाद्युपासनेषु अङ्गनिर्णयमुक्त्वा, ज्ञानाङ्गतया ज्ञानमार्गीयेषु तेष्वङ्गनिर्णयमाहेत्यर्थः । सूत्रं व्याकुर्वन्तो विषयमाहुः **अथर्वेत्यादि** । अत्र मत्स्यकूर्मादिपदात् पूर्वं ब्रह्मविष्ण्वादीतिपदस्य त्रुटिर्बोध्या । तथाच नृसिंहोपासनायां 'यो वै नृसिंहो देवो भगवान् यश्च ब्रह्मा तस्मै वै नमो नम' इति, श्रीरामोपासनायां च 'यो वै रामचन्द्रः स भगवान् ये च मत्स्यकूर्माद्यवतारास्तस्मै वै नमो नम' इत्येवं विभागेन स्तुतिः श्रूयत इत्यर्थः । द्वितीयं पौराणोदाहरणम् । एवं विषय उक्तः । तत्र तत्सर्वरूपत्वेनोपासना कार्या, उत तेषां रूपाणां विरुद्धधर्मवत्त्वात् तथा न कार्येति संशये, शब्दादिभेदेन नानोपासनस्य पूर्वमुक्तत्वात् सर्वरूपत्वेनोपासने च तद्विरोधान्न कार्येति प्राप्तम् । तत्र सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति **एवं सतीत्यादि** । अत्र 'अङ्गेषु यथाश्रयभाव' इत्यनुवर्तते । **समाहार** इति । एकीभावः । तथाच ज्ञानमार्गीयोपासनाङ्गेष्वपि यथाश्रयभावे सति, 'रूपभेदेपी'त्यादिनोक्तरीत्या समाहारदर्शनात् तथेत्यर्थः । एतदेवाभिप्रेत्य 'भेदान्नेति चे'दिति सूत्रे 'उपासनाविषयेष्वि'त्यादिनावतारेष्वपि सर्वगुणोपसंहारौचित्यमुक्तम् ॥ ६३ ॥

अत्र हेत्वन्तरं सूत्रान्तरेणाह ।

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥ अत्र चकारोऽधिकरणपूर्णत्वद्योतकः । शेषं प्रकटार्थम् । तथाच भगवत्त्वप्राधान्योपासने एवं सर्वरूपत्वेनोपासनं कार्यम्, तत्तद्रूपप्राधान्येनोपासने तथा न कार्यमिति विभागान्न कोपि विरोध इत्यर्थः ॥६४॥ **इति चतुर्विंशं समाहाराधिकरणम्** ॥२४॥

रश्मिः ।

समाहारात् ॥ ६३ ॥ पूर्वकाण्डव्यवच्छेदेन वेदान्तपरिच्छिन्नकर्ममार्गीयोपासन इत्यर्थं मत्वाहुः **कर्माङ्गतयेति** । 'यदेव विद्यये'ति श्रुतिविषयेषु सामोपनिषदुक्तोपासनेषु पूर्वाधिकरणे निर्णयमुक्त्वा, आदिना यजुः 'तमेतं वेदानुवचनेने'ति श्रुत्याहुः **ज्ञानाङ्गतयेति** । मत्स्यकूर्मश्रुत्यभावं नृसिंहोपासनेऽदृष्ट्वाहुः **अत्र मत्स्येति** । **तथाचेति** । त्रुटौ पूरितत्वे च । आदिना रामोपासनेत्याशयेनाहुः **श्रीरामेति** । नृसिंहोपासना आदिर्यासां रामोपासनादीनां ता नृसिंहोपासनादयः तासु । अत्रातद्गुणसंविज्ञाने नृसिंहोपासनानन्वयः श्रूयत इत्यनेनेत्याशयः । अनन्वयापेक्षायां तु न त्रुटेः प्रयोजनम् । **यथाश्रयभाव** इति । यथाश्रयभावो व्याकृतः । **तथेत्यर्थ** इति । सर्वरूपत्वेनैकत्रोपासनमपि साध्वित्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥६४॥ **तत्तद्रूपेति** । मत्स्यत्वादिरूपप्राधान्ये तु । मत्स्य इति प्रतीतिः, न तु मत्स्यो भगवानिति प्रतीतिरिति भावः ॥६४॥ **इति त्रयोविंशं समाहाराधिकरणम्** ॥२३॥

---

१. अवतारत्वस्य ।

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥ (३-३-२५.)

नन्वेवमुपासनं नित्यम्, उत वैकल्पिकमिति संशये, उक्तरीत्या नित्यत्वे प्राप्ते, तन्निषेधमाह नेति। किन्तु वा, विकल्प एवैवमुपासन ऐच्छिकः, तत्र हेतुमाह सहभावाश्रुतेरिति। नियमतस्तेषां रूपाणां सहभावश्रवणं चेत् स्यात्, तदा स्यात्तथोपासनस्य नित्यता, न त्वेवम्, अतो विकल्प एवेत्यर्थः ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

योपि रूपान्तरसमाहारपूर्वकमुपास्ते, सोप्येकं रूपमुपास्यत्वेन मत्वा तत्तथोपास्त इति फलं तस्यैकस्यैव रूपस्य दर्शनं भवति, न तु सर्वेषाम्, इतोपि हेतोर्विकल्प एवेत्यर्थः। एतद्दृष्टान्तेन यस्मिन् रूपे यादृग्धर्मवत्त्वं श्रूयते, तादृग्धर्मविशिष्टमेवैकं रूपमुपास्यमिति व्यासहृदयमिति ज्ञायते। उपासनानिर्णयान्ते दर्शनात्मकहेतूक्त्या सर्वोपासनानां भगवत्साक्षात्कारः फलमिति ध्वन्यते। माहात्म्यज्ञापनार्थं परं सर्वावताररूपत्वं यथार्थमेव कैश्चिज्ज्ञाप्यते। यथार्थत्वात्त-

---

भाष्यप्रकाशः।

न वा तत्सहभावाश्रुतेः ॥६५॥ अधिकरणमवतारयन्ति नन्वित्यादि। सर्वरूपत्वेनैकावतारोपासनं नित्यं अग्निहोत्रदर्शपूर्णमासादिवत् क्रमेण समुच्चेतव्यम्, उतैकमेव यावज्जीवं कर्तव्यमित्येवं वैकल्पिकमिति संशये, उक्तरीत्या सर्वेषां सर्वरूपत्वेनैश्वर्यादिगुणसाधारण्येन च क्रमिकसमुच्चये प्राप्ते, तस्य समुच्चयस्य निषेधमाहेत्यर्थः। व्याकुर्वन्ति नेतीत्यादि। चेत्स्यादिति। 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते'त्यादिवच्चेत् स्यात्। शेषं स्फुटम्। एतमेव विकल्पमभिसन्धाय स्वाध्यायसूत्रे सदृष्टान्तव्याख्यानोत्तरं 'प्रकृतेपी'त्यादिना तत्तद्रूपे तत्तदसाधारणधर्मोपसंहारो व्यवस्थापितः ॥६५

दर्शनाच्च ॥ ६६ ॥ पूर्वसूत्रात्तत्पदमत्रानुवर्तत इत्याशयेन सूत्रं व्याकुर्वन्ति योपीत्यादि। तत्तथोपास्त इति। तत् एकमवताररूपं सर्वरूपवत्तयोपास्ते। एतद्दृष्टान्तेनेति। दर्शनदृष्टान्तेन। एतेन पूर्वाधिकरणोक्तपक्षस्य गौणता सूचिता। तथा दर्शनाभावादिति। सर्वनिरूपणान्ते एवं कथनस्य तात्पर्यमाहुः उपासनेत्यादि। ननु यद्येकस्यैव रूपस्य दर्शनम्, तदा सर्वरूपोपसंहारबोधनस्य किं प्रयोजनम्, अत आहुः माहात्म्येत्यादि। कैश्चिदिति। स्मृतिपुराणादिवाक्यैः। तदपीति। सर्वरूपोपसंहरणम्। तथाचैकरूपदर्शनेपि सर्वरूपोपसंहारोऽप्येकदेशिनां न दुष्ट इति भावः।

अन्ये तु इदं षट्सूत्रमेवाधिकरणमङ्गीकृत्य, कर्माङ्गभूतेषूद्गीथादिषु य आश्रिता वेदत्रयविहिताः प्रत्ययास्ते समुच्चीयेरन्, उत यथाकामं स्युरिति संशये, प्रत्ययाश्रयभूताः स्तोत्रादयो

रश्मिः।

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥ स्पष्टम् ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥ सर्वरूपवत्तयेति। रामस्य हासरूपत्वं वामनस्य कटिभूषणरूपत्वमित्येवमादिप्रकारेण। भाष्ये। न तु सर्वेषामिति। रामादीनां हासादिरूपत्वादिति भावः। उपासनेत्यादीति। भगवदिति। चित्तशुद्धिद्वारेति ज्ञेयम्। माहात्म्येति। महात्मनो व्यापकस्य भावो मत्स्यादिः 'अरूपव'त्सूत्रसिद्धमाहात्म्यं तस्य ज्ञापनार्थम् कर्माङ्गेति। 'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या। दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेने'ति पूर्वमीमांसाकारिका। प्रत्यया ज्ञानानि अङ्गविषया बोध्याः। प्रत्ययेति। प्रत्ययाश्रयाः ज्ञानविषयाः स्तोत्राद्यर्थाः।

दृष्यविरोधीति ज्ञेयम् ॥ ६६ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चविंशं न वा तत्सहभावाश्रुतेरित्यधिकरणम् २५

इति श्रीवेदव्यासमतवर्तिश्रीमद्वल्लभाचार्यविरचिते श्रीमद्ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य तृतीयः पादः समाप्तः ॥ ३ ॥ ३ ॥

भाष्यप्रकाशः।

यथा समुच्चीयन्ते, एवं तदाश्रिताः प्रत्यया अपि। तत्रानुशिष्टत्वादिभ्यो हेतुभ्यः समुच्चीयेरन्निति पूर्वपक्षे, सहभावाश्रवणादिहेतुभ्यां यथाकामं स्युरिति सिद्धान्तयन्ति।

तन्नास्माकं रोचते। यथाकामसूत्रोक्तहेतुनैव तादृशनिर्णयसम्भवेनैतद्वैयर्थ्यात्। गुणसाधारण्यसूत्रे पूर्वपक्षसमाप्त्या शिष्टिसूत्रस्थचकारवैयर्थ्यापत्तेश्चेति। तस्मात् पूर्वोक्तमेव युक्तमिति दिक्।

अत्रायं संग्रहः। 'सर्वे वेदा यत्पदमामनन्ती'ति श्रुतेः सर्वस्य वेदस्य ब्रह्मविद्यात्वम्, 'इतिहासपुराणं च वेदानां पञ्चमं वेद'मितिश्रुतेर्वेदपदेन तयोरपि सङ्ग्रहात्तयोरपि तथात्वम्। 'द्वे विद्ये वेदितव्ये' इत्याद्याथर्वणश्रुतेर्ऋग्वेदादिरूपा अपरा, अक्षराधिगमिका परेति फलतो विभागः। परास्वपि 'ब्रह्मविदाप्नोति परम्', 'अक्षरात् परतः पर' इति श्रुतेः पुरुषोत्तमस्य तत आधिक्ये तद्विद्यानां विषयफलयोर्बलादक्षरविद्यातोऽप्याधिक्यम्। परास्वपरासु च तत्तद्भेदोक्तासु सर्ववेदान्तप्रत्ययसूत्रोक्तहेतुना फलसंयोगरूपचोदनानामविशिष्टत्वे विद्यैक्यनिर्णयः। तन्मध्ये अन्यतरस्याभावे तु विद्याभेदः। गुणोपसंहारस्तु प्रायशो रूपैक्यात् प्रयोजनैक्याद्वा, क्वचित्त्वर्थवादतौल्यादपि। स च स्वाध्यायसूत्रोक्तैर्निरूपणप्रकारभेदाधिकारिभेदसम्बन्धिभेदैः 'योऽन्यथा सन्त'मिति वाक्योक्तदोषापत्त्या च कासुचिदात्मविद्यासु बाध्यते, कर्मणि तु पूर्वोक्तैस्त्रिभिर्न्यूनातिरिक्तप्रायश्चित्तश्रवणाच्च बाध्यते। तदभावे तु भवति। परविद्या अपरविद्याश्च फलैक्ये

रश्मिः।

वाचकत्वेनाङ्गत्वादित्वेन समुच्चीयन्ते। तदाश्रिताः कर्माङ्गभूतविषयाः प्रत्ययाः। अनुशिष्टेति। अग्रिमसूत्रोक्तेभ्यः। सहभावेति। 'नवे'ति 'दर्शना'दिति सूत्रोक्ताभ्याम्। चकारेति। सूत्रार्थस्तु शिष्टिः शासनं विधानमित्यर्थः। यथाङ्गानां प्रतिवेदं विधानं तथा तथा तदाश्रितोपास्तीनां विधानाविशेषाच्चाङ्गवत् समुच्चयनियम इति। एवं निरर्थकश्चकारवैयर्थ्यापत्तेरित्यर्थः॥ इति चतुर्विंशं न वा तत्सहभावाश्रुतेरित्यधिकरणम् ॥ २४ ॥

'सर्ववेदान्तप्रत्यय'सूत्रार्थपुरःसरमाहुः सर्वे वेदा इत्यादि। तथात्वमिति। वेदत्वम्। फलत इति। कर्मज्ञानाक्षरज्ञाने फले ताभ्याम्। ननु 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तम'मिति पुरुषोत्तमस्येदमित्थतया ज्ञानविषयेऽधोक्षजे कथं विद्येत्यतः प्रसङ्गादाहुः परास्विति। तथा च देशकृतपरत्वसम्बन्धेन यैः कैश्चिद्धर्मैरनधोक्षजस्यापि विद्येति भावः। विषयेति। विषयः पुरुषोत्तमः, परप्राप्तिः फलं तयोर्बलात्। 'सर्ववेदान्तप्रत्यये'त्यत्र सर्वपदं मुख्यवृत्तमित्याहुः परास्विति। अपरास्विति। धर्मकर्मरूपासु। फलेति। फलं संयोगश्च रूपं च चोदना च तासाम्। तन्मध्य इति। तेषां मध्ये। अन्यतरस्येति। तरप् महाभाष्यात्। 'उपसंहारोऽर्थाभेदा'दिति सूत्रार्थसङ्ग्रहः गुणोपेति। स चेति। गुणोपसंहारः। त्रिभिरिति। उक्तहेतुभिः। बाध्यत इति। उपसंहारो बाध्यते। भवतीत्युपसंहारः। 'विकल्पोऽविशिष्टफलत्वा'दित्यस्यार्थसङ्ग्रहः। परविद्या इति। 'काम्यास्त्वि'त्यस्य सङ्ग्रहः

भाष्यप्रकाशः ।

विकल्पन्ते, फलभेदे तु यथाकामं समुच्चीयन्ते, क्वचिदेकस्योपासनस्य स्वकामितानेकफलत्वे विकल्पन्ते च । कर्ममार्गीयविद्याङ्गानि तु बहूनां विद्यानां फलैक्येपि यथाश्रयं तत्रैव व्यवतिष्ठन्ते, ज्ञानमार्गीयविद्याङ्गानि तु यथाश्रयं क्वचित् समाह्रियन्ते, क्वचित्तु यथाश्रयं व्यवतिष्ठन्ते । अवतारोपासनं च यथाकाममेव भवति, सर्वासां परविद्यानामुपास्यरूपसाक्षात्कारः फलमिति च ॥ ६६ ॥

इति पञ्चविंशं न वा तत्सहभावाश्रुतेरित्यधिकरणम् ॥ २५ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य पुरुषोत्तमस्य
कृतौ भाष्यप्रकाशे तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

रश्मिः ।

फलभेद इति । क्वचिदेकस्येति । यथा 'अकामः सर्वकामो वे'त्यत्र । 'अङ्गेषु यथाश्रयभाव' इत्यस्यार्थसङ्ग्रहः कर्ममार्गीयेत्यादिः । 'यथाश्रय'मिति सूत्रव्याख्याने व्याख्यातम् । तत्रैव अवयविन्येव । 'समाहार'सूत्रार्थसङ्ग्रहः ज्ञानमार्गीयेति । 'गुणसाधारण्ये'त्यादिसूत्रार्थसङ्ग्रहः अवतारेति । 'दर्शनाच्चे'ति सूत्रार्थसङ्ग्रहः सर्वासामित्यादि ।

इति श्रीविठ्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण
सम्पूर्णवेत्रा विठ्ठलरायजिद्भ्रात्रीयगोकुलोत्सवात्मजगोपेश्वरजिता
कृते भाष्यप्रकाशस्य तृतीयाध्यायस्य रश्मौ तृतीयाध्यायस्य
तृतीयः पादः सम्पूर्णतामगमत् ॥ ३ ॥ ३ ॥

इति श्रीमत्कृष्णद्वैपायनप्रणीतब्रह्मसूत्रेषु तृतीय उपनिषदां बोधकताप्रकारनिरूपके
साधनाध्याये गुणोपसंहारो नाम तृतीयः पादः ॥ ३ ॥ ३ ॥

1967

प्रास्ताविकम् ।

भाष्यप्रकाश–रश्मि–परिबृंहित–श्रीमदणुभाष्यस्य तृतीयाध्यायस्याद्यपादद्वयस्य प्राकट्यानन्तरं यत्किमपि समुपलब्धं तन्निवेदनमावश्यकम् । आंग्लभाषायां यद्यप्येतत् सविस्तरं निरूपितम्, तथापि तद्भाषानभिज्ञानां प्रमोदाय सङ्क्षेपेणात्रानूद्यते । श्रीमन्नाथद्वाराधीशश्रीमद्गोस्वामिकुलतिलकश्रीमद्गोवर्धनलालजिमहाराजचरणानां तत्सूनुलालबावाश्रीदामोदरलालचरणानां परमोदारानुग्रहेण श्रीमत्प्रभुचरणश्रीमद्विठ्ठलेश्वराणां निजश्रीहस्ताक्षरलिखितस्य श्रीमदणुभाष्यस्य चतुर्थाध्यायस्य तृतीयाध्यायस्य चतुर्थपादस्यान्तिमपत्रत्रयस्य 'अनुष्ठेय'मिति सूत्रस्य वर्णकान्तरस्य च दर्शनसौभाग्यं सम्प्राप्तम् । तद्भागस्य श्रीमदणुभाष्यस्य पाठादि तदाधारेणैव योजयिष्यते । श्रीमत्प्रभुचरणश्रीहस्ताक्षरप्रतिकृतिमपि यथावकाशं प्रकटीकरिष्यामः । एतेनाणुभाष्यस्यान्तिमसार्धाध्यायस्य प्रणेतृत्वं श्रीमत्प्रभुचरणानामेवेति तन्मूलपुस्तकदर्शनेन सुष्ठु निश्चीयते । श्रीमदणुभाष्यस्यायं विभागः श्रीमत्प्रभुचरणैः श्रीगोकुल एव तत्र निवासाङ्गीकृत्यनन्तरं प्रणीत इत्यपि निर्णीतमस्माभिरांग्लटिप्पणे । कारणानि च सविस्तरं तत्रैव दर्शितानि ।

भाष्यप्रकाशश्च श्रीमत्पुरुषोत्तमानां श्रीहस्ताक्षरलिखितान्तिमशोधयुक्तो 'गुजराती' मुद्रणालयाधिपतिसन्मान्य 'नटवरलाल इच्छाराम देसाइ' इत्यस्य सौहार्देन प्राप्तः । एतेन प्रकाशमुद्रणमपि विदुषां हृदये सन्तोषं जनयिष्यतीति । अत्राप्यधिकजिज्ञासुभिरन्यत्रास्मिन्नेव पुस्तके द्रष्टव्यमिति ।

एतत्पादभाष्यस्य पाठादियोजनेऽस्माभिः श्रीमत्प्रभुचरणपौत्राणां श्रीमद्धरिधनपितृचरणानां श्रीकल्याणरायाणां पुस्तकस्योपयोगः कृतः । श्रीकङ्करपल्लीस्थश्रीमद्द्वारकाधीश्वरप्रभोर्मन्दिरस्थप्राचीनचित्रसङ्ग्रहात् श्रीमत्पुरुषोत्तमानां प्राचीनं चित्रं श्रीमन्मातृचरणश्रीमद्गोस्वामिनीश्रीसौन्दर्यवतीनां निःसीमानुग्रहेणोपलब्धम् । तत्तादृशमेव सम्पाद्य 'श्रेष्ठिवर-वैष्णव-लालजीभाई' इत्येतेषां सम्मत्यात्र निवेशितमिति ।

श्रीपुरुषोत्तमचरणानां गुरुश्रीकृष्णचन्द्रचरणानामेतद्भाष्यविभागविवरणमस्माभिस्तन्मूलपुस्तकाधारेण संशोध्य परिशिष्टे निवेशितम् । एतन्मूलपुस्तकमस्माभिः 'परलोकनिवासित्रिपाठिमनःसुखरामसूनुविद्वद्वरतनसुखरामभाई'सकाशात् सम्प्राप्तम् । एतदखिलं विवरणं ग्रन्थप्रणेतृणां श्रीहस्ताक्षरेष्वेव लिखितमिति तद्दर्शनेनास्माकं स्फुरति । एतदखिलं विवरणं श्रीपुरुषोत्तमैर्निजकृतौ प्रायः समग्रमेव समावेशितं दृश्यते । ए ते श्रीकृष्णचन्द्राः श्रीमत्प्रभुचरणानां तृतीयलालश्रीबालकृष्णानां द्वितीयसूनुश्रीव्रजनाथानां सूनवः संवत् १६५५ श्रावण-कृष्ण-सप्तम्यां प्रादुर्भूताः । निखिलोपलब्धब्रह्मसूत्रभाष्यसमीक्षापूर्वकमणुभाष्यमर्मोद्घाटनपद्धतिर्यास्माभिर्भाष्यप्रकाशे दृश्यते, सा पद्धतिः श्रीपुरुषोत्तमैः श्रीकृष्णचन्द्राणामेव प्रेरणया कृपया चोपलब्धेति प्रतिभाति । तृतीयाध्यायस्य तृतीयपादभाष्यप्रकाशस्यात्र मुद्रितपरिशिष्टेन सम्वादनेनास्मदभिप्रायः स्फुटिष्यतीति । साम्प्रदायिकविद्वत्सु प्रार्थनीयमिदं यच्छास्त्ररीत्या श्रीमदणुभाष्यस्यावगाहनं भवतामभीष्टं चेत्, एतेषां श्रीकृष्णचन्द्राणां श्रीमदणुभाष्यस्य प्राचीनतमैतद्विवरणस्यान्वेषणं कर्तव्यमिति । सम्प्रदाये तेषां तच्छिष्यश्रीपुरुषोत्तमानां च वंशस्योत्सन्नत्वात् नामावशेषा एव ते जाता इति विचिन्त्य चेतो दुनोत्यस्माकम् । कस्मिन् वर्षे तेषां प्रादुर्भावो जात इत्यपि सम्प्रदायवंशवृक्षे प्रायो न दृश्यते । निर्भयरामः सम्प्रदायकल्पद्रुमे 'इमे शास्त्रवित्तमा' इति वर्णयति । 'मद्रपुरनिवासिवैष्णवश्रेष्ठिवर-दि-ब-गोविन्ददास'सकाशादुपलब्धात् प्राचीनपुस्तकतस्तज्जन्मसमयोऽस्माभिर्ज्ञातः । एतेषां गोस्वामिनां पण्डितमुकुटमणीनामैतिह्यं सम्प्रदायगौरवमभिलषद्भिरवश्यमन्वेषणीयमिति विज्ञप्तिः ।

श्रीमदाचार्यश्रीमद्वल्लभाधीश्वर-
प्राकट्यमहोत्सवः ।
चैत्र-कृष्ण-११-१९८३ ।

मूलचन्द्र तेलीवाला ।

श्रीकृष्णाय नमः।

परिशिष्टम्।

गुणोपसंहारपादभाष्यविवरणम्।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ तृतीयपादं व्याचिख्यासवः सङ्गतिबोधनाय पूर्वपादार्थमनुवदन्तः प्रस्तूयमानार्थमाहुः **पूर्वपादेत्यादि**। **विचार्यन्त** इति। धर्माः सर्वे सर्वत्र सन्ति, क्वचिदेव वा केचन सन्ति, केचन न सन्ति, सर्वत्रैव न सन्त्यौपाधिका वा सन्तीति सन्देहे विचार्यन्त इत्यर्थः। नन्वत्र सर्वैरेकदेशिभिर्विद्याभेदाभेदविचार एवाद्रियते, तत्कुतो धर्मा विचार्यन्त इत्युच्यत इति चेत्। उच्यते। आचार्यस्य ब्रह्मनिरूपणार्थमेव मुख्यतया प्रवृत्तत्वेन ब्रह्मशेषतयैव विद्याविचारस्यौचित्यात्पूर्वपादसङ्गतिसौकर्यात् पक्षवाचकविज्ञानोपासनादिपदाध्याहारापेक्षया पूर्वपादान्तपरामृष्टब्रह्मानुषङ्गस्यैव ज्यायस्त्वात्सर्ववेदान्तप्रत्ययमित्येकवचनस्यापि स्वारस्यात् विद्याविचारादर्तृभिरपि तद्भेदाभेदयोर्विषयभेदाभेदाभ्यामेव समर्थनेन तद्विचारस्यापि विषयविचारैकशरणत्वेन तत्सिद्धान्तितविद्यैक्यस्यैवमपि सिद्धेश्चेति बुध्यस्व। ननु सिद्धे विग्रहे धर्माः सिद्धप्राया एवेति पुनः किमिति विचार्यन्त इत्यत आहुः **ते चेदित्यादि भिन्ना** इत्यन्तम्। अतो विचार्यन्त इत्यर्थः। एवं सङ्गतिं प्रदर्श्य मतान्तरोक्तविषयस्यापि प्रस्तुतरीतिकविचारेण निर्णयसिद्धिबोधनाय तत्साधारणं विषयद्वयं पूर्वमाहुः **यथेत्यादि**। एतदाद्युदाहरणानां विभूतिविषयकत्वाद्विचारस्यैतादृग्विषयमात्रपरताव्यावर्तनायोदाहरणान्तरमाहुः **अपरं चेत्यादि**। एवं विषयं निर्दिश्य पूर्वपक्षाकारं विवेक्तुं पूर्वं मतान्तरीयाकारं वदन्तस्तेनाशङ्कान्तरमुत्थापयन्ति **तथा चेत्यादि**। अत्र दृष्टान्तोदाहरणं त्वामिक्षाधिकरणम्। तत्र हि 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन'-वाक्ये तप्तदुग्धनिष्पन्नघनविरलद्रव्यद्वयरूपक एको यागो यागद्वयं वेति सन्देहे, द्रव्यदेवताविशिष्टयागान्तरविधौ गौरवप्रसङ्गादपूर्वान्तरकल्पनाप्रसङ्गाच्च न यागद्वयविधिः, किन्तु पूर्वस्मिन्नेव यागे वाजिनं गुणो विधीयते, वाजिभ्य इत्यनेन च वाजोऽन्नमामिक्षा तद्येषामस्तीति व्युत्पत्त्या पूर्वोक्ता विश्वेदेवा एवोपलक्ष्यन्त इति पूर्वपक्षः, तत्रोत्पत्तिशिष्टामिक्षाद्रव्यावरुद्धे याग उत्पन्नशिष्टं वाजिनं गुणत्वेन प्रवेशं न लभते निर्बलत्वात्, ततश्च तत् द्रव्यं स्वसम्बन्धियागं पूर्वस्माद्भिनत्ति, वाजिपदं चाश्वे रूढत्वान्न योगेन विश्वान् देवानुपलक्षयिष्यति, तथा सति विध्यपूर्वान्तरकल्पनयोः प्रामाणिकत्वात्तत्कृतं गौरवं न दोषायेति द्रव्यदेवताभेदाद्यागभेद इति स्थितम्। तथा प्रकृते पञ्चाग्नयः षडग्नय इत्यादि। श्रीकृष्णः श्रीरामो नृकेसरीत्यादीतरपरिच्छेदकरूपभेदाद्वेद्यभेदः। किंच यथा कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति नेतर इति धर्मभेदः, तथात्र शिरोव्रतमाथर्वणिकानामेव नेतरेषामिति धर्मभेदः। विभूतिभेदश्च क्वचिद्रामस्वरूपं विभूतिमध्ये गण्यत इतरत्र वासुदेवस्वरूपम्, एवं मुरलीधरत्वं धनुर्धरत्वं चेति धर्माणामावापोद्वापौ। किञ्च दृष्टादृष्टफलभेदोपि। यथा राममन्त्राणां सर्वकामदत्वं मोक्षः। श्रीकृष्णस्मरणस्य भगवद्विषयककामजननं तन्मन्त्रस्यानायासतो भगवत्पदप्राप्तिरिति, रूपभेदेन धर्मभेदेन फलसंयोगभेदेन च वेद्यभेदप्राप्तौ दोषान्तरमापतितम्, तेन मतान्तरोक्त-

---

[1] इदमखिलं विवरणं श्रीपुरुषोत्तमचरणैः स्वकृतप्रकाशे प्रायः शब्दश उद्धृत्य समावेशितम्। श्रीपुरुषोत्तमगुरुभिः श्रीमद्गोस्वामिश्रीकृष्णचन्द्रचरणानामियं कृतिरित्यस्मत्प्रत्ययः।

पूर्वपक्षसमाधानाभ्यां धर्मभेदापादितदोषो नापैतीति कश्चिदधिक आकारो वक्तव्य इत्यर्थः । अत्रोपासनाविषयाणामब्रह्मत्वं सिद्धान्तत्वेनाभिमन्यमानः कश्चिदेकदेशी पूर्वोक्ताशङ्कामप्रयोजकां मनसि कृत्वा चोदयति नन्वित्यादि । तद्दूषयन्ति मैवमित्यादि । समन्वयविरोधापत्तेरिति । आचार्येण हि समन्वयः श्रुतीनां ब्रह्मनिरूपकत्वेन प्रतिपादितः, न तु तासामौपाधिकनिरूपकत्वेनातस्तथेत्यर्थः । अथ ब्रह्मत्वतया तथैव प्रतिपादित इत्युक्तौ युक्त्यन्तरमाहुः तासामित्यादि । ननु तासां यथाकथंचिद्ब्रह्मप्रतिपत्त्यर्थत्वान्न हानिरित्यत आहुः श्रुतेरित्यादि । अन्यथा सतोऽन्यथा कथनात्तथेत्यर्थः । अथ विषभोजनवद्वदतीति न प्रतारकत्वमित्यत एतन्न्यायस्याप्रवृत्तिं सूचयन्ति अपरं चेत्यादि । तत्तदुपासनामिति । अन्यथा ज्ञानरूपामित्यर्थः । तथा च न विषभोजनवदेषोक्तिरिति भावः । एतदाढर्याय युक्त्यन्तरमाहुः स्पष्टेत्यादि । तथा च यदि त्वदुक्तं व्यासोऽभिप्रेयात्, स्पष्टार्थानि रामादिपदान्यपि देवतावाचकानि ब्रह्मवाचकानि वेति सन्दिह्य तन्निर्णयमपि कुर्यादतस्तदभावान्न तथेत्यर्थः । एवमेकदेशिमतं निरस्य सर्वासां ब्रह्मनिरूपकत्वमेव व्यासाभिप्रेतमित्याशयेन सिद्धं पूर्वपक्षस्वरूपमाहुः एवं च सतीत्यादि । सर्वासां ब्रह्मनिरूपकत्वे सति धर्मभेदकृतधर्मिभेदाद्ब्रह्मानेकत्वापत्त्या 'नेह नानास्ती'त्यादिश्रुतिविरोधस्तासामौपाधिकपरत्वे बहूनां वाक्यानां ब्रह्मविषयत्वहानिरित्ययमेव पूर्वपक्षाकार इत्यर्थः । अत्र सूत्रावयवमुपन्यस्य समादधते अभिधीयत इत्यादि । ननु नायं प्रतिज्ञार्थः । तथाहि । पूर्वकाण्डे यज्ञस्यानन्तरूपनिरूपणं यथा भगवन्मूर्तित्वसिद्ध्यर्थम्, तथा ब्रह्मनिरूपणाय प्रवृत्ते उत्तरकाण्डेऽनेकरूपनिरूपणप्रयोजनालाभाद्यथाकथंचित्प्रतिपत्त्यर्थत्वस्य सिद्धान्तिनानङ्गीकारादनन्तरूपश्रुतेरसङ्कुचितवृत्तित्वेन निरूपणस्याशक्यत्वाच्चेत्याशङ्कायामाहुः ब्रह्मण इत्यादि । तथा च 'फलमत उपपत्ते'रित्यत्र ब्रह्मणः फलदातृत्वस्य निश्चितत्वात्तत्तत्फलसाधकोपासनार्थं तत्तन्निरूपणमित्ययमेव प्रतिज्ञार्थ इत्यर्थः । ननूपासनार्थमेकमनेकरूपेण निरूप्यत इति कथमवगन्तव्यमित्यत आहुः तत्र हेतुरिति । तथाच सूत्रोक्तहेतोरवगन्तव्यमित्यर्थः । कथमित्याकाङ्क्षायां तमनूद्य विवृण्वन्ति चोदनेत्यादि । तथा च ब्रह्मत्वेनोपासनाविधानात्तथावसीयते, तेन यथाग्निहोत्रे द्रव्यभेदे उपांशुयाजे देवताभेदेपि एकदेशस्यैव भेदान्न यागभेदस्तथात्रापि किंचिद्रूपधर्मभेदान्न वेद्यभूतब्रह्मभेद इत्येवमित्यर्थः । ननु शाखान्तराधिकरणे केवलानां रूपादीनां व्यभिचारित्वं हृदिकृत्य 'एकं वा संयोगरूपचोदनाऽख्याऽविशेषा'दिति सूत्रेण संयोगादिहेतुचतुष्कसमुदायं हेतूकृत्याभेदः साधित इति प्रकृत एकेन हेतुना कथं सिद्धिरित्यत आहुः आदीत्यादि । तथा चात्रापि संयोगरूपचोदनात्मकहेतुत्रयसत्त्वादेकदेशरीतिकोदाहरणे आख्या अपि सत्त्वेनोक्तचतुष्कस्यापि सत्त्वान्न दोष इत्यर्थः । अत्र सर्ववेदान्तप्रत्ययमेकं चोदनाद्यविशेषात्, यत्र चोदनाद्यविशेषस्तत्र प्रतिपाद्याभेदः । सर्वशाखाप्रत्ययज्योतिष्टोमवदित्यनुमानमत्र सिद्धम् ।

तत्र दोषमाशङ्क्य सूत्रकारः समाधत्ते इत्याशयेन सूत्रं पठन्ति भेदादित्यादि । उक्तहेत्वसिद्धिमिति । धर्मभेदकृतमिथोभेदादिपदसंगृहीतरूपाभेदस्य पक्षे ब्रह्मण्यभावेन चोदनाद्यविशेषादित्यस्य हेतोः स्वरूपासिद्धिमित्यर्थः । तथा च ब्रह्मधर्मस्त्वेत्यादि, यथा षोडशिग्रहणाग्रहणयोः स्वरूपभेदेंप्यतिरात्रधर्मत्वेनाभेदस्तथा तत्तद्धर्मवैशिष्ट्यावैशिष्ट्ययोर्ब्रह्मधर्मत्वेन तथात्वात् त्वदुक्तहेतोरेव स्वरूपासिद्धिरित्यर्थः, भेदेन हेतुना सिद्धान्तहेतुं दूषयता त्वया प्रतिवाक्यं प्रतिपाद्यं ब्रह्म भिन्नं धर्मभेदाद्यत्र धर्मभेदस्तत्र प्रतिपाद्यभेद आमिक्षावाजिनयागवदित्यनुमानं लक्षितम् । तत्र त्वदुक्तहेतोरतिरात्रदृष्टान्तेन व्याप्यत्वासिद्धिरित्यपि बोध्यम् । नन्वेवं ब्रह्मैक्यमत्राचार्यः किमित्याग्रहेण निरूपयतीत्याकाङ्क्षायामुपसंहारसूत्रविचारेण तदाशयमाहुः एवं सतीत्यादि । तत्रेति, न्यूनगुणके रूपे । उचित इति,

कर्मणि द्वयोरेकदा कर्तुमशक्यत्वात्पर्यायभेदेन विकल्पस्यापि प्रसक्तिः, प्रकृते तु तदपि नेत्यत उचित इत्यर्थः । नन्विदं सूत्रकारेण नोक्तमित्याशङ्कायामाहुः इति भाव इति । पूर्वसूत्रोक्तहेतोरत्र शोधनादग्रे कथनाच्च तथाशयो लभ्यत इत्यर्थः । उपसंहारपदार्थश्च सामान्यतः प्रसक्तस्य विशेषे नियमनमित्यग्रिमसूत्रे स्फुटीभविष्यति । तथात्र तेषां तेषां गुणानां तत्रतत्र सत्त्वेन ज्ञानरूपमित्यग्रे वाच्यं 'न वा विशेषादि'ति सूत्रे । नन्वेवं सति यत्र ब्रह्मत्वेनोपासनं विधीयते तत्र तद्वाक्यनिर्णयो भवति, यत्र पुनर्ब्रह्मत्वेनोपासनं न विधीयते यथा प्राणसंवादे पञ्चाग्निविद्यायां च, तत्र ब्रह्मत्वेनोपासनाभावेनैक्याभावात्कथं निर्णय इत्याशङ्कायां तत्रापि न्यायस्यास्य तौल्यादेतेनैव निर्णय इति हृदिकृत्य कंचिद्विशेषमाहुः अत्रेत्यादि । ॐमित्येतदक्षरमिति, ॐकाराक्षरमित्यर्थः । तथा च विभूत्युपासनान्यायस्तत्रापि बोध्य इत्यर्थः । अत्राचार्येणोपासनामात्रनिर्णयो न क्रियतेपि तु साधनमात्रस्य, तथा सति भक्तिमार्गस्यापि व्यवस्था वक्तव्यैवेत्याशयेनाहुः भक्तीत्यादि । अग्र इति, 'न वा प्रकरणभेदा'दिति सूत्रे । ननु भक्तेरप्रस्तुतत्वात्तद्व्यवस्थाकथनमनुपपन्नमिति चेत् । न । उपासनाया अपि तथात्वात् । न च तस्याः श्रौतत्वादस्ति प्रस्ताव इति वाच्यम् । तुल्यत्वात् । गोपालतापनीये इति 'सकलं परब्रह्मैतद्यो ध्यायति रसति भजति सोऽमृतो भवती'ति ध्यानाद्भिन्नतया तस्या अपि विधानात् । 'भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्य'मिति लक्षणभेदाच्च । न च यच्छब्दोपबन्धादयमनुवाद एव न विधिरिति वाच्यम् । 'यदाग्नेयोऽष्टाकपाल' इत्यादिवददोषात् । न च कर्तृसामानाधिकरण्यान्नेदं साम्प्रतमिति वाच्यम् । तथापि समासौ 'कृष्ण एव परो देवस्तं ध्यायेत्तं रसेत्तं भजे'दिति दर्शनेनादोषात् एकस्मिन्नेव प्रकरणे सृष्टिकर्तृत्वादिना माहात्म्यस्य आत्मत्वेन निरुपाधिप्रियत्वस्य च बोधनात् श्रुतीनां भक्तावेव तात्पर्यावसायाच्च । नन्वत्र विहितभक्तिमार्गीया व्यवस्था वाच्या अविहितभक्तिमार्गीया वेति चेत् । उभयोरपीति ब्रूमः । किं मानमिति चेत् । श्रीभागवते श्रीनन्दादीनां फलकथनात्तद्बलेनाविहितभक्तेरपि प्रामाणिकत्वसिद्धौ तद्व्यवस्थाया अपि मन्दमध्यमयोरर्थे आवश्यकत्वात् । अतो नात्र चोद्यावसर इति दिक् ॥

ननु सूत्रकारेणेदं कुत्रोक्तमिति चेत् । अग्रिमसूत्रेऽधिकारस्य नियामकत्वं वदता सूचितमिति जानीहि ।

अग्रिमसूत्रमवतारयन्ति नन्वित्यादि । तथा च शिष्टाचारविरोधात्पूर्वत्र साधितोपासनाद्यैक्यचिन्तावैयर्थ्ये प्राप्ते प्रतिवदतीत्यर्थः । सूत्रस्थस्य तथात्वेनेत्यस्यार्थमाहुः स एकमित्यादि बोधयतीत्यन्तम् । यत एवं बोधयत्यतो हेतोः स्वाध्यायस्य वेदस्य तथात्वेन नानास्वरूपैकैककर्मबोधकत्वेनेत्यर्थः । तत्प्रयुक्त इति नियमविशेषणम् । तथा च बोधनप्रकारमर्यादाबलात्तावत्कर्मकरणनियम इत्यर्थः । अत्र बीजमाहुः तावद्भिरित्यादि । स्वाध्यायस्य तथात्वेनेत्यस्य हेतोर्यज्ञानां भगवन्मूर्तितासाधकत्वेन चारितार्थ्यादनेन हेतुना दोषापरिहारं मन्वानः सूत्रकृद्धेत्वन्तराणि समुच्चिनोतीत्याशयेनाहुः नन्वित्यादि । उक्तहेतुप्रयुक्ते नियमे शिष्टाचारबीजभूतां सम्मतिमाहुः अत एवेत्यादि । अत एव, तत्तच्छाखावाक्यतत्तदधिकारन्यूनाधिकप्रायश्चित्तानां नियामकत्वादेव । परशाखोक्तमिति, यथा 'कुक्कुटोसीत्यश्मानमादत्ते कुटरुरसीति वे'त्यश्मादानमन्त्रो येषां कल्पे विकल्पितस्तैरेव तत्र पठ्यते, नेतरैः । विकल्पे तूभयस्याशास्त्रार्थत्वमिति, यत्कल्प एवं विनियोगविधिर्नास्ति तेषां तादृशस्थले इच्छया करणे धर्माभासपरधर्मत्वापत्त्या तथेत्यर्थः । अतोपीति, कल्पोक्तनियमबलादपि । नियम्यन्त इति, लिङ्गान्नियम्यन्ते । एवं सूत्रं व्याख्याय उपासनाया अपि समाचारत्वेन सङ्ग्रहात्तमेव नियमं तत्राप्याहुः प्रकृतेपीत्यादि । तथा सतीति, तद्बोधकप्रमाणमननुरुध्य रूपान्तरासाधारणधर्मोपसंहारेऽङ्गीकृते

सति । तथा चैवं भावने सवदृष्टान्तबोधिता लिङ्गस्य नियामकता भज्येतातस्तथा न भावनीयमित्यर्थः । अत्र वादी लैङ्गिकनियमस्याप्रयोजकत्वं शङ्कते नन्वित्यादि । तत्र समादधते सत्यमित्यादि । तत्रेति, आक्षेपे । कार्येति, मूलरूपोपासकेन कार्या । इति ज्ञेयं परमिति । अत्रेवताराणामेव तत्त्वविधानदर्शनात्तथेत्यर्थः । ननु श्रुत्या त्वेतावद्बोध्यत इति सत्यम्, तथापि मूलरूपत्वाविशेषस्योपसंहारहेतोर्विद्यमानत्वात्तदुपसंहारे किं बाधकमित्यत आहुः तत्रेत्यादि । उक्तमेवेति । लैङ्गिकनियमरूपं यत्कर्मण्युक्तं तदेव, अन्यथा तत्राप्यतिप्रसङ्गः स्यादिति भावः । ननु पूर्वसूत्रोक्तहेतुना सर्वत्र सर्वगुणोपसंहारप्राप्तौ समाचारसूत्रे निरूपणप्रकारभेदाधिकारभेदप्रायश्चित्तश्रवणासाधारणलिङ्गानां नियामकत्वमादृतम्, तेन तत्तच्छाखिभिस्तत्तदधिकारिभिस्तत्तल्लिङ्गनियताः स्वाधिकारानुसारेण स्वशाखोक्ता गुणा भावनीया इति सिद्धम् । तथा सति प्राणाद्युपासनायां शाखान्तरोक्तगुणोपसंहारो न स्यादित्यत आहुः प्राणादीत्यादि । न च निरूपणप्रकारभेदरूपं बाधकं दृश्यत एवेति वाच्यम्, तस्य मन्दमत्यनुग्रहार्थत्वेन बाधकत्वाभावात् । शाखाविभागात् पूर्वमिच्छयैवाधिकारमनुसृत्यर्षिभिः करणात् । आचार्येण मन्दमतेस्तावतैव फलसिद्धिबोधनार्थमेव तदुपन्यासात् । हेत्वन्तरकथनेन तथानिश्चयात् । तेनैकशाखाध्येतुस्तावतैव सिद्धिर्द्वित्र्याद्यध्येतुस्तूपसंहारेणोपासनापौष्कल्यात्फलश्रैष्ठ्यमिति फलति, तदेतदभिसन्धायोक्तं न किञ्चिद्बाधकमिति । लैङ्गिकनियमसमर्थनाय मत्स्यकूर्मादिरूपेणायमेव सर्वकर्म कृतवानिति यदुक्तं तत्र चोदयति नन्वित्यादि । तत्र समादधते नैवमित्यादि । धर्मिग्राहकमानतः सिद्धिं दृष्टान्तेनोपपादयन्ति यथेत्यादि । नियतपदार्थवादिमते भावभिन्नस्य निषेधमुखप्रतीतिगोचरस्यैकस्यैव पदार्थस्य तादृशप्रतीतिबलेन तावद्रूपत्वं स्वीक्रियते, न तु निरूपकभेदमादाय स्वरूपनानात्वम्, तद्वदत्र ब्रह्मण औपनिषदत्वात्तद्वाक्यबलेन तथेत्यर्थः । एवमुपपत्तिपरिहाराय श्रुतिरूपप्रमाणेन भगवतोनन्तरूपत्वं साधितम् । अतः परं श्रुतार्थापत्तिश्रुतिभ्यामनन्तधर्मवत्त्वं साधयितुं पूर्वं श्रुतितात्पर्यमनूद्य वादिनमनुयुञ्जन्ति अपरं चेत्यादि । तदाशयमनूद्य दूषयन्ति उपेत्यादि । वदाम इति, तत्रानिष्टापत्तिं वदामः । न वदेदिति ग्रहणकोक्तमवदनं व्याकुर्वन्ति तथाहीत्यादि । तस्येति, ब्रह्मज्ञानस्य । एकजातीयत्वे हेतुः । घटवस्त्रस्येत्यादि । निरूपयेदिति, ब्रह्मविज्ञानफलं निरूपयेत् । अपि वा वदेदिति, अशेषगुणज्ञानाभावे फलाभावापत्त्या वदेदित्यर्थः । आशयान्तरमनुवदन्ति । न चेत्यादि । उपासनानाममात्रोक्तौ प्रकाराज्ञानादुपासनाया असिद्धेस्तथेत्यर्थः । तद्दूषयन्ति परेत्यादि । तथा चैवमाशयकल्पनपक्षे प्रकारोक्तिवैयर्थ्यं तदवस्थमित्यर्थः । तर्हि कस्तदाशय इत्याकाङ्क्षायां मन्दाधिकारिणामपि तावतैव फलसिद्ध्यर्थं वदतीत्याशयं हृदिकृत्य तेन विवक्षितं साधयन्ति तस्मादित्यादि । तस्मादिति, त्वदुक्ताशयस्यानुपपन्नत्वात्, एतेनेति, उक्तार्थापत्त्याधिकारव्यवस्थापनेन । उक्तोपष्टम्भाय श्रुतिमुपन्यस्यन्ति तदुक्तमित्यादि । स्वाभाविकीति विशेषणतात्पर्यकथनेनैकदेशिमते निरस्ते अनन्तधर्मवत्त्वं ब्रह्मणि वास्तवमिति सिद्धम् । तथा सति यस्य रूपस्य ये असाधारणा धर्मास्ते तस्मिन्नेव रूपे नियता इत्याक्षेपलभ्यत्वाभावान्नान्यत्रोपसंहर्तुं शक्या इत्यर्थः । एवं लैङ्गिकनियमं समर्थयित्वा स्वोक्तसूत्रव्याख्यानं दृढीकर्तुं मतान्तरीयमेतत्सूत्रव्याख्यानमप्यसमञ्जसमिति बोधनाय तमनुवदन्ति केचिदित्यादि । अयं मतान्तरग्रन्थः शाखान्तराधिकरणस्थस्य 'विद्यायां धर्मशास्त्र'मिति सूत्रीयशाबरभाष्यस्य छायामनुसरति, तत्र हि 'कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति नेतरे, तथैकेऽग्निमधीयाना उपाध्यायस्योदकुम्भमाहरन्ति नेतरे, तथैकेऽश्वमेधमधीयाना अश्वस्य घासमाहरन्ति नेतर' इति धर्मभेदात्कर्मभेद आशङ्किते, विद्यायां धर्मशास्त्रमिति सूत्रेण विद्या वेदनमध्ययनमिति यावत्, तस्यायं धर्मो, न तु कर्मणस्तेनान्यधर्मस्या-

न्याभेदकत्वात्कर्मभेदः परिहृत इति स्थितम् । तेन प्रामाणिकः, परन्तु सूत्रकारानुशयविरुद्ध इति बोधनाय दूषयन्ति स्म चिन्त्यत इत्यादिना । चिन्ताहेतुमाहुः न हीत्यादि । हि यतो हेतोः । अस्य शिरोव्रतस्य विद्याधर्मत्वं विद्याभेदकं न भवति, उक्तन्यायेन चोदनाद्यविशेषरूपेणान्यत्रापि तथात्वेन सर्वविद्याधर्मत्वस्य सिद्ध्या तदभेदकत्वात्, तथा चास्य भेदकत्वमापाद्य ततोन्यधर्मसाधनेन तदसाधकत्वं काकदन्तविचारन्यायमनुसरतीत्युपेक्ष्य इत्यर्थः । इवपदं प्रकारस्य प्रामाणिकत्वबोधनार्थम् । प्रामाणिकत्वेनोपेक्ष्यत्वमसहमानश्चोदयति नन्वित्यादि । तत्रोपेक्ष्यत्वे बीजभूतामनुपपत्तिं बोधयन्ति सूत्रस्येत्यादि । तत्तात्पर्यकल्पनेति, शिरोव्रतोपदेशतात्पर्यकल्पना । ननु मुख्यार्थबाधः फलमुखो न दोषायेत्यतो दूषणान्तरमाहुः किञ्चेत्यादि । तथा च भवता हि विद्यैकत्वसाधकत्वेनेदं सूत्रं व्याख्यातम्, तथा सति शिरोव्रतस्य प्रकृतग्रन्थविशेषसंयोगेनासङ्कीर्णत्वेपि पूर्वसूत्रोक्तहेतोर्दृढत्वे सम्पन्ने 'तेषामेवैतां ब्रह्मविद्यां वदेते'त्यत्र यथैतच्छब्दस्तथा सर्वत्र धर्मकथन एतच्छब्दादर्शनेन तद्धर्मोपसंहारस्य प्राप्तावसरत्वादुक्ताशङ्काया अनिवृत्तिस्तस्मादस्य सूत्रस्योक्तरीत्योपसंहारनियमबोधकतयैव व्याख्यानमुचितम्, एवं च नियमविशेषस्यैवोपसंहारपदार्थत्वात्तल्लक्षणस्यापि सौत्रत्वसिद्धिरिति गुणोपि । तस्मान्मतान्तरीयव्याख्यानमुपेक्ष्यमेवेत्यर्थः ।

एवं मतान्तरनिरासेनैतत्सूत्रार्थं निष्कृष्य पुनः सिंहावलोकनेन स्थूणानिखननवत्पूर्वसूत्रार्थं दृढीकर्तुं चिन्तान्तरमारभन्ते नन्वित्यादि । पूर्वोक्तरीत्येति, अनन्तरूपत्वसमर्थनरीत्या । शेषग्रन्थस्तु निगदव्याख्यातः । तथा च निर्धारासम्भवे धर्माणां मायिकत्वमेव शरणीकरणीयम् । तथा सति स्वरूपपराणामेतच्चिन्ताया अनुपयोगात्पूर्वोक्तशङ्काया अनिवृत्तावप्यदोष इति मतान्तरीयव्याख्यानं साध्वेवेति भावः । तत्र तन्निर्धारणचिन्तासार्थक्याय समादधते अभिधीयत इति । तत्र पूर्वं निरवयवत्वेपि यथावतारेष्वंशस्तं प्रकारं बोधयितुं रामानुजादिमतस्याप्येकदेशत्वं बोधयन्तोंशं च प्रयोजकं वदन्ति सत्त्वमित्यादि । अत्र वाक्ये सत्त्वविशेषणाभ्यां प्रियापदविशुद्धपदाभ्यां सत्त्वस्य प्राकृतत्वं व्यावर्त्यते । 'मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षक'मिति, 'विलज्जमानया यस्य स्थातुमीक्षापथेऽमुये'ति वाक्याभ्यां तस्य गुणानामप्रियत्वेन तस्य अविशुद्धत्वेन च बोधनाय तद्गुणस्य सत्त्वस्य प्रियत्वशुद्धत्वयोरशक्यवचनात् । न चाप्रसिद्ध्या नैवमिति शक्यम्, 'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रय' इति द्वितीयस्कन्धे त्रयाणां भगवद्गुणत्वोक्तेस्तत्र तेषां सिद्धत्वात् । 'कार्पासे न हि सूत्रं तदेव पुनः पौर्वापर्यमापद्यमानं सूत्रतामापद्यत इति भगवान्निर्गुणस्ते गुणा' इति तत्र विवरणात्तदेतदुक्तं भगवद्धर्मरूप एव कश्चनास्तीति । एतमेव रामानुजमते शुद्धसत्त्वं नाम रजस्तमोमिश्रप्राकृतसत्त्वविलक्षणसत्त्वगुणाश्रयो द्रव्यविशेष इत्याहुः 'स्वसत्ताभासकं द्रव्यं त्रिगुणात्तद्विलक्षण'मिति प्रमाणं चाहुः । सिद्धान्ते तु प्राकृतानामिव तस्यापि द्रव्यत्वस्याविरुद्धत्वात्तत्रैव विश्राम्यत इति विशेषः । एवं प्रयोजकमुक्त्वा तेन सिद्धमंशस्वरूपमाहुः यादृशोनेत्यादि । अतो निरवयवत्वांशत्वबोधकप्रमाणयोर्न विरोध इत्यर्थः । अतः परं श्रैष्ठ्यबोधनाय मूलस्वरूपं विवृण्वन्ति यत्राधिष्ठानेत्यादि । प्रादुर्भूतस्य पूर्णत्वे गमकमाहुः अत एवेत्यादि । तेनेति, जृम्भाव्यादानदामोदरलीलासु व्यापकत्वं प्रदर्शयितुस्तथात्वेनेत्यर्थः । एवमिति, सत्त्वस्याधिष्ठानत्वे । सर्वत्रेति, अवतारादौ । विभूतिस्वरूपमाहुः भक्तेत्यादि । तत्त्वमिति, विभूतिरूपत्वम् । तत्र तत्रेति, नानाविधलौकिकशरीरेषु । एवं रूपत्रयविभागस्याप्रयोजकत्वं मन्यमानश्चोदयति नन्विति । न्यायसिद्धत्वाद्विभूतिरूपं तथास्तु, अवताररूपमूलरूपे तु न तथा, वदतो व्याघातादित्यर्थः । समादधते नैवमिति । तत्रेति, स्वतोनन्तरूपत्वे प्रमाणं च । आदिपदेन 'क्षयन्तमस्य रजसः पराक' इत्यादीनां

संग्रहः । एव सत्त्वाधिष्ठानतदनधिष्ठानयोः स्थिरीकरणेन तथा प्राकट्यमपि स्थिरमेवेति रूपविभागोपि स्थिर इति साधयित्वा तादृक्प्राकट्यप्रयोजकं तत्प्रयोजनं चाहुः **प्राकट्यं हीत्यादि** । **प्राकट्यमपि तथेति**, अत्रापि बीजं 'ये यथा मां प्रपद्यन्त' इति प्रतिज्ञावाक्यं बोध्यम् । **एतेनैवेति**, प्राकट्यप्रकारव्यवस्थापनेनैव । एवं विभागमुपपाद्य सिद्धमाहुः **एतेनेत्याद्यध्यवसीयत** इत्यन्तम् । मथुराद्वारकादिस्थानां प्रायशः सोपाधिकस्नेहवत्त्वात्तदर्थं प्राकट्यविनियोगे वैरूप्यापत्तिं हृदिकृत्योक्तम**ानुषङ्गिकत्वादिति** । व्यूहविशेषं द्वारीकृत्य तत्करणेन तेषां तद्दानात्तथेत्यर्थः । **एतदेव रूपमिति**, सत्त्वाव्यवहितं श्रीकृष्णस्वरूपम् । **इदमिति**, अधिष्ठानाव्यवधानम् । **तथेति**, विषयः । तथा च यदि निर्विशेषं ब्रह्म स्यात्तदा तथा स्यादपि, तत्तु प्रागेव निरस्तम्, तथा सति विरुद्धधर्माधारस्यैवं स्वरूपनिर्धारसिद्धेर्धर्माणाममायिकत्वेन वास्तवत्वात्तदुपसंहारचिन्ताया अप्युपयुक्तत्वादुक्तशङ्का निवर्तनीयैवेत्यतो मतान्तरीयव्याख्यानमुपेक्ष्यमेवेति भावः । एवं स्वरूपधर्मादिकं निर्द्धार्यानया चिन्तया सिद्धं गुणान्तरमाहुः **एवं सन्तीत्यादि** । **गुणभेदस्याप्रयोजकत्वादिति**, विद्यागुणभेदस्य वेद्यभेदाप्रयोजकत्वात् । **निःप्रत्यूहमिति**, निर्विशेषवादिमते धर्माणामुपाधिनिष्ठत्वादुपाधीनां भिन्नत्वादुपास्यानां रूपाणां चाब्रह्मत्वात्तेन रूपेण वेद्यैकत्वं सविघ्नम्, अत्र तु ब्रह्मणः सर्वरूपत्वात्प्राञ्जलमतस्तथेत्यर्थः ।

तेन वेद्यैक्यादेव विद्यैक्यमित्येतमेवार्थं सूत्रकारोभिप्रैतीति ज्ञापयन्तं सूत्रमेवाग्रिमं पठित्वा व्याकुर्वन्ति **दर्शयति चेत्यादि** । इत्यादिनेत्यादिपदेन रामानुजभाष्यमायावादिभाष्याद्युपन्यस्तश्रुतीनां संग्रहः । तथा च श्रुतिरपि वेद्यैकत्वेन विद्यैकत्वं दर्शयति, न तु स्वतः, दोषं च ब्रह्मभेददर्शने, अतोपि निःप्रत्यूहं ब्रह्मणः सर्ववेदान्तप्रत्ययत्वमित्यर्थः । एतेन श्रीरामादिविद्यानां ब्रह्मविद्यात्वेनैक्यम् विभूतिविद्यानां तु प्राणादिरूपतत्तद्विभूतिविद्यात्वेनैक्यमिति सिद्धम् ॥ १ ॥

अतः परं यदर्थमिदमैक्यं विवेचितं तत्प्रयोजनमुपसंहारसूत्र उच्यत इत्यन्य एकदेशिनो वदन्ति, तथा सत्युपसंहारहेतोरैक्यस्य पूर्वं सिद्धत्वादस्मिन् सूत्र उपसंहारस्तस्मादित्येव वक्तव्यं पदान्तराणां प्रयोजनाभावेन वैयर्थ्यादिति न सोर्थः, किन्तु श्रुतितात्पर्यबोधनाय पूर्वसूत्रोक्तनियमसमर्थनायोपसंहारप्रयोजकज्ञापनाय चैवं सूत्रप्रणयनमित्याशयेनाहुः **नन्वित्यादि** । **पूर्वसूत्रोक्तरीत्येति**, लैङ्गिकनियमेनेत्यर्थः । **क्वचिदिति**, रूपविशेषे । उक्तावताररूपत्वस्य श्रीराम इति, ब्रह्मधर्मस्य ब्रह्मरूपविशेषे । एवमग्रे रूपान्तरधर्मस्य रूपान्तर इति बोध्यम् । **इत्याशङ्क्येति** । इति अतो हेतोर्लिङ्गस्य नियामकत्वं यत्पूर्वसूत्र उक्तं तदसार्वत्रिकत्वाद्व्यभिचारीत्ययुक्तमित्याशङ्क्येत्यर्थः । **पदार्थस्येति**, अभिधेयस्य । 'इति रामपदेनासौ परं ब्रह्माभिधीयते', 'तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत' इति श्रुतिः । तथा च परब्रह्मत्वे श्रुतेस्तात्पर्यं न तु रूपान्तरत्वे, यदि तथाभिप्रेयान्नोपसंहरेदित्यर्थः । अर्थाभेदपदकृत्यमुक्त्वा शेषाणां वक्तुमाहुः **नन्वित्यादि** । विधिशेषशब्दे बहुव्रीहिः । पूर्वं चोप्यर्थे । **समानेपीति**, अर्थाभेदे समानेपि । तथा च तस्य मत्स्यादिरूपत्वमेवोपसंहृतम्, न तु तद्धर्मवत्त्वम्, तेन तेषां तद्रूपधर्मलैङ्गिकनियमबाधो नेत्यर्थः । नन्वयमर्थस्तूपसंहारार्थाभेदादित्यनेनैव सिद्ध इति शेषवैयर्थ्यं दुर्वारमित्यतः पक्षान्तरमाहुः **यद्वेति** । मत्वर्थीयो वत्प्रत्यय इति, वदिति प्रत्ययो योत्र सूत्रे स मत्वर्थीयः । सर्वे सर्वपदादेशा इत्यभिप्रेत्यैवमुक्तम् । अस्मिन् पक्षे विधिशेष इत्यत्र षष्ठीतत्पुरुषः । अस्य यागस्येति चातुर्मास्यप्रथमपर्वणो वैश्वदेवयागस्य । **इत्याशासीतेति**, वैश्वदेवाख्यपर्वणः संवत्सराभिमान्यग्निप्राप्तिहेतुत्वात्तद्यागकाले तदीयसूक्तवाकमध्ये संवत्सरीणामिति मन्त्र सूक्तवाकाशीःषु

होता आशासीतेत्यर्थः । शेषं प्रकटार्थम् । **उक्तरीतिरिति**, अर्थवादबलात्फलान्तरसाधकत्वम् । तथा च यो मां स्मृत्वा निष्कामः सकामो भवति, यो ध्यायति सोऽमृतो भवतीत्युभयविधार्थवादबलाद्भगवत्स्मरणे उभयफलसाधकत्वमुपसंहरणीयमित्यर्थः । अस्मिन्पक्षे चकारार्थो नोक्त इति, तमाहुः **प्राणादीत्यादि** । **तदादय** इति, बाधका भावादयः । अयमर्थः पूर्वसूत्रेणैव सिद्ध एवेति पुनःसंग्रहे बीजं न पश्याम इत्यत आहुः **वस्तुत** इति, पूर्वसमुच्चयार्थ इति, अर्थाभेदादित्यस्य समुच्चयार्थः । अत्रापि चकारवैयर्थ्यमाशङ्क्य तत्तात्पर्यमाहुः **शाखेत्यादि** । अतो न वैयर्थ्यमित्यर्थः । एवं चाधिकारः प्रायश्चित्तादिरूपबाधकार्थाभेदार्थवादविशेषैर्नियतो गुणोपसंहार इति सिद्धम् ।

पूर्वसूत्र उपसंहारप्रयोजको हेतुरर्थाभेदरूप उक्तस्तं समर्थयितुमिदं सूत्रद्वयमित्याशयेन सूत्रमुपन्यस्य सूत्रं व्याकुर्वन्ति **अन्यथात्वमित्यादि** । **उक्तन्यायेनेति**, अर्थाभेदादित्यनेन अब्रह्मत्वं स्यादिति, तथा चास्मिन्पक्षे उपसंहारस्यैवासिद्धिरिति भावः । **इति भाव** इति, तथा च शब्दबलकृतनिर्णयस्योभयत्रापि तुल्यत्वेन सिद्धो ब्रह्मत्वेनाभेद इति नोपसंहारासिद्धिरित्यर्थः । पूर्वसूत्रांशाशङ्कितमन्यथासूत्रे प्रकारान्तरेण परिहरतीत्याशयेन सूत्रं पठित्वा व्याकुर्वन्ति **न चेत्यादि** । विकल्पेनेत्यस्यैव त्वस्मिन् विवरणं **पूर्वोक्तादित्यादि** । **नवेति**, तथा च अन्यथा त्वप्रकरणभेदाद्वा नेति सूत्रयोजना । विषयवाक्यं तु तैत्तिरीयसंहिताषष्ठकाण्डद्वितीयाध्यायस्थम् । एवं च प्रकरणभेदेन तत्तदुपयोगिगुणकथनात्तत्र तावतैवार्थसिद्धेरेकरसत्वाग्राह्यत्वाद्यनपायाच्च नाब्रह्मत्वमित्यर्थः फलति । एवं सूत्रद्वयेनोपसंहारसूत्रोक्तो हेतुः समर्थितः । अतः परमस्मिन्नेतत्सूत्रव्याख्याने वक्ष्यमाणाशङ्कानिवृत्तिर्न भवतीत्यरुच्या प्रकारान्तरेण व्याचक्षते **अथवेत्यादि** । **पूर्वसूत्रेणेति**, उपसंहारसूत्रेण । **इत्यत्रेत्यादि**, इति हेतोः अत्रास्मिन् सूत्रे गुणोपसंहारस्य तथात्वमाहेत्यर्थः । **तदेतदुच्यत** इति, एकान्तिभक्तस्वभावतः प्राप्तोऽनुपसंहार एवानूद्यत इत्यर्थः । **एवं प्रकृतेपीति**, एकान्तिभक्तोपलभ्यमानगुणेभ्य इतरेषां सत्वेप्युपसंहारो नेत्यर्थः । अस्मिन् सूत्रेऽधिकारभेदादुपसंहारो व्यवस्थापितस्तां व्यवस्थामग्रिमसूत्रे हेत्वन्तरेण दूषयित्वा तस्मिन् हेतौ दोषप्रदर्शनेन तां पुनर्द्रढयतीत्याशयेनाग्रिमसूत्रं पठन्ति **संज्ञात इत्यादि** । नन्वधिकारस्यान्तरत्वेपि प्रमाणेष्वगणनान्न बलीयस्त्वमित्यत आहुः **संज्ञैकत्वस्येत्यादि** । **प्रमितभेदेष्विति**, छान्दोग्ये ‘ॐमित्येतदक्षरमुद्गीथमुपासीते’त्युद्गीथावयवं प्रणवं प्रस्तुत्य रसतमादिगुणोपव्याख्यानपूर्वकं देवासुराः संयेतिरे’त्यादिना अथ ह्य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिर इत्युद्गीथावयवप्रणवविषयमुपासनमुच्यते, वाजसनेयके तु ‘हन्तासुरान्यज्ञ उद्गीथेनात्ययामे’ति कृत्स्नमुद्गीथं प्रस्तुत्य ‘अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेती’त्यादिना कृत्स्नोद्गीथविषयमुच्यते, तेन प्रकरणभेदे विषयभेदाभ्यामुपासनभेदः प्रमीयत इति तथेत्यर्थः । न च नैर्बल्यमधिकारस्य, प्रकरणान्तःपातित्वेन समाख्यापेक्षया प्रबलत्वात् । एवं पूर्वसूत्रद्वितीयवर्णकेनानेन सूत्रेण चेत्येवं सूत्रद्वयेन समाचारसूत्रे याधिकारस्योपसंहारनियामकतोक्ता सा प्रपञ्चिता । पूर्वसूत्राभ्यामपि तदुपयोग्येवोक्तमिति । चतुःसूत्री तस्यैव शेष इति बोधितम् ॥ २ ॥

अतः परमधिकरणान्तरेण पुनर्धर्मानेव विचारयतीत्याशयेन सूत्रं पठन्ति **व्यासेरित्यादि** । ननु विरुद्धगुणाशङ्कितमब्रह्मत्वं पूर्वं परिहृतमेवेति किमनेनाधिकरणेन विचार्यत इत्याकाङ्क्षायां तद्विषयादिकमाहुः **बाल्येति**, **तथा सतीति**, प्राकृतत्व इति । **तत्रोक्तमिति**, श्रुत्युक्तम् । **सर्वमिति**, उपास्यरूपेषु साधितब्रह्मत्वं तत्त्वेनोपासनादिश्रुतिविरोधपरिहारश्चेत्यर्थः । सिद्धान्तग्रन्थस्तु निगदव्याख्यातः । **क्रमेणेत्यादि** । सर्वरसश्रुत्याक्षेपलभ्येन क्रमेण ‘तस्यैष आत्मा विवृणुते तनूं

स्था'मिति श्रुतिलभ्येन वृतेष्वावरणात्मकयोगमायापसारणेन तथात्वात्सर्वमवस्थाप्रतीत्यादिकमुपपन्नमाक्षेपलभ्यत्वाच्छ्रौतमिति ब्रह्मणस्तादृशत्वान्न काप्यसामञ्जस्यमिति भावः ।

अन्ये तु । अन्यथात्वादिसूत्रत्रयात्मकमधिकरणान्तरं कल्पयन्ति । तत्रोद्गीथविद्यां विषयीकृत्यान्यथात्वसूत्रे मुख्यप्राणस्योपास्यत्वाङ्गीकारेणैक्यप्रतिज्ञासाधकहेतुना विद्यैक्यं पूर्वपक्षीकृत्य नवेत्यादिसूत्राभ्यामुद्गीथावयवप्रणवकृत्स्नोद्गीथयोर्वेद्ययोर्भिन्नत्वं संज्ञायाः साधारणत्वं च प्रदर्श्य, विद्याभेदं सिद्धान्तयन्ति । ततो व्याप्तिसूत्रेप्यधिकरणान्तरम् । 'तत्रोमित्येतदक्षरमुद्गीथमुपासीते'ति सामानाधिकरण्ये प्रतीयमानेऽध्यासापवादैकत्वविशेषपक्षाः सम्भवन्ति । तत्राध्यासपक्षे लक्षणाप्रसङ्गादपवादपक्षे फलाभावप्रसङ्गात्पर्यायताविरहेणैकत्वस्याप्यभावात्परिशिष्टो विशेषणपक्षः सिद्ध्यति । व्यावर्तकं हि विशेषणं यथा नीलं यदुत्पलं तदानयेति, तथोद्गीथो य ॐकारस्तमुपासीतेति सर्ववेदव्यापिन ॐकारस्य ग्रहणप्रसङ्गे उद्गातृविषयस्य समर्पणमिति । तत्र भेदस्योच्चारणगतत्वेनोत्पलानामिवौङ्कारस्य नानात्वाभावात्प्रत्यनुवाकर्गुपक्रमसमाप्त्यादिष्विव सामभक्तावुद्गीथावयवत्वेनापि सर्ववेदव्यापिनस्तस्यैव सत्वादुद्गीथपदेन कस्य व्यावृत्तिरिति निर्वचनाशक्त्या सामञ्जस्यासम्भवात्सूत्रविरोधः स्फुटति । एतदपेक्षया ये सूत्रचतुष्टयात्मकमधिकरणं वदन्तोऽनेनापि विद्यानानात्वं साधयन्ति, त एव युक्तं वदन्ति ।

प्रकृतमनुसरामः । एवमवस्थास्वरूपनिरूपणेनासामञ्जस्यं परिहृत्य तासां तथा स्वरूपाङ्गीकारे प्राप्तदोषस्य परिहारायोत्तरं पठन्तीत्याशयेनाहुः **नन्वित्यादि** । **तत्तद्भक्तविशिष्टा** इति, तत्तद्भावक्रीडोपयोगिभक्तविशिष्टाः । **श्रूयत** इति । कृष्णोपनिषदि देवप्रार्थितदानोत्तरं 'यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनी'त्यादिना श्रीनन्दादिवृन्दापर्यन्तानां स्वरूपश्रावणात् 'सोऽवतीर्णो महीतले', 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति तैः सह क्रीडाश्रावणाच्च तथेत्यर्थः । तथा सति यो दोषस्तमाहुः **तथा चेत्यादि** । **नित्यत्वेनेति**, ब्रह्मधर्मत्वाविशेषान्नित्यत्वेन । **एवं सतीति**, पूर्वलीलाभक्तयोर्नित्यत्वेन तल्लीलावैशिष्ट्यस्यापि नित्यत्वे सति । **भिन्नत्वं स्यादिति**, एकस्यैकदाऽनेकलीलासम्बन्धस्याशक्यवचनत्वात्तथात्वं स्यात् । **अनुभवेत्यादि**, अनुभवो लीलास्थानाम्, तदावेदकमानमुक्तश्रुतिः । **भिन्नत्वं** तदुभयविरुद्धम्, तथा च लीलानित्यत्वे भक्तभेदप्रसङ्गो भक्ताभेदे च लीलानित्यत्वभङ्ग इत्युभयतःपाशारज्जुरित्यर्थः । एतत्परिहाराय सूत्रं पठित्वा व्याचक्षते **लीलेत्यादि** । **ब्रह्मणा सहाभेदादिति**, 'तस्मान्न भिन्ना एतास्ता आभिर्भिन्नो न वै प्रभु'रिति कृष्णोपनिषन्मन्त्रे अभेदश्रावणात्तथेत्यर्थः । नन्वस्तु ब्रह्माभेदो भक्तस्वरूपस्य, परं लीलायाः कथं नित्यत्वसिद्धिरित्याकाङ्क्षायां तदर्थमभेदप्रकारं व्याकुर्वन्ति **अत्रेत्यादि** । तत्तादात्म्यं रसस्येति, अनेन प्रपञ्चस्य यद्ब्रह्मतादात्म्यं तस्मादिदं विलक्षणमिति बोधितम् । तथा च सच्चिदानन्दात्मकमपि ब्रह्म यदा भक्तहृदयेष्वाविर्भवति, तदा स्वस्य रसत्वं रसशास्त्रोक्तप्रनाड्या प्रकटयतीति श्रुत्युक्तलीलाप्रकारान्यथानुपपत्त्याऽवसीयते, सोप्याविर्भावप्रकारस्तेन प्रकारेण मायापसारणहेतुक इति ते स्वज्ञानानुसारेण तत्तत्कालिकत्वं लीलानां मन्यन्त इति न लीलास्वरूपनित्यत्वभङ्गः । इयं कल्पना श्रुतार्थापत्तिसिद्धेति सर्वाभेदो निःप्रत्यूहः लीलानित्यभङ्गात्मकविघ्नरहित इत्यर्थः । करुणादीनां त्वनुक्रियमाणानामेव रसत्वमिति न काप्यनुपपत्तिः । अत्र किंचिदाशङ्क्य परिहरन्ति **नन्वित्यादि** । **सामंजस्यादित्यन्तम्** । **प्रादुर्भाव** इति, विचार्यमाण इति शेषः । प्रकटार्थमन्यत् ।

अभेदे प्राप्तस्य दोषस्य परिहारायाग्रिमं सूत्रमित्याशयेनाहुः **नन्वित्यादि** । **नियमादिति**, अयं नियम आकाशपरिमाणे आत्मचेतनायां च स्फुटः ॥ ३ ॥

एवं त्रिसूत्र्या भक्तिप्रकरणीया ब्रह्मधर्मा विचारिताः । अतः परमुपासनामार्गे भक्तिमार्गे च तदुपसंहारानुपसंहारौ चिन्तयतीत्याशयेन सूत्रं पठन्ति ।

प्रियेत्यादि । प्रमेयपरस्य प्रमाणमनुसृत्य भक्तिमार्गे प्रवृत्तस्य प्रियशिरस्त्वादयो भावनीया न वेति संशयं हृदिकृत्य तन्निवृत्तये पूर्वपक्षं परिहरतीत्याशयेनाहुः **नन्वित्यादि** । **अत्रापीति**, भक्तिमार्गे । **चित्तशुद्धीत्यादि** । अत्र सूत्रार्थ एवं व्याकृतो बोध्यः । **भेदे**, चित्तशुद्धितारतम्ये सति, हि यस्माद्धेतोः उपचयापचयौ प्रमोदमोदरूपावानन्दोपचयापचयौ स्वबुद्ध्या भासेते इति शेषः । न तु तारतम्याभावे, अतः प्रियशिरस्त्वाद्यप्राप्तिस्तदनुपसंहार इति । यद्वा, यतो भेदे ब्रह्मणः सकाशाद्भेदे तौ लीलास्थानां तु ब्रह्माभेदस्य पूर्वमुक्तत्वाच्चित्ते तारतम्याभावेन नोपचयापचयभानं सम्भवतीति तदनुसारिणः स्वरूपपरस्य न तदुपसंहार इत्यर्थः । अस्मिन् वर्णके उपासनामार्गीयनिर्णयो नोक्त इति, वक्ष्यमाणां शङ्का चैवं नापैतीति मनसिकृत्य पक्षान्तरमाहुः **अथवेत्यादि** । **अयुक्तत्वादिति**, लिङ्गस्य नियामकत्वेनायुक्तत्वात् । **तद्रूपस्येति** । पक्षिरूपस्य । **पुरुषरूप इति**, अथर्वणोपनिषदुक्तपुरुषरूपः । **तथात्व इति**, आनन्दमयत्वे । **देशभेदेनेति**, दक्षिणोत्तरपार्श्वस्थत्वेन । **पक्षेपीति**, अपिः समुच्चयार्थः । **तत्रेति** । ब्रह्मणि । **न त्ववुक्तरूपत्वमिति**, नोपचयापचयरूपत्वम् । **निरूपितमिति**, 'पुरश्चक्र' इति श्रुतिविचारे निरूपितम् । तथा च तत्रालौकिकशरीरे भक्तानां देहादिस्थित्यर्थमन्नमयादिरूपस्तत्र तत्र प्रविशतीत्युक्तम्, तेन जीवे पक्षिरूपेण प्रविशतोऽवयवा भिन्ना एव, ते जीवस्य यथाधिकारं प्रियादिरूपेण भासन्ते, न तु तेषां तथात्वं नित्यत्वादतो दोषाभावादुपासनामार्गेऽत उपसंहार्याः, भक्तिमार्गे तद्भानाभावात्तन्मार्गीयैर्नोपसंहार्या इति पूर्वोक्ताधिकारनियता वर्णकद्वयसिद्धा व्यवस्था । यत्तु, कोशधर्मानेतान्ब्रह्मधर्मत्वेन परिकल्प्य न्यायमात्रमाचार्येण दर्शितमिति वदन्ति, तदप्येतेन परास्तं ज्ञेयम् । आनन्दमयाधिकरणे तत्प्रपञ्चनाच्च । पौनरुक्त्यपरिहारायाहुः **यद्यपीत्यादि** । **इयमिति**, अब्रह्मधर्मत्वविषयिणी ।

अत्र वर्णकद्वयेन या व्यवस्थोक्ता, सैवाग्रे सूत्रत्रयेण दृढीक्रियत इत्याशयेन पूर्वत्र हेतुं विवरीतुं सूत्रमवतारयन्ति **नन्वित्यादि** । सूत्रयोजना तु पूर्वसूत्रस्थाप्राप्तिशब्दात् नञमपसार्य धातुं कृत्यप्रत्ययान्तं कृत्वा प्राप्यपदेन कार्या । तस्यैवार्थ उपसंहार्या इति । नन्वयमर्थ उपसंहारसूत्र एव सिद्ध इति पुनः किमित्युच्यत इत्याकाङ्क्षायां कञ्चिद्विशेषमाहुः **तत्रेत्यादि** । तथा चाविरोधबोधनाय पुनः प्रपञ्च इत्यपुनरुक्तिरित्यर्थः । अनेन सूत्रेण ब्रह्मत्वेनोपासने लिङ्गं न नियामकमिति निगमितम् ।

उत्तरत्र हेतुं विवरीतुमग्रिमसूत्रमवतारयन्ति **अथेत्यादि** । सूत्रयोजना तु इतरपदाप्राप्यपदानुषङ्गेन बोध्या । ननु प्रयोजनाभावेप्यधिकस्याधिकं फलमिति तदुपसंहारे को दोष इत्यत आहुः **अन्येषामनुपसंहार इत्यादि** । **अविवक्षितत्वादिति** । तथा चाविवक्षितसङ्ग्रह एव दोष इत्यर्थः । **तत्रेति**, अविवक्षितत्वे । तथा 'चानन्द आत्मे'त्यात्मशब्दो मध्यं वदन्नथानन्दपदसामानाधिकरण्यात्प्रियादीनां स्वरूपमेव संगृह्णाति, न त्वाकारमपीति पक्षादयो न विवक्षिता इत्यर्थः । नन्वाकारपूरणार्थः पठित आत्मशब्द आकारे तात्पर्यरहित इत्यत्र किं मानम्, तथात्वे वा तन्निरूपणस्य किं प्रयोजनमतमाहुः **अग्र इत्यादि** । तथा चोक्तानन्दमयविवरणे तस्य रसात्मकत्वश्रावणेन च तथावगम्यत इत्यर्थः । तेन सिद्धमन्यत्फलद्वयमाहुः **एतेनेत्यादि** ज्ञेयमित्येतेन । केचित्तु द्विसूत्रमाध्यानाधिकर(णं)भिन्नं परिकल्प्य, 'इन्द्रियेभ्यः परा ह्यर्था' इत्यादि 'सा काष्ठा सा परा गति'रित्यन्ते विषयवाक्येऽर्थादीनां ततस्ततः परत्वप्रतिपादने प्रयोजनाऽसा काष्ठेत्यादिना पुरुषविषयका-

दरप्रदर्शनाच्च तस्यैव परत्वं प्रतिपाद्यत इति सिद्धान्तयित्वा, आध्यानशब्द आध्यानपूर्वकसम्यग्दर्शनार्थत्वेन विवृतः । तन्न । आध्यानपदे लक्षणापेक्षया विषयवाक्यान्तरोपन्यासस्यैव ज्यायस्त्वात् । अस्मिन्सूत्रे साध्यानिर्देशेन प्रियशिरस्त्वाधिकरणशेषत्वस्य स्फुटत्वात् । विषयवाक्येप्यर्थादौ परत्वप्रतिपादनस्य तद्बलिष्ठताबोधनार्थत्वेन सप्रयोजनकत्वात् । अन्यथा तत्त्यागनिग्रहाद्यनास्थाया'मिन्द्रियैर्विषयाकृष्टै'रिति स्मृत्युक्तप्रणाड्या तैः प्रबलानर्थप्रसङ्गात् । ज्ञाते तु तत्तन्नियामकतया तत्तत्परत्वे तत्त्यागनिग्रहादिभिः पुरुषनिष्ठपरत्वप्रतिपत्तिसौकर्यमिति तदर्थमिदं नानावाक्यघटितं महावाक्यं तत्तत्परत्वप्रतिपादनपूर्वकपुरुषपरत्वप्रतिपादनपरं तद्विरोधाच्चेति दिक् ॥ ४ ॥

एवं चतुःसूत्रेणानेनाधिकरणेनोपसंहारो व्यवस्थापितः । अतः परं तत्प्रसङ्गेनानन्दमयाधिकरणशेषमेव चिन्तयतीत्याशयेन सूत्रं पठित्वाधिकरणं रचयन्ति **आत्मेत्यादि** । **तथा सतीति**, एष इत्यनेन पूर्वस्यान्नमयस्यात्मा परामृश्यते, ह्यभिमानी च लोके जीवो दृश्यत इति जीवत्वे सतीत्यर्थः । ननु तस्मिन्प्रकरणे शारीर आत्मेतिवदन्तर आत्मेत्यप्यात्मग्रहणमस्तीति कथमस्यैव ग्रहणं विनिगम्यत इत्यतः पक्षान्तरमाहुः **अथवेत्यादि** । **य इति**, प्राणमयादिः । तथा च तयापि अन्तरात्मत्वमानन्दमय एव समाप्यते, तेन निर्व्याज आत्मा स एवेति 'शारीर आत्मे'त्यत्रापि स एव परामृश्यत इति मास्तु विनिगमना, तथापि नोक्तार्थव्याहतिरित्यर्थः । अग्रिमसूत्रार्थस्तु स्फुट एव ॥ ५ ॥

एतस्यैव दार्ढ्यायाग्रिमं पठतीत्याशयेन सूत्रं पठित्वाधिकरणमारचयन्ति **कार्येति** । **पूर्वोक्त इति**, अन्नजन्यः । **पूर्वस्येत्यादि** । अयमर्थः । अन्नमयश्लोके अन्नस्य ब्रह्मत्वेनोपासनाय यदि ब्रह्मधर्माः स्तुत्यर्थमुच्येरंस्तदा 'अन्नाद्वा' इत्यादिना पूर्वमुक्त्वा ततः 'सर्वं वै तेन्नमाप्नुवन्ति येन्नं ब्रह्मोपासत' इति सफलमुपासनमात्रं वदेन्न तु पुनरपि 'अन्नꣳ हि भूतानां ज्येष्ठ'मित्यादिना भूतजनकत्ववर्द्धकाभ्यां धर्माभ्यां भूतव्याप्तिबाधकमतति सततं व्याप्नोतीत्यन्नमिति निर्वचनं सूचयेन्ना'प्यद्यते च भूतानि तस्मादन्नं तदुच्यत' इति च निरुच्यात्, प्रयोजनाभावात्, उपासनायाः पूर्वस्तुत्यैव सिद्धेः । एवं सत्यपि यदेवं निर्वक्ति, तेन कार्यरूपादन्नादेतं व्यवच्छिनत्ति, प्रपाठकान्तरेपि तस्मिन्ब्रह्मत्वविज्ञानं ब्रह्मात्मकतपोरूपसाधनेन वक्ति, न तु यथाकथञ्चित्, तेनान्नस्य पूर्वविलक्षणत्वमवश्यं वक्तव्यम्, 'विश्वभृद्वैनामैषा तनूर्भगवतो विष्णोर्यदिदमन्न'मिति 'स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं चे'ति श्रुत्यन्तरे भगवत्तनुत्वव्यापकत्वादिश्रावणाच्च, एवं सिद्धे वैलक्षण्ये 'स वा एष पुरुषोन्नरसमय' इत्यत्र तदेतच्छब्दाभ्यां वक्ष्यमाणपरामर्श एव युक्तो न प्रकृतस्य निरुक्तलिङ्गाभ्यासादिविरोधात् । तदेतदुक्तम् । **न वा तदपीत्यादि** । **एवमेवेति** । तपोरूपसाधनस्येत्यर्थः । तेन सिद्धमाहुः **अत एवेत्यादि** । कार्यपुरुषवैलक्षण्येनाध्यात्मिकत्वादेवेत्यर्थः । एवं पूर्वाधिकरणेनानेन वर्णकेन चानन्दमयविद्यायामात्मपदं परब्रह्मपरमित्यापाततो मायावादिनो निरासायान्नमयादिपुरुषास्तद्विभूतय इति तेषां विभूतिरूपेणोपासनाय च तद्विद्याशेषो विचारितः । अस्मिन् पक्ष एकसूत्रमेवेदमधिकरणम् । अतःपरमुपासनबोधके श्रुत्यन्तरेप्यात्मशब्दः परब्रह्मपर एवेति बोधयितुं प्रकारान्तरेणैतद्व्याकुर्वन्ति **अथवेत्यादि** । **वाजसनेयिशाखायामिति**, तस्यां बृहदारण्यके पुरुषविधब्राह्मणे । **अन्यत्रेति**, मैत्रेयीब्राह्मणे । **अपूर्वमिति**, पुत्राद्यभिमानिदशायां वेद्यात्प्रतीचो भिन्नम् । तदेव विवृण्वन्ति **पूर्वं त्वित्यादिना** । ननु प्राणनादिकथनात्प्रत्यगात्मातिरिक्त आत्मा कथं निश्चेय इत्यत आहुः **लोके हीत्यादि** । **अत एवेति**, जीवभिन्नत्वादेव । लिङ्गान्तरमाहुः **अत एवेति** । जीवभिन्नत्वेनेश्वरत्वादेव । **एतेनेति**, प्राणनादिकार्याख्यानेनेश्वरो हि तथा स्यादिति तत्तद्रूपताख्यानेन चेत्यर्थः । अधिकरणप्रयोजनमाहुः **तेनेत्यादि** । **उपसंहर्तव्या इति**, अवतीर्णे स्वरूपेऽनुसन्धेया इत्यर्थः । अग्रिमसूत्रस्यैतच्छेषत्वं बोध-

यितुमवतारयन्ति **नन्वित्यादि** । तथा च तरुकुसुमयोरिव स्वगतद्वैतमापततीति तत्परिहारायोत्तरं पठतीत्यर्थः । ननु भिन्नप्रकारकप्रतीतौ विद्यमानायां कथमभेदसिद्धिरित्यत आहुः **अत्रेत्यादि** । **स** इति, औपनिषदः पुरुषः । **स चेति**, व्यवहारश्च । न च तस्य व्यवहारस्याप्रामाणिकत्वं शक्यशङ्कम्। वरणकृतस्वतनुविवरणैकसाध्यत्वात् । पूर्वपादे 'प्रकाशवच्चावैयर्थ्या'दित्यादिसूत्रद्वये तदुपपादनात् । तदेतत् हृदिकृत्याहुः **एवं सतीत्यादि** । अत्र लौकिकयुक्तेः कौण्ठ्यमेव श्रुत्याशयगोचर इत्याशयेनाहुः **एवंविध** इत्यादि । सिद्धमाहुः **एतेनेति**, ईश्वरस्य तथात्वश्रावणेनेत्यर्थः । इमामेव श्रुतिं हृदि (कृत्य) प्रकारान्तरेण सूत्रं योजयन्ति **एवं सत्याविरित्यादि** । अस्यां श्रुतावुक्तस्येश्वरत्वस्य साहजिकत्वेन तादृगाकारस्य सार्वदिकत्वे सति तथेत्यर्थः । अत्र च 'विश्वतश्चक्षु'रित्यादिश्रुतयोऽनुसन्धेयाः । पूर्वं चोप्यर्थे उक्त इत्यस्मिन्पक्षेऽर्थान्तरमाहुः **चकार** इत्यादि । **साक्षादाविर्भूत** इति । सत्वाद्यधिष्ठानमनपेक्षस्वरूपेणाविर्भूत इत्यर्थः ॥ ६ ॥

एवमवतारोपासनादौ गुणोपसंहारं विचार्यावेशे तं विचारयतीत्याशयेनाग्रिमाधिकरणमवतारयन्ति **अथेत्यादि** । श्वेताश्वतरोपनिषदि 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ, तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इति गुरुभक्तेर्देवभक्तिवदतिदिष्टत्वात्, 'योन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ती'ति स्मृतावाचार्यचैत्यस्य वपुष्ट्वकथनेन तत्र भगवदावेशस्योक्तत्वात् लोकोद्दिधीर्षया तत्राविशति, तथा गोपालतापनीये मथुरासमीपस्थवनस्थिता द्वादशमूर्तीरुक्त्वा 'ता हि ये यजन्ति ते मृत्युं तरन्ति मुक्तिं लभन्त' इत्यादिफलमुक्त्वाऽग्रे 'मथुरामण्डले यस्तु जम्बूद्वीपे स्थितोपि वा, योर्चयेत्प्रतिमां मां च स मे प्रियतरो भुवि, तस्यामधिष्ठितः कृष्णरूपः पूज्यस्त्वया सदे'त्यादिभिः प्रतिमां लक्षीकृत्य स्वपूजनं सर्वेषामुक्तम्, प्रतिमायामधिष्ठानकथनेन स्वावेशश्चोक्तः । तदेतदुक्तं 'कार्यचिकीर्षया जीवे स्वयमाविशतीति जीव इत्युपलक्षणम्' । **विकल्पेनेति**, मार्गभेदव्यवस्थितविकल्पेनेत्यर्थः। प्रतिमासङ्ग्रहार्थमाहुः **तत्त्वेन व्यपदेशादिति** । **अत्रैवं ज्ञेयमिति**, उपासनामार्गे व्यवस्थितस्य पक्षस्य बीजं वक्ष्यमाणप्रकाराभ्यां बोध्यमित्यर्थः । प्रकारद्वयेप्यभिसन्धिमात्रं नोपसंहारप्रयोजकं किन्त्वावेश इत्याहुः **तत्रेत्यादि** । न च गुरौ भक्तिरेवोक्ता न तूपासनेति तद्व्यवस्था न सङ्गतेति शङ्क्यम् । तैत्तिरीये 'वेदमनूच्याचार्योन्तवासिनमनुशास्ती'त्युपक्रम्य 'यान्यस्माक॰ सुचरितानि, तानि त्वयोपास्यानी'ति गुरुसुचरितोपासनस्योक्तत्वात्, न चोपासनपदं कर्तव्यार्थकम् । 'यान्यनवद्यानि कर्माणि, तानि सेवितव्यानी'ति पूर्वमुक्तत्वात्तेनैव सिद्धेः। 'एवं गुरूपासनयांशितेने'त्येकादशस्कन्धे स्मरणाच्चेति दिक् । निषेधपक्षो भक्तिमार्गीय इति बोधयितुं द्वितीयसूत्रमवतारयन्ति **यस्त्वित्यादि**। **भक्तिमार्गीय** इति, प्रेमोत्कर्षात्तथेत्यर्थः । नन्वेवं तस्य विस्मृतभगवत्कत्वे उपसंहारप्राप्तेरेवाभावान्निषेधार्थस्य नञोसङ्गतिरित्यत आहुः **भगवदवतारेत्यादि**। तथा च प्रियशिरस्त्वसूत्रे या अप्राप्तिरुक्ता, तामत्रान्यधर्मविषयिणीमनुवदतीति नासङ्गतिर्नञ इत्यर्थः । अयमेवाशय इत्यत्र गमकं वदन्त उत्तरसूत्रमवतारयन्ति **अपि चेत्यादि** ॥

तृतीयसूत्रमवतारयन्ति **नन्वित्यादि** । **तत्सम्भारकस्येति**, वीर्यसम्भारकत्वस्य। **उपसंहारं करिष्यतीति**, 'तं यथा यथोपासत' इति श्रुतौ स्वाभिसंहितरूपेणैवावनस्योक्तत्वात्स्वैहिकपारलौकिकार्थमुपसंहारं करिष्यतीत्यर्थः । **तत्रैवोक्तमिति**, भजनरसास्वादने एतदपेक्षया विशेषादिति पूर्वसूत्र एवोक्तमित्यर्थः । अयमेव सूत्रकाराशय इत्यत्र गमकमाहुः **विषयेत्यादि** । तथा च विनाप्युपसंहारं तल्लौकिकालौकिकसम्पादनादलौकिकानुभावप्रदर्शनाच्च नोपसंहारशङ्कात्रेति पूर्ववदत्रापि भक्तस्वभावस्ये-

वानुवादः । श्रुतेरनारम्याधीतत्वेन भक्तहृद्याविष्टभगवद्धर्मकत्वाभावात्पूर्वोक्तो व्यासाशयो न निश्चेतुं शक्यत इति विषयवाक्यं तात्पर्यकथनपूर्वकं तमुद्घाटयन्ति अन्यथेत्यादि । तथा च तुरीयपादेनाविर्भूतब्रह्मविषयकत्वे श्रुतेर्निश्चिते यद्द्वयोरेवानुपसंहारकथनं तेन तथेत्यर्थः ॥ ७ ॥

एवमनारम्याधीतानां धर्माणां भक्तिमार्गेऽनुपसंहारमुक्त्वा उत्तमाधिकारिभिरशेषगुणपूर्णं पर ब्रह्मैवोपास्यं न तु विभूतिरूपमिति बोधयितुमुपासनामार्गेपि विशेषेनुपसंहारं वदतीत्याशयेन सूत्रं पठित्वाधिकरणं रचयन्ति पुरुषेत्यादि । अत्र हीति, पुरुषविद्यायाम् । अनेकत्वोपलक्षणतात्पर्यमाहुः तेनेनेत्यादि । तत्रेति, अन्नमयाद्युपासनाप्रकरणे । स इति, अन्नमयादिः । वैलक्षण्यान्तरमाहुः किञ्चेत्यादि । तथात्वेनेति, मूलभूतब्रह्मत्वेन । एतदधिकरणसिद्धमर्थमाहुः तेनेनेत्यादि । एतेनेदं बोधितं व्यासचरणानां परब्रह्मपरत्वभवन एव तात्पर्यादस्माभिरेवमधिकरणानि व्याख्यायन्ते । उत्तमाधिकारिणां तावतैवार्थसिद्धेः । इतरैस्तु साधारणाधिकारिणामर्थे उच्यन्ते । न हि शत्रुजयः षोडशवर्षशतजीवनं श्रीकीर्त्यादिकमुत्तमस्याभिलषितं भवति । तेन नात्र (चोद्य)चोद्यावसर इति ॥ ८ ॥

अग्रिमाधिकरणमवतारयन्ति अथेत्यादि । कुतो न वाच्यमित्यत आहुः न हीत्यादि । उपासनार्थमितरेषां पाप्मवेधः समुच्च्यत उतासमुच्च्यते, यद्याद्यः पक्षस्तदा न संशयापायः । यदि द्वितीयस्तदोक्तदोषापत्तिरित्यर्थः । नन्वर्थवादाधिकरणे विधेयस्तावकत्वेनार्थवादानां प्रामाण्यं पूर्वतन्त्रे व्यवस्थापितम्, 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्यु'रिति, एवं च यथाकथञ्चन स्तुत्याप्युपासनरुचिसिद्धेर्नाप्रामाण्यमिति चेत्तत्राहुः एकत्रेत्यादि । स्तुत्यंशे असन्तमर्थं वदतीति निश्चिनुयात्तदा विचारकस्य विध्यंशेपि तथात्वसन्देहोद्भवे तत्र प्रवृत्तिव्याघातेन विधेः प्रवर्तकत्वसिद्धान्तो व्याहन्येत, वैयर्थ्यं च वेदस्य स्यात्, न च मध्वादिविद्यासु कल्पनोपदेशस्य व्यासपादैरङ्गीकारादत्रापि तथास्त्विति वाच्यम् । भूतार्थकप्रयोगविरोधापत्तेः । मध्वादिविद्यास्वपि 'तस्य द्यौरेव तिरश्चीनवꣳशोन्तरिक्षमपूर्वम्' इत्याद्युद्देश्यं रूपविशिष्टस्यैव रूपान्तरविधानदर्शनेन तावन्मात्रस्यैव काल्पनिकत्वात् । अन्यथा तत्रापि 'ता एता ऋच एतमृग्वेदमभ्यतप'न्नित्यादिबाधापत्तेः । न चार्थवादेषु सर्वत्र यथाश्रुतार्थग्रहण 'आदित्यो यूपः यजमानः प्रस्तरः । गो अश्वा एव पशवोऽन्ये त्वपशव' इत्यादिगौणीव्युच्छेद इति वाच्यम् । तत्र प्रत्यक्षविरोधेन गौणीस्वीकारात्तदनुच्छेदात् । असति प्रमाणान्तरविरोधे तद्दृष्टान्तेनान्यत्र तथा वक्तुमशक्यत्वात्, तथासति 'प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती'त्यादावार्थवादिकफलस्याप्यनङ्गीकारापत्तेः । तस्माद्यत्र प्रमाणान्तरविरोधस्तत्रैव कल्पनोपदेशसिद्धिः, नान्यत्रेति निश्चयः । तदेतद्धृदिकृत्वाहुः साक्षादित्यादि । पूर्वतन्त्रविचारेणैवं परम्पराक्रियार्थत्वमुक्त्वा उत्तरकाण्डविचारेण साक्षात्क्रियार्थत्वमेवेत्याहुः वस्तुत इत्यादि । य एवं वेदेति । वाक्यैरिति, 'एतद्वै छन्दसां वीर्यमाश्रावयास्तु श्रौषड्यज ये यजामहे वषट्कारो य एवं वेद स वीर्यैरेव छन्दोभिरर्चति, इन्द्रस्य वा एषा यज्ञिया तनूर्यद्यज्ञस्तामेव तद्यजन्ति य एवं वेदोपैनं यज्ञो नमती'त्या(दि)जातीयैर्ज्ञानफलबोधकवाक्यैरित्यर्थः । तमेवेति हेतुमेव । तर्ह्यासन्यस्य कथं ब्रह्माभेद इत्यत आहुः आसन्यस्त्वित्यादि । अर्थशब्दस्यार्थान्तरग्रहणेप्ययमर्थः सिध्यतीत्याशयेन पक्षान्तरमाहुः अथवेत्यादि । वक्ष्यमाणैरिति, उपासत्वादिलिङ्गैः ॥ ९ ॥

अग्रिमाधिकरणमवतारयन्ति एवमित्यादि । तत्रेति, भगवत्सम्बन्धे । पठ्यत इति, मुण्डके पठ्यते । एतत्पूर्वार्द्धं तु 'यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनि'मिति । इति योजनेति, अनेन परममुत्कृष्टं साम्यं समत्वमद्वैतलक्षणं उपैति अवगच्छतीति योजना निरस्ता । अद्वैतस्य वैषम्याभावरूपत्वेन लक्षणाप्रासात्, साम्यस्य द्वयधर्मत्वेन तदभावरूपतायां श्रुतिविरोधप्रसङ्गाच्च

तदपेक्षया पदावृत्त्यार्थान्तरग्रहणस्यैवौचित्यात् । हानाविति । सूत्रे तुशब्देन श्रुत्यन्तरे समाभ्यधिकनिषेधादत्र साम्यपदं लक्षणयाऽद्वैतपरमितिपक्षो निरस्यते, तथा चेह साम्यशब्दो नाद्वैतपरः, किन्तु हानौ ओहाक् त्यागे । ब्रह्मणा सृष्टीच्छया स्वरूपात्यागे विभागस्य पूर्वस्थितित्यागात्मकत्वादविभागे इति यावत्, तस्यां सत्यां ये धर्मास्तिरोहितास्ते परमोपायने आविर्भूतास्तत्प्रयुक्तसाम्यपरः । तत्र हेतुः उपायनेत्यादि । दृष्टान्तः कुशेत्यादि । 'कुशाछन्दःस्तुत्युपगानवत्' प्रस्तोतृस्थापितकुशाछन्दःस्तुत्युपगानसाधनभकारवदिति योजना । हानिशब्देनोच्यत इति, त्यागात्मकत्वात्क्षयात्मकत्वाद्वोच्यत इत्यर्थः । तद्वैवेति, ब्रह्मसम्बन्ध एव । अत्राभेदबोधनादिति । जीवे ब्रह्माभेदबोधनात् । तदुक्तपदसूचितमर्थान्तरमाहुः अपि चेत्यादि । ब्रह्मधर्मवदिति, अत्र तत्सूचनवदित्यर्थः । उपसंहारप्रकरणे धर्मसाम्यविचारस्यासङ्गतत्वान्नायमधिकरणार्थ इत्याशङ्कायामाहुः यथेत्यादि । तथा चोपसंहारसादृश्यात्प्रासङ्गिकमेतन्निरूपणम्, फलविचारे उपयोक्ष्यमाणत्वाच्च प्रसङ्ग इत्ययमेवाधिकरणार्थ इत्यर्थः । यत्तु उपायनशब्दस्य हानशब्दशेषत्वं कैश्चिद्व्याख्यातम् । तच्चिन्त्यम् । आथर्वणिकश्रुतोपायनशब्दस्य फलबोधकत्वेन हानशेषत्वाभावेन, तस्य विषयवाक्यत्वाभावप्रसञ्जकत्वात् । 'तदा विद्वान् पुण्यपापे विधूये'त्येतावन्मात्रस्यैव विषयवाक्यत्वेप्याथर्वणताण्डिकौषीतकिश्रुतिषु कम्पनार्थकविधूननशब्देन हान्यर्थालाभात्तस्य हानशेषतायाः क्लिष्टत्वात् । यदप्यस्योपायनवादस्य स्तुत्यर्थत्वादन्यदीयपुण्यपापयोः कथमन्यत्र प्राप्तिरित्यत्र नाभिनिवेशः कार्य इत्युक्तम् । तदपि न रोचिष्णु । 'राज्ञि चामात्यजा दोषाः पत्नीदोषाश्च भर्तरी'त्यादिस्मृतावभिमानमात्रेण दोषसंक्रमकथनात्, भारतादौ यमस्य माण्डव्यशापप्रसङ्गे बालकृतपापस्य जनकत्वोपाधिना पितृसंक्रान्तिस्मरणाद्विश्वामित्रपुण्येन त्रिशङ्कोः स्वर्गप्राप्तिस्मरणाच्चात्रापि तथा सम्भवेन स्तुतिमात्रत्वाङ्गीकारस्याप्रयोजकत्वात् । 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे, ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे'त्यादिश्रुतिस्मृतिभिर्ज्ञानस्य कर्मनाशकत्ववद्विद्याविशेषस्यान्यत्र कर्मसंक्रामकत्वेपि बाधकाभावात् । ननु सुकृतदुष्कृतयोः कर्तृसामानाधिकरण्यस्यैव सर्वत्र दर्शनात्साक्षादन्यस्मिन् सम्भवो न शक्यवचन इति चेत् । न । 'राज्ञि चामात्ये'त्याद्युक्तस्मृतिविरोधापरिहारात् । न च तत्र न साक्षात्संक्रमोऽपि तु फलस्य तत्र सम्बन्धात्तत्र तदुपचर्यत इति वाच्यम् । हेतुव्यधिकरणस्य फलस्यैवाशक्यवचनत्वात् । वाक्यबलात्तु सुकृतदुःकृताङ्गीकारस्यापि शक्यकल्पनत्वात् । न च तत्राद्रव्यत्वं बाधकमिति वाच्यम् । गन्धवदुपपत्तेः । अवयवगमनस्य युक्तिविरुद्धत्वात् । सूत्रकृताप्यनङ्गीकाराच्च । तस्मात्पूर्वोक्त एव प्रकारः साधीयानिति दिक् ॥ १० ॥

प्रसङ्गाद्भक्तिपूर्वदशां विचारयतीत्याशयेन सूत्रं पठन्ति सम्पराय इत्यादि । साम्पराय इति पाठे स्वार्थेण् बोध्यः । ननु सम्परायशब्दः परलोकवाचकत्वेन प्रसिद्धस्तत्कथं भक्तिपूर्वदशाविचारोत्रेतीत्याशङ्कायां सूत्रे तर्तव्याभावपदात्तथेति हृदिकृत्य तर्तव्यलिङ्ग विषयवाक्यमुपन्यस्यन्ति वाजेत्यादि । इदं वाक्यं शारीरब्राह्मणस्थम्, तत्र पूर्वं 'मनसैवानुद्रष्टव्य'मित्यनेन तद्दर्शनसाधनमुक्त्वा 'विरजः परं आकाशा'दित्यादिना विरजत्ववशित्वेशानत्वादीन् धर्मान् बोधयित्वा ततोऽनिरुक्तत्वाय 'नेति नेती'त्यनेनैतावन्मात्रत्वं निषिध्य, 'अगृह्यो नहि गृह्यते अशीर्यो नहि शीर्यतेऽसङ्गोऽसितो न सज्जते न व्यथते' इत्यनेन लौकिकप्रमाणाग्राह्यत्वमनाशित्वमसङ्गत्वं षिञ् बन्धने अबद्धत्वेन निर्दुःखत्वं चोक्त्वा तेन जडजीवविलक्षणं ब्रह्मस्वरूपं बोधयित्वा ब्रह्मण एतादृशत्वात्तद्विदपि साध्वसाधुकर्मरहित इति बोधयितुं पठ्यते- 'अतः पापमकरवमतः कल्याणमकरवमित्युभे ह्येष एते तरत्यमृतः साध्वसाधुनी'ति, अत इदमभिसन्धाय पापमकरवं कृतवानस्मि अत इदमभिसन्धाय कल्याणं पुण्यं कृतवानस्मि इति

एवमभिसन्धिपूर्वकं कृते एते उभे साध्वसाधुनी हि निश्चयेन एष उक्तरीतिकब्रह्मवित् तरति अतिक्रामति अभिभवति अमृतः जीवन्नेव, नैनं कृताकृते तपतः एनं ब्रह्मविदं निन्दितकरणं च कल्याणाकरणं च न पश्चात्तापं जनयतः । नास्य केनचन कर्मणा लोको मीयते अस्य प्राप्तव्यो ब्रह्मलोकः केनापि नापयाति, प्राप्तव्यं प्राप्नोत्येवेत्यर्थः । तदेतदृचाभ्युक्तम् । ब्राह्मणोक्तोर्थो वक्ष्यमाणया ऋचाप्युक्त इत्यर्थः । ऋचमाह, 'एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान्, तस्यैव स्यात् पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेने'ति । एष इति ब्राह्मणोक्तः । तं पूर्वोक्तरूपमात्मानं विदित्वा तस्यैवात्मनः पदवित् स्यात्, पदं चरणं स्थानं च, 'तद्धाम परमं ममे'ति वाक्यादक्षरवित्स्यात्, ततः पापेन लिप्तो न भवतीत्येवमक्षरब्रह्मविदो माहात्म्यमुत्कर्षमुक्त्वा, पठ्यते तत्साधनमुच्यते तस्मादित्यादिना, यस्मादेवं ज्ञातुर्माहात्म्यं तस्मादेवं शास्त्रतो ज्ञेयस्वरूपवित् शान्तो दान्तः निगृहीतान्तर्बहिःकरण उपरतो निवृत्तसर्वेहस्तितिक्षुर्दुःखसहिष्णुः श्रद्धाचित्त आस्तिक्यबुद्धिमानात्मन्येवात्मानं पश्येत्स्वात्मनि शारीरे पूर्वोक्तमात्मानमक्षरं पश्येत् । अर्हे कृत्यतृचश्चेति लिङ् । दर्शनार्ह इत्यर्थः । एवं दर्शनार्हतामुक्त्वा स्वस्य द्रष्टृत्वनिश्चयार्थं द्रष्टृलिङ्गानि वदति, सर्वमेनं पश्यतीत्यादिना, स्वाज्ञानार्थं लिङ्गान्युक्त्वा परज्ञानार्थमाह, विपापो विजरो विजिघत्सोऽपिपासो ब्राह्मणो भवति य एवं वेदेति । यदुक्तप्रकारकब्रह्मद्रष्टा स विपापादिलिङ्गैर्निश्चेय इत्यर्थः । एतस्य वाक्यस्य निष्कृष्टमर्थमाहुः अत्रेत्यादि । तर्त्तव्यलिङ्गां श्रुतिमुक्त्वा तदभावलिङ्गामाहुः अथर्वणेत्यादि । आदिपदेन तदुपबृंहणपुराणसङ्ग्रहः । अतः परं यदंशे संशयस्तं बोधयितुं पूर्वविचारितमंशं पूर्वमाहुः अतदित्यादि । अधिकारिभेदेन साधनभेदो वेदधर्मभेदश्चेत्येतत्पुरा 'न वा प्रकरणभेदा'दिति सूत्र एवोक्तेति तदंशे सन्देहाभावात्सात्र पुनर्नोच्यत इत्यर्थः । सन्दिग्धांशं विवरीतुमाहुः एतावानित्यादि । एवं सति मुक्तिकारणत्वसाम्याद्भक्तिज्ञानयोस्तौल्ये सति । व्याकुर्वन्ति सम्पराय इत्यादि । सम्परायशब्दस्य प्रसिद्धार्थग्रहणे भक्तिमार्गस्य बोधकस्याध्याहारापत्तिरिति तमर्थं विहाय यौगिकार्थं गृहीतुं पक्षान्तरमाहुः अथवेत्यादि । अत्र द्वेधा व्याख्यानेन पुरुषोत्तमज्ञानप्राप्त्योः साधनं भक्तिमार्ग एवेति बोधितम् । तस्मादिति, ज्ञानमार्गात् । एवं कथनमिति, यौगिकपदेन कथनम् । भक्तेरेव पुरुषोत्तमज्ञानसाधनत्वं न ज्ञानस्येत्यत्र गीतावाक्यं प्रमाणत्वेनाहुः ब्रह्मभूतस्येत्यादि । तथेति, भक्तेर्ज्ञानमार्गादुत्कृष्टत्वम् । तत्र तर्त्तव्याभावे प्रमाणमाहुः एवं सतीत्यादि । ननु सूत्र इदं कुतो लभ्यते इत्याकाङ्क्षायामाहुः उक्तेत्यादि । तेन धर्वितव्यलिङ्गाः कौषीतक्यादिश्रुतीरुपन्यस्य यत्सूत्रं व्याख्यायते तच्चिन्त्यमिति बोधितम् । उत्तरसूत्रमवतारयन्ति ननु भक्तीत्यादि । व्याख्यानं तु स्फुटार्थम् । तेन पापतरणं न सन्निपततीति सिद्धम् ॥ ११ ॥

एवमनेनाधिकरणेन ज्ञानापेक्षया भक्तेरुत्कर्षः साधितः । अतः परं 'तमेव विदित्वे'ति श्रुतौ साधनान्तरनिषेधश्रावणाद्भक्तेर्ज्ञानकारणत्वेन मोक्षकारणत्वं न तु साक्षादिति शङ्कामपाकर्तुमधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्ति गतेरित्यादि । संशयं विवरीतुं विषयवाक्यान्याहुः नन्वित्यादिना । इत्युच्यत इति, तथा च ज्ञानभक्त्योः समुच्चयो विकल्पो वेत्येकः संशयः । संशयान्तरमाहुः किञ्चेत्यादिना । उभयत्रेति, उक्तश्रुतौ स्मृतौ च । तथा च नात्र स्मृतिविरोधकृतः संशय इत्यर्थः । तत्र तमेव संशयाकारं स्थापयितुं तद्दूषकहेतुकथनमुखेन संशयानपायमाहुः विषयेत्यादि । तथा चैकतरज्ञानवतो मोक्षाभावप्रसक्त्या तद्बोधकश्रुत्यादिबाधप्रसक्तेरित्यर्थः । समुच्चय इति, ज्ञानभक्तिसमुच्चयः । विरोधाभावदूषणमुखेन संशयान्तरमाहुः पूर्वमित्यादि । पुनः संशयान्तरमाहुः अपरं चेत्यादि । तत्साधनत्वेति ज्ञानसाधनत्वेत्यर्थः । पूर्वपक्षमाहुः तथा चेत्यादि । ननु ज्ञानस्य पुष्टिमर्यादाभे-

देनैव फलवत्त्वमिति कथं बोध्यमित्यतस्तदाशयमाहुः **अत्रेत्यादि**। **सृष्टिपूर्वकाल** इत्यादि, कार्यमात्रं प्रति भगवदिच्छायाः कारणत्वेनेच्छायाश्च नित्यत्वेन तदैव तथेत्यर्थः। **तत्रेत्यादि**। विचारशरीरप्रविष्टोन्नयनकारणाकाङ्क्षया उक्तरीत्या ज्ञानभक्तिवरणज्ञानाभावरमणादिबुद्धीनां शास्त्रे कथनेन मुक्तिसाधनाननुगमे शास्त्रद्वारा मुमुक्षोः प्रवृत्तये हेतुरनुगमहेतुरवश्यं वाच्य इत्यर्थः। उभयोर्मर्यादापुष्ट्योः स्वरूपमुक्त्वा व्यवस्थामाहुः **तथा चेत्यादि**। **सर्वं सुस्थमिति**। उदितानुदितहोमिवदधिकारिभेदाद्व्यवस्थितमित्यर्थः। एतेनैव पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतो लयस्थानानिश्चयोपि परिहृतो बोध्यः। क्रमेणाङ्गीकृतस्याक्षरे लयोत्तरं तत उद्धृत्य पुरुषोत्तमलयस्य शक्यवचनत्वात्। 'ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता' इत्यत्राक्षरे लीनानां तत उद्धारस्य कथनात्। एतेनैव स्मृत्योरपि विरोधः परिहृत इति बोधयन्ति **अत एवेति**। मार्गभेदेन व्यवस्थासौकर्यादेवेत्यर्थः। **तथेत्यर्थ** इति, मुक्तिसाधने मुमुक्षोः प्रवृत्तिप्रतिरोध इत्यर्थः। अत्रेदं बोध्यम्। ब्रह्मबोधकेषु वेदान्तवाक्येषु सृष्टिकर्त्तृत्वप्रशासितृत्वादिकमात्माभेदश्च प्रतिपाद्यते, ज्ञानस्य मोक्षसाधनत्वं वरणेनात्मविवरणं च। तत्र प्रकरणभेदादेवं ज्ञायते, केवलेन माहात्म्यसहितात्माभेदज्ञानेनाक्षरप्राप्तिर्वरणसहितेन त्वात्मस्वरूपदर्शनस्य विचारितत्वात्सुदृढस्नेहरूपायां भक्तौ पुरुषोत्तमप्राप्तिरिति, न च वरणमश्रुतमपि तत्रोपसंहार्यमिति वाच्यम्। विद्याधर्मत्वाभावात्। 'नायमात्मा प्रवचनेन लभ्य' इत्यादिना वरणश्रुतौ साधनालभ्यत्वश्रावणस्य श्रवणादिविधिविरुद्धत्वेनोपसंहारस्याशक्यत्वाच्च। एवं साधनभेदेन ज्ञानविषयफलयोर्भेदसिद्धौ पूर्वोक्तोन्निनीषा श्रुतिसिद्धविचारशरीरे श्रौतसाधनतदभावतद्विरुद्धकामादीनामपि प्रवेशेन वरणेपि प्रकारभेदसिद्धौ तस्य पुराणोक्तोपबृंहणैर्विशेषावगतिं हृदिकृत्य सूत्रकृता इदमधिकरणं प्रणीतमिति पुराणस्थविरोधपरिहारचिन्तनमत्र कृतम्, न तु मुख्यतया तेषां विषयवाक्यत्वमिति वैदिकंमन्यबहिर्मुखबोधनाय वर्त्म, वस्तुतस्तु 'सर्ववेदेतिहासानां सारं सारं समुद्धृत'मिति वाक्याद्वेदत्वमेव, 'इतिहासपुराणं पञ्चमो वेद' इति श्रुतेश्च, तेन तद्वाक्यत्वेनापि विषयवाक्यत्वमिति। प्रकृतमनुसरामः।

एतस्याधिकरणस्य पूर्वाधिकरणोत्थशङ्कानिरासरूपं प्रयोजनान्तरमाहुः **एतेनेत्यादि**। **नन्विति**, पूर्वाधिकरणे सर्वपापक्षये भक्तिरुदेतीत्युक्तं तत्रेदमाशङ्क्यत इत्यर्थः। **न साधीयानिति**, तथा च पापं विना भगवति कापठ्यासम्भवात्तथेत्यर्थः। एतेन सम्परायाधिकरणसिद्धान्त आक्षिप्तो ज्ञेयः। तमप्यत्र मार्गभेदेन समादधते **तथा हीत्यादि**। **वक्तुं शक्यमित्यन्तम्**, तथा च पूर्वाधिकरणसिद्धः सिद्धान्तो मर्यादामार्गविषयः। सत्यपि पापे भक्त्युदयस्तु पुष्टिमार्गे तेन न चोद्यावकाशः। नापि श्रवणादिदर्शनात्तेषां पापनाशनाय क्रियमाणत्वं शङ्क्यम्। तेषां फलमध्यपातित्वात्। नचैवं सति पश्चात्पापसत्तायां तदर्थं यत्नान्तरकृतिवैयग्र्यादिकं शङ्क्यम्, भगवतैव तन्नाशादिसम्भवेन सर्वसौस्थ्यादित्यर्थः। भगवतैव तत्पापनाशे प्रमाणमाहुः **तदुक्तमित्यादिना**। एतद्व्याख्याने, **तद्दुःखदमित्यत्र तदिति** भिन्नं पदम्। ननु तर्ह्याधुनिकविकर्मणः का गतिरित्यपेक्षायामाहुः **उक्तेत्यादि**। मत्तो भूतं न तु मया कृतमितिवद्वेति, अकामतः कृतमबुद्धिपूर्वकं च कृतम्। तथा च सांसर्गिकं वा अकामादबुद्धिपूर्वं कृतं वेत्यर्थः। तृतीयमकृतमप्यज्ञानात्मकमन्यदाहुः **त्यक्तेत्यादि**। एतादृशस्थले तस्य पापमेव न, किन्तु भगवदिच्छैव तादृशी सन्मार्गस्थापनार्थेत्याशयेनाहुः **यक्तेत्यादि**। किन्तु बहुना, भक्तहृदयस्थः स्वभक्तभक्तस्यापि दूरीकरोतीत्याशयः सर्वपदेनोच्यत इत्याहुः **कदाचिदित्यादि**। सिद्धमाहुः **अत्रेत्यादि**। अत्रेति, पुष्टिमार्गे। अत्रेदं सिद्धम्। मर्यादाभक्तिमार्गे तर्त्तव्याभावात् ज्ञानमार्गत उत्कर्षः। पुष्टिभक्तिमार्गे तु कचित्पापसत्त्वेपि भगवता तन्नाशात्कृपाविशेषादुत्कर्ष इति ॥ १२ ॥

अग्रिमाधिकरणमपि भक्ततारतम्यबोधनद्वारा वरणश्रुतिविचारस्य प्रपञ्च इत्याशयेन सूत्रं पठन्ति **उपपन्न** इत्यादि । अत्र पूर्वाधिकरणसिद्धपुष्टिभक्त्युत्कर्षासहिष्णुमर्यादाभक्तरूपपूर्वपक्षवादिमुखेन विषयवाक्यं संशयं च वदन्तः सूत्रं व्याकुर्वन्ति **नन्वित्यादि** । तत्र मुक्तेस्तदनपेक्षत्वस्य श्रौत(त्व)बोधनायाह **तदुक्तमिति** । कुत्रेत्याकाङ्क्षायामाह **अष्टादशार्णेत्यादि** । भक्तिरहस्यभजनमिति । भक्तिशब्दाच्छान्दसः सोर्लुक् । रहस्यभजनमित्यस्यैव विवरणं **तद्विहेत्यादि** । अमुष्य वस्तुत एतदीयस्यात्मनो जीवस्येहामुत्रोपाधिनैराश्येनैव ऐहिकसुखमुक्तिपर्यन्तामुष्मिकसुखविषयकेप्साराहित्येनैव कल्पनं तदीयत्वसमर्थनं अन्तर्बहिःसेवया तद्दृढीकरणमित्यर्थः । अयं पाठः शाखान्तरीयः । उक्तवाक्यद्वयस्य तात्पर्यं विचार्यत्वेनाह **एतदत्र विचार्यत** इति । कथमित्याकाङ्क्षायामाह **मन्त्रेत्यादि** । **अत एवेति**, स्वरूपस्य फलत्वादेव । **इति संशय** इति, उक्तहेतुभ्यामुभयसाम्यमेव युक्तमिति पूर्वपक्षगर्भे संशय इत्यर्थः । ननु पुरुषोत्तमे सायुज्येपि सौत्रहेतोः सत्त्वात्कथं रहस्यभजनकर्तुराधिक्यसिद्धिरित्यत आहुः **यद्यपीत्यादि** । अयमेवार्थः सूत्रकारानुशयगोचर इत्याहुः **अत एवेति** । उक्तस्यार्थस्याभिप्रेतत्वादेव । तथा च रहस्यभजनकर्त्ता उप समीपे पन्नो गत इति हेतोरुपपन्न इत्यर्थः । रहस्यभजनकृत उपपन्नताया विषयवाक्यादेव लाभादर्थस्य गोप्यत्वाच्च न वारद्वयं तत्प्रयोगः । चतुर्विधमुक्तव्यावृत्त्यर्थं तादृशस्य सिद्धं स्वरूपमाहुः **तेनेत्यादि** । एतदेवोहापोहेन द्रढयन्ति **न चेत्यादि** । इतोप्युत्कटभक्तसूचनाय पक्षान्तरमाहुः **अथचेत्यादि** । एवं परमा भक्तिकाष्ठा सूचिता । तेन फलभक्तौ मुक्तिर्न सन्निपतीति सिद्धम् ॥ १३ ॥

अतःपरं भक्तिसाध्यायां मुक्तौ सर्वा भक्तयः सन्निपतन्ति न वेति विचारयितुमधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्ति **अनियम** इत्यादि । विषयवाक्यपाठः शाखान्तरस्थः । **सर्वाङ्गे** मनोनिवेदनं धारयतिपदार्थः । रसति, कीर्त्तयति जपतीत्यर्थः । भजति, शरीरादिना सेवते । ध्यायते, एकदेशं लीलां वा चिन्तयति । प्रेमति, स्निह्यति युधिष्ठिरादिवत् । उपदिशति, भगवन्तं मन्त्रद्वारा बोधयति कथयति वा । आचरति, भगवद्धर्मानिति शेषः । प्रत्येकपक्षे लोकविरोधमाशङ्क्य परिहरन्ति **नन्वित्यादि** । **एवमेवाहेति**, प्रत्येकपक्षमेवाहेत्यर्थः । एवमनेन वर्णकेन प्रत्येकपक्षं व्याख्याय समुच्चये लोकन्यायेन फलशैघ्र्यं बोधयितुं वर्णकान्तरमाहुः **एतेनेत्यादि** । **श्लिष्ट** इति, अनियम इत्यनेन एकमेव कर्त्तव्यं न द्वयं त्रयमित्यस्याप्यनियमस्य सङ्ग्रहात्तथेत्यर्थः ॥ १४ ॥

पूर्वोक्तानां भगवद्धर्माणां फलव्यभिचारं परिहर्तुं प्रसङ्गादधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्ति **यावदिति** । मुक्तो भवति न वेति विचार्यत इति । मुक्तिं प्राप्नोति न वा, यदि प्राप्नोति, तदा भक्तित्वं न मुक्तिजनकतावच्छेदकं, यदि न प्राप्नोति तदा भगवद्धर्मत्वमपि न तथा, तथा चाद्ये पूर्वोक्तश्रुतिविरोधो द्वितीये भगवद्धर्माणां प्रतिबन्धकत्वप्रसङ्ग इत्यतो विचार्यत इत्यर्थः । अत्र भगवद्धर्माणां वरणहेतुकत्वात्तैरपि मुक्तिरित्येकः पूर्वपक्षवादी, विहितत्वाभावान्नेत्यपरस्तत्रोभयत्र युक्तिसद्भावात्सन्देह एव पर्यवस्यतीत्याशयेनाहुः **तत्रेत्यादि** । सिद्धान्तमाहुः **यस्मिन्नित्यादि** । **तत्सम्पत्ताविति**, कार्यसम्पत्तौ । **तथैव विचारितत्वादिति**, अधिकारसमाप्त्यनन्तरमेव भक्तेः फलोन्मुखत्वस्य विचारितत्वात् । तथा च सामग्र्यभावेन विलम्ब इति न भगवद्धर्माणां मुक्तिप्रतिबन्धकत्वं न वा भक्तित्वस्य मुक्तिजनकतावच्छेदकत्वहानिरित्यर्थः । अधिकारिणां मुक्तिश्च न ब्रह्मणा सहैव नियता, किन्त्वधिकारसमाप्तौ नियतेति बोधयितुं ब्रह्मणा सहेति वाक्यविषयमाहुः **यथेत्यादि** । अनेनाधिकरणेन 'भक्ताधिकारिणां मुक्तिरन्यथा प्रकृतौ लयः । पुनः सृष्टौ तथैश्वर्ये कर्मिणां पुनरागति'रिति सर्वोपि विषयः सूचितो बोध्यः । अत्र भक्तपदं ज्ञानिनामप्युपलक्षकम् ॥ १५ ॥

मुक्तिस्वरूपविचारायाग्रिममधिकरणमित्याशयेन सूत्रं पठन्ति **अक्षरेत्यादि** । विषयसंशयौ पूर्वपक्षकुक्षावेव निक्षिप्याहुः **नन्वित्यादि** । **मुक्तौ च तदसम्भवादिति**, 'भूयश्चान्ते विश्वमायानिवृत्ति'रिति श्रुत्या वैजात्यासम्भवात् । श्रुत्योर्विरोधे स्मृतेर्निर्णायकत्वमभिप्रेत्याहुः **भक्त्येत्यादि** । **भक्तौ ज्ञानस्यापि सम्भवादिति**, ज्ञानकारणत्वबोधकश्रुतेः सावधारणत्वाद्भक्तिकारणत्वबोधिकायां तदभावादुक्तार्थस्य गीतास्मृत्योपबृंहितत्वाच्चेत्यर्थः । तथा च 'गतेरर्थवत्त्व'मित्यधिकरणे मर्यादामार्गे ज्ञानस्य मुक्तिसाधनतायाः प्रतिपादनाद्भक्तेः परम्परया कारणतामादाय भक्तिकारणतावाक्यानि समर्थनीयानीति भावः । **आहेति**, विषयभेदव्यवस्थया मुक्तौ वैजात्यं वारयन्ज्ञानस्य परम्परया कारणत्वमाहेत्यर्थः । तदुपपादयन्ति तुः **पूर्वपक्षनिरास** इत्यादिना, भक्तिः परम्परया कारणमिति शङ्कैव न कार्येत्यर्थः । तत्र हेतुं व्याकर्तुं श्रुतितात्पर्यं विशदयन्ति **वाजेत्यादि** । तथा च श्रुतावक्षरज्ञानस्य फलद्वयकथनादियं शङ्का न कार्येत्यर्थः । ननु तावता सा कथं निवर्तेत इत्यत आहुः **भक्त्येत्यादि** । तथा च भक्तेरक्षरज्ञानाजनकत्वाद्यतो न परम्परितत्वमतस्तथेत्यर्थः । नन्वेवं सति कारणवैजात्यान्मुक्तौ वैजात्ये श्रुतिर्विरुद्ध्येतेत्यत आहुः **किञ्चेत्यादि** । **तस्येति**, ब्रह्मभावस्य । **पूर्वकक्षाविश्रान्तमिति**, तेन 'ब्रह्म वेद ब्रह्मैव भवती'त्यादितत्फलवाक्यानामपि तत्रैव विश्रान्तिर्न तु पुरुषोत्तमप्राप्तिपर्यन्तत्वम्, तेनाक्षरप्राप्तेर्मुक्तित्वं यदुच्यते, तदक्षरस्य पुरुषोत्तमाविनाभावेन तत्सामीप्यादुच्यते, न तावता परमुक्तित्वम्, तेनावधारणमपि पुनरावृत्त्यभावेन मृत्य्वतिक्रमेण कैवल्येनाक्षरप्राप्तेः ब्रह्मभावात्मकत्वेन चोपपद्यमानं न विरुध्यते । ननु यद्यक्षरप्राप्तेर्न परमुक्तित्वं तज्ज्ञानं च पूर्वकक्षाविश्रान्तम्, तर्हि तैत्तिरीयश्रुतौ मुक्तिसाधनत्वेन कथं तदुच्यत इति चेत्तत्राहुः **एवं सतीत्यादि** । पुरुषोत्तमसम्बन्धिसम्बन्धे मुक्तिरिति सामान्यमिति । श्रवणादीनामिवाक्षरस्यापि पुरुषोत्तमसम्बन्धित्वात् तथेत्यर्थः । **यद्वा** । यथा भक्तस्य पुरुषोत्तमसम्बन्धित्वं तथा पुरुषोत्तमधाम्नोऽक्षरस्यापीति भक्तभक्तिवदक्षरधीरपि परम्परया मुक्तिसाधनं तेनैवं सामान्यमित्यर्थः । तद्भावं व्याकुर्वन्त एव हेतू योजयन्ति **मर्यादेत्यादि** । ननु भवत्वेवं पुरुषोत्तमप्राप्तेर्मुक्तित्वम्, परन्तु पूर्वोक्तश्रुत्योर्विरोधस्तु परिहार्य इत्याशयेन सूत्रोक्तं दृष्टान्तं व्याकर्तुमवतारयन्ति **नन्वित्यादि** । **हेतुम्**, भगवदिच्छारूपम् । तथा चौपसदे यथा यजमानस्नेहेन यज्ञयशःप्रापणेच्छया तानूनप्त्रप्रथमावमर्शनं तथा भगवत्कृपया स्वप्रापणेच्छया भक्तिसहितमक्षरवेदनमिति तथा तथेत्यर्थः । सूत्रोक्तां सम्मतिं व्याख्यातुमवतारयन्ति **नन्वित्यादि** । एतानि वाक्यान्यष्टमाध्यायस्थानि । **वैलक्षण्यमिति**, साधनसौकर्यं स्वप्राप्तिरूपफलोत्कर्षं च । अत्राक्षरस्वरूपकथने तस्य परमगतित्वं स्वधामत्वं चोक्त्वा परस्य यद्भक्त्येकलभ्यत्वं वक्ष्यति तदक्षरादुत्तमत्वेन वाक्यान्तरे सिद्धे स्वस्मिन्नेव परत्वविश्रान्तेः स्वस्यैव वक्ष्यति । बाधकाभावे तच्छब्देन सन्निहितपरामर्शाच्च । तदेतदुक्तं स्वस्य वक्तुमिति । **एतेनेति**, 'क्षरः सर्वाणि भूतानी'ति वाक्यान्तरसिद्धं भूतग्रामं व्यक्तकोटौ निवेश्य ततः परत्वकथनेनेत्यर्थः । **यमित्यादि** । भूतग्रामपदेन जडान् गृहीत्वा अक्षरपदेन जीवग्रहण एतौ दोषौ प्रसज्येयातामित्यर्थः । स्फुटमन्यत् । उक्तस्यार्थस्य श्रौतत्वं बोधयितुं तैत्तिरीयश्रुत्यर्थं प्रकाशयन्तः सामान्यतद्भावाभ्यामित्यस्यार्थान्तरं सङ्गृह्णन्ति **किञ्चेत्यादिना** । अग्रिममन्त्रे लोकाक्षरस्य वक्ष्यमाणत्वादन्त्यस्य तस्यार्थमाहुः **अत्रेत्यादि** । एतमुपष्टभ्नन्ति **अत एवेत्यादि** । द्वितीयमन्त्रस्थाक्षरपदस्यार्थं लिङ्गबलेन लोकात्म(कत्व)माहुः **यदित्यादि** । यदर्थमिदं निरूपितं तदाहुः **एवं सतीत्यादि** । अत्र भट्टभास्करशङ्कररामानुजभाष्येषु पूर्वोक्तवाजसनेयकाथर्वणोक्ताक्षरवाक्यद्वयमेव विषयवाक्यत्वेनोदाहृत्य किमेषां विशेषप्रतिषेधबुद्धीनां सर्वत्र प्राप्तिरुत व्यवस्थेति संशये, यथायथं प्रकरणावरोधात्, श्रुति-

विभागात्, विधान्तररूपस्य विधान्तररूपत्वे प्रमाणाभावान्निषेधरूपाणां गुणानामानन्दादिवत्स्वरूपावगमोपायत्वाभावाच्चेति हेतुभिर्नान्यत्र प्राप्तिरिति पूर्वपक्षः। सिद्धान्तस्तु, यथायथम्, प्रपञ्चपर्युदासस्य, विशेषनिराकरणरूपस्य ब्रह्मबोधनप्रकारस्य, सामान्यात्, तस्य प्रतिपाद्यस्य ब्रह्मणः सर्वत्र भावादैक्यात्सर्वत्रावरोध इति भट्टभास्करशङ्करमते। ते'नानन्दादयः प्रधानस्ये'त्यत्र विधिमुखो विचारोत्र तु निषेधमुख इति तस्यैवायं प्रपञ्चः। तेनैतदधिकरणं नात्यन्तावश्यकम्। रामानुजभाष्ये तु, सर्वेषूपासनेषु ब्रह्मणः समानत्वात्, अस्थूलत्वादीनां तत्प्रतीतौ भावात् अन्तर्भावात्। अयमर्थः। केवलानन्दादेः प्रत्यगात्मनि विद्यमानत्वेन तेषामसाधारणाकारेण ब्रह्मोपस्थापकत्वाभावादसाधारणाकारनिश्चयार्थं हेयप्रत्यनीकताज्ञानस्यावश्यकत्वेन चिदचिदात्मकप्रपञ्चवैलक्षण्यबोधनमावश्यकम्। तत्रास्थूलत्वादिना अचिद्वैलक्षण्यं प्रशासनेन चिद्वैलक्षण्यं च वाजसनेयके उच्यते, एवमाथर्वणेपि अदृश्यत्वादिकथनान्निरङ्कुशकर्तृत्वसर्वज्ञत्वादिना ज्ञेयम्। तथा चास्थूलत्वादिविशेषितज्ञानानन्दाद्याकारस्य ब्रह्मणोनुसन्धेयत्वादस्थूलत्वादीनामानन्दादिवदस्ति ब्रह्मप्रतीतावन्तर्भाव इति तासामस्थूलत्वादिबुद्धीनां सर्वत्रावरोध इति सिद्धान्तः। तेनेदमधिकरणं तत्सहकारित्वादत्यन्तावश्यकमिति तदपेक्षयेदं मतं युक्तम्। ननु तर्हि पूर्वपक्षोक्तहेतूनां का गतिरित्याकाङ्क्षायां गुणानां प्रधानावर्तित्वे दृष्टान्तं तत्र प्रमाणं चाहोपसद्वत्तदुक्तमिति। यथा चतूरात्रे जामदग्न्याहीने पुरोडाशिनीषूपसत्सूपसद्गुणभूतः सामवेदपठितोप्यग्निर्वै होत्रं वेत्वित्यादिकः पुरोडाशप्रदानमन्त्रो विनियोगविधेर्याजुषत्वेन यजुर्वेदिनाध्वर्युणा याजुर्वैदिकेनोपांशुस्वरेण पठ्यते न तूद्गात्रा सामगेन सामस्वरेणोच्चैस्त्वेन तद्वत्। तदुक्तं पूर्वकाण्डे शेषलक्षणे। 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग' इति। अर्थस्तु, गुणमुख्ययोर्व्यतिक्रमे विरोधे सति तदर्थत्वात् गुणस्य उत्पत्तिविधेस्तदर्थत्वात्प्रधानार्थत्वात् मुख्येन याजुर्वैदिकेन विनियोगविधिना वेदसंयोगो ग्राह्य इति। पूर्वोक्तभाष्यत्रयेपि समानम्। शाबरे भाष्ये त्वत्रान्यदुदाहृतम्। तथाहि। अस्त्याधानं यजुर्वेदविहितं 'य एवं विद्वानग्निमाधत्त' इति, तदङ्गत्वेन यजुर्वेद एव गानं च विहितं 'य एवं विद्वान्वारवन्तीयं गायति, यज्ञायज्ञीयं गायति। वामदेव्यं गायती'ति। एतानि सामानि च सामवेद उत्पन्नानि। अतः केन स्वरेण पठनीयानीति सन्देहे उत्पत्तिविधेर्विनियोगविध्यधीनतया यजुर्वेदस्वरो ग्राह्य इति। एवं चात्र विचारे क्रियमाणे पूर्वोक्तमतद्वयं न रुचिरम्। अक्षरस्य धीरित्यत्राक्षरस्येति षष्ठ्यां अक्षरस्य विशेषनिषेधस्य सम्बन्धितया निवेशेन गौरवात् प्रशासनादेरसङ्ग्रहाच्च पूर्वोक्तानावश्यकत्वदोषाच्च। तृतीयं तु त्रितयाभावादुत्तमम्॥ १६॥

अक्षरानन्दपुरुषोत्तमानन्दयोस्तरतमभावस्य बोधनायाग्रिममधिकरणमित्याशयेन सूत्रं पठन्ति इयदामननादिति। अत्राक्षरपुरुषोत्तमानन्दयोस्तारतम्यमस्ति न वेति संशयः। अविशेषान्नास्तीति पूर्वपक्षश्च ज्ञेयः। आनन्दमयस्येनेत्यादि। आनन्दमये उपसङ्क्रममुक्त्वाऽऽनन्दमयं लक्ष्यीकृत्य 'यतो वाचो निवर्तन्त' इति श्लोकेन वाङ्मनसागोचरत्वकथनात्पूर्वाधिकरणे पुरुषोत्तमानन्दस्याधिक्यनिर्धारणमित्यर्थः। ननु 'यतो वाच' इति श्लोको मनोमये कदाचनेति पाठभेदेन पठ्यते, ब्रह्मोपनिषदि चैतदुत्तरार्धं 'मानन्दमेतज्जीवस्य यज्ज्ञात्वाऽमृतमश्नुत' इति पठ्यतेऽतो नैतेन पुरुषोत्तमानन्दाधिक्यसिद्धिरिति चेत्। न। मनोमयस्य यजुःशिरस्त्वादिना वेदात्मकत्वनिश्चायनाद्वेदस्य च शब्दब्रह्मात्मकस्य 'सर्वे वेदा यत्पदमामनन्ती'तिश्रुत्या ब्रह्मबोधकत्वेन ब्रह्मणः वेदात्मकान्मनोमयाद्वाङ्मनसगोचरमानन्दं विद्वान् कदाचन न बिभेतीत्येवं पुरुषोत्तमानन्दज्ञानसाधनत्वेन मनोमयश्लोकार्थस्य बोद्धव्यत्वात्। ब्रह्मोपनिषद्यपि ज्ञेयत्वेन तस्य जीवसम्बन्धित्वबोधनस्याभिप्रेतत्वात्, 'यज्ज्ञात्वाऽमृतमश्नुत' इति तुरीयपादेन तथा निश्चयात्। अतो न चोद्यावसर इति दिक्॥ १७॥

सिद्धेषु ज्ञानसाधनेषु वृत्तिरात्मनो ब्रह्माभेदसाक्षात्कारात्मिका भवतीति 'ब्रह्म वेद ब्रह्मैव भवती'त्यत्र श्रुतम्। सा भक्तावपि सिद्धायां 'भक्त्या मामभिजानाती'त्यभिज्ञावाक्यावेदिते ज्ञाने निवेशं लभते नवेत्येतद्विचारायाधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्तो विचारयन्ति अन्तरेत्यादि । **भक्तिमार्गे** इति, फलभक्तिमार्गे । **सर्वान्तरत्वादित्यादि**, 'अन्योन्तर आत्मा आनन्दमयः पृथिव्यां तिष्ठ'न्नित्यारभ्य 'य आत्मनि तिष्ठन्नात्मनोन्तर' इत्यादौ परमात्मा सर्वान्तरत्वेन श्रावितः, स च यदन्तस्तिष्ठति तमन्तरयति वह्निरिवायोगोलकम् । तथा सति श्रौतेन येन केनापि साधनेन तस्मिन्नभिज्ञायमाने स्वात्मनस्तद्व्याप्तत्वेन भेदास्फुरणात् स्वात्मत्वेनास्य तज्ज्ञानमदण्डवारितमतस्तद्भवतीत्यर्थः। **तथात्वेपीत्यादि** । सर्वान्तरतयैतदात्मनस्तदविभक्तत्वेपि 'सर्वस्य वशी'त्यादिश्रुत्युक्तसर्वेश्वरत्वादिधर्माणामेवोत्कटभक्त्या स्फुरणादेतत्पुरस्कृतमेव ज्ञानं भवति, न तु स्वात्मत्वप्रकारकमित्यर्थः। नन्वभिज्ञाने सर्वांशज्ञानदर्शनात्तदंशाज्ञाने हेतुं न पश्याम इत्याकाङ्क्षायामाहुः **अत्र तथेत्यादि** । **विपरीते**, स्वात्मत्वेन ज्ञाने । एतदेव व्याकुर्वन्ति **पूर्वस्मिन्नित्यादि** । **स** इति, भजनानन्दः । **न सम्पाद्यत** इति, क्रीडार्थो मुख्यो भक्तिमार्गः क्रीडा च भेदादेव सिध्यतीति 'स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छ'दित्यादिश्रुतिभ्योऽवसीयतेऽभेदश्च तद्व्यवधायक इति तथेत्यर्थः । **अन्यथाभावादिति**, अभेदज्ञानस्य विलायकस्वभावत्वेन तद्धतो विलयादित्यर्थः । नन्वस्तु तस्यां तथात्वं तथापि न सम्पादयतीति कथमवगन्तव्यमित्यत आहुः **तत्सम्पादनस्येत्यादि** । **अलौकिक** इति, साक्षात्सम्बन्धस्य हेये लौकिकशरीरे असम्भवात्तथेत्यर्थः । **तथेति**, चिकीर्षितलीलाप्रतिबन्धकत्वमेवास्य हीनत्वं तस्मादिदं न सम्भवतीत्यर्थः । प्रतिबन्धकस्यासम्भवो ज्ञानमार्गे तुल्य इति तद्दृष्टान्तेन तं बोधयितुं दृष्टान्तं प्रकारान्तरेणाहुः **अथवेत्यादि** । आत्मत्वेन ज्ञानाभावस्यायुक्तत्वमाशङ्क्य परिहरतीत्याशयेन सूत्रं पठन्ति **अन्यथेत्यादि** । **नन्वित्यादि** । 'उपपन्न' इति सूत्रे दासीदाससुहृद्भेदेन त्रिविधा लीलामध्यपातिभक्ता उक्तास्तत्र 'नोद्धवोण्वपि मन्न्यून' इति वाक्यादत्यन्तरङ्गः आदिपदेन व्रजस्थास्तेपि 'रामेण सार्द्धं मथुरां प्रणीत' इत्यादिना विगाढभावा उक्ता इति तेष्वपि चेत्साक्षात्सन्देशद्वारा चोपदेशस्तदेतरेषु किं वाच्यम्, किञ्च, तेषु चेदुपदेशो विफलस्तदाऽपार्थकार्यकर्तृत्वाज्जीवतुल्यत्वापत्तिरिति तस्य तत्र फलमवश्यमभ्युपेयम्, तथा सति पूर्वोक्तमिति सूत्रांशेनाशङ्क्य परिहरतीत्यर्थः । परिहारं व्याकुर्वन्ति **नहीत्यारभ्येत्यर्थ** इत्यन्तम् । तथा चोक्तरीत्या फलान्तरसत्त्वेनावैफल्ये सति न जीवतुल्यत्वापत्तिर्नापि ज्ञानमार्गोत्कर्ष इत्यर्थः । ननूक्तरीत्या भजनानन्दप्रतिबन्धाभाव एव, न ब्रह्माभेदानुभव इत्यत्र किं गमकमित्याकाङ्क्षायामाहुः **अन्यथेत्यादि** । **ज्ञेयमिति**, कुरुक्षेत्रप्रसङ्गस्योत्कण्ठावाक्यैर्ज्ञेयमित्यर्थः । अयमेव सूत्रकाराशय इति ज्ञापनायाहुः **अत्रेत्यादि** ।

उपदेशान्तरपदमिति, दृष्टान्तकोटिप्रविष्टं तत्पदम् । **तस्याभावादिति**, अभेदोपदेशस्य दार्ष्टान्तिकत्वेन दृष्टान्ते प्रवेशाभावादित्यर्थः । सिद्धमाहुः **एतेनेत्यादि** । मार्गभेदेन प्रकारभेदेन चैकस्यैवात्मोपदेशस्य दृष्टान्तदार्ष्टान्तिकभावेनोक्तार्थसिद्धौ सम्भवत्यां किमित्युपदेशान्तरं ग्राह्यमित्याशयेन पक्षान्तरमाहुः **अथवेत्यादि** । **क्रियत** इति, मैत्रेयीब्राह्मणादौ क्रियते । **अत्रेति**, भक्तिमार्गे । **बोध्यत** इति, आत्मोपदेशेन बोध्यते । गतार्थत्वमाशङ्क्य परिहरन्ति **यद्यपीत्यादि** । **एतावतेति**, आत्मबोधनमात्रेण । **आयातीति**, फलत्वेन नायातीत्यर्थः । निदर्शनस्य पूर्वमेवोक्तत्वात्सिद्धमाहुः **अत्र** इति । तथाच यत्र किञ्चित्कार्यार्थं विप्रयोगतापसहनमावश्यकं तत्रैवं प्रभुः करोति, न तु सर्वत्र, अतः पूर्वोक्तं स्वारस्यमुपपन्नमित्यर्थः । एवं करणस्य प्रासङ्गिकं फलमाहुः **तेनेत्यादि** ।

अत्रोद्धवादिषूपदेशस्य स्मार्तत्वं न शङ्कनीयम् । 'विधिश्च प्रतिषेधश्चे'त्यादिप्रश्नेन, 'मां विधत्तेभिधत्ते मा'मित्याद्युत्तरेण च श्रौतत्वस्य स्फुटीकरणेन श्रुतिभिरेवोपदेशनिश्चयात् । शूद्रादीनां श्रवणाधिकारायैव व्यासपादैः स्वश्लोकैरुक्तत्वात् । 'सर्ववेदेतिहासानां सारं सारं समुद्धृत'मिति वाक्यात् । एवं सन्देशेपि 'एतदन्तः समाम्नाय' इति वाक्यात् ज्ञेयम्, तेन न चोद्यावकाशः ॥ १८ ॥

ननु यद्यभेददर्शनस्य भक्तिफलत्वं न स्यात्तदा लीलास्थानां स्वस्मिन् ब्रह्माभेदो न स्फुरेत्, दृश्यते च स इति पूर्वाधिकरणसिद्धान्तोऽयुक्त इति शङ्कायामुत्तरमधिकरणमित्याशयेन सूत्रं पठन्ति **व्यतिहार** इत्यादि । एतरेय इव तैत्तिरीये आवृत्त्यभावात्कथं व्यतिहारलाभ इत्यत आहुः **अत्रेत्यादि** । व्यतिहारेणाभेदबुद्धौ तात्पर्यं श्रुतेरिति वदतां तेन तदसिद्धिं बोधयन्तो दूषयन्ति **अपरं चेत्यादि** । शेषं तूत्तानार्थम् ॥ १९ ॥

फलमुखेन भक्त्युत्कर्षं साधयित्वा साधनमुखेन तं साधयितुमग्रिममधिकरणमित्याशयेन सूत्रं पठन्ति **सैव हीति** । शेषमतिरोहितार्थम् ॥ २० ॥

ननु भक्तेः कथमेवमसहायशूरत्वमित्याकाङ्क्षायां तत्र हेतुं बोधयितुं कैमुतिकेन स्वरूपत उत्कर्षं च बोधयितुमग्रिमाधिकरणं प्रणयतीत्याशयेन सूत्रं पठन्ति **कामादीति** । तदेतद्विशदयन्ति **पूर्वसूत्र** इत्यादि । सूत्रं व्याकर्तुं तदुपयोगित्वेन भक्तिविभागं विभाजकोपाधिस्वरूपं च पूर्वमाहुः **भक्तिरित्यादि** । **अन्यत्र** इति, शास्त्रव्यतिरिक्तात्स्वभावादितः । **इतरत्रे**त्यस्यार्थः कामाद्युपाधिजस्नेहरूपायामिति । **इत्यर्थ** इति, इत्येषोर्थः शेषभूत इत्यर्थः । कथमेवमित्याकाङ्क्षायां तत्र प्रयोजकमाहुः **भगवतीत्यादि** । **भवतीत्यन्तम्** । सूत्रशेषं व्याकुर्वन्ति **तत्रेत्यादि** । तेषु तथा प्रयोगप्राचुर्यादिति । **यथा पञ्चायतनपूजेति** । **एतेनेति** । कामादीनां गृहादीनां च मुक्तिसाधकत्वकथनेन । **इति ज्ञापनायेति**, तेन विहिताविहितोभयरूपापि संगृहीतेति भावः । **इतरे तु** । 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोस्मिन्नन्तर आकाश' इत्युपक्रम्य 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प' इति छान्दोग्ये आम्नायते । 'स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेषु, य एषोन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी'त्यादि वाजसनेयके आम्नायते । तयोरैकविद्यं न वा परस्परगुणोपसंहारो न वेति सन्देहद्वये, कामादीति सूत्रेणैकविद्यमुपसंहारश्च सिद्धान्तीक्रियते। कामादीत्यत्र, कामपदं देवदत्तो दत्तः सत्यभामा भामेतिवन्नामैकदेशरूपम्। तेन सत्यकामाद्या वाजसनेयके वशित्वाद्याश्छान्दोग्य उपसंहार्याः । हृदयस्यायतनस्य वेद्यस्येश्वरस्य लोकासम्भेदप्रयोजनसेतुत्वरूपेश्वरधर्मस्यापि समानत्वाद्विद्यैक्यं परस्परोपसंहारश्चेत्याहुः । तच्चिन्त्यम् । सत्यकामादिपदानां नामत्वाभावेन दृष्टान्तवैषम्यात् । आयतनादीनां केषाञ्चिदेव समानत्वे विद्यैक्याङ्गीकारे 'चोदनाद्यविशेषा'दित्यस्य व्यभिचारित्वप्रसक्तेश्च ॥ २१ ॥

एवमधिकरणत्रयेण सात्त्विकानां वृतानां ज्ञानासक्तिनिवारणाय ज्ञानमार्गाद्भक्तिमार्गस्य फलतः साधनतः स्वरूपतः सम्बन्धतश्चोत्कर्षः प्रतिपादितः । अतः परं ये वृता राजसास्तेषां ज्ञाने रुच्यभावेपि कर्मणि रुचेर्विद्यमानत्वात्तन्निर्णयायाधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्ति **आदरादलोप** इति । संशयादिकमाहुः **नन्वित्यादि** । **इतरत्रेति**, भगवद्धर्मेषु । **ब्रह्मयज्ञप्रकरण** इति, आरण्यके स्वाध्यायब्राह्मणे । 'ओमिति प्रतिपद्यते एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरं तदेतदृचाभ्युक्त'मिति प्रणवाक्षरं प्रतिपद्यते पञ्चमो लकारः । ब्रह्मयज्ञेन यक्ष्यमाणः पूर्वमुच्चारयेत्, कुत इत्याकाङ्क्षायामाह । एतद्वै यजुस्त्रयीं विद्यां प्रति अयं यजूरूपः प्रणवमन्त्रस्त्रयीं विद्यां लक्षीकृत्य प्रति-

निधिरूपो यतोस्ति, तच्चाथर्वणे स्फुटम्, तस्य वै प्रणवस्य पूर्वामात्रापृथिव्यकारः स ऋग्भिर्ऋग्वेदोथ द्वितीयान्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदस्तृतीया द्यौः स मकारः स सामभिः सामवेद इति सायनभाष्ये। वस्तुतस्तु गोपथब्राह्मणे इन्द्रप्रजापतिसंवादे प्रजापतिना वेदत्रये एकाक्षरोथर्ववेदे मात्राभिर्युक्त इति व्यवस्थापितम्, तैत्तिरीये बृहन्नारायणे 'ओमित्येकाक्षरं ब्रह्मे'ति श्रावितं च। तेनात्रामात्र एव। न चैवं त्रयीप्रतिनिधित्वविरोधः। द्वादशे स्कन्धे, 'सर्वमन्त्रोपनिषद्वेदबीजं सनातन'मिति बीजत्वबोधनाद्यथा पुस्तकलिखनोत्तरं तन्मूलपुस्तके प्रतिपुस्तके व्यवहारस्तथा त्रयीमूलत्वात्प्रतित्वमेकादशे 'वेदः प्रणव एवाग्र' इति कृतयुगे तन्मात्रवेदबोधनाच्च तदा सर्वं कार्यं प्रणवेनैवेति तस्य त्रयीप्रतिनिधित्वं वा। एषा वागिति, सर्ववाग्बीजत्वात्सर्ववाग्रूपम्। तथाच छन्दोगा आमनन्ति, 'तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृणान्येवमोंकारेण सर्वा वाक् सन्तृणे'ति। 'अश्वत्थादिपत्रे दृश्यमानास्तन्तुसदृशा अवयवाः शङ्कवस्तैर्यथा कृत्स्नानि पर्णानि व्याप्तानि तद्वदोंकारेण सर्वा वाग्व्याप्ते'तिभाष्ये। एतत्परममक्षरम्, 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं पर'मिति काठकश्रुतेः। तदेतदृचाभ्युक्तम्, तदेतत्परब्रह्मरूपं प्रणवाक्षरं वक्ष्यमाणर्चा स्पष्टमुक्तमित्यर्थः। ऋचं व्याकुर्वन्ति अत्रेत्यादि। 'यो वेद निहितं गुहायां परमे व्योम'न्नित्यत्राक्षरे परस्थितेर्व्याख्यातत्वा'त्तद्धाम परमं ममे'ति वाक्याच्चाहुः वर्तमानमिति, प्रतिपाद्यत्वेन स्वरूपेण च वर्तमानम्। लोकवेदप्रसिद्धमिति, यस्मिन् परब्रह्मणि देवा अग्न्यादयोवयवरूपा अध्युपरि निषेदुः स्थितवन्त इति श्रुतिपुराणयोर्दृश्यते, 'अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति च गीतावाक्यं तेन तथेत्यर्थः। ऋचेति, ऋचपदं वेदमात्रोपलक्षकम्। अन्वये निदर्शनमिति, अन्वयव्यभिचारे निदर्शनं श्रुतिराहेत्यर्थः। शेषं प्रकटार्थम्। प्रणवार्थभूतभगवज्ज्ञानस्यावश्यकत्वं तदज्ञानेऽध्ययनादिनैष्फल्यं बोधयन्त्यानयर्चा भगवज्ज्ञानसाधनीभूतायां वरणसाध्यायां भक्तावादरो दर्शितः। एवं श्रुत्यन्तरे साधनभक्तावप्यादरः श्राव्यत इत्याशयेनाहुः ऋगित्यादि। अर्थस्तु, हे स्तोतारो मदुत्कर्षवर्णनपराः। इयं वेदानामुक्तिः। पूर्व्यं सर्वकारणकारणरूपम्, तं लोकवेदप्रसिद्धं पुरुषोत्तमम्, यथाविदः भवन्तो यथावद्विदन्ति तत्स्वरूपमिति तथाभूताः ऋतस्य सूनृतवाणीरूपस्य वेदस्य गर्भे अन्तर्निहितम्, जनुषा, स्वस्य सम्पूर्णजन्मना, यावज्जीवमिति यावत्, पिपर्तन पूर्तियुक्तं सन्तुष्टं कुरुत सन्तोषयत, अत्र यथावित्त्वोक्त्या पूर्णज्ञानानां देहेन्द्रियप्राणान्तःकरणजीवविनियोगं भगवत्तोषार्थं दर्शयति श्रुतिरित्यादरो भगवद्धर्मेषु श्रुतेः स्फुटति। भगवत्तोषाभावे किमपि न सिद्ध्यतीत्याशयेन पूर्वोक्तकरणशक्त्यभावेनुकल्पमाह। आसमन्तात् अस्य परमपुरुषस्य नाम जानन्तः अखण्डशब्दब्रह्मरूपत्वेन जानन्तः विवक्तन विशेषेण वदत, नामस्वरूपं वित्त्वा तदेव कीर्तयत, अनुकल्पेन कथं सन्तोष इत्यतो नामस्वरूपमाह चिदिति, चित्स्वरूपं उपलक्षणमेतत्, सच्चिदानन्दात्मकम्। तथा च नाम्नो ज्ञानरूपत्वेन तद्द्वारा भगवतोपि ज्ञानं भविष्यति, तेन तोषोपि भविष्यतीत्यर्थः। नामस्वरूपस्याप्यज्ञाने तदुपायमाह गुरूपसत्तिरूपम्। हे विष्णो ते त्वत्सम्बन्धिनं महस्तेजोरूपम्। समभिव्याहारात्त्वत्तेजोरूपं सुमतिम्, निर्दोषपूर्णगुणत्वेन भगवन्तं जानन्तं सुबुद्धिं भक्तमिति यावत्तं भजामहे, तथा चान्यो भजतु मा वा वयं तु भजामहे इति श्रुतयः स्वकृतिं दर्शयन्ति। अनेन तदुपायेप्यादरो दर्शितस्तेन भगवद्धर्माणामत्यादृतत्वं बोधितम्। तेनेति, कथनेन। तथेति, प्रत्यवायः।

अग्रिमसूत्रमवतारयन्ति नन्वित्यादि। श्रुतेरिति, प्रत्यवायश्रवणस्यैवं तात्पर्यकत्व इत्यर्थः। तयोर्युगपदित्यादि। दाशतयीश्रुतौ यथाविद इति स्तोतृविशेषणाद्विधेयस्य करणे ज्ञानस्याधिकारप्रयोजकत्वं लभ्यते तेन ज्ञानोत्तरं करणमायाति। कर्माणि तु 'तमेतं वेदानुवचनेन ब्राह्मणा

विविदिषन्ति यज्ञेन दानेन तपसा श्रद्धयाऽनाशकेने’ति श्रुतेर्विविदिषायामेवोपक्षीणानि ज्ञानसम्पादनेपि नालं भवितुमर्हन्तीति दूरतरापास्तं कर्मप्राधान्यम् । एवं सति ज्ञानोत्तरं यत्र कथञ्चिद्वर्णाश्रमा भगवद्धर्माश्च युगपत्प्राप्तास्तत्र प्रबलदुर्बलभावस्य प्रत्यवायादिबोधकवाक्यैर्वैपरीत्ये भाते तदपवादायादरः प्रकाश्यते ततश्च भगवद्धर्माणां बाधाभावः सिद्ध्यति ततश्च इतरेषामादराभावेपि प्रत्यवायश्रवणवैयर्थ्यपरिहाराय तेषां गौणकाले करणमद्धाधानवद्व्यवस्थाप्यतेऽतो न तेषां कर्माङ्गत्वमित्यर्थः ॥ २२ ॥

ननु यद्येवं तर्हि गौणमुख्यन्यायेन तेषां कर्मणामप्रयोजकत्वात्परमहंसेष्विव भक्तेष्वपि प्राप्तिरेव न सम्भवतीति व्यर्थोयं विचार इत्याकाङ्क्षायामग्रिमाधिकरणं पाक्षिकप्राप्तिं हृदिकृत्य तत्प्रयोजनबोधनाय प्रणयतीत्याशयेन सूत्रं पठन्ति तन्निर्धारणेत्यादि । एतादृशस्येति, वक्ष्यमाणश्रुत्या सर्वदानन्दानुभवकर्तुः, श्रूयत इति, तापनीयेऽतिथिपूजारूपो गृहस्थधर्मो गान्धर्वीप्रभृतीनाम्, पूर्वकाण्डे च ‘प्रह्लादो ह वै कायाधव’ इत्यादिना प्रह्लादस्य श्रूयते इत्यर्थः । चकारात्स्मृतिसङ्ग्रहः । उभयविधानामिति । मर्यादायां पुष्टौ चाङ्गीकृतानां भक्तानां सिद्धमिति । तथा चैवं कर्मप्रसक्तेर्विद्यमानत्वान्न पूर्वाधिकरणोक्तविचारवैयर्थ्यमित्यर्थः । ननु निर्धारणानियमात्कर्म कर्तव्यमिति यदुक्तम्, तन्न युज्यते, ‘योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सये’त्युपक्रम्य ‘निर्विण्णानां ज्ञानयोगः कर्मयोगस्तु कामिनाम्, न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिद’ इत्याधिकारिभेदेन व्यवस्थापनात्तावतैव फलसिद्धेः कथनाच्च भक्तियोगात्मकभगवद्धर्मकारणमात्र एव भगवदिच्छाया निर्धारयितुं शक्यत्वादितरकरणस्य वैयर्थ्याच्चेत्याशङ्कायां नैवमिच्छा निर्धारयितुं शक्येत्याशयेन सूत्रशेषं व्याकर्तुमवतारयन्ति तत्रेत्यादि । अत्रेति, पूर्वोक्तरीतिकाशङ्कायाम् । स्फुटमन्यत् ॥ ॥

पूर्वाधिकरणे आदरात् भगवद्धर्माबाधस्य व्यवस्थापनेनैवानादृतानां गौणकालिकता प्राप्ता, प्रत्यवायश्रवणाधिकारिभेदाभ्यां च तद्बाधबाधाविति नास्याधिकरणस्यावश्यकतेति हृदिकृत्य पक्षान्तरमाहुः अथवेत्यादि । आवश्यकत्वमुक्तमिति, तथा राति ते विहितभक्त्यन्तःपातितया सिद्धा इत्यर्थः । किं तेनेत्यत आहुः सर्वेत्यादि । असम्भवादिति, तद्भावस्वभावेनासम्भवात् । किं फलमिति, श्रौतस्य फलस्य विहितसाधनसाध्यत्वात्तेषामकरणे किं फलमित्यर्थः । तदिति, मुख्यं फलम् । तस्मिन्नित्यादि भवतीत्यन्तम् । तथा च तद्दृष्टिपदं भगवत्सङ्गमाभिलाषौत्कट्येन तदेकज्ञानवत्परमित्यर्थः । एतेनेति, तन्निर्धारणानियमपदेन । शेषं स्फुटम् । एवमेतैः प्रथमान्तपदैः फलपूर्वावस्था मुख्यमनिर्वाच्यफलमानुषङ्गिकफलं चेति त्रयमुक्तं भवति । इदं कया सङ्गत्योक्तमित्याकाङ्क्षायामाहुः प्रासङ्गिकमिति । सूत्रपदेनानधिकरणत्वमुक्तम् ॥ २३ ॥

एवं राजसानामन्यासक्तिवारणायाधिकरणद्वयप्रणीतं मुख्यभक्त्यभिलाषोपजननाय च तत्फलमत्र प्रदर्शितम् । अतःपरं मुख्यभक्तिः केन भवतीत्याकाङ्क्षायामधिकरणान्तरं वदतीत्याशयेन सूत्रं पठन्ति प्रदानवदेव तदुक्तमिति । साधनत्वेनेत्यादि । सर्वात्मभावकरणकशरणप्राप्तिसाधनत्वेन रूपेण सर्वात्मभावस्य स्वकृतिसाध्यत्वं स्यादित्यर्थः । तन्निवृत्तेरिति, शम्बादिनिवृत्तेः । कथमस्य वाक्योक्तार्थस्य प्रदानतुल्यतेत्याकाङ्क्षायां तदुपपादयन्ति प्रकृतेपीत्यादि । तदिति, उक्तविधं शरणगमनम् । नन्वेवं स्वकृत्यसाध्यत्वे प्रदानत्वमेवास्य सिद्ध्यति, न तु तत्तुल्यत्वमित्याकाङ्क्षायामाहुः भक्तस्येत्यादि । नन्वेमपि शरणागतेरेव स्वकृत्यसाध्यत्वं सिद्ध्यति, न तु सर्वात्मभावस्येत्यतो वाक्यस्य योजनान्तरमाहुः अथवेत्यादि । शरणपदं मामित्यस्य विशेषणं तथा सति सर्वात्मभावस्यैव प्रदानतुल्यत्वं

निराबाधत्वमित्यर्थः । अस्मिन् पक्षे विचारस्य स्मार्तत्वमेव पुरःस्फूर्तिमारोहतीत्यतः पक्षान्तरमाहुः यद्वेत्यादि । तत्तथैवेति, परमात्मनो लभ्यत्वं वरणजन्यसर्वात्मभावसाध्यमेव, तेन सर्वात्मभावो वरणैकलभ्यो न त्वितरसाधनसाध्य इत्यर्थः । एतेन सर्वात्मभावसाधनकत्वप्राप्तिबोधकं पूर्ववाक्यं वरणलभ्यत्वबोधकश्रुत्यर्थनिर्णायकमिति न तस्य पक्षस्य स्मार्तविचारत्वमिति बोधितम् । ननु पूर्वोक्तवाक्ये अकुतोभयसाधनतया शरणागतेः सर्वात्मभावपूर्वकस्वप्राप्तेर्वोपदेशः । अकुतोभयं च मुक्तिरेवाक्षरप्राप्तिरूपा, ‘अभयं वै जनक प्राप्तोसी’त्यादिश्रुत्या तथा निश्चयात् । एवं सति सर्वात्मभावस्य मुक्तिसाधनत्वमेव सिद्ध्यति, न पुरुषोत्तमप्राप्तिसाधनत्वम्, पुरुषोत्तमप्राप्तेः साधनकोटिप्रवेशेन तदपेक्षया मुक्तेरेवोत्कर्षश्च सिद्ध्यतीति पूर्वोक्तं सर्वं द्रविडमण्डकन्यायमनुसरतीत्याशङ्कायामकुतोभयपदतात्पर्यमाहुः भगवदुक्तेत्यादि । तथा चास्याः श्रुतेः ‘रसो वै स’ इत्यादिना रसरूपताप्रतिपादनोत्तरमानन्दमीमांसया ब्रह्मानन्दस्य गणितानन्दत्वसमर्पणोत्तरमुक्तत्वादस्या उक्त एवार्थो निश्चीयते, भगवद्वाक्ये‘प्यथैतत्परमं गुह्यं शृण्वतो यदुनन्दन । सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखे’ति तादृशेतिगोप्यकथनं प्रतिज्ञाय ‘केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे’ति भावेन बहूनां प्राप्तिमुक्त्वा, को भाव इत्याकाङ्क्षायां ‘रामेण सार्द्धं मथुरां प्रणीत’ इत्यादिश्लोकचतुष्टयेन विगाढभावात्मकं तत्स्वरूपं स्वरूपज्ञानाभावेपि तेन भावेनैव परब्रह्मरूपस्य प्राप्तिमुक्त्वा, ‘तस्मा’दित्यादिवाक्यद्वयेन सर्वात्मसाधनकस्वप्राप्त्यकुतोभयप्राप्ती उच्येते, तेनोक्तश्रुत्युक्तरसात्मकब्रह्मानुभवोत्तरकालीनतैवाकुतोभयस्य स्फुटतीति न पूर्वोक्तार्थो द्रविडमण्डकमित्यर्थः ॥ २४ ॥

एवमनेनाधिकरणेन सर्वात्मभावरूपाया मुख्यभक्तेर्वरणैकलभ्यत्वं निर्द्धारितम्, तत्र वरणश्रुतौ परमात्मनो वरणैकलभ्यत्वमुच्यते, न सर्वात्मभावस्येत्याकाङ्क्षायां तत्स्वरूपं वक्तुं तस्य वरणैकलभ्यत्वं च पुनर्दृढीकर्तुमधिकरणान्तरं प्रणयतीत्याशयेन सूत्रं पठन्ति लिङ्गेत्यादि ।

प्रतिबन्धकाभावस्येत्यादि । एतेन पूर्वाधिकरणसिद्धान्त आक्षिप्तः । वरदानमपि हि तपआदिसाधनैस्तोषे सति भवतीति सर्वत्र प्रसिद्धम्, तथा सति प्रतिबन्धकनिवृत्तेरागतैव कारणतेति वरणैकलभ्यत्वं न साधीय इति । सिद्धान्तं व्याख्यातुं लिङ्गभूयस्त्वबोधिकां श्रुतिं प्रदर्शयन्तस्तदर्थं प्रकटयन्ति सामोपनिषत्स्वित्यादिना । प्रसिद्धस्थलनिर्देशो विप्रतिपत्तिनिरासाय, स च संवादः ‘अधीहि भगव इति होपससाद सनत्कुमारं नारद’ इत्यारभ्यान्तं ज्ञेयः । तत्र अधीहीत्यन्तर्भावितण्यर्थः । अध्यापय । ‘बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योणे’रितीको ण्यतात्परस्मैपदम् । तादर्थ्येपि तेन पदव्यत्ययः । अत्र सर्वात्मभावस्य वरणैकलभ्यत्वं बोधयितुमतिदुरापत्वमुपपादयन्त‘स्तं होवाचे’ति सनत्कुमारवाक्यस्य तात्पर्यमाहुः प्रथमत इत्यादि । ‘उपसीदेती’त्यस्य ‘तं होवाचे’ति श्रौतेन पदेनान्वयः । ‘यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति होवाच’, यत्त्वं जानासि तत्प्रकथनेन मदुपसन्नो भव स्वाधीतं वद ततोतिरिक्तं तुभ्यं कथयिष्यामीत्युक्तवान् । विद्यान्तमिति । ‘वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्या’मिति, वेदानां वेदो व्याकरणम् । पित्र्यं श्राद्धकल्पः । राशिर्गणितम् । दैवमुत्पातज्ञानम् । निधिर्महाकालादिनिधिशास्त्रम् । वाकोवाक्यं तर्कशास्त्रम् । एकायनं नीतिशास्त्रम् । देवविद्या निरुक्तम् । ब्रह्मविद्या शिक्षाकल्पच्छन्दश्चितयः । भूतविद्या भूततन्त्रम् । क्षत्रविद्या धनुर्वेदः । नक्षत्रविद्या ज्योतिषम् । सर्पविद्या गारुडम् । देवजनविद्या गन्धर्वोक्तयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि । एतद्भगवोऽध्येमि ।

एतत्पूर्वोक्तं हे भगवन् अध्येमि स्मरामि । सोहं भगवो मन्त्रविदेवास्मि । शब्दार्थविदस्मि, परोक्षशाब्दानुभवमात्रं मेस्तीति स्वाधिकारमुक्तवान् । तर्हि किमवशिष्टमित्याकाङ्क्षायां 'नात्मवि'दित्यादि 'तारयत्वि'त्यन्तमाह । तथा चाप्तवाक्यप्रामाण्याच्छोकेन लिङ्गेन स्वस्यानात्मवित्त्वमनुमाय तज्ज्ञानेन शोकं तर्तुमुपसन्नोस्मीति नारदाशयः । तदा शोकतारणाय नारदेन विज्ञापितः सनत्कुमारः 'यद्वै किं चाध्यगीष्ठा नामैवैतन्नाम वा ऋग्वेद' इत्यादिना नारदोक्तानां सर्वेषां नामत्वबोधनपूर्वकं नाम्नो ब्रह्मत्वेनोपासनमुपदिश्य, 'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवती'ति तत्फलं शोकतारणायोक्तवान्, तदा नारदः केवलनामत्वेनोपासने उक्तफलाभावं ब्रह्मत्वेनोपासने उक्तं फलं तदपि यावन्नाम्नो गतमित्यनेन नामगतिपरिच्छिन्नमिति विमृश्य तेन शोकातरणं निश्चित्य ततोधिकं जिज्ञासमानोऽ'स्ति भगवो नाम्नो भूय' इति पप्रच्छ, इदं भूयःपदं न बाहुल्यार्थकमपि तूत्कर्षार्थकमित्याशयेनाहुः भूय इत्यादि । आधिक्यमुत्कर्षः । तत्र 'नाम्नो वाव भूयोस्ती'त्युत्तरिते'तन्मे भगवान्ब्रवीत्वि'ति विज्ञापयामास । तदा सनत्कुमारो 'वाग्वा नाम्नो भूयसी'त्यादिना नामरूपविज्ञापकत्वरूपं तन्माहात्म्यमुक्त्वा वाचो ब्रह्मत्वेनोपासनं तत्फलं च पूर्ववदुवाच । एवमग्रेपि । तत्र मन इति मननव्यापारविशिष्टमन्तःकरणम्, मननव्यापारश्च विचारात्मकः । एवं सङ्कल्पोपि कर्तव्याकर्तव्ययोर्विषयविभागेन समर्थनरूपस्तादृशान्तःकरणस्यैव वृत्तिविशेषः । चित्तं चेतयितृत्वं प्राप्तकालानुसन्धानवत्त्वम्, अतीतानागतविषयप्रयोजननिरूपणसामर्थ्यं च । ध्यानं शास्त्रोक्तदेवतालम्बनो विजातीयानन्तरितः प्रत्ययसन्तान एकाग्रतापरपर्यायः । विज्ञानं शास्त्रार्थविषयकं विशिष्टज्ञानम् । बलमन्नभक्षणजनितं मनसो विज्ञेयविभावनसामर्थ्यम् । अन्नमापस्तेज आकाशः प्रसिद्धाः । स्मरः स्मरणमप्रयत्नश्चित्तव्यापारः । आशा अप्राप्तवस्त्वाकाङ्क्षा, तृष्णा कामाद्यपरपर्याया, प्राणः सूत्रं आसन्यः सर्वसङ्घातनियामकः । एतस्य दर्शनमननविज्ञानैः सत्येनातिवादित्वं फलमुक्तं 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवती'ति, न तु पूर्वोक्तोपासनानामिवोपास्यगतिपरिच्छिन्नम् । अतिवादित्वं च पूर्वोक्तनामाद्यतितवादित्वं एतदतिरिक्तनिकर्षवादित्वमिति यावत् । तत्र 'नापह्नुवीते'त्यनेन सङ्कोचवारणादुत्कर्ष उक्तोतिवादित्वे पूर्वोक्तोपासनाफलानामिवोपास्यगतिपरिच्छिन्नत्वं नोक्तमिति प्राण एवात्मेति भ्रमो नारदस्य मा भूदित्येतदर्थमाह, 'एष तु वा अतिवदति यः सत्येनातिवदती'ति । एवमुक्ते नारदेन प्राणस्य तत्त्वं न प्राणः, किन्तु सत्यमित्यवगतम्, ततः 'सोहं भगवः सत्येनातिवदानी'ति स्वाभिप्राये निवेदितेप्यपृष्टस्यावक्तव्यत्वात्तस्य प्रश्नकरणायाह 'सत्यं त्वेव विजिज्ञासितव्य'मिति । तदा 'सत्यं भगवो विजिज्ञास' इति प्रश्ने 'यदा वै विजानात्यथ सत्यं वदती'त्यादिना तत्कारणत्वेन विज्ञानं विज्ञानकारणत्वेन मतिमित्येवं श्रद्धानिष्ठाकृतिसुखान्तानुक्तवान् । अत्र षट्सु प्रश्नोत्तरयोर्वैयधिकरण्यम्, सत्यादिविषयकायां जिज्ञासायां तत्कारणानां कथनात् । ततः सुखस्वरूपजिज्ञासायां 'यो वै भूमा तत्सुख'मित्यादिना भूमानं सुखत्वेनोक्तवान्, तेन ज्ञायतेऽग्रोक्तानां सत्यादीनां कारणभूतभूमाभिन्नत्वं तज्ज्ञानगम्यत्वं च, 'प्राणा वै सत्यं तेषामेष सत्यम्, नित्यं विज्ञानमानन्दं ब्रह्मे'त्यादौ तथा सिद्धत्वात् सन्दंशपतितत्वान्मत्यादयोप्येवं ज्ञेयाः । ततो भूमस्वरूपजिज्ञासायां 'यत्र नान्यत्पश्यती'त्यादिना यस्मिन् रसरूपे ज्ञाते इतरविषयकदर्शनश्रवणविज्ञानाभावः स भूमेति भूमस्वरूपमुक्तवान्, सुखस्यान्तरेवाभिव्यक्तेर्भूमरूपस्यापि तस्य तत्रैवाभिव्यक्त्याऽऽनन्दत्वान्तर्वर्तित्वाभ्यां रसरूपत्वेन भूम्नः सर्वात्मभावरूपत्वं सिद्ध्यति, तदेतद्धृदिकृत्याहुः एतेनेत्यादि । एतादृशत्वं लौकिकेपि रसे भवतीति तद्वारणायाल्पे सुखं निराकृतं 'नाल्पे सुखमस्ती'ति, तत्राल्पे कथं न सुखमित्याकाङ्क्षायामल्पस्वरूपकथनपूर्वकं भूम्नोल्पस्य च यथायथममृतत्वं मर्त्यत्वं चाह 'यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्य'मिति । तथा च शोकपर्यवसानान्नाल्पे सुखमित्यर्थः ।

अत्र भूम्नोऽमृतत्वकथनात्कालापरिच्छिन्नत्वं बोधितम् । तथा सत्युत्पत्तियोगात्स्थितिस्तस्य जिज्ञास्येत्यतो नारदः पृच्छति ‘स भगवः कस्मिन् प्रतिष्ठित’ इति, तत्रोत्तरमाह ‘स्वे महिम्नि यदि वा न महिम्नी’ति, अत्र पक्षद्वयकथनान्नारदस्य पुनः सन्देहो भविष्यतीत्याशङ्क्य निषेधवाक्यं व्याकरोति ‘गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमी’ति, गोअश्वादिरूपे महिम्नि न प्रतिष्ठित इत्येवमहं ब्रवीमीत्यर्थः । तर्हि स को वा महिमा यत्र प्रतिष्ठित इत्याकाङ्क्षायां ‘अन्यो ह्यन्यस्मिन् प्रतिष्ठित इति ब्रवीमीति होवाचे’ति श्रुतिराह । गोअश्वादिभ्योऽन्यो यो महिमा स्वे भक्ते य उत्कर्षरूपो भावस्तस्मिन्प्रतिष्ठित इत्यर्थः । (तेनेदं सर्वात्मभावरूपं भूमाख्यं सुखमत्यन्तैकान्तभक्त एवेति निश्चीयते ।) ततः स कीदृक् महिमा येन तत्रैव प्रतिष्ठित इत्याकाङ्क्षायां तं विवृणोति ‘स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदं सर्वमित्यथात अहङ्कारादेश’ इत्यादि । तथा च यस्य सर्वत्र तद्भानं सर्वस्मिंश्च तदभेदभानं इति एवंप्रकारेण अथ एवंभानोत्तरं अतः अस्मात् भानादहङ्कारादेश एव भगवत्प्रतिरूढतया स्वस्मिन् भूमत्वप्रतिसन्धाने स्वस्यैव पूर्ववत्सर्वत्र भानं सर्वस्मिन् स्वाभेदभानं च तादृशो यः तस्मिन् प्रतिष्ठित इत्यर्थः । एतेन स्वे आत्मीये परमैकान्तिकभक्ते महिम्नि तन्निष्ठे भावे स्वविभूतिरूपे प्रतिष्ठितो नेतरत्रेति भावो बोधितः । तर्ह्यात्मादेश इत्यादिकं किमित्युच्यत इत्यत आहुः तत्र विरहभावेत्यादि । एतेषामिति, विरहभावकृततत्तत्स्फूर्तिरूपाणां ज्ञानानाम् । तथा च पूर्वोक्तभाववद्भक्तस्वरूपनिश्चायनार्थमेवेदमप्युच्यत इत्यर्थः । अहङ्कारादेशात्मादेशयोः कथनाद्वामदेववत् ज्ञानिभावस्यैव विभूतिरूपत्वमिहाभिसंहितं न तु भक्तभावस्येति शङ्का भविष्यतीति ज्ञानिनः सकाशाद्विवेक्तुमाह ‘स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द’ इति । उक्तप्रकारकदर्शनमननविज्ञानवत्वानुक्तप्रकारकरत्यादिरूपसंयोगभाववान् भवति, न तु शुष्काद्वैती वाकर्मी कूटस्थवद्वा भवतीति भक्त एवायं बोद्धव्य इत्यर्थः । एवं तत्स्वरूपं निष्कृष्य पूर्वं शोकपारंतारणार्थं चोदितत्वात्तत्तारणोपायत्वमेतस्यैव भावस्य नेतरस्येति बोधयन्नुक्तप्रकारकभक्तस्य फलमाह ‘स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवती’ति । सः भूमात्मरत्यादिमान् स्वस्मिन् भूम्न्यात्मन्येव राजमानो भवति, तस्य नामाद्याशापर्यन्तलोकेषु स्वातन्त्र्यं भवति, ततः सर्वप्राप्त्या शोकपारतीर्णो भवतीत्यर्थः । एवं शोकतारणोपायमुपदिश्य उपायान्तरं निराकर्तुमन्यथा ज्ञानवतो निन्दति ‘अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ती’त्यादि । अन्यस्मिन् भूमातिरिक्ते राजमाना भवन्तीत्यर्थः । नन्वत्र जीवन्मुक्त एव वक्तव्यः, ‘सर्वेषु लोकेषु कामचारो भवती’ति गतिस्थित्योर्बोधनात् । न तु भक्तः । तादृशस्य भक्तस्य पूर्वोक्तरीतिकविरहभावे दशमावस्थाया एव सम्भवेन गतेः सुतरां बाधितत्वादित्याकाङ्क्षायामाहुः तत्र संयोगेत्याद्युक्तवानित्यन्तम् । ततः पूर्वोक्तसर्वात्मभावोत्तरं संयोगभावे असतीति पदच्छेदः । श्लोकार्थमाहुः तत्र इत्यादि । श्लोकार्थस्तु, पश्य उक्तदर्शनवान् मृत्युरोगौ दुःखभावं न कस्यापि पश्यति, उतेति पादपूरणे पक्षान्तरे वा । दुःखतां दुःखसत्तामेव न पश्यति तथा च मृत्युरोगयोः (का)वार्तेत्यर्थः । दर्शनविषयमाह सर्वमिति, सर्वं भूमात्मकमेव पश्यतीत्यर्थः । फलमाह ‘सर्वशः सर्वमाप्नोती’ति । तथा सति न पुनः शोक इत्यर्थः । प्राप्तौ प्रकारमाह ‘स एकधे’त्यादिना । सः भूमा पश्यार्थमेवं प्राणादिरूपो भवति, तेन सर्वं पश्यः प्राप्नोति, पश्यो वैवं भूत्वा भूम्नः सर्वं प्राप्नोतीत्यर्थः । स एकधेति श्लोकेन ‘आत्मत आविर्भावतिरोभावा’विति श्रुत्युक्तयोस्तयोः प्रकार आविर्भावमुखेन विवृतः । एवं फलपर्यन्तं भावस्वरूपमुक्तम्, तेनापि भक्त एवात्रोच्यत इति दृढीकृतम् । अयमुपदेशो न यस्मै कस्मैचिद्बुधे कर्तव्योऽपि तु उत्तमाधिकारिणे एवेति बोधनाय श्रुतिराह ‘तस्मै मृदि-

तकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमार' इति । सनत्कुमारस्य कृपालुतामाह 'तं स्कन्द इत्याचक्षत' इति । स वरदानेन शिवस्य पुत्रोपि जातस्तेन तथेत्यर्थः । अतःपरं परं सूत्रं व्याकर्तुमाहुः स चेत्यादि । स इति भगवान् प्राणपोषकः । स इति, सर्वात्मभावः । तथेति, भक्त्यनुग्रहप्रकारेण । तं चेति, वरणं चेत्यर्थः । नन्वात्मादेशे 'आत्मैवेदं सर्व'मिति सर्वस्यात्मत्वमानं श्रावितं तथा सति स्वात्मन्यपि तदभेदो भासत्येव, भाते च तस्मिन् पूर्वोक्तरूपः सर्वात्मभावस्तेन प्रतिमन्स्यते, न हि स्वात्मत्वेन ज्ञाते ब्रह्मणि विरहभावो वक्तुं शक्यो विरोधादिति हृदिकृत्याहुः ज्ञानमार्गीयेत्यादि । उपपादितमिति, फलदित्सया पूर्वमेव सत्वात्तत्प्रतिबन्धकं भगवता न क्रियते एवेतीदमपि न क्रियत इत्येवं विविच्योक्तमित्यर्थः ।

पूर्वोक्तमर्थं दृढीकर्तुं सूत्रद्वयेन शङ्कत इत्याशयेन सूत्रं पठन्ति पूर्वेति । निरूपित इति, ऐतदात्म्येति महावाक्ये निरूपित इत्यर्थः । उत्तरमिति, सनत्कुमारोक्तं प्रत्युत्तरम् । बाह्यं तदिति, बाह्यपूजनम् । द्वितीयं पठन्ति अतिदेशाच्चेति । तत्पूर्वमिति, पदद्वयमिदम् । तत् जगत् पूर्वं पूर्वप्रपाठके इत्यर्थः । अनूद्येत्यादि । 'यद्वै किं चाध्यगीष्ठा' इत्यनेनानूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते, यथा कौण्डपायिनां सत्रे 'मासमग्निहोत्रं जुहोती'त्यग्निहोत्रनाम्ना प्राकृताग्निहोत्रधर्मा अतिदिश्यन्ते तथात्र तेषु नामत्वविधानेन नामात्मकब्रह्मणि प्रतीतं ब्रह्मत्वमृगादावतिदिश्यत इत्यर्थः । इत इति, ब्रह्मधर्मातिदेशेनर्गादीनां ब्रह्माभेदबोधनादित्यर्थः ।

एवं सूत्रद्वयेनाशङ्काग्रिमेण परिहरतीत्याशयेन सूत्रमाहुः विद्यैवेत्यादि । ननु विद्याशब्दो ज्ञानसामान्ये प्रसिद्धः सर्वात्मभावरूपे विशेषे कथं नियन्तुं शक्यत इत्याकाङ्क्षायां तदुपपादयितुं वरणादिश्रुत्येकवाक्यतया प्रकृतश्रुतितात्पर्यमाहुः अत्रेत्यादि । तदुद्घाटयितुं वरणश्रुतिं व्याकुर्वन्ति नायमित्यादि । 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वा'मिति तु मुण्डकस्था । अत एवेति, पुरुषोत्तमस्य वृणुतास्मात्मत्वादेव । तस्यैष आत्मा सम्बर्थात्तं स्वां तनुं वृणुत इत्यन्वयो बोध्यः । ननु माध्यन्दिनानामन्तर्यामिब्राह्मणे 'यस्यात्मा शरीर'मिति सामान्यत आत्ममात्रस्य शरीरत्वेन श्रावणात्कथं वृतस्यैतत्तनुरूपत्वमित्याकाङ्क्षायामाहुः तद्वरणेत्यादि । तथा च तत्र यद्यपि शरीरत्वमात्मनः श्रावितं तथापि 'य आत्मानमन्तरो यमयती'ति नियन्तव्यत्वायैव साधारण्येन श्रावितं न तु स्वकीयत्वकथनपूर्वकम् । अतः शरीरत्वसाधारण्येपि यं स्वीयत्वेनालोचितवान् तमेव वृणुत इत्यर्थः । विवृणुत(इति)पाठेप्ययमेवार्थः । ननु विवृणुत इति पाठेऽयमर्थो न स्फुटति, विवरणपदस्य प्रकाशार्थत्वात् । तथा च यं वृणुते तस्य स्वां तनुं पश्यतीत्येवार्थो युक्त इति चेत्, सत्यम्, तथापि सर्वेषां जीवानां तुल्यत्वाद्वरणीये कश्चिद्विशेषो वाच्य एव । स यदि साधनकृतो विवक्षितस्तदा पूर्वार्धासङ्गतिः । यदि साधनाभावकृतस्तदा पामरपशुकीटमात्रे तदापत्तिः । अतोन्यथानुपपत्त्याऽऽलोचनकृत एव वाच्यः । सोपि ज्ञानिभक्तयोः साधारणश्चेद्भावभेदात्तनुपदवैयर्थ्यापत्तिश्च, स्वं विवृणुत इत्येतावतैव चारितार्थ्यात् । अतस्तनुपदानुरोधात्साकारस्यैव प्रकाशो वक्तव्यः । स तु प्रायो भक्तानामेव । यत्तु, 'यमेवैष वृणुते तेन लभ्य' इत्यस्य यः प्रार्थयते तेन प्रार्थने लभ्य आत्मकामनयैवात्मा ज्ञेय' इति व्याख्यातं कैश्चित् । तत्र व्याख्येयविरोधः स्फुट एव । किञ्च । गीतायां 'एवं सततयुक्ता ये' इत्यर्जुनप्रश्ने भगवता 'मय्यावेश्य मनो ये मा'मिति तथैवोत्तरदानात्, 'ज्ञानी त्वात्मैव मे मत'मिति भजनमुपक्रम्यैव तस्यात्मत्वकथनात्, शुष्कज्ञान्यपेक्षया योगिन उत्कर्षमुक्त्वा ततोपि भक्तोत्कर्षस्यैव 'तपस्विभ्योधिक' इति

सन्दर्भे कथनात्, भक्तस्यैव प्रियत्वकथनाच्चोक्त एवार्थः। अतस्तस्मिन्नपि पक्षे तनुप्रकाशलिङ्गेन भक्तस्यैव वरणविषयत्वं निश्चीयते, तथा सति स्वीयत्वं तेष्वेव सिद्धमिति पूर्वोक्तप्रकारेपि न कश्चिद्दोष इति हृदिकृत्योक्तार्थदार्ढ्याय श्रुत्यन्तरमाहुः अत एवेत्यादि । तथा च यदि लाभपदार्थः प्रकाशात्मक एव स्यात्तदास्यामपि प्राप्तिपदार्थः कामभोगरूपो नोच्येत, अतो न पूर्वोक्तेर्थे विप्रतिपत्तव्यमित्यर्थः। एतच्छ्रुतौ विप्रतिपत्तिश्चेत्तदा पूर्वग्रन्थमवलोक्य निरसनीयेत्याशयेनाहुः एतदित्यादि । नन्वियं श्रुतिः काठके मुण्डके चास्ति । तत्र काठके 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदे'ति प्रश्ने। 'सर्वे वेदा यत्पदमामनन्ती'त्यादिना 'एतद्ध्येवाक्षरं ब्रह्मे'ति प्रकृत्य 'नायमात्मे'ति पठितम् । मुण्डकेपि 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्य'मित्यक्षरमेवोपक्रान्तम्, एवं सति पुरुषोत्तमप्रसङ्गस्य कुत्राप्यदर्शनात्कथमत्रैवं व्याख्यायत इति चेत् । अनवधाय वदसि । काठके सर्ववेदवेद्यत्वं परस्यैवोच्यते, तच्च वाच्यवाचकाभेदविवक्षया प्रणवे वक्तुमक्षरपदेन प्रणवं परामृश्य तत्र ब्रह्मत्वमुपासनासाधनत्वाय विधीयते मन्त्रद्वयेन, ततो 'न जायते न म्रियते वे'ति मन्त्रद्वयेनोपासकस्वरूपमुक्त्वा 'अणोरणीयान्महतो महीया'नित्यादिमन्त्रत्रयेण तस्य परस्यात्मनो विरुद्धधर्माश्रयत्वादिकमुक्त्वा तस्य ज्ञानं कथमित्याकाङ्क्षायां 'नायमात्मे'ति पठ्यतेऽतो नात्र तद्गन्धः । मुण्डकेपि, प्रथमे 'यत्तदद्रेश्यमग्राह्य'मित्यादिना सर्वकारणत्वेन प्रस्तुतं द्वितीयेपि 'सुदीप्तात्पावकाद्विस्फुलिङ्गा' इति मन्त्रेण तस्मात्सजातीयविजातीयसृष्टिमुक्त्वा 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रोऽक्षरात्परतरः पर' इति मन्त्रे पूर्वोक्तादक्षरात्परतः परोतिरिक्त उक्तः । तृतीयेपि 'द्वासुपर्णे'त्यनेनान्तर्यामितया तमेव परामृश्य ततो 'जुष्टं यदा पश्यत्यन्यमीश'मित्यादिना तद्दर्शनफलमुक्त्वा, ततो 'ज्ञानप्रसादेने'त्यनेन निष्कलज्ञानात्तद्दर्शनमुक्त्वा ततो ज्ञानप्रसादेपि न स्वसामर्थ्येन पश्यति किन्तु तत्कृतसामर्थ्येनैवेत्याशयेन 'नायमात्मे'त्यादिकं पठ्यते, तेनोभयत्रापि पुरुषोत्तम एव प्रकृत इत्यनवद्यम् । एतदेव गीतायामुपबृंहितम् । द्वाविमौ पुरुषौ लोक इत्यारभ्य प्रथितः पुरुषोत्तम इत्यन्तेन । तस्मान्नात्र शङ्कालेशः । तदेतदभिसन्धायोक्तं एतच्चेत्यादि । आनन्दमयाधिकरणेऽक्षरादुत्तमस्य रसरूपस्यैव परशब्देन निश्चितत्वात्परमव्योमपदेन निश्चितत्वादन्नमयादीनां तद्विभूतित्वेन निश्चितत्वाद्वरणेनैव तत्प्राप्तेश्चोक्तत्वात्तथेत्यर्थः । ननु तथापि तेषु तेषु भक्तेषु वरणमप्यनेकविधमिति कथं रसमार्गीयमेवात्र ग्रहीतुं शक्यत इत्याकाङ्क्षायामाहुः किञ्चेत्यादि । तथा चाग्रिमश्रुत्या तथावसीयत इत्यर्थः । श्रुतिस्तु मुण्डके, 'नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गा'दिति । ननु श्रुतौ बलशब्दो वर्तते न भक्तिशब्द इति कथं तन्निश्चय इत्याकाङ्क्षायां बलशब्दस्य भक्तिवाचकत्वमुपपादयन्ति बलकार्यमित्यादिना । उच्यत इति, परोक्षवादेनोच्यते । ननु बलशब्दः शरीरसामर्थ्ये प्रसिद्धस्तत्परित्यज्य कथं भक्तिपर इत्यत आहुः अन्यथेत्यादि । तथाच पूर्ववाक्योक्तार्थानुपपत्त्या बलस्य देहमनोव्यापाररूपभक्तिलक्षकत्वेनाद्रियत इत्यर्थः । ननु पूर्ववाक्ये प्रवचनादीनामेव निषेधो नत्वितरेषामिति नानुपपत्तिरित्यत आहुः वरणेत्यादि । तथा च उत्तरार्धे एवकारेण वरणस्यैव हेतुतानिश्चायनात् प्रवचनादीनां जीवबलकृततयावत्साधनोपलक्षकत्वे अनुपपत्तेः सिद्धौ प्रमाणासहायस्य शारीरबलस्य सुतरां ग्रहीतुमशक्यत्वादस्मिंश्च वाक्ये बलाभावनिषेधमुखेन बलस्य हेतुताबोधनाल्लौकिकप्रामाणिकबलाभ्यामतिरिक्तमेव बलमत्र बलपदेन ग्राह्यं तच्चोक्तरीत्या भक्तिरेवेत्यतः सैव गृह्यते, भगवांस्तु 'बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम्, या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवले'त्यादौ भ्रूभङ्गीकारकसामर्थ्येपि बलपदप्रयोगदर्शनात्सामर्थ्ये एव शक्तं बलपदं प्रकरणादिना विशेषे पर्यवस्यति, तेन न कोपि शङ्कालेश इति भावः । श्रुतौ बलपदेन भक्तिग्राहकत्वाग्रहेण च

'प्रमादा'दित्यादि यदुच्यते, तेन भक्तस्याप्यप्रमादः सलिङ्गं तपश्च सहकारित्वेनोच्यते, तत्राप्रमादो भगवदिच्छानुरूपाचरणादिः। सलिङ्गं तपः सर्वात्मभावसहितो विरहभावो ज्ञेयः । उत्तरार्धं व्याकुर्वन्ति **एतादृशस्येत्यादि** । **तद्धृदय** इति, श्रौतस्य षष्ठ्यन्ततत्पदस्य तात्पर्यकथनायेदम् । एवं श्रुतिद्वयार्थं निश्चित्य सौत्रस्य विद्यापदस्य सर्वात्मभावबोधकत्वमुपपादयितुं विषयवाक्यतात्पर्यं पूर्वसङ्गतिं च विशदीकुर्वन्ति **प्रकृत** इत्यादि । **ब्रह्माभेदबोधनेनेति**, अक्षराभेदबोधनेन । **तत्रेति**, सनत्कुमारनारदयोर्भक्तयोः संवादे । **तद्धेत्वसिद्धिरिति**, पूर्वपक्षनिरूपितप्रकरणैक्यरूपस्य हेतोरसिद्धिरित्यर्थः । एवं प्रकरणे भिन्ने सत्यतिदेशोप्यकिञ्चित्कर एव, नह्यतिदेशमात्रेण तदवान्तरभेदत्वसिद्धिः क्वापि सिद्धा । निर्धारणं दर्शयन्ति **सुखं त्वित्यादि** । पूर्वत्र 'सदेव सौम्ये'ति सद्रूपं आत्मानं प्रकृत्य तदभेदज्ञानमुपदिष्टम् । इह तु निरवध्यानन्दरूपं जिज्ञास्यत्वेन निर्धारयतीति विषयभेदान्न पूर्वं ज्ञानं किन्तु मुख्या सर्वात्मभावरूपैव विद्योच्यत इत्यर्थः । ननु भूमात्र जिज्ञास्यत्वेनोच्यते, तावता सर्वात्मभावः कथं सिध्यतीत्याकाङ्क्षायां भूमलक्षणवाक्ये सिध्यतीत्याशयेनाहुः **भूम्न** इत्यादि । ननु सर्वात्मभाववतां लीलोपयोगिपदार्थदर्शनं दृश्यते, भूमलक्षणे तु तदितरदर्शनं निषिध्यत इति भूमलक्षणे सर्वात्मभावो नोच्यत इत्याकाङ्क्षायामाहुः **तथा सतीत्यादि** । निरासप्रकारमाहुः **तैरित्यादि** । तथा च तद्दर्शनं प्रभुकृतं न भक्तकृतमतो भक्तेषु न सर्वात्मभावसम्भवाभाव इत्यर्थः ।

इममेवार्थमग्रिमसूत्रे स्फुटीकरोतीत्याशयेन सूत्रं पठित्वा व्याचक्षते **दर्शनाच्चेत्यादि** । पुनराशङ्क्य सूत्रान्तरमवतारयन्ति **नन्वित्यादि** । **समाम्नायेति** । पूर्वतन्त्रे असंजातविरोधत्वेनोक्तक्रमप्राबल्यस्य स्थापितत्वात्तदनुरोधेनैवोपसंहारगताः शब्दा नेया इत्यर्थः । **आत्मपदानामिति**, 'अथात आत्मादेश' इत्यारभ्य पठितानां तेषाम् । **वाक्यभेद** इति, अर्थैकत्वाभावात्स इत्यर्थः । सूत्रं पठित्वा समादधते **श्रुत्यादीति** । श्रुतिं दर्शयन्ति **प्रकृत** इत्यादि । न केवलमुदासीनतया ज्ञायमानः शोकं तारयति, अपि तु लभ्यमानः, अन्यथा 'आत्मलाभान्न परं विद्यत' इति श्रुत्यन्तरात्तदलाभे परमफलाभावाच्छोको नापेयात् । लाभश्च न ज्ञानमात्रं किन्तु स्वाधीनतापुरस्कृतमाकाङ्क्षापूर्त्या विलक्षणानन्दजनकं ज्ञानम् । स च लाभो वरणाधीन इति शोकतारणश्रुतिसार्थक्यसम्पादिका वरणश्रुतिरेव बलीयसी । आदिपदसूचितं हेत्वन्तरं दर्शयितुं **अपरं चेत्यादि** विभजन्ति **सहीत्यादि** । **सनत्कुमारोक्तरूपमिति**, सनत्कुमारोक्ते वाक्ये रूपे किं नामादिरूपं लक्षीकृत्येत्यर्थः । तथा चैतेन प्रश्नद्वयेनाप्युपक्रमगतमात्मपदं पुरुषोत्तमपरमेवेत्यर्थः । नन्वेवमात्मपदस्य पुरुषोत्तमपरत्वेपि सर्वात्मभावलिङ्गस्याभावात्तस्य कथं सिद्धिरित्यत आहुः **तदेत्यादि** । तथा च द्वितीये प्रश्नोत्तरे सर्वात्मभावलिङ्गदर्शनादेव सिद्धिरित्यर्थः । एतेनावश्यकोपपत्तिरप्येतत्तात्पर्यनिर्णायकेत्युक्तम् । उक्तमर्थं दृढीकर्तुमाशङ्क्य सूत्रान्तरमवतारयन्ति **नन्वेतयेत्यादि** । **अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तमिति**, अत्र न बाध इत्यनुषज्यते । तथा चानुबन्धादिभ्यो हेतुभ्यः सर्वात्मभावलिङ्गात्मकभावस्य निश्चायनात्तद्बाधोत्र न वक्तुं शक्य इत्यर्थः । इममर्थं व्याकर्तुं पूर्वं श्रुतिं व्याचक्षाणा आहुः **भूमेत्यादि** । तथा च यदि तथाभिप्रेया'त्स्व' इत्येकमेव पदं वदेत्, 'अन्यो ह्यन्यस्मिन्प्रतिष्ठित' इति च न व्याकुर्यादतस्तथेत्यर्थः । नन्वत्र 'स्वे महिम्नी'ति कथनोत्तरं 'यदि वा न महिम्नी'त्याशङ्क्य 'गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानी'त्यनेन महिमस्वरूपं निरूप्य, 'नाहमेवं ब्रवीमी'त्यनेन तत्र भूमप्रतिष्ठां निषिध्य 'ब्रवीमीति हे'त्यनेन स्वस्मिन् प्रतिष्ठां निगमयित्वा पूर्वोक्तमहिमनि प्रतिष्ठानिषेधे हेतुरुच्यते 'अन्यो ह्यन्यस्मिन्प्रतिष्ठित' इति, एवं सति

'स्वे महिम्नी'त्यस्य स्वस्वरूपे व्यापक इत्यर्थः सेत्स्यतीत्यस्वरसमुद्भाव्य पक्षान्तरमाहुः स्वरूपात्मके महिम्नीति चेति । अनेनापि प्रकारेण व्याख्याने तत्प्राप्तिरित्यर्थः । तथात्वं व्याकुर्वते भगवदित्यादि । सर्वभावस्य रसात्मकत्वाद्भगवदभेदः प्रागेव विवृत इति महिमरूपत्वं विवृण्वन्ति तदितरेत्यादि । तथा च भावस्याधिकरणसापेक्षत्वादर्थादेव तत्प्राप्तिरिति सोपि पक्षो न दुष्ट इत्यर्थः । एवं सर्वात्मभाव एवात्रोच्यत इति व्याख्याय पूर्वोक्तशङ्कामपाकर्तुं सर्वात्मभावलिङ्गानि स्फुटीकुर्वन्तः सूत्रस्थं हेतुं व्याकुर्वन्ति सत्त्वित्यादि । त्रिविधा इति द्वितीया निरूप्येत्यनेनान्वेति । तमेवानुबध्नाति, धृतभक्तं धृतभक्तनिष्ठं भावमेव वा गोचरयतीत्यर्थः । तत्र हेतुः । तच्छब्देस्यत्यादि । 'स वा एष' इत्यनेन पुरुष उच्यते, 'एवं पश्य'न्नित्यादिना दर्शनमननादिकर्तृताबोधनेन भाववैशिष्ट्यं च स्फोर्यत इति पूर्वोक्तानुबन्धदर्शनात्तादृशभक्तनिष्ठसर्वात्मभावरूप एव महिमा तत्राभिप्रेत इत्यर्थः । एवं सतीति भिन्नं वाक्यम् । उक्तरूपे महिम्नि विद्यमान एव श्रुतिसङ्गतिरित्यर्थः । लिङ्गं व्याकर्तुमादिपदार्थमाहुः आदिपदादित्यादि । तत्स्वरूपं विवृण्वन्ति पूर्वमित्यादिना । स्फुटमग्रे । ननूक्तयुक्तिभिरत्र भवतु सर्वात्मभावस्तथाप्यत्र फलत्वेन सर्वग्रन्थिमोक्षस्यैवोक्तत्वात्तस्य च 'भिद्यते हृदयग्रन्थि'रिति श्रुत्यन्तरस्वारस्येन परावरदर्शनफलरूपस्यैव ग्राह्यत्वात्तस्य च 'तमेवंविद्वानमृत इह भवती'त्यादिश्रुत्यन्तरे मुक्तिरूपत्वेनैवोक्तत्वादस्यापि मुक्तावेव यदि पर्यवसानं तदा फलतो न कश्चिद्विशेषः । अथ न, तदा प्रकृते फलोक्तिविरोध इत्यस्यापि फलबलेन पूर्वविकल्पत्वमेवेत्याशङ्कां हृदिकृत्वा सूत्रांशमवतारयन्ति ननु सर्वेत्यादि । प्रज्ञान्तरपृथक्त्ववदिति, प्रज्ञानन्तरकृतं पृथक्त्वं प्रज्ञान्तरपृथक्त्वं तद्वत् न बाध इत्यन्वयः । एतमेवार्थं व्याकुर्वन्ति मुमुक्षुभक्तेत्यादि । शेषं प्रकटार्थम् । दृष्टश्च तदुक्तमित्यत्रापि न बाध इत्यन्वयो बोध्यः । एवं च दर्शनान्तरे हृदयग्रन्थिभेदनं नानाविधवृत्त्यनुत्पत्तिरूपम्, अत्र तु सर्वग्रन्थीनां प्रविमोक्षो नानाचित्त्युदयेपि तासामबन्धकत्वरूपमिति दर्शनभेदात्फलभेदस्तत्क्रतुन्यायादप्युपपन्न इति भावः ।

लिङ्गविरोधपरिहारायाग्रिमं पठतीत्याशयेन सूत्रं पठन्ति न सामान्यादिति । विरोधं व्युत्पादयन्ति नन्वित्यादि । प्रतिपाद्यत इति । 'सालोक्यसार्ष्टी'ति वाक्ये उच्यते । एवं सतीति, श्रुतिस्मृत्योर्विरोधे सतीत्यर्थः । उक्तप्रमाणं सालोक्यम् । अनेकधा इति, 'आदित्यो यूपः यजमानः प्रस्तरः स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुष' इत्यादावित्यर्थः । प्रकरणादिति, लभ्यत इति शेषः । अत एवेति, लोकान्तरस्य मृत्युतुल्यत्वादेवेत्यर्थः ।

परेणेति सूत्रे ॥ श्रुतिवाक्यपदेन, 'न पश्य' इति श्लोको बोध्यः । अनुबन्ध इति, अनुपश्चाद्बध्यते सम्बध्यत इत्यनुबन्धः । उक्तार्थे अपुष्टार्थत्वं विभाव्यार्थान्तरमाहुः अथवेत्यादि ।

अग्रिमसूत्रभाष्यं तु प्रकटार्थम् । अन्ये त्वेतत्सूत्रमग्रिमाधिकरणे योजयन्ति । तदग्रे विचारणीयम् ॥ २५ ॥

एवमनेनाधिकरणेनाविहितभक्तिरूपसर्वात्मभावस्वरूपं तस्य सर्वसाधनोत्कृष्टत्वं तत्फलं च निर्धारितम् । अतःपरम् ।

---

१. एतावदेवोपलब्धमिति ।

EDITOR'S NOTE.

After the publication of the first two Pādas of the Adhyāya III of the Aṇu Bhāshya with Bhashya-Prakās'a and Ras'mi, we have been fortunate in the further acquisition of manuscripts by the Grace of Lord Kṛishṇa. In the introduction to Pāda I we stated that the Bhāshya Prakās'a the original of which in the author's own hand is in our possession missed the final revision made by the author himself, and the additional portions found in some copies of of the Prakās'a were of the authorship of S'rī Purushottamajī himself even though not found in the original manuscript. This inference was based merely on our familiarity with the style of Purushottamaji, which was apparent in those passages. Our diffidence was the more because the learned author of Ras'mi had not chosen to write his commentary on those passages. Gopes'varaji has based his Ras'mi on the original manuscript of Prakās'a which came in his possession through his father Gokulotsavaji who was adopted in the Purushottamaji's house by Mahāraṇi Vahuji at Surat. Gopes'varaji would seem to look upon the passages of Prakās'a not found in the above original with an eye of suspicion, and we find him in the Pāda III throwing doubt on those passages of Prakās'a on the ground of their not being found in the original in his possession. In his Ras'mi also he omits commenting on those passages. This decision of Gopes'varaji was rather unfortunate. As will be presently seen these passages of Prakās'a are Purushottamaji's own, and Gopes'varaji's omission to comment on them has increased our difficulties in approaching those passages for a thorough understanding.

It was rather a happy coincidence that in basing the text of the Prakās'a for our edition we did not follow Gopes'varaji's view. We always felt that those additional passages of the Prakās'a, though not found in the original, were of the authorship of Purushottamaji. Our surmise was that Purushottamaji's original must have been got copied fair, and a final revision on the same must have been made by Purushottamaji himself. Thus these additional passages were due to a final revision and as such ought to be included in the authentic text of the Prakās'a. Hence we have acted accordingly from the very beginning. Our conjecture as to the final revision has happily turned out to be true. Through the kindness of Mr. Natavaralal Iccharam Desai B. A. of the famous Gujarati Press we have been able to secure that very copy of the Prakās'a in which Purushottamaji has made additions and revisions in his own hand and which are not found in the original wholly written in his own hand. Except these additions and revisions the rest of this manuscript is written in neat handwriting by a scribe. This neatly written portion contains the whole of Purushottamaji's Prakās'a original, while the additions and revisions seem to have been made by Purushottamaji himself in his own hand when he finally revised his Bhashya-Prakās'a. The text of the Prakās'a of the present Pāda is based on the original so far as its text was common with the above-mentioned fair copy and for portions not found in the above-mentioned original, it is based on the additions in Purushottamaji's hand in the fair copy. Thus the whole text of the Prakās'a is based on the most authentic basis. The same lines will be followed in the edition of the subsequent portions.

Another thing to note is this. The last Adhyāya and a half, though the authorship of the same is attributed to Vallabhacharya, is actually from the pen of Vitthales'vara, his second son. Scholars like Krishṇachandraji and Purushottamaji have mentioned this fact in their works Vritti and Prakās'a respectively III. 2-34. B. S. The Sāmpradayika Gatha also states that the last two Adhyāyas of Aṇu-Bhashya were composed by Vitthales'vara under the directions of his father. But we did not learn from the above the materials on which their suggestion was based. The statement of Purushottamaji that the second Varṇaka of the Anandamayādhikaraṇa and the Aṇu-Bhāshya from III. 2-33 was Vitthales'vara's, appeared to be perfectly correct from the style and views expressed there in. Any one familiar with the language of Vallabhacharya could without doubt say that the passage 'कश्चित् गोकुल' etc in III. 3-1 was not of the authorship of Vallabhacharya. This difficulty has been now solved beyond any doubt. In search of MSS. of the missing portions of Ras'mi, we again went on a tour to Nathadwara. Through very great kindness of H. H. Tiket S'ri Govardhanalalji Maharaja and his son Lalbava Saheb S'ri Damodaralalji we got access to the original MSS. carefully preserved there. To our great delight and satisfaction we found an almost complete Manuscript of the Aṇu-Bhāshya Adhyāya IV and three last pages of Adhyāya III Pāda IV and second interpretation of III, 4-19. 'अनुष्ठेयं' in the handwriting of Vitthales'vara himself. This unexpected discovery of the original Manuscript of the Anu-Bhāshya has been fruitful of many far-reaching results. It has put beyond the shadow of doubt the authorship of the last two Adhyāyas of the Anu-Bhashya. Purushottamaji's statement in Prakās'a III. 2-24. 'इत आरभ्य प्रभूणामिति' is based on a firm and reliable basis. He, it seems, had access to the above original of the Aṇu-Bhashya. On the leaves of this original MSS. there are fine paper-slips. On these paper-slips there are remarks pointing out the portions of the Aṇu-Bhāshya to which those pages belonged. These remarks, it appears to us, are in Purushottamaji's own handwriting. This fact has led us to prefer Prakās'a's readings of the Aṇu-Bhāshya in preference to others. This original Manuscript with all its additions and revisions taken into consideration proves beyond doubt that Vitthales'vara is the author of the last Adhyāya and a half of Aṇu-Bhāshya, though the 'इतिश्री' in the name of Vallabhacharya in Vitthales'vara's own hand would suggest that he himself desired to allow the public to know that Vallabhacharya was also the author of the same. The ambiguous verse 'भाष्यपुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे । निवेदिता तेन तुष्टा भवन्तु मयि ते सदा' is consistent both with the authorship of Vallabhacharya and Vitthales'vara. In one case we have to understand the word Acharya as referring to Badarayaṇa and in the other to Vallabhacharya. This fact explains the references to Vitthales'vara's Vidvanmaṇḍana and Bhakti-Hansa in this portion of the Aṇu-Bhāshya. References to the Adhyāyas III and IV in Subodhini and Nibandha would go to show that Vallabhacharya himself wrote complete Bhashyas on both the Mimānsās. But it seems Vitthales'vara got Vallabhacharya's Bhashya on the Brahma-Sūtras upto III-2-33. It seems this was the only portion in his possession when he composed his Vidvanmaṇḍana. It was at a late stage, after he adopted Gokula near Muttra as his permanent residence, and when he seems to have lost all hopes of securing a complete manuscript of his father's Brahma-Sūtra-Bhashya, that he undertook to complete the Bhashya fragment of his father on the Brahma-Sūtras. In order to distinguish this Bhashya from that of his father, he seems to have named it Aṇu-Bhāshya. In Subodhini Vallabhacharya does not refer to his commentary on Brahma-Sūtra as *Aṇu* Bhashya, but only as *Bhashya* without the word Aṇu. The absence of any pungent expressions, which we find in the Vidvanmaṇḍana, against opponents in the Aṇu-Bhāshya portion of Vitthales'vara would clearly show that the portion of the Aṇu-Bhāshya by Vitthales'vara is the work of his mature age.

We express our heartfelt obligations to H. H. S'rī Govardhanalalji Maharaja of Nathadwara and his son S'rī Damodaralalji for allowing us the use of the said original manuscript of the Aṇu-Bhāshya, and for giving us photographs of some of its pages. In due course photo-blocks of the same will be ready, when the Vaishṇava public will be in a position to know Vitthales'vara's handwriting.

A picture of Purushottamaji is placed in this volume. The original was obtained by us from S'rī Dwarkanathaji's Mandira at Kankroli in Mewar, through the kindness of H. H. S'rīmad Goswamini S'rī Saundaryavati Vahuji, the mother of S'rī Vraja Bhushaṇaji, the present occupant of the seat. We also thank Seth Lalji Naranji J. P. for having given his consent on behalf of the trustees for defraying the cost of getting the blocks made and printed.

One of the manuscripts utilised in basing the text of this Pāda-Bhashya has turned out to be of S'rī Kalyāṇarayaji, the father of the Great S'rī Harirayaji. This Kalyaṇarayaji is the first grandson of Vitthales'vara. We beg to draw the attention of the scholars of the Sampradāya as well as others to the Paris'ishta printed here. It is almost a complete commentary on the Guṇopasanhāra Pāda of the Aṇu-Bhashya. It was made available to us by the late Mr. Tansukhram M. Tripathi B. A., the veteran scholar of Gujarat. On a comparison of the same with the Prakās'a, we find that almost the whole of it is incorporated in the Prakās'a. It seems possible from the style of expression and method of writing that Purushottamaji owes much to this. Its style resembles that of Krishṇachandraji's Vṛitti. If so, the comparative method of exposition followed by him in Prakās'a owes its origin to the genius of Krishṇachandraji. This Krishnachandraji was born on the 7th day of Dark half of S'ravaṇa 1655 Samvat. He was the guru of Purushottamaji both in name and fact. It is possible that Krishṇachandraji wrote his commentary from the very beginning, and the same is incorporated in the Prakās'a as here. We request scholars to make a search for the same. If found, it will be the oldest commentary on the Aṇu-Bhāshya. The copy of the Guṇopasanhāra-Pāda-Vivaraṇa printed in the Paris'ishta seems to be the original in Krishṇachandraji's own hand.

Bombay,
27-4-27.

2000

M. T. Telivala.

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसम्पूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वरजि-
चरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

तृतीयाध्यायस्य चतुर्थः पादः ।

'भगवद्धर्मपरायण सद्गत श्रेष्ठि गोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसङ्ग्रहतः 'प्राप्तभगवत्पद
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्एल्. बी.,
वकील, हाइ कोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४४९. संवत् १९८४.

मूल्यमेकमुद्रिका ।

S'ri Vitthales'vara and Anu Bhāshya.

S'rī Vitthales'vara Dīkshita, the author of the last Adhyāya and a half of the Aṇu Bhāshya was the second son of S'rī Vallabhāchārya. He was born at Charaṇāta near Allahabad on the 9th day of the dark half of Margas'īrsha, 1572, Samvat. Vallabhāchārya in his later life adopted Adel as his permanent residence, and therefore Vitthales'vara passed his childhood there. When Vallabhāchārya took up Tridanda-Sannyāsa in 1587, Vitthales'vara was a boy, fifteen years old. His elder brother S'rī Gopīnātha was senior to him by five years. His Upanayana ceremony was performed by Vallabhāchārya, but his early education seems to have been of a desultory character. A Gāthā current in Sampradāya states that Vitthales'vara in his childhood was given to playfulness. He did not seem to realise the heavy responsibility that lay on his shoulders, so Dāmodaradāsa, the chief among Vaishṇavas, is said to have remonstrated with young Vitthales'vara and persuaded him to study, and thus be fit to bear the responsibility of the Sampradāya as the worthy son of a worthy father. There is no doubt that Dāmodaradāsa had his share in turning Vitthales'vara from worldly playfulness to the meditation of Krishṇa-Leelā. Chāchā Harivams'ajī was another personality who influenced Vitthales'vara in the successful discharge of his duties as Āchārya. Chāchā Harivams'aji's proselytizing tendencies were great. It was he who generally visited a place in advance and prepared it for the acceptance of Vitthales'vara's teachings. It is not known from whom Vitthales'vara got direct help in the profound learning which is manifest in his works which are available now. A Gāthā says that Vitthales'vara was sent by Vallabhāchārya to Mādhava Sarasvati for his studies, but instead of studying anything at his place, he devoted his time to reading S'rimad Bhāgavata. Whatever may be the truth in the above Gāthā, it is an undisputed fact that like his father, Vitthales'vara had a very great hold on and absorbing attachment to S'rimad Bhāgavata. After Vallabhāchārya passed away in 1587, Gopīnātha and Vitthales'vara lived together at Adel. Except perhaps two small works named *Sādhanadīpaka* and *Sevāpaddhati*, we are not aware of any important work of S'ri Gopīnātha, and so we have not got materials to decide how far Vitthales'vara was indebted to his elder brother S'rī Gopīnātha, for his future literary activities. S'rī Gopīnātha and his son Purushottama seem to have passed away between 1590 and 1600. After this, Vitthales'vara became the recognised representative of his father, and thereafter he seems to have planned various tours, and thought of writing works for the propagation of the Sampradāya.

Unlike S'ankara, Rāmānuja, Mādhva, Chaitanya, and a host of others, Vallabhāchārya preferred to follow the *Aupanishada* traditions, and like Yājnyavalkya and others, became a Grihastha Acharya. After him, his elder son too, became a Grihastha Ācharya. S'rī Gopīnatha got Vitthales'vra married to S'rī Rukmiṇī, a daughter of Vis'vanātha Bhatta and Bhawāni of his own caste. The relations of the two brothers were of a very cordial nature. A letter* addressed by Vitthales'vara to his elder brother reveals the high regard which he had for him.

When Gopīnātha and his son Purushottama passed away, Vitthales'vara seems to have begun his tours. His first visit was from Adel to Gujarāt in the year 1600, and his second visit to Gujarāt was also from Adel in 1613. In Gujarāt his activities were chiefly confined to Ahmedabad, Cambay and Godhra. In Godhra, one Nāgaji Bhatta was initiated in the Sampradāya by him. This Nāgaji Bhatta was, it is said, a state-officer, and the name Pancha Mahals owes its origin to his activities. He was a Sāthodrā Brahmin. Mr. Kes'havalāl Harshadraya Dhruva, the veteran Gujarāti scholar, is said to be a descendant of this Nāgaji Bhatta. Whenever Vitthales'vara visited Gujarāt, Nāgaji Bhatta always took advantage of his company. A few of the original letters addressed by Vitthales'vara to Nāgaji Bhatta are preserved even to this day at Nāthadwara in Mewar. Nāgaji Bhatta seems to have been a very intelligent follower. Various questions seem to have been put by him to Vitthales'vara. He seems to have been a very active agent in spreading the doctrines of Vallabhāchārya in his country. After having read *Subodhinī*, *Nibandha* etc., he wanted to know as to what was the kernel of Vallabhāchārya's teachings. In answer to this query, Vitthales'vara sent to him a beautiful couplet which summarises the doctrine in the choicest words. It runs as follows:—

श्रीवल्लभाचार्यमते फलं तत्प्राकट्यमव्यभिचारिहेतुः ।
प्रेमैव तच्छ्रवणवचोक्तक्रियाद्योपयोगोऽखिलसाधनानाम् ॥

According to the view of Vallabhāchārya, भगवत्प्राकट्य is the फल, and the unfailing remedy for it is love for Him, while all other Sādhanas are useful in generating this love. Nāgaji Bhatta remained in company of Vitthales'vara not only in Gujarat, but he often visited Adel to pay his respects to him. He is said also to have visited the shrine of S'rī Nāthaji–Govardhanadhara–at Jatipura on the Govardhana Hill, and stayed there for a couple of months. Thus it would seem that Nāgaji Bhatta was familiar both with the practice and theory of the Sampradāya, and he was instrumental in the rapid spread of the Sampradāya from Samvat 1600 onwards in Gujarāt.

Another personality who helped in the spread of Sampradāya was

---

*The letter runs as follows:—

स्वस्ति श्रीमज्ज्येष्ठभ्रातृचरणकमलेषु कनीयसो विट्ठलस्य प्रणामकोटिनिवेदनोऽयं पत्रप्रसूतः । क्षेममिह, भावत्कमाशासे । अहं भगवदाज्ञया रासोत्सवपर्यन्तं श्रीगोवर्धनधरणचरणारविन्दनिकटे स्थितोऽस्मि । हरिद्वारे प्रस्थाने न यातेति न मतम् । अत्र ममास्वास्थ्यं बहु जातमासीत् । उपवासदशकं कृतम् । अधुना भगवत्कृपया च नैरुज्यं जातमस्ति । कापि चिन्ता न कार्या । अक्का–अम्मा–भ्रातृचरणेषु नतयः । अक्का यथा दुःखं न करोति ममास्वास्थ्यं श्रुत्वा तादृक् कर्तव्यम् । भवतापि कापि चिन्ता न कार्या मम, भगवति सर्वत्र । वाह्देवेन्द्रपुरीषु महानुभावेषु दीक्षितेषु हरिहरनामाद्यपूज्यादिषु [illegible] । विष्णुदासादिभ्याशिषः । भगवदीयानां नतयः ।

Bhāilā Kothāri of As'arvā near Ahmedabad. When Vitthales'vara visited Dwarka or Gujarat, he used to put up with him for a couple of months. Bhāilā's son-in-law Gopāladāsa has given the Sampradāya a charming and unique poem in Navākhyāna. The Sampradāyika Gāthā relates that this Gopāladāsa was Narsinha Mehtā in his preceding birth. Whatever that may be, it helps one in furnishing the latest date of Narsinha Mehtā. Vitthales'vara's first visit to Gujarāt was in 1600 St, and Gopāladāsa was then nine years old. The poem of Gopāladāsa (Navā Khyāna) has been the most popular and revered among Vaishṇavas. Every Vaishṇava, male and female, recites it. Commentaries in Sanskrit and Vraja Bhāshā are written on it. The commercial people of Gujarāt have been fascinated by it. This poem, it seems, has been instrumental in shaping Vaishṇava attitude towards the Mahārājas. The intensely tender feelings with which the Mahārājās are looked upon have their genesis in the spread of this lyric. It speaks of Vitthales'vara as Goswāmiji. He assumed the surname of Goswāmi in 1634, after he was granted permission by Emperor Akabar to graze his cattle on all lands including the Royal ones. From this it would seem that this poem of Gopāladāsa could not have been composed before 1634. The Sāmpradāyika Gāthā informs us that the inspiration of this poem came to Gopāladāsa from Vitthales'vara himself. It is said that Gopāladāsa, who was dumb, miraculously got his powers of speech as a result of the chewing of the betelleaf offered by Vitthales'vara. When he visited Bhāilā's house, numerous persons came to see him and joined his Sāmpradāya.

In Cambay, Jivā Pārekh, a celebrated Baniā merchant was instrumental in the early spread of Vaishṇavism. On the whole the spread of Vaishṇavism in Gujarāt was not only rapid but complete. Numerous castes and sub-castes wholly embraced the Vaishṇava Cult. This continued in increasing proportions during the times of the succeeding generations of Vitthales'vara.

Vitthales'vara himself visited Gujarāt not less than six times. His first visit was in 1600 from Adel. The second one was also from Adel in 1613. The third one was from Gaḍā in 1619. The fourth one was from Mathurā in 1623. The fifth one was in 1631 from Gokula. And his sixth and last visit was also from Gokula in 1638. This would show that for nearly forty years Vitthales'vara exercised his influence over Gujarāt and Kathiāwād. The visits to Gujarāt were incidental to his visit to the shrine of Dwārkānāthajī at Dwārkā. His desire for and interest in Dwārakā and Gujarāt were created by the early reception of his father and his elder brother S'rī Gopīnātha. Rānā Vyāsa, a learned pupil of Vallabhāchārya, was an active worker at Siddhapura. So also there was one Gopāladāsa of Narodā. Vallabhāchārya himself had visited Dwārakā not less than three times, his last visit being in 1585. He is said to have stayed at Dwārakā for over six months. The Swarūpa of Dwārkānāthaji at Bet-Dwārkā was installed there by Vallabhāchārya.

In the year 1616, on Māhā Vad 13th, Vitthales'vara visited the shrine of Jagannātha in Puri (Orissa). He was there accompanied by his wife Rukmiṇī, his eldest daughter S'obhājī and his eldest son Giridharaji. He stayed there for nearly six months. After witnessing the Rathotsava at Puri, he seems to have returned to Adel. During his visit to Puri he had taken with him a carpenter by name Rāsā. This was with a view to see the model of the Jagannātha Car. It is said that when Vitthales'vara returned to Adel, he got a car prepared of a similar model, and took his deity round the village of Adel in a procession. During his stay at Gaḍā also he celebrated a Rathotsava similarly. But when he shifted his abode to Mathurā he had to give up the public celebration of Rathotsava on account of the Mahomedan fanaticism. During his stay in Jagannātha, Vitthales'vara came in contact with the immediate followers of Chaitanya, living there. It is possible that the composition of Swāminyashtaka (स्वामिन्यष्टक) Swāminīstotra (स्वामिनीस्तोत्र) and several other minor stotras, in which the Eternal consort–Rādhā–of S'ree Krishna is extolled, date from this period; or their composition may be due to the direct or indirect influences of Chaitanya saints. There is no stotra or writing of Vallabhāchārya to our knowledge where Rādhā is extolled in the strain in which Vittales'vara has done. How far and how much of this influence was retained by Vitthales'vara it is difficult for us to determine from the materials available, though the conclusion of the Aṇu–Bhāshya where Navanīta–priya (नवनीतप्रिय) and Govardhanadhara (गोवर्धनधर) only are remembered would show that Vitthales'vara in later times had completely freed himself from the Chaitanya influences. His commentary on Krishṇapremāmrita (कृष्णप्रेमामृत) and S'ringārarasamandana (शृङ्गाररसमण्डन) may be due to Chaitanya mould of thought.

Or that was the time when the wave of Rādhā–Krishṇa worship swept over the whole of India, and it would be difficult to say exactly how far the influence of Chaitnya thought there is in the above Stotra. The originality of thought and method of expression are Vitthales'vara's own. But we would not be wrong if the composition of the above Stotras was assigned to this period. It is possible that these Stotras are due to Sarasvatī-Samvāda and nothing else.

After his return from Puri, Vitthales'vara seems to have resided at Adel from Samvat 1616 Āshādh to the beginning of 1619. On the analogy of Jagannātha, car-festivel was celebrated here. It was during this period, that he composed his Vidvanmaṇḍana. A manuscript dating from वैशाख शु. १२ सं. 1619 leads us to this inference. In any case, we cannot assign any later date than this to the composition. In 1619 it appears that Mahomedan invasion made Vitthales'vara give up his abode at Adel for good.

From Adel, after his stay at two or three places, he seems to have moved over to the kingdom of Bandhe Gaḍhā. Rāmachandra, a Waghelā Rajput, was the king of the place. He seems to have received Vitthales'vara well, who stayed at this place for a couple of months. The relations of Giridharaji the eldest son of Vitthales'vara were very cordial with this prince. The eldest son of Giridharaji by name Muralidharaji was born here on Vijaya Das'amī day. Tānsen the famous minstrel was formerly a musician of king Rāmachandra, but he had to hand him over to Emperor Akbar. This Tānsen seems to have come into contact with Vitthales'vara here. But Vitthales'vara did not stay here long. In later days when Vitthales'vara adopted Gokula as his permanent residence, this king Rāmachandra visited Gokula. He was well received by Vitthales'vara and Giridharaji then.

From Bandhe-Gaḍhā, Vitthales'vara seems to have moved over to Gaḍhā. It is difficult to say whether the modern Jubbulpore on the banks of the Narbadā was Gaḍhā of those times. Vitthales'vara's Bethak near Jubbulpore would go to show that Gaḍā was situated somewhere there. The havoc wrought by Akbar's general Asafkhan is so complete that it has become difficult to identify the place. Vitthales'vara's desire to go to Gaḍā was natural. Gaḍhā was ruled over by queen Durgāvati. She was a princess of great reputation. She was married to Dalpatishāh in a very romantic manner and out of this union a son was born. When he was three years old, Dalpatishāh died. Since then Rāṇi Durgāvati was the *de facto* ruler of Gaḍhā acting as Regent for her son Vīra Nārāyana. Even after he was of age she continued to rule over the kingdom. Fiftytwo Gaḍhas (fortresses) were included in her kingdom. She fought many battles, and on account of her exceptional valour she was called Durgashāh. She was very religious and patronised numerous learned Brahmins. Some of the Telagu Brahmin families who were connected with Vitthales'vara's family by marital ties lived there. Besides, next to Vijayanagara, the only independent Hindu kingdom where Vallabhāchārya was recognised as the greatest Āchārya by the then ruling king Krishṇadeva, this princess Durgāvati was the only independent Hindu princess in whose kingdom Brahmins were encouraged and people were extremely happy. Her government was a faultless one and Akbar's attack on this princess is considered by competent historians to be nothing more than wanton destruction for self-aggrandizement. When Vitthales'vara came to her Capital first of all, he put up on the banks of Jammniya-talao or the Rāni-talao. Durgāvati was so much impressed with his saintly character, high learning and sublime devotion to Krishṇa that she visited his Ās'rama frequently and requested him to accept Gaḍhā as his permanent residence. Suitable arrangements were made for his stay. During his three years' stay the relations between him and the Queen were very cordial. Vitthales'vara's first wife Rukmiṇī passed away about this time, and he had absolutely no desire to marry again. But under the pressure of Rāṇi Durgāvati Vitthales'vara had to marry Padmāwati daughter of Krishnāraya Bhatta on Akshaya-Tṛitiyā day of 1620. On another occasion Durgāvati gave a gift of 108 villages to Vitthales'vara which were in their turn gifted away by him to Bhattās, his caste people, who were living there and whose descendants to this day are said to be in the enjoyment of the same. During his stay at Gaḍhā, a Brahmin by name Brahmadāsa came in his contact. He was blessed by Vitthales'vara by giving him his own waist-coat. From this day the fortunes of this Brahmadāsa began to rise and ultimately he became one of the trusted advisers of Emperor Akbar under the now well-known name of Birbal (बिरबल). This Birbal's relations with Giridharaji were very intimate, as could be gathered from the letters of Vitthales'vara. He seems to have helped Vitthales'vara a great deal when the possession and control of the shrine of Shree Nāthaji on the Govardhana Hill were taken over by Vitthales'vara some time later from the Bengālee worshippers.

After his stay for about three years, Vitthales'vara perhaps noticed that even this kingdom of Durgāwati would ultimately be invaded by Akabar's armies. In samvat 1621 (1564 A. D.) a pretext was found out by Asafkhan by demanding from her, her favourite elephant Gurudār. She naturally refused to comply with the demand. The attack of Asafkhan is the more glaring because Durgāvati's prime minister Adhāradāsa was deputed by her to the court of Akbar. This seems to have influenced Vitthales'vara in giving up his residence at Gaḍhā. He therefore expressed his desire to Raṇi Durgāvati that he wanted to go and reside on the banks of the Yamunā (Jumna). To meet Vitthales'vara's desire Rani Durgāvati caused to be built at Mathurā the Seven Houses which became ultimately known as 'Sat-garā'. Vitthales'vara and his seven sons lived at Mathurā in this Satgarā. It was in these Satgarā that for about two months or so S'ree Nāthaji was brought on Fālgun Krishṇa 7, 1623 from the Govardhana Hill by Giridharaji when Vitthales'vara was on his visit to Gujarāt. These seven houses do not exist now, but the place on which they stood is to this day known as Sat-garā at Mathurā. It is situated behind Chhattā Buzaar on the west, and the pilgrims for Parikramā start from this place. At Gaḍhā, Vitthales'vara had very pleasant times. He celebrated the Rathotsava festival. The car was taken in a big procession round the capital in which Rāṇi Durgāvati took part with all the nobles of her court. In fact all the resources of the state were requisitioned for the celebration of the Rathotsava.

When Vitthales'vara left Gaḍhā, Rāṇi Durgāvati sent her minister Adhardāsa, to accompany him with a large escort.

After he left Gaḍhā Vitthales'vara does not seem to have been visited by Rāṇi Durgāvati. She lost her life while fighting valiantly with Asafkhan, and her son Veeranārāyana also seems to have met with a similar fate. The rich treasures of the Royal treasury were looted by Asafkhan, and were carried away by him. The ravage done was so complete that no definite marks of this illustrious princess's kingdom could now be traced by historians. The traces of Vitthales'vara's stay in Gaḍhā are fortunately preserved by his Bethak, near Jubbulpore which is said to be the place where his second marriage with Padmāvati was celebrated as mentioned above.

From Gaḍhā,[1] Vitthales'vara seems to have migrated to Prayāga (Allāhābād). Here he stayed for some time in great happiness. He engaged himself in the worship of Krishṇa and the performance of Somayāga.

From Prayāga Vitthales'vara seems to have migrated to Gokula on भाद्रपदकृष्ण 3, 1622. Here he resided in a place where his father and his elder brother used to reside during their visits in Chāturamāsa. Vitthales'vara is said to have stayed in Gokula for about 84 days. Then on कार्तिकशुक्ल 11, 1623 he seems to have removed to Mathurā. He lived in Sat-garā built by Rāṇi Durgāvati. From 1623 to 1629 Vitthales'vara passed his time in Mathurā. In 1623 when he visited Gujarat, the image of S'ree Nāthaji was brought by Giridharaji from the Govardhana Hill to his house and was installed in his house in Sat-gara. The image continued to be worshipped for about two months and 21 days in Vitthales'vara's house in Mathura. Vitthales'vara did not approve perhaps of this on account of the irksome preponderance of Mahomedan influence. After his visit to Mathurā Vitthales'vara gave up the public celebration of the Rathotsava festival for the same reason. Vitthales'vara seems to have preferred the place of Govardhana Hill selected by his father. And by the time he reached Mathurā, from his visit to Gujarāt in 1623, the image of S'ri Nāthaji was again taken over to Girirāja and again installed therein on the 14th day of the bright half of वैशाख, सं. 1624. Vitthales'vara some-how preferred the quiet place of Gokula to the city life of Mathurā and in the year 1629, on Falguna Krishna 7 he adopted Gokula as his permanent residence.

मथुरानगरे विलोक्य वासं यवनादिप्रसरेण भूरिबाधम् ।
अथ विट्ठलदीक्षिता विविक्तं स्वकमात्मस्थितये व्यचारयंस्ते ॥ १ ॥
कदाचिन्नृमहेन्द्रेण परमात्मविनिर्णये । पृष्टास्तदीयसन्देहानपाकुर्वन् सदुक्तिभिः ॥ २ ॥
प्रसन्नेनाथ तेनोक्ताः किमपि प्रार्थ्यतामितः । तस्माद्ग्रहमथालोक्य हृदि सम्यग्विचार्य च ॥ ३ ॥
आत्मनः सुखवासार्थं महावनसमीपतः । यमुनातीरमाश्रित्य स्थलं रम्यमयाचिषुः ॥ ४ ॥
अथ स्वाधिकृतैर्भूमेः पत्रं संलेख्य भूपतिः । स्वनाममुद्रासहितं दीक्षितेभ्यस्तदार्पयत् ॥ ५ ॥
ततो मौहूर्तिकादिष्टे मुहूर्ते विधिपूर्वकम् । ग्रामं गोकुलनामानं स्थले तत्र न्यवासयत् ॥ ६ ॥
अब्देऽहनेत्राङ्गमहीप्रमाणे(१६२८)तपस्यमासस्य तमिस्रपक्षे ।
दिने ७ दिनेशस्य शुभे मुहूर्ते श्रीगोकुलग्रामनिवास आसीत् ॥ ७ ॥
वृत्तान्तमिममाकर्ण्य सजातीया द्विजोत्तमाः । कुटुम्बसहितास्तत्र वासार्थं समुपागमन् ॥ ८ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च बहवस्ततः । स्वं स्वं कुटुम्बमादाय निवासोत्काः समाययुः ॥ ९ ॥
समागतेभ्यः सर्वेभ्यः निवासाय यथायथम् । स्थानानि दापयामासुर्विट्ठलेश्वरदीक्षिताः ॥ १० ॥

(वंशावली–मधुसूदनभट्टकृता)

---

[1] गढायां पूर्वमवसन् विट्ठलेश्वरदीक्षिताः । तेऽपि प्रयागमाजग्मुस्तत्रोपद्रवसंभवे ॥
यमुनातीरमाश्रित्य तत्र वासं प्रचक्रिरे । श्रीकृष्णसेवानिरताः सोमयागविधायिनः ॥
बहून्संवत्सरांस्तत्र न्यवसन्परया मुदा । अथ तेषां व्रजे वासं कर्तुमिच्छाभवत् किल ।
गोवर्धनो गिरिर्यत्र श्रीमद्वृन्दावनं तथा । मथुरापि हरिर्यत्र नित्यं संनिहितो विभुः ।
तत आगत्य मथुरां कुटुम्बसहिता इह । कंचित् कालं मुदावात्सुर्यमुनाहरिसेविनः ॥
वंशावली मधुसूदनभट्टकृता. (1717 Samvat)

From the the year 1628 upto his passing away in 1642 Vitthales'vara resided at Gokula and carried on his literary and other religious activities. Emperor Akbar took delight in discussion of questions relating to the world beyond. He is said to have paid a visit to Goswāmis of Brindāwan by this time. Vitthales'vara Dīkshīta was invited by Emperor Akbar for the elucidation of the nature of the Supreme Being. Akbar was much pleased with his explanations, and he requested him to ask for a gift. Vitthales'vara asked the Emperor to give him Gokula, which being a quiet place was congenial to his tastes and requirements, being situated on the banks of the river Yamunā near Mahā Vana. Thereupon Emperor Akbar made a grant to him of Gokula under his Royal Seal and handed over the Firman to Vitthales'vara in the year samvat 1634 corresponding with 29th of Jamādi the 2nd, A. H. 985 (1577 A. D.). Vitthales'vara was the recipient of three other Firmans granting him the privilege of grazing his cattle on all lands including Khālsā or Jāgir. Another Firmān was granted to him by Hamidāh Bānu Begum, mother of Emperor Akbar. He was also the recipient of the grant of the Jatipurā village where the Shrine of Govardhanadhara was situated. During his stay at Gokula he visited Gujarāt twice, once in the year 1631, and then in 1639. It was perhaps during this last visit that Gopāladāsa, the author of Navākhyāna, came into his contact and wrote his beautiful poem describing in the last chapter the whole family of Vitthales'vara. This last chapter mentions seven sons of Vitthales'vara and their wives. It does not mention the names of either of the wives of Vitthales'vara. The inference is that this poem is written after Vitthales'vara's both wives had passed away and his youngest son Ghanas'yāma, if not actually married, was betrothed to Krishnāvati. All his four daughters were married, and the two widowed daughters of his elder brother Gopinātha, Lakshmī and Satyabhāmā, were residing with him, and passed their widowhood in complete happiness in the service of S'ree Navanītapriya.

Thus from the year 1629 to 1642 Vitthales'vara lived at Gokula in complete tranquility. During his stay there, he carried on and perfected the mode of worship (Sevā-Prakāra), both at Govardhandhara's temple at Jatipurā and in Navanītapriya's temple at Gokula. Poet Gopāladāsa describes beautifully how Vitthales'vara daily went on horseback from Gokula to Govardhana. 'तुरग चाल्यो वायुवेगे उतावळो, जाणे नौका चाली सिन्धु तरवा.' Vitthales'vara translated his father's teachings into actual practice and turned them into a divine religion. His father mentioned two alternatives in the verse एवं सर्वात्मना त्याज्यं तचेत्त्यक्तुं न शक्यते । कृष्णार्थं तद्विनियुञ्जीत कृष्णोऽनर्थस्य मोचकः ॥ (विवेक.). The first alternative of त्याग (complete renunciation) cannot be translated into practice as an inflexible rule, by everyone. Hence Vitthales'vara accepted the second alternative of अत्याग by which every thing was to be utilised for Krishṇa, thereby ultimately the goal enunciated in the first alternative of त्याग was to be gradually reached. With this end in view he promulgated an elaborate mode of rituals for the Sevā-mārga. The Sevā-mārga was based purely on the dictates of the finer sentiments of heart.

The result was that the very household of Vitthales'vara became free from the experiences of the miserable surroundings of the worldly life. The mode of worship was carried on in such a way that all the members of his family, young and old, males and females, could take part in the daily worship with such fervour and pleasantness that his house was a sight which gods would envy. The poet Gopāladāsa gives expression to this fact in the following couplets:—

हारकंकणकर्णभूषणनाद नाना हींडतां । गान गावे स्वर सुहावे श्रीनवनीतप्रियजीने पोढतां ॥
सन्ध्यासमे श्रृंगार नूतन फूल गुंथे सौ मळी । सदनशोभा निरखतां ते लक्ष्मी मन पाम्यां रळी ॥

Emperor Akbar's two ministers Todarmall and Bīrbal seem to have come into closer contact with him during this time and gave him their help whenever required. The shrine of S'ree Nāthajī came into existence under circumstances in which the followers of Vallabhāchārya and those of the Gaud school both worshipped it with equal reverence. S'ree Nāthaji or Govardhanadhara was worshipped by the local people as Devadamana (देवदमन). It is alleged that originally this shrine was set up by king Vajra of the Yādava race who was brought to Muttrā by Arjuna after the destruction of the Yādava race. The said image which remained under-ground was then discovered. When Vallabhāchārya visited Vraja, he installed this image of Govardhanadhara or S'ree Nāthaji in the year 1576, अक्षयतृतीया. He appointed Mādhavendra-puri a Tailanga Brāhmana Sannyāsi of the Mādhva school to carry on the worship of Govardhana-dhara. This Mādhavendra-puri was a Krishṇa-worshipper. He was the guru of Ishvarapuri who initiated the Bengal saint Chaitanya into Krishṇa-worship. Mādhavendra-puri was instrumental in introducing Krishṇa-worship in Bengal. To carry on the daily worship of S'ree Nāthaji was a task difficult for a single individual. Hence he kept some Bengāli Vaishṇavas to help him. Rāmdāsa, another saint, was commissioned by Vallabhāchrāya to act as first मुख्यप्रचारक. He was a Chauhana Rajput. Krishnadās was appointed as the Adhikāri. Vallabhāchārya and his son Gopīnātha used to visit Vraja during the Chātur-māsya of every year, and during their absence they used to carry on the Sevā themselves. After the passing away of Vallabhāchārya and Gopinātha, some disagreement seems to have arisen between the Bengāl Vaishṇavas and Vāllabha Vaishnavas. So long as Mādhavendra-puri was there, no disagreement seems to have arisen. The image is spoken of as Gopāla and described as such in the works of Chaitanya writers. When Mādhavendra-puri went to the south to fetch Malayāgaru chandana (sandal-wood) he passed away there at an advanced age of about 130 years and the Bengāl Vaishṇavas used to carry on the worship of S'ree Nāthaji under the control and supervision of Krishṇadāsa Adhikārī. Gopinātha's visit to Gujarāt brought him about a lakh of rupees as Sevā. The same was dedicated by him to S'ree Nāthaji. Vitthales'vara's frequent visits to Gujarāt attracted its rich people to visit the shrine of S'ree Nāthaji and they made rich presents to the Deity.

It seems, Bengal Vaishṇavas who used to carry on the worship, secretly carried away these presents to their Goswāmis who lived at Brindāvan. This created great dissatisfaction among the Vaishṇavas of Gujarāt. One Anantadāsa raised an emphatic protest against this misuse of the offerings to the Deity. He persuaded Krishṇadāsa Adhikāri to put a stop to this and drive out the said Bengāli worshippers. Krishṇadāsa could not do it unless he had the sanction of Vitthales'vara. For this purpose he was persuaded to approach Vitthales'vara, who at first hesitated, because these Bengalees were appointed by his father. But after some deliberations, Krishṇadāsa succeeded in obtaining a letter of recommendation to Rājā Bīrbal to help him in his mission. With this letter Krishṇadāsa saw Bīrbal, then collected a number of men with him and set fire to the huts of the Bengalees. The moment the latter came to know of this, they came down from the Govardhana hill where the shrine was situated. At first they offered great resistance to Krishṇadāsa, but ultimately yielded, and he got exclusive control and possession of the shrine. Rājā Birbal was intimate with Giridharajī, the eldest son of Vitthales'vara. Perhaps to establish his absolute control, Giridharajī brought the shrine of Gopāla-S'ree Nāthaji to his own house in Mathurā in 1623. From this date the mode of worship was greatly elaborated by Vitthales'vara. It became the exclusive resort of Vāllabha Vaishṇavas, and Bengal Vaishṇavas began to forget their early connection with it. The personal relations of Vallabhāchārya and Chaitanya were very cordial as can be inferred from the above facts regarding the setting up of the shrine of S'ree Nāthaji. The Chaitanya writers, and especially Krishṇadāsa, who lived in Bengal and who is the author of Chaitanya-Charitāmrita perhaps felt bitterly this loss of the control of the above shrine. In their zeal to extol Chaitanya they try to belittle the achievements of Vallabhāchārya. Vallabhāchārya's records are singularly devoid of any unpleasant reference to Chaitanya, while the statement of Chaitanya writers that Vallabhāchārya, though praising Chaitanya, slighted his companions, and that he had to take lessons in Bhāgavata at Puri from Jagadānanda, pupil of Chaitanya, seems to be due merely to some sort of prejudice and historically impossible. There can be no greater nonsense than this. The present Bengal writers like Dr. Sen and others who copy this, seem to be rather uncritical. We believe the above statements are the result of the disappointment felt by Chaitanya Goswāmis of Brindābana on account of the loss of S'ree Nāthaji as mentioned above. We are told that in an early work, Brindāvandāsa's Chaitanya Bhāgavata, there is no reference to the incident of Puṛi. The transference of the control of the shrine to Vitthales'vara had very marked results. Emperor Akbar presented the Jatipurā village to Vitthales'vara by a special Firmān. The inner worship became confined to the agnates of Vitthales'vara and their wives and daughters only. Among Brāhmaṇas, Geernārās and Sāchorās who early joined the Faith were allowed to take part in the worship. But the mass of Vaishṇavas were henceforth excluded from coming into direct contact with the holy shrine, a result which it is doubtful whether Vallabhāchārya or Vitthales'vara could have had in their minds, when Vallabhāchārya installed the shrine and Vitthales'vara got its exclusive control. His immediate object then was to exclude the Bengalees only. Perhaps it would not be out of place to remark that this was the occasion when Vitthales'vara lost all traces of Chaitanya thought which he had gained during his visit to Jagannātha in 1616.

During his stay at Gokula in Samvat 1629, Rājā Todarmal paid a visit to Vitthales'vara. He was ordered by Emperor Akbar to take the command of the Imperial forces in Behar against king Daud. This was an onerous task and before setting out on his expedition, Todarmall came to Vitthales'vara to invoke his blessings. He was given by Vitthales'vara, a 'Pītāmbara' which Todarmall tied over his head, while he started on his expedition. This would show that Todarmall held Vitthales'vara in very high esteem.

Rājā Birbal's connections with Vitthales'vara were equally intimate as stated above. When Vitthales'vara was on his visit to Gujarāt, a controversy seems to have arisen as regards the date on which the Janmāshtami fast was to be observed. On his return he came to know about this and composed a work named जन्माष्टमीनिर्णय stating his view about it with reasons. Possibly the रामनवमीनिर्णय was also written by him under similar circumstances. Having quietly settled at Gokula, he gave definiteness to the religious practices initiated by his father.

After Vallabhāchārya, Vitthales'vara's elder brother S'ri Gopīnātha succeeded as Achārya. S'ri Gopīnātha was a great devotee. Vitthales'vara entertained great respect for his brother. We have not got materials enough to learn how S'ri Gopīnātha understood and expounded the tenets promulgated by his father. We know that he used to reside at Adel for the most part of the year and like his father used to visit Vraja during the monsoon. There he used to perform Gopāla-upāsanā. There is a work called *Sādhana-Deepaka*, the authorship of which is attributed to him. From this work we do not learn much. One rule laid down in it is that a widow is to worship Krishṇa with Bāla-bhāva, while a woman whose husband is living, is to worship Krishṇa with Bhartri-bhāva. Though we have failed to trace this distinction to any of the writings of Vallabhāchārya which are extānt, we feel that there is some ground for the above rule which is based on common sense. Again, this work, though purporting to detail Sādhanas a Bhakta has to follow, omits any reference to the process of Nivedana which is practised in the Sampradāya even to this day. Beyond this, there is not much in this work elucidating any other point of Vallabhāchārya's philosophy. It seems therefore clear that Vitthales'vara had to depend on his own exertions to understand the works of his father. In this effort an unfortunate incident seems to have damaged the cause of the Sampradāya to a considerable extent, and in spite of Vitthales'vara's attempts, one would feel that the loss to the Sampradāya is irreparable.

It is not certain when S'rī Gopīnātha passed away. It seems after his death some unpleasantness was caused between Vitthales'vara and his sister-in-law, and these feelings of unpleasantness became more embittered on the part of the sister-in-law when her only son S'rī Purushottama also passed away soon after. The result of this was that the original works of Vallabhāchārya which were in possession of S'rī Gopīnātha as the eldest son of Vallabhāchārya were consigned to oblivion by her. The greatness of Vallabhāchārya's personality was so much felt by his devotees during his life-time that none of them seems to have contributed anything to the composition of his works. In the case of S'ankarāchārya and Rāmānujāchārya one feels that their respective Bhāshyas are written, re-written, revised and recast with the collaboration of their learned pupils. In the case of Vallabhāchārya the distance felt by the devotees was so great that none has upto this day ventured to add or subtract anything from them. This being the position and the devotees being wholly engrossed in Krishṇa-worship as taught by Vallabhāchārya, they did not try to get the copies of his writings. Another reason for the loss of the original works of Vallabhāchārya seems to be the great fire which destroyed almost the whole village of Adel at the time he took to Sannyāsa. When the helm of the Sampradāya came into the hands of Vitthales'vara it was a problem to him as to how he should get authentic texts of his father's works. On the side of Adel counter influences were working, and it was difficult, if not impossible, to get all the works. He seems to have secured the original copy of the Brahmasūtra-Bhāshya of his father upto 3-2-34. *Nibandha* seems to have been secured by him, and he has attempted to finish *Prakās'a* on *Nibandha* by writing commentaries on the Fourth skandha, and a portion of the Fifth of the *Bhāgavatārtha-prakaraṇa.* From Gujarāt Vaishṇava Rāṇā Vyāsa he secured the *Subodhinī*, a commentary on *S'rīmad Bhāgavata* of Vallabhāchārya. We have no materials to learn whether he got Pūrva-mimāṅsa Bhāshya of Vallabhāchārya, though there is plenty of evidence in *Aṇu-Bhāshya* to show his great hold on the Sūtras of Jaimini, to which he refers as a master. It is possible, as Purushottamji says, that the Pūrva-mimāṅsa Bhāshya became उत्सन्न in his times. We may infer from this that Vitthales'vara might have been in possession of the Purva-mīmansa-Bhashya of S'rī Vallabhāchārya; which became lost to us during the period, so to say, of interregnum, between 1642 and 1724 Samvat. Thus it would seem that Vitthales'vara had before him almost all the works of S'rī Vallabhāchārya which are now available to us. From these materials we shall presently see how he has developed the system promulgated by his father, both on the practical as also the theoretical side.

On the formation of the Sāmpradāyika practices Vitthales'vara's influence seems to be very marked, the nucleus having been supplied by his elder brother Gopinātha in his Sevā-Paddhati. Vallabhāchārya established the shrine of S'ri Nāthaji on the holy mount of Govardhana and initiated a mode of worship which was extremely simple. This shrine was entrusted by him to the devotees who resided there. The initiation of Vaishṇavas was a very simple formula, as he puts it somewhere in his Subodhinī, viz; *Krishṇa, I am Thine.* कृष्ण तवास्मि. This would seem to be the ordinary mode of initiation as communicated to Vallabhāchārya by Lord S'rī Krishṇa. But for the practical purposes of the Sampradāya, some solemn declaration was a necessity, and hence we feel it is possible that the language used in the explanation incorporated in the *Gadya* formula (सहस्रपरिवत्सरमितकालजातकृष्णवियोगजनिततापक्लेशानन्दतिरोभावोऽहं भगवते कृष्णाय देहेन्द्रियप्राणान्तःकरणानि तद्धर्मांश्च दारागारपुत्राप्तवित्तेहापराण्यात्मना सह समर्पयामि, दासोऽहम्, 'कृष्ण तवास्मि ।') is the work of S'rī Vitthales'vara. For the Sampradāya which was expanding in all directions, some grave and solemn declaration appeared to Vitthales'vara to be a necessity, and he without adding or subtracting anything to the sense of कृष्ण तवास्मि added a solemn declaration by which the sense of the Mantra became abundantly clear. The Sāmpradāyikas do understand that the portion of the *Gadya* preceding कृष्ण तवास्मि is explanatory of the same. This being an explanation coming from Vitthales'vara accounts for the difference in the readings of the formula among his seven sons. This change was most essential as it added to the solemnity of the initiation ceremony. Vitthales'vara's personality was second to none in the Sampradāya after S'ri Vallabhāchārya, and one feels admiration for his wisdom when he sees how he has added to the gravity without sacrificing the sense of the original.

We are informed by Goswāmi S'rī Gokulanāthajī Mahārāja of Bombay that the whole Gadya in the handwriting of S'rī Vallabhāchārya is preserved in the daily worship in the temple of S'rī Damodaraji at Junagadha in Kāthiāwār. We have not been able to satisfy ourselves as to the authenticity of the same,. but if it were so, the above reasoning would be inapplicable.

It is rather difficult now to appreciate how much Vitthales'varā contributed to the development of the aesthetics in the mode of worship, Sevā-Prakāra. All the fine arts were requisitioned in the performance of the daily worship. Vitthales'vara was himself a master-musician. He knew both the theory and practice of the Indian Music. Some of the most charming songs which are sung before the deity were composed by him. The song 'मंगल मंगलम्' is daily sung in every Pushtimārgīya temple in the early morning when the (स्वरूप) is made to awake. The famous Prabodha is also daily recited. Another song 'ऐश्वपर्यंकशयनम्' is always sung in 'Rāmakali' in the morning when the (स्वरूप) is swung in the cradle (Palnā). During the Vasanta season an Ashtapadi 'मजुगुणितशतसंगे' is daily sung when Vasanta is being played during the Rāja Bhoga Dars'ana. This

Ashtapadi can best compare with the finest ones of Jayadeva in Gīta-Govinda. Govindaswāmi, the greatest musician of the times, was appointed by him as the chief kirtanakāra in the temple of Nāthadwāra. Nandadāsa, Chaturbhujadāsa, Chhituswāmi and Govindaswāmi composed some of the finest songs in the local vernacular (Vraja Bhāshā) under the direct inspiration of Vitthales'vara. The songs of Vitthales'vara are all in Sanskrit. The Rāmānujiya saint Tyāgarājaswāmi composed beautiful songs in Sanskrit. Vitthales'vara's mother-tongue was Telagu, and his activities were confined to Gujarāt, Kāthiāwār, and Rajputānā where Telagu was least known. Hence Sanskrit was preferred by him as the medium of communication. Almost all the letters of Vitthales'vara which are now available are in Sanskrit.

Thus after preparing materials for music, he utilised them in the Sevā-Prakāra with consummate skill and erudition. The music to be sung before the deity was in conformity with each season. Music in the morning Sevā was to be sung in Rāgas which are to be sung in the morning. Music in the evening is to be sung in Ragas which are to be sung in the evening, the rule being relaxed during the big festivals of Janmāshtāmi, Annakuta etc., when any Raga can be sung. In music, Ragas change according to season. The finest musical instruments (Tambura, Bin, Mridanga, Sarangi etc.) of the age were made use of in the daily Sevā. This practice is continued to this day in the Sampradāya. Vitthales'vara's son Raghunāthajī was, we believe, literally correct when he speaks about his father as गीतसंगीतसागर.

The daily worship changed according to seasons. Everything was so arranged that if one entered a Pushtimārgīya temple during winter, the moment he was within the precincts of it, he would least feel the unpleasantness of winter cold. Similarly during summer, entrance in Vitthales'vara's temple would make you forget that it was summer. The perfection was carried to such an extent that the richest dainties that are daily offered to the deity vary acccording to time and season. Akbar sometimes did pay visits to Vitthales'vara and the latter made an exception by allowing the former 'Dars'an'. A Sāmpradāyika Gāthā records the following incident of Akbar's visit on one S'ārada full-moon day (रासपूर्णिमा). Krishṇa is the symbol of highest Rasa S'ringāra. He is described as S'yāma (श्याम). Accordingly every thing in the Sevā i. e. [illegible], [illegible], etc. was naturally श्याम. This was changed to white silver cloth at Akbar's request, and this practice continues to this day.

Painting too was a favourite pastime with Viṭthales'vara. A beautiful painting of his deity Navanita-priyaraya drawn by him is in the possession of Goswāmi Dwārkes'jee of Bombay. On Utsava days beautiful Ārtis were drawn and filled with pearls and it was filled with harmonious blending of colours. These Ārtis designed as they were by the ladies of Vitthales'vsra's family are still current in the Sampradāya under their respective names, such as Arti of Rukminiji etc. Some of these Ārtis show a considerable amount of accurate drawing. During the Vasanta season beautiful prints both in dried and wet colours were utilised in the curtains etc. of the daily worship. Similarly during the Sānji days, beautiful Sānjis in the choicest colours depicting the particular sports of Krishṇa were prepared for the deity under the inspiration of Vitthales'vara.

Choicest flowers such as rose, jasmine, Bakula, Kadamba, lotus etc, were utilised in preparing the garlands to be offered daily to the deity. During summer, flower-houses (फूलमंडली) were organised in such a way that flowers were knit and strung together in the most artistic way. In short the finest arts which were developed during the Akbar-period were all availed of in the daily worship of Krishṇa.

Vitthales'vara's field of activities lay chiefly in Gujarāt and Kāthiāwād. The people of those countries were by instinct commercial. It would be rather difficult to make them take interest in books dealing with the subtle and abstruse problems of philosophy. It was a question to Vitthales'vara as to how he should make them accept Krishṇa-Sevā as their goal. For this purpose Vitthales'vara organised bands of amateurs who would give life-like representations of the various sports of Krishṇa. This method proved very successful and whole communities of Gujarāt accepted the Krishṇa-Sevā creed with marvellous zeal and rapidity. In fact everything that belongs to any one is to be dedicated to Krishna. There was no actual parting with the thing but there was the ingrained remembrance that everything of you is not for your own self but for God, a doctrine like this which Vallabhāchārya preached in अविद्या पूतना नष्टा गन्धमात्रावशेषिता was translated into the daily life of Vaishṇavas by turning this अहंता and ममता from संसार towards God. Vitthales'vara achieved this for his devotees by this simple and sure remedy of Krishṇa-worship in which every member of the family could take part and all their belongings could be best utilised. Thus Vitthales'vara made Vaishṇavism a living religion among the masses of Gujarāt. The influence of Vitthales'vara was so deep-rooted, and in course of time it went on increasing to such an extent that when one speaks of a Vaishṇava in Gujarat the reference is generally understood to be to a Pushtimārgiya Vaishṇava. Dr. Bhāndārkar's remark that Vallabha's mode of worship was more dramatic than emotional seems to be rather unfounded. All the paraphernalia of the Sevā without the deity's special grace अनुग्रह and intense love was a thing never approved of nor preached by Vitthales'vara. Dr. Bhāndarkar's remark was rather due to the learned scholar's unfamiliarity with or distant acquaintance from hearsay evidence about the Sevā-Prakāra followed in Pushtimārgiya temples. Our own experience of the temples of Rāmānujās, Madhvas, Godias, and the chief shrines of Jagannātha and Vitthala leads us to the inevitable conclusion that in the mode of Krishṇa-worship Vitthales'vara's position is unique and unrivalled. This fact was whole-heartedly acknowledged by one great Vaishṇava teacher Swāminārāyaṇa of Gujarāt when he speaks of Vitthales'vara as the king of Vaishṇava teachers in his शिक्षापत्री, where he preaches his followers to follow the mode of worship as laid down by Vitthales'vara. The fact is that the Seva-Prakāra was modelled to develop the finer sentiments of the human heart, and to term it dramatic would certainly do injustice to the great Āchārya. Experience has proved that by following this Sevāprakāra the devotees not only forgot the bonds of Sansāra, but it helped them in feeling the living presence of the deity. In actual practice flaws might be noticed, the ideal set up by Vitthales'vara might not be attained, but to term the whole Sevāprakāra as dramatic is rather an abuse of language.

In the construction of temples Vitthales'vara followed a plan of his own. He did not approve of the idea of rich and costly buildings for temples. He realised that gorgeous temple buildings were not safe under the mahomedan rule. For this reason he constructed temples of an extremely simple style. Nothing could be seen from outside. From outside appearance his temple would appear to be a simple dwelling-house. But at the same time, inside the temple, great care was bestowed on its construction. Free passage of light and air was always borne in mind. The temple of S'rī Nāthajī to this day is a building of an exceptionally simple type. Inside the temple, in the middle, there was kept a chawk surrounded by three arched-door-gallaries. Behind one of such gallaries was the inner chamber called Nija-Mandira. On one side of this Nija-Mandira was kept the sleeping-apartment or S'ayana gṛiha which was always constructed in the most costly and artistic fashion. On the other side were kept the Bhoga-gṛiha-dining apartment where the deity was offered Bhoga-food etc. Beyond the Bhoga-gṛiha were situated two rooms where food to be offered to the deity was prepared. Separate rooms were kept for prepartion of flower garlands, vegetables, Betelleaves, and baths, known as Fula-gṛiha, s'aka gṛiha, Pāna-gṛiha, Jalagṛiha etc. Valuable ornaments and dresses with which the deity is adorned were similarly kept in a safe place. This temple was situated in the centre and round the temple were raised dwelling places fort he Mahārāja and his prachārakas. The idea that the deity was the Lord and the others including the Goswāmi Mahārāja were His servants was kept in mind in the construction of their dwelling places.

Side by side with the development of the sevā-prakāra, he devoted himself with equal earnestness with elaborating and expounding the doctrines of his revered father. He wrote his literary works with maturity of thought and expression. The completion of the Anu Bhāshya on the Vedānta-Sūtras belongs to this period. His reputation as a great religious teacher was established beyond question. Rich presents from Vaishṇavas of Gujarāt flowed to him here. The patronage of Emperor Akbar and his famous ministers Todarmull, Birbal, Rai Purushottama and others came to him unsolicited. The learned men of his caste who stayed with him at Gadhā came to him and they were all patronised by him. With these men he netered into matrimonial relations. His daughters were given in marriage to the sons of these learned men and their daughters were taken in marriage by him for his sons. These people of his caste came to be known as Bhattas. Vitthales'vara's connection with the country of his forefathers now being no longer necessary was practically severed. He became naturalised in Gokula. Gradually the mother-tongue Telugu came to be replaced by the local language. Both Vaishṇavas and Bhattas began to revere Vitthales'vara with intense devotion. The result was that Vitthales'vara was made conscious of his greatness to such an extent that he could with equal propriety speak of himself in plural. While explaining the Subodhinī to Vaishṇavas, during the evening recess, he wrote out notes on difficult passages on Subodhinī. These notes were ultimately put together and given the name of विवृतिप्रकाश. The मंगलाचरण, 'श्रीविट्ठलैः' क्रियते suggests the above mentioned self-consciousness.

Vallabhāchārya had given several Swarupas to his devotees. When these devotees and their descendants became extinct or unable to carry on the Sevā of the Swarupas, they returned the same to Vitthales'vara. Of these about seven or eight were received by him. These Swarupas were distributed by Vitthales'vara in Dāya-Bhāga among his seven sons in Samvat 1634. All the seven sons were given a joint right to Sevā of S'ri Nāthaji, the eldest son Giridharaji being left in control of the same under the primogeniture rule. These seven Swarupas came to be known in the sampradāya as the seven Nidhis. Separate houses for all the seven sons (except perhaps for Yadunāthaji who being the youngest son of Rukmiṇi remained joint with Giridharaji, the eldest son), were built in Gokula and given to each of the sons. Each son thus set up the Swarūpa given to him in Dāyabhāga as a shrine of his own. This came to be known in the Sampradāya as seven Gādis or seats. In a letter Vitthales'vara asks his sons to select a site for the house of Yadunātha. It seems he passed away before the house of Yadunātha actually came to be built. The result of this has been rather undesirable in the Sampradāya because it proved fruitful in giving scope to as many as four persons to put forward their claims to the Gādi of Yadunātha.

The last years of Vitthales'vara were passed very happily at Gokula. One Murarī Pandit wrote to him to give him a work which would explain to him the fundamental principles of Pushti-mārga in such a way that he could silence all his opponents on his side of the country. For him Vitthales'vara wrote out the Bhakti-hansa and sent it to him. On receipt of the same the Pandit was much delighted and asked for a further explanation of the root cause of Bhakti. Thereupon Vitthales'vara wrote out the Bhakti-hetu. Both these works together in a nutshell explain that the cause of Bhakti is God's Grace (अनुग्रह) alone and that the Supreme Purushottama plays among his select devotees, unapproched by मख, तप etc.

Vitthales'vara lived for over 70 years. His was a life in which there was a happy perfection of the theory and practice of the Sampradāya. His devotees have drawn a veil on the manner of his passing away, but from one Gopāldāsa of Vyāra we learn that he had fever and some pain in stomach when he passed away on Magha Krishṇa seventh Samvat 1642. Thus a life full of events was closed, the happy memories of which are enshrined in the hearts of the Vaishṇavas even to this day.

Good comes out of evil is well illustrated in an incident in the life of Vitthales'vara. Krishṇadāsa was appointed as the Adhikāri in the temple of Nāthadwāra on Govardhana hill by Vallabhāchārya. On account of some disagreement with Vitthales'vara, Krishṇadāsa prohibited his access into the temple. Vitthales'vara submitted to the order of the Adhikāri, and lived at Chand Sarovara, Parasoli, for about six months of the exile. During the period he has penned some of the finest Vijnaptis-prayers. It is said that one such Vijnapti was written per day and the same was taken to S'rī Nāthaji by Rāmdāsa. These Vijnaptis reveal the depths of Vitthales'vara's heart. In them there is a harmonious blending of thought and expression. A perusal of these Vijnaptis leaves a lasting impression on our mind. They are the outcome of a burning heart yearning passionately to meet the object of his intense love. A veil has been drawn as to the reason which led to the exile of Vitthales'vara by Krishṇadāsa. However, ultimately Krishṇadāsa came round, begged Vitthales'vara's pardon and requested him to return to the temple. In these Vijnaptis each verse stands by itself. One publisher grouped them together into a collection of 25 each, but there seems to be little warrant for the same. It would not be out of place to record our own view as to the origin of these Vijnaptis. Vitthales'vara was a great letter-writer. He used to send and receive letters from a good many Vaishṇavas. These letters were in Sanskrit prose, but in the beginning and end of each letter a verse or two were written by Vitthales'vara to remind his pupils of their sublime mission. In course of time, the uninteresting matter of the letters came to be neglected, but the verses were collected and preserved. This being the origin of these Vijnaptis, we can well understand why these verses are unconnected. Unconnected as they are, they do breathe the fervent devotion of the great author. In some of them the highest and noblest sentiments find expression.

Vitthales'vara's family-life was exteremely happy. He himself was blessed by God with a big family. By his first wife Rukmiṇī he had seven sons and four daughters. S'obhā, Yamunā, Kamalā and Devakā were his daughters by the first wife. They were all. married, and they lived with their husbands in Vitthales'vara's house. Giridhara, Govinda, Bālkrishṇa, Vallabha, Raghunātha and Yadunātha were six sons by his first wife Rukmiṇī. Ghanas'yāma was the seventh and the only son of Vitthales'vara by his second wife Padmāvatī. The first child of Vitthales'vara was S'obha and after her Giridhara the eldest son was born. Purushottama the only son of his brother Gopinātha had passed away, but his two sisters Lakshmī and Satyabhāmā lived with Vitthales'vara. They passed their widowhood in the service of

S'rī Navanitapriya, the family deity, in perfect happiness. In spite of his being a big family-man, he had freed his house from the shortcomings of the Sansārika miseries. In short there was no touch of Sansāra in his family-life. One Devakinandana, a grandson of his, son of Raghunātha the fifth son, records the mode in which he was fondled by Vitthales'vara in his childhood in a poetical work Rasābdhi composed by him. 'श्रीकृष्णः शरणं ममेति शानकेस्वार्थे वात्सल्यतः श्रीहस्ताम्बुजमाननोपरि मम व्यापारयन् सर्वतः। ××× श्रीविट्ठलः शर्मणे। This would show that while fondling his children Vitthales'vara would not forget his Lord Krishṇa himself, but would leave a lasting impression on the tender minds of his children that primarily their duty was to serve Lord Krishṇa. A Kīrtana attributed to his another grandson Kalyāṇarāya gives an exquisitely delicate expression to his unwillingness to leave Vitthales'vara's house, at the time when Vitthales'vara's uncle who was childless came to ask him to give him any one of his male children. At this time Kalyānarāya was afraid that he, being the first-born grandson, would be given away. The idea of remaining at the gate of Vitthales'vara and thereby singing praises of Lord Krishṇa was a thing which appealed to Kalyāṇarāya more than anything else in the world howsoever attractive. Vitthales'vara understood all his children and he knew very well that none of them would be willing to leave his house, so he asked his uncle to take away any of them who would be willing to go with him. The uncle was baffled by this reply and went away disappointed. The Sampradāyika Gāthā relates that the uncle administered three curses to Vitthales'vara's progeny. These three are—(1) maintenance of daughters' husbands, (2) debts, and (3) travelling. How far and how much truth there is in this Gāthā, it is difficult for us to determine, but so far as the first charge is concerned, it is literally true. Even to this day the Bhattas, the so-called husbands of the daughters of a Goswami's family, are maintained in Goswāmi's house with almost all the members of their family. So far as the second charge is concerned, we find some evidence for accepting the truth of the same. In a letter written by Vitthales'vara himself he asks his sons to wipe out the debts. As regards the third, it is a blessing in disguise, it would add to the number of वैष्णवs, and the religion would prosper. Whatever that may be, Vitthales'vara's attitude seems clear. He had accepted the second alternative of Atyāga. He did not want his daughters to plunge into Sansāra. So he kept them in his house, so that they could also serve Lord Krishṇa with the same facilities as his sons would do. They were married of course, but their husbands the Bhattas had no access into the Sevā-prakāra of Lord Krishṇa in the family of Vitthales'vara. Even to this day no Bhatta is admitted in the inner worship in a temple owned by a Goswāmi. Debts for the Sevā of Lord Krishṇa were never considered objectionable. They are not for the Sansāra, and as such, the evil influences are few. Thus these curses had no evil effect on the descendants of Vitthaleshvara. Family-life led by them was happy. The wives of Giridhara and Raghunātha were two sisters, so also those of Yadunātha and Ghanashyāma were sisters. Not only were members of the family happy but even those who came in Vitthales'vara's contact were extremely happy and contented. One Mahādeva Dwivedi gives expression to this fact in the following verse 'श्रीविट्ठलदीक्षिते राजमाने महीतले। वैकुण्ठगमनेच्छा कुण्ठिता वैकुण्ठवासिनाम्'. The Girinārā and Sachorā Brāhmins who early joined the faith and were taken by Vitthales'vara in the inner worship did so without any monetary remuneration. Their duty was to serve Lord Krishṇa according to the directions of Vitthales'vara. All their other wants were looked after by Vitthales'vara. How much he cared for the comforts of his Sevakas could be well seen from the following. In the daily worship, water was to be brought from the Jamunā river by Sevakas, but writes Vitthales'vara in his letter, that if it was found troublesome to them, it should not be done because his Swāmī—Lord Krishṇa was delicate, and the inference was that he would not accept anything which arose out of Kles'a. (श्रीयमुनाजलनिर्वाहः सेवकैः कर्तव्यः, परन्तु नातिक्लेशेन, मत्स्वामिनः कोमलस्वभावत्वात्). Endowed as he was with such tender feelings for his devotees, it is no wonder that the hearts of his devotees should reciprocate the same sentiments in greater degrees. It is in fitness of things that poet Gopāladāsa after describing all the details of Vitthales'vara's family should describe the same as Kalpa Vriksha. (श्रीविट्ठलकल्पद्रुम फळ्यो तेनी शाखा प्रसरी अनेकरे).

प्राप्तभगवत्स्वरूप

मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्एल्. बी.

जन्म—१९४३ आश्विन शुक्ल ७.]   [भगवद्धामप्राप्तिः—१९८३ ज्येष्ठ कृष्ण १२.

The late Editor Mr. Mulchandra Tulsidas Teliwala, B.A., LL. B.

The above introduction is left incomplete, because the Editor suddenly passed away on 26th June 1927, at the early age of 39. A short sketch of his life, which was destined to be a life of sacrifice in the cause of पुष्टिमार्ग, will not be out of place. He was born on 23rd September 1887 (Aso Sud 7, 1943) in the ancient and holy city of Bhṛgucutchha or Broach situated on the right bank of the Narmada. It was here that king Bali performed his अश्वमेध, and gave Lord वामन three steps of earth. It is the abode from most ancient times of Bhārgava and other Brahmins well-versed in कर्मकाण्ड. Further up the river are situated the holy places of व्यासाश्रम and शुक्लतीर्थ the abodes of व्यास and शुक्लनारायण. He was born in a very rich and famous family of विशामोढ वैश्य. The caste being a very small one, his grand-father Mr. Lalbhai was not married till he was about 55 years old. He went to the pilgrimage of श्रीनाथद्वार and कांकरोली and at कांकरोली, गोस्वामी श्रीपुरुषोत्तमजी, (who flourished later than his namesake the writer of प्रकाश on अणुभाष्य) gave him a blessing that he would have two sons. He replied that he was unmarried and there was no chance of marriage at that age but the गुरु smiled and asked him to go home. The वरदान came to be true, he married and he had two sons. The family business of cotton also prospered and their firm had agents at Palej, Miyagaum and other places, and a branch at Bombay. A marriage of a member of the family was performed at Gulalwady in the 3rd Bhoiwada, Bombay, with great pomp and large vessels were given in gift by the family to Gulalwady, which even now may be traced. Their prosperity increased, and the cellars of their house were filled with Silver bars. But when God shows special favour to any one, he takes away the burden of wealth, and by the grace of God it happened so in this case. A year before the birth of Mulchandra there came a sudden crash, there was a heavy loss and all the money vanished. On account of worldly worries and troubles with which his parents were surrounded, Mulchandra inherited a very poor, lean, physical body. At any time of life his weight was not more than 72 lbs., but this slender body contained a spirit, which was dauntless, not ruffled by any obstacles, not deceived by any outward show or pomp, and could easily spurn wealth, of which his family had more than enough till his birth. His early years were spent in playfulness and he was accustomed to run on the city-walls and swim in the river. But he was always the top-boy in his class. His memory was so sharp that he could easily remember what he read once. He was the pet of his teachers. The light jovial nature of this pigmy monitor commanded willing obedience from the strongest, tallest and most mischievous boy in the class. After passing his Matriculation Examination in 1905 he joined the Wilson College for further studies. In the College hostel he picked up some knowledge of singing and music from his Deccani friends. He graduated B. A. with वेदान्त as his optionl subject in 1909, and he was a favourite student of Mr. Bhadkamkar, Professor of Sanskrit. In the absence of any other calling, he took up government service, as a teacher in the Elphinstone High School, Bombay. Thence he was selected for the Training College with a scholarship of Rs. 50 per month, and this gave him an opportunity to read up the course for LL. B. For some time, he lived with Mr. Khimji Cooverji at Walkeshwar, as a tutor to his son.

The first वैष्णवपरिषद् met at Baroda in 1906, second at Patan in 1907, and the third at Nandurbar in 1909. After this, पुष्टिभक्तिसुधा the well-known monthly magazine was started, and though he was a student, his constant and powerful contributions coupled with his independent thinking and fearless expression created a stir in the वैष्णव world. Mr. Maganlal Gunpatram Shastri, the founder of the Parishad and the Magazine, found in him a young, able and resourceful co-worker. The fourth session of the परिषद् was held at Surat in 1910, and there also he attracted great attention.

He passed his final LL. B. in 1914, and in all probabilities it appeared that he would begin practice at Broach, as the same was his native place, but all were surprised when he took a High Court Sanad and came to settle in Bombay. The reason which led him to this decision without consulting any one, is as under:—

From infancy, he often got dreams in which he found himself flying in the air, and some dreams were suggestive of future events. While at Broach, one early morning before living the bed, he got a dream in which he saw श्रीनाथजी, the स्वरूप in the Broach temple, swinging in पलना and smiling at him. He got up with great joy, and after प्रातःनित्यकर्म he went for दर्शन. He was greatly delighted to have the same दर्शन there, not in dream, but in reality. There was पलना मनोरथ and the स्वरूप was adorned in the same वस्त्रालङ्कार as he had seen in the dream, and there was the same joyful, smiling look. While he was returning home, Mr. Jaikisandas, a life-long friend of Teliwala family, called him at his shop, congratulated him on his passing the 2nd LL. B. examination, advised him to practice in the Bambay High Court, and gave him Rs. 500/ (Rs. 300+Rs. 200) required for taking out a Sanad. Mulchandra saw God's hand in all this and without waiting to consult any one, he came to Bombay, took the Sanad, and began practice. He shared the chamber of the late Mr. Bhailal Kothari at Lamington Road. Here he came into contact with the late Mr. Kashidas Narayandas Dalal who was the sub-tenant of Mr. Bhailal and who was the Secretary of Pandit Gattulalaji's संस्था. He helped Mr. Kashidas in preparing the annual टिप्पणी, and from that time Mr. Kashidas took a liking to him. He allowed him full access to the Library manuscripts fully appreciating his great erudition and learning, and finally got him appointed a trustee of the संस्था along with the late Shet Tribhovandas Vurjivandas, J. P. The reader will thus see that but for वरदान to his grand-father, the जन्म of Mulchandra was impossible, that at the time of his birth, the worldly wealth was all taken away by way of अनुग्रह, the suggestion and facility to settle in Bombay was all due to the Almighty's helping hand, and finally the greatest convenience for his life-work, *viz.* the possession of an excellent manuscript Library of the सम्प्रदाय was provided for him by God; and but



for divine help, not one of these series of important events could have been brought about by his own efforts. The astrologer of his family predicted from his कुण्डली that he would perform a great and memorable यज्ञ, and after more than half of his valuable publications were out, Mulchandra himself understood the meaning of this यज्ञ, and whenever there were difficulties in his work on account of illness or want of funds or want of manuscripts, he prayed to God, and the prayers were in many cases heard and difficulties solved.

Long before this, Mr. Maganlal Shastri had begun to utilise the वैष्णव परिषद् funds for getting manuscripts copied from पं. गट्टूलालजी's library in consultation with Mulchandra, but the fund was small, and the work was stopped after some time. In December 1914, Mr. Maganlal Shastri was transferred to the Deccan College, Poona, and he had to leave Bombay in January 1915. The daily Katha Mandli at the Khakhar Building came to a stop, and thereupon at the request of his friends, Mulchandra began reading अणुभाष्य and निबन्ध, every night. The Bombay University prescribed for गोकुलजी झाला वेदान्त prize for 1915 the following essay–'Discuss how far शंकराचार्य truly represents the view of the author of the ब्रह्मसूत्र'. Mulchandra had gone through the प्रकाश of श्रीपुरुषोत्तमजी about four or five times, and with his powerful memory he had materials enough for the required discussion. He thought of writing the essay just a month before it was due, and with the wonderful concentration of mind that he possessed, he wrote it out and gave it on the last due date. The language, the outer garment he had no time to correct or adorn, but the thought is so deep, the discussion so balanced, the judgment so impartial, that it is difficult to find fault anywhere, while the comparative method and the wide knowledge that he had gathered from प्रकाश having been fully utilised here must have compelled admiration of his examiners. The prize was divided between him and Mr. Kurtkoti. The essay is published and is very widely read. Scholars like Dr. Bhandarkar, Dr. Thibeau, and many other Orientalists have long ago come to the conclusion that शंकर's interpretation of ब्रह्मसूत्रs does not represent बादरायण's view, but they had not before them अणुभाष्य and प्रकाश, and so they thought that शंकर had, however, well succeeded in making a समन्वय of all important उपनिषद्'s. If this view were correct, शंकर would be wiser than बादरायण. We have no doubt that a wide knowledge of अणुभाष्य, प्रकाश and रश्मि would dispel this view. Copies of the Essay were sent to many scholars and many have praised it, and some have expressed their inability to pronounce any judgment as they had not studied the various भाष्यs by the comparative method.

In about 1915, at the request of Mr. Tribhovandas of Nadiad to translate सेवाफल, he began collecting साहित्य on it, and at first collected 12 Teekas, some in हस्ताक्षर of authors themselves. Such a collection was never to be found before in any one library or with any one गोस्वामी or ordinary वैष्णव, and he thought of publishing them. Mr. Tribhovandas had no funds for this work, so Mulchandra approached श्रीजीवनलालजी of पोरबन्दर for the same. He immediately consented and sent Rs. 500 for the publication. The work was begun at once, and the first volume of his memorable series was published in December 1916. It established his reputation in the पुष्टिसम्प्रदाय. So many commentaries were never thought of before by any one, much less seen, and now they had them before their eyes all collected, beautifully printed, and with a lucid introduction in Sanskrit. Three more commentaries were subsequently traced and published along with अणुभाष्य. This publication was followed in quick succession by others, and the details as to how, whence and how many manuscripts were collected, how funds were obtained etc., are given in the introduction to each work.

His first marriage took place at Ujjain in 1911-12, and he was blessed with a wife who was very pious, spending about two hours every morning in religious observances, highly devoted to her husband, and had a strong and healthy constitution. Mulchandra's mother also was called from Broach, and all lived in Bombay. His income being very limited, they had to live an extremely frugal life, devoid of all luxuries such as tea, vegetables and milk; but it was peaceful and contented. His first son was born in 1914, and a daughter was born in 1915. But even this little happiness did not last long. The daughter died, followed by his wife who died at Broach from fever incident on delivery in Diwali, *viz.*, about October 1917, and Mulchandra and his son were put to great difficulties for daily food. There were no means to keep a cook, or a servant to take care of the son. When the father went to court at 11 A. M. after locking the room, the son passed his time somehow with the neighbours, and if the father did not return at 6 P. M., the lonely son would sit in front of the door with a stream of tears flowing from his eyes down the cheeks and with constant sobs which no amount of pursuasion could check. When ultimately he did arrive, the boy would fly into his arms, and would not leave him even in bed and till next day's fateful hour 11 A. M. One source of his little income was some small commissions which came to him from the Chief Judge of the Bombay Small causes Court who appreciated his value, thereby showing his great regard for him, for his sterling character and great learning. For this work, pleaders asked him to fix time after 5-30 P. M., which this junior Mulchandra did, but after some bitter experiences of the above nature, he avoided engagements after 5-30 p. m. It was under such difficulties that the life-work of Mulchandra was done.

In 1919 (Vaishakh 1975) he went to श्रीनाथद्वार and कांकरोली at the time of यज्ञोपवीत ceremony of श्रीव्रजभूषणजी son of श्रीबालकृष्णलालजी. He had with him a company of friends including उत्सवलाल चन्दुलाल, and others. With their help, he saw the libraries of कोटा and gathered important information from manuscripts from all possible sources. He also saw the Nathadwārā Library. The library of श्रीविठ्ठलेशजी the second house in which श्रीहरिरायजी, and योगिगोपेश्वरजी flourished, could not be seen, though many efforts were made, and it still remains to be seen with a view to find out all the ग्रन्थs of श्रीहरिरायजी and श्रीयोगिगोपेश्वरजी. It was at the time of this trip that the publication of श्रीटिप्पणीजी was undertaken, and the circumstances under which it was done, and the important discovery of the पाण्डु draft in the हस्ताक्षर of श्रीगुसांइजी which it led to, are fully described in the introduction of श्रीटिप्पणीजी. His second marriage took place at Surat in 1920, in दशामोढ caste. The dowry was fixed at about Rs. 750, but Mulchandra could ill afford this cash and he got a loan from a friend without asking for it. श्रीव्रजरत्नलालजी of Surat graced the marriage procession by his presence. His second wife has two sons and a daughter.

In 1917 his friend उत्सवलाल invited Mulchandra to Anand, and told him in the course of conversation that he had seen रश्मि at Surat. Mulchandra sent him to Surat to fetch it, which he did. It was a portion found in a very bad condition, and since then Mulchandra tried to collect रश्मि manuscripts from all sources, and one of his great desires was to be able to publish भाष्य, प्रकाश and रश्मि together. Through the help of श्रीगोकुलनाथजी of बडामंदिर, Bombay, he succeeded in arranging in May 1925 to get funds from the Gordhandas Soondardas Trust administrated by Seth Lalji Naranji and others, and curtailed all other activities, so that he may be able to devote his undivided attention to the publication of this great work. He was able to publish only three volumes consisting of first, second and third Padas of the third अध्याय before his death.

In 1927, Shree Tikayat Maharaja, Shree Gordhanlalji and Lālbāvā Shree Damodarlālji invited him to श्रीनाथद्वार and he went there accompanied by his friends Messrs. Jamnadas Kanji, Gordhandas Pragji and Hiralal Mulji. He was shown a few pages of the 3rd अध्याय and a complete manuscript of the 4th अध्याय of अणुभाष्य and he found them to his great delight in the हस्ताक्षर of श्रीगुसांइजी. In this manuscript the portion of the second interpretation of the first two सूत्रs of the fourth अध्याय is subsequently added by श्रीगुसांइजी. A minute inspection of the manuscript left no doubt in Mulchandra's mind that the author of the work was श्रीगुसांइजी himself.

He had a very wonderful genius for research. His creative faculty, powerful imagination, extremely retentive memory and a deep alround knowledge of the Sāmpradāyika Gāthās helped this aptitude for research to such an extent that he compelled old worn out manuscripts to speak out, to whom they belonged, from whom they were stolen, when they were written, in whose hand-writing they were and other special details about each of them, with a quickness and preciseness which would put to shame even the hero of a detective novel. We would give an instance and narrate the facts in his own words:—

"નવ પુસ્તકના આધારે શ્રીટિપ્પણીજીનું શોધન કરી અમે મુદ્રણકાર્યમાં જન્મપ્રકરણના પ્રથમાધ્યાયના અન્તભાગપર્યન્ત આવ્યા. 'क्रिया सर्वापि सैवात्र' એ સુબોધિનીકારિકાનું વ્યાખ્યાન કંઈક વિલક્ષણ લાગ્યું. આથી શ્રીપુરુષોત્તમજીકૃત તત્પ્રકાશ જોયો. આ પ્રકાશ પણ શ્રીપુરુષોત્તમજીનો નિજશ્રીહસ્તાક્ષરે લખેલો અમારે ત્યાં બિરાજે છે. તે જોતાં નીચેની પંક્તિ વાંચવામાં આવી:—'अत्र कारिकाव्याख्यानं टिप्पणीपुस्तकेषु दृश्यते, तत् पाण्डुलिपिगते नास्तीति श्रीगोकुलनाथानां तद् प्रतिभाति, केचारीत्यापि सर्वेति च ।' અહિં કારિકાવ્યાખ્યાનનું દર્શન

ટિપ્પણીપુસ્તકોમાં થાય છે, તે પાંડુલિખનમાં નથી, તેથી શ્રીગોકુલનાથજીનું તે હોય એમ લાગે છે, લેખરીતથી પણ તેમજ ભાસે છે. એ કારિકાવ્યાખ્યાન શ્રીગોકુલનાથજીનું છે એમ શ્રીપુરુષોત્તમજી કહે છે તે વાતને એજ કારિકાવ્યાખ્યાનનું સ્વતંત્ર પુસ્તક જે અમારી પાસે વિદ્યમાન છે તે પુષ્ટિ આપે છે. તે પુસ્તકમાં આ પ્રકારે લખેલું છેઃ—'श्रीश्रीवल्लभो जयति । दशमना अध्याय २६ ने समाप्ते श्रीआचार्यजीनी कारिका ५ ॥ छे, ते मध्ये पहेली कारिका जे 'क्रिया सर्वापि सैवात्र परं कामो न विद्यते । तासां कामस्य संपूर्तिर्निष्कामेनेति बाध्यता ॥ १ ॥ श्रीजीकृत एहू लिखाव'. આના પછી મુદ્રિત શ્રીટિપ્પણીજીમાં વિદ્યમાન સંસ્કૃત વ્યાખ્યાન અક્ષરશઃ આદ્યન્ત લખેલું છે. શ્રીગોકુલેશના અન્તરંગ સેવકો એઓશ્રીને પુરુષોત્તમભાવથી શ્રીજીસંજ્ઞાથી વ્યવહારે છે. આથી શ્રીપુરુષોત્તમજીનું કથન કે આ વ્યાખ્યાન શ્રીગોકુલનાથજીનું છે તે સુદૃઢ થાય છે. આ તો અપ્રસ્તુત પ્રસંગ થયો, પરન્તુ આ શ્રીપુરુષોત્તમજીની પંક્તિથી અન્ય વાર્તા સ્ફુરી. આ લેખથી એમ જણાયું કે શ્રીપુરુષોત્તમજી પાસે આ પાંડુલિખન શ્રીટિપ્પણીજીનું હોતું જોઇએ, અને શ્રીપુરુષોત્તમજી સુરતમાં થયેલા હોવાથી ઉક્ત પુસ્તક સુરતના શ્રીબાલકૃષ્ણજીના મંદિરમાં હોતું જોઇએ. આ અનુમાનોથી દોરાઇને અમે એક વિનતિપત્ર આ સંબંધમાં શ્રીવ્રજરત્નજીને લખ્યું. મહારાજશ્રીએ નિજમંદિરમાં વિદ્યમાન સંગ્રહમાં તપાસ કરી, પરન્તુ એ પાંડુલિખનનું પુસ્તક તેમાં મળ્યું નહિ. તેથી આપશ્રીએ અમને જણાવ્યું કે ઉક્ત શ્રીટિપ્પણીજીનું પુસ્તક અમારે ત્યાં સુરતના મંદિરમાં નથી. આ પ્રત્યુત્તરથી અમારા અન્તરાત્માને સંતોષ થયો નહિ, તેથી સ્વતઃ સુરત જઈ આનો નિશ્ચય કરવાનું સ્ફુર્યું. આથી દીવાળીની રજામાં ગત આશ્વિન શુક્લ ત્રયોદશીને દિવસે અમે સુરત ગયા. તે જ દિવસે મહારાજશ્રીવ્રજરત્નજીને વિનતિ કરી કે આપશ્રી અમને આપશ્રીને ત્યાં સેવામાં વિરાજતા હસ્તલિખિત પુસ્તકોનું દર્શન કરાવવા કૃપા કરો. મહારાજશ્રીએ કૃપા કરી અમારી વિનતિ લક્ષમાં લઈ બીજે જ દિવસે—આશ્વિન શુક્લ પૂર્ણિમા—રાસોત્સવને દિવસે—પ્રાતઃકાલે ગ્વાલ અને રાજભોગના અનવસરમાં ઉક્ત પુસ્તકોનું દર્શન કરાવ્યું. હસ્તલિખિત પુસ્તકોનું દર્શન કરતાં અમને બહુજ આનન્દ તથા સંતોષ થયો. અમને માલૂમ પડ્યું કે શ્રીમદ્વિઠ્ઠલેશ્વર પ્રભુચરણના નિજ શ્રીહસ્તાક્ષરે લખેલા શ્રીટિપ્પણીજીના મૂલ પુસ્તકજી ત્યાં બિરાજે છે. અને આજ પુસ્તકનો ઉપન્યાસ શ્રીપુરુષોત્તમજી પાંડુલિખન તરીકે કરે છે."

Besides tracing the original of टिप्पणी, some of the other important results of this genius for research which has put the whole Sampradāya in great obligation to him might be summed up as under:—

2. भरुची वैष्णवs give the date of श्रीमद्वल्लभाचार्य's birth as, 1529, and not 1535, and the place of birth as चोडाग्राम and not चंपारण्य. Mulchandra got an old manuscript of कल्लोल from these भरुचीs in which one old श्लोक (about 3rd or 4th) about नामकरण or ordinary matter was deleted and this श्लोक specially mentioning date and place was substituted, scratching out the old one. There was not the slightest necessity of scratching out the old श्लोक but the writer purposely did it with an ulterior motive. The manuscript was returned and since then it is not produced by वैष्णव उत्सवलाल भरुची though repeatedly demanded. From the time we saw the mss., we were convinced about the interpolation, thus leaving no doubt that the date given by भरुचीs 1529 is not correct, as also the place चोडाग्राम.

3. Very little was known to the सम्प्रदाय about श्रीकृष्णचन्द्रजी. It was he who pointed out the deep obligation under which श्रीपुरुषोत्तमजी was to his गुरु for adopting the comparative method of writing, to unearth and publish as an appendix to Vol. III of भाष्यप्रकाशरश्मि, कृष्णचन्द्रजी's टीका on गुणोपसंहारपाद, and to draw attention to the different इतिश्री's in the भावप्रकाशिकावृत्ति showing which portion was written by श्रीकृष्णचन्द्रजी himself and which was collected, set right or written by श्रीपुरुषोत्तमजी.

4. It was he who obtained the fourth अध्याय of श्रीपुरुषोत्तमजी's अधिकरणमाला from the Deccan College Bhandarkar Institute, and published it. योगी श्रीगोपेश्वरजी could not get it, and so he wrote out the fourth अध्याय himself, which also has been printed in the appendix, thus facilitating a comparison between the writings of two master-minds.

5. A copy of some portion of बृहद्भाष्य was found many years ago, and published in पुष्टिभक्तिसुधा. It was well-known then to every student that this contained words, phrases and sentences which were also found in प्रकाश and वृत्ति. The portion was published for what it was worth for the information of the public. The matter rested there for several years. Two or three years ago, Mulchandra got a rough draft* of the same portion of the बृहद्भाष्य, and he had no difficulty in tracing it to रामकृष्णभट्ट, the learned शास्त्री of काशीस्थ श्रीगिरिधरजी, and the टीकाकार of श्रुतिरहस्य. In the introduction to भाष्यप्रकाशरश्मि ३-१-१ published in samvat 1982, Mulchandra wrote on p. 12 as under:—"In conclusion we ought not to omit reference to one work which passes in the name of श्रीमद्भाष्य of S'rī Vallabhāchārya. Some passages of the जिज्ञासाधिकरण and the first Pāda of the third Adhyāya and 11 Sūtras of the second Pāda have been seen by us. The portion from the third Adhyāya has been published by us in the monthly Pushti Bhakti-Sudhā. From the style, this seems to be a clumsy attempt of a writer of recent times. All copies seen by us are new. The style is such as leaves little doubt in our minds as to the spurious nature of this production". Notwithstanding this, Mr. Jethalal Shah, who has recently published अनुवाद of १-२ अध्यायs writes, in his introduction on p. 9, "...સદ્ગત તેલીવાલા એવું માને છે કે શ્રીવલ્લભાચાર્યે બ્રહ્મસૂત્ર ઉપર બે ભાષ્ય રચ્યાં હતાં...તેના પુરાવા તરીકે પુષ્ટિભક્તિસુધાના વર્ષ ૬ માં પ્રકટ થયલા લખાણને રજુ કરે છે અને તે પ્રકટ થયલું લખાણ તે "શ્રીમદ્ભાષ્ય અગર બૃહદ્ભાષ્ય" છે." To attribute to Teliwala what he deliberately considered "spurious" is misrepresenting a departed scholar, misleading oneself and misleading the public. His conclusion which he puts in bold type on p. 16. "પાછળથી કૃષ્ણચન્દ્રજીએ બૃહદ્ભાષ્ય રચ્યું હશે" is also due to ignorance. To say that अणुभाष्य derives its name from the अणुत्व of जीव is absurd, because the जिज्ञासा is not जीवजिज्ञासा, but ब्रह्मजिज्ञासा, and the अणुभाष्य is not जीवसूत्राणुभाष्य, but ब्रह्मसूत्राणुभाष्य. The present requirements of the सम्प्रदाय are not arguments based on antiquated opinions, but investigation and research which would throw more light on the सम्प्रदाय.

6. It was he who identified a manuscript of सुबोधिनी now at Dabhoi, as originally belonging to श्रीदामोदरलालजी, son of श्रीगिरिधरजी, the eldest son of श्रीगुसांइजी. The additions made by श्रीगुसांइजी to सुबोधिनी are put into brackets in this manuscript. While reading सुबोधिनी, it was found difficult to establish any connection between some sentences, which difficulty is removed by श्रीगुसांइजी's additions being thus separated. The तामसफलप्रकरण is published from this manuscript, by Mulchandra.

7. The idea of collecting all the टीकाs on षोडशग्रन्थs and publishing them together was his; he successfully carried it out, and helped चीमनशास्त्री and हरिकृष्णशास्त्री with manuscripts to complete the series.

---

* The draft is with us at present.

8. He collected टीकाs of श्रीगुसांइजी on सिद्धान्तमुक्तावली and pointed out that श्रीगुसांइजी had revised the टीका at least four times.

9. It was he who first found out that श्रीव्रजराजजी of the 1st house wrote his टीकाs and sent them to his गुरु श्रीवल्लभजी of the 5th house who made many changes in them. The copies made from the original became known as श्रीव्रजराजजी's टीकाs and those that were altered became known as श्रीवल्लभजी's टीकाs.

10. He went to श्रीनाथद्वार, identified the fourth अध्याय of भाष्य as written out wholly by श्रीगुसांइजी, in which second interpretation of 1st two सूत्रs is subsequently added, thus conclusively showing that the whole was written by श्रीगुसांइजी.

11. He found out फलप्रकरणप्रकाश in the हस्ताक्षर of श्रीपुरुषोत्तमजी and published the same.

12. He collected two copies of भाष्यप्रकाश, first in श्रीपुरुषोत्तमजी's own hand and got and identified a subsequent copy of प्रकाश in which additions and alterations were made by श्रीपुरुषोत्तमजी. He adopted for publication the final copy of प्रकाश and hence we find differences in प्रकाश and रश्मि, as रश्मिकार श्रीगोपेश्वरजी had got only the first copy of प्रकाश with him.

13. He threw new light on श्रीगुसांइजी's life, which is published above with dates as traced by him.

14. He found out that the सुवर्णमेखला that श्रीवल्लभाचार्यजी presented was not to श्रीविट्ठलनाथजी of पंढरपुर, but it was to श्रीविट्ठलनाथजी of विजयनगर, where there was a temple of श्रीविट्ठलनाथजी.

15. He obtained from श्रीव्रजरत्नलालजी of सुरत the will of श्रीपुरुषोत्तमजी and published the same.

16. He collected and published several स्वतन्त्रलेखs in पुष्टिभक्तिसुधा and वेणुनाद.

17. He laboured hard and succeeded in collecting रश्मि, the monumental work of श्रीयोगिगोपेश्वरजी and with the help of श्रीगोकुलनाथजी of बडा मन्दिर, Bombay, he arranged for publication of the same.

On account of his wide knowledge about the history of the सम्प्रदाय together with a clear preception of the facts of the case put before him he was consulted by गोस्वामिs in their cases, and his services were ulitised by S'rī Gokulnāthjī of Bombay and his son S'rī Krishṇajīvanjī in Madras and Dharangaon cases, in both of which they succeeded, and also by Shrī Gopeshwarji who also won his case at Madras.

Again, if there was an attack against the पुष्टिसम्प्रदाय and his presence was required at any place he never refused, but started immediately. He had thus to go to सिहोर (near Indore) Mehemdabad, Patan, Savali and other places.

The necessity of a Research Institute for the सम्प्रदाय was recognised through the efforts of Mulchandra by Shrī Tikayat Mahārājā of Nāthadwara, and Shrī Vallabhāchāryajī, son of S'rī Devakinandanjī offered him a decent block of four rooms in Chandrabag, and Mulchandra went to live there in Chaitra of 1983. But God willed it otherwise. He fell ill, went to Broach during the Summer vacation in High Court, and when he returned in June 1927, he had not thoroughly recovered. He was attacked with unbearable neuralgic pain in the head on 18th June 1927, and he passed away on 26th June 1927.

Though he died young, his abilities as a great Scholar were recognised by Oriental scholars as well as Sāmpradāyika scholars. Mr. Woodroffe, Mr. Keith, the late Mr. Tansukhram Mansukhram Tripathi, Anant Shastri of Shanti Niketan, Vidhushekhara Bhattacharya, Bal Shastri and Nandkishore Shastri all acknowledged his scholarship. Mr. Tansukhram was always delighted with his conversation, and gave him from his vast collection whatever manuscript or book was required by him. Mr. Keshav Harshad Dhruva was so much delighted to read his introduction of शृङ्गाररसमण्डन that he came to see him, and expressed a desire to read with him साम्प्रदायिक works, and दयारामनो अक्षरदेह was entrusted to him by Mr. Govardhanram's brother to make suitable changes for the second edition.

The guiding principle of his life was 'अतोऽन्यदार्तम्' a phrase in the अन्तर्यामि-ब्राह्मण of बृहदारण्यक उपनिषद्, meaning 'Everything else except God is painful.' He was born tired with the world, for which he had a deep-rooted disgust, and he had realised from very early age that real आनन्द was in आनन्दमय भगवान् only. There was therefore a touch of cynicism in his words, which were mildly sarcastic even when talking with men most highly placed in life, and a sort of non-attachment in all his worldly deeds. But his spirit was always young, buoyant and playful, and one enjoyed innocent, slightly mischievous joy in his company.

He had a very noble heart. Many Brahmins and friends came to him for recommendation-letters or support, and he did whatever he could for them. We were sometimes even puzzled to see how he could help one who had done him wrong or abused him. The whole of the Nirnaya Sagar Press, the Proprietor, Manager, Shastri, and Compositors, all loved him, and they feel a void in their daily life without his cheerful presence. The compositors would whisper in your ears how he had helped them, and allowed their pro-notes to be time-barred. We admired the nobility of his heart when we saw him working very hard for the success of a प्रस्ताव at the house of a very valued friend of his, whose conduct towards him was by God's will inexplicably strict, at another time hurrying to do him a good turn at considerable sacrifice, and a third time moving heaven and earth to carry out a special desire of his, forgetting considerable pecuniary loss that he had to suffer. It was due to this nobility that he freely acknowledged whatever help he received in his work by way of money, manuscripts or cooperation.

This leads us to note another important trait of his, which was complete आश्रय, *viz.*, willing dependence on the will and wisdom of the Lord, at all times, however critical and in all matters, however important. His mind was therefore always at ease, and he was never oppressed with burden or weight on his head for anything whatever. "भगवदिच्छा सर्वत्र मूलम्, न बुद्ध्यादिदोषाः शङ्कनीयाः।" सु. ११. १. १८. This was ingrained in him, and hence under most trying circumstances, he was most light-hearted.

This आश्रय resulted in other important traits, *viz.*, अभय, स्वमान and निःस्वार्थ, fearlessness, self-respect and self-sacrifice. Though he had nothing, he seemed to posses everything, he could talk straight to a king on equal footing, and while engaged in सम्प्रदायसाहित्यसेवा, in his small room, he acted like a happy king, surrounded by co-working companions, all merry-making, sometimes sitting two on broken chairs, or comfortably couched on the broad handles of a broken easy-chair. The chairs were sometimes discarded and heaped out of the room near the door, for making room for men. His children cried and ran to him to escape the wrath of the mother, and insisted on sitting on his table, full of old manuscripts, or in his lap, while he was deciphering some knotty passage in an old manuscript. The mother of the children perhaps silently cursed the man for his neglect of the house and its inmates, and even expressed her disapprobation in sharp significant words. This was all well as it was, because it was God's will, which is always best, and the work of comparing and correcting manuscripts, sometimes five, sometimes ten at a time, went on till midnight with the help of a jewel-lamp in the middle. गोस्वामी श्रीव्रजरत्नलालजी of Surat, as well as most prominent personages and वैष्णवs from Kathiawad, Sind, Culcutta, Nainital, Madras saw him in this room. The difference between the small room and the great man, who was doing the abstruse work of deciphering and publishing old manuscripts was patent to all.

This आश्रय and धैर्य resulting from it kept him always collected, though there may be the greatest cause for losing one's temper. If there was a caste-dinner at his place, and there is none to work and no invitations are sent, he is calm; if there is a procession, and no tom-toms are available, he is calm; if people did not pay the money due to him, it was God's will; if members of the family are laid up with illness, if he is unjustly attacked in news-papers, he is not the least disturbed. He goes on quietly with his self-imposed work, with a concentration of mind and with a non-attachment to surroundings (असंग) simply marvellous. This concentration continued even in sleep, and then naturally he got dreams. His little room was filled with hallowed light (so he said and we fully believe him), and he saw, (at any rate he believed he saw) at one time श्रीपुरुषोत्तमजी and at other times other great persons or भक्तs. When he woke next morning after such a dream, there was a joyous smile on his face which was unmistakable, and the writer can never forget the innocent smile on his face on the morning of the last day of his life on this Earth, the 26th June, which clearly showed that he had some दर्शन in dream.

His sudden death was a great loss to the सम्प्रदाय, and the hearts of almost all बैष्णवs were moved by this great loss. Two telegrams were received from गोस्वामी श्रीगोवर्धनलालजी तिलकायित, one to take care of his wife and children, and the other to hold a meeting in which he promised to send his representative. A similar telegram was received from लालबावा श्रीदामोदरलालजी to the same effect, and many others followed in quick succession. A meeting was immediately held in Bada Mandir, Bombay, and गोस्वामी श्रीगोकुलनाथजी announced Rs. 500 as his subscription to the fund for a memorial to be raised after him. Mr. Ranchhoddas Patwari also paid Rs. 251. Meetings were also held at Ahmedabad, Dabhoi, Sankheda, Mangrol and a dozen other places, and a grand meeting was held in Bombay on 24th July 1927 in Mulji Jetha Market Hall under the presidentship of the Hon'able Mr. Justice Krishnalal Mohanlal Jhaveri. Goswami S'rī Gokulnāthji moved the first resolution as under:—

"વેદાન્તના સુપ્રસિદ્ધ ગુજરાતી વિદ્વાન્ અને પુષ્ટિમાર્ગીય વૈષ્ણવ સંપ્રદાયના સાહિત્યપ્રકાશક સદ્ગત વૈષ્ણવ મૂલચન્દ્ર તુલસીદાસ તેલીવાલા બી. એ., એલએલ. બી., એમ. આર. એ. એસ. વકીલ, હાઇકોર્ટના, જેઠ વદ ૧૨ ને રવિવાર તા. ૨૬ મી જુન ૧૯૨૭ ની રાત્રિએ થયલા અકાલ અવસાન બદ્દલ મુંબઈના આચાર્યોની, વૈષ્ણવોની અને સદ્ગતના મિત્રોની તેમજ વખાણનારાઓની આ સભા પોતાનો અત્યંત ખેદ પ્રદર્શિત કરે છે, અને તેમના અવસાનથી સમસ્ત ગુજરાતને, અને વિશેષતઃ પુષ્ટિસમ્પ્રદાયને ગયલી મોટી ખોટની દિલગીરી સાથે નોંધ લેછે, અને સદ્ગતના કુટુંબ ઉપર આવી પડેલી આ અણધારી આપત્તિમાં તેમના પ્રતિ પોતાની દિલસોજી દર્શાવે છે."

This resolution was seconded in suitable language by Goswāmi S'rī Ranchhodlālji, son of S'rī Jivanlālji of Porebunder, and supported by Mr. Hanumanprasad M. A., the representative specially sent to Bombay from S'rī Nathadwar by S'rī Govardhanlalji Tilakayit Maharaja and his son S'rī Damodarlalji. He read in the meeting the letter of condolence sent by His Holiness S'rī Govardhanlalji and gave Rs. 1001 for a suitable memorial to be raised after him as proposed by the following second resolution moved by Sheth Lalji Naranji and seconded by Rao Saheb Harjiwan Valji:—

સદ્ગત રા. મૂલચન્દ્ર તુલસીદાસ તેલીવાલાએ અતિશય પરિશ્રમ સહીને પ્રાચીન દુષ્પ્રાપ્ય સામ્પ્રદાયિક સંસ્કૃત સાહિત્યને સર્વાંગ સુંદર પ્રકારે પ્રસિદ્ધ કરીને આપણને જે ઋણમાં મુક્યાં છે, તે ઋણમાંથી કાંઇક અંશે મુક્ત થવાને તેમનું યોગ્ય સ્મારક ઉભું કરવાને તથા તેમના કુટુંબના શિક્ષણાદિ સર્વ પ્રકારક સંરક્ષણનો પ્રબંધ કરવાને તેમને આ બંને બાબતની સર્વ વ્યવસ્થા કુલ સત્તાસાથે કરવાને નીચેના સભ્યોની પોતાની સંખ્યામાં વધારો કરવાની સત્તાસાથે કમિટિ નીમવાનો આ સભા ઠરાવ કરે છે.

The third resolution was moved by Mr. Keshavji Ramji Lakshmidas and supported by Mr. Sundarlal Manilal Vakilna to send a copy of the first resolution to his family.

Decent sums were announced as subscribed for the memorial and a representative committee appointed to collect funds.

After his death his work has been continued by us, his co-workers, inspired by his noble example. Having worked with him for a number of years, we know the difficulties in the way, as well as the means to overcome them. Sheth Lalji Naranji asked us to go on with the work, and we continued it from the place where he had left it. He had given orders to print four forms of this Volume before his death, and we have begun from the fifth form. This volume would have been published long ago, but for the delay of the press. The present volume completes the third Adhyaya of Anu Bhashya, the Sādhanādhyāya, and the reader will immediately perceive the wide difference in the subjects for discussion taken up by श्रीवल्लभाचार्य, differing from all the previous Acharyas. The work of the fourth Adhyāya has been already taken in hand. Professor Maganlal Ganpatram Shastri M. A., helps us very cheerfully whenever approached and Shastri Kalyanji Kanji has offered his help in all matters, and we have gladly accepted the same. All the other Shastris and Pandits of the सम्प्रदाय have expressed their desire to help us in any way they can, and by the grace of God, we hope to proceed with the work without any serious trouble.

With feelings of joy, we offer this fruit of our labour of love at the Lotus Feet of Lord S'rī Krishṇa.

Dhirajlal Varajdas Sankalia.
Jamnadas Kanji Morparia.
Govardhandas Pragji.
Hiralal Moolji.
Purshottam Kanji Morparia.

2032

श्रीकृष्णाय नमः ।
श्रीगोपीजनवल्लभाय नमः ।
श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

तृतीयोऽध्यायः ।

चतुर्थः पादः ।

पुरुषार्थोऽतःशब्दादिति बादरायणः ॥ १ ॥ (३-४-१.)

उपासनाभेदेऽप्युपास्याभेदाच्छाखान्तरोक्तधर्माणामप्युपसंहारः कर्तुमुचित इति पूर्वपादे निरूपितमिति तन्न्यायेनोत्तरकाण्डप्रतिपाद्यब्रह्मफलकसर्वात्मभावेपि पूर्वकाण्डप्रतिपादितकर्मणामुपसंहारः प्राप्नोति न वेत्यधुना विचार्यते । विधि-

---

भाष्यप्रकाशः

पुरुषार्थोतःशब्दादिति बादरायणः ॥ १ ॥ अथ तुरीयपादं विवरिषवः सङ्गतिबोधनाय पूर्वपादार्थमनुवदन्त एतत्पादार्थमाहुः उपासनेत्यादि । 'फलमत उपपत्ते'रित्यत्र हेतुव्यपदेशेन जैमिनिमतनिरासपूर्वकं परमेश्वरस्यैव कारयितृत्वं फलदातृत्वं च समर्थयित्वा, ततोऽनन्तरूपस्य भगवतस्तत्तत्फलदानाय साक्षात्कारो यथा भवति, तदर्थं तत्तदुपासनमुक्तम् । तेन तत्तदुपास्यरूपसाक्षात्काररूपविद्यासिद्धौ परमेश्वरात् फलं भवतीति सिद्धम् । तथा उपासनाः कथं कर्तव्या इत्यपेक्षायां तं तं मार्गं स्वस्वाधिकारं तत्तद्भगवद्रूपं वानुरुध्य ते ते तत्तत्स्वरूपगुणास्तत्तदुपासनास्वरूपनिर्वाहकत्वादन्तरङ्गा इत्यन्तरङ्गविचारेण तत्तद्गुणानां बुद्धौ विषयीकरणरूपो गुणोपसंहार उक्तः । तत्र 'उपसंहारोऽर्थाभेदा'दिति सूत्रेऽर्थपदस्य वस्तुवाचकतामादाय उपासनाभेदेऽप्युपास्यवस्त्वभेदाद्यथा शाखान्तरोक्तधर्माणामप्युपसंहारः कर्तुं युक्त इति निरूपितम्, तथा अस्मिन् पादे उपासनाया बहिरङ्गाणामाश्रमादीनां विचारे उपसंहारसूत्रीयार्थपदस्य प्रयोजनवाचकतामादाय ब्रह्मदर्शनरूपफलैक्यात् तन्न्यायेन उत्तरकाण्डोक्तब्रह्मफलकसर्वात्मभावेपि पूर्वकाण्डोक्तकर्मणामुपसंहारः । स च कर्मणां तत्तदुपासनोपकारकतया बुद्धौ विषयीकरणरूपः करणार्थं प्राप्नोति । 'यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत् ।

रश्मिः ।

पुरुषार्थोऽतःशब्दादिति बादरायणः ॥ १ ॥ प्रयोजनेति । फलवाचकतामादाय । 'दर्शनाचे'तिगतसूत्रविचारेणाहुः ब्रह्मदर्शनेति । अन्तरङ्गबहिरङ्गोपासनयोः ब्रह्मदर्शनरूपफलैक्याद्धेतोः । तन्न्यायेनेति । एकफलकसाधनयोः परस्परं गुणोपसंहारन्यायेन । 'तन्न्यायेने'ति भाष्यविवरणं ब्रह्मफलकेति । ननु भजनानन्दावाप्तिफलकः सर्वात्मभावः कथं ब्रह्मफलकः सर्वात्मभाव इति चेत् । न । अग्रे उपपादयिष्यमाणत्वात् । तेन 'ब्रह्मफलके'त्यत्र परब्रह्मेतिफलकेति बोध्यम् । कर्मणा-

---

१. भगवद्धर्मा अन्तरङ्गाणि ।

पक्षे तत्सहकृतस्यास्य फलसाधकत्वमिति सिध्यति। निषेधपक्षे तु केवलस्येति। इममेव पक्षं सिद्धान्तत्वेनाह पुरुषार्थ इत्यादिना। सिद्धान्ते ज्ञाते [1]न तत्र पूर्वपक्षसम्भव इत्यादौ तमेवाह। अतः सर्वात्मभावादेव केवलात् पुरुषार्थः सिध्यति। कुतः। शब्दात्। श्रुतेरित्यर्थः। श्रुतिस्तु 'नायमात्मा प्रवचनेने'त्युपक्रम्य, 'यमेवैष वृणुत' इत्यादिका, 'ब्रह्मविदाप्नोति पर'मित्यादिका, 'तमेवं विद्वानमृत इह भवती'ति, सनत्कुमारनारदसंवादे 'यत्र नान्यत् पश्यती'त्याद्यात्मिका छान्दोग्यश्रुतिश्च। एतदादिश्रुतिषु पूर्वोक्तरीत्या केवलस्यैव भगवद्भावस्य फलसाधकत्वं श्रूयते इति तथा। अत्र 'फलमत उपपत्ते'रित्यत्रेवोपपत्तिं हेतुत्वेनानुक्त्वा, श्रुतिपदं चानुक्त्वा, शब्दपदं यदुक्तवान्, तेन श्रुतिस्मृत्यात्मकः सर्वोपि प्रमाणशब्दो हेतुत्वेन व्यासाभिमत इति ज्ञायते। तेन[2] 'केवलेन हि भावेन गोप्यो गावः खगा मृगाः। येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा। यन्न योगेन सांख्येन दानव्रततपोऽध्वरैः। व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयात् यत्नवानपि' इत्यादिरूपा स्मृतिरपि संगृह्यते। एतेन श्रुत्यादिप्रमाणवादिनामिदमेवाभिमतम्, तद्विरुद्धवादिनामितोऽन्यदिति तेषामप्रामाणिकत्वं ज्ञाप्यते। अत एव

भाष्यप्रकाशः।

यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्। एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलं तथा। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तम'मिति गीतावाक्यात्। सहस्रसमे सत्रे हिरण्मयशकुनिरूपब्रह्मदर्शनस्य तत्र श्रावणात्। नाभ्यादीनां यज्ञेषु भगवत्प्रादुर्भावस्य श्रीभागवतेऽप्युक्तत्वाच्च। अथवा। 'यमेवैष वृणुते तेन लभ्यः' 'भक्त्या त्वनन्यया शक्य' इत्यादिषु साधनान्तरव्युदासाच्च प्राप्नोतीति सन्देहे, अधुना प्रथमाधिकरणे विचार्यते। तथाच शेषिशेषभावः सङ्गतिरित्यर्थः। ननु गुणानामिव कर्मणामुपासनास्वरूपनिर्वाहकत्वाभावेनानावश्यकत्वात् किं तद्विचारेणेत्याकाङ्क्षायां विचारफलं पादार्थं वदन्तः सूत्रमवतार्य व्याकुर्वन्ति विधीत्यादि। इममिति। निषेधपक्षम्। तथाच विद्यासामर्थ्यबोधनायायं विचार इत्यर्थः। सिद्धान्तेनाधिकरणोपक्रमस्य तात्पर्यमाहुः सिद्धान्त इत्यादि। 'पूर्वं तु बादरायणो हेतुव्यपदेशा'दित्यत्र सिद्धान्तिनः सूक्ष्मदर्शित्वस्यावधारितत्वात्तथेत्येतदर्थं तमेवाहेत्यर्थः। शब्दशब्दप्रयोगतात्पर्यमाहुः अत्रेत्यादि। संग्रहेण यत् सिद्धं तदाहुः एतेनेत्यादि। अभिमतमिति। तात्पर्यगोचरम्। तद्विरुद्धवादिनामिति। तत्तात्पर्यविरुद्धवादिनाम्। अप्रामाणिकत्वमिति। प्रमाणतात्पर्यानभिज्ञत्वम्। बादरायणपदोक्तितात्पर्यमाहुः

रश्मिः।

मिति। सहस्रसमादीनाम्। कर्मस्वरूपं फलैक्यार्थं फलं वाहुः सहस्रसम इति। श्रीभागवत इति। पञ्चमस्कन्धे। शेषीति। पूर्वोत्तरपादयोर्भगवद्धर्मबहिरङ्गधर्मप्रतिपादकयोः तथा। शेषिणो भगवद्धर्माः शेषाः बहिरङ्गा वर्णाश्रमधर्माः। इयं प्रसङ्गसङ्गत्यन्तर्गता। पादार्थमिति। बहिरङ्गवर्णाश्रमधर्मरूपम्। सूत्रमवेति। सूत्राभासमवतार्य सूत्रं व्याकुर्वन्तीत्यर्थः। विधीत्यादीति। कर्मणामुपसंहारः प्राप्नोतीति विधिपक्षः। कर्मसहकृतस्यास्य सर्वात्मभावस्य। केवलस्येति। सर्वात्मभावस्य। केवलस्येति पक्षप्रयोजनमाहुः तथा चेति। विद्या सर्वात्मभावः तस्याः सामर्थ्यं असहायशूरत्वं तस्य बोधनायायं नैषेधपाक्षिको विचार इति प्रयोजनमित्यर्थः। पूर्वं त्विति। द्वितीयपादसमाप्तौ वर्तते

---

[1] नेति क्षसम्। [2] येन।

स्वनाम गृहीतम्। स्वस्य वेदव्यासकर्तृत्वेन तत्रैव यतो भरः।

अपरं च, वैदिकसिद्धान्ते भगवत्स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वात् प्राप्ततत्स्वरूपाणां मुक्त्यनिच्छाकथनान्मुक्तोपसृप्यव्यपदेशाच्च मुक्तेरपरमपुरुषार्थत्वात् सा भवतु नामान्यैः साधनैः। वस्तुतः परमपुरुषार्थो य उक्तरूपः, स तु सर्वात्म-

---

भाष्यकाशः।

अत एवेत्यादि। तत्रैवेति। प्रमाणभूते शब्दे। पुरुषार्थपदतात्पर्यमाहुः अपरं चेत्यादि। अन्यैः साधनैरिति। मर्यादामार्गीयैः कर्मज्ञानविहितभक्तिरूपैः साधनैः। एतेन भास्कराचार्याद्यङ्गीकृतो ज्ञानकर्मसमुच्चयः पूर्वकक्षाविश्रान्त इति बोधितम्।

पुरुषार्थपदेन सूचितमर्थान्तरमाहुः एवं सतीत्यादि। अस्यां श्रुतौ 'तमसः परस्ता'दित्य-

रश्मिः।

स्म। तमेवेति। सिद्धान्तमेव। पुरुषार्थपदेति। उपलक्षणमेतत्। उक्तश्रुत्यादिषु सर्वात्मभावप्रतिपादनस्य। तदाहुरित्यन्वयः। वैदिकेति। गौणमुख्यन्यायेन मुख्ये सर्वात्मभावतत्फलविषये सिद्धान्ते। भगवत्स्वरूपस्यैवेति। सर्वात्मभावलभ्यस्य, एवकारो भगवत्प्राप्तिरूपस्यापि फलस्य व्यवच्छेदकः। प्रेमलभ्यत्वभगवत्प्राप्तेः। सायुज्यालौकिकसामर्थ्यं भगवत्सेवोपयोगिदेहो वैकुण्ठादयः तनुवित्तजसेवाफले। प्राप्तेति। व्रजभक्ताम्बरीषप्रभृतीनाम्। मुक्तीति। 'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थिति'रितिवाक्यात् स्वरूपस्थितिः। तदनिच्छाकथनं 'अनिच्छतोपि गतिमण्वीं प्रयुक्त' इति वाक्ये। ननु सर्वात्मभावोपि मुक्तिः, चतुर्विधपुरुषार्थेषु मोक्षेऽन्तर्भावात्, अत आहुः मुक्तोपेति। ननु विशेषमुक्तिः स इति चेत्, न। 'मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इति वाक्यात्। अत्रापि तथेति चेत्, 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोग'मिति वाक्यादित्यस्तु। पुरुषार्थेति। धर्मार्थकाममोक्षवाचकं पदम्। तेन चतुर्भुजरूपं धर्मकाममोक्षार्थरूपं पञ्चाध्याय्युक्तं सर्वात्मभावफलम्। एवं च ननु 'यमेवैषे'ति श्रुतौ वरणं न दानमिति कथं सर्वात्मभावः, 'ब्रह्मविदाप्नोती'त्यत्र भक्तिर्मूले निवेशिता। 'तमेवे'त्यत्र 'विद्वा'निति ज्ञानम्। आदिपदोक्त 'तरति शोकमात्मवित्', 'ब्रह्म वेद ब्रह्मैव भवति', 'ब्रह्मैव सन् ब्रह्माप्येती'त्यत्र ज्ञानमुक्तमिति चेत्। न। 'यत्र नान्यत् पश्यती'त्याद्युक्तसर्वात्मभावे मुख्यभक्तिपदप्रयोगः। वरणलभ्यत्वं तु नोपपद्यते, वरणस्य त्रिषु मार्गेष्वनन्तर्भावात्। अत एव क्वचित् सर्वात्मभावे प्रवेशेन वरणजसर्वात्मभाव इति प्रकाशः। अङ्गग्रन्थे 'वृङ् संभक्तौ' इत्यत्र सम्यक् भजनं भक्तस्य दानम् संभक्तिः सर्वात्मभावो मुख्यभक्तिरपि वरणम्। 'तमेव'मित्यत्र सर्वात्मभावचरमवृत्तिरूपं ज्ञानम्। एवं 'तरति शोक'मिति श्रुतिर्नारदसनत्कुमारसंवादस्था सर्वात्मभावविषयिणी। अतो वित् ज्ञानं सर्वात्मभावचरमवृत्तिरूपम्। ब्रह्मज्ञानादिकमपि तद्रूपमिति सर्वं सुस्थम्। अत उक्तं 'केवलस्यैव भगवद्भावस्य फलसाधकत्व'मिति भाष्ये। एतेनेति। स तु सर्वात्मभावेनैवेति कर्मव्यवच्छेदकैवकारग्रथितग्रन्थेन। शङ्कराचार्यमते तु भाट्टमतं नास्तिकादिनिराकरणार्थमात्मास्तिता, परन्तु व्यवहाराभावात् चित्तशुद्ध्यर्थं कर्म, न समुच्चय इति भास्कराचार्यादीत्युक्तम्। पूर्वकक्षेति। अधिकारकक्षाविश्रान्तः। ननु सर्वात्मभावो ज्ञानम्, 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति वाक्याग्रे 'एतज्ज्ञान'मिति गीताया इति पूर्वकक्षाविश्रान्तः सर्वात्मभाव इति चेत्। न। गीतायामव्यभिचारिण्या भक्तेर्मर्यादामार्गीयत्वात्। पुष्टिमार्गे सदानन्देपि चित्त्वाभावमादाय तद्विषयकसर्वात्मभावस्य व्यभिचारिभक्तित्वाङ्गीकारात्। एवं

भावेनैवेति ज्ञापनाय फलपदमनुक्त्वा पुरुषार्थपदमुक्तम्। एवं सत्यस्य सूत्रस्यार्थान्तरमपि व्यासाभिमतमिति ज्ञायते। तथा सत्ययं श्लिष्टः प्रयोगः। तथाहि। पुरुषार्थो भगवानेव। कुतः। अतःशब्दात्। अतःपदविशिष्टश्रुतिवाक्यादित्यर्थः। तैत्तिरीयोपनिषत्सु पठ्यते ‘अतः परं नान्यदणीयस५ हि परात् परं यन्महतो महान्तम्, यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता’दिति ॥ १ ॥

अथात्र प्रत्यवतिष्ठते।

शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥

विष्णोरिज्यत्वेन कर्मशेषत्वात् तत्स्वरूपज्ञानपूर्वको यागः फलातिशयहेतुरिति तन्माहात्म्यमुच्यत इत्यर्थवादरूपं तत्। अत्र दृष्टान्तमाह यथान्येष्विति।

भाष्यप्रकाशः।

नेनानुपाधित्वबोधनात् स्वतो विरुद्धधर्माधारत्वं बोध्यते। ‘परात् पर’मित्यनेनाक्षरादुत्तमत्वम्। तथाचाक्षरात् परो यः, स एव परमपुरुषार्थ इति सिध्यति। एवं व्याख्यानद्वयेन केवलविद्याया एव पुरुषार्थपर्यवसायित्वम्, पुरुषोत्तमस्यैव च परमपुरुषार्थत्वं बोधितम् ॥ १ ॥

शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥ सूत्रमवतारयन्ति अथेत्यादि। सिद्धान्तसूत्रे सर्वात्मभावस्य स्वतन्त्रतया पुरुषार्थपर्यवसायित्वे परब्रह्मण एव च परमपुरुषार्थत्वे दर्शितेपि हेतुव्यपदेशविषयश्रुतौ फलदित्सया कारयितृत्वस्योक्तत्वात् क्रिययैव फलम्, छान्दोग्ये कर्माङ्गोपासनानामेव पूर्वमुपक्रान्तत्वादन्यासामपि कर्मशेषत्वेन फलवत्त्वम्, ईश्वरस्य च तच्छेषतयैव फलदत्वमित्याशयेन पूर्वमीमांसक उक्तेर्थे प्रतिकूलतयावस्थितो भवतीत्यर्थः। सूत्रं व्याकुर्वन्ति विष्णोरित्यादि।

अयमर्थः। पूर्वपादे कर्माङ्गोपासनानां निर्णये तु न पूर्वकाण्डविरोधः। यत्पुनरात्मज्ञानादेः सर्वात्मभावस्य च स्वातन्त्र्येण पुरुषार्थपर्यवसायित्वं परब्रह्मणः परमपुरुषार्थत्वं चेत्युक्तम्।

रश्मिः।

सतीत्यादीति। फलपदमनुक्त्वा पुरुषार्थपदे दत्ते सति। अयमिति। पुरुषार्थ इत्ययम्। भगवानिति। जिज्ञासासूत्राद्ब्रह्मेत्यनुवर्तत इति भावः। एवकारस्तु ‘शिष्टेश्चे’ति सूत्रान्मण्डूकप्लुत्या चकारमनुवर्त्यावधारणार्थे प्रयुक्तः। अनुपाधीति। तमो माया उपाधिः। तदुक्तं ब्रह्मविद्योपनिषदि ‘ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमाम्। यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरा’दिति। तम उपाधिर्महेश्वरत्वे ॥ १ ॥

शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥ हेतुव्यपदेशेति। द्वितीयपादसमाप्तिस्थस्य ‘पूर्वं तु बादरायणो हेतुव्यपदेशा’दिति सूत्रस्य शेषः। विषयश्रुतिस्तु ‘एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति यमधो निनीषत’ इति। परस्मैपद्यपि। न पूर्वेति। चित्तशोधकत्वेन ज्ञानोपयोगवत् वेदान्तोपासनाभिश्चित्तशोधे कर्मोपयोगात् दृढत्वम्। ‘इत्याह नास्तिक्यनिराकरिष्णु’रिति वाक्यात्। न पूर्वकाण्डविरोधः। आत्मज्ञानादेरिति। ‘तरति शोकमात्मवि’दिति सर्वात्मभावप्राकरणिकश्रुत्युक्तमात्मज्ञानम्। चरम-

अन्येषु द्रव्यसंस्कारकर्मसु । 'यस्य पर्णमयी [1]जुहूर्भवति, न स पापꣳश्लोकꣳशृणोति,' '[2]यदङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते, यत्प्रयाजानुयाजा इज्यन्ते, वर्म वा एतत यज्ञस्य क्रियते, वर्म यजमानस्य भ्रातृव्याभिभूत्या' इत्येवंजातीयका फलश्रुतिरर्थवादस्तद्वदित्यर्थः ॥ २ ॥

ननु 'तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति,' एतदग्रे च 'ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ती'ति श्रुतिर्भगवज्ज्ञानवतः सर्वत्यागं वदतीति न त्वदुक्तं साधीय इत्यत उत्तरं पठति ।

आचारदर्शनात् ॥ ३ ॥

ब्रह्मविदामपि वसिष्ठादीनामग्निहोत्रादिकरणं जैमिनिः [3]पश्यतीति तदाचारं

भाष्यप्रकाशः ।

तन्न युक्तम् । कुतः । शेषत्वात् । शेषलक्षणे 'पुरुषः कर्मार्थत्वा'दिति पुरुषस्य कर्मार्थत्वमुक्तम् । तत्र चोदनाविचारे कर्तृतया सिध्यतीत्यात्मज्ञापकानि वाक्यानि कर्तृस्वरूपबोधकानि । एवं ब्रह्मवाक्यानि ब्रह्मणोऽनन्तरूपैरिज्यत्वात् 'यो देवानां नामधा एक एवे'त्यादिमन्त्रवर्णेन तन्नामकत्वाच्च कर्मशेषत्वम्, तस्मात् । 'तत्स्वरूपज्ञाने'त्यादिवक्ष्यमाणभाष्योक्तरीत्या तत्तादृशम्, अतस्तत्र पुरुषार्थत्ववाद इत्यर्थः । विष्णोरिज्यत्वं ब्रह्मत्वं च शतदूषणीकारोपन्यस्तात् सङ्कर्षणकाण्डसमाप्तिस्यात् 'स विष्णुराह हि' 'तत् ब्रह्मेत्याचक्षते' इति सूत्रद्वयात् सिध्यतीति मुख्यतया तस्यैव शेषत्वमत्र व्याख्यातम् । अन्येषां च शेषत्वात् तत्फलस्यार्थवादत्वं जैमिनिना चतुर्थस्य तृतीयपादे उक्तं 'द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्या'दिति । तदुदाहरणं च 'यस्य पर्णमयी'त्यादिनोक्तम् ॥ २ ॥

रश्मिः ।

वृत्तिरूपमादिपदार्थः । शेषेति । पूर्वमीमांसातृतीयाध्यायारम्भसूत्रं 'अथातः शेषलक्षणम्' । तस्मिन् प्रपञ्चनीये । 'पुरुषः कर्मार्थत्वा'दिति सूत्रम् । 'चोदना पुनरारम्भ' इत्यत्र भावार्थपादे चोदनाविचारस्तस्मिन् । नामधा इति । नाम दधातीति नामधाः विश्वपावत् । कर्मशेषत्वमिति । 'इन्द्राय स्वाहे'त्यत्र सम्प्रदानत्वेन कर्मशेषत्वं यथा । तस्मादिति । 'विष्णोरिज्यत्वेन कर्मशेषत्वा'दिति भाष्यं विवृतम् । तत्तादृशमिति । माहात्म्यं तादृशम् । पुरुषस्य विराजः प्रजापतेरर्थवादरूपम् । पुरुषार्थस्य पूर्वसूत्रोक्तस्य । जैमिनिमतेऽभावात् । अतस्तत्र माहात्म्ये पुरुषस्य प्रजापतेरर्थत्ववादः । शतदूषणीकारो ग्रन्थकर्ता । सङ्कर्षणेति । सङ्कर्षणकाण्डसमाप्ति यथा स्यात् तथेति क्रियाविशेषणम् । स्यादिति । स प्रसिद्ध इज्यः विष्णुः स्यात् । आह हि । कर्तृ । तस्यैवेति । विष्णोरेव । विष्णुः फलम्, तस्य शेषत्वं जैमिनिमते स्वमतरीत्या । तथा च गुरुमतेन कर्तृफलस्यार्थवादत्वमित्युक्तम् । स्वर्गादिफलमिति प्रसिद्धिः । अस्य फलस्य नार्थवादत्वमनुक्तेः, अन्येषां त्वाहुः अन्येषां चेति । द्रव्यसंस्कारकर्मणाम् । बादरिमतमिदम् । तथा च तृतीयाध्यायसूत्राणि । तृतीयाधिकरणे । 'द्रव्यगुणसंस्कारेषु बादरिः' 'कर्माण्यपि जैमिनिः फलार्थत्वात्' 'फलं च पुरुषार्थत्वात्' 'पुरुषश्च कर्मार्थत्वात्' इति । शेषाधिकाराशेषत्वं शेषाणि शेषं शेष इति चतुर्षु ज्ञेयम् । 'यस्य पर्णमयी'ति । जुहूर्द्रव्यम् । संस्कारोदाहरणम् । यदङ्क्त इति । अङ्क्ते चक्षुरङ्क्ते अञ्जयति संस्कुरुते । भ्रातृव्यस्य । भ्रातुः पुत्रस्य । 'व्यन्सपत्ने' । सपत्नस्य शत्रोश्चक्षुरेव वृङ्क्ते । ओ वृश्चू छेदने छिनत्तीत्यर्थः । कर्मोदाहरणम् । यत्प्रयाजेति । पञ्च प्रयाजाः पञ्चानुयाजाः । वर्म उपकञ्चुकम् ॥२॥

---

१. जुहुः । २. यदाङ्क्ते । ३. पश्यति । ४. समाप्ति स्यादिति रश्मिपाठश्चिन्त्यः ।

प्रामाणिकं च मनुत इति तन्मतमनुवदन्निममप्यनूक्तवान् व्यासः। ब्रह्मविदां त्यागावश्यकत्वे गार्हस्थ्यमेतेषां न स्यादिति भावः। उक्तश्रुतिस्तु कर्मण्यशक्तानां तेषां त्यागमनुवदति। 'लोकैषणायाश्च व्युत्थाये'ति श्रुतेर्लोकसंग्रहार्थं तत्करणमिति न वक्तुं शक्यम् ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

ब्रह्मविदः कर्माचारनिरूपकश्रुतेरित्यर्थः। सा च 'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेज' इत्यादिरूपा। तथाच ज्ञानेनैवार्थसिद्धिश्चेत् स्यात्, तदा तद्वत आयाससाध्ये कर्मणि प्रवृत्तिर्न स्यादिति भावः ॥ ४ ॥

समन्वारम्भणात् ॥ ५ ॥

'तं विद्याकर्मणी समन्वारभेते' इति श्रुतिः फलारम्भे विद्याकर्मणोः साहित्यं दर्शयतीति न स्वातन्त्र्यं विद्यायाम् ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

'ब्रह्मिष्ठो ब्रह्मा दर्शपूर्णमासयोस्तं वृणीत' इति कल्पश्रुत्या ब्रह्मविदो ब्रह्मत्वेन वरणं विधीयत इति ब्रह्मज्ञानस्यार्त्विज्याधिकारसम्पादकत्वात् कर्मशेषत्वमेवेत्यर्थः ॥ ६ ॥

भाष्यप्रकाशः।

आचारदर्शनात् ॥ ३ ॥ सूत्रचतुष्टयमवतारयन्ति ननु तमित्यादि। उत्तरं पठतीति। उक्ताशङ्कायां विद्यायाः पुरुषार्थत्वं वारयितुमग्रिमसूत्राणि वक्तीत्यर्थः। सूत्रं व्याकुर्वन्तः प्रथमत आचारमेव कुतो वदतीत्यत आहुः ब्रह्मविदामित्यादि। प्रामाणिकं च मनुत इति। 'यदेव विद्यये'तिश्रुत्युपोद्बलकत्वेन तथा मनुते। तर्हि 'तमेव विदित्वे'त्यादिश्रुतेः का गतिरित्यत आह उक्तेत्यादि। ननु 'प्रव्राज'श्रुतेरशक्ताधिकारकत्ववत् कर्मकरणश्रुतेर्लोकसंग्रहार्थत्वस्यापि शक्यवचनत्वान्नेदं साधीय इत्यत आह लोकेत्यादि। तथाच, आचारदर्शनान्यथानुपपत्त्या तथा कल्प्यत इत्यर्थः।

अन्ये त्वाचारदर्शनसूत्रे 'जनको ह वा' इति श्रुतिम्, द्वितीये च 'यदेव विद्यये'त्युदाहरन्ति। तच्चिन्त्यम्। द्वितीयसूत्रवैयर्थ्यापत्तेः ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥ समन्वारम्भणात् ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥ एतद्भाष्यं सुगमम् ॥ ६ ॥

रश्मिः।

आचारदर्शनात् ॥ ३ ॥ अग्रिमेति। चत्वारि। यदेवेति। आचारस्येति बोध्यम्। भाष्ये। तन्मतमिति। जैमिनिमतम्। व्यासः स्वमतमनुवदन् इमं जैमिन्याद्याचारमप्यनूक्तवान्। एतेषामिति। जैमिनिजनकप्रभृतीनाम्। द्वितीयेति। तदर्थस्याचारे निवेशादिति भावः ॥ ३ ॥

तच्छ्रुतेः। समन्वारम्भणात्। तद्वतो विधानात् ॥ ४ ॥ ५ ॥ ६ ॥ सुगममिति। जनको ह वा इति। ब्रह्मवित्त्वं याज्ञवल्क्यादिति बृहदारण्यके। फलारम्भ इति। तमित्यनेन देहत्वावच्छिन्नोपादानम्। न स्वातन्त्र्यमिति। किन्तु कर्मसाहित्यम्। कल्पश्रुत्येति। अङ्गकल्पश्रुत्या। अन्यथा वा। एवं सुगमम् ॥ ६ ॥

---

१. तदाचारं च प्रामाणिकं मनुत इति, तदाचारं प्रामाणिकमिति च मनुत इति पाठौ।

ननु 'यदहरेव विरजेत्, तदहरेव प्रव्रजेत्, गृहाद्वा प्रव्रजेद्वनाद्वे'त्यादिश्रुतिभ्यो विहितत्वाविशेषात् कर्मतत्त्यागयोरैच्छिको विकल्पोऽङ्गीकार्यः, अतो न शेषिशेषभाव इत्यत उत्तरं पठति।

नियमाच्च ॥ ७ ॥

'आश्विनं धूम्रललाममालभेत, यो दुर्ब्राह्मणः सोमं पिपासेत्', 'ऐन्द्राग्नं पुनरुत्सृष्टमालभेत, य आतृतीयात् पुरुषात् सोमं न पिबेत्, विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्नातृतीयात् पुरुषात् सोमं न पिबति, 'यावज्जीवमग्निहोत्रं जुहुया'दित्यादिश्रुतिभ्यो यथा कर्मकरणे नियमः श्रूयते, न तथा तत्त्याग इति नोक्तपक्षः साधुरित्यर्थः। चकारात् 'नियतस्य तु संन्यासः कर्मणो नोपपद्यते। मोहात् तस्य परित्यागस्तामसः परिकीर्तित' इत्यादिरूपा स्मृतिः समुच्चीयते। त्यागविधिरशक्तविषय इत्युक्तमिति प्राप्ते ॥ ७ ॥

प्रतिवदति।

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुशब्दः पूर्वपक्षं व्यवच्छिनत्ति। यदुक्तं 'शेषत्वात् पुरुषार्थवाद' इति,

---

भाष्यप्रकाशः।

नियमाच्च ॥ ७ ॥ सूत्रमवतारयन्ति नन्वित्यादि। व्याकुर्वन्ति आश्विनमित्यादि। अत्र 'दुर्ब्राह्मण' इति 'विच्छिन्न' इति पदाभ्यामकरणे निन्दा बोध्यते, तेन च नियमेन नित्यत्वं कर्मणो व्यक्तीभवति, तथाग्रे यावज्जीवाधिकारेण। सूत्रपञ्चकोक्तं निगमयन्ति त्यागेत्यादि। इति प्राप्ते इति। एवंप्रकारेण ब्रह्मणस्तद्विद्यायाः कैमुतिकेन जीवविद्यायाश्च कर्मशेषत्वे प्राप्ते।

अन्ये तु 'तच्छ्रुते'रित्यत्र विद्यायाः कर्मशेषत्वाय 'यदेव विद्यये'ति श्रुतिमुदाहरन्ति, 'तद्वतो विधाना'दित्यत्र 'आचार्यकुलाद्वेदमधीत्ये'ति छान्दोग्यसमाप्तिस्थश्रुत्या वेदार्थज्ञानवतः कर्माधिकारं व्याकुर्वन्ति, 'नियमा'च्चेत्यत्र 'कुर्वन्नेव हि कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नर' इतीशावास्यश्रुतिं जरामर्यसत्रश्रुतिं चोदाहरन्ति।

तन्मते विद्यायाः कर्मशेषत्वमिति पूर्वपक्षः ॥ ७ ॥

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥ परिहारं व्याकुर्वन्ति तुशब्द इत्यादि। पूर्वपक्षमिति। ईश्वर इज्यत्वात् कर्मशेष इति पक्षम्। कर्मसाम्यमिति।

रश्मिः।

नियमाच्च ॥ ७ ॥ आश्विनमित्यादीति। इन्द्राग्नी देवतेस्य। सास्य देवतेत्यण्। सोमस्य पीथः पानं सोमपीथः। सोमस्य पीथः पानं यस्य मूर्ध्नः स सोमपीथो मूर्धा। कैमुतिकेनेति। ब्रह्मणस्तद्विद्यायाः कर्मशेषत्वे, किं वाच्यं जीवविद्यायाः कर्मशेषत्व इति न्यायप्राप्तम्। एवमिति। एवं त्वयि न, अन्यथा इतः अस्ति। न, कर्म, लिप्यते नरे इति छेदः। लिप उपदेहे। तु–उ–अनिट् मुचादित्वात् नुम्। लिम्पति। लिप्यत इति कर्मकर्तरिप्रयोगः। विद्याया इति। न ब्रह्मणः ॥ ७ ॥

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥ कर्मणो ब्रह्मसाम्यमिति। ननु सामर्थ्याभावात् कथं कर्मसाम्ययोः समास इति चेत्, न। साम्यपदस्य ब्रह्मसाम्ये लाक्षणिकत्वात्।

तन्नोपपद्यते। कुतः। अधिकोपदेशात्। कर्मसाम्यमपि न वक्तुं शक्यं यत्र, तत्र तच्छेषत्वं दूरापास्तम्। यत ईश्वरः कर्मणः सकाशादधिक उपदिश्यते। तथाहि। 'स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च, स न साधुना कर्मणा भूयान्नो एवासाधुना कनीया'नित्युपक्रम्य, अग्रे पठ्यते 'तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्ती'त्यादि। एवं सति यज्ज्ञानसाधनत्वं यज्ञे, तस्य यज्ञशेषत्वं कथं स्यात्, किन्तु यज्ञस्य तद्वेदनशेषत्वम्। एतेनेज्यत्वेन तच्छेषत्वं प्रत्युक्तं वेदितव्यम्। तज्ज्ञानस्य यागपूर्वाङ्गत्वात् तद्विशिष्टस्य तस्य ब्रह्मज्ञानसाधनत्वात्। नच पूर्वं सामान्यत इज्यज्ञानमासीत्, यज्ञेन विशेषतो ज्ञाने सति पुनर्यज्ञकरणे पूर्णं कर्मफलं भवतीति न तदशेषत्वमिति वाच्यम्। 'तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सतः प्रव्रजन्ती'ति श्रुतेस्तद्वेदनस्य गार्हस्थ्यविरोधित्वेन तदसम्भवात्।

भाष्यप्रकाशः।

कर्मणो ब्रह्मसाम्यम्। 'स वा अयम्' इति श्रुतिस्तु बृहदारण्यके शारीरब्राह्मणे। एवं सतीत्यादि। उक्तश्रुतौ 'वेदानुवचनेने'त्यादिभिस्तृतीयाश्रुतिभिर्भगवज्ज्ञानशेषत्वे कर्मणामुक्ते सति। तस्येति। यज्ञशेषिणोपि शेषिभूतस्य। अधिकोपदेशेन हेतुना यत् सिद्धं तदाहुः एतेनेत्यादि। उक्तहेतुना तत्प्रत्युक्तमित्यर्थः। तत् व्युत्पादयन्ति तज्ज्ञानस्येत्यादि। इज्यत्वेन ज्ञानस्य यागपूर्वाङ्गत्वात् पूर्वं सत्त्वेपि तादृशज्ञानपूर्वकं यागकरणे तादृशज्ञानविशिष्टस्य यागस्य ब्रह्मज्ञानसाधनत्वात् तत्फलस्य ज्ञानस्य यः शेषी तस्यैकदेशज्ञानशेषत्वापादने यस्य ज्ञानं यागपूर्वाङ्गं स यागशेष इति नियमो हेतुत्वेन वक्तव्यः। स तु स्वर्गादौ व्यभिचरति। स्वर्गादेः फलत्वज्ञानं विना तदर्थके यागे प्रवृत्त्यभावेन तज्ज्ञानस्य यागपूर्वाङ्गत्वेपि स्वर्गादेः फलत्वेन यागशेषत्वानङ्गीकारात्। अतस्तदप्रयोजकमित्यर्थः। पुनः शेषत्वमाशङ्क्य निषेधन्ति नचेत्यादि। पूर्वं गुरुमुखादध्ययने ततस्तस्यावर्तनेन स्वाध्यायतन्त्रसम्पादने ब्रह्मण इज्यत्वेन सामान्यतो ज्ञानमासीत्, ततस्तदुद्देश्यकस्य ब्रह्मयज्ञस्य द्रव्ययज्ञस्य च करणे विशेषतो ज्ञाने सति पुनर्यज्ञकरणे 'यदेव विद्यये'ति श्रुत्या यागस्य वीर्यवत्तायां पूर्णं फलं भवतीति तात्पर्यात् 'तमेतं वेदानुवचनेने'ति श्रुत्या न ब्रह्मणो यागशेष-

रश्मिः।

यज्ञेति। यज्ञशेषि भगवज्ज्ञानं तस्य शेषी विषयो भगवान् तस्येत्यर्थः। भाष्ये। तद्वेदनशेषत्वं भगवद्वेदनशेषत्वम्। प्रकृते। उक्तहेतुनेति। आभासोक्तहेतुना तत् इज्यत्वेन कर्मशेषत्वं विष्णोः। इज्यत्वेनेति। विष्णोर्ज्ञानस्य। यागपूर्वाङ्गत्वं जानातीच्छति यतत इति प्रणाड्या। यागस्य यत्नत्वात्। फलत्वेन यागपूर्वाङ्गज्ञानम्। तत्फलस्येति। कर्मफलस्य। शेषीति। भगवान् विषयः। तस्येति। ज्ञानरूपस्य शेषिणः एकदेशज्ञानम्, 'श्रुतेस्तु शब्दमूलत्वात्' निरवयवत्वेपि तद्धर्मात्मकं ज्ञानं कर्म तेन। शेषिणः कर्मशेषत्वापादने। यदि ज्ञानविषयो न स्यात्, ज्ञानशेषो न स्यादित्येवं शेषत्वापादने। नियममाहुः यस्येति। विष्णोः। स इति। विष्णुः। तदिति। परम्पराकर्मशेषत्वम्। ब्रह्मण इज्यत्वेनेति। वराहरूपस्य विष्णोरिज्यत्वेन ज्ञानं वेदब्राह्मणात्। ब्रह्मयज्ञः श्रावण्यां प्रसिद्धः।

---

१. भावीतिपाठः।

यश्च साध्वसाधुकर्मफलसम्बन्धरहितः, तस्य कर्तृत्वेन तथात्वमनुपपन्नम्, अतो जीवात्मन एव तथात्वम्, न तु परस्य। नचैतयोर्वास्तवाभेदान्नैवमिति वाच्यम्। वास्तवाभेदाज्जीवेऽप्युक्तश्रुतिभ्यस्तथात्वस्य सुवचत्वात्। वास्तवाभेदस्य पूर्वमेव निरस्तत्वात्तमादाय ये पूर्वपक्षास्ते पूर्वपक्षा एवेत्यलमुक्त्या। 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राजते तत् यतयो विशन्ती'ति श्रुत्या कर्मप्रजाधनैर्मोक्षाप्राप्तिमुक्त्वा त्यागेन तत्प्राप्तिरुच्यते। त्यागविषयस्यान्यस्यानुक्त्या सान्निध्यात् कर्मादीनामेव त्यागोऽभिप्रेतः। तथाच मुक्तोपसृप्यत्वाद्भगवत उक्तसाधनेन मुक्ताः सन्तो नाकं परेण

भाष्यप्रकाशः।

त्वनिवृत्तिरित्येवं न वाच्यम्। 'एतमेवे'त्यादितदग्रिमश्रुतेस्तादृग्ब्रह्मज्ञानस्य गार्हस्थ्यविरोधित्वेन यज्ञासम्भवात्। तदसम्भवे तथा फलोत्पत्त्यापादनस्यापि कर्तुमशक्यत्वात् ब्रह्मणः कर्मशेषत्वं नापादयितुं शक्यमित्यर्थः। नन्वीश्वरस्य कर्तृत्वाद्विश्वसृङ्न्यायेन यज्ञकर्तृत्वे सुखेन तच्छेषत्वसम्भव इत्याशङ्क्य परिहरन्ति यश्चेत्यादि। तथात्वमिति। कर्मशेषत्वम्। एकदेशिप्रतिपन्नम्। जीवब्रह्मैक्यमादाय पुनः शेषत्वाशङ्कायां तदुपगम्य परिहरन्ति नचैतयोरित्यादि। तथात्वस्येति। ईश्वरवत् कर्मशेषित्वस्य। ननु यदि जीवेश्वरयोर्वास्तवाभेद उपगतः, तर्ह्येकतरपक्षपातस्य कर्तुमयुक्तत्वादुभयमप्यस्त्विति शङ्कायां सिद्धान्ते तदनुपगमेनाहुः वास्तवाभेदस्येत्यादि। जीवब्रह्मणोर्हि घटाकाशमहाकाशयोरिवोपाधितो भेदः, वस्तुतस्त्वभेदः। एतादृशाभेदस्य द्वितीयाध्यायतृतीयपादे 'अंशो नाने'त्यत्रांशत्वव्यवस्थापनेन निरस्तत्वात् तमादाय ये पूर्वपक्षास्ते जीवस्वरूपाज्ञानात् पूर्वपक्षा एव न भवन्तीति तथेत्यर्थः। श्रुत्यन्तरेणापि कर्मशेषत्वं परिहरन्ति न कर्मणेत्यादि। श्रुतिस्तु बृहन्नारायणे 'अणोरणीया'नित्यनुवाकस्था। अत्रानुवाकारम्भमन्त्रे

रश्मिः।

पूर्णमिति। वीर्यं शुक्रमेकादशबलं ज्योतिःशास्त्रप्रसिद्धं फलमिति शुक्रब्रह्मवादिनः। **यज्ञासंभवादिति** तदसंभवादिति भाष्यस्यार्थः। **तथा फलेति।** यदि फलज्ञानाभावे यागप्रवृत्तिर्न स्यात्, 'इज्यत्वेन ज्ञानस्ये'त्याद्युक्तरीत्या फलोत्पत्तिर्न स्यात्। प्रवृत्तिः ज्ञानसाध्या, प्रवृत्तित्वात् घटप्रवृत्तिवदित्यनुमानम्। तथा 'फलज्ञाने यागप्रवृत्तिः इज्यत्वेन ज्ञानस्ये'त्याद्युक्तरीत्या फलोत्पत्तेः। पटप्रवृत्तिवदित्यनुमानम्। एवं तथा फलोत्पत्त्यापादनस्येत्यर्थः। **विश्वसृगिति।** तच्छेषत्वेति। **कर्मशेषत्वम्।** **निरस्तत्वादिति।** ननु श्रीभागवतद्वादशस्कन्धीयप्रमाणनिरूपणाध्यायस्थत्वान्न निरासः साधीयानिति वाच्यम्। परमतत्वेन तस्य शुकेष्टगतिरूपत्वात्। 'तत्त्वं च यथा यथाश्रुतं यथामति तदहं तेऽभिधास्यामी'ति शुकवाक्ये कथनात्। अत एव 'अंशो नानाव्यपदेशा'दिति व्याससूत्रमुक्तम्। करणत्वेन तद्विषयवाक्येन सहितं पुराणमतबाधकं भवतीति। अतः पूर्वपक्षाः पूर्वपक्षाः, न तु सिद्धान्ताः अस्मन्मते, श्रौतजीवस्वरूपाज्ञानादिति पूर्वपक्षा एव न भवन्तीति वाक्यशेषः। पूर्वपक्षाः पूर्वपक्षा इति प्रयोगस्तु न भवति, उद्देश्यतावच्छेदकविधेययोरैक्यात्। अतो न भवन्तीति वाक्यशेषः। पूर्वपक्षा निरस्ता न पूर्वपक्षा इति। एवमप्यपदार्थोपदार्थ इत्युद्देश्यतावच्छेदकविधेययोरैक्यमिति चेत्। भाष्यप्रामाण्यादस्तु प्रयोगः। **तथेति।** इत्यलमुक्त्येत्यर्थः। **न कर्मणेत्यादीति।** **त्यागेन तत्प्राप्तिरिति।** अत्र नञः प्रयोगाभावादिति। **कर्मादीनामिति।** त्यागविषयाणाम्। **उक्तसाधनेनेति।**

विद्यमानमपि भक्त्या गुहायां विभ्राजते, तत्, 'यस्मात् परं नापरमस्ती'त्यादिनोपक्रान्तत्वात् पुरुषोत्तमस्वरूपं यतयो विरहभावेन तद्विना स्थातुमशक्तास्तत्प्राप्त्यर्थं यतमाना विशन्तीति भक्तिमार्गीयाणां फलमुक्तम् । अग्रे 'वेदान्तविज्ञाने'त्यृचा ज्ञानमार्गीयाणां फलमुक्तम्, अन्यथा पौनरुक्त्यं स्यात् । एवं कर्मज्ञानाभ्यामधिको भक्तिमार्गः, तत्प्राप्यः पुरुषोत्तमश्च श्रुतावुपदिश्यत इति तदेकप्रमाणवादिनो बादरायणस्य मतमप्येवं जैमिनिमतादधिकमित्यर्थः । एवं श्रुत्या परमतं निरस्य शिष्यविश्वासार्थं स्वानुभवमपि प्रमाणयति तद्दर्शनादिति । उक्ताधिक्यवत्त्वेनैव भगवतो भक्तिमार्गस्य चानुभवादित्यर्थः । 'श्रुतयोऽधिकमात्मानं दर्शयन्ती'ति न व्याख्यानम् । उपदेशपदेन पौनरुक्त्यापत्तेः । तन्मतमनिरस्य तस्मात् स्वमत आधिक्यमात्रोक्त्या निष्कामकर्मणश्चित्तशुद्धिहेतुत्वेन परम्पराज्ञानमार्गोपयोगाङ्गीकारोऽत्र[1] सूच्यते । पुष्टिभक्तिमार्गे तु सोपि न । 'यन्न योगेने'ति वाक्यात् । एवं सति क्व कर्मशेषत्वगन्धोपि ब्रह्मणीति भावः ॥ ८ ॥

भाष्यप्रकाशः ।

'महिमानमीश'मित्यनेनेशपदवाच्यस्य शिवस्य विभूतित्वकथनात्, 'यस्मात् पर'मिति मन्त्रस्य श्वेताश्वतरेपि श्रवणाच्छिवपरत्वभ्रमो मा भूदित्येतदर्थं भाष्ये पुरुषोत्तमस्वरूपपदमुक्तम् । एतस्यानुवाकस्य यथा पुरुषोत्तमपरत्वम्, तथा प्रहस्ताख्ये वादे मया सम्यगुपपादितमिति विशेषतो नोच्यते । अत्रैतन्मन्त्रद्वयोक्तयोः प्रवेशपरिमोक्षयोर्भक्तिज्ञानफलयोरनावृत्तिरूपत्वात् दुःखसाहचर्याभावेन कर्मफलादाधिक्यं बोधितमिति तौ कर्ममार्गादुत्कृष्टाविति सिद्धम् । दर्शनव्याख्याने भक्तिमार्गस्य चेति चकारो ज्ञानमार्गसमुच्चायकः । श्रुतिसूत्रशेषयोर्व्याख्यानं तूत्तानार्थम् । मतान्तरीये एतद्व्याख्याने अयुक्तत्वं बोधयन्ति श्रुतय इत्यादि । शारीरादधिकं परमात्मानं दर्शयन्तीति यत् व्याख्यानम्, तत्पौनरुक्त्यापादकत्वादयुक्तमित्यर्थः । एवं स्वोक्तं व्याख्यानं समर्थयित्वा बादरायणपदेन स्वमतबोधनस्य तात्पर्यमाहुः तन्मतमित्यादि । तन्मतमिति । जैमिनीयं मतम् । अर्थस्तु स्फुटः । एवमेतेन सूत्रेण जैमिन्युक्तस्य शेषत्वस्य हेतोर्बाधितत्वं स्फुटीकृतम् ॥८॥

रश्मिः ।

श्रुत्युक्तत्यागेन । नाकमिति । नाकस्य स्वर्गस्य परेण । ङसः सुः । भक्त्येति । राजा प्रसन्नः सन्नागच्छति, तद्वद्गुहायां भक्त्या आगच्छतीति भक्तिनिवेशः करणत्वेन । भ्राजृ दीप्तौ । यस्मात् परमिति भाष्यं विवृण्वन्ति स्म श्रुतिस्त्विति । भक्तिमार्गीयाणामिति । 'तद्यतयो विशन्ती'त्यत्र त्यागिनो विशन्तीत्यनुक्त्वा यत् यतिपदमुक्तम्, तदर्थ उक्त इति तथा । सूत्रार्थमाहुः एवं कर्मेति । 'अधिकोपदेशात्तु बादरायणस्य एव'मिति पदचतुष्टयं व्याख्येयम् । स्वानुभवमिति । व्यासः स्वस्यानुभवम् । एतदुक्तं श्रुतिसूत्रेत्यादिना । तत्पौनरिति । उक्तहेतुना तथा । स्फुट इति । तन्मतनिरासे ज्ञानोपयोगो झटिति न भासते युक्तिं विनेति तन्मतमनिरस्येत्येवं स्फुटः । बाधितत्वमिति । पुरुषार्थवादः शेषत्वात् । न पुरुषार्थवादः शेषत्वादिति बाधितत्वम् । अर्थवादत्वे शेषत्वं नोपपद्यते । स्वार्थेऽप्रामाण्येन घटोऽस्तीति वाक्यादपि चित्तशुद्धिः स्यादिति ॥ ८ ॥

---

[1] अत्रेति नास्ति ।

तुल्यं दर्शनम् ॥ ९ ॥

यदुक्तं 'आचारदर्शनात् कर्मशेषत्वं ब्रह्मण' इति, तदपि न साधीयः । तुल्यं यतो दर्शनम् । ब्रह्मविदां शुकतृतीयजन्मवदार्षभादीनां त्यागदर्शनात् । एतेन यद्विदां कर्मत्यागः, तस्य कर्मशेषत्वं कथं शङ्कितुमपि शक्यमिति भावः सूच्यते । एतेन 'कर्मण्यशक्तान्प्रति त्यागविधि'रिति निरस्तम् । शुकादीनामतथात्वात् ॥९॥

ननु 'जनको ह वैदेह' इति श्रुतिसाहाय्यादाचारदर्शनं त्यागदर्शनादधिकबलमित्यत उत्तरं पठति ।

असार्वत्रिकी ॥ १० ॥

ब्रह्मविदां सर्वेषामेतदाचारं चेन्निरूपयेच्छ्रुतिः, तदा त्वदुक्तं स्यात्, न त्वेवम् । यत एतादृशी श्रुतिर्ब्रह्मवित्सु सर्वेषु न श्रूयते । तथाहि । 'एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः । किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे । एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवाञ्चक्रिरे, एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' 'एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजे'त्यादिश्रुतयो बहुयस्तद्विदां कर्मत्यागमेवानुवदन्ति, अतस्त्यागपक्ष एव बलवान् ॥ १० ॥

भाष्यप्रकाशः ।

एवं ब्रह्मणः कर्मशेषत्वं निराकृत्य विद्यायाः कर्मशेषत्वं वारयतीत्याशयेनाहुः ।

तुल्यं दर्शनम् ॥ ९ ॥ भाष्यमत्र प्रकटार्थम् । तथाच य आचारदर्शनमिति हेतुर्विद्यायाः कर्माङ्गत्व उक्तः, सोपि साधारणत्वाद्धेत्वाभास इति बोध्यते, ब्रह्मणः कर्माङ्गत्वं च कैमुतिकान्निरस्यते, जैमिनीयकृता त्यागव्यवस्था च निरस्यत इति तत्र बोधितम् ॥ ९ ॥

असार्वत्रिकी ॥ १० ॥ सूत्रमवतारयन्ति नन्वित्यादि । सदाचारस्य तुल्यत्वेपि केवलस्य परमुखनिरीक्षकत्वेन श्रुत्युपष्टब्धस्यैव बलवत्त्वम्, अतस्तुल्यत्वं न हेतोः साधारणत्वापादकमित्याशङ्कायां श्रुतेरपि साधारण्यं बोधयितुं सूत्रान्तरं पठतीत्यर्थः । सूत्रं व्याकुर्वन्ति ब्रह्मविदामित्यादि । अत्र प्रथमा श्रुतिर्बृहदारण्यके शारीरब्राह्मणे, द्वितीया मैत्रेयीब्राह्मणे । तथाच श्रुतेरपि साधारणत्वात् तद्बहुत्वानुगृहीतस्त्यागपक्ष एव बलवान्, न तु तत्करणपक्ष इत्यर्थः ।

अन्ये तु 'यदेव विद्यये'ति श्रुतिरुद्गीथविद्यापठितेति तस्या एव कर्माङ्गतां बोधयतीति विद्यायाः कर्माङ्गता असार्वत्रिकीत्यर्थमाहुः ॥ १० ॥

रश्मिः ।

तुल्यं दर्शनम् ॥ ९ ॥ प्रकटेति । शुकेति । शुकः तृतीयजन्मवज्जडभरतः ऋषभः आचार्याः तेषाम् । त्यागेति । कर्मत्यागदर्शनात् । एवं प्रकटार्थम् । साधारणत्वादिति । कर्माङ्गत्वाभाववति विष्णौ आचारदर्शनं हेतुरिति साध्याभाववद्वृत्तित्वात् तथा । कैमुतिकादिति । ब्रह्मविद्यायाः कर्माङ्गत्वाभावे किमु वक्तव्यं ब्रह्मणः कर्माङ्गत्वाभाव इति कैमुतिकात् । एतेन एतेन यद्विदामित्यादिभाष्यविवरणं कृतम् । एतेन कर्मणीत्यादिभाष्यविवरणं जैमिनीयेति । सा च भाष्योक्ता । तत्रेति । सूत्रे तुल्यत्वोक्त्या वितण्डया बोधितम् ॥ ९ ॥

असार्वत्रिकी ॥ १० ॥ त्यागपक्ष इति । कर्मत्यागपक्षः । तत्करणपक्ष इति । कर्मकरणपक्षः । तस्या एवेति । उद्गीथविद्याया एव । एवकार इतरविद्यायोगव्यवच्छेदकः ॥ १० ॥

ननु ब्रह्मवित्त्वाविशेषेऽप्येकेषां कर्मकृतिः, एकेषां तत्त्याग इति विभागः कुत इत्याशङ्क्य तत्र हेतुमाह ।

विभागः शतवत् ॥ ११ ॥

'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेर्मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तं ये गणिता आनन्दास्ते सर्वे पुरुषोत्तमानन्दात्मका एव । एवं सति येषु यावानानन्दो दत्तोऽस्ति, तावन्तं तं निरूपयन्त्यधिकारतारतम्येन तद्दानमिति ज्ञापनाय शतोत्तरं शतोत्तरमानन्दं श्रुतिर्न्यरूपयत् । अत एव पुरुषायुःसंख्यासमानसंख्ययैवोत्कर्ष उक्तः, तेन पुरुषधर्मस्याधिकारस्यैवोत्कर्षः सूच्यते । एवं प्रकृतेऽप्यन्यभावराहित्यतारतम्येन भगवद्भावतारतम्यम्, अत्र त्वनुग्रह एवाधिकाररूप इति तदुत्कर्षे त्यागः, तदनुत्कर्षे नेत्यर्थः ॥ ११ ॥

यच्चोक्तं 'तद्वतो विधाना'दिति, तत्राह ।

अध्ययनमात्रवतः ॥ १२ ॥

यदुक्तं 'ब्रह्मिष्ठो ब्रह्मे'त्यादि, तत्र ब्रह्मशब्देन वेद एवोच्यते, न तु परः, तथाच तं ब्रह्मत्वेनाविकृतशब्दरूपत्वं ज्ञात्वा सततं तदध्ययनमात्रं यः करोति, न तु तेन किञ्चित् कामयते, तस्याधिकारो ब्रह्मत्वार्त्विज्य इत्युच्यत इति न ब्रह्म-

---

भाष्यप्रकाशः ।

विभागः शतवत् ॥ ११ ॥ सूत्रमवतारयन्ति नन्वित्यादि । यदि बहुप्रमाणप्रमितत्वात् कर्मत्यागपक्ष एव ज्यायान्, तदोक्तरूपो विभागः किंहेतुक इति वक्तव्यम्, तदवचने तु ब्रह्मवित्स्वपि ये कर्मण्यधिकारशून्याः, तेषामेव कर्मत्यक्तृत्वं सेत्स्यतीति न विद्याया वेद्यस्य वा आधिक्यसिद्धिरित्याशङ्कायां कर्मत्यागात्यागविभागे हेतुमाहेत्यर्थः । एतस्येत्यादि । निरूपयन्तीति सुब्विभक्तिर्बोध्या । अत एवेति । अधिकाराभिप्रायादेव । प्रकृत इति । कर्मत्यागात्यागविभागे ब्रह्मविदाचारविभागे वा । अत्र त्विति । भगवद्भावतारतम्ये तु । तथाच कर्मत्यागात्यागविभागे एवमुत्कर्षस्तदभावश्च बीजम्, न तु त्वदुक्तमित्यर्थः ।

अन्ये तु इदं सूत्रं समन्वारम्भणसूत्रोत्तरत्वेनाङ्गीकृत्यैवं व्याकुर्वन्ति । यथा 'शतमाभ्यां दीयता'मित्युक्तेऽर्धमेकस्मै, अर्धमन्यस्मै दीयते, तथा विद्यान्यमारभते, कर्मान्यमिति विभागो द्रष्टव्य इति ।

तच्चिन्त्यम् । तत्र उपसंहारे 'इति तु कामयमान' इति कथनात् कर्माङ्गभूतविद्याया एव विवक्षितत्वावगमेन समन्वारम्भणस्य हेतुत्वाशङ्काया भ्रान्तिमूलत्वेन तदुपेक्षाया एव युक्तत्वादिति ॥ ११ ॥

अध्ययनमात्रवतः ॥ १२ ॥ सूत्रमवतारयन्ति यच्चेत्यादि । व्याकुर्वन्ति यदुक्तमि-

रश्मिः ।

विभागः शतवत् ॥ ११ ॥ उक्तरूप इति । कर्मत्यागात्यागरूपः । सुब्विभक्तिरिति । प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्तं पदं ग्राह्यम् । सुबन्तं बोध्यमित्यर्थः । भाष्ये । पुरुषायुरिति । 'शतायुर्वै पुरुष' इति तथा । प्रकृते । त्वदुक्तमिति । कर्माशक्तिरूपम् । एवेति । शरीरारम्भकविद्याव्यवच्छेदकः । हेतुत्वेति । विद्याकर्मसाहित्ये हेतुत्वाशङ्कायाः । तदुत्कर्षेति । सूत्रप्रत्याख्यानस्य ॥ ११ ॥

अध्ययनमात्रवतः ॥ १२ ॥ यदुक्तमित्यादीति । ब्रह्मत्वार्त्विज्य इति । ब्रह्मत्वाया-

ज्ञानस्य कर्मशेषत्वम्। प्रत्ययस्यातिशायनार्थकत्वादतिशयेन ब्रह्मरूपस्तदैव भवतीति युक्तं तस्य तदार्त्विज्यम्। एवं सति ब्रह्मपदं ब्राह्मण्यपरमपि सङ्गच्छते।

अथवा। वेदाध्ययनमात्रवतः कर्मण्यधिकारः, न तु ब्रह्मविदोऽपीत्यर्थः। नच तदन्तःपातित्वेन वेदान्तानामप्यध्ययनस्यावश्यकत्वे तत्प्रतिपाद्यब्रह्मज्ञानस्याप्यवर्जनीयत्वात्तद्वत एव तत्राधिकार इति वाच्यम्। शाब्दपरोक्षज्ञानस्य ब्रह्मज्ञानत्वाभावात्। न हि 'सिता मधुरे'तिशाब्दज्ञानमात्रवांस्तन्माधुर्यज्ञो भवति। तथा सति पित्तोपशमादिकं तत्कार्यमपि स्यात्, न त्वेवम्। अत एव छान्दोग्ये सनत्कुमारेण 'यद्वेत्थ तेन मोपसीदे'त्युक्तो नारद् ऋग्वेदमारभ्य सर्पदेवजनविद्यापर्यन्तं स्वाधीतमुक्त्वाह 'सोऽहं मन्त्रविदेवास्मि, नात्मवि'दिति। अतोऽपरोक्षब्रह्मज्ञानमेव ब्रह्मज्ञानमुच्यते। अत एव तैत्तिरीयोपनिषत्सु 'वेदान्त-

भाष्यप्रकाशः।

त्यादि। इष्ठन्प्रत्ययसूचितमर्थमाहुः प्रत्ययस्येत्यादि। एतादृशस्य दुर्लभत्वाद्दर्शपूर्णमासयोश्च प्रतिपक्षान्तं कर्तव्यत्वात् तादृशाभावे तल्लोपप्रसङ्ग इत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि। 'आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य शुचौ देशे स्वाध्यायमधीयान' इति श्रुतावध्ययनमात्रश्रवणात्तावन्मात्रवत एवेति तथेत्यर्थः। नन्वध्ययनस्याक्षरग्रहणरूपत्वेऽविद्वत्त्वात् कर्मानधिकारप्रसक्तिः, अथार्थज्ञानस्याप्यपेक्षितत्वम्, तदा तु वेदान्तेभ्यो ब्रह्मज्ञानस्यापि सम्भवात् ब्रह्मिष्ठस्यापि कर्मशेषत्वमनिवार्यमित्याशङ्कामनूद्य परिहरन्ति नचेत्यादि। ब्रह्मज्ञानत्वाभावादिति। अत्र शाब्दज्ञानस्य तथात्वेन विवक्षितत्वाभावात्। तदुपपादयन्ति न हीत्यादि। तथा सतीत्यादि। तावतैव तन्माधुर्यज्ञत्वे सति तस्यापरोक्षज्ञानस्य रासनरूपत्वात् तत्कार्यं स्यात्, तत्तु न दृश्यते, एवं प्रकृतेपि यदि तत् तथा स्यात्, तदा शुकादिवदेव चरेत्, न त्वार्त्विज्यं कुर्यात्, अतस्तदिवैतदपि नापरोक्षमित्यर्थः। अत्र श्रुतिसम्मतिमाहुः अत एवेत्यादि। लिङ्गेन तस्यापरोक्षज्ञानत्वं निवार्य श्रुत्यापि वारणायाहुः तैत्तिरीयेत्यादि। ननु

रश्मिः।

र्त्विज्यम्। 'तं दर्शपूर्णमासयोर्वृणीत' इति वरणविधानादार्त्विज्यम्। सह सुपेतिसमासः। प्रत्ययस्येत्यादीति। अतिशयेनेति। अतिशयेन ब्रह्मा ब्रह्मिष्ठः। एवं सतीति। अतिशयस्य ब्रह्मविशेषणत्वे सति। ब्रह्मण्यतिशयासम्भवात् मीमांसकरीत्या आकृतौ शक्त्या ब्राह्मण्यपरम्। प्रतिपक्षान्तमिति। दर्शपूर्णमाससंज्ञाभ्यां पक्षयोरन्तं लक्षीकृत्य। तादृशेति। अतिशयितब्राह्मण्यवदृत्विगभावे। तल्लोपेति। दर्शपूर्णमासलोपप्रसङ्गात्। तथेत्यर्थ इति। कर्मण्यधिकारः, न तु ब्रह्मविदोपीत्यर्थः। भाष्ये। तद्वत इति। ब्रह्मज्ञानवतः। तत्र कर्मणि। प्रकृते। प्रकृते योजयन्ति स एवं प्रकृत इति। तत्तथेति। अपरोक्षं ज्ञानं कर्माङ्गं स्यात्। चरेदिति। ब्रह्मिष्ठः। नत्विति। यजमानफलसाधकमार्त्विज्यं स्वं प्रति निष्फलम्। ब्रह्मफलं त्यक्त्वा न कुर्यादित्यर्थः। अत इति। अत आर्त्विज्यकरणात् तदिव आर्त्विज्यमिव तदपि कर्माङ्गज्ञानमपि नापरोक्षम्, किन्तु शाब्दमित्यर्थः। लिङ्गेनेति। लिङ्गं शब्दस्य सामर्थ्यमिति 'मन्त्रवित् नात्मवि'दिति शब्दयोः सामर्थ्येन। तद्यथा। मन्त्रविदिति शाब्दं ज्ञानं नात्मविदित्यात्मापरोक्षनिषेध इति। तेन लिङ्गेन। श्रुतिः कल्प्यते। कर्माङ्गत्वेन शाब्दं ज्ञानं भवतु, मा भूदापरोक्षज्ञानमिति। एतच्छ्रुत्या कर्मणि शाब्दं ज्ञानमङ्गमिति लिङ्गेन विनियुज्यते। श्रुत्येति। निरपेक्षो रवः श्रुतिः। विज्ञानं निरपेक्षो रवः। तयेत्यर्थः।

विज्ञानसुनिश्चितार्था’ इति पठ्यते । विज्ञानमनुभव एव, न तु ज्ञानमात्रम्, अतो दूरापास्तं कर्मशेषत्वं ब्रह्मणः । ‘तं विद्याकर्मणी’ इत्यादिस्तु संसार्यात्मनः पूर्वदेहत्यागसामयिकं वृत्तान्तं निरूपयति, न तु ब्रह्मविद इति ‘समन्वारम्भणा’दिति सूत्रमुपेक्षितमाचार्येण ॥ १२ ॥

यथोक्तं ‘नियमाच्चे’ति, तत्राह ।

नाविशेषात् ॥ १३ ॥

‘आग्विन’मित्यादिश्रुतिभ्यः कर्मकृतौ यथा नियमः श्रूयते, न तथा त्याग इति यदुक्तम्, तन्न । कुतः । अविशेषात् । ‘न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशु’रिति श्रुतिः कर्मादिना अमृतत्वाप्राप्तिमुक्त्वा तत्त्यागेन तां वदन्ती कर्मत्यागस्यावश्यकत्वं वदतीति तस्मान्न विशेषो यत इत्यर्थः । तथाच ‘अमृतत्वमानशु’रिति पदात् मुमुक्षोः कर्मत्यागनियमः, अमुमुक्षोस्तत्कृतिनियम इतिव्यवस्थेति भावः ।

भाष्यप्रकाशः ।

भवत्वेवम्, तथापि समन्वारम्भणस्यापरिहृतत्वात् विद्यायाः कर्मसाहित्येनैव फलजनकताङ्गीकार्येति विद्यायाः कर्मशेषत्वं त्वनिवार्यमित्याशङ्कायामाहुः तं विद्येत्यादि । यतः सा संसारिवृत्तान्तं शारीरब्राह्मणे निरूपयति, अतस्तत्र विद्यापदेन विद्वद्वाक्योक्ता कर्माङ्गभूतैव विद्याभिप्रेयते, अत एव तत्र विद्याकर्मभ्यां ‘दैवं वा पित्र्यं वा गान्धर्वं वे’ति तादृशशरीरमेव फलत्वेन वक्ति, न मोक्षम्, अतस्तस्मिन् वाक्ये ब्रह्मवित्संसर्गस्याप्यभावात् तदुपेक्षितम्, अतो न वेदान्तोदितविद्याया अपि कर्मशेषत्वमित्यर्थः । एतेन यदन्यैरत्र व्याख्यातम्, औपनिषदमात्मज्ञानं स्वातन्त्र्येणैव प्रयोजनवत् प्रतीयमानं न कर्माधिकारकारणतां प्रतिपद्यत इति प्रतिपादयाम इति, तत्र बीजमिदमेव वक्तव्यम्, न तु क्रत्वन्तरज्ञानं क्रत्वन्तराधिकारेणापेक्ष्यत इति दृष्टान्तबोधितमिति सूचितम् । तथा सत्यपि ब्रह्मिष्ठपदबोधितशेषताया अनपायादिति ॥ १२ ॥

नाविशेषात् ॥ १३ ॥ अवतारयन्ति यथोक्तमित्यादि । सौत्रं हेतुं व्याकुर्वन्ति न कर्मणेत्यादि । तथाच यथा कर्मश्रुतावकरणनिन्दादिना तदावश्यकतया कर्मकरणनियमोऽवग-

रश्मिः ।

विद्यायाः कर्मशेषत्वमिति । कर्मविशेषणत्वम् । विद्यासहितं कर्मेति । न च द्वन्द्वानुपपत्तिः । उभयप्राधान्येपि व्याख्यानप्राप्तं कर्मशेषत्वमित्यर्थात् । तत्रेति । शारीरब्राह्मणे । तदुपेति । तत्सूत्रं प्रत्याख्यातमित्यर्थः । इदमेवेति । उक्तोपपादनम् । क्रत्वन्तरेति । दर्शपूर्णमासक्रत्वन्तराधिकारेण । क्रत्वन्तरं दर्शपूर्णमासक्रतोरन्यः क्रतुः प्राकृतिकः क्रतुस्तस्य ज्ञानं नापेक्ष्यत इत्यर्थः । दृष्टान्तेति । ‘सिता मधुरे’त्यादिदृष्टान्तः भाष्योक्तः । तेन बोधितम् । तद्यथा । शाब्दं ज्ञानं तदपि दर्शपूर्णमासाय ब्रह्मत्वार्त्विज्ये, न तु सर्वक्रत्वार्त्विज्ये । दूषणमाहुः तथा सतीति । ब्रह्मिष्ठो ब्रह्मेत्यत्र । शेषता विशेषणता गौणता । स्वमते ज्ञानकर्मणोः परस्परमङ्गाङ्गिभावः पूर्वाधिकरणे जिज्ञासाधिकरणे स्फुटः ॥ १२ ॥

नाविशेषात् ॥ १३ ॥ तथेत्यर्थ इति । यतः कर्मनियमान्न कर्मकृतौ विशेष इत्यर्थः ।

अथवा । ननु क्रमप्राप्ते तुरीयाश्रमे हि कर्मत्यागः, द्वितीये तस्मिन् कर्मकरणनियमः, तत्र च कर्तुरङ्गत्वेन तत्स्वरूपज्ञानमावश्यकम्, तच्च वेदान्तैरेवेति कथं न

भाष्यप्रकाशः ।

म्यते, तथा त्यागश्रुतावपि कर्मादिभिर्मोक्षाप्राप्तिकथनपूर्वकं त्यागेन तत्प्राप्त्युक्त्या तदावश्यकतया त्यागस्यापि नियमोऽवगम्यत इति तथेत्यर्थः । तेन सिद्धमाहुः तथाचेत्यादि ।

एवं ब्रह्मज्ञानस्य कर्माङ्गत्वाभावेपि जीवस्वरूपज्ञानस्य कर्माङ्गत्वं न वारयितुं शक्यमित्याशङ्काप्यनेनैव निरस्ता भवतीत्याशयेन पक्षान्तरमाहुः अथवेत्यादि । तत्र चेति । कर्मणि च । अविशेषपदस्य व्याख्यानं 'आश्रमविशेषे विशेषाभावा'दिति ।

अयमर्थः । भाट्टा हि अध्ययनविधिगृहीतानां वेदान्तानां वेदशेषत्वायैवमुपवर्णयन्ति । तथाहि । यत्तावत् 'अविनाशी वा अरे अयमात्मे'त्यादिना जायमानं शरीराद्यतिरिक्तनित्यात्मस्वरूपसद्भावज्ञानम्, तत् पारलौकिकफलककर्मानुष्ठानौपयिकत्वात् कर्मज्ञानवदेव सामर्थ्यतः क्रतुसंयोगात् क्रत्वर्थम् । यथा ज्योतिष्टोमादिवाक्याध्ययनं दृष्टेनैव द्वारेणानुष्ठानौपयिकं ज्ञानं जनयतीति तदर्थतयैवाध्ययनं विधीयते, तथा 'अविनाशी'त्यादिवाक्यानामप्यध्ययनविधिरेव कर्मानुष्ठानोपयोग्यात्मज्ञानार्थतां विधत्ते, तद्यदि प्रमाणान्तरेणात्मनः शरीरादिविवेको नैकान्ततः सिध्यति, ततो दृढविवेकप्रतिपादकानामुपनिषद्वाक्यानां विस्पष्टज्ञानमेव फलम् । तदुक्तं 'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या । दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन' इति । यदि च शरीरादिव्यतिरिक्तात्मज्ञानमन्यतोपि सिध्यति, ततो यथैवान्यतः क्रतुज्ञानसम्भवेऽप्यध्ययनोपात्तवेदवाक्यावगतकर्मरूपाणामेव पुंसां कर्मस्वधिकारः, तथैवाध्ययनोपात्तोपनिषद्वाक्यावगतात्मतत्त्वानामेवाधिकार इत्यध्ययनविधिबलादेव कल्प्यते । यस्त्वात्मसद्भावप्रतिपादनोपक्रमे 'आत्मा वा अरे द्रष्टव्य' इत्यादिकं विधिरूपं वाक्यम्, तत्तु

रश्मिः ।

भाष्ये । तस्मादित्यन्तं सौत्रो हेतुर्विवृतः । (भाष्ये । वैराग्यस्यैवेति । एवकारो वेदान्तैर्जीवस्वरूपज्ञानव्यवच्छेदकः । आश्रमविशेषे संन्यासाश्रमे जीवे वेदान्तैः स्वरूपज्ञानरूपविशेषाभावादिति द्वितीयोऽत्र सूत्रार्थः ।) अध्ययनेति । 'षडङ्गो वेदोऽध्येय' इत्यत्राध्ययनविधिना विषयविधया वेदा गृहीता इति हेतोः वेदपदार्था वेदान्ता अपि गृहीतास्तेषाम् । चित्तशुद्धिद्वारा भक्तिज्ञानजननेन पारलौकिकेत्यादिः । सामर्थ्यतः तच्छब्दसामर्थ्यतः शरीराद्यतिरिक्तनित्यात्मस्वरूपसद्भावज्ञानं वक्ष्यमाणदिशा क्रतुसंयोगात् क्रत्वर्थम् । कर्मज्ञानवत् । दृष्टेनैवेति । पदार्थधीः शक्तिधीश्च द्वारं दृष्टम् । एवकारोऽदृष्टं द्वारं व्यवच्छिनत्ति । तेन । तदर्थतयेति । अनुष्ठानौपयिकज्ञानार्थतया । एवकारेण पदार्थधीः शक्तिधीश्च व्यवच्छिद्यते । अध्ययनविधिरिति । उक्त एव वेदशब्देन वेदान्तग्रहणात् तत्र लाघवादेवकारः । विधत्त इति । वक्ष्यमाणरीत्या विधत्ते । प्रमाणान्तरेणेति । वेदान्तातिरिक्तप्रमाणेन । नैकान्ततः । न मुख्यतः । एव फलमिति । ज्ञानस्य सिद्धत्वेपि विस्पष्टांशे साध्यत्वेन साध्यवेदार्थसत्त्वादित्यर्थः । एवकारः साध्यकर्मान्तरं व्यवच्छिनत्ति । एतद्विषय इति । कर्मणः साध्यत्वेनादृढत्वेप्यात्मनः सिद्धस्यास्तितया कर्मविषयः प्रबोधो दृढत्वं प्रयातीत्यर्थः । अन्यत इति । 'ज्योतिष्टोमेन स्वर्गकामो यजेत'इत्यादिभ्यः । अधिकार इति । विधेयत्वज्ञानवत्त्वात् । वक्ष्यमाणेति । स्वकर्मरूपार्थस्य । 'कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः । अकर्मणश्च बोद्धव्यं गहना कर्मणो गति'रिति वाक्यात् । महेति ।

भाष्यप्रकाशः ।

वक्ष्यमाणार्थस्यातिगहनत्वान्महोपयोगित्वाच्चालस्यं निवार्य श्रद्धाविशेषेण कृत्वा वक्ष्यमाणार्थप्रतिपत्तिमात्रार्थम् । तस्मादेतज्ज्ञानं दृष्टोपयोगित्वात् क्रत्वर्थम् । यानि पुनरितिकर्तव्यताविशेषे उपासनात्मकानि ज्ञानानि विधीयन्ते, तेषां क्रतौ दृष्टोपयोगाभावाददृष्टफलत्वम् । अदृष्टं च फलं वाक्यशेषात् द्विविधम्, अभ्युदयरूपं निःश्रेयरूपं च । 'सर्वांश्च कामानाप्नोति' 'सोऽश्नुते सर्वान् कामा'नित्याद्युक्तमभ्युदयफलम् । 'न स पुनरावर्तत' इत्याद्युक्तं निःश्रेयसफलमिति विवेकः ।

यत्तु 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञास्ती'ति ब्राह्मणेन भूतचैतन्यमुक्तमित्याशङ्क्यते । तन्न । स्वयमेव ब्राह्मणेन अत्रैव 'मा भगवानमूमुहं न प्रेत्य संज्ञास्ती'त्यनेन पूर्वोक्ताजरामृतत्वस्य विनाशित्वाभिधानतो बाधात् पूर्वपक्षं चोद्याख्यमुत्थाप्य, 'न वा अरे मोहमहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मे'त्युक्त्वा, 'मात्रासंसर्गस्त्वस्य भवती'ति कथनेन मात्राशब्दवाच्यानां भूतेन्द्रियधर्माधर्माणां विकाराणां सम्बन्धबोधनात् विज्ञानघनशब्दोक्तो ज्ञानशक्तिस्वभाव आत्मा एतेभ्यो भूतेभ्यः समुत्थाय व्यक्तो भूत्वा तान्येवानुविनश्यति । भूतविनाशाद्विनष्ट इव भवति । भूतसंस्थो ह्यसौ स्वयं प्रत्यक्षेण गृह्यते । परैश्च शरीरचेष्टादिलिङ्गकानुमानेन । मुक्तस्तु प्रमाणपथातिवर्तनाद्विनष्ट इव भवतीति प्रकारेण मात्राणामेव नाश उच्यते, नात्मन इत्यविरोधात् । तदुक्तं 'अविनाशी स्वरूपेण पुरुषो याति नाशिताम् । मात्राणां सविकाराणां भूतादीनामसंज्ञिते'ति । अत्र हि मुक्तस्य ज्ञानाभावो बोध्यते । भूतेन्द्रिन्द्रियादिवियोगे करणाभावेन ज्ञानोपायाभावात् । 'तत्केन कं पश्ये'दित्यारभ्य 'विज्ञातारमरे केन विजानीया'दित्यन्तेन विज्ञानाभावोपपादनात् । वस्तुतस्तु प्रकरणार्थोपसंहारोऽयम् । यत एवं पूर्वोक्तन्यायेन भूतचैतन्यं न सम्भवति, तस्मात् भूतेन्द्रियाणामसंज्ञित्वम् । अचैतन्यम् । अन्यस्तु तेभ्यो नित्यश्चेतनस्तस्य स्वर्गगमनसम्भवाच्च स्वर्गं लोकं यातीत्यस्य प्रत्यक्षस्य विरोध इत्येवं भट्टकारिकाया अर्थादिति पार्थसारथिमिश्राः । तथाच यथा प्रोक्षणसंस्कृता एव

रश्मिः ।

साध्यार्थकर्मोपयोगित्वात् । वक्ष्यमाणेति । मैत्रेयीब्राह्मणे वक्ष्यमाणोऽर्थं आत्मरूपः तस्य प्रतिपत्तिर्ज्ञानं तन्मात्रार्थम् । यद्वा । कर्मरूपार्थप्रतिमात्रार्थम् । मात्रचा स्वर्गादिफलोपयोगव्यवच्छेदः । दृष्टेति । दृष्टस्य कर्मण उपयोगित्वात् । क्रत्वर्थं ज्ञानस्य बह्वायाससाध्यत्वेन पुरुषप्रीत्यजननात् क्रत्वर्थत्वम् । यैरङ्गैः पुरुषप्रीतिर्न जन्यते, तानि क्रत्वर्थानि । नन्वितिकर्तव्यता कर्मणि प्रसिद्धा, 'आत्मेत्येवोपासीते'त्याद्युपासनाविधीनां किं प्रयोजनमत आहुः इतिकर्तव्यताविशेष इति । आत्मनोपासना कार्येत्येवं कर्माङ्गात्मोपासनाज्ञानं सम्पाद्य कर्म भावयेदित्येवमुपासनाविधिविषयाः क्रियन्ते । अदृष्टेति । धर्मफलत्वम् । भूतचैतन्यमिति । नत्वात्मचैतन्यम् । अत्रेति । अत्र 'न प्रेत्य संज्ञास्ती'त्यत्र । भगवन् याज्ञवल्क्य माहं मूमुहम्, किन्तु मूमुहम् । चोद्याख्यममिति । वक्तृप्रेरणार्हास्यम् । अरे इति । मैत्रेयि । अहं याज्ञवल्क्यः । शरीरेति । भूतादिः आत्मवान् प्रेष्ठायाः देवदत्तवत् । आदिना ज्ञानवत्त्वादिच्छावत्त्वाच्च । देवदत्तवदेव । मात्राणामिति । भूतेन्द्रियधर्माणाम् । एवकारेणात्मव्यवच्छेदः । तदाहुः नात्मन इति । मिश्रव्याख्यानमाहुः अत्र हीति । कारिकायाम् । तेन नाशितं ज्ञानाभावम् । मुक्तमात्रविषयत्वापत्त्या वस्तुतः पक्षमाहुः वस्तुत इति । प्रकरणेति । आत्मप्रकरणम् । पूर्वोक्तेति । 'विज्ञानघनशब्दोक्त' इत्याद्युक्तव्याख्यानरीत्या । अर्थादिति । अयं हेतुः मात्राणामेव नाशः, नात्मन इत्यत्र । प्रोक्षणेति । 'व्रीहीन् प्रोक्षती'ति श्रुतिः । 'लौकिकं नैव

भाष्यप्रकाशः ।

व्रीहयो याग उपयुज्यन्ते, एवमौपनिषदज्ञानसंस्कृत एव कर्ता उपयुज्यत इति तत्स्वरूपनिरूपकत्वेन वेदशेषा वेदान्ता इत्याहुः । तत्र भाष्योक्तं दूषणं पश्चात् व्युत्पाद्यम् । पूर्वं तु तदुक्तेऽस्यात्मवाक्यतात्पर्यत्वासङ्गतिः प्रकाश्यते । शरीरादिव्यतिरिक्तात्मसत्तामात्रसाधनायाविनाशीत्यादिश्रुतिरिति यदुक्तम् । तन्मदम् । शाबरभाष्ये नैयायिकाद्युक्तयुक्तिभिरेव तत्सिद्ध्या तत एव नास्तिक्यनिराकरणसिद्धौ 'अविनाशी वा अर' इत्यादिश्रुतिसन्दर्भस्य तदर्थताया वक्तुमयुक्तत्वात् । एतदुपक्रमे 'येनाहं नामृता स्यां किमहं तेन कुर्या'मिति मोक्षार्थत्वस्य श्रावणान्निरुपधिप्रियत्वबोधनस्याप्यन्यत्र वैराग्योत्पादनार्थत्वेन संसारिलिङ्गत्वाभावात् । 'ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म वेदे'त्यादिनिन्दाश्रुत्या आत्मज्ञानेन सर्वज्ञानश्रावणस्यापि स्तुत्यर्थताया वक्तुमशक्यत्वात् । अध्ययनवाक्ये तु न विधिः, किन्त्वावश्यकार्थे तव्य इति जिज्ञासासूत्र एवोपपादितम् । अर्थज्ञानं तु सामान्यतो गुरुकृतात् ज्ञापनात् । विशेषस्तु तपआदिभ्यः साधनेभ्यो मीमांसाद्वयसहकृतेभ्य इत्यपि । अर्थज्ञानं च न द्रव्ययज्ञमात्रानुष्ठानोपयोगि । चातुराश्रम्यधर्मार्थत्वात् । अन्यथा तद्वाक्यवैयर्थ्यापत्तेः । धर्मोपि न धर्मत्वेन रूपेण वेदार्थः, किन्तु ब्रह्मात्मकत्वेन । 'यज्ञो वै विष्णु'रिति 'धर्मो यस्यां मदात्मक' इति श्रुतिस्मृतिभ्याम्, 'सर्वे वेदा यत्पदमामनन्ती'ति 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिश्रुतिस्मृतिभ्यश्च । एवं च विधिपक्षेपि 'आत्मा वारे द्रष्टव्य' इति दर्शनविधानं ब्राह्मणोपक्रममारभ्यान्तं प्रोक्तस्यार्थस्यातिगहनत्वात् तदर्थम्, न तु क्रत्वर्थम् । 'सोऽश्नुते सर्वा'नित्यस्य यदभ्युदयरूपत्वमुक्तम् ।

रश्मिः ।

मनुत' इति वाक्यात् । अनधिगतार्थगन्तृत्वरूपप्रमाणाच्च । लोकेऽधिगतार्थगन्तृत्वम् । **उपयुज्यत इति** । कर्मण्युपयुज्यते । **तत्स्वरूपेति** । कर्तृस्वरूपनिरूपकत्वेन । **भाष्योक्तमिति** । यदहरेवेत्यादिभाष्योक्तम् । **अस्येति** । मैत्रेयीब्राह्मणस्य । 'भाष्यकृदत्र युक्त्ये'त्यस्यार्थमाहुः **शाबरेति** । **नैयायिकादीत्यादिना** वैदिकः । **उक्तयुक्तिभिरिति** । नैयायिकयुक्तयः शरीरचेष्टाज्ञानेच्छाभिरनुमानानि । तत्र व्याप्तिशोधिकाः । वैदिकयुक्तयो 'न्यग्रोधफलमत आहरे'त्यादयः । अत एवकारोऽ'विनाशी वा अरे' इत्यादिश्रुतिसन्दर्भव्यवच्छेदकः । **मोक्षार्थत्वस्येति** । सन्दर्भस्य मोक्षार्थत्वं तस्य । **निरुपधीति** । भगवत इति बोध्यम् । **अन्यत्रेति** । जीवादौ । लिङ्गं हेतुः । किन्तु वाक्यान्वयाधिकरणोक्तात्मलिङ्गत्वात् । **स्तुत्यर्थताया इति** । किन्तु वास्तवार्थपरताया वक्तुमुचितत्वात् । **एवेति** । पत्रावलम्बनादेवकारः । **ज्ञापनादिति** । 'साङ्गो वेदोऽध्येयोज्ञेयश्चे'त्यत्रार्थज्ञापनात् । 'तपसा ब्रह्म विजिज्ञासस्वे'त्यत्राहुः । 'अलौकिको हि वेदार्थ' इति श्रुत्याहुः **तपआदिभ्य इति** । 'वेदयुक्त्या तु प्रसादात् परमात्मन' इति श्रुत्यंशोक्तवेदयुक्तिपरमात्मप्रसादावादिपदेन गृह्येते । **इत्यपीति** । जिज्ञासासूत्र एवोपपादितमित्यर्थः । 'अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीते'त्यत्राहुः **अर्थज्ञानं चेति** । **द्रव्येति** । इदं गृहस्थमात्राधिकारकम् । **तद्वाक्येति** । द्रव्ययज्ञातिरिक्तज्ञानयज्ञादिबोधकगीतावाक्यवैयर्थ्यापत्तेः । मीमांसकं प्रत्यन्यदप्याहुः **धर्मोपीति** । भावकर्मविध्यनुवादप्राप्तकालार्थेषु तव्यविधायकसूत्रेण विधिपक्षो मास्तु, नियमविधिपक्षस्तु स्यादित्यत आहुः **एवं चेति** । **आन्तमिति** । आ अन्तं अन्तमभिव्याप्य । **अतीति** । 'आश्चर्यो वक्ता कुशलोऽस्य लब्धे'ति काठकात् । इदं दूषणं वितण्डया तस्या उक्त्यभिप्रायः जिज्ञासाधिकरणभाष्ये परस्परमङ्गाङ्गिभावस्य ज्ञानकर्मणोरुक्तेरेकतरस्यादूष्यत्वविषयः । **न त्विति** । वेदान्तत्वेन 'तमेत'मितिश्रुतिप्रसक्तेः, न तु 'यदेव

कर्मशेषत्वमित्युत्सूत्रमाशङ्क्य निषेधति नेति। 'यदहरेव विरजे'दिति श्रुतेः 'तावत् कर्माणि कुर्वीत न निर्विद्येत यावते'ति भगवद्वाक्याच्च त्यागे वैराग्यस्यैव प्रयोजकत्वादाश्रमविशेषे विशेषाभावादप्रयोजकत्वादित्यर्थः। यत्रापि कश्चित्[1]क्रम-

भाष्यप्रकाशः।

तदप्ययुक्ता। परप्राप्तिविवरणरूपत्वेन तस्य निःश्रेयसरूपत्वात्। इदं च प्रागुपपादितम्। यदपि 'न प्रेत्य संज्ञास्ती'त्यनेन मोक्षदशायामात्मनः करणाभावाज्ज्ञानशून्यत्वमुच्यत इत्युक्तम्। तदपि तथा। 'अनुच्छित्तिधर्मे'त्यनेन तत्रैव धर्मानुच्छित्तिं श्रावयित्वा 'यद्वैतन्न पश्यति पश्यन् वै तत् द्रष्टव्यं न पश्यती'त्यादिना करणाभावेपि स्वत एव दर्शनस्य विभक्ताभावेनान्यादर्शनस्य चोक्त्या स्वतोऽविभक्तदर्शनस्यैव व्युत्पादनादिति। वस्तुतस्त्विदमपि ब्रह्मप्रकरणमिति वाक्यान्वयाधिकरणे व्युत्पादितमिति न तत्र जीवात्मसत्तासाधनार्थत्वगन्धोपि। तस्मान्न कर्तृशेषा वेदान्ताः।

अतः परं भाष्यं विव्रीयते यदहरेवेत्यादि। यदुक्तं कर्तृस्वरूपनिरूपकत्वात् कर्मशेषत्वं वेदान्तानामिति। तन्न युक्तम्। कर्तुः कर्मशेषत्वाभावात्। 'यदहरेवे'त्यादिश्रुतेः 'तावत् कर्माणी'ति भगवद्वाक्याच्च त्यागे वैराग्यस्यैव प्रयोजकत्वाद्वैराग्योत्पत्तिपर्यन्तमेव कर्मकरणप्राप्तेराश्रमविशेषस्याप्रयोजकत्वाद्वेदानां पूर्वोक्तरीत्या 'कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथे'ति स्मृत्या च कर्मत्याग एव तात्पर्याद्वेदानां वेदान्तशेषत्वाज्जीवस्वरूपनिरूपकवेदान्तभागस्यापि त्यागकर्तृनिरूपकत्वमेव मुख्यम्, कर्मकर्तृनिरूपणं तु प्रासङ्गिकम्। अत एव तद्वाक्येषु 'इति तु कामयमान' इति 'अथाकामयमान' इत्युभयविधं तत्स्वरूपं निरूप्यते। अत आश्रमविशेषमादाय वेदान्तानां कर्मशेषत्वस्थापनमयुक्तमेवेत्यर्थः। ननु त्यागस्य फलार्थत्वेपि ज्ञानाङ्गत्वात् ज्ञानस्य च वेदान्तसिद्धस्य कर्माङ्गतायाः प्रागेवोक्तत्वात् प्रव्राजेपि चातुराश्रम्यपक्षकथनेनाध्ययनोपात्तवेदान्तभागजन्यस्य ज्ञानस्य कर्मशेषत्वमनिवार्यमेवेत्याशङ्कायां तस्याः पूर्वमेवोत्तरं दत्तमित्याहुः यत्रापी-

रश्मिः।

विषये'ति श्रुतेः प्रसक्तेरिति भावः। ननु न निःश्रेयसरूपम्, 'सोऽश्नुत' इत्याद्युक्ताभ्युदयस्य सगुणप्राप्तिरूपत्वात्, अत आहुः इदं चेति। प्रागिति। पूर्वपादे। निर्गुण(स)गुणयोरभेदप्रतिपादन उपपादितम्। तथेत्ययुक्ता। मुक्तस्त्वित्यादिनोक्तं दूषयन्ति स्म यदपीति। तत्रैवेति। ईश्वर एव। न उच्छित्तिर्येषां तेऽनुच्छित्तयः, अनुच्छित्तयो धर्मा यस्येत्येवं श्रावयित्वा। यत् करणदृश्यं न पश्यति, किन्तु करणाभावेपि पश्यति, अतः स्वतः एतद्दर्शनस्य। तथा तद्द्रष्टव्यं अन्यत् द्रष्टव्यम्। तदेवोच्यते करणाभाव इति। एवेति। ज्ञानशून्यत्वयोगव्यवच्छेदकः। वाक्यान्वयेति। प्रथमस्य तुरीयपादे। तस्मादिति। कर्मशेषकर्तृप्रतिपादकत्वात्। वैराग्यस्येति। एवकारो वेदान्तैर्जीवस्वरूपज्ञानव्यवच्छेदकः। आश्रमविशेषे संन्यासाश्रमे जीवे वेदान्तैः स्वरूपज्ञानरूपविशेषाभावादिति द्वितीयोत्र सूत्रार्थः। अन्योपि प्रयोजकत्वादाश्रमेत्यादिभाष्यार्थमाहुः प्रकरणेति। जीवप्रकरणप्रयोजकत्वात्। उपक्रमाभावाच्च जीवप्रकरणत्वमिति भावः। कर्मकर्त्रिति। कर्मणि कर्ता गृहस्थाश्रमे स्थितः, तस्य निरूपणं तु। तद्वाक्येष्विति। शारीरब्राह्मणीयकर्तृवाक्येषु। तत्स्वरूपमिति। कर्तृस्वरूपम्। आश्रमविशेषमिति। गृहस्थाश्रमम्। एवकारस्तु 'तमेत'मिति श्रुतिविरोधात्। ज्ञानाङ्गत्वादिति। 'वेदान्तविज्ञानसुनिश्चितार्था' इति श्रुतेस्तथा विशुद्धसत्त्वानन्तरं ज्ञानोदयनियमात्। प्रागेवेति। 'तद्वतो विधाना'दित्यत्र विस्मृतकण्ठमणिन्यायेन। चातुराश्रम्येति। क्रमेण संन्यासे। ज्ञानस्येति। शाब्द-

---

[1] क्वचित्। [2] रश्मिकाराणां प्रकाशपुस्तकस्थः 'प्रकरणप्रयोजकत्वादिति पाठः मूलप्रकाशेऽन्तिमे चाभावान्नात्र' स्वीकृतः।

प्राप्तिः, तत्रापि न तज्ज्ञानं ब्रह्मज्ञानमिति पूर्वसूत्र एवोक्तमिति भावः । एतेन वेदाध्ययनादिकमप्यप्रयोजकमिति ज्ञापितम् । अत एव शुकस्य वैराग्यातिशयादुपनयनादेरप्यनपेक्षोच्यते । एवं सूत्रद्वयेन कर्माधिकारसम्पादकत्वेन ब्रह्मज्ञानस्य तच्छेषत्वं निरस्तम् ॥ १३ ॥

भाष्यप्रकाशः ।

त्यादि । यत्रापि कस्मिंश्चित् पुरुषविशेषे क्रमेण त्यागप्राप्तिः, तत्रापि शाब्दज्ञानस्य मुक्तिसाधकत्वाभावान्न विवक्षितब्रह्मज्ञानत्वमिति पूर्वस्मिन् 'अध्ययनमात्रवत' इति सूत्र एव व्युत्पादितम्, अतो न ब्रह्मज्ञाने कर्मशेषत्वगन्धोपीत्यर्थः । ननु तथापि 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चे'त्यादिश्रुतिभिर्वेदाध्ययनादिकं त्वावश्यकम्, तदपि कर्मैवेति तदङ्गत्वं त्वात्मज्ञानस्य भविष्यत्येवेति कथं न कर्माङ्गत्वमित्यत आहुः एतेनेत्यादि । अप्रयोजकमिति । ज्ञानस्य कर्माङ्गत्वाप्रयोजकम् । अत्र निदर्शनमाहुः अत एवेत्यादि । सिद्धमाहुः एवमित्यादि । एवमधिकोपदेशसूत्रेण स्वोक्तमुपष्टभ्य शेषैः पञ्चभिः सूत्रैर्जैमिन्युक्ता हेतव आभासीकृताः ।

अन्ये तु 'कुर्वन्नेव ही'त्यत्र 'न विदुष' इति विशेषेण नियमविधानमित्येवं सूत्रार्थमाहुः । तथाचाविद्वद्विषयत्वेपि वाक्यसामञ्जस्यान्न तेन विद्यायाः कर्माङ्गत्वसिद्धिरिति तदाशयः ।

रामानुजास्तु, उक्तवाक्ये कर्मणां करणनियमेपि कर्मसु विशेषो नोच्यते । यज्ञाद्येव कार्यम्, नान्यदिति । अतो यथा अविदुषां स्वतन्त्रफलसाधकं नियतम्, एवं विदुषां विद्याङ्गभूतम्, अत एवमपि वाक्यसामञ्जस्यान्नानेन विद्यायाः कर्माङ्गत्वप्राप्तिरित्याहुः । तदप्यविरुद्धम् ॥ १३ ॥

रश्मिः ।

ज्ञानस्य । कर्मशेषत्वमिति । 'यं यं क्रतुमधीते, तेनास्येष्टं भवती'ति श्रुत्युक्तकर्मशेषत्वम् । पूर्वमिति । 'अध्ययनमात्रवत' इत्यत्र । क्रमेणेति । 'आश्रमादाश्रमं गच्छेन्नान्यथा मत्परश्चरे'दिति वाक्याद्ब्रह्मचर्याद्गृहस्थाश्रमः, ततो वानप्रस्थाश्रमः, त(तः)संन्यासाश्रम इति क्रमेण । मुक्तीति । 'तमेव विदित्वे'त्यत्र शाब्दाविवक्षणात् । तदङ्गत्वमिति । 'ब्राह्मणेने'त्यत्र ब्रह्म जानाति ब्राह्मणस्तेनेत्यर्थात् कर्माङ्गत्वम् । ज्ञानस्येति । वेदाध्ययनादिकमिति भाष्येऽध्ययनज्ञानस्यादिपदार्थस्य । कर्माङ्गत्वे अप्रयोजकं अन्यथासिद्धं अन्यथासिद्धिस्तु पञ्चमीक्षसभादिर्यथा घटं प्रति । भाष्ये । वैराग्येति । न तु वेदान्तैर्जीवस्वरूपज्ञानात् । उपेति । अध्ययनतज्ज्ञानयोरधिकारसम्पादकस्य । आदिना विवाहवनवासयोः संग्रहः । एवमित्यादीति । निरस्तमिति । यत् तन्निरस्तम् । न विदुष इति । उभयान्वयि । 'कुर्वन्नेव ही'त्यत्र न नियमो न । विदुष इति विशेषेण नियमविधानं नेति । विद्याया इति । विद्वानित्यत्र विदितिशब्देनोक्तायाः । तदाशय इति । तदप्यविरुद्धम्, सूत्राणां न्यायरूपत्वात् । एवमग्रेपि । करणेति । नियम एवकारार्थः । तथाच करणानियमेति पाठः । करणनियमो यो वर्तते, स न, कुतः, अविशेषात् । तद्व्याकुर्वन्ति स्म कर्मसु विशेषो नोच्यत इति । स्वतन्त्रेति । स्वतन्त्रं फलं अज्ञातत्वेपि कर्मस्वभावादेव फलम् । तस्य साधकम् । नियतं दर्शनात् । विद्याङ्गभूतं कर्म १३

अथ प्रहिलतया 'ब्रह्मिष्ठ' इत्यत्र ब्रह्मपदेन पर एवोच्यत इति वदसि, तत्रापि वदामः ।

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

दर्शपूर्णमासावेतादृशौ यत्र ब्रह्मविदार्त्विज्याधिकारीति तत्स्तुत्यर्थं 'ब्रह्मिष्ठो ब्रह्मे'त्यनेन ब्रह्मविदोऽप्यार्त्विज्येऽनुमितिः क्रियते, न तु तस्याधिकारत्वमभिप्रेतम् । उक्तानुपपत्तिभिरित्यर्थः ॥ १४ ॥

भाष्यप्रकाशः ।

स्तुतयेऽनुमतिर्वा ॥ १४ ॥ एवं षड्भिः सूत्रैर्जैमिनीयोक्तं निराकृत्य पुनरुत्सूत्रं किञ्चिदाशङ्क्य निराकरोतीत्याशयेन सूत्रमवतारयन्ति अथेत्यादि । व्याकुर्वन्ति दर्शेत्यादि । तस्येति । ब्रह्मज्ञानस्य । तथाचोक्तवाक्ये ब्रह्मिष्ठपदमतिशयेन ब्रह्मवानित्यर्थकम् । अतिशयश्च श्रद्धया साक्षात्कारेण चेति 'यो यच्छ्रद्धः स एव सः' 'ज्ञानी त्वात्मैव मे मत'मिति गीतास्मृत्यावसीयते । तादृशश्चेत् ब्रह्मा कृताकृतावेक्षकतया यागे तिष्ठति, तदा परमकाष्ठाप्रापकौ दर्शपूर्णमासौ साङ्गौ भवतः । 'यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवे'दित्यष्टमस्कन्धे शुक्राचार्यं प्रति भगवद्वाक्यात् । अतो 'ब्रह्मिष्ठो ब्रह्मे'ति पदसमभिव्याहाररूपस्यानुग्रहबीजस्य वाक्ये विद्यमानत्वात्, शुकाद्याचारकावषेयश्रुतिविरोधत्यागनियमरूपाणामार्त्विज्यबाधकानामनुपपत्तीनां सत्त्वाच्च तस्या अनुज्ञायाः यागस्तुत्यर्थत्वमेवेत्यर्थः । सूत्रे वाशब्दोऽनादरे । तेन ब्रह्मणि श्रद्धावतः सर्वत्र ब्रह्मद्रष्टुश्च तदार्त्विज्यं प्रासङ्गिकमिति बोधितम् । स्तुतिप्रयोजनं त्वविद्वत्प्ररोचनम् । अधिकाराभावेपि त्यागकरणेऽनिष्टं स्यादिति तन्निवृत्त्यर्थमिति बोध्यम् ।

अन्ये तु, 'कुर्व'न्निति श्रुतौ प्रकरणसामर्थ्याद्विद्वानेव संबोध्यत इत्युच्यते । तदापि विद्यास्तुतये कर्मानुष्ठानं द्रष्टव्यम् । 'न कर्म लिप्यते नर' इति वाक्यशेषात् । यावज्जीवं कर्म

रश्मिः ।

स्तुतयेऽनुमतिर्वा ॥ १४ ॥ उत्सूत्रमिति । सूत्रादूर्ध्वं अधिकम् । कृताकृतेति । तथा वदन्ति कर्मण्युपाध्यायाः कृताकृतावेक्षत्वेन त्वं ब्रह्मा भवेति पूगीफलस्थापने । परमेति । यागे पञ्चमस्कन्धादौ प्रसिद्धौ । न च कुतो वैषम्यं समं भवेदिति शङ्क्यम् । ब्रह्मानुभावात् । स्तुतिस्सद्धर्मारोप उत्कर्षाधायकगुणवर्णनरूपः । तत्र हेत्वाकाङ्क्षायामाहुः अतो ब्रह्मिष्ठ इति । पदस्येति । पदस्य ब्रह्मिष्ठपदस्य समभिव्याहारो ब्रह्मपदे वर्तते, अतः ब्रह्मपदधर्मस्य समभिव्याहारस्य विषमे समत्वानुग्राहकरूपस्यानुग्रहबीजस्य वाक्ये 'ब्रह्मिष्ठो ब्रह्मे'त्यस्मिन् विद्यमानत्वादनुज्ञाया 'ब्रह्मिष्ठो ब्रह्मा दर्शपूर्णमासयोस्त्वं वृणीते'त्यत्रामन्त्रणे लिङ्गोक्तायाः स्तुत्यर्थत्वमित्यन्वयः । हेत्वन्तरमाहुः शुकादीति । शुकनारदाद्याचारः पर्यटनम्, न तु ज्ञानित्वे सम्पन्ने ऋत्विक्त्वमिति । कावषेयश्रुतिः 'तद्धतो विधाना'दिति सूत्रोक्ता कल्पश्रुतिस्तस्या विरोधस्तस्य त्यागः । नियम 'आश्विनं धूम्रललाम'मिति श्रुत्युक्तो 'नियमाच्चे'ति सूत्रीयः । एतेषां द्वन्द्वः । एतद्रूपाणामार्त्विज्यबाधकानाम् । एतद्विशेषणं पूर्वपदस्य । तेषां या अनुपपत्तयस्तासां सत्त्वाच्चेति । एवेति । 'तमेतमि'ति श्रुति(श्रुति)र्यतः । ननु वेदवेदान्तयोरङ्गाङ्गिभावो जिज्ञासाधिकरणे उक्त एवेति केनापि प्रकारेण ज्ञानस्य वेदाङ्गत्वमस्त्विति चेत्, तत्राहुः सूत्रे वाशब्द इति । ब्रह्मणीत्यादिः । ब्रह्मिष्ठपदार्थः । भक्तिपूर्वकश्रद्धा सर्वत्रेति । भक्तिकारणं 'सर्वभूतेषु मन्मति'रिति वाक्योक्तः सर्वत्र ब्रह्मद्रष्टा तस्य । तदार्त्विज्यं ऋत्विजः कर्मार्त्विज्यम् । प्रासङ्गिकं दर्शपूर्णमासप्रसङ्गजातम् । दर्शपूर्णमासमात्रेपि 'ब्रह्मिष्ठो ब्रह्मे'त्युक्तम् । तन्निवृत्तीति । त्यागनिवृत्त्य-

---

१. अत्रापि ।

कामकारेण चैके ॥ १५ ॥

ननु 'एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीया'निति श्रुत्या ब्रह्मविदः कर्मकृतगुणदोषौ निषिध्येते, स च प्राप्तिपूर्वक इति ब्रह्मविदः कर्मकरणमावश्यकमिति प्राप्ते, उच्यते । कामकारेणेति । करणं कारः । कामेनेच्छया करणं कामकारः । तथाच परानुग्रहार्थमिच्छामात्रेण, न तु विधिवशात्, यत् करणम्, तत् कामकार इत्युच्यते । तथाचैवं कृते कर्मणि तत्कृतगुणदोषप्रसक्तौ तत्प्रतिषेधमेके शाखिन 'एष नित्य' इत्यादिना पठन्ति । न ह्येतावता कर्मकृत्यधिकारप्राप्तिरिति भावः ।

अथवा । कामेन कारो यस्य स तथा । तादृशेन कर्मणा प्राप्तवृद्धिह्रासयोः

भाष्यप्रकाशः ।

कुर्वत्यपि विदुषि विद्यासामर्थ्यात् कर्म न लेपाय भवतीति तत्रार्थादित्याहुः । तदप्यविरुद्धम् ॥ १४ ॥

कामकारेण चैके ॥ १५ ॥ नन्वनुज्ञयाप्यार्त्विज्यकरणे विध्यधीनत्वं तु निर्बाधम्, अतो भवतु कर्माङ्गत्वं विद्यायास्तद्द्वारेत्याशयेन सूत्रमवतारयन्ति नन्वित्यादि । स चेति । निषेधः । सूत्रं व्याकुर्वन्ति करणमित्यादि । इच्छामात्रेणेति । स्वेच्छामात्रेण । एतस्यैव विवरणं न तु विधिवशादिति । (तेन 'शौचमाचमनं स्नानं न तु चोदनया चरेत् । अन्यांश्च नियमान् ज्ञानी यथाहं लीलयेश्वर' इत्येकादशीयभगवद्वाक्यानुरूपया स्वेच्छयेति फलितं बोध्यम् ।) एतावतेति । गुणदोषनिषेधमात्रेण ।

एवं व्याख्याने स्वकृत्या दोषाद्यप्रसक्तिरायाति, न तु तदभिव्यञ्जककर्मकृतगुणदोषाप्रसक्तिरपीत्यतः प्रकारान्तरमाहुः अथवेत्यादि । स इति । ब्रह्मवित् । तथाच श्रुता'वेष' इत्यनेन

रश्मिः ।

र्थम् । कर्मप्रवृत्त्यर्थम् । प्रकरणेति । वाक्यशेषादिति । 'सन्दिग्धेषु वाक्यशेषा'दिति जैमिनिसूत्रम् । ज्ञानिकृतकर्म लेपाय भवति न वेति सन्देहोऽत्र । अविरुद्धमिति । सूत्राणां न्यायरूपत्वादित्युक्तम् ॥ १४ ॥

कामकारेण चैके ॥१५॥ अनुज्ञयेति । 'तं वृणीते'त्यामन्त्रणेन । तद्द्वारेति । अनुज्ञाद्वारा । आमन्त्रणं कामचारानुज्ञेति वैयाकरणप्रसिद्धेः । काम इच्छेत्यपि । कमु कान्तौ कान्तिरिच्छेति । तिङन्ते । 'न तु विधिवशा'दिति भाष्यप्रविष्टनिषेधप्रतियोगिविधिवशविशेषणविधिप्रतिपादक एव प्रकाशः न तु विधिवशादिति । तथा च काठकीयां 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदे'ति प्रश्ने 'सर्वे वेदा यत्पदमामनन्ती'त्युत्तरे 'श्रा अभ्यास' इत्यस्य प्रयोगात् गीतायां 'ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विता' इत्यत्र भक्तिरूपश्रद्धोक्तेश्च 'सात्त्विकीश्रद्धाभ्यास' इत्यायाति । सा तु 'अफलाकाङ्क्षिभिर्युक्तो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विक' इति वाक्या'न्मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यका'न्महतामन्तःकरणं प्रमाण'मित्युद्धवादिवदिति तथा । तदभिव्यञ्जकेति । स्वकृत्यभिव्यञ्जकापूर्वस्थानीयं स्वसिद्धान्तेन भावार्थपादभाष्यीयं नित्यं कर्म । तत्कृतगुणदोषाप्रसक्तिरित्यर्थः । ब्रह्मविदिति । महानपि ब्राह्मः । यतस्तृ-

---

१. इत्यादि ।

सम्बन्धाभावं ब्रह्मविदि एके पठन्तीत्यर्थः । चकारेणेश्वराज्ञया लोकसंग्रहार्थं कृतं कर्म समुच्चीयते । 'सर्वस्य वशी सर्वस्येशान' इति श्रुतेस्तथा ॥ १५ ॥

उपमर्दं च ॥ १६ ॥

अनेन कर्माधिकाराभावे हेत्वन्तरमुच्यते । द्वैतभाने हि यथाकथञ्चित् कर्मकृतिसम्भावनापि । यस्य त्वखण्डब्रह्माद्वैतभानं 'ब्रह्मे'त्येव, न 'त्विदं ब्रह्मे'ति सखण्डम् । अत्रोद्देश्यत्वेन प्रपञ्चस्यापि भानात् सखण्डत्वम् । तथाचाखण्डतज्ज्ञाने कर्मतदधिकारादेरुपमर्दं चैके शाखिनः पठन्तीति न ब्रह्मज्ञानस्य कर्मशेषत्वस-

---

भाष्यप्रकाशः ।

कृताकृतजन्यतापाभावरूपं पूर्वोक्तमहिमानं परामृश्य तस्य नित्यत्वोक्तिस्तस्यैकरसत्वोक्तिश्च कामकारलिङ्गम् । तेन तादृशपुरुषस्यापि चेत्कर्मशेषत्वनिवृत्तिः, तदा विद्यायाः कर्मशेषत्वं शङ्कितुमप्यशक्यमित्यर्थः । ईश्वरेच्छायां गमकमाहुः सर्वस्येत्यादि । तथाच सर्ववशकरणार्थं कर्मणामावश्यकत्वात् भगवतः सर्वेशनशीलत्वेन ज्ञानिनामपि भगवदीशितव्यतया तानाज्ञापयति लोकसंग्रहार्थमित्ययमर्थोऽनया श्रुत्यैव ज्ञायत इत्यर्थः । (यद्यपि पूर्वपादे 'तन्निर्धारणानियम'सूत्रेऽयमर्थस्तत्फलार्थमुक्तः, तथाप्यत्र स एव वादिनिराकरणार्थमुच्यत इति न पुनरुक्तिदोषः ।) एवं ब्रह्मविदः कामकारबोधनादार्त्विज्यमपि तस्य न विधिनियतमिति च समर्थितम् ।

अन्ये तु, कामकार इच्छेति व्याख्याय, 'तद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते, किं प्रजया करिष्यामो येषां नो एवायमात्मा नायं लोक' इति वाजसनेयिश्रुतौ कर्मत्याग इच्छयैव बोध्यत इति प्रत्यक्षीकृतविद्याफलानां तदवष्टम्भेन प्रजादिषु कामाभावकथनात् । अतो विद्याफलस्य प्रत्यक्षतया तत्फलश्रुतेरयथार्थताया वक्तुमशक्यत्वान्न विद्यायाः कर्मशेषत्वमाश्रयितुं शक्यमित्येवं व्याकुर्वन्ति । तत्र कामपदस्येच्छावाचकत्वेपि कामकारपदस्य तद्वाचकत्वं चिन्त्यम् ॥ १५ ॥

उपमर्दं च ॥ १६ ॥ उक्तोपष्टम्भाय सूत्रान्तरं पठतीत्याशयेन सूत्रमवतारयन्ति अनेनेत्यादि । व्याकुर्वन्ति द्वैतेत्यादि । अनेनापि पूर्वोक्तं समर्थितं ज्ञेयम् । शाङ्करग्रन्थेऽप्येवम् ।

रश्मिः ।

तीयस्कन्धे 'नोद्धवोण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभु'रिति । तदन्तःकरणं प्रमाणम् । 'बालक्रीडनकैः कृष्णक्रीडां य आदद' इति । ननु बालक्रीडा शास्त्राज्ञानवत इति कुतोन्तःकरणं प्रमाणमिति चेत् । न । सकलशास्त्रसंवादात् । इदं यथा तथोपपादितं भक्तिरत्नटीकायां मदीयायाम् । तदुक्तं 'अफलाकाङ्क्षिभि'रिति वाक्येन गीतायाम् । 'भक्त्याहमेकया ग्राह्य' इति समर्थितं ज्ञेयम् । तस्येति । महिम्नः । तस्येति । ब्रह्मविदः । कामकारेति । कामकारपदसामर्थ्यम् । विद्याया इति । पुरुषरूपकर्तृप्रतिपादिकायाः । ईश्वरेति । ब्रह्मवित्कामकारमूलभूतायाम् । तानाज्ञापयतीति । 'ब्रह्मज्ञो ब्रह्मे'ति श्रुत्या तथा । अनयेति । उक्तया कावषेयश्रुत्या 'ब्रह्मिष्ठो ब्रह्मे'त्यादिरूपया । न विधीति । किन्तु कामकारेण । प्रत्यक्षीति । 'अयमात्मे'ति प्रत्यक्षगेदमः प्रयोगात् । तदवष्टम्भेन फलावष्टम्भेन । विद्याफलस्येत्यात्मनः । फलश्रुतेरिति । 'अयमात्मे'ति फलश्रुतेः । तद्वाचकत्वं इच्छावाचकत्वम् ॥ १५ ॥

उपमर्दं च ॥ १६ ॥ उक्तोपेति । अखण्डब्रह्मविदः कर्मकृतगुणदोषनिषेधोपष्टम्भाय ।

म्भावनापीत्यर्थः। श्रुतिस्तु 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये'दित्यादिरूपा ॥ १६ ॥

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

अत्रेदं विचार्यते । ब्रह्मचर्यानन्तरं गार्हस्थ्यमपि श्रुत्या बोध्यते, 'ब्रह्मचर्यादेव प्रव्रजे'दित्यादिश्रुतिभिर्ब्रह्मचारिण एव प्रव्रजनमपि बोध्यते, एवं सत्यविरोधाय 'यदहरेवे'ति श्रुतेश्च रागितद्रहितभेदेन विषयभेदो वाच्यः। तत्र ब्रह्मचर्याविशेषेऽपि भगवदनुग्रहविशेषजचित्तशुद्धिविशेषजवेदान्तार्थपरिज्ञानमेव

भाष्यप्रकाशः ।

रामानुजास्तु 'भिद्यते हृदयग्रन्थि'रिति श्रुतिमुपन्यस्यात्र विद्यया कर्मक्षयकथनाद्विद्यया तदुपमर्द इति न तस्याः कर्माङ्गत्वमित्याहुः ॥ १६ ॥

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥ ननु पूर्वसूत्रैर्विद्यायाः कर्मशेषत्वं बहुधा निराकृतम्, फले स्वातन्त्र्यं च स्थापितमिति किमनेन सूत्रेणेत्याशङ्कायां तत्प्रयोजनं वदन्तः पूर्वं त्रिभिः सूत्रैर्ग्रहिलवाद एकस्मिन्निराकृतेपि श्रुतौ ब्रह्मचर्यगार्हस्थ्यावेवाभिप्रेतौ, चातुराश्रम्यपक्षस्तु स्मार्तत्वान्निर्बल इति तमादाय कर्मत्यागादरो न युक्त इति ग्रहिलवादान्तरं निराकरोतीत्याशयेन सूत्रं व्याकुर्वन्ति अत्रेत्यादि ।

अयमर्थः । जाबालश्रुतौ हि 'संन्यासमनुब्रूही'ति जनकप्रश्ने याज्ञवल्क्यो 'ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजे'दिति क्रमेण चातुराश्रम्यपक्षं पूर्वमुक्तवान् । तत्रायुर्भागक्रमेण तथाकरणे आयुस्तुरीयभागे आन्ध्यादिकमपि क्वचित् सम्भवतीति तदा कर्मानधिकारे संन्यास इति शङ्का स्यादिति तदभावाय पक्षान्तरमाह 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वाथ पुनरव्रती वा व्रती वा स्नातको वास्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव

भाष्यप्रकाशः ।

पूर्वोक्तमिति । ब्रह्मविदः कर्मकृतगुणदोषनिषेधनम् । विद्ययेति । 'दृष्टे परावर' इति विद्या तया । तदुपमर्दः कर्मोपमर्दः । 'भिद्यते हृदयग्रन्थिःश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावर' इति श्रुतिः । कर्माणीति कर्म । तस्या इति । विद्यायाः । 'अप्रतिषिद्धमनुमतं भवती'ति बहुधेति वक्ष्यमाणोपयोगि भवतीति ज्ञापितम् ॥ १६ ॥

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥ बहुधेति । अन्यमतान्यपि दूषितानि संगृहीतानि। फल इति । पुरुषोत्तमज्ञाने स्वातन्त्र्यं कर्माशेषत्वेन तथा । ग्रहिलवाद इति । सप्तम्यन्तम् । श्रुताविति । 'यदहरेव विरजेत्, तदहरेव प्रव्रजे'दिति श्रुतौ । एवेति । ग्रहिलवादात् । स्मार्तत्वादिति । सप्तदशाष्टादशाध्याययोरेकादशे चत्वार आश्रमाः । अतः स्मार्तत्वात् । तमिति । चातुराश्रम्यपक्षम् । ('यदि वेतरथे'त्यस्य प्रपञ्चः 'ब्रह्मचर्यादेवे'त्यादिः। स्नातक इति। 'वेदमधीत्य स्नाया'दिति वाक्यादधीतवेदः स्नातः । स्वार्थे कन् । उत्सन्न उच्छिन्नोऽग्निर्यस्य) श्रुत्या बोध्यत इति भाष्यीयश्रुतिं बोधयितुं प्रक्रम्यते ग्रन्थकृद्भिः । अयमर्थ इति । आयुस्तुरीयभाग इति । सप्तम्यन्तं पदम् । क्वचिदिति । पुरुषे । पक्षान्तरमिति । आश्रमद्वयपक्षम् । 'यदि वे'त्यादिनाह श्रुतिः । 'यदि वे'त्यादि । यदि वेति पक्षान्तरे । इतरथेति । भाष्यीयपक्षेण इतरथेत्यस्य प्रपञ्चः । एवकारः क्रमयोगव्यवच्छेदकः । गृहाद्वेति । ब्रह्मचर्यादित्यन्वेति । ब्रह्मचर्याद्गृहीत्यतो गृहाद्वा प्रव्रजेत् । वाकारोऽनादरे । तथा वनाद्वेत्यत्रापि ।

हेतुर्वाच्यः। 'वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगात् यतयः शुद्धसत्त्वा' इति श्रुतिरिममेवार्थमाह। तथाचैनादृशा एवोर्ध्वरेतस इत्युच्यन्ते। एवं सत्यूर्ध्वरेतस्सु कर्माभाव उक्तरीत्या त्वयाप्यूरीकार्य इनि ज्ञानरहितानां कर्मण्यधिकारः, तद्रूतां सन्न्यास इति त्वदुक्ताद्विपरीतोऽर्थः सिध्यतीति क्व कर्मशेषत्वसम्भावना ज्ञाने।

नन्तु सन्न्यासेऽपि तदाश्रमीणं कर्मास्तीति वैराग्यसहकृतं ज्ञानमेतच्छेषभूतम्, तदसहकृतं तदग्निहोत्रादिशेषभूतमिति न वैपरीत्यमिति प्राप्ते, आह

भाष्यप्रकाशः।

प्रव्रजे'दिति। तेन कर्मानधिकारो न सन्न्यासप्रयोजकः, किन्तु वैराग्यमेव तत्प्रयोजकम्। तथा सति यावज्जीवाग्निहोत्रादिश्रुतीनामपि रागाधिकारकत्वान्न विरोध इति सिध्यति। तथापि ब्रह्मचर्यस्य तद्धर्मस्य च सर्वसाधारणत्वेपि कथं कस्यचिदेव विरागः, न सर्वस्येत्यपेक्षायां भगवदनुग्रहजनितचित्तशुद्धिरेव हेतुत्वेन वाच्या। भगवदनुग्रहे च व्यापारत्वेन वेदान्तार्थविज्ञानं तत्सहकारी सन्न्यासश्च वाच्य इति 'वेदान्तविज्ञाने'ति तैत्तिरीयश्रुत्यावसीयते। तथाचैवं भगवदनुगृहीता ऊर्ध्वरेतस इन्युच्यन्ते। तेषु च कर्माभाव उक्तरीत्या हेतुभेदकृतविषयभेदेन सन्न्यासयोगास्त्वयापि श्रौतवादिनाङ्गीकार्यः। अन्यथा श्रुतीनां सामञ्जस्यासम्भवात्। एवं सति 'परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः शुद्धिरद्रोही भैक्षाण' इत्यादिरूपं तदग्रिमवाक्यमपि सङ्गतं भवेत्। तस्मान्न ज्ञानस्य कर्मशेषत्वं शक्यवचनमपि।

सूत्रशेषमवतारयन्ति नन्वित्यादि। तदाश्रमीणमिति। शौचाचमनस्नानाष्टग्रासभक्षण-

रश्मिः।

अन्यथोक्तक्रमपक्षेण पुनरुक्तिः स्यादिति। **अथेत्यादि** स्पष्टम्। **स्नातक** इति। 'वेदमधीत्य स्नाया'दिति वाक्यादधीतवेदः स्नातः। स्वार्थे कन्। उत्सन्न उच्छिन्नोऽग्निर्यस्य स उत्सन्नाग्निः। **एवं सतीत्यादि** भाष्यतात्पर्यवर्णनम्। **तेनेति**। प्रव्रजने ब्रह्मचर्याद्यनेकानन्तर्यश्रावणात् कारणतावच्छेदकगौरवेण तृणारणिमणिन्यायत्यागाल्लाघवेनैकप्रयोजनान्वेषणेन। **वैराग्यमेवेति**। 'यदहरेव विरजेत्, तदहरेव प्रव्रजे'दिति श्रुत्युक्तं वैराग्यम्। एव कर्मानधिकारव्यवच्छेदकः। कर्मानधिकार आरुण्युपनिषदि। 'आरुणिः प्रजापतेर्लोकं जगाम, तं गत्वोवाच, भगवन्, केन कर्माण्यशेषतो विसृजानीति। तं होवाच प्रजापतिस्तव पुत्रान् भ्रातृन् बन्ध्वादीन् शिखां यज्ञोपवीतं यागं सूत्रं च'त्याद्युक्त्वा, 'विसृजे'दित्युक्तत्वात्। **एवं सतीति**भाष्यतात्पर्यं **तथा सतीत्यादि**। **तत्रेत्यादि**भाष्यविवरणं **तथापीत्यादि**। विषयभेदेपि। भाष्यीयतत्रेतिपदस्याप्ययमर्थः। **तद्धर्मस्येति**। एकयज्ञोपवीतभोजनमौनादर्शादर्शनानि ब्रह्मचर्यधर्माः। एकत्वमविवक्षितम्। **व्यापारत्वेनेति**। भगवदनुग्रहेण वेदान्तार्थविज्ञानतत्सहकारिसन्न्यासाभ्यां चित्तशुद्धिरित्यत्र व्यापारत्वेन। **तथा चेति** भाष्यं विवृण्वन्ति स्म **तथा चेति**। **एवमिति** 'वेदान्तविज्ञाने'ति श्रुत्युक्तप्रकारेण। अन्ये तूर्ध्वमूत्रिण इति वक्तव्याः, अप्राप्तयोषितो वा वाच्या इति भावः। नपुंसका एते। एवं सतीति भाष्यं विवृण्वन्ति स्म **तेषु चेति**। ऊर्ध्वरेतस्सु च। **हेतुभेदेति**। रागितद्रहितौ भावप्रधानो निर्देशः। रागितद्रहितत्वे हेतू तयोर्भेदेन कृतो यो गृहस्थतुरीयाश्रमीणरूपविषयौ तयोर्भेदः तेन। **श्रौतेनेति**। पूर्वमीमांसकेन। **तदग्रिमेति**। उक्तजाबालाग्रिमवाक्यम्। **सङ्गतमिति**। हेतुभेदभिन्नसन्न्यासानां बहुविधत्वात्

---

१. इति नास्ति, उच्यत इत्यपि पाठः। २. प्रजापतिम्।

शब्दे हीति। ज्ञानस्वरूपं तत्फलं च न युक्तिसिद्धम्, किन्तु वद्मात्रसिद्धम्। तत्र तु 'तमेवं विद्वानमृत इह भवति' 'ब्रह्मविदाप्नोति परम्' 'य एनं विदुरमृतास्ते भवन्ती'त्यादिवाक्यैर्ब्रह्मज्ञानस्य मोक्ष एव फलं श्रूयते। सर्वसाधनानां साक्षात्परम्पराभेदेन तत्रैव पर्यवसानात्। अतो धर्मिग्राहकमानविरोधात्संन्यासाश्रमीणकर्मशेषत्वमपि न वक्तुं शक्यमित्यर्थः। नन्वेवं संन्यासवैयर्थ्यमिति चेत्। न। ब्रह्मविदतिरिक्तसङ्गस्य भगवद्विस्मारकत्वेनावश्यत्याज्यत्वेन श्रुत्या कथनात्, अत एव 'वेदान्तविज्ञानसुनिश्चितार्था' इत्युक्त्वा, 'संन्यासयोगात् यतयः शुद्धसत्त्वा' इत्युक्तम्। अत्र पञ्चम्यान्तःकरणे संस्कारविशेषाधायकत्वं च प्रतीयते संन्यासस्य। स च संस्कारः फलोपकार्यङ्गमित्यावश्यकः संन्यासो मर्यादा-

---

भाष्यप्रकाशः।

योगाभ्यासादि। व्याकुर्वन्ति ज्ञानस्वरूपमित्यादि। धर्मिग्राहकमानविरोधादिति। धर्मि कर्मशेषत्वेन मुख्यत्वेन च सन्दिह्यमानं ज्ञानम्। तद्ग्राहकं मानं तत्स्वरूपज्ञापिका श्रुतिः। सा तु ज्ञानस्य मोक्षपूर्वकालीनत्वं प्राप्तृविशेषणतां च कर्मनैरपेक्ष्येण वदन्ती मोक्षरूपं फलं प्रति साक्षादेव कारणतां बोधयतीति कर्मशेषत्वाङ्गीकारे तद्विरोधात्। तथाच ज्ञानस्य संन्यासाश्रमीणकर्मशेषत्वनिवारणाय मर्यादामार्गे संन्यासस्यावश्यकत्वबोधनाय चेदं सूत्रमित्यर्थः। अत्रैव किञ्चिदाशङ्क्य परिहरन्ति नन्वेवमित्यादि। एवमिति। ज्ञानस्य केवलस्य कारणत्वे। तथाच मर्यादामार्गे प्रतिबन्धनिवृत्तेरावश्यकतया श्रुतौ सन्न्यासस्य सत्त्वशोधकत्वकथनेन ज्ञानस्वरूपोपकारकत्वेपि फलानुभवप्रतिबन्धनिवारकत्वात् तत्राप्यपेक्षासत्त्वेन न वैयर्थ्यमित्यर्थः। क्वचित् व्यभिचारदर्शनेनावश्यकत्वशङ्का स्यादिति तन्निवृत्त्यर्थमाहुः पुष्टीत्यादि। तथाच मार्गभेदान्न दोष इत्यर्थः। एवमेतैश्चतुर्भिः सूत्रैराग्रहवादनिराकरणेन विद्यायाः स्वातन्त्र्येण मोक्षसाधकत्वं दृढीकृतम्।

रश्मिः।

सङ्गतम्। भेदास्तु विवेच्याः। ज्ञानस्वरूपमित्यादीति। शब्दे हीत्यस्य व्याख्यानं तत्र त्विति। प्राप्तृविशेषणतामिति। विद्वान् प्राप्ता प्रथमश्रुतौ, ब्रह्मवित्प्राप्ता, विदुरिति यच्छब्दार्थनिष्ठो वेदनानुकूलो व्यापार इति वेदनानुकूलव्यापारवान् यच्छब्दार्थ इति प्राप्तृविशेषणता। वदन्तीति। विद्वानित्यादौ ह्येकार्थीभावेपि विग्रहदशायां वदन्ती। ननु विग्रहदशा न श्रुतिघटिकेति चेत्। न। व्यपेक्षायाः संहितापदक्रमेषु सत्त्वात्। तद्विरोधादिति। कर्मव्यवहितत्वेन साक्षात्कारणताबोधनविरोधात्। तथा चेति संन्यासाश्रमीणेतिभाष्यमपि विवृण्वन्ति स्म संन्यासेत्यादि। संन्यासाश्रमीणकर्माणि शौचाचमनस्नानाष्टग्रासभक्षणयोगाभ्यासादीनि। तानीच्छाद्वारा ज्ञानकार्याणि जानातीच्छति यतत इति ज्ञानस्य कर्मशेषत्वम्। सूत्रमिति। एक इत्यनुवर्तते। ऊर्ध्वरेतस्सु च शब्दे श्रुतिरूपे तु एके संन्यासाश्रमीणकर्मशेषत्वं पठन्तीति सूत्रार्थः। भाष्ये आर्थिकार्थः। प्रतिबन्धेति। पापं प्रतिबन्धः। फलानुभवेति। प्रतिबन्धः कः, भक्त्यभावः, भक्तौ प्रतिबन्धः पापम्। मर्यादाभक्तिव्यवस्थेयम्। पुष्टिव्यवस्थात्रैवाग्रे वाच्या। अपेक्षेति। संन्यासापेक्षासत्त्वेन। भाष्ये। ब्रह्मवित् संन्यास्यपि। संस्कार इति। शुद्धसत्त्वरूपः। प्रकृते। क्वचिदिति। संन्यासवति ज्ञानाभाववति। यथा व्रजभक्तेषु। 'संन्यस्य सर्वविषयांस्तव पादमूल'मिति 'ते नाधीतश्रुतिगणा नोपासितमहत्तमाः। अव-

मार्गे। पुष्टिमार्गे त्वन्यैव व्यवस्था। 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति वाक्यात् ॥ १७ ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

ऊर्ध्वरेतस्सु च ज्ञानोक्तेस्तस्य मुक्तिफलकत्वोक्तेः 'किं प्रजया करिष्यामो

भाष्यप्रकाशः।

अन्ये तु, 'त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति, प्रथमस्तप एव, द्वितीयो ब्रह्मचार्याचार्यकुलवासी, तृतीयो योऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्, सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेती'ति छान्दोग्यश्रुतिम्, 'ये चेमेऽरण्ये श्रद्धातप इत्युपासत' इति पञ्चाग्निविद्याश्रुतिम्, 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती'ति काण्वश्रुतिं चोपन्यस्य एतेषु शब्देषूर्ध्वरेतसामाश्रमाणां कथनात्तेषां चाग्निहोत्रादिकर्मासम्भवाच्च विद्यायाः कर्माङ्गत्वमिति व्याकुर्वन्ति ॥ १७ ॥

परामर्ष[1] जैमिनिरचोदना चापवदति हि ॥ १८ ॥ अत्रान्ये पूर्वोक्ता एव श्रुतीरुपन्यस्य एतेषु शब्देष्वाश्रमान्तराणां परामर्शं अनुवादं जैमिनिराचार्यो मन्यते, न विधिम्। अत्र लिङाद्यन्यतमस्य चोदनाशब्दस्याभावात्, अर्थान्तरपरत्वस्यैतेषु शब्देषु प्रत्येकमुपलम्भाच्च। 'त्रयो धर्मस्कन्धा' इत्यत्र त्रयाणां परामर्शपूर्वकपुण्यलोकप्राप्तिरूपमनात्यन्तिकं फलं सङ्कीर्त्य ब्रह्मसंस्थस्यामृतफलतायाः कथनेन, पञ्चाग्निविद्यास्थद्वितीयश्रुतौ च देवयानोपदेशप्रत्ययेनाश्रमा-

रश्मिः।

तातसतपसः [2]सत्सङ्गान्मामुपागताः' इति वाक्याभ्याम्। ज्ञानस्य व्यभिचारदर्शनेन ज्ञानस्यानावश्यकत्वशङ्का मोक्षं प्रति स्यात्। धर्मस्कन्धाः धर्मशाखाः धर्मांशाः। यज्ञादिपदानि तद्वति लाक्षणिकानीत्याहुः **प्रथम इति**। प्रथमो यज्ञस्कन्धः ते विद्वांस एव यज्ञवत्त्वात्। द्वितीयोध्ययनवान्। तृतीयो दानवान्। भोजनदानवान्। **पुण्यलोका इति**। पुण्या लोका येषाम्। **ब्रह्मसंस्थ इति**। ब्रह्मणि संस्था भक्तिर्यस्येति तथोक्तः। 'तत्संस्थस्यामृतत्वोपदेशा'दिति शाण्डिल्यसूत्रात्। ब्रह्मसंस्थो गृहस्थः पत्न्यादिसाहाय्यात्। 'ये च इमे अरण्य' इति वानप्रस्थाः। प्रव्राजिनः संन्यासिनः। **ऊर्ध्वरेतसामिति**। पारिभाषिकब्रह्मचर्यादाश्रमिणोरूर्ध्वरेतस्त्वम्। यद्वा। गौण ऊर्ध्वरेतस्त्वम्। **अग्निहोत्रादीति**। गृहस्थधर्मोऽग्निहोत्रम्। आदिना वन्यपुरोडाशयागो वानप्रस्थधर्मः। यतिधर्मश्च **न विद्याया इति**। किन्तु कर्मणां विद्याङ्गत्वम्। बहुधेत्युक्ते प्रकाशे उपयुज्यत इति न दूषणम् ॥ १७ ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥ मृश तितिक्षायामितिवत् मृष तितिक्षायामित्यपीति मूर्धन्यान्तं पदं परामर्षमिति। यथालिखितपाठकस्याधमत्वेन तालव्यान्तं पाठकाले कुर्यात्। भाष्ये तु तालव्यान्तम्। **एतेष्विति**। एत्युपासते प्रव्रजन्तीत्येतेषु। **न विधिमिति**। त्रिषु लेडाश्रयणे न विधिः प्राप्तः। सूत्रे **अचोदना** नाम चोदनाभावः। नञः पञ्चम्या लुक्, चोदनाभावात्, इत्यर्थमाहुः **अत्रेति**। **लिङादीति**। लिङ् लेट् लोट् तव्यानामन्यतमस्य। चोदनावाचकशब्दश्चोदनाशब्दस्तस्य। **अर्थान्तरेति**। वर्तमानार्थपरत्वस्य। **अनात्यन्तिकमिति**। क्षयिष्णु। न आत्यन्तिकं मोक्षरूपं तद्भिन्नम्। **ब्रह्मसंस्थस्येति**। व्याख्यातोऽयंशब्दः। **देवयानेति**। देवयानपथ्युपदेशज्ञानेन। 'ये चेमेऽरण्ये श्रद्धातप इत्युपासते, तेऽर्चिषमभिसंभवन्ती'ति श्रुतेः। **आश्रमान्तरस्येति**। 'योषा वाव गौतमाग्निः तस्या उपस्थ एव समि'दित्यादिश्रुत्या गृहस्थाश्र-

---

[1] श्रीहस्ताक्षरेषु परामर्षमिति। [2] मत्सङ्गात्।

येषां नोऽयमात्मा नायं लोक' इत्यादिश्रुतेश्च ब्रह्मप्राप्तावेव सर्वस्याः श्रुतेस्तात्पर्यमिति सिध्यति, तस्या एव सर्वक्लेशापायपूर्वकपरमानन्दरूपत्वात्, न तु कर्मणि, दुःखात्मकसंसारहेतुत्वात् तस्य । जीवश्रेयोनिमित्तमेव श्रुतिप्राकट्यात् । अन्यथा निषेधविधिर्न स्यात् । तथाच कर्मविधिनापि परम्परामोक्ष एव फलत्वेन परामृश्यत इति सिद्धम् । तं परामर्शं कर्मस्वातन्त्र्यवादी जैमिनिरपवदति बाधत इत्यर्थः । मोहकशास्त्रप्रवर्तकः स इतीश्वरमेव न मनुते यतः, अतस्तत्प्राप्तिस्तस्य मते दूरापास्ता । कर्मानधिकारिणामन्धादीनां संन्यासविधिविषयत्वम् । अन्यथा

भाष्यप्रकाशः ।

न्तरस्य सन्दिग्धतया तृतीयस्यां काण्वश्रुतौ च लोकपदतो लोकसंस्तवप्रतीत्या च तथावसायात् । अपि चापवदति । 'वीरहा वा एष देवानामि'ति, 'आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी' रिति, 'नापुत्रस्य लोकोऽस्ती'ति प्रत्यक्षा श्रुतिरेवाश्रमान्तरमपवदतीति व्याख्याय 'ब्रह्मचर्यादेव प्रव्रजे'दिति जाबालश्रुतिमनपेक्ष्यायं विचार इत्याहुः ।

तत्र जाबालश्रुत्यनपेक्षायां बीजं नोपलभ्यते । परामर्शशब्दश्च ग्रहणे प्रसिद्धः, न त्वनुवाद इत्यतो न सूत्रे तदुक्तोऽर्थोऽभिप्रेतः, किन्तु पूर्वोक्तमेव सिद्धान्तं स्थूणाखननवत् दृढीकर्तुं पुनर्जैमिनिमतमुत्थापयतीत्याशयेन पूर्वसिद्धमनुवदन्तः सूत्रं व्याकुर्वन्ति ऊर्ध्वेत्यादि । तस्येति । ज्ञानस्य । इत्यादिश्रुतेश्चेति । 'नापुत्रस्य लोकोऽस्ती'त्यादिश्रुतिविरुद्धायाः 'किं प्रजया करिष्यामः, न कर्मणा न प्रजये'त्यादिश्रुतेश्च । तस्या इति । ब्रह्मप्राप्तेः । न तु कर्मणीति । कर्मकरणे तु न तात्पर्यम् । तस्येति । कर्मणः । तथाच कर्मविधिनापि 'तमेतं वेदानुवचनेने'ति श्रुत्यादिभिर्ज्ञानजननद्वारा कर्मणां फलत्वेन मोक्ष एव तात्पर्यगोचरीक्रियते इति श्रुतिसन्दर्भविचारात् सिद्धम् । तमेतं परामर्शं निश्चयं कर्मस्वातन्त्र्यवादी जैमिनिर्बाधत इति सूत्रभागस्यार्थो युक्त इत्यर्थः । पुनर्जैमिनिपदकथनतात्पर्यमत्राहुः मोहकेत्यादि । तदुक्तं पाद्मोत्तरखण्डे मोहक-

रश्मिः ।

मादन्याश्रमस्य वानप्रस्थस्य । लोकेति । प्रव्राजिनां क्षयिष्णुलोकासम्भवाल्लोकस्य संस्तवः एतादृशो लोको यः प्रव्राजिनां फलमिति । एवं लोकसंस्तवप्रतीतिस्तया । तथेति । अर्थान्तरपरत्वावसायात् । एष इति । आश्रमान्तरस्थः । आश्रमान्तरमिति । गृहस्थाश्रमादन्यमाश्रमम् । पूर्वोक्तमेवेति । ज्ञाननिरपेक्षं मोक्षरूपम् । एवकारो जैमिनिमतीयं कर्मण एव मोक्ष इति पक्षयोगं व्यवच्छिनत्ति । स्थूणेति । 'असन्दिग्धो हि वेदार्थः स्थूणाखननवन्मत' इति जिज्ञासाधिकरण एवोक्तम् । भाष्ये । जीवश्रेय इत्यादि । जिज्ञासाधिकरण उक्तम् । निषेधेति । 'न कलञ्जं भक्षयेत्', 'नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचने'ति निषेधविधी । यथा विधयः प्रेरणामभिदधतः स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेः श्रेयःसाधनतामाक्षिपन्तः पुरुषं तत्र प्रवर्तयन्ति । एवं 'न कलञ्जं भक्षये'दित्यादयो निषेधा अपि निवर्तनामभिदधतः स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य कलञ्जभक्षणादेरनर्थहेतुत्वमाक्षिपन्तः पुरुषं ततो निवर्तयन्तीति । अन्यत् मीमांसार्थप्रदीपे स्पष्टम् । प्रकृते । तथा चेति भाष्यं विवृण्वन्ति स्म तथा च कर्मेति । श्रुत्यादिभिरिति । आदिना 'ज्ञानी त्वात्मैव मे मत' इति गीता, 'कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारण'मिति श्रीभागवतं च । तमिति भाष्यं विवृण्वन्ति स्म तमेतमिति । निश्चयमिति । ज्ञानग्रहणम् । पूर्वं परामर्शो ग्रहण-

'वीरहा वा एष देवानां योऽग्निमुद्वासयत' इति श्रुतिर्न स्यात्, अतो 'ब्रह्मचर्यं समाप्य गृही भवेत्, गृहाद्वनी भूत्वा प्रव्रजेत्, यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वनाद्वे'तिश्रुतेरप्यङ्गहीन एव स विषयः, यत आयुर्भागविभागेनाश्रमाणां विधानम् । तुरीये तस्मिन् देहेन्द्रियादिवैकल्यं नियतम्, अतः कर्मण्येव श्रुतेस्तात्पर्यम् । अपिच, ज्ञानकर्मणोरलौकिकफलसाधकत्वे तत्त्वेन विहितत्वमेव प्रयोजकम् । अपरोक्षब्रह्मज्ञानं च न विधेयम् । साक्षात्स्वकृत्यसाध्यत्वात् । चोदनाबोधकलिङ्गाद्यभावाच्च ज्ञानस्य न मुक्तिसाधकत्वं वक्तुं शक्यम् । 'य एनं विदु'रित्यादिस्तु यागेष्विज्यविष्णुस्तुतिपरेत्याशयेनाह अचोदना चेति । जैमिनिवत्तत्सहायभूतेयमचोदना च परामर्शमपवदतीति सम्बन्धः । तथाच विधिसम्बन्धात् कर्मैवानुष्ठेयम्, न तु मुक्तिसाधनमपि, अतथात्वादिति स्थितम् ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

बादरायण आचार्यो जैमिनेरपि गुरुस्तदेव कर्तव्यमिति शिष्यसंमतमनुष्ठेयं कर्मापवदतीति पूर्वेण सम्बन्धः । तत्र हेतुः । साम्यश्रुतेः । यथा 'वीरहा वा एष देवाना'मिति श्रुत्या कर्मत्यागकर्तुर्निन्दा श्रूयते, एवमेव भगवज्ज्ञानरहितस्यापि सा श्रूयते यतः । तथाहि । 'असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्यापि गच्छन्त्यविद्वांसोऽबुधा जनाः ।' एतदग्रे च, 'ये तद्विदु-

---

भाष्यप्रकाशः ।

शास्त्रकथनप्रस्तावे 'द्विजन्मना जैमिनिना पूर्वं वेदमयार्थतः । निरीश्वरेण वादेन कृतं शास्त्रं महत्तर'मिति । पराशरोपपुराणेपि 'अक्षपादप्रणीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोंऽशः श्रुत्येकशरणैर्नृभिः । जैमिनीये चे'त्युक्तम् । तन्मतेन सन्यासविधितात्पर्यमाहुः कर्मेत्यादि । अङ्गहीन एव स इति । अङ्गहीनः पुरुषः । अत्र गमकं यत इत्यादिनोच्यते । तदुपपादनं तुरीय इत्यादिना । एतेन सिद्धमाहुः अत इत्यादि । अचोदनेत्याद्यंशमवतारयन्ति अपि चेत्यादि । शेषं स्फुटम् ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥ पूर्वसूत्रे जैमिनिमतमनूद्येदानीं तत्परिहरतीत्याशयेन सूत्रं व्याकुर्वन्ति बादरायण इत्यादि । 'असुर्या' इति मन्त्रे 'अविद्वांस' इत्यनेन कर्माङ्गभूतविद्वद्वाक्योक्तज्ञानशून्या एव निन्द्यन्त इति शङ्कानिरासायाहुः एतदग्र इत्यादि । श्रुती तु बृहदारण्यके शारीरब्राह्मणस्थे । तथाच यथा कर्माकरणनिन्दया कर्मनित्यत्वम्, तथा अविद्वन्निन्दया ब्रह्मज्ञाननित्यत्वं प्राप्यते, अतो निन्दामात्रेण कृत्वा कर्मकरणे श्रुतितात्पर्यसाधनमयु-

रश्मिः ।

मित्युक्तत्वात् । पुनरिति । शेषत्वादितिसूत्रीयजैमिनिशब्देनैव चारितार्थ्ये पुनरित्यर्थः । जैमिनीये चेति । 'जैमिनीये च वैयासे न विरोधोऽस्ति कश्चने'ति । अपि चेत्यादिनेति । तत्त्वेनेति । अलौकिकफलसाधकत्वेन । तत्सहायेति । जैमिनिमतसहायभूता । परामर्शं ज्ञानपरामर्शम् । अतथात्वादिति । विधिसम्बन्धाभावात् ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥ तथोक्तमिति । आपाततो नाम

रमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ती'त्यादिरूपा । एतच्च निन्दामात्रेण साम्यमुक्तमापाततः । वस्तुतस्तु 'तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येनमेव प्रव्राजिनो लोकमीप्सन्तः[1] प्रव्रजन्ती'ति श्रुत्या ज्ञानसाधनत्वेनैवाश्रमकर्मकरणोक्तेश्च न स्वातन्त्र्यं कर्मणो वक्तुं शक्यम् । अत एव शुकस्य न ब्रह्मचर्यादिकमपि । फलस्य जातत्वेन तत्साधनानपेक्षणात् । नच स्वर्गकामपदश्रवणान्नैवमिति वाच्यम् । त्वदभिमतलोकात्मकस्वर्गे 'यन्न दुःखेन सम्भिन्न'मिति वाक्यशेषोक्तस्वर्गपदप्रवृत्तिनिमित्तधर्माभावादात्मसुखस्यैव तादृशत्वात्तस्यैव तत्रोक्तेः । एवं सति 'तमेतं वेदानुवचनेने'तिश्रुत्येकवाक्यता[2]पि सम्पद्यते । अन्यथा तु विरोध एव ।

भाष्यप्रकाशः ।

क्तमित्यर्थः । ननु साम्यश्रुत्या ज्ञानस्याप्यावश्यकत्वं प्राप्यते, न तु कर्मापवादः, तथा सति विद्वद्वाक्योक्तज्ञानवद्वेदान्तोक्तब्रह्मज्ञानस्यापि कर्माङ्गत्वमवर्जनीयमित्याशङ्क्य तन्निवारणायाहुः एतदित्यादि । उक्तमापातत इति । भगवता व्यासेन तथोक्तम् । तथोक्तौ गमकमाहुः वस्तुत इत्यादि । न ब्रह्मचर्यादिकमिति । उपनयनाभावादाश्रमरूपं तन्न । तथाच श्रुत्यर्थसन्देहवारणायाचार्यस्य प्रवृत्तत्वादुक्तश्रुतिदर्शनेपि यदेवं निन्दामात्रेण साम्यकथनं तदापातत एव । नचोक्तश्रुतिदर्शनेपि साम्यकथनात् कर्मणां मुख्यत्वमेवाभिप्रेतमिति शङ्क्यम् । शुकादिषु तथा दर्शनस्य विरोधप्रसङ्गात् । नच तत्तद्वाक्येषु स्वर्गकामादिपदश्रवणाज्ज्ञानसाधनत्वोक्तेश्च भिन्नवाक्यगोचर-

रश्मिः ।

वितण्डयोक्तम् । **तथोक्ताविति** । आपतत उक्तौ । **वस्तुत इत्यादीति** । **ज्ञानसाधनत्वेनेति** । विविदिषन्तीत्यत्र रामानुजाचार्यैः सनर्थाविवक्षणात् । भाष्येण स्वमतेपि तत् सूच्यते, अन्यथा ज्ञानेच्छासाधनत्वेनेत्युक्तं स्यात् । ज्ञानपदं ज्ञानेच्छायां लाक्षणिकं वा । 'वेदोऽक्षरमात्रमपि नान्यथा वदती'ति भाष्यात् । **आश्रमेति** । ब्रह्मचर्यं प्रथमाश्रमीणस्य, तपस्तृतीयाश्रमीणस्य, श्रद्धा तुरीयाश्रमीणस्य । 'विरहानुभवार्थं तु सर्वत्यागः प्रशस्यत' इति संन्यासनिर्णयवाक्यात् । यज्ञो गृहस्थस्येति तथा । चकार आपाततः साम्यहेतोरुक्तस्य समुच्चायकः । **न स्वातन्त्र्यमिति** । फलजनने ज्ञानस्य कर्मापेक्षत्वेन स्वातन्त्र्यं ज्ञानवत् स्वातन्त्र्यम् । **उक्तश्रुतीति** । 'वीरहा वा एष' इति श्रुतिदर्शने । दूषणरहितश्रुतिदर्शने । स्वपक्षदोषमनुद्धार्य परपक्षदोषाविष्करणस्य वितण्डात्वात् । फलस्येति भाष्यं विवरीतुमाहुः **न चोक्तेति** । **साम्येति** । न तु स्वपक्षदोषोद्धारपूर्वकपरपक्षदोषाविष्करणात् । **मुख्यत्वमिति** । प्रथमशास्त्रत्वात् । ज्ञानवत् फलजनने स्वातन्त्र्यम् । विवृण्वन्ति स्म **शुकादिष्विति** । **तथा दर्शनस्येति** । अखण्डब्रह्मज्ञानरूपफलस्य जातत्वेनाखण्डब्रह्मज्ञानसाधनकर्मानपेक्षत्वदर्शनस्य । अपेक्षत्वमपेक्षणम् । कर्मणां मुख्यत्वे ज्ञानवत् तत्सहकृतं दर्शपूर्णमासयोर्ब्रह्मार्त्विज्यं श्रुतं स्यात्, कर्मणां मुख्यत्वात् । फलजनने ज्ञानवत् स्वातन्त्र्यात् । अतो विरोधस्यैकाङ्गसहानवस्थानस्य प्रसङ्गात् । न चेतिभाष्यं विवृण्वन्ति स्म न चेति । उपलक्षणविधया स्वर्गकामपदव्याख्यानं **स्वर्गकामादीति** । तेन स्वर्गकामश्च स्वर्गकामश्च स्वर्गकामौ आदी यस्य वृष्टिकामपदस्य तत् स्वर्गकामादिपदं तस्य श्रवणादित्यर्थः । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'विश्वजिता यजेत' 'चित्रया यजेत वृष्टिकामः' इति । ज्ञानसाधनत्वोक्तिः 'तमेत'मिति श्रुतौ तस्याः । ताभ्यां हेतुभ्यां ज्ञानकर्मणोर्भिन्नवाक्य-

---

[1] लोकममीप्सन्तः । [2] अपि नास्ति ।

ननु दृष्टफलका अपि कारीरीचित्रादियागाः श्रूयन्त इति नैवं निर्णय इति चेत्। उच्यते। नित्यकर्मणो हि ज्ञानसाधनत्वमुच्यते। व्रीहिपश्वादीनां तन्निर्वा-

भाष्यप्रकाशः।

त्वेन दुर्बलत्वान्नोक्तं साधीय इति शङ्क्यम्। स्वर्गकामपदावयवभूतस्वर्गपदस्यात्मसुखे लोके च शक्तेः किमत्राभिप्रेतमिति सन्देहे प्रसिद्ध्यपेक्षया वाक्यशेषस्य बलिष्ठत्वात् त्वदभिमतस्य वाक्यशेषेऽनुपपत्तावात्मसुखस्यैव वाक्यशेषे सिद्धेस्तदभिप्रायेणैव तेषु वाक्येषु स्वर्गकामपदस्योक्तेः। नचात्र किं गमकमिति शङ्क्यम्। एवमात्मसुखस्य तत्रोक्तत्वे सति तस्यात्मज्ञानसापेक्षतयोक्तश्रुत्येकवाक्यता सिध्येत्, अन्यथा तु विरोध एव। स च सम्भवत्येकवाक्यत्वेऽयुक्त इति सर्वसामञ्जस्यस्यैव गमकत्वात्। अतो वाक्यशेषोक्तमेवाङ्गीकार्यमित्यर्थः।

अत्र किञ्चिदाशङ्कते नन्वित्यादि। तथाच श्रुत्यन्तरे तथादर्शनात् स्वर्गपदस्य प्रसिद्धार्थाङ्गीकार एव युक्तः, न तु वाक्यशेषोक्तार्थाङ्गीकारः। तथा सति 'सुवर्गाय वा एतानि लोकाय हूयन्त' इत्यादिकं युज्येत। अन्यथा तद्विरोधापत्तेरित्यर्थः।

अत्राभिदधते नित्येत्यादि। उक्तश्रुतौ हि नित्यस्य कर्मणस्तथात्वमुच्यते। नित्यं च कर्म तदैव साङ्गं भवति, यदा शुद्धैर्द्रव्यादिभिरुपसम्पद्यते। अन्यथा 'चाण्डालो जायते यज्ञकरणा-

रश्मिः।

गोचरत्वेन तादृशविरोधस्यैकाङ्गसहानवस्थानरूपस्य दुर्बलत्वादित्यर्थः। नोक्तमिति। एकवाक्यानुक्तत्वेन कर्मणाममुख्यत्वम्। शङ्क्यमिति। तेन भाष्ये वाच्यमित्यत्र तर्कवाग्विवक्षा बोध्या। त्वदभिमतेति भाष्यं विवृण्वन्ति स्म स्वर्गकामपदेति। वाक्यशेषस्येति। 'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पद'मिति वाक्यशेषस्य। अभीति। ज्ञानप्रकरणात् त्वदभिमतस्येत्यपि। प्रसिद्ध्याभिमतस्य। एवकारेण लोकव्यवच्छेदः। तदभीति। आत्मसुखाभिप्रायेणैव। ज्ञानप्रकरणादेवकारः। तेष्विति। स्वर्गविषयेषु कामेषु सत्सु। सति ससम्यन्तम्। एवं सतीति भाष्यं विवरीतुमाहुः न चात्रेति। विवृण्वन्ति स्म एवमात्मेति। तत्रेति। वाक्यशेषे। तस्यात्मेति। आत्मसुखस्य स्वानुभवात्मज्ञानसापेक्षतया। उक्तेति। भाष्योक्त'तमेतं वेदानुवचनेने'ति श्रुत्येकवाक्यता। सा चेत्थम्। स्वर्गपदघटितवाक्ये आत्मसुखं स्वर्गपदेन ज्ञानप्रकरणात्, तत्र वेदानुवचनं साधनम्, न तु ज्ञानवत् फलजनने स्वतन्त्रमिति। एवं सिध्येदित्यर्थः। अन्यथेति। उभयसमुच्चये तु शुकादिषु कर्माभावात् सहानवस्थानविरोध एव। सर्वेति। अधिकारानुसारेण श्रुतिसामञ्जस्यं जिज्ञासासूत्रभाष्योक्ते ज्ञानकर्मणोः परस्पराङ्गाङ्गित्वे, श्रुत्योर्विरोधे विकल्प इति मनुस्मृते च सामञ्जस्यम्। तस्येत्यर्थः। अत इति। गमकसत्त्वात् ज्ञानप्रकरणाच्च, आभ्याम्। नन्वित्यादीति। कारीरीति। 'कारीर्या यजेत वृष्टिकामः' 'चित्रया यजेत वृष्टिकामः' इति श्रुती। आदिना 'विश्वजिता यजेते'ति। अत्र स्वर्गः फलम्। 'स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वा'दिति जैमिनिसूत्रात्। फलं स स्वर्गः स्यादिति विधेयलिङ्गम्। सर्वान् यागान् प्रति। अविशिष्टत्वाद्धिति सूत्रार्थः। नैवमिति। न वाक्यशेषेण निर्णयः, प्रसिद्धिप्रायपाठाभ्यां प्रसिद्ध्या निर्णयः। श्रुत्यन्तरेणेति। प्रायपाठावेदककारीर्यादिश्रुत्यन्तरेण। तथेति। दृष्टफलत्वस्य फले दर्शनात्। [1]युज्यत इति। लोकपदघटिता युज्यते। तद्विरोधेति। लोकपदविरोधापत्तेः। अभिदधत इति। सिद्धान्तमभिदधते। उक्तेति। 'तमेतं वेदानुवचनेने'ति श्रुतौ। कर्मण इति साङ्गस्य। निबन्धेपि 'यथा कथञ्चिन्नित्यस्य सिद्धिर्वेदेन बोध्यते'

---

१. प्रकाशे युज्येत, रश्मौ युज्यते।

हकत्वात्तच्छेषत्वेन तेषां विधानम् । एवं सति 'वीरहे'ति श्रुतिः साग्निकस्य गृहिण आलस्यादिदोषेण तदुद्वासने दोषमाह, न त्वाश्रमान्तरपरिग्रह इति मन्तव्यम् । अन्यथा तदुच्छेदस्तद्विधिवैयर्थ्यं च स्यात् । नचानधिकृतमादाय तत्समाहिति-रिति वाच्यम् । अत्र पृच्छामः । अन्धपङ्ग्वादिभिः प्रव्रजनं कार्यमिति विधिरस्ति, आहोस्वित् यावज्जीवमग्निहोत्रविधायकप्रव्रजनविधायकवाक्ययोर्विरोधाभावाय विषयो भिन्नः कल्प्यते । नाद्यः । अश्रुतेः । न द्वितीयः । 'यदहरेव विरजे'-दिति श्रुत्या वैराग्यवतः प्रव्रजनविधानात्तेनैव विषयभेदसिद्धौ तत्कल्पनानवका-

भाष्यप्रकाशः ।

च्छूद्रभिक्षिता'दित्यादिनिन्दावाक्यानि न स्युः । अतस्तादृशद्रव्याद्यर्थं चित्रादियागानां नित्य-शेषतया विधानम् । एवमेकफलकेषु नानायागेष्वपि कश्चिदभिप्रायोऽस्तीत्यवगन्तव्यम् । अन्यथा तद्वैयर्थ्यापत्तेः । एवमतिविमुखस्य सन्मार्गश्रद्धाजननार्थं दृष्टफलाः कारीर्यादयो विधीयन्ते । इदमप्यश्वमूत्रणादिनिदर्शनादवगम्यते । एवं सति काम्यैस्तत्तद्यागैः समीचीनादृष्ट उत्पन्ने तदि-च्छपरैरुपकरणैर्यदा साङ्गनित्यकर्मसिद्धिः, तदा ज्ञानं भवति । तेन चात्मसुखम् । लोकस्त्वङ्गवा-क्येषु फलतयोच्यते । यदि प्राचीनदुरदृष्टवशात् यष्टुर्लोककामना भवति, तदा साङ्गात् कर्मण-स्तद्भवतीति । अतो न तत्र तात्पर्यम्, किन्तु वाक्यशेषोक्त एवेति कर्मणां ज्ञान एव तात्पर्य-मित्यर्थः । ननु यदि ज्ञानमेव मुख्यम्, तदा त्यागावश्यकत्वे 'वीरहे'त्यादिनिन्दावाक्यविरोधो दुर्वार इत्यत आहुः एवं सतीत्यादि । ननु निन्दावचनद्वयाञ्जस्यार्थमधिकारिभेदकल्पनमाव-श्यकम्, तत्र 'वीरहे'त्यादिविषयसङ्कोचापेक्षया 'असूर्ये'त्यादिविषयसङ्कोच एव युक्तः, 'आज्य-मवेक्षते, विष्णुक्रमान् क्रामती'त्यादिस्वारस्यात् । तत्रानधिकारे तु कर्मानधिकारात्तत्र त्यागादि-विधिसार्थक्ये सर्वसामञ्जस्यादित्याशङ्क्य विकल्पपूर्वकं तत् परिहरन्ति नचानधिकृतेत्यादि । तत्समाहितिरिति । संन्यासोच्छेदतद्विधिवैयर्थ्ययोः समाधानम् । तथाच यदि प्रव्राजवाक्ये

रश्मिः ।

इति । तथात्वं ज्ञानसाधनत्वम् । शुद्धैर्वेदोक्तैः संस्कृतैः द्रव्यादिभिरित्यत्रादिना तपोयोगज्ञानानि गीतोक्तानि । शूद्रेति । शूद्रभिक्षितात् द्रव्यात् यज्ञकरणं तस्मात् । चण्डालो जन्मान्तरे जायते, फलस्योत्तरजन्मीनत्वात् । तद्भवतीति । स्वर्गलोकरूपं फलं भवतीति । तत्रेति । लोके । तात्पर्यशब्दाद-भिधास्ति । वाक्यशेषेति तात्पर्यमित्यनुषज्यते । कर्मणामित्यादि । 'तमेत'मिति श्रुतेरित्यर्थः । मुख्य-मिति । फलजनने स्वतन्त्रम्, न तु कर्म । वीरेति । गार्हस्थ्यबोधकमिदम् । परामर्शसूत्र उक्तम् । एवं सतीत्यादीति । तदुद्वासन इति । अभ्युद्वासने । आश्रमेति । आश्रमो गृहस्थाश्रमः । तदन्यश्चतुर्था-श्रमः तस्य परिग्रहे । अन्यथेति । आश्रमान्तरपरिग्रहे श्रुतेर्दोषबोधकत्वे । संन्यासोच्छेदः संन्यासविधेः 'यदहरेव विरजेत्, तदहरेव प्रव्रजे'दित्यस्य वैयर्थ्यं चेत्यर्थः । निन्देति । वचनद्वयेति । तत्तु 'वीरहे'ति 'असुर्या नाम ते लोका' इति च । वीरहेत्यादीति । अस्य विषयसङ्कोचः साग्निकस्य गृहिण आल-स्यादिदोषेणाभ्युद्वासने दोषमाह श्रुतिः, न त्वाश्रमान्तरपरिग्रह इति । तस्यापेक्षया । 'असुर्ये'त्यादि-विषयसङ्कोचमेवाहुः आज्यमवेति । इत्यादीति । 'यस्य पर्णमयी जुहूर्भवति, न स पाप९ श्लोक९ शृणोती'त्यादिपदार्थः । तेत्तत्त्यागादीति । अवेक्षणादित्यागः, आदिना संन्यासः । सर्वेति । वेदवेदान्तशास्त्रस्य सर्वशास्त्ररूपस्य सामञ्जस्यात् किं पुनस्तदन्तर्गतस्य निन्दाद्वयस्य । तदिति ।

---

१. तत्कथनानवकाशादिति रश्मिपाठः । २. प्रकाशे तत्र त्यागादीति, रश्मौ तत्तत्त्यागादीति ।

शात् । तेन 'नापुत्रस्य लोकोऽस्ती'ति श्रुतिरप्यविद्वद्विषयिणीति न विरोधः । 'विद्वांसः प्रजां न कामयन्त' इति श्रुतेः । एतेनर्णत्रयापाकरणमपि प्रत्युक्तं वेदितव्यम् । अविद्वद्विषयत्वात् । यदप्युक्तं 'अचोदना चे'ति सूत्रावयवेन 'चोदनाबोधकलिङ्गाद्यभावो बाधक' इति । तदपि न साधीयः । श्रुतिसाम्यादेव । श्रूयते हि 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्ये'दिति । न च प्रमाणवस्तुपरतन्त्रत्वान्न ज्ञानस्य विधेयतेति वाच्यम् । इतरज्ञानस्य तथात्वेपि जीवात्मलक्षणेऽधिष्ठाने परमात्मनो भगवतो दर्शनस्यान्यतोऽप्राप्तत्वाच्छ्रद्धान्तसाधनैस्तद्दर्शने स्वरूपयोग्यतासम्पत्तावात्मन्यधिष्ठाने परमात्मदर्शना-

---

भाष्यप्रकाशः ।

'विरजे'दित्यधिकारबोधकं पदं न भवेत्, तदा तथा कल्पयितुं शक्येतापि, न तु तत्सद्भाव इति तदप्रयोजकमित्यर्थः । श्रुत्यन्तरविरोधपरिहारायाहुः तेनेत्यादि । एतेनेति । 'विद्वांस' इति कथनेन ।

ननु साम्यश्रुतिरूपेण हेतुना भवतूक्तदोषपरिहारः, तथापि ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेन चोदनाविषयत्वाभावादचोदनाकृतापवादस्य कथं परिहार इत्यत आहुः यदपीत्यादि । तथाच चोदनाश्रुतिसाम्यात् तस्यापि परिहार इत्यर्थः । अत्र 'पश्ये'दित्यस्य प्रमाणान्तरजन्यदर्शनानुवादत्वमाशङ्क्य निषेधन्ति नचेत्यादि । तथाचात्र 'एवंवि'दित्यादिभिर्निर्विचिकित्सशाब्दज्ञानवत्त्वशमदमवैराग्यदुःखसहिष्णुत्वश्रद्धावित्तत्वपूर्वकं जीवात्माधिकरणकपरमात्मदर्शनप्रयत्नस्य प्रमाणान्तरेणाप्राप्तत्वात् तद्विधानस्य सुखेन सम्भवान्नानुवादत्वमित्यर्थः । ननु तथापि कर्मचोदनासु

रश्मिः ।

सर्वसामञ्जस्यम् । भाष्यीयविकल्पेन सह सिद्धान्तप्रघट्टकार्थमाहुः **तथा च यदीति** । **विरजेदिति** । इदं कामवतो भिन्नस्य वैराग्यवतोऽधिकारबोधकम् । **तथेति** । तदतिरिक्तो यावज्जीवमग्निहोत्रविधायकप्रव्रजनविधायकवाक्ययोर्विरोधाभावायान्धपंग्वादिभिः प्रव्रजनं कार्यमिति भिन्नविषय इत्यर्थः । **तत्सद्भाव इति** । **विरजेदिति** । वाक्ययोर्विरोधाभावसाधकपदसद्भावे । **तस्य** विरजेदिति पदस्य । अतिरिक्तं अन्धपंग्वादिभिः प्रव्रजनं कार्यमिति यत्तदप्रयोजकम् । तेन भाष्ये **तेनैवेत्यस्य** वैराग्येनैव । **विषयभेदेत्यादेः**गृहस्थतुरीयाश्रमभेदसिद्धौ अयं विषयो भिन्नः कल्प्यते इत्यस्य कथनानवकाशादित्यर्थः । **श्रुत्यन्तरेति** । 'नापुत्रस्य लोकोऽस्ती'त्यस्याः विरोधपरिहाराय । **तेनेत्यादीति** । **अविद्वदिति** । तेन संन्यासे पुत्राभावेपि लोकस्याक्षरात्मकस्य सिद्धिः विद्वदधिकारात् । **भाष्ये** । **ऋणत्रयेति** । देवर्णपित्रर्णमनुष्यर्णाः । 'ऋणत्रयमपाकृत्य मनो मोक्षे निवेशये'दिति तुरीयेर्णत्रयापाकरणाभावान्मोक्षानधिकारसम्पादकर्णत्रयापाकरणम् । **उक्तदोषेति** । 'वीरहा वा एष' इति श्रुत्युक्ताम्युद्वासनकृतनिन्दादोषपरिहारः । **प्रमाणान्तरेति** । प्रमाणं 'तस्मादेवंवित्', तदन्यत् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इति प्रमाणान्तरम्, तज्जन्यदर्शनानुवादत्वम् । **तथा चेति** । **भाष्ये** । भगवतो दर्शनस्येत्यस्यान्तर्यामिब्राह्मणोक्तदर्शनमात्रम्, न तूपासनम्, जीवे तन्निषेधात् । एवं तस्य दर्शनस्य विधिविषयत्वेनान्यतोऽप्राप्तत्वात् । 'आत्मा वा अरे द्रष्टव्य' इत्यत्रावश्यकार्थेष्वपि तव्यस्य सम्भवात् श्रद्धान्तसाधनैस्तद्दर्शने आत्मोपासनात्मके स्वरूपयोग्यतासम्पत्तौ दर्शनसाधनं तु भक्तिरेव ।

नुकूलप्रयत्नविधानसम्भवात्, श्रवणविधिना श्रुतिवाक्यजशाब्दज्ञानानुकूलप्रयत्नविधानवत् । एवमेव हि यागविधिनापि क्रियारूपयागस्य स्वानुकूलप्रयत्नाधीनत्वेन स प्रयत्न एव विधीयते । अन्याप्राप्तत्वात् । न तु क्रिया । तत्प्रयत्ने सति तस्याः स्वत एव सम्भवात् ।

अथवा । ननु यथा 'वीरहे'ति श्रुत्या कर्मत्यागो निन्द्यते, तथैव 'असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्यापि गच्छन्त्यविद्वांसोऽबुधा जनाः । ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ती'त्यादिश्रुत्या भगवज्ज्ञानाभावो निन्द्यते । एवं सति कर्मज्ञानानुकूलप्रयत्नयोर्विधेयत्वे मिथो विरोधादधिकारिभेदेन विधेयत्वं वाच्यम् । न च 'तावत् कर्माणि कुर्वीत न निर्विद्येत यावते'ति भगवद्वाक्याद्रागिणः कर्म विधीयते, तद्रहितस्य ज्ञानमिति वाच्यम् । 'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेज' इति श्रुतेर्नीरागत्वेन प्रसिद्धस्यापि तस्य कर्मणि प्रवृत्तिर्या, सा न स्यात्, अधिकाराभावात् । अथ जनकदृष्टान्तेन कर्मणोऽङ्गित्वं ज्ञानस्य तदङ्गत्वं वाच्यम् । तथा च ज्ञानवता कर्मानुष्ठेयमिति प्राप्तं प्रतिवदति । **अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥** ज्ञानमङ्गं तदङ्गित्वेनानुष्ठेयं कर्मेति मतं बादरायणोऽपवदतीति पूर्वेण सम्बन्धः । तत्र हेतुमाह **साम्यश्रुते-**

भाष्यप्रकाशः ।

कर्मण एव विधेयतेति तस्य फलवत्त्वमुचितम्, इह तु ज्ञानानुकूलप्रयत्नस्येति ज्ञानस्याविधेयत्वं दुर्वारमित्याशङ्कायां कर्मचोदनास्वप्येतत्तुल्यत्वं बोधयन्ति एवमेवेत्यादि । स इति । यागाभिव्यञ्जकः । न तु क्रियेति । 'यज्ञो वै विष्णुः' 'सुप्तं कर्म प्रबोधय'मित्यादिश्रुतिस्मृतिभिरलौकिकस्य कर्मणो नित्यत्वात् सा न विधेया । इदं यथा तथा समन्वयसूत्र एव व्युत्पादितं कारिकाभिः । भावार्थपादभाष्ये चाचार्यैः । तथा चोभयत्रापि तत्तदभिव्यञ्जकप्रयत्नस्यैव विधेयत्वात्तेनाभिव्यक्ताभ्यां ज्ञानकर्मभ्यां सुखेन फलसम्भवान्न कोपि दोष इत्यर्थः । अस्मिन् व्याख्याने ज्ञानाङ्गत्वेन कर्म कर्तव्यमिति सिद्धम् ।

इदमेव च 'विधिर्वा धारणव'दितिसूत्रे प्रतिपादनीयमित्येकतरवैयर्थ्यमापद्येतेत्यरुच्या प्रकारान्तरेण व्याकर्तुमवतारयन्ति अथवेत्यादि । मिथो विरोधादिति । कर्माङ्गस्य कामस्य ज्ञानाङ्गस्य शान्त्यादेश्चेतरेतरविरोधेन तयोर्विरोधात् । व्याकुर्वन्तो हेतुं विशदीकुर्वन्ति स्वत

रश्मिः ।

आत्मनीत्यादि । मनसि अधिष्ठाने परमात्मनो दर्शनमुपासनम्, **तदनुकूलप्रयत्नविधानसम्भवात्** । अनुभवातिरिक्तज्ञानं विधिविषयमपि 'तस्मादेव'मित्यत्रापूर्वविधिविघटकत्वाभाव इत्याशयेनाहुः **श्रवणविधिनेति** । अत्र **प्रयत्नः** पूर्वापरीभावापन्नो विधिपुरुषोभयनिष्ठः । तस्य विधानवदित्यर्थे चेत्यर्थः । **जीवात्माधीति** । जीव इव जीवः मनोऽधिष्ठानत्वात् । **दर्शनमुपासनम्** । **नानुवादत्वमिति** । 'तस्मादेवंवि'दित्यत्र 'पश्ये'दित्यस्य 'द्रष्टव्य' इति विधिदर्शनानुवादत्वम् । सिद्धत्वेनाविधेयत्वेन तस्याफलवत्त्वात् । **एतत्तुल्यत्वम्** । ज्ञानचोदनातुल्यत्वम् । **भाष्ये** । **भर्जनस्येवेति** । भर्जनस्य यथा नाङ्गता,

रिति । स्वतोऽपुरुषार्थं कर्म फलार्थिनैवानुष्ठेयम् । तथा च 'एष नित्यो महिमे'ति श्रुत्या ज्ञानवति विहितनिषिद्धयोः कर्मणोः फलाजनकत्वेन साम्यं श्रूयत इति फलार्थिप्रवृत्त्यसम्भवेन ज्ञानिनस्तथात्वाभावेन कर्मोच्छेदप्रसक्त्या न ज्ञानस्याङ्गत्वं वक्तुं शक्यम् । कृषीवलस्य व्रीहीणां वपने भर्जनस्येव । तथा च ज्ञानिनः प्रवृत्त्यसम्भवेनान्येषां च 'अथेतरे दुःखमेवोपयन्ती'ति निन्दाश्रवणेन तथात्वात् सर्वार्थतत्त्वज्ञा श्रुतिर्ज्ञानबहिर्भूतं कर्म कथं विदध्यादिति ज्ञानस्य पुरुषार्थासाधकत्वोक्तिमसहमानेनाचार्येण प्रौढ्या निरूपितम् ॥ १९ ॥

भाष्यप्रकाशः ।

इत्यादि । तथात्वाभावेनेति । कर्मकर्तृत्वाभावेन । ननु ज्ञानिप्रवृत्त्यभावेपि न कर्मोच्छेदः' फलार्थिनां प्रवृत्तेः सम्भवात् । न चासुर्यवाक्याभिवृत्तिः, तत्र 'अविद्वांस' इत्यनेन विद्वद्वाक्योक्तज्ञानशून्यनिन्दाया अपि शक्यवचनत्वादित्याशङ्कायां स्वोक्तं विभजन्ते तथा चेत्यादि । अन्येषामिति । ब्रह्मज्ञानशून्यानाम् । तथात्वादिति । कर्मकरणासम्भवात् । ज्ञानबहिर्भूतमिति । तत्सम्बन्धशून्यम् । एवं निरूपणस्य तात्पर्यमाहुर्ज्ञानस्येत्यादि ।

अन्ये तु, अनुष्ठेयमाश्रमान्तरम् । कुतः साम्यश्रुतेः । 'त्रयो धर्मस्कन्धा' इत्यादौ गार्हस्थ्येन सममेवाश्रमान्तरपरामर्शश्रुतिदर्शनादित्याद्याहुः ।

तत्तु जाबालश्रुतिचोदितत्वादेवाश्रमान्तराणां तद्विहायैवं व्याख्यानं न समञ्जसमिति प्रागेव दत्तोत्तरमित्यवधेयम् ॥ १९ ॥

रश्मिः ।

तथा ज्ञानस्य कर्मभर्जकस्य न कर्माङ्गतेत्यर्थः । 'ज्ञानभर्जितकर्माणम्' । प्रकृते विद्वद्वाक्येति । विद्वद्वाक्योक्तकर्मज्ञानशून्यनिन्दायाः, अपिना कर्मनिन्दायाः । स्वोक्तमिति । कर्मनिन्दनं विभजन्ते विशेषेण भजन्ते स्मरन्ति स्मेत्यर्थः । ज्ञानस्येत्यादीति । प्रौढ्येति । गौरवेण ज्ञानकाण्डत्वान्निरूपितम् । वस्तुतस्तु परस्परं ज्ञानकर्मणोरङ्गाङ्गिभावो वर्तते एव, 'तमेत'मिति 'यदेव विद्यये'ति श्रुतिभ्याम् । इत्यादीति । आदिना यथा शाखान्तरप्राप्तयोरेव निवीतप्राचीनावीतयोः परामर्श उपवीतविधिपरे वाक्ये तस्मात् तुल्यमनुष्ठेयत्वं गार्हस्थ्येनाश्रमान्तरस्येति भाष्यम् । तत्त्वित्यादि । तत्तु न समञ्जसमित्यन्वयः । किं तदित्यत आहुः आश्रमान्तराणामिति । ब्रह्मचर्यवानप्रस्थगृहस्थतुरीयाश्रमाणाम् । द्वयोराश्रमयोरन्येषाम् । द्वयप्रतियोगिको भेदः । तद्विहायानुष्ठेयत्वं विहाय । एवं गृहस्थतुरीयाश्रमपरव्याख्यानम् । एवं व्याख्यानं कस्मादसमञ्जसमित्यत आहुः जाबालचोदितत्वादेवेति । आश्रमाणां व्याख्यानस्येति बोध्यम् । ननु परामर्शसूत्रे'ऽत्रान्य' इति प्रक्रम्य 'ब्रह्मचर्यादेव प्रव्रजे'दिति जाबालश्रुतिमनपेक्ष्यायं विचार इत्याहुरित्युक्तेः कुतस्तदपेक्ष्यासामञ्जस्यदानमिति चेत्, तत्राहुः प्रागेवेत्यादि । परामर्शसूत्र एवासामञ्जस्यदानं दत्तोत्तरम् । तत्र 'जाबालश्रुत्यनपेक्षायां बीजं नोपलभ्यत' इत्यादिनेत्यवधेयम् ॥ १९ ॥

एवं सति पूर्वकाण्डवैयर्थ्यमापततीति तत्तात्पर्यमाह ।

विधिर्वा धारणवत् ॥ २० ॥

यथा योगशास्त्रे मनःसमाधेरेव साध्यत्वात् तत्साधनत्वेनैव मानस्याः मूर्तेर्धारणं विधीयते, न तु स्वतन्त्रतया फलसाधकत्वेन, मनःसमाधौ तत्त्यागात्, 'ततः किञ्चन न स्मरेत्', 'तत्रापि चित्तबडिशं शनकैर्वियुङ्क्ते' इत्यादिवाक्येभ्यस्तथा, तथा भक्तिसाधनत्वेनैवानुष्ठेयमिति तात्पर्येण कर्मविधिरुच्यते, न तु स्वतन्त्रतया फलसाधकत्वेन । ननु तत्र समाधिमधिकृत्य यमादीन्युक्तानीति तन्मध्यपातित्वेन धारणस्य तथात्वमुच्यते, प्रकृते ज्ञानं भक्तिं वाधिकृत्य न कर्म विहितमिति दृष्टान्तवैषम्यमिति चेत् । न । उक्तानुपपत्त्या स्वानिन्द्यमेव कर्म श्रुतिर्विदधातीत्यवश्यं वाच्यम् । निन्दायां चेतरपदाज्ज्ञानमध्यपातिन एव तद्विषयस्य प्राप्तेरावश्यकत्वात् । तथा च भगवज्ज्ञानस्येतरनिरपेक्षत्वेन स्वरूपो-

---

भाष्यप्रकाशः ।

विधिर्वा धारणवत् ॥ २० ॥ सूत्रमवतारयन्ति एवं सतीत्यादि । एवं सतीति । उक्तश्रुतिवेत्तुः कर्माकरणे प्राप्ते सति । व्याकुर्वन्ति यथेत्यादि । अत्र 'ततः किञ्चने'ति वाक्यमेकादशस्कन्धीयम् । द्वितीयं तृतीयस्कन्धीयम् । तथेति । त्याज्यत्वम् । तथा भक्तीत्यत्र भक्तिपदं ज्ञानस्याप्युपलक्षकम् । अत्र दृष्टान्तबलेन कर्मणोऽस्वातन्त्र्यसाधनमसहमानो दृष्टान्तवैषम्यमाशङ्कते नन्वित्यादि । वैषम्यं समादधते नेत्यादि । 'एष नित्य' इति श्रुतौ ज्ञानिनि कर्मणां फलाजनकत्वकथनात्तेषां कर्मण्यप्रवृत्त्या ज्ञाने कर्माङ्गतायामप्युक्तदोषतौल्येन उक्तश्रुतौ ब्रह्मज्ञानशून्यानां दुःखप्राप्तिकथनेन चान्येषामपि प्रवृत्त्यसम्भवे पूर्वकाण्डवैयर्थ्यप्रसक्तिरूपयानुपपत्त्या स्वानिन्द्यमेव कर्म पूर्वकाण्डीयश्रुतिर्विदधातीत्यवश्यं वाच्यम् । 'अथेतर' इत्यविद्वन्निन्दावाक्य 'इतर'पदात् ज्ञानशून्येषु निन्दितेषु ज्ञानवान् वा तद्योग्यो वा ज्ञानमार्गमध्यपात्येव कर्माधिकारी वाच्यः । तत्र जातज्ञानस्यापि 'न कर्मणे'त्युक्तश्रुत्या निवृत्तौ तद्योग्यस्यैव विषयत्वेन प्राप्तेरावश्यकत्वात् । तथा च काम्यानां कर्मणां मूढविश्वासजनकतया परम्परातः सार्थक्यम् । नित्यानां त्वात्मसुखफलकानां विद्यासाहाय्यमन्तरेण तादृशफलोपधायकत्वस्यादृष्टत्वाज्जनकादिष्वपि विद्यासाहाय्यस्यैव दर्शनात् केवलभगवज्ज्ञानस्य च शुकारुणिमरतादिषु फलोपधायकत्वदर्शनात्तस्येतर-

रश्मिः ।

विधिर्वा धारणवत् ॥२०॥ श्रुतीति । 'असुर्या नाम ते लोका' इति श्रुतिवेत्तुः, भाष्ये तत्तात्पर्यमिति । एकादशसप्तदशाध्याये युधिष्ठिरवाक्यम् । 'यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवे'दित्यादिवाक्यैस्तत्तात्पर्यं सर्वोत्तममार्गविषयमाह । प्रकृते । तृतीयेति । वृद्धत्वाभावाच्छप्रत्ययो मृग्यः । भाष्यं विवरीतुमाहुः एष नित्य इति । उक्तदोषेति । कर्मण्यप्रवृत्त्याख्यदोषतौल्येन । उक्तेति । 'ये तद्विदु'रिति श्रुतौ । अत्रान्येषामिति । कर्मकाण्डे कर्मठानां ज्ञानिभिन्नानामपि । विवृण्वन्ति स्म पूर्वकाण्डेति । विदधातीति । वाक्यं विदधाति । तेन 'ब्राह्मणो न हन्तव्य' इत्यत्र 'हन्तव्य' इति मात्रे निन्द्यविधानेपि न दोषः । वाक्यं त्वनिन्द्यकर्म विदधात्येव । निन्दायामिति भाष्यं विवृण्वन्ति स्म । तद्विषयस्येति भाष्यस्य 'ज्ञानाधिकारिणः' इत्यर्थात् तत्र निकल्पेपि ज्ञानयोग्यस्येत्याहुः तत्र जातेति । तथा चेति भाष्यं विवृण्वन्ति स्म, तथा चेति । जनकादिष्विति । आदिना ज्ञानिनः कर्मसिद्धाः श्रीभागवतप्रसिद्धाः यथा आविर्होत्रः । शुकेति । आरुणिरारुण्युपनिषदि । तस्येति ।

पकारित्वमस्य कर्मणो वाच्यम् । तथा चोक्तं दानव्रततपोहोमजपस्वाध्यायसंयमैः । श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते' इति । 'एष नित्यो महिमे'ति श्रुतिरपि यज्ज्ञाने सति विहितनिषिद्धकर्मफलासम्बन्धः 'तद्वित् स्या'दित्यनुक्त्वा 'तस्यैव पदवित् स्या'दिति यदुक्तवती, तेन पदयोर्भक्तिमार्गरूपत्वात् तत्र च पदयोरेव सेव्यत्वेन मुख्यत्वात्तज्ज्ञानानुकूलप्रयत्नमेव पूर्वं विदधे । तेन 'शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः । त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुज'मिति वाक्याच्च वर्णाश्रमधर्मा आत्मधर्माश्च पदज्ञानसाधनत्वेन कर्तव्या इति सिद्धम् । 'तस्यैव'

भाष्यप्रकाशः ।

निरपेक्षकत्वेन नित्यकर्मविधिवैयर्थ्यपरिहाराय 'तमेतं वेदानुवचनेने'त्यादितृतीयाश्रुत्या ज्ञानभक्ती प्रति स्वरूपोपकारित्वं नित्यस्य कर्मणो वाच्यमिति तात्पर्येण नित्यविधीनां तदुपयोगित्वेन काम्यविधीनां च सामञ्जस्यान्न पूर्वकाण्डवैयर्थ्यमित्यर्थः । ननु भवत्वेवं कर्मणां ज्ञानाङ्गत्वम्, तथापि भक्त्यङ्गत्वे किं मानम्? अत आहुः तथा चोक्तमित्यादि । ननु तथापि ह्यन्तरितत्वात् भक्त्यङ्गत्वापेक्षया ज्ञानाङ्गत्वमेव साधीय इति शङ्कायां भक्त्यङ्गत्वस्य श्रौतत्वं विशदयन्ति एष इत्यादि । सिद्धमाहुः तेनेत्यादि । उक्तेन स्वल्पोपपादनेनापरितुष्यन्तो विशेषतः श्रुत्यर्थं वदन्ति तस्यैवेत्यादि । सर्वत्रेति । पदविच्छब्देपि । पूर्वमिति । पूर्वार्धे । तथा च पूर्वोक्तं युक्तमित्यर्थः । वस्तुतस्तु, तेनेत्यादिसिद्धार्थकथनात् पूर्वस्तस्यैवेत्यादिग्रन्थो लेखकभ्रमात् पश्चात् पतित इति प्रतिभाति ।

रश्मिः ।

शुकादिज्ञानस्य । ज्ञानभक्ती इति । विविदिषन्तीत्यत्र विद् ज्ञाने, सन्निच्छायाम्, 'इच्छा प्रेमे'ति विश्वनाथमतं गौणं, 'नैवेच्छा तु साधारण्या'दिति शाण्डिल्यर्षिणा निषेधात्, अतश्चित्तशुद्धिद्वारा ज्ञानभक्ती प्रतीत्यर्थः । तदुपेति । ज्ञानोपयोगित्वेन । काम्यविधीनां च परम्परया ज्ञानोपयोगित्वेन । किमिति । ज्ञाने ज्ञानकाण्डोक्तवाक्यशक्तिः भक्तिकाण्डाभावात् किमिति प्रश्नः । तथा चोक्तमित्यादीति । 'विविध'पदेनान्यविशेषणेनापि 'ज्ञानी चेद्भजते कृष्ण'मिति वाक्येन कर्मणो ज्ञानभक्तिह्यन्तरितत्वात् । एष इत्यादीति । तस्यैवेत्यादि । यज्ज्ञाने सति विहितनिषिद्धकर्मफलासम्बन्धः । तस्यैव । पुष्टिस्थस्यैव । भक्तीति । 'भवत्पदाम्भोरुहनाव'मित्यत्र सुबोधिन्यामस्ति । तत्र चेति । प्रत्येकभक्तिमार्गे च । पदयोरिति । पादसेवनभक्तिरुक्ता ताभ्यामेव मुक्तिरिति । तज्ज्ञानेति । पदे वेत्तीति पदवित् । कर्तरि क्विप् । पदनिष्ठज्ञानानुकूलप्रयत्नवान् स्यादिति लिङा विदधे । उक्तप्रयत्नवत्त्वं प्रयत्न एव तम् । तद्दानानुकूलप्रयत्नमेवेति पाठे पादसेवनभक्तेर्जीवस्य पद्भ्यां सेवनमित्यपि तृतीयसुबोधिन्यामस्ति । तदा तेन पदयोरित्यादिभाष्यं न सम्भवति । अतस्तद्दानेति । विरहे पदयोर्दानं पञ्चाध्याय्यां स्पष्टम् । 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति दुर्लभाधिकारीयं पादसेवनमुक्तम् । तदा पदवित् पददानानुकूलप्रयत्नवान् । तर्हि धात्वर्थज्ञानमेतद् दानम् । ज्ञानसमवायिकत्वात् । छान्दोग्ये नारदसनत्कुमारसंवादे 'आत्मतः स्मरः' 'आत्मतो विज्ञान'मिति श्रुतिभ्याम् । अन्यत् पूर्ववत् । तेनेत्यादीति । वर्णाश्रमेति । तेन वर्णाश्रमधर्मवत्सु आत्मधर्मवत्सु ये 'शृण्वन्ती'त्यादिकर्तारः त एव पश्यन्तीत्यन्वयः । आत्मधर्मा भगवदैश्वर्यादिमन्तः । कर्तव्या इति । 'दानव्रततपोहोमे'ति वाक्यात् कर्तव्याः । वदन्तीति ।

तच्छब्दस्य प्रसिद्धार्थकत्वाल्लोकवेदप्रसिद्धस्य पुरुषोत्तमस्यैव, तत्रापि, 'पदवि'देव, दीनभावेन भक्तिमार्गीयज्ञानवानेव, स्यादेवेत्येवकारः सर्वत्रानुषज्यते। तथा सति भक्तौ जातायां स्वत एव भगवज्ज्ञानं भवतीति ज्ञापयितुं 'तं विदित्वे'ति पश्चादुक्तवतीति तदाशयो ज्ञायते। अत एव पूर्वं कर्म निरूपितम्। साधनत्वात्।

स्यादेतत्। भक्तिसाधनत्वमेव चेत् कर्मणः श्रुतेरभिप्रेतम्, तदा भगवद्विदि तत्फलासम्बन्ध इत्यनुपपन्नमिति चेत्। मैवम्। कर्मणां हि भक्त्युत्पत्तौ स्वरूपयोग्यतासम्पादकत्वमेव। 'नायमात्मे'ति श्रुतेः कर्मज्ञानाभ्यामलभ्यत्वाद्भगवतः स्वरूपयोग्यतापेक्षापि मार्यादिकस्य, न तु पौष्टिकस्य, अत एव वाशब्द उक्तोऽनियमवाची। तथा सति भगवदनुग्रहश्चेत्, तदा भक्तिः, तया पुरुषोत्तमज्ञानम्, तदा कर्मतत्फलसम्बन्धगन्धोऽपि नेति किमनुपपन्नम्। एतेन, 'तमेव विदित्वा मुनिर्भवति' 'अग्राह्यो न हि गृह्यते' इत्यादिश्रुतीनां मिथो विरोधः परिहृतः,

---

भाष्यप्रकाशः।

अत्र पुनश्चोदयति स्यादित्यादि। अनुपपन्नमिति। साक्षाद्वैदिककर्मणः फलावश्यम्भावनियमेन ततो भक्त्युत्पत्तिसम्भवादनुपपन्नमित्यर्थः। तत् समादधते मैवमित्यादि। उक्त इति। ज्ञानस्य कर्मसापेक्षत्वात् पूर्वकाण्डे नित्यविधिर्ज्ञानमार्गीयस्येति कर्मणस्तदङ्गत्वबोधनाय ग्रन्थे उक्त इत्यर्थः। उक्तार्थोपष्टम्भार्थमेवंतात्पर्याङ्गीकारे गुणान्तरमाहुः एतेनेत्यादि। अत

रश्मिः।

प्रेमविवशा वदन्ति। भ्रमरगीतटिप्पण्यां विरहे प्रेम प्रसिद्धम्। निरोधलक्षणे च 'अहं निरुद्धो रोधेन निरोधपदवीं गत' इति। दीनेति। अहङ्कारविरुद्धं पादसेवनानुकूलं दैन्यं, तेन। भावपदेन भक्त्यन्तःपातिना। भक्तिमार्गीयेति। भक्तिमार्गीयपदज्ञानवान्। पदविच्छब्द इति। श्रुतिप्रामाण्यादिति भावः। भाष्ये। तथा सतीत्यादि। मुक्तिसाधनपादसेवने सति। तज्जन्यप्रेमभक्तौ। स्वत इति। आत्मीयभक्तेः प्रेम्णः। भगवज्ज्ञानं फलात्मकं 'भक्त्या मामभिजानाती'ति वाक्योक्तम्। 'तं विदित्वे'ति। शारीरब्राह्मणे 'एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान्। तस्यैव स्यात् पदवित् तं विदित्वा न कर्मणा लिप्यते पापकेने'ति। अग्रे 'तस्मादेवंविच्छान्तो दान्तः' इति श्रुतिः। तदिति। फलात्मकं ज्ञानम्। तदाशयः श्रुत्याशयः। प्रकृते। पूर्वार्धं इति। 'एष नित्यो महिमे'त्यस्मिन्। पूर्वोक्तमिति। पादसेवनप्रपञ्चनम्। प्रति भातीति। प्रेम्णा वैवश्यदशायां पश्चादपि सम्भवात् प्रति भातीत्युक्तम्। मैवमित्यादीति। स्वरूपेति। शुद्धचित्तस्य भक्तिरिति चित्तशुद्धिसम्पादकत्वम्। स्वरूपस्य भक्तिस्वरूपस्य चित्तशुद्धिर्योग्यता स्वरूपयोग्यता, तत्सम्पादकत्वम्। श्रीभागवतवाक्यादेवकारः। भाष्ये। कर्मतत्फलेति। कर्म चित्तशुद्धिसम्पादकं तत्फलं चित्तशुद्धिः। ननु कुतो न चित्तशुद्धिसम्बन्धो मानसीनत्वादिति चेत्। न। मर्यादाभक्तस्य यदानुग्रहेण पुष्टिभक्तिः तदा पुरुषोत्तमज्ञानमिति पुष्टौ पापाभावस्येव चित्तशुद्धेरप्रयोजकत्वात्। ननु 'स मानसीन आत्मा जनाना'मिति श्रुतेः 'शुद्ध एव रमत' इत्याचार्योक्तेश्च कथं चित्तशुद्धिरूपकर्मफलसम्बन्धाभाव इति चेत्। न। 'जगद्व्यापारवर्ज'मित्यधिकरणे जगद्व्यापाराराहित्यात्तत्र। 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इत्यत्र मिश्रसत्त्वनिषेधात्। विशुद्धसत्त्वाभावश्चित्त इति। कालविक्रमरहितसत्त्वत्वं विशुद्धसत्त्वत्वम्। उक्तार्थोपेति। उक्तार्थः कर्मणो ज्ञानाङ्गत्वबोधनं स्यादेतदिति ग्रन्थात् पूर्वग्रन्थोक्तः तदुपष्टम्भार्थं स्यादेतदित्यादिना ग्रन्थेन, एवं पुष्टिमार्गीयत्वेन कर्मविधेस्तात्पर्यम्, अभिधेयं तु

भक्त्या प्राबल्यात् तदितरसाधनाप्राबल्यात्। अत एव 'विविदिषन्ति', न तु विदन्त्यपीत्याशयवती 'तमेतं वेदानुवचनेने'ति श्रुतिः पठ्यते।

न चानुपदमेव, 'तमेव विदित्वा मुनिर्भवती'त्युक्तेः सान्निध्यादुक्तसाधनैरेव वेदनमभिप्रेतमिति वाच्यम्। वेदानुवचनादीनां सर्वेषां वेदनसाधनत्वे सर्वेषां तत्कर्तॄणां वेदनसम्भवेन 'मुनिर्भवती'त्येकत्वं तद्विदि न वदेत्, अतो ज्ञानं कस्यचिदेकस्य भवतीति ज्ञानस्य दुर्लभत्वं ज्ञाप्यते। 'मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत' इति भगवद्वाक्याच्च। तर्हि वेदानुवचनादिषु निःशङ्का प्रवृत्तिः कथम्? इत्थम्। 'स वा अय-

---

भाष्यप्रकाशः।

एवेति। साधनबलेनाप्राबल्यादेव। इत्याशयवतीति। यद्यपि 'रथेन जिगमिषती'त्यादाविच्छामात्रस्यापुरुषार्थत्वात् फलपर्यन्तत्वमिष्यत इति प्रकृतेप्येवं वक्तुं शक्यम्, तथापि लोके फलपर्यन्ततायाः प्रायो दर्शनेन प्रतिबन्धाभावे तथा कल्पयितुं शक्यम्। प्रकृते तु 'नायमात्मे'ति श्रुत्यां वरणाभावे ज्ञानाभावस्य निश्चितत्वात् केवलेन वेदानुवचनादिना ज्ञानरूपं फलं न वक्तुं शक्यते। अत इच्छायास्तदर्थकयत्नकारणत्वेनेच्छाकारणानां यज्ञादीनां ज्ञानं प्रति स्वरूपयोग्यतासम्पादकत्वमेवेत्याशयवतीत्यर्थः। अग्रिमवाक्यविरोधमाशङ्क्य परिहरन्ति न चानुपदेत्यादि। उक्तसाधनैरिति। वेदानुवचनादिभिः। तथा च 'मुनि'रित्येकवचनश्रुत्यानेनापि तदुपोद्बलनमेव क्रियत इति न तद्विरोध इत्यर्थः। ज्ञानं कस्यचिदेवेति यदुक्तम्, तत्राशङ्कते तर्हीत्यादि। नित्यकर्मणां वेदानुवचनादीनां ज्ञान उत्कटेच्छाजननेन वा सत्त्वशोधनेन वा स्वरूपयोग्य-

रश्मिः।

कर्मैव, तस्याङ्गीकारे सर्वोत्तममार्गे गुणान्तरं विरुद्धधर्माश्रयत्वेन साधितेपि श्रुत्यविरोधेऽर्थान्तररूपं गुणान्तरम्। एतेनेत्यादीति। श्रुतीनामिति। शारीरब्राह्मणस्थानाम्। साधनेति। भक्तीतरसाधनबलेन। प्रकृते इति। 'वेदानुवचनेन विविदिषन्ती'त्यत्र। फलेति। फलमुत्तरदेशसंयोगो ग्रामसंयोगश्च। प्रायो दर्शनमिच्छायास्तेन। प्रतिबन्धेति। निम्नोच्चभूमिकृतप्रतिबन्धः कार्यविघटनम्, तदभावे। तथेति। फलपर्यन्तं कल्पयितुं शक्यम्। जानातीच्छति यतत इति क्रमेणाहुः तदर्थकेति। यज्ञादीनामिति। ज्ञानजनकत्वात् पञ्चरात्रशास्त्राच्च ज्ञानरूपाणाम्। ज्ञानं प्रतीति। भक्तिं प्रति। गीतायां भक्तौ शक्तिर्ज्ञानशब्दस्य। स्वरूपेति। चित्तशुद्धिद्वारा। स्वरूपं भक्तेः। योग्यता चित्तशुद्धिरित्युक्तमेव। तस्याः सम्पादकत्वम्। यद्वा। इच्छाकारणानामित्यादेर्ग्रन्थस्यायमर्थः। 'तमेत'मितिश्रुतौ भक्त्यप्रतीतेः। इत्थं च इच्छा कारणं येषां यत्नरूपाणां यज्ञादीनाम्। न तु विदन्त्यपीतिभाष्यात् ज्ञानं प्रति स्वरूपेत्यादिः। स्वरूपं ज्ञानस्वरूपम्। योग्यता चित्तशुद्धिः। तस्याः सम्पादकत्वम्। अग्रिमेत्यादि। अयमनुपदम्। पदं विविदिषन्तीति। न तु विदन्त्यपीत्यनेन विरोधः 'तमेव विदित्वे'त्यस्य। तं विरोधं परिहरन्ति न चानुपदेत्यादीति। पदं विविदिषन्तीति तल्लक्षीकृत्येत्यनुपदम्। भागे वा। उक्तपदं अग्रिमवाक्यभाग इत्यर्थः। एवेति। एवकारोऽन्ययोगव्यवच्छेदकः। कस्यचिदिति। शुद्धचित्तस्य। मुनिरित्येकेति। कश्चिदेवेत्यत्र हेतुः। तदुपोद्बलनमिति। न तु विदन्त्यपीत्यस्योपोद्बलनम्। तर्हीति। एकदेशविकृतन्यायात् न तु विदन्त्यपीत्यनेन तमेव विदित्वेत्यस्य विरोध इत्यर्थः। वेदानुवचनादीनामिति। वेदानुवचनमपि याग इति सामानाधिकरण्यम्। ज्ञान इति। चित्तस्य शुद्धत्वादिति भावः। अन्यथा कर्मविषयकज्ञाना-

मात्मे'त्यादिकया पूर्वश्रुत्या भगवन्माहात्म्यं श्रुत्वा यथाकथञ्चित् तद्वेदनौत्सुक्ये सति सत्सङ्गाभावेन भक्तिमार्गापरिचयात् कर्ममार्गमात्रमाश्रमधर्मत्वेनालौकिककार्यसाधकत्वेनापि पूर्वं ज्ञातमस्तीति तदेव भगवद्वेदनेपि साधनमिति मन्यमानास्तदेव कुर्वन्ति । ननु वैदिकसाधनानां वैयर्थ्यं कथमिति चेत् । न । भ्रमकृतत्वेऽपि जन्मान्तरीयाक्षरज्ञानोपयोगिसंस्काराधायकत्वेनावैयर्थ्यात् ॥ २० ॥

भाष्यप्रकाशः ।

तासम्पादन एव पर्यवसानम्, तदा ज्ञानमूलकारणस्य वरणस्य स्वविषयतानिश्चयस्याभावेन वेदानुवचनादिषु निःशङ्का प्रवृत्तिर्या दृश्यते, सा कथमित्यर्थः। तत्परिहाराय प्रवृत्तिमुपपादयन्ति इत्थमित्यादि । 'स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च । स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष भूताधिपतिरेष लोकेश्वर एष लोकपालः स सेतुर्विधरण एषां लोकानामसम्भेदाये'ति माहात्म्यश्रवणेन वेदनौत्सुक्ये सति तेन तेषु तत्साधनत्वभ्रमात् प्रवृत्तिरित्यर्थः । ननु भ्रमात् करणे पापभ्रमेण कृतस्य प्रायश्चित्तस्येव तेषां वैयर्थ्यं स्यादित्याशयेनाशङ्कते नन्वित्यादि । तत्र समादधते नेत्यादि । तथा च तत्र कर्मफलनिषेधस्य 'नान्तरिक्षे न दिवी'त्यादिवन्नित्यानुवादरूपत्वादेते पदज्ञानसाधनत्वेन कर्तव्या इति विदित्वा ते कुर्वन्ति । तत्र भक्तिमार्गात्मकपदज्ञानाभावेप्यक्षरात्मकपदज्ञानस्य जन्मान्तरे भवनार्थं मनसि तत्संस्कारमाश्रमधर्मा आदधत इति पूर्वोक्तमक्षुण्णमित्यर्थः । न च पापभ्रमप्रायश्चित्तस्येवास्य वैयर्थ्येपि दोषाभावात् सार्थकत्वसाधनमप्रयोजकमिति शङ्क्यम् । 'न हि कल्याणकृत् कश्चि'दिति न्यायेन पापभ्रमप्रायश्चित्तस्यापि जन्मान्तरे तादृशपापविषयकमनःप्रवृत्त्यभावस्य फलत्वेन वक्तुं शक्यतया किञ्चिदंशेन तत्रापि सार्थक्यस्यैव युक्तत्वात् । तेन पूर्वोत्तरकाण्डयोरैकशास्त्र्यानुरोधादेवं श्रुतितात्पर्यनिश्चयेनैकवाक्यतायां पूर्वस्योत्तरशेषत्वमिति सिद्धम् ॥२०॥

रश्मिः ।

दीनां कर्मविषयिणीच्छेति कर्मविषयिण्युत्कटेच्छा स्यात् तज्जननेन । स्वरूपेति । व्याख्यातम् । ज्ञानमूलेति । ज्ञानकरणं कर्म चित्तशुद्धिद्वारा । मूलकारणं वरणं यथा कर्मणि यथा भक्तौ तथा ज्ञानेपि कल्प्यं तस्य हृतस्य । स्वेति । अयं ज्ञानमार्गीयं वरणं प्राप्य ज्ञानेन मां प्राप्नोत्विति वरणस्य स्वविषयतानिश्चयः। तस्याभावेन । अवान्तरप्रवर्तकाभावेन । निःशङ्केति । कस्यचिदेव ज्ञानमिति शङ्काकारणसत्त्वात् । तेनेति । औत्सुक्येन । तेषु । वेदानुवचनादिषु । तत्साधनत्वेति । ज्ञानसाधनत्वभ्रमात् । तेषामिति । वैदिकसाधनानाम् । वैयर्थ्यं कथं स्यादित्यर्थः । तत्रेति । भ्रमात्करणे । कर्मेति । अप्राप्तप्रतियोगिकस्य । नान्तरिक्ष इति । अग्निश्चेतव्य इति सम्बन्धः । नित्येति । प्रत्यक्षसिद्धार्थानुवादाद्यथा 'अग्निर्हिमस्य भेषज'मिति । एत इति । आश्रमधर्माः । 'तस्यैव पदवित्स्या'दिति श्रुत्युक्तपदज्ञानसाधनत्वेन । पूर्वोक्तमिति । वैदिकसाधनानां वैयर्थ्यं भ्रमकृतानां संस्कारफलानामक्षुण्णम् । ऐकशास्त्र्येति । 'संहतमेतच्छास्त्रं जैमिनीयेन षोडशलक्षणेने'तिवृत्त्या तथा । सर्वोत्तममार्गे तु 'तमेत'मिति श्रुत्यैकवाक्यता वृत्तेरानुगुण्याद् भक्तिपर्यन्तम् । वेदानुवचनेनाधिदैविकशुद्ध्या भक्तिरिति । 'यथानुष्ठीयमानेन त्वयि भक्तिर्यथा भवे'दिति युधिष्ठिरवाक्यात् । न तु विदन्त्यपीति भाष्यमनुग्रहरहितकर्तृपरम् । एवमिति । उक्तप्रकारेण । श्रुतीनां पूर्वोत्तरकाण्डस्थानां तात्पर्यनिश्चयेन ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

ननु साम्यश्रुतेर्हेतोः कर्मशेषत्वं ज्ञानस्य यदपास्तम्, तन्नोपपद्यते। साम्योक्तेर्ज्ञानस्तुतिरूपत्वात्। अपि च। तथा ज्ञानिनोपि कर्मोपादानात् कर्मकृतिस्वीकारादिति यावत्। अन्यथा ज्ञानिनां कर्मकृत्यभावेन तत्कृतगुणदोषाप्रसक्त्या तन्निषेधानुपपत्तिः स्यात्। तेषामपि तत्कृतगुणदोषसम्बन्धोऽस्त्येवेति ज्ञापनाय मात्रपदम्। निषेधेनेतरसाधारण्यं परिह्रियते। तथा च ज्ञानिनोपि कर्मकरणात् कर्मशेषत्वं ज्ञानस्य निष्प्रत्यूहमिति चेत्, नैवं वक्तुं युक्तम्। पदज्ञानस्य कर्मफलासम्बन्धफलकत्वस्यापूर्वत्वाद्विधेयत्वमेव। न हि यस्य कर्मणो ज्ञानस्य वा यत्फलं तदुक्तिरपि स्तुतिरेवेति युक्तम्। तयोरुच्छेदापत्तेः। विधिर्हि प्रवर्तकः। तस्य

भाष्यप्रकाशः ।

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥ अत्रैव किञ्चिदाशङ्क्य परिहरतीत्याशयेन सूत्रं विवृण्वन्तः पूर्वपक्षभागं व्याकुर्वन्ति नन्वित्यादि। ननु यदि साम्यश्रुत्या कर्मोपादानमापाद्यते, तदा निषेधश्रवणं बाधितमेव स्यादित्यत आह निषेधेनेत्यादि। इतरसाधारण्यमिति। अज्ञानिनां यथा कर्मजगुणदोषः, तथा ज्ञानिनो नेति तथेत्यर्थः। कर्मशेषत्वमिति। सन्न्यासाश्रमीणकर्मशेषत्वम्। परिहारभागं व्याकुर्वन्ति नैवमित्यादि। अपूर्वत्वाद्विधेयत्वमिति। यथा 'प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती'त्यत्र रात्रिसत्रीयप्रतिष्ठाफलकत्वस्यापूर्वत्वाद् विधेयत्वमेव, न तु स्तुतिमात्रत्वं तथेत्यर्थः। तदेतदुपपादयन्ति न हीत्यादि। यस्येति पदं 'यत् फल'मित्यनेन सम्बध्यते। हिर्हेतौ। विधिर्हीत्यत्रापि तथा। एवमिति।

रश्मिः ।

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥ **परिहरतीति** । सूत्रकारः। **नन्वित्यादीति** । **यदपास्तमिति**। 'असुर्या नामे'ति श्रुत्या कर्मनिन्दाया वितण्डयापास्तम्। **स्तुतीति**। असदुत्कर्षाधायकगुणवर्णनरूपत्वात्। यथा 'सौधाग्राणि स्पृशन्ति विधुमण्डल'मिति सौधस्तुतिः। **मात्रच्प्रत्ययान्तस्याव्ययत्वेन पञ्चम्यन्तत्वम्**। सौत्रो वा लुक् पञ्चम्याः। स्तुत्योपादानादिति **स्तुतिपदानुवृत्त्या हेत्वन्तरमन्यच्चेत्यर्थोपि चेत्यस्य**। **तयेति**। स्तुत्या। आप्तस्य **ज्ञानिनोपि**। **तन्निषेधेति**। कामकारसूत्रोक्तायां 'एष नित्यो महिमा ब्राह्मणस्ये'ति श्रुतौ कर्मकृत्यभावकृतगुणदोषनिषेधानुपपत्तिः। **तेषामित्यादि**। ज्ञानिनामपि **कर्मकृत्यभावकृतगुणदोषसम्बन्धः** । **मात्रपदमिति** । स्तुतिरेव **स्तुतिमात्रमित्यवधारणार्थकमात्रपदम्** । स्तुतज्ञानमात्रस्थितौ कर्मकृत्यभावकृतगुणदोषसम्बन्ध इति भावः। **आपाद्यत इति**। **साम्यश्रुतेः** स्तुतिमात्रपरायाः ज्ञानस्य कर्मसाम्यं स्यात्, तदा ज्ञानिनां कर्मोपादानं न स्यात्, वर्तते तु विपरीतम्, अतो ज्ञानिनां कर्मोपादानापत्तिः एवमापाद्यते। **बाधितमिति**। 'मम माता वन्ध्ये'तिवन्निर्विषयं स्यात्। **ज्ञानिनो नेति**। तेनेतरैरज्ञानिभिः साधारण्यं परिह्रियत इति भाष्यार्थः। अयमेव तथेत्यस्यार्थः। **सन्न्यासाश्रमीणेति**। सन्न्यासाश्रमे कर्माणि ससागारभिक्षुचर्यादि **तच्छेषत्वं** कर्मज्ञाने। 'ज्ञात्वा कर्म कुर्या'दिति। **तथेत्यर्थ** इति। 'तस्यैव पदवित् स्यात्' इत्यत्र पदज्ञानस्य 'एष नित्यो महिमा ब्राह्मणस्ये' तिश्रुत्युक्तो यः गुणदोषफलासम्बन्धः तत्फलकत्वस्य। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुत' इति। 'स्यादि'ति **विधिस्तद्विषयत्वं** विधेयत्वं **तथेत्यस्यार्थः**। **पदज्ञानवानेवेति** भाष्य एवकारेण ज्ञानप्रतिबन्धकगुणदोषफलसम्बन्धव्यवच्छेदः क्रियत

---

१. तयेतिरश्मिपाठः।

पुरुषप्रवृत्त्युपयोग्यर्थकथनेनैव चारितार्थ्यादन्यार्थकथनस्य स्तुतित्वमस्तु नाम । न ह्येवं प्रकृते । मुमुक्षोः कर्मबन्धाभावप्रेप्सोस्तत्साधनत्वज्ञान एव प्रवृत्तिसम्भवात् । यच्च कर्मफलसम्बन्धनिषेधानुपपत्त्या कर्मसम्बन्ध इत्युक्तम्, तन्न साधीयः । न हि तरणौ तमःकार्याभाव इत्युक्ते तत्प्राप्तिरपि सम्भवति । अथवा । पुरुषोत्तमज्ञानमुख्यफलस्यातिमहत्त्वेन साक्षाद्वक्तुमशक्यत्वं ज्ञापयन्ती कैमुतिकन्यायेन परम्परया तदाहनयर्चा 'तं विदित्वा ब्राह्मणो भवती'ति श्रुतेर्ब्राह्मणपदेन ब्रह्मविदुच्यते । तथा चाद्यपदेन बुद्धिस्थब्राह्मणमाहात्म्योद्देशे कृते, स क इत्याकाङ्क्षायामाह, तं ब्राह्मणं विदित्वा विहितनिषिद्धफलासम्बन्धी भवतीतिलक्षण इत्यर्थः । साक्षाद्भगवद्विदः किमु वाच्यमिति भावः । अतस्तस्यैव तच्छब्दस्य पूर्वपरामर्शित्वात् ब्राह्मणस्यैव भगवद्विदो भक्तस्यैव पदवित् स्यात्, तज्ज्ञानानुकूलप्रयत्नवान् स्यात्, तद्भजेतेति यावत् । तथा च यत्र [1]भक्तविद्विषयकज्ञानस्याप्युक्तरीत्या न कर्मशेषत्वं वक्तुं शक्यम्, तत्र भगवज्ज्ञानस्य तथात्वं दूरदूरतरमिति सर्वं सुस्थम् ॥ २१ ॥

भाष्यप्रकाशः

अन्यार्थकथनम् । पूर्वोक्तमाशङ्कान्तरमनूद्य परिहरन्ति यच्चेत्यादि । 'यतो वाचो निवर्तन्त' इत्यत्राकुतोभयस्य भगवज्ज्ञानफलत्वश्रवणात् । ततो न्यूनं [2]कर्मफलसम्बन्धाभावमात्रस्य फलत्वकथनमप्रयोजकमित्यरुच्या 'एष नित्य' इति ऋगुत्तरार्धं प्रकारान्तरेणाहुः अथवेत्यादि । तदाहेति । महत्त्वमाह । तद्विशदयन्ति तमित्यादि । 'तं विदित्वे'ति व्याख्येयप्रतीकम् । श्रुतेरिति । विपापादिपदोत्तरं पठितान्निरपेक्षाच्छब्दात् । आद्यपदेनेति । एष इति पदेन । स क इति । ब्राह्मणः कः । विहितनिषिद्धफलासम्बन्धीति । पापकपदे पापं कं सुखं यस्मादित्यस्याप्यर्थस्य सङ्ग्रहीतुं शक्यत्वात् तथेत्यर्थः । तद्भजेतेति । पदं भजेत । सुस्थमिति । कर्मफलासम्बन्धस्य विधेयत्वेन स्तुतिरूपताया आदतुमशक्यत्वाज्ज्ञानस्य न सन्न्यासाश्रमीणकर्मशेषत्वमिति यदुक्तं तदक्षुण्णमित्यर्थः ।

रश्मिः ।

इति कर्मफलासम्बन्धफलकत्वस्य विधेयत्वम् । पूर्वोक्तमिति । अत्रैव पूर्वोक्तम् । भगवदिति । 'आनन्दं ब्रह्मणो विद्वा'नित्यनेनानन्दात्मकभगवज्ज्ञानफलत्वश्रावणात् । न्यूनेति । न्यूनञ्च तत् कर्मफलसम्बन्धाभावमात्रं तस्य । कर्मफले गुणदोषौ तयोः सम्बन्धस्तस्याभावः स एव तन्मात्रं तस्येति व्याख्यातम् । अथवेत्यादीति । पुरुषोत्तमज्ञानफलं प्रवेशः मुख्यं फलं पदवित्त्वं तस्य । महत्त्वमिति । उपकारस्मृत्या पूज्यत्वम् । अनया ऋचा वेद आह । एष इति पदेनेति । 'एष नित्यो महिमा ब्राह्मणस्ये'ति श्रुतिस्थपदेन । भाष्ये । बुद्धिस्थेति । एष बुद्धौ सन्निहितः इच्छाद्वारा ज्ञानकार्यस्य उद्देशकृतिरूपयत्नस्याग्रे दर्शनात् । नित्यो महिमेति । तथा च बुद्धिस्थं ब्राह्मणस्य महिमरूपमाहात्म्यं तस्योद्देश इत्यर्थः । प्रकृते । पापकेति । 'तस्यैव स्यात् पदवित् तं विदित्वा न कर्मणा लिप्यते पापकेने'त्यत्रपापकपदे । तथेति । विहितनिषिद्धफलासम्बन्धीत्यर्थः । पुष्टिमार्गे पापस्य प्रतिबन्धकत्वमाशङ्क्य श्रुत्योक्तम् । भाष्ये । इतिलक्षण इति । एष इति पूर्वोक्तवि-

---

[1] भगवद्विद्विषयक इति पाठः । [2] रश्मौ न्यून कर्मफलेति समस्तं पदम् ।

पारिप्लवार्था इति चेन्न विशेषितत्वात्॥ २२॥

अथ प्रकारान्तरेण शङ्कते। 'भृगुर्वै वारुणिर्वरुणं पितरमुपससार' 'अधीहि भगव' 'इति होपससाद सनत्कुमारं नारदः' 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं

भाष्यप्रकाशः।

एतदग्रे भावशब्दाच्चेति सूत्रं पठ्यते। तत्र च भावशब्दादित्यस्य विधिशब्दादित्यर्थः। तथा चापूर्वत्वादेव न पदज्ञानस्य विधेयत्वकल्पनम्, किन्तु 'पदवित् स्या'दिति विधिशब्दादपीत्यर्थो वक्तव्यः। 'कुर्यात् क्रियेत कर्तव्यं भवेत् स्यादिति पञ्चमम्। एतत् स्यात् सर्ववेदेषु नियतं विधिलक्षणम्' इति वाचस्पतिलिखितात् न्यायविदां स्मरणात्।

तच्च 'विधिर्वा धारण'वदित्यत्रैतस्यैव 'स्यात् पदवि'दिति श्रुतिव्याख्यानेनैव व्युत्पादितम्, अतः प्रयोजनाभावादुपेक्षितमिति प्रतिभाति। लेखकदोषात् त्रुटितं वेति ज्ञेयम्।

अन्ये तु, 'स्तुतिमात्र'मित्यादिद्विसूत्रमधिकरणान्तरमङ्गीकृत्य, 'स एष रसानां रसतमः परमः परार्ध्योऽष्टमोयं उद्गीथ' इत्याद्याः श्रुतयः किमुद्गीथादिस्तुत्यर्थाः, उतोपासनविध्यर्था इति संशये, उद्गीथादिकर्माङ्गान्युपादाय श्रावणात् स्तुत्यर्था इति शङ्कायाम्, अपूर्वत्वाद्विध्यर्थाः 'उद्गीथमुपासीते'ति विधिशब्दाच्च तथेत्याहुः। ततः पारिप्लवादिसूत्रत्रयमप्यधिकरणान्तरत्वेनोक्त्वा, अग्नीन्धनसूत्रं, 'पुरुषार्थोऽतः शब्दा'दित्याद्यधिकरणस्य फलोपसंहारार्थमिति चाहुः।

तन्नास्माकं रोचते। विद्यायाः स्वतः पुरुषार्थत्वसाधनाय सन्न्यासस्य तदङ्गत्वसाधनाय चाचार्यस्य प्रवृत्तत्वान्मध्ये उद्गीथादिविचारे प्रसङ्गस्यादर्शनादिति दिक्॥ २१॥

पारिप्लवार्था इतिचेन्न विशेषितत्वात्॥ २२॥ अत्राशङ्कान्तरं परिहर्तुमेषा

रश्मिः।

हितनिषिद्धफलासम्बन्धीतिलक्षणः। प्रकृते। पदं भजेत। पादसेवनं चतुर्थं भजनं कुर्वीत। तदुक्तं 'निवृत्ततर्षैरुपगीयमाना'दिति। उपगानं समीपमागत्य गानम्, समीपागमनं पद्भ्यामिति पदयोरुपकारं स्मृत्वा भजेत। पादुकाद्वारा। 'त्वत्पादुकामविरतं परि ये चरन्ती'ति वेदस्तुतौ। पादसंवाहनं वा तदुक्तं 'तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम' इति। भाष्ये। उक्तरीत्येति। द्वितीयव्याख्यानोक्तरीत्या। दूरेति। दूरात् तद्विषयकज्ञानात् दूरतरं भगवज्ज्ञानस्य तथात्वं कर्मशेषत्वम्। प्रकृते। कर्मफलेति। भक्तिमार्गीयज्ञानवानेव स्यादिति पदवित्पदव्याख्यानभाष्य एवकारार्थविवरणेन विवृतम्। 'विधिर्वा धारणव'दिति सूत्रे। स्तुतीति। व्याख्यातम्। पठ्यत इति। शङ्कराचार्यादिभिः स्वभाष्येषु पठ्यते। कर्माङ्गानीति। सावयवत्वापादकानि। भावशब्दाच्चेति सूत्रार्थमाहुः उद्गीथमिति। तथेति। उपासनविध्यर्थाः। फलोपेति। फलं अग्नीन्धनाद्यपेक्षाभावः तस्योपसंहारार्थम्। अस्माकमिति। अस्मभ्यमिति वक्तव्ये समबुद्धित्वाय सर्वत्र 'रुच्यर्थानां प्रीयमाण' इति सूत्रात् स्वस्य प्रीयमाणत्वाभावाद्वा षष्ठी। विद्याया इति। 'पुरुषार्थोऽत' इति सूत्रीयातःशब्दार्थः। उद्गीथादीति। आदिनोद्गीथाङ्गानि॥ २१॥

पारिप्लवार्था इति चेन्न विशेषितत्वात्॥ २२॥ आशङ्कान्तरमिति। पारिप्ल-

धामोपजगामे'त्याद्युपाख्यानैर्हि ब्रह्मविद्या निरूप्यते। 'सर्वाण्याख्यानानि' पारिप्लवे शंसती'ति श्रुत्या शंसनशेषत्वं तेषामवगम्यते। शंसने शब्दमात्रस्य प्राधान्येनार्थज्ञानस्यातथात्वादुपदेशान्ताख्यानप्रतिपाद्यं ज्ञानं मन्त्रार्थवदप्रयोजकमिति कर्मशेषत्वमपि न वक्तुं शक्यम्। प्राधान्यं तु दूरापास्तम्। धर्मिण एवासिद्धिरित्याह। पारिप्लवार्था इति। उक्तरीत्या सर्वा उपाख्यानश्रुतयः कर्मशेषभूता इत्यर्थः अत्राचार्य एवमपि कर्मशेषत्वं ज्ञानस्य न सम्भवतीत्याह नेति। कुतः। विशेषितत्वात्। कर्मणः सकाशाज्ज्ञानं विशेषितमधिकधर्मविशिष्टत्वेनोक्तमिति न ज्ञानस्य कर्मशेषत्वमित्यर्थः। ननु विशेषितत्वमाख्यानेष्वेवेत्यप्रयोजको हेतुरिति चेत्। मैवम्। आचार्याशयानवगमात्। तथाहि। पूर्व 'तुष्यतु दुर्जन' इति न्यायेनाख्यानानां शंसनशेषत्वमुपेक्षित्वोच्यते। न ह्याख्यानेष्वेव ज्ञानं निरूप्यते, किन्त्वन्यत्रापि। तथा हि। तैत्तिरीयके पठ्यते। 'ब्रह्मविदाप्नोति परम्, तदेषाभ्युक्ता, सत्यं ज्ञानमनन्तं ब्रह्मे'त्युपक्रम्य, माहात्म्यविशेषज्ञानार्थमाकाशादिकर्तृत्वमुक्त्वा, आनन्दमयत्वं रसरूपत्वमुक्त्वा, 'भीषास्मा'दित्यादिना सर्वनियामकत्वं चोक्त्वा, भगवानेव पूर्णानन्द इति ज्ञापनायानन्दगणनां कृत्वा, आनन्दमयं पुरुषोत्तमं प्राप्तेनानुभूयमानानन्दस्वरूपं, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'त्यादिनोक्त्वा, तद्विदो माहात्म्यमुच्यते 'एतꣳ ह वा व न तपति किमहं साधु नाकरवं किमहं पापमकरव'मिति। अत्र ज्ञानवान् सच्चिद्रूपदेशकालापरिच्छिन्नं सर्वकर्तारं निरवध्यानन्दात्मकं सर्वनियामकं मनोवागगोचरं पुरुषोत्तमं प्राप्नोति, कर्म तु स्वयं क्लेशात्मकम्, तद्वांश्च 'अस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेः क्षुद्रतरानन्दजनकस्वर्गपश्वादिफलमाप्नोतीति विहितनिषिद्धकर्मणोश्चाप्रयोजकत्वं तस्मिन्नुच्यत इति कर्मणः सकाशाज्ज्ञानस्य निरवधिरेव विशेष उच्यत इति न धर्म्यसिद्धिः, न वा कर्मशेषत्वं ज्ञानस्य सिध्यति ॥ २२ ॥

भाष्यप्रकाशः।

त्रिसूत्रीत्याशयेनैतस्य पूर्वपक्षांशमवतारयन्ति अथेत्यादि। तेषामिति। उपाख्यानानाम्। धर्मिण एवासिद्धेरिति। धर्मिणो ज्ञानस्यैव अप्रयोजकत्वादसिद्धेः। परिहारांशमवतारयन्तो व्याकुर्वन्ति अत्रेत्यादि। विशेषितमिति। विशेषः सञ्जातोऽस्येति विशेषितम्। अधिकधर्मविशिष्टत्वं च परमानन्दरूपफलजनकत्वं ज्ञेयम्। तदेवाग्रे व्युत्पाद्यम्। शेषं स्फुटम् ॥ २२ ॥

रश्मिः।

वकर्मशेषत्वं ज्ञानस्येत्याशङ्कान्तरम्। भाष्ये। उपदेशान्तेति। 'मामुपास्स्वे'ति प्रतर्दनं प्रतीन्द्रोपदेशान्ताख्यानप्रतिपाद्यम्। प्रकृते। विशेषितमिति। 'तारकादिभ्य इतच्'। शेषमिति। ज्ञानं कर्मशेषत्वाभाववत्, विशेषितत्वात्, यन्नैवं तन्नैवं लौकिकघटवत्। इत्यत्राख्यानेषु हेतोः साध्याभाववद्वृत्तित्वात् साधारण्यमाहुः ननु विशेषितत्वमिति। अप्रयोजक इति। साधारणो हेतुः विशेषितत्वरूपः। उपेक्षित्वेति। क्त्वो ल्यबभावश्छान्दसः। अत्रेति। भृगुप्रपाठके। तस्मिन्नुच्यते इति। भृगुप्रपाठके ब्रह्मवित्प्रपाठके 'एतꣳह वा व न तपती'ति श्रुत्योच्यते इत्यर्थः। एवं शेषं स्फुटम् ॥२२॥

तथाप्याख्यानप्रतिपादितविद्यानामसिद्धिरेवेति चेत्, तत्राह ।

तथा चैकवाक्यतोपबन्धात् ॥ २३ ॥

यथा केवलश्रुतेर्विद्याप्राधान्यम्, तथैवोपाख्यानश्रुतीनामित्यर्थः । चकारेण प्रश्नोत्तरैर्निर्णीतार्थप्रतिपादनम् । महतामेवात्र प्रवृत्तिः । सापि बह्वायासपूर्विकेति विद्यामाहात्म्यज्ञापनं प्ररोचनं चाधिकमुपाख्यानानामुपाख्यानं विनैव विद्यानिरूपिकायाः श्रुतेः सकाशादित्युच्यते । तत्र हेतुरेकवाक्यतोपबन्धादिति । 'आचार्यवान् पुरुषो वेदे'ति श्रुत्यैकवाक्यताज्ञानमाख्यानं विना न भवतीति तदर्थमुपबन्धात् गुरुशिष्यकथोपबन्धादित्यर्थः ।

अथवा । उपाख्यानरहितायां श्रुतौ यथा ज्ञानं निरूप्यते, तथैव 'अधीहि भगव इति होपससाद सनत्कुमारं नारद' इत्याद्याख्यानेष्वपि निरूप्यत इत्यनाख्यानश्रुत्यैकवाक्यतयैवाख्याने ज्ञानस्वरूपोपबन्धात् प्रतिपादनादित्यर्थः ।

भाष्यप्रकाशः ।

तथा चैकवाक्यतोपबन्धात् ॥ २३ ॥ सूत्रप्रयोजनमाहुः तथापीत्यादि । असिद्धिरिति । कर्मशेषत्वाभावस्यासिद्धिः । तथा चाशङ्कान्तरस्य निवृत्तत्वेऽप्युक्ताशङ्काया अनिवृत्तत्वादेकदेशदोषपरिहारायेदं सूत्रमित्यर्थः । व्याकुर्वन्ति यथेत्यादि । प्ररोचनं चाधिकमिति । इदमवान्तरफलमधिकम् । कथमेकवाक्यतोपबन्ध इत्याकाङ्क्षायां तामुपपादयाहुः आचार्येत्यादि । सर्वासां परविद्यानां परब्रह्मैवार्थः, तत्प्राप्तिरेव च प्रयोजनम् । 'आचार्यवान् पुरुषो वेदे'ति श्रुतिश्छान्दोग्ये श्वेतकेतूपाख्याने 'यथा सौम्य पुरुषं गन्धारेभ्योऽभिनिबद्धाक्ष'मित्युपक्रम्य पठिता । तत्र तद्दृष्टान्तेन आचार्याच्छिष्यस्य ब्रह्मज्ञानादिकं श्राव्यते । अतः सर्वा एव विद्या गुरुशिष्यसाकाङ्क्षाः । तदेतच्छ्रुत्युक्तमेकवाक्यताज्ञानमाख्यानं विना न भवतीति तदर्थं तदुपबन्धात् । तथा च केवलानां यथा न शंसनशेषत्वम्, तथा आख्यानोक्तानामपि नेत्यर्थः ।

अन्ये तु सूत्रे 'एकवाक्योपबन्धा'दिति पाठमङ्गीकृत्य एकवाक्यतयोपबन्धं व्याकुर्वन्त, एकवाक्यपदं भावप्रधानं बोधयन्तीति न कश्चिद्विशेषः ।

रश्मिः ।

तथा चैकवाक्यतोपबन्धात् ॥ २३ ॥ तथापीत्यादीति । यद्यपि 'एतꣳह वा व न तपती'ति श्रुत्या विहितप्रतिषिद्धकर्मणोरप्रयोजकत्वम्, तथापि 'सर्वाण्याख्यानानि पारिप्लवे शंसती'ति श्रुत्या आख्यानप्रतिपादितेत्यादि । उक्तेति । आभासोक्ताशङ्कायाः । एकदेशेति । शङ्कैकदेशः । शङ्का धर्म्यसिद्धिविषया ज्ञानस्य कर्मशेषत्वविषया च शङ्कान्तरपदेनोक्ता, तत्रैकदेशः ज्ञानस्य कर्मशेषत्वं तस्य दोषस्य परिहारायेत्यर्थः । यथेत्यादीति । तथा चेति सूत्रांशार्थः । तथा चकारार्थमाहुः चकारेणेति । गुरुशिष्येति । 'अर्थैकत्वात् एकं वाक्यं साकाङ्क्षं चेत्, विभागे स्या'दित्यत्र द्वितीयाध्याये । परस्पराकाङ्क्षयैकवाक्यत्वमुक्तम् । अत्र विद्यानां केवलज्ञानानां गुरुशिष्यघटितोपाख्यानापेक्षा तयार्थैकत्वादेकं वाक्यमित्युक्तम् । तदर्थमिति । तेन त्रिपदमिदं सूत्रं एकवाक्यतया उपनिबन्धात् तृतीयासमासः । अपि नेति । विशिष्टं शुद्धान्नातिरिच्यत इति भावः । ननु तथापि 'सर्वाण्याख्यानानी'ति श्रुतिविरोधस्तु स्यादिति चेत् । न । सर्वाण्युपाख्यानानि शंसत्येव,

नैकट्यवाचिनोपपदेन वस्तुसती[1] या तत्तद्गुरुतत्तच्छिष्यकथा तत्सामीप्यमत्रोच्यते अन्यथा सामीप्यासम्भवादतः कल्पितत्वशङ्कानिरासः ।

नन्वेवमपि पारिप्लवार्थत्वे न बाधकं पश्याम इति चेत् । उच्यते । अश्वमेधप्रकरणे, 'मनुर्वैवस्वतो राजे'त्यादीन्याख्यानानि यत्र पठितानि, तत्र सामान्यतस्तेषां विनियोगः, 'सर्वाण्याख्यानानि पारिप्लवे शंसती'त्यनेनोक्त इति सर्वशब्दस्तदा-

भाष्यप्रकाशः ।

नन्वेवमाख्यानरहितानामप्याख्यानोक्तार्थाकाङ्क्षत्वात्तासामेवैतच्छेषत्वम् न त्वाख्यानवतीनां तच्छेषत्वमिति नोक्तदोषनिवृत्तिरित्यपेक्षायां पक्षान्तरमाहुः अथवेत्यादि । तथा च यदि तत्रान्यदेवोच्येत तत्परत्वमेव स्यात्, न ज्ञानपरत्वम् । निरूपिते तु ज्ञानस्वरूप एतासामपि केवलविद्याशेषत्वम्, अतो न दोष इत्यर्थः । सूत्र उपोपसर्गकथनस्य तात्पर्यमाहुः नैकट्येत्यादि ।

अत्र पुनराशङ्कते नन्वित्यादि । एवं पूर्वव्याख्याने तासामुपाख्यानाकाङ्क्षा, द्वितीये चोपाख्यानानां तदाकाङ्क्षेति परस्पराकाङ्क्षयैकवाक्यत्वे उभयविधवाक्यानां पारिप्लवशेषता अदण्डवारितेति तथेत्यर्थः । अत्र समादधते उच्यत इत्यादि । तथा च प्रकरणेन सर्वशब्दार्थसङ्कोचावगमादनेन वाक्येन विद्यानां न कर्मशेषत्वसिद्धिरित्यर्थः । उक्तेऽर्थे लिङ्गमप्युपोद्बलकमाहुः एवं सतीत्यादि ।

रश्मिः ।

न तूपाख्यानानां पारिप्लवाङ्गत्वमित्याशयात् । एवमिति । तेन द्विपदमिदं सूत्रं एकवाक्यताया उपनिबन्धात् । शेषत्वं निषेधे । आख्यानेति केवलज्ञानानाम् । आख्यानेति । विद्यानां विधेयत्वनिर्वाहायोपाख्यानोक्तार्थस्य विधेयस्तावकस्य आकाङ्क्षत्वादित्यर्थः । यः स्तूयते, स विधीयते इति पूर्वमीमांसकोक्तेः । किञ्च 'केवलानां यथा न पारिप्लवशंसनशेषत्वं तथाख्यानोक्तानामपि विद्यानां पारिप्लवशंसने उक्तार्थेति तु केवलभारहारकत्वनिवृत्त्यै । 'केवलभारहारः स्यादधीत्य वेदं यो न जानात्यर्थमिति' । एवमप्येकवाक्यतोपबन्धात् । तासामिति । आक्षिप्ताख्यायिकानां केवलानाम् । एतच्छेषत्वम्, पारिप्लवशेषत्वम् । 'सर्वाण्याख्यानानी'ति श्रुतावाख्याने विशेषाश्रवणात् । तच्छेषत्वमिति पारिप्लवशेषत्वम् । उक्तेति । भाष्यीयाभासोक्तदोषनिवृत्तिः । अथवेत्यादीति । श्रुतावित्यस्य 'साङ्गो वेदोऽध्येयो ज्ञेयश्चे'त्यस्याम् । अनारभ्याधीतत्वादस्याः । निरूप्यत इत्यस्य 'तरति शोकमात्मविद्' इति श्रुत्या निरूप्यत इत्यर्थः । एकवाक्यतेत्यस्यार्थैकत्वेन तथेत्यर्थः । आख्यान इत्यस्य भृगूपाख्यान इत्यर्थः । तत्रेति । आख्यानरहितविद्यासु । अन्यदेव ज्ञानाद्भिन्नमेव । एतासामपीति पारिप्लवशेषभूतानाम् । अतो नेति । विद्याशेषत्वात् न भाष्यीयाभासोक्तो दोषः आख्यानप्रतिपादितविद्यानां कर्मशेषत्वाभावस्यासिद्धिरूपः । नैकट्येत्यादीति । वस्तुसजातीयेति समानसंवित्संवेद्या ज्ञानादिवस्त्वाकाङ्क्षिता । यथा ज्ञानं कथावस्त्वाकाङ्क्षितमित्याकाङ्क्षितत्वेन सजातीयत्वं वा । अन्यथेति । आकाङ्क्षितत्वाभावे । कल्पितत्वस्य अर्थवादत्वस्य शङ्कानिरासः वस्तुसजातीयत्वात् । तासामिति । केवलानां विद्यानां तदाकाङ्क्षेति केवलविद्याकाङ्क्षा । उभयेति । केवलश्रुत्युपाख्यानश्रुत्योरिव उभये केवलोपाख्याने विधेयेषु तानि वाक्यानि उभयविधवाक्यानि तेषाम् । पारिप्लवेति । 'सर्वाण्याख्यानानि पारिप्लवे शंसती'ति श्रुत्या पारिप्लवशेषिता एतयैव श्रुत्याऽदुष्टा सा न दण्डेन युक्त्यन्तरेण वारितेत्यर्थः । यथा दण्डेन गामभ्याजेत्यत्र दुष्टां गां तथेत्येवं प्रकृते नेत्यदण्डवारिता । तथेतीति । एवमपि पारिप्लवार्थत्वे बाधकं न पश्याम इत्यर्थः । अनेनेति । पारिप्लवेन वाक्येन । लिङ्गमिति 'पारिप्लवमा-

---

[1] वस्तुसजातीयेतिरश्मिपाठः व्याख्यातश्च तथा । [2] पारिप्लवशेषितेति रश्मिपाठः ।

ख्यानपर एव, न त्वाख्यानान्तरपरोऽपि। प्रकरणस्य नियामकत्वात्। एवं सति, यदा पारिप्लवाख्यकर्मप्रस्तावः, तदा विशेषविनियोग उक्तः। 'पारिप्लवमाचक्षीते'ति। तत्र प्रथमेऽहनि 'मनुर्वैवस्वतो राजे'ति। द्वितीयेऽहनि 'इन्द्रो वैवस्वत' इति। तृतीयेऽहनि 'यमो वैवस्वतो राजे'त्याद्याख्यानविशेषा वाक्यशेषे विनियुज्यन्ते। आख्यानसामान्यपरत्वे त्वहोविशेष उपाख्यानविशेषविधानं न स्यात्। अत एव पारिप्लवमित्येकवचनम्, अतो नाख्यानान्तरगन्धसम्बन्धोऽपि। ज्ञापकाभावात् ॥ २३ ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २४ ॥

एवं 'पुरुषार्थोऽतः शब्दा'दित्युपक्रम्य ज्ञानस्य फलसाधने कर्माऽनपेक्षत्वमुपपाद्य तत्रैवोपपत्त्यन्तरमाह। यतो ज्ञानी ज्ञानेन स्वयमेव यज्ञात्मको जातः, अत एव जरामर्याग्निहोत्रेऽग्निस्तदिन्धनं समिदादि, तदादय आज्यादयस्तेषामनपेक्षोक्ता। श्रुतौ तैत्तिरीयके पठ्यते। 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा

भाष्यप्रकाशः।

एवं सतीति प्रकरणसन्निधिभ्यां सर्वशब्दार्थसङ्कोचे सति। तथा चेदं लिङ्गमपि सङ्कोचे मानमित्यर्थः। ननु 'मनुर्वैवस्वत' इत्यादीनि तत्तदहनि पूर्वमाख्यातव्यानीत्यभिप्रायेण विशेषविधानमित्याशङ्कावारणाय गमकान्तरमाहुः अत एवेत्यादि। तथा च यदि तथाभिप्रायः स्यात्, तदा बहुवचनमादिपदं वा प्रयुक्तं स्यात्, अतस्तदभावाच्च तथेत्यर्थः। एवञ्च पारिप्लवसूत्रे यो विशेषितत्वरूपो हेतुरुक्तः, स एव प्रकृतेतराण्याख्यानानि व्यावर्तयन् सर्वशब्दार्थसङ्कोचं बोधयतीति न काऽपि शङ्केति तात्पर्यम् ॥ २३ ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २४ ॥ सूत्रप्रयोजनमाहुः एवमित्यादि। व्याकुर्वन्ति

रश्मिः।

चक्षीते'ति श्रुतिसामर्थ्यम्। प्रकरणेति। सन्निधिः। पारिप्लवसन्निधिः। भाष्ये विशेषेति सङ्कुचितसर्वशब्दार्थोपाख्यानस्य विनियोगः। वाक्येति सर्वाण्युपाख्यानानि शंसति कर्माणि, उतैकं सङ्कुचितोपाख्यानं कर्मेति सन्देहे प्रवृत्तं 'पारिप्लवमाचक्षीते'ति वाक्यशेषस्तेन वाक्यशेष इति पाठे न वर्णलोपः, किन्तु विवक्षातः कारकाणि भवन्तीत्यधिकरणत्वविवक्षा वाक्यशेषे। अहोविशेष इति सप्तम्यन्तम्। प्रकृते। पूर्वमिति। पारिप्लवकर्मणः पूर्वम्। बहुवचनमिति। 'पारिप्लवाण्याचक्षीते'ति। पारिप्लवमादावाचक्षीतेति। तद्भावादिति। आदिबहुवचनयोरभावात्। तथेति। नाख्यानान्तरगन्धसम्बन्धोपीत्यर्थः। पूर्वमाख्यातव्यानीति नेति वार्थः। एवं चेति। सूत्रे तथेत्यनेन दृष्टान्तार्थं पूर्वसूत्रीयार्थानुवादसूचने च। इतराणि। अधिकधर्मविशिष्टानि। न कापीति। सूत्रे सङ्कोचकपदाभावात् व्याख्यानं प्रासङ्गिकं कुत इति शङ्का न ॥ २३ ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २४ ॥ स्फुटमिति। सूत्रं व्याकुर्वन्ति स्म जरामर्येति। महानारायणसमासावस्ति। जरा पञ्चसप्तत्यनन्तरं मरणं मरस्तयोः साधु जरामर्याग्निहोत्रं तत्र। तथा च श्रुतिः 'एतद्वै जरामर्याग्निहोत्रं सत्र'मिति। तैत्तिरीयक इति। महानारायणे। विदुषो यज्ञस्येति। विद्वत्कर्तृकयज्ञस्य। यद्वा। यज्ञस्येति। ज्ञानेन यज्ञात्मकस्य। 'गोपालोऽहमिति भावये'दिति गोपालतापनीयात्। यजमान इति। फलभाक्त्वात्। पत्नीति। फलेऽनुकूलत्वात्।

पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्नि'रित्यादि । एतेन यदन्यस्य यज्ञतासम्पादकम्, तस्य स्वकार्यसाधने कथं यज्ञापेक्षा भवेदिति भावः सूच्यते ॥ २४ ॥

इति तृतीयाध्याये चतुर्थपादे प्रथमं पुरुषार्थोऽतः शब्दादित्यधिकरणम् ॥ १ ॥

भाष्यप्रकाशः ।

यत इत्यादि । शेषं स्फुटम् ॥ २४ ॥

इति प्रथमं पुरुषार्थोऽतः शब्दादित्यधिकरणम् ॥ १ ॥

रश्मिः ।

शरीरमिध्ममिति । इध्मं समिधः, ता यथाग्नौ हूयन्ते, तथा शरीरं तपसि, द्वितीयस्कन्धनवमाध्यायोक्ते । **उरः** प्रसिद्धम् । **वेदिः** संस्कृता भूः स्थण्डिलम् । **बर्हिरिति** । विराड्लोमानि । तत्साम्यात् । **वेद इति** । 'वेदं कृत्वा वेदिं करोती'ति श्रुत्युक्तो वेदः । वेदो धननामसु निरुक्त उक्तम् । **हृदयं यूप इति** । यथा उरोऽधो हृदयं तथा वेद्यधो यूप इत्यधस्त्वसाम्यात् । **काम आज्यमिति ।** आज्ये घृतं यथाग्नौ तथा कामस्तपसि तपः कामः । विरहताप एव सर्वात्मभावव्यक्तेः सर्वात्मभावकामः स्यात् । **मन्युः पशुरिति** । पशुवन्मन्युः क्रोधः राजसादिभावे विशसनीय इत्यर्थः । जरामर्याग्निहोत्रस्य सत्रत्वमुक्तं तदर्थं कर्तॄनाह **दमः शमयितेत्यादि** । बहुकर्तृको यागः सत्रम् । तत्र **दम** इन्द्रियसंयमरूपोपि कर्ता । कर्तृभूतदमाभावे अन्यत्र मनस्सत्त्वे सर्वात्मभावसत्रं न निर्वहेत् । **शमयिता** मनसो बोध्यः । **दक्षिणावाग्घोतेति** । दक्षिणा दैवी वाक् होता होतृकर्मकर्त्री होतर्ग्वित् । जुहोतीति होता । नेष्टृत्वष्टृहोतृपोत्रिति साधुः । **प्राण उद्गातेति** । उद्गातृकर्मकर्ता । **प्राण** आसन्यः । सोपि कर्ता । यतः सन्देशसदृशसामगानकर्ता । सादृश्यं च प्राणरक्षकत्वेनापहतपाप्मत्वेन । सर्वात्मभाववत्यः दास्यभक्तिमत्यः 'भवाम दास्य' इति वाक्यात् । साम्नि च भगवतः परिचर्योक्तेति युक्तं सामगातुः प्राणस्य कर्तृत्वम् । **उद्गाता** सामवित् । उद्गायतीत्युद्गाता । तृन् तृच् वा । **चक्षुरध्वर्युरिति** । इन्द्रियवतीनां सर्वात्मभावाध्वरे साध्वीत्वात् चक्षुरध्वर्युः । अध्वर्युर्यजुर्वित् । अध्वरमिच्छतीत्यध्वर्युः । सुप इति क्यच्, कव्यध्वरपृतनस्येति लोपः क्याच्छन्दसीत्युः । **ब्रह्मेति** । ब्रह्मन्मभानां मनोपि बृहदिति ब्रह्मा कृताकृतावेक्षकः । **श्रोत्रं अग्नीदिति** अग्नीन् इन्धे इत्यग्नीत् । ञि इन्धि दीप्तौ क्विप् । न लोपः अग्नीदृत्विक् । **या अवभ्रियते सा दीक्षेति** । दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु । भ्वा. आ. से. अवार्था बहवः नवार्थ्यामुक्ताः तदर्थं भ्रियते वैकुण्ठलीला सा **दीक्षा** नियम इत्यर्थः । **साधारणविषयेति** प्रतिज्ञेत्यर्थः । नियमः प्रतिज्ञा । **यदश्नाति तद्धविरिति** प्रसिद्धमग्नौ विरहतापे । **यत्पिबति तदस्य सोमपानमिति** । स्पष्टम् । **यद्रमते तदुपसद इति** । उपसीदन्त्यासु उपसदः । रमणेऽनेकेषु सीदन्तीति साम्यम् । 'आत्मक्रीड' इति श्रुतेः । **यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्य इति** । प्रवर्ग्यो वायुः । आदित्यो वा चेष्टारूपः । कालश्चेष्टेति यागे प्रवर्ग्यो द्रष्टव्यः । स्वाहाकारे । **यन्मुखं तदाहवनीय इति** । मुख्यतो मुखे जुहोतीति । आहवनीयोग्निः कुण्डश्च । **या व्याहृतिराहुतिरिति** । तिस्रो व्याहृतयो नोक्ताः आत्मयजमानस्य आधिभौतिकत्वात् । व्याहृतिर्भूस्तस्याः सत्ता मुखे । 'अग्निर्वाग्भूत्वा मुखं प्राविश'दिति श्रुतेः । आहुतिराहवनीयमुखे । **यदस्य विज्ञानं तज्जुहोतीति** । अस्य आत्मयजमानस्य यद्विज्ञानं व्याहृत्याहुतिविषयकम् । विशिष्टं वैदिकं ज्ञानम् । **तज्जुहोति** । मुखयोर्ददातीत्यर्थः । **यत्सायं प्रातरत्ति तत् समिधमिति ।**

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २५ ॥ (३-४-२.)

उक्तन्यायेन ज्ञानं प्रति कर्मणः फलोपकारित्वाभावेपि स्वरूपोपकारित्वमस्ति न वेति चिन्त्यते। तत्र नेति पूर्वः पक्षः। गुरूपसत्तितदुपदेशैरेव तत्सम्भवात्। 'आचार्यवान् पुरुषो वेदे'ति श्रुतेः। अत्र सिद्धान्तमाह सर्वापेक्षेति। सर्वेषां

भाष्यप्रकाशः।

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २५ ॥ अधिकरणमवतारयन्ति उक्तन्यायेनेत्यादि। पूर्वाधिकरणे पुरुषोत्तम एव पुरुषार्थः, तत्प्राप्तिश्च केवलाज्ज्ञानादेवेति प्रतिज्ञाय शब्दाद्धेतोस्तत् साधयित्वा शब्दस्य तत्साधकत्वं व्युत्पादितम्। अत उक्तेन न्यायेन शब्देन ज्ञानं प्रति कर्मणः फलोपकारित्वाभावेपि कर्मणां सार्थक्याय स्वरूपोपकारित्वं यदुक्तम्, तद्युक्तत्वादस्ति, उतायुक्तत्वान्नास्तीत्येतदस्मिन्नधिकरणे विचार्यत इत्यर्थः। सिद्धान्तं व्याकुर्वन्ति सर्वेषामित्या-

रश्मिः।

अग्निविरहतापाविन्धे समिति सम्यक्। पचाद्यच्। 'यदेव असृजत तत्तदत्तुमध्रियते'ति बृहदारण्यकादात्मात्ति। यजमानोप्यत्ति। सुषुप्तावानन्दमपि। 'आनन्दभुक्' इति नृसिंहतापिन्याः। नन्वौषधिरग्निविरहतापाविन्धे न त्वन्नमिति चेत्, न। 'औषधवदशनमाचरे'दित्यारुणिश्रुतेः। पाच्यान्नाशनमाचरेदित्यर्थः। यथा 'अत्यम्बुपानात् न विपच्यतेन्नं निरम्बुपानाच्च स एव दोषः। तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरी'ति। पाच्याम्बुपानम्। यत्प्रातर्मध्यन्दिनं सायञ्च तानि सवनानीति। सोमलताकण्डनकालाः प्रातर्मध्यन्दिनसायंरूपाणि सवनानि सर्वात्मभावे षुञ् अभिषवे स्वा. उभय, अभिषुन्वन्ति सोमं भगवन्मन इति सवनानि। नन्द्यादित्वात् ल्युः। ल्युट् वा। ये अहोरात्रे ते दर्शपूर्णमासाविति। विरहकालरूपौ त्वत्र। ये अर्धमासाश्च मासाश्च ते चातुर्मास्यानीति। षट्कचतुष्टयत्रिकचतुष्टयसाम्यात्। य ऋतवस्ते पशुबन्धा इति। मन्युं पशुं हृदये यूपे ऋतुभिः षड्भिः प्रतिबन्धकृतं कुर्यादिति ऋतवो मन्युं बध्नन्तीति पशुबन्धाः। मन्युपदात् नित्यलीलायां सर्वात्मभावेपि। मन ज्ञाने दि. आ. अ. मनिजनिद् सिभ्योरिति युः। 'मन्युर्दैन्ये क्रतौ क्रोधे क्रुधी'ति हैमकोशः। ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणा इति। देवदेवत्वाद्भगवतः। देवदिनं संवत्सरः। सर्ववेदसं वा एतत्सत्त्रमिति। सर्वस्वदाननामकं सत्रम्। सर्ववेदसशब्दः काठकभाष्ये सर्वस्वदाने व्याख्यातः। सत्रं बहुकर्तृकयागः। यन्मरणं तदवभृथ इति। अवभृथस्नानं मन्त्रात्मकम्। 'विभुरसी'त्यादि महानारायणे मन्त्रः असन्तत्वेन मन्त्रत्वात्। सन्न्यासमन्त्रोयम्। विस्मरणजनकत्वादन्त्ये अत्यन्तविस्मरणरूपत्वं मन्त्रस्य। 'मृत्युरत्यन्तविस्मृति'रितिवाक्यादत्यन्तविस्मृतेर्मृत्युत्वात्। 'एतद्वै जरामर्यमग्निहोत्रं सत्र'मिति। जरा मरणं मरः तयोः साधु जरामर्यम्। तत्र साधुरिति यत्। सत्रं व्याख्यातम्। इति दमः शमयितेत्यादि श्रुत्यर्थः। यदन्यस्येति। यत् ज्ञानं अन्यस्य जरामर्यस्य। अत्रेदं ज्ञानं सर्वात्मभावरूपं जरामर्यात्मकयागविषयकम्। 'यज्ञो वै विष्णु'रिति श्रुतेः। कृष्णोपि यज्ञधर्मकः यज्ञः, 'धर्मो यस्यां मदात्मक' इति वाक्यात्। स्वकार्येति। सर्वात्मभावकार्यं पुरुषोत्तमप्राप्तिः तस्य साधने। भाष्ये सर्ववेदससत्रे जरामर्याग्निहोत्रसत्रत्वोक्तिः सर्ववेदससत्रपदं विहाय जरामर्याग्निहोत्रपदमुपात्तम्। इत्यादीति। आदिना दमः शमयितेत्यादि। एवं स्फुटम् ॥ २४ ॥

इति प्रथमं पुरुषार्थोत इत्यधिकरणम् ॥ १ ॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २५ ॥ उक्तन्यायेनेति। सूत्रे सर्वशब्दो

कर्मज्ञानभक्तीनां पुरुषोत्तमज्ञानोत्पत्तावस्त्यपेक्षा । अत्र प्रमाणमाह यज्ञादिश्रुतेरिति । यज्ञादिनिरूपिका श्रुतिरेव प्रमाणं यत इत्यर्थः ।

इदमत्राकूतम् । पुरुषोत्तम एव स्वतन्त्रपुरुषार्थरूपः, तत्प्राप्तिरेव फलम् । तत्र प्रेमभक्तिजं तज्ज्ञानमेव साधनमिति 'ब्रह्मविदाप्नोति पर'मित्यादिना 'एतद्विदुरमृतास्ते भवन्ती'त्यादिश्रुतिसहस्रैश्च प्रतिपाद्यते । 'अथेतरे दुःखमेवोपयन्ती'ति श्रुत्या ज्ञानरहितानां दुःखमात्रप्राप्तिरुच्यते । एवं सति स्वतोऽपुरुषार्थरूपं यज्ञादिकं सर्वार्थतत्त्वप्रतिपादिका श्रुतिर्यन्निरूपयति, तत्सर्वथा पुरुषार्थसाधनत्वेनैवेति मन्तव्यम् । तच्च निष्कामतयैव कृतं तथा । अत एव वासजनेयिशाखायां 'यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवती'त्युपक्रम्य पठ्यते 'तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण' इति तु कामयमानोऽथाऽकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति, न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माऽप्येती'त्यादि । अत्र 'अथाकामयमानः' कर्ता निरूप्यत इति शेषः । यः पुमान् कर्मकृतावकामस्ततो निष्कामः सन्नात्मकामो निरुपधिस्नेहवान् प्रभौ, ततो भगवत्प्राप्त्या आप्तकामो भवतीत्यर्थः । अत्र

भाष्यप्रकाशः ।

दि । तथा च मार्गत्रयापेक्षाकथनात्तत्तन्मार्गोक्तानां कर्मणामपेक्षास्तीत्यर्थो बोधितः । यज्ञादिपदे आदिशब्देन शमदमादीनां कर्मणां भगवद्धर्मरूपाणां शरणगमनादिकर्मणां च सङ्ग्रहः । यज्ञादिकर्मणां विद्यास्वरूपोपकारकत्वे कथं यज्ञादिश्रुतेः प्रमाणत्वमित्याकाङ्क्षायां तदुपपादयन्ति इदमत्रेत्यादि । एवं सतीति । अनेन प्रकारेण ज्ञानशून्यकर्मणां दुःखप्रापकत्वे सति । मन्तव्यमिति निरूपणान्यथानुपपत्त्या मन्तव्यम् । तथेति । पुरुषोत्तमज्ञानसाधकम् । 'अथा-

रश्मिः ।

मार्गांशेऽसङ्कुचितवृत्तिरित्याशयेनाहुः कर्मज्ञानभक्तीनामिति । 'मार्गास्त्रयो मया प्रोक्ता' इति वाक्यात् । ननु ज्ञानकाण्डं कर्मकाण्डमिति काण्डद्वयात् कर्मज्ञानयोः पुरुषोत्तमज्ञानोत्पत्तावस्त्यपेक्षेति युक्तम्, भक्तिनिवेशः कुत इत्यत आहुः इदमत्रेति । तत्र प्रेमेति । ज्ञानकाण्डकर्मकाण्डयोरभिधेये ज्ञानकर्मणी भवतः । 'सर्वेषामेव शब्दानां व्यञ्जकत्वमपीष्यत' इति शब्दानामपि व्यञ्जकत्वात् तात्पर्यार्थाकाङ्क्षायां भक्तिरस्तु । 'अग्नये जुष्टं निर्वपामी'ति प्रथमाष्टकात् । 'भगवान् ब्रह्म कार्त्स्न्येने'तिवाक्याच्च । एवं च 'भक्त्या मामभी'तिवाक्योपष्टब्धं प्रेम भक्तिजमित्यर्थः । अन्यथेति । सर्वथा पुरुषार्थसाधनत्वकल्पनं समाधेयस्वतोऽपुरुषार्थरूपयज्ञादिनिरूपणस्यानुपपद्यमानस्योपपत्तये । इदमर्थापत्तिलक्षणम् । अन्यथानुपपत्तिलक्षणं तु अर्थान्तरकल्पनया समाधेयत्वेनोच्यमानः प्रमाणसिद्धयोरर्थयोः परस्परप्रतिघातः । प्रस्थानरत्नाकरे प्रमाणपरिच्छेदसमाप्तौ सम्यग् द्रष्टव्यो विचारः । अथेत्यादीति । कर्मकृताविति । काम्यानां कर्मणां कृतौ । निष्काम इति । सन्न्यासी । 'काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदु'रिति गीता । आत्मकाम इति । आत्मनि कामो यस्य पुंसः । कामोत्र इच्छा 'अलमन्यविचारेण प्रेमेच्छेति स्थितं मत'मिति विश्वेश्वरमतेनाहुः निरुपधिस्नेहवानिति । एवं मर्यादाभक्तिं निरूप्य कर्मभिर्ज्ञानं निष्कामसकामयोश्च निरूपयन्ति स्म अत्र

'यथाकारी'त्यादिना कर्मकर्तुरेवोपक्रमात् 'अथाकामयमान' इत्यनेनापि तथाभूतः स एवोच्यते । एवं सति सत्कर्मणि प्रवृत्त्यर्थं विविधफलानि स्वयमेवोक्त्वा जनान् भ्रामितवानिति स्वोक्तकरणात् चिरेण दयया निष्कामं करोति, सकामतयापि क्रियमाणेन वैदिककर्मणाऽनेकजन्मभिः संस्कारविशेषप्रचयेनापि तथा । 'कषाये पक्वे ततो ज्ञानं प्रवर्तते' इत्यादिस्मृतिभ्यश्च ज्ञानोत्पत्तौ कर्मापेक्षास्तीति । चकारेण पुष्टावङ्गीकृतस्य सर्वानपेक्षेति सा समुच्चीयते । अत एव, 'नायमात्मे'त्यादिश्रुतिर्न विरुध्यते ।

भाष्यप्रकाशः ।

कामयमान' इति श्रुतिभागं व्याकुर्वन्ति अथेत्यादि । तथाभूतः स इति । 'एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलं तथे' ति गीतावाक्यादकामः कर्मकृतौ, निष्कामः फले । एवं द्विविधकर्तृनिरूपणेन यत् सिध्यति तदाहुः एवं सति सदित्यादि । उक्तमर्थं स्मृत्योपष्टम्भन्ति कषाय इत्यादि । एवं मर्यादामार्गे कर्मापेक्षैव यद्यपि भगवत्साक्षात्कारे व्युत्पादिता, तथापि हेतुबोधके यज्ञादिश्रुतिपदे आदिशब्देन तैत्तिरीयाद्युक्तानामानन्दमयाद्युपासनानामन्यत्रोक्तानां शमादीनां ज्ञानोपकारिणाम्, तथा भक्त्युपयोगिनां गोपालतापनीयाद्युक्तानां शरणगमनध्यानरसनभजनादीनां च सङ्ग्रहात्तदपेक्षापि बोध्या । साप्यग्रिमसूत्रेषु व्युत्पादयिष्यते । चकारार्थमाहुः चकारेणेत्यादि । सेति । अत्रानुक्तापि । सौत्रस्य चकारस्यार्थं श्रौतार्थापत्त्योपष्टम्भन्ति अत एवेत्यादि । अत एवेति । मार्गभेदादेव । तथा च साधनदशायामेव कर्मापेक्षा, न तु सिद्धदशायामिति भावः ।

अत्रेवं बोध्यम् । पुरुषोत्तमज्ञानं हि मार्गभेदेन सामान्यतश्चतुर्विधं वा । तत्र कर्ममार्गे

रश्मिः ।

यथेति । अकाम इति 'अकामयमान' इत्यनेनाकामः 'यथाकारी'त्यादिना कर्मकर्ता । भाष्यस्थेनापिना पूर्वोक्तनिःकामः केति चेत् फले । अपिः पदार्थसम्भावनायाम् । स्वयमिति वेदः भ्रामितवानिति । अविहितकरणात् लौकिकात् वैदिके भ्रामितवान् । चिरेणेत्यादि । 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति वाक्यात्तथा । निष्कामः सन्न्यासीत्युक्तं 'आश्रमाणां तुरीयोस्मी'ति । अतो मुक्तः । तथेति निष्कामं करोति । कषाय इति कामक्रोधादौ पक्वे शास्त्ररीत्या परिणते । एवमिति सर्वशब्देन मार्गत्रये प्रमेये सति यज्ञादिपदेन भक्तिज्ञानसङ्ग्रहवत् । गोपालेति । आदिना श्रीभागवतमुपष्टम्भकम् । अन्यदप्युपयुक्तम् । शरणेति 'मुमुक्षुर्वै शरणमनुव्रजे'दिति शरणगमनम् । मुमुक्षुत्वस्य साधनचतुष्टयप्रवेशात् । शरणगमनस्य मुमुक्षत्वज्ञापकत्वात् । ध्यानं श्रीभागवतेपि साधनस्कन्धीयत्वात् उपात्तम् । रसनभजनयोः स्वरूपं गोपालतापनीय एवोक्तम् । हेतुबोधकं सूत्रे यज्ञादिश्रुतिपदम् । पञ्चम्यन्तत्वात् । तत्र यज्ञादीत्यत्रादिपदेन षष्ठ्यन्तोक्तानां सङ्ग्रहात् । चकारेति । एवं मर्यादाभक्तिं कर्मभिर्ज्ञानं निष्कामसकामयोश्च निरूप्य पुष्टिभक्तिर्निरूप्येत्याशयेन चकारार्थम् । श्रौतार्थापत्त्येति लक्षणमुक्तम् । पुष्टिकल्पनं समाधेयनायमात्मेतिश्रुतार्थस्यानुपपद्यमानस्योपपत्तय इति लक्षणसमन्वयोत्र । दृष्टार्थापत्तिस्तु, जीवन् देवदत्तो गृहे नास्तीत्यत्र जीवनसंसृष्टगृहाभावस्यानुपपद्यमानस्योपपत्तये बहिर्भावकल्पना । मार्गेति । 'भक्तिमार्गस्य कथनात् पुष्टिरस्तीति निश्चय' इति पुष्टिमार्गभेदात् । पुरुषोत्तमज्ञानमिति । ननु

ननु ज्ञानद्वारा कर्मादीनामेव फलसाधकत्वमस्त्विति शङ्कानिरासाय दृष्टान्तमाह अश्ववदिति । यथा स्वेष्टफलसाधकदेशव्यवधानात्मकदेशातिक्रमेऽश्वस्य साधनत्वम्, न तु तत्तत्फलसिद्धावपि, तथाधिभौतिकाध्यात्मिकाधिदैविकप्रतिबन्धनिवृत्तावेव तेषां साधनत्वम्, न तु भगवत्प्राप्तावपीत्यर्थः । इदं च मुमुक्षुभक्तविषयकमिति ज्ञेयम् । आत्यन्तिकभक्तिमतां भक्तीतरानपेक्षणात् ॥ २५ ॥

भाष्यप्रकाशः ।

यदाविर्भवति, तत् सत्त्वगुणमाधारीकृत्य तत्रान्तर्यामिन्यायेन प्रविश्य सत्त्वं स्वान्तर्भूतं कृत्वा तेन तेन रूपेणाविर्भवतीति नाभिदक्षादियज्ञेषु तत्तद्रूपेणाविर्भावादवगम्यते । ज्ञानमार्गे त्वक्षररूपेणैवाविर्भवतीति, 'ये त्वक्षरमनिर्देश्य'मिति गीतावाक्यसन्दर्भादवगम्यते । ज्ञानभक्तिसाहित्ये तु यद् बलिष्ठं तदनुसारेणाविर्भवति । एवं केवलेपि विहितभक्तिमार्गेपि तत्तदुपासनावाक्यैस्तत्क्रतुन्यायादवसीयते । अविहितभक्तिमार्गे तु वरणानुसारेणाविर्भवतीति वरणश्रुत्यादिभिरवसीयते । तत्र विहितमार्गत्रयसम्बन्धित्वान्मर्यादामार्गीयसाक्षात्कारे साधनापेक्षा । पुष्टिमार्गे तु वरणमात्रैकसाध्यत्वान्न तदपेक्षेत्युभयमप्युपपन्नमिति ।

ननु सर्वापेक्षापदे कर्मज्ञानभक्तीनां पुरुषोत्तमज्ञानेऽपेक्षां व्याख्याय यज्ञादिश्रुतेरित्यस्यार्थव्युत्पादने द्विविधं कर्मकर्तारं व्याख्याय निष्कामकर्तुः कर्मापेक्षामात्रं व्युत्पादितम् । ततश्च ज्ञाने कर्मापेक्षा सिद्धा, न तु ज्ञानभक्त्यपेक्षेति तत्कथनस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः इदं चेत्यादि । इदमिति । कर्मापेक्षणम् । भक्तीतरानपेक्षणादिति । अतीतपादे, 'सैव हि सत्यादय' इत्यत्र निर्णीतत्वेन तथात्वात् । तथा चैकादशस्कन्धे 'योगास्त्रयो मया प्रोक्ता' इत्यत्र कर्मज्ञानभक्तीरुक्त्वा, । 'निर्विण्णानां ज्ञानयोगः कर्मयोगस्तु कामिनाम् । न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिद' इति कथनेन तस्य तस्य तत एव सिद्धिरिति मुमुक्षुभक्तस्य सोपाधिकस्नेहवत्त्वात्तस्य कर्मापेक्षणं युक्तम् । अत्र वाक्यसन्दर्भे योगशब्देन पुरुषार्थप्राप्त्युपाय उच्यते । ज्ञानशब्देन, 'सर्वभूतेषु येनैकम्' 'कैवल्यं सात्त्विकं ज्ञान'मित्यादिवाक्योक्तं ब्रह्मैव सर्वम्, 'वासुदेवः सर्व'मित्यत्र पर्यवसितं सात्त्विकं ज्ञानमुच्यते । कर्मशब्देन च पूर्वकाण्डाद्युक्तमग्निहोत्रादिलक्षणं विहितं कर्मोच्यते । भक्तिशब्देन च तापनीयगीताश्रीभागवताद्युक्तो भगवद्विषयकः स्नेह उच्यते । अत एव त्रयः स्वस्वप्रकरणोक्तसाधनसहिता मार्गशब्देन व्यवह्रियन्त इति सोपाधिभक्तस्य तदपेक्षणं युक्तमेवेत्यर्थः । तस्मादस्ति ज्ञानस्वरूपे सर्वापेक्षेति सिद्धम् ॥ २५ ॥

रश्मिः ।

चित्तशुद्धिद्वारा पुरुषोत्तमज्ञाने यज्ञस्य कारणत्वं वक्तव्यम्, तथा च सर्वोत्तममार्गस्य कुतः शङ्काया मुक्तिरिति चेत् न । भक्त्यजनकत्वात् । तत्कथनस्येति ज्ञानभक्तिकथनस्य । भाष्ये । आत्यन्तिकेति 'सैवात्यन्तिकी या स्वतो रसभावं प्राप्ता सैव नान्यत्फलमङ्गीकारयति । अत्यन्तप्रेमोत्पत्तावेवं भवती'ति तृतीयस्यैकोनत्रिंशाध्याये 'सालोक्ये'ति श्लोकव्याख्याने । तथा चेति मुमुक्षुभक्तेतरभक्तसत्त्वे च । तस्य तस्येति । ज्ञानाधिकारिणः कर्माधिकारिणः भक्त्यधिकारिणश्च । तत एवेति ज्ञानात् कर्मणो भक्तेश्च साधनात् तयेति सर्वापेक्षेत्यर्थः । ज्ञानेति क्षराक्षरपुरुषोत्तमज्ञाने ॥ २५ ॥

शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्॥२६॥

ननु 'तस्मादेवंविच्छान्तो दान्त' इत्यादिना शमादेरेव ज्ञानसाधनत्वमुच्यते, न तु यज्ञादेरिति चेत्, तत्राह शमदमाद्युपेतो भक्तिमार्गेऽपि स्यादेव यद्यपि, तथापि तदङ्गतया 'आत्मन्येवात्मानं पश्ये'दिति ज्ञानमार्गीयज्ञानाङ्गतयैव शमादिविधेर्हेतोर्ज्ञानमार्गे तेषामवश्यानुष्ठेयत्वात् तथा विधिरित्यर्थः। भक्तिमार्गे स्वत एव शमादीनां सम्भवेऽप्यावश्यकत्वं न तेषामिति भावः॥ २६॥

भाष्यप्रकाशः।

शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्॥ २६॥ सूत्रमवतारयन्ति नन्वित्यादि। 'तमेतं वेदानुवचनेने'ति श्रुतिलिङ्गाद्यभावेन विद्यास्तुत्यर्थं, यज्ञाद्यनुवादस्य शक्यवचनत्वात्। विद्यार्थिनः 'शान्तो दान्त' इति श्रुत्या शमादीनां साधनानां विशेषतो विधानात्, भक्तिमार्गेपि, 'ॐकारेणान्तरितं कृत्वा यो जपति गोविन्दस्य पञ्चपदं मनुं तस्येवासौ दर्शयेदात्मरूप'मित्यादिश्रुतीनां तापिनीयेषु दर्शनाच्च तत्करणमेव युक्तम्, न तु यज्ञादिकरणमिति पूर्वोक्तहेतोर्बाधितत्वमित्याशङ्क्य तत्परिहारमाहेत्यर्थः। सूत्रं व्याकुर्वन्ति **शमदमेत्यादि**। **तथा विधिरिति**। साधनत्वेन विधानम्। तथा चानया श्रुत्या ज्ञानमार्गीयस्य साधनान्तरमधिकं विधीयते इति तेषामवश्यानुष्ठेयत्वम्। तत्र च न यज्ञादिकं निषिध्यत इति तेषामप्यनुष्ठेयत्वम्। यद्यपि तत्र लिङ्गाद्यभावः, तथापि 'विविदिषन्ती'ति फलसंयोगस्यापूर्वत्वात्तत्र रात्रिसत्रवत् दिष्टाग्निहोत्रस्थे, 'उपरि हि देवेभ्यो धारयन्ती'ति वाक्ये समिद्धारणवच्च विधिः कल्पयितुं शक्यत इति तेषामपि हेतुत्वमदण्डवारितमिति न पूर्वोक्तहेतोर्बाधितत्वमित्यर्थः। एतेन भक्तिमार्गव्यवस्थाप्यर्थात् सिद्धेत्याहुः **भक्तीत्यादि**। 'भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्ये-

रश्मिः।

शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्॥ २६॥ **लिङ्गादीति**। (यद्यपि वेदानुवचनेनेत्यादितृतीयाश्रुतिर्वर्तते, तथापि स्तुतावप्यविरुद्धेति लिङ्गादीत्युक्तम्। आदिना वाक्यप्रकरणस्थानसमाख्याः। लिङ्गादिकं विविदिषावेदानुवचनादीनां कार्यकारणभावे बोध्यम्।) आदिना लेट्ट लोट्ट तव्यादिः। तत्प्रतिपाद्यविध्यभावे 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्यु'रिति सूत्रविषयत्वात् यत्र कुत्रत्यविद्यास्तुत्यर्थमित्यादिः। **पञ्चपदमिति** कृष्णायेत्येकं पदम्, गोविन्दायेति द्वितीयम्, गोपीजनेति तृतीयम्, वल्लभायेति तुरीयम्, स्वाहेति पञ्चममिति श्रुत्युक्तम्। ॐकारेणान्तरितम्, ॐ कृष्णाय ॐ गोविन्दाय ॐ गोपीजन ॐ वल्लभाय ॐ स्वाहेत्येवं कृत्वा। **मनुं** अवताररूपम्। तापिनीयं च तापिनीयं च तापिनीयं च तापिनीयानि तेषु। रामतापिनीयं नृसिंहतापिनीयं च। **तत्करणं** शमदमादिकरणं **पूर्वोक्तहेतोरिति** ज्ञानोत्पत्तिः सर्वापेक्षावती, यज्ञादिश्रुतेरित्यस्य बाधितत्वं पक्षेऽभावः। **तत्परिहारमिति** शमदमादेः परम्परया कारणत्वव्यवस्थापनात् यज्ञादिश्रुतेः पक्षे सद्भावस्थापनात् परिहारम्। **अनयेति** तस्मादेवंविदित्यनया। **साधनान्तरं** शमदमादिरूपम्। **तत्र चेति** 'तस्मादेवंवि'दिति श्रुतौ। **फलेति**। फलं ज्ञानेच्छा। **विधिरिति**। उपयन्तीत्यत्र लेडाश्रयणात् धारयन्तीत्यत्र च तथा। **तेषामपीति** वेदानुवचनादीनामपि। **दण्डः** श्रुतिविरोधः तेन वारितं दण्डवारितं न भवतीत्यर्थः। **पूर्वोक्तेति**। यज्ञादिश्रुतेरित्यस्य

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २७ ॥

ननु सत्त्वशोधकत्वेन यज्ञशमदमादेर्विधानमिति मतं नोपपद्यते। 'आहारशुद्धौ सत्त्वशुद्धि'रिति श्रुतेस्तद्विरुद्धा सर्वान्नभक्षणानुमतिरपि यतः श्रूयते छन्दोगानाम्। 'न ह वा एवंविदि किञ्चनानन्नं भवति'। तथा वाजसनेयिनां, 'न ह वा अस्यानन्नं जग्धं भवती'त्यादि। तस्मात् सत्त्वशुद्ध्यर्थं यज्ञादेर्न विधानमिति प्राप्ते विषयव्यवस्थामाह। आहारदौर्लभ्येन प्राणात्यय उपस्थिते प्राणधारणस्य ज्ञानाऽन्तरङ्गतमसाधनत्वेनाहारस्य देहपोषकत्वेन ततो बहिरङ्गत्वात् तदनुमतिः क्रियत इत्यर्थः। अत्र प्रमाणमाह तद्दर्शनादिति। 'चाक्रायणः किलर्षिरापद्गत इभ्येन सामिखादितान् कुल्माषांश्चखादे'त्यादिश्रुतिदर्शनादित्यर्थः।

भाष्यप्रकाशः।

नैवामुष्मिन् मनःकल्पन'मिति भक्तिलक्षणात्तादृश्यां सत्यां तन्मार्गे स्वत एव शमदमादीनां सम्भवान्न तेषामावश्यकतया विशेषतो विधानम्। अत एव तत्र 'एतदेव च नैष्कर्म्य'मिति सन्न्यासरूपत्वं श्रावितम्। तथा च ज्ञानेऽन्तरङ्गाणां शमादीनां बहिरङ्गाणां यज्ञादीनां चास्त्यपेक्षा। भक्तौ तु तेषामर्थात् सिद्धिरिति भेद इत्यर्थः ॥ २६ ॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २७ ॥ अत्रैव किञ्चिदाशङ्क्य परिहरतीत्याशयेन सूत्रमवतारयन्ति नन्वित्यादि। तथा च यथा प्राणसंवादस्थश्रुतिभ्यामाहारशोधकश्रुत्युक्तमपोद्यते, तथा ताभ्यां शमयज्ञाद्यपवादोपि वक्तुं शक्यते। तस्मात् सत्त्वशुद्ध्यर्थं यज्ञशमदमादेर्न विधानम्, किन्त्वेतानि वाक्यानि विद्यास्तावकान्येवेति प्राप्ते, तानि न स्तावकानि, अपि तु विशेषविधानार्थान्येवेति हृदिकृत्य, अन्नभक्षणवाक्यव्यवस्थामाहेत्यर्थः। सूत्रं व्याकुर्वन्ति आहारेत्यादि। क्रियत इति। प्राणधारणार्थं क्रियते। तथा च सर्वान्नानुमतेर्ज्ञानान्तरङ्गसाधनार्थं

रश्मिः।

हेतोः। **तत्रेति** भक्तिमार्गे। **सन्न्यासेति**। 'काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदु'रिति गीतावाक्यात्। **अन्तरिति** लिङ्गदेहधर्मत्वात्तथा। **बहिरिति** यज्ञादीनां क्रियात्वेन देहधर्मत्वात्तथा। **तेषामिति**। शमदमादीनाम् ॥ २६ ॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २७ ॥ परीति व्यासः परिहरति **नन्वित्यादीति**। **छन्दोगानामिति**। **एवंविदीति** ज्ञानिनि प्राणविदि। **अनन्नमिति**। अप्रशस्तम्। प्राणोपासकस्य यजन्तुमात्रस्य जग्धं भक्ष्यं तत्सर्वमनन्नं भवति, इह अदनीयमेव भवतीत्यर्थ इति श्रद्धामृतवर्षणीकारः। **विशेषेति**। बहिरङ्गसाधनानुमतिरूपविशेषविधानार्थानि। तथान्तरङ्गशमदमादिविधानार्थानि। **आहारेत्यादीति**। **ज्ञानान्तरिति**। अन्तरङ्गतमसाधनत्वं मर्यादाभक्तेः भ्रमरगीतसुबोधिन्यामुक्तम्। **तत इति** प्राणधारणात्। **चाक्रायण इति** मटचीहतेषु कुरुष्वित्येतस्मिन् ब्राह्मणे चाक्रायणो नामतः किल ऋषिः कुरुदेशे दुर्भिक्षे जाते क्षुत्पीडितो देशान्तरमागतः कदाचिद्धस्तिपालकदेशं निविष्टः, तेन हस्तिपालकेन इभ्यपदवाच्येन सामि अर्धं भक्षितान् कुत्सितान्

यद्यपि ज्ञानसाधनत्वेन सत्त्वशुद्धेरपेक्षितत्वात् जाते ज्ञाने तत्साधनापेक्षणात् 'एवंविदी'ति वचनात् तादृशो सार्वदिक्यपि तदनुमतिर्नानुचिता। 'अपि स्मर्यते' इत्यनेनाविदुषोऽप्यनुमतेर्वक्ष्यमाणत्वाच्च। तथाप्याचार्येणावस्थाविशेषविषयकत्वमुक्तं यत्, तेन ज्ञानिनोऽप्यनापदि विहितत्यागोऽविहितकरणं च चित्तमालिन्यजननेन ज्ञानतिरोधायकमिति श्रुत्यभिमतमिति ज्ञाप्यते । अत एव श्रीभागवते द्वितीयस्कन्धे "विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम् । सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् । ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः । यदा तदेवासत्तर्कैस्तिरोभूयेत विप्लुत'मिति ब्रह्मणोक्तम् । 'ज्ञानिनामपि चेतांसि देवी भगवती हि सा। बलादाकृष्य मोहाय महामाया प्रयच्छति' इति मार्कण्डेयेनाप्युक्तम्। एषा ज्ञानमार्गीयज्ञानवतो व्यवस्थेति ज्ञेयम् । भक्तिमार्गीयस्यैवमापदसम्भवात्। 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह'मिति भगवद्वाक्यात्। 'मामेव ये प्रपद्यन्ते मायामेतान्तरन्ति ते' इत्यत्रैवकारेण पुरुषोत्तमज्ञानवत एव मायातरणोक्तेरक्षरमात्रज्ञानवतां तथात्वमनुचितम् ॥ २७ ॥

भाष्यप्रकाशः ।

व्यवस्थितत्वेनासार्वदिकत्वाच्च तया सार्वदिकानां सत्त्वशोधकसाधनानां ज्ञानमार्गे बाधः शक्यवचन इत्यर्थः। अत्र किञ्चिदाशङ्क्य परिहरन्ति यद्यपीत्यादि तथापीत्यादि च। ननु भवत्वेवं ज्ञानमार्गे, तथापि भक्तिमार्गे शमदमादीनां सत्त्वशोधकानां स्वभावतः प्राप्तत्वेन तदर्थकनिर्बन्धाभावात्तस्यापदुपस्थितौ पूर्वोक्तानुमतेरपि तत्र वक्तुमशक्यत्वात्तस्य का गतिरित्यत आहुः भक्तिमार्गीयस्यैवमिति। ननु यद्येवम्, तदा ज्ञानमार्गीयस्य कथमापत्तिरित्यत आहुः मामेवेत्यादि। तथा च मायातरणाभावादापत्तिमत्त्वमित्यर्थः ॥ २७ ॥

रश्मिः ।

माषान् भक्षितवान्। तेनोदपानं गृहाणेत्युक्ते सति, उच्छिष्टं न पीतं स्यादिति प्रतिषिध्य स्थिते चाक्रायणे, किमेते माषा उच्छिष्टा नेति हस्तिपकेनोक्ते सति, नेत्यत्र हेतुमाह चाक्रायणः। कुल्माषभक्षणं चेदहं न कुर्याम्, तर्हि मे जीवनं न स्यात्, उदपानं तु तटाकादिषु स्वेच्छातो भविष्यतीति। एवमिभ्योच्छिष्टान् माषान् खादित्वा शिष्टान् जायायै ददौ, तया च भर्तुः स्वभावज्ञया निहितानुत्तरादनेपि भक्षितवानिति श्रुतम्। **ज्ञानान्तरङ्गेति** । न च बहिरङ्गत्वमुक्तमिति कुतोऽन्तरङ्गत्वमिति वाच्यम्। अन्तरङ्गतमाद्बहिरङ्गमन्तरङ्गमित्यदोषात्। अत्रान्तरङ्गतमादीनां क्षराक्षरपुरुषोत्तमज्ञानैर्विवेको ज्ञेयः। **भाष्ये चित्तमालिन्येति**। 'यथा यथात्मा परिमृज्यत' इति वाक्यमनुसन्धेयम् । **ऋष** इति हे नारद। **प्रयच्छतीति**। चित्तमालिन्यजननेन ज्ञानतिरोधायको मोह इति। तमोरूपमायाकार्यत्वात्। **प्रकृतेति**। **तदर्थकेति** । भक्त्यर्थकशमादिनिर्बन्धाभावात् । तस्य आपदुपस्थिताविति च्छेदः। **तत्रेति** । भक्तिमार्गे । **तस्येति** । भक्तिमार्गीयस्य। **आपत्तिमत्त्वमिति**। भाष्यीयस्य **तथात्वमिति** पदस्य विवरणमिदम् ॥ २७ ॥

अबाधाच्च ॥ २८ ॥

आपदि तथान्नभक्षणेन चित्ताशुद्ध्यसम्भवेन तज्जनितप्रतिबन्धाभावाच्च न दोष इत्यर्थः ॥ २८ ॥

अपि स्मर्यते ॥ २९ ॥

आपद्यविदुषोपि दुष्टान्नभक्षणे पापाभावो यत्र स्मर्यते, तत्र विदुषि श्रुत्यनुमते का शङ्केत्यर्थः । स्मृतिस्तु 'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' इति । अथवा । विदुषो दुष्टकर्मासम्बन्धः, 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथे'ति स्मर्यतेऽपीत्यर्थः ॥ २९ ॥

शब्दश्चातोऽकामकारे ॥ ३० ॥

यतो ज्ञानाग्निरेव सर्वकर्मदहनसमर्थ इति फलदशायां कामकारेऽपि न दोषः, अत एव साधनदशायां तदभावेन 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षु'-रित्यादिरूपः शब्दः कामकारनिवर्तकः श्रूयत इत्यर्थः ॥ ३० ॥

इति तृतीयाध्याये चतुर्थपादे द्वितीयं सर्वापेक्षेत्यधिकरणम् ॥ २ ॥

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥ (३-४-३.)

एवं ज्ञानस्य कर्मनाशकत्वे सिद्धे जातज्ञानस्याश्रमकर्म कर्तव्यं न वेति चिन्त्यते । तत्र फलस्य जातत्वात् कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्तव्यमिति पूर्वः पक्षः । तत्र सिद्धान्तमाह ।

यथा ज्ञानिनामप्यनापदि शिष्टानामेवान्नं भक्षणीयम्, विहितत्वात्, तथा

भाष्यप्रकाशः ।

अबाधाच्च ॥ २८ ॥ अपि स्मर्यते ॥ २९ ॥ शब्दश्चातोऽकामकारे ॥ ३० ॥

एतत्सूत्रत्रयभाष्यमतिरोहितार्थम् ।

अन्ये तु, 'सर्वान्नानुमति'रित्यादिसूत्रचतुष्टयात्मकमधिकरणान्तरमङ्गीकृत्य, किमत्र विद्यावतः सर्वान्नभक्षणं विधीयते, उत विद्यास्तुत्यर्थं कीर्त्यत इति संशये, न द्वयमपि, किन्तु प्राणरक्षार्थमनुज्ञामात्रम् । अतोऽर्थवाद एवेति सिद्धान्तयन्ति । तदप्यविरुद्धम् ॥ ३० ॥

इति द्वितीयं सर्वापेक्षेत्यधिकरणम् ॥ २ ॥

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥ अधिकरणप्रयोजनं पूर्वपक्षादिकं चाहुः एवं ज्ञानस्येत्यादि । सूत्रव्याख्यानं तु स्फुटम् ॥ ३१ ॥

रश्मिः ।

अबाधाच्च ॥ २८ ॥ अपि स्मर्यते ॥ २९ ॥ शब्दश्चातोऽकामकारे ॥ ३० ॥ तद्भावेनेति ज्ञानाग्न्यभावेन । अतिर इति । एवमतिरोहितार्थमित्यर्थः ॥ ३० ॥

इति द्वितीयं सर्वापेक्षेत्यधिकरणम् ॥ २ ॥

विहितत्वाच्चाश्रमकर्मापि ॥३१॥ एवं ज्ञानस्येत्यादीति । 'ज्ञानाग्निः सर्वकर्माणी'त्युक्तदिशा । 'अविद्यायामन्तरे वर्तमाना' इति मुण्डके कर्माविधेत्यन्ये व्याकुर्वन्ति स्म । कृतस्येति कर्मणः । विहितत्वेति 'ब्रह्मचर्यं समाप्य गृही भवेत्, गृहाद्वनी भूत्वा प्रव्रजे'दित्यनया एकादशे

आश्रमकर्मापि कर्तव्यमेव, नित्यं विहितत्वादित्यर्थः। यथाऽनापद्यशिष्टान्नभक्षणं दोषाय, निषिद्धत्वात्, एतच्चोपपादितं 'सर्वान्नानुमति'रित्यत्र, तथा नित्यत्यागोऽपि प्रत्यवायजनक इति तत् कर्तव्यमेवेति भावः॥ ३१॥

यच्चोक्तं कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्तव्यमिति तत्राह।

सहकारित्वेन च॥ ३२॥

शमदमादीनामन्तरङ्गसाधनानां सहकारीण्याश्रमकर्माणीत्येतद्रहितैः शमादिभिरपि ज्ञानं न स्थिरीकर्तुं शक्यमिति तानि कर्तव्यान्येवेत्यर्थः। संसारवासनाजनकत्वस्वभावो यः कर्मणां स ज्ञानेन नाश्यत इति न सहकारित्वेऽनुपपत्तिः काचिदिति भावः॥ ३२॥

एवं ज्ञानमार्गीयज्ञानस्थैर्यसाधनमुक्त्वा भक्तिमार्गीयसाधनानां भगवच्छ्रवणादीनामित आधिक्यमावश्यकतां चाह।

सर्वथापि त एवोभयलिङ्गात्॥ ३३॥

भगवच्छ्रवणकीर्तनादयः साधनान्तरवद्विहितत्वेन कर्तव्या एव यद्यपि, तथापि सर्वथापि अन्येषां युगपदुपस्थितौ तदनुरोधमकृत्वापि त एव भगवद्धर्मा

भाष्यप्रकाशः।

सहकारित्वेन च॥ ३२॥ ननु गीतास्मृतौ ज्ञानस्य सर्वकर्मनाशकत्वमुक्तम्, जातज्ञानस्य च ज्ञानं वर्तत इति तेन कर्मनाशे कथं तेषां सहकारित्वं युज्यत इत्याशङ्कायामाहुः संसारेत्यादि। तथा च स्मृतावेधोऽग्निदृष्टान्तस्योक्तत्वात् यथाग्निरेधांसि दहँस्तेषां धूमादिजनकं स्वभावं नाशयति, स्वस्थितिपर्यन्तमङ्गाररूपेण स्थापयति च तत्स्वरूपम्, तद्वदत्रापि स्वान्तर्गतमेव कर्मस्वरूपं कृत्वा स्थापयतीति न सहकारित्वेऽनुपपत्तिरित्यर्थः॥ ३२॥

सर्वथापि त एवोभयलिङ्गात्॥ ३३॥ पूर्वं सर्वापेक्षासूत्रे सर्वपदेन कर्मज्ञानभक्तीनां सङ्गृहीतत्वात्तेषु कर्मणामङ्गाङ्गतयैव सङ्ग्रहः, मुख्यतया तु ज्ञानभक्त्योरिति पूर्वं प्रथमकक्षाविश्रान्तज्ञानमार्गीयज्ञानस्थैर्यप्रकारं दर्शयित्वा अधुना भक्तिमार्गीयाणां तं दर्शयतीत्याशयेन सूत्रमवतारयन्ति एवमित्यादि। आहेति। शारीरब्राह्मणस्थश्रुतिविचारेण श्रीभागवतगीतावाक्यविचारेण चाहेत्यर्थः। सूत्रं व्याकुर्वन्ति भगवदित्यादि। अन्येषामिति। आश्रमधर्माणाम्। ननु तच्छब्दस्य पूर्वपरामर्शित्वात् पूर्वं चाश्रमधर्माणां शमादीनां चोक्तत्वात्तान् विहायात्र तच्छब्देन भगवद्धर्मा एव कथं

रश्मिः।

सप्तदशाष्टादशाध्यायीयाभ्यां च विहितत्वात्। प्रत्यवायेति। 'सप्तहात् शूद्रतां व्रजे'दिति सप्तदिनानि सन्ध्यावन्दने अकृते प्रत्यवायो यथा। एवं स्फुटमित्यर्थः॥ ३१॥

सहकारित्वेन च॥ ३२॥ तेषामिति। एधसां काष्ठानाम्। तद्वदिति ज्ञानं कर्मणां संसारवासनाजनकत्वस्वभावं नाशयित्वा ज्ञानस्थितिपर्यन्तं स्वस्य ज्ञानस्यान्तर्गतं कृत्वा॥ ३२॥

सर्वथापि त एवोभयलिङ्गात्॥ ३३॥ शारीरेति। भाष्य एवाग्रे वक्तव्यानि।

एव कर्तव्या इत्यर्थः । कुतः । श्रुतिलिङ्गात् स्मृतिलिङ्गाच्च । श्रुतिलिङ्गं तु 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद् बहून् शब्दान् वाचो विग्लापनं हि त'दिति । 'तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतु'रित्यपि । अत्रैवकारेण भगवदतिरिक्तं प्रतिषिद्ध्य तद्विषयकज्ञानानुकूलं प्रयत्नं श्रवणात्मकं विज्ञायेति विधाय स्मरणमपि तन्मात्रविषयकमेव 'प्रज्ञां कुर्वीते'ति वचनेन विधाय तदेकनिष्ठताहेतुभूतानामेव शब्दानामावर्तनमर्थानुसन्धानमपि कर्तव्यम्, नान्येषामिति 'नानुध्यायाद् बहू'नित्यनेनोक्तवती । अत्र 'अन्वि'त्युपसर्गेण ध्यानस्य पश्चाद्भावित्वमुच्यते । तेन योग्यतया श्रवणकीर्तने एव तत्पूर्वभाविनी प्राप्येते । स्मृतिस्तु 'शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः । त एव पश्यन्त्यचिरेण तावकं भवप्रवा-

भाष्यप्रकाशः ।

गृह्णन्त इत्याशङ्कायां हेतुव्याख्यानेन तामपि निरस्यन्ति श्रुतिलिङ्गं तु 'तमेव धीर' इत्यादि । तथा च पूर्वं सूत्रेषु शमादीनां यज्ञादीनां च शारीरब्राह्मणस्थानामेव परामृष्टत्वादत्रापि तत्रत्यमेव साधनं परामृश्यते । तत्र च पूर्वं 'तमेव धीर' इति वाक्यमेवोक्तम् । ततो वेदानुवचनवाक्यम् । ततः शान्तदान्तवाक्यम् । अतः सूत्रस्थेन तच्छब्देन श्रुतिस्थं यत्पूर्वम्, तदेव परामृश्यते । श्रुतावेषां पूर्वमुक्तत्वेपि यदेषां पश्चाद्विचारणम्, तदेकादशस्कन्धे भगवता 'ज्ञानं कर्म च भक्तिश्चे'ति पश्चादुक्तत्वात् । 'तमेवैक'मिति मुण्डकश्रुतिश्चासन्दिग्धतया सम्यङ् माहात्म्यस्फोरणाय पठ्यते । केन लिङ्गेनात्र भगवद्धर्मप्राप्तिरित्याकाङ्क्षायां इतरानुध्याननिषेधकवाक्यगतानूपसर्गस्य पश्चाद्भावित्वप्रकाशकत्वलिङ्गेन तत्पूर्वभाविनी श्रवणकीर्तने प्राप्येते । तेन तदनन्तरं तत्सारभूतशब्दार्थानुसन्धानमेव कार्यम्, न त्वन्येषां तदर्थमन्यानुवादकानामपीति बोध्यत इति न कोपि शङ्कालेशः । स्मृतिलिङ्गं वक्तुमाहुः स्मृतिस्त्वित्यादि । अत्रापि प्रथमवाक्ये फलश्रुतिलिङ्गेन तेषां करणं लभ्यते । एवं

रश्मिः ।

तामिति आशङ्काम् । पश्चादीति अस्मिन्सूत्रे । पश्चादिति ज्ञानकर्मणी पूर्वसूत्रविचारिते इति ताभ्यां पश्चात् भक्तेरुक्तत्वात् । भाष्ये 'तमेवैक'मित्यत्राभिप्रायानुक्त्या । शारीरेत्यादि पूर्वमुक्तं साधयन्ति स्म तमेवैकमिति । माहात्म्येति । 'महात्मानस्तु मां पार्थे'ति वक्ष्यमाणवाक्ये महात्म्यावच्छिन्नोक्तेरुपष्टम्य श्रुतावपि त एव सम्बोध्या इति भावः । यद्वा । आत्मानमिति पदादतनशीलस्य माहात्म्यं क्षराक्षरज्ञानेपि तत् ज्ञानमेवेति माहात्म्यं देवत्वम् । माहात्म्यं तमेवेत्यत्रैवोक्तमित्यतोऽग्रेतनभाष्यमित्याशयेन अत्रान्वित्युपसर्गेत्यादिभाष्यार्थमाहुः केनेति लिङ्गं शब्दस्य सामर्थ्यं तेन । भगवद्धर्मेति माहात्म्यप्राप्तिः । पश्चादिति । तच्छब्दार्थध्यानस्य स्मरणस्य भावनस्य कृष्णचिन्तनस्येति यावत् । 'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः । आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तये'दिति वैक्यात् । तत्पूर्वेति निर्वाहकत्वेन भावेनापूर्वभाविनी । श्रवणादित्रिकस्य परस्परनिर्वाहकत्वमेकादशस्कन्धसुबोधिन्यां वर्तते । तेनेत्यादि भक्तेः कर्मज्ञानाभ्यां पश्चादस्मिन् सूत्र उक्तत्वेन । तदनन्तरमिति श्रवणकीर्तनानन्तरम् । शब्देति । अनुसंधानं भावना । न त्वन्येषामिति । 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति उपनिषदुक्तोऽर्थः । तदर्थम् तदुपष्टम्भार्थम् । अन्येषां काव्यादीनां तत्राप्यन्येषां राज्ञामनुवादकानाम् । 'सर्वाः शरत्काव्यकथारसाश्रया' इति वाक्यात् । फलश्रुतीति पदाम्बुजदर्शनविषयिणीफलश्रुतिसामर्थ्येन । तेषामिति ।

ह्योपरमं पदाऽम्बुज’मिति । ‘महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् । सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः । नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासत’ इति । एतेन भगवद्धर्माणामात्मधर्मत्वेनान्तरङ्गत्वादाश्रमकर्मणो देहधर्मत्वेन बहिरङ्गत्वात्तदविरोधेनैव तत् कर्तव्यमिति स्थितम् । अत एव भगवद्धर्मान्यधर्मं प्रतिषिद्ध्य तेषां सर्वेभ्य आधिक्यं ज्ञापयितुं ‘स वा अयमात्मा सर्वस्य वशी’त्यादिना भगवन्माहात्म्यमुक्तम् ॥ ३३ ॥

अनभिभवं च दर्शयति ॥ ३४ ॥

प्राधान्येन भगवद्धर्मा एव कर्तव्या इत्यत्रोपोद्बलकान्तरमनेन उच्यते । ‘सर्वं पाप्मानं तरति, नैनं पाप्मा तरति, सर्वं पाप्मानं तपति, नैनं पाप्मा तपती’त्यादिना भगवद्धर्मानुरोधेनाश्रमकर्माकरणजदोषैरनभिभवं च श्रुतिर्दर्शयति, अतो भगवद्धर्मा एव सर्वेभ्य उत्तमानि साधनानीत्यर्थः ॥ ३४ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३५ ॥

भगवद्धर्मेभ्य आश्रमधर्मा हीना इत्यप्यल्पमुच्यते । अपि तु तस्मिन् पुरुषोत्तमे धर्मिण्येव दृष्टिस्तात्पर्यं यस्य पुंसस्तस्याश्रमधर्मा अन्तरा च फलसिद्धौ व्यवधानरूपाश्चेति श्रुतिर्दर्शयतीति पूर्वेण सम्बन्धः । अन्तराशब्दोऽत्राव्ययात्मको व्यवधानवाचकः । तथा च श्रुतिः ‘एतद्ध स्म वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः

भाष्यप्रकाशः ।

गीतावाक्येपि ज्ञेयम् । सिद्धमाहुः एतेनेत्यादि । एतदुपष्टम्भाय प्रकृतश्रुतिस्थमेव लिङ्गं दर्शयन्ति अत एवेत्यादि । तथा चान्ते भगवन्माहात्म्योक्तिरपि भगवद्धर्माणामाधिक्ये तेषामवश्यकर्तव्यत्वे च लिङ्गमित्यर्थः । एतेन अस्मिन् सूत्रे त एवेत्यवधारणेन त्रयाणां युगपदुपस्थितौ भगवद्धर्मातिरिक्तान् आचार्यो निवर्तयतीति बोधितम् । एतदुपष्टम्भायैवाग्रिमा पञ्चसूत्रीति ॥ ३३ ॥

अनभिभवं च दर्शयति ॥ ३४ ॥ अत्र भाष्यमतिरोहितार्थम् । ‘सर्वं पाप्मानं तरती’ति श्रुतिस्तु शारीरब्राह्मणस्था ॥ ३४ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३५ ॥ व्यवधानवाचक इति । ‘अन्तरेऽन्तरा, अन्तरेण च

रश्मिः ।

श्रवणकीर्तनादीनाम् । एवं गीतेति । नवमाध्यायस्थं वाक्यम्, अत्रापि पदाम्बुजदर्शनं फलश्रुतिः । श्रीभागवतस्य गीताव्याख्यानत्वात् । यद्वा । नवमाध्यायस्थं व्यवहितम्, ‘यान्ति मद्याजिनोपि मा’मिति वाक्योक्तं श्रीभागवतोक्तरूपम् । एतेनेत्यादीति । तदविरोधेनेति । अन्तरङ्गाविरोधेन । तत्कर्तव्यम् बहिरङ्गकर्तव्यम् । प्रकृतेति । ‘तमेव धीर’ इति श्रुतिस्थम् । अत एवेत्यादीति । अन्तरङ्गानुरोधेन बहिरङ्गस्य कर्तव्यत्वादेव । ‘नानुध्याया’दित्यादिना भगवद्धर्मेभ्योऽन्यं बहूनां धर्मं निषिद्ध्य । माहात्म्यमुक्तमिति । देवत्वमुक्तम् । आचार्य इति व्यासः । आश्रमे आश्रमान्तरधर्मनिवर्तनवत् निवर्तयति ॥ ३३ ॥

अनभिभवं च दर्शयति ॥ ३४ ॥ सर्वमिति । अस्यां श्रुतौ । नैनमिति । पुरुषोत्तमविदमपीति तात्पर्यार्थः ॥ ३४ ॥

प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक' इति ऋणापाकरणहेतुत्वेन लौकिकोत्कर्षहेतुत्वेनापि प्रजाया अभीष्टत्वेपि तदुत्पादनव्यासङ्गेन भगवदानन्दानुभवेऽन्तरायो भविष्यतीति तद्दृष्ट्या तत्रोपेक्षां दर्शयति ॥ ३५ ॥

अपि स्मर्यते ॥ ३६ ॥

अपिशब्देनाश्रमधर्माणां तथात्वं किमु वाच्यम्, यतो ज्ञानतत्साधनवैराग्यादीनामप्यन्तरायरूपत्वं स्मर्यते । 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वाक्यम् ॥ ३६ ॥

विशेषानुग्रहश्च ॥ ३७ ॥

स्मर्यत इति पूर्वेण सम्बन्धः । ज्ञानादेः सकाशाद्भक्तिमार्गे फलतोऽप्युत्कर्षमाह । ज्ञानादिसाधनयत्स्वनुग्रहो मुक्तिपर्यन्त एव, भक्तिमार्गे तु, 'अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विजे'त्यादिवाक्यैर्विशेषरूपो मुक्तादिभ्योपि भक्तानां व्यावर्तको भगवदनुग्रहः स्मर्यत इत्यर्थः ॥ ३७ ॥

गूढाभिसन्धिमुद्घाटयन् फलितमर्थमाह ।

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३८ ॥

अत इति पूर्वोक्तश्रुतिस्मृतिपरामर्शः । तथा चेतरस्या मुक्तेरपि भक्तिमार्गीयतदीयत्वमेव ज्याय इत्यर्थः । अत्र हेत्वन्तरमाह लिङ्गाच्चेति । मुक्तानां तु मायाविनिर्मुक्तमात्मस्वरूपमेव, न तु देहेन्द्रियादिकमप्यस्ति, येन भजनानन्दानुभवः स्यात् । भक्तानां तु देहेन्द्रियादिकमपि मायातत्कार्यरहितत्वेनानन्दरूपत्वेन च भगवदुपयोग्यतोपि तत्तथेत्यर्थः । न हि मुक्तात्मनां कश्चन भगवदुपयोगोऽस्तीति

भाष्यप्रकाशः ।

मध्ये स्यु'रिति कोशात् । मध्यस्थितस्य च व्यवधायकत्वाद् व्यवधानवाचक इत्यर्थः । आश्रमकर्मणां कथं व्यवधायकत्वमित्याकाङ्क्षायां श्रुत्या तदुपपादयन्ति तथा चेत्यादि । इयमपि श्रुतिस्तत्रत्यैव ॥ ३५ ॥

अपि स्मर्यते ॥ ३६ ॥ विशेषानुग्रहश्च ॥ ३७ ॥ एतद्भाष्यमप्यतिरोहितार्थम् । अनुग्रहस्तु धर्मान्तरं कृपादयाद्यपरपर्यायम्, न तु फलदित्सा । 'यस्यानुग्रहमिच्छामी'ति वाक्यात् । अयमेव च पुष्टिशब्देनोच्यते । 'पोषणं तदनुग्रह' इति वाक्यात् । एतत् सर्वं मत्पितृचरणविरचिते पुष्टिप्रवाहमर्यादाख्यग्रन्थविवरणे प्रपञ्चितमिति नात्रोच्यते ॥ ३७ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३८ ॥ मुक्तेरिति पञ्चमी अत्रेति । भक्तिमार्गीयभगवदीयत्वस्य मुक्तितोपि ज्यायस्त्वे । स्वरूपमेवेति । तिष्ठतीति शेषः । अतोपीति भगवदुपयोगिलिङ्गस्थूलशरीरद्वयात्मिकाया भजनानन्दानुभावकसामग्र्या आधिक्यादिति । एतेन 'सर्वेन्द्रियैस्तथा चान्तःकरणैरात्मनापि हि । ब्रह्मभावात्तु भक्तानां गृह एव विशिष्यत' इति निबन्धोक्तं

रश्मिः ।

अन्तरा चापि तु तद्दृष्टेः ॥ ३५ ॥ तत्रत्यैवेति । शारीरब्राह्मणस्यैव ॥ ३५ ॥

अपि स्मर्यते ॥ ३६ ॥ विशेषानुग्रहश्च ॥ ३७ ॥ अतस्त्वितरज्ज्यायो लिङ्गाच्च

भावः । तदुक्तं श्रीभागवते, 'न यत्र माया किमुताऽपरे हरेरनुव्रता यत्र सुरासुरार्चिता' इत्यादि, मुक्तोपसृप्यत्वं चोच्यते । अत एव सप्तमस्कन्धे 'देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिना'मित्युक्तम् । पुरवासित्वे देहादेरावश्यकत्वान्निषेधो जडात्मकानामेवेत्यवगम्यते । इतरज्ज्याय इति पाठे तु पूर्वोक्ताश्रमकर्मपरामर्शोऽत इत्यनेन उक्तयोरेव वा । एतेन, 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'तिश्रुत्युक्तफलवत्त्वं तस्य सूच्यते ॥ ३८ ॥

इति तृतीयाध्याये चतुर्थपादे तृतीयं विहितत्वाच्चाश्रमकर्मेत्यधिकरणम् ॥

भाष्यप्रकाशः ।

स्मारितम् । ननु भगवदुपयोगित्वस्य कथं मुक्त्यपेक्षया भक्ताधिक्यलिङ्गत्वमित्यपेक्षायां तत्र प्रमाणमाहुः तदुक्तमित्यादि । एतद्वाक्ये मायासंसर्गरहिते स्थाने भगवदनुव्रतानां कथनाद्भगवतो मुक्तसेव्यत्वस्य पूर्वं भगवता सूत्रकारेण मुक्तोपसृप्यसूत्रे उक्तत्वाच्च तदेव प्रमाणमित्यर्थः । एतदुपोद्बलनाय निषेधमुखेनालौकिकदेहबोधकं वाक्यान्तरमाहुः अत एवेत्यादि । एवमेकपाठं व्याख्याय पाठान्तरं व्याकुर्वन्ति इतरदित्यादि । उक्तयोरिति । श्रुतिस्मृत्योः । अस्मिन् पक्षे इतरदितिपदेन भक्तिमार्गीयभगवदीयत्वं बोध्यम् । सिद्धमाहुः एतेनेत्यादि । तस्येति तादृशभगवदीयत्वस्य । एवं ज्ञानिधर्माणां शमादीनामाश्रमधर्माणां च विहितत्वेन तौल्यादवश्यकर्तव्यत्वे प्राप्तेप्यनभिभवादिपञ्चसूत्र्या भगवद्धर्माणामुत्कर्षप्रदर्शनेन, अन्येषामेतेषां च युगपदुपस्थितौ भक्तिमार्गीयेण पूर्वमेत एव कर्तव्या, गौणकाले त्वन्य इति निर्णीतम् । यद्यप्यतीतपादे, 'आदरादलोप' इत्यधिकरणे राजसभक्तानां कर्मासक्तिनिवृत्तयेऽयमर्थ उक्तः, तथाप्यत्र कर्मोपसंहारप्राकारदार्ढ्यार्थं पुनर्विशेषतो युक्तिपूर्वकं बोधित इति न पुनरुक्तिदोष इति ज्ञेयम् ।

अन्ये तु 'सर्वथाऽपी'ति सूत्रद्वयमाश्रमकर्माधिकरणशेषत्वेनाङ्गीकृत्य त एवेत्यवधारणेनाश्रम-

रश्मिः ।

॥ ३८ ॥ **स्वरूपमेवेति** । तेनात्मस्वरूपमित्यत्रात्मनः स्वरूपमित्यपि पाठः । **आधिक्यादिनीति** आधिक्यादपि । 'इति प्रकरणे हेतौ प्रकारादिसमाप्तिष्वि'ति विश्वात् । **भक्ताधिक्येति** । ननु मुक्तिः फलम्, भक्तो फलभक्तिविशिष्ट इति मुक्त्यपेक्षया भक्ताधिक्यासिद्ध्या दूरं तल्लिङ्गत्वप्रश्न इति चेत्, न । 'अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तम' इत्यात्यन्तिकभक्तिलक्षणमुक्त्वा कार्यमाह 'सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जना' इत्यत्रैकत्वापेक्षया भगवत्सेवनस्याधिक्योक्तेः । **पूर्वमिति** द्वितीयाध्याये । **निषेधेति** 'देहेन्द्रियासुहीनाना' मित्येवं पूर्वोक्तस्य, भक्तानां तु देहेन्द्रियादिकमपीत्यस्य **निषेधमुखेन** निषेधोपायेन **भगवदीयत्वस्य** । तेन भगवदीयत्वं फलवदिति निष्पन्नम् । फलं किमित्युक्ते । साधनफलैकीकारेण । प्रकटसदंशसेवायां प्रकटानन्दांशत्वे भवति । सेवाविषयभगवद्रूपानन्देन वा । तदुक्तं 'तस्मात् सर्वं परित्यज्य निरुद्धैः सर्वदा गुणाः । सदानन्दपरैर्ज्ञेया सच्चिदानन्दता स्वत'इति निरोधलक्षणग्रन्थे । निरुद्धस्य जीवस्य सच्चिदानन्दता स्वत इति बोध्यम् । निरोधस्त्वात्यन्तिकभक्त्यात्मको भवत्येव । एतच्चेतः प्रेत्य फलम् । 'अस्माल्लोकात् प्रेत्ये'ति ब्रह्मवित्प्रपाठकश्रुतेः । **भक्तिमार्गीयेणेति** । पुंसा । **आश्रमकर्मेति** । इदमधिकरणं सूत्रचतुष्टयात्मकम् । तेनाश्रमकर्माधिकरणे शेषत्वेनाश्रमकर्माधिकरणशेषत्वेन । सप्तमी शौण्डैरित्यत्र सप्तमीति योगविभागात् समासः । **त एवेति** । **सर्वथापि त एवेत्यत्र त एवेत्यवधारणेन** । **आश्रमेति** । आश्रमधर्मातिरिक्तानि धर्मान्तराण्यभिहो-

भाष्यप्रकाशः ।

धर्मातिरिक्तधर्मान्तरनिवृत्तिमङ्गीकुर्वन्ति । यथा हि, 'मासमग्निहोत्रं जुहुती'ति कर्मान्तरमुपदिश्यते, तथा नात्र, किन्तु तान्येव वेदानुवचनादिपदैरनूद्य पृथक्संयोगो विधीयते तस्मादिति । तत्रैवं व्याख्याने सर्वथेति पदानर्थक्यम् । आश्रमधर्मपक्षे भेदशङ्काया एवानुदयादिति । अनभिभवसूत्रवैयर्थ्यं च ।

तथा, 'अन्तरा चापी'ति सूत्रचतुष्टयात्मकमधिकरणान्तरमङ्गीकृत्य तत्र विधुरादीनां द्रव्यादिसम्पद्रहितानां चान्यतमाश्रमप्रतिपत्तिहीनानां च विद्यायामधिकारोऽस्ति, न वेति संशये, रयिक्वाचक्नुवीप्रभृतीनामपि ब्रह्मवित्त्वश्रुत्युपलब्धेः । संवर्तप्रभृतीनां च नग्नचर्यादियोगादनपेक्षिताश्रमकर्मणामपि महायोगित्वस्मरणात् । विधुरादीनामविरुद्धैः पुरुषमात्रसम्बन्धिभिर्धर्मविशेषैर्विद्यानुग्र-

रश्मिः ।

त्रादीनि न भवन्ति । किन्तु सर्वथाप्याश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे च त एवाग्निहोत्रादयोऽनुष्ठेयाः । त एवेत्यवधारयन् आचार्यः किं निवर्तयति । कर्मभेदाशङ्कामिति ब्रूमः । यथा कुण्डपायिनामयने'मासमग्निहोत्रं जुहोती'त्यत्र नित्याग्निहोत्रात् कर्मान्तरमुपदिश्यते नैवमिह कर्मभेदोस्तीत्यर्थः । कुतः । श्रुतिलिङ्गात्, स्मृतिलिङ्गाच्च । श्रुतिलिङ्गं तावत् 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'ति सिद्धवदुत्पन्नरूपाण्येव यज्ञादीनि विविदिषायां विनियुङ्क्ते । जुहुतीत्यादिवत् नापूर्वमेषां रूपमुत्पादयतीति । स्मृतिलिङ्गमपि 'अनाश्रितः कर्मफलं कार्यं कर्म करोति य' इति । एवं आश्रमधर्मातिरिक्तधर्मान्तरनिवृत्तिमङ्गीकुर्वन्तीत्यर्थः । कर्मान्तरमिति । पूर्वतन्त्रे चिन्तितं द्वितीयेऽध्याये । अत्र हि जुहुतीत्याख्यातस्य विधायकस्य प्रकृतिभूतस्य जुहोतेरर्थः अग्निहोत्रमिति युक्तः तस्य प्रसिद्धाग्निहोत्राद्भेदः । जुहोतेः साध्यहोमव्यक्तिवचनत्वेन सिद्धाग्निहोत्रपरामर्शानुपपत्तेः । अत एव तदेकार्थकाग्निहोत्रशब्दस्य न नित्याग्निहोत्रानुवादकत्वं व्यक्तिवचनादेव । एवं कर्मान्तरमुपदिश्यते । तथा नात्रेति अत्र प्रकृते तथा न यज्ञादेर्विधायकाख्यातः प्रकृत्यर्थः । विविदिषाया एव तदर्थत्वात् किन्तु तानीति । अग्निहोत्रादीनि । विविदिषन्तीति पृथग्विद्यासंयोगः । तस्मादाख्यातप्रकृत्यर्थमात्रार्थकैर्यज्ञादिशब्दैः प्रसिद्धस्य यज्ञादेरनुवादेन 'तमेत'मित्यत्र विद्यासंयोगमात्रमपूर्वं विधीयते इति न कर्मभेदः । तस्मादिति उभयलिङ्गात् । एवमिति सर्वथाप्याश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे चेति । सर्वथापदव्याख्याने । अनुदयादिति अग्निहोत्रादेर्गृहस्थाश्रमधर्मत्वात् विद्यासहकारित्वमात्रपक्षे सर्वपदासङ्गतेः । अनभिभवेति । रागादिभिः क्लेशैरेष ह्यात्मानं न पश्यति यं ब्रह्मचर्येणानुविद्याश्रुतिर्ब्रह्मचर्यादेराश्रमकर्मणो मनःशुद्धिद्वारा ज्ञानसाधनत्वे आत्मानभिभवं लिङ्गं दर्शयतीति सूत्रार्थः । अत्राश्रमधर्मविचारः पूर्वसिद्ध इति तथा । विधुरेति अन्तराले वर्तमानो विधुरः । एतस्यैव प्रपञ्चः द्रव्यादीति । रयिक्वेति । छान्दोग्ये 'जानश्रुतिर्ह पौत्रायण' इत्यारम्भके प्रपाठकेऽस्ति । वाचक्नुवीति । वचक्नोरपत्यं स्त्री वा वाचक्नुवी । वाचक्नवीत्यपि पठ्यते । ब्रह्मवित्त्वेति । 'रयिक्वेमानि षट्शतानि गवामयं निष्को अयं अश्वतरीरथोऽनु म एतां भगवोदेवताᳫशाधि वां देवतामुपास्सः' इति ब्रह्मवित्त्वश्रुतेरुपलब्धेः । वाचक्नवी स्त्रीत्वादनाश्रमी । अपि स्मर्यत इति सूत्रार्थमनुवदन्ति संवर्तेति । प्रभृतिशब्देनर्षभादयः । महेति इतिहासे तथा । विशेषानुग्रहश्चेति सूत्रार्थमनुवदन्ति स्म विधुरादीनामिति । अविरुद्धैरिति अविधुरादिभ्योऽविरुद्धैः । धर्मेति जपोपवासदेवताराधनादिभिः । तथा च स्मृतिः 'जप्येनैव तु संसिद्ध्येद् ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वाऽकुर्यात् मैत्रो ब्राह्मण उच्यते' इति । संशयद्वितीयकोटेः पूर्वपक्षत्वं

तद्भूतस्य तु नाऽतद्भावो जैमिनिरपि नियमातद्रूपाभावेभ्यः ॥ ३९ ॥ (३-४-४)

अथेदं विचार्यते । तदीयानामपि कदाचित् सायुज्यमस्ति, न वेति । तत्र भक्तिमार्गस्यापि साधनरूपत्वात् तस्य च मुक्तावेव पर्यवसानात् तदीयत्वस्य साधनावस्थायामुत्कृष्टावस्थारूपत्वात् तेषामपि मुक्तिरावश्यकी । तथा च फलतो न कश्चित् विशेष इति प्राप्ते, उच्यते तद्भूतस्येत्यादि । तुशब्देन मर्यादामार्गीयव्यवच्छेदः । अत्र विश्वासदार्ढ्यायाह । अन्यस्य का वार्ता, कर्ममात्रनिरूपकस्य जैमिनेरपि यदि कदाचिद्भगवत्कृपयायं भावो भवेत्, तदा तद्भूतस्य पुष्टिमार्गीयभगवद्भावं प्राप्तस्य तस्यापि नातद्भाव उक्तभावतिरोधानं न कदाचिदपीत्यर्थः । अत्र हेतूनाह नियमादीन् । तैत्तिरीयके, 'ते ते धामान्युष्मसी'ति मन्त्रे 'यत्र भूरिशृङ्गा अयासस्तदुरुगायस्य परमं पद'मित्युक्त्वा, तदनन्तरं तत्र कृतानि कर्माण्यपि, 'विष्णोः कर्माणि पश्यते'ति मन्त्रेण निरूप्य, पुनः पूर्वोक्तलीलास्थानं, 'तद्विष्णोः परमं पद'मिति पदेनानूद्य, तस्य नित्यत्वनिरू-

भाष्यप्रकाशः ।

द्मरणाच्च । तेषामप्यस्त्यधिकार इति निर्णयमाहुः । अन्तरालवर्तित्वापेक्षया आश्रमित्वं ज्यायो विद्यासाधनमिति चाहुः । तत्रोदासीना वयम् ॥ ३८ ॥

इति तृतीयं विहितत्वाच्चाश्रमकर्मेत्यधिकरणम् ॥ ३ ॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ३९ ॥ अधिकरणमवतारयन्ति अथेत्यादि । कदाचित् सायुज्यमस्ति, न वेति साधनभक्तिपरिपाकदशायामक्षरसायुज्यमस्ति न वेत्यर्थः । तस्य चेति । साधनस्य । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति तुशब्देनेत्यादि । तेन 'नैकात्मतां मे स्पृहयन्ती'त्यादीनां भक्तमुक्तिबोधकानां वाक्यानां न विरोध इति बोधितम् । मर्यादासहितपुष्टौ फलस्य पुरुषोत्तमसायुज्य एव पर्यवसानादिति । यदि कदाचिदिति । अनेकजन्मसु विहितकर्मकरणेन भगवत्तोषे जाते । तन्नियम इति । सार्वदिकदर्शननियमः । पुष्टिमार्गीयभगवदीयत्वस्य मुक्तिफलरूपत्वे श्रुतिं दर्शयन्ति यदा सर्वे इत्यादि । इयं शारीरब्राह्मणस्था । तत्र अकामयमानं कर्तारमुपक्रम्य तादृशस्य प्राणानुत्क्रमणं 'ब्रह्मैव सन् ब्रह्माप्येती'ति ब्रह्मणि लयं चोक्त्वा लयस्वरूपं विवेक्तुं 'तदेष श्लोको भवती'ति प्रतिज्ञाय, 'यदा सर्वे' इति पठ्यते । तत्र सर्वकामप्रमोके अस्यामृतत्वभवनमुक्त्वा, 'अत्र' एतल्लोक एव, 'ब्रह्म समश्नुते' इत्यनेन 'सोऽश्नुते' इत्यत्रेव 'अश भोजने' इति धातोरेव विकरणपदव्यत्ययाभ्यां प्रयोगात्तत्संवार्थो गृह्यत इति मुक्तस्य

रश्मिः ।

सूचयन्तो अन्येषामिति । इतरदिति सूत्रार्थमनुवदन्ति स्म । अन्तराल इति आश्रमाणामन्तराले । वर्तित्वापेक्षया आश्रमरहिततायां वर्तित्वापेक्षया । उदासीना इति । सारवद्विश्वतोमुखत्वात् सूत्राणामिति भावः ॥ ३८ ॥ इति तृतीयं विहितत्वाच्चाश्रमकर्मेत्यधिकरणम् ॥ ३ ॥

तद्भूतस्य तु नाऽतद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ३९ ॥ तेनेति ज्ञानमार्गीयमुक्तिनिषेधेन । न विरोध इति । भक्तिमार्गीयत्वादिति भावः । नैकात्मतामित्यत्रैकात्मताप्राप्तौ निषेध इति । भाष्ये । सूरिपदेनेति । पुरुषोत्तमज्ञानवद्वाचकपश्यतिपदसमभिव्याहृतेन । प्रकृते । उक्तेति आत्मकामेनोक्ता । विकरणेति अश्नातीत्यत्र तथा । स चेति भाष्यं

पणायोच्यते, 'सदा पश्यन्ति सूरय' इति । सूरयो विद्वांसः पुरुषोत्तमज्ञानवन्त इति यावत् । तच्च भक्तयैवेति सूरिपदेन भक्ता उच्यन्ते । तथा च भक्तानां सार्वदिकदर्शनं नियम्यते, 'सदे'ति पदेन । एवं सति पुष्टिमार्गीयभगवद्भावं प्राप्तस्य मुक्तावुच्यमानायां तन्नियमो भज्येतेत्यर्थः । यच्चोक्तं साधनावस्थायामुत्तमावस्थारूपत्वम्, परं तदीयत्वस्य फलं मुक्तिरेवेति तत्राह । **अतद्रूपेति** । उक्तभगवदीयत्वं न साधनरूपमपि तु मुक्तेरपि फलरूपम् । 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा' इति वाक्यात् । 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत' इति श्रुत्या अमृतस्य मुक्तस्य ब्रह्मस्वरूपभोग उच्यते । स च, 'यमेवैष वृणुत' इति श्रुतेर्भगवदीयत्वसाध्य एवेति स्पष्टं फलत्वमस्यातोऽतद्रूपत्वम् । किञ्च । फलं हि साधनादुत्तमं भवति । भगवदीयत्वादुत्तमस्यार्थस्याभावादपि न मुक्तिर्वक्तुमुचिता । तदुक्तं श्रीभागवते पञ्चमस्कन्धे पूर्वं भक्तिस्वरूपं निरूप्य, 'तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्था' इति ॥ ३९ ॥

इति तृतीयाध्याये चतुर्थपादे चतुर्थं तद्भूतस्येत्यधिकरणम् ॥ ४ ॥

भाष्यप्रकाशः ।

ब्रह्मस्वरूपभोग एवात्रोच्यते । स च, 'यमेवे'ति श्रुत्यन्तरैकवाक्यतया तथावधार्यते इति मुक्तिफलरूपत्वान्न तस्य मुक्तिसाधनरूपत्वमित्यर्थः । तेन अतद्रूप इति भावप्रधानो निर्देश इति बोधितम् । न च 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यत्रेयं वाजसनेयिश्रुतिः । 'अकामयमानस्ये'त्यारभ्या'त्र ब्रह्म समश्नुत' इत्यन्तं सुषुप्तिपरत्वेन भाष्य एव व्याख्यातेति कथमत्रैवमुच्यत इति शङ्क्यम् । याज्ञवल्क्येन श्लिष्टतया तत्र सुषुप्तिमोक्षावस्थे बोधिते इति बोधनार्थं तत्र तथा व्याख्यानम्, न तु सिद्धान्तबोधनायेति तत्रैव मया व्युत्पादितत्वादिति । शेषं स्फुटम् । यद्यप्यतीतपादे लिङ्गभूयस्त्वाधिकरणस्थे 'अनुबन्धादि'सूत्रेऽयमर्थो निर्णीतः, तथापि सर्वात्मभाववत एव निर्णीतः न तु पुष्टिमर्यादामार्गीयभगवद्भक्तस्यापीति न पुनरुक्तिरिति ज्ञेयम् ।

अन्ये तु, अत्र ऊर्ध्वरेत आश्रमात् कथमपि पुनराश्रमान्तरं भवति न वेति संशयेऽनेन सूत्रेण तद्भावः साध्यत इत्याहुः । तदस्माकमपि सम्मतम् ।

यत्तु जैमिनिपदमैकमत्यबोधनायेत्याहुः तत् तद्दर्शने तद्विचारादर्शनाच्छिष्यत्वेन तत्सम्मतिप्रदर्शनप्रयोजनाभावाच्चेति न रोचिष्णु ॥ ३९ ॥ इति चतुर्थं तद्भूतस्येत्यधिकरणम् ॥४॥

रश्मिः ।

विवृण्वन्ति स्म । स च यमेवेति । तथेति भाष्योक्तप्रकारेण । तस्येति । तदीयत्वस्य । तेनेति । अतद्रूपत्वमिति भाष्येण । अत्रैवमिति अस्मिन्नधिकरणे । एवं पुष्टिफलदत्वेन । श्लिष्टतयेति । मोक्षसुषुप्तिसुखयोः श्लिष्टं ब्रह्मपदं तया । बोधिते इति । स्फुटमिति । उत्तमस्येति । भगवदीयत्वफले वैराग्यजनकस्य । आत्यन्तिकमिति एतल्लक्षणमुक्तम् । एवं स्फुटमित्यर्थः । ऐकमत्ये विशेषावधानमाशङ्क्याहुः शिष्यत्वेनेति । नेति । विशेषावधानाभावान्न रोचिष्णु ॥ ३९ ॥

इति चतुर्थं तद्भूतस्येत्यधिकरणम् ॥ ४ ॥

न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॥ ४० ॥ (३-४-५)

अथेदं विचार्यते । ध्रुवायेव ब्रह्मादिलोकाधिकारं दत्त्वा तत्सम्बन्धिफलं ददाति, न वेति । तत्र नेत्याह न चेति । तत्र हेतुः । पतनानुमानादिति । 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुने'ति स्मृतेरित्यर्थः । फलस्य सावधित्वादिति भावः । किञ्च । तादृशे भगवदीये पतनायोगादपि न तथा । अथवा । तादृशस्य सदा भक्तिरसानुभवात्तदतिरिक्तस्यानपेक्षणादन्येषां फलानां सम्बन्धाभावादित्यर्थः ॥ ४० ॥

भाष्यप्रकाशः ।

न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॥ ४० ॥ अधिकरणमवतारयन्ति अथेत्यादि । अथेदं विचार्यत इति पुष्टिमर्यादामार्गीयफलविचारोत्तरं मर्यादापुष्टस्य फलं विचार्यत इत्यर्थः । तत्सम्बन्धीति अधिकारसम्बन्धि । सिद्धान्तमाहुः तत्र नेत्यादि । ईदृशे सन्देहे 'ध्रुवायेव ददाती'ति पूर्वपक्षे नेत्याहेत्यर्थः । हेतुं व्याकुर्वन्ति आब्रह्मेत्यादि । सूत्रयोजना तु, आधिकारिकं फलम् चकारादधिकारमपि न, पुष्टिमार्गीयेभ्यो न ददात्येव । कुतः । पतनानुमानात् । अनुमीयते श्रुतिरनेनेत्यनुमानं स्मृतिः, पतनबोधकमनुमानं पतनानुमानं तस्मात् । शेषा तु स्फुटा । तर्हि, ध्रुवाय कथं दत्तवानिति तु न शङ्क्यम् । द्वितीयस्कन्धे, 'ते वै विदन्त्यतितरन्ति च योगमाया'मिति भगवद्योगमायाज्ञानरूपसाधनान्तरस्य ध्रुवे उक्तत्वेन, 'नैच्छन्मुक्तिपतेर्मुक्तिं पश्चात्तापमुपेयिवा'निति वाक्येन च तस्य मुमुक्षुतया मर्यादामार्गीयत्वावगमात् । ये पुनः पुष्टावङ्गीकृताः, तेषां तु मुक्तावप्याकाङ्क्षाराहित्यात्तामेव न ददातीति दूरापेतमाधिकारिकमित्यर्थः । किञ्च । तस्यापि तत्र मुक्तिरेव मायातरणरूपा फलत्वेनोच्यते, न तु भक्तिफलम्, अतो न दोषः । भक्तस्वरूपविचारेणार्थान्तरं तदयोगपदस्याहुः । अथवेत्यादि ॥ ४० ॥

रश्मिः ।

न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॥ ४० ॥ तत्सम्बन्धीति । ततोऽपुनरावृत्त्यादि यावदधिकारम् । नेत्यस्यार्थः पुष्टिमार्गीयेभ्य इत्यादिः सम्प्रदानक्रियावधारणैः सह । श्रुतिरनेनेति । ऋषीणां श्रुत्युक्ताचारस्मरणात् स्मृतिरिति व्युत्पत्त्या स्मृतिमूलश्रुतिरनेनानुमानेन ज्ञाप्यतेऽनुमीयते वा । 'आब्रह्मे'ति स्मृतिः एतत्समानार्थकश्रुतिमूला, स्मृतित्वात् । 'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः । प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महे'ति स्मृतिवदिति । मध्यमपदलोपी समास इत्याहुः पतनेति । देवपूजको ब्राह्मणो देवब्राह्मण इतिवत् । शेषेति । तदयोगादित्यस्य योजना भाष्ये स्फुटेत्यर्थः । दत्तवानिति । अपुनरावृत्त्यादि यावदधिकारं दत्तवान् । उक्तत्वेनेति । ज्ञानवत्त्वात् । मुमुक्षुतायां हेतुः नैच्छन्निति । ध्रुवः मुक्तिपतेर्मुक्तिं नैच्छदित्यर्थः । तस्मात् सपत्न्या वा वाक्स्मरणात् । पश्चादितिपाठे स्मरणात् पश्चात् । तस्येति । ध्रुवस्य । तामिति । मुक्तिम् । तस्यापीति । ध्रुवस्यापि । न दोष इति । ध्रुवायापुनरावृत्त्यादिदानदोषो न । भाष्ये । पतनायोगादिति । भगवद्भावाच्युतिः पतनम् । अग्रिमसूत्रे वक्ष्यन्ति । फलानामिति । अधिकारसम्बन्धिफलानामपुनरावृत्त्यादीनाम् ॥ ४० ॥

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४१ ॥

एके भक्ता आधिकारिके फले पतनमात्रं न हेयत्वप्रयोजकमिति वदन्ति, अपि तु उपपूर्वं पतनमेव तदिति वदन्ति, भक्तिभावाच्युतेः । अधिकारसमाप्तौ भगवदनुग्रहाशापि कदाचित् सम्भवतीत्युपपतनं तत् । मुक्तौ त्वपुनरावृत्तेर्भक्तिरसाशापि नेति महापतनमेव सेति भावः । तेन निषिद्धकर्मफलतुल्यत्वं ज्ञापितं भवति । अत एव श्रीभागवते 'नारायणपरा लोके न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इति गीयते । भक्तिमार्गे तु साक्षात्सङ्गाभावेपि तदीयं भावमात्रमप्यशनवत् साक्षाद्भगवत्स्वरूपभोगवदेव मन्यन्ते । तदुक्तं श्रीभागवते, 'अथ ह वा व तवे'त्यादिना । साक्षाद्भगवद्भोगो जीवस्यासम्भावित इति शङ्कानिरासायाह, तदुक्तमिति । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति, 'अत्र ब्रह्म समश्नुत' इत्यादिश्रुतिषु साक्षाद् ब्रह्मस्वरूपरसाशनमुक्तमित्यर्थः ॥ ४१ ॥

इति तृतीयाध्याये चतुर्थपादे पञ्चमं न चाधिकारिकमित्यधिकरणम् ॥ ५ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४२ ॥ (३-४-६)

अथेदं चिन्त्यते । प्रचुरभगवद्भावमात्रवतः साक्षात् स्वरूपभोगवतो वा गृह-

---

भाष्यप्रकाशः ।

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४१ ॥ उक्तेऽर्थे हेत्वन्तरमाहेत्याशयेन सूत्रं व्याकुर्वन्ति, एक इत्यादि । 'अथ ह वा वे'ति । इदं गद्यं षष्ठस्कन्धे नवमाध्याये 'अथ ह वा व तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्पन्दमानानवरतसुखेन विस्मृतदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतसुहृदि सर्वात्मनि नितरां निरन्तरनिर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाऽम्बुजानुसेवां विसृजन्ति, न यत्र पुनरयं संसारपर्यावर्त' इति । तथा च पूर्णानुग्रहभाजनानामेव भगवत्परायणत्वात् तेषामाधिकारिकं फलमधिकारं च तुच्छत्वान्न ददाति, किन्तु भगवल्लोकेषु नित्यमक्षरात्मकं सेवानुरूपं देहमन्तर्भजनानन्दानुभवं च ददातीत्येतादृशं मर्यादापुष्टानां फलमिति सिद्धम् । एतेन भक्तिमार्गे मध्यमजघन्याधिकारिणोरपि ज्ञानफलतः फलोत्कर्षाद्भक्तिमार्ग उत्कृष्ट इत्यपि सिद्धम् ॥ ४१ ॥

इति पञ्चमं न चाधिकारिकमित्यधिकरणम् ॥ ५ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४२ ॥ अधिकरणप्रयोजनमाहुः अथेदमि-

रश्मिः ।

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४१ ॥ उक्तेऽर्थ इति लोकाधिकारसम्बन्धिफलं न ददातीत्युक्तेऽर्थे । भाष्ये । सोऽश्नुत इति श्रुत्योरर्थः पूर्वमुक्तः ॥ ४१ ॥

इति पञ्चमं न चाधिकारिकमित्यधिकरणम् ॥ ५ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४२ ॥ ननु सन्न्यासस्य प्रसिद्धत्वात् किमनेनाधिकरणेनेत्यत आहुः अधिकरणेति । प्रयोजनमिति आरुण्युपनिषदि 'आरुणिः प्रजापतेर्लोकं

त्यागः कर्तव्यो न वेति, फलस्य सिद्धत्वान्नेति पक्षव्यवच्छेदाय, 'मद्वार्तायातयामानां न बन्धाय गृहा मता' इति वाक्याद् बन्धकत्वेन त्याज्य इति पक्षव्यवच्छेदाय च तुशब्दः भावमात्रे साक्षात्प्रभुसम्बन्धे वा, उभयथापि गृहाद्बहिर्गमनं गृहत्याग इति यावत्। स आवश्यकः। तत्र प्रमाणमाह स्मृतेरित्यादि। 'त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु। मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गा'मित्यादिस्मृतिर्भगवद्भाववतस्तत्सङ्गविशिष्टस्यापि बहिर्गमनमाह। तदाचारोपि तथैव श्रूयते, अतस्तथा।

अत्रायमाशयः। आश्रमधर्मत्वेन गृहत्यागो 'यदहरेवे'त्यादिश्रुतिभ्यः पूर्वमुपपादितोपि यदधुना पुनरुच्यते, तेन तद्व्यतिरिक्तोऽयमिति ज्ञायते। तथा चोक्तवाक्यान्मुमुक्षुमुक्तिप्रतिबन्धकत्वाभावेपि व्यासङ्गस्य तत्रावश्यकत्वादुक्तोभयोरप्यनवरतं प्रभुरसास्वादे प्रतिबन्धकत्वेन तस्य तत्त्यागस्य विप्रयोगरसानुभावकत्वेन च स कर्तव्यः। यद्यपि स्वेष्टान्तरायत्वेन स्वत एव तत्त्यागो भावी, तथापि 'आश्रमादाश्रमं गच्छे'दितिवाक्यादत्राश्रमान्तरत्वाभावेन त्यागस्याविहितत्वशङ्काभावायेयमुक्तिरिति ॥ ४२ ॥

भाष्यप्रकाशः।

त्यादि। अथ भक्तिमार्गीयमध्यमजघन्ययोः फलविचारोत्तरं मध्यमस्य त्यागरूपं साधनं चिन्त्यत इत्यर्थः। मध्यमत्वं विशदयन्तः संशयादिकमाहुः प्रभुरेत्यादि। अत्राधिकारिद्वयस्योक्तत्वाद्द्विविधपूर्वपक्षव्यवच्छेदार्थस्तुशब्द इत्याशयेनाहुः फलस्येत्यादि मद्वार्तेत्यादि च।

अतस्तथेति उक्तप्रमाणप्राप्तत्वात्त्यागः कर्तव्य इत्यर्थः। उद्धवस्य मध्यमाधिकारित्वं तु 'उद्धवादिमध्यमभावबोधकाय नम' इति नामावल्यां स्फुटम्। पुनरुक्तिपरिहाराय तदाशयमाहुः, अत्रेत्यादि। पूर्वमिति ऊर्ध्वरेतःसूत्रे। उक्तवाक्यादिति। 'मद्वार्तायातयामाना'मिति वाक्यात्। तस्येति गृहस्य। इयमुक्तिरिति अनेन सूत्रेणानुज्ञा। तथा चाश्रमान्तररूपत्वाभावेन स्मृत्यन्तरोक्तत्वाभावेपि एकादशस्कन्धेऽष्टादशाध्याये 'यदा कर्मविपाकेषु लोकेषु निरयात्मसु। विरागो जायते सम्यङ् न्यस्ताग्निः प्रव्रजेत्तत' इत्यादिषोडशभिः श्लोकैस्त्रिदण्डसन्न्यासमुक्त्वा, ततो, 'ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः। सलिङ्गानाश्रमांस्त्यक्त्वा

रश्मिः।

जगाम, तं गत्वोवाच भगवन् केन कर्माण्यशेषतो विसृजामी'ति प्रश्ने 'दण्डमाच्छादनं कौपीनं परिग्रहेत् शेषं विसृजेच्छेषं विसृजेदि'त्युत्तरम्। सन्न्यासोपनिषदि च, 'गर्भवासभयाद् भीतः शीतोष्णाभ्यां तथैव च। गुहां प्रवेष्टुमिच्छामि परं पदमनामय'मिति 'सन्न्यासाग्नीन् न पुनरावर्तये'दित्युक्तम्। तज्ज्ञानमार्गे ज्ञानकाण्डत्वात्। भक्तिमार्गे तु तन्मध्ये भगवतोक्तं नारदं प्रति। नारदस्य भक्तत्वात्। तदुक्तं 'यच्चित्तं तत्सदा मय्येवावतिष्ठते तस्मादहं च तस्मिन्नेवावस्थीय' इति भगवता नारदं प्रत्युक्तं परमहंसोपनिषदि। तथा च ज्ञानमार्गीयसन्न्यासस्य प्रसिद्धत्वेपि भक्तिमार्गीयमोक्षसन्न्यासनिरूपणं प्रयोजनमित्यर्थः। यद्यपि गीतोक्तचतुर्थपञ्चमाध्याययोरप्येवं निरूपयितुं शक्यम्, तथापि ज्ञानमार्गीयत्वात् तद्विहायाष्टादशाध्यायोक्तः सङ्गृहीतः, भक्तिमार्गीयत्वात्। अधिकारद्वयस्येति प्रभुरेत्यादिभाष्यो-

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४३ ॥

पुष्टिमार्गीयभक्तस्य विहितत्वादिज्ञानमप्रयोजकम् । तत्र हेतुः । तस्य भक्तिमार्गस्वामिनः श्रीगोकुलेशादेव फलस्य श्रुतेः । अतो बहिर्गमनं न साधनत्वेनात्र कार्यमिति भावः । अत्र, 'यमेवैष वृणुत' इति श्रुतिरनुसन्धेया । एतदनुपदमेव पठ्यते 'नायमात्मा बलहीनेन लभ्य' इति । अत्र भगवद्वरणानन्तरमपि जीवबलं कतमं, यदपेक्ष्य भगवल्लाभ इति जिज्ञासायां सर्वात्मभाव एव बलमिति निर्णीयते । तस्यैव मर्यादाबलोपमर्दकत्वाद्भगवद्वशीकारहेतुत्वाच्च । व्रजसीमन्तिनीनां प्रभुवचनातिक्रममपि कृत्वा स्वरूपपरिग्रहस्तद्बलेनैव यत इत्यात्रेय आचार्यो मनुते ।

भाष्यप्रकाशः ।

चरेदविधिगोचर' इत्यादिभिरेकादशभिर्ज्ञाननिष्ठस्य भक्तस्य च तदतिरिक्तः सन्न्यास उक्तः । तद्बोधनायेदं कथनमित्यर्थः । एतस्य प्रपञ्चः सन्न्यासनिर्णयग्रन्थादवगन्तव्यः ॥ ४२ ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४३ ॥ ननु भक्तिमार्गीयत्यागो मध्यमस्य कर्तव्यत्वेनोक्त इत्याकाङ्क्षायामिदं सूत्रं प्रवृत्त इत्याशयेन व्याकुर्वन्ति पुष्टीत्यादि । विहितत्वादिति विहितत्वेन ज्ञानम् । तथात्वेन फलसाधकत्वज्ञानं च । साधनत्वेनेति फलप्राप्तिसाधनत्वेन । अत्रेति 'स्वामिन एव फल'मित्यस्मिन्नर्थे 'नायमात्मा बलहीनेने'ति वाक्यार्थस्य गुणोपसंहारपाद एव विचारितत्वात्तद्विचारोऽत्र न क्रियते । तस्यैव मर्यादेत्यादि । 'धर्मः सत्यदयोपेतो विद्या वा तपसान्विता । मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति ही'ति । 'न साधयति मां योगो न साङ्ख्यं धर्म उद्धव । न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिते'त्येका-

रश्मिः ।

क्तस्य गताधिकरणान्त्योक्तश्रुतिद्वयार्थस्य । विविधपूर्वेति भाष्योक्तविविधपूर्वपक्षव्यवच्छेदार्थः । भाष्ये । त्वं त्विति हे उद्धव त्वम् । तदाचार इति उद्धवाचारः । श्रूयत इति एकादशस्कन्धे श्रूयते । तथेति बहिर्गमनम् । पुनरुक्तीति ऊर्ध्वरेतःसूत्र उक्तो गृहत्यागः पुनरत्रोच्यते इति पुनरुक्तिः, तस्याः परिहाराय । अत्रेत्यादीति । उक्तोभयोरिति । साक्षात् स्वरूपभोगवत्प्रचुरभगवद्भावमात्रवतोः । प्रभुरसास्वादे प्रतिबन्धकत्वेनेति । तत्तु क्व भगवान् मिलिष्यतीति पर्यटनोक्तेः, 'क इत्था वेद यत्र स' इति श्रुत्या स्थानज्ञानाभावोक्तेश्च । किञ्च, 'भक्त्याहमेकया ग्राह्य' इति वाक्याद्भक्त्यैकग्राह्ये पूर्णभक्तिग्राह्यत्वाद्विप्रयोगरसानुभावकत्वेन । तद्व्यतिरिक्तेति । तदुक्तं परमहंसोपनिषदि चतुर्थाश्रमधर्मत्वेन गृहत्यागमुक्त्वोच्यते, अयं न मुख्योऽस्ति, कोऽयं मुख्य इति चेत्, अयं मुख्यः 'न दण्डं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहंसः न शीतं न चोष्णं न सुखं न दुःखं न मानापमाने चे'ति । चरत्याचरति । 'न दण्डमाचरति दण्डाभावनिष्ठाचारानुकूलव्यापारवानिति बोधः । यज्ञोपवीताभावः दण्डवेष्टनाभावस्तन्निष्ठाचारानुकूलव्यापारवानिति बोधः । एवमन्यत्र ॥ ४२ ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४३ ॥ प्रकटार्थमिति । एतदनुपदमिति एतत्पदं स्वामितिपदम् । 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वा'मिति श्रुतिः । कतममिति । बल इति पुंस्त्वस्मरणादिति भावः । उभयलिङ्गं बलपदम्, न स्त्रीलिङ्गम् ।

इदमत्राभिप्रेतम्। सर्वात्मभावस्य यद् बलम्, तत्तदात्मकस्य प्रभोरेव, तस्य चायं स्वभावो यदन्यन्न रोचते। अत एव व्रजपरिवृढवदनेन्दुवचनकिरणप्रचारप्रोच्छलत्केवलभावाम्भोधिवचनवीचयो गीयन्ते 'यर्ह्यम्बुजाक्ष तव पादतलमस्प्राक्ष्म तत्प्रभृति नान्यसमक्षं स्थातुं पारयाम' इत्यादयः। अतस्त्यागः पृष्ठलग्न एवायातीति न तदर्थं यतनीयमिति। विष्ण्ववतारत्वेन पुरुषोत्तमभावस्वरूपज्ञोऽयमिति तथा ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥

सर्वत्यागपूर्वकं यद् बहिः प्रभुसमीपगमनं भक्तस्य तद् आर्त्विज्यमृत्विक्कर्मैवेत्यौडुलोमिराचार्यो मन्यते।

भाष्यप्रकाशः।

दशमस्कन्धीयवाक्याभ्यां तथात्वादित्यर्थः। तदात्मकस्येति सर्वात्मभावात्मकस्य। अन्यदिति भगवदतिरिक्तम्। सिद्धमाहुरत इत्यादि। तथा चोत्तमस्य स्वत एव गृहत्यागः सम्भवतीत्यतो नोक्त इत्यर्थः। नन्वात्रेयस्य कथमेवं भक्तिमार्गीयभावस्वरूपज्ञानं येन गृहत्यागयत्नं निषेधतीत्यत आहुः विष्ण्ववतारेत्यादि। 'अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान् स दत्त' इति द्वितीयस्कन्धवाक्यादवतारत्वेन तथेत्यर्थः ॥ ४३ ॥

रश्मिः।

सर्वात्मभाव एव बलमिति बलं भक्तिरिति भाष्ये, भक्तिः सर्वात्मभाव इति भावः। तथा च श्रुतौ बलहीनेन सर्वात्मभावहीनेन। मुख्ये कार्यप्रत्ययात्। सर्वात्मभावलिङ्गं च 'तपसो वाप्यलिङ्गा'दिति। तपो विरहतापः, विरह एव सर्वात्मभावस्य सम्यग् ज्ञानात् सर्वात्मभावलिङ्गभिन्नात्। प्रभुवचनेति। अत्रायं भावः। गुरुवाक्योल्लङ्घनं महापराध इति प्रभुवचनातिक्रमत्वेन स्वरूपपरिग्रहत्वेन कार्यकारणभाव उक्तः, स न मुख्यः, किं तु तद्बलेनैवेति भाष्येण प्रभुवचनातिक्रमयोगव्यवच्छेदपूर्वकसर्वात्मभावबलेनेत्युक्तत्वात् सर्वात्मभावत्वेन स्वरूपपरिग्रहत्वेन कार्यकारणभाव इति। एवं च प्रभुवचनातिक्रमस्य स्वरूपपरिग्रहकारणत्वं सर्वात्मभाववत्कृतस्यैव। तथापि कथमिति चेत्। न। 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणे'त्यत्र तासां स्वातन्त्र्यम्, ब्रह्मणो गौणत्वमिति। ब्रह्मणो गौणत्वेप्यतिक्रमः कथमिति चेत्, 'दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथ' इति भगवद्वाक्यगतदुःखांशत्वात्। तेन स्वरूपं विद्वन्मण्डननित्यलीलावादस्थबृहद्वामनपुराणोक्तं गोपीजनवल्लभं तस्य परिग्रह एतादृगतो न गुर्विच्छया कृतो गुरुवाक्यातिक्रमो नापराधः लीलान्तःपातात्। भाष्ये। व्रजेति व्रजस्य परिवृढः प्रभुः। प्रभौ परिवृढः इति पाणिनीयसूत्रात्। तस्य वदनं परमैश्वर्ययुक्तं तस्य वचनानि 'स्वागतं वो महाभागा' इत्यादीनि तेषां किरणाः वचनानां वीचित्वात्, तेषां प्रचारः प्रचरणं तत्र पुष्टिमार्गीयाणामनुग्रहजन्यमिति अनुग्रहजप्रचारेण तद्व्यापारभूतेन प्रोच्छलन् श्रुतिरूपाणां सुधाजन्यज्ञानाधिकभावं कुर्वन् केवलभावाम्भोधिः साधनरहितपुष्टिभावाम्भोधिर्यासां ता व्रजपरिवृढवदनेन्दुवचनकिरणप्रचारप्रोच्छलत्केवलभावाम्भोधयः। तासां वचनानि 'मैवं विभोर्हति भवान् गदितुं नृशंसं सन्त्यज्य सर्वविषयांस्तव पादमूलं प्राप्ता' इत्यादीनि। तान्येव वीचयस्तरङ्गाः। पृष्ठलग्न इति पृष्ठे प्रस्वेदादिना लग्नः पदार्थः। तदर्थं त्यागार्थम्। प्रकृते तथेति भगवद्भावज्ञश्चात्रेयः। विष्णोः पुराणे ब्रह्मसमानधर्मवत्त्वोक्तेः ॥ ४३ ॥

तस्यायमभिसन्धिः । यजमानो हि स्वेष्टसिद्ध्यर्थमृत्विज आदौ वृणुते। प्रकृते च, 'यमेवैष वृणुत' इति श्रुतेः 'तस्मादेकाकी न रमत' इति श्रुतेश्च स्वक्रीडार्थं भगवान् स्वचिकीर्षिततत्तल्लीलानुरूपान् जीवान् वृणुते। 'यूनः स्थविरान् वे'ति विकल्पादेकरूपाणां यथा सोमादिषु वरणम्, तथा सर्वात्मभाववत्त्वेनैकरूपाणामेवात्र वरणम्। तत्र यथा स्वीयस्वीयतदङ्गमात्रकरणं तेषाम्, तथेतरसम्बन्धनिवर्तनपूर्वकं तद्भोग्यसमर्पकत्वमत्र। तदुक्तं भगवता 'यदा पुमाँस्त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो म' इति। अत्र पूर्वपदेनेतरसम्बन्धनिवर्तनोक्त्या सर्वात्मभाव उक्तो भवति। तदनन्तरमात्मनिवेदने सति तद्विषयकलीलाकरणेच्छाविषयः सम्भवति। अन्तरङ्गलीलाप्रवेशनमिच्छायां विशेषः। तस्मात् सुष्ठूक्तमार्त्विज्यमिति। एतेन, 'न ददाति न पचती'त्यादिश्रुतेर्यथा सोमादौ दीक्षितस्य तद्यागेतरधर्मनिवृत्तिः, स एव परमो धर्मो यतः, तथा पुरुषोत्तमस्योक्तभक्तैः सह रमणमेव सार्वदिकम्, एतदेव च महन्महत्त्वमिति सूचितं भवति। प्रकृते भक्ता-

भाष्यप्रकाशः ।

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥ औडुलोम्याशयमाहुः तस्यायमित्यादि। यूनः स्थविरान् वेति। सर्वान् यूनः सर्वान् स्थविरान् वा । तत्रेति सोमादियागे । अत्रेति भक्तिमार्गीयलीलायाम् । तत्र सम्मतिमाहुः । तदुक्तमित्यादि 'यदा पुमा'निति वाक्यमेकादशस्कन्धे ऊनत्रिंशाध्यायेऽस्ति । तद् व्याकुर्वन्ति अत्रेत्यादि। पूर्वपदेनेति 'त्यक्तसमस्तकर्मे'तिपदेनेतरसम्बन्धनिवर्तनोक्त्या भक्तिमार्गीयो विगाढभावैकदेशः सर्वात्मभाव उक्तो भवति । न चायं ज्ञानमार्गीय इति वक्तुं शक्यः । अग्रे निवेदितात्मपदात् । तदनन्तरमात्मनिवेदने सति विचिकीर्षितो, निवेदितात्मजीवविषयकलीलाकरणेच्छाविषयः, स निवेदितात्मा जीवो भवति; विचिकीर्षितपदे व्युपसर्गेण अन्तरङ्गलीलाप्रवेशनरूपो विशेष, इच्छायां बोध्यते । एतदुत्तरार्धं तु 'तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै' इत्यस्ति । तदर्थस्तु, यदैवं भवति, तदा अमृतत्वं ब्रह्मभावं वह्न्ययोगोलकन्यायेन प्रतिपद्यमानः सन् मया सह कल्पते, कामाशनसमर्थो भवति च पुनः आत्मभूयाय 'स्वरूपेणावतारेणे'ति न्यायेन मदात्मत्वाय कल्पत इति। क्वचित्तु, 'यदा पुमा'नित्यत्र 'मर्त्यो यदे'ति मूले पाठः, तदाऽप्यर्थे न कोपि विशेषः ।

तदेतत्सूत्रार्थत्वेन निगमयन्ति तस्मादित्यादि । आर्त्विज्यपदमेवं व्याख्याय तत्सूचितमर्थमाहुः एतेनेत्यादि । एतदेव च महत्त्वमिति। रमणे सार्वदिकत्वमेव च भक्तिमार्गे उत्कर्षः ।

रश्मिः ।

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥ त्यक्तसमस्तेति । अभिधेयेति ज्ञेयम् । भक्तीति । कामशास्त्रीयसर्वात्मभावव्यावर्तकं विशेषणम् । विगाढेति । विगाढभावः 'ता नाविद'न्नितिश्लोकोक्तः तदेकदेशस्तच्चरमवृत्तिरूपः । उक्त इति तात्पर्यवृत्त्योक्तः । आत्मनिवेदन इति 'श्रवणं कीर्तनं विष्णो'रित्यस्मिन् श्लोके पाठक्रमेण कृतात्मनिवेदने । अन्तरङ्गेति भाष्यं विवृण्वन्ति स्म विचिकीर्षितपद इति । इच्छायामिति विषयसप्तम्या इच्छाविषय इत्यर्थः । स्वरूपेणेति अयं न्यायः । निगमयन्तीति । तस्मात्पर्वतो वह्निमान् इति निगमनं यथा तथा निगमयन्ति । आर्त्विज्यपदमिति । वेदान्ते लीलाधर्म आर्त्विज्यम् । ऋतौ यजतीति ऋत्विगिति सूत्रेण साधुः । भाष्ये । सोमादाविति । यागे तद्यागेतरधर्मा दानपचनादयः तेषां निवृत्तिः । एतदेव च महत्त्वमिति भाष्यप्रतीकम् । अत्र महन्महत्त्वमिति भाष्यपाठः । तत्र

मामृत्विक्त्वेन निरूपणे हेतुत्वेन तात्पर्यान्तरमप्याह। तस्मै यजमानारब्धकर्मसाङ्गत्वाय ऋत्विक् परिक्रीयते वरणेन स्वकार्यमात्रोपयोगित्वाय स्वीयः क्रियते, तथा प्रकृतेपि। न च 'कचित् कल्याण्यो दक्षिणा' इति प्रश्नवचनात्तदर्थैव तत्प्रवृत्तिः, अत्र तु स्वतः पुरुषार्थत्वेन भगवदर्था प्रवृत्तिः, अतो वैषम्यमिति वाच्यम्। नीरागस्यापि वरणसमये तत्प्रश्नस्यावश्यकत्वात्, तथैव दक्षिणादानमपि, अन्यथा निरङ्गत्वापत्तेः। प्रकृतेपि भक्तानां स्नेहादेव प्रवृत्तिर्भगवान् स्वानुभवार्थमेव ताननुभावयतीति न वैषम्यम् ॥ ४४ ॥

श्रुतेश्च ॥ ४५ ॥

अथर्वणोपनिषत्सु पठ्यते 'भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्य'मिति।

भक्तिमार्गप्रचारैकहृदयो बादरायणः।
मानं भागवतं तत्र तेनैवं ज्ञेयमुत्तमैः ॥ ४५ ॥

इति तृतीयाध्याये चतुर्थपादे षष्ठं बहिस्तूभयथेत्यधिकरणम् ॥ ६ ॥

भाष्यप्रकाशः।

अत्रशेषं व्याकुर्वन्ति प्रकृत इत्यादि। तथा प्रकृत इति। चिकीर्षितलीलासाङ्गत्वाय तत्तद्भक्तवरणमित्यर्थः। स्मृतिषु याजनस्य वृत्तिमध्ये गणनादार्त्विज्ये स्वार्थमेव प्रवृत्तेर्भजनस्य च भगवदर्थत्वेन तदभावात् तद्वैषम्यमाशङ्क्य परिहरन्ति न चेत्यादि। नीरागस्येति याजनेन वृत्तिमनिच्छतः। आवश्यकत्वादिति वैधत्वेनावश्यकत्वात्। तथैवेति वैधत्वेन। अनुभावयतीति लीला अनुभावयति। तथा च यथा तत्र वैधत्वमेव तादृशप्रश्नादिप्रवृत्तिप्रयोजकम्, एवमत्र निरुपधिस्नेहः, यथा तत्र तद्दानेन कर्मसाङ्गता, तथात्र स्वलीलानुभावनमतो न वैषम्यमित्यर्थः। तथा च भगवदिच्छायां सत्यामुत्तमस्य गृहत्यागः कर्तव्यः, अन्यथा तु न कर्तव्यः, यजमानाधीनर्त्विग्वत्तादृशस्य केवलं प्रभ्वधीनत्वादिच्छा चानियता, अतो नोक्त इत्यौडुलोमेराशय इति बोध्यम् ॥ ४४ ॥

रश्मिः।

महत्त्वे महत्त्वपरिमाणं नास्तीति महत्पदं बाहुलकमित्याशयः। महतो महत्त्वं पूजकत्वं सन्माननमिति षष्ठीतत्पुरुषे तु न बाहुलकम्। वृत्तिमध्य इति अध्ययनाध्यापनदानप्रतिग्रहयजनयाजनब्राह्मणवृत्तय इति वृत्तिमध्य इत्युक्तम्। स्वार्थमेवेति। न च यजमानकर्मार्था प्रवृत्तिरिति वाच्यम्। याजनाय स्ववृत्तये प्रवृत्त्यङ्गीकारेण यजमानकर्मार्थत्वाभावात्। तदभावादिति स्वार्थत्वाभावात्। तद्वैषम्यं दृष्टान्तवैषम्यम्। न चेत्यादीति। कचित् 'कल्याण्यो दक्षिणा' इति याजने प्रश्नवचनात्। स्वार्थदक्षिणार्थैव तत्प्रवृत्तिः ऋत्विक्प्रवृत्तिः। अत्र तु दार्ष्टान्तिके तु। वैषम्यं दृष्टान्तवैषम्यम्। भाष्ये तत्प्रश्नस्येति। कल्याणदक्षिणाविषयकप्रश्नस्य। निरङ्गत्वेति यागस्येति बोध्यम्। प्रकृते। अनुभावयतीति ते लीला अनुभवन्ति तान् लीला अनुभावयतीति हेतुमण्णिच्। स्वलीलेति सप्रतियोगिनिःप्रतियोगिलील्योर्मध्ये सप्रतियोगिस्वलीलानुभावनं तेन सप्रतियोगिलीलासाङ्गतेत्यर्थः। न वैषम्यं न दृष्टान्तवैषम्यम् ॥ ४४ ॥

भाष्यप्रकाशः ।

श्रुतेश्च ॥ ४५ ॥ व्याकुर्वन्ति अथर्वणेत्यादि । तथा चात्र विहिताया भक्तेः सन्न्यासरूपताया उक्तत्वात् बुद्धिपूर्वकं तत्करणमावश्यकम्, न तु त्यागस्यापि, श्रुतौ तावन्मात्रस्यैव कथनादिति व्यासमतमित्यर्थः । तेनात्र भक्तिमार्गे साधनपरिपाकदशायां द्विविधः सन्न्यासः अत्यन्तसिद्धानां विगाढभावस्वाभाव्यादेव प्राप्तः, यथा व्रजभक्तानामतः सोऽवैधः । तत ईषन्न्यूनानां तु विरहानुभवार्थं कर्तव्यः, यथा श्रीमदुद्धवानाम् । स वैधः । 'त्वं तु सर्वं परित्यज्ये'ति, 'मद्भक्तो वाऽनपेक्षकः, सलिङ्गानाश्रमाँस्त्यक्त्वा चरेदविधिगोचर' इत्यादिवाक्यतः प्राप्तत्वात् । द्वावप्येतौ नाश्रमरूपाविति तूपपादितम्, अतो न कोपि सन्देहः ।

नन्वत्रान्यैः 'परामर्शा'दि सूत्रेष्वाश्रमरूपं सन्न्यासं विचार्य, 'अन्तरा चापी'ति सूत्रे विधुरादीनामपि तस्य कर्तव्यता विचारिता, महायोगिनां नग्नचर्यादिकं च । 'तद्भूताधिकरणे' च ऊर्ध्वरेतोभ्य आश्रमेभ्यः प्रच्युतभावश्च विचारितः, तन्मते चाश्रमात्मक एव सन्न्यासो विविदिषाविद्वद्दशाभेदेनेति तदेवात्र कुतो नाद्रियत इत्याकाङ्क्षायामाहुः भक्तीत्यादि । "अनर्थोपशमं साक्षाद् भक्तियोगमधोक्षजे । लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिता'मिति श्रीभागवतवाक्याद्भागवतं पुराणमेव सर्वं तत्र व्यासस्य तादृशत्वे मानं प्रमितिजनकम् । तेन हेतुना उत्तमैर्भक्तावधिकारिभिरेवं ज्ञेयम् । यद्यपि प्रकारान्तरेण व्याख्यातृभिरुक्तैः सूत्रवर्णकैर्ज्ञानमार्गीयो द्विविधोपि सन्न्यासो व्याख्यातः, तथापि विविदिषायां कालदोषेणापचारदोषस्य तैरेव दर्शितत्वात् । आन्तरवैराग्याभावे बहिर्लिङ्गमात्रस्थापने च 'गृहस्थस्य क्रियात्यागो व्रतत्यागो वटोरपि । तपस्विनो ग्रामवासो भिक्षोरिन्द्रियलौल्यता । आश्रमापसदा ह्येते खल्वाश्रमविडम्बकाः । देवमायाविमूढाँस्तानुपेक्षेतानुकम्पये'ति सप्तमस्कन्धीयनारदवाक्ये 'मौनानीहानिलायामा दण्डा वाग्देहचेतसाम् । यस्यैते न भवन्त्यङ्ग वेणुभिर्न भवेद्यति'रित्येकादशीयभगवद्वाक्ये च तादृशस्य निन्दितत्वात् । विद्वद्दशायां चेदानीं दुर्घटत्वात् तदनादृत्य भक्तिमार्गीय एव साधनपरिपाकदशायां कर्तव्यो, न त्वन्यथापीत्यर्थः ।

अन्ये तु, 'आत्रेया'दिसूत्रत्रये अङ्गोपासनानां यजमानकर्मत्वं वार्त्विककर्मत्वं वेति संशये, आत्रेयमते यजमानकर्मत्वम्, औडुलोमिमते ऋत्विक्कर्मत्वम्, तदेव च युक्तमिति व्यवस्थापयन्ति । तत्रोदासीना वयम् । अप्रासङ्गिकत्वेनारुच्यत्वादिति ॥ ४५ ॥

इति षष्ठं बहिस्तूभयथेत्यधिकरणम् ॥ ६ ॥

रश्मिः ।

श्रुतेश्च ॥ ४५ ॥ भक्तिमार्गीयं दार्ष्टान्तिकमार्त्विज्यं श्रुतेश्च इत्यर्थः । उक्तत्वादिति नैष्कर्म्यपदेनोक्तत्वात् । निष्कर्मणः पुंसो भावो नैष्कर्म्यमिति व्युत्पत्तेः । बुद्धीति इहामुत्र फलभोगवैराग्यविषयिणी या बुद्धिस्तत्पूर्वकम् । तत्करणं सन्न्यासपूर्वकभक्तिकरणम्, न तु सन्न्यासमात्रकरणम् । 'कृष्णसेवा सदा कार्ये'त्यस्य व्याख्याने आवश्यकार्थयत्प्रत्ययोक्त्या तत्स्मारणायावश्यकमित्युक्तम् । प्रत्ययस्तु नैष्कर्म्यमित्यत्र भावे । साधनेति सा तु विपक्वकषायाणां व्यसनदशा, तस्याम् । विगाढेति 'ता नाविद'न्निति वाक्योक्तभावस्वाभाव्यात् । अवैध इति स्वभावजे विधेरप्रयोजकत्वात् । पूर्वतन्त्रेप्येवम् । ईषदिति । मर्यादास्थानाम् । विरहानुभवार्थमिति । तेन पुष्टौ विरहोपि न तथा प्रयोजकः, स्वरूपबलेनैव मोचकत्वात् । विधी आहुः त्वं त्विति, मद्भक्तो वेति च । आद्ये विचरस्वेति विधिः । लोटा । द्वितीये चरेदिति । उपपादितमिति बहिस्तूभयथेति सूत्रभाष्यप्रकाश उपपादितम् । अपचार इति । क्रोधादिके ॥ ४५ ॥

इति षष्ठं बहिस्तूभयथेत्यधिकरणम् ॥ ६ ॥

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥ (३-४-७)

ननु 'यमेवे'ति श्रुतिः साधनान्तरनिषेधपूर्वकं वरणस्यैव साधनत्वमाह, 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वाऽऽत्मन्येवात्मानं पश्ये'दिति श्रुतिः साधनान्तरमप्याह । एवं विरोधे श्रुतित्वाविशेषात् किमादरणीयम्, किं नेति संशये, साधनान्तरविधिरेवादरणीयः, अन्यथा शास्त्रवैयर्थ्यं स्यादिति प्राप्ते, उच्यते सहकार्यन्तरविधिरिति । मर्यादापुष्टिभेदेन वरणं द्विधोच्यते । तत्र सहकार्यन्तरविधिस्तु मर्यादापक्षेणोच्यते । पुष्टौ तु नान्यापेक्षेति न विरोधगन्धोपि । अपरं च । साधनं हि कायिकं वाचिकं मानसिकं च विधीयते, तत्र 'मनसैवाप्तव्य'मिति श्रुतेस्तृतीयं मुख्यम् । तदपि तावदेव मार्यादिकस्यापि विधेयत्वेन कर्तव्यम्, यावत्स्नेहो न भवति । यतस्तद्वतः स्नेहवतस्तूक्तं तृतीयं साधनमपि विध्यादिवत् । यथा तद्वतो विधिरर्थवादो वा प्रवृत्तावप्रयोजकः, तस्य स्वत एव सम्भवात्, तथा भगवत्प्राप्ताविदमित्यर्थः । कैमुतिकन्यायेन पूर्वयोरप्रयोजकत्वमेतच्छेषत्वादेवायास्यतीति तृतीयमेवोक्तम् ॥ ४६ ॥

इति तृतीयाध्याये चतुर्थपादे सप्तमं सहकार्यन्तराधिकरणम् ॥ ७ ॥

भाष्यप्रकाशः ।

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥४६॥ एवं भक्तिमार्गीयस्य गृहत्यागावश्यकत्वे साधिते तद्वत्साधनान्तरं शमादिरूपमप्यायातीति तद्व्यवस्थां बोधयितुमिदमधिकरणमित्याशयेन तदवतारयन्ति ननु यमेवेत्यादि । व्याकुर्वन्ति मर्यादेत्यादि । नान्यापेक्षेति 'नायमात्मा बलहीनेन लभ्य' इति श्रुत्युक्तादन्यस्यानपेक्षा । नन्वेतानि शमादीन्यन्तरङ्गाणि मानसानि साधनानि किमिति पाक्षिकाणि क्रियन्त इत्यत आहुः अपरं चेत्यादि । विधीयन्त इति 'तमेतं वेदानुवचनेन', 'शान्तो दान्त' इत्यादिवाक्यैर्विधीयन्ते । तृतीयमिति शान्तादिवाक्योक्तम् । विध्यादिवदिति विधिश्च तदादिश्च विध्यादी तद्वत् । प्रथमार्थे वतिः । तथा च पित्रादौ सहजस्नेहवतो यथा तत्सेवाविधिस्तत्फलबोधकोऽर्थवादो वा न तत्प्रवृत्तिप्रयोजकः, तस्य तत्र स्वत एव प्रवृत्तिसम्भवात्, तथा भगवत्प्राप्त्यर्थमिदं शमादिकं स्वभावादेव सम्भवतीति न तदर्थं वाक्यापेक्षा । अतो भक्तिदार्ढ्येच्छुं प्रत्येवेदं विधेयम्, न तु दृढभक्तिमन्तं प्रतीति तथेत्यर्थः । तेन पुष्टिमार्गे वरणमात्रमेव साधनम्, मर्यादामार्ग एव त्वन्याकाङ्क्षेति सिद्धम् ॥ ४६ ॥

इति सप्तमं सहकार्यन्तराधिकरणम् ॥ ७ ॥

रश्मिः ।

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥ तदिति । अधिकरणम् । ननु 'यमेवे'त्यादीति । विधिरेवादरणीय इति । पुंस्त्वं स्मार्ते । 'समाधिनानुस्मर तद्विचेष्टित'मिति । मर्यादेत्यादीति । सहकार्यन्तरेति भक्तावनुग्रहः कारणम्, सहकारीणि श्रवणादीनि । अन्यत्सहकारि सहकार्यन्तरं शमादि । अत्र सहकारिणां श्रवणादीनामपि मर्यादापक्षेण विधिः । सिद्धमाहुः अत इति पुष्टिमर्यादाभ्याम् । भक्तिबीजदार्ढ्येच्छवो मार्यादिकाः । भक्तिवर्धिन्यां भक्तिबीजमुक्तम् । इदमिति साधनजातम् । दृढभक्तीति । दृढबीजा भक्तिः तद्वन्तम् । तथेति । सहकार्यन्तरविधिस्तु मर्यादापक्षेणोच्यते । पुष्टौ तु नान्यापेक्षेति न विरोधगन्ध इत्यर्थः ॥ ४६ ॥

इति सप्तमं सहकार्यन्तराधिकरणम् ॥ ७ ॥

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥ (३-४-८)

ननु 'बहिस्तूभयथे'त्यादिना भगवदीयस्य गृहत्याग आवश्यक इति निरूपितम्।

छान्दोग्ये तु 'आचार्यकुला'दित्युपक्रम्य, छान्दोग्योपनिषदन्ते 'आचार्यकुलाद्वेदमधीत्य गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्य अहिंसन् सर्वाणि

भाष्यप्रकाशः।

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥ पूर्वाधिकरणोक्तं दृढीकर्तुं किञ्चिदाक्षिप्य समाधत्ते, इत्याशयेन सूत्रमवतारयन्ति ननु बहिरित्यादि। तात्पर्यमाहेति। उक्तश्रुतेस्तात्पर्यमाहेत्यर्थः।

श्रुत्यर्थस्तु, आचार्यकुलाद् गुरुगृहाद्, गुर्वभावे तत्पत्न्यां तत्पुत्रे तद्गोत्रे वा ब्रह्मचर्यमिति ज्ञापयितुं कुलपदम्। वेदमधीत्य गुरोः कर्मातिशेषेण गुरोः सेवारूपं यत्कर्म तत् कृत्वा, ततोऽतिशेषोऽवशेषो यः कालस्तेन कालेन वेदाध्ययनं साङ्गं सरहस्यार्थज्ञानपुरःसरं कृत्वा, अभिसमावृत्य जिज्ञासाद्वयसमापनोत्तरमाचार्यकुलान्निवृत्य दारानाहृत्य कुटुम्बे स्थित्वा, गार्हस्थ्यविहिते कर्मणि तिष्ठन्, शुचौ देशे स्वाध्यायमधीयानो विविक्ते स्वाध्यायब्राह्मणोदितप्रकारे पवित्रे देशे यथावदासीन आवृत्तिमधीतस्य कुर्वन्, धार्मिकान् विदधत् पुत्रान् शिष्यांश्च शिक्षणेन धर्मशीलान् कुर्वन्, आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्य हार्देऽन्तर्यामिणि परे ब्रह्मणि बाह्याभ्यन्तरेन्द्रियाणि सम्यक् स्थापयित्वा, 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति न्यायेन तमेव शरणत्वेन ज्ञात्वा कर्माणि तत्र सन्न्यस्येति यावत्। अहिं-

रश्मिः।

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥ पूर्वेति। बहिस्तूभयथेत्यधिकरणोक्तम्। साङ्गमित्यादि। 'साङ्गो वेदोऽध्येयो ज्ञेयश्चे'ति श्रुतेरुक्तम्। यद्वा। आचार्यपदादाचार्यलक्षणनिविष्टरहस्यतदङ्गेऽधीत्येतिशब्देनोपलक्ष्येते। जिज्ञासाद्वयार्थगमनरहितं समावर्तनमभिसमावर्तनम्। गार्हस्थ्यविहित इति कुटुम्बविशेषणम्। सम्प्रतिष्ठाप्येत्यत्र समुपसर्गार्थमाहुः हार्द इति। जीव उपासनानिषेधान् मानसीन इत्युक्तम्। हार्दपदेन 'यो मनसि तिष्ठन् मनसोऽन्तरो यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयति स त आत्मान्तर्याम्यमृत'इतिश्रुत्युक्तेऽन्तर्यामिणि। तत्रापि प्रत्येकपर्यवसितरूपव्यावृत्त्यर्थं ब्रह्मणीति तद्व्यावृत्त्यर्थं पर इति। अत्र हार्द इति विशेष्यम्। इदं हार्दं प्रकटं बोध्यम् 'धार्मिकान् विदध'दित्युक्तत्वात् धर्मेण चित्तशुद्धौ भक्त्याविर्भावात्। सम्यगिति। निरोधलक्षणग्रन्थोक्तरीत्या। अनिरुद्धैस्तु सिद्धान्तमुक्तावल्युक्तरीत्या। तथा च श्रुतिः 'इन्द्रियाणि जुहोती'ति। गीतापि। यद्यप्येव मुख्यत्वात् तथापि निरोधस्य दानसाध्यत्वादाचार्यसन्दर्शितागमप्रकारेत्याहुः। ईश्वर इति। शरणत्वेनेति। 'शुद्धाश्च सुखिनश्चैव ब्रह्मविद्याविशारदाः। भगवद्भजने योग्या नान्य इत्यर्थतः फल'मिति प्रथमसुबोधिनीकारिकायां 'ब्रह्मविद्याविशारदा' इत्युक्तेरुक्तशमदमादिसूत्रोक्तशमदममुमुक्षावैराग्यप्राप्त्या मुमुक्षुकार्यं शरणगमनं श्रुतत्वादत्र

---

१. छान्दोग्य इत्यारभ्य इदं विषयवाक्यमित्यन्तं श्रीहस्ताक्षरलिखितमूलपुस्तके नास्ति, तथापि प्रकाशकारैर्व्याख्यातत्वादुपलब्धेष्वादर्शेषु दृश्यमानत्वाच्चात्र निवेशितम्।

भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते। न स पुनरावर्त्तते न स पुनरावर्त्तते'। इदं विषयवाक्यम्।

'ब्रह्मलोकमभिसम्पद्यत' इति गृहिणोपसंहारः कृतः। वाजसनेयिशाखायां च 'तद्ध स्म वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्त' इत्युपक्रम्य 'अथ भिक्षाचर्यं चरन्ती'ति पठ्यते। एवं सति विकल्पे सक्रमवत्युपसंहारस्य तात्पर्यग्राहकत्वाद् गृहिण एव यथोक्तकर्तुर्ब्रह्मसम्पत्तिरिति श्रुतेस्तात्पर्यम्। त्यागोक्तिस्तु ब्रह्मैतादृशं यदर्थं सर्वं त्यज्यत इति स्तुतिपरेति प्राप्ते, गृहिणोपसंहारे हेतुत्वेन तात्पर्यमाह कृत्स्नेति। त्यागे वाङ्मनसोरेव भगवति विनियोगः, न सर्वेन्द्रियाणाम्। गृहिणस्तु सर्वैः प्रकारैर्भजनं भवतीति, परिजनश्च कृतार्थो भवतीति च भजने

भाष्यप्रकाशः।

तान् सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः, तीर्थानि शास्त्रादिष्टा भिक्षाद्युपायास्तेषु परपीडापि सम्भवति, यथा याज्ञवल्क्यस्य कुरुपाञ्चालब्राह्मणैः सह चर्चायाम्, तदादिभ्यो भिक्षाटनाद्युपायेभ्योऽतिरिक्तस्थले हिंसां परपीडामकुर्वन्, स खल्वेवं वर्तयन् सोधिकारी उक्तेन प्रकारेण वर्तमानः पुत्रादिपरिजनमप्येवं वर्तयन् यावदायुषं यावज्जीवम्, ब्रह्मलोकमभिसम्पद्यते देहान्ते भगवल्लोकं प्राप्नोति। न च पुनरावर्तते। प्राप्तेर्जन्यत्वेन पुनरावृत्तिः शङ्क्येत। जन्यभावत्वेन नश्वरत्वेन लोके व्याप्तेः। तदभावायात्रावृत्तिर्निषिध्यते तेन लोकवैलक्षण्यं बोधितम्। पुनः कथनं समाप्तिद्योतनायेति बोध्यम्।

सूत्रं व्याकुर्वन्तः श्रुतितात्पर्यमाहुः त्याग इत्यादि। कृत्स्नेति। सर्वेषामान्तराणां बाह्यानां

रश्मिः।

प्राप्नोति। गोपालतापनीये 'मुमुक्षुर्वै शरणमनुव्रजे'दिति श्रुतिः। शमदमादिष्वेकस्य कार्यमुक्तम्। एकादशे 'मच्छरणो मुनि'रित्युपबृंहणात्। एवं श्रीमदाचार्यमार्गरीत्या ज्ञात्वा, कर्माणि सर्वेन्द्रियाण्यपि तत्र सन्न्यस्येति। भगवति सन्न्यस्य, तत्पराणि कृत्वा इति यावत्। द्वितीयविवरणे सामञ्जस्यमुक्तं कर्मणां तत्परत्वकरणमेकादशैकोनविंशाध्याये। षड्शास्त्रातिरिक्तस्य मुख्यत्वं यथा तथोपपादितं भक्तिरत्नटीकायां मया। एवं चैकोनविंशे 'श्रद्धामृतकथायां म' इत्यादिना श्रद्धामन इति मनसस्तत्परकरणम्। एवमन्यदपि। परन्त्वेत'देवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम्। मयि सञ्जायते भक्ति'रिति तत्र वाक्यादार्थक्रमेण श्रुतात्मनिवेदनं शरणगमनानन्तरं प्राप्नोति। तद्वत्तु 'श्रद्धामृतकथायां म' इत्यत्रविनोक्तनवधाभक्तयस्तत्र सकलेन्द्रियपरता तद्द्वारा भगवति सर्वेन्द्रियाणि सम्प्रतिष्ठाप्य सन्न्यस्येति यावत्। सन्न्यस्येत्युक्त्या सन्न्यासो नैष्कर्म्यं 'इहामुत्रफलभोगनैराश्यं' कृत्वेत्युक्तम्। अत्र नैष्कर्म्यपदं इहामुत्रफलभोगनैराश्यकरणकमनःकल्पने उक्तम्। तदुक्तं भक्तिहंसे 'भक्तिमार्गः श्रवणादिसन्निरूप' इति। अन्यदूह्यम्। भिक्षादीति। आदिना निरोधलक्षणग्रन्थोक्तो निरोधः। 'तीर्थं नातः परात् पर'मिति तद्ग्रन्थवाक्यात्। वर्तयन्निति णिचं समर्थयन्ति स्म स इति। उक्तेनेत्यस्यार्थेन श्रुतानुक्तेन। पुत्रादीति। पुत्रादिपरिजनो वर्तमानस्तं पुत्रादिपरिजनं वर्तयन्। जन्यभावत्वेनेति। जन्यत्वेन नश्वरत्वेन व्याप्तौ घटोन्मज्जनापत्तिः। ध्वंसस्य जन्यत्वेन नश्वरत्वात्। दत्ते तु भावपदे ध्वंसस्याभावत्वेन नश्वरत्वाभावान्नोन्मज्जनापत्तिरिति। तदभावायेति। पुनरावृत्त्यभावाय। तेनेति। व्याप्तेर्लौकिकत्वेनापुनरावृत्तौ लोकवैलक्षण्यं बोधितम्, व्याप्तिविषयत्वात्। पुनः कथनमिति। 'न

कृत्स्नता भवतीति तेनोपसंहारः कृत इत्यर्थः । अत एव ‘आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये’त्युच्यते । अत्र, आत्मपदं भगवत्परमिति ज्ञेयम् । कर्ममार्गीयगृहिव्यवच्छेदाय तुशब्दः ।

अत्रेदमाकूतम् । ‘भक्तिमार्गो बहुविध’ इति कपिलदेववाक्यात् केचन भक्ताः स्वगृहेष्वेव स्नेहेन भगवदाकारे विविधोपचारैः सेवां कुर्वन्तस्तयैव निर्वृत्या मुक्तिमपि तुच्छां मन्यन्ते । तदुक्तं ‘मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गु’रिति । तेन भगवद्भजन एव, तत्रापि पुष्टिमार्ग एव, श्रुतेर्भर इति ज्ञायते । पूर्वमुत्कटभगवद्भाववतां तदर्थं त्यागं निरूप्य, गृहिणोपसंहारतात्पर्यं पश्चाद् यन्निरूपितवान्, तेन तादृग्भाववतैव त्यागः कार्यः, तद्रहितेन तु गृह एवोक्तरीत्या प्रभुभजनं कार्यम्, तेनैव तल्लाभ इति व्यासहृदयमिति ज्ञायते । उक्तभावाभावे त्यागधर्मानिर्वाहादिति । केचन भक्ता भाषणादिलीलादर्शनं विना स्थातुमशक्ताः प्रचुरभावविवशाशया गृहाँस्त्यक्त्वा वनं गच्छन्ति । आत्रेयौडुलोमिभ्यां तु भगवदवतारसाम-

---

भाष्यप्रकाशः ।

च सार्थक्यम् । तेनेति । गृहिणा । एवं तात्पर्ये गमकमाहुः अत एवेत्यादि । कर्ममार्गीयेति । जैमिनीयतन्त्रविचारितेत्यर्थः ।

ननु पूर्वाधिकरणे त्यागं निरूप्य, यदत्र गार्हस्थ्यं प्रशंसति, तत्किमित्याकाङ्क्षायामाहुः अत्रेदमित्यादि । भक्तिमार्गो बहुविध इति कपिलदेववाक्यादिति । ‘भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते । स्वभावगुणभेदेन पुंसां भावो विभिद्यत’ इति कपिलदेववाक्याद् भक्तिमार्गो बहुविध इत्यन्वयः । तदुक्तमिति ‘यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् । नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गु’रिति पञ्चमस्कन्धे भवाटवीसमाप्तौ शुकेनोक्तम् । तथा च भरतस्य राजदशायां तथाभावस्योक्तत्वादन्यस्यापि गृहिणस्तथाविधत्वे तथात्वमित्यर्थः । तेनेति गृहिणोपसंहारे आत्मनि सर्वेन्द्रियसम्प्रतिष्ठापनादिकथनेन । श्रुतितात्पर्यं निरूप्य व्यासतात्पर्यं निरूपयन्ति पूर्वमित्यादि । तल्लाभ इति । भगवत्प्राप्तिः । उक्तभावाभावे त्यागधर्मानिर्वाहादिति । विगाढभावाभावे ‘स इवावसत्ता’दित्यादिनोक्तस्य सर्वत्र तद्भानरूपस्य त्यागधर्मस्य मध्ये विच्छेदेन सर्वदा स्थैर्या-

रश्मिः ।

च पुनरावर्तत’ इत्यस्य । जैमिनीयेति । पूर्वतन्त्रविचारितगृहिव्यवच्छेदाय । यथाहुः षष्ठाध्याये ‘दम्पत्योः सहाधिकार’ इति । पाठान्तरमाहुः भक्तियोगो बहुविध इति । भगवदाकार इति । भगवत्स्मरणं त्रेधा भवति, ‘यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया । मदर्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मन’ इत्येकादशे विंशाध्यायवाक्यात् । अत्र ‘शङ्खचक्रे मृदा यस्तु कुर्यात् तप्तायसेन वा । स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मण’ इत्यत्र शङ्खचक्रनिषेधस्य तप्तायसे पर्यवसानवद् ध्येयस्मरणस्य भगवदर्चोपासनायां पर्यवसानात् । तथात्वमिति । उक्तभाववत्त्वम् । गृहिणोपसंहार इति । गृहिणा विद्योपसंहारे । पूर्वमित्यादीति । बहिस्तूभयथेत्यधिकरणे । तदर्थमिति । भगवदर्थम् । मर्यादां स्पष्टत्वात् त्यक्त्वा पुष्टिमाहुः । विगाढेति । इदं लिङ्गभूयस्त्वाधिकरणे स्पष्टम् । त्यागधर्मस्येति । त्यागः सर्वात्मभाव इति श्रीहरिरायजितः । तस्य धर्मश्चरमवृत्तिस्तस्य ।

यिकभक्तदशोक्ता। एते सर्वे फलमार्गीयाः। वाजसनेय्युक्तास्तु साधनमार्गीया इति नानुपपत्तिः काचित् ॥ ४७ ॥

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

किञ्च। सन्न्यासिन आवश्यका ये धर्मास्ततोऽधिकास्ते गृहिणः सिध्यन्ती-

---

भाष्यप्रकाशः।

भावात्। ननु यद्येवं दौर्लभ्यम्, तदा तत्कथनमशक्योपदेशरूपत्वादप्रयोजनकं, अतो न वक्तव्यमेवेति किमित्युक्तमत आहुः केचनेत्यादि। तथा च दौर्लभ्येपि तत्सत्तास्तीत्यतस्तदनूदितम्। अतस्तादृशाधिकारे भगवत्कृपया सम्पन्ने तत्कर्तव्यताबोधनार्थं तत्कथनमित्यर्थः। नन्वात्रेयौडुलोमिभ्यामेतादृशदशासम्पत्तौ गृहत्याग उच्यते, वाजसनेयके तु 'किं प्रजया करिष्यामो येषां नो एवायमात्मा नायं लोक' इति श्रावणादात्मलोककामनामात्रे बोध्येते इति ताभ्यामुक्तं श्रुतिविरुद्धम्, किञ्च, ये लीलादर्शनार्थं वनं गच्छन्ति, ते भगवदागमने पुनरायान्ति, न तु वन एव स्थित्वा सन्न्यासिधर्मानातिष्ठन्तीत्यतोपि तच्छ्रुतिविरुद्धम्, अतः कथं श्रौते विचार एवं तन्मतोपन्यास इत्यत आहुः। आत्रेयेत्यादि। एते सर्वे यदीया दशा ताभ्यामुक्ता, ते सर्वे भक्ताः फलमार्गीयाः, मार्ग उपायः। फलमेव मार्गो यत्रासौ मार्गः फलमार्गस्तत्सम्बन्धिनः। यथा गोपालतापनीयोक्ता गान्धर्वीप्रभृतयः। तथा च फलरूपो भगवानेव स्वस्वरूपंताननुभावयतीति भगवत्कृपाविशिष्टयैवेच्छया तेषां सर्वेन्द्रियव्यापाराः। वाजसनेयिनां कहोडब्राह्मण उक्तास्तु साधनमार्गीयाः। साधनं शमादिविशिष्टं ज्ञानमेव मार्ग उपायः फलप्राप्तौ यत्रासौ साधनमार्गस्तत्सम्बन्धिन इति तत्तदधिकारिभेदेन तथा तथा कथनान्न पूर्वोक्ता श्रुतिविरोधरूपा काप्यनुपपत्तिरित्यर्थः ॥ ४७ ॥

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥ सूत्रमवतारयन्ति किञ्चेत्यादि। व्याकुर्वन्ति मौनपदमित्यादि। यद्यपि मुनेर्भावो मौनमिति योगेन विचारात्मकं ज्ञानमप्यादातुं शक्यते,

रश्मिः।

अतोऽवक्तव्यमिति। अतः अवक्तव्यमिति च्छेदः। आत्मेति। आत्मा च लोककामना चात्मलोककामने ते एवात्मलोककामनामात्रे बोध्येते। तन्मतेति। आत्रेयौडुलोमिमतोपन्यासः। फलसाधनयोः सामानाधिकरण्यमाहुः मार्ग उपाय इति। फलमार्ग इति। प्रमेयबलमिति यावत्। गान्धर्वीति। प्रभृतिपदेन व्रजस्त्रियः। 'तासां मध्ये श्रेष्ठा गान्धर्वी ह्युवाचे'ति श्रुतेः। एते प्रमेयबलेन मुक्ता इति प्रमेयबलरूपफलमार्गसम्बन्धिनः, तदाहुः तथा चेति। भगवानेवेति। फलमेव, एवकारेण तदतिरिक्तसाधनव्यवच्छेदः। भगवत्कृपेति। भगवदभिन्ना, फले साधनांश इति शेषः। कृपाविष्टः साधनमित्याचार्योक्तेः। भगवत्कृपाविशिष्टयेच्छयेति न समस्तं पदम्। इच्छायां कृपाविशिष्टत्वाभावात्। विशिष्टयेति। ब्रह्मह्रदं नीतानामपि सर्वेन्द्रियव्यापारा भवन्त्विति विशिष्टेच्छा तया। एवकारेण साधारणेच्छायोगव्यवच्छेदः क्रियते। भक्तमनोरथपूरकत्वेन रूपभेदात्। वाजसनेयीति भाष्यं विवृण्वन्ति स्म वाजसनेयिनामिति। साधनमित्यादि। 'ब्रह्मविदाप्नोति पर'मित्यत्र ब्रह्मविदित्यत्र ज्ञानम्। तत्सम्बन्धिन इति। प्रमाणबलिनः। पूर्वोक्तेति। सूत्रारम्भोक्ता। श्रुतिस्तु 'एतद्ध स्म वा' इति ॥ ४७ ॥

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥ रूढमिति। यौगिकमित्युक्ते विचारात्मकज्ञान-

स्यपि हेतोस्तेनोपसंहारः कृत इत्याशयेनाह मौनवदित्यादि । मौनपदमनीहानिलायामादित्रिदण्डिधर्मोपलक्षकम् । यथा वागिन्द्रियमात्रदेह[1]मात्रचित्तमात्रनियामकास्ते धर्मा उक्ता न्यासिनः, तथेतरेषामपीन्द्रियनियामकानां धर्माणां 'आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति श्रुत्या गृहिण उपदिश्यन्त इति युक्तो गृहिणोपसंहार इत्यर्थः । तत्र नियमनमात्रम्, अत्र तु भगवति विनियोगात् आधिक्यमिति भावः । वस्तुतस्तु केवलनियमनस्याप्रयोजकत्वात् तत्रापि भगवति विनियोग एव तात्पर्यमिति ज्ञेयम् ॥ ४८ ॥

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

ननु भगवति सर्वेन्द्रियविनियोगात् गृहिणोपसंहार इति न युज्यते, 'शुचौ देशे स्वाध्यायमधीयान' इत्यादिकर्ममार्गीयसाधनश्रुतेरित्याशङ्क्य, तत्तात्पर्यमाह अनाविष्कुर्वन्निति । भगवद्भावस्य रसात्मकत्वेन गुप्तस्यैवाभिवृद्धिस्वभावकत्वादाश्रमधर्मैरेव लोके स्वं भगवद्भावमनाविष्कुर्वन् भजेतेत्येतदाशयेन ते धर्मा उक्ताः । गोपने मुख्यं हेतुमाह अन्वयादिति । यतो भगवता सममन्वयं सम्बन्धं प्राप्य वर्तते, अतो हेतोस्तथा । अत्र ल्यब्लोपे पञ्चमी । एतेन यावद् अन्तःकरणे साक्षात् प्रभोः प्राकट्यं नास्ति, तावदेव बहिराविःकरणं भवति, प्राकट्ये तु न तथा सम्भवतीति ज्ञापितम् ॥ ४९ ॥

भाष्यप्रकाशः ।

तथापि भगवता 'मौनानीहानिलायामा दण्डा वाग्देहचेतसा'मिति वाक्ये त्रयाणां समभिव्याहृतत्वाद्वाग्दण्डरूपं मौनं रूढं गृहीतं ज्ञेयम् । शेषं स्फुटम् ॥ ४८ ॥

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥ सूत्रमवतार्य व्याकुर्वन्ति नन्वित्यादि । भाष्यमत्रातिरोहितार्थम् ॥ ४९ ॥

रश्मिः ।

बोधापत्तिरतो रूढमित्युक्तम्, योगरूढमित्यर्थः । नामैकदेशग्रहणात् ॥ ४८ ॥

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥ अतिरोहितार्थमिति । तत्तात्पर्यमिति । कर्ममार्गीयसाधनश्रुतितात्पर्यम् । भगवद्भावस्येति । अत्राश्नुत इति श्रुतावशनमनाविष्कृतमश्नुत इत्यश्नातिस्थाने प्रयोगात् । अतः सूत्रमप्यनाविष्कुर्वन्नशनमित्याशयेन व्याकृतम् । न चान्योन्याश्रयः । अश्नातीत्यस्य पदव्यत्ययविकरणव्यत्ययाभ्यां वक्ष्यमाणसूत्रव्याख्यानं सूत्रव्याख्यानेनाश्नुत इत्यत्र पदव्यत्ययविकरणव्यत्ययौ यत इति वाच्यम् । आनन्दमयाधिकरणोक्तयुक्तिभिरनाविष्कुर्वन्निति योगविभागाच्चानाविष्कुर्वन् श्रुतौ ह्यश्नातीति प्रथमसूत्रार्थः ततश्चाश्नुत इत्यादावुभयसिद्धौ योगविभागस्येष्टसिद्ध्यर्थत्वादन्वयादिति द्वितीयसूत्रे पूर्वसूत्रमनुवर्त्य प्रकृतं सूत्रं सिद्धमित्यन्योन्याश्रयाभावात् । आश्रमेति । सर्वाश्रमधर्मैरित्यर्थः । भजने प्रकाराकाङ्क्षायां स्वधर्ममाहेति सुबोधिन्यां यतः । उक्ता इति । स्वाध्यायब्राह्मण उक्ताः । अतस्तथेति । ल्यब्लोपे पञ्चमीत्यतः शेष उक्तः । अतोऽत्यन्तस्नेहाद्भगवत्सुखकरं गोपनमित्यर्थः । नास्तीति । विरहे नास्ति । बहिराविष्करणं गुप्तान्वयस्याश्रमधर्मद्वारा भवति । प्राकट्य इति । अन्तःकरणे प्राकट्ये तु तथा नाम, बहिराविष्करणं न सम्भवति,

---

[1] देहमात्र चित्तमात्रेतिद्वयं प्राचीनतमादर्शे हरितालिकया दूरीकृतं दृश्यते ।

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

वैदिककर्मकरणे तात्पर्यमुक्त्वा लौकिकस्यानावश्यकत्वेपि तत्सम्भवमाह । प्रस्तुतं प्रभुभजनं तत्प्रतिबन्धासम्भवे एवैहिकं कार्यम् । नन्वैहिकं कर्मास्तु, मा वा, अतस्तत्समयोक्तिर्व्यर्थेत्याशङ्क्याह । तद्दर्शनादिति । 'आचार्यकुला-दित्युपक्रम्याग्रे पठ्यते, 'धार्मिकान् विदध'दिति । अतो धार्मिकपुत्रविधान-मैहिकं कर्म श्रुतौ दृश्यते, अतस्तत्समयोक्तिरावश्यकी । अन्यथा श्रुताद्युक्तमस्तीति प्रस्तुतबाधेपि तत्करणे फलप्रतिबन्धः स्यादिति भावः ॥ ५० ॥

इति तृतीयाध्याये चतुर्थपादेऽष्टमं गृहिणोपसंहाराधिकरणम् ॥ ८ ॥

भाष्यप्रकाशः

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥ अत्रापि भाष्यं प्रकटार्थम् । एवञ्च यस्य मर्यादायां वरणं वर्तते, तेन साधनापरिपाकदशायां 'आचार्यकुला'दिति श्रुत्युक्तरीत्या गृह एव स्थित्वा भगवद्भजनं कर्तव्यम्, स्वधर्मरहस्यं च गोपनीयमिति सिद्धम् ॥

शङ्कराचार्यास्तु, सहकार्यन्तराधिकरणं त्रिसूत्रमङ्गीकृत्य, 'तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण' इति बृहदारण्यकीयकहोळब्राह्मणे किं मौनं विधीयत उत नेति संशये, मौनं विधीयते । यद्यप्यत्र न विधिः, तथाप्यपूर्वत्वाद्विधिराश्रयणीयः । मौनं च पाण्डित्यमतिरिक्तं ज्ञानातिशय-रूपम् । 'मुनीनामप्यहं व्यास' इति प्रयोगदर्शनात् । अतो मननान्मुनिस्तद्भावो मौनम् । अतो-

रश्मिः ।

विरहे विविधभावोत्पत्त्या नवधाभक्तिभक्तधर्मैराश्रमधर्माणां तादृशे बाधात् । ज्ञापितं तात्पर्यवृत्त्योक्तम् । एवमतिरोहितार्थमित्यर्थः ॥ ४९ ॥

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥ प्रकटार्थमिति । प्रकटोऽर्थो यस्य, तथाहि । अप्रस्तुतेत्यत्र प्रस्तुतस्य प्रतिबन्धः प्रस्तुतप्रतिबन्धः, न प्रस्तुतप्रतिबन्धोऽप्रस्तुतप्रतिबन्धस्तस्मिन्नित्यर्थं मत्वाहुः प्रस्तुतमिति । कार्यमिति । मृत्युभीरुणा कार्यम् । एकादशे योगीश्वरवाक्ये 'वेदोक्तं नाचरेद्यस्तु मृत्योर्मृत्युमुपैति स' इति दर्शनात् । श्रुताद्युक्तमिति । स्वाध्यायब्राह्मणश्रुताद्युक्तम् । अधुना प्रस्तुतपदे नञन्वयं कृत्वाहुः प्रस्तुतबाध इति । नञर्थबाधः । तत्करण ऐहिककरणे । फलेति । प्रस्तुतभजनरूपसाधनाभावात्तथा । एवं प्रकटार्थम् । साधनेति । शमदमादिमुमुक्षुत्ववैराग्यबोधका(भा)वपरिपाकः अस्वाधीनता । रहस्यमिति । यथा त्रिभङ्गललितस्तोत्रोक्तम् । 'अहं तदीय इत्येषा तद्वार्ता रूपिता पर'मिति तदीयाधिकारोक्तेः । तस्माद्ब्राह्मण इति । यस्मात् पूर्वे ब्राह्मणा आत्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थाय भिक्षाचर्यं चरन्ति, तस्मादद्यतनो ब्राह्मणः पञ्चाध्ययनजा आपाततो ब्रह्मधीस्तद्वान् पण्डितस्तस्य कृत्यं पाण्डित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलभावेन मननेन, शुद्धान्तःकरणत्वेन वा स्थातुमिच्छेत् तद्द्वयं लब्ध्वा, अथ श्रवणमननानन्तरं मुनिर्मननशीलो निदिध्यासनपरः स्यादमौनं श्रवणमनने च मौनं च निदिध्यासनं लब्ध्वोक्तत्रयस्य ब्रह्मसाक्षात्कारहेतुत्वात् तत्त्रयानन्तरं ब्रह्मावगच्छतीति ब्राह्मणः साक्षात्कृतब्रह्मा भवतीति श्रुत्यर्थः । मौनमिति । निदिध्यासनम् । ज्ञानातीति । निदिध्यासनमित्यर्थः । ब्रह्मामृतवर्षिण्यां तथा व्याख्यानात् । तद्भावो मौनमिति । भावे घञ् । भावोत्र प्रकृतिजन्यबोधे

भाष्यप्रकाशः ।

'स्य मुनि'रित्यत्र मुनिः स्यादित्येवं विधिराश्रयणीयः । यद्यपि 'गार्हस्थ्यमाचार्यकुलम्' 'मौनं वानप्रस्थ्य'मित्यत्र मुनिशब्द उत्तमाश्रमेपि श्रुतः, तथापि, 'वाल्मीकिं मुनिपुङ्गव'मित्यत्र व्यभिचारदर्शनान्न नियमतोऽन्यत्र तदर्थको ग्रहीतुमुचितः । उक्तश्रुतौ त्वाश्रमान्तरसन्निधानात्तुर्ये तद्ग्रहणम् । ज्ञानप्रधानत्वादुत्तमाश्रमस्य तस्माद् बाल्यपाण्डित्यापेक्षया तृतीयं मौनमत्र विधीयते । निर्वेदनीयत्वनिर्देशादपि मौनस्य बाल्यपाण्डित्यवद् विधेयत्वाश्रयणम् । 'तद्वत' इति विद्यावतः सन्न्यासिनो ग्रहणम् । कहोलब्राह्मणे तस्यैव प्रस्तुतत्वात् । ननु विद्यावत्त्वे तत एव ज्ञानातिशयप्राप्तेः किं मौनविधिनेत्यत आह 'पक्षेणे'ति । यस्मिन् पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मिन् पक्षे विधिरिति विध्यादिवदिति । यथा दर्शपूर्णमासादौ सहकारित्वेनाग्न्याधानाद्यङ्गजातविधिः, एवमविधिप्रधानेऽस्मिन् विद्यावाक्येपि मौनविधिरित्याहुः ।

तेन तन्मते 'तद्वतः पक्षेण सहकार्यन्तरविधि'रिति प्रतिज्ञा, तृतीयं विध्यादिवदिति हेतुवाक्यमिति सिध्यति ।

भास्कराचार्यास्तु पूर्ववदेवाङ्गीकृत्य सूत्रमेवं योजयन्ति । विधीयत इति विधिः । तद्वतो विद्यावतस्तृतीयं मौनं ज्ञानप्रकर्षपक्षेण सहकार्यन्तरविधिः । तथा च ज्ञानातिशयमापादयेज्ज्ञानपरिपाकाय योगाभ्यासं कुर्यादित्यर्थः । विध्यादिवत् । यथा अग्निहोत्रादिकमविदुषः फलातिशयार्थिनो विधीयते, तथा विदुषो व्युत्थायिनो ज्ञानप्रकर्षरूपं मौनं कर्तव्यत्वेन विधीयत इति वदन्ति ।

रामानुजाचार्यास्तु सूत्रयोजनां भास्कराचार्यवदेवाङ्गीकृत्य तदर्थमेवमाहुः । विधिशब्देन यज्ञादिः, सर्वाश्रमधर्मः शमदमादिश्च विधिशब्देनोच्यते । आदिपदेन श्रवणमनने गृह्येते । सहकार्यन्तरं विधीयत इति सहकार्यन्तरविधिः । तथा च यथा, 'तमेतं वेदानुवचनेने'त्यादिना, 'शान्तो दान्त' इत्यादिना च यज्ञादिः शमादिश्च सहकारित्वेन विद्यावतो विधीयते । तथा च,

रश्मिः ।

प्रकारः । यलो लोपो वा । मुनिशब्द इति । भावप्रधानोऽयम्, व्यवहारे भाक्तत्वाद्वा मुनित्वे युक्तिः । मुनित्वस्य विधेयत्वमाश्रीयत इति भाष्यात् । उत्तमेति । तुरीयाश्रमे । आश्रमप्रायपाठात् । व्यभिचारेति । मुनिषु मध्ये पुङ्गवं श्रेष्ठं न निर्धारण इति षष्ठीसमासनिषेधः । आश्रमवाचकत्वव्यभिचारदर्शनात् । अन्यत्रेति । आश्रमप्रायपाठादन्यत्र । तदर्थकः आश्रमार्थकः । उक्ते । 'गार्हस्थ्यमाचार्यकुल'मित्यादिश्रुतौ । तद्ग्रहणमिति । मौनशब्दस्य चतुर्थाश्रमवाचकस्य ग्रहणम् । निर्वेदनीयत्वेनेति । निश्चयेन वेदनीयत्वनिर्देशात् । प्रस्तुतत्वादिति । 'एतं वै तमात्मानं विदित्वे'त्युपक्रम्य, 'अथ भिक्षाचर्यं चरन्ती'तिश्रुत्या प्रस्तुतत्वात् । मौनविधिनेति । अतिशयहेतु । न प्राप्नोतीति । अभेदविद्यावत्त्वं न प्राप्नोति । अविधीति । कृत्यविषयत्वेन ज्ञानस्याविधिप्रधाने विद्यावाक्ये । अग्न्याधेयेति । तर्कप्रधाना एते । यदि ज्ञानातिशयो न स्यात्, ज्ञानपरिपाकाय योगाभ्यासं न कुर्यादिति । अतो योगाभ्यासं कुर्यादिति सहकार्यन्तरविधिः । अविदुष इति । अपरज्ञानरहितस्य । भेदज्ञानवतः । व्युत्थायिन इति । व्युत् स्थायिनः । व्याख्यानयोः पूर्वस्य । व्युद् अधिकं स्थायिनः पूर्वज्ञानादेव तदधिकज्ञाने स्थायिनः । इत्यादीति । इत्येवं बोधयन्तीति पूर्वेणान्वयः । तदर्थमिति । सूत्रार्थम् । यज्ञप्राय इति । शमदमादिमध्यपाठात् प्राप्ते ।

भाष्यप्रकाशः।

'श्रोतव्यो मन्तव्य' इत्यादिश्रवणमनने स्वार्थप्राप्ते विद्यासहकारित्वेन गृह्येते, तथा। तस्मात् ब्राह्मणः पाण्डित्यमित्यादिना पाण्डित्यं बाल्यं मौनमिति त्रयं विद्यायाः सहकार्यन्तरं विधीयत इत्युक्तं भवति। मौनं च पाण्डित्यादर्थान्तरमित्याह 'पक्षेणे'ति। इदं च मननं श्रवणप्रतिष्ठार्थान्मननादप्यर्थान्तरम्। उपासनालम्बनस्य पुनः संशीलनं तद्भावनारूपम्। अतोऽपूर्वत्वादत्र विध्यश्रवणेपि तदाश्रयणम्। मुनिः स्यादिति। तस्मादेवं वाक्यार्थः। ब्राह्मणो विद्यावान् पाण्डित्यं निर्विद्य उपास्यं ब्रह्मतत्त्वं परिशुद्धं परिपूर्णं च विदित्वा श्रवणमननाभ्यां प्राप्तं वेदनेन प्रतिलभ्येति यावत्। तच्च भगवद्भक्तिभूतं सत्त्वशुद्धिकृतम्। 'नाहं वेदै'रित्यारभ्य, 'भक्त्या त्वनन्यया शक्यो ज्ञातु'मिति गीतायामुक्तत्वात्, 'यस्य देवे परा भक्ति'रिति, 'नायमात्मा प्रवचनेन लभ्य' इति श्रुतावप्युक्तत्वाच्च। बाल्येन तिष्ठासेदिति। बालस्य यत्स्वभावानाविष्काररूपं कर्म तेन स्थातुमिच्छेत्। बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः स्यात्, बाल्यपाण्डित्ये यथावदुपादाय परिशुद्धे परिपूर्णे ब्रह्मणि निदिध्यासनरूपप्राप्तये मननशीलो भवेत्। एवं त्रितयोपादानेन लब्धविद्यो भवेदित्याह। 'अमौनं च मौनं च निर्विद्याथ ब्राह्मण' इति। अमौनं मौनेतरसहकारिकलापस्तच्च मौनं च यथावदुपाददानस्तदेकनिष्ठायां विद्याकाष्ठां लभत इत्येवं विषयवाक्यं व्याख्यातवन्तः।

बृहदारण्यकमिताक्षरायां तु, पण्डा वेदाध्ययनजन्या बुद्धिस्तद्वान् पण्डितस्तस्य कर्म वेदा-

रश्मिः।

श्रवणेति। श्रवणस्य प्रतिष्ठा मननं एतदर्थात्। उपासनालम्बनस्तद्विषयस्तस्य। वाक्यार्थ इति विषयवाक्यार्थः। वेदनेन इति। उपासनेन। तच्चेति वेदनं च 'सत्त्वात्सञ्जायते ज्ञान'मिति वाक्यात् सत्त्वकृतं भक्तिरूपं सत्त्वशुद्धिकृतम्। तदेकेति। सत्याम्। सती सप्तमी। श्रवणेति श्रवणलक्षणं ज्ञेयम्, यथाचार्यमते 'भगवद्वाचकपदवाक्यानां भगवति शक्तितात्पर्यनिर्धार' इति द्वितीयसुबोधिन्याम्। अतः श्रवणापरपर्यायम्। निःशेषमिति। शेषान्निष्क्रान्तं कृत्वा। निरादयः क्रान्ताद्यर्थे पञ्चम्येति समासः। श्रवणेति। श्रवणज्ञानेनोत्पन्नमशेषानात्मदृष्टेस्तिरस्करणं तस्य सामर्थ्यम्। तिष्ठासेदिति स्थातुमिच्छेत्। व्युत्थायिनमिति। विद्वांसम्। तद्विधिः सहकार्यन्तरविधिः। रामानुज इति मते। तद्विधिः सहकार्यन्तरविधिः। नातीति नातिक्रम्य गच्छन्ति। इत्यत इति। इति हेतोः विद्याया भक्तित्वे ज्ञानपदप्रवृत्तेर्भक्तौ सत्त्वादतो भक्तेर्ज्ञानत्वेन ज्ञानपक्षानतिरेकादित्यर्थः। तेन परोक्तपक्षोत्र सम्मतः सूत्राणां विश्वतोमुखत्वोदाहरणार्थः। एतदिति। व्युत्थाप्यपरिपक्वौ विहाय स एव मर्यादापक्ष एवाहृतः। व्युत्थाप्यपरिपक्वत्वयोर्मार्यादिकधर्मत्वात्। ननु पुष्टिमर्यादापक्षयोर्गतेरर्थवत्त्वसूत्र उक्तत्वात् तद्धर्मभूतोत्थाप्यपरिपक्वत्वे पुरस्कृत्यायं विचारोत्र युक्त इति चेत्, तत्राहुरेवेति। धर्मौ स्याद्वावित्येवकारस्त्वयोगव्यवच्छेदकः। गतेरर्थवत्त्वसूत्रे पुष्टिमर्यादे ससाधनासाधनत्वाभ्यां विचारिते, अत्र तु तृतीयस्याप्रयोजकत्वं विचारितमिति विशेषः। कहोडब्राह्मणार्थस्तु मिताक्षरोक्तः तत्रापि विशेषस्तु। श्रवणापरपर्यायं स्वमार्गीयश्रवणलक्षणात्। बाल्येन भक्तित्वेन बलं भक्तिरिति भाष्यात्। स्वार्थे ष्यञ् वा। भक्तिरूपो भवेयमिति स्थातुमिच्छेत्। मुनिः मौनवान् सन्यासिधर्ममौनानीहानिलायामवान्, अनिलायामः प्राणायामः। तिष्ठासेत्। 'विरहानुभवार्थं तु सर्वत्यागः प्रशस्यत' इति वाक्यात् विरहानुभवार्थं

एवं मुक्तिफलानियमस्तद्वस्थावधृतेस्तद्वस्थावधृतेः ॥ ५१ ॥ (३-४-९)

ननु 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य' इति श्रुतौ मुक्त्यनन्तरं ब्रह्मसम्पत्तिः श्रूयते, सा तु पुरुषोत्तमसङ्गे लीलारसानुभवातिरिक्ता वक्तुमशक्या, मुक्तोपसृप्यव्यपदेशात्, 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदु-

भाष्यप्रकाशः ।

न्त्रविचारलक्षणं श्रवणापरपर्यायं पाण्डित्यं निर्विद्य निःशेषं कृत्वा अनन्तरं बाल्येन तिष्ठासेत् । श्रवणज्ञानोत्पन्नाशेषानात्मदृष्टितिरस्करणसामर्थ्यं बलं तस्य भावो बाल्यम्, तेन बाल्येन विषयानाकृष्टस्तिष्ठासेन्मननं कुर्यादिति यावत् । बाल्यं च पाण्डित्यं च निःशेषं कृत्वा अथ मुनिर्मौनवान् धारावाहिकात्मप्रत्ययप्रवाहवान् तिष्ठासेदित्यनुषज्यते । निदिध्यासने कुर्यादिति यावत् । एवममौनशब्दवाच्यं श्रवणमननाख्यं मौनशब्दवाच्यं निदिध्यासनं निर्विद्य अथ ब्राह्मणो निरुपचरितब्राह्मण्यवान् ब्रह्मैव स्यात् कृतकृत्यो भवेदित्येवं व्याख्यातम् ।

तत्र मतभेदेन वाक्यव्याख्यानस्य भिन्नार्थत्वेपि मौनस्य प्रकृष्टज्ञानरूपस्यैवाङ्गीकारादर्थस्तुल्यप्रायः । सूत्रव्याख्याने तु शाङ्करे भास्करे च मते व्युत्थायिनं प्रति तद्विधिः । रामानुजे तु अपरिपक्वं प्रत्यावश्यकतया विद्यापरिपाकार्थं तद्विधिरिति फलति । सिद्धान्ते तु यावन्त्येतानि साधनानि तानि सर्वाणि मर्यादापक्षं नातिचरन्तीत्यत एतद्विहाय स एवादृत इति बोध्यम् । अग्रे तु न तथा विरुद्धम् । 'गृहिणोपसंहारे' तु बहुकर्मोपदेशं बीजमाहुः । बहुकर्मोपदेशे तु न किञ्चिदपीति तत्साकाङ्क्षत्वादरुच्यम् । 'मौनव'त्सूत्रे तु विद्यायाः सर्वाश्रमसाधारण्यं व्याकुर्वन्ति । 'अनाविष्कुर्व'न्नित्यत्र च बाल्यरूपं निश्चिन्वन्ति । तदविरुद्धमित्युपरम्यते ॥ ५० ॥

इत्यष्टमं गृहिणोपसंहाराधिकरणम् ॥ ८ ॥

एवं मुक्तिफलानियमस्तद्वस्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥ सूत्रमवतारयन्ति

रश्मिः ।

सर्वत्यागं कुर्यात् । अथ ब्राह्मणो गोपालतापिनीये यः सः पुरुषोत्तमवित् स्यात् ततः कृतकृत्यो भवेत् । बहुकर्मेति । कृत्स्नभावः सन्न्यासिनो विशिष्यते । बहुलायासानि हि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्तव्यतयोपदिष्टानि आश्रमान्तरकर्माणि च यथासम्भवं अहिंसेन्द्रियसंयमादीनि अस्य विद्यन्ते, तस्मात् गृहमेधिनोपसंहारो न विरुध्यत इति भाष्येण तथा । साकाङ्क्षत्वादिति बहुकर्मोपदेशबीजसाकाङ्क्षत्वात् । व्याकुर्वन्तीति । इतरेषां चतुर्णामाश्रमाणामुपदेशाविशेषात् । मौनवदिति व्याकुर्वन्ति । तेन विद्यायाः सकलाश्रमसाधारण्यं गौणसाधनव्युदासार्थम् । निश्चिन्वन्तीति । बाल्येन तिष्ठासेदित्यत्र यथोपपादमूत्रपुरीषत्वादिबालचरितं, अन्तर्गता वा भावशुद्धिः, दम्भदर्पप्ररूढेन्द्रियत्वादिरहितत्वं बाल्यं स्यादिति संशये, यथोपपादमूत्रपुरीषत्वं च प्रसिद्धतरं बाल्यमिति पूर्वपक्षे आन्तरो भावविशेषो बालस्याप्रकटेन्द्रियत्वादिरिह बाल्यमाश्रीयत इति सिद्धान्त इत्येवं निश्चिन्वन्ति । तद्विरुद्धमिति । 'शुद्धभावप्रसादित' इति वाक्यात् प्रसादहेतुत्वेन स्नेहान्तर्गतत्वात् ॥ ५० ॥

अष्टमं गृहिणोपसंहाराधिकरणम् ॥ ८ ॥

एवं मुक्तिफलानियमस्तद्वस्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥ सूत्रमिति । अधिक-

लैभः प्राशान्तात्मा कोटिष्वपि महामुन' इति स्मृतेश्च, मुक्तेः फलं भक्तिरसानुभव एव, एवं सत्युक्तगृहिणस्तत्फलं भवति, न वेति संशये, निर्णयमाह । एवंभूतस्योक्तरूपस्य मुक्तस्य मुक्तेर्यत्फलं भक्तिरसानुभवः, तस्य अनियमः तस्य भगवदिच्छाधीनत्वात् । साधनाप्राप्यत्वात् । अत एव 'मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति शुकवाक्यम् । अत्रौत्सर्गिकं हेतुमाह तदवस्थेति । 'न स पुनरावर्तत' इत्यस्यावृत्त्या मुक्त्यवस्थाया एव सार्वदिकत्वेन निर्धारः क्रियते । यद्यप्येवं मुक्तिफलाभावनियम एवायाति, न तु तदनियमः, तथापि 'तस्य तावदेव चिर'मित्यादिप्रमाणैः 'न स पुनरावर्तत' इति श्रुत्या समं विरोधा-

---

भाष्यप्रकाशः ।

ननु तस्येत्यादि । सेति । ब्रह्मसम्पत्तिः । तस्या उक्तरूपत्वे मानं मुक्तेत्यादि । एवं सतीति । लीलारसानुभवस्य मुक्तिफलत्वे सति । एवं संशये व्युत्पादिते पूर्वपक्षः स्वत एव भासत इत्याशयेन निर्णयमेव सूत्रे आहेत्यर्थः । व्याकुर्वन्ति एवमित्यादि । उक्तरूपस्य मुक्तस्येति गृहिणो मुक्तस्य । अत एवेति साधनाप्राप्यत्वादेव । औत्सर्गिकमिति अधिकारसामान्यात् प्राप्तम् । नन्वनया श्रुत्या पुनरावृत्तिकथनेन मुक्तावस्थाया एव नित्यत्वनिर्धारे लीलारसानुभावकब्रह्मसम्पत्तिरूपस्य मुक्तिफलस्य भेदसाध्यत्वात्तदभावेन मुक्तिफलाभावनियम एवायाति, न त्वनियम इत्याशङ्क्य तत्परिहरन्ति यद्यपीत्यादि । सत्यं यद्यपि, 'न स पुनरावर्तत' इति तदवस्थावधारणश्रुत्या उक्तानियमो नायाति, तथापि 'तस्य तावदेव

रश्मिः ।

रणात्मकम् । ननु तस्येत्यादीति । श्रुत्यर्थस्तु तस्य आचार्यवतः पुरुषस्य पण्डितस्य मुक्ताविद्याबन्धनस्य मेधाविनः तावदेव कालं चिरं विलम्बः सत्सम्पत्ताविति शेषः । तावत्कियदित्यत आह यावदिति । यावत्कालपर्यन्तं न विमोक्ष्ये, नञर्थः स्वल्पः विमोक्षो भूमा, मोक्षोऽक्षरः, स्वल्पो विमोक्षो भूमा सर्वात्मभावः साधनत्वात्, लिङ्गभूयस्त्वाधिकरणे भूमपदं सर्वात्मभावे, यथा भूमाधिकरणे ब्रह्मणि तथा चाहं भूमा न विमोक्ष्ये सर्वात्मभावं करिष्ये । अथ तदनन्तरं सम्पत्स्ये, देहपातानन्तरमहं सम्पत्स्ये विभूतिसहित आनन्दमयः पत्स्ये भक्ततनुं प्राप्स्यामि । 'तस्यैष आत्मा वृणुते तनुं स्वा'मिति श्रुतौ तस्य वृतभक्तस्य तनुं चतुरात्मकं स्वां स्वकीयां स्वकीयत्वेन वृणुते सम्भजते इत्यर्थात् । एषा श्रुतिश्छान्दोग्ये श्वेतकेतूपाख्याने वर्तते, तत्र व्याख्यानेऽग्रे मुक्तिरियमपि । यद्वा न विमोक्ष्य इत्यस्य न विमुक्तिं मुक्तिम्, वर्णागमं करिष्ये इत्यर्थः अतो नाग्रेतनभाष्यविरोधः । अशक्येति । वक्ष्यमाणभक्तिमार्गीयेर्षे अशक्या । उक्तरूपत्वे लीलारसानुभवरूपत्वे । मुक्तेत्यादीति । गृहिण इति । पुष्टिमार्गीयस्य सर्वस्यानुगृहीतस्य प्राप्तात्यन्तानुगृहीतस्य वा तस्येत्यपि संशयो ज्ञेयः । तत्फलं तु कस्यचिदत्यनुग्रहेण पुष्टौ प्रवेशने भवतीति वक्ष्यमाणभाष्यात् । मुक्तिफलत्व इति मुक्तस्य मुक्तेः फलत्वे साधनेति । लीलारसानुभवस्य मार्यादिकस्य पुष्टिभक्तिद्वारा कथनात्तथा । प्राप्तमिति । तत आगत इति ठञ् । यद्यपि सौत्रे इत्यणन्तमुदाहरणं तथापि सूत्रे विशेषात् ठगपि उत्सर्गश्च उत्पत्त्यादिशून्यकालिकत्वं तत् प्राप्तम् । जीवानामधिकारसामान्यं मुक्त्यवस्था । 'यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकं । परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते । अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षज' इति वाक्यात् । भाष्ये । तदवस्था । कृत्स्नभावाधिकरणविषयवाक्येनाधिकरणसङ्गत्यर्थमाहुः न स पुनरित्यादि ।

भावायौत्सर्गिकी तदवस्था । तत्फलं तु कस्यचिदत्यनुग्रहेण पुष्टौ प्रवेशने भवतीति स्वाभिप्रायं प्रकटीकुर्वता बादरायणेन अनियम इत्युक्तम् । एवं सति

भाष्यप्रकाशः ।

चिर'मिति श्वेतकेतूपाख्यानश्रुतावाचार्यवतः पुरुषस्य ब्रह्मज्ञानोत्तरं मोक्षानाप्तिपर्यन्तमेव ब्रह्मसम्पत्तिविलम्बः, न तु तदुत्तरमिति श्राव्यते । ब्रह्मसम्पत्तिश्च 'सता सोम्य तदा सम्पन्नो भवती'ति 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, स उत्तमः पुरुष' इत्यादौ सम्परिष्वङ्गरूपैव सिद्धेत्येकीभावदशाविरुद्धा । अतस्तदविरोधार्थमेतयोः श्रुत्योर्विशेषौत्सर्गिकभाव आदर्तव्यः । वरणेन पुष्टौ प्रवेशने मुक्त्यनन्तरं ब्रह्मसम्पत्तिरूपं फलम्, तदभावे तु मुक्त्यवस्थैवेति । तथा च वरणस्य भगवदिच्छामात्राधीनत्वात् तस्याश्च पूर्वं ज्ञातुमशक्यत्वाद्भगवता सूत्रकृता एवम्भूतस्वाभिप्रायस्य बोधनार्थमनियम इत्युक्तमित्यर्थः । नन्वेवं सति वृतस्य भेद आयाति, स च तस्या-

रश्मिः ।

मुक्त्येति । स इत्यस्य तत्त्वावच्छिन्ने वृत्तिः । तत्त्वं च मुक्त्यवस्था ब्रह्मांशत्वात् । तथा च चैतन्यं अपुनरावृत्तत्वेनोपस्थितं मुक्त्यवस्था । **क्रियत** इति । तस्या इति शेषः । मुक्त्यवस्थावधृतेरित्यर्थः । **प्रकृते** । तथा चायं सूत्रार्थः । एवं गृहिणोपसंहारे विद्यानां कृते । मुक्तेः फलं पुरुषोत्तमलीलानुभवः तस्यानियमः तुरीयाश्रमानन्तरमेवेति नियमः, पुष्टिस्थानां सर्वेषामिति च, तस्याभावः, कुतः, मुक्त्यवस्थावधृतेर्गृहिण आदृताया इति । **तदभावेनेति** । भेदाभावेन । **तदवस्थेति** । गृहस्थाश्रमे । मुक्त्यवस्थायाः अनावृत्तिरूपायाः अवधारणश्रुत्या । ननु कुतो 'न स पुन'रित्यस्या गृहस्थाश्रमे मुक्त्यवस्थावधारकत्वमिति चेत्, तत्प्रकरणादिति जानीहि । **उक्तानियमः** सूत्रोक्तमुक्तिफलानियमः । **तदनियम** इत्यन्तभाष्यार्थमुक्त्वा, तथापीत्यादिभाष्यार्थमाहुः प्रपञ्चेन **तथापीत्यादिना** । इयमपि पूर्वाधिकरणसङ्गत्यर्था, सङ्गतिस्तु सामान्यविशेषभावरूपा । भाष्यार्थस्तु, 'तस्य तावदेव चिर'मित्यत्र । आदिना मुक्तोपसृप्येत्यादिप्रमाणानि । षष्ठ्यन्तप्रयोगे कर्तव्ये तृतीयान्तश्छान्दसः प्रयोगः । **विरोधेति** । 'न स पुनरावर्तत' इत्यैक्यम् । 'तस्य तावदेव चिर'मित्यत्र लीलारसानुभवः कर्मकर्तृभावादिति वार्थभेदेनेति भेदाभेदयोर्विरोधः तदभावाय । 'न स पुनरावर्तत' इत्यत्रौत्सर्गिकी दशा 'तस्य तावदेव चिर'मित्यत्र विशेषावस्थेति विरोधाभावः तस्मै । सामान्यविशेषयोर्न विरोधः कालभेदादित्यर्थः । **औत्सर्गिकीति** । 'न स पुनरावर्तत' इति श्रुतौ औत्सर्गिकी । **तदवस्थेति** । मुक्त्यवस्था । **आचार्यवत** इति । छान्दोग्ये 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिर'मित्याद्युक्तेस्तथा । ब्रह्मज्ञानोत्तरमित्यावश्यकत्वात् साधनमाक्षिप्तम् । **मोक्षानाप्तिः** भगवदिच्छाज्ञानपरिपाकरूपकारणाभावात् । तत्पर्यन्तमेव । **ब्रह्मसम्पत्तीति** । ननु ब्रह्मसम्पत्तिरेव मोक्ष इत्यभेदान्वयोऽस्तु, न भेदान्वयः साध्यसाधकभावसम्बन्धकृत इति चेत् । न । अभेदस्य ज्ञानपर्यन्तत्वेन भक्तावभेदादानान्नाभेदान्वय इति । अभेदादान'मथ सम्पत्स्य' इत्युक्तदशायाम् । **विरोधाभावायेति** भाष्ये उक्तम्, तत्रैकीभावदशाविरुद्धेत्यन्तेन विरोधं व्युत्पाद्याहुः **ब्रह्मसम्पत्तिश्चेति** । यद्यप्यत्रेतिशब्दपर्यन्तं ब्रह्मसम्पत्तिः सत्सम्पत्तिरिति लक्ष्यमुक्तम्, लक्षणवाक्ये परं ज्योतिः कर्म, ज्योतिर्जीव उपसम्पद्य, उपेत्यनर्थकम् । **स्वेन** चिन्मात्रेण रूपेण । **सम्परिष्वङ्गः** सायुज्यमैक्यमिति लक्षणार्थ उक्त इति वक्तुं शक्यम्, तथापि तस्य ज्ञानमार्गीयत्वादुपोपसर्गत्वा'दुत्तमः पुरुषः' इति पदाभ्यां च 'परं ज्योति'रित्युपलक्षणं सदनन्तानन्दयोः । यथा 'सत्यं परं धीमही'त्यत्र चिदनन्तानन्दयोरुपलक्षकं सत्यपदम् । उप समीपे सम्पद्य सालोक्यादिमुक्तीनामे-

‘न स पुनरावर्तत’ इति श्रुतिः प्रपञ्चे पुनरावृत्तिं निषेधति, न तु तदतीतेपीति ज्ञेयम् । समाप्तिज्ञापनायावृत्तिः ।

अथवा । श्रुतौ तदवस्थावधृतेर्हेतोरस्माकमपि तदवस्थावधृतिर्यतोऽतः फलानियमनिश्चयोपीत्यर्थः । एवं सति मुक्तिपर्यन्तं साधनं भगवद्भाव इति निर्णयः सम्पन्नः ॥ ५१ ॥

इति तृतीयाध्याये चतुर्थपादे नवमं मुक्तिफलानियम इत्यधिकरणम् ॥ ९ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये

तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥

समाप्तोयं तृतीयोऽध्यायः ।

भाष्यप्रकाशः ।

वृत्तिमापादयन्नुक्तां श्रुतिं विरुणद्धीति शङ्कायामाहुः एवं सतीत्यादि। श्रुतिद्वयस्याविरोधे कर्तव्ये सत्यनावृत्तिश्रुतिः प्रपञ्चे पुनरावृत्तिं निषेधति । उपकोसलब्राह्मणे ‘एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त’ इति विशेषनिर्देशात् । न तु तदतीतेपि । एतेनैवावृत्तिनिषेधस्य सामान्यत्वनिवारणादिति ज्ञेयमित्यर्थः ।

सूत्रस्थपदावृत्तेः समाप्तिमात्रबोधकत्वेऽर्थवत्ता न स्यादित्यतः पक्षान्तरमाहुः अथवेत्यादि । अत इति । श्रुत्यन्तराविरोधात् । सिद्धमाहुः एवमित्यादि । भगवद्भाव इति सप्तमी । तथा च परप्राप्तौ भगवद्भाव एव परमा साधनकाष्ठेत्यत्र सिद्धमित्यर्थः ।

रश्मिः ।

कतमां सम्यक् प्राप्य स्वेन रूपेण तत्तन्मुक्त्युचितेन । अभीति । ञिभी भय इत्यादीनां प्रत्ययान्तानां तदुचितं रूपम् । उत्तमः पुरुषोत्र पुरुषोत्तमलीलाप्रवेशात् तत्तल्लीलारसानुभविता । अत्यनुग्रहवांश्चेत्, उत्तमश्चासौ पुरुषः पुरुषोत्तम इति पुरुषोत्तमपदं कर्मधारयसमासेन निष्पन्नम् । सम्परिष्वङ्गो भेदघटित इति भक्तिमार्गीयः । इवार्थो भेद इत्युक्तम् । एकीभावो ‘न स पुनरावर्तत’ इत्यत्र, इयं दशा मुक्तावस्था नित्यत्वरूपा अनावृत्तिरूपत्वात् । लीलारसानुभवितृत्वरूपा च विरुद्धानेकीभावरूपत्वात् । एकीभावेति । पूर्वाधिकरणविषयवाक्योक्ता पुनरावृत्तचैतन्यैकीभावदशाविरुद्धा । तदविरोधार्थमिति । विरोधाभावायेति भाष्यविवरणम् । श्रुत्योरिति । ‘तस्य तावदेव चिर’मित्यस्याः ‘न स पुनरावर्तत’ इत्यस्याश्च । विशेषेति विशेषभावः ‘यदेकमव्यक्तमनन्तरूप’मिति श्रुत्युक्त‘तमसःपरस्ता’दित्युक्त्या पुरुषोत्तमः श्रुतिद्वयस्येति मानवमावर्तं नावर्तन्त इति श्रुत्युक्तनित्यलीलाया अपुनरावृत्तनित्यत्वरूपः औत्सर्गिकभावो अपुनरावृत्तनित्यत्वरूपः । पुनरावृत्तिर्मायिकानाम् । अमायिकानां पुरुषे विराजि दोधूयमानानां विशेषपदार्थवद् अपुनरावृत्तिः । पुष्टाविति अत्यनुग्रहसाध्यायाम् । तदभाव इति । वरणेन पुष्टिप्रवेशस्याभावे इत्यर्थः । मुक्त्यवस्थेति । पुष्टानामपि इत्यन्तभाष्यविवरणम् । अनियम इत्युक्तमिति । उभयोराश्रमयोः । इतरयोस्तदङ्गत्वात् । अत एवैकादशे सप्तदशाध्याये ब्रह्मचर्यगृहस्थाश्रमयोर्निरूपणम् । भिन्नेऽष्टादशाध्याये तुरीयवानप्रस्थाश्रमयोर्निरूपणम् । तस्य तावदेव चिरमित्यस्या न स पुनरित्यस्याश्च । अनावृत्तिश्रुतिरिति । ‘इमं मानवमावर्त’मिति श्रुत्यैकवाक्यताप्राप्ता । एतेनेति साधनेन । तदतीत इति मानवावर्तातीते जगद्व्यापारवर्जे, आत्मबोधोपनिषत्प्रसिद्धे, ‘सत्यं ज्ञानमनन्तं यत् ब्रह्मज्योतिः सनातन’मित्युपदृष्टे । एतेनेति उक्तनिर्देशस्य सामान्यान्तर्गतत्वेन । आवृत्तिनिषेधो विषयवाक्येन तस्य, सामान्य-

भाष्यप्रकाशः ।

अन्ये तु 'ऐहिक'सूत्रे साधकस्यैतज्जन्मनि विद्योत्पत्तिरुत, जन्मान्तरे इति सन्देहे, मम जन्मान्तरे विद्या भवत्वित्यभिसन्ध्यभावादिभिरस्मिन्नेव जन्मनीति प्राप्ते, प्रतिबन्धकाभावस्य कारणतायाः सर्वत्र सिद्धत्वादत्र वा परत्र वा यदैव प्रतिबन्धककर्मादिनिवृत्तिः, तदैव तत्र विद्योत्पत्तिरिति सिद्धान्तयन्ति ।

'एवं मुक्तिफलानियम' इति सूत्रे तु यथा साधनवीर्यविशेषाद्विद्याया ऐहिकामुष्मिकत्वकृतो विशेषः, तथा विद्याफलभूताया मुक्तेरप्युत्कर्षापकर्षरूपो विशेषो भवेदित्येवं प्राप्ते । उच्यते । एवं मुक्तिरूपे विशेषनियमो नास्ति । कुतः । तदवस्थावधृतेः । सर्वेषु ब्रह्मरूपत्वावधारणात्, 'अस्थूलमनणु,' 'स एष नेति नेत्यात्मा', 'यत्र नान्यत् पश्यति' इत्यादिश्रुतिभ्यो ब्रह्मण एकलिङ्गत्वस्यैव सिद्धत्वादित्याहुः ।

तद्वस्मन्मते पूर्वकक्षारूपमिति लिङ्गभूयस्त्वाधिकरणे निर्णीतम् । तदवगमिका विद्या च तत्रैव विश्रान्तेति निर्णीतं 'अक्षरधिया'मित्यधिकरणे । अतो नास्माभिस्तत्राधिकं किञ्चिद्विचार्यत इति बोध्यम् ॥ ५१ ॥

इति नवमं मुक्तिफलानियम इत्यधिकरणम् ॥ ९ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य पुरुषोत्तमस्य
कृतौ भाष्यप्रकाशे तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥
समाप्तस्तृतीयोऽध्यायः ।

रश्मिः ।

त्वस्य निर्धारणादिति पाठः । सामान्यस्येति समानपदात् स्वार्थे ष्यञ् । सूत्रस्थपदेति । तदवस्थावधृतिपदस्यावृत्तिः समासीति । व्यञ्जनया बोधकत्वे शक्त्यभावात् । अतः तदवस्थावधृतिपदस्यार्थवत्ता नेत्यर्थः । अथवेत्यादीति । श्रुतौ ज्ञानिनां तदवस्थावधृतेरस्माकं भक्तानामपि तदवस्थावधृतेः । यद्वा श्रुतौ प्रमाणभूतायाम् । अस्माकं प्रामाणिकानाम् । श्रुत्यन्तरेति । 'इमं मानवं आवर्तं नावर्तन्त' इति श्रुत्यन्तराविरोधात् । भाष्ये फलानियम इति । तुरीयाश्रम एवेति नियमो न । यद्वा गृहस्थस्यानुग्रहभाजः स सर्वस्य न लीलानुभवः, कस्यचिदेवात्यन्तानुग्रहेण पुष्टिप्रविष्टस्य । अभिसन्धिः सङ्कल्पः । आदिनेच्छायत्नौ । भवेदिति । तथा च मुक्तेरेकरसत्वभङ्ग इति भावः । एकलिङ्गत्वस्येति । विधिनिषेधयोर्निषेधलिङ्गत्वस्य निषेधो लिङ्गं हेतुः प्रमाणं यस्य तत्त्वस्य । आरोपापवादात् । पूर्वकक्षेति । 'अरूपवदेव हि तत्प्रधानत्वा' दित्यत्र स्फुटम् । विद्येति परा विद्या । 'अथ परा यया तदक्षरमधिगम्यत' इति मुण्डकात् ॥ ५१ ॥

इति नवमं मुक्तिफलानियम इत्यधिकरणम् ॥ ९ ॥

इति श्रीविट्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण
सम्पूर्णवेद्मा विट्ठलरायजित्प्रात्रीयगोकुलोत्सवात्मजगोपेश्वरजिता
कृते भाष्यप्रकाशस्य तृतीयाध्यायस्य रश्मौ तृतीयाध्यायस्य
चतुर्थपादः सम्पूर्णतामगमत् ॥ ४ ॥
समाप्तस्तृतीयाध्यायः ॥ ३ ॥

---

१. एतावतो ग्रन्थस्य श्लोकानां संख्या ८८१७ अष्टसहस्राष्टशतसप्तदश । अध्यायत्रयस्य श्लोकसंख्या १४२४२ चतुर्दशसहस्रद्विशतद्विचत्वारिंशत् । श्रीहस्ताक्षरमूलग्रन्थे इदं श्रीगोपेश्वरैः स्वयमेव लिखितम् ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम्

श्रीमद्वल्लभाचार्यचरणप्रणीतम्

AṆUBHĀṢYA
ON
THE BRAHMASŪTRA

WITH THE COMMENTARY
BHĀṢYAPRAKĀŚA
AND
THE SUPER- COMMENTARY
RAŚMI ON THE BHĀṢYAPRAKĀŚA

VOLUME 4
ADHYAYA 4

EDITED WITH INTRODUCTION BY
MULCHANDRA TULSIDAS TELIWALA

WITH A NEW INTRODUCTION BY
GOSWAMI SRI SHYAM MANOHARJI MAHARAJ

Ācārya Śrī Vallabha, the founder of the *Śuddhādvaita* school of *Vedānta* tradition is said to be of a divine origin imbued with spiritual insight. His philosophy is called pure-non-dualism undefiled by *Māyā*. He was born in *Vikram Saṁvat* 1535 (1479 A.D.), to Śrī Lakṣmaṇa Bhaṭṭa, a Telugu Brahmin and Illammāgāru, a family which had learning towards Vedic rituals and the worship of Gopālakṛṣṇa. He travelled extensively to the religious places such as Vijyanagar, Kāśī and Aḍail (near Prayāga). At these places, he developed his literary and religious activities. His firm faith in lord Kṛṣṇa's commandment led him to devote to the task of a faithful interpretation of the sacred texts like the *Upaniṣad, Gītā* and *Brahmasūtra*. He found that the essential reality is *Śuddha* (pure) unalloyed with *māyā,* and non-dualism (*Advaya*). He advocated the *Puṣṭi* (divine grace), as the most powerful and unfailing method for attaining Supreme Bliss. His *Siddhānta* is known as *Śuddhādvaita-Brahmavāda-Nirguṇa-Puṣtibhakti Mārga*.

Ācārya Vallabha has written a commentary on the *Brahmasūtra,* known as *Aṇubhaṣya* which is available only in the summary form upto III.2.33, the remaining part was supplemented by his second son Śri Viṭṭhalanātha.

Ācārya differs from the earlier Ācāryas viz. Śaṁkara, Rāmānuja, Madhva, and Nimbārka with regard to the interpretation of the nature of Reality. According to Vallabha, Reality is *Brahman* which is *Sat* (existence), *Cit* (conscious), *Ānanda* (bliss)

Continued on back flap

ISBN 81-88643-11-4 (Vol.4)
ISBN 81-88643-07-6 (Set) **Rs. 3700**
(Set of 4 Vols.)

continued from front flap

which is denominated as *Rasa* (sentiment). He is *Pūrṇa Puruṣottama*. Among his divine characteristics *Jñāna* and *Kriyā* are important. He is *Kartā* (doer) and *Bhoktā* (enjoyer). For *Līlā*, He creates the universe out of Himself. Vallabha propagates the path of *Puṣṭi Bhakti* (Divine grace) in order to enjoy the union with the Supreme. The *Puṣṭi* can be realised as in the case of gopi's of Vṛndāvan who, in fact, opened the gateway to realize everything with lord Kṛṣṇa. He is for *Svarūpānanda,* instead of *Brahmānanda*. Lord is full of *Rasa* in which love is most important. This brings enjoyment of the Bliss of the Union with Divine.

The present commentaries on *Aṇubhāṣya* known as *Prakāśa* written by Śrī Puruṣottama Caraṇa, a descendent of Śrī Vallabhācārya and another on the same known as *Raśmi* by Śrī Yogi Gopeśvara, of the same lineage, provide excellent and appropriate interpretation of the tradition. In fact, *Aṇubhaṣya* of Vallabhācārya with these two commentaries given by Śrī Puruṣottamacaraṇa and Gopeśvarajī is the most authentic text for providing illuminating interpretation of the *Brahmasūtra*.

This edition was originally printed by Nirnaysagar Press, Bombay, an institution known for publishing and printing the authentic editions. This work was published some eighty years ago, now printed again with a new Introduction by one of the greatest scholars of modern times in the tradition.

MAHĀPRABHU ŚRĪ VALLABHĀCHĀRYA'S

AṆUBHĀṢYA

ON

THE BRAHMASŪTRA

WITH THE COMMENTARY

BHĀṢYAPRAKĀŚA

OF

GOSVĀMI ŚRĪ PURUṢOTTAMAJI

AND

THE SUPER- COMMENTARY

RAŚMI ON THE BHĀṢYAPRAKĀŚA

OF

GOSVĀMI ŚRĪ GOPEŚVARJI

EDITED WITH INTRODUCTION AND APPENDICES ETC. BY
MULCHANDRA TULSIDAS TELIWALA

WITH A NEW INTRODUCTION BY
GOSWAMI SRI SHYAM MANOHARJI MAHARAJ
ṢAṢṬHAPĪṬHĀDHĪŚVARA,
MANDIRA ŚRĪ MUKUNDARĀYAJĪ ŚRĪ GOPĀLALĀLAJĪ, KĀŚĪ.

VOLUME FOUR
ADHYĀYA 4

AKSHAYA PRAKASHAN
DELHI

First published: Bombay, 1927-28

Reprint: Delhi 2005

ISBN 81-88643-07-6 (set)

ISBN 81-88643-11-4 (vol.4)

Published by:
Harish Chandra for Akshaya Prakashan,
208, M.G. House, 2 Community Centre,
Wazirpur Industrial Area, Delhi - 110052
Email: harish@busyinfotech.com
Fax: 011-27374358
Phone: 011-55195949, 27377342

Printed at:
D.K.Fine Arts Press (Pvt.) Ltd.,
A-6,Nimri Community Centre,
Ashok Vihar, Phase IV, Delhi - 110052.

श्रीकृष्णाय नमः

श्रीमद्ब्रह्मसूत्राणुभाष्यम्

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-

श्रीमद्वल्लभाचार्यचरणप्रणीतम्

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-

भाष्यप्रकाशेन

सम्पूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वरजिचरणप्रणीत-

भाष्यप्रकाशरश्मिना

च परिबृंहितम्

मूलचन्द्रतुलसीदासतेलीवाला

इत्यनेन संशोधितम्

काशीस्थ-श्रीमुकुन्दरायजी-श्रीगोपाललालजीमन्दिराधिष्ठित-

षष्ठपीठाधीश्वर-गोस्वामिश्रीश्याममनोहरपाद-

विरचितया नवीनभूमिकया समुल्लसितम्

चतुर्थो भागः

चतुर्थोऽध्यायः

देहलीस्थ-

अक्षयप्रकाशनेन

प्रकाशितम्

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसम्पूर्णवेतृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिचरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

चतुर्थाध्यायस्य प्रथमद्वितीयौ पादौ ।

‘भगवद्धर्मपरायण सद्वृत श्रेष्ठि गोवर्धनदास सुन्दरदास’ इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसङ्ग्रहतः ‘प्राप्तभगवत्पद-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्एल्. बी.,
वकील, हाइ कोर्ट’ इत्येतेषां सुहृद्भिः
संशोध्य ‘निर्णयसागर’ मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४५०. संवत् १९८४.

मूल्यं सार्धमुद्रिका ।

श्रीकृष्णाय नमः।
श्रीगोपीजनवल्लभाय नमः।
श्रीमदाचार्यचरणकमलेभ्यो नमः।

श्रीमद्ब्रह्मसूत्राणुभाष्यम्।

भाष्यप्रकाश-रश्मि-परिबृंहितम्।

अथ चतुर्थोऽध्यायः।

प्रथमः पादः।

समन्वयेनाविरोधात् साधनैर्ब्रह्मविद् यदि।
तस्याग्रिमव्यवस्था या सा चतुर्थे विविच्यते॥ १॥
जीवतो म्रियमाणस्य गच्छतः सफलस्य च।

भाष्यप्रकाशः।

अथ चतुर्थाध्यायं विवरिषवो यथा पूर्वाध्यायारम्भे कारिकाभिरध्यायार्थः पादार्थश्च सङ्गृहीतः, तथात्राध्यायार्थं पादार्थांश्च सङ्गृह्णानाः पूर्वाध्यायसङ्गतिं निरूपणप्रकारं च बोधयितुं पूर्वाध्यायार्थान् स्मारयन्तः प्रस्तुताध्यायार्थं सार्धेनाहुः समन्वयेनेत्यादि। श्रुतीनां परस्पराविरोधाद् यो ब्रह्मणि सम्यगबाधितोन्वयः सम्यग्बोधनरूपस्तेनानुष्ठितैः साधनैर्यदि ब्रह्मविद् विरुद्धसर्वधर्माधारभूतब्रह्मविषयकनिर्विचिकित्सशाब्दज्ञानवान् भवति, तस्य जीवतो म्रियमाणस्य गच्छतः सफलस्य च याग्रिमव्यवस्था ज्ञानानुकूलप्रकारेण फलपर्यन्ता स्थितिः सा चतुर्थे फलाध्याये विविच्यते फलस्वरूपप्रकारबलानां निष्कर्षेणासङ्कीर्णतया

रश्मिः।

निःसाधनजनोद्धारः ससाधनजनप्रियः।
फलात्मा कृष्णपरमानन्दान् प्रादुश्चकार ह॥ १॥

'आत्मा वा अर' इति श्रुत्युक्तदर्शनमत्र- ज्ञेयम्। भक्तिमार्गीयभाष्यत्वात्। फलाध्यायं व्याकरिष्यमाणा मङ्गलमाचरन्ति स्म अथेत्यादिना। श्रवणमात्रेण मङ्गलसिद्धेः साधनाध्यायानन्तरमित्यर्थः। सङ्गृह्णाना इति। उभयपदी श्र्यादिस्तेन स्वाधिकारः सूचितः। सङ्गतिमिति। हेतुतारूपाम्। निरूपणेति। जीवत इत्यादिना निरूपणप्रकारम्। सम्यगिति। 'यतो वाचो निवर्तन्त' इति श्रुतिप्राप्ताशब्दत्वनिराकरणपूर्वकबोधनरूपो बोध्यतेनेन शब्देनेति बोधनः शब्दः। बोध्यत इति बोधनं ज्ञानम्। ताभ्यां रूप्यते व्यवह्रियते यः सम्बन्धः स सम्यग्बोधनरूपः। केचिद्वाक्यार्थमन्वयमाहुः। तेनेति। सम्बन्धेन वाक्यार्थैर्वानुष्ठितैः पूर्वं सर्वोत्तममार्गेणानुष्ठानं कर्ममार्गस्य। 'यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवे'दित्येकादशस्कन्धात्। तदनु नवधाभक्तिरेकादशकोनविंशाध्यायोक्ता। तदनुष्ठानम्। पश्चाद् गीतोक्ता ज्ञानयज्ञादीनां विधानमनुष्ठानं तयानुष्ठितैः साधनैः। सफलस्येति। भुक्त्या सह वर्तमानस्य। ज्ञानेति। सफलस्य पुरुषोत्तमज्ञानानुकूलप्रकारेण पुरुषोत्तमलीलानुभवः फलपर्यन्ता स्थितिः। विशेषात् पूर्वाधिकरणोक्तं स्मारितम्। फलेति। पूर्वपादे जीवतः फलादिकानां निष्कर्षेण, द्वितीये

अतो ब्रह्मविदा कार्यमेवमेव, न चान्यथा ॥ २ ॥
तामसीं बुद्धिमाश्रित्य ये मूढाः सर्वविप्लवम् ।
वदन्ति शास्त्रनाशाय सद्भिः शोच्याश्च येऽनु तान् ॥ ३ ॥

भाष्यप्रकाशः ।

प्रकाश्यते । तथा च यथा समन्वयाविरोधाभ्यामुपनिषद्वाक्यानामाभासत्वनिराकरणेन तेषां ब्रह्मण्येव प्रमाणत्वम्, तेषु च ब्रह्मण एव प्रमेयत्वं व्यक्तीकृतम्, यथा च श्रुतीनां बोधकताप्रकारनिरूपणेनोपासनात्मकसाधनप्रकारनिर्णयाद् ब्रह्मवित्त्वं व्यक्तीकृतम्, तथात्रोपासनादिसाधनवतो ब्रह्मविदोवस्थानिरूपणात् क्रमेण साक्षाच्च प्राप्यस्य ब्रह्मणः फलत्वमुपपत्तिपूर्वकं निरूप्यत इत्ययं निरूपणप्रकारः, कार्यकारणभावोवसरश्च सङ्गतिरित्यर्थः ॥ १½ ॥

पूर्वाध्याये यावज्जीवं ज्ञानानुकूलसाधनानुष्ठानरूपं जीवतो ब्रह्मविदः कार्यं निरूपितमिति पुनरत्र तत्कथनस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः अत इत्यादि । यतोयं सिद्धसाधनः, न तु प्राप्तफलः, अत ईदृशेन प्रथमपादोक्तरीत्यैव कार्यम्, न तु तूष्णीं स्थेयम् । 'तत्त्वेव भयं विदुषोऽमन्वानस्ये'ति प्रतिबन्धबोधकश्रुतेः । अतः सिद्धज्ञानस्याप्येतत्कर्तव्यताबोधनमेव प्रयोजनमित्यर्थः ॥ २ ॥

नन्वत्रान्ये 'किं प्रजया करिष्याम' इति श्रुत्या 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यत' इति गीतास्मृत्या च ब्रह्मविदः कार्यमात्रनिषेधमङ्गीकुर्वन्ति, तत्कथमत्र ब्रह्मविदः कार्यकरणशिक्षेत्याशङ्कायां तन्मतं दूषयितुमाहुः तामसीमित्यादि । 'अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी' इति गीतोक्तलक्षणका सर्वार्थवैपरीत्यबोधिका भ्रान्ता बुद्धिस्तामसी । तामाश्रित्य ये मूढा वैयासशास्त्रनाशाय सर्वविप्लवं सगुणब्रह्मविद्याविषयस्य ब्रह्मस्वरूपस्य वेदोक्तसाधनगुरूपदेशप्रभृतीनां मायिकत्वादिरूपं वदन्ति, ये चताननु तदनुसारिणस्ते सद्भिः शोच्याः पूर्वोक्तश्रुतिस्मृत्युक्तस्य कार्यकरणनिषेधस्य बहिरङ्गसाधनविषयतयान्तरङ्गतद्विषयत्वाभावादबोध-

रश्मिः ।

म्रियमाणस्य फलादिकानाम्, तृतीये क्रममुक्तिः फलं तदादिकानाम्, तुरीये पुष्टिमर्यादाभेदेन फलं तदादिकानां निष्कर्षेणेत्यर्थः । समन्वयेति । प्रथमाध्यायार्थः समन्वयः, अविरोधो द्वितीयाध्यायार्थः ताभ्याम् । अत्रेति । तुरीयेध्याये । तृतीयाध्यायोक्तोपासनादिसाधनवतः । अवसर इति । शाब्दापरोक्षे भूयसामुपनिषद्भागानां तृतीयाध्यायसङ्गृहीतानां सन्दिग्धानां च साधननिरूपकाणां वैय्यर्थ्यप्रसङ्गात् प्रतिबन्धकीभूतसाधनजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वमग्रिमावस्थाया इति पूर्वपादयोरस्य चावसर इत्यर्थः । साधनफलयोः कार्यकारणभावः सङ्गतिः स्पष्टा ॥ १ ॥ निरूपितमिति । सफलोपासनानां सफलभक्तीनां च निरूपणान्निरूपितम् । अयमिति । ब्रह्मवित् । तत्त्वेवेति । तत् वा इव विदुषोऽमन्वानस्य भयमित्युक्त्या युक्तिभिरनुचिन्तनस्य मननत्वेन यदि साधनाध्यायेन ब्रह्मविदेव फली स्यात् फलाध्यायं न वदेदित्यादियुक्तिभिरनुचिन्तनस्य तत्वादेव मन्वानस्य भयं प्रतिबन्धकम् । 'उद्वेगः प्रतिबन्धो वा भोगो वा स्यात्तु बाधक'मिति भयरूपप्रतिबन्धकश्रुतेः । सिद्धज्ञानस्य साधकस्यैतत्कर्तव्यताबोधनं फलाध्यायोक्तकर्तव्यताबोधनम् ॥ २ ॥ मायिकत्वादीति । आदिना सगुणं कार्यं स्वतन्त्रत्वानि । शोच्यत्वमाहुः पूर्वोक्तेति । अव्यवहितपूर्वाशङ्काग्रन्थोक्तश्रुतिस्मृत्युक्तस्येत्यर्थः । कार्यकरणेति । कार्यकृतिनिषेधस्य । अन्तरङ्गसाधनविषयत्वाभावाय 'यस्त्वात्मरति' श्लोकोत्तरश्लोकमाहुः

ब्रह्मविद्गमनाभावः शतांशेनापि चेद् भवेत् ।
शास्त्रमेतद् वृथा जातं सर्वसूत्रविनाशतः ॥ ४ ॥
स्वाप्ययस्य च सम्पत्तेरत्र ब्रह्मगतिश्रुती ।

भाष्यप्रकाशः ।

ग्रस्ता इत्यतः शोकविषयीकार्या एव, न तूपादेयवाक्याः । गीतायां 'यस्त्वात्मरति'रित्यादिवाक्यानन्तरं, 'तस्मादसक्तः सततं कार्यं कर्म समाचर । असक्तो ह्याचरन् कर्म परमाप्नोति पूरुष' इति तथा कर्मकरणावश्यकत्वकथनात् । अतः शिक्षाकथनमेवात्र युक्तम्, न तु साधननिरूपणस्य प्रासङ्गिकत्वकथनम् । साधनसिद्ध्यनन्तरमपि कर्तव्यतया फलविषयकपरोक्षानुभवरूपतया चावान्तरफलरूपत्वादित्यर्थः ॥ ३ ॥

नन्विदमप्रयोजकम्, 'तस्य तावदेव चिर'मिति श्रुतेर्ब्रह्मज्ञानोत्तरं सद्योमुक्तेरेव श्रावणात्, अतो ब्रह्मविदो न किञ्चित् कार्यम्, यत्पुनरत्रोक्तम्, तत्तु जघन्याधिकारिणां सगुणविद्यावतां फलसिद्ध्यर्थम्, अत एवाग्रे द्वितीयतृतीययोरुत्क्रान्तिगमनादिविचारोपि युज्यते, तस्मान्नोक्तं साधीय इत्यत आहुः ब्रह्मविदित्यादि । परब्रह्मविदो गमनाभावोर्चिरादिना क्रममुक्तिमार्गेण गमनस्य राहित्यं चेत्; शतांशेनापि प्रकारेण भवेत्, तदा एतत् तृतीयपादरूपं शास्त्रम्, सर्वेषां 'अर्चिरादि'सूत्रमारभ्य, 'विशेषं च दर्शयती'त्यन्तानां सूत्राणां विनाशतोऽब्रह्मप्राप्तिपरतया वैयर्थ्याद् वृथा जातम्, कार्यात्यये परप्राप्तेः साधनं विनापि सम्भवादिति॥४॥

नन्वत्र कोपपत्तिर्ययैतेषां सूत्रार्थानां परब्रह्मपरत्वं स्थाप्यत इत्यत आहुः स्वाप्ययस्येत्यादि । अत्र दहरविद्यारूपे ब्रह्मविद्गतिप्रकरणे स्वाप्ययस्य सुषुप्तेः सम्पत्तेर्ब्रह्मप्राप्तेश्च सम्बन्धिन्यौ ब्रह्मगतिश्रुती, 'अथ या एता हृदयस्य नाड्य' इत्यारभ्य, 'तेजसा हि तदा सम्पन्नो भवती'त्यन्ता, 'अथ यत्रैतदस्माच्छरीरादुत्क्रामती'त्यारभ्य, 'शतं चैका च पुरुषस्य नाड्य' इति श्लोकान्ता च ब्रह्मणि गमनबोधिके श्रुती पूर्वं वर्तेते । अतो भगवदुपन्यस्ते प्रजापतिवाक्येपि ते आदर्तव्ये ।

रश्मिः ।

गीतायामिति । शिक्षेति । कार्यकरणशिक्षाकथनम् । साधनेति । तृतीयाध्याये । प्रासङ्गिकत्वं शाब्दापरोक्षोपपादने साधनानां स्मृतत्वात् । कर्तव्यतयेति । 'साधनानामसिद्धवदावृत्तिः कर्तव्ये'ति सुबोधिन्याम् । फलेति । परोक्षानुभवः शाब्दानुभवः । अवान्तरेति । शाब्दापरोक्षं परमफलम् ॥ ३॥ अत्रोक्तमिति । पूर्वकारिकयोरुक्तम् । द्वितीयेति । अध्याययोः । 'उत्क्रान्तिगत्यागती'त्यादिसूत्रैर्द्वितीये । 'तदन्तरप्रतिपत्तौ रंहती'त्यादिभिस्तृतीये च विचारोपि युज्यते । परेति । गौणमुख्यन्यायेनोक्तम् । ब्रह्मविदोपि बोध्यम् ॥ ४ ॥ एतेषामिति । तृतीयपादस्थानाम् । परब्रह्मेति । अधोक्षजपरब्रह्मरूपफलपरत्वम् । अत्रेति । व्याख्येयम् । फलाध्याये दहरविद्यारूपे ब्रह्मविद्गतिप्रकरणे इति व्याख्यानम् । ब्रह्मविदिति । 'यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहित'मिति श्रुतौ नास्ति यत्तस्यापि समाहित्युक्तेः कतिपयगुणैरधोक्षजपरब्रह्मविदपि । प्रजापतीति । प्रजापतेर्वाक्यं प्रजापतिवाक्यम् । 'एतद्ध स्म वैतत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्याम' इत्यादिशारीरब्राह्मणे तस्मिन् । अत्र ब्राह्मणा इत्यत्र ब्राह्मणः प्रजापतिः । गोपालतापनीये 'तꣳहोवाच ब्राह्मण' इति श्रुतौ पर्यायतादर्शनात् ।

अन्यथा न श्रुतेरर्थः स्याचेद् व्यासो वदेन्न किम् ॥ ५ ॥
तामसीं बुद्धिमाश्रित्य या मुक्तिः कैश्चिदुच्यते ।
सा सुषुप्तिश्रुतेरर्थो मोहादेवान्यथामतिः ॥ ६ ॥

भाष्यप्रकाशः।

ज्ञेयस्यात्मन उभयत्राप्यैक्यात्। यतः प्रजापतिवाक्यरूपश्रुतेरर्थः अन्यथा न, पूर्ववाक्यविरुद्धो न। यदि स्यात्, तदा व्यासः सर्वस्य ब्राह्मपदार्थस्य निर्णयार्थं प्रवृत्तः फलविवेचनावसरे तमर्थं किं न वदेत्, अपि तु वदेदेव। तथा चानयोपपत्त्या तेषां ब्रह्मपरत्वं स्थाप्यत इत्यर्थः ॥५॥

ननु, 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते, अविनाशित्वान्न तु द्वितीयमस्ति, ततोन्यद्विभक्तं यत् पश्ये'दित्यादिना मुक्तौ भेददर्शनाभावश्रावणात्तत्र कथं ब्रह्मविदो गत्युपपत्तिरित्यत आहुः तामसीमित्यादि। पूर्वोक्तां बुद्धिमाश्रित्यास्यां श्रुतौ या निःसम्बोधा मुक्तिः साङ्ख्यमतवदिष्यते, सा निःसम्बोधा मुक्तिः सुषुप्तिश्रुतेरर्थः, शारीरब्राह्मणे तत्सजातीयवाक्यैस्तथा सिद्धत्वात्। अतः प्रजापतिवाक्यसिद्धायां मुक्तौ या तथा मतिः सा मोहादेव। तस्मात्

रश्मिः।

शिष्याभिप्रायेण बहुवचनम्। उभयत्रेति। दहरविद्यायां शारीरब्राह्मणे च। पञ्चम्या उत्तरार्धं विवृण्वन्ति स्म यत इति। पूर्ववाक्येति। पूर्वं पूर्वत्वेनाङ्गीकृते वाक्ये दहरोक्ते। ताभ्यां विरुद्धो न। तदित्थम्, पूर्ववाक्ययोर्दहरविद्यास्थयोः प्रथमे सुषुप्तेः प्रतिपादनादकामो भगवान् सुषुप्तिरूप उक्तः, स गीतोक्ते कर्तर्यसक्ते प्रपञ्चाऽसक्तेऽवस्थारूपः, स एव 'किं प्रजया करिष्यामो येषां नायमात्मा नायं लोक'इति पूर्वं भवदुपन्यस्ते प्रजापतिवाक्येप्यसक्तः गीतोक्तः कर्ता, तत्राकामरूपो भगवान् सुषुप्त्यभिन्नः, अनुगमात्। द्वितीये सम्पत्तेः प्रतिपादनादोङ्काररूपजीवो मनःक्षेपं कुर्यात्, तदन्वादित्यद्वारा विदुषः प्रपदनं निरोधो नाशोन्येषां जीवानाम्। निरोधपदतात्पर्यार्थः प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपः, स भगवद्दत्तो जीवधर्मः। सोप्यन्येषामविदुषां विद्वद्भिन्नानां भक्तानाम्, अन्यथा न्यूनताख्यनिग्रहस्थानापत्तेः। भूमत्वेन रूपेण निरोधस्य सम्पत्तित्वम्। 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'तिवाक्यात्। एषोक्ता सम्पत्तिरूपब्रह्मप्राप्तिः। सैव भवदुपन्यस्तप्रजापतिवाक्याग्रे 'स एष नेति नेत्यात्मे'ति श्रुतिः। अस्या 'अथात आदेशो नेति नेती'तिवदर्थः। अत्र पूर्वोक्तसम्पत्तेः ब्रह्मप्राप्तिरूपायाः स्वीकारः। अग्रे 'तस्यैव स्यात्पदवि'दिति पादसेवनभक्तिमुक्त्वा 'ब्राह्मणो भवती'त्युक्तम् ततोपि 'ब्रह्मामयं वै ब्रह्मामयꣳहि वै ब्रह्म भवति य एवं वेदे'ति पठ्यते। एवं पूर्ववाक्याभ्यां विरुद्धो न। विरुद्धस्तु 'किं प्रजया करिष्याम' इत्यादेः। 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते' इतिवाक्यमात्रविषयो ब्रह्मविदः कार्यमात्रनिषेधपरोर्थः। तमर्थमिति। ब्रह्मविदः कार्यमात्रनिषेधपरमर्थं सूत्रैः किं न वदेत्। अनयेति। अर्थो विरुद्धः स्यात्तं सूत्रैर्वदेदेवेत्यनया तृतीयपादस्थानां सूत्रार्थानां परब्रह्मपरत्वं 'यस्त्वात्मरति'रितिवाक्याग्रेतने 'तस्मादसक्त' इति वाक्ये 'परमाप्नोति पूरुष' इति कथनात् स्थाप्यत इत्यर्थः ॥ ५ ॥ गत्युपपत्तिरिति। द्वितीयस्मिन् गत्युपपत्तिः। पूर्वोक्तामिति। द्वितीयकारिकाव्याख्यानोक्ताम्। निःसम्बोधेति। 'किं प्रजया करिष्याम' इत्यस्या अग्रे सम्पत्तिबोधिका 'स एष नेति नेत्यात्मे'ति श्रुतिः तया निःसम्बोधा मुक्तिरुच्यते। 'स एष नेति नेती'त्यस्याः तामसीं बुद्धिमाश्रित्य स्वमतरीत्या निःसम्बोधेति। सम्यग् बोधः सम्बोधः सविषयस्तस्मान्निर्गता निःसम्बोधा। 'देवस्तुर्यो विभुः स्मृत' इति मण्डूकोपनिषदि श्रावणात् तुर्यः तुरीयः विभुत्वमपि स्मृतम्, न तु वस्तुत इति निःसम्बोधा। प्रजापतीति। 'किं प्रजया करिष्याम' इति

अतो ब्रह्मविदः कार्यं जीवतः पूर्वमुच्यते ।
आवृत्तिः श्रवणादीनां नवकृत्वोपदेशतः ॥ ७ ॥
दर्शनार्थत्वतो लिङ्गादपि व्रीह्यवघातवत् ।
आवृत्तौ श्रवणादीनामात्मेति स्याद् दृढा मतिः ॥ ८ ॥
आपाततो दर्शनं तद्‌भेदेनापि बोध्यते ।
प्रतीकोपासनादीनां [1]नैवं भावो हि जायते ॥ ९ ॥

भाष्यप्रकाशः ।

प्रथमे पादे यदुक्तम्, तत् ब्रह्मविदः शिक्षार्थमेव न तु साधनशेषतयेत्येव मन्तव्यम् । 'तत्वेव भय'मिति श्रुतेर्ज्ञानोत्तरमपि मननस्यावश्यकत्वादित्यर्थः ॥ ६ ॥

एवं पादप्रयोजनं निश्चित्य तदर्थमाहुः अत इत्यादि । यस्माद् ब्रह्मविदोपि जीवद्दशायां फलानुकूलं कार्यमावश्यकम्, अतः पूर्वं प्रथमपादे तदुच्यते । किं तदित्याकाङ्क्षायामाहुः आवृत्तिः श्रवणादीनामिति । तत्र गमकं हेतुत्रयम् । नवकृत्वोपदेशतः नवसङ्ख्यां कृत्वा य उपदेशः, नवकृत्वउपदेश इति यावत् । तस्मात् ॥ ७ ॥ लिङ्गात् स्मृतिरूपात् । व्रीह्यवघातवच्छ्रवणादीनां दर्शनार्थत्वतोपीति । सा आवृत्तिः प्रथमेधिकरणे उच्यते । तत्फलं द्वितीयमाहुः आवृत्तावित्यादि । आत्मेति । भगवानात्मा । तथा चेदं तस्यावान्तरफलमित्यर्थः ॥८॥ अवान्तरत्वं साधयन्ति आपातत इत्यादि । भगवतः सर्वात्मकत्वात् सर्वरूपत्वादात्मात्मत्वाच्च तस्य यद् आत्मसूत्रप्रथमवर्णकोक्तरीत्या आत्माभेदेन दर्शनम्, तद् आपाततो दर्शनमिति बोध्यते । अपिशब्दाद्यथाधिकारमात्मोपदेशरूपं द्वितीयं ब्रह्मविदः कार्यं च । प्रतीकमुपासनं येषां ते प्रतीकोपासनाः । आदिपदात् कर्ममार्गीयाश्च । तेषां हि यतो हेतोर्भावो ज्ञानित्वं भक्तिर्वा नैव जायते ॥९॥ अत आलम्बनार्थं ध्यानविषयतया ग्रहणार्थम्, तत्रापि अन्यैः प्रतीक-

रश्मिः ।

वाक्यसिद्धायां ससम्बोधायां मुक्तौ तथा निःसम्बोधत्वेन मतिः सा मोहाज् ज्ञानावरकतमोधर्मात् । ससम्बोधत्वं तु मण्डूके 'स्मृत' इत्यनेन स्मृतिविषयः, स्मृतौ तु श्रीभागवतरूपायामधोक्षजत्वेपि 'कृष्णस्तु भगवान् स्वयम्' इति तुरीय इत्युक्त्वा व्रजे क्रीडितोक्तः । विद्वन्मण्डनेपि बृहद्वामनपुराणवचनैर्वृन्दावनादिस्थगोपीजनवल्लभ उक्तः । एवं च कतिपयगुणैः स्मार्तैरधोक्षजः स्मृतः ससम्बोध इति । तुरीयः ससम्बोधमोक्षरूप इति । साङ्ख्यमते विशेषतो वदिष्यते । साधनशेषेति । ब्रह्मविदः कार्यमात्रनिषेधशेषतया 'तत्वेव भयं विदुषोऽमन्वानस्येति' श्रुतिः । तदुच्यत इति । जीवतः कार्यमुच्यते । यतो द्वितीयस्कन्धसुबोधिन्यां जीवतो म्रियमाणस्य च 'तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम्' इतिवाक्येन कार्यकर्मसमाचरणमुक्तम् । तद् द्वयमत्र गृहीतम् । तदित्तीति । कार्यं कर्म । द्वितीय इति । आत्माधिकरणे । दृढमिति । दृढं मननम् । तच्च वस्तुविशेषविषयकम् । तस्येति । श्रवणाद्यावर्तनस्येत्यर्थः । यथाधिकारमिति । भेदाधिकारे भेदोपदेशोपि । प्रतीकमङ्गमुपासनकरणमुपासनविषयं येषामुपासकानाम् । नैवेति । कर्मसु देशादिषण्णामशुद्ध्योपासनासु श्रद्धाभावादिप्रतिबन्धकेन चित्तशुद्ध्यभावान्नैव जायते । कर्मोपासनाभ्यां स्नेहवतामदर्शनादेवकारः ॥९॥ ग्रहणार्थमिति । आत्मनो ग्रहणार्थम् । तत्रापीति । व्याख्येयम् ।

---

[1] नैवेति प्रकाशः ।

आलम्बनार्थं तत्रापि ब्रह्मदृष्टिर्विशिष्यते।
आदित्यादिब्रह्मदृष्टेरङ्गत्वं न स्वतन्त्रता ॥ १० ॥
मनने च निदिध्यासे विशेषश्चोच्यतेऽधुना।
आसनादिषडङ्गैस्तु चित्तं श्रौतार्थ एव हि ॥ ११ ॥

भाष्यप्रकाशः।

त्वेनोच्यमाने विषयेपि, **ब्रह्मदृष्टिर्विशिष्यते** विशेषबोधिका भवति। सापि तदीयं कार्यम् ॥९३॥

तृतीयाधिकरणस्यार्थमाहुः **आदित्येत्यादि**। स्पष्टम्। **मनने चेत्यादि**। अधुना आदित्यादिमत्या आदित्याद्युपासनेन आदित्यादिभिः फलदानद्वारा माहात्म्यप्रतिपादनेन भक्तिद्वारा **मनने, निदिध्यासे**, भावे घञ्, निदिध्यासने च **विशेषो** भगवतो बहिरन्तःप्राकट्यरूप**श्चोच्यते**। तेन फलस्यापाततोऽनुभवप्रकारो मनननिदिध्यासनरूपं तृतीयं कार्यम्। तेन फलमाहुः **आसनादीति**। **आसनं** भगवतो बहिःप्रकटस्य उपवेशनम्। आदिपदेनान्तरुपवेशनं लीलाप्राकट्यं च, तेषां यानि षडङ्गानि श्रवणाद्यावृत्तिः, आत्माभेददृष्टिः, तथा ग्राहणम्, अप्रतीकोपासनम्, सर्वत्र ब्रह्मदृष्टिः, आदित्यादिष्वङ्गबुद्धिश्च, **तैश्चित्तं श्रौतार्थे** भगवति

रश्मिः।

अन्यैरिति व्याख्यानम्। **विशेषेति**। ब्रह्मेत्युपास्ते सर्वत्रब्रह्मदृष्टिरधिकारिणि **विशेषस्योत्कर्षस्य बोधिका** भवति। **सापीति**। ब्रह्मदृष्टिरपि । **तदीयं** विद्वज्जीवीयम्। **स्पष्टमिति**। मधुब्राह्मणे 'य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्त'इति श्रुत्युक्ताया आदित्यादिषु ब्रह्मदृष्टेः। **अङ्गत्वमिति**। नत्वादित्यो ब्रह्माङ्गमिति न ब्रह्मेति। **स्वतन्त्रतेति**। ब्रह्मवत् स्वतन्त्रता। कर्तृत्वम्। एवं **स्पष्टमित्यर्थः**। **अधुनेति**। व्याख्येयं पूर्वार्थानुसन्धाने। श्रवणानुसन्धानेन मनननिदिध्यासयोर्वक्तव्ययोः सतोः। **आदित्याद्युपासनेन** चित्तशुद्धिः। इदं श्रवणादिकमुपासनाङ्गम्। अतो भक्तौ कारणं माहात्म्यमाहुः। **आदित्यादिभिरिति**। **माहात्म्येति**। यतो यदङ्गं फलं ददातीति देवनं माहात्म्यम्, तस्य भक्तिकारणस्य **प्रतिपादनेन** कारणरूपेण। **भक्तीति**। उक्तचित्तशुद्धिराधिदैविकीति भक्तिः, सा प्रेमलक्षणा, तद्द्वारा। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति मैत्रेयीब्राह्मणश्रुत्या **मनने** इत्यर्थः। **भावे घञिति**। निदिध्यास्यते **निदिध्यासः**, इति निदिध्यासनं समाधिस्तस्मिन्। **भगवतो बहिरिति**। तेन मनने ध्यानमेकैकाङ्गमनोनिवेशनरूपं बहिरन्तःप्राकट्यकारणं बोध्यम्। **फलस्येति**। अध्यायार्थस्याव्याप्तिः परिहृता। तैत्तिरिशाखारूपस्य द्वादशस्कन्धोक्तस्य आदित्यादिभिर्दत्तफलस्य यथाकथञ्चित् फलस्यात्राध्याये सत्त्वात्। **आपाततः** आत्माभेदेन दर्शनात्। **तेनेति**। उक्तसाधनेन। **सूत्रैरधुनोच्यत इति** पूर्वकारिकायां करणोपलब्धेराहुः **आसनं भगवत इति**। यद्यपि 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजये'दितितृतीयस्कन्धकारिकया श्रौतः षडङ्गयोगः प्राकट्यानन्तरं वक्तुमुचितः, 'ततः सिद्धिमवाप्स्यती'त्यपि सम्भवः। एकादशे सेवानन्तरं सिद्धिनिरूपणात्। किञ्च मनने ध्याननिवेशाद्धारणोपस्थितिर्भवति। अधिकारस्कन्धानन्तरं साधनस्कन्धे ध्यानधारणयोर्निरूपणात्। तथापि यावत् पर्यन्तमासीनसूत्रस्य धर्मिपरत्वं सम्भवति, तावत्पर्यन्तं न दैशिकत्वम्, सूत्राणां सारवद्विश्वतोमुखत्वेप्यत आहुः, **आसनं भगवत इति**। **प्रकटस्येति**। अव्यवहितपूर्वोक्तप्राकट्यवत इत्यर्थः। आसीनसूत्रे। **अन्तरुपेति**। ध्यानाच्चेतिसूत्रे उक्तम्। **लीलाप्राकट्यमिति**। अचलत्वं चेति सूत्रे। **श्रवणाद्यावृत्तिरिति**। लिङ्गाच्चेति सूत्रे श्रवणाद्यावृत्त्यङ्गम्, अतः आत्मेतिसूत्रार्थमाहुः **आत्माभेददृष्टिः**। **तथा ग्राहणमिति**। न प्रतीकेनेति सूत्रार्थमाहुः '**अप्रतीके**'ति। ब्रह्मदृष्टिसूत्रार्थमाहुः **सर्वत्रेति**। आदित्यादिमतिसूत्रार्थमाहुः

धारयेदामतेरेवं ततः सिद्धिमवाप्स्यति ।
धर्माधर्मभयं तस्य नास्त्येवेति विनिश्चयः ॥ १२ ॥
अग्निहोत्रादिकं कार्यं सन्न्यासः फल एव हि ।
षोढा चेत् पुरुषो व्यक्तः प्रारब्धान्ते फलं भवेत् ॥ १३ ॥
एतावान् प्रथमे पादे निर्णयः सूत्रकृत्कृतः ।
द्वितीये म्रियमाणस्य सर्वेन्द्रियलयः पुरा ॥ १४ ॥
लिङ्गस्यापि शरीरस्य नाड्योत्क्रान्तिरिहोच्यते ।
विनायनकृतो नास्य विशेषोस्तीति चोच्यते ॥ १५ ॥
तृतीये क्रममुक्तौ यो मार्गो यस्य श्रुतेर्मतः ।
तन्निर्द्धारोन्यमार्गीयाणामप्राप्यत्वं च वर्ण्यते ॥ १६ ॥
गन्तव्यं च परं ब्रह्म कार्यो लोकस्तु नेति च ।
तुरीये पुष्टिमर्यादाभेदेन फलमुच्यते ॥ १७ ॥
प्रभोरेव फलत्वं तन्निर्दोषत्वं च वर्ण्यते ।
लीलानित्यत्वतः पूर्णगुणत्वं च ततोखिलम् ॥ १८ ॥

भाष्यप्रकाशः ।

धारयेत् । तदपि, आमतेः, मननमारभ्य, एवं उक्तप्रकारेण, ततः तदुत्तरम्, सिद्धिं भगवदासनादिसम्पादकोत्कटस्नेहसम्भवरूपामवाप्स्यति । एवं आप्रायणसूत्रान्तस्यार्थ उक्तः ।

तदधिगमादिसूत्रार्थमाहुः धर्मेत्यादि । अग्निहोत्रादिसूत्रार्थमाहुः अग्निहोत्रेत्यादि । फल इति । फलनान्तरीयकदशायाम् । तदावश्यकत्वाय फलप्राप्तिप्रकारमाहुः षोढेत्यादि । प्रथमपादार्थमुक्त्वोपसंहरन्ति एतावानित्यादि ॥ १३½ ॥

द्वितीयस्याहुः द्वितीय इत्यादि । सर्वेन्द्रियलय इति । पुष्टिमार्गीयस्य भगवति, मर्यादामार्गीयस्य भूतेषु । इहेति । जघन्याधिकारिणि उत्क्रान्तिरित्यर्थः । तृतीयस्याहुः । तृतीय इत्यादि । यस्येति । अधिकारिणः । अन्यमार्गाणामिति । अन्ये मार्गा उपाया येषां ते तथा, तेषाम् ॥ १६½ ॥

रश्मिः ।

आदित्यादिष्विति । उक्तप्रकारेणेति । षडङ्गैः । भगवदासनादीति । आदिना ध्यानाच्चेत्यादिसूत्रोक्तम् । अनेन 'स्मरन्ति चे'ति सूत्रार्थ उक्तः । यत्रैकाग्रतासूत्रार्थः पूर्वशेषः । अनुव्यवसायनिर्णायकाप्रायणसूत्रार्थोपि पूर्वशेषः । आप्रायणेति । भाष्यस्य । धर्मेत्यादीति । तत्रैव स्पष्टम् । अग्निहोत्रादीति । ननु इतरस्याप्येवमित्यादिसूत्रद्वयस्य कावर्थाविति चेत् । न । सूत्रद्वयार्थयोः पूर्वशेषत्वेन तदधिगमादिसूत्रार्थमित्यत्रादिपदार्थत्वात् तदधिगमादिसूत्राणामर्थमिति षष्ठीतत्पुरुषात् । फलनान्तरीयकेति । फलदशायामित्युक्ते भोगेन त्वितरे इति सूत्रे सन्न्यासः फलायाक्षेप्यः तद्वदात्मेति तूपगच्छन्तीत्यत्रामुख्येपि स्यादतो नान्तरीयकेति दशाविशेषणम् । न अन्तरीयके मध्ये भवा दशा नान्तरीयकदशा, फलस्य नान्तरीयकदशा फलनान्तरीयकदशा तस्याम् । तदावश्यकेति । सन्न्यासावश्यकत्वाय । षोढेत्यादीति । उक्तैः षडङ्गैः । प्रारब्धान्त इति । भोगेन त्वितरे इति सूत्रे स्फुटम् ॥ १३ ॥

द्वितीयस्येति । पादस्यार्थमाहुः । जघन्याधिकारिणीति । जघन्यानामधिकारोस्यास्तीत्य-

---

१. मार्गाणामिति प्रकाशकाराभिमतः पाठः ।

अस्य फलप्रकरणत्वेपि साधनरूपस्यापि श्रवणस्यान्तरङ्गत्वं ज्ञापयितुं तन्निर्धारमप्याह।

आवृत्तिरसकृदुपदेशात्॥ १॥ (४-१-१)

‘आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य’ इत्यादिवाक्यैर्विहितं श्रवणादिकं किं सकृदेव कर्तव्यम्, उतासकृदिति भवति संशयः। किं तावत् प्राप्तम्, सकृदेवेति। तावतैव शास्त्रार्थस्य सम्पत्तेः। न च तण्डुलनिष्पत्तिफलकावघातस्येव दर्शनफलकानां श्रवणादीनां तत्सिद्धिपर्यन्तमावृत्तिर्न्यायप्राप्तेति वाच्यम्। अवघातस्य वितुषीकरणात्मकदृष्टद्वारकत्वेन तथात्वमस्तु नाम, प्रकृते त्वदृष्टद्वारकत्वात् सकृत्कृतेनैवादृष्टद्वारा फलसम्पादनसम्भवादावृत्तिरप्रयोजिकेति प्राप्ते, उच्यते। आवृत्तिरेव श्रवणादीनां श्रुत्यभिमता। कुतः? असकृदुपदेशात्। छान्दोग्ये श्वेतकेतूपाख्यान ‘ऐतदात्म्यमिदꣳसर्वम्,

---

भाष्यप्रकाशः।

तुरीयार्थमाहुः तुरीय इत्यादि। सामान्यत उक्त्वा तत्र विशेषमाहुः प्रभोरित्यादि। अत्र प्रभोः फलत्वं ‘आत्मा प्रकरणा’दित्यादिसूत्रद्वये, तन्निर्दोषत्वं च ‘तन्वभावे संध्यव’दित्यादिसूत्रद्वये, शेषं ‘जगद्व्यापारवर्जा’दिसूत्रेषु। ततोखिलमिति। ततः तादृशनिरूपणाद्धेतोः। अखिलं लीलाविशिष्टं स्वरूपं फलमित्यर्थः॥ १८॥

एवं पादार्थनिरूपणमुखेनाध्यायार्थं निरूप्य सूत्राणि व्याचिकीर्षन्तोत्र फलप्रकरणे साधननिरूपणस्य किं प्रयोजनमित्याकाङ्क्षायां तत्प्रयोजनं वक्तुं सूत्रमवतारयन्ति अस्येत्यादि। अन्तरङ्गत्वमिति। फलपूर्वकक्षारूपतया फलमध्यपातित्वेन तदुपकारकत्वम्॥

आवृत्तिरसकृदुपदेशात्॥ १॥ अस्याधिकरणत्वाय विषयादिकमाहुः आत्मेत्यादि। इति प्राप्त इति। द्वारविचारेणावृत्त्यानर्थक्ये प्राप्ते। हेतुं व्याकुर्वन्ति छान्दोग्य इत्यादि।

रश्मिः।

विकारि योनिशरीरादि तस्मिन्। भाष्ये। लिङ्गस्येति। नाड्येति। तदोकोग्रज्वलनसूत्रादिषु। अस्येति। विदुषः। तथेति। अन्यमार्गास्तेषाम्। शेषमिति। भोगे लौकिकव्यापारयुतत्वाभावादि। अध्यायार्थमिति। अनावृत्तिःफलमध्यायार्थः उपक्रमापेक्षयोपसंहारस्य ‘अनावृत्तिः शब्दादनावृत्तिः शब्दा’दितिसूत्रीयस्यासञ्जातविरोधित्वात्। अनावृत्तत्वेन फलं गृह्यते। तच्च सपरिकरं बोध्यम्। तेन साधनादिनिरूपणे नाव्याप्तिः॥ १८॥

फलप्रकरण इति। देशकालौ प्रकरणम्, निबन्धे स्पष्टम्। तथा च देशकालयोरित्यर्थः। तत्प्रयोजनमिति। साधननिरूपणस्य प्रयोजनं फलसाधनयोरेकीकारः तस्यापि प्रयोजनं ‘स्वयमेवात्मनात्मान’मिति वाक्यानुकूलत्वम्। फलपूर्वेति। स्वरूपस्य साधनत्वेनाङ्गीकारात् तथा। अत्र भूमत्वेनैक्येपि सर्वात्मभावस्य दानसाध्यत्वाद्विलम्बोपस्थितिकत्वादप्रसिद्धत्वाच्च, ज्ञानमात्रं परं यथोक्तज्ञानशक्तिरूपं साधनं तदनतिरिक्तत्वेन श्रवणं गृहीतम्, तच्च न श्रोत्रेण शब्दसाक्षात्काररूपम्। जगत्साधारणत्वात्। किन्तु भगवद्वाचकपदवाक्यानां भगवति शक्तितात्पर्यनिर्धारणरूपम्। भक्तिरत्नटीकायां स्पष्टीकृतम्। फलमध्येति। यद्यपि सर्वात्मभावः फलमध्यपाती भूमत्वात्तथापि ज्ञानकाण्डे श्रवणरूपं ज्ञानं फलमध्यपाति। ‘आत्मा वा अरे द्रष्टव्यः श्रोतव्य’ इति श्रुतौ दर्शनरूपज्ञानसाधनज्ञानत्वेन ज्ञानत्वेनैक्यात्, ज्ञानं फलं साधनं च। तदुपकारकत्वं फलाविर्भावकत्वम्।

आवृत्तिरसकृदुपदेशात्॥ १॥ द्वारेति। दृष्टादृष्टद्वारविचारेण। स्यादिति। पुरुषार्थ-

तत्सत्यम्, स आत्मा तत्त्वमसि श्वेतकेतो' इतिवाक्येन जडजीवयोर्ब्रह्मात्मत्वं नवकृत्व उपदिष्टवान् । तथा च सकृदुपदेशेनैव चेदर्थसिद्धिः स्यात्, तदैकमेवार्थमेकस्मा एकदैवासकृन्नोपदिशेत् । प्रयोजनाभावात् । एतेनावघातवदन्तःकरणदोषनिवर्तनं दृष्टं द्वारमन्येषामुपदेशानाम्, चरमस्य तस्य ज्ञानसाधकत्वमिति मन्तव्यम् ॥ १ ॥

अत्रैव हेत्वन्तरमाह ।

लिङ्गाच्च ॥ २ ॥

श्रुत्यनुमापकत्वेन स्मृतिर्लिङ्गमित्युच्यते । सा च, "यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः । तथा तथा पश्यति तत्त्वसूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम्' इत्यादिरूपा, तदावृत्तिमेव फलसाधकत्वेनाह । अत्र दृष्टान्तेनापि दृष्टद्वारकत्वं श्रवणादीनां सूच्यते । 'आत्मा वाअरे द्रष्टव्य' इतिपदेन

भाष्यप्रकाशः ।

अर्थसिद्धिः स्यादिति । अदृष्टद्वारा स्यात् । अवघातवदिति । सप्तम्यर्थे वतिः । तेन तत्र यथा वैतुष्यमेवमत्रान्तःकरणदोषनिवर्तनम्, अतो नादृष्टमत्र द्वारम्, किन्तु दृष्टमेवात आवृत्तिरावश्यकी । तत्र यथान्येषामवघातानां वैतुष्यजनकत्वम्, चरमावघातस्य तण्डुलनिष्पादकत्वम्, एवमत्रान्येषामुपदेशानामन्तःकरणदोषनिवर्तनम्, चरमस्योपदेशस्य तु मनसा साक्षात्कारे जनयितव्ये तत्सहकारितया ज्ञानसाधकत्वम् । शब्दादपरोक्षमितिवादस्य प्रागेव निरस्तत्वात् । न च चरमोपदेशस्य करणत्वमेवास्त्विति शङ्क्यम् । तथा सति प्रत्यक्षसामग्रीनैर्बल्येपि तत् स्यात् । तथा सत्यसकृदुपदेशो मननादिविधयश्च मुधैव स्युः । सामग्रीप्राबल्यार्थमेव तदुपयोगात् । प्रबलायां च तस्यां शब्दस्य सहकारित्वमेव । लोके तथा दर्शनादिति । तस्मादावृत्तिरावश्यक्येवेत्यर्थः ॥ १ ॥

लिङ्गाच्च ॥ २ ॥ सूत्रमवतारयन्ति अत्रैवेत्यादि । अत्रैवेति । आवृत्तावेव । किं लिङ्गमित्यपेक्षायां व्याकुर्वन्ति श्रुतीत्यादि । स्मृतत्वात्मपदमन्तःकरणपरम् । दृष्टान्तेनेति ।

रश्मिः ।

सिद्धिः स्यात् । भाष्ये । अर्थमुपदेशरूपम् । एकस्मै श्वेतकेतवे । एकदा एककाले । प्रकृते । तत्रेति । अवघाते । अत्रेति । श्रवणे । प्रागेवेति ।.............। तत्स्यादिति । शाब्दापरोक्षं स्यात् । मननादीति । आदिना निदिध्यासनं 'मनसैवानुद्रष्टव्य'मिति च । तदुपेति । तेषामसकृदुपदेशादीनामुपयोगात् । तस्यामिति । प्रत्यक्षसामग्र्याम् । शब्दस्य उपदेशस्य । लोक इति । 'दशमस्त्वमसी'त्यादौ ।

लिङ्गाच्च ॥ २ ॥ श्रुतीत्यादीति । आहेति । व्यञ्जनयाहेत्यर्थः । यथा यथेत्यत्र वीप्सा । अत्र व्यञ्जना, तयार्थः आवृत्तिरूपः प्रतीयते । दृष्टान्तेनेति । अत्र चक्षुषोऽञ्जनपरिमृष्टता दृष्टं द्वारम् । दृष्टद्वारकत्वमिति । आत्मपरिमृष्टता दृष्टं द्वारम् । एतावत्पर्यन्तमयमशुद्धान्तःकरणः, अधुना श्रवणाभिधानैः शुद्धान्तःकरण इति प्रतीतेः । एवं च दृष्टं द्वारमनुमितं द्वारम् । यद्वा । योगिभिर्दृष्टं 'अनागत-

---

[1] अत्राक्षररहितपङ्क्तिदर्शनात्किञ्चिदवशिष्टं दृश्यते तेन तृतीयाध्यायचतुर्थपादस्य द्वादशे सूत्रे शाब्दपरोक्षज्ञानस्य प्रमाज्ञानत्वाभावादित्यादिभावोऽत्रापि ग्रन्थकृदभिमतो भवेदिति ध्येयम् ।

[2] अ० सू० १०

श्रवणादीनां फलात्मकं दर्शनं पूर्वमुक्त्वा, 'श्रोतव्यो मन्तव्य' इत्यादिना तत्साधनानि पश्चादाह तेनात्मनः परोक्षमपि ज्ञानमवान्तरफलरूपमिति भक्तिमार्गे परमफलरूपतत्सजातीयत्वेन च फलमध्यपात्येवेति श्रुत्यभिमतमिति ज्ञायते । तेन सूत्रकृदपि फलप्रकरणेपि साधनविचारं चकारेति निगूढाशयः ।

भाष्यप्रकाशः ।

चक्षुर्दृष्टान्तेन । एवञ्च पूर्वाध्याये कर्मोपसंहारे 'सर्वथापि त एवोभयलिङ्गा'दित्यनेन श्रवणादीनां भगवद्धर्माणां यदवश्यकर्तव्यत्वमुक्तम्, तस्यावान्तरफलत्वाय तत्प्रकारोत्र फलाध्याये प्रथमत एव सूत्रद्वयेन दर्शितः । तेषां कथमवान्तरफलत्वमित्याकाङ्क्षायां श्रवणादीनामवान्तरफलत्वे बीजमाहुः 'आत्मा वाअर' इत्यादि । तत्सजातीयत्वेनेति । एकविषयतया साक्षात्कारसजातीयत्वेन । तथा च भक्तिमार्गेपि 'सतामयं सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि । प्रतिक्षणं नव्यवदच्युतस्य यत् स्त्रिया विटानामिव साधुवार्ता' इति न्यायेनाभीष्टरूपत्वादवान्तरफलत्वं बोध्यम् । 'या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्मापसर्पत्वि'ति वैष्णवे प्रह्लादवाक्यादपि तथेत्यर्थः । अत्र गमकमाहुः तेनेत्यादि ॥ २ ॥

एवमेकेन प्रकारेण सूत्रं व्याख्याय तत्र दोषाभावेपि श्रुतौ कर्मज्ञानभक्तीनां मार्गाणामुक्तत्वेपि ज्ञानभक्त्योरेव फलत उत्कृष्टत्वम्, न तु कर्ममार्गस्यापीति श्रुत्याशयं स्फुटीकर्तुमत्र कर्ममार्गस्य फलजाघन्यमपि बोधयतीति हृदिकृत्वा प्रकारान्तरेण व्याख्यातुं तद्बीजमाहुः तथापीत्यादि । अस्मिन् दर्शने शब्दस्यैव प्राधान्याद् यद्यपि शाब्द एव क्रमो मुख्यः, तथापि तत्र-

रश्मिः ।

मतीतं चे'ति वाक्यात् । **अवान्तरफलत्व** इति । तदित्थम् । श्रवणस्य शब्दपरोक्षज्ञानत्वम् । उक्तलक्षणाभ्याम् । **आदिना** कीर्तनस्मरणे । परोक्षज्ञानरूपे । कीर्तनं शब्दोच्चारणं तच्छाब्दज्ञानपर्यन्तमिति परोक्षज्ञानरूपम् । एकविषयकतयावान्तरफलत्वम् । तत्र बीजमाहुः **बीजमिति** । **'द्रष्टव्य'** इति फलोत्तरोक्तिरूपम् । **'आत्मा वाअर' इत्यादीति** । 'भक्त्या जानाति चाव्यय'मिति श्रुतिः, 'भक्त्या मामभिजानाती'ति स्मृतिः । **फलात्मकमिति** । भक्तिफलात्मकम् । **परोक्षमिति** । शाब्दं ज्ञानम् । **अवान्तरेति** । भगवद्विषयकज्ञानस्य फलत्ववदर्थाभेदात्तद्वाचकशब्दजन्यतज्ज्ञानस्यापि फलत्वमिति अवान्तरफलरूपमित्यर्थः । शब्दार्थयोरौत्पत्तिकसम्बन्धात् । **एकविषयतयेति** । परमफलेन रूप्यते व्यवह्रियत इति **परमफलरूपं** ज्ञानम्, विषयेण व्यवहारात् । परमफलरूपं च शब्दार्थयोरौत्पत्तिकसम्बन्धात् । तत्तत्सजातीयं परमफलरूपतत्सजातीयम् । तस्य भावः परमफलरूपतत्सजातीयत्वं तेनेत्यर्थः । **ज्ञायत इति** । एकस्यैव पाठार्थक्रमभेदेन श्रवणादिभ्यः पूर्वमार्थक्रमेणोत्तरं च द्रष्टव्य इत्यस्यान्वयात् । तथा चैको भगवान् विषयो ययोः शाब्दापरोक्षयोर्ज्ञानयोः ते एकविषये तयोर्भावः एकविषयता तया । इयं परोक्षज्ञानस्य । **नव्यवदिति** । प्रथमान्ताद्वतिः । विटानां स्त्रियाः साधुवार्तेव । **बोध्यमिति** । शाब्दपरोक्षस्य बोध्यम् । **वैष्णव इति** । विष्णुपुराणे । **तथेति** । अवान्तरफलत्वम् । **अत्रेति** । साधनरूपेऽवान्तरफले । **गमकं** प्रमाणं व्याससूत्रात्मकम् । **निगूढेति** । निगूढश्चासावाशयो निगूढाशयः, आशयोभिप्रायः स निगूढोशब्दार्थः । किन्तु तात्पर्यार्थः । **न तु कर्मेति** । ज्ञानकाण्डत्वात् 'तमेतं वेदानुवचनेने'ति श्रुतिप्रवृत्त्या तथा । **तद्बीजमिति** । व्याख्यानबीजं फलप्रकरणासङ्गतत्वापातरूपम् । **अस्मिन्निति** ।

तथापि 'शाब्दक्रमादार्थक्रमो बलीया'निति न्यायात् 'द्रष्टव्य' इति पदस्य पश्चात्सम्बन्धे तूक्तरीतिर्नावसरं प्राप्नोतीति प्रकृतविचारस्य फलप्रकरणासङ्गतत्वमापततीति प्रकारान्तरेण सूत्रार्थ उच्यते आवृत्तिरसकृदुपदेशात् । श्रुतिर्हि कर्मज्ञानभक्तीः साक्षात्परम्पराभेदेन पुरुषार्थसाधनत्वेन हीनमध्यमोत्तमाधिकारिणः प्रति कर्तव्यत्वेन प्रतिपादयति । तत्र तेषां स्वरूपं तृतीयेध्याये बादरायणेन प्रतिपादितम् । अथ तुरीयेध्याये तेषां फलं चिन्त्यते । तत्रादौ कर्ममार्गस्य फलमुच्यते । ज्ञानभक्त्योरेव क्रमेणोत्तमात्युत्तमफलकत्वम्, अतस्तत्साधनत्वेनैव तत् कर्तव्यम्, न तु स्वातन्त्र्येणेति ज्ञापयितुम् । आवृत्तिरिति । कर्ममार्गस्या-

---

भाष्यप्रकाशः ।

द्वयस्यैकवाक्यात् पूर्वतन्त्रस्याप्यादरणीयत्वम् । तत्र च क्रमलक्षणे 'क्रमकोपोर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्चे'त्यत्र 'अग्निहोत्रं जुहोति यवागूं पचती'त्यादौ शाब्दक्रमादरे यवाग्वाः पाकस्य च वैयर्थ्यप्रसङ्गाददृष्टार्थत्वादरे च गौरवात्तमनादृत्य यवाग्वा होमसम्भवेन पूर्वोक्तदोषासम्भवादर्थक्रम एव युक्त इति निर्णीतम् । तन्न्यायाद् द्रष्टव्यादिवाक्येपि दर्शनानन्तरं श्रवणादीनां वैयर्थ्यप्रसङ्गः फलसिद्ध्या मोक्षस्यैव सम्भवेनादृष्टस्यापि कल्पनायोग इति शाब्दं तमनादृत्य तेषां साधनतया पूर्वमेव सम्बन्धो युक्त इति कश्चिदुद्भावयेत्, तदोक्तरीतिरनवसरपराहता स्यादतस्तथोच्यत इत्यर्थः । एवं प्रकारान्तरं प्रतिज्ञाय तस्मिन् पूर्वाध्यायसङ्गतिं वदन्तः प्रस्तुतार्थमाहुः श्रुतिर्हीत्यादि । तत्र तेषां स्वरूपमिति । तत्र साधनविचारे तेषां कर्मज्ञानभक्तिरूपाणां पुरुषार्थसाधनानां स्वरूपं स्वं प्रति नियतं फलोपयोगि रूपम् । अध्यायार्थमुक्त्वा सूत्रमवतारयन्ति तत्रादावित्यादि । तत्कर्तव्यमिति । कर्म कर्तव्यम् । तथा च मार्गान्तरप्रवेश एव कर्मण उत्तमफलत्वम्, स्वतो मार्गत्वे तु जघन्यफलत्वमिति ज्ञापनाय कर्ममार्गफलमुच्यत इत्यर्थः । व्याकुर्वन्ति कर्ममार्गस्येत्यादि । फलमिति । साध्यान्तरसाधनव्यापारोपरमजनकं कार्यम् ।

रश्मिः ।

वैयासे । बादरिमतेर्थस्य । क्रमलक्षण इति । पञ्चमाध्याये । उक्तदोषेति । गौरववैयर्थ्यप्रसङ्गयोरसम्भवात् । तमिति । क्रमम् । तेषामिति । श्रवणादीनाम् । पूर्वं 'द्रष्टव्य' इत्यस्मात्पूर्वम्, उक्तरीतिरिति । शाब्दक्रमरीतिः । तथेति । प्रकारान्तरेण श्रुत्यर्थ उच्यत इत्यर्थः । पूर्वाध्यायेति । हेतुतासङ्गतिं वदन्तः । प्रस्तुतेति । प्रस्तुतं फलं तद्रूपमर्थमाहुरित्यर्थः । श्रुतिर्हीत्यादीति । हीनमध्यमेति । उत्तरकाण्डे साधनत्वं हीनत्वम् । तेषामिति । ज्ञानभक्तिकर्मणामिति सुवचम् । 'बहुष्वनियम' इति सूत्रात्तथापि त्यदादीनामुत्सर्गतः पूर्वपरामर्शकत्वान्न कर्मान्तपरामर्श इति कर्मज्ञानभक्तिरूपाणामितिरूपपर्यन्तमनुधावनम् । अध्यायार्थमिति । सपरिकरं फलरूपम् । भाष्ये । तत्साधनत्वेनेति । ज्ञानभक्त्योः साधनत्वेन । आधिदैविक्याध्यात्मिकचित्तशुद्ध्या । प्रकृते । जघन्येति । तदुक्तं 'न शोभते ज्ञानमलं निरञ्जनं कुतः पुनः शश्वदभद्रमीश्वरे । न चार्पितं कर्म यदप्यकारण'मित्यनेन । कर्ममार्गफल इति । कर्ममार्गफलनिमित्तमुच्यते । कर्ममार्गफलस्मारणमत्राचार्याणां कृपालुत्वं द्योतयति । आचार्यश्चाचार्याश्चाचार्यास्तेषाम् । साध्यान्तरेति । साध्यं स्वर्गादि तदन्यद्ब्रह्म तस्य साधनं ज्ञानं तस्य व्यापारः स्नेहः तस्योपरमस्तस्य जनकं स्वर्गादिकार्यम् ।

---

१. प्रधानपरामर्शकत्वादित्यर्थः. २. सूत्रकारः । ३. भाष्यकाराः ।

वृत्तिः पुनर्जन्म फलं तदपि असकृत् । इदं पदमावृत्त्योभयत्रापि सम्बध्यते । तथा चात्र प्रमाणापेक्षायां तदाह हेतुत्वेन असकृदुपदेशादिति । श्रुतौ कर्ममार्गे पुनर्जन्मासकृदुपदिश्यते यतः । अन्यथा सकृदुपदेशेनैव तदवगमेप्यसकृदुपदेशो व्यर्थः स्यात्, अतस्तथेत्यर्थः । वाजसनेयिशाखायां पठ्यते, 'एवमेवायꣳ शारीर आत्मैभ्योङ्गेभ्यः सम्प्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैवे'ति तत्रैव पुन'स्तेन प्रद्योतेनैष आत्मा निष्क्रामती'त्युपक्रम्य, पठ्यते 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति । तत्रैवैतदनुपदमेव 'तद्यथा तृणजलायुके'त्युपक्रम्य, पठ्यते 'एवमेवायं पुरुष इदꣳ शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरꣳ रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वान्येभ्यो वा भूतेभ्य' इति । तत्रैवाग्रे पठ्यते, 'प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण' इति ।

भाष्यप्रकाशः ।

उभयत्रेति । साध्ये हेतौ च । उभयत्र सम्बन्धस्य प्रयोजनमुच्यते । तथा चेत्यादिना । तथेत्यर्थ इति । पुनर्जन्मैव फलमित्यर्थः । तेन कर्मवाक्येषु यत् स्वर्गादिरूपं फलमुच्यते, तत् प्रतिपत्तिरूपमेवेति श्रुतितात्पर्यं बोधितम् । वाजसनेयिशाखायामिति । बृहदारण्यके शारीरब्राह्मणे । तथा चास्यां श्रुतावावृत्तावुपसंहार आवृत्तावेव पूर्वकर्मव्यापारोपरमश्रावणात् कर्ममार्गस्य तदेव फलमित्यर्थः ।

रश्मिः ।

भगवदिच्छापर्यन्तं भोगः स्वर्गादौ पश्चादावृत्तिः, स्नेहे त्वनावृत्तिरतस्तस्योपरम उक्तः । हिरण्यगर्भमोक्षे तु स्वर्ग आत्मसुखम् । तस्य कर्ममात्रं साधनम् । नन्वेतदेव हि देवा गायन्ति । 'अहो अमीषां किमकारी'ति वाक्ये देवानां स्नेहः स्मर्यते इति चेत् । सत्यम् । परन्तु चित्तशुद्धौ तु कर्मणा स्नेहद्वारा मोक्षः, 'माहात्म्यज्ञानपूर्वस्त्वि'तिवाक्याच्छ्रीभागवतवाक्याच्च । अत्र तु स्वर्गस्तेषां स्वर्गिणां स्नेहस्तु भोगशेषः, न तु निरुपधिरिति स्पृहायाः सोपधित्वम्, न तु निरुपधित्वमिति । अत्र कर्ममार्गस्येति पूर्वाध्यायसङ्गत्या लभ्यते । फलं ब्रह्मेत्यनुवृत्त्या । भोगेन त्वितरे इति सूत्रस्थः सम्पद्यत इत्युपसंहारेण ब्रह्मसम्पत्तिरूपफलोक्तेरावृत्तमानन्दविशिष्टमिति ज्ञाप्यतेऽतः फललाभः । उपक्रमस्य सञ्जातविरोधित्वान्न निर्णायकत्वम् । साध्ये हेतौ चेति । साध्ये त्वावृत्तिरसकृदिति । हेतौ त्वसकृदुपदेशादिति । तथा चेत्यादिनेति । अत्र साध्येप्यन्वये हेतुत्वेन तत्प्रमाणमाहेत्यर्थः । यत इत्यन्तभाष्येण साध्येन्वय उक्तः । अन्यथेत्यादिभाष्येण हेतावन्वय उक्तः । कर्मवाक्येष्विति । 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादिषु । प्रतिपत्तिरूपमिति । भक्तिहंसोक्तरीत्या स्वर्गलोकमध्यपातादावृत्तिरपि लोक इति प्रतिपत्तिस्तद्रूपमेव । भाष्यविरोधादेवकारः । तथा च विश्वः 'प्रतिपत्तिः पदप्राप्तौ प्रवृत्तौ गौरवेपि च, प्रागल्भ्ये च प्रबोधे च प्रतिपत्तिः प्रयुज्यते' इति । प्रागल्भ्येत्र । श्रुतीति । कर्मवाक्यरूपा । तथा चेति । आवृत्तिपर्यन्तश्रुत्युपन्यासे च । पूर्वकर्मव्यापारेति । देहारम्भात्पूर्वस्य कर्मणो व्यापारः सुकृतदुःकृतभोगजनकः तस्योपरमः 'प्राप्यान्तं कर्मणस्तस्ये'तिश्रुत्या श्रावणात् । तदेवेति । स्वर्गरूपमावृत्त्यादिसहितम् । भाष्यविरोधापत्तेरेवकारः ।

अत्र हेत्वन्तरमाह लिङ्गाच्च । वेदानुमापकत्वेन स्मृतिर्लिङ्गमित्युच्यते । सा च भगवद्गीतासु 'त्रैविद्या मा'मित्युपक्रम्य पठ्यते 'एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्त' इति । 'आब्रह्मभवनाल्लोकाः पुनरावर्तिनोर्जुने'ति च ।

अथवा 'यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेने'ति श्रुतिर्वर्तमानजन्मकर्मणोः पूर्वजन्मसम्बन्धिकर्मानुमापकत्वं वदतीति कर्मिणः पुनर्जन्मावश्यकमिति ज्ञायते । एवं सति लिङ्गत्वेन निरूपणादित्यर्थः सम्पद्यते । निवृत्तिमार्गीयस्यापि तस्य ज्ञानोपकर्तृत्वमात्रम्, न तु जन्मनिवर्तकत्वम्, मानाभावात् ॥ २ ॥

इति चतुर्थाध्याये प्रथमपादे प्रथममावृत्त्यधिकरणम् ॥ १ ॥

एवं कर्मफलं विचार्य ज्ञानफलं विचारयति ।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ (४।१।२)

पूर्वार्थनिरूपणव्यवच्छेदाय तुशब्दः । ज्ञानिनो हि भगवन्तमात्मत्वेनै-

---

भाष्यप्रकाशः ।

लिङ्गाच्च ॥ २ ॥ लिङ्गपदस्य स्मृतौ प्रयोगप्राचुर्याभावान्नेदं युक्तमित्यतः पक्षान्तरेण व्याकुर्वन्ति अथवेत्यादि । 'यथाकारी'त्यारभ्य 'पापो भवती'त्यन्तेन पूर्वकृतकर्मणः फलमुक्त्वा 'पुण्यः पुण्येने'त्यादि यद् वदति, तदेतज्जन्मीनकर्मणः पूर्वकर्मानुमापकत्वायैव वदति । अन्यथा पुनरुक्तं स्यादतस्तथेत्यर्थः । सूत्रार्थमाहुः एवं सतीत्यादि । ननु तर्हि निवृत्तस्य कर्मणोपि तथात्वापातो 'निवृत्तं कर्म सेवेते'त्याद्यनुज्ञावैयर्थ्यं च स्यादित्यत आहुः निवृत्तीत्यादि । तथा चाङ्गत्वदशायां तस्य प्रधानोपकारातिरिक्तफलाभावात् प्रधानेन ज्ञानेनैव जन्मनिवृत्तेर्न तद्वैयर्थ्यमित्यर्थः । अस्मिन् पक्ष इदं सूत्रद्वयं नाधिकरणरूपमिति बोध्यम् । अन्ये त्वत्र पूर्ववर्णकोक्तरीत्या जघन्याधिकारिणः श्रवणादिप्रत्ययावृत्तिमात्रं साधयन्ति । अस्य साधनाश्रयविचारस्यात्र प्रवर्तने बीजं तु न किञ्चिदपि वदन्तीति तच्चिन्त्यम् ॥२॥ इति प्रथममावृत्त्यधिकरणम् ॥१॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ सूत्रमवतार्य व्याकुर्वन्ति पूर्वेत्यादि । नन्वात्मशब्दः सन्मात्रादिप्रत्यग्रसान्तद्वादशलक्षणविशिष्टवस्तुबोधकः । इतिशब्दः प्रकारवाची । तस्य च विस्मृतकण्ठमणिज्ञानवज्ज्ञानं मोक्षसाधनमित्येवार्थोऽत्राङ्गीकार्यः । यत उपगच्छतीत्यस्य ज्ञानार्थतैव प्रसिद्धेति साधनाश्रय एवात्र विचारः प्रतीयते इति कथमस्य फलाश्रयत्वमित्यतस्तदुपपादयन्ति ज्ञानिनो हीत्यादि । ज्ञानिनो ज्ञानमार्गीयाः, ते हि 'आत्मेत्येवोपासीत' 'स

रश्मिः ।

लिङ्गाच्च ॥२॥ नेदमिति । 'लिङ्गं स्मृति'रितिव्याख्यानं न । तथेति । कर्मिणः पुनर्जन्मावश्यकमिति ज्ञायत इत्यर्थः । एवं सतीत्यादीति । एवं सति पुनरुक्त्यभावाय एतज्जन्मीनकर्मणः पूर्वकर्मानुमापकत्वे सिद्धे सति । आवृत्तौ श्रुतेर्लिङ्गत्वेन हेतुत्वेन प्रमाणत्वेन निरूपणात् । अत्रावृत्तौ श्रुतिलिङ्गादिति हेतुः । भाष्ये तु सूत्रार्थ उक्तः । एतज्जन्मीनकर्मणः पूर्वकर्मानुमापकत्वं वैद्यके तु कर्मविपाके स्पष्टम् । तथात्वेति । आवृत्तिसाधकत्वापातः । निवृत्तं कर्म मोक्षसाधकं हिरण्यगर्भस्य । इत्यादीति । आदिना 'किं प्रजया करिष्यामः' इति श्रुतिः । तस्येति । कर्मणः । तद्वैयर्थ्यमिति । प्रधानाङ्गं कर्म निवृत्तं तस्य वैयर्थ्यम् । नाधीति । संशयाद्यभावात्तथा । श्रवणादीति । प्रत्ययो ज्ञानम् । साधनेति । साधनं श्रवणाद्याश्रयतीति एरच् साधनाश्रयः । तस्य ॥२॥ इति प्रथममावृत्त्यधिकरणम् ॥१॥

चोपासते। तस्या नैरन्तर्येनेकजन्मभिस्तथैव तेषां हृदि भगवान् स्फुरति। तदा स्वानन्दांशस्याप्याविर्भावात् 'ब्रह्मभूतः' सन्नात्मत्वेनैव ब्रह्म स्फुरितमिति तदानन्दात्मकः संस्तमनुभवति। एवं स्थितः प्रारब्धसमाप्तौ देहापगमे तत्रैव प्रविष्टो भवति। एतादृशः सर्वोपकारीति परार्थमपि तस्मै भगवता ज्ञानं दत्तमिति प्रवचनमपि तस्य फलान्तःपातीत्यधिकारिण्युपस्थिते तथैवोपदिशति च। एतदेवाह आत्मेत्यादिना। उप समीपे गमनं प्रवेश इति यावत्।

भाष्यप्रकाशः

म आत्मेति विद्या'दित्यादिवाक्येभ्य आत्मत्वेनैव भगवन्तमुपासते। तस्या उपासनाया नैरन्तर्ये, 'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते' इति स्मृतेरनेकजन्मभिरात्मत्वेनैव भगवान् हृदि स्फुरतीति 'त्वं वै अहं भगवो देवते अहं वै त्वं भगवो देवते' इति व्यतिहारादवसीयते। तदा बह्वभ्यासे जीवानन्दस्याप्याविर्भावात् सच्चिदानन्दानां त्रयाणां प्राकट्ये 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतेर्ब्रह्मभूतः सन्, आत्मत्वेनैवेत्याद्युक्तरीत्या ब्रह्मानन्दात्मकः सन्नात्मानं साक्षात्करोति। ततः प्रारब्धसमाप्तौ ब्रह्मण्येव प्रविष्टो भवतीति मुख्यं ज्ञानिनः फलमुपगच्छन्तीत्यनेनोक्तम्। ग्राहयन्तीत्यनेनावान्तरं तदुच्यत इत्याशयेन तदुपपादयन्ति एतादृश इत्यादि। फलान्तःपातीति। भगवत्कृपाकार्यत्वात् फलान्तःपाति। तथा चायं सूत्रार्थः। इतिशब्दः प्रकारे। पूर्वसूत्रद्वये श्रवणाद्यावृत्तेरुक्तत्वाच्छ्रवणादौ च ब्रह्मण एव विषयत्वात्तत्प्रकृतं ब्रह्म आत्मा स्वात्मा इति एवंप्रकारेण उपगच्छन्त्यनुभवन्ति। तत्क्रतुन्यायेन तद् प्राप्नुवन्ति, अन्यानप्यधिकारिणो ग्राहयन्ति, उपदिशन्ति चेति बोध्यः। ननु भवत्विदमेवम्, तथापि आत्मत्वेन ग्राहणस्य तादृशग्रहणानन्तरभावित्वात् 'उपगच्छन्ती'त्यस्य ज्ञानमेवार्थत्वेन प्रतीयते, न तु प्रवेश इत्यत आहुः उपेत्यादि। तथा चोपगच्छन्तीत्यत्र कर्त्रपेक्षायां साधक-

रश्मिः।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ पूर्वेत्यादीति। कर्ममार्गफलरूपार्थनिरूपणव्यवच्छेदाय। सन्मात्रादीति। आदिना........। इत्येवेत्यत्रैवकारः पुरुषोत्तमज्ञानव्यवच्छेदकः। तदुपपादयन्तीति। फलाश्रयत्वमुपपादयन्ति। उक्तमिति। उपोपसर्गविशिष्टत्वादिति भावः। तदुच्यत इति। फलमुच्यते। तदिति। अवान्तरत्वं, शाब्दरूपं ग्रहणमवान्तरम्। तथा च 'ग्राहयन्ती'त्यस्य ग्राहणमुपदेशं करोतीत्यर्थः। भगवदिति। स भगवान् शुक इव तदानीं गुरुत्वमिति तल्लक्षणं कृपालुत्वमिति कृपोपस्थितिः। तन्मुख्यं कार्यं 'आत्मेति तूपगच्छन्ती'त्युक्तम्। तद्वदुपदेशः प्रवचनं पूर्वकक्षारूपत्वादवान्तरं भगवत्कृपाकार्यं तत्त्वात्। फलेति। नवधाभक्त्यन्तःपात्यर्चनवत्। ज्ञानमेवेति। ग्रहणरूपं ज्ञानम्, 'यो गच्छति, तं गमयती'त्यत्र णिचस्स्थले तथा दर्शनादेवकारः। न तु प्रवेश इति। वादी 'अनुभवती'त्यत्र सूत्रांशसमाप्तिं मन्यत इति भावः। धातूनामनेकार्थत्वात्। तथा चोपेति। उपगच्छन्तीत्यस्योपासते प्रविशन्तीत्यर्थद्वयम्। यद्वा। उपासते नाम प्रविशन्तीत्यर्थः। मनोमात्रमिदं ज्ञात्वेतिपक्षे मनोनिवेशनरूपव्यापारस्य देहापगमे 'तत्रैव प्रविष्टो भवती'त्यत्र प्रवेशरूपत्वेपि बाधकाभावात्। नन्वाकाशशरीरस्याणोर्जीवस्य प्रवेश इति नोपासनेनैकवाक्यतेति चेत्। न। तर्ह्युपासनमुप समीपे स्थित्वा यथायोग्यकरणमस्तु इति। तथा चोपासन उपविशन्तीत्येकार्थके क्रियापदे। एकादशस्कन्धोक्तलक्षणात्। ज्ञानिन उप समीपे स्थित्वा यथायोग्यं कुर्वन्ति

अथवा । ननु ज्ञानभक्त्योरनावृत्तिः फलम्, अत उत्तमे ते, न तु कर्मेत्याशयेन कर्मणः फलमावृत्तिरिति यन्निरूपितम्, तत्रेदं चिन्त्यते । 'न स पुनरावर्तत' इतिश्रुतिः सर्वथानावृत्तिमाह, उत सावधिकींताममरशब्देन तन्निवृत्तिमिव । किमत्र युक्तम् । सावधिकीमेवेति । तथाहि । पूर्वं कर्मनैयत्यस्य त्वयाप्यङ्गीकार्यत्वात् तस्य प्ररोहैकस्वभावत्वात्तस्य दुरतिक्रमत्वात्तत्फलानुभवस्यावश्यकत्वात् । अपि च, 'य एनं विदु'रिति श्रुतेः सति ज्ञाने हि सा । 'यतो वाचः,' 'अगृह्यो न

भाष्यप्रकाशः ।

मात्रस्य ग्रहीतुमशक्यत्वाज्ज्ञानिन एव कर्तृत्वेन वाच्याः । तथा सति कर्तृविशेषणत्वेनैव तत्प्राप्त्यास्यार्थद्वयसङ्ग्राहकत्वाद्योगान्तरेण तस्य फलबोधकत्वं नायुक्तम् । अत्र फलस्यैव प्रकरणादिति । तथा चात्मनि प्राप्ते पुनरावृत्त्यभावाज्ज्ञानस्यानावृत्तिरेव फलमित्यर्थः । अस्मिन् पक्ष एतस्यापि सूत्रस्य नाधिकरणत्वम् । पूर्वशेषत्वात् ।

एवमत्र ज्ञानफलस्य कथनात् कैमुतिकेन भक्तिफलस्य सूचितत्वेप्यविवेचितत्वात् तद्विवेचनाय पूर्वसूत्रयोर्द्वितीयवर्णके यदुक्तम्, तदुपष्टम्भाय चेदमप्यधिकरणान्तरमेवेत्याशयेनाहुः अथवेत्यादि । तत्रेति । अनावृत्तौ । विषयमुक्त्वा संशयमाहुः न स इत्यादि । उक्तवाक्येन 'गृहिणोपसंहार'स्थले कर्मकरणमुक्तम् । सन्न्यासिनो ज्ञाने स्वरूपोपकाराय कर्मकरणं सर्वापेक्षासूत्रेपि स्थापितम् । कर्मणां प्ररोहैकस्वभावत्वं च संयमनाधिकरणे पूर्वसूत्रयोर्द्वितीयवर्णके च व्यवस्थापितम् । एवञ्च ज्ञानवता कर्मकरणेऽपुनरावृत्तिश्रुत्यावृत्तिश्रुत्योर्विरोध आपततीति तत्सन्देहबीजं बोध्यम् । पूर्वपक्षमुपपादयन्ति तथाहीत्यादि । अनावृत्तिश्रुतेः पूर्वं 'यावदायुषमेवं वर्तय'मिति श्रावणादनावृत्तेः पूर्वं जीवद्दशायां कर्मनैयत्यस्य त्वया सिद्धान्तिनाप्यङ्गीकार्यत्वात् कर्मणां च प्ररोहैकस्वभावत्वात् स्वभावस्य च दुरतिक्रमत्वाज्जन्मान्तरे पूर्वकर्मफलानुभवस्यावश्यकत्वादनावृत्तिश्रुतिः पूर्वानुरोधेन सावधिकीमेव तां वदतीत्यर्थः । एवमावृत्तौ साधकमुक्त्वानावृत्तौ बाधकमाह । अपि

रश्मिः ।

नाम देहापगमे तत्रैव प्रविष्टा भवन्ति यथायोग्यं सत्तां कुर्वन्तीत्यर्थः । तत्प्राप्त्येति । ज्ञानिन इति विशेषणाज्ज्ञानप्राप्त्या । अस्येत्यादि । कर्तृवाचकपदस्यार्थद्वयं ज्ञानस्वरूपं तस्य सङ्ग्राहकत्वात् । ज्ञानिकर्तृपदे योगः करणव्युत्पन्नज्ञानयुक्तः परतन्त्रत्वेन करोतीति कर्ता । तदन्यो योगः भावव्युत्पन्नज्ञानरूपफलयुक्तः स्वतन्त्रत्वेन करोतीति कर्तेति । तस्येति । अर्थद्वयवाचकजातिकर्तृपदस्य । ज्ञानस्येति । करणव्युत्पन्नसाधनस्य । एवेति । अप्यर्थे । ज्ञानफलान्तःपातिन्यनावृत्तिरपि फलमित्यर्थः । नाधीति । विशयाद्यभावात् तथा । अथवेत्यादीति । न तु कर्मेति । न तु कर्मोत्तममित्यर्थः । यन्निरूपितमिति । पूर्वसङ्गत्यर्थम् । अनावृत्ताविति । तत्रोभयोरावृत्त्यनावृत्त्योरावृत्तेर्निरूपणादवशिष्टायामनावृत्तावित्यर्थः । विषयमुक्त्वेति । 'आत्मेत्येवोपासीत स म आत्मेतिविद्या'दित्यादिविषयमपुनरावृत्तिवाक्यघटितम् । अनधिकरणत्वपक्ष एवोक्तार्थः । अपुनरावृत्तिघटितवाक्यार्थाधिकारिणो गृहस्थाः सन्न्यासिनश्चेत्युक्तेन विषयवाक्येनाधिकारिद्वयमाहुः । न स इत्यादीति । तामिति । अनावृत्तिम् । तन्निवृत्तिमिति । सावधिकीं मरनिवृत्तिम् । उक्तवाक्येनेति । गृहिणेति । कृत्स्नभावसूत्रेत्यर्थः । कर्मकरणमिति । 'आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति श्रुत्या । ज्ञानवतेति । जनकेन । तत्सन्देहेति । तदिति विधेयलिङ्गम्, विरोध इत्यर्थः । श्रावणादिति । छान्दोग्येऽन्ते श्रावणात् । पूर्वेति । अमरदृष्टान्तानुरोधेन । तामिति । अनावृत्तिम् । साधकमिति ।

हि गृह्यत' इत्यादिश्रुतिभ्यो ब्रह्मज्ञानासम्भवात् । इत एव भक्तिरपि प्रत्युक्ता वेदितव्या । ज्ञानाविषये स्नेहासम्भवात् । किञ्च । 'सर्वस्य वशी सर्वस्येशान' इत्यादिश्रुतिभ्यो 'यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः, न यं विदन्ति तत्त्वेने'त्यादिस्मृतिभ्यश्च का प्रत्याशा जीवस्यातिहीनस्य तत्प्राप्तौ । अत एवोपदेशासम्भवोऽपीति प्राप्ते प्रत्याह आत्मेतीत्यादिना । तुशब्दः पूर्वपक्षनिरासकः ।

अत्रायमाशयः । सत्यमुक्तं भवता । तत्रोच्यते । यथाऽगृह्यत्वातिमहत्त्वादिधर्मा भगवति सन्ति, तथा सर्वात्मत्वमपि । 'य आत्मनि तिष्ठ'न्नित्यादिश्रुतिष्वात्मत्वेनैवोक्तेः । सर्वधर्माश्रयत्वेपि यदा यं धर्मं पुरस्कृत्य लीलां करोति, तत्कार्यमेव तदा सम्पद्यते । हितकारित्वस्वभावत्वात् तस्य । एवं सति यस्मिन् पुरुषे यदात्मत्वेन लीलां करोति, तदा स्वप्राप्त्यनुकूलप्रयत्नवन्तं विधायास्मानं प्रापयति । ननूक्तं दुरतिक्रमः कर्मस्वभाव इति । नैष दोषः । न ह्यम्ररसपाकाय

भाष्यप्रकाशः ।

चेत्यादि । सेति । अनावृत्तिः । तथा च ज्ञानाभावे तत्कार्यभूता अनावृत्तिरपि न वक्तुं शक्या । न च भक्त्या सेत्यत आह इत इत्यादि । तथा च भक्तेर्माहात्म्यज्ञानपूर्वकस्नेहरूपत्वात् स्नेहस्य च ज्ञानोत्तरमेव सम्भवेन तदविषये स्नेहस्याशक्यवचनत्वेन भक्तेरप्यसम्भवादित्यर्थः । एवं प्रमाणबलेन साधनदौर्घट्यरूपं बाधकमुक्त्वा फलविचारेणापि तदाह किञ्चेत्यादि । अत्र श्रुत्या प्राप्तिदौर्घट्यं स्मृत्या च तत्साधनभूतज्ञानदौर्घट्यमुक्तम् । न च केवलकरणबलेन ज्ञानासम्भवेपि शब्दसहकृतेन ज्ञानसम्भवमाशङ्क्य निराचष्टे अत एवेत्यादि । शब्दो हि श्रुतः सहकरोति । श्रवणं चोपदेशादुपदेशश्च ज्ञानादतो गुरुरेव, ज्ञानदौर्घट्यादुपदेशस्याप्यसम्भव इत्यर्थः । तथा च सर्वथानावृत्तौ साधकस्याभावाद् बाधकानां च बहूनां सत्त्वादनावृत्तिः सावधिक्येवाङ्गीकार्येति कर्मज्ञानभक्तीनां फलतो न कश्चिद्विशेषः । वस्तुतस्तु तयोः सम्भव एव दुर्घट इति कर्मफलमेव फलम्, नान्यदिति पूर्वः पक्ष इत्यर्थः । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्तः पूर्वं ज्ञानदौर्घट्यमप्राप्यत्वं च परिहरन्ति ।

रश्मिः ।

कर्म । आवृत्तित्वेन कर्मत्वेन कार्यकारणभावात् । न च हिरण्यगर्भमोक्षे कर्मणामनावृत्तिरिति अन्वयव्यभिचार इति वाच्यम् । सृष्टीच्छयावृत्तिरित्यङ्गीकारात् । बाधकमिति । ज्ञानाभावम् । यत इत्यारभ्य असम्भवादित्यन्तभाष्यार्थमाहुः न च भक्त्येत्यादिना । प्रमाणेति । 'यतो वाच' इत्याद्युक्तप्रमाणबलेनेत्यर्थः । साधनेति । ज्ञानदौर्घट्यरूपम् । तदाहेति । बाधकमाह । केवलेति । केवलशाब्दज्ञानबलेनानुभवात्मकज्ञानासम्भवेपि । श्रुत इति । न तु तूष्णीम् । श्रवणमिति । श्रुत इत्यत्र विशेषणं यत्तत् । गुरुरेव । उपदेशो गौरवग्रस्त एव । भाष्यविवरणं ज्ञानदौर्घट्यादित्यादि । ज्ञानदौर्घट्यादेवोपदेशस्यासम्भवोपीति योजना । भाष्यात् । साधकस्येति । ज्ञानस्य । बहूनामिति । कर्मादृष्टाज्ञानानाममरदृष्टान्तानाम् । फलत इति । अनावृत्तितः । दुर्घट इति । 'बहूनां जन्मनामन्ते ज्ञानवा'निति वाक्यात्, 'मुक्तानामपि सिद्धाना'मिति वाक्यात् । कर्मफलं स्वर्गादि । भाष्ये । सन्तीति । 'न यं विदन्ती'त्यत्र ज्ञानाभावसाधकाः । सर्वात्मत्वमिति । ब्रह्मत्वेन ज्ञानसाधकम् । 'अयमात्मा ब्रह्मे'ति श्रुतेः । आत्मत्वेनैवेति । एवकारेण ब्रह्मत्वेनात्मज्ञानयोगो व्यवच्छिद्यते । तत्कार्यमिति । यथा गोवर्द्धनोद्धरणत्वलीलां भक्तमनोरथपूरकत्वधर्मं पुरस्कृत्य करोति, तत्कार्यं भक्तस्यैव सम्पद्यते । प्रकृते । कर्मस्वभावेति । षष्ठ्यन्ताद्वतिः । कर्मस्वभावो नावृत्तिप्रतिबन्धको

जग्धमौषधमपि गौरवाय भवति, तेन न तन्निवृत्तिर्वा । व्यापादनैकस्वभावमपि विषमाशीविषं तदपगमपटुतरनिगमसङ्क्रमो नापगमयति वा । तथा भगवदर्पितं तदर्थं च कृतं कर्म न कर्मनाशाय भवतीति न वक्तुं शक्यम् । 'कर्ममोक्षाय

भाष्यप्रकाशः ।

तुशब्द इत्यादि । प्रापयतीत्यन्तम् । सत्यमुक्तमिति । 'यतो वाच' इत्यादिना, किञ्चेत्यादिना च यदुक्तम्, तत्सत्यमुक्तम् । आत्मत्वेनेति । शरीरभूतस्यात्मनो नियामकत्वेन । तस्येति । आत्मनः । तथा च कर्मस्वभाववदात्मस्वभावस्यापि तथात्वात् स्वयमेव भगवान् स्वलीलानुसारेण ज्ञानप्रणाड्या भक्तिप्रणाड्या वा यथाधिकारं स्वात्मानं प्रापयतीति न ज्ञानभक्त्यात्मप्राप्तीनां दौर्घट्यमित्यर्थः । अत्र शङ्कते नन्वित्यादि । तथा चात्मकर्मणोरुभयोरपि स्वभावस्य तथात्वादनावृत्तिसावधिकत्वानवधिकत्वयोः संशय एव पर्यवस्यतीत्यर्थः । एतत् समाधातुं कर्मस्वभावातिक्रमप्रकारं व्युत्पादयन्ति । न हीत्यादि । तथा च यथान्नौषधयोर्द्रव्यत्वेन भक्ष्यत्वेन च तौल्येपि तयोर्नैकस्वभावत्वम्, अपि तु स्वभावभेदः, यथा च निगमस्य विषादिस्वभावनाशकत्वेपि तत्कार्यप्रतिबन्धकत्वम्, तथात्र 'आत्मनि सर्वेन्द्रियाणी'त्यादिबोधितस्य भगवदर्पितस्य तदर्थं कृतस्य च कर्मणः कर्मत्वे तुल्येपि स्वभावभेदो वा, भगवदर्पणादेस्तत्स्वभावनिवर्तकत्वं वेत्यदोषः । उक्तं च मार्कण्डेये रौच्यमन्वन्तरे 'अविद्याप्युपकाराय विषवज्जायते नृणाम् । अनुष्ठिताभ्युपायेन बन्धायान्या यतो हि सा' इति । अविद्येति विद्याभिन्नं कर्म, भावरूपमज्ञानं चेत्युभयमपि सङ्गृह्यते । एतदेव श्रुतितात्पर्यमित्यत्र गमकमाहुः कर्मनाशायेत्यादि । एतदेकादशस्कन्धे योगेश्वरवाक्यं 'परोक्षवादो वेदोयं बालानामनुशासनम् । कर्मनाशाय कर्माणि विधत्ते ह्यगदं यथे'ति । क्वचित्तु कर्ममोक्षायेतिपाठः, तदाप्यर्थतौल्यम् । आत्मस्वभावस्य तु न नाशादिशङ्का । 'अनुच्छित्तिधर्मे'ति श्रुतेः, 'सर्वस्य वशी'त्यादिश्रुतेश्च । ततोधिकबलस्यान्यस्याभावात् ।

रश्मिः ।

ह्यावृत्तिपरिणामकः । आत्मस्वभावः आवृत्तिप्रतिबन्धकोनावृत्तिपरिणामकः । तथात्वादनावृत्तिपरिणामकत्वात् । प्रमेयबलमाहुः स्वयमेवेति । कर्मादीनामप्रतिबन्धकत्वायायमेव मार्गः । तथा चेति । उक्तपदं भावव्युत्पन्नं केन प्रकारेणेत्यत्र आहुः । वुरतीति । इतिप्रकारेण तत्रात्मप्रवेश उत्तरे सति चेत्यर्थः । तथात्वादिति । दुरतिक्रमत्वात् । संशय एवेति । अनावृत्तिसावधिकत्वे कर्मस्वभावो बीजम् । अनावृत्त्यनवधिकत्वे आत्मस्वभावो बीजमित्येवकारः । नैकेति । रसपरिणामहेतुत्वम् । स्वभावभेद इति । अन्नस्यापटुतरजग्धस्य रसपरिणामहेतुत्वम् । औषधस्य रसनिवृत्तिपरिणामहेतुत्वमिति स्वभावभेदः । निगमस्येति । वणिजस्यौषधिदानद्वारा । यद्वा । निगमस्याभ्यस्तवेदस्य । तदुक्तं 'अनभ्यासाच्च वेदानां मृत्युर्विप्रान् जिघांसती'ति निबन्धे । तत्कार्येति । मरणप्रतिबन्धकत्वम् । अत्रेति । दार्ष्टान्तिके । 'आत्मनी'ति श्रुतिश्छान्दोग्यसमाप्तौ । तुल्य इति । अन्यकर्मणा तुल्ये । स्वभावभेद इति । भगवदर्पितस्येत्यादिकर्मणः कर्मनाशपरिणामहेतुत्वमन्यस्य कर्मण आवृत्तिपरिणामहेतुत्वं स्वभाव इति स्वभावभेदः । तत्स्वभावेति । कर्मस्वभावनिवर्तकत्वम् । इत्यदोष इति । एवं कर्मस्वभावातिरिक्तप्रकारेण दुरतिक्रमकर्मस्वभावरूपो दोषो न । संगृह्यत इति । अन्यापि योजना । उपकाराय नाशे प्रतियोगित्वेनोपकाराय । विषवदिति । प्रथमान्ताद्वतिः । अनुष्ठितेनाभ्युपायेन कर्मनाशकज्ञानकर्मभ्याम् । अन्यानुष्ठिताभ्युपाययुक्तान्यावधिका बन्धाय मता यतः साऽविद्येत्यर्थः । अनुच्छित्तीति । न उच्छित्तिर्येषां ते अनुच्छित्तयः ते धर्मा यस्येत्यनुच्छित्तिधर्मा

THE ASIATIC SOCIETY KOLKATA

कर्माणि विधत्ते ह्यगदं यथे'ति वाक्यात् । अगृह्यत्वगृह्यत्वविरोधापहारस्तु जीवसामर्थ्येश्वरेच्छाभ्यां पुरैव कृत इति नाधिकमत्र निरूप्यम् । इतिशब्दो हेत्वर्थे । तथा च भगवानात्मा भवति सर्वेषां जीवानामतो हेतोरुक्तरीत्या तदनुग्रहेण तमुपगच्छन्ति । ज्ञानमार्गेङ्गीकृतास्त्वात्मत्वेनैव ज्ञानादुप समीप एव गच्छन्ति, उक्तरीत्याक्षरात्मके तत्रैव प्रविष्टा भवन्तीत्यर्थः । भक्तिमार्गेङ्गीकृतास्तु साक्षात् प्रकटे पुरुषोत्तमे सति तद्भजनार्थमुप समीपं गच्छन्तीत्यर्थः ।

भाष्यप्रकाशः ।

ननु विरुद्धधर्माधारत्वाद्धर्मा एव स्वभावबाधका भवन्त्वित्याशङ्क्य तेषामप्यबाधकत्वमाहुः अग्राह्येत्यादि । एतेन ज्ञानादिदौर्घट्यमपि परिहृतम् । एवं बाधकं परिहृत्य सूत्रं व्याकुर्वन्ति । इतिशब्द इत्यादि । आत्मशब्दार्थस्तु सर्वान्तर्यामित्वादिरूपः पूर्वोक्त एव । एतावान् परं विशेषो यज्ज्ञानिनां प्रत्यग्रसत्वप्राधान्येन तत्स्फूर्तिर्भक्तानां तु सर्वात्मत्वपरमप्रियत्वानन्दप्राधान्येनेति । अत उक्तरीत्या यस्य मार्गस्य या रीतिः क्रमाक्रमादिना व्युत्पादिता, तया रीत्या तं प्राप्नुवन्तीत्यर्थः । उपगमनं विभजन्ते । ज्ञानमार्ग इत्यादि । भजनार्थमुप समीपे गच्छन्तीति ।

रश्मिः ।

इति व्युत्पत्तिः । एतेनेति । विरुद्धधर्माधारत्वेन । परिहृतमिति । ईक्षतेर्नाशब्दमित्यत्र यावद्धर्मवत्त्वेन ज्ञानस्नेहदौर्घट्यम् । बाधकमिति । आत्मोपगमने आत्मग्राहणे च बाधकमगृह्यत्वादिकम् । भाष्ये । पुरैवेति । उभयव्यपदेशाधिकरणे । प्रकृते । सर्वान्तरिति । सर्वान्तर्यामित्वमादिर्यस्या व्यक्तेः सा सर्वान्तर्यामित्वादिः, जातिव्यक्तिभ्यां रूप्यत इति तथा । पूर्वोक्त इति । अत्रैव पूर्वमन्तर्यामिब्राह्मणोपन्यासे 'नायं सुखापो भगवान् देहिनां गोपिकासुतः । ज्ञानिनां चात्मपोतानां यथा भक्तिमतामिहे'त्यनेनोक्तं तारतम्यं सर्वेषां जीवानामिति भाष्य आहुः एतावानिति । प्रत्यग्रसत्वं यद्यपि प्रतिदेहमात्मा तत्त्वं तथापि ज्ञानिनां ज्ञानकृते विशेषे प्रतीचो रसत्वं कारणदृष्ट्या शान्तरसत्वं तत्प्राधान्येनेत्युक्तम् । न तु प्रत्यगात्मत्वेन, 'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थिति'रितिवाक्यात् । प्रत्यग्रस एवात्मपोतः । संसारसागरे प्रत्यग्रसत्वे तरणमिति 'शान्तो दान्त उपरतस्तितिक्षु'रित्युक्त्वा 'त्मन्येवात्मानं पश्ये'दिति श्रुतेः । 'ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः परः,' 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इति वाक्याभ्यां सर्वात्मत्वं ज्ञानिविषयः । भक्तत्वेऽभेदस्य प्रतिबन्धकत्वेन परमप्रियत्वेन स्फूर्तौ कर्मकर्तृव्यपदेशादत एव फलत्वेन सच्चिदानन्देष्वानन्दप्राधान्येनेति । एतावत्पर्यन्तं ज्ञानमार्गे ज्ञानादित्यन्तं भक्तिमार्गे सत्यन्तं भाष्यमपि विवृतम् । उभयोः फक्किकयोरग्रेतनभाष्यार्थमपि वदन्तः प्रकृतस्यातो हेतोरिति भाष्यस्यार्थमाहुः अत उक्तरीत्येति । व्याख्येये इमे, यस्येति व्याख्यानम् । क्रमाक्रमेति । क्रमः पापाभावानन्तरं मर्यादाभक्तिरक्रमः पापसत्त्वेपि पुष्टिभक्तिरिति । व्युत्पादितेति । तत्रोच्यत इत्यादिभाष्येण । यं धर्मं पुरस्कृत्येत्यस्यानुग्रहं पुरस्कृत्य भक्तिमार्ग उभयविधे ज्ञानमार्गे तु प्रतिजीवं विचारितफलसाधनेच्छां पुरस्कृत्येत्यर्थात् । विभजन्त इति । भक्तिज्ञानभेदेनेत्यर्थः । ज्ञानमार्ग इत्यादीति । अर्थौ तूभयोः फक्किकयोरुक्तौ पूर्वफक्किकार्थकथनावसरे । उप समीप एवेति भाष्यार्थो नोक्तः स उच्यते । ज्ञानेन स्वरूपस्थित्या वास्तविकाणवः महत्त्वार्थमुपसमीप एव गच्छन्ति, यतोक्षरात्मके स्वमहद्रूपे विभूत्यात्मके प्रतिमादावेव प्रविष्टा भवन्ति, 'अणोरणीयान् महतो महीया'निति श्रुतेः । उक्तरीत्यात्रैव ज्ञानमार्गे त्वित्याद्युक्तरीत्या ।

एवं श्लेषोक्तिरियमिति ज्ञायते। सम्प्रदायानुवृत्तिरपि भगवदिङ्गितेत्येतादृशाः स्वयं येन मार्गेण फलं प्राप्ताः, तं मार्गमन्यानपि ग्राहयन्त्युपदेशैः, अत्रोभयत्राप्यात्मत्वमेव हेतुः, अन्यथा आत्मारामस्य सर्वनिरपेक्षस्यैवंकरणासम्भवेन मोक्षमार्गाप्रसिद्धिरेव स्यात्। तस्मात् सर्वथानावृत्तिरेव श्रुत्यभिमतेति ज्ञेयम्॥३॥

भाष्यप्रकाशः ।

मुक्तोपसृप्यत्वस्य पूर्वमुक्तत्वात् 'ब्रह्मविदाप्नोति पर'मित्युक्तायाः परप्राप्तेः, 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'त्यत्र ब्रह्मसाहित्येन श्रावणाद्भूमविद्यायामात्ममिथुनत्वस्य श्रावणाच्च तथेत्यर्थः ।

अत्रेदं सम्पद्यते । भक्ता हि 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेन अमृतत्वमेती'ति श्वेताश्वतरश्रुत्या, 'आत्मेत्येवोपासीते'त्युक्त्वाग्रे, 'आत्मानं प्रियमुपासीत ईश्वरो हि तथा स्यात्, आत्मानं लोकमुपासीत'इत्येकस्मिन् प्रकरणे त्रिधोपासनश्रावणात् 'ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते, एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुख'मिति गीतास्मृतेश्च स्वात्मतया स्वात्मात्मतया च प्रियतया देहमारभ्य यावन्तो भजनीयाः प्रियास्तदात्मत्वेन चोपासत इति तत्क्रतुन्यायात् पृथगेव समीपे तिष्ठन्ति । ज्ञानमार्गीयास्तु 'त्वं वै अहं भगवो देवते अहं वै त्वं भगवो देवते' इति व्यतिहारेण स्वात्मतयैवोपासते इति तत्क्रतुन्यायात्तत्रैव प्रविशन्ति । अतो ज्ञानिभक्तयोरुभयोरप्यात्मत्वेनोपासनस्य तुल्यत्वेपि उपासनाप्रकारभेदादेवं फलभेद इति । उभयसङ्ग्रहस्य सूत्राभिप्रेतत्वं स्फुटीकुर्वन्ति एवमिति । एतादृशशब्दप्रयोगेण । अन्यथा चेदभिप्रेयात्, गृह्णन्तीत्येवं ब्रूयादतस्तथेत्यर्थः । एवं मार्गद्वयस्य मुख्यं फलं निरूपितम् । अवान्तरफलं वक्तुं शेषं व्याकुर्वन्ति । सम्प्रदायेत्यादि । इतिशब्दो हेतौ व्याख्यातस्तत्रात्मत्वस्य प्राप्तौ हेतुत्वं युक्तम्, तस्या भगवत्सम्बन्धित्वात्। ग्राहणं तु ज्ञानिधर्मः। तत्रात्मत्वस्य कथं हेतुत्वमित्याशङ्कायां तत्रापि तस्य हेतुत्वं व्युत्पादयितुं मार्गद्वयग्राहणेपि तस्य हेतुत्वं व्यक्तीकुर्वन्ति उभयत्रेत्यादि । उभयत्रेति । मार्गद्वयोपदेशे । सिद्धमाहुः तस्मादित्यादि । यस्माद्भगवतः सर्ववशित्वं सर्वेशानत्वं चेति न तत्स्वभावस्य पर्यावृत्तिः, किन्तु कर्मण एव स्वभावपर्यावृत्तिरतस्तथेति तात्पर्यभ्रमेण

रश्मिः ।

भाष्यार्थत्वात् । पूर्वमिति । प्रथमाध्याये तृतीयपादे । तथेत्यर्थ इति । तद्भजनार्थमुप समीपे गच्छन्तीत्यर्थः । उभयेति । भक्तिज्ञानसम्बन्धिनोः सङ्ग्रहस्य । एतादृशेति । उपगच्छन्तीति श्लिष्टशब्दप्रयोगेण । तथेति । श्लेषोयमिति ज्ञायते इत्यर्थः । शेषमिति । ग्राहयन्ति चेति सूत्रशेषम् । सम्प्रदायेत्यादीति । सम्प्रदायाश्चत्वारः श्रीविष्णुस्वामिरामानुजमाध्वनिम्बार्कनामानः । इङ्गिता प्रापिता । 'इङ्गितं गतिचेष्टयो'रिति विश्वः । एतादृशा इति । सम्प्रदायिनां ज्ञानिन आचार्याः । प्राप्ताविति । उपगच्छन्तीत्यस्य प्राप्नुवन्तीत्यर्थ उक्तः । तत्र प्राप्तौ । तस्या इति । प्राप्तेः । भगवत्प्राप्तिरित्येवं भगवत्सम्बन्धित्वात् । शेषं व्याकुर्वन्ति स्म । ग्राहणमिति । ज्ञानीति एतादृश इत्यादिभाष्ये ज्ञानं दत्तमित्युक्तेः । अत्र ज्ञानिधर्मः । तत्रापीति । ज्ञानिधर्मेपि । तस्यात्मत्वस्य । तस्येत्यात्मत्वस्य । अतस्तथेतीति । तस्मात्सर्वथानावृत्तिरेव श्रुत्यभिमतेति ज्ञेयमित्यर्थः । तात्पर्येति । कर्ममोक्षाय कर्मणः स्वर्गादिफलसाधकत्वे तात्पर्यभ्रमस्तेन । तात्पर्यं तु आत्मसुखे, कर्ममोक्षे च । एतद्विषयक-

---

१. एतेन 'अर्चायामेव हरये' इति भागवतपद्यं व्याख्यातम्, 'मैत्र्याद्ब्रह्मन्येव जुहोति स' इति च । एवं च पृथक्त्वेनापि विधानात् ।

नन्वात्मत्वेनोक्तिरुपासनार्थेति नोक्तं साधीय इत्यत उत्तरं पठति ।

न प्रतीकेन हि सः ॥ ४ ॥

अतद्रूपे तत्त्वेनोपासनं हि प्रतीकमित्युच्यते । तथा च तादृशेन तेन स मोक्षो न भवतीत्यर्थः । श्रुतिसिद्धत्वान्नास्ति मोक्ष इति न वक्तुं शक्यमिति भावः ।

भाष्यप्रकाशः ।

क्रियमाणकर्ममार्ग एवावृत्तिः, फलम्, न तु तात्पर्यज्ञानपूर्वकं भक्तिमार्गीयत्वेन ज्ञानमार्गीयत्वेन वा क्रियमाणे निवृत्तिरूपे कर्मणीत्यनावृत्तिफलकत्वाज्ज्ञानभक्ती उत्तमे इत्यर्थः ॥ ३ ॥

न प्रतीकेन हि सः ॥ ४ ॥ सूत्रमवतारयन्ति नन्वित्यादि । अयमर्थः । आत्मत्वेन ज्ञानस्याभेदे तादात्म्ये वा पर्यवसन्नत्वात्तत्तन्मार्गरीत्या आत्मत्वेन ज्ञानात्तत्तन्मार्गीयो मोक्षोनावृत्तिरूपः फलमित्युक्तम् । तदयुक्तम् । 'पादोस्य विश्वा भूतानि', 'ममैवांशो जीवलोक' इत्यादिष्वात्मा ब्रह्मांशत्वेन सिद्धः । 'अहमात्मा गुडाकेशे'त्यत्र विभूतिरूपत्वेन च । एवं सति यथा 'सर्वं खल्विदं ब्रह्मे'त्यादौ सर्वादिर्ब्रह्मत्वेनोपासनार्थं स्तूयते, तथा 'आत्मेत्येवोपासीते'त्यादौ स्वात्मा परमात्मत्वेनोपासनार्थं स्तूयते । एवं सति तत्र यथा ब्रह्मत्वेनोक्तिरुपासनार्था, तथा स्वात्मन्यपि परमात्मोक्तिरिति न पूर्वोक्तं साधीय इत्यर्थः ।

व्याकुर्वन्ति । अतद्रूप इत्यादि । सत्यमात्मत्वेनोक्तिरुपासनार्था, परन्तु तया श्रुत्या आत्मत्वमवगत्योपासितव्यमिति बोध्यते, न त्वात्मत्वज्ञानस्य फलं निषिध्यते । तस्या अकृत्स्नत्ववारणार्थत्वात् । पूर्वं 'प्राणन्नेव प्राणो भवती'त्याद्युक्त्वा 'तान्येतान्यस्य कर्मनामान्येव स योत

रश्मिः ।

तात्पर्यज्ञानपूर्वकं भक्तिमार्गीयत्वेनाधिदैविकचित्तशुद्ध्यर्थम् । ज्ञानमार्गीयत्वेनाध्यात्मिकचित्तशुद्ध्यर्थं वा क्रियमाण इत्यर्थः । इत्यर्थ इति । इतिभाव इत्यर्थः । अत्रार्थशब्दो भाववाचकः ॥ ३ ॥

न प्रतीकेन हि सः ॥ ४ ॥ अभेद इति । अज्ञानोपाधिनिवृत्तिद्वाराऽभेदे पर्यवसन्नत्वम् । स्वमते तु 'तत्त्वमसी'त्यत्र तस्य भावस्तत्त्वमसीतिपक्षे तादात्म्ये तदात्मनो भावस्तादात्म्यं तस्मिन्पर्यवसन्नत्वं तस्मात् । 'ऐतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसी'त्यत्र पूर्वं ऐतदात्म्यपदात् । तत्तन्मार्गरीत्येति । मायावादिमार्गब्रह्मवादिमार्गरीत्या । मोक्ष इति । निःसम्बोधो मोक्षः ससम्बोधो मोक्षः । अहमित्यादि । व्यापकात्मवादिमतयोरिमौ प्रकारौ । अण्वात्मवादिमते प्रकारोंशत्वं तदुक्तम् । अहमस्मत्प्रत्ययगोचरः स्वात्मा शङ्कराचार्यमते । स्वात्मत्वेन जीवब्रह्मवादेन । भास्कराचार्यमते विभूतिरूपत्वेन, जीवानामपि व्यापकत्वात् । कार्यरूपत्वेनेति । सर्वमिदं ब्रह्मेति न प्रयोगः, सर्वमिदं तज्जलानिति प्रयोगोत आहुः । सर्वं कार्यरूपत्वेनेति । घटः पृथिवीत्यत्र यथा पृथिवीत्वेन घटस्य बोधः, न तु घटत्वेन । स्तूयत इति । शङ्कराचार्यमते सोपाधिकः स्तूयते । फलार्थताया इति । अनावृत्त्यर्थतायाः । नन्वित्यादीति । नोक्तमिति । स्तुतेरनावृत्तिफलमित्युक्तं न । षोढा सृष्टिषु मायिकीमादत्याहुः । सत्यमित्यादिना । फलमनावृत्तिः । तस्या इति । अनावृत्तेः । आवृत्तौ तु फलाकृत्स्नता स्यात् । 'न स पुनरावर्तत' इति श्रुतौ फलं भगवान् । पूर्वमिति । आत्मेत्येवोपासीतेत्यस्याः पूर्वम् । इत्याद्यीति । आदिना 'वदन् वाक् पश्यन् चक्षु'रित्यादि । अस्येति । अव्याकृतस्याकृत्स्नस्य । कर्मनामानीति । प्राणनादिकर्मकृतानि । न इत्यस्माकं वागादीनां मध्ये । योत इति पाठे यः अतः कृत्स्नतापादकत्वात् । वागादीनां मध्ये एकैकमुपास्ते । एकैके कृत्स्नो न

अथवा आत्मत्वेनोक्तिरुपासनार्थेति वदन् वादी वक्तव्यः। फलार्थमेव तत्। फलं च श्रुत्युक्तस्तत्प्रवेश एवेति त्वयापि वाच्यम् । एवं सत्यादौ ज्ञानमार्गेनुप-

---

भाष्यप्रकाशः ।

एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोन्त एकैकेन भवती'त्युक्त्वा अकृत्स्नत्ववारणार्थम्, 'आत्मेत्येवोपासीते'ति वदन्नग्रे, 'अत्र ह्येते सर्व एकं भवन्ती'त्याह । तेनात्मत्वात् सर्वरूपस्य प्राणादिनैकदेशरूपेण यदुपासनं तत्प्रतीकरूपम्, तादृशेन तेन मोक्षो न भवतीति सिध्यति, न त्वात्मत्वेन ज्ञानान्मोक्षो न भवतीति । 'अत्र ह्येते सर्व एकं भवन्ती'त्यनेन कृत्स्नत्वरूपस्य फलस्यात्मोपासने बोधितत्वात् । कृत्स्नत्वं सर्वभावपूर्वकक्षा, सर्वभावश्च मोक्षपूर्वकक्षेति तत्रैव पुरुषविधब्राह्मणे 'तद्धैतत् पश्यनृषिर्वामदेवः प्रतिपदे' इत्यत्र सिद्धम् । अतो मोक्षपूर्वकक्षाया अत्र बोधनादात्मनः परमात्मत्वेनोपासनायां मोक्ष एव फलमिति सिध्यति । तथा च फलस्यापि वाक्यतात्पर्यनिर्णायकत्वान्मोक्षरूपेण फलेनात्मोपासनबोधकश्रुतितात्पर्यं निर्णीयते । अतः **श्रुतिसिद्धत्वान्न मोक्ष इति न वक्तुं शक्यमिति** भावोनेन सूत्रेण बोध्यते । अत आत्मनः परमात्मत्वेनोपासनं प्रतीकोपासनमिति तवाभिमतमसङ्गतमित्यर्थः ।

अस्मिन् पक्षे आत्मत्वेनोपासनस्याप्रतीकोपासनत्वाज्ज्ञानभक्त्योः फलवत्ता यद्यप्यायाति, तथापि न हीति पदद्वयं सूत्रे व्यर्थं स्यादित्यतः प्रकारान्तरेण सूत्रं व्याकुर्वन्तोवतारयन्तिं। अथवेत्यादि । **तदिति** । उपासनम् । उपासनस्य फलं च 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुत्युक्तस्तस्मिन् ब्रह्मण्युपासकस्य जीवस्य प्रवेश इति त्वयापि वाच्यम् । अन्यथा उपासनविधानस्य वैय-

रश्मिः ।

भवति प्रविष्टोपि । यद्वा । एकैकेनेति तृतीयान्तम् । एकैकेन प्रतीकेन वेदनं न भवतीत्यर्थः । **सर्वभावेति** । कृत्स्नत्वे सर्वभावः सर्वत्वमात्मोपासने भवतीति कृत्स्नत्वं सर्वभावस्य पूर्वकक्षा । भावपदेन सर्वत्वेन भावो भक्तिर्भवतीत्युक्तम् । **पूर्वकक्षेति** । सर्वात्मकब्रह्मभवनस्य पूर्वकक्षा । 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणा'मिति श्रुतेः । **तत्** तस्मात् **प्रत्यबुध्यत** आत्मानं यथावत् प्रबोधितवान् । **तदभवत्** सर्वात्मकं ब्रह्माभवत् । अग्रे 'तद्धै तत्पश्यन्नि'ति श्रुतिः बृहदारण्यके पुरुषविधब्राह्मणे । **शाण्डिल्येति** । छान्दोग्ये 'असौ वा आदित्यो देवमध्वि'त्यारम्भके प्रपाठकेस्ति । **ब्रह्मभावरूपमिति** । **एतमित** इति श्रुतावेतमात्मानं इतः प्रपञ्चात् प्रेत्य मृत्वेत्यभिसम्भवितास्मीति श्रुत्यर्थात् । अभिसम्भविता प्राप्ता । अभितः सम्बन्धानवगाहि ज्ञानं ब्रह्म तदपि प्राप्ता । समिति सम्यक्त्वं सर्वरूपत्वेन, विपरीतं वा । अत उक्तं **ब्रह्मभावरूपमिति** । ब्रह्मात्मनोब्रह्मणो मुख्यत्वप्रसिद्धेः । **श्रुतिसिद्धत्वादिति** भाष्यं विवृण्वन्तिस्म । **अत इति** । आरोपितत्वात् मिथ्यात्वेन मोक्षासाधकत्वात् । **परमात्मत्वेनेति** । आरोपितेन । **असङ्गतं** मोक्षाजनकत्वात् । न च'सत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहत' इति मोक्षोपपत्तिरिति शङ्क्यम् । 'स्वयमेवात्मनात्मानं वेत्थे'ति स्मृतिविरोधात् । अतोसत्ये वर्त्मनीत्यप्येकः पक्षो न सर्वथा । **अप्रतीकोपासनयेति** । चित्तशुद्धिद्वारेति ज्ञेयम् । षष्ठ्यन्तपाठे तु ज्ञानविशेषणम् । **फलं चेति** भाष्यं विवृण्वन्ति स्म । **उपासनस्येति** । 'ब्रह्मैव स'न्निति श्रुतिः शारीरब्राह्मणेस्ति । **त्वयापीति** । आवरणभङ्गातिरिक्तमनङ्गीकुर्वंस्योऽभिन्नेन । यद्वा । त्वयाप्यस्मदाग्रहेण वाच्यम् । **उपासनेति** । अर्थवादत्वेपि उक्तयुक्तियुक्तवेदाः प्रमाणमिति । उपपत्तिमिति पाठो व्याकृतः । अनुपपत्तिमितिपाठे तु इति शेष इति भाष्ये

पत्तिमाह । न प्रतीकेनात्मभूते ज्ञानिन उपगमः पूर्वोक्तः प्रवेशः सम्भवतीति शेषः । भक्तिमार्गेपि तामाह न हि स इति । न हि प्रतीकोपासने स लोकवेदप्रसिद्धः पुरुषोत्तमोस्त्युपास्यत्वेन, येन तत्प्राकट्यं स्यात्, तदुपगमनं चेत्यर्थः । एवं ज्ञानभक्त्योः फलसत्ता साधिता ॥ ४ ॥

ननु 'सर्वं खल्विदं ब्रह्म,' 'आत्मैवेद५ सर्वं'मित्यादिश्रुतयः सर्वत्र ब्रह्मदृष्टिं मुक्तिसाधनत्वेनोपदिशन्ति, सा च प्रतीकात्मिकैवेति कथं प्रतीकोपासनस्य न मोक्षसाधकत्वमिति प्राप्त उत्तरमाह ।

भाष्यप्रकाशः ।

ध्यौपपत्तेः। एवमात्मोपासनस्य फलवत्त्वे सति आदौ पूर्वं ज्ञानमार्गेनुपपत्तिम्, एकदेशोपासनेन फलाभावबोधिकां युक्तिमाहेत्यर्थः । उपगच्छन्तीति पूर्वसूत्रादनुवृत्य न प्रतीक इति सूत्रभागस्यार्थमाहुः । न प्रतीक इत्यादि । प्रतीक इति । अनात्मभूते मनआदौ ब्रह्मत्वेनोपासिते प्रतीकत्वान्न ब्रह्मणि प्रवेशः फलम्, किन्तु मनआद्युपासनाद्युक्तमेव । अत्र तु ब्रह्मणि प्रवेशस्योपपादितत्वान्न प्रतीकत्वमित्यर्थः। शेषमवतार्य व्याकुर्वन्ति भक्तीत्यादि। तथा च यदीदं प्रतीकोपासनं न स्यात्, अत्रोपास्यः पुरुषोत्तमो न स्यात् । यतोत्र पुरुषोत्तम एवात्मत्वेनोपास्यः, न त्वात्मा पुरुषोत्तमत्वेन । उपक्रमे सृष्टिकर्तृत्वरूपब्रह्मलिङ्गेन, अग्रे च 'आत्मानं प्रियमुपासीते'ति विशेषकथनेन, ईश्वरत्वकथनादिना च तथा निश्चयात् । अतो नेदं प्रतीकोपासनमित्यर्थः । सिद्धमाहुः एवमित्यादि । तथा च मोक्षफलकं ज्ञानिनामात्मत्वेनोपासनं न प्रतीकम् । अकृत्स्नत्ववारणार्थत्वात् । भक्तानां चात्मत्वेनोपासनं पुरुषोत्तमपर्यवसायीत्यतोपि न प्रतीकम् ।

अतः पूर्वोक्तं तवाभिमतमसङ्गतमित्यर्थः । एवमप्रतीकोपासनेन ज्ञानभक्त्योः फलवत्त्वे सिद्धे तयोरनावृत्तिफलकत्वेन तदङ्गभूतकर्मणोप्यनावृत्तावेव पर्यवसानमित्यपि बोध्यम् ॥ ४ ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥ सूत्रमवतारयन्ति नन्वित्यादि । मुक्तिसाधनत्वेनेति । परम्परया साक्षाच्च तत्साधनत्वेन । सा च प्रतीकात्मिकैवेति । ब्रह्मकार्ये ब्रह्मांशे च ब्रह्मदृष्टिरूपत्वात्तथा । तथा चेदं वाक्यद्वयं छान्दोग्यस्थम् । तत्र प्रथमं शाण्डिल्यविद्यास्थम् । तेन शुद्धान्तःकरणस्याग्रे 'यस्य स्यादद्धे'त्यनेन भगवत्प्राप्तिरूपं फलमुक्तम् । द्वितीयं सनत्कुमारनारदसंवादस्थम् । तत्रापि, 'न पश्यो मृत्युं पश्यती'त्यादिना 'तमसस्पारं दर्शयती'त्यन्तेन मुक्ति-

रश्मिः ।

अपि तु न सम्भवतीति काकुर्बोध्या। अनुवृत्त्येति । अत्र क्त्वो ल्यपः स्थानिवद्भावेन कित्त्वं स्वीकृतम्, अतो न गुणः । न प्रतीक इत्यादीति। न प्रतीक इत्येकं पदमित्याशयेनाहुः। अनात्मभूत इति । शेषमिति । न हि स इति तत्र शेषम् । भक्तीत्यादीति । तामित्युपपत्तिं, अनुपपत्तिं च पाठान्तरे । न हीति। भक्तिहंसे स्पष्टम्। पुरुषोत्तमस्य भक्त्येकविषयत्वेनोपास्यत्वाभावात्। उपगमनं पूर्वसूत्रादनुवृत्तोपगच्छन्तिपदप्रकृत्यर्थः । पर्यवसानमिति । उद्देश्यभेदेन चित्तशुद्ध्यर्थं कृतेन कर्मणा ज्ञानभक्तिद्वारानावृत्तिरिति तथा ॥ ४ ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥ तेनेत्यादीति । 'सर्वं खल्विदं ब्रह्मे'त्युपासनेन ब्रह्मदृष्टिरूपेण । अग्रे श्रुत्यग्रे । भक्तिफलं 'यस्य स्यादद्धा प्रत्यक्ष'मितिवाक्येन प्रत्यक्षे लयनियमात्, भगवत्प्राप्तिरू"मित्यर्थः । अतिमुक्तिः मुक्तिरूपमिति । सर्वात्मभावप्रकरणादतिमुक्तिरूपम् । आत्मबोधोपनि-

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

सर्वत्र ब्रह्मदृष्टिर्न प्रतीकात्मिका । सर्वस्य वस्तुतो ब्रह्मात्मकत्वात् । सा च नोपदेशसाध्या, अतो नोपदिश्यते, किन्त्वनूद्यते । सा त्वधिकारोत्कर्षात्

भाष्यप्रकाशः ।

रूपमेव फलमुक्तम् । तच्चोपासनद्वयमपि प्रतीकरूपम् । सर्वरूप आत्मनि प्राणाद्येकदेशदृष्टिवद् ब्रह्मकार्यरूपे जगति ब्रह्मांश आत्मनि च ब्रह्मदृष्टिरूपतयातद्रूपे तत्त्वेनोपासनरूपत्वात् । तस्माच्च मुक्तिरुक्तेति प्रतीकेनापि मुक्तिसिद्धौ फलेन विषयेण च निर्णयाभावादात्मत्वेनोक्तेर्मोक्षफलकत्वोक्तेश्च तादृशप्रतीकनिवारकत्वकथनं न साधीय इत्याशङ्कायामुत्तरमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति सर्वत्रेत्यादि । सर्वस्मिन् प्रपञ्चे या ब्रह्मदृष्टिः, सा न प्रतीकात्मिका । कार्यस्य कारणात्मकत्वेन प्रपञ्चस्य ब्रह्मात्मकतया वस्तुतो ब्रह्मात्मकत्वस्य श्रुत्यभिप्रेतत्वात् । अन्यथा 'सर्वं खल्वि'ति वाक्ये 'तज्जला'निति सर्वविशेषणमुपासनाहेतुत्वेन न वदेत् । 'खल्वि'त्यव्ययं च न वदेत् । तद्विनापि प्रतीकोपासनाया वाचो धेनुत्वोपासनवत्सुखेन सिद्धेः । अत इयं मननात्मिका । अत एवाग्रिमवाक्ये, 'स क्रतुं कुर्वीते'ति शब्दान्तरेण मननमुपदिश्यते, भेददृष्टिजनितभयाभावार्थम् । अन्यथा 'तत्वेव भयं विदुषोमन्वानस्ये'ति श्रुत्यन्तराद्भयापत्तेः । श्वेतकेतुविद्यायामप्यावृत्त्या मननमेव बोध्यते । मैत्रेयीब्राह्मणसनत्कुमारविद्यादिषु त्वनूद्यते, यतः साधिकारोत्कर्षादेव सेत्यु-

रश्मिः ।

षदि प्रसिद्धा । श्रुत्यर्थस्तु लिङ्गभूयस्त्वाधिकरणेस्ति । प्राणादीति । प्रथमान्ताद्वतिः । आत्मत्वेनेति । उक्ते परमात्मत्वारोपेणोक्ते जीवे आत्मत्वेन तादृशप्रतीकोपासनस्य निवारकत्वकथनं पूर्वसूत्रे न साधीय इत्यर्थः । तज्जलानिति । तज्जायत इति जं, लीयत इति लं, अनितीत्यन्, उभयत्र तस्मिन्निति ज्ञेयम् । तज्जं च लं च अन् च तज्जलान्, तज्जलान् सर्वम् । अव्ययमिति । निश्चयार्थकम् । तद्विनेति । विशेषणान्वयद्वयं विना । वाच इति । 'वाचं धेनुमुपासीते'तिश्रुतिः । षष्ठ्यन्ताद्वतिः । आवृत्त्येति । नवकृत्व उपदेशान्नवावृत्तिभिः । तथा च श्रीभागवते 'सर्वभूतेषु मन्मति'रित्युक्तसाधनेन प्रेम लभत इत्युपासनाव्यतिरेकः । मुक्तीनामनेकविधत्वात् । अतो न ब्रह्मदृष्टिं मुक्तिसाधनत्वेनोपदिशन्तीति भाष्यविरोधः । सा चेति भाष्यं विवृण्वन्ति स्म । मैत्रेयीति । आदिना प्राणविद्या । सा च छान्दोग्ये उपकोसलजाबालविद्या । जाबाल आचार्यः । सा च प्राणं च ह अस्मै तदाकाशं चोचुः । अस्मा उपकोसलाय । अनूद्यत इति । न तूपदिश्यते । भक्तिविद्यायाः पुराणादिष्वपि दर्शनात्, वेदेपि 'अग्नये जुष्टं निर्वपामी'ति भक्तिरुपदिश्यते इति । सिद्धस्य कथनमनुवाद इति । सा त्विति भाष्यविवरणम् । यतः सेति । अधिकारेति । दैव्यां सम्पदि जातस्य शरणगमने श्रुतात्मनिवेदित्वे च जिज्ञासुत्वामात्सर्यश्रवणादरवत्त्वं श्रोतुरधिकारः । श्रुतभागवतत्वचातुर्यगुरुज्ञानवत्त्वं वक्तुरधिकारः । अयं हीनाधिकारः, अस्मादुत्कर्षः मध्यमेधिकारे, भगवत्कृपाभगवदीयत्वभगवदेकत्वरूपवक्तृश्रोतृगुणरूपे । ततोप्युत्कर्षः उत्तमेधिकारे, पारंपर्यकृतदोषाभावो भगवत्कृपया ॥ १ ॥ भगवत्कृपया स्त्रीपारंपर्यकृतदोषाभावः ॥ २ ॥ जीवाज्ञाननिवृत्त्या परमकृपा तया पोषकान्नशुद्धिः ॥ ३ ॥ सम्बन्धिनां भगवत्परतापुरःसरं सामान्यतः सुखप्राप्त्या भगवतः परमकृपा तया सांसर्गिकदोषाभावः ॥ ४ ॥ भगवतः कार्यसमाप्त्या सुखस्थित्यान्येष्वपि भगवत्सुखेन सुखप्राप्त्या आगन्तुकदोषाभावः ॥ ५ ॥ भगवद्रक्षितपुत्रादिसम्पत्त्या विशेषेण सुखप्राप्त्याधिकारिणि परमकृपा ॥ ६ ॥ बीजमुक्तिः ॥ ७ ॥ बीजमुक्तिकार्यस्वत-

स्वत एव भवतीति प्रतीकोपासनस्य न मुक्तिसाधनत्वमिति साधूक्तम् । एतद्बोधनमनेन सूत्रेण ॥ ५ ॥ २ ॥

इति चतुर्थाध्याये प्रथमपादे द्वितीयमात्माधिकरणम् ॥ २ ॥

भाष्यप्रकाशः ।

तीत्यभिप्रायेण । एवं 'मनो ब्रह्मेत्युपासीते'त्यादावपि मनो ब्रह्म इति हेतोस्तत्रोक्तफलार्थमुपासीतेत्येवमुपासनाहेतुत्वेनानूद्यते, न तु विषयत्वेनोपदिश्यते । सा त्वेवं ज्ञात्वोपासने क्रियमाणेऽधिकारोत्कर्षात् स्वत एव भवति । अतस्तत्र मुक्तिफलकथनेन त्वदुक्तेषु प्रतीकेषूपासनेषु न मुक्तिफलकत्वसिद्धिः, अतः पूर्वोक्तं साध्वेवेत्यर्थः । तथा चोपासनावाक्यगतस्यात्मशब्दस्य प्रतीकोपासननिवृत्त्यर्थत्वात् सर्वत्रात्मदृष्टेरप्रतीकत्वादात्मशब्दब्रह्मशब्दयोरैकार्थ्यात् सर्वत्र ब्रह्मदृष्टौ साक्षात्परम्परया च मोक्ष एव फलमिति ज्ञानभक्त्योरनावृत्तिफलकत्वमप्रत्यूहमिति सिद्धम् । न च यदि ब्रह्मदृष्टिर्न कुत्रापि प्रतीकात्मिका, तर्ह्यात्मनोऽप्यन्यतुल्यत्वात् पूर्वसूत्रे आत्मत्वेन ग्राहणमेव कुत उक्तम्, विशेषाभावादिति वाच्यम् । सर्वत्र जडे सदंशमात्रस्य प्राकट्येन जीवात्मनि चिदंशस्यापि प्राकट्येन, 'द्वा सुपर्णा', 'ऋतं पिबन्ता'विति श्रुतिभ्यां सखित्वैककार्यकारित्वयोः श्रावणेन, 'सरूपा' इति साजात्यश्रावणेन, 'त्वं वै अहं भगवो देवते अहं वै त्व'मिति व्यतिहारश्रावणेन च, 'अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः । न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपी'ति छिद्राभावस्मरणेन च विशेषबाहुल्यात् । एतन्निगमयन्ति एतद्बेत्यादि । तथा च ब्रह्मदृष्ट्युपदेशबोधनार्थं नेदं सूत्रम्, किन्तु ब्रह्मत्वस्य फलदाने हेतुत्वेन बोधनार्थमित्यर्थः ।

अन्ये तु 'आत्मेती'त्यादिसूत्रत्रयं प्रत्येकमधिकरणत्वेनोपगच्छन्त आद्येऽधिकरणे शास्त्रोक्तलक्षणः परमात्माहमस्मीति ग्रहीतव्यः, किं वा मदन्य इति संशये मदन्य इति प्राप्तम् । परमात्मनोऽपहतपाप्मादिगुणकस्य तद्विपरीततया ग्रहणस्यायुक्तत्वात् । तथाग्रहणे चेश्वराभावप्रसङ्गात् । स्वस्येश्वरतया ग्रहणेन साधकाभावशास्त्रानर्थक्यप्रत्यक्षविरोधानां प्रसङ्गाच्चेति । अतः

रश्मिः ।

हिर्निगमनहेतुभूतवैराग्यम् ॥ ८ ॥ वैराग्यनिर्गमफलीभूतमुक्तिः, पूर्वजकृतप्रतिबन्धाभावाय पूर्वजमुक्तिः ॥ ९ ॥ लौकिकसामर्थ्यं परीक्षिद्वत् ॥ १० ॥ अलौकिकसामर्थ्यम् ॥ ११ ॥ त्यागकारणीभूतवैराग्यहेतुशापादिना धर्मोन्नतिः ॥ १२ ॥ त्यागसत्सङ्गौ ॥ १३ ॥ एवं क्रमिके इति । एवमधिकारोत्कर्षादित्यर्थः । एवमधिकारोत्कर्षं प्राप्य सा ब्रह्मदृष्टिः । स्वत एवेति सत्त्वाविर्भावोऽत्र द्रष्टव्यः । 'रजसा तु तमो हन्याद्रजः सत्त्वेन चैव हि,' 'सत्त्वं सत्त्वेन हन्या'दिति गीतायाम् । एवं ब्रह्मदृष्टिः 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत' इति वाक्योक्तश्रेयस्सु निविष्टा 'सर्वभूतेषु मन्मति'रिति श्रीभागवतीया प्रेमलक्षणा भक्तिः कारणभूता । प्रेमद्वारा मुक्तिः । ब्रह्मदृष्टाविति । तस्यां सत्यां प्रेमद्वारा मोक्ष इत्यर्थः । निगमयन्तीति । तस्मात्तथेति पञ्चावयवेषु निगमनवत्परप्रतिपत्त्यर्थं सिद्धं निगमयन्ति । अपहतपाप्मेति । भावप्रधानः । अपहतपाप्मत्वादिगुणकस्य । अपहतपाप्मादिगुणविपरीततयाऽस्मत्त्वेन ग्रहणस्य । ईश्वरेति । ईश्वरस्यास्मत्प्रत्ययगोचरत्वे जडत्वापत्त्येश्वराभावप्रसङ्गात् । साधकेति । ईश्वरस्याधिकारिरूपसाधकबोधकानां 'कर्मकर्तृव्यपदेशा'च्चेत्यादीनामभावस्य प्रसङ्गात् । तथाशास्त्रस्य प्रयोजनमुद्दिश्य प्रवृत्तस्यानर्थक्यस्य प्रसङ्गात् । प्रयोजनाभावात् । तथा प्रत्यक्षस्य मदन्यविषयकस्य विरोधस्य प्रसङ्गात् । स्वेति । जीवात्मनस्तस्य तदभिन्नस्य तस्यात्मनोऽपा-

भाष्यप्रकाशः ।

शास्त्रात् प्रतिमासु विष्णुदृष्टिवत् स्वात्मनस्तत्तादात्म्यदृष्टिः कर्तव्या, न तु संसारिणो मुख्य आत्मा परमेश्वर एवेति प्रापयितव्यम् । एवं प्राप्ते, उच्यते । आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः । यतः परमेश्वरप्रक्रियायां जाबाला आत्मत्वेनैवैनमुपगच्छन्ति, 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते' इति ।

तथा अन्येपि 'अहं ब्रह्मास्मी'त्येवमादाय आत्मत्वोपगमा द्रष्टव्याः । ग्राहयन्ति चात्मत्वेनैवेश्वरं वेदवाक्यानि । 'एष त आत्मा सर्वान्तरः', 'एष त आत्मान्तर्याम्यमृतः', 'तत् सत्यं स आत्मा तत्त्वमसी'त्येवमादीनि । यदुक्तं प्रतिमान्यायेन प्रतीकं भविष्यतीति । तदयुक्तम् । गौणत्वप्रसङ्गात् । 'मनो ब्रह्मेत्यादित्यो ब्रह्मे'त्यादौ सकृदेव तद्वचनेन, इह चाहं त्वं त्वमहमित्यसकृद्वचनेन प्रतीकश्रुतिवैरूप्याच्च । 'अथ योन्यां देवतामुपास्तेन्योसावन्योहमिति न स वेद, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'ति, 'सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदे'त्यादिषु भेददर्शनापवादाच्च । न च विरुद्धगुणयोरन्योन्यात्मत्वासम्भवः शङ्क्यः । विरुद्धगुणत्वस्य मिथ्यात्वोपपत्तेः । नापीश्वराभावः शङ्क्यः । शास्त्रप्रामाण्येनास्माभिरीश्वरस्य संसारित्वाप्रतिपादनेन संसार्यात्मनः संसारित्वापोहेनेश्वरात्मत्वप्रतिपादनस्य क्रियमाणत्वेन तदभावात् । नाप्यधिकार्यभावः, प्रत्यक्षविरोधो वा । प्राक्प्रबोधाद् व्यवहारे संसारित्वस्य तद्विषयकप्रत्यक्षस्य चाङ्गीकारेण विरोधाभावात् । 'यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्ये'दित्यादिना प्रबोधदशायामेव श्रुत्या प्रत्यक्षाद्यभावबोधनात्तदानीं च श्रुत्यभावस्यापि, 'अत्र पिता अपिता भवती'त्युपक्रम्य, अग्रे 'वेदा अवेदा' इति वचनेन वेदाभावस्यापीष्टत्वात् । यदपि कैश्चिदविद्याया ब्रह्मणः सद्वितीयत्वादद्वैतानुपपत्तिरिति शङ्क्यते, तदप्येतेनैव प्रत्युक्तम् । तस्मादात्मेत्येवेश्वरे मनो दधीतेति शाङ्करा आहुः ।

तन्न रुचिरम् । परमात्मन्यहङ्ग्रहोपासने साध्ये प्रमाणत्वेनात्मत्वोपगमस्य वक्तुमयुक्तत्वात् । परमात्मनि मुख्यवृत्तस्यात्मपदस्य 'सर्वं खल्विदं ब्रह्म,' 'इदं सर्वं यदयमात्मा आत्मैवेदं सर्व'मित्यादिश्रुतिभिः सर्वस्य ब्रह्मत्वे बोधिते सर्वसङ्ग्राहकतया स्वप्रत्यग्वित्तिवेद्यवाचकाहम्पदतो

रश्मिः ।

वस्तत्तादात्म्यं तस्य दृष्टिः । मुख्य इति । सोपाधिको गौणो मुख्यत्वनिरूपकः । विरुद्धेति । अहतपाप्मत्वापहतपाप्मत्वयोः । तदभावादिति । ईश्वराभावशङ्काभावात् । प्रबोधाज् ज्ञानात् । तद्विषयकेति । संसारिविषयकप्रत्यक्षस्य । प्रत्यक्षादीति । आदिनाधिकारी । एतेनेति । मिथ्यात्वोपपादनेन । परमात्मनीति । जीवे ब्रह्मोपासनानिषेधात् परमात्मनोधिष्ठानत्वमुक्तम् । परमते परमात्मविषयके, 'अहमस्मि ब्रह्माहमस्मि' इत्यादावर्थवादत्वानङ्गीकारादहङ्ग्रहोपासनं तस्मिन् । तत्रापि 'ब्रह्माहमस्मी'ति । ब्रह्मणः प्रसिद्धेः । 'अहं ब्रह्मास्मी'त्यत्र भवन्नये ब्रह्मज्ञानाधीनविद्यासम्बन्धाधीनत्वादस्मच्छब्दप्रयोगस्य 'ब्रह्माहमस्मी'ति प्रबोधे सुकरत्वात् । प्रमाणत्वेनेति । अहङ्ग्रहोपासनश्रुतौ ह्यनधिगतार्थगन्तृत्वं प्रमाणम् । जीवस्यात्मत्वेनोपगमस्तयेति, आत्मोपगमस्य प्रमाणत्वं शब्दार्थयोरौत्पत्तिकसम्बन्धात् । सर्वेति । आत्मपदस्यात्मत्वेन सर्वसङ्ग्राहकतया । स्वप्रत्यगिति । स्वमात्मा प्रत्यक् जीवस्तस्य वित्तिर्ज्ञानं तद्वेद्यः प्रादेशिकः, 'अङ्गुष्ठमात्रो रवितुल्यरूपः कामाहङ्कारसमन्वितो यः, बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोपि दृष्टः', इति श्रुतेर्बुद्ध्यादिगुणेषु प्रदेशेषु भवः प्रादेशिको जीवः ।

---

१. श्रुतौ पश्यतिपदादिति शेषः ।

भाष्यप्रकाशः।

भिन्नार्थत्वेऽहम्पदार्थमात्रत्वप्रमित्यजनकत्वात्। अथ 'आत्मैवेदमग्र आसी'दित्युपक्रम्य 'सोहमस्मी'त्यग्रे व्याहरत्ततोहंनामा अभव'दिति श्रुतेः पर्यायत्वान्न दोष इत्युच्यताम्। तथा सति तेन तदहंवित्तिवेद्यत्वगुणकोपासनं सेत्स्यति, न तु तस्य स्वाभेदपर्यवसायित्वाहंवित्तिवेद्यत्वगुणकम्। ततश्च किमहमिति ग्रहीतव्यः, किं वा मदन्य इति संशयाकारासङ्गतिः। तत्रास्मत्पदाभ्यां प्रतिशरीरं भिन्नस्य स्वाहंवित्तिवेद्यस्यैव बोध्यमानत्वात्। न चोपाधेर्मिथ्यात्वात् तदनादरेण घटाकाशमहाकाशन्यायात्तयोरभेदस्यैव सिद्धेर्न दोष इति वाच्यम्। मिथ्यात्वेपि यावद्व्यवहारं तत्सत्तायां भेदाभावस्योपगन्तुमशक्यत्वात्। न च जाबालवाक्यादभेदोपगमनं शङ्क्यम्। तत्रापि 'देवते' इति द्विवचनेन देवतापदस्य सम्बुद्धित्वपक्षेपि स्वप्रत्यक्पराग्वित्तिवेद्यत्वाभ्यां च भेदस्यैव बोधनात्। न च व्यतिहारानुरोधादभेदः शङ्क्यः। तस्य भेदविरुद्धस्वभावे तादात्म्यरूपे अभेदेप्युपपन्नत्वेनाभेदोपासनास्तुत्यर्थतया भेदाभावरूपतदगमकत्वात्। 'त्वं तु भागवतेष्वहम्,' 'आयुधानामहं वज्र'मित्यादावहम्पदस्य विभूतावपि प्रयोगेण 'त्वं वाहमस्मी'त्यहम्पदस्य त्वद्विभूत्यात्मकोस्मीत्यर्थस्य, 'अहं वै त्वमसी'त्यत्र विभूत्यात्मनाभेदस्य शक्यवचनत्वाच्च। नापि 'अहं ब्रह्मास्मि,' 'तत्त्वमसी'त्यादिविरोधः। तत्रापि सुवर्णशकले सुवर्णबुद्धिवद् ब्रह्मांशे ब्रह्मबुद्धेरुपपन्नत्वेन तदविरोधात्। 'मामेव विजानीही'त्यादिवदाविष्टवाक्यादिरूपत्वेनाप्युपपत्तेश्च।

रश्मिः।

तस्य वाचकादहम्पदत एकात् सर्वसङ्ग्राहकात्मपदाद्भिन्नार्थत्वे अहम्पदार्थेति। आत्मत्वस्यापि सर्वान्तर्गतत्वात् ग्राह्य। न दोष इति। 'सोह'मित्यनयोरात्माहमिति पर्यायत्वेनात्मपदवदहम्पदस्यापि सर्वसङ्ग्राहकतयाहम्पदस्याहंपदार्थमात्रत्वप्रकारिका, अहम्पदार्थमात्रविशेष्यिका प्रमितिस्तज्जनकत्वरूपो दोषो न। तेन तदहमिति। 'सोहमस्मी'त्युपासनेनात्माहंवित्त्या वेद्यत्वं गुणो यस्मिन्नुपासने तत्। तस्येति। 'सोहमस्मी'त्युपासनस्य स्वस्यात्मनो जीवेनाभेदपर्यवसायोस्यास्तीति स्वाभेदपर्यवसायि स्वं तेन सहाहंवित्तिवेद्यत्वं जीवनिष्ठं गुणो यस्मिन्नुपासने तत्। ग्रहीतव्य इति। तव्यस्याकित्वान्न सम्प्रसारणं कृतम्। गृहीतव्यइति सम्प्रसारणं चिन्त्यम्। असङ्गतिरिति। अभेदान्वयासम्भवादसङ्गतिः। तत्रास्मदिति। 'सोहमस्मि' 'ब्रह्माहमस्मि' इत्यहङ्ग्रहोपासनयोः। स्वाहंवित्तीति। स्वेनात्मना सहाहंवित्तिस्तया वेद्यस्य। तयोरिति। आत्मजीवयोः। न दोष इति। संशयाकारासङ्गतिदोषो न। मिथ्यात्व इति उपाधेर्मिथ्यात्वेपि खपुष्पवन् मिथ्यात्वाभावः यतो यावद्व्यवहारं सत्ता व्यावहारिकीति श्रीभागवतप्रसिद्धा तस्याम्। जाबालेति। 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते' इतिवाक्यात्। भगवो भगवन्। स्वप्रत्यगिति। स्वमात्मा प्रत्यक् पूर्वं पराक् पश्चात्, एवं च स्वं च तौ प्रत्यक्पराञ्चौ स्वप्रत्यक्पराञ्चौ तयोर्वित्ती ताभ्यां वेद्यत्वे ताभ्यामित्यर्थः। पूर्ववाक्ये युष्मदर्थस्य प्रत्यग्वेद्यत्वम्। द्वितीये पराग्वेद्यत्वम्। भेदस्यैवेति। त्वमहं अहं त्वमितिप्रतीयमाननिराकार्यभेदस्य। एवकारोप्यर्थे। तथा च देवदत्तो ममात्मेतिप्रतीतौ निराकार्यभेदस्येव देवदत्तपदस्यात्मपरत्वम्, न तु देहपरत्वमिति। अत्रापि प्रतिदेहं गच्छतीति प्रत्यग्जीव इति व्युत्पत्तिः। पूर्वत्वं तस्य। व्यतिहारेति। 'त्वमहं अहं त्वमिति व्यतिहारः। तस्येति। व्यतिहारस्य। तादात्म्यरूपे स्वप्रतियोग्यसम्बन्धरूपे। स्वमभेदः। यथा घटानामभेदस्तादात्म्यरूपः। नाभेदेति। न अभेदेनोपासना नाभेदोपासना तत्स्तुत्यर्थताऽभेदारोपेण तयेत्यर्थः। भेदाभावरूपाभेदागमकत्वात्। त्वं त्विति। उद्धवः, मामेवेतीन्द्रप्रतर्दनसंवादे। अत्र भगवदाविष्ट इन्द्रः। आविष्टेति। भगवदाविष्टजीवभेत-

भाष्यप्रकाशः ।

अत एव, 'एष त आत्मे'त्यादिषु ब्राह्मणवाक्येष्वप्यात्मपदमेवोक्तम्, न तु, त्वम्पदमहम्पदं वेति युज्यते । किञ्च । आत्मनः स्वप्रत्यग्वित्तिवेद्यस्य च सर्वथा भेदाभावे, 'अथातोहङ्कारादेश'इत्यनन्तरं 'अथात आत्मादेश' इति पुनर्नोपदिश्येत । तस्मात् स्वात्मेश्वरयोर्भेदविरुद्धस्वभावाभेदेनैवोपासना युक्ता, न तु भेदाभावरूपेणाभेदेन । एवमेव श्रीभागवतेप्युच्यते । 'आत्मानं चिन्तयेदेकमभेदेन मया मुनि'रिति, न तु स्वाभेदेन मामिति । 'अथ योन्यां देवतामुपास्तेन्योसावन्योहमिति न स वेद यथा पशुरेवं हि स देवाना'मिति भेदोपासननिन्दापि, न हि निन्दान्यायेन पूर्वोक्ताभेदोपासनास्तुत्यर्थत्वादुपपन्ना । एवमन्यान्यपि वाक्यानि बोध्यानि । एवञ्च प्रतिमादौ विष्णुबुद्धेः प्रतीकत्वं यदुक्तम्, तदपि तथा । सर्वस्य ब्रह्मात्मकत्वेन तत्र विष्णुबुद्धेः प्रतीकत्वाभावात् । अतद्रूपे तत्त्वेनोपासनस्यैव भवद्भिः प्रतीकत्वोपगमात्, यदपि, वेदानामप्यभावः प्रबोधे इत्युक्तम् । तदपि तथा । 'यत्र त्वस्य सर्वमात्मैवाभू'दित्यत्र सर्वस्य नाशाकथनेनात्मभावस्य च कथनेन, 'वेदा अवेदा' इत्यत्रापि ज्ञानाद्विकल्पबुद्धिमात्रबाधेन वस्तुस्वरूपाबाधात् स्वरूपतो वेदाभावस्य वक्तुमशक्यत्वादिति । यदपि, न प्रतीकसूत्रे प्रतीकोपासने आत्म-

रश्मिः ।

केतू प्रति वाक्यादिरूपत्वेन । आदिना 'श्रद्धत्स्व सौम्ये'तिश्रद्धावाक्यं श्वेतकेतुं प्रति । व्यतिहारवाक्यमन्यान् प्रति । तेनाविष्टानां वाक्यादि, आविष्टवाक्यादि तत्स्वरूपत्वम् । सम्बन्धश्च षष्ठ्यर्थो न कर्मसम्बन्धो विषयविषयिभावोऽतो न द्वितीयापत्तिः । अत इति । आविष्टवाक्यादिरूपत्वात् । आत्मपदमिति । असन्देहायात्मपदम् । एवकारार्थमाहुः न त्विति । आत्मानं चिन्तयेदिति । अभेदस्तादात्म्यरूपस्तेन । न तु स्वेति । स्वस्य जीवस्याभेदो भेदाभावरूपस्तेन । न हि निन्देति । 'न हि निन्दा निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतु'मितिन्यायेन । पूर्वोक्तेति । तादात्म्यरूपाभेदोपासना स्तुत्यर्थत्वात् । अन्यानीति । 'मद्धियार्चये'त्यादीनि । 'ज्ञानी त्वात्मैव मे मत' इति गीतावाक्यात्तादात्म्यरूपाभेदः । एवं चेति । 'दृष्टमात्रा मत्प्रतिमाहमेवेति मन्तव्ये'ति विष्णुस्वामिनं प्रति भगवद्वाक्ये 'शिलाबुद्धिर्न कार्या च तत्र नारद कर्हिचित् । ज्ञानानन्दात्मको विष्णुर्यत्र तिष्ठत्यचिन्त्यकृत् । तीर्थक्षेत्रस्थिते विष्णौ शिलाबुद्धिं करोति यः । स याति नरकं घोरं पुनरावृत्तिवर्जितम् ॥ अत्र सामान्यतो मूढा हैतुकाः पापबुद्धयः । प्रतिमेति विकल्पन्ते दृष्टानन्दात्मकं वपुरि'ति स्कान्दसह्याद्रिखण्डोत्तरसंहितास्थपाण्डुरङ्गमाहात्म्यवचने च । अत्र पूर्वत्र प्रतिमाहमिति प्रयोगः । प्रतिमा सती अस्मत्पदार्थः सच्चिदानन्दरूपः, एनयोरभेदस्तादात्म्यरूपः । घटयोरिव । यदि तु विष्णुस्वामी दैशिको भगवत्सान्निध्यं चेति प्रतिमा सच्चिदानन्दरूपा तदापि तादात्म्यरूपोऽभेदः, परन्तु 'आश्चर्यो वक्ता कुशलोस्य लब्धे'तिकाठकादाश्चर्याभिनिवेशिनां भेदाभावरूपोऽभेदोऽस्तु भेदप्रतीतावपि । तदुक्तं 'आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः' इति । परत्र । प्रतिमायां शिलाबुद्धिनिषेधाच्छिलात्वेन बुद्धिः प्रतिमाविषयिणी । एवं च सच्चिदानन्दबुद्धिः शिलायां प्राप्ता । दृष्टशास्त्राभ्यामन्यस्या बुद्धेरभावात् । तत्रेत्यस्यानन्दात्मकवपुषि । उपलक्षणमेतत् सच्चितोः । यत्र त्वस्याप्ययमर्थः । तीर्थे सर्वात्मभावोपि । 'नातः परतरं स्तोत्रं नातः परतरः स्तवः, नातः परतरा विद्या तीर्थं नातः परात्पर'मिति निरोधलक्षणग्रन्थवाक्यात् । एतदेवोक्तं सर्वस्य ब्रह्मत्वेत्यादिप्रकाशेन । तथेति । अनुपपन्नम् । प्रबोध इति ज्ञाने । तथेत्यनुपपन्नम् । उपपादयन्ति स्म । यत्र त्वस्येत्यादिना । ज्ञानादिति । आत्मत्वप्रकारकसर्वविशेष्यकज्ञानात् । विकल्पेति । 'आत्मैवाभू'दित्यात्मरूपवेदाः

भाष्यप्रकाशः।

दृष्टिर्न कार्येत्युक्तम्। तत्रापि मनआद्युपासनस्य प्रतीकत्वमेवायुक्तम्। 'सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदे'ति सर्वत्राभेददृष्ट्यर्थं भेददृष्टिनिन्दाङ्गीकारेण भवतामपि सिद्धे सर्वस्य ब्रह्मात्मकत्वे मनआदीनामपि तथात्वात्पुरुषाङ्के पुरुषबुद्धिवत् प्रतीकत्वाभावात्। अथ, 'अङ्गं प्रतीकोवयव' इति कोशादङ्गोपासनैव प्रतीकोपासनेतीष्यते, तदा तु ॐमिति ब्रूमः।

रामानुजाचार्यास्तु, तुशब्दोवधारणे। उपासितुरात्मत्वेनोपास्यम्। उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथात्मा तथा स्वात्मनोपि परं ब्रह्मात्मेत्येवोपासीत। कुतः। एवं ह्युपगच्छन्त्युपासितारः। 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसी'ति। उपासितुरर्थान्तरभूतं ब्रह्म उपासितारः कथमित्युपगच्छतीत्यत्राह। ग्राहयन्ति चेति। इति इममर्थमविदूरोपासितॄन् ग्राहयन्ति। शास्त्राणि तान् प्रत्युपपादयन्ति। 'य आत्मनि तिष्ठन्नात्मनोन्तरः'। 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः', 'ऐतदात्म्यमिदं सर्वम्', 'सर्वं खल्विदं ब्रह्म तज्जला'निति च सर्वस्य चिदचिद्वस्तुनस्तज्जत्वात्तल्लत्वात्तदन्त्वात्तन्नियम्यत्वात्तच्छरीरत्वाच्च सर्वस्यायमात्मा, अतः स त आत्मा। अतो यथा प्रत्यगात्मनः स्वशरीरं प्रत्यात्मत्वाद्देवोहं मनुष्योहमित्यनुसन्धानम्, तथा परमात्मनः प्रत्यगात्मनोप्यात्मत्वात्प्रत्यगात्मानं प्रत्यप्यहमित्यनुसन्धानं युक्तमित्युपपादनात्। सर्वबुद्धीनां ब्रह्मैकनिष्ठत्वेन सर्वशब्दानां ब्रह्मैकनिष्ठत्वमभ्युपगच्छत'स्त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसी'ति व्यतिहारेणोक्तवन्तः। एवं च 'अथ योन्यां देवतामुपास्तेन्योसावन्योहमिति, अकृत्स्नो ह्येषः, आत्मेत्येवोपासीत, सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदे'ति आत्मत्वाननुसन्धाननिषेधः। तेन, 'पृथगात्मानं प्रेरितारं च मत्वे'ति पृथगात्मानुसन्धानं चाविरुद्धम्। अहमिति स्वात्मतयानुसन्धानादन्यत्वानुसन्धाननिषेधो रक्षितः। स्वशरीरात्स्वात्मनोधिकत्वानुसन्धानवत् स्वात्मनोपि परात्मनोधिकत्वानुसन्धानात् पृथक्त्वानुसन्धानविधानं च रक्षितम्। अधिकस्य ब्रह्मणस्तदात्मकत्वात् तस्य च ब्रह्मशरीरत्वान्निषेधवाक्येकृत्स्नो ह्येष इत्युक्तम्। अत उपासितुरात्मत्वेन ब्रह्मोपास्यमिति स्थितमित्याहुः। तदपि शाङ्करादिमतापेक्षयोपपन्नम्॥ ५॥

इति द्वितीयमात्माधिकरणम्॥ २॥

रश्मिः।

त्मकत्वस्यापि सम्भवादकारो नञो वा विष्णुवाचको वेति विकल्पस्तद्विषयिणी बुद्धिस्तन्मात्रबाधेनेत्यर्थः। किन्तु अकारो विष्णुः चासौ वेद इतिसमासः। अत एव न वेदा इत्यस्य निरुक्ते कृतिनो न वेदा इत्यस्यार्थ उक्तः। **अभेदेति।** तादात्म्यादिरूपाभेददृष्ट्यर्थम्। **तथात्वात्** ब्रह्मात्मकत्वात्। **ॐमिति।** अग्रिमाधिकरणात्तथा। विशिष्टाद्वैतार्थं 'यस्यात्माशरीर'मित्यन्तर्यामिब्राह्मणेनाहुः **उपासितेति।** अत्र शरीरमचित्, आत्मा चित्, परमात्मा चिदचिद्विशिष्टः। 'अहमस्मी'ति जाबालश्रुतिः। **भगवो** भगवन्। त्वं विशिष्टः अहं चिदचित उपलक्षणम्। **उपासितुरिति** पञ्चम्यन्तम्। **इतीति।** आत्मैवेत्यवधारणेन। **तन्नियम्यत्वा**दित्याद्यन्तर्यामिब्राह्मणस्थम्। अद्वैतानुरोधेनाहुः **सर्वबुद्धीनामिति।** अन्योहं भिन्नोहम्। **अकृत्स्न इति।** अभेदे कृत्स्नत्वमिति भावः। **आत्मत्वानन्विति।** भिन्नेसच्छब्दवाच्ये। **तेनेति।** विशिष्टाद्वैतेन। **स्वात्मनोपीति।** पञ्चम्यन्तम्। **अकृत्स्न इति।** शरीरं विनाऽकृत्स्नः। **उपपन्नमिति।** भेदस्येवार्थत्वमङ्गीकृतं गीतायामित्यस्मिन्मते विशेषाभावाच्छाङ्करादिमतापेक्षयोपपन्नम्॥ ५॥ इति द्वितीयमात्माधिकरणम्॥ २॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥ (४-१-३.)

छान्दोग्ये 'अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इति, आदित्यमेव भगवो राजन्निति होवाचे'ति। 'अथ होवाचेन्द्रद्युम्न'मित्युपक्रम्य, 'कं त्वमात्मानमुपास्स इति, वायुमेव भगवो राजन्निति होवाचे'ति । एवमेवाग्रे प्रश्नभेदेन वक्तृभेदेनाकाशापःप्रभृतय आत्मत्वेन उपासनाविषया उक्ताः । तत्रैव 'असौ वा आदित्यो देवमध्वि'त्युपक्रम्यान्ते पठ्यते 'य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्त' इति ।

अत्रेदं चिन्त्यते। अत्र प्रतीकोपासनत्वमस्ति, न वेति। अस्तीति पूर्वः पक्षः।

तथाहि । 'सर्वं खल्विदं ब्रह्मे'ति श्रुतौ सर्वमनूद्य ब्रह्मत्वं तत्र बोध्यत इति न क्वचित् प्रतीकोपासनमस्तीति हि पूर्वं निरूपितम् । तच्चोक्तश्रुतिभिः प्रत्येकं तत्त्वेनोपास्यत्वेनोक्त्या नोपपद्यते । ब्रह्मण एकत्वादेकप्रकारकेणैवोपासनेन

भाष्यप्रकाशः ।

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥ एवं प्रधानभूतानां ज्ञानभक्तिसम्बन्धिनीनामुपासनानां फलमुक्त्वा, अङ्गोपासनानां तदुक्तप्रतीकत्वं वारयितुमङ्गोपासनानां फलं विचारयतीत्याशयेनाधिकरणविषयमाहुः छान्दोग्य इत्यादि । छान्दोग्य इति । तत्र वैश्वानरविद्यायाम् । अत्र प्रश्नप्रत्युत्तरे 'चक्षुष्ट्वेतदात्मन' इत्यादिकथनाद् आदित्यस्याङ्गत्वेपीतः पूर्वं प्रश्ने 'दिवमेव भगवो राज'न्नित्यादिना द्युमतेरुक्तत्वेनादित्यमतेरादित्वाभावात्पूर्वं द्युमतेरुक्तत्वेन तत्त्यागे बीजाभावादत्राङ्गोपासनाफलस्योत्कृष्टत्वाभावाद्भक्तिमार्गीयस्य नेदं युज्यत इत्यरुच्या विषयवाक्यमन्यदाहुः तत्रैवेति । छान्दोग्ये मधुविद्यायाम् । संशयमाहुः अत्रेत्यादि । अत्रात्माङ्गेष्वादित्यादिष्वात्मबुद्धित्वबोधनादतद्रूपे तद्बुद्धिरूपतया प्रतीकत्वस्य पुरुषैकदेशे पुरुषबुद्धिवदत्र ब्रह्माङ्गे ब्रह्मबुद्धेरपि मननसिद्धत्वादप्रतीकत्वस्य सम्भवः सन्देहबीजम् । पूर्वपक्षं व्युत्पादयन्ति तथाहीत्यादि । पूर्वं निरूपितमिति । पूर्वाधिकरणीयसूत्रद्वये व्युत्पादितम् । तत्त्वेनेति । ब्रह्मतया । एकप्रकारकेणेति । 'सर्वं खल्विद'मिति श्रुत्युक्तप्रकारकेण ।

रश्मिः ।

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥ ज्ञानभक्तीत्यादि । ज्ञानफलं आत्मेति ज्ञानम् । 'उपगच्छन्ती'ति श्लिष्टप्रयोगेण भक्तिमार्गफलं पुरुषोत्तमसमीपगमनम् । ज्ञानभक्त्युपासनानां चित्तशुद्धिद्वारा जन्यजनकभावः । फलमिति । उपगच्छन्तीतिपदाभिहितम् । तदुक्तेति । न प्रतीकसूत्रोक्तं प्रतीकत्वम् । तेन सायुज्यालौकिकसामर्थ्यभगवत्सेवोपयोगिदेहो वैकुण्ठादिष्विति फलत्रयं मुख्यत्वेन निरूप्यते । 'सालोक्यसार्ष्टिसामीप्ये'त्याद्युक्तं यथायथमत्रैवान्तर्भूतम् । फलमिति । 'उपगच्छन्ती'तिपदेनोक्तं फलम् विचारयतीति । प्रतीकोपासनात्वनिवर्तनेन ज्ञानभक्तिद्वारा फलं विचारयति । चक्षुष्ट्वेतदात्मन इति। चक्षुः तु एतत् आत्मन इतिपदच्छेदः । इत्यादीति । आदिना 'प्राणस्त्वेष आत्मन' इत्यादि । इत्यरुच्येति । यद्यप्यादित्यस्यादिरादित्यादिः, आदित्यः आदिर्यासां ता आदित्यादयः, आदित्यादिश्चादित्यादयश्चादित्यादयः तेषां मतयः आदित्यादिमतय इति समासः सम्भवति, तथापि भाष्यानादृतत्वादरुचिस्तया । अत्रात्माङ्गेष्विति । स्यान्तयोः सम्भवपदेनान्वयः । भाष्ये कप्रत्ययः स्वार्थ इत्याशयेनाहुः सर्वं खल्विदमिति । प्रयोजनेति । स्वोक्तप्रयोजनविशेषाभावे

सर्वेषां फलसिद्धेः, पृथक्पृथगुक्तौ गौरवात्, प्रयोजनविशेषाभावाच्च । तादृशाधिकाराभावात् पृथक् तदुक्तिरिति चेत् । न । सर्वत्र सदा तद्भावनायां तथानुभवस्यापि सम्भवात् । एवं सति वस्तुतः सर्वस्य ब्रह्मत्वं नाभिमतम्, किन्तु यथादित्यादीनां तत्तथा, तथा सर्वस्यापीति प्रतीकोपासनत्वमेव सर्वत्र । तेनैव फलमिति प्राप्ते प्रतिवदति ।

आदित्यादौ या ब्रह्मत्वमतय उच्यन्ते, तास्तु साकारस्यैव ब्रह्मणो व्यापकत्वात् तस्य प्रत्येकमप्यङ्गमुपासितं फलदमित्येकैकाङ्गविषयिण्यस्ता विधीयन्ते । उपपन्नं चैतत् । न हि साकारव्यापकब्रह्मणोऽङ्गं न ब्रह्म, अतो न प्रतीकोपासनत्वं तत्र ।

भाष्यप्रकाशः ।

प्रयोजनविशेषसत्तामाशङ्कते तादृशेत्यादि । तादृशाधिकाराभावादिति । उत्कृष्टाधिकाराभावात् । तथा च येषां न सर्वत्र ब्रह्मत्वेन स्फूर्तिः, तदर्थं पृथगादित्याद्युपासनोक्तिरित्यर्थः । समाधत्ते नेत्यादि । सर्वत्र तद्भावनायां तया उपनयेनोपनीतभानरूपस्य ब्रह्मानुभवस्यापि सम्भवात् । एवं सतीति । अधिकाराभावेप्युक्तरीत्या सर्वत्र ब्रह्मदर्शनसम्भवेप्येवं पृथगुपासनोपदेशे सति । वस्तुत इत्याद्युक्तरीत्या तत्तथा उपासनं प्रतीकम्, तथा सर्वस्यापि ब्रह्मत्वेनोपासनमपि प्रतीकम् । तेनैव चित्तशुद्धिद्वारा मुक्तिरूपं फलं सम्भवतीति पूर्वसूत्रद्वयोक्तमयुक्तमिति प्राप्ते प्रतिवदति । आदित्याद्युपासनानामङ्गोपासनत्वेन फलवत्त्वं वदन् तासु तदुक्तप्रतीकरूपत्वं परिहरतीत्यर्थः । सिद्धान्तं वक्तुं सूत्रं व्याचक्षते । आदित्येत्यादि । एकैकाङ्गविषयिण्य

रश्मिः ।

प्रतियोगिज्ञानरूपप्रयोजनविशेषसत्ताम् । उत्कृष्टेति । ब्रह्मत्वदृष्ट्यधिकारः ह्यादित्यवायुघटपटप्रतिमादिषु तस्याभावादेकप्रकारेणोपासनस्य पृथगुक्तिः । तेन ह्यादित्यवायुघटपटादिरूपौपमन्यवसत्ययज्ञेन्द्रद्युम्नकुलालकुविन्दफलानां तूष्णीकं विचारो ज्ञानमार्गोपयोगी । भक्तिमार्गे तु घटपटादिकार्यस्य ब्रह्मत्वमात्मकृत्स्नतासम्पादकम् । कृत्स्नोपासनया तादृशाधिकारे प्रेम, 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत' इतिवाक्यात् । तदर्थमिति । औपमन्यवसत्ययज्ञेन्द्रद्युम्नाद्यर्थम्, न तु वामदेवाद्यर्थम् । उपनयेनेति । उपनयः समीपनयनं यथा शाब्दं ह्युपनीतं मन्तव्यमितिशङ्कायां श्रोत्रसमीपे शब्देनार्थनयनं श्रावणं प्रत्यक्षमिति । तेनेत्यर्थः । उपनीतस्य ब्रह्मणो भानं तद्रूपस्य । उक्तरीत्येति । उपनीतमानरूपत्वेन ब्रह्मदर्शनमिति रीत्या । आदित्यादीनां पृथक् तदनन्तर्गतत्वेनोपासनोपदेशे सति । तत्तथेति व्याख्येयम् । उपासनं प्रतीकम् । तथा सर्वस्येतिभाष्यार्थमाहुः तथा सर्वस्येति । पूर्वसूत्रेति । 'न प्रतीक' 'ब्रह्मदृष्टि'सूत्रद्वयोक्तं प्रतीकोपासनस्यामुक्तिजनकत्वम् । तास्त्विति । अङ्गोपासनासु । पूर्वपक्ष्युक्तप्रतीकरूपत्वम् । आदित्येत्यादीति । उच्यन्त इति । छान्दोग्ये उच्यन्ते इति । साकारस्येति । विराजः । 'सर्वं खल्विदं ब्रह्मे'ति विषयवाक्ये भाष्ये विराज उक्तेः 'सर्वत्र प्रसिद्धोपदेशा'दित्यत्र । ननु 'न हि स' इति भागे भक्तिमार्गे पुरुषोत्तमोक्तेः 'साकारब्रह्मवादैकस्थापक' इति श्रीसर्वोत्तमग्रन्थोक्तेर्विराट्स्वप्रभुः साकारत्वं कथमिति चेत् । न । अधोक्षजत्वेपि 'यतो वाच' इतिश्रुत्येदमित्थतया यावद्धर्मैरप्रतिपाद्यत्वेपि परब्रह्मणो जगदभिन्ननिमित्तोपादानत्वेन साकारजगत्समवायिनः साकारत्वात् । साकाराद्देवदत्ताज्जायमानस्य तत्पुत्रस्य साकारत्वदर्शनात् ।

अपरश्च । 'असौ वा आदित्यो देवमध्वि'त्युक्त्वा तस्य प्रतिदिक्करश्मीनां कृपावलोकनरूपाणां मधुत्वं निरूप्य, 'तद् यत् प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन, न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति । त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ती'ति पठ्यते । तथा च दर्शनमात्रेण

भाष्यप्रकाशः ।

इति । सूत्रेऽङ्ग इति सप्तम्या वैषयिकाधिकरणबोधनात्तथा । हेतुं व्याकुर्वन्ति उपपन्नमित्यादि । तथा च, 'अङ्गं प्रतीकोऽवयव'इति कोशादङ्गमेव प्रतीकं तदुपासनं चाङ्गोपासनमेव, न तु त्वदुक्तरीतिकप्रतीकोपासनम् । अतस्त्वदुक्तरीतिकात्तस्मान्न फलम् । अस्मदुक्तरीतिकात्तु तस्मात्फलम् । भगवदङ्गमाहात्म्यप्रतिपादने ज्ञानाङ्गभक्तिद्वारा भगवज्ज्ञाने ज्ञानमार्गीयस्योपकरोतीति भावः । अङ्गत्वेन प्रतीकत्वाच्च तावन्मात्रस्यात्मत्वेनोपासनेऽकृत्स्नत्वादन्धत्वदोषकथनमपि युज्यते । न च यद्येवम्, तदा 'अत्त्यन्नं पश्यति प्रिय'मित्यादिफलकथनमपि कथमिति शङ्क्यम् । भगवदङ्गमप्युपासितं फलायेतिभगवन्माहात्म्यज्ञापनेन तत्र भक्तिसिद्ध्यर्थमिति जानीहि । एतासां भक्तिमार्गोपकारार्थम् । द्वितीयवाक्यस्यार्थं परोक्षवादेनाहुः । अपरं चेत्यादि । आदित्यो भगवच्चक्षूरूपः ।

रश्मिः ।

त्रिगुणतन्तुभिर्जायमानस्य पटस्य चित्रपटत्वदर्शनाच्च । वैषयिकेति । मोक्षे इच्छास्ति इत्यत्र यथा । तथेति । एकैकाङ्गविषयिण्यः । उपपन्नमिति । उपपत्तेरित्यत्र भावे क्तिन् । उपपन्नमित्यत्र कर्मणि क्तः इति प्रयोगशुद्धिः कथमितिचेदुच्यते । भावप्रत्ययान्तस्य हेतोः पक्षभिन्ने देवदत्तस्य चक्षुरित्यादौ निश्चितसाध्ये विशिष्टाभिधानं यत्र तत्र कर्मप्रत्ययान्तत्वमिति । तथा चादित्यादिमतयोऽङ्गविषयिण्य उपपत्तेर्दृष्टान्ते देवदत्तचक्षुरादिवदित्यनुमानं फलितम् । तत्रेति । औपमन्यवाद्युपासनेषु । त्वदुक्तेति । लक्षणपुरःसरप्रतीकोपासनम् । तस्मादिति । प्रतीकोपासनात् । अस्मदिति । कोशोक्तलक्षणकात् । अन्धत्वेति । कृत्स्नादर्शित्वादन्धत्वम् । 'अन्धो भविष्यत्यस्मान्नागमिष्य' इति श्रुतिः । श्रुतौ युज्यते । अत्तीति । 'अन्नमत्ति प्रियं पश्यती'ति एतत्फलकथनं 'य एतमेवमात्मानं वैश्वानरमुपास्त' इति श्रुत्या वक्ष्यमाणोपासनायाः मुक्त्यतिरिक्तफलकथनम् । द्वितीयेति । द्वितीयविषयवाक्यस्य । परोक्षवादेनेति । 'परोक्षवादो वेदोय'मितिवाक्यात्तथा । अथवा । तत्तदुपासकानामादित्यादीनां फलत्वेन फलांशे परोक्षवादात्तथा । आदित्यस्य फलत्वात्तत्र परोक्षवादं वक्तुमादित्यस्वरूपमाहुः आदित्य इति । चक्षूरूप इति । विष्णोस्तृतीयरूपशरीरेषु चक्षुषामेवं रूपत्वात् । मधुत्वमिति । 'मनेर्धश्छन्दसी'तिसूत्रेण ज्ञानार्थकस्य मनेर्धप्रत्यय औणादिकः । देवस्य 'अन्तस्तद्धर्मो'धिकरणोक्तस्यादित्यान्तःस्थस्य नारायणस्य मधु ज्ञानकर्तृ द्वादशस्कन्धप्रसिद्धम् । त्रयीरूपत्वाद्वा । अतो मधुनः नारायणस्य नाड्यादित्यः । नाडीछिद्रम् । अतो मधुशब्दे लक्षणा । लक्षणायां प्रमाणमाहुः प्राच्य इत्यादि । श्रुतौ लक्षणामाहुः तासामिति । नाडीनाम् । तेन कर्मधारयः । एतस्याः पूर्वश्रुत्यर्थस्तु, आदित्ये मधुनाडीत्वसम्पादनाय ज्ञात्रादिपदान्यपहाय मधुपददानेन प्रसिद्धमधुसाम्यं दर्शयितुमुपक्रमते तस्य द्यौरिति । तिरश्चीनवंशः सामान्यस्थानं मधुकृतः तद्वद् द्यौः । अत्र मधुकृत ऋच इत्यृचां सामान्यस्थानमवयव्यादित्यद्वारा । अवयव्यनङ्गीकारे साक्षादपि । 'अन्तरिक्षमपूप' इति । अपूपः पिष्टस्य विकारः आश्रयो मधुकृतस्तद्वदन्तरिक्षम् । अत्र मधुकृत ऋचः तासामाश्रयः । ननु मधुकृतामाश्रयः सरसा वृक्षाः, अपूपः कथमिति चेत् । न । अपूपेषु स्थित्वा तद्रसपायिणां मधुकराणां

भाष्यप्रकाशः।

मधुत्वं मधुनाडीत्वम्। 'प्राच्यो मधुनाड्य' इत्यादिश्रुतेः। तासां मधुप्रधानत्वान्मधुत्वम्। ऋचां मधुकृत्त्वम्, ऋग्वेदस्य पुष्पत्वम्। तासामेव ऋचाममृतता ब्रह्मरूपत्वम्, ताभिर्ऋग्वेदतापम्,

रश्मिः।

विवक्षितत्वात्। पूञ्पवने, सम्पदादि क्विप्, अपुवं पाति पिबति वा। आतोनुपेति कः। पिष्टस्य विकारः। संज्ञायामिति कन्। 'पिष्टको घृतपूपादौ नेत्ररोगान्तरेपि चे'ति विश्वः। 'पिष्टको नेत्ररोगे स्याद्धान्यादिचमसेपि चे'ति पाठान्तरम्। धान्यादिपानपात्रं नानावृक्षा रसाश्रया अप्यपूपः। तेन 'यथा मधु मधुकृतो निस्तिष्ठन्ती'त्यत्रोक्तनानावृक्षरसातृत्वं मधुकृतां न विरुद्धम्। तद्वदन्तरिक्षं तत्रादित्यत्रयीरूपोन्तरिक्षस्याध्यक्षे वायौ स्वसमवायिनि समवायेन स्थित्वा 'वायव्या वै पशव'इत्युक्तेः पशून् अश्वान् रथद्वारा भुङ्क्ते। ऋचोपि भुञ्जते आदित्यद्वारा। 'वायुः शब्दतामापद्यत' इति प्राचां प्रवादात्।

अत्रेदं प्रतिभाति। अवयवा ऋगादयः न तूष्णीमादित्यमवयविनमारभन्तेपि तु मधुत्वम्। आदित्यस्य सिद्धत्वात्। मधुत्वान्तर्गतज्ञानं च किंविपयकमित्यपेक्षायामन्तरिक्षे ये वायव्याः पशवः राधाकृष्णवराहाः। पञ्चमाष्टके 'आदित्यः पशुरासीत्तेनायजन्त, अग्निः पशुरासीत्तेनायजन्त, वायुः पशुरासीत्तेनायजन्ते'ति श्रुतावुक्तेः। आदित्यः कृष्णः पशुः पश्यतीति पशुः द्रष्टा अग्निः, निरुक्ते देवपत्नीनामसु सूर्यपाठाद् राधा। वराहः वायुः। हिरण्यगर्भनस्तो 'वराहतोको निरगा'दिति श्रीभागवते। तथा च मधुत्वान्तर्गतज्ञानं पशुविपयकमिति भावोत्र। अधिकारस्कन्धानन्तरं ज्ञानस्कन्धः। तादृशज्ञानविषयत्वेन तृतीयस्कन्धे वराहपशुसर्गपुरःसरं सर्ग उक्तः। ततो राधाकृष्णपशुनिरोधपुरःसरं सामान्यतो निरोधः प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिलक्षणकनिरोधो व्याख्यात इति। स्कन्धचतुष्टयव्याख्याशयः। मरीचयः पुत्रा इति। मधुकृतां पुत्रा अपि मधुकृतस्तद्वन्मरीचयः किरणाः दीप्तयोपि आदित्यमधुकृतः। तथाहि। आदित्योपां पुष्पं तेजस्तु भगवदीयं पुत्रवत् किरणदीप्तिरूपम्। 'अजायमानो बहुधा विजायत' इति श्रुतेरधिकारिणं 'पुन्नाम्नो नरकात् त्रायत' इति पुत्रपदव्युत्पत्तेः पालकम्। अन्यथा बन्धप्राप्त्या नाधिकारं कुर्यात्। 'देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण' इति संहितोक्तम्, तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः। अत्रत्यं प्रतीकमाहुः। **प्राच्य** इत्यादि। तस्यादित्यस्यावयवर्ग्रूपरसाश्रयस्य सवितुर्ये प्राञ्चः पूर्वदिग्गता रश्मयः। ता एवास्यादित्यस्य प्राच्यो मधुनाड्यः। प्रसिद्धमधुरूपार्णवादित्यमधुरूपछिद्राणि। **ऋचामिति**। ऋच एव मधुकृत इति श्रुत्यर्थः। भ्रमरा इवर्चः समवायित्वं मधुनि भ्रमराणां आदित्ये ऋचाम्। 'एषा त्रय्येव विद्या तपती'तिश्रुतेः। 'ऋग्वेद एव पुष्प'मितिश्रुत्यर्थमाहुः **ऋग्वेदस्येति**। नारायणविशिष्टादित्यस्य पुष्टिद्वारोपासनफलत्वं सूचितमित्यादित्यमधुनर्ग्रूपेण वेद ऋग्वेदः पुष्पं अर्थरूपफलसत्ताविशिष्टम्। वेदयति साधनफले अलौकिके इति वेदः। 'ता अमृता आप' इति श्रुत्यर्थमाहुः **तासामेवेति**। प्रसिद्धमधुनः द्रव्यभूयस्करत्वरूपापां लक्षणवत्त्वात् प्रकृते आप उक्ताः। ता इति विधेयलिङ्गम्। पुष्पं फलसत्ताकमिति। आदित्यमधुपीता आपः अमृताः अमृतपदवाच्या मुख्यफलजनकत्वात्। एवं च तासामपामेव या रुचो दीप्तयः तासाममृता आपः इतीति शेषः। इति हेतोर्ब्रह्मरूपत्वम्। ऋग्वेदस्य शब्दस्यार्थरूपत्वम्। 'ब्रह्म वेद' इति शब्दरूपत्वं वा। 'ता वा एता ऋच एतमृग्वेदमभ्यतप'न्निति श्रुत्यर्थमाहुः **ताभिरिति**। ता वै मधुकृतः वै निश्चयेन एताः पुष्परूपाः कार्यकारणाभेदात्। ऋग्वेदं स्वं रूपं गहनार्थवत्त्वेन तापयुक्तमकरोत्। आधिदैविके तापः सम्भवति। 'मृदब्रवी'दितिवत्। 'तस्याभितप्तस्य यशस्तेज

भाष्यप्रकाशः ।

ताभिस्तप्तस्यर्ग्वेदस्य यशआदिरसजननं तत्क्षरणम्, तस्य रसस्यादित्यमभितः श्रयणम्, तस्यादित्यरोहितरूपत्वमित्येवं प्रतिदिक्करश्मीनां ये रसास्तेषाममृतत्वं च निरूप्य, तदग्रे 'तद्यत्प्रथममृत'मित्यादि पठ्यते । अत्र कल्पनोपदेशात्परोक्षवादता । तेन यदत्र सिद्धं तद्विशदयन्ति ।

रश्मिः ।

इन्द्रियं वीर्यमन्नाद्यं रसोऽजायते'त्यस्यार्थमाहुः **ताभिस्तप्तस्येति** । अभितस्यशब्दो लोकप्रसिद्धः । कः शब्दः इत्यपेक्षायामाहुः **यश** इत्यादि । यशः रसः, यशोजनकशब्दः 'रस शब्दे' इतिधातुपाठात् । स च शब्दः 'अलौकिको हि शब्दार्थो न युक्त्या प्रतिपद्यते, तपसा वेदयुक्त्या तु प्रसादात् परमात्मन' इति । 'आचार्यवान् पुरुषो वेदे'ति । तेजो रसः, आधिदैविके सन्तापस्तेजः तत्प्रतिपादकः शब्दः 'मद्भयाद्वाति वातोयं सूर्यस्तपति मद्भयाद्'इति । 'यदादित्यगतं तेजो जगद्भासयतेखिलम्, यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक'मिति च । इन्द्रियं रसः, इन्द्रियप्रतिपादकः शब्दः 'इन्द्रियाणि जुहोती'तिगीतोक्त इन्द्रियहोमश्च । वीर्यं रसः, तत्प्रतिपादकः शब्दः, 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेवास्य वीर्यवत्तरं भवती'ति । दशमस्कन्धे वीर्यवाक्यानि । अन्नाद्यं रसः, अन्नाद्यप्रतिपादकशब्दः । 'अग्नये जुष्टं निर्वपामी'ति । प्राणाग्निहोत्रोपनिषद्रूपश्च । आद्यपदेन 'अस्या देवतायाः सालोक्यं सार्ष्टितां सायुज्यतामाप्नोती'ति । 'सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत, दीयमानं न गृह्णन्ति विना मत्सेवनं जना' इति फलप्रतिपादकः शब्दः । तद्व्यक्षरदित्यस्या अर्थमाहुः **तत्क्षरणमिति** । तस्य यशआदेरन्नाद्यान्तस्य क्षरणं विशेषेण तद्यशआद्यन्नाद्यान्तं विशेषेणोर्ध्वमक्षरदगमत् । 'तदादित्यमभितोश्रय'दित्यस्याः श्रुतेरर्थमाहुः **तस्य रसस्येति** । स्पष्टा । 'तद्वा एतद्यदेतदादित्यस्य रोहितं रूप'मित्यस्या अर्थमाहुः **तस्यादित्येति** । तद्वैतदेव पूर्वोक्तमेवैतत्प्रत्यक्षं मधु, किं तत्, यत् एतत् उद्यत आदित्यस्य रोहितं रक्तरूपमप्युष्पादित्यशुक्लरूपातिरिक्तं दृश्यत इत्यर्थः । **इत्येवमित्यादि** । पूर्वोक्तप्रकारेण दिशं दिशं प्रतीति प्रतिदिक् येषां रश्मीनां ते इत्येवं प्रतिदिक्कास्ते च रश्मयः इत्येवं प्रतिदिक्करश्मयस्तेषाम् । ये रसाः पुष्पाणि तेषां वेदत्वेनात्मत्वादमृतत्वम्, ता अमृता आप इत्येतया निरूप्य । **अत्र कल्पनेति** । भक्तिरसपरोक्षस्य भाष्य उपदेशात् । अक्ष्णः परमिति परोक्षं तस्य वादस्तत्ता । **विशदयन्तीति** । परोक्षार्थस्याधिकस्योक्त्या विशदं कुर्वन्तीत्यर्थः । **तथा चेत्यादीति** । तत् तस्मात् यत् प्रथममममृतमृग्वेदरूपं तद् वसवोष्टौ नन्दाद्याः उपजीवन्ति । समीपस्थादाचार्यादुपसमीपाय जीवन्ति कारणं कुर्वन्ति । अग्निस्त्वाचार्यः स्वयमुपजीवति । केनोपायेनेत्यत आह**ाग्निना मुखेना**ग्न्याचार्येण । आचार्याः सर्वात्मभाववन्त इति सर्वात्मभाववन्तो नन्दाद्याष्टवसव उपजीवन्ति ब्रह्मज्ञानकारणं कुर्वन्ति । परोक्षार्थस्तु कृपावलोकनेन प्रथमममृतमृग्वेदरूपमग्न्याचार्यस्नेहेन तात्पर्यार्थं कृत्वा व्रजभक्तभावेन नित्यक्रीडाप्रवेशार्थं कारणं कुर्वन्तीति । एतस्य संक्षेपः **दर्शनमात्रेण** ऋग्वेददर्शनमात्रेण शाब्दज्ञानेन तात्पर्यार्थविषयेण । कारणान्तरव्यवच्छेदको मात्रच् । 'न वै देवा' इत्यस्याः परोक्षापरोक्षार्थयोः परोक्षार्थमाहुः **प्राणादिति** । 'धारयन्त्यतिकृच्छ्रेणे'तिवाक्ये प्राणधारणमुक्तम्, तस्माद्धेतोरिन्द्रियरूपाणां चक्षुरादीनां निवृत्तिवैकल्यमिति परोक्षार्थः । अपरोक्षस्तु 'न वै देवा' इत्यस्य स्पष्टः । ननु देवानां भोगो विग्रहवत्त्वात् सिद्धोपलभ्यते कुत इति चेत् । न । प्रमेयबलात् । वस्तुतस्तु परोक्षवाद इति । तत्रात्मेतराभावादात्मेतरन्नाश्नन्ति न पिबन्तीति

अन्यधर्मनिवृत्तिः, तस्यैव स्वतन्त्रपुरुषार्थत्वेन ज्ञानमतिशयितस्नेहजविगाढभावेन तत्रैव लयः, पुनस्तद्दर्शनानन्दानुभवार्थं भगवानेव कृपया पुनः पूर्वभावं सम्पादयतीति तस्माद्रूपाद्युदयश्च । एतत्सर्वं भगवदङ्गत्वे एवोपपद्यत इत्यपि हेत्वभिप्रेतोर्थो ज्ञेयः । न हि प्रतीकत्व इदं सर्वं सम्भवति । भक्तिमार्गीयत्वादस्यार्थस्येति भावः । अङ्गानां भगवत्स्वरूपात्मकत्वेनैक्यमिति ज्ञापनायैकवचनम् । एतेन स्वरूपस्यैव फलत्वमुक्तं भवतीति मुख्यः सिद्धान्तः सूचितो भवति ॥ ६ ॥

भाष्यप्रकाशः ।

तथा चेत्यादि । अन्यधर्मनिवृत्तिरिति । प्राणधर्मरूपक्षुदादिनिवृत्तिः । हेत्वभिप्रेतोर्थ इति । हेतुबोधके उपपत्तिपदेभिप्रायगोचरोर्थः । तदुपपादयन्ति न हीत्यादि । ज्ञानमार्ग एवान्धत्वादिदोषः, न भक्तिमार्ग इत्यपि सूचितम् । शेषं स्फुटम् । किञ्च, अस्मिन् सूत्र आदित्यादिमतीनामङ्गविषयकत्वकथनेन पूर्वं, 'अन्तस्तद्धर्मो'दिसूत्रेषूक्तानां हिरण्मयपुरुषाकाशप्राणादीनामप्यङ्गत्वं बोध्यते । तेन तदुपासना अपि तथेत्यपि बोधितमिति ज्ञेयम् ॥ ६ ॥

रश्मिः ।

सूपपन्नम् । भाष्ये । तस्यैवेत्यादि । तात्पर्यार्थस्यैव । ज्ञाते स्नेह इति नियमार्थमुक्तम् । तत्कार्यमाहुः । अतिशयितेति । विगाढत्वं शास्त्रार्थोत्थत्वम्, शास्त्रार्थसंवादित्वं वा । लयोभिसंवेशः परोक्षार्थः । कृपयेति । ब्रह्मानन्दात्समुद्धृत्य भजनानन्दयोजनं कृपाकार्यमिति । प्रकृते । हेत्विति । गोचरः प्रत्ययार्थः । न हीत्यादीति । प्रतीकत्वमत्र पूर्वोक्तमतद्रूपे तत्त्वेनोपासनत्वं तस्मिन् । भक्तीति । भक्तिमार्गीयार्थेऽतत्त्वे तत्त्वेनोपासनं नास्ति 'सर्वं खल्विदं ब्रह्मे'तिश्रुतेर्जगन्नित्यत्वात् । 'सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत्, भ्रान्त्या सद्बुद्धिरत्रेति सन्तं कृष्णं भजेद्बुध' इति तु ज्ञानमार्गीयार्थपरमिति सूच्यते । अस्ति समन्वितसत् कृष्णभजनपरं वा, समन्वयाधिकरणात् । ननु भगवदङ्गत्वे सकलाङ्गोपासना माभूत्, तत्रैवाङ्गे मनोव्यापाररूपोपासनासम्भवात्, तथापि सर्वाङ्गेषु मनोव्यापारस्यावर्जनीयत्वादेकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमितिन्यायादन्तस्तद्धर्माधिकरणोक्तादित्यान्तःस्थनारायणस्मरणाच्च भक्तिमार्गे उप समीपे स्थित्वा यथायोग्यकरणरूपोपासनासत्त्वात्, 'चक्षुष्ट्वेतदात्मन इति होवाचान्धो भविष्यद्यन्मां नागमिष्य' इति श्रुतिविरोध इति चेत्, तत्राहुः ज्ञानमार्गे इति । उपासनयाध्यात्मिकचित्तशुद्धौ ज्ञानमित्यस्मिन्मार्गे एव, न भक्तिमार्गे इत्येवकारार्थो वक्ष्यते । अन्धत्वादिदोषस्याभिधेयार्थे सम्भवः । आदिपदेन 'मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य' इति द्युमतिकरणवाक्यं 'प्राणस्ते उदक्रमिष्यद्यन्मां नागमिष्य' इति वायुमतिकरणादिवाक्यानि सङ्गृह्यन्ते । सूचितार्थे तु न । तथा च 'यथा एष द्युलोकाख्यः आत्मनो वैश्वानरस्य मूर्धा, नायं समग्रो वैश्वानरोतः समग्रबुद्ध्यास्योपासनाद् विपरीतग्राहिणस्ते मूर्धा पतितोभविष्यत्, यद्यदि मां प्रति नागमिष्य इत्यभिधेयार्थलङ्विचारेण तथा भक्तिमार्गे लङ्विचारेण क्रियाया अनिष्पत्तौ गम्यमानायां नान्धत्वादिदोषः । तथा च मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य' इत्यस्यामात्मन इत्यभेदे षष्ठी राहोः शिर इतिवत् । व्यतीतपतनयुक्तमभविष्यदिति व्यपतिष्यदित्यस्येति सूचितार्थः । एवं 'चक्षुष्ट्वेतदात्मन इति होवाचान्धो व्यभविष्यद्यन्मां नागमिष्य' इत्यादिषु । स्फुटमिति । एकवचनमिति । सूत्रेऽङ्ग इत्येकवचनम् । एतेनेति । गौणमुख्यन्यायोक्त्या चेति भाष्येणेत्यर्थः । सूचित इति । वाच्यस्तु प्रतीतोर्थः । एवं शेषं स्फुटमित्यर्थः ॥ ६ ॥

आसीनः सम्भवात् ॥ ७ ॥

पूर्वसूत्रेण धर्ममात्रस्य फलत्वमुक्त्वा, अधुना धर्मिणः फलत्वं तत्साधनं चाह सम्भवात् । उत्कटस्नेहात्मकसाधनस्य सम्भवात् तदधीनः सस्तदग्रे आसीनो भगवान् भवति । एतेन भक्तवश्यतोक्ता ॥ ७ ॥

एवं बहिःप्राकट्यमुक्त्वा आन्तरं तदाह ।

ध्यानाच्च ॥ ८ ॥

भावानौत्कट्यदशायां व्यभिचारिभावात्मकसततस्मृतिरूपध्यानादपि हृदि प्रकटः सन्नासीनो भवतीत्यर्थः । तेन स्थैर्यमुक्तं भवति ॥ ८ ॥

एवं भक्तेच्छयैव स्वरूपप्राकट्यमित्युक्त्वा लीलानाविष्करणमाविष्करणं चापि तदिच्छयैवेत्याह ।

अचलत्वं चापेक्ष्य ॥ ९ ॥

भक्तेच्छामपेक्ष्याचलत्वम्, चकाराच्चलत्वमपीत्यर्थः ॥ ९ ॥

भाष्यप्रकाशः ।

आसीनः सम्भवात् ॥ ७ ॥ सूत्रमवतारयन्ति पूर्वसूत्र इत्यादि । पूर्वसूत्रे चक्षुरादिरूपस्यादित्यादेर्धर्मस्य प्राप्यत्वेन फलत्वमुक्त्वास्मिन् सूत्रे धर्मिणो भगवत एव तदुपासनफलत्वं तत्प्राप्तिसाधनं चाहेत्यर्थः । व्याकुर्वन्ति सम्भवादित्यादि । भगवदङ्गत्वज्ञानपूर्विकयादित्याद्युपासनया उत्कटस्नेहसम्भवात् तथा, न तु तदभावेपीत्यर्थः । एतेन ज्ञानमार्गिणामीदृशस्नेहाभावान्नासीनो भवति, किन्तु परोक्षज्ञानविषयो भवतीत्यपि बोधितम् । सिद्धमाहुरेतेनेत्यादि ॥ ७ ॥

ध्यानाच्च ॥ ८ ॥ सूत्रमवतारयन्ति एवमित्यादि । तदिति । प्राकट्यम् । व्याकुर्वन्ति भावेत्यादि । स्थैर्यमुक्तं भवतीति । एतेन ज्ञानमार्ग एतादृशस्यापि भावस्याभावादस्थैर्यमित्यपि बोधितम् ॥ ८ ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥ सूत्रमवतारयन्ति एवं भक्तेत्यादि । अस्मिन्नपि सूत्रे अपेक्ष्येति कथनाज्ज्ञानमार्गीयस्योपासनामपेक्ष्य वाऽचलत्वादिकं बोध्यम् ॥ ९ ॥

रश्मिः ।

आसीनः सम्भवात् ॥ ७ ॥ उक्त्वेति । अभिधयोक्त्वा, व्यञ्जनया तु धर्म्यप्युक्त एव । आहेति । अभिधयाहेत्यर्थः । परोक्षेति । 'भक्त्याहमेकया ग्राह्य' इतिवाक्यात् तथा ॥ ७ ॥

ध्यानाच्च ॥ ८ ॥ भावेत्यादीति । भावना न सन्न्यासनिर्णयोक्तत्वाद्विप्रयोग एव, संयोगव्यभिचारिभावसततस्मृतिरूपत्वस्य वक्ष्यमाणत्वात् । एकैकाङ्गे मनोनिवेशस्य ध्यानस्य साधनदशायां सत्त्वम् । फले त्वत्र निविष्टम् । अत एव सततपदम् । एतादृशस्येति । भक्तिरसे व्यभिचारिभावात्मकस्यान्तर्बहिःस्थित्या स्थैर्ययुक्तस्य । किन्त्वक्षरविषयकं ज्ञानं सोहमिति तस्य 'कृष्णोहं पश्यत गति'मित्यत्रोक्तसदृशस्य । अस्थैर्यमिति । तादृशे स्थैर्यमिन्नो धर्म उक्तः, आन्तरमात्रत्वात् ॥ ८ ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥ उपासनामपेक्ष्येति । यावदुपासनं तावदित्यर्थः । अचलस्येति । आदिना चलत्वम् ॥ ९ ॥

स्मरन्ति च ॥ १० ॥

केचन भक्ताः स्वरूपनिरपेक्षास्तत्स्मरणजनितानन्देनैव विस्मृतापवर्गान्तफला भवन्ति । चकाराच्छ्रवणकीर्तनाद्योपि समुच्चीयन्ते । तदुक्तं 'अथ ह वा व तव महिमामृतसमुद्रविप्रुषा सकृल्लीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतसुखलेशाभासाः परमभागवता' इति । अथवा । 'अहं भक्तपराधीन' इत्यादिस्मृतिः पूर्वोक्ते प्रमाणत्वेनोक्ता ॥ १० ॥

इति चतुर्थाध्याये प्रथमपादे तृतीयमादित्याद्यधिकरणम् ॥ ३ ॥

भाष्यप्रकाशः

स्मरन्ति च ॥ १० ॥ अनेन साधनान्तरमुक्तमित्याहुः **केचनेत्यादि** । अत्र भाष्यमतिरोहितार्थम् ।

एवञ्चात्रादित्यसूत्रोक्ते मनने आसीनसूत्रेण विशेष उक्तः, ध्यानसूत्रोक्तनिदिध्यासने चाचलत्वसूत्रेणेति ज्ञेयम् । अनेनाधिकरणेन आदित्याद्यङ्गविषयिणीनामुपासनानां जघन्याधिकारिषु फलदानद्वारा भगवन्माहात्म्यप्रतिपादनेन तत्र भक्तिजननद्वारा सर्वात्मभावरूपज्ञानाङ्गत्वमपि प्रतिपादितम् । तेन तासामपि परम्परया तदेव फलमिति सिद्धम् ।

अन्ये तु, आदित्यादिमतिसूत्रमधिकरणान्तरत्वेनोक्त्वा तत्र 'य एवासौ तपति तमुद्गीथमुपासीते'त्यादिषु कर्माङ्गोपासनेषु किमादित्यादिषूद्गीथदृष्टिः कार्या, किं वोद्गीथादिष्वादित्यादिदृष्टिः, दृष्टेरनियमो वेति संशये, उद्गीथादिष्वङ्गेष्वेवादित्यादिदृष्टयः कार्या इति सिद्धान्तयन्ति। आसीन इत्यादिकं चतुःसूत्रमधिकरणान्तरमुक्त्वा तेष्वेवासननियमोस्ति न वेति संशये, आसीन एवोपासीतेति नियमं सिद्धान्तयन्ति । तत्रोदासीना वयम् ॥ १० ॥

इति तृतीयमादित्याद्यधिकरणम् ॥ ३ ॥

रश्मिः।

स्मरन्ति च ॥ १० ॥ अनेनेत्यादि सूत्रेण । साधनं भक्तेच्छालीलाविष्करणे तदन्यत् साधनं 'अहं भक्तपराधीन' इति भगवत्सङ्कल्पस्तद्रूपं साधनान्तरम् । **आदित्येति** । मतिपदेनादित्यसूत्रोक्ते । **विशेष इति** । आसीनत्वविषयकमनने विशेषः । **निदिध्यासन इति** । सततस्मृतिरूपे । ध्यानधारणयोः स्मृतौ सातत्याभावात् । **अचलत्वेति** । भक्तेच्छापेक्षत्वरूपो विशेषो भगवत्युक्तः । लीलाः पूर्वं नित्यलीलास्थानामनूदितास्तत्र प्रवेशस्तु व्रजभक्तभावेन भजने भवति, तत्र तु सर्वात्मभावोपीति तमाहुरत्रानेनेति । **फलदानेति** । तत्तद्देवतासायुज्यफलदानद्वारा । **तत्रेति** । भगवति । **सर्वात्मभावेति** । प्रदानसिद्धसर्वात्मभावेत्यादि । **ज्ञानत्वं तु** । सर्वात्मभावरूपं ज्ञानमिति 'लिङ्गभूयस्त्वा'धिकरणग्रन्थात् । न च 'प्रदानवदेवे'तिसूत्रात् प्रदानमात्रसाध्यत्वं सर्वात्मभावस्येति शङ्क्यम् । पूर्वसाधनवते दानस्याविरुद्धत्वात् । **तदेवेति** । सर्वात्मभाव एव फलम् । तदिति विधेयलिङ्गात् । **कर्माङ्गेति** । 'यदेव विद्यया करोति' इतिश्रुतेर्विद्योपासनकृतिं करोति । कृतिः कर्म । तेषु कर्माङ्गोपासनेषु । **अभियम[1] इति** । अभितः पक्षद्वयेपि यमो नियमः । **इति संशये** त्रिकोटिकसंशये । **अङ्गेष्वेवेति** । उद्गीथाद्यङ्गिषु । 'रसाना५ रसतमः परमः पराध्योंष्टमोयमुद्गीथ' इत्यादिष्वङ्गिनः। **तेष्वेवेति**। उपासनेष्वेव, एवकारेण योगयोगव्यवच्छेदः। **उदासीना इति**। योगं विनासनविचाराप्रसङ्गादसङ्गतो विचार इति तथेत्यर्थः ॥१०॥ **इति तृतीयमादित्याद्यधिकरणम् ॥३॥**

---

[1]. अभियम इति रश्मिपाठः ।

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ (४-१-४.)

अथेदं विचार्यते । बहिराविर्भावो येभ्यो, येभ्यश्चान्तस्तेषां तेषां च मिथस्तारतम्यमस्ति, न वेति । तत्र निर्णयमाह । यत्र भक्तेषु एकाग्रता भगवत्स्वरूपे प्रकट एवैकस्मिन् ग्राहकचित्तधारा, न त्वन्तर्बहिर्विज्ञानम्, तत्रोभयोरन्तःपश्यतो बहिःपश्यतश्च भावे भगवत्स्वरूपे च विशेषाभावान्न तारतम्यमस्तीत्यर्थः ॥ ११ ॥

इति चतुर्थाध्याये प्रथमपादे चतुर्थं यत्रैकाग्रताधिकरणम् ॥ ४ ॥

आप्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥ (४-१-५.)

उक्तेर्थ एवायं संशयः । अन्तःप्राकट्यवतो यदा बहिःसंवेदने सत्यपि पूर्वानुभूतभगवत्स्वरूपानुभवः, तदा पूर्वमन्तरन्वभूवम्, अधुना बहिरनुभवामीत्यनुव्यवसायो भवति, न वेति । तत्र वैलक्षण्याद्भवितुमर्हतीति पूर्वः पक्षः । तत्र सिद्धान्तमाह आप्रायणादिति । श्रीभागवते, 'प्रायणं हि सतामह'मिति

भाष्यप्रकाशः ।

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ एतस्य सूत्रस्याधिकरणत्वं बोधयन्तोवतारयन्ति अथेत्यादि । अथेति । पूर्वाधिकरण आदित्यादिरूपाणामङ्गानामुपासनाभिः साधनभूतभक्त्युत्कर्षात् पुरुषोत्तमस्य बहिरन्तःप्राकट्यविचारानन्तरम् । येभ्य इति । चतुर्थी तादर्थ्ये । तत्रेति । उक्तसंशयोत्तरं प्राकट्यप्रकारभेदाद् भक्तयोस्तारतम्यमिति प्राप्ते । न त्वन्तर्बहिर्विज्ञानमिति । करणभेदानुसन्धानकृतमन्तर्बहिर्विज्ञानम् । शेषः सिद्धान्तग्रन्थस्तु स्फुटः । तथाचैकाग्र्याभावे भावतारतम्यम् । तेन च तयोस्तारतम्यम्, न तु प्राकट्यप्रकारभेदादिति भावः ॥ ११ ॥

इति चतुर्थं यत्रैकाग्रताधिकरणम् ॥ ४ ॥

आप्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥ एतस्याप्यधिकरणान्तरत्वं बोधयन्त आहुः । उक्तेऽर्थ इत्यादि । तेनानुप्रसङ्गः सङ्गतिरित्यर्थः । सत्यपीत्यपिशब्दोऽनुभवशब्दानन्तरमन्वेति । पूर्वपक्षमाहुः तत्रेत्यादि । वैलक्षण्यादिति । भूतकालवर्तमानकालरूपविशेषणभेदकृताद्वैलक्षण्यात् । सिद्धान्तं वक्तुं सूत्रं विवृण्वन्ति श्रीभागवत इत्यादि । तत्रैकादशस्कन्ध एकादशा-

रश्मिः ।

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ अथशब्दस्यानन्तर्यमर्थमाहुः पूर्वेति । साधनेति । पुरुषोत्तमप्राप्तिसाधनभूतप्रेमसर्वात्मभावरूपेण श्रवणाद्युत्कर्षात् । करणेति । करणं मनः तस्य भेदयोरनुसन्धानमन्तर्बहिर्विषयानुसन्धानकृतम् । तयोरिति । अधिकारिणोः । प्राकट्येति । अन्तर्बहिःप्रकारौ तयोर्भेदात् ॥ ११ ॥ **इति चतुर्थं यत्रैकाग्रताधिकरणम् ॥ ४ ॥**

आप्रायणात् तत्रापि हि दृष्टम् ॥ १२ ॥ अनुप्रसङ्ग इति । पूर्वाधिकरणयोः प्रसङ्गः उक्तेनाधिकरणेनास्य पश्चात् प्रसङ्गोधिकरणयोः सङ्गतिरित्यर्थः । अन्वेतीति । तेनान्वेति । भाष्ये । अनुव्यवसाय इति । अयं घट इति ज्ञानानन्तरं घटमहं जानामीति ज्ञानवत् । तत्तेदन्ताप्रकारकज्ञानत्वाभावान्न प्रत्यभिज्ञा, सेयं दीपमालिकेतिवत् । प्रकृते । भूतेति । अन्वभूवमिति

भगवद्वाक्यात् प्रायणशब्देन स्वतःपुरुषार्थत्वेन प्राप्यं परमं पारलौकिकं फलमुच्यते । तथा च तन्मर्यादीकृत्य तस्य सैवावस्था सार्वदिकी, न तु बहिःप्राकट्येपि बहिष्ट्वानुसन्धानमित्यर्थः । ततस्तस्य तत्र सायुज्यं भवति, न वेति संशये निर्णयमाह । तत्रापि प्रायणेपि प्राप्ते तस्य पूर्ववत् प्रभुणा सममालापावलोकनश्रीचरणनलिनस्पर्शादिकं दृष्टमेव फलम्, न त्वदृष्टं सायुज्यमित्यर्थः । यतः शुद्धपुष्टिमार्गेङ्गीकृतः, अन्यथा पूर्वोक्तभावसम्पत्तिः कथं स्यादित्युपपत्तिर्हिशब्देन सूच्यते । एतच्च 'तद्भूतस्य तु नातद्भाव' इत्यत्र निरूपितम् ॥ १२ ॥

इति चतुर्थाध्याये प्रथमपादे पञ्चममाप्रायणाधिकरणम् ॥ ५ ॥

भाष्यप्रकाशः ।

ध्यायोपान्ते ज्ञानमार्गाद् भक्तिमार्गोत्कर्षं वदता भगवतोक्तं 'प्रायेण भक्तियोगेन सत्सङ्गेन विनोद्धव । नोपायो विद्यते सम्यक् प्रायणं हि सतामह'मिति । प्रकृष्टमयनं प्रायणमिति योगात्तादृशं फलमुच्यते । तथा च तादृशं फलं मर्यादीकृत्य तस्य भक्तस्य सैवावस्थैकाग्रतारूपा सार्वदिक्यतस्तथेति नानुव्यवसायवैलक्षण्यमित्यर्थः । तर्हि प्रायणे तु फले वैलक्षण्यं भविष्यतीति शङ्कायां सूत्रशेषमवतारयन्ति ततस्तस्येत्यादि । निर्णयमाहेति । तत्क्रतुन्यायात्, 'यं यं वापी'ति स्मृतेश्च भवतीति प्राप्ते निर्णयमाहेत्यर्थः । व्याकुर्वन्ति । तत्रापीत्यादि । सूच्यत इति । हेतुतया सूच्यते । तथा च पूर्वपक्षोक्तन्यायादिर्ह्युपासने प्रवर्तते । अत्र तु साक्षात्कार इति तस्य भावस्य सार्वदिकत्वं निष्प्रत्यूहमित्यर्थः ।

रश्मिः ।

भूते लुङ्, अत्र भूतकालो व्यापारस्य विशेषणमस्मत्पदार्थनिष्ठ एकः भूतकालीनोनुभवानुकूलो व्यापार इतिबोधात् । तथानुभवामीत्यत्र वर्तमाने लट् । अत्र वर्तमानकालो व्यापारस्य विशेषणम् । अस्मत्पदार्थनिष्ठ एकः वर्तमानकालिकोनुभवानुकूलो व्यापार इति बोधात् । एवं विशेषणकृताद्भेदाद्व्यवसायानुव्यवसाययोर्ज्ञानयोर्वैलक्षण्यात् । तादृशमिति । अयनं प्राप्यं प्रकृष्टं परमं पारलौकिकं सर्वात्मभावलभ्यम् । भाष्ये । सैवेति । अन्तःप्रकटैकाग्रतारूपा । न त्विति । अत्र बहिष्ट्वमिदं पदार्थान्तर्गतं बोध्यम् । तथा च वाक्यं 'ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेद'मिति । तत्र दृष्टान्त उत्तरार्धेन । 'यथा समाधौ मुनयोब्धितोये नद्यः प्रविष्टा इव नामरूपे' इति । दृष्टान्तद्वयं ज्ञानभक्तिभेदेन । नामरूपे विहाय । प्रकृते । फलितमाहुः तथा चेति । अतस्तथेति । न तु बहिरित्यादिभाष्योक्तम् । भाष्यार्थस्तु ह्युक्तः । नान्येति । अनुव्यवसायादन्यस्य व्यवसायस्य वैलक्षण्यं नेत्यर्थः । बहिष्ट्वेनानुसन्धानाभावाद्विषयभेदाभावादिति भावः । वैलक्षण्यमिति । प्रायणे भगवति फले बहिष्ट्वेन व्यवसायस्य सद्योमुक्तये आवश्यकत्वादन्तर्व्यवसायाद्वैलक्षण्यम् । सूत्रशेषमिति । अधिकरणकत्वेन सूत्रशेषम् । ततस्तस्येत्यादीति । तत्रेति । बहिःप्रकटे । सायुज्यं सद्योमुक्तौ । तत्क्रतुन्यायादिति । अयं तृतीयचरणे 'अप्रतीकालम्बन'सूत्रशेष इति तत्रैव स्फुटिष्यति । 'भगवद्भजनलक्षणक्रतुर्म नीयत' इत्यर्थः । यमिति । 'यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्, तत्तदेवैति कौन्तेय सदा तद्भावभावितः' इति स्मृतेश्च । भवतीति । सायुज्यं भवति । तत्रापीत्यादीति तत्रापीति । व्याख्येयम् । प्रायणेपीति व्याख्या । प्राप्त इति, सायुज्ये प्राप्ते । हेतुतयेति । पुष्टिमार्गेङ्गीकारो हेतुः पूर्वोक्तभावसम्पत्तिः कार्यम् । हेतुताग्राहकोपपत्तिसूचको हिशब्दार्थः तेन

तद्धिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥ (४-१-६.)

पुष्टिमार्गीयभक्तस्य फलं निरूप्य मर्यादामार्गीयस्य तस्य फलं चिन्त्यते। तत्र तु ज्ञानपूर्वकत्वं भक्तेरावश्यकम्। कर्ममर्यादाया अपि स्वकृतत्वात्तामनुल्लङ्घ्यैव भगवता फलं दीयते। तच्च, नाऽभुक्तं क्षीयते। तद्भोगानुकूलकर्मणा स्वसजातीयतत्सन्तानजननादनिर्मोक्ष एव सर्वस्य सम्पद्यते। न च प्रायश्चित्तवज्ज्ञानस्य कर्मनाशकत्वं वक्तुं शक्यम्। तद्वत्तस्य तदुद्देशेनाविहितत्वात्। तथा कथने चान्योन्याश्रयः। दुरितस्य चित्ताशुद्धिहेतुत्वेन तन्नाशे ज्ञानोदयो यतः, अतो मर्यादामार्गे मुक्तिरनुक्तिविषयेति प्राप्ते, उच्यते। **तदधिगमे** ब्रह्मज्ञाने सति तज्ज्ञानस्वभावादेवोत्तराघस्याश्लेषोऽसम्बन्धः, पूर्वस्य तस्य विनाशो भवतीत्यर्थः। अत्रोत्तरस्योत्पन्नस्याश्लेष इति नार्थः, तस्यात्मन्येवोत्पत्तेस्तदतिरिक्तस्य श्लेषस्या-

---

भाष्यप्रकाशः।

अन्ये तु, पूर्वसूत्रे उपासनासु एकाग्रताप्रयोजकं यद्भवति, तदेव दिगादिकं नियतम्, न तु प्राच्यादिनियम इति सिद्धान्तयन्ति। अस्मिंस्त्वभ्युदयफलासूपासनास्वपि प्रयाणकालपर्यन्तं प्रत्ययावृत्तिं सिद्धान्तयन्ति। प्रायणपदेन च प्रयाणकालं व्याकुर्वन्ति। तदा प्रायणशब्दो यौगिक एव। अयनपदस्य गमनवाचकत्वादिति। तत्राप्युदासीना वयम् ॥ १२ ॥

इति पञ्चममाप्रायणाधिकरणम् ॥ ५ ॥

तद्धिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥ अधिकरणप्रयोजनमाहुः पुष्टीत्यादि। पुष्टिमार्गीयभक्तस्य फलमिति। लौकिकदेहे भगवत्साक्षात्कारादिकं फलं 'आसीनः सम्भवा'दित्यादिभिर्निरूप्य प्रायणप्राप्तावलौकिकदेहेऽस्य भगवत्संसेवनरूपं फलं चिन्त्यत इति। कथं भवतीति विचार्यते। कुतश्चिन्त्यत इत्याकाङ्क्षायां संशयं तद्बीजं च सूचयन्तः पूर्वपक्षमाहुः तत्र त्वित्यादि। ज्ञानपूर्वकत्वं भक्तेरावश्यकमिति। 'तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव। ज्ञानविज्ञानसहितो भज मां भक्तिभावत' इति भगवद्वाक्यात् तथा। दीयत इति। मर्यादामार्गे दीयते। तच्चेति। कर्म च। तद्वदिति प्रायश्चित्तवत्। ज्ञानस्य पापनाशकत्वाङ्गीकारे दूषणान्तरमाह तथेत्यादि। अन्योन्याश्रयं व्युत्पादयति दुरितस्येत्यादि। तथा च ज्ञानोदये दुरितक्षयो, दुरितक्षये च ज्ञानोदय इत्यन्योन्याश्रय इत्यर्थः। अनुक्तिविषयेति। तूष्णीम्भावविषया, अशक्यवचनेति यावत्। तथा च मर्यादामार्गे सर्वमर्यादारक्षणात्

रश्मिः।

सूच्यते तात्पर्यवृत्त्योच्यते। अव्ययानां द्योतकत्वम्। भाष्ये। तन्मूलस्येति। गतपादेस्ति तत्र। प्रकृते। न्यायादिरिति। 'यं यं वापी'तिस्मृतिरादिना गृह्यते। अत्र त्विति। भक्तिमार्गे तु अन्तर्व्यवसायः साक्षात्कार इति न वैलक्षण्यमित्यर्थः। उपासनोक्तेः साधनाविष्करणात् सद्योमुक्त्यर्थं बहिःप्राकट्यं बहिष्ठानुसन्धानयोरभावात्, फलसम्बन्धित्वात्। अभ्युदयेति। षोडशकर्मफलमभ्युदयः। निःश्रेयसफलव्यतिरिक्तस्तत्तदुपासना फलं च। यौगिक इति। प्रकर्षेणायनं गमनं यत्र काल इति प्रायणम्। समासोयं न योग इति चेत्, तत्राहुः। अयनेति। अय्यत इत्ययनमितियोगाद्यौगिकः। उदासीना इति। फलविचाराभावात् फलाध्यायेऽसङ्गतो विचार इति तथा ॥१२॥ इति पञ्चममाप्रायणाधिकरणम् ॥ ५ ॥

भावात्। अतोनुत्पत्तिरेवार्थः। न चैवं मर्यादामार्गीयत्वभङ्गः। साधनं विना स्वस्वरूपबलेनैव कार्यकारणे हि पुष्टिः, इह तु नियतकर्मविरोधित्वस्वभावेन ज्ञानेनैव तथा सम्पत्तेः। अत एव, 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य

भाष्यप्रकाशः।

कर्ममर्यादाया अपि रक्षणीयतयोक्तप्रकारेण ज्ञानानुदये भक्त्यभावान्मोक्षरूपफलाभावः, उत 'यतो वाचो निवर्तन्त' इति ज्ञानिनमुपक्रम्य, 'एतꣳ ह वा व न तपति किमहꣳ साधु नाकरवं किमहं पापमकरव'मिति ज्ञानस्य बलवत्ताश्रावणात्तेन तन्नाशे भक्त्युदयात् फलं भवतीति संशये उक्तरीत्या मर्यादारक्षणावश्यकतया तूष्णीम्भाव एव शरणमिति प्राप्त इत्यर्थः। सिद्धान्तं वदन्तः सूत्रं व्याचक्षते तदधिगम इत्यादि। अत्राश्लेषपदार्थोऽसम्बन्धपदेन विवृतः, तं निर्णेतुं व्युत्पादयन्ति अत्रेत्यादि। एतत्सूत्रार्थविचारेनुत्पन्नस्याश्लेष इति नार्थः। 'श्लिष आलिङ्गन' इति धातोः संयोगविशेषार्थकतया गुणरूपस्य पापस्यात्मनि समवेतत्वेन संयोगस्य मूलत एवाभावादनश्यति च पापे समवायाभावस्य वक्तुमशक्यत्वादुत्पन्नस्य पापस्याश्लेष इति नार्थः, किन्तु तस्य पापस्यात्मनि लिङ्गविशिष्टे जीव एवोत्पत्तेरुत्पन्नकार्यसमवायातिरिक्तस्य श्लेषस्याभावात्। अत उक्तानुपपत्तिरूपाद्धेतोरनुत्पत्तिरेवार्थः। 'यथा पुष्करपलाश आपो न श्लिष्यन्त' इति श्रुतावपि पापानुत्पत्तिरेवार्थ इत्यर्थः। न च श्रौतदृष्टान्तानुरोधाल्लिङ्गशरीरे उत्पन्नस्य जीवेऽसम्बन्ध इत्येवार्थो युक्तः, न पूर्वोक्त इति शङ्क्यम्। तेन 'भवत्यसङ्गो ह्ययं पुरुष' इति श्रुतेस्तस्य सदैवासङ्ग-

रश्मिः।

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥ **उक्ते** इति। अन्योन्याश्रयप्रकारेण। **तेन तन्नाश** इति। ज्ञानेन पापनाशे। **उक्तरीत्येति**। आसूत्रादुक्तरीत्या। **उत्पन्नस्येति**। सौत्रोत्तरपदार्थस्य भाष्ये विवृतस्य। **मूलत** इति। द्रव्ययोरेव संयोग इति नियमादेवाभावात्। [1]**अवीति**। न विश्यदविश्यत् शता तस्मिन्। **नार्थ** इति। गुणगुणिनोः समवायेन श्लेषरूपसंयोगाभावादश्लेषाभावात्। **तस्यात्मन्येवेति** भाष्यं विवृण्वन्ति स्म, **किन्त्विति**। जीवे पापाभावोपहतपाप्मांशत्वात्, अतो विशेषणं लिङ्गविशिष्ट इति तदाहुः **लिङ्गविशिष्ट** इति। **श्लेषस्येति**। संयोगरूपस्य गुणगुणिनोरभावात्। **अत** इति। व्याख्येयम्। **उक्तेति**। **किन्त्वित्यादि**नाऽव्यवहितपूर्वोक्तानुपपत्तिरूपात् क्वचित्प्रत्यये रुशब्दस्य दीर्घाभावश्छान्दसः। **अर्थ** इति। अश्लेषपदार्थः। आद्यक्षणसम्बन्धः उत्पत्तिः सा संयोगसम्बन्धः न कालिकः, द्रव्यस्य कालस्यात्मनि द्रव्ये कालिकविशेषसंयोगस्य वक्तुं शक्यत्वात्। **यथा पुष्करेति**। श्रुत्यर्थः स्पष्टः। **श्रुताविति**। 'न ह वा एवंविदि किञ्चनानन्नं भवती'त्यस्याम्। 'सर्वान्नानुमति'सूत्रे व्याकृता। एवंविदि ज्ञानिनि प्राणविघनन्नमप्रशस्तमन्नम्। जन्तुमात्रस्य जग्धं भक्ष्यं तत्सर्वमिहानन्नं भवति, अदनीयमित्यन्ये। भवतीत्यस्योत्पद्यत इत्यर्थे। अप्रशस्तं पापजनकम्। अत्र पापस्य समवाय इति पूर्वश्रुत्यैकवाक्यत्वे पापानुत्पत्तिरसंश्लेषः। **पूर्वोक्त** इति। जीव एवानुत्पत्तिरसंश्लेष इति। **श्रौतेति**। अग्नेरुत्पन्नास्तदाश्रया आपः तत्संयुक्ताः पुष्करपत्रे संयोगाभाववत इति श्रौतदृष्टान्तानुरोधात्। **तस्येति**। जीवस्येत्यर्थः। **लिङ्ग एवेति**। अभावप्रतियोगिनोरैकाधिकरण्यनियमादेवकारः। **असंबन्धेति**। अनुत्पत्ति-

---

१. रश्मौ अविश्यति इति सप्तम्यन्तपाठः।

सर्वे पाप्मानः प्रदूयन्त' इति श्रुतिरग्निदृष्टान्तमाह । स्मृतिरपि 'यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा' इति । 'सर्वं पाप्मानं तरति, तरति ब्रह्महत्यां योऽश्वमेधेन यजत' इत्यादिश्रुतिभ्यस्त्वयापि न तद्भोगनियमो वक्तुं शक्यः । एतेनाभुक्तस्याक्षयाद्भोगे च कर्मान्तरजननान्मोक्षासम्भव इति निरस्तं वेदितव्यम् । नचान्योन्याश्रयः । अनाद्यविद्याजनितसंसारवासनात्मिका हि सा । सा च गुरूपसत्तिश्रवणमननविष्णूपासनादिरूपया ज्ञानसामग्र्यैव नाश्यते। अविद्या परं ज्ञानेन नाश्यत इति

भाष्यप्रकाशः ।

त्वेनैवंविदीतिविशेषणवैयर्थ्यप्रसङ्गात् । न च लिङ्ग उत्पन्नं लिङ्गे एव न श्लिष्यत इत्यपि युक्तम् । दृष्टान्तवैषम्यस्यात्रापि तुल्यत्वात् । अतः पापस्यासम्बन्धमात्रमेव श्रुतौ विवक्षितम्, न तु तस्य पूर्वं सत्तापीति पूर्वोक्तमनवद्यम् । मर्यादाभङ्गमाशङ्क्य समादधते । न चैवमित्यादि । एवमिति । दुष्कर्मणो दुरदृष्टानुत्पादकत्वे । तथा सम्पत्तेरिति । कर्मासम्बन्धसम्पत्तेः । तथा चेयमपि मर्यादैवेति न तद्भङ्ग इत्यर्थः । अत एवेति । मर्यादाभङ्गाभावादेव । 'तद् यथेषीकातूल'मिति श्रुतिस्तु छान्दोग्ये वैश्वानरविद्यायां द्रष्टव्या । 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभ'मिति नियमवादे श्रुतिविरोधरूपं दूषणान्तरमाहुः सर्वमित्यादि । एतेनेति । अश्वमेधरूपनिर्वेशादभुक्तस्यापि दुष्कर्मणः क्षयश्रावणेन । अन्योन्याश्रयं परिहरन्ति न चान्येत्यादि । सेति । चित्ताशुद्धिः । क तत्प्रसङ्ग इति । अन्योन्याधीनोत्पत्तिकत्वे ह्यन्योन्याश्रयः । इह तु श्रवणादिरूपसामग्र्या ज्ञानोदयस्तयैव च चित्ताशुद्धिनाश इति नान्योन्याधीनोत्पत्तिकत्वम् । अतः कान्योन्याश्रयप्रसङ्गः । ननु तथा-

रश्मिः ।

मात्रम् । तस्येति । पापस्याभावप्रतियोगिनी सत्तापीत्यर्थः । पूर्वोक्तमिति । अश्लेषोनुत्पत्तिरिति पूर्वोक्तम् । एवमित्यादीति । सम्भ्रमात् । छान्दोग्य इति सप्तमस्यार्धप्रपाठकानन्तरं 'प्राचीनशाल औपमन्यव' इत्यारम्भकेस्ति । श्रुत्यर्थस्तु 'यथा लोके इषीकायाः मुञ्जमध्यवर्तिनालस्य तूलमग्रं अग्नौ प्रोतं प्रक्षिप्तं प्रदूयेत दह्येत एवमेवेहास्य विदुषः सर्वे पाप्मानः धर्माधर्माख्याः प्रदूयन्ते दह्यन्ते दहेरन्निति । प्रसिद्धार्थस्तु इषीका दुर्गमनस्थानम्, 'इषीकाटवीं निर्विविशु'रिति वाक्यात् । तूलं ब्रह्मदारु, 'तूलं वा रूई'इति लोके, प्रोतं तन्तुषु पट इव प्रोतम् । प्रदूयेत दुष्यते । अग्रे समानोर्थः । अत्र भोगाभावेपि ज्ञानिनो ज्ञानेन कर्मदूषणमुक्तम् । अग्रे भाष्ये ज्ञानेन कर्मनाश उक्तः । एवं भोगेन कर्मनाशे नियमभङ्गः, भोगेनैव कर्मनाश इति नियमभङ्गः । दूषणान्तरमिति । उक्तदूषणादन्यदूषणम् । सर्वमित्यादीति । अत्र तरणोक्त्या पाप्मनि जलदृष्टिः कर्तव्या । 'आपमापामपः सर्वा' इत्यारणेनाप्रूपत्वात् । एवं ब्रह्महत्यायामपि स्वकारणादृष्टिः कर्तव्या । अश्वमेधेति । 'निर्वेशो मूर्च्छने भोगे' इति विश्वादश्वमेधरूपाद्भोगात् । अन्योन्याश्रयमिति । ज्ञानोदये दुरितक्षयो दुरितक्षये ज्ञानोदयः इत्यन्योन्याश्रयम् । न चान्योन्येत्यादीति । अनादीति । अनादिर्योऽविद्या तया जनितो यः संसारोऽहंताममतात्मकः तेन वासना संस्काररूपा, पूर्वापरानुसन्धानरहितपदार्थादानं वा तदात्मिकेत्यर्थः । चित्ताशुद्धिरिति । दुरितजन्या । अन्योन्येति । ज्ञानोदयदुरितक्षययोस्तया । ज्ञानोदय इति । ज्ञानाङ्गभक्तित्वादिति भावः । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इति श्रुतेः, न तु दुरितक्षयेण । तयैवेति । श्रवणादिरूपसामग्र्या स्वव्यापाररूपचित्ताशुद्धिनाशः । तन्नत्वे सति

---

१. अश्वमेधेन यजते यः स ब्रह्महत्यां तरति ।

क तत्प्रसङ्गः। ज्ञानसामग्र्या बलिष्ठत्वात्कर्मणो दुर्बलत्वान्न तत्प्रतिबन्धकत्वमिति ज्ञाननाश्यत्वबोधकश्रुतिस्मृतिमता त्वयाप्युरीकार्यम्। इममेव हेतुमाहाचार्यस्तद्व्यपदेशादिति ॥ १३ ॥

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

पापस्य शास्त्रविरोधित्वेन शास्त्रीयज्ञानेन समं विरोधो भवतु नाम,

---

भाष्यप्रकाशः।

प्यभुक्तेन कर्मणा ज्ञानसामग्रीबन्धो भवत्विति चेत्, तत्राहुः ज्ञानसामग्र्या इत्यादि। यदि हि कर्ममात्रमभुक्तं न क्षीयेत, तदा प्रायश्चित्तविधिरनर्थकः स्यात्। यदि चाक्षीयमाणं स्वसजातीयसन्तानमुत्पादयेत्, तदा ज्ञानसाधने प्रवृत्त्यनुपपत्त्या ज्ञानसामग्रीविधिरानर्थक्यमापद्यते। अतस्तदभावाय प्रारब्धस्यैवाभुक्तस्याक्षयः, क्रियमाणसंचितयोस्तु प्रायश्चित्तादिना क्षय इत्यवश्यमङ्गीकार्यम्। एवं सति प्रारब्धं भुञ्जानस्यापि क्रियमाणसञ्चितयोः क्षये ज्ञानसामग्र्या बलिष्ठत्वात्तयैव चित्ताशुद्धिनिवृत्तौ तत्पोषकस्य कर्मणो निरालम्बनतया दुर्बलत्वान्न सामग्रीप्रतिबन्धकत्वमिति त्वयापि श्रौतवादिनाङ्गीकार्यम्। इममेव हेतुं पूर्वपक्षिबोधनाय तद्व्यपदेशादिति पदेनाह। तस्मान्न कोपि दोष इत्यर्थः। अश्लेषश्रुतिस्तु, 'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत' इति छान्दोग्य उपकोसलविद्यास्था बोध्या। सात्र न लिखिता। सहकारित्वसूत्रे ज्ञानस्य कर्मस्वभावनाशकताया व्युत्पादिततया तत एव निर्वाहादिति ॥ १३ ॥

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥ सूत्रमवतारयन्ति पापस्येत्यादि। इत्या-

रश्मिः।

तज्जन्यजनको हि व्यापार इति व्यापारलक्षणात्। न तु ज्ञानोदयेन। चित्ताशुद्धिनाशस्य कर्मोपासनाजन्यत्वादित्येवकारः। **कर्मणेति**। दुष्कर्मणा। सूत्रेऽघपदेनाघत्वेनाघग्रहणादघविवेचनेनार्थमाहुः **यदि हीत्यादि**। **कर्ममात्रमिति**। प्रारब्धक्रियमाणसञ्चिताघमात्रम्। **अनर्थक इति**। प्रायश्चित्तस्य भोगातिरिक्तस्य भोगनाश्याघनाशेऽकारणत्वात् तथा। **स्वसजातीयेति**। अघत्वेन सजातीयत्वम्। स्वसजातीयसन्तानज्ञानप्रतिबन्धकम्। **आनर्थक्यमिति**। शमदमादीनां ज्ञानोत्पादे कौण्ठ्यात्तथा। **तदभावायेति**। द्वयोर्विध्योरानर्थक्याभावाय। **अभुक्तस्येति**। भोगेन क्षयः। **प्रायश्चित्तादिनेति**। आदिना ज्ञानेन। **चित्ताशुद्धीति**। ज्ञानसामग्रीव्यापारभूतायाम्। **तत्पोषकस्येति**। चित्ताशुद्धिहेतोर्दुष्कर्मणः। आलम्बनं दुष्कर्मणश्चित्ताशुद्धिः, तस्याः निष्क्रान्ततया। **सामग्रीति**। ज्ञानसामग्रीप्रतिबन्धकत्वम्। **श्रौतेति**। श्रुतिभिः श्रूयत इति श्रौतम्। शैषिकोण्। श्रुतिः श्रवणं तस्य वादिना श्रुतिश्रुतिमता श्रुतिश्रवणवतेति यावत्। **इममेवेति** भाष्यविवरणं **इममेवेति**। **तद्व्यपदेशादिति**। तस्य हेतोर्व्यपदेशात्। **न लिखितेति**। अघनाशविचारेऽभावप्रतियोगिनोर्व्यधिकरणयोरिति बोध्यमित्येवंबोधिका न लिखिता। **कर्मस्वभावेति**। व्यधिकरणज्ञानस्य कर्मस्वभावनाशकत्वम्। समानाधिकरणस्य कर्मनाशकत्वमिति बोधनाय स्वभावशब्दः। श्रुतौ व्यधिकरणयोर्जलतदभावयोः समानाधिकरणयोः जलसंयोगतदभावयोर्ग्रहणं बोध्यम्। **तत इति**। सहकारित्वसूत्रात् ॥ १३ ॥

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥ पापस्येत्यादीति। विरोधः सहानव-

धर्मस्यातथात्वेनाविरोध एवेत्याशङ्कानिरासाय पूर्वन्यायातिदेशमाह । इतरस्य पुण्यस्याप्येवम्, पूर्वस्य नाश उत्तरस्याश्लेष इत्यर्थः । अतिदेशाद्धेतुरपि स एव ज्ञेयः । तथाहि । 'उभे उ हैवैष एते तरति', 'क्षीयन्ते चास्य कर्माणी'ति सामान्यवचनाज् 'ज्ञानाग्निः सर्वकर्माणी'ति स्मृतौ सर्वशब्दाच्च तथा ।

अथेदं शङ्क्यते । मर्यादामार्गीयत्वाज्ज्ञानानन्तरं भरतवत् सङ्गदोषेण भगवद्भावाच्युतौ सङ्गजदोषोत्पत्तिवदग्रे विहितनिषिद्धकर्मणोरप्युत्पत्तिर्वक्तुं शक्येति ज्ञानस्य न सर्वात्मना कर्मविरोधित्वमिति । तत्र निर्णयमाह । पाते । भक्तिमार्गे भगवद्भावाच्युतिः पात इत्युच्यते । तुरप्यर्थे । अपिशब्दे वाच्ये व्यवच्छेदार्थकतुशब्दोक्त्यास्मिन्मार्गे पातस्य व्यवच्छेद एव । 'न कर्हिचिन्मत्पराः' इति वाक्यात् । परन्तु मर्यादामार्गीयत्वात् प्रारब्धभोगार्थं प्रभुश्चेत्तथा करोति, तद्भावे पूर्णे सति तद्भोगोसम्भावित इति तदैवं भवतीति व्यासाभिप्रायो ज्ञायते ।

तथा च तस्मिन् सत्यप्युत्तरस्य कर्मणोसंश्लेष एवेत्यर्थः । पूर्वसूत्र एवमेवा-

---

भाष्यप्रकाशः ।

शङ्कानिरासायेति । इति हेतोः पूर्वपुण्यस्यानाश उत्तरस्य च संश्लेषो भवत्विति शङ्कानिरासाय । ननु हेतोरकथनात् कथं पुण्यस्य तथात्वं ज्ञेयमित्यत आहुः अतिदेशादित्यादि । 'उभे ह्येवैष' इति श्रुतिस्तु शारीरब्राह्मणस्था । 'उभे ह्येवैष एते तरत्यमृतः साध्वसाधुनी' इत्यादि । द्वितीया तु मुण्डकस्था । सूत्रशेषमवतारयन्ति । अथेदमित्यादि सङ्गजदोषोत्पत्तिवदिति । ज्ञानानन्तरं यथा सङ्गजदोषोत्पत्तिस्तथेत्यर्थः । अग्र इति । ज्ञानानन्तरम् । व्याकुर्वन्ति भक्तीत्यादि । वाक्यं तु तृतीयस्कन्धे कापिलेये 'न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नोऽनिमिषो लेढि हेतिः । येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्ट'मिति । अत्र 'मत्परा न नङ्क्ष्यन्ती'ति कथनात् पातव्यवच्छेदलाभः । तथा करोतीति । भक्तिभावं प्रतिबध्नाति । तदर्थं प्रतिबन्धकरणे हेतुः तद्भाव इत्यादि । तदैवं भवतीति । यदा भक्तिभावप्रतिबन्धः, तदा भरतवदन्यासक्त्यादिर्भवति । असंश्लेष एवेति । तदुपाख्याने, 'स च तदा पितृसन्निधावेवा-

रश्मिः ।

स्थानम् । अतथात्वेनेति । अशास्त्रविरोधित्वेन । सूत्रशेषमिति । पाते त्वितिसूत्रशेषम् । ज्ञानानन्तरमिति । हरिणशरीरे ज्ञानानन्तरं पञ्चमस्कन्धेस्ति । व्याकुर्वन्तीति । सूत्रशेषं व्याकुर्वन्ति भक्तीत्यादीति । अपिशब्दं विहाय तोरुपादाने तात्पर्यमाहुः अपिशब्द इति । पातस्येति । सुकृतदुष्कृताभ्यां कर्मभ्यां पातस्य व्यवच्छेद एव तोः प्रयोजनम्, न त्वन्यत्तात्पर्यप्रयोजनम् । न कर्हिचिदिति । शान्तरूपे हे मातः नङ्क्ष्यन्ति नाशं पातं वा प्राप्नुवन्ति । अनिमिषः हेतिः कालः । लेढि । 'लिह आस्वादने' तिपि तस्य रूपम् । अत्रेति । मत्पराः सुकृतदुःकृतकर्मनिर्हारकाः न नङ्क्ष्यन्ति । 'प्राप्तिपूर्वको निषेध' इति नाशः पातः प्राप्तः । सोन्यनिष्ठसुकृतदुःकृतकर्मभ्यां भगवत्परनिष्ठः व्यवच्छेदयुक्तः । सुकृतदुःकृतकर्मणोर्भगवत्परभक्तेऽभावात् । एवं पातव्यवच्छेदलाभः । तद्भाव इत्यादीति । भगवद्भजने पूर्णे सति । तद्भोगः प्रारब्धभोगः । अन्यासक्त्यादिरिति । प्रारब्धभोजकः । तदुपाख्यान इति । भरतोपाख्याने । तादृशेति ।

श्लेषशब्दस्य व्युत्पत्तेः । अतिदेशस्यैवंपदेनैव प्राप्तेः सर्वं सूत्रं तत्परत्वेन न व्याख्येयम् । पातशब्दस्य देहपातं तुशब्दस्यावधारणमर्थमुक्त्वा देहपाते मुक्तेरावश्यकत्वावधारणं वाक्यार्थ इति चोक्तिर्न साधीयसी । मुक्तिप्रापकपदाभावात् 'भोगेन त्वितरे क्षपयित्वाथ सम्पद्यत' इत्यग्रे वक्तव्यत्वाच्च ॥ १४ ॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

ननु देहस्य कर्मजन्यत्वात्तन्नाशे तन्नाशस्यावश्यकत्वाद् ब्रह्मविदः प्रवचनानुपपत्तिः । एवं सति ब्रह्मजिज्ञासोर्गुरूपसत्त्यादिसाधनासम्भवः । 'आचार्यवान् पुरुषो वेदे'ति श्रुतेस्तदभावेन ज्ञानमार्गोच्छेदेन मुक्त्युच्छेदप्रसङ्ग इत्याशङ्क्य समाधत्ते । पूर्वे पूर्वसूत्राभ्यां ज्ञाननाश्यत्वेन ये प्रोक्ते पापपुण्ये ते नाशेषे,

भाष्यप्रकाशः ।

सध्रीचीनमिव स करोती'तिवाक्येन तादृशकर्मबोधनादग्रे च जीवन्मुक्तत्वबोधनादसंश्लेषः । एवमेवेति । अनुत्पत्तिरूपतया । ननु सर्वस्य सूत्रस्यातिदेशपरत्वे को दोषः, येन एवं विभज्य व्याख्यायत इत्यत आहुः अतिदेशस्येत्यादि । तत्परत्वेनेति, अतिदेशपरत्वेन । तथा च शेषवैयर्थ्यमेव दोष इत्यर्थः । एवं मर्यादामार्गेपि ब्रह्मज्ञानोत्तरं भक्तौ यदा प्रतिबन्धः, तदापि प्रारब्धमात्रस्यैव भोगो, न तु क्रियमाणसञ्चिताभ्यां दुरदृष्टोत्पत्तिरित्यर्थः सिद्धः । अत्रान्येषां व्याख्यानं पातशब्दस्येत्यादिनानूद्य दूषयन्ति उक्तिर्न साधीयसीत्यादि । ननु सूत्रे मुक्तिप्रापकपदाभावेपि फलप्रकरणत्वात्तदनुरोधेन तथा कल्पने को दोष इत्यत आहुः भोगेनेत्यादि । तथा च तैः 'सम्पद्यत' इत्यस्य 'मुच्यत' इति व्याख्यानात्तस्या मुक्तेरत्र सिद्धौ तन्मतेग्रिमसूत्रान्तरे भोगेन कर्मक्षपणानन्तरं ब्रह्मसम्पत्तिरूपमुक्तेरेव व्याख्यानात्तद्वैयर्थ्यमेव दोष इत्यर्थः ॥ १४ ॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥ सूत्रमवतारयन्ति नन्वित्यादि । तन्नाशे तन्नाशस्येति । कर्मनाशे देहनाशस्य । एवं सतीति, ब्रह्मविदो देहनाशे सति । तदभावेनेति । आचार्याभावेन । भक्त्युच्छेदप्रसङ्ग इति । निरुपधिस्नेहात्मिका हि भक्तिरात्मत्वेन ज्ञाने सति भवति । आत्मत्वेन ज्ञानं च परम्परया आचार्याधीनमतस्तदभावे तत्प्रसङ्ग इत्यर्थः । मुक्त्युच्छेदप्रसङ्ग इति वा पाठः । व्याकुर्वन्ति पूर्वेत्यादि । नाशेषे इति ।

रश्मिः ।

असंश्लिष्टकर्मबोधनात् । अग्रे चेति । नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगम इत्यत्र । असंश्लेष इति अनुत्पत्तिः । एवं विभज्येति । इतरस्याप्येवमसंश्लेष इत्यस्यातिदेशकत्वं 'पाते त्वि'त्यस्य भिन्नप्रक्रमेण ज्ञानस्य न सर्वात्मना कर्मविरोधित्वमिति शङ्कानिवर्तकत्वमिति विभागं कृत्वा । शेषेति । 'पाते त्वि'तिसूत्रशेषस्य वैयर्थ्यम् । तैरिति । लीलोपयोगिपदार्थैः । तद्वैयर्थ्यमिति । 'भोगेने'ति सूत्रवैयर्थ्यम् ॥ १४ ॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥ भक्त्युच्छेदेति । भाष्ये कचित्पुस्तके मुक्त्युच्छेदप्रसङ्ग इति । भक्त्युच्छेदप्रसङ्ग इति पाठं व्याकुर्वन्ति स्म निरुपधीति । अयमेव प्रेमा । सर्वात्मभावस्तु प्रदानसाध्य इति नोक्तः । भवतीति । तथा च भाष्यम् । ज्ञात एव स्नेह इति । परम्परयेति । आचार्याभावे तद्दत्ताभाव इत्याचार्याधीना तद्दत्ता तद्दत्ताधीनमधिकारद्वारात्मत्वेन ज्ञानमिति परम्परा तथा । तदभाव इति । आचार्याभावे, आत्मत्वेन ज्ञानाभावप्रसङ्ग इत्यर्थः ।

---

१. श्रीविट्ठलेश्वरहस्ताक्षरलिखितादर्शे मुक्त्युच्छेद इति पाठः ।

किन्त्वनारब्धं भोगायतनलक्षणं कार्यं याभ्यां ते एवेत्यर्थः । नन्वितरनिरपेक्षं हि ज्ञानं स्वशक्त्यैवाग्निरेध इव कर्माणि दहतीति पूर्वमुक्तम्, तथा सत्यशेषमेव तद्दहतीति वक्तुं युक्तम्, न तु सशेषम् । शक्तेरविशिष्टत्वात् । न च कर्मनाशेपि संस्कारवशात् कुलालचक्रभ्रमिवत्तद्वासनावशाद्देहादिसत्तया प्रवचनाद्युपपत्तिरिति वाच्यम् । ज्ञानस्य सर्वतो बलवत्त्वात् सवासनस्य तस्य नाशनात् । न हि महाशिलानिपाते चक्रभ्रमिरनुवर्तितुं शक्नोतीत्याशङ्क्यारब्धकार्यादहने हेतुमाह । तदवधेः । तज्ज्ञानेनारब्धकार्यादहनं यत् तदखिलकारणकारणत्वेनाखिलस्य पूर्वावधिरूपभगवदिच्छालक्षणाद्धेतोरित्यर्थः । यत्र तस्यापि दहनेच्छा तत्र तथैवेति निगूढाशयः । अत एवाग्रे तथा वक्ष्यते । अत एव श्रीभागवते 'मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशित' इति, 'उपभोगेन कर्मारब्धं व्यपनय'न्निति च भरतं प्रति वचनं गीयते । एवं सति मणिमन्त्रादिप्रतिबद्धशक्तेरग्नेरिव ज्ञानस्याप्यदाहकत्वे न काचिद्धानिरिति सर्वमनवद्यम् । इच्छाप्रतिबद्धतादशायां न प्राचीना दशास्तीति तद्व्यवच्छेदज्ञापनाय तुशब्दः । एतेन भगवद्भावस्य सर्वतो बलवत्त्वात् कथं तस्य पात इति शङ्का निरस्ता । भगवदिच्छाया मूलकारणत्वेनोक्तेस्तस्याः सर्वतो बलिष्ठत्वात् । तथेच्छा च स्वकृतमर्यादापालनाय पुष्टावङ्गीकृते न तथेति सर्वमनवद्यम् ॥ १५ ॥

भाष्यप्रकाशः ।

न यावत्तावच्छिन्ने नश्येते इति शेषः । ते एवेति । दह्येते इति शेषः । तथा चापरोक्षेणापि ज्ञानेनारब्धकार्यमेव कर्म दह्यत इति शरीरारम्भकस्य कर्मणः सत्त्वेन शरीरस्यापि सत्त्वान्न प्रवचनाद्यनुपपत्तिरित्यर्थः । हेतुं व्याख्यातुं सूत्रशेषमवतारयन्ति नन्वित्यादि । न तु सशेषमिति । न तु प्रारब्धकर्मरूपं शेषं स्थापयित्वा । हेतुं व्याकुर्वन्ति तदित्यादि । तत्र तथैवेति । तादृशस्थले प्रारब्धकर्मणोपि दाह एव । अत्र गमकमाहुः अत एवाग्रे तथा वक्ष्यत इति । 'अतोन्यापी'ति सूत्रे वक्ष्यत इत्यर्थः । मर्यादामार्गे प्रारब्धकर्मसत्तायां मानमाहुः अत एवेत्यादि । भरतं प्रतीति । प्रतिर्लक्षणे । भरतं लक्षीकृत्य । अदाहकत्व इति भिन्नं पदम् । तथेच्छेति । प्रारब्धस्य भोगेनापनयनेच्छा । न तथेति । न तस्य भोगेनापनयेच्छा ।

रश्मिः ।

भाष्ये । शक्तेरिति । दृष्टान्ते दाहकशक्तेः । शेषशेषिणी प्रति कारणताया विशेषशून्यत्वात् । निर्विशेषाया एकस्या एव कारणत्वात् । महाशिलेति । तद्वत्प्रकृते ज्ञानप्राप्तिः । तदवधेरितिहेतोस्तस्य तच्छब्दार्थस्य ब्रह्मणः अवधेरिच्छाया इत्यर्थं हृदिकृत्याहुः तज्ज्ञानेनेति । ज्ञानेनेतिव्याख्यानं तदित्यन्तम् । अग्रे षष्ठीतत्पुरुषः । तस्याखिलकारणत्वेनाखिलस्यावधेर्नाम पूर्वावधिरूपाद्भगवदिच्छालक्षणात् । पूर्वत्वं कार्यापेक्षया । इच्छाशक्त्यधीनत्वात्सर्वशक्तीनामिति । गूढाशय इति । तात्पर्येन्तःकरणम् । अदाहकत्व इति । सप्तम्यन्तम् । सौत्रतुशब्दार्थमाहुः इच्छेति । प्रारब्धकार्यादहने इच्छाप्रतिबद्धता या दशा, तस्याम् । प्राचीनेति । सर्वकर्मनाशिका दशा । तद्व्यवच्छेदेति । प्राचीनदशाव्यवच्छेदज्ञापनाय । तथा च तदवधेस्त्वित्यन्वयः । प्राचीनदशा-

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

ननु प्रारब्धं हि प्राचीनम् तन्नाशाय तद्भोग एव कर्तव्यो ब्रह्मविदा, न तु विहितमन्यदप्यग्निहोत्रादि, प्रयोजनाभावात्, दृश्यते च तादृशानां तत्करणम्, अत उत्तरस्य कर्मणः संश्लेष आवश्यक इत्याशङ्क्य तत्प्रयोजनमाह । तुशब्दः शङ्काव्युदासकः । अग्निहोत्रादिविहितकर्मकरणं तत्कार्यायैव, भोगकार्याय प्रारब्धनाशायैवेत्यर्थः । येषामग्निहोत्रादिकारकं प्रारब्धमस्ति, तैरेव तन्नाशाय भोगवत्तदपि क्रियते, न त्वतादृशैः, अत एव न सनकादीनां तथात्वम् । कुत एतत् । तद्दर्शनात् । 'यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेने'ति श्रुतिः पूर्वकर्मणोऽग्रिमकर्महेतुत्वं दर्शयतीति नानुपपत्तिः काचित् ।

केचित्तु ज्ञानस्य यत्कार्यं तदेवाग्निहोत्रादेरिति तत्कार्यायेति पदस्यार्थं वदन्ति । स न साधुः । तदधिगम इत्युपक्रमात् ब्रह्मविदः प्रारब्धात्मकप्रतिबन्धनाशे मोक्षस्य पूर्वज्ञानेनैव सम्पत्तेः कर्मणो वैयर्थ्यापातात् । 'तमेतं वेदानुवचनेने'त्यादिश्रुतिदर्शनं दर्शनपदार्थ इत्यपि पूर्वविरोधादुपेक्ष्यः ॥ १६ ॥

इति षष्ठं चतुर्थाध्याये प्रथमपादे तदधिगमाधिकरणम् ॥ ६ ॥

भाष्यप्रकाशः ।

अन्ये तु, 'तदवधे'रित्यस्य, 'तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्य' इति प्रारब्धस्य शरीरपातावधिश्रुतेरित्यर्थमाहुः । तत्रापि प्रवृत्तफलस्य कर्मणोऽनाशे हेतुस्तु मृग्यः । सोत्र सिद्धान्ते विवृत इति तन्मतेपि नातो विशेष इति बोध्यम् ॥ १५ ॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥ सूत्रमवतार्य विवृण्वन्ति तुशब्द इत्यादि । केचिदित्यादिना परमतमुपक्षिप्य दूषयन्ति स नेत्यादि । प्रारब्धात्मकप्रतिबन्धनाशे इति । 'तस्य तावदेव चिर'मिति श्रुतेस्तस्य नाशे । पूर्वविरोधादिति । एतस्माद्वाक्यात् पूर्वं 'मनसैवावाप्तव्यम्, मनसैवानुद्रष्टव्य'मित्यवधारणश्रावणेन सूत्रकृतापि तदधिगमसूत्रे ज्ञानादेव कर्मनिवृत्तिकथनेन उक्तश्रुतौ च यज्ञादेर्विविदिषाफलकत्वस्य ज्ञानपर्यन्तत्वस्य

रश्मिः ।

व्यवच्छेदादिति तोरर्थः । तुरिति । लुप्तपञ्चम्यन्तम् । तस्येति । भक्तस्य । तथेच्छेति । पातेच्छा । स्वकृतेति । एवं 'जीवेनैतदेतत्कर्म कारयित्वैतदेतत्फलं दास्यामी'ति विद्वन्मण्डनोक्तदिशा स्वकृतामर्यादा तस्याः पालनाय । न तथेति । न भक्तस्य पातेच्छा । मर्यादाकारणस्य पापाद्यभावस्य पुष्टौ कारणताभावात् । प्रवृत्ते । प्रवृत्तं प्रवृत्तिः फलं यस्येति विग्रहः, न तु निवृत्तं फलं तस्य, प्रारब्धकर्मण इत्यर्थः । अनाश इति । शरीरपातात्पूर्वमनाशे । स इति । भगवदिच्छारूपः ॥ १५ ॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥ अवतारयन्तीति । नन्वित्यादिभावतार्य । भाष्यार्थस्तु, प्राचीनमिति । ननु सञ्चितमपि प्राचीनमिति चेन्न । स्वतन्त्रेच्छस्य मुनेः पर्यनुयोगानर्हत्वात् । प्रारब्धं भोगेन नश्यति । क्रियमाणमकरणेन सञ्चितं देहमुत्पाद्य नश्यतीति । आवश्यक इति । कर्मणां प्ररोहैकस्वभावत्वात् तथा । तुशब्द इत्यादीति । अग्निहोत्रादीति ।

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥ (४-१-७.)

तदेवं पूर्वसूत्रचतुष्टयेन मर्यादामार्गीयभक्तस्य मर्यादयैव मुक्तिप्रतिबन्धसम्भवस्तयैव तन्नाशश्चेति निरूपितम् । अथ पुष्टिमार्गीयस्य विनैव भोगं प्रारब्धं नश्यति न वेति विचार्यते । तत्र भोगैकनाश्यस्वभावत्वात्तस्य न तं विनास्यापि तन्नश्यतीति प्राप्ते निर्णयमाह । एकेषां पुष्टिमार्गीयाणां भक्तानामुभयोः प्रारब्धाप्रारब्धयोर्भोगं विनैव नाशो भवति । कुत एतत् ! तत्राह । अतः । श्रुतेः कर्मणो ज्ञाननाश्यत्वनिरूपिकायाः । ब्रह्मविद एव प्रवचनादिनिरूपणेन तदनाश्यप्रारब्धाख्यकर्माक्षेपकश्रुतेश्च । अन्यापि श्रुतिः पठ्यते 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां, द्विषन्तः पापकृत्या'मिति । ज्ञानभोगाभ्यां कर्म-

भाष्यप्रकाशः ।

वा बोधनेन तद्विरोधात् । न च सहकारित्वसूत्रविरोधः । प्रारब्धनाशकत्वेनापि तदुपपत्तेरविरोधात् ॥ १६ ॥ इति षष्ठं तदधिगमाधिकरणम् ॥ ६ ॥

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥ एतस्याधिकरणस्य न पूर्वशेषत्वमिति बोधनाय पूर्वोक्तमनुवदन्त एतदवतारयन्ति तदेवमित्यादि । अथेत्यादि च । पूर्वपक्षमाहुः तत्रेत्यादि । तस्येति । प्रारब्धस्य । तं विनेति । भोगं विना । अस्यापीति । पुष्टिमार्गीयस्यापि । व्याकुर्वन्ति एकेषामित्यादि । तदनाश्येति । ज्ञानानाश्येत्यर्थः । 'तस्य पुत्रा' इतिश्रुतिस्तु शाट्यायनिनामस्ति । ननु सूत्रे, एकेषामिति पदेन पुष्टिमार्गीया एव विवक्ष्यन्त इत्यत्र किं गमकमित्याकाङ्क्षायामन्यथानुपपत्तिं तथात्वेनोपपादयन्ति ज्ञानभोगाभ्यामित्यादि । अर्थस्तु प्रकटः ।

रश्मिः ।

अत्रादिना विहितकर्म तत्करणं च गृह्यते । अतादृशैरिति । अग्निहोत्रादिकारकप्रारब्धशून्यैः । अत एवेति । अतादृशत्वादेव । तथात्वं अग्निहोत्रादिकर्तृत्वम् । एतदिति । प्रारब्धतदभावाभ्यामग्निहोत्रादिकरणाकरणम् । सहकारित्वेति । तृतीयस्य चतुर्थचरणेस्ति । अत्राश्रमधर्माणां ज्ञानाय सहकारित्वमुक्तमिति तथा । तदुपपत्तेरिति । आश्रमधर्मोपपत्तेः ॥ १६ ॥ इति षष्ठं तदधिगमाद्यधिकरणम् ॥ ६ ॥

अतोन्यापि ह्येकेषामुभयोः ॥ १७ ॥ तदेवमित्यादीति । मर्यादयेति । एतस्मै जीवायैतदेतत्कर्म कारयित्वैतदेतत्फलं दास्यामीति सृष्ट्यादौ इच्छाविषया मर्यादा तस्याम् । मर्यादायामग्निहोत्रादिकारकं प्रारब्धं निवेश्य मुक्तिप्रतिबन्धसम्भवोस्ति । अग्निहोत्रादिनैव प्रारब्धनाशाय भोगवदग्निहोत्राद्यपि क्रियत इति कर्मणा मुक्तिप्रतिबन्धसम्भवः । तयैवेति । मर्यादयैव मुक्तेः प्रतिबन्धोनुत्पादस्तस्य नाशश्च सनकादीनामिव । मुक्तिप्रतिबन्धकं कर्मेत्युक्तम् । नश्यतीति । अग्निहोत्रादिना नश्यति । अत्र संशये पूर्वकोटौ 'कर्मणा कर्मनिर्हार' इतिवाक्यं बीजं, द्वितीयस्यां कोटौ, 'ते नाधीतश्रुतिगणा नोपासितमहत्तमा' इतिवाक्यं बीजम् । भाष्ये तन्नश्यति, प्रारब्धं नश्यति । ज्ञाननाश्यत्वेति । श्रुतिस्तूक्ता । हेत्वन्तरमाहुः ब्रह्मविद इति । श्रुतिस्तु 'धर्मान्न प्रमदितव्य'मिति शिक्षायाम् । 'आचार्यवान् पुरुषो वेदे'ति छान्दोग्ये । 'आचार्यः पूर्वरूपं अन्तेवास्युत्तररूपं विद्या सन्धिः प्रवचनꣳसंधान'मिति तैत्तिरीये । प्रवचनं प्रारब्धं विना नेति प्रारब्धाख्यकर्माक्षेपकं प्रवचनादि । 'येन विना यदनुपपन्नं तत्तेनाक्षिप्यत' इतिन्यायात् । तस्येति । पुष्टिमार्गीयस्येत्यर्थः ।

भाष्यप्रकाशः।

अन्ये तु, अतोग्निहोत्रादेर्नित्यात्मकर्मणोन्याप्यस्ति साधुकृत्या या फलमभिसन्धाय क्रियते। तस्या एष विनियोग उक्त इति व्याकुर्वन्ति। तथा सत्येवं नित्यकाम्यकर्मभेदेन श्रुत्योर्विषयभेदे सिद्धे विरोधाभावात् सूत्रे 'चैकेषा'मिति पदेन शाखिनां परामर्शादुभयोरित्यनेन जैमिनिबादरायणयोराचार्ययोः परामर्शाच्छ्रुतौ सूत्रे चानुपपत्त्यभावात् कथमधिकारिकृतविषयभेदावगमः, कथं च प्रारब्धकर्मणोत्र विषयत्वावगम इत्याकाङ्क्षायां तद् दूषयितुमाहुः न चेत्यादि। तथा चैवं नित्याग्निहोत्रादेरस्या विषये भेदितेपि, 'तदधिगमा'दिसूत्राद्विषयो न भिद्यत इति, 'तद्यथेषीकातूलं' 'यथा पुष्करपलाश आपः', 'उभे ह्येवैष एते' इत्येताभ्यो विषयभेदाभावात्तासां विरोधो दुष्परिहरः। न च येषामश्लेषो व्याख्यातः, तेषां विद्यमानत्वादयं तेषां विनियोग इति विषयभेदात् सुपरिहर इति वाच्यम्। विद्यमानाश्लेषस्य प्रागेव दूषितत्वात्। ज्ञानोत्तरं स्वर्गादिलौकिककामनोत्पत्त्यसम्भवेन काम्यायाः साधुकृत्याया उत्पत्तेर्वक्तुमशक्यत्वाच्च श्रुतौ पापकृत्याविनियोगस्याप्युक्तत्वेन तस्यां च फलाभिसन्धानासम्भवेन काम्यत्वासम्भवाच्च

रश्मिः।

साधुकृत्यापापकृत्यासहितत्वात्। न ब्रह्मविद इत्यर्थे ज्ञाने न कृत्ययोर्नाशात्। मर्यादाभक्तस्येत्यर्थे भक्तेः पूर्वमेव तन्नाशात्। साधारणस्येत्यर्थे प्रायपाठविरोधः। अतः पुष्टिमार्गीयसम्बन्धिनीं साधुकृत्यां भगवदनुग्रहेण सुहृत्सु गच्छन्तीं ते गृह्णन्ति, तथा पापकृत्यां द्विषन्तो गृह्णन्तीत्यर्थः। **प्रकृते।** **अन्यथानुपपत्तिमिति।** विषयभेदकल्पनमन्तरोक्तरीत्या श्रुत्यर्थासम्भवे 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावर' इति, 'नाभुक्तं क्षीयते कर्मे'ति च श्रुत्यास्याः 'तस्य पुत्रा दायमुपयन्ती'त्यस्या विरोध इत्यर्थापत्तिः। अन्यथानुपपत्तिस्तु जीवन् देवदत्तो गृहे नास्तीत्यत्र जीवनसंसृष्टगृहीभावबहिर्भाववयोः प्रमेययोः संसृष्टबुद्धिरूपप्रमेयं तस्याः कारणमित्यन्यथानुपपत्तिरत्र ताम्, तथा च ज्ञानभोगाभ्यामिति भाष्ये विरोधेत्यन्तभाष्येणान्यथानुपपत्तिनिरूपणं, परिहारायेत्यादिभाष्येणार्थापत्तिनिरूपणमिति ज्ञेयम्। तथा च **प्रस्थानरत्नाकरे**ऽन्यथानुपपत्तिस्त्वर्थान्तरकल्पनया समाधेयत्वेनोच्यमानप्रमाणसिद्धयोर्द्वयोरर्थयोः परस्परप्रतिघातः, तत्समाधानायार्थान्तरकल्पनमर्थापत्तिरिति। **तथात्वेनेति।** गमकत्वेन। **प्रकट इति।** **विषयभेद इति।** पुष्टिमार्गरूपविषयस्य भेदः। **अन्यस्तु** अन्यथानुपपत्तिसमर्थने प्रकट इत्यर्थः। **तस्या इति।** साधुकृत्यायाः काम्यकर्मरूपायाः। **व्याकुर्वन्तीति।** सूत्रं व्याकुर्वन्ति। **श्रुत्योरिति।** अग्निहोत्रादिनित्यकर्मप्रतिपादिका, 'तस्य पुत्रा' इत्यस्याः काम्यकर्मप्रतिपादिका, तयोः। **अधीति।** पौष्टिकमार्यादिकाभ्यामधिकारिभ्यां कृतो यो विषयस्य पुष्टिमार्गरूपस्य भेदावगमः। **अत्रेति।** सूत्रे। **तदिति।** मतं दूषयितुम्। **अस्या इति।** काम्यकर्मप्रतिपादिकायाः 'तस्य पुत्रा' इति श्रुतेः। नित्यत्वकाम्यत्वाभ्यां भेदिते। तदधिगम इत्यादि–भाष्यफलितार्थमाहुः। **तदधिगमादीति।** तदधिगमादिसूत्रं प्राप्य यः काम्यकर्मविषयः स न भिद्यत इत्यर्थः। **एताभ्य इति।** भाष्यतत्प्रकाशभेदेन तदधिगमसूत्रोक्ताभ्यां द्वाभ्यां 'इतरस्ये'तिसूत्रोक्ता तृतीया एताभ्यः। **विरोध इति।** एताभिरेवैतस्य पुत्रा इति श्रुतेः सहावस्थानसम्भवेपि पृथक् चिन्तने तथा। **येषामिति।** पुण्यपापानां, अश्लेषो ब्रह्मविदि। **अयमिति।** तेभ्यः काम्यकर्मभ्यः पृथगयं तस्य पुत्रा इति श्रुत्युक्तः। **तेषां** पुण्यपापानाम्। **प्रागेवेति।** तदधिगमसूत्र एव, 'अत्रोत्तरस्योत्पन्नस्याश्लेष इति नार्थ' इत्यादिभाष्येण दूषितत्वात्। पापकृत्यायामिति भाष्यं प्रपञ्चयन्ति स्म। **श्रुतौ पापेति।** **फलाभीति।** कृष्णेच्छाविषयस्य बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानस्य प्रवर्त-

नाशनिरूपकश्रुत्या अस्याः श्रुतेर्विरोधपरिहारायावश्यं विषयभेदो वाच्यः । न च काम्यकर्मविषयेयं श्रुतिरिति वाच्यम् । 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशा'विति सूत्रेण 'इतरस्याप्येव'मितिसूत्रावयवेन चाविशेषेणारब्धातिरिक्तकर्मणोरखिलयोर्नाशनिरूपणात् । पापकृत्यायां काम्यत्वासम्भवाच्च । तस्मात्स्वानुग्रहभाजनस्य भक्तस्य स्वप्राप्तिविलम्बमसहिष्णुर्भगवान् अस्य प्रारब्धमेतत्सम्बन्धिगतं कृत्वा तस्य तेन भोगं कारयति । प्रारब्धं भोगैकनाश्यमिति स्वकृतमर्यादापालनाय न नाशयति। न च तयोरमूर्तत्वेनाकृताभ्यागमप्रसङ्गेन च नैवं वक्तुमुचितमिति वाच्यम् । ईश्वरत्वेनान्यथापि करणसम्भवात् । मर्यादाविपरीतस्वरूपत्वात् पुष्टिमार्गस्य न काचनात्रानुपपत्तिर्भावनीया । तस्या अत्र भूषणत्वात् । अत एवैकेषामिति दुर्लभाधिकारः सूचितः ॥ १७ ॥

भाष्यप्रकाशः ।

विषयश्रुतिविरोधो[1]पि दुष्परिहरः । अतस्तदभावायावश्यमधिकारिभेदः प्रा[2]रब्धात्मककर्मविनियोगश्चात्राभ्युपेयः । उभयपदे आचार्यद्वयग्रहणमप्यसङ्गतम् । सन्निधौ जैमिनेरश्रुतत्वात् । सामान्यशब्दस्य चोपस्थितार्थकत्वनियमेन बाधकं विना तत्त्यागायोगात् । अत उक्तरीत्यैव मन्तव्यमित्यर्थः । तदेतच्चतुर्थस्कन्धीये तत्त्वदीपप्रकाशे सम्यग् व्युत्पादितमिति प्रभुचरणैर्नात्रोक्तम् । सिद्धमाहुः तस्मादित्यादि । पुनः किञ्चिदाशङ्क्य परिहरन्ति न च तयोरित्यादि । तथा चेदं तवापि तुल्यमतः परिहारसाम्यान्न पर्यनुयोग उचित इत्यर्थः ॥ १७ ॥

रश्मिः ।

कत्वात् । बलवत् यदनिष्टं तस्याननुबन्ध्यजनकं यदिष्टसाधनताज्ञानं तस्येत्यर्थः । **विषयश्रुतिस्तस्य पुत्रा इति** । तस्या **निरोधः** काम्यकर्मविषये सूत्रविषयश्रुतित्वप्रलयो नाशः । **विषयश्रुतिविरोध** इति पाठो वा । विषयश्रुतिसहानवस्थानं तस्य पुत्रा इत्यस्या इत्यर्थः । तथा च तदधिगम इत्यत्र सहावस्थानमित्यर्थः । **तदभावायेति** । तदधिगमाधिकरणे विषयत्वेन प्रवेशाभावाय । **अधिकारीति** । पुष्ट्यधिकारिभेदः । **अप्रारब्धेति** । सञ्चितक्रियमाणकर्मविनियोगः पुष्टिमार्गरीत्योक्तः । **सामान्येति** । एकेषामिति शाखिपरत्वेन **सामान्यशब्दस्य चोपस्थितार्थो** विशेषार्थः पुष्टिमार्गीयाणामिति, **तदर्थकत्वनियमेन** । **तत्त्यागेति** । पुष्टिमार्गीयाणामित्यर्थत्यागस्य योगाभावात् सामान्यतो विशेषो बलीयानिति । **मन्तव्यमिति** । मननं कर्तव्यम् । **तदेतदिति** । तदधिगम इत्यादिभाष्येणोक्तम् । **तस्मादित्यादीति** । **एतत्सम्बन्धीति** । यथा पूर्णभगवदीयानां शेषव्यासाग्निमारुतानामाचार्याणां तत्सम्बन्धिगतकरणम् । **तस्य प्रारब्धस्य** । **तेन** सम्बन्धिना भोगं कारयति । यतः सम्बन्धिनो विरक्तानामग्रेसराः । तत्कार्याणि कुर्वन्तीति णिच् । **प्रारब्धमिति** । मर्यादास्वरूपं पुष्टिगतम् । **न च तयोरित्यादीति** । **तयोः** पुण्यपापयोः । **अकृतेति** । सुहृद्द्विषत्सु अकृतस्य कर्मणोभ्यागमस्तस्य **प्रसङ्गेन**, कृतनाशाभावात् कृतनाशो नोक्तः । **नैवं वक्तुमिति** । पुष्टिमार्गीयस्य साधुपापयोः सुहृदादिषु प्रापणं वक्तुं नोचितम् । **अन्यथापीति** । अमूर्तयोः प्रापणमकृताभ्यागमप्रसङ्गनाशनं च । **अत्रेति** । पुष्टिमार्ग इत्यर्थः । **तस्या इति** । मर्यादामार्गीयानुपपत्तेः । **दुर्लभेति** । 'मुक्तानामपि सर्वेषां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इति वाक्यात् तथा । **सूचित इति** । वाच्यार्थस्तु पुष्टिमार्गीया इत्युक्तम् । **तथापीति** । तयोरमूर्तत्वेनेत्याद्याशङ्कितुरपि । **परि-**

---

[1] विषयश्रुतिनिरोध इति रश्मिपाठः ।
[2] अप्रारब्धेति रश्मिपाठः ।

यदेव विद्ययेति हि ॥ १८ ॥

ननु 'यदेव विद्यया करोती'ति श्रुत्या विद्यापूर्वकं कर्मकरणे वीर्यातिशयः फलं श्रूयते । अतो ब्रह्मविद्यावतोपि तथात्वस्योचितत्वा'दुत्तरस्याश्लेष' इति यदुक्तम्, तन्नोपपद्यत इति प्राप्ते, आह यदेवेति । हि यस्माद्धेतोस्त्वया 'यदेव विद्यया करोति श्रद्धयोपनिषदे'ति श्रुतिरेव ब्रह्मविदोपि कर्मोत्पत्तिप्रसञ्जिकात्वेनोदाहृता । सा तु न तत्समर्था । तथाहि । 'ॐमित्येतदक्षरमुद्गीथमुपासीते'त्युपक्रम्य तस्य रसतमत्वं मिथुनरूपत्वमनुज्ञाक्षरत्वं त्रयीप्रवृत्तिहेतुत्वं च निरूप्य, एतदग्रे 'यदेव विद्यये'त्याद्युक्त्वा, 'इति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवती'त्युपसंहारादुद्गीथोपासनाविषयमेव 'यदेव विद्यये'ति वाक्यमिति ज्ञायते । तेनोक्तरसतमत्वादिप्रकारकोपासनानां मध्ये यदेव विद्यया करोति, तदेव वीर्यवत्तरं भवतीति तदर्थ इति न ब्रह्मविद्यागन्धोऽपीति न सा शङ्कात्र सम्भवतीत्यर्थः ।

भाष्यप्रकाशः ।

यदेव विद्ययेति हि ॥ १८ ॥ सूत्रमवतारयन्ति नन्वित्यादि । तथात्वस्येति । कर्मणो वीर्यवत्त्वस्य । तथा च यदि ब्रह्मविद्यावतः कर्मसंसर्गो न स्यात्, तदेयं श्रुतिर्विद्यया वीर्यवत्तां कर्मणो न श्रावयेत् । अतस्तदन्यथानुपपत्त्याऽश्लेषादिवाक्यानां विद्यास्तावकत्वमेवाङ्गीकार्यमिति पूर्वोक्तं नोपपद्यत इत्यर्थः । परिहारं वक्तुं सूत्रं व्याकुर्वन्ति हीत्यादि । तेनेति । वाक्यस्य प्रकरणावरुद्धत्वेन । तथा चानुपपत्त्यभावान्नैतेषां स्तावकत्वं शक्यवचनमतः पूर्वोक्तं साध्वेवेत्यर्थः । अस्मिन् पक्षे सूत्रयोजना तु, यदेव विद्ययेति वाक्यं हि यतो हेतोः इति प्रकरणावरुद्धम्, तथा च न ब्रह्मविद्यावतः कर्मप्रसञ्जिकेत्यर्थः ।

रश्मिः ।

हारेति । इदं परिहारसाम्यं ग्रहिलतया पुष्टिमार्गानङ्गीकर्तारं प्रत्युक्तं बोध्यम् । स्वमार्गे पुष्टिमार्गाङ्गीकारेण परिहारस्य कृतत्वात् । पर्यनुयोग इति । नैवं वक्तुं युक्तमित्यनेनोक्तः पुष्टिमार्गीयस्य साधुपापयोः सुहृदादिषु प्रापणं वक्तुं नोचितमित्येवंरूपो नोचित इत्यर्थः । 'यत्रोभयोः समो दोषः परिहारश्च तत्समः, नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारण' इति वाक्यात् ॥ १७ ॥

यदेव विद्ययेति हि ॥ १८ ॥ तदन्यथेति । अन्यथानुपपत्तिः पूर्वसूत्र उक्ता । अत्रार्थान्तरस्य यदेवेतिवाक्यस्य प्रकरणावरुद्धत्वस्य कल्पना तया समाधेयत्वेनोच्यमानप्रमाणसिद्धयोर्द्वयोर्ब्रह्मविद्यावत्कर्मसंसर्गाभावविद्याकर्मवीर्यवत्तयोरर्थयोः परस्परप्रतिघातोन्यथानुपपत्तिः । पूर्वोक्तमिति । अश्लेषादिवाक्योक्तं ब्रह्मविद्यावतः कर्मसंसर्गाप्रसञ्जनम् । नोपपद्यत इति । परस्परप्रतिघातरूपान्यथानुपपत्तिरुक्ता । अग्रे भाष्ये । इति प्राप्ते नामान्यथानुपपत्तिप्राप्ते । आह अर्थापत्तिरूपं सूत्रमाहेत्यर्थः । अर्थापत्तिस्तूक्तपरस्परप्रतिघातसमाधानायार्थान्तरस्य यदेवेति वाक्यस्य प्रकरणावरुद्धत्वस्य कल्पना । हीत्यादीति । त्वयेति । कर्मवादिना । तत्समर्थेति । ब्रह्मविदः कर्मोत्पत्तिप्रसञ्जनसमर्था । विषयश्रुतेश्छान्दोग्यीयप्रथमप्रपाठकोपसंहारस्थत्वेन प्रकरणद्योतनार्थं प्रपाठकार्थं स्मारयन्ति स्म तथाहीत्यादिना । तदर्थ इति । विषयश्रुत्यर्थः । इत्यक्षरविद्यायाः कर्माङ्गत्वप्रतिपादकविषयवाक्ये न ब्रह्मविद्यागन्धोपीति, सा, अनया श्रुत्या ब्रह्मविद्यावतोपि कर्मणो वीर्यवत्त्वस्योचितत्व-

यद्वा । उक्ताशङ्कानिरासायैवाह यदेवेति । ब्रह्मविद्धि प्रारब्धक्षयायैव कर्म कुरुते, तत्त्वन्यकृतात् कर्मणः सकाशात् सवासनतन्नाशनाद् वीर्यवत्तरं भवत्येवेति नानुपपत्तिः काचिदित्यर्थः ।

यद्वा । ननु पुष्टिमार्गीयस्य प्रारब्धस्यापि भोगं विनैव नाश इति श्रुत्वाऽसम्भावनां कुर्वाणं प्रति कैमुतिकन्यायेन तत्परिहारमाह यदेवेत्यादि । जीवनिष्ठा विद्या हि भगवज्ज्ञानशक्तेरंशभूता । एवं सति यत्र धर्मसम्बन्धिसम्बन्धावन्येभ्योऽतिशयं कर्मणि वदति श्रुतिः, तत्र साक्षाद्धर्मिसम्बन्धेऽतिशयितकार्यसम्पत्तौ कथमसम्भावना कर्तुमुचितेति निगूढाशयः । अत एव हेतुवाची हिशब्दः ॥ १८ ॥

भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते ॥ १९ ॥

पुष्टिमार्गीयफलप्राप्तौ प्रतिबन्धाभावं सोपपत्तिकमुक्त्वा तत्प्राप्तिप्रकारमाह ।

भाष्यप्रकाशः ।

श्रद्धोपनिषदोः साधारणत्वात् तत्समभिव्याहृताया विद्याया अपि साधारण्यमेवोचितम्, न तु सङ्कोचनमिति कश्चिच्छङ्केत, तदर्थं प्रकारान्तरेणार्थमाहुः । यद्वा । उक्ताशङ्केत्यादि । सवासनतन्नाशनादिति । सवासनप्रारब्धनाशनात् । तथा च सङ्कोचाभावेपि पूर्वोक्तार्थसिद्धिरप्रत्यूहेति न तेषां स्तावकत्वमित्यर्थः । एतेन जन्मादिसूत्रभाष्ये व्युत्पादितं पूर्वोत्तरकाण्डयोः परस्पराङ्गत्वमपि समर्थितं ज्ञेयम् ।

पूर्वोक्तमर्थं सगृह्णन्त एतत्सूत्रस्य तात्पर्यान्तरमाहुः । यद्वा नन्वित्यादि ॥ १८ ॥

भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते ॥ १९ ॥ भाष्यमत्रातिरोहितार्थम् । अत्र

रश्मिः ।

रूपा शङ्केत्यर्थः । एतेषामिति । अश्लेषादिवाक्यानाम् । पूर्वोक्तमिति । पूर्ववत् । श्रद्धेति । ‘यदेव विद्यया करोति श्रद्धयोपनिषदा वे’ति श्रुतावुक्तयोः । साधारणत्वादिति । सकलविद्यासाधारणत्वात् । तत्समभिव्येति । श्रद्धोपनिषत्समभिव्याहृतायाः ‘यदेव विद्यये’त्युक्ताया विद्याया अप्युद्गीथानुद्गीथसाधारण्यमेवेत्यर्थः । सङ्कोचनमिति । उद्गीथविद्यामात्रपरत्वेन सङ्कोचनम् । तेषामिति । अश्लेषादिवाक्यानाम् । जन्मादीति । जन्मपदादादिसूत्रं जिज्ञासासूत्रम् । तस्य भाष्ये इत्यर्थः कर्तव्यः । व्युत्पादितं जिज्ञासासूत्रभाष्य इति । भाष्ये । नानुपपत्तिरिति । अनुपपत्तिर्ब्रह्मविदः कर्मणो वीर्यवत्तरत्वस्य । प्रकृते । तात्पर्यान्तरमिति । पूर्वार्थोभिधेयो द्वितीयार्थस्तात्पर्यरूपः, वक्ष्यमाणस्तृतीयोर्थस्तात्पर्यान्तररूपस्तमाहुरित्यर्थः । यद्वा नन्वित्यादीति । तत्परीति । असम्भावनापरिहारम् । अंशभूतेति । अस्तिभातिप्रियत्वेन समन्वयाधिकरणे समन्वयोक्तेस्तथा । कैमुतिकन्यायं विवृण्वन्ति स्म । यत्र धर्मेति । धर्मो ज्ञानं तस्य सम्बन्धोऽस्यास्तीति धर्मसम्बन्धिन आचार्यास्तत्सम्बन्धादित्यर्थः । निगूढेति । संवृततात्पर्यसम्बन्ध्यन्तःकरणम् । अत एवेति । उक्ताशङ्कानां सत्त्वादेव, तन्निरासक‘यदेव विद्ययेतिही’तिहेतुप्रतिपादकं सूत्रम् ॥ १८ ॥

भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते ॥ १९ ॥ अतिरोहितार्थमिति ।

इतरे अग्रे प्राप्यालौकिकदेहाद्भिन्ने स्थूललिङ्गशरीरे क्षपयित्वा दूरीकृत्य, अथ भगवल्लीलोपयोगिदेहप्राप्त्यनन्तरं भोगेन सम्पद्यते । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति श्रुत्युक्तेन भोगेन सम्पद्यत इत्यर्थः । श्रुत्यर्थस्त्वानन्दमयाधिकरणे निरूपितः । अलौकिकत्वं विनोक्तदेहं विना चोक्तफलप्राप्तेर्व्यवच्छेदकस्तुशब्दः ॥ १९ ॥

इति सप्तममतोन्याधिकरणम् ॥ ७ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीमद्ब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

भाष्यप्रकाशः ।

क्षपणं च कुरुक्षेत्रप्रसङ्गे व्रजभक्तानां जीवकोशध्वंसरूपम् । भोगश्च तदनन्तरदर्शनादिरूपो जीवद्दशायामेव भवतीत्यवान्तरफलपरिसमाप्तिरिति मम प्रतिभाति । अत्यन्तानुग्रहे तु स्थूलस्य लोकवत् क्षपणम्, सूक्ष्मस्य, 'वाङ्मनसी'ति वक्ष्यमाणरीत्या ततस्तदव्ययसहितमेवालौकिकदेहप्राप्त्या भोगसम्पत्तिरिति ज्ञेयम् ।

अत्र मतान्तरीयव्याख्यानस्यादूषणात् तदपि ज्ञानमार्गीयमर्यादाभक्तिमार्गीयपरतया सङ्ग्राह्यमिति सूचितं ज्ञेयम् ॥ १९ ॥

रश्मिः ।

प्रतीति । प्रारब्धनाशकमर्यादां पुष्टौ निवेश्य प्रारब्धादिप्रतिबन्धानामभावमुपपत्तिः कैमुतिकन्यायस्तया सहितम् । इतरे इति । भोगस्य पौष्टिकप्रारब्धादिनाशेऽकरणत्वात् । सम्पद्यत इत्यत्र करणत्वात् तेनान्वयः । अलौकिकत्वमिति । इतरे क्षपयित्वाऽलौकिकत्वम् । अथ भगवल्लीलोपयोगिदेहप्राप्त्यनन्तरमित्यत्राथशब्दार्थघटकमुक्तदेहं प्राप्य तु भोगेन सम्पद्यते न तु तौ विनेत्येव व्यवच्छेदकस्तुशब्द इत्यर्थः । एवमतिरोहितार्थम् ।

अत्रेदमुच्यते । अवसाने भोगेन सम्पद्यत इति फलोक्त्या प्रथमसूत्रादारभ्य 'सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत, दीयमानं न गृह्णन्ति विना मत्सेवनं जना'इत्यस्मिन् श्रुत्युक्तफलविस्तारके मुख्यफलमुक्तं सन्दिग्धत्वाद् अन्येषां फलानां प्रसङ्गं विना नोक्तिरतोसन्दिग्धफलप्रतिपादकानां न विषयवाक्यत्वम् । फलेभ्यः पातस्तु वर्तत इति, फलावृत्तिः सन्दिग्धोक्ता, अनावृत्तिश्च, न फलविचारः कृतः । फलानां सर्वत्रासन्दिग्धत्वात् । भोगेन सम्पत्तिर्भगवत्सेवनमिति ।

प्रकृतमनुसरामः । षष्ठाधिकरणे मतान्तरमविरुद्धतया नीतं, तत्रापि परेषामग्निहोत्राद्यधिकरणमेकसूत्रात्मकं प्रविष्टम् । तत्राग्निहोत्रादिकर्म नश्येन्नो वेति संशयेनुष्ठितं यदग्निहोत्रादिकर्म तस्यापि काम्यकर्मवदकर्त्रात्मबोधवस्तुमहिम्ना नाशोभ्युपेयत इति पूर्वपक्षे द्वावंशौ नित्यकर्मण एकोंशः प्राधान्येन चित्तशुद्धिप्रदोपरोंशोनुषङ्गेप्यस्वर्गादिफलप्रदस्तस्य नाशोस्तु नाम, चित्तशुद्धिप्रदस्य तु विद्यायामुपयुक्तत्वान्न नाशो वक्तुं शक्यः । न हि लोके भोगेनोपक्षीणं व्रीह्यादिकं नष्टं मन्यन्ते । यत्तु ज्ञानादूर्ध्वं नित्यं कर्म तस्य काम्यवल्लेप इति व्याख्यानस्य । अत्राधिकरणे तु मतान्तरनामापि नास्तीत्यत्राहुः । अतोन्यादि । सप्तमाधिकरणे । मतान्तरीयव्याख्यानस्येति सूत्रत्रये प्रत्येकमधिकरणद्वयम् ।

भाष्यप्रकाशः ।

इति सप्तममतोन्याधिकरणम् ॥ ७ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥

समाप्तः प्रथमः पादः ॥ १ ॥

रश्मिः ।

तत्रातोन्यापीत्येकं सूत्रं विनियोगवाक्यं परेषां तद्विषये तत्रैव प्रकाशे किञ्चिदुक्तम् । 'यदेव विद्यये'-त्यधिकरणे विद्यासाधनं नित्यं कर्म द्विविधम् । अङ्गावबोधोपास्तिसहितम्, तद्रहितं च । विद्यासाधनमङ्गावबोधोपास्तिसहितं तद्रहितं वेति संशये सोपासनस्य कर्मणः प्रशस्तत्वात् तदेव विद्यासाधनं न तूपास्तिरहितमिति पूर्वपक्षे, सोपासननिरुपासनयोस्तारतम्येन विद्यासाधनत्वं 'यदेव विद्यये'ति श्रुतेः सिद्धान्त इति **व्याख्यानस्य** । तथा 'भोगेने'त्यधिकरणे अधिकारिपुरुषाणां मुक्तिरस्ति न वेति सन्देहेधिकारिपुरुषाणां नास्ति मुक्तिः, प्रारब्धभोगाय बहुषु जन्मसु स्वीकृतेषु तत्र पूर्वार्जितविद्यायां तु लुप्तायां यत्कर्म क्रियते तस्य फलप्रदत्वे सत्युत्तरोत्तरजन्मपरम्पराया अवश्यम्भावित्वादिति पूर्वपक्षे, आरब्धकर्म स्वफले सुखदुःखे भोजयेत्, तदर्थमेव प्रवृत्तत्वात् । न हि विद्याविलोपार्थं किञ्चित्कर्म पूर्वमनुष्ठितम्, येन कर्मवशाद्विद्यालोप आशङ्क्येत । न मरणव्यवधानमात्रेण विद्याविद्याविलोपः, सुषुप्तिव्यवधानेन तल्लोपादर्शनात् । अतो विद्यायामवस्थितायां बहुभिरपि क्रियमाणैः कर्मभिरश्लेषादस्त्यधिकारिणां मुक्तिः । यद्यप्येतद्गुणोपसंहारपादे निर्णीतं, तथापि तस्यैवाक्षेपसमाधाने इत्यनवद्यमिति **व्याख्यानस्येत्यर्थः** । शङ्कराचार्यमतेधिकरणानि चतुर्दश । 'अतोन्यापि ह्येकेषा'मित्यस्य विनियोगवाक्यत्वात् । **ज्ञानमार्गीयेति** । 'यदेव विद्यये'त्यत्रोक्तसिद्धान्तस्य स्वमते कर्मणाध्यात्मिकचित्तशुद्धौ ज्ञानमिति साधनकर्मपरतया सङ्ग्राह्यत्वम् । 'भोगेने'त्यत्रोक्तसिद्धान्तस्तु मर्यादाभक्तिमार्गीयाधिकारिमुक्तिपरतयेति बोध्यम् । **सूचितमिति** । सूत्रयोरधिकरणात्मकयोः सर्वतोमुखत्वाद् व्यञ्जनया वृत्त्यार्पितमित्यर्थः ॥ १९ ॥

इति सप्तममतोन्याधिकरणम् ॥ ७ ॥

इति श्रीविट्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण सम्पूर्णवेत्रा विट्ठलरायजिद्भ्रात्रीयगोकुलोत्सवात्मजगोपेश्वरजिता कृते भाष्यप्रकाशस्य रश्मौ चतुर्थाध्यायस्य प्रथमपादः सम्पूर्णतामगमत् ॥ ४ ॥

समाप्तः प्रथमः पादः ॥ १ ॥

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ चतुर्थोऽध्यायः ।

द्वितीयः पादः ।

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥ (४-२-१).

पूर्वपादे लौकिकशरीरे क्षपयित्वा अलौकिकं तत्प्राप्य फलेन सम्पद्यत इति निरूपितम् ।

अथात्रैवं चिन्त्यते भक्तस्य सूक्ष्मशरीरस्य क्षपणं नाम किं तत्स्वरूपनाशनम् ,उत मणिस्पर्शादयसश्चामीकरत्वमिव तस्यैवालौकिकत्वसम्पादनं भगवदनुग्रहादिति ।

भाष्यप्रकाशः ।

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥ अथ द्वितीयपादं व्याचिख्यासवः पादार्थानां तत्सङ्गतेश्च पूर्वं कारिकाभिर्निरूपितत्वादिहाधिकरणसङ्गतिं वक्तुं अतीतपादान्ते यन्निरूपितं तदनुवदन्ति पूर्वपाद इत्यादि । अलौकिकं तत् प्राप्येति । अलौकिकं देहं लब्ध्वा । अलौकिकदेहस्वरूपं त्वग्रे वक्तव्यम्, 'ब्राह्मेण जैमिनि'रित्यादिभिः । प्रकृतं वक्तुमाहुः । अथेत्यादि । तदनन्तरमवसरसङ्गत्या एतत्पादारम्भे प्रकृतं वक्तुं तदुपोद्घाततया इदं वक्ष्यमाणं विचार्यत इत्यर्थः । तदाहुः भक्तेत्यादि । एवं संशयमुक्त्वा पूर्वपक्षमाहुः । अत्रेत्यादि । तथात्रापि वक्तुमुचितत्वादिति । सूक्ष्मलिङ्गशरीरात्मकं प्राणेन्द्रियादिष्वपि द्वितीयस्य चतुर्थपादे 'तथा प्राण' इत्यत्र

रश्मिः ।

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥ पादार्थानामिति । पादार्थस्तु म्रियमाणस्याग्रिमावस्थोक्ता । अनुवदन्तीति । सिद्धस्य कथनमनुवादः । भाष्ये । निरूपितमिति । सन्दिग्धत्वात् फलत्वात् फलप्रसङ्गायातत्वाच्च निरूपितम्, परमतनिराकरणेन स्वमतं स्थापितम् । प्रकृते । प्रकृतमिति । पादार्थम् । तदिति । वक्ष्यमाणम् । भक्त्येत्यादीति । भक्तस्येत्यपि पाठः । अयस इति । लोहस्य सुवर्णत्वमिव । तेनाधिकरणसङ्गतिः सामान्यविशेषभावरूपोक्ता । क्षपणसामान्यविशेषयोरुभयोरधिकरणयोः सत्त्वात् । पादार्थसङ्गतिस्तु जीवतोग्रिमावस्थानिरूपणानन्तरं म्रियमाणस्यावस्थाया अधीतश्रीभागवतस्य स्मरणात् काग्रिमावस्था म्रियमाणस्येति जिज्ञासया पादनिरूपणा-

तत्रोत्तर एव पक्षः साधीयानिति भाति । तथाहि । यथा पूर्वं संसारिण एव जीवस्य तदनुग्रहात् पूर्वावस्थापगमो मुक्त्यवस्था चोच्यते, तथात्रापि वक्तुमुचितत्वात् । 'न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्त' इति श्रुतिस्तु जीवस्य सायुज्यमुक्तिकाले तत्प्राणादीनामपि तथैवाह, अत एवाग्रे 'ब्रह्मैव सन् ब्रह्माप्येती'त्युच्यते । पुष्टिमार्गीयस्योक्तमुक्त्यभावान्नेयं तद्विषयिणीति प्राप्ते प्रतिवदामः । ब्रह्मांशत्वेन जीवस्यानन्दात्मकत्वान्निर्दोषस्वरूपत्वान्नित्यत्वाच्च दोषाणां चागन्तुकत्वात्तदपगमे तस्य तथात्वमुचितम् । प्राणादयस्तु न तादृशा इति तद्दृष्टान्तेनात्रापि तथात्वं न वक्तुं शक्यम् । 'देहेन्द्रियासुहीनानां वैकुण्ठ-

---

भाष्यप्रकाशः ।

जीवातिदेशेन जीववन्नित्यत्वाद्यङ्गीकाराल्लौकिकावस्थापगमस्यालौकिकावस्थाप्राप्तेश्च वक्तुमुचितत्वात् । तथैवाहेति । कारणभूते सति लयमाह । तथा च पुष्टिमार्गे तेषामलौकिकत्वापादनपक्ष एव साधीयानित्यर्थः । सिद्धान्तमाहुः ब्रह्मांशत्वेनेत्यादि ।

अयमर्थः । श्रुतौ हि त्रिविधा सृष्टिरभिप्रेतेति ज्ञायते । ब्रह्मवित्प्रपाठके आनन्दमयस्य ब्रह्मत्वपरिचायनार्थं 'तस्माद्वा एतस्मा'दित्यादिना 'सोकामयते'त्यादिना 'स आत्मान५ स्वयमकुरुते'ति वारत्रयं कथनात् । श्वेतकेतूपाख्याने च कार्यस्य कारणानन्यत्वं मृत्पिण्डनखनिकृन्तनलोहमण्यात्मकदृष्टान्तत्रयकथनाच्च । तासु विधासूच्चनीचभावोपि मृदपेक्षया अयसः, तदपेक्षया लोहस्योत्कृष्टतायाः सर्वजनीनत्वात् । ब्रह्मवित्प्रपाठकेपि 'सोऽकामयते'त्यादिना पूर्वमुक्तायाः सृष्टेः 'असद्वा इदमग्र आसी'दित्यनेनासत्त्वकथनपूर्वकं 'तदात्मान५ स्वयमकुरुते'ति सृष्टेः सुकृतत्वश्रावणाच्च । तदेतत्सृष्टित्रयं तदुत्कर्षादिकं च पुष्टिप्रवाहमर्यादाग्रन्थे आचार्यचरणैः 'इच्छामात्रेण मनसे'त्यत्र सूचितम् । तत्प्रपञ्चोस्मत्पितृचरणकृतात्तद्विवरणादवगन्तव्यः । एवं सति यत्र पुष्टिमार्गीया जीवा मार्यादिकसृष्टिपातिनः, तत्र ब्रह्मांशत्वेन जीवस्यातिरोहितानन्दत्वं तत्र तस्यानन्दात्मकत्वान्निर्दोषस्वरूपत्वाच्च जीवस्य तथात्वं युक्तम् । प्राणादयस्तु सृष्ट्यन्तरस्थाः 'असद्वा इदमग्र आसीत्तदाहुः किं तदसदा-

रश्मिः ।

न्निर्वाहकसङ्गतिः । अत्रेत्यादीति । तत्रेत्यपि पाठः । सायुज्येति । सह युनक्तीति सयुक् सयुजो भावः सायुज्यम् । पूर्वपक्षे तु सायुज्यपदमैक्ये रूढम् । तच्चासौ मुक्तिः सायुज्यमुक्तिः तस्याः काले । सतीति । विशेष्यम् । न तु सप्तम्यर्थः । भाष्ये । अत एवाग्र इति । बृहदारण्यके शारीरब्राह्मणेग्रे । प्रकृते । तेषामिति । प्राणादीनाम् । भाष्ये । उक्तमुक्तीति । सायुज्यमुक्त्यभावात् । तद्विषयिणीति । पुष्टिमार्गविषयिणी । प्रकृते । त्रिविधेति परम्परात्वविधा, इच्छाद्वाराविधा, आत्मरूपाविधेति त्रिविधा । लोहस्येति । सुवर्णस्य । पुष्टिमार्गीया इति । जयविजयवत्पाते भगवद्भावाच्युतौ मार्यादिकसृष्टिपातिनः । जयविजययोः क्रोधादीश्वरे मन आवेशनं मानसी । अतिर इति । मर्यादामार्गीयस्य यदृच्छया प्राप्तस्याम्बरीषवत्तत्र सत्त्वात् । मार्यादिकसर्वात्मभावे तु तत्र फलं निरोधलक्षणग्रन्थोक्तं 'सच्चिदानन्दता तत' इतिवाक्योक्तमिति । तत्र मर्यादायाम् । तस्य जीवस्य । तथात्वमिति । पुष्टौ भगवदनुग्रहेण दोषाणामुद्वेगप्रतिबन्धभोगानामवैराग्यामुमुक्षुत्वाशमदमादीनां चापगमे तथात्वमानन्दात्मकत्वम् । प्राणादय इति भाष्यं विवृण्वन्ति स्म प्राणादय इति । सृष्ट्यन्तरेति । पुष्टिसृष्टिरन्यस्यां सृष्टौ । श्रुताविति । अर्थस्तु स्पष्टः । न तादृशा इत्यस्य

पुरवासिना'मिति श्रीभागवतवाक्याच्च । न च लौकिकत्वविशिष्टदेहादिरत्र निषिध्यत इति वाच्यम् । सामान्यनिषेधे बाधकाभावात् । नच तदनुभव एव बाधक इति वाच्यम् । भगवत इव तदीयानामपि तेषां तथात्वे बाधकाभावात् । नन्वागन्तुकत्वमेव बाधकमिति चेत् । मैवम् । यथा व्यापिवैकुण्ठस्याक्षरात्मकत्वेनानागन्तुकत्वेन नैसर्गिकतद्गताखिलवस्तुरूपत्वेन सामीप्यादिमुक्तिं प्राप्नुवतां भक्तानां देहेन्द्रियादिरूपमप्यनागन्तुकमेव वैकुण्ठप्राप्तिमात्रेण शुद्धजीवानां सम्पद्यते, तदीयत्वेन तत् फलतीति यावत्, तथा पुरुषोत्तमलीलाया अपि पुरुषोत्तमात्मकत्वात्तत्राङ्गीकारमात्रेण प्राचीनाशेषप्रावाहिकधर्मनिवृत्तौ शुद्धजीवस्य पुरुषोत्तमलीलात्मकदेहादिरपि तदीयत्वेन सम्पद्यत इति नानुपपन्नं किञ्चिदित्यवहितोऽवेहि ।

अयमेवार्थो वाजसनेयिशाखायां 'अथाकामयमान' इत्युपक्रम्य, 'आत्मकाम

भाष्यप्रकाशः ।

सीदित्यृषयो वा व तेऽग्रे असदासीत्तदाहुः के ते ऋषय इति प्राणा वा ऋषय' इति वाजिनां श्रुतौ प्राणा असत्पदेनासाधुतया श्राविता इति पुष्टिसृष्टिस्थत्वाभावान्न तादृशाः । धर्मान्तरैर्जीवतौल्येपि स्वरूपतो न जीववन्निर्दुष्टा इति जीवदृष्टान्तेन प्राणादिरूपे सूक्ष्मशरीरे लौकिकत्वापगमेनालौकिकत्वं न वक्तुं शक्यम् । अयं च पक्षो,'देहेन्द्रियासुहीनाना'मिति सप्तमस्कन्धवाक्येनोपष्टभ्यते । अतस्तत्त्यागपक्ष एव साधीयानित्यर्थः । उक्तवाक्य एव किञ्चिदाशङ्क्य परिहरन्ति न च लौकिकेत्यादि । अत्रेति । एतद्वाक्ये । तदनुभव इति । देहाद्यनुभवः । तथात्व इति । ब्रह्मात्मकत्वे । पुनः किञ्चिदाशङ्क्य परिहरन्ति नन्वित्यादि । मैवमित्याद्यवेहीत्यन्तं च । अनागन्तुकमेवेति । यथा लौकिकेषु देहादिषु प्रकृतिर्मूलकारणतयाऽनुसीव्यति, एवं जीवेऽक्षरमन्वेति । 'यथा प्रदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपा' इति, 'यदक्षरे परमे प्रजा' इति च श्रुतेः । तच्च सर्वत्र सर्वात्मकमिति जीवांशिभूतस्य तस्य आकारो जीवरूपेंऽशे नैसर्गिक एवेत्यनागन्तुकम् । तदीयत्वेन तत्फलतीति । अग्रे 'ब्राह्मेण जैमिनि'रित्यत्राङ्गीकरिष्यमाणत्वादावरणभूतलौकिकापगमे भगवद्दत्तस्तदीयत्वेन फलतीत्यर्थः । दार्ष्टान्तिके तु बादरायणसूत्रोक्तः पुरुषोत्तमात्मकस्तदीयत्वेन सम्पद्यत इति ज्ञेयम् । एतं पक्षं श्रुत्योपष्टभ्नन्ति । अयमेवेत्यादि । श्रुतिं

रश्मिः ।

विवरणं धर्मान्तरैरित्यादि । शरीरादिभिः । निर्दुष्टा इति । असत्पदेन श्रुतौ मृत्युत्वस्य नास्तिकत्वस्योक्त्या सर्वमारकत्ववेददूषकत्वदोषवन्त इति न निर्दुष्टाः । सूक्ष्मेति । प्राणर्षीणां सूक्ष्मशरीरे । तथात्वमित्यस्य व्याख्यानमलौकिकत्वमिति । देहेन्द्रियेति । भाष्यं विवृण्वन्तिस्म । अयं चेति । सूक्ष्मशरीरस्य क्षपणपक्षः । तत्त्यागेति । प्राणादीनां त्यागपक्षः । प्रकृतिरिति । पुराणमतमिदम् । मायाद्वारा सृष्टौ ब्रह्मकर्तृ माया समवायिकारणमिति । श्रुतेरिति । दृष्टान्तश्रुतेः । पूर्वश्रुत्येकवाक्यतया 'यदक्षर' इत्यत्रापि अक्षरे समवायिनीत्यर्थः । कपालयोर्घट इतिवत् । दार्ष्टान्तिकश्रुतिस्तु 'तथाक्षराद्विविधाः सौम्य भावाः प्रजायन्त' इति मुण्डकस्था । यद्वा, महानारायणस्थं 'यदक्षर'इतिदार्ष्टान्तिकम् । तच्चेत्यक्षरम् । 'द्विरूपं तद्धि सर्वं स्या'दिति सिद्धान्तमुक्तावलीवाक्यम् । आकार इति । निराकारस्याकारः सर्वात्मभाववतां नित्यलीलाप्रविष्टानां च । छान्दोग्ये नारदसनत्कुमारसंवादे 'तस्य वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानतः आत्मतः प्राण आत्मतः आशात्मतः स्मर आत्मत आकाश आत्म-

आप्तकामो भवति, न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येती'त्यन्तेन वाक्येन निगद्यते। अत्र प्राणशब्देन प्राणाः सर्वेन्द्रियाणि प्रोच्यन्ते। आत्मकामशब्दे भगवद्वाचकात्मपदग्रहणेन भक्तस्य स्नेहातिशयजनितप्रभुदिदृक्षार्त्यतिशयस्तादृशो येन मरणमेव सम्पद्येत, यदि प्रभुप्राकट्ये क्षणमपि विलम्बः स्यात्। अतो भगवत्प्राकट्येनैवात्मस्थितिरिति ध्वन्यते। भक्तिमार्गे प्राकट्यस्यैव परमफलत्वेन तद्दर्शनेनाप्तकामो भवति। ततः साक्षादाश्लेषादिकामनायां प्राचीनदेहप्राणादेस्तदयोग्यत्वात्ते तत्रैव लीना भवन्ति।

भाष्यप्रकाशः।

व्याकुर्वन्ति **अत्र प्राणे**त्यादि। **ध्वन्यत इति**। तात्पर्यवृत्त्या बोध्यते। तात्पर्यवृत्तिस्तु मया प्रस्थानरत्नाकरे व्युत्पादिता ततो ज्ञेया। **अत्रैव लीना भवन्तीति**। अन्तःप्रकटे पुरुषोत्तमस्वरूप एव लीना भवन्ति। ननु पुरुषोत्तमात्मकलीलोपयोगिदेहप्राप्त्या ब्रह्मभाव एव श्रुत्य-

रश्मिः।

तस्तेज आत्मत आप आत्मत आविर्भावतिरोभावा'वित्यादि। अत्र तस्येति पूर्वं सर्वात्मभावनिरूपणात् सर्वात्मभाववत इत्यर्थात्। नलकूबरादेरिति, आदिर्गजेन्द्रः। 'सच्चिदानन्दता तत' इत्यानन्दस्य साकारत्वात्। नलकूबरमणिग्रीवगजेन्द्रादिमुक्तीनामौडुलोमिमतसिद्धत्वादानन्दाकारस्य श्यामत्वाद्यदि विभाव्येत तदा तु तदीयत्वेन तत्फलतीति प्रतीकसहितग्रन्थो हेयः। तत्रत्योऽग्रे ब्राह्मेण जैमिनिरित्यत्राङ्गीकरिष्यमाणत्वाच्चेति चकारं पूरयित्वा हेतुर्ग्राह्यः। **उपष्टभ्नन्तीति**। श्र्यादिरयं प्रयुक्तः। स्वरवर्णानुक्रमहैमधातुपाठे तु ष्टभुङ् स्तम्भे, भ्वा. आ. सेट्, उदिदन्तमिति भ्वादिरयं तदनुसारेण शब्विकरणम्। अत्र **प्राणेत्यादीति**। **भक्तस्येति**। आत्मकामशब्दे काम इच्छा सा च 'अलमन्यविचारेण प्रेमेच्छेति स्थितं मत'मिति विश्वनाथः प्रेमरसायनकारः ततश्चात्मस्नेह इत्यर्थो भवति, अत उक्तं **भक्तस्येति**। मुख्यवाचकात्मशब्दग्रहणेन तत्र कामरूपप्रेम्णा गोपालतापिनीयोक्तरीत्यानाविष्कुर्वन् कामप्रेमविनियोगात्। **स्नेहातिशये**त्यादिः परानुरक्तिभक्तिधर्मानाहुः **स्नेहातिशयेति**। आर्तिशब्दादार्तत्वं चतुर्ष्वधिकारेष्वासां व्रजस्त्रीप्रभृतीनामुक्तम्। भ्रमरगीते स्फुटं यत्तदाहुः। **येन मरणमि**त्यादि। ननु वृत्तेर्द्वैविध्यमत आहुः **भगवत्प्राकट्येनेति**। इदं त्रिचत्वारिंशाध्याये 'आगमिष्यत्यदीर्घेण कालेने'तिश्लोकव्याख्याने 'नन्दं द्रष्टुं समागत एव भगवा'निति सुबोधिन्योक्तम्। नन्दोद्धवसंवादसमये भगवतस्तिरोहितत्वेप्येवमुक्तेः। ननु वृत्तेर्द्वैविध्यमत आहुः **तात्पर्यवृत्तिरिति**। **भाष्ये। प्राकट्यस्येति**। निबन्धोक्तप्रणाड्या प्राकट्यं तस्य। 'भगवानेव हि फलं स यथाविर्भवेद्भुवी'ति निरोधलक्षणग्रन्थात्परमफलत्वं तेन। आप्ताः कामा येनेत्याप्तकामः। काम्यन्त इति कामा अनन्तकल्याणगुणास्तत्रात्मदर्शनस्यापि सत्त्वात्। 'एकदा हि व्रजस्त्रियः सकामाः शर्वरीमुषित्वा सर्वेश्वरं गोपालं कृष्णं हि ता ऊचिरे' इति गोपालतापिनीयारम्भः 'गान्धर्वी गच्छ त्वं स्वालयान्तिक'मित्युपसंहारस्ताभ्यामाप्तकामत्वं व्रजस्त्रीणाम्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इति श्रुतेश्च। पूर्वपादान्ते सूत्रोक्तरीत्या मननं प्रभुचरणैर्नात्रोक्तम्। चतुर्थस्कन्धीये तत्त्वदीपप्रकाशे सम्यग्व्युत्पादितत्वादित्युक्तमतः ऋषिरूपाणां स्वेषां चानुरोधेन सायुज्यकामनामाहुः **ततः साक्षादिति**। भ्रमरगीते लौकिकभाषया श्रुतिरूपाणामपि कामनिरूपणात् सायुज्यकामना बोध्या। सर्वदा तु भक्तौ तात्पर्याद्भक्ता एव व्रजस्त्रियः।

---

१. अत्रेति प्रकाशे। ३. पुष्टिप्रवाहमर्यादाग्रन्थाविति स्यात्।

बहिःप्रकटस्यैवान्तरपि प्राकट्यादुत्क्रमणाभाव उच्यते । आत्मातिरिक्तस्य गतिमुक्त्वा तस्य तामाह 'ब्रह्मैव सन् ब्रह्माप्येती'त्यनेन । उक्तरीत्या पुरुषोत्तमात्मकतल्लीलोपयोगिदेहेन्द्रियादिसम्पत्त्या ब्रह्मैव सन्, न तु ब्रह्मातिरिक्तदेहादिमानपि, तादृशः सन्, ब्रह्म बृहत्त्वात् बृंहणवत्त्वात् पुरुषोत्तमस्वरूपं प्राप्तो भवतीत्यर्थः । अन्यथा जीवस्य ब्रह्मांशत्वेनानन्दांशाविर्भावेन च ब्रह्मत्वे प्राणादिलयोक्त्या तदितरव्यवच्छेदे चानुक्तसिद्धे सति 'ब्रह्मैव स'न्निति न वदेत् । अत एवैतदग्रे श्लोकोक्तिः 'अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत' इति । मृतिधर्मवच्छरीरं हि मर्त्यम्, तद्रूपत्वेन जीवोपि तथोच्यते । तथाचायं पूर्वं तादृश एव, अथ पुष्टिलीलाप्रवेशानन्तरममृत उक्तरूपशरीरवान् भवति, ततोत्र अस्मिन्नेव शरीरे ब्रह्म सम्यगश्नुते । भगवता क्रियमाणलीलारसमनुभवतीत्यर्थः ।

भाष्यप्रकाशः ।

भिप्रेत इत्यत्र किं गमकमित्यत आहुः अन्यथेत्यादि । तथाच 'ब्रह्मैव स'न्नित्यस्यान्यथावैयर्थ्यापत्तिरेव गमिकेत्यर्थः । उक्तोपष्टम्भाय गमकान्तरमाहुः अत एवेत्यादि । तथा चात्र 'ब्रह्मभूतः प्रसन्नात्मे'त्युक्तरीतिको ब्रह्मभावो यदि 'ब्रह्मैव स'न्नित्यत्राभिप्रेतः स्यात्, तदास्मिन् श्लोके 'अथ मर्त्योऽमृतो भवती'त्येतावदेव वदेत्, न तु तुरीयं पादम् । अतो यथोक्त एव श्रुत्यर्थ इत्यर्थः । एवमुपोद्घातेन पुष्टिमार्गीयस्य लौकिकदेहक्षपणं नाम प्राणादीनां ब्रह्मणि लय इति सिद्धम् । तदेतत्पूर्वपादान्तसूत्रे एव विचारणीयम् । तथाप्येतत्सूत्रप्रणयनं प्रति तस्य हेतुत्वं न स्फुटं भवेदिति तत्रानुक्त्वा अत्र विचारितमिति ज्ञेयम् । तदेतत् हृदि कृत्वाचार्यः प्रकृतं विचा-

रश्मिः ।

बहिरिति । सद्योमुक्त्यर्थं, आत्मस्थित्यर्थं वा **बहिःप्रकटस्य** । **उत्क्रमणेति** । छान्दोग्यीयाष्टमोपदेशोक्तरीत्या प्राणेन्द्रियादीनां लयस्थानेन्तःप्रकटे लयादुत्क्रमणाभाव उच्यत इत्यर्थः । **आत्मातिरिक्तस्येति** । सूक्ष्मदेहस्य । **तस्येति** । भक्तस्य । **तां गतिं**, ननु विरहं विना पूर्णभक्त्यभावाद्विरहे च ब्रह्मणश्चान्तरत्वेन बहिःप्राकट्याभावात् कथं पुरुषोत्तमप्राप्तिरत आहुः । **ब्रह्म बृहत्त्वादिति** । अत एव बृहत्त्वात् **बृंहणत्वाच्च ब्रह्मेति** लक्षणमादृतं न स्वरूपलक्षणं नापि कार्यलक्षणमिति बोध्यम् । **तदितरेति** । ब्रह्मातिरिक्तयोगव्यवच्छेदे । **तद्रूपत्वेनेति** । मर्त्यशरीरवत्त्वेन । **तथोच्यत इति** । मर्त्यत्वेनोच्यते । **तादृश इति** । मर्त्यः । **ब्रह्मसम्यगिति** । सायुज्ये परमात्मन एव ब्रह्माशनम् । सन्दिग्धमुक्तौ तु निर्णीतायां सम्यगन्तरात्मबाह्यात्मनोरपि ब्रह्माशनमिति **सम्यगश्नुत** इत्यर्थः । **अश्नुत** इत्यस्य न व्याप्नोतीत्यर्थ आनन्दमयाधिकरणे दूषणात्, नाप्यश्नातीत्यर्थः । द्वितीयत्वाभावात् । अतो धातूनामनेकार्थत्वादर्थान्तरमाहुः **भगवतेति** । आविर्भूतभगवताष्टमोपदेशोक्तेनैक्यं गतेन । म्रियमाणस्याग्रिमावस्थानिरूपणे पादार्थसङ्गतेः । तेन नासम्भवः । **अनुभवतीति** । पूर्णा भगवदीयाः सदा, अन्ये तु कदाचिदितिविवेकः । **प्रकृते** । **उपोद्घातेनेति** । म्रियमाणस्यास्याग्रिमावस्थानिरूपणोपोद्घातेन । 'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधा' इत्युपोद्घातलक्षणम् । **तदेतदिति** । **क्षपणम्** । **एवेति** । 'भोगेन त्वितरे क्षपयित्वे'ति क्षपणोक्तेरेवकारः । **हेतुत्वार्थमिति** । तथा च हेतुहेतुमद्भावः पूर्वोत्तरपादयोः सङ्गतिरिति

---

१. बृंहणत्वादितिरश्मौ । २. प्राप्नोतीति पाठः ।

भगवान् बादरायण इमामेव श्रुतिं विषयीकृत्य तत्रोक्तप्राणानां लय एकदैव, उत क्रमनियमोऽस्तीति संशये निर्णयमाह वाङ्मनसीति । तत्र हेतुर्दर्शनादिति ।

एतदुक्तं भवति । भक्तेः स्नेहात्मकत्वात्तस्य प्रभुप्राकट्यफलकत्वात्तदौत्कट्ये तस्यावश्यकत्वात् 'अयं मां पश्यत्वि'ति प्रभ्विच्छया तस्मिन् सम्पन्ने, चक्षुर्भ्यां मनसा च तद्रूपामृतमनुभवतः स कोप्युत्कटो भावः समजनि, येन प्रभुणा सह

भाष्यप्रकाशः ।

रयतीत्याशयेन सूत्रमवतारयन्ति भगवानित्यादि । निर्णयमाहेति । उक्तश्रुतौ सामान्यतो लयश्रावणाल्लयो युगपदेव युक्त इति पूर्वपक्षनिरासाय निर्णयमाहेत्यर्थः । सूत्रं व्याकुर्वन्तः क्रमनियमे दर्शनस्य कथं हेतुत्वमित्यतो व्युत्पादयन्ति एतदित्यादि । तदौत्कण्ठ्य इति । भक्तस्योत्कण्ठायाम् । तदौत्कट्य इति पाठे तु स्नेहौत्कट्य इत्यर्थो बोध्यः । तत्रैव सङ्गता इति । मनसैव सर्वे प्राणाः समागताः । शेषं स्फुटम् ॥ १ ॥

रश्मिः ।

न स्फुटं भवेदित्यपि बोध्यम् । प्रकृतमिति । म्रियमाणस्याग्रिमावस्थानम् । क्रमनियम इति । एतेन तत्रेतिभाष्यस्योक्तस्य क्रम इत्यर्थो बोधितः । एतदित्यादीति । अकामयमानप्रकरणाद् ब्रह्मसमशनकथनाद्विषयवाक्ये एतद्वक्ष्यमाणमुक्तं भवति । न च प्रकरणानुरोधेपि 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मनैव च सन्तुष्टस्तस्य कार्यं न विद्यते' इतिवाक्योक्ताकामयमानस्य छान्दोग्यीयाष्टमोपदेशोक्तब्रह्मसमशनस्य सर्वसाधारण्यस्य सम्भवः 'तद्यथा हि निर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीतैव मेवेद५शरीर५शेत' इति श्रुतेरत एव 'धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चने'ति वाक्याविषयत्वमिति वाच्यम् । गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति न्यायेन वक्ष्यमाणस्य निरुक्तेः । एतेनैव सर्वसाधारणब्रह्मसमशनस्यापि सिद्धेः । किञ्च 'तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ धर्मस्यैष सेतु'रिति श्रुत्यन्तरोक्तो गुणः । अत उक्तमेतदुक्तं भवतीति । अत एव 'गूढं ब्रह्मणि वाङ्मय' इति तृतीयस्कन्धवाक्यम् । वाङ्मये वेदे गूढम् । गुह् संवरणे । संवरणं भक्तिस्तद्विषय इत्यर्थः । स्वार्थे ष्यञमभिप्रेत्याहुः उत्कण्ठायामिति । भाष्ये । तस्येति । प्रभुप्राकट्यस्य । न विषयसन्निधिमात्रेण पुरुषोत्तमप्रत्यक्षमलौकिकत्वव्याहतेरत आहुः अयं मामिति । तस्मिन्निति । दर्शने । चक्षुर्भ्यामिति प्रभ्विच्छयेत्यन्वेति तया विशेषाधानं, एवमग्रेपि । स विशेषः क इति चेत् ? शृणु । सप्तान्नब्राह्मणे बृहदारण्यके आत्मने त्रीण्यकुरुतेति मनो वाचं प्राणं तान्यात्मने कुरुतेति व्याख्यायाग्र आह । 'विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत् किञ्च विज्ञातं वाचस्तद्रूपं, वाग्घि विज्ञाता वागेनं तद्भूत्वावती'त्युक्तम् । अत्रात्मने स्वस्मै । एत इति वाङ्मनःप्राणाः । एनमित्यादि । एनं वाग्विदं भगवदिच्छया कृतवाग्विशेषविदं तद्भूत्वा विज्ञातस्वरूपं भूत्वावतीति । अवार्था उक्ता अस्माभिर्ग्रन्थान्तरेतस्ततोवसेयाः । एवमग्रेपि, यत् किञ्च विजिज्ञास्यम् । मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद्भूत्वावति । यत् किञ्चाविज्ञातम् । प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वावतीत्यनयोरर्थो ज्ञेयः । अत उक्तं तद्रूपामृतमनुभवत इति । तद्रूपं चक्षुर्विषयं अमृतमानन्दरूपम् । 'आनन्दरूपममृतं यद्विभाती'ति श्रुतेः । ननु विरहे सर्वोपमर्दे कथमानन्दानुभव इति चेत् ? न । विरहे ये भावा रसस्वभावादानन्दरूपास्तेषामनुभवे बाधकाभावात् । 'भवतीनां वियोगो मे नहि सर्वात्मना

---

१. 'स्फुटोके संमता' इति हस्ताक्षरादर्शे; 'स्फुटोकेस्तंमत्या' इत्यन्यादर्शेषु; 'स्फुटोकेस्तं मत्वा' इति रश्मौ ।

सर्वेन्द्रियव्यापारकृतीच्छा समभूत् । तत्र तेषामसामर्थ्यात् भगवदानन्दसम्बन्धिमनःसम्बन्धेन तं प्राप्स्याम इति तत्रैव सङ्गताः तेनानन्देन सम्पन्ना जाताः । अयमेवार्थोऽनेन सूत्रेणाग्रिमेण च 'अत एव सर्वाण्यन्वि'ति सूत्रेण निरूप्यते । दर्शनानन्तरमादौ सह सम्भाषणेच्छैव जन्यत इति, 'वाङ्मनसि सम्पद्यत' इति छान्दोग्ये स्फुटोक्ते संमत्या वादौ सैवोक्ता । एवं सति वाङ्मनसि सङ्गता सती भगवदानन्देन सम्पद्यत इति सूत्रार्थः सम्पद्यते । 'दर्शनाभावेपि वेण्वादिशब्दादपि तथा सम्पद्यत इति हेत्वन्तरमाह शब्दाच्चेति ॥ १ ॥

अत एव सर्वाण्यनु ॥ २ ॥

अत एव दर्शनाच्छब्दाच्च हेतोः सर्वाणीन्द्रियाणि, अनु सान्निध्यात् वाचः पश्चात् मनसि सङ्गतानि भगवदानन्देन सम्पद्यन्त इत्यर्थः ।

भाष्यप्रकाशः ।

अत एव सर्वाण्यनु ॥ २ ॥ एतेन श्रुतौ वाक्पदमिन्द्रियान्तराणामप्युपलक्षकमिति बोधितम् । भाष्यमत्र स्फुटार्थम् ।

रश्मिः ।

क्वचित्, आत्मत्वाद्भक्तवश्यत्वात् सत्यवाक्त्वात् स्वभावत' इति वाक्यं चेति । **सर्वेन्द्रियेति** । ऋषिरूपाणां सायुज्यादरात्तथान्येषां, श्रुतिरूपाणां भक्त्यादरान्निरोधलक्षणग्रन्थोक्तरीत्या सर्वात्मभावरूपसर्वेन्द्रियव्यापारकृतीच्छाभेदेन बोध्या । **तत्र तेषामिति** । पूर्णभगवदीयानां सामर्थ्यं तत्र पूर्णविरहानुभवे फलकेन्येषां तु अलौकिकसामर्थ्यरूपे सेवाफले जात एवेति तदभावेनासामर्थ्यात् । 'मन आनन्द'मिति श्रुतेराहुः । **भगवदानन्दसम्बन्धिमनःसम्बन्धेनेति** तमानन्दं प्राप्स्यामः । उपलक्षणमेतत् । मनस ओजः प्राप्स्याम इत्यलौकिकसामर्थ्यं प्राप्तम् । भगवत्सेवायाः सत्त्वात् । **तेनेति** । मानसीनानन्देन वागादयः सामानाधिकरण्यं प्राप्यानन्दसम्पन्ना जाता इति तेपि जाताः । जानातीच्छति यतत इति कार्यकारणभावादाहुः **दर्शनानन्तरमिति** । **एवेति** । स्वानुभवादेवकारः । **छान्दोग्य** इति । श्वेतकेतूपाख्याने । **तं मत्वेति** । अर्थं मत्वार्थस्य मननं कृत्वा । **सैवेति** । वागेव । **भगवदिति** । छान्दोग्येष्टमोपदेशेप्यधोक्षजानन्दो वर्तत इति तथा । 'मुक्तानामपि सिद्धानां नारायणपरायणः, सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इति षष्ठस्कन्धादाहुः **दर्शनेति** । विरहे वेण्वादिसम्बन्धात् । आदिना सिद्धान्तरहस्यीयभगवत्सम्बन्धात् । **प्रकृते** । **समागता इति** । **सम्पद्यत** इति गत्यर्थकधातुप्रयोगात् ॥ १ ॥

अत एव सर्वाण्यनु ॥ २ ॥ सूत्रप्रयोजनं वाक्पदस्योपलक्षकत्वबोधनमित्याहुरेतेनेति । सूत्रेणेत्यर्थः । **स्फुटार्थमिति** । स्फुटोर्थो यस्येति स्फुटार्थम् । **भगवदानन्देनेति** । पूर्वसूत्र उक्तम् । **अभीति** । अभितः परमार्थत्वेन सम्यग्घितत्वम् । **तेषामिति** । दूषणत्रयेण विषयत्वं बोधयितुम् । **केचिदित्यादीति** । वाग्वृत्तीति, वाग्व्यापारो 'वृथालापक्रियाध्यानं सर्वथैव परित्यजे'दित्यत्र त्यागविषयस्तत्परत्वम् । तन्नाशं वाग्वृत्तिनाशं वदन्तीत्यर्थः । **तन्नेत्यादीति** । **तत्सरूपमिति** । वाग्वृत्तेः समानं रूपं स्वभावसौन्दर्यं यस्य वाक्यस्य सूत्रस्य । वाग्घटितत्वेपि न वाग्वृत्तिसरूपं सूत्रम् । वाक्यमित्यत्र वाक्पदमिति पाठो वा बाहुलकात् । **तन्निर्णयेति** । वाग्वृत्तिनिर्णयार्थम् । एवं वाग्वृत्तिर्मनसि सम्पद्यत इति पाठभेदापत्तिरूप एको दोष उक्तः । दोषद्वयमन्यदाहुः **मुख्यार्थेति** । मुख्यार्थो

केचित्त्वत्र छान्दोग्यस्थं 'वाङ्मनसि सम्पद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवताया'मिति वाक्यं विषयत्वेन उक्त्वा, सूत्रे वाक्पदस्य तद्वृत्तिपरत्वं वदन्ति, सम्पत्तिं तन्नाशं च ।

तन्न साधीयः । तथाहि । वाक्पदस्य वृत्तिपरत्वं चेच्छ्रुत्यभिमतं स्यात्, सूत्रकारस्तदा तथैव वदेत्, न तु तत्सरूपमेव वाक्यम् । तन्निर्णयार्थमेव प्रवृत्तेः । मुख्यार्थत्यागो लक्षणापत्तिश्च । किञ्च, एवं 'मनसी'ति पदवैयर्थ्यं स्यात्, विषयवाक्योक्तक्रमत्यागानुपपत्तिश्चेति ॥ २ ॥

भाष्यप्रकाशः ।

ननु या छान्दोग्यश्रुतिरत्र सम्मतित्वेन दर्शिता, सैवात्र सर्वादृतत्वाद्विषयवाक्यत्वेनादरणीया, ततश्च कथं भवदुक्तस्यार्थस्याभिसंहितत्वमित्याकाङ्क्षायामन्यमते तेषां बोधयितुं मतान्तरमनुवदन्ति केचिदित्यादि । ते हि हिरण्यगर्भादिविद्यास्वपरासु च विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन्तो यथाशास्त्रमुत्क्रान्तिक्रमकथनं विद्वदविदुषोरुत्क्रान्तौ प्रकारसाम्यं च व्यासाभिमतमङ्गीकुर्वन्त उक्तरीत्या वदन्तीत्यर्थः । तन्न तथेति बोधनाय दूषयन्ति तन्नेत्यादि । ननु सत्यमस्तीदं दूषणत्रयम्, तथाप्यग्रे 'अविभागो वचना'दित्यनेन तत्त्वप्रलयस्य वक्ष्यमाणत्वादत्र वृत्तिप्रलय आद्रियत इति व्यासाशयस्य तैर्बोधनाददोष इत्यत आहुः किञ्चेत्यादि । यद्यपि तत्सूत्रमन्यार्थम्, तथापि स्वोक्तसमर्थनाय तथार्थादरेपि सम्पत्तिपदस्य वृत्त्युपसंहारार्थकतया वृत्तिनाशनार्थत्वमेवाभिप्रेतम्, यथाग्निरम्भेः । तथा सति निरन्वयो वृत्तिध्वंस इति ध्वंसकसंसर्गमात्रस्यैवापेक्षणेन ध्वंसकस्य तत्राधिकरणतानपेक्षणान्मनसीत्यधिकरणबोधकपदवैयर्थ्यम् । नन्वधिकरणत्वेऽनपेक्षितेऽप्यग्नेरप्सु प्रक्षेपे वृत्तिनाशस्य दर्शनाच्च मनसीत्यस्य वैयर्थ्यमित्यतो दूषणान्तरमाहुः विषयेत्यादि । स्यादवैयर्थ्यम्, यदि विषयवाक्यत्वमस्य स्यात् । तदेव तु न । यत एतस्य विषयवाक्यत्वे सूत्रकृता तेजस्त्यागेन प्राणस्य करणाध्यक्षे जीवे लयकथनाद्यः क्रमत्यागस्तदनुपपत्तिश्चेत्यतो व्यासानभिप्रेतत्वावगमादनेकदोषग्रस्तं तथा व्याख्यानमयुक्तमित्यर्थः।

यत्तु दर्शनादित्यस्य व्याख्यानम् । दृश्यते हि वाग्वृत्तेर्मनोवृत्ताववस्थितायां पूर्वोपसंहार इति । तदपि न युक्तम् । परमनोवृत्तेर्वाग्वृत्तिद्वारैव गोचरतायाः प्रत्यक्षसिद्धत्वेन वाग्वृत्त्यभावे तदवस्थित्यवगतेरशक्यवचनत्वात् । तथा विद्वदविदुषोरुत्क्रान्तिप्रकारसाम्याङ्गीकारेऽपीन्द्रियवृत्त्युपसंहारो न युक्तः । प्रश्नोपनिषदि 'इन्द्रियैर्मनसि सम्पद्यमानै'रित्यत्रापि लक्षणापत्त्या सम्पत्तिपदस्य नाशार्थाङ्गीकारे च बृहदारण्यकीयशारीरकब्राह्मणस्थायां 'एकीभवति न पश्यतीत्या-

रश्मिः ।

वाक्पदस्य शब्दस्तस्य त्यागः लक्षणा वाचस्तद्वृत्तीनां च जन्यजनकभावः सम्बन्धः । तेन स्ववृत्तौ लक्षणा वाक्पदस्य । अनेनेति सूत्रेण । अत्रेत्यस्मिन् सूत्रद्वयके । वृत्तीति । वाग्वृत्तिप्रलयः । व्यासेति । व्यासाभिप्रायस्य । तैरिति । कैश्चित् । दूषणत्रयेप्यदोषः । तत्सूत्रमिति । अविभागसूत्रम् । निरन्वय इति । नास्तिकप्रसिद्धो द्वितीयाध्याये तन्मतखण्डनप्रसङ्ग उक्तार्थः । ध्वंसकेति । मनःसंसर्गमात्रस्य मनस्येवमागच्छति केनापि न सम्भाषणं कार्यं भगवन्नामैव ग्राह्यमिति लोके मनःसङ्कल्पवृत्तिः । ध्वंसकस्येति । मनसः । न मनसीति । वाग्वृत्तीनामुक्तरीत्या मनसि प्रक्षेपेधिकरणबोधकमनसीत्यस्य न वैयर्थ्यमित्यर्थः । मनोवृत्ताविति । सङ्कल्परूपायाम् । पूर्ववाचां मनस्युपसंहारः । तदवस्थितीति । मनोवृत्त्यवस्थित्यवगतेः । लक्षणेति । श्रुताविन्द्रियैरित्यस्येन्द्रियवृत्तिभिरित्यर्थाश्र-

तन्मनः प्राण उत्तरात् ॥ ३ ॥

पूर्वोक्तसर्वेन्द्रियवैशिष्ट्यवन्मनः प्राणे सम्पद्यते, न तु केवलम् । तत्र हेतुः । उत्तरादिति । 'स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयते, एवमेव खलु सौम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयत' इत्युक्त्वा, तत्र हेतुमुत्तरेण वाक्येनाह 'प्राणबन्धनं हि सौम्य मन' इति । तस्माद्धेतोस्तथेत्यर्थः ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

सर्वेन्द्रियविशिष्टमनोविशिष्टः प्राणोऽध्यक्षे पुरो हृदि वा प्रकटे भगवति

भाष्यप्रकाशः ।

हु'रित्यादिरूपायां च श्रुतौ लक्षणापत्त्या श्रुतिपीडाया दुर्वारत्वापत्तेः । अत एतेषु सूत्रेषूत्क्रमिष्यद्व्यवस्थामात्रकथनमयुक्तम्, किन्तु मुख्यतया सद्योमुच्यमानव्यवस्थायामिन्द्रियलयक्रमः, प्रासङ्गिकस्तूत्क्रमिष्यद्वृत्तान्तः । 'ओकोग्रज्वलन'सूत्रादिभिस्तस्यापि वक्ष्यमाणत्वादिति ।

यदपि भामतीनिबन्धे, वाचस्तूपसंहारमदृष्टं नागमोपि गमयितुमर्हति । आगमप्रभवयुक्तिविरोधात् । आगमो हि दृष्टानुसारतः प्रकृतौ विकाराणां लयमाहेत्युक्तम् ।

तदपि व्याख्येयग्रन्थपूजामात्रम् । आगमस्य सर्वत्र दृष्टानुसारित्वादर्शनेन युक्तेः शिथिलत्वादिति । तस्मादेतस्य विषयवाक्यत्वमयुक्तमेवेति पूर्वोक्तमेव विषयवाक्यम्, तथैवार्थश्चाभिप्रेत इति ध्येयम् ॥ २ ॥

तन्मनः प्राण उत्तरात् ॥ ३ ॥ अत्र भाष्यमुत्तानार्थम् । श्रुतिस्तु छान्दोग्ये श्वेतकेतूपाख्यानस्था ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥ अत्रापि भाष्यमुत्तानार्थम् ।

अत्रेदमर्थात् सम्पद्यते । अत्यनुग्रहभाजनस्य पुष्टिमार्गीयस्योक्तप्रकारेण वागादिप्राणान्तानां

रश्मिः ।

न्यजनकभावरूपलक्षणापत्त्या । नाशार्थेति । निरन्वयध्वंसार्थाङ्गीकारे च । बृहदिति । 'न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्त' इत्यस्याम् । लक्षणेति । समवनयस्यैकीभावस्य च निरन्वयध्वंसत्वाभावेन सान्वयध्वंसवाचकयोर्निरन्वयध्वंसे लक्षणा विपरीतलक्षणा, तस्या आपत्त्या । तस्यापीति । उत्क्रमिष्यद्वृत्तान्तस्यापि । उपसंहारमिति । मनस्युपसंहारम् । आगमः पञ्चरात्रम् । इत्युक्तमिति । भामतीनिबन्ध इत्यनेनान्वेति ॥ २ ॥

तन्मनः प्राण उत्तरात् ॥ ३ ॥ उत्तानेति । पूर्वोक्तेति । मतुबन्तम् । तथेति । मनः प्राणे सम्पद्यते । एवमुत्तानार्थम् ॥ ३ ॥

सोध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥ उत्तानेति । मुण्डकोपनिषदनुरोधेनाहुः । उपगम इति । मर्यादामार्गस्यासन्दिग्धत्वादाहुः । पुष्टीति । 'यमेवैष वृणुत' इति श्रुतेः । प्रवचनादिनिषेधा-

सम्पद्यत इत्यर्थः। अत्र हेतुः। उपगमादिभ्य इति। उपगमोऽभ्युपगमः पुष्टिमार्गेऽङ्गीकार इति यावत्। ततस्तथेत्यर्थः। आदिपदाद् भगवद्वशीकरणसमर्थः स्नेहः प्रभ्वनिङ्गितार्थत्यागस्तदनुरूपं भजनं च। अभ्युपगमे सिद्धे स्नेहादयोऽवश्यं भवन्त्येवेत्याशयेन, तदादित्वमुक्तम्, नोद्देशः कृतः। मर्यादामार्गेऽङ्गीकृतानां तु मुक्तिपर्यवसायित्वेन मुमुक्षुत्वादुत्कटस्नेहासम्भवेन प्रभुप्राकट्यासम्भवात् स्वस्वप्रकृतौ सङ्घातलये शुद्धजीवस्य भगवदनुग्रहेण श्रवणादिरूपया तथाविधस्नेहरूपया च भक्त्या मुक्तिः सम्पद्यत इति यद्वेव तारतम्यमिति निगू-

---

भाष्यप्रकाशः।

लये तदानीमेव पुरुषोत्तमात्मकदेहप्राप्त्या लीलात्मकभोगसम्पत्तिः। ततो न्यूनस्य तस्य तु पुरुषोत्तमे लयः, ततः सम्पद्याविर्भावाधिकरणोक्तरीत्या भगवता तस्य स्वरूपाभिष्कासने पुरुषोत्तमात्मकदेहसम्पत्त्या लीलानुभव इति बोध्यम्।

अन्ये तु, अध्यक्षपदे करणाध्यक्षं जीवम्, उपगमादिपदे च ज्योतिर्ब्राह्मणे 'एवमेवेममा-

रश्मिः।

दस्याः पुष्टिमार्गीयत्वम्। तथेति। प्राणो भगवति सम्पद्यते। भगवद्वशीति। 'नायमात्मा बलहीनेन लभ्यः' इति श्रुतेः। बलं भक्तिरिति भाष्यम्। भक्तौ बलपदप्रयोगेन तात्पर्यार्थः वशीकरणसमर्थ इति विशेषणम्। प्रभ्विति। 'इङ्गितं गतिचेष्टयो'रिति विश्वात्, भगवतः सेवायामकालत्यागः, अर्थस्य त्यागो व्ययः। तनुवित्तजे उक्ते। 'न च प्रमादादि'ति श्रुतेः। उभयमप्यप्रमादरूपम्। तदनुरूपं भगवदनुरूपभजनं महाराजोपचारकरणरूपम्। 'एतैरुपायैर्यतते यस्तु विद्वानि'तिश्रुतेः। नोद्देश इति। पुष्टिमार्गेङ्गीकारादीनामुद्देशो नाम्ना पदार्थसङ्कीर्तनम्। अत्र पुष्टिमार्गाङ्गीकारे बीजं वक्तुं मर्यादायां स्पष्टत्वं मुक्तिपर्यवसायिनीत्वं न तु नित्यलीलाभावे पर्यवसायिनीत्वम्। स तु मर्यादास्थेनात्यन्तानुग्रहवता लब्धपुष्टिना लभ्य इति तारतम्यमाहुः। मर्यादेति। मुक्तीति। 'मार्गास्त्रयो मया प्रोक्ता' इति 'भजतां भगवान् मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोग'मिति मुक्तिपर्यवसायित्वं भक्तेः। साधनचतुष्टयसम्पत्त्यन्तर्गतं मुमुक्षुत्वम्। तस्मात्। तथा च श्रुतिर्गोपालतापनीये 'मुमुक्षुर्वै शरणमनुव्रजे'दिति। तदुक्तं 'शुद्धाश्च सुखिनश्चैव ब्रह्मविद्याविशारदाः। भगवद्भजने योग्या नान्य इत्यर्थतः फल'मिति सुबोधिन्याम्। उत्कटेति। मर्यादामार्गाङ्गीकारस्वभावात्, स्नेहासम्भवो नास्त्यत उत्कटेति विशेषणम्। स्नेहत्वेन सायुज्यत्वेन कार्यकारणभावात् प्रभुप्राकट्यसम्भवाभावरूपफलाभाव उक्तः। न च भगवदाविर्भावाभावेन न सद्योमुक्तिः, किन्तु ज्ञानिविलक्षणचरणमुक्तिस्तु स्यादिति वाच्यम्। सङ्घातस्य प्रतिबन्धकत्वात्। अतस्तल्लयं विदुष आहुः। स्वप्रकृताविति। स्वयोनौ। श्रुतिस्तु, अग्निमाधिकरणेस्ति। शुद्धेति। शुद्धबुद्धमुक्तस्वभावनिराकारजीवस्य। 'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थिति'रित्येकादशस्कन्धात्। ननु सङ्घातद्वयरहितस्य करणादिः कुत इत्यत आहुः। भगवदनुग्रहेणेति। तथा च भगवत्सन्निधानस्यावर्जनीयत्वान्मर्यादायां महापुरुषाङ्गीकाराच्च 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जित'मिति गीतायां ब्रह्मलक्षणनिविष्टवाक्याद् भगवदनुग्रहेण सर्वेन्द्रियासफलनात्। अत आहुः। श्रवणादिरूपयेति। नापि पुष्टिमार्गीयप्रमेयबलेन सर्वेन्द्रियगुणाभासत्वम्। भाष्ये भगवदनुग्रहेणेत्यत्रात्यन्तानुग्रहपदाभावात्। अत्यन्तानुग्रहत्वेन पुष्टित्वेन कार्यकारणभावात्। 'आश्चर्यो वक्ता कुशलोस्य लब्धे'ति काठकादाश्चर्यं च। तदुक्तं 'आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्य'इति गीतायाम्। तथाविधेति। श्रवणादिजन्यस्नेहरूपया। भक्त्येति। मर्यादाभक्त्या।

ढाशयेनेदमुक्तम् । अभ्युपगमादयस्तु मुण्डकोपनिषत्सु पठ्यन्ते । 'नायमात्मे'त्युपक्रम्य, 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम् । नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाथ लिङ्गात् । एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामे'ति ॥ ४ ॥

इति चतुर्थाध्याये द्वितीयपादे प्रथमं वाङ्मनोधिकरणम् ॥ १ ॥

उक्तं निगूढमाशयं प्रकटयति ।

भूतेषु तच्छ्रुतेः ॥ ५ ॥ (४-२-२.)

ननु मर्यादामार्गीयाणामप्येवमेव वागादिलयः, उतान्यथेति संशये निर्णयमाह । तेषां ते भूतेषु लीयन्ते, न तूक्तरीत्या भगवति । अत्र प्रमाण-

भाष्यप्रकाशः ।

त्मानमन्तकाले सर्वे प्राणा अभिसमायन्ती'त्यनेनोक्तमुपगमनम्, शारीरब्राह्मणे 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामती'त्युक्तमनुगमनम्, 'सविज्ञानो भवती'त्यनेनोक्तमवस्थानं च व्याकुर्वन्ति । तदा छान्दोग्यस्थस्य कस्याप्यर्थस्यानङ्गीकारात् कथं तस्य विषयवाक्यत्वमित्यपि ध्येयम् ॥ ४ ॥

इति प्रथमं वाङ्मनोधिकरणम् ॥ १ ॥

भूतेषु तच्छ्रुतेः ॥५॥ अधिकरणमवतारयन्ति **नन्वित्यादि** । **इति संशये निर्णय-माहेति** । एवं संशये भगवन्मार्गत्वस्याविशिष्टत्वेनात्रापि पूर्ववदेव वागादिलय इति पूर्वपक्षावताराभिर्णयमाहेत्यर्थः । **सूत्रं व्याकुर्वन्ति तेषामित्यादि** । हेतुबोधिकां श्रुतिमुदाहरन्ति

रश्मिः ।

तदुक्तं भक्तिहंसे 'भक्तिमार्गः श्रवणादिसरणिरूप' इति । स चैकादशैकोनविंशाध्यायोक्तो ग्राह्यः । 'पुनश्च कथयिष्यामि मद्भक्तेः कारणं पर'मितिवाक्ये परपदात् परं फलाविसंवादि तेन शरणगमनानन्तरमात्मनिवेदनमपि श्रोतव्यं भगवत्सन्निधापन इति बोधितम् । सप्तदशाष्टादशाध्यायोक्ता भक्तिः सर्वोत्तममार्गीया, तथापि तया भक्तयजननदर्शनान्न गृहीता । **मुक्तिरिति** । पुरुषोत्तमचरणसायुज्यम् । चरणस्य वैकुण्ठादिरूपत्वाद्विहगादिरूपत्वं बोध्यम् । 'प्रायो बताम्ब विहगा मुनयो वनेस्मिन्नि'ति वाक्यात् । पुष्टिमार्गोप्ययमुच्यते 'तत्त्वा यामि ब्रह्मणा वन्दमान' इति सन्ध्याश्रुतेः । अस्यां तदाश्रया प्रतिकृतिभजने फलसाधनविषययोर्भिन्नत्वेन व्यभिचारिणी भक्तिरिति । **निगूढाशयेनेति** । भक्तिविषयाभिप्रायेण । **मुण्डकेति** । बहुत्वमान्यत्वात् । **तनुं स्वामिति** । स्वीयतनुत्वेन वृणुते । **अलिङ्गादिति** । सर्वात्मभावलिङ्गशून्यात् । आत्मनोप्यात्मा । धाम अक्षरं अक्षरात्मकं हृदयम् । एवमुत्तानार्थमित्यर्थः । प्रकृतमुच्यते **सविज्ञान इति** । विज्ञायतेऽनेनेति विज्ञानम् । इन्द्रियजालं प्राणसहितं तेन सह वर्तमानो भवति । **अवस्थानमिति** । सप्राणस्येन्द्रियजालस्य प्रासव्यकर्मफलज्ञानवति जीवेऽवस्थानम् । तदेत्यादिविषयवाक्योक्तार्थस्य सौत्रसइतिपूर्वपरामर्शकतच्छन्दस्य छान्दोग्यीयार्थपरामर्शकस्य सत्त्वेपि कस्यार्थस्येत्यादिः । **तस्येति** । ज्योतिर्ब्राह्मणादेः । **विषयेति** । तृतीयमेकसूत्रमधिकरणमिदं परेषाम् । **इत्यपीति** । अपिना सन्दिग्धत्वविषयवाक्यस्य व्याख्यानेन । नन्वस्त्येवं परन्तु ग्रन्थान्तरेधिकरणमालायां प्राणश्छान्दोग्योक्तोत्रत्यविषयवाक्यैकवाक्यतया प्राणसहितो जीवस्तेजसि लीनो भवतीत्युक्तेः कथं छान्दोग्यस्थस्य कस्याप्यर्थस्यानङ्गीकार इति चेन्न । एतद्ग्रन्थमात्रविषयत्वेन दोषस्य ग्रन्थान्तरसम्मेलनेऽभावात् ॥ ४ ॥ **इति प्रथमं वाङ्मनोधिकरणम् ॥ १ ॥**

---

१. वाप्यलिङ्गादिति रश्मिपाठः ।

माह । तच्छ्रुतेः । 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवी१ शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयत' इति श्रुतेः ।

न चाविद्वद्विषयिणीयं श्रुतिरिति वाच्यम् । 'याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात् प्राणाः क्रामन्त्याहो नेति, नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेत' इति पूर्ववाक्यात् । न ह्यविदुषः प्राणानामनुत्क्रमः । 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामती'त्यादिश्रुतेः । ननु 'यत्रास्य पुरुषस्ये'त्युपक्रम्य 'रेतश्च निधीयत' इत्यन्ता श्रुतिरविद्वद्विषयिणीति मन्तव्यम् । यत एतदग्रे, 'क्वायं तदा पुरुषो भवती'ति प्रश्ने याज्ञवल्क्यार्तभागाभ्यां विचारितमुत्तरमुच्यते । 'तौ ह यदूचतुः कर्म हैव तदूचतुरथ ह यत् प्रशशꣳसतुः कर्म हैव तत् प्रशशꣳसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेने'ति । एतेन कर्माश्रयस्तिष्ठतीति निर्णयः सम्पद्यते । एवं सति प्राणानुत्क्रमणोक्त्या सङ्घातलयोक्त्या च विद्वद्विषयत्वमत्रावसीयते, यतस्तस्यैवोक्तं द्वयं सम्भवति । अग्रिमश्रुत्युक्तकर्माश्रयत्वं च तस्मिन् विरुद्धम्, अतः पूर्वोत्तरविरोधाद्विषयानिश्चये प्राप्ते प्रतिवदामः । मर्यादामार्गीयविद्वद्विषयिण्येवेयं श्रुतिरिति । अत एव प्रश्ने, 'क्व तदा पुरुषो भवती'त्येतावतैव चारितार्थ्येऽपि

भाष्यप्रकाशः ।

यत्रास्येत्यादि । एतेन सूत्रस्थं 'भूतेष्वि'ति पदं देवताया अप्युपलक्षकमिति बोधितम् । श्रुतिस्तु बृहदारण्यक आर्तभागब्राह्मणेऽस्ति । इयं श्रुतिरन्यैरविद्वद्विषयत्वेन व्याख्यातेति तन्निषेधन्ति न चेत्यादि । तथा चेतः पूर्वस्मिन् ग्रन्थे प्राणानुत्क्रमणरूपस्य मुक्तिलिङ्गभावनाभाविद्वद्विषयत्वं तस्या वक्तुं शक्यमित्यर्थः । एवमस्याः श्रुतेरविद्वद्विषयतायां बाधके दर्शिते पुनरविद्वद्विषयतां साधयितुं पूर्वोत्तरश्रुत्योर्विरोधेन सन्देहमुत्थापयन् विद्वद्विषयतां प्रतिक्षिपति नन्वित्यादि । एतेनेति । विचारितनिर्धारकवाक्येन । एवं सतीति । उक्तप्रकारके विरुद्धवाक्यद्वये एकस्मिन् प्रकरणे श्रूयमाणे सति । विरुद्धमिति । अवसीयत इति शेषः । एवं

रश्मिः ।

भूतेषु तच्छ्रुतेः ॥ ५ ॥ बोधितमिति । स्वदेवतासहितायां प्रकृतौ योनौ निधानकथनाद्बोधितम् । न चेत्यादीति । याज्ञवल्क्यो नेति होवाचेत्यन्वयः । उच्छ्वयतीति । उच्छूनतां प्राप्नोति शोथेन । आध्मायतीतिवद्बहिष्ठेन वायुना पूर्यत इत्यर्थः । मुक्तिलिङ्गस्येति । वक्ष्यमाणादमुक्तलिङ्गाद्विपरीतं मुक्तिलिङ्गं तस्य । बाधक इति । प्राणानुत्क्रमणरूपे बाधके । पूर्वोत्तरेति । यत्रायं पुरुषो म्रियतेति पूर्वा, यत्रास्य पुरुषस्येत्युत्तरा, तयोः श्रुत्योः । नन्वित्यादीति । उच्यत इति । भगवतोच्यते श्रुत्या । उक्तेति । आर्तभागब्राह्मणप्रकारके । आर्तभागब्राह्मणे वाक्यद्वयमित्युक्तप्रकारकता । ऋतभागस्यापत्यमार्तभागः । विरुद्धेति । संघातलयप्राणानुत्क्रमणबोधकवाक्यद्वये । एकस्मिन्निति । एकविद्वन्मात्रविषये देशकालरूपे प्रकरणे । विरुद्धमितीति । विद्वन्निष्ठज्ञानविरुद्धं, सहानवस्थायित्वं

---

१. उच्छूयतीति प्राचीनादर्शेषु, उच्छ्वयतीति रश्मौ ।

साधारणपुरुषव्यावृत्त्या मर्यादामार्गीयतत्प्रापकं 'अय'मिति पदम्। तस्यैवोपक्रान्तत्वात् तथा। अग्रिमविचारितोर्थोपि तद्विषयक एवेति बुध्यस्व। ननूक्तं बाधकमिति चेत्। हन्त श्रुतिशिरःसमाकलितमाकलय। मर्यादामार्गे हि विधिप्राधान्यम्, तथैव तन्निर्माणात्। तत्र ह्येवं कृत एवं फलं दास्ये, न त्वकृतेपीति भगवदिच्छा, अतः कर्म प्रधानम्।

एवं सत्यार्तभागस्यायमाशयः। वागादिरेतोऽन्तलयेन प्रारब्धस्यापि तदा नाशाच्छुद्धं जीवं विध्यविषयं कदाचित् पुष्टौ प्रवेशयति, न वेति संशयेन तदायं क मर्यादामार्ग एवोत पुष्टावपि प्रवेशितो भवतीति प्रश्नः। तदास्यार्थ-

---

भाष्यप्रकाशः।

पूर्वपक्षमुत्थाप्य समादधते प्रतिवदाम इत्यादि। तस्यैवोपक्रान्तत्वादिति। प्राणानुत्क्रमलिङ्गेन विषय एवोपक्रान्तत्वात्। तदग्रिमविचारितोर्थ इति। उपक्रमानुरोधिप्रश्नोत्तररूपत्वात् 'तौ ह यदूचतु'रित्यादिना विचारितोऽर्थः। अग्रिमविचारिताऽर्थे पुनः शङ्कते नन्वित्यादि। उक्तं बाधकमिति। कर्माश्रयेणावस्थानरूपं विद्वत्ताबाधकम्। तथा च विद्वद्विषयत्वे बाधकस्य विद्यमानत्वादविद्वद्विषयैवेयं श्रुतिरित्यर्थः। अत्र समादधानाः पूर्वपक्षिणो भ्रान्तत्वं बोधयितुमुपालभन्ते हन्तेत्यादि। श्रुतिशिरःसमाकलितमिति। वेदान्ततात्पर्यबोधितम्। एवं सतीत्यादि। उक्तरीत्या मर्यादामार्गे कर्मप्राधान्ये सति आर्तभागस्य वक्ष्यमाण आशयः। वक्ष्यमाणरीतिकसंशयेन तदा क शुद्धत्वदशायाम्, अयं विधिनियतो जीवः, क वैषयिकाधिकरणे सप्तमी। कस्मिन् मार्गे, किं मर्यादामार्ग एव तिष्ठत्युत पुष्टौ प्रविष्टो भवतीति

रश्मिः।

निरोधः। **तदग्रिमे विचारितार्थ** इतीति। भाष्येऽग्रिमेत्याद्यपि पाठः। **भाष्ये। तद्विषयक** इति। मर्यादामार्गीयविषयकः। विद्वानित्यत्र विच्छब्देन ज्ञानमिव भक्तेरपि वक्तुं शक्यत्वात्। गीतायां 'भक्तिरव्यभिचारिणी'त्युक्त्वा 'एतज्ज्ञानमिति प्रोक्त'मित्युक्तेः। **प्रकृते। कर्माश्रयेणे**ति। ननु नेदमुक्तं बाधकं किन्तु प्राणानुत्क्रमणरूपं बाधकमिति चेन्न। पूर्वोक्तबाधकस्य तथाविधत्वेपि नास्य तथाविधत्वं कर्मावस्थानश्रुतेः पूर्वमुक्तत्वात्। तत्त्यागेन पूर्वमनुधावने दूरान्वयदोषात्। **वेदान्ते**ति। श्रुतिशिरो वेदान्तम्। कल अव्यक्ते शब्दे तात्पर्येण बोधनेऽव्यक्तः शब्दो भवति। **आकलय** विचारय। **मर्यादामार्ग** इति। यद्यपि मर्यादामार्गः श्रवणादिसरणिरूपस्तथापि साधनत्वमिश्रफलरूपमिति विचारितत्वाच्च फलाध्याय इतिसमाख्यया वक्ष्यमाणेच्छाशरीरनिविष्टफलानि सर्वाण्येवोद्देष्टव्यानि। प्रथमसूत्रभाष्ये सामीप्यादिमुक्तिं प्राप्तवतां भक्तानामिति भाष्येऽसन्दिग्धानां सामीप्यादीनामुद्देशादित्याशयेनाहुर्विधिप्राधान्यमिति। विधेः प्राधान्यं विधिप्राधान्यम्। **कर्मप्रधान**मिति। विधिविषयं कर्मैव प्रधानं न तु विधिः साक्षात्फलकारणत्वाभावात्। **उक्तरीत्ये**ति। तथैव तन्निर्माणादित्याद्युक्तरीत्या। **कर्मप्राधान्य** इति। कर्मप्राधान्यमत्र न विधया कृते कर्मणि। अङ्गित्वात्, यदेव विद्ययेति हीत्यत्र व्याख्यातत्वाच्च। किन्तूक्तरीत्येति करणोक्तेः **मर्यादामार्गे** कर्मणः फलजनकत्वं कर्मप्राधान्यम्। यथा वाक्यं 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यत्र प्राधान्यं फलसम्बन्धात्तथा। **विधिनियत** इति। 'आश्रमादाश्रमं गच्छेन्नान्यथा मत्परश्चरेत्' इति विधिनियतः। पूर्वसूत्रे शुद्धस्य जीवस्य भगवदनुग्रहेण श्रवणादिरूपयेत्युक्तेः। **कस्मिन्नि**ति। किंमार्गविषयो जीव इत्यर्थः। यद्वा। 'ज्ञाननिष्ठो विरक्तो

स्येश्वरेच्छारीतिमविदुषो दुर्ज्ञेयत्वं जानन्तौ स्वयमेव यद्वधारितवन्तौ, तदपि रहस्यमिति स्फुटमनुक्त्वा, श्रुतिः पर्यवसितमर्थमुक्तवती 'तौ हे'त्यादिना । अत्र कर्मपदं मर्यादामार्गपरम् । तथा च मर्यादामार्ग एव तस्य स्थितिरित्यर्थः सम्पद्यते, मुक्त एव भवतीति यावत् । अत एव तत्प्रशंसापि । यत ईश्वरत्वेन सर्वकरणसमर्थोपि तद्दाने तदपेक्षते । अत्र हेतुत्वेन मर्यादामार्गस्वरूपमुक्तं 'पुण्यो वा' इत्यादिना ॥ ५ ॥

ननु मर्यादामार्गीयौ भक्तो ज्ञानी च भवतः, उक्तनिर्णयस्तु ज्ञानमार्गीयविषय एव, भक्तं तु तादृशमपि कदाचित् पुष्टावपि प्रवेशयतीत्याशङ्क्य तन्निर्णयमाह ।

भाष्यप्रकाशः ।

प्रश्न इत्यर्थः । एवं प्रश्नस्य विद्वद्विषयत्वं प्रतिपाद्योत्तरस्य प्रतिपादयन्ति तदेत्यादि । ईश्वरेच्छारीतिमविदुषः पुंसः प्रति अस्यार्थस्य दुर्ज्ञेयत्वमिति योजना । अत्रेत्यादि । श्रुतिवाक्ये कर्मपदं मत्वर्थलक्षणया तन्मार्गपरम् । ननु मर्यादामार्गस्य विद्वदविद्वत्साधारणत्वादत्र विद्वद्व्यवस्थैवोच्यत इत्यत्र किं गमकमित्यपेक्षायामाहुः अत एवेत्यादि । तथा च निवृत्तिमार्गीयकर्मणोपि तत्र विद्यमानत्वात्तदादाय तत्प्रशंसात्र मुख्यं विद्वद्विषयत्वगमकमित्यर्थः । प्रशंसायां बीजमाहुः यत इत्यादि । तद्दाने तदपेक्षत इति । मुक्तिदाने ज्ञानसमुच्चितं कर्मापेक्षते । ननु यद्यस्य विद्वद्विषयत्वं स्यात्, तदात्र 'पुण्यो वा पुण्येने'त्यादि न वदेदित्यत आहुः अत्रेत्यादि । अत्र हेतुत्वेनेति । फलदाने हेतुत्वेन । तथा च, 'एष उ वे'ति श्रुतेः फलदाने कर्मकारणमेव हेतुर्मर्यादामार्गे इति बोधनाय 'पुण्यो वाइ'त्यादिना तत्स्वरूपमुक्तम् । तावता न अविद्वद्विषयकत्वं वक्तुं शक्यमिति विद्वद्व्यवस्थैवात्रोच्यत इत्यर्थः ॥ ५ ॥

रश्मिः ।

वा मद्भक्तो वाऽनपेक्षकः, सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचर' इति नियतः । शुद्धं जीवं विध्यविषयमित्युक्तभाष्यात् । **प्रविष्ट इति** । भगवतात्यन्तानुग्रहेण प्रवेशितः प्रविष्टो भवतीत्यर्थः । **विद्वदिति** । विद्वन्तौ विषयौ भक्तज्ञानिनौ यस्य प्रश्नस्य तत्त्वम् । **उत्तरस्येति** । प्रश्नोत्तरस्य विद्वद्विषयत्वम् । **ईश्वरेति** । ईश्वरेच्छया मर्यादामार्गे प्रवेशितः तयैव पुष्टिमार्गे प्रवेशित इत्यत्र न विचार इत्युक्तरीतिम् । **अविदुषः पुंस इति** । द्वितीयाबहुवचनान्ते पदे । **भाष्ये** । **यद्वेति** । ज्ञानकर्मभक्तिमार्गानवधारितवन्तौ निश्चितवन्तौ षड्शास्त्रैः । **तदपि रहस्यं** मार्गत्रयं षड्शास्त्ररहस्यरूपमित्यर्थः । रहस्यपदेन अत्रैव समनीयन्त इति पुष्टजीवपुरुषोत्तमसायुज्यम् । इन्द्रियसमर्पणेन साधनेन जीवोपि समवनयनं प्राप्स्यतीति रहस्यम् । एवं अग्निं वागप्येतीत्यादिषु स्त्रीपुंनपुंसकमिथुनोक्ते रहस्यं बोध्यम् । **पर्यवसितमिति** । रहस्यं न वक्तव्यं खलत्वं च निवर्तनीयमिति उभयसामञ्जस्याय मार्गत्रयकथनपर्यवसितं मार्गत्रये कथिते तदीयं रहस्यमपि ज्ञास्यन्तीत्यभिप्रायेण ।

प्रकृते । **तन्मार्गेति** । मर्यादामार्गपरम् ॥ चित्तशुद्धिद्वारा कर्मवन्तौ भक्तिज्ञानमार्गौ । **मर्यादामार्गस्येति** । भाष्ये स्वीकृतस्य कर्मप्रधानरूपस्य । **निवृत्तीति** । ज्ञानभक्तिमार्गीयकर्मणोऽपि । **ज्ञानसमुच्चितमिति** । ज्ञानेन स्वकारणचित्तशुद्धिजनकत्वेन कर्मसमुच्चितमिति तथा । वीर्यवत्तरं फलमन्यथा तु न कर्मसमुच्चय इति ध्येयम् । **न वदेदिति** । **विद्वान्नापुण्यः** । अपुण्यवत्त्वज्ञानानन्तरमपुण्यनाशकज्ञानेतरकर्मसत्त्वे विद्वत्त्वं न स्यादिति । तथा चाविद्वानपुण्यः पुण्येन कर्मणा भवतीत्यर्थः । **तत्स्वरूपमिति** । हेतुस्वरूपम् ॥ ५ ॥

नैकस्मिन् दर्शयतो हि ॥ ६ ॥

एकस्मिन् ज्ञानिनि भक्ते वा मर्यादानियमो न, किन्तूभयोरपि । तत्र हेतुः दर्शयत इति । यतो याज्ञवल्क्यार्तभागौ ज्ञानिभक्तसाधारण्येन मर्यादानियमं दर्शयत उक्तरीत्या, 'तौ हे'त्यादिना । अन्यथा प्राक् कृताङ्गीकृतिरन्यथा भवेदित्युपपत्तिर्हिशब्देन सूच्यते । पूर्वोक्तपूर्वोत्तरश्रुतिविरोधपरिहारान्यथानुपपत्तिरत्र मूलमिति ज्ञेयम् ।

केचित्तूपसंहृतेषु वागादिषु शरीरान्तरप्रेप्सासामयिको जीवः 'क्वायं तदा पुरुष' इति प्रश्नविषय इति वदन्ति । तन्न साधीयः । 'तमुत्क्रामन्तं

भाष्यप्रकाशः ।

नैकस्मिन् दर्शयतो हि ॥ ६ ॥ सूत्रमवतारयन्ति नन्वित्यादि । भक्तं तु तादृशमपि कदाचित् पुष्टौ प्रवेशयतीति । तृतीयस्कन्धे, 'जीवाः श्रेष्ठा ह्यजीवाना'मित्यादिना शेषपूजायामुत्कृष्टबोधने, 'मय्यर्पितात्मनः पुंसो मयि सन्न्यस्तकर्मणः । न पश्यामि परं भूतमकर्तुः समदर्शना'दिति कपिलदेववाक्ये मर्यादाभक्ते उत्कर्षविश्रान्तेः कथनेन तादृशं पुष्टौ प्रवेशयतीत्येवं सम्भावयितुं शक्यत्वात्तं प्रवेशयति । व्याकुर्वन्ति एकस्मिन्नित्यादि । ज्ञानिभक्तसाधारण्येनेति । विशेषानिर्देशात्, 'अयं पुरुष' इति सामान्यनिर्देशात्, कर्मोक्तिकर्मप्रशंसाभ्यां मर्यादामार्गस्यैव विषयीकरणाच्च । तथा च यद्यवान्तरो ज्ञानभक्तिकृतो विशेषो विवक्षितः स्यात्, तदा सामान्येन न वदेताम्, अतस्तथेत्यर्थः । ननु पुष्टिमर्यादाभक्तयोर्भक्तिमत्त्वे तुल्येपि कुतोऽयं विशेषो यन्मर्यादामार्गीयवागादीनां भूतेष्वेव लयः, न भगवतीत्याकाङ्क्षायां गूढाभिसन्धिमाहुः अन्यथेत्यादि । यदि तद्वागादिलयो भगवत्यङ्गीक्रियेत, तदा अप्राकृतानां सर्वभावप्रपत्त्या प्रकृतिसम्बन्धरहितानां या अङ्गीकृतिः स्वीयत्वेन वरणम्, सा अन्यथा भवेत्, इतरतुल्यतां प्राप्नुवन्ती वरणश्रुत्युक्तमसाधारण्यं विरुन्ध्यादित्यर्थोपपत्तिर्हिशब्देन सूच्यते । तथा च ताभ्यां ज्ञानिभक्तसाधारण्येन यन्निरूपितं तत्रेदं बीजमित्यर्थः । नन्वस्याः श्रुतेरेवं तात्पर्यकल्पने किं बीजमत आहुः पूर्वोक्तेत्यादि । पूर्वोत्तरश्रुतिस्तु 'न तस्मात् प्राणा उत्क्रामन्ती'त्यादिरूपा बोध्या । तथा चैतद् बीजमित्यर्थः ।

एतदेव दृढीकर्तुं, दूषणाय मतान्तरमुपक्षिपन्ति केचिदित्यादि । दूषयन्ति तन्नेत्यादि ।

रश्मिः ।

नैकस्मिन् दर्शयतो हि ॥ ६ ॥ अकर्तुरिति । वाक्योक्तान्यस्याकर्तुः । पञ्चम्यन्तम् । मर्यादाभक्तेरिति । मय्यर्पितात्मन अत्रात्मपदं मनःपरम् । पञ्चम्यन्तं पदम् । मानसीसेवा । संन्यस्तानि कर्माणि । 'कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन्नि'त्युक्तानि । अतस्तथा । पुष्टाविति । कदाचिदिति बोध्यम् । अत्यन्तानुग्रहकाल इति तदर्थः । मर्यादामार्गस्येति । विधिविषयस्य कर्मणः । तथेति । ज्ञानिभक्तसाधारण्येनेत्यर्थः । गूढाभिसन्धिमिति । वरणश्रुत्युक्तासाधारण्यभङ्गरूपम् । ताभ्यामिति । याज्ञवल्क्यार्तभागाभ्याम् । एतदिति वरणश्रुत्युक्तासाधारण्यभञ्जनम् । अस्या इति । वरणश्रुतेः । पूर्वोक्तेत्यादीति । 'भूतेष्वि'ति । सूत्रभाष्योक्तस्य पूर्वा यत्रायं पुरुष इति, उत्तरा यत्रास्य पुरुषस्येति तयोः श्रुत्योर्विरोधस्य यः परिहारः परिहारान्तरं तस्यान्यथानुप-

प्राणोनूत्क्रामति प्राणमनूत्क्रामन्तꣳसर्वे प्राणा अनूत्क्रामन्ती’ति श्रुतिर्भावि-

---

भाष्यप्रकाशः ।

अत्रायमर्थः । ‘अत्रैव समवनीयन्त’ इति वाक्येन प्राणानुत्क्रमणमुभयत्रोक्तम् । तत्र शारीरब्राह्मणे ‘अथाकामयमान’ इति निष्कामं पुरुषमुपक्रम्योक्तम् । अन्ते च ‘ब्रह्मैव सन् ब्रह्माप्येती’ति तस्य ब्रह्मप्राप्तिरुक्ता । आर्तभागब्राह्मणे तु ‘यत्रायं पुरुषो म्रियत’ इति सामान्यतो म्रियमाणमुपक्रम्योक्तम् । अन्ते च ‘स उत्क्ष्वयत्याध्मायत्याध्मातो मृतः शेत’ इत्येतावदुक्तम् । तत्र सामान्यस्य विशेषेण निर्णय इति ब्रह्माप्ययवाक्यस्यात्र निर्णायकत्वादस्य मुक्तिलिङ्गत्वमेवोचितम् । तथापि ‘आध्मातो मृतः शेत’ इत्यनेनोक्तावस्था ब्रह्मविच्छरीरस्यानुचिता । लौकिकस्य पुण्यकृतोपि प्रायस्तादृशावस्थाया अदर्शनात् । अतः पुनः प्रश्नः ‘यत्रास्य पुरुषस्ये’त्यारभ्य, ‘क्वायं तदा पुरुषो भवती’त्यन्तः । अमुच्यमानस्य हि प्राणोत्क्रमः ‘तमुत्क्रामन्त’मित्यादिश्रुत्योक्तः । अयं शरीरदुरवस्थावानुक्तस्तस्य चेद् ‘अग्निं वागप्येती’त्युक्तप्रकारेणेन्द्रियाणामनुत्क्रान्तानां तत्तद्योग्येषु भूतेषु इन्द्रियाधिष्ठातृदेवतायां च लय’स्तदा तस्य साधनाभावान्न मुक्तिर्वक्तुं शक्या । इन्द्रियाणां लये मनसोपि चन्द्रे लयात् । ‘तदेव स तत्सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्ये’ति श्रावितस्य जीवगमनस्यापि वक्तुमशक्यतया शरीरान्तरप्राप्त्यावश्यकत्वे वागादिलयवैयर्थ्यापत्त्या, देहस्य मृतत्वात्तत्र स्थितेर्वक्तुमशक्यतया तस्य जीवस्य कुत्र स्थितिरिति तत्राशयो भाति । एतदुत्तरे तु कर्माश्रयस्तिष्ठतीति । यथा बाणो वा पाषाणशकलो वा चेतनेन क्षिप्त आकाशे गच्छति, तस्य गमनक्रियैवाश्रयः, न त्वन्यः, तथा जीवोपि, ‘एष उ’ इति श्रुत्युक्तकर्माश्रयस्तिष्ठतीति सिध्यति । तत्र जीवस्य स्वतः क्रियाराहित्याल्लिङ्गस्य च लीनत्वान्न्यायादिमतवददृष्टस्यात्मधर्मताया अत्रानङ्गीकाराज्जीवाधिष्ठानभूतं कर्म किमीयमिति शङ्का नापैति । तेन शरीरान्तरप्रेप्सासामयिको जीवः ‘क्वायं तदे’ति प्रश्नविषय इत्यसङ्गतम् । लीनकरणग्रामस्य प्रेप्साया व्यापारस्य च वक्तुमशक्यत्वात् । प्रेप्साङ्गीकारे च ‘तमुत्क्रामन्त’मिति श्रुत्या लिङ्गसाहित्यस्यावश्यकत्वाद्वागादिलयोऽप्यसम्भवदुक्तिकः । ‘अत्रैवे’ति मुक्तिलिङ्गश्रुतिविरोधाच्च ।

रश्मिः ।

पत्तिरर्थापत्तिरूपा । द्वितीया वान्यथानुपपत्तिसमर्पितप्रमेयार्थापत्तिः । प्रस्थानरत्नाकरे स्पष्टा पूर्वमुक्ता च । अत्रेति । श्रुतौ पुष्टिकल्पने । एतद्विति । अर्थापत्तिः । विधेयलिङ्गमेतदिति । उभयत्रेति । आर्तभागब्राह्मणे शारीरकब्राह्मणे च । सामान्यस्येति । ‘मृतः शेत’ इति सामान्यं, ‘ब्रह्मैव सन् ब्रह्माप्येती’ति विशेषः । अस्येति । मृतः शेत इत्यस्य । मनसश्चन्द्रे लये मुक्त्यभावं वदन्ति स्म । तदेवेति । यत्र गन्तव्ये मनः लिङ्गं निषक्तं निश्चयेन सक्तं भवति तत्र स आसक्तः सन् फलारम्भकीभूतकर्मणा सह तदेव गन्तव्यं फलमेति गच्छतीति श्रुत्यर्थः । वक्तुमिति । मनोसक्तायां मुक्तौ वक्तुम् । वागादीति । मुक्त्यभावे तथापत्त्या । स्थितेरिति । जीवस्य स्थितेः । तत्रेति । यत्रास्येत्यादि पुनः प्रश्नश्रुतौ । भातीति । भात्ययमर्थ इति पूर्वेण सम्बन्धः । जीव इति । बाणवद्वा पाषाणशकलवद्वा ऊर्ध्वगन्ताऽधोगन्ता वा । किमीयमिति अदृष्टधर्ममिश्रम् । अपैतीति । अप आ एतीति पदच्छेदः । पूर्वं वृद्धौ ऐतीति जाते एङि पररूपमित्यस्य अविषयत्वाद्वृद्धिरेचि । प्रेप्सेति । मनोधर्मः प्रेप्सा । ‘कामः सङ्कल्प’ इति श्रुतेः । व्यापारान्मधुरादेः । एवमुपोद्घातमुक्त्वा तमुत्क्रामन्तमिति भाष्यं विवृण्वन्ति स्म प्रेप्साङ्गीकार इति । तत्रासम्भवादित्यन्तभाष्यविवरणम् ।

देहान्तरजीवस्य प्राणानामिन्द्रियाणां च सहैवोत्क्रमणं भवतीति वागादिलयस्य तत्रासम्भवान्नोक्तस्य प्रश्नविषयत्वं वक्तुं शक्यम् । पूर्ववाक्ये 'अत्रैव समवनीयन्त' इत्युक्तत्वाच्च, अतोऽसदुक्त एव मार्गोऽनुसर्तव्यः । एतेन नायं परविद्यावान्

भाष्यप्रकाशः ।

अतो देहान्तरप्रेप्सावतः प्रश्नविषयताया वक्तुमशक्यत्वादसदुक्त एव मार्गः, सदसत्कर्मप्रधानो मर्यादामार्ग एव कर्मपद आदर्तव्यः । अन्यथा केवलकर्मणः संसारजनकत्वात् प्रशंसावैयर्थ्यापत्तेः । मार्गादरे तु तस्य प्रवृत्तिनिवृत्तिकर्मात्मकत्वाभिवृत्तं कर्मादाय प्रशंसोपपत्तेः । दुष्टं कर्मादाय शरीराध्मानाद्युपपत्तेश्च । एतद्बोधनायैव 'पुण्यो वा पुण्येने'ति मार्गस्वरूपमुक्तम् ।

एवं सतीदमत्र सिध्यति । यः सद्यो मुच्यते, तस्य प्राणानामत्रैव समवनयनम् । यश्चान्धन्तमो विशति, तस्यापि प्राणानामत्रैव समवनयनम् । शरीरदुरवस्थालिङ्गात् । अन्यथा तदुक्तिवैयर्थ्यापत्तेः । ये पुनः क्रममुक्तिगामिनः, तत्प्राणानां सहोत्क्रमः । 'अणुः पन्था विततः पुराण' इत्यादिश्रुतेः । 'यदि प्रयास्यन्नृप पारमेष्ठ्य'मित्यादिस्मृतेश्च । ऊर्ध्वगामिनां च तथा । 'तदेव तत्सह कर्मणैती'त्यादिश्रुतेः, 'मनः कर्ममयं नृणा'मित्यादिस्मृतेश्च । सुबोधिन्यां तु धृतराष्ट्रं प्रत्यक्रूरवाक्ये 'अकृतार्थं प्रहिण्वन्ति प्राणाराय' इत्युक्त्वा, उपसंहारे 'मृतोऽन्धं

रश्मिः ।

तत्रेत्यस्य भाष्यस्य 'इहैव समवनीयन्त' इति श्रुत्युक्ताश्रये भगवतीत्यर्थः । **नोक्तस्येति** भाष्यविवरणम् । **अतो देहान्तरेति** । नोक्तस्येत्यत्र उक्तस्येत्यस्यार्थः देहान्तरप्रेप्सावत इति । प्रश्नविषयत्वं वक्तुं न शक्यमित्यत्र भाष्यान्वये इतिशब्दं हेत्वर्थकमध्याहृत्य विवरणं प्रश्नविषयतेत्यादि । **सदसदिति** । सन्मार्गद्वयरूपं कर्ममार्गरूपं चासत् तदतिरिक्तं सर्वम् । **कर्मपद इति** । औपश्लेषिकाधारे सप्तमी । **प्रशंसेति** । 'यत्प्रशशꣳसतुः कर्म हैव तत्प्रशशꣳसतु'रिति श्रुत्युक्तप्रशंसावैयर्थ्यापत्तेः । **यश्चेति** । पुष्टोपि । **समवनयनमिति** । अष्टमोपदेशस्य समत्वात् । तत्र समवनाश्रयस्य भगवत्त्वात् । तत्रायं विवेकः । भक्तिमार्गीया आनन्दे लीना भवन्ति अनुग्रहात्यन्तानुग्रहयोः पुष्टिमर्यादाकारणयोः सत्त्वात्, ये संभूत्यां रताः आसुरीसंपज्जाताश्च तेषामानन्दधर्मे तमसि लयः अनुग्रहाभावादिति । **तदुक्तीति** । शरीरदुरवस्थोक्तिवैयर्थ्यापत्तेः । तत्प्राणानां तेषां प्राणानाम् । **अणुः पन्था इति** । शरीरब्राह्मणेस्ति । मोक्षः । **अणुः** स्थूलादिसकलविशेषातीतत्वात् । **विततः** विस्तीर्णः सत्याद्यात्मावगाहित्वात् । **पुराणश्चिरंतनो** नित्यः श्रुतिप्रकाशितत्वात् । एवंभूतः पन्था अभेदान्वयः फलसाधनयोरतो भक्तिज्ञानमार्गः । मोक्षाभिन्नः 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति सूत्रेण धर्मधर्मिणोरभेदात् । **आदिना** 'माꣳस्पृष्टोनुवित्तो मयैव । तेन धीरा अपियन्ति ब्रह्मविद उत्क्रम्य स्वर्गं लोकमितो विमुक्ता' इति पादत्रयम् । अर्थस्तु **मां** याज्ञवल्क्यं **स्पृष्टः** शाखाचार्यादेर्मामनुप्राप्तः मया प्राप्त इति वा । किञ्च मयैवानुवित्त इत्यत्रैवकारोन्ययोगव्यवच्छेदको न भवतीत्यभिप्रेत्याह **तेनेति** । जीवन्त एव विमुक्ताः सन्त इतोस्माच्छरीरपाताऊर्ध्वमनन्तरमेव तेन ब्रह्मविद्यामार्गेण स्वर्गं परमानन्दलक्षणं प्रकरणाल्लोकं स्वप्रकाशं यन्ति गच्छन्तीति । **यदि प्रयास्यन्निति** । क्रममुक्तिप्रतिपादिका द्वितीयस्कन्धस्मृतिः तस्याः । **अकृतार्थमिति** । पूर्वार्धसमाप्तौ 'पुष्णाति यानधर्मेण स्वबुद्ध्या तमपण्डितम् । तेऽकृतार्थं प्रहिण्वन्ति प्राणारायः सुतादय' इति वाक्यम्, कृतः अर्थो येन स कृतार्थः । न कृतार्थोऽकृतार्थस्तम् । हि गतौ स्वादिः प्रपूर्वकः । प्राणा इन्द्रियाण्यपि ते आसमन्ताद्रायो येषां ते प्राणारायः । तेऽकृतार्थं प्रहिण्वन्ति त्यजन्ति । **मृत इति** । अत्र विशेष्यम् । स्वयं पिता ।

यतः, अमृतत्वमेव तत्फलमिति । तच्च देशान्तरानायत्तमित्युत्क्रमणापेक्षा कर्माश्रयत्वं च न स्यात्, किन्त्वपरविद्यावान् । तस्यास्तु ब्रह्मलोकावधि फलमिति कर्माश्रयत्वोत्क्रमणादिकं सम्भवतीत्यपि निरस्तं वेदितव्यम् ॥ ६ ॥

इति चतुर्थाध्याये द्वितीयपादे द्वितीयं भूताधिकरणम् ॥ २ ॥

भाष्यप्रकाशः ।

विशते तम' इति कथनादन्धन्तम एव प्रकृतमिति श्रौतं मुक्तिलिङ्गं न विचारितम् । इह तु मुक्तेरेव फलत्वेन प्रकृतत्वात् तमोलिङ्गं न विचारितम् । अतोऽन्धतमसोऽप्यासुरमुक्तित्वाच्च भाष्यसुबोधिन्योर्विरोध इति ज्ञेयम् । उभयथापि शरीरान्तरप्रेप्साया अलाभान्मतान्तरदूषणं तूभयथापि निष्प्रत्यूहमिति च ।

एवं परोक्तं प्रश्नाशयं दूषयित्वा तदुक्तं सिद्धान्ताशयं दूषयन्ति एतेनेत्यादि । एतेनेति । जीवस्यात्र देहान्तरप्रेप्सासामयिकत्वासङ्गतिव्युत्पादनेन । इत्यपि निरस्तमिति । इति एवमर्थकं यद्, 'भूतेषु तच्छ्रुते'रित्यत्र, 'भूतेष्वतः श्रुते'रिति पाठमङ्गीकृत्य स प्राणोऽध्यक्षस्तेजःसहचरितेषु देहबीजभूतेषु सूक्ष्मेष्ववतिष्ठते । कुतः । अतः श्रुतेः प्राणस्तेजसीत्यतः श्रुतेरिति व्याख्यानम्, 'नैकस्मि'न्निति सूत्रे च शरीरान्तरप्रेप्सावेलायां नैकस्मिन्नेव तेजसि जीवोऽवतिष्ठते । कार्यस्य 'शरीरस्य पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमय' इति श्रुतिः, 'अण्व्यो मात्राऽविनाशिन्य' इत्यादिस्मृतिश्चैतमर्थं दर्शयत इति व्याख्यानमुक्तम्, तदपि निरस्तम् । तद्रीत्योत्क्रमाङ्गीकारे पूर्वेन्द्रियलयप्राणानुत्क्रमणवैयर्थ्यप्रसङ्गेन आर्तभागब्राह्मणेऽनुक्तायाः शरीरान्तरप्रेप्साया नूतनेन्द्रियापेक्षायाश्च कल्पनापत्त्या लक्षणाप्रसङ्गेन श्रुतिसूत्रव्याकुलीभावापत्त्या च निरस्तमित्यर्थः ।

अत्रावसरगर्भः प्रसङ्गोऽधिकरणसङ्गतिः ॥ ६ ॥ इति द्वितीयं भूताधिकरणम् ॥ २ ॥

रश्मिः ।

प्रकृतमिति । 'असिद्धार्थो विशत्यन्धं स्वधर्मविमुखस्तम' इति वाक्यार्थेनोक्तेन प्रकृतं मुक्तिष्वेतत्स्वीकृतम् । **श्रौतमिति** । अत्रैव समवनीयन्त इति श्रुत्युक्तं **मुक्तिलिङ्गम्** । **इहत्विति** । **भाष्ये तु** । **मुक्तेरिति** । सद्योमुक्तेः । **तमोलिङ्गमिति** । शरीरदुरवस्थालिङ्गम् । **नेति** । पूर्वत्रैकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति प्रवादाच्छ्रौतमुक्तिलिङ्गविचारः स्थानसाम्यात्पूर्वमीमांसोक्ताद्वा । उत्तरत्र तत एव तमोलिङ्गमीमांसेत्यर्थभेदाभावान्न विरोध इत्यन्वयः । **उभयथेति** । उभे भाष्यसुबोधिन्यौ अवयवौ प्रतिपादकौ यस्य मुक्तिरूपप्रकारस्य तेन प्रकारेण । **प्रश्नाशयं** प्रश्नाभिप्रायम् । **अत्रेति** । भाष्ये । **सूक्ष्मेष्विति** । रेतःकणेषु अण्वी मात्रारूपेषु वा । **व्याख्यानमिति** । अन्याचार्यव्याख्यानम् । **तद्रीत्येति** । अपरविद्यावतः उत्क्रमाङ्गीकारे । **पूर्वेन्द्रियेति** । अग्निं वागप्येतीत्याद्युक्तो लयः अत्रैव समवनीयन्त इति प्राणानुत्क्रमणं तयोः वैयर्थ्यम् । बुद्धेर्गुणैरङ्गुष्ठमात्रो जीव इति तल्लये परविद्यावतो या मुक्तिरावरणभङ्गरूपा सा स्यादिति **पूर्वेन्द्रियलयवैयर्थ्यम्** । परविद्यावतः फलं **देशान्तरानायत्तं** देशान्तरं बुद्धिगुणकृतजीवदेशादन्यद् देशान्तरं तस्यानायत्तमनधीनमिति प्राणानुत्क्रमणं प्राणोत्क्रमरूपप्रतियोगिकवैयर्थ्यं च तस्य प्रसङ्गेन । **लक्षणेति** । अत्रैव समवनीयन्त इति वाक्यं शरीरान्तरप्रेप्सा । नूतनेन्द्रियापेक्षावतोऽत्रैव समवनीयन्त इत्येवं कल्पयित्वा तदर्थे लक्षणाप्रसङ्गेनेत्यर्थः । शक्यार्थस्य षष्ठ्यर्थेन सम्बन्धो लक्षणा । **श्रुतीति** । पूर्वेन्द्रियलयप्राणानुत्क्रमणानङ्गीकारेण श्रुतिपीडापत्तिः, पाठान्तरेण सूत्रव्याकुलीभावापत्तिः तया ॥ ६ ॥ **इति द्वितीयं भूताधिकरणम्** ॥ २ ॥

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥ (४-२-३.)

मर्यादापुष्ट्योर्न कदाचिदन्यथाभाव इति यदुक्तम्, तत्र हेत्वपेक्षायां वस्तुस्वरूपमेव तथेति बोधयितुमाह समानेत्यादि ।

अत्रायमाशयः । साधनक्रमेण मोचनेच्छा हि मर्यादामार्गीया मर्यादा, विहितसाधनं विनैव मोचनेच्छा पुष्टिमार्गमर्यादा । तथा सति सदैकरूपत्वं तयोर्युक्तमिति ।

एतदेवाह । सृतिः संसृतिः । जीवानां स्वस्मात् पृथक्कृतानामविद्यया अहन्ताममतास्पदीकरणम् । तदुपक्रम आरम्भस्तं मर्यादीकृत्य मुक्तिपर्यन्तमुक्तरूपा मर्यादा समाना सदैकरूपा, मध्ये नान्यथा भवतीत्यर्थः । एवमेव अनुपोष्य, व्रतमकृत्वा, अमृतत्वमपि पुष्टिमार्गे समानमित्यर्थः । अत्रोपोषणपदमशेषमुक्तिसाधनोपलक्षकम् ॥ ७ ॥

भाष्यप्रकाशः ।

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥ एवमधिकरणद्वयेन पुष्टिमर्यादास्थयोः क्रमेण वागादिलयं व्युत्पाद्य पुष्टिमर्यादास्थयोः कुत एवं विशेष इत्याकाङ्क्षायां मार्गस्वरूपविशेषादेव विशेष इति वक्तुम्, इत आरभ्य नवभिः सूत्रैरुपोद्घातेन तद्वाढ्यार्थं तास्ता आशङ्का निवारयतीत्याशयेन काञ्चिदाशङ्कामनुवदन्तः सूत्रमवतारयन्ति मर्यादेत्यादि । व्याकुर्वन्ति साधनेत्यादि । अविद्यया अहन्ताममतास्पदीकरणमिति । 'विद्ययाऽविद्यये'तिश्लोकोक्तया स्वीयया मूलशक्त्या अहंममेत्यसद्ग्राहात्मकजीवाविद्याश्रयत्वसम्पादनम् । मुक्तिपर्यन्तमिति । इदमुत्तरावधिकथनमार्थिकं ज्ञेयम् । संसारस्य तदधीनत्वादिति । मध्ये नान्यथा भवतीति । 'एष उ वे'ति श्रुत्युक्ताया इच्छाया इव

रश्मिः ।

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥ साधनेत्यादीति । मर्यादेति ज्ञानभक्तिमर्यादा । एतदेवाहासृतिरिति भाष्यपाठः । आसृतिरित्यस्य संसृतिरिति विवरणम् । विद्ययेति । इदं दशमस्कन्धेऽक्रूरदर्शनेस्ति । 'विद्ययाऽविद्यया शक्त्या मायया च निषेवित'मिति । एतत्कथनं भक्तिमार्गे भक्तिसाधननाश्यसंसृतेरभावादत्यन्तानुग्रहे तेनैव तदभावाच्चायुक्तं संसृतिकथनं मत्वोक्तम् । तदुक्तं 'कृत्वाऽतरन्वत्सपदं स्म यत्प्लवा' इत्यस्य सुबोधिन्याम् । एवं च पुष्टिमार्गेत्यन्तानुग्रहनाश्यत्वेनाहन्ताममते तयोरास्पदीकरणम् । मर्यादाभक्तिमार्गे साधननाश्यत्वेन ते तयोरास्पदीकरणम् । ज्ञानमार्गे ज्ञाननाश्यत्वेन ते तयोरास्पदीकरणं बोध्यम् । विद्ययाऽविद्ययेति वाक्यात् । भाष्ये । मुक्तीति । सद्योमुक्तिक्रममुक्तिपर्यन्तम् । उक्तरूपेति । अहन्ताममतास्पदीकरणं ज्ञानेन न सम्भवति तथापि अन्तराभूतग्रामसूत्रादिवाऽर्थभेददाने भवतीति भक्तिमार्गेऽहन्ताममतास्पदीकरणारम्भे तया उक्ता श्रवणादिसरणिरूपा मर्यादा सा समाना । ज्ञानभक्तिभ्यामविद्योपमर्देपि भक्तिज्ञानरूपविद्याया अविद्योपमर्दादहन्ताममतास्पदीकरणं ज्ञानमार्गीयश्रवणादिसरणिरूपा मर्यादा, सा समाना । 'यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानै'रित्यत्र ज्ञानाङ्गभक्त्युक्तेः । ज्ञानमार्गीयश्रवणादिभिः सूक्ष्मवस्तुदर्शनम् । भक्तिमार्गीयश्रवणादिभिः प्रेमेति विवेकः । 'तथा तथा पश्यति वस्तुसूक्ष्म'मित्युत्तरार्धात्,

एवं प्रासङ्गिकमुक्त्वा प्रकृतं परामृश्यते । 'सोऽध्यक्ष' इति सूत्रेण पुष्टिमार्गीयभक्तसङ्घातस्य भगवत्येव लय इत्युक्तम् । अग्रिमेण तेन मर्यादामार्गीयभक्तसङ्घातस्य भूतेषु लयमुक्त्वा, प्रश्नानन्तरं शुद्धजीवस्य तस्य मुक्तिरेव भवतीति वक्तव्ये सति, 'आहर सौम्य हस्त'मित्यादिना स्वाशयमन्येष्वप्रकटयन्तौ कर्म यन्निरूपितवन्तौ, तत्कुत इत्याशङ्क्य तयोराशयं निगूढं प्रकटयति ।

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

तदा नित्यलीलान्तःपातलक्षणपुष्टिमार्गीयमुक्तिदशायां मर्यादामार्गीयाया अपीतेर्मुक्तेः संसारत्वाभावेपि पुरुषोत्तमभजनानन्दानुभवाभावात् संसार इत्येव पुष्टिमार्गे व्यपदेशो यतः क्रियते, अतस्तदभिसन्धाय तया रीत्या

भाष्यप्रकाशः ।

मुमोचयिषाया अप्यप्रतिहतविषयत्वस्य न्याय्यत्वात् तथा । पुष्टिमार्गे समानमिति । 'ते नाधीतश्रुतिगणा' इत्यादिभगवद्वाक्यात् तथा । सूत्रे तु प्रथमश्चकारोऽवधारणे, द्वितीयश्चोऽप्यर्थे बोध्यः । 'भूतेष्वि'त्यतीताधिकरणे भार्यादिकव्यवस्थाया उक्तत्वादव्यवधानेनात्र मर्यादास्मृतेर्मर्यादोल्लेखः । व्यवहितत्वेन पश्चात् पुष्टेरित्यपि ज्ञेयम् । तादृशतादृशेच्छायां लीलाया लोकतुल्यत्वस्यैव हेतुत्वादिति ॥ ७ ॥

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥ सूत्रमवतारयन्ति एवं प्रासङ्गिकमित्यादि । यथा एकनगरप्रापकयोर्मार्गयोस्तत्प्रापकत्वे मार्गत्वे च समानेपि कस्यचित्केवलपान्थप्रापकत्वम्, कस्यचित् सपरिकरपान्थप्रापकत्वमिति तन्मार्गस्वरूपकृत एव भेदः, तथा मर्यादापुष्ट्योरपीत्येतत्प्रासङ्गिकं तत्तन्मार्गस्वरूपबोधनायोक्त्वा, प्रकृतं आर्तभागब्राह्मणस्थं प्रमेयं परामृश्यते विचार्यत इत्यर्थः । ननु तत्र किमवशिष्टं येन पुनर्विचार्यत इत्याकाङ्क्षायामाहुः सोऽध्यक्ष इत्यादि । अग्रिमेणेति । 'भूतेषु तच्छ्रुते'रिति सूत्रेण ।

फक्किकायोजना तु एवं लयमुक्त्वा प्रश्नानन्तरमित्याद्युक्तरीत्या निरूपणं कुत इत्याशङ्क्य तथा प्रकटयतीति बोध्या । तथा च यदि न तत्तन्मार्गीयमुक्तौ तारतम्यम्, तदा वागादिलयस्य भिन्नप्रकारकत्वविचारः काकदन्तविचारतुल्यः स्यादिति तन्निवृत्त्यर्थं तयोरेकान्तगमनाद्याशयं वक्तीत्यर्थः । सूत्रं व्याकुर्वन्ति तदेत्यादि । तथा रीत्या निरूपणमिति ।

रश्मिः ।

'एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिना'मित्येकादशैकोनविंशाध्यायवाक्याच्च । तथेति । ज्ञानमार्गेण समानम् । ज्ञानमार्गेण श्रवणादीनां पुष्टिमार्गे समानत्वेपि उपोषणाद्यकरणमपि समानं ज्ञानमार्गेण । ज्ञानमार्गे उपोषणाद्यकरणजपापस्य ज्ञानेन नाशः । पुष्टिमार्गेऽत्यन्तानुग्रहेण पापस्य नाशः । एवं फलप्रकरणे सन्दिग्धे अहन्तास्पदत्वमसम्भवद्विचारितम् । अवधारण इति । तथा च समानैवेत्यर्थः । अप्यर्थ इति । अमृतत्वमपीति भाष्यात् ॥ ७ ॥

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥ केवलेति । पदातिमार्गत्वम् । सपरिकरेति । राजमार्गत्वम् । मर्यादेति । मर्यादापदेन भक्तिज्ञाने । एवमिति । पूर्वोक्तप्रकारम् । तदित्यस्यार्थमाहुः । निरूपणमिति । तथेति । तयोराशयं निगूढम् । 'गूढं ब्रह्मणि वाङ्मय' इति वाक्यात् । तयोरिति ।

निरूपणम् । अत एव श्रीभागवते श्रीशिववचनं गीयते । "नारायणपराः सर्वे न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इति । श्रीभगवद्गीतास्वपि । 'देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपी'ति वाक्येन मर्यादामार्गीयभक्तमुक्तेरितरसाधारण्यमुच्यते ॥ ८ ॥

ननु संसारवन्मुक्तेरपि हेयत्वं यत्र, तादृशं चेत् पुष्टिमार्गीयं तत्त्वम्, तदा मुक्तेः पुरुषार्थत्वबोधिकायाः श्रुतेः प्रतारकत्वमापततीति तद्बोधकप्रमाणानां तत्स्तुतिमात्रपरत्वमेवेति प्राप्त आह ।

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

पुष्टिमार्गीयं तत्त्वं सूक्ष्मं दुर्ज्ञेयमित्यर्थः ।

अत्रायमाशयः । पुष्टिमर्यादामप्यतिक्रम्य पुष्टिपुष्टौ प्रवेशे तत्तत्त्वमनुभवविषयो भवति, नान्यथा । तत्र प्रवेशस्त्वतिदुरापोऽतिशयितानुग्रहेतरासाध्यत्वात्, अत उक्तेतराज्ञेयमेव तद्भवति । तेषां तु मुक्तिरेव फलम् । तस्या एवेष्टत्वात् ।

भाष्यप्रकाशः

पुष्टिमार्गीयमुक्त्यपेक्षया मर्यादामार्गीयमुक्तेः साधनसाध्याया न्यूनत्वबोधनाय मुक्तिहेतुत्वेन प्रशंसनीयस्यापि मार्गरूपस्य कर्मण एकान्ते गत्वा जीवाश्रयत्वेन निरूपणम् । तथा च तस्य सद्योमुक्तिप्रकारत्वदृढीकरणार्थं पुष्टिमार्गीयापेक्षया न्यूनत्वज्ञापनार्थं च पुनर्विचार इत्यर्थः । इदं चोपबृंहणाभावे मनसि न विशतीत्यतस्तदाहुः अत एवेत्यादि । तथा चात्र मुक्तेरितरसाधारण्यकथनात्तथेत्यर्थः ॥ ८ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥ सूत्रमवतारयन्ति नन्वित्यादि । तद्बोधकप्रमाणानामिति । भजनानन्दोत्कर्षप्रमाणानाम् । सूत्रं व्याकुर्वन्ति पुष्टीत्यादि । ननु पुष्टितत्त्वस्य दुर्ज्ञेयत्वे श्रुतेः प्रतारकत्वं कथं निवर्ततामित्यतस्तदाशयमाहुः अत्रायमित्यादि । तत्त्वमिति । पुष्टिमार्गीयतत्त्वम् । उक्तेतराज्ञेयमिति । अतिशयितानुग्रहभाजनातिरिक्ताऽज्ञेयम् ।

रश्मिः ।

याज्ञवल्क्यार्तभागयोः । एकान्तेति । आदिनाऽऽहर सौम्य हस्तम् । आर्तभागेति होवाच तौ होत्क्रम्य मन्त्रयांचक्रतुः तौ ह यदूचतुः कर्मैव तदूचतुरित्यत्रोत्क्रम्येत्युत्क्रम्य सतीवत् 'मुक्तोपसृप्यव्यपदेशादि'ति सूत्रात् । तथा च ताविन्यस्य जीवावित्यर्थः । इत्युत्क्रम्यपदाशयः । तथेत्यादीति । नित्येति । व्रजभक्तसजातीयभावः कारणं पुष्टिमुक्तौ । एकान्त इति । एतस्य शरीरे संस्थाप्योत्क्रमणेनैकान्त इत्यप्यर्थो भगवन्माहात्म्यस्थापकः । **जीवाश्रयत्वं** जीवस्याश्रयत्वं बाणस्याश्रयत्वं यथा कर्मणः । तेन । पुनरिति । फलत्वेन **पुनर्विचारः** । यथा एकनगरेत्याद्युक्तरीत्या मार्गत्वेन निरूपणाद्धतेरर्थवत्त्वसूत्रादिविचारितस्य पुनर्विचारः ॥ ८ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥ श्रुतेरिति । मुक्तेः पुरुषार्थत्वबोधिकायाः 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत' इति श्रुतेः । पुष्टिमार्गीयतत्त्वमिति । ननु ज्ञानकाण्डत्वात् ज्ञानमार्गीयं तत्त्वं तत्र तदुक्तं 'तथा तथा पश्यति

रागिणां स्वर्गादिवत् । इष्टफलाप्राप्तौ हि प्रतारकत्वम्, अन्यथा प्रवृत्तिमार्गीयफलबोधिकाया अपि श्रुतेः प्रतारकत्वं स्यात् । इच्छा चाधिकारानुसारिणीति नानुपपन्नं किञ्चिदिति ।

नन्वेवंविधार्थास्तित्वे किं मानमित्याकाङ्क्षायामाह प्रमाणत इत्यादि । प्रमाणं श्रुतिः । सा तु, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति । 'एतꣳह वा व न तपति किमहं साधु नाकरवं किमहं पापमकरव'मिति ।

अत्र पूर्वार्धेन दुर्ज्ञेयत्वम्, उत्तरार्धेन तत्सत्ता च बोध्यते । अन्यथा मनसोऽप्यप्राप्यस्य वेदनकथनं विरुद्धं स्यात्, अतो दुर्ज्ञेयत्वेनैव धर्मिग्राहकमानसिद्धं तदित्यर्थः । चकारात्तादृशानामनुभवः परिगृह्यते ॥ ९ ॥

भाष्यप्रकाशः ।

तेषामिति । अतिशयितानुग्रहभाजनातिरिक्तानां भक्तानां शुष्कज्ञानिनां च । इच्छेति । स्वर्गादिविषयिणी मोक्षविषयिणी च । इति नानुपपन्नं किञ्चिदिति । इति हेतोः, यथा स्वर्गादिकामिनः प्रति निवृत्तिमार्गतत्त्वं दुर्ज्ञेयमधिकारराहित्यादेवं मोक्षकामिनः प्रति पुष्टिमार्गतत्त्वमपीति तत्तच्छ्रुतीनां तं तं प्रति फलबोधकत्वान्न प्रतारकत्वमतो हेतोर्ये उत्कृष्टाधिकारिणस्तान् प्रति भजनानन्दोत्कर्षबोधकतया न स्तुतिमात्रत्वमतः पूर्वोक्तं सूपपन्नमित्यर्थः । सूत्रशेषमवतारयन्ति नन्वेवमित्यादि । एवंविधार्थास्तित्व इति । अतादृशसर्वदुर्ज्ञेयार्थसद्भावे । शेषं स्फुटम् ॥९॥

रश्मिः ।

वस्तुसूक्ष्मम्'ति वाक्येनेति चेन्न । असन्दिग्धमिदं ज्ञानकाण्डेऽविचार्यमिति । पुष्टिप्राप्ये सूक्ष्मपदं गीतायां त्रयोदशे 'ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते । सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखं । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति । सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च । बहिरन्तश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् । अविभक्तं च भूतेषु विभक्तमिव च स्थितम् । भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च । ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते । ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् । इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते' इत्यत्र । 'यतो वाच' इति श्रुत्या सह निर्णयः । तथाहि । गीतायाम् । अहं परो यस्येति मत्परः । अग्रे विरुद्धधर्माश्रयः । अग्रे सूक्ष्मत्वात्तदविज्ञेयमुक्तम् । तत्र कर्ममार्गीयगीताया उपनिषत्त्वात् । नापि ज्ञानमार्गीयम् । ज्ञानंगम्यत्वात् । नापि मर्यादाभक्तिमार्गीयम् । 'भक्त्या जानाति चाव्यय'मिति श्रुतेः । नापि पुष्टिमर्यादायाम् । मर्यादांशेन ज्ञेयत्वात् । अतः पुष्टिपुष्टावेव सूक्ष्मत्वात्तदविज्ञेयम् । 'यतो वाच' इति श्रुतेः । तर्हि वस्त्वभावसिद्धिः । नेत्युच्यते । 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इति वाक्यात्, 'पूर्णा भगवदीयास्ते शेषव्यासाग्निमारुता' इति वाक्याच्च वस्तुसिद्धेरिति । अग्रे दूरस्थमित्यादिसमानम् । अग्रे भक्ते विशेषः 'मद्भक्त एतद्विज्ञाये'ति । अतिशयितेति । 'भगवान्भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोग'मिति वाक्यात् । न च भक्तियोगो मर्यादादिभक्तिरपि । भजतामित्यनेन तत्सङ्ग्रहात् । प्रवृत्तीति । अकामयमानस्य प्रवृत्तिर्बोध्या । अतादृशेति । अनधिकारिणः सर्वे तेषां दुर्ज्ञेयार्थसद्भावे ॥ ९ ॥

तर्हि ब्रह्मविदामिव तादृशानां भक्तानामपि स्वमार्गोपदेशनं क्वचिच्छ्रूयेत, न चैवम्, अतः पूर्वोक्तं न साधीय इति भातीत्युत्सूत्रमाशङ्क्य तत्र हेतुमाह ।

नोपमर्देनातः ॥ १० ॥

उपदेशनं तदा स्यात्, यदि ब्रह्मविदामिव तेषां स्वास्थ्यं स्यात्, यतस्तेषां विरहदशा प्रियसङ्गमदशा चेति दशाद्वयमेव भवति, नान्या । पूर्वस्यास्तस्यास्त्वतिदुःसहत्वेन सर्वेषां भावानामुपमर्देन तिरोधानेनोपदेशो न भवतीत्यर्थः । सङ्गमे तु, अतः, पुरःप्रकटपरमानन्दस्वरूपाद्भगवत एव हेतोरुपदेशोऽन्यस्मै न भवतीत्यर्थः । न हि भगवदग्रे स सम्भवतीति भावः ॥ १० ॥

ननु 'रसो वै सः रसꣳ ह्येवायं लब्ध्वानन्दी भवती'त्युपक्रम्य 'एष ह्येवानन्दयाती'ति श्रुतेरुक्तरूपानन्दप्राप्तौ दुःसहविरहतापोऽशक्यवचनः । आनन्दतिरोधान एव तत्सम्भवात् । तद्धेतोरसम्भवात्, सम्भवे तु तत्प्राप्तिरेव न स्यादिति प्राप्ते, उत्तरं पठति ।

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

आनन्दात्मकरसात्मकस्यास्यैव भगवत एव धर्म ऊष्मा विरहताप इत्यर्थः । विरोधपरिहारायाह उपपत्तेरिति ।

इदमुक्तं भवति । भगवद्विरहस्य सर्वसाधारणत्वेपि स्थायिभावात्मकरसरूपभगवत्प्रादुर्भावो यस्य हृदि भवति, तस्यैव तदप्राप्तिजस्तापः, तदनन्तरं

भाष्यप्रकाशः ।

नोपमर्देनातः ॥ १० ॥ सूत्रमवतारयन्ति तर्हीत्यादि । तत्रेति । तादृशमार्गानुपदेशे । सूत्रं व्याकुर्वन्ति उपदेशनमित्यादि । अर्थस्तु स्फुटः ॥ १० ॥

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥ उपमर्दे प्रत्यवस्थानं वारयितुमग्रिमसूत्रमवतारयन्ति ननु रस इत्यादि । तद्धेतोरित्यादि । तद्धेतोरानन्दतिरोधायकहेतोरविद्याकामकर्मरूपस्य उत्कटभक्तिभावे सत्यसम्भवात् उत्कटभक्तिदशायामप्यविद्यादिसम्भवे तु तत्प्राप्तिर्भगवत्प्राप्तिरेव न स्यात् । सा च तेषामस्ति । अत उपमर्दासम्भवादनुपदेशोऽसङ्गत इति प्राप्ते । सूत्रं व्याकुर्वन्ति आनन्देत्यादि । तथा चान्तःप्राप्तिबाह्याप्राप्तिभ्यामानन्दानुभवविरहतापाविति द्वयमप्युपपद्यत इत्यर्थः ॥ ११ ॥

रश्मिः ।

नोपमर्देनातः ॥ १० ॥ स्फुट इति । अत इति सौत्रं व्याख्येयम् । पुर इत्यादि व्याख्यानम् । सम्भवतीति । दासानामाज्ञां विना सम्भवतीति । एवं स्फुटः ॥ १० ॥

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥ प्रत्यवेति । आनन्दरूपत्वाद्ब्रह्मणः सन्देशादिभिर्नोपमर्द इति प्रत्यवस्थानम् । सम्भवे त्वित्यादिभाष्यं विवृण्वन्ति स्म उत्कटेति । अनुपदेशः असङ्गत इति । एङः पदान्तादतीति न भवति, वाक्ये विवक्षाभावेन संहिताभावात् । आनन्दे-

नियमतस्तत्प्राप्तिश्च भवति, न त्वतथाभूतस्येत्यन्वयव्यतिरेकाभ्यामुक्तरसस्यैवैष धर्म इति निश्चीयते। तस्य वस्तुन एव तथात्वात् स तापोपि रसात्मक एव ॥ ११ ॥

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

ननु 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःख'मितिश्रुत्या दुःखप्रतिषेधस्तादृशे भक्ते क्रियत इति तस्य दुःखित्वं न वक्तुं शक्यमित्याशङ्क्य प्रतिषेधति नेति। कुतः। शारीरात्। शरीरसम्बन्धिनो हेतोर्यद् दुःखं कर्मजनितमिति यावत्, तस्यैव श्रुतौ प्रतिषेधान्नात्रानुपपत्तिरित्यर्थः। एतेन दुःखत्वेन कर्मजन्य-

---

भाष्यप्रकाशः।

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥ अत्र पूर्वपक्षसिद्धान्तयोर्दुरूहत्वात् पूर्वपक्षे, उपमर्दसूत्रान्नशब्दं, तस्यैवेतिसूत्रात्तस्यैवोष्मेति पदत्रयं चानुवर्त्य, सिद्धान्ते चोपपत्तेरिति पदमनुवर्त्येदं व्याख्यायत इत्याशयेन पूर्वभागं व्याकुर्वन्ति नन्वित्यादि। तस्य दुःखित्वं न वक्तुं शक्यमिति। तस्य भगवत्स्वरूपलाभवतो भक्तस्य दुःखित्वं तस्यैवोष्मेत्यनेनोक्तो विरहतापो न वक्तुं शक्यः। प्रतिषेधतीति। प्रतिषेधस्य कर्मजन्यत्वं बोधयंस्तत्कथनाशक्यत्वं प्रतिषेधति। सिद्धान्तभागं व्याकुर्वन्ति नेत्यादि। तस्यैवेति। शरीरसम्बन्धिनोर्मृत्युरोगयोरनन्तरं तत्प्रायपाठे पठितस्य तादृशस्यैव दुःखभावस्य पूर्वसूत्रोक्तहेतोः संग्रहं सूचयन्ति एतेनेत्यादि। एतेनेति। सिद्धान्तभागेन। तथा च भगवद्विरहदुःखं कर्मजन्यं दुःखत्वाद् दुःखा-

रश्मिः।

त्यादीति। **विरोधेति।** आनन्दानुभवविरहतापयोर्विरोधपरिहाराय। **अन्वयेति।** स्थायिभावात्मकरसरूपभगवत्प्रादुर्भावसत्त्वे विरहतापः, उक्तप्रादुर्भावाभावे विरहतापाभाव इत्यन्वयव्यतिरेकौ ताभ्याम्। यत्सत्त्वे यत्सत्त्वमन्वयः, यदभावे यदभावो व्यतिरेक इति ॥ ११ ॥

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥ **दुरूहत्वादिति।** अनुवर्तनीयपदाज्ञानात् पूर्वपक्षस्य, स्वरूपतः सिद्धान्तस्य दुरूहत्वं बोध्यम्। तेनायं सूत्रार्थः। अस्य भक्तस्यैव ऊष्मा दुःखित्वं न, **प्रतिषेधात्।** इति **चेन्न। शारीरात्।** शरीरसम्बन्धिनः कर्मजनितदुःखात् हेतोः, तं हेतुं प्रकृत्योपपत्तेरिति। उपपत्तिस्तु कर्मजनितदुःखस्यैव प्रतिषेधादिति। **नन्वित्यादीति।** दुःखतां दुःखसत्ताम्। **तस्यैवेति।** अत्रास्यैवेति सूत्रादस्यैवोष्मेतिपदत्रयमिति पाठः। **तस्यैवोष्मेति।** तस्यैव तदप्राप्तिजस्ताप इति भाष्येण। लाघवादूष्मपदोपादानम्। **प्रतीति।** दुःखस्य। **बोधयन्निति।** व्यासः। **तत्कथनेति।** भक्तस्योष्मकथनाशक्यत्वम्। 'न पश्य' इति श्रुतिमनुसन्धायाहुः **शरीरसम्बन्धिनोरिति।** तथा चायं भाष्यार्थः। **शरीरसम्बन्धिनो हेतोरिति।** शरीरसम्बन्धिनः यस्य दुःखस्य हेतोः कर्मणः इत्यर्थः। एतदेवाहुः **यद्दुःखमिति।** **प्रतिषेधादिति।** आवृत्त्योपपत्तिहेतुत्वेनोक्तः। अनुवृत्तस्योपपत्तिपदस्यार्थमाहुः **नात्रेति।** अत्र भक्तस्योष्मणि। **दुःखत्वेनेति** भाष्यं विवृण्वन्ति स्म **तथेत्यादि।** यथा सिद्धान्तभागेन पूर्वसूत्रो-

त्वानुमानमपि निरस्तं वेदितव्यम् । लौकिक एव दुःखे तज्जन्यत्वनियमात् ॥ १२॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥

एकेषां शाखिनां भगवत्स्वरूपलाभानन्तरं दुःखतन्निवर्तनलक्षणोऽर्थः स्पष्टः पठ्यते ।

तथाहि । 'रसो वै सः, रसꣳ ह्येवायं लब्ध्वानन्दीभवति, को ह्येवान्यात्, कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति' । अत्र रसात्मकभगवत्स्वरूपलाभे सत्यानन्दवत्त्वमुक्त्वा, तस्यैव जीवनहेतुत्वं परमानन्दहेतुत्वं चोच्यते । मरणहेतूपस्थित्यभावे जीवनहेतुत्वं न घटेत् । स रसस्तु संयोगविप्रयोगभावाभ्यामेव पूर्णो भवत्यनुभूतः, नैकतरेण । तत्र विरहतापस्यात्युपमर्दित्वेन तदा प्राणस्थितिरपि न स्यात्, यदि रसात्मको भगवान् हृदि न स्यादित्याशयेनाह, 'को ह्येवान्या'दिति । यत् यदि एष हृदि स्फुरद्रूप आकाशो भगवान्न स्यात्, कस्तदाऽन्याद्, अन प्राणने, को वा जीव-

---

भाष्यप्रकाशः ।

न्तरवदिति साधने, सुखत्वेन हेतुना मोक्षसुखस्यापि तथात्वापत्तेस्तत्परिहाराय तत्र लौकिकत्वस्योपाधित्वं वाच्यम् । तच्चात्रापि तुल्यमिति लौकिक एव दुःखे कर्मजन्यत्वनियमाद् उपपत्तेरेव निरस्तमित्यर्थः ॥ १२ ॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥ पुष्टिमार्गीयस्य भगवद्विरहजं यद्दुःखं तन्न कर्मजन्यमित्यत्र प्रमाणापेक्षायां तद्बोधनायेदं सूत्रमित्याशयेन सूत्रं पठित्वा व्याचक्षते एकेषामित्यादि । शाखिनामिति । तैत्तिरीयाणाम् । श्रुतिमुपन्यस्य तदर्थं व्याख्यातुं गृह्णन्ति अत्रेत्यादि । विभजन्ते स रस

रश्मिः ।

क्तहेतोः सङ्ग्रहसूचनम्, तथा दुःखत्वेनेत्यादिभाष्येण भगवद्विरहेत्याद्युक्तम् । सुखत्वेनेत्यादि । मोक्षसुखं कर्मजन्यम्, सुखत्वात् सुखान्तरवदित्यनुमानेन सुखत्वेन हेतुना मोक्षसुखस्यापि तथात्वापत्तेः कर्मजन्यत्वापत्तेः । तत्परीति । मोक्षसुखस्य कर्मजन्यत्वपरिहाराय । अत्रापीति । दुःखत्वलिङ्गकानुमानेपि । लौकिक इति भाष्यं विवृण्वन्ति स्म लौकिक इति । एवेति । अयमलौकिकसुखदुःखयोगव्यवच्छेदकः । उपेति सूत्रेऽनुवृत्तोपपत्तेरेव न तूत्सूत्रयुक्तेरित्यर्थः । उपाधित्वं तु साध्यव्यापकत्वे सति साधनाव्यापकत्वम् । तत्र साध्यसमानाधिकरणः कर्मजन्यत्वसमानाधिकरणो यो लौकिकत्वात्यन्ताभावो दुःखान्तरे नास्ति, किन्तु घटाभावस्तादृशाभावप्रतियोगित्वं घटे अप्रतियोगित्वं लौकिकत्व इति साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वमिति लक्षणसमन्वयः एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वमित्थम् । साधनवद् दुःखत्ववद् अलौकिकदुःखम् । तन्निष्ठो योऽत्यन्ताभावः लौकिकत्वात्यन्ताभावः तादृशाभावप्रतियोगित्वं लौकिकत्वेन त्ववधृते घटाभावे प्रतियोगी घट इति साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वमिति लक्षणसमन्वयः ॥ १२ ॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥ अलौकिकदुःखसत्त्वे पुनः प्रमाणमत्र । विभजन्त इति । विभागं व्याख्यानं कुर्वते । स रस इत्यादीति । एवकारव्यवच्छेद्यमाहुः नैकतरेणेति । संयोगेन विप्रयोगेण वा । साधनैकदेशत्वात् । क इति । कर्तृसामान्यपदम् । भाष्ये ।

येत्, न कोपीत्यर्थः। तादृशस्य भगवत्स्वरूपातिरिक्तान्न जीवनमिति ज्ञापनाय सामान्यपदम्। ब्रह्मानन्दाधिकपूर्णानन्दविरहासन्नमरणनिवारणासामर्थ्यमतादृशस्योचितमेवेति ज्ञापनाय हिशब्दः। तादृशस्य जीवनसम्पादनं प्रभोरावश्यकमिति ज्ञापनाय एवकारः। तापात्मकस्याप्यानन्दात्मकत्वमेवेति ज्ञापनायानन्दपदम्। तदा प्रलापगुणगानादयो ये भवन्ति, तेपि तद्धर्मा एव। नीलाम्बुदश्यामोऽतिक्लेशवशाद् हृदयादपगच्छत्विति भावेपि हृदयान्नापसारयितुं शक्य इति ज्ञापनाय चाकाशत्वमुक्तम्। तदनन्तरं प्रकटीभूय, तदन्यः को वा प्रकर्षेण दर्शनस्पर्शाश्लेषभाषणादिभिः स्वरूपानन्ददानेन अन्यात्, पूर्वतापनिवृत्तिपूर्वकमानन्दपूर्णं कुर्यादित्यर्थः। 'रसꣳ ह्येवायं लब्ध्वानन्दीभवती'ति पूर्ववाक्येनैवान्यव्यवच्छेदपूर्वकं भगवत्प्राप्तेरानन्दहेतुत्वप्राप्तावपि यत्पुनराह, तत्रापि व्यतिरेकमुखेन, तत्रापि जीवनहेतुत्वम्, तदपि सामान्यविशेषाभ्यां वारद्वयम्, तेन विरहसामयिकोक्तरूप एवार्थः श्रुतेरभिप्रेत इति निश्चीयते।

भाष्यप्रकाशः।

इत्यादि। तत्रेति। पूर्णरसानुभावनेच्छया भगवतानुभाव्यमाने विप्रयोगे। सामान्यपदमिति। क इति पदम्। ब्रह्मानन्दाधिकपूर्णानन्दविरहासन्नमरणनिवारणासामर्थ्यमिति। अक्षरानन्दादधिको यः पूर्णानन्दो भगवाँस्तद्विरहेणासन्नं यन्मरणं तन्निवारणे असामर्थ्यम्। तद्धर्मा इति। विप्रयोगरसात्मकस्य भगवत एव धर्माः। आकाशपदस्य ब्रह्मवाचकत्वेपि व्यापकत्वरूपं धर्ममादाय तस्य तात्पर्यान्तरमाहुः नीलाम्बुदेत्यादि। अतिक्लेशवशादित्यस्य, इति भावेपीत्यनेन सम्बन्धः। प्राण्यादिति पदस्यार्थमाहुः तदनन्तरमित्यादि। अस्याः श्रुतेरयमेवार्थ इत्यत्र किं गमकमित्यपेक्षायां तदाहुः रसमित्यादि। यत्पुनराहेति। 'को ह्येवान्या'दित्यादिना आनन्दनं यत्पुनराह। अन्यथेति। विरहावस्थाया अनभिप्रेतत्वे। अत्र 'अन्यात्' 'प्राण्या'दित्यत्रान्यतरेणैव जीवनसम्पादनसिद्धौ सामान्यविशेषभावो नातीवोपयुज्यत इत्यरुच्या 'प्राण्या'दित्यस्य व्याख्यानान्तरमाहुः तदवस्थेत्यादि। तथा च मास्तु सामान्यविशेषभावः, तथाप्युक्तव्याख्यानेन दोषनिवृत्तेर्भगवद्विप्रयोगदुःखस्य कर्माजन्यत्वे उक्त-

रश्मिः।

हिशब्द इति। श्रुतौ हिशब्दः। एवकारोऽवधारणार्थ इत्याहुः तादृशस्येति। तापात्मकस्येति। टिप्पण्यामेतत्स्पष्टम्। वागवर्णनीय आनन्दे भक्तविरहदुःखं कियत् यद् स्वस्वरूपं सुखमतिक्रम्य प्रभवेत्, किन्तु सुखाय तत्स्वरूपोपज्ञापकत्वात्। दुःखभिन्नं सुखमिति। एवकारो दुःखमनु तन्निवर्तकौषधप्रयोगे सुखविशेष इत्यनुभवात्। प्रलापेति। 'मधुप कितवबन्धो' इति प्रलापः। प्रकृते। ब्रह्मवाचकस्य इति। आकाशस्तल्लिङ्गादित्यधिकरणात्। तात्पर्यान्तरमिति। आकाशत्वावच्छिन्ने आकाशपदशक्तिः। नीलाम्बुदश्यामे तात्पर्यम्। हृदयादपसारणाशक्यत्वेर्थे तात्पर्यान्तरम्। एतज्ज्ञापनाय चेति भाष्यीयचकारार्थः। तदाहुरिति। गमकमाहुः। अत्रान्यादिति। अयं सामान्यविशेषाभ्यां वारद्वयमिति भाष्यार्थोपि। यन्नुज्यत इति। यस्मान्न युज्यत इति नञ्विशिष्टोर्थोत्र भाति। तदवस्थेत्यादीति। अन्यात् स्त्रीः प्राण्यात् पुरुषः, 'स्त्रियो वा पुरुषा वापि भर्तृभावेन केशवम्। हृदि कृत्वा गतिं यान्ति श्रुतीनां नात्र संशय' इति वाक्यात्। उक्तेति। भाष्योक्तव्याख्यानान्तरेण पुनरुक्तिदोषस्य अन्यात् प्राण्यादित्यत्र निवृत्तेः। कर्माजन्यत्व इत्यस्य प्रमाणमित्यनेनान्वयः।

अन्यथा मरणहेत्वनुपस्थितौ जीवनहेतुत्वं न वदेदित्युक्तम् । तदवस्थापन्नः को वा पुरुषो जीवेदिति वार्थः ॥ १३ ॥

स्मर्यते च ॥ १४ ॥

भगवद्भावस्य मरणहेतुत्वम्, तेनैव च जीवनं तस्य ब्रह्मादिदुरापत्वं च श्रीभागवते स्मर्यते । 'ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः । ये त्यक्तलोकधर्माश्च मदर्थे तान् विभर्म्यह'मित्युपक्रम्य, 'धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चने'त्यादिश्रीप्रभुवचनम् । श्रीमदुद्धववचनं च 'एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः । वाञ्छन्ति यं भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथारसस्य' इत्यादि । तेन भगवत एव जीवनहेतुत्वं भावस्य च परमपुरुषार्थत्वं दुरापत्वं च स्फुटमवगम्यते ॥ १४ ॥

तानि परे तथा ह्याह ॥ १५ ॥

ननु हृदि बहिश्च रसात्मकभगवत्प्राकट्यम्, तददर्शनजनितो विरहभावः, तज्जनितस्तापः, तेन मरणोपस्थितिः, तन्निवर्तनं तदौत्कट्यं, तदा प्राकट्यं, ततः पूर्णस्वरूपानन्ददानादिकं लोके क्वचिदपि न दृष्टं श्रुतं वा वैकुण्ठेपीति कुत इत्याशङ्कायामाह । तानि । उक्तानि वस्तूनि परे प्रकृतिकालाद्यतीते वैकुण्ठादप्युत्कृष्टे श्रीगोकुल एव सन्तीति शेषः । तत्र प्रमाणमाह । तथाह्याह

भाष्यप्रकाशः ।

श्रुतिबोधितं भगवत्कर्तृकजीवनसम्पादनरूपमासन्नमरणलिङ्गमेव प्रमाणमित्यर्थः । अस्मिन् सूत्रे 'एकेषां स्पष्ट' इत्युक्त्या शाखान्तरेऽस्पष्ट इति बोधितम् । तेन भूमविद्यायां 'आत्मतः प्राण' इत्यादिकथने 'आत्मत एवाविर्भावतिरोभावा'वित्यपि कथनेन व्यापारतया विरहदुःखस्यापि स्मारणादिति । एतेनापि, 'न पश्यो मृत्युं पश्यती'ति श्लोकोक्तस्य दुःखस्य कर्मजन्यत्वं दृढीभवति । अदर्शनकथनेन तस्यैवाप्राप्तस्य बाधबोधनादिति बोध्यम् ॥ १३ ॥

स्मर्यते च ॥ १४ ॥ यद्यपि रसात्मकमेव ब्रह्म प्रकृत्येयं श्रुतिः प्रवृत्तेति नास्मिन्नर्थे सन्देहः, तथापि कश्चिदेतदर्थं सामान्यजीवपरतया शङ्केतेति तद्वारणायैतमर्थं स्मृत्योपष्टम्भयतीत्याशयेन सूत्रं पठित्वा व्याचक्षते भगवद्भावस्येत्यादि ॥ १४ ॥

तानि परे तथा ह्याह ॥ १५ ॥ सूत्रमवतारयन्ति नन्वित्यादि । न दृष्टं श्रुतं वेति । फलकोटौ न दृष्टं श्रुतं वा । इति कुत इति । इति हेतोः कुत एवमुच्यत

रश्मिः ।

उक्तेति । कः प्राण्यादिरस्याः पूर्वा उक्तश्रुतिस्तया बोधितम् । व्यापारतयेति । आत्मत इत्यत्र तसिलर्थः सव्यापारो हेतुरिति भावः । विरहेति । आत्मनः सव्यापारहेतोः विरहदुःखस्याविर्भाव इति स्मारणात् । एतेनेति । शाखान्तरीयेणापि । अदर्शनेति । न पश्यतीति योजनया अदर्शनकथनेन । तस्यैवेति । कर्मजन्यस्यैव दुःखस्य ॥ १३ ॥

स्मर्यते च ॥ १४ ॥ भाष्ये । जीवनेति 'तान् बिभर्म्यह'मिति जीवनहेतुत्वम् । 'वाञ्छन्ति य'मित्यादिना परमपुरुषार्थत्वादि ॥ १४ ॥

श्रुतिः । ऋग्वेदे पठ्यते 'ता वाँ वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि' । ता तानि वां भगवत्तदन्तरङ्गभक्तयोः सम्बन्धीनि वास्तूनि वस्तूनि गमध्यै प्राप्तुमुश्मसि कामयामहे । तानि कानीत्याकाङ्क्षायां गूढाभिसन्धिमुद्धाटयति । यत्र श्रीगोकुले गावो भूरिशृङ्गा बहुशृङ्गा रुरुप्रभृतयो मृगाश्च वसन्तीति शेषः । अयासः शुभावहाः । तत् उक्तगुणविशिष्टं उरु गीयत इत्युरुगायस्तस्य । गोप्यो हि सततं तं गायन्ति । अत एव तदादिभक्तेषु कामान् वर्षतीति वृषा । तस्य परमं प्रकृतिकालाद्यतीतं पदं स्थानं भगवतो वैकुण्ठं भवति । तत्रैताहशलीलाऽभावेन तस्मादपि परममुत्कृष्टम् । अत्र भूमाववभाति प्रकाशत इत्यर्थः । तथापि स्वहग्गोचरो न भवतीति खेदेन अहेत्याह श्रुतिः । उरु गीयते परं सर्वत्र कामवर्षणं भक्तेष्वत्रैवेति तात्पर्येण वा विशेषणद्वयमुक्तम् । यमुनापुलिनतदुपवननिकुञ्जगह्वरप्रदेशाद्रिसान्वाद्यात्मकत्वेन भूरि बहुरूपम् । तथा चैताहशं यत् परमं पदमवभाति तत्सम्बन्धीनि वास्तूनि कामयामह इति वाक्यार्थः सम्पद्यते । 'ते पदार्था' इति वक्तव्ये सति 'तानी'त्युक्तिर्या, सा विषयवाक्यानुरोधादिति ज्ञेयम् ।

पुरुषोत्तमसम्बन्ध्यर्थानां तत्प्राकट्यस्थान एव प्राकट्यं युक्तमिति हिशब्देनाह ॥ १५ ॥

अविभागो वचनात् ॥ १६ ॥ (४-२-४)

ननु लीलाया नित्यत्वेन तन्मध्यपातिनां तद्दर्शनं यथा नित्यम्, तथा ताहक्साधनाभावेपि निजानुकम्पया कदाचित् कमपि भक्तं तत्र नयति

भाष्यप्रकाशः ।

इत्यर्थः । आहेति । तस्य स्थानं, तत्र प्रमाणं चाह । सूत्रस्य श्रुतेश्च व्याख्यानमतिरोहितार्थम् ॥ १५ ॥ इति तृतीयं समानाधिकरणम् ॥ ३ ॥

अविभागो वचनात् ॥ १६ ॥ एवं नवभिः सूत्रैस्तत्तदाशङ्कानिराकरणेन वागादिलयप्रकारभेदावश्यकत्वं दृढीकृत्य पुष्टिमार्गविषय एव किञ्चिद्विचारयतीत्याशयेनाधिकरणमवतारयन्ति ननु लीलाया इत्यादि । अत्र यदि वियोजयति, तदापि कृपाविषयत्वात् संसारे न पातयति, किन्तु मुक्तिमेव ददातीति प्रथमकोटेराशयः । द्वितीयकोटिस्तु कादाचित्कत्वादनुपपन्नेति सन्देहबीजम् । शेषं भाष्यमतिरोहितार्थम् ।

रश्मि

तानि परे तथा ह्याह ॥ १५ ॥ अतिरोहितार्थमिति । उत्कृष्ट इति । वाराहेस्ति 'वैकुण्ठादप्युत्कृष्टं गोकुल'मिति चातुर्मास्यमाहात्म्ये । 'वेदार्थौ रामकृष्णयो'रिति कृष्णोपनिषच्छ्रुतेरर्थमाहुः श्रीगोकुल इत्यादि । एताहशलीलाऽभावेनेति समत्वादेवम् । अहेति खेदे । अधोक्षजत्वाद् विरुद्धधर्माश्रयत्वाच्चाहुः पुरुषोत्तमसम्बन्ध्यर्थानामिति । औचित्यैवकारः । एवमतिरोहितार्थम् ॥ १५ ॥ इति तृतीयं समानाधिकरणम् ॥ ३ ॥

अविभागो वचनात् ॥ १६ ॥ अतिरोहितार्थमिति । निजेति । प्रमेयबलेन ।

चेत् तदा कञ्चित्कालं स्थापयित्वा, ततस्तं वियोजयति, न वेति संशयः। तोषस्य कादाचित्कत्वात् तत्साध्या तत्र स्थितिरपि तथैवेति वियोजयतीति पूर्वः पक्षः। तत्र सिद्धान्तमाह। तत्र प्रवेशितस्य तस्मादविभाग एव। कुतः। वचनात्। तैत्तिरीयक उक्तर्गनन्तरमेव, 'विष्णोः कर्माणि पश्यते'त्यृचा तत्र कृतानि कर्माण्युक्त्वा, तदग्रे वदति 'तद्विष्णोः परमं पद५सदा पश्यन्ति सूरय' इति। पुरुषोत्तमस्वरूपवित्त्वं सूरित्वम्। तच्च भक्त्यैवेति सूरयो भक्ता एव। तेषां सदा दर्शनमुच्यते। अन्यथा लीलानित्यत्वेनैव पूर्वगर्भ्यां तत्र स्थितगवादीनां प्रभुकर्मविषयाणां च भक्तानां सदा तद्दर्शनस्य प्राप्तत्वादिदं न वदेत्। तस्मादविभाग एव। एतेनापि लीलानित्यत्वं सिध्यति। एतद् यथा तथा विद्वन्मण्डने प्रपञ्चितम्॥ १६॥

इति चतुर्थाध्याये द्वितीयपादे चतुर्थमविभागाधिकरणम्॥ ४॥

भाष्यप्रकाशः।

अयं च विचारः प्रासङ्गिक इति बोध्यम्। तस्य स्थानस्य परिच्छिन्नत्वाद् भक्तानां च नानादेशत्वेन तत्र तत्र मरणे ततो निर्गत्यात्रागमनस्यावश्यकत्वात् सद्योमुक्तिप्रसङ्ग एतद्विचारो न युक्त इति शङ्क्यम्। दहराधिकरणन्यायेन तन्नित्यत्वस्य परिच्छिन्नत्वेपि व्यापकत्वस्य, एतस्य

रश्मिः।

उक्तर्गिति। 'ता वां वास्तूनी'त्याद्यृगनन्तरम्। तच्चेति फलात्मकपुरुषोत्तमज्ञानवत्त्वं च भक्त्यैव, 'भक्त्या मामभिजानाती'ति वाक्यात्। प्रभ्विति। निजानुकम्पया नित्यक्रीडायां निवेशितानाम्। तथा च प्रभुनिवेशनकर्मविषयाणाम्। इदम्। 'सदा पश्यन्ति सूरय' इत्युक्तं दर्शनम्। अविभाग एवेति। तेन 'अविभक्तं च भूतेषु विभक्तमिव च स्थित'मिति गीतायां विरुद्धधर्माश्रयत्वं नोक्तम्, किन्तु ब्रह्मस्वरूपमेवेति द्योतितम्। तेन भेदाभेदावित्यत्रापि भेद इवार्थः स्वरूपनिविष्टः, न तु विरुद्धधर्माश्रयत्वार्थम्। यथा 'प्रवर्तते यत्र रजस्तम' इत्यत्र, 'विद्ययाविद्यया शक्त्या मायया च निषेवित'मित्यत्र मायाविद्याविद्याभ्यां न विरुद्धधर्माश्रयत्वम्। मायाया अवस्थितमतेऽनङ्गीकारेण तया विरुद्धधर्माश्रयत्वासिद्धिः। विद्याविद्ययोस्तु ज्ञानस्वरूपत्वात् प्रभोरविद्यया तन्नाश्यया न विरुद्धधर्माश्रयत्वम्, तथा। नन्वविद्यायाः सर्वथा नाशे 'कृत्वातरन् वत्सपदं स्म यत्प्लवाः' इत्यस्य सुबोधिन्युक्तदिशाहन्ताममतयोरपि भेदनिबन्धनत्वात् तन्नाशे सुबोधिन्यादिविरोध इति चेत्। न। जगतो बन्धकत्वेन मोचकभक्तिमार्गाविषयत्वात्तदीयाहन्ताममतयोर्बन्धकत्वेपि भक्तिमार्गेऽहन्ताममतयोर्भक्तित्वेन मोचकत्वात्। इवार्थभेदनिबन्धनत्वेपि बन्धदोषाभावात् स्वरूपतो ब्रह्मत्वात्। एतेनापीति। 'पश्यन्ती'ति वर्तमानप्रयोगेण। ननु 'वर्तमानसामीप्ये वर्तमानवद्वे'ति सामीप्ये वर्तमानप्रयोगेपि 'पश्यन्ती'ति लडुपपत्तेर्न लीलानित्यत्वं सिध्यतीत्यत आहुः एतद्यथातथेति। 'जयति जननिवासो देवकीजन्मवाद' इत्यत्र निरोधलीलोपसंहारश्लोके 'जयती'त्यादिवर्तमानप्रयोगेण लीलानित्यत्वसाधने प्रपञ्चितम्। अत्राप्यष्टाविंशतिदोषास्ते सुवर्णसूत्रे विविच्य परिहृताः। भक्तिमार्तण्डेपि मया लिखिताः। एवमतिरोहितार्थमित्यर्थः।

प्रकृतमनुसरामः। तस्येति। श्रीगोकुलीयस्य (व्रजभवस्य) भक्तस्थानस्य। अत्रेति। भगव-

भाष्यप्रकाशः।

व्रजस्य तद्वृत्तिलाभस्थानतायाश्च व्युत्पादितत्वात् तादृशभक्तस्य यत्र क्वचन मरणेपि तदानीं लीलादिसहितस्य भगवतो हृदि वा बहिर्वा प्राकट्ये तत्स्थानादेरपि तत्रैव प्राकट्येन तत्रैव तस्य तत्प्राप्तेर्विद्वन्मण्डन एवोपपादितत्वेन सद्योमुक्तिविचार एतद्विचारस्य युक्तत्वादिति।

अन्ये तु, 'समाना चासृत्युपक्रमा'दित्यादिषु दशसु सूत्रेष्वपि प्रथमे मूर्धन्यनाडीद्वारा देवयानमार्गे गमनात् पूर्वं विद्वदविदुषोरुत्क्रान्तिसाम्यं व्याख्यातम्, तदोकोग्रसूत्रोक्तज्वलनादेव स्मर्यमाणतया गतार्थम्। यत्पुनरग्रेविद्यादिक्लेशानदग्ध्वा आपेक्षिकममृतत्वं व्याख्यातम्, तत्त्वग्रिमपादे गमनस्य प्रारब्धभोगार्थत्वाद्यदैव प्रारब्धनिवृत्तिस्तदैव मोक्ष इति व्युत्पादनेन दूषयिष्यते। यत्पुनर्द्वितीये 'तेजः परस्यां देवताया'मित्युक्तायाः साध्यक्षसप्राणसकरणग्रामसभूतान्तरस्य तेजसः परदेवतायां सम्पत्तेः सौषुप्तिकसम्पत्तिवत् संसारबीजभावयुक्तत्वं व्याख्यातम्, तदुत्क्रान्तिसामर्थ्यादेवार्थात् सिध्यतीत्यविचार्यम्। यत् तृतीये पूर्वोक्ततेजसो निष्क्रमणवेलायां दुर्ज्ञेयत्वम्, चतुर्थे च स्थूलशरीरदाहादिना लिङ्गशरीरस्य सूक्ष्मत्वादनुपमर्दम्, पञ्चमे च देहौष्ण्यरूपस्योष्मणः सूक्ष्मशरीरधर्मत्वं व्याख्यातम्, तत्प्रयोजनाभावादनर्थकम्। षष्ठे च 'न तस्य प्राणा उत्क्रामन्ती'ति शारीरब्राह्मणीयवाक्ये या षष्ठी, सा आर्तभागब्राह्मणीये 'न तस्मात् प्राणा उत्क्रामन्ती'ति वाक्ये या पञ्चमी तया सम्बन्धसामान्ये व्यवस्थाप्यमाना पञ्चम्यर्थमेवाभिधत्ते इति परविद्यावतोपि जीवान्न प्राणानामुत्क्रमः, किन्तु सहैव प्राणैः स्थितिरिति

रश्मिः।

स्थाने। तद्वृत्तीति। भगवद्वृत्तिलाभस्थानतायाः। व्युत्पादितत्वादिति। 'सर्वोपेता चे'त्यधिकरणे 'लोकवत्तु लीला कैवल्य'मितिसूत्रे तथा। यद्वा। प्रथमाध्यायस्य द्वितीयपादे 'अन्तर उपपत्ते'रित्यधिकरणे। तथाप्युपपादितत्वादित्यर्थापत्त्या पूर्वं व्युत्पादितत्वादित्यर्थः। पूर्वं तृतीयाध्याये उपसंहारपादे 'सर्वाभेदादन्यत्रेमे' इत्यादिसूत्रभाष्ये। तत्स्थानादेरिति। भगवतः स्थानम्, आदिना यद्धिया भावितं रूपं तत् तस्य। तत्रैवेति। व्रज एव। तस्य भक्तस्य। तत्प्राप्तेः भगवत्प्राप्तेः। दूषयन्ति स्म तद् ओकोग्रेति। वक्ष्यमाणाधिकरणेऽस्ति। गतार्थमिति। सूत्राणां न्यायरूपत्वादिति भावः। अग्र इति। 'अमृतत्वं चानुपोष्ये'ति सूत्रांशे। अनुपोष्येत्यस्यार्थो विद्यादिक्लेशानदग्ध्वेति। द्वितीय इति। 'तदापीते'रिति सूत्रे। तत् तेज आदिभूतं सूक्ष्मं आपीतेरासंसारमोक्षात् सम्यग् ज्ञाननिमित्तादवतिष्ठतः पुंसः। 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुत'मिति सूत्रार्थः। साध्यक्षं सजीवं तेजः। अत्र सूक्ष्मशरीरस्य लयः। संसारबीजेति। संसारबीजं कर्म, तदभावयुक्तत्वम्। 'संसारव्यपदेशा'दिति सूत्रांशव्याख्यानम्। संसारस्य संसारबीजस्य व्यपदेशादभावात्। तथात्र भाष्यं 'बीजभावावशेषैवैषा सत्सम्पत्ति'रिति। तत्तु क्रममुक्तिकथकाच्छ्रीभागवतादेवासन्दिग्धमित्याशयेन दूषयन्ति स्म तत्त्विति। तृतीय इति। 'सूक्ष्म'मिति सूत्रे। दुर्ज्ञेयत्वमिति। सूक्ष्ममित्यस्यार्थः। 'प्रमाणतश्चे'त्यस्य सूत्रांशस्य नाडीनिष्क्रमणश्रुतेः। 'तथोपलब्धे'रित्यस्य सूत्रांशस्य तनुत्वात् सञ्चारोपपत्तिः, स्वच्छत्वाच्चाप्रतिघातोपपत्तिः, अत एव देहान्निर्गच्छन् पार्श्वस्थैर्नोपलभ्यत इत्यर्थः। चतुर्थ इति। 'नोपमर्देने'ति सूत्रे। नोपमर्देनेत्यस्यार्थः स्थूलशरीरेत्यादिः। सूक्ष्मत्वादिति। सौत्रस्य अत इत्यस्यार्थः। पञ्चम इति। 'अस्यैवे'ति सूत्रे। षष्ठ इति। प्रतिषेधादिति सूत्रे। आर्तभागेति। सप्तम्यन्तम्। तस्मादिति श्रुतिः। परविद्यावत इति। पञ्चम्य-

एवं पुष्टिमार्गीयभक्तवृत्तान्तमुक्त्वा ज्ञानमार्गीयस्य तमाह ।

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥ (४-२-५)

पूर्वं, 'भूतेषु तच्छ्रुते'रित्यादिना मर्यादामार्गीयस्य वागादिलय उक्तोऽधुना तस्य जीवात्मन उत्क्रमणप्रकार उच्यते । 'स एतास्तेजोमात्राः समभ्याददानो

भाष्यप्रकाशः ।

पूर्वपक्षः । सप्तमाष्टमयोस्तु परविद्यावतः शरीरादेव प्राणानुत्क्रम इति परविद्यावान् केवल एव मुच्यत इति सिद्धान्तः । नवमे च परविद्यावतः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परे ब्रह्मण्येव सम्पद्यन्त इति । दशमे च, परविद्यावतो यः प्राणादीनां परब्रह्मणि लयः स नान्यप्राणलयवत् सविशेषः किन्त्वात्यन्तिक इति सिद्धान्तयन्ति । तत्र षष्ठं 'प्रतिषेधा'दिसूत्रमारभ्य सूत्रपञ्चके यत् प्रतिपादितम्, तदत्र पूर्वपक्षांशं विहाय, शेषं 'वाङ् मनसी'ति प्रथमाधिकरण एव हेतूक्तिपूर्वकं पुष्टिमार्गीयभक्तेन्द्रियाणां प्रतिपादितम् । ततो मर्यादामार्गीयाणां भक्तानां ज्ञानिनां च यत्ततो वैलक्षण्यम्, तदपि 'भूतेषु तच्छ्रुते'रिति द्वितीये प्रतिपादितम् । तावता सद्योमुक्तिप्रकारः सर्वोऽपि विचारित इति तेनैव गतार्थम् । यानि पुनस्तैरपरविद्यावदविद्वत्साधारण्येन तत्परतया व्याख्यायन्ते, तान्यत्र विरोधाभावात् पूर्वोक्तदूषणेनैव विरुद्धांशदूषणस्य जातत्वादुपेक्षितानि ॥ १६ ॥ ४ ॥ इति चतुर्थमविभागाधिकरणम् ॥ ४ ॥

अतः परं क्रममुक्तिप्रकारः पितृयानेन भ्रमतां च प्रकारो विचारणीय इति तं वक्तुं सूत्रमवतारयन्ति एवमित्यादि ।

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥ तत्र को वृत्तान्त इत्याकाङ्क्षायामाहुः पूर्वमित्यादि ।

रश्मिः ।

न्तम् । जीवादिति शारीरादिसूत्रांशार्थः । नेति । श्रुतिविरोधान्न प्राणानामुत्क्रम इति विरोधादिति सूत्रांशार्थः । तथा च शारीरादुत्क्रान्तिप्रतिषेधाद् इति चेद् इत्यन्तः पूर्वपक्षः । नेति सिद्धान्ते योज्यं सूत्रे । सप्तमेति । 'स्पष्टो ह्येकेषाम्' 'स्मर्यते चे'त्येतयोः । प्राणानुत्क्रमः । 'अत्रैव समवनीयन्त' इति श्रुतेरत्रैव लयः । इतीति । इत्येवम् । 'सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः । देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिण' इति 'स्मर्यते चे'ति सूत्रस्य स्मृतिसहायं सिद्धान्तमाहुरित्यर्थः । नवम इति । 'तानि परे' इति सूत्रे । 'तथा ह्याहे'त्यस्यार्थस्तु 'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ती'ति छान्दोग्यश्रुतिस्तथा ह्याहेति । दृष्टान्तोऽपि । 'यथा नद्यः समुद्रं प्राप्यास्तं गच्छन्ती'ति । षोडश कलाः सूक्ष्मदेहरूपाः । दशम इति । 'अविभाग' इति सूत्रे । 'वचना'दित्यस्य तु कलानां लयोक्त्यनन्तरं 'भिद्येते चासां नामरूपे' इति वचनादित्यर्थः । पूर्वोक्तेति । 'समाना चासृत्युपक्रमा'दित्यादिसूत्रभाष्योक्तदूषणेनैव । विरुद्धांशेति । यथा 'अथातो ब्रह्मजिज्ञासे'त्युक्ते विरुद्धस्य 'अथातो धर्मजिज्ञासे'त्यस्य धर्मांशस्य दूषणमप्राकरणिकत्वं तस्य जातत्वात्तदुपेक्षा तद्वत् ॥ १६ ॥

इति चतुर्थमविभाग इत्यधिकरणम् ॥ ४ ॥

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥ अतः परमिति । सद्योमुक्तिविचारानन्तरम् ।

हृदयमेवान्ववक्रामती'ति श्रुतेस्तस्यात्मन ओक आयतनं हृदयं तदग्रं पूर्वं प्रज्वलति, पूर्वं तथा अप्रकाशमानमपि तदा प्रकाशत इति यावत्। तदा तत्प्रकाशितं द्वारं निर्गमनमार्गो यस्य तादृश उत्क्रामति। यतः श्रुतिस्तथाह 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वे'त्यादि।

भाष्यप्रकाशः।

मर्यादामार्गीयाणां सद्योमुक्तिर्द्विधा, हृदय एव साधनप्राबल्ये ब्रह्म प्राप्नोतीत्येकः, तदभावे ब्रह्माण्डमध्ये दशमद्वारान्निर्गतस्य तत्रैवेत्यन्यः। क्रममुक्तिर्ब्रह्माण्डभेदनोत्तरं ततो बहिः। तत्राद्यायां जीवस्य नोत्क्रमणम्। द्वितीयतृतीययोस्तदपेक्षासत्त्वात् तत्प्रकार उच्यत इत्यर्थः। एवं वृत्तान्तस्वरूपमुक्त्वा सूत्रं व्याकुर्वन्ति स इत्यादि। प्रकाशत इति। इन्द्रियरूपाभिस्तेजोमात्राभिः प्रकाशते। सूत्रशेषं पूरयन्ति तादृश उत्क्रामतीति। श्रुतिस्तु बृहदारण्यके शारीरब्राह्मणे। 'स वा अयमात्मा अबल्यं नीत्य संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति, स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवत्येकीभवति न पश्यतीत्याहुः। एवं न जिघ्रति, न वदति न शृणोति, न मनुते, न विजानातीत्याहुरित्युक्तम्। ततः, 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती'त्यादिना 'इति तु कामयमान' इत्यन्तम्। अर्थस्तु, यः पूर्वब्राह्मणे 'एभ्योऽङ्गेभ्यः सम्प्रमुच्ये'त्यादिना म्रियमाणावस्थ उक्तः, सोऽयं शारीर आत्मा जीवो यत्र यस्यां म्रियमाणावस्थायां अबल्यं नीत्य अबलभावं नितरां प्राप्य, संमोहमिव न्येति सम्मोहः संमूढता विवेकराहित्यं तन्नितरां प्राप्नोति, अथ तदा एनं करणस्वामिनम्, एते प्राणा वागादयोऽभिसमायन्ति आभिमुख्येन निकट आयान्ति। स एतास्तेजोमात्रा विषयप्रकाशकानीन्द्रियाणि चक्षुरादीनि समभ्याददानः सम्यगाभिमुख्येन गृह्णान उपसंहरमाणो हृदयं स्वायतनमेवान्ववक्रामति तल्लक्षीकृत्य आयाति, स यत्र वर्तते, तत्र एष चाक्षुषः पुरुष आदित्यांशश्चक्षुर्देवतारूपः पराङ् पर्यावर्तते स्वकार्याद्विमुखो भवति। अथ तदा 'स एष' इत्यनेनोक्तश्चक्षुरधिष्ठाता अरूपज्ञो भवत्येकीभवति करणग्रामेण। तदा न पश्यतीत्याहुः। पार्श्वस्था न पश्यतीत्याहुः। एवमग्रेपि। तदुत्तरावस्थामाह तस्येत्यादि। तस्य लिङ्गोपाधिकस्य ह एतस्य मुमूर्षोर्हृदयस्य एतत्स्थानस्य अग्रं नाडीमुखं प्रद्योतते पूर्वमप्रकाशमपि तदानीं प्रकाशते। तेन प्रद्योतेन एष आत्मा शरीरान्निष्क्रामति

रश्मिः।

को वृत्तान्त इति। सङ्गतिबोधको वृत्तान्तः कथा। साधनेति। प्रमेयबलमपि द्रष्टव्यम्। तदभावे साधनप्राबल्याभावे। दशमेति। नवद्वाराणि देहे। दशमद्वारं (नाडीद्वारं) हृदयाग्रद्वारम् तस्मात्। तत्रैवेति। हृदय एव। इति सद्योमुक्तिः। तदपेक्षेति। जीवोत्क्रमणापेक्षासत्त्वात्। स इत्यादीति। तेजोमात्रा इन्द्रियाणि। प्रकाशत इति। तेन प्रकाशमानं हृदयाग्रं भवति। मांसपिण्डं हृदयं आकाशरूपम्। 'काशृ दीप्ता'विति धातुपाठात् तत्सूक्ष्मत्वात् तेजोमात्राभिः प्रकाशत इत्यर्थः। पूर्वं तथा अप्रकाशमानमपीति भाष्यात्। पूर्वेति। ज्योतिर्ब्राह्मणे। इत्यादिनेति। 'प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैवे'ति। स्पष्टोऽर्थः। उपसंहारेति। उपसंहारं कुर्वाणः। अप्रकाशमानमिति। पररीत्योक्तम्। स्वमते तथा अप्रकाशमानं यतः। यमगतीति। यमकृता

यद्यप्येतावत् सर्वजीवसाधारणम्, तथापि विद्वांस्तु नेतरवदितरनाड्या निष्क्रामति, किन्तु, शताधिकया एकशततम्या नाड्या मूर्धन्या निष्क्रामति । 'शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ती'ति यतः श्रुतिराह । अत्र हेतुमाह । **हार्दानुगृहीत** इति । हेत्वन्तर्गर्भं विशेषणम् । 'गुहां प्रविष्टौ परमे परार्धे' इति श्रुतेर्हृदयाकाशसम्बन्धी यः परमात्मा तदनुग्रहात् तथैव भवतीत्यर्थः । अनुग्रहे हेतुः विद्यासामर्थ्यादिति । तस्या विद्यायाः शेषभूताङ्गभूता या गतिः प्रव्रजनरूपा, तच्छेषभूतैव या भगवत्स्मृतिपरम्परा च ताभ्यां च यो भगवदनुग्रहस्तेन तथेत्यर्थः ॥ १७ ॥ इति चतुर्थाध्याये द्वितीयपादे पञ्चमं तदोकोधिकरणम् ॥ ५ ॥

भाष्यप्रकाशः ।

निर्गच्छति । चक्षुराद्यन्यतमेभ्यः शरीरदेशेभ्यः । तदुत्तरव्यवस्थामाह तमुत्क्रामन्तमित्यादि । तं जीवात्मानम् । प्राण आसन्यः । प्राणा इन्द्रियाणि । अयं च निष्क्रमणप्रकारो यमगतिरहितानाम् । यमगतीनां तु, 'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बला'दित्यादिवाक्यात् पिण्डितकरणग्रामस्य जीवस्य बलान्निष्क्रामणम् । एवं सति यद्यप्येतावदू ओकोग्रज्वलनादिकं यमगतिरहितचर्षणीजीवानां विदुषां च साधारणम्, तथापि, विद्वांस्तु नेतरवदितरनाड्या निष्क्रामति, किन्तु शताधिकयेत्याद्युक्तमार्गेण । श्रुतिस्तु छान्दोग्ये दहरविद्यास्था । शेषं स्फुटम् ।

तथा च 'स यदास्माच्छरीरान्निष्क्रामती'ति श्रुत्युक्तो निष्क्रमणप्रकारो विद्वदविदुषोस्तुल्यो वा विशेषवान् वेति सन्देहे, कामयमानताया उभयोस्तुल्यत्वेन शारीरब्राह्मणोक्तरीत्या तुल्य एवेति प्राप्ते । हृदयाग्रप्रद्योतनपर्यन्तं विद्वदविदुषोस्तुल्यो निर्गमनमार्गः प्रकारश्च विदुषोऽतिरिक्त इति सिद्धान्तो बोधितो ज्ञेयः । एवमेतेन क्रममुक्तिप्रामृणां जीवस्य शरीरान्निर्गमनप्रकार उक्तः । तत्र ये मूर्ध्नो निष्क्रामन्ति, ते दशमद्वारं भित्त्वा तत्रैव सद्यो ब्रह्मणि लीयन्ते । तथा सति करणग्रामो भूतेष्वेव लीयत इत्यर्थादायाति ॥ १७ ॥ इति पञ्चमं तदोकोधिकरणम् ॥ ५ ॥

रश्मिः ।

गतिर्यमगतिस्तद्रहितानाम् । **पिण्डितेति** । पिण्डितः पिण्डीभावो विद्यते यत्र । तारकादिभ्य इतच् । करणानामिन्द्रियाणां ग्रामः । **यमगतीति** । चृष प्रजननैश्ययोः । चर्षण्यो भ्रमणशक्तयः तद्युक्तानां जीवानाम् । **इत्याद्युक्तमार्गेणेति** । इत्यादिभाष्योक्तमार्गेण । **शेषमिति** । **मूर्धानमिति** । मूर्धानं लक्षीकृत्य । **हेत्वन्तर्गर्भेति** । हेतुरन्तर्गर्भो यस्य विशेषणस्य । हार्दानुगृहीतत्वादित्यर्थः । हार्दानुग्रहमाहुः **गुहामिति** । **तथैवेति** । हार्दानुगृहीत एव । **तच्छेषेति** सूत्रांशं विवृण्वन्ति स्म तस्या इति । गतिर्गमनं तत्प्रव्रजने प्रधानमिति तुरीयत्वाच्च गतिः प्रव्रजनम् । मुख्याधिकारत्वाच्च । संन्यासनिर्णयग्रन्थोक्तम् । तत्तु आयुष उत्तरभागेऽवशिष्टे पञ्चविंशतिवर्षे भवति । पारिभाषिकं प्रव्रजनं तु गृहस्थाश्रमेप्यस्ति । काम्यकर्मसर्वकर्मफलत्यागात् । तदुक्तं गीतायां 'काम्यानां कर्मणां त्यागं संन्यासं कवयो विदुः । सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा' इति । अनुस्मृतेरर्थमाहुः **तच्छेषेति** । उक्तभक्त्यादिविद्याशेषभूता भगवत्स्मृतिपरम्परायां अनुस्मृतिर्भवति । सा चानुस्मृतिर्ग्रन्थोक्तरीत्या ग्राह्या । श्रवणादीत्यनुक्त्वा स्मरणपरम्परोक्तेरयं भावः । तुरीयाश्रमसाहचर्याद् भक्त्या प्रसन्ने हरौ योगप्रयुक्तेः । सैकादशचतुर्दशाध्याये । 'नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखम् । तत्र

रश्म्यनुसारि ॥ १८ ॥ (४-२-६)

'अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति, शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल' इत्युपक्रम्य, अग्रे पठ्यते 'तमभित आसीना आहुर्जानासि मां जानासि मामिति। स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानात्यथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभि-

---

भाष्यप्रकाशः।

रश्म्यनुसारी ॥ १८ ॥ एवं ब्रह्माण्डमध्ये सद्योमुक्तस्य व्यवस्थामुक्त्वा क्रमेण मुच्यमानस्य व्यवस्थां वदतीत्याशयेन प्रासङ्गिकमेतस्याधिकरणस्य विषयादिकमाहुः अथ या एता इत्यादि। श्रुतिस्तु छान्दोग्यस्थदहरविद्यायाम्।

अर्थस्तु, यो हृदयपुण्डरीकगतयथोक्तगुणविशिष्टब्रह्मोपासकः स या एता हृदयस्य पुण्डरीकाकारस्य ब्रह्मोपासनस्थानस्य सम्बन्धिन्यो नाड्यो हृदयमांसपिण्डात् सर्वतो विनिःसृता आदित्यमण्डलाद्रश्मय इव ता एताः पिङ्गलस्य वर्णविशिष्टस्याणिम्नः सूक्ष्मरसस्य पूर्णा इति सर्वत्राध्याहारः। तिष्ठन्ति। शुक्लस्य नीलस्य पीतस्य लोहितस्य सौरं तेज एव शरीरे पित्तं तत्पार्थिवेन कफेन न्यूनाधिकभेदादनुविद्धं सत् शरीरस्थं रसं पाचयत्तत्तद्वर्णं करोति। तत्रादित्यसम्बन्ध एव कारणम्। पित्तरूपेण तेजसा आदित्यस्य तत्र सत्त्वात्। तदाह श्रुतिः 'असौ वा आदित्यः पिङ्गल एष शुक्ल' इत्यादि। तथा चादित्यमण्डलस्य पञ्चवर्णत्वात्तदंशभूतं पित्तमपि तादृशमपि स्वपाचितं शारीरं रसमुपरञ्जयति, तदा तत्तन्नाडीस्थो रसस्तथा भवतीत्यर्थः। तदेतदुपक्रम्य ततो महापथदृष्टान्तेन आदित्यरश्मीनामुभयलोकसंसर्गित्वमुक्त्वा,

रश्मिः।

लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत्। तच्च त्यक्त्वा मदारोहो न किञ्चिदपि चिन्तये'दिति सार्धश्लोके उक्ता। तथेति। हार्दानुगृहीतः। एवं शेषं स्फुटम्। अधिकरणत्वायाहुः तथा चेति ॥ १७ ॥

इति पञ्चमं तदोकोधिकरणम् ॥ ५ ॥

रश्म्यनुसारी ॥ १८ ॥ प्रासङ्गिकमिति। स्मार्तम्। तथा चारणे। 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानचतुष्टयम्। एतैः सर्वैरादित्यमण्डलमेव विधास्यत' इति। एतन्मूलभूता श्रुतिः। 'सूर्य आत्मा जगतस्तस्थुषश्च'। जगतः जङ्गमस्य। तस्थुषः स्थावरस्य। हृदयेति। हृदयपुण्डरीकगतं यथोक्तगुणविशिष्टं ब्रह्म। तस्योपासक इत्यर्थः। हृदयमांसेति। स्मार्तपक्षे हृदयरूपमांसे आकाशे सूर्य आत्मा। आकाशो मांस' इत्यत्र संहिता। उपासनवशाद् अणोः सूर्यजीवस्याप्रत्यक्षेण हृदयमांसपिण्डादित्युक्तम्। सूक्ष्मेति। अपां पुष्पत्वादादित्यरसत्वमुक्तम्, पिङ्गलस्य हृदयद्वारा सूर्यस्य पिङ्गले सत्त्वात्। एवमित्यन्तां श्रुतिं व्याकृत्य 'असावा' इत्यादिश्रुतिं व्याकर्तुमाहुः सौरं तेज इति। पित्तमित्यौचित्यात्। कफस्य पार्थिवत्वं कठिनत्वात् शुष्कस्य। न्यूनाधिकेति। न्यूनं पित्तम्, कफोऽधिकः। अधिकं पित्तम्, कफो न्यून इति। एवं न्यूनाधिकप्रकारात्। करोतीति। पञ्चवर्णत्वादादित्यस्य मूलस्य रसं तत्तद्वर्णं करोति। उपरञ्जयतीति। रञ्ज रागे। इत्यर्थोऽर्थ इति पूर्वेणान्वयः। उद्देश्यतावच्छेदकविधेययोरैक्यं बाधकं न भवति। घटो घटो न पट इति प्रयोगदर्शनात्। इत्युपक्रम्येत्यादिभाष्यं विवृण्वन्ति स्म तदेतदिति। महापथेति। 'तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामु-

रूर्ध्व आक्रमत' इति । अत्र 'तमभित' इत्याद्युक्तेः सर्वसाधारण्युत्क्रान्तिः प्राप्यते । पूर्वमादित्यत्वेनोक्तस्य पिङ्गलस्य रश्मिभिरूर्ध्वाक्रमणं च तथा । अत्र संशयः । ओकोग्रज्वलनादेरितरसाधारण्येपि यथा हार्दानुग्रहाद्विलक्षणा गतिर्विदुष उक्ता, तथा रश्म्यनुसारित्वमपीतरसाधारणम्, उतास्मिन्नेवेति । तत्रावधारणमाह । **रश्म्यनुसारी** । निष्क्रामत्ययमेवेति ॥ १८ ॥

इति चतुर्थाध्याये द्वितीयपादे षष्ठं रश्म्यधिकरणम् ॥ ६ ॥

भाष्यप्रकाशः ।

तासां नाडीनामादित्यरश्मिसंसृष्टत्वं चोक्त्वा, तासु नाडीषु सृप्तस्य सुषुप्तिं चोक्त्वा, ततो मरणावस्थां बोधयन्ती श्रुतिः पठ्यते तमभित इत्यादि । तदर्थस्तु स्फुटः ।

एवं श्रुतिमुपन्यस्यात्र संशयजनकं विषयमाहुः अत्रेत्यादि । उत्क्रान्तिः शरीराभिर्गमनम् । पिङ्गलस्येति । वर्णविशिष्टस्यादित्यांशभूतस्य पित्तस्य । संशयस्तु स्फुटः । पूर्वपक्षस्तु, ओकोग्रज्वलनादीनां साधारण्याद्रश्म्यनुसारित्वमपि तत्प्रवाहपातात्साधारणमिति । सिद्धान्तमाहुः तत्रेत्यादि । अत्र प्रमाणं तु, 'अथैतैरेव रश्मिभिरूर्ध्व आक्रमत' इत्येतदनन्तरं, 'स ॐमिति चाहोद्वा मीयते स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषा'मिति तदग्रिमा श्रुतिः । तत्र हि स विद्वान् ॐकारेण परमात्मानं ध्यायन् ॐमिति चाह, यथापूर्वं वदति, उत् ऊर्ध्वं वा मीयते गच्छति । स विद्वान् यावन्मनः क्षिप्येत् यावता कालेन मनोव्यापारं कुर्यात्तावता कालेनादित्यं गच्छति प्राप्नोति । एतद्वै आदित्यरूपं खलु निश्चितं लोकद्वारं ब्रह्मलोकप्रवेशमार्गः । विदुषां प्रपदनं प्राप्तिकरणभूतम्, निरोधोऽविदुषाम्, ये अविद्वांसस्तेषां तेजसा निरोधजनकमिति तस्या अर्थात् । अतो विदुष एव रश्म्यनुसारित्वावधारणमित्यर्थः । अयं च करणग्रामसहितो गच्छति । 'यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारम् । अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च' इति श्रीभागवतोक्तन्यायस्यात्रापि शक्यवचनत्वात् । एतस्य करणग्रामलयस्तु प्रारब्धसमाप्तौ मुक्तिदशायां भूतेष्वेव बोध्यः । तथैवोपक्रान्तत्वादिति ॥ १८ ॥ इति षष्ठं रश्म्यधिकरणम् ॥६॥

रश्मिः ।

ष्मादादित्यात् प्रतायन्त' इत्यनयोक्त्वा । महापथशब्दः सप्तम्यन्तः । आतत इति च सप्तम्यन्तम् । **प्रतायन्त** इति । तनु विस्तारे इत्यस्य रूपम् । **तासामिति** । ता आसु नाडीषु सृप्ताः आभ्यो नाडीभ्यः प्रतायन्तेऽमुष्मिन्नादित्ये सृप्ता इत्यनयोक्त्वा । ता रश्मयः । **तास्विति** । 'तद्यत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति तन्न कश्च पाप्मा स्पृशति, तेजसा हि तदा सम्पन्नो भवती'त्यनयोक्त्वा । **श्रुतिः पठ्यते** इति । 'अथ यत्रैतदवलिमानं नीतो भवती'त्यवन्तरं 'तमभित' इत्यादिश्रुतिः पठ्यते । **अवलिमानं** अवलभावम् । **स्फुट** इति । **अस्मिन्नेवेति** । विदुष्येव । एवं स्फुटः । **तत्रेत्यादीति** । **अयमेवेति** । विद्वानेवेत्यवधारणमित्यर्थः । **चाहेति** । श्रुतौ पूर्वो चाकारः समुच्चयार्थक इति भावः । केन सह समुच्चय इत्याकाङ्क्षा तु 'ॐकारेणे'त्यादिग्रन्थेनोपशान्ता । **यथापूर्वमिति** । पूर्वं ध्यानविषयः तमनतिक्रम्य । **आहेत्यस्यार्थो वदतीति** । वा आह उद् वा मीयते इति श्रुतौ पदच्छेदः । **येऽविद्वांस** इति । य इति सामान्योक्त्या पुष्टा अपि । नाशपदं विहाय निरोधपदोपादानादविदुषां नाशः पुष्टानामधिकार्यादित्यप्रेरणया निरोधो निरोधलक्षणमन्योक्तः । भगवतोऽत्यन्तानुग्रहात् ॥ १८ ॥ इति षष्ठं रश्म्यधिकरणम् ॥ ६ ॥

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥१९॥ (४।२।७).

विदुष उत्क्रमणे हार्दानुग्रहकृतो यथा विशेषः, तथा कालविशेषकृतोपि विशेषो भविष्यतीत्याशङ्क्य तन्निरासमाह। तत्राहोरात्रकृतोऽयनकृतो वा स भवेत्। तत्राद्यकृतो नास्तीत्याह नेति। तत्र हेतुः । सम्बन्धस्येत्यादि। अनुग्रहहेतुभूतो यः पूर्वोक्तो गत्यनुस्मृतिसम्बन्धस्तस्य यावद्देहभावित्वात् तत्कार्यस्यानुग्रहस्यापि तथात्वात् कालस्याप्रयोजकत्वमित्यर्थः। अत्र प्रमाणमाह। दर्शयति यतः श्रुतिः। 'तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ती'ति ॥ १९ ॥

हार्दानुग्रहस्य मुक्तिहेतोर्विद्यमानत्वादयनविशेषोप्यप्रयोजक इत्याह।

भाष्यप्रकाशः।

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १९ ॥ इत्याशङ्क्येति। एवं निशि नेत्यनेनाशङ्क्य। तथा च निशीतिपदं मुक्तिप्रतिबन्धककालविशेषोपलक्षकम्। तत्र न आदित्यद्वारेण गमनम्। अतो ज्ञानिना मुक्त्यर्थं योगादिना कालः प्रतीक्षणीय इत्याशङ्केत्यर्थः। सिद्धान्तं व्याकुर्वन्ति अत्रेत्यादि। अर्थस्तु स्फुटः।

अन्ये तु, सम्बन्धस्य 'यावद्देहभावित्वा'दित्यत्र नाडीसम्बन्धस्य तथात्वं व्याकुर्वन्ति। 'दर्शयती'त्यत्र, 'अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता'इति छन्दोगश्रुतिं दर्शयति। तत्र यद्यपि पूर्वसूत्रोक्तं रश्म्यनुसारित्वमेव, 'निशि ने'त्यनेनाक्षिप्यत इति प्रतीयते, न तु कालविशेषनिषेधः, कालान्तरस्य सहकारित्वापादनं वा, तथाप्ययनसूत्रे रश्म्यभावशङ्कानुदयेन तत्रैतत्सूत्रोक्तस्य तत्परिहारहेतोरसङ्गत्या, 'अतश्चे'त्यतिदेशासङ्गतिरिति तत्र उदीक्षानुपपत्तेर्विद्याया अपाक्षिकफलत्वस्य मृत्योरनियतकालत्वस्य चेति कल्पितहेत्वन्तराध्याहारापेक्षया अतिदेशसामञ्जस्याय सम्बन्धपदे हार्दानुग्रहजनकगत्यनुस्मृतिसम्बन्धग्रहणस्यैव युक्तत्वाच्चिन्त्यम्। तथा च, 'रश्म्यनुसारि'सूत्रेपि स हेतुर्बोध्यः ॥ १९ ॥

रश्मिः।

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च ॥ १९ ॥ अत्रेत्यादीति। तत्राहोरात्रकृत इत्यपि भाष्ये पाठः। स्फुट इति। पूर्वोक्त इति। तदोकोग्रसूत्रोक्तः। यावदिति। साकल्ये। देहानां साकल्यं यावद्देहम्। अव्ययीभावः। यावद्देहं भावी यावद्देहभावीतत्त्वात्। 'को नु राजन्निन्द्रियवान् मुकुन्दचरणाम्बुजम्। न भजेत् सर्वतोमृत्युरुपास्यममरोत्तमै'रिति वाक्यात्। एवं स्फुटः। ता आस्विति। ता रश्मयः। आक्षिप्यते इति। नञर्थनिषेधप्रतियोगित्वेनाक्षिप्यते। रश्म्यभावेति। रश्म्यनुसारित्वनिषेधशङ्कानुदयेन। असङ्गत्येति। अर्थद्वारासङ्गतिस्तया। अतिदेशेति। हेत्वतिदेशासङ्गतिः। तत्र उदीक्षेति। अयनसूत्रे वक्ष्यमाणे 'अथापि रात्रावुपरतोऽहरागममुदीक्षेते'त्युक्तोदीक्षाऽहरागमोदीक्षा तस्या अनुपपत्तेः उत्तरायणोदीक्षासत्त्वात्। तथा विद्याया पक्ष उत्तरायणस्तत्सम्बन्धिपाक्षिकः, न पाक्षिकं फलं यस्याः सा अपाक्षिकफला तत्त्वस्य। तत्सम्बन्धि तदभिन्नं यत् हेतोः नाडीसम्बन्धस्य यावद्देहसम्बन्धित्वादित्यस्माद् अन्यत् तद्धेत्वन्तरं हेत्वन्तरद्वयम्। तदपेक्षया। अतिदेशेति। तथा च शङ्करभाष्यम्। अतश्चायन इत्यत्र। 'अत एव उदीक्षानुपपत्तेः अपाक्षिकफलत्वाच्च विद्याया' इति। तस्यातिदेशस्य साम-

अतश्चायनेपि दक्षिणे ॥ २० ॥

स्पष्टार्थमिदम् ॥ २० ॥

भाष्यप्रकाशः ।

अतश्चायनेपि दक्षिणे ॥ २० ॥ स्पष्टार्थमिति । चोऽवधारणे 'नेति चेन्ने'ति पूर्वसूत्रादनुवर्तते । तथा च 'दक्षिणेऽयने ने'ति चेन्नेति पूर्वपक्षस्य, 'अतश्चे'त्यनेनातिदिष्टस्य तत्परिहारहेतोश्च स्फुटत्वात्तथेत्यर्थः ॥ २० ॥

रश्मिः ।

ज्ञस्याय अत इति सौत्रातिदेशस्य वा सामञ्जस्याय। स इति। हार्दानुग्रहजनकगत्यनुस्मृतिसम्बन्धः। रश्म्यनुसारी विद्वानेव निष्क्रामति हार्दानुग्रहजनकगत्यनुस्मृतिसम्बन्धात् । अपरेषां तदोकोग्रज्वलनमेकसूत्रमधिकरणम् । अर्थस्तु न विरुद्धः । रश्म्यनुसारीत्यधिकरणं द्विसूत्रम् । अतश्चायनाधिकरणं द्विसूत्रमिति । 'अथैतैरेव रश्मिभिरूर्ध्वमुत्क्रामती'त्यत्र रश्म्यनुसारित्वमुक्तम्, तत्किमविशेषेणैवाह्नि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वम्, आहोस्विदह्न्येवेति संशये, अविशेषश्रवणादविशेषेणैव रश्म्यनुसारीति प्रज्ञायते इति रश्म्यनुसारिसूत्र उक्तम् । 'निशि नेति'सूत्रे अस्त्यह्नि नाडीरश्मिसम्बन्ध इति । अह्नि मृतस्य स्याद् रश्म्यनुसारित्वम्, रात्रौ तु प्रेतस्य न स्यात्, नाडीरश्मिसम्बन्धविच्छेदादिति चेत्, न, नाडीरश्मिसम्बन्धस्य यावद्देहभावीति । शिराकिरणसम्पर्कः । दर्शयति चैतमर्थं श्रुतिः । 'अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते, अतोऽमुष्मिन्नादित्ये सृप्ता' इति । तस्मादविशेषेणैवेदं रात्रिन्दिवं रश्म्यनुसारित्वमित्युक्तम् । अतश्चायनाधिकरणे द्विसूत्रे प्रथमे अत एव उदीक्षानुपपत्तेरपाक्षिकफलत्वाच्च विद्याया अनियतकालत्वाच्च मृत्योर्दक्षिणायनेपि म्रियमाणो विद्वान् प्राप्नोत्येव विद्याफलमित्युक्तम् । द्वितीये 'यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभे'ति कालप्राधान्येनोपक्रम्याहरादिकालविशेषः स्मृतावपुनरावृत्तये नियमितः । कथं रात्रौ दक्षिणायने वा मृतोनावृत्तिं यायादिति । अत्रोच्यते । 'योगिनः प्रती'ति । योगिनः प्रति चायमहरादिकालविनियोगोऽनावृत्तये स्मर्यते । स्मार्ते चैते योगसाङ्ख्ये । न श्रौते । अतो विषयभेदात् प्रमाणविशेषाच्च नास्त्यस्मार्तस्य कालनियोगस्य श्रौतेषु विज्ञानेष्ववतार इत्युक्तम् ॥ १९ ॥

अतश्चायनेपि दक्षिणे ॥ २० ॥ चोऽवधारण इति । अन्यभाष्याभिमतोयमर्थः । इदमधिकरणान्तरमिति शाङ्कराः, अतः 'पूर्वपक्षस्ये'ति वक्ष्यन्ति । भास्कररामानुजाचार्याणां तु नाधिकरणान्तरम् । अतो नात्राधिकरणसमाप्तिः कृता । अतः सन्दिग्धमधिकरणमिदम् । ब्रह्मविदो ब्रह्मप्राप्तिर्दक्षिणेऽयने भवति, उत हार्दानुग्रहमात्रेणेति सन्देहे पूर्वपक्षः दक्षिणेऽयनेपि न, किन्तु वेदान्तविज्ञानेनावरणभङ्गमात्रमिति चेत्, न । अतश्च अत एव । हार्दानुग्रहजनकगत्यनुस्मृतिसम्बन्धात् । अतो हार्दानुग्रहान्मुक्तिहेतोः पुष्टिस्थस्य मुक्तिः, दक्षिणायनादिकालोप्यप्रयोजक इत्यर्थः । ब्रह्मविद् यद्यपि ज्ञानमार्गी, तथापि भक्तावपि ज्ञानपदस्य गीतायां प्रयोगात् सुष्ठु । नारायणपरायणस्य दुर्लभत्वादेवमुक्तम् । एतदेवोक्तं तथा चेत्यादिना, अतश्चेत्यनेनेत्यादिना च । अनधिकरणत्वे तु, अतश्च अत एव निशि मृतस्यापि विदुषो दक्षिणेऽप्ययने मृतस्य ब्रह्मप्राप्तिः सिद्धा । विद्याकर्मसम्बन्धस्य यावद्देहभावित्वादिति रामानुजभाष्ये । किञ्च, अधिकाशङ्का तु, 'अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छती'ति दक्षिणायने मृतस्य चन्द्रप्राप्ति-

ननु 'यत्र काले त्वनावृत्ति'मिति कालप्राधान्येनोपक्रम्य 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना' इति भगवद्वाक्याद् ब्रह्मविदोऽप्युक्तकालापेक्षास्तीत्याशङ्क्य विषयभेदेन समाधत्ते ।

योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २१ ॥

ज्ञानमार्गाद् योगमार्गो हि भिन्नः । तथा च योगिनमुद्दिश्यैव कालविशेषस्य गतिविशेषहेतुत्वं स्मर्यते, न तु ज्ञानमार्गीयस्य श्रौतस्य । इतरनिरपेक्षत्वात् । न च योगसाङ्ख्ये अपि श्रौते एवेति वाच्यम् । यतः स्मार्ते एते । चो हेत्वर्थे । एते योगसाङ्ख्ये, 'अग्निर्ज्योतिर्धूमो रात्रि'रिति वाक्यद्वयोक्तगती वा । इदं तु

भाष्यप्रकाशः ।

योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २१ ॥ व्याकुर्वन्ति ज्ञानमार्गादित्यादि । तथा च मार्गभेदान्न कालविशेषापेक्षेत्यर्थः । साङ्ख्यस्य स्मृत्युक्तत्वेऽपि योगस्य न तथात्वम् । योगतत्त्वोपनिषदादौ तस्योक्तत्वात् । सूत्रे च योगिपदमात्रम् । अत एते इति पदे साङ्ख्यनिवेशनं न युक्तमित्यरुच्या पक्षान्तरमाहुः अग्निरित्यादि ।

नन्वेतयोर्गत्योरपि स्मार्तत्वं न युक्तम्, किञ्चिच्छब्दभेदेपि छान्दोग्योक्तदेवयानपितृयानयोरेव प्रत्यभिज्ञानात्, अतः कथमिदं समाधानमित्यत आहुः इदं त्वित्यादि । न विरोध इति । तस्मिन् कालद्वारा तत्तदभिमानिन्य आतिवाहिक्यो वा देवता मार्गद्वयगता उच्यन्ते, न तु काल इति तस्यात्राकथनाच्छ्रुतिस्मृत्योर्न विरोधः । तथा च यदि तत्र काल उच्यते, तदा तत्र

रश्मिः ।

श्रवणाच्चन्द्रमसं प्राप्तानां च तेषां 'तत्पर्यवैत्यथैतमेवाध्वानं पुनर्निवर्तन्त' इति पुनरावृत्तिश्रवणात् भीष्मादीनां च ब्रह्मविद्यानिष्ठानामुत्तरायणप्रतीक्षादर्शनात्तद्दक्षिणायने मृतस्य ब्रह्मप्राप्तिर्न संभवतीति । परिहारस्तु, अविदुषां पितृयानेन यथा चन्द्रमसं प्राप्तानामेव पुनरावृत्तिः विदुषस्तु चन्द्रं प्राप्तस्यापि, 'तस्माद्ब्रह्मणो महिमानमाप्नोती'ति वाक्यशेषात्तस्य दक्षिणायनमृतस्य चन्द्रप्राप्तिर्ब्रह्मप्रपित्सतो विश्रामहेतुमात्रमिति गम्यते । वाक्यशेषाभावेपि पूर्वोक्तादेव बन्धहेत्वभावाद्विदुषश्चन्द्रं प्राप्तस्यापि ब्रह्मप्राप्तिरनिवार्या । भीष्मादीनां योगप्रभावात् स्वच्छन्दमरणानां धर्मप्रवर्तनायोत्तरायणप्राशस्त्यप्रदर्शनार्थः, तथाविधाचार इति रामानुजभाष्ये । भास्करभाष्ये तु, अतश्चेत्यनेन नाडीरश्मिसम्बन्धस्य यावच्छरीरभावित्वादिति पूर्वसूत्रोक्तहेतुर्गृहीतः ॥ २० ॥

योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २१ ॥ भाष्ये । विषयभेदेनेति । योगमार्गरूपविषयभेदेन । प्रकाशे । योगतत्त्वेति । आदिना योगशिखा । अग्निरित्यादीति । 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः । धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् । तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते । शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते । एकया यात्यनावृत्तिमन्ययावर्तते पुन'रिति वाक्यानि । प्रत्यभिज्ञानादिति । छान्दोग्योक्ते एते गती इति प्रत्यभिज्ञानात् । तत्तेदन्ताप्रकारकं ज्ञानं प्रत्यभिज्ञा । सेयं दीपमालिकेतिवत् । इदं त्वित्यादीति । इदं ब्रह्मविदोप्युक्तकालापेक्षणम् । श्रुत्युक्तेति । योगमार्गमभिप्रेत्य । तस्मिन्निति । गीताग्रन्थे स्मृतौ । कालद्वारेति । दक्षिणायनोत्तरायणकालद्वारा

श्रुत्युक्तदेवयानपितृयानातिरिक्तमार्गमभिप्रेत्य समाहितम् । ते एव चेदत्राप्युच्येते शब्दभेदेन, तदा न विरोधः ॥ २१ ॥

इति चतुर्थाध्याये द्वितीयपादे सप्तममतोन्याधिकरणम् ॥ ७ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

भाष्यप्रकाशः ।

योगिन उपक्रान्तत्वाद् विषयभेदेनाविरोधः, यदि चैकविषयत्वम्, तदा अर्चिरादिश्रुताविवात्राप्यग्न्यादिशब्दैस्तत्तद्देवतालोकविशिष्टौ तावेव मार्गावुच्येते इत्युभयथापि न श्रुतिस्मृत्योर्विरोध इत्यर्थः । तेन विद्यावतो नान्यापेक्षेति सिद्धम् ॥२१॥ इति सप्तममतोन्याधिकरणम् ॥७॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य श्रीपीताम्बरात्मजस्य
पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥
समाप्तो द्वितीयः पादः ॥ २ ॥

रश्मिः ।

तस्यात्रेति । कालस्य अत्र छान्दोग्येऽकथनाद्विषयभेदाद् गतिस्मृत्योर्न विरोधः । तत्रेति । गीतास्मृत्योः । तत्रेति । पूर्ववदर्थः । विषयेति । ज्ञानयोगमार्गभेदेन । एकेति । प्रत्यभिज्ञयैकविषयत्वम् । अत्रापीति । गीतास्मृतावपि । ताविति । अर्चिरादिधूमादिमार्गौ । उभयथेति । विषयभेदविषयैक्यप्रकाराभ्याम् ॥ २१ ॥ ७ ॥ इति सप्तममतोन्याधिकरणम् ॥ ७ ॥

इति श्रीविट्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण
सम्पूर्णवेत्ता विट्ठलरायजिद्गात्रीयगोकुलोत्सवात्मजगोपेश्वरजिता
कृते भाष्यप्रकाशस्य रश्मौ चतुर्थाध्यायस्य
द्वितीयः पादः सम्पूर्णतामगमत् ॥ ४ ॥
समाप्तो द्वितीयः पादः ॥ २ ॥

Editors' Note.

We are glad to be able to put before the public this fifth volume of भाष्य-प्रकाश-रश्मि containing the प्रथम and द्वितीय पाद of चतुर्थाध्याय. श्रीपुरुषोत्तमजी states in प्रकाश on ३. २. ३४ 'इत आरभ्य प्रभूणामिति प्रतिभाति.' The internal evidence of the difference in language is sufficient by itself to convince the reader that the author of this portion is different from the author of the previous portion. Again, the interpretation of जगद्व्यापारवर्जम् (४. ४. १७) given here is different from the one suggested in सुबोधिनी on ३. ४. १२. which is as follows :—'उत्सृजन्तमित्यनेन त्यजन्तमूर्ध्वं सृजन्तं चेत्यर्थद्वयं विवक्षितम्। तेन यागप्रयोजनं भक्तावश्च एकरूपो भवति। भक्तावेप्येतद् द्वयं कर्तव्यम्, गुप्ततया स्थित्वा विश्वजननं सर्वलोकपरित्यागश्च। तज्जन्मनश्वरमत्वादेव परित्यागः सिद्धः। भक्तावेन जगज्जननमवशिष्यते। तत्र मत्सायुज्ये जगज्जननमन्यथासिद्धं भवति, एकीभावश्रुतेः। यथा सर्वासामपां समुद्र एकायनम्, इति। भिन्नतया ब्रह्मभावे जगद्व्यापारवर्जमितिन्यायाच्च जगत्कर्तृत्वम्। अतः सर्वाविरोधेन भक्तावेन जगज्जननं यथा सिध्यति तथा वक्ष्यामि।'. Here जगद्व्यापार is clearly used in the sense of जगत्कर्तृत्व. In भाष्य ४. ४. १७. we find as under :—ब्रह्मणा सह भोगकरणं लौकिकव्यापारयुतमुत नेतिसंशये तद्युतमिति पूर्वः पक्षः। तथा सति मुक्तित्वभङ्गात् पूर्वोक्तमनुपपन्नम्, इति प्राप्ते, आह जगदित्यादि। पूर्वोक्तस्य जगत्सम्बन्धी लौकिको यो व्यापारः कायवाङ्मनसां तद्वर्जं तद्रहितं भोगकरणम्। तत्र हेतू आह प्रकरणादसंनिहितत्वाच्चेति। ब्रह्मविदाप्नोति परमित्युपक्रमेण मुक्तिप्रकरणात् तत्र लौकिकव्यापारोऽसम्भावितः। लीलायाः कालमायाद्यतीतत्वेन प्राकृतं जगद्दूरतरम्, इतोपि हेतोर्न तत्संभवः। Here the question discussed is whether the भोगकरण mentioned in the श्रुति 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' is लौकिक, and प्राकृत, or जगद्व्यापारवर्जम्, *viz.* अलौकिक. If the author were one and the same, he would have at least given both the meanings.

If there is any doubt still left in the mind of any one, it is set at rest by the हस्ताक्षर copy of the भाष्य of श्रीविठ्ठलेश्वर now at श्रीनाथद्वार. It contains a few pages of तृतीय अध्याय, and the whole of चतुर्थाध्याय with some breaks. When our late Editor Mr. Mulchandra went to श्रीनाथद्वार, he compared a copy of the Calcutta Edition of the अणुभाष्य with it, and brought the corrected copy with him to Bombay. But at the time of printing, we compared it with five old copies of भाष्य, and many doubts were raised, and hence we requested तिलकायित श्रीगोवर्धनलालजी and श्रीदामोदरलालजी, and they were kind enough to arrange to send the हस्ताक्षर copy to Bombay for a fresh comparison. Thus we got one more opportunity of comparison and some more corrections were made. We have thus got an unique opportunity of publishing all the three works भाष्य, प्रकाश and रश्मि with the help of original manuscripts, and we have done our work with utmost delight, as well as greatest care and devotion

The हस्ताक्षर copy had to be returned, but we find that it is necessary to have it here for ready reference. We have again requested श्रीदामोदरलालजी, and he has promised to send it.

Now, what are the facts found on a careful examination of the हस्ताक्षर copy? We find that the leaves of the manuscript are divided into separate groups. A slip of paper is attached round each group, and on each of these slips are mentioned the portions of भाष्य which they contain. The hand-writing on these slips we find to be of श्रीपुरुषोत्तमजी, and we immediately perceive that 'इत आरभ्य प्रभुणा' was written by him after a careful examination of the हस्ताक्षर manuscript itself, and our soul does homage to his genius, faculty for research, his carefulness and service to साम्प्रदायिक literature. We know that besides this भाष्य, he has also found and preserved the पाण्डुलेख of श्रीटिप्पणी, and he has traced one leaf of पत्रावलम्बन in श्रीवल्लभाचार्य's हस्ताक्षर. Let us now remove the slips of paper, and turn to चतुर्थाध्याय. The first page is written on both the sides as usual, and let us put it aside for a moment and take the second page. It is peculiar and immediately draws our attention. It was originally numbered १, which is subsequently changed into २. On one side only a few lines are written as under :—

श्रीगोपीजनवल्लभाय नमः ॥ आवृत्तिरसकृदुपदेशात् ॥ श्रुतिर्हि कर्मज्ञानभक्तीः हीनमध्यमोत्तमाधिकारिणः प्रति क्रमेण कर्तव्यत्वेन ~~निरूपयिष्यन्ती~~ । तत्राद्यस्या (चित्तशोधकत्वेन ज्ञानस्य पुरुषोत्तमप्राप्तौ स्वरूपयोग्यतासंपादकत्वेन भक्तेः) (~~साक्षात् पुरुषोत्तमप्रापकत्वेन साधकत्वमिति तृतीयेऽध्याये बादरायणेन तत्तात्पर्यं निर्णीतं~~ । अथ तुरीयेऽध्याये तत्तत्फलस्वरूपं निर्णीय) (ते । तत्र कर्मसामान्यं चित्तशोधकमुत तद्विशेष इति संशये विहितत्वाविशेषात्तत्सामान्यं त) दौ फलमुच्यते । आवृत्तिरसकृदिति । जन्मप्रवाहः कर्ममार्गस्य फलं । तत्र हेतुरसकृदुपदेशादिति । आवृत्याऽसकृत्पदमुभयत्रापि संबध्यते ।

This is the beginning of the चतुर्थाध्याय, and we find that the author's thoughts were not quite settled, so he made changes again and again and then left it, and he turned over to the other side of the page and began writing and he wrote as under :—

आवृत्तिरसकृदुपदेशात् । श्रुतिर्हि कर्मज्ञानभक्तीः साक्षात्परंपराभेदेन पुरुषार्थसाधनत्वेन हीनमध्यमोत्तमाधिकारिणः प्रति कर्तव्यत्वेन प्रतिपादयति । तत्र &c. The reader will find that this is from the beginning of the second interpretation of the first two सूत्रs of चतुर्थाध्याय. He began here and went on till the end. So, what is second interpretation (प्रकारान्तरेण सूत्रार्थ उच्यते) was the only interpretation when first written.

Now let us look at the first page. It begins as under :—'श्रीकृष्णाय नमः ॥ समन्वयेनाविरोधात् साधनैर्ब्रह्मविचारे । तस्याभिमव्यवस्था या' &c. All the कारिकाs are written in running lines. After the कारिकाs are over, we find 'अस्य फलप्रकरणत्वेपि साधनरूपस्यापि श्रवणस्यांतरंगत्वं ज्ञापयितुं तन्निर्धारमप्याह ॥ ॥ आवृत्तिरसकृदुपदेशात् ॥ आत्मा वारे' &c. The last lines on the first page are as under:—'तथापि शाब्दक्रमादार्थक्रमो बलीयानिति न्यायादृष्टव्य इति प्रथम पक्षात्संबंधे सूत्ररीतिर्नावसरं प्राप्नोतीति प्रकृतविचारस्य फलप्रकरणासंगतत्वमापततीति प्रकारान्तरेण सूत्रार्थ उच्यते ॥' Here ends the first page. The reader will find that all this is exactly as we find in the present manuscripts, and we cannot but come to the conclusion that the whole of the first page containing the कारिकाs and the first interpretation of the two सूत्रs is subsequently added.

This leads us to the further question as to whose these कारिकाs are? Whether they were composed by श्रीवल्लभाचार्य, and श्रीविठ्ठलेश्वर having found them subsequently, incorporated them in his own work, or whether they are the composition of श्रीविठ्ठलेश्वर himself? In सुबोधिनी on ३. २५. ३३. we find as under:—पञ्चाग्निविद्यायां ज्ञानोपयिकदेहसिद्धिर्निरूपिता, तस्मिन् देहे ज्ञाने जाते मुक्तिर्भवतीति तस्य च ब्रह्मविदो 'जीवतो म्रियमाणस्य गच्छतः सङ्गतस्य च' व्यापारा निरूपिताः । सद्योमुक्तावपि सायुज्यं निरूपितम् । The words जीवतो म्रियमाणस्य गच्छतः च are repeated in the second कारिका, and hence the doubt. Our opinion is that the words as well as the thought expressed therein are both very common, and at the most, they may have acted as मार्गदर्शक, but the language of the कारिकाs is quite different from that of the कारिकाs of श्रीवल्लभाचार्य, which are very concise. We therefore think that the whole is the composition of श्रीविठ्ठलेश्वर himself. In श्रीटिप्पणी also we have seen that the मङ्गलाचरणं is added subsequently.

This is फलाध्याय, and the फल that is realised by ब्रह्मविद्, while he is living, is described in प्रथमपाद, his state while dying is described in द्वितीयपाद, his state in the journey is described in तृतीयपाद, and the final condition is described in चतुर्थपाद. The फल varies in मर्यादामार्ग and पुष्टिमार्ग, as well as in कर्म, ज्ञान and भक्तिमार्ग. A very lucid analysis of the whole is given by श्रीपुरुषोत्तमजी in वेदान्ताधिकरणमाला, and hence we refrain from repeating the same here.

We tender our heart-felt thanks to all those who have helped us in our work, and with feelings of joy we offer this fruit of our labour of love at the Lotus Feet of Lord S'rī Krishṇa.

2214

Dhirajlal Varajdas Sankalia.
Jamnadas Kanji Morparia.
Hiralal Mulji.
Govardhandas Pragji.
Purshottam Kanji Morparia.

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसम्पूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिचरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

चतुर्थाध्यायस्य तृतीयचतुर्थपादौ ।

'भगवद्धर्मपरायण सद्गत श्रेष्ठि गोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसङ्ग्रहतः 'प्राप्तभगवत्पद
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्एल्. बी.,
वकील, हाइ कोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४५१. संवत् १९८५.

मूल्यं मुद्रिकात्रयम् ।

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ चतुर्थोऽध्यायः ।

तृतीयः पादः ।

अर्चिरादिना तत्प्रथितेः ॥ १ ॥ (४-३-१)

ननु ज्ञानमार्गीयस्येव मर्यादामार्गीयभक्तस्याप्यर्चिरादिमार्गेणैव गमनम्, उत सद्योमुक्तिरेव[1] भवति संशयः । तत्र यथा ज्ञानिनो नियमाभावः, तथात्रापीति प्राप्ते आह । अर्चिरादिमार्गेण तस्य ज्ञानमार्गीयस्यैवोत्कर्षकथनात् स एव तेन मार्गेण गच्छति, न तु भक्तोपीत्यर्थः ।

भाष्यप्रकाशः ।

अर्चिरादिना तत्प्रथितेः ॥ १ ॥ पूर्वस्मिन् पादे प्रथमतः पुष्टिमार्गीयस्य ततो मर्यादामार्गीयस्य सद्योमुक्तिप्रकारो दर्शितः, तदनु क्रममुक्तौ निर्गमनद्वारादिकं च दर्शितम्, इह तु ततो निर्गतस्य यो ब्रह्मप्राप्तिमार्गो ब्रह्मलोकस्तत्प्रकारश्च प्रदर्श्यते, तत्राधिकरणमवतारयितुं संशयादिकमाहुः नन्वित्यादि । अत्र मर्यादायाः स्वकृतत्वात् तत्पालनं भक्तेर्ज्ञानादुत्कृष्टत्वं च सन्देहबीजम् । नियमाभाव इति । साधनसामर्थ्यतारतम्यनियमाभावः । सिद्धान्तं वक्तुं सूत्रं विवृण्वन्ति अर्चिरादीति । तस्येत्यादि । 'प्रथ प्रख्याने', प्रथनं प्रथितिः प्रसिद्धिः । सा श्रुतिषु तस्यैव ज्ञानमार्गीयस्यैवेति तस्यैव तथेत्यर्थः । ज्ञानिन एव प्रसिद्धिरिति यदुक्तम्, तद् व्युत्पादयन्ति

रश्मिः ।

अर्चिरादिना तत्प्रथितेः ॥ १ ॥ पूर्वस्मिन् पादे इति । द्वितीयपादे । निर्गमनेति । तदोकोग्रज्वलनाधिकरणे निर्गमनद्वारादिकम्, आदिना रश्म्यनुसारित्वादिकम् । ब्रह्मलोक इति । 'वेदान्तविज्ञानसुनिश्चितार्था' इति श्रुतेर्ब्रह्मविदो विश्रामस्थानम् । संशयादिकमिति । आदिना पूर्वपक्षोत्तरे सङ्गतिश्च । भाष्ये । तत्र यथेति । संशये यथा । नियमाभावः सद्योमुक्त्यर्चिरादिमार्गयोः तथा । तथात्र सद्योमुक्त्यर्चिरादिमार्गयोः भक्तस्य नियमाभावः । प्रकृते । साधनसामर्थ्येति । अत्र साधनतारतम्यादित्येतावतैव चारितार्थ्ये सामर्थ्यपदं ज्ञापयति । सद्योमुक्तिक्रममुक्त्योः सायुज्यं सह युनक्तीति सयुक् सयुजो भावः सायुज्यमित्येवं यौगिकपदार्थं जीवब्रह्मणोः प्रथमपादे निरूपितम् । द्वितीयपादे तत्प्रकारादिर्दर्शित इति प्रकाश उक्तम् । तत्र भक्तिमार्गीयसायुज्या-

---

[1] भवतीति पाठः ।

तथाहि । पञ्चाग्निविद्याप्रकरणे 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्ष'मित्यत्र उपक्रमे भक्तातिरिक्तानेव अधिकृत्य तथा गतिरुच्यते । स्मृतावपि 'अग्निर्ज्योतिरहः शुक्ल'इत्यत्र 'ब्रह्मविदो जना' इति वचनेन ज्ञानमार्गीयस्यैव स पन्था इत्युच्यते ।

अथेदं चिन्त्यते । सामोपनिषत्सु पठ्यते 'अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल' इत्युपक्रम्यादित्यरूपस्य पिङ्गलस्य रश्मिरूपत्वं नाडीनामुक्त्वा, अग्रे वदति 'अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमत' इति नाडीरश्मिसम्बन्धेनैका परलोकगतिः श्रूयते । अर्चिरादिका चाऽन्या, 'तेर्चिषमभिसम्भवन्त्यर्चिषोऽह'रित्यादिश्रुत्युक्ता । 'स एनं देवयानं पन्थानमापद्याग्निलोकमागच्छती'ति चापरा । 'स यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छ-

भाष्यप्रकाशः ।

तथाहीत्यादि । भक्तातिरिक्तानेवाधिकृत्येति । 'इत्थं विदु'रित्यादिना क्रियाविषयस्य क्रियायाश्च श्रावणात् 'ये' इत्यनेन तानेवाधिकृत्य । तथा च मर्यादामार्गीयाणामपि भक्तानां प्रायशः सद्योमुक्तिरेव । ज्ञानमार्गीयस्यैवानियम इत्यर्थः ।

ननु भवत्वर्चिरादिमार्गेण ज्ञानमार्गीयस्य गतिः, तथापि मर्यादाभक्तस्य प्रायशः सद्योमुक्तिरेवेति न नियन्तुं शक्यते, श्रुतावर्चिरादिमार्गातिरिक्तानामपि मुक्तिमार्गाणां श्रावणात्, तथा बहूनां सत्त्वेपि सूत्रकृतार्चिरादिमार्ग एव कस्मादुक्त इति चाशङ्कायामाहुः अथेदमित्यादि । तान् मार्गान् विषयीकृत्य तेषां भेदोऽस्ति परस्परम्, उत नेति चिन्त्यत इत्यर्थः । एवं प्रतिज्ञाय मार्गबोधिकाः श्रुतीरुदाहरन्ति सामेत्यादि । पठ्यत इति । विद्याभेदेन गतिभेदः पठ्यते । श्रूयत इति । दहरविद्यायां श्रूयते । अन्येति । पञ्चाग्निविद्यास्था । अपरेति । कौशीतकि-

रश्मिः ।

दिषु सेवाफलोक्तेषु सायुज्यं गतपादयोर्निरूपितम्, अलौकिकसामर्थ्यमत्र निरूप्यत इति । तदातिवाहिकाधिकरणभाष्ये 'ब्रह्म अमानवः पुरुषः प्रापयती'ति वक्ष्यते तथा चामानवपुरुषस्य भक्तिमत्त्वं वक्तव्यम्, भक्ताधीनत्वाद्भगवतः । भक्तिभावे तु अलौकिकं सामर्थ्यं वक्तव्यम्, शूरत्वलक्षणं 'अशूरेणापि कर्तव्यं स्वस्यासामर्थ्यभावना'दित्याचार्यवाक्यात् । चतुर्थपादेऽलौकिकदेहो वैकुण्ठादिषु निरूपयिष्यते । सेवाफलानां त्रयाणां सगुणत्वापादकानां सन्दिग्धत्वात् । एवञ्च, सालोक्यादिवाक्ये प्रतिलोमक्रमेणैकत्वं प्रथमद्वितीयपादयोर्निरूप्य तृतीये सारूप्यस्य स्पष्टत्वात् सार्ष्टिरूपालौकिकसामर्थ्यं निरूप्यते । तदनु चतुर्थपादे सालोक्यं निरूपयिष्यते । सामीप्यं सालोक्यभेदः । सार्ष्टिः 'ऋष गतौ' । तु. । प. । से. । क्त्वाप्रत्यये नेट्, क्तिनि नेट् । समाना ऋष्टिः गतिः सार्ष्टिः । समानस्य सः । प्रथप्रख्याने भाष्ये प्रथमकथने ज्ञानिनि । तथेति । उत्कर्षकथनादित्यादिः । तथाहीत्यादीति । अह्न इति पञ्चम्यन्तम् । आपूर्यते किरणैश्चन्द्र इत्यापूर्यमाणपक्षः शुक्लः पक्षः तम् । क्रियाविषयस्येति । प्रेतस्य क्रियायाः श्रद्धातपउपासनक्रियायाश्च श्रावणात्, 'इत्थं विदु'रित्यत्र ज्ञानविषयत्वेन क्रियाविषयस्य प्रेतस्य 'ये चेमेऽरण्य' इत्यत्र क्रियायाः श्रावणात् । तानेवेति । 'इम' इति प्रत्यक्षविषयाणामुक्तेरेवकारः । भक्तानामुक्तोभयाभावात् प्राधान्येन । भाष्ये । ब्रह्मविद इति । क्वचिदेव कार्यवशाज् ज्ञानं भक्तिरिति व्याक्रियत इति भावः । प्रकृते । सामे-

ती'ति चेतरा । 'सूर्यद्वारेण ते विरजाः प्रयान्ती'ति चान्या । एवमनेकेषु मार्गेषु सत्स्वर्चिरादेरेवोक्तिः कुत इति । तत्र सर्वेषां पारिभाषिकमर्चिरादित्वम्, अत एव 'अथैतयोः पथोर्न कतरेण च ने'ति मार्गद्वयभ्रष्टानामतिकष्टं 'जायस्व म्रियस्वेति तृतीयं स्थान'मित्युक्तम्, अन्यथानेकेषां मार्गाणामुक्तानां श्रूयमाणत्वादस्य तृतीयत्वं नोच्येत, अतः प्रकरणभेदाद्भिन्नोपासनशेषत्वान्मिथोऽनपेक्षा भिन्ना एवैते मार्गा ब्रह्मप्रापका इति मन्तव्यमिति चेत् ।

तत्रोच्यते । न हीयं परिभाषा सर्वेषु श्रुतास्ति, यतस्तथोच्येत । अतो लाघवादनेकपर्वविशिष्ट एक एव मार्ग इति मन्तव्यम्, न तु पर्वभेदेन मार्गभेद इति । गौरवप्रसङ्गात् । न चैवम् 'अथैतैरेव रश्मिभि'रित्यवधारणानुपपत्तिरिति वाच्यम् ।

भाष्यप्रकाशः ।

ब्राह्मणे पर्यङ्कविद्याख्या । इतरेति । बृहदारण्यकेऽनात्मोपासनगतिफलकथने । एवमन्यापि पञ्चमी प्रथममुण्डकसमाप्तौ द्रष्टव्या । एवं मार्गभेदबोधिकाः श्रुतीरुपन्यस्य सूत्रेऽर्चिरादेरेवोक्तौ हेतुं निश्चेतुं पृच्छति एवमित्यादि । स्वयं हेतुं कल्पयित्वा वास्तवैकत्वस्य हेतुत्वं दूषयति । तत्रेत्यादि । अर्चिराद्युक्तिहेतुविचारे । सर्वेषां मार्गाणामर्चिरादित्वं पारिभाषिकम्, मुक्तिमार्गा अर्चिरादिपदेन व्यवहर्तव्या इति साङ्केतिकनियमसिद्धम्, न तु वास्तवम् । अतः पारिभाषिकत्वादेव हेतोः 'अथैतयोः पथो'रिति द्वित्वम्, 'जायस्वे'त्यस्य तृतीयस्थानत्वं च श्रुतावुक्तम् । अन्यथा वास्तवेऽर्चिरादित्वे बहूनामुक्तानां मार्गाणां ब्रह्मप्रापकतया श्रूयमाणत्वादस्य तृतीयत्वं पथोरिति द्वित्वं च नोच्येत । अतस्तृतीयत्वादिपीडारूपाद्धेतोस्तेष्वर्चिरादित्वं पारिभाषिकमङ्गीकृत्योक्तहेतुद्वयाद् ब्रह्मप्रापका मार्गा बहव एवेति मन्तव्यमित्यर्थः ।

एवं पूर्वपक्षी स्वमतमुक्त्वा तत्रैकदेशिकृतं समाधिं प्रतिक्षेप्तुमुपक्षिपति तत्रोच्यत इत्यादि । तथोच्येतेति । पारिभाषिकत्वमुच्येत । अतो लाघवादिति । पारिभाषिकत्वेनार्चिरादित्वस्य वक्तुमशक्यत्वात् पर्वप्रत्यभिज्ञानलिङ्गेन मार्गैक्याङ्गीकारे लाघवात् । गौरवप्रसङ्गादिति । मार्गाणामनेकत्वं तेषु पर्वन्यूनाधिक्येन कस्यचिन्निकटत्वम्, कस्यचित् दूरत्वम्, निकटमार्गत्यागेन दूरमार्गगमने उपपत्तिकल्पनम्, निकटत्यागे चोपपत्तिकल्पनमित्येवं तथात्वादित्यर्थः । पुनर्मार्गानेकत्वमाशङ्क्य निषेधति न चैवमित्यादि । एवमिति । मुक्तिमार्गस्यैकत्वे ।

रश्मिः ।

त्यादीति । बहुवचनं स्मार्तम् । यथाहुः 'इति श्रीभगवद्गीतासूपनिषत्सु' इति । अत एवेति भाष्यविवरणम् । अत इति । श्रुताविति । पञ्चाग्निविद्याप्रकरणे छान्दोग्ये 'अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति । जायस्व म्रियस्वेत्येतत्तृतीयꣳ स्थान'मिति श्रुतौ । श्रुत्यर्थस्तु कतरेण चेति प्रश्नः । नकारद्वयस्य न यान्त्यपि नेति शेषेण योजना । यद्वा एतयोः पथोः न कतरेण नेति प्रश्नः । उत्तरम् । तानीमानीति तृतीयस्थानमिति । अन्यथेति भाष्यविवरणे । अन्यथेति । उक्तेति । 'अर्चिरादिने'ति सौत्रपदोक्तहेतुद्वयात् । वास्तवपारिभाषिकहेतुद्वयात् । पारीति । पारिभाषिकत्वमुच्येतेति पाठः । न तूच्यत इति पाठः । पर्वप्रतीति । तानि पर्वाणीति प्रत्यभिज्ञानलिङ्गेन । पर्वन्यूनेति । पर्वन्यूनत्वे कस्यचित्फलस्य निकटत्वं पर्वाधिक्ये फलस्य दूरत्वम् । उपपत्तीति । अधिकाररूपोपपत्तिकल्पनम् । तथात्वादिति । गौरवप्रसङ्गात् । एकत्व इति । एतैरेव रश्मिभिरन्यमार्गेष्वूर्ध्वं आक्रमत

तस्याः श्रुतेरुत्क्रमणमात्रमार्गनिरूपकत्वात् । तथाहि । तत्रोपक्रमे हि 'अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमत' इत्युच्यते । एतस्मात् पुरस्तात् 'अथ या एता हृदयस्य नाड्य' इत्युपक्रम्य पिङ्गलस्यादित्यत्वमुक्त्वा, 'तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ता' इत्यन्तेन वाक्येन नाडीषु रश्मिप्रचारमुक्त्वा, अग्रे 'अथ यत्रैतदस्मा'दित्याद्युक्तम् । उपसंहारे च 'शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका, तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ती'ति । एवमुपक्रमोपसंहाराभ्यामुत्क्रमणमात्रमार्गनिरूपकत्वम्, न तु ब्रह्मप्रापकमार्गस्य, अतस्तदनुपपत्तिपरिहारोऽनर्थकः । नन्वनेकपर्वविशिष्टत्वेन मार्गस्यैकत्वे तं निरूपयन्ती श्रुतिः क्वचित् किञ्चित् पर्व निरूपयति, क्वचिन्नेति कथम् । उपसंहारेण प्राप्स्यन्त इति तात्पर्येण तथेति चेद् ब्रवीषि, तदा शाखान्तरमविदुषस्तदसम्भवेन तं प्रति श्रुतेर्न्यूनतापातः । न हि सर्वशाखाविदं प्रत्येव कथनमिति वक्तुमुचितम् । तस्यासम्भवात् । अतः स्वस्वशाखाज्ञानवन्तं प्रत्येव तथा । अध्ययनविधेरपि तावन्मात्रपरत्वात् ।

भाष्यप्रकाशः ।

निषेधे हेतुः । तस्या इत्यादि । तत्रेति । रश्मिवाक्ये । हिर्हेतौ । इत्युच्यत इति । शरीरादुत्क्रम उच्यते । नन्वेतस्मात् पूर्वं रश्मिनाडीप्रचारकथने महापथदृष्टान्तेन तासां मार्गत्वमपि बोध्यत इति नैवं वक्तुं युक्तमित्याशङ्कायामाह एतस्मात् पुरस्तादित्यादि । तथा च महापथदृष्टान्तेऽप्यन्ते, 'एतस्मा'दित्यादिनोत्क्रान्तिरेवोक्तेति तन्मार्गत्वमेव तासां युक्तमित्यर्थः । युक्त्यन्तरमाह उपसंहारे चेत्यादि । एतदेव निगमयति एवमुपक्रमेत्यादि । तदनुपपत्तिपरिहार इति । ब्रह्मप्रापकमार्गत्वानुपपत्तिपरिहारः । एवमेकमार्गत्वे साधिते तद् दूषयितुं पर्वोक्तिप्रकारे पृच्छति नन्वित्यादि । समाधिमुद्भाव्य दूषयति उपसंहारेणेत्यादि । तस्यासम्भवादिति । वेदानामनन्तत्वेनेदानीं कलिकृतबुद्धिह्रासेन च सर्वशाखावित्त्वस्यासम्भवात् । एतदुपष्टम्भायाह अध्ययनेत्यादि । स्वस्यासाधारणत्वेन पितृपितामहादिपरम्पराप्राप्ता शाखा स्वाध्याय इति योगस्य सर्वै-

रश्मिः ।

इत्यवधारणानुपपत्तिरित्यन्वयः । निषेध इति । न च वाच्यमिति निषेधे । हिर्हेताविति । यस्मादित्यर्थः । श्रुतिस्त्वथ यत्रेत्यादिः । नैवमिति । मुक्तिमार्गस्यैकत्वं न । महापथेति । श्रुतिस्तु पूर्वं व्याख्याता । तन्मार्गत्वमुत्क्रमणमार्गत्वम् । पर्वोक्तीति । विषयसप्तमी । पर्वोक्तप्रकारविषयकः प्रश्नानुकूलो व्यापारः । तथा च पर्वोक्तिप्रकार इति प्रश्नस्य विषयपूरक इति नैकदेशान्वयः । अनन्तत्वेनेति । 'अनन्ता वै वेदा' इति श्रुतेः । कलिकृतेति । द्वादशस्कन्धे कालेनाग्रहणं दृष्ट्वेति । भाष्ये । तथेति । निरूपणम् । प्रकृते । स्वस्यासाधारणत्वेनेति । 'स्वाध्यायोध्येतव्य' इत्यध्ययनविधौ स्वाध्यायपदार्थः सायणीयानुसारेणोक्तः । अत उक्तं सर्वैरिति । सुष्ठु आसमन्ताद्ध्यायः स्वाध्याय

शाखान्तरसंवादिपर्वकथनानुपपत्तिश्च । उपसंहारेणैव तस्यापि प्राप्तिसम्भवात् । अतो विरुद्धदिक्कानां स्वस्वमार्गेणैकग्रामप्राप्तिवदिहापि भवितुमर्हति स्वातन्त्र्येण सर्वैर्मार्गैर्ब्रह्मप्राप्तिः । न चैवम् 'अथैतयोः पथो'रिति द्विवचनानुपपत्तिः, 'जायस्व म्रियस्वे'त्यस्य तृतीयत्वं चानुपपन्नमिति वाच्यम् । अर्चिरादिकमुक्त्वा 'उपसंहरति 'एष देवयानः पन्था' इति, श्रुत्यन्तरे च, 'स एनं देवयानं पन्थानमापद्याग्निलोकमागच्छती'ति । तथा च ब्रह्मप्रापकाः सर्वे मार्गा देवयाना इत्युच्यन्ते । 'दैवी सम्पद्विमोक्षाये'ति भगवद्वाक्यादैव्यां सम्पदि ये जाताः, ते देवा इत्युच्यन्ते तेषां यानं गमनं यत्रेति ते सर्वेपि मार्गा देवयानशब्देनोच्यन्ते । द्वितीयस्त्वविशिष्टः । एवं द्वित्वं त्रित्वं चोपपद्यते । न चोक्तरीत्या लाघवादेक एव स मन्तव्यः । स्वतःप्रमाणभूता हि श्रुतिः । सा येन यदा या श्रुता, तदर्थावधारणे द्वितीयस्या अनुपस्थितत्वान्न लाघवगौरवतद्विचारावसरः । क्वचिदुपस्थितौ चोक्तबाधकैरुपसंहारानवकाशः ।

अपरं च । ब्रह्मविदः क्रममुक्तौ गन्तव्यो मार्गो ह्ययमुपदिश्यते । तत्तल्लोके तदानन्दानुभवश्चावश्यकः । तथा चोपासनभेदात् फलभेदस्यावश्यकत्वान्मार्गभेदोपि तथेति सर्वेष्वेकरूपफलप्रसञ्जक उपसंहारो न युक्तः । किञ्च । उपासने

भाष्यप्रकाशः ।

रादृतत्वेन शाखाप्रणयनस्य च तदर्थत्वेन तथात्वात् । उपसंहारेणैव तस्यापि प्राप्तिसम्भवादिति । उपसंहारे हि प्रयोजको वस्त्वभेदः, प्रयोजनाभेदश्च । तस्योभयसत्तया कृते उपसंहारे तेनैवानुक्तपर्वप्राप्तिसम्भवात् । एवं तदुक्तं दूषयित्वा स्वमतं स्थापयति अतो विरुद्धदिक्केत्यादि । द्विवचनाद्यनुपपत्तिं परिहरति न चेत्यादि । उपपद्यत इत्यन्तम् । लाघवं दूषयति न चोक्तेत्यादि । येनेति । यच्छाखाध्यायिना । बहुशाखाध्यायिनोऽनेकमार्गोपस्थितौ दोषतादवस्थ्यमाशङ्क्य परिहरति क्वचिदित्यादि । उक्तबाधकैरिति । अध्ययनविधेः स्वशाखाध्ययनमात्रपरत्वम्, तदध्येतुस्तावन्मात्रकरणे सर्वशास्त्रार्थकरणपूर्तिः, शाखान्तरसंवादिपर्वकथनानुपपत्तिश्चेत्येवंरूपैः ।

एवं परोक्तं परिहृत्य स्वोक्तौ युक्तिमाह अपरं चेत्यादि । आवश्यक इति । तदर्थमेव तत्कथनात् पुराणे तथा प्रसिद्धेश्चावश्यकः । तथेति । आवश्यकः । एवं स्वमतं स्थापयित्वा उपसंहारपक्षे बाधकमप्याह किञ्चेत्यादि । ननूपासने फलभेदजनकः प्रकारभेद उपसंहारप्रयोजकः

रश्मिः ।

इति स्वमते पत्रावलम्बने प्रकाशे च जिज्ञासाधिकरणे । तदर्थत्वेनेति स्वाध्यायार्थत्वेन । तथात्वादिति । तावन्मात्रपरत्वात् स्वशाखाध्ययनमात्रपरत्वात् । उपसंहार इति । एकवस्तुप्रतिपादकचरमवर्णध्वंस उपसंहारस्तस्मिन् । प्रयोजनेति प्रयोजनमर्थनिर्णयः, तस्य संजातविरोधिन उपक्रमाद् भेदः, असंजातविरोधित्वेनापि भेदः । तस्येति अभिन्नवस्तुनः । उभयसत्तया वस्त्वभेदसत्तया अर्थनिर्णयसत्तया च । तेनैवेति उपसंहारेणैव, न तु शाखान्तराध्ययनेन । विरुद्धदिक्कानामिति । यथा पूर्वादिदिक्कानां एकस्य श्रीगोवर्धननाथद्वारस्य प्राप्तिः । न चेत्यादीति । द्वितीय इति धूममार्गः । अविशिष्टो मार्गान्तराविशिष्टः । पुराण इति । द्वितीयस्कन्धे क्रममुक्तौ । तथा चेति । द्वितीयार्थबोधकचकारघटितत्वे सति । किञ्चेत्यादीति । उपासने उपसंहारपादे धर्मोप-

कर्मणि चोपसंहारः सम्मतः । मार्गस्तु नान्यतररूपः, अतो यस्योपासकस्य येन मार्गेण गमनम्, स मार्ग उपदिश्यत इति नोपसंहारो युक्तः । अविधेयत्वादपि तथा । एतद् यथा तथा पुरस्तान्निरूपितम् 'उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने चे'त्यत्र । एवं सत्यर्चिःशब्देनार्चिरुपलक्षितो मार्ग उच्यते । आदिपदेनान्ये सर्वे मार्गाः संगृह्यन्ते इति नानुपपत्तिः काचिदिति चेत् ।

अत्र वदामः । 'अर्चिरादिभ्य' इत्युक्तं भवेत्, त्वद्रीतिरेव चेदभिप्रेता भवेत्, तस्मान्नैवमित्यवधार्यते । आर्चिरादिनेत्येकवचनान्यथानुपपत्त्या मार्गस्यैकत्वमवश्यमूरीकार्यम् । एवं सति श्रुतिषु यावन्ति पर्वाण्युक्तानि तानि सर्वाण्येकस्मिन्नेवार्चिरादिमार्गे वर्तमानान्यपि यस्योपासकस्य यावत्पर्वभोगो भावी, तं प्रति तावत्पर्वोक्तिः, यस्य यावतां तेषां स न भावी तं प्रति न तदुक्तिः, तद्भोगाभावादिति नानुपपन्नं किञ्चित् । ननु त्वयाप्यनुक्तानां पर्वणां तत्र स्थितिं वदतोपसंहार एवोक्तो भवति प्रापकत्वेनेति चेत् । स्यादेतदेवम्, यदि तस्यैव गन्तुर्भोगाय तदपि पर्व तत्रोच्येत, न त्वेवम्, किन्त्वेकवचनानुरोधान्मार्गैक्ये निश्चिते यं प्रति यत् पर्वोच्यते, तत्तत्र कण्ठोक्तमेवेति नोपसंहारापेक्षा । अग्रेऽ-

---

भाष्यप्रकाशः ।

कर्मणि च वाक्यसार्थक्यम्, न तूपासनत्वं कर्मत्वं वा, अतो मार्गस्य तदन्यतररूपत्वाभावेपि ब्रह्मप्राप्तिरूपप्रयोजनैक्यात् कुतो न युक्त उपसंहार इत्यत आह अविधेयत्वादपि तथेति । नन्वविधेयत्वस्योपसंहारबाधकत्वं क्व सिद्धमित्यतः पूर्वोक्तं स्मारयति एतद्यथेत्यादि । तत्र हि समाने योऽर्थाभेदादुपसंहारः स विधिशेषः, येऽग्निहोत्रादयस्तद्वदित्युक्तम् । तेऽग्निहोत्रादयः सर्वेषां समाना अपि येषां शाखिनां यथोक्ताः, तेषामेव ते तथा विधेया नेतरेषाम् । तथाऽविधेयत्वात् । एवमत्रापि यदुपासनशेषे यत्पर्वको मार्ग उक्तः, तं प्रति स एव विधेयः, न त्वन्यान् प्रति । अतोऽन्यान् प्रत्यविधेयत्वादपि न मार्गोपसंहारो युक्त इत्यर्थः । एवमुपपाद्य सिद्धमाह **एवं सतीत्यादि** ।

एवं पूर्वपक्षमुपपाद्य सिद्धान्तमाहुः **अत्र वदाम इत्यादि** । तथा च नानाग्रामयुक्तमार्गैक्येऽपि कस्यचित् कस्मिंश्चित् ग्रामेऽवान्तरनिवासः, अन्यस्यान्यत्र, तथेहापीत्यर्थः । अत्रोपसंहारस्य पर्वप्रापकत्वमाशङ्कते नन्वित्यादि । तत्परिहरन्ति स्यादेतदित्यादि । नोपसं-

रश्मिः ।

संहारः । कर्मणि प्रयाजोपसंहारः । **येनेति** । अधिकारानुसारेण येन मार्गेण गमनम् । **वाक्येति** । प्रयाजानुयाजवाक्यसार्थक्यम् । अङ्गानां अर्थः फलं तदभावेऽनुपसंहृतानामानर्थक्यं स्यात् । **मार्गस्त्विति** । **भाष्यं** विवृण्वन्ति स्म **अतो मार्गस्येति** । अर्चिरादिमार्गस्य प्रकारभेदवाक्यसार्थक्ययोरन्यतररूपत्वाभावेपि । **अस्येति** । अविधेयत्वस्य । **तथाविधेयत्वादिति** । तथा अविधेयत्वादिति पदच्छेदः । **यदुपासनशेष इति** । यस्योपासनस्य शेषे कर्तरि । **तमिति** । उपासनकर्तारं प्रति । **तथेति** । भाष्यार्थमाहुः **न मार्गोपसंहार** इति । सिद्धमाहुः **तथा चेति** । तथा च यथा व्रजं गच्छतः शकटवाहनत्वे क्रोशपञ्चकग्रामे क्रोशषट्कग्रामे वावान्तरनिवासः । रथवाहनत्वे क्रोशाष्टकग्रामेवान्तरनिवासः । अश्ववाहनत्वे क्रोशदशकग्रामेऽवान्तरनिवासः । तथैव शिबिकावाहनत्वे । उष्ट्रवाहनत्वे क्रोशद्वादशके क्रोशचतुर्दशके वा ग्रामे निवासः । सुखेन । **इहापीति** । इह यावत्पर्वभोगस्तं प्रति तावत्पर्वोक्तिः । **नन्वित्यादीति** । **तत्रेति** । अर्चिरादिमार्गे । **प्रापकत्वेनेति** । पर्वप्रापकत्वेन

न्यत्रोक्तानां पर्वणामुक्तस्थले सन्निवेशोक्त्यापि सूत्रकाराभिमत एक एव मार्ग इति ज्ञायते। श्रुतौ सर्वत्र पूर्वपरामर्शादपि तथा ॥ १ ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

छान्दोग्ये वायुर्न पठ्यते। कौशीतकिश्रुतौ तु 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोक'मिति वाय्वादयः श्रूयन्ते । तत्रार्चिषोऽग्नेश्चाभेदान्न विचारणीयमस्ति । वायुलोकं कस्माल्लोकात् गच्छतीत्याकाङ्क्षायामाह वायुमब्दादिति । 'अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासाँस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्य'मित्यत्र संवत्सरलोकात् परस्ताद्वायुलोको निवेशयितव्यः, तथा च संवत्सरलोकाद्वायुलोकं गच्छतीत्यर्थः। तत्र विनिगमकमाह अविशेषविशेषाभ्यामिति ।

अत्रेदं ज्ञेयम्। अग्निहोत्रादिकर्मभिश्चित्तशुद्धावुपासनाभिर्ज्ञानोदये क्रममुक्त्यधिकारी हि तत्तल्लोकं गत्वा भुक्त्वा अन्ते ब्रह्म प्राप्नोति। कर्म त्वग्निसाध्यम्

भाष्यप्रकाशः।

हारापेक्षेति । अन्यभोगाभावान्नोपसंहारापेक्षा । ननु मार्गभेदे को दोषो येन क्लिष्टादरः क्रियत इत्यत आहुः अग्र इत्यादि । अग्र इति । अग्रिमसूत्रेषु। पूर्वपरामर्शादिति । 'अर्चिषोऽहरह्नः पूर्वपक्ष' इत्यादिरूपात्तस्मात् । तथा च मार्गान्तरस्याभावादेतस्य च ज्ञानिनः प्रत्येवोक्तत्वाज्ज्ञानिनामेव क्रममुक्तिः । मर्यादाभक्तानां तु पूर्वोक्तरीत्या सद्योमुक्तिरेवेति सिद्धम् ॥ १ ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥ ननु मार्गैक्यं न युक्तम्, अनुक्तपर्वस्थलस्य वक्तुमशक्यत्वादित्याशङ्क्य तद्विनिगमनायाग्रिमं पठतीत्याशयेन सूत्रमवतारयन्ति छान्दोग्य इत्यादि। आहेति। 'संवत्सरलोकाद्वायुलोकं गच्छती'ति विनिगमकपूर्वकमाहेत्यर्थः ।

अविशेषौ कतरावित्यपेक्षायां हेतुं व्याकुर्वन्ति अत्रेदमित्यादि । तथाचार्चिरादिसंवत्सरान्तानां भूसम्बन्धित्वमविशेषः। वाय्वादित्ययोर्नीचोच्चलोकाधिपत्येन तथात्वात्तयोः पौर्वा-

रश्मिः।

रूपेण। **पूर्वपक्ष** इति। अह्नः आपूर्यमाणपक्षः। **इत्यादिरूपादिति** । 'आपूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासाꣳस्तान् मासेभ्यः संवत्सरꣳसंवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयत्येष देवयानः पन्था' इति श्रुतिरादिपदार्थः । सिद्धं वदन्तः तथेति। भाष्यार्थमाहुः **तथा चेति**। **पूर्वोक्तेति**। पूर्वपादोक्तरीत्या ॥ १ ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥ **संवत्सरलोकादिति**। **सौत्राब्दशब्दार्थः**। **कतराविति**। अविशेषविशेषयोः साधारणयोर्विशेषाविशेषौ कतराविति प्रश्नः। **हेतुमिति**। **अविशेषविशेषरूपम्** । **अत्रेदमित्यादीति** । **अग्निहोत्रादीति**। अग्निहोत्रादिभिराध्यात्मिकचित्तशुद्धौ

भूलोक एव च भवति, अत आदौ तत्रत्यो भोगः, ततस्तदुपरितनलोकानाम् । 'पृथिवी दीक्षा तयाऽग्निर्दीक्षया दीक्षितः' । 'यथा पृथिव्यग्निगर्भे'त्यादिश्रुतिभ्यो भूरग्निप्रधाना भवति, अतोऽर्चिराख्यमग्निलोकमादौ गच्छति । ततः कर्मोपासनयोरहरादिसंवत्सरान्ते काले विहितत्वात्तत्र तत्र गत्वा भुङ्क्ते । तथा च संवत्सरान्तानां भूसम्बन्धित्वेनाविशेषात् तन्मध्ये वायोर्न प्रवेशः । भूलोकादुपर्यन्तरिक्षलोकस्तदुपरि द्युलोकः, तथा च 'वायुरन्तरिक्षस्याधिपति'रिति श्रुतेः, 'सूर्यो दिवोऽधिपति'रिति श्रुतेस्तयोः पौर्वापर्ये विशेषो हेतुरस्तीत्यादित्यलोकात् पूर्वमुक्तरीत्या भूलोकमध्यपातिसंवत्सरस्य परस्ताच्च वायुर्निवेशयितव्य इत्यर्थः । ननु 'तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽह'रित्यादिश्रुतिरुक्तमुक्तमनूद्यानूद्यापादानत्वं वदन्ती पूर्वोत्तरयोरव्यवधानं सूचयतीति नोक्तमादरणीयमिति चेत् । सत्यम् । यस्योपासकस्य न वायुलोकभोगः, तं प्रति सोक्तिः, यस्य तु तद्भोगः, तस्योक्तरीतिमार्गैक्यादिति नानुपपत्तिः काचित् ।

केचित्तु, 'स एनं देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकं स वरुणलोक'मित्यविशेषेण वायुरुपदिश्यते । मिथःपौर्वापर्यप्रापकपदाभावात् ।

भाष्यप्रकाशः ।

पर्ये विशेष इति ताभ्यां तथेत्यर्थः । अत्र 'नन्वि'त्यादिना छान्दोग्यश्रुतिविरोधमाशङ्क्य समादधते सत्यमित्यादि । सोक्तिरिति । छान्दोग्योक्ता अव्यवधानोक्तिः । उक्तरीतिरिति । व्यासोक्तरीतिः । तथा च भोक्तृविशेषेणाव्यवधानव्यवधानसम्भवान्न श्रुतिविरोधरूपानुपपत्तिरित्यर्थः ।

एवं स्वमतेन व्याख्यायात्र शाङ्करादिमतमुपक्षिपन्ति केचित्त्वित्यादि । मिथःपौर्वापर्यप्रापकपदाभावादिति । तादृशपञ्चम्यन्तपदाभावात् । तथा च सोऽत्राविशेषपदार्थः । 'यदा

रश्मिः ।

ज्ञानम्, आधिदैविकचित्तशुद्धौ भक्तिरिति सुबोधिन्यां अस्य पक्षस्य 'नैतादृशा भक्ता' इति निबन्धेऽनङ्गीकारात् तन्न्यायेनोपासनाः निवेश्योक्तम् । एवेति । मनुष्याणां न तु देवानामिति न 'तदुपर्यपी'त्यधिकरणविरोधः । यदि पृथिव्यग्निगर्भा स्यात्, तदा पृथिवीदीक्षयाग्निर्दीक्षितो भवेदित्याशयेनाहुः **यथा पृथिव्यग्निगर्भेति** । तथा च पृथिव्या दीक्षा तया दीक्षया पृथिवीगर्भोऽग्निर्दीक्षित इत्यर्थः । दीक्षां इतो दीक्षितः । **अहरादीति** । 'अहरहः सन्ध्यामुपासीत' । 'प्रातर्मध्यन्दिने सायं विष्णुपूजा स्मृता बुधैः । यथा सन्ध्या तथा विष्णुपूजा नित्ये'ति नारदीये । 'नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः परिकीर्तितः' इति गीता । 'मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चन'मित्युपक्रम्य 'मज्जन्मकर्मकथनं मम पर्वानुमोदनम् । गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः । यात्राबलिविधानं च सर्ववार्षिकपर्वस्वि'ति श्रीभागवते । सर्वेषु वार्षिकेषु पर्वसु च । **एवमहरादिसंवत्सरान्ते काले विहितत्वात् तत्र तत्रेति** । जगन्नाथादौ । श्रीगोवर्धननाथादौ भक्तिशरणमार्गाभ्याम् । एवं चादित्यमित्यनेन पदेन विश्रामस्थानमपि । 'स तत्र विजिहीत' इति बृहदारण्यकात् । स सूर्यः तत्र आगमनस्थले विजिहीते छिद्रं कुरुते । **उक्तरीत्येति** । छान्दोग्ये पञ्चाग्निविद्योक्ता'र्चिष' इत्यादिश्रुतिक्रमेण । **तथात्वादिति** पौर्वापर्यात् । **तथेति** वायुमब्दान्निवेशयेत् । **अत्रेति** सूत्रार्थे । **छान्दोग्येति** उक्तश्रुतिविरोधम् । **अव्यवेति** । वायुतो न तथा । **न श्रुतीति** । उपा-

'यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छती'ति श्रुत्वा आदित्यात् पूर्वो वायुर्विशेषेणोपदिश्यत इत्यब्दादित्ययोरन्तराले निवेशयितव्य इत्यर्थं वदन्ति।

स चिन्त्यते । यथा तेन 'स ऊर्ध्व आक्रमते स आदित्यमागच्छती'ति विशेषोपदेश इत्युच्यते, तथा 'स वरुणलोक'मित्यत्रापि वक्तुं शक्यम् । न च, 'स आदित्यमागच्छती'त्यत्र तच्छब्दस्य पूर्वपरामर्शित्वाद्वायुलोकगतस्यैव पूर्वत्वात् तथेति वाच्यम्। 'अग्निलोकमागच्छति स वायुलोकं स वरुणलोक'मित्यत्रापि

भाष्यप्रकाशः।

वै पुरुष' इत्युक्तं तेनोर्ध्वाक्रमणमादित्ये गमनं च यदुच्यते, स विशेषपदार्थः । ताभ्यामब्दादित्ययोरन्तराले वायुनिवेशं वदन्तीत्यर्थः । श्रुत्यर्थस्तु यदा यस्मिन् वै निश्चयेन पुरुषो ब्रह्मविद् अस्माल्लोकाच्छरीरात् प्रैति लोकान्तरं गच्छति, तदा स पुरुषो वायुमागच्छति प्राप्नोति । तस्मै आगताय, स वायुः तत्र तदागमनस्थले विजिहीते पूर्वं स्तिमितोऽपि तदानीं स्वावयवान् विगमयति तस्य गमनार्थम् । विगमनस्थलपरिमाणमाह, यथा रथचक्रस्य खम् यावत्परिमाणं रथचक्रस्य छिद्रम् । तेन मार्गेण स पुरुष ऊर्ध्व आक्रमते, स आदित्यमागच्छति प्राप्नोतीति ।

एवं तद्व्याख्यातमर्थमनूद्य तदुक्तस्य विशेषस्य विशेषत्वं युज्यते, न वेति विचारयन्ति स चिन्त्यत इत्यादि। इत्यत्रापि वक्तुं शक्यमिति । ऊर्ध्वाक्रमणस्यार्थसिद्धत्वात्तच्छब्दस्य तत्रापि सत्त्वाद्वक्तुं शक्यम् । तथाचोर्ध्वाक्रमणतच्छब्दोक्तपूर्वपरामर्शयोर्विशेषपदार्थत्वाङ्गीकारे वाजसनेयिभिर्वाय्वनन्तरमादित्यवत्कौशीतकिभिर्वायुलोकानन्तरं वरुणलोकस्य पठ्यमानत्वेन भवदुक्तविशेषस्य तत्रापि शक्यवचनत्वादुक्तहेतोरर्थान्तरसाधकतया प्रकृतासिद्धिरित्यर्थः । तर्हि वायुलोकगतपुरुषीयं पूर्ववर्तित्वं परामृशतस्तच्छब्दस्य तथात्वमस्त्वित्यत आहुः न चेत्यादि । तथा चाद्ये पक्षे व्याख्येयसूत्रविरोधः, द्वितीये च वरुणसूत्रस्येत्युभयमप्ययुक्तमित्यर्थः । दूषणान्तर-

रश्मिः।

दानविरोधकृतश्रुतिविरोधरूपा । **अब्दादित्ययोरन्तराल** । इति नन्वब्दः क्वोक्त इति चेन्न । छान्दोग्यैकवाक्यतया प्राप्तेः । **स्तिमित** इति विगमनस्थलरहितोपि । **विगमयतीति** विगमनस्थलं कुर्वन्त्यवयवास्तान् विगमनस्थलं कारयति वायुः । **तच्छब्दस्येति** । स वरुणलोकं इत्यत्र स इति तच्छब्दस्य । **तत्रेति** वरुणवाक्ये । **तत्रापीति** कौशीतकिब्राह्मणेपि । **उक्तहेतोरिति** अविशेषविशेषहेतोः । **अर्थान्तरम्** । 'संवत्सराद् वायुलोकं वायुलोकाद् वरुणलोकं वरुणलोकादादित्यं' इत्यर्थान्तरम् । **अर्थः** 'अग्निलोकात्संवत्सरं संवत्सराद्वायुलोकं वायुलोकाद्वरुणलोकं वरुणलोकादादित्यलोकम् । स आदित्यमागच्छती'त्युक्तश्रुतेरिति । तदन्योर्थ उक्त **इत्यर्थान्तरम्** । तस्य साधकतया प्रकृतं यदब्दाद्वायुलोकं वायुलोकादादित्यमिति । यद्वा परमते प्रकृतोग्निलोकात्संवत्सरं इत्यादिरुक्तोर्थः । तस्यार्थस्यासिद्धिः । अनुमानं तु छान्दोग्ये वायुमब्दात् अविशेषविशेषाभ्याम् । 'अग्निलोकमागच्छति स वायुलोकं स वरुणलोक'मिति वाक्यवदिति । एवं दृष्टान्तः । **तच्छब्दस्येति** स वरुणलोकमिति तच्छब्दस्य । **तथात्वमिति** । पौर्वापर्यवाचकत्वमस्त्विति । **न चेत्यादीति** । **तथेति** । स वरुणलोकमागच्छतीति न निवेश्यम् । तडितोधिवरुण इतिसूत्रात् । एवं च तथा

तुल्यत्वात् । किञ्च, एवमग्निलोकानन्तरं वायुलोक इत्यपि वक्तुं शक्यम्, अतो विद्वद्भिरुपेक्ष्योऽयम् । वाजसनेयिनस्तु, 'मासेभ्यो देवलोकं देवलोकादादित्य'मिति पठन्ति । तत्राप्यादित्यात् पूर्वो देवलोकात् परो वायुर्ज्ञेयः । एकत्रादित्यात् पूर्वत्वे सिद्धे मार्गैक्यादन्यत्रापि तथात्वस्य न्यायप्राप्तत्वात् । सूत्रकारेण तु छन्दोगश्रुत्यपेक्षयोक्तम्, वायुमब्दादिति । एवं सति मासेभ्यः परस्तादब्दनिवेशनं कार्यम् ।

नच 'वायुमब्दा'दिति सूत्रान्मार्गभेदापत्तिः । देवलोकस्यादित्याधिष्ठेयत्वेनादित्यमध्यपातित्वमभिप्रेत्य छन्दोगश्रुतिस्तथोक्तवती । तदनुसारेण व्यासोपि । अतो नानुपपत्तिः ॥ २ ॥

भाष्यप्रकाशः ।

माहुः । किञ्चेत्यादि । एवमिति । ऊर्ध्वाक्रमणपूर्ववर्तित्वयोर्विशेषपदार्थत्वे । तथा चाब्दानन्तर्यमपि न सिध्येदित्यर्थः । एवं सूत्रव्याख्यानांशे तन्मतमपास्य बृहदारण्यकश्रुतिविरोधांशेपि तन्मतं परिहर्तुमाहुः वाजसनेयिन इत्यारभ्याब्दादितीत्यन्तम् । परिहरन्ति एवं सतीत्यादि । एवं सतीति । देवलोकनिवेशेऽवश्यं कर्तव्ये सति । तथोक्तवतीति । संवत्सराब्दादादित्यमित्युक्तवती । तथाच स्थानापेक्षया 'सूर्यो दिवोऽधिपति'रित्युक्तलिङ्गस्य बलिष्ठत्वाद् देवलोकात् पूर्वमेव वायुनिवेशो युक्तः, न तु ततः परमित्यर्थः ।

रामानुजाचार्यास्तु, देवलोकशब्दं वायुलोकपरमेवाङ्गीकुर्वन्ति । यद्देवलोकशब्दे अविशेषेणोक्तम्, तदेव वायुलोकशब्दे विशेषेणोच्यत इत्यविशेषविशेषाभ्यामित्येव तत्रापि हेतुः । वाजसनेयिनां 'स वायुमागच्छती'ति श्रावणात् कौशीतकिनां वायुलोकशब्दे वायुश्चासौ लोकश्चेति कर्मधारयमङ्गीकुर्वन्तो वायोर्देवलोकत्वाय, 'योऽयं पवत एष देवानां ग्रहा' इति श्रुतिं चाहुः । तत्राप्येकत्र कर्मधारयाङ्गीकारे प्रायपाठविरोधः । सर्वत्र तदङ्गीकारे तु लोकपदप्रयोगवैयर्थ्यम् । 'स वायुमागच्छती'त्यत्र केवलवायुप्रयोगस्तु द्वारत्वाभिप्रायेण । आदित्यसन्निधानात् । आदित्ये लोकद्वारत्वस्य, 'एतद्वै खलु लोकद्वार'मिति छान्दोग्ये श्रावणादिति । अतश्चिन्त्यम् ॥ २ ॥

रश्मिः ।

नाम स आदित्यमागच्छतीत्यत्र अविशेषविशेषहेतुर्न वरुणलोकमित्यत्रापीति न च वाच्यमित्यर्थः । तुल्यत्वादिति वायुलोकानन्तरमादित्यलोकं गच्छतीत्यस्य तुल्यत्वात् । तथा च न स वरुणलोकमागच्छतीत्यनिवेश्यम् श्रुतत्वात्, अन्यपौर्वापर्यं तु निवेश्यमिति भावः । आद्य इति अर्थान्तरपक्षे । व्याख्येयेति वायुमब्दाद्वायोरादित्यमिति व्याख्यानाद् व्याख्येयसूत्रविरोधः । द्वितीय इति । अर्थपक्षे सोप्युक्त एव । उभयमिति अर्थोर्थान्तरं च । दूषणेति । उक्तानुमाने अग्निलोकमागच्छतीत्यादेरदृष्टान्तत्वार्थं तथा । बृहदारण्यकेति माते व्याख्येयसूत्रविरोधांशे । तन्मतमिति । वाजसनेयिनस्तु 'मासेभ्यो देवलोकं देवलोकादादित्य'मिति समामनन्ति । तत्र आदित्यानन्तर्याय देवलोकाद् वायुमभिसंभवेयुः । वायुमब्दादिति तु छन्दोगश्रुत्यपेक्षयेति परभाष्यादनूदितं तन्मतम् । इत्यन्तमिति । इत्यन्तं तन्मतमाहुरित्यन्वयः । एवं सतीत्यादीति । मार्गभेद इति वायुलोकाद्देवलोकं देवलोकादादित्यमित्यस्मान्मार्गाद्भेदस्यापत्तिः । इत्युक्तस्येति । अत्रैव भाष्योक्तस्य लिङ्गस्य । तत इति देवलोकात् । ग्रहा इति । छत्रिणो यान्तीत्यत्र छत्रित्ववत् वायौ ग्रहत्वम् । बहुवचनं छान्दसम् । ग्रहा इत्यत्र अचो रेफो वा । प्रायपाठेति । अग्नेर्लोकोग्निलोकस्तमित्येव षष्ठीतत्पुरुषप्रायपाठस्तस्य विरोधः । सर्वत्रेति । वायुलोकपदेपि । लोकेति वायुश्चासौ लोकः वायुलोक इत्यत्र वायुलोकलोक इत्यर्थापत्त्या तथा । वायुपदस्य वायुलोकवाचकत्वम् । 'योऽयं पवत एष देवानां ग्रहा' इति श्रुतेः ॥२॥

तडितोऽधि वरुणः सम्बन्धात् ॥ ३ ॥

'आदित्याच्चन्द्रमसं चन्द्रमसो विद्युत'मित्यत्र पठितविद्युल्लोकात् परतो वरुणलोको निवेशनीयः । तत्र हेतुः । सम्बन्धात् । तडितोऽप्सम्बन्धित्वाद्वरुणस्य तत्पतित्वात् तथा ॥ ३ ॥

वरुणाच्चाधीन्द्रप्रजापती ॥ ४ ॥

स्पष्टमिदम् । अर्चिरादिपाठे विद्युदनन्तरं 'तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयती'ति पठ्यते । तत्तु यस्योपासकस्य वरुणादिलोकगमनापेक्षा नास्ति, तमपेक्ष्येति ज्ञेयम् । मार्गैक्यनियममभिप्रेत्य सूत्रकारोऽन्यत्रोक्तानामन्येषामपि लोकानां तत्रैव निवेशनमाह ॥ ४ ॥

॥ इति चतुर्थाध्याये तृतीयपादे प्रथममर्चिराद्यधिकरणम् ॥ १ ॥

भाष्यप्रकाशः ।

तडितोऽधि वरुणः सम्बन्धात् ॥ ३ ॥ ननु भवतु संवत्सरादुपरि देवलोकादर्वाग्वायुलोकनिवेशस्तथापि वरुणलोकः क्व निवेशनीयः, न हि तत्र विशेषादिरूपं किमपि नियामकमन्तराले निवेशने लभ्यते, अतो मार्गभेदपक्ष एव युक्त इत्याशङ्कानिरासायेदमित्याशयेन व्याकुर्वन्ति आदित्यादित्यादि । तडितोऽप्सम्बन्धित्वादिति । 'विशाला हि विद्युतो नृत्यन्ति[1] तीव्रस्तनितनिर्घोषो जीमूतोदरेषु नृत्यन्ति अथापः प्रपतन्ति विद्योतते स्तनयति वर्षिष्यति वे'ति ब्राह्मणात् तथा । तथा चाप्सम्बन्धरूपस्य नियामकस्य विद्यमानत्वात् तन्निवेशसिद्धेर्न मार्गैक्यबाध इत्यर्थः ॥३॥

वरुणाच्चाधीन्द्रप्रजापती ॥ ४ ॥ स्पष्टमिति । पाठसामर्थ्यादेव तन्निवेशस्थानं स्पष्टमिति न पूर्ववदाशङ्कावकाश इत्यर्थः । तडिदनन्तरं वरुणादिलोकनिवेशेऽर्चिरादिश्रुतिविरोधमाशङ्क्य परिहरन्ति अर्चिरादीत्यादि । तमपेक्ष्येति पर्यङ्कविद्युदुपासकमपेक्ष्य । मार्गैक्यनियममभिप्रेत्येति । अक्षिपुरुषविद्यापञ्चाग्निविद्ययोरिव पर्यङ्कविद्यायामपि देवयानमार्गस्य प्रत्यभिज्ञानात् तयोरिवास्यामपि वैद्युतस्यातिवाहिकस्यावश्यकत्वात्

रश्मिः ।

तडितोऽधि वरुणः सम्बन्धात् ॥ ३ ॥ तत्रेत्यादि । 'अग्निलोकमागच्छति स वायुलोकं स वरुणलोक'मित्यत्र विशेषः स इति द्वये । आदिना क्रमः सम्बन्धश्च । अन्तराले इन्द्रादित्यलोकयोरन्तराले । इदमिति । सूत्रम् । नृत्यन्तीतीति । नृत्यन्ति इति द्व इति छेदः । इ आश्चर्ये । ब्रह्मेति । ब्रह्मेवाचरति । नृत्यसूक्ष्मत्वादिना । तेति वर्णागमः । तन्निर्घोषो वा तकारलोपः । तस्याः विद्युतः निर्घोषः आकाशे जीमूतोदरेष्वाकाशे शब्दः । 'आकाशे कः शब्दं करोती'ति प्रश्ने 'शारणे विद्यु'दित्युत्तरात् । जीमूतो मेघः इन्द्रस्यात्ममूर्तिः । अथ तदनन्तरं आपः सेचनकर्म्यः । विद्योतते विद्युत् । स्तनयति जीमूतः । वर्षिष्यति वा जीमूतः । तथेति । भाष्यीयतथेत्यस्यानुवादः । तडितोऽप्सम्बन्धित्वम् । तन्निवेशेति । वरुणलोकनिवेशसिद्धेः ॥ ३ ॥

वरुणाच्चाधीन्द्रप्रजापती ॥ ४ ॥ पाठे इति । 'स एवं देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकम्, स वरुणलोकम्, स इन्द्रलोकम्, स प्रजापतिलोकम्, स ब्रह्मलोक'मिति कौषीतकिश्रुतिपाठसामर्थ्यात् । पूर्ववदिति । तडित्सूत्रवत् । आशङ्केति । लोकनिवेशशङ्कावकाशः । मार्गैक्यनियममभिप्रेत्येतीति । अर्चिरादिमार्गैक्यनियमम् । तयोरिवास्यामिति ।

---

[1] नृत्यन्तीति रश्मिपाठः ।

आतिवाहिकास्तल्लिङ्गात् ॥ ५ ॥ (४-३-२)

विद्युदनन्तरं 'तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयती'त्यत्र भवति संशयः। उक्तश्रुतेर्गमयित्रैव ब्रह्मप्राप्तिरिति निश्चीयते। स च विद्युदनन्तरमेव पठ्यते। एवं सति यस्य वरुणादिलोकगमनम्, तस्य वचनाभावेन गमयित्रप्राप्ते-र्ब्रह्मप्राप्तिर्भवति, न वेति। तत्र वाचनिकस्य यावद्वचनत्वात्तदभावेन सा न भवतीति प्राप्त आह आतिवाहिका इति।

एतदुक्तं भवति। यस्योपासकस्य यावत्फलभोगानन्तरं ब्रह्मप्राप्तिर्भाविनी, तस्य तावत्तद्भोगानन्तरं ब्रह्मप्राप्तिर्भवति, अत एव कौशीतकिश्रुतौ प्रजापति-लोकानन्तरं ब्रह्मलोकः पठ्यते। अन्यथा कृतसाधनवैयर्थ्यम्, तेषां ब्रह्मप्राप्तिसाधनत्वबोधकश्रुतिविरोधश्च स्यात्। तथा च यत्रातिवाहिकश्रुतिर्नास्ति, तत्राप्यातिवाहिको भगवदीय एव ब्रह्म प्रापयतीति ज्ञेयम्। वस्तुतस्तु बहव एव तादृशाः

भाष्यप्रकाशः।

तथाभिप्रेत्य। तथाचैतन्न्यायेन सर्वासु क्रमप्राप्तिबोधिकासु ब्रह्मविद्यासु वैद्युतं पुरुषं विना न ब्रह्मप्राप्तिरिति बोधनार्थं मार्गैक्यनिरूपणमित्यर्थः॥४॥ इति प्रथममर्चिराद्यधिकरणम् ॥१॥

आतिवाहिकास्तल्लिङ्गात् ॥ ५ ॥ एतस्याधिकरणत्वाय विषयं संशयं चाहुः विद्यु दित्यादि। सङ्गतिस्त्ववसरः। पूर्वपक्षमाहुः तत्रेत्यादि। सिद्धान्तं व्युत्पादयन्ति एतदित्यादि। अन्यथा कृतसाधनवैयर्थ्यमिति। तेनोपासनेन ब्रह्मप्राप्त्यभावे तदर्थं कृतं यदुपासनरूपं साधनं तस्य वैयर्थ्यम्। तेषामिति। उपासनानाम्। आतिवाहिकश्रुतिरिति। अतिवहनं अतिक्रामयित्वा प्रापणं अतिवाहः। भावे घञ्। तत्सबन्धी आतिवाहिकस्तद्बोधिका श्रुतिरातिवाहिकश्रुतिः। ननु यद्येवमातिवाहिकप्राप्त्यर्थमिदं सूत्रं स्यात्, तदैकवचनमेव प्रयुज्येत, श्रुतौ 'अमानवः पुरुष' इत्येकवचनात्, अतो नैवमित्यत आहुः वस्तुत इत्यादि। तथा च यत्रातिवाहिको न पठितः, तस्यामपि विद्यायां ब्रह्मप्राप्तेरुक्त-

रश्मिः।

अक्षिपुरुषविद्यापञ्चाग्निविद्ययोरिवास्यां पर्यङ्कविद्यायाम्। तथाभिप्रेत्येति। मार्गैक्यनियममभिप्रेत्य। एतदिति। समीपतरवर्तिसूत्रेण ॥ ४ ॥ इति प्रथममर्चिराद्यधिकरणम् ॥ १ ॥

आतिवाहिकास्तल्लिङ्गात् ॥ ५ ॥ विद्युदित्यादीति। उक्तेति। अव्यवहितपूर्वमुक्तश्रुतेः। गमयित्रप्राप्तेरिति। भोगभूमिषु भोगानन्तरं अन्यस्य कर्मादेर्गमयितुरभावादपेक्षितगमयित्रप्राप्तेरित्यर्थः। अवसर इति। क्रममुक्तौ ज्ञानिसम्बन्धिन्यां ब्रह्मप्राप्तौ प्रतिबन्धकीभूता मार्गनिवेशनजिज्ञासा तस्या निवृत्तौ सत्यां अवश्यवक्तव्यत्वं सर्वत्र ब्रह्मपुरुषस्य अमानवस्य निवेशे इत्यवसरसङ्गतिलक्षणसमन्वयः। प्रतिबन्धकीभूतजिज्ञासानिवृत्ताववश्यवक्तव्यत्वमवसर इति लक्षणम्। तत्रेत्यादीति। वाचनिकस्य तत्पुरुषस्य अमानवस्य। यावद्वचनं वचनमनतिक्रम्येति यावद्वचनम्। अव्ययीभावः। अन्यत्र वचनाभावेन। सेति ब्रह्मप्राप्तिः। तदर्थं ब्रह्मप्राप्त्यर्थम्। भास्करभाष्ये तु भवार्थे ठगुक्तः तत्र भव इति सूत्रात्। तथा चातिवाहे भव आतिवाहिकः। आतिवाहिक इति। औणादिकष्ठक्। भाष्ये। तथा चेत्यादि। विद्यासामर्थ्याद्गमयित्रभावेपि ब्रह्मप्राप्तौ सत्याम्। भगवदीय एवेति।

सन्तीति ज्ञापनाय बहुवचनमत्रोक्तम्। तन्मध्ये कश्चनागत्यैक एव नयतीति ज्ञापनाय श्रुतावेकवचनम् । तत्र हेतुः तल्लिङ्गात् । 'तत्पुरुषोऽमानव' इत्यत्र ब्रह्मसम्बन्धित्वं लिङ्गमुच्यते । तेनेदं ज्ञाप्यते, यथा विद्याबलात् तत्तल्लोकप्राप्तिः, तथैव ब्रह्मप्राप्तिरपीति न, किन्तु भगवदीयपुरुषानुग्रहेणैवेति ।

न च पूर्वपूर्वलोकाधिष्ठातृदेवा उत्तरोत्तरलोकं प्रत्यातिवाहिका यथा, तथा ब्रह्मप्राप्त्यव्यवहितपूर्वलोकदेवा एव ब्रह्मप्रापका इति तत्पदेन स लोक एवोच्यत इति वाच्यम् । तदेतरलोकेषु तदकथनं यथा, तथात्रापि न कथयेत् । लोका-

भाष्यप्रकाशः ।

त्वात् तदन्यथानुपपत्त्या स कल्प्यः, अतः प्राप्यबहुत्वात् प्रापकबहुत्वबोधाय तद्वचनमित्यर्थः । श्रौतस्यैकवचनस्य तात्पर्यमाहुः तन्मध्य इत्यादि । तत्र हेतुरिति । बहुत्वे हेतुः । एतमर्थं हेतुव्याख्यानमुखेन स्फुटीकुर्वन्ति तत्पुरुष इत्यादि । उच्यत इति । 'अमानव' इत्यादिना वाक्येनोच्यते । तेनेति । श्रौतेन लिङ्गेन । तथा चैतल्लिङ्गेनैव तेषां बहुत्वसिद्धिरित्यर्थः ।

अत्रान्ये एवं व्याकुर्वन्ति । 'अर्चिषोहरह्न आपूर्यमाणपक्ष'मित्यादौ किमेतेऽर्चिरादयो देवयानमार्गस्य चिह्नानि, यथा अमुकं नगरं प्रति गच्छतोऽमुकः[1] पर्वतोऽमुका नदी, एते ग्रामा इति, अथवा अवान्तरभोगभूमयः यथा दूरतरं नगरं गच्छतोऽवान्तरनिवासग्रामाः, उतातिवाहिका देवताविशेषा इति सन्देहे । आतिवाहिका एवैते । कुतः । तल्लिङ्गात् । 'आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीति सिद्धवद्गमयितृत्वदर्शनरूपाल्लिङ्गात् । 'अमानव' इति विशेषणं तु पूर्वोक्तमानवत्वनिवृत्त्यर्थमिति ।

तदेतन्निषेधन्ति न चेत्यादि । तत्पदेनेति । श्रौतेन लुप्तापादानपञ्चमीकेन । तन्निषेधहेतुं व्युत्पादयन्ति तदेतरेत्यादि । यदि तत्पदेन विद्युल्लोकः परामृश्येत, तदान्येषु लोकेषु यथा गमयितुरकथनम्, तथात्रापि गमयितारं न कथयेत् । देवानामातिवाहिकत्वस्य लोकसम्बन्धादेव प्राप्तत्वात् । नन्वत्र तत्पदस्य लोकबोधकत्वेपि देवानां लोकस्थत्वान्नातिवाहिकत्व-

रश्मिः ।

अयं कर्मस्थानीयः, न तु ज्ञानावभर्जितकर्मणां ज्ञानिनामुत्क्रमणादि कर्म । ननु विद्या प्रापयतीत्युक्तमिति चेत् । न । विद्याफलस्य ब्रह्मप्राप्तेरवान्तरमार्गगततत्तल्लोकदेवताऽसाहित्ये सामिफलं भवेदिति विद्यासाफल्यायातिवाहिकोक्तेः । **नैवमिति** । यत्रातिवाहिकश्रुतिर्नास्तीत्याद्युक्तं न, किन्तु वाचनिकस्यामानवपुरुषस्य यावद्वचनत्वम् । **तदन्यथानुपपत्त्येति** । अत्र शास्त्रान्तरवत् नान्यथानुपपत्तिरर्थापत्तेरविषयत्वपरिजिहीर्षयापि त्वर्थापत्तिरेवान्यथानुपपत्तिः करणत्वोक्तेस्तृतीययेति । **स** इति आतिवाहिकः । **तद्वचनमिति** सूत्रे बहुवचनम् । एनमित्यन्वादेशः । प्रतीकार्थमुपात्तस्य हेतोः स्फुटीकारार्थं पुनरुपादानात् । किञ्चित्कार्यार्थमुपात्तस्य पुनरुपादानमन्वादेशः तत्पुरुषो लोकपुरुषः अतोऽमानवो ब्रह्मसम्बन्धिलिङ्गमित्याशयेनाहुः **अमानव** इति । **श्रौतेन** इति । अमानवरूपेण । **तेषामिति** । आतिवाहिकानाम् । **यथा अमुकमिति** । यथा अमुकं नगरं प्रति गच्छतः अमुकः पर्वतः अमुका नदी य एते ग्रामा इति पाठः । **सन्देह** इति त्रिकोटिकसन्देहे । पूर्वपक्षस्तु **अवान्तरभोगभूमय** आतिवाहिका इति । **आतिवाहिका एवेति** । देवताविशेषा एव तु देवयानमार्गस्य चिह्नानि नाप्यवान्तरभोगभूमय

---

[1] अमुकः, अमुका इति रश्मिपाठौ ।

चिह्नाद्देवानामातिवाहिकत्वोक्तावर्चिर्लोकप्रापकातिवाहिकस्याभावात् तत्प्राप्तिर्न स्यात्। तथा सति देवयानमार्ग एवोच्छिद्येत। अतो यथा विद्याबलेनैवार्चिषः प्राप्तिः, तथेतरेषामपीति बुध्यस्व। कस्यचिदल्पलोकगत्यनन्तरमेव ब्रह्मप्राप्तिः। कस्यचित् बहुलोकगत्यनन्तरं सोच्यत इति भोगभूमित्वमेव तेषामवगन्तव्यम्। सर्वेषां सर्वत्र गमने देवयानं पन्थानं वदन्त्याः श्रुतेः सामि तत्कथनमनुपपन्नं स्यात्। अत उपासनाभेदेन फलभेदं ज्ञापयन्ती तथा वदतीति युक्तमुत्पश्यामः॥ ५॥

भाष्यप्रकाशः।

कल्पनम्, किन्तूपसंहारस्थं सिद्धवत् गमयितृत्वदर्शनमेव देवानामातिवाहिकत्वे लिङ्गम्, अतस्तत्प्रापणार्थं तत्कथनमिति चेत्, तत्राहुः लोकेत्यादि। तथा चात्र यद् गमयितृकथनम्, तद्विद्युल्लोकात् पूर्वेषु लोकेषु गमयित्रपेक्षाभावं बोधयति, न तु गमयितारं प्रापयतीत्यर्थः। ननु यदि विद्याबलेनैव विद्युदन्तलोकप्राप्तिः स्यात्, तदा सर्वासु विद्यासु सर्वे लोका उच्येरन्, तत्तु नोच्यते, अतो न विद्याबलेन तत्प्राप्तिः, किन्तु गमयित्रैवेति श्रुतेस्तात्पर्यमिति चेत्, तत्राहुः कस्यचिदित्यादि। तथा च देवयाने मार्गेऽग्न्याद्युत्तरं सर्वत्र लोकशब्दोपबन्धात्तस्य च श्रुतिरूपतया लिङ्गापेक्षया बलीयस्त्वात्तेषां भोगभूमित्वमेव युक्तम्, न त्वातिवाहिकत्वम्। किञ्च। कस्यचित् प्रापणार्थमर्चिरादिदेवतायां गतायां तस्मिन्नवसरेऽन्यस्यार्चिःप्राप्तिर्न स्यात्। तथाच 'तेऽर्चिषमभिसम्भवन्ती'तिश्रुतिबाधप्रसङ्गः। अतस्तदभावाय तेषां लोकत्वमवश्यमङ्गीकार्यम्। किञ्च। विद्याया अर्चिषः पूर्वमुक्तत्वेपि तस्या गन्त्रा सहानुवर्तमानत्वात्तयैव तत्तल्लोकप्राप्तिरित्येव युक्तम्।

रश्मिः।

इत्यर्थः। **सिद्धवदिति**। न तु पूर्वकोटिद्वयमुपन्यस्य तत्पुरुष इत्यादि साध्यवत्। **पूर्वोक्तेति**। तत्पुरुष इत्यनेनोक्तमानवत्वनिवृत्त्यर्थम्। तत्पदेन तस्य लोकस्य पुरुषा इति व्याख्यानं तद्वत् तत् तस्मादित्यपि व्याख्यानमित्याशयेनाहुः **श्रौतेन लुप्तापादनपञ्चमीकेनेति**। **तन्निषेधहेतुमिति**। भोगभूमिरूपार्थरहिततत्पुरुषरूपार्थस्य निषेधे हेतुं व्युत्पादयन्ति **विद्युल्लोक इति**। तस्माल्लोकादित्यर्थात्तथा। **परामृश्येतेति**। अधीष्टे लिङ्। **कथयेदिति**। स्वार्थे णिच्। **उपसंहारस्थमिति**। देवयानपथि संप्राप्तिस्थमित्यर्थः। **तत्प्रापणार्थमिति**। लोकप्रापणार्थम्। **तत्कथनमिति** आतिवाहिककथनम्। **तत्त्विति**। लोकन्यूनाधिकभावापेक्षया सामान्ये नपुंसकम्। लोकन्यूनत्वं लोकाधिकत्वं नोच्यत इत्यर्थः। **तत्प्राप्तिः** लोकप्राप्तिः। **अग्न्यादीति**। वायुवरुणेन्द्रप्रजापतिब्रह्माणि गृह्यन्ते आदिना। **श्रुतीति**। निरपेक्षो रवः श्रुतिः पूर्वतन्त्रोक्तलक्षणा। **लिङ्गेति** आतिवाहिकलिङ्गापेक्षया। **बलीयस्त्वं** 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्य'मिति जैमिनिसूत्रात्। तेषां अर्चिरादिमार्गगतावान्तरविश्रामस्थानानाम्। **आतिवाहिकत्वमिति**। तत्तल्लोकदेवताविशेषत्वम्। **तेषामिति**। आतिवाहिकानाम्। सर्वेषामित्यारभ्योत्पश्याम इत्यन्तभाष्यतात्पर्यार्थं वदन्तो विद्यासाफल्यायातिवाहिका इत्याहुः **किञ्च विद्याया इति**। **तयैवेति**। तया विद्ययापि। **अपिनातिवाहिकाः**। **एवकारोऽप्यर्थे**। लोकदेवता विना विद्या सामि स्यादिति भावः। लोकदेवतास्तात्पर्यार्थः। भाष्यार्थस्तु सर्वेषां विद्यावतां सर्वत्र लोकेषु। **सामि** तत्तल्लोकदेवता विनार्धम्। **तत्कथनं** देवयानपथकथनम्। **फलभेदं** तत्तल्लोकदेवतासाहित्यरूपं फलप्रकारम्। **तथा वदतीति**। **शक्तितात्पर्याभ्यामातिवाहिकपदार्थं वदतीति**।

ननु 'तेषामिह न पुनरावृत्तिरस्ती'त्यादिश्रुतिभ्यो देवयानं पन्थानं प्राप्तानां पुंसां ब्रह्मवित्त्वमवश्यं वाच्यम्। तेन सद्योमुक्तौ सम्भवत्यां सत्यां क्षयिष्णुत्वेन क्षुद्रानन्दत्वेन च हेयानां परमफलप्राप्तिविलम्बहेतूनामर्चिरादिलोकानां कामना कुतः यतस्तद्धेतुभूतोपासनाः सम्भवन्ति। किञ्च। 'अर्चिरादिना तत्प्रथिते'रित्यत्र यदुक्तं ज्ञानमार्गीयस्यैवार्चिरादिप्राप्तिः, न भक्तिमार्गीयस्येति, तदप्यनुपपन्नम्। 'यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च य'दित्युपक्रम्य, 'सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा, स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छती'ति भगवद्वाक्याद्भक्तस्याप्येतद्वाञ्छाफले सम्भवतः। अन्यथा प्रभुर्न वदेत्। एवं सति भक्तिसुखं हित्वान्यत्र कामनायां हेतुर्वाच्य इत्याकाङ्क्षायां तमाह।

उभयव्यामोहात् तत्सिद्धेः ॥ ६ ॥

अत्रेदं ज्ञेयम्। देवयानः पन्था अपि भगवतैव सृष्टोऽस्ति। तथाचोक्तहेतुभिस्तत्र कस्यापि कामाभावे तत्सृष्टिर्व्यर्था स्यात्, अतो भगवानेव काँश्च व्यामोहयति ज्ञानिनो मर्यादामार्गीयभक्ताँश्च, अतस्तत्कामनासिद्धेस्तत्फलभोग इति।

यत्त्वर्चिरादिमार्गगन्तॄणां देहवियोगेन सम्पिण्डितकरणग्रामत्वेनास्वातन्त्र्यं व्यामोहः। अर्चिरादीनां चाचेतनत्वेनास्वातन्त्र्यं व्यामोहः। कार्यकरणासामर्थ्यमिति यावत्। तेनार्चिराद्यधिष्ठातृदेवैरतिवाह्यन्त इति सिद्धमिति व्याख्यानम्।

भाष्यप्रकाशः।

अतो यथैकदेशीयानेकग्रामवासिनामेकस्मिन् देशे गन्तव्ये तन्मार्गेणैकेन तं प्रति गच्छतां मध्येमार्गमनेकनगरग्रामादिसद्भावेपि यस्य यत्र किञ्चित्कार्यम्, स एव तत्र विरम्याग्रे गच्छति, अन्यस्त्वन्यत्र, न तु सर्वः सर्वत्र तथेत्यर्थः ॥ ५ ॥

उभयव्यामोहात्तत्सिद्धेः ॥ ६ ॥ सूत्रमवतारयन्ति ननु तेषामित्यादि। अर्थस्त्ववतारणस्य सूत्रव्याख्यानस्य च स्फुटः। तथाच, 'स वै नैव रेम' इत्यादिश्रुतेः 'कृतप्रयत्नापेक्ष' इति न्यायाच्च काँश्चन व्यामोहयन् लीलां करोतीति तदर्थं तथेत्यर्थः।

पूर्वसूत्रोक्तं हेतुमर्चिरादिदेवानामातिवाहिकत्वसिद्धावपर्याप्तं मन्वानैस्तदर्थं यदत्रान्यैर्व्या-

रश्मिः।

गन्तव्य इति। देशस्वास्थ्ययुक्त एको देशः गन्तुमर्हस्तस्मिन्। तन्मार्गेणेति गन्तव्यदेशमार्गेण। तमिति। गन्तव्यदेशं प्रति। अग्रेपि गच्छतीति। सुहृद्भिः सह गच्छतीति बोध्यम्। दार्ष्टान्तिकानुरोधात् ॥ ५ ॥

उभयव्यामोहात्तत्सिद्धेः ॥ ६ ॥ स्फुट इति। तमाहेत्यस्य हेतुमाहेत्यर्थः। एवमवतारणस्यार्थः स्फुटः। सूत्रव्याख्यानस्यार्थस्तु ज्ञानिन इत्यारभ्य सूत्रार्थः। उभयेषां ज्ञानिमर्यादामार्गीयभक्तानां व्यामोहात् कामनासिद्धेस्तत्तल्लोकफलभोग इत्येवं स्फुटः। कृतप्रयत्नेति। 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्य' इति सूत्रात् द्वितीयाध्यायतृतीयपादस्थात्। तथेत्यर्थ इति। उभयव्यामोहात् तत्सिद्धेरित्यर्थः। अपर्याप्तमिति। अग्निवायुवरुणाद्युत्तरं लोकसम्बन्धान्निरपेक्षस्वरूपश्रुतिः भोगायतनत्वहेतुभूता पूर्वसूत्रोक्ततल्लिङ्गादिति हेतोर्बलीयसी आतिवाहिकत्वहेतुभूतात्। अतोऽपर्याप्तम्। अपरिपूर्णम्। तदर्थमिति। आतिवाहिकत्वसिद्ध्यर्थम्। ननूक्तमर्चिराद्यधिष्ठातृदेवैरति-

तन्न साधीयः । व्यामोहशब्दस्यान्यथाज्ञानवाचकत्वेन असामर्थ्यावाचकत्वात् । तथा सत्यर्चिर्लोकमपि न प्राप्नुयात् । प्रापकाभावादित्युक्तम् ॥ ६ ॥

भाष्यप्रकाशः ।

ख्यातं तद्दूषणायोपक्षिपन्ति दूषयन्ति च यत्त्वित्यादि । तन्नेत्यादि च ।

तथा सतीति । गन्तॄणां पिण्डितकरणग्रामत्वेनास्वातन्त्र्ये सति । तथा चानया रीत्या व्यामोहेनार्चिरादीनामातिवाहिकत्वसाधनमसङ्गतमेवेत्यर्थः । किञ्च । यदनवस्थितत्वादर्चिरादीनां न मार्गलक्षणत्वमिति । तदपि तथा । तेषां लोकत्वस्य स्वयमप्यङ्गीकृतत्वेनाप्रलयं तत्स्थितेस्तदभावात् । नापि रात्रौ प्रेतस्याहःसम्बन्धानुपपत्तिः । तेषां लोकतया स्थिरत्वेन विद्ययैव तत्प्राप्त्युपपत्तेः । 'अहोरात्रेषु ते लोकेषु सज्जन्त' इति ब्राह्मणस्य स्वयमेव पूर्वं लिखनात् । तेनाहोरात्रन्यायात् समानप्रकरणे लोकपदोपबन्धाच्च गन्तृविशेषभोगभूमित्वमेव युक्तम् । अतः पूर्वसूत्रव्याख्याने श्रौतानामर्चिरादिपदानां स्वार्थत्यागः । अन्यगतलिङ्गेनान्येषामातिवाहिकत्वसाधनम् । लोकपदोपबन्धवैयर्थ्यम् । अत्र सौत्रपदस्य स्वार्थत्याग इति तदुभयव्याख्यानमप्यसङ्गतमित्यर्थः ॥ ६ ॥

रश्मिः ।

वाह्यन्त इति चेत्, तत्राहुः प्रापकाभावादिति । अर्चिषः प्राप्तावातिवाहिकाभावादन्यत्रापि तथात्वादित्यर्थः । अर्चिषः प्राप्तौ कल्प्यत आतिवाहिक इति चेत्, तत्राहुः इत्युक्तमिति । लोकाधिष्ठानेत्यादिभाष्येण पूर्वसूत्र उक्तम् । तथा च त्रिवृत्करणे पञ्चीकरणाप्राप्तिवदर्चिष्यातिवाहिकाप्राप्तिरिति भावः । असङ्गतमिति । निरपेक्षस्वरूपाग्निलोकादिश्रुत्यपेक्षयातिवाहिकलिङ्गस्य दुर्बलत्वादिति पूर्वसूत्र उक्तत्वादेवकारः । शाङ्करभाष्यीयमन्यदपि दूषयन्ति स्म किञ्चेति । न मार्गेति । न मार्गचिह्नत्वं संशयप्रथमकोट्युक्तम् । तथेति । असङ्गतम् । आप्रलयमिति । प्रलयं मर्यादीकृत्येत्यर्थः । तदभावादिति । अनवस्थितत्वाभावात् । प्रलयात् पूर्वमेकदेशविकृतावप्येकदेशविकृतमनन्यवदितिन्यायस्य 'अन्ये तु' इत्येवं शाङ्करादिमतोपन्यासेन सूचनात् । अहः सम्बन्धेति । लोकदेवता विना । अहःसम्बन्धावश्यकत्वं 'निशि ने'ति सूत्र उक्तम् । तेषामिति । आतिवाहिकानाम् । विद्ययैवेति । विद्ययापि । अपिना तात्पर्यविषया लोकदेवताविशेषाः । पूर्वमिति । आतिवाहिकसूत्रे । सिद्धमाहुः तेनेति । अहोरात्रन्यायो गन्तॄणां विशेषत्वे हेतुः । विशेषो विद्वत्त्वम् । रात्रौ मृतस्य विदुषोऽहःसम्बन्धावश्यकत्वात् । समानेति तेषां भोगभूमित्वे हेतुः । समानप्रकरणत्वं तु कौशीतकिनां समानप्रकरणीयत्वकथनात् । एवेति । न तु देवताविशेषत्वम् । इदमातिवाहिकाधिकरणं परेषां मतेपि त्रिसूत्रम् । तत्र प्रथमसूत्रे किञ्चिदाहुः अतः पूर्वेति । व्याख्यानं तु तल्लिङ्गादातिवाहिकाः लोकदेवताविशेषाः । द्वितीयार्थस्तु उभयव्यपदेशात् आतिवाहिकत्वसिद्धेरिति । तृतीयसूत्रार्थस्तु अमानवो विद्युल्लोकमागतो वैद्युतः । तेनैव ततो विद्युल्लोके प्राप्तेरूर्ध्वं नीयमाना विद्वांसः कार्यं ब्रह्म प्राप्नुवन्ति । तच्छ्रुतेः विद्युल्लोकस्थनित्यमानवस्यैव गमयितृत्वश्रावणादिति । तस्मिन् । स्वार्थेति । लोकरूपस्वार्थस्तस्य त्यागः । अन्यगतेति । संपिण्डितकर्णग्रामजीवगतत्वेन अर्चिरादिमार्गगतत्वेन च लिङ्गेन उभयव्यामोहेन च । अन्येषामिति । लोकदेवानाम् । लोकपदेति । अग्निलोकवायुलोकेत्यादिषु लोकपदेत्यादिः । अग्न्यादिपदैरेव देवताविशेषोपस्थितेः 'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशा'दिति न्यायात् । अत्रेति उभयव्यामोहसूत्रे । सौत्रपदस्य व्यामोहपदस्य । स्वार्थोऽन्यथाज्ञानम् । तस्य त्यागः । तदुभयेति । सूत्रयोरुभययोर्व्याख्यानम् । तृतीयं त्वागन्तुकमित्युपेक्षितम् ॥ ६ ॥

ननु विद्युतो वरुणादिलोकप्राप्त्यनन्तरं यस्य ब्रह्मप्राप्तिः, तस्य तल्लोकसम्बन्धी ब्रह्मप्रापकः पुरुषोस्ति, उत स स्वत एव तत्प्राप्नोतीति संशय उत्तरं पठति ।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ७ ॥

न हि ब्रह्मप्राप्तिर्विद्युल्लोकसम्बन्धिपुरुषसामर्थ्येनोच्यते, किन्तु ब्रह्मसम्बन्धितत्सामर्थ्येन । तथा च यत एव लोकात् तत्प्राप्तिः, ततो ब्रह्मसम्बन्धिपुरुषादेव । एवं सति विद्युल्लोकात्तत्प्राप्तौ यो ब्रह्मसम्बन्धी पुरुषः प्रापक उक्तः, तेनैव ततो वरुणादिलोकेभ्योपि ब्रह्मप्राप्तिः । तत्र हेतुमाह तच्छ्रुतेः । 'तान् वैद्युतात् पुरुषो मानस एत्य ब्रह्मलोकान्गमयती'ति श्रुतेः । अत्र 'एत्ये'ति वचनाद्यत एव लोकाद् ब्रह्मप्राप्तिर्भवित्री, तत्रैवागत्य ब्रह्म प्रापयतीति गम्यते । श्रुतौ 'वैद्युतं लोकमागत्य तस्माद् ब्रह्मलोकान्गमयती'त्युक्तमिति स पुरुषो वैद्युत इत्युच्यते, न तु तल्लोकवासित्वेन । तथा सति 'एत्ये'ति न वदेत् तत एव ब्रह्मप्रापणे ।

अत एव 'मानस' इत्युक्तः । यदैव भगवन्मनसि भवति 'अथैनं मां प्रापयत्वि'ति, तदैव प्रापयतीति तथा ।

छान्दोग्ये तु 'अमानव' इति पठ्यते । तस्यालौकिकत्वम्, तदप्युक्तरूपमेवेति न कश्चिद्विशेषः । वाजसनेयके 'ब्रह्मलोकान्गमयती'ति पठ्यते । छान्दोग्ये तु 'ब्रह्मे'ति । तत्रायं भावः । भक्तं तु वैकुण्ठलोकं नयति, ते बहुविधा इति

भाष्यप्रकाशः ।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ७ ॥ सूत्रमवतारयन्ति ननु विद्युत इत्यादि । तल्लोकसम्बन्धीति । विद्युल्लोकसम्बन्धी । तत्प्राप्नोतीति । ब्रह्म प्राप्नोति । सूत्रं व्याकुर्वन्ति न हीत्यादि । इति श्रुतेरिति । पञ्चाग्निविद्यास्थवाजसनेयिश्रुतेः । श्रुतौ 'वैद्युता'दित्यस्य 'गमयती'त्यनेन सम्बन्धाद्योऽर्थः सिध्यति, तमाहुः अत्रेत्यादि । तथा सत्येत्येति न वदेदिति । तस्य विद्युल्लोक-

रश्मिः ।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ७ ॥ न हीत्यादीति । ब्रह्मसम्बन्धीति । ब्रह्मसम्बन्धः स्वस्वामिभावलक्षणस्तद्वान् ब्रह्मसम्बन्धी । ब्रह्मसम्बन्धी चासौ सः ब्रह्मसम्बन्धिसः तस्य सामर्थ्येन । तत्प्राप्तिरिति ब्रह्मप्राप्तिः । तत इति लोकाद् अवधिभूतात् । ब्रह्मसम्बन्धिपुरुषाद्वैद्युतादेव । उक्त इति । वक्ष्यमाणश्रुतावुक्तः । तत इति । सौत्रं पदं व्याख्येयम् । गमयतीत्यनेनेति । न त्वेत्येत्यनेनेति भावः । भाष्ये । तत इति विद्युल्लोकवासिन एव ब्रह्मप्रापणे सति । प्रकृते । तदेति । विद्युल्लोक आगमनपूर्वकाले ब्रह्मलोकवासित्वादेव । स्फुटमिति । तथेति मानसः । बहुविधा इति । चत्वारः पञ्च वा । व्यापिवैकुण्ठः रमावैकुण्ठः श्वेतद्वीपः अन्यश्च । आत्म[illegible]

'ब्रह्मलोका'नित्युक्तम्। ज्ञानमार्गीयं त्वक्षरं ब्रह्म प्रापयतीति 'ब्रह्मे'त्युक्तम्। अत एवोभयव्यामोह उक्त आचार्येण ॥ ७ ॥

इति चतुर्थाध्याये तृतीयपादे द्वितीयमातिवाहिकाधिकरणम् ॥ २ ॥

अत्र सिद्धान्तदार्ढ्यार्थमुक्तमर्थं हस्तपिहितमिव कृत्वा बादरिमतं पूर्वपक्षत्वेनाह।

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ८ ॥ (४-३-३)

'स एतान् ब्रह्म गमयती'त्यत्र ब्रह्मपदेनाविकृतं परमेव ब्रह्मोच्यते, उत कार्यरूपो ब्रह्मलोक इति भवति संशयः। परस्य व्यापकत्वेन देशविशेषगमयित्रोरनपेक्षितयोरुक्तेः कार्यरूप एव स ब्रह्मपदेनोच्यत इति बादरिराचार्यो मन्यते। कुतः। अस्य गत्युपपत्तेः। तस्य परिच्छिन्नत्वेन तत्स्थितिदेशं प्रत्यस्य गन्तुर्गतेरुपपत्तेरित्यर्थः ॥ ८ ॥

भाष्यप्रकाशः।

वासित्वे सति विद्युताद् ब्रह्मलोकान् गमयतीत्येतावतैव विवक्षितार्थसिद्धेरेत्येति न वदेदित्यर्थः। अत एवेति। तदवासित्वादेव। शेषं स्फुटम् ॥ ७ ॥

इति द्वितीयमातिवाहिकाधिकरणम् ॥ २ ॥

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ८ ॥ क्रममुक्तौ मार्गं विचार्य तत्फलं विचारयतीत्याशयेन सूत्रमवतारयन्ति अत्र सिद्धान्तेत्यादि। क्रममुक्तौ परब्रह्मैव प्राप्यमिति सिद्धान्तस्य दार्ढ्यार्थमुक्तमर्थमर्चिरादिमार्गो जघन्याधिकारिणां परप्राप्तिसाधनमित्येतमर्थं हस्तपिहितमिव कृत्वा अग्रे स्थापनीयत्वादिदानीमनुक्त्वा तथेत्यर्थः। सूत्रं व्याख्यातुमधिकरणत्वाय विषयसंशयावाहुः स एतानित्यादि। तथा च ब्रह्मपदश्रुतेर्गतिश्रुतेश्च संशय इत्यर्थः। पूर्वपक्षमाहुः परस्येत्यादि। स इति। ब्रह्मलोकः। तस्येति। कार्यस्य ब्रह्मलोकस्य ॥ ८ ॥

रश्मिः।

वाराहपुराणीयचातुर्मास्यमाहात्म्ये श्रीभूः। अत एवेति। फलाभोगादेव। क्रममुक्तौ ज्ञानिनोपि फलभोगः। उभयेषां ज्ञानिनां मर्यादाभक्तानां व्यामोहोऽन्यथाज्ञानम्। परप्राप्तित्वाभाववति ज्ञानिमर्यादाभक्तमोक्षे परप्राप्तित्वप्रकारकज्ञानत्वाल् लक्षणसमन्वयः। तदभाववति तत्प्रकारकं ज्ञानमन्यथाज्ञानमिति लक्षणम्। पुष्टिमार्गीयपरप्राप्तिव्यतिरिक्ते फले व्यामोह इत्युक्तम्। तदुक्तं तृतीयसुबोधिन्यां 'भक्तिमार्ग एव मार्ग' इति। मुख्ये पुष्टिमार्गे कार्यसम्प्रत्ययो बोध्यः। एवं स्फुटम्। अत्र वृत्तौ ब्रह्मप्राप्तेः प्रापकपुरुषाधीनत्वाद् विद्युल्लोकस्य चातिक्रान्तत्वाद् वरुणादिलोकस्थस्यैव ग्राह्यत्वाद् अस्तीति पूर्वपक्षं निक्षिप्याधिकरणान्तरत्वं सूचितम्। संशय आभास उक्तः। विषयसिद्धान्तौ व्याख्यान एव स्फुटाविति ॥ ७ ॥ **इति द्वितीयमातिवाहिकाधिकरणम् ॥ २ ॥**

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ८ ॥ तत्फलमिति। उभयव्यामोहोनुसन्धेयः। परब्रह्मैवेति। ज्ञानिभक्तौ विशेषतश्चेदनुगृह्णाति तदा पुष्टिभक्तिं प्राप्नुत आदाविति सिद्धान्तमुक्तावलीटिप्पणे श्रीगोस्वामिनः। तेन परब्रह्मापीत्यर्थः। एवकारोप्यर्थे। तथेति। बादरिमतं पूर्वपक्षत्वेनाहेत्यर्थः। **गतिश्रुतेरिति।** 'गमयती'ति गतिश्रुतेः। ब्रह्मणः सायुज्यात्तत्र गमनाभावाद्ब्रह्मलोको ब्रह्मपदवाच्य इति ॥ ८ ॥

विशेषितत्वाच्च ॥ ९ ॥

'ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ती'ति श्रुतौ बहुत्वेन वासाधिकरणत्वेन च विशेषिता लोकाः । गन्तारश्च दूरदेशगत्या विशेषिता इति न परं ब्रह्म तत्, किन्तु कार्यमेवेत्यर्थः । लोकपदं तज्जन्यभोगपरम् । तेन तस्यैकत्वेपि विविधभोगज्ञापनाय बहुवचनं घटते ॥ ९ ॥

तत्र ब्रह्मशब्दप्रयोगहेतुमाह ।

सामीप्यात्तु तद्व्यपदेशः ॥ १० ॥

तल्लोकस्थितानां नान्यलोकव्यवधानं परप्राप्तौ, किन्तु तत एवेति परब्रह्मसामीप्याद् ब्रह्मत्वेन व्यपदेशः कृतः । तुशब्दस्तु वस्तुतो ब्रह्मत्वं व्यवच्छिनत्ति ॥ १० ॥

भाष्यप्रकाशः ।

विशेषितत्वाच्च ॥ ९ ॥ तस्य कार्यत्वाय हेत्वन्तरं दर्शयतीत्याशयेन सूत्रं व्याकुर्वन्ति ब्रह्मलोकानित्यादि । विशेषिता इति । अत्र श्रुतौ पूर्वं तानिति गन्तृविशेषणे दूरदेशगन्तारः परामृश्यन्ते, बहुत्वं चोच्यत इति गन्तारस्तथा विशेषिताः । 'पराः परावतो वसन्ती'ति प्रकृष्टा गन्तारः प्रकृष्टान् ब्रह्ममानमितान् संवत्सरान् वसन्तीति श्रावणाच्च ब्रह्मलोका विशेषिताः । तदिति 'ब्रह्म गमयती'त्यत्र प्राप्यत्वेनोक्तम् । ननु ब्रह्मपदस्य कार्यब्रह्मपरत्वे श्रुत्यन्तरोक्तलोकपदविरोध इत्यत आह लोकपदमित्यादि ॥ ९ ॥

सामीप्यात्तु तद्व्यपदेशः ॥ १० ॥ भाष्यमत्रातिरोहितार्थम् ॥ १० ॥

रश्मिः ।

विशेषितत्वाच्च ॥ ९ ॥ तस्येति । स एतान्ब्रह्म गमयतीत्यत्र ब्रह्मणः । दूरदेशेति । लोकाल्लोकान्तरगमनेऽवधिभूतदेशस्थास्तानिति तच्छब्दार्थः दूरदेशगन्तारः तानिति । **बहुत्वं च । तथा विशेषिताः** बहुत्वेन साधिकरणत्वेन च विशेषिताः । परपदार्थमाहुः । **प्रकृष्टाः** । 'परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यत' इत्यत्र । **परावत** इत्यास्यार्थमाहुः **ब्राह्ममानेति** । ब्राह्ममानेन मितान्परिमितान् । परा विद्यन्तेऽस्येति परावान् तान् **परावतः** । पराशब्दोत्र धर्षणे । 'परादि मोक्षप्राधान्यप्रातिलोम्येषु धर्षण' इति विश्वात् तद्वतः **संवत्सरान्** कालो धर्षयतीति तथा । **ब्रह्मलोका इति** । तेन ब्रह्मलोकान् गमयति ते तेषु कार्यरूपेषु ब्रह्मलोकेषु पराः परावतः वसन्तीति पदच्छेदः । पराः परावतो ब्रह्मलोकान् वसन्तीत्यन्वयः । केष्वित्याकाङ्क्षायामाह । तेषु ब्रह्मलोकेषु ये ब्रह्मलोकास्तान् । श्रुत्यन्तरेति । 'अग्निलोकमागच्छति स वायुलोक'मित्यादिश्रुत्यन्तरेत्यर्थः । **लोकः** कार्यमिति । स ब्रह्मपदार्थ इति तथा । **आहेति** पूर्वपक्ष्याह **लोकपदमित्यादीति** । तज्जन्येति लोकजन्यभोगपरम् । **तस्येति** । कार्यब्रह्मणः । **विविधेति** 'सोश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिते'त्यत्र विविधं पश्यच्चित्त्वमर्थः तेन तद्वद्विविधभोगचतुरेणेत्यप्यर्थात् । **घटत इति** । अन्यथा तु ब्रह्म गमयतीत्यत्र शुद्धबुद्धमुक्तस्वभावे एकस्मिन्नद्वितीये उक्तब्रह्मलोकानिति बहुवचनं न घटत इति युक्त्या वेदार्थोऽन्यथा नीतः ॥ ९ ॥

सामीप्यात्तु तद्व्यपदेशः ॥ १० ॥ अतिरोहितार्थमिति । तत्रेति । ब्रह्मलोके कार्ये । एवमतिरोहितार्थम् ॥ १० ॥

ननु 'आब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुने'ति वाक्यात्ततः पुनरावर्तते। अत्र तेषामिह न पुनरावृत्तिरस्तीति पठ्यत इति परमेवात्र ब्रह्मशब्देनोच्यत इति प्राप्ते, उत्तरं पठति।

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्॥ ११॥

कल्पसमाप्तौ कार्यस्य ब्रह्मलोकस्य नाशे सति तदध्यक्षेण चतुर्मुखेन ब्रह्मणा सह अतो ब्रह्मणः सकाशात् परमीश्वरं प्राप्नोत्यतोऽपुनरावृत्तिश्रुतिर्न विरुध्यते। अत्र प्रमाणमाह अभिधानादिति। श्रुतौ तथाभिधानादित्यर्थः। सा तु 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे' इति। 'परान्तकाल' इत्यत्र परशब्देन ब्रह्मणः पूर्णमायुरुच्यते॥ ११॥

उक्तेऽर्थे श्रुतिं प्रमाणत्वेनोक्त्वा स्मृतिमप्याह।

स्मृतेश्च॥ १२॥

'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पद'मिति स्मृत्यापि स एवार्थः प्रतिपाद्यते॥ १२॥

भाष्यप्रकाशः।

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्॥ ११॥ प्राप्यस्य ब्रह्मसामीप्याद् ब्रह्मत्ववाद इत्यङ्गीकारे विषयश्रुतिविरोधमाशङ्क्य समाधत्त इत्याशयेन सूत्रमवतारयन्ति नन्वित्यादि। व्याकुर्वन्ति कल्पेत्यादि। ब्रह्मण इति। चतुर्मुखात्॥ ११॥

स्मृतेश्च॥ १२॥ उत्तानार्थम्॥ १२॥

रश्मिः।

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्॥ ११॥ प्राप्यस्येति। ब्रह्मलोकस्य न तु ब्रह्मणः, तस्य नित्यप्राप्तत्वात्। समाधत्त इति पूर्वपक्ष्येव। नन्वित्यादीति। अत्रेति। प्रकृतविषये। पञ्चाग्निविद्यायां श्वेतकेतुब्राह्मणे 'तेषामिह न पुनरावृत्तिरस्ती'ति श्रुतिः। अत्रेति 'स एतान्ब्रह्म गमयती'त्यत्र। कल्पेत्यादीति। परशब्देनेति। तथा च ब्रह्मणश्चतुर्मुखस्य पूर्णायुषोऽन्तकाले आयुषश्चरमावयवे इति परान्तकाल इत्यस्यार्थः॥ ११॥

स्मृतेश्च॥ १२॥ उत्तानेति सम्प्राप्ते प्रतिसञ्चरे कल्पसमाप्तौ कार्यस्य ब्रह्मलोकस्य नाशे सति नाशः सृष्टेः प्रतिकूलसञ्चरः तद्रूपे ब्रह्मणा चतुर्मुखेन सह ते सर्वे कृतात्मानः प्राप्तज्ञानाः। परस्यान्ते परान्तकाले। परं पदं पदनीयं ब्रह्म। एवमुत्तानार्थम्।

वृत्तौ त्वत्राधिकरणसमाप्तिः सूचिता, वक्ष्यमाणसूत्रे अत्रापि 'स एतान्ब्रह्म गमयती'त्येव विषयवाक्यम्। पूर्ववदेव संशयः, तद्बीजं च पूर्वपक्षस्तु बादरिमतेनेति पुनरुक्तेः। तन्न, भाष्यविरुद्धत्वात्। अत एव अग्रे सूत्रमवतारयन्तीत्युक्तम्, न त्वधिकरणमवतारयन्तीत्युक्तम्॥ १२॥

अत्र सिद्धान्तमाह ।

परं जैमिनिर्मुख्यत्वात् ॥ १३ ॥

'स एतान् ब्रह्म गमयती'त्यत्र ब्रह्मपदेन परमेव ब्रह्मोच्यत इति जैमिनिराचार्यो मनुते । कुतः । मुख्यत्वात् । बृहत्त्वादिधर्मविशिष्टं हि ब्रह्मपदेनोच्यते । तादृक् परमेव ब्रह्म भवतीति मुख्या वृत्तिर्ब्रह्मपदस्य परस्मिन्नेव, अन्यत्र गौणी । तथा च मुख्यगौणयोर्मध्ये मुख्यस्यैव बलिष्ठत्वात् तथा ॥ १३ ॥

दर्शनाच्च ॥ १४ ॥

'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोक'मिति कौशीतकिश्रुतिरग्न्यादिलोकप्राप्तिवद्विशेषेणैव प्रजापतिलोकप्राप्त्यनन्तरं ब्रह्मलोकप्राप्तिं दर्शयति । न हि तत्र ब्रह्मलोकशब्देन कार्यः स उच्यत इति वक्तुं शक्यम् । पार्थक्येन प्रजापतिलोकस्योक्तत्वात् ।

भाष्यप्रकाशः ।

परं जैमिनिर्मुख्यत्वात् ॥ १३ ॥ सूत्रमवतारयन्ति अत्रेत्यादि । पञ्चभिः सूत्रैर्बादरिमतोपक्षेपमुखेन पूर्वपक्षमुक्त्वा, अस्मिन् सूत्रे जैमिनिमतोपन्यासमुखेन स्वसिद्धान्तमाहेत्यर्थः । सूत्रव्याख्यानं तूत्तानार्थम् ॥ १३ ॥

दर्शनाच्च ॥ १४ ॥ अविद्यादिदोषाणामभावेपि कामनायाः सत्त्वात्तन्मात्रेणाधिकारजाघन्याद् गत्युपपत्तौ लोकाङ्गीकारेण विशेषितत्वस्य चोपपत्तौ सामीप्यनिबन्धनाया गौण्या अप्रयोजकत्वाभिप्रवृत्तिरिति पूर्वसूत्रे मुख्यत्वेन हेतुनैव सिद्धमिति कार्यात्ययादिसूत्रद्वयोत्तरमवशिष्यते । तदनेन वदतीत्याशयेन सूत्रं व्याकुर्वन्ति स एतं देवयानमित्यादि ।

रश्मिः ।

परं जैमिनिर्मुख्यत्वात् ॥ १३ ॥ बादरीति । मुखमुपायः । उत्तानेति । अत्रेति । पूर्वपक्षे । बृहत्त्वादीति । आदिना बृहत्त्वाद् बृंहणत्वाच्च ब्रह्मेत्यत्रोक्तं बृंहणत्वम् । अन्यत्रेति ब्रह्मलोके । गौणमुख्यन्यायमाहुः तथा चेति । तथेति । ब्रह्मपदेन परमेव ब्रह्मोच्यत इत्यर्थः ॥ १३ ॥

दर्शनाच्च ॥ १४ ॥ सूत्रावतरणाय पञ्चभिः सूत्रैर्बादरिमतोपक्षेपः कृतः तस्य परिहारे विवेचयन्ति स्म अविद्यादीति । कामनाया इति । द्वितीयस्कन्धोक्तलोकदिदृक्षायाः । गतीति कार्ये ब्रह्मणि गत्युपपत्तौ । द्वितीयसूत्रे अक्षरलोकपरब्रह्माङ्गीकारेण परावद्विशेषणस्य चोपपत्तेः । परावत इत्यस्य मोक्षवतो ब्रह्मलोकान् । प्राधान्यवतो वा । उक्तविश्वासात् । तृतीयसूत्रे सामीप्येत्यादिः । मुखत्वेनेति । कार्यं ब्रह्म न मुख्यम्, परावत इत्यस्य धर्षणवत इत्यर्थो न मुख्यः प्रथमत्यागे मानाभावात् । गौणी न मुख्येति प्रसिद्धमिति पूर्वोक्तं मुख्यत्वेन हेतुनोत्तरं सिद्धमित्यर्थः । अनेनेति । दर्शनाच्चेति सूत्रेण । जैमिनिमतेन समाधाने धर्मोपस्थित्या तत्प्रतिपादकपूर्वकाण्डे प्रजापतिलोकोपरि ब्रह्मलोकस्य असम्भवदुक्तिकत्वात् तृतीयाष्टके 'प्रजापतिरकामयत प्रजाः सृजेये'तीक्षाश्रावणात् ।

भाष्यप्रकाशः ।

ननु तैत्तिरीयभाष्ये आनन्दमीमांसायां 'विराट् त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिरूपः संसारमण्डलस्थायी प्रजापतिशब्देनोच्यते । यत्रैते शतं प्रजापत्यानन्दा एकतां गच्छन्ति धर्मश्च तन्निमित्तं ज्ञानं चैतद्विषयम् अकामहतत्वं च निरतिशयं यत्र स एष हिरण्यगर्भ' इति शङ्कराचार्यैर्व्याख्यातत्वात्तस्य हिरण्यगर्भस्य यो लोकः स कौशीतकिवाक्ये ब्रह्मलोकपदेन पठ्यते, हिरण्यगर्भश्च जन्यः । 'हिरण्यगर्भं जनयामास पूर्व'मिति श्वेताश्वतरे 'हिरण्यगर्भं पश्यत जायमान'मिति तैत्तिरीये च श्रावणात् । अतस्तस्यात्र परामर्शे कार्यता कुतो न वक्तुं शक्येति चेत् । उच्यते । प्रजापत्यतिरिक्तस्य हिरण्यगर्भस्य वक्तुमशक्यत्वात् । 'वेदात्मनाय विद्महे, हिरण्यगर्भाय धीमहि, तन्नो ब्रह्म प्रचोदया'दिति तैत्तिरीयमन्त्रे 'हिरण्यगर्भो वेदाना'मित्येकादशीयविभूत्यध्यायवाक्ये च तस्य वेदात्मकतयैव सिद्धत्वात् । वेदात्मकत्वं च प्रजापतावेवं सिद्धम् । 'शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः । ब्रह्मावभाति विततो नानाशक्त्युपबृंहित' इति तृतीयस्कन्धे प्रजापतिं प्रकृत्यैव वाक्यात् । पर्यङ्कस्थे ब्रह्मणि हिरण्यगर्भपदस्य वेदात्मकत्वादिबोधकस्य वाक्यस्य चाभावात् । न च 'यजूदरः सामशिरा असावृङ्मूर्तिरव्ययः । स ब्रह्मेति विज्ञेय ऋषिर्ब्रह्ममयो महा'निति मन्त्रे तस्य वेदात्मकत्वमुक्तमेवेति शङ्क्यम् । तत्र 'एतावदिदं सर्व'मित्यनेन सत्यपदार्थे निगमिते इदं सर्वमसीत्येवैनं तदाहेत्यनेन एनं उपासकं तत् पर्यङ्कस्थं ब्रह्म इत्येवाहेति तदुक्तस्य याथार्थ्यं बोधयित्वा, तदेतच्छ्लोकेनाभ्युक्तमिति वाक्यं श्रुतिरुक्त्वा श्लोकमाह 'यजूदर' इति । तत्र यजूदरादिविशिष्टोऽसौ ब्रह्ममयो महानृषिः स ब्रह्मा ब्रह्मसहितो

रश्मि

प्रजापतिलोकपर्यन्तवस्तुस्थितिर्ब्रह्मलोकेऽर्थवाद इत्याशङ्कते ननु तैत्तिरीयेति । विराट् कीदृशः, त्रैलोक्यं शरीरं यस्य स त्रैलोक्यशरीरः । समष्टीति । यथा देवदत्त इति । समष्टिदेहेन व्यष्ट्यवयवै रूप्यते व्यवह्रियते आत्मा स समष्टिव्यष्टिरूपः । संसारेति । प्रपञ्चस्य मण्डलं कदम्बकः तत्र स्थायी । तन्निमित्तमिति । धर्मस्य निमित्तम्, ज्ञात्वा कुरुते सर्व इति । यद्वा । तन्निमित्तं धर्मस्य निमित्तं फलं चित्तशुद्धिद्वारा ज्ञानम्, तन्निर्विषयं नास्तीति एतद्विषयमकामहतत्वम् । 'ते ये शतं बृहस्पतेरानन्दाः स एको ब्रह्मण आनन्दः श्रोत्रियस्याकामहतस्ये'ति ब्रह्मविज्ञपाठकश्रुतेः । हिरण्यगर्भ इति । प्रजापतिः संसारमण्डलस्थायिनोतिरिक्तः आनन्दादिमान् । पठ्यते इति । अभेदान्वयात् पठ्यते । अर्थवादत्वात् सम्भवति । पूर्वमिति । सृष्टेः पूर्वम् । पश्यतेति । यूयं पश्यत दूर्वादयो रुद्रान्ताः पूर्वोक्ताः । महानारायणे श्रुतिराह तस्येति । ब्रह्मलोकाभिन्नप्रजापतिलोकस्य परामर्शे कार्यता कार्यब्रह्मता । एवं जैमिनिपदसूचिताशङ्कां समादधते स्म उच्यते इति । सत्यं परन्तु औत्पत्तिकसूत्रे जैमिनिना बादरायणग्रहणेन गुरुमतप्राधान्यपूर्वकेऽर्थे विवक्षिते यत् सिध्यति तदुच्यत इत्यर्थः । तन्नो ब्रह्मेति । तन्नोऽस्मान् ब्रह्म, प्रजापतिरित्यर्थात् । वेदानां हिरण्यगर्भोऽस्मीत्यर्थः । तस्येति । प्रजापतेः । शब्देति । शब्दब्रह्मात्मनः वेदात्मनः तस्य प्रजापतेः । व्यक्ताव्यक्तात्मनः पञ्चम्यन्तम् । जगत्प्रकृतिभ्यां परः ब्रह्मावभाति । सुबोधिन्यां द्वादशाध्याये प्रपञ्चोऽस्य । वेदात्मकत्वादीति । आदिना व्यक्ताव्यक्तात्मनः परत्वं नानाशक्त्युपबृंहितत्वं च । यजूदर इति । सकारलोपश्छान्दसः ततोऽकः सवर्णे दीर्घः । एतावदिति । सत्यम् । निगमित इति । पर्वतो वह्निमानितिवन् निगमिते । तदुक्तस्येति । उपासकस्य । वाक्यश्रुतिरुक्तेति । वक्ष्यमाणवाक्यसम्बन्धिनी श्रुतिरुक्तेत्यर्थः ।

---

1. वाक्यश्रुतिरुक्तेति रश्मौ ।

अपरं च, 'ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्ती'ति छान्दोग्यश्रुतिं विषयीकृत्य, 'अर्चिरादिना तत्प्रथिते'रित्युपक्रम आचार्येण कृतः, अन्यत्रार्चिःशब्दस्याभावात्, तत्र चान्ते 'ब्रह्म गमयती'त्युच्यते। तथा च छान्दोग्येऽनुक्तानामन्यत्रोक्तानां लोकानां मार्गैक्यसिद्ध्यर्थं तत्रैव सन्निवेशो, 'वायुमब्दात्', 'तडितोऽधिवरुणः,' 'वरुणाच्चाधीन्द्रप्रजापती' इत्यन्तेनोक्तः। एवं सत्याद्यार्चिषम्, ततोऽहः, ततः सितपक्षम्, तत उदगयनम्, ततः संवत्सरम्, ततो वायुम्, ततो देवलोकम्, तत आदित्यम्, ततश्चन्द्रमसम्, ततो विद्युतम्, ततो वरुणम्, तत इन्द्रम्, ततः प्रजापतिम्, ततश्चामानवेन पुरुषेण ब्रह्मप्राप्तिरिति निर्णयः सम्पद्यते। एवं सति प्रजापतिलोकादन्यस्य कार्यब्रह्मलोकस्यासम्भवात् तच्छङ्कापि भवितुं नार्हति यद्यपि, तथापि व्यासोक्तमार्गैक्यममन्वानस्तथाऽवददिति ज्ञायते। परन्तु वेदार्थनिर्णयार्थमेव प्रवृत्तत्वाद् भगवदवतार-

भाष्यप्रकाशः।

विज्ञेय इति वचनव्यक्त्या ब्रह्मविद एव वेदात्मकत्वबोधनात्। न चेतः पूर्ववाक्ये 'तं ब्रह्मापृच्छती'ति पुँल्लिङ्गस्य प्रष्टरि ब्रह्मणि निर्देशादत्र यजूदरत्वादिकं प्रष्टृपरमेवेति शङ्क्यम्। तत्र ब्रह्म आपृच्छतीति पदच्छेदात्। न चात्रैवं पदच्छेदे किं मानमिति शङ्क्यम्। ततः पूर्ववाक्ये 'स ब्रह्मालङ्कारेणालङ्कृतो ब्रह्म विद्वान् ब्रह्माभिप्रैती'ति 'विसुकृतो विदुष्कृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैती'ति अभिप्रायकर्मणि ब्रह्मणि नपुंसकप्रयोगस्यैव मानत्वात्। तस्मादत्र ब्रह्मलोकपदेन नित्य एव लोको ग्राह्यः। तथा च पूर्वोक्तश्रुतिस्मृत्योः प्रलयविषयत्वेन विषयभेदान्न ताभ्यामत्र निर्णयो युज्यत इति तन्मतमयुक्तमित्यर्थः।

ननु यदीदं स्वस्याभिप्रेतम्, तदाचार्येण स्वनामैव गृहीतं स्यात्, न तु जैमिनेः, अतो नैवं सिद्धान्त इति शङ्कायां तन्नामोक्तितात्पर्यमाहुः अपरं चेत्यादि ज्ञायते इत्यन्तेन। तथावददिति। जैमिनिरवदत्। तथा च फलांशे सिद्धान्तभेदाभावेपि मार्गांशे भेद इति ज्ञापनार्थं तदुक्तिरित्यर्थः। तर्हि मार्गभेद एव कुतो नाद्रियत इत्यत आहुः परं त्वित्यादि। ननु व्यासेन स्वनाम्नः कुत्राप्यनुक्तत्वान्मतद्वयमपि पारक्यमित्येव प्रतीयते, तथा सति जैमिनिमतस्यादरणीयत्वे किं

रश्मिः।

विशेषेण सुकृतं यस्य स विसुकृतः। एवं विदुष्कृतः। पुंस्त्वे तु ब्रह्माणमिति स्यादित्येवकारः। तस्मादिति। जैमिनिना गुरुमतस्य भृगुणा मानववदुक्तत्वात्। अत्रेति। कौशीतकिश्रुतौ। पूर्वोक्तेति। कार्यात्ययसूत्रस्मृतेश्चेतिसूत्रोक्तयोः श्रुतिस्मृत्योः। ताभ्यामिति। श्रुतिस्मृतिभ्याम्। अत्र व्यासमते। तन्मतमिति। बादरिमतम्। आचार्येण व्यासेन। तन्नाम जैमिनिनामोक्तितात्पर्यम्। सिद्धान्त इति। मन्त्रमयीं देव पठन्तीति फलांशे चितः सदानन्दयोश्च शास्त्रद्वये भेदेपि सिद्धान्तस्याधुना बादरायणगुरोर्मतेऽवस्थितेः सिद्धान्तभेदाभावेपीत्यर्थः। मार्गांशे भेद इति। यद्यपि क्रियाज्ञानमिति पञ्चरात्रशास्त्रे इति ज्ञानकर्ममार्गैक्यम्, तथापि प्रसिद्ध्या परस्परं साध्यसाधनभावान्मार्गांशे भेद इत्युक्तम्। तदुक्तिरिति। जैमिनिनामोक्तिः। एवेति। न तु क्रियाज्ञानयोरैक्यम्। परन्त्वित्यादीति। प्रवृत्तत्वादिति। व्यासस्य 'जिज्ञासितमधीतं च यत्तद्ब्रह्म सनातन'मिति प्रथमस्कन्धे व्यासवाक्यात्। मन्तव्यमिति। पञ्चरात्रशास्त्रप्राधान्यात् क्रियाज्ञानमार्गैक्यमत्र मन्तव्यम्, मीमांसितव्यम्। कुत्रापीति। कुत्राप्यत्र पादत्रये। मतद्वयमिति। बादरिजैमिनिमतद्वयम्।

स्याच्च तदुक्त एव शास्त्रार्थ इति मन्तव्यम् । किञ्च । ‘स प्रजापतिलोकं स ब्रह्मलोक’मित्यत्र ब्रह्मपदस्य परवाचकत्वं तेनापि वाच्यं चेत्, तद्दृष्टान्तेनान्यत्रापि तथैव वाच्यं बाधकाभावात् ।

भाष्यप्रकाशः ।

बीजमित्यत आहुः किञ्चेत्यादि । तेनेति । बादरिणा । अन्यत्रेति । अक्षिपुरुषविद्यायां पञ्चाग्निविद्यायां च । बाधकाभावादिति । गत्युपपत्त्यादिदूषणानां परिहृतत्वेनान्येषां चाभावेन तथात्वात् । तथा च श्रुतिसामञ्जस्यमेव बीजमित्यर्थः ।

अत्र बादरिमतमुपपन्नं मन्वानाः शङ्कराचार्या एवमाहुः । ‘आकाशवत् सर्वतगतश्च नित्य’ इति श्रुतेः परस्य ब्रह्मणो व्यापकत्वम्, ‘य आत्मा सर्वान्तर’ इति श्रुतेः सर्वान्तरत्वम्, ‘आत्मैवेदं सर्वम्,’ ‘ब्रह्मैवेदं विश्वमिदं वरिष्ठ’मिति श्रुतेः सर्वात्मकत्वं च निर्धारितम् । तत्र व्यापकस्य ब्रह्मणो गन्तृदेशे विद्यमानत्वेन गन्तृतैवेति तस्य गन्तव्यता नोपपद्यते । न च भूमिष्ठं प्रति गताया एव पृथिव्या देशान्तरद्वारेण गन्तव्यतावदत्राप्युपपद्यत इति वाच्यम् । सर्वात्मकत्वस्यापि गन्तव्यताबाधकत्वात् । अन्य एव ह्यन्यद् गच्छतीति लोके दर्शनात् । न च बालस्य वार्धकवदनन्यत्वेपि गन्तव्यतोपपद्यत इति वाच्यम् । ‘निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्’, ‘अस्थूलमनणु’, ‘स एष नेति नेत्यात्मे’त्यादिश्रुतिस्मृतिन्यायेभ्यो ब्रह्मणः सर्वविशेषशून्यतया सिद्धत्वेन तत्र देशकालविशेषयोगस्याशक्यवचनतया दृष्टान्तविरोधेन तन्न्यायस्य

रश्मिः ।

बादरिणेति । विपरीतलक्षणा जैमिनिना निरीश्वरवादिनेत्यर्थः । यथापकारिणि ‘बहूपकृतं त्वये’ति बहूपकारित्वप्रयोगः । **अक्षिपुरुष इति** । ‘जानश्रुतिर्ह पौत्रायण’इत्यारम्भकेऽस्ति । ‘उ ह वै ज्येष्ठश्च श्रेष्ठश्चे’त्यारम्भके पञ्चाग्निविद्यास्ति छान्दोग्ये । ‘स एतान् ब्रह्म गमयती’त्यक्षिपुरुषविद्यायाम् । ‘स एतान् ब्रह्म गमयती’ति पञ्चाग्निविद्यायाम् । उभयत्रापि ब्रह्मपदेन परमेवोच्यते, न तु कार्यं ब्रह्मेति । **पञ्चाग्निविद्यायां चेति** । चकारोऽथवा सेश्वरजैमिनिमते इत्यनुक्तसमुच्चायकः । यद्वाथवेत्याद्युक्तशेषो वा पूरणीयः । एतेन व्यासेन सूत्रे मन्त्रमयी देवता जैमिनिमुख्यत्वादित्यनुक्त्वा ‘परं जैमिनिर्मुख्यत्वा’दित्युक्तं तत्स्वारस्यमसूचि । **परिहृततत्वेनेति** । सूत्रव्याख्यानारम्भ एव परिहृतत्वेन । **श्रुतिसामञ्जस्यमिति** । ‘स एतान् ब्रह्म गमयती’ति श्रुतिसामञ्जस्यं ब्रह्मपदे गौणीनिवृत्तिः, सा मतद्वयस्य पारक्ये परमते स्यात्; न तु स्वमत इति । तुरीयपादे बादरायणग्रहणात् तस्य बुद्धिस्थत्वेन जैमिनिसेश्वरवादिस्वशिष्यस्य स्वमतसिद्धस्य सूत्रे ग्रहणं बीजमित्यर्थः । तेन ‘परं जैमिनिर्दर्शना’दिति सूत्रान्वयः । ‘स एतान् ब्रह्म गमयती’त्यत्र ब्रह्मपदेन परमेव ब्रह्मोच्यते, दर्शनाच्छास्त्ररूपादिति जैमिनिराचार्यो मनुत इति सूत्रार्थः । **अत्रेति** । वक्ष्यमाणसूत्रेण सहास्मिन् सूत्रे । वक्ष्यमाणविचारस्य द्वितीयसूत्रे करणात् । अपिचेतिप्रभृति द्वितीयभाष्यादत्रैव तद्विचार उपक्षिप्तः । ‘कार्यं बादरिरस्ये’त्यधिकरणीयत्वात् सूत्रयोरेकविषयत्वम् । अग्रे ‘अप्रतीकालम्बनाधिकरणम्’ ।

देशान्तरद्वारेण । यद्वा यथा पृथिवीस्थ एव पृथिवीं देशान्तरद्वारेण गच्छति । शारीरब्राह्मणे ‘तस्य हैतस्य हृदयस्याग्रं प्रद्योतते, तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य’ इति देशान्तरवद्वा । **अत्रापीति** । व्यापके ब्रह्मण्यपि । **तत्रेति** । ब्रह्मणि । देशकालरूपविशेषयोगस्य । **दृष्टान्तेति** । बालवार्धक्यदृष्टान्तविरोधेन । तन्न्यायस्य

भाष्यप्रकाशः।

अत्र वक्तुमशक्यत्वात्। नच जगदुत्पत्तिप्रलयहेतुत्वश्रुतेर्ब्रह्मणोऽनेकशक्तित्वान्न दोष इति वाच्यम्। विशेषनिषेधकश्रुतीनामनन्यार्थत्वात्। नचोत्पत्त्यादिहेतुत्वबोधकश्रुतीनामपि ब्रह्मपरत्वात् समानमनन्यार्थत्वमिति वाच्यम्। तासामेकत्वप्रतिपादनपरत्वात्। तत्र मृदादिदृष्टान्तवाक्येषु 'मृत्तिकेत्येव सत्य'मित्युपसंहारे एकस्य कारणस्यैव सत्यत्वकथनेन विकारानृतत्वप्रतिपादने तद्धर्माणामुत्पत्त्यादीनामपि तथात्वेन शास्त्रस्य तत्परताया वक्तुमर्हतया तासां विशेषनिराकरणश्रुतिशेषताया एव युक्तत्वात्। न चोत्पत्त्यादिश्रुतिशेषत्वं निर्विशेषश्रुतीनामेवास्त्विति शङ्क्यम्। विशेषनिषेधश्रुतीनां निराकाङ्क्षार्थत्वात्। आत्मन एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः कदाचिदप्याकाङ्क्षान्तरानुदयेन तत्र पुरुषार्थसमाप्तिबुद्ध्युत्पत्तेः। न चात्र मानाभावः शङ्क्यः। 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' 'अभयं वै जनक प्राप्तोऽसि', 'विद्वान्न बिभेति कुतश्चन', 'एतꣳ ह वा व न तपति किमहꣳ साधु नाकरव'मित्यादिश्रुतिभ्यस्तथैव विदुषस्तुष्ट्यनुभवादिदर्शनस्य च मानत्वात्। तथा विकारानृताभिसन्ध्यपवादाच्च। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'ति भेददृष्ट्यपवादाच्च। न विशेषनिषेधश्रुतीनामन्यार्थत्वं शक्यवचनम्। उत्पत्त्यादिश्रुतीनां तु नैवं निराकाङ्क्षार्थप्रतिपादनसामर्थ्यमस्ति, येन तच्छेषत्वं विशेषनिषेधश्रुतीनां वक्तुं शक्येत। तत्र हि, 'यत्रैतच्छुङ्गमुत्पतितं तं सोम्य विजानीहि नेदममूलं

रश्मिः।

बालवाधैक्यन्यायस्य। **अत्रेति**। व्यापकस्य गन्तव्यतोपपत्तौ। **अनेकेति**। जगत्कर्तृत्वजगत्पालकत्वजगत्संहारकत्वरूपानेकशक्तित्वाद्विशेषसत्त्वेपि न दोषः, कार्यलक्षणत्वेन ब्रह्मप्रतिपिपादयिषा विषयार्थत्वाद्विशेषाणामिति वाच्यमित्यर्थः। **विशेषनिषेधकेति**। ताश्च 'निष्कलं निष्क्रिय'मित्याद्युक्ताः तासाम्। **अनन्यार्थत्वादिति**। निर्वाहकसङ्गत्या ब्रह्मनिरूपणपरत्वात्। न तु आरोपापवादसङ्गत्या ब्रह्मनिरूपणपरत्वं तासाम्। आरोपापवादलक्षणसङ्गतेर्निर्वाहकसङ्गतिरन्योऽर्थो भवत्येवम्। अन्योऽर्थः ब्रह्माप्रतिपादकत्वलक्षणः प्रयोजनम्। न अन्योऽर्थो यासां ता अनन्यार्थाः तासां भावः अनन्यार्थत्वम् तस्मात्। यथा विशेषप्रतिपादिकानां ब्रह्मलक्षणत्वम्, तथा विशेषनिषेधिकानामपि ब्रह्मलक्षणत्वम्। कार्यलक्षणत्वं स्वरूपलक्षणत्वमिति विशेषः। **ब्रह्मपरत्वादिति**। यथारोपापवादन्यायेन विशेषनिषेधिकानां ब्रह्मपरत्वम्, तथा निर्वाहकसङ्गत्या विशेषप्रतिपादिकानां ब्रह्मपरत्वम्। यथा 'अथात आदेशो नेति नेति', तथा 'तदेजति तन्नैजती'ति। यथा शाखारुन्धतीन्यायः, तथा किमन्यद्ब्रह्मज्ञाननिर्वाहकमिति जिज्ञासा। तया जगज्जन्मादिकर्तृत्वं कार्यलक्षणमुक्तम्। अतः समानमन्यार्थत्वम्। **तासामिति**। निर्विशेषप्रतिपादिकानामस्थूलादिश्रुतीनाम्। **तत्रेत्यादीति** एकत्वप्रतिपादने छान्दोग्ये मृदादिदृष्टान्तवाक्येषु। एतच्च द्वितीयाध्याये तदनन्यत्वाधिकरण उक्तम्। **तद्धर्माणां** ब्रह्मधर्माणाम्। **तथात्वेनेति**। विकारानृतत्वेन। **तत्परेति**। धर्मपरताया वक्तुमर्हतया। ब्रह्मणो वागविषयत्वेनोत्पत्त्यादीनामर्हता तया। **तासामिति**। सविशेषप्रतिपादिकानां 'यतो वा इमानि भूतानी'त्यादीनाम्। **अस्त्विति**। यतो निरूपणं हि लक्षणैः। तानि चासाधारणधर्मरूपाणि जगज्जन्मादिकर्तृत्वादीनि। तैर्निर्विशेषश्रुतिप्रतिपाद्यज्ञानमिति तथा। अन्तरङ्गत्वं बहिरङ्गाद्बलीय इत्याहुः **विशेषनिषेधेति**। **तत्रेति**। एकत्वाद्युक्त आत्मनि। **तुष्ट्यनुभवेति**। आदिना संक्षोभोऽक्षरजुषाम्। **तथा विकारेति**। छान्दोग्ये मृदादिवाक्येषु। **भेददृष्टीति**। न च नाना इव पश्यति स मृत्युमाप्नोति, किं पुनरभेदमित्यर्थेन भेददृष्ट्यपवाद इति शङ्क्यम्। अस्यार्थस्य नैयायिकमते शोभनात्। **अन्यार्थत्वं** शून्योत्तरार्थकत्वम्। **तच्छेषत्वम्**उत्पत्त्यादिश्रुतिशेषत्वम्। **तत्र हीति**।

भाष्यप्रकाशः।

भविष्यती'त्युपन्यस्य तदुदर्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वदर्शनात्। एवं, 'यतो वा इमानी'-त्यादिश्रुतावपि ज्ञेयम्। अतस्तासां सर्वासामैकात्म्यावगमपरत्वान्नानेकशक्तियोगो ब्रह्मण इति।

अत्र च ब्रह्मणो व्यापकत्वं निर्विशेषत्वं च गन्तव्यताबाधकत्वेन सिद्धमिति सङ्ग्रहेण तदनुवदन्ति ननु परस्येत्यादि उपपद्यत इत्यन्तम्।

अथ यत्तैर्जीवस्वरूपविचारेणागन्तव्यत्वं साधितम्, जीवो नाम किं ब्रह्मणोऽवयवो वा, विकारो वा, अन्यो वा। नाद्यः। एकदेशत्वे एकदेशिनो नित्यप्राप्तत्वाद्गन्तव्यत्वानुपपत्तेर्ब्रह्मणो निरवयवत्वप्रसिद्धेरेकदेशित्वकल्पनस्यानुपपन्नत्वाच्च। न द्वितीयः। विकारेणापि विकारिणो नित्यप्राप्तत्वात्। परित्यागेऽभावप्राप्तेः। पक्षद्वयेपि ब्रह्मणः स्थिरत्वेन जीवस्य संसाराभावप्रसक्तेश्च। अथ तृतीयः पक्षश्चेत्, तदापि किं जीवोऽणुर्व्यापको मध्यमपरिमाणो वा। आद्ये सर्वशरीरवेदनोपलम्भानुपपत्तिः। द्वितीये गमनानुपपत्तिः। तृतीये अनित्यत्वप्रसङ्गः। अन्यत्वे, तत्त्वमस्यादिशास्त्रबाधप्रसङ्गः। विकारावयवपक्षयोरपि मुख्यैकत्वानुपपत्तिः। सर्वेषु चैतेषु पक्षेषु संसारित्वानतिवृत्तेरनिर्मोक्षप्रसङ्गः। अतिवृत्तौ वा स्वरूपनाशप्रसङ्गो ब्रह्मात्मत्वानभ्युपगमादित्येवं जीवविषये मतत्रयं निराकृत्य, ततो भिन्नजीवपक्षे काम्यनिषिद्धकर्मपरिहारपूर्वकं नित्यनैमित्तिककर्मणां करणमात्रेणैव स्वरूपावस्थानरूपो मोक्षोपि भविष्यतीति मतमुपक्षिप्य, तद् दूषयित्वा संसार्यात्मनः कर्तृत्वभोक्तृत्वभावस्य विद्यागम्यब्रह्मात्मत्वावगतिमन्तरेण मोक्ष-

रश्मिः।

छान्दोग्ये श्वेतकेतूपाख्याने हि। यत्राप्सु शुङ्गं अन्नरूपं शुङ्गं कार्यम्। **तदुदर्के** तस्य शुङ्गस्योत्तरोत्तरप्रतिभायाम्। 'उदर्क ईषत्कालीयफले मदनकण्टक' इति विश्वात् फलाध्याये परोक्षवादान् मूलकारणे फलाध्यायोपयोगिनीति वार्थः। उदक इति पाठः। 'तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतित'-मिति श्रुतेः। **विज्ञेयत्वेति**। 'सदेव सौम्येदमग्र आसी'दिति श्रुतेः। ज्ञेयमिति। मूलं ज्ञेयम्। **सर्वासामिति**। सविशेषनिर्विशेषप्रतिपादिकानाम्। **ऐकात्म्येति**। एक एव ऐक्यः, स्वार्थे ष्यञ् एकात्मत्वावगमपरत्वात्। **नानेकशक्तियोग इति**। सविशेषश्रुतिप्रतिपादितः सः। **अनुवदन्तीति**। सिद्धस्य कथनमनुवादः तं कुर्वन्ति उपपद्यत इत्यन्तेनेति। आद्योपपद्यत इत्यन्तेन। **अथेति**। ईश्वरस्वरूपविचाराद्भिन्नप्रक्रमेण। **न गन्तव्यत्वमगन्तव्यत्वम्**। नित्यप्राप्तत्वे सदा विकारित्वापत्तिरत आहुः **परित्याग इति**। विकारपरित्यागे। **अभावेति**। अत्यन्ताभावप्राप्तेः। **पक्षद्वये इति**। नित्यप्राप्तत्वाभावप्राप्तत्वपक्षद्वये। **स्थिरत्वेनेति**। असङ्गत्वे तथा। **तृतीय इति**। ब्रह्मान्यत्वपक्षः। विकारावयवयोर्मध्यमपरिणामत्वादाहुः **विकारावयवपक्षयोरिति**। **मुख्यैकत्वेति**। 'तत्त्वमसा'दिवाक्ये बोध्या। **संसारित्वेति**। तृतीयपक्षोक्तेषु सर्वेष्वेतेषु पक्षेषु। **संसारित्वेति**। संसारित्वस्य आसमन्तान्न निवृत्तेः। स्वरूपत्वेन केनाप्यंशेन विकारादीनां सत्त्वात्। **अतिवृत्ताविति**। विकारादीनां स्वरूपत्वे तदतिवृत्तौ तु स्वरूपनाशप्रसङ्गः। विकारादीनां ब्रह्म आत्मा येषां तत्त्वानभ्युपगमात्। **काम्यनिषिद्धेति**। स्वर्गनरकानवाप्तये तथा। **नित्यनैमित्तिकेति**। प्रत्यवायानुत्पत्तये। **स्वरूपावस्थानेति**। साम्प्रतं देहोपभोग्यानि च कर्माण्युपभोगेनैव क्षीयन्त इत्यतो देहपातादूर्ध्वं देहान्तरप्रतिसन्धानकारणाभावात्। स्वरूपावस्थानलक्षणो मोक्षो विनापि ब्रह्मतया एवंवृत्तस्य सेत्स्यतीति मतम्। **तद् दूषयित्वेति**। 'तदस'दित्यादिना भाष्येण दूषयित्वा। तथाहि। तदसत्। प्रमाणाभावात्। न ह्येतत् शास्त्रेण केनचित् प्रतिपादितम्। 'मोक्षार्थीत्थं समाचरे'-

ननु परस्य व्यापकत्वान्निर्विशेषत्वाच्च न गन्तव्यतोपपद्यते। जीवस्याप्यविद्योपाध्यवच्छिन्नतादशायां परब्रह्मणि गन्तृत्वासम्भवात् तन्नाशे च वस्तुतोऽभिन्नत्वात् स्वरूपेणावस्थानमेव भवतीति न गन्तृत्वमप्युपपद्यते। तस्यैवाभावात्।

भाष्यप्रकाशः

प्रत्याशाभावात्, 'नान्यः पन्था विद्यतेऽयनाये'ति श्रुत्या मोक्षे ज्ञानातिरिक्तसाधननिषेधाच्च तस्य मतस्यासङ्गतत्वं स्थापयित्वा, जीवस्य परस्मादन्यत्वे संव्यवहारलोपप्रसङ्गः, प्रत्यक्षादिप्रमाणाप्रवृत्तिश्चेत्याशङ्क्य, प्राक् प्रबोधात् स्वप्नव्यवहारवत् तदुभयोपपत्तिमुक्त्वा, 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यती'त्यादिश्रुत्या अप्रबुद्धविषये प्रत्यक्षादिव्यवहारश्रावणात् प्रबुद्धविषये च 'यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्ये'दित्यादिना तदभावश्रावणात्। परब्रह्मविदो गन्तव्यत्वादिविज्ञानस्य बाधितत्वेन न कथमपि गतिरुपपादयितुं शक्येत्यन्तेन।

तदेतत् संगृह्यानुवदन्ति **जीवस्योपाध्यवच्छिन्नत्वदशायामित्यादि**। **तस्यैवाभावा**दिति। जीवस्यैवाभावात्।

एवं परब्रह्मविदो गत्यभावमुपपाद्य गतिविषये यत्तैरुक्तम्—गतिविषयाः श्रुतयः सगुणब्रह्मविषया भविष्यन्ति। तथाहि। क्वचित् पञ्चाग्निविद्यां प्रस्तुत्य गतिरुच्यते, क्वचित् पर्यङ्कविद्याम्, क्वचिद्वैश्वानरविद्याम्। यत्रापि ब्रह्मविद्यां प्रस्तुत्य गतिरुच्यते, 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म,' 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मे'त्यादौ, तत्रापि वामनीत्वादिभिः सत्यकामत्वादिभिर्गुणैः सगुणस्योपास्यत्वात् सम्भवति गतिः। न क्वचित् परब्रह्मविषया गतिः श्राव्यते। गतिप्रतिषेधस्तु 'न तस्मात् प्राणा उत्क्रामन्ती'ति श्राव्यते। यः पुनः 'ब्रह्मविदाप्नोति पर'मित्यत्र गत्यर्थ आप्नोतिः, तत्रापि पूर्वोक्तेन न्यायेन देशान्तरप्राप्त्यसम्भवात् स्वरूपप्रति-

रश्मिः।

दिति। 'स्वमनीषया त्वेतत् तर्कित'मित्यादिना दूषयित्वा। जीवस्य परस्मादनन्यत्वे सर्वव्यवहारलोपप्रसङ्ग इति पाठः। **प्रबोधा**दिति। ज्ञानात् प्राक् दीर्घ**स्वप्नव्यवहारवत्**। **तदुभये**ति। जीवस्य परस्मादनन्यत्वसर्वव्यवहारलोपप्रसङ्गाभावयोरुभयोरुपपत्तिमुक्त्वा। **तदभावे**ति। प्रत्यक्षादिव्यवहाराभावश्रावणात्। **इत्यन्तेने**ति। भाष्येण। **परब्रह्मविद्** इत्यारभ्य तु तद्भाष्यफक्किकैव। **कथमपी**त्यत्र **कथञ्चने**ति भाष्ये पाठात् तावन्मात्रभेदः। **जीवस्योपाध्यवच्छिन्नत्वदशाया**मित्यादीति। क्वचित् पुस्तके तु जीवस्याप्युपाध्यवच्छिन्नतादशायामिति भाष्ये पाठः। **गन्तृत्वासम्भवा**दिति। अज्ञानस्योपाधेर्विद्यमानत्वाद् गन्तृत्वस्यैक्यस्यासम्भवात्। **आविद्यकरूपे**ति। आधुनिकास्तु मायाविद्ययोर्भेदमङ्गीकृत्य मायोपाधिरीश्वरः, अविद्योपाधिर्जीव इत्याहुः तत्त्वानुसन्धानाख्यग्रन्थादौ। **गन्तृत्वे**ति। नात्र गन्तृत्वमैक्यम्, किन्तु विद्यावतो विद्ययावरणभङ्गाद्गन्तृत्वस्यासम्भवो ज्ञेयः। **क्वचि**दिति। श्वेतकेतूपाख्याने। **यत्रापी**ति। छान्दोग्ये 'जानश्रुतिर्ह पौत्रायण' इत्यारम्भके प्रपाठकेपि। तथा दशमप्रपाठके दहरविद्यायामपि। **तत्रापी**ति। आप्नोतावपि। **पूर्वोक्तेने**ति। भाष्यप्रकाशे 'अथ यत्तैर्जीवस्वरूपविचारेणेत्याद्युक्ते य आद्यपक्षदूषण एकदेशत्व इत्यादिनोक्तन्यायेन। **स्वरूपे**ति। स्वरूपपदप्राप्तिः स्वरूपप्रबोधो वा।

भाष्यप्रकाशः ।

प्तिरेवेयम्, अविद्याऽध्यारोपितं नामरूपप्रविलयापेक्षयाऽभिधीयते। 'ब्रह्मैव सन् ब्रह्माप्येती'तिवदिति द्रष्टव्यम् । किञ्च । परब्रह्मविषया गतिः किं ब्रह्मविदः प्ररोचनाय, किं वानुचिन्तनाय। नाद्यः । स्वसंवेद्येनैवाव्यवहितेन विद्यासमर्पितेन स्वास्थ्येन तत्सिद्धेः । न द्वितीयः । नित्यसिद्धनिःश्रेयसे वेदनस्यासाध्यफलस्य विज्ञानस्य गत्यनुचिन्तनापेक्षाया अभावात् । तस्मादपरब्रह्मविषयैव गतिः । सा परस्मिन् ब्रह्मणि नोपपद्यत इति परापरब्रह्मविवेकानवधारणेनापरस्मिन् ब्रह्मणि वर्तमाना गतिश्रुतयः परस्मिन्नध्यारोप्यन्ते । न च परापरभावेन द्वे ब्रह्मणी न स्त इति शङ्क्यम् । 'एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कार' इत्यादिश्रुतिदर्शनात् । किं पुनः परं ब्रह्म, किमपरमिति चेत् । उच्यते । यत्राविद्याकृतनामरूपनिषेधेनास्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत्परम् । तदेव यत्र नामरूपादिविशेषाणां केनचिद्विशिष्टमुपासनायोपदिश्यते, 'मनोमयः प्राणशरीरो भारूप' इत्यादिशब्दैः, तदपरम् । नचैवमद्वितीयश्रुत्युपरोधः शङ्क्यः । अविद्याकृतनामरूपतया परिहृतत्वात् । तस्य चापरब्रह्मोपासनस्य तत्सन्निधौ श्रूयमाणं 'स यदि पितृलोककामो भवती'त्यादिजगदैश्वर्यलक्षणं संसारगोचरमेव फलं भवति । अनिवर्तितत्वादविद्यायाः । तस्य फलस्य देशविशेषावबद्धत्वात् तत्प्राप्त्यर्थं गमनमविरुद्धम् । आत्मनः सर्वगतत्वेऽप्याकाशस्य घटादिगमनेनेव बुद्ध्याद्युपाधिगमनेन गमनप्रसिद्धिरित्यवादिष्म, 'तद्गुणसारत्वा'दित्यत्र । तस्मात् 'कार्यं बादरि'रित्येव स्थितः पक्षः । 'परं जैमिनि'रिति तु पक्षान्तरप्रतिभानमात्रप्रदर्शनं बुद्धिविकासनायेति द्रष्टव्यमिति ।

रश्मिः ।

इयं प्राप्तिः । अविद्ययाध्यारोपिते ये नामरूपे तयोः प्रविलयस्यापेक्षया । ब्रह्माप्येतीति । गत्यर्थास्ते प्राप्त्यर्था इति ब्रह्म अप्येति स्वरूपं प्रतिपद्यते प्रबोध्यते वेत्यर्थः । प्ररोचनायेति । 'रोचनार्था फलश्रुति'रिति वाक्यादपि । अव्यवहितेनेति । परब्रह्मणा । विद्या तत्त्वमस्यादिरूपया समर्थितेन । स्वास्थ्येनेति । 'अस्य महिमानमिति वीतशोक' इति श्रुतिः स्वास्थ्येन स्वरूपस्थित्या । तत्सिद्धेः प्ररोचनसिद्धेः । वेदनस्येति । विज्ञानस्य कृत्यसाध्यं फलं यस्य । गत्यनुचिन्तनस्य कृतिरूपस्य अपेक्षायाः । अपरेति । मुण्डके यद्यपि ऋग्वेदादिरूपा अपरविद्या, तथापि तत्प्रतिपाद्यब्रह्माग्न्यादिविद्या तादृशापरविद्यैव गतिः । ब्रह्मणीति । अक्षरब्रह्मणि । अध्यारोप्यन्त इति । परत्र परावभासन्ते । एतद्वा इति । परं ब्रह्म च यदोङ्कारः अपरविद्यारूप इति योजनया प्रतिपाद्यप्रतिपादकरूपपरापररूपे द्वे ब्रह्मणी उक्ते । नामरूपादीति । आदिना क्रिया, 'नाम रूपं क्रिया चे'ति बृहदारण्यकात् । एतेषां मध्ये केनचिन् नाम्ना रूपेण क्रियया वा तदेव विशिष्टम् । परीति । अद्वितीयश्रुत्युपरोधस्य । श्रूयमाणमिति । छान्दोग्ये दहरविद्यायाम् । जगदैश्वर्येति । जगति ऐश्वर्यं पित्रादिसमुत्थानकर्तृत्वं सङ्कल्पद्वारा । 'स यदि पितृलोककामो भवति, सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ती'त्यादिश्रुतेः । एवं 'स यदि मातृलोककामः, भ्रातृलोककामः, स यदि स्वसृलोककामः, स यदि सखिलोककामः, स यदि गन्धमाल्यलोककाम' इत्यपि द्रष्टव्यम् । संसारः प्रपञ्चः ।

जीवत्वदशायां तूपाध्यवच्छेदाद् गन्तृत्वं जीवस्यापरस्य ब्रह्मणश्चाविद्यकरूपनामवत्त्वेन गन्तव्यता चोपपद्यते । उपासनाफलत्वादस्य गमनस्य उपास्यस्य च सगुणत्वेन तत्प्राप्तेरेवोचितत्वाच्च । निर्गुणब्रह्मविद्यावतो गन्तृत्वासम्भव इत्युक्तम्, अतो बादरिमतमेव साधीयः । न च ब्रह्मपदस्य मुख्यार्थत्वमुक्तरीत्यात्र सम्भवति, अतोऽत्रामुख्यार्थत्वमेवानुसर्तव्यमिति चेत् । स्यादेतदेवम्, यद्यौपाधिकमुपास्यरूपं जीवत्वं वा स्यात्, न त्वेवम् । 'प्रकृतैतावत्त्वं हि प्रतिषेधती'त्यादिभि'स्तद्गुणसारत्वाच्च तद्व्यपदेश' इत्याद्यधिकरणैः श्रुत्यर्थनिर्णयेन ब्रह्मणि विशेषाणामौपाधिकत्वस्य जीवपुरुषोत्तमाभेदस्य च पुरस्तादेव निरस्तत्वात् । न च व्यापकत्वं गन्तव्यत्वे बाधकम् । प्रारब्धभोगं विना तत्प्राप्त्यसम्भवाद् यदा यत्र तद्भोगसमाप्तिः, तदा तत्र तत्प्राप्तेर्निःप्रत्यूहत्वात् ।

भाष्यप्रकाशः ।

तदनुवदन्ति जीवत्वेत्यादिना चेदित्यन्तेन । एवं सर्वं तन्मतं सङ्ग्रहेणानूद्य, यत्तैर्गतिश्रुत्युपपादनार्थं पश्चादुक्तम्, तदेव प्रथमतो दूषयन्ति स्यादेतदेवमित्यारभ्य निरस्तत्वादित्यन्तम् ।

अत्रायमर्थः । यत्तावत् परब्रह्मणो निर्विशेषमात्रत्वोपपादनाय, 'सदेव सोम्ये'ति, 'यतो वा इमानी'त्यादीनां जगदुत्पत्त्यादिबोधकश्रुतीनामेकत्वप्रतिपादनपरत्वमुक्तम्, तत्किमुपादानतयैकत्व प्रतिपादनार्थम्, उत तटस्थतयैकत्वप्रतिपादनार्थम् । आद्ये तासामुपादानतादिबोधकत्वेन स्वार्थेऽपि तात्पर्यात् सिद्धमनेकशक्तित्वम् । द्वितीये तु, न प्रमाणमुपलभामहे, तत्र ताटस्थ्यबोधकपदाभावात् । न च मृदादिदृष्टान्तवाक्ये विकारस्य वाचारम्भणमात्रत्वकथनेन तन्मिथ्यात्वस्य 'मृत्तिकेत्येव सत्य'मिति कारणसत्यत्वस्य च बोधनात् तदेव मानमिति वाच्यम् । तत्र तथार्थाभावात् । तत्र विकारस्य वाचारम्भणत्वोक्त्या तस्य कारणानन्यताया एव सिद्धेस्तावता तटस्थैक्यस्य साधयितुमशक्यत्वात् । वाचारम्भणस्य नामधेयत्वविधानेन

रश्मिः ।

जीवत्वेत्यादिना चेदित्यन्तेनेति । परब्रह्मण इति । ननु तन्मतेऽक्षरातिरिक्तब्रह्माभावात् किं परं ब्रह्मेति चेदुच्यते । न च कार्ये प्रतिपत्त्यभिसन्धिरिति सूत्रभाष्ये तथोक्तेरस्ति परब्रह्मेति । परन्त्वक्षरमेव परब्रह्म । ब्रह्मपदस्येति । उक्तरीत्येति । बादरिमतोक्तरीत्या । अत्रेति । 'स एतान् ब्रह्म गमयती'तिश्रुतौ । अत्रेति । उक्तश्रुतौ । अमुख्यार्थत्वं कार्यब्रह्मार्थत्वम् । पश्चादिति । जीवविचारेण पश्चादुक्तम् । व्यापकत्वविचारात् पश्चात् । जगदुत्पत्त्यादीति । एतेन यद्यौपाधिकमुपास्यरूपमित्यत्र मायोपाधिरुक्तः धर्माणामाविद्यकत्वात् । उपास्यं मायोपाधिकमिति । एकत्वेति । आरोपापवादसङ्गत्या तथा । जीवविषये तु जीवब्रह्मैकत्वप्रतिपादनपरत्वमित्यर्थः । जीवोऽविद्योपाधिकः । तत्राप्यारोपापवादः । भागत्यागलक्षणयैकत्वम् । तत्त्वमस्यादिवाक्ये । उक्तमिति । न च कार्ये प्रतिपत्त्यभिसन्धिरिति सूत्रे उक्तम् । तथा च यदि मायोपाधिकमुपास्यरूपम्, अविद्योपाधिकं जीवत्वं वा स्यादिति भाष्यार्थो दिङ्मात्रेणासूचि । अनूद्य दूषयन्तः न त्वेवमित्यादिभाष्यं प्रपञ्चयन्ति स्म विचारेति । विचारेण विकारो विचारविकारः तस्य । मृदादिदृष्टान्तवाक्यविचारे इति पाठः सुवचाः । तत्रेति । वाचारम्भणश्रुतौ । कारणानन्यतेति । 'कार्यकारणवस्त्वैक्यमर्षणं पटतन्तुव'दिति वाक्यात् । साधयितुमिति । आरोपापवादसङ्गत्या साधयितुम् । नामधेयत्वेति । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मित्यत्र वाचारम्भणं विकारः कार्यम् । तथा सत्युक्तसङ्गत्या मिथ्यात्वं प्राप्तं तद्वारणाय वाचारम्भणं

---

१. विचारविकार इति रश्मौ ।

भाष्यप्रकाशः।

तथा निश्चयात्। अन्यथा, वाचारम्भणनामधेयपदयोरन्यतरप्रयोगमात्रेण विकारमिथ्यात्वसिद्धावन्यतरवैयर्थ्यापत्तेर्दुर्वारत्वात्। अतो घटशरावादयो यथा मृद एव नामान्तरम्, तथा प्रपञ्चरूपो विकारोपि ब्रह्मण एव नामान्तरमिति तत्र कारणानन्यतायामेव तात्पर्यात्। भगवता सूत्रकारेणापि तथैव सूत्रितत्वात्। अन्यथा 'तन्मिथ्यात्वमारम्भणशब्दादिभ्य' इत्येव वदेत्। 'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य। तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्व'दित्येकादशस्कन्धीयभगवद्वाक्याच्च। अतस्तासां कारणैक्ये एव तात्पर्यम्, न तु तटस्थैक्ये। एवं कारणसत्यत्वावधारणादपि न तटस्थैक्यसिद्धिः, कारणत्वेनैव सत्यत्वावधारणात्। न च कारणत्वेनापि कारणसत्यत्वावधारणे कार्यस्य मिथ्यात्वसिद्धौ ताटस्थ्येनैव कारणतेति तटस्थैक्यस्यैव सिद्धिरिति वाच्यम्। 'आत्मैवेदं सर्वम्', 'ब्रह्मैवेदं विश्वमिदं वरिष्ठ'मित्यादिभिस्तदुक्तश्रुतिभिरेव कार्यस्य ब्रह्मत्वावधारणे तन्मिथ्यात्वस्यैव वक्तुमशक्यत्वात् तटस्थकारणताया एवासिद्धेः। अतः, 'सन्मूलाः सौम्येमा' इत्यादिश्रुतेः सूत्रकृता कार्यलक्षणमुखेनैव ब्रह्मजिज्ञासाप्रतिज्ञानादन्यथा जगदप्रतीत्यादिदोषप्रसङ्गाच्च उपादानत्वेनैवैकत्वसिद्धिरित्युत्पत्त्यादिहेतुत्वबोधकश्रुतीनां स्वार्थेपि तात्पर्यस्य दुरपोहत्वात् तासां विशेषनिराकरणश्रुतिशेषताया एवायुक्तत्वात्। अनन्तशक्तित्वेनैव ब्रह्मणः सिद्धिरिति न विशेषनिषेधश्रुतीनां निराकाङ्क्षार्थत्वम्। तावता ब्रह्मज्ञानस्यापूर्तेः। नाप्यात्मन एकत्वनित्यत्वशुद्धत्वाद्यवगत्या पुरुषार्थसमाप्त्यवगतिः। भूमविद्यायां 'भूमैव विजिज्ञासितव्य' इत्यादिना नित्यनिरवधिसुखात्मकब्रह्मज्ञानादेव पुरुषार्थबुद्धिसमाप्तिबोधनात्। जीवब्रह्मैक्यस्यापि तादात्म्यरूपत्वमेव,

रश्मिः।

नामधेयमित्युक्तम्। तथेति। तटस्थसाधनाशक्यत्वनिश्चयात्। मृद इति। षष्ठ्यन्तम्। तथैवेति। कारणानन्यत्वबोधकत्वेन 'तदनन्यत्वमारम्भणशब्दादिभ्य' इति। वदेदिति। सूत्रकारः। तासामिति। सविशेषप्रतिपादिकानां श्रुतीनाम्। तटस्थैक्यमारोपापवादेन तस्मिन्। तदुक्तेति। 'न च कार्ये प्रतिपत्त्यभिसन्धि'रितिसूत्रभाष्ये शङ्कराचार्यैरुक्ताभिः श्रुतिभिः। अन्यथा जगदिति। विद्वन्मण्डने 'उपजीव्यत्वतः श्रौतवाक्यैश्चान्यपरत्वतः अन्तरङ्गत्वतश्चापि निर्विशेषं निरूप्यत' इत्यनया निर्विशेषनिरूपणे प्रतिज्ञाते सिद्धान्तोक्तिः 'अभेदादनुपाधित्वाज् जगदप्रत्ययासितः, सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधन'मित्यनया। इमे जगदप्रतीत्यादिदोषास्तेषां प्रसङ्गात्। अर्थस्तु सुवर्णसूत्रे प्रसिद्धः। तथा चान्यथेत्यस्य तटस्थकारणत्वे च। न च व्यावहारिकसत्तया मिथ्यात्वेपि न जगदप्रतीतिप्रसङ्ग इति वाच्यम्। तथाप्यनृतप्रतीतेर्दुर्वारत्वात्। व्यावहारिकसत्तायाः सत्कृष्णत्वात्। वेदस्तुतौ 'सन्तं कृष्णं भजेद्बुध' इत्युक्तत्वात्। स्वार्थेपीति। अन्यथा तु व्यवहारे वयं भाट्टा इति वदतां शाङ्कराणां 'विधिना त्वेकवाक्यत्वे स्तुत्यर्थेन विधीनां स्यु'रिति जैमिनिसूत्रेण विध्यर्थस्तावकत्वेन स्वार्थे तात्पर्यस्यापोह्यत्वात्। तासामिति। उत्पत्त्यादिहेतुत्वबोधकश्रुतीनाम्। अयुक्तत्वादिति। स्वार्थे तात्पर्यविधुराणामेव अर्थवादानां विधिना त्वेकवाक्यत्वात्स्तुत्यर्थत्वम्। तासां तु स्वार्थे तात्पर्योक्तेर्नार्थवादत्वमित्ययुक्तत्वं तस्मात्। निराकाङ्क्षेति। ब्रह्मज्ञानपूर्तौ तथा। तावतेति। विशेषनिषेधमात्रेण। ब्रह्मज्ञानस्य विषयतावच्छेदकं विरुद्धधर्माधारत्वम्। दशविधलीलाविशिष्टत्वं वा। अन्यथा मायाकार्यत्वेन जगतो मिथ्यात्वादप्रतीतिप्रसङ्गः। पुरुषार्थेति। मोक्षपुरुषार्थसमाप्त्यवगतिः। ननु 'प्रकृतैतावत्त्वं हि प्रतिषेधती'त्यादौ तृतीयाध्यायद्वितीयपादस्थे विशेषतो अक्षरजीवविषय इति फलाध्याये किं प्रयोजनमत आहुः भूमेति। छान्दोग्ये नारदसनत्कुमारसंवादेस्ति। मार्गत्रये भक्तिमार्गगणनादधिकारिभेदादाहुः जीवब्रह्मेति। अपिना ब्रह्म परं ब्रह्म तेनैक्यस्य तादात्म्यरूपत्वं

भाष्यप्रकाशः ।

न तु सर्वात्मनाऽभेदरूपत्वम् । 'तत्त्वमसी'त्यादौ तस्य भावस्तत्त्वमिति व्युत्पत्त्या तथैव सिद्धत्वात् । सर्वात्मनाऽभेदस्य भागत्यागलक्षणादोषग्रस्तत्वेनाग्रहमात्रत्वात् । एतच्च, 'तद्गुणसारत्वात्तु तद्व्यपदेश' इत्यत्र व्युत्पादितम् । तदनन्यत्वाधिकरणे च । 'तत्र को मोहः कः शोक एकत्वमनुपश्यत' इति ईशावास्यवाक्येपि, 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानत' इति पूर्वार्धेन ज्ञानिनः सर्वात्मभावो वामदेववत्तस्यामवस्थायामुच्यते इति तादृशीनां[1] श्रुतीनामपि पूर्वकक्षाविश्रान्तत्वमेव ।

रश्मिः ।

गौणाद्वैतरूपत्वम् । तथा च तन्न्यायस्य फलाध्यायेपि तौल्यं सूचितम् । ब्रह्मपदस्याक्षरे पुरुषोत्तमे च प्रयोगात् । गौणमद्वैतं फलप्रकरणे पुरुषोत्तमस्याधोक्षजत्वात् । 'अन्तरा भूतग्रामवत्स्वात्मन' इति सूत्रविषयत्वाच्च । एवकारव्यावर्त्यमाहुः **न त्विति** । मुख्याद्वैतस्याक्षरविषयत्वात् । फलाध्याये पुरुषोत्तमस्य मुख्यत्वात् । **सर्वात्मना अभेदो** भेदाभावः यथा सैन्धवखिल्यस्य सिन्धुना अभेदो मुख्यः । यथा घटस्य घटान्तरेणाभेदस्तादात्म्यरूपो अभेदो गौण इति । **तत्त्वमसीत्यादाविति** । आदिना ब्रह्माहमस्मीति । अन्यान्यष्टपदानि च । तत्त्वमसीत्येकादशपदात्मक उपदेश इति । तस्य भावस्तत्त्वमिति । तत् त्वमित्युपादानकार्ययोरभेदः सोक्षरेण अतस्तं विहाय कर्तृकारकघटितत्वाच्च । तस्य त्वमिति शेषषष्ठीघटिततादात्म्यरूपोऽभेदः पुरुषोत्तमविषये फलाध्यायत्वादुक्तः । षष्ठ्या अकारकत्वात् । द्वितीयसप्तमाध्याये 'शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वम् । शब्दो न यत्र पुरुकारकवान्क्रियार्थो मायापरैत्यभिमुखे च विलज्जमाने'त्यत्र पुरुषोत्तमे कारकत्वाभावोक्तिः । **तथैवेति** । जीवपरब्रह्मैक्यस्य तादात्म्यरूपत्वस्यैव सिद्धत्वात् । जीवपरब्रह्मणो मुख्याभेदे दोषमाहुः **सर्वात्मनेति** । तथा च मुख्याभेदे स्वीकृते लीलावैचित्र्यं न स्यादिति दृष्टवैचित्र्यापलापो दोषः । नन्वधोक्षजे लीलावैचित्र्यदर्शनं केन करणेनेति चेन्न । महतामन्तःकरणस्य करणत्वात् । महत्त्वं भगवत्सम्बन्धादेव । तदुक्तं बृहदारण्यके 'मनसैवानु द्रष्टव्यमेतदप्रमेयं ध्रुव'मिति । अनु महत्वमनु भक्तिमनु वा । अप्रमेयमधोक्षजरूपम् । तथा च सप्तमस्कन्धे सप्तमाध्याये सद्वासनाप्रकरणे 'हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः । इति भूतानि मनसा कामैस्तैः साधु मानये'दित्युक्त्वा 'यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम् । मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः । तदा पुमान्मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः । निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् । अधोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् । तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वर'मिति । तस्य भावश्चेष्टादिः तस्य भावो भावना तेनानुकृते आशयानुकृती मनःशरीरे यस्य । निर्दग्धं बीजमज्ञानमनुशयो वासना च यस्य सः । सम्यगेति प्राप्नोति । ततः किमत आह । अधोक्षजस्यालम्भं मनसा स्पर्शम् । अधोक्षजालम्बमिति पाठेऽधोक्षजस्याश्रयणम् । अशुभः रागादियुक्त आत्मा मनो यस्य । शातनं निवर्तकम् । ब्रह्मणि निर्वाणं लयो मोक्षस्तदात्मकं सुखम् । हृदीश्वरमन्तर्यामिणम् । उक्तरीत्या पूर्वकक्षाविश्रान्तत्वादेव । **तद्गुणेति** । द्वितीयाध्यायस्य तृतीयपादेऽस्ति । **तदनन्यत्वेति** । द्वितीयाध्यायस्य प्रथमपादेऽस्ति । भाष्यस्य दिङ्मात्रत्वात्तत्सिद्धयेप्रपञ्चमाहुः **तत्र को मोह** इति । एकत्वमिति । तादात्म्यं वक्ष्यमाणदृष्टान्तात्, फलाध्यायाच्च । **सर्वात्मभाव** इति । सर्वस्मिन्नात्मभावः सर्वात्मभावः 'सर्वात्मभावोऽधिकृतः' इत्यस्य सुबोधिनीटिप्पण्युक्तः । **वामदेववदिति** । पुरुषविधब्राह्मणेऽस्ति । तत्रापि टिप्पण्युक्तो विग्रहः । **तस्यामिति** । तस्य ज्ञानिनः अवस्थायां साधनावस्थायाम् । 'सर्वभूतेषु मन्मति'-

---

[1] एतादृशीनामिति रश्मौ ।

भाष्यप्रकाशः।

अत एव 'आनन्दं ब्रह्मणो विद्वान्न विभेति कुतश्चने'ति श्रुतावपि मनोवागगोचरनिरवध्यानन्दज्ञानादेव भयाभावकथनं युज्यते। एतेनैव विदुषस्तुष्ट्यनुभवादिदर्शनमपि व्याख्यातम्। तस्य यथाधिकारत्वात् विकारानृताभिसन्ध्यपवादस्तु विकारसत्यत्वमेव बोधयति। अन्यथा तेनात्मान्तर्धानानुपपत्तेः। आत्मान्तर्धानानन्तर्धानयोर्वस्तुधर्मत्वात्। अन्यथा 'अनृतेनात्मानमन्तर्धाये'ति श्रुतिविरोधापत्तेः। 'मृत्योः स मृत्युमाप्नोती'ति भेददृष्ट्यपवादस्तु परब्रह्मस्वरूपगतभेददृष्टिविषयः। काठके 'पराञ्चि खानी'त्यादिना परमात्मन एवोपक्रान्तत्वात्। उपसंहारेपि 'अङ्गुष्ठमात्रः पुरुष' इति मन्त्रद्वये तस्यैवोक्तत्वात्। अग्रे च, 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति। एवं मुनेर्विजानत आत्मा

रश्मिः।

रिति वाक्यात्। तथा च सर्वात्मभावः लिङ्गभूमविद्यायां पुष्टिमार्गीयः। तच्चरमवृत्तौ टिप्पण्युक्तः। मर्यादायां निरोधलक्षणग्रन्थोक्तः। अम्बरीषस्येव 'सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास हे'ति नवमस्कन्धे। वामदेवस्य महादेवस्य सर्वात्मभावः भक्त्यङ्गं ज्ञानित्वात्। 'ज्ञानेन भक्त'ेति श्रुतेः। भक्त्यङ्गं सर्वात्मभावः। 'सर्वभूतेषु मन्मति'रिति वाक्योक्तः। टिप्पण्युक्तो नित्यलीलायामपि। तत्र ज्ञानस्यावर्जनीयत्वेन राजसादिज्ञानानां चाभावात्। 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इति वाक्यात्। **एतादृशीनामिति**। 'ज्ञानेन भक्ता', 'तद्वैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे, अहं मनुरभवम्, सूर्यश्च', 'यस्मिन् सर्वाणि भूतानी'त्येतादृशीनाम्। **पूर्वकक्षेति**। भयाभावसाधनं यदानन्दज्ञानं तत्साधनं भक्तिः तस्याः पूर्वकक्षा ज्ञानिनां ज्ञानं तत्र विश्रान्तत्वमित्यर्थः। वाक्यशृङ्खलयैवकारः। **अत एवेति**। उक्तरीत्या पूर्वकक्षाविश्रान्तत्वादेव। **एवेति**। पूर्वकक्षाव्यवच्छेदकः। **एतेनेति**। मनोवागगोचरनिरवध्यानन्दज्ञानादेवाभयकथनेन। **विदुषः** पूर्वकक्षाविश्रान्तज्ञानवतः भक्त्यङ्गसर्वात्मभावेन तुष्टेरनुभवः स्वस्य परस्य। आदिना स्थितिः। **व्याख्यातमिति**। ज्ञानिपरत्वेन व्याख्यातम्। तदेवाहुः **तस्येति**। दर्शनस्य भक्ताधिकारकसर्वात्मभावातिरिक्तसर्वात्मभावमनतिक्रम्य यथाधिकारं तस्य भावो यथाधिकारत्वं तस्मात्। **विकारेति**। विकारानृताभिसन्धिर्मृदादिदृष्टान्तेन छान्दोग्ये तस्यापवादः 'वाचारम्भणं विकार' इत्येतावतैव चारितार्थ्ये नामधेयपदेन व्यर्थतां गतेन विकारवाचारम्भणाभिसन्धेरपवादः क्रियते। एवं नामधेयपदसार्थक्यम्। यद्यपि नामरूपरूपस्य जगतो विकारत्वप्रतिपादनेन वाचारम्भणनामधेयपदयोरुभयोः सार्थक्यम्, तथापि नाम्नां शब्दात्मकानां शब्दनित्यत्वेन विकारसत्यत्वप्रतिपादकत्वमपीत्याहुः **विकारसत्यत्वमेवेति**। 'वाचा विरूपनित्यये'ति श्रुतेरेवकारः। छान्दोग्ये श्वेतकेतूपाख्यानस्थश्रुतिसिद्धमर्थं श्रुतिं चोपष्टम्भकत्वेनाहुः **अन्यथेत्यादि**। नामधेयपदेन विकारसत्यत्वाबोधने। **तेन** अनृतेन। अनृतेनेत्यादिश्रुतिः। **परब्रह्मस्वरूपेति**। 'सजातीयविजातीयस्वगतद्वैतवर्जित'मिति निबन्धात्। **पराञ्चीति**। द्वितीयाध्यायारम्भे। अनया मध्ये 'मृत्योः स मृत्यु'मिति श्रुतिः। तत्र 'पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन्नि'त्यत्र द्रष्टृत्वेन अन्तरात्मसमवायित्वेन तदभिन्नस्य परमात्मन एव। यद्वा। प्रथमाध्याये 'स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्य'मित्युपक्रान्ताग्नित्वेनान्तरात्मन एव। **मन्त्रद्वयेनेति**। 'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ईशानो भूतभव्यस्य स एवाद्य स ईश्वर[1] एतद्वैतत्। यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति। 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमे'त्यत्र तृतीयश्रुतिं परित्यज्य मन्त्रद्वये। **तस्यैवेति** ईश्वरस्य सधर्मकस्य परात्मन एवोक्तत्वात्। **विजानत** इत्यस्याक्षर

---

[1] 'उश्वः' इति मुद्रितोपनिषदि।

भाष्यप्रकाशः ।

भवति गौतमे'ति मुक्तिदशायामपि साम्यमात्रबोधनाच्च । तेन 'चक्षुषश्चक्षु'रित्यादिना परस्य ब्रह्मण एवोपक्रान्तत्वाद्यथा बृहदारण्यकेऽर्थः, तथात्रापीति न तेनापि विकारस्य मिथ्यात्वसिद्धिः । 'यत्रैतच्छुङ्गमुत्पतित'मिति श्रुत्यापि जगन्मूलत्वेनैवैकत्वमुदर्के प्रतिपादितम्, न तु ताटस्थ्येन । एवं, 'यतो वे'त्यादावपि ज्ञेयम् । अतः सर्वासां श्रुतीनामुपादानकारणैकात्म्यावगमपरत्वाद् विशेषनिषेधश्रुतीनां च लौकिकविशेषनिषेधपरत्वात् तासां परस्परसाकाङ्क्षतैव । शेषशेषिभावस्तु यथाधिकारं प्रकरणबलादनियत इति ब्रह्मण्येकशक्तियोगो निराबाध एव ।

तेन यत्तैः प्रश्नोपनिषद्वाक्यात् परापरे द्वे ब्रह्मणी अङ्गीकृत्य, यदविद्याकृतनामरूपादिविशेषप्रतिषेधेनास्थूलादिशब्दैर्ब्रह्मोपदिश्यते, तत् परम्; यत्पुनर्नामरूपविशेषाणां केनचिद्विशिष्टमुपासनायोपदिश्यते 'मनोमयः प्राणशरीर' इत्यादिशब्दैस्तदवरमिति प्रतिपादितम्; तत्र किं मानम्? न तावदस्थूलादिवाक्यम्, मनोमयादिवाक्यं च । तत्र परापरशब्दयोरश्रवणात् । आद्ये अक्षरशब्देनैव लक्ष्यनिर्देशात् । यदि च मुण्डके, 'अथ परा यया तदक्षरमधिगम्यत' इत्यक्षरविद्यायाः परत्वश्रावणात् तद्वेद्यस्याक्षरस्य परत्वमिष्यते । बाढम् । तदा पुरुषस्य ततोपि परत्वमेव द्रष्टव्यम् । 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो

रश्मिः ।

विद्यया विजानत इत्यर्थादाहुः **मुक्तीति** । जीवन्मुक्तिदशायाम् । काठक उपक्रमस्य परमात्मपरत्वं क्लिष्टं मत्वा भाष्यस्य दिङ्मात्रत्वाय बृहदारण्यकेन एतत्प्रपञ्चयति स्म **तेन चक्षुष** इति । शारीरब्राह्मणे अर्धप्रपाठकसमाप्तौ 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः, ते निचिक्युः ब्रह्मपुराणमग्र्यं मनसैवावाप्तव्यं नेह नानास्ति किंचने'ति, अग्रे 'मृत्योः स मृत्युमाप्नोति य इहे'त्यादिश्रुतिः । चक्षुषश्चक्षुरित्यस्यादिः चक्षुषश्चक्षुरित्यादिः तया । अत एव प्राण इत्यातिदेशाधिकरणे प्राणस्य परब्रह्मतोक्तेः । **बृहदारण्यकेऽर्थ** इति । भेददृष्ट्यपवादः परब्रह्मस्वरूपगतभेददृष्टिविषय इत्यर्थः । **तथात्रापीति** । काठकेऽपि उक्तोऽर्थ इति । **न तेन** काठकेन । **विकारस्येति** । नाना पश्यति विकारैः कृत्वा नाना पश्यति इति विकारस्य मिथ्यात्वे मृत्योर्मृत्य्वाप्तिर्नेत्येवं न विकारस्य **मिथ्यात्वसिद्धिः** । **यत्रैतदिति** । तत्रैतदित्यपि पाठः, तत्रेत्यप्सु । अन्नरूपं **शुङ्गं** कार्यम्, **उत्पतितं** जातम् । जगदिति जगत्समवायित्वेनैवैकत्वं कार्यकारणैकत्वम्, न तु विकारमिथ्यात्वेनैकत्वम् । नाप्युदकविकारयोरैक्ये नैकत्वम् । श्रौतत्वेऽपि जलस्य मूलकारणत्वाभावेन जन्माद्यधिकरणविरोधापत्तेः । **उदर्के** ईषत्कालीयफले मदनकण्टके वा । उदक इति वा पाठः । तदपः आचक्षते अशनायेति तत्रैतच्छुङ्गमुत्पतितमिति श्रुतेः । तथापि फलाध्याये परोक्षवादादुदर्क इति । एवं कार्यलक्षणोक्तधर्मेणैक्यमुक्तम्, तटस्थलक्षणोक्तसत्यत्वादिधर्मैरित्याहुः **न त्विति** । 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्युक्तं तटस्थलक्षणम् । 'यतो वा इमानि भूतानि जायन्त' इत्युक्तं कार्यलक्षणं तदेवाहुः **एवं यतो वेति** । सिद्धमाहुः **सर्वासामिति** । सगुणनिर्गुणप्रतिपादिकानां श्रुतीनां फलाध्यायत्वाज् जगदुपादानमक्षरं लोकरूपं तत्रत्यो भगवान् रसात्मकजगदुपादानं तत्र कार्यकारणयोरैकात्म्यावगमः तस्माद्विरुद्धधर्माधारत्वादाहुः **तासामिति** । धर्मिप्रतिपादिकानां स्वलक्षणधर्माकाङ्क्षा, धर्मप्रतिपादिकानां च स्वाश्रयाकाङ्क्षेति **परस्परसाकाङ्क्षता** । **शेषशेषीति** धर्मप्रतिपादिकानां प्रतियोगिप्रतिपादकत्वाच्छेषभावः । धर्मनिषेधिकानां तु शेषिभावः । शेषः प्रतियोगी यस्यास्तीति शेषी निषेधः । तयोर्भावः **शेषशेषिभावः** । ज्ञानरूपमधिकारमनतिक्रम्य **यथाधिकारम्** । ज्ञानकर्मभक्तिप्रकरणबलात् । **अनेकेति** । जगज्जन्मादिकर्तृत्वादिसत्यत्वादिरूपानेकशक्तियोगः । उभयव्यपदेशाद्यधिकरणसत्त्वादेवकारः । **आद्य इति** । परस्मिन् । एवकारः पुरुषोत्तमयोगं

भाष्यप्रकाशः ।

ह्यक्षरात् परतः पर' इति तत्रैव श्रावणात् । न च तस्य यावद्विशेषशून्यत्वम् । तदग्रे, 'एतस्माज्जायते प्राण' इति मन्त्रेण तत एव सृष्टेः श्रावणात् । 'अग्निर्मूर्धे'त्यादिभिस्तद्रूपोपन्यासाच्च । नाप्यक्षरस्य तथात्वम् । अस्थूलादिश्रावणोत्तरं प्रशासनस्य वेद्यत्वद्रष्टृत्वादीनामाकाशोपादानत्वस्य च श्रावणेन, मुण्डकेपि, 'यत्तदद्रेश्य'मित्याद्युक्त्वा, 'यद्भूतयोनिं परिपश्यन्ती'त्यादिजगदुपादानत्वसर्वज्ञत्वादीनां श्रावणेन 'यावद्विशेषशून्यताया वक्तुमशक्यत्वात् । एवं वाक्यान्तरेष्वपि द्रष्टव्यम् । सर्वत्र एकस्यैव ब्रह्मणः प्रतिपाद्यत्वात् । अत एव श्वेताश्वतरेपि 'प्रधानक्षेत्रज्ञपतिर्गुणेशः', 'यो ब्रह्माणं विदधाति पूर्व'मित्यादीन् नानाधर्मबोधकानेव मन्त्रानुक्त्वा 'निष्कलं निष्क्रिय'मित्युक्तम् । 'स वा एष महानज आत्मे'त्यत्रापि शारीरब्राह्मणे, 'अन्नादो वसुदान' इति 'सर्वस्य वशी सर्वस्येशान' इत्यादयो धर्मा उक्ताः । 'स वा एष नेति ने'त्युक्त्वा, 'अगृह्यो न हि गृह्यते, अशीर्यो न हि शीर्यते असङ्गोऽसितो न सज्जते न व्यथत' इत्येवं निषेधो विवृतो न तु यावद्धर्मपरत्वेनेति द्रष्टव्यम् । अतो यत्रोत्कर्षस्य विश्रान्तिः, अक्षराद्वा यदुत्कृष्टम्, तदेव परमिति मन्तव्यम्, उक्तमुण्डकश्रुतेः । 'अव्यक्तात् पुरुषः परः, पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गति'रिति काठकश्रुतेः । 'अम्भस्यपार' इत्युपक्रम्य, 'अतः परं नान्यदणीयसꣳ हि परात् परं यन्महतो महान्त'मिति तैत्तिरीयश्रुतेश्च । पुरुषस्य च विरुद्धधर्माश्रयत्वमेतास्वेव प्रतिपादितम् । एतदेव परत्वम् । गीतासु च 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तन्ते तद्धाम परमं मम । पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यये'ति । 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । यस्मात् क्षरमतीतोऽहमराक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति तदुपबृंहणात् । अत एव, 'न तत्समश्चाभ्यधिकश्च दृश्यते' इत्यादिषु तस्य समाभ्यधिकनिषेधोपि युज्यते । न च पुरुषोत्तमाक्षरयोः परापरभावाङ्गीकारे अद्वैतश्रुतिविरोधः । गणितागणितानन्दत्वधर्मभेदेपि वस्त्वभेदेन द्वैताभावे तदभावात्, अग्निस्त्रादिवदद्वैतविरुद्धसम्पद्रूपत्वेनाभेदस्य तादात्म्यात्मकत्वात् । अथवा । शब्दब्रह्मवेद्यं परम्, शब्दब्रह्मैवापरम् । षष्ठस्कन्धे चित्रकेतुं प्रति, 'शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू' इति भगव-

रश्मिः ।

व्यवच्छिनत्ति । लक्ष्यनिर्देशो बृहदारण्यकेऽक्षरब्राह्मणेऽस्ति । वाक्यान्तरेष्विति । यथा प्रश्नोपनिषदि । 'यो ह वैतदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सौम्य सर्वज्ञः सर्वो भवती'ति । पर्युदासार्थको नञ् । अतो यावद्विशेषशून्यता न । परत्वमिति । पुरुषोत्तमत्वम् । तत्रैवेति । मुण्डके एव । तस्येति । पुरुषोत्तमस्य । सृष्टेरिति । आत्मसृष्टेः । अक्षरसृष्टेरन्यत्वात् । श्रावणेनेति । अक्षरब्राह्मणे श्रावणेन । अशक्यत्वादिति । न च प्रशासनत्वादिकं प्रशासत्वाद्यभावाभावात्मकं अभावोऽधिकरणात्मकमिति कथमशक्यत्वमिति शङ्क्यम् । अभावस्याधिकरणात्मकताया अप्रसिद्धेः यावदिति । तथा च यावद्धर्मनिषेधे 'स वा एष नेति नेती'त्यत्र विवक्षिते न विवृणुयादिति भावः । अत एवेति । विरुद्धधर्माधारत्वादेव । युज्यत इति । तादृशविरुद्धधर्माधारत्वाभावादिति भावः । तदभावादिति । अद्वैतश्रुतिविरोधाभावात् । नन्वक्षरत्वेन पुरुषोत्तमत्वेन रूपेण भेदो वर्तत इति कुतो वस्त्वभेद इति चेत्, तत्राहुः अग्निस्त्रादीति । तादात्म्येति । फलाध्यायत्वात् तादात्म्यात्मकत्वम्, न तु भेदाभावात्मकत्वम् । 'अन्तरा भूतग्रामव'दिति सूत्रे भेदाभावरूपाभेदस्य फले निषेधात् । शब्दब्रह्मवेद्यमिति । वाच्यं परम्, वाचकमपरमित्यर्थः । ममेति भगवतः । इति

भाष्यप्रकाशः ।

द्वाक्यस्य 'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छती'त्यादिवाक्यस्य च स्वारस्यात् । 'एतद्वै सत्यकाम परं च ब्रह्मे'ति वाक्यविचारेऽप्योङ्कारस्य, 'एतद्वै यजुस्त्रयीं विद्यां प्रती'ति श्रुतेः सर्ववेदमूलत्वेन वाच्याभिन्नत्वेन चोभयरूपत्वं प्रतिज्ञाय, तदभिध्यानफलकथने एकद्वित्रिमात्राध्यानेनर्ग्यजुःसामभिर्मनुष्यलोकसोमलोकसूर्यलोकेषु यथायथं महिमानुभवं फलमुक्त्वा, अर्धचतुर्थमात्रेणोङ्कारेण ध्याने, अथर्वभिर्ब्रह्मलोकप्राप्तिं चोक्त्वा, 'स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षत' इति फलमुक्तम् । शङ्कराचार्यमतेत्र त्रिमात्र एवोङ्कारोऽङ्गीकृतः । स पाठो यद्यपीदानीन्तनेभ्यः पुस्तकेभ्यः पाठिभिः पठ्यमानात् पाठाच्च विरुध्यते, तथापि त्रिमात्रध्यानेपि, 'ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत, स तेजसि परे सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते, एवं ह वै स पाप्मना विनिर्मुक्त' इत्येतावतो ग्रन्थस्य 'स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षत' इति ग्रन्थस्याग्रिमश्लोकद्वयस्य च वर्तमानत्वेन शब्दब्रह्म अपरम्, मृत्युमन्मात्राप्रतिपाद्यं वाऽपरम्, जीवघनरूपो यो हिरण्यगर्भः क्षरः पुरुषस्तस्मात् परमक्षरं ब्रह्म । परं ततोपि यः परः पुरिशयोऽन्तर्याम्युक्तः, श्लोकेपि 'तमोङ्कारेणैवायनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं परायणं चे'त्युक्तः

रश्मिः ।

वाक्येति । प्रश्नोपनिषत्स्थवाक्यमीमांसायामपि 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार' इति श्रुतेरोङ्कारस्य । **एतदिति** । ओङ्कारः यजुः मूलकारणं कां प्रतीत्यत आहुः । त्रयीं विद्यां प्रतीति श्रुत्यर्थः । **मूलं** शब्दरूपम् । **सर्ववेदेति** । त्रयीविद्यामूलत्वेन वाच्यं परं ब्रह्म तदभिन्नत्वेन । **उभयरूपत्वं** वाच्यवाचकरूपत्वम् । **प्रतिज्ञायेति** । उक्तश्रुत्या । **तदभीति** । 'स यद्येकमात्रमभिध्यायीते'त्यादिना तदभिध्यानफलस्य लोकजयस्य कथने । **एकद्वीति** । 'स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव तस्यामभिसम्पद्यते किञ्चिदुक्त्वाग्रे द्विमात्रेण मनसि सम्पद्यते पुनः किञ्चिदुक्त्वा यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये इत्येवमेकद्वित्रिमात्राध्यानेन । **उक्त्वेति** । अभिसम्पद्यत इत्यस्या अग्रे 'तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पद्यते स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवती'त्यनयोक्त्वा । 'तथा द्विमात्रेण मनसि सम्पद्यत' इत्यस्या अग्रे 'सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकं स सोमलोके विभूतिमनुभूय पुनरावर्तते' इत्यनयोक्त्वा । यः पुनरित्यस्या उक्ताया अग्रे सामभिरुन्नीयते सूर्यलोकं स सूर्यलोके विभूतिमनुभूय पुनरावर्तत इत्यनयोक्त्वेत्यर्थः । **अर्धचतुर्थेति** । उक्तोङ्कारचतुर्थमात्रेण । **पुस्तकेभ्य इति** । पञ्चम्यन्तमेको हेतुः । पाठिभिरित्यपरः । **ओमित्येतेनेति** । यः पुनरर्धचतुर्थमात्रेणोमित्येतेनेत्यादिः । **एवं ह वा** इति श्रुतिस्तु 'एवं ह वै स पाप्मना विनिर्मुक्तः सोथर्वभिरुन्नीयते ब्रह्मलोक'मिति । एतस्या अग्रे 'स एतस्माज्जीवघना'दिति श्रुतिः । **अग्रिमेति** । 'तदेतौ श्लोकौ भवतः । तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनुविप्रयुक्ताः । क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः । ऋग्भिरेतं यजुर्भिरन्तरिक्षं स सामभिर्यत्तत्कवयो वेदयन्ते । तमोंकारेणैवायतनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं परायणं चे'त्यग्रिमश्लोकद्वयस्य । तस्मात्परमक्षरं ब्रह्म, ततोऽपि यः पर इति पाठः । **श्लोकेऽपि तमिति** । परपुरुषम् ।

किञ्च । उपास्यरूपाणां सर्वेषां निर्गुणत्वमेव, उपासकस्य परं सगुणत्वेन

भाष्यप्रकाशः।

स एव पर इति सिध्यति । तथा चात्र 'परायणं चे'ति चकारादक्षरात् परः पुरुषोऽपि परं परायणं यस्येति योगादक्षरधामवासी बोधितः । तेन मुण्डकवदेवात्राप्यर्थः । अपरं तु ब्रह्म वेदात्मकम्, हिरण्यगर्भस्य शब्दब्रह्मात्मकत्वात् । किञ्च । नृसिंहोत्तरतापनीये, 'सैषाऽविद्या जगत् सर्व'मिति सर्वस्य जगतोऽविद्यात्वश्रावणेपि न सर्वस्य जगतस्तथात्वम् । उपसंहारे, 'तस्मादात्मन एव त्रैविध्यं योनित्वमपी'ति निगमनात् । इदं यथातथोपपादितं द्वितीयस्य प्रथमे पादे, 'दृश्यते त्वि'ति सूत्रे । मुण्डके, 'यथोर्णनाभिः सृजते गृह्णते चे'त्यादिना अक्षरात् सृष्टिमुपक्रम्य, 'तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते तदेतत्सत्य'मिति निगमनात् । 'तदेतदृषिः पश्यन् वामदेवः प्रतिपेद' इत्यादिश्रुत्युक्ताबाधितब्रह्मवित्प्रत्यक्षविषयत्वात् । व्यावहारिको नामरूपप्रपञ्चः, स्वोत्कृष्टसत्ताकतत्प्रपञ्चपूर्वकः, मायिकप्रपञ्चत्वादैन्द्रजालिकादिप्रपञ्चवदित्यत्र साध्यविशेषणत्वेनानुमितिविषयत्वाच्च । अतो नामरूपादीनामपि न सर्वेषामाविद्यकत्वमिति सिद्ध्यति । एवं सति 'मनोमयः प्राणशरीरो भारूपः ।' 'अयमात्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प' इत्यादिषु शाण्डिल्यदहरभूमविद्याप्रभृतिवाक्येष्वपहतपाप्मसत्यकामादिशब्दैस्तत्तद्विशेषणविशिष्टं यदुपासनायोपदिश्यते, तस्याविद्याकृतनामरूपविशेषविशिष्टत्वं कुतोऽवधारितं येन तस्यापरब्रह्मत्वमुच्यते, न तावदुपासनाविषयत्वात्, उपासनाविषये तथात्वनियमस्य क्वाप्यसिद्धत्वेन प्रमाणशून्यत्वात् । न च, 'यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत' इत्यादितलवकारश्रुतेरिति युक्तम् । तत्र तथार्थाभावात् । नेदमित्यनेन मनोवागादिनिषेधोत्तरम्, 'इदं ब्रह्म विद्धि यदुपासत' इत्यर्थात् ।

रश्मिः।

परं अयनं यस्येति । परमक्षरम् । मुण्डकवदिति । 'अक्षरात्परतः पर' इति मुण्डकमुक्तम् । परतोऽक्षरात् पर इत्यर्थः । वेदात्मकमिति । 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद' इत्यादि मुण्डकात् । तत्र परापरयोः । आत्मन एवेति । आत्मनः, न त्वविद्यायाः । त्रैविध्यं गुणैः स्वीयैः । योनित्वमुपादानत्वम् । निगमनं तस्मात् पर्वतो वह्निमानितिवत् । तदेतदिति । अबाधितत्वं भ्रमप्रतिबाधवद् बाधाविषयत्वम् । ऐन्द्रजालिकादीति । आदिना हिरण्यगर्भसृष्टिः कुलालादिपुत्रकर्तृकसृष्टिश्च । व्यावहारिको नामरूपप्रपञ्चः स्वोत्कृष्टसत्ताकतत्प्रपञ्चपूर्वकत्ववानित्यनुमितिः, अत्र साध्यं स्वोत्कृष्टेत्यादि । तद्विशेषणं पक्षः तत्त्वेन व्यावहारिकप्रपञ्चस्यानुमितिविषयत्वादित्यर्थः । अत इति । आविद्यकान्तरालिकसृष्टिवदात्मयोनेः सत्त्वाद्ब्राह्मसृष्टेः । सर्वेषां ब्राह्मानामाविद्यकानां च । मनोमय इति शाण्डिल्यविद्यास्थं वाक्यम् । अयमात्मेति दहरविद्यास्थं वाक्यमादिना भूमविद्यास्थं वाक्यं तत्तु 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'ति । भूमैव सुखमिति वा । सुखत्वेन भूम्नि मनोनिवेशनं मनसा ज्ञानमुपासनम् । प्रभृतिपदेनोपकोसलविद्यास्थं वाक्यम् । तत्तु 'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मे'ति । अपहतपाप्मेति । दहरविद्यास्थौ शब्दौ । अतः शाण्डिल्यविद्यास्थशब्दाग्रहणं तदर्थम्, अपहतपाप्मसत्यकामयोरादयः अपहतपाप्मसत्यकामादयः । मनोमयप्राणशरीरभारूपाः । तथापहतपाप्मसत्यकामावादी येषां ते विजरादिसुखामृताभयब्रह्मरूपाः अपहतपाप्मसत्यकामादयः ते च ते चापहतपाप्मसत्यकामादयस्ते च ते शब्दाः अपहतपाप्मसत्यकामादिशब्दास्तैः । मनोवागादीति ।

भाष्यप्रकाशः ।

अन्यथा द्वितीयेदङ्कारप्रयोगवैयर्थ्यप्रसङ्गादित्येवं प्रागेवोपपादितत्वात् । 'तदेव ब्रह्म त्वं विद्धी'ति विधीयमानज्ञानविषयस्य ब्रह्मणः पूर्वं, 'न तत्र चक्षुर्गच्छती'त्यादिना यावत्करणागम्यताया उक्तत्वात्तस्य ज्ञानस्य प्रत्यक्षादिरूपताया वक्तुमशक्यत्वादुपासनारूपत्व एव पर्यवसानेन तद्विषयस्य परस्याप्यपरत्वापत्तेश्च । नाप्युपशान्तत्वाभावात् । सर्वत्र परस्य ब्रह्मण एकत्वेन तस्य च विरुद्धधर्माधारताया उपपादितत्वेन तदभावस्यैवाभावात् । एतेनैव, 'अवचनेनैव प्रोवाचे'त्यनेनापि प्रत्यवस्थानमयुक्तम् । तत्राप्युपशान्तत्वस्यैवोक्तत्वात् । लौकिकयावद्धर्मराहित्येनैव तत्सिद्धेश्च । एवं 'इन्द्रो मायाभि'रित्यादिवाक्यानामप्युभयलिङ्गाद्यधिकरणविचार एव विचारितत्वान्न तैरपि प्रत्यवस्थानावकाशः । अतः परविद्यासूक्तानामन्यत्राप्युक्तानां परब्रह्मधर्माणामनाविद्यकत्वादलौकिकैर्नानागुणैर्युक्तमप्युपास्यरूपं नापरब्रह्मरूपमिति नौपाधिकम् ।

एवं जीवत्वमपि नौपाधिकम् । 'अंशो नानाव्यपदेशा'दित्यत्र जीवस्यांशत्वेनैव निर्धारितत्वात् । श्वेताश्वतरे, 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जग'दिति कण्ठतोऽवयवत्वोक्तेश्च । 'घटसंवृतमाकाशं लीयमाने घटे यथा । घटो लीयेत नाकाशं तद्वज्जीवो नभोपम' इति बिन्दुस्तोकश्रुतौ नभोपम इति दृष्टान्तोपि लयाभाव एव, न त्वनंशत्वे । इतः पूर्वस्मिन्, 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रव'दिति मन्त्रे जलचन्द्रदृष्टान्तेनांशप्रवेशद्वारिकायाः सर्वभूताधिकरणकस्थितेर्बोधितत्वात् । निष्कलश्रुतेस्तु नांशत्वबाधकत्वम् । 'स विश्वकृद्विश्वविदात्मयोनि'रित्यादिभिः पूर्वमन्त्रैर्नानाधर्माणां क्रियाणां च बोधनेन जीवानामवयवरूपतायाश्च पूर्वमुक्तत्वेन, 'नित्यो नित्यानां चेतनश्चेतनाना'मिति भेदस्य बोधनेन ब्रह्मणो विरुद्धधर्माधारत्व एव तत्तात्पर्यावगमात् । अविद्यया विस्मृतस्वस्वरूपं ब्रह्मैव जीव इति पक्षस्यापि, 'तत्त्वमसी'ति वाक्यविचारे लक्षणादोषग्रासेनैव

रश्मिः ।

मनोवागादीनां करणत्वनिषेधोत्तरम् । **प्रागेवेति** । **विधीयमानेति** विद्धीति लोटा विधीयमानज्ञानविषयस्य **तद्विषयस्येति** । यदिदमुपासत इति श्रुत्युक्तोपासनाविषयस्य । ननु यथोपासनाविषयत्वेन परस्य अपरत्वम्, तथोपशान्तत्वाभावादपरत्वं भविष्यति तत्राहुः **नापीति** । **उपशान्तत्वाभावादपरत्वापत्तिर्न** । **सर्वत्रेति** । निर्गुणसगुणप्रतिपादिकासु एकत्वं निर्वाहकसङ्गत्या, न त्वारोपापवादसङ्गत्या । **उपपादितत्वेनेति** । तृतीयाध्याये उभयव्यपदेशाद्यधिकरणेषु । **तदभावस्येति** । उपशान्तत्वाभावस्य । एतेन तस्य चापरब्रह्मोपासनस्य तत्सन्निधौ श्रूयमाणं 'स यदि पितृलोककामो भवती'त्यादिजगदैश्वर्यलक्षणं संसारगोचरमेव फलं भवति, अनिवर्तित्वादविद्याया इति पूर्वं प्रकाशे यदुक्तं तदाक्षिप्तम् । **एतेनेति** विरुद्धधर्माधारत्वेन उपशान्तत्वेन वा । **प्रत्यवेति** । अवचनेनाविद्यकेनेति प्रतिकूलस्थितिः । **तत्सिद्धेरिति** । उपशान्तत्वसिद्धेः । विरुद्धधर्मासिद्धेः । **प्रत्यवेति** । आरोपापवादीयधर्माणामाविद्यकत्वमित्येवं प्रतिकूलावस्थानं तस्यावकाशः । **अवयवभूतैरिति** जीवैः । अवयवत्वे दृष्टान्ताभावमाहुः **घटसंवृतमिति** । **लयाभाव इति** । स्वांश्यक्षरातिरिक्तलयाभाव एव न त्वनंशत्वे । **नानेति** अंशत्वसमर्पकाणाम् । **पूर्वमिति** । अत्रैव पूर्वं श्वेताश्वतरश्रुत्युपन्यासेन । **भेदस्येति** । षष्ठ्या भेदस्य । भेदोत्र इवार्थो बोध्यः फलाध्यायत्वात् । भाष्योक्तनिरस्तत्वपदपुरस्कारेणाहुः **अविद्ययेति** । **पक्षस्येति** सोपाधिजीवपक्षस्य । अपिना **भाष्योक्तजीवपुरुषोत्तमाभेदस्य सङ्ग्रहः** । **लक्षणेति** अविद्यारूपभागत्यागलक्षणादोषग्रासेन ।

भाष्यप्रकाशः ।

निरस्तत्वात् । ब्रह्मणि प्रदेशानङ्गीकारेण निष्प्रदेशे तस्मिन्नविद्यासम्बन्धाङ्गीकारे सर्वस्य जीवतापत्तेश्च तस्याप्यप्रयोजकत्वात् । विकारप्रतिबिम्बाभासपक्षाणामपि, 'नात्माऽश्रुते'रित्यादिसूत्रविचारे एव निरस्तत्वात् । जीवे ब्रह्मत्वव्यपदेशस्य सुषुप्तिसाक्षिभूतप्राज्ञदृष्टान्तेन गौणतायास्तद्गुणसारत्वाधिकरण एव साधितत्वाच्च । तस्माज्जीवेंशत्वमपि दुरपोहम् । तदेतदुक्तं, स्यादित्यारभ्य निरस्तत्वादित्यन्तेन । तथा च अपरस्य ब्रह्मणो गन्तव्यत्वमविद्यावतश्च गन्तृत्वं विद्याकृतं तदा स्याद्यदि भवदुपदर्शितो ब्रह्मणः परापरविभागो वा जीवस्य सर्वात्मना ब्रह्माभेदो वा श्रुतिस्मृतिसूत्रतात्पर्यगोचरः स्यात्, स एव तु नास्तीति वृथा बादरिमताग्रहाडम्बर इत्यर्थः । ननु न वृथा, ब्रह्मणो व्यापकत्वरूपस्य गन्तव्यताबाधकस्यापरिहृतत्वादित्यत आहुः न चेत्यादि । तथा च प्रतिबन्धकाभावस्य सहकारितायास्त्वयाप्युपगतत्वाद् यत्रैव प्रारब्धरूपस्य प्रतिबन्धकस्य यथा यदाभावः, तत्रैव ब्रह्मप्राप्तिरितिगमनस्य प्रारब्धनिवारणार्थत्वाद् ब्रह्मणो गतत्वेऽपि न गन्तव्यत्वानुपपत्तिरित्यर्थः । ननु भवत्वेवं परब्रह्मणो गन्तव्यत्वानुपपत्तिपरिहारः, तथापि गतिश्रुतीनां पञ्चाग्न्यादिविद्यास्वपि दर्शनात्तासां परविद्याङ्गत्वं नासाधारणम्, अपरविद्यासु च विषयः सगुण एव, अतस्तदुपासने तत्क्रतुन्यायात् सगुणमेव फलं युक्तम्, तथा सति तत्र गन्तव्ये प्रयुक्तं ब्रह्मपदं सामीप्य एव नेतव्यम्, एवं यत्र लोकपदसमभिव्याहृतं ब्रह्मपदम्, तत्रापि लोकविशेषणभूतम्, लोकत्वं च कार्यत्वनियतमिति तत्रापि कार्यस्यैव गन्तव्यता, एवं बहुषु स्थलेषु कार्यत्वे गन्तव्यस्य सिद्धे परविद्यास्वपि तथाङ्गीकार्यमित्याशयेन यत्तैः 'क्वचित् पञ्चाग्निविद्या'मित्यादिनोक्तम्, तत्रोत्तरमाहुः किञ्चेत्यादि । पञ्चाग्निविद्यादिष्वप्युपास्यरूपाणां प्राकृतगुणरहितत्वमेव । 'शब्द इति चेन्नातः प्रभवा'दित्यत्र वैदिकपदार्थानां सर्वेषामाधिदैविकत्वेन भगवदवयवरूपत्वस्थापनात् । तत एव लोकेष्वपि नित्यत्वम् । एवमन्येष्वप्युपास्यरूपेषु द्रष्टव्यम् । न चापरासु पुरुषयज्ञादिविद्यासु जघन्यफलोक्तिविरोधः । उपासकस्य सगुणत्वेन तस्य जघन्य-

रश्मिः ।

तस्यापीति अविद्यासम्बन्धस्यापि । जीवत्वव्यवहारे अप्रयोजकत्वात् । तादात्म्यरूपाभेदातिरिक्तभेदाभावरूपभेदस्य अयमात्मा ब्रह्मेत्यादौ फले विरुद्धत्वमाहुः जीवे ब्रह्मत्वेति । अपरस्येति सविशेषस्य । परीति । सविशेषब्रह्माङ्गीकारेण परिहृतत्वात् । एवमिति । प्रारब्धाभावे सायुज्यमुपाधिनाशे सायुज्यवत् । साधनप्राबल्ये सार्ष्टिरलौकिकसामर्थ्यपदवाच्या । भगवत्सेवोपयोगिदेहो वैकुण्ठादिषु च । गतीति । स एतान्ब्रह्म गमयतीत्येवंविधानाम् । पञ्चाग्न्यादीति । आदिना वैश्वानरविद्या । पर्यङ्कविद्या । परविद्येति । चित्तशुद्धिद्वाराङ्गत्वम् । असाधारणमिति । किन्तु परेषां शब्द इवास्माकमावृत्तचक्षुराद्यसाधारणम् । वेदान्तविज्ञानेतिश्रुतिः 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छ'न्निति श्रुतिश्चोभयत्र । तत्क्रतुन्यायोऽग्रिमाधिकरणेस्ति । ब्रह्मपदमिति । 'स एतान्ब्रह्म गमयती'त्यत्र ब्रह्मपदम् । सामीप्य इति स्वार्थे ष्यञ् । ब्रह्मसमीपब्रह्मकार्ये । क्वचित्पञ्चाग्निविद्यामित्यादीति । शङ्कराचार्यमतोपन्यासे उक्तम् । पञ्चाग्नीति । आदिना पर्यङ्कविद्या वैश्वानरविद्या च । प्राकृतगुणेति । तेन विभूतिरूपाणामप्राकृतत्वं बोधितम् । अत एव 'यदेकमव्यक्तमनन्तरूप'मित्युक्त्वा, 'तमसः परस्ता'दित्यनेनांशेन तमोरूपप्रकृतिपरत्वमुक्तम् । अत एव 'सर्वे जीवाः सर्वे आत्मानो व्युच्चरन्ती'ति पृथगात्मव्युच्चरणोक्तिरुपनिषदि । लोकेष्विवति । पर्यङ्कस्थे वैश्वानरे च यद्वा तत्तदाविष्टेषु । अन्येष्विति । प्रतिमादिषु प्राकृतगुणरहितत्वं द्रष्टव्यम् । पुरुषयज्ञादीति । पुरुषविद्या सहस्रशीर्षेति प्रसिद्धा । यज्ञविद्या प्राणाग्निहोत्रोपनिषदि । बहुवचनेन स्मार्तविद्याः पौराणविद्याश्च । जघन्येति ।

तत्तारतम्यात् फलतारतम्यम्। यस्तु भगवदनुग्रहेण प्राकृतगुणरहितोऽभूत्, स निर्गुणब्रह्मविद्यावानित्युच्यते। तादृशस्यैव मुक्तिप्रकारद्वयमुक्तम्, सद्योमुक्ति-

---

भाष्यप्रकाशः।

फलमेव कामितमिति तदर्थं तत्र तत्कथनात्। एवं परविद्यास्वपि बोध्यम्। अत उपासकाधिकारतारतम्यादेव फलतारतम्यं फलविलम्बश्च। न चोपास्यरूपाणां सर्वेषां निर्गुणत्वे विद्यानामपि तथात्वात् सगुणब्रह्मविद्यावान्निर्गुणब्रह्मविद्यावानिति व्यवहारभेदलोपप्रसङ्गः शङ्कनीयः। यस्तु **भगवदनुग्रहेण प्राकृतगुणरहितोऽभूत्, स निर्गुणब्रह्मविद्यावानित्युच्यते।** यस्तद्भिन्नः, स सगुणविद्यावानित्युपपत्तेः। एवं सति य आद्यः, तादृशस्यैव सद्योमुक्तिक्रममुक्तिभेदभिन्नं प्रकारद्वयम्। तत्र प्रारब्धरहितस्य सद्योमुक्तिप्रकारो 'न तस्मात्प्राणा उत्क्रामन्ती'त्यादिनोच्यते। तद्वतः क्रममुक्तिप्रकारस्तु 'शतं चैका च पुरुषस्य नाड्यः,' 'तेऽर्चिरभिसम्भवन्ती'त्यादिभिः। न च निर्गुणब्रह्मविद्यावतः सर्वस्य प्रारब्धशून्यत्वमिति वक्तुं शक्यम्। तथा सति तस्य शरीरराहित्यप्रसङ्गेन प्रवचनाद्यनुपपत्त्या ज्ञानमार्गोच्छेदापत्तेः। न च चरमवृत्त्यभावाच्छरीरस्थितिरिति युक्तम्। शब्दादपरोक्षवादिनः साक्षात्कारोत्तरं प्रारब्धातिरिक्तस्य वृत्तिचारम्यहेतोर्वक्तुमशक्यत्वात्। अतस्तेनैव गत्युपपत्तिस्तन्निवृत्तिप्रकारबोधनार्थमेव गतिश्रुतिः। अतः परविद्यासु सा प्ररोचनार्था वा, अनुचिन्तनार्था वेति विकल्प्य तद्दूषणमप्यसङ्गतमेव। न च, 'ते ब्रह्मलोके त्वि'ति श्रुति-

रश्मिः।

यथा अपरब्रह्मोपासनस्य तत्सन्निधौ श्रूयमाणं 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ती'ति तथा जघन्यमेव फलं कामितम्, छान्दोग्ये मधुप्रपाठके 'एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः पादोस्य विश्वा भूतानी'ति पुरुषविद्यायां 'पूर्णामप्रवर्त्तिनीं श्रियं लभते य एवं वेदे'ति जघन्यफलोक्तिः तस्या विरोधः। प्राणाग्निहोत्रोक्तयज्ञविद्याफलं 'यदि एकेनैव जन्मना जन्तुर्मोक्षं प्राप्नुयादिति मोक्षं च प्राप्नुयादिति मोक्षं च प्राप्नुयादिति मार्गत्रये मोक्षो न जघन्य इति विभाव्यते, तदा मधुप्रपाठक एव 'पुरुषो वा व यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनमि'त्याद्युक्त्वा 'स ह षोडशं वर्षशतं जीवति य एवं वेदेति य एवं वेदे'ति जघन्यफलोक्तिर्ज्ञेया। **तत्रेति।** अपरासु पुरुषयज्ञादिविद्यासु। **तत्कथनाज्** जघन्यफलकथनात्। **परविद्यास्विति।** ब्रह्मविद्यासु 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीक'मित्यादिषु प्राणाग्निहोत्रोक्तायां च। **फलविलम्ब** इति। 'वेदान्तविज्ञानसुनिश्चितार्था' इति श्रुत्युक्तः ब्रह्मलोकवासकृतः। **यस्त्विति** भाष्यं विवरीतुमाहुः **न चोपास्येति** विवृण्वन्ति स्म **यस्त्विति।** **भगवदनुग्रहेणेति।** व्यापारोऽत्र भक्तिस्तया ज्ञानरूपया प्राकृतगुणास्तमोरूपास्तै रहितोऽभूत्। **निर्गुणेति।** बृहदारण्यके अक्षरब्रह्मणोक्तनिर्गुणब्रह्मविद्यावान्। **तद्भिन्न** इति। अनुग्रहेण प्राकृतगुणरहितो भक्तिमानभूत्, स गुणैर्विरुद्धैः सह विद्यमानस्तस्य विद्या सर्वात्मभावादिः तद्वान्। ज्ञानिमात्रप्रकरणं वृत्तम्। **तादृशेति** भाष्यं विवृण्वन्ति स्म **एवं सतीति।** **न तस्मादिति** भाष्यं विवृण्वन्ति स्म **तत्रेति.।** **प्रारब्धरहितस्येति।** सद्योमुक्तिप्रागभावक्षणे ध्वस्तप्रारब्धस्य। **निर्गुणेति** भाष्यं विवृण्वन्ति स्म **न च निर्गुणेति।** **चरमेति।** प्रारब्धचरमवृत्तिप्रागभावात्। **शब्दादिति।** शाङ्करस्य। **तेनैवेति** प्रारब्धेनैव। **गत्युपपत्तीति।** आश्चर्येणेति बोध्यम्। **श्रुतिरिति।** 'स एतान्ब्रह्म गमयती'ति श्रुतिः। **अत इत्यादि।** आश्चर्यात्। **सेति।** परब्रह्मविषया गतिः। **प्ररोचनार्थेति।** ब्रह्मविदः प्ररोचनार्था। **एवेति** आश्चर्यविघटकत्वात् 'आश्चर्यो वक्ता कुशलोस्य लब्धे'ति काठकविरोधापत्तेरेवकारः। **ते ब्रह्मेति** भाष्यं विवरीतुमाहुः **न च त इति।** **श्रुति-**

क्रममुक्तिभेदेन। 'न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येती'त्यादिश्रुतिस्तु प्रारब्धरहितविषया। निर्गुणब्रह्मविद्यावतोपि प्रारब्धभोगस्तु त्वयापि वाच्यः, अन्यथा प्रवचनासम्भवेन ज्ञानमार्ग एवोच्छिद्येत। 'ते ब्रह्मलोके तु परान्तकाल' इति श्रुतिरपि परान्तकाल एव येषां प्रारब्धभोगसमाप्तिस्तद्विषयिणीति मन्तव्यम्। अन्यथा 'वेदान्तविज्ञाने'त्याद्युक्तधर्मविशिष्टानां मुक्तौ विलम्बो नोपपद्येतेति दिक्॥ १४॥

भाष्यप्रकाशः।

व्याकोपः। येषां परान्तकाल एव प्रारब्धभोगसमाप्तिस्तेषामेव तत्र सर्वपदेन परामर्शात्। तत्र सगुणविद्यावत्परामर्शाङ्गीकारे तु तेषां वेदान्तार्थानभिज्ञत्वादविद्यावत्त्वेनाशुद्धसत्त्वत्वाच्च न पूर्वार्धोक्तस्य 'वेदान्तविज्ञाने'त्यादिविशेषणद्वयस्य बाधः स्यात्। अतो यदत्र तैः प्रतिपादितम्, तत् सर्वं श्रुतिविरुद्धत्वादसङ्गतम्। किञ्च। तत्रापि क्वचिद्गौणः शब्दो दृष्ट इति नैतावता शब्दप्रमाणकेऽर्थे गौणी कल्पना न्याय्या। सर्वत्रानाश्वासप्रसङ्गादिति। 'तन्निष्ठस्य मोक्षोपदेशा'दिति सूत्रव्याख्याने यदुक्तम्, तदपि विस्मृतम्। अथवा। ईक्षतिसूत्रावतारणे वेदान्तवाक्येभ्य एव युक्त्याभासवाक्याभासावष्टम्भाः सांख्यादिवादिन उत्तिष्ठन्ते। तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्त' इति कथनाल्लक्षणां विरहय्य वेदान्तव्याख्यानमाचार्यस्यैव संमतम्, नास्माकमिति बोधितमिति प्रभुचरणैर्दिक्पदप्रयोगेण ज्ञापितम्॥ १४॥

रश्मिः।

व्याकोप इति। फलविलम्ब उपपत्त्यर्थं प्ररोचनार्था वा अनुचिन्तनार्था वा गतिरित्यत्र दूषणं स्वास्थ्यस्य स्वस्थचित्ततया विद्यासमर्पितेनैवाव्यवहितेन स्वसंवेद्येन सिद्धेर्न प्ररोचनार्था स्वास्थ्यसहितपरब्रह्मविषयगतिः। नाप्यनुचिन्तनार्था। नित्यसिद्धज्ञानस्य कृत्यजन्यत्वात्कृतिरूपानुचिन्तनस्यापेक्षाया अभावादिति। तद्दूषणं ते ब्रह्मलोके त्वित्यंशस्यार्थवादत्वेन स्वार्थे अप्रामाण्यादुक्तम्। इति मन्वानैः श्रुतिव्याकोप उक्तः। कार्यात्ययसूत्रे तु क्रममुक्तौ विलम्ब्य गतिरविलम्ब्य गतिरित्युभया गती विवृण्वन्ति स्म **येषां परे**ति। तत्रेति वेदान्तविज्ञानश्रुतौ। **सगुणे**ति। अत्र सगुणपदं मायोपाधिकब्रह्मपरम्। न तु विरुद्धधर्माधारपरम्। **वेदान्तार्थानभी**ति। वेदान्तार्थ आचार्यप्रतिपन्नो ग्राह्यः। **अत** इति। पूर्वोक्तरीतेः। **अत्रे**ति 'न कार्ये प्रतिपत्त्यभिसन्धि'रिति सूत्रेण सह दर्शनसूत्रे। **तैः** शङ्कराचार्यैः। दिक्पदोपसन्धानेन गच्छतोऽग्रिमावस्थानिरूपणे परब्रह्मविषया गतिर्या तत्र सर्वत्र गौणीति स्वोक्तं विस्मृतमिति गौण्या व्याख्यानेऽस्मदुक्तं दिङ्मात्रमित्याशयेनाहुः **किञ्चे**ति। **तैरपि** शङ्कराचार्यैरपि। यदुक्तमित्यनेन संबध्यते। **क्वचि**दिति। सोमेन यजेतेत्यादौ **गौणः शब्दः** सोमेनेति। सोमवतेत्यर्थाद् **दृष्टः**। **गौणी**ति। 'तस्माद्वा एतस्मादात्मन आकाशः संभूत' इत्यत्र 'यतो वा इमानि भूता'नीत्यत्रात्मशब्दे गौणी यत इति शब्दे च गौणी तस्याः कल्पना अन्याय्या। **विस्मृत**मिति। 'तन्निष्ठ'स्येतिसूत्रोक्ते मुख्ये फल आत्मनि गतिर्गौणीति वदद्भिर्विस्मृतमित्यर्थः। अतो दिङ्मात्रमत्रोक्तं दूषणमिति भावः। **आचार्येणे**ति। भगवता व्यासेन। **वाक्याभासे**ति। निराक्रियन्त इति मुख्यक्रियापेक्षया प्रथमान्तं पदम्। कर्मण उक्तत्वात्प्रथमाबहुवचनम्। **आचार्यस्य** व्यासस्य **नास्माकं** शाङ्कराणाम्। तेन गच्छतः अग्रिमावस्था गौणीति परब्रह्मणा सर्वकामभोगेच्छवः कान्दिशीकाः तान्प्रति दिगेषा। अनया दिशा नित्यसर्वकामभोगः ब्रह्मप्राप्तेरग्रिमावस्थारूपायाः गच्छतो मुख्येति। तेन

'तस्मादस्माभिरेवोक्तपद्धत्या श्रुतिसिद्धया।
ज्ञात्वा ब्रह्मस्वरूपं तत्प्राप्त्यै तद्भजताखिलाः'॥ १॥ इति सिद्धम्॥ १४॥

न च कार्ये प्रतिपत्त्यभिसन्धिः ॥ १५ ॥

अपि च । 'ब्रह्मविदाप्नोति पर'मिति सङ्क्षेपेणोक्त्वा, 'तदेषाभ्युक्तेति' तद्विवरिकां ऋचं प्रस्तुत्य, सोक्ता, 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां

भाष्यप्रकाशः ।

न च कार्ये प्रतिपत्त्यभिसन्धिः ॥ १५ ॥ एवं प्रासङ्गिकमतान्तरपरिहारेण जैमिनिमतस्यैव सिद्धान्तत्वमिति दृढीकृत्य प्रकृतं सूत्रं पठित्वा व्याचक्षते अपि चेत्यादि । सोक्तेति । ऋगुक्ता । उपक्रमानुरोधेनेति । 'आप्नोति पर'मित्युपक्रमानुरोधेन । तथा च 'ब्रह्म गमयती'त्यत्र परब्रह्म प्रापयतीत्येवार्थः । यतः परब्रह्मप्राप्तिमेव परमफलत्वेन 'ब्रह्मविदाप्नोति पर'मित्यत्र श्रावयित्वा, 'सत्यं ज्ञान'मिति तद्विवरणर्चि परेण ब्रह्मणा सह सर्वकामभोगलक्षणा प्रतिपत्तिरुच्यते इति । अतो हेतोः कार्यरूपे वस्तुमात्रे प्रतिपत्तिः । 'पद गतौ', पदनं पत्तिः, संसारगतिप्रतिकूलापत्तिः । गतिर्न क्वापि कार्ये श्रुतेरभिप्रेता, 'प्रजापतेः सभां वेश्म प्रपद्य' इत्यत्रापि पूर्वं 'अश्व इवे'ति मन्त्रे ब्रह्मलोकस्याकृतत्वं श्रावयित्वा, 'आकाशो वै नामे'त्यत्र 'तद् ब्रह्म तदमृतं स आत्मे'ति नित्यस्यैव ब्रह्मणः श्रावणात् । पूर्वकाण्डेपि, 'यन्न दुःखेन सम्भिन्न'मित्यत्रात्मसुखस्यैव स्वर्गत्वेन श्रावणात् । अतोत्रापि ब्रह्मपदेनाक्षरं परब्रह्मैव गन्तव्यत्वेनोच्यत इत्यर्थः । इदमेव च मतं व्यासचरणानां सिद्धान्तीयत्वेनाभिप्रेतम् । एतदव्यवहितमेवाप्रतीकालम्बननयनविचारात् । अन्यथा तु वैपरीत्येन मतद्वयमुक्त्वा तत्र नयनं विचारयेदिति ।

अन्ये तु । 'प्रजापतेः सभां वेश्म प्रपद्ये, यशोऽहं भवामि ब्राह्मणानां यशो राज्ञा'मिति छान्दोग्यसमाप्तिस्थां श्रुतिमुदाहृत्य, नायं कार्यविषयः प्रतिपत्त्यभिसन्धिः सम्प्राप्तिसङ्कल्पः, 'आकाशो ह वै नामरूपयोर्निर्वहिते'ति परब्रह्मण एव प्रकृतत्वात्, 'यशोहं भवामी'ति सर्वात्मत्वानुक्रमणात्, 'न तस्य प्रतिमा अस्ति यस्य नाम महद्यश' इति ब्रह्मनामनिर्देशाच्चेति व्याकुर्वन्ति ।

भास्कराचार्यास्तु 'सगुणब्रह्मविद्याविषयैव गतिर्निर्गुणब्रह्मविदो गतिर्नोपपद्यते, परस्य सर्वगतत्वेन प्राप्तत्वात्; न हि गतविषया गतिरुपपद्यत' इत्येवं शाङ्करं मतमनूद्य, तदेवं दूषयन्ति । तथाहि । यदि निर्गुणविद्यासु गतिरनुपपन्ना, तर्हि सगुणास्वप्यनुपपत्तिस्तुल्या । तत्रापि सर्वगतस्यैव ब्रह्मण उपास्यत्वात् सर्वगतगुणानामाकाशीयपरममहत्परिमाणपृथक्त्वादिवत् सर्वगतत्वात् । किञ्च, अपहतपाप्मत्वादयः संसारविनिवृत्तिहेतवो यस्य गुणाः, स परमात्मेत्युच्यते, यस्यैते न सन्ति स संसारीति तद्भिन्नस्य परमात्मनः पराभिन्नत्वात् । अथ सत्त्वादिगुण-

रश्मिः ।

न च कार्ये प्रतिपत्त्यभिसन्धिः ॥ १५ ॥ प्रतिपत्तिरिति । सर्वकामभोगलक्षणा । योगमाहुः पद गताविति धातुपाठे । संसारगतिप्रतिकूलापत्तिर्गतिर्ब्रह्मणा सह सर्वकामभोगलक्षणा । अत्रापीति । 'ब्रह्मविदाप्नोति पर'मित्यत्रेवात्र 'स एतान्ब्रह्म गमयती'त्यत्रापि । अन्ये त्विति । एकदेशविकृतन्यायेनान्यपदेन अन्याचार्योपादानम् । एवमन्यत्रापि । यशोहमिति । अशुङ् व्याप्तौ । अश्नुत इति यशः । अशे युड्वेति युट् असुन्प्रत्ययश्च । व्यापकोहं भवामीति सर्वात्मभावः । एवं राज्ञां च मध्ये यशो भवामीति । ब्रह्मक्षत्रविशां सर्वात्मभावः । सम्प्राप्तिसङ्कल्प इति । सङ्कल्पेन लेडादिप्रयोगो नियतः, आधुनिकसङ्कल्पे तथा दर्शनादिति । परब्रह्मण इति । आकाशस्तल्लिङ्गादिति सूत्रे आकाशपदस्य ब्रह्मणि शक्तयुक्तेः । महद्यश इति यशो व्यापकम् । भास्कराचार्यमते अत्रैकदेशविकृतत्वाभावात्पृथक् तन्मतमनुवदन्ति स्म भास्कराचार्यास्त्विति । भेदाभेदवादिनः । तद्भि-

परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति। अत्रोपक्रमानुरोधेन परेणैव ब्रह्मणा सह सर्वकामभोगलक्षणा प्रतिपत्तिरुच्यत इति

भाष्यप्रकाशः।

योगादमी गुणा आरोपिताः, न तु स्वाभाविकाः, तदापि तद्वत्तयोपास्यमानं सगुणं ब्रह्म तु नाब्रह्म भवति। न ह्यारोपितलौहित्यगुणयोगे स्फटिकोऽस्फटिको भवति। न वा स्वाभाविकस्य प्रकाशस्य प्रत्याख्यानेऽग्निरनग्निर्भवति। न वा द्रव्यप्रत्याख्याने गुणो नास्ति। वस्तुन उभयात्मकत्वात्। 'विज्ञानमानन्दं ब्रह्म,' 'आनन्दो ब्रह्मे'ति श्रुतेः। शतगुणितोत्तरक्रमेणानन्दप्रतिपादनात्। यदि चैतन्यमात्रं ब्रह्म, तदा आनन्दगुणोपदेशोनर्थकः स्यात्। न चाकस्मादर्थवादत्वकल्पना युक्ता। यथाश्रुतग्रहणेनुपपत्त्यभावात्। अस्थूलादिश्रुतिस्तु प्रपञ्चनिराकरणपरा। 'स एको ब्रह्मण आनन्द' इति त्वसाधारणो गुणोत्कर्षोपकर्षरहितो व्यपदिष्ट इति। यदि च श्रुतं नाद्रियते, तदा अपवर्गोप्यर्थवादः किं न भवति। अत एव सर्वशक्तित्वं स्रष्टृत्वमित्यादयः परस्यासाधारणा गुणा न केनचित् प्रतिषेद्धुं शक्यन्ते। गुणकृतं कार्यकृतं च नानात्वं यद्दर्शितम्, तदस्माकं न दोषाय, प्रत्युतालङ्काराय। भिन्नाभिन्नात्मकवस्तुरूपोपगमात्। अतः सगुणनिर्गुणयोर्भेदस्यानुपपन्नत्वाद् ब्रह्मैकमेवेति सगुणविद्यावतोपि गतिरनुपपन्ना। तस्यापि तद्भावापत्तेः। न हि प्राप्तमेव प्राप्तव्यं भवतीति त्वदुक्तेनैव हेतुना गतिश्रुतयो रूपे प्रवेशयितव्याः। किञ्च। संसारिणोपि स्वरूपतो गतिर्नोपपद्यते। तस्यापि लिङ्गशरीरगमनादेव गमनात्।

ननु संसारी जीवो नाम परमात्मन आभास इति तस्य परिच्छिन्नत्वात् गतिरुपपद्यत इति चेत्। कोयमाभासो नाम। किं वस्तुभूतोऽथावस्तुभूतः। यदि तावदवस्तुभूतः, तदा तस्य स्वर्गापवर्गयोरधिकाराभावः, शशविषाणवत्। अथ वस्तुभूतः सर्वगतश्चेत्यभावः। अणुपरिमाणत्वं मध्यमपरिमाणत्वं च भवता नेष्यते। यच्चाणुत्वं तदौपचारिकमिति लिङ्गगमनादेव गमनं पूर्वोक्तमभ्युपगन्तव्यम्। नचास्माभिरियं गतिः कल्पिता। श्रुतयोत्र प्रमाणम्। परविद्यासु च गतयो लभ्यन्ते। 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त' इति। 'तद्येह वै तदिष्टापूर्ते कृतमित्युपासते ते चान्द्रमसमेव लोकमभिजयन्ते। त एव पुनरावर्तन्ते तथोत्तरेण

रश्मिः।

तस्येति संसारिभिन्नस्य। तद्वत्तयेति। आरोपितगुणवत्तया। प्रत्याख्यान इति। भस्मादिना प्रतिकूलाख्याने। नास्तिकमतेनाहुः न वेति। ते हि गुणातिरिक्तं द्रव्यं नेच्छन्ति। तदपि प्रतिषेधन्ति स्म वस्तुन इति। उभयगुणद्रव्यं तदात्मकत्वात्। विज्ञानमिति। विज्ञानमानन्दौ गुणौ तद्वती द्रव्ये। 'विज्ञानमानन्द'मित्यत्रार्श आद्यच्। तस्यापीति। सगुणविद्यावतोपि सगुणभावापत्तेः, आपत्तिः प्रतिपत्तिः। त्वदुक्तेनेति। व्यापकत्वेन। किं वस्त्विति। अयथाभूत इति पदच्छेदः। तस्येति। जीवस्य। अभाव इति। अत्यन्ताभावः। भवतेति। शाङ्करेण। औपचारिकमिति। 'बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोपि दृष्ट' इति। पूर्वोक्तमिति। जीवगमनम्। भवतां भास्कराणां जीवव्यापकत्वादयं दोष इति तत्राहुः न चास्माभिरिति। श्रुतिप्रमाणवादिभिः। श्रुतय इति। एकप्रमाणत्वावच्छिन्नाभिन्नबहुत्वावच्छिन्नाः श्रुतय इत्यर्थः। उत्तरेणेति। उत्तरायणेन।

कार्यरूपे वस्तुमात्रे प्रतिपत्तिर्न क्वापि श्रुतेरभिप्रेता, अतोत्रापि परमेव ब्रह्मपदेनोच्यते । ऋगर्थस्त्वानन्दमयाधिकरणे प्रपञ्चित इति नात्रोक्तः ॥ १५ ॥

॥ इति चतुर्थोध्याये तृतीयपादे तृतीयं कार्यं बादरिरित्यधिकरणम् ॥ ३ ॥

भाष्यप्रकाशः ।

तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्ते, एतद्वै प्राणानामायतनमेतदमृतमभयमेतत् परायणमेतस्मान्न पुनर्वर्तन्त' इति प्रश्ने, मुण्डके च, 'सूर्यद्वारेण ते विरजाः प्रयान्ती'ति । कठवल्लीषु च परविद्याप्रकरणे, 'शतं चैका च हृदयस्य नाड्य' इति । परविद्यायामेव चैतरेयके श्रूयते 'अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभव'दिति । एवं तत्र तत्र गीतासु चावृत्त्यनावृत्ती विभागेनोक्ते । 'अमृतत्वं हि भेजिर' इति पुराणेषु च । ननु गतिश्रुतौ वाजसनेयके 'इहे'ति विशेषणादिह कल्पेनावृत्तिः कल्पान्तरेस्यावृत्तिरिति चेत् । न । 'श्वोभूत' इतिवदनुवादात् । 'यथा राजसूये ब्रह्मणो ग्रहे महिष्या ग्रह' इत्येवमादिना 'द्वादश हवींषि प्रत्येकं कर्तव्यानीति विधाय श्वोभूते निर्वपे'दित्युक्तम् । तत्रैकस्मिन्[1] कृते पुनरपि श्वोभूत इत्युपतिष्ठते तद्वत्[2] । 'इह कल्प इह कल्प' इति सर्वकल्पव्याप्तिराकृतिनिर्देशात्[3] । अपि चेह युगेवान्तरे कल्पे अन्यस्मिन् वेत्यनध्यवसानाद् आकृतिवादो युक्तः । अर्थवादसमाम्नातानां ग्रहैकत्ववद् वाक्यभेदात् पदानावृत्तिर्विधीयते, युगपत् सर्वकल्पानावृत्तिरेवावतिष्ठते । तत्रास्मिन्नेव कल्पे न कल्पान्तर इति अपरस्मिन्नर्थे विधीयमाने वाक्यभेदो दुर्निवारः । यथा ग्रहं सम्मार्ष्टीति सम्मार्गे विधीयमाने सर्वग्रहेषु प्राप्तिः । तत्रैकस्येति पुनर्विधीयमाने वाक्यभेदः, तद्वदत्रापि अनावृत्तिर्न विधीयते । तदानीमिहेति पदं किंविशेषणं[4] स्यात् । तस्मादिहपदमनुवादः । अत एव काण्वानामिहपदं न पठ्यते । तस्मादर्चिरादिना गत्वा परमात्मनि लिङ्गप्रलयो न प्रागिति श्रुतिसामर्थ्यान्निश्चीयते । विद्याकर्माक्षिप्ता च गतिः संसारतरणी युज्यते । सत्यलोकमतिक्रम्य कारणे ब्रह्मणि सूक्ष्मशरीरस्य कारणात्मना विलयः । तथा

रश्मिः ।

अर्चिरादिमार्गेणेति वा । **अन्विष्येति** ल्यबन्तम् । **प्रश्न इति** । प्रश्नोपनिषदि । **विभागेनेति** । धूममार्गार्चिरादिमार्गविभागेन । **अस्येति** । जीवस्य । भाष्यत्वाच्छ्वोभूत इतिवत् पदं व्याख्यायते । **यथा राजेति** । **ग्रह इति** । पात्रविशेषे । **तत्रेति** । निर्वपेदित्युक्ते । **तद्वदिति** । **कल्पान्तरेऽस्या**नावृत्तिरित्यनुवादेनोपस्थितिः, न तु कल्पान्तरेऽस्यावृत्तिरित्यननुवादेन । **आकृतीति** । आकृतौ शक्तेः इहेत्यस्य श्रौतस्यैकत्र शक्तेरनुवादः, नत्वननूदितस्य कल्पान्तरेऽस्यानावृत्तिरित्यस्य समर्पकत्वम् । **आकृतिवाद इति** । एकत्राकृतौ शक्तिं गृहीत्वान्यत्रानुवाद इति वादः । **अर्थवादसमाम्नायेति** । अर्थवादसम्भवादिति भास्करभाष्ये पाठः । अर्थवादभूतवेदेन ग्रहैकत्वं यथा । **पदानावृत्ति**रिति । कल्पान्तरेऽस्यावृत्तिरित्यत्र । **सर्वकल्पेति** । सर्वकल्पेष्वनावृत्तिः सर्वकल्पानावृत्तिः । **वाक्यभेद इति** । इह कल्पेऽनावृत्तिर्भवति, कल्पान्तरेऽस्यावृत्तिर्भवतीति वाक्ययोर्भेदः 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्या'दिति मीमांसकोक्तवाक्यभेदः । 'एकतिङ्वाक्य'मिति वैयाकरणाः । **सम्मार्ग इति** । सम्मार्गे सम्मार्जने परसवर्णः । **तत्रेति** । सर्वेषु ग्रहेषु । **अनुवाद इति** अनुवादार्थम् । **विद्या-**

---

१. विधीयमाने हविरन्तरे । २. अन्यस्मिन्नपि कल्पे विधीयमानावृत्तौ सोपि कल्पोवतिष्ठत इत्यर्थः । ३. कल्पत्वरूपजातिनिर्देशादित्यर्थः । ४. विधेयविशेषणत्वाभावेन तव मतेनूद्य विशेषणं स्यात् । तथा चानूद्य गतसङ्ख्यायाः प्रविवक्षितत्वेन सर्वकल्पा नामेव प्राप्तिरित्यर्थः ।

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ॥ १६ ॥ (४-३-४)

क्रममुक्त्यधिकारिणः प्रारब्धं भुक्त्वाऽमानवेन पुरुषेण प्रापिताः परमेव ब्रह्म प्राप्नुवन्तीति सिद्धम् । तत्रेदं सन्दिह्यते अर्चिरादिलोकप्राप्तिरुपासनाविशेषफलम् । एवं सत्यमानवः पुरुषस्तान् सर्वान् ब्रह्म प्रापयति, उत कांश्चिदेवेति । किमत्र युक्तम्, सर्वानेवेति । यतोर्चिरादिमार्गगतानामन्ते ब्रह्मप्रापणार्थमेव स नियुक्तः, ततोऽन्यथाकरणे हेत्वभावात्तथैव स करोतीति प्राप्ते, उच्यते । श्रुतौ ब्रह्मत्वेनैव सर्वत्रोपासनाया उक्तत्वादुपास्येषु भगवद्विभूतिरूपत्वेन शुद्धब्रह्मरूपेष्वप्यतथात्वं ज्ञात्वा श्रुतिर्ब्रह्मत्वेनोपासनायाः फलसाधनत्वं वदति, न तूपास्ये ब्रह्मतामपीति मन्वाना य उपासते, ते प्रतीकालम्बना इत्युच्यन्ते । तथा च

भाष्यप्रकाशः ।

चाह, 'परेव्यये सर्व एकीभवन्ती'ति । 'पुरुषायणाः पुरुषं प्राप्यास्तं यन्ती'ति । यदुक्तं ब्रह्मलोकेष्विति बहुवचनं नावकल्पत इति । तच्चोद्यं ब्रह्मणि सङ्ख्याभावान्न । एकत्वे बहुत्वं च पाशबहुत्ववदेव द्रष्टव्यम् । 'अदितिः पाशान् प्रमुमोक्ते ता'निति । तत्रैकस्मिन् पाशे बहुवचनं साधुत्वार्थं प्रयुज्यते । विभक्तेर्हि द्वावर्थौ, सङ्ख्या कर्मादयश्च । तत्राविवक्षितायामपि सङ्ख्यायां सप्तमी निमित्तमात्रविवक्षयावकल्पते । ब्रह्म सर्वभोगनिमित्तं सर्वप्रपञ्चनिमित्तमिति निमित्तसप्तम्येवेत्यदोष इति ।

एवं भास्कराचार्यमतेपि भोगजनकप्रारब्धेनैव गमनम् । ब्रह्मणि भोगस्तु ब्रह्मेच्छयैवेति फलति । तेन सिद्धान्तवदेवार्थः । गन्तृविचारे तु तन्मते जीवस्य व्यापकत्वादुपाधिगमनादेव गमनमिति भेदः ॥ १५ ॥ इति तृतीयं कार्यं बादरिरित्यधिकरणम् ॥ ३ ॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ॥ १६ ॥ पूर्वाधिकरणसिद्धमनुवदन्तः प्रस्तूयमानमवतारयन्ति क्रमेत्यादि । तत्रेति । सिद्धे परप्राप्तिरूपेर्थे । सर्वानिति । तदुपासनावतः । पूर्वपक्षग्रन्थः स्पष्टः । सिद्धान्तं व्युत्पादयन्तः सूत्रं व्याकुर्वन्ति उच्यत इत्यादि । अतथात्वं ज्ञात्वेत्यस्यैवार्थः श्रुतिर्ब्रह्मत्वेनेत्यारभ्य, मन्वाना इत्यन्तम् । तथा चातस्मिंस्तत्त्वेनोपासनं प्रतीकमिति पूर्वं 'न प्रतीक' इति सूत्रे उक्तम्, अतो ये तथोपासते ते तथा, तथा च सत्यपीति, प्रतीकालम्बनत्वे तेषां सत्यपि । तथा च यथा

रश्मिः ।

कर्मेति । पूर्वकाण्डेपि ग्रन्थकरणात्कर्मेति । आहेति श्रुतिराह । पाशबहुत्ववदिति । अदितिः पाशानिति वक्ष्यमाणपाशबहुत्वं तद्वत् । विभक्तेरिति । स्वादेः जातिव्यक्ती इति द्वावर्थौ । सङ्ख्येति । पञ्चकं प्रातिपदिकार्थः । द्रव्यजातिसङ्ख्यापरिमाणकारकाणि । तत्रेति । ब्रह्मलोकेष्वित्यत्र । अदोष इति । लोकेष्विति बहुवचनप्रयोगादोषः । ब्रह्मेच्छयैवेति । तन्मते भास्कराचार्यमते । भेद इति सिद्धान्ताद्भेदः ॥ १५ ॥ इति तृतीयं कार्यं बादरिरित्यधिकरणम् ॥ ३ ॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ॥ १६ ॥ मन्वाना इत्यन्तमिति । ननु ज्ञात्वेति भावप्रत्ययान्तं मन्वाना इति कर्तृप्रत्ययान्तमिति कथमतथात्वं ज्ञात्वेत्यस्यैवार्थ इति चेत्प्रकृत्यर्थपर्यन्तमिति अर्थपदात्पूर्वं पूरणीयम् । मन्वाना इत्यत्र ज्ञानानुकूलव्यापारवन्त इति प्रकृत्यर्थो ज्ञानम् । तथा चेत्यादि । षडङ्गवेदस्य ज्ञेयत्वेन छन्दोवत्सूत्राणि

सत्यपि वेदविहितत्वेनोपासनायाः कृतत्वेन सफलत्वात् तत्फलत्वेनोपासकानामर्चिरादिलोकप्राप्तावपि तान् अमानवः पुरुषो ब्रह्म न प्रापयति, किन्तु शुद्धब्रह्मत्वं ज्ञात्वा य उपासते, तानेव ब्रह्म प्रापयतीति बादरायण आचार्यो मन्यते । तत्र हेतुमाह उभयथा दोषादिति । वस्तुतो यद् ब्रह्मरूपम्, तत्राब्रह्मत्वनिश्चयः, उपासनार्थं च ब्रह्मत्वेन भावनम्, एवमुभयथाकरणे दोषः सम्पद्यत इति तस्य न ब्रह्मप्राप्तावधिकारोस्तीति युक्तं तदनयनमित्यर्थः । तथा च श्रुतिः । 'असन्नेव स भवति, असद् ब्रह्मेति वेद चे'दिति, 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते, किं तेन न कृतं पापं चोरेणात्मापहारिणे'ति । एवं ज्ञानमार्गीयव्यवस्था-

---

भाष्यप्रकाशः ।

पूर्वकाण्डतात्पर्यं ब्रह्मणीत्यज्ञात्वा कर्मण्येव तात्पर्यमवधार्य तात्पर्यभ्रमेण यजतां स्वर्गाद्यनन्तरं पुनरावृत्तिः, तथा अत्रापि प्रतीकालम्बनानां तात्पर्यभ्रमेण तथोपासनात्तत्तल्लोकभोगोत्तरमावृत्तिः, अथवा कार्यात्ययावधि तत्र वासः, न तु विद्याबलात् ततः पूर्वं मुक्तिरिति भगवत आचार्यस्याशय इत्यर्थः । हेतुं व्याकुर्वन्ति वस्तुत इत्यादि । एतयोर्दोषत्वे मानत्वेन यथायथं श्रुतिद्वयमुदाहरन्ति तथा चेत्यादि । तेनात्रैतावेव दोषावभिप्रेतावित्यर्थः । सूत्रशेषं व्याकर्तुमवतारयन्ति एवं ज्ञानेत्यादि । व्याकुर्वन्ति सर्वमित्यादि । अस्मिन् पक्षे लकारार्थव्यत्यय

रश्मिः ।

भवन्तीत्यभियुक्तोक्तेः सूत्रेष्वपि षडङ्गैरभिधेयनिर्णयादप्रतिकूलस्मरणालम्बनानित्यर्थो भवति । इङ्किकावध्युपसर्गं न व्यभिचरत इत्यस्य छन्दसि विकल्पः । पुराणमते तु वक्ष्यमाणगारुडवाक्याद्देवतादीनित्यर्थो भवति । तथा च श्रौते मते प्रतिकूलत्वं भ्रमविषयत्वमतस्मिंस्तत्त्वेनोप समीपे स्थित्वा यथायोग्यान्तर्गतस्मरणस्य करणमित्यर्थः । **एकादशसुबोधिन्यां** 'उप समीपे स्थित्वा यथायोग्यकरणमुपासन'मित्युक्तम् । **तथेति** । अप्रतीकालम्बना इत्युच्यन्त इत्यर्थः । **तेषामिति** । उपासकानाम् । **पूर्वकाण्डेत्यादि** । **ब्रह्मणीति** हरौ । अक्षर इति यावत् । 'वेदे रामायणे चैवे'त्युपक्रम्य 'हरिः सर्वत्र गीयत' इति वाक्यात् । 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तम'मिति वाक्याच्च । महानारायणे 'वह्निशिखाया मध्ये परमात्मा व्यवस्थितः स हरिः सेन्द्रः सोक्षरः परमः स्वरा'डिति श्रुतेः । तथाप्यत्राभिधावृत्तिः, न तात्पर्यमिति ब्रह्मणीत्यस्य स्वःपदास्पदे आत्मसुख इत्यर्थः । स्वर्गपदस्य लोके शक्तिः । स्वःपदास्पदे तात्पर्यमिति । तेन हिरण्यगर्भमोक्षरूपे ब्रह्मणीति जैमिनिमते मोक्षः फलं स्मारितम् । किं च । भक्तेस्तात्पर्यविषयत्वस्य पुरस्तादुक्तत्वेन तद्विषयस्यापि तात्पर्यविषयत्वम् । 'धर्मो यस्यां मदात्मक' इत्येकादशस्कन्धात् । अभिधा तु हीदमित्थतया धर्मेषु यागसृष्ट्यादिकर्तृत्वेषु न मदात्मके धर्मे इति । **कर्मण्येवेति** 'कर्मैके तत्र दर्शना'दिति जैमिनिसूत्रे एक इति पदात् कर्मण्येव यागादौ साध्ये तत्प्रतीतीच्छयोच्चरितत्वरूपं तात्पर्यमवधार्येत्यर्थः । कर्मपदं स्वसाध्ये स्वर्गे लाक्षणिकम्, फलभ्रमेण । स्वर्गादीत्यादिना वृष्टिप्रतिष्ठादि । **तथोपासनादिति** । प्रतीकत्वेनोपासनात् । **तत्रेति** । ब्रह्मलोके । **तत इति** । ब्रह्मलोकवासात्पूर्वम् । **आचार्यस्येति** । व्यासस्य । **तेनेति** । श्रुतिबलेन श्रुतिद्वयेन वा । **अवतारयन्तीति** । न्यूनतारूपनिग्रहस्थानरूपदोषाभावाय तथेत्यर्थः । तेन तत्क्रतुर्विद्या च नयतीति योजना नोक्ता । **सर्वमित्यादीति** । **तस्येति** भक्तस्य । **एतदिति** ।

भुक्त्वा भक्तिमार्गीयस्यापि तामाह तत्क्रतुश्चेति । 'सर्वं मन्त्रक्रियोगेने'ति वाक्यान्न तस्योपासनापेक्षेति न प्रतीकादिसम्भावना । तत्र 'कथञ्चित् यदि वाञ्छती'ति वाक्यादिच्छामात्रेण तद्भोगकरणानन्तरं प्राचीनभगवद्भजनलक्षणक्रतुश्च नीयत इत्यर्थः । वस्तुतस्तु भक्तस्यामानवपुमपेक्षाभावात् स्वयमेव ब्रह्मलोकान् प्राप्नोतीति ज्ञापनाय प्रथमान्त उक्तः । ननु ब्रह्मणोधिकं न किञ्चिदस्ति । 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुतेः । एवं सति छान्दोग्ये सनत्कुमारनारदसंवादे 'स यो नाम ब्रह्मेत्युपास्ते' इत्यादिना नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानादीनां ब्रह्मत्वेनोपासनमुत्तरोत्तरं पूर्वस्मात् पूर्वस्माद् भूयस्त्वं चोच्यते । अतो न ब्रह्मत्वं सर्वेषामुपास्यानां वक्तुं शक्यमिति चेत् । मैवम् । विभूतिरूपाणां नियतफलदातृत्वाद् येन रूपेणाल्पफलदानम्, तत्राधिकगुणप्राकट्ये प्रयोजनाभावात् तावन्मात्रगुणप्रकटनम्, येन रूपेण ततोधिकफलदानम्, तत्र ततोधिकगुण-

---

भाष्यप्रकाशः ।

इत्यरुच्या प्रकारान्तरमाहुः वस्तुत इत्यादि । तथा च सूत्रे नयतीति कर्तरि लट्प्रयोगात् तत्क्रतुरिति प्रथमान्तप्रयोगाच्चैवं ज्ञायते । यो ब्रह्मत्वेनाङ्गोपासनकर्ता, स तत्क्रतुर्भक्तः सन् स्वयमेव स्वात्मानं भक्तिबलेन नयतीति न प्रयोगव्यत्ययोपीति । एतेन निबन्धे, 'सूर्यादिरूपधृग्ब्रह्मे'त्यस्य प्रकाशे भक्तिद्वारा ज्ञानाङ्गत्वं यदङ्गोपासनस्योक्तम्, तत्समर्थितं ज्ञेयम् । उपास्यरूपाणामसत्त्वेन ज्ञानस्य तेष्वब्रह्मज्ञानस्य च यद्दोषत्वमुक्तम्, तत्र शङ्कते ननु ब्रह्मण इत्यादि । अतो न ब्रह्मत्वं सर्वेषामुपास्यानामिति । न्यूनत्वरूपाद् बाधकाद् न ब्रह्मत्वं भूमव्यतिरिक्तानामुपास्यानाम् । तथा च तेषां ब्रह्मत्वस्य बाधितत्वात्तेष्वसत्त्वाब्रह्मत्वज्ञानयोर्न दोषत्वमिति पूर्वोक्तः सूत्रार्थोऽसङ्गत इत्यर्थः । तत्र समादधते मैवमित्यादि । तथा च 'यदेकमव्यक्तमनन्तरूप'मिति श्रुत्या ब्रह्मणोनन्तरूपत्वान्नामादिषु रूपेषु लीलार्थमिच्छया न्यूनाधिकगुणप्राकट्येन न्यूनाधिकभावेपि ब्रह्माभिन्नत्वाद् ब्रह्मणश्चैकत्वात्तै रूपैर्न ब्रह्मणः समाभ्यधिकराहित्यहानिः, यथा विस्फुलिङ्गानां न्यूनाधिकभावेन नाग्नेः, यथा च विस्फुलिङ्गानां तथात्वेपि तेषां नाग्नित्वहानिः, तथेति तेषां ब्रह्मत्वानपायात्तेष्वतथात्वज्ञानयोर्दोषत्वमक्षुण्णमिति पूर्वोक्तं सूत्रव्याख्यानं साध्वेवेत्यर्थः । ननु तेषु किमिति ब्रह्मरूपत्वाग्रहः क्रियते, यथा प्रतिमायां शालग्रामे गुरौ च देवबुद्धिमात्रेण पूजया फलसिद्धिः, शास्त्रप्रामाण्यात्, तथोपास्यरूपेष्विति कुतो नाद्रियत इत्यत

रश्मिः ।

एतस्य समीपतरवाक्योक्तस्य भोगस्य करणानन्तरम् । प्राचीनेत्यादि । भक्त इत्यर्थः । लकारार्थे इति । कर्तरि लकार इति लकारार्थः कर्ता, नयतीत्यत्र तस्य व्यत्ययो नाशः कर्मणि लकारेण नीयत इत्यनेन । भूमव्यतीति । 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'ति परब्रह्मैकलक्षणात् तद्व्यतिरेक उक्तः । तथात्व इति न्यूनाधिकभावे । तथेतीति । दार्ष्टान्तिकेपि तथेति । तेषां उपास्यानाम् । शालग्राम इति । शालिग्राम शब्दोपि । 'सूर्योग्नि'रित्येकादशे वाक्यम् । संग्रह इति । किं च द्वितीयाध्याये तर्कपादे कापालिकमतम् । आत्मानो मुक्तिदशायामश्मानो भवन्ति शैली प्रतिमात्मा । 'शिलाबुद्धिर्न कर्तव्ये'तिवाक्यात् । प्रतिमा सच्चिदानन्दरूपत्वप्रतिपादकवाक्याच्च । 'तदश्मसारं हृदय'मिति श्रीभागवते । हृदि अयं हृदयमिति छान्दोग्ये । सप्तम्या

प्रकटनमिति पूर्वस्मादाधिक्यमुच्यते । एवमेव सर्वत्र । नियतफलदानं तु स्वतन्त्रेच्छत्वाल्लीलारूपमिति नानुपपन्नं किञ्चित् । प्रतिमादिष्वावाहनेन सन्निहिते विभूतिरूपे तद्भावनं पूजामार्गे । भक्तिमार्गे तु भक्त्या तत्र प्रकटे तथा । गुरौ तु, 'शाब्दे परे च निष्णातं ब्रह्मणी'ति विशेषणवत्त्वेन भगवदावेशात् तत्र तद्भावनमिति सर्वमवदातम् । अपि च बादरिजैमिनिमतोक्त्यनन्तरं स्वमतोक्त्या तत्समानविषयत्वमत्रापीत्यवगम्यते । तत्र च कार्यब्रह्मलोकप्राप्तिपरब्रह्मप्राप्तिविषयत्वमुक्तं पूर्वोत्तरपक्षभेदेन । बादरिमते सविशेषस्यैवोपास्यत्वाद्विशेषाणां चाविद्यकत्वादुपासनानां सर्वासां प्रतीकतद्रूपत्वमेव सिध्यति । एवं सति 'अप्रतीकालम्बनान्नयती'ति वदता व्यासेन बादरिमतानुसारिण उपासकस्य न कस्यापि ब्रह्मप्राप्तिरिति ज्ञाप्यते । वस्तुतस्तूपासनायामुपास्यस्वरूपज्ञानस्याप्यङ्गत्वात्तन्मतीयानामुक्तरीत्या तदभावेन निरङ्गत्वादर्चिरादिप्राप्तिरपि न सम्भवति, किं पुनर्ब्रह्मण इति निगूढाशयो व्यासस्य । एवं सति परप्राप्तावेवोपोद्बलकमुक्तं भवतीति सैव व्यासाभिमतेति सिद्धम् । ये तु प्रतीकेष्वब्रह्मक्रतुत्वं वदन्तः पञ्चाग्निविद्यायास्तथात्वेपि वचनबलात्तद्भूतो ब्रह्मप्राप्तिरिति वदन्ति, तत्रेदमुच्यते । वचनं तु वस्तुसतः पदार्थस्य बोधकम्, न तु कारकम्, अतस्तच्चेद् बोधयति तदा

भाष्यप्रकाशः ।

आहुः प्रतिमादिष्वित्यादि । अत्रादिपदेन 'सूर्योग्निर्ब्राह्मणा गाव' इत्याद्युक्तानां पूजापदानां सङ्ग्रहः । आवाहनेन सन्निधानं च 'अप्स्वग्नौ हृदये सूर्ये' इत्याद्युक्तस्य नित्यसन्निधानस्याप्युपलक्षकम् । तथा च प्रतिमादिष्वपि शास्त्रप्रामाण्यात् कथञ्चन तत्तद्रूपसन्निधानमेव तत्तत्फलदानादिप्रयोजकम्, न तु बुद्धिमात्रम्, अतः शास्त्रादेव तथा आग्रह इत्यर्थः । अत्रर्षिद्वयमतोक्त्यनन्तरं स्वमतकथनस्य तात्पर्यं स्फुटीकुर्वन्ति अपि चेत्यादि । प्रतीकतद्रूपत्वमिति । प्रतीकोपासनरूपत्वम् । एवं सतीत्यादि । ब्रह्मणः प्रतीकालम्बनाप्राप्यत्वे अङ्गरूपालम्बनप्राप्यत्वे च सति । अप्रतीकालम्बननयनकथनं परप्राप्तावेवोपोद्बलकत्वेन सिद्ध्यतीति सैव तथेत्यर्थः ।

अत्र शाङ्करमतमनुवदन्ति ये त्वित्यादि । तद्भूत इति पञ्चाग्न्युपासकस्य । तद्दूषयन्ति तत्रेत्यादि । तस्मिन् मते वक्ष्यमाणं दूषणमुच्यते । विधिभिन्नं वचनं वस्तुसतः पदार्थस्य बोध-

रश्मिः ।

लुक् । अयमात्मा । अप्स्वग्नाविति । इदं धर्मशास्त्रग्रन्थे कस्मिंश्चिल्लिखितं द्रष्टव्यम् । तत्तद्रूपेत्यादि । भाष्ये । ननु विभूतिरूपत्वेपि नियतफलदाने अनियतफलदानोपरोधजानन्दस्वरूपैकरसत्वविरोधस्तु स्यात्, अत आहुः सर्वत्र । नियतेति । तद्भावनमिति स्वेष्टभावनस्य । भक्त्येति । 'भक्त्याहमेकया ग्राह्य' इति वाक्याद्भक्त्या प्रकटे । तरतमभावो भक्तौ द्रष्टव्यः । भक्तिमार्गस्य बहुविधत्वेन भावभेदात् । शाब्द इति । शाब्दे परे च ब्रह्मणि निष्णातं गुरुमित्येवं विशेषणवत्त्वेनेत्यर्थः । तद्भावनं भगवद्भावनम् । 'तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम' इति श्रुतेः । बुद्धिमात्रमिति । अब्रह्मरूपप्रतिमादौ तत्तत्फलदानादिप्रयोजकम् । तथाग्रह इति ब्रह्मरूपत्वाग्रहः । ऋषिद्वयेति जैमिनिबादरिरूपर्षिद्वयमित्यर्थः । स्वमतेति बादरायण इति सौत्रपदाद् बादरायणमतकथनस्य । अपि चेत्यादीति । निगूढेति नितरां गूढा वासना । सैवेति परप्राप्तिरेव ।

---

१. अत्र परिशिष्टे मुद्रितः शोधो द्रष्टव्यः ।

'अप्रतीकालम्बनान्नयती'ति व्यासोक्त्यविरोधाय तत्राप्यप्रतीकत्वमूरीकार्यम्, अन्यथा पञ्चाग्निविद्यानिरूपिकां श्रुतिं पश्यन्नेवं स न वदेत्। न चौत्सर्गिकं पक्षमाश्रित्य तथोक्तमिति वाच्यम्। तस्य बाधकापनोद्यत्वाद्वचनस्य चोक्तन्यायेनाबाधकत्वात्। यत्र वचनस्य बाधकत्वमुच्यते, तत्र बाधबोधकत्वमेव, न तु तथात्वमित्युपेक्षणीयास्ते। ननु मनःप्रभृतीनां शुद्धब्रह्मत्वे मनो ब्रह्मोपास्त इति वदेत्, न तु प्रकारवाचीतिशब्दशिरस्कं ब्रह्मपदम्, अत उपासनाप्रकारावच्छेदकत्वमेव ब्रह्मपदस्य, न तु स्वरूपनिरूपकत्वमिति चेत्, हन्तेदं शब्दार्थानवगम-

---

भाष्यप्रकाशः।

कम्। यथा 'ब्रह्मविदाप्नोति पर'मित्यादिवाक्यम्। न तु कारकम्। यथा ज्योतिष्टोमादिवाक्यम्। अतस्तत्पञ्चाग्निविद्यास्थमातिवाहिकवाक्यं चेद् ब्रह्मप्राप्तिं बोधयति, तदैतद् व्यासोक्त्यविरोधाय पञ्चाग्निविद्यायामपि, 'मूर्धैव सुतेजा' इत्यादिश्रुतेर्लोकादीनां ब्रह्माङ्गत्वादादित्यादिमति सूत्रव्याख्यातरीत्याङ्गविद्यात्वेनाप्रतीकत्वमूरीकार्यम्। अन्यथैतां श्रुतिं पश्यन् व्यास एवं

रश्मिः।

तथेति। परप्राप्तावेवोपोद्बलकमुक्तं भवतीत्यर्थः। व्यवहारे वयं भाट्टा इति वदतां शांकराणां मतेनाहुः **विधिभिन्नमित्यादि**। विधिभिन्नमर्थवादवचनं न स्वार्थे प्रमाणमिति वस्तुसतः पदार्थस्याबोधकमित्यर्थः। परं त्वग्रे अन्वयाभावाद् भाष्ये वस्तुसतः पदार्थस्य बोधकमिति भाष्ये पाठः, वस्तुसतः पदार्थस्य बोधकमिति भाष्यप्रकाशेपि पाठः। तथा चार्थवादवचनं विधिभिन्नं ब्राह्मणवद्बोधकमिति स्वमतेऽर्थः। शब्दात्सृष्टिरिति कारकत्वं वाक्यस्य प्राप्तं तन्निषेधन्ति स्म न त्विति। अदर्शनादिति भावः। विध्यर्थवादयोरविशेषात्स्वमतेनाहुः **यथा ज्योतिरिति**। **अतस्तच्चेदिति** भाष्यं विवृण्वन्ति स्म **अतस्तत्पञ्चाग्नीति**। **आतिवाहिकेति**। 'तत्पुरुषो अमानवः स एनान् ब्रह्म गमयती'ति वाक्यम्। **तदेति** भाष्यं विवृण्वन्ति स्म **तदैतद्व्यासोक्तीति**। अप्रतीकालम्बनान्नयतीति व्यासोक्त्यविरोधाय। **तत्रापीत्यस्यार्थः** पञ्चाग्निविद्यायामपीति। **मूर्धैवेति**। छान्दोग्ये प्राचीनशाल औपमन्यव इत्यारम्भके प्रपाठकेऽस्ति। वैश्वानरविद्यायामस्ति 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोन्वाहार्यपचन आस्यमाहवनीय' इति। अर्थस्तु प्राचीनशालो नामतः उपमन्योरपत्यं औपमन्यवः। सुतेजाः शोभनतेजाः द्यौः शुक्लनीलादिसर्वरूपत्वाद्विश्वरूप आदित्यः। **पृथग्वर्त्मात्मेति** पृथङ्नानाविधानि अभिमुखागमनऊर्ध्ववहनानि वर्त्मानि यस्य स एवात्मा स्वभावो यस्य। पृथग्वर्त्मा धूमादिवर्त्मा वह्निः स आत्मनि यस्य तयोरिति वा। सर्वगतत्वाद्बहुल आकाशः स सन् देहः आत्मनः शोभनो देहः। रयिः आपः बस्तिः नाभेरधस्तादलाबुसदृशमधोनालमनेकच्छिद्रं मूत्रभाजनं बस्तिरित्युच्यते। सन्देहः शरीरमध्यभाग इति। पृथिव्येव पादाविति स्पष्टम्। अथ भूमिकापूर्वकमग्निहोत्रं सम्पादयिष्यन्नङ्गविद्यामाह। उर एव वेदिरिति तस्य वैश्वानरस्य भोक्तुरुर एव वेदिराकारसाम्यात्। लोमानि बर्हिर्वेद्यामिवास्तीर्णत्वात्। हृदयं गार्हपत्यः मनोग्निप्रणयनहेतुत्वसाम्यात्। हृदयाद्धि मनः प्रणीतमिवानन्तरं भवति। मनोन्वाहार्यपचनो दक्षिणाग्निः पचनहेतुत्वसाम्यात्। आस्यमाहवनीयोग्निः हूयतेऽस्मिनन्नमित्याहवनीयः। मुखेऽप्यन्नं हूयत इति साम्यादिति। **तदुक्तेति** ग्रन्थोक्तप्रतीकलक्षणाभावात्। **अन्यथेति** भाष्यं विवृण्वन्ति स्म **अन्यथैतामिति**। एतामिति वैश्वानरविद्यानिरूपिकां साधारणनयनसम्बन्धिनीम्। एवमिति। अप्रतीक-

भाष्यप्रकाशः ।

न वदेत् । न च बाधकापनोद्यस्य नियमस्योत्सर्गत्वेन तत्क्रतुन्याये तं पक्षमाश्रित्य व्यासेनाप्रतीकालम्बननयनमुक्तमित्यपोद्य पक्षबोधकत्वान्न तद्विरोध इति वाच्यम् । औत्सर्गिकपक्षस्य बाधकापनोद्यत्वात् । प्रकृते च तत्क्रतुवाक्यस्य सामान्यतः क्रतुप्रकारफलप्रकारतौल्यनियमबोधकतया पञ्चाग्निवचनस्यापि ब्रह्माङ्गद्वारा ब्रह्मणो ब्रह्मप्राप्तेश्च बोधकत्वाद् विधिभिन्नवचनान्तरन्यायेन तत्क्रतुविशेषरूपतया ब्राह्मणश्रमणन्यायेनाबाधकत्वात् । न च विधिभिन्नवाक्यस्थले बाध्यबाधकभावानादरणे वाक्ययोर्बाध्यबाधकभावप्रसिद्धिविरोधप्रसङ्ग इति शङ्क्यम् । यत्र वचनस्य बाधकत्वमुच्यते, तत्र बाधबोधकत्वमेव, न तु बाधकत्वम् । विधिभिन्नवाक्यस्य कारकत्वाभावात् । न चानिवृत्त्यप्रसङ्गः । बाधबोधादेव तत्सिद्धेः । तस्मात्तन्मते तत्क्रतुश्रुतिबाधकल्पनम्, तत्क्रतु-

रश्मिः ।

विशेषनयनं न वदेत् । न चौत्सर्गिकमिति भाष्यं विवृण्वन्ति स्म न चेत्यादि । श्रुत्योर्विरोधे विकल्प इति मनूक्तेः । पञ्चाग्निविद्याश्रुतौ साधारणत्वेनैनान् गमयतीति सकलगतिप्रतिपादिकायामुत्सर्गतः । सामान्यतो विशेषो बलीयानिति बाधकापनोद्यस्य नियमस्योत्सर्गत्वं सामान्यन्यायत्वं तेनेत्यर्थः । तेन भाष्ये औत्सर्गिकमित्यत्र स्वार्थे औणादिः प्रत्ययः उत्सर्गेण न भिद्यते इत्यौत्सर्गिकं तं पक्षं तत्क्रतुन्याये आश्रित्य । अप्रतीकालम्बननयनं विशेषबलीयोरूपमुक्तम् । अपोद्येति पञ्चाग्निविद्यास्थगतिवाक्य अपोद्यस्य उत्सर्गपक्षस्य बोधनात् । न तद्विरोध इति पञ्चाग्निविद्यावाक्यात्सामान्यतः प्रतिपादकान्न विशेषबलीयसो व्यासवाक्यस्याप्रतीकालम्बननयनस्य विरोधः । औत्सर्गिकपक्षस्येत्यादि । भाष्यीयस्य तस्येत्यस्यार्थः । बाधको बलीयान्विशेषस्तदपनोद्यत्वात् त्वदुक्तरीत्या । तत्क्रतुवाक्यस्येति । तत्क्रतुः स्वयमेव ब्रह्मलोकान्नयतीति वाक्यस्य । सामान्यत इति विशेषालोचनरहितदशायाम् । फलप्रकारः ब्रह्मलोकानित्युक्तः । सूत्रस्य छन्दस्कत्वान्नियमपदम् । वचनस्येति भाष्यं विवृण्वन्ति स्म पञ्चाग्नीत्यादि । सामान्यतो बलीयो विशेषो निरूप्यते । चकारोनुक्तसमुच्चय इत्याशयेनोक्तसामान्यतो विशेषमाहुः ब्रह्माङ्गेति । ब्रह्मलोकानित्यत्र गोकुलाष्टकोक्तरीत्या ब्रह्मलोकगोकुलस्याङ्गस्य द्वारा ब्रह्मण इत्यर्थः । उक्तन्यायेनेति भाष्यविवरणं विधिभिन्नेत्यादि । अयं न्यायोत्रैव पूर्वमुक्तः प्रकाशे । तत्क्रत्विति 'स एनान्ब्रह्म गमयती'ति ब्रह्मणः अधोक्षजत्वेन ब्रह्माङ्गद्वारा ब्रह्मणः तथा ब्रह्मप्राप्तेश्च तत्क्रतुविशेषरूपतया ब्राह्मणश्चेच्छ्रमणः श्रमशीलः अनेन न्यायेन तत्क्रतौ सामान्ये विशेषस्य ब्रह्माङ्गद्वारा ब्रह्मसम्बन्धित्वस्य ब्रह्मप्राप्तिसम्बन्धित्वस्य च बोधनेनाबाधकत्वात् । न हि दध्ना जुहोतीति यद्दधि गुणं विदधत् यागे यागबाधकं भवति तद्वत् । यत्र वचनस्येति भाष्यं विवरीतुमाहुः न च विधीति । अर्थवादस्थले 'श्रुत्योर्विरोधे विकल्प' इति मनूक्तेर्विकल्पादरणेन बाध्यबाधकभावानादरणे । विवृण्वन्ति स्म यत्र वचनस्येति । मनूक्तेपि यत्र वचनस्य बाधकत्वमुच्यते, वचनं बाधकमुच्यते । तत्रेति पयोव्रते न वृतयतीत्यत्र बाधकं वचनमुच्यते पूर्वमीमांसायां अजीर्णिसम्भवे न वृतयेदिति । बाधकत्वमिति तथात्वमित्यस्य भाष्यस्यार्थः । विधिभिन्नस्येति । विधिवाक्यस्य तु कारकत्वम्, विधिप्रयुक्तो अहं करोमीति प्रत्ययात् । न चेत्यादि । कारकत्वाभावेपि बाधबोधानन्तरमजीर्णिसंभवेपि पयोव्रताच्छ्रुतादनिवृत्तेरप्रसङ्गः । अनिवृत्तिप्रसङ्गस्य प्रतियोगित्वस्य विवक्षणान्नञ्द्वयम् । तत्सिद्धेरिति पयोव्रतान्निवृत्तिप्रसङ्गसिद्धेः । उपेक्षणीयत्वे हेतून् वदन्तः सिद्धमाहुः तस्मादिति । बाध्यबाधकभावप्रसिद्धिविरोधप्रसङ्गाभावात् । तत्क्रत्विति । तत्क्रतुश्रुतेः सुश्रीयतत्क्रतुश्रवणस्य निरपेक्षस्वरूपस्याब्रह्मक्रतौ पञ्चाग्निविद्यायां बाधकल्पनम् । तत्क्रत्विति । तत्क्रतु-

भाष्यप्रकाशः ।

पञ्चाग्निवाक्ययोर्बाध्यबाधकभावकल्पनम्, व्यासे तच्छ्रुत्यविचारापादनम्, पुनरौत्सर्गिकपक्षबोधकतया तद्विचारकल्पनमिति चतस्रः कल्पनाः । अस्मन्मते तु तत्क्रतुपञ्चाग्निवाक्ययोः सामान्यविशेषभावेन समानविषयत्वमात्रं कल्पनीयमिति लाघवम्, अतस्तन्मतं गुरुत्वादुपेक्षणीयमित्यर्थः । पञ्चाग्न्यादिविद्यानां ब्रह्मविद्यात्वे शङ्कते ननु मन इत्यादि । तद्दूषयन्ति हन्तेः त्वमित्यादि । पूर्वमुक्तमिति । इतिशब्दशिरस्कवाक्यकथनात् पूर्वमुक्तम् । सर्वत्रेति । अत्रत्यवाक्यान्तरे प्रकरणान्तरीयवाक्ये च । तथा च तैत्तिरीये, 'येन्नं ब्रह्मोपासते', 'ये प्राणं ब्रह्मोपासते', 'आनन्दं ब्रह्मणो विद्वान्', 'विज्ञानं ब्रह्म चेद्वेदे'ति वाक्येषु इतिशब्दशिरस्कताया अदर्शनान् 'मनो ब्रह्मेत्युपासीते'त्यादावितिशब्दस्य हेत्वर्थतैव युक्तेत्यर्थः । ननु मनआद्युपासनासु ब्रह्मक्रतुत्वमसङ्गतम्, बृहदारण्यकोपान्तभागे 'अन्नं ब्रह्मेत्येक आहुः तन्न तथा पूयति वा अन्नम्, ऋते प्राणात् प्राणो ब्रह्मेत्येक आहुः, तन्न तथा शुष्यति वै प्राण ऋतेन्नादेते ह वै देवते एकधा भूयं भूत्वा परमतां गच्छत' इति तयोर्ब्रह्मत्वनिराकरणात्, पञ्चाग्निविद्यायामपि पुरुषयोषयोर्लौकिकयोरेवाग्नित्वकल्पनात्, एवं छान्दोग्ये मनसोप्यन्नमयत्वश्रावणात् तेषु भगवद्विभूतित्वस्य वक्तुमशक्यत्वादिति चेत् । मैवम् । बृहदारण्यकवाक्ये भौतिकयोरेवान्नप्राणयोः

रश्मिः ।

वाक्यं सामान्यं बाध्यम्, पञ्चाग्निविद्यावाक्यं विशेषरूपं बाधकम्, न तु विशेषबोधकम्, अतः पञ्चाग्निवचनेन विशेषणबाध्यबाधकभावकल्पनम् । स्वमते तु पञ्चाग्निवचनस्य तत्क्रतुविशेषरूपत्वम् । व्यास इति । तच्छ्रुत्याः पञ्चाग्निविद्यायां 'स एनान्ब्रह्म गमयती'त्यस्याः विचारापत्तिः, प्रसङ्गेऽविचारितत्वात् । पुनरिति । तथा च तद्भाष्यम् 'तदभावे त्वौत्सर्गिकेण तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तथासिर्नेतरेषा'मिति । ब्रह्मक्रतुत्वाभावे त्विति तदभावे त्वित्यस्यार्थः । तथा च पुनरुत्तरसूत्रे । तद्विचारेति । प्रासङ्गिकं विशेषविचारं त्यक्त्वौत्सर्गिकविचारकल्पनम् । अग्रिमसूत्रे शङ्करभाष्ये यत्तदत्रैव चिन्तयन्ति स्म, अग्रिमे विषयान्तरसत्त्वात् । प्रासङ्गिकपञ्चाग्न्यादीनां पुरुषोत्तमाप्रापकत्वेपि ब्रह्मलोकप्रापकत्वात् । पञ्चाग्न्यादीति । ब्रह्मविद्यात्व इति ब्रह्मविद्यात्वार्थम् । न त्विति । छान्दोग्ये नारदसनत्कुमारसंवादे नवमप्रपाठके 'मनो ब्रह्मेत्युपास्ते' इति प्रकारवाचीतिशब्दशिरस्कं इतिशब्दप्रधानं न तु वदेदित्यर्थः । ननु शङ्करभाष्ये नामादिषु च प्रतीकोपासनेषु पूर्वस्मात् पूर्वस्मात्फलविशेषमुत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयतीत्युक्तम्, अत्र तु नामवाचौ विहायार्थमनःप्रभृतीनामित्युक्तं तत्कुत इति चेन्न नामवाचोर्नित्यत्वेन शब्दब्रह्मत्वाच्चार्थविषये तयोरुपयोगाभावात्, स्पष्टत्वाच्च । भाष्ये उपासनाप्रकारेति उपासनाप्रकारेषु अवच्छेदकत्वम् । सप्तमी शौण्डैरित्यत्र सप्तमीति योगविभागात्समासः । अर्थादुपासनाप्रकारे विषयतयावच्छेदकत्वम् । मनस्यब्रह्मणि ब्रह्मेति । मनो ब्रह्मेति । प्रकृते हन्तेत्यादीति । हन्त इति खेदे । अत्रत्येति छान्दोग्यीयनवमप्रपाठकस्थे 'सङ्कल्पो वा व मनसो भूया'नित्यादौ 'चित्तं वा सङ्कल्पाद्भूय' इत्यादौ । 'ध्यानं वा व चित्ताद्भूय' इत्यादिषु च । प्रकरणान्तरीयवाक्यमुदाहरन्ति स्म तथा च तैत्तिरीय इति । तन्न तथेति । तत्तथा न ग्रहीतव्यम् । अन्नं पूयति क्लिद्यते वै प्राणादृते, प्राणो न क्लिद्यते इति प्राणो ब्रह्मेत्येक आहुः । तदपि न तथा न ग्राह्यम्, अन्नादृते प्राणः शुष्यति । ब्रह्म तु क्लेदशोषवर्जितम् । एवमेवैकस्य ब्रह्मत्वानुपपत्तेर्ह एते एव तु देवते अन्नप्राणलक्षणे एकधाभूयं एकभावं भूत्वा गत्वा परमतां परमत्वं गच्छतो ब्रह्मत्वं प्राप्नुतः । तयोरिति पृथग्भूतयोः । अन्नमयत्वेति । 'अन्नमयं हि सोम्य मन' इति

विजृम्भितमेव, यतो 'मन उपास्वे'त्युक्त्वा तदुपासनाफलं 'यावन्मनोगतं तत्रास्य कामचारो भवती'ति वदिष्यँस्तदुपासनाया एतत्फलसाधकत्वे प्रयोजकरूपाकाङ्क्षायामाह 'मनो ब्रह्मे'ति। इतिशब्दोत्र हेतुत्ववाची। तथा च यतो मनो ब्रह्म, अतो हेतोस्तदुपासनं तादृक्फलसाधकमित्यर्थः। अत एव, 'मनो हि ब्रह्म मन उपास्वे'ति पूर्वमुक्तम्। सर्वत्रैवमेव ज्ञेयम् ॥ १६ ॥

॥ इति चतुर्थाध्याये तृतीयपादे चतुर्थमप्रतीकालम्बनाधिकरणम् ॥ ४ ॥

भाष्यप्रकाशः।

पूयीभावशोषणात्मकदोषदर्शनेन ब्रह्मता निराक्रियते, न तु श्रुत्योपास्यत्वेनोक्तयोः। तत्रैतयोर्दोषयोः क्वाप्यसिद्धत्वात्। प्रत्युत तैत्तिरीयके, 'अद्यतेत्ति च भूतानी'त्यन्नप्रशंसाश्लोके प्रसिद्धविरुद्धस्यात्तृत्वस्य प्राणश्लोके, 'तस्मात् सर्वायुषमुच्यत' इति सर्वायुष्ट्वस्य, मनःश्लोके, 'आनन्दं ब्रह्मणो विद्वा'निति ब्रह्मानन्दरूपत्वस्य च धर्मस्य श्रावणेन, बृहदारण्यकीये, 'तत्र तथे'ति वाक्ये तद् अन्नप्राणयोर्ब्रह्मत्वं न तथा, न तदुक्तप्रकारेण, किन्तु श्रुत्युक्तप्रकारेणेत्यर्थस्य लभ्यमानत्वाच्च। एवं पञ्चाग्निविद्यास्थयोषापुरुषयोरपि भगवद्विभूतिरूपयोरेवोपास्यत्वं ज्ञेयम्। 'सर्वयोनिषु कौन्तेय मूर्तयः प्रभवन्ति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिते'ति गीतावाक्ये तासां तत्तदनुरूपाणां मूर्तीनां तत्तत्कारणभावापन्नयोः प्रकृतिपुरुषयोर्मातापितृभावेन कथनात्। देवकृतरेतोन्नहोमस्य तत्रैव युक्तत्वाच्च। 'तदभिध्यानादेव तु तल्लिङ्गात् स' इति सूत्रे तथैव सिद्धत्वात्। अन्तर्यामिब्राह्मणे, 'यः सर्वेषु भूतेषु तिष्ठ'न्नित्यादिश्रावणाच्चेति। तस्मान्नासङ्गतिलेश इति दिक्। तेन यत्रोपास्यविशेषणतया ब्रह्मपदमुच्यते, यत्र वा ब्रह्मप्राप्तिरूपं फलम्, अन्यद्वा ब्रह्मत्वगमकं तात्पर्यलिङ्गं लभ्यते, तत्र तस्या उपासनाया अप्रतीकत्वमिति बोध्यम्।

एवमत्र चतुर्भिरधिकरणैः सप्रकारा गच्छद्ब्रह्मविद्व्यवस्थोक्ता। अग्रे तु प्रासङ्गिकमुच्यते। ज्ञानिभक्तयोर्गमने प्रकारविशेषदर्शनेनाकाङ्क्षाविशेषोदयादिति ॥ १६ ॥

इति चतुर्थमप्रतीकालम्बनाधिकरणम् ॥ ४ ॥

रश्मिः।

श्रुतेः। **श्रुत्येति** बृहदारण्यकश्रुत्या। **उक्तयोरिति** तैत्तिरीयोक्तयोः। **तत्रेति** तैत्तिरीये। **दोषयोरिति** शोषक्लेदनयोः। **प्रशंसेति**। 'अन्नाद्भूतानि जायन्ते जातान्यन्नेन वर्धन्ते अद्यतेत्ति च भूतानि तस्मादन्नं तदुच्यत' इति श्लोके। असदुत्कर्षाधायकं गुणवर्णनं प्रशंसा। पूर्वार्धे स्फुटा। उत्तरार्धेन्नपदनिर्वचनम्। भूतैरद्यते अदन्ति च भूतानीति। यद्वा उत्पत्तिस्थितिसमभिव्याहारादन्नेन भूतानि अद्यन्ते अन्नं भूतान्यत्तीति लय उक्तः। तस्माज्जगज्जन्मादिकर्तृत्वात्। अत एव आहुः **प्रसिद्धेति**। **प्राणश्लोक इति**। 'प्राणं देवा अनुप्राणन्ति, मनुष्याः पशवश्च ये, प्राणो हि भूतानामायुः, तस्मात्सर्वायुषमुच्यते' इति प्रशंसाश्लोके। मनःश्लोके 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचने'ति प्रशंसाश्लोके। **तदुक्तेति** मायावाद्युक्तेन प्रकारेण। ननु मायावादिश्रुतिविचारे क्वेति चेन्न। 'अनागतमतीतं चे'ति वाक्यात्। **असङ्गतीति**। मनआद्युपासनासु ब्रह्मक्रतुत्वासङ्गतिः तस्या लेश.। **उपास्यविशेषणेति**। ब्रह्माहमस्मीत्यत्र यथा। **ब्रह्मप्राप्तिरूपमिति**। 'ब्रह्मविदाप्नोति पर'मित्यत्र। **ब्रह्मत्वगमकमिति**। 'सर्वाणि ह वा भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ती'त्यत्र ब्रह्मत्वगमकं जगज्जन्मादिकर्तृत्वं आकाशपदस्य ब्रह्मणि तात्पर्ये लिङ्गम्। **अप्रतीकत्वमिति**। एतेषां शुद्धब्रह्म ज्ञात्वोपासकत्वेन अप्रतीकालम्बनत्वात्तेषामुपासनाया अप्रतीकत्वम् ॥ १६ ॥ **इति चतुर्थमप्रतीकालम्बनाधिकरणम् ॥ ४ ॥**

विशेषं च दर्शयति ॥ १७ ॥ (४-३-५)

सर्वाण्युपास्यानि रूपाणि ब्रह्मरूपाण्येवेति तदुपासकानां परप्राप्तिरेवेति सिद्धम् । तत्रेदं चिन्त्यते । ज्ञानमार्गीयाणां भक्तिमार्गीयाणां चाविशेषेणैव परप्राप्तिः, उत कश्चिद्विशेषोस्तीति । तत्र उभयोरपि ब्रह्मोपासकत्वेनाविशेषेणैव फलं भवतीति प्राप्ते, प्रत्याह विशेषं च श्रुतिर्दर्शयति । तैत्तिरीयके पठ्यते । 'ब्रह्मविदाप्नोति पर'मिति गूढाभिसन्धिना सामान्यत एतावदुक्त्वा, गूढं तदुद्घाटयन्त्यतिगोप्यत्वमस्मिन्नर्थेनुभवैकवेद्यत्वं च ज्ञापयन्त्याह 'तदेषाभ्युक्ता सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति । तत् पूर्वोक्तं प्रतिपाद्यत्वेनाभिमुखीकृत्यैषर्गुक्ता, तदनुभवकर्तृभिरिति शेषः । ब्रह्मविदक्षरब्रह्मविदाप्नोति, सान्निध्यादक्षरमेवाप्नोति । एतावान् अर्थो 'यो वेदे'त्यन्तयर्चोक्तः । अथ 'परमाप्नोती'त्यस्यार्थ उच्यते 'निहित'मित्यादिना । अत एव मध्ये क्रियापदमुभयसम्बन्धित्वज्ञापकमुक्तम् । तत्प्राप्तिश्च मर्यादापुष्टिभेदेन द्वेधा । तत्रादौ मर्यादायामुच्यते ।

भाष्यप्रकाशः ।

विशेषं च दर्शयति ॥ १७ ॥ पूर्वाधिकरणसिद्धमनुवदन्तः प्रस्तुतमवतारयन्ति सर्वाणीत्यादि । सर्वाणीति । मनआदीनि विभूतिरूपाणि । परप्राप्तिरिति । यया कयाचित्परम्परया परप्राप्तिः । तत्रेति । परप्राप्तौ । पूर्वपक्षार्थस्तु स्फुटः । सिद्धान्तं व्याकर्तुं विशेषदर्शिकां श्रुतिमुपन्यस्य व्याकुर्वन्ति तैत्तिरीयक इत्यादि । सान्निध्यादिति । वेदनसान्निध्यात् । यद् वेद तदेव प्राप्नोति । वेदनशेषं च 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यनेनोक्तम् । यस्तादृशमक्षरं ब्रह्म वेद, सान्निध्यात् तदाप्नोतीत्यर्थः । ननु पूर्वोक्तरीत्यार्थोक्तौ परमिति द्वितीयान्तस्य कुत्रान्वय इत्यत आहुः अथेत्यादि । तथा च मध्ये उक्ताया आप्नोतीति क्रियायाः कर्मणाप्यन्वयात् तस्याप्यर्थ उच्यते । नन्वेवं व्याख्याने किं बीजमत आहुः अत एवेत्यादि । यत आप्नोतीति क्रियापदं मध्ये उक्तमतो देहलीदीपन्यायेन तस्योभयसम्बन्धित्वमेव बीजमित्यर्थः ।

नन्वेवं व्याख्याने आकाङ्क्षाया अपूरणात् भिन्नवाक्यत्वापत्तेः, आप्नोतीति पदावृत्तेश्चापत्त्या क्लिष्टं किमित्याद्रियत इत्यत आहुः तत्प्राप्तिरित्यादि । आदाविति । ब्रह्मविदित्यनेन मर्यादामार्गीयस्योपक्रान्तत्वादादौ मर्यादायामङ्गीकृतस्य 'यो वेदे'त्यनेन ग्रन्थेन व्यवस्थोच्यते ।

रश्मि ।

विशेषं च दर्शयति ॥ १७ ॥ यया कयाचिदिति । उपासनाभिश्चित्तशुद्धिः, तया भक्तिः, तद्द्वारेति प्रसिद्धा परम्परा । अमानवपुरुषं भक्त्यनन्तरं निवेश्यापरा परम्परा । आतिवाहिकसूत्रे यथा विद्याबलात् तत्तल्लोकप्राप्तिः, तथैव ब्रह्मप्राप्तिरपीति न, किन्तु भगवदीयपुरुषानुग्रहेणैवेत्युक्तेः पुरुषानन्तरं तदनुग्रहं निवेश्यापरा ज्ञापिता । उपासनाविषयप्राप्त्युद्देशेन कृतयोपासनयादित्याद्यङ्गप्राप्तिः । अङ्गानां भगवत्स्वरूपात्मकत्वेनैक्यमिति स्वरूपस्यैव फलत्वमुक्तं भवतीत्यपरा 'दित्यादिमति' सूत्र उक्ता । तैत्तिरीयक इत्यादीति । मध्य इति परप्राप्त्यक्षरप्राप्त्योर्मध्ये । वेदेति क्रियापदम् । उभयेति । गुहायां परमे व्योम्नि, सप्तम्या लुक् । निहितं नितरां हितं स्थापितं यो वेदेत्युभयसम्बन्धित्वज्ञापकम् । तत्प्राप्तिरिति । परप्राप्तिः । विचिकित्सितमिति सन्दिहानं प्रति ।

इहायमाशयो ज्ञेयः। 'नायमात्मा प्रवचनेने'ति श्रुत्या भगवद्वरणातिरिक्तसाधननिरासः क्रियते पुरुषोत्तमप्राप्तौ। एवं सत्यक्षरब्रह्मज्ञानस्य तत्साधनत्वे उच्यमाने तद्विरोधः स्यात्। तेनैवमेतदर्थो निरूप्यते। ज्ञानमार्गीयाणामक्षरज्ञानेनाक्षरप्राप्तिः, तेषां तदेकपर्यवसायित्वात्, भक्तानामेव पुरुषोत्तमपर्यवसायित्वात्। तदुक्तं भगवद्गीतासु 'एवं सततयुक्ता य' इति प्रश्ने, 'मय्यावेश्य मनो ये माम्,' 'ये त्वक्षरमनिर्देश्यम्', श्रीभागवते च 'भक्त्याहमेकया ग्राह्यः,' 'तस्मान्मद्भक्तियुक्तस्ये'त्युपक्रम्य, 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'त्यादिना। तथा च ब्रह्मविदं चेद् भगवान् वृणुते, तदा भक्तिरुदेति। तत्प्रचुरभावे सति स्वयं तद्धृदि प्रकटीभविष्णुः स्वस्थानभूतं व्यापिवैकुण्ठं तद्गुहायां हृदयाकाशे प्रकटीकरोति, तत् परमव्योमशब्देनोच्यते। अलौकिकप्रयोगेण तस्यालौकिकत्वं ज्ञाप्यते। यथा स्वस्थापितं वस्त्ववश्यं स्वदर्शनयोग्यं भवति, तथात्र भगवानपीति ज्ञापनाय 'निहित'मित्युक्तम्। तथा च 'परमाप्नोती'ति पदविवृतिरूपत्वादस्य

भाष्यप्रकाशः।

तदेव विवृण्वन्ति इहायमाशय इत्यादि। इहेति। अस्मिन् व्याख्यानपक्षे। नायमात्मेत्यादि। अत्र प्रवचनपदं वेदे रूढम्, तदत्र वाच्यतासम्बन्धेन तदुक्तसाधनान्युपलक्षयति। मेधा धारणावती बुद्धिः, सा च पुरुषनिष्ठस्वाभाविकसाधनानि श्रुतं चागन्तुकानि। एवं भगवद्वरणातिरिक्तसाधननिरासः क्रियत इत्यर्थः। एवं सतीति। पुरुषोत्तमप्राप्तेर्वरणैकलभ्यत्वे सति। उच्यमान इति। प्राञ्जलतयोच्यमाने। तद्विरोधः स्यादिति। 'नायमात्मे'ति श्रुतिविरोधः स्यात्। नन्वस्त्वेवं निरूपणम्, तथापि पूर्वोक्तदोषाणां तु न परिहार इत्यत आहुः ज्ञानेत्यादि। तदेकपर्यवसायित्वादिति। मुण्डके 'धनुर्गृहीत्वे'ति मन्त्रे, 'लक्ष्यं तदेवाक्षरं सोम्य विद्धी'ति श्रावणात् तत्क्रतुन्यायेन तेषां तदेकपर्यवसानात्। तथा च वाक्यभेदपदावृत्तिश्च नात्र दूषणमित्यर्थः। नन्वेवमक्षरप्राप्तावपि अक्षरस्य पुरुषोत्तमप्रत्यासन्नत्वात् तत्प्राप्तिरपि कुतो नाद्रियत इत्यत आहुः भक्तानामित्यादि। ननु भवत्वेवम्, तथापि कर्त्रपेक्षादोषः कथं परिहार्य इत्यत आहुः तथा चेत्यादि। तस्येति। परमव्योमरूपस्याक्षरस्य। अस्येति। निहितमित्यादि-

रश्मिः।

इहायमाशय इत्यादीति। इह व्याख्यानक्लेशे अयं व्याख्यानक्लेशनिवर्तकः। तद्विरोधो वरणश्रुतिविरोधः। एवमेतदर्थ इति। क्लिष्टो ब्रह्मविदाप्नोति परमिति श्रुत्यर्थः। 'ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः पर' इत्यादिविरोधं परिहर्तुं हेतुमाहुः तत्क्रत्विति। अयमप्रतीकालम्बनसूत्रैकदेशः। यदाक्षरप्राप्तिमुद्दिश्य ज्ञानी, तदा तत्क्रतुरक्षरैकपर्यवसायी भवति। यदा तु ज्ञानी चेद्भजते कृष्णम्, तदा तत्क्रतुः पुरुषोत्तमैकपर्यवसायीत्येवं तथात्वादक्षरैकपर्यवसायित्वात्तत्क्रतुरित्यत्र प्रसिद्धवाचकसामान्यतच्छब्दोपादानादित्यर्थः। शेषमिति। एवं सततेति 'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते, ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमा' इति प्रश्ने, 'मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते, श्रद्धया परयोपेतास्ते मे युक्ततमा मताः' इति भिन्नं पद्यम्, 'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासत' इति भिन्नम्। श्रीभागवत इति एकादशस्कन्धे। अलौकिकेति। लुप्तसप्तम्यन्तस्य व्योमन्नितिशब्दस्य प्रयोगेण। तस्येति व्योम्नः। यस्येति द्वितीयभागस्य। तस्य सद्यो

गुहायां परमे व्योम्नि निहितं यो वेद, स 'नास्य प्राणा उत्क्रामन्तीहैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुत्युक्तरीत्या परमाप्नोतीत्यर्थः सम्पद्यते। अथ शुद्धपुष्टिमार्गेऽङ्गीकृतस्य व्यवस्थामाह, 'सोश्नुत' इत्यादिना। अत्रायमभिसन्धिः। यथा स्वयं प्रकटीभूय लोके लीलां करोति, तथात्यनुग्रहवशात् स्वान्तःस्थितमपि भक्तं प्रकटीकृत्य तत्स्नेहातिशयेन तद्वशः सन् स्वलीलारसानुभवं कारयतीति स भक्तो ब्रह्मणा परब्रह्मणा पुरुषोत्तमेन सह सर्वान् कामानश्नुत इति। चकारादुक्ता श्रुतिः स्मृतयश्च संगृह्यन्ते। एवं सति ज्ञानमार्गीयाणामक्षरप्राप्तिरेव, भक्तानामेव पुरुषोत्तमप्राप्तिरिति सिद्धम् ॥ १७ ॥

इति चतुर्थाध्याये तृतीयपादे पञ्चमं विशेषाधिकरणम् ॥ ५ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीमद्ब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य तृतीयः पादः समाप्तः ॥ ४ ॥ ३ ॥

भाष्यप्रकाशः।

वाक्यस्य। तथा च यः पूर्वकर्ता उक्तः, तस्यैव वरणेन भक्तिप्राप्तौ भगवद्धामत्वेनाक्षराविर्भावे पुरुषोत्तमप्राप्तिर्भवतीति तेनैव कर्त्राकाङ्क्षापूर्तिरिति न कोपि दोष इत्यर्थः। तथा चैवं विहितं यो वेद, सोश्नुते, अर्थात्तमेवाश्नुते प्राप्नोति। नन्वेतावता व्याख्येयस्य यजुषो विवरणे सिद्धे 'सर्वान् कामा'निति शेषस्य किं प्रयोजनमित्यत आहुः अथेत्यादि। तथा चास्मिन् पक्षे 'सोश्नुत' इति क्रियापदस्य सम्बन्ध इति बोधनार्थमवतारणे 'सोश्नुत' इत्यपि संगृहीतम्। तथा चायं शेषः पुष्टिमार्गीयफलबोधनार्थः। तथा सत्येवं श्रुतियोजना। अत्राश्नुते इति क्रियापदं संयोगपृथक्त्वेन त्रिधा सम्बध्यते। सत्यं ज्ञानमनन्तं ब्रह्म यो वेद, सोश्नुते। सान्निध्यात्तादृशमक्षरं ब्रह्मैव प्राप्नोतीत्यर्थः। यः पुनर्वरणसहकृतो गुहायां परमे व्योमन् निहितं परं ब्रह्म पुरुषोत्तमं वेद, सोश्नुते, अर्थात्तं पुरुषोत्तममेवाश्नुते। 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतिबलात् पुरुषोत्तमसायुज्यं प्राप्नोतीत्यर्थः। यः पुनः पूर्वमक्षरब्रह्मवित् ततस्तन्निहितपुरुषोत्तमवित् पुरुषोत्तमे लीनोऽसम्भावितलीलारसानुभवः स चेदतिकृपया शुद्धपुष्टिमार्गे वृतः सन् विपश्चिता ब्रह्मणा पुरुषोत्तमेन सह सर्वान् कामानश्नुते। तथा चात्र ब्रह्मविदस्ततो वरणसहकृतस्य ततो भक्तिसहकृतस्य क्रमिकैव व्यवस्था बोध्यते। सौत्रस्य चकारस्य प्रयोजनमाहुः चकारादित्यादि। अतो ज्ञानभक्तिमार्गीययोरुक्तविशेषस्य श्रुत्यैव दर्शनान्नैका व्यवस्था, किन्तूक्तरीतिकविशेषदर्शनाद् विशेषवत्येव सेत्यर्थः सिद्धः। एतेनाहंग्रहोपासकानां सायुज्यम्, पृथग्ग्रहोपासकानां भक्तानामेव परप्राप्तिस्तत्क्रतुन्यायादिति सिद्धं ज्ञेयम्।

रश्मिः।

मुक्तिमाहुः नास्य प्राणेति। इहैव पुरः प्रकटे ब्रह्मणि। हृदि प्रकटे ब्रह्मणि सति तत्प्रभावाद् ब्रह्मैव सन् पुरः प्रकटं ब्रह्माप्येतीति। अश्नुत इति अश्नातीत्यर्थः। उक्तेति अस्याः पूर्वमुक्ता श्रुतिः। निहितं गुहायामित्याद्या श्रुतिः, नायमात्मेति श्रुतिर्वा। स्मृतय इति 'एवं सतत युक्ता' इत्याद्याः, 'वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथे'ति, 'निवेदितात्मा विचिकीर्षितो मे' इति च। एवं शेषं स्फुटमित्यर्थः। एतेनेति। ज्ञानिभक्तयोः परप्राप्तौ विशेषविचारेण। ब्रह्माहमस्मीत्यहंग्रहोपासना। ब्रह्मण आत्मत्वेन ग्रहः तेनोपासना तत्कर्तृणाम्, जीवब्रह्मवादेपि भवति। पृथगिति।

भाष्यप्रकाशः।

अन्ये तु अप्रतीकालम्बनसूत्रशेषत्वेनेदं सूत्रमङ्गीकुर्वन्ति। अप्रतीकालम्बनसूत्रस्य चैवमर्थमाहुः। तत्र प्रतीकालम्बनान् वर्जयित्वा ब्रह्मक्रतूनब्रह्मक्रतूँश्च सर्वानन्यान् विकारालम्बनान्नयतीति बादरायण आचार्यो मन्यते। उभयथा अदोषात्। अनियमः सर्वेषामिति तार्तीयीके सूत्रे श्रुतिस्मृतिभ्यां सर्वेषामेव ब्रह्मलोकगत्युपपादनात्। तत्क्रतुश्च। अस्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः। 'यो हि ब्रह्मक्रतुः स ब्रह्मैश्वर्यमासीदेदितीष्यते तं यथायथोपासते तदेव भवती'ति श्रुतेः। पञ्चाग्निविद्यायां ब्रह्मप्राप्तिश्रावणं त्वाहत्य वादत्वाद् उत्सर्गबाधकम्। अतस्तदभावे औत्सर्गिकेन तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति शाङ्करमतम्। तदसङ्गतमिति प्रागेवोक्तम्।

भास्कराचार्यास्तु, मनआद्युपासनानां प्रतीकत्वमेवाङ्गीकृत्य तदालम्बनव्यतिरिक्तान् कार्यब्रह्मणो हिरण्यगर्भस्योपासकान् परब्रह्मोपासकांश्च नयति। तत्र हेतुः। उभयथा दोषात्। तत्रापि हेतुः। तत्क्रतुश्चेति। तथाचैकत्वभावनया आत्मक्रतुः परमात्मानं प्रति। द्वैतक्रतुश्च कार्यं ब्रह्मेति। न च द्वैतोपासकानां कथं कार्यब्रह्मप्राप्तिरिति शङ्क्यम्। पञ्चाग्निविद्यायां 'शुद्धः पूतः पुण्यलोको भवती'ति श्रुतेः। न च 'परं जैमिनि'रिति सूत्रे परब्रह्मण एव ब्रह्मपदार्थत्वेन निश्चितत्वाद् द्वैतोपासनायां तदनङ्गीकारे पूर्वापरविरोध इति शङ्क्यम्। क्रममुक्तिसद्योमुक्तिभेदेन मुक्तेर्द्वैविध्याद् द्वैतोपासकानां हिरण्यगर्भप्राप्त्यनन्तरं बहुकालेनोदये परप्राप्तिः, साक्षाद्ब्रह्मोपासकानां तु शीघ्रं

रश्मिः।

श्रीकृष्णः शरणं ममेति शरणमार्गे ममेति भेदे षष्ठ्याः। एवं भक्तिमार्गेपि दासवद्दासीवद्वा प्रभुनिकटे स्थितौ सत्यां पृथग्ग्रहोपासना भवति तत्कर्तृणाम्। तत्क्रतुन्यायो विवृतः भक्तज्ञानिसाधारण्येन। **अप्रतीकेति** द्विसूत्रमधिकरणम्। **उभयथेति** ब्रह्मक्रत्वब्रह्मक्रतुभेदेन नयनाभ्युपगमेऽदोषात्। गत्यनुपपत्त्यादिदोषाभावात्। **सर्वेषामिति** ब्रह्मक्रत्वब्रह्मक्रतूनाम्। **उभयथाभावस्येति**। ब्रह्मक्रत्वब्रह्मक्रतुनयनलक्षणभावस्य। **हेतुरिति** तत्क्रतुर्ब्रह्मक्रतुरेवेति हेतुगर्भं विशेषणम्, तत्क्रतुत्वाद्यो हि ब्रह्मक्रतुः स ब्रह्मैश्वर्यमासीदितीष्यत इत्यर्थः। ब्रह्मक्रतोर्नीतस्य प्रापणे श्लेषमाहुः **यो हीति**। ब्रह्मात्मैश्वर्यं आसीदासादेदिति श्लेषे इष्टिः। यो हि ब्रह्मक्रतुः स ब्रह्मात्मैश्वर्यमासादेदिति शङ्कराचार्यभाष्यात्। ब्रह्मात्मैश्वर्यमित्यत्र श्रुतिविरोधं परिहरन्ति स्म **पञ्चाग्नीति**। 'स एनान्ब्रह्म गमयती'त्यनया ब्रह्मप्राप्तिः श्रावणम्। **आहत्येति** उक्तवचनबलाद्वादात्। उत्सर्गस्य ब्रह्मात्मैश्वर्यासादनलक्षणस्य बाधकम्। आहत्य वादाभाव इति तदभाव इत्यस्यार्थः तत्प्राप्तिरिति। ब्रह्मात्मैश्वर्यप्राप्तिः **इतरेषां** अब्रह्मक्रतूनाम्। **प्रागेवेति**। अत्रैव ये तु प्रतीकेष्वब्रह्मक्रतुत्वमित्यादि भाष्ये तत्प्रकाशे च।

प्रतीकत्वमेवेति। कार्यत्वेन भेदे प्रतीकत्वमवलम्बनवत्त्वमेव। **तदालम्बनेति**। प्रतीकालम्बनेत्यर्थः। **उभयथेति**। कार्यब्रह्मपरब्रह्मोपासकभेदेनादोषात्। **तत्रापीति**। दोषाभावेपि हेतुः। तत्क्रतुरात्मक्रतुः परमात्मानं प्रतिपद्यते। **द्वैतोपासकानामिति**। द्वैतेनोपासकानाम्। **कथमिति**। भेदेनाभेदेन वेति प्रश्नः। कार्यजब्रह्मक्रतुः कार्ये द्वैतैकत्वभावनया हिरण्यगर्भो भविष्यामीत्येवं प्रवृत्तस्तद्भावमेकत्वे एति द्वैते तत्प्राप्त्यर्थस्य अर्चिर्मार्गः पठ्यते। तदाहुः **पञ्चाग्नीति**। शुद्धः पूतो व्यापकजीवः कारणात्मना अभेदात् पुण्यलोको हिरण्यगर्भः भवति उत्पद्यते। कार्यात्मनाऽभेदात्। **ब्रह्मपदार्थत्वेनेति**। कार्यब्रह्मपदार्थत्वेन। **तदनङ्गीकार** इति। कार्यब्रह्मप्राप्तौ परब्रह्मप्राप्त्यनङ्गीकारे। **पूर्वस्य** 'परं जैमिनि'रिति सूत्रभाष्यस्य **अपरस्य** 'अप्रतीकालम्बन'सूत्रभाष्यस्य विरोधः। **परप्राप्तिरिति**। **क्रममुक्तिः**। **साक्षादिति**। परब्रह्मोपासकानाम्। **शीघ्रमिति**। सद्यः

भाष्यप्रकाशः ।

तत्प्राप्तिरित्यविरोधादित्याहुः । अत्र मनआद्युपासनानां प्रतीकत्वमनुपादेयम् ।

रामानुजाचार्यास्तु, इतः पूर्वसूत्रे 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहुमुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानी'ति श्रुत्या सम्भाव्यब्रह्मलोकस्य अकृतत्वश्रावणात् सर्वबन्धविनिर्मोकस्य च साक्षाच्छ्रावणात् परब्रह्मलोकस्य नित्यत्वमङ्गीकृत्य, अस्मिन् सूत्रे 'उभयथा चे'ति पाठमङ्गीकृत्य मनआद्युपासनानां पूर्ववदेव प्रतीकत्वं चाङ्गीकृत्य, अप्रतीकालम्बननयनप्रतिज्ञायां हेतुमुभयथादोषमेवं व्याकुर्वते । कार्यब्रह्मोपासकनयनमात्रनियमे 'अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्ये'त्यादिकाः श्रुतयः कुप्येयुः । परब्रह्मोपासकनयनमात्रनियमे च पञ्चाग्निविदो नयनश्रुतिः कुप्येदित्युभयस्मिन् पक्षे दोषः स्यात् । तस्मादुभयविधान्नयतीति, तत्क्रतुश्चेति भागस्य च, तत्क्रतुस्तथोपासीनस्तथैव प्राप्नोतीत्यर्थ इत्याहुः । तेन तन्मतेपि मनआद्युपासनानां प्रतीकत्वमात्रमेवानुपादेयम् ।

तन्मतचौरस्तु तद्वदेव सूत्रं व्याख्याय, विष्णुद्वेषाद् 'ऋतं सत्यं परं ब्रह्मे'ति महानारायणोपनिषन्मन्त्रम् 'परात् परतरो ब्रह्मा तत्परात् परतरो हरिः । तत्परात् परतरो हीश' इति शिवसङ्कल्पसूक्तमन्त्रं 'नारायणं परं ब्रह्मे'ति च महोपनिषन्मन्त्रं, 'विश्वाधिको रुद्र' इति श्वेताश्वतरमन्त्रं चोपन्यस्य, त्रिलोचननीलकण्ठादिविशिष्टमुमया शबलितमेव परमेश्वररूपमुवाद ।

तदसङ्गतम् । महानारायणोपनिषदि अणोरणीयानित्यनुवाके महिमानमीशमित्युक्त्या ईशस्य परमेश्वरविभूतित्वेनैव सिद्धत्वात् । 'ऋतं सत्य'मिति मन्त्रस्य नारायणानुवाकोक्तोपासनप्रकारबोधनाय रासलीलास्थभगवत्स्वरूपनिरूपकत्वेन 'नारायणपरं ब्रह्मे'ति मन्त्रस्य च प्रथमान्त-

रश्मिः ।

तत्प्राप्तिर्मुक्तिः, सद्योमुक्तिरित्यर्थः । **प्रतीकत्वमिति** । भाष्योक्तलक्षणम् । जगतो ब्रह्मत्वात् । **इतः पूर्वसूत्र इति** । द्विसूत्रादधिकरणात्पूर्वस्मिन् 'न च कार्ये प्रतिपत्त्यभिसन्धि'रिति सूत्रे । अर्थस्तु कार्ये हिरण्यगर्भे न चायं प्रत्यभिसन्धिः 'प्रजापतेः सभां वेश्म प्रपद्य' इत्यर्चिरादिना गतस्यानुसन्धानमपि तु परस्मिन्नेव ब्रह्मणि यथाहं भवामि ब्राह्मणानामिति तस्याभिसन्धातुः सर्वाविद्याविमोकपूर्वकसर्वात्मभावाभिसन्धानादिति । अग्रे सर्वाविद्याविमोकपूर्वकसर्वात्मभावबोधकग्रन्थे अश्व इव रोमाणीत्यादिः, तदाहुः **अश्व इव रोमाणीत्यादि** । अश्वो रोमाणीवाप्रतीकालम्बनः पापमित्यर्थः । **विधूय राहुमुखाच्चन्द्र** इव पापमुखादप्रतीकालम्बनः । **प्रमुच्य शरीरं धूत्वा अश्व इ**वेत्येव । **कृतात्मा** कृतः पापशरीराभ्यां रहितः कृत आत्मस्वरूपं येन । स **अकृतं** कृतभिन्नं नित्यं ब्रह्मलोकं **अभिसंभवानि** अभितः सम्यगसानि । इति प्रत्यभिसन्धिरित्यर्थः । एवं नित्यत्वमङ्गीकृत्येत्यर्थः । **अस्मिन्निति** । अप्रतीकालम्बनरूपे । **पूर्ववदेवेति** । अस्मद्भाष्यवत् । तथा च रामानुजाचार्यभाष्यम् । 'ये तु ब्रह्मकार्यान्तरभूतं नामादिकं वस्तु देवदत्तादिषु सिंहादिदृष्टिवद् ब्रह्मदृष्ट्या केवलं वा तत्तद्वस्तूपासते, न तान्नयति । अतः परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनान्नयती'ति । तत्तद्वस्तु विशिष्टाद्वैतसिद्धम् । **अनुपादेयमिति** । ब्रह्मात्मकत्वाज्जगतः । **तन्मतेति** भगवाञ्छैवः । **तद्वदेवेति** । रामानुजाचार्यवत् । **विष्ण्विति** । आचार्यत्वेपि तामसत्वात्तथा । **ऋतं सत्यमिति** । शिवलिङ्गमन्त्राग्रेवाच्यम् । **रासलीलेति** । परब्रह्मत्वं 'सोश्नुते सर्वान् कामा'निति श्रुत्युक्ते इति भावः । किं च । परं ब्रह्म कृष्णः, तस्य महिमा रुद्र इति पदशक्तिरपि न शिवे । तृतीयान्तानां पदानां तदभिमतेत्यादिनान्वयः । **प्रथमान्तेति** । तथा च पुंनपुंसकत्व-

भाष्यप्रकाशः ।

नारायणपदप्रायपाठसंदृष्टत्वेन, 'परात्परतर' इति मन्त्रस्य च सूक्तारम्भे 'येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृते सर्वम्, येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्त्वि'ति मनसस्तथात्वं प्रक्रम्य पठिततया तन्माहात्म्यबोधकत्वेन मनसश्चानन्दवल्ल्यां ब्रह्मानन्दात्मकत्वेन सिद्धतया तत्र शिवमाहात्म्यबोधकताया अशक्यवचनत्वेन, 'विश्वाधिक' इति श्वेताश्वतरतृतीयाध्यायमन्त्रस्य च केवलब्रह्मस्वरूपमुपक्रम्य पठितत्वेन त्रिलोचनादिवैशिष्ट्यस्यानुक्तत्वेन तदभिमतरूपाबोधकत्वेन तदुक्तानां सर्वेषामेव मन्त्राणां तदुक्तार्थानुपष्टम्भकत्वात् । इदं यथा तथा प्रहस्तेस्माभिर्निपुणतरमुपपादितमिति नात्र प्रपञ्चयते ।

माध्वास्तु,

'प्रतीकं देह उद्दिष्टो येषां तत्रैव दर्शनम् । न तु व्याप्ततया क्वापि प्रतीकालम्बनास्तु ते ॥
अप्रतीका देवतास्तु ऋषीणां शतमेव च । राज्ञां च शतमुद्दिष्टं गन्धर्वादिशतं तथा ॥
एतेऽधिकारिणो व्याप्तिदर्शनेऽन्ये न तु क्वचित् । अयोग्यदर्शने यत्नाद्भ्रंशः पूर्वस्य चापि तु ॥
अप्रतीकाश्रया ये हि ते यान्ति परमेव तु । स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद् ब्रह्मसलोकताम् ॥

ब्रह्मणा सह सम्प्राप्ते संहारे परमं पदम्' इति गारुडवाक्यान्युपन्यस्य कांश्चित् कार्यं कांश्चित् परं नयति । उभयपक्षोक्तदोषात् । परप्राप्तिपक्षे गत्यनुपपत्त्यादिदोषस्योक्तत्वात् । कार्यप्राप्तिपक्षे च ब्रह्मशब्दामुख्यत्वादिदोषाणामुक्तत्वादित्येवमाहुः ।

तत्र गत्यनुपपत्त्यादिदोषाणामदृष्टादिना भाष्ये एव परिहृतत्वादुदासीना वयम् ।

रश्मिः ।

रूपविरुद्धधर्माधारत्वं परब्रह्मलिङ्गमिति । न शिवपरत्वमिति भावः । सूचीकटाहन्यायेनाहुः **परात्पर इति** । अन्यथा 'नारायणं परं ब्रह्मे'ति मन्त्रात् पूर्वमेव विचारितः स्यात् । **येनेदमिति** । मनसा वेदशरीरेण जीवपरिगृहीतेन । 'स एष जीव' इति वाक्यात् । आनन्दसृष्टिः । **येनेति** । वेदशरीरेण । **यज्ञस्तायते इति** । 'विज्ञानं यज्ञं तनुत' इति श्रुतिः । **सप्तहोतेति** । सप्तभिश्छन्दोभिरग्निजिह्वाभिर्वा जुहोतीति होता नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोत्रिति साधुः । **शिवेति** । शिवः सङ्कल्पो मनोवृत्तिर्यस्य मनसः । **तथात्वमिति** । भूतादिकर्तृत्वम् । **तन्माहात्म्येति** । मनोमाहात्म्यं देवत्वं तस्य बोधकत्वेन । **ब्रह्मानन्देति** । 'यतो वाचो निवर्तन्त' इत्यादिना 'न बिभेति कदाचने'त्यन्तया श्रुत्या । **प्रहस्त** इति तस्य तृतीयवादे । **तत्रैवेति** । देह एव । **एत इति** । ऋषिराजगन्धर्वाः । ननु देहे परमात्मदर्शिनामपि यत्नेन व्याप्ततया दर्शने अप्रतीकालम्बनत्वे सूत्रोक्तोभयथापदविरोध इति चेत्, तत्राहुः **अयोग्येति** । व्याप्ततया दर्शने । **पूर्वस्येति** । देहे दर्शनवतः । **ब्रह्मसलोकतामिति** । हिरण्यगर्भसमानलोकताम् । **कार्यमिति** । कार्यब्रह्म । **उभयपक्षेति** । उभययोः पक्षयोः उक्तयोरदोषात् । **गत्यनुपपत्त्यादीति** । आदिना गतेर्गौणत्वम् । **ब्रह्मशब्देति** । 'स एनान् ब्रह्म गमयती'त्यत्र कार्यं ब्रह्म ब्रह्मशब्दार्थ इति ब्रह्मशब्दस्यामुख्यत्वं गौणत्वम्, आदिना गत्यमुख्यत्वमित्युक्ता दोषाः तेषामभावात् । एवं स्वमते उभयथा अदोषादिति पदच्छेदे सिद्धान्तभाष्यविरोधः स्यात्, तदर्थं उभयथा दोषादित्यस्यैवं व्याख्यातस्य प्रयोजनाभावमाहुः **तत्र गत्यनुपेति** । **अदृष्टादिनेति** । आदिना इच्छा । **भाष्ये**

भाष्यप्रकाशः ।

विशेषदर्शनसूत्रे च, 'यावन्नाम्नो गतं तत्रास्य कामचारो भवती'त्यादिश्रुतिर्नामादिप्राणपर्यन्तेषु प्रतीकोपासनेषु फलविशेषं च दर्शयतीति प्रतीकालम्बनान् वर्जयित्वा नयतीति सिद्धमिति शङ्करभास्कररामानुजाचार्या आहुः । तत्तु मनोनामाद्युपासनानां प्रतीकतानिराकरणेन फलविशेषभवनस्य च भगवदिच्छया भगवद्विभूतित्वात् साधनेनैव निरस्तम् ।

यत्तु शैवो विष्णुलोकापेक्षया शिवलोके विशेषं दर्शयतीत्याह । तदपि प्रहस्ते निपुणतया दूषितमिति ततोवधेयम् ।

माध्वास्तु, 'अन्तःप्रकाशाः बहिःप्रकाशाः सर्वप्रकाशाः देवा वा सर्वप्रकाशा ऋषयोऽन्तःप्रकाशा मानुषा एव बहिःप्रकाशा' इति काचिच्चतुर्वेदशिखाश्रुतिर्विशेषं दर्शयतीत्याहुः । तत्रापि श्रुतेरप्रसिद्धत्वादुदासीना वयम् ॥ १७ ॥ इति पञ्चमं विशेषाधिकरणम् ॥ ५ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे चतुर्थाध्यायस्य तृतीयः पादः ॥ ४ ॥ ३ ॥

रश्मिः ।

अणुभाष्ये पूर्वाधिकरणे भाष्यप्रकाशे चाधिकरणसमाप्तौ । साधनेनेति । अप्रतीकालम्बनसूत्रे साधनेन । विशेषमिति । अन्तःप्रकाशादिषु देवाद्यधिकारिविशेषम् ॥ १७ ॥ इति पञ्चमं विशेषाधिकरणम् ॥ ५ ॥

इति श्रीविठ्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण
सम्पूर्णवेत्रा विठ्ठलरायजिद्भ्रात्रीयगोकुलोत्सवात्मजगोपेश्वरजिता
कृते भाष्यप्रकाशस्य रश्मौ चतुर्थाध्यायस्य
तृतीयः पादः सम्पूर्णतामगमत् ॥ ३ ॥

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ चतुर्थोऽध्यायः ।

चतुर्थः पादः ।

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥ (४-४-१)

'ब्रह्मविदाप्नोति पर'मित्युपक्रम्य 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति तैत्तिरीयके पठ्यते । तत्रेदं सन्दिह्यते किमन्तःस्थित एवाश्नुते, उत पुनर्जन्म प्राप्येति । तत्रान्त्यस्त्वनुपपन्नः । 'न स पुनरावर्तते' 'तेषामिह न पुनरावृत्तिरस्ती'त्यादिश्रुतिविरोधात् कर्माभावाच्चेति प्राप्ते,

---

भाष्यप्रकाशः ।

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥ द्वितीये पादे सद्योमुक्तिक्रममुक्त्योः प्रकारो दर्शितः, तदनु तृतीये क्रममुक्तौ प्राप्यस्वरूपं प्राप्तिप्रकारं च दर्शयित्वा समाप्तौ ज्ञानमार्गीयभक्तिमार्गीययोः सद्योमुक्तावप्यक्षरप्राप्तिपुरुषोत्तमप्राप्तिरूपः फले विशेषोस्तीति दर्शितम् । इदानीं तत्पुरुषोत्तमप्राप्तिरूपं फलं कथमनुभवतीत्यतस्तत्प्रकारः, कीदृशं च पुरुषोत्तमस्य स्वरूपमित्यतस्तत्प्रकारश्चेत्येतदस्मिन् पादे विचार्यत इत्याशयेन सूत्रमुपन्यस्य विचारमारभन्ते ब्रह्मविदित्यादि । तत्रेदं सन्दिह्यत इति । यद्यन्तःस्थितोश्नुते, तदा 'स' इति भोगस्वातन्त्र्यबोधकप्रथमाविभक्त्यनुपपत्तिः । ब्रह्मणि लये भेदाभावात् । यदि बहिर्भूत्वा तदा आवृत्त्यापत्त्या परप्राप्तेर्मुक्तित्वभङ्ग इत्युभयथापि दोषात् 'अश्नुत' इति विवरणं सन्दिह्यत इत्यर्थः ।

पूर्वपक्षमाहुः तत्रेत्यादि । तथा च ब्रह्मलोकसम्पत्तौ यत्र पुनरावृत्त्यभावः, तत्र साक्षाद्ब्रह्मप्राप्तानां कुतस्तत्सम्भावनेत्यपुनरावृत्तिश्रुतिविरोधापेक्षया विभक्त्यर्थमात्रबाधस्य स्वल्पदोषत्वा-

रश्मिः ।

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥ कथमनुभवतीति । सफलस्याग्रिमावस्थायां पादार्थरूपायां फलतावच्छेदकं पुरुषोत्तमत्वं कथं केन प्रकारेणानन्दाविष्टपुरुषोत्तमत्वप्रकारेणोतस्वरूपस्यैव फलत्वात्पुरुषोत्तमत्वेन फलं पुरुषोत्तममुत 'न तदश्नोति कश्चन, न तदश्नोति कश्चने'ति श्रुत्या तद्भोगनिषेधात्सुधासंवलितत्वेन रूपेण तमनुभवतीत्यर्थः । भेदाभावादिति । फलप्रकरणेऽपि तादात्म्याद्युक्त्या 'ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता' इति प्रकारः सूचितः । तथेति । प्रतिवदतीत्यर्थः ।

प्रतिवदति। सम्पद्य ब्रह्म सम्पद्यापि स्थितस्य जीवस्य प्रभोरत्यनुग्रहवशात् स्वरूपात्मकभजनानन्ददित्सायां तत्कृत आविर्भावो भवत्येव। आविर्भावस्य भगवदधीनत्वज्ञापनायास्य तत्र कर्तृत्वं नोक्तम्। ननूक्तं 'न स पुनरावर्तत' इत्यादिश्रुतिविरोधः कर्माभावश्च बाधक इत्यत आह स्वेनेति। स्वशब्दोऽत्र भगवद्वाची। तथा च भगवत्स्वरूपबलेनैवाविर्भावइत्यर्थः।एवं सत्युक्तश्रुतिर्मर्यादामार्गविषयिणीतिनविरोध इति भावः। तेषामिह प्रपञ्चे न पुनरावृत्तिरस्तीति हि श्रुतिराह। लीलायाःप्रपञ्चा-

---

भाष्यप्रकाशः।

दन्तरित्येव युक्तमिति प्राप्ते तथेत्यर्थः। सिद्धान्तं व्याकुर्वन्ति सम्पद्येत्यादि। ब्रह्म सम्पद्येति। द्वितीयपादोक्तरीत्या वागादीनां प्राणानां ब्रह्मणि लयोत्तरं, 'ब्रह्मवेद ब्रह्मैव भवति', 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुत्या ब्रह्मणा सहैकीभावं प्राप्य। आविर्भाव इति। स्वस्य ब्रह्मभिन्नतयानुभवविषयत्वयोग्यता। अस्य तत्र कर्तृत्वं नोक्तमिति। जीवस्याविर्भावे कर्तृत्वं नोक्तम्। स्वेनेति पदमवतार्य व्याकुर्वन्ति नन्वित्यादि। भगवत्स्वरूपबलेनैवाविर्भाव इति। छान्दोग्ये भूमविद्यायां 'तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण' इत्याद्युपक्रम्य, 'आत्मत आविर्भावतिरोभावावात्मतोऽन्न'मित्यादिश्रावणात्तस्य ब्रह्मसम्पन्नस्यापि ब्रह्मस्वरूपबलेनैवाविर्भावः। एवं हेत्वन्तरकथनेन कर्माभावात्मकमाविर्भावबाधकं परिहृतम्। एतेनैवापुनरावृत्तिश्रुतिविरोधोपि परिहृत इत्याहुः एवं सतीत्यादि। न विरोध इति। विषयभेदान्न विरोधः। ननु तर्हि पुष्टिमार्गस्य मर्यादामार्गापेक्षया जघन्यत्वापत्तिरित्यत आहुः तेषामिहेत्यादि। यद्यपि 'न स पुनरावर्तत' इति श्रुताविह नेति विशेषो न श्रूयते, तथापि पञ्चाग्निविद्यायामक्षिपुरुषविद्यायां च 'तेषामिह न पुनरावृत्तिरस्ती'ति, 'इमं मानवमावर्तं नावर्तन्त' इति च यथायथं श्रावणादस्मिन् लौकिके प्रपञ्चे पुनरावृत्त्यभावमाह, न तु नित्यायां भगवल्लीलायामपीति श्रुतिविरोधाभावाच्च पुष्टिमार्गे कथमनावृत्तिसिद्धिरित्यतो हेतुं वदती-

रश्मिः।

ब्रह्मवेदेति। आरणे सह वै पन्नायामस्ति। ब्रह्मैवेति। शारीरकब्राह्मणेस्ति। ब्रह्मवेद् अक्षरब्रह्मवित्। ब्रह्म परं ब्रह्म भक्त्या भवति तदैक्यं प्राप्नोति। मतान्तरे आवरणभङ्गद्वारा ब्रह्माक्षरमेव भवति। आत्मकामः आत्मभक्तिमान् ब्रह्मैव सन् साधनैर्जीवन्मुक्तः सन् 'नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववि'दित्युक्त्वा 'इन्द्रियाणीन्द्रियार्थेषु वर्तन्त' इति भाष्योक्तगीतायाः 'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थिति'रित्येकादशे मुक्तिलक्षणम्, तल्लक्षितः। मतान्तरे वेदान्तविज्ञानेन। अकामो निष्कामः आप्तकाम आत्मकाम इत्युक्तरूप ब्रह्मैव सन् ब्रह्माप्येति प्राप्नोति। देहाद्यावरणविच्छेदापेक्षयाप्येतीवेत्युपचर्यते। नित्यप्राप्तत्वादेवेत्यर्थः। ब्रह्मणेति। परब्रह्मणा। भाष्ये प्रभोरत्यनुग्रहेति। अनुग्रहेण भक्त्या पुरुषोत्तमप्राप्तिर्जातैव, पुनरनुग्रहो व्यर्थ इत्यतिशब्दः। 'भजतां भगवान्मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोग'मित्यदेयभक्तिकारणमुक्तम्। स्वरूपेत्यादिनाऽदेयभक्तिरूपमानन्दफलसहितमुक्तम्। इच्छाधीनत्वज्ञापनाय दित्साशब्दः। ब्रह्मभिन्नतयेति। भेदेपि तादात्म्यरूपाभेदोस्त्येवेति न स्वगतं द्वैतम्। लक्षणन्तु विद्वन्मण्डने प्रपञ्चितमेव। हेत्वन्तरेति। हेतुः शब्दादिति। तदन्यो हेतुः स्वेनेति। हेतौ तृतीयेति। तस्य कथनेन। परिहृतमिति। वेदे कर्मणो जगज्जन्मादिकर्तृत्वं गुरुत्वमीश्वरत्वं चेति, 'आत्मतः प्राण' इत्यत्रात्मपदवाच्यत्वात्तस्य चोक्तत्वात्परिहृतम्। एतेनैवेति। स्वेन पदेनैव। एवं सतीत्यादीति। उक्तेति। 'न स पुनरावर्तत' इति श्रुतिः। विषयभेदादिति। पुष्टिमर्यादाविषयभेदात्। तर्हीति। पुष्टिमार्गस्यावृत्तिविशिष्टत्वकाले। मर्यादेति। अनावृत्ति-

तीतत्वात् तत्राविर्भावस्यनिषेधाविषयत्वादपि न विरोधः।अत्र प्रमाणाकाङ्क्षायामाह शब्दादिति । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति श्रुतिः पुरुषोत्तमेन सह सर्वकामभोगं वदति । स च न विग्रहं विना सम्भवतीति श्रुतिबलादेव तथा मन्तव्यमित्यर्थः ॥ १ ॥

हेत्वन्तरमाह ।

मुक्तः प्रतिज्ञानात् ॥ २ ॥

अत्रोपक्रमे 'ब्रह्मविदाप्नोति पर'मिति वाक्येन परप्राप्तिलक्षणां मुक्तिं प्रतिज्ञाय हि तद्विवृतिरेव 'सोऽश्नुत' इत्यादिना क्रियते । तेन पुष्टिमार्गीयमुक्तिरूपत्वमेव तस्याशनस्य सिध्यति, अतोऽपि हेतोस्तदाविर्भावस्य न लौकिकत्वम्, न चावृत्तिरूपत्वमित्यर्थः ॥ २ ॥

भाष्यप्रकाशः ।

त्याशयेन अवतारयन्ति अत्रेत्यादि । व्याकुर्वन्ति सोऽश्नुत इत्यादि । तथा च पुरुषोत्तमे अक्षरापेक्षया परत्वस्य मुण्डके श्रावितत्वादक्षरे भगवद्धामत्वस्यापि तत्र श्रावणात् तैत्तिरीये प्रजारूपत्वस्यापि श्रावणात्तस्य लीलास्थानतायामत्रोक्तौ भोगोऽक्षरे सिध्यति । भोगश्च विग्रहमन्तरेणानुपपद्यमानो विग्रहमाक्षिपतीति भोगबोधकवाक्यरूपः शब्द एवात्र तदाविर्भावे प्रमाणमित्यर्थः ॥ १ ॥

मुक्तः प्रतिज्ञानात् ॥ २ ॥ सूत्रमवतारयन्ति हेत्वन्तरमाहेति । ननु ब्रह्मसम्पत्तिरेव मुक्तिरिति सम्पन्नो मुक्तः, आविर्भावस्तु विभागे सति व्युच्चारणाद् भवति । तथा सति सृष्ट्यादाविव बन्ध एव सम्भावित इति कथमाविर्भावस्य मुक्तिकोटौ प्रवेश इत्याकाङ्क्षायां अत्र भगवतः सकाशाद्विभज्य यो जीवस्याविर्भावस्तस्यालौकिकत्वेऽनावृत्तिरूपत्वे चैतत्प्रकरणोक्तं हेत्वन्तरमाहेत्यर्थः । व्याकुर्वन्ति अत्रेत्यादि । परप्राप्तिलक्षणामिति । ब्रह्मविदः परप्राप्तिलक्षणाम् । तथा च प्रतिज्ञानादुक्तवाक्ये मुक्तेः प्रतिज्ञानाद् यस्याविर्भावः प्रतिपिपादयिषितः, स मुक्त इति सूत्रयोजना । तथा सति तस्याविर्भावस्य न लौकिकत्वम्, न चावृत्तिरूपत्वमित्यर्थः ॥ २ ॥

रश्मिः ।

साधकमर्यादामार्गापेक्षया । अत्रेति । इह लोके एवानावृत्तिसिद्धिरित्यर्थः । मुण्डक इति । 'स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम् उपासते यत्र पुरुषं ये ह्यकामास्ते शुक्रमतिवर्तन्ति धीराः ॥' इत्यत्र यत्रेत्यस्य परमे ब्रह्मणि धाम्नीत्यर्थात् । 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर' इत्यत्र वा । परपदघटितत्वात् । पूर्वाधामत्वश्रावणे । तैत्तिरीय इति । महानारायणोपनिषदि । 'अजायमानो बहुधा विजायत' इति श्रुतेः । पूर्वैकवाक्यतया प्रजारूपः पुरुषः ॥ १ ॥

मुक्तः प्रतिज्ञानात् ॥ २ ॥ हेत्वन्तरमिति । शब्दाद्धेतोरन्यत् । आप्नोति परमिति प्रतिज्ञारूपं हेतुम् ॥ २ ॥

ब्राह्मेण ब्रह्मसम्बन्धिना ब्रह्मणा भगवतैव स्वभोगानुरूपतया सम्पादितेन सत्यज्ञानानन्दात्मकेन शरीरेण पूर्वोक्तानश्नुत इति जैमिनिराचार्यो मनुते । तत्र हेतुः, उपन्यासादिभ्य इति । 'ब्रह्मविदाप्नोति पर'मिति ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय तदर्थस्यैवोपन्यासोऽग्रिमयर्चा क्रियते, 'सोऽश्नुत' इत्यादिना । तथा च परप्राप्तेर्मुक्तिरूपत्वात् पुष्टिमार्गीयायास्तस्या एवंरूपत्वादक्षरब्रह्मणः पुरुषोत्तमायतनरूपत्वात्तदात्मकमेव शरीरं तस्य वक्तुमुचितम्, न तु प्राकृतम् । एतद्बोधनायैवाग्रेऽन्नमयादीनि विभूतिरूपाण्युक्तानि । भक्तशरीरे प्रतीयमानानामर्थानां

भाष्यप्रकाशः ।

वक्ष्यमाणविचार आरभ्यते इत्यर्थः । पूर्वपक्षार्थः स्फुटः । सिद्धान्तं व्याकुर्वन्ति ब्राह्मेणेत्यादि । ब्रह्मसम्बन्धिनेत्यस्य विवरणं ब्रह्मणेत्यादि शरीरेणेत्यन्तम् । उपन्यासादिभ्य इति । उप समीपे न्यासः कथनं विवरणमिति यावत् स आदिर्येषाम्, तद्गुणसंविज्ञानः, ते उपन्यासादयस्तेभ्यः । तदेतद्विवृण्वन्ति ब्रह्मविदित्यादि । एवंरूपत्वादिति । सर्वकामाशनरूपत्वात् । ननु ब्रह्मभावं विना मुक्त्यभावाज्जाते च तस्मिन् व्यापकत्वादिवदानन्दाविर्भाववच्च पूर्वसिद्धाकारस्याप्याविर्भाव उपन्यासश्रुतेरप्युपपत्तौ भोगार्थं ब्राह्मशरीरस्याङ्गीकारो न प्रामाणिक इत्यत आहुः एतदित्यादि । शरीरस्याक्षरात्मकत्वबोधनायैव ऋगुक्तोपन्यासानन्तरमन्नमयादीनि विभूतिरूपाणि पुरुषविधत्वेन ब्रह्मत्वेनोपास्यत्वेन चोक्तानि । तस्य फलं भक्तशरीरे प्रतीयमानानामर्थानां पृथिव्यादीनां गन्धादीनां च विभूतिरूपत्वेन ब्रह्मात्मकत्वं तेन कथनेन

रश्मिः ।

सम्पादयतीति ब्राह्मं शरीरम् । अन्येभ्योपीति डः । यावदिति । नितरां क्षेपः विवरणस्यैवेतिभावः । तद्गुणेति । उपन्यासादिभ्य आक्षिप्तेन ब्राह्मेण शरीरेण पुरुषोत्तमेनैव सर्वान्कामानश्नुत इति सूत्रार्थादाक्षेपे विशेष्यान्वयिन्युपन्यासस्याप्यन्वयाद्धेतुत्वेन विशेष्यान्वय्यन्वयित्वरूपतद्गुणसंविज्ञानलक्षणादिना तद्गुणसंविज्ञानो बहुव्रीहिः । त इति । विवरणार्चि परप्राप्तिलक्षणार्थस्योपन्यासः । आदिपदोक्तं ब्रह्मणो निर्गुणत्वं विवर्यविवरकर्ग्विभागश्च उपन्यासप्रतिपादक 'मुक्त' इति सूत्रादग्रिमसूत्रद्वयाच्चोक्तास्ते उपन्यासब्रह्मनिर्गुणत्वविवर्यविवरकर्ग्विभागा इत्यर्थः । यद्वात्रायमुपलक्षितोर्थः ते उपन्यासाऽन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया इत्यर्थः । ब्रह्मविदितीति । ब्रह्मविदित्यादीति वक्तव्ये तत्पर्यायोपन्यासोऽयम् । तेन शरीरप्राप्तेरित्यादिभाष्यस्य आक्षेपलभ्यत्वेपि शरीरप्राप्तेः मुक्तौ रूपं यस्या इत्येवं मुक्तिरूपत्वं तस्मादित्यर्थः । पूर्वसिद्धेति । 'अविप्रणाशः सर्वेषां कर्मणामिति निश्चयः । कर्मजानि शरीराणि तथैवाकृतयो नृपे'ति वाक्यात् सूक्ष्मस्य । उपन्यासश्रुतेर्ब्रह्मविदाप्नोतीति श्रुतेः । ब्राह्मशरीरस्येति । सच्चिदानन्दात्मकस्य । उक्तानीति । ब्रह्मवित्पाठके । भक्तशरीरइत्यादिभाष्यं विवृण्वन्ति स्म तस्य फलमिति । ब्रह्मात्मकत्वमिति । जगतो ब्रह्मात्मकत्वेपि पुनर्ब्रह्मात्मकत्वविधानमलौकिकेपि देहे 'आश्चर्यो वक्ते'ति काठकात्पृथिव्यादीनां तन्मात्राणां गन्धादीनां कथनम् । आश्चर्य आश्चर्यवान् आश्चर्यशब्दादर्शआद्यच् । 'आश्चर्यवत्पश्यति

विभूतिरूपत्वेन ब्रह्मात्मकत्वं तेन साधितं भवति। इदमेवादिपदेन बहुवचनेन च ज्ञाप्यते एतदानन्दमयाधिकरणे प्रपञ्चितम्, अतो नात्र पुनरुच्यते। यत्र कर्मवादी जैमिनिरेवं मनुते, तत्रान्येषामेवमङ्गीकारे किमाश्चर्यमिति ज्ञापनाय तन्मतोपन्यासः कृतः ॥ ५ ॥

भाष्यप्रकाशः।

साधितं भवति। इदं श्रौतमुपपादनमेव आदिपदबहुवचनाभ्यां ज्ञाप्यत इत्यर्थः। प्रपञ्चितमिति। 'तन्निरूपकस्यापि तत्तुल्यफलत्व'मित्यनेन वर्णकान्तरेण च प्रपञ्चितम्। तथा चाग्रेऽन्नमयादिनिरूपणबलादेवमुच्यते, अतः सृष्ट्यादौ यो भगवदाकारस्तिरोहितः, तस्यैवैवमाविर्भावेपि दित्सितफलानुभवयोग्यरूपेणाविर्भावादुक्तप्रकारकस्थूलरूपस्यैवाविर्भावान्नाप्रामाणिक इति भावः। इदमेव 'स्वरूपेणावतारेणे'ति सार्धेन पुष्टिप्रवाहमर्यादाग्रन्थ उक्तम्। एवञ्च जीवस्य व्यापकत्वादिषु भगवद्धर्मेष्वानन्दे चाविर्भूते सच्चिदानन्दात्मके देहेऽक्षरात्मके सम्पन्ने यो लीलारसानुभवः, स निरुपम इति, स एव सेवाफले, 'महान् भोगः प्रथमे विशते सदे'त्यनेनोक्त इति ज्ञेयम्। ननु मान्त्रवर्णिकसूत्रेऽन्नमयप्राणमययोर्बाह्याभ्यन्तरलौकिकव्यवहारकारणत्वेन लोकत्वं मनोमयस्य च वेदत्वं तद्भाष्ये प्रत्यपादीति विभूतित्वादिकथनं तद्विरुद्धमिति चेत्। न। श्रुतौ परस्मादानन्दरूपात् सृष्टिः प्रक्रान्तेति सा सृष्टिरतिरोहितानन्दा भवति। कारणस्य समन्वयात्। कार्यत्वाच्चेषत्तिरोभावोपि। अन्यथा व्यवहारभङ्गेन लीलाया असिद्धेः। एवं सति तादृश्यां सृष्टौ तत्तद्व्यवहारकारणीभूतस्य विभूतिरूपस्यैवौचित्येन तल्लौकिकवैदिकव्यवहारे कारणपदेन तस्यैव सूचनाविरोधात्। मतकथनप्रयोजनमाहुर्यत्रेत्यादि ॥ ५ ॥

रश्मिः।

कश्चिदेनमाश्चर्यवद्वदति तथैव चान्य' इति गीता। इदमेवेति भाष्यविवरणम्। इदं श्रौतमिति। आदिपदेति। सौत्राभ्याम्। एवमुच्यत इति। भाष्यशरीरं स्थूलमुच्यते। भगवदाकारेति। मुक्तस्य भगवता दत्त आकारः तिरोहितः। उक्तप्रकारकेति। भक्तशरीर इत्यादिभाष्योक्तप्रकारकस्थूलरूपस्य। आश्चर्यमुक्तमेव। पुष्टिप्रवाहेति। ननु पुष्टिप्रवाहमर्यादाग्रन्थस्य बादरायणमतानुसारित्वाज्जैमिनिमतानुसन्धानं कुत इति चेन्न। वेदाविरुद्धमतत्वात्। 'जैमिनीये च वैयासे न विरोधोस्ति कश्चने'ति वाक्यात्। वेदविरोधो नास्तीत्यर्थः। सच्चिदिति। आनन्दोत्र गणितानन्दः अक्षरात्मक इति विशेषणात्। सेवाफल इति। आशङ्कासमाधाने पुष्टिप्रवाहमर्यादाग्रन्थवत्। प्रक्रान्तेति। 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इति। कारणस्येति। अतिरोहितानन्दस्य सच्चिद्भ्यामतिरोहितानन्दस्य। आनन्दमीमांसानुकारकलीलानुरोधात्फलेप्याहुः कार्यत्वादिति। ईषत्तिरोभावेऽपि समन्वयादिति पूर्वेण सम्बन्धः। व्यवहारेति। कार्यकारणव्यवहारभङ्गेनेत्यर्थः। तादृश्यामिति। नित्यलीलास्थायां शब्दसृष्टौ। लौकिकेति। मान्त्रवर्णिकसूत्रोक्तलौकिकवैदिकव्यवहारे। कारणेति। भाष्येणेत्यत्र हेतौ तृतीयया भाष्येणेतिपदेन। यद्वा मान्त्रवर्णिकसूत्रीयकारणपदेन। तस्यैवेति। विभूतिरूपस्यैव कार्यत्वेन सूचनेनाविरोधस्तस्मात्। यत्रेत्यादि। अन्येषामिति। बादरिकाशकृत्स्नादीनाम् ॥ ५ ॥

चिति तन्मात्रेण तदात्मत्वादित्यौडुलोमिः ॥ ६ ॥

'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनं' इति श्रुतौ घनपदेन ज्ञानात्मकविग्रहात्मत्वं ब्रह्मणो बोध्यते, अन्यथा न वदेत्, प्रयोजनाभावात् । तथा च तादृशेन सह भोगकर्त्रा तादृशेनैव भाव्यमिति, चिति चिद्रूपे ब्रह्मणि, तन्मात्रेण चिन्मात्रेण रूपेण कामान् भुङ्क्ते, न तु विग्रहेण । श्रुतौ जीवस्य तथात्वस्यानुक्तेः । पूर्णानन्दत्वाद्भगवतस्तत्सम्बन्धेन तदानन्दाननुभवतीत्यर्थः सम्पद्यते । चिदात्मत्वं जीवस्य यतो नैसर्गिकमित्यौडुलोमिराचार्यो मनुते 'अशरीरं वा वे'तिश्रुतिरेतादृशान्यविषयिणीति ज्ञेयम् । मुक्तिदशायां तदनुभवस्य भगवदिच्छाविषयत्वाभावान्न तथा । तथा चैतदेतज्जातीयकानन्दानुभवोऽस्य भवत्विति भगवदिच्छैव श्रुतौ कामशब्देनोच्यते ॥ ६ ॥

भाष्यप्रकाशः ।

चिति तन्मात्रेण तदात्मत्वादित्यौडुलोमिः ॥ ६ ॥ व्याकुर्वन्ति स इत्यादि । न वदेदिति । घनपदं न वदेत् । तथात्वस्येति । विग्रहवत्त्वस्य ।

अन्ये तु चितितन्मात्रेणेत्येकं पदमङ्गीकुर्वन्तश्चिन्मात्रेणाविर्भवतीत्यर्थमाहुः । तन्मते इक्प्रत्ययान्तस्य चितिपदस्य धातौ शक्तेस्तदर्थे लाक्षणिकत्वं तत्पदव्यर्थता च ।

भास्कराचार्यास्तु चैतन्यसन्मात्रेणेत्यर्थमाहुः । तन्मते तत्पदवैयर्थ्यं न भवतीति पूर्वापेक्षया तत्सम्यगिति बोध्यम् ।

नन्वशरीरस्य प्रियाप्रियभोगः श्रुत्या निषिध्यते, न तु सशरीरस्य, 'न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती'ति श्रुतेस्तस्य का गतिरित्यत आहुः अशरीरमित्यादि । 'अशरीरं वा व सन्तं प्रियाप्रिये न स्पृशत' इति श्रुतिस्तु प्रियपदस्याप्रियपदसमभिव्याहा·रादेतादृशान्यविषयिणी एतादृशाद्भगवदानन्दादन्यो यो दुःखसम्भिन्न आनन्दस्तद्विषयिणीति न तद्विरोध इत्यर्थः । तत्र हेतुमाहुः मुक्तीत्यादि । तदनुभवस्येति । दुःखसम्भिन्नसुखानुभवस्य । तर्हि सुखे वैजात्याभावात् 'कामानि'ति बहुवचनस्य का गतिरित्यत आहुः तथा चेत्यादि । तथा च तादृगिच्छानुभवे तदिच्छाविषयस्यानन्दस्याप्यनुभवश्चिन्मात्रेणैव रूपेण, न तु तत्र विग्रहस्याप्यपेक्षेति औडुलोमेर्मतमित्यर्थः । एतेन 'चैत्यस्य तत्त्वममलं मणिमस्य कण्ठ'इत्यादि स्मारितं ज्ञेयम् ॥६॥

रश्मिः ।

चिति तन्मात्रेण तदात्मत्वादित्यौडुलोमिः ॥ ६ ॥ इक्प्रत्ययान्तस्येति । इक्श्तिपौ धातुनिर्देश इति सूत्रविहितेक्प्रत्ययान्तस्य । तदर्थे इति । धात्वर्थे संज्ञाने । चिती संज्ञाने संज्ञानं धात्वर्थः । दुःखसम्भिन्नेति । दुःखमिश्रः । भाष्ये । तथेति । एतादृशान्यविषयिणी । कामानिति । 'सोश्नुते सर्वान्कामा'निति श्रुतौ । तादृगिति । कर्मपदवाच्येच्छानुभवे । इच्छावानहमित्याकारके । इच्छायाः सविषयत्वनियमादाहुः तदिच्छेति । अनुभव इति आनन्दविषयकेच्छावानहमिति । चिन्मात्रेणेति । एवकारोप्यर्थे । अपिर्गर्हायाम् । सच्चिदानन्दत्वाद्ब्रह्मणः अंशद्वयत्यागाद् गर्हा । व्यासगृहीतत्वाद्गर्हितस्य प्रयोजनमाहुः एतेन चैत्यस्येति । प्रकृते द्वादशस्कन्धीयम् । तथा च भगवत्स्मारकैकदेशे तन्मतमिति भावः ॥ ६ ॥

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

परमाचार्यो बादरायणस्तु नैवं मनुते। 'ब्रह्मविदाप्नोति पर'मित्यस्योपन्यास एवमपि विग्रहवत्त्वेनापि कृतो यतः। तथाहि। 'यो वेद निहितं गुहाया'मित्यत्र गुहाया उक्तत्वात्तस्या विग्रह एव सम्भवात्। किञ्च। प्रथमान्तोपस्थितत्वेन 'प्राप्नोती'त्युक्त्या च ब्रह्मविदः परप्राप्तौ स्वातन्त्र्यं ज्ञाप्यते। तदेव 'ब्रह्मणा सहे'ति

भाष्यप्रकाशः।

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥ सिद्धान्तं व्याकुर्वन्ति परमेत्यादि। एवमिति। औडुलोम्युक्तरीत्या। उपन्यासादिति हेतुं व्याकुर्वन्ति ब्रह्मेत्यादि। तथा च यदि तन्मात्रेणैव भोगः श्रुत्यभिप्रेतः स्यात्, तदा विग्रहवत्त्वेनोपन्यासो न क्रियेत। यत एवमतो न चिन्मात्रमतं साधीय इत्यर्थः। नन्वत्र विग्रहाश्रवणात् कथं तथोपन्यासोऽङ्गीक्रियत इत्यतस्तदुपपादयन्ति तथाहीत्यादि। तस्या इति। गुहायाः। तथा चात्र ब्रह्मवित्पदेनापरोक्षब्रह्मज्ञानवानुच्यते, तस्याशरीरत्वे तद्व्याख्यानभूतर्क्पूर्वार्धे गुहापदं न वदेत्। न च तत्र साधनदशापन्नस्यैव विग्रह उच्यत इति वाच्यम्। 'यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्यैव भवती'तिवदवस्थाभेदगमकपदाद्यभावात्। 'वेदे'ति 'अश्नुत' इति च समानकालबोधकपदविरोधापातात् कामभोगस्य विग्रहतन्त्रत्वात्तदभावे, 'सोऽश्नुत' इत्यादिनोक्तस्य फलस्य विरोधापत्तेश्च। अतो गुहापदव्याकोपात्तदुक्तो भक्तविग्रहाभावपक्षोऽसङ्गत इत्यर्थः। उत्तरार्धमादाय युक्त्यन्तरमाहुः किञ्च प्रथमेत्यादि। तथा चौडुलोमिमते कामपदव्याकोपाऽ-

रश्मिः।

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥ ब्रह्मेत्यादीति। यत इति। यत्तदोर्नित्यसम्बन्धात्तस्मादुपन्यासादित्यर्थः। विग्रहवत्त्वस्याक्षेपलभ्यस्यास्पष्टत्वात्स्पष्टयन्ति स्म **तथाहीत्यादि**। अतो विग्रहवत्त्वमाक्षिप्यत इति भावः। **तथा चात्रेति**। अत्र श्रुतौ। ब्रह्मवित्पद इति सप्तम्यन्तम्। अपरोक्षब्रह्मज्ञानवान्नोच्यत इति नशब्दान्वयः। **तस्य शरीरत्व इति**। तस्य ब्रह्मविदः। 'तस्यैष आत्मा वृणुते तनुं स्वा'मिति पाठे वृणुतेः प्रकाशार्थत्वाभावात्तस्य वृतभक्तस्य एष आत्मनोऽप्यात्मा तं स्वां स्वीयां तनुं तनुत्वेन वृणुते सम्भजते इत्यर्थाच्छरीरत्वे। **न वदेदिति**। शरीरे नित्यलीलायां निहितत्वादधिकरणान्तरं न वदेत्। तस्याशरीरत्व इति पाठे अतो ब्रह्मवित्पदेऽपरोक्षज्ञानवान्नोच्यत इति भावः। **तत्रेति**। 'ब्रह्मविदाप्नोति पर' मित्यादिश्रुतौ। **एवेति**। फलदशायोगव्यवच्छेदक एवकारः। **अवस्थाभेदेति**। जीवदवस्थामरणावस्थाभेदगमके भवति प्रेत्यपदे दृष्टान्ते तद्दार्ष्टान्तिके साधनदशाफलदशाभेदबोधकपदाद्यभावात्। आदिना वाक्यम्। **समानकालेति**। वर्तमानकालत्वेन समानकालस्तस्य बोधकपदयोर्विरोधस्यापातात्। विरोधापातस्तु साधनदशापन्नस्यैव ब्रह्मविदो ग्रहणे भवति। **तदुक्त इति**। औडुलोम्युक्तः। **उत्तरार्धमिति**। ऋगुत्तरार्धं सोऽश्नुत इत्यादि। **युक्त्यन्तरमिति**। युक्तिर्विग्रहवत्त्वे। यदि विग्रहो न स्याद्गुहोक्तिर्न स्यादिति। अन्या युक्तिः। यदि विग्रहो न स्यात्कामा न स्युरिति। इदं युक्त्यन्तरम्। **किञ्च**। प्रथमेत्यादीति। **प्रथमान्तं** ब्रह्मवित्पदं तेनोपस्थितत्वम्। **ब्रह्मविदो**ऽर्थस्य तेनेत्यर्थः। **स्वातन्त्र्यमिति**। स्वतन्त्रः **कर्तेति सूत्रात्**। **तदेवेति**। स्वातन्त्र्यमेव ब्रह्मणा सह स कर्ता स्वतन्त्रः। पूर्वोक्त इति विवरणर्च्युपन्यस्तम्। **तेनेत्यादि**। नेन सहार्थकतृतीयान्तब्रह्मपदेन स इत्युक्तभक्तवाचकपदान्वशन-

पदेनोपन्यस्तम् । तेन ब्रह्मणोपि तत्समानक्रियावत्त्वं ज्ञाप्यते, परन्त्वप्राधान्येन । तथा च भक्तस्यैव कामा वक्तुमुचिताः, ते च न विग्रहं विना सम्भवन्ति । किञ्च । 'विपश्चिते'ति विशेषणेन विविधं पश्यच्चिद्रूपत्वमुच्यते । कामभोगोक्तिप्रस्ताव एतदुक्त्या तदुपयोग्येव सर्वं वाच्यम् । एवं सति भक्तविविधभावान् पश्यति, स्वयं भोगचतुरश्चेत्युक्तं भवति । एतेनापि भक्तविग्रहः सिध्यति । ननु विग्रहस्यागन्तुकत्वेन लौकिकत्वादलौकिकेन ब्रह्मणा भोगो विरुद्ध इत्यत आह पूर्वभावादिति । भक्तप्राप्तेः पूर्वमेव भगवद्दित्सितभोगानुरूपविग्रहाणां सत्त्वान्न विरोधः । किञ्च । उक्तश्रुतिसूत्रैः पुरुषोत्तमेन सह भक्तस्य कामभोगो निरूपितः । स यावताऽर्थेन विना नोपपद्यते, तावान् स श्रुत्यभिमत इति मन्तव्यम् । तथा च ब्रह्मसम्बन्धयोग्यानि शरीराणि नित्यानि सन्त्येव । यथानुग्रहो यस्मिन् जीवे, स तादृशं तदाविश्य भगवदानन्दमश्नुत इति सर्वमवदातम् ॥ ७ ॥

भाष्यप्रकाशः ।

निवृत्तेस्तदयुक्तमित्यर्थः । विपश्चित्पदेनापि तत् साधयन्ति किञ्चेत्यादि । एतेनेति । भक्तविग्रहाभावेऽनुपपद्यमानेन भोगचातुर्यबोधकविपश्चित्पदेन । हेत्वन्तरमवतारयन्ति नन्वित्यादि । व्याकुर्वन्ति भक्तेत्यादि । भक्तप्राप्तेरिति । भक्तस्य भगवत्प्राप्तेः । न विरोध इति । आगन्तुकत्वलौकिकत्वाभ्यां कृतोपि चिन्मात्रत्वब्राह्मशरीरवत्त्वयोर्विरोधो न । तथा चैतैर्हेतुभिर्विग्रहवत्त्वस्याविरोधं मन्यत इत्यर्थः । सिद्धमाहुः किञ्चेत्यादि । सन्त्येवेति । पुत्तलिकावद्भगवन्मन्दिरे भगवद्धर्मात्मकानि सन्त्येव । आविश्येति । अयं मम देह इत्यभिमानं कृत्वा । तथा च श्रुतार्थापत्तिसिद्धत्वान्नात्र सन्देह इत्यर्थः ।

ननु सूत्र एतद्बोधकपदाभावादेतस्यैतद्विषयवाक्यत्वं कथमवगन्तुं शक्यत इति चेत् ।

रश्मिः ।

क्रियान्वयिना ब्रह्मणोऽपि भक्तसमानाशनक्रियावत्त्वं ज्ञाप्यते । अप्राधान्येनेति । 'सहयुक्तेऽप्रधान' इति पाणिनिसूत्रात् । सिद्धमाहुस्तथा चेति । औडुलोमिमतेऽयुक्ते योग्यं तमाहुः तथा चेति । विग्रहं विना कामपदव्याकोपानिवृत्तेरौडुलोमिमतमयुक्तम् । तत्साधयन्तीति । शरीरं साधयन्ति । किञ्चेत्यादीति । स्वयमिति । तेन 'सूर्यो विपश्चिन्मनसा पुना'त्वित्यत्र सूर्ये विपश्चित्त्वं भगवदीयं बोध्यम् । हेत्वन्तरमिति । हेतुरुपन्यासः हेत्वन्तरं पूर्वभावः । भक्तस्येति । रसान्तःपाती भक्तोऽपि भगवानिति सामर्थ्यसत्त्वान्न समासानुपपत्तिः । विरोधो नेति । आगन्तुकत्वेन चिन्मात्रत्वस्य लौकिकत्वेन ब्राह्मशरीरवत्त्वस्य यः सहानवस्थानलक्षणो विरोधः स न । तथा चैतैरिति । एते जैमिनिप्रभृतयः बादरायणश्च हेतुभिरुपन्यासादियुक्त्युपन्यासपूर्वभावैः । मन्यत इति । बादरायणो मन्यतेऽन्ये मन्यन्त इति वचनविपरिणामेनान्वयः । किञ्चेत्यादीति । स इति । सोऽर्थः । तदिति । शरीरम् । अश्नुते अश्नातीत्यर्थः । सर्वमिति । सगुणत्वेपि निर्गुणत्वम् । लीलायामात्मगुणाः सत्त्वादय इति सर्वं पूर्वोक्तं निर्दोषमित्यर्थः । सिद्धमाहुः तथा चेति । आक्षेप्यविग्रहे सिद्धे सति । ब्रह्मविच्छ्रुतौ श्रुतो यः कामभोगो गुहा चार्थस्तस्यापत्तिरापादनम् । यदि विग्रहा न स्युः कामभोगो गुहा च श्रुतो न स्याद् यतः श्रूयतेतो विग्रहा इति श्रुतार्थापत्तिसिद्धत्वान्नात्राप्राकृतशरीरे सन्देहः । प्राकृतेन शरीरेण मुक्तः उताप्राकृतेनेति सन्देहो नेत्यर्थः । श्रुतार्थापत्तिरुक्ता पूर्वम् । एतद्बोधकेति ।

भाष्यप्रकाशः

अर्थबलादिति वदामः । तथाहि । अस्मिन् चरणे मुक्तस्य फलानुभवप्रकार उच्यते । मुक्तिस्तु न यावद्दुःखात्यन्ताभावमात्ररूपा, अपि तु निरवधिसुखात्मकब्रह्मप्राप्तिरूपा, तल्लोकादिप्राप्तिरूपा च । तैत्तिरीयोपनिषदि 'ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोती'ति श्रुतौ द्वयोः श्रावणात् । पुराणेपि 'सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युते'ति प्रकारभेदकथनाच्च । सा च यथाधिकारं सद्यः, क्रमेण वा भवति । तत्र सद्योमुक्तावात्मकाम एवाधिकारी । 'अथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतेः । तादृशस्य ब्रह्मानुभवप्रकारश्चाग्रे । 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत' इति श्लोक उक्तः । स्वप्रतिज्ञानुरोधाद्याज्ञवल्क्येन सम्यङ् न विवृतः । सोऽत्र 'ब्रह्मविदाप्नोती'त्यस्य विवरणर्चि व्यक्तीक्रियते । अशनप्रकारस्य विवरणात् । अतः स चेदत्र न विचार्येत, तदा शास्त्रे न्यूनतैवापद्येत । विचारिते च तस्मिन् मुक्तौ निःसम्बोधताया निवृत्तेः सर्वास्वपि तादृशत्वमर्थादेव सेत्स्यतीति बुध्यस्व ।

रश्मिः ।

ब्रह्मविदाप्नोति परमित्यादिवाक्यबोधकपदाभावात् । एतस्योक्तश्रुतिवाक्यस्य एतदधिकरणविषयवाक्यत्वम् । **यावदिति** । एकविंशतिदुःखध्वंसो मोक्ष इति नैयायिकाः । **निरवधीति** । गणितानन्दनिवृत्त्यर्थं निरवधीति सुखविशेषणम् । सुखं च ब्रह्मविशेषणम् । ब्रह्मप्राप्तिर्मोक्ष इति 'ब्रह्मविदाप्नोति पर'मित्यत्र स्पष्टा । **सायुज्यमित्यादि** । सायुज्यं ब्रह्मप्राप्तिः संयोगरूपा ब्रह्मजीवयोर्द्रव्यत्वात् । ज्ञानरूपगुणत्वे तूभयोर्योगमात्रम् । **सलोकतामिति** । ब्रह्मलोकप्राप्त्या भवति ब्रह्मसमानलोकता । इत्यतस्तल्लोकताप्रकारभेदः । एवं स्वरूपेण व्यवस्थितिर्मुक्तिरित्येकादशस्कन्धे । **सायुज्यं सलोकतेति** । आत्मलाभवत्स्वरूपेण व्यवस्थिती भवतः । तल्लोकादीत्यत्रादिशब्दार्थमाहुः **पुराणेपीति** । **प्रकारेति** । सालोक्यं तल्लोकप्राप्तिप्रकारेषु भेदः प्रकारः । एवं सामीप्यसारूप्ये अपि तल्लोकप्राप्तिप्रकारेषु भेदौ प्रकारौ । **सार्ष्टिर**लौकिकसामर्थ्यं परिशेषात् । एकत्वं सायुज्यप्रकारेषु ऐक्यमोक्षब्रह्मप्राप्तिरूपेषु भेदः प्रकारस्तेषां कथनाच्च । **आत्मकाम** इति । उपनिषदि शारीरकब्राह्मणे आप्तकाम आत्मकाम इति पाठः । **सोश्नुत** इति । सम्यगश्नाति ब्रह्मानुभवं करोति । ब्रह्म गौणीभावेन कर्मीभूतं बृहत्त्वादिगुणविशिष्टं सुखदुःखसाक्षात्कारविषयं करोतीत्यर्थः । **स्वप्रतिज्ञेति** । याज्ञवल्क्यप्रतिज्ञाऽथाकामयमान इति तदनुरोधात् । **व्यक्तीति** । सामान्यप्रकारस्य विशेषप्रकाराकाङ्क्षत्वात्तथा । **अशनप्रकारस्य** विशेषस्य विवरणात् । **स चेदिति** । **समश्नुत** इति सामान्यसमशनप्रकारस्योक्तत्वात् सविशेषप्रकारश्चेद् **अत्र** फलाध्याये । **शास्त्रे** मीमांसारूपोपाङ्गशास्त्रे सन्दिग्धश्रुतिसन्देहवारके । **तस्मिन्** विशेषे प्रकारे । **निःसम्बोधतायाः** इति । निष्क्रान्ता सम्बोधान्निःसम्बोधा तत्ताया निवृत्तेः ब्रह्मणा सहाहं सर्वकामानश्नामीति सम्बोधात् । किम्पुनः स्थूलान् जाग्रति सूक्ष्मान् स्वप्ने सुषुप्तौ आनन्दमात्रान् कामानश्नातीति । 'लोकवत्तु लीलाकैवल्यमि'ति सूत्रात् । **सर्वास्वपीति** । मुक्तिष्वपि । **तादृशत्वमिति** । ससम्बोधत्वम् । **इति बुध्यस्वेति** । इति हेतोरेतस्यैतद् विषयवाक्यत्वं बुध्यस्व । तेनैतद्भिन्ना निःसम्बोधा । अत्र मण्डूकोपनिषद्विरोधमाशङ्क्य निषेधन्ति स्म **न च निःस्वमिति** । तथा च श्रुतिः ।

प्रज्ञानांशुप्रतानैः स्थिरचरनिकरैर्व्यापिभिर्व्याप्य लोकान् ।
भुक्त्वा भोगान्स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ॥

भाष्यप्रकाशः ।

न च निःसम्बोधा मुक्तिरिति युक्तम् । 'ब्रह्मैव सन् ब्रह्माप्येती'त्यत्र ब्रह्मभावोत्तरमेव मुक्तेः श्रावणात् । ब्रह्मणश्च विरुद्धधर्माश्रयताया उभयलिङ्गाद्यधिकरणेष्वेव निर्णयेन निर्विशेषवादस्य प्रागेव निरस्तत्वात् । ये पुनः प्रजापतिवाक्यस्थां 'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति श्रुतिं विषयवाक्यत्वेन आद्रियन्ते, तेषामपि तस्यास्तथात्वं सन्दिग्धमेव । सूत्र उपसम्पत्तिपदाभावात्, 'केवलस्य सम्पद्येति पदस्य 'सता सौम्य तदा सम्पन्नो भवति सति सम्पद्य न विदुः सति सम्पद्यामह' इति सुषुप्तिविषये श्रावणात् । अत उपसम्पत्तिवाक्यस्य विषयत्वेनादरणमर्थबलादेवेति वक्तव्यम् । तथा सति तौल्यान्न पर्यनुयोगावकाशः । किञ्च 'स्वेने'ति पदस्यापि ब्रह्मवाचकत्वमेव मुख्यम् । 'स्वमपीतो भवती'-त्यादौ तथा सिद्धत्वात् । अतस्तत्रापि तथा । किञ्च । नायं नियमो यद्विषयवाक्यं सौत्र-

रश्मिः ।

पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुग्मायया मोहयन्नो ।
मायासङ्ख्यात्तुरीयं परममृतमजं ब्रह्म यत्तन्नतोस्मि ॥ इति

उपक्रमाज्ज्ञानमार्गीयेयम् । पुनरपीत्यादिना जाग्रदवस्थामनु स्वाप्निकीं तामाहुर्माण्डूकाः । धिषणा बुद्धिः । स्वापावस्थामाहुः पीत्वेति । स्वपिति स्वापं करोति । मधुरभुक्—आनन्दभुक् । तुरीयावस्थामाहुः माययेति । नोस्मान् मण्डूकान् । मायया त्रिगुणरूपया सङ्ख्यायते सम्प्रकथ्यते तन् मायासङ्ख्यम् । न तु स्वयम् । सोर्डा । नत इति । जात्यपेक्षयैकवचनम् । ज्ञानैकत्वादेकवचनं वा । ब्रह्मैव सन् ब्रह्मभावं गतः सन् । **ब्रह्मभावोत्तरमेवेति** । न तु तूष्णीम् । एवमप्यनुवादेन मुक्तिर्निस्सम्बोधेति चेत्तत्राहुः **ब्रह्मणश्चेति** । **निर्विशेषेति** । निःसम्बोधमुक्तिसमर्पकस्य । **प्रागेवेति** । उभयलिङ्गाद्यधिकरणेष्वेव । श्रुत्यविरोधस्तु अग्रेतनश्रुत्यन्तरात् । श्रुत्यन्तरं तु ।

यो विश्वात्मा विविधविषयान्प्राप्य भोगान् स्थविष्ठान् ।
पश्चात्स्वान्यान् स्वमतिविभवान् ज्योतिषा स्वेन सूक्ष्मान् ॥
सर्वानेतान् पुनरपि शनैः स्वात्मनि स्थापयित्वा ।
हित्वा सर्वान् विशेषान् विगतगुणगणः पात्वसौ नस्तुरीयः ॥ इति

भक्तिमार्गीयेयम् । मायाऽश्रवणेन विश्वादीनां नित्यत्वस्फोरणात् । विश्वात्मना स्थविष्ठभोगमुक्त्वा जाग्रति स्वप्ने 'अत्रात्मा स्वयंज्योतिर्भवती'ति श्रुतेः । स्वेन ज्योतिषा स्वाप्निकान् पश्चात्स्वान्यान् पश्चात्स्वान् यान् पश्चात्स्वानन्यान् प्राप्य भोगान् । सुषुप्तौ सर्वानेतानिति । स्थापयित्वा प्राज्ञः न किञ्चन संवेत्तीत्युत्तरेणान्वयः । न इति । मण्डूकान् । मण्डूकोपनिषत्त्वादन्येषामलाभाच्च । अत्र मायाऽश्रावणाच्छ्रुत्यन्तरत्वम् । अत्रापि निःसम्बोधमुक्त्यभाव उक्तः । 'नात्मानं नापरञ्चैव न सत्यं चापि नानृतम् । प्राज्ञः किञ्चन संवेत्ति तुर्यं तत् सर्वदृक् सदा ॥ निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः । अद्वैतः सर्वभूतानां देवस्तुर्यो विभुः स्मृत' इति ॥ तत्सर्वदृक्पदेन सर्वविषयकज्ञानोक्तेः । भक्तिमार्गस्य काचित्कत्वादग्रे 'मायामात्रमिदं विश्वमद्वैतं परमार्थत' इति विश्वस्य मायामात्रत्वमुक्तम् । भक्तावाग्रहे तु । मायामात्रं—इन्द्रियमात्रम् । वैराग्यार्थमनृतं वेत्यर्थः । **ये पुनरिति** । शाङ्करादयः । **श्रुतिस्तु** छान्दोग्यसमाप्तावस्ति । **तथात्वमिति** । विषयवाक्यत्वम् । **उपसम्पत्तीति** । भावप्रत्ययान्तत्वेन पर्यायत्वम् । **श्रावणादिति** । छान्दोग्ये तथा । **ब्रह्मेति** । हेतुभूतब्रह्मवाचकत्वम् । **तत्रापि तथेति** ।

भाष्यप्रकाशः ।

पदानुरूपमेव ग्राह्यमिति । 'अत्ता चराचरग्रहणा'दित्यादौ तथा दर्शनाभावात् । अतोऽर्थमादाय विषयवाक्यग्रहणं नानुचितमिति दिक् ॥

यत्तु शङ्कराचार्याः, सम्पद्याविर्भावाधिकरणं त्रिसूत्रमङ्गीकृत्य, प्रथमसूत्रे 'एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति छान्दोग्ये इन्द्रप्रजापतिसंवादस्थां श्रुतिं विषयवाक्यत्वेनोपन्यस्य, किं देवलोकाद्युपभोगस्थानेष्विवागन्तुकेन केनचिद्विशेषेण अभिनिष्पद्यते, उतात्ममात्रेणेति संशये, मोक्षस्याफलत्वप्रसिद्धेः 'अभिनिष्पद्यत' इत्युत्पत्तिपर्यायभूतशब्दप्रयोगादात्मनश्च सर्वदा विद्यमानत्वेनाभिनिष्पत्तेर्वक्तुमशक्यत्वाच्चागन्तुकेनेति पूर्वपक्षमुक्त्वा, केवलेनैवात्मना आविर्भवति, न धर्मान्तरेण । कुतः । स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दात् । अन्यथा 'स्वेने'ति विशेषणस्य वैयर्थ्यप्रसङ्गात् । न चात्मीयवाची स्वशब्द इति युक्तम् । तस्य रूपान्तरेपि तुल्यत्वेनात्र विशेषतस्तत्कथनस्य वैयर्थ्यानपायात् । अतः 'स्वेने'ति विशेषणसार्थक्यार्थं केवलेनावतिष्ठत इति सिद्धान्तं व्याख्याय, पूर्वावस्थास्विह च स्वरूपानपायसाम्ये सत्यत्र को विशेष इति शङ्कायां द्वितीये सूत्रे सर्वबन्धविनिर्मुक्तत्वरूपो विशेषः । पूर्वं जाग्रदाद्यवस्थासु, 'अन्धो भवती'ति, 'रोदितीवे'ति, 'विनाशमेवापीतो भवती'त्यवस्थात्रयकालुष्यकथनेन बन्धाविमोकबोधनात् । तस्य मुक्तत्वं च 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामी'त्यवस्थात्रयविहीनस्यात्मनो व्याख्येयत्वेन प्रतिज्ञातस्याशरीरत्वाद्युपन्यासपूर्वकं 'स्वेन रूपेणाभिनिष्पद्यत' इत्युपसंहारात् । आख्यायिकोपक्रमे चापहतपाप्मेत्यादिमुक्तात्मविषयप्रतिज्ञानादिति व्याख्याय, तृतीयसूत्रे 'परं ज्योतिरुपसम्पद्ये'त्यनेन ज्योतिःसम्पत्तेरुक्तत्वाज्ज्योतिषश्च प्राकृतत्वात् सम्पत्तौ कथमस्य मुक्तत्वमिति शङ्कायां 'परं' 'ज्योति'रिति पदाभ्यां 'तद्देवा ज्योतिषां ज्योति'रिति श्रुत्यन्तराज्ज्योतिःशब्देन परं ब्रह्मैवोच्यते, न तु प्राकृतमतस्तत्सम्पत्तौ न मुक्तत्वभङ्गः । आत्मन एव प्रकरणदर्शनादित्याहुः । ततो'ऽविभागेन दृष्टत्वा'दित्येकसूत्रमधिकरणान्तरमङ्गीकृत्य, किं मुक्तः परमेश्वराद्भेदेनावतिष्ठते, उताभेदेनेति शङ्कायामविभक्त एवावतिष्ठत इति सिद्धान्तयन्ति । ततो 'ब्राह्मेणे'त्यादित्रिसूत्रमधिकरणमङ्गीकृत्य, पूर्वाधिकरणे यदात्मरूपेण स्वेनाऽनागन्तुकेनावतिष्ठत इत्युक्तम्, तत् कीदृशमिति चिन्तायां जैमिनिस्तावद् यद् ब्राह्मं रूपम्, 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प'इत्यनेन प्रागुक्तम्, तथा सर्वेश्वरत्वं सर्वज्ञत्वं च तेन रूपेणाभिनिष्पद्यत

रश्मिः ।

स्वेनेति पदेऽपि तौल्यम् । तथेति । 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स' इति काठकस्थस्य विषयवाक्यस्य सौत्रपदानुरूपत्वदर्शनाभावात् । न चात्मीयेति । तदा आत्मीयेन केनचिद्विशेषेणेति स्वेन रूपेणेत्यस्यार्थः । तस्येत्यादि । तस्यात्मीयत्वस्य रूपान्तरेषु मोक्षेऽविवक्षितेषु तत्कथनस्येति । आत्मीयवाचिनः स्वेनेत्यस्य कथनस्य । इह चेति । मोक्षावस्थायां च । अपायो नाशः । अत्रेति । मुक्तौ । रोदितीवेति । स्वप्ने रोदितीव देवदत्तो न तु रोदितीति । स्वापे नाशमेवापीतोपि गतः । कालुष्यमशुद्धत्वम् । एतमिति । अवस्थात्रयविहीनम् । तत्सम्पत्तौ ज्योतिःसम्पत्तौ । तदिति । रूपम् । प्रागुक्तमिति । दहरविद्यायां प्रजापतिवाक्याद्विषयात्पूर्वमुक्तं छान्दोग्ये । तथेति । यथा प्रागुक्तं ब्राह्मं रूपम् । तथा

भाष्यप्रकाशः ।

इति मन्यते । तत्र हेतुरपहतपाप्मेत्यादिनोक्त उपन्यासः, आदिपदसङ्गृहीतं 'स तत्र पर्येती'-त्यादिनोक्तं च । औडुलोमिस्तु—यद्यप्यपहतपाप्मादयः, अभेदेनैव धर्मा निर्दिश्यन्ते, तथापि शब्दविकल्पजा एवैते इति पाप्मादिनिवृत्तिमात्रं तत्र गम्यते । चैतन्यमेव तस्यात्मनः स्वरूपमिति तन्मात्रेणैव रूपेणाभिनिष्पत्तिर्युक्ता । 'एवं वा अरे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'त्यादिश्रुत्यनुग्रहात् । सत्यकामत्वादयस्तु यद्यपि वस्तुरूपेणैव धर्मा उच्यन्ते, सत्याः कामा अस्येति, तथाप्युपाधिसम्बन्धाधीनत्वात्तेषां न चैतन्यवत् स्वरूपत्वसम्भवः । अनेकाकारत्वप्रतिषेधात् । प्रतिषिद्धं हि ब्रह्मणोऽनेकाकारत्वं, 'न स्थानतोऽपि परस्योभयलिङ्ग'मित्यत्र । अत एव जक्षणादिसङ्कीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थम् । आत्मरतिरित्यादिवत् । न हि मुख्यान्येव रतिक्रीडामिथुनान्यात्मनिमित्तानि शक्यन्ते वर्णयितुम् । द्वितीयविषयत्वात्तेषाम् । तस्मान्निरस्ताशेषप्रपञ्चेन प्रसन्नेनाव्यपदेश्येन बोधात्मनाभिनिष्पद्यत इति बादरायणस्त्वाचार्य एवमपि पारमार्थिके चैतन्यमात्रस्वरूपाभ्युपगमे व्यवहारापेक्षया पूर्वस्य पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरोधं मन्यते इत्येवं व्याचख्युः ।

तत्रेदमवधेयम् । छान्दोग्य इन्द्रप्रजापतिसंवादे, य आत्मा वेद्यत्वेन प्रकृतः, स दहरविद्योपास्य एव, देवासुरैरनुबुध्यमाने प्रजापतिवाक्ये तस्यैवापहतपाप्मत्वादिगुणकस्य प्रत्यभिज्ञानात् । इन्द्रविरोचनाभ्यामपि तस्यैव विवित्सया तथानुवादात् । अतः प्रजापतिरपि तमेव सर्वेषु पर्यायेषु बोधयति 'य एषोऽक्षिणि पुरुषो दृश्यत' इत्यादिना । परं त्विन्द्रविरोचनौ

रश्मिः ।

सर्वेश्वरत्वमित्यादि द्रष्टव्यम् । **अभेदेनेति** । विशेष्यविशेषणयोरभेदान्वयो नीलो रूपमित्यादौ दृष्टमिति भावः । **शब्दविकल्पेति** । दर्शनेन देवदत्ते पाप्मवति पाप्मवच्छब्दवाच्येऽपहतपाप्मशब्दप्रवृत्तौ अपहतशब्दवाच्यत्वमिति । पाप्मवच्छब्दे विकल्पो जातोऽत एतादृशशब्दविकल्पजा एवैते शब्दाः । **तत्रेति** देवदत्तादौ । **द्वितीयेति** । सप्रपञ्चविषयत्वात् । निरस्तोऽशेषप्रपञ्चो यस्मिन् । **पूर्वस्य पूर्वस्येति** । **पूर्वभावादिति** सौत्रपदार्थोऽयम् । **अप्रत्याख्यानादिति**, भावात् । **ब्रह्मणो** मुक्तात्मनः सप्रपञ्चत्वनिःप्रपञ्चत्वयोरविरोधं मन्यते । **य आत्मेति** । 'य आत्मापहतपाप्मा विजर' इत्यादिना । 'सोऽन्वेष्टव्यः स विजिज्ञासितव्य' इति श्रुतेर्वेद्यत्वेन प्रकृतः । **देवासुरैरिति** । 'तद्धोभये देवा अनुबुबुधिर' इत्यादिना । **प्रजापतिवाक्ये इति** । 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वा१ँश्च लोकानाप्नोति सर्वांन्कामान्यस्तमनुविद्य विजानातीतीह प्रजापतिरुवाचे'ति वाक्ये । **तस्यैवेति** । दहरविद्योपास्यस्यैव । अष्टमप्रपाठकस्थत्वाद्दहरविद्योपास्येत्येवकारः । इन्द्रप्रजापतिसंवादस्यापि अष्टमप्रपाठकस्थत्वम् । तत्तेदन्ताप्रकारकं ज्ञानं प्रत्यभिज्ञानं, **तस्यैव** दहरोपास्यस्यैव **विवित्सयेति** । वेत्तुमिच्छा विवित्सा तया । **तथेति** । तेन प्रकारेण । 'तौ होचतुर्य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यवतो वाचो वेदयन्ते तमिच्छन्तावववास्त'मित्यनुवादात्सिद्धस्य कथनात् । टीकायां सत्यवतो वचो वचनं वेदयन्ते शिष्टा इति वाच इत्यत्र वच इति पाठः **शिष्टा** इति कर्तुरध्याहारः । **अवास्तमिति** । आवां अवास्वेति लङुत्तमपुरुषे वक्तव्येऽवास्तमिति मध्यमपुरुषाभिधानं युवां वचनप्रजापती अवास्तमिति प्रजापतिवचनानुकर्षणमात्रम् । **वसू** निवासे । भ्वा० प. अनि. विकरणव्यत्ययः, शपः **लुक्** । लङ् । **तमेवेति** ।

भाष्यप्रकाशः।

परप्राप्तिं पुरुषार्थत्वेनावगत्य तदर्थं न प्रष्टुं प्रवृत्तौ, किन्त्वपहतपाप्मादिगुणकात्मज्ञानेन सर्वकामप्राप्त्याद्यर्थम्, अतस्तदधिकारं हीनमवगत्य चित्तशुद्ध्यर्थं तप उपदिदेश, श्लिष्टप्रयोगेण चोक्तवान्। तत्र प्रथमे पर्याये 'दृश्यत' इत्यनेनार्षमेव दर्शनमभिप्रेतम्। तदेवोपपादितं 'अन्तर उपपत्ते'रित्यत्र। परमिन्द्रेण न बुद्धमिति देहमात्मानं बुद्ध्वा भयं ददर्श, 'अस्मिन्नन्धेऽन्धो भवती'त्यादि। एवं दृश्यस्याज्ञाने पुनस्तप उपदिश्य, द्वितीयेऽपि पर्याये स्वप्नसृष्टिकर्तारमुपदिदेश, 'य एष स्वप्ने महीयमानश्चरती'ति। अत्रापि 'एतं त्वेवं भूयोऽनुव्याख्यास्यामी'त्येतच्छब्देन स्वबुद्धिस्थस्यैव परामर्शात्। न त्विन्द्रबुद्धिस्थस्य। इन्द्रेण देहस्यैव पूर्वं बुद्धत्वादिति। परं त्विन्द्रेण द्वितीयेपि पर्याये स न बुद्धः, किन्तु देहाद्भिन्नो जीव एव स्वप्नद्रष्टोपदिश्यत इति बुद्धम्। स यद्यपि बाह्योपाधिदोषान्न दुष्यति, तथाप्यान्तरदोषाद् दुष्यतीति पुनस्तृतीये पर्याये समागत्य भयमुक्तवान्। तदा सुषुप्त्यधिकरणभूतं तमेव 'यत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न

रश्मिः।

दहरविद्योपास्यमेव। अन्यथा प्रक्रान्तविरोध इत्येवकारः। **अवगत्येति**। स सर्वा१श्च लोकानाप्नोतीति श्रुतेरवगत्य। **अपहतपाप्मेत्यादीति**। आप्नोति सर्वा१श्च कामान्यस्तमात्मानमनुविद्य विजानातीति श्रुतेस्तथा। **तप उपेति**। वसापराणि द्वात्रिंशतं वर्षाणि इति स हापराणि द्वात्रिंशतं वर्षाण्युवासेति। **श्लिष्टेति**। निवासार्थकवसतेः प्रयोगः श्लिष्टः इष्टाकरणेन निवासे सन्तापः श्लिष्यते इति तेन तप उक्तवान्। लौकिकं दर्शनं कुतो नेत्यत आहुः **तदेवेति** यदि स्वचक्षुरधिकरणमनार्षं विवक्षितं न स्यात्तदान्तरपदं सूत्रे न ब्रूयात्। आर्षज्ञानविषयत्वादन्तरस्येति भावः। **देहमात्मानमिति**। 'तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव' इति श्रुतेर्बुद्ध्वा। **तौ इन्द्रविरोचनौ**। भगवः भगवन् हिरण्यगर्भः आत्मानं देहम्। **भयं ददर्शेति**। अथ 'हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव स्वयमस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतः' इत्याद्युक्त्वा 'एवमेवायमस्मिन्नन्धेन्धो भवती'त्यादि अग्रे 'अस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाये'ति श्रुतिः। **अयमिति**। उदशरावे देहदर्शनानन्तरं साध्वलङ्कृतसुवसनदेहस्योदशरावे दर्शनानन्तरं शरीरान्तर्बुद्ध आत्मा। **अस्मिन्नन्ध** इति शरीरेन्धे आत्मान्धः। अनु एष आत्मा। **अत्र भोग्यमिति**। छायात्मदर्शने भोग्यं फलम्। समित्पाणिरिन्द्रः ब्रह्मचर्यं वस्तुं पुनरेयाय आगतवान्। **एवं दृश्यस्येति**। भोग्यत्वेन दृश्यस्यात्मनोऽज्ञाने। 'वसापराणि द्वात्रि१शतं वर्षाणी'ति श्रुतेः **पुनस्तप उपदिश्य**। **द्वितीयेति**। 'य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृतमभयं ब्रह्मे'ति द्वितीये पर्याये। **अत्रापीति**। अत्रापीत्यस्य बुद्धिस्थस्येत्यनेनान्वयः। **स्वबुद्धिस्थस्येति**। अन्तर्विद्यमानस्य। **इन्द्रबुद्धिस्थस्य** परप्राप्तिपुरुषार्थस्य। **बाह्योपाधीति**। देहस्यान्धस्रामवृक्णरूपदोषेभ्यः एकत्वमविवक्षितम्। **आन्तरेति**। अविपक्वकामक्रोधादिदोषात्। अत्राप्येकत्वमविवक्षितम्। **पुनस्तृतीय इति**। पुनः समागत्य भयमुक्तवान् इत्यन्वयः। द्वितीयपर्याय एव सहाप्राप्यैव देवानेतद्भयं ददर्शेत्यादिना समागत्य भयमुक्तवानित्यर्थः। तृतीयपर्याये तदाप्सुषुप्त्यधिकरणभूतमित्यादिरन्वयः। सुषुप्तिश्चापश्चाप्सुषुप्ती। अल्पाच्तरं पूर्वमित्यप्शब्दस्य पूर्वनिपातः। अयमस्मिन् शरीरे प्राणो युक्त इति श्रुतावप्यधिकरणभूतमत्र उक्तम्। प्राण आपोमयः 'आपोमयः प्राण' इतिश्रुतेः। तेन लिङ्गशरीरोपादानमत्र। तेन प्राणस्य जीवाधेयत्वेपि लिङ्गरूपस्याधारत्वेन सूचितमप्सु आधारत्वमत्र ज्ञेयम्। अब्रूपत्वाल्लिङ्गस्याधारत्वेनापामाधारत्वं वा। तदा सुषुप्त्यधिकरणभूतमित्येव वा पाठः। **तमेवेति**

भाष्यप्रकाशः ।

विजानाती'त्येवमुपदिदेश । तत्रापि सुषुप्त्यधिकरणभूतं परमात्मानं न ज्ञातवान्, किन्तु सुषुप्त्यवस्थाकं शारीरमेव ज्ञात्वा, तत्राप्यज्ञानरूपं भयं 'विनाशमेवापीतो भवती'त्यन्तेन प्रदर्श्येन्द्रः पुनरुपससाद । तदा प्रजापतिस्तमेव स्वबुद्धिस्थमुपदेष्टव्यत्वेनोपक्षिप्य इन्द्रेणावगतस्य जीवस्य सर्वकामभोगयोग्यं स्वरूपं तत्सम्पत्त्या भवतीति वक्तुं 'मघवन् मर्त्यं वा इदं शरीर'मित्यादिना शरीरस्य दुःखदत्वम्, अशरीराणां वाय्वादीनां परं ज्योतिरुपसम्पन्नानां स्वरूपप्राप्ति-

रश्मिः ।

स्वबुद्धिस्थमेव । यत्र एतत्सुप्त इति तृतीयपर्यायारम्भः । क्वचित्पुस्तके तद्यत्रैतत्सुप्त इत्यादि पाठः । समस्तः सम्यगस्तः स्वरूपे । समस्तमिति पाठे प्रागुक्तार्थं स्वप्नविशेषणम् । सम्प्रसन्नः आनन्दभुक् । सुषुप्त्यधिकरणभूतमिति । सुषुप्तिस्तु अकामो भगवान् । एवमकामरूपसुषुप्त्यधिकरणभूतं परमात्मानमित्यर्थः । अत्र श्रुतिः । 'स शान्तहृदयः प्रवव्राज । सहाप्राप्यैव देवानेतद्भयं ददर्श नाहं खल्वयमेवꣳसम्प्रत्यात्मानं जानाम्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवती'ति ॥ स इन्द्रः । भयमेवाहुः । नाहमित्यादिना । नो एवेमानि भूतानि जानन्ति । विनाशमेवेति । एवकार इवार्थे । अ इवेति पदच्छेदात् । विनाशमिव अपीतः प्राप्तो भवति । सुषुप्तौ ज्ञानाभावादात्मा नष्ट इवेति भावः । उपक्षिप्येति । 'नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय तꣳह प्रजापतिरुवाच मघवञ्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच नाहं खल्वयं भगव एवꣳसम्प्रत्यात्मानं जानाम्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीत्येवमेव मघवन्निति होवाचैतं त्वेव ते भूयोनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्चवर्षाणीति स हापराणि पञ्चवर्षाण्युवास तान्येकशतꣳ सम्पेदुरेतत्तद्यदाहुरेकशतꣳ ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाचे'त्यनयोपक्षिप्य । स इन्द्रः । नो एवान्यत्रेति । एतस्यैव भूयोनुव्याख्याने हेतुरयम् । एतस्मादन्यत्र परमात्मनि नो एव स्वबुद्धिस्थत्वम् । एकशतमिति । तानि इन्द्रब्रह्मचर्यवर्षाणि एकीकृतानि एकाधिकशतं सम्पेदुः प्राप्तानि । द्वात्रिंशतसङ्ख्या त्रिगुणीकृता षण्णवतिः पञ्चसङ्ख्या तत्र चेदेकाधिकशतं भवति । अस्याः सङ्ख्यायाः श्रुतिः । स्वमुखेनैवैतिह्यत्वं विद्यास्तुत्यर्थमाहुः । एतत्तद्यदाहुरिति । यदेतद्वृत्तं तदेतदाहुः शिष्टाः । इन्द्रेणावगतस्येति । परमात्मरूपस्य । मामेवोपास्स्वेति परमात्मनः स्वात्मरूपस्येन्द्रप्रतर्दनसंवाद उपदेशात् । तत्स्वरूपस्येति । शरीरसम्पत्त्या । इत्यादिनेति । मघवन्मर्त्यं वा इदꣳ शरीरमात्तं मृत्युनात्तं तदस्यामृतस्य शरीरस्याशरीरस्यात्मनोधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यामित्यादिशब्दार्थः । अधिष्ठानं भोगाधिष्ठानम् । अशरीर आत्मा आत्तः । काभ्यामित्यत आह प्रियाप्रियाभ्यामिति । प्रियाप्रियाभ्यां आत्तो व्याप्तः । असशरीरस्य प्रियाप्रिये सम्भवतः । प्रियः प्रीतिविषयः संयोगे, अप्रीतिविषयो विप्रयोगे । एवं चासशरीर आत्मविशेषः । अकारो विष्णुः सशरीरः सन् प्रियाप्रियाभ्यां सुखदुःखाभ्यां आप्तो व्याप्तो वै प्रसिद्धम् । तथा च इत्यादिना शरीरस्य दुःखदत्वमित्यस्य प्रकाशस्य सुखदत्वोपलक्षकत्वादात्मविशेषमादायोक्तरीत्या शरीरस्य सुखदुःखदत्वम् । तदपि आत्मविशेषाय संयोगविप्रयोगदत्वम् । न च शरीरस्य दुःखदत्वमेवेति भाष्यविरोधः । श्रुत्या भाष्येप्युपलक्षणाद्दुःखदत्वमित्यंशे । अशरीराणामिति । 'न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतोशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यन्त एवमेवैष सम्प्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन

भाष्यप्रकाशः ।

दृष्टान्तेनास्यापि स्वव्याख्यातं परं ज्योतिरुपसम्पन्नस्य स्वरूपाभिनिष्पत्तिम्, ‘एवमेवैष सम्प्रसाद’ इत्यादिनोक्त्वा परस्य ज्योतिषः स्वरूपमाह ‘स उत्तमः पुरुष’ इति । योऽयं गीतायां ‘उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत’ इत्यादिश्लोकद्वयेन कृतनिर्वचनः । अतः परमुपसम्पन्नस्य तल्लोके भोगं वक्तुं तत्र परमात्मनो भोगमाह ‘स तत्र पर्येती’त्यादिना । तथा च ‘देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिना’मिति सप्तमस्कन्धात्तादृशानां सालोक्यादिचतुष्टयं प्राप्तानां भगवत्प्रसादरूपस्तद्दत्तो भोगो निराबाधः । अत्र विद्योपक्रमे तेषां तदर्थमेवोपासना प्रवृत्तेरुक्तत्वात् । नन्वेवं स्वरूपं प्राप्तस्य तत्र भोगोपि मनसस्तु पूर्वस्यैव तत्र सत्त्वात्तेन प्राक्तनदेहस्मरणे तदीयदुःखस्यापि स्मरणात् सुखभोगोऽपि दुःखसम्भिन्न एव स्यादित्यतस्तदभावायाह ‘नोपजनꣳ स्मरन्निदꣳ शरीर’मिति । उप आत्मसमीपे अविद्याकामकर्मभिर्जायते इत्युपजनं इदं प्राक्तनं शरीरं न स्मरति, अतस्तदस्मरणान्न दुःखसम्भेद इत्यर्थः । नन्वस्मरणं शरीरस्य कुतः, स्वरूप आकारसद्भावेपि भोगसाधनभूतानामिन्द्रियाणामभावाद्भोगेपि कथमित्याशङ्काद्वयनिवृत्त्यर्थमाह ‘स यथा प्रयोग्य’ इत्यादि । ‘अथ यत्रैतदाकाश’मित्यादि च । यथा प्रकर्षेण योग्योऽश्वादिराचरणे आसमन्ताच्चरणसाधने रथादौ तस्य गमनादिसाधनाय युक्तः, एवमयं पञ्चवृत्तिर्मुख्यः प्राणोऽस्मिन् शरीरे तद्यात्रासाधनाय युक्तः । तथा च मुक्तौ तस्य लये तद्वियुक्तस्य शरीरस्याप्रयोजकत्वादस्मरणमित्यर्थः । इन्द्रियाभावेपि भोगमुपपादयति ‘अथ यत्रे’त्यादि । यत्र शरीरदेशे एतदाकाशमनुविषण्णं नेत्रकनीनिकोपलक्षितमाकाशमनुगतं चक्षुःशब्दवाच्यम् । तत्र स चाक्षु-

रश्मिः ।

रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति । सम्प्रसादः जीवः । अस्यापि स्वव्याख्यातमिति । सम्प्रसादस्यापि स्वेन श्रुत्या व्याख्यातं परं ज्योतिरित्यर्थः । सम्पद्यान्तं व्याख्येयं स्वेन रूपेणेत्यादि व्याख्यानम् । परं ज्योतिःस्वरूपमिति । परांशत्वात्परत्वं ज्योतिश्चित् । परस्येति । अंशिनः परस्य । परममिति । परो मीयते ज्ञायतेनेनेति परममक्षरम् । इत्यादिनेति । ‘स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनꣳ स्मरतीदꣳ शरीरꣳ स यथा प्रयोग्य आचरणे युक्तः एवमेवायमस्मिञ्छरीरे प्राणो युक्त’ इति श्रुतिः । जक्षन् भक्षन् नोपजनमिति स्थूल शरीरं न स्मरति । स्त्रीपुंसयोरन्योन्यसमागमाज्जायत इत्युपजनम् । यद्वा उप आत्मसामीप्येन जायत इत्युपजनम् । प्रयुज्यत इति प्रयोग्यः अश्वादिः । यथा आचरणे आचरति गच्छत्यनेनेत्याचरणो रथादिस्तस्मिन्युक्तः । एवं यथादृष्टान्तमेव । अस्मिन् स्थूलशरीरेऽयं प्राणो लिङ्गात्मा । तदुपाधिकः प्राज्ञः रथित्वेन युक्तः ईश्वरेण नियुक्तो वर्तत इत्यर्थः । भगवत्प्रसादेति । ‘त्वयोपभुक्तस्रग्गन्धवासोलङ्कारचर्चिताः उच्छिष्टभोजिनो दासास्तव मायां जयेमही’ति वाक्यात् । गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययोत्र । अत्र विद्येति । छान्दोग्येऽक्षिपुरुषविद्यायां क्रमे तेषां देवासुराणाम् । तदर्थं भोगार्थम् । उक्तत्वादिति । तद्धोभये देवा असुरा इत्यादिनोक्तत्वात् । पूर्वस्यैवेति । ‘तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्ये’ति शारीर इति वाक्यात् । तद्यात्रेति । शरीरयात्रासाधनाय । ‘अहमेतद्बाणमवष्टभ्य विधारयामी’त्युक्तेः प्राणस्य । तस्येति । मुख्यप्राणस्य लये । अप्रयोजकत्वात् । दर्शनाविषयत्वात् । अनुभवे न संस्कारः तदुद्बोधे स्मरणात् । आहार्यज्ञानमविवक्षितं कादाचित्कम् । अथ यत्रेत्यादीति । अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरिति श्रुतिः । नेत्रकनीनिकेति । नेत्रस्य कनीनिका कृष्णतारा तयोप समीपे छिद्रेणाकाशकार्येण लक्षितं ज्ञातं कारण-

भाष्यप्रकाशः।

यश्चक्षुषि विद्यमान आत्मा दर्शनाय रूपग्रहणार्थं चक्षुश्चक्षुरिन्द्रियरूपम्, एवं यो जिघ्राणीति गन्धग्रहणाय स घ्राणम्, एवं व्याहरणाय वाक्, श्रवणाय श्रोत्रं, मननाय मन' इति। एतेषु अस्य जीवात्मनो दैवं चक्षुर्मनः सर्वकार्यप्रयोजकम्। तथा च मुक्तस्य देहेन्द्रियाद्यभावेपि मनसः सत्त्वात् तस्य दैवत्वेनापूर्वत्वात्तेन दैवेन चक्षुषा मनोरूपेण ब्रह्मलोकस्थान् कामान् पश्यन् रमत इति सुखेन भोगसम्पत्तिरित्यर्थः। एवं सर्वमुपपाद्यैतदुपासनाफलं निगमयन्नुपसंहरति 'तं वा एतं देवा आत्मानमुपासत' इत्यारभ्य 'प्रजापतिरुवाचे'त्यन्तेन। तथा चात्र परमात्मन एव प्रकृतत्वात् 'एवं त्वेव ते भूयोऽनुव्याख्यास्यामी'ति प्रतिज्ञाया अपि परमात्मपरतया तद्विरुद्धमिन्द्रज्ञानमनुसृत्य जीवपरमात्मनोर्भेदाभावेन व्याख्यानमनुचितम्। जीवात्मनः परमात्माभेदस्य तादात्म्यरूपत्वेनैव पूर्वं सिद्धतयाभ्युपगमैकशरणत्वाच्च। तेनाख्यायिकोपक्रमेऽप्यपहतपाप्मत्वादिरूपेण परस्यैव प्रतिज्ञानम्, जीवस्तु मुक्तौ प्राप्तस्वरूपस्तथा भवतीति ब्राह्मलौकिककाम-

रश्मिः।

माकाशं अनु पश्चाल्लक्षीकृत्य गतं उपलब्धम्, कृष्णताराग्रवर्ति चक्षुःशब्दवाच्यम्। आत्मेति। केनोपनिषदुक्तः। 'यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यन्ति तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत' इति श्रुतिः। स चाक्षुषः स प्रकृतः शारीरः चक्षुषि भवतीति चाक्षुष इति टीकायां तदा वेदान्तपरिभाषाप्रक्रिया। पूर्वोक्तार्थोऽत्र ग्राह्यः। दर्शनायेत्युक्तेराधिदैविकमात्रविवक्षणात्। न तु भोगाश्रयपुरुषापेक्षा। एवं य इति। पूर्वोक्तरीत्या 'अथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमि'ति श्रुतिः। एवं व्येति। 'अथ यो वेदेदमभिव्याहराणीति स आत्माभिव्याहाराय वा'गिति श्रुतिः। श्रवणायेति। 'अथ यो वेदेदꣳ शृण्वानीति स आत्मा श्रवणाय श्रोत्र'मिति श्रुतिः। शृणवानीति टीकायाम्। मननायेति। अथ यो वेदेदं मन्वानीति स आत्मा मन इति श्रुतिः। 'अस्य दैवं चक्षुः स वा एष तेन दैवेन चक्षुषा मनसैतान् कामानाप्नोति सर्वाꣳश्च कामा'निति श्रुतिः। अस्या अर्थमाहुः। एतेष्विति। सर्वकार्य इति ज्ञानरूपे प्रयोजकम्। आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षमिति नैयायिकप्रक्रिया। किं पुन'र्माया मनः सृजती'ति सप्तमस्कन्धे सद्वासनाप्रकरणे। एतदुपासनेति। अक्षिपुरुषोपासनाफलम्। सर्वलोकाप्तिः सर्वकामाप्तिः। तं वा एतमिति। 'तं वा एतं देवा आत्मानमुपासते। तस्मादेषां सर्वे लोका आत्ताः सर्वे च कामाः स सर्वांश्च लोकान् सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाचे'ति श्रुतिः। एवं सर्वमुपपाद्य सम्पाद्याविर्भावसूत्रे य एष सम्प्रसाद इत्यादौ विषयवाक्ये केवलेनैवात्मनाविर्भवतीत्युक्तम्। तद्व्याख्यानमुपक्रमविरुद्धमनुचितमित्याहुः। तथा चेति। उपक्रमोक्तापहतपाप्मत्वादेरपि सत्यकामत्वादिवत्स्वरूपेणैव धर्मत्वे न तु शब्दविकल्पजत्वे च धर्मान्तरेणाविर्भावे च। इन्द्रज्ञानमिति। मामेवात्मानं जानीहीतीन्द्रप्रतर्दनसंवादस्थमनुसृत्य ब्रह्मप्राप्त्यवगममैन्द्रमनुसृत्य। हेत्वन्तरमाहुः जीवात्मन इति। जीवस्येन्द्रस्य। परमात्मन अभेदो यो वर्तते स नभेदाभावरूपः निःसम्बोधमुक्तेरभावात्। किन्तु ससम्बोधरूपमुक्तेरुपपादनात्तादात्म्यरूपत्वेनेत्यर्थः। पूर्वमिति। अत्रैव। अभ्युपगमेति। भेदाभावरूपाभेदस्य। आख्यायिकेति। तद्धोभये देवा इत्यारभ्याख्यायिका तस्या उपक्रमे य आत्मापहतपाप्मेत्यादिरूपे। ननु अपहतपाप्मपदेन जीवोपक्रमोस्तु अभेदात्। पाप्मरूपप्रतियोगिनो ब्रह्मण्यभावाच्चेत्यत आहुः जीवस्त्विति। अपहतपाप्मत्वं ब्रह्मणि

---

१. कामानाप्नोति य एतमिति पाठान्तरम्।

भाष्यप्रकाशः।

भोगयोग्यत्वात्तथोच्यते। एवं सति 'अविभागेन दृष्टत्वा'दिति सूत्रेऽविभागः सोऽप्यविभक्तः, भ्रातॄणामिव भोगमात्रसाम्यादेव, न त्वभेदात्। अत एव काठके 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमे'ति मुक्तस्वरूपनिरूपणपरे वाक्ये तादृगिति पदेन साम्थमेवोक्तम्, न त्वभेदः, तथा सति तदेवेति ब्रूयात्। एवं नदीसमुद्रनिदर्शनेपि भेदस्यान्याज्ञेयत्वाय नदीनां नामरूपत्यागकथनं द्रष्टव्यम्। एवं 'तत्त्वमसि' 'अहं ब्रह्मास्मी'त्यादावपि ब्रह्मणः सर्वरूपत्वादंशांशिभावेनैव तादात्म्यमभिप्रेत्य जीवस्यापि ब्रह्माभेद उच्यते, न त्वभेद इत्यभिप्रायेणेत्यवगन्तव्यम्। एवं 'यत्र नान्यत् पश्यती'त्यनेनोक्तो भूमान्यदर्शनाभावोऽप्यंशांशिभावावगमादेवोपपन्नतरः। 'न तु द्वितीयमस्ति ततोऽन्यद्विभक्त'मित्यत्रापि विभागाभावादेव द्वितीयदर्शनाभावो द्रष्टव्यः। इदं च तत्र तत्र बहुधोपपादितमिति नात्राधिकमुच्यते। अतो यदुक्तं भेदनिर्देशस्त्वभेदेऽप्युपचर्यते, 'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नी'ति। 'आत्मरतिरात्मक्रीड' इत्यादिदर्शनादित्युक्तम्, तदप्यप्रयोजकम्। भेद-

रश्मिः।

न प्रतियोगिसापेक्षाभावरूपम्। अखण्डशब्दार्थत्वात्। मुक्तात्मा जीवस्तु मुक्तौ आवरणभङ्गेन साधनैर्वा स पाप्मानं निहत्य प्राप्तस्वरूपः तथानामापहतपाप्मा भवतीति ब्राह्मेण देहेन लौकिकैः कामैरक्षरात्मकत्वेन जीवस्य भोग्यत्वाच्चोपक्रमेऽपहतपाप्मत्वेनोच्यत इत्यर्थः। योऽविभागः अविभक्त एवावतिष्ठत इति सिद्धान्तीयः। न त्विति। निःसम्बोधमोक्षरूपफलाभावेन ससम्बोधमोक्षे भेदाभावरूपमोक्षाभावात्। तादृगिति। तमेवेमं पश्यन्ति जना इति तादृक्। तदेवेति तादृगेव भवतीत्यत्र तदेव भवतीति ब्रूयात्। पूर्वोक्तं दूषयित्वान्यदपि भाष्यीयं दूषयन्ति स्म एवं नदीति। नदी यमुनागङ्गादिरूपा समुद्रः क्षीरोदादिरूपः। तयोर्भेदः प्रसिद्धः नदीनामरूपत्यागः। न तु प्रवाहरूपस्वरूपत्यागस्तस्य कथनम्। 'ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम्। यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे' इत्यादौ द्रष्टव्यम्। तादात्म्यमिति। ब्रह्मत्वेन तादात्म्यम्। घटत्वेन घटतादात्म्यवत्। घटो नेति न प्रतीतिः। न त्विति। ननु तर्हि तत्त्वमिति व्युत्पत्तिभङ्ग इति चेन्न। फलाध्याये तस्या अमुख्यत्वात्। अत्र श्रुतिं प्रमाणयन्ति स्म। एवमिति। भूमान्येति। भूम्नोन्यस्य दर्शनस्याभावः। अंशांशिभावो भेदप्रत्ययप्रयोजकः। तादृशाभेदो यत्र नान्यत्पश्यतीत्युक्तो न भेदाभावरूपोऽपि तु तादात्म्यरूपः। उपपन्नेति। तमप्प्रत्ययान्तं नोक्तम्। 'युक्तयः सन्ति सर्वत्रे'ति वाक्यात्। इत्यत्रापीति। बृहदारण्यकेपि ज्योतिर्ब्राह्मण तत्र तत्रेति। प्रथमाध्याये तृतीयपादे सुषुप्त्यधिकरणे द्विसूत्रे। लिङ्गभूयस्त्वाधिकरणे तृतीयाध्यायस्य तृतीयपादे। बहुधेति। स्वपरनयैर्बहुधा। भेद इति। ज्योतिरुपसम्पद्य भेदनिर्देश इति। ज्योतिरुपसम्पद्येति कर्तृकर्मनिर्देशाद्भेदनिर्देशः। विपरीतलक्षणयाऽभेदेप्युपचर्यत इत्यर्थः। स्व महिम्नीत्यत्राधाराधेयनिर्देशाद्भेदनिर्देशः। आत्मनि रतिर्यस्य, आत्मनि क्रीडा यस्यात्मना मिथुनं यस्येत्यत्रापि भेदनिर्देशः। तथा च स्वे महिम्नीति भेदनिर्देशस्याभेदोपचारकस्य दर्शनात्। तथात्मरतिरित्यादेर्भेदनिर्देशस्याभेदोपचारकस्य दर्शनादित्यर्थः। भेदविरुद्धेति। अभेद इत्यत्र विरोधो नञर्थः षट्सु नञर्थेषु। भावप्रधानो भेदविरुद्धशब्दः। भेदविरुद्धत्वं भेदविरोधः भेदविरुद्धा सम्पत् भेदविरुद्धसम्पत् तस्याः तादात्म्येन तदात्मनो भावेन ब्रह्मत्वादिना रूप्यते व्यवह्रियत इति तादात्म्यरूपस्तस्य अभेदस्य।

---

१. साम्यम्।

भाष्यप्रकाशः ।

विरुद्धसम्पदस्तादात्म्यरूपस्याभेदस्याङ्गीकारेणैव दोषनिवृत्तौ उपचारेण तत्र व्याख्यानस्यानुचितत्वात् । न चांशांशिभावेन नानात्वापत्त्या, 'नेह नानास्ती'ति विरोधः शङ्क्यः । ऐच्छिकनानात्वस्य स्वरूपैक्याद्यबाधकत्वादिति प्रागेवोक्तत्वादिति । एवमौडुलोमिसूत्रव्याख्यानेऽप्यसङ्गतत्वं द्रष्टव्यम् । औडुलोमिना अपहतपाप्मत्वादीनां धर्माणां शब्दविकल्पजत्वस्य कुत्राप्यनुक्तत्वेन तथापादयितुमयुक्तत्वात् । न च चैतन्यमात्रत्वकथनादेव धर्मनिवृत्तिरिति वाच्यम् । स्वरूपमात्रकथनेपि धर्मानिवृत्तेर्मध्यन्दिने नभोमण्डले सूर्य एवास्तीत्यादिलौकिकवाक्येपि प्रभाकरादिमत एव प्रतिपादनेनादर्शनात् । श्रुतावपि 'एवं वा अरे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'त्यत्रापि अकृत्स्नत्वबुद्ध्युत्पादकधर्माकारसत्तामास्थायैव तेषां धर्म्यनतिरिक्तत्वबोधनाय तस्य प्रज्ञानघनत्वकृत्स्नत्वयोर्बोधनात् । अन्यथा तयोः पदयोः सैन्धवदृष्टान्तस्य च वैयर्थ्यापत्तेर्दुर्वारत्वात् । अत एव सत्यकामादयोऽपि वास्तवा एव, नौपाधिकाः । न चानेकाकारत्वसम्भवो दोषः । 'न स्थानतोऽपी'त्यधिकरणे ब्रह्मणो विरुद्धधर्माधारत्वस्यैव प्रतिपादनात् । अतो न स्वकृततद्व्याख्यानुसरणेनौडुलोमिसूत्रव्याख्यानं युक्तम् । तस्य व्यासमतत्वाच्चेति । एवं वादरायणसूत्रेऽपि व्यवहारापेक्षया पूर्वस्य पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरोधं मन्यते वादरायण इति व्याख्यातम् । तत्रापि व्यवहारापेक्षयेति यदुक्तम्, तदभ्युपगमैकशरणमेव । सूत्रे पूर्वभावपदेन प्राक्कालिकसत्तामात्रस्यैव बोधनेन व्यवहारापेक्षाया

रश्मिः ।

दोषेति । ज्योतिरुपसम्पद्येति कर्तृकर्मव्यपदेशाद्भेदनिर्देशरूपो यो दोषस्तस्य निवृत्तौ । कर्तृकर्मणोर्ज्योतिःसम्प्रसादयोर्भेदनिर्देशो दोषो त्वैक्यलक्षणसायुज्ये वक्तव्ये । स तु ऐक्यलक्षणसायुज्ये वक्तव्ये तस्य तादात्म्यरूपत्वेऽङ्गीकृते नास्तीति व्यर्थो भेदस्याभेद उपचार इत्येवम् । निवृत्तौ स्वरूपैक्यादिति । आदिनैकरसत्वम् । प्रागेवेति । जन्मादिसूत्रे । औडुलोमिनेति । तथापादयितुमित्यनेन आपादयितुमित्यनेनान्वयः । धर्मानिवृत्तेरिति अदर्शनादित्यनेनान्वेति । केत्यत आहुः मध्यन्दिन इत्यादि । आदिना मध्यरात्रौ चन्द्र एवास्तीति । ननु मेघादीनामपि सत्त्वात्कथमेवकारो दीयत इत्यतः कारणमाहुः प्रभाकरादीति । आदिना भट्टभास्करमतेऽपि कथमित्यत आहुः प्रतिपादनेनेति । प्रतिपादनं तु साध्यपरवेदातिरिक्तस्यार्थवादत्वात् । चाक्षुषज्ञानस्यापि प्रातिपदिकार्थे मन्त्रमय्यां देवतायां चक्षुरादिप्रवृत्तेरभावात् । अकृत्स्नत्वेति । अकृत्स्नत्वबुद्ध्युत्पादका धर्माः अनन्तरत्वाबाह्यत्वे तत्प्रतियोगिनी अन्तरत्वबाह्यत्वे च । साकारत्वाद्ब्रह्मणो धर्माणामाकारसत्ता । तेषामिति । धर्माणाम् । तस्येति । आत्मनः । विरुद्धधर्मेति । एवकारेण 'न स्थानतोऽपि परस्योभयलिङ्ग'मित्यत्रानेकाकारत्वप्रतिषेधपरोक्तस्य योगस्तस्य व्यवच्छेदः क्रियते । न स्वकृतेति । चैतन्यमात्रेणैव रूपेणाभिनिष्पत्तियुक्तेति कृता औडुलोमिसूत्रव्याख्या । तस्या अनुसरणेनेत्यर्थः । व्यासमतेति । अरूपवत्सूत्रोक्तव्यासैकदेशिमतत्वात् । यद्वा भवदुक्तव्यासमतत्वात् । पूर्वस्य पूर्वस्येति । य आत्माऽपहतपाप्मेत्यादिना सत्यकामः सत्यसङ्कल्प इत्येवमन्तेनोपन्यासेन पूर्वस्यापहतपाप्मत्वस्य विजरत्वव्यवहारापेक्षया तथा विमृत्युत्वव्यवहारापेक्षया पूर्वस्य विजरत्वस्येत्येवं पूर्वस्य पूर्वस्येत्यर्थः । उपन्यासेति । आदिना स तत्र पर्येति जक्षन् क्रीडन् रममाण इति श्रुत्युक्तधर्मसङ्ग्रहः । इदमेव ब्राह्ममैश्वर्यं रूपं तस्य । अविरोधमिति । ब्रह्मणो मुक्तात्मनः सप्रपञ्चत्वनिःप्रपञ्चत्वयो रविरोधम् । अग्र इति । स उत्तमः पुरुष इत्यस्याग्रे । प्राक्कालिकेति । प्राक्कालपूर्वशब्दार्थः सम्बन्धविशिष्टः

भाष्यप्रकाशः ।

अनुपलम्भादिति । एवं सति यदौडुलोमिमतमनुसृत्य मुक्तस्य मनसा सर्वान् ब्राह्मलौकिकान् कामान् पश्यतोपि विभागेनादर्शनात् सुषुप्ताविवापश्यत्त्वं सर्वैकत्वात् द्वितीयाभावेन व्याख्यातं छान्दोग्यभाष्ये, तदपि प्रकृतविरुद्धम् । 'रमत' इति रमणस्याग्रे कथनात् । न च तत्र 'रमत' इत्यस्य मुख्यार्थो नाभिप्रेत इति वाच्यम् । मानाभावात् । उपक्रमे इन्द्रादेः सर्वलोकसर्वकामप्राप्त्योरेवाभिसंहितत्वकथनेन तद्विरोधाच्च । अतोऽविभागेन दर्शनं शारीरब्राह्मणोक्तायाः सुषुप्तिश्रुतेरेवार्थः, न तु क्रममुक्तिमार्गप्राप्तब्रह्मलोकसुखप्राप्तिबोधिकाया एतच्छ्रुतेरित्यवधेयम् । न च द्वितीये मैत्रेयीब्राह्मणेपि 'न हि द्रष्टुर्दृष्टे'रित्याद्यविभक्तदर्शनश्रुतेर्विद्यमानत्वात्तस्याश्च मुक्तविषयत्वादत्र तथाङ्गीकारे को दोष इति वाच्यम् । विषयभेदात् । तत्र हि, 'प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ती'ति ब्रह्मणि जीवस्य लयनिरूपणेन तथा निश्चयात् । अत एव शारीरब्राह्मणे, 'अथाकामयमान' इत्युपक्रम्य, 'अत्र ब्रह्म समश्नुत' इत्यन्तेनाकामयमानस्यात्मनो ब्रह्मणि लय उक्त इति सायुज्यविषयं मैत्रेयीब्राह्मणवाक्यम् । अतस्तदादायात्र कामवत्प्रकरणे तथापादनं प्रकृतविरुद्धमेवेति दिक् ।

भास्कराचार्यास्तु, सम्पद्याविर्भावसूत्रे इन्द्रप्रजापतिसंवादस्थामेव श्रुतिं विषयत्वेनोपन्यस्य, सर्वाणि सूत्राणि पूर्ववदेव व्याख्याय, जीवब्रह्मणोरौपाधिकभेदः, पारमार्थिकं त्वैक्यमिति स्वीयं सिद्धान्तं चोक्त्वा, जीवस्य ब्रह्माविभागेन स्थितिं चाङ्गीकृत्य, जैमिनीयमतं च पूर्ववदेव व्याख्याय, औडुलोमिसूत्रे एवमाहुः । तथाहि । चैतन्यसन्मात्रेणाभिनिष्पद्यत इत्यौडुलोमिर्मन्यते स्म । कुतः । तदात्मकत्वात् । चैतन्यात्मकं सत्तात्मकं च ब्रह्म । तथा च श्रुतिः, 'एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'ति । तथा, 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति सत्यकामादीनां तु विकल्पमात्रत्वादतत्स्वरूपतेति मन्यते । 'सुषुप्तवन्निःसम्बोधो मोक्ष'

रश्मिः ।

प्राक्कालिका सत्ता भावपदार्थः भू सत्तायामिति धातुपाठात् तन्मात्रस्य । एवकारेण व्यवहारापेक्षायोगव्यवच्छेदः क्रियते । रमत इतीति । रमत इति रममाण इति शब्देन रमणस्याग्रे कथनादित्यर्थः प्रतिभाति । पुस्तके रमत इति पदाभावात् । तत्र रमत इति । रममाण इति श्रौतशब्दस्य रमत इत्यस्य विग्रहस्य । नाभिप्रेत इति । ब्राह्मस्यैश्वर्यरूपस्य धर्मत्वात् । किन्तु गौणोर्थः उत्तमः पुरुष इत्यत्र सर्वकामान्पश्यतोऽपि विभागेनादर्शनात्सुषुप्ताविवापश्यत्वरूपः । अविभागेन दर्शनं वा गौणोर्थः । एतच्छ्रुतेरिति । स तत्र पर्येतीत्यादिश्रुतेः । द्वितीय इति । उभयत्रार्थभेदाभावाय विशेषणम् । कामवदिति । परप्राप्तिप्रकरणे । तथापादनमिति । उत्तमः पुरुष इत्युक्त्यनन्तरं स तत्र पर्येतीत्यत्र रमणस्य मुख्यार्थः स्याद्ब्राह्मस्यैश्वर्यस्य धर्मः स्यादतो गौणोर्थ इत्यापादनम् । प्रकृतेति । उपक्रान्तार्थविरुद्धम् । मनसैतान्कामानाप्नोति सर्वा९श्च कामान्यस्तमात्मानमनुविद्य विजानातीत्युपसंहारादेवकारः । औपाधिकेति । मायोपाधिः । तत्कृतो भेदः प्रातीतिकः ब्रह्म जीवो नेति प्रतीतिः । **स्वीयं भेदाभेदरूपम् एवं वा अर इति** । प्रज्ञानघनोस्तीति क्रियापदं विभक्त्युत्पत्त्यर्थमावश्यकमिति चैतन्यात्मकं सत्तात्मकं च । **सत्यं ज्ञानमिति** अनन्तत्वादानन्दविशेषणं सद्धर्मरूपम् । **सत्यकामादीनामिति** सत्यकामस्यादय अपहतपाप्मादयोपि यासां ताः । सत्यकामआदिर्यस्य सत्यसंकल्पस्य स सत्यकादिः सत्यकामादयश्च सत्यकादिश्च सत्यकामादयस्तेषाम् । सुषुप्तवदिति षष्ठ्यन्ताद्वतिः । **विकल्पमात्रत्वादिति** कदाचित्सत्यकामादयः कदाचिदसत्यकामत्वादयः । साङ्ख्येति

भाष्यप्रकाशः ।

इत्यौडुलोमेरभिप्रायः साङ्ख्यवैशेषिकादीनामिव । इदानीन्तना अपि केचिदेतदेवं दर्शनं प्रतिपन्ना इति । बादरायणसूत्रं त्वेवं व्याकुर्वन्ति । तथाहि । एवमपि चैतन्यमात्रत्वेपि पूर्वस्याप्यैश्वर्यरूपस्य भावात् । कथम् । उपन्यासात् पूर्वोक्तेन जैमिनीयेन हेतुना उभयेषां वेदवाक्यानां प्रामाण्याविशेषात् । असाधारणत्वाच्चापहतपाप्मादिगुणानां व्यतिरिक्ताव्यतिरिक्तस्वभावत्वादविरोधं भगवान् बादरायणः परिनिश्चिकाय । न च गुणगुणिनोरेकत्वानेकत्वविरोधः । यथाग्निरेकः सप्तजिह्वः प्रकाशवानूर्ध्वज्वलन उष्ण इति न नानात्वम्, यथा च उद्यद्दिनकर एकं किरणजालमन्त्रनिमण्डले प्रथयन्नानेको भवतीति ।

अत्र वैशेषिकाः प्राहुः ससम्बोधो मोक्षो नोपपद्यते सर्वज्ञत्वादिगुणयुक्तः । दुःखनिवृत्तिमात्रं मोक्षः । आनन्दादिशब्दाश्च दुःखनिवृत्तिमात्रावलम्बनाः । यदि च सुखे रागेण प्रवर्तेत, ततो बन्ध एव स्यात् । गुणस्य बन्धहेतुत्वात् । शरीरेन्द्रियमनसां निवृत्तौ विज्ञानोत्पत्तिहेत्वभावात् । मुक्तो निःसंज्ञः पाषाणकल्पोऽवतिष्ठते ।

साङ्ख्याः पुनश्चैतन्यस्वभाव आत्मा, तस्य द्रष्टुः स्वरूपे चैतन्यमात्रेऽवस्थानमसम्प्रज्ञातयोगनिष्पत्तौ मोक्ष इति मन्यन्ते ।

तत्राऽभिधीयते । यत्तावदुक्तं रागो बन्धहेतुरिति । तदयुक्तम् । शास्त्रादयं विभागो गम्यते । यथा स्वदारगमनं नाधर्माय, तथा विषयविषयो रागो बन्धहेतुः, निरतिशयानन्दब्रह्मविषयो मुक्तये । न चानन्दशब्दो दुःखाभाववचनः । शतगुणोत्तरोत्तरक्रमेण उत्कर्षापकर्षौ प्रतिपाद्य निरतिशयस्य ब्रह्मानन्दस्योपदेशात् । न चाभावस्य निरुपाख्यस्योत्कर्षापकर्षौ । लोकेपि दुःखतारतम्यं सुखतारतम्यं च परस्परविलक्षणं प्रत्यक्षेणानुभूयते । तस्मान्मुक्तः कारणात्मानमाप्तस्तद्वदेव सर्वज्ञः सर्वशक्तिः सर्वात्मापि भवतीति जैमिनिबादरायणयोरभिप्रायः । ततो ये वेदबाह्या वैशेषिकाः साङ्ख्यास्तत्पक्षाऽवलम्बिनश्च, ते सर्वेऽपसिद्धान्तिनः, तर्कमत्राशरणत्वादिति । यदि च विज्ञानमात्रं ब्रह्म, तदानन्दपदमनर्थकम् । न हि चैतन्यमात्रमानन्दः । दुःखावस्थायामपि चैतन्यानुवृत्तिदर्शनात् । न च दुःखनिवृत्तिमात्रमानन्दशब्दार्थ इति युक्तम् । तस्मात् स्वयं संविदितमेव सुखं सर्वदा मुक्तस्याभ्युपेयमिति ।

रश्मिः ।

वैशेषिका नैयायिकविशेषाः । आदिना मायावादिनः तदनुसारिणः दर्शनं शास्त्रं ज्ञानं वा । आभावादितिपदच्छेदः । ऐश्वर्यरूपस्याभावादित्यत्र । हेतुनेति । प्राबल्येणेत्यनेन सधर्मप्रतिपादकेन । व्यतिरिक्तेति । 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति सूत्रात् । परिनिश्चिकायेति । चिञ् चयने परिनिःपूर्वकः, लिट् । एकत्वेति । धर्माणां धर्म्यभेदपक्षे । सप्तजिह्व इति । 'सप्त ते अग्ने समिधः सप्त जिह्वाः' इति श्रुतेः । रागेणेति । अपहतपाप्मत्वादिधर्मैं रागेण । एवेति । लोके तथादर्शनादेवकारः । तस्येति । जीवात्मनः । असम्प्रज्ञातेति । असम्प्रज्ञातसमाधिनिष्पत्तौ । न संप्रज्ञातं स्वरूपं यत्र योगसूत्रमत्र । 'देशबन्धश्चित्तस्य धारणा । तत्र प्रत्ययैकतानता ध्यानम् । तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधि'रिति सूत्रत्रयम् । निरतिशयेति । निरतिशयानन्दो ब्रह्म यदि भक्तिविषयः । प्रतिपाद्येति । तैत्तिरीये आनन्दमीमांसायां प्रतिपाद्यः उपदेशादिति । 'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द' इत्यत्र 'यतो वाचो निवर्तन्त' इति श्रुत्येकवाक्यतयोपदेशात् । निरुपाख्यस्येति । द्वितीयाध्यायतर्कपादे नास्तिकमतोक्तौ । लोकेपीति । परविलक्षणं चेत्यन्वयः । इति युक्तमिति । 'दुःखाभावं सुखं चैव पुरुषार्थद्वयं मत'मिति वाक्यविरोधात् । स्वयं संविदि-

भाष्यप्रकाशः ।

अत्र पूर्वेषां सूत्राणां शङ्कराचार्यवदेतैर्योऽर्थ उक्तः, स तु तदुत्तरेणैव दत्तोत्तरः । शेषं त्वविरुद्धत्वादनुमन्यामहे ।

रामानुजाचार्यास्तु—परं ब्रह्मोपासीनानामात्मानं च प्रकृतिवियुक्तब्रह्मात्मकमुपासीनानामर्चिरादिमार्गेणापुनरावृत्तिलक्षणा गतिरुक्ता । इदानीं मुक्तानामैश्वर्यप्रकारं चिन्तयितुमारभत इति पादद्वयार्थमुक्त्वा, सम्पद्याविर्भावसूत्रे छान्दोग्यस्थप्रजापतिवाक्यगां तामेव श्रुतिं विषयत्वेनोपन्यस्य, पूर्वोक्तवदेव सर्वं सिद्धान्तपर्यन्तमुक्त्वा, अविभागेन दृष्टत्वादिति द्वितीयेऽधिकरणे, किमयं प्रत्यगात्मा स्वात्मानं परमात्मनः पृथग्भूतमनुभवति, उत तत्प्रकारतया तदविभक्तमिति संशये, 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्, तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति,' 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता' इत्यादिश्रुतिस्मृतिभ्यां मुक्तस्य परेण साहित्यसाम्यसाधर्म्यप्रतिपादनात् पृथग्भूतमेवानुभवतीति प्राप्ते, अनेन सूत्रेण परस्माद् ब्रह्मणोऽविभागेन स्वात्मानं मुक्तोऽनुभवतीति प्रतिपाद्यते । तत्र हेतुर्दृष्टत्वादिति । 'परं ज्योतिरुपसम्पद्य निवृत्ताविद्यातिरोधानस्य याथातथ्येन स्वात्मनो दृष्टत्वात् । स्वात्मनः स्वरूपं हि, 'तत्त्वमसि,' 'अयमात्मा ब्रह्म,' 'ऐतदात्म्यमिदं सर्वम्,' 'सर्वं खल्विदं ब्रह्मे'त्यादिसामानाधिकरण्यनिर्देशैः 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरम्', 'अन्तःप्रविष्टः शास्ता जनाना'मित्यादिश्रुतिभिः परमात्मात्मकं तच्छरीरतया तत्प्रकारभूतमिति काशकृत्स्नसूत्रे सिद्धम् । अतोऽविभागेन 'अहं ब्रह्माऽस्मी'त्येवानुभवात्तैर्वाक्यैः साम्यसाधर्म्यव्यपदेशो ब्रह्मप्रकारभूतस्यैव प्रत्यगात्मनः स्वरूपं 'तत्सम'मिति श्रुतिः प्रतिपादयति । सहश्रुतिस्त्वेवंभूतस्य प्रत्यगात्मनः प्रकारिणा ब्रह्मणा सह तद्गुणानुभवं प्रतिपादयतीति न कश्चिद्विरोधः । 'सङ्कल्पादेव तच्छ्रुतेः,' 'अधिकं तु भेदनिर्देशा'दित्यादेश्च न विरोध इति ब्राह्मदेहेन जीवस्य तत्र भोगं परमात्मसङ्कल्पात् कर्मानधीनत्वभगवत्सृष्टपदार्थैरेव तद्भोगं स्वसृष्टपदार्थैश्च लीलारसभोगादिकमङ्गीकुर्वन्ति । तत् सिद्धान्तादविरुद्धमित्युपादेयम् ।

रश्मिः ।

तमिति । इदं पाषाणकल्पस्य मुक्तस्यापि ज्ञेयम् । सतः पाषाणकल्पस्यानन्दजनकत्वात् । **अत्रेति भास्कराचार्यमते ।**

परं ब्रह्मेति परं ब्रह्म मायारूपाचिद्विशिष्टं तस्योपासीनानां विशिष्टत्वनिरूपकाणां चिताम् । आत्मानं विशिष्टं प्रकृतिरचित्तद्वियुक्तम् । **उपासीनानामिति** चिताम् । विशिष्टाद्वैतं मतम् । **ऐश्वर्येति ।** ईश्वरत्वं यज्ञातं तस्य प्रकारम् । **तत्प्रकारेति ।** ईश्वरत्वप्रकारतया **श्रुतिस्मृतिभ्यामिति ।** द्वित्वमविवक्षितम् । श्रुतिस्मृतिभ्य इत्यर्थः । रामानुजभाष्ये तु इत्यादिश्रुतिस्मृतिभ्य इति पाठः । तथा च लेखकदोषाद् द्विवचनमत्र । **साहित्येति ।** यथाक्रमं त्रिषु वाक्येषु बोध्यम् । **इत्यादि सामानाधिकरण्येति ।** सामानाधिकरण्यं, भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थप्रतिपादकत्वम् । तत् तत्त्वमित्यत्र 'अयमात्मेत्यत्र' 'ऐतदात्म्यमिदं सर्व'मित्यत्र सर्वमिदं ब्रह्मेत्यत्र सामानाधिकरण्यनिर्देशास्तैः । अन्तर्यामिब्राह्मणे परमात्मशरीरतया परमात्मप्रकारभूतम् । आत्मशरीरः परमात्मेति । तत्सममिति साम्यश्रुतिः । **न विरोध इति ।** अधिकसूत्रोक्ते ब्रह्मणो जगत आधिक्येपि सङ्कल्पसूत्रोक्तपरमात्मसङ्कल्पाद्भोग इति न विरोध इति हेतोः । **तत्रेति ।** चिदचिद्विशिष्टे । **कर्मानधीति ।** कर्मानधीनत्वेन रूपेण यो भगवान् जीवीयकर्मानुरोधी भगवानित्युक्तम् । तेन सृष्टैः पदार्थैः तद्भोगं जीवकर्मकं भोगम् । **स्वसृष्टेति ।** आत्मसृष्टपदार्थैः । **ली-**

सङ्कल्पादेव च तच्छ्रुतेः ॥ ८ ॥

एवं परमाप्तिः केषाञ्चिदेव भवति । तत्र हेत्वपेक्षायामाह । भजनानन्दं दातुं यमेव सङ्कल्पविषयीकरोति, स एवैवं प्राप्नोतीति भगवत्सङ्कल्प एव तत्र हेतुः । तत्र प्रमाणमाह । तच्छ्रुतेः 'नायमात्मे' त्युपक्रम्य, 'यमेवैष वृणुते तेन लभ्य' इति श्रुतिः श्रूयते, अतः स एवात्र हेतुः । श्रुतौ प्रवचनादिनिषेधः कृत इत्यत्राप्येवकार उक्तः । चकारात्तज्जनितैवैतदनुरूपा परमार्तिः संगृह्यते ॥ ८ ॥

भाष्यप्रकाशः ।

शैवस्तु–तन्मतस्यैव चौरः शैवीः श्रुतिस्मृतीरुपन्यस्य स्वं मतं ततो भिनत्ति । तत्र शिवपदस्य नारायणादिपदवत् परब्रह्मवाचकताया वाराहपुराणे उक्तत्वात् स्वरूपभेदकत्वाभावे कोपि न विरोधः । रूपभेदकत्वे तु नृसिंहपूर्वतापिनीयोक्तादिरीत्या तत्रोत्कर्षविश्रान्त्यभावस्य प्रहस्ताख्ये वादे निपुणतरमुपपादितत्वान्न तस्मिन् परत्वमिति न तदर्थमधिकं किञ्चिदुच्यते ।

माध्वास्तु—कर्मनाशाख्यं फलं प्रथमपादे, देवानां मोक्ष उत्क्रान्तिश्च द्वितीयपादे फलम्, मार्गो गम्यं च तृतीये पादे फलम् । एवं त्रयं पूर्वमुक्त्वा चतुर्मुखेन सह परं ब्रह्म प्राप्तानां यस्तत्र भोगः क्रमप्राप्तः, तमत्र पादे वदतीति पादार्थमुक्त्वा, 'सम्पद्याविर्भाव' इत्यत्र 'सम्पद्याविहाये'ति पाठमङ्गीकुर्वन्तोऽविभागसूत्रपर्यन्तं प्रतिसूत्रमधिकरणभेदमङ्गीकुर्वन्तः प्रथमे मुक्तस्य ब्रह्मानतिक्रमेण भोगम्, द्वितीये ब्रह्मप्राप्तस्य मुक्तत्वम्, तृतीये मुक्तप्राप्यस्य परस्य ज्योतिषः परमात्मत्वम्, चतुर्थे च ब्रह्मप्राप्तिं सायुज्यादिरूपामुक्त्वा, तेषां ब्रह्ममुक्तबहिष्ठभोगभोक्तृत्वं प्रतिपादयन्ति । 'ब्राह्मेणे'ति त्रिसूत्रेऽधिकरणे च चिन्मात्रदेहानां भगवत्सायुज्यं प्राप्तानां ब्रह्माङ्गानुगृहीतैः स्वाङ्गैर्भोगं प्रतिपादयन्ति । तत्रोदासीना वयम् ॥ ७ ॥

सङ्कल्पादेव च तच्छ्रुतेः ॥ ८ ॥ सूत्रमवतारयन्ति एवं परेत्यादि । व्याकुर्वन्ति भजनेत्यादि । स एवेति । वरणरूपः सङ्कल्पः । अत्रापीति । सूत्रेपि ॥ ८ ॥

रश्मिः ।

ल्लारस्येति । आदिना ससम्बोधो मोक्षस्तम् । शैव इति । भगवान् शैवः । नृसिंहेति । आदिनाथर्वशिर आदिस्तत्र ज्ञानेन भक्तेति शिवविशेषणात्तदुक्तरीत्या । भजनीये उत्कर्षविश्रान्त्या । तत्र शिवे । वाद इति द्वितीये वादे । तस्मिन्निति शिवे । तदर्थमिति शिवमतनिवृत्तये । अनतिक्रमेणेत्यविहायेत्यस्यार्थः । तेषामिति । मुक्तानाम् । ब्रह्माङ्गेति । ब्रह्माङ्गं कारणं कारणमनु पश्चात् कार्याणीव गृहीतैः स्वाङ्गैः मुक्तानामङ्गैः । उदासीना इति । पूर्ववद्व्याख्यानम् ॥ ७ ॥

सङ्कल्पादेव च तच्छ्रुतेः ॥ ८ ॥ भाष्ये । वरणं सङ्कल्पः । वृङ् सम्भक्तौ । तथा च । प्रमेयबलं सङ्कल्पः । क्लृप् सामर्थ्ये । बलं सामर्थ्यम् । सामर्थ्येन वरणमिति सङ्कल्पकार्ये सङ्कल्पपदं लाक्षणिकम् । बलं भक्तिरिति भाष्यम् । सङ्कल्पविषयो भक्तः विषयविषयिभावः । फलकर्मणोः सम्बन्धः तदनुकूलो व्यापारो भगवन्निष्ठः । एतद्यमेव सङ्कल्पविषयं करोतीति भाष्येणोक्तम् । एवं च पुष्टिभक्तिजभगवदावेशे पूर्वसूत्रोक्ते सङ्कल्पो हेतुः । तत्र चतुर्षु आद्य आर्तोधिकारी । तदुक्तं 'विरहातुरात्मे'त्युद्धववाक्यं तृतीयस्कन्धे । 'ममार्तायाः सखे दर्शय सन्निधि'मिति पञ्चाध्याय्याम् । तदेतदाहुः । चकारादिति । अनुक्तसमुच्चयार्थकात् । वरणजनितैव । एवकारेण लौकिकविषयालब्धिजनितत्वयोगव्यवच्छेदः क्रियते । तदनुरूपेति । भगवदानन्दाशनानुरूपा न तु तूष्णीं दुःखरूपा तस्या निषेधात् । 'नोत दुःखता'मिति श्रुतौ । दुःखतां दुःखसत्तां पश्यतीत्यन्वयः । परमार्तिरधिकारः ॥ ८ ॥

अत एव चानन्याधिपतिः ॥ ९ ॥

यतो हेतोः साधनं फलं चोक्तरीत्या स्वयमेव, नान्योऽतो हेतोस्तेषां हृदि साधनत्वेन फलत्वेन प्रभुरेव स्फुरति, नान्यः, तेनानन्यास्ते । तेषामेवाधिपतिः पुरुषोत्तमः । अन्यत्राधिपत्यं विभूतिरूपैः करोति, अतः 'सर्वस्याधिपति'रितिश्रुतिरपि तदभिप्रायेणैवेति भावः। चकारात्, 'मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपी'ति भगवद्वाक्यं सङ्गृह्यते । अन्यथा सर्वज्ञस्याकुण्ठितज्ञानशक्तेरेवं कथनमयुक्तं स्यात् । अतः पुष्टिमार्गोऽनुग्रहैकसाध्यः प्रमाणमार्गाद्विलक्षणः, तत्र विश्वासश्च तथेति सिद्धम् ॥ ९ ॥

भाष्यप्रकाशः ।

अत एव चानन्याधिपतिः॥९॥ व्याकुर्वन्ति यत इत्यादि । यतो हेतोः पुष्टिमार्गीयाणां वरणादिरूपं साधनं स्वस्वरूपात्मकं फलं च स्वयमेवातस्तथेत्यर्थः । 'सर्वस्य वशी'त्यादिश्रुतिविरोधपरिहारायाहुः अन्यत्रेत्यादि । शेषं स्फुटम् । विश्वासस्तथेति । अनुग्रहैकसाध्यः ।

अत्रान्ये मुक्तसङ्कल्पं व्याकुर्वन्ति । 'अनन्याधिपति'रित्यत्र च जीवस्य स्वाधीनताम् । तद्यदि, 'सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपति'रिति श्रुतिं नोपरुन्ध्यात्तदोपादेयम्, अन्यथा तूपेक्ष्यम् ॥ ९ ॥

रश्मिः ।

अत एव चानन्याधिपतिः ॥ ९ ॥ साधनमिति । आदिना सङ्कल्पो वरणजनकः । स्वस्वरूपेति । वृतस्य भक्तस्य शरीरात्मनोरभेदा'त्तस्यैष आत्मा वृणुते तनुं स्वा'मित्यत्र लभ्यविवरणे वृतनिवेशात् स्वस्वरूपं स्वं आत्मा तस्य स्वरूपं वृतभक्तनिष्ठं वरणादि तत् आत्मनि शरीरे लभ्यविवरणशरीरे यस्य साधनस्य तत्स्वस्वरूपात्मकम् । फलं लभ्यपदोक्तम् । तथेति । पूर्वसूत्रोक्तरीत्या स्वयमेवेत्यादिः । अनन्या इति । न अन्यत् फलमिन्नं साधनादि हृदि येषां ते अनन्याः । तादात्म्याधिपत्यमुक्तम् । भेद आधिपत्यमाहुरित्याशयेनाहुः सर्वस्येति । विरोधस्तु मुक्तौ भेदाभावात् प्रशासनस्य भेदाधीनत्वात् । अन्यत्रेत्यादीति । मायाभेदविशिष्टे जगति । विभूतीति । ब्रह्मादिभिः । तद्भीति । विभूत्यभिप्रायेण । पुरुषोत्तमस्य भक्तैः सह निगूढभावकरणातिरिक्तस्वक्रीडाभावादेवकारस्तद्योगं व्यवच्छिनत्ति । अनुग्रहेति । विश्वासस्य पुष्ट्यन्तर्गतत्वात्तथा । मुक्तसङ्कल्पेति । दहरविद्यायां 'अथ य इहात्मानमनुविद्य व्रजन्त्येताꣳसत्यान् कामाꣳस्तेषाꣳसर्वेषु कामचारो मवती'ति । आत्मानुवेदिनो मुक्तास्तेषां सङ्कल्पा अव्यवहितोत्तरश्रुतिषु 'स यदि पितृलोककामो मवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ती'त्यादिषु । एकत्वमविवक्षितम् । स्वाधीनतामिति । नान्योधिपतिर्यस्येति । अत एवेत्यस्यावन्ध्यसङ्कल्पादेवेत्यर्थः ॥ ९ ॥

अभावं बादरिराह ह्येवम् ॥ १० ॥

मुक्तोऽपि जीवः पुष्टिमार्गेऽङ्गीकृतो भगवद्दत्तं विग्रहं प्राप्य भजनानन्दं प्राप्नोतीति सिद्धम् । अत्र प्रत्यवतिष्ठते । बादरिराचार्यो मुक्तस्य देहाद्यभावं मनुते । तत्र हेतुराह ह्येवमिति । ब्रह्मविदो हि मुक्तिरुच्यते । 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यती'त्याद्युक्त्वा, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये' दित्यादिना द्वितीयज्ञाननिषेधमाह ब्रह्मविदः श्रुतिः । तथा च तस्य कामभोगवार्ता दूरतरेति, तदाक्षेप्यदेहोपि तथा ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

जैमिनिराचार्यस्तु मुक्तस्य पुंसो देहादेर्भावं सत्तां मन्यते । तत्र हेतुः विकल्पेत्यादि । 'ब्रह्मविदाप्नोति पर'मिति श्रुत्या ब्रह्मज्ञानस्य तत्प्राप्तिसाधनत्वमुच्यते । 'नायमात्मे'ति श्रुत्या तु वरणमात्रप्राप्यत्वम् । 'सोऽश्नुत' इत्यादिना च परप्राप्त्युपन्यासः क्रियते । 'इहैव समवनीयन्ते' 'ब्रह्मैव सन् ब्रह्माऽप्येती'ति च पठ्यते । एवं सति मिथो विरोधे तदभावायोक्तव्याख्यानरीत्या ज्ञानमार्गीयस्य ब्रह्मज्ञानेनाक्षरब्रह्मप्राप्तिः, पुष्टिमार्गीयभक्तस्य तु 'सोऽश्नुत' इत्यनेनोक्ता परप्राप्तिरिति व्यवस्थितविकल्प एव श्रुत्यभिमत इति ज्ञायते । तेन, 'नायमात्मे'ति

भाष्यप्रकाशः ।

अभावं बादरिराह ह्येवम् ॥ १० ॥ अत्रेत्यादि । अस्मिन्नर्थे निःसम्बोधनिरानन्दमुक्तिवादी प्रत्यवतिष्ठत इत्यर्थः । तत्र हेतुः । बादरिरित्यादि । शेषं स्फुटम् ॥ १० ॥

एतन्मते कामाशनबोधकश्रुत्यादयः पूर्वकक्षाविश्रान्ताः जैमिनिस्तु पूर्वकक्षाविश्रान्तौ मानाभावात् ब्रह्मविद्वृत्तान्तकथनस्योभयत्र तुल्यत्वान्मार्गभेदेनाधिकारिभेदमङ्गीकृत्योभयव्यवस्थामाह ।

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥ विकल्पामननादिति । विरुद्धाः कल्पाः पक्षाः विकल्पाः श्रुतिषूच्यमानाः, तेषां आमननात् आसमन्तान्मननाद् विचारात् । तथा च ज्ञानप्राप्यत्वविरुद्धं वरणैकलभ्यत्वं कामाशनविरुद्धश्चाप्यय इति साधनयोः फलस्वरूपयोश्च मिथो विरुद्धत्वे सति तदभावायाधिकारिभेद आस्थेय इति ज्ञानमात्रात् साधनात् ब्रह्मभावे तत्र लयः,

रश्मिः ।

अभावं बादरिराह ह्येवम् ॥ १० ॥ निःसम्बोधेति । अर्थबलाच्छब्दोप्यन्यथा नेय इति मत्येदृशो भवति । भाष्ये । तथेति दूरतरः ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥ एवं सतीति भाष्यं विवृण्वन्ति । इति

श्रुतिः परप्राप्तिविषयिणी । 'इहैवे' त्यादिश्रुतिस्तु मर्यादामार्गीयविषयिणीति मन्तव्यम् । एवं सति पुष्टिमार्गीयस्य भोगसाधनात्मकविग्रहवत्त्वं निष्प्रत्यूहं सिध्यति । 'तत् केन कं पश्ये' दित्यादिना तु ब्रह्मज्ञानसामयिकीं व्यवस्थामाह, न तु तदुत्तरकालीनपरप्राप्तिसामयिकीमिति किमनुपपन्नम् ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

ब्रह्मणा सह सर्वकामाशनप्रयोजकं शरीरं शरीरत्वस्य भूतजन्यत्वव्याप्यत्वात्तदभावेनाशरीररूपम्, तद्भोगायतनत्वेन शरीररूपमपीति बादरायण आचार्यो मन्यते । अत्र हेतुः, अत इति । तथाविधश्रुतेरित्यर्थः । तथाहि । 'भूमैव विजिज्ञासितव्य'इत्युक्त्वा, तत्स्वरूपमाह 'यो वै भूमा तत्सुख'मित्युपक्रम्य,

---

भाष्यप्रकाशः ।

वरणसहकृतात्तु तल्लाभः स्वाधीनतया स्वरूपानुभावात्मक इति श्रुत्यभिप्रेतस्य व्यवस्थितविकल्पस्य सम्यग्विचारात् तथेत्यर्थः । शेषं स्फुटम् ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥ भगवान् व्यासस्तु जैमिन्युक्तव्यवस्थां बादर्युक्तं द्वैतदर्शननिषेधं चाङ्गीकृत्य जैमिन्युक्तात् कश्चिद्विशेषमाहेत्याशयेन सूत्रं व्याकुर्वन्ति **ब्रह्मणा सहेत्यादि** । एवमधिकारिभेदमार्गभेदाभ्यां मुक्तस्य देहसत्तायास्तदभावस्य च प्राप्तौ यस्य शरीरं प्राप्तम्, तत् कीदृशमित्यपेक्षायां तच्छरीरं उभयविधम्, केनचिद्धर्मेण शरीररूपम्, केनचिद्धर्मान्तरेण अशरीररूपमित्येवं द्विविधमिति बादरायण आचार्यो मन्यत इत्यर्थः । हेतुबोधिका श्रुतिः कुत्रास्तीत्याकाङ्क्षायामाहुः तथाहीत्यादि । तथा तत्प्रकारकं हि यतो हेतोः, 'भूमैव विजिज्ञासितव्य' इत्याद्युक्त्वा तस्य शरीरस्य स्वरूपमाह । तथा च छान्दोग्ये भूमविद्यायामस्तीत्यर्थः । ननु तत्र भूम्नः स्वरूपमुच्यते, न शरीरस्येत्यत आहुः यो वा इत्यादि । सत्यं भूम्नः स्वरूपमुच्यते, तथापि तस्य सुखरूपत्वमुपक्रम्याग्रे सुखरूपतया तदुच्यते, इत्येवं

रश्मिः ।

साधनयोरित्यादि । **वरणसहकृतादिति** । अनुग्रहजपुष्टिभक्तिरूपात्साधनात् । 'वशे कुर्वन्ति मां भक्त्ये'ति वाक्यादाहुः । **स्वाधीनतयेति** । तथा च एवमपि उपन्यासादिति सूत्रभाष्यं भगवदानन्दमश्रुत इति । **तथेति** । ज्ञायत इत्यर्थः । **शेषमिति** । तेन नायमात्मेत्यादि भाष्यं स्फुटम् । तथाहि । **मर्यादामार्गीयविषयिणीति** । मर्यादामार्गीयसद्योमुक्तिविषयिणी । **ब्रह्मज्ञानसामयिकीमिति** । गीताष्टादशाध्यायोक्तसात्त्विकज्ञानसामयिकीमिति ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥ ब्रह्मणा सहेत्यादीति । **भूतजन्यत्वेति** । भूतजन्यं शरीरत्वात् । देवदत्तशरीरवत् । **तदभावेन** भूतजन्यत्वाभावेन । तदिति भिन्नं पदम् । **एवमपीति** । बादरिरर्थार्थी अधिकारी । जैमिनिरार्त्तोधिकारीत्यधिकारिभेदः । अधिकारभेदे तत्कृतो मार्गभेदः ताभ्याम् । **केनचिदिति** । भोगायतनत्वेन धर्मेणेत्यर्थः । **केनचिदिति** । भूतजन्यत्वाभावेन धर्मान्तरेण । अशरीररूपमित्यत्राभावज्ञानं शरीररूपंप्रतियोगिज्ञानाधीनमिति भाष्यविपरीतक्रमः । भाष्यं तु सूत्रे अनुरुणद्धीत्यदोषः । सूत्रयोरतु शरीराभावः । द्वितीये तु शरीराभावाभावरूपं शरीरमित्यदोषः । **तदुच्यते** । भूमस्वरूपमुच्यते इत्येवं

अग्र उच्यते 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'त्यनेन केवलभावविषयत्वं पुरुषोत्तमलक्षणमुक्त्वा केवलभाववतो भक्तस्य विप्रयोगसामयिकीं व्यवस्थामाह 'स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्ता'दित्यादिना । ततः, 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजान'न्निति पूर्वावस्थामनूद्य, संयोगावस्थामाह 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द' इति वाक्येन, 'सोऽश्नुत' इति श्रुतिसंवादिनमर्थमुक्त्वा, भक्तस्वरूपमाह 'तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण' इत्युपक्रम्य, 'आत्मत एवेदꣳ सर्व'मिति । तेनाशरीरत्वं सिध्यति । अव्ययप्रयोगेणाविकृतावेव पुरुषोत्तमात् प्राणाद्याविर्भाव उच्यते । अत्र ल्यब्लोपे पञ्चमी । पूर्वं विरहदशायां प्राणादयो भगवत्येव लीना आसन्, ततस्तत्प्राकट्ये तत एव प्राणादयोपि सम्पन्ना इति तत्प्राप्तेर्निमित्तत्वम् यतो, विभूतिरूपाणामपि पुरुषोत्तमे लयो नानुपपन्नः ।

भाष्यप्रकाशः ।

गृहीत्वा विभजन्ते । यत्र नान्यदित्यादि, सर्वमितीत्यन्तम् । तथा चात्र नित्यनिरवधिसुखात्मकं भूमानमुपक्रम्य तस्माद् भूम्न आत्मनः सकाशात् प्राणादिसर्वान्तानां देहान्तःस्थानामाविर्भाव उक्तः । तेन तस्य भूताजन्यत्वादशरीरत्वम् । 'आत्मरति'रित्यादिना भोगस्योक्तत्वात्तदायतनत्वेन शरीरत्वमतस्तथेत्यर्थः । ननु ब्रह्मणः सकाशादेव तैत्तिरीयादावपि सृष्टेरुक्तत्वात् कोऽत्र विशेष इत्यत आहुः अव्ययेत्यादि । अत्रेति । 'आत्मत' इति शब्दे । तथा च तत्राकाशवाय्वादिभावापन्नात् सोच्यते, अत्र तु भूमरूपादेवेति विशेष इत्यर्थः । नन्वत्र भक्तस्यैव व्यवस्थोच्यत इत्यत्र किं गमकमत आहुः पूर्वमित्यादि । तथा च यत इदमवस्थाद्वयं क्रमेणोक्त्वा भगवद्दर्शनोत्तरं प्राणाद्याविर्भावं वदतीति भगवत्प्राप्त्यनन्तरभावित्वकथनमेव तद्गमकमित्यर्थः । नन्वानन्दमयाधिकरणे विषयश्रुतौ एवंविदो भक्तस्य एतल्लोकत्यागः, 'अस्मा-

रश्मिः ।

गृहीत्वेति । इत्येवं शरीरपर्यन्तं गृहीत्वा । विभजन्त इति विभागं कुर्वते । शब्दार्थान् । तस्येति । वृतभक्तस्य । तथेत्यर्थ इति । शरीरस्य स्वरूपमुच्यत इत्यर्थः । तेनाशरीरत्वं सिध्यतीति भाष्ये शरीरत्वमप्युपलक्षणविधया ज्ञेयम् । आत्मरतिरित्यादि वक्ष्यमाणभाष्यं त्वनुवादकमिति भावः । तैत्तिरीयादाविति । छान्दोग्यमादिशब्देन । 'सदेव सौम्येदमग्र आसी'दिति । आत्मत इति शब्द इति । आत्मानं प्राप्य प्राणादयो भवन्तीत्यर्थः । भूमरूपादिति । तेन सदेवेत्यत्राप्यानन्दानुक्तेस्ततोऽपि विशेषः । पूर्वमित्यादीति । भगवति लीत्वा प्राणादयः प्रकटन्तीत्यर्थः । ततस्तत्प्राकट्य इति । भक्तेच्छातः । आत्मनः प्राकट्ये सति । तत एव आत्मत एव प्राणादयोऽपि शरीरे सम्पन्ना आक्षिप्ते । तत्प्राप्तेः भगवति लयरूपायाः । निमित्तत्वमिति । 'नासतो विद्यते भावो नाभावो विद्यते सत' इति गीतायास्तथा । ततः किमित्यत आहुः । तथा चेत्यादि । यस्य भगवतो विरहेण लयाख्यप्राप्त्यनन्तरभावित्वकथनं मुक्तस्य तदेव भक्तस्य व्यवस्थाया गमकमित्यर्थः । तथा च छान्दोग्यश्रुतिः मधुब्राह्मणे । 'तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबन्ति तदेवामृतं दृष्ट्वा तृप्यन्ति त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ती'ति । वसवः सर्वात्मभाववन्तः अग्निरूपाः मुखं आचार्याः सर्वात्मभाववन्त इति । तथा चोक्तभाष्येपि भक्त इत्यर्थः । विषय-

भाष्यप्रकाशः ।

ल्लोकात् प्रेत्ये'त्यनेनोक्तः, सोऽत्र 'वाङ्मनसी'त्यादिना, 'सोऽध्यक्षे तदुपगमादिभ्य' इत्यन्तेन व्युत्पादितः । या पुनस्तदग्र 'एतमन्नमयमात्मानमुपसङ्क्रामती'त्यादिना विभूतिरूपाणां प्राप्तिरुक्ता फलानुभवोपयोगिनी, सात्र सम्पद्याविर्भावादिसूत्राभ्यामुक्त्वा, 'ब्राह्मेणे'त्यादि'द्वादशाह'सूत्रान्तैर्व्युत्पाद्यते । फलानुभवस्त्वतिविगाढभावेन सर्वात्मभावे सत्येव भवतीति तद्बोधनार्थं या पूर्वं विरहदशा, सा तत्र ब्रह्मवित्प्रपाठकश्रुतौ 'यतो वाचो निवर्तन्त' इत्यारभ्य, 'उभे ह्येवैष एते आत्मानꣳ स्पृणुत' इत्यन्तेन भृगुप्रपाठके च, 'हा३वु हा३वु' इत्यारभ्य, 'अहं विश्वं

रश्मिः ।

श्रुताविति । 'को ह्येवान्यात्कः प्राण्या'दितिश्रुतौ । इत्यन्तेन सूत्रग्रन्थेन व्युत्पादितः । तदग्र इति । विषयश्रुत्यग्रे तैत्तिरीये । फलानुभवेति । 'अलौकिको महान् भोगः प्रथमे विशते सदे'ति सेवाफलग्रन्थोक्तं फलं तदनुभवोपयोगिनी । अतिविगाढेति । विरहे भवति । 'धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान्कथंचने'त्यत्रातिकृच्छ्रशब्दाद्विगाढः 'ता नाविदन्नि'ति वाक्योक्तो भावो विरहः रसैकदेशः अव्यवहितोत्तरप्राप्तिसाधनत्वात् । सर्वात्मभावः सर्वोप्यात्मनो भावः । या पूर्वमिति । भाष्ये पूर्वं विरहदशायामित्यादिनोक्ता । सा तत्रेति । तैत्तिरीये उपसंहारे अर्थनिर्णायके'अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रामती'त्यादिविभूतिप्राप्त्यनन्तरं तत्सङ्ग्रहश्लोकं तदप्येष श्लोको भवतीत्यनयोक्त्वा ब्रह्मवित्प्रपाठकश्रुतावुच्यते । 'उभे ह्येवैष एते' इति । भक्तिमार्गीयज्ञानमार्गीयौ भक्तज्ञानिनौ विशेषतोनुग्रहवन्तौ । सामान्ये नपुंसकं श्रुतौ । स्पृणुते प्रीणीतः । एकवचनं छान्दसम् । ज्ञानी भक्तः स्पृणुत इत्येकवचनम् । स्पृ प्रीतौ । ननु सर्वात्मभावो भक्तिमार्ग इति उभे इति कथमिति चेन्न । ज्ञानेन भक्तेति श्रुतेः शिवे ज्ञानिनि 'अहं मनुरभवं सूर्यश्चे'ति श्रुतेः सर्वात्मभावदर्शनात् । ननु ज्ञानी तैत्तिरीये कुत्रेति चेन्न । उभे ह्येवैष इत्यस्याः पूर्वश्रुतौ 'एतꣳह वा व न तपति किमहꣳसाधु नाकरवं किमहं पापमकरव'मिति । 'स एवं विद्वानेते आत्मानꣳस्पृणुत' इत्यस्यां विद्वानित्यनेन ज्ञान्युक्तेः । एते तात्पर्यार्थभक्तोऽपि विद्वानित्यस्यार्थः अतो द्विवचनम् । स्पृणुते स्पृणाते । भृगुप्रपाठके चेत्यादीति । पूर्वम् 'एतत्साम गायन्नास्ते' इत्यत्र किमेतत्साम समत्वाद्ब्रह्मैव साम सर्वानन्यरूपं गायन् । कथम् । हा ३वु३ अहो इत्यस्मिन्नर्थेऽत्यन्तविस्मयख्यापनार्थाः । मार्गत्रय आश्चर्यमिति वारत्रयम् । कथमद्वैत आत्मा निरञ्जनः रज उपाधिः ब्रह्मा भक्त्युपाधिः मार्गत्रयेऽपि सन् । अहमेवान्नम् । मार्गत्रये भक्तिमार्गप्राधान्यायान्नस्य त्रिरुक्तिः । 'पृथिवी वा अन्न'मिति श्रुतेः । पृथ्वी भार्या स्त्रीभावे तदभेदः उक्तः । अहमेवान्नमिति । तत एव ज्ञानमार्गेप्यन्यद्विहायान्नाभेदैः । कर्ममार्गे हिरण्यगर्भमुक्तौ पृथिव्यभेदः जगदाश्रयत्वादुभयोर्गौणः । 'कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः । अकर्मणश्च बोद्धव्यं गहना कर्मणो गति'रिति कर्मज्ञो ब्रह्मा उच्यते नान्यः । यद्वा कर्मणा चित्तशुद्धौ भक्त्या मोक्षो ब्रह्मणः । पुनर्विस्मयः । भक्तिमार्गी सर्वात्मभाववान् नान्नमत्ति । उक्तमधुब्राह्मणश्रुतेः । ज्ञानी तु सर्वं ब्रह्मात्मकं पश्यन्नात्ति किन्त्वानन्दो भुनक्तीति मन्यते । कर्ममार्गी तु न भुनक्ति । 'पयोव्रतेन व्रतयतीति' श्रुतेः । ज्ञानं क्रियेति पञ्चरात्र इति पूर्ववन्नात्तीति वा । किञ्चाहमेव श्लोककृत् । अन्नान्नादयोः सङ्घातकर्ता त्रिरुक्तिर्विस्मयख्यापनार्था । श्लोकृसङ्घाते । 'अहमस्मि प्रथमजा ऋतस्येत्यादि' । अहमस्मि भवामि प्रथमजा सोर्डा।प्रथमोत्पन्नः नित्यक्रीडास्थः । नित्यक्रीडास्था द्विविधाः । सनातनाः कृत्रिमाश्च तत्र नित्यक्रीडास्थाः कृत्रिमा इमे इत्याह । ऋतस्येति । ऋतस्य सत्यस्य मूर्तामूर्तस्यास्य जगतः

‘आत्मरति’रित्यादिना, ‘सोऽश्नुत’ इत्यनेन च शरीरत्वम्। जैमिनिरप्यत एव ‘ब्राह्मेणे’ति मनुते। एकस्य विरुद्धोभयधर्मवत्त्वममन्वानं प्रति वैदिकं दृष्टान्तमाह द्वादशाहवदिति। ‘यः कामयेत प्रजायेयेति स द्वादशरात्रेण यजेते’ति चोदनया ‘द्विरात्रेण यजेते’त्यादिवन्नियतकर्तृकत्वेनाहीनत्वं गम्यते द्वादशाहस्य। ‘द्वादशाहमृद्धिकामा उपेयुः। य एवं विद्वाꣳसः सत्रमुपयन्ती’ति श्रुत्या च सत्रत्वं बहुकर्तृकस्य गम्यते। एवमेव द्वादशाङ्गशरीरेन्द्रियप्राणान्तःकरणात्मभिरश्नुत इति सत्रतुल्यत्वम्। वस्तुतो भगवद्विभूतिरूपत्वेन ब्रह्मात्मत्वेनैकरूपत्वम्, अतो द्वादशाहवदुभयविधम्। सत्रे प्रत्येकं चेतनानां यजमानानां फलभागित्ववदत्रापि तादृग्भक्तदेहादीनामपि ब्रह्मात्मकत्वात्। चेतनत्वमेवेत्यप्यनेन

भाष्यप्रकाशः।

भुवनमभ्यभवां सुवर्णज्योती’रित्यन्तेनोक्ता। तथा सति यस्तादृशः स आनन्दमयं ब्रह्मस्वरूपमात्मादेशोक्तप्रकारेणाहङ्कारादेशोक्तप्रकारेण वानुभवतीति सिध्यति, अतो विभूतिरूपाणां प्राणादीनां लयाङ्गीकारोऽनुपपन्न इत्यत आहुः विभूतीत्यादि। अहङ्कारादेशे आत्मादेशे च सर्वस्मिन् स्वाभेदस्यात्माभेदस्य च भानोक्त्या लयस्यार्थादेव बोधितत्वात्। अथ तत्र तेषां भक्तानां पार्थक्येन प्राणाद्यभावनमेवाभिप्रेतम्, न सर्वात्मना लय इत्युच्यते, तदापि तस्यां दशायां ब्रह्मणा सह सर्वकामाशनरूपस्य ‘आत्मरति’रित्यादिनोक्तस्यानुभवस्याभावात् फलतः-

रश्मिः।

देवेभ्यश्च पूर्वम्। तेन नित्यलीलानुकूलजगत्कर्तृस्थः कृत्रिमः। ऋता३स्येत्यत्र प्लुतोकारः। अमृतस्य नाभा ईति। नाभौ मध्ये मुख्ये वा तत्संस्थम्। अमृतत्वं प्राशानां ‘ई’ आश्चर्ये। यद्वा नाभा ई नाभिमध्यं तत्संस्थममृतत्वं प्राशानाम्। रासस्थसुधाप्राशानाम्। समानवायुप्राशानां वा। समानस्य नाभिसंस्थितत्वात्। ‘समानो नाभिसंस्थित’ इति वाक्यात्। आचार्यपूजनं नित्यक्रीडायामाह। यो मा ददाति स इदेव मा३वा हेति। यः कश्चिदाचार्यः मां अन्नं अर्थार्थिभ्यो ददाति। अन्नात्मना ब्रवीति कथाद्वारा। यथा ‘आत्मना प्रथमा क्रीडे’ति पञ्चाध्याय्याम्। स इत् इत्थं एवमविनष्टं यथाभूतं मा मां वाह अचतीत्यर्थः। अञ्चुगतिपूजनयोः ‘अच’ इत्येके। अहमन्नमन्नमदन्तमाद्मीति। यः पुनरन्यो मामदत्वार्थिभ्यः काले प्राप्तेन्नमभितोऽदन्तं अहमन्नमेव सम्प्रत्यद्मि। अहं विश्वं भुदनमभ्यभवां सुवर्णज्योतीरिति। अहं विश्वं समस्तं भुवनमभ्यभवाम्। अभिपरेणेश्वरेण। सुवर्णम् सुवरादित्यो नकार उपमार्थः। आदित्य इव सकृद्विभातमस्मदीयज्योतिःप्रकाशः। प्रकृतमनुसरामः। **तादृशा इति**। विरहदशायां प्राप्तभूमः। भगवति लीनः पुनः प्रकटः सम्भ्रमचरमवृत्त्यानुभवतीत्याहुः। **आत्मादेशोक्तेति**। आत्मा ब्रह्म तत्पदवाच्यः। अयं व्यष्टिप्रकारः सपुष्टिप्रकारमाहुः। **अहङ्कारादेशोक्तेति**। भक्तसंवलित आत्मेति पुष्टिफलम्। चकारोऽनुक्तसमुच्चये। आत्मादेशोक्तप्रकारेण च। **लयाङ्गीकार इति**। प्राणादयो भगवत्येव लीना इत्युक्तभाष्योक्तलयाङ्गीकारः। **स्वाभेदस्येति** जीवाभेदस्य। अथातोहङ्कारादेश इत्युपक्रमादात्मधर्माणामुपरिष्टात्वादीनामहङ्कारेणाध्यासक इति। अत्र बोध्यम्। तादात्म्यरूपाद्वैतात्। **लयस्यार्थादेवेति**। लयमन्तराऽभेदमानासम्भवात्तथा। फलाध्याये तादात्म्यरूपाभेदविवक्षणादाहुः। **अथ तत्रेति**। **तस्यामिति**। पूर्वोक्तायां दशायां विरहदशायामिति यावत्। **अभावादिति**। प्राणादीनां लयेनाभावात्। **तौल्यमिति**। सर्वात्मना लयेन तौल्यम्। ‘आन्तरन्तु परं फल’मिति सुबो-

भाष्यप्रकाशः ।

तौल्यमेव । वस्तुतस्तु तदग्रे 'तस्य ह वा एतस्ये'त्यादिना आत्मतः प्राणादीनामाविर्भावश्रावणात्तदन्यथानुपपत्त्यैव लयाङ्गीकारः, अतो नानुपपन्न इत्यर्थः । एवमशरीरत्वबोधिकां श्रुतिं व्याख्याय शरीरत्वसाधिकां श्रुतिमाहुः आत्मरतिरित्यादि । तेन तैत्तिरीयसमाप्तौ या दशोक्ता, सा फलानुभवस्य प्रथमावस्थेति बोधितम् । स्वोक्ते पूर्वसूत्रसम्मतिमाहुः जैमिनिरित्यादि । एवं हेतुं व्युत्पाद्य दृष्टान्तं व्युत्पादयन्ति एकस्येत्यादि । दार्ष्टान्तिके योजयन्ति एवमेवेत्यादि । तेन, 'ब्रह्मभावात्तु भक्तानां गृह एव विशिष्यत' इति साधितम् । तथा च भक्तानामेव भोगरूपकार्यबलेन सत्रतुल्यत्वम्, अन्येषां तु तदभावादहीनतुल्यत्वमिति भक्ताभक्तव्यवस्थाबोधनादभक्तस्य बादरेः पूर्वकक्षाविश्रान्तत्वात्तदुक्तमपि युक्तम् । जैमिनेस्तु सर्वत्र दृष्ट्या उत्तरकक्षाविश्रान्तत्वात्तदुक्तमपि युक्तमिति तस्य तस्य तथात्वबोधनायैव स्वमतकथनमित्यर्थः । मर्यादामार्गीया अपि भगवल्लोक एतादृशदेहेनैव यथाधिकारं चतुर्विधमुक्तिभाजस्तिष्ठन्ति । ज्ञापनेनापि पूर्वोक्तं साध-

रश्मिः ।

धिन्याम् । तस्यां दशायां ब्रह्मणा सह सर्वकामाशनस्यात्मरतिरित्यादिनोक्तस्यानुभवस्य सूक्ष्मरूपैर्भावात्तौल्यं नेत्यरुच्या वस्तुतस्तु पक्षमाहुः । **वस्तुतस्त्विति** । **तदग्र** इति । अहङ्कारादेशस्याग्रे । **तदन्यथेति** । आविर्भावो लीनस्येत्याविर्भावान्यथानुपपत्त्या । अन्यथानुपपत्तिरत्र पूर्वमीमांसोक्ता प्रस्थानरत्नाकरेऽङ्गीकृता ग्राह्या । **अनुपपन्न** इति । लयाङ्गीकारो नानुपपन्नः । **तैत्तिरीयेति** । सामगायनेन । **यादृशोक्तेति** । यादृश्युक्तेत्यपि । **प्रथमावस्थेति** । भूमविद्यारूपा । **स्वोक्त** इति । गोस्वाम्युक्ते आचार्योक्ते वा भाष्ये ब्राह्मणेति पूर्वसूत्रसम्मतिमाहुः । **हेतुमिति** । **अत** इति सौत्रं हेतुम् । तथा च बादरायण उभयविधं शरीरमतः भाष्योपपादनादिति सूत्रार्थः । **एकस्येत्यादीति** । विहितोभयधर्मौ शरीराशरीरत्वे । **आहेति** । व्यासो भगवान् । **नियतेति** । एककर्तृकत्वेन । एकत्वविवक्षणात् । **उपेयुरिति** । उप समीपे ईयुः गच्छेयुः कुर्युः आधिदैविकं प्रकटमीयुः । आधिभौतिकं कुर्युः । **उपयन्ति** उपगच्छन्ति कुर्वन्ति । **सत्रत्वमिति** सत्रत्वमुक्तमिति । **बहुकर्तृकस्य** द्वादशाहीनस्य । बहुकर्तृकत्वं सत्रत्वमिति सत्रलक्षणात् । **एवमेवेत्यादीति** । पादौ गुल्फौ जङ्घे स्तनौ करौ शिरः हृदिति द्वादशाङ्गशरीरे । **आत्मा** जीवः । **एकरूपत्वमिति** । तादात्म्यरूपाभेदादेकरूपत्वम् । **उभयेति** । शरीराशरीरत्वे विधेयस्य शरीरस्य तदुभयविधं शरीरम् । **तेनेति** । श्रीभागवते एकादशे सप्तदशेऽध्याये ब्रह्मचर्यगृहस्थाश्रमाभ्यामध्यायं समाप्याष्टादशाध्याये आश्रमद्वयमुक्तम् । तस्मादाश्रमद्वयं गार्हस्थ्यं सन्न्यासश्च मुख्यावितरौ गौणौ । एवं च तेनेत्यस्य द्वयोराश्रमयोर्मुख्यत्वेन तत्रापि ज्ञानिनो भक्तत्वेन ब्रह्मभावाद्भक्तविशेषत्वेनेत्यर्थः । **ब्रह्मभावाद्** भूमविद्याविद्यानन्दानुभवात्पूर्वोक्तात् साधनरूपात् तिरोहितस्याविर्भावे ब्रह्मभावः । सन्न्यासाश्रमाद्वा । गृहाणां बन्धकत्वाद्भक्तानामिति विशेषणम् । 'मद्वार्तायातयामानां न बन्धाय गृहा मता' इति वाक्याद्गृहस्य पुंस्त्वं स्मार्तम् । **विशिष्यत** इति । यथानुग्रहो यस्मिन् जीवे स तादृशं तदाविश्य भगवदानन्दमश्नुत इति । एवमप्युपन्याससूत्रभाष्यात् । एवं पुष्टिमार्गीयाणां फलकथनेन स्मृतेर्मर्यादामार्गीयशरीरस्य शरीराशरीरत्वे आहुः । **मर्यादेति** । **एतादृशेनेति** । अक्षरात्मकेन । परंत्वेष विशेषः । ज्ञानिनो लोके मर्यादाभक्तास्तु चरणात्मकेऽक्षर इति । कृत्स्नभावात्तु गृहिणोपसंहार इत्यत्राप्युक्तम् । अत एव गीतायां मुक्तौ पारिभाषिकत्यागसन्न्यासौ गृहस्थस्यापि सम्भवतः ब्रह्मचर्यं च । **चतुर्विधेति** । सालोक्यसार्ष्टिसामीप्यसारूप्यरूपचतुर्विधमुक्तिभाजः । सायुज्यसार्ष्टिसामीप्यानि

---

१. यादृशोक्तेति रश्मौ ।

दृष्टान्तेन ज्ञाप्यते । अत एव श्रीभागवते 'देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिना'मिति गीयते ॥ १२ ॥

इति चतुर्थाध्याये चतुर्थपादे द्वितीयं ब्राह्मेणेत्यधिकरणम् ॥ २ ॥

तन्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥ (४-४-३)

अथेदं चिन्त्यते । भगवत्स्वरूपे प्राकृतशरीर इवावस्था दृश्यन्ते तत्कालीनैः

भाष्यप्रकाशः ।

यितुमाहुः अत एवेत्यादि । तथा च यत्र जयविजयादीनामप्येवम्, तत्र पुष्टिमार्गीयस्य का वार्तेत्यर्थः । एवं प्रसङ्गेन भगवल्लोकप्राप्तिरूपं फलमुक्तमिति ज्ञेयम् ।

अन्ये तु बादरिसूत्रे, 'मनसैतान् कामान् पश्यन् रमत' इति श्रुतौ 'मनसे'ति विशेषनिर्देशबलान्मुक्तस्य देहेन्द्रियाद्यभावम्, जैमिनिसूत्रे च 'स एकधा भवती'त्यादिविकल्पामननाद्देहेन्द्रियसद्भावम्, बादरायणसूत्रे, उभयश्रुत्यनुरोधान्मुक्तस्य सङ्कल्पेन कदाचित्तदभावं कदाचित्सद्भावं च व्याकुर्वन्ति । तत्र मुक्तसङ्कल्पो यदि परमेश्वरसङ्कल्पानुसारी, तदा तद्व्यापारभूतः, यदि तद्विरुद्धः, तदा अकिञ्चित्करत्वादप्रयोजक इति ध्येयम् ॥ १२ ॥ इति द्वितीयं ब्राह्मेणेत्यधिकरणम् ॥ २ ॥

तन्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥ एवमत्र फलानुभवप्रकारमध्ये देहरूपः प्रकारो विचारितः । अथ 'आत्मा प्रकरणा'दित्यादिसूत्रद्वयोक्तस्य फलस्य प्रकारं विचारयतीत्याशयेनाधिकरणमवतारयन्ति अथेत्यादि । एवमष्टसूत्र्या पूर्वसूत्रद्वयोक्तदेहस्वरूपनिरूपणोत्तरं इदमग्रिमसूत्रद्वयोक्तं भगवत्स्वरूपमनेन प्रकारेण विचार्यते । यद्यपि गुणोपसंहारे भगवतो निर्दोषत्वम्,

रश्मिः ।

सेवाफलत्वे नित्यलीलायामप्याविर्भवन्ति सेवाफलग्रन्थोक्तानि । अत एवेत्यादीति । शरीरस्योभयविधत्वादेव । 'देहेन्द्रियासुहीनाना'मित्यशरीरत्वं शरीरस्य पुरवासिनामिति शरीरत्वम् । जयेति । आदिनाऽऽनन्दादयः । एवमिति । शरीराणां शरीरत्वाशरीरत्वे । जयविजययोर्वैकुण्ठात्पातस्तु प्रश्नोपनिषद्यस्ति । पितृयाणेन याताः पुनरावर्तन्त इति सुबोधिन्यां तृतीयस्य स्पष्टम् । प्रसङ्गेनेति । ब्रह्मप्राप्तिनिरूपणेन स्मृतं भगवल्लोकप्राप्तिरूपं फलं उपेक्षानर्हमिति स्मृतस्योपेक्षानर्हत्वं प्रसङ्गत्वेन । स एकधेति । छान्दोग्ये भूमविद्यास्था । तदभावं शरीराभावम् । तत्सद्भावं शरीरसद्भावम् । परमेश्वरेति । मायोपाधिकसङ्कल्पानुसारी तद्व्यापारभूतः सगुणव्यापारः सगुणो न तु मुक्तनिर्गुणस्य । अकिञ्चित्कर इति । आविद्यकत्वादिति भावः । मुक्तनिष्ठाविद्ययोपमर्द्योपमर्दकभावो न परेषाम् । विद्ययाऽविद्यानाशात् । मुक्तसङ्कल्पो मायिकोऽन्येषामाचार्याणामिति न न्यूनता ग्रन्थे । भास्करभाष्ये मनसैतानिति श्रुतिरस्ति, रामानुजभाष्ये तु नास्ति । 'न ह वा सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती'त्यस्ति । सैतच्छ्रुतेरुपलक्षिकेति ज्ञेयम् । एवमन्यभाष्येषूह्यम् ॥ १२ ॥

इति द्वितीयं ब्राह्मेणेत्यधिकरणम् ॥ २ ॥

तन्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥ फलस्येति । ब्रह्मणा विपश्चितेत्युक्तस्य गुणातीतस्य ब्रह्मरूपस्य । अष्टसूत्र्येति । ब्राह्मेणेत्याद्यष्टसूत्र्या । पूर्वसूत्रेति । 'सम्पद्याविर्भावः स्वेन शब्दात्' 'मुक्तः प्रतिज्ञाना'दिति पूर्वसूत्रद्वयेत्यर्थः । अग्रिमेति । 'आत्मा प्रकरणात्' । 'अविभागेन दृष्टत्वा'दित्य-

पुम्भिरिति कथमप्राकृतत्वमुपपद्यत इति तत्रोपपत्तिमाह। तद्दर्शनस्य वास्तववस्तुविषयकत्वव्यवच्छेदेन पूर्वपक्षव्युदासाय तुशब्दः। तत् प्राकृततुल्यताद्दर्शनं अभावे तथात्वस्याभाव एव भवति, न तु तत्र प्राकृता धर्माः सन्ति। नन्वविद्यमानानामर्थानां कथं दर्शनमुपपद्यत इत्यत आह सन्ध्यवदिति। स्वप्ने यथा वासनावशादविद्यमानानामप्यर्थानां दर्शनं भवति, तथा भगवदिच्छावशात् तत्रापि प्राकृततुल्यत्वदर्शनस्योपपत्तेर्न प्राकृतत्वं तत्र ज्ञेयमित्यर्थः। तथा च श्रुतिः। 'सन्ध्यं तृतीयꣳ स्वप्नस्थानं तस्मिन् सन्ध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च

भाष्यप्रकाशः।

वेधाद्यधिकरणे, अनन्तगुणपूर्णत्वादिकं च, 'व्याप्तेश्च समञ्जस'मित्यवान्तराधिकरणे विचारितम्, तथापि तदेव स्वरूपं फलरूपमिति तत्र न विचारितम्। साधनप्रकरणत्वात्। अतः फलरूपमन्यद्भविष्यतीत्याशङ्कानिरासाय तदेवात्र फलमिति बोधनार्थमवसरसङ्गत्या पुनः परामृश्यते। तथा चात्र फलत्वेन प्रतिपाद्यमानं भगवत्स्वरूपं प्रकृतिसम्बन्धविशिष्टम्, न वेति संशयः। अवस्थादर्शनादाद्यमिति पूर्वपक्षः। तद्दर्शनस्य भ्रान्तत्वान्नेति सिद्धान्त इत्याशयेन सूत्रमवतारयन्ति भग-

रश्मिः।

ग्रिमसूत्रद्वयोक्तम्। अवस्थेति। कृष्णावतारे भीष्मप्रसङ्गे रुधिरक्षतादिप्राकृतबाल्यपौगण्डाद्यवस्थादर्शनात्॥ भाष्ये। आहेति। छान्दोग्यीयश्वेतकेतूपाख्यानस्य द्वितीयोपदेशप्रकारेण व्यास आहेत्यर्थः॥ प्रकृते॥ तद्दर्शनस्येत्यादीति। उक्तप्राकृतधर्माणां दर्शनस्य। तथात्वस्येति। प्राकृतत्वस्य। सन्ध्यं तृतीयमिति। 'तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं चेति सन्ध्यं तृतीय'मित्यादिः पूर्वश्रुतिः। अर्थस्तु तस्य वै प्रसिद्धस्यैतस्य प्रकृतस्य पुरुषस्य द्वे एव स्थाने भवतो न न्यूने। के ते इदं च प्रत्यक्षतोनुभूयमानं जन्मैकं द्वितीयं तु परलोक एव स्थानम्। परलोकस्थानं भावि जन्म। एतयोः सन्धौ भवं सन्ध्यं तृतीयं त्रयाणां पूरणं स्वप्नस्थानम्। तस्मिन् सन्ध्ये स्वप्नस्थाने तिष्ठन् वर्तमानः सन्निदं च परलोकस्थानं चेत्येते उभे स्थाने पश्यति। किमाश्रितः केन विधिना परलोकं पश्यतीत्यत आह। अथेति। यथाक्रमः आक्रमत्यनेनेत्याक्रमः, आश्रयोऽवष्टम्भः विद्याकर्मपूर्वप्रज्ञालक्षणः। यादृश आक्रमो यस्य सोयं यथाक्रमोयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमित्ते यादृशेनाक्रमेण संयुक्तो भवति। तमाक्रमं बीजभूतमाक्रम्यावष्टभ्योभयान्पाप्मनः पापफलानि दुःखानि आनन्दांश्च धर्मफलभूतान् सुखविशेषान् पश्यत्येवंप्रकारेण। धर्माद्देवताप्रसादाद्वान्त्ये वयसि यदिहासम्भाव्यमानं पश्यति स्वप्ने तत्पारलौकिकमेवेत्यर्थः। स खल्वात्मा बाह्यैर्ज्योतिर्भिरसंसृष्टः स्वयमेव यथा ज्योतिर्भवति, तथेदं स्वयंज्योतिष्ट्वं साक्षादवष्टम्भेनाह स इति। स प्रकृत आत्मा यत्र यस्मिन् काले प्रस्वपिति प्रकर्षेण स्वप्नमनुभवति तदा किमाश्रयः केन प्रकारेण च स्वयं प्रतिपद्यते इत्याकाङ्क्षायामाह। अस्येति। दृष्टस्य जागरितलक्षणस्य देहस्य। कथम्भूतस्य। सर्वा भूतभौतिकमात्रा अध्यात्मादिविभागयुक्ताः अस्य संसर्गकारणभूता विद्यन्त इति सर्वावान् तस्य सर्वावतो मात्रामंशं वासनात्मकमुपादाय गृहीत्वा स्वयमात्मैव अनादित्यादिर्जाग्रद्देहं विहत्य निःसम्बोधमापाद्य स्वयमेव स्वकर्मानुसारि स्वज्योतिषाऽलुप्तदृक् स्वभावेन निर्मितं वस्तु विषयीकुर्वन् प्रस्वपिति। अत्रास्यां स्वापावस्थायामयं पुरुष आत्मा स्वयमेव ज्योतिर्भवति। तदादित्यादेरभावादिन्द्रियाणां चोपसंहृतत्वान्मनसश्च विषयाकारेणैवोपक्षयात्। यद्वा परलोकदर्शनार्थं करणत्वेन सङ्ग्रहादिति परिशेषादित्यर्थः। ननु स्वप्नेपि

परलोकस्थानं च । अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति । स यत्रायं प्रस्वपिती'त्युपक्रम्य, 'स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति, न तत्र रथा न रथयोगा न पन्थानो भवन्ती'त्यादिरूपा । एवमेव भगवानासुराणां प्राकृतगुणे तमस्येव दुःखात्मके लयं चिकीर्षुः स्वस्मिन् प्राकृतत्वबुद्धिसंपादनाय तादृशीमिव लीलां दर्शयति, अतो न प्राकृतत्वशङ्कागन्धोऽप्यत्र । अत एव भगवतोक्तं, 'मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयका' इत्युपक्रम्य, 'ततो यान्त्यधमां गति'मिति । तेषामासुरत्वेन मुक्त्यनधिकारित्वात् तथाकरणम् । अतः सुष्ठूक्तं सन्ध्यवदुपपत्तेरिति ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥

लौकिकवद्भासमाने लीलापदार्थे यद्दर्शनं भक्तानाम्, तत् तु भावे विषये विद्यमाने सति भवति । अत्र दृष्टान्तमाह । जाग्रद्वत् । यथा मोहाभाववतः पुंसः सत एवार्थस्य दर्शनं तथेति ।

भाष्यप्रकाशः ।

वदित्यादि । तत्रेति । प्राकृतावस्थादर्शने । व्याकुर्वन्ति तद्दर्शनस्येत्यादि । श्रुतिस्तु बृहदारण्यके ज्योतिर्ब्राह्मणे । दार्ष्टान्तिके योजयन्ति एवमित्यादि । अभ्यसूयका इति । गुणेषु दोषारोपकाः । इयमेवोपपत्तिर्ब्रह्माण्डपुराणेऽप्युक्ता, शिवतत्त्वविवेकेऽनूदिता । तथाहि । 'निर्दोषश्चेत् कथं विष्णुर्मनुष्येषु प्रजायते । चिन्ताश्रमव्रणाज्ञानदुःखयुग्दृश्यते कथम् । एवं मे संशयो ब्रह्मन् हृदि शल्य इवार्पित' इति नारदप्रश्ने 'स्त्रीपुंमलानुषङ्गात्मा देहो नास्य विजायते । किन्तु निर्दोषचैतन्यसुखनित्यां स्वकां तनुम् । प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा । तथाप्यसुरमोहार्थं परेषां च क्वचित् क्वचित् । दुःखाज्ञानश्रमादींश्च दर्शयेच्छुद्धसद्गुणः । क्व व्रणादि क्व चाज्ञानं स्वतन्त्राचिन्त्यसद्गुणे । दौर्लभ्याचैव मोक्षस्य दर्शयेत्तानजो हरिः । कृष्णो ह्यत्यक्तदेहोपि त्यक्तदेहस्य देहवत् । लोकानां दर्शयामास स्वरूपसदृशाकृतिम्' इति ब्रह्मणोक्तम् ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥ एवं दोषदर्शने उपपत्तिमुक्त्वा गुणदर्शने उपपत्तिमाहेत्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति लौकिकवदित्यादि । अत्र पूर्वसूत्रात् 'उपपत्ते'रिति पदमनुवर्तते । अर्थस्तु स्पष्टः । तथा च गुणोपसंहारपादे, 'व्याप्तेश्च समञ्जसम्', 'सर्वाभेदादन्यत्रेमे' इति सूत्रद्वये

रश्मिः ।

सर्वस्यादित्यादेर्दृश्यमानत्वात्कथं परिशेषात्स्वयंज्योतिष्ट्वसिद्धिरित्याशङ्कायां तस्य सर्वस्य वासनानिर्मितत्वादित्याह । नेति । तत्र स्वप्ने रथाः प्रसिद्धाः रथैर्युज्यन्त इति रथयोगाः अश्वादयः पन्थानो मार्गा न भवन्तीति प्रत्येकं नञाभिसम्बध्यते न सन्ति । अथो अपि रथान् रथयोगान्पथः सृजते वासनात्मकान् मायिकान् । तादृशीमिति । व्रणक्षतादिभिर्लौकिकीमिव लीलां छान्दोग्ये द्वितीयोपदेशोक्तां मधुरूपदशविधधर्मरूपाम् । प्रकृतमनुसरामः । तथाकरणमिति । असत्त्वेन व्रणादीनां करणम् । स्वरूपेति । स्वरूपसदृशीमाकृतिं त्यक्तदेहस्य देहवद्दर्शयामास ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥ गुणोपसंहारेति । तृतीयाध्याये तृतीये पादे । दोषेति । व्रणादिदर्शने । गुणेति । 'यावानर्थ उदपाने सर्वतः सम्प्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानत'

एताभ्यां सूत्राभ्यामेतदुक्तं भवति । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति श्रुत्या भक्तकामपूरणाय भगवाँल्लीलां करोतीति गम्यते । यद्दर्शनश्रवणस्मरणैर्भक्तानां दुःखं भवति, तादृशीमपि तां करोतीति श्रूयते । यथा सौभयुद्धे मोहवचनानि, हस्तादायुधच्युतिः, प्रभासीयलीला च । उक्तरीत्या, 'सोऽश्नुत' इति श्रुत्या परब्रह्मत्वमवगम्यते । उक्तलीलया तद्वैपरीत्यं च । एवं सत्येकस्या वास्तवत्वम्, अन्यस्या अवास्तवत्वं वाच्यम् । 'ते ते धामान्युश्मसि' 'विष्णोः कर्माणि पश्यत', 'तद्विष्णोः परमं पदम्', 'तद्विप्रासो विपन्यव' इत्यादिश्रुतिभिः, 'सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं परमं

भाष्यप्रकाशः ।

'व्यापकस्य रसरूपस्यैव भगवतो भक्तानां तत्तद्रसानुभावनाय तथा तथा मायापसारणेन तत्तत्परिमाणादिप्राकट्येन बाल्यपौगण्डाद्यनुभावनात् तेषां विद्यमानानामेवार्थानामनुभव' इत्युपपादनात्तथोपपत्तेरित्यर्थः ।

एवं सूत्रद्वयं व्याख्याय सूत्रद्वयोक्तिप्रयोजनमाहुः एताभ्यामित्यादि ।

रश्मिः ।

इति गीतावाक्यात्कृष्णाश्रये मधुनीव पृथगग्राह्याः दृष्टानुसारिणः सर्वत आकृष्टाः गुणास्तेषां दर्शने । यथाकाशशरीरं ब्रह्मेत्युक्तस्य कृष्णाश्रये यावन्तो धर्माः दृष्टानुसारिणः तज्जन्यत्वेनापृथग्भूताः सर्वतः शास्त्रेभ्य आकृष्टाः मया दृष्टाः योगेश्वरे कृपया प्रकटास्तेन दर्शिताः । पित्तलघण्टागोलकः निर्दण्डः सच्छिद्रः छिद्रे कृष्णा दोरकाः सूक्ष्मा बहवः । तत्र मन्त्रौ । ॐसच्चिदालिङ्गनप्रसू ॐसच्चिदालिङ्गनप्रसो इति । ताभ्यां घण्टागोलके दण्डभ्रामणेन गोलकः घोषवान् सूत्रे प्रोतमणिगणशब्दवाँश्च । समस्तया तदभाववान् घण्टागोलकः । अत्र गीतावाक्यात्सर्वेषु वेदेषु ब्रह्मोपनिषदि घण्टागोलकः । तैत्तिरीये आकाशशरीरं ब्रह्मेत्यतो घोषः । 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवे'त्यत्र सूत्रे प्रोतमणिगणशब्दः समस्ता आचार्यशास्त्रे 'आत्मा यावत्प्रपन्नोभूत्तावद्दै रमते हरिः । सोन्तःकरणसम्बन्धी तिरोधत्ते हरिश्च स' इत्यत्र प्रपत्तितदभावौ । 'मन्त्रस्यापि विधानत' इति भक्तिमार्गे मन्त्रावपि । दण्ड औषधिविद्यारूपः कालकर्मस्वभावाः सत्त्वरजस्तमांसि च योज्यानि तृतीयस्कन्धे प्रसिद्धानि ॥१॥ वेदे शास्त्रे 'कृष्णाजिनं ब्रह्मे'ति संहिता । 'स सर्पानसृजते'ति संहिता, आत्मनेति ज्ञेयम् । कृष्णाजिनं ब्रह्म भवतीत्यर्थः । कालकर्मादिकं योज्यम् ॥२॥ 'स वयांस्यसृजते'ति संहिता । वंशपात्रे इत्यत्र वेदे वंशपात्रमत्र योज्यम् ॥३॥ औषधिविद्या तत्र 'तासां मे पौरुषी प्रिये'ति श्रीभागवते स देहो योज्यः क्रियाधर्मो योज्यः । रामेण बाणेन हतो मृग इति दृष्टं मया ॥ ४ ॥ लौकिकवदित्यादीति । अत्रापि 'यावानर्थ उदपाने' इति द्रष्टव्यम् । तेन 'जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्म'मिति दशमस्कन्धलीलोपसंहारश्लोकोक्तो यावानर्थोत्र लौकिकवत्सिध्यति । बाल्येति । बाल्यपौगण्डादिलोकवद्ब्राह्माणि । न तु प्राकृतानि । तस्यानुभावनात् । तथोपपत्तेरिति । स्वाभाविकधर्मोपपत्तेः । भाष्ये । भक्तकामेति । स इति प्रथमया स्वातन्त्र्याद्भक्तस्येति भावः । तां करोतीति । स्वस्मिन्ननुवृत्तिवृत्तये । 'विपदः सन्तु नः शश्वत्' इति पृथावाक्यात् । उक्तरीत्येति । 'समान एवं चाभेदा'दिति सूत्रादारभ्येयदवध्यवतारकविषयरीत्येत्यर्थः । उक्तेति । अत्रैवोक्तया भक्तदुःखदया । तद्वैपरीत्यं प्राकृतत्वम् ।

---

१. सत एव धर्मस्योपपत्तेः ।

पदम्। विश्वतः परमं नित्यं विश्वं नारायणं हरिम्। विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युत’मित्यादिभिश्च शुद्धब्रह्मणस्तद्विपरीतदर्शनेऽवश्यं हेतुर्वाच्यः। स त्वासुरव्यामोहनमेवेति पूर्वसूत्रेणोपपादितः। भक्तेभ्यः स्वरूपानन्ददानाय ‘लोकवत्तु लीलाकैवल्य’मिति न्यायेन या लीलाः करोति, यथा रिङ्गणादिलीला भगवतो नैसर्गिकधर्मरूपानन्दात्मकत्वेन विद्यमाना एव, ता भक्ताः पश्यन्तीति द्वितीयसूत्रेणोक्तम्। अत एव लीलाया अनेकरूपत्वाद् ब्रह्मणश्च श्रुतौ सैन्धवदृष्टान्तेनैकरसत्वनिरूपणाच्छुद्धब्रह्मधर्मत्वं न सम्भवतीति शङ्कानिरासाय ‘कैवल्य’मित्युक्तम्। ‘साक्षी चेता केवलो निर्गुणश्चे’त्यादिश्रुतिषु याऽन्यधर्मराहित्यलक्षणा केवलतोक्ता, सा लीलात्मिकैव, लीलाविशिष्टमेव शुद्धं परं ब्रह्म, न कदाचित् तद्रहितमित्यर्थः पर्यवस्यति। तेन स्वरूपात्मकत्वं लीलायाः पर्यवस्यति तेन च नित्यत्वम्। एतद् विद्वन्मण्डने प्रपञ्चितम्। अथवा। लीलैव कैवल्यम्, जीवानां मुक्तिरूपम्। तत्र प्रवेशः परमा मुक्तिरिति यावदित्यर्थः॥ १४॥

इति चतुर्थाध्याये चतुर्थपादे तृतीयं तत्त्वभावाधिकरणम्॥ ३॥

भाष्यप्रकाशः।

इत्यादिभिश्चेति। लीलानां भगवतश्च नित्यत्वं शुद्धब्रह्मत्वं चावगम्यत इति शेषः।

अत्र, ‘ते त’ इतिश्रुतिरग्रे व्याख्येया। ‘विष्णोः कर्माणी’त्यादयस्तु विद्वन्मण्डने सम्यग्व्याख्याताः। ताश्च पूर्वकाण्डस्था इत्यतः ‘सहस्रशीर्ष’मिति तैत्तिरीयाणां महानारायणोपनिषत्स्थानुवाकीया उक्ताः। एवं द्विविधा लीलास्तासां नित्यत्वं च प्रामाणिकमिति प्रतिपाद्य पूर्वसूत्रप्रयोजनं स्फुटीकुर्वन्ति। शुद्धेत्यादि। तथा च तदर्थानां लीलानां आसुरव्यामोहकत्वेनैव रूपेण नित्यत्वम्, न तु प्रतीयमानन रूपेणेत्यर्थः। द्वितीयस्यार्थमाहुः भक्तेभ्य इत्यादि। एवं द्वितीयस्य तात्पर्यमुक्त्वा लीलानां स्वरूपात्मकत्वं निगमयितुं लीलाकैवल्यसूत्रार्थं स्फुटमनुवदन्ति अत एवेत्यादि। एतस्य सूत्रार्थस्योपपादनसापेक्षत्वात् प्रकारान्तरेणार्थमाहुः। अथवेत्यादि। एवं फलरूपस्य भगवतः स्वरूपं सूत्रद्वयेन विचारितम्।

रश्मिः।

एवं द्विधेति। आरोपितानारोपितभेदेन द्विधापि सप्रतियोगिनीत्वाप्रतियोगिनीत्वाभ्यां चतुर्धा। प्रामाणिकमिति। फलाध्याये फलश्रुत्या प्रमाणेन प्रतिपाद्यत इति प्रामाणिकम्। शैषिकप्रत्ययः। अत एवेत्यादीति। सैन्धवेति। सैन्धवदृष्टान्तेन ब्रह्मण एकरसत्वं मैत्रेयीब्राह्मणे तेन श्वेतकेतूपाख्यानेप्येकरसत्वख्यापनाय षष्ठोपदेशः। विद्वन्मण्डन इति। नित्यक्रीडावादे। ‘रसो वै स’ इति श्रुतेर्दशरससामग्री यावती तावत्प्रत्येकरसरूपमेकमिति तथा। भक्तिमार्तण्डे सुवर्णसूत्रेण सह नित्यलीलावादः सङ्गृहीतः। उपपादनेति। तथाहि। शुद्धब्रह्मेत्यादि पूर्वभाष्ये। शुद्धब्रह्मेति। धर्मरहितं ब्रह्म। तद्धर्मलीला इति न सम्भवति। तदर्थे लीलासु कैवल्यविधिः। धर्मसहितः केवल इति शास्त्रदृष्टिः कार्या। अग्रे या केवलतोक्ता सा लीलात्मिकैवेत्युक्तम्। तत्र केवलता सत्यत्वाद्यात्मिका नेत्यत्रोपपत्तिः केति। तेनेत्यादि। तेन केवलतारूपत्वेन। तस्याः स्वरूपसम्बन्धविशेषरूपत्वेन स्वरूपात्मकत्वं लीलायाः पर्यवस्यतीति प्रकाशाश्रयवत्सूत्रं प्रवर्तते न वेति सन्देहः। अत्रोपपादनम्। उपपत्तिः केत्यत्र विनिगमनाविरहात्केवलतायाः सत्यत्वाद्यात्मकत्ववल्लीलात्मकत्वं किं न स्यादिति। सूत्रप्रवृत्तिसन्देहे त्वधिकं तत्रानुप्रविष्टं न तु तद्धानिरिति न्यायात्तत्सन्देहनिवृत्तिः। एवमुपपादनसापेक्षत्वात्। अथवेत्यादीति। मुक्तिरूपमिति। न त्वीश्वरो मुक्तिरूपो न तद्धर्म-

भाष्यप्रकाशः।

अत्र सर्वेपि पूर्वसूत्रे, तन्वभाव इति पाठमङ्गीकृत्यैवं व्याकुर्वन्ति। 'सङ्कल्पादेवे'ति सूत्रे पित्रादिसमुत्थानमुक्तसङ्कल्पादुक्तम्। स एव सङ्कल्पो द्वादशाहसूत्रेऽतःशब्देन परामृश्यते। तेन मुक्तो द्वादशाहवदशरीरः सशरीरश्च सिध्यति। तत्राशरीरस्य यो भोगः, स तन्वभावेपि ब्रह्मसृष्टैरेव पदार्थैः सन्ध्यवत् स्वामिकपदार्थभोगवत् सिध्यति। तनुसद्भावपक्षे तु लीलार्थमीश्वरेण सृष्टैर्मुक्तेन वा स्वसङ्कल्पादेव सृष्टैर्जाग्रद्वत् बहिर्भुङ्क्ते इति।

तन्नास्माकं रोचते। 'एवमप्युपन्यासा'दिति सूत्रेऽपहतपाप्मादिसत्यसङ्कल्पान्तानां धर्माणां मुक्तेऽप्यङ्गीकारेण तत्सङ्कल्पादेव तदनुरूपभोगोपपत्तेर्विशेषतस्तदुपपादनप्रयोजनाभावेनैतत्सूत्रद्वयस्यानतिप्रयोजनत्वप्रसङ्गात्। अथ सूत्रे तथा पाठ इति तदनुरोधेन तथा व्याख्यानमित्युच्यते, तदा तु सूत्रे 'तन्वभाव' इत्यत्र तनुशब्दस्याभावशब्देन समासेऽनचि चेति वैकल्पिकं नकारस्य द्वित्वं, तथा तत् नु अभाव इति पदच्छेदेपि, यरोऽनुनासिकेऽनुनासिको वेति नकारद्वित्वमिति तत्त्वभावपदस्य सैद्धान्तिकोऽर्थ एव युक्तः। द्वित्वाभावश्चेत्, तदा 'तन्वभाव' इत्यत्र सप्तमीसमासमङ्गीकृत्य भगवत्तनौ तदभाव इत्यर्थो वक्तव्यः। भगवता स्वस्वरूप आसुराणामन्यथाभानस्य कारणेन तद्भानस्यावश्यमुपपादनीयत्वात्। अन्यथा आसुरदृष्टेषु सत्यत्वबुद्धौ दैवानां मोक्षप्रतिबन्धापत्तेरिति। तदेतत् प्रागेव ब्रह्माण्डवाक्योपन्यासपूर्वकं विचारितमित्युपरम्यते।

ये मायावादिनो मोक्षे भोगं नाङ्गीकुर्वन्ति, तान् प्रति भास्कराचार्यैरेवं दूषणमुच्यते। ससम्बोधं मोक्षं श्रुतिसिद्धमाश्रित्याचार्येणायं विभागो दर्शितः श्रोतृणामनुग्रहाय, न नास्तिक्यमवलम्ब्य भ्रान्त्या वा सूत्राणामन्यथार्थत्वं कल्पनीयम्। श्रुतीनां नार्थवादत्वम्। सर्वत्रार्थवादत्वप्रसङ्गात्। निःसम्बोधे तु मोक्षे न प्रेक्षापूर्वकारी प्रवर्तते। संसारावस्थायां तावद्देवलोकादिषु पर्यायेण सुखतारतम्यं लभते, मुक्तः पुनः सुषुप्तवन्न किञ्चित्। स्वरूपचैतन्यं तु विद्यमानमप्यसत्सममेव। न हि तच्चैतन्यान्तरेण संवेद्यते। तस्यैवाभावात्। न च स्वचैतन्यतः संविदस्तु चैतन्यव्यतिरिक्तसंवित्त्यनभ्युपगमात्। अभ्युपगमे च भेदप्रसङ्गान्मायावादहानिः स्यादेव। ससंबोधे

रश्मिः।

रूपलीला इति चेन्न। ईश्वरस्याधोक्षजत्वेनेदमित्थतया मुक्तिशब्दाभिधाप्रवृत्तेर्भाष्ये लीलैव कैवल्यं मुक्तिरूपमित्युक्तम्। 'भक्त्या मामभिजानाती'ति वाक्यादधोक्षजत्वेपि मोक्षत्वमिदमित्थतया भवति ज्ञातम्। तथाप्यन्यशिष्याधिकारेणोक्तं लीलानां मुक्तिरूपत्वम्। मुक्तिलीलावैचित्र्यमाहुः। **तत्र प्रवेश इति**। व्रजभक्तभावेन सेवायाः फलं नित्यलीलाप्रवेशः इत्यर्थः। **समशरीर इति**। पित्रादिसमशरीरः। तथा पाठ इति। तन्वभाव इति पाठे। सैद्धान्तिकेति। नापि तत्त्वत्वे तत्त्वभाव इत्यस्यार्थः। पूर्वापरभाष्यासङ्गत्यापत्तेः। त्वान्तात्त्वप्रत्ययाभाववत् तत्त्वभाव इति विग्रहवाक्यं न स्यात्। **तद्भाव इति**। मुक्ततन्वभावः। **तद्भानस्येति**। शुद्धबुद्धमुक्तस्वभावे तत्स्वरूपगोपनाय शुद्धमुक्तदेहभानस्य। **असुरेति**। देहादिषु। **मोक्षप्रतिबन्धेति**। 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते, किं तेन न कृतं पाप'मिति श्रुतेः। पापसम्भवान् मोक्षप्रतिबन्धापत्तेः। पापाभावस्य मोक्षकारणत्वात्। **प्रागेवेति**। तत्त्वभावसूत्रे। **प्रेक्षेति**। युक्तिः। युक्तिः पूर्वा यस्येति युक्तिपूर्वः कारः करणमस्यास्तीति युक्तपूर्वकारी। **लभत इति**। आनन्दमीमांसया लभते। **चैतन्यव्यतिरिक्तेति**।

---

१. समशरीर इति अन्यपुस्तके रश्मौ च पाठः।

प्रदीपवदावेशस्तथाहि दर्शयति ॥ १५ ॥ (४-४-४)

ननु पूर्णज्ञानक्रियाशक्तिमता ब्रह्मणा तुल्यभावेन तत्रापि प्रधानभावं प्राप्य कामभोगकरणमपूर्णज्ञानक्रियावतो भक्तस्यानुपपन्नमित्याशङ्कायां तत्रोपपत्तिमाह। न हि तदा नैसर्गिकज्ञानक्रियाभ्यां तथा भोक्तुं शक्तो भवति, किन्तु भगवाँस्तस्मिन्नाविशति यदा, तदायमपि तथैव भवतीति सर्वमुपपद्यते। एतदेवाह प्रदीपवदिति। यथा प्राचीनः प्रकृष्टो दीपः स्नेहयुक्तायां वर्त्यामर्वाचीनायामाविष्टः स्वसमानकार्यक्षमां तां करोति, स्नेहाधीनस्थितिश्च भवति स्वयम्, तथात्रापीत्यर्थः। अत्र प्रमाणमाह। तथाहि दर्शयति श्रुतिः। 'भर्ता सन् भ्रियमाणो बिभर्ति, एको देवो बहुधा निविष्ट' इति। 'सर्वान् कामा'नित्युक्तत्वात् यस्य कामस्य भोगो यथा निवेशे सति भवति तत्र तथा तदा निवेश इति बहुधा निवेश उक्तः। अयं निवेशो नान्तर्यामित्वेन, तस्यैकधैव प्रवेशात्। निसर्गतः सर्वेषां जीवानां भगवान् भवत्येव प्रभुर्यद्यपि, तथापि यं स्वीयत्वेन वृणुते, तस्य विवाहितः पतिरिव भर्ता सन्, वरणजस्नेहातिशयेन भक्तेनापि भ्रियमाणः सन्, स इव स्वयमपि तं स्वस्मिन् बिभर्ति। अत एव स्नेहराहित्येनायोगोलकादिकं विहाय प्रदीपं दृष्टान्त-

---

भाष्यप्रकाशः।

पुनर्मोक्षे सर्वमुत्पन्नं सल्लक्षणं बोधस्य रूपम्। मनः सर्वज्ञं सर्वशक्तिभिन्नाभिन्नरूपं हि। तेनास्तु तदवगतिर्नातोऽन्यथेति ॥ १४ ॥

इति तृतीयं तत्त्वभावाधिकरणम् ॥ ३ ॥

प्रदीपवदावेशस्तथाहि दर्शयति ॥ १५ ॥ एवमधिकरणत्रयेण फलप्राप्त्युपकरणं फलस्वरूपं च विचार्य फलानुभवोपकरणं विचारयति। तत्र भगवद्भोगरूपोऽनुभवो जीवस्य सम्भवति, न वेति संशयः। भक्तस्य स्वतोऽसामर्थ्यं भोगश्रुतिश्च संशयबीजम्। तदेतन्मनसिकृत्य सूत्रमवतारयन्ति नन्वित्यादि। व्याकुर्वन्ति नहीत्यादि। नैसर्गिकज्ञानक्रियाभ्यामिति। मुक्तौ भगवत्कृपयाभिव्यक्ताभ्यां 'हानौ तूपायने'ति सूत्रे व्युत्पादिताभ्यां जैवाभ्यां ताभ्याम्। 'भर्ता स'न्नितिश्रुतिस्तु तैत्तिरीयारण्यके पुरुषसूक्तोत्तरनारायणानन्तरं भर्तृसूक्तारम्भेऽस्ति। एवं तां विवृण्वन्ति। सर्वान् कामानित्यारभ्य गतिष्विनीत्यन्तम्। ननु भर्तृसूक्ते

रश्मिः।

चैतन्यव्यतिरिक्तायाः संवित्तेरनभ्युपगमात्। रूपमिति। विषयः। भिन्नाभिन्नेति। कारणात्मनाऽभिन्नं कार्यात्मना भिन्नम्। यथा सुवर्णं कटकं न। कटकं सुवर्णमिति प्रतीतिः। तेनास्त्विति। मनसा बोधविषया गतिरस्तु न मनसोन्यथाऽन्यप्रकारेणेत्यर्थः। तेनैतेषां मते न निःसम्बोधो मोक्षः स्वमते त्वधिकारिभेदे नास्तीति बोध्यम् ॥ १४ ॥

इति तृतीयं तत्त्वभावाधिकरणम् ॥ ३ ॥

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥ फलप्राप्त्युपकरणमिति। देहादिकम्। सम्पद्याविर्भावब्राह्मेणेत्यधिकरणयोः। तत्त्वभावाधिकरणे। फलस्वरूपं भगवान् तत्प्राप्तिः, नित्यलीलाप्रवेशश्च। फलानुभवोपकरणम्, अलौकिकसामर्थ्यम्। संशयेति। प्रथमकोटौ प्रथमं बीजं द्वितीयस्यां द्वितीयम्। नन्वित्यादीति। पूर्णज्ञानेति। सोऽश्नुत इत्यत्र विपश्चितेति पदार्थः। प्रधानेति। सह ब्रह्मणेत्यप्रधानतृतीयया भक्तस्य प्रधानभावं प्राप्येत्यर्थः। प्राचीन इति। प्राचीनायां

मुक्तवान् व्यासः। अत एव देवपदमुक्तम् । स्वरूपानन्ददानाद्भावोद्दीपनात् पूतनाविमुक्तिदानेन स्वमाहात्म्यद्योतनाद्वैकुण्ठादिस्थितेश्च । तदुक्तं निरुक्ते 'दिवो दानाद्वा, दीपनाद्वा, द्योतनाद्वा, द्युस्थानो भवतीति वा यो देव' इति । किञ्च । भक्तानां कामभोजनार्थं क्रीडाकरणात्, क्रीडायामेव जयेच्छाकरणात्, भक्तैः सह व्यवहारकरणात्, भक्तेषु स्वमाहात्म्येच्छादिद्योतनात्, 'न पारयेऽहम्', 'न त्वादृशीं प्रणयिनी'मित्यादिभिः स्तुतिकरणात्, भक्तप्रपत्तिदर्शनेन कालीयदमनादौ मोदकरणात्, तेष्वेव भक्तिमदकरणात्, ते स्वप्नेपि प्रियमेव पश्यन्तीति स्वप्नकरणात्, तेषां कान्तिकरणादिच्छाकरणाद्वा, तन्निकटे गमनादपि देवः । तदुक्तं धातुपाठे 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिष्वि'ति । एवं सति युक्तमेव तेषां तथात्वमिति हिशब्देनाह ॥ १५ ॥

भाष्यप्रकाशः।

तदग्रिमानुवाकेषु च प्रभासीयलीलैव प्रायशः प्रतीयते, किं बहुना, एतदृगुत्तरार्धेपि 'यदा भारं तन्द्रयते, स भर्तुं निधाय भारं पुनरस्तमेती'ति भारवहनालस्यं भारस्तत्त्यागोऽस्तगमनं चोच्यते । अग्रे च, 'तमेव मृत्युममृतमाहु'रित्यादि । तत् कथमत्रैवं व्याख्यातमिति चेत् । उच्यते । पूर्वं हि पुरुषसूक्ते सृष्टिलीलोक्ता । तत उत्तरनारायणे स्थितिलीलोक्ता । तत्र, 'ह्रीश्च ते लक्ष्मीश्च पत्न्या'वित्यनेन भोगलीलां सूचयित्वा 'इष्टं मनिषाण, अमुं मनिषाण, सर्वं मनिषाणे'तिवाक्यत्रये ऐहिकामुष्मिकमिष्टं ब्रह्मविद्भिः प्रार्थितम् । ततो भर्तृसूक्तारम्भे इयमृगिति पूर्वग्रन्थे उत्तरग्रन्थे चेयमुपयुज्यते इति पूर्वसम्बद्धार्थोत्र व्याख्यातः । तृतीयस्कन्धे तु 'भर्तुः पादावनुस्मर'न्नित्यग्रोक्ता । अतस्तत्रोत्तरग्रन्थसम्बद्धोऽर्थ इति मया विद्वन्मण्डनव्याख्याने प्रभासलीलाप्रसङ्गे उत्तरग्रन्थानुसारेण व्याख्यातेति न दोषः । नन्वत्र मुक्तस्य यानि 'त्रिधा भवति पञ्चधे'त्यादिनोक्तानि शरीराणि सृजन्ते, तानि सात्मकानि निरात्मकानि वेति संशये, निरात्मकानि सृष्ट्वा, यथा प्रदीप एकोऽनेकभावं विकारशक्तियोगादापद्यते, तथा मुक्त एकोऽप्यनेकशरीराण्यैश्वर्ययोगादाविशतीत्युच्यते, न तु पूर्वोक्तोऽर्थ इति शङ्कायामाहुः अत एवेत्यादि । यत

रश्मिः ।

वर्त्यां प्रविश्योर्ध्वज्वलनोपेक्षितः । गतिष्वितीत्यन्तमिति । समस्तात्पदादुद्धृतम् । एवं सतीत्यादीति । श्रुत्या बहुधा निवेशे सति । तेषामिति भक्तानाम् । तथात्वमिति । स्वरूपानन्दादिदानादिभिः क्रीडाकरणादिभिश्च हेतुभिः, बहुधा भगवत्प्रविष्टत्वम् । भारवहनेति । स यदा मारं भर्तु तन्द्रयत इति भारवहनालस्यं भारश्च निधाय भारमित्यत्र मारं निधायेति । भारत्यागः । अस्तमेतीत्यस्तगमनम् । तमेवेति । प्रभासीयलीलाकर्तारम् । एवमिति । भोगलीलापरत्वेन । पुरुषसूक्त इति । द्वितीयस्कन्धसुबोधिन्यां स्फुटमिदम् । प्रार्थितमिति । मनिषाणेत्यत्र मनसः ईषा मनीषा तामिवाचरतीति मनीषति प्रार्थनायां लोट् मध्यमपुरुषः । इष्टविषयिणीं मनीषां कुरु । इष्टमैहिकम् । अमुं आमुष्मिकम् । सर्वमिष्टं प्रार्थितम् । न दोष इति । अत्रेति ।

ननु 'अस्थूलमनण्वह्रस्व'मित्याद्यनन्तरं पठ्यते 'न तदश्नोति कश्चन न तदश्नोति कश्चने'ति उक्तश्रुतौ च ब्रह्मणा सह जीवस्य भोग उच्यते । तथा च सगुणनिर्गुणभेदेन विषयभेदोऽवश्यं वाच्यो विरोधपरिहारायेत्यत उत्तरं पठति ।

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

इहायमाशयः । 'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय' इत्याद्यधिकरणैः 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'त्यादिश्रुतिभिश्च प्राकृता एव धर्मा निषिध्यन्ते, ब्रह्मण्यप्राकृता एव बोध्यन्ते, अन्यथा तद्बोधनमेव न स्यान्निषेधकवाक्य एव तद्बोधनमपि न स्यात्, 'एतस्यैवाक्षरस्य प्रशासन' इत्यादिरूपम्, अतोऽचिन्त्यानन्तशक्तेर्भगवतः का वा कार्योऽक्षमता,

---

भाष्यप्रकाशः ।

उक्त एवार्थोऽभिप्रेतः, अत एवायं दृष्टान्त उक्तः, नायोगोलकादेरतस्तथेत्यर्थः । मदुक्तश्रुतावयमेवार्थोऽभिप्रेत इत्यत्र गमकमाहुः अत एव देवेत्यादि । तथा च देवपदार्थाञ्जस्यमेवात्र गमकमित्यर्थः । सौत्रस्य हिशब्दस्यार्थमाहुः एवं सतीत्यादि । तेन यदा भगवान् जीवस्य स्वदत्ते देहे स्वेन सह सर्वभोगकामभोगं कारयितुमिच्छति, तदा स्वयमपि तदनुगुणप्रकारेण तस्मिन् देहे आविशतीति तादृश आवेश एव भोगोपकरणम् । गुणगानगृहकार्यादिदशायां तु यथासम्भवं या रामानुजभास्कराचार्याभ्यामुक्तव्यवस्थोक्ता, सैवाभिमतेत्यर्थात् बोधितम् ॥ १५ ॥

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥ सूत्रमवतारयन्ति नन्वस्थूलेत्यादि । श्रुतावश्नोतीत्यस्य विकरणव्यत्ययेन अशनमेवार्थ इति पूर्वं व्याख्यातम् । अतोत्र भोग उच्यत इत्यर्थः । व्याकुर्वन्ति इहायमित्यादि । निषेधिका श्रुतिरिति । भोगनिषेधिका, 'न तदश्नोती'ति श्रुतिः । अन्यतरापेक्षमित्येतदग्रे, आविष्कृतमाविष्करणं भगवत्प्राकट्यमिति यावत् । हि यतो हेतोरतो युक्तम् एतावती त्रुटिर्बोध्या । दहराधिकरणे एतत्सूत्रोपन्यासे आविष्कृतपदस्य भगवदाविर्भावार्थकताया अङ्गीकृतत्वात् ।

रश्मिः ।

छान्दोग्ये भूमविद्यायाम् भाष्यीयायां । अतस्तथेति । दृष्टान्तानुरोधात्पूर्वोक्तोर्थ इत्यर्थः । देवपदेति । देवपदार्थस्याञ्जस्यं सामञ्जस्यम् । अत्रेति । अस्मिन्सैद्धान्तिकेर्थे ॥ १५ ॥

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥ श्रुताविति । न तदश्नोतीत्यादिश्रुतौ तदिति कर्तृ अग्रे तदिति कर्म । विकरणेति । 'श्ना' विकरणे 'श्नु' विकरणमिति श्ना विकरणव्यत्ययेन । पूर्वमिति । आनन्दमयाधिकरणे । भाष्ये । उक्तश्रुताविति । सोश्नुत इति श्रुतौ ॥ प्रकृते ॥ अत्रेति । सोश्नुत इति श्रुतौ ॥ भाष्ये ॥ ज्ञानबलेति । प्रायपाठाद्बलं भक्तिः । तथा च भाष्ये बलं भक्तिरिति । अन्यथेति । अप्राकृतानां बाधेऽप्राकृतबोधनमेव 'यतो वा इमानि भूतानि जायन्त' इत्यादिश्रुतिभिर्न स्यात् । निषेधिकेति । अस्थूलमनण्वित्यादिनिषेधकवाक्यसन्निधावेवाक्षरब्राह्मणेऽक्षरे प्रशासनबोधनमपि न स्यादित्यर्थः । तथा । 'अथात आदेशो नेति नेती'ति निषेधवाक्ये तद्बोधनं मूर्तामूर्तबोधनं न ह्येतस्मादिति नेत्यन्यत्त्वमिति प्राणा वै सत्यं तेषामेष सत्यमिति श्रुत्या न स्यादित्यर्थः । श्रुत्यर्थस्तु । नहि एतस्मात् इति न इति अन्यत् त्वं इति प्राणा वै सत्यं तेषां एष

यया प्राकृतान् गुणानूरीकुर्यात्, अतो निर्गुणमेव सदा सर्वत्र भगवद्रूपमिति मन्तव्यम् । एवं सति, 'तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इति छान्दोग्यश्रुतेः प्रस्वापदशायां न कश्चित् ब्रह्माश्नाति, तच्च न कश्चनेति तद्विषयिणी निषेधिका श्रुतिः, 'ब्रह्मविदाप्नोति पर'मिति श्रुत्युक्तपरब्रह्मप्राप्तिदशाविषयिणी भोगबोधिका सेति न विरोधगन्धोपि । एतदेवाह । स्वाप्ययः प्रस्वापः, 'स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षत' इति श्रुतेः । सम्पत्तिः ब्रह्मसम्पत्तिरुक्तरीत्या पुष्टिमार्गीयो मोक्षः । एतयोरन्यतरापेक्षमुभयश्रुत्युक्तमित्यर्थः । भगवत्कर्तृकभोगस्य लीलारूपत्वात् तस्याश्च, 'लोकवत्तु लीलाकैवल्य'मित्यत्र मुक्तित्वेन निरूपणात् तत्प्राप्तेः सम्पद्रूपत्वं युक्ततरमिति हिशब्दार्थः ॥ १६ ॥

इति चतुर्थाध्याये चतुर्थपादे चतुर्थं प्रदीपवदित्यधिकरणम् ॥ ४ ॥

भाष्यप्रकाशः ।

तथा चात्रेदं सम्पद्यते । आद्ये प्रकारे यद्यपि, 'तद्यथा प्रियया स्त्रिये'त्यादिना सम्परिष्वङ्गो ब्रह्मकृतो जीवस्योक्तः, तथापि, 'न बाह्यं किञ्चन वेद नान्तर'मिति ज्ञानाभावशेषत्वेनोक्त इत्यस्थूलादिश्रुतौ सकलप्रापञ्चिकधर्माभावकथने प्रापञ्चिकभोगाभावोऽप्युक्तः । द्वितीयप्रकारे तु ज्ञानसद्भावाद् भोग इति विरोधाभावात् स्वरूपे सगुणनिर्गुणभेदकल्पनमसङ्गतमित्यर्थः । तदेवभिगमयितुं हिशब्दस्यार्थमाहुः भगवत्कर्तृकेत्यादि । एवमनेनापि प्रकारेण फलस्वरूपमेव विचारितं भवति ।

रश्मिः ।

सत्यम् । इति पदानि । एतस्माद्ब्रह्मणो नहि उक्तो भावो व्यतिरिक्तो नहि इति न । मूर्तत्वामूर्तत्वाभाव एतस्मादन्य इत्युक्तम् । अन्यत्, निषिद्धान्मूर्तामूर्तात् अन्यत् त्यमिति । अधिकं त्यत्, इत्यर्थः । अधिकं तु भेदनिर्देशादिति सूत्रात् । किं तत्त्यं नामैकदेश इत्यत आहुः । प्राणा वै सत्यमिति तेषां प्राणानां सम्बन्धि एष गूढ आत्मा सत्यमिति । प्राकृतानिति । तामसप्रकरणादौ तु द्वितीयस्कन्धोक्तात्मगुणानूरीकृत्य सुबोधिनीति ज्ञेयम् । निर्गुणमेवेति । एवकारेण सगुणव्यवच्छेदः क्रियते । मायया दर्शितानां मिथ्यात्वादन्येषां धर्माणामभेदात् । सर्वत्रेति । अन्तर्यामिब्राह्मणेऽपि । आभासोक्तं विरोधं परिहरन्ति स्म । एवं सतीति । गुणोरीकारं विनापि कार्यक्षमत्वे सति । छान्दोग्येति । दहरविद्याख्यायाः । अर्थस्तु, तत् तत्र विद्यमानानामेवालाभे दृष्टान्तः । यथा हिरण्यनिधिं निहितं भूमेरधस्तान्निक्षिप्तमक्षेत्रज्ञाः निधिक्षेत्रानभिज्ञाः निधेरुपरि उपरि सञ्चरन्तोऽपि निधिं न विन्देयुः । दार्ष्टान्तिकमाह । एवमेव यथा दृष्टान्तमेव । सर्वा अविद्यावत्यः अहरहः प्रत्यहम् सुषुप्तिकाले, एतद् हार्दाकाशाख्यं ब्रह्मैव लोकं ब्रह्मणो लोकं वा 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तम'मिति वाक्यात् यन्त्योपि प्राप्नुवन्त्योपि न विन्दन्ति न लभन्ते इति । विन्दन्तीत्यत्र परस्मैपदं छान्दसम् । प्रकृते अस्थूलेति । अक्षरब्राह्मणेऽस्ति । भाष्ये । स्वमपीतो भवतीति । स्वं अपि गतो भवतीत्यर्थः । सम्पत्तेर्मार्गत्रयसाधारण्यात्तां व्यवच्छिन्दन्ति । उक्तरीत्येति । द्वादशाहसूत्रभाष्योक्तरीत्या । प्रकृते । भवतीति । आविष्कृतं भवति । आद्य इति । सुषुप्तौ । द्वितीय इति । सम्पत्तौ भगवत्कर्तृकेत्यादीति । युक्ततरमिति । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इति श्रुतेः । 'भिद्यते हृदय-

भाष्यप्रकाशः ।

शाङ्करास्तु, मुक्तस्यानेकशरीरावेशलक्षणैश्वर्याभ्युपगमे, 'तत् केन कं विजानीया'दित्यादिश्रुतिविरोधशङ्कायां, 'तत्केन कम्', 'सलिल एक'इत्यादौ यद्विशेषविज्ञानवारणं तत् सुषुप्तिकैवल्यावस्थयोरन्यतरापेक्षम् । कुतः । आविष्कृतं हि यतो हेतोस्तत्रैव तदधिकारवशादाविष्कृतम्, 'यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यती'त्यनेन । 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति । यत्र त्वस्य सर्वमात्मैवाभू'दित्यनेन च प्रकटीकृतः । इदं तु सगुणविद्याविपाकस्थानं स्वर्गादिवदवस्थान्तरम्, यत्रैतदैश्वर्यमुपवर्ण्यते, अतो न दोष इत्येवं सूत्रार्थमाहुः । तेषामियं सम्पत्त्यवस्थातो हीनावस्थेत्यभिप्रायः ।

तदेतदन्ये न क्षमन्ते । तथाहुर्भास्कराचार्या रामानुजाचार्याश्च अत्र सम्पत्तिपदेन 'वाङ् मनसि सम्पद्यत' इत्यादिनोक्ता मरणावस्था परामृश्यते । अतः सुषुप्तौ मरणावस्थायां च विशेषविज्ञानवारणम् । 'यत्र सुप्तः', 'एतेभ्यो भूतेभ्य' इति श्रुतिभ्यां यतस्तत्रैव तदधिकारवशादाविष्कृतम् । तेन शरीरेन्द्रियविषयनिबन्धनं यद्विशेषविज्ञानं तदेव वार्यते, न तु परं भावं प्राप्तस्य विद्याकर्मसामर्थ्यात् सर्वविषयं सामान्यज्ञानमाविर्भूतं तत्र वार्यत इत्यदोषः । यत इन्द्रप्रजापतिसंवादे एव सुषुप्तौ निःसम्बोधत्वमुक्त्वा, अग्रे मुक्तमधिकृत्य, स वा एष एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोक' इति सर्वज्ञत्वकथनादिति । अस्मन्मते

रश्मिः ।

ग्रन्थिश्छिद्यन्ते सर्वसंशया' इति श्रुतेश्च भगवदीयत्वेपि युक्तशब्दात्तमप् न कृतः । लीलानां मुक्तित्वेऽपि विविधभावाभावात् । स्वाप्ययस्वाम्योक्तभोगाभावमालोच्याहुः । एवमनेनेति । स्वाप्ययसाम्यद्योतकप्रकारेणापि । 'अरूपवदेव ही'तिसूत्रोक्तैकदेशिमते मुक्तिफलस्वरूपं विचारितं भवति । न्यूनताख्यनिग्रहस्थानप्रहाणादेवकारः । न तु तदतिरिक्तं विचारितमिति । केन कमिति । केनेन्द्रियेण कं विषयं पश्येदिति केन कं पश्येदित्यस्यार्थः । 'सलिल एको द्रष्टेति' श्रुतिः । विशेषेणेन्द्रियविषयरूपेण यद्विज्ञानं तस्य वारणम् । हिर्हेतावित्याशयेनाहुः । यतो हेतोरिति । तत्रैवेति । स्वाप्ययसम्पत्त्योरन्यतरस्मिन्नेव । न त्वन्यत्र । यत्र सुप्त इति यस्यामवस्थायां सुप्तः । यत्र त्वस्येति । यत्र सम्पत्तौ त्वस्य भूतसमुत्थितस्य । सगुणविपाकेति । अनेकशरीरावेशे ऐश्वर्यधर्मे सति निर्गुणत्वं भविष्यतीति निर्गुणत्वप्रागभावविषयिप्रतीतिर्भवतीति सगुणविपाकस्थानम् । वृद्धिस्थानमपक्षयस्थानम् । तदनु । न दोष इति । मुक्तस्यानेकशरीरावेशप्रतिपादिकायाः स एकधेत्यादिश्रुतेस्तत्केन कमित्यादिश्रुतेश्च न विरोधरूपो दोष इत्यर्थः । तेषामियमिति । शाङ्कराणामियं सगुणविपाकावस्था । तत्रैवेति । स्वाप्ययसम्पत्त्योरन्यतरस्मिन्नेव । न तु परमिति । शरीरेन्द्रियविषयनिबन्धनकरहितकं विशेषविज्ञानं सर्वज्ञत्वलक्षणं भावम् । वार्यत इति । तत्केन कमित्यादिश्रुत्या । अदोष इति । श्रुतिविरोधरूपो दोषो न । यदिति । अव्ययम् । यत इत्यर्थः । इन्द्रेति । छान्दोग्येऽन्ते वर्तते । स वा एष इति मुक्तः । चक्षुषेति । करणत्वे कामानिति कर्मत्वेन भेद उक्तः । य एते इति ये एते कामा ब्रह्मलोके सङ्कल्पमात्रेण लभ्यास्तान् सर्वान्कामान्पश्यन्निति सर्वज्ञत्वकथनम् । शाङ्करोक्तेति 'ते तु ब्रह्महृदे नीता मग्नाः कृष्णेन चोद्धृता' इति पञ्चाध्याय्यां सुबोधिनी । एताभ्यां श्रुतिभ्यां 'न तद्भाती'ति

जगद्व्यापारवर्जं प्रकरणादसंनिंहितत्वाच्च ॥ १७ ॥ (४-४-५)

ब्रह्मणा सह भोगकरणं लौकिकव्यापारयुतम्, उत नेति संशये, तद्युतमिति पूर्वः पक्षः,तथा सति मुक्तित्वभङ्गात् पूर्वोक्तमनुपपन्नमिति प्राप्ते,आह जगदित्यादि। पूर्वोक्तस्य जगत्सम्बन्धी लौकिको यो व्यापारः कायवाङ्मनसां तद्वर्जं तद्रहितं भोगकरणम् । तत्र हेतू आह प्रकरणादसंनिहितत्वाच्चेति । 'ब्रह्मविदाप्नोति पर'मित्युपक्रमेण मुक्तिप्रकरणात् तत्र लौकिकव्यापारोऽसम्भावितः । किञ्च,

---

भाष्यप्रकाशः ।

त्वेतावान् विशेषः । शाङ्करोक्तमुक्तावस्था प्रथमा कक्षा । एताभ्यामुक्तावस्था तु मध्यमकक्षा। भोगे भगवत्साहित्याभावादिति ॥ १६ ॥

इति चतुर्थं प्रदीपवदित्यधिकरणम् ॥ ४ ॥

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥ एवं भोगोपकरणं विचार्य भोगप्रकारं विचारयितुमधिकरणान्तरमारभत इत्याशयेन विषयसंशयपूर्वपक्षान् वदन्तोऽधिकरणमवतारयन्ति ब्रह्मणा सहेत्यादि । संशयबीजं तु भोगे लौकिकव्यापारयुक्तत्वस्य लोके दर्शनम् । एतस्य भोगस्य सायुज्यमुक्त्युत्तरभावित्वं च ज्ञेयम् । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति पूर्वोक्तस्येत्यादि । पूर्वोक्तस्येति । प्राप्तसायुज्यस्य पुष्टिभक्तकायवाङ्मनसामित्यत्र टजभावः समासान्तस्यानित्यत्वेन वैकल्पिकत्वाज्ज्ञेयः । असन्निहितत्वं व्याकुर्वन्ति किञ्चेत्यादि ।

रश्मिः ।

'तत्केन कं पश्ये'दिति च श्रुती। मध्यमावस्था। सर्वात्मभावावस्था। भोग इति । अन्तर्भोगस्य विरहे सत्त्वेपि बहिर्भोगे भगवत्साहित्याभावात् । सोश्नुत इति मुख्या कक्षा ॥ १६ ॥

इति चतुर्थं प्रदीपाधिकरणम् ॥ ४ ॥

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥ भोगोपकरणमिति । प्रदीपवदावेशरूपं स्वाप्ययरूपं च । भोगप्रकारं भोगे लौकिकव्यापारराहित्यम्। ज्ञेयमिति यथाक्रमं ज्ञेयम् । टजभाव इति सूत्राट्टच् न प्राप्तस्तथापि द्वन्द्वाच्चुदषहान्तादित्यत्र समाहारे बाहुलकात्प्राप्तस्य टचोऽभावः । अन्यथा वा द्रष्टव्यः । भाष्ये । वर्जमिति । णमुलन्तम् । प्रकृते । किञ्चेत्यादीति । द्वितीयस्कन्धे नवमाध्याये 'एतन्मतं समातिष्ठ परमेण समाधिने'ति वाक्यस्य भगवदाज्ञयैतन्मतेऽवस्थितिः कर्तव्येति सुबोधिन्यां तन्मतवाक्यानि । तदीयानि भवन्त्यत्र । 'न यत्र कालोऽनिमिषां परः प्रभुरि'ति 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इति । आदिना मृत्युः । 'मृत्युरस्मादपैती'ति वाक्यात् । एतन्मतीयश्रुतयः । 'कालस्वभावो नियतिर्यदृच्छे'त्युक्तौ तेषां चिन्त्यत्वं श्वेताश्वतरे उक्तम् । 'स ईक्षाञ्चक्र' इति श्रुतौ मायास्थल ईक्षाश्रावणात्तत्र मायाभावः । बृहदारण्यके 'ते होचुः क नु सोभूद्यो न इत्थमसक्तेत्ययमास्येन्तरिति । सोऽयास्य आङ्गिरसोङ्गानाꣳहि रसः । सा वा एषा देवता दूर्नामा दूरꣳह्यस्या मृत्युर्भवति य एवं वेदे'त्यत्रासन्यंदेवताया दूरं मृत्युरुक्तोतस्तत्र तदभावः । श्रुत्यर्थस्तु ते देवाः ह ऊचुः । असक्तेति प्रजापतिरूपेण भवनं पाप्मशत्रुपराभवं च असक्त संयोजितवान् । आस्येन्तः आस्ये मुखे य आकाशस्तस्मिन्नन्तरे वर्तते । इत्यध्यवसितवन्तो वागादयः परस्परं वदन्तः अनयाख्यायिकया गुणद्वयं सिद्धमित्याह । सोयास्येति । यस्मादेवं वागादयः

लीलायाः कालमायाद्यतीतत्वेन प्राकृत जगत् दूरतरमितोपि हेतोर्न तत्सम्भवः । कदाचिल्लोके लीलाप्रकटनेच्छायां तदधिष्ठानत्वयोग्ये मथुरादिदेशेऽतिशुद्धे गोलके चक्षुरिन्द्रियमिव स्थापयित्वा लीलां करोति । तदापि लीलामध्यपातिनां न लौकिकव्यापारसम्भवः । न हि चक्षुरिन्द्रियं गोलककार्यं करोति । न वा तन्नाशे नश्यति । एतत्सर्वं, 'दिवीव चक्षुराततं'मिति श्रुतिव्याख्याने विद्वन्मण्डने प्रपञ्चितम् । किञ्च । छान्दोग्ये, 'भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य' इत्युक्त्वा, भूम्नो लक्षणमाह 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यत् विजानाति स भूमे'ति । अत्र 'नान्यद्विजानाती'त्येतावतैव चारितार्थ्येऽपि यदिन्द्रियव्यापारो

भाष्यप्रकाशः ।

एतेनाक्षरब्रह्मण्येव सम्भोगो बोधितः । 'निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नम' इति द्वितीयस्कन्धे तथा सिद्धत्वात् । तर्हि, 'ते ते धामानी'त्यादिश्रुतिषु भूमौ भोगः कथमुच्यत इत्यत आहुः कदाचिदित्यादि । कदाचिदिति । जगदुद्दिधीर्षाऽवसरे । स्थापयित्वेति । अक्षरं स्थापयित्वा । तथा च तस्मात्तथोच्यत इत्यर्थः । नन्वेवमक्षरस्य भूमौ प्रकटने तत्र स्थितानां भक्तानां भूमिसम्बन्धजगुणदोषसंसर्गाल्लौकिकव्यापारप्रसङ्गो दुर्वार इत्यत आहुः तदापीत्यादि । ननु प्रमाणाभावे दृष्टान्तमात्रस्याकिञ्चित्करत्वान्न भक्तानां लौकिकव्यापारराहित्यसिद्धिरित्यत आहुः एतदित्यादि । प्रपञ्चितमिति । 'चक्षु'रिति द्वितीयैकवचनान्तं पदमित्यादिना प्रपञ्चितम् । तस्मिन् व्याख्याने आग्रहवाद इति शङ्का स्यादिति तदर्थं भूमविद्याश्रुतिमुदाहरन्ति किञ्च, छान्दोग्य इत्यादि । इन्द्रियव्यापार इति । पश्यतिशृणोति-

रश्मिः ।

प्राणमास्येन्तरिति व्याजह्रुः तस्मात्स आसन्यः अयास्य आङ्गिरसः । आस्ये इत्ययास्यः अव्ययीभावः पुंस्त्वं छान्दसम् । आङ्गिरसः अङ्गिरा ऋषिः तत्सम्बन्धी । यद्वा अङ्गानि यस्य सन्ति स अङ्गी । आ अङ्गी आङ्गी । आङ्गी चासौ रसः आङ्गिरसः । कार्यकरणानामात्मा । तत्र हेतुर्हि यस्मात्कार्यकरणानां रसस्तस्मादाङ्गिरसः इत्यर्थः । सा वेति । प्राणरूपा । अस्या इति पञ्चम्यन्तम् । देवतायाः इति । एवं लीलायाः कालमायाद्यतीतत्वेनेत्यर्थः । न तत्सम्भव इति । जगद्व्यापारसंभवो न । उच्यत इति । 'यत्र गावो भूरिशृङ्गा' इतिपदैरुच्यते । जगदिति । भक्तियोगवितानेन जगदुद्धारार्थम् । इच्छाकाले । 'भक्तियोगवितानार्थं'मिति पृथावाक्यात् । 'यदा यदा हि धर्मस्ये'ति गीताप्रपञ्चः । भक्तियोगवितानस्य धर्मत्वात् । भाष्ये तदधीति । तच्छब्दो ब्रह्मवाची न तु परामर्शकः । तथा च रसरूपाधिष्ठानत्वयोग्ये गोलके चक्षुरिन्द्रियमिवेति दृष्टान्तः । अक्षरं स्थापयित्वेत्यर्थः स्थापयित्वेत्यस्यार्थः । ननु मथुरादिदेशानामक्षरात्मकत्वं स्वभावत एवेति पुनरक्षरस्थापनस्य किं प्रयोजनमिति चेन्न । अक्षरानन्दात्मकलक्ष्मीं स्थापयित्वेत्यर्थात् । नन्दयशोदादौ स्वस्वानन्दैर्लक्ष्म्यानन्दाः प्रतिबध्यन्ते । अन्यथा सोश्नुत इत्यत्र विपश्चित्पदविरोधापत्तेः । प्रकृते । तस्मादिति । लक्ष्मीरूपाक्षरस्थापनात् । तथोच्यत इति । भूमौ भोग उच्यते । तदापीत्यादीति । चक्षुरिन्द्रियमिति । कृष्णताराग्रवर्ति । केनोपनिषदधिकारिणे व्यक्तव्येति द्योतितम् । तन्नाश इति । गोलकनाशे नश्यतीन्द्रियम् । किंतु पश्यत्यचक्षुरिति श्रुतेस्तत्र गच्छति । प्रपञ्चितमिति । गोस्वामिभिः । प्रपञ्चितमित्याचार्यार्षज्ञानमुक्तम् । गोस्वामिभाष्यमिदमिति पक्षे स्पष्टम् ।

निषिद्धः, तत्राप्यन्यविषयकः, तेन भगवद्विषयकः स सिद्धो भवतीति जगद्व्यापारराहित्यं सिद्धम् । तत्र तेन भगवत एव स्वतन्त्रफलत्वमुक्तं भवति । नहि सुखस्यान्यत् प्रयोजनमस्ति ॥ १७ ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

नन्वेतत्प्रकरण एव छान्दोग्ये पठ्यते 'सर्वᳪ ह पश्यती'ति सर्वविषयक-

---

भाष्यप्रकाशः ।

म्यामुक्तः सः । तथा चास्यां श्रुतौ लौकिकव्यापारराहित्यस्य सिद्धत्वात्तत्र तथा व्याख्याने नाग्रहवाद इत्यर्थः । अत्र यत्पारिशेष्यात्सिद्धं तस्य फलमाहुः तेनेत्यादि । तत्र हेतुः न हीत्यादि । न हि भूमविद्यायां प्रतिपाद्यमानस्य भूमरूपस्य सुखस्य फलत्वातिरिक्तमन्यत् प्रयोजनं कथनस्यास्ति तस्मात् तथेत्यर्थः ।

यत्तु भाष्यान्तरेऽस्मिन् सूत्रे ब्रह्मसायुज्यं ब्रह्मसाम्यं वा प्राप्तस्य जीवस्यैश्वर्यादिकं जगत्सृष्टिव्यापाररहितमेव भवतीति विचारितम् । तदस्माकं मतम्, 'नेतरोऽनुपपत्ते'रित्यानन्दमयाधिकरण एव साधितमिति न काचिन्न्यूनतेति बोधितम् ।

यत्तु निरङ्कुशजगत्कर्तृत्वस्यैव ब्रह्मलक्षणत्वाद् 'ब्रह्म वेद ब्रह्मैव भवती'ति श्रुत्या जीवस्य ब्रह्मभावे बोधिते तस्यापि तदभेदाज्जगद्व्यापारोऽस्तु, तथा सतीदं सूत्रमवान्तरमुक्तिविषयमिति कश्चित् । तदसङ्गतम् । वेदस्तुतौ 'सममनुजानतां यदमतं मतदुष्टतये'ति जीवे तादृशनियन्तृत्वभावस्य ब्रह्मविदसम्मतत्वकथनेन तादृशजगत्कर्तृत्वादेरपि निरासबोधनादतः सायुज्येपि तदभावः सूत्रकाराभिमत इति ज्ञेयम् । तथा च यथा भूमिसम्बन्धिनो मथुरादिदेशस्य लौकिकत्वम्, तत्र स्थापितस्य चालौकिकत्वम्, तथा तत्र स्थितानां लौकिकदेहे निविष्टत्वाल्लौकिकत्वम्, तदन्तःस्थापितानां सदेहानामेव लीलास्थानामलौकिकत्वम् । तेन लौकिकालौकिकोभयकार्यकरणं तादृशतादृशतत्तज्ज्ञानविषयत्वं नानुपपन्नम्, नापि लीलासाङ्कर्यप्रसङ्गः । चक्षुरिन्द्रियदृष्टान्तेनैवोपपादितत्वादित्यर्थः ॥ १७ ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥१८॥ सूत्रं व्याकुर्वन्ति । नन्वि-

रश्मिः ।

तथा च गोस्वामिभिः प्रपञ्चितमित्यर्थः । तत्र तथेति । विद्वन्मण्डने । 'दिवीव चक्षुराततम्'मिति श्रुतेस्तथावर्णकभेदेन व्याख्यानम् । भाष्ये । तत्रेत्यस्य नित्यक्रीडायामित्यर्थः । प्रकृते । अत्र यदिति । पूर्वसन्दर्भे गौणमुख्यन्यायेन यत्सिद्धं कस्माद्धेतोरित्यत आहुः । पारिशेष्यादिति । अक्षरप्राप्तिपरप्राप्तिनित्यलीलाप्रवेशभगवद्भोगभगवत्सुरसत्वेनैकोपि भगवत एव मुख्यत्वेन पारिशेष्यादित्यर्थः । तेनेत्यादीति । पूर्वसन्दर्भेण । सर्वात्मभावकथनेनेति वा । भगवत एवेति । भूम्नोपि भूमत्वेन भगवत्येव शक्तिः सर्वात्मभावे तु सर्वात्मभावत्वेनेति सर्वात्मभावस्थायियोगव्यवच्छेदक एवकारः । ननु भूम्न एकलक्षणत्वेन कथमेवकार इति चेत्तत्राहुः । तत्र हेतुरिति । सर्वात्मभावस्थायिव्यवच्छेदहेतुः । फलत्वातिरिक्तमिति । साधनत्वेपि 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'ति वाक्यसाफल्याय स्वयंप्रकाशत्वाय च फलत्वातिरिक्तमन्यत् स्तुत्यादिप्रयोजनमित्यर्थः । तस्मात्तथेति । भगवत एव स्वतन्त्रफलत्वमित्यर्थः ॥ १७ ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥ नान्यत्पश्यतीति ।

प्रत्यक्षमुपदिश्यत इत्यन्यविषयकव्यापारराहित्यं नोपपद्यत इत्याशङ्क्य, समाधत्ते आधिकारिकेत्यादिना ।

अत्रेदमुच्यते । 'सोऽश्नुते', 'लोकवत्तु लीलाकैवल्य'मित्यादिभिर्नित्यलीलामध्यपातित्वं तस्योच्यते । 'नान्यत् पश्यती'त्यादिश्रुतिवशाज् जगद्व्यापारवर्जं भोगकरणं पूर्वसूत्रेणोक्तम् ।

अथेदं विचार्यते । 'नान्यत् पश्यती'ति प्रकरण एव 'सर्वꣳ ह पश्यती'ति सर्वविषयकं दर्शनमुच्यते, तत् कथं पूर्वोक्तमुपपद्यत इति । किञ्च । एकस्यैव

भाष्यप्रकाशः ।

त्यादि । ननु भूमविद्यास्थस्य, 'नान्यत् पश्यती'त्यादिवाक्यस्य बलेन भक्तस्याक्षरे ब्रह्मणि जगद्व्यापाररहितो भोग इति यदुक्तम्, तन्नोपपद्यते । यत एतत्प्रकरण एव छान्दोग्ये भक्तस्य जगद्व्यापारः पठ्यते । स को वेत्यत आहुः 'सर्वꣳह पश्यः पश्यती'ति । जगद्विषयकप्रत्यक्षरूपः स इत्यतस्तथेत्याशङ्क्य समाधत्त इत्यर्थः ।

समाधानांशव्याख्यानाय हेत्वंशस्फुरणे तेनाशङ्कान्तरस्यापि निवृत्तिमालोच्य तमप्यर्थं संग्रहीतुं प्रकारान्तरेणावतारयन्ति अत्रेदमित्यादि । अत्र अवतरणग्रन्थे, इदं वक्ष्यमाणमधिकमुच्यते, न तु तावन्मात्रमित्यर्थः । किं तदित्याकाङ्क्षायां आक्षेप्यं विषयमाहुः सोऽश्नुत इत्यादि । तस्येति । भक्तस्य । एवं विषयमनूद्य तत्र विचारः क्रियत इत्याहुः अत्रेत्यादि । अत्रास्मिन् सूत्रे इदमुक्ताभ्यां श्रुतिभ्यां सूत्राभ्यां च यदुक्तम्, तद्विचार्यत इत्यर्थः । विचारमाहुः नान्यदित्यादि । अत्र, नान्यदित्यारभ्य पूर्वोक्तमुपपद्यत इत्यन्तेन पूर्वोक्तैवाशङ्कानूदिता । सोऽश्नुत इत्यादिविषयिणीं द्वितीयामाहुः किञ्चेत्यादि । 'सोऽश्नुते', 'स वा एष

रश्मिः ।

तेन नान्यच्छृणोति नान्यत्पश्यतीत्युक्तभाष्येण यथालिखितपाठो न कर्तव्य इति सूचितं तदत्र स्फुटीकृतम् । आहुरिति । मान्यत्वाद्बहुवचनम् । तेन 'अधीहि भगव इति होपससाद सनत्कुमारं नारद' इति । श्रुतिविरोधो न । सर्वꣳहेति । अनेनापि प्रकाशेन यथालिखितपाठो व्यावर्तितः । शिष्याभिप्रायं वा । सनत्कुमारा नारदं प्रत्याहुरित्यर्थः । ग्रन्थकर्तुर्भक्तिं सूचयति । तथेति । अन्यविषयकव्यापारराहित्यं नोपपद्यत इति आशङ्क्येत्यर्थः । हेत्वंशेति । आधिकारिकमण्डलस्थोक्तेरिति हेत्वंशस्फुरणे । तेनेति । हेत्वंशेन । आशङ्कान्तरस्य । आशङ्का सर्वविषयकदर्शनवचनेन जगद्व्यापारवर्जं कथमिति तस्याः शङ्कायाः अन्यत् स एकधेत्यादौ जीवानेकत्वं न सम्भवतीति तत्र लीलायां नित्यत्वासिद्धिरूपमाशङ्कान्तरं तस्य । तमर्थमिति । शङ्कान्तरविषयमर्थम् । प्रकारान्तरेणेति । प्रकारः सङ्क्षेपेणोक्तसूत्रार्थः तस्मादन्यद् विस्तरेण सूत्रव्याख्यानं तेन । अवतारयन्तीति । भाष्यत्वायावतारयन्तीति । स्वपदवर्णनात् । 'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदु'रिति भाष्यलक्षणात् । अवतरणग्रन्थ इति । विस्तरेण सूत्रे व्याख्यातव्य इति शेषः । उच्यत इति । विस्तरायोच्यते । तावन्मात्रं उक्तमात्रमवतरणम् । किं तदिति । वक्ष्यमाणमधिकम् । आक्षेप्तुं योग्यं पूर्वपक्षिणा । विषयमिति । उक्ताभ्यां श्रुतिभ्यां सूत्राभ्यां च यदुक्तं तत् । यदुक्तमिति । विषयम् । पूर्वोक्तैवेति । सङ्क्षेपेण सूत्रव्याख्यानायोक्ता । द्वितीयामिति । पूर्वोक्तायां सङ्क्षेपेण सूत्रव्याख्यानायोक्तायामाशङ्कायां विस्तरायाधिकशङ्काम् ।

भक्तस्य देशकालभेदेन क्रियमाणानेकलीलासम्बन्धित्वं भवति। तच्च लीलानित्यतायां न घटते। यतस्तत्तद्देशतत्तत्कालसम्बन्धिनी सा नित्या। एवं सत्येकस्यानेकरूपत्वं जीवस्य न सम्भवतीति तन्नित्यत्वमपि न सिध्यतीति।

भाष्यप्रकाशः ।

एवं पश्यन्' 'सर्वꣳ हि पश्यः पश्यती'त्यादिश्रुतौ श्रीभागवतादिषु च एकत्वकथनेन भक्तानामेकस्यैव रूपस्य प्रत्यक्षोपदेशादेकस्यैव भक्तस्य देशकालभेदेन क्रियमाणानेकलीलासम्बन्धित्वमुक्तं भवति। तच्च लीलानित्यतायां न घटते। यतस्तद्देशकालसम्बन्धिनी तत्तद्विशेषणविशिष्टैव नित्या ध्वंसाद्यप्रतियोगिनी। एवं देशकालभक्तविशिष्टाया लीलाया

रश्मिः ।

प्रत्यक्षोपदेशादिति । प्रत्यक्षश्चासावुपदेशस्तस्मादिति कर्मधारयः । सर्वविषयकप्रत्यक्षे रूपस्य विषयतयान्वयासम्भवात्। **श्रीभागवता**दिष्विति । 'निवेदितात्मा विचिकीर्षितो म' इत्यत्र भक्तस्य एकत्वकथनेन । आदिना गीतायां 'ज्ञानिनामपि सर्वेषां मद्गतेनान्तरात्मना । श्रद्धावान्भजते यो मां स मे युक्ततमो मत' इति 'अभये जुष्टं निर्वपामी'ति संहिता । यद्वा 'भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः' इत्यत्र भक्तस्यैकत्वकथनेन एकस्यैव रूपस्य यत्सर्वविषयकं प्रत्यक्षं तस्योपदेशात् । आदिना गीतायां 'स सर्वविद्भजति मां सर्वभावेन भारते'त्यत्र तथा। एवमन्यत्र। 'सोऽश्नुत' इत्यत्र सर्वकामान् जानातीच्छति यततेऽश्नातीति एकस्यैव रूपस्य सर्वकामविषयकं प्रत्यक्षं तस्योपदेशात् । 'स वा एवं पश्य'न्नित्यत्र एवमात्मादेशमहङ्कारादेशं पश्यन्नित्यर्थादात्मविषयकमहङ्कारविषयकं यत्प्रत्यक्षं तस्योपदेशात्। 'सर्वꣳह पश्यः पश्यती'त्यत्र सर्वविषयकं प्रत्यक्षं तस्योपदेशादित्यर्थो यद्यपि सम्भवति तथापि, **रूपस्य प्रत्यक्षोपदेशादि**त्यत्र रूपस्य विषयितया प्रत्यक्षरूपैकदेशे रूपान्वयो भाति स विरुद्धः रूपस्याऽप्रत्यक्षात्किन्तु सर्वकामादीनामतः प्रत्यक्षश्चासौ उपदेशस्तस्मादिति कर्मधारयोत्र व्याख्येयः। एवं विस्तरपक्षे सौत्राशङ्काग्रन्थं व्याख्याय हेतुभाष्यं व्याकुर्वन्ति स्म। **एकस्यैव भक्तस्ये**ति। 'तदेजति तन्नैजती'ति निःप्रतियोगिनी क्रीडा स्फुटा। ब्रह्मणो विरुद्धधर्माश्रयत्वात्। सप्रतियोगिनी तु क्रीडा भक्तसम्बन्धिनीति तत्राशङ्कते। **एकस्यैव भक्तस्ये**ति। पुष्टिफले भक्तस्यावश्यकत्वं भक्तसंवलितो भगवान्पुष्टिमार्गे फलति यतः। **देशो** वृन्दावनादिः। **कालः** श्वस्त्वद्वह आयास्य इत्यादिवाक्येषु श्वः ह्यः वर्तमानश्च । **क्रियमाणानेके**ति । दशमस्कन्धप्रसिद्धाः क्रियमाणानेकलीलास्तासाम् । क्रियमाणा अनेकलीलासम्बन्धित्वं इति पाठे संहिताया। अविवक्षणान्न समासे 'अकः सवर्णे दीर्घ' इत्यस्य प्राप्तिः । आलस्याद्वाऽसन्धिः । रभसाद्वा । **उक्तं भवती**ति । सोऽश्नुत इत्यादिश्रुतिषु भागवतादिवाक्येषु चोक्तं भवति । **तच्चे**ति । भाष्यविवरणम् । **तच्चे**त्यादि । **तच्चे**ति क्रियमाणानेकलीलासम्बन्धित्वम्। **न घटत** इति। भक्तं प्रत्येकस्या लीलायास्त्रिक्षणावस्थायिन्या अनुवृत्तेरनित्यत्वादिति भावः । भक्तोऽनेकलीलामनोरथः। अथ'मात्मत आविर्भावतिरोभावा'विति श्रुतावाविर्भावाद्यर्थं उत्पत्तिविनाशौ मन्यते । **यत इत्यादि** भाष्यं विवृण्वन्ति स्म । **यत** इत्यादि । **तत्तद्देशकाले**ति । यथाचार्येषु वृन्दावनादिदेशे, एकादश्यां महानिशि काले, साक्षाद्भगवत्प्रवचनलीला निरोधरूपा तत्तत्सम्बन्धिन्याचार्यसम्बन्धिनी । सम्बन्धश्च स्वस्वामिभावः । 'इति श्रीकृष्णदासस्य वल्लभस्य हितं वचः । चित्तं प्रति यदाकर्ण्य भक्तो निश्चिन्ततां व्रजे'दिति वाक्यात् **तत्तद्विशेषेणविशिष्टा** विशेषणं यथा । लीला त्रिक्षणावस्थायिन्यनित्या सती यथासम्भवं कर्तुरनित्यत्वं सम्पादयेत्तत्र प्रम्वाचार्यसम्बन्धिनीक्रीडाविशेषणं, वर्तमानप्रम्वाचार्यसम्बन्धिनी क्रीडा । वर्तमानत्वं 'आचार्यं मां विजानीया'दिति वाक्यात् । 'नित्यो नित्याना'मिति

तत्रोच्यते । श्रुतौ सर्वपदेन न जगदुच्यते, किन्तु यस्यां यस्यां लीलायां

भाष्यप्रकाशः ।

नित्यत्वे सति देशकालयोरन्यान्यत्ववद्भक्तस्याप्यनेकरूपत्वं वाच्यम् । तथानुक्तत्वाज्जीवस्य न सम्भवतीति । एवं विशेषणविघटने तस्या लीलाया नित्यत्वमपि न सिध्यतीत्यतो न घटत इत्यर्थः । प्रत्यक्षोपदेशादित्यत्र प्रथमपक्षे षष्ठीतत्पुरुषो द्वितीयपक्षे च कर्मधारयो ज्ञेयः ।

एवमाशङ्कांशं द्वेधा व्याख्याय समाधानांशं व्याकुर्वन्ति तत्रोच्यत इत्यादि । तथा-

रश्मिः ।

च । स्वरूपतः सम्बन्ध्यनित्यत्वमप्येतेन विशेषणेनापास्तम् । प्रमाणाभावस्तु प्रमाणसिद्धवर्तमानप्रभ्वाचार्यसम्बन्धिनीक्रीडेति विशेषणात् । अन्यानि विशेषणानि विद्वन्मण्डनसुवर्णसूत्रमिश्रीभावेन कर्तव्यानि । भक्तिमार्तण्डे तु स्पष्टीकृतानि मत्कृते । एवं गोपालतापिनीये 'वेणुवादनशीलाये'ति श्रुतेर्गोपीमाधवसम्बन्धिनीक्रीडाविशेषणम् । वर्तमानगोपीमाधवसम्बन्धिनी क्रीडा । वर्तमानत्वं निरोधस्कन्धलीलासमाप्तिश्लोकात् स च 'जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् । स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्धयन् कामदेव'मित्यत्र जयतीति वर्तमानप्रयोगात्तथा । अस्यन् वर्धयन्निति च । लीला त्रिक्षणावस्थायिन्यनित्या सती यथासंभवं कर्तुरनित्यत्वं सम्पादयेदिति दोषे विशेषणमुक्तम् । गोपीमाधवयोर्विशेषणं वर्तमानेति विशेषणम् । स्वरूपतः सम्बन्ध्यनित्यत्वदोषोप्येतेन विशेषणेनापास्तः । प्रमाणाभावरूपस्तृतीयदोषस्तु प्रमाणसिद्धवर्तमानगोपीमाधवसम्बन्धिनी क्रीडेति विशेषणादपास्तः । शेषं पूर्ववत् । **नित्येति** । पूर्वं दोषत्रयं वारितं 'जयति जननिवास' इति श्लोकोपन्यासेन । अन्ये पञ्चविंशतिर्दोषाः विद्वन्मण्डनसुवर्णसूत्रभक्तिमार्तण्डेषु वारितास्तेभ्योवधेया वारणीयाश्च विस्तरभिया न लिख्यन्ते । **ध्वंसादीति** । आत्मनि लीला ध्वस्ताः आत्मनि लीला भविष्यन्ति आत्मनि लीला न सन्तीति संसर्गाभावास्तेषामप्रतियोगिनीत्वाद् ध्वंसाद्यप्रतियोगिनीत्वेन ध्वंसाद्यप्रतियोगिनी । अन्योन्याभावस्तु भेदाभावरूपाद्वैताभावादस्ति । परन्तु इवार्थः स गीतायां स्वरूपे निवेशोक्तेस्तस्य भेदस्य स्वरूपे निवेशादुक्तेः । तादात्म्याद्वैतसत्त्वाच्च । एवं सतीत्यादिभाष्यविवरणम् । **एवं देशकालेति** । **अन्यान्यत्ववदिति** । वीप्सा । देशोन्यः कालोन्य इति । **अनेकरूपत्वमिति** । अयमन्योयमन्य इति । 'स एकधा भवति त्रिधा भवति पञ्चधे'त्यादिश्रुतेः । **अनुक्तत्वादिति** । जन्यत्वापत्त्या बादरिमतेन शब्दान्यथानयनेनानुक्तप्रायत्वात् । अर्थवादकः शब्द इति । यद्वा सोश्नुत इत्यादिष्वेकस्यैव भक्तस्योक्त्यानुक्तत्वात् । **इतीति** व्याख्येयम् । तस्य व्याख्यानं **एवं विशेषणविघटन इति** । बादरिमतेन जीवस्यानेकरूपत्वविशेषणविघटने । **तस्या इति** । अनेकजीवकर्तृकाया इत्यर्थः । **अपिना** भगवत्सम्बन्धित्वम् । **न सिध्यतीति** । क्रियायास्त्रिक्षणावस्थायित्वेनानित्यत्वान्न सिध्यतीत्यर्थः । **न घटत इति** । क्रियमाणानेकलीलासम्बन्धित्वं न घटते । एकभक्तसम्बन्धिनी लीला एका । **कर्मधारय इति** । सर्वविषयकं दर्शनं न पश्यविषयकमिति न पश्यस्य प्रत्यक्षविषयतयान्वयः सूत्रे सम्भवत्यतः प्रत्यक्षश्चासौ विषय इति कर्मधारय इत्यर्थ उक्तः । **आशङ्कांशमिति** । 'प्रत्यक्षोपदेशादिति चे'दिति सौत्रमाशङ्कांशम् । **द्वेधेति** । सङ्क्षेपविस्तरप्रकारेण षष्ठीतत्पुरुषकर्मधारयप्रकारेण च । **तत्रोच्यत इत्यादीति** । **सर्वपदेनेति** । सङ्क्षेपपक्षे 'सर्वं ह पश्यः पश्यती'त्यत्र सर्वपदेन । विस्तरपक्षे सोश्नुत इत्यत्र 'सोश्नुते सर्वान् कामा'नित्यत्र सर्वपदेन । 'स वा एष एवं पश्य'न्नित्यत्र सर्वपदं नास्ति तथाप्येवमित्यस्यात्मादेशप्रकारेणेत्यर्थादधस्तादादिदेशप्रभेदभिन्नात्मा सर्वोपि ग्राह्य इति सर्वपदेनार्थिकेन । 'सर्वं हि पश्यः पश्यती'त्यत्र सर्वपदेन एकत्वस्य श्रुतौ भक्ते-

देशकालभेदेन क्रियमाणायामधिकृतो य एको भक्तः, तस्यैव तावन्ति रूपाणि सन्ति तान्याधिकारिकाणीत्युच्यन्ते। तेषां मण्डलं समूहस्तत्र स्थितवस्तुमात्रमुच्यत इति नानुपपन्नं किञ्चित्। अत एवाग्रे पठ्यते 'सर्वमाप्नोति सर्वश' इति, 'स एकधा भवति त्रिधा भवति पञ्चधा भवति। सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः। शतं च दश चैकश्च सहस्राणि च विंशति'रिति। यथा मण्डलवर्तिषु पुंसु नैकस्य प्राथम्येन प्राधान्यं वक्तुं शक्यम्, तथैतेष्वपि रूपेष्विति ज्ञापनाय मण्डलपदमुक्तम् ॥ १८ ॥

भाष्यप्रकाशः।

चाधिकारोऽत्र भक्तानां लीलानुभवयोग्यतासम्बन्धाधिकारिकं तेषां मण्डलं समूहस्तत्र यत्तिष्ठति तस्योक्तेः कथनाच्छ्रुतौ तथोच्यत इति नानुपपन्नं किञ्चित्। श्रौतस्य दर्शनविषयवाचकस्य सर्वपदस्य सङ्कुचितवृत्तिकत्वात्तद्विषयकदर्शनेऽपि भोगस्य जगद्व्यापाररहितत्वं नानुपपन्नम्। तथा, 'सोऽश्नुत' इत्यादावेकवचनस्य भक्तस्वरूपविषयकत्वात् स भक्तस्तत्तद्देशतत्तत्कालभेदेन क्रियमाणा लीलाः आधिकारिकदेहसमूहस्थः पश्यतीति तत्तद्विशेषणविशिष्टानां लीलानां तदनुभवितुर्भक्तस्य च नित्यत्वं नानुपपन्नमित्यर्थः। ननु सर्वपदार्थसङ्कोचे भक्तरूपबाहुल्ये च किं मानमित्यत आहुः अत एवेत्यादि। अग्र इति। 'सर्वꣳ ह पश्यः पश्यती'त्यस्याग्रे। तथा च 'सर्वमाप्नोती'ति वाक्ये सर्वैः प्रकारैः सर्वप्राप्तिश्रावणात् 'एवं पश्यती'ति वाक्यस्थसर्वपदेन विवक्षितग्रहणस्यैव युक्तत्वात्। तथा 'स एकधे'ति वाक्ये भक्तस्य बहुधाभवनश्रावणात्, 'सोऽश्नुत' इत्यादावपि बहुभी रूपैर्भोगरूपस्य लीलानुभवस्य युक्तत्वादिति। ननु मण्डलपदेन चक्राकारेण परिणतः समूह उच्यते, न तु सामान्यसमूहः, अतः कथमेवमुच्यत इत्यतो मण्डलपदस्य तात्पर्यमाहुः यथेत्यादि। तथा चैतज्ज्ञापनाय मण्डलपदम्, न तु समूहस्य चक्राकारेण परिणतेर्ज्ञापनायेत्यर्थः ॥ १८ ॥

रश्मिः।

र्विवक्षणादाहुः। एको भक्त इति। तावन्तीति। फलसाधनयोरैकाधिकरण्यनियमात्। तत्सम्बन्ध्याधिकारिकमिति। तत्सम्बन्धि आधाराधेयभावसम्बन्धोऽस्यास्तीति तत्सम्बन्धि। णिनिः। तथा च 'तत्र भव' इति सूत्राट्ठक्। कथनादिति। सङ्क्षेपपक्षे। 'सर्वꣳह पश्यः पश्यती'ति श्रुतौ। विस्तरपक्षे 'सोश्नुते', 'स वा एवं पश्यन्', 'सर्वꣳह पश्यः पश्यती'ति श्रुतिषु भागवतादिषु च 'भक्त्या मामभिजानाती'त्यादिषु कथनात्। उच्यत इति। नानुपपन्नं किञ्चिदिति भाष्यविवरणम्। श्रुतौ तथोच्यत इत्यादि। श्रुताविति। 'सर्वꣳह पश्यः पश्यती'ति श्रुतौ। उपलक्षणमेतत् सोश्नुत इत्यादिश्रुतीनाम्। विवृतं व्याकुर्वन्ति स्म। श्रौतस्य दर्शनेति। सङ्कुचितेति आधिकारिकमण्डलस्थे तथा। तद्विषयेति सर्वविषयस्य दर्शनेऽपि। उक्तोपलक्षणविषय आहुः। तथा सोऽश्नुत इत्यादाविति। विस्तरपक्षे श्रुतय इति पृथग्विचारः। आधिकारिकदेहसमूहस्थ इति। उदाहरणं तु बहुभीकत्वानन्तरं नारददर्शितस्य रूपस्य कार्यम्। यथा विश्वामित्रस्य गौः। तत्तद्विशेषणेति। अष्टाविंशविशेषणेषु तत्तद्विशेषणविशिष्टानां लीलानाम्। पश्यतीत्यस्याग्र इति इतिशब्दः प्रकारवाची षष्ठ्या लुक् पश्यतीति प्रकारो विशेषणं सर्वमाप्नोति सर्वश इत्यत्र तस्य प्रकारस्याग्रे। पश्यतीत्यस्या अग्र इति पाठो वा। कथमेवमिति केन प्रकारेण तत्स्थो जीवभक्त उच्यते ॥ १८ ॥

---

१. तत्सम्बन्ध्याधिकारिकमिति रश्मौ।

विकारावर्ति च तथाहि स्थितिमाह ॥ १९ ॥

नन्वेवं सति 'श्वस्त्वङ्गेहमायास्य' इति प्रभुणोक्ते तदाशया तत्स्थितिर्नोपपद्यते। नित्यत्वाल्लीलायास्तस्य कालस्य तदागमनस्य च तदापि वर्तमानत्वात्। तथा प्रभूक्तिरपि नोपपद्यत इत्याशङ्क्य समाधत्ते। इह भगवल्लीला प्रकृतिः, तद्विरुद्धोऽर्थो विकार इत्युच्यते। तत्र न वर्तते तज्ज्ञानं तादृशं च भवति।

भाष्यप्रकाशः।

विकारावर्ति च तथाहि स्थितिमाह ॥ १९ ॥ एवं श्रुतिविरोधं परिहृत्य लौकिकविरोधं परिहरतीत्याशयेन सूत्रमवतारयन्ति नन्वेवं सतीत्यादि। एवं सतीति तत्तल्लीलातत्तद्देशतत्तत्कालतत्तद्भक्तदेहानां नित्यत्वे सति व्याकुर्वन्ति इहेत्यादि। इहेति भगवत्सम्बन्ध्यर्थविचारे, भगवल्लीला प्रकृतिः, रसात्मकत्वात्तद्गुणवत्त्वात्, अनुकृत्यधिकरणसिद्धकारणत्वाद्वा। तद्विरुद्धोऽर्थो लौकिकः, स हि विकार इत्युच्यते तत्प्रतिकृतिभूतयत्किञ्चित्तद्गुणवत्त्वात्। कार्यत्वाद्वा। तत्र लौकिके विकारभूतेऽर्थे न वर्तते, तत् ब्रह्मणा सह भोगकरणमत आधिकारिकमण्डलस्थं सर्वं तदन्तःपातिज्ञानं च विकारावर्ति तादृशं तत्समानाकारं च भवति अत एवेतः पूर्वं 'आत्मत आशा आत्मत आविर्भावतिरोभावा' वित्यादि श्रावितमन्यथा तन्न वदेत्। तदेतदत्र सर्वं चकारेण सूच्यते। तथा च, 'स एकधा भवती'ति श्रुतिबलेनैकस्य भक्तस्य यान्यनेकानि रूपाण्यङ्गीकृतानि, तानि योगिकायव्यूहवन्न नानादेशवर्तीनि, किन्तु यथैकस्मिन्नेव भगवत्स्वरूपे विद्यमानानि प्रद्युम्नादिव्यूहरूपाणि तत्कार्ये

रश्मिः।

विकारावर्ति च तथाहि स्थितिमाह ॥ १९ ॥ **लौकिकेति** 'लोकवत्तु लीलाकैवल्यमि'ति सूत्राल्लौकिकवत्प्रतीयमानधर्मविरोधं परिहरतीत्यर्थः। **तत्तल्लीलेति**। पूर्वसूत्र उपपादितम्। पूर्वतन्त्रे यत्र सकलाङ्गोपदेशः सा **प्रकृतिरिति** प्रकृतिलक्षणादाहुः। **रसात्मकेति**। उत्तरतन्त्रविचारेण प्रकृतिलक्षणमाहुः। **अनुकृतीति**। सर्वानुकरणार्थं कारणं तेजसः। 'न तद्भासयते सूर्यो न शशाङ्को न पावकः' 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक'मिति च सार्धवाक्ये। तत्त्वाद्वेत्यर्थः। तथा च प्रकृतिः स्वरूपम्। 'प्रकृतिमगन् किल यस्य गोपवध्व' इत्यत्र तथाव्याख्यानात्। **तद्विरुद्ध** इति भाष्यविवरणम्। तद्विरुद्ध इत्यादि। **लौकिक** इति लौकिकवत्। विकारत्वस्य त्रिषु सत्त्वात्सामान्ये नपुंसकम्। विकारजातमाहुः। **तत्प्रतिकृतीति** तस्याः प्रकृतेः प्रतिकृतिभूतम्। **तद्गुणवत्त्वात्** प्रकृतिगुणवत्त्वात्। **कार्यत्वाद्वेति** प्रकृतेरेव। **तत्र न वर्तत इति भाष्यं** विवृण्वन्ति स्म। **तत्र लौकिकेति**। किं न वर्तत इत्याकाङ्क्षायां तज्ज्ञानमित्यादिभाष्यं विवृण्वन्ति स्म। **तद्ब्रह्मणेति**। तज्ज्ञानमित्यतस्तत्पदानुवृत्तिरत्र ज्ञेया। **तदन्तःपातीति** तस्याधिकारिकमण्डलस्थस्य सर्वस्यान्तःपाति तदन्तःपाति। **तादृशमित्यस्यार्थः**। **तत्समानाकारमिति** लौकिकविकारसमानाकारं लोकवदित्यर्थः। **अत एवेति** लौकिकविकारसमानाकारत्वादेव। **इतः पूर्वमिति**। 'सर्वꣳह पश्यः पश्यती'त्यादि श्रुतेः पूर्वम्। **श्रावितमिति**। लौकिकविकारसमानाकारमाशादिकं श्रावितम्। **अन्यथेति**। आधिकारिकमण्डलस्थज्ञानाशादेर्लौकिकविकारसमानाकारत्वाभावे लौकिकत्वे च नित्यलीलायां तज्ज्ञानाशादिकम्। **तदेतदिति**। तज्ज्ञानं तादृशमित्यादि भाष्योक्तम्। यत्स्वरूपमित्यादि भाष्यं विवृण्वन्ति स्म। **तथा चेत्यादि** तादात्म्या-

यत्स्वरूपं प्रति तथा वदति, तस्य स्वगेहे तदा भगवत्स्थितिज्ञानं न भवतीत्यर्थः। उपलक्षणं चैतत्, अतो यद्देशकालविशिष्टा यादृशी या लीला, तस्यास्तादृश्या एव तल्लीलामध्यपातिनो भक्तस्य ज्ञानं, नान्यविषयकमिति ज्ञेयम्। अत एव द्वितीयस्यापि, 'मध्यं पूर्वमुक्तमासीत्तेनागत' इत्येव ज्ञानं भवति। तदैव हि रसोदयः, अतो रसस्वरूपमध्यपातित्वाल्लीलाया रसस्य च भगवदात्मकत्वाद्भगवद्रूपत्वेन सर्वमुपपद्यते लीलायाम् । अत्र प्रमाणमाह तथाहि स्थितिमाहेति। 'सर्वमाप्नोति सर्वश' इति श्रुतिरेकस्यैव भक्तस्य सर्वशः सर्वैः प्रकारैः सर्वलीलारसमाप्नोतीति वदन्त्युक्तरीत्यैव लीलायां स्थितिमाहेत्यर्थः। अतो वस्त्वेवेदमलौकिकमीदृशमिति मन्तव्यं वैदिकैरिति भावः । अलौकिकेऽर्थे लौकिकरीत्यनुसरणं न युक्तम्, किन्त्वलौकिकरीत्यनुसरणमेव युक्तमिति हिशब्देन द्योत्यते। एतेन 'रसो वै स' इति श्रुतेर्लीलाविशिष्ट एव प्रभुस्तथेति तादृश एव परमफलमिति ज्ञापितं भवति ॥ १९ ॥

भाष्यप्रकाशः।

प्रकटीभवन्त्यपि न स्वरूपाद्भिन्नतया प्रतीयन्ते तथा भक्तशरीराण्यप्येकस्मिन्नेव वर्तमानानि तत्तत्कार्ये बहिर्भवन्ति। एवं सति यत्स्वरूपं प्रति, 'श्वस्त्वद्गृहमायास्य' इति वदति, तस्य स्वगेहे प्रथमदिने भगवत्स्थितिज्ञानं न भवति, तस्य विरहानुभवयितृ रूपं बहिर्भवति, पूर्वोक्तं चान्तः। ततो द्वितीयदिने पूर्वोक्तं बहिर्भवति विरहानुभवयितृ चान्तस्तयोरन्तर्भावबहिर्भावौ तेन न ज्ञायेते, एकमेव स्वमनुभवतीत्येवं लीलारसालत्वार्थं दिङ्मात्रेण प्रदर्श्यते। वस्तुतस्तु यथा नित्यव्यापकशब्दवादिजैमिनीयमते व्यञ्जकस्य वायोर्ध्वनेर्वा अभावेन न वर्णात्मकशब्दस्य सर्वत्र सदा ज्ञानम्, यथा च नित्यव्यापकात्मवादिकाणादादिमते स्वदेहादन्यत्र तद्वृत्तिलाभस्थानभूतदेहाभावेन न स्वात्मज्ञानम्, तथात्र लीलादिव्यञ्जकभगवदिच्छाभावेन न भगवत्स्थित्यादिज्ञानं भवतीत्यर्थः। एवं सूत्रैकदेशं व्याख्याय तेनानुक्तस्यान्यस्यापि तथा सिद्धिमाहुः उपलक्षणमित्यादि। तथा च 'अचिन्त्याः खलु ये भावास्तांस्तर्केण प्रसाधयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षण'मिति मत्स्यपुराणवाक्यात्। अत एव श्रुतिमूलकतर्कादपि सर्वं सुस्थमित्यर्थः। उपपादनप्रकारस्य प्रामाणिकत्वाय सूत्रशेषमवतारयन्ति अत्रेत्यादि। सिद्धमाहुः अत इत्यादि। तथा च 'नैषा तर्केणे'ति श्रुतेः, 'अलौकिकास्तु ये भावा न तांस्तर्केण योजये'दिति स्मृतेश्च श्रुत्यनुसारेणैव निर्णयमिति सिद्धेस्तथेत्यर्थः॥ १९ ॥

रश्मिः।

उक्ते स्वस्वरूपपदमाहुः। यत्स्वरूपं प्रतीति। अन्यत्रेति अन्यदेहादौ। तद्वृत्तीति जीववृत्तिलाभस्थानेत्यादिः। नेति स्वगृहादौ न। तेनेति। सौत्रचकारेण। तथा सिद्धिमिति। चकारेण यथासिद्धिस्तथा तामाहुः। अत एवेति। तर्केणेत्यस्य मीमांसायुततर्केणेत्यर्थादेव। अत्रेत्यादीति। सर्वैः प्रकारैरिति। अलौकिकेर्थे लौकिकी व्युत्पत्तिर्न कृता सर्वान्ददातीति किन्तु सर्वे प्रकाराः सर्वश इति व्युत्पत्तिः कृता। तथा चोक्तम्। 'इत्थं लौकिकशब्दानां प्रक्रिया इह दर्शिते'ति सिद्धान्तकौमुदीसमाप्तौ। उक्तरीत्येति अस्मिन् सूत्रे उक्तरीत्या। तथेत्यर्थ इति। वस्त्वेवेदमलौकिकमीदृशमिति मन्तव्यं वैदिकैरित्यर्थः। ननु तथापि युक्तिस्तु काचिद्वक्तव्येति चेदग्रे वक्ष्यते। भाष्ये। प्रभुस्तथेति प्रभुः प्रकृतः॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

न च लौकिकयुक्तिविरोधोऽत्र बाधकत्वेन मन्तव्यः, किन्तु साधकत्वेन यतः प्रत्यक्षानुमाने श्रुतिस्मृती अपि लौकिकयुक्त्यप्रसारेणालौकिके भगवत्सम्बन्धिन्यर्थेऽन्यथाभावनं निषेधति, 'नैषा तर्केण मतिरापनेया'। 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'। 'अलौकिकास्तु ये भावा न तांस्तर्केण योजयेत्'। श्रीभागवते च 'न हि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाशयदुरवग्रहवादिनां विवादानवसर' इत्यादिवाक्यैरचिन्त्यानन्तशक्तिमत्त्वेन भगवत्स्वरूपस्यैव परमफलत्वं प्रदर्श्यते। किञ्च। 'ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरी'ति ऋग्वेदे पठ्यते। किञ्चित्पाठभेदेन यजुःशाखायामपि। ता तानि वास्तूनि वां गोपीमाधवयोः सम्बन्धीनि गमध्यै प्रसाद-

---

भाष्यप्रकाशः ।

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥ भगवत्सम्बन्धिपदार्थानां युक्त्यगम्यत्वरूपं पूर्वोक्तमर्थमेव दृढीकर्तुं सूत्रान्तरं पठतीत्याशयेन सूत्रं व्याकुर्वन्ति न चेत्यादि। भाष्यमत्र निगदव्याख्यातम्। अत्र 'नैषा तर्केणे'ति काठकश्रुतेर्जीवप्रश्नोत्तरवर्तित्वेन तया भगवत्सम्बन्धिनामर्थानां तर्कागोचरत्वसाधनं न युक्तमित्याशङ्क्य, ब्रह्मप्रकरणस्थायाः 'परास्य शक्ति'रिति द्वितीयस्याः श्वेताश्वतरश्रुतेरुपन्यासः। 'अलौकिकास्त्वि'त्यस्याः स्मृतेः प्रसिद्धत्वेन विषयान्तरे चारितार्थ्यमाशङ्क्य, श्रीभागवतषष्ठस्कन्धीयस्य 'न हि विरोध'इति वाक्यस्योपन्यासः। एवमेतैः प्रमाणैर्लीलाया अलौकिकत्वं निगमयित्वा तन्मुखेनापि भगवतः फलत्वनिगमनाय किञ्चेत्यादिना शाखाद्वयस्थश्रुत्युपन्यासः। ऋक्शाखास्थश्रुतेर्यास्केन सूर्यकिरणपरताया निर्वचनात् तदर्थभ्रमनिरासाय यजुःशाखापाठस्मारणम्। तेन यास्कोक्तस्य शृङ्गादिपदनिरुक्तमात्रार्थत्वम्, न तु

रश्मिः ।

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥ निगदेति। श्रुतिस्मृती इति। 'तं त्वौपनिषद'मिति श्रुत्याधोक्षजे प्रत्यक्षादेरसङ्क्रमादेवं व्याख्यातम्। ननु तर्हि स्मृतेरप्यौपनिषदत्वाभावात्स्मृतिर्न व्याख्यानमिति चेन्न। गीतास्मृतिषु इति श्रीमद्भगवद्गीतासूपनिषत्स्विति उपनिषत्पदप्रयोगादुपनिषत्त्वात्। ब्राह्मण आर्षमिति प्रत्यक्षमूलत्वाज्जन्यजनकभावसम्बन्धो लक्षणा प्रत्यक्षपदस्य श्रुतौ। अनुमीयते उत्सन्नप्रच्छन्नवेदशाखा येन तदनुमानं स्मृतिरिति वेदान्ते योगमात्रादरणात्। एवं निगदेन भाष्यव्यक्तवचनेन व्याख्यातं व्याख्यातप्रायम्। बहुवाक्योपन्यासे गौरवं मन्यमानास्तत्स्वारस्यमाहुः। अत्र नैषेति। विषयान्तरेति विषयोऽधोक्षजः। ततोन्यद् विषयो नटादौ प्रसिद्धं तद्विषयान्तरं तस्मिन्। शाखाद्वयेति। ऋग्वेद आश्वलायनशाखा। एवं यजुःशाखापि। यास्केनेति निरुक्तकर्षिणा। सूर्येति। गावः किरणा उच्यन्त इत्येवं व्याख्याताः। तदर्थेति सूर्यकिरणार्थभ्रमनिरासाय। यजुःशाखेति किञ्चित्पाठभेदेनेत्यादि भाष्येण तथा। पाठभेदस्तु भूरीत्यृग्वेदे। भूरेरिति यजुःशाखायाम्। यास्कोक्तस्येति निर्वचनस्य। शृङ्गादीति। शृङ्गादि।

त्वेन प्राप्तुमुश्मसि कामयामहे। तानि कानीत्याकाङ्क्षायां गूढाभिसन्धिमुद्घाटयति, यत्र श्रीगोकुले गावो भूरिशृङ्गा बहुशृङ्गा रुरुप्रभृतयो वसन्तीति शेषः। ग्राम्यारण्यपशूपलक्षणार्थमुभयोरेव ग्रहणम्। अत्राह भूमावेव तदुरुगायस्य बहुगीयमानस्य वृष्णः भक्तेषु कामान् वर्षतीति वृषा तस्य पदं स्थानं वैकुण्ठम्, ततोऽपि परममधिकम्, अत्र विचित्रलीलाकरणात्। भूरि यमुनापुलिननिकुञ्जगोवर्धनादिरूपत्वेन बहुरूपम्। तथा च तत्रत्यानि तानि कामयामह इति वाक्यार्थः सम्पद्यते। एतेन लीलासम्बन्धिवस्तूनां यत्र फलत्वेन प्रार्थनम्, तत्र तल्लीलाकर्तुः परमफलत्वे किं वाच्यमित्याशयो ज्ञाप्यते। 'अथ ह वा व तव महिमाऽमृतसमुद्रविप्रुषा सकृल्लीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतसुखलेशाभासाः परमभागवता' इति श्रीभागवते। एतेनापि कैमुतिकन्यायेन प्रभोरेव स्वतः पुरुषार्थत्वं ज्ञाप्यते। फलप्रकरणत्वात्तदेवाचार्यतात्पर्यविषय इति ज्ञायते ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

इतोपि हेतोः पुरुषोत्तमस्वरूपमेव परमं फलमिति ज्ञायते । यतः, 'सोऽ-

---

भाष्यप्रकाशः।

तत्तात्पर्यकत्वम्। ऋचो विष्णुसूक्तस्थत्वात्, तैत्तिरीयपाठे च विष्णुपदादग्रेपि 'विष्णोः कर्माणि पश्यते'त्यादिमन्त्रदर्शनाच्च। एतदुपष्टम्भायैव, 'अथ ह वा वे'ति श्रीभागवतवचनोपन्यास इति। शेषं स्फुटम् ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥ **सूत्रमवतारयन्ति इतोपीत्यादि**। **इतोपीति**।

रश्मिः।

निरुक्तमात्रोर्थो यस्य तत्त्वम्। **तत्तात्पर्येति**। निरुक्ततात्पर्यकत्वम्। सूर्येभिधावृत्तिसत्त्वेन तात्पर्यवृत्त्यभावात्। **विष्णुपदादिति**। वृष्ण इति पदस्थले तथा। **एतदिति**। उक्तकैमुतिकन्यायोपष्टम्भाय **स्फुटमिति**। **गूढाभिसन्धिमिति** गोकुलेन गूढस्य संवृतस्य वैकुण्ठस्याभिसन्धिं अभितः सन्धिं भग्नसङ्घट्टनमुद्घाटयतीत्यर्थः। अयमर्थः। मर्यादामार्गीयस्य हृदि व्यापिवैकुण्ठे प्रकटस्य बहिराविर्भावे तत्र प्रवेशः सद्योमुक्तिः। तदुक्तम्। 'भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिनम्। वैकुण्ठं स्वर्गवासिनमिति' वीप्सा, मार्गद्वयग्रहणार्थम्। कर्ममार्गेण हिरण्यगर्भातिरिक्तस्य मुक्त्यभावात्। एवं च भूमावित्यनेन श्रीगोकुलमपि प्राप्नोति। पुष्टौ तु मर्यादातो विपरीता गतिः यतः प्रमेयबलेनैव पुष्टिस्थानां सर्वं तत्र 'अह्न्यापृतं निशि शयानमतिश्रमेणे'त्युक्त्वा 'लोके विकुण्ठमुपनेष्यति गोकुलं स्व'मिति विकुण्ठे श्रीगोकुलनयनम्। एवं च पुष्टिमार्गानुसारेण वैकुण्ठे गोकुलमिति गूढस्य पुष्टिमार्गीयप्राप्यगोकुलस्य अभितः सन्धिं भग्नस्य अत्यन्तानुग्रहं विना आमर्दितस्य सन्धिं सङ्घट्टनमनधिकारेपि कश्चिदुद्दिश्योद्घाटयन्तीति। **उभयोरिति** गोभूरिशृङ्गयोः। **भूमाविति**। मर्यादामार्गे श्रीगोकुलमपि। 'भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिनं वैकुण्ठं स्वर्गवासिनम्' इति श्रुतेः। पुष्टिप्रकरणादाहुः। **ततोपि परममिति**। कैमुतिकन्यायेनेति पाठः। **तदेवेति**। **प्रभैव** परं लीलाकर्तृ। एवं शेषं स्फुटमित्यर्थः ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥ **भाष्ये**। **पुरुषोत्तमस्वरूपमिति** रसात्मकमिति

श्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति श्रुतौ भक्तसाम्यमुच्यते । तच्च पुरुषोत्तम एव सम्भवति । यतः सख्यं दत्त्वा तत्कृतात्मनिवेदनमङ्गीकुर्वन्नतिकरुणः स्वस्वरूपानन्दमनुभावयँस्तं प्रधानीकरोति। अन्यथा भक्तोऽनुभवितुं न शक्नुयाद् युक्तं चैतत्। प्राप्तं फलं स्वाधीनं भवत्येव, अन्यथा फलत्वमेव न स्यात्। तथा चास्माल्लिङ्गादपि प्रभोरेव परमफलत्वं सिध्यति। 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुतिविरोधपरिहाराय मात्रपदम्। न चात्र कामभोगस्य फलत्वं शङ्कनीयम् । 'आप्नोति पर'मित्येतद्व्याकृतिरूपत्वात् स्वरूपानुभवरूपत्वाद् भोगस्य। अनुभूयमानस्यैव हि सुखस्य लोके पुरुषार्थत्वोक्तेः ॥ २१ ॥

भाष्यप्रकाशः ।

'मात्रं कार्त्स्न्येऽवधारणे' । भोगमात्रे भोगे एव यत् साम्यम्, भक्तेन सह तौल्यम्, अस्यां श्रुतौ सहपदेन श्राव्यते, तस्माल्लिङ्गादपि । तद् व्याकुर्वन्ति यत इत्यादि । पुरुषोत्तम एवेत्येवकारेणाक्षरं व्यावर्त्यते । तत्र हेतुः यतः सख्यमित्यादि । नन्वत्र कामानामेव प्राप्तेरुक्तत्वात्तद्भोगस्यैव फलत्वमस्त्विति चेत् तत्राहुः न चेत्यादि । 'आप्नोति पर'मित्येतद्व्याकृतिरूपत्वादिति । 'आप्नोति पर'मिति यद्वाक्यं तद्व्याख्यानरूपत्वात् । ननु यदि भगवत एव फलत्वम्, तदा कामानामशनं किमिति विवरणत्वेनोच्यत इत्यत आहुः स्वरूपेत्यादि । तत्र युक्तिमाहुः अनुभूयमानस्येत्यादि । तथा च फलत्वव्युत्पादनार्थं तत्, न तु फलत्वार्थमित्यर्थः । एवमनया पञ्चसूत्र्या भोगप्रकारविचारोपि भगवतः परमफलत्वबोधनायैवेति ज्ञापितम् । इदमेवाचार्यैः पुष्टि-

रश्मिः ।

ज्ञेयम् । प्रकृते । अस्यामिति 'सोऽश्नुत' इत्यस्याम् । तौल्यमिति । ब्रह्मणो गौणत्वेऽपि कियद्गौण्यं किन्तु साम्यमिति भावः । तद्व्याकुर्वन्तीति तत् तस्मात् तमुक्तमर्थं हृदिकृत्य सूत्रं व्याकुर्वन्तीत्यर्थः । व्यावर्त्यत इति ब्रह्माहमस्मीत्यक्षरसाम्यस्य जीवन्मुक्ते सिद्धत्वेन फले तदनुपयोगाद्व्यावर्त्यत इत्यर्थः । तत्र हेतुरिति साम्ये हेतुः । अक्षरव्यावर्तनापेक्षया समग्रस्य प्रधानत्वात् । यतः सख्यमित्यादीति । सख्यं दत्त्वेति सम्पद्याविर्भावाधिकरणेन सम्पद्याविर्भावात्समानशीलव्यसनवत्त्वरूपं सख्यं सिद्ध्यति । रासेष्टधाविर्भावात् । अत्र षड्धर्मैः क्रियमाणलीलासु षड्धर्मा भक्ता अधिकारिण इति सख्यं नानुपपन्नम् । सख्यात्मनिवेदने पुष्टिश्रुतीनां नाभिप्रेते इति भ्रमरगीते 'मृगयुरिव कपीन्द्र'मित्यस्य सुबोधिन्यामस्तीति न तदर्थं भक्तसाधनमत उक्तं दत्त्वेति । ब्राह्मणेत्यधिकरणेन देहा उक्ताः तेषां निवेदनं श्रुतिरूपाणामङ्गीकुर्वन्, आत्मानो देहाः तेषां निवेदनम् । आत्मीयानां तत्राभावात् । सालोक्यमुक्तिश्चेत्सा तु उक्तभक्तिद्वये श्रुतेस्तात्पर्याभावेपि ददात्यङ्गीकरोत्यतोतिकरुणः । स्वस्वरूपेति । प्रदीपाधिकरणे सामर्थ्यमुक्तमतः स्वरूपानन्दमनुभावयन्नित्यादिः । स्वस्य स्वरूपं भक्तदेहित्वेनाङ्गीकृत्य तदानन्दमित्यादिः । अत्र 'तस्यैष आत्मा वृणुते तनुं स्वा'मिति श्रुतिरनुसन्धेया । भवत्येवेति । साधनानां जीवाधीनत्वादिति भावः । 'भक्त्या त्वाद्यो द्वितीयस्तु तदभावाद्धरौ सदे'ति भक्तिभावास्तदभावाः साधनानि । भगवतः सर्ववशित्वादत्यन्तायोगं मत्वाऽत्यन्तायोगव्यवच्छेदकैवकार उक्तः । क्रियासङ्गतैवकारोत्यन्तायोगव्यवच्छेदकः । नीलं सरोजं भवत्येवेत्यत्रेव । तद्भोगस्येति कामभोगस्य । फलस्येति रसात्मकस्य । तदिति ब्रह्मणा सह

---

१. तौल्यम् ।

एवं भगवतः स्वतः पुरुषार्थरूपत्वमुक्त्वा कर्मफलभोगानन्तरमावृत्तिवदत्राप्यावृत्तिर्भविष्यतीत्याशङ्कानिरासायोत्तरं पठन्ति।

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

भाष्यप्रकाशः।

प्रवाहमर्यादायां पुष्टिफलविचारे 'भगवानेव हि फलं स यथाविर्भवेद्भुवि। गुणस्वरूपभेदेन तथा तेषां फलं भवे'दित्यनेनोक्तं ज्ञेयम् ॥ २१ ॥

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥ सूत्रमवतारयन्ति एवमित्यादि।

रश्मिः।

भोगकरणम्। तदित्यव्ययं वा तत्कामभोगः। न चानुभूयमानसुखस्य पुरुषार्थत्वे सुषुप्तिस्वरूपसुखसाक्षात्कारादिना ईश्वरादेः पुरुषार्थत्वप्रसङ्ग इति वाच्यम्। इष्टापत्तेः। तत्तदुपासकान्प्रति तत्तद्भक्तान्प्रति तत्तदीश्वरादेः पुरुषार्थत्वादिति। 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'ति वाक्याद्ब्रह्मणः सर्वात्मभावरूपस्य पुरुषार्थत्वं भक्तिमार्तण्डे उपसमाह्युक्तमेवेति शुभम्। **गुणस्वरूपेति।** गुणाः ऐश्वर्यादयः स्वरूपं साक्षान्मन्मथरूपं पञ्चाध्याय्याम्। एवंप्रकारेण स्वरूपान्तरेणापि तेषां वैदिकानां अत्र कायिकानां पौष्टिकानां फलं भवेदित्यर्थः ॥ २१ ॥

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥ एवमित्यादीति। स्वत इति साध्यत्वभिन्नसिद्धत्वतः। स्वशब्द आत्मीयवाची। आत्मवाचकत्वेऽपि न क्षतिः। तादात्म्याभेदात्। **उक्त्वेति।** ननु विकारावर्तिसूत्रभाष्ये 'अतो वस्त्वेवेदमलौकिकमीदृशमिति मन्तव्य'मित्युक्तम्। इयदवधि तदेवोक्तम्। परन्तु युक्तिस्तु काचन वक्तव्येति चेदुच्यते। उक्तरूपे तादात्म्यरूपमद्वैतम्। भेदाभावरूपस्याद्वैतस्य स्वरूपेऽभावाद् 'अविभक्तं च भूतेषु विभक्तमिव च स्थित'मित्यस्य स्वरूपनिरूपणे उक्तत्वाद् गीतायां तदत्रावतार्यते फलस्य स्वरूपत्वात्। ननु लीला हि द्वेधा। सप्रतियोगिनी निःप्रतियोगिनी च तत्र निःप्रतियोगिनी 'तदेजति तन्नैजती'त्यनया श्रुत्योक्ता विरुद्धधर्माश्रये स्पष्टा भगवति, सप्रतियोगिनी तु अद्वैते कथं सम्भवेद् यतस्तत्र नन्दयशोदागोपीगोपाः प्रतियोगिनस्ते कथं ज्ञानस्वरूप एकीभवेयुरिति चेदुच्यते। 'आत्ममायामृते राजन् परस्यानुभवात्मनः। न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'ति सिद्धान्तवाक्ये द्वितीयस्कन्धे मायासम्बन्धः प्रतियोग्यात्मदेहार्थमुक्तस्तन्न्यायेन श्रुतौ भक्तेच्छया नित्यलीलायां देहसम्बन्धः, 'स ईक्षाञ्चक्र' इति श्रुतौ मायास्थले ईक्षाश्रावणात्। न चेयं भगवदीयेच्छा न भक्तेच्छेति वाच्यम्। भक्तभगवतोरैक्याद् ब्रह्महृदनीतत्वेन ब्रह्मत्वात् सर्वस्य लीलास्थपदार्थस्य। एवं चावस्थात्रयपक्षे सुषुप्तिस्त्वकामरूपो भगवानतस्तद्भक्तेच्छा न सम्भवति किन्तु 'मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृगि'त्युक्तदृगपि निर्विषया। नैयायिकास्तु ज्ञानं सविषयकमेवेति सुषुप्तौ स्वरूपस्य विषयत्ववत्तुरीये त्रिषु सन्तते सायुज्ये प्राप्तजीवमनोरथकेनाविर्भूतानां नन्दादिप्रतियोगिनामात्मत्वेन तादृग्दृग्विषयत्वेन दृशो न निर्विषयत्वम्। तथा च यथा घटानां न परस्परं भेदः तादात्म्यात्तत्सम्बन्धावच्छिन्नप्रतियोगिताया अभावात्तथा भगवन्नन्दयशोदादीनामपि न परस्परं भेदः तादात्म्यात्तत्सम्बन्धावच्छिन्नप्रतियोगिताया अभावात्। शास्त्रदृष्ट्यात्मत्वेन तादात्म्याद्वैतसम्भवात्। सा चाद्वैते 'एकमेवाद्वितीय'मिति श्रुतिविषयत्वेन तर्कसम्भवाद्युक्तिः। तथा चोक्तरीतिर्न स्यात्तदा वस्त्वेवेदमलौकिकमीदृशं न स्यादिति युक्तिः सिद्धा। मेन इति वाक्यीयदृग्विषयनन्दादीनां तादात्म्यान्न स्वयंप्रकाशत्वहानिरिति। प्रकृतमनुसरामः। **अत्राप्यावृत्तिरिति** स्वर्गसुखवन्निरूपितफलेऽपि।

अनावृत्तिर्भक्तानां ज्ञानिनां चोच्यते । तत्र मानं शब्दः । स च 'तयोर्ध्वमायन्नमृतत्वमेति', 'न तेषां पुनरावृत्तिः', 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते', 'ब्रह्मलोकमभिसम्पद्यते'; 'न च पुनरावर्तत' इत्यादिरूपस्तु ज्ञानिनां तामाह । न हि भक्तानां नाड्यादिप्रयुक्तममृतत्वम् । 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह', इत्यादिवाक्येभ्यः । किन्तु 'यमेवे'ति श्रुतेर्वरणमात्रलभ्यः पुरुषोत्तमः । एवं सति 'ब्रह्मविदाप्नोति पर'मिति श्रुतेर्विरोधपरिहारपूर्वकोक्तव्याख्यानरीत्या भक्तस्य परं

भाष्यप्रकाशः ।

व्याकुर्वन्ति अनावृत्तिरित्यादि । ननूक्तः शब्दो ज्ञानिनामेव तामाहेत्यत्र गमकमाहुः न हीत्यादि । काठके ज्ञानं प्रस्तुत्य, 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः' इति वैराग्यं चोक्त्वा, ततः 'शतं चैका च हृदयस्य नाड्य' इत्यनेनोत्क्रमस्योक्तत्वात्, बृहदारण्यके शारीरब्राह्मणेपि तथात्वादन्यत्रापि तथैवेति नाड्योर्ध्वगतिहेतुभूतयोर्ज्ञानवैराग्ययोर्भक्तस्य श्रेयस्करत्वाभावेऽप्रोक्तं तत्कार्यभूतनाडीगतिप्रयुक्तममृतं न शक्यं वक्तुम्, अतो ज्ञानिनामेव तेन शब्देन तदुच्यत इत्यर्थः । तर्हि भक्तस्यानावृत्तिः कुतोऽवगन्तव्येत्यत आहुः किन्त्वित्यादि । किन्तु 'यमेवे'ति श्रुतेर्वरणलभ्यः पुरुषोत्तमो भक्तानाममृतत्वम् । स च 'अक्षरात् परतः पर' इति श्रुतेः 'यस्मात् क्षरमतीतोऽह'मिति गीतावाक्याच्चाक्षरात् परः । एवं वरणलभ्यस्यात्मनोऽक्षरात् परत्वे सति 'ब्रह्मविदाप्नोति पर'मिति श्रुतेर्विरोधपरिहारपूर्वकं यद्व्याख्यानं वरणसाहित्ये सर्वकामाशनरूपो ब्रह्मस्वरूपानन्दानुभवः वरणसाहित्याभावे तु लोकत्वेनाक्षरप्राप्तौ तदानन्दानुभवोऽक्षरसायुज्यं वा यथाऽधिकारमिति पूर्वमुक्तम्, तद्रीत्या अक्षराधिष्ठातारं पुरुषोत्तमं परं ब्रह्म वरणेन प्राप्तस्य भक्तस्य निर्दोषत्वादावृत्तिहेतूनामविद्याकामकर्मणामभावात् प्रपञ्चेऽनावृत्तिः सम्भवति । तथा चात्र परशब्दे प्राप्यस्याक्षरात् परत्वप्रकाशनसामर्थ्याल्लिङ्गादनावृत्तिर्भक्तानामव-

रश्मिः ।

अनावृत्तिरित्यादीति । तयोर्ध्वमिति तया नाड्या । एतेन प्रतिपद्यमाना इति एतेनार्चिरादिमार्गेण । ननूक्त इति ननुराशङ्कायाम् । उक्तः शब्दो ज्ञानिनामेव तामाहेत्यत्र अस्यां ननु आशङ्कायाम् । गमकमाहुरिति योजना । यद्वा । ननूक्तः शब्दो ज्ञानिनामेव तामाहेत्यत्र किं गमकमतो गमकमाहुरिति शेषपूरणम् । शेषस्तु किं गमकमत इति । तत्कार्येति ज्ञानवैराग्यकार्यभूतनाडीगतिप्रयुक्तममृतत्वम् । नन्वमृतमित्येवास्त्वस्य किं प्रयोजनमिति चेन्न । तादात्म्याद्भगवन्निष्ठामृतत्ववद्भक्तानाममृतत्वमविरुद्धम् । तदुच्यत इति अमृतत्वमुच्यते । तामाहेत्युक्तां तां तु अग्रे विचारयिष्यन्ति । यद्वा तदित्यव्ययम् । सोच्यत इत्यर्थः । पुरुषोत्तम इति कस्याञ्चिल्लीलायां भक्तगौण एव सः । आश्चर्यमुक्तम् । स चेति परतः परस्मादक्षरात्परतः । अक्षरात्पर इति । परतोऽक्षरात्परः । एवं सतीति भाष्यं विवृण्वन्ति स्म । एवं वरणेति तूष्णीकम् । भाष्येऽनावृत्तौ हेत्वभाव उक्तः । प्रमाणपुरःसरं तमाहुः तथा चात्रेति । अत्र 'ब्रह्मविदाप्नोति परमि'ति श्रुतौ शब्दादिति हेतोः स्वाक्षिप्तनिर्दोषत्वहेतुता निर्दोषत्वस्यानावृत्तौ हेतुत्वमुक्तम् । शब्दादिति हेतोरविशेषान्न साक्षादनावृत्तौ हेतुत्वं किन्तु परम्परयेत्याशयेन तदपि हेतुत्वं शब्दसामर्थ्याभावे न भवतीति पूर्वपक्षवासनया लिङ्गहेतौ निवेशितः । शब्दादिति सौत्रं हेतुं ल्यबन्तं हृदिकृत्याहुः परशब्द

ब्रह्म प्राप्तस्य निर्दोषत्वादावृत्तिहेत्वभावात् प्रपञ्चेऽनावृत्तिः सम्भवति । तादृशं प्रतीश्वरेच्छापि न तथा भवितुमर्हति । 'ये दारागारपुत्राप्तप्राणान् वित्तमिमं परम् । हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सह' इति भगवद्वाक्यात् परप्राप्तिरूपत्वाच्च भोगस्य न नाशसम्भावना । किञ्च यत्रैकस्यैव भक्तस्य देशकालभेदेनानेकविधलीलासम्बन्धित्वेपि तत्तल्लीलासम्बन्धित्वमनश्वरमुच्यते, तत्र सर्वथा तदभावः कथं वक्तुं शक्यो ब्रह्मणापि । अपरञ्च । कालसाध्यो हि नश्वरः स्यात् । न हि पुरुषोत्तमे कालः प्रभवितुं शक्नोति । 'न यत्र कालोऽनिमिषां परः प्रभु'रित्यादिवाक्येभ्यः । तथा च ज्ञानमार्गीयभक्तिमार्गीययोरनावृत्तौ तुल्यत्वेपि फलप्राप्तौ वैलक्षण्यात् पूर्ववाक्येन भक्तानामाहानावृत्तिम्, उत्तरवाक्येन ज्ञानिनामिति ज्ञायते । न च फलप्रकरणान्तेऽनावृत्त्युक्तेः संसाराभाव एव जीवस्य परमं फलमित्याचार्याभिप्रायो ज्ञायत इति वाच्यम् । ब्रह्मविदः परप्राप्तिं फलत्वेनोक्त्वा तत्स्वरूपस्य सर्वकामभोगत्वेन श्रुत्या निरूपणात् । स च स्वस्वाधिकारानुसारेण निवेदितार्थाङ्गीकाररूप एवेति ज्ञेयम् । तेन स एव परमं फलम् । अनावृत्तिस्त्वार्थिकी, परन्त्वावृत्तौ सम्भवत्यां परमफलत्वं नोपपद्यत इति ज्ञानदुर्बलशङ्कानिरासायेयमुक्ता ।

भाष्यप्रकाशः ।

गन्तव्येत्यर्थः । ननूभयव्यामोहसूत्रे भक्तव्यामोहस्यापि क्वचिदुक्तत्वात्तादृशेच्छया कदाचिदावृत्तिः स्यादिति शङ्कायामाहुः तादृशं प्रतीत्यादि । तथा च ये सर्वात्मभावप्रपत्तिरहिता उक्तभोगात्मकस्वरूपानुभवरहिताश्च तान् प्रत्येव तथेच्छेति, नात्र तत्सम्भावनापीत्यर्थः । समूलकाषमावृत्तिशङ्कानिवृत्त्यर्थं कैमुतिकेनापि तदभावं साधयन्ति किञ्चेत्यादि । ननु लीलायां देशकालसम्बन्धस्य पूर्वमुक्तत्वाल्लीलानित्यत्वोपपादनमात्रेण कथं शङ्कायाः समूलकाषं निवृत्तिरित्यतस्तत्र कालस्यासामर्थ्ये प्रमाणमाहुः अपरं चेत्यादि । एवं लीलायाः स्वरूपानुभवस्य च नित्यत्वमुपपाद्य सिद्धमाहुः तथा चेत्यादि । ज्ञानमार्गीयफलस्योत्कर्षमाशङ्क्य समादधते न चेत्यादि, इयमुक्तेत्यन्तम् । स चेति भोगश्च । स एवेति उक्तरीत्यानुभूयमानः पुरुषोत्तम एव । आर्थिकीति । परप्रकाशनसामर्थ्याल्लिङ्गात्परप्राप्तिरूपवाक्यार्थबलेन प्राप्ता । तथा च श्रुत्या समर्पितायाः परप्राप्तेरेव मुख्यत्वात्तत्रैवाचार्याभिप्रायः न तु लिङ्गिक्यामनावृत्तावित्यर्थः । यद्यपि द्विरुक्तिः समाप्ति-

रश्मिः ।

इत्यादि । लिङ्गं शब्दस्य सामर्थ्यमिति पूर्वतन्त्रे । तादृशेति भक्तव्यामोहेच्छया । सर्वात्मभावेति । सर्वात्मभावेन शरणरहिताः । तथेच्छा व्यामोहेच्छा । नात्र तदिति नात्र भक्तिमार्गे तस्या आवृत्तेः सम्भावना । तथा च भाष्ये । तांस्त्यक्तुमुत्सह इत्यस्य तान् भक्तान् त्यक्तुं आवर्तितुं उत्सह इत्यर्थः । अपि तु नेति काकुः । समूलकाषमिति, मूर्धन्यषकारान्तम्, कष हिंसायाम् । भ्वा. प. से. 'निमूलसमूलयोः कष' इति सूत्रेण णमुल्, समूलकाषं कषति, कर्मणीत्येव, कर्मणीत्युपपद इत्यर्थः, द्वीपिनं समूलकषभावं हिनस्तीत्यर्थः । प्रकृते तु समूलकाषमावृत्तिशङ्कानिवृत्त्यर्थम् । भाष्ये । तद्भाव इति अनश्वरं लीलाभावः । प्रकृते । तद्भावमिति आवृत्त्यभावम् । तथा चेत्यादि । पूर्ववाक्येनेति अनावृत्तिः शब्दादिति पूर्ववाक्येन । उत्तरेणेति द्वितीयेन तेन । ज्ञायत इति कर्ममार्गेण ब्रह्ममुक्तावप्येकदेशविकृतन्यायेनावृत्तिरेवेति ज्ञायत इत्युक्तम् । उक्तरीत्येति प्रदीपाधिकरणोक्तरीत्या । लिङ्गिक्यामिति लिङ्गिन्याम्, परप्रकाशनसामर्थ्य

पुष्टिमार्गीयभक्तविशेषप्रवर्तकनिवर्तकवेणुशब्दाद्भगवन्निकटगतावनावृत्तिः पूर्वेणोक्ता, मर्यादामार्गीयाणां वेदरूपाच्छब्दात्तदुक्तसाधनादनावृत्तिं द्वितीयेनेत्यपि तात्पर्यविषयः श्लिष्टोऽर्थो ज्ञेयः । तथा सति परमफलमग्रे स्वत एव भावीति भाव इत्यलं विस्तरेण ॥ २२ ॥

इति चतुर्थाध्याये चतुर्थपादे पञ्चमं जगद्व्यापाराधिकरणम् ॥ ५ ॥

भाष्यप्रकाशः ।

बोधनार्थो, तथापि तत्र श्लेषेणार्थान्तरमपि बोध्यत इत्याहुः पुष्टीत्यादि । 'वाङ्मनसि दर्शनाच्छब्दाच्चे'ति सूत्रे तथा साधितत्वात्तथेत्यर्थः । एवमाचार्याशयः पुष्टिमार्गीयफलस्यैव मुख्यत्व इति साधितम् । एवमत्र पादे 'ब्रह्मविदाप्नोति पर'मिति श्रुत्युक्तं 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुत्युक्तं च फलं सपरिकरं विचारितम् ।

शङ्कराचार्यास्तु, सगुणब्रह्मोपासनात् सहैव मनसेश्वरसायुज्यं प्राप्तानां किं सावग्रहमैश्वर्यं भवति, उत निरवग्रहमिति संशये, 'आप्नोति स्वाराज्य'मिति 'सर्वेऽस्मै देवा बलिमावहन्ती'ति 'तेषां सर्वेषु लोकेषु कामचारो भवती'त्यादिश्रुतिभ्यो निरङ्कुशमेवैश्वर्यं भवतीति प्राप्तम् । तत्र जगदुत्पत्त्यादिव्यापारं वर्जयित्वैवाणिमाद्यैश्वर्यं भवतीति साङ्कुशमेव तत् । जगद्व्यापारस्तु

रश्मिः ।

लिङ्गं यद्यपि शब्दे तथापि कार्यतासम्बन्धेनानावृत्तावपीति लिङ्गिन्यामनावृत्तावित्युक्तम् । **द्विरुक्तिः समाप्त्यर्थेति** । विरहसामयिकी परमतभाषाप्येकदेशिमते पुष्टौ न प्रतिबन्धिकेति भ्रमरगीतवत्तामाहुः **पुष्टीति** । भक्तविशेषोत्र 'अरूपवदेव हि तत्प्रधानत्वात्' इत्येकदेशिमतश्रद्धालुः श्रुतिरूपान्तर्गतवेणुशब्दोत्र साधारणो ज्ञेयो न त्वसाधारणः । एकदेशिमतश्रुतिरूपत्वात् । **भगवन्निकटगताविति** सामीप्यसप्तमी भगवन्निकटगतिसमीपे ब्रह्मलोकेऽवान्तरस्थितिरनावृत्तिः । भाष्य उक्तं तदविरोधायाहुः **यद्यपीति** । **श्लेषेणेति** तात्पर्येण । **पुष्टीत्यादीति** । **अनावृत्तिरिति** आवृत्तिहेत्वभावादनावृत्तिः । यतो भगवानेवैवं सम्पादयति । 'नाहं तु सख्यो भजतोऽपि जन्तून्भजाम्यमीषामनुवृत्तिवृत्तय' इति भगवद्वाक्यात् । अनुवृत्तिः सेवा सा चानेकधा धातूनामनेकार्थत्वे षिवु सेवायामिति धातुपाठे मानमतः प्रेमपूर्वकानुवृत्तिरत्र । **पूर्वेणेति** अनावृत्तिः शब्दादित्यनेन । **द्वितीयेनेति** द्वितीयेनानावृत्तिः शब्दादित्यनेन भगवान्व्यास आहेत्यर्थः । **श्लिष्ट इति** अभिधेयार्थेनालिङ्गितस्तात्पर्यार्थः । **परमफलमिति** । 'ज्ञात्वात्मानमधोक्षज'मिति भ्रमरगीतवाक्यात् । 'आन्तरं तु परं फल'मिति सुबोधिन्याम् । 'तदध्यासोऽपि सिध्यती'ति निरोधलक्षणग्रन्थे । 'सच्चिदानन्दता तत' इति च तत्रैव । अत्रावतारावतारिसाङ्कर्यं न दोषाय । 'समान एवं चाभेदा'दिति सूत्रात् । सुबोधिन्यां च 'नैश्चिन्त्यं वाचि पूर्वव'दिति । **अलं विस्तरेणेति** विस्तरः अष्टाविंशद्दोषास्तदुद्धारश्च तेनालम् । निषेधेऽलम् । विस्तरेण कथनस्य निषेधः गौरवप्रसङ्गादित्यर्थः । **ब्रह्मैवेति** । हृदि प्रकटे ब्रह्मणि जीवो ब्रह्मैव सन् बहिःप्रकटेऽपि गतो भवति सद्योमुक्तो भवतीत्यर्थः । **विचारितमिति** । सन्दिग्धत्वादिति भावः । यद्यपि 'आचार्यं मां विजानीयान्नावमन्येत कर्हिचि'दिति मतान्तराक्षेपो न युक्तस्तथापि ब्राह्मणगत्यभिधानादाहुः **शङ्कराचार्यास्त्विति** । तथा चैकादशे वाक्यम् 'नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा । एवं विवदतां हेतुः शक्तयो मे दुरत्ययाः' इति । **सावग्रहमिति** साङ्कुशम् । **निरवग्रहं** निरङ्कुशम् । **तदित्यैश्वर्यं**

भाष्यप्रकाशः ।

नित्यसिद्धस्यैवेश्वरस्येति सिद्धान्तीक्रियते । तत्र हेतुः प्रकरणमितरेषामसन्निहितत्वं च । यत्र हि 'सदेव सोम्येदमग्र' इत्यादौ जगद्व्यापारः श्रूयते, तत्र परमेश्वर एव प्रकृतः, नेतरेषां सन्निधानम्, तस्मात् । न च 'आप्नोति स्वाराज्य'मिति प्रत्यक्षोपदेशविरोधः । एतदग्रे 'आप्नोति मनसस्पति'मित्यनेन आधिकारिको यः सवितृमण्डलादिषु विशेषायतनेष्ववस्थित ईश्वरः पूर्वसिद्धः सर्वमनसां पतिस्तत्प्राप्तिश्रावणात्तदायत्तैव स्वाराज्यप्राप्तिरिति बोधनात् तदग्रे, 'वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिः एतत्ततो भवती'ति फलस्य तत एव श्रावणाच्च । एवं सूत्रद्वयं व्याख्याय विकारावर्तिसूत्रे त्वेवं वदन्ति । परमेश्वररूपं विकारावर्ति च । 'तावानस्य महिमा ततो ज्यायांश्च पूरुष'इत्याम्नायो यतस्तस्य परमेश्वरस्य द्विरूपां स्थितिमाह । तच्च निर्विकारं रूपं विकारालम्बना न प्राप्नुवन्ति । अतत्क्रतुत्वात् । अतो यथा द्विरूपं परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठन्ते । एवं सगुणेपि निरवग्रहमैश्वर्यमनवाप्य सावग्रहाय एवावतिष्ठन्त इति । अग्रिमसूत्रे च 'न तत्र सूर्यो भाती'ति प्रत्यक्षा श्रुतिः 'न तद्भासयते सूर्य' इति गीतास्मृतिश्च परमेश्वरस्य विकारावर्तित्वं दर्शयतः । तदेवं विकारावर्तित्वं परस्य ज्योतिषः प्रसिद्धमित्यभिप्राय इति । अग्रे तु भोगमात्रसाम्येनैश्वर्यस्य सावग्रहत्वं व्याख्याय, तेन सातिशयत्वे प्राप्ते शब्दादनावृत्तिं व्याहृत्य, सम्यग्दर्शनानां विध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिः, तदाश्रयणेनैव सगुणशरीराणामनावृत्तिसिद्धेरिति कैमुतिकमुक्त्वा समापयन्ति ।

तन्मते विकारावर्त्यादिसूत्रद्वयमनतिप्रयोजनम् । जीवस्य सावग्रहैश्वर्यसाधने रूपद्वयबोधकयोस्तयोरनुपयोगात् । न च दृष्टान्तार्थमुपयोगः । विकारावर्तिनोऽप्राप्तौ अतत्क्रतुत्वस्य हेतोरिवात्र सावग्रहैश्वर्ये हेतोरकथनेन दृष्टान्तमात्रस्याप्रयोजकत्वात् । न च वाचस्पतिना निरव-

रश्मिः ।

वदन्तीति क्रियापदम् । **सिद्धान्तीयत** इति सिद्धान्त इवाचर्यते शङ्कराचार्यैरित्यर्थः । सिद्धान्तीक्रियत इति वा पाठः । **इतरेषामिति** प्रकृत्यादीनाम् । प्रत्यक्षोपदेशसूत्रार्थमाहुः । **स्वाराज्यमिति** निरङ्कुशं स्वाराज्यं परमेश्वरवत् । **पूर्वसिद्ध** इति अन्तस्तद्धर्मोपदेशाद्यधिकरणसिद्धः । **तत** इति विशेषायतनस्थितेश्वरात् । **अतत्क्रत्विति** । अतत्क्रतुत्वात्तेषाम् । **अतत्क्रतुबाधादिति** पाठश्च । तेषां विकारालम्बनानां विकारोपासकानां तत्क्रतुत्वस्य निर्विकारक्रतुत्वस्याभावात् । द्वितीयपाठे तस्य विकारस्य क्रतुः तत्क्रतुः तत्क्रतोर्बाधः तत्क्रतुबाधः न तत्क्रतुबाधः अतत्क्रतुबाधः तस्मादित्यर्थः तत्क्रतुबाधाभावात् । **एवं सगुण** इति यथा सगुणे स्थितं निर्गुणं विकारालम्बना **अनवाप्य** विकारालम्बना **एवावतिष्ठन्ते** एवं सगुण इत्यादि । **तच्चेति** सगुणे ब्रह्मणि विकारावर्ति च निर्गुणं स्वरूपमस्ति तत् । **समापयन्तीत्य**धिकरणं समापयन्ति । **जीवस्येति** । जीवस्य सगुणोपासनात् सहैव मनसेश्वरसायुज्यं प्राप्तस्य । निरङ्कुशैश्वर्यासाधनेन सावग्रहस्यास्वतन्त्रस्याणिमाद्यैश्वर्यसाधने रूपद्वयं सगुणे ब्रह्मणि निर्गुणं ब्रह्मेति रूपद्वयम् । तस्य बोधकयोर्यथा सगुणब्रह्मस्थनिर्गुणब्रह्माप्राप्तिः सगुणब्रह्मोपासकस्येति दृष्टान्तः । दार्ष्टान्तिकस्तु, तथा सगुणोपासकस्य सगुणब्रह्मस्थनिरवग्रहजगद्व्यापारसहिताणिमाद्यैश्वर्याप्राप्तिरिति सावग्रहाणिमाद्यैश्वर्यसाधनार्थम् । **तयोरिति** सूत्रयोः । **दृष्टान्तार्थमिति** उक्तरीत्या । **विकारावर्तिन** इति विकारः कार्यं तदवर्तिनो निर्गुणस्य । न विकारावर्तिनः क्रतुत्वं निश्चयत्वमध्यवसायित्वं यस्मिन् सगुणब्रह्मोपासने तस्मात् । **अत्र सावग्रहैश्वर्य** इति निरवग्रहैश्वर्यप्राप्तौ हेतोरकथनेनेत्युक्तौ निरवग्रहैश्वर्यप्राप्तिप्रसङ्ग इति सावग्रहै-

भाष्यप्रकाशः ।

ग्रहत्वस्योपासनविध्यगोचरत्वादुपासके तदक्रतुत्वस्य समर्थिततया अतत्क्रतुत्वस्यैव तत्रापि हेतुत्वमुक्तप्रायमेवेति वाच्यम् । 'मनोमयः प्राणशरीर' इति हार्दोपासनवाक्ये 'सर्वकर्मे'ति विशेषणस्य सर्वं विश्वं तेनेश्वरेण क्रियत इति जगत्सर्वं कर्मास्य 'स सर्वकर्मा स हि सर्वस्य कर्ते'तिश्रुतेरित्येवं शङ्कराचार्यैरेव व्याख्याततया निरवग्रहत्वस्य विध्यगोचरताया वक्तुमशक्यत्वात् । न चोपासनात्तु पुरुषस्य विध्यधीनत्वेनास्वातन्त्र्यात् फलदशायां तथात्वमिति युक्तम् । पूर्वावस्थाधर्मस्य तदानीमुपगमे बद्धत्वस्यापि तदा प्राप्त्यापत्त्या मुक्तिविप्लवस्यैवापत्तेः । यच्च स्वातन्त्र्ये प्रातिभत्वप्रसङ्गादित्युक्तम्, तत्र नवनवोल्लासशालिनी बुद्धिः प्रतिभा, तत्सम्बन्धित्वमिति यदि, तदा तु 'स यदि पितृलोककामो भवती'त्यादिना नवनवबुद्धीनां श्रुत्यैव सूचनात्तत्प्रातिभत्वे स्वातन्त्र्यस्य दुरपोहताया एव सिद्धेः । तथा च

युक्तिभिरतिशिथिलाभिः समादधानो दृढान् दोषान् ।
वाचस्पतिरपि भाष्यव्याख्याव्याजेन दूषणं वक्ति । इत्येव सिद्धम् ।

न चैवं सिद्धान्तेपि मनोमयवाक्योक्तोपासकस्य तथात्वापत्त्या जगद्व्यापारापत्तिरिति शङ्क-

रश्मिः ।

श्वर्य इत्युक्तम् । **दृष्टान्तमात्रस्येति** । यथा निर्गुणब्रह्मप्राप्तिस्तथा न स्वतन्त्राणिमाद्यैश्वर्याप्राप्तिरिति दृष्टान्तमात्रस्याप्रयोजकत्वम् । श्यामे मित्रातनयदृष्टान्तेन मित्रातनयान्तरे श्यामत्वप्रसाधने यथा तथेत्यर्थः । **निरवग्रहत्वस्येति** सगुणब्रह्मधर्मस्य । सगुणब्रह्मोपासने तद्धर्ममन्तरा कथमुपासके तत्क्रतुत्वाभावस्य सोऽक्रतुर्यस्येति तदक्रतुरुपासकः तस्य भावस्तदक्रतुत्वं तस्य सिद्धिरत आहुः । **समर्थिततयेति** । **तत्रापीति** सावग्रहैश्वर्येपि । **सर्वमिति** । **विश्वमिति** व्याख्यानम् । **क्रियत इति** । **तेन क्रियत** इति कर्मेतिप्रत्यय इति बोधितम् । **स सर्वकर्मेति** स निरङ्कुशसर्वकर्मेति ज्ञातव्यम् । एवं निरवग्रहत्वनिरङ्कुशत्वमेतदुपासनविधिगोचरम् । तथा **सर्वस्य कर्तेत्यत्र** निरङ्कुशकर्तृत्वविशिष्टः कर्ता । **व्याख्याततयेति** निरवग्रहत्वस्योपासनविधिगोचरतया व्याख्याततया । **निरवग्रहत्वस्येति** निरङ्कुशत्वस्य । 'स क्रतुं कुर्वीत मनोमयः प्राणशरीर' इति छान्दोग्यीयविधेर**गोचरतायाः** । नन्वगोचरतायाः वक्तुं शक्यत्वं क्रतोर्विधिविषयत्वेन निरङ्कुशत्वस्याविषयत्वादिति चेन्न । **हार्दोपासनवाक्य** इति कथनान्न लिङ्गमात्रार्थं विवक्षणं किन्तु विधिवाक्यार्थविवक्षणात् । तथा च गीता 'करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रह' इति । 'ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः । सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचर' इति श्रीभागवते । अनपेक्षकस्य विधिगोचरत्व एव तन्निषेध इति । विध्यधीनत्वं विधिं विनाऽप्रवृत्तेः पुरुषस्य । **फलदशायामिति** अविधिगोचरजीवन्मुक्तदशायाम् । **तथात्वमविध्यगोचरत्वम्** । **पूर्वावस्थेति** मुक्तिपूर्वावस्था जीवन्मुक्तावस्था तस्याः धर्मो विध्यगोचरत्वं तस्य । **तदानीमिति** जीवन्मुक्तिकाले । **मुक्तिविप्लवस्येति** बद्धत्वभोजककर्मान्तरानबद्धत्वमिति मुक्तिप्रतिबन्धककर्मापत्त्या तथा । **स्वातन्त्र्य** इति जीवस्याणिमाद्यैश्वर्ये स्वातन्त्र्ये निरवग्रहत्वे । **सूचनादिति** । स इत्यादीनां स सोभिधेयार्थः । **दूषणं वक्तीति** सावग्रहैश्वर्ये हेतोः कथनेन दूषणमिव वक्तीत्यर्थः । एतावत्पर्यन्तं साधारणं जगज्जन्मादिकर्तृत्वमादाय जगद्व्यापाराराहित्यं विचारितम् । अधुना छान्दोग्यीयवाक्ये जगज्जन्मादिकं जगद्व्यापाराराहित्येन सहैव विद्यमानं विचारयन्ति स्म **न चैवमित्यादिना** । **मनोमयवाक्य** इति छान्दोग्ये 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इत्येकं वाक्यम् । एकतिङ् वाक्यमिति वैयाकरणाः । 'अर्थैकत्वा-

भाष्यप्रकाशः ।

नीयम् । ‘न तत्समश्चाभ्यधिकश्च दृश्यत’ इति श्रुत्या तादृशस्य फलस्य ततो व्यभिचारणात् । ‘यथा क्रतु’रिति पुरुषविशेषणबोधके पदे प्रकारांशे पुरुषाधिकारस्यापि निविष्टत्वात् समत्वाद्याकाङ्क्षायाश्च, ‘तेनार्हति ब्रह्मणा स्पर्धितुं क’ इति, ‘उषति ह वै स तं योऽस्मात् पूर्वो बुभूषती’ति श्रुतिभ्यां निषिद्धत्वेन तादृशोपासनेऽधिकारस्य निवृत्तेश्च । न चायमेव समाधिः शाङ्करेपि मतेऽस्त्विति वाच्यम् । तन्मते निर्गुणस्य रूपस्य सर्वाभ्यधिकत्वेन सगुणेऽभ्यधिकराहित्याभावेनाधिकसाहित्ये प्राप्ते उक्तरीत्या समसाहित्यस्यापि वक्तुं शक्यतया तद्राहित्यस्यापि दुरुपपादत्वेनैतच्छ्रुतिविषयतायास्तत्र वक्तुमशक्यत्वात् । समाभ्यधिकनिषेधावधिकतया निर्गुणबोधकत्वे च सगुणे समसाहित्यस्यै-

रश्मिः ।

देकं वाक्यं साकाङ्क्षं चेद्विभागे स्या’दिति द्वितीयाध्यायसूत्रे पूर्वमीमांसायां वाक्यलक्षणम् । ‘अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवती’ति द्वितीयं वाक्यम् । ‘स क्रतुं कुर्वीते’ति तृतीयम् । अग्रे ‘मनोमयः प्राणशरीर’ इत्यादि क्रतुस्वरूपम् । तत्र मनोमयवाक्योक्तोपासकस्येत्यर्थः । **तथात्वापत्त्येति** ब्रह्मणो मननोपदेशे मननरूपोपासनायां सर्वकर्मेतिविशेषणस्यापि सत्त्वेन जीवन्मुक्तदशायां संशयाभावरूपे फले स्वातन्त्र्यापत्त्या इत्यर्थः । **जगद्व्यापारेति** जगद्व्यापारो जगज्जन्मादिकर्तृत्वलक्षणस्तस्यापत्तिः । स्वातन्त्र्ये निरङ्कुशजगत्कर्तृत्वस्य नियतत्वात् । ‘स्वतन्त्रः कर्ते’ति पाणिनीयसूत्रादित्यर्थः । **तादृशस्येति** जगद्व्यापाररहितस्य ‘यस्य स्यादद्धा न विचिकित्सास्ति’ इति तत्रोक्तश्रुत्युक्तसंशयाभावरूपस्य फलस्य । **तत** इति समाभ्यधिकजगद्व्यापारसहितप्रपञ्चाद्व्यभिचारणात् । व्यभिचारोत्र समाभ्यधिकफलवत्त्वाभावाभावस्य । जगद्व्यापारसहितप्रपञ्चत्वासमानाधिकरण्यं व्यभिचारस्तादृशफले । ‘यथा क्रतुरस्मिंलोके पुरुषो भवति तथेतः प्रेत्ये’ति छान्दोग्ये । **प्रकारांश** इति थाल् प्रत्ययार्थः प्रकारस्तदंशे । अधिकारस्यापि प्रकारत्वान् निविष्टत्वं तस्मात् । **समत्वादीति** । आदिनाधिकत्वम् । **स्पर्धितुमिति** स्पर्ध सङ्घर्षे । सङ्घर्षः पराभिभवेच्छा पराभवेष्टुम् । **क इति** न कोपीति । समत्वाकाङ्क्षाया निषिद्धत्वम् । **उषति** उष् दाहे दहति । **स** आत्मा । **बुभूषतीति** भवितुमिच्छतीति बुभूषति भू सत्तायामिच्छार्थे सन् सनि द्वित्वम् । अनयाधिक्याकाङ्क्षाया निषिद्धत्वम् । आधिक्यं पूर्वत्वम् । ‘मद्भक्तपूजाभ्यधिके’त्यत्राधिक्यं प्राथम्यमिति व्याख्यानात् । **तादृशेति** मनोमयवाक्योक्ते ब्रह्मणो मननोपदेशे मननरूपोपासने । **अधिकारस्येति** ‘सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते’त्युक्ते सर्वजगतो ब्रह्मत्वेनोपासने स्पष्टनिरवग्रहोपासनाधिकारस्य । **अयमेव समाधिरिति** यथाक्रतुरिति पुरुषविशेषणबोधके पदे प्रकारांशे पुरुषाधिकारस्यापि निविष्टत्वान्निर्गुणफलाप्राप्तिः सगुणोपासकस्य सावग्रहाणिमाद्यैश्वर्यप्राप्तिश्च न निरवग्रहैश्वर्यप्राप्तिरिति समाधिरेव । **शाङ्करेपि मते** सगुणोपासकस्य न निर्गुणप्राप्तिः, सगुणप्राप्तावपि न निरवग्रहाणिमाद्यैश्वर्यप्राप्तिः किन्तु सावग्रहाणिमाद्यैश्वर्यप्राप्तिरित्यस्मिन्मते । **उक्तरीत्येति** अव्यवहितोक्तरीत्या । तथाहि । निर्गुणस्य रूपस्य सर्वासाम्येन सगुणे साम्यराहित्याभावेन समसाहित्ये प्राप्ते इति रीत्या । **तद्राहित्यस्येति** समाभ्यधिकराहित्यस्य । **एतच्छ्रुतीति** ‘न तत्समश्चाभ्यधिकश्चे’ति श्रुतिविषयतायाः । **तत्र शाङ्करे मते** । **समाभ्यधिकेति** समाभ्यधिकयोर्निषेधस्तस्यावधिकतया श्रुतेर्निर्गुणस्य बोधकत्वे च । **समसाहित्यस्येति** श्रुतौ तदित्यव्ययं लुप्तपञ्चमीकम्, निर्गुणाद् अवधेः समाभ्यधिकनिषेधेऽधिकधर्मादेर्मायिकत्वेनाधिक्यसाहित्याप्राप्त्या समसाहित्यस्यैवेत्यर्थः । विशिष्टं शुद्धान्नातिरिच्यत इति नैया-

भाष्यप्रकाशः।

वापत्तेश्च । अधिकारविचारेणातत्क्रतुत्वसाधने च निरवग्रहतायाः प्राप्तेरेवाभावेन स्वातन्त्र्यशङ्काया एवानुदयात् स्वातन्त्र्ये प्रातिभत्वप्रसङ्गस्यैवाभावादिति दिक् ।

भास्कराचार्यास्तु, सिद्धान्ते 'अविभागेन दृष्टत्वा'दित्यारभ्य परमकारणे सायुज्यं गतानां निरवधिकमैश्वर्यमिति स्थितम्। ये पुनर्वेदान्ते द्वैतवादिनो मन्यन्ते, मुक्ताः पृथगवतिष्ठन्त इति, तन्मतमभ्युपगम्य, सावधिकमैश्वर्यं तेषामपि प्रतिपादयितुं जगद्व्यापारवर्जाधिकरणमारभत इत्युक्त्वा, जगद्व्यापारादिसूत्रं पूर्ववदेव व्याख्याय, विकारावर्तिसूत्रे, पारमेश्वरं पुनरैश्वर्यं नित्यसिद्धं विकारावर्ति,स्वमहिमप्रतिष्ठत्वात्, 'तावानस्य महिमे'ति श्रुतेः। कार्यब्रह्मलोकवर्तिनां मुक्तानां 'सङ्कल्पादेवे'ति श्रुतेः। 'तदैरम्मदीयꣳ सरस्तदश्वत्थः सोमसवन' इति बहुविधमैश्वर्यं प्रकीर्त्य तत्रेश्वरायत्तमित्युपपन्नम्। 'दर्शयत' इति सूत्रे, परस्य ज्योतिषो विकारावर्तित्वं विकारानुग्राहकत्वं च 'न तत्र सूर्यो भाती'त्यादिश्रुतिस्मृती दर्शयत इत्युक्तवन्तः।

तन्मते विकारावर्त्यादिसूत्रयोर्यद्यपि न वैयर्थ्यम्, तथापि दहरविद्योक्तब्रह्मलोकस्य कार्यत्वं यदङ्गीकृतमेतैरन्यैश्च तच्चिन्त्यम्। तत्कार्यत्वबोधकप्रमाणानुपलम्भात् । न च प्रभुविमितं हिरण्मयमिति वेश्मविशेषणे विमितमितिपदे निर्मितत्वकथनादेकदेशस्य कार्यत्वे सर्वस्य तथात्वं शङ्क्यम्। विमितपदस्य विशेषेण मितं ज्ञातमित्यर्थकतयापि नेतुं शक्यत्वेन ततो निर्णयाभावात्। नापि, 'तृतीयस्यामितो दिवी'ति ब्रह्माण्डान्तर्वर्तित्वश्रावणात्तन्नाशे एतन्नाशात्कार्यत्वमिति वाच्यम्। 'नास्य जरयैतज्जीर्यती'त्यादिना आत्मरूपताबोधनेनास्याः शङ्कायाः प्रागेव निरस्तत्वात्। न च तदन्यदेव, नेदमिति वाच्यम्। एकप्रकरणगतत्वेन पूर्वं 'एतत्सत्यं ब्रह्मपुर'-

रश्मिः।

यिकोद्घोषात्। आपत्तिस्तु न तत्सम इति निषेधाद्बोध्या। अधिकारेति यत्र यस्याधिकारस्तस्य तत्क्रतुत्वं अन्यस्यातत्क्रतुत्वस्य साधने । निरवग्रहताया इति निरङ्कुशतायाः। स्वातन्त्र्येति निरङ्कुशतायाः । इत्युक्त्वेति भेदाभेदवादादित्युक्त्वा। सङ्कल्पादिति छान्दोग्ये 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ती'ति दहरविद्यायाम् । ऐरमिति इराया वारिणः सम्बन्धि न शुष्कम् । 'इरा वारिसुराभूमिभारतीषु प्रयुज्यत' इति विश्वः । इरान्नं तन्मय ऐरः मण्डस्तेन पूर्णमैरं सरः मदीयं तदुपयोगिनां हर्षोत्पादकमिति टीकायाम्। सोमसवन इति सोमं सूत इति सोमसवनः। नन्द्यादित्वाल्ल्युः। सोमं स्रवतीति सोमसवन इति टीकायाम्। 'सवनं यजने स्नाने सोमनिर्दलनेऽपि चे'ति विश्वः । तेन स्रवतीत्यस्य निर्दलतीत्यर्थः। दल विशरणे भ्वा. प. से.। तत्रेति छान्दोग्ये। ईश्वरायत्तमिति ऐश्वर्यम् । 'आत्मानमनुविद्य व्रजन्ती'ति पूर्वश्रुत्या स यदीत्यत्र स इत्यस्यात्मानुविदित्यर्थात्। न वैयर्थ्यमिति दृष्टान्तार्थत्वाभावान्न वैयर्थ्यमित्यर्थः। एकदेशस्येति हिरण्मयस्य। तथात्वं कार्यत्वम् । तृतीयस्यामिति छान्दोग्ये 'अथ यदिद'मित्यारम्भके प्रपाठकेऽस्ति। इतो भूलोकादारभ्यान्तरिक्षं चापेक्ष्य तृतीयस्यां तृतीयत्वेन व्यवस्थितायां दिवि द्युलोकाख्ये ब्रह्मलोके अरश्चेत्यादिरस्ति । प्रागेवेति दहराधिकरणे । 'जगद्व्यापारवर्जा'धिकरणे। तृतीयचरणे 'कार्यं बादरि'रित्यधिकरणे च। न च तदिति छान्दोग्यीयं दहरविद्योक्तम्। नेदमिति न 'तृतीयस्यामितो दिवी'त्यनया श्रुत्योक्तम्। तथा च 'नास्य जरये'त्यादिहेतुना तृतीयस्यामित्युक्ते नाशनिवृत्तिरिति भावः। एकप्रकरणेति मन्दाधिकारिप्रकरणगतत्वेन टीकायां स्पष्टम्।

भाष्यप्रकाशः।

मित्यनेनोक्तस्य ब्रह्मपुरस्य, 'तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोक' इत्यादिना परिकरपूर्वकं तत्प्रपञ्चनस्यैव भासमानतया भेदस्य वक्तुमशक्यत्वात्। उपबृंहितं चैतद् वाराहे चातुर्मास्यमाहात्म्ये चतुर्दशाध्याये क्षीरसमुद्रं प्रकृत्य।

'तन्मध्ये मम लोकस्तु परितो वलयाकृतिः।
योजनानां तु लक्षाणि विंशतिस्तस्य विस्तृतिः।
श्वेतद्वीप इति ख्यातः प्रलयेपि न नश्यति' ॥

इत्युक्त्वा, तत्र श्रीभूदुर्गात्मकभागत्रयं तत्परिमाणं संस्थां चोक्त्वा, तत्र भूदुर्गाभागयोस्तत्स्थानां चावान्तरप्रलये नाशाभावमुक्त्वा,

'तस्मिन् स्थाने लयं याते प्रविशन्त्युदरे मम'।

इति ब्रह्मणो लये भूदुर्गाभागस्थानां स्वोदरे स्थितिमुक्त्वा

'श्रीभागे संस्थिता ये तु न तेषां प्रलये भयम्।
शाश्वतः स तु मे लोको न नश्येद् ब्रह्मणो लये ॥
मुक्ता एव तु मां तत्र वीक्षन्ते सर्वदैव तु।
कल्पान्तप्रभवो वह्निर्जलं वा भूमिदुर्गयोः ॥
भागौ न स्पृशते तौ हि चक्रेण परिरक्षितौ।
तत्रस्थास्तु जनाः सर्वे मोदन्ते सर्वदैव तु ॥
कल्पान्तप्रभवां बाधां न ते जानन्ति जातुचित्।
श्वेतद्वीपादधस्तात्तु पृथ्वी तिष्ठति पीठवत् ॥
सृष्टौ स्पृशति तद्वीपं प्रलये तु वियुज्यते।
मम शक्त्यैव स द्वीपः सदा तिष्ठति शाश्वतः ॥
भूमिश्रीभागयोर्मध्ये लक्षयोजनविस्तृतः।
अरनामा सुधाम्भोधिर्मुक्तामुक्तनिषेवितः ॥
अर्धं तस्य तु भूभागः श्रीभागस्यार्धमेव च।
लक्षयोजनमध्ये तु द्वीपाकारोऽस्ति तत्तटम् ॥
दशयोजनसाहस्रं विस्तृतिस्तस्य कीर्तिता।
अर्धनाशो भवेत्तस्य प्रलये च पुनः पुनः ॥
अर्धो भागस्तु मुक्तानां क्रीडास्थानं न नश्यति।
दुर्गाश्रीभागयोर्मध्ये ण्यनामामृतसागरः ॥

तदर इति अरश्च ण्यश्च ह वै प्रसिद्धौ अर्णवौ समुद्रौ वर्तेते इत्यर्थः। तदिति पूर्वान्वयि। ब्रह्मचर्यमेव तदित्यर्थः। इत्यादिनेति आदिना 'तृतीयस्यामितो दिवि' 'तदैरम्मदीय९सर' इत्यादि। तत्प्रपञ्चनस्येति 'एतत्सत्यं ब्रह्मपुर'मित्यनयोक्तब्रह्मपुरप्रपञ्चनस्य। भेदस्येति 'तृतीयस्यामितो दिवी'त्युक्तस्य ब्रह्माण्डान्तर्वर्तिनो 'नास्य जरये'त्यनयोक्तस्य सत्यब्रह्मपुरस्य च भेदस्य। तन्मध्य इति क्षीरसमुद्रमध्ये। वलयेति वलयवद्वर्तुलाकृतिः। योजनं चतुःक्रोशी। 'योजनं तु चतुःक्रोश्यां योगे च परमात्मनी'ति विश्वः। विंशतिर्लक्षाणि अशीतिलक्षक्रोशपरिमिता विस्तृतिः। कल्पान्तः ब्रह्मदिनान्तः। दशेति चत्वारिंशत्सहस्रक्रोशपरिमिता।

भाष्यप्रकाशः।

तस्याप्येवं विभागोऽस्ति नित्यानित्यविभेदतः।
अरण्याख्यौ सुधासिन्धू धूमलोकत्रयेपि च॥
वर्तेते मम भक्तानां क्रीडायै सर्वकामदौ'।
इति लोकत्रयं तु वैकुण्ठानन्तासनश्वेतद्वीपभेदेन तत्रैवोक्तम्।

तेषु छान्दोग्योक्तो वैकुण्ठाख्यो ज्ञेयः। 'तृतीयस्यामितो दिवी'ति विशेषणेन उच्चस्थत्वबोधनादिति। अतः स लोको न कार्यः, किन्तु नित्य एवेति निश्चयः। लोकस्य ब्रह्मरूपत्वादेव च न तत्प्रभोरपि स्वप्रतिष्ठत्वहानिरिति सर्वमनवद्यम्।

रामानुजाचार्यास्तु, मुक्तस्यैश्वर्यं जगत्सृष्ट्यादिपरमपुरुषासाधारणम्, उत तद्रहितं केवलपरमपुरुषानुभवविषयमिति संशये, जगदीश्वरत्वमपीति पूर्वः पक्षः। 'निरञ्जनः परमं साम्यमुपैती'ति श्रुतेर्मुक्तस्य सङ्कल्पत्वश्रुतेश्च। तत्र सिद्धान्तस्तु जगद्व्यापारवर्जं मुक्तैश्वर्यं निरस्तनिखिलतिरोधानस्य मुक्तस्य निर्व्याजब्रह्मानुभवरूपमैश्वर्यम्। तत्र हेतुः 'प्रकरणा'दित्यादि। अर्थस्तु पूर्ववदेव। श्रुतयः परं बह्व्य उपन्यस्ताः। अग्रिमसूत्रे च, 'स स्वराड् भवती'त्यादिभिर्जगन्नियमनरूपं व्यापारमाशङ्क्य, 'आधिकारिकमण्डलस्थोक्ते'रित्यस्य अधिकारे नियुक्ता ये हिरण्यगर्भादयो मण्डलं तेषां लोकाः तत्स्था भोगा मुक्तस्याकर्मवश्यस्य भवन्तीत्ययमर्थः 'तस्य सर्वेषु लोकेषु कामचारो भवती'त्यादिनोच्यते। तथा च कर्माप्रतिहतज्ञानो मुक्तो विकारिलोकान् ब्रह्मभूताननुभवतीत्यनेन वाक्येनोच्यते, न जगद्व्यापार इत्युक्त्वा, अग्रिमसूत्रेषु मुक्तस्य सत्यसङ्कल्पत्वं परमपुरुषसाम्यं च परमपुरुषासाधारणनिखिलजगन्नियमनश्रुत्यानुगुण्येन वर्णनीयमिति साधयन्ति। तेन तन्मतं सिद्धान्ताद् अविरुद्धमित्युपरम्यते।

तन्मतस्थौरस्तु, रामानुजाचार्यवदेव सूत्राणि व्याख्याय शिवलोकस्य सर्वतः परत्वं परब्रह्मणः शिवाकारत्वं चोक्तवान्। तत्तु तदुपन्यस्तेन्द्रप्रजापतिसंवादश्रुतेरपि विरुध्यते। तत्र 'स उत्तमः पुरुष' इत्यनेन परज्योतिषः पुरुषोत्तमत्वेन प्रतिपादनात्। अग्रे च 'श्यामाच्छबलं

रश्मिः।

धूमेति धूमादिमार्गप्राप्यलोकत्रयेपि। **जगत्सृष्ट्यादीति** ऐश्वर्यविशेषणम्। **परमपुरुषेति** सर्वेश्वरत्वम्। **तद्रहितमिति** परमपुरुषासाधारण्यरहितं सर्वेश्वरत्वरहितमित्यर्थः। **केवलं** परमपुरुषसंसर्गजम्। **परमपुरुषेति** साधारणमित्यर्थः। केवलपरमपुरुषेत्यादिसमस्तपाठोऽपि। **सङ्कल्पत्वेति** सत्यसङ्कल्पत्वश्रुतेरित्यर्थः। सत्यसङ्कल्पत्वश्रुतेश्चेति रामानुजभाष्यात्। **अग्रिमेति** प्रत्यक्षोपदेशसूत्रे। **व्यापारमिति** प्रत्यक्षोपदेशादित्यनेनोक्तप्रत्यक्षोपदिष्टम्। **मण्डलं तेषामिति** तेषां मण्डलं लोका इत्यर्थः। **अनेन वाक्येनेति** 'स स्वराड् भवती'ति वाक्येन। **जगद्व्यापार इति** जगज्जन्मादिकर्तृत्वलक्षणः। **अग्रिमसूत्रेष्विति** चतुर्षु। **मुक्तस्येति** तदीयं भाष्यकमिदम्। त्रिसूत्र्यन्ते परमपुरुषसाम्यं सत्यसङ्कल्पत्वमिति पाठो भाष्येऽत्र तु विपरीत इति प्रकाशो भाष्यमिवेतीदं व्याख्यानं भाष्यकमित्युक्तम्। अग्रेनावृत्तिसूत्रम्। **परमेति** कतिपयगुणैर्बोध्यम्। तेन जगद्व्यापारवर्जमेव मुक्तैश्वर्यमीश्वरायत्तं च। **साधयन्तीति** त्रिसूत्र्यामेव साधयन्ति। चतुर्थे तु सूत्रे ईश्वरस्य स्वातन्त्र्येपि न तत्सङ्कल्पान्मुक्तावृत्तिमाहुः **सिद्धान्तादविरुद्धमिति**। तथा च तैरेवोक्तम् 'ब्रह्माभेदोपासनाज्ज्ञानतो वा ब्रह्मात्मैक्येप्यज्ञतामत्यजन्तः। यस्यैश्वर्यादासते यन्नियम्यास्तं श्रीकृष्णं देवदेवं नमामी'ति भेदाभेदवादे भेद इव शब्दार्थोऽत्र। **तन्मतेति** भगवाञ्छैवाचार्यः। **इन्द्रप्रजापतीति** छान्दोग्ये समासिकेस्ति। **अग्रे**

भाष्यप्रकाशः ।

प्रपद्ये' इत्यादिना श्यामवर्णश्रावणाच्च । लोकोपि ततः पूर्वं दहरविद्योक्त एव सन्निहितः । स चारण्याख्यार्णवद्वयव्याप्तो वाराहपुराणवाक्यैर्भगवल्लोकत्वेन निश्चितः । अथर्वशिरःशिखाद्याश्च विद्याः भगवद्विद्यानां न तुल्याः । 'अथर्वशिरःशिखाध्यायिशतमेकमेकेन मन्त्रराजजापकेन तत् सम'मिति नृसिंहपूर्वतापनीये श्रावणात् । अतस्तत्प्रतिपाद्यस्य रूपस्य न भगवत्तुल्यत्वम् । वेद्योत्कर्षत एव विद्योत्कर्षसिद्धेरिति । एतत् सर्वं पूर्वमपि किञ्चिदुक्तं प्रहस्ताख्ये वादे च मया निपुणतरमुपपादितमिति न पुनः प्रपञ्च्यते ।

माध्वास्तु, जगद्व्यापारसूत्रे, 'सर्वान् कामानाप्त्वा अमृतः समभव'दिति काञ्चन श्रुतिं लिखित्वा, तस्या जीवप्रकरणगतत्वाज्जीवानां जगज्जननादिसामर्थ्यविदूरत्वाच्च सृष्ट्यादिभ्योऽन्यानेव कामानाप्नोतीत्युक्त्वा, 'स्वाधिकानन्दसम्प्राप्तौ सृष्ट्यादिव्यापृतिष्वपि । मुक्तानां नैव कामः स्यादन्यान् कामाँस्तु भुञ्जते । तद्योग्यता नैव तेषां कदाचित् क्वापि विद्यते । न चायोग्यं विमुक्तोपि प्राप्नुयान्न च कामये'दिति वाराहवचनं लिखन्ति । अग्रिमसूत्रे च, 'सर्वेस्मै देवा बलिमावहन्ती'ति श्रुत्या ब्रह्मविदि जगदैश्वर्यमस्तीत्याशङ्क्य, तत्र आधिकारिकमण्डलस्थ आधिकारिकसमूहाधिपतिर्ब्रह्मा, तत्रोच्यत इत्युक्त्वा, 'आत्मेत्येवं परं देवमुपास्य हरिमव्ययम् । केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन । अत्रैव च स्थितिस्तेषामन्तरिक्षे च केचन । केचित् स्वर्गे महर्लोके जने तपसि चापरे । केचित् सत्ये महाज्ञाना गच्छन्ति क्षीरसागरम् । तत्रापि क्रमयोगेन ज्ञानाधिक्यात् समीपगाः । सालोक्यं स्वस्वरूपत्वं सामीप्यं योग एव च । इमामारभ्य

रश्मिः ।

चेति छान्दोग्ये दहरादिविद्याङ्गभूतजपादिविधानार्थं मन्त्रोयम् । **श्यामात्कृष्णाच्छबलं** आकाशशबलमाकाशशरीरं ब्रह्मलोकं प्रपद्ये गच्छामि । शबलाच्छ्याममिति व्यतिहारः । **इत्यादिनेत्यादिना** 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवाम्यभिसम्भवामीती'ति । अर्थस्तु तत्प्राप्तिमनेकदृष्टान्तेनाह अश्व इवेति । यथा अश्वो रोमाणि विधूय कम्पनेन श्रमं पार्श्वादि च रोमतोपनीय निर्मलो भवति तथा हार्दब्रह्मज्ञानेनोपासको ह शरीरं धूत्वा पापं धर्माधर्माख्यं विधूयापनीय निर्मलः सन्, चन्द्र इवेति यथा राहुग्रस्तश्चन्द्रो राहोर्मुखात्प्रमुच्य भास्वरो भवति विद्यमानस्वस्वरूपो भवत्येवमुपासको ह शरीरं धूत्वा इहैव ध्यानेन कृतात्मा कृतकृत्यः सन् अहमकृतं ब्रह्मलोकं नित्यं अभि अभितः मार्गभेदेन सम्भवामि प्राप्नोमि । द्विरुक्तिः कर्माभिप्राया । ज्ञानिनामक्षरे लयान्न नित्यब्रह्मलोकप्राप्तिः । इतिशब्दो ध्यातुर्ध्यानसमाप्त्यर्थः । अभ्यासो मन्त्रसमाप्त्यर्थोपि । आकाशशरीरं कथं ब्रह्मलोक इत्याकाङ्क्षायामग्र आह छान्दोग्य एव 'आकाशो ह वै नामरूपयोर्निर्वहिते'त्यादिना लोकप्रयोजकत्वमाकाशस्योक्तम् । **अरण्याख्येति** अरश्च ण्यश्च अरण्यौ, अल्पाक्षरं पूर्वमित्यस्य छन्दसि विकल्पः, तौ आख्या यस्यार्णवद्वयस्य तेन व्याप्तः । **विद्या इति** शिवविद्याः । **भगवद्विद्यानामिति** भगवद्विद्याभिरित्यर्थः । **कर्मादीनामपि** सम्बन्धसामान्यविवक्षायां षष्ठ्येवेति । **पूर्वमिति** द्वितीयाधिकरणे 'एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायण' इति सूत्रभाष्ये । **समभवदिति** उपासको भक्तो वा । **तद्योग्यतेति** सृष्ट्यादिव्यापृतियोग्यता । **सर्वेऽस्मा** इति अस्मै नित्यक्रीडायुक्ताय ब्रह्मणे । **इत्याशङ्क्येति** 'प्रत्यक्षोपदेशा'दिति सूत्रांशेनाशङ्क्य । **तपसीति** तपोलोके । **मुच्यन्त इति** सद्योमुक्तिं कुर्वते । **नोत्क्रामन्तीति** देहेभ्यो नोत्क्रामन्ति । **अत्रेति** भूलोके । **क्रमयोगेनेति** क्रममानेनेत्यपि पाठः । **योग एवेति** 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजये'दित्युक्तम् । **इमामिति**

भाष्यप्रकाशः।

सर्वत्र यावत्तु क्षीरसागरम्। पुरुषोऽनन्तशयनः श्रीमन्नारायणाभिधः। मानुषा वर्णभेदेन तथैवाश्रमभेदतः। क्षितिपा मनुष्यगन्धर्वा देवाश्च पितरश्चराः। आजानजाः कर्मजाश्च तात्त्विकाश्च शचीपतिः। रुद्रो ब्रह्मेति क्रमशस्तेषु चैवोत्तमोत्तमाः। नित्यानन्दे च भोगे च ज्ञानैश्वर्यगुणेषु च। सर्वे शतगुणोद्रिक्ताः पूर्वस्मादुत्तरोत्तरम्। पूज्यन्ते चावरैस्ते तु सर्वपूज्यश्चतुर्मुखः। स्वजगद्व्याप्तिस्तेषां पूर्ववत् समुदीरिता। सयुजः परमात्मानं प्रविश्य च बहिर्गताः। चिद्रूपान् प्राकृतांश्चापि विना भोगांस्तु काँश्चन। भुञ्जते मुक्तिरेवं ते विस्पष्टं समुदाहृते'ति गारुडवाक्यानि लिखन्ति।

तेन तन्मते मुक्तानां मुक्तेश्च तारतम्यं सिध्यति।

विकारावर्तिसूत्रे च 'स्वाधिकारेण वर्तन्ते देवा मुक्तावपि स्फुटम्। बलिं हरन्ति मुक्ताय विरञ्चाय च पूर्ववत्। समस्तकास्तु ते देवा विष्णवेऽत्र विशेषतः। न विकाराधिकारास्तु मुक्तानामन्य एव तु। विकाराधिकृता ज्ञेया ये नियुक्तास्तु विष्णुने'ति वाराहवचनं लिखन्ति।

तेन तन्मते मनुष्यादीनां चतुर्मुखान्तानां स्वस्वव्यापारकरणं तत्राधिकारश्च सिध्यति।

कश्चित्तु, मुक्तौ तारतम्यमस्ति, न वेति सन्देहे तारतम्ये प्रमाणाभावात्तदङ्गीकरणे च 'निरञ्जनः परमं साम्यमुपैती'ति श्रुतिविरोधान्मुक्तेः स्वर्गसंसारसाम्यापत्तेर्मुक्तानां स्वसमाभ्यधिकदर्शने दुःखेर्ष्यादिप्रसङ्गाच्च न मुक्तेस्तारतम्यमिति पूर्वपक्षः। सिद्धान्तस्तु तैत्तिरीये, 'सैषानन्दस्य मीमा[1]सा भवति ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाऽकामहतस्ये'त्यादिश्रुत्या मनुष्यगन्धर्वप्रभृतिब्रह्मान्तानां श्रोत्रियत्वमकामहतत्वं च श्रावितम्। वाजसनेयके च, 'अथ ये शतं कर्मदेवानामानन्दाः स एक आजानजानां देवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहत' इत्यादिश्रुत्याजानजानारभ्य ब्रह्मलोकस्यानन्दपर्यन्तमकामहतत्वमवृजिनत्वं च श्रावितम्। अकामहतत्वं च कामकृतोपद्रवरहितत्वम्, न त्वकामत्वं हतशब्दवैयर्थ्यात्। अवृजिनत्वं च पापरहितत्वं दुःखरहितत्वं वा। अवृजिनत्वाकामहत-

रश्मिः।

भूमिम्। यावत्तु वस्तुषु। क्षीरसागरं लक्ष्मीकृत्य। चिरा: पुराणाः। शचीपतिरिन्द्रः। स्वजगदिति तृणारणिमणिन्यायेन तत्तद्ब्रह्माण्डान्तरेष्वियं बोध्या। पूर्ववदिति ब्रह्मवत्। ते समुदीरिताः। सयुज इति सह युनक्तीति सयुक् जसि सयुजः। चिद्रूपान् रौद्रान्। 'वेदः शिवः शिवो वेद' इति श्रुतेः। सदानन्दः कृष्णः चिच्छब्दः 'नामचिद्दिवक्तने'त्यृग्वेदश्रुतेः। प्राकृतान्मायिकान् मानसान् 'माया मनः सृजती'ति श्रीभागवतात्। विनायोगे द्वितीया मानसान्प्राकृतान् भोगान् विना। त इति। अर्थो गरुडपुराणाज्ज्ञातव्यः। पूर्ववदिति चतुर्थ्यन्ताद्वतिः। ब्रह्मवत्। 'विकारावर्ति चे'ति सूत्रार्थः। न विकाराधीति ते न विकारावर्तिनः किन्तु मुक्तानां मध्येऽन्ये तरतममुक्तिं प्राप्ता एवेत्यर्थः। 'तथाहि स्थितिमाहे'ति सूत्रांशार्थः विकाराधीति। नियुक्ता इति आज्ञाद्वारा वैधे नियुक्ताः। कश्चित्त्विति माध्वा इत्येव। सिद्धान्तस्त्विति वदन्तीत्यग्रेन्वयः। श्रोत्रियस्येति श्रोत्रियश्छन्दोधीते यः सः। अवृजिनत्वेति मुक्तलिङ्गत्वमित्यनेनान्वयः।

---

[1] ꣳसा इति प्रकाशपाठः।

भाष्यप्रकाशः ।

स्वयोश्च 'यत्राप्ताः कामास्तत्र माममृतं कृधी'ति श्रुत्या, 'स हि मुक्तोऽकामहत' इति ब्रह्माण्डवाक्येन च मुक्तलिङ्गत्वम् । न चैतयोरपरोक्षज्ञानिलिङ्गत्वमिति शङ्क्यम् । प्रारब्धपापतत्कार्यदुःखयोस्तस्मिन्नपि सत्त्वात् । श्रोत्रियत्वमपि मुक्तस्यैव मुख्यम् । 'प्राप्तश्रुतिफलत्वात्तु श्रोत्रियाः प्राप्तमोक्षिणः । ते एव चाप्तकामत्वात् तथाऽकामहता मता' इति भारतोक्तेः । एवं सत्येतेषां मुक्तलिङ्गत्वम् । एवं सत्येतयोः श्रुत्योरुत्तरोत्तरमानन्दाधिक्यकथनं मुक्तितारतम्ये पर्यवस्यति । किञ्च 'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवु'रित्यादितैत्तिरीयश्रुतौ मनोवेगे सर्वेषामसाम्यकथनात्, 'मुक्तानामपि सिद्धानां नारायणपरायणः स दुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इति श्रीभागवतवाक्ये, 'मुमुक्षोरमुमुक्षुस्तु परो ह्येकान्तभक्तिमा'निति पुराणान्तरवाक्ये, 'अन्ये त्वेवमजानन्त' इति, 'स्त्रियो वैश्यास्तथा शूद्रा' इति गीतावाक्ये च साधनतारतम्येन फलतारतम्यप्रतिपादनात्, 'अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी'ति वाक्ये चाल्पभक्तिसाध्यमुक्तितोऽधिकभक्तिसाध्यमुक्तेराधिक्यप्रतिपादनात्, अस्मदादिमुक्तभोगो, मुक्तचतुर्मुखभोगान्निकृष्टः, अस्मदादिभोगत्वात्, संसारस्थास्मदादिभोगवदित्यनुमानादपि मुक्तौ तारतम्यमेव पर्यवस्यतीति प्रमाणाभावरूपो हेतुरसिद्धः । दुःखाभावसत्यकामत्वादिना सरःसागरयोरिव स्वयोग्यानन्दपूर्त्या च मुक्तानां ब्रह्मसाम्ये साम्यश्रुत्युपपत्तेस्तद्विरोधरूपो हेतुरप्यसिद्धः । बहुजन्मनिर्गतदोषत्वे ब्रह्मापरोक्षाद् द्वेषेर्ष्यादिसम्भावनाया एवाभाव इति सोऽप्यसिद्धः । अतो मुक्तितारतम्यं निष्प्रत्यूहमिति वदन्ति ।

तत्र यदि मुक्तेस्तारतम्यम्, तदापि मुक्तिं प्रति तत्तदुपासनाया भक्तेर्वा तदनुरूपाया एव कारणत्वमिति तत्क्रतुन्यायादेव तारतम्यक्रमादिसिद्धिरिति किमनेन विचारेणेति प्रकृतानुपयोगात्तदनुचिन्तनप्रयोजनस्याप्यनुपलब्धेश्च तत्र वयमुदासीनाः ।

प्रकृतमनुसरामः । अत्रैतत् सिद्धम् । ज्ञानमार्गीयाणां तद्रीत्याऽदृश्यत्वादिगुणकाक्षरोपासने तत्क्रतुन्यायेन तादृशेऽक्षरे 'ब्रह्मैव सन् ब्रह्माऽप्येती'तिश्रुत्युक्तो लयः । अक्षरस्य,

रश्मिः ।

एतयोरिति अवृजिनत्वाकामहतत्वयोः । तस्मिन्निति ज्ञानिनि । प्राप्तमोक्षिणो मुक्ताः । एतेषामिति श्रोत्रियत्वाकामहतत्वावृजिनत्वानाम् । एतयोरिति तैत्तिरीयवाजसनेयकयोः । सर्वेषामिति अक्षण्वतां कर्णवतां सखीनाम् । अन्ये त्वेवमिति 'ज्ञात्वान्येभ्य उपासत' इति द्वितीयचरणः । प्रमाणाभावेति इमे हेतवः क्वचित्त्वित्यादिनोक्ताः । असिद्ध इति मुक्तिः तारतम्याभाववती तारतम्ये प्रमाणाभावाच्छ्रुतिविरोधाद्दुःखेर्ष्यादिप्रसङ्गाज् जनकवद् व्यतिरेके जयविजयवत् । मुक्तिस्तारतम्यवती प्रमाणसत्त्वाच्छ्रुतिविरोधाभावाद् दुःखेर्ष्यादिप्रसङ्गाभावादुक्तभक्तवद् व्यतिरेके ज्ञानिवद् इति सत्प्रतिपक्षत्वेऽपि स्वरूपासिद्धः । सिद्धान्तवाक्यैः झटिति स्वरूपासिद्धिबोधात् । द्वितीये हेतुसम्बन्धिविचारमाहुः दुःखाभावेति । सोपीति दुःखेर्ष्यादिप्रसङ्गरूपो हेतुरपि ।

तत्क्रतुन्यायेनेति अप्रतीकालम्बनसूत्रोक्तेन । तादृश इति ज्ञानिनामक्षरत्वेनोपस्थितेऽक्षरे । ब्रह्मैव सन्निति सामीप्यमुक्त्या ब्रह्मैव सन् बहिःप्रकटे निर्विशति सद्योमुक्तिं प्राप्नोतीत्यर्थे भक्तिमार्गे, ज्ञानेनाविद्यानिवृत्तौ सायुज्याद्ब्रह्मैव सन् ब्रह्माप्येतीत्युपचर्यते । यद्वा । युक्तः सन् भक्तिलाभे ब्रह्माप्येति परब्रह्मसामीप्यमप्येति गच्छति ज्ञानीत्यर्थः । अक्षरत्वेनोपस्थितिमुक्त्वा

---

१. श्रुत्वा।

भाष्यप्रकाशः ।

'तद्धाम परमं ममे'ति वाक्योक्तभगवद्धामत्वज्ञानपूर्वकं नित्यभगवल्लोकत्वेन भगवदभिन्नत्वेन दहराद्युक्तरीत्योपासने यथाधिकारं सालोक्यादिचतुष्टयप्राप्तिः । आदित्याद्युपासनानामङ्गोपासनात्वात् पञ्चाग्न्युपासनाया अपि तत्रैव प्रवेशस्योपपादितत्वादर्चिरादिक्रमेण गत्वाऽमानवेन पुरुषेण भगवल्लोकप्राप्तिरैश्वर्यादिभोगश्च । उपासनायां मर्यादाभक्तिसाहित्ये तु वैकुण्ठादिलोकेषु भगवत्सेवकत्वमधिकम् । तदा रामानुजभाष्योक्तरीत्या भगवदनुभवः । तत्रापि भक्तेरुत्कर्षे तु भगवच्चरणे कौस्तुभादौ वा प्रवेशेन भगवत्सायुज्यम् । अनुग्रहविशेषेण पुष्टिभक्तौ तु, 'भक्त्या मामभिजानाती'त्युक्तरीत्या स्वस्मिन् प्रवेश्य भूमविद्योक्तरीत्या पुनः प्रथममाविर्भाव्य भजनानन्दानुभावने 'सोऽश्नुत' इति श्रुत्युक्तरीतिकं भोगं कारयतीति ॥ २२ ॥

इति पञ्चमं जगद्व्यापाराधिकरणम् ॥ ५ ॥

रश्मिः ।

भक्तिमार्गेऽक्षरस्य भगवद्धामत्वेनोपस्थितौ या मुक्तिस्तामाहुः । **अक्षरस्येति** । **नित्यभगवल्लोकत्वेनेति** न त्वक्षरत्वेन । **दहरादीति** तत्रापि पूर्वोक्तरीत्या । आदिनात्मबोधोपनिषत् । तट्टीका मयापि कृता । **सालोक्यादीति** सालोक्यानन्तरमक्षरात्मकदेहे सार्ष्टिः भगवत्समाना ऋष्टिः गतिरलौकिकसामर्थ्यम्, तया सामीप्यम्, ततः सारूप्यमलकादिषु लयः । सालोक्यमुक्तिविशेषत्वात् । एतच्चानावृत्तिः शब्दादनावृत्तिः शब्दादिति सौत्रवीप्सया स्मृतम् । चतुर्णां पादानां विचारितार्थानाहुः **आदित्याद्युपासनानामिति** । **उपपादितत्वादिति** तत्रैव भाष्यप्रकाश उपपादितत्वात् । एवं प्रथमपादविचारितार्थमुक्त्वा द्वितीयपादविचारितार्थमाहुः **अर्चिरादिक्रमेणेति** । तृतीयपादविचारितार्थमाहुः **अमानवेनेति** । चतुर्थपादविचारितार्थमाहुः **उपासनायामिति** । उपासनयाधिदैविकचित्तशुद्ध्या जाताया मर्यादायाः साहित्ये तु सा च वेदोक्तातिविस्तरे तु स्कन्दपुराणीयचातुर्मास्यमाहात्म्योक्ता विस्तृता । विस्तृतायामप्यनधिकारे श्रीभागवतैकादशस्कन्धैकोनविंशोक्ता श्रुतात्मनिवेदने श्रवणादिसरणिरूपा । 'श्रीकृष्णः शरणं मम' इति शरणमन्त्रस्तु ज्ञानमार्गे सकामे, ब्रह्माहमस्मीति मन्त्रवत् । भक्तिमार्गेऽभेदाभावादक्षरस्य चाभावात् सच्चिदानन्दः श्रीकृष्णः ममाक्षरात्मकस्य सेवकस्य स्वामी शरणं रक्षिता इत्यनुसन्धानं कर्तव्यम् । तदुक्तम् 'तस्मात्सर्वात्मना नित्यं श्रीकृष्णः शरणं मम । वदद्भिरेवं सततं स्थेयमित्येव मे मति'रिति परमार्थविदाचार्यैः । **तत्रापीत्यादि** मर्यादाभक्तावपि । **उत्कटत्वे** व्यसनात्मकत्वे । **भगवच्चरणे इति** मर्यादापुरुषोत्तमचरण इति साधनभक्तिविचारेणोक्तं भक्त्यात्मकचरणप्रवेशेनेति । जीवविचारेण त्वाहुः **कौस्तुभादाविति** 'जीवस्य तत्त्वममलं मणिमस्य कण्ठ' इति वाक्यात् । आदिना चैद्यज्योतिषो मुक्तिस्थलम् । 'वृत्रदेहोत्थितं ज्योतिर्वासुदेवमुपाविश'दिति वृत्रमुक्तिस्थानं च । 'यतो वाच' इति श्रुत्या पुष्टिस्थस्याविषयत्वाद् वाग्विषयो व्याख्यातः । 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तमम्' इति वाक्यात् । वासुदेवस्याक्षरत्वं वेदप्रतिपाद्यत्वात् । 'वासुदेवः परं ब्रह्म एष छन्दसि पठ्यत' इति ज्योतिर्ग्रन्थवाक्यात् । पुरुषोत्तमस्तु भक्तैः सह निगूढभावकरणं करोति । तस्य स्वरूपात्मकहास्यचरणादौ वा । पुरुषोत्तमविचारेण त्वाहुः **अनुग्रहेति** । **स्वस्मिन्निति** चरणे कौस्तुभादौ वा प्रवेश्य । **भूमविद्येति** छान्दोग्ये नारदसनत्कुमारसंवादेऽस्ति । **पुनरिति** । 'तस्य वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशे'त्यादिना तथा । भोगाक्षेप्याविर्भावादिरिति चेत्तर्हि पुनःपदेनाक्षेप्याविर्भावतिरोभावापेक्षया पुनः पृथगाविर्भाव उच्यत इत्यदोषः ॥ २२ ॥ **इति पञ्चमं जगद्व्यापाराधिकरणम् ॥ ५ ॥**

जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम् ।
तदन्यदिति ये प्राहुरासुराँस्तानहो बुधाः ॥ १ ॥
नानामतध्वान्तविनाशनक्षमो
वेदान्तहृत्पद्मविकासने पटुः ।
आविष्कृतोऽयं भुवि भाष्यभास्करो
मुधा बुधा धावत नान्यवर्त्मसु ॥ २ ॥
पुरन्दरमदोद्भवप्रचुरवृष्टिसम्पीडित-
स्वकीयवरगोकुलावनपरायणो लीलया ।
स्मितामृतसुवृष्टिभिः परिपुपोष तान् यो गिरिं
दधार च स एव हि श्रुतिशिरस्सु संराजते ॥ ३ ॥

भाष्यप्रकाशः ।

एवं सर्वं शास्त्रं व्याख्याय स्वीयशिक्षार्थं सङ्क्षेपेण तदर्थमुपदिशन्ति जानीतेत्यादि । तदन्यदिति । तत् परमं तत्त्वम् । अन्यत् यावद्धर्मशून्यम् ॥ १ ॥

भाष्यविभावनार्थमुपदिशन्ति नानेत्यादि ॥ २ ॥

अत्रोक्तस्य फलस्य भगवत्कृपाधीनत्वाद्भगवतः कृपालुत्वं स्वीयरक्षकत्वेन स्फुटीकुर्वन्ति पुरन्दरेत्यादि । हिर्हेतौ ॥ ३ ॥

रश्मिः ।

शास्त्रमिति उपाङ्गमीमांसाशास्त्रम् । अवयवेष्वपि शास्त्रत्वमविरुद्धम् । षट् शास्त्राणि । **सङ्क्षेपेणेति** सन्दिग्धवाक्यानां मीमांसाविषयत्वाद्विस्तरे बुद्ध्यनिवेशाच्च सङ्क्षेपेण शास्त्रार्थम् । **जानीतेत्यादीति**। फलाध्याये प्रतिपादितं सन्दिग्धफलमुपदिशन्ति आज्ञापयन्ति यथा स्वमार्गीयः स्वार्थान्न नश्येत् । आचार्याज्ञोल्लङ्घनं महापराध इति । **तत् परमं तत्त्वम्** । **अन्यत्** यशोदोत्सङ्गलालितादन्यत् भिन्नं **यावद्धर्मशून्यम्** । हे **बुधा आसुरान्** तामसान् अभिन्ने भिन्नत्वबुद्धीन् **तान्** जानीतेत्युपदेशः ॥१॥ **नानेत्यादीति**। नानामतानि अन्यभाष्यीयाणि ज्ञेयानि । नानामतैर्ध्वान्तः सूत्रार्थाप्रकाशस्तस्य विनाशने **क्षमः** समर्थः । भावे ल्युट् विनाशन इत्यत्र, क्षम इत्यत्र पचाद्यच् । **वेदान्तेति** । उपनिषत्सिद्धान्तविकाशने । **भाष्येति अणुभाष्यभास्करः**। नामैकदेशग्रहणम् । भास्करपदेन अज्ञानेधिकारि अणुभाष्यमिति द्योतितम् । **धावतेति**। भाष्यविभावनार्थमुपदेशः आज्ञा । फलानन्तरं भाष्यविभावनोक्त्या ज्ञापयन्ति । आत्मानन्दसमुद्रस्थं कृष्णमेव भाष्येण विचिन्तयेदिति । तदुक्तं सिद्धान्तमुक्तावल्यां 'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः। आत्मानन्द समुद्रस्थं कृष्णमेव विचिन्तये'दिति ॥ २॥ **भगवत्कृपेति** । कृपा प्रथमचतुर्थचरणे 'सूक्ष्मं तु तदर्हत्वा'दिति सूत्रभाष्ये महतः परं निवेशिता । 'कृपाविष्टः साधनं' भगवान् तत्कृपा 'तदन्तरप्रतिपत्ता'वित्याद्युक्तसाधने भक्त्यात्मके परम्परया वर्तत इत्याशयेन कृपालुत्वम् । भगवत्कृपया भाष्यं कृतमिति । 'इति भारतमाख्यानं कृपया मुनिना कृत'मिति न्यायेन । 'दत्वाज्ञां च कृपावलोकनपटु'रिति प्रथमसुबोधिन्याम् । पुष्टिमार्गीयत्वेन स्वेषामाहुः **स्वीयरक्षकत्वेनेति** । **गिरिं दधारेति** पदतात्पर्यार्थः । पदद्वयार्थानुसन्धाने बीजमग्रे वाच्यम् । **पुरन्दरेत्यादीति** । **स्मितामृतेति** स्मितं श्रीरामचन्द्रः हास्यरूपत्वाद्, अमृतमानन्दः तयोः **सुवृष्टिभिः** दानेन । **तान्** पुष्टभक्तान् । गिरिं दधारेति । ननु गोपाल-

श्रीकृष्णकृपयैवायं सिद्धान्तो हृदि भासते ।
तेनाधिकं वरीवर्ति न वक्तव्यं हरेर्नृणाम् ॥ ४ ॥
भाष्यपुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे ।
निवेदितस्तेन तुष्टा भवन्तु मयि ते सदा ॥ ५ ॥

इति श्रीमद्वेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीमद्ब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥ ४ ॥

समाप्तश्चतुर्थोऽध्यायः ॥ ४ ॥

भाष्यप्रकाशः ।

भाष्यविभावनयार्थस्फुरणेऽपि भगवत्कृपाया एव कारणत्वम्, न पाण्डित्यादेरित्याशयेनाहुः श्रीकृष्णेत्यादि ॥ ४ ॥

गुणोपसंहारपादमारभ्य सार्धाध्यायस्य स्वयं करणाचदाचार्येषु निवेदयन्तः समाप्तौ मङ्गलं कर्तव्यमिति शिष्टाचारं च शिक्षयन्त आचार्याणां प्रसादमाशासते भाष्येत्यादि । अर्थस्तु श्लोकानां स्फुट इति शुभम् ॥ ५ ॥

क्रीडन् श्रीबालकृष्णः परमकरुणया मन्मनः प्रेरयित्वा
भाष्यार्थं योऽतिगूढं प्रकटितमकरोत् सम्प्रदाये निवृत्ते ।
तं नित्याकुण्ठशक्तिं हृतनिखिलनिजाज्ञानसंसारहारं
स्मृत्वा स्मृत्वोपकारं प्रमुदितमुदितः स्वप्रभुं सन्नमामि ॥ १ ॥

रश्मिः ।

तापिनीये 'गोपिकानयनाम्भोजमालिने नृत्यशालिने' इति नमनं फलात्मकस्योक्त्वा यद्यपि गिरिधराय चेति साधनरूपमुक्तम् । तथापि 'नमः प्रणतपालाये'त्यस्यानुक्तौ बीजं स्वरूपमर्यादां परित्यज्य भक्तमनोरथपूरकत्वेनोपकारस्मरणम् । पादसेवनवत् । श्रुतिशिरःस्विति वेदान्तेषु । 'ऋचां मूर्धानं यजुषामुत्तमाङ्गं साम्नां शिरोथर्वणां मुण्डमुण्ड'मिति वाक्यात् । संराजत इत्यपि श्रद्धाविशेषात् । प्रथमं पादसेवनं पश्चादन्याङ्गसेवनमिति ॥३॥ श्रीकृष्णेत्यादीति । तेन सिद्धान्तेनाधिकं वरीवर्ति तथापि हरेर्नृणां नृभिर्न वक्तव्यम् । यत एतावतैव परमार्थसिद्धेऽधिकवचने गौरवादिति भावः ॥४॥ निवेदयन्त इति यत्करोषीति स्मृतेः । कर्तव्यमिति ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते कृतमङ्गलानि शास्त्राणि प्रथन्त इति सदाचारात्कर्तव्यम् । प्रसादमिति तोषम् तेन 'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते । तपसा वेदयुक्त्या च प्रसादात्परमात्मन' इति श्रुत्युक्तसाधनसम्पत्तिम् । स्फुट इति । श्रीमदाचार्येति श्रीमन्त आचार्याः श्रीमदाचार्याः व्यासचरणाः । आचार्यभाष्यपक्षे । श्रीमद्गोस्वामिभाष्यपक्षे श्रीमदाचार्याः श्रीवल्लभाचार्या इति सर्वं शुभम् ॥ ५ ॥

स्वयं मङ्गलश्लोकान्निबध्नन्ति स्म क्रीडन्नित्यादिना । प्रकृतिजातिः । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धराकीर्तितेयम्' । बालश्चासौ कृष्णः सदानन्दः 'नैभिन्त्यं वाचि पूर्वव'दिति सुबोधिन्या 'समान एवं चाभेदा'दिति सूत्रेणावतारिवदवतारेपि मङ्गलघटकत्वेपि स्वसेव्यस्वरूपनमनात्मकमपि मङ्गलमिदम् ।

भाष्यप्रकाशः ।

मायावादादिवादैर्व्यवहितमिव तं ब्रह्मवादं प्रकाश्य
श्रीमत्कृष्णाज्ञया तद्रतिपथ उदितो दैवजीवावनार्थम् ।
यैस्तान् श्रीकृष्णरूपान् प्रथितगुणगणान् श्रीमदाचार्यवर्यान्
ध्यायं ध्यायं नमामि स्वहितमवहितस्तत्कृपादृष्टिवृष्ट्या ॥ २ ॥
श्रीविठ्ठलेशाङ्घ्रिसरोजयुग्मं नमामि यैर्दासजनावनाय ।
पुष्टिप्रकारः श्रुतिगूढ आविष्कृतो निरस्तोन्मदमायिवादः ॥ ३ ॥

रश्मिः ।

भाष्योक्तबालत्वात् तस्य तुरीयत्वात् सोबिभेदिति श्रुतिलिङ्गात्। तदुक्तम् 'व्रजे स बालको भूत्वा क्रीडते पुरुषोत्तम' इति श्रुतेः । किञ्च एकादशस्कन्धविंशाध्याये 'यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया । मदर्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मन' इति वाक्य ईश्वरवाक्ये मदर्चोपासनायां योग्यस्मारकत्वपर्यवसानात् । यथा 'शङ्खचक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा । स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मण' इत्यत्र तप्तायसे निषेधपर्यवसानं तद्वत् । न च तप्तायसेन शङ्खचक्रादिकृतौ निषेधपर्यवसानमिति वाच्यम् । निषेधोस्तु तत्पर्यवसानं तु दुर्घटमिति । एवं स्वसेव्यस्वरूपेन्यत्रापि बोध्यम् । अतिगूढमिति 'गूढं ब्रह्मणि वाङ्मय' इति तृतीयस्कन्धात् सोश्नुते सर्वान्कामानित्यतिगूढम् । निवृत्त इति ननु 'तदुक्तमपि दुर्बोधं सुबोधं स्याद्यथा तथा । तन्नामाष्टोत्तरशतं प्रवक्ष्याम्यखिलाघहृ'दिति तच्छरणानां कथं सम्प्रदायनिवृत्तिरिति चेन्न, श्रवणादिसरणिरूपसाधनसत्त्वेपि निःसन्देहसाधननिवृत्तेः निःसन्देहसाधनसहिते सम्प्रदाये निवृत्त इत्यर्थः । विशेषणनिवृत्तिरत्र शिखी ध्वस्त इत्यत्र शिखामात्रध्वंसे शिखिनि ध्वस्त इति प्रयोगवत् । समन्वयोपदेशेन नित्याकुण्ठशक्तित्वं सिध्यति। अविरोधोपदेशेन वृतानां निखिलानां निजानामज्ञानेन, अत्र सेवासंसाराऽज्ञानमपि निविष्टम्। यः संसारोऽहन्ताममतात्मकः सेवासम्बन्धशून्यः तस्य हरमेव हारम् । साधनोपदेशेन उपकारं स्मृत्वा । फलोपदेशेन प्रमुदितमुदितः स्वप्रभुमात्मसहितं श्रीमदाचार्यं सप्तस्वरूपिणम् ॥१॥ इत्येकेन श्लोकेन मङ्गलासिद्धौ प्रचुरतरविघ्ननिवारणाय श्लोकान्तराण्याहुः । मायावादादीति । आदिना सप्तवादा अन्ये । शङ्करभास्करमाध्वविज्ञानेन्द्रभिक्षुरामानुजशैवनिम्बार्काचार्यप्रणीताः । इवेति । इव वर्तमानम् । प्रकाश्येति भगवदाज्ञया सृष्ट्यर्थं भगवत्सङ्गोपने शङ्कराचार्यादिभिः कृते भगवदाज्ञया यदा रामानुजमाध्वाभ्यां भगवत्सङ्गोपनेऽवृत्ते स्वयं मुखारविन्दरूप आविर्भूय 'नृप स्वात्मैव वल्लभ' इति वल्लभाचार्यः, भगवत्सङ्गोपननिवारकं ब्रह्मवादं प्रकाश्येत्यर्थः । रतिपथमिति भक्तिमार्गे 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'ति वाक्ये भक्तिरुक्ता सा त्वानन्दधर्मो न मार्गः । मार्गत्वार्थमन्यसम्मेलने प्राप्ते भूमौ श्रद्धा तस्यां प्रेमलक्षणभक्तिसम्बन्धे आध्यात्मिकरतिपथं यथा भवति तथोदितः स्वहितं अग्निरूपम् । 'नास्ति वह्निसमं मित्रं' इति वाक्यात् । तत्कृपादृष्टिर्ज्ञानेन्द्रियं तद्वृष्ट्या तत्सम्पादितज्ञानैः। प्रकृतिजातिः । स्रग्धराछन्दः ॥२॥ 'आत्मा वै पुत्रनामासी'ति प्रभुनमनेनैव श्रीगोपीनाथजिन्नमनसिद्धौ श्रीगोस्वामिनो नमन्ति श्रीविठ्ठलेशेति । उपजातिः । शार्दूलविक्रीडितं छन्दः । पुष्टिप्रकार इति । यद्यपि विद्वन्मण्डने मर्यादायामेव स्थेयमित्युक्तम् । भक्तिहंसे च भक्तिमार्गः श्रवणादिसरणिरूप इत्युक्तम् । तथापि गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति ज्ञापितम् । श्रुतिगूढ इति । 'तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुश९स मा न आयुः प्रमो-

---

१. रश्मावेकत्र रतिपथमिति क्रियाविशेषणमन्यत्र रतिपथ उदित इति पाठद्वयमादृतम् ।

भाष्यप्रकाशः।

श्रीविट्ठलेशपादाब्जप्रसादवरलाभतः ।
प्रकाशमणुभाष्यस्य वितन्वन् पुरुषोत्तमः ॥ ४ ॥
तदीयचरणद्वन्द्वे निवेद्य कुसुमाञ्जलिम् ।
तदीयदास्यलाभाय प्रसादमभिवाञ्छति ॥ ५ ॥
यदत्र सदसद्वापि जीवबुद्ध्या मयोदितम् ।
तत् क्षमन्त्वपराधं मे कृपया दीनवत्सलाः ॥ ६ ॥
प्रलयजलदवृष्टेर्गोव्रजस्यावनाय
स्वमृदुकरनखाग्रन्यस्तगोवर्धनाद्रिः ।
वदनविधुमयूखैर्नेत्रतापं निजाना-
मपनयतु हृदीशः स्थापयन् पादपद्मम् ॥ ७ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृद्व्यध्वान्तस्य श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥

समाप्तोऽयमध्यायः सम्पूर्णश्चायं भाष्यप्रकाशः ।

रश्मिः।

षी’रित्यत्र गूढः । श्रुत्यर्थस्तु तत् तस्मात् त्वा त्वां यामि पद्भ्यां सेवे ब्रह्मणा हिरण्यगर्भेण वन्द्यमानः श्रमः सुः, वन्द्यमानम् । मानसीसेवापूर्त्यै । मानसीसेवां ब्रह्मा प्रत्यहं करोतीति यजमानो दैशिकस्तत् तच्छन्दार्थमाशास्ते हविर्भिः मदर्चोपासनासम्बन्धिभिः अहेडमानोऽनादरकर्ता न छान्दसः अनात्मनिवेदीति । न अनादरकारयिता । आत्मनिवेदनं गुरुणानादरेण कार्यत इति । हे वरुण इह भूमौ बोधी ज्ञानी उरु बहु शंसमानः कथकः आयुरन्नं प्रमोषीः चोरय । मा क्लेदय । वर्णलोपः । यद्वा शंस त्वं कथय नोऽस्माकं आयुर्मा प्रमोषीरिति । ‘नायमात्मा प्रवचनेने’ति श्रुतौ गूढः । येन आविष्कृतः । निरस्तेति निरस्त उन्मदमायिवादः येन स निरस्तोन्मदमायिवादो भवतीत्येव ॥ ३ ॥ श्रीविट्ठलेशेति । अनुष्टुप्जातिश्छन्दस्तु वितानं वितानमाभ्यां यदन्यस्पदाभ्यां समानिकाप्रमाणिकाभ्यां अन्यत् तद्वृत्तं वितानं नाम, स्तुतो विद्युन्मालादिभ्योखिलेभ्यो यदतिरिक्तमनुष्टुप् वृत्तं तदेव वितानं वृत्तं बोध्यम् । पितृदेवो भवेति श्रुतेर्गोस्वामिमात्रो विषयः । यद्वा श्रीविट्ठलेशाश्च पादा आचार्यपादाश्च अब्जश्चन्द्रः तुरीयश्च श्रीविट्ठलेशपादाब्जाः तयोस्तेषां वा प्रसादवरः ग्रन्थकरणप्रतिभा तस्य लाभतः ॥ ४ ॥ तदीयेति । तदीयदास्येति । कीर्तनभक्तेः श्रेष्ठत्वेपि रतिपथ उदित इति कथनात्पथि स्थित्यर्थमुक्तम् । ‘भवाम दास’ इति पञ्चाध्यायीवाक्यात् । प्रसादमिति । प्रसादं दास्यफलम् । ‘भक्त्या तुतोष भगवान् गजयूथपाये’ति वाक्यात् । ‘भक्तिं लब्धवतः साधोः किमन्यदवशिष्यत’ इति । तेषु प्रसादे स्ववाञ्छोक्ता । वाछि इच्छायां भ्वा. प. से. अनुष्टुप्जातिः छन्दस्तु वितानम् । उक्तलक्षणम् ॥ ५ ॥ यदत्रेति । अत्रेति भाष्यप्रकाशे । जीवबुद्ध्येति जीवन्मुक्तजीवबुद्ध्या । क्षमन्त्विति । आचार्यादयः बालास्तद्वंशीया वा । ग्रहणधारणापटुर्बालः न तु स्तनन्धयः ॥ ६ ॥ प्रलयजलदेति । अतिशक्करीजातिः । छन्दस्तु मालिनी । ‘ननमयययुतेयं मालिनी भोगिलोकैः’ । स्वमृदुकरेति । विद्वन्मण्डनानुसारेण । यत्तु ‘इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम् । दधार लीलया कृष्णश्छत्राकमिव बालक’ इति वाक्ये स्वमृदुकराग्रन्यस्तगोवर्धना-

रश्मिः ।

द्विरुक्तस्तत्र नखगुणो विहितः । **वदनं विधुश्चन्द्रः** तस्य **मयूखैः** किरणैः । **नेत्रतापं** नेत्राभ्यां दृष्टानामन्यथाकरणेन शब्दबलविचारकाणामस्माकं यो नेत्राभ्यां तापः **तमीशः हृदि पादपद्मं** स्थापयन्नपनयत्वित्यर्थः । उपकारस्मरणेन पादसेवार्थमुक्तम् ॥ ७ ॥ इति

श्रीविट्ठलेशपादाब्जप्रसादवरलाभतः ।
रश्मिं प्रकाशे व्यतनोत्सचमत्कृतिमीश्वरः ॥ १ ॥
पौनःपुन्यं च रभसो प्रमादिः क्रीडया कृतः ।
सोढव्यः कृपया सद्भिर्गूढत्वात्सेश्वरादपि ॥ २ ॥
मसज्ञः कृतकृत्यश्च हृदीश्वरज्ञ एव च ।
कृतार्थश्च प्रमाणज्ञस्तत्कृतिं ज्ञातु[1]पश्यत ॥ ३ ॥
एतेनास्मत्कुलपतिः श्रीगोपीजनवल्लभः ।
श्रीमदाचार्यवर्यश्च नित्यलीलास्थतज्जनः ॥ ४ ॥
प्रीतो भवतु ज्ञात्वा मामाचार्यकुलसम्भवम् ।
श्रीदामोदरजित्पुत्रौ द्वौ श्रीविट्ठलरायजित् ॥ ५ ॥
श्रीगिरिधारिजिच्चैव तत्पुत्रो (श्री)रघुनाथजित् ।
श्रीगोविन्दरायजित् तत्पुत्रो (श्री)विट्ठलरायजित् ॥ ६ ॥
श्रीगोकुलोत्सवो भ्राता श्रीगोपेश्वरजिदहम् ।
तत्पुत्रस्तु प्रकाशेऽस्मिन्नरश्मिं तु वितनोमि ह ॥ ७ ॥

इति श्रीविट्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीदामोदरजिद्भ्रात्रीयेण
श्रीगोविन्दरायजित्पौत्रेण सम्पूर्णवेश्मा विट्ठलरायजिद्भ्रात्रीय-
गोकुलोत्सवात्मजगोपेश्वरजिता कृते भाष्यप्रकाशस्य
रश्मौ चतुर्थाध्याये चतुर्थः पादः
सम्पूर्णतामगमत्॥ ४॥ ४॥

समाप्तोयमध्यायः। समाप्तश्च रश्मिः । सेवानवसरे दैवीजीववाचनार्थमयं ग्रन्थः स्वयं गोपेश्वरेण लिखितः श्रीगोवर्धननाथद्वारे ।श्रीरस्तु । मिति चैत्रशुक्लत्रयोदशी। संवत् १८९७। मङ्गलवारे । लेखकपाठकयोर्दीर्घायुः । मङ्गलमस्तु । एतावतो ग्रन्थस्य श्लोकसङ्ख्या ८४२४ अष्टसहस्रचतुःशतचतुर्विंशा । अध्यायचतुष्टयस्य श्लोकसङ्ख्या ४२६६६ द्विचत्वारिंशत्सहस्रषट्शतषट्षष्टिः ।

श्रीकृष्णार्पणमस्तु.

---

[1] ज्ञमुपश्यत इति पूर्वमासीत्, पश्चादेवं संस्कृतं हस्ताक्षरेषु ।

INTRODUCTION.

By the Grace of God we are able to put before the public the third and the fourth pādas of the Fourth Adhyâya, together with the charming रश्मिपरिशिष्ट of भक्तिमार्गीय रूपसन्निधान and फलदानादि on 3. 3. 16, revealing how God (रसो वै सः) becomes manifest before His भक्त in पुष्टिमार्गे, and what sort of फल the भक्त gets. Unfortunately seven pages of the manuscript are missing, and hence we have lost the description of some of the subjects mentioned in the contents.

The delay in the publication of this Volume is chiefly due to the extreme difficulty of deciphering the परिशिष्ट, in which additions and interlineations have been made by the author on almost all the pages and on all the sides of the margin so closely, that it is almost impossible to read them and to put them in their proper places; and in spite of our devoting as much labour as we could, we had unavoidably to leave out some words which could not be deciphered.

Shastri Kalyanji Kanji has rendered us very valuable assistance in carrying this edition through the press and has often solved knotty points for which our hearty thanks are due to him. We have also to thank Prof. Maganlal Ganpatiram Shastri, M. A., of the Deccan College, Poona for the willing co-operation and help in the solution of difficulties.

* * *

Both the साधन and the फल अध्यायs are now before the public, and in order that the reader may get a clear view of both, he must acquaint himself with some of the षोडश ग्रन्थाः of श्रीवल्लभाचार्य, such as सिद्धान्तमुक्तावली, भक्तिवर्धिनी, निरोधलक्षण, सेवाफल, and पुष्टिप्रवाहमर्यादा. He will get very valuable help in understanding the subject by a clear grasp of these small works. As श्रीपुरुषोत्तमजी's अधिकरणमाला gives a beautiful summary of all the अधिकरणs, we refrain from repeating the same.

Attention of the reader has already been drawn in our note to the previous volume (४ अ. १. २. पा.) to the difference in the interpretation of some सूत्रs as between श्रीमद्वल्लभाचार्य and श्रीविठ्ठलेश्वर. This difference will be found in विद्वन्मण्डन also, where the interpretation of the सूत्रs quoted differs from that of श्रीवल्लभाचार्य. This may perhaps be due to the आधिभौतिक standpoint taken up by श्रीवल्लभाचार्य following वेदव्यास, and आधिदैविक standpoint taken up by श्रीविठ्ठलेश्वर. This idea is suggested to us by the very lengthy and beautiful addition to the आनन्दमयाधिकरण made by श्रीविठ्ठलेश्वर, giving the आधिदैविक interpretation. The रश्मिकार श्रीगोपेश्वरजी states in 2-3-50 as under:—

अत्र ऋतेर्थं यत् प्रतीयेतेति भागवतोक्तमायापक्षो नास्ति, तस्य लक्ष्मणभट्टात्मजवल्लभविरचितत्वेन आधिदैविकमतत्वात्। अस्य वेदव्यासमतवर्तिवल्लभाचार्यमतत्वेन आधिभौतिकत्वात्। एतेन अपरितोषे श्रीभागवतकरणात्। निबन्धे आध्यात्मिकमतम्, विष्णुस्वामिमतवर्तिवल्लभाचार्यविरचितत्वात्। यमुनाष्टकादि तु स्वमतम्, निर्गुणम्, मुख्या परमार्थः तत्प्रतिपादकम्, मुख्यं च। स्वनाम्ना तु मुख्यत्वमित्यभियुक्तोक्तेः। 'इति श्रीवल्लभाचार्यविरचितं यमुनाष्टकं सम्पूर्ण'मितीतिश्रीकथनात्। रश्मि २-३-५०.

We invite the scholars of the सम्प्रदाय as well as others to study these works with devotion, and with a view to approach the Presence of God, for which they have been intended. The generality of people go in the wrong direction because पराञ्चि खानि व्यतृणत् स्वयंभूः, तस्मात् पराङ् पश्यति नान्तरात्मन्, and because मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये. It is only in this भारतवर्ष that people were engrossed so much in religion, for which men like Emerson, Carlyle, Max Muller and many others have lavished praises over it; but here also काल has been rapidly doing its work, and the contact with materialism and आसुरत्व of the West has hastened this change. We have therefore to be very careful, and in all our religious studies we should never miss the goal viz. the Presence of God. We are thankful to many Western Oriental Scholars for the vast amount of labour devoted by them to the study of Sanskrit literature, Vedic and modern. They have approached the subject also very sympathetically, but partly on account of their being strangers unacquainted with our manners and customs with their roots buried in the hoary past, partly on account of partiality for their own Christian religion, partly due to the Doctrine of Evolution which looks upon ancient things in quite a different light, partly on account of want of श्रद्धा, and finally on account of a difference in the idea of civilisation,—the west being generally engrossed in finding fresh means of material comforts and gratification of the senses, and not caring for the vision of God, Who lies deeply buried in the heart,-we have to be very cautious in accepting their premises and their conclusions. Even a sympathetic man like Prof. Max Muller, after his lifelong study of Sanskrit literature opined that writing was unknown to Vedic ऋषिs. Again वेद means knowledge from विद् to know and ऋषि means a seer, from ऋष् to see. Do they implicitly believe that वेद contains true knowledge and that ऋषिs were Seers? If not, it can well be questioned whether the true meaning underlying these writings will ever be revealed to them. They only see the worship of the Sun and the Moon and elements such as Fire, Water etc. in these writings, and they imagine terror to be the root cause of this worship. We are inclined to ask them as to how many Saints and Sages of भारतवर्ष they believe to have got a vision of God, from Vedic Revelation up to the modern times.

One writer after another has written about श्रीवल्लभाचार्य and his System, and has condemned outright the sect of Maharajas. But both श्रीवल्लभाचार्य and श्रीविट्ठलेश्वर were so holy and learned that they were worshipped, as gods upon the Earth. At that very time another divine personage श्रीकृष्णचैतन्य was similarly worshipped in Bengal. They were all called महाप्रभुs, because they had साक्षात्कार of God, their mind was in tune with the Infinite and they were able to lead their followers into the Presence of God. Millions of men in Gujarat, Kathiawar, Sind, Rajputana, Muttra and Madras, including several princes, are followers of श्रीवल्लभाचार्य, and millions in Bengal and elsewhere are followers of श्रीकृष्णचैतन्य. Many of the descendents of श्रीवल्लभाचार्य have been great devotees and inspired authors, who have kept the torch of Hinduism burning for these four dark centuries. The latest of them पंडित गट्टूलाल—

blind from infancy, was the greatest scholar in वेदान्त of his age, had a wonderful mastery over मीमांसा, न्याय, व्याकरण, अलंकार and all kindred important subjects, was an extempore poet, a शतावधानी, and was the recipient of the title of भारतमार्तण्ड in the holy city of Benares, only about 40 years ago. The reader of these volumes can easily find out for himself the vastness and depth of learning of योगी श्रीगोपेश्वरजी who lived about a hundred years ago, in all branches of learning—वेद, वेदान्त, पूर्वमीमांसा, व्याकरण, न्याय, अलंकार, etc., who was deeply reverential to his ancestors, and calls himself पूर्णेश, कृतिकृत्य and हरीश्वरज. None of the critics of the सम्प्रदाय ever read सुबोधिनी or निबन्ध, अणुभाष्य or विद्वन्मण्डन; भाष्यप्रकाश–that balanced criticism of all the available भाष्यs-they never heard of; and of the wonderful रश्मि they never dreamt. They never cared to inquire as to how the best among these महाराजs spent their lives in निरोध (प्रपञ्चविस्मृतिपूर्वकभगवदासक्ति i. e. forgetfulness of the world and devotion to God only), and what their divine experiences were. They denounced one and all in the same strain, attributing to them all concievable vices and no virtue.

Now what is the फल in श्रीवल्लभाचार्य's doctrine ! It is in a nutshell भगवत्प्राकट्य. In पुष्टिप्रवाहमर्यादा he says "भगवानेव हि फलं, स यथाविर्भवेद्भुवि." In निरोधलक्षण he says "क्लिश्यमानान् जनान् दृष्ट्वा कृपायुक्तो यदा भवेत्, तदा सर्वं सदानन्दं हृदिस्थं निर्गतं बहिः". In सन्यासनिर्णय he says "बहिश्चेत् प्रकटः स्वात्मा वह्निवत् प्रविशेद्यदि, तदैव सकलो बन्धो नाशमेति न चान्यथा." His son श्रीविट्ठलेश्वर says

श्रीवल्लभाचार्यमते फलं तत्प्राकट्यं, अत्राव्यभिचारिहेतुः ।
प्रेमैव तस्मिन् नवधोक्तभक्तिः, तत्रोपयोगोखिलसाधनानाम् ॥

Not to talk of सूक्तs which are prayers to various manifestations of God, the उपनिषत्s also clearly speak about दर्शन of God in आत्मा वा अरे द्रष्टव्यः, कश्चिद्धीरः प्रत्यगात्मानं ऐक्षत्, यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनुं स्वाम्, सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायाम् परमे व्योमन् सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता. ब्रह्मसूत्रs also are very clear on this point. In आसीनः संभवात् (4-1-7) it is stated उत्कटस्नेहात्मकसाधनस्य संभवात् तदधीनः संसदग्रे आसीनो भगवान् भवति. In ध्यानाच्च (4-1-8)...ध्यानादपि हृदि प्रकटः सन्नासीनो भवति. प्रदीपवदित्यधिकरणे (4-4-4) 'भगवानपि स्वदत्ते मुक्तदेहे जीवेन सह प्रविष्टस्तं देहं स्वभोगरूपकार्यक्षमं करोति । यतो भर्ता सन्निति भर्तृसूत्रारम्भमध्ये भगवतः क्रीडार्थं बहुधा आवेश उक्तः । तेन एवं ज्ञायते क्रीडोपयोगिभगवदावेश एव फलानुभवोपकरणमिति (अधिकरणमाला). गीता also clearly mentions भगवत्प्राकट्यं, *e. g.*, संभवामि युगे युगे, दर्शयामास परमं रूपं, आत्मानं सृजाम्यहम्. And भागवत is the invaluable treasure-house of भगवदवतारs. In this holy land of भरत, there have been so many भक्तs at various times and places with varied experiences about प्रभुप्राकट्य, that for a genuine seeker after truth, the evidence is simply overwhelming. नृसिंहमेहता and मीराबाई in the West, ज्ञानदेव, तुकाराम and रामदास in the South, कृष्णचैतन्य in the East and many others had all experienced प्रभुप्राकट्य in one form or another. The reader may refer to भक्तमाल and such other works in this respect. There are many anecdotes in this पुष्टिसम्प्रदाय about भगवत्साक्षात्कार, and the large mass of कीर्तन literature, yet unpublished, and the lives of भक्तs like सूरदास, कुंभनदास, चतुर्भुजदास, परमानन्ददास and others leave no doubt about भगवत्प्राकट्य right up to the modern times.

That this प्राकट्य is of रसो वै सः and it is not simply an emotion of the mind is clear from the following :—

श्रुतौ हि 'असद्वा इदमग्र आसीत्, ततो वै सदजायत, तदात्मानं स्वयमकुरुत, तस्मात्तत्सुकृतमुच्यत इति यद्वै तत्सुकृतम्, रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवती'त्येवं पूर्वसृष्टेरसाधुत्वं, ततः सृष्ट्यन्तरस्य साधुत्वम्, साधुत्वे स्वात्मरूपत्वरूपं हेतुः, तस्य सुकृतत्वं, सुकृतस्य रसत्वं, रसस्यानन्दरूपता च बोधिता। तत्र यद्युद्बोधकादिप्रनाडी न विवक्षिता स्यात्, आत्मकरणं न वदेत्, यदि वा सर्वसामान्या स्यात्, पूर्वसृष्टेरसाधुत्वमनेवंरूपतां च न वदेत्। यदि च रसस्य मनोविकारत्वं लौकिकत्वं वा विवक्षितं स्यात्, तदाप्यात्मकरणं आनन्दरूपत्वं च न वदेत्। अत उद्बोधकादिवैशिष्ट्यं श्रुतिसिद्धम्। तदेतदुक्तं तत्स्वरूपस्यैव तथात्वादित्यन्तेन। तथा च प्रनाड्यङ्गीकारेपि न भगवद्रूपत्वहानिरित्यर्थः। किञ्च, अनुकृत्यधिकरणे सर्वस्य भगवदनुकारित्वं 'तमेव भान्तमनु भाति विश्व'मिति विषयवाक्येन प्रतिपादितम्, अतः प्रकृतेपि यदि लौकिको रसः प्रतिपाद्यते, तदापि मूलरसानुकारितयैव तत्स्वरूपं सिध्यतीत्येतद्दृष्टान्तेन सोपि रसोनुमीयताम्। अयं लौकिकः परिच्छिन्नो, मात्रोपजीवनश्रुतेः, स त्वपरिच्छिन्नो, भूमत्वात्। तथा च लोकेऽनुकरणमात्रेण तदाभासस्यैव प्राकट्यम्, न तु तस्येति न जीवस्य तत्करणेपि न तद्रससम्बन्धलेशः। शास्त्रप्रणयनं तु दूरतस्तस्यैव परिचायनायेति तत्रैव स्फुटम्। वस्तुतस्तु पाद्मे पातालखण्डे रामाश्वमेधे शेषवात्स्यायनसंवादाद्दृषेर्वैष्णवत्वमवगम्यते। एवं भरतस्यापि, नाट्यशास्त्रज्ञातुर्मोक्षकथनात्। किञ्च, आञ्जनेयोपि प्रणेता नाट्यशास्त्रस्य। स च परमभक्तो जनकतनयाप्राणनाथस्य। अतस्तादृशां य एतावान् प्रयासः स न त्रिवर्गोपयोगितया जीवार्थः, अपि तूक्तरीत्या मोक्षसाधनतापर्यन्ततया। किञ्च, वात्स्यायनेन सांप्रयोगिकाधिकरणे 'ऋचां दशतयीनां चतुःषष्टिसंज्ञितत्वादिहापि तदर्थसम्बन्धात्पाञ्चालसम्बन्धाच्च बह्वृचैरेषा पूजार्थं संज्ञा प्रवर्तितेत्येके' इति सूत्रयता संप्रयोगाङ्गचुम्बनादीनामृगर्थत्वं प्रदर्शितम्। 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्य' इति श्रुतिस्मृतिभ्यां वेदस्य भगवत्परत्वं सिद्धम्। एवं सत्यस्य शास्त्रस्य तत्सामानाधिकरण्ये वेदवत् परोक्षवादेन लीलासहितभगवत्प्रतिपादकत्वं युक्तमेव। गान्धर्वस्य सामवेदोपवेदतया च। अत एवमर्थाज्ञातॄणां जीवानां भ्रान्तिरित्येतदाद्यभिसन्धायोक्तं तच्चेत्यादि, बुद्ध्यस्वेत्यन्तम्। तस्मान्न कोपि शङ्कालेश इति दिक्।

(प्रकाश on भा. १०. १०.१)

That this प्राकट्य is of परब्रह्म in पुष्टिमार्ग is clear from the three लीलाs, viz , जृम्भालीला, मृत्साभक्षणलीला and दामोदरलीला. We may study various systems of religions from a historical point of view, we may try to fix exact dates of the various teachers and their systems, we may try to penetrate into the mysteries of various rites and ceremonies of differant religions, but what is the use of all these things if they do not lead us into the Presence of God? भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः, क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे. (मुण्डक.)

What are the साधनs for this भगवत्प्राकट्य? It is clear from पराञ्चि खानि that इन्द्रियs are of no use; on the contrary they are a hindrance. Giving up the world and concentration–कीटभ्रमरन्याय–has been generally considered the best method. But it too lacks प्रेम. In सन्न्यासनिर्णय श्रीवल्लभाचार्य says भावो भावनया सिद्धः साधनं नान्यदिष्यते; in शिक्षाश्लोकs he says भावस्तत्राप्यस्मदीयः सर्वस्वं चैहिकश्च सः, परलोकश्च. In भक्तिवर्धिनी he mentions प्रेम, आसक्ति

and **व्यसन**. In **सिद्धान्तमुक्तावली** he says **कृष्णसेवा सदा कार्या.** **सेवा** is defined as **चेतस्तत्प्रवणं सेवा**. This reminds us of मन्मना भव मद्भक्तः in गीता. In Aṇu-Bhâshya तृतीयाध्याय तृतीयपाद, this question is discussed 'यथा साक्षात्कारो भवति, तथा साधनमुपासनारूपं वक्तव्यम् । उपासनायां च क्रियमाणायां धारणासिद्धौ मानसी मूर्तिरभिव्यक्ता भवति । तत उपासनापरिपाके साक्षात्कारः.' In this connection प्रदानवदधिकरण 3.3.16–17, and लिङ्गभूयस्त्वाधिकरण 3.3.43-47, will be specially useful to understand श्रीवल्लभाचार्य's and श्रीविट्ठलेश्वर's view. When once God does become **प्रकट**, all the **इन्द्रियs** also get their highest **फल**, as is clear from **अक्षण्वतां फलमिदम्** etc. (वेणुगीतसु.)

That **ब्रह्म** and **कृष्ण** are not different is clear from the derivation of the word **कृष्णः**—'कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः, तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते.' **ब्रह्म** comes from **बृंह्** to grow or increase, and the whole जगत् which has grown out of **ब्रह्म** is nothing but **ब्रह्म** itself, 'सर्वं खल्विदं ब्रह्म.' It is also called **आत्मा** from अत् to spread, **अहिकुण्डलवत्**. **ब्रह्म** is निःप्रकारकम्, while **आत्मा** signifies प्रकार. In either sense it is **रस**, **रसो वै सः**, and when **रस** becomes **प्रकट**, it is **फलरूपकृष्ण**. All the three words bear the same meaning from different points of view. All the three words **ब्रह्म**, **आत्मा** and **रस** etymologically imply परिणाम and that too in स्वरूप and not of शक्ति or शरीर or माया; therefore it cannot but be अविकृतपरिणाम. परिणाम can only be of something which is साकार, and this आकार is आनन्दमात्रकरपादमुखोदरादि. How this आकार becomes manifest is mentioned in रसनिष्पत्तिप्रकार in वेणुगीत (भागवत १०. १८. ८). That the reader may be able to connect it with the परिशिष्ट of श्रीगोपेश्वरजी, and have a faint vision of his meaning, this is quoted here in full.

चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ ।
मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रङ्गे यथा नटवरौ क्व च गायमानौ ॥८॥

केवलं रसरूपमाह चूतेति ।

सु०—चूतानामाम्राणां प्रवालाः कर्णयोः, बर्हस्तबकाः बर्हगुच्छानि शिरसि, उत्पलाब्जानां माला कण्ठे, तैरनुपृक्तं मिलितं परिधानं पीताम्बरादिवस्त्राणि तैर्विचित्रो वेषो ययोः । एतादृशावुभावपि पशुपालगोष्ठ्यां मध्ये विरेजतुः । रसाभिनयेवतारवदेवावेशस्याप्युपयोगाद् द्विवचनम् ।

गुणा माया च वेषार्थमुपयुक्ता भवन्ति हि । अतो रसस्याभिनये चत्वारोर्था निरूपिताः ॥ १ ॥
रसरूपसुगन्धानां प्रतिष्ठा त्रिषु निश्चिता । धर्म्याच्छादनबोधाय मायाप्यत्र निरूप्यते ॥ २ ॥
वस्तुनिर्देशमात्रेण श्रोतॄणां काव्यवद् रसः । रसवत्फलबोधाय प्रथमं पल्लवो मतः ॥ ३ ॥
शास्त्रार्थस्य परिज्ञानाद् भावस्य कलिका भवेत् । ततस्तस्य च वैचित्र्यं पुष्पस्थानमिहोच्यते ॥ ४ ॥
अहोरात्रं वासना स्यात् तत आच्छादनं स्मृतम् । रसोत्पत्त्यर्थमेतावन्निरूपितमितिस्थितिः ॥ ५ ॥
आविर्भावे रसास्वादान् नृत्यं शोभा ततो भवेत् । अतोतिगुप्तो भगवान् रसत्वं प्रतिपद्यते ॥ ६ ॥

विचित्रवेषाविति सर्वरसाभिनिवेशनार्थम् । त्रयाणामन्योन्यगुणप्रधानभावे नव रसा भवन्ति । एवं रसरूपं भगवन्तं निरूप्य तद्रसपोषकौ समाजे वाद्यगीतविशेषौ निरूपयति

मध्ये विरेजतुरिति। पशुपालानां गोष्ठी नात्यन्तं गूढा। तेन रसस्य सुलभत्वं निरूपितम्। मध्ये गीतवाद्ययोः। त्रयाणां समानतैव सर्वोत्तमा। नृत्यस्य तु विशेषः प्रायिक एवेति तदेवोक्तम्। कादाचित्कनिषेधार्थमलमिति। शास्त्रमत्र नियामकं न भविष्यतीत्याशङ्क्याह दृष्टान्तं रङ्गे यथा नटवराविति। रङ्गः शास्त्राधारभूतं स्थानम्। रङ्गमण्डपे यथा नटौ शास्त्रार्थानुसारिणौ भवतः। अलौकिकनाट्यार्थं वरपदम्। एवं राजसभावनृत्यमुक्त्वा सात्त्विकभावनृत्यमाह क्व च गायमानाविति। देशविशेषे हस्ताभिनयमात्रपूर्वकं श्रमरहितं गानं कुरुतः। एतदपि लोकप्रसिद्धम् ॥८॥

टि०—चूतप्रवालेत्यत्र—त्रयाणामन्योन्यगुणप्रधानभाव इति। स्थायिभावव्यभिचारिभावविगाढभावानामित्यर्थः ॥ ८ ॥

प्र०—चूतप्रवालेत्यत्र—वरपदातिरिक्तं पूर्वार्धमनेन विधियत इत्याशयेनाहुश्चूतानामित्यादि। तेन कर्णिकारोपरि पल्लवा अपि स्थापिताः सन्तीति बोध्यम्। वैजयन्ती च कमलानां बोध्या। ननु केवले रसे निरूपणीये 'बर्हापीडं नटवरवपु'रितिश्लोकोक्तवरपदातिरिक्तस्यैकत्वादुभयबोधकद्विवचनस्य किं प्रयोजनमित्यत आह रसाभिनय इत्यादि। अवतारवदिति। यथावतारे भूभारहरणादिना भगवत्प्रियकर्तृत्वेनोपयोगस्तथा रसाभिनये सहस्थितिप्रशंसादिभिः प्रियकर्तृत्वादुपयोग इति तथेत्यर्थः। पल्लवादिनिरूपणप्रयोजनं कारिकाभिराहुर्गुणा माया चेत्यादि। अत्रैवं ज्ञेयम्। 'नाट्यशब्दो रसे मुख्यो रसाभिव्यक्तिकारणम्। चतुर्धाभिनयोपेतं लक्षणावृत्तितो बुधैः। नर्तनं नाट्यमित्युक्त'मिति सङ्गीतरत्नाकरे नाट्यशब्दार्थकथनात् तन्मूलभूतार्षग्रन्थेष्वप्ययमेवार्थ इति ज्ञायते। अत्र रसे योगोप्यस्ति नटितुमभिनेतुं योग्यं नाट्यमिति। अर्हे कृत्यस्य यतो भवनात्। तेन योगरूढः। एवञ्च 'न्यायश्चानेकशब्दत्व'मिति जैमिनीयसूत्रैकस्यार्थस्यैकशब्दवाच्यत्वनियमावधारणाद् धर्मविशेषपर्यवसानस्यैव ज्यायस्त्वेन नर्तनाभिव्यङ्ग्यत्ववदङ्ग्याप्रत्वविशिष्टरसवाचकत्वमिति सिध्यति। नर्तनेपि यदा नटस्य भावः कर्म वा नाट्यमिति योगो विचार्यते तदापि ष्यञो भावे कर्मणि च विधानाद् योगतौल्यं तथापि रससत्तां विना तथा कर्मणः प्रयोक्तुमयुक्तत्वात् तत्प्रयोजको भाव एव मुख्यः। कर्मणि तु सामान्यतः प्रवृत्तः प्रत्ययो योगविशेषवत्तथा रसाभिव्यञ्जके तस्मिन् कर्मणि सङ्कोच्यत इति नर्तनेऽर्थे नाट्यशब्दो लक्षणागर्भ एव। एवमुभयथापि नाट्यशब्दविचारे रसस्य नृत्याभिव्यङ्ग्यत्वं सिद्धम्। किञ्च 'नटकथितवाक्यार्थपदार्थाभिनयात्मकं नाट्य'माङ्गिकाभिनयैरेव भावानेव व्यनक्ति यत् तत् नृत्यं मार्गशब्देन प्रसिद्धं नृत्यवेदिनां 'गात्रविक्षेपमात्रं तु सर्वाभिनयवर्जितम्। आङ्गिकोक्तप्रकारेण नृत्तं नृत्तविदो विदु'रिति नर्तनस्य भेदत्रयं तत्रोक्तं तथा 'स त्वत्राभिनयो भवे'दित्युपक्रम्य 'काव्यबद्धं विभावादि व्यञ्जन् योऽर्थो नटे स्थितः। सामाजिकानां जनयन् निर्विघ्नरससंविद'मित्यभिनयं लक्षयित्वा'ङ्गिको वाचिकस्तद्वदाहार्यः सात्त्विकोपरः चतुर्धाभिनयस्तत्राङ्गिकोङ्गैः सम्प्रदर्शितः। वाचा विरचितः काव्यनाटकादिस्तु वाचिकः। आहार्यो हारकेयूरकटकादिविभूषणम्। सात्त्विकः सात्त्विकैर्भावैर्भावुकेन विभावित' इति च तत्रोक्तम्। एवं चतुर्धाभिनयमध्ये य आहार्याभिनयो वेषात्मा तदर्थं गुणा रसरूपसुगन्धा माया परिधानस्था 'कनककपिशता' च हि यतो हेतोरुपयुक्ता भवन्त्यतो हेतो रसस्याहार्येभिनये निरूपणीये चत्वारः पल्लवादयः परिधानान्ताः पदार्था निरूपिताः। यत एवम्प्रयोगे रसस्याभिव्यक्तिः। रसश्च विभावादिभिः प्रकृष्यमाणः स्थायिभावात्मा मूर्तो नालम्बनविभावमन्तरेणाभिव्यक्तुमर्हति। एवं सति तस्मिन् धर्माविर्भावेणैव कैवल्यं त्यजन् नाट्यरूपतां जहातीत्युभयसामञ्जस्याय नटवेषात्मकैराहार्याभिनयैरालम्बनत्वारोपणेनाङ्गिकादिभिस्त्रिभिः सामाजिकानां रससंविज्जननम्। यत्र पुनरालम्बनस्यैव नटत्वं तत्रापि नाट्यदशायां मुख्यानां रसधर्माणामनाविष्कारेण न्यग्भूतैवालम्बनता। तादृशत्वमजानतः प्रत्यारोपिता च। एवं प्रकृते ब्रह्मात्मकस्य रसस्य पूर्वोक्तरीत्या स्वप्रतिष्ठत्वालम्बनत्वयोरविरोधेपि यथा रसत्वं न्यग्भाव्यालम्बनताया एव क्वचित्प्रकटनं तथात्र तां न्यग्भाव्य तामप्रकटीकृत्य नटत्वं प्रकटीकृत्य "रसो वै स" इतिश्रुत्युक्तं हि स्वस्वरूपात्मकं रसं सङ्गीतशास्त्रोक्तप्रणाड्याभिनयतीति तत्र गुणाद्युपयोगस्तेनैते पल्लवादयोऽर्था उक्ता इत्यर्थः। तर्हि गुणा एव निरूप्या न गुणिन इत्यत आहू रसेत्यादि धर्म्याच्छादनबोधायेति। धर्मी रसस्तस्य गुप्ततावोधनाय। तथा च पल्लवादिषु तेषां प्रतिष्ठा निश्चितेति ते निरूपिताः। केवलगुणनिरूपणे तेषामागन्तुकता स्यादिति तथा। उक्तार्थबोधनाय मायापि निरूप्यत इत्यर्थः। ननु रसप्रतिष्ठा चूतस्य फले न तु पल्लव इति नास्योपयोगः कथञ्चिदुपयोगे वा हस्तकेन पल्लवादिरप्यभिनेयो न तु वेषेपि स्थाप्य इत्यत आहुर्वस्तुनिर्देशेत्यादि। नाट्ये हि न रासन आस्वादः किन्तु काव्येन शब्दद्वारैवात्र पल्लवादिवस्तूनां हस्तकनिर्देशेन चाक्षुषद्वारा मानस आस्वादो न तु तदभिव्यञ्जकस्यार्थस्य बोधनमतस्तेन रसवत्फलबोधार्थं प्रथमं पल्लवो मतो विचारितः। तथा च चूतपल्लवेन रसवत्फलं भावीति चक्षुर्द्वारा बोध्यत इति तेन मानसिकास्वादसिद्धिरिति रसप्रतिष्ठा तत्रापि न दुर्घटेति पल्लव उचित

एव । तत्र हृद्येऽभिनय इत्यक्षरतः आभासमात्रं न तु रसत्वरूपपर्यवसायित्वबोधनमपीति तत्स्थापनमित्यर्थः । भगवान् हि स्वरूपात्मकमेव हि रसमभिनयाद्विना यत्र स्थापयति, ततः कदापि न गच्छति, किन्तु बीजत्वात् फलं प्रयच्छतीति वस्तुस्थितिः । तथा च भाववतां नाट्यप्रणाड्या प्राप्तरसानामग्रे फलप्राप्तेरवश्यंभावाय प्रथमं तद्रूपस्थापनोक्तिरितिभावः । ननु भवत्वेतदेवं तथापि रसस्तावत् हृद्दर्शनादिभिस्तत्तद्धेतुभिर्जनितः प्रमोदात्मा स स्थायिभावस्तत्तत्सानुकूलदेशकालकलावेषभोगादिसेवनप्रभृतिभिस्तत्तद्धेतुभिः प्रकृष्यमाणः स रस इत्युच्यते, स च मनोविकार एवान्तरश्चानेकरूपश्चानित्यश्च, भगवांस्तु न तथा, किञ्च पूर्वश्लोके परत्वमुपपादितमत्र च नटदृष्टान्ते-नाभिनेतृत्वं तथैव क्रियमाणश्लोकेऽपि । एवं चालम्बनत्वमभिनेतृत्वं च स्फुटति न तु सर्वरसत्वमतः कथं प्रतिज्ञापूर्तिरित्याकाङ्क्षायामाहुः कारिकायां शास्त्रार्थस्येत्यादि । अयमर्थः । 'रसो वै स' इतिश्रुत्या 'असद्वा इदमग्र आसीदि'त्यादिनोपक्रान्तस्य ब्रह्मण एव रसत्वं बोध्यते । रसशब्दश्च रसनाग्राह्ये गुणे द्रवद्रव्ये सारभूतेऽर्थे आस्वाद्यानन्दजनके च तत्र तत्र प्रसिद्धः । तेषु प्रकृते कोऽर्थो विवक्षित इत्याकाङ्क्षायां 'रसꣳ ह्येवायं लब्ध्वानन्दी भवति, को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यादेष ह्येवानन्दयाती'त्यनेन रसस्यानन्दत्वं प्राणधारणप्रयोजकत्वं हृदयाकाशस्थत्वमानन्दजनकत्वं च तथैवोच्यते । तेन हृदयस्थः प्राणिनामानन्दजनको य आनन्दः स रस इति सिध्यति । तत्र यद्यप्यानन्दोत्पत्तिरूपस्य कार्यस्य तत्तदवयवेष्वनुभूयमानत्वेनानन्दस्य सर्वशरीरव्यापित्वं तथाप्युक्तश्रुत्या 'स मानसीन आत्मा जनाना' मितिश्रुत्यन्तरेण च मनस्येव तस्य विशेषतः स्थितिरिति निश्चीयते । एवं सति रसशास्त्रप्रणाड्या जायमानो यो मानसो विकारः प्रमोदात्मा स रसात्मनो भगवत एव कार्यभूत 'एष ह्येवानन्दयाती'तिसावधारणश्रुतेस्तथा तदंशभूतश्च 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती-तिश्रुतेः । अत एव च प्रकृष्यमाणे तस्मिन् रसत्वप्रतीतिर्लौकिकानां तथाप्रयोगश्च ब्रह्मादिषु पुरुषपदप्रयोगवद् भाक्तः । न चैवं ब्रह्मानन्दमात्रस्यैव तथात्वात् प्रणाड्यामेव कुतो विशेष इति शङ्क्यम् । रसस्वरूपस्यैव तथात्वात् । न च माना-भावः । लौकिकस्य प्रणाड्याभिव्यञ्जकत्वे सिद्धे तद्दृष्टान्तेनालौकिकेऽपि तथानुमातुं शक्यत्वात् । कारणतद्धर्माणामेव कार्येऽभिव्यक्तेः सन्देहनिरासाच्च । न चानित्यत्वापत्तिः । ब्रह्मत्वादेव तन्निरासात् । अत एव न मनोविकारत्वमपि । नाप्यनेकरूपत्वं दोषाय । तस्य प्रणाडीकृतत्वेन वास्तविकरूपाबाधकत्वा'दनन्तरूप'मितिश्रुत्या वास्तविकत्वाच्च । तेनेदं सिद्धम् । परं ब्रह्मैव रसशास्त्रोक्तप्रणाड्या हृद्याविर्भूतं सत् स रस इति । तत्र च चिदंशो न्यग्भूत एव । अत एव 'कृपिर्भूवाचक' इतिश्रुतौ सदानन्दत्वमेवोक्तम् । न च भूशब्दस्य सत्तावाचकत्वात् सत्तानन्द इति भवति न तु सदानन्द इति शङ्क्यम् । तस्यसत्ताया आत्मरूपत्वेन धर्मत्वाभावस्य व्याकरणमते सिद्धत्वात् सत एव सिद्धेः । अतः परब्रह्मणस्तथात्वेन प्रणाड्याविर्भूतेऽपि तथात्वमेव ।

नन्वस्त्वेवं तथाप्युक्तश्रुतौ ब्रह्मणो रसत्वमुच्यते न तु रसस्य ब्रह्मत्वं, तथा सति बहिराविर्भूतस्य भगवतो रस-त्वाभावात् कथं प्रतिज्ञायाः पूर्तिरिति चेदित्थम् । यत्रेदं वर्ण्यते न तत्र भगवान् बहिःप्रकटः किन्तु हृद्येवेत्युपपादितं 'बर्हापीडे'त्यस्य व्याख्याने । यद्यपि बहिरुदाप्यासक्तिक्रमव्याजेन 'मानसीन' एवेति तत्पूर्तेः । नन्वेवं सति तृप्तिविशेष-जनकत्वाद्भगवानिति चेन्न । लोके दृष्टा प्राकृतस्य देशकालपरिच्छिन्नत्वेन तत्र तदभावेऽपि विरहादौ संस्कारप्राब-ल्यादिना तृप्तिनिगमात् व्याप्तिः स्वीक्रियते न तथा प्रकृते । देशकालापरिच्छिन्नत्वात् । किन्त्वनन्यभक्तिकत्वाद् यादृशी सा तथा तत्राविर्भवति । सा च मनोधर्म इति तदभिव्यञ्जकत्वेन बहिराविर्भूतस्य मानसीनत्वेन तृप्तित्वाभा-वव्याप्यापादिमते दृश्यावच्छिन्नविषयावच्छिन्नयोस्तयोरेकत्वाभावे बहिःस्थस्य दृश्यावच्छिन्नत्वेऽपि तृप्तित्वाभाववत् । नन्वस्त्वेवं तथापि प्रकृतानुरोधाच्छृङ्गारात्मकत्वमेवात्र वक्तव्यं तस्य च परस्परसाकाङ्क्षस्त्रीपुंव्यक्त्यात्मकालम्बनद्वयाधीन-स्थितिकत्वादत्रापि तथात्वमङ्गीकर्तव्यं तथ भगवतो रसत्वे विरुध्येतैकालम्बनत्वेन रसाभासत्वप्रसञ्जकत्वादिति चेन्न । आलम्बनत्वस्यापि रसत्वात् । 'कामिनां दर्शयन् दैन्य'मित्यस्य टिप्पण्यां 'रसात्मको रसवांश्च भगवा'निति कण्ठरवेणोक्त-त्वात् । न च विरोधः । स्वप्रतिज्ञत्वस्य श्रौतत्वेन सर्वसम्मतत्वात् । यथान्येषां कामेन कामवत्त्वं कामस्तु स्वत एव तथान्येषां रसेन रसवत्त्वं रसस्तु स्वत इत्यस्यापि सुवचत्वाच्च तदप्रसङ्गात् । तस्माद् बहिराविर्भूतस्यापि भगवतो रसत्वमबाधितमेव । तथा चैवम्प्रकारस्य शास्त्रार्थस्य श्रुत्यर्थस्य परिज्ञानाद् विचारपूर्वकाश्रयणाद् भावस्य कलिका स्थायिभावात्मिका विचारवतां भवेत् । बीजाङ्कुरादिकं तु पूर्वमनुग्रहात्मकं सिद्धमेवासीदितिभावः । ततस्तस्य स्थायि-भावस्य वैचित्र्यं भावादि-व्यभिचारिभावादि-कृतं भवेत् । तदिहास्मिन् श्लोके पुष्पस्थानमुच्यते । 'विचित्रवेषा'-मित्यनेन कथ्यते । ततोहोरात्रं वासना तत्प्रावण्यरूपा स्यात् । तथा सति प्रसिद्धस्य रसत्वादीनेतेत्याच्छादनं विवरणे । अन्यथा प्रयोजनाभावात् परिकरं न कुर्युः । इममर्थं संगृह्य साधकशिक्षार्थमाहू रसेत्यादि । एतावदर्ध-श्लोकोक्तम् । सिद्धरसानां रसाङ्कुरप्रकारमुत्तरार्धेन बोधयन्तीत्याशयेनाहुराविरित्यादि । तथा च तदा मानसीनस्य तद्दृष्टिविषयीभूतस्य स्वधर्मभाक्त्वं करोतीत्यर्थः । सिद्धमाहुरत इत्यादि । तथा चोक्तप्रणाड्यान्तराविर्भूतो रसो बहिराविर्भू-

तत्तु धर्मसाहित्यात् तद्वद्बोधकत्वाच्च साधनमतः स्वानभेदेनोभयमप्यविरुद्धमितिभावः । अवाप्तामित्यादेरर्थं स्फुटण्यामाहुः स्थायीत्यादि । तदेवोक्तमिति गोष्ठीमध्ये विराजनरसेवोक्तमित्यर्थः ॥ ८ ॥

This will also explain the meaning of 'स्त्रीभावो गूढः पुष्टिमार्गे तत्त्वमिति कृष्णपदार्थः क्वचिद्विवृतः'. In order to realise कृष्णरस, स्त्रीभाव is thus essential and hence the remark of मीरा to जीवगोस्वामी that he was to be congratulated (!) in remembering his पुंभाव in वृन्दावन.

It will also help the reader in understanding the significance of the following श्लोक of श्रीविठ्ठलेश:—

भावैरङ्कुरितं महीमृगदृशामाकल्पमासिञ्चितैः
प्रेम्णा कन्दलितं मनोरथमयैः शाखाशतैः संभृतम् ।
लौल्यैः पल्लवितं मुदा कुसुमितं प्रत्याशया पुष्पितं
लीलाभिः फलितं भजे व्रजवनीशृङ्गारकल्पद्रुमम् ॥

A person does not become fit to experience these various stages of love emanating from रसो वै सः (उद्बोधकं तु हरिणा), unless the mind is free of all burden and the heart is open to these higher Influences. He thus gets स्वरूपयोग्यता, but even then the pouring in of the Influences depends only on वरण, as is stated in यमेवैष वृणुते तेन लभ्यः । Mental repose is ब्राह्मीस्थिति, described in the second अध्याय of गीता, on attainment of which a man has simply to work as an instrument of परमात्मन्, or a servant of God, and the best servants are those who never forget their Master and His commands for a single moment (मन्मना भव). These गोपीजनs were always गोविन्द एव निखिलात्मनि रूढभावाः, and hence their दास्य was best, and therefore they were परं तनुभृतः । This also answers the question as to who are the best of human beings.

श्रीमद्वेदव्यास puts into the mouth of श्रीउद्धव the following verse as regards व्रजवनिताः।

एताः परं तनुभृतो भुवि गोपवध्वो
गोविन्द एव निखिलात्मनि रूढभावाः ।
वाञ्छन्ति यं भवभियो मुनयो वयं च
किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥ भा. १०-४४-५९.

श्रीमद्वल्लभाचार्य's comments on it are as under:—

तनुभृत एता एव, नापि ज्ञानिनो नापि लौकिका नापि भक्ताः, तत्र लौकिकास्तु व्यर्थजीवना एव । न रज्ज्वा बद्धः पाशी भवति, स्वाधीनपाश एव तथा । एवं तनुभृतोपि येषां स्वाधीना तनुः । ज्ञानिनां तु ज्ञानप्राप्तिपर्यन्तमेव साधनत्वेन शरीरोपयोगादग्रे व्यर्थ एव देहः, अनपेक्षितं भारवद् गृह्णन्तीति । भक्ता अपि मौढ्याद्देहमेवात्मानं मन्यमानाः तत्रैव पर्यवसितमतयो बहिर्मुखत्वात्तनुरूपा एव न तु तनुभृतः । कालान्तरे परं सत्फलम्, अस्मदादयस्तु भक्ता अपि प्राप्तज्ञाना अपि मन्दभावं प्राप्ता नोत्कर्षेण तनुभृतः । अतः परमुत्कर्षेण एता एव तनुभृतः । नन्वेतादृश्यः सन्ति तनुभृतः लक्ष्मीप्रभृतयः । तत्राह भुवीति । ननु भुव्यप्युत्कटभक्ताः प्रह्लादादयः सन्त्येव तत्राह गोपवध्व

इति । एतादृशीमवस्थां प्राप्य न कोप्येवंविधो जात इत्याश्चर्यम् । किञ्च । गोविन्दे स्वकीयत्वेन ज्ञाते वस्तुतः **अखिलात्मनि एवं रूढभावः**, अतो देहस्य स्वाधीनस्यैतदेव फलमिति सर्वात्मत्वेन ज्ञात्वापि निर्दोषपूर्वभावनिष्ठा एव । ननु ज्ञानावस्थोत्तरेति, 'आत्मलाभान्न परं विद्यत' इति, एता भगवता ज्ञाननिष्ठा कृता इति च, वस्तुत एवाग्रे देहस्यानुपयोगात्कथमेषा स्तुतिरिति चेत्तत्राह **वाञ्छन्ति यमिति**, यं भावं भवाद् भीः येषां ते मुमुक्षवः **मुनयो** मुक्ताः **वयं** भक्ताः चकारात्सर्व एव धर्ममार्गपरा अपि । अवश्यं हि विदेहकैवल्यपर्यन्तं सर्वेषां बहिःसंवेदनास्त्येव, जीवन्मुक्तानां तथा श्रवणात् । तत्र लौकिक एव भावः सर्वेषां जायत इति कालावच्छेदेन जन्मवैयर्थ्यमेव । अन्येषां तु वैयर्थ्यं सिद्धमेव । नारदादीनामपि कदाचित् प्राकृतवद् व्यवस्था । अन्यथा लौकिकसमानकार्यं न स्यात्, प्रह्लादस्यापि राज्यादिकरणात् तथावसीयते । बहिःसंवेदने तु एषैवावस्था सर्वशास्त्रपर्यवसिता नातोन्या क्वचिदप्यस्तीति अवस्थायां विचार्यमाणायामेता एव तनुभृतः । नन्वेतदपेक्षया ये श्रोत्रिया ब्रह्मविदो ब्राह्मणाः वसिष्ठादयः ते महान्तो भविष्यन्तीत्याशङ्क्याह **किं ब्रह्मजन्मभिरिति** । ब्रह्मभावापन्नानां जन्मभिः शौक्रसावित्रयाज्ञिकैः किं, न किञ्चित् । यद्यपि बहिःसंवेदने तेषां वेदार्थानुष्ठातृत्वं दीर्घसत्रित्वादिरूपमन्तर्निष्ठतायां तु ब्रह्मपरत्वमिति, तथापि कर्मापेक्षया भक्तिरधिका, कर्म हि प्रपञ्चे स्वास्थ्यं सम्पादयति न तु भक्तिः, यो हि दुष्टं मन्यते स दुष्ट इति निर्धारः । तत्तत्प्रकरणे तत्तत्प्रशंसा तु प्रकरणानुरोधिनी, अतः अनन्तकथायामरसस्य ब्रह्मजन्मभिः कर्मोपयोगिभिरपि न किञ्चित् । ननु तथाप्युत्कर्षहेतुः लोके तद्भवतीति युक्त्या बाधेऽपि प्रसिद्ध्यैव उत्तमफलत्वं पर्यवसानविधया कल्प्यत इति चेत्तत्राह **अनन्तकथायां रसयुक्तस्य** पूर्वोक्तब्रह्मजन्मभिः न कोपि पुरुषार्थः साधनीयः । ततोप्युत्कृष्टस्यैव साधनदशायां च फलस्य सिद्धत्वात् कर्मापेक्षयापि भक्त्यैव ज्ञाने अधिकोपकारकरणाच्च ॥ ५९ ॥

We praise कालिदास, Shakespeare and other poets, for being able to understand and vividly describe the various fine subtle emotions of the human heart, but so long as these emotions emanate from the senses, they are opposed to the मोक्षमार्ग, because all attachment is to be cut asunder by असङ्गशस्त्र.* But when we learn from उपनिषत्s that God is रस as opposed to लौकिकइन्द्रियजन्यविषय, that रस is अलौकिक and नित्य as opposed to विषय which is अनित्य, सविघ्न, अल्प and घातक, we begin to have a glimpse of "नित्य नौतन नित्यलीला श्रुति न पामे पार" "क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।" We can then and then only appreciate रासलीला of श्रीमद्भागवत, जयदेव's गीतगोविन्द, नृसिंहमेहेता's बाललीला, सुरत संग्राम, चातुरी षोडशी, दानलीला, राससहस्रपदी, शृङ्गारमाला, and हींडोलापद, श्रीविट्ठलेश्वर's शृङ्गाररसमण्डन, and poems and कीर्तनs of सूरदास, परमानन्ददास and other अष्टसखाs. Mere imagination and passion-play have no deeper foundation, and hence Plato as well as श्रीमद्वल्लभाचार्य have rightly discarded poetry from their philosophy.

तैत्तिरीय is one of the most important उपनिषत्s as it narrates फल. The reader must carefully study it.† From the four पुरुष–अन्नमय, प्राणमय, मनोमय and विज्ञानमय, it leads us finally to the आनन्दमयपरमात्मन्, and the enjoyment of सर्वान् कामान् with this विपश्चित् ब्रह्मन् is the crowning glory of the soul. This रसरूपता is again described in the तामसप्रमेयप्रकरण, *viz.*, 12 to 18 अध्यायs of श्रीमद्भागवत दशमस्कन्ध. This रसरूपता is

---

*Cf. वैराग्यासक्तः कथं नु विषयव्यापारकौतूहलः । &c.

† तैत्तिरीयोपनिषद् with भाष्य by जयगोपालभट्ट is published by Mr. Teliwala. आनन्दमयाधिकरणभाष्य may also be read with advantage.

again clearly described in the verse मल्लानामशनिः (१०. ४०. १७.) where all the ten रसs including the भक्तिरस are mentioned. That कृष्ण Himself is this रसरूपफल and परब्रह्म is clear from the three distinguishing characteristics given in श्रीमद्भागवत viz; जृम्भालीला, मृत्स्नाभक्षणलीला and दामोदरलीला. In the first two, He shows all the ब्रह्माण्डs in His mouth, including the sun, the moon, stars etc., which is shown by no other अवतार, it being peculiar to ब्रह्म only, and in the third, He, in the form of a child, could not be bound by any length of ropes, because they were all within Him, He alone being Immeasurable. Here श्रीवल्लभाचार्य says:—(भागवत १०-९. १३-१९)

न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् ।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः ॥ १३ ॥
तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम् ।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा ॥ १४ ॥
तद् दाम बध्यमानस्य स्वार्भकस्य कृतागसः ।
द्व्यङ्गुलोनमभूत् तेन सन्दधेन्यच्च गोपिका ॥ १५ ॥
यदासीत् तदपि न्यूनं तेनान्यदपि सन्दधे ।
तदपि द्व्यङ्गुलं न्यूनं यद्यदादत्त बन्धनम् ॥ १६ ॥
एवं स्वगेहदामानि यशोदा सन्दधत्यपि ।
गोपीनां सुस्मयन्तीनां स्मयन्ती विस्मिताभवत् ॥ १७ ॥
स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः ।
दृष्ट्वा परिश्रमं कृष्णः कृपयासीत् स्वबन्धने ॥ १८ ॥
एवं प्रदर्शिता ह्यङ्ग हरिणा भक्तवश्यता ।
स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ ॥

शुकोपि तां दूषयन्निव बन्धाभावे परमार्थतो युक्तिं प्रदर्शयति न चान्तरिति, भगवति बन्धाभावो द्वेधापि भवति, भगवत्स्वरूपविचारेण बन्धनसाधनस्वरूपविचारेण च, तत्रादौ स्वरूपं विचारयति । बन्धनं हि कार्यद्वयं सम्पादयति बहिर्निरोधमन्तस्तापं च, तत् तस्यैव भवति यस्यान्तर्बहिर्भावो भवति, भगवांस्तु पूर्णः सर्वं व्याप्य तिष्ठतीति न कस्मादपि भगवानन्तर्भवति, निरवयवत्वाच्च न कोपि तस्य परिच्छेदकः, चकारादन्तःशब्दव्यवहार्य आकाशोतः स शब्दोपि भगवति न प्रवर्तत इत्युक्तम् । अन्तर्यामिब्राह्मणे सर्वान्तरो भगवानुक्तो न तु भगवतोन्तरं कचित् । सर्वान्तरः केनान्तर्भावमापद्येत ? आधारत्वे तु नान्तरभावना, रूपादिषु तथोपलब्धेः । न हि फलस्यान्तःस्वरूपं तिष्ठति बीजवत्, तथा सत्यदृश्यः स्यात्, अतो न केनाप्यंशेन भगवतोन्तरमस्ति, नापि बहिः, व्यापकत्वात्, बहिःस्थित एवाकाशोन्तस्तिष्ठतीति नाकाशाद् बहिरस्ति किञ्चित् । अनेनान्तःकरणे खेदो बहिरावरणं वा नास्तीत्युक्तं । किञ्च बन्धनं हि वेष्टनात्मकं, तद् दिग्विभागे सति भवति, निरवयवस्यानिरूप्यस्य स्वत एव भासमानस्य ज्ञातृज्ञेयभावतिरोधायकस्य केनाप्यंशेन पूर्वभावोपरभावो वा न सम्भवति । अनेनैव दक्षिणोत्तरभावा अपि परिहृताः । सर्वत्र स्थितः पूर्वापरभावमेव न मन्यते, अतः स्वरूपकृता वा विकृता वान्तरादिधर्मा भगवति न सन्तीति न बन्धसम्भावना । साधनस्वरूपविचारेणापि न भवतीत्याह पूर्वापरमिति रज्ज्वादीनां पूर्वभागे परभागे चायमेव वर्तते, तत्र यशोदैव प्रमाणं, भगवति सर्वं दृष्टवती यतः,

सर्वस्यापि भगवान् बहिरपि भवति व्यापकत्वात्, अन्तरपि भवति सर्वान्तरत्वात्, चकारात् स्वरूपमपि । किञ्च जगतो य एतावान्, **यतो** जायते **गच्छति चेति जगत्**, यदि भगवानेतावन्न स्यात् कथं जगद् भवेत्? पूर्वभावाभावे न भवेत् परभावाभावे न गच्छेत्, जगतश्चेद् भगवान् बहिर्न भवेद् जगति गच्छति गच्छेद्, यदि सर्वान्तरो न भवेज् जगदिति विशिष्टं सर्वप्रतीतिसिद्धं न भवेत्, अन्तःस्थितभगवद्धर्मैरेव जगतो विवक्षितधर्मवत्त्वात् । किञ्च **यो ज़गत्, न हि स्वात्मना स्वयं बद्धो भवति**, तथा सति बन्धकानां वैयर्थ्यापत्तेः । किञ्च जगन्मयोयं सर्वमेव जगद् व्याप्य तिष्ठति, एतदाज्ञयैव जगत् कार्यं करोति, ततः कथमयं स्वबन्धने जगत् प्रेरयेत्? अतो न केनापि प्रकारेण भगवतो बन्धनमस्तीति **निश्चिन्ता भक्ताः** ॥ १३ ॥ तादृशं योन्यथा विचारयति स निष्फलप्रयासो भवतीति तां दूषयन्निव तस्याप्यज्ञानमाह तमिति, **तं** पुराणपुरुषोत्तममात्मजं स्वशरीराज्जातं **मत्वा दाम्ना बबन्धे**तिसम्बन्धः । देहस्तु प्राकृतस्तस्या इति तज्जातः सुतरां प्राकृतो भवति । ननु कश्चिन् महान्तोपि पुत्रा जायन्ते देवादयोपि ततो लोके कारणवैलक्षण्यस्यापि दृष्टत्वात् कथमात्मजत्वे तथा कर्तुं शक्यत इति चेत् तत्राहाव्यक्तमिति, न केनाप्यंशेन **व्यक्तं, ये हि महान्तो भवन्ति ते स्वधर्मान् प्रकटीकुर्वन्ति यथा भरतादयः, भगवांस्तु तथा न करोतीति** प्राकृतबुद्धिस्तेषां दृढा, मध्यमावस्थानामेव तथा करणं न तु परमकाष्ठां गतस्य । किञ्च यदि गुप्त एव संस्तूष्णीं तिष्ठेत् तथापि सन्देहः स्यादन्यवाक्येन वा माहात्म्यं जानीयुः, प्रत्युत भगवान् विपरीतधर्मान् बोधयत्यतः कथं प्रतीतिरित्याह **मर्त्यलिङ्गमिति, मर्त्यस्यात्यन्तप्राकृतस्य लिङ्गानि यस्मिन्निति**, तथैव स्वरूपं गुणांश्चेष्टां च प्रदर्शयतीत्यर्थः । ननु तथाप्यत्यन्ताभिज्ञा यथा नटं परिचिन्वन्ति तथा सर्वविलक्षणानन्तगुणवत्त्वादानन्दमयत्वाच्च कथं न ज्ञायत इत्याशङ्क्याहाधोक्षजमिति, **अधोक्षजं** ज्ञानं यस्मादिति, न हि भगवान् गुणा वा कस्यचिदपि चक्षुर्गोचरा भवन्ति, इच्छा तु नास्तीत्यवगम्यते विरुद्धप्रदर्शनात् । किञ्चेयं च यशोदा गोपिकातिप्राकृतरूपा, अतोनभिज्ञा कथं जानीयात्? **उलूखलोपरि पादं दत्त्वा भगवान् क्रीडति, अग्रेश्च नाभिर्भवति, अतो भगवान् गोकुलस्थितमुलूखलं स्वाश्रयत्वेन ज्ञापयितुमत्र बन्धनं कारितवान् गोपिकायास्तु बुद्धिर्यथान्यत्र न गच्छतीति।** दाम पशूनां बन्धकं, ननूलूखलदामहस्ताधिष्ठितदेवानां कथं तूष्णीम्भावः? तत्राह **प्राकृतं यथेति**, तेषामपि बुद्धिर्भगवता तथा सम्पादितेति ॥ १४ ॥ **अयं देहाकारेण भासमान एव भगवान् सच्चिदानन्दरूप इति गुणोपसंहारन्यायेन “न चान्तर्न बहिर्यस्य”त्यादिधर्मा अस्यैवेति ज्ञापयितुं बन्धनेप्युपायं वदन् भगवान् सामिबद्धो** जात इत्याह तद्दामेति, **भगवता स्वस्मिन् दोषद्वयं प्रदर्शितं तत्पुत्रत्वमपराधश्च, तदा रज्जुरन्तर्बहिःस्थितं भगवन्तं तिरोहितं मत्वा वेष्टनं कृतवती स्वयं बहिःस्थितान्तःस्थितस्य भगवतः**, तदाह **तद्दाम बध्यमानस्येति, अन्यथा बहिरपि रज्जुर्न भवेद् वेष्टकमपि न भवेत् । तथापि परितो वेष्टनरूपा न जाता, पूर्वापरयोर्भगवत एव सत्त्वात्**, अतो **द्व्यङ्गुलं** न्यूना जाता । लोकपरिमाणे प्रथमपरिमाणमङ्गुलिः, तत्र प्रथमातिक्रमे कारणाभावादल्पवैलक्षण्ये महतो योजनायामाश्चर्यमपि भवतीति **द्व्यङ्गुलोनमेवाभूत्** । **रज्ज्वाद्यन्तयोर्यो भगवान् स एवायं क्रोडीकृतः, न तु ततः केनापि धर्मेण भिन्न इति ज्ञापयितुमेवमाह व्यापकत्वस्य दर्शनार्थमेव तिरोभावाद् रज्जुस्थूलतायामपि नोदरस्थौल्यं**, प्रतिबिम्बादौ तथोपलब्धेः, अतो वैलक्षण्याज्ञानात् **तेनान्यदपि** दाम तावत्प्रमाणकं **सन्दधे** योजितवती । **चकाराद् विसदृशमपि ततोपि स्थूलम् । नन्वङ्गुलद्वये न्यूने किमित्येतावद् योजितवती?**

तत्राह **गोपिकेति**, मौढ्यं तस्या अनुवर्तत इति ॥ १५ ॥ तत किमभूदित्याशङ्कायामाह **यदासीदिति**, उभयोः सम्बन्धे पुनः सैकैत्र रज्जुर्जाता, तदाह **यदासीदिति**, उभयोः सम्बन्धे यदेकमासीदित्यर्थः, **तदपि** पूर्वोक्तन्यायेनैन **न्यूनमासीद् द्व्यङ्गुलं तेनापि** विशिष्टेन पुनरन्यत् **सन्दधे** तत् तृतीयं, **तदपि द्व्यङ्गुलमेव** न्यूनं, "त्रिवृत्त्या हि देवा" इति, **भगवतो जगदाद्यन्तःस्थितिर्वारत्रयं प्रदर्शिता**। मानुषभावं ततोपि बहुवारं कृतवतीत्यनुवदति **यद्यदादत्त बन्धनमिति**, यद्यदेव योजनार्थं गृहीतवती तत्तदेव द्व्यङ्गुलोनमभूत् ॥ १६ ॥ सर्वा एव गोप्योङ्गणमध्ये तथाकरणाद् द्रष्टुमागताः, ता अद्यापि तथा न निरुद्धा इति तदा **स्मयन्त्यो** जाता गर्विष्ठाः सन्मुखा वा स्वस्यापि भुजबन्धनादिकं भावयिष्यन्त्यः **सुस्मयन्त्यो** जाताः । गृहस्थसर्वदामव्ययीकरणेपि न बन्धनं निवृत्तमित्याहैवमिति पूर्वोक्तन्यायेन सर्वाण्येव **दामानि** योजितवती, यतो **यशोदा** यशो ददाति धत्ति वा, **सन्दधत्यपि** द्व्यङ्गुलन्यूनभावाद् **विस्मिताभवदिति** सम्बन्धः। **यशोदागृह एव भगवता पुत्रत्वमपराधश्च दर्शित इति तद्गेहदामान्येवान्तर्बहिर्भगवत्तिरोभावात् सम्बद्धानि न तु गेहान्तरस्थितानि, अन्यासां तु तदर्थप्रवृत्तिरेव नास्ति, अन्तर्बहिस्तिरोधानाभावात्, रज्जूनामानयनं यशोदाकर्तृकमेव, न हि तादृश्या अन्यः सहायं कर्तुमर्हति**। पूर्वं तु वारद्वयत्रययोजनायां रोषे गते **स्मयन्ती** जाता, ततोपि बहुवारयोजनायां **विस्मिता चाभवत्**, आश्चर्यं प्राप्तवती, ततो रज्जूनामन्वेषणार्थं निर्बन्धेन यत्नं कृतवती ॥१७॥ ततः सामर्थ्याभावे गोपिकानां समक्षं परमलज्जां प्राप्य भग्नमानससङ्कल्पा **मृतप्रायासीत्**। **तदा भगवान् परमकृपालुस्तादृशदुष्टेष्वपि सद् बुद्ध्यायुक्तमपि कृतवानित्याह स्वमातुरिति**, ततो भगवान् **कृपया स्वबन्धन आसीदिति सम्बन्धः**। तत्र कारणत्रयमाह **स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रज** इति। मातुर्हि परितोषः कर्तव्यः, "मातृदेवो भव" "एभ्यो माता गरीयसी"ति वाक्यात् । नापि तस्या अपत्यान्तरमस्ति यो ह्युपस्थितं दुःखं निवारयेत् यत इयं स्वस्यैव मातातो **मातृत्वं** ख्यापयित्वा तस्या दुःखमसहमानेन तथा कृतम्। किञ्च गोकुलवासिनां खेददूरीकरणार्थमागतो भगवान् स कथं **स्विन्नगात्रायाः** सर्वाङ्गे जातस्वेदाया न **परिश्रमं** दूरीकुर्यात् ? **किञ्च** गोकुलवासिनां सर्वसौभाग्यदानार्थमागतः स कथं विस्रस्ताः **कबरात्** केशपाशात् **स्रजो** यस्यास्तादृशीं पश्येत् ? अनेन सर्वाभरणानामेव तिरोभावः सूचितः। एवमेतादृश्याः **परिश्रमं** दृष्ट्वेतस्ततः पर्यटनं खेदः प्रस्वेदो मुखशोषो महती च ग्लानिरित्यादिः **परिशब्दार्थः**। तत्रापि भगवान् **कृष्णः** सदानन्दोननुभूतदुःखो दुःखितानामसमक्षः परदुःखमपि न पश्यति तदपूर्वं यशोदादुःखं दृष्ट्वा **कृपया** व्याप्तो मात्रर्थे स्विन्नगात्रार्थे स्रगभावार्थे च **स्वस्यैव स्वयं बन्धकरूपगुणाङ्गुलत्रयभूतो जातः**। **द्वाभ्यां पूरितमङ्गुलमात्रं च बन्धनं जातं, तदा स्वस्यैव स्वयमेव बन्धने जात आसीत्**, प्रकरणाद् गृहीत इत्यवक्तव्यत्वान्नोक्तम् ॥ १८ ॥ ननु किमर्थं भगवानेतावत् कृत्वा बन्धनरूपो जात इति चेत् तत्राहैवमिति, **एवमपकारिणि लोके स्वकीयत्वमात्राभिमानेनाप्येतावतीमभूतपूर्वां कृपां करोतीति स्वस्य भक्तवश्यता प्रदर्शिता**। प्रदर्शनस्यापि प्रयोजनमाह **हरिणेति**, स हि सर्वदुःखहर्ता तत्त्वसिद्ध्यर्थमसम्बन्धेन दुःखहन्तृत्वेतिप्रसङ्गात् संसारविलयः स्यादिति **सम्बन्धार्थं** कृपालुतां प्रदर्शयति, **कृपा च सर्वधर्मधर्मिभ्यो बलिष्ठेति वक्तुं भक्तवश्यता शब्देनैवोक्ता**। ननु भक्त्या चेद् धर्मधर्मिणामुपमर्दः क्रियते तदा स्वरूपस्य प्रच्युतत्वात् फलाभावात् प्रदर्शनमपि व्यर्थं स्यादित्याशङ्क्याह **स्ववशेनापीति**, स हि **स्ववश एव न केनाप्युपमर्द्यः**, अनेन फलसाधकत्वमुक्तम्। फलरूपत्वमाह **कृष्णेनेति**, नन्वेवं कृतेन्यो

महान् ब्रह्मादिर्न मंस्यते ततो माहात्म्यस्य न्यूनभावान्न तथा फलत्वमित्याशङ्क्याह यस्येदं सेश्वरं वशे इति, तत्तदधिष्ठातृदेवतासहितं सर्वं जगद् यस्य वशे, अतो नान्यथाभावनं केनचिदपि कर्तुं शक्यमिति भावः ॥ १९ ॥

Thus the aim of श्रीवल्लभाचार्य is to take the soul into the Presence of God, and to bring back the आनन्द which is तिरोभूत in जीव. For this, जीव has to forget the जगत् in which he is placed and remember his source ब्रह्म or कृष्ण—प्रपञ्चविस्मृतिपूर्वकभगवदासक्ति. This can be achieved by कृष्णसेवा which must be मानसी, the steps leading to मानसी being तनुजा and वित्तजा सेवा. This he has to do अव्यावृत्त, because his body is supported by कृष्ण, who has promised 'योगक्षेमं वहाम्यहम्'. In order that he may get the true फल of his सेवा, he must be free from उद्वेग, प्रतिबन्ध and लौकिकभोग. It is thus that सेवा becomes आधिदैविकी, and he realises कृष्णसाक्षात्कार. He realises also that मोक्षोपि सर्गः, the whole लीलासृष्टि he gets in directcommunion with, and following in the footsteps of 'एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः' he becomes a part and parcel of the रसरूपपरब्रह्म and eternally enjoys indescribable bliss with Him.

Let us hope these stray notes will guide the reader in understanding to a certain extent पुष्टिमार्ग, in which भगवान् Himself is both साधन and फल, and will lead him to an appreciation of the परिशिष्ट. According to the विस्फुलिंग श्रुति, जीव is the अंश of ब्रह्मन्, and it is clear that यो यदंशः स तं भजेत्. This भजनानन्द begins after उद्धार from ब्रह्मानन्द and is the Eternal Sport of the मुक्त soul with परब्रह्मन्, which is आनन्दमय. These souls also are specially elected for His सेवाः—

> तस्माज्जीवाः पुष्टिमार्गे भिन्ना एव न संशयः ।
> भगवद्रूपसेवार्थं तत्सृष्टिर्नान्यथा भवेत् ॥ १२ ॥
> स्वरूपेणावतारेण लिङ्गेन च गुणेन च ।
> तारतम्यं न स्वरूपे देहे वा तत् क्रियासु वा ॥ १३ ॥
> तथापि यावता कार्यं तावत्तस्य करोति हि । (पुष्टिप्रवाहमर्यादा).

In this सेवा he gets अलौकिकसामर्थ्य. He becomes भोक्ता, while परब्रह्म becomes गौण—सोश्नुते सह ब्रह्मणा, which idea itself is so very enchanting, and in संयोग and विप्रयोग, in one of the ten stages of रसशास्त्र, going through various अनुभावs and संचारिभावs, he is always in रससमुद्र, सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता.

Though we have given here very long quotations, we are aware that they are quite inadequate to give a clear idea of पुष्टिमार्ग, but if the reader is able to get a glimpse of what these great religious teachers mean to say, and if he is inclined t think and inquire and work on these lines, we have given him an idea of almost all the sources, and in course of time, we may except to see a complete treatise published on the subject.

We again express our gratefulness to God for giving us strength to complete this volume, and with feelings of joy, we offer this fruit of our labour of love at the Lotus Feet of Lord Shri Krishna.

ज्येष्ठाभिषेकः }
१९८५. }

Dhirajlal Vrajdas Sanklia.
Jamnadas Kanji Morparia.
Hiralal Mooljee.
G. P. Merchant.
Purshottam Kanji Morparia.

परिशिष्टम् ।

श्रीगोपेश्वरजिद्भिरष्टसप्ततिपत्राणि भावनात्रयादिकं संकलय्य रश्मौ शोधपत्रेषु निवेशितानि, अनुपलब्धपत्रसप्ताद्दते तान्यत्र मुद्र्यन्ते।

प्रतिमादिष्वावाहनेन सन्निहिते विभूतिरूपे तद्भावनं पूजामार्गे । भक्तिमार्गे तु भक्त्या तत्र प्रकटे तथा । (भाष्यम् । अ० ४ पा० ३ अ० ४ सू० १६)।

यथा पूर्वकाण्डतात्पर्यं ब्रह्मणीत्यज्ञात्वा कर्मण्येव तात्पर्यमवधार्य तात्पर्यभ्रमेण यजतां स्वर्गाद्यनन्तरं पुनरावृत्तिः, तथात्रापि प्रतीकालम्बनानां तात्पर्यभ्रमेण तथोपासनात् तत्तल्लोकभोगोत्तरमावृत्तिः । * अवतारयन्ति एवं ज्ञानेत्यादि । * आवाहनेन सन्निधानं च 'अप्स्वग्नौ हृदये सूर्ये' इत्याद्युक्तस्य नित्यसन्निधानस्याप्युपलक्षकम् । तथा च प्रतिमादिष्वपि शास्त्रप्रामाण्यात् कथञ्चन तत्तद्रूपसन्निधानमेव तत्तत्फलदानादिप्रयोजकं, न तु बुद्धिमात्रम् । (प्रकाशः) ।

अप्रतीकालम्बनान् तथा चेत्यादि । षडङ्गवेदस्य ज्ञेयत्वेन छन्दोवत्सूत्राणि भवन्तीत्यभियुक्तोक्तेः सूत्रेष्वपि षडङ्गेनाभिधेयनिर्णयादप्रतिकूलस्मरणालम्बनानित्यर्थो भवति, पुराणमते तु वक्ष्यमाणगारुडवाक्याद् देवतादीनित्यर्थो भवति । तथा च श्रौते मते प्रतिकूलत्वं भ्रमविषयत्वमतस्मिन् तत्त्वं तेनोप समीपे स्थित्वा यथायोग्यान्तर्गतस्मरणस्य करणमित्यर्थः । **पूर्वकाण्डेत्यादि** । भक्तेस्तात्पर्यविषयत्वस्य पुरस्तादुक्तत्वेन तद्विषयस्यापि तात्पर्यविषयत्वम्, 'धर्मो यस्यां मदात्मकः' इत्येकादशस्कन्धात् । अभिधा तु हीदमित्थतया धर्मेषु सृष्ट्यादिकर्तृत्वेषु 'ज्ञानशक्तिक्रियाशक्ती सन्दिष्टेते परस्थिते' इति भाष्यात्, न मदात्मके धर्म इति, तथा च 'वेदार्थो रामकृष्णयो'रिति श्रुतेः रामकृष्णसम्बन्धी सृष्ट्यादिकर्तृत्वादिर्वेदार्थ इत्यर्थः । सुबोधिन्युक्तषड्भगेष्वपि शक्तिः । **अवतारयन्तीति** । न्यूनतारूपनिग्रहस्थानरूपदोषाभावाय तथेत्यर्थः । **अप्स्वग्नावित्यादि** । इदं वाक्यं स्मृत्यर्थसारे विष्णोः, 'अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च । शालिग्रामे च चक्राङ्के परे मुद्रासु देवताः । नित्यं सन्ति हिरण्ये च ब्राह्मणेषु च गोषु च' इति ।

तत्तद्रूपेत्यादि । अत्र समासः श्रीप्रभूणां श्रीमद्गोपीनाथजितां व्रजराजजितां वा श्लोकानां ग्रन्थे प्रभुध्यानपद्यावतारसेवकदेवीभाग्याभिनन्दनपद्यभजनानन्दानुभवप्रतिबन्धकत्वभातकर्मपरित्यागवत्स्नानसन्ध्याजपहोमब्रह्मयज्ञतर्पणाभ्यवहारपानजीवनप्रकारः, ततः श्रीकृष्णसेवार्थस्नानालौकिकभवनजपनामप्रशंसाप्रातःकृष्णनमनसन्ध्याहोमब्रह्मयज्ञगौणकालिकलौकिकवैदिककर्माभ्यवहारपानतत्फलस्वोच्छिष्टदानविधितद्ग्रहणप्रतिमाभावनास्वरूपवर्णनशृङ्गारस्वरूपवर्णनोत्सवभावनासेवाविधिसेवाश्लोकपञ्चामृतश्लोकसम्बुद्धिपूर्वकनिमन्त्रणयमुनाजिच्छरणमार्गत्रयोदशश्लोकनिरूपके भक्तिमार्गीयरूपसन्निधानस्य फलदानादेश्च । तथा हि । तदर्थं पूर्वं व्यसनरूपभक्तेः **भक्तिमार्गे तु भक्त्या तत्र प्रकट** इति वक्ष्यमाणभाष्यात्सन्निधानकारणीभूताया जन्या विविधा भावा निरूप्यन्ते गोस्वामिभिः **सौन्दर्यमित्यादिना** ।

सौन्दर्यं निजहृद्गतं प्रकटितं स्त्रीगूढभावात्मकं पुंरूपञ्च पुनस्तदन्तरगतं प्रावीविशत्स्वप्रिये ॥
संश्लिष्टावुभयोर्बभौ रसमयः कृष्णो हि तत्साक्षिकं रूपं तत्रितयात्मकं परममिध्येयं सदा वल्लभम् ॥१॥

यद्वल्लभाष्टकादौ रूपं निरूपितं तदेव बुद्धिप्रवेशसौकर्यायात्रोपनिबद्ध्य निरूपितं, 'मद्भक्तपूजाभ्यधिका', 'आचार्यं मां विजानीयात्', 'आचार्यवान् पुरुषो वेद' इत्यादिवाक्येभ्यः । आदौ

---

१ 'अष्टसप्ततिपत्राणि शोधितानि । ब्रह्मनिरूपणमदूषणीयं केनापि' इति ग्रन्थप्रणेतुराज्ञा श्रीहस्ताक्षरेण लिखितास्ति ।

वस्तुनिर्देशात्मकमङ्गलार्थमत्र पुष्टिरूपं स्वयं ज्योतीरूपं ध्यानविषयत्वेनोक्तं भविष्यति । **परं विशेष्यम्** । एतट्टीकायामपि ज्ञेयम् । **परमभिध्येयमिति परं** विशेष्यम् । कथंभूतं परं **तत्त्रितयात्मक**मुभयं साक्षिकं रूपं चेति त्रितयात्मकम् । कथंभूतं साक्षिकं रूपं **वल्लभं** अत्यन्तानुग्रहभाजनरूपम् । वल्लेनाज्ञानसंवरणेन भातीति तं वल्लभम् । सदा वल्लभं नाम यस्येति वा । 'वाचारम्भणं विकारो नामधेय'मित्यन्यत्रेति ज्ञापनाय । कथंभूतं तदुभयं **रसमयो बभौ हीति** । कस्यां सत्यामिति चेन्न; **उभयोः संसृष्टौ** सत्याम् । कथं रसमयत्वमित्यत आहुः **कृष्ण इति** । कृष्णो हि **प्रावीविशत्** । किम् । 'तदेव कदाचित्परमसौन्दर्यं स्वगतं (प्रकटं) करिष्यामीति साकारं प्रादुर्भूतं सच्छ्रीकृष्ण' इत्यादिनिबन्धाद्युक्तदिशा साक्षात्पुष्टिरसामृतप्रेप्सुव्रजवररत्नकदम्बेषु स्वलावण्यामृतदित्सयानिर्वचनीयानन्दरसमयः श्रीकृष्णः प्रादुर्बभूवेति **सौन्दर्यम्** । कथंभूतं सौन्दर्यम्, **निजस्य स्वस्य हृद्गतं** मनोगतं, पुनः कथंभूतं, **स्त्रीगूढभावात्मकम्** । अस्ति भावद्वयं भगवति, पुम्भावः स्त्रीभावश्चेति । एवमेव श्रीमुख्यस्वामिन्यामपि भावद्वयम् । तदुक्तं 'यथा हि सर्वभावात्मा कृष्णः सापि च तादृशी' इति श्रीहरिरायैः । ब्रह्मत्वे सर्वभावात्मत्वं 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्म' 'सत्यं विज्ञानमानन्दं ब्रह्मेति' श्रुतिभ्याम् । यद्यपि द्वितीया श्रीयमुनाजित्तत्त्वपरा तथापि तत्पौराणं मतं, श्रौते मते ब्रह्मानन्दत्वं यत्र तत्र श्रुतिप्रवृत्तिः । पुनः कथंभूतं **प्रकटितं**, रसाभासप्रसक्तिः पुंद्वये स्त्रीद्वये चात उभाभ्यां पृथक् स्थितं रूपद्वयं प्रकटितं स्वेच्छया । तद्भावद्वयं श्रीमदाचार्यवर्यस्वरूपम् । **तृतीयं** साक्षिकं रूपं अनुभवितृ । तथा च '**द्वौ सुपर्णौ** भवत' इति गोपालतापनीय उक्तौ तावेतौ भवतः[1] । कथंभूतं पुंरूपम् । **चः** समुच्चये । **पुनस्तदन्तरगतं** स्वामिन्यन्तरगतं भगवद्रूपं स्त्रियाः पूर्वमुक्तत्वात् । केति चेन्न, **स्वप्रिये** । कदेति चेन्न, **सदा** । तादृशं रूपं **ध्येयम्** । 'अभिश्चकार तत्त्वार्थदीपं भागवते मह'दित्यभिरूपभावा भक्तिजन्या भक्तिः स्मरणादिरूपा अत्र । अत्र विरहाग्निः स्वयंज्योतीरूपः स्वप्रिये यद्दत्सत्यज्ञानात्मकं तत्रानन्तमानन्दं ब्रह्म पूर्णानन्दरूपं स्वगतभक्तविरहशामकं स्वगतसंयोगश्रीमदाचार्यगतविप्रयोगात्मकं यच्छ्रीकृष्णः[2] प्रावीविशत्तत्र विरहोग्निः[3] ज्योतिरग्निः[4] हृद्दर्शनाग्निः[5] पूर्णानन्दोप्यानन्दमात्रकरपादमुखोदरादिरूपः[6] सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितश्चातो दर्शनाग्निरूपः श्रीमदाचार्यसूक्ष्मदेहः । गर्भोपनिषदि 'दर्शनाग्नी रूपाणां दर्शनं करोती'ति श्रुतिः । त्रिविधात्मस्वात्मोपनिषदुक्तं द्वयमुक्तम् । तृतीयो हि परमात्मान्तरात्मबाह्यात्मसु बाह्यात्मा । गर्भोपनिषदुक्तेषु द्वयमुक्तम् । तृतीये ज्ञानाग्निदर्शनाग्निकोष्ठाग्निषु कोष्ठाग्निस्तद्रूप इतरस्तु विरहाग्निकारणं, तेन कारणविशिष्टो विरहाग्निर्बीजं वृक्षविशिष्टमिव । तथा च भाष्यम् 'सर्वत्र प्रसिद्धोपदेशाद्' इत्यधिकरणस्य ध्यानादिसमाध्यन्तरूपनिदिध्यासनरूपं मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलब्धनिजसुखानुभवरूपं ब्रह्म, इदमेव ब्रह्मज्ञानमिति, स्वयं प्रकाशत्वाद्ब्रह्मैव ब्रह्मज्ञानम् । मनसा तज्जननेपि तथा मनसः सत्यज्ञानात्मकत्वेनाक्षरब्रह्मत्वात् । अत एवाधिकरणसप्तम्यन्तं मनःपदमुक्तम् । 'स मानसीन आत्मे'तिश्रुतावप्येवम् । एवं सति 'यतो वाच' इत्यस्यां पुष्टिश्रुतौ 'आनन्दं ब्रह्मणो विद्वान्' इत्यनेनाप्युक्तम् । पुष्टिजीवस्य तु ब्रह्मोपनिषदि 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दमेतज्जीवस्य यज्ज्ञात्वा मुच्यते बुध' इति । 'सूक्ष्मं प्रमाणतश्चे'ति सूत्रभाष्ये उदाहृता पुष्टिश्रुतिः । एतत्त्रयं ध्यानविषयत्वेनोक्तमितरत्तु ऋतेऽर्थं प्रतीयमानत्वान्माया शरीरादि । यत्तु 'आचार्यचैत्यवपुषा स्वगतिं

---

[1] विप्रयोगप्रधानेच्छयाविर्भूतम् । अन्तर्विप्रयोगे बहिःसंयोगे आविर्भावाङ्गीकारात् सुबोधिन्यादौ । [2] कर्मेदम् । [3] सूक्ष्मात्मा । [4] परमात्मा ज्ञानाग्निरूपः तत्र परमात्मा आत्मोपनिषदुक्तो ज्ञानाग्निः गर्भोपनिषदि । [5] पश्यत्यनेनेति दर्शनं सूक्ष्मात्मा गर्भोपनिषदुक्तः । [6] अन्तर्यामी । [7] आत्मोपनिषदि आत्मत्रैविध्याद् गर्भोपनिषदग्नित्रैविध्यादेतत्त्रयम् । अप्रतीत्यग्निः ।

व्यनक्ती'त्यत्र वपुस्तदिदं, यद'प्याचार्यं मां विजानीया'त्तदपि वपुरात्मा चेदम् । अत्र श्रुतिसूत्रगीताः प्रभूतसवे वक्तव्याः ।

एवं श्रीमदाचार्यध्यानमुक्त्वा मूलस्वरूपादेरग्रे निरूपणीयतया स[1]मानसूत्रोक्तावताररूपगोविन्दभजनकर्त्रीध्यानमाहुः अहो इति ।

अहो भाग्यवती देवी यशोदा नन्दगेहिनी ।
गोविन्दमङ्कमारोप्य मुखं चुम्बति सादरम् ॥ २ ॥

'स्त्रीद्वारा पुरुषे भवे'दिति सुबोधिन्यां भगवदाश्रयत्वेन स्त्रिया निरूपणम्, मुक्तिपरमानन्दाभ्यां भजनयोग्यता, 'शुद्धाश्च सुखिनश्चैव ब्रह्मविद्याविशारदा' इति सुबोधिनीकारिकातः । **भाग्यवती** मुक्तित्वात्, **देवी** मातृत्वेङ्गीकारात्, तदेवनादिकर्त्री **यशोदा** । सुबोधिन्यां द्रष्टव्यमेतत् प्रयोजनम् । **नन्दः** परमानन्दः पुष्टौ निरुद्धत्वात् अतस्तद्गेहं निर्गुणम् । **गोविन्दमिति** एकादशसुबोधिन्यां 'मन्येऽकुतश्चि'दित्यादिकविवाक्ये गोविन्दभजनम् । **मुखमित्यादि** भक्तिरसपात्री । व्यभिचारिभावोयम् । ज्ञानकर्ममार्गसाधारण्यात् । लोकोत्तरानुभवैकवेद्यापरिमितानन्दवतीत्यहो आश्चर्यम् । आनुमानिकाधिकरणेऽत्र श्रुतिः, 'मुक्तोपसृप्यव्यपदेशा'दिति सूत्रं, गीता 'जन्म कर्म च मे दिव्यमि'ति ।

'भक्त्या जानाति चाव्यय'मिति श्रुतेर्जातब्रह्मज्ञानाः पञ्चभिः श्लोकैः सप्तविधस्नानेषु पञ्चानां नियतत्वेन मन्त्रवारुणस्नानयोः मन्त्रस्नानकाले मन्त्रस्नानमिच्छन्तो व्यसना[2]वस्थायां स्नानाद्यभावमिच्छन्ति स्म **श्रीराध** इत्यादिना ।

श्रीराधे प्रियतमदृक्सङ्गमसञ्जातहासरुक्तरलैः ।
भवदीयैः स्नानं मे भूयात्सततं न पाथोभिः ॥ १ ॥

आशीर्लिङ्घटितवाक्या[3]भ्यामिच्छा प्रतीयते 'एकोहं बहु भूयास'मित्यत्र यथा । इयमेव मुख्याशीरिति । ब्राह्मणकरेरितैरम्भोभिस्तद्धासरुक्तरलाह्वानकैः स्नानं पञ्चरात्रोक्तप्रकारेण । अत्रेदं ज्ञेयम् । सर्वोत्तममार्गे यथा ब्रह्मभावं गतस्यान्यथाकर्तव्या (आश्रमधर्माः) इति दृष्टान्तो भजनानन्दानुभवे त्रयोदशगुणविषये वर्णा[4]श्रमाचारधर्मत्यागे । तत्रेदं वक्तव्यं तृतीयाध्याये चतुर्थचरणे 'अन्तरा चापि तु तद्दृष्टे'रिति सूत्रे पुरुषोत्तमदृष्टेः पुंसोन्तरा फलसिद्धौ व्यवधानरूपा आश्रमधर्माः । 'एतद्ध स्म वै ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते, किं प्रजया करिष्यामो येषां नोयमात्मायं लोक' इति श्रुतेः । तत्र दृष्टान्तानुरोधेनान्यथा निरूपणं प्राप्नोति ब्रह्मभावात्पूर्वं भजनानन्दात्पश्चात् । अत्रापि ब्रह्मभूतो मर्क्ति लभेदिति स्वरूपवर्णने वक्ष्यमाणत्वाद्ब्रह्मभावं गतस्याप्यन्यथा निरूप्यन्ते पुष्टौ, अत्र श्रुत्यादि । 'रहस्यं श्रीराधेत्यखिलनिगमानामिव धन'मिति । आथर्वणानां पुरुषबोधिन्यां 'सुषुप्तौ नीलगीः सिद्धा स्वप्ने सिद्धा च रुक्मिणी । लीलायां राधिका सिद्धा नातः साधनपद्धति'रिति, 'यमैरयं चन्द्रमसि स्वधाभिस्तां धारासो अनुदृशा यजन्ते' 'राधो[5]गूर्ता अमृतस्य पत्नी'रिति, 'स्वाभाविकी ज्ञानबलक्रिया चे'ति, 'क्रिया सा राधिका देवी'ति च स्तोत्रादौ । फलाध्याये नित्यलीलासूत्रे यत्र 'स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुतिः, गीतायां च 'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम्' इति । अत्रैकमेवाद्वितीयं ब्रह्मेत्येकत्र ब्रह्मणि 'स्वामिन्यो गुरव' इति वाक्याद्बहुरूपसत्त्या वक्ष्यमाणमिति **श्रीराध** इति आत्मन्निति विहायोक्तं, तथोक्तं तृतीयाध्यायसूत्रीयार्थसूचितदृष्टान्तानुरोधे, श्रुतौ तावच्छान्दोग्ये पञ्चमे प्रपाठके तृतीये वा मधुविद्यायां 'तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति

---

[1] समान एवाभेदादितिक्रमम् । [2] उपलक्षणं भजनानन्दप्रतिबन्धावस्थायाः । [3] न पाथोभिर्भूयादिति द्वितीयं वाक्यम् । [4] तृतीयस्कन्धे वाक्यमस्ति । [5] राधा उ गूर्ता गुरैघ् गतिहिंसयोर्दिवादिरात्मनेपदी छेद ऐवितत्वाक्तादेनेद् ।

न पिबन्त्येतदेव देवा अमृतं दृष्ट्वा तृप्यन्ती'तिवत् कृष्णे व्यसनिन इच्छन्ति । तथा हि प्रथममृतं रोहितरूपवदमृतं, प्रकृते दृग्रुक् । तत्राग्निर्मुखमत्राग्नय आचार्याः स्वामिन्यो वा गुरुत्वात् । उपजीवनव्याकरणं 'न वै देवा' इत्यादिना समानमुभयत्र । 'आदित्यादिमतयश्चाङ्ग उपपत्ते'रित्यत्रायमर्थः स्पष्टः । **प्रियतमहस्तसङ्गमसञ्जातहासरुक्तरलैर्भवदीयैर्मे स्नानं भूयात्** दृगोचरैः स्नानाभावजातृप्तिविरहो भूयादिति भावः । तत्राग्निमुखा वसवोत्राचार्यमुखाः स्वामिन्युपाया वा कृष्णे व्यसनिनः । न चेदमप्रयोजकम् । वेदविरुद्धकरणिनां पाषण्डित्वेनात्रापि पाषण्डित्वापत्त्या तत्परिहारकस्यास्य प्रयोजकत्वात् । भक्तिहंसेपि स्वयमुक्तं 'आधुनिकानामुपदेष्टृणामपि स्नेहाभावेपि तन्मूलभूतानां प्राचामाचार्याणां तद्वत्त्वेन भगवदनुगृहीतत्वेन सर्वोपपत्ते'रिति । यद्वा । 'एवं सति भक्तिमार्गीयभजनप्रकारेषु स्नेह एव नियामकः स्नेहवतां कर्मणि विधिवत्, तद्रहितानां तु तद्वत्कृत उपदेश एव, स च वेदाविरुद्ध एव इति' ज्ञेयमिति । × ×

+ संज्ञाः स्युरिति भूवादयो धातव इति सूत्रस्य । गोविन्दनामस्तोत्रे स्वयं श्रीविट्ठलेश्वराः 'शश्वत्प्रियासितापाङ्गध्यानावस्थितचेतसे । प्राप्ततन्निजरूपाय गोविन्दाय नमो नमः,' इति ।

भावेत्यादि ।

भावात्मकत्वात्तद्रूपं गुणातीतं सदैव हि ।
ध्येयं तद्रूपभावेन शुद्धैर्जीवैर्न चान्यथा ॥ १५ ॥

'सत्यं ज्ञानमनन्तमानन्दं ब्रह्मे'ति सर्वोपनिषच्छ्रुतेश्चतुर्ष्वंशेषु त्रयोंशा 'अग्राह्य'मित्यादिश्रुतौ ग्राह्यभिन्नग्राह्यसदृशादिभावाश्चाक्षरात्मका अपि तुर्यांशस्तु देव आनन्दात्मा स त्रेधाभावस्तदित्थम् । **भावो** हि श्रीकृष्णगोपिकारससंयोगभावः, स च सत्ता । भक्तिभावः शृङ्गारभावश्च । भू सत्तायां भावे घञन्तमतः सत्तार्थः । भक्तिरहस्यभजनमित्यादिश्रुतेर्**भावो** भक्तिः । विभावादिभिरभिव्यक्तः स्थायिभावश्च रत्यात्मा । तद्रूपस्य सत्ताभावात्मकत्वं तद्रूपतां प्राप्तमिति पूर्वोक्तं कादाचित्कम् । भक्तिभावात्मकत्वं च साधनाध्यायस्य तृतीये पाद उपपन्नसूत्रे स भगवानेव लक्षणमसाधारणो धर्मो यस्य स तल्लक्षण उद्भटभक्तिभावः, स एव पुरुषार्थः, स्वतन्त्रपुरुषार्थरूप इति भाष्यम् । अत्र भगवान् लक्षणेन उद्भटभक्तिभाव इति चेत् 'सर्वाभेदादन्यत्रेम' इति सूत्रे 'रसो वै स' इति श्रुत्या 'सर्वरस' इति श्रुत्या च सर्वरसात्मकत्वं ब्रह्मणो निर्णीतमिति भाष्यमस्तु । भक्तिरसो गुरुदेवादिषु रतिः । 'स्फुटं चमत्कारतया वत्सलं च रसं विदु'रिति रससर्वस्वकारः । अयं भावः । आत्मा सार्वदिकं रूपं यस्य स तथोक्तः । भगवान् गोपिकादिभक्ताश्च आलम्बनविभावाः, स्नेहानुकूलसङ्कीर्तनाद्युद्दीपनविभावाः । अनुभावाःमन्दिरोद्यानादयः(स्नेहीया विविधाश्चेष्टाः) । सञ्चारिणो वैराग्यपरितोषादयः । पूर्वोक्ता रतिः स्थायिभावः । 'कुर्वन्ति हि त्वयि रतिं कुशला'इति फलप्रकरणे राजसीनां वाक्यात् । यद्वा तत्रैव सात्त्विकीनां वाक्यं 'यत्पत्यपत्यसुहृदामनुवृत्ति'रित्यादि । ततश्चानुवृत्तिः सेवा स्थायी भावः । 'चेतस्तत्प्रवणं सेवे'ति सिद्धान्तमुक्तावल्याः चेतस्तत्प्रवणं सेवा, सा च भक्तिः, भक्तिश्चोपपन्नसूत्रे 'भक्तिरहस्यभजनं तदिहामुत्रफलभोगनैराश्येनामुष्मिन् मनःकल्पन'मितिगोपालतापिन्युक्तलक्षणा । मनःकल्पनं च मनःसङ्क्रमनं 'मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये, मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोम्बुधौ, लक्षणं भक्तियोगस्ये'ति श्रीकपिलवाक्यात् । मनसो गतिरावेगः स स्थायिभावः त्रयस्त्रिंशत्सञ्चारिभावेष्वस्य गणना । काव्यप्रकाशे सञ्चारिणः स्थायित्वमपि । तत्र निर्वेदस्य शान्तरसे स्थायित्वमिव । उदाहरणं तु 'ता नाविद'न्नित्यादिमानसीसेवायाम् । सैवानन्दधर्मरूपता तु भक्त्युत्कर्षवादे । एवमानन्दरूपस्य तनुवित्तजसेवानन्तरं

---

१ इतः परं सप्तपत्राणि नोपलब्धानि, + अष्टमस्यादिमे संज्ञाः स्युरित्यादिनात्रोपक्रम्यते ।

भवनात् । अक्षरात्मके हृदये मानसीनस्यात्मनः । तत्र च भक्तेर्भवनात् । कामादिति सूत्रे माहात्म्यज्ञानयुतेश्वरत्वेन प्रभौ निरुपधिस्नेहात्मिका विहितेति भक्तिविशेषणादुदाहरणोक्ता सा । माहात्म्यज्ञानं तनुवित्तजा सेवा च सञ्चारिभावास्तत्त्वमस्यादिमहावाक्यार्थाभेदज्ञानं 'अन्तरा'सूत्रे भक्तानामदेयम् । अत्र सेवालक्षणस्य विस्तारिकायां टीकायां रतिलक्षणत्वेपि मनःप्रवणता रतिरित्युक्त्या मनःप्रवणता रतिः, चेतःप्रवणता सेवा, तथा च विभावाद्यभिव्यक्तमनश्चेतःप्रवणता सेवा । अत्र व्यभिचारिणो महावाक्यार्थाभेदज्ञानस्य सुषुप्तिप्रतिमस्य चेतसा ग्रहात् सुषुप्तिश्चित्तग्राह्या । चित्तं त्वात्मानमेव सुषुप्तौ पश्यत्यन्यदा तु लीनमिति प्रस्थानरत्नाकरात् । 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यत्र प्रथमस्य तृतीयपादे सुषुप्तिस्त्वकामरूपो भगवान् इति भाष्यम् । एवं चाकामरूपः कामरूपश्च भगवान् भक्तिशृङ्गाररसयोरालम्बनविभाव इति स्पष्टो भेदः । अस्यार्थस्य व्यभिचारिभावत्वं व्यतिहारसूत्र उपपादितम् । यद्वा 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'ति सूत्रे भक्तिमार्ग इत्यादिभाष्यादात्मेत्युपगमनं कटकाद्युपचाराः साक्षात्कृता भवन्तीति सेवाप्रकरणाद्युक्तदिशा ग्राहणं चेति चेतोमात्रप्रवणता विवक्षितात्मातिरिक्तविषयाभावात् ।

तथा च श्रुतयः 'सत्पुण्डरीकनयन'मित्याद्याः अत्र 'सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुज'मित्यन्तमालम्बनविभावः । 'गानमुद्राढ्य'मितिपाठे उद्दीपनविभावः । ककाराद्यनुकूलो यत्नस्तत्सम्बन्धिनी मुद्रा वेणुवादनसामयिकी मुद्रा तयाढ्यम् । 'वनमालिनमीश्वरं गोपगोपाङ्गनावीत'मित्यत्रापि स्नेहानुकूलाश्चेष्टा बोध्याः । 'गोपगोपाङ्गनावीतमि'त्यत्र गोपाङ्गनावीतमुद्दीपनविभावः । किञ्च 'सुरद्रुमतलाश्रय'मित्यत्र सुरद्रुम उद्दीपनम् । सुरद्रुमो वेदार्थः स्वधर्मत्वेन स्फुट इति निर्धर्मकत्वव्यावृत्तिः । 'निर्धर्मको वा भिन्नो वा निरोधं कुरुते यदि, तदा निरोधो व्यर्थः स्यादि'ति कारिकायाः । 'दिव्यालङ्करणोपेतं रत्नपङ्कजमध्यग'मित्युक्त्यालम्बनविभावाः । 'कालिन्दीजलकल्लोलसङ्गिमारुतसेवित'मित्यत्र कालिन्दीयुक्तमारुतौ सञ्चारिणौ 'चिन्तयँश्चेतसा कृष्ण'मित्यत्र चिन्तनं सञ्चारिभावः । 'मुक्तो भवति संसृते'रितीत्यत्राधिकारिणो वैराग्यं सञ्चारिभावो ध्वन्यते । द्वितीयपक्षे उक्तावेगस्य सेवारूपस्य विस्तारिकायां राजगजवर्षादिभिरुत्पत्तेः सरस्वतीतीर्थटीकायामभिरामादिभिरुत्पत्तेरुक्तेः महाराजोपचारकरणं राजा प्रतिमादिर्गजः वर्षं बाल्यं वय आदि एतदादिविभावादिः अभिरामादिर्वा । स च प्रथमपक्षवद्द्वितीयेप्युन्नेयः । भक्तिरसस्य द्वौ भेदौ संयोगो विप्रयोगश्च तत्र संयोगश्चक्षुर्योगः परस्परसॅल्लापाद्यनेकभेदत्वादपरिच्छेद्य इत्येकविध एव गण्यते अभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधो विप्रयोगः ।

ननु मनःप्रवणता रतिः कामः, सोपि ब्रह्मात्ममिष्ठतया भक्तेच्छाविषय इति हि आत्मातिरिक्तविषयाभावात् सुषुप्तिवत् स्नेहोस्तु चेतःप्रवणतात्मकत्वात् । चेतसो मनोभेदत्वात् । अन्यथा सुषुप्तिवदग्रहणदशायां 'मनसैवानुद्रष्टव्य' इतिश्रुते'र्भक्तिरहस्यभजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पन'मिति श्रुतेश्च या मनःप्रणवता तस्या अपलापप्रसङ्गः, सुषुप्तितुल्यत्वेन तस्यात्मनश्चेतःप्रवणविषयत्वादिति चेद्बाढम् । भवता विस्तारिकोक्तमनःप्रवणतात्मकलौकिकरत्या सह भक्तिरत्याः साम्यमुच्यते, तत्तु सर्षपेण स्वर्णाचलस्येव । यतः शृङ्गारे रतिः स्थायी भाव आवेगस्तु व्यभिचारीति कथमनयोः साम्यमिति, ननु कथमावेगः स्थायी भवति भक्तिरसचरमकवृत्तिरूपत्वाद् इति चेत्, सत्यं, विभावाद्युत्तरकालीनस्नेहात्मकस्थायिभावसामयिकलक्षणश्रुत्युक्तमनःकल्पनात्मकस्यावेगस्यापि सम्भवात्तमादाय स्थायित्वोपपत्तेः । संयोगेनैकेषां चक्षुःसंयोगपरस्परसंलापलक्षणवाक्योक्तमनःकल्पनानामपरिच्छेद्यत्वेनैकविधत्वात् संयोगस्यैकविधत्वम् । न च प्रथममुक्तप्रायस्य 'ता नाविदन् मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् । यथा समाधौ मुनयोब्धितोये नद्यः प्रविष्टा इव नामरूपे' इत्यत्र दृष्टान्तप्रतिमस्य दार्ष्टान्तिकस्य स्थायिस्नेहान्तर्भावेऽनुपपत्तिरिति वाच्यम् । तर्हि पूर्णत्वापूर्णत्वाभ्यां धर्माभ्यां रसत्वस्थायित्वप्रयोजकाभ्यां

दृष्टान्तोक्तधर्मस्य पूर्णत्वस्योपपत्तेः स्नेहस्य चरमवृत्तित्वेपि रसत्वमिति । इत्थञ्च स्थायिनः स्नेहस्य विभावान्तर्गतालम्बनविभावः कारणमुद्दीपनविभावश्च तदन्वयव्यतिरेकानुविधानादिति विस्तारिकायामनुभावाः कार्यमसति स्नेहे तदभावात् । सञ्चारिणो निर्वेदादयः सहकारिकारणानि न तत्कार्याणि । तेन विनापि सम्भवेन व्यभिचारात् । न चाकारणानि तदुत्तरत्वान् नैयत्यात् । किन्तु स्वसामग्र्या प्रादुर्भवन्ति सन्ति स्नेहस्योपवासकानि भवन्ति । सामग्रीसम्पातेन स्नेहेन स्थायिना सहचरणात् सञ्चारीणि । सहकारीणि तु स्नेहस्यैव रूपस्य । तच्च तद्विचित्रस्मितरुदितकार्याजननायोगेन सामग्रीवैचित्र्यापादकानि । स्नेहो लक्षणश्रुत्युक्तः स्थायिभावः । ननु 'तत्सिद्ध्यै तनुवित्तजे'ति सिद्धान्तमुक्तावल्यां तत्सिद्ध्या इतिपदात् तनुजवित्तजे सेवे, 'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथे'ति पञ्चरात्रान्माहात्म्यज्ञानं च कारणानि । सञ्चारिभावस्तु सहकारिकारणमिति सञ्चारिभावे कुत एतेषां निवेश इति चेत्सत्यम् । भक्तिहंसे नवधाभक्तीनां कर्मज्ञानभक्तिमार्गेषु प्रवेशकथनात्सञ्चारिभावत्वमविवादं; महावाक्यार्थस्य भक्तिमार्गेऽसञ्चारः पूर्वमुक्तः, यद्यपि यस्मात्कर्मादिभ्यो ज्ञानमेव पुरुषार्थसाधनमतस्तज्ज्ञानाय विचारोधिक्रियत इति जिज्ञासाधिकरणभाष्ये महावाक्यार्थमपि ज्ञानपदेन सङ्गृहीतम्, तथापि शाब्दार्थज्ञानं महावाक्यार्थज्ञानं विचारफलमित्येतावदेव, न तु रतिपर्यन्तानुधावनं भागवतमतत्वात् । 'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत्' इति भागवतम् । तथा च 'प्रदानवत्'सूत्रोक्तं 'यमेवैष वृणुते तेन लभ्य' इति श्रुत्युक्तवरणं कारणं, स्नेहचरमवृत्त्यात्मकसर्वात्मभाव इति भक्तिहेतूपपादितभक्तिकारणमनुग्रहस्तावदुद्दीपनविभावो भक्तनिष्ठो येन केनापि सम्बन्धेन भवतु । भगवदनुगृहीतोयं यतो भक्तो भक्तिमनुभवतीति प्रत्ययात् । 'मानसी सा परा मते'त्युक्तसेवायामपि ह्युद्दीपनविभावरूपानुग्रहस्य मुख्यकारणत्वमिति, तथा च भाष्यं 'विधैव तु निर्धारणादि'ति सूत्रस्य किन्तु 'भगवदनुग्रहेण भक्तसङ्गेन च भक्तौ सत्यामिती'ति साधनाध्याये । अनुग्रहः स्वभाव इति तृतीयस्कन्धसुबोधिन्याम् । अनुग्रहो धर्मान्तरमिति भक्तिहेतौ । उभयेषां मतं पन्थाश्च तल्लक्षणं च विस्तारिकायाम् । चेतस्तत्प्रवणं[1] मनःकल्पनं भक्तिप्रेमस्नेहप्रियत्वं च पर्यायाः । कृष्णगोपिकयोः परस्परस्नेहो भगवन्निष्ठालम्बनविभावे । तत्र निरुपधिप्रियत्वस्य समन्वयाध्याये ब्रह्मधर्मतां निर्णिनाय भगवान् व्यासः । ननु तथापि मनःकल्पनं मनःप्रवणं तच्च रतिरेव पुराणं च सङ्गृहीतं भविष्यतीति चेन्न, अभिलाषप्रतियोगिभेदात्प्रापकभेदादधिकरणभेदाच्च । तदुक्तं भक्त्युत्कर्षवादे 'मुक्तैरप्यभिलषितामत्यन्तानुग्रहात्प्राप्याम् । आनन्दधर्मभूतां रसरूपां नौमि हरिभक्ति'मिति । तत्र तु कामाभिलाषिणः प्रतियोगिनः, कर्मप्रापकं मनोधिकरणमिति ।

एवं स्नेहरूपा रतिर्व्याकृता । कामरूपा द्वितीया रतिः लक्ष्मीकलानिध्योः । नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम्, लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधिम्' इति ह्याचार्योक्तेः । ननु सत्तायां योगो भावशब्दस्य तात्पर्यं रतौ । 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्त इति । द्वितीयायां रतौ केतिचेन्न आधिभौतिके योग आध्यात्मिकाधिदैविकयोरेकत्वात्तात्पर्यवृत्तिरिति । अञ्जित इत्यस्य न व्यञ्जित इत्यर्थः किन्तु तात्पर्यविषयीकृत इत्यर्थः । वृत्तेर्द्वैविध्यादित्युपपादितमारम्भे रश्मेः । एकदेशविकृतन्यायेनाधिदैविकस्याध्यात्मिकानन्यात्वात् तत्प्रपञ्चस्य भावशब्दतात्पर्यवृत्तिविषयत्वे बाधकाभावात् । ब्रह्मस्वरूपे लौकिकयुक्तभावस्य भूषणत्वाच्च । प्रकृतमनुसर्यते । तथा च विभावाद्यैरभिव्यक्ता रतिः पूर्णा शृङ्गाररसः । रसत्वं च । ब्रह्मास्वादमिवानुभावयन्नलौकिकचमत्कारकारी शृङ्गारादिको रसस्तत्त्वम् ।

---

[1] प्रकर्षेण वनं भक्तिः प्रवणं, वन संभक्तौ धातुः ।

प्रकृतमनुसर्यतेऽधुना, तद्रूपम् , सत्पुण्डरीकनयनमित्याद्युक्तं गोपालतापिनीये किन्तद्रूपमिति प्रश्न एतदुत्तराद् व्याकृताश्चैताः श्रुतयः प्राक् ह्यनुक्रमशः । गुणातीतं गीतायाम् 'नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति । गुणेभ्यश्च परं वेत्ति मद्भावं सोधिगच्छती'ति । यद्वा 'निर्गुणं गुणभोक्तृ चे'ति निर्गुणं 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्युक्तं गुणभोक्तृ, 'आनन्दमात्रमिति यद्वदन्तीह पुराविदः' इति वाक्योक्तमेतद्रूपद्वयम् । हि निश्चयेन सदैवेत्याहुः सदैव हीति । अयमर्थः । नात्र ज्ञानविषयं ब्रह्मोच्यते, ज्ञानं च फलात्मकं 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' 'ब्रह्मविदाप्नोति परं' 'तमेव विदित्वातिमृत्युमेती'त्यादिश्रुतिस्मृत्युक्तम् । ततश्च तृतीयाध्यायस्थ'अम्बुवदग्रहणाद्य'धिकरणोक्तं ब्रह्म प्रतिपिपादयिषितं न भवति । किन्तु प्रवेशानन्तरमत्यन्तानुग्रहे पुष्टिभक्तौ सत्यां भक्तेच्छयोद्गतं रूपं तच्चैच्छिकं न तु सदैव हीति । अत्रोच्यन्ते श्रुतिगीतासूत्राणि । तद्रूपमित्यत्र 'तानि परे तथा ह्याह' । 'ता वां वास्तूनि' । 'श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम्' । अत्रास्फुटं गीताविस्तरे श्रीभागवते 'ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः । ये त्यक्तलोकधर्मांश्च मदर्थे तान् बिभर्म्यह' मित्युपक्रम्य 'धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन' इति श्रीप्रभुवचनमेतत्फलाध्याये 'स्मर्यते चे'ति सूत्र उक्तम् । समाधिभाषाद्वितीयस्कन्धवैकुण्ठदर्शनवाक्यानि । गुणातीतमित्यत्र 'तानि पर' इति सूत्र एव प्रकृतिकालाद्यतीत इति वैकुण्ठविशेषणम् । तानीत्येव सूत्रम् । गीतोक्ता । तथापि भक्तैच्छिकं रूपमिति स दोषस्तदवस्थ एवेति चे'दविभागो वचना'दिति सूत्रे एतेनापि लीलानित्यत्वं सिद्ध्यति एतद्यथा तथा विद्वन्मण्डने प्रपञ्चितमिति भाष्याद्दोषो निर्गच्छतु । विद्वन्मण्डने नित्यलीलावादे प्रपञ्चितमित्यर्थः । किञ्चिदुच्यते स्वबुद्ध्या ब्रह्मसम्मत इति पाठः । अत्र नपुंसकत्वं पुंस्त्वं चोक्तं श्रुतौ व्याहरत्प्राप्तमिति च व्याख्यातश्लोक उभयमुक्तम् । अन्यत्र श्रुत्योररसं सर्वरस इत्यत्र नपुंसकत्वं पुंस्त्वं च रसविलक्षणत्वं रसत्वं चोक्तम् । 'निर्गुणश्च यः सर्वज्ञः सर्वशक्ति'रित्यत्र निर्गुणत्वसगुणत्वे चोक्ते । अत्रोच्यते तृतीयद्वितीयपादे 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' 'दर्शनाच्चे'ति सूत्रद्वये । अत्र पूर्वसूत्रे एवं परमार्थतो विरोधः परिहृतः यथाकाशस्य वृद्धिह्रासभाक्त्वं करकादिष्वन्तर्भावात्तथैवोभयसामञ्जस्याद्विभुत्वाल्पत्वयोरैकाधिकरण्येन प्रामाणिकादरणीयत्वात् । ब्रह्मणोप्येवं शरीरादिप्रवेशाद्वृद्धिह्रासभाक्त्वमिति तथा च प्रकृतेपि 'स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुत्योक्तायां स्वाभाविक्यां शक्तौ निवेशे नपुंसकत्वम् । 'को ह्येवान्या'दित्युक्त आनन्दे प्रवेशे तु पुंस्त्वम् । एवमुभयोरैकाधिकरण्येन प्रामाणिकादरणीयत्वम्, द्वितीयस्मिन् सूत्रे च भगवति सर्वे विरुद्धधर्मा दृश्यन्ते 'नहि दृष्टेऽनुपपन्नं नाम व्याघातात्' तादृशमेव तद्वस्त्वित्यध्यवसाय इत्युक्तम् । स्पष्टौ प्रकृते पुंस्त्वं नपुंसकत्वं च विरुद्धौ धर्मौ रसारसत्वे च । निर्गुणत्वसर्वज्ञत्वसर्वशक्तिमत्त्वानि विरुद्धधर्माः । प्रकृतोपपादकं भाष्यम् । इति हीति निश्चयेनैतद्रूपं सदैवेति । नूनं सत्यज्ञानादिरूपं गुणातीतं व्रजभक्तवृन्दप्राप्तं च गुणातीतं तद्व्यूहचतुष्टयरूपं छान्दोग्योक्तपरदेवतादिरूपं च गुणातीतं तथा वाराहपुराणोक्तं श्रीभूमिस्थितं च प्राकृतप्रलये तन्नाशाभावकथनात् । रस शब्दे इति पक्षेपि तादृशमेवेति । सर्वरसमिति श्रुतेः । ध्येयमित्यादि शुद्धैः पापरहितैः मर्यादाभक्त्यधिकारिभिः 'गतेरर्थवत्त्व'मिति सूत्रेऽस्मिन् मार्गे श्रवणादिभिः पापक्षये प्रेमोत्पत्तिस्ततो मुक्तिरिति भाष्याज्जीवैः भगवद्रूपसेवार्थं सृष्टैः पुष्टैः पुष्टिप्रवाहमर्यादायामुक्तैस्तद्रूप भावेन तद्रूपत्वेन ध्येयतावच्छेदकरूपेण त्वतलौ विहाय भावपदोपसन्दानात्तद्रूपश्चासौ भावश्चेति विगृह्य भावप्रधानं निर्देशं चास्थाय तद्रूपभावत्वेन ध्येयं भावनौत्कण्ठ्यदशायां व्यभिचारिभावात्मकसततस्मृतिरूपं ध्यानं तद्विषयं कार्यम् । 'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः । आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेत्' इति सिद्धान्तमुक्तावली 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मित्येवं स्वयमुक्तस्यावान्तरब्रह्मबोधनलक्षण-

फलवतः प्रत्याज्ञां करोति तच्च चिन्तनमुक्तविधम् । अत्रात्मानन्दो व्रजरत्नात्मक इति श्रीविट्ठलनाथदीक्षितगोस्वामिटीकायामतोत्रात्मानन्दः स पूर्वोक्तः तथा च भावो भक्तिर्भूमा 'आनन्दमात्रमिति यद्वदन्तीह पुराविद' इत्युक्त आत्मनि सत्यज्ञानानन्तानन्दे स्वरूपलक्षणाक्रान्ते यस्य 'यतो वाचो निवर्तन्त' इति श्रुत्युक्तस्य तद्भावात्मकं तस्य भावस्तदात्मकत्वं तस्माद् इति भावात्मकत्वादित्यस्यार्थः । भावात्मकस्य भक्तान् प्रत्येव ज्ञापनात् । अत्र व्याख्यायमानग्रन्थेऽग्रे 'सर्वत्र पश्यद्भिः पुरुषोत्तम'मित्यत्र सर्वत्रपदम्! एकादश एकोनत्रिंशाध्याये 'लघुस्वमार्गवक्ता चे'ति पुरुषोत्तमसहस्रनाम्नि स्तोत्रे लघुस्वमार्गवक्तृत्वेनोक्तस्य श्रीकृष्णस्य वाक्यभूते 'सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया । परिपश्यन्नुपरमे'दिति सर्वपदम् । तदपि सर्वे ब्राह्मणा भोजयितव्या इत्यत्र निमन्त्रितब्राह्मणवाचकसर्वपदवद् एतेन व्रजरत्नपदरहितेन सामान्येन ग्रन्थेन भक्तिमार्गस्य निर्गुणत्वं समर्थितम् । स्वाधिकारे तु श्रीगोस्वाम्युक्तो विशेषोपीति । चकार ऐश्वर्यवीर्ययशःश्रीज्ञानवैराग्यशृङ्गारादिवाचकपदानुकर्षकः 'स्वोरमो लुक्' तथा च ऐश्वर्यवीर्ययशःश्रीज्ञानवैराग्यशृङ्गारश्चकारार्थध्येयमित्यनेनान्वेति । एवञ्च तद्रूपमैश्वर्यवीर्ययशःश्रीज्ञानवैराग्यशृङ्गारमपि ध्येयमिति सिद्धम् । अन्यथा नेति अन्यथापदात्तृतीयाया लुक् अन्येन प्रकारेण तद्रूपभावान्येनैश्वर्यत्वाद्यन्येन च प्रकारेण न ध्येयम् । अयं भावः 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणे'ति श्रुतेस्तद्रूपभावाद्यतिरिक्तेन न प्रतिपदनम् । अनेन प्रकारेण तु प्रतिपदनं गोपालतापिनीये श्रूयते ब्राह्मणस्य तथाहि 'मुनयो ह वै ब्राह्मणमूचुः कः परमो देव' इत्यादि तस्योत्तरं 'तदुवाच ब्राह्मणः श्रीकृष्णो वै परमं दैवत'मित्याद्यभिधाय 'गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रितम्' तदिह श्लोका भवन्ति 'सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं मानमुद्राढ्यं वनमालिनमीश्वरम् । गोपगोपाङ्गनावीत'मित्यादि । तद्रूपप्रश्नोत्तरम् 'ब्रह्म जानाति ब्राह्मणः' इति ब्राह्मणपदव्युत्पत्तिः । एवमैश्वर्यभावादि बोध्यं श्रुतिषु हीति 'तदोषधिविद्यायां वैराग्यमित्येवं सप्ताष्टकेषु बोध्यं' नवार्थ्यामुक्तं च । एवं ध्येयमित्यनेन स्मृतिविषयं वस्तूक्तमत्र स्मृतिस्तु सिद्धान्तमुक्तावल्यां संसारदुःखनिवृत्तिर्ब्रह्मबोधनलक्षणा तनुवित्तजसेवावान्तरफलत्वेन निर्दिष्टा ततः सेवाफलाख्यग्रन्थे सेवायाः फलत्रयमुक्तं तेषु तदीयत्वं भगवत्सेवोपयोगिदेहो वैकुण्ठादिष्वित्येवमुक्तं मुख्यमिति । तत्साधनमाहुः लीलेत्यादि ।

लीलारूपैश्च तत्सेव्यं तदीयत्वाय सर्वदा ।
एतत्संसेवनाद् ब्रह्मभूतो भक्तिं लभेत्पुनः ॥ १६ ॥

लीलास्वैश्वर्यवीर्ययशःश्रीज्ञानवैराग्यशृङ्गाररूपाणि, रूपाणि द्वारकानाथजित्सूनुगोविन्दजित्कृतभावनोक्तशकटभञ्जनौत्थानिकलीलादिषु वात्सल्यादिरूपाणि रूपाणि च येषां तैः रूपैः श्रीनवनीतप्रियजिच्छ्रीमथुरानाथजिच्छ्रीविट्ठलनाथजिच्छ्रीद्वारकानाथजिच्छ्रीगोकुलनाथजिच्छ्रीगोकुलचन्दमोजिच्छ्रीमदनमोहनजिच्छ्रीबालकृष्णजिदादिरूपैः । चकारेण धर्मिरूपेण श्रीगोवर्द्धननाथजिद्रूपेण तद्ब्रह्म सेव्यम् । तनुवित्तजसेवाविषयं कार्यं तदर्हत्वात् । सेवाविषये ब्रह्मणस्तावद्रूपत्वे साधनाध्यायतृतीयचरणे 'आनन्दादयः प्रधानस्ये'ति सूत्रं स्पष्टत्वाय । पूर्णानन्दैश्वर्यादयः प्रधानस्य धर्मिणः श्रीगोवर्द्धननाथस्य ब्रह्मणो धर्मा इति भाष्यकम् । श्रुतयस्तु सर्ववेदान्तप्रत्ययसूत्रेऽथर्वणोपनिषत्स्था 'गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रितम्' तदिहश्लोका भवन्ति 'सत्पुण्डरीकनयन'मित्याद्याः ध्वनिताश्चेमास्तत्रैव भाष्ये 'क्वचिद्गोकुलवृन्दाकाननसञ्चरद्गोपरूप'मित्यादौ क्वचित्पदस्य शक्तिः गोपालतापिनीये ध्वनिरुक्तासु

---

१ तात्पर्यम् ।

श्रुतिषु । गीता तावत् त्रयोदशेऽध्याये ज्ञेयं प्रस्तुत्य 'सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुख' मित्यादि 'सर्वेन्द्रियगुणाभास'मित्यादि च । अत्रैश्वर्यादयो भगवत्पदसमानाधिकरणज्ञेयगोपवेशपदाभ्यामुन्नेयाः । तल्लक्षणानि गुणप्रकरणस्य सुबोधिन्यामग्रे च प्रपञ्चनीयानि । सेवायां तावद् । 'गतेरर्थवत्त्वमुभयथान्यथा हि विरोध' इति सूत्रे । अत्र सूत्रेऽस्मिन् मार्गे श्रवणादिभिः पापक्षये प्रेमोत्पत्तिस्ततो मुक्तिरिति भाष्यात् । सहकार्यन्तरविधिपक्षेण तृतीयं 'तद्वतो विध्यादिव'दिति वा सूत्रम् । 'सर्वथापि त एवोभयलिङ्गा'दिति साधनाध्यायस्थं वा सूत्रम् । ननु सेवात्र दास्यकं तत्कथमत्र श्रवणादिषु प्राथम्यं 'तत्सिद्ध्यै तनुवित्तजे'त्यत्राईतीति चेन्मैवं 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'ति सूत्रस्य भक्तिमार्गेऽङ्गीकृतास्तु साक्षात्प्रकटे पुरुषोत्तमे तद्भजनार्थं उप समीपं गच्छन्तीत्यर्थः एवं श्लेषोक्तिरियमिति ज्ञायते । 'सम्प्रदायानुवृत्तिरपि भगवदिङ्गितेत्येतादृशाः स्वयं येन मार्गेण फलं प्राप्तास्तं मार्गमन्यानपि ग्राहयन्त्युपदेशै'रिति भाष्यात् । अत्र श्रुतिः 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च' इति श्रवणादिभिर्दर्शनमाह तच्च प्रेमद्वारेति ग्राहयति । आचार्यास्तु 'चेतस्तत्प्रवणं सेवा तत्सिद्ध्यै तनुवित्तजे'ति दास्यकं ग्राहयन्ति । अयमप्युपदेशः उपदेशैरिति बहुवचनात्तदुक्तं फलप्रकरणे श्रुतिरूपाभिः 'भवाम दास्य' इति । ननु कथमेवमुपदेशो यावता गोपालतापिनीये एव पञ्चपदमष्टादशार्णमन्त्रस्वरूपमुक्त्वा पठ्यते 'भक्तिरहस्यभजनम्' इत्यादि ततश्च पञ्चपदजपस्य तत्सिद्ध्यै ह्युपदेशोऽस्त्वथवाग्रे 'ते होचुरुपासनमेतस्य परमात्मनो गोविन्दस्याखिलाधारिणो ब्रूही'ति प्रश्नोत्तरीभूतोपासनवाचकवाक्येभ्य उपासनोपदेशोऽस्त्विति चेन्न 'उपपन्न' इत्यादिसूत्रेऽष्टादशार्णमन्त्रोपासकस्य मुमुक्षोः सकाशाद्रहस्यभजनकर्तैवोपपन्न उपपत्तियुक्त इति भाष्येणोपासनामार्गीयस्य पञ्चपदजपस्योपासनस्य चान्यमार्गीयत्वात् । नन्वन्यमार्गीयस्यापि भक्तिमार्गान्तःपातित्वेन भक्तिमार्गीयत्वं भविष्यतीति चेन्न भक्तिमार्गीयसाक्षाद्भगवल्लक्षणफलातिरिक्तमुक्तिफलत्वेन तदन्तःपातित्वस्यासम्भवात् । तदुक्तं 'तल्लक्षणार्थोपलब्धे'रित्यंशेन । श्रुतिस्तावत् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति 'अनियम' इति सूत्रभाष्योक्तदिशात्रापि नवधाभक्तीनामुपलक्षणम् । गीता तावद् भक्तियोगाध्याये द्वादशे 'ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः । अनन्येनैव योगेन मां ध्यायन्त उपासते । तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय । निवसिष्यसि मय्येवात ऊर्ध्वं न संशय' इति । 'सततं कीर्तयन्तो मां यतन्तश्चे'त्यादयस्तु तृतीयसूत्रपक्षे एवमवान्तरफले ध्यानं साधनं तत्त्वेन सेवामुपपाद्य तस्या इतरं भक्तितो मुख्यं फलमाहुः तदीयत्वायेति मानसीसेवाया इत्यर्थः । तदुक्तमुपपन्न इति सूत्रभाष्यप्रकाशेऽमुष्यात्मनः कल्पनमिति स्वपाठं भक्तिरहस्यभजनमित्यङ्गीकृत्यामुष्यात्मनो वस्तुत एतदीयस्य जीवस्य कल्पनं तदीयत्वसमर्थनमन्तर्बहिःसेवया तद्दृढीकरणम् । कृपू सामर्थ्ये इति धातुपाठात् । पूर्वलिखितपाठे त्वन्येमुष्मिन् कृष्णाख्ये ब्रह्मणि मनसः सङ्कल्पनं प्रेरणा तन्मयत्वमिति चार्थं वदन्तीति । मानसीसेवायां गीता 'मय्येव मन आधत्स्व मयि बुद्धिं निवेशय । निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः' इति । सूत्रं तु 'यत्रैकाग्रता तत्राविशेषा'दिति । अत्रैकाग्रता ग्राहकचित्तधारा । यद्वा । साधनाध्यायतुरीयपादस्थं 'अतस्त्वितरज्ज्यायो लिङ्गाच्चे'ति सूत्रं तदीयत्वमेव ज्याय इत्यर्थ इति भाष्यम् । श्रुतिस्तु 'ब्रह्मविदाप्नोति परम्' । स्मृतयो ह्युक्ताः । अन्या अपि 'अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च । निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः । मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः' इति । अत्र सिद्धान्तमुक्तावलीस्थ 'ततः संसारदुःखस्य निवृत्ति'रिति सेवावान्तरफलघटनात् । अहन्ताममतात्मको हि संसारः ।

---

१. संस्कारोद्बोधकत्वे ।

तत्रान्यदुःखस्य 'निर्ममो निरहङ्कार' इत्यनेन निवृत्तिकथनात्। 'भगवदीयत्वेनैव परिसमाप्तसर्वार्था' इति गीताविस्तारश्रीभागवतम् । सर्वदेति सेव्यमित्यनेनान्वेति । 'कृष्णसेवा सदा कार्येति' सिद्धान्तमुक्तावलीवाक्यात् । सर्वदा सेव्यमित्युक्तं तत्र सेव्ये स्वरूपे प्रथमाध्यायद्वितीयपादस्थादृश्यत्वाधिकरणोक्ताक्षराभेदपक्षेऽक्षरसंसेवनमादाय तत्फलमुक्तफलातिरिक्तब्रह्मभावो भवति तेनाक्षरसंसेवनात्मकज्ञानेनाविद्यानिवृत्तिद्वारा जीवीयानन्दस्य प्राकट्यात् । तदुक्तं साधनाध्यायतृतीयचरणेऽक्षरधियामि'ति सूत्रे । एतादृशस्य ब्रह्मभूतस्याविर्भूतानन्दांशरूपस्य भक्तिलाभमनुवदन्ति स्म एतदित्यादिना । ब्रह्मभूत आविर्भूतानन्दांशः एतत्संसेवनात् समीपतरवर्तिदास्यकरूपाद्भक्तिं तदीयत्वलक्षणां मानसीसेवारूपां प्रेमलक्षणां लभेदित्यनुवादः पूर्वोक्तस्यार्थस्य लभेतेत्यर्थः । अनुदात्तेतआत्मनेपदानित्यत्वात्परस्मैपदं लभेदिति । ब्रह्मभावानन्तरं मर्यादाभक्तावक्षरधियामित्यादि सूत्रं 'ब्रह्मविदाप्नोति पर'मितिश्रुतिः । 'ब्रह्मभूतः प्रशान्तात्मा न शोचति न काङ्क्षति, समः सर्वेषु भूतेषु मद्भक्तिं लभते परा'मिति गीता । पूर्वोक्तमर्यादाभक्तिफलं पुरुषोत्तमप्रवेश इत्यक्षरधियामित्यादिसूत्रे स्थितं तत्रोक्तं पुष्टिपद्धतित्वेनास्याः परिपाट्याः, तथा सति मर्यादापद्धतिरवान्तरभूता स्यात्तन्निवृत्त्यै तादृशस्याप्राप्तमर्यादाफलस्यात्यन्तानुग्रहे सति पुनर्लीलाप्रवेशसाधनीभूतपुष्टिभक्तिलाभमाहुः पुनरिति अत्यन्तानुग्रहे सतीति शेषः । तस्मिन् सति पुनर्भक्तिं पुष्टिभक्तिं लब्ध्वेत्युत्तरश्लोकेन्वयः । पुष्टिभक्तिरत्यन्तानुग्रहैकसाध्या 'गतेरर्थवत्त्व'सूत्रे निर्दिष्टा, तद्रहितानामपि 'स्वस्वरूपबलेन स्वप्रापणं पुष्टि'रित्युच्यत इति । पुष्टिमार्गेऽङ्गीकृतेस्त्वत्यन्तानुग्रहसाध्यत्वादिति । पुष्टिभक्तेः फलमाहुः ।

भक्तिं लब्ध्वा च विशते कृष्णलीलास्वसंशयम् ।
नातः परतरं किञ्चित्प्राप्यमस्तीह कर्हिचित् ॥ १७ ॥

गीताविचारे तु लीलास्वरूपैश्च तत्सेव्यम् । अष्टादशे 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति वाक्यात् । तदीयत्वाय । 'असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः । नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति' इति वाक्यात् । नैष्कर्म्यसिद्धिः गोपालतापिनीये 'भक्तिरस्य भजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्य'मिति । सर्वदा 'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्' 'स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्' 'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्, सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः' इति वाक्याभ्याम् । एतत्संसेवनादिति एतत्समीपतरवर्ति एतस्य वा संसेवनं विवेकधैर्याश्रयैरन्तःकरणप्रबोधेन च सेवनम् । तस्मात् 'सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे । समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा । बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य चे'त्यत्र विशुद्धा बुद्धिः 'विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यती'त्युक्तान्तःकरणप्रबोधग्रन्थोक्ता च । धृतिः'त्रिदुःखसहनं धैर्यमामृतेः सर्वतः सदे' ति वाक्योक्ता । 'धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी'ति वाक्यात् । आत्मानं बुद्धिम् । अग्रे 'शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च । विविक्तसेवी लघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः' इत्यत्र प्रपञ्चविस्मरणपूर्वकभगवदासक्तिमुक्त्वाऽऽश्रयरक्षणार्थमाहुः 'अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पत' इति । 'अशक्ये वा सुशक्ये वा सर्वथा शरणं हरिः' इति शान्तः । एतत्संसेवनाद् ब्रह्मभूतः । 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षती'ति 'समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्' इति वाक्यादाहुः भक्तिं लभेत्पुनरिति । अत्र सूत्रं 'भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यत' इति । श्रुतिस्तावत् 'सोऽश्नुते सर्वान्

कामान् सह ब्रह्मणा विपश्चिते'ति । गीता तावत् 'सूक्ष्मत्वात्तदविज्ञेय'मिति ज्ञेयनिरूपणे त्रयोदशेऽध्याये। 'सूक्ष्मं तु प्रमाणतश्च तथोपलब्धे'रिति सूत्रे पुष्टिमार्गीयं तत्त्वं सूक्ष्मं दुर्ज्ञेयमित्यर्थ इति भाष्यम्। नापि सर्वथा दुर्ज्ञेयम्। 'तानि परे तथा ह्याहे'ति सूत्रे श्रीगोकुले तानि वस्तूनि सन्तीत्युक्तेः। सर्वसामर्थ्यसहितस्य सर्वत्रैवाखिलार्थकृत ईश्वरस्यात्यन्तानुग्रहेण प्राप्तया भक्त्या कृष्णलीलासु प्रवेशोत उक्तमसंशयमिति । स्वभावतो दुष्टस्य जीवस्य जगत्कारणकारणे तत्रापि लीलानिविष्टे प्रवेशो भविष्यति न वेति संशयो भवत्येव तदभावोऽसंशयः क्रियाविशेषणत्वान्नपुंसकत्वम्। सगुणं ब्रह्म सर्वमित्याशङ्क्य परिहरन्ति स्म । नात्र इत्यादि, अतो न सगुणं पूर्वमुपपादितत्वात् । अत्र सूत्रं तृतीयाध्यायद्वितीयपादे 'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्य' इति सूत्रेणातो देशकालवस्तुस्वरूपपरिच्छेदाच्चतुर्विधपरिच्छेदरहितमन्यत्किञ्चिदस्तीति प्रतिपत्तव्यमित्येवं प्राप्ते 'सामान्यात्त्वि'ति। श्रुतिस्तावत् 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति । गीता 'ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यत' इति ।

साकारव्यापकं रूपमुपसंहरन्ति स्म एतद्रूपमित्यादि ।

एतद्रूपं समास्थाय श्रीवल्लभसुनिश्चितम् ।
सात्त्विकैर्भगवद्भक्तैः स्थेयं कृत्वा दृढं मनः ॥ १८ ॥

समीपतरवर्तिब्रह्मरूप उक्तप्रकारेण सम्यङ्नियमपूर्वकं आसमन्तादर्थे शब्दे शङ्काराहित्येन स्थापयित्वा स्वमनसीति शेषः । श्रीवल्लभेत्यादि । भाष्यसमाप्तौ

'जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम्। तदन्यदिति ये प्राहुरासुरांस्तानहो बुधाः' ॥
'नानामतध्वान्तविनाशनक्षमो वेदान्तसिद्धान्तविकाशने पटुः ।
आविष्कृतोयं भुवि भाष्यभास्करो मुधा बुधा धावत नान्यवर्त्मसु' इति ॥
निबन्धे शास्त्रार्थसमाप्तौ
'अर्थोयमेव निखिलैरपि वेदवाक्यै रामायणैः सहितभारतपञ्चरात्रैः ।
अन्यैश्च शास्त्रवचनैः सह तत्त्वसूत्रैः निर्णीयते सहृदयं हरिणा सदैव' ॥
श्रीभागवतार्थसमाप्तौ च
'श्रीमद्भागवतं समस्तनिगमन्यायैकतत्त्वात्मकम्
नानाभ्रान्तितमःकपाटपिहितं सत्तुष्टये सर्वथा ।
नाभूदित्यवगत्य निश्चितपदैरुद्दीप्तदीपाकृतिं
श्रीमद्भागवतप्रदीपमधुना चक्रे मुदा वल्लभः ॥'
दशमपूर्वार्धसमाप्तौ
'इत्येवं भगवल्लीला कृष्णविश्वासदायिनी । निरूपितातियत्नेन कृष्णपादाम्बुजाश्रया' इति ।

अत उक्तं श्रीवल्लभैः सुनिश्चितमिति सूत्रश्रुतिगीताभिर्भाष्यशास्त्रार्थनिबन्धश्रीभागवतप्रदीपदशमपूर्वार्धादिष्विति शेषः। सात्त्विकैरिति। इदं विशेषणं 'सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः। भवान्तसम्भवा दैवास्तेषामर्थे निरूप्यत' इति निबन्धात्। दृढं मनः कृत्वा स्थेयमिति मनसश्चञ्चलत्वेन 'लोके तदादरो मुख्यः फलं वैमुख्यतस्तमः' इत्यत्रानादरेऽन्यत्र कामेऽन्यत्र 'जीवाः स्वभावतो दुष्टा' इति तेषामन्यत्र सङ्कल्पे किञ्च बहुष्वाचार्येषु सत्सु किमेतत्सुभणितमुतान्यैराचार्यैः सुभणितमित्येवमत्र विचिकित्सायां च सत्यामदृढं मनो भवति तद्व्यावृत्त्यर्थं दृढमिति विशेषणम्। दृढत्वं च मनसो मनसि मीमांसानिर्णयरूपं 'असन्दिग्धोपि वेदार्थः स्थूणाखननवन्मतः । मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वय' मिति भाष्यात्। मीमांसानिर्णयश्च मनसि। 'कामः सङ्कल्पो विचिकित्सेत्यारभ्य धीर्भीरित्येतत्सर्वं

मन एव' इति श्रुतेः । मीमांसानिर्णयवतो निबन्धस्थ 'लोक' इत्यादिवाक्यस्यापि प्रसङ्गादर्शनेन तत्र फलवैमुख्यस्मारणान्मायावादादितः कामनिवृत्तिस्तस्य । 'जीवाः स्वभावतो दुष्टाः' तेषां दोषाणां 'श्रवणादि ततः प्रेम्णा सर्वं कार्यं हि सिद्ध्यती'ति वाक्यान्मीमांसानिर्णयवतः श्रवणाद्यावश्यकमिति निवृत्त्यांन्यत्र सङ्कल्पनिवृत्तिः । 'विप्रतिषेधे पर'मिति सूत्रेण श्रीमदाचार्यभणितं सुभणितमिति निश्चयः । सर्वेभ्य आचार्येभ्यः एषां परत्वात् । तथा च तस्यैव सूत्रस्य वृत्तिः 'तुल्यबलविरोधे परं कार्यं स्या'दिति । अत एव कस्याश्चित् काश्चित्प्रति वचनं पूर्वं गृहे जारः समायातः पश्चात्पतिस्तावुभौ दृष्ट्वा क्रमे सन्दिहाना 'स्मर सखि पाणिनिसूत्रं विप्रतिषेधे परं कार्य' मिति । एवं विद्वद्युक्तिमुपगच्छतो मीमांसानिर्णयवतो विचिकित्सानिवृत्तिः । अतः पर'मेतत्सर्वं प्रयत्नेन गृहस्थस्य प्रकीर्तित'मिति निबन्धसेवाप्रकरणीयवाक्यादत्र गृहिणोपसंहाराधिकरणाद् गृहस्थस्य भक्तिवर्द्धिनीनवरत्नश्रीमद्भागवतरीत्या प्रथमदलानुभवः कर्तव्यः ।

एतावतापि रूपमर्धबृंगलमिति भक्ते रसस्य विरहरूपं द्वितीयं दलमनुभवितव्यमित्याहुः । श्रीकृष्णेत्यादि ।

श्रीकृष्णविरहानन्दानुभवाय विशेषतः ।
श्रुत्युक्तरीत्या सर्वत्र पश्यद्भिः पुरुषोत्तमम् ॥ १९ ॥

अत्र सन्न्यासनिर्णयः 'विरहानुभवार्थं तु सर्वत्यागः प्रशस्यते' इति निरोधलक्षणग्रन्थोक्तरीत्या स्थेयम् । अत्रो'र्ध्वरेतःसु च शब्दे ही'ति सूत्रे ब्रह्मविदतिरिक्तसङ्गस्य भगवद्विस्मारकत्वेनावश्यत्याज्यत्वेन श्रुत्या कथनादिति भाष्येण यस्याधिकारिणः सन्न्यासस्य भगवत्सङ्गिसङ्गार्थत्वमवदत् । ततो विशिष्टाधिकारिणः स्फूर्तिमाहुः विशेषत इति विशेषात् पूर्वस्माद्विशेषात् । 'बहिस्तूभयथापि स्मृतेराचाराच्चे'ति सूत्रोक्तादित्यर्थः । अतो हेतोः श्रुत्युक्तरीत्या सर्वत्र पुरुषोत्तमं पश्यद्भिः स्थेयं न तु सत्सङ्गमात्रार्थं सन्न्यासं कृत्वा स्थेयमुपासनामार्गीयत्वात् 'सत्सङ्गलब्धया भक्त्या मयि मां य उपासिता'इत्येकादशस्कन्धवाक्यात् । अत्र सूत्रं साधनाध्यायीयं 'लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपी'ति 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' 'स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेद५सर्वमित्यथातोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादात्मा (पुरस्तादहं) दक्षिणतोहमुत्तरतोहमेवेद५सर्वमित्यथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेद५सर्वमिति' श्रुती । गीता तावत्तुरीयाश्रमीणस्य विरहाधिकारात्सन्न्यासयोगाध्यायीया ग्रहीष्यते 'कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मना'मिति । अभितो ब्रह्मनिर्वाणकस्य भक्तस्य सर्वात्मभावोनुमीयतेऽतो विदितात्मनामित्यस्य सर्वैरिन्द्रियैरनुवृत्त्या यतचेतसां विदितात्मनामित्यर्थः । आत्मपदार्थश्च न गौणः किन्तु मुख्य एव । सर्वात्मभावस्य स्वरूपं पूर्वोक्तभूमश्रुत्योक्तम् । द्वितीयश्रुत्या तु तद्वतां स्फूर्तय इति गीतायामपि तथा । अथ पदकृत्यम् । श्रीकृष्णयोर्विरह इति श्रीकृष्णयोः परस्परं विरहस्तयोर्भक्तानां विरहः । भक्तानामपि गुरुभक्तिरावश्यकीति भक्तिरसेपि श्रीरालम्बनम् । अत्र पञ्चाङ्गविप्रलम्भे द्वितीयाङ्गस्य विरहस्य ग्रहणं देशैक्येपि गुर्वादिपारतन्त्र्यं विरहलक्षणम् । 'तादृशस्य विशिष्टरहो विरह' इति सुबोधिन्युक्तलक्षणलक्षितत्वेनानन्दरूपत्वं 'प्रतिषेधादिति चेन्न शारीरादि'ति फलाध्यायसूत्रे दुःखतानिवारणात् प्रवासश्चापेर्ष्याभिलाषाणां दुःखरूपत्वेनाविवक्षितत्वमाहुरानन्देति विरहेणानन्दस्तस्य स्वस्वरूपस्यानुभवस्तस्मा इत्यर्थः । वस्तुतस्तु विप्रलम्भ इति वक्तव्ये विरहपदोपादानं भागवतमतस्य

---

१. मिदलमित्यर्थः ।

परम्पराप्राप्तत्वेन तत्र च 'विरहातुरात्मे'त्युद्धववचनात्तदनुरोधेन । 'नोद्धवोण्वपि मन्न्यून'इति वाक्यादङ्गमपि विरहो विप्रलम्भपर्यायः । उक्तश्रीकृष्णविरहेत्यादिप्रयोजनाय कुत इत्यत आहुः **विशेषत्त** इति 'बहिस्तूभयथे'ति सूत्रोक्ताद्विरहानुभवरूपाद्विशेषात् । तादृशानुभवाय स्थेयमित्यन्वयः । स्थितौ प्रकाराकाङ्क्षायां कर्तृविशेषणम् । श्रुत्युक्तरीत्या **सर्वत्र पुरुषोत्तमं पश्यद्भिरिति** । उक्तश्रुत्या उक्तासर्वात्मभावास्तत्स्फूर्तिश्चेत्येवमुक्ता या रीतिस्तया सर्वत्राधस्तादादिदेशे आत्मादेशे निर्दिष्टे उत्तमं पुरुषमक्षरादुत्तमम् । **पश्यद्भिः**रथात आत्मादेश इत्यादिश्रुत्युक्तसर्वात्मभावजस्फूर्तिविषयं कुर्वद्भिः । नेदं साधनसाध्यं किन्तु भगवत्प्रदानेन सिद्ध्यति । तदुक्तं 'प्रदानवदेवे'ति सूत्रे । सर्वात्मभावस्वरूपं निरोधलक्षणग्रन्थोक्तं यत्र नान्यत्पश्यतीत्यादिनोक्तं लिङ्गभूयस्त्वाधिकरणे निपुणतममुदीरितम् । 'विद्यैव तु निर्द्धारणा'दितिसूत्रे सर्वात्मभावो विद्या । 'नातः परतरो मन्त्रो नातः परतरः स्तवः । नातः परतरा विद्या तीर्थं नातः परात्पर'मिति निरोधलक्षणग्रन्थान्ते ।

सिद्धमाहुः । अनयेत्यादि

अनया पुष्टिपद्धत्या ससूत्रश्रुतिगीतया ।
ज्ञात्वानन्दमयत्वं हि भजनीयो व्रजाधिपः ॥ २० ॥

अनया प्रत्यक्षगया पुष्टिपर्यन्ता पद्धतिः पुष्टिपद्धतिः मध्यमपदलोपी समासो न तु मर्यादानन्तरं तत्फलं प्रदर्श्योपरता पद्धतिः तया पद्धत्या । सूत्राणि च श्रुतयश्च गीता च सूत्रश्रुतिगीताः सूत्रश्रुतिगीताभिः सहेति ससूत्रश्रुतिगीता तया, सहस्य सादेशः ताश्चोदाहृताः ताश्च निबन्धे 'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि । समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टय'मिति चकारो जैमिनिसूत्राणि सङ्गृह्णाति । **पुष्टिपद्धत्या भजनीयः** । किं कृत्वानन्दमयाधिकरणादानन्दमयत्वं **ज्ञात्वा** । **हि** निश्चितोयमर्थः 'एवं विचारचातुर्यवद्भिः सद्भिर्व्रजाधिपे । आनन्दमयतानन्दसन्दोहायावधार्यते' इति श्लोकात् । अत्र सूत्रं 'आनन्दमयोभ्यासात्' श्रुतिस्तावत् 'को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यादेष ह्येवानन्दयाती'ति । गीतात्रयोदशेध्याये 'यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते' इति । अत्राकाशरूपानन्ददृष्टान्तः । सौक्ष्मा पुष्टिमार्गीया तत्त्वता सापि दृष्टान्ते दृष्टान्तोक्तौ धर्मौ दार्ष्टान्तिकेपि । यद्वा 'यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रवि'रिति तत्रैव । 'आनन्दमानन्दमयोवसान' इति श्रीभागवते आनन्दमयत्वस्याच्युतत्ववद्भजनीयतावच्छेदकत्वम् । तदर्थमत्रानन्दमयत्वज्ञानस्योक्तिः । **व्रजाधिप** इति । अत्र सूत्रं 'अत एव चानन्याधिपतिरि'ति फलाध्यायतुरीयपादे । श्रुतिः 'सर्वस्याधिपति'रिति । गीताविस्तारः 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'ति भागवतम् ।

स्वरूपवर्णनमुपसञ्जहुः इतीत्यादिना ।

इति स्वरूपसर्वस्वं धारयेद्यः समाहितः ।
स बुद्ध्वानन्दरूपं तु मुच्यते सर्वसंशयात् ॥ २१ ॥

इति उक्तप्रकारेण **स्वरूपस्य सर्वं** आत्मात्मीयज्ञातिधनरूपं ब्रह्म वृतभक्तसर्वात्मभावनन्दादिगोधनादिसमाहितैकग्रमनाः सम्यगासमन्तादात्मनो हितो हितकारी **यो धारयेत्** मननेन ततः पतनप्रतिबन्धकव्यापारात्मकधृतिं कुर्यात्स **आनन्दरूपं बुद्ध्वा सर्वसंशयात्तु मुच्यते** 'यस्यामतं तस्य मतं मतं यस्य न वेद स'इति श्रुत्युक्तो मन्तुः संशयस्तु वर्तत एव । मतं ब्रह्मामतं ब्रह्म वेति । पूर्वोक्ता श्रुतिः सुबोधिन्यां 'यतो वाचो निवर्तन्त' इति श्रुतिः समानार्थेति प्रोक्तप्रायं 'आसामहो' इत्यत्र ।

सर्वे संशयास्तु उक्तप्रकारं यथान्यप्रकारं वा सर्वात्मभावः साधनं ज्ञानादि वा शब्दप्रत्यक्षानुमानोपमानानि प्रमाणं 'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि, समाधिभाषा व्यासस्य' प्रमाणं वा फलं वा भगवान् वाऽविद्यानिवृत्तिर्वा । आचार्या इमेऽन्ये वात्मानः । **इति स्वरूपवर्णनम् ।**

स्वरूपस्वरूपं प्रस्तोतुं मङ्गलं स्मरन्ति । जयतीत्यादिना ।

'जयत्याचार्यपादाब्जरेणुर्यल्लाभतः स्वयम् ।
तुरीयं पुरुषार्थं हि प्रीतः कृष्णः प्रयच्छति ॥ १ ॥

यद्रेणुलाभतः यो यस्य चरणरेणुं वाञ्छति स तद्भवति तद्योग्यो वा भवतीति वा । तथा च यथाऽऽचार्येभ्यः पुष्टिमर्यादाभक्तिमार्गीयमोक्षं प्रयच्छति मोक्षदातृत्वेपि प्रीतस्तत्रापि कृष्णः सदानन्दो न तु विभूतिरूपस्तत्रापि स्वयं न तु धर्मरूपेण तथास्मभ्यमपि मोक्षं दास्यति **प्रीतः कृष्णः स्वयम् ।** किञ्च ते यथाऽदेयदानदक्षास्तथा वयमपि भविष्याम इति भावः । स्पष्टं चेदम् 'आसामहो चरणरेणुजुषामहं स्या'मित्यत्र सुबोधिन्याम् । 'अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभि'रित्येकादशचतुर्दशे पापाभावे चरणरेणुः कारणमुक्तमेवं च चरणरेणुलाभतः पापाभावः ततः **प्रीत** इति मर्यादोक्ता। पापाभावस्य भक्तिकारणत्वात् ।

संस्कृतदेहे तुरीयपुरुषार्थसिद्ध्यर्थं साधनमाहुः शब्देत्यादि ।

शब्दार्थयोर्नित्यता तद्भक्तिरात्यन्तिकी हरौ ।
उदेति श्रीवल्लभेतिनामोच्चारणमात्रतः ॥ २ ॥

श्रीवल्लभेतिनाम प्रतिपादकं श्रीश्च श्रीश्च श्रीश्च श्रीश्च श्रीश्च श्रीश्च श्रियः षट् । षट्श्रीयुक्ताः वल्लभाः श्रीवल्लभास्तेषां नाम **श्रीवल्लभेतिनाम** प्रतिपादकं प्रतिपाद्यंच प्रियत्वरूपश्रीवल्लभत्वविशिष्टम् । एतयोः शब्दार्थयोर्नित्यता तदुच्चारणमात्रतो'अनियमः सर्वासा'मिति सूत्रप्रमाणेनात्यन्तिकी **भक्तिरुदेति** । क्वेति चेन्न हरौ । हरिर्मनो ब्रह्म 'मनसो ह्येव खल्विमानि भूतानि जायन्त' इति प्रथमचरणं प्रतिमारूपमपीति तत्रेत्यर्थः । यद्वा जिज्ञासाधिकरणोक्तनिर्गुणब्रह्मणः सकाशाज्जगदिति प्रथमचरणं प्रतिमारूपमपीति तत्रेत्यर्थः । मानसीसेवारूपात्यन्तिकी भक्तिः । तथा च पञ्चाग्निविद्यासंस्कृतदेहेभ्य इव चरणरेणुसंस्कृतदेहेभ्यः आत्यन्तिक्या भक्त्या तुरीयं पुरुषार्थं स्वयं प्रयच्छतीत्युक्तम् ।

तुरीयं पुरुषार्थं स्वयमुक्तं प्रपञ्चयामासुः आनन्देत्यादिना ।

'आनन्दमयतानन्दसन्दोहो यत्प्रवेशतः ।
आनन्दरूपे भवति स वै श्रीवल्लभः प्रभुः ॥ ३ ॥

यद् येभ्यः उक्तगुरूपसत्त्यादिमुखद्वारानन्दमयता जीवानां भवति 'आनन्दरूपे प्रवेशतः आनन्दस्य सन्दोहः समूहो भवति जीवीयसच्चिदानन्देष्वानन्दरूपे भवति स श्रीवल्लभः प्रभुः समर्थ इत्यर्थः ।

भिषु साकारव्यापकं निरूप्य तद्रूपं निरूपयाम्बभूवुः सिद्धिवेत्यादिना ।

सिद्धिवा यादृशी प्रोक्ता जीवानां सेवना कृता ।
तादृशीं स्वीयशिक्षार्थं दर्शयामास वाक्पतिः ॥ ४ ॥

सिद्धिवा एकादशपञ्चदशाध्याये प्रोक्ता । न चैकोनत्रिंशाध्यायोक्तेति कुतो नोक्तमिति शङ्कनम् । भाष्ये गोपालतापिनीयश्रुतिप्रोल्लेखा'द्भक्तिरस्य भजनमि'ति श्रुत्युक्तां मुख्यां ग्रहीतुं सिद्धिवे-

---

१. उत्सवे । २. आचार्येभ्यः ।

स्याद्युक्तेः । सा पश्चान्मानसिकसाधनत्वाद्वक्तव्येदानीं संसारदुःखनिवृत्तिब्रह्मबोधनमानसीसेवारूपसिद्धिदा सिद्धान्तमुक्तावल्यां यादृशी प्रोक्ता तस्याः साधनभूतायाः कायिकीत्वात् तावत्तद्विषयीभूतं प्रतिमायाहुः **षड्गुणैरि**त्यादि ।

षड्गुणैः सहितो धर्मी कृष्णः सेव्यः परः प्रभुः ।
गुणाश्च भगवद्रूपाः रूपलीलाविभेदतः ॥ ५ ॥

षड्गुणैः सहितो धर्मीति । अत्र 'आनन्दादयः प्रधानस्ये'ति सूत्रम् । 'गोपवेशमभ्राभं तरुणं कल्पद्रुमाश्रितं तदिह श्लोका भवन्ति सत्पुण्डरीकनयन'मित्यादिश्रुतिः । इयमस्मिन् सर्ववेदान्तप्रत्ययाधिकरणेस्ति, राजविद्याराजगुह्ययोगाध्याये 'ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते । एकत्वेन पृथक्त्वेने'ति तथा 'बहुधा विश्वतोमुखमि'ति गीता । **कृष्णः** सदानन्दः **परः** पुरुषोक्षरात्परः **प्रभुः** सर्वसामर्थ्यसहितः । 'सर्वसामर्थ्यसहित' इतिकृष्णाश्रयात् । **गुणाश्च** पूर्णानन्दैश्वर्यवीर्यादयः । **भगवद्रूपा इति** । सेव्या इत्यन्वयः । 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति सूत्रम् । 'गोपवेश'मित्यादिश्रुतिः । 'सत्यं ज्ञानमनन्तं ब्रह्म' 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्म' 'अरसं सर्वरसो निर्गुणः सर्वशक्ति'रिति श्रुतयः । शक्तयो हि पूर्णानन्दैश्वर्यवीर्ययशःश्रीज्ञानवैराग्याण्यपि । 'निर्गुणं गुणभोक्तृ चे'ति 'ज्योतिषामपि तज्ज्योति'रिति 'सर्वतः पाणिपादं तत्', इति 'सूक्ष्मत्वात्तदविज्ञेय'मिति, 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जित'मिति, 'निर्गुणं गुणभोक्तृ चे'ति यथायोग्यं श्रुतिपदानुकूला गीता । **रूपलीलाविभेदत** इति तज्ज्ञात्वेत्यनेनान्वयः । **रूपाणि** श्रीपञ्चकयुक्तगोवर्धनाधीशैश्वर्यरूपादिरूपाणि । **लीलाः** 'तदेजति तन्नैजति तद्दूरे तद्वन्तिके' इत्यादिश्रुत्युक्ता निष्प्रतियोगिन्यः ।

सप्रतियोगिन्यो बाललीलाद्याः । **तज्ज्ञात्वे**त्यादि ।

तज्ज्ञात्वा सेवनाकार्येत्येवंरूपविभेदतः ।
सेवयामास वागीशो बहुरूपाणि वै हरेः ॥ ६ ॥

तद्ब्रह्म सर्वत्र प्रसिद्धोपदेशाधिकरणोक्तरीत्या प्रथमपादमपीति **ज्ञात्वा** । **किञ्च** 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'तिश्रुत्या च ज्ञात्वा । 'त्वया ततं विश्वमनन्तरूपे'ति विश्वप्रदर्शनाध्याये गीतया च ज्ञात्वा । **सेवना कार्ये**ति हेतोरेवं वक्ष्यमाणप्रकारेणेत्यर्थः । तद्रूपं निरूप्यते । प्रतिमाया जगन्नित्यत्वेन नित्यत्वात् कार्यकारणवस्त्वैक्यमर्षणं प्राप्नोति । तथा च घटः कपालद्वयं संयोगसहितमस्ति कार्यं कारणं च । अत्राभिन्ननिमित्तोपादानो घटः । एवं जगत्कार्यमभिन्ननिमित्तोपादानं ब्रह्माभिन्नं पटवच्च । 'कार्यकारणवस्त्वैक्यमर्षणं पटतन्तुवत्' इति वाक्यात् । तत्रापि साकारब्रह्मणः 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दिति तैत्तिरीयोक्तं भावेन रूपम् । 'नवाम्बुदानीकमनोहराय प्रसन्नराजीवविलोचनाय । वेणुस्वनामोदितगोकुलाय नमोस्तु गोपीजनवल्लभाय' इत्युक्तं तरुणं प्रादेशमात्रं वा जगदन्तर्गतप्रतिकृतिरिति तद्रूपम् । 'कटकाद्युपचाराः साक्षात्कृता भवन्ती'ति निबन्धटीकायाः । न तु 'सदंशेन जडा अपि' इति निबन्धादयोगोलके वह्निरिव ह्युक्तं रूपं व्याप्तम् । भक्तभावेन पूर्वं सदंशत्वेपि कार्यकारणवस्त्वैक्यमर्षणानन्तरं तिरोहितज्ञानानन्दाविर्भावाङ्गीकारेण सदंशमात्रत्वाभावात् । 'सर्वं खल्विदं ब्रह्म' इति छान्दोग्ये नृसिंहतापिनीये च 'सच्चिदानन्दात्मकमिदं सर्वमि'ति च । तथा च भाष्यम् 'भक्तिमार्गे तु भक्त्या तत्र प्रकट' इति भक्तभावेन पूर्वोक्तदिशा न्यूनेन अन्यथा ततो न्यूनेन ततोन्यथेति बोध्यम् । अग्रे स्पष्टम् ।

शिक्षायां हरिः ॐ 'ॐ शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः' । 'नमो ब्रह्मणे नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासी'ति सप्तमित्रादीनुक्त्वा नमो ब्रह्मण इत्येकत्वपूर्वकं वन्दनभक्तिरुक्ता । ञिमिदा स्नेहने, मेद्यतीति मित्रः 'अमिचिमिदिशसिभ्यः क्रः' इति क्रन् । व्रियते वृणोति वा, वृञ् वरणे, 'कृवृदारिभ्य उनन्' । इयर्ति अर्यमा, 'श्वन्नुक्षन्पूषन्' इति निपातितः अर्यमा सूर्यः साम वा । इन्दति 'ऋज्रेन्द्रे'त्यादिना रन् । बृहतां पतिः 'तद्बृहतो'रिति सुट्तलोपौ । विष्लृ व्याप्तौ वेवेष्टि 'विशेःकिच्चे'ति नुः । उरु क्रमो यस्य ।

एष्वेकस्य रूपलीलाविभेदतो ज्ञानमाहुः ।

गोवर्धनाधीशरूपं मूलरूपानुकारतः ।
शरणीयं च सेव्यं च भक्तिमार्गानुसारतः ॥ ७ ॥

मूलरूपं ब्रह्मरूपं देवरूपं तुरीयं तत्त्वं तदनुकरणतः अनुकृत्यधिकरणे 'सर्वोपि पदार्थस्तमेवानुकरोति सूर्य रश्मय इव छाया पुरुषमिवैवं तुरीयं देवं गोवर्धनाधीशरूपमनुकरोती'ति तदनुकारः । कर्मण्युपपदे घञ् । ततस्तसिल् । अत्र मूलरूपे सूत्रं 'पुरुषाश्मवदिति चेत्तथापि,' 'अदृश्यत्वादिगुणको धर्मोक्ते'रिति । श्रुतिस्तावत् । 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा' इति । 'क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत' इति 'यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः । अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' इति गीता । **शरणीयमिति** । शरणमार्गो निबन्धे 'जगन्नाथे विठ्ठलेशे श्रीरङ्गे वैङ्कटेऽथवा, यत्र पूजाप्रवाहः स्यात्तत्र तिष्ठेत तत्परः' इत्यत्र स्वाशयप्रकाशनद्वारा स्थितिरूपः । तद्विषयीकार्यम् । **सेव्यमिति** व्याकृतमिदं पदम् । भक्तिमार्गो ह्युत्सवादिनिरूपणे वक्ष्यते तदनुसारस्तदनुसरणं तस्मात् ।

शब्दात्मको भगवान् निबन्धे भावनान्तरे चास्ति । प्रथमद्वितीयस्कन्धौ चरणौ, तृतीयचतुर्थौ जङ्घे, ऊरू, श्रीहस्तः, स्तनभागौ, हृदयम्, शिरः वामश्रीहस्तः क्रमेण ।

अथ पीठकभावना । भगवतो भागवतस्य रूपं 'उत्क्षिप्तहस्तः पुरुषो भक्तमाकारयत्युते'ति निबन्धाद्भक्ताकारणाश्रयो भगवान् रसमर्यादया भावनीयः । 'तस्माच्छ्रीकृष्णमार्गस्थ' इति वाक्यात् । 'सर्वरस' इति श्रुतेश्च । तत्र रसो भक्तिः स च 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति'रिति सूत्रादालम्बनोक्तावप्युद्दीपने किंचिद्वक्तव्यमपि चानुभावसंचारिभावा वक्तव्याः । तत्र **विहगो** मुनिः 'प्रायो बताम्ब विहगा मुनय' इति, सोनुभावः भक्तिमनुभावयतीति । **द्वितीयविहगोपि** । **मेघः** कालो लीलानुकूलः उद्दीपनश्चेष्टारूपत्वात् । **शेषः** सङ्कर्षणः शय्यादिरूपः । आलम्बनविभावः व्यूहत्वात् । आकार्यभक्तो हि 'सर्वं सर्वमयमि'ति श्रुतेः शेषो द्वितीयः शेषपक्षी । श्रीगोवर्धनस्थाश्रयो भक्ता धर्मार्थकामाश्रयो विभावा आलम्बनविभावाः । गावो गोकुललोकबोधिका उद्दीपनविभावाः । श्रीनृसिंहोऽक्षरः 'प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तदुद्भव' इति निबन्धाल्लोकबीजम् । भगवानक्षरस्य उत्तमः पुरुषः । अधो यमुनाजित् । अन्यच्छ्रीगोवर्धनजिद्धरिदासवर्यैः तदुक्तं नित्यलीलावादे विद्वन्मण्डने यावती रसमर्यादा तावन्तोर्था भगवद्रूपा मन्तव्याः अयमेको भक्तिरसः । शब्दात्मको भगवान् इतिपक्षे 'उत्क्षिप्तहस्तः पुरुषो भक्तमाकारयत्युत । दक्षिणेन करेणासौ मुष्टीकृत्य मनांसि नः । वामं करं समुद्धृत्य निह्नुते पश्य चातुरीमि'ति ॥ १६ ॥ सार्ध-

यथोक्ताकारणार्थमेव निकुञ्जमन्दिरद्वारे स्थितोस्तीति **पीठिकाभावना** । अथ शब्दार्थयोरौत्पत्तिकसम्बन्धाद्वक्ष्यमाणरीत्या षड्धर्मादिभावनास्तया रीत्या समष्टिभावनायामपि कृतायां 'जयति जननिवासो देवकीजन्मवाद' इति पद्यसङ्गृहीतनित्यलीलावादोक्तलीलाभावनायामपि विद्वन्मण्डनोक्तदिशा सिद्धायां धर्मिनिरूपणात्प्रमेयरूपधर्मिस्फूर्तेर्मूले उक्तत्वाच्छब्दार्थरसरूपद्वयो रूपे वेणुगीतम् । अत्र प्रमेयप्रकरणं षड्गुणयुक्तस्वरूपवर्णनेन धर्मिनिरूपणमिति ह्युभयरूपरसभावनायां परिकल्प्यते । वेणुगीतारम्भे 'सगोगोपालकोच्युत' इति । 'अच्युतं पादपद्मैकरूप'मित्यत्राच्युतत्वं भजनीयतावच्छेदकं रूपमुक्तं, सोच्युतः सगोगोपालकः गोगोपालाः पीठकस्थाः । किञ्च 'इत्थं शरत्स्वच्छजल'मिति वृन्दावनविशेषणात्पीठकस्था **श्रीयमुनाजित्** । निकुञ्जरूपवृन्दावनद्वारे स्थितो भक्ताकारणार्थमिति शब्दात्मको भगवान् इति पक्षे **पीठिकाभावना** । उत्पलाब्जानां माला स्वरूपे वर्तते चूतप्रवालश्लोकोक्ता । तस्याः स्वरूपं **योगमाया** । गोपालतापिनीये श्रुतिः 'कण्ठं तु निर्गुणं प्रोक्तं माल्यन्ते आद्ययाजया । माला निगद्यते ब्रह्मंस्तव पुत्रैस्तु मानसै'रिति । आद्या मायाजा तथा माल्यन्ते माल्यते । कीर्तिमयी सा । कीर्तिमयीं वनमालामिति 'बर्हापीड'श्लोकसुबोधिन्याः । 'वृन्दावनं सखि भुव' इत्यत्र 'अद्रिसान्वपरतान्यसमस्तसत्त्व'मिति वृन्दावनविशेषणान्निकुञ्जमन्दिरद्वारे तेन गोवर्धनाधीशपदसमानता । अर्थपक्षे रसरूपा विभावाः । 'धन्याः स्म मूढमतय' इत्यादिश्लोके धर्माणामैश्वर्यादीनां निरूपणम् । तदग्रे स्फुटिष्यति । 'कृष्णं निरीक्ष्ये'त्यत्राप्सरसां स्वरूपं तासां भावने सत्युपयुज्यते । 'गावश्च कृष्णमुखनिर्गते'त्यनेन पीठिकास्थगवां स्वरूपम् । 'प्रायो बताम्ब विहगा' इत्यनेन शुकमयूरस्वरूपम् । 'नद्यस्तदे'त्यत्र श्रीयमुनाजित्स्वरूपम् । 'दृष्ट्वातप' इत्यनेन कन्दराया मेघत्वेन भायने तत्स्वरूपमुक्तम् । 'पूर्णाः पुलिन्द्य' इत्यनेन भक्तत्रयस्य पुलिन्दीत्वेन भावने तत्स्वरूपमुक्तम् । 'हन्तायमद्रि'रित्यनेन सम्पूर्णपीठिकायाः स्वरूपम् । 'गागोपकै'रित्यनेन श्रीगोवर्धने पुलिन्दीषु च कृपोपपत्तिः । इत्थमर्थपक्षे विभावाः । ननु शब्देनैव निर्वाहेऽर्थस्य द्वितीयतया 'एकमेवाद्वितीयं ब्रह्मे'ति श्रुतिविरोध इति चेन्न । शब्दसृष्टेरर्थस्यापि शब्दात्मकत्वात् । किञ्च ब्रह्मणो विरुद्धधर्माधारत्वेन शब्दः पुंस्त्वविशिष्टः ब्रह्मार्थरूपं नपुंसकत्वविशिष्टम् । तथा च श्रुतिः 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जन'मिति । पद्मपुराणे तु 'निष्कलो निष्क्रियः शान्तो निरवद्यो निरञ्जन' इति । एतेन छान्दसं नपुंसकत्वं श्रुताविति ज्ञायते । तेन पुंस्त्वनपुंसकत्वविशिष्टं विरुद्धधर्माधारो ब्रह्मरूपमिति । **इति पीठिकाभावना समाप्ता ।**

अथ गुणप्रकरणे यत्तन् 'निर्धर्मको वा भिन्नो वा निरोधं कुरुते यदि । तदा व्यर्थं समस्तं स्या'दिति षड्गुणवर्णनमाहुः कृष्ण इत्यादि ।

कृष्णः स्वैश्वर्यरूपेण प्रकटो बाललीलया ।
नवनीतादिचौर्येण स सेव्यस्तत्प्रभावतः ॥ ८ ॥

समष्टिरूपेण सेवितोपि व्यष्ट्या धर्मरूपेण । एवं धर्मिरूपस्य सेवायां श्रीनवनीतप्रियजित् दुग्धस्य सर्वप्रतिष्ठाभूतस्य तत्त्वं नवनीतम् । 'पयसि सर्व प्रतिष्ठित'मिति संहिताश्रुतेः । तदपि शुद्धम् । नवनीते तेजोरूपघृतस्य सत्त्वात् । 'तेजो वै घृत'मिति श्रुतेः स आश्रयः । 'सर्वमत्तुमभ्रियते'ति बृहदारण्यकात् । भक्तिविशेषाधिकारिणां भक्तानामिच्छातः 'अचलत्वं चापेक्ष्ये'ति सूत्रोक्तायाः । **कृष्णः** सदानन्दः **स्वैश्वर्यरूपेण प्रकटो** भवति । तदा **बाललीलया** युतो भवति । **नवनीतादिचौर्येण** रूपेण प्रतिमारूपं च भवति । आदिना रोठ्यादि । इदमुक्तं भवति ।

नवनीतचौर्यं शक्यतावच्छेदकं नवनीतचौर्यविशिष्टनवनीतचोरे शक्तिः । यद्यप्यष्टमी तिथिः रोहिणीनक्षत्रं वृषराशिरिति न नवनीतचोरपदप्रवृत्तिनिमित्तं नवनीतचौर्यं, तथापि ह्यनुकृतेर्नवनीतचौर्यं शक्यतावच्छेदकं बोध्यम् । सर्वकर्मकर्तृत्वमष्टमीतिथिजातस्य भवतीति चौरकर्मकर्तृत्वमपीति वा, अत एवैकादशसुबोधिन्यां'मूर्त्याभिमतया स्वये'त्यस्य प्रकारसहस्रमध्ये नवनीतचौर्यादिरूपेषु स्वभावो नियामक इति । प्रसिद्धं तु नवनीतप्रियजित्त्वं शक्यतावच्छेदकम् । एवं चोत्सवाध्याये ऐश्वर्यनिरूपके या बाललीला तया नवमेध्याये ज्ञाननिरूपके नवनीतादिचौर्यं तेन च प्रमाणप्रकरणीयाः सर्वा लीलाः प्रसिद्धाः श्रीनवनीतप्रियजितीत्युक्तम्, 'जानीत परमं तत्त्वं यशोदोत्सङ्गलालित'मिति भाष्यात् । ननु मूलरूपानुकारत एव सेव्यो मुख्यत्वादित्याकाङ्क्षायामाहुः प्रतिविधानम् । स सेव्य इत्यादि । भवेदेतदेवं यदि धर्मित्वेनैव भक्तिविषयः स्यात्किन्तु ऐश्वर्यादिरूपा धर्मा अपि नवनीतचौर्यादिरूपैस्तस्य मूलरूपस्य प्रभावः प्रकृष्टो भावो धर्मस्तस्माद्धेतोः स नवनीतचोररूप ऐश्वर्यधर्मोपि सेव्यः । अन्यथा'प्रकाशाश्रयवद्वा तेजस्त्वा'दित्यत्र निरूपितो भगवतो धर्माभेदो माहात्म्यं जीवात्म्यैक्यं च ज्ञापयन स्नेहमात्रपर्यवसायी स्यात्, एवं तु स्नेहेन धर्मानुवृत्त्याख्यसेवापर्यवसायीति सिद्धान्तमुक्तावलीस्थ'कृष्णसेवा सदा कार्ये'ति वाक्यानुगुण्यमेव गुणः । कृष्णो भगवान् । भगवानिव भगा अपि सेव्या इति । अन्यथा युगलगीते'कृष्णे वनं यात'इत्युक्ते सति तल्लीलाः प्रगायन्त्य इति वक्तव्ये'कृष्णलीलाः प्रगायन्त्य' इत्युक्तौ कृष्णपदं व्यर्थं सत् किंचिज्ज्ञापयति कृष्ण इव कृष्णलीला इति ख्यातिप्रयोजनको ग्रन्थः स्यात् । भगा लीलावत् । धर्मी त्वरसः, सर्वरसोयं त्वैश्वर्यधर्मोद्भुतरसः ।

ऐश्वर्यलक्षणम् । ईश्वरस्य भाव ऐश्वर्यमित्यत्र प्रकृतिजन्यबोधे प्रकारस्य महात्मन ईश्वरेण सह भेदसम्बन्धस्याव्युत्पन्नत्वेनालौकिकविषय एव युक्त्यगोचरेऽभेदसंसर्ग आस्थीयते, 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति सूत्रभाष्योक्तरीत्या । आस्थिते च प्रकृतिप्रत्ययार्थाभेदे ऐश्वर्यमालम्बनविभावः । तद्गुणातिशया नवनीतचौर्यादय उद्दीपनविभावाः । स्तवकीर्तनाश्रुपातादयोनुभावाः । तनुजवित्तजसेवामाहात्म्यज्ञानवैराग्यगतिधृतिहर्षादयो व्यभिचारिभावाः । देवादिविषयो विस्मयः स्थायिभावः । अत्राधिकारिणो राजसा नराः, 'मल्लानामशनि'रित्यत्र सुबोधिन्यां स्पष्टम् । वात्सल्यरसो धर्मी इत्येवमुक्तं वात्सल्यरसो वा । अथ परिमाणम् । वैश्वानराधिकरणे गोवर्धनाधीशरूपं मूलरूपानुकारत इति तरुणमिति गोपालतापिनीयश्रुत्युक्तस्तरुणाकारः स्पष्ट एव नो प्रोच्यते । तत्रापि 'ह्युत्क्षिप्तहस्तः पुरुषो भक्तमाकारयत्युते'ति भागवतार्थनिबन्धोक्तः श्रीमदाचार्यभावितत्वात् । स चातिरसरूपे यद्वा पुरुषोत्तमयोगाध्याये 'स सर्वविद्भजति मां सर्वभावेन भारते'ति गीता । अत्र गीतायां सर्वभावेन मां भजतीत्यनेन । पूर्वा....भगवद्धर्मधर्मितनुभावरूपमत्र नवतनुस्त्वनिवेशो परिवृढाष्टकटीकायाम् । ऐश्वर्यरूपं तु बाललीलापदसमभिव्याहाराद्व तरुणमिति प्रादेशमात्रं प्रोच्यते । तथा च तत्रैव भाष्यम् । 'शब्दादिभ्योन्तःप्रतिष्ठाना'दित्यादिसूत्रे विरुद्धधर्माणां तत्तद्धर्मोपपत्तिरित्यैश्वर्यमेव भगवतो वर्णितमिति 'आमनन्ति चैन'मिति सूत्रे तस्मात्प्रादेशमात्रो व्यापक इति वैश्वानरो भगवानेवेति सिद्धमिति च । तस्मात्प्रादेशमात्रो व्यापक इति भाष्ये व्यापकत्वांशे 'आनन्दादयः प्रधानस्य' इति सूत्रे लीलापदार्थास्तु ब्रह्मधर्मत्वेन व्यापका उच्यन्ते । व्यापकस्य धर्मिणो अनागन्तुकधर्मस्य व्यापकत्वनियमादिति भाष्यम् । तेन ऐश्वर्यादीनां ऐश्वर्यादय एवं तेषामपीति न भावनीयं पूर्वसूत्रे प्रतिषेधात् । गुणप्रकरणनिबन्धे । ऐश्वर्यादिलक्षणानि । कर्तुमकर्तुमन्यथाकर्तुं समर्थ ईश्वरः । 'येनैतावत्कृतं सर्वं स कृष्णो भगवान्परः । इति दर्शयितुं षड्भिरध्यायैः षड्गुणाङ्गा'विति षड्गुणप्रयोजनं देवकीवसुदेवादीनामन्त-

बहिरानन्ददानं ज्ञानादिना पुत्रादिभ्यश्चातस्तादृशानामन्तर्बहिर्ज्ञानं पुत्रादिभ्य आनन्दान् यः प्रयच्छति । स ईश्वरः स एवैश्वर्यम् वेणुगीते च 'ईश्वरः पूज्यते लोके मूढैरपि यदा तदा । निरुपाधिकमैश्वर्यं वर्णयन्ति मनीषिणः' इति 'धन्याः स्म मूढमतय' 'इत्यस्य सुबोधिन्यां, तथा अन्यान्यपि । बाललीलायां स्पष्टं तु श्रुत्सवाध्याये आनन्ददानं स्वेन पुत्रेण बहिरानन्ददानमैश्वर्यकार्यम् । तथा ग्रामीणानां मूढानां पूजनं चोत्सवाध्यायनिरूपितबालकस्य श्रीनवनीतरायजितः स्मर्यते । तद्रूपे साकारव्यापकत्वमग्रे शृङ्गारस्वरूपे वर्णिष्यते । परं धर्मिणि अतो धर्मे ऐश्वर्यरूपे । अत्रैवं भक्त्या प्रकटे सर्ववेदान्तप्रत्ययाधिकरणोक्तरीत्या सर्वे धर्मा उपसंहर्तव्याः । तेन धर्मी न निर्धर्मकः नापि भिन्नो निरोधं कुरुत इति सिद्धम् । अत्र अन्यथाकर्तुं समर्थत्वं ज्ञेयम्, अन्यद्वा ज्ञेयम् । अत्र श्रुतिः 'व्रजे स बालको भूत्वा क्रीडते पुरुषोत्तम' इति, 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दिति, 'मूर्त्याभिमतया स्वये'ति श्रीभागवतैकादशे, गीता 'यद्यद्विभूतिमदि'ति, सूत्रं 'अन्तस्तद्धर्मोपदेशा'दिति, सूत्राणां न्यायरूपत्वात् प्रतिकृतावपि प्रवृत्तिः, तथापि श्रीगोवर्धननाथजिदन्तर्गतानां धर्माणां....वादिना....तर्यादीनामित्याशङ्कायामत्र सूत्रं 'सर्वाभेदादन्यत्रेम' इति । श्रुतिस्तु सर्ववेदान्तप्रत्ययाधिकरणविषयवाक्यं 'सत्पुण्डरीकनयन'मित्याद्या 'रसो वै स' इति श्रुतिश्च । गीता तावत् साधनाध्यायस्य श्रुतिसूत्रयोरियम् । 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति क्षेत्रक्षेत्रज्ञाध्याये साधननिरूपिका ।

वीर्यरूपेणेति ।

वीर्यरूपेण मथुरां गत्वा भक्ताधिमर्दनम् ।
कृत्वा गतः स्वप्रिययालिङ्गितो भक्ततापहृत् ॥ ९ ॥

एवं 'अचलत्वं चापेक्ष्ये'ति सूत्रोक्ताया आधुनिकनित्यलीलाप्रविष्टभक्तेच्छातो वीर्यरूपेण प्रकटो भवति । सर्वरस इति श्रुतेर्वीरस्य गोवर्धनेशस्य भावो भवति । तदा राजसप्रकरणीयमथुरागमनादिलीलायुतो भवति । भक्ततापहृत्त्वेन टिप्पण्युक्तमधुसूदनत्वेन रूपेण प्रतिमारूपं च भवति । अत्र भक्ततापहृत्त्वं मधुसूदनत्वरूपं शक्यतावच्छेदकम् । प्रसिद्धं मथुरेशजित्त्वं शक्यतावच्छेदकम् । गुणाश्च यथासम्भवमुपसंहर्तव्या एव । अतः प्रिययालिङ्गितः । प्रिया कुब्जा । स सेव्य इत्यन्वयः । राजसप्रकरणीयपञ्चचत्वारिंशाध्याये वैराग्यनिरूपणं न वीर्यनिरूपणं अतः कुब्जारूपया प्रियया वीर्यरूपेणालिङ्गित इति सङ्गतं न भवति । तथैव मथुरां गत्वेति मथुरागमनं राजसप्रकरणीयाष्टत्रिंशाध्याये । 'अथापराह्णे भगवान्कृष्णः सङ्कर्षणान्वितः । मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारित' इति वाक्यात् । अष्टत्रिंशाध्याये च वैराग्यनिरूपणं, न वीर्यनिरूपणम् । अग्रिमाध्याये धर्मिनिरूपणं, न वीर्यनिरूपणम् । तदग्रिमाध्याये चैश्वर्यनिरूपणं, न वीर्यनिरूपणम् । एकचत्वारिंशाध्याये च भक्ताधिमर्दनं, मल्लादिवधस्य कृतत्वेन दर्शनाद्वीर्यनिरूपणम् । अक्षरात्मकत्वेन स्त्रीरूपजीवेषु । अग्रिमाध्याये च मातापितृबन्धविमोचनोग्रसेनराज्यदानादेर्यशोबोधकत्वेन यशोनिरूपणं, न वीर्यस्य निरूपणम् । अग्रिमाध्याये श्रीनिरूपणं, न वीर्यनिरूपणम् । अग्रिमाध्याये ज्ञाननिरूपणं, न वीर्यनिरूपणम् । पञ्चचत्वारिंशे च 'सानङ्गतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रन्त्यनन्तचरणेन रुजो मृजन्ती । दोर्भ्यां स्तनान्तरगतं परिरभ्य कान्तमानन्दमूर्तिमजहादतिदीर्घताप'मिति वाक्याद्भक्तायाः कुब्जायास्तापहृत् ।

---

१. भावनायां सङ्कर्षणमदापकाणीति क्रमः ।

अन्यच्च मथुरां गत्वा वीर्यरूपेण भक्ताधिमर्दनं कृत्वा सान्दीपिनिगुरुं गोपिकाश्च पुत्रद्वारा भ्रमरगीतोक्तज्ञानद्वारा च सान्त्वयित्वा पुनर्मथुरां गत इत्यर्थः । तत्रापि वीर्यरूपेण भक्ताधिमर्दनातिरिक्तलीलाकरणाद्वीर्यरूपेण मथुरां गत्वेत्यादि सङ्गतं न भवति यद्यपि तथापि 'ह्येकं रूपं रसात्पृथ'गिति नैयायिकानां सामानाधिकरण्येन रूपे गुणे एकत्वसङ्ख्या तथा पृथक्त्वरूपो गुणो यथा तथा वैराग्यादिना भक्ताधिमर्दनातिरिक्तं सर्वमुपपद्यताम् । वीर्यलक्षणम् । 'वीर्यं मे दुश्चरं तप' इति वाक्यात्तपः । तच्चिविधम् । 'बुद्धिवीर्यं क्रियावीर्यं क्रिया च द्विविधा मते'त्यस्यां कारिकायां बुद्धिवीर्यं बुद्धिरूपतत्त्वान्तरकृतिः सा सुभद्राप्रसङ्गे लोकदोषेण सर्वदा कन्यात्वेनैव स्थितेरयुक्तत्वादुत्पन्नायाः सुभद्रायाश्चौर्यायार्जुनाय दानकृतिः । अस्याः कृतेः स्थितिलीलायामन्तर्भाव उत्पन्नानां तत्तन्मर्यादया पालनात् । वैकुण्ठस्य सुभद्रारूपस्येच्छाशक्त्या विजयाच्च स्थितिलीलारूपा कृतिः । तथा च युगलगीतसुबोधिनी । वीर्याणि जगत्कर्तृत्वादिरूपाणीति । क्रियावीर्यं तु जनकश्रुतदेवगृहयोरेकेनैव रूपेण गमनकृतिः । यद्यप्यन्यथा कर्तुं सामर्थ्यरूपमैश्वर्यमिदं तथापि ह्यन्यथा कर्तुमित्यंशे क्रियावीर्यमत्र कर्तुं कृतिरिति पर्यायः । तुमुनो भावे विधानात् । सामर्थ्यं चैकीभावलक्षणं व्यपेक्षालक्षणं वा । अन्यथा वैषम्यनैर्घृण्ये स्याताम् । एवं चैकीभावरूपसङ्ख्या ऐश्वर्यम् । कृतिः कर्म वीर्यमिति भेदः । वेणुगीते च 'वीर्यं देवेषु तत्रापि स्त्रीषु तत्रापि कामतः, सान्निध्ये पुरुषाणां च मूर्च्छा तेन ततो महत्' । अत्रापि तत्तन्मर्यादया पालनकर्तृत्वरूपा कृतिर्वीर्यं बोध्यम् । कृतिपदं विहाय वीर्यपदमुपात्तं तत्प्रयोजनं देवेष्वित्यादिनोक्तम् । अत्र वीर्यपदं मुख्यम् । अन्यत्र गौणं यथा पूतनामारणलक्षणवीर्ये एवमग्रेपि सर्वत्रैतादृशविषये बोध्यम् । वीररसस्य विभावादयः । सर्वसामर्थ्यसहितः आलम्बनविभावो मूर्त्तिः । भक्तानां वीररसभावनमनुचितमिति सर्वसामर्थ्यसहित इति विशेषणम् । वीरप्रकृतिकभक्तनिरोधार्थं वा लीला, तदा विशेषणं न देयम् । उद्दीपनं महाबलकुवलयापीडहननम्, 'लीलयेभो हतो येन सहस्रद्विपसत्त्वभृ'दिति चाणूरवाक्यात् । बालकिशोरोपेक्षणं कृष्णं प्रति स्पर्धा चानुभावौ । 'न बालो न किशोरस्त्व'मिति चाणूरवाक्यात् । गजादपि बलिष्ठत्वस्मरणं व्यभिचारिभावः । 'तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोत्र वै' इति वाक्याद् उत्साहः स्थायी भावः । परिमाणं तु 'समो मशकेन समो नागेने'त्यादि श्रुत्युक्तम् । प्रादेशमात्रं वा तावतोपि प्रादेशस्य सम्भवादवतारादौ । श्रुतिः 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दिति महानारायणोपनिषत्स्था । सूत्रम् 'अन्तस्तद्धर्मोपदेशा'दिति । न्यायरूपत्वात्, गीता, 'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंशसम्भव'मिति । तथापि श्रीगोवर्धननाथजिदन्तर्गतानां सेवादि न तत्प्रभूतानामैश्वर्यादीनामित्याशङ्कायाम् । सूत्रादिकं पूर्वोक्तं सर्वाभेदादित्यादि । गुणोपसंहारक्लेशे तु श्रुतिरन्या । गोपालतापिनीये 'शङ्खचक्रगदापद्मवनमालावृतस्तु वा' इति । अत्र दक्षिणभागमारभ्य शङ्खपद्मगदाचक्राणि बिभ्रन्मधुसूदनो भवति ।

अत्र प्रमेयप्रकरणीयलीलाप्रसिद्धेतिभावनायां द्वारकानाथजित्तनुजगोविन्दजित्कृतायामस्ति तदा कालियदमनक्रियया श्रीगोपालवशीकरणाद्वीर्यम्भवति परं मथुरां गत्वेत्यादिविरोधाद्गुणोपसंहारेण योज्यमत्र एवं सर्वत्र । मूलरूपस्येश्वरस्य धर्मैरैश्वर्यादिचरित्रं प्रमेयप्रकरणीयं योज्यमत्र ।

१–ज्ञानद्वारेत्युक्तत्वाज्ज्ञानरूपेण गतः । २–शक्यत्वं सामर्थ्यं प्रपञ्चे अशक्यत्वभानात् । ३–प्रपञ्चे कृतप्रयत्नापेक्षः ।
४–एकीभावेन एको भगवान्नीलास्यपदार्थश्चेति प्रतीत्या रूप्यते व्यवह्रियत इत्येकत्वमिति तद्रूपा सङ्ख्या ।

यशोरूपेणेति ।

यशोरूपेण भक्तार्तिं हृतवान्स्वप्रयासतः ।
सर्वशक्तियुतः प्रेम्णा स सेव्यो विट्ठलेश्वरः ॥ १० ॥

अश्नुते अश भोजने, अशेर्देवने युट् चेत्यसुन् यशः । पूर्वोक्तप्रकारेण भक्तानामिच्छातो यशोरूपेण प्रकटो भवति । यशोरूपेण प्रेम्णो ज्ञापकविरहात्मकशब्दात्मकस्य योजनेन सात्त्विकभगवद्भक्तानामार्तिः गीतोक्ताधिकाररूपा 'चतुर्विधा भजन्ते मा'मिति फलप्रकरणीयद्वितीयाध्यायोक्ता । तस्य यशोनिरूपकत्वात् तृतीयेध्यायेपि । तत्र च भक्तानामवस्थाद्वये द्वितीयावस्थानुपचिते विरहानुभवो अतो भक्तानामार्तिः । **तामार्तिं स्वप्रयासतः** स्वस्य प्रेम्णा ज्ञापक इत्याद्युक्तः प्रयासः प्रयत्नः प्रमेयबलं ततः सर्वासु शक्तिषु व्रजवनितासु हृदि युतो मिश्रितः । विरहे आन्तरत्वाद्विट्ठलेश्वरस्य । तादृशः सन्नार्तिं हृतवान् । 'आन्तरं तु परं फल'मिति सुबोधिन्याः परत्वावच्छिन्ने फले ये विविधा भावा उत्पद्यन्ते न ते सङ्गमे इति । एतज्ज्ञापितं नयनमुद्रणेन विरहेन्तर्भावे ज्ञानाभावात् । अतोत्र संयुक्तो रतिपतिः वियुक्तस्त्वग्निरूप इति । स **विट्ठलेश्वरः प्रेम्णा** हर्षभावेन **सेव्यः** । 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्त', इति काव्यप्रकाशात् । अत्र विट्ठलेश्वरत्वं शक्यतावच्छेदकम् । अत्र यशोरूपविट्ठलेश्वर आलम्बनं मन्दिरोत्सवादिकमुद्दीपनम् । हर्षकारणत्वात् । अश्रुपातादयोनुभावाः हर्षकार्यत्वात् । वैराग्यतनुवित्तजसेवादिसञ्चारिभावाः । हर्षः स्थायी भावः । विस्तारिकायां हर्षस्योत्सवादिभिरुत्पत्तिकथनात् । उद्दीपनेपि ह्युत्सवादिकमुपात्तम् । प्रेम्णः सञ्चारिणोस्य हर्षस्य स्थायिभावत्वं शान्तरसे निर्वेदवत् । अस्य दुःखात्मकस्यापि सुखरूपत्वं रसस्यापरिमितलोकोत्तरानन्दरूपत्वेन तदन्तर्गतदुःखस्यापि सुखरूपत्वम् । नखक्षतकृतदुःखस्येव अत्र प्रेमपदमावृत्तं तच्च स्वाश्रयानन्दे लाक्षणिकम् । अतोत्र प्रेमपदेन हर्षो रसः । श्रीकृष्णगोपिकाप्रौढेत्यादिना वक्ष्यते । वैश्वानराधिकरणोक्तं प्रादेशमात्रं परिमाणम् । निबन्धे लौकिकालौकिककर्तृत्वम् । वेणुगीते यशोलक्षणम् । 'समपादाम्बुजं सूक्ष्मं कटिलग्नं भुजद्वयम् । किरीटिनं लसद्वक्त्रं विट्ठलेशमहं भज' इति शङ्खचूडहननेन स वैराग्ययुतः शङ्खयुतः । मूलरूपनिष्ठं वैराग्यं अपि यशोरूपेपि प्रत्येति । एकं रूपमितिवत् । पीठं तु सर्वात्मभाववद्भक्तहृदयम् । निर्गुणे भगवद्रूपे मूढानां सात्त्विकभगवद्भक्तानां प्रत्यक्षासक्तिवारणं विधाय ज्ञानभक्त्यात्मकं स्वधर्मं तेषु योजयित्वा तज्ज्ञापकविरहात्मकं शब्दात्मकं च योजयित्वा मनसो निवेशनं यत्तत्करणत्वं यशस्त्वं अष्टाविंशतितत्त्वसम्मिते नाम्नि यशसीत्यादिगुणप्रकरणे श्रुतिगीताध्याये कारिकासु लक्षणं वेणुगीतीयलक्षणसंमेलनेन । तदुक्तं वेणुगीते । 'यशो यदि विमूढाना प्रत्यक्षासक्तिवारणात् । स्वधर्मं योजयेत्तेषु तदा भवति नान्यथे'ति । अत्र प्रयोगः । अत्र यशसा, मूढानां भक्तानां प्रत्यक्षासक्तिवारणज्ञानभक्तियोजनोभयद्वारा निर्गुणे भगवद्रूपे मनोनिवेशनं कारयतीति । 'यशः कीर्तिः समाज्ञा च स्तवः स्तोत्रं स्तुतिर्नुति'रित्यमरः । आधारोत्कर्षाधायकगुणवर्णनं स्तुतिः । एतदेवाधारोत्कर्षाधायकसर्वजनाह्लादकगुणवत्त्वम् । गुणवद्गुणवर्णनम् तत्त्वं स्तुतित्वं यशस्त्वमपि । विदा ज्ञानेन ठान् शून्यान् लात्यनुगृह्णाति यः स्वयं स विट्ठलः कथ्यते बुधैः स ईश्वरो विट्ठलेश्वरः पुष्टिरूपमिदम् । शङ्खचक्रगदापद्मश्रिया जुष्टमिति मर्यादारूपम् ।

विरह इत्यादि ।

विरहे भावितप्रेम्णा प्रियया द्वारिकास्थितः ।
मार्गतोङ्गीकृतः सेव्यः श्रियेया द्वारिकेश्वरः ॥ ११ ॥

१–निर्गताः प्रकृतिगुणा यस्माद् । नित्यलीलास्थे । २. श्रिया वा इति पाठः ।

उत्तरार्धे एकत्रिंशाध्याये अष्टाविंशे वा स्पष्टोर्थः । तत्र निर्गुणः कृष्णः गुणत्रयाभावः कृष्णश्चेति । त्रिविधभक्तदुःखहर्ता समष्टिव्यष्टिभेदेन इति । यद्वा द्वारिकास्थितः उत्तरार्धप्रथमाध्याये । प्रिया रुक्मिणी तया तद्विरहे भावितः पञ्चाशत्तमे आगतो रुक्मिण्याङ्गीकृतः श्रियायेति । अत्र पञ्चाशत्तमे श्रीरूपरुक्मिणीनिरूपणेन श्रीनिरूपणादिति भावः । श्रिया वा इति पाठः । श्रयति हरिमिति श्रीः क्विब्वचीति क्विबूदीर्घौ । यद्वा प्रकृतिपुरुषौ रामकृष्णौ अतो योगेन बन्धूनां द्वारिकास्थापने मनसापि द्वारिकास्थितः प्रियया प्रकृत्या रामरूपया प्रेम्णा विरहाय भावितो मन्त्रितः मनसा आगतः अङ्गीकृतो विरहार्थं बहिर्गमनम् । श्रियेति पूर्ववत् । पद्मगदाचक्रशङ्खाश्चतुर्षु श्रीहस्तेषु माधवष्टिप्पण्युक्तदिशा गदाचक्रे दक्षिणयोरब्जशङ्खौ वामयोर्धारयन् भवति अत इदं रूपान्तरम् । शङ्खगदाद्युदायुधमिति वाक्ये शङ्खगदे आदी ययोस्ते शङ्खगदादिनी पद्मचक्रे उदायुधे यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । शङ्खपद्मे दक्षिणे गदाचक्रे वामयोर्धारयन् कृष्णो भवति एवमेतानि धारयति यदा शङ्खचक्रगदापद्मक्रमेण कृष्णो भवति तदा तानि हस्तेषु धारयन् वर्तते । यदा शङ्खाब्जचक्रगदा धारयन् नारायणो भवति इतिवत् शङ्खगदयोः आदिनी चक्रपद्मे उदायुधे यस्येति विगृह्य वामपरावृत्तः क्रमः । शङ्खचक्रगदापद्मविराजितमथुराजन्मलीलो वनमालीति प्राप्तम् । श्रीलक्षणं निबन्धे 'हरिरेव श्रियं भुङ्क्ते श्रियं नान्यस्तु कश्चन' इति हरिभोग्यत्वम् । 'श्रियो हि परमा काष्ठा सेवकास्तादृशा यदी'ति वेणुगीते । आश्रयत्वाच्छ्रीधर्मः । परिमाणं प्रादेशमात्रम्, तावत्प्रदेशस्य वामनावतारादौ सम्भवात् । रसस्तु शृङ्गारः । 'रुक्मिणीरमणः कामपिते'ति पुरुषोत्तमसहस्रनाम्नः । भक्तिरसे तु कामो दिदृक्षामात्रं श्रुतिस्तु 'यदेकमव्यक्तमनन्तरूप'मिति अनन्तरूपेषु तावत् प्रादेशमात्रं रूपम् । 'अन्तस्तद्धर्मोपदेशा'दिति सूत्रम् । प्रतिकृतेः सूर्यत्वाभावेपि सूत्राणां न्यायरूपत्वेन प्रतिकृतावपि प्रवृत्तेः । गीता 'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंशसम्भव'मिति ।

ज्ञानं क्रमप्राप्तं निरूपयितुमादौ गोकुलचन्द्रमसं निरूपयन्ति **कदाचिदि**त्यादि ।

कदाचित् यमुनातीरे ज्ञानरूपेण वेणुना ।
प्रियामाकारयन्सेव्यस्त्रिभङ्गो गोकुलाधिपः ॥ १२ ॥

अत्र ज्ञानस्वरूपं निरूप्यते, अतो ज्ञाननिरूपके युगलगीते **कदाचित्** युगलैर्गीतकाले । **यमुनातीरे** 'तर्हि भग्नगतयः सरितो वै' इति वाक्यात् । **ज्ञानरूपेण** इति । अत्रापि मूलरूपगुणाः पूर्णानन्दैश्वर्यादयः सामानाधिकरण्येन उपसंहर्तव्या नान्ये तु गुणाः । गुणोपसंहारपादोक्तरीत्या भक्तेच्छया ज्ञानरूपेण प्रकटो भवति । अभेदे प्रकृत्यादिभ्यः उपसङ्ख्यानमिति वार्तिकेन तृतीया । ज्ञानाभिन्नगोकुलाधिप इत्यन्वयः । **त्रिभङ्गः** त्रयो भङ्गाः कटिग्रीवाचरणेषु यस्य सः । **गोकुलाधिप** इति । 'श्रीमद्गोकुलपालक' इति गोकुलाष्टकात् अन्यथा नन्दगोकुले तदीयजनैर्न गीतो भवेत् । युगलगीते 'वामबाहुकृतवामकपोलः' अत्र तु दक्षिणबाहुगतदक्षिणकपोलः । वामपरावृत्तो देवस्त्रीणाम् । स्त्रीणां पुरुषाणां च दक्षिणपरावृत्तो भावोद्बोधको वेणुनाद इति श्रीगोकुलचन्द्रमा इति प्रसिद्धः । **आकारयन्सेव्य** इति । 'हन्त चित्रमबला' इत्यत्र हन्त अबला इति सम्बोधनं गत्वा दर्शनाभावायेति सुबोधिन्याः आकारयन् न तु सर्वशक्तिसंयुक्तः । अत्र शक्यतावच्छेदकं गोकुलाधिपत्वम्, प्रसिद्धं गोकुलचन्द्रमस्त्वम् । अथ ज्ञानलक्षणम् । क्षमालिङ्गेन स्वभावपरावृत्तिलिङ्गेन च माहात्म्यज्ञानं ज्ञानोत्कर्षश्च सारम् । ज्ञानवान् क्षमावत्त्वाद् भृगूपाख्याने कृष्णवज् ज्ञानोत्कर्षवान् स्वभावपरावृत्तेः

---

[1] मधुसूदनः ।

वेणुगीते 'नद्यस्तदा तदुपधार्ये'ति छन्द उक्तनदीवत् इति । गुणप्रकरणे कारिका 'ततः परन्तु ज्ञानस्य निर्णयो हरिमेधसः क्षमा तस्योत्तमं लिङ्गं कृष्ण एव प्रतिष्ठिते'ति 'ज्ञानोत्कर्षस्तदैव स्यात् स्वभावविजयो यदि, हरेश्चरणयोः प्रीतिः स्वसर्वस्वनिवेदनादि'ति ज्ञानलक्षणं वेणुगीते । एवं च भृगूपाख्याने यथा क्षमा तथात्रात्मारामत्वलक्षणस्वभावपरावृत्तावपि ज्ञानोत्कर्षः प्रतीयते । भावस्तु स्मृतिः । उक्तकाव्यप्रकाशात् । रसो भविष्यति शृङ्गाररससंचारिभाववैराग्यवत् । अत्र ऐश्वर्यादीनां पाठक्रमादिव क्षणेन ज्ञानरूपः स्मरणविषयः श्रीगोकुलेन्दुरालम्बनं सदृशादृष्टचिन्ताद्युद्दीपनं वेणुनादप्रभावो देहविस्मरणं नृत्यमोहादि, 'वृन्दावनं सखि भुव' इत्यत्र 'कृष्णं निरीक्ष्य वनितोत्सवचारुवेश'मित्यत्र च निरूपितोऽनुभावः । वैराग्यसेवादयः सञ्चारिणः । स्मृतिः स्थायिभावः । परिमाणं पूर्वोक्तं सेव्य इति पदात्सूत्रादिकं च पूर्वोक्तम् ।

वैराग्यमाहुः । स्वीयेति ।

स्वीयविद्वेषिवैराग्यलीलयाधारयद्गिरिम् ॥
तद्रूपेणार्तिहृत्सेव्यः प्रभुर्गोवर्धनेश्वरः ॥ १३ ॥

स्वीया गोकुलस्थास्तद्विद्वेषीन्द्रादिस्तत्र वैराग्यं विषयवैतृष्ण्यसंज्ञं नित्यलीलाप्रवेश इन्द्रादिविषयतृष्णा स्यात्तदभावाय वैराग्याय साधनप्रकरणे चतुर्विंशाध्याये कृतापराधेपीन्द्रे प्रसादान्मदत्याजनं लिङ्गं तेन दोषदूरीकरणरूपा लीला तया हेतुभूतया लीलया कृत्वा द्वाविंशोक्तायामेकं रूपमितिवच्छ्रियां मुख्यतया प्रतीतायां श्रीगोवर्धनगिरिमधारयदतो वैराग्यरूपाभिन्नो गोवर्धनेश्वरो भक्तार्तिहृत्प्रभुः सेव्य इति भावः । गोवर्धनयुत ईश्वरः श्रीगोवर्धनमन्यथाकर्तुं समर्थः गोवर्धनेश्वरः गोवर्धनस्य ईश्वरः इति विग्रहे षष्ठी संयोगसम्बन्धे इति युतपदेनोक्तं, न तु मध्यमपदलोपिसमासः वैराग्यरूपेण प्रकटे ईश्वरत्वं एकं रूपमितिवत्प्रत्येष्यति । त्रयोविंशे 'यः ससहायन' इत्यत्र वेणुं वादयन्निति सुबोधिन्या वेणुवादकः एकत्र करे शङ्खः । मेघतत्त्वापहारेण निर्वीर्या मेघाः कृताः । 'अपां तत्त्वं दरवर' इति वाक्यात् । आधिदैविकसंबन्धेनेन्द्रदत्तजलपानं कृतमिति भावनायाम् । गोवर्धनेश्वरत्वं शक्यतावच्छेदकम् । भावस्तु मतिः । रसो भविष्यति । श्रीमद्गोवर्धनेश्वर आलम्बनम् । गुरूपसत्तिशास्त्रार्थोपदेशाद्युद्दीपनम् । सेवाद्यनुभावः । शमदमेहामुत्रफलभोगनैराश्यमुमुक्षुत्वानि सञ्चारीणि । गुरूपसत्तिः शास्त्रार्थोपदेशमन्त्राद्यैरर्थनिर्धारात्मकमतिः स्थायिभावः । ननु वैराग्यं स्थायिभावः तत्प्रसङ्गादिति चेत्सत्यम् । एकं रूपमिति यत्प्रत्येष्यति वैराग्यस्य धर्मिरूपत्वात् । परिमाणं प्रादेशमात्रम् । त्रिभङ्ग इत्यनुवर्तनीयम् । पीठं त्वक्षरात्मकं वर्तुलम् । वैराग्यलक्षणं पूर्वोक्तम् । अत्राप्युत्कर्षो वेणुगीते 'उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदि । भक्त्या च तादृशत्वं च सा सेवा सेवकोचिते'ति । तादृशत्वं सखित्वम् । तदुक्तं गुणप्रकरणे–'कृष्णो विरक्तः किं वाच्यस्तत्संबन्धात्स्त्रियोऽपि हि । कामैकरसपूर्णाश्च विरक्ताः सर्वथा मता'इति । अत्र भक्त्या हरेरपि हरयोत्र हि स्त्रियः सख्यश्चेति कामैकरसपूर्णासु सर्वथा वैराग्यं विषयवैतृष्ण्यलक्षणम् । सूत्रादिकं पूर्वोक्तम् ।

अन्यत्रोभयोः स्वरूपयोर्ज्ञानवैराग्यवैपरीत्यं देवपदेन शृङ्गाररसत्वेन तुरीयं तत्त्वं निरूपितम् । परं'यतो वाच' इति श्रुतेस्तदेकप्राधान्यं संदिग्धमिति धर्मत्वेन शृङ्गारमाहुः । मदनमित्यादि ॥

मदनं कामरूपेण स्त्रीभावाद्भावितो हरिः ॥
मोहयन्मूलरूपेणावतीर्णः सेव्य एव सः ॥ १४ ॥

भावितो दैन्येनोत्पादितो हरिः शौरिः श्रीभावान् शृङ्गारभावान् हेलालीलादिहावजनकान् मोहयन् तेषां वैचित्र्यं कुर्वाणो हि कामरूपेण साक्षान्मन्मथमन्मथरूपेण कामाधिदैविकरूपेण श्रीनिरूपके श्रीप्राधान्येनावतीर्ण एकोनत्रिंशाध्याये यः स एव धर्मिनिरूपके त्रिंशाध्याये 'तत्रातिशुशुभे ताभिर्भगवान्' इति वाक्ये श्रीलक्षणाच्छ्रीरूप एव मूलरूपेणानन्दरूपेण त्रिंशाध्याये 'योगेश्वरेण कृष्णेने'ति कृष्णपदान्मदनं मोहयन्नित्येवमवतीर्णो धर्मी सेव्यो न सन्देह इत्यर्थः । 'अपि संराधने प्रत्यक्षानुमानाभ्या'मिति व्याससूत्रात् । 'यतो वाच' इत्यस्या उत्तरार्धे 'आनन्दं ब्रह्मणो विद्वान्' 'इति श्रुतेः' । अन्यथा शोक एवावतिष्ठेदिति भावः । मदनं मोहयन्निति त्रिंशाध्यायसन्दर्भीयमिति मदनमोहनजित्त्वं शक्यतावच्छेदकं न तु श्रीभावमोहनजित्त्वम् श्रीभावान्मोहयन्नित्यस्य वाक्यस्यैकोनत्रिंशाध्यायसन्दर्भीयत्वात् । अत्र भाव उक्तकाव्यप्रकाशाद् रसो भवत्येव । श्रीमदनमोहनजिदालम्बनं स्वामिन्यौ च । उद्दीपनं मंदिरोद्यानादि अनुभावोश्रुपातादिः । संचारिणो वैराग्यादयस्त्रयस्त्रिंशत् । रतिः स्थायी भावः । परिमाणमत्रापि प्रादेशमात्रम् । त्रिभङ्ग इत्यत्राप्यनुवर्तनीयम् । तासां द्वयोः स्वामिन्योर्मध्य एकं स्वरूपं त्रिंशाध्याये वर्तत एव । गोकुलाधीशजित्यप्ययं उभयस्वामिनीमध्यस्थत्वरूपो गुण उपसंहर्तव्यः । धर्मिलक्षणं तु साधनाध्यायद्वितीयचरणेस्त्येवोभयव्यपदेशाधिकरणेऽतस्तेपि विरुद्धाः सर्वे गुणा उपसंहार्याः । एकं रूपमितिवदपि ज्ञेयाः । सूत्रादिकं पूर्वोक्तम् ।

षट्स्वौत्संगिकेषु स्वरूपेषु तेषु चान्यरूपेषु गुणोपसंहारैरनेकलीला अतिदिशन्ति स्म । एवमित्यादिना ।

एवंविधानेकलीलारूपैस्तद्भावभाविताः ।
सेवयेदन्यथा तु स्यादपराधो न तत्फलम् ॥ १५ ॥

षट्सु स्वरूपेषु प्रथमं श्रीबालकृष्णजित्स्वरूपम् । एवंविधा एवमुक्तपरामर्शे ऐश्वर्यादिभ्यस्तत्कारणलिङ्गज्ञापिका लीला उक्तास्तत्परामर्शेन विधाः प्रकारा यासां ता अनेका लीला अर्थात्तत्सदृश्यो लीलाः यथा प्रमाणप्रकरणीयोत्सवाध्यायप्रतिपाद्या ऐश्वर्यज्ञापकनन्दाद्युत्सवलीला तत्सदृशी प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिजनकत्वेन महापुरुषकर्तृत्वेन भवनाशकत्वेन च वीर्यलीला पूतनामारणलक्षणा । एवं यशःश्रीज्ञानवैराग्यधर्मिणां लिङ्गभूताः कारणभूता ज्ञापिकाश्च या लीलास्ताभी रूप्यन्ते क्रियन्ते लिङ्ग्यन्ते ज्ञाप्यन्ते ये वीर्यादयस्तैरूपैः कृत्वा तासां मूर्तीनां भावैरुक्तै रससंयोगभावविस्मयभाववीरहर्षस्मृतिज्ञानशृङ्गारभावैश्च भावित उद्बुद्धसंस्कारादिभिर्भावनास्मरणं तद्युक्तः यथायोग्यं पूर्वोक्ता गोवर्धनाधीशादिमूर्तीः षडौत्सङ्गिकमूर्तीश्चान्यामूर्तीश्च सेवयेदित्याज्ञा विधिराज्ञा । अन्यथान्यैः प्रकारैः सेवने तु "योऽन्यथा सन्तमात्मानमन्यथाप्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणे"ति श्रुत्युक्त आत्मापहारलक्षणो दोषरूपोपराधः स्यान्न तु सेवाफलमित्यर्थः । तत्र उत्सङ्गे य कथ्यते स औत्सङ्गिकः श्रीबालकृष्णजित् । शैषिकः प्रत्ययः । यशोलीला प्रसिद्धा शकटभञ्जने यशोनिरूपके सप्तमाध्याये नात्र हि फलप्रकरणे । 'यशोरूपेण कृष्णोत्र प्रकटो बाललीलया । नवनीतादिचौर्येण स सेव्यस्तत्स्वभावतः' ॥ १ ॥ व्याख्यातम् ॥ गोविन्दजित्कृतभावनायामपि यशोलीला पूर्वोक्ताङ्गीकृता । शेषं यशो निरूपणवत् । पञ्चस्वौत्सङ्गिकेषु भावनायां भावना उदिताः । तथाहि श्रीनटवरजिति यशोलीला तृणावर्तभङ्गरूपा सप्तमाध्याये यशोनिरूपके । 'यशोरूपेण कृष्णोत्र प्रकटो बाललीलया । नवनीतादिचौर्येण स सेव्यस्तत्स्वभावतः' । व्याकृतम् । श्रीनवनीतप्रियजित्पार्श्वे श्रीमदनमोहनजित् श्रीबालकृष्णजिच्च स्वस्वत्र । 'मदनं कामरूपेण श्रीभावाद्भावितो हरिः । मोहयन्मूलरूपेणावतीर्णः

सेव्य एव सः’ । निरूपितम् । अत्र जृम्भालीलेति भावनायां यशोनिरूपके सप्तमाध्यायेऽस्ति । ‘यशोरूपेण कृष्णोऽत्र प्रकटो बाललीलया । नवनीतादिचौर्येण स सेव्यस्तत्प्रभावतः’ । अत्र श्रीबालकृष्णजिति जृम्भालीला सत्त्वशुद्धिलीला च । जृम्भालीलाभावने ‘यशोरूप’ इत्यादिकारिका । सत्त्वशुद्धिलीलानाम धौर्यादिलीला अष्टमाध्यायोक्ता श्रीरूपा । ‘स्वश्रीरूपेण श्रीकृष्णः प्रकटो बाललीलया । नवनीतादिचौर्येण स सेव्यस्तत्प्रभावतः’ । श्रीनिरूपणे उक्तप्रायम् । गोकुलचन्द्रमोजित्पार्श्वे श्रीबालकृष्णजित्युलूखललीला प्रसिद्धा ज्ञानरूपा । ‘एकदा भाण्डस्फोटेन रज्ज्वन्यूनतयापि हि । ब्रह्मत्वबोधनाख्यं हि ज्ञानं कुर्वन् स सेव्य उ’ । ज्ञाननिरूपणे पूर्वं स्फुटम् । श्रीमदनमोहनजिति नलकूबरमणिग्रीवोद्धारलीला प्रसिद्धा । ‘दामोदरेण’ ‘परमविक्रमिताऽतिवेपस्कन्धप्रवालनिटपा’विति पदाभ्यां वीर्यरूपा । ‘वीर्यरूपेण यमलार्जुनौ गत्वाधिमर्दनम् । कृत्वा च मोचितौ चैव तद्रूपं सेव्यमेव च’ । वीर्यनिरूपणे स्पष्टम् । भावनायामप्येवम् । बालस्यात्र मदनमोहनक्रीडानुकरणं न मदनमोहनत्वम् । इति तद्रूपनिरूपणम् ।

त्रिषु साकारव्यापकं तद्रूपं च निरूप्य तत्र स्थितं निरूपयितुं यद्यपि तत्र स्थिता अन्येऽप्यद्भुतादिरसाः पूर्वमुक्तास्तथापि शृङ्गाररसेनैवान्ये रसतां भजन्त इत्यावश्यकमन्येषु रसेषु रसताजनकं शृङ्गारमङ्गीकुर्वन्तः शृङ्गारेणाविहितभक्त्यात्मकेन यथा ब्रह्मत्वेन स्नेहः पुष्टो भवति न तथाऽविहितेन वात्सल्येन मत्या वा भवतीति गुरुभूताभिर्व्रजसीमन्तिनीभिरादृतम्, अक्षराभिन्नोऽक्षरे प्रतिष्ठित इति अदृश्यत्वाधिकरणेऽक्षरस्यापि ब्रह्मत्वं पुरुषस्यापि तयोः परापरभावः अभेदश्च, एतादृश एव हि ब्रह्मवाद इति भाष्यात्तादृशं शृङ्गारं निरूपयांबभूवुः प्रतिज्ञापूर्वकं मङ्गलाचरणपूर्वकं चाज्ञानां गीताद्यविदुषां स्वविघ्नसम्भवात् शृङ्गारस्वरूपम् । कन्दर्पेत्यादि ।

कन्दर्पकोटिलावण्यं नत्वा गोपीजनप्रियम् ।
शृङ्गाररसरूपं हि यादृक् तादृङ् निरूप्यते ॥ १ ॥

ननु पुरःस्फूर्तिकं ब्रह्मत्वं तत्र स्थितं रूपं न त्यक्तुं योग्यमतः कुतः शृङ्गाराङ्गीकार इति चेच्छृणु । ब्रह्मत्वं सत्यत्वादिरूपं शृङ्गारे पर्यवस्यति, श्रीभागवतमते सत्यं परं धीमहीति ब्रह्मणि वेदार्थविस्तारकसति साधौ सत्यपदप्रयोगात्सत्यं लक्ष्मीस्तथा एकादशे ‘आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पित’मिति ज्ञानं ब्रह्म तथाऽशने सङ्कर्षणः शेषस्वरूपोऽनन्त इत्यर्थ उक्त एता........वत्त्वं ब्रह्मवादत्वं........द्वितीय....धन....नित्यस्य लीलावादे । ननु शृङ्गारः कामस्तृतीयशास्त्रप्रतिपाद्यः कथं तुरीयरूपे तुरीयशास्त्रप्रतिपाद्ये कामपुरुषार्थ इति चेन्न ‘भगवानेव हि फलं’ सायुज्यं मोक्ष आनन्दोऽमृतमिति पर्यायाः । सायुज्यं च युनक्तीति युक् सह युक् सयुक् सयुजो भावः सायुज्यम् । ‘सायुज्यं कृष्णदेवेन शीघ्रमेव ध्रुवं फल’मिति निबन्धात् । ‘भगवत्सेवोपयोगिदेहो वैकुण्ठादिषु अलौकिकसामर्थ्यं च’ पुष्टौ फलम्, तत्र वास्तविकाणुत्वविशिष्टानामक्षरात्मकानां जीवानां ब्रह्मणि योगस्तूष्णीमुतानन्दपदवाच्यत्वमपि सायुज्यपदवाच्यस्येति कोप्यानन्द इति संशये गीता प्रवर्तते ‘मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यह’मिति मर्यादामार्गीयमोक्षे मार्यादिकं गर्भाधानमवसीयत इत्येवम् । अत एव ‘सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जित’मिति क्षेत्रक्षेत्रज्ञाध्याय एव ब्रह्मस्वरूपम् । पुष्टिमार्गीयफलयोस्तु ‘आनन्दं ब्रह्मणो विद्वान्’ इति श्रुत्या स्फुट एवानन्दो रसात्मेति द्वादशाध्याये

---

१. रसो वै स इति श्रुत्या च सिद्धम् ।

'तं गोरजश्छुरितकुन्तले'त्यत्र धर्मार्थकाममोक्षाणां चतुर्णां धर्मादिसहितानामेव मोक्ष इत्येकवाक्यतेति शृङ्गाररसो निरूपित इति च सुबोधिनीटिप्पण्यां स्फुटेयं 'अतः शृङ्गारस्वरूपं निरूप्यत' इति प्रतिज्ञा । श्रुतिरूपाणां व्रजसीमन्तिनीनामत्र शृङ्गार एव मनोरथान्तप्राप्तेः 'मनोरथान्तं श्रुतयो यथा ययु'रिति वाक्यात् । आनन्दमात्रं पुराविदामिदं रूपमत एव वेणुगीतसुबोधिन्यां 'कृष्णं निरीक्ष्ये'त्यत्र 'तत्क्वणितवेणुविचित्रगीत'मित्यस्य व्याख्याने गीतं शृङ्गारान्तर्गतमिति विचित्रमिति विशेषणेन शृङ्गार एव सर्वरसा इति नाट्यशास्त्रसिद्धान्त इति विचित्रमद्भुतरसवत् । किञ्च अन्यस्य रसत्वमेव न मन्यन्ते यथा महान्तः सुवर्णाभरणान्येवोपकरणानि कुर्वन्तीति सुबोधिन्यां भावनोक्ताः सर्वत्र शृङ्गारभावना । तथा हि

श्रीगोवर्धनाधीशेषु भक्तमनोरथेन तामसप्रकरणीयफलप्रकरणोक्तपूर्णानन्दैश्वर्यादयः प्रधाने भावेलिमाः 'उत्क्षिप्तहस्तः पुरुषो भक्तमाकारयत्युते'ति भक्तमनोरथपूरकं रूपमालम्बनविभावः शृङ्गारे शान्तरसे च । ननु कुतः शृङ्गार इति बृहदारण्यके ज्योतिर्ब्राह्मणे तद्वाच्यस्यै'तदात्मकाममाप्तकाममका-म९रूपं तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवाय९शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तर'मिति अत्र प्रियस्त्रीदृष्टान्तशारीरात्मप्राज्ञरूपजीव-दार्ष्टान्तिकयोर्दर्शनात् । इदं प्रथमाध्यायतृतीयपादान्ते 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यधिकरण उक्तम् । आचार्यमार्गे तु अन्यत्सर्वं भक्तमनोरथहेतुकं भक्तिरसरूपम् । तत्रालम्बनमुक्तम् । उद्दीपनविभावस्त-च्चेष्टा, अनुभावः भगवता समं संलापादिः, स च भगवच्छय्यादिरूपशेषः पीठस्थः यद्यपि चतुर्भिर्व्यूहै-रेकोत्रालम्बनविभावस्तथापि रामः........पि कृष्णावतारे स दृष्टः अनिष्टशङ्कायाः रसान्तःपातिनो व्यभिचारिभावाः हरिदासनिष्ठाः नृसिंहोऽक्षरावतारः योऽदृश्यत्वाद्यधिकरणे पुरुषोत्तमाधिकरणं तत्रोक्ताभिन्नाक्षरश्चरणारविन्ददौ मुक्तभक्तौ मयूरो, मुक्तजीवः शुकश्च भक्तमुक्तौ त्रयोपि व्रजभक्तानां पुंभावगताः । मेषश्चेष्टारूपः कालः महिषी........क्षे उपवेदादि ऋग्रूपगोभ्यः............पश्चा'दजा गावो महिष्यश्चे'त्यत्र कीर्तनाद् द्वितीयः शेषश्च, भावनीया गावः ऋचः शङ्खश्चेद्यमुनाजित्तयान्तःकरणीया इति ।

श्रीनवनीतप्रियजित्सु गुप्तरसप्रकारो बालभाव एव । निरावृतस्वरूपं रसाधायकमिति कटिवस्त्राणि नो धारणीयानि । वासुदेवव्यूहकार्यस्य मनोरथान्तदान आवश्यकत्वात् । 'जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम् । तदन्यदिति ये प्राहुरासुरांस्तानहो बुधा' इत्यादि ।

श्रीमथुरेशजित्सु भुजाचतुष्टयं स्वानन्ददानं वासुदेवव्यूहस्य सायुज्यदातुः सत्त्वात्तत्क्रीडा पूर्वोक्तश्च व्यूहस्तत्सहिता गोपीजनानां भक्तत्वं..............................गोचारणं कृत्वा व्रजे यदागच्छति तदा भक्तानां स्वमुखामृतपानं कारयति यत्तत् । द्वितीया स्वानन्ददाने प्रति-बन्धनिवारणं विरहजतापस्योपशमनम् । तृतीया स्वसेवाकारणं मार्गे सन्ध्याभोगस्य स्वीकरणम् । चतुर्थी आधिदैविकभावस्य परम्परोद्बोधनं वने चतुर्दशरसानां या लीला कृता सा, प्रत्येकरसानां स्थायिभावान् प्रकटीकृत्य व्रजभक्तासूद्बोधितेति ।

श्रीमद्विठ्ठलनाथजित्सु तामसप्रकरणीयफलप्रकरणद्वितीयाध्यायोक्तलीला प्रसिद्धा तत्र वीर्योक्ते मोक्षप्रसङ्गाद्वासुदेवप्रसङ्गात् वासुदेवचरित्रं बोध्यम् ।

श्रीद्वारकानाथजित्सु

'भ्रूवल्लीसंज्ञयादौ सहचरि निकरे वर्जयित्वा स्वकीयाम्
पश्चादागत्य तूष्णीमथ नयनयुगं स्वप्रियाया निमील्य ।

कोस्मीत्येतद्वचनमसकृद्वेणुना भाषमाणः
पातु क्रीडारसपरिचयस्त्वां चतुर्बाहुरुच्चै'रिति ।

श्रीगोकुलाधीशजित्सु साधनप्रकरणीयऋषिपत्नीप्रसङ्गः ।

श्रीगोकुलचन्द्रमोजित्सु फलप्रकरणीयचतुर्थाध्यायोक्तलीला ।

श्रीमदनमोहनजित्सु फलप्रकरणीयप्रथमाध्यायोक्तलीला भावनीया एवं षट्सु औत्सङ्गिकेषु गुणोपसंहारेण शृङ्गारलीला भावयितव्या । अष्टस्वरूपाणि धर्मिरूपाणीति भावनायां आनन्दमनःशरीरजीवशरीरक्रियाप्राणानङ्गाः क्रमश इति केचित् ।

प्रकृतमुच्यते । **कन्दर्पकोटेर्लावण्यं** सम्भोगशृङ्गारो यस्य तं लवणा त्विट् लवणैव लावण्यम् । स्वार्थे ष्यञ् । 'लवणा त्विषी'ति विश्वः । शृङ्गारनिरूपणे विघ्नस्य ध्वंसाय यः कश्चिच्छृङ्गारस्तद्विशिष्टरूपस्य मङ्गले कर्तव्यं उपादानमुचितमिति विशेषणम् । परकीयास्वेव रस इति विशेष्यमीदृक् ॥ १ ॥

स्वच्छ इत्यादि ।

स्वच्छो मरकतश्यामः स्त्रीपुम्भावात्मकः पटुः ।
अनन्यपरतन्त्रश्च रसः शृङ्गार उच्यते ॥ २ ॥

स्वच्छः श्यामरूपेऽयोग्यश्यामरहितो न शुचिर्नाप्युज्वलः । तेन शृङ्गारपदोपादानेपि न पुनरुक्तिः । 'शृङ्गारः शुचिरुज्वलः' इत्यमरः । **मरकतमणिवच्छ्यामः** । अत्र सुबोधिनी तृतीये षड्विंशेऽध्याये यद्विदुरित्यत्र 'श्यामश्च गुणः शृङ्गारात्मको भवती'ति । भावत्रयाभिव्यक्तः स्थायी श्याम इति भ्रमं वारयामासुः । **स्त्रीति** स्त्रीपुंरूपो भाव आलम्बनविभाव आत्मा स्वरूपं यस्य आलम्बनविभावो **मरकतश्याम** इत्यर्थः । **पटु**श्चतुरः । **न परतन्त्र** इति वक्तव्येऽन्यपदसंवलितपदेन स्वेतरपरो व्युदस्यते नित्यलीलायां स्वात्मकपरेषां तन्त्र इति हृदयम् । **रस इति** । रस आस्वादने । **शृङ्गारः** शृङ्गं प्राधान्यं इयर्ति स शृङ्गारः । कर्मण्यण् । शृङ्गो भावाङ्कुरः । **अनन्यं परं तन्त्रः शृङ्गारो रस इत्यर्थः** ॥ २ ॥

गाढेत्यादि ।

गाढत्वाद्व्यापकत्वाच्च ब्रह्मत्वाच्छ्याम उच्यते ।

शृङ्गारः श्यामो गाढत्वाज्जलवद् व्यापकत्वान्नीरूपनीलाकाशवन् नीरूपो 'नील आकाश' इति प्रस्थानरत्नाकरे प्रमेयप्रकरणे उपपादितम् । **ब्रह्मत्वा**दानन्दवदित्यनुमानत्रयम् । न च गाढत्वं शुभ्रपाषाणादौ, व्यापकत्वं मनआदौ, ब्रह्मत्वं स्वयंप्रकाशादाविति साध्याभाववद्वृत्तित्वात्साधारणा हेतव इति वाच्यम् । हेतूनां श्यामसमानाधिकरणश्यामत्वसमानाधिकरणान्यतरेण विशेषणीयत्वात् । न चैवमपि पक्षे हेत्वसिद्धिः विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वेन विशेषणीभूतश्यामाज्ञानप्रयुक्तश्यामसमानाधिकरणगाढत्वाद्यज्ञानादिति वाच्यम् । श्यामसमानाधिकरणश्यामत्वसमानाधिकरणेत्याभ्यां श्यामेतरासमानाधिकरणश्यामत्वेतरासमानाधिकरणयोर्विवक्षितत्वात् । भवति च पक्षे श्यामेतराशैत्याद्यसमानाधिकरणगाढत्वं जलरूपदृष्टान्ते यथा तथा श्यामेतरदुःखासमानाधिकरणगाढत्वं यथा श्यामेतराश्यामत्वासमानाधिकरणव्यापकत्वमाकाशरूपदृष्टान्ते तथा पक्षेऽपि ।

यथा च श्यामेतरानाह्लादकत्वासमानाधिकरणब्रह्मत्वमानन्दरूपदृष्टान्ते तथा पक्षेपीति परगमनप्रणाडीं रसस्याहुः सार्धेन **स्त्रीति** ।

---

१. महत्तत्त्वसूत्राहङ्कारसत्त्वमनसोनिरूपत्वनिरूपके श्यामत्वं देवहूत्यर्थमेव ।

स्त्रीपुंप्रेमविहारात्मगाथानन्दविभावतः ॥ ३ ॥
प्रादुर्भवति कृष्णात्मा हृदि भावाङ्कुरात्मकः ।
अनिर्वाच्यानन्दरूपानन्दानुभवसाक्षिकः ॥ ४ ॥

स्वगतो रसो भवति यदा रामसीतादयः परस्परानुरागे परस्परं कारणानि तदन्वयव्यतिरेकानुविधानात् । कटाक्षादयः कारणानि । असति रत्यादौ तदभावात् । लज्जाहास्यादीनि सहकारीणि न तत्कार्याणि । तेन विनापि सम्भवेन व्यभिचारात् । न वा कारणानि तदुत्तरत्वान्नैयत्यात् । किन्तु स्वसामग्र्या प्रादुर्भवन्ति सन्ति रत्यादेरुपवासकानि भवन्ति । सामग्रीसंपातेन रत्यादेरेव रूपस्य तत्र तद्विचित्रस्मितरुदितकार्यजननायोगेन सामग्रीवैचित्र्यापादकानि । अत्र विभावादिभिरभिव्यक्तः स्थायिभावो रसः । अयं शृङ्गमियर्तीति शृङ्गारः । शृङ्गो भावाङ्कुरः । अनन्यं परं तत्तत्रः शृङ्गमियर्तीति शृङ्गारो रस इति । तथाहि सामाजिकानां सामाजिकरत्यादिवासनाया उद्बोधो हि रसः तस्याश्च रामादयो न कारणानि असन्निहितत्वात् । कटाक्षादीन्यपि न कार्याणि व्यधिकरणत्वात् । तेषामालम्बननिष्ठत्वात् । एवं सहकारिणामपि सामाजिकेष्वभावात् । किं तु तैर्भावनायाः प्रवर्तके सामाजिके बाह्यविषयेभ्यो व्यावृत्ते मनसि ज्ञानसुखात्मको रत्यादिः स्वयं प्रकाशते ज्ञानोपनीता विभावादयोपि तद्विषया इति समूहालम्बनरूपता । विभावनमनुभावनं सहकरणं च तस्य तस्य व्यापारास्तैश्च रत्यादेरीषत्स्फुटतरः स्फुटतमश्च प्रकाशः विभावनमनादिसामाजिकवासनान्तर्लीनरत्यादेर्वासनाया बहिःकरणम् । अनुभावनं तथाभूतस्य रत्यादेरास्वादाङ्कुरयोग्यतानयनम् । सहकरणं तथाभूतस्य तस्यास्वादाङ्कुरप्रादुर्भावनम् । इत्थं व्यापारवैलक्षण्यादित एव कारणादयो विभावादिव्यपदेशात्स्थायिभावो रसः ।

प्रकृतमुच्यते । प्रकृते तु रामसीतावल्लक्ष्मीकलानिध्योः स्त्रीपुंसोः 'वशीकुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा' इति वाक्यात्प्रेमा । अयं शृङ्गार इति काव्यप्रकाशादौ । कथं शृङ्गारमात्रेण वशीभवेत् । शृङ्गारोऽपि भक्ताभावात्कस्येच्छया भवेत् । तेन प्रेम्णा प्रेमा शृङ्गारः । गौण्या प्रेमपदवाच्यः । 'शृङ्गारः शुचिरुज्ज्वल' इत्यमरे शृङ्गारनामानि त्रीणीति । यः प्रेमपदवाच्यः प्रेमा स प्रेमा च प्रेमा च प्रेमाणौ सरूपैकशेषः विहिताविहितभक्तिरूपौ ताभ्यां ये विहारास्तत्र प्रेम्णोवस्थाद्वयं संयोगविप्रयोगात्मकं तत्रापि विरहे सर्वोपमर्द इति न विहाराः संयोगे परं नवरत्नभागवतभक्तिवार्द्धिनीप्रोक्तं भवति सन्न्यासे च निरोधलक्षणग्रन्थोक्तं च भवति नोपदेशनं भक्तिमार्गस्य भगवत्सन्निधाने भगवदतिरिक्तस्यानुचितम् । किञ्च 'समुद्विजे भवद्धेतोः कंसादहमधीरधीः' इत्यत्र टिप्पण्यां ज्ञानमार्गीयसामग्र्या भक्तिमार्गसामग्री बलीयसीति निरूपणाद्भक्तिमार्गसामग्रीपूर्वकशृङ्गारविहाराः 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्म कैतवे' इत्यादि 'मह उद्धव उत्सव' इत्यन्तामरोक्ता नाट्यवर्गे त आत्मनि वाच्यत्वेन यस्यास्तादृशी **गाथा** 'तददोषा'वित्याद्युक्तलक्षणकाव्यवन् निरोधप्रतिपादकदशमस्कन्धीया शब्दात्मिका तत्रा ये **आनन्दाः** श्रवणरूपभजनानन्दाः विषयानन्दविलक्षणाः प्रेम्णा शुद्धानां व्यासाभिमारुतानामतिदुर्लभानां नारायणपराणामवस्थानुकृतिलक्षणनाट्यवतां मुक्तानां मुमुक्षूणां चानन्दाः स्वधर्मप्रेमरूपस्नेहसम्पृक्ताः श्रवणद्वारान्तःप्रविष्टाः तेषां विभावा आलम्बनविभावा मुक्तमुमुक्ष्वादिरूपा भक्त्या तद्रूपा जाता इति उद्दीपनविभावरूपा अप्यालम्बनविभावा जातास्तादृशाः । अत्र विभावव्यञ्जनावृत्तिः । तेषामानन्दानां **विभावतः** । विशिष्टो भावः प्रेमा विभाव आलम्बनोद्दीपनरूपश्च तत्र **प्रादुर्भवति कृष्णात्मेति** कृष्णघटितकार्यस्य शृङ्गारस्य वक्ष्यमाणत्वात् प्रेम्णो **विभावत** इति

पदवाच्याद् हृद्यानन्दः **कृष्णात्मा** सदानन्दसविकल्पकज्ञानरूपः तावतीं मायां दूरीकृत्य **प्रादुर्भवति** तत्र आत्मस्वरूपं यस्य शृङ्गारस्य । प्रकृते पूर्वोक्तोऽयमेव विभावने व्यञ्जनया विभावपदवाच्यमुक्तमुमुक्षुरूपोद्दीपनविभावरूपभक्तानां मनोन्तर्लीनरत्यादेरीषत्प्रकाशः अनुभावनेनानुभावपदवाच्यकटाक्षभुजक्षेपादिभिः स्फुटतरं प्रकाशमाहुः । **भावेति** अनुभावनं तथाभूतस्य रत्यादेरास्वादाङ्कुरयोग्यतानयनमनेन व्यापारेणानुभवपदवाच्यकटाक्षभुजक्षेपादिभिः भक्तानां मनोन्तर्लीनरत्यादेः **भावा अङ्कुरा आत्मनि** यस्य शृङ्गारस्य, यद्वा स्फुटतरः प्रकाशः । इत्थं च कृष्णात्मकस्य भावैरनुभावैर्यथेष्टाङ्कुरं स्वाद्यरूपाङ्कुरं आत्मा स्वरूपं विभावात्मकं यस्य । समासान्तः कप् । भावपदं प्रेमाणमन्तरेण न किञ्चिल्लीलास्थमित्यसूसुचत् । उद्यानाद्युद्दीपनविभावानुवादवत् सञ्चारिणामननुवादः । **सहकरणेन** व्यापारेण तथाभूतस्य रसास्वादाङ्कुरप्रादुर्भावनरूपेण सहकारिपदवाच्यनैराग्यग्लानिशङ्कालस्यदैन्यचिन्तास्मृतिधृतिव्रीडाचपलताहर्षावेगजडतागर्वविषादौत्सुक्यमनिवितर्कादिभी रत्यादिसामग्रीवैचित्र्यापादकैः स्फुटतमः प्रकाशो भक्तानां मनोन्तर्लीनरत्यादेः कृष्णात्मकस्य । तदर्थं विशेषणमाहुः **अनिरिति** । 'यतो वाच' इति श्रुत्युक्तोऽनिर्वाच्यानन्दपदेन रूप्यते यः स **आनन्दस्तस्यानुभवः साक्षी** ज्ञानज्ञेयानामाविर्भावतिरोभावज्ञानात् स्वयमेवमाविर्भावतिरोभावहीनः स्वयंज्योतिः स साक्षीत्युच्यत इति श्रुतेः स्वयं ज्योतीरूपो यस्य कृष्णात्मकस्य स तथोक्तः । समासान्तः कप् । श्रुतिः । 'समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य' इत्यधिकरणे सूत्राणि च । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इति गीता । 'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्वि'ति श्रुतिः । 'ज्योतिश्चरणाभिधानादि'ति सूत्रम् । काव्यप्रकाशेपि 'लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिपरिमितयोगिज्ञानवेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्ययोप्यभिधीयतामि'ति सार्धश्लोकेनोक्तं स्वरूपमभ्यर्हितत्वाच्छ्रुतीनां 'मनोरथान्तं श्रुतयो यथा ययु'रिति वाक्यात् । गुर्व्यस्तास्तु दशधा स्त्रीपुरुषभेदेन विंशतिधाऽतो भक्तमनोरथा अपि विंशतिधेत्यन्येषामप्यधिकारः मनोरथान्तप्राप्तिश्च ॥ ३ ॥ ४ ॥

एवं प्रेमा निरूपितः स न शृङ्गारः । संज्ञाभेदात् । संज्ञाभेदाद्भेदो हि पूर्वतन्त्रसिद्धः । शृङ्गार इत्यन्ये । परं रसत्वेन प्रेमा विवक्षितः । रसत्वं च शृङ्गारमन्तरेणान्येषु नास्तीति शृङ्गारनिरूपणं प्रतिज्ञातम् । स चापुष्टो रसाभास इति तत्पोषकावाहुः । **भावाभासेत्यादि** ।

भावाभासरसाभासौ पोषकौ तस्य सम्मतौ ।

रसाभासभावाभासा अनौचित्यप्रवर्तिताः । 'तदाभासा अनौचित्यप्रवर्तिता' इति काव्यप्रकाशात् । न च रस एव रसाभासः सकलकारणकारणे अनौचित्यप्रवर्तितत्वादिति वाच्यम् । अनौचित्यप्रवर्तकानामनधिकारात् । साधनचतुष्टयस्य शमदमवैराग्यमुमुक्षुत्वरूपस्य ज्ञानद्वारा भक्त्युपयोगः 'शमदमाद्युपेतः स्या'दित्यादिसूत्रभाष्य उक्तत्वाच्च । तथा च वैराग्योत्कर्षः शृङ्गारप्रवर्तकानां न वैराग्यमात्रं 'उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदी'ति वेणुगीतकारिकायाः । 'कामादीतरत्र तत्र चायतनादिभ्य' इति सूत्रे भाष्ये कामस्याविहितभक्तित्वेन निरूपणात् । रसाभासभावाभासा यद्यपि भावं निरूप्य रसं निरूप्य क्रमप्राप्तास्तदाभासा लक्षणीया इति वदन्ति सरस्वतीतीर्थास्तथापि अनुभवसाचिव्यात्पोषकाः क्रमप्राप्ता इत्युक्तं **सम्मताविति** ।

पुष्टस्य तस्य रसस्यावस्थाद्वयं पोष्यत्वायाप्याहुः । **संयोग इत्यादि** ।

संयोगो विरहश्चापि तस्यावस्थाद्वयं मतम् ॥ ५ ॥

तस्य पुष्टरसस्य ॥ ५ ॥

अवस्थेत्यादि ।

अवस्थाद्वयपूर्णो हि स्वकार्यकरणक्षमः ।

अवस्थाद्वयेन पूर्णः पोषकैर्व्यभिचारिभिश्चोपलक्षणविधया पूर्णः । **स्वकार्यं** रसकार्यं आनन्दः सकलबन्धनाशरूपं वा स्वात्मकार्यं 'हृद्रोगमाश्वपहिनोत्यचिरेण धीर' इति वाक्यात् । 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति श्रुतेः ।

एवं सम्भोगविप्रलम्भौ लक्षयित्वा तत्पोषकौ भावाभासरसाभासौ लक्षयाम्बभूवुः । **भावोद्बोधमिति ।**

भावोद्बोधं विना भावसम्पत्त्यर्थं तु या कृतिः ॥ ६ ॥
हास्यस्पर्शादिरूपा हि भावाभासः स उच्यते ।
रसोद्गमक्रिया काचिद्व्याजवाक्यादिसंयुता ।
करोत्यानन्दमन्तर्हि रसाभासः स उच्यते ॥ ७ ॥

श्लोकद्वयेन त्वन्यत्र विरहे रसाभासभावाभासौ श्लोकद्वयेनोदाहृतावित्यत्राप्युदाह्रियेते परं संयोगे । विरहे तु ते एवोदाहर्तव्ये । रतिहासक्रोधादीनां भावानामुद्बोधो रसत्वेन बोधो **भावोद्बोधः** तं **विना** रसता या सञ्जातेति यावत् । **भावः** प्रेमलक्षणा भक्तिः **तत्सम्पत्त्यर्थं तु या कृतिः** । का सेत्यत आहुः । **हास्येति** । हासो हास्यरसस्य स्थायी संयोगे सञ्चारी । यद्यपि सम्भोगस्य परस्परालिङ्गनपरिचुम्बनाद्यनेकभेदत्वादपरिच्छेद्य इत्येक एव गण्यते इति हास्यमपि सम्भोगस्तथापि मुख्यवृत्त्यादरेण सम्यग्योगो गृह्यत इत्यादिपदेनापि संयुक्तपदार्थो ग्रहीष्यत इति परम्परासंयुक्तहास्यं सञ्चार्येव । स्पर्शोपि न संयोगः । परम्परासंयोगात्मकस्पर्शस्य विवक्षितत्वेन सञ्चार्येव । तस्मात् हास्यं 'रागादिवैकृताच्चेतोविकासो हासः' स्वार्थे ष्यञ् हास्यम् । **स्पर्शः** । चेतःपतनप्रतिबन्धकव्यापाररूपा धृतिः । तदुक्तं 'सन्तोषो ज्ञानशक्त्यादेर्धृतिरव्यग्रभोगकृ'दिति विस्तारिकायाम् । ननु धृतिः सञ्चारिणी पोषिका भवतु । हास्यं तु स्थायिभावः कथं पोषकमिति चेन् मैवम् । 'स्थायी भावो रसः स्मृत' इत्यस्य विस्तारिकायां रतिहासक्रोधादीनां स्थायिनामपि करुणशृङ्गारवीरादिषु सञ्चारित्वं स्वीकृतं तेष्वस्थिरत्वाद् इत्यादिकृतीनां भावोद्बोधं विना भावसम्पत्त्यर्थत्वादीश्वरे सकलकारणकारणेऽनौचित्यप्रवृत्तत्वेन भावाभासत्वम् ॥ ६½ ॥

एवं च हास्यस्पर्शादीत्यत्रादिपदेन व्रजभक्तानामिव परिचयलक्षणो भावोऽपि ’तौ विना भावाभास एव । **रसोद्गमेत्यादि** । रसः पूर्वोक्तः तस्योद्गमाय **क्रिया** सा पूर्वोक्तानुभावान्तर्गता नियता, तामाहुः **काचिदिति**। न चात्र भावाभावः। 'अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन्नि'ति वाक्यात् । एवं भगवतोपि व्याजवाक्यादि तत्संयुता क्रिया काचिद्बोध्या । न तु युद्दीपनवैचित्र्यापादिका । तस्याः स्वरूपं **व्याजवाक्यादिसंयुतेति** । आदिपदेन निगुह्यवस्त्वादि । **अन्तरानन्दं करोतीति** पूर्वानन्दभिन्नं करोतीत्यालम्बननिष्ठाकर्त्री तस्या व्याजवाक्यादिसंयुताया बह्वानन्दानां विषयस्य शृङ्गारस्य प्रवृत्तेः **स रसाभास उच्यत** इत्यर्थः । कर्तृबहुविषयशृङ्गारप्रवृत्तेराभासत्वमिति तद्विदः । भावोद्बोधं विना इति पूर्वश्लोकोक्तमनुषज्यत एव तेन तादृशभक्तेच्छया प्रवर्तितस्यानन्दसंयोगस्य रसाभासत्वमनौचित्यप्रवर्तितत्वादिति भावः । व्याजवाक्यादेः सञ्चारित्वं औत्सुक्येन्तर्भावाद् गर्वरूपत्वाद्वा अवहित्थत्वाद्वा । तथाहि । 'व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम्' । उद्भिन्नत्वम-

---

१. अभावसम्परयर्थंभावोद्बोधो विना ।

स्फुटस्य प्रकाशः स्फुटम् । निगूढमपि वस्तुनो रूपं कथमपि प्रतिभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः । उदाहरणम् ।

शैलेन्द्रप्रतिपद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः ।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टो हरः पातु व' इति ।

अत्र पुलकवेपथू सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलापिस्वरूपौ व्याजोक्तिं प्रयोजयत इति । एतादृशव्याजवाक्यादि 'कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्, नित्यप्रिये पतिसुतादिभिरार्तिदैः कि'मिति ज्ञानवतीनां दास्यभक्तीच्छूनां मनोज्ञात्मानं प्रति स्फुटदास्यस्यास्फुटं प्रकाशकानां गोपीनां 'त्वत्सुन्दरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्य'मित्यनेन । यद्वा एतस्याग्रे प्रिययोगात् 'कितव योषितः कस्त्यजेन्निशि' इत्यनेन व्यपदेशेनापह्नूयत इति कुर्वन्ति हीत्याद्येव रसोद्गमत्वादि 'दोहं हित्वा समुत्सुका' इति वाक्यात् पूर्वं सम्भ्रमोपि एतद्वाक्यादनुमीयते तत्संयुता एककार्यकारित्वेन च सम्बन्धेन क्रिया काचिदौत्सुक्यसम्बद्धा तस्याः कार्यत्वेन सम्बद्धमुच्छ्वासादि 'श्वसनेन शुष्यद्बिम्बाधराणी'ति वाक्यात् । तदुक्तं 'कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसम्भ्रमैः । तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमा' इति काव्यप्रदीपे । विस्तारिकाकृत्त्वौत्कण्ठ्यमिति पपाठ । कालाक्षमत्वमित्यौत्सुक्यलक्षणं सम्भ्रमलक्षणं विस्तारिकायां 'आवेगः सम्भ्रमो राजगजवर्षादिसम्भव' इति । तथा तादृशव्याजवाक्यादिमधुपेत्यादिनिन्दारूपव्यपदेशस्तेनापह्नुता तत्संयुता एककार्यकारित्वेन च सम्बन्धेन रसोद्गमक्रिया गर्वसम्बद्धा तस्याः कार्यत्वेन सम्बद्धमसूयादि तदुक्तं 'निन्दादितः परावज्ञा गर्वोसूयादिकृद्भवे' दिति विप्रयोगे 'निन्दादितः परावज्ञे'ति गर्वलक्षणम् । तथा तादृशव्याजवाक्यादि 'त्वत्सुन्दरे'त्यादि तत्संयुता रसोद्गमक्रियाऽवहित्थसम्बद्धा लज्जाद्यैर्हर्षाद्याकारगोपनमवहित्थम् । अत्र कामभावेन प्रेमाकारगोपनम् । आकारगोपनं च 'व्यापारान्तरसक्तित्ववदनानमनादय' इति काव्यप्रदीपे । न च त्वत्सुन्दरस्मितेत्यादिकामभावेन प्रेम्णोरव्यभिचारित्वमात्रं क्रियते 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति गीतातः । न तु प्रेमाकारगोपनमिति शङ्क्यम् । 'अनाविष्कुर्वन्नन्वयादि'ति तार्तीयसूत्रे 'भगवद्भावस्य रसात्मकत्वेन गुप्तस्यैवाभिवृद्धिस्वभावकत्वादाश्रमधर्मैरेव लोके स्वं भगवद्भावमनाविष्कुर्वन्भजेत'इति भाष्यात् । न च कामभावोऽस्वधर्म इति शङ्क्यं 'यत्पत्यपत्यसुहृदा'मित्यत्र स्वधर्मत्वस्योपपादनात् । करोत्यानन्दमन्तर्हीति भावसन्धिवारणाय भावसन्धौ हर्षस्यावेगविरुद्धत्वात् । अतो **रसाभास उच्यत** इत्यर्थः । उभयमन्यत्र काव्यप्रकाशादौ ।

अविरुद्धरसाभासः ।

'स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे ।
सुलभे को जातः शशिमुखि यमालिङ्गसि बलात्
तपःश्रीः कस्यैषा मदननगरि ध्यायसि तु यम्' ।

अत्रानेककामुकविषयो हि पञ्चविधविप्रलम्भान्तर्गताभिलाषो हि पतिव्रतानामनुचितः ।

भावाभासः ।

‘राकासुधाकरमुखी तरलायताक्षी सा स्मेरयौवनतरङ्गितविभ्रमाङ्गा ।
तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इहाभ्युपायः’ ।

इति रावणवाक्यं सीतासन्धिकरणे । अत्र चिन्तानौचित्यप्रवर्तिता । औत्सुक्यमौत्कण्ठ्यं विस्तारिकायां ‘औत्कण्ठ्यं वाञ्छतः प्राप्तौ कालक्षेपासहिष्णुते’ति लक्षणं यथा

‘आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बद्धुं न सम्भावित एव तावत् करेण रुद्धोपि हि केशपाश’ इत्यत्र ।

सम्भ्रमोदाहरणं यथा ।

‘अर्घ्यमर्घ्यमिति वादिनं नृपं सोनवेक्ष्य भरताग्रजो यतः ।
क्षत्रकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम्,’ इति ।

गर्वोदाहरणम् ।

‘धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वाणसिद्धं मन्त्रेण मम तत्केन सेत्स्यति’ इत्यत्र ।

अवहित्थोदाहरणम् ।

‘एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती’ इति ।

भावस्य शान्तिरुदयः सन्धिः शबलता च न रसरूपेङ्गभावादतिरिक्तरूपेणोपयुक्तेति ग्रन्थान्तरादेव ज्ञेया । यथा भावसन्धिः ।

‘उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
तत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः ।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-
न्नानन्दी हरिचन्दनेन्दुशिशिरस्पर्धी रुणद्ध्यन्यतः’ इति ।

अत्रावेगहर्षयोः सन्धिः तथाहि रामस्य वचनं उद्रिक्तस्य तपसः पराक्रमस्य च निधिभूतस्य परशुरामस्यागमनात् तत्सम्पर्कप्रियत्वं वीररसाधिक्यं चैकतो मां कर्षतः । अनेनावेगाख्यो भाव उदीरितः । एष सीतापरिरम्भश्च अन्यतो मां रुणद्धि । कीदृशः मुहुश्चैतन्यमामीलयन्नित्यादि अनेन हर्षाख्यो भावः इति प्रकृतोपयोगादुदाहृतः भावस्थितिरपि । अङ्गित्वमतिशयचमत्काराधायकत्वे सति तच्च । ‘न तत्समश्चाभ्यधिकश्च दृश्यत’ इति श्रुतेरङ्गित्वासम्भवाद्भावशान्त्यादेः ।

‘स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः’ ।

इत्युक्ताः सात्त्विकभावा अनुभावेन्तर्भूताः ॥ ७ ॥

‘रसो वै सः’ ‘एकमेवाद्वितीयं ब्रह्म’ इति श्रुतिभ्यां एकमेव पूर्वोक्तं सर्वं ब्रह्म चासंलक्ष्यक्रमस्तं सामान्यं चाश्रित्येति साकारव्यापकस्य रूपस्य ‘लीलारूपैश्च तत्सेव्य’मित्यनेन सेवोक्ता तद्रूपस्य ‘बहुगुणैः सहितो धर्मी कृष्णः सेव्य’ इत्यनेन सेवोक्ता तत्र स्थितस्यान्तर्यामिणो मर्यादायां पुष्टौ तु ‘प्रदीपवदावेश’ इति सूत्रेऽयं प्रवेशो नान्तर्यामित्वेन तस्यैकधैव प्रवेशादित्यनेन निषेधः । किं तु बहुधा सन्निवेश इति बहुधानिविष्टस्य भर्तुर्दृढविश्वासतो भजन्नित्यनेन सेवा वक्ष्यमाणा तस्याः फलमवान्तरं प्रेमरूपा मानसी सेवा तस्याः सिद्धिं कुर्यादित्याहुः । श्रीकृष्णेत्यादि ।

श्रीकृष्णगोपिकाप्रौढविलासकथयोद्गतम् ।
रससंयोगभावं हि श्रीकृष्णे साधयेद् ध्रुवम् ॥ ८ ॥

श्रिया सहितस्य सदानन्दस्य द्वात्रिंशत्कलाः वैराग्यसाङ्ख्ययोगतपोभक्तिरूपास्तासां च ये **प्रौढाः** प्रौढत्वं च सकलदर्शनार्थज्ञानपूर्वकनिर्गुणभक्तिमार्गगूढार्थज्ञानवत्त्वमिति शब्दरत्नात्सिद्ध्यति तादृशा येन केनापि सम्बन्धेन **विलासास्तेषां कथया** गोपालतापिन्यादिदशमस्कन्धादिनिरूपितया प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपयोद्गतं 'भक्तिरहस्यभजनं तदिहामुत्रफलभोगनैराश्येनामुष्मिन्मनःकल्पनं' 'ता नाविदन्मय्यनुषङ्गबद्धधिय' इति निरूपितमानसीसेवारूपं **रससंयोगभावं** रसेन विहिताविहितप्रेमशृङ्गारादिना संयोगभावं सायुज्यमिव वर्तमानं **श्रीकृष्णे** कृष्णाश्रयं **साधयेत्**सिद्धं कुर्यात् । कदाचिन्मतिसञ्चारिभावप्रधाना 'यत्पत्यपत्यसुहृदामनुवृत्तिरङ्गे'त्यादिवाक्यं व्याहरन्त्यो गुरवः प्रौढाः कुर्वन्तीति **ही**त्युक्तम् । 'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः । आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तये'दिति सिद्धान्तमुक्तावल्यां 'तानि परे तथा ह्याहे'ति सूत्रे 'ता वां वास्तूनी'ति श्रुतौ 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जित'मिति गीतायां यद्रूपं निरूपितं तदिदं ध्रुवं रूपमित्याहुः **ध्रुव**मिति शाश्वतम् । 'ध्रुवं तु निश्चिते तर्के निश्चले शाश्वतेऽन्यवदि'ति विश्वः । तदुक्तं सर्वनिर्णयाभासे 'यन्न योगेन साङ्ख्येन दानव्रततपोध्वरैः । व्याख्यास्वाध्यायसन्न्यासैः प्राप्नुयाद्यत्नवानपि' 'तस्मात्त्वमुद्धवोत्सृज्य नोदनां प्रतिनोदनाम् । प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च । मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यास्यसे ह्यकुतो भयम्' इत्येकादशसर्वस्वं भगवान् स्वयमुक्तवानिति । श्रुत्यन्यसाधारणम् ।

ततश्चेति ।

ततश्चातितरं वृद्धो निमेषाद्यन्तरायकम् ।
विरहं साधयित्वा च पुष्टः स्यात् स्वस्वरूपतः ॥ ९ ॥

प्रेमशृङ्गारादिभावनानन्तरं रससंयोगभावसिद्ध्यनन्तरं चेति क्रमवाचकस्य **तत** इति पदस्यार्थः । **अतितरं वृद्ध** इति । तृतीयाध्यायोपान्त्ये 'अनाविष्कुर्वन्नन्वयादि'ति सूत्रभाष्यं 'गुप्तस्यैवाभिवृद्धिस्वभावकत्वादि'ति । तर्हि गोपनकरणप्रतिपादकस्य 'आश्रमधर्मै'रेवेति भाष्यस्य विरोध इति चेन्मर्यादायां प्रेमशृङ्गारादीत्यत्रादिपदेनोक्तत्वान्न विरोधगन्धः । रसोतितरं वृद्धः **निमेषाद्यपि** अदर्शनादौ **अन्तरायं** यस्मात् तादृशं **विरहं साधयित्वा चकारेण** तनुवित्तजसेवादिसञ्चारिभावान्साधयित्वा **पुष्टः**, सञ्चारिणां पोषकत्वात् । स्वस्य निर्विकल्पकज्ञानस्य ब्रह्मणो यत्स्वमात्मा तस्य रूपं विशिष्टज्ञानमध्ययीभूतं ततः सार्वविभक्तिकस्तसिः प्रथमान्तं पदम् । स्वस्वरूपात्मा सन् स्यादित्यर्थः । आश्रमधर्मैर्वृद्धो भवति रसः, वात्सल्यादिभिरतिवृद्धः, शृङ्गारेणातितरं वृद्धः अतितमं तु केन वृद्धो भवतीतीश्वरो वेत्ति । 'यस्यामत' मित्यादिश्रुतेः ।

ननु सकलकारणकारणेऽविद्यावच्छिन्नजीवस्य सेवाद्यर्थमयोग्यता तथा च भाष्यं मुक्तोपसृप्येति सूत्रस्य तेन शरीराद्यध्यासविशिष्टं न ब्रह्मणि योजनीयमितीत्याशङ्क्याहुः एवं चेति ।

एवं चेत्पुष्टतामेति भावात्मा स रसस्तदा ।
श्रीकृष्णभजने योग्यं कुर्याज्जीवं निवेदितम् ॥ १० ॥

एवमित्युक्तपरामर्शे विरहसंयोगवांश्चेद्यदि तदोभयसञ्चारिभिर्वैराग्यादिभिः **पुष्टतामेति चेत्**

---

१. अनेनभक्तिमार्गो व्याक्षिप्यते ।

यदीति भाग्यवशेन अत्र निदर्शनमुक्तं शाण्डिल्यर्षिणा 'संयोगे वियोगवृत्तिः प्रेमे'ति सूत्रेण एवं 'वियोगे संयोगवर्तनमपी'ति तद्भाष्ये । **निवेदितम्**मिति 'सख्यानन्तरमात्मनिवेदन'मिति सुबोधिन्यां पाठक्रमः 'आत्मनिवेदिनो हि भजनार्हा नेतर' इति नवरत्नटीकायामर्थक्रमः । श्रुतकृताभ्यामात्मनिवेदनविशेषितत्वाद्वा । सुबोधिन्यां कृतात्मनिवेदिनः । आद्ये स्तुतो रसप्रमेयबलेन पुष्टिभक्तौ, साधनबलेन मर्यादाभक्तौ **योग्यं जीवं कुर्यात्** । द्वितीये आरम्भदशायां 'धर्मेण पापमपनुदती'ति श्रुतेः पापाभावद्वारा मर्यादाभक्तौ योग्यं जीवं कुर्यात् । तदुक्तं 'प्रदीपवदावेशस्तथा हि दर्शयती'ति सूत्रभाष्ये । 'ननु पूर्णज्ञानक्रियाशक्तिमता ब्रह्मणा तुल्यभावेन तत्रापि प्रधानभावं प्राप्य कामभोगकरणमपूर्णज्ञानक्रियावतो भक्तस्यानुपपन्नमित्याशङ्कायां तत्रोपपत्तिमाहे'ति, अत्र तुल्यभावेनेति सख्यं, प्रधानभावमिति ह्यात्मनिवेदनम्, 'भोगमात्रसाम्यलिङ्गाच्चे'ति सूत्रे स्पष्टमिदम् । आत्मनिवेदनानन्तरं विचिकीर्षितो जीवः । 'निवेदितात्मा विचिकीर्षितो म' इति वाक्यम् । श्रुतिस्तु 'भर्ता सन् भ्रियमाणो बिभर्ती'ति । **द्वितीयपक्षे** तु भजने 'तपोवैराग्ययोगे तु ज्ञानं तस्य फलिष्यती'ति निबन्धाद्यथासङ्ख्यं देहाध्यासेन्द्रियाध्यासान्तःकरणाध्यासानां आलोचनवैराग्यसाङ्ख्यैर्निवृत्तिमचीक्लृपन्नाचार्याः 'योगयोगे तथा प्रेमे'त्यनेन कारिकांशेन प्रेमयोगाभ्यां प्राणाध्यासस्वरूपविस्मृत्योर्निवृत्तिम् । सिद्धान्तरहस्ये 'ब्रह्मसम्बन्धकरणात्सर्वेषां देहजीवयोः सर्वदोषनिवृत्तिर्हि' इति आत्मनिवेदनस्य योग्यकरणकारणतोक्ता ।

कृष्ण इत्यादि ।

कृष्णे निवेदनाज्जीवः कृतकृत्यो भवेदिह ।
अतः सर्वात्मना कुर्याद्विधित्वेन निवेदनम् ॥ ११ ॥

'इहैव समवनीयन्ते प्राणा' इति श्रुतेरि**ह** । **अतो** जीवस्य योग्यत्वात् । **सर्वात्मना** सर्वपशुपुत्रेन्द्रियादियुक्तेनात्मनान्तःकरणेन सह **जीवः कुर्यात्** । अथवा 'यस्मिन्नकृते न कोपि पुरुषार्थः सिध्यति तत्सर्वात्मना कृतमात्मनिवेदनं' सुबोधिन्यामयमर्थः यतः कृतकृत्यताफलमुक्तमतः सर्वेषां पृथ्व्यप्तेजोवाय्वाकाशप्रकृतिपुरुषमहत्तत्त्वाहङ्काराणां मध्येऽष्टानां पृथिव्यादीनामात्मा पुरुषान्तर्गतपुरुषः परा काष्ठा तेन हेतुना विधित्वेन आत्मनिवेदनं कुर्यात् । तथा चोक्तं गीतायां 'स सर्वविद्भजति मां सर्वभावेन भारते'त्युक्त्वा 'एतद्बुध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत' इति । **विधित्वेनेति** । विधिर्यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादौ लिङर्थः । वाक्यं तु तेन विधिवाक्यमुच्यते, एवं विधित्वमाज्ञानिष्ठमपि आज्ञाघटितार्थरूपात्मनिवेदन उच्यते एवमेव पूर्वमीमांसकानां व्यवहारः । 'इमे विदेहा अयमहमस्मी'ति बृहदारण्यके जनकात्मनिवेदनवाक्यम् । 'इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् । दारान्सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम्' इत्येकादशे वाक्यम् । अत्र शिक्षेदित्यनेनानुकृष्टेनान्वयात्परस्मै इष्टाद्यभिन्नं निवेदनं यत् तत्कर्मकशिक्षानुकूलकृतिविषयिण्या आज्ञायाः प्रतीतिः । अत्र पदार्थसमूहरूपवाक्यार्थैकदेशाज्ञानुकूलपर्वसु सुखसंवेदनरूपा रतिश्चेतस्तत्प्रवणाख्यमानसीसेवारूपभावरूपाङ्कुरमियर्तीति शृङ्गारलक्षणवाक्योक्तस्त्रीपुंभावात्मकत्वं जीवानां अक्षरत्वादस्त्येव भावाङ्कुरार्थः । यद्वा भावैरनुभावैरित्यादिना पूर्वमुक्तो यः स तथानिष्ठं विधित्वमात्मनिवेदने आरोप्यते । छत्रिणो यान्तीतिवत् । अथवा विधीयते यत् स विधिः 'उपसर्गे घोः कि'रात्मनिवेदनं पूर्वश्रुतिस्मृत्योरत्रात्मनिवेदनशिक्षावाचकलिङ्गादि विधीयते इति प्रत्ययात् । अत्र सूत्रं साधनाध्याये 'अनियमः सर्वासामविरोधः शब्दानुमानाभ्या'मिति । श्रुतिस्तु 'परं ब्रह्म एतद् यो

---

१. प्रवेश।

धारयति रसति भजति ध्यायत' इत्यादि । गीताविस्तारस्तु 'केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा' । गीता तु त्रयोदशाध्याये 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी' । पुरुषोत्तमयोगाध्याये 'स सर्वविद्भजति मां सर्वभावेन भारत' 'इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारते'ति च ।

भक्तिमार्गविषयं निष्कर्षन्तः फलाय साधननिष्कर्षमाहुः शृङ्ग इति द्वयेन ।

शृङ्गो भावाङ्कुरः प्रोक्तः शृङ्गारस्तद्गतो रसः ।
स वै कृष्णात्मको ज्ञेयः श्रुतिवाक्यानुसारतः ॥ १२ ॥
समर्प्य तत्र सर्वं हि दृढविश्वासतो भजन् ।
ऐहिके पारलोके च चिन्तां त्यक्त्वा सुखी भव ॥ १३ ॥

भावाङ्कुरः चेतस्तत्प्रवणाख्यो भावः प्रेमा तस्याङ्कुर आस्वादयोग्यः शृङ्गः प्रभुत्वाद् भगवत्प्रापकत्वात् । ज्ञानस्याक्षरब्रह्मप्रापकत्वात् 'शृङ्गं प्रभुत्वे शिखरे चिह्ने' इति विश्वः । प्रोक्तः ब्राह्मणेन भगवता प्रोक्तः श्रीशुकैः प्रोक्तः व्रजभक्तैः प्रोक्तः । भक्तिरहस्यभजनमित्यादिगोपालतापनीये । 'तस्माद्भारत सर्वात्मा भगवानि'ति द्वितीयस्कन्धे 'कुर्वन्ति हि त्वयि रति'मिति फलप्रकरणे प्रोक्तः । तद्गतः प्रेमास्वादगतः रस आनन्दमयः शृङ्गार इत्यर्थः । शृङ्गं भावाङ्कुरमियर्तीति शृङ्गार इति व्युत्पत्तेः । शृङ्गश्च शृङ्गश्च शृङ्गौ तौ इयर्तीति शृङ्गार इति व्युत्पत्तिरपि शृङ्गारपदस्य । यद्वा शृङ्गगतः शृङ्गारः शृङ्गशृङ्गारः शृङ्गः शृङ्गारः इति प्रयोगत्रयम् । न तु भावास्वादयोग्यता सः, चेतसि भावास्वादो भगवद्दत्तः स्वधर्मीभूतभावाङ्कुरमाश्रयतया स्वीकुर्वन् तद्गतः विषयितया मानसीसेवां शृङ्गारः स्वीकुर्वन् विषयत्वेन तद्गतो वा । वै निश्चयेन, तद्गतो यतः कृष्णात्मकः । ननु कथं प्रेमप्रियताहार्दस्नेहपदान्यप्रवर्त्य शृङ्गारपदप्रवृत्तिरिति चेत्सत्यम् । वेदान्ते योगमात्राश्रयणाद् भक्तिमार्गस्य सुबोधिन्यां शृङ्गत्वाच्च लक्षणाप्रसङ्गाच्च । अत्र हेतुः श्रुतीत्यादि 'को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्या'दिति । अत्र मरणोपस्थितिमन्तरा प्राण्यादित्यस्याप्रवृत्तेः विरहः कः प्राण्यात्मकः । किञ्च 'स मानसीन आत्मा जनानां सर्वात्मे'ति वाक्यानि, 'तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्' 'भक्त्याहमेकया ग्राह्यः' 'वशीकुर्वन्ति मां भक्त्या' 'कामाद्द्वेष्य' इत्यादीनि । अत्र भक्तिर्मानसीसेवा । कामो दिदृक्षा । तत्र तन्निमित्तं तत्फलकमिति यावद् गृहिणोपसंहाराधिकरणोक्तरीत्या इन्द्रियादिकं सर्वं समर्प्य सर्वात्मभावं कृत्वेति यावद् 'दृढं कृत्वा मन' इत्यत्र दृढपदार्थ उक्तः दृढश्चासौ विश्वासश्च निश्चयात्मकः 'रक्षतीत्येव विश्वास' इति पञ्चरात्रात् तथा कापट्याभावः । ततो भजन् । एतदत्रोक्तं भवति । 'सदा सर्वात्मभावेन भजनीयो व्रजाधिपः । स्वस्यायमेव धर्मो हि नान्यः क्वापि कदाचने'ति चतुःश्लोक्यामुक्तम् । सर्वदा सर्वभावेनेति पाठः । चिन्तां पश्चात्तापरूपामन्तःकरणप्रबोधोक्ताम् । किञ्च । चिन्तां सञ्चारिभावरूपाम् । यथा 'चिन्तामापुर्दुरत्ययाम्' । यद्वा । 'राकासुधाकरमुखी'त्यत्र सीतायाः परवधूत्वात्तत्सन्धिविषयिणी चिन्ताऽनौचित्यप्रवर्तिता रावणस्य । एवं जीवस्यान्यदेवभजनविषयिणी चिन्ता 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति क्षेत्रक्षेत्रज्ञनिरूपणाध्यायीयगीताया अनौचित्यप्रवर्तिता नवरत्नोक्तरीत्या वा चिन्तां त्यक्त्वा सुखी भव भजनानन्दवान्भवेत्याज्ञा । दुःखाभावे तु किं वक्तव्यमिति भावः । सर्वात्मभावेन भजनं विधा । 'विधैव तु निर्धारणादि'ति सूत्रात् । सर्वात्मभावस्य विधात्वे लिङ्गभूयस्त्वाधिकरणसूत्राणि । सनत्कुमारनारदसंवादश्छान्दोग्यस्थः श्रुतिरूपः । गीता 'अमानित्वमदम्भित्वम्' इत्यादि 'अज्ञानं यदतोन्यथे'त्यन्तम् । अत्र गृहिणोपसंहारा-

धिकरणरूपसूत्राणि । विषयवाक्यं श्रुतिः । 'आचार्यकुलाद्वेदमधीत्य गुरोः कर्माभिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तत' इति । गीता पुरोक्ता । **इति शृङ्गारस्वरूपम् ।**

पूर्वं गृहिणोपसंहाराधिकरणविषयवाक्ये आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्येत्युक्तमपुनरावृत्तिमोक्षार्थम् । इदमात्मनि सर्वेन्द्रियप्रतिष्ठापनं ब्रह्मवादे त्वेवम् । उक्तपरामर्शस्तु एकादशे एकोनत्रिंशाध्यायेस्ति । 'एतत्ते कथितः सर्वो ब्रह्मवादस्य सङ्ग्रह' इति वाक्यात्तत्रत्यानि पद्यानि प्रस्तूयन्ते ।

श्रीभगवानुवाच ।

कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् ।
मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ॥
देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् ।
देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥
पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् ।
कारयेन्नृत्यगीताद्यैर्महाराजविभूतिभिः ॥

एतदेव 'समर्प्य तत्र सर्वं ही'त्यादिनोक्तं तत्र नित्योत्सवसेवयोरुत्सवाः प्रोच्यन्त इत्याहुः **उत्सवा इति** । उत्सवाः प्रोच्यन्त इत्यर्थः । महोत्सवमभ्यर्हितत्वादाहुः प्रथमं जन्मेत्यादि । जन्माष्टम्युच्यत इत्यर्थः पूर्वग्रन्थेन तद्रूपं तत्र च स्थितं साकारव्यापकं च ब्रह्मज्ञानमभूत् ततो भगवदाविर्भावानुकूला भक्तेच्छा या जाता तया विज्ञापनात्मकं यत्नमाहुः **येनेत्यादीति विज्ञाप्येत्यन्तम् । येनेति ।**

येन दुःखेन गोपीनां यशोदानन्दयोस्तथा ।
प्रकटोभून्निरोधार्थं तथा मयि कृपां कुरु ॥ १ ॥

अत्र 'चतुर्विधा भजन्ते मां जना' इति गीतायामुक्तेषु चतुर्षु आर्तोधिकारी यो भगवत्प्राप्तिविरहमसहमानः । ज्ञानी तु सर्वात्मभाववान् 'तस्मान्नास्त्यधिकः परः' अधिकारः, उत्तमोत्तमः सः । इति विज्ञाप्येति वक्ष्यमाणत्वात् । आर्तस्य विवेकाभावात् । 'प्रार्थिते वा ततः किं स्या'दित्यस्य विवेकधैर्याश्रयस्थस्य विवेकबोधकस्य न विरोधः । **किञ्च** । भगवदाविर्भावे भक्तानां दुःखस्य हेतुत्वेन भक्तिमार्गारम्भदशायामपि विरहानुभवकर्तृफलदशां भावयित्वा स्वस्मिन्दुःखारोपं कृत्वा निरोधस्य पदवीं यियासेत् । भक्तिवर्धिनीनवरत्नश्रीभागवतोक्तमारम्भदशायां क्रियते इति पुरुषोत्तमप्रतिष्ठानाम्नो ग्रन्थादुच्यते । फलदशायां सन्न्यासनिर्णयोक्तकरणावसरे निरोधलक्षणोक्तं क्रियत इति श्रीवल्लभाचार्यग्रन्थसङ्ख्यायां पाठानुक्रमादुच्यते । पूर्वश्लोकार्थः स्फुटः 'उभयो रोधसो'रिति वाक्याद्गोप्यादीनामपि रोधोधिकरणकत्वात् । यद्वा । बृहद्वामनपुराणे पुराविदां ब्रह्म यत्तदज्ञानजं दुःखं, यशोदानन्दयोर्भुवि विश्वेश्वरे हरौ, भक्त्यभावजं दुःखम् । तद्दशमस्कन्धाष्टमाध्याय उक्तम् । अयमर्थः । **येन ब्रह्माज्ञातं तत्तेन दुःखेन** प्रयोजकेनानुमोदनेन हेतुना तथा । 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत' इति गीतातस्त्वेन निर्गुणत्वेन परत्वेन वाङ्मनोगोचरातीतत्वेनानन्दमात्रत्वेन प्रकारेण गोपीनां **निरोधार्थं प्रकटोभूत्** । येन दुर्गतितारकपरमभक्त्यभावजेन दुःखेन प्रयोजकेन ब्रह्मादेस्तसत्य-

करणेन हेतुना तथा तेन नन्दयशोदयोर्बालकत्वेन प्रीतिकारकत्वेन प्रकारेण निरोधार्थं प्रकटोभूत् । **तथा** यथाधिकारं तेन पूर्वोक्तप्रकारेणैव **कृपां** प्रथमस्य चतुर्थचरणस्यानुमानिकाधिकरणोक्तामव्यक्तपदवाच्यां अव्यक्तपदस्याक्षरवाचकत्वे तु तूष्णीं कृपां विज्ञानहेतुभूतां कुरु इत्याशीरधीष्टं वा कृपामधीष्टः सत्कारपूर्वको व्यापार इति सिद्धान्तकौमुद्याम् । तेन कृपाविषयिणीच्छा कर्तव्या न तु पुष्टिनिरोधविषयिणी गोपीनन्दादिवत् । तेषां पुष्टिमार्गीयत्वादस्मदादीनां मर्यादामार्गीयत्वात् । कृपया विज्ञानं विज्ञानेनेच्छया निरोधः ।

नीत्यादि ।

निवेदितात्मभावेन महतां कृपया तथा ।
देहि स्वानन्दरूपं स्वदास्यं श्रीपुरुषोत्तम ॥ २ ॥

निवेदितो जीवस्तस्यात्मभावो 'विद्यैव तु निर्धारणादि'ति सूत्रभाष्योक्तरीत्या जीवस्य तनूकरणेन, भावपदेन भगवान् भावसंपृक्तः जीववत् 'ये यथा मां प्रपद्यन्त' इति वाक्यात् । **महतां** कृपा पूर्वोक्तातिरिक्तापि वरणहेतुभूता तथा निवेदितजीवस्यात्मभावरूपप्रकारेणावृतया अनेनानुमानिकाधिकरणोक्तेन योग्यं शरीरं तदधिकरणोक्तमुपलक्षितम् । **देहीति** दानमधीष्टम्। षट्साधनानां देशादीनामसाधकत्वात् । सर्वात्मभावव्यतिरिक्तस्य दानायोगात् । 'प्रदानवदेवे'ति सूत्रात् । **स्वानन्दरूपं** धर्मशास्त्रे पञ्चदशसु दासेषु नराधमत्वेनोक्तस्य भक्तिशास्त्रे 'तवास्मीति च यो वदेत्। अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं हरे'रित्यभयरूपमोक्षसाधनत्वेनोत्कृष्टत्वेन निरूपितस्य तवाहमित्युपगतस्यानन्देन रूपं स्वरूपं भवति तादृशानन्दव्यावृत्त्यर्थं **स्वानन्दरूपमिति** स्वीयानन्दरूपं भजनानन्दरूपमिति यावत्। **स्वदास्यं** न तु विभूत्यादेः दास्यमपि, प्रकटसत्त्वं तिरोहितचिदानन्दं जगद्वत्, तत्प्रकटानन्दं तिरोहितचित्सत्त्वं **देहि** । तदपि सर्वभावेन निर्गुणभक्तिमार्गीयेणेत्याहुः । **श्रीपुरुषोत्तमेति** । पुरुषोत्तमयोगाध्याये 'यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारते'त्यत्र भजतीति भक्तिमार्गः । एवमिति उक्तपरामर्शे, तृतीयाया लुक् । उक्त'मूर्ध्वमूलमधःशाख'मित्यादिना वेदविदोश्वत्थमेनमित्यादिना असङ्गशस्त्रेण द्वैधीकृत्य 'ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः । तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी'ति श्लोकोक्ता पुनरावृत्तिस्थानमार्गणं तत्परामर्शेन सिद्धान्तमुक्तावल्युक्तेन पुरुषोत्तमं जानाति स सर्ववित् सर्वभावेन मां भजति श्रिया सहितमिति ।

हरे इति ।

हरे करुणया कृष्ण मदर्थे प्रकटो भव ।
अहं यथा निरोधस्य पदवीं याम्यसंशयम् ॥ ३ ॥

'यो यस्य तस्य दैवत'मिति वचनात् सम्बोधनं हरे इति । करुणयेति 'कृपाविष्टः साधन'मिति भाष्यम् । निरोधपदव्याः साधनमत्र श्रीभगवान् कृपाविष्टः । भवेति कामचारानुज्ञायां लोट् । ननु किमर्था कामार्था प्राकट्यविषयिणी कामचारानुज्ञा यतो निरोधलक्षणग्रन्थोक्तसाधनैर्निरोधो भविष्यतीत्यत आहुः **पदवीमिति** । यथाचार्याणां **निरोधस्य** पदवी तथा ममापीति कामचारानुज्ञेति भावः । मम निरोधः समजनि न वा पदव्या असञ्जननाद् इत्येवं संशयस्तस्याभावो यथा भवति तथा यामि प्राप्नोमि ।

इतीति ।

इति विज्ञाप्य श्रीकृष्णमूर्त्यग्रे प्राञ्जलिः स्थितः ।
यशोदानन्दगोगोपीगोपसङ्घसमन्वितम् ॥ ४ ॥
व्रजं भावनया सिद्धं कृत्वा हृदि विभावयेत् ।
स्वार्थं प्रकटितं कृष्णमानन्दाकारमुत्तमम् ॥ ५ ॥

इति विज्ञाप्य आर्तस्याशक्यविज्ञापना, विरहस्य 'अशक्ये वा सुशक्ये वा सर्वथा शरणं हरि'रिति वाक्याद्विवेकाभावो न दोषावह इति पूर्वमुक्तम् । इदं विज्ञापनं अर्धरात्रे श्लोकसार्धाष्टपाठानन्तरम्, **स्वार्थं प्रकटित**मिति भूतप्रयोगात् । न च प्रकटितमित्यत्र पुरुषोत्तमप्रतिष्ठासामयिकं भूतं प्राकट्यं गृह्णीम इति वाच्यम् । कृत्वेति त्त्वान्तकर्तुः जन्माष्टमीदिनपुरुषोत्तमभावुकस्य प्रकटितकर्मकभावनाकर्तृत्वात् । पुरुषोत्तमप्रतिष्ठासामयिकभूतप्राकट्यस्य जन्माष्टम्यन्यदिनपुरुषोत्तमभावुककर्तृकत्वात् । तत्सामयिकप्राकट्यग्रहणायोगात् । 'अत्र कटकाद्युपचाराः साक्षात्कृता भवन्ती'ति सेवाप्रकरणटीकायाम् । तादृशस्तु संयोगभक्तिः सुप्रसिद्धैव साप्यर्धबृगला कथं पुरुषोत्तमाविर्भावं साधुयादतो द्वितीयमर्धदलमाहुर्हृदि भावनाख्यम् । **यशोदे**त्यादि । ननूक्तेपि विरहे संयोगोपि सुस्थिर एवेति कथं भावनाख्यं द्वितीयदलं संयोगावस्थायामिति चेन्न । विरहावस्थायामेव हृदि प्राकट्यमिति नियमो नास्ति । 'ध्यानाच्चे'ति सूत्रे भाष्ये 'भावनौत्कट्यदशायां व्यभिचारिभावात्मकसततस्मृतिरूपध्यानादपि हृदि प्रकटः सन्नासीनो भवतीत्यर्थः । 'तेन स्थैर्यमुक्तं भवती'ति भाष्यात् । न च 'भावो भावनया सिद्धः साधनं नान्यदिष्यते' इति सन्यासनिर्णयाद्भावनौत्कट्यं विरह एवेति वाच्यम् । 'आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तये'दिति सिद्धान्तमुक्तावल्यां संयोगभक्तिसञ्चारिण उपदेशात् । अतोत्र संयोगेपि संयोगसञ्चारिणः सुवचत्वम् । अत्र देवकीवसुदेवादिसमन्वितं व्रजं सिद्धं कृत्वेति नोक्तम्, पुराणाद्युक्तमपि । कृष्णोपनिषदि 'यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनी' । 'देवकी ब्रह्मविद्या' 'निगमो वसुदेव' इति श्रुतिभ्यस्तत्स्वरूपाण्युक्त्वावतीर्णस्य क्रीडा'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति यतो नन्दादिभिरेवाह श्रुतिः । ननु जन्माष्टमीतिसमाख्याप्रामाण्याज्जन्मनो वसुदेवगृहत्वाद्विज्ञापनवाक्येषु यशोदानन्देत्यादिवाक्ये च देवकीवसुदेवाद्युल्लेखनेन सन्दर्भं विरचयन्तु गोपगोपीसुरोल्लेखनं क्रीडास्थलेऽन्यत्र भवतु न तु जन्माष्टम्यामिति चेन्न । जन्माष्टमीसमाख्यया प्राप्तावपि, पुराणान्तरेण प्राप्तावपि भागवते मते जन्मनो गोप्यत्वेन वसुदेवगृहजन्मार्थमुल्लेखनासम्भवात् । 'जन्म गोप्यं भगवत' इति प्रथमस्कन्धात् । जन्माष्टमीसमाख्याया भागवते मते 'वासुदेवस्त्वत्रैवाविर्भूत इति सिद्धान्त' इति सुबोधिन्या नन्दगृहक्रीडास्वपि सम्भवात् । **हृदि कृष्णं भावये**दित्यन्वयः । सदानन्दम् । जन्माष्टम्यां भावनातः प्रकटितमिति विशेषणम् । तदपि 'परित्राणाय साधूना'मिति गीतातः । **स्वार्थं** स्वीयार्थम् । 'तदपि 'विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे' इति वाक्यात्सङ्कर्षणानिरुद्धकार्यार्थं न, किन्तु 'भक्तियोगवितानार्थ'मिति गीताविस्ताराद् भक्तियोगवितानार्थ**मानन्दाकारम्, तदप्युत्तमं** कार्याख्यानाधिकरणोक्तम्, न तु विषयानन्दाकारम् ।

तत इति ।

ततः संपूजयेद्भक्त्या यथालब्धोपचारकैः ।

संयोगसेवायां दास्यभक्तित्वेन दास्यान्तर्गतानि भक्तिवर्धिनीनवरत्नश्रीभागवतान्यवतार्यन्ते, तत्र

सिद्धान्तरहस्योक्तरीत्या निवृत्तसर्वदोषभक्तिमार्गीयो भक्तिवर्धिन्युदितरीत्या **सम्पूजयेत्**। भक्तिवर्धिन्युक्तपूजायां सम्यक्त्वं श्रवणादिपूर्वकत्वमेव[1] 'पूजया श्रवणादिभि'रिति भक्तिवर्धिनीवाक्यात्। भक्तिपूर्वकत्वे भक्त्येति वक्ष्यमाणं पुनरुक्तं स्यात्। बालकृष्णजितामासनम्[2]। १। सङ्कल्पः। २। कुङ्कुमाक्षतम्। ३। भक्तिमार्गीयोपचारा मुख्या इति कुङ्कुमतिलकं अक्षतानि च तुलसी। ४। पञ्चामृतस्नानम्। ५। अर्घ्यम्। ६। चन्दनम्। ७। स्नानम्। ८। अङ्गवस्त्रम्। ९। भगवते पीताम्बरम्। १०। श्रीबालकृष्णजिते पीताम्बरम्। ११। अत्राशङ्का आधुनिका रक्ताम्बरं कुतः समर्पयन्तीति नेयमाशङ्का कार्या 'पीताम्बरधरः स्रग्वी'ति वाक्यस्य तामसप्रकरणीयत्वेन लौकिकमुख्यत्वम्। तदुक्तं तामसप्रकरणादौ 'लौकिकं तामसे मुख्य'मिति। तेन पीताम्बरपदेन रक्ताम्बरमुच्यते इति ज्ञापनाय पीताम्बरपदपुरस्कारेण रक्ताम्बरग्रहणम्। प्रमाणं पीताम्बरपदं लौकिकी भाषा तत्समाधिभाषायां 'भावस्तत्राप्यस्मदीय' इत्यलौकिकभावसहकारिकारणेन अर्थान्तरे शक्तमगत्या। भगवते गुञ्जा। १२। माला। १३। चन्दनम्। १४। चन्दनार्कः (चोवा)। १५। चन्दनचूर्णम्। १६। श्रीबालकृष्णजिते गुञ्जा। १७। माला। १८। चन्दनम्। १९। चन्दनार्कः। २०। चन्दनचूर्णम्। २१। भगवते धूपम्। २२। दीपः। २३। जलपात्रे। २४। नैवेद्यम्। २५। अर्घ्यम्। २६। तुलसी। २७। शङ्खोदकम्। २८। आचमनम्। २९। मुखवस्त्रम्। ३०। ताम्बूलीताम्बूलम्। ३१। वेणुः। ३२। नीराजनम्। ३३। त्रयस्त्रिंशदुपचाराः साधुकृताः साधवः साधुकृताः। भक्तिमार्गानुसारेणोपचारा मुख्या इत्यधिकोपचारा न दुष्टाः। 'अपि चेत्सुदुराचारो भजते मामनन्यभाक्। साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः' इति वाक्यात् 'पत्रं पुष्पं फलं तोय'मिति वाक्याच्च। अत उक्तं **भक्त्येति**। संयोगसेवायां स्थितवतो भक्तिवर्धिनीपूजोदिता भक्तिवर्धिनीश्रवणाद्युच्यते। श्रीभागवतं च लघुस्वमार्गे 'देवासुरमनुष्येषु मद्भक्ताचरितानि' 'कारयेत् मह्यं पर्वयात्रामहोत्सवान्' 'कारयेदि'त्युक्तम्। तत्र महोत्सवस्मरणभक्त्यर्थं नन्दमहोत्सवश्रवणाद्युच्यते, श्रवणादीनि तदानीं भगवतो वक्ष्यमाणान्यपेक्षितानि, तानि समर्प्यन्ते, अथवा 'यद्यदिष्टतम'मिति वाक्यात् स्वेष्टतमानि समर्प्यन्त इति दास्यकरूपता। 'देहि स्वानन्दरूपं स्वदास्य'मिति विज्ञापनावाक्यात्। अतः पूर्वं प्रेङ्खपर्यङ्कसमर्पणम् ततो जलपात्रताम्बूलनैवेद्यक्रीडनकानि भक्तिमार्गानुसारेण समर्पणीयानि। भक्तिवर्धिनीपक्षे लीलास्मरणविषयं समर्पितं सर्वम्। 'प्रेङ्खपर्यङ्कशयन'मिति वाक्यात्। यद्यपि 'लोकवत्तु लीलाकैवल्य' मिति व्याससूत्रात् पूर्वोक्तं न समर्पयेत् कोपि, तथापि सर्वसामर्थ्यसहिताय बालमुकुन्दाय; 'यद्यदिष्ट' मिति वाक्यात् 'पत्रं पुष्प'मिति गीतायाश्च समर्पणीयानि। 'अनाग्रहश्च सर्वत्र धर्माधर्माग्रदर्शन'मिति वाक्यादन्याग्रहेण समर्पणीयानि वा जलपात्रताम्बूलनैवेद्यानि। 'अवाद्यन्त विचित्राणि वादित्राणि महोत्सव' इति वाक्यान् नन्दमहोत्सवे 'मद्भक्ताचरितानी'ति वाक्याद्देवेषु भगवद्भक्ता नन्दादयस्तेषां चरितानीति नाभिनयः प्राप्नोति तथाप्युपासनाशेषभक्तौ 'जन्म कर्म चाभिनयन्मुहु'रिति वाक्यादभितः सर्वतोभिनयः प्राप्नोत्येव एवं च 'नन्दस्त्वात्मज उत्पन्ने' इत्यादि श्रीभागवतोत्सवाध्यायोक्तं सर्वमभिनेयम् यथाशक्तिभावनात्रयं उत्तमाधिकार्यधिकारिकम्। तथा हि। **स्वरूपभावना** भगवतो निःप्रतियोगिकर्मणश्च लीलारूपस्य। **क्रीडाभावना** सप्रतियोगिलीलायाः स्मरणम्। **भावभावनं** नन्दादिदुःखहर्त्रा प्रेरितस्य नन्दादिप्रीत्यनुकूलस्नेहस्य भावना 'तदेजति तन्नैजति' 'वने वृन्दावने क्रीडन्

---

[1] साहित्यम्। [2] बालमुकुन्दजिताम्।

गोपगोपीसुरैः सह' इति 'यद्वाचानभ्युदितं येन वागभ्युद्यत' इति यथाक्रमं श्रुतयः। अथ नन्दादीनां भावना नन्दमहोत्सवे स्वरूपभावना 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इति भाषापरिच्छेदकारिकाया आनन्दसदृशं संपाद्य भावना। क्रीडाम्बिकावनगत्यादि, ब्रह्मणा सह क्रीडाभावना वा। भावः सर्वात्मभावः सेवारूपस्तस्य भावना यथा श्रिया युक्तोहं तथा भक्तो मम प्रियः 'मद्भक्ताचरितावि च' इति श्रुतिस्मृतिभ्यां मध्याधिकारे 'भगवद्धर्मनिष्ठातः स्वस्मिन् तद्धर्मशालिता'। एवंविधवाक्यात्प्रेम्णः परमकाष्ठायामुत्तमाधिकारे स्मरणं नन्दादीनां वा कीर्तनानि 'आजु नन्दरायके आनन्द भयो' इत्यादीनि 'नन्दस्त्वात्मज उत्पन्न' इत्यादि च स्मरणमुत्तमाधिकारकृतम्। श्रवणं च पूर्वोक्तानामेव। दास्यभावेनैव, आरात्रिका सेवासम्पूर्णत्वद्योतिका। पूजावत्। रूपकाणि वस्त्राणि चोत्तारणीयानि। अर्धरात्रजन्मनः प्राग् जन्मनो दिनमिति जन्मवर्षात्पञ्चमवर्षमारभ्योत्सवः प्रवृत्तस्तथैव क्रियते। उत्सवान् मङ्गलभोगो महान्, स्नानात्पूर्वं 'पत्रं पुष्पं फलं तोय'मिति वाक्यात् पीताम्बरादिकं समर्प्य पञ्चामृतेन स्नापयेत्। तत्स्वरूपमग्रे वक्ष्यन्ति पञ्चामृतेनेत्यादिना। ततोङ्गवस्त्रं ततोभ्यङ्गोद्वर्तनादीन् गन्धं च। रसोद्बोधकत्वाच्चारक्तान्याभरणानि श्वेतानि पीतानि हरितानि च विशिष्टानि। 'विशिष्टालङ्कारे उत्सवः सार्वजनीनो भवती'ति सुबोधिन्याः। कमलपत्राञ्जनवेणवः। तदुत्तरं तिलकाक्षतमुपायनं चूर्णनीराजनं सङ्कल्पश्च मार्कण्डेयपूजावत्। अत एव 'सतिलं गुडसम्मिश्र पयोपि समर्पणीयम्। 'सतिलं गुडसम्मिश्रमञ्जल्यर्धं शृतं पयः, मार्कण्डेय महाबाहो पिबाम्यायुःसमृद्धये' इति वचनात्। 'लोकवत्तु लीलाकैवल्य'मिति सूत्रात्। न राजभोगोत्तरम्। 'प्रातरेव प्रकुर्वीत देवतानां च पूजन'मिति मनुस्मरणात्। अस्मदादिकैस्तु सेवानवसर एव। 'आदरादलोप' इति सूत्रात्। नन्दादीनामयं भावः। दासदासीवत्स्थितानामप्ययं कर्तव्यः।

तथा च भाष्यम्। उपपन्नस्तल्लक्षणसूत्रस्य 'दासीत्वेन दासत्वेन लीलायां सुहृत्त्वेन प्रभुनिकटे स्थितिरुक्ता भवती'ति। अत्र गोपीग्वाला वन्दनभक्तौ शूद्रनमस्कारं निषिद्धं मन्यन्ते तदज्ञानात्। 'ब्रह्मसम्बन्धकरणात् सर्वेषां देहजीवयोः सर्वदोषनिवृत्तिर्हि'ति ब्रह्मसम्बन्धिसमुदायपतितानां सर्वदोषनिवृत्त्या शूद्रत्वाभावात्। तदुक्तं ब्राह्मण्यादिदेवतावादे दशमे, तत एवानुसन्धेयम्॥ अतः परं उत्सवान्तरवच्छयनारात्रिकपर्यन्तम्। ततो जागरणम्। स्कान्दे मार्गशीर्षमाहात्म्ये 'यावद्दिनानि कुरुते जागरं मम सन्निधौ। युगायुतानि तावन्ति वसते मम वेश्मनि' इति साधारणवाक्यम्। अन्यदुक्तम्।

इयं लीला जन्मनः पञ्चमवर्षात्प्रवृत्ता प्रत्यब्दं नित्यत्वादाविर्भवतीत्याहुः प्रत्यब्दमिति।

प्रत्यब्दं कार्यमेवं हि लीलानित्यत्वतः सदा ॥ ६ ॥

एवमुक्तपरामर्शेन सदा सर्वस्मिन् काले आशौचकालेऽन्यद्वारा। अशक्तावपि सिद्धान्तमुक्तावलीटीकायां 'नामच्चिद्विविक्तने'ति श्रुतिप्रामाण्यात्स्वयं नामानि वक्तव्यान्यन्यद्वारैवं कार्यम्।

वामनजयन्ती। अत्र पूर्वं श्रीस्वामिनीजन्माष्टमी द्रष्टव्या दानैकादश्यपि। 'अन्यान्यपि तथा कुर्यादुत्सवो यत्र वै हरे'रिति सेवाप्रकरणनिबन्धात्। 'रहसं श्रीराधेत्यखिलनिगमानामिव धनम्' इति स्वामिन्यष्टकम्। एतत्स्वरूपं 'श्रीराधे' इत्यस्य व्याख्याने उपारम्भे उपपादितम्। हरेरुत्सवस्तु पाद्मोत्तरखण्डे।

---

१. रक्ताम्बरादिकम्। २. गौरस्य शृङ्गारोद्बोधकत्वादेतासामुत्सवाय काश्मीररञ्जितानि वस्त्राणि सुधाया अप्याविर्भाव इत्युक्त्या श्यामप्रीतेरप्याविर्भावात् रसोद्बोधकत्वाय आरक्तानि आभरणानि।

'वृषभानुरिति ख्यातो गोपो ज्ञातिमतां वरः । तस्य पत्नी महाभागा नाम्ना सौभाग्यसुन्दरी । तावुभौ ब्रह्मसावित्र्यौ स्वांशेन जगतीं गतौ । तयोर्गेहे महालक्ष्मीः प्रादुर्भूता सुरेश्वरी । अयोनिजा विशालाक्षी' इत्युक्त्वाग्रे 'कृष्णस्यानन्दकारिणी'ति वाक्याद् अग्रे च 'मासि भाद्रपदेऽष्टम्यां सौम्ये मूलर्क्षमण्डित' इति । आसनवस्त्रगन्धालङ्कारपुष्पमालानैवेद्यजलपात्रधूपदीपकुङ्कुमाक्षतनीराजनताम्बूलाचमनमुखवस्त्रताम्बूलानि । स्वामिनीस्वरूपसेवायां पञ्चामृतस्थाने सति विभवे दुग्धस्य स्नानमभ्यङ्गश्च षोडशोपचाराः, पुराणमते त्वावाहनविसर्जने अपि । 'स्थण्डिले तु भवेद् द्वय'मिति वाक्यात् ।

लोके सर्वं परित्यज्य लीलासिद्धिमचीक्लृपः ।
प्रभूपरिकृता दृष्टिस्तथा मयि कृपां कुरु ॥ २ ॥ ममेयं कृतिर्न प्राचाम् ।

दानैकादश्यां श्रीगोस्वामिरचितदानलीलाभावना ।

वामनजयन्ती । यथेति ।

यथा स्वदासवंशीयबलेरर्थोर्थसिद्धये ।
अङ्गीकृतं तत्सर्वस्वं तथैव कुरु मे प्रभो ॥ १ ॥

यथा याचकत्वेन प्रकारेण, **स्वदासः** प्रह्लादः, **अर्थः** स्वर्गस्तदपेक्षयाधिकोर्थः सुतलं तस्य **सिद्धये** । 'सुतलस्थापितबलिः स्वर्गाधिकसुखप्रद' इति पुरुषोत्तमसहस्रनाम्नःस्तोत्रात् । मध्यमपदलोपिसमासगर्भितषष्ठीतत्पुरुषः । **प्रभो** परिवृढ, परिवृढाष्टकात् । जन्माष्टमीवत् काश्मीररञ्जितवस्त्राणि कुलहीधौतिपदवाच्ये उत्तरीये च, अनुरागार्थबोधकानि रक्ताभरणानि । **कुरु** इति पूर्ववत् । 'तयोर्वा पुनरेवाहमदित्यामास कश्यपात् । उपेन्द्र इति विख्यातो यामनत्वाच्च वामनः' इति याक्यात् 'आतिथ्येन तु विप्राग्र्ये' इति वाक्यादातिथ्यं कर्तव्यम् । 'अह्नो मध्ये वामनो रामरामौ' इति वाक्याद् राजभोगपदवाच्यानन्तरमासनं सङ्कल्पः कुङ्कुमाक्षते तुलसीपत्राणि पञ्चामृतमर्घ्यं स्नानचन्दने स्नानाङ्गवस्त्रे बालमुकुन्दादेः । मूर्तौ तु परपीडादिसम्भवे पूजा त्याज्येत्याचार्याज्ञातो न कर्तव्या वस्त्रगुञ्जापुष्पमालाचन्दनचन्दनार्कचन्दनचूर्णानि नैवेद्यजलपात्रधूपदीपतुलसीशङ्खोदकाचमनमुखवस्त्रताम्बूलनीराजनाद्युपचाराः ।

विजयदशमी । अत्रापि पूर्वं पर्वनवकं मन्तव्यम् । अत्र श्रीहरिरायजितां नवविलासैः कीर्तनाभिधैर्भावनाः । भगवतश्चिकीर्षितत्वात् ।

प्रतिबन्धेत्यादि ।

प्रतिबन्धासुरं दूरीकृत्य भक्तमनोरथः ।
पूरितः स्वप्रियां नीत्वा तथा मेऽस्तु मनोरथः ॥ १ ॥

असुरो रावणः **भक्तो** हनुमान्, 'विष्णुभक्ता हनुमन्तमिदं ब्रुवंन्' इति श्रुतिर्हनुमदुपनिषदि । विष्णुभक्ता यं पृच्छन्ति स भक्त एव । **अस्त्वि**त्यधीष्टे लोट् ।

इति सत्कारपूर्वकं व्यापारं स्पष्टयाम्बभूवुः **श्रीकृष्णेति** ।

श्रीकृष्ण पूरयान्तःस्थासुरभावविनाशनात् ।
दर्शनं देहि रासस्थस्वप्रियासङ्गतं स्वकम् ॥ २ ॥

---

१. शाकपार्थिवादिराकृतिगण इत्याधुनिकाः, गणपाठे तु नास्ति । २. अडभावश्छान्दसः ।

आसुरभावः पुरुषोत्तमप्रकरणे शरणमार्गानन्तरमात्मनिवेदनमुक्तं कठिनमितीन्द्रियाणि जुहोतीति श्रुत्युक्तात्मनिवेदनप्रतिबन्धकपदार्थ आसुरभावः । श्रीरामचन्द्रगुणोपसंहारस्तावदेव भक्तमनोरथकाल एव पश्चात्तु मूलस्वरूपमेव विचिन्तयेदित्याहुः **दर्शनमिति** । इदं मूलरूपमिति विद्वन्मण्डने 'श्रुतय ऊचु'रित्यादिना प्रोक्तम् । **देहि**, इति पूर्ववत् ।

दीपोत्सवः । अत्रापि पूर्वं रासोत्सवधनत्रयोदशीरूपचतुर्दश्यो मन्तव्याः । रासोत्सवो गोपालतापिनीये विद्वन्मण्डने च, इतरयोर्द्वयोरेक उत्सवः क्वचिद् द्रष्टव्यः, अपरः स्मार्त उत्सवप्रताने ।

यथेति ।

यथा श्रीमन्नन्दकृतदीपावलिविधानकम् ।
लौकिकं स्वीकृतं स्वात्मप्रवेशार्थं व्रजेश्वर ॥ १ ॥

लौकिकं हैतुकम् । ननु 'वने वृन्दावने' इति श्रुतौ गोपपदेन नन्दस्यापि सङ्ग्रहान्नन्देन क्रीडन्निति वचनव्यक्तेर्न हैतुकं किन्तु वैदिकमिति चेन्न । तौ तु बालभावेनैव भावितवन्ताविति सुबोधिन्याः बालक्रीडानुपयोगिनो दीपदानस्य हैतुकत्वात् । तदपि स्वीकृतं दीपदानं स्प्रष्टुं[१] मनसः स्वस्य च परिस्पन्दात् । **स्वस्य प्राण आत्मा** व्रजो नित्यलीलास्थानं तत्प्रवेशार्थम् । यद्वा । स्वस्मिन्नात्मनो मनसः प्रवेशार्थं दीपदानाद्ब्रह्म वारयितुं श्रीनन्दमनोनिरोधो यतः अतः सम्बोधनं **व्रजेति** । व्रजस्य **ईश्वरः** कर्तुमकर्तुमन्यथा कर्तुं समर्थ ईश्वरः । श्रीनन्दनिरोधार्थं हमेलपदवाच्यालङ्कारौ धारणीयौ । श्रीनन्दस्य बालभावेन भावनात् । 'लोकवत्तु लीलाकैवल्यमि'ति सूत्रात् । अत एव सुवर्णाक्तसूत्रवस्त्राणि नो धारणीयानि किन्तु निर्गुणबोधकरूप्याक्तवस्त्राणि धारणीयानि श्रीनन्दस्य ग्रामीणत्वेन निर्गुणनिष्ठत्वात्तत्रानुरागबोधकानि कानिचित् सूथनेति प्रसिद्धं गोकर्णकटिवस्त्रगोक्रीडनवस्त्राण्याभरणानि चान्नकूटदिनधार्याण्यपि । गोकर्णौ शाबरभाष्ये चतुर्थस्य तृतीयाधिकरणे उक्तौ 'गोलक्षणान्यप्येवमेव कर्तरीकर्ण्यः कर्तव्या एवमादीनी'ति ।

तदीयं यथा स्वीकृतं मदीयं तथाङ्गीकुर्वित्याहुः **कृपयेति** ।

कृपया स्वीयतासिद्ध्यै पूर्वविस्मारणेन हि ।
तथा दीपादिकं सर्वमङ्गीकुरु मदर्पितम् ॥ २ ॥

पूर्वस्य स्मार्तस्य स्वशरीरादेर्निर्बन्धाभावमुद्दिश्य कृतस्य मूत्राद्युच्चारादेर्विस्मारणेन किन्तु 'कायेन वाचा मनसे'ति श्लोके विवृतस्य यथोपरुद्धेन पूजादिकरणेऽपचारः स्यादिति बुद्ध्या मूत्राद्युच्चारो न स्वशरीरादेर्निर्बन्धाभावमुद्दिश्येत्याद्युक्तस्य स्मारणेन । ननु श्रौतधर्मैर्मोक्षसिद्ध्या इति वक्तव्ये कुतः **कृपया स्वीयतासिद्ध्या** इत्युक्तमिति चेन्न तृतीयाध्यायचतुर्थचरणे 'अतस्त्वितरज्ज्यायो लिङ्गाच्चे'ति सूत्रे 'इतरत्तदीयत्वमेव ज्याय' इति भाष्यात् । मोक्षोपादानापेक्षया स्वीयतोपादानस्य युक्तत्वात् । न च तदीयत्वं भक्तिमार्गान्तर्गतभक्तिमार्गीयोत्कृष्टावस्थारूपं साधनरूपमेवेति कथं मोक्षोपादानापेक्षया स्वीयतोपादानस्य युक्तत्वमिति शङ्क्यम् । अस्याः शङ्कायास्तत्रैव तद्भूतसूत्रे निरासात् । 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मे'ति वाक्यं तत्र कृपयेति साधनत्वाय 'कृपाविष्टः साधन'मिति । पूर्वोक्तलौकिकभिन्नालौकिकं **दीपादिकमङ्गीकुर्विति** पूर्ववत् । इदानीमपि तथा दृश्यते । आदिपदेनापणद्यूतारात्रिकोपायनानि, महाराजोपचाराणां मुख्यत्वात् । ननु बालभावस्योक्तत्वात्कुतस्तद्विरुद्धमहाराजोपचारा इति चेन्न । विरुद्धधर्माधारत्वाद्भगवतः । 'सर्वसामर्थ्यसहित' इति कृष्णाश्रयात् ।

---

[१] स्पष्टम् ।

अन्नकूटः । विशिष्टालङ्कारविशिष्टनैवेद्यानन्तरं श्रीगोवर्द्धनपूजा तत्रेदं **वक्तव्यं स्वशक्तीति** ।

स्वशक्तिहृदयाद्रूपं स्वं यथा प्रकटीकृतम् ।
तथैव प्रकटीभूय गिरौ पूजां गृहाण मे ॥ १ ॥

गोपालतापिनीये 'गोवर्द्धनधराय चे'ति श्रुतिस्तस्याः प्रपञ्चः । **स्वस्य** श्रीपुरुषोत्तमस्य **शक्तिर्माया** तस्या **हृदयं** प्राप्य तस्या अपसारणं 'कृष्णायाक्लिष्टकारिण' इति श्रुतेरक्लिष्टकारितया करोति तेन मायापसारणेन येन प्रकारेण स्वं श्रीगोवर्द्धनाधिदैविकभिन्नं रूपमतिस्थूलं **प्रकटीकृतमप्रकटं** तद् अतोऽभूततद्भावे च्विः, तथा मायापसारणप्रकारेण । 'तस्मै नमो व्रजजनैः सह चक्र' इत्यस्य सुबोधिन्यां स्पष्टमिदं प्रमेयम् । **गिरीति** ।

गिरिच्छत्रेण दृक्पातचामरैः स्नेहवारिभिः ।
केवलस्वीयताराज्येऽभ्यषिञ्चद्व्रजमीश्वरः ॥ २ ॥

त्रिभी राजा कदापि स्वावसरे न वियुनक्ति एवं गिर्यादित्रिभिर्व्रजोपि न वियुनक्ति तल्लीलामण्डलत्वात् । **ईश्वरोऽभ्यषिञ्चयतः** पातेन्द्रो भगवन्तं सुरभिकृताभिषेकेऽभ्यषिञ्चद् भगवान् स्वस्वरूपामृतपाता **व्रजमभ्यषिञ्चद्** इन्द्रो हि शृङ्गं वंशीस्थाने स्वसमये तिष्ठति ह्यतः पातृत्वसम्भवः । ईश्वरः अह्वयापूतं निशि शयानं निःसाधनं व्रजं स्वस्वरूपे व्यापकः । मालाकार इव व्रजः सन्नतानुन्नमयनुन्नतान् सन्नमयन्नुत्खातानारोपयन् विगलितान्विसृज्यान् यत्समीचीनं कुर्वाणो पुष्टान् पोषयन् जगति जातान् जागर्ति । जन्माद्यस्य यत इत्यत्र यच्छब्दार्थस्य निर्गुणत्वाद् 'उत्खातान्प्रतिरोपयन् कुसुमितांश्चिन्वंल्लघून्वर्द्धयन् कुब्जान् कण्टकितान् बहून्निरसयन् विश्लेषयन्संहतान् । अत्युच्चान्नमयन् नतांश्च शनकैरुन्मीलयन् भूतले मालाकार इव प्रपञ्चचतुरो राजा चिरं जीवति' । प्रास्ताविकः । तदुक्तं पाद्मोत्तरखण्डीयवाक्ये सम्बोधनं गोवर्धनकृतच्छत्रेति ।

ततः पीताम्बरं गोक्रीडनार्थं धारयित्वा गोक्रीडनादि कारयित्वान्नकूटसमर्पणे इमे वक्तव्ये **त्वदित्यादि** ।

त्वदाज्ञप्तस्वयागात्मान्नकूटस्य समर्पणात् ।
गोवर्धनाचलाधीश प्रसीद सततं मयि ॥ १ ॥
यथेन्द्रयागभङ्गस्य सयागस्य च कारणात् ।
नन्दादीनामनन्यत्वं कृतं मयि तथा कुरु ॥ २ ॥

नन्दं प्रति **त्वदाज्ञप्ते**त्यादि । **अधीशो** नाधिदैविकःकिन्तु स्वरूपमतिस्थूलम् । **सयागस्येन्द्रयागभङ्गस्ये**त्यत्र विरोध इति चेन्न । यागेन गोब्राह्मणादिप्रतियोगिकेन सहेति **सयागस्तस्येन्द्रयागभङ्गस्ये**ति । प्रतियोगिभेदात् 'तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मख' इति श्रीभागवतात् । **अनन्यत्वं** नान्यःपूज्यतमो येषां तेऽनन्यास्तेषां भावोऽनन्यत्वम् । तथा च गोपान्प्रति श्रीनन्दवाक्यं त्रयोविंशाध्याये 'इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते । मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिण'मिति ॥ १ ॥ २ ॥

प्रबोधिनी । अत्रापि पूर्वं भ्रातृद्वितीयागोपाष्टम्यक्षयनवम्यः । भ्रातृद्वितीयायां तद्दिनकीर्तनैर्भावना 'लोकवत्तु लीलाकैवल्य'मिति सूत्रात् । गोपाष्टम्यां कृष्णोपनिषच्छ्रुत्युक्तगोभिः क्रीडा 'शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः । तद्दिने वासुदेवोभूद्गोपः पूर्वं तु वत्सपः' इति पाद्मात् । भावना तद्दिनकीर्तनैः । अक्षयनवमीयुगादिः प्रदक्षिणाप्रधाना । तथैव शिष्टाचारात् । **क्रीडतेति** ।

क्रीडता योगनिद्राङ्गीकारेण रससागरे ।
तत्रस्याङ्गीकृता मासैः पुमर्थप्रतिपादकैः ॥ १ ॥

तथाधुनोत्तिष्ठ कृष्ण याहि स्वात्मनिवेदितान् ।
तदङ्गीकृतिमात्रार्थं जगद्रसमयं सृज ॥ २ ॥

अत्रोत्तिष्ठेति भक्तमनोरथार्थमधीष्टे लोट् न प्रार्थने 'प्रार्थिते वा ततः किं स्या'दिति निषेधात्। एतादृशीच्छा लीलाप्राकट्यार्थमतोयमुत्थापनमन्त्रः मत्रि गुप्तभाषणे इति धातुपाठात्। ननूत्सवप्रताने 'इदं विष्णुर्विचक्रम' इति मन्त्र उक्तस्तेनास्य बाध इति चेन्न। इच्छायां मन्त्रार्थज्ञानं कारणमर्थदेवस्तु तिरोहितः 'अपरिज्ञाननष्टेषु मन्त्रेष्वव्रतयोगिषु । तिरोहितार्थदेवेषु कृष्ण एव गतिर्ममे'ति वाक्यात्। किञ्च सर्वोत्तममार्गे भक्तिरुक्ता तत्र नवधाभक्तिः 'तत्रोपयोगोखिलसाधनानामि'ति वक्ष्यते तादृशभक्तौ गीता द्वादशे भक्तियोगाध्याये मन्त्राभावो मन्त्राणां स्वस्वप्रकरणे साधनभक्तितत्साधनेषूपक्षीणशक्तीनामुक्तायां भक्तौ धावनायोगात्। अतः **क्रीडतेत्यादिभिर्भगवतः** श्रीपुरुषोत्तमस्योत्थापनम्, न मन्त्रैः प्रमाणाभावात्। ननु मा सन्तु प्रेमानन्तरं स्वव्यसनतः क्रियमाणायां भक्तौ फलात्मिकायां साधनभक्तौ तु पूजायां मन्त्राः कुतो नेति चेन्न। गीताद्वादशाध्याये भक्त्यध्याये मन्त्राभावाद् उपासनायाः प्रेमभक्तिसाधनत्वे पूजायां मन्त्राः सन्तु बाधकाभावात्। 'मन्त्रस्यापि विधानत' इति सेवाप्रकरणनिबन्धात्। प्रकृतमथोच्यते **क्रीडता योगेत्याद्युक्ते** द्वितीयस्कन्धनवमाध्यायः। किञ्च वाराहपुराणीयचातुर्मास्यमाहात्म्यचतुर्दशाध्यायसन्दर्भः। श्वेतद्वीपस्वरूपकथनानन्तरम्।

'श्वेतद्वीपसमीपे तु क्षीराब्धौ शेषमञ्चके ।
चातुर्मास्ये तु सम्प्राप्ते स्वपामि प्रतिवत्सरम् ॥
श्वेतद्वीपस्थिताः सर्वे ये चान्येत्रापि वर्तिनः ।
मद्भक्ता देवताः सर्वास्तत्रस्थाः पूजयन्ति हि ॥
श्रीभूदुर्गात्मिका लक्ष्मीस्त्रिभी रूपैः सदैव तु ।
सेवतेऽनन्तरूपैश्च बहुरूपधरं हि माम् ॥' इति ।

स्वपामीति योगनिद्रा। अथ प्रलयात्मा नारायणोवान्तरप्रलयाधारः इति सुबोधिन्याम्। ननु **रससागर** इति विरुद्धं तस्य भेदनिबन्धनत्वादत आहुः तत्रस्थेति। **तत्रस्था** योगनिद्राङ्गीकृता क्रीडायां भेदार्थम्। तदुक्तमिदं 'मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदती'त्यत्रैकादशस्कन्धे, 'अन्तरा भूतग्रामवदि'ति सूत्रेऽभेदोन्तरातो भगवानभेदं न ददातीत्युक्तमेवं 'योगमायामुपाश्रित' इत्यत्र सुबोधिन्याम्। अतोत्र 'न यत्र माये'त्यस्य न विरोधः। अत्र निदर्शनमाहुः **मासैरिति**। चतुर्भिर्मासैः बहुत्वमपेक्षाबुद्धिजन्यं भेदनिबन्धनम्। सङ्ख्यातात्पर्यं वदन्तः शब्दार्थयोरौत्पत्तिकं सम्बन्धमाहुः पुमिति। पुमर्थाश्चत्वारस्तेषां प्रतिपादकाः शब्दात्मका अर्था मासाः रससागरे भक्तेच्छया चतुर्भिः पुमर्थैः क्रीडतीत्युक्तम्। यद्वा मासैश्चेष्टारूपैः कीदृशैः पुमर्थांल्लक्षीकृत्य गतैरित्यर्थः। प्रतिर्लक्षणे पद गतौ अर्थप्रकरणे शब्दगतप्रतिपादकत्वाभावात् तथा योगमायाङ्गीकृतत्वेन रूपेणेत्यर्थः। स्वेति स्वस्मिन्नात्मनि आत्मा निवेदितो यैस्तान् याहि 'प्रदीपवदावेश'सूत्रोक्तरीत्या कामभोगकरणार्थं प्रविश। यतस्त इन्द्रियाणि जुह्वति। स्फुटमात्मनिवेदनाख्ये ग्रन्थ इदम्। **तदित्यादि** स्वात्मनिवेदितानामङ्गीकृतिरूपाधिकारमात्रार्थं **रसमयं सृजेत्यधीष्टम्**। किं जगद् गोकुलात्मकं 'रसो वै स' इति श्रुतेः। एतदेव स्वात्मनिवेदितानामधीष्टम्। यतस्त इन्द्रियाणि जुह्वति। अत्र 'अचलत्वं चापेक्ष्ये'ति सूत्रम्। 'भक्त्या जानाति चाव्ययम्' इति श्रुतेर्वक्ष्यमाणस्मृतिस्वारस्यात्। गीता तु तद्विस्ताररूपा स्मृतिः। 'स्मरन्ति चे'ति सूत्र उदाहृता तत्रैव 'अहं भक्तपराधीन' इत्यादिः।

मार्गशिरः। भगवतः श्युत्तमपुरुषस्य भगिनीभावनं पूजनं चाहुः स्वेति।

स्वनाथप्रापिकां देवीं सन्तुष्टां कृष्णरूपिणीम्।
भावयित्वात्मभजनीये रूपे पूजयेच्च ताम्॥ १॥

नन्वन्याश्रयोन्यत्रान्यारोपे भ्रमश्चेति चेन्न। साधनाध्याये सर्ववेदान्तप्रत्ययाधिकरणे ‘सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्’ ‘भेदान्नेति चेदेकस्यामपि’ ‘स्वाध्यायस्य तथात्वेन समाचारेधिकाराच्च सववच्च तन्नियमः’ ‘दर्शयति चे’ति सूत्रचतुष्टयसिद्धमुपसंहारसूत्रभाष्य उच्यते आशङ्कामुखेन। ननु पूर्वसूत्रोक्तरीत्या गुणोपसंहारो न क्वचिदपि प्राप्तावसर इति सिद्धम्।“दृश्यते चोपसंहारः रामोपनिषत्सु ‘यो वै ये मत्स्यकूर्माद्यवतारा’ इत्यादिनोक्तावताररूपत्वस्य श्रीरामे ‘नमस्ते रघुवर्याय रावणान्तकराय चे’त्यादिषु त इति युष्मच्छब्दविषये श्रीव्रजनाथे श्रीरघुवर्यत्वादेरित्याशङ्क्य तत्प्रयोजकं रूपमाहुः **उपसंहार** इत्यादिना”। उक्तस्थलादिषु य उपसंहारः स त्वर्थस्य पदार्थस्य भगवल्लक्षणस्योभयत्राप्यभेदादित्यर्थः। इत्येकं रूपं द्वितीयम्। **विधिशेषवदिति** विधिशेषोर्थवादस्तद्वत्समानं च भवतीति। प्रकृते ‘सङ्कल्पो विदितः साध्व्यो भवतीनां मदर्चना’दिति ब्रह्मवाक्ये मदर्चनपदाद्भगवल्लक्षणार्थभेदः कात्यायन्याः। ‘विधिशेषवत्समानं’ विधिकल्पितस्य शरीरस्य ‘तस्य सेवादिकल्पने’ति श्रुतौ क्रियेतेति विधिं प्रकल्प्य तच्छेषः ॐ यो वै श्रीपन्याप्रकृतिर्भूर्भुवः स्वस्तस्मै वै नमो नम इति अर्थवादस्तत्समानमिदमेव। अथवा वायव्यं श्वेतमालभेतेत्यस्य वायुर्वै क्षेपिष्ठेत्यर्थवादस्तेन समानमिदम्। एवं कृष्णरूपिण्या देव्या उपसंहारे बीजद्वयमप्युपलभामहेऽतो भेदे सिद्धे नान्याश्रयो वाप्यन्यत्रान्यारोपः। ननु पुंस्त्वमुपसंहृत्य पूर्वं भजनं कृतमिदानीं कृष्णरूपिणीत्वं स्त्रीत्वमप्युपसंहृतमिति स्वरूपस्यान्यथात्वमापतितमिति चेन्न। विरुद्धसर्वधर्माश्रयत्वेन न स्वरूपस्यान्यथात्वमित्यस्य ‘अन्यथात्वं च शब्दादिति चेन्नाविशेषा’दिति सूत्रे सिद्धत्वात्। **स्वनाथप्रापिकां** दुरदृष्टनाशिकां कात्यायनीरूपां संहारिकां शक्तिमग्निरूपाम्। शक्तित्वेन व्यवहारेभेः स्त्रीत्वमतः साधनरूपाम्। अस्या अपि शक्तेरिच्छाशक्तिर्बलीयसीतीच्छया दुरदृष्टनाशप्रतिबन्धेऽसाधनत्वमाशङ्क्याहुः **सन्तुष्टामिति**। सन्तोषोनुद्धर्षः महाभाग्यवती ‘अल्पभाग्यत्वे भगवान्नाज्ञापयेत् यशोदायां च जन्म न स्याद्भगवद्दास्यं च न प्राप्नुयात्, त्वया प्रार्थितः प्रियः स्वेच्छामप्येतदनुगुणां करिष्यति अहो महाभाग्यं तव आभिमानिकसम्बन्धेन त्वं पुनर्भगिनी भवसि अत उपकारोपि कर्तव्यः’ एतादृश्या महानुद्धर्षः। परिशेषात्प्रमाणरूपां प्रामाणिकः सन्तुष्टो भवतीति। फलप्रमेययोरग्रे स्पष्टत्वात्। न च मन्तव्यं तादृशदोषो न मया परिहर्तुं शक्यत इति यतस्त्वं **देवी ताम्**। महायोगिनी गर्भसङ्कर्षणादिकार्यकारणात् प्रमेयरूपां दिवु क्रीडाव्यवहारेति धातुपाठात्। नन्वाधिदैविकं कथं परिहर्तव्यं कालादिभ्यो बलिष्ठा हि सा प्रतिबन्धकशक्तिस्तत्राहुः **कृष्णरूपिणीमिति**। कृष्णे रूपमस्या अस्तीति कृष्णरूपिणी तामधीश्वरीमित्यर्थः। ईश्वरं भगवन्तमधिकृत्य वर्तते अतोन्तरङ्गा त्वं शक्तिः स्वल्पापेक्षमन्तरङ्गम्। भगवन्मात्रापेक्षा, प्रतिबन्धकशक्तिस्तु बहिरङ्गा बह्वपेक्षत्वं बहिरङ्गत्वम्। भगवत्प्रतिबद्धोभयापेक्षत्वात्। अतः सर्वप्रकारेण त्वं भगवदीयेति **आत्मभजनीये रूपे भावयित्वेत्यर्थः**। न च ‘मायेत्यसुराः’ ‘माया च तमोरूपे’ति श्रुतिभ्यां तमउपासका असुरा इति वाच्यम्। अनीश्वरप्राकृततमउपासकत्व आसुरत्वं न तु हीश्वरदास्यकर्त्र्यां आत्मगुणतमोरूपाया उपासकत्व आसुरत्वमिति।

---

१. पनि स्तुतौ भ्वादिरात्मनेपदी सेट्।

वसन्तः । मकरकर्कटयोर्यदा विकर्तनः सङ्क्रामति तदा पर्वात्मक उत्सवः पूर्वमत्रापि । किञ्च, पौषे श्रीगोस्वाम्युत्सवोपि कृष्णपक्षनवम्याम्, 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इति श्वेताश्वतरात् । ननु गोपीनाथजिदुत्सवः कुतो नोक्त इति चेन्न ब्रह्माण्डपुराणे सप्तसप्तत्यध्याये मथुरागोकुलाद्युक्तम् 'तत्राहं मुहुः तं रूपं सर्वलोचनगोचरं, करिष्ये विमलं सौम्य मम भक्तसुखावहम् । विट्ठलेशेतिविख्यातिं गमिष्ये जगतीतले' इति वाक्येभ्यः ।

काम इति

कामेपि प्रमदाभावकरणं कामसुन्दरम् ।
तदर्थं सेवयेत्कृष्णं कैशोरे वयसि स्थितम् ॥ १ ॥
एवं संसेवितः कामपञ्चम्यां कामदोसि यत् ।
गोपीनां कृपया देहि तथा मे काममद्भुतम् ॥ २ ॥

अद्भुतपदमहिम्ना व्याख्यायते संराधनाभावेन प्रत्यक्षानुमानाभावात् । पुरुषादियोग्यकामोप्यस्तीश्वर इति । 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' इति सूत्रे संराधनस्य कारणत्वात्सर्वधर्मप्रत्यक्षे **कामेपि** पदेन भूर्भुवःसुवःपदवाच्यलक्ष्म्याः कामोध्यारोपितलक्ष्मीकः लक्ष्म्या रमणस्थानत्वाद् अत उक्तं **प्रमदा** लक्ष्मीस्तस्या **भावो** लक्ष्मीत्वं तस्य **करणमिति कामात्सुन्दरम्** । **तदर्थं** कामसुन्दरप्रमदाभावकरणार्थं 'कामादीतरत्र तत्र चायतनादिभ्य' इत्यत्राविहितभक्त्यात्मककामस्य भगवत्सम्बन्धान्मुक्तिसाधनत्वमुक्तमिति तत्कामना कार्या, अत्र प्रमदाभावकरणं फलं कामादिनिष्ठं सेवा साधनरूपा देहनिष्ठेति फलसाधनयोर्वैयधिकरण्यं तत्तु दूषणं 'उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदी'ति सुबोधिनीकारिकातः स्ववैराग्योत्कर्षार्थं यदि तदा नास्ति फलस्य स्वनिष्ठत्वस्य **कृपया देहि तथा मे काममद्भुत**मिति वक्ष्यमाणत्वाच्च एवमुक्तपरामर्शेन **कामपञ्चम्यां** भक्तैः संसेवितो कामः अद्भुतत्वाद् यद् येन प्रकारेण गोपीनां कामदोसि त्वं तेन प्रकारेण सर्वेन्द्रियहोमकर्त्रैर्थं तदिच्छया विकृतलीलत्वेन प्रकारेण **मे** मह्यमद्भुतं **कामं देहीति** सत्कारपूर्वको व्यापारः अधीष्टे लोट् इति । अकामो भक्तेच्छया सकाम इत्यद्भुतम् । **तथाहि** विभावानुभावसञ्चारिणस्तावद् अत्र श्रीकृष्ण आलम्बनम् । तद्गुणातिशयः सच्चिदानन्दरूपत्वाकामत्वकामलक्ष्मीप्रमदाभावकरणलोकोत्तरसौन्दर्यकरणाद्यतिशय उद्दीपनम् । स्तवादयः 'अकामो भगवान्' कामदोसीत्युत्कर्षाधायकगुणवर्णनादयोनुभावाः । सेवनार्थं गतिधृतिहर्षादयः सञ्चारिणः । इति विस्तारिकायामद्भुतरसविवरणे । एभिः कारणादिभिर्विविधेषु पदार्थेषु लोकसीमातिवर्तिषु 'विस्फारश्चेतसो यस्तु विस्मयः स उदाहृत' इति लक्षणवाक्याद्भुतः कामः । शृङ्गारेणैव सर्वे रसा रसभावं प्राप्नुवन्तीति रसयोर्विशेष्यविशेषणत्वम् । अन्योपि विस्मयो गोपीनां कामदोसीत्यत्र गोप्यः आविद्याकला वैराग्यसाङ्ख्ययोगतपोभक्तिरूपास्तासां काम इति ।

दोलोत्सवः । अत्रापि पूर्वं माघी पौर्णिमा युगादिः, फाल्गुनी, सप्तमी, श्रीगोवर्धननाथागमनोत्सवः, शुक्लैकादश्यां निकुञ्जोत्सवः, उद्यानोपवनोत्सवः, फाल्गुनी पूर्णिमा मन्वादिः । अत्र भावना उल्लासादिभिः कीर्तनादिभिश्च कार्या एव ।

प्रियेति।

प्रियोरुरूपभावात्मस्तम्भयुग्मसमन्विताम् ।
श्रीकृष्णस्मृतिसौख्यां यद्दोलामारोपयाम्यहम् ॥ १ ॥

प्रियाबाहुलताभावात्मिकायामनुरागतः ।
दोलायां दोलयामि त्वां प्रसीद पुरुषोत्तम ॥ २ ॥

स्वाधिकारानुसारेणेयं भावना न सर्वजनाधिकारानुसारिणीत्युपरमामः । पुरुषोत्तमप्रकरणे श्रीमदाचार्यैरिन्द्रियहोमः प्रतिपादितः सोपि ग्रन्थान्तरे कस्यचित्पुंसः कृतपुण्यपुञ्जस्य भगवता सह रिरंसा समजनीत्यादिनैताद्दशरिरंसावतो दासस्य तु निरोधलक्षणग्रन्थोक्तरीत्येन्द्रियहोमस्तथापि स्ववंशे स्थापिताशेषमाहात्म्या आचार्यो अतो ग्रन्थे निबन्धः । अन्येषामपि 'यद्यदाचरति श्रेष्ठ' इति न्यायेनेयं भावना 'ईश्वराणां वचस्तथ्यं तथैवाचरितं क्वचिद्' इति न्यायानुसन्धाने तु 'आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेदि'ति दासभावेन भावनात्रयं, मध्यमाधिकारे तु स्वधर्मबुद्ध्या प्रेम्णे । हीनाधिकारे तु स्कन्दपुराणोक्तं 'त्रिरेव दोलयेद्देवं सर्वपापापनोदनम्' इत्यन्यदप्युत्सवप्रतानेऽस्ति । स्कन्दस्य तामसत्वेऽपि पुराणानां सात्त्विकादिविभागो न प्रवृत्त उत्सवप्रताने ग्रन्थान्तरे आकरे निबन्धलेखे श्रीकल्याणरायैस्तूक्तः । अत्र सूत्रं 'तानि परे तथाह्याहे'ति । श्रुतिः 'ता वां वास्तूनी'ति । गीता त्रयोदशेऽध्याये 'सर्वेन्द्रियगुणाभासमि'ति । श्रीहरिरायाणां कीर्तनं हिन्दोलायाः 'झूली झूली हो पियसङ्ग पावसरितु आनन्दभरी । चरणयुगल दोऊखम्भ भये भुजदाण्डी चारि सिरजुरे मयारएहो लटकन आभूखन बहुरङ्ग' कीर्तनादिभिर्भावनाः ।

रामनवमी । अत्रापि द्वितीयापाटपुष्पमण्डिनीसंवत्सरादि पूर्वं बोध्यम् । श्रीति ।

श्रीकृष्णहास्यरूपेण प्रमदाभावकारकः ।
तदर्थं प्रकटाय त्वां भजामि रघुनायक ॥ १ ॥
यथैवाग्निकुमाराणां भावमुत्पाद्य दत्तवान् ।
वरं मे कृपया देहि तथा देव नमोऽस्तु ते ॥ २ ॥

श्रीकृष्णस्य हास्यरूपेण रामतापिनीये 'कामरूपाय रामाय नमो मायामयाय चे'ति श्रुतौ मायामयायेत्यत्र प्राचुर्ये मयट् । रामस्य मायाऽविकारत्वात् । तच्च प्राचुर्यं श्रीकृष्णसत्तामंशतो बोधयतीत्युक्तं **श्रीकृष्णहास्येति** । प्रमदाभावस्य कार्यत्वेन वक्ष्यमाणत्वात्तद्बीजशक्तिः श्रीति कायस्य मायामयत्वेन 'पुष्टिं कायेन निश्चय' इत्यत्र कायपदार्थत्वेऽपि प्रमदानां साधारणीनां ग्रहणे प्राप्तेऽपलापप्रसङ्गात् । वाराहे श्रीभागकथनाच्च् छ्रियाः कृष्णस्येति वा । इन्द्रियमयायेत्यनुक्त्वा मायामयायेत्युक्तं तत्सूचयति प्रमादाभावकार्यं भेदयुतमेव । मायापदवाच्यानीन्द्रियाणि यथा तथा पुराणे गुणा मायापदवाच्याः 'हास्यं जनोन्मादकरी च माये'ति वाक्यान् मायामयायेत्यत्र मायापदसूचितहास्यरूपेणेत्यर्थः । हास्यावतारः श्रीराम इति प्रसिद्धिः । रामतापिनीये मन्त्रसाधनमन्यमार्गपरं मतं नात्रोपयुज्यते । दण्डकारण्यवासिनामृषीणां **प्रमदाभावकारकः** प्रसिद्धम् । यत एताद्दशः स्वतः प्रमदाभावकरणार्थं **प्रकटाय** तुभ्यं नम इत्यनुकर्षेणान्वयः । मर्यादापुरुषोत्तमत्वेन ग्रन्थकरणवेलायां प्रकट इति नमनं भगवदाविर्भावे माहात्म्यज्ञानपूर्वकं नमनं कर्तव्यमिति सुबोधिन्याम् । **रघुनायकेति** सम्बोधनं रघूणां नायक इति दासानां दास्ययोग्यं वरान्तरमपि ध्वनितं देयम् । मायामयायेति श्रुतौ मायापदं माङ् माने शब्दे चेति धातुपाठान्माने परिच्छिन्नपरिमाणे शब्दे चास्ति । ततः प्रत्ययः मयट् च । एवं चात्र हास्यं जनोन्मादेति वाक्योपबृंहितश्रुत्या हास्यं मायेति ।

श्रीमत्प्रभूत्सवः । श्रीकृष्णेति ।

श्रीकृष्णान्तरकृष्णास्यरवरूपविहारकृत् ।
तदर्थप्रकटः स्वीयदास्ये मामनुभावय ॥ १ ॥

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरा'विति श्वेताश्वतरश्रुतेरावश्यकः । 'आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् । न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरु'रिति भगवद्वचनात् । अत्रापि 'प्रभौ परिवृढ' इति पाणिनिसूत्रात् परिवृढसमानाधिकरणप्रभुपदोपादानम् । परिवृढाष्टके श्रीपुरुषोत्तमे परिवृढपदप्रयोगः । अतः **प्रभूत्सव** इत्युक्तम् । आचार्यत्वं च नूतनमार्गप्रवर्तकत्वं 'आचार्यवान् पुरुषो वेद' इति श्रुतेः 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ति' इति स्मृतेश्च । 'उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षत' इति आरणश्रुतिर्वेदमार्गाचार्यलक्षणप्रतिपादिका । 'एकं साङ्ख्यं च योगं च वेदारण्यकमेव च । परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यत' इति भारतात् । आरण्यकमित्यत्र स्वार्थे ष्यञ् कप्रत्ययश्च । आरणमित्यर्थः । सुबोधिन्यामपीयं श्रुतिर्विचारिता श्रीकृष्णस्यानन्दमात्रकरपादमुखोदरादेर्योन्तरकृष्णो विरहदलविविधभावात्मा तस्य सूर्यात्मकस्यास्ये ये रवाः 'अग्निर्वाग् भूत्वा मुखं प्राविशत्' इति श्रुतेस्तद्रूपा **विहाराः** तेषां **कृत् तदर्थं** तादृशविहारार्थं यत्र श्रीकृष्णस्तत्र **प्रकटः स्वीय** आत्मीये **दास्ये** तन्निमित्तं **मां** लक्षीकृत्य **भावय** स्मर। आचार्येषु भेदबुद्धेस्त्रयस्त्रिंशदपराधेषु गणनाज्जन्माष्टम्यां यानि श्रुत्यादीनि तान्यत्रापि । यद्वा लिङ्गभूयस्त्वाधिकरणे ब्रह्मत्वेनोपासनाविषयत्वेनेति भाष्ये उपासनात्वेन भक्तित्वेन कार्यकारणभावः सूचित इति मर्यादाभक्तौ जनयितव्यायामुपासनामपेक्षते कारणत्वेन तत्रोपासनाविषये प्राणे श्रुतिः 'प्राण आचार्य' इतीयं श्रुतिः । अप्रतीकालम्बनसूत्रम् । विभूत्यध्याये गीता 'मुनीनामप्यहं व्यास' इति । 'भक्तिमार्गप्रचारैकहृदयो बादरायण' इति भाष्यादाचार्याणामपि भक्तिमार्गप्रचारैकहृदयत्वाद्भक्तिमार्गप्रचारैकहृदयत्वगुणयोगाद्व्यासपदस्य गौणी ।

चन्दनयात्रा ।

कुचकुङ्कुमगन्धाढ्यमङ्गरागमतिप्रियम् ।
श्रीकृष्ण तापशान्त्यर्थमङ्गीकुरु मदर्पितम् ॥ १ ॥

स्पष्टम् । 'तानि पर' इति सूत्रम् । 'ता वां वास्तूनी'ति श्रुतिः प्रपञ्चरूपा वैकुण्ठस्थानोद्भवं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचन्दनं वैकुण्ठस्थानादाहृत्य द्वारकायां मया प्रतिष्ठितं चन्दनं कुङ्कुमादिसहितं विष्णुचन्दनं ममाङ्गे प्रतिदिनमालिप्तं गोपीभिः प्रक्षालनाद्गोपीचन्दनं मदङ्गलेपनं पुण्यं चक्रतीर्थान्तस्थं चक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवतीति श्रुतिर्गोपीचन्दनोपनिषदि । पुण्यं प्रथमाधिकारे मर्यादायां प्रेमद्वारा मुक्तिसाधनं पुष्टौ मुक्तिः कर्मसम्बन्धव्यतिरेकेण गृह एवं चतुर्विधपुरुषार्थमनुभवतो भगवदीयत्वरूपा पुष्टिमार्गीयमोक्षविवृतौ श्रीपुरुषोत्तमकृतायां विवृतेयं मुक्तिः । गीतातावद् 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह'मिति राजविद्याराजगुह्ययोगाध्याये नवमाध्याये ।

नृसिंहजयन्ती । ग्रीवेति ।

ग्रीवारूपं श्रीनृसिंहं स्वभक्त्यतिशयाद्यथा ।
प्रकटीकृतवान् कृष्ण तां भक्तिं वितर स्व मे ॥ १ ॥

---

१. सेवेत ।

ग्रीवया रूप्यते नृसिंहोऽयमिति व्यवह्रियत इति ग्रीवारूपं सर्वो हि शिरसाभिज्ञायते देवदत्तोयं विष्णुमित्रोयमित्यतो विशेषणम् । स्वपदेन प्रह्लादः । सप्तमस्कन्धे स्पष्टम् । वितर स्व हे स्व वितर । तॄ प्लवनतरणयोः भ्वादिपरस्मैपदी । नृसिंहतापिनीयेऽथैष एवाकार इत्यनेन जीवात्मैक्यकृतात्मरूपाकारमनूद्याप्ततमार्थं आत्मन्येवेत्येवकारेण विशेषणसङ्गतैवकारेणात्ममात्रे तं बोधयित्वा नृसिंहे ब्रह्मणि वर्तत इत्यनेन श्रुत्यंशेनाकारस्यानात्मन्यव्यापकेवतार इति यावत् तमाकारं न बोधयति । अतः श्रुत्या न पुराणोदितरूपबाधः ।

ज्येष्ठाभिषेकः । अत्रापि गङ्गाजिद्दशहरा पूर्वं बोध्या । अत्रापि हरेरुत्सवः ज्येष्ठशुक्लदशम्यां प्रयागे श्रीयमुनया समागमो जात इति यमुनासखीत्वात् । पद्मपुराणे मरीचिसर्गे यमुनोवाच 'पृथग्भूत्वा गन्तव्यं हि त्वया सखी'त्यत्र सखीति सम्बोधनात् ।

प्रियेति ।

प्रियारतिविहारोत्थश्रमवारिसुगन्धिना ।
शृङ्गाररसरूपात्मयामुनब्रह्मवारिणा ॥ १ ॥
स्वरूपरसदानार्थं तापानन्तरभावनात् ।
प्रियाङ्गरसनीरेण स्वभिषिक्तो भव प्रभो ॥ २ ॥
स्नातस्तद्रसदानार्थं स्वसृष्टिं कारणात्मिकाम् ।
सृष्ट्वा वितर सत्क्रीडां तदास्ये स्वीकुरुष्व माम् ॥ ३ ॥

अत्र पद्मपुराणे मरीचिसर्गे यमुनामाहात्म्ये त्वाष्ट्री ब्रह्मणो वरं लब्ध्वा सूर्यनारायणाद्यमं यमुनां च ससर्ज । तत्र द्रवरूपांशेऽचेतने ब्रह्मामृतमिश्राम्भःपरिक्लिन्नपाणिस्पर्शैः विष्णुप्रवेश ईश्वरैश्वर्याधानं च देवत्रयकार्यं तत उभयोर्जातकर्मादि । ततो 'यमुनाम्बुवपुर्भूत्वा पुण्यतोयाभिगामिनी । वैष्णवीयोगमास्थाय सावतीर्यास्तपर्वतात् । अर्घ्यादिकृतसत्कारा भित्त्वा चाम्बुनिधिं ततः । संप्राप्ता पुष्करद्वीपं पुष्करद्वीपवासिभिः । पूज्यमाना विवेशाशु क्षीराब्धिं तेन सत्कृते'ति । अत्रान्तस्तद्धर्माधिकरणे सूर्यान्तस्थः परमात्मा प्रतिपादितस्तस्य प्रिया त्वाष्ट्री 'अहं बीजप्रदः पिते'ति गीता । प्रियायाः क्रीडाविहाराश्च तैरुत्थेन श्रमेण यद् वारि तस्य सुगन्धिना सुगन्ध इव सुगन्धोऽस्त्यस्मिन् एतेन चन्दनादि पुष्पादि चोद्घृष्टं सुगन्धजनकं वारिण्युक्तं 'रसो यः परमाधारः सच्चिदानन्दलक्षणः । ब्रह्मेत्युपनिषद्गीतः स एव यमुना स्वयम् । पावनायास्य जगतः सरिद्भूत्वा ससार हे'ति वाक्यैस्तत् शृङ्गाररसरूपम् । एतस्य वारिणो मधुरो रस इति चेन्न । तच्छृङ्गाररसरूपमात्मनि स्वरूपे ब्रह्मात्मके यस्य न प्रकटं भक्तेच्छातो विनाऽप्राकट्यात् । नन्वप्रकटस्य तस्य सत्त्वे कोतिग्रह इति चेच्छृणु स एव यमुनेति प्रत्यभिज्ञाशब्द एव । तच्छब्देन ब्रह्मपरामर्शात् तस्य च शृङ्गाररसत्वात् । तादृशं यामुनं ब्रह्म निर्विकल्पकज्ञानं वारि तेन वारिणा ॥ १ ॥

स्वरूपरसः फलप्रकरणे 'ततो रूपं प्रतिष्ठित'मित्युक्तः **तद्दानार्थम्** । ननु कथमेवं व्याख्यायते यतः सूर्यान्तस्थपरमात्मनो दुहितेति चेन्न । यमुनाम्बुवपुर्भूत्वेत्यनेन वपुरन्तरप्राप्तेः, भूत्वेति पदादंशतः सत्ताया अबाधकत्वात् । 'या माता सा पुनर्भार्या या भार्या जननी हि सा । यः पिता स पुनः पुत्रो यः पुत्रः स पुनः पिते'ति योगतत्त्वोपनिषच्छ्रुतेः ब्रह्मवारिणेत्युक्तेर्न कोऽपि दोषः । स्वरूपरसदानार्थमित्यत्र यमुनाया इत्युच्यते कुत एतद् 'आपो वा' इत्यादिश्रुतेरवान्तरप्रलय-

7 परि०

विषयत्वेन सुबोधिन्यां व्यवस्थापनाद् अत्रापि स्वयं विष्णुः प्रविश्याजीवयद्धि तदित्युक्तम् । तदित्यचेतनं मिथुनं यमयम्यात्मकम् । तापेति स्वयं तापः सा करैस्तप्तेत्युक्तस्तदनन्तरं भगवत्तोषः । 'तुष्यतां मे स भगवानि'ति श्रीभागवते कालिन्दीवाक्यात् तस्य भावनाद् उत्पादनात् तापानन्तरं तोषे स्वरूपरसदानमित्युक्तम् । हे **प्रभो** परिवृढ **सुष्ठ्वभिषिक्तो भव**ेत्यधीष्टे लोट् । यद्वा कालिन्द्यै स्वरूपरसदानार्थम् । यद्वा यामुनब्रह्मवारिणेत्यत्र कालिन्दीब्रह्मवारिणेत्यर्थः । यामुनेत्यत्र शैषिकप्रत्ययात् । यमुनया गृह्यते रूपान्तरेण कालिन्दीत्वेन तद्यामुनमेतदुभयपक्षे 'अहं देवस्य सवितु'रित्यादिसुबोधिनीसन्दर्भे स्फुटोऽयमर्थ उत्तरार्धे । प्रियेत्यादि 'प्रिया कालिन्दी सैवाङ्गं स्वयं विष्णुः प्रविश्ये'ति वाक्यात् तदेव **रसो** मधुरः तद्युक्तं **नीरं** तेन ॥ २ ॥

अभिषेकः स्नानं स्नातस्य भक्तेच्छया लीलाप्राकट्यमाहुः स्नातस्तेति । स्वसृष्टिमात्मसृष्टिम् । **कारणात्मिकां** ब्रह्मात्मिकाम् । सत्क्रीडाममृतक्रीडाम् । तद्दास्ये ब्रह्मदास्ये विस्तृतब्रह्मक्रीडाङ्गीकृतदास्ये । स्वीकुरुष्वेत्यात्मनेपदं स्वीकारफलं भजनानन्दरूपं आत्मगामि प्रतिपादयति । स्वसृष्टिः सर्वतः स्वसृष्टिं विशिंषन्ति स्म **कारणात्मिका**मिति । कारणानि श्रीगोकुले भक्तेच्छया जातानि अथवा दहराधिकरणोक्तपरमात्मन्यवरुद्धानि कारणानि ब्रह्मजीववादनिराकरणसिद्धानि । न स्थानतोपीत्यधिकरणे ब्रह्मस्वरूपं सिद्धम्, 'अपि संराधन' इति सूत्रे फलायितं वा, अरूपवत्सूत्रे सिद्धं वा कारणं प्रस्थानरत्नाकरस्य प्रमेयप्रकरणे 'तच्च ब्रह्म पूर्वं निराकारमेव सच्चिदानन्दात्मकं सर्वभवनसमर्थ'मित्येवं सर्वभवनसामर्थ्योक्तेः, जिज्ञासाधिकरणे निर्गुणमेव ब्रह्म कारणमिति निरुक्तेः । इमानि कारणानि आत्मा स्वरूपं यस्याः । आत्मसृष्टिस्तु वाराहे 'प्रादुर्भावोऽवताराणां मम सृष्टिरितीरिते'ति लक्षणिकोक्ता सापि व्याख्येया । सत्क्रीडायां मृत्युरूपाशननिवृत्तिस्तु न, तद्भिन्नतत्सदृशाशनाया अमृतत्वेनामृतरूपापेक्षितभोगस्य सम्भोगप्राप्तिसूत्रे प्रसाधनात् ॥ ३ ॥

रथोत्सवः । मन इति ।

मनोरथात्मकरथे रथात्मात्मन् हरे मम ।
श्रीकृष्णस्योपवेशार्थमधिवासं कुरु प्रभो ॥ १ ॥

मनोरथो भक्तानां ब्रह्मणि प्रचरति तेनात्मा स्वरूपं यस्य तादृशे **मम रथे, हे हरे** प्रपञ्चे वर्तमानानां सर्वदुःखहर्तः । यद्वा रथो देहस्तस्मिन्नात्मा जीवात्मा तस्यात्मा स्वरूपं रथशब्दस्य देहे शक्तिः 'आत्मानं रथिनं विद्धि शरीरं रथमेव त्वि'ति श्रुतौ जीवस्याक्षरात्मककरणसामर्थ्यं द्योतितम् । 'य एवास्मि स सन् यज' इति श्रुतेः । तदपि भावात्मकं तु यद्धाम तद्रूपत्वेन व्यावर्तयामासुः **प्रभो** इति परिवृढ इत्यर्थः पुरुष इति यावत् । तथा च भाष्यम् । अक्षरस्यापि ब्रह्मत्वं पुरुषस्यापि तयोः परापरभावोऽभेदश्चेति अदृश्यत्वाधिकरणे । क्रियासहितसदानन्दरूपश्रीकृष्णस्योपवेशार्थं **अधि** अधिकं प्रभुत्वेन **वासम्** । यद्वा मनोरथात्मकरथविशेषणम् । **अधिवास**मिति वास इत्यर्थः वास इत्यधिवासमव्ययीभावः । **उपवेशार्थ**मुपवेशस्यार्थे प्रयोजनं फलमानन्दं **कुरु** यद्वा योग्यतां कुरु । अधीष्टे लोट् ।

मनोरथेति ।

मनोरथात्मकः कृष्ण कल्पितोयं रथस्तव ।
पूरयात्रोपसंविश्य गोपीवन्मन्मनोरथम् ॥ २ ॥

'उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पने'ति रामपूर्वतापिनीयश्रुतेः **कल्पित इत्युक्तम्**। 'मनोरथान्तं श्रुतयो यथा ययु'रिति फलप्रकरणे वाक्यान्मनोरथत्वावच्छेदेन **मन्मनोरथं पूरयेति** सत्कारपूर्वको व्यापारः।

श्रीकृष्णेति।

श्रीकृष्ण रथमारुह्य सरामेण सुभद्रया।
पाहि मां भक्तिदानेन दुःखसंसारसागरात्॥ ३॥

हे **श्रीकृष्ण** स पूर्वं मनोरथपूरकत्वेन भावितो **रामेण सुभद्रया** च सह त्वं **रथमारुह्य दुःखसंसारसागरान्मां पाहि**। नन्वियदवधि सेवयैवं दुःखसंसारसागरात् पा रक्षणे रक्षणं कृतमेव 'ततः संसारदुःखस्य निवृत्ति'रिति सिद्धान्तमुक्तावल्याः पुनः कुतः स्मारयसीत्यत आहुः **भक्तिदानेनेति**। सर्वात्मभावोत्र भक्तिः दानपदसमभिव्याहारात् 'प्रदानवदेव तदुक्तमि'ति तार्तीयसूत्रात्। सर्वात्मभावाभावजदुःखं तिष्ठत्येवेत्यंशतोऽपि दुःखसंसारसागरात्पाहीत्यर्थः। हीनाधिकारे तामसस्कन्दोपन्यासेन। सर्वत्र प्रसिद्धरथोत्सव उत्सवप्रताने प्रतिपादित एव, भावनायां भावनापि।

पवित्रोत्सवः। अत्रापि पूर्वं षष्ठी पूर्णिमा हिन्दोला श्रावणशुक्लतृतीया वाटिका बोध्याः। तत्र षष्ठीपूर्णिमयोर्भावने विधेये के अपि। हिन्दोलायां दोलोत्सववद् भावना। 'झूली झूली हो पियसङ्ग' इति भाषाकीर्तनाद् अन्यैः कीर्तनैश्च। अत्र तृतीयायामपि कीर्तनाद्भावना। उद्यानेऽपि उल्लासादिभिर्भावना। द्वितीयस्कन्धनवमाध्याये 'प्रेङ्खं श्रिता या····गायती'त्यत्र सुबोधिन्यां हिन्दोलोक्ता।

अक्षरे लीनतासिद्ध्यै भृशं लक्ष्मीर्यथाकरोत्।
दोलिकारोहणं स्वप्रियकर्म गायती तथा॥ १॥

प्रतिमुखे मुखान्दोलैरक्षराद्भयं कुरु। मम कृतिरियं न मूलग्रन्थकृताम्।

या कृतेति।

या कृता वार्षिकी सेवा सा मूलफलदा मता।
प्रत्यहं सूत्ररूपेण सैकीभूतानुभावनात्॥ १॥

मूलं धर्मी प्रत्यहं क्रियमाणा तु तत्तदृत्वन्तर्गततत्तद्दिनसेवाजतोषमुत्पादयन्ती प्रत्यवायाभावे पर्यवस्यति न तु मूले, प्रत्यहं सेवया प्रेमासक्तिव्यसनानां भवनात्। प्रेमत्वेन सेवात्वेन कार्यकारणभावात्। तदुक्तं 'कृष्णसेवा सदा कार्ये'ति सिद्धान्तमुक्तावल्यां तट्टीकायां तदकरणे प्रत्यवायी भवतीति। मानसी सा परा मते'त्यस्य टीका परा फलरूपेति 'मद्भक्तेः कारणं पर'मित्येकादश एकोनविंशे परमिति फलाव्यभिचारिकारणमतः परा फलाव्यभिचारिकारणमतो वार्षिकी सेवा प्रत्यहं क्रियमाणा सूत्ररूपा मूलफलदवार्षिकीसेवासूचनात्। 'सूचनात्सूत्रमित्याहु'रिति ब्रह्मोपनिषच्छ्रुतेः। न च यज्ञोपवीतसूत्र एवेयं प्रवर्तेत इति शङ्क्यम्। सूत्रपदादत्रापि समाख्यासत्त्वात्। एवं च प्रत्यहं सूत्ररूपेण 'प्रकृत्यादिभ्य उपसङ्ख्यान'मिति वार्तिकेन तृतीयाऽभेदार्थिका सूत्ररूपेणेत्यत्र तथा च सूत्ररूपा भिन्ना या सेवेत्युक्तम्। ननु सूत्रं कार्पासं सेवानुवृत्तिः क्रियेति यावत् तयोर्द्रव्यकर्मणोः कथमभेद इति चेन्न। 'क्रियाङ्गं तद्धि वै स्मृत'मिति ब्रह्मोपनिषदः क्रियाङ्गस्य क्रियाकत्वात् तदन्तःपातिनां सूत्राणां तद्रूपत्वात्। ननु सूत्रपदस्य कार्पाससूत्रं शक्यार्थः न क्रियातोत्र कथं सूत्ररूपा, सूत्रपदेन रूप्यत इति सूत्ररूपेति चेन्न। सूत्रपदस्याभिधेयार्थतिरस्कारेण व्यङ्ग्यार्थे तात्पर्यार्थे वा क्रियारूपे प्रवृत्तेः सूचनात्सूत्रमुच्यत इति श्रुतेः।

सङ्ख्यातात्पर्ये वा यथा पुष्टौ। ननु षष्ट्युत्तरशतत्रयपरैः सङ्ख्यातात्पर्यं कुतो नेति चेन्न। यथावनिकस्मार् वा सेवा व्यष्टीभूता सानुभावनाद् अनु पश्चाद् भावनमनुभावनं चानुभावनं चानुभावनं चैतेषां समाहारोनुभावनं एकवद्भावः। तस्मात्समष्टीभूतानुक्रमेणैकदा भावनाविषयीकृतैकीभूतेत्युच्यते। क्रियाप्रिक्षणावस्थायिनीत्वपक्षे आहार्यज्ञानविषयत्वं बाधकालीनेच्छाजन्यं ज्ञानमाहार्यम्। अत्र वार्षिकीसेवा नाकृता मूलफलदापि तु कृतेति कृतेत्युक्तम्। नन्वेकं तत्पदं व्यर्थं या प्रत्यहं सूत्ररूपेण व्यष्टीभूतानुभवनादेकीभूता कृता वार्षिकी सेवा सा मूलफलदा मतेत्यन्वयादिति चेन्न। दूरान्वयस्य पूर्वतन्त्रे निषिद्धत्वाद् एवं च या प्रत्यहं सूत्ररूपेणेत्यत्र यच्छब्दानुवृत्तिर्यत्तदोर्नित्यसम्बन्धाज् 'जनुषा पिपर्तने'ति ऋग्वेदश्रुत्या सा मूलफलदा मम ग्रन्थकर्तुर्मता। श्रीमदाचार्याणां तु एकापि सेवा सम्यक् कृता पुरुषार्थपर्यवसायिनी तथापि देहनिष्कृत्यै सम्पूर्णजन्मना पूर्तियुक्तं कुरुतेत्यृग्वेदश्रुतिराहेति मतम्।

एवमेकीभूतसूत्रा वार्षिकी सेवा चैकार्थवाचिका तत्र सूत्रपदं प्रत्यहं सेवानां वार्षिकसेवासूचनरूपं ज्ञापकमित्याहुः पवित्रमिति।

पवित्रं तज्ज्ञापकं हि प्रेषितं हरिणा ततः।
अतस्तदारोपणं तु श्रीकृष्णे सन्मतं सदा॥ २॥

पवित्रं षष्ट्यधिकं शतत्रयतन्त्वात्मकं तस्य प्रत्यहसेवानां वार्षिकसेवासूचनरूपस्य ज्ञापकम्। तदुक्तं 'तत्रोत्तमं पवित्रं तु षष्ट्युत्तरशतत्रय'मिति। 'ये त्वां न बहु मन्यन्ते यथा सम्भावितो मया। जपहोमादिजं तेषां फलं त्वामेतु निश्चया'दिति कपर्दिवचनम्। ब्राह्मं च राजसं 'न करोति विधानेन पवित्रारोपणं तु यः। तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम' इति। तथा चैकं सूत्रं न्यूनं चेन्न पवित्रं पूर्णं यथा तथोक्तवाक्याभ्यां पवित्रोत्सवरूपसूत्रं न्यूनं चेन्न वार्षिकी सेवा पूर्णा भवतीति प्रोक्तम्। कपर्दिनो धर्मज्ञभक्तत्वेन निश्चयार्थे हीत्युक्तम्। 'द्वादशैते विजानीमो धर्मं भागवतं भटा' इति धर्मराजवाक्याद्धर्मज्ञत्वं 'ज्ञानेन भजती'त्यथर्वशिरःश्रुतेर्भक्तत्वं कपर्दिनः। हरीति हरिणा क्रोडरूपिणा भक्तानां स्वभावत इष्टं प्रेषितं कृतम्। वाराहे चातुर्मासमाहात्म्ये 'पूर्णिमायां ततः कुर्यात्पवित्राणां समर्पणम्। नानावर्णैः पट्टसूत्रैर्निर्मितानि समर्पयेदि'ति वचनात् ततः कारणात्पवित्रं तज्ज्ञापकम्। श्रीकण्ठे आरोपणस्याविवक्षितत्वाच्छ्रीकृष्ण इत्युक्तम्। श्रीकृष्णाश्रय इत्यर्थः। श्रीकृष्णाश्रयस्य विशुद्धत्वात्। सतामभृतमिच्छूनां मतम्। सदा सर्वमासेषु 'मुख्यालाभे हि सर्वत्र प्रावृट्प्रोत्तिष्ठते हरि'रिति विष्णुरहस्यवचनात्।

तत्रेति।

तदारोपाद्भक्तिभावा मूले सर्वे समर्पिताः।

श्रीकृष्णाश्रये पवित्रारोपान्मूले आदिकारणे कटकादिवद् भक्तिभावा दशमोक्ताः। विशेषजिज्ञासायां श्रीहरिधनकृतभावनायां विमृष्टाः।

त्वत्प्रेति।

त्वत्प्रेषितं पवित्रं हि मूलसेवाफलात्मकम्॥ ३॥
समर्पयामि तत्प्रीतः कृपयाङ्गीकुरु प्रभो।

त्वया प्रेषितं त्वत्प्रेषितं मूलसेवैव फलमितरफलानपेक्षणात्। तस्य आत्मा स्वरूपं पूर्व वेन [illegible] तत्प्रोक्तम्। 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व

मदर्पणं' इति गीतायामाहुः समिति । प्रीतस्त्वङ्गीकुरु इति वचनव्यक्तेः प्रीतेर्भगवत्त्वमित्वाङ्कुर्विति परस्मैपदं धातोरुभयपदित्वेऽपि प्रभो इति पूर्ववत् ।

समर्पणफलमाहुस्तदिति ।

तत्समर्पणतो भावसेवायाः फलरूपता ॥ ४ ॥

भावसेवा 'भावात्मकत्वात्तद्रूपं गुणातीतं सदैव ही'त्यत्र रसो भावो देवादिविषयिण्या रत्याः स्थायिभावत्वात् 'स्थायिभावो रसः स्मृत' इति अङ्गशास्त्रे, भू सत्तायाम् भावे घञ् भावः सत्तातः सदानन्दसेवेत्यर्थः । फलरूपतेतिवचनं प्रत्यहं सेवायाः फलरूपत्वेऽपि पुराणमत एनया सेवया वार्षिकसेवाव्यङ्ग्यत्वपरिहारात् फलसमर्पकत्वेन भावसेवाया वार्षिक्याः फलरूपता नेतरद्वाहयति साधनं फलं वा ।

रक्षा । पूतनेति ।

पूतनायां संस्थितायां गोपिकाभिर्यथा कृतम् ।
तथा रक्षाबन्धनं प्रेम्णाङ्गीकुरु कृतं मया ॥ ५ ॥

ननु शरणमार्गविरुद्धं रक्षाबन्धनम् । शरणमार्गे ब्रह्मणो रक्षकत्वादत्र भक्तानां रक्षकत्वमिति रक्षाकारणधर्माणां ब्रह्मणि स्फूर्तेर्भ्रमत्वशङ्केति चेन्न । दशमस्कन्धषष्ठाध्यायटिप्पण्यां स्नेहभावे ये धर्मा भगवन्निष्ठाः स्फुरन्ति ते तत्र सन्त एव तादृगेकभक्तवेद्या एवेति प्रकथनाद्रक्षाबन्धनकारणधर्माणां भगवति स्फूर्तेर्न भ्रमत्वशङ्केति यथा रक्षा कारणधर्मप्रकारेण तथा पूर्णब्रह्मत्वरूपं फलं ब्रह्मगामीति परस्मैपदमङ्गीकुर्विति । 'लोकवत्तु लीलाकैवल्यम्' इति सूत्राद्रक्षाबन्धनम् ।

एतदनु हिन्दोलोत्तारणम् । पूर्णिमामुक्त्वा 'ततः परं हृषीकेशं यजेत्प्रतिपदादिषु' इति वाराहात् । जन्माष्टमीमभिव्याप्य क्रीडनकार्पणम् । गर्भस्तुतिवत् ।

मालामणिव्यवधायकग्रन्थिवन्नित्यविध्यन्तरोत्सवाननुक्त्वा पृथगुक्तितात्पर्यमाहुः प्रतीति ।

प्रत्यब्दमेवं करणादुत्सवानां विधानतः ।
श्रीमदाचार्यमार्गोक्तसेवायाः फलरूपता ॥ ६ ॥

स्नेहानन्तरं स्वव्यसनतः क्रियमाणोत्सवानां विधिप्रयोजकताशून्यानामकरणापत्तेः । एवमुक्तपरामर्शेन विधानतः विधानतोपीत्यर्थः । अपेरध्याहारः । विधानतो यथा । 'ततो जन्माष्टमी कृष्णा ममातीव प्रिया हि सा । तस्यां निशीथे कर्तव्यं कृष्णमूर्तेः प्रपूजनमि'ति वाराहे । 'अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः' इति गीतायाम् । श्रीमदिति । सेवोत्सवसेवा । कदाचिद्वक्ष्यमाणसेवायाः फलरूपता । नित्यसेवोत्सवान्ग्राहयत् अष्टवर्षब्राह्मणदेवान्यद्वारत्वं निवारितम् ।

जनयत्याशु वैराग्यमिति विषयवैतृष्ण्यसंज्ञवैराग्योक्तेर्भक्तिफलत्वेनात्र सेवात्वेन सेवोक्तैव विशेषप्रकारेण धनिकसाध्यत्वात् सेवाफलं त्रिभिः प्रपञ्चयामासुः सेत्यादिभिः । सा कायेति ।

सा कायवाङ्मनोभिश्च दृढप्रेम्णा कृता सती ।
दृढमूली लतावच्च वृद्धा कृष्णं फलिष्यति ॥ ७ ॥

सा सेवा कायेन कृता सेवा भगवत्तोषं 'यद्वृत्त्या तुष्यते हरि'रिति तृतीयस्कन्धात् परं तु कायमात्रेण सेवाऽसम्भवाद् वाङ्मात्रेण सेवा सिद्धान्तमुक्तावलीटीकायामनुक्ता किन्तु तनुवित्ताभ्यामुक्ताऽतः कायग्रहणं कायवाग्भ्यां सेवायाः फलं पापाभावः 'उभयोरप्यभावे तु [illegible]

भवे'दिति निबन्धात्। कायवाङ्मनोभिः सेवायाः फलं संसारदुःखनिवृत्तिः 'ततः संसारदुःखस्य निवृत्ति'रिति सिद्धान्तमुक्तावल्याः। चकारादनुक्तसमुच्चयार्थकीतनुवित्तजसेवाफलं मानसीसेवा सिद्धान्तमुक्तावलीटीकायाः। किञ्च तपोवैराग्यसेवायाः फलं ज्ञानं साङ्ख्यं सर्वत्वज्ञानं वा 'तपोवैराग्ययोगे तु ज्ञानं तस्य फलिष्यति' इति निबन्धात्। अपि च तनुवित्ताभ्यां 'भक्तिरहस्यभजनं तदिहामुत्रफलभोगनैराश्येनामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्य'मिति गोपालतापिनीयोक्तमानसीसेवोक्ता, एवं च तनुवित्तजयोर्योगयोगो जातः 'परो हि योगो मनसः समाधि'रिति वाक्यात् तस्याः फलं प्रेम 'योगयोगे तथा प्रेम' इति निबन्धात्। कायवाङ्मनःप्रेमभिः सेवायाः फलं ब्रह्मबोधनं 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मिति सिद्धान्तमुक्तावल्याः। भक्तिः 'ब्रह्मप्रकृतयस्त्विमा' इति सप्तदशे 'परं ब्रह्माधिगच्छती'ति त्वष्टादशे वाक्याभ्यां तत इत्यस्य कायवाङ्मनोभ्यः कायवाङ्मनःप्रेमभ्य इत्यर्थात् 'यथा भक्त्येश्वरे मनः' इति वाक्याच्छ्रुत्युक्तमनःकल्पनस्य प्रेमसाध्यस्य ग्रहणात् कायवाङ्मनोदृढप्रेमभिः सेवायाः फलं कृतार्थता। 'यदा स्याद्व्यसनं कृष्णे कृतार्थः स्यात्तदैव हि' इति भक्तिवर्धिन्याः। दृढत्वमनुक्रमेण व्यसनावस्थात्वम्। दृढत्वं यर्हि प्रमाणादिचतुष्टयबाधाभावस्तदापि कृतार्थता। 'श्रवणादि ततः प्रेम्णा सर्वं कार्यं हि सिद्ध्यति' इति बालबोधात्। दृढत्वमत्र प्रमाणादिफलं ज्ञेयम्। दृढमूलीति दृढं मूलं श्रद्धालक्षणं यस्याः 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यति' इति वाक्यात्। दृढं बलम्। 'दृढः स्थूलबलयो'रिति सूत्राद् बलं च प्रमाणादिचतुष्टयबाधाभावः। 'श्रद्धाभक्तिज्ञानयोगादवैही'ति श्रुतेश्च तस्याः फलं रतिद्वारा भक्तिः, 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'ति वाक्यात्। अनुवृत्त्याख्यसेवाफलं सायुज्यं 'सायुज्यं कृष्णदेवेन शीघ्रमेव ध्रुवं फल'मिति निबन्धात्। भक्तिहेतूक्तदिशानुग्रहेण मर्यादाभक्तौ फलं भगवत्सेवोपयोगिदेहो वैकुण्ठादिषु। अनुग्रहेण पुष्टिभक्तौ तु अलौकिकसामर्थ्यं फलम्। पुष्टिभक्तिर्मर्यादाभक्तिश्चानुग्रहेण जातेति मूलमनुग्रहो वा साधनसाध्यत्वाद्धनलतावद्वृद्धा मर्यादाभक्तिरानिरोधलक्षणग्रन्थोक्तनिरोधम्। पुष्टिभक्तिस्तु आसर्वात्मभावम्। 'पुरुषार्थोतः शब्दादिति बादरायणः' इति 'फलमत उपपत्ते'रिति तार्तीये न्यायसूत्रात् 'प्रदानवदेव तदुक्तम्' इति सूत्रेण तस्य मुख्यभक्तिरूपसर्वात्मभावस्य दानसाध्यत्वेन साधनासाध्यत्वादतः कृष्णं फलिष्यति। ब्रह्मप्राप्तेर्गौणफलरूपाया अत्र निवेश एवं वृद्धा भावैरङ्कुरिता सेवानुग्रहाभिव्यक्त्या सद्रूपेण पुंसु स्थिता महीमृगदृशां बीजरूपा 'बीजं तदुच्यते शास्त्रे दृढं यन्नापि नश्यति' इति भक्तिवर्धिन्याः भक्तिः सत्तारूपं बीजं शृङ्गाररसत्तारूपं बीजं लतावद्वृद्धं यथा भावैरङ्कुरिता श्रुतिस्मृतिदृशामाकल्पमासिञ्चितैः श्रद्धा कन्दलिता मनोरथमयैः शाखाशतेनावृता लौल्यैः पल्लविता मुदा कुसुमिता प्रत्याशया पुष्पिता इति वृद्धा सा फलिष्यति कृष्णं लीलाभिः। चकाराद्भाग्यैरङ्कुरिता महीमृगदृशामाकल्पमासिञ्चितैः प्रेम्णा कन्दलिता मनोरथमयैः शाखाशतैरावृता लौल्यैः पल्लविता मुदा कुसुमिता प्रत्याशया पुष्पिता लीलाभिः फलिता व्रजवनीशृङ्गारकल्पद्रुमरूपा 'कामादितरत्र' इत्यादिसूत्रोक्ता विहितभक्तेरितरत्र कामादिरूपा सेवा गृहीता भक्तिवर्धिन्युक्तदिशा वृद्धा प्रेमासक्तिव्यसनरूपा वा कृतार्थताफलम्।

एतदेवाहुः व्यस्तैरिति।

व्यस्तैस्तैः सुदृढैर्हीनमध्यमोत्तमभेदतः।
कृता जीवैः स्वमार्गस्थैः फलिष्यत्युत्तरोत्तरम्॥ ८॥

---

१. कन्दलं नवाङ्कुरमिता इतम्।

हीनमध्यमोत्तमभेदतो व्यस्तैस्तैः पूर्वोक्तैः प्रकारैः **सुदृढैः** सुशोभनैराचार्याभिमतैः **दृढैः** स्वरुचिमननशास्त्राभ्यासकृतैः। व्यासस्तु स्वरुच्या कायवाग्भ्यां कृता हीनाधिकारिणी कायवाङ्मनोभिस्तैः सप्रेमैः कृता मध्यमाधिकारिणी तैः दृढप्रेमसहितैः दृढमूल्युत्तमाधिकारिणी लतावद्वृद्धोत्तमोत्तमाधिकारिणी, अयं भेदो नातिप्रसिद्धोऽनुग्रहसाध्य इत्युत्तमान्तर्गतमात्रो गृहीतः। 'मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्' इति वाक्यादुत्तमोत्तमाधिकारिभक्तिरनुग्रहे सति ददातीति । अत्र फलं ब्राह्मणेत्यादिसूत्रोक्तं भगवत्सेवोपयोगिदेहो वैकुण्ठादिषु, अलौकिकसामर्थ्यं तु 'निवेदितात्मा विचिकीर्षितो मे' इति वाक्यादत्यन्तानुग्रहे सति संपादयति । आत्मनिवेदनमात्मनिवेदनपद्धतौ द्रष्टव्यं सप्रकारम् । 'अभि त्वा शूर नोनुमोऽदुग्धा इव धेनव' इत्याद्याः श्रुतयः। त्रिविधं निवेदनम्। आत्मा तु ईश्वरे तस्मात्कृतात्मनिवेदनेन विहाय पुरुषोत्तमं न कोपि भजनीयः शरीरं तु गुरुपुरुषोत्तमयोः कार्ये कल्पनीयं नान्यत्र तथा सर्वं धनादिकमपि। यदा निवेदितं शरीरं गुरुर्विक्रीणाति भुनक्ति वा कथमपि करोति तदा तस्मिन् शरीरे स्वयं स्वामित्वं न करणीयम् । 'विक्रीतस्य पशोः पुत्र न कर्तव्यो यथा व्ययः । न करोति पुनः शिष्यस्तथा जीवे निवेदिते' इति काठिन्यमस्तीत्यनधिकारिणि न देयम्। 'यस्य देवे परा भक्तिः' 'स इतः प्रेत्यानन्दमयमात्मानमुपसङ्क्रामति' परं विशिष्टं चिकीर्षु पुष्टिभक्तत्वादिति प्रतिभाति ।

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इति श्वेताश्वतरन्यायादप्रकाशितानां फलानुपयोगमाशङ्क्य प्रकाशार्थं पावित्र्यद्वारा भावजनकरजोभक्तिस्मरणात्मिकां मार्गरूपार्थप्रकाशद्वारा फलोपयोगार्थमाहुः **पित्रित्यादि** ।

पितृपादरजो जातु स्तुत्तमैर्विस्मृतं न यैः ।
तेषामेव हि मार्गोयं फलिष्यति न चान्यथा ॥ ९ ॥

अन्यथा पितृपादरजोविस्मृतत्वप्रकारेण वर्तमानानां च पुनर्न **फलिष्यति** तदुक्तं 'यत्पादरजसागत्य यादृग्भावः कृतो मम । तादृशेनैव तद्भावं वर्णयाम्यवशः क्वचिदि'ति भ्रमरगीतटिप्पण्यां स्वानुभव उक्तः। एकादशे चतुर्दशाध्याये 'पूयेयेत्यङ्घ्रिरेणुभि'रिति रजसो महदङ्घ्रिसम्बन्धिनः पावित्र्यं प्रति कारणत्वमुक्तम् ।

एवं प्रवृत्त्यर्थं फलमुपपाद्य बाधकसत्त्वे प्रवृत्तिरपि निष्फलातः कालस्य बाधकत्वाभावमनुगुणत्वं विरोधदार्ढ्यं संप्रार्थ्यमपि वदन्तो नमनात्मकविरहदशायां वस्तुनिर्देशात्मकं च मङ्गलं ग्रन्थमध्येऽष्टश्लोक्याहुः **श्रीति** ।

श्रीवल्लभो जयति भक्तहितैकबन्धु-
राविश्चकार तनयं किल विट्ठलं यः ।
तस्यैव पादयुगलं सततं नमामि
प्रेम्णा तदस्तु हृदये मम सर्वदैव ॥ १ ॥

वल्लभपदमारभ्य एव व्याख्यातम् । **भक्तानां हित**श्चासावेक**बन्धु**र्मुख्य**बन्धुः** । विशेषणप्रतिपादनार्थं ज्येष्ठभ्रातरोनुजस्य स्वनामापि गृहीतवन्तः । **विदा** ज्ञानेन ठान् शून्यान् लातीति पितृप्रवर्तितपथप्रचारसुविचारक इति नाम ।

कलिकालस्याबाधकत्वमाहुः श्रीति ।

श्रीवल्लभाचार्यमार्गे स्मरणात्सेवनाद्धरेः ।
तत्कथाश्रवणाच्चापि न कालो बाधते क्वचित् ॥ २ ॥

स्मरणं सकलशास्त्रनिष्पन्नं भगवद्विषयकमात्मविषयकं च । 'कृष्णमेव विचिन्तये'दिति सिद्धान्तमुक्तावली । सेवनकथाश्रवणे संप्रदायप्रदीपे एताभ्यां हरिं सेवेतेति । कालो न बाधत इति कठवल्ल्यां 'भयादस्याग्निस्तपति भयात्तपति सूर्यः' इत्युपक्रम्य 'मृत्युर्धावति पञ्चम' इति श्रुतेः । 'कालात्मा दिनकृदि'ति ज्योतिषे । यो बिभेति स न बाधते क्वचिद्देशे ।

अनुवृत्त्याख्योत्सवसेवायां कालाबाधमुक्त्वा तत्र तस्यानुगुणत्वं तत्र करणं चाहुः वा इति ।

वैराग्यप्रेमयोगेन स्मरणादित्रिकात्पुनः ।
प्रसीदति हरिः शीघ्रं कालश्चानुगुणो भवेत् ॥ ३ ॥

विद्याज्ञतपआत्मकविचारेण ज्ञानं फलिष्यतीति तपो विहाय वैराग्यमात्रमुक्तम् । ततश्च वैराग्यस्य प्रेमयोगेन जन्यजनकभावः सम्बन्धः वैराग्यजनकेन प्रेमयोगेनेत्यर्थः । प्रेमयोगवैराग्यात्मकं विद्यापर्वत्रयमुक्तम् । साङ्ख्यमपि चतुर्थं पर्वोक्तम् । तस्य योगत्वात् । 'साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिता' इति गीतावाक्यात् । स्मरणादित्रिकं प्रेमयोगात्पूर्वं कृतं पुनः स्मरणादित्रिकाद् वैराग्यप्रेमयोगेनेति प्रसादकथनात् स्मरणाद्यावृत्तिः 'आवृत्तिरसकृदुपदेशा'दिति तत्त्वसूत्रात् । हरिः सर्वदुःखहर्ता । काल इति उक्तश्रुतेः । 'कलिं सभाजयन्त्यार्या' इति वाक्याच्च । अत्र कश्चित् 'तस्मादुक्तप्रकारेण दृढविश्वासतो हरिम् । भजेदन्यत्परित्यज्य ततः सिद्धिमवाप्नुयादि'ति श्लोकं लिखन्ति । तत्र हरिं मनोमयमन्यथा दैवतमिति फलश्रुतिविरोधः । सिद्धिहेतुत्वं श्रीयमुनायाः 'सकलसिद्धिहेतु'मिति यमुनाष्टकात् । भगवत्सेवान्तर्गतश्रीयमुनाजित्सेवापि वक्ष्यते समाप्तौ ग्रन्थस्य कारिकात्मकस्य । अन्नमयः प्राणमयो मनोमय इति तृतीयत्वेपि यो यस्य स तस्य दैवतमिति श्लोकाद्यर्थं उपनिषदः । तथाप्यन्यत्परित्यज्येति विरुध्यते । पुरुषोत्तमभजनस्य सर्वान्प्रत्यविशिष्टत्वात् । 'देवोऽसुरो मनुष्यो वे'ति वाक्यात् सिद्धयोऽणिमाद्याः सर्वात्मभावाद्या वा भगवच्चित्ताभिज्ञता तु साङ्ख्यप्रवचनस्य 'प्रत्ययस्य परचित्तज्ञान'मिति सूत्रात् पातञ्जले योगशास्त्रे साङ्ख्यप्रवचनसूत्रे तृतीयपादेऽस्ति । परमधिकारभेदात्फलानि व्यवस्थितानि । भक्तेः संयोगविप्रयोगाभ्यां भेदस्तत्साधारणो निरोधोऽपि करणत्वेनानुवृत्त्याख्यसेवायां निविशते आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्येति छान्दोग्यसमाप्तिश्रुतेः ।

अतः श्रीमद्भागवतभक्तिवर्धिनीनवरत्नोक्तं संयोगसेवाकरणं विहाय विप्रयोगसेवाकरणनिरोधेदार्भप्रकारमाहुः व्रज इत्यादि ।

व्रजे मधुवने चापि द्वारकायां तथैव च ।
गोपीषु कुब्जादिषु च रुक्मिण्यादिषु या कृता ॥ ४ ॥
प्रकटानन्दरूपेण स्वकीया रसरूपता ।
प्रकटीकृत्य कृपया तां चेत्कारयते मयि ॥ ५ ॥
तदा निरोधः सुदृढो जायते नान्यथा क्वचित् ।

अत्र गोपालतापिनीयकृष्णोपनिषदाद्युक्ताः सर्वाः प्रकृतोपयोगिन्यः सङ्गृहीताः श्रुतयः। द्वारकायामिति गोपीचन्दनोपनिषत्स्थद्वारकायां मया प्रतिष्ठितं चन्दनमिति श्रुत्यंशीभूतद्वारकायामिति पदस्यानु

---

१. सेवाप्रकरणात्सेवायां संयोगनिरोधः सर्वत्रेत्याशयः ।

करणम्। तेन 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप' इति पाणिनीयसूत्रं न प्राप्नोति। रसरूपता दशरसरूपता, चकोरे कामवति शृङ्गाररस इव भगवति शृङ्गाररसरूपता। क्रौञ्चे वीर इव भगवति वीररसरूपता। चक्राह्वे करुण इव करुणरसरूपता। भारद्वाजेद्भुत इवाद्भुतरसरूपता। भारद्वाजस्य द्विजन्मत्वात्। बर्हिणि हास्यरस इव हास्यरसरूपता। व्याघ्रसिंहयोर्भयानकवद् भयानकरसरूपता। बलभद्रे संवाहनपदे भक्तिमति बीभत्सरसः हीनाद्धीनभाव उत्तमस्य बीभत्सो भवति, स भक्तिमतां प्रतीयते। वल्गत्सु भक्तेषु रौद्र इव रौद्ररसरूपता। कृतोत्सङ्गोपबर्हणेषु गोपेषु शान्तरस इव तत्र सुप्ते भगवति शान्तरसः। भगवत्पाद-संवाहकेषु भक्तेषु दास्यभक्तिरसः। तद्भगवति दास्यभक्तिरूपता यावद्रससामग्र्या ब्रह्मत्वात् 'रसो वै स' इति श्रुतेः। जीवद्वारा जीवधर्मस्य भगवद्धर्मत्वं वा। एतच्च दशमद्वादशाध्याये 'चकोरक्रौञ्चचक्राह्वे'त्यत्र सुबोधिन्यां स्पष्टम्। गोपीषु भक्तिरससंयोगविप्रयोगरसरूपता। पञ्चाध्याय्यां भ्रमरगीते विरहरसः। कुब्जायां कामरसः। आदिपदोक्तसान्दीपिनिगुरौ भक्तिरसः। रुक्मिण्यादिषु कामरसः। तां प्रकटीकृत्य कृपया मयि कारयते चेदित्यन्वयः। मदिच्छया प्रकटीकृत्य, भक्तेच्छायाः क्रीडाप्राकट्यं प्रति हेतुत्वाद् 'अचलत्व'मिति सूत्रभाष्यात्। कृपया प्रकटानन्दरूपेण मयि सर्वात्मभावस्य आश्रये, कृपाया आनन्दरूपप्राकट्येऽपि कारणत्वात्। कृपया विज्ञानं स्वानन्दप्राकट्ये सति भवतीति प्रथमस्य चतुर्थचरणे 'तदधीनत्वादर्थवदि'ति सूत्रे 'कृपाविष्टः साधनम्, आनन्दरूपः फल'मिति भाष्यात्। कारयत इति ब्रह्मणा सहाहं भक्तः कामलीलाः करोमि ब्रह्मोपाधि-भेदभिन्नं मां भक्तं कारयते कामलीला इत्यस्मच्छब्दोत्तरं द्वितीया प्राप्ता महिम्नः स्वस्याध्यात्मिकादि-त्रितयविदाश्रयत्वविवक्षया निरस्ता। विवक्षातः कारकाणि भवन्तीति युक्तवचनात्। ग्रामे गच्छतीतिवत् सप्तमी मयीति। कारयत इत्यात्मनेपदं तु 'णिचश्चे'ति सूत्रात्। लीलाकरणरूपं फलं प्रयोज्यप्रयोजककर्तृगामि भवत्येव। तदुक्तं स्वामिनीस्तोत्रे उदाहरणं तु 'प्रियतमकरपद्मस्पर्शभावे-क्षणोद्यद्रसभरजवरासामन्दमोदाकुलानाम्। प्रतिपदतलरुग्भिर्गोपसीमन्तिनीनामरुणतरहृदम्भोजन्मने मे नमोस्त्वि'ति। एतत्फलं निरोधसुदार्ढ्यं तच्च तदा भवति यदा निरोधः सुदृढो जायते नान्यथा, अन्ये-षूक्तनिरोधलीलाकारयितृत्वप्रकारातिरिक्तेषु सर्गादिलीलाकारयितृत्वादिषु सत्सु क्वचिदपि निरोधलीला-कारयितृविरहिते मनसि देशे तत्काले च दृढो निरोधो जायते न सुदृढः। शुद्धलीलाऽसाहित्यवद्भगव-द्विषयकत्वेन शोभनघटिकाभिपदार्थाभावादाचार्याभिमतत्वस्य शोभनपदार्थत्वस्याभावात्। एवं तु व्रज इत्यादिना रुक्मिण्यादिष्वित्यन्तेन ग्रन्थेन 'जयति जननिवासो देवकीजन्मवाद' इत्युत्तरार्धान्त्यक-श्लोकोक्तशुद्धलीलाः सङ्गृहीतास्तत्साहित्याच्छोभनघटकाभिपदार्थोऽस्त्येव।

निरोधस्य सर्वात्मभावरूपकस्य कारणं 'प्रदानवदेवे'ति सूत्रोक्तं भगवत्कृतं प्रदानकं शक्तिस्तु सर्वोऽप्यात्मनो भावो भगवत्येवाधिकृत इति षष्ठीतत्पुरुषगर्भितकर्मधारयादात्मनि सर्वेन्द्रियप्रतिष्ठापने। फ़लमत्र मोदप्राप्तिः 'ये निरुद्धास्त एवात्र मोदमायान्त्यहर्निशमि'ति निरोधलक्षणवाक्यात्। सेवाफलं तु पृथक्सेवाफलोक्तम्। तत्र सेवायाश्चेतस्तत्प्रवणत्वरूपत्वात्, अत्र सेवाया अनुवृत्तिरूपत्वात्।

एवं ज्ञानात्सुदृढनिरोधेच्छुं प्रति कृपावितरणप्रार्थनां स्मरणात्त्यागविधिं चाहुः निरोधेत्यादि।

निरोधेच्छुभिरेतावदेव प्रार्थ्यं हरौ ततः ॥ ६ ॥

अक्रूरे श्रुतदेवे च विदुरेऽथोद्धवे च या।
कृता दासार्पितकृपा तां कृपां वितर प्रभो ॥ ७ ॥

---

१. मद्द भूपायां मिथू कल्कने तदा मिकेम्मिति पाठः।

श्रीमदाचार्यपादाब्जरेणोर्न स्मरणं त्यजेत् ।
तत्त्यागे महती हानिर्मानुष्यं निष्फलं भवेत् ॥ ८ ॥

ततो ज्ञानानन्तरं ज्ञानाद्धेतोर्वा हरौ, निरोधेच्छुभिः निरोधदार्ढ्येच्छुभिः, श्रुतावात्मनीति सप्तम्या निरोधस्यात्माभिन्नाश्रये बोधनाद्धराविति सप्तमी, युक्तं चैतत्, आश्रयस्य मुख्यत्वात् । प्रार्थ्यमिति 'प्रार्थिते वा ततः किं स्यात्स्वाम्यभिप्रायसंशयादि'ति वाक्यात्प्रार्थना विरुद्धा तथापि 'रतिप्रादुर्भावो भवतु सततमि'ति वाक्ये प्रार्थनायां लोट्स्वीकाराद्रतिप्रार्थना युक्ता । कृपाविस्तारस्य रतित्वात्, रतिः प्रीतिर्यद्यपि तथाप्यत्र रतिः क्रीडा रमु क्रीडायामिति धातुपाठात् प्रार्थ्यम् । अक्रूरे दासार्पितकृपा 'अप्यङ्घ्रिमूल' इति श्लोके पञ्चत्रिंशाध्याये 'मयि दया उत्पत्स्यत' इति सुबोधिन्यां कृपा सा दासार्पिता, 'प्रणतवत्सल' इत्यस्य 'नतिमात्रेणैव कृपा अभिव्यक्ता भवती'ति सुबोधिन्यां च कृपा सा दासार्पिता पञ्चचत्वारिंशाध्याये 'अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः । किञ्चिच्चिकीर्षया प्रागादक्रूरप्रियकाम्यये'ति वाक्ये प्रभुपदादुक्ता । 'सर्वेषां हि स्वामी सेवकगृहेऽपि सेवकसंमाननार्थं गच्छती'ति सुबोधिन्यां श्रुतदेवे दासार्पितकृपा । उत्तरार्धे सप्तत्रिंशाध्याये मैथिलस्य गृहवासमात्रं श्रुतदेवस्य तु सन्मार्गोपदेश इति तं विहाय श्रुतदेवोपादानम् । तत्र कृपा तु 'अद्य नो दर्शनं प्राप्तः परं परमपूरुष' इत्यस्य सुबोधिन्यां दर्शनं चक्षुषाद्यैव शास्त्रतस्तु यः शक्तिभिः सृष्ट्वा आत्मसत्तया प्रविष्टः स कीदृश इति मनोरथ एव स्थितः, न तु कदाचिद्दृष्टः, अद्यैव परं दृष्ट इति तद्दर्शनं तु बुद्ध्वा बुद्धिमानयं पदार्थाञ्जानातीति प्रत्ययात्सा च कृपयैव भाष्यप्रामाण्याद् अतः श्रुतदेवे दर्शनानुमितबुद्ध्यनुमिता कृपा या सा दासार्पिता । 'स त्वं शाधि स्वभृत्यान्नः किं देव करवाम ते । एतदन्तो नृणां क्लेशो यद्भवानक्षिगोचर' इत्यत्र सुबोधिन्यां दासत्वात् स्वामिकार्यमेव कर्तव्यमिति । अत आज्ञापयेत्यर्थ इति कथनात् 'देवाः क्षेत्राणी'त्यादिवाक्यादर्चार्चनेऽधिकारो माभूदिति तु न सूच्यते गृहिणोपसंहाराधिकरणभाष्यविरोधाद् अतो ज्ञानिनि कृपामात्रमक्षरोत्तमदर्शनजनकबुद्धिजनकं प्रार्थनीयं प्रार्थयन्ते पुष्टिभक्ताक्रूरदृष्टान्तेन पुष्टिभक्ते कृपा पूर्वं प्रार्थिता भाष्यमर्यादार्थं कृपया विज्ञानं 'बुद्धिर्विज्ञानरूपिणी'ति भगवद्वाक्यात् तेन दर्शनमिति । विदुरे दासार्पितकृपा तृतीयस्कन्धे चतुर्थाध्याये 'इति सह विदुरेण विश्वमूर्तेरि'त्यत्रोत्तमाधिकारिणि विदुरे यथा यथा यस्मिन्नवसरे भगवान्पुष्ट्यादिलीलया स्वस्मिन्कृपां कृतवान् एवं विदुरोपि उद्धवं प्रति भगवत्कृपाकथां कथयति स्मेति सुबोधिन्यां कृपा या सा दासार्पिता । 'विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरन्ती'ति उद्धवं प्रति विदुरवाक्यात् । परमाधिकारिणि भगवद्दर्शनजनकबुद्धिजनिका कृपा प्रार्थिता । उद्धवे दासार्पितकृपा पूर्वोक्तरीत्या स्पष्टा एकादशे च स्पष्टा भगवत्प्रवर्तितपथप्रचारसुविचारके भगवद्दर्शनजनकबुद्धिजनिका कृपा या सा प्रार्थिता । 'भक्त्या जानाति चाव्यय'मिति श्रुतौ भक्त्या ज्ञानकरणत्वेन हेतुत्वेन चोक्तेस्तस्याश्च 'ब्रह्मविदाप्नोति परमि'त्यत्र व्यापारत्वेन तादृक्षज्ञानजनकबुद्धौ कारणत्वात्कृपा भगवद्दर्शने परम्परया निविशते । अर्पितपदेन श्रुतदेवे 'भगवान्भक्तभक्तिमानि'ति वाक्यात्स्नेहेन कृपावितरणे सत्कारपूर्वको व्यापारः, अधीष्टे लोट् । अत एव प्रभो भोः परिवृढ इति सम्बोधनम् । सर्वमिदं 'यस्य देव' इति श्रुतौ गुरुभक्त्यधीनं निरूपितमिति तदाहुः श्रीति । महती हानिर्हि ब्रह्मणः सकाशाज्जीवस्य विभागः सा 'हानौ तूपायने'ति सूत्र उक्ता सा महती ।

प्रभुमुक्तांश्च यो जीवान् सङ्गृह्णाति गुरुः स्वग ।
नाङ्गीकरोम्यहं मुक्तान् गुरुणा पुष्टिसेवकान् ॥

गुरौ निवेद्यते भक्तिर्यस्मिन्नात्मा निवेदितः ।
तेषामहं न गृह्णामि भक्तिं वै नवलक्षणाम् ॥
गुरोः प्रियतमो यस्तु भजनं मम शासने ।
करोति पारतन्त्र्येण तत्रावेशं करोम्यहम् ॥
नावेशो मम विज्ञेयोऽसमूर्तिर्न तु मामकी ।

अः विष्णुः समूर्तिः मूर्त्या सह । अश्चासौ समूर्तिश्च असमूर्तिः कर्मधारयः । 'विनोद्धव हरेर्भक्त्या भक्तिर्मम विडम्बनम्' । 'गुरुर्भवेद्यथा तात प्रसन्नो मनसा शुभम् । तदुपायं करोत्याशु विवेकी मम वल्लभ' इत्यात्मनिवेदनकाठिन्यबोधकपुराणान्महती । निष्फलं तासां पुरां मानुषी भगवत्प्रिया तत्र तत्त्वाधिगमात् तदभावान्मानुष्यं निष्फिलम् । यतो मानुषो विष्णुर्भवति । 'नावेशो मम विज्ञेयोऽसमूर्तिर्न तु मामकी'त्युक्तवाक्यात् ।

श्रीमत्प्रभुविरचितसेवाविधिः । प्रभुपदं श्रीमदाचार्यपरं श्रीमत्प्रभूत्सव इत्याचार्योत्सवे उक्तत्वात् 'चातुर्मास्ये विशेषत' इति वाराहपुराणन्यायेनात्र विशेषत्वात्पूर्वमपुनरावृत्तिसाधकोत्सवानुक्त्वाऽद्यान्प्रति चातुर्मास्यसेवा 'यस्य शक्तिः सदा नास्ति कर्तुं मम निवेदने' इति वाक्यात् । इदानीं सदा शक्तिमतः प्रति सेवाविधिमाहुः भगवदित्यादि श्रुतिस्तावत् छान्दोग्योपनिषदन्ते 'आचार्यकुलाद्वेदमधीत्य गुरोः कर्मातिशेषेणातिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तत' इति । श्रीकृष्णवाक्यानि तावत् पुरुषोत्तमयोगाध्याये 'ऊर्ध्वमूलमधःशाखमि'त्यारभ्य

'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत ॥'

इत्युपसंहारात् । श्रीव्याससूत्रं तावत् साधनाध्यायीयसमाप्तौ 'कृत्स्नभावात्तु गृहिणोपसंहार' इति । समाधिभाषा तावत् 'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे । लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिताम्' । सात्वतसंहिता तावत् 'श्रीभगवानुवाच । कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् । मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः । देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् । देवासुरमनुष्येषु मद्भक्ताचरितानि च । पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् । कारयेन्नृत्यगीताद्यैर्महाराजविभूतिभि'रित्येकोनत्रिंशाध्याये ब्रह्मवादसङ्ग्रहरूपा । प्रकृतिस्तु एकादशस्कन्धैकादशाध्यायोक्ता 'लघुस्वमार्गवक्ता चे'ति पुरुषोत्तमसहस्रनाम्न्याचार्याः ब्रह्मवादसङ्ग्रहो लघुः, स्वमार्गः श्रीकृष्णमार्गः । अत्र भाष्यम् । 'भक्तिमार्गो बहुविध' इति कपिलदेववाक्यात्'केचन भक्ताः स्वगृहेष्वेव स्नेहेन भगवदाकारे विविधोपचारैः सेवां कुर्वन्तस्तयैव निर्वृता

---

१. हरेर्मम भक्तिर्गुरुभक्त्या विना ।

मुक्तिमपि तुच्छां मन्यन्त' इति । अन्यत्सर्वं तृतीयाध्याय एवोपपादितम् ।एवं च 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'ति श्रुत्या वेदानुवचनेन ब्राह्मणा ज्ञात्वा वेत्तुमिच्छन्तीति वेदनं तु भक्त्या । व्यापारः कृपा । ततो जानातीच्छति यतत इति लोके न्यायविदो वचनात्कृष्णानुवृत्तिरूपा सेवोक्ता इयमंशत्रयवतीत्यन्यत्र भक्तिरत्नटीकायां विस्तरः । 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवती'ति छान्दोग्यश्रुत्यौपनिषदज्ञानस्य कर्मयोगाङ्गता । 'अत एव ब्रह्मविदामेव जनकादीनां कर्मणि सर्वदेवसान्निध्यमन्यथाऽऽभासत्वमेव'। एतच्च जिज्ञासाधिकरण एवोपपादितमेतच्च कर्म 'एकं साङ्ख्यं च योगं च वेदारण्यकमेव च । परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यत' इति वाक्याद् भगद्गनकर्मप्रकाशकपञ्चरात्राद्युक्तमित्यवसीयते । शैवान्प्रति तु पाशुपतशास्त्रमिति वेदान्तवेदसाङ्ख्ययोगपञ्चरात्रपशुपतिमतमिति षड्शास्त्राणां विषयाः । अत्र सेवामार्गे भगवदित्यारभ्य मां हि पालयेत्यन्ता नवश्लोकी, हरितुर्येत्यारभ्य भावमुत्तममित्यन्तं श्लोकद्वयं च श्रीमत्प्रभुविरचितसेवाविधिस्त एकादशश्लोकाः सानुपूर्वीव्याख्याने व्याकरिष्यन्ते । श्रीमत्प्रभुकृतसेवाश्लोकान् सानुपूर्व्या लिखामः । 'प्रातरुत्थाय सविधानं स्नात्वा इत्यादि' इत आरभ्य श्रीगोपीनाथजितां सेवाविधिकृतिरस्ति । सविधानमिति । 'यं मां स्मृत्वा अपूतः पूतो भवती'ति गोपालतापिनीये 'एवं विधिना गोपीचन्दनं यो धारयेद्यस्त्वेतदधीते वे'त्युपक्रम्य 'सर्वेषु तीर्थेषु स्नातो भवती'ति वासुदेवोपनिषदि च श्रुतिभ्याम् । वारुणं स्नानं वेदान्तिनां कुतः प्राप्तम् । उच्यते । 'आचार्यवान्पुरुषो वेद' इति श्रुतेर्वेदनप्राप्तीच्छुं प्रत्याचार्याज्ञाप्राधान्येन वारुणस्य स्नानस्योक्तिरुक्तं तु स्नानं सकलसाधारणम् । तदुक्तं ग्रन्थविशेषे कुम्भनदासादीन्प्रति 'मस्तके जलं निक्षिप्य स्नाया'दिति । विधानं तु भक्तिरत्नटीकायां प्रोक्तमेव परम्परागतं क्रियत एवं पञ्चरात्राद्युक्तस्नानं तु ह्युपनिषदा कर्तुर्विहितम् । एकं साङ्ख्यमिति वाक्यात् । श्रीमदाचार्यान्स्मृत्वेति । अस्मन्मार्गे श्रीमदाचार्यस्मरणं विना तद्वैमनस्येन सेवा परगामिनी भवति । 'विनोद्धव गुरोर्भक्त्या भक्तिर्मम विडम्बनमि'ति वाक्यात् ।

वल्लभाष्टकेन स्मरणं भावनायां, नित्यकृत्ये तथोक्तेः । प्रार्थनादिकमाहुः भगवद्धामेत्यादि ।

भगवद्धाम भगवन्नमस्ते त्वलङ्करोमि तत् ।
अङ्गीकुरु हरेरर्थे क्षान्त्वा पादोपस्पर्शनम् ॥ १ ॥

भगवन्मन्दिरं प्रार्थयित्वा नमस्कृत्येत्ययं ग्रन्थो हे भगवन् हे भगवद्धाम भगवद्धामत्वेन वाक्यार्थांशेन युक्तं भगवन्निति अदृश्यत्वाधिकरणोक्तरीत्याऽक्षरमभेदेन संबोध्य प्रभुत्वेन हरेः स्फूर्तौ धामत्वेन तदुद्भवस्वाभाव्याद्धामत्वेन वाक्यार्थे बोधस्तदाश्रयत्वेन वक्तुरिच्छाविषयत्वात्प्रार्थना गम्यते धाम्नो भेदानुसन्धाने 'प्रार्थिते वे'त्यस्य न विरोधः । ते तुभ्यं नम इति नमस्कारः । उभाभ्यां गतार्थः । वाक्यार्थबोधाश्रयत्वेन वक्तुरिच्छाविषयत्वं सम्बोधनलक्षणं प्रार्थनागमनाय ज्ञेयं ग्रन्थकर्तुः श्रीगोपीनाथजितो भक्तिमार्गीयत्वेनाग्निपुत्रत्वेऽपि 'ऋषिरग्निकुमारस्त्वि'ति वाक्याद् भ्रातुर्ग्रन्थकर्तुः ऋषित्वेऽपि मन्त्रत्वं नास्ति । श्लोकानामाचार्यकर्तृत्वात् । मन्त्रैरेव स्मर्तव्यमिति नियमस्य दशमचतुर्थपादे रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोतीति श्रुत्यां रथघोषेण उपावर्तयमिति बर्हिर्म्यां स्तोत्रमुपाकरोतीति प्राकृतौ बर्हिर्मन्त्रौ बाध्येते एवं बाधात् प्रकृते 'स्वयं परिचरेद्भक्त्ये'ति तृतीयाश्रुत्या भक्त्यबाधात् किन्तुः भक्तित्वं तथा च भगवद्धामेत्यादिकीर्तनभक्तिरूपम्, न मन्त्ररूपम्, कारिकातिरिक्तं ग्रन्थमप्यत्रैव बोधाय समग्रं लिखामः ।

अलङ्कारं विवृण्वन्त एव मार्जनादिकं कुर्यादिति ग्रन्थं स्पष्टयांबभूवुः **मार्जनादिति** ।

मार्जनात्कृष्णगेहस्य मनोविक्षेपकं रजः ।
नाशमेति तदर्थं च मार्जयामि तथास्तु मे ॥ २ ॥

मार्जनमलङ्कारः । ननु 'कुर्यात्सर्वाणि कर्माणि मदर्थ'मित्यादित्रिश्लोकीमन्तरा कुतः सर्वोत्तममार्गे एकादशस्कन्धीयैकादशाध्यायस्थमार्जनादिकमूरीकुरुथेति चेन्न प्रकृतित्वात् । प्राकृतान्यङ्गानि त्रिश्लोक्यां निष्पतन्ति विकृतौ । भक्तिरत्नटीकायां प्रकृतिविकृतिभावः प्रपञ्चितः । चकारान्मानसी सेवा । 'मानसी सा परा मते'ति वाक्यात् । **तथास्तु मे** इति मार्जनं मे मम मत्कर्तृकं 'कर्तृकर्मणोः कृती'ति सूत्रेण षष्ठी । तथा मनोरजोनाशकत्वमानसीसेवाजनकत्वाभ्यां प्रकाराभ्यामस्तु । इह कृष्णगेहमार्जनस्य कृष्णगेहस्य रजोनाशकत्वात्कुतः कृष्णगेहमार्जनत्वेन मनोरजोनाशकत्वेन कार्यकारणभावः । उच्यते । गीतायां चतुर्दशेऽध्याये 'मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते' इति वाक्ये भक्तियोगसेवात्वेन गुणात्ययत्वेन कार्यकारणभावद्योतनाद् यत् सामान्ययोः कार्यकारणभावस्तद्विशेषयोरपीति नैयायिकोद्घोषादुक्तकार्यकारणभाव इति ।

मार्जनादित्यत्रादिशब्दार्थमाहुः **आत्मन इति** ।

आत्मनोऽज्ञानरूपस्य दुरितस्य क्षयाय हि ।
करोमि सेकोपलेपौ त्वद्गृहे गोकुलेश्वर ॥ ३ ॥

आत्मनो जीवस्य **अज्ञानरूपं** स्वरूपाज्ञानरूपं तस्य **क्षयाय सेकलेपौ**, निबन्धे पञ्चसु विद्यापर्वसु भक्तिपर्वणा स्वरूपाज्ञाननाशोक्तेः । स्वरूपाज्ञानमविद्यायाः पञ्चमं पर्व । 'माया च तमोरूपा' इति श्रुतेः । अज्ञानं तमोगुणस्तस्य क्षयो भक्तियोगेनेत्यत्र गीता पूर्वं निर्दिष्टा ज्ञानत्वेन वा भक्तिरत्राज्ञाननाशकत्वात् । यद्वा आत्मनो मनसः भक्तिस्तनुजा सेवा कार्यकारणभावः पूर्वमुक्तो गीतया तथा चैकादशे 'प्रकृतिवचांसि' 'उद्यानोपवनाक्रीडपुरमन्दिरकर्मणि । सम्मार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः । गृहशुश्रूषणं मह्यं दासवद्यदमायये'ति ।

ततः सिंहासनास्तरणं कुर्यादिति । तत इति क्रमवाचकपदम् । यद्यपि मार्जनाद्यानन्तर्यवाचकं तत इति पदं तथापि तात्पर्येण क्रमवाचकम् । क्रमस्तु पाठमनादृत्य 'लोकवत्तु लीलाकैवल्य' मिति व्याससूत्रात् पश्चादुक्तमपि मार्जनादि पूर्वं कृत्वा प्रवर्तते । प्रकृतौ पूर्वं 'परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्तन'मित्यनेनोक्ता परिचर्या पश्चात्कर्तव्या आर्थक्रमादत्र मार्जनादि परिचर्यार्थम् । 'सिंहासने समासीनं रामं' इति रामोपनिषच्छ्रुतेः सिंहासनपदम् । 'सिंहासने आस्तरणमिति सप्तमीतत्पुरुषः । अलङ्करणं सिंहासनस्य 'यथा सुन्दरतां याति वस्त्रैराभरणैरपि । अलङ्कुर्वीत सप्रेम तथा स्थानपुरःसरम्'इति सेवाप्रकरणात् ।

अभीष्टमाहुः सिंहासने कीर्तनभक्तिरूपं **सिंहेति** ।

सिंहासनं मद्धृत्पद्मरूपं सज्जीकरोम्यहम् ।
श्रीगोपीशोपवेशार्थं तथा तद्योग्यतां भज ॥ ४ ॥

'तद्रूपस्थैर्यमावहे'ति चतुर्थचरणं श्रीमत्प्रभुविरचितसेवाविधौ । **सिंहासनं** शेषरूपं **'अग्रतो भविता देव'** इत्यत्र सुबोधिन्यां तथोपपादनात् । **मद्धृत्पद्मं** सर्वात्मभाववद्धृत्पद्मं तद्रूपं लिङ्गभूयस्त्वाधिकरणतोदो विहायैतदुपात्तम् । 'सर्वं सर्वमयं' इति तापिनीयश्रुतेः । सिंहासनस्य

हृत्पद्मत्वेन ज्ञानं न भ्रमः । हे तद्रूप हृत्पद्मरूप स्थैर्यं हृत्पद्मत्वेन रूपेणावह प्रापय सिंहासने । पाठान्तरे हृत्पद्मत्वेन रूपेणेति तथेत्यस्यार्थः । योग्यतां सर्वात्मभाववद्भक्तहृदयं श्रीगोपीशोपवेशयोग्यं पाठे तु सिद्धान्तरहस्ये 'तथा कार्यं समर्प्यैव सर्वेषां ब्रह्मता ततः । गङ्गात्वं सर्वदोषाणां गुणदोषादिवर्णना । गङ्गात्वेन निरूप्या स्यात् तद्वदत्रापि चैव ही'ति ब्रह्मतया योग्यता । यद्वा फलप्रकरणे 'स्वानन्दानुभवार्थं हि योग्यतापि निरूपिते'त्यस्याष्टिप्पण्युक्तदिशा भूर्भुवःसुवो जगत्तद्रूपलक्ष्मीरूपतां भज । लक्ष्मीतुल्यतायां हि भगवद्रमणमिति हि मर्यादेति । ततः पात्राणि सज्जीकुर्यादिति एतावानेव ग्रन्थः स्पष्टः । श्लोकान्तरं श्रीमत्प्रभुविरचितसेवाविधेर्ग्रन्थकर्तुः ।

पानीयेति ।

पानीयपात्रं हि तथा व्रजनाथाय कल्पितम् ।
राधाधरात्मकत्वेन भूयात्तद्रूपमेव तत् ॥ ५ ॥

अर्थः । प्रकृतौ परिचर्यापदं तत्र चान्यत्र वाराहे चातुर्मासमाहात्म्ये 'सुगन्धिशीतलं वारिं ततो मह्यं निवेदयेदि'ति 'लोकवत्तु लीलाकैवल्यं' इति सूत्रे लोकवल्लीलायामपि । गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यत्रर्तं पिबन्ताविति श्रुत्या वारिपानस्यर्तस्य वारित्वेन सिद्ध्या 'सत्यं विज्ञानमानन्दं ब्रह्म' इत्यनया श्रीयमुनाजिदुक्त्या च स्वरूपामृतपानं प्रथमं निर्दिष्टम् । सुवर्णमयपात्रे राधाधराकत्मत्वं 'सर्वं सर्वमय'मिति श्रुत्या तदीयभोगोपि राधाधरात्मकत्व एव 'ऋतं पिबन्तौ' इति श्रुतेः । ऋतं परब्रह्मानन्दम् । तद्रूपमेव तद्भूयादित्याशीर्भाषणस्य ग्रन्थकर्तुः । तथा च भाष्यं 'ऋतं सत्यं परं ब्रह्मे'ति ।

श्रीमत्प्रभुविरचितसेवाविधिश्लोकः स्वामिनीति ।

स्वामिनीकररूपाणि भावस्वर्णमयानि वै ।
श्रीकृष्णभोज्यपात्राणि सन्तु ते मत्कृतानि हि ॥ ६ ॥

अनुभावुकानामपि श्लोको विव्रीयते । श्रिया सह कृष्णः सदानन्दः तस्य भोज्यपात्राणि यानि मत्कृतानि मया ते तुभ्यं सज्जीकृतानि धात्वादिमयानि भावो भावना तेन स्वर्णमयानि स्मरणभक्त्या सर्वमयत्वेपि स्वर्णप्रचुराणि निबन्धे 'अथवा सर्वरूपत्वात्' इत्यत्र वाक्यमात्रस्य प्रामाण्योक्तेः । अत आहुर्वा इति । तानि पुनः स्वामिनीकररूपाणि । सन्त्विति सत्कारपूर्वको व्यापारः । अधीष्टे लोट् आशीर्वा । अयमर्थष्टिप्पण्यां फलप्रकरणे लक्ष्मीतुल्यतायां हि भगवद्रमणमिति मर्यादा सा च ब्रह्मानन्दरूपेति । तथा च सिद्धान्तरहस्ये ब्रह्मतोक्त्या तद्रूपत्वमुक्तं जातमित्युक्तमर्यादापि सम्पन्ना । तत्राप्यधिकं तत्रानुप्रविष्टं न तु तद्धानिरिति न्यायेनाधिकप्रवेशः । द्वादशस्वङ्गेषु कराणां पात्रत्वेन तदुक्तिः पिबत्यस्मादात्मेति पात्रं तानि पात्राणि ष्ट्रन् प्रत्ययः । 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इति श्रुतेर्दर्शनात् । हीति निश्चयार्थकमव्ययम् ।

ततः शय्यातो विज्ञाप्योत्थापयेदिति तत इति पदं क्रमवाचकं पूर्ववत् । शय्यात इति पदेन मुक्तिसाधनीभूतवक्ष्यमाणवन्दनभक्तावपि दास्यभक्तिवच्छयनमाक्षिप्यते 'लोकवत्तु लीलाकैवल्य'मिति न्यायात् । विज्ञापना भावनोक्ता लोडर्थः । तत्र श्रुतिः । 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति कृष्णोपनिषदि सा यशोदोत्थापनभावनायां गोप्युत्थापनभावनायां च प्रबोधोपि । गोपगोभिरित्यत्र गोपाश्च गोप्यश्च गोपाः 'पुमान् स्त्रिये'त्येकशेषः । उत्थापयेदिति विधिः ।

वन्दनभक्तौ कीर्तनभक्तिमाहुः उदिति ।

उदेति सविता नाथ प्रियया सह जागृहि ।
अङ्गीकुरुष्व मत्सेवां स्वकीयत्वेन मां वृणु ॥ ७ ॥

हे नाथात्यन्तानुग्रहे स्वैकदेशभक्तविरोधिवारक । सुबोधिन्यां स्वांशेषु कस्यानिवार्यत्वेऽप्यत्यन्तानुग्रहे वारयत्यपि । **प्रिययेति** यदा स्वामिन्युत्थापनं न यशोदाजित्कृतं तदुत्थापने तदिच्छया ब्रह्मणो बालत्वेन तां प्रति प्रियाविर्भावाभावाद् यशोदाजिद्भावनायां तस्या अपि बालात्वात् । **अङ्गीकुरुष्वेति** अधीष्टे लोट् । सेवाङ्गीकारफलं कर्तृगामीत्यात्मनेपदम् । **मत्सेवामिति** दास्यभक्तिरपि वन्दनभक्त्यन्तर्गता । **वृणु** वरणफलं भगवन्मार्गे रुचिः । **स्वकीयत्वेनेति** तु मुक्तेः सकाशात् तदीयत्वमेव ज्यायो भजनानन्दानुगुणत्वात् । मुक्तानां मायाविनिर्मुक्तमात्मस्वरूपमेव न तु देहेन्द्रियादिकमप्यस्ति येन भजनानन्दानुभवः स्यात् । ततः सिंहासने उपवेशयेदिति स्पष्टम् ।

महाराजोपचारः उद्धवं प्रति त्रिश्लोक्यां एकत्रिंशे एकादशे 'महाराजविभूतिभि'रिति वाक्याद् उद्धवोपचारः । **क्रीडेति** ।

क्रीडात्मसाधनयुत मद्गृद्धामाक्षरात्मकम् ।
आस्थाय गोकुलाधीश रमस्व कृपया मयि ॥ ८ ॥

यावत्पर्यन्तं स्वहृदये न कोऽपि भगवन्तं वेद तावन्न कोऽपि प्रतिमादौ पूजयेदिति सुबोधिन्यां प्रतिमासेवादौ पूर्वं स्वहृदयेऽधीष्टमुक्तम् । **क्रीडात्मेति** साधनविशेषणादन्यानि साधनानि व्यावर्तितानि । **अक्षरात्मके** रमणं तृतीयाध्याये 'विद्यैव तु निर्धारणादि'ति सूत्रभाष्ये । **कृपयेत्यनेन** साधनरूपो भगवानित्युक्तं 'कृपाविष्टः साधन'मिति । सेवायां प्रवृत्तः स्वसेवोपयोगिपदार्थाभावे दुःखी भवत्यतो बुद्धिप्रेरके सत्कारव्यापारः । सिद्धान्तमुक्तावलीटीकायां स्पष्टमिदम् ।

प्रकृतमाहुः **भावेति** ।

भावात्मकतया कॢप्तस्वोत्तरीयात्मकासने ।
सिंहासने गोकुलेश कृपयोपविश प्रभो ॥ ९ ॥

व्रजभक्त**भावः** शृङ्गारात्मा भक्तिर्वा । 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः, भावः प्रोक्त' इति काव्यप्रकाशात् । **तदात्मकतयेत्यर्थः** । भक्तिशृङ्गारयोरन्तःपातिवस्तूनां भक्तित्वं शृङ्गारत्वं वा । **कृपयेति** पूर्ववत् । ततो नमस्कुर्यादिति स्पष्टम् ।

यादृश इति ।

यादृशोऽसि हरे कृष्ण तादृशाय नमो नमः ।

यादृशः भाष्यादिप्रतिपादितः । 'यतो वाच' इति श्रुतिप्रतिपादितश्च 'यस्यामतं तस्य मत'मिति श्रुतेः । **नमो नम इति** । 'भगवति जीवैर्नमनातिरिक्तं कर्तुमशक्य'मिति । 'किमासनं ते गरुडासनाय किं भूषणं कौस्तुभभूषणाय । लक्ष्मीकलत्राय किमस्ति देयं वागीश किं ते वचनीयमस्ती'ति निबन्धशास्त्रार्थात् । तथा च श्रुतिर्गोपालतापिनीये 'ॐ नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे । विश्वेश्वराय विश्वाय गोविन्दाय नमो नमः' इत्यादि । श्रीभागवते चादृश्यत्वाधिकरणोक्तरूपमनमञ्छुकः 'नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् । निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि 'रंस्यते नम' इति । एतच्च श्रुतात्मनिवेदिना कर्तव्यम् ।

पूर्वं तावच्छरणं गतस्य आत्मनिवेदनं कर्तव्यं । नान्यस्येति 'मुमुक्षुर्वै शरणमनुव्रजे'दिति । गोपालतापिनीयश्रुत्याहुः **यादृश इति** ।

यादृशोऽस्मि हरे कृष्ण तादृशं मां हि पालय ॥ १० ॥

यादृशः शास्त्रादौ निरूपितस्तादृशमणुं पालय त्वं रक्षको भवेत्यभीष्टे लोट् । 'श्रीकृष्णः शरणं ममे'त्युक्तम् । अयं वन्दनभक्तिप्रकारः सुबोधिन्यां दशमस्याष्टमाध्याये । एवं श्रीमत्प्रभुविरचित-सेवाविधिनवश्लोक्युक्तवन्दनभक्तिरित्युक्तं न शरणमार्गः, मार्गाणां त्रित्वात् । 'मार्गास्त्रयो मया प्रोक्ता' इति वाक्यात् । शरणमार्गस्तु पृथगेव 'पृथक् शरणमार्गोपदेष्टे'ति सर्वोत्तमात् । ननु कथं चतुर्थो मार्ग उक्त इति चेन्न । न्यासादेशेष्वित्यस्य विवरणे 'मदितरभजनापेक्षणं वा व्यपोढम्' धनाद्यभावे तु प्रपत्तिमार्गं वक्ष्यन्त्येवेति निबन्धटीकातः ।

'एवमनियमः सर्वासा'मिति सूत्रोक्तवन्दनादिभक्तीनां मध्ये वन्दनभक्तिर्नवश्लोक्या विवृता, अधुना दास्यभक्तिः सिद्धान्तमुक्तावल्युक्ता वितन्यते स्म । हरितुर्यप्रिय इति श्लोकद्वयं मर्यादीकृत्य ग्रन्थकर्तृभिः । तथा च द्वितीयस्कन्धचतुर्थाध्यायसुबोधिनी 'नमो नमस्त' इत्यत्र नमनमात्रेणैव स्वतः पर्यवसाने तदधीनत्वलक्षणे अधिके धर्मे सम्पन्ने स्वसेवामपि कारयतीति वन्दनानन्तरं दास्यं प्रयोजनमिति निरूपितमिति **नमो नम** इति ।

नमो नमोऽस्तु ते राधे श्रीकृष्णरमणप्रिये ।
स्वपादपद्मरजसा सनाथं कुरु मच्छिरः ॥ ११ ॥

अत्र दास्यभक्तौ वन्दनभक्तिर्नवश्लोक्युक्ता सम्बध्यते । एवं ज्ञानं नत्वा क्रियामनमत् । आरम्भे श्रीराधे इति श्लोके इदं प्रमेयं स्पष्टम् । तनुजा सेवेयम् ।

ततः श्रीमदाचार्यान्नमस्कुर्यादिति स्पष्टं पूर्वमुक्तप्रायम् ।

चिन्तासमिति ।

चिन्तासन्तानहन्तारो यत्पादाम्बुजरेणवः ।
स्वीयानां तान्निजाचार्यान्प्रणमामि मुहुर्मुहुः ॥ १२ ॥

नवरत्नग्रन्थे याः परिहार्याश्चिन्ता उक्तास्तासां सन्तानस्य हन्तारः यत्पादाम्बुज-सम्बन्धिरेणवः पादाम्बुजापेक्षया साक्षात्सम्बद्धाः कारणानि । अन्यत्स्पष्टम् । प्रकृतौ 'परिचर्यास्तुति-प्रह्वगुणकर्मानुकीर्तन'मित्यत्र प्रह्वपदेन नमस उक्तेः । णम प्रह्वत्वे शब्दे चेति धातुपाठात् । अत्र सर्वत्र यशोदागोपीगोपोद्धवादिसम्बन्धिनी सेवा महाराजोपचाराश्च ज्ञेयाः । महाराजोपचारास्तूत्तरार्ध-सुबोधिन्यां 'चामरव्यजनशङ्खातपत्रकिरीटासनशय्यामहाराजचिह्नानी'ति । तत्रोत्थापनाक्षिप्तशय्या-शङ्खनादश्च जागरणादिसमय उष्णकाले व्यजनमपि भक्तिमार्गानुसारेणोपचारा मुख्या इत्याहेति । 'यथा सुन्दरतां याति' इत्यस्य निबन्धस्य टीकायाः । तदुक्तं 'देशकालविभागविदि'ति चतुर्थस्कन्धे । अत्रैकश्लोकपर्यन्तमुद्धवादिवत्परिचरणं 'पूर्वं स्नानं प्रकुर्वीत धौतदन्तोङ्गशुद्धये' इत्युद्धवं प्रति सप्तविंशे वाक्यात् । नन्दयशोदादीनां श्रीकृष्णे बालभावेन स्नानाद्यसम्भवोप्युन्नीयते यतः, अग्रे श्लोकद्वयोक्त-मप्युद्धवादिवत्परिचरणं प्रकृतेस्तं प्रत्युपदेशात् । क्रीडेत्याद्येकश्लोकोक्तमप्यन्यभक्तवत् । तदुत्तरश्लोकोक्त-मप्युद्धवादिवत्परिचर्यान्तर्गतत्वात् । अक्रूरवदभिवन्दनं यादृश इत्याद्युक्तम् । 'अक्रूरस्त्वभिवन्दन' इति कस्यचिद्वाक्याद् अकिञ्चनादिवच्छरणमार्गः, न्यासादेशेष्विति वाक्यात् । अग्रेऽपि वन्दन-मक्रूरवत् किञ्च गीतनृत्यादि कारयितव्यम् । मन्दिरे दर्शनाद् 'गीतनृत्यादि पर्वणि स्युक्ता-न्वह'मिति वाक्यात् । भावनायां तु शृङ्गारसमये शयनभोगसमये चोक्तम् ।

ततः पात्रे सामग्रीं संस्थाप्य विज्ञाप्य समर्पयेदिति स्पष्टम् ।

विज्ञापनायाः सम्भोगप्राप्तिसूत्रानुगुणत्वाद्विज्ञापनामाहुः व्रजेति ।

व्रजस्त्रीकरयुग्मात्मयन्त्रे पात्रं च तन्मयम्।
स्थापितं ते भोजनार्थं योग्यभोज्यान्नसम्भृतम् ॥ १३॥

व्रजस्त्रीणां करयुग्मं तदात्मके यन्त्रे, उपासनया शुद्धे चित्ते भरिति पक्षेक्ति रामतापिनीये सर्वात्मकयन्त्रस्य विभूतिविषयत्वं भक्तिहंसोक्तदिशाऽतो गोपालतापिनीयोक्तं यन्त्रं जानीयाद् ध्यानविषयीभूतं न तु रामतापिनीयोक्तं लेख्यम्। ननु दास्यभक्तौ प्रेमलक्षणाभक्तिकारणत्वात् किमनेन यन्त्रेण पाक्षिकेण सच्चिदानन्दैकरसे भक्तियोगस्तिष्ठतीति तत्रैव श्रुतेरिति चेन्न। यन्त्रमिव यन्त्रमित्युपचारात्। एतस्योपयोगः पूर्वं 'क्रीडात्मसाधनयुतम्' इत्यत्र निरूपितः। क्रीडात्मसाधनानि यन्त्रे श्रुत्युक्तानि। तास्तु 'ते होचुरुपासनमेतस्य परमात्मनो गोविन्दस्याखिलाधारिणो ब्रूहीति। तानुवाच यत्तस्य पीठं हैरण्यमष्टपलाशमम्बुजं तदन्तरालिकानलास्रयुगं तमनु गायत्रीं यथावद्व्यासज्य भूमण्डलं मूलवेष्टितं कृत्वा गवा वेष्टितं कृत्वाङ्गवासुदेवादिरुक्मिण्यादिस्वशक्ती इन्द्रादिवसुदेवादिपार्थ्यादीनिध्यायितं यजेत्सन्ध्यासु [1]प्रतिभिरुपचारैस्तेनास्याखिलं भवत्यखिलं भवतीति' भक्तिमार्गे उपासनानिवेशे श्रुतिरत्रैव 'तस्यैवासौ दर्शयेदात्मरूप'मिति। आत्मरूपदर्शनं तु भक्त्यैवेति भक्तिलिङ्गम्। तादृशं यन्त्रं व्रजस्त्रीकरयुग्मात्मकम्। रुक्मिण्यादीत्यत्र आदिपदार्थत्वाद् गोपालतापिनीये गोपीनां चोपलेखात्। तेन चतुष्पाद्यां व्रजस्त्रीकरयुग्मात्मकयन्त्रत्वेन भावना। भ्रमस्तु परास्तः पूर्वम्। **पात्रं च तन्मयं परं** तत्तद्व्यक्तित्वेन भेदमास्थायाधाराधेयभावः। **योग्यस्य श्रीपुरुषोत्तमस्य भोज्यान्नैः सम्भृतम्।**

भुङ्क्ष्वेति।

भुङ्क्ष्व भावैकसंशुद्धदधिदुग्धादिमोदकान्।
प्रियं ते नवनीतं च राधया सहितो हरे ॥ १४ ॥

यद्यपि 'सुखदुःखसाक्षात्कारो भोगः' 'नैवेद्यं तुष्टिद'मिति भोगो जात एव परं पुराणमतम्, श्रुतिस्तु 'सर्वमत्तुमभ्रियत' स्मृतिश्च 'सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्' अन्यापि 'पत्रं पुष्पमि'त्यादि तच्छ्रौतं मतम्, अतोऽधीष्टे लोट्। **भावः** 'सर्वेषां भवता ततः' 'निवेदिभिः समर्प्यैव सर्वं कुर्यादिति स्थिति'रिति सिद्धान्तरहस्यकीर्तनोत्थः तेनैकेन शोधने मुख्येन समीचो ब्रह्मज्ञानोपयोगित्वेन **शुद्धान् दध्यादिकान्**। मङ्गलभोगे दध्यादिकं स्कान्दे पञ्चदशेऽध्याये मार्गशीर्षमाहात्म्ये भगवता 'अथ श्रीमदुद्यानसंवीते'त्यादिना स्वध्यानमुक्त्वोच्यते 'सितामोदहैयङ्गवीनैश्च दध्ना विमिश्रेण दौग्धेन स प्रीणयेत्तम्' इति 'प्रातरेवार्चयेदच्युतं यो नरः प्रत्यहं शश्वदास्तिक्ययुक्तः लभेताचिरेणैव लक्ष्मीं समग्रामिह प्रेत्य शुद्धं परं धाम भूयादि'ति। सिता शर्करा, मोदा मोदकाः, विमिश्रं संधितं नूतनसत्करीरादि, दौग्धं दुग्धं प्रज्ञायण् मलाई। दौग्धं, दुग्धेन निष्पन्नत्वात्। सामान्ये नपुंसकम्। यद्वा सिताहैयङ्गवीनदधिदुग्धानि चत्वारि चतुर्णां व्यूहानां 'नवनीतं दधि क्षीरं घनीभूतं घृतं तथा। अनिरुद्धादिमूर्तीनां चतसृणां क्रमात्प्रियम्। नारायणस्य चत्वारि सर्वेषां शर्करापि चे'ति सप्तदशे वाराहात्। चतुर्व्यूहा व्यष्टयः श्रीनारायणः समष्टिः अन्यदिष्टतमं लोके दधिदुग्धादीत्यादिपदेन मलाईसन्धितसिताः। राधयेति भावनाविषयीभूतया कचित्साक्षात्। भोजनाधीष्टं यशोदाजिहृत्परिचरणम्। भावनायां तथोक्तेः।

भाषणमिति।

भाषणं मा त्यज प्राणप्रिये गोपवधूपतेः।
त्वन्मुखामोदसुरभि भोज्यं भुङ्क्तेऽधिकं प्रियः ॥ १५ ॥

---

[1] प्रपत्तिभिः प्रतिपत्तिभिः।

9 परि॰

गोपवधूपतेः प्राणप्रिये हे राधे यशोदाजिदुक्तिः । तत्र गोपवधूपतेरित्युक्तिः स्नेहेन मुक्तित्वाद्वा । 'यशोदा मुक्तिगेहिनी'ति कृष्णोपनिषच्छ्रुतेः धरात्वाद्वा 'यशोदा सा धराभवत्', इति भागवताद् धराया विरुद्धधर्माश्रयत्वम् । किञ्च ग्रन्थकर्ता श्लोकानुपनिबबन्ध । श्लोकास्तु विज्ञस्यादिष्वेतद्ग्रन्थानां तत्कर्तुस्तूचितमेव । **गोपवधूपते**रिति पदं तदीयत्वाद् 'अहं तदीय इत्येषा तद्वार्तारूपिता परम्' इति त्रिभङ्गललितस्तोत्रन्यायात् । तत्र हेतुमाहुः **त्वदि**त्यादि । तव **मुखस्यामोदः सुरभि**विशेषः तेन **सुरभी**त्यर्थः । **अधिक**मिति । भक्तमात्रनिवेदितमश्नाति यद्यपि तथापि नाहं भक्षितवानिति वाक्यादानन्दभुगपि ब्रह्मानन्दामोदेन **सुरभि त्वधिकं भुङ्क्ष्व** 'ऋतं पिबन्ता'विति श्रुतेः ।

तदेवाहुः **राधे**ति ।

राधाधरसुधापातुः किमन्यन्मधुरायितम् ।
यन्निवेद्यं तदप्येतन्नामसम्बन्धतो भवेत् ॥ १६ ॥

अन्यन्मधुरवदाचरितं किम्, न किमपीति काकुः । ध्वनेर्विकारः काकुः । **एतस्या नामसम्बन्धतो मधुरायितं भवेत्** । यथा 'व्रजस्त्रीकरयुग्मात्मयन्त्रे पात्रं च तन्मय'मिति व्रजस्त्रीनामसम्बन्धः । अयं भावः । सर्वेषां ब्रह्मत्वेऽपि पुनः 'सर्वेषां ब्रह्मता तत' इति सिद्धान्तरहस्ये ब्रह्मताविधानमीदृगिति । 'ऋतं पिबन्ता'विति श्रुतेः ।

एवं विज्ञाप्यात्राङ्गीकारेधीष्टमाहुः **प्रिये**ति ।

प्रियामुखाम्बुजामोदसुरभ्यन्नमतिप्रियम् ।
अङ्गीकुरुष्व गोपीश तदीयत्वान्निवेदनम् ॥ १७ ॥

ननु प्रियेत्यादिविशेषणेन पूर्वोक्तब्रह्मतानुवादस्तेनैव योग्यतया भुङ्क्ष्वेत्युपपन्नेऽङ्गीकुरुष्वेत्यङ्गीकारस्य किं प्रयोजनमिति चेन्न । एतादृशब्रह्मत्वेऽपि वरणरूपाङ्गीकारस्यावश्यकत्वात् । तदुक्तं 'विद्यैव तु निर्धारणात्' इति सूत्रभाष्ये 'नायमात्मेति श्रुतिरितरसाधननिषेधपूर्वकं वरणस्य साधनत्वमुक्त्वे'त्यादि । **अङ्गीकुरुष्वे**त्यात्मनेपदेनाङ्गीकारफलं भक्तमनोरथपूर्तिरात्मगामिनी । **तदीयत्वा**दिति स्वस्य योग्यता । **निवेदन**मिति अर्शआद्यच्[1] निवेदितमित्यर्थः ।

'सर्वतोक्षिशिरोमुख'मित्युक्ते कस्मिन्निज आस्य इत्याकाङ्क्षायां नवलास्ये भक्तिमार्गमर्यादयाङ्गीकृतं भोज्यमन्नं भुङ्क्ष्वेत्याहुः **निजे**ति ।

निजास्यनवलास्येऽस्मिंश्चारुभोज्यं मदर्पितम् ।
भुङ्क्ष्व श्रीगोकुलाधीश स्वाधिव्याधी निवारय ॥ १८ ॥

सर्वत आस्येषु **निजे आस्ये** तत्रापि **नवं** भक्तेच्छयाधुना प्रकटं **लास्यं** यत्र तदपि प्रत्यक्षं साक्षात्कृतं तस्मिन् भुङ्क्ष्व, न तु धर, 'तत्तदत्तुमध्रियते'ति बृहदारण्यके सर्वाश्रयस्योक्तेः । अयं तु भक्तिमार्गाश्रयः । भक्तस्त्वाध्यात्मिकादित्रितयविदाश्रयः । अत ऊचुः **स्वाधी**ति । पूर्वोक्तभक्तेच्छया स्वस्यात्मनो निवर्तनीयत्वेन भक्तेच्छाकालिकौ **आधि**र्मनःपीडा **व्याधिः** शरीरस्य तौ **निवारय** । ननु मूर्ध्नि तावशक्यवचनावित्यत आहुः **गवि**ति । **गोकुलस्य** पुष्टिभक्तौ स्वीकृतस्याधीशः पुष्टिरक्षकस्तस्य सम्बोधनम् । पुष्टौ क्षुत्पिपासादि ज्ञापयतीति । स्वीयानां आधिव्याधी इति वा । 'उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदी'ति सुबोधिनीकारिकाया वैराग्योत्कर्षवतां भक्तानां आधिव्याधी भवतः । लौकिकावाधिव्याधी वा ।

---

[1] अर्शआद्यादिराकृतिगण इत्याधुनिकाः ।

दास्यसेवाया मानसीसेवा फलं तस्यै समाधये ध्यानवद्भावनास्ता आहुः **यशोदेति**।

यशोदारोहिणीभावाद्बलेन सह बालकैः।
भुक्तं यथा बाल्यभावप्राकट्याद्भुङ्क्ष्व मे तथा॥ १९॥

अत्र तृतीयाध्यायस्थ 'सर्वथापि त एवोभयलिङ्गादि'ति सूत्रे 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति बृहदारण्यकश्रुत्या भावनात्रयम्। तासु प्रथमं लीलाभावना **यशोदारोहिणीभावादिति**। लीलाभावना नाम लीलास्थभक्तानामात्मनिष्ठक्रीडाभावना सप्रतियोगिकक्रीडाभावनेति यावत्, लीलास्था भक्ताः परिगणिताः क्वचिद्भावनायाम्, उभये स्वामिन्यौ, तुर्यप्रिया, श्रीगोवर्धनः, व्रजः श्रीमदाचार्याः श्रीगोस्वामिनः सप्तबालका इति। अत्र श्रीगोपीनाथजितः श्रीमल्लक्ष्मणजितः अन्येऽपि नित्यलीलाप्रविष्टा उपलक्षणविधया ग्राह्याः। **यशोदारोहिणीभावाद्**बाल्यभावप्राकट्याद् बाल्यभावेऽष्टस्वरूपाणां भावना कर्तव्या यथास्वरूपस्थितिः सा कर्तव्या कश्चिच्छ्यामः कश्चिच्छ्रीनवनीतप्रियजिदादिर्गौरः कश्चिद्गौरश्यामः केचिद्द्विभुजाः केचिच्चतुर्भुजाः। तत्र क्वचिद्भक्ताकारणक्रिया क्वचिन्नवनीतं रोटी च कर्कटीति द्विः खरबूजेति ख्याता। क्वचिच्छङ्खचक्रगदापद्मानि क्वचिच्छङ्खः सच्छिद्रः क्वचिच्छ्रीगोवर्धनः शङ्खश्च सोऽपि निश्छिद्रः क्वचिच्छ्रीहस्तोऽभयकरः क्वचिच्छ्रीहस्तो भयकरः 'अपि संराधनसूत्रा'दनुभवगम्यावित्यादिपदार्थानां भावना। अयं कीदृग्लीलाविशिष्टविग्रह इति स्वरूपभावना। इयं लीला निष्प्रतियोगिनी। 'तदेजति तन्नैजती'ति श्रुत्युक्ता स्वरूपान्तःपातिनी 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति न्यायात्। ननु बाल्यभावप्राकट्य एकरसत्वहानिः तथा च सच्चिदानन्दत्वमनुपपन्नं स्यादिति चेन्न। अस्या आशङ्काया 'व्याप्तेश्चासमञ्जसमि'ति सूत्रे परिहृतत्वात्। यशोदारोहिणीभावात्कारणाद्बाल्यभावप्राकट्यं तस्माच्च **बलेन बालकैश्च** सह यथा **भुक्तं** त्वया तथा बाल्यभावेन प्रकारेण मम नैवेद्यं **भुङ्क्ष्वे**त्यर्थः।

नन्दादिवन्मद्गृहेऽप्यागन्तव्यमिति भक्तिमार्गमर्यादारक्षणार्थमावश्यकमागमनमित्याहुः **सेवेति**।

सेवार्थं दत्तगेहस्य निजदासस्य मे प्रभो।
आगन्तव्यं भोजनार्थं श्रीकृष्ण कृपया गृहे॥ २०॥

दत्तगेहस्येति भगवता दत्तं गेहं पूर्वं गेहं नास्ति। ननु तथा च कुत्राश्रमेऽवस्थानं गृहिणोपसंहाराधिकरणे 'धार्मिकान्विदधदि'ति गृहस्थाश्रम उक्तः तत्र कथं तुरीयाश्रमः। सेवाप्रकारो गृहस्थस्य भक्तिवर्धिन्युक्तस्तत्र 'त्यागं कृत्वा यतेद्यस्तु तदर्थार्थैकमानस' इति त्यागे दास्यं कथमिति चेन्न। एकादशे एकोनत्रिंशे त्रिश्लोक्यनन्तरं ज्ञानप्रकारमुक्त्वोवाच भगवानुद्धवं प्रति। 'एतत्ते कथितः सर्वो ब्रह्मवादस्य सङ्ग्रह' इति वचनात्। ननु तथापि गृहं न ग्राह्यं तद्धि वान्ताशनवद्भवतीति चेन्न। 'प्राप्तं प्राप्तं भजेन्मुनि'रिति 'सर्वेषां मदुपासनमि'ति वाक्याभ्यां वान्ताशनं स्मार्तानां न ब्रह्मवादिनाम्। एकदण्डिनामित्युक्त्या ब्रह्मोपनिषदि 'आत्मविद्यातपोमूल'मिति श्रुतेः। विद्या सर्वात्मभावः 'विद्यैव तु निर्धारणादि'ति तत्त्वसूत्रात्। विद्यातपसी मूले कारणे प्रापिके यस्य। मूलपदं नित्यं नपुंसकम्। विद्यातपसोर्मूलं वा कारणं विषय इति यावत्। 'एतꣳह वा व न तपति किमहꣳसाधु नाकरवं किमहं पापमकरवमि'ति श्रुतेश्च। तथा चैतादृशं गृहं भगवता दत्तम्। 'अनन्याश्चिन्तयन्तो मां नित्ययुक्ता उपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्' इति वाक्योत्तरं गीतानवमाध्याये राजविद्याराजगुह्ययोगे 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्। शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः। संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसी'ति गीतातः संन्यासानन्तरं गृहादिप्राप्तिः पूर्वमुक्ता। ननु वैराग्याभावे कथं संन्यासः सर्वेषामिति चेन्न।

'स्ववंशे स्थापिताशेषस्वमाहात्म्य' इति सर्वोत्तमे श्रीमदाचार्यनाम्नः सर्वेषां तद्वंशजानां वैराग्यसंभवात् । **कृपयेति** श्रीभगवतः साधनत्वायैतत्पूर्वमुक्तम् । अत्र 'कृष्णस्तु भगवान् स्वयम्' इति यशोदानन्दादिभाववता देवासुरेति वाक्यार्थमनुसन्दधता श्रीकृष्ण एव संबोधितः बलस्तु गोपीवल्लभभोगापसरणानन्तरमाकार्यः ।

सेवार्थं नन्दादयश्च तत्रैवाकार्यन्ते स्म देवकीति ।

देवकीवसुदेवश्रीबलरोहिणीसंयुतः ।
श्रीमन्नन्दयशोदाभ्यां समं मयि कृपां कुरु ॥ २१ ॥

देवकी ब्रह्मविद्या ब्रह्मविद्योपनिषदुक्ता, सर्वात्मभावः पुरुषोत्तमविद्या, **वसुदेवः** शुद्धसत्त्वात्मकः, **श्रीबलः** शेषनागः, **रोहिणी** दया, **श्रीमद्गोकुलम्**, वनम्, वैकुण्ठम्, तत्र **नन्दः** परमानन्दः । श्रीमन्नन्द इति वा स एवार्थः । 'यशोदा मुक्तिगेहिनी' मुक्तिश्च गेहिनी मुक्तिर्भक्तिमार्गीयात्र गृह्यते **मय्याश्रये** आध्यात्मिकादित्रितयविदाश्रये भक्ते वा । यथायोग्यकाले **कृपां कुरु** । देवक्यादीनां स्वरूपाणि कृष्णोपनिषदि वर्तन्ते ।

निःकिञ्चनस्य 'यद्यदिष्टतमं लोक' इति श्लोकोक्तमर्यादातिक्रमेऽपि ह्यधिकारस्याकिञ्चनाधिक्रियोक्तेत्यत्रोपपादनादाहुः **निःकिञ्चनेति** ।

निःकिञ्चनस्य दीनस्य गुणहीनमपि प्रभो ।
शुद्धान्नं तत् स्वदत्तत्वाद्भुङ्क्ष्व गोकुलनायक ॥ २२ ॥

विकृतेः प्रकृतौ 'मच्छरणो मुनि'रिति मुनिविशेषणाच्छरणं भक्तिमार्गे प्रोक्तमतः 'पृथक् शरणमार्गोपदेष्टे'त्यस्य न विरोधः । किञ्च प्रकृतौ 'धर्मान्सन्त्यज्य यः सर्वान्मां भजेत् स च सत्तम' इत्यत्र 'न्यासादेशेषु धर्मत्यजनवचनतोऽकिञ्चनाधिक्रियोक्ता कार्पण्यं वाङ्गमुक्त'मिति श्लोकोक्तप्रकारोऽसूचि । परान्नगणान्नादिभिन्नमन्नं **शुद्धान्नम्** । वाराहे 'कान्यन्नानि निषिद्धानि तद्भक्ते शोधने च किं'मिति पृथ्वीप्रश्ने श्रीवराहः 'परान्नं नैव भुञ्जीत परपक्वं विशेषतः । तथा गणान्नं शूद्रान्नं स्वयं पक्वमपि त्यजे'दिति षोडशाध्याय उवाच । **तत्** सिद्धान्तरहस्योक्तरीत्या ब्रह्मात्मकं **स्वदत्तं** यतिभ्यो दत्तं स्वेन पूर्वमुपपादितं 'पुष्पं पत्रं फलं तोय' मिति श्लोकोक्तमर्यादया **भुङ्क्ष्व** ।

भोजनफले आहुः **भुक्त्वेति** ।

भुक्त्वा दत्त्वातिप्रियेभ्यो भक्तेभ्योऽतिप्रियं सदा ।
तदात्मशोधकोच्छिष्टं कृतकृत्यं च मां कुरु ॥ २३ ॥

भुक्त्वा वैराग्योत्कर्षं मयि फलं कुरु 'उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदी'ति वाक्यात् । मानसीसेवां प्रति तनुजापूर्तिं कुरु, **तदतिप्रियं** भुक्तमात्म**शोधकोच्छिष्टं** कुरु, पुरुषोत्तमयोगाध्यायोक्तपदार्थज्ञानात्**कृतकृत्यं च मां कुरु** । 'एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारते'ति गीतातः । **अतिप्रियमात्मशोधकं भक्तेभ्योऽतिप्रियेभ्यो दत्त्वा च कृतकृत्यं मां कुरु** । 'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां प्रविमोक्ष' इति श्रुतेः ।

केत्याकाङ्क्षायां श्रीविष्णुस्वामिसंप्रदायानुरोधाद्यथा तद्गृहे आगत्य भुक्तं तथा भुक्त्वा कृतार्थं कुर्वित्याहुः **श्रीति** ।

श्रीकृष्णान्तरस्वरूप स्वकीयस्य गृहे मम ।
आगत्य भोजनं कृत्वा कृतार्थं कुरु मां प्रभो ॥ २४ ॥

हे **प्रिया सहित कृष्ण** सच्चिदानन्द हे **आन्तरस्वरूप** 'आनन्दमय आनन्दभुगि'ति नृसिंहतापिनीयश्रुतेः । यद्यपीयं तृतीयचरणनिरूपणेऽस्ति तथापि तुरीयचरणे 'नित्यानन्दं सदैकरस'मितिश्रुतेरानन्दभुक्त्वमस्त्येव सदैकरसं मन्यन्त इत्यस्य रसत्वेनानेकरसत्वप्राप्त्या तन्निषेधार्थमेकरसावबोधोक्तेः मनु अवबोध इति धातुपाठात् । तर्ह्यानन्दमयः प्राज्ञ इत्यायाति । 'प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखश्चतुरात्मा प्राज्ञ ईश्वरस्तृतीयः पाद' इति श्रुतेः । मैवम् । 'नित्यानन्दं सदैकरस'मिति पूर्वोक्तश्रुतेः, अत एवानन्दमयाधिकरणे 'को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यादि'ति श्रुतिर्मीमांसिता, नतूक्ता श्रुतिर्मीमांसिता । अत एवाहुः **स्वकीयस्येति** । मदीयजीवविशिष्टो भोगान्भुङ्क्ते यतः । एतच्च विधैवेति सूत्रभाष्य उक्तम् । **कृतार्थं** हृदि भगवत्प्राकट्यवन्तं **मां कुरु** । एतादृशस्य हृदि भगवत्प्राकट्यं भवतीत्याहेति भाष्यात् तथा च **कृतः अर्थो** हृदि भगवत्प्राकट्यं येन स तथोक्तः । अत्र श्रुतिः 'ता वां वास्तूनि' 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सह' । सूत्रं 'तानि परे तथा ह्याह' । गीतात्रयोदशाध्याये 'सर्वेन्द्रियगुणाभासम्' समाधिभाषा 'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षज' इति । अथवा श्रुत्यादयः 'सर्वथापि त एवे'त्यादिसूत्रस्थाः, समाधिभाषा तु सैव । मङ्गलभोगपर्यन्तं 'गोपगोपीसुरैः सहे'त्यतो नन्दयशोदागोपीमात्रेण सह लीलादि भावनीयम् । ततो **जलमर्पयेदिति** स्पष्टम् ।

अत्राचार्याज्ञा कुम्भनदासादीन्प्रति **प्रियेति** ।

प्रियारतिश्रमपरिमलितं वारि यामुनम् ।
समर्पयामि तत्पानं कुरु श्रीकृष्ण तापहृत् ॥ २५ ॥

वारीत्युक्तं चेदितरस्य स्यादतो यामुनमिति विशेषणं **यामुनं** सिकताद्यपीति **वारीति** । तदपि न नापि सेवमानानां भुक्तिमुक्तिदा अपि तु **प्रिया** या कदाचित् प्रत्यक्षा, तस्या **रतिः** तत्स्थश्रमणा एकैकस्मिन्पदार्थे दशलीलाविशिष्टो भगवान्वर्तत इति सुबोधिन्याः । तज्जन्यश्रमेण **परिमलवत्कश्चित्पदार्थमितं** प्राप्तं तारकादिभ्य इतच्, आधिदैविकसंपृक्तमिति यावत् । मल धारणे भ्वादिरात्मनेपदी सेट् । क्ते रूपमपि प्रियारतिश्रमं परिहातुं धारितमित्यर्थः । तापो ह्याधारे भक्तेच्छया वार्यपनोद्यधर्मरूपः । सर्वधर्मकत्वात् । श्रुतिस्तावत् 'ऋतं पिबन्तावि'ति । सूत्रं 'गुहां प्रविष्टावात्मानौ' इति । 'पुष्पं पत्रं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मन' इति गीताराजविद्याराजगुह्ययोगाध्याये । गुरुपादुकाजितपूजनं तु पूर्वमेव कर्तव्यम् । मद्भक्तपूजाभ्यधिकेति वाक्यात् । आधिक्यं प्राथम्यम् । तथा च भाष्यम् । गुरौ तु 'शाब्दे परे चे'त्यादिगुर्वभेदेन भगवत्सेवयैव चारितार्थ्यम् । पादुकाजितां भक्तिमार्गीयं पूजनं वेदस्तुतौ वर्तते । घटिकानन्तरं कृत्यमाहुः ततः आचमनं कारयेदिति । 'दत्त्वाचमन'मिति वाक्योक्ताचमनस्य 'पाद्योपस्पर्शार्हणादीनि'त्यत्राप्यादिपदार्थत्वात् ।

कुरुष्वेति ।

कुरुष्वाचमनं कृष्ण प्रिययामुनवारिणा ।
स्नेहात्मदन्तसक्तान्यभावापाकरणात्मकम् ॥ २६ ॥

आचमनफलस्य शुद्धेः कृष्णगामित्वादात्मनेपदम् । **कुरुष्वेति** । आङ् मर्यादायां चमु अदने अदनमवधिर्यस्य भावे ल्युट् । **आचमनं** हस्तादेः प्रक्षालनम् । **कृष्ण** सदानन्द । **स्नेहात्मानो दन्तास्तेषु सक्ताः अन्यभावाः** स्नेहग्लानिकारकास्तदपाकरणरूपमाचमनम् । तदुक्तं 'स्नेहकला द्विजानी'ति द्वितीयस्कन्धे । ननु हस्तादेरपि प्रक्षालनं वर्तते किं पुनर्बालभावे सर्वाङ्गप्रक्षालनं भवति । तत्र सक्तान्यभावाः

क इति चेन्न । भक्तिमार्गे स्नेहासक्तान्यभावापाकरणस्येष्टत्वेनान्येषामत्रानिष्टत्वात् । नन्वान्यत्रिकमाचमनं किमात्मकमिति चेन्न । ब्रह्मणः फलत्वेऽपि तद्दर्शनादेरवर्जनीयस्वभावस्य फलत्ववद्दन्तप्रक्षालनेऽन्येषामवर्जनीयप्रक्षालनकत्वाद् अत एव द्वादशस्कन्धोक्तज्योत्स्नात्मकत्वं दन्तानां नोक्तम् । ननु मन्त्रात्मकत्वे विषयस्य विभूतित्वं न तु पूर्णत्वं तथा च भाष्यं स्वाध्यायस्येति सूत्रे मन्त्राद्यधिष्ठातृरूपाणि तु विभूतिरूपाणीतीति चेन्न । एतावद्ब्रह्मभाषणमात्रेण मन्त्रत्वाभावात् । 'प्रयोगकरणभूतः शब्दो मन्त्र इत्युक्तं भवती'ति भावार्थपादभाष्ये मन्त्रलक्षणात् । नन्वयमपि भक्तिमार्गीयः प्रयोग इति चेन्न । तथा सति मन्त्राधीनत्वे पूर्णत्वं भज्येत विषयस्य । तथा च सर्वश्लोकार्थावगमानन्तरं प्रयोगः पुनः श्लोकार्थावगमानन्तरं प्रयोग इति नियमाभावः ब्राह्मणवत्प्रयोगात्पूर्वं प्रमितिजनकत्वमात्रम् । ननु साक्षाद्भक्तिर्नास्तीति द्वितीयस्कन्धषष्ठाध्यायसुबोधिन्यां भनक्तु नाम पूर्णत्वमिति वाच्यम् । तस्याः शास्त्रार्थपरत्वात् । 'शास्त्रार्थतो यदि हरिर्भवतामभीष्टस्तत्पश्यतात्र विवृति'मिति समाप्तौ कारिकायाः ।

नन्वयं शास्त्रार्थो न वेति चेन्न । धर्मे शास्त्रार्थपर्यवसानात् । धर्मिणि तद्वच्छास्त्रार्थत्वाभावात् । धर्मास्तु सर्गादयो दशानन्दस्य लीलात्मकाः संनियोगशिष्टन्यायेनाहुः स्नेहादिति ।

स्नेहाद्रतिश्रमजलप्रोञ्छद्राधाकराञ्चलम् ।
स्मृत्वानन्दभरान्नाथ कुरु श्रीमुखमार्जनम् ॥ २७ ॥

गुहां प्रविष्टावित्यधिकरणपरोक्षवाद इति भाष्येणर्तं पिबन्ताविति श्रुतावातपः प्रकटानन्द आतप इति ह्यातपशब्दस्य परोक्षवादः । तद्योग्यो मुखवस्त्रे परोक्षवादः । पूर्वं यामुनं वारि मुखसम्बद्धमिदानीं स्नेहात् स्वमुखाद्धेतोस्तद्रतिश्रमस्य क्रीडाश्रमस्य जलं जातमिति परोक्षवादः । एवमग्रेऽपि । तत्प्रोञ्छद्राधायाः करस्याञ्चलं स्मृत्वा यथा निघण्टव इत्यत्र निगन्तव इति परोक्षवादः । निगमयितार इति प्रत्यक्षवादः निघण्टव इत्यतिपरोक्षवादो निरुक्तौ परेषाम् । एवं प्रकृते वैयाकरणानामक्ष्णः श्रोत्रस्य परो वादः परोक्षवादः । या प्रीतिरविवेकानां विषयेषु सा प्रीतिः प्रत्यक्षा तादृशं शब्दान्तरं स्नेहशब्दस्थाने प्रकल्प्य ब्रह्मण्यक्ष्णः परा मुखरूपाः । भक्तानां तु परोक्षस्यापि प्रत्यक्षम् । सा स्नेहपदवाच्या सैव मुखं 'तस्य प्रियमेव शिर' इति श्रुतेः । न च प्रीतिः परोक्षा मुखं प्रत्यक्षमिति शङ्क्यम् । स्नेहपदस्य परोक्षार्थविवक्षणात् । प्रीतिस्त्वक्ष्णः परोक्षा श्रवणस्य न । रतिर्मनःप्रवणता लौकिकी, चेतस्तत्प्रवणताऽलौकिकी, सा परोक्षा क्रीडा वा । 'रमु क्रीडायाम्' इति धातुपाठात् प्रत्यक्षा, पूर्वोक्ते उभये परोक्षे । यद्यपि स्नेहो रतिरिति पर्यायोऽत्र व्याख्याने तथापि प्रपञ्चविस्मृतिपूर्वकमत्यासक्तिरूपा रतिः । तज्जन्यश्रमः श्रमस्य श्रम आधिदैविकः । यथा चक्षुषश्चक्षुराधिदैविकम् । तज्जन्यं जलं यमुनाजलं 'सत्यं ज्ञानमानन्दं ब्रह्मे'ति श्रुतेः । अत्रापि रतिश्रमजत्वं परोक्षं, जलं प्रत्यक्षम् । प्रोञ्छनमपि प्रोञ्छनस्य प्रोञ्छनमाधिदैविकम् । राधापि ह्यष्टसिद्धेराधिदैविकी राध संसिद्धाविति धातुपाठात् तस्याः कराञ्चलमप्याधिदैविकम् । तं स्मृत्वा स्नेहादिषु तानारोप्य स्मृत्वा स्वस्वरूपानन्दस्वस्वरूपामृतपानजानन्दौ मिलित्वाऽन्येऽपि तत्कालिकानन्दा मिलिता आनन्दभरो भवत्यस्मात्कारणान्नाथ हे आतप श्रीमुखमार्जनं कुरु तत्सेवाफलं मद्वामि कुरु । अत्र स्वस्मिन् राधात्वारोपो भावनायां यशोदासखीत्वारोपः । तदुभयभक्तमनोरथपूरणाय सञ्जातरूपे युक्ततमम् । यथाभक्तमनोरथमाविर्भावात् । अत्र गौण्या निर्वाहः । तदुपपादितमेव चमसवदित्यधिकरणे ।

---

१. दर्शनश्रवणमनननिदिध्यासनादीनाम् । २. वर्जनीयानां प्रक्षालनं वर्जनीयप्रक्षालनं न तथेषाम् तत्कत्वात् ।
३. [illegible] स्नेहः तदादिषु पदार्थेषु स्नेहान्मुखस्याचमनजलं प्रोञ्छवाचमनजलं मुखपङ्कजमिति स्नेहादयः ।

उद्धवभावनया सेवामाहुः ततस्ताम्बूलमर्पयेदिति । 'लोकवत्तु लीलाकैवल्यमि'ति व्याससूत्रादिति भावः । इदमग्रेतनमाकृष्यते ताम्बूलमिति ।

ताम्बूलं स्वप्रियावक्त्रसौरभ्यरतिसंयुतम् ।
गृहाण गोकुलाधीश तत्कपोलाभपाण्डुरम् ॥ २८ ॥

स्वस्य सदानन्दस्य **प्रिया** भक्तियुता ब्रह्मानन्दात्मिका तस्या **वक्त्रे** तदिच्छयाविर्भूतेन **सौरभ्य**-ब्रह्मणा **या रतिः** क्रीडाव्याप्तिस्तया **संयुतम्** । **ताम्बूलं** पर्णव्यतिरिक्तमपि पर्णमात्रेऽपि प्रियावक्त्रसौरभ्याभावादेवं व्याख्यातम् । तत्कराद्याभपाण्डुरमित्यनुक्त्वा तत्कपोलाभेत्याद्युक्तं तत्तन्मुखमात्रयोग्यार्थत्वाय हस्तद्वारेति ज्ञेयम् । **गृहाणे**ति हस्तव्यापारादानात् । ग्रह उपादाने 'हस्तौ चादातव्यं चे'ति प्रश्नोपनिषच्छ्रुतेः । उपेति लुप्तषष्ठीकं समीपस्थानां पदार्थानां हस्तव्यापारो हस्ताभ्यामादानं यत्तदुपादानम् । **गृहाण, हे गोकुलाधीश** गोकुल एवैतल्लीलाप्रसिद्धेः ।

तत आरात्रिकं कृत्वा स्नानादिशृङ्गारार्थं विज्ञाप्य स्नानादिकं कारयेदिति । 'पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेदि'ति वाक्यात् । 'सामनीराजनादिभिरि'ति वाक्याद्वा ।

स्नानादिशृङ्गारार्थं यद्वस्त्राद्युत्तारणं तद् विज्ञापयन्ति स्म **रमणे**त्यादि ।

रमणातिभराद्रात्रौ वस्त्राण्याभूषणानि हि ।
मृगजानि च वस्त्राणि प्रसीदोत्तारयामि ते ॥ २९ ॥

रमणमत्र बालशृङ्गारयोः । 'कामादीतरत्र तत्र चायतनादिभ्य' इति व्याससूत्रात् । अतोऽत्र भावनाद्वयं, यशोदा गोपिकानां च भावभेदेन । ततो बालरमणशृङ्गाररमण**योरतिभरा**दित्यर्थः । **मृगजानि** मृगजा कस्तूरिका सास्त्येषु अर्शआद्यजित्यच् मृगजानि **वस्त्राणि** । अर्शआदित्वं नास्तीति चेन् मृगो याञ्चा सा च वैकुण्ठादागमने हिरण्यगर्भस्य, श्रीमदाचार्यजिद्गृहे भक्तानां तस्याजाविबोध्यानि अलौकिकानि । भक्तमनोरथपूरकत्वाद् मृगजैव वा वस्त्ररूपा जाता । 'यदस्ति यन्नास्ति तत्सर्वं तत्र वर्तत' इति दहराधिकरणे उक्तम् । **तवोत्तारयामि प्रसीदे**त्यर्थः । 'भदर्शो पाणिना मृजेदि'ति वाक्यात् ।

स्नानादिविज्ञापनामाहुः **प्रिये**ति ।

प्रियाङ्गसङ्गसम्बन्धिगन्धसम्बन्धतो भवेत् ।
कदाचित्कस्यचिद् भावो यतः स्नानं समाचर ॥ ३० ॥

यतः प्रियाया अङ्गसङ्गस्य सम्बन्धी यो गन्धः तस्य **सम्बन्धतः कदाचित्**कस्मिंश्चित्काले **कस्यचित्** भगवत्साक्षिकस्य कस्यचित् यदि[3] **भावः** 'पूर्णाः पुलिन्द्य' इति वेणुगीतश्लोकरीत्या श्रीगोवर्धनसत्सङ्गात् कुङ्कुमादिकृतस्मररुक्शान्त्यर्थं भगवदुपास्थितानां पुलिन्दीनां लक्ष्मीप्रवेशवद् भक्तिस्ततः **स्नानं समाचरे**त्यर्थः । ननु भक्तिर्निविशतां मुक्तो भविष्यतीति चेन्न । अयोग्ये भक्तिप्रवेशे भगवद्विषयीकरणं भक्तविद्विष्टमिति पुलिन्दीनां'गा गोपकै'रित्यत्र योग्यत्वनिरूपणाद् अयोग्यानां पुलिन्दीनामिति । 'चलसि यद्व्रजा'दित्यत्र 'शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छती'त्यनेनाऽयोग्ये शिलतृणादौ भगवत्संबन्धस्य भक्तविद्विष्टत्वम् । भक्तिमार्गमर्यादयैषा विज्ञापना । यद्वा **यत** इत्यन्तं पूर्ववत् । अग्रे ततस्तस्मै भावाय **स्नानं समाचर** । स्नानप्रक्षिप्तगन्धेन भावो भवतीति । यशोदाया भुक्तित्वाज्जागरणार्थं गताया बालभावाच्च न तां प्रति तत्प्रतिकूलभावजननम् । तां प्रत्यन्यभावस्य तिरोभावात् । लीलात्मकत्वाद्भावस्य ।

---

[1] सर्वात्मभावभक्तयोः । [2] भक्तिः । [3] चेद् यदर्थे मनोरमायामिदमपि क्वचिद् द्रष्टव्यम् । [4] जागरितुम् ।

स्नेहेति ।

स्नेहात्मगन्धतैलेन प्रियगन्धातिचारुणा ।
अभ्यक्तो मङ्गलस्नानं कुरु गोकुलनायक ॥ ३१ ॥

स्नेहो गुणस्तद्वात्मा गन्धो न संभवतीति स्नेहेनात्मा स्वरूपं भगवद्योग्यतारूपं यस्य **गन्धयुक्ततैलस्य** तेन **तैलेन प्रियो गन्धः** प्रियागन्धः पूत्युग्रगन्धव्यतिरिक्तो वा गन्धः **प्रियगन्धस्तेन चारुणा मङ्गलदिने स्नानं कुरु ।**

स्नेहेति ।

स्नेहात्मगन्धतैलस्य स्नापनाद्गोकुलाधिप ।
वितरात्यन्तिकीं भक्तिं मयि स्नेहात्मिकां विभो ॥ ३२ ॥

भक्तिवर्धिन्यां तनुजासेवाया भक्तिवृद्धिबीजत्वेनोपादानाद् **वितरे**त्युक्तम् । ननु सेवायाः फलं मानसी सिद्धान्तमुक्तावल्युक्तम् । भक्तिवर्धनस्य फलत्वं कुत इति चेन्न । श्रद्धा भक्तिबीजं 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'ति वाक्यात् । सेवा मानसीसेवायाः कारणम् । व्यसनात्मिका तु सेवा भक्तकृतार्थताबीजमिति । **आत्यन्तिकीं भक्तिं** फलाभिसन्धानरहितां 'मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति वाक्यान् मुकुन्दाद्भक्तिसत्कारपूर्वको व्यापारो युक्तः । **स्नेहात्मिकां भक्तिं वितरे**ति । **विभ**विति । मुक्तिदातुरपि भक्तिदाने सामर्थ्यं द्योतितम् ।

श्रीति ।

श्रीसुगन्धोद्वर्तनेन निशाश्रमनिवारणात् ।
उद्वर्तितः कृष्ण भक्तिदानेन कुरु मे कृपाम् ॥ ३३ ॥

चतुरसेवकैः सुगन्धयुक्तमुद्वर्तनं कृतं चेच्छ्रीयुक्तं भवतीतरथा तु कृष्णं शुभ्रं वा भवेत् । उद्वर्तनं उबटनेति लोके उच्यते । तत्करण पुस्तकेऽस्ति । तथाहि । सठी, कचूरेति लोके तद्वस्तु सेटकद्वयम् । कर्पूरा, कपूरकाचरीति प्रसिद्धा सा पादद्वयपरिमिताऽऽनकद्वयमिता च । मांसी, वरमीति लोके, तत्पादद्वयानकद्वयपरिमितम् । जटिला, भूतकेशी छडीलो इति लोके सा पादद्वयानकद्वयमिता । तालीसपत्रं तमालपत्रं वा, पत्रेति लोके तदपि पादद्वयानकद्वयम् । मुस्ता, मोथा इति लोकं सापि पूर्वोक्तमाना । वेसा, वेसवनोसा इति लोके सापि सार्धसेटकैकपादा च । वालम्, वालो इति लोके तदपि सेटकद्वयम् । उक्तसर्वौषधय एकीकृत्य पक्वाः कृत्वा शुष्काः कृत्वा खण्ड्यन्ताम् । पश्चाद् रुगातुगा तवखीरेति लोके सा पादोनसेटकद्वयमिता । चन्दनं घृष्ट्वा कृताः स्थपड्यः सेटकद्वयानकद्वयाः । चन्दनचूर्णं सपादद्वयसेटकमेतानोषधीनेकीकृत्य पिष्ट्वा वस्त्रपूतान्कृत्वोद्वर्तनं कुर्यात् । 'कस्तूर्या चन्दनेनैव कुर्यादुद्वर्तनादिक'मिति स्कान्दे । **निशे**ति आलस्यं स्नानेन निवर्तते श्रमस्तु 'मृत्युः श्रमो भूत्वे'ति श्रुतेर्मृत्युरूपः स उद्वर्तनेन निवर्तते । **भक्ती**ति करणे ल्युट् प्रकृत्यादित्वादभेदे तृतीया । भक्तिदानकरणीभूता कृपा तां कुरु । कृपापदस्यानुग्रहे गौणी । तेनानुमानिकाधिकरणे विज्ञानकरणत्वेऽपि भक्तिदानकरणत्वं कृपायाः । परस्मैपदार्थ उक्त एव ।

आलस्यदूरीकरणाय स्नानमाहुः **दिवे**ति ।

दिवा स्वद्वनगमनस्मरणात्तापभावतः ।
गोपिकास्पर्शनोष्णेन वारिणा स्नापयाम्यहम् ॥ ३४ ॥

ननूष्णेन वारिणा स्नापयाम्यहमित्येतावता चारितार्थ्ये 'लोकवत्तु लीलाकैवल्यमि'ति

व्याससूत्रात् । तदुक्तं सिद्धान्तरहस्ये 'सर्वेषां ब्रह्मता तत' इति 'निवेदिभिः समर्प्यैव सर्वं कुर्यादिति स्थितिरि'ति च । स्पर्शनान्तं तु परं किमर्थमिति चेन्न । 'ऋतं पिबन्ता'विति श्रुतौ सर्वेषां ब्रह्मतारूपप्रकारस्य प्रस्तावनाङ्गीकारात् । तदुक्तं सिद्धान्तमुक्तावल्यां 'कृष्णसेवा सदा कार्ये'ति। 'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः । आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेदि'ति । तथा च स्नानवारिणि कृष्णविचिन्तनं **दिवात्मनो वने गमनस्य स्मरणाद्** यस्तापो विरहतापः सोऽपि **भावो** भक्तिदलं ततो गोपिकास्पर्शनवदुष्णः स्पर्शो यस्य वारिण इति । ननु गोपिकास्पर्शनोष्णत्वचिन्तनं न कृष्णविचिन्तनमिति चेन्न । 'सर्वरस' इतिश्रुत्या कृष्णस्यैव सर्वरूपत्वेनास्य कृष्णविचिन्तनत्वात् । अत्र श्रीभागवतम् 'चन्दनोशीरकर्पूरकुङ्कमागुरुवासितैः । सलिलैः स्नापयेन्मन्त्रैर्नित्यदा विभवे सती'ति ।

स्नानेति ।

स्नानार्द्रतानिवृत्त्यर्थं प्रोञ्छिताङ्ग विभो मम ।
दूरीकुरुष्व गोपीश कृपया लौकिकार्द्रताम् ॥ ३५ ॥

प्रोञ्छितान्यङ्गानि यस्य तस्य संबोधनं **प्रोञ्छिताङ्ग** भोः **कृपया**नुमानिकाधिकरणोक्तया **लौकिकेष्वार्द्रतां** स्नेहात्मिकां **दूरीकुरुष्व** विज्ञानतननाल्लौकिकार्द्रतातननं प्राप्तम् । गीतायां ज्ञाननिरूपणे 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति वाक्यात् । मयीति विश्वस्मिन् भक्तिः प्राप्ता तामन्यत्र **दूरीकुरुष्व** । आत्मनेपदं तु लौकिकस्नेहदूरीकरणरूपफलस्य 'मदन्यत्ते न जानन्ती'ति पद्योक्तान्यज्ञानाभावे साधनद्वारोक्तस्ववाक्यसत्यकरणेन भगवद्रूपकर्तृगामित्वात् ।

विप्रयोगकालेऽपि वक्ष्यमाणकीर्तनभक्तिसंप्रयोगाय संयोगशृङ्गारावसरे विप्रयुक्तब्रह्मस्वरूपशृङ्गारं वक्तुं विरहे भजनमतिदिशन्ति स्म **गोपिके**त्यादि ।

गोपिकावद्विप्रयोगे कालक्षेपाय सर्वथा ।
कृष्णमूर्तिं प्रियां कृत्वा भजेत्तत्तत्स्वभावतः ॥ ३६ ॥

विप्रयोग इति । ननु कथं विप्रयोगो यावता निबन्धे मूर्तौ कृताः कटकाद्युपचाराः साक्षात्कृता भवन्ती'त्युक्तमिति चेन्न । कृष्णस्य मूर्तिरिति भेदनिर्देशात् । तथा च श्रुतिः 'योऽर्चयेत्प्रतिमां मां चे'ति गोपालतापिनीयस्था । तर्हि निबन्धस्य का गतिरिति चेन्न । विष्णुस्वामिमतपरत्वान्निबन्धस्य, समाप्तौ विष्णुस्वामिमतवर्तिश्रीवल्लभविरचित इति दर्शनात् । तथा च शास्त्रार्थे सुबोधिनीद्वितीयस्कन्धस्य, साक्षाद्भक्तिर्नास्त्येवेति, इत्थं च विष्णुस्वामिमतेन संयोगकाले प्रेमवशाद्विप्रयोगवर्तने **कालक्षेपाय** भजेत् । तदुक्तं शाण्डिल्यर्षिणा 'संयोगे वियोगवृत्तिः प्रेमे'ति सूत्रे । वृत्तिर्वर्तनम् । तद्वद्वियोगे संयोगवर्तनमपि प्रेमेति तद्भाष्यकारः । एवं संयोगे विप्रयोगस्तस्मिन् । चतस्रो घटिकाः शृङ्गारस्य संयोगे विप्रयोगे च यदा कदाचिदधिका न्यूना वा घटिका भवन्ति तदा 'अशक्ये वा सुशक्ये वा सर्वथा शरणं हरिरि'ति वाक्यान्न चिन्ता । अत्रापि पूर्वं मधुपर्को ज्ञेयः । 'दिव्यं पयोदधिमधुघृतखण्डसमन्वितम् । मधुपर्कस्य पात्रे वै दद्यान्मे श्रद्धयार्चक' इति मार्गशीर्षमाहात्म्ये स्कान्दात् । न च स्कान्दस्य तामसत्वेनाप्रामाण्यमिति शङ्क्यम् । तदप्रामाण्यस्य ग्रन्थान्तरे खण्डनात् । बहिर्मुखमुखध्वंसाख्ये ग्रन्थे निपुणतरमुपपादनात् । विविधोपचारेषु मधुपर्कस्यापि निवेशो वा । 'मुख्योपहारैर्विविधैश्च पूज्य' इति रामतापिनीयश्रुतेः । एवं वित्तजसेवाविप्रयोगेऽपि गोपिका यथा विप्रयोगकाले भजन्ति तथा भजेत् । प्रथमान्ताद्वतिः । व्रजरत्ना यां काञ्चिद्धरिमूर्तिं प्रियां कृत्वा भक्तवत्यः 'आनर्चुर्नृप सैकती'मिति वाक्यात् । श्रीमदाचार्यवत् । अत्र 'कृष्णमूर्तिः

सदा ध्येया' 'दर्शनं स्पर्शनं स्पष्ट'मिति वाक्ये । अत्र प्रयोगे यत्र मूर्तिकर्मकार्चनवाक्यार्थे कर्तृत्वेन प्रतिपाद्यत्वं तत्र हरिमूर्तिभक्तत्वमिति व्याप्तिः । सर्वथेति सर्वैः प्रकारैस्ते च 'कामादीतरत्रे'ति सूत्रोक्ता ब्रह्मत्वकामुकत्वभयानकत्वद्विष्टत्वसम्बन्धित्वस्नेहविषयत्वभक्तिविषयत्वरूपाः । अत्र द्विष्टत्वभयानकत्वरूपौ प्रकारौ भक्तिमार्गे चिन्त्यौ । तत्तत्स्वभावत इति तेन श्रीविष्णुना तस्य श्रीपुरुषोत्तमस्य स्वभावस्तस्मात् । 'अलङ्कारप्रियो विष्णुरि'ति श्रीपुरुषोत्तमोऽप्यलङ्कारप्रियः भूमोऽप्रियः क्रीडनकानि प्रियाणि श्रीपुरुषोत्तमस्य । यद्वा 'इन्द्रस्य युज्यः सखे'ति श्रुतेरिन्द्रेण समानानि शीलव्यसनानि श्रीपुरुषोत्तमस्येतीन्द्रस्वभावेन श्रीपुरुषोत्तमस्वभावमनुमाय भजेदित्यर्थः ।

ननु 'शैली दारुमयी लौही लेप्या लेख्या च सैकती । मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता' तत्र का मूर्तिः प्रिया कार्येत्याकाङ्क्षायां मनोमयीमाहुः भावेत्यादि ।

भावोत्थविप्रयोगेऽपि न स्थातुं शक्यते यतः ।
अतः स्वहृद्गतैर्भावैर्भूषयेत्तं मनोमयम् ॥ ३७ ॥

मूर्तिद्वारापि प्रेमलक्षणाभक्त्युत्थविप्रयोगेपीत्यर्थः । हृद्गतैर्मनोगतैः भावैः स्मरणकैः स्मरणस्यापि भक्तित्वात् । मनोमयमिति यथा 'तोये तोयपुरस्कृतै'स्तथा मनोमयं मनोमयैर्भूषयेदित्यर्थः । 'मनो ब्रह्मेति व्यजानादि'ति श्रुतेः । न त्वानन्दमयं तस्य मूर्तित्वाभावेनाष्टमूर्तिष्वप्रवेशात् । विज्ञानमयस्य जीवत्वाज् जीवे भजननिषेधात् ।

शृङ्गारे कीर्तनभक्तिमाहुः व्रजेशेति ।

व्रजेश रसरूपात्मन् शृङ्गारं रचयाम्यहम् ।
स्वीकुरुष्व तदीयात्वात्स्वप्रियायत्कृतं निशि ॥ ३८ ॥

व्रजेश तव शृङ्गारं महाराजोपचाररूपमीशत्वाद्रचयामि स्वीकुरुष्व भक्ताधीनतायाः स्वीकारफलस्य स्वगामित्वादात्मनेपदम् । अन्यथा व्रजेशः कथं स्वीकुर्यात् । अत एव तदीयत्वादित्युक्तम् । तदीयत्वं प्राप्याहमित्यर्थः । अयं भक्तः शास्त्रीयोतः 'ऋतं पिबन्तौ' इति श्रुत्यनुरोध्यतो निशि स्वप्रियया यत्कृतमिति शृङ्गारविशेषणम् । प्रिया रमा तत्कृतशृङ्गारस्यापि ब्रह्मानन्दत्वात् । ननु शास्त्रीयभक्तस्य निरुक्तशृङ्गारोऽनुचितः । फलाध्याये 'सोध्यक्षे तदुपगमादिभ्य' इति सूत्रस्थादिपदा'द्भगवद्वशीकरणसमर्थः स्नेहः प्रभ्वनिङ्गितार्थत्यागस्तदनुरूपं भजनं चे'ति भाष्यस्य विरोधादिति चेत्तत्र संबोधनमाहु रसरूपात्मन्निति । रसरूपमात्मनि यस्य, रसरूपः आत्मा यस्येति वा । ननु नवनीतचोरस्य शृङ्गारे कर्तव्ये कथं निशि स्वप्रियायत्कृतमिति शृङ्गारविशेषणमिति चेन्न । स्वप्रियाङ्गीकारात् । प्रिया माता वा 'आऊ गोपाल शृङ्गार बनाऊं' अस्मात्कीर्तनात् । रसरूपात्मन्नित्यत्र भक्तिरसात्मन्नित्यर्थः ।

गन्धार्पणमाहुः कुचेति ।

कुचकुङ्कुमगन्धाढ्यमङ्गरागमतिप्रियम् ।
श्रीकृष्ण तापशान्त्यर्थमङ्गीकुरु मदर्पितम् ॥ ३९ ॥

अङ्गरागं सुवासिततैलादि तदप्यतिप्रियं स्वस्य । इतरद्विशेषणं पूर्ववत् । तापोऽङ्गरागनिराकरणीयः पदार्थः । प्रियाविरहतापो वा प्रियास्मारणात् । अङ्गीकुर्विति परस्मैपदमङ्गीकारफलस्य प्रेम्णः परगामित्वात् । जलपात्रमपि बोध्यं ताम्बूलं च । 'वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनै'रित्येकादशस्कन्धीयसप्तविंशाध्यायस्थवाक्यात् ।

वस्त्रार्पणमाहुः प्रियेति ।

प्रियाङ्गतुल्यवर्णानि वस्त्राणि व्रजनायक ।
समर्पयामि कृपया परिधेहि दयानिधे ॥ ४० ॥

प्रियाङ्गेत्यादिपूर्ववद् ब्रह्मानन्दत्वाय । ननु लोहितशुक्लनीलरूपाणि प्राप्तानि न परं पीतहरितकपिशचित्ररूपाणीति चेन्न । त्रिविधरूपभेदत्वादन्येषाम् । तथा च श्रुतिः, 'यदग्ने रीहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति यद् धूम्रं तद्वायोरि'त्याथर्वणीश्रुतिरित्यनन्तानि रूपाणीति प्रस्थानरत्नाकरेऽस्ति । वस्त्राणि यथाकालं 'देशकालविभागविदि'ति चतुर्थस्कन्धवाक्ये दैशिकविशेषणात् । कृपयेत्यत्र परिधानकारणं कृपा गृह्यते न विज्ञानकारणं वाक्यं पूर्वमुक्तम् ।

अलङ्कारार्पणमाहुः भूषणेति ।

भूषणान्यवतारात्मकान्येतान्यर्पयामि ते ।
प्रियाङ्गतुल्यकान्तीनि प्रसीद व्रजसुन्दर ॥ ४१ ॥

अवतारात्मकानि द्वितीयस्कन्धसुबोधिन्यां सप्तमाध्याये यथर्षभावतारो 'लसन् महारत्नहिरण्मयाङ्गद' इति 'नाभेरसावृषभ' इत्यत्र निरूपितः । हयग्रीवो हि स्फुरन्महारत्नकिरीटकुण्डलरूपः । नृसिंहो भगवान् कौस्तुभरूपः । यो हरिः स वनमाला । वामनो हि कटिमेखलारूपः । नूपुरकङ्कणादीनि मन्वन्तरावताररूपाणि । प्रियाङ्गेत्यादि विशेषणं पूर्ववत् । व्रजसुन्दरेति संबोधनं तदनुरूपशृङ्गाररूपभजनार्थमुक्तभाष्यात् ।

प्रियेति ।

प्रियानासाभूषणस्थबृहन्मुक्ताफलाकृतिम् ।
समर्पयामि राधेश गुञ्जाहारमतिप्रियम् ॥ ४२ ॥

प्रियाणां नासाभूषणानि तत्स्थानि बृहन्ति मुक्ताफलान्यादावन्ते च येषां मणीनां ते तथोक्तास्तेषामिवाकृतिर्यस्य हारस्य तम् । राधेशेति संबोधनं तादृशहारसमर्पणे प्रम्वनिङ्गितत्यागार्थम् ।

मिलितेति ।

मिलितान्योन्याङ्गकान्तिचाकचक्यसमं विभो ।
अङ्गीकुरुष्वोत्तमाङ्गे केकिपिच्छमतिप्रियम् ॥ ४३ ॥

मिलिता अन्योन्यस्याङ्गकान्तयः पीताङ्गकान्तिः श्यामाङ्गकान्तिश्चोभे मिलिते हरिता कान्तिः लोहिताङ्गकान्तिर्नीलाङ्गकान्तिश्चोभे मिलिते ताम्रवर्णकान्तिस्तयोः कान्त्योः शोभयोः चाकचक्यं भास्वरशुक्लं रूपं तेन समम् । चाकचक्यं लौकिकशब्दानुकरणं दीधितिवाचकम् । अमरकोशादान्यत्रिको वा शब्दः । केकिनां मयूराणां पिच्छं अङ्गीकुरुष्वेत्यात्मनेपदम्, 'मयूराश्चित्रिता येने'ति स्ववक्त्रनिःसृतमयूरचित्रश्रैष्ठ्यघजवाक्यसत्यत्वरूपम्, अङ्गीकारफलस्य कर्तृब्रह्मगामित्वात् ।

गोपेति ।

गोपस्त्रीहस्तस्थितं श्रीमच्छृङ्गारात्मकमञ्जनम् ।
शोभार्थं मातृवद्दत्तमङ्गीकुरु व्रजाधिप ॥ ४४ ॥

मातृवदित्यत्र तृतीयान्ताद्वतिः मया दत्तम् । ननु शृङ्गारात्मकमञ्जनं मातृवद्दत्तमित्यनुचितमिति चेन्न । हे व्रजाधिपेति संबोधनाद् व्रजस्य ग्रामीणाः स्त्रियो न चतुराः नागर्यश्चतुरास्तस्याधिप इत्यनौचित्यभावाद् अङ्गीकारफलस्य परगामित्वात्परस्मैपदम् ।

कस्तूरीति ।

कस्तूरीतिलकं भाले चित्रं चारु कपोलयोः ।
दृष्ट्वा प्रियाकृतं हृष्टस्तथा मुदमवाप्नुहि ॥ ४५ ॥

ननु बालगोपाले कथमिति चेन्न । प्रियापदस्य मातृवाचकत्वमपीति दोषाभावात् ।

मुखेति ।

मुखाब्जमकरन्दासिलोभेन रसभावतः ।
मधुपायितचित्तानि व्रजरत्नानि तानि ते ॥ ४६ ॥

मुखं भक्तिः साऽब्जं भक्तोष्मापहारित्वात् तस्य मकरन्द आनन्दः भजनानन्द इत्यर्थः । तस्यासेर्लोभेन । मकरन्दः पुण्यं कर्म वा दास्यमिति यावत् सौरभ्यसाम्यात् । अयमर्थः । बह्वीषु भक्तासु कस्याश्चिन्मनोरथेन मन्मथमन्मथरूपेणात्मन आविर्भावे आत्मनः कपोलरिरंसावशादूष्मणि सति कासाञ्चिद्भक्तानां वैराग्योत्कर्षवशात्तच्छान्तचित्तानां रसभावः रसः शृङ्गारः स च देवादिविषयो भावः । 'रतिर्देवादिविषये'ति काव्यप्रकाशात् तादृशरसभावतः पाञ्चभौतिकापगमे मधुपायितानि मधुपवदाचारयुक्तानि चित्तानि येषां व्रजरत्नानामतो 'अन्ते या मतिः सा गति'रिति वाक्याद्दण्डसायुज्यालकाभिन्नसारूप्योभयातिक्रमेण मुखाब्जभक्तावुद्गतकस्तूरीरूपता । अतः कपोलयोश्चित्रं चारु कस्तूरीरूपं ते तव तानि प्रसिद्धानि व्रजरत्नानि तान्यपि मधुपायितचित्तानि नान्यानि । अन्येषां भक्तानामन्यत्रालकादौ प्रवेशात् । वाक्यं तु 'वस्त्रोपवीते'त्याद्युक्तमेव । 'तथा स्नानपुरःसर'मिति च ।

मालार्पणं सुमनसामाहुः क्विति ।

कुसुमान्यर्पितानीश प्रसीद मयि संततम् ।
कृपासंहृष्टदृग्वृष्ट्या तदङ्गीकृतिशोभितः ॥ ४७ ॥

मालाकारेणार्पितानि 'भक्तिमार्गानुसारेणोपचारा मुख्या' इति निबन्धे दर्शनात् । 'नमः कमलमालिन' इति गोपालतापिनीयश्रुतेः । तदुक्तं स्कान्दे 'जातीपुष्पसहस्रेण यच्छेन्मालां सुशोभनाम्' इति । कृपया संहृष्टानि । यद्वा । संहृष्टानां व्रजरत्नानां दृशि ज्ञानानि वल्लवीनयनाम्भोजरूपाणि । यद्वा द्वितीयपक्षे नयनाम्भोजरूपाणि वल्लवीनां संहृष्टपदेनोक्तेः । तेषां ज्ञानानां वृष्टिर्ब्रह्मोपरि मोचनं तया तदात्मकमालाङ्गीकृत्या शोभितः । तदुक्तं 'वल्लवीनयनाम्भोजमालिन' इति गोपालतापिनीये ।

'वेणुवादनशीलाये'ति श्रुतेर्वेणुवादनमाहुः प्रियेति ।

प्रियाकारणदौत्यैकभावेनातिप्रियं सदा ।
वेणुं धृत्वाधरे कृष्ण पूरय स्वामृतस्वनैः ॥ ४८ ॥

स्पष्टम् । प्रियाणां व्रजरत्नानामाकारणे, दूतत्वं तदेवैकं मुख्यं भावो प्रकृतिजन्यबोधे प्रकारत्वेन । 'धूपदीपोपहाराणि दद्यान्मे श्रद्धयार्चकः' इति वाक्ये उपहारान्तर्गतो वेणुरिति भागवतमार्गः ।

आदर्शार्पणमाहुः प्रियेति ।

प्रियानत्वात्मकादर्शे विलोक्य वदनाम्बुजम् ।
व्रजाधीश प्रमुदितः कृपया मां विलोकय ॥ ४९ ॥

आदर्शविशेषणं पूर्ववत् । सेवाफलमवान्तरमभीष्टमकार्षुः । कृपया ज्ञानकारणभूतया मां

विलोकय प्रबोधनयुतं कुरु । परस्मैपदं प्रबोधनस्य परगामित्वात् । ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः पर' इति वाक्यात् स्वेच्छयाऽस्मिञ्श्लोकेपीष्टं कृतं प्रबोधनम् ।

एवं शृङ्गारं कृत्वा सिंहासने उपवेश्य सामग्रीमग्रे स्थाप्य व्रजस्त्रीकरेत्यादिसार्धपद्येन विज्ञाप्य भाषणमित्यादिपद्यद्वयेन विज्ञाप्यानेन पद्येन समर्पयेद् गोपिकेति ।

गोपिकाभावतः स्नेहाद्भुक्तं तासां गृहे यथा ।
मदर्पितं तथा भुङ्क्ष्व कृपया गोपिकापते ॥ ५० ॥

गुप्तरसे स्पष्टोऽस्यार्थः । 'न रोधयति मां योग' इत्यारभ्य 'यथा भक्तिर्ममोर्जिता' 'भक्त्याहमेकया ग्राह्य' इत्येकादशद्वादशाध्याये । अत्र श्रीभागवते मार्गे गोपीवल्लभभोगो न दृश्यते अतः सामान्यतः प्रमाणमुक्तमन्यच्च 'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः' इति वाक्ये द्रव्यानियम उक्तः । तेन भक्तिहंसोक्तदिशा वेदाविरोधे स्नेहे च सर्वभोगोपपत्तेः । ततो यथावदाचमनं कारयित्वा ताम्बूलमर्पयेत् ।

ततो दुग्धफेनं दुग्धं चार्पयेत् स्वर्णेति ।

स्वर्णपात्रे पयःफेनपानव्याजेन सर्वतः ।
अभ्यस्यति प्राणनाथः प्रियाप्रत्यङ्गचुम्बनम् ॥ ५१ ॥

स्वर्णपात्रं प्रियाङ्गतुल्यकान्तित्वेन प्रियाङ्गं पयोधररूपं पयआधारपात्रत्वात् 'सर्वकाम' इति श्रुतेः । कस्यचित् सुकृतराशेरात्ममनोज्ञत्वे तेन प्रियाप्रत्यङ्गचुम्बनं त्वया क्रियत इत्युक्ते स्वर्णपात्रे पयःफेनपानं क्रियते मयेति स्वर्णपात्रे पयःफेनव्याजरूपं **तेन व्याजेन सर्वतः** सर्वं प्रियाङ्गाङ्गचुम्बनम् । वीप्सायां प्रतिः । **अभ्यस्यति** पुनः पुनः कथयति । तथा च सर्वं प्रियाप्रत्यङ्गचुम्बनं प्राणनाथः स्वर्णपात्रे पयःफेनव्याजेन पुनः पुनः कथयतीत्यर्थः । बालस्तु प्राणनाथः प्रियाया मातुर्भोगरूपं पयोधररूपमङ्गं तस्य चुम्बनं न पानं पानस्य दुग्धकर्मकत्वात् । दुग्धं पिबतीति प्रत्ययात् तत्स्वर्णपात्रे पयःफेनपानव्याजेनाभ्यस्यति यथा पूर्वोक्तो महानभ्यस्यति तथानुकरोति ।

एवं गुहां प्रविष्टाविति सूत्रभाष्योक्तरीत्योक्त्वा संप्रदायप्रदीपोक्तरीत्या श्रीभागवतमार्गेणेति निबन्धोक्तरीत्या श्रीहरिरायजिद्भावनयाहुः गोपेति ।

गोपार्पितपयःफेनपानं यद्भावतः कृतम् ।
मदर्पितपयःफेनपानं तद्भावतः कुरु ॥ ५२ ॥

मालामुक्तायोंक्तं समर्पणीयं यद्भावतो व्रजे धारोष्णदुग्धत्वेन । किंच तन्मध्ये सूक्ष्मं सुवर्णपात्रं पयोमहापात्रे ज्ञेयम् । ततः पुनराचमनं कारयित्वा ताम्बूलमर्पयेत् । अत्रापि मुखवस्त्रं योजितं देयम् । ततः पायसादिकमर्पयेदिति मूलम्, आदिपदेनोत्सवादौ भोगविशेषः पायसेन सहैव, जलपात्रं चादिपदार्थः धूपदीपतुलसीशङ्खोदकानि च ।

व्रजेति ।

व्रजस्त्रीकृतशृङ्गारानन्तरं तद्गृहे यथा ।
अभोजि पायसं ताभिः सह भुङ्क्ष्व तथैव मे ॥ ५३ ॥

---

१ वटबीजन्यायेनाह ।

स्पष्टम् । ततः पुनराचमनं कारयित्वा ताम्बूलमर्पयित्वा आरात्रिकं कुर्यात् । अत्रापि माला ।

अमङ्गलनिवृत्त्यर्थं मङ्गलावाप्तये तथा ।
कृतमारात्रिकं तेन प्रसीद पुरुषोत्तम ॥ ५४ ॥

तृतीयमारात्रिकमिदं क्वचिल्लुप्तं स दोषो नित्यत्वात्सेवायां नास्ति तदुक्तं पूर्वमीमांसायाम् । ननु स्कान्दे मार्गशीर्षमाहात्म्ये नृसिंहपरिचर्यायां च 'सर्वं संपूर्णतामेति कृते नीराजने सुते'ति सर्वसंपूर्णतावाप्तये 'नीराजनमिदं नाथ प्रीयतां मधुसूदने'ति प्रीत्यवाप्तये चारात्रिकस्य निरुक्तेः कथममङ्गलनिवृत्त्याद्यर्थमिति चेन्न । स्कान्दस्य तामसत्वेन 'तामसा निरयायैवे'ति वाक्यप्रसरात् । सर्वं संपूर्णतामित्यस्य मानसीपूजामन्त्रत्वात् । अतो'अचलत्वं चापेक्ष्ये'ति सूत्राभासोक्तभक्तेच्छयाऽमङ्गलनिवृत्त्याद्यर्थमारात्रिकं साधु, घण्टादीनां वादनं 'सामनीराजनादिभि'रित्यत्रादिपदार्थत्वात् । अश्रुतघटस्थापनापेक्षया पुराणादौ स्मृतस्य घण्टावादनादेर्ज्यायस्त्वात् 'सामनीराजनादिभि'रिति भागवतवाक्यात्सामश्रुतिः । सेवापूर्त्यर्थमिति स्कान्दे । स्पष्टमन्यत् ।

नवनीतचौर्यादीनां प्रेङ्खशायनमाहुः प्रेम्णेति ।

प्रेम्णा मत्प्रेङ्खशयनदोलने श्रीयशोदया ।
सिताद्यमर्पितं भुक्तं भुङ्क्ष्वेदं च तथैव मे ॥ ५५ ॥

बालानामतिमहतामप्यन्यप्रेङ्खशयनं न दोषाय । प्रेमवशत्वादात्मनस्तदाहुः प्रेम्णा मत्प्रेङ्खेति । वर्तमानेन त्वयेति शेषः । आद्यपदेन त्वक्सहिता मज्जा शीर्षफल, वीणि, खर्जूरिका, द्राक्षादीनि खण्डशकलानि च बदाममीजी गरी चिरोंजीति लोके त्रयाणां पूर्वेषां समाख्याः । अधुना तु नवनीतथपडीस्वल्पमोदकाद्यपि । पिष्टसिताखण्डे च जलभृङ्गारः । इदं चेत्यत्र चकारः समुच्चये । पूर्वोक्तं प्रत्यक्षगमित्यर्थः । इदं सेवायाम् । पूर्वोक्तं गृहे । अन्येषां स्वरूपाणां भावनया शय्यायां शायनं श्रीयशोदादिभावनं च ।

अग्रेतनकृत्यमाहुस्ततोग्रे क्षणं क्रीडार्थमक्षादीन्निवेदयेत् ।

क्रीडारूपात्मकैरक्षैः क्रीडार्थं स्थापितैः प्रभो ।
क्रीडां कुरु महाराज गोपिकाभिश्च राधया ॥ ५६ ॥

आदिपदेन क्रीडनकानि व्याघ्रबर्करी, शतरञ्जिका । क्रीडारूपात्मकैरिति नव सात्त्विकादिभेदाः । सच् चिद् आनन्दाः विभावोऽनुभावः सञ्चारिभावो निर्गुण इति मिलित्वा षोडश क्रीडारूपाणि । धीरा, अधीरा, धीराधीरारूपा अक्षास्त्रयः । अक्षबिन्दवश्चतुर्दश तेषां सङ्ख्यातात्पर्यं षट् तथैकः पञ्च द्वौ च । षट् धर्माः, एको धर्मी, पञ्च महाभूतानि, जीवपरमात्मानौ द्वौ । पट्टिकाखण्डानि षण्णवतिः षोडश शृङ्गाराः पुंसः षोडश स्त्रियाः मिलित्वा द्वात्रिंशच्छृङ्गाराश्चतुःषष्टिकलाः एवं षण्णवतिः । शतरञ्जिकाशयः द्वात्रिंशच्छृङ्गाराः क्रीडनकरूपाः, चतुःषष्टिखण्डानि कलारूपाणि, द्वौ क्रीडाकर्तारौ, द्वौ द्रष्टारौ मिलित्वा शतं जातम् । व्याघ्राजाशयः विंशतिरजानां सात्त्विकादिनवैकादशेन्द्रियभेदेन । व्याघ्राश्चत्वारः पुष्टिमार्गीयधर्मार्थकाममोक्षरूपाः द्वौ चेद् धर्ममोक्षात्मकौ धर्ममोक्षरूपकोटेरर्थकामकोटेरुत्कृष्टत्वात् । द्वात्रिंशत्खण्डानि द्वात्रिंशच्छृङ्गाररूपाणि स्त्रीपुरुषभेदेन । एवं क्रीडारूपाण्यक्षादीनि भक्तेच्छया तत्र तत्र स्थिताभिर्गोपीभी राधया च । श्रीहरिरायजितां भावनया वेणुवेत्रे अपि श्रीहस्ते धर्तव्ये ।

मालामुक्त्वार्थं राजभोगसमर्पणमाहुः ततो राजभोगं समर्पयेच्छ्रीमदिति ।

श्रीमद्राधाङ्गसौगन्ध्यागरुधूपार्पणाद्विभो ।
भावात्मकृतसामग्र्यां भोगेच्छां प्रकटीकुरु ॥ ५७ ॥

अगरुधूपार्पणस्य विशेषणं पूर्ववच्चन्दनधूपार्पणस्योपलक्षकम् । तेन मुक्तः कृतसामग्रीको भवति । 'मुक्तोपसृप्यव्यपदेशात्' इति व्याससूत्रात् । धूपार्पणेन मुक्तत्वं तु तत्त्वसागरे 'कृष्णागरुसमुत्थेन धूपेन श्रीधरालयम् । धूपयेद्वैष्णवो यस्तु स मुक्तो नरकार्णवा'दिति नृसिंहपरिचर्यायाम् । भोगेच्छाकारणत्वेन भक्तान्याज्ञातुरात्मनः । सामग्रीज्ञानार्थं विशेषणम् । **भावात्मेति** । भावो भक्तिर्दास्यरूपा तस्यामात्मा स्वरूपं यस्याः **कृतसामग्र्याः** । तथा च 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि' इति वाक्ये तत्पदार्थो भक्तत्वावच्छिन्नस्तत्र भक्तत्वं भक्तिरेव । तस्यामात्मा स्वरूपं यस्या इति सामग्र्या आत्मज्ञानविषयत्वम् । ततो जानातीच्छति यतत इति प्रणाड्या **भोगेच्छां प्रकटीकुर्वि**त्युक्तम् ।

दीपः समर्पितो भोग्यरूपार्थान्नप्रदीपने ।
तद्दीपनेन चोद्दीप्तभावो भोजनमाचर ॥ ५८ ॥

प्रदीपने प्रकाशने । ननु सूर्यप्रभाप्रकाशितेऽन्ने प्रकाशकान्तरदीपापेक्षाभाव इति चेन्न । भूयः प्रकाशदेशान्मन्दिर आगच्छत आत्मनः प्रथममपेक्षाभावे मानाभावात् । **उद्दीप्तभावस्तू**द्दीप्तस्नेहः 'धूपदीपोपहाराणी'ति श्रीभागवतम् । नारदीयकल्पे तु 'सघृतं गुग्गुलं धूपं दीपं गोघृतदीपितम् । समस्तपरिवाराय हरये श्रद्धयार्पयेदि'त्युक्तम् ।

धूपदीपावुक्त्वोपहाराण्याहुः व्रजेति ।

व्रजस्त्रीकरयुग्मात्मयत्नैः पात्रं च तन्मयम् ।
स्थापितं ते भोजनार्थं योग्यभोज्यान्नसम्भृतम् ॥ ५९ ॥

व्याख्यातम् ।

गुप्तरस इव प्रकारमाहुः स्वर्णेति ।

स्वर्णपात्रेषु दुग्धादि दध्याद्यं राजतेषु च ।
मृत्पात्रेषु रसालाद्यं भोज्यं सद्रोचकादिकम् ॥ ६० ॥
राजते नवनीतं च पात्रे हैमे सिता तथा ।
यथायोग्येषु पात्रेषु पायसव्यञ्जनादिकम् ॥ ६१ ॥
सूपौदनं पोलिकादि तथान्नं च चतुर्विधम् ।
भुङ्क्ष्व भावैकसंशुद्धं राधया सहितो हरे ॥ ६२ ॥

सद्रोचकं सन्धितं तदादिकमादिपदेन निम्ब्वार्द्रकादि । **यथायोग्यानि पात्राणि** । श्रीपद्मपुराणे 'नैवेद्यपात्रं वक्ष्यामि केशवस्य महात्मनः । हैरण्यं राजतं कांस्यं ताम्रं मृण्मयमेव च । पालाशं पद्मपत्रं वा पात्रं विष्णोरतिप्रियम्' । इति नृसिंहपरिचर्यायाम् । **सूप**शब्देन 'दारि' इत्युच्यते लोके तद्वाच्यम् । **पोलिका** रोट्यः आदिपदेन बाट्यः । **चतुर्विधमन्नं** भोज्यं तण्डुलादि, लेह्यं शिखरिण्यादि, चोष्यमिक्षुदण्डादि, पेयं दुग्धादि । **भावैकसंशुद्धं** भक्त्यैकसंशुद्धं सिद्धान्तरहस्योक्तरीत्या । नवनीतप्रियजित्स्वरूपे राधाशक्तिर्बाला वा भावनीया । अत्र भावना गुप्तरसे स्फुटैव, उपहाराणीत्यत्र

श्रीभागवते उपहारान्तरमुक्तम् । 'गुडपायससर्पींषि शष्कुल्यापूपमोदकान् । संयावदधिसूपांश्च नैवेद्यं सति कल्पये'दिति 'पच्यन्तां विविधाः पाका' इति श्रीगोवर्धनप्रसङ्गे ।

उपहारपदस्य नैवेद्यवदन्यत्रापि वृत्तेराहुः कम्बुनेति ।

कम्बुनाम्नातिप्रियश्रीशङ्खान्तर्गतवारिणा ।
दृष्ट्यादिदोषाभावाय सामग्री प्रोक्षिता विभो ॥ ६३ ॥

कम्बुर्गलकस्तन्नाम्नातिप्रियः श्रीशङ्खो गलकशङ्खः । तथा च विश्वः 'कम्बुः शम्बूकगजयोर्ग्रीवागलकशङ्खयोः' अमरः 'कम्बुर्ना वलये शङ्खे' इति । कम्ब गतौ मृगय्वादिः । काम्यते वा । एकदेशान्वयः । तदन्तर्गतवारिणा । भक्तिमार्गानुसारेणाहुः दृष्ट्यादिदोषेति । आदिपदेनाज्ञातास्पृश्यतादोषः । तदुक्तं 'नाद्यं तडागजं वापि वापीकूपादिकं च यत् । गाङ्गेयं जायते सर्वं जलं शङ्खे कृतं सुत । त्रैलोक्ये यानि तीर्थानि मम वै याज्ञया सुत । शङ्खे तानि वसन्तीह तस्माच्छङ्खो वरः स्मृत' इति स्कान्दे । याज्ञयेत्यत्र इ आज्ञयेति छेदः । श्रीभागवते च 'अपां तत्त्वं दरवर' इति । यद्वा कम्बुर्वलयस्तन्नाम्ना कम्बुना गृहीतः शङ्खोऽतिप्रियो भवति । राधाशृङ्गारत्वाद्वलयस्यान्यत्पूर्ववत् । प्रायपाठाद् यथाव्रजस्त्रीकरयुग्मात्मेति यन्त्रविशेषणम् । 'व्रजस्त्रीकरयुग्मात्मयन्त्रे पात्रं च तन्मयमि'त्यत्र तथा च वलयस्मारककम्बुपदेन शङ्खाभिधानादेतं पिबन्ताविति श्रुत्युक्तस्वरूपामृतपानात्मकः शङ्खभोग आत्मनः सिद्धः । न च शङ्खभोगो न वलयभोग इति वाच्यम् । सर्वं सर्वमयमिति श्रुतेर्वलयस्य स्मारकपदप्रयोगे वलयस्यापि भोगाङ्गीकारात् ।

प्रक्षिप्तेति ।

प्रक्षिप्ता तुलसी तेऽतिप्रियगन्धा तथैव च ।
कुरुष्व तेनातितुष्टो भोजनं व्रजनायक ॥ ६४ ॥

अतिप्रियेति । तदुक्तं ब्रह्मपुराणे 'तुलसीदलगन्धेन मालतीकुसुमेन च । कपिलाक्षीरदानेन सद्यस्तुष्यति केशवः' इति । राजसत्त्वेऽपि पुराणस्य समबलत्वं समोत्कर्षः समं प्रामाण्यं परेषाम् । अस्माकं बलोत्कर्षयोः साम्यासहनमिति बहिर्मुखमुखध्वंसे कल्याणरायाः । तथैव भक्तराधास्रग्गन्धत्वेनैवेत्यर्थः । तेनातितुष्ट इत्यत्रातिपदम् । अतिप्रियेत्यत्रापि । वाक्यं तु गरुडपुराणे भगवतः 'तुलसीं प्राप्य यो नित्यं न करोति ममार्चनम् । तस्य तां प्रतिगृह्णामि न पूजां शतवार्षिकीम्' इति । इदं सात्त्विकं पुराणम् । 'भक्त्या तुतोष भगवान् गजयूथपाय' इति श्रीभागवतम् । एवमुक्तं श्रीगरुडपुराणे 'तुलसीदलसम्मिश्रं हरेर्यच्छति यः सदा । नैवेद्य'मित्यादि 'भाषणं मा त्यजे'ति श्लोकचतुष्टयेन समर्पयेदिति मूलम् । अत्रार्घपात्रेऽर्घो ज्ञेयः । विष्णुरहस्ये 'सौवर्णे रम्यपात्रे तु मणिरत्नविभूषिते । तोयाद्यष्टाङ्गसम्पूर्णे स्वामिनेऽर्घ ददामि ते' इति वचनात् । यद्यपि नृसिंहपरिचर्यायां मानसीसेवायां पादप्रक्षालनानन्तरमनेन वाक्येनार्घ उक्तस्तथा स्कान्दे 'अर्घ्यं दद्यात्ततो वत्स पाद्यमाचमनीयकमिति पादप्रक्षालनमर्घ्यानन्तरमुक्तं तथापि प्रयोगभेदात्पाठक्रममनादृत्य क्रमान्तरेण नैवेद्यसमये बोध्यः । तदित्थम् । 'श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि' । 'गन्धो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः ।' 'भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ।' इत्येकादशसप्तविंशाध्याये भगवदुपदेशः । तत्र भक्त्या क्रमेण नैवेद्यसमयेऽर्घः । एकत्र सिद्धः शास्त्रार्थोऽपरत्रापि तथेत्यतिदेशस्य निर्बलत्वाद्भगवदुपदेशापेक्षया । पूर्वतन्त्रे पञ्चमस्यैकादशाधिकरणे आचार्येषु ह्यात्मभेदबुद्धेर्महापराधेषु गणनं यद्यपि तथापि लौकिकदृष्टिमतो भक्तस्येच्छया पादुकाजितामुत्सवेषु नित्यदा वा राजभोगसमर्पणं पादुकाजितामाहुः ततः श्रीमदाचार्येषु समर्पयेदिति ।

कीर्तनभक्तिमपि तदर्थमाहुः स्वार्थेति ।

स्वार्थप्रकटसेवाख्यमार्गे श्रीवल्लभप्रभो ।
निवेदितस्य मे भोज्यं स्वास्ये कुरु हुताशन ॥ ६५ ॥

'मायावादतमोनिरस्य मधुभित्सेवाख्यवर्त्मोद्धुतं, श्रीमद्गोकुलनाथसङ्गमसुधासंप्रापकं तत्क्षणात् । दुःप्रापं प्रकटं चकार करुणारागातिसंमोहनः स श्रीवल्लभमानुरुल्लसति यः श्रीबल्लवीशान्तर' इति स्फुरत्कृष्णप्रेमामृतात्स्वार्थप्रकटसेवाख्यमार्गः । भोज्यं चतुर्विधान्नम् । हुताशन कृष्णवर्त्मन् । पानीयपात्रमपि ज्ञेयम् । घटिकाद्वयं भोगं प्रस्थाप्यानन्तरं कृत्यमाहुः । ततो यथावदाचमनं कारयित्वा ताम्बूलमर्पयेदिति, अत्र मुखवस्त्रं द्रष्टव्यम् । 'मुखवासं सुरभिमत्ताम्बूलाद्यम्' इति श्रीभागवतवाक्यात् । आचार्येभ्योऽपीति ज्ञेयम् । किञ्च 'मद्भक्तपूजाभ्यधिके'ति वाक्यात्सप्तबालकपादुकाजितामपि ताम्बूलान्तं समर्पयेत् । 'पितृदेवो भवे'ति श्रुत्या भक्तः स्वपितृभ्योऽपि पादुकाजिद्द्वारा योग्यं कुर्यात् । 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इति श्रुतिः ।

ततो भोजनपात्रस्थले मार्जनं कुर्याद् गोकुलेशेति ।

गोकुलेश तवोच्छिष्टलेपात्पात्रप्रमार्जनात् ।
त्वत्सेवान्तरधर्मेषु रतिर्भवति निश्चला ॥ ६६ ॥

भोजनपात्राणां मार्जनं च कुर्याद् इति फक्किकार्थः । श्लोके उच्छिष्टलेपमालोक्य पात्राणां प्रकृष्टं मृदादिभिर्मार्जनं तस्मात् । त्वत्सेवातोऽन्यधर्माः पात्रप्रमार्जनादयस्तेषु । रतिः पूर्वं वर्तते सेवान्तरधर्मेष्वपि प्रवृत्तत्वात् । इदानीं नित्यदा करणान्निश्चला । अन्तरपदं मध्यवाचि वा ।

ततश्चरणयोस्तुलसीं समर्पयेत् प्रियेति ।

प्रियाङ्गगन्धसुरभितुलसीं ते पदप्रियाम् ।
समर्पयामि मे देहि हरे देहमलौकिकम् ॥ ६७ ॥

तुलसीविशेषणं पूर्ववत् । पदप्रियाम् 'कच्चित्तुलसि कल्याणि गोविन्दचरणप्रिये' इति वाक्यात् । देहमिति । तुलस्याः पदसमर्पिताया अलौकिकदेहदातृत्वं पद्मपुराणे 'सुकृती दुःकृती चापि तुलस्या योऽर्चयेद्धरिम् । देहान्ते दिव्ययानेन विष्णुभक्तैः स नीयत' इति । देहमन्तरा यानेन नयनासंभवात् ।

प्रसीदेति ।

प्रसीद पूजितो भक्त्या तुलस्या प्रियगन्धया ।
निःकिञ्चनाधीश नान्यत्कर्तुं शक्नोमि सर्वथा ॥ ६८ ॥

तुलस्याः गोविन्दचरणप्रियत्वात् प्रसीद । अन्यत्पुष्पमालादि । सर्वथा सर्वैः प्रकारैः देहेन मूल्येनाज्ञया वा । तादृशदेहवान् मूल्यवानाज्ञावांश्च नास्मीति देहादीनां प्रकारता । ननु निःकिञ्चनस्य कथं सेवेति चेन्न । यतो निःकिञ्चनानामधीश 'धर्मान्सन्त्यज्य यः सर्वान्मां भजेत्स च सत्तम' इत्येकादशस्कन्धदशमेऽध्याये । 'न्यासादेशेषु धर्मत्यजनवचनतोऽकिञ्चनाधिक्रियोक्ते'ति । ननु गीता कुतो नोक्ता 'सर्वधर्मान्परित्यज्ये'त्यादिः । गीतायाः प्रकृतित्वाभावात् । एकादशाध्यायस्य लघुस्वमार्गस्यैकोनत्रिंशाध्यायोक्तस्य प्रकृतित्वात् । धनी पुष्पमालाः पुष्पमण्डपादिकं कुर्यादेव । वीटिकासमर्पणमपि । ततः पादपीठादिकमर्पयेत् । आदिपदेन जलपात्रं मुखवस्त्रं दर्पणमुष्णकालश्चेन्मृत्पात्रं जलपूर्णं चन्दनपात्रं च व्यजनानि च सिंहासने उभयपार्श्वयोः स्थापनीयानि । सिंहासनखण्डास्तरणं

दन्तादिक्रीडनकानि तष्टी भूमितूलिका विष्वगास्तरणं शीतकाले, उष्णकाले लम्बतूलिकास्तरणं तूलासनद्वयं पीठकशय्याश्रयोः । वक्रवेत्रद्वयं वा चतुष्टयं वा त्रयं वा कन्दुकद्वयं तच्चतुष्टयं तत्त्रयं वा । 'मुखवासं सुरभिमत्ताम्बूलाद्य'मिति वाक्यीयाद्यपदात् ।

पादपीठसमर्पणे कीर्तनमाहुः हृदिति ।

हृत्पङ्कजात्मकं स्वर्णपादपीठं समर्पितम् ।
पादौ धृत्वा गोकुलेश हृत्तापं समपाकुरु ॥ ६९ ॥

सर्वात्मभाववद्भक्तानां हृत्पङ्कजात्मकं सर्वात्मभावस्य भगवत्कृतदानसाध्यत्वेनाक्षरात्मकं हृत्पद्मं वा भक्तसाधारणम् । पादयोः पङ्कजत्वेन तापापाकरणसामर्थ्यात्तापमपाकुरु । पादौ धृतौ पादपीठे हृद्भक्तनिष्ठं तस्य तापापाकरणं 'सर्वतः पाणिपादं त'दिति वाक्यात्पादयोः सर्वत्र सत्त्वात् ।

ततः आरात्रिकं कृत्वा विज्ञापयेद् भक्तार्थेति ।

भक्तार्थाविर्भूतरूप कृष्ण ते चरणाब्जयोः ।
सर्वाशुभविनाशार्थं न्यस्तः पुष्पाञ्जलिः शुभः ॥ ७० ॥

पृथास्तुतौ 'भक्तियोगवितानार्थं कथं पश्येम हि स्त्रियः' 'भक्ताया भुव उद्धारो भारहाराभिरूपित' इत्यादौ भक्तानामर्थे अविर्भूतरूपः कृष्णस्तस्य संबोधनम् । पुष्पाञ्जलिरिति भक्तिमार्गानुसारेण मुख्या उपचारा इति पुष्पाणां मालास्ता उक्ताः श्रद्धालुश्चेत्करोतु कश्चित् कदाचित् ।

अनेन पुष्पाञ्जलिमर्पयेद् अमङ्गलेति ।

अमङ्गलनिवृत्त्यर्थं मङ्गलावाप्तये तथा ।
कृतमारात्रिकं तेन प्रसीद पुरुषोत्तम ॥ ७१ ॥

व्याकृतम् । अनुक्तमपि नमस्कारमनेन कुर्यात् । 'प्रसीद भगवन्निति वन्देत दण्डवदि'ति वाक्यात् । अत्रापि प्रसीद पुरुषोत्तमेति दर्शनात् । तदुक्तं गरुडपुराणे 'अन्नं चतुर्विधं पुण्यं गुणाढ्यं चामृतोपमम् । निष्पन्नं स्वगृहे यद्वा श्रद्धया कल्पयेद्धरेः । नैवेद्यं परया भक्त्या घण्टाद्यैर्जयनिःस्वनैः । नीराजनैश्चाहरहः पश्चादापोशनं बुधः । अथ भुक्तवते दत्त्वा जलैः कर्पूरवासितैः । आचमनं च ताम्बूलं चन्दनैः करमार्जनम् । पुष्पाञ्जलिं ततः कुर्याद् भक्त्यादर्शं प्रदर्शयेत् । नीराजनं ततः कार्यं कार्पूरं विभवे सती'ति ।

नक्तंशयनार्थं विज्ञापनस्य वक्ष्यमाणत्वान् मध्याह्ने शयनार्थं विजिज्ञपुः पञ्चभिः प्रीत इत्यादिभिः ।

प्रीतो देहि स्वदास्यं मे पुरुषार्थात्मकं स्वतः ।
स्वदास्यसिद्धौ दासानां न किञ्चिदवशिष्यते ॥ ७२ ॥

'तं भजेदि'ति गोपालतापिनीये दास्यमुक्तं तस्य साधनसाध्यत्वेन दानमनुपपन्नमत उक्तं स्वस्यात्मनो दास्यं सर्वात्मभावरूपं निरोधलक्षणग्रन्थोक्तं तत्तु साधनासाध्यं 'मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्' 'प्रदानवदेव तदुक्त'मितिस्मृतिसूत्रवाक्याभ्याम् । 'पुरुषभूषण देहि दास्यम्' इति पञ्चाध्याय्याम् । अतः प्रीतो देहि स्वदास्यं म इत्युक्तम् । पुरुषार्थात्मकमिति । तच्च 'अतस्त्वितरज्यायो लिङ्गाच्च' 'तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्य' इति सूत्रद्वये साधनाध्यायोपान्त्य उपपादितम् । श्रीभागवते च 'तथैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितमपि नो एवाद्रियन्ते भगवदीयत्वेन परिसमाप्तसर्वार्था' इति । अत एवोत्तरार्धं 'सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जना' इति च

वाक्यम् । 'भक्तिमार्गे हरेर्दास्यं धर्मोर्थो हरिरेव हि । कामस्तस्य दिदृक्षैव मोक्षः कृष्णस्य चेद् ध्रुवम्' इत्याचार्यकारिका ।

एतावदिति ।

एतावदेव विज्ञाप्यं सर्वथा सर्वदैव मे ।
त्वमीश्वरोसीङ्गितं ते क्षुद्रोऽहं न विदामि हि ॥ ७३ ॥

इङ्गिताज्ञाने सेवा न संभवति । भगवदीयत्वस्य च पुष्टिमार्गीयमोक्षत्वादेतावदेव **विज्ञाप्यमन्यत्साधनसाध्यमिति** । विप्राय गां ददातीत्यत्र स्वानुमतिप्रकाशनवत् । विज्ञापनद्वारा स्वानुमतिः प्रकाशितात्र । गोवत् सर्वात्मभावदास्यं दास्यतीति **सर्वथा** सर्वेषु साधनसाध्यतदितरेषु प्रकारेषु । **सर्वदा** सर्वकालेषु आपत्संपत्स्वपि । तत्तत्सेवाकाल **इङ्गितं** 'इङ्गितं गतिचेष्टयोः' इति विश्वात् । चेष्टायाः कालत्वात् । **क्षुद्रो**ऽल्पोंश इति यावत् । 'क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत्' इति विश्वात् । **विदामीति** विदधातुर्लाभे तुदाद्युभयपदी लभ इत्यर्थः । तादृशकाललाभफलं परगामीति परस्मैपदम् ।

तुष्टुवुः स्तवैः **परमकारुणिक इति ।**

परमकारुणिको न भवत्परः परमशोच्यतमो नहि मत्परः ।
इति विचिन्त्य सदा मयि किङ्करे यदुचितं व्रजनाथ तथा चर ॥ ७४ ॥

पूर्वश्लोकसङ्गतिस्तु प्रसादयुक्तो हि ददातीति प्रसादानन्तरं स्वदास्यदानविज्ञापनम् । स्वदास्ये इङ्गितलाभः कारणमितीङ्गितलाभविज्ञापनं तदनन्तरं वैराग्योत्कर्षात्स्वस्मिन्विचिकीर्षितमधीष्टीक्रियते 'निवेदितात्मा विचिकीर्षितो म' इति वाक्यात् ।

किञ्च कियानिति ।

कियान्पूर्वं जीवस्तदुचितकृतिश्चापि कियती
भवान् यत्सापेक्षो निजचरणदास्ये बत भवेत् ।
अतः स्वात्मानं स्वं निरुपममहत्त्वं व्रजपते
समीक्ष्यास्मन्नेत्रे शिशिरय निजास्याम्बुजरसैः ॥ ७५ ॥

कियान्पूर्वं जीवोऽणुरित्यर्थः । अणूचितकृतिश्चापि कियत्यण्वीत्यर्थः । यस्याः कृतेः सापेक्षो **यत्सापेक्षो भवान्** साधनसापेक्षो **बत** इति खेदे **भवेत्** । मर्यादायां साधनसापेक्षोऽहं भवाम्येवेत्यत आहुर्निजचरणदास्य इति लक्ष्मीवद्भवेदित्यर्थः । चरणदास्ये लक्ष्म्या अधिकारात् । पुष्टिफले दास्य इति चरणपदेन ज्ञाप्यते । व्रजभक्तभावेन भजतः फलं नित्यलीलायां प्रवेश इत्यर्थः । अतस्तादृशफलानुरूपसाधनाभावात् **स्वात्मानं** निःसाधनजनोद्धारकं 'अहृथापृतमि'ति वाक्यात् । **स्वं महत्त्वं** जीवन्मुक्तेऽप्यणुत्वसमानाधिकरणमतोऽनुग्रहमात्रात् तन्निष्ठाकृतिरपि महती पुष्टिफलोपयुक्ता तु निरुपममहती **निरुपममहत्त्वं** च स्वम् । निजास्यमेवाम्बुजं तस्य रसैरास्वादनैः तदनुभवैरित्यर्थः । विरहस्य 'सेवित' इत्यनेन वक्ष्यमाणत्वाद्विरहतप्ते नेत्रे **शिशिरये**त्यधीष्टम्, अधीष्टे लोडिति ।

किमित्यधीष्टीक्रियते पुष्टौ प्रवृत्त्यर्थं साधनानां विद्यमानत्वान्मर्यादायां स्थितेरुत्कर्षाद्यथाशास्त्रं साधनानि विधीयन्तामित्याशङ्कमानं प्रत्याहुर्भगवन्तं **स्वदोषानिति ।**

स्वदोषान् जानामि स्वकृतिविहितैः साधनशतै-
रभेद्यांस्त्यक्तुं चापटुतरमना यद्यपि विभो ।

तथापि श्रीगोपीजनपद्परागाश्रितशिरा-
स्त्वदीयोऽस्मीति श्रीव्रजनृप न शोचामि मुदितः ॥ ७६ ॥

स्वदोषा 'गुणदोषौ शुभाशुभा'विति वाक्यादशुभाः संशोध्या अशुचित्वबाहिर्मुख्यादयस्तान् । ते च जलकूपीटयोनिश्रीभागवतानुसन्धानैः साधनैः संशोध्यन्तां इति चेत्तत्राहुः साधनानां शतं यत्र तादृशैः स्वकृतिविहितैर्वस्तुभिरभेद्यान् भेत्तुमयोग्यान् आसमन्तात् पुष्टिफलाय पटुतरं साधनं यथा भवति तथा तानभेद्यांस्त्यक्तुं च न शक्नोमि इति शेषः । ननु पुष्टावत्यन्तानुग्रहेतरसाधनासाध्यत्वात्साधनोक्तिर्विरुद्धेति चेन्न । 'संयोगे वियोगवृत्तिः प्रेमे'ति शाण्डिल्यसूत्रभाष्ये वियोगे संयोगवृत्तिरपि गृहीतेति तां वृत्तिमादाय दोषाभावात् । अपटुतरो धनापथ्यपीति वा पाठः । तर्हि शोचथ दोषसत्त्वे भक्त्यभावादिति चेद् 'एतꣳह वा व न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवमि'ति श्रुतेरेवंविदं शोको न तपतीत्याहुः तथापीति । श्रीगोपीजना आविद्याकलाः परिदृश्यमानाः तासामचतुरश्रीगोपीनां पद्परागो धूलिस्तत्पूजितशिराः गोप्यो मेघवद्वर्षन्ति अतस्तद्दर्शितलीलेन शिरोधृतं रजोऽतस्त्वदीयोऽस्मीत्यनुमाय पुष्टिर्मय्यस्तीति दोषाणां भक्त्यप्रतिबन्धकत्वं चाज्ञाव प्रमुदितो न शोचामि अतः संबोधनं व्रजनृपेति व्रजस्य निःसाधनस्य नृप ।

एवम्, 'आन्तरं तु परं फल'मिति 'सेवित' इति श्लोके वक्ष्यमाणपरफलार्थमपि विज्ञाप्य प्रासङ्गिके मध्याह्नशयनगोचारणेधीष्टेऽकार्षुः प्रियेति ।

प्रियासङ्केतकुञ्जीयवृक्षमूलेषु पल्लवैः ।
कृतेषु भावतल्पेषु क्रीडन् गोचारणं कुरु ॥ ७७ ॥

'मुदा चन्द्रावल्याः कुसुमशयनीयादि रचितु'मित्यादि श्रीगोस्वामिग्रन्थे । भावतल्पेष्विति बहुवचनेनेदानीन्तनकृतशय्यामन्दिरतल्पसङ्ग्रहः । कृतमार्जनमन्दिरवस्त्रशय्यामन्दिरे शय्यायाः कृतसेवाया यथाकालं तदुपर्याच्छादिताया दक्षिणपार्श्वे शय्याभोगं तदधोदेशे जलपात्रं च निधाय वामपार्श्वे ताम्बूलतष्टीमालाव्यजनानि चतुष्पट्टिका सूक्ष्मसिंहासनं च स्थापयेत् । 'मुखवासं सुरभिमत्ताम्बूलाद्य'मिति वाक्ये आदिपदात् । भावनात्रत्या श्रीहरिरायाणाम् । ततश्च 'इति शेषां मया दत्तां शिरस्याधाय सादर' इति वाक्योक्तं मालाताम्बूलादि ग्राह्यम् । पुष्टिमार्गीयं विलासं हृदि स्वाधीष्टमकार्षुः ।

सेवित इति ।

सेवितोऽत्र हरे रन्तुं गृहे मद्धृदयात्मके ।
निमीलयामि दृग्द्वारं विलसैकान्तसद्मनि ॥ ७८ ॥

'तं काचिन्नेत्ररन्ध्रेण हृदिकृत्ये'ति फलप्रकरणे वाक्यम् ।

ततो वस्त्रप्रक्षालनादिकं कुर्याद् वस्त्रेति ।

वस्त्रप्रक्षालनादुष्टसंसर्गजमनोमलम् ।
महत्सेवाबाधरूपं मम कृष्ण निवारय ॥ ७९ ॥

'अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं पर'मिति वाक्याद् दुष्टसंसर्गजमनोमलनिवृत्तिकामनया वस्त्रप्रक्षालनं 'स्वयं परिचरेद्भक्त्या वस्त्रप्रक्षालनादिभि' रिति सेवाप्रकरणे निबन्धस्य । आदिपदेन पुस्तकावलोकनमहाप्रसादग्रहणशयनव्यवहारादि ।

सायंसेवामाहुः । ततश्चतुर्थप्रहरे प्रसुप्तं प्रबोध्य फलादिकमर्पयेदिति । षड्घटिकात्मके दिने उर्वरिते प्रसुप्तं भगवन्तं प्रबोध्य गावो गोपाश्च व्रजे जिगमिषवोऽतः शीघ्रं जागृहीत्यादिभावनोक्तप्रकारेण व्रजभक्तसम्बन्धानुकरणेन प्रबोध्य फलमूलकन्दादिकमर्पयेदित्यर्थः ।

समर्पणे कीर्तनभक्तिमाहुर्यथेति ।

यथा गोवर्धने भुक्तं फलमूलादिकं हरे ।
रामेण सखिभिः सार्धं पुलिन्दीभिः समर्पितम् ॥ ८० ॥
तथा फलादिकं सर्वं भुङ्क्ष्व भावार्पितं मया ।
पुलिन्दीवद्भावदानात् सार्थकं जन्म मे कुरु ॥ ८१ ॥

गोवर्धने श्रीगोवर्धनसमीपे 'वटे गावः सुशेरते' इतिवत्सामीप्ये सप्तमी । **पुलिन्दीभिरिति** । 'पूर्णाः पुलिन्द्य' इत्यत्र व्याख्याने ता अप्युपभुक्ता इत्युक्त्या सान्निध्यात् । 'हन्तायमद्रि'रित्यत्र कन्दफलमूलादिकं पुलिन्दीभिराहृतं श्रीगोवर्धने स्थितं तदादिभिः समर्पितं प्रकरणाच्च 'उभयाकाङ्क्षा हि प्रकरणम्' प्रमाणमिति पूर्वतन्त्रकाराः । पुलिन्दीनां पूर्णत्वेन फलाद्याहार्याकाङ्क्षा। फलादीनामाहारकाकाङ्क्षा एवं च साहचर्यादुभयोरङ्गाङ्गिभावः । भावार्पितमित्यत्र भावः क इत्यपेक्षायामाहुः **पुलिन्दीवदिति** । पुलिन्दीनां यथा भावो दत्तः 'पूर्णाः पुलिन्द्य' इत्यत्रोक्तः स्मररुग्रूपः स तुभ्यं श्रीराधाश्रीसखीभ्यां मन्थरगत्या निकुञ्जे नीताय व्रजभक्तैर्दृष्टाय व्रजतरुणीकण्ठे हस्तायोरुत्थापनभोगं समर्प्य यतो मम जात इति । एतावत्पर्यन्तं जन्म निष्फलं गृहे त्वां सेवमानस्य वने गमनाभावादपूर्णलक्षणमिदानीं तु वनभावनाया अत्र मन्दिर एव कृतत्वात् कुङ्कुमादि मुखादौ तिलकादिरूपेण लेपधियैवोपस्थितस्य स्मरणरुक्छमनरूपं तादृशकुङ्कुमाद्यर्थेन सह वर्तमानं **सार्थकम्** । ननु कुङ्कुममिदानींतनानां कुङ्कुमतिलकरूपं वैष्णवलिङ्गं न तु तच्छमनाय लक्ष्मीप्रवेशद्वारमिति चेन्न । भावशमनार्थं धारणं भाववतामविरुद्धमिति । एतादृशं **सार्थकं मे** मम जन्म कुरु । अत्र किं मानमिति चेन्न । 'एककालं द्विकालं वा त्रिकालं वाऽपि पूजयेत्' इति निबन्धः श्रीभागवते च 'अथार्हयेदि'ति । वाराहेपि षोडशे च 'ततः सायं प्रकुर्वीत मम पूजां तु भक्तितः । नानाविधानि खाद्यानि फलानि विविधानि च । नवनीतं दधि क्षीरं घनमाज्यं सुगन्धितम् । विकारानैक्षवांश्चापि शर्करादीन् स्वशक्तितः । निवेद्य मां सताम्बूलं दक्षिणां च स्वशक्तितः । ततो नीराजयित्वा तु प्रणम्यापि च भक्तित' इति । अत्र व्यवस्था श्रीमदाचार्याणामाज्ञया विधीयते । 'सेवाकृतिर्गुरोराज्ञा बाधनं वा हरीच्छये'ति नवरत्नात् । विष्णुरहस्ये च 'अविज्ञाय विधानोक्तां हरिपूजाविधिक्रियाम् । कुर्वन्भक्त्या समाप्नोति शतभागं विधानत' इति । शतांशं फलं शतभागम् । तत्र भगवतांश्चाचार्याणां कुम्भनदासादीन् पृच्छतः प्रत्याज्ञा । नानाविधानि खाद्यानि शयनभोगे, उत्थापनसमये तेषां दुःकरत्वाच्च । अतः फलानि विविधानि कन्दमूलफलानि समर्पणीयानि । विकारानैक्षवांश्चापि शर्करादीनपि, सन्ध्याभोगे शीतलपानकरसादिकं नार्पयेदित्याज्ञया उत्थापने समर्पणीयम् । जलपात्रं पुनर्भर्तव्यं तदाज्ञात एव । भावनाप्यत्रास्ति महानुभावानाम् । ननु पुराणपाठक्रमो बलीयानाचार्योपदेशत इति पाठक्रमोऽस्तु हीति चेन्न । पुराणस्याप्राप्तविधिनापि चारितार्थ्य श्चाचार्योपदेशस्यानुष्ठानस्मारणायैवाभिव्यक्तस्य बाधनायासामर्थ्यात् । तदिदं पूर्वतन्त्रे पञ्चमस्य नवमाधिकरणे चिन्तितम् ।

ततो घटिकानन्तरं भोगं विसृज्याचमनमुखवस्त्रताम्बूलमालोत्थितवेणुवेत्रचतुष्पाद्यः समर्प्याः । तदनन्तरं कृत्यमाहुः । ततो व्रज आगच्छन्तं विज्ञापयेद् **बलभद्राद्य** इति ।

बलभद्रादयो गोपा गावश्चाग्रे च पृष्ठतः ।
गोपिकावेष्टितो मध्ये रणद्वेणुर्व्रजागमात् ॥ ८२ ॥
दिवा विरहजं तापं व्रजस्थानां यथाहृतम् ।
तथा मल्लोचने नाथ शिशिरीकुरु संततम् ॥ ८३ ॥

द्रागेव श्रीगोवर्धननगे वेणुं क्वणन्नारूढस्तदाज्ञया बलभद्रादयो बलभद्रसंघट्टिनो गोपाः गावश्चाग्रे तत्रापि गावः पृष्ठतः । स्व पुनरात्मनो गोपाः गवां पृष्ठतः सर्वासां स्वयमात्मा कमलहस्त एकाकी वनं दृष्ट्वा स्वगोपेष्वागत्य वने दिदृक्षुभक्तदर्शनार्थं सार्थं त्यक्त्वाऽग्रेऽग्रे गत्वा भक्तान् रहस्स्थलं प्रदर्श्य ताभिर्गोपिकाभिर्वेष्टितो मध्ये रणद्वेणुर्बलभद्रादिसर्वसहितो व्रजस्यागमात् द्विधा विरहजं तापं व्रजस्थानां गोगोपिकानां गृहस्थितानां गोधूलिं दृष्ट्वानेकफलहस्तानामनेकखाद्यहस्तानां जलपात्रचतुष्पादीमुखवस्त्रताम्बूलाभरणाचमनपात्रवस्त्रहस्तानां परस्परं दत्तकरतालकानां सन्ध्याभोगस्वीकारेण हृतवान् । तापपदस्य नपुंसकत्वे तथैव । तथा नामैवंप्रकारेण मल्लोचने शिशिरीकुरु सन्ततं निरन्तरम् । ततो यत्किञ्चिन्मोदकादि समर्पयेत् । ततो विज्ञापनानन्तरं मोदकादीत्यत्रादिपदेन पूर्वोक्तं व्रजभक्तहस्तगतं सर्वम् ।

कीर्तनमाहुः श्रीति ।

श्रीमन्नन्दयशोदादिप्रेम्णा भुक्तं व्रजे यथा ।
भोजनं कुरु गोपीश तथा प्रेमार्पितं हरे ॥ ८४ ॥

अत्र भावनानुरोधेनार्थाच्छ्रीमन्नन्दयशोदे आदी यासां व्रजभक्तानामित्यतद्गुणसंविज्ञानो बहुव्रीहिः । अत एव गोपीशेति संबोधनम् । तत आरात्रिकं कृत्वा शृङ्गारोत्तारणार्थं विज्ञाप्योत्तार्य पयःफेनं पयो वा समर्पयेत् । ततो व्रजभक्तानीतत्वेन स्मृताचमनमुखवस्त्रताम्बूलसमर्पणानन्तरं सखीबोधितपुत्रागमनत्यक्तपुत्रविरहया स्वकृतमालार्पितया स्वगृहे नीतपुत्रया पुत्रसंछादितोत्तरीयया कृतारात्रिकं स्मृत्वारात्रिकं कृत्वा उत्तार्येति ।

अत्र कीर्तनमाहुः राधिकेति ।

राधिकाश्लेषान्तरायभूषणोत्तारणात् प्रभो ।
निशि तत्कृतशृङ्गाराङ्गीकारार्थं प्रसीद मे ॥ ८५ ॥

शृङ्गारोत्तारणं तु पूर्वं मुकुटोत्तारणम्, पश्चात् काछनीपदवाच्यकटिवस्त्रोत्तारणम्, एवं क्रमेण यशोदया कृतमेव । तत्कृतशृङ्गार उष्णीषादितिलकतन्मुक्ताफलावलियुगलोत्थितमुक्तामालानासाभूषणचिबुकाभरणकर्णफूलकण्ठमालाकराभरणनूपुरमुद्रिकानखभूषणनीवीरचितः । पयःफेनमित्यादि ।

अत्र कीर्तनमाहुः व्रजेति ।

व्रजे स्वानन्दतो दोहं बलेन सह गोपकैः ।
कृत्वा पीतं पयःफेनं तथा पिब व्रजाधिप ॥ ८६ ॥

व्रजे गोस्थाने स्वानन्दतः 'आनन्दभु'गिति श्रुतेः, पीतमित्यनेनान्वयि, स्वयं दोहं कृत्वा गोपकैः शृङ्गारं रात्र्युषितं कृत्वा वनसंबन्धिनीं वार्तां पृच्छन्त्या यशोदाया अभिमुखे स्थितात्मभगवन्तं धारोष्णदुग्धपानार्थं विज्ञापकैर्गोपकैस्तथानन्दद्वारकत्वेन प्रकारेण पिब । ननु नाहं पिबामि, आनन्दः पास्यतीति, तत्राहुः व्रजाधिपेति । व्रजस्य स्वीकृतस्याधिप, अहमपि स्वीकृतः, अतः पिब । आचमनमुखवस्त्रताम्बूलानि ततः समर्पणीयानि । अग्रिमां व्यवस्थामाहुः । तमोदीपं निवेद्य निशि दुग्धान्नादि समर्प्य शयनार्थं विज्ञाप्य शयनं कारयेदिति ।

तमोदीपनिवेदने कीर्तनमाहुः वासरीयेति ।

वासरीयवियोगार्तराधिकास्यावलोकने ।
दीपार्पणाद्गोपिकेश प्रसीद करुणानिधे ॥ ८७ ॥

वासरीयवियोगार्तस्य भगवतो राधिकेत्यादि । 'अस्यैव चोपपत्तेरूष्मे'ति व्याससूत्रात् । राधिकाया वियोगस्य व्रजागमात् परिहृतत्वाच्च । तमोदीपस्य यत्किञ्चिद्दिवससत्त्वेऽर्पणस्य श्रीमदाचार्याज्ञाविषयत्वेन निशीत्युत्तरान्वयि फक्किकायाम् ।

निशि दुग्धान्नादिसमर्पणे कीर्तनमाहुर्दुग्धेति ।

दुग्धान्नादि यथा भुक्तं रोहिण्युपहृतं निशि ।
व्रजनायक भोक्तव्यं तथैव हि मदर्पितम् ॥ ८८ ॥

वाराहीयवाक्येपि विविधानि खाद्यानि भक्तसूपशाकसन्धितलवणपर्पटरूपाणि शयनभोगे वाराहीयवाक्ये 'दधि क्षीरं घनमाज्यं सुगन्धितमि'त्यस्मिन् दधि तक्रलक्षकं क्वथितचणकचूर्णादिमिश्रित तक्रलक्षकं च 'कढी'ति लोके 'क्षीरं घनमाज्यं च सुगन्धितम् । एलाकर्पूरयुतं च पेयं तदि'ति गुप्तरसात् । क्षीरं च सुगन्धितम् । तत्र दुग्धान्नं यशोदया प्रथमं भोजितमिति दुग्धान्नादीत्युक्तम् । रोहिण्युपहृतमिति । गोष्ठे गते भगवति यशोदा भक्तसूपादिकं शयनभोगार्थमपचत्, ततो रोहिणीं पाकरक्षार्थं निरूप्य गोपगोपबालगोपीः पृष्ट्वा गोष्ठं गत्वा भगवन्तमुक्तवती, भोज्यं सम्पाद्य मयागतम्, स्त्रियो गृहे गायन्ति, रोहिणी भोजनकालं प्रतीक्षमाणास्ते इति, ततो भगवन्तमुत्सङ्गे कृत्वा, रामं चैकहस्तेन गृहीत्वा गृहे नीतवती, तदनन्तरं बलं दक्षिणभागे उपवेश्य स्वयं वामभागे उपविवेश, सखी जलपात्रं वामभागेऽधरत्, रोहिणीजित्तु ज्ञात्वा महास्थालीमानीय भगवदग्रे धृतवती, बलं दृष्ट्वा हृष्टवती, तद् रोहिण्युपहृतं तथैव पूर्वोक्तरीत्या रोहिण्युपहृतभोक्तृत्वेन । यशोदाजिद् दुग्धौदनं प्रथममत्याग्रहेण मुखेऽकरोत् । धूपदीपावर्घ्यं च यथादृष्टं कर्तव्यम् । ततो घटिकानन्तरं कृत्यमाहुः । ततस्ताम्बूलाचमनादिकं विधाय, आरात्रिकं कृत्वा, शयनार्थं विज्ञाप्य, शयनं कारयेदिति । आदिपदेन मुखवस्त्रमालाचन्दनस्थलपद्मजलानि, गुलाबजलमिति लोके । 'अथार्हयेदि'ति वाक्यात् । 'उपगायन्ति'ति स्मरणाद् गानं स्वस्य अन्यस्य वा शयनार्थमित्यादिपूर्वोक्तानुवादः ।

शयनार्थं विज्ञापने कीर्तनमाहुः 'गृणन्ति'ति स्मरणाद् भावेति ।

भावात्मकाब्जहृदयपल्यङ्के शेषरूपके ।
रमस्व राधया कृष्ण शयानो रसभावतः ॥ ८९ ॥

रसभावान् प्राप्येति रसभावत इत्यस्यार्थः । तदुक्तम् 'नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् । लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधि'मिति दशमसुबोधिन्यारम्भे ।

इदं च कीर्तनीयम्, तदाहुः अयीति ।

अयि व्रजसखि व्रज व्रजवधूकदम्बाम्बिका-
समर्हणफलीभवच्चरणपङ्कजस्यान्तिकम् ।
नितम्बमिलदम्बरक्वणितहेमदामाङ्गना-
वृतस्य नलिनावलीप्रतिभटप्रभस्य द्रुतम् ॥ ९० ॥

ननु श्रुतिरूपाणां वृत्तान्तं परित्यज्य ऋषिरूपाणां वृत्तान्तपरिग्रहे किं बीजमिति चेन्न । अत्र भक्तिवर्धिनीनवरत्नश्रीभागवतोक्तरीत्या सेवोपक्रान्ता, भक्तिवर्धिन्यां तु 'गृहे स्थित्वा स्वधर्मतः । अव्यावृत्तो भजेत् कृष्णं पूजया श्रवणादिभि'रित्युक्तम्, पूजायामपि 'भक्तिमार्गानुसारेण उपचारा मुख्या' इति भक्तिमार्गानुसार उक्तः । 'पत्रं पुष्प' मित्यत्र 'कुर्यात सर्वाणि कर्माणी' त्यादिपद्यत्रिके च भक्तिमार्गानुसारिणां प्रपञ्च उक्तः । अत्र च ऋषिरूपाणां वृत्तान्तप्रसक्तिः, न श्रुतिरूपाणाम् । ता

ह्यन्यपूर्वास्तासां त्यागोऽङ्गम् । एतासां तु ह्यत्यागः । 'अत्यागस्त्यागादुत्तम' इति निरूपयितुं साधनप्रकरणे व्रतचर्योक्तेत्यादि 'हेमन्ते प्रथमे मासी' त्यादिपद्येषु । तद्दृटिप्पण्यादौ च स्फुटम् । अत ऋषिरूपाणां परिग्रहः । तत्र अयीत्यनुनयः । 'अयि प्रश्नानुनययो'रिति विश्वात् । अत्राधिकारः कृतपुण्यपुञ्जानामृषिरूपासजातीयभाववताम् । तथा चोक्तं महाकौर्मे 'अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभु'मिति । पद्मपुराणेऽपि 'दण्डकारण्यवासिनामृषीणां श्रीकोसलेन्द्रे रिरंसाभर उक्तः । व्रजसखीति सम्बोधनं व्रजवधूनां कदम्बः सिद्धार्थस्तद्रूपमम्बिकायाः समर्हणं नत्फलीभवच्चरणपङ्कजं तस्यान्तिकं समीपं व्रज । नितम्बो हि कटितटः स्कन्धो वा, तत्र मिलदम्बरं तच्च कणितं शब्दयुक्तं हेमदाम हेमरज्जुः कट्याभरणरूपं कराभरणरूपं वा । तत्र ते आलिङ्गनविशेषे । तादृशहेमदामयुक्ताङ्गनानितम्बमिलदम्बरकणितहेमदामाङ्गना तया ताभिर्वा धृतस्य । किञ्च नलिनानां कमलानामावल्यस्तत्सदृशी प्रभा कान्तिर्यस्य पङ्क्तिसादृश्यमङ्गुलिद्वारा । क्रीडायामनेकत्वमप्येकस्याविरुद्धं योगिवत् ।

एवमष्टविधकामान्तर्गतोऽमर्यादभोगस्तमाहुः निर्भरमिति ।

निर्भरं क्रीडतोरालि कुञ्जे विगतवाससोः ।
अन्योन्यप्रभयैवासीदन्योन्यस्योचितांशुकम् ॥ ९१ ॥

कौ जायत इति कुञ्जः पृषोदरादिः । अन्योन्यप्रभया 'कोटिसूर्यसमप्रभ' इति पुरुषोत्तमसहस्रनाम्नि नाम्नश्चिक्रीडिषायाः प्रभानियामकत्वेन प्रभाया उचितांशुकत्वम् । नयनतेजोनुपहारकत्वं तत्तदवयवयोग्यत्वमुचितत्वम् । ततोन्योन्यप्रभयेत्यत्र 'प्रकृत्यादिभ्य उपसङ्ख्यानमि'ति वार्तिकेनाभेदे तृतीया अन्योन्यप्रभाभिन्नमन्योन्यस्योचितांशुकमित्यर्थः ।

श्रमशयनमाहू रतीति

रतिश्रमशयानयोरलसलोचनाम्भोजयोः
कलं किमपि कूजतोरभिमुखं मिथः सस्मितम् ।
रताङ्गभरिताङ्गयोर्मिलितजानुसंवाहने
पदाम्बुजतलानि मद्धृदि लुठन्तु राधेशयोः ॥ ९२ ॥

किमप्यनिर्वचनीयम् । रता च रतश्च रतौ तौ चाङ्गभरिताङ्गौ च तयोः । अङ्गो भूषणम् । एतादृशराधेशयोः पदाम्बुजतलानि । मिलितानि जानूनि तेषां संवाहनार्थं निमित्ते सप्तमी चर्मणि द्वीपिनं हन्तीतिवत् । मद्धृदि लुठन्तु लुट लुठ उपघाते भ्वादिः परस्मैपदी सेट् प्रार्थने लोट् । 'प्रार्थिते वा ततः किं स्यादि'त्यस्य रत्यतिरिक्तविषयत्वाद् 'रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढ' इत्यत्र तथा निश्चयात् । दाक्षिण्येन गच्छतु । 'उपसामर्थ्यदाक्षिण्ये'ति विश्वाद्, हन हिंसागत्योरदादिः परस्मैपद्यनिट् ।

अतिदुर्लभत्वात्सन्दिहानाः फलाप्तौ संशयमाहुः केलीति ।

केलीश्रान्तशयानश्रीराधाश्रीशपदसरोजानि ।
कृपया कृतानि मदुरसि कदानु संलालयिष्येऽहम् ॥ ९३ ॥

अनु संशये (अनु संशये चेति) अनु पश्चाद्वा 'पश्चात् सादृश्ययोरन्वि'ति विश्वकोशे । मत्कर्तृकं संलालनं भविष्यत्कालिकं अनु संदिग्धमित्यर्थः ।

विज्ञापनामाहुः प्रातरिति ।

प्रातः कुञ्जगृहाद्बहिर्यदि समागत्य स्थिता त्वं भवस्य-
म्भोजाक्षि ददासि चर्वितमिदं चाकार्यं हस्तेन तु ।
ताम्बूलस्य यदा पुनस्तदिह सच्छिद्रस्य मुक्त्यापि च
कार्यं किं सततं प्रसीदसि यदि त्वं स्वामिनीत्थं तदा ॥ ९४ ॥

हस्तेनाकार्यं सच्छिद्रस्य मम । सच् छिद्रं जीवरूपं यस्य देहादिसङ्घस्य । पुष्टिफलस्यात्यन्तानुग्रहसाध्यस्य मुक्तजीवापेक्षाभावेपि मार्गरीत्या ज्ञानिनो मर्यादाभक्तस्य वा पुष्टिभक्त्युक्तेर्न दोषः । **मुक्त्यापि कार्यं च किम्**, न किमपीत्यर्थः । 'तदापीतेः संसारव्यपदेशा'दिति व्याससूत्राद् अपीतेर्मोक्षस्य । **त्वमित्थमहोरात्रं सततं** निरन्तरं **प्रसीदसि** । ननु सायं सेवां विधाय न किञ्चित् कृत्यम्, प्रातः पुनस्ताम्बूलचर्वितग्रहणमिति कथमहोरात्रं सततं प्रसीदसीत्युक्तमिति चेन्न रात्रौ ताम्बूलचर्वितग्रहणानन्दिना स्थितं निद्रा तु सेवायामालस्याभावायेति सततमेवेति । ननु संसारवन्मुक्तेरपि हेयत्वं यत्र तादृशं चेत् पुष्टिमार्गीयं तत्त्वम्, तदा मुक्तेः पुरुषार्थत्वबोधिकायाः श्रुतेः प्रतारकत्वमापततीति तद्बोधकप्रमाणानां तत्स्तुतिमात्रपरत्वमिति चेन्न 'सूक्ष्मं प्रमाणत' इत्यादिसूत्रेऽस्याः शङ्काया निरासात् ।

एतावती श्रीगोपीनाथजितां पद्धतिरूपा कृतिः ।

ननु सगुणं ब्रह्मेदम्, न तु निर्गुणमिति चेत् तत्राहुः श्रीति ।

श्रीवल्लभाचार्यमते फलं तत्प्राकट्यमत्राव्यभिचारिहेतुः ।
प्रेमैव तस्मिन् नवधोक्तभक्तिस्तत्रोपयोगोऽखिलसाधनानाम् ॥ ९५ ॥

निर्गुणं ब्रह्माखिलसाधनान्तर्गतशमाद्युपेतस्याध्यात्मिकचित्तशुद्धिमतो ज्ञानफलमक्षरम्, सगुणं च धारणाश्रयो विराडात्मा, स च 'ततो विराडजायते'ति श्रुतेः पुरुषावतारः । 'अतो ज्यायांश्च पूरुष' इति श्रुतेः । पुरुषस्तु ततो ज्यायान् उभयव्यपदेशाधिकरणोक्तो भक्त्यैकलभ्यः 'यमेवैष वृणुत' इति श्रुतेः । अतो निर्गताः प्राकृता गुणा यस्मात् तन् निर्गुणमितीदं निर्गुणमेव रूपम् । तदुक्तं 'मन्निष्ठो निर्गुणः स्मृतः' इति भगवन्निष्ठस्य निर्गुणत्वे भगवतो निर्गुणत्वे किमु वक्तव्यम् । यत्तु विश्वकोशे प्रकृतिपदं परमात्मनि प्रयुक्तम्, तदपि 'प्रकृतिमगन् किल यस्य गोपवध्व' इत्यत्र प्रकृतिपदस्य स्वरूपपरत्ववत् स्वरूपे प्रयुक्तम् । यद्वा । एतादृशफलप्राप्तिः कुतः साधनादित्याकाङ्क्षायामाहुः श्रीति । **फलं तत्प्राकट्यम्** । 'एतेन स्वरूपस्यैव फलत्वमुक्तं भवतीति मुख्यः सिद्धान्तः सूचितो भवती'त्यादि 'आदित्यादिमतयश्चाङ्ग उपपत्ते'रिति सूत्रभाष्यात् । **प्रेमैवेति** । साधनाध्यायोपान्त्ये 'श्रुतेश्चे'ति सूत्रे 'भक्तिरहस्यभजनं तदिहामुत्र फलभोगनैराश्येनैवामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्य'मिति श्रुतिरुदाहृता । मनःकल्पनं प्रेमापरपर्यायमित्युक्तं प्राक् । **नवधोक्तेति** वाक्यान्वयाधिकरणे उपपादितम् । **तत्रोपयोगो** नवधाभक्तावुपयोगः । उपासनायाश्चित्तशुद्धिद्वारा भक्तावुपयोगो भाष्ये ज्ञान उपयोगेपि भक्तावेवोपयोगो भक्तेर्ज्ञानव्यापारत्वात् । एवं साङ्ख्यं योगश्च स्वतो मुक्तिसाधकौ भिन्नौ । **अखिलसाधनानां** धर्मादीनामित्यर्थः । एतच्च 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववʼदिति सूत्रभाष्ये निरूपितम् ।

'ननूक्तं मर्यादाभक्तिफलं पुष्टिभक्तिफलं केन इत्यपेक्षायां तद्विशेषसर्वात्मभावेनेत्याहुः तत इति ।

ततो यदिन्दीवरसुन्दराक्षीवृतस्य वृन्दावननन्दितांहेʼः ।
सर्वात्मभावेन सदास्यलास्यमस्यानिशं सानु फलानुभूतिः ॥ ९६ ॥

---

१. अङ्गेरितिपाठः ।

ततः प्राकट्यानन्तरं **इन्दीवरसुन्दराक्षीवृतस्य वृन्दावननन्दितांह्रेरस्य सर्वात्मभावेन अनिशं सदास्यं लास्यं यत् सानु फलानुभूतिः ।** इन्दीवरं कमलं तद्वत् सुन्दरे अक्षिणी यासां ताभिः संवेष्टितस्य तापापहारिभक्तिमार्गीयज्ञानवतीसंवेष्टितस्य 'स्वामिन्यो गुरव' इति वाक्याद्गुरुसंवेष्टितस्य तस्य तापापहारिभक्तिमार्गीयज्ञानवत्त्वात् । एतादृशस्यांह्रेः भक्तिमार्गे भक्तिरूपांह्रेः सेव्यत्वात् । तदुक्तं 'विधिर्वा धारणव'दिति सूत्रभाष्ये । याम्यां पङ्क्त्यां 'हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम्' समर्चताम् । तयोर्द्वयोरेकस्य वांह्रेः समर्चनद्वारेश्वरार्चनं मर्यादायाम्, पुष्टौ तु 'वृन्दा भक्ति'रिति कृष्णोपनिषत् तयोपलक्षितं वनं **वृन्दावनं** तत्र **नन्दितस्य** समृद्धितस्यांह्रेः । अयमर्थः । वृन्दावने सच्चिदानन्दो भगवान् सेव्यः, तदुक्तं गोपालतापिनीये वृन्दया वृन्दावनमिति द्वादशमं वनमुक्त्वा 'द्वादशी तु भूम्यां तिष्ठति, ता हि ये यजन्ति, ते मृत्युं तरन्ति, मुक्तिं लभन्त' इति श्रुतौ कृष्णमूर्त्युक्तेः । ननु कथं कृष्णमूर्तिलाभ इति चेन्न । तत्र हि रामस्य राममूर्तिः, प्रद्युम्नस्य प्रद्युम्नमूर्तिः, अनिरुद्धस्यानिरुद्धमूर्तिः, कृष्णस्य कृष्णमूर्तिरित्युक्त्वा 'वनेष्वेवं मथुरास्वेवं द्वादशमूर्तयो भवन्ती'त्यत्र तृतीयावृत्तौ द्वादशी कृष्णमूर्तिर्द्वादशमे वृन्दावने सिध्यतीति । एवं च वृन्दावनसमृद्धितोंह्रिद्वारा 'स्वे महिम्नि प्रतितिष्ठती'त्यंह्रिद्वारा वृन्दावनसमृद्धितो भगवान् सेव्यः । विशेषस्तु स्त्रीभिः समृद्धिस्तद्रूपो वेणुगीते । **अस्य** प्रत्यक्षीकृतस्य 'शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः । त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुज'मिति वाक्यात् । भगवद्दत्तेन सर्वात्मभावेन पुष्टौ लिङ्गभूयस्त्वाधिकरणोक्तेनानिशं सदा **सदास्यं** दास्येन सह वर्तमानं **लास्यं** तौर्यकम् 'लास्यं तौर्यत्रिक' इति विश्वात् । तुर्यमेव तौर्यं तौर्यमिव यथावदज्ञातं वा तौर्यं तौर्यकं देवं 'देवस्तुर्यो विभुः स्मृत' इति मण्डूकोपनिषदः । एतादृशं दास्यं यत् **सा अनु** मर्यादाभक्तिमनु पश्चात् फलं भजनानन्दस्तस्या**नुभूतिः** । **सर्वात्मभावेने**त्यभेदे तृतीया । सर्वात्मभावस्वरूपं स्वस्मिन् विगाढभावात्मकमिति लिङ्गभूयस्त्वसूत्रभाष्यप्रकाशेऽस्ति । एवं च विगाढभावाभिन्नं यद्दास्यं तेन सह वर्तमानं लास्यं चेत्, लास्यविगाढभावात्मको भजनानन्दो भवत्येव । लास्यमनुभूतिर्भजनानन्दस्येति । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'ति गीतायाः । ननु 'ततो यदिन्दीवरे' त्यादिकं मर्यादायामस्तु, कुतः पुष्टिर्व्याक्रियते इति चेन्न । **सर्वात्मभावेने**तिपदात् । नहि सर्वात्मभावः पुष्टिं विहाय भवति । मर्यादायां सर्वात्मभावो निरोधलक्षणग्रन्थोक्त इति चेत्, लास्येनेति पदादित्यस्तु । न हि सर्वात्मभावाभिन्नं लास्यं मर्यादायामस्ति । 'कामस्तस्य दिदृक्षैवे'ति वाक्यात् साधनासाध्यत्वे सति प्रदानसाध्यत्वात् सर्वात्मभावस्य । 'प्रदानवदेव तदुक्त'मिति सूत्रभाष्य एतदुक्तम् । 'यत्र नान्यत् पश्यति, नान्यच्छृणोति, नान्यद्विजानाति, स भूमे'ति । एतेन सर्वात्मभावस्वरूपमेवोक्तं भवती'तिभाष्यम् । कृतात्मनिवेदनो हि पुष्ट्यवधिकारी न तु श्रुतात्मनिवेदनः । अत्रानुफलानुभूतिर्भवत्विति विज्ञापना ।

पुरुषोत्तमप्रकरणे 'अज्ञात्वा पुरुषं पुष्टिमकृतात्मनिवेदनः । धर्मलोपकरो यस्तु स नरो नरकं व्रजेदि'ति वाक्यं तत्राचार्यमुखादज्ञात्वेत्यर्थादाचार्यपादाब्जभजनं कर्तव्यत्वेनाहुः श्रीति ।

श्रीमदाचार्यपादाब्जं भवेद्येषां हृदि स्थिरम् ।
सदा श्रीराधिकाकान्तस्तत्र तिष्ठति सुस्थिरः ॥ ९७ ॥
अतः पितृपदाम्भोजभजनं सर्वथा मतम् ।
उत्तमानामितो नान्या कृतिः काचन विद्यते ॥ ९८ ॥

नान्या कृतिः पौष्टिकानाम्, मार्यादिकीनां त्वन्या कृतिरुपदिष्टात् ·साधनादन्या कृतिः । **उत्तमाना**मिति विशेषणात् । तथास्त्विति विज्ञापना ज्ञेया ।

किञ्च, विज्ञापनान्तरमाहुः **मानुष्येति** ।

मानुष्यप्राप्तिसाफल्यं यत्संसारविरागिता ।
सात्त्विकत्वस्य साफल्यं श्रीकृष्णस्यानुरागिता ॥ ९९ ॥

अत्र पूर्वार्धे 'नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् । मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महे'ति वाक्यम् । उत्तरार्धे 'सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः । भवान्तसम्भवा दैवात् तेषामर्थे निरूप्यत' इति निबन्धवाक्यम् । तथा च मनुष्याणां पूर्वार्धोक्तं सात्त्विकानां तु पूर्वग्रन्थोक्तं भवत्विति विज्ञापनात्र । सात्त्विकानामर्थे ग्रन्थकरणात् ।

मध्ये विज्ञापनायाः षट्श्लोकाः स्नानायोग्यैः स्नानविज्ञापनार्थाश्चिन्त्याः । पञ्चामृतस्नानोपयोगित्वाद् व्याक्रियन्ते । **पञ्चेति** ।

पञ्चामृतेन भावात्मरूपेणातिप्रियेण ते ।
स्नापयामि ततः स्नात्वा हृदि मे सुस्थिरो भव ॥ १०० ॥

'अकामः सर्वाकामो वे' ति वाक्याद् हृदि सुस्थिरत्वार्थं कारितं स्नानं सुस्थिरत्वफलकम् । कथं लेह्यखाद्यपेयैः स्नानमिति चेत्तत्राहुः **भावात्मेति** । भावा वक्ष्यमाणास्तदात्मरूपेण । अत एव **अतिप्रियेण** 'ऋतं पिबन्ता' विति श्रुतेः ।

वक्ष्यमाणभावानाहुः **प्रियेति** ।

प्रियाहास्यप्रभातुल्यरूपेण पयसा गवाम् ।
स्नानं समाचर विभो कम्बुस्थेन व्रजेश्वर ॥ १०१ ॥

प्रभा श्वेतरूपा । कम्बुः शङ्खः । यद्वा । विज्ञापना आहुः षड्भिः **पञ्चेति** । शयनसमये स्नानं भक्तिमार्गविरुद्धं प्रत्यहं, ग्रहणेऽविरुद्धं तत्राहुः **प्रियेति** । प्रियेति पूर्ववत् । **गवामिन्द्रियाणां पयसा** रसेनास्वादरूपेण **कम्बुर्गजस्तत्स्थेन** स्वात्तेन 'आत्तगजेन्द्रलील' इति वाक्यात् । **स्नानं** ष्णा शुद्धौ अदादिरनिट् । इन्द्रियशुद्धिं **समाचर** । श्रीउराणाजिच्छ्रीभीमसिंहजिद्रूपदा वाण्या प्रेरितोऽहं द्वितीयार्थकर्ता । यद्वा । जलस्थलभेदेन क्रीडा द्विधा तत्र स्थलक्रीडामुक्त्वा जलक्रीडां स्नानात्मिकामाहुः **पञ्चेति** । अत्र पक्षे ततः प्रियाभिः सह त्वां स्नापयामि, त्वं प्रियाभिः सह स्नात्वेति पूर्वश्लोके, द्वितीये च प्रियाभिः सह त्वं नीराणां नीरेण शङ्खस्थेन गाङ्गेनेति **गवां पयसा कम्बुस्थेनेति** पदत्रयार्थौ विश्वकोशात् **स्नान**मितरत् समानम् ।

राधिकेति ।

राधिकास्यामृतकरचन्द्रिकाविशदेन वै ।
सरसेन घनेनेह दध्ना स्नानं समाचर ॥ १०२ ॥

राधिकाया आस्यं मुखं तदेवामृतं चन्द्रस्तस्य **करः** प्रत्ययः किरणा वा तत्सम्बन्धिनी **चन्द्रिका** तद्वत् **विशदः** पाण्डुरस्तेन । पूर्वोक्तप्रयोजनायोक्तम् । **सरसेन** सजलेन । अम्लरससहितेन वा कम्बुस्थेनेत्यनुवर्तनीयम् । यद्वा । पूर्वार्धं पूर्ववत् । **दध्ना** श्रीनिवासेन वासेन वा शृङ्गारादिरससहितेन **घनेन** दृढेन **स्नानं** भयजनितचित्तोद्वेगस्य शुद्धिं मार्जनं **समाचर** । नात्र कम्बुस्थेनेत्यनुवर्तनीयम् । जलक्रीडापक्षे बहिःस्नाने शीतं प्रतिबन्धकं भक्तिमार्गे, अतो दध्ना वासेन हेतुना प्रियाभिः सह त्वं स्नानं समाचर । इतरत् समानम् । नात्र कम्बुस्थेनेत्यनुवर्तनीयम् ।

प्रियेति ।

प्रियाधरामृतस्पन्दमधुरेण महाप्रभो ।
शङ्खस्थितेन मधुना स्नात्वा मुदमवाप्नुहि ॥ १०३ ॥

प्रियायाः अधरामृतमधरजलं तस्य स्पन्दः प्रस्रवस्तद्वन्मधुरेण मधुररसवता । उत्तरार्धं स्पष्टम् । यद्वा । पूर्वार्धं पूर्ववत् । शङ्खस्थितेन सुगन्धद्रव्यस्थितेन मधुना जलेन । चन्दनपात्रस्थितेन जलेन स्नात्वा कामानुद्दीपनशुद्धिं विधाय मुदमवाप्नुहि । जलक्रीडापक्षे शङ्खस्थितेन जलेनेत्यर्थः । स्नानयोग्यं जलमिति चेन्न 'समः प्लुषिणे'ति श्रुतेर्विस्फुलिङ्गसाम्येनोपपत्तेः । भक्तेन शङ्खस्थापितेन जलेनेति वा । स्नात्वा अङ्गशुद्धिं विधाय मुदमवाप्नुहि ।

प्रियेति ।

प्रियास्नेहैकरूपेण घृतेन व्रजनायक ।
स्नानं स्नेहात्मकं कृत्वा स्निग्धतां प्रकटीकुरु ॥ १०४ ॥

विशषणं पूर्ववत् । स्निग्धतां भक्तिमत्तां भक्ततां वा । सुरतान्ते स्नेहो गच्छति स्नानानन्तरं प्रकटीभवत्यत उक्तं प्रकटीकुर्विति । यद्वा विशेषणं पूर्ववत् । घृतेन प्रदीप्तेन निर्णाशितेन पूर्वोक्तसुगन्धद्रव्यप्रदीप्तेन कामेन स्नेहात्मकं स्नेह आत्मनि मनसि यस्मात् स्नानात्तादृशं स्नानं सुरतान्तवैराग्यमार्जनं विधाय स्निग्धतां प्रकटीकुरु । जलक्रीडापक्षे घृतेन जलेनान्यत्पूर्ववत् । तथा च विश्वः 'घृतमाज्ये प्रदीप्ते च सलिले च घृतं स्मृत'मिति ।

प्रियेति ।

प्रियाप्रत्यङ्गसौन्दर्यमाधुर्यसमतां गतम् ।
तया शर्करया स्नात्वा प्रत्यङ्गोच्छूनतां व्रज ॥ १०५ ॥

प्रियायाः प्रत्यङ्गमङ्गमङ्गं सौन्दर्यं स्वार्थे ष्यञ् । सुन्दरं तदेव माधुर्यं प्रियं तत्समतां गतं यथा भवति तथा त्वं प्रत्यङ्गमुच्छूनतामुत्तुङ्गतां व्रज । कया तया प्रसिद्धया शर्करया स्नात्वेत्यर्थः । यद्वा उं शंभुं प्रति पलति गच्छति तादृशोपलारूपशर्करया स्नात्वा तच्छक्तियुक्तत्वेन केवलमन्मथमन्मथत्वमार्जनं विधाय भक्तमाधुर्यं प्रियताख्यं तत्समतां गतं यथा भवति तथा प्रत्यङ्गमुत्तुङ्गतां व्रज । भक्तभक्तियोग्यं रूपं मन्मथमन्मथत्वं तिरोभाव्य प्रकटीकुरु भक्तभक्तिमात्रयोग्यं रूपम् । 'उपला शर्करापि चे'त्यमरः । जलक्रीडापक्षे शर्करया कर्पररूपया कर्परः कटाहोण्डकटाहः 'कर्परः स्यात्कपाले च शस्त्रभेदकटाहयो'रिति विश्वः । 'शर्करा कर्परांशेऽपी'त्यमरः । अण्डकटाहांशो गङ्गा स्वर्गङ्गया प्रियाभिः सह स्नात्वा । अन्यत्स्पष्टम् । एवं शयनार्थं विज्ञाप्य शयनं कारयेदिति ।

एवं स्त्यानानां रसरूपस्य विज्ञापनपूर्वकशायनमुक्त्वा दैन्येन हरितोषणसाधनेन नवनीतमुखं विज्ञापयन्तः संयोगे वियोगवर्तनं कुर्वन्त आत्मनः शयनस्य कारितत्वाद् आत्मनश्च गोपिकादिभ्यो निजानन्ददानार्थं तद्गृहे गोपिकाप्रार्थितस्य शयनानन्तरं गतत्वाद् विरहे विज्ञापनमाहुः हेति ।

हा नाथ हा रमण हा करुणैकसिन्धो हा कृष्ण हा पतितपावन दीनबन्धो ।
संसारसागरमहोर्मिषु मज्जमानं मामुद्धर प्रणतपालक बालकृष्ण ॥ १ ॥

हा नाथ उपतापक संयोगेपि वियोगवर्तनलक्षणप्रेम्णा, हा विषादं करोमि । 'हा विषाद' इति विश्वात् । नाथ नवनीतयाचक । एवमग्रेपि । रमण रमु क्रीडायाम् । करुणैकसिन्धो । पुष्टिप्राकट्यात् पुष्ट्यनेकविहाररूपरत्नप्राकट्यान् नवनीतमुद्, करुणैकसिन्धुः, स्वरूपानन्ददानात् । कृष्ण सच्चिदानन्द । पतितानामपि पावन, किमुतास्माकम् । दीनबन्धुश्च । संसारोऽहन्ता-

---

१. स्निग्धानाम् ।

ममतात्मकसंसारः सागरोऽनेकभगवत्सेवोपयोगितदनुपयोगिमात्सर्यदुःखेर्ष्यादिनिधिः । गरेण नरकसाधकेन विषयेण विषेण सह वर्तमानो वा सगरः सगरस्यायं सागरः । तस्येदमित्यणिति सुधायाम् । महोर्मयो गुर्वाद्युपरि क्रोधात्मिका ऊर्मयो मात्सर्यदुःखेर्ष्यादिजा गुर्वाद्यतिरिक्ते क्रोधविषयनिन्दादयः तेषु मज्जमानं मुह्यमानं मामुद्धर सेवोपयोगिसंसारं स्थापय, अन्यं शोषय । किं साधनमिति चेत् तत्राहुः प्रणतेति । प्रणामः साधनम् । मर्यादाभक्तौ प्रेमसाधनत्वेपि वन्दनभक्तावुक्तसाधनत्वं कुरु । 'अकामः सर्वकामो वे'ति वाक्यात् । बालः कृष्णो बालकृष्णः । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचक' इति श्रुतेः । ब्रह्माण्डपुराणे च ।

'बालाय नीलवपुषे नवकिङ्किणीकजालाभिरामजघनाय दिगम्बराय ।
शार्दूलदिव्यनखभूषणभूषिताय नन्दात्मजाय नवनीतमुषे नमस्ते' ।

इति नवनीतचोरविज्ञापना ।

रूपसेवामुक्त्वा अविशेषेण नामसेवां 'आवृत्तिरसकृदुपदेशा' दिति सूत्रेणावृत्त्याख्यां विज्ञापयामासुः श्रीति ।

श्रीबालकृष्णेतिनाम सकलाभीष्टदं कलौ ।
जिह्वाग्रे वर्ततां तेन सदा मे कृतकृत्यता ॥ २ ॥

श्रीभिः शोभाभिर्बालोचिताभिर्युक्तो बालः पुरुषविधब्राह्मणोक्तोभयलिङ्गवांश्च स कृष्णः सच्चिदानन्द इत्यभिधायकं नाम । ननूभयलिङ्गवत्त्वं न बालस्य, किन्तु 'कारणगुणाः कार्ये समायान्ती'ति प्रवादमूलकः कार्ये एकाकिनि पुरुषे भयं ज्ञापितः पुरुषविधे भयं कारणात्मकमिति चेन्न । कार्ये भयस्य द्वितीयाभिनिवेशकृतत्वेन मायिकत्वे सत्युपपत्तेः 'भीषास्माद्वातः पवते भीषोदेति सूर्य' इत्यादीनां 'भीरपि यद्बिभेती'त्यस्य च विरोधाच्च । न च भयस्य ब्रह्मलिङ्गत्वमसम्भवीति शङ्क्यम् । 'अनुकृतेस्तस्य च' इति सूत्रेऽनुकृतेर्भयसत्त्वात् । न चैकरसत्वविरुद्धं बाल्यपौगण्डादिकं मुक्तसच्चिदानन्दत्वानुपपत्तिसाधकं चेति वाच्यम् । 'व्याप्तेश्च समञ्जस'मिति सूत्रे 'सर्वतः पाणिपादान्तमि'त्यादिश्रुतेः साकारमेव व्यापकमिति भाष्यात् । एवमग्रे सकलेति पदम् । कलाविति । 'कलिं सभाजयन्त्यार्या' इत्यादिवाक्यात् । कृतकृत्यतेति । पुरुषोत्तमयोगाध्याये 'यो मामेवमसम्मूढो जानाति पुरुषोत्तममि'त्यत्र पदजन्यपदार्थोपस्थितेरावश्यकत्वात्पदस्यापि कृतकृत्यतासाधने निवेशेनोक्तं कृतकृत्यतेति 'एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारते'ति गीतायाः ।

एवं विज्ञाप्य धृतानां शय्यानिकटे भोग्यानांशय्या श्रीगोवर्द्धननाथजिन्नवनीतरायजिदादि भोगानां ताम्बूलमालातष्टीजलपात्रव्यजनादीनां च भोगं विज्ञापयामासुरप्रियमित्यादिपञ्चभिः ।

अप्रियं सप्रियं वापि धनहीनस्य मे प्रभो ।
मद्गृहे भोजनार्थाय त्वागन्तव्यं महाप्रभो ॥ ३ ॥

अप्रियं सप्रियं वा आगमनं कर्तव्यम्, प्रश्विज्ञिताज्ञानादित्यर्थः । मे मम मत्सम्बन्धिभोजनार्थाय । ननु व्यापकोहमानन्दभुक् भुनज्म्येव गोपिकादिगृहस्थितोपीति चेत्, तत्राहुः मद्गृह इति । एतावत्पर्यन्तं प्रभुत्वं स्थितं मद्गृहागमनानन्तरं तु महाप्रभुर्जातः परिवृढोपि महान्जातः । आचार्योक्तपरिवृढाष्टकात् । तत्रत्य 'परा काष्ठा प्रेम्णः पशुपतरुणीना'मिति वाक्यात् । महत्त्वं च गृहस्थस्य मे उद्धरणसमर्थत्वम् । हे गृहस्थोद्धारक परिवृढ, हे महाप्रभो बालस्तु चङ्क्रणादावपि शेते इति मद्गृहागमनविज्ञापना । 'चलसि यद्व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम् । शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छती' ति न्यायेन भक्तमनःकलिलताजननात् ।

आगत्य तूष्णीं न स्थेयम्, किन्तु भक्तिमार्गत्वात् प्रीतिः क्रियतामित्याहुः येति ।

या प्रीतिर्विदुरार्पिते मुररिपो कुन्त्यर्पिते यादृशी
या गोवर्द्धनमूर्ध्नि या च पृथुके स्तन्ये यशोदार्पिते ।
भारद्वाजसमर्पिते शबरिकादत्तेऽधरे योषितां
या प्रीतिर्मुनिपत्निभक्तरचिते त्वत्रापि तां तां कुरु ॥ ४ ॥

विदुरार्पिते सेवने विशेषानुल्लेखः श्रीभागवते तृतीयस्कन्धे कथाश्रवणातिरिक्तसेवनाप्रसिद्धेः। तर्हि कथाश्रवणे **विदुरार्पित** इत्यस्तु कथाश्रवणार्पणास्मरणात्। तर्हि विदुरश्रुते इति मूलमस्तु 'इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधये'ति वाक्ये कीर्तनस्याप्युक्तेः। न च विदुरश्रवणादाविति वक्तव्यमिति शङ्क्यम्। अनर्पितस्यासाधनत्वात् । ननु विदुरमुक्त्या विदुरश्रवणादीनामर्पितत्वमनुमास्यत इति चेन्न । मूलाविरोधादोम् । न च विदुरार्पिते श्रवणादाविति वक्तव्यमिति वाच्यम् । अनुमितार्पणनिवेशे पदक्लिष्टतापत्तेः । न चानुमितार्पणविषयश्रवणादाविति वाच्यम् । शरीरगौरवात् । अतोर्पितत्वेन श्रवणादीनां ग्रहणं युक्तमेव। **कुन्त्यर्पितेऽ**खिलोदये । 'पृथयेत्थं कलपदैः परिणूताखिलोदय'इति वाक्यात् । **या प्रीतिः** 'मन्दं जहास वैकुण्ठो मोहयन्निव मायये'ति वाक्यात् । महिमज्ञानेनैक्यबुद्ध्या लये प्राप्ते ऐक्यप्रतिबन्धकमायामोहेन कुलसम्बन्धजा यद्यपि तथापि भगवान् प्रक्रान्तस्वविचारितमेव मोहं दत्तवान्। अद्भुतकर्मनिरूपणे **तां तां कु**र्वित्यत्र शाकपत्रे या तां पुनस्तां स्वकुलसम्बन्धजाम्। ब्रह्मबोधप्रतिबन्धानन्तरमपि सिद्धान्तमुक्तावल्युक्तो ब्रह्मबोधः। अद्भुतकर्मत्वाद्भगवतो नात्र मोहदानं विवक्ष्यते। **गोवर्द्धनमूर्ध्नि या प्रीतिः** यया हरिदासप्रीत्या गोवर्धनस्य मूर्ध्नि शिखरे व्रजस्यार्तिं मोचयन् गवां दिनतापात्मिकां चक्राम। उत्थापनभोगं भुक्त्वा । **तां प्रीतिं** दासप्रीतिं कुरु। सुदाम्नः **पृथुके** चिपिटे खाद्यभेदे तन्दुले 'पृथुकः पुंसि चिपिट' इत्यमरः। 'चिपिटः खाद्यभेद' इति विश्वः। **तत्र या प्रीतिः** सख्यन्नभोजनप्रीतिः। **यशोदया अर्पिते स्तन्ये** दुग्धे जग्धप्राये सति या प्रीतिर्विश्वदर्शनेन सुविस्मयजनिका । 'विस्मयोद्भुतगर्वयोरि'ति विश्वः। 'एकदार्भकमादाये'त्यादिसन्दर्भे सप्तमेध्याये स्पष्टमेतत्। उदासीनत्वश्रुत्या स्नेहो विरुध्यते इति कथमुदासीनस्यात्मनः स्नेह इत्याकाङ्क्षायामुदासीनस्य स्नेहो विरुद्धसर्वधर्माश्रयत्वेन निरूपितः। **स्तन्ये या प्रीतिरि**ति वा 'भगवान्भक्तभक्तिमा'निति वाक्यात् । **भारद्वाजो** व्याघ्राटाख्यो विहङ्गमस्तदर्पिते रावेऽद्भुतरसे तद्वद्वाग्व्यापारो भगवत इति तदर्पितो रावस्तत्र या प्रीतिरद्भुतरसजन्या। अद्भुतरसस्तावत् 'चित्रं महानेष बतावतारः क यत्र एषोभिनवैव भङ्गिः। लोकोत्तरं यत्नमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः'। बतेति हर्षे, भङ्गिः प्रकारः, एष सर्गः भारद्वाजशब्दसर्गः। अत्र लोकोत्तरदर्शनादिर्विभावः, नेत्रविकासाद्यनुभावः, हर्षादिर्व्यभिचारी, विस्मयः स्थायिभावोद्भुतरसः । **तां प्रीतिम्**। 'चित्रं महानेष बतावतारः क कान्तिरेषाऽकृतसाधनत्वम्। लोकोत्तरं कार्यमनुग्रहश्च कः प्रेम को नूतन एष सर्गः'। पुष्टिमार्गस्थस्य प्रभोर्वचः। कार्यं फलम्, अनुग्रहोनुभावः। **शबरिकाः** पुलिन्द्यः शबरिका पार्वती वा तद्धस्ते कामे। पुलिन्द्यो वेणुगीते। पार्वती पुराणान्तरे। **योषितां** व्रजभक्तानामधरे। 'अधरस्तु पुमानोष्ठ' इति कोशः। स्पष्टोर्थः। तां प्रीतिं कामात्मिकाम्। **मुनिपत्निभक्तरचिते** बहुगुणेन्ने। पत्नीत्यत्र ह्रस्वो व्याकरणान्तराद् यथा परिणूताखिलोदय इत्यत्र णू स्तुतौ व्याकरणान्तरान्न तु छन्दोनुरोधेन णू स्तुतावित्यस्य दीर्घः। यद्वा 'ङ्यापोः संज्ञाछन्दसोर्बहुल'मिति सूत्रे बहुलग्रहणात् संज्ञाभावेपि पत्नीशब्दस्य ह्रस्वः। अत्र-मद्वहे।

यशोदा यथा शयने भगवन्तं नेष्यन्ती गोपीद्वारा शय्याभोगं धारयति रात्रिर्महती बालगोपालः

क्षुधितो भविष्यतीति शय्यानिकटे भोगं स्थापयेति गोपीमाज्ञापयन्ती तद्द्वारा भोगं धारयति तद्भावेन धृतभोगे प्रीतिं कुर्वित्याहुः **यशोदाया** इति ।

यशोदायाः स्तन्ये तदनु नवनीते व्रजगवां
विहारे दध्यन्ने द्विजयुवतिदत्ते बहुगुणे ।
तथा मित्रात्प्राप्ते पृथुकवरमुष्टौ मुरहरे
यथा प्रीतिस्तां मे प्रकटय सुनैवेद्यनिचये ॥ ५ ॥

पूर्वश्लोकव्याख्यानेन व्याख्यातप्रायमेतत् । **मित्रा**त्सुदाम्नः **पृथुकवरमुष्टौ** पृथुकः खाद्यभेदस्तत्सम्बन्धिनी **वरा मुष्टिस्तस्याम्** । **यथे**ति यशोदादत्तत्वेन प्रकारेण उभयत्र स्ववृत्तित्वेन प्रकारेण 'वयं गोवृत्तय' इति वाक्याद् द्विजपत्निदत्तत्वेन प्रकारेण मित्रदत्तत्वेन प्रकारेण । **सुनैवेद्यं** तथा दत्तम्, तस्य **निचयः** शरदुत्सवादौ ।

प्रीतिकरणं विज्ञाप्य भोजने कृपाकरणे विज्ञापयांबभूवुः **विदुरस्ये**ति ।

विदुरस्य गृहे प्रीत्या यथा भुक्तं निजेच्छया ।
तथैव भुङ्क्ष्व नैवेद्यं मयि नाथ कृपां कुरु ॥ ६ ॥

व्याख्यातप्रायम् । **यथा** भक्तदत्तत्वेन प्रकारेण **निजस्य** भक्तस्येच्छया । **नैवेद्यमि**ति मातृचरणैर्नैवेद्यसमर्पणस्य कारितत्वात्प्राधान्येन नैवेद्यस्य ग्रहणम् ।

ताम्बूलतष्टीमालाजलभाजनव्यजनादिभोगं प्रार्थयन्तो 'यज्ञशिष्टामृतभुजो यान्ति ब्रह्मसनातनम्' इति गीतायाः भुक्तशिष्टान्नदानं स्वकीयोभ्योधीष्टं कुर्वन्ति स्म ।

यथा त्वं गोपिकादिभ्यो निजानन्दं प्रयच्छसि ।
तथैव भुक्तशिष्टान्नं भक्तेभ्यो यच्छ पुष्कलम् ॥ ७ ॥

यशोदया शायितः श्रीगोप्या प्रार्थितो ह्यात्मा सखीशतेन भृङ्गैरावृतो भक्तगेहानुत्थाय गच्छति । तदाभासोक्तताम्बूलादीनां भोगो भवति तद्द्वारा **निजानन्दं** रसस्वरूपानन्दं प्रयच्छति । आदिपदेन कर्मणि यज्ञशेषामृतभोजनाद् ब्रह्म संसिद्धिमास्थितो गृह्यते । तथैव यज्ञशेषामृतत्वेन यज्ञशेषामृतभोगदातृत्वेन वा प्रकारेण 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति सूत्रेण धर्मात्मकयज्ञस्यापि धर्म्यात्मकत्वं मत्वोक्तम् । तथा च भाष्यम् 'यदेव विद्यया करोति श्रद्धयोपनिषदा वे'ति । एवं च पूजया श्रवणादिकमुक्त्वा आदिपदेनोपनिषदा श्रवणादिभिः पूजेत्युक्तम् । अधुना किञ्चिदुच्यते । ननु 'नह्यन्तोऽनन्तपारस्य कर्मकाण्डस्य चोद्धव । सङ्क्षिप्तं वर्णयिष्यामी'ति प्रतिज्ञाय 'दत्त्वाचमन' मित्यादीनां वाक्यानां श्रीभागवते उक्तत्वात् तैर्दास्यप्रामाणिकीकरणमसङ्गतम्, दास्यार्चनयोर्भेदादिति चेन्न उपासनायामपि भक्तिमार्गानुसारेणोपचारा मुख्या इति 'दत्त्वाचमन-'मित्यादिवाक्यानां पाठादिक्रमानुरोधेनेदृशमर्चनं विधाय, तत्रेदृशदास्यभक्तिमार्गानुसरणम् । दास्यभक्तिमार्गानुसरणे सिद्धे दास्यभक्त्यनुसृतै'र्दत्त्वाचमन'मित्यादिवाक्यैर्दास्यप्रामाणिकीकरणं सङ्गतमेव । उभयोरेकमार्गीयत्वेनान्यापेक्षयैतद्ग्रहणस्य ज्यायस्त्वात् । ननु 'लोकवत्तु लीलाकैवल्य' मिति व्याससूत्रेण प्रामाणिकीकरणं सङ्गतमिति चेन्न । 'श्रीभागवतमार्गेण स कथञ्चित् तरिष्यती'ति निबन्धाल्लोकः श्रीभागवतं गृह्यत इत्यदोषात् । न च पञ्चमस्कन्धतृतीयाध्याये 'परिजनानुरागविरचितशबलसंशब्दसलिलसितकिशलयतुलसिदूर्वाङ्कुरैरपि संभृतया सपर्यया किल परम परितुष्यसी'ति लोकः कुतो न गृह्यत इति वाच्यम् । स्थानलीलात्वेन शुद्धलीलात्वाभावात् । अपिपदं सङ्गृहीतपदार्थानां चानियतत्वात् । पूर्वोक्तरीत्याऽनियतत्वे तु ह्यपिपदसङ्गृहीतपदार्थानां सुकरत्वात् । किञ्च,

‘आशिष आशासानानामेतदभिसंराधनमात्र’मिति । न च सप्तमेऽध्याये भगवत्परिचर्यानिरूपके ‘विविधकुसुमकिशलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधन’मिति वाक्यं लोकस्तदुक्तप्रकारोऽस्त्विति वाच्यम् । तत्राप्युक्तयैवैकभक्तिमार्गे पदार्थनियमसंभवात् । भक्तिमार्गस्य बहुविधत्वात् स्थानलीलात्वाच्च । वसन्तोत्सवादावस्या अप्यभिनिवेशाच्च । एवं च दास्यपूजापरिचर्याः सहैवानुष्ठिताः । ‘सर्वासामविरोध’ इति व्याससूत्रात् । दास्यपरिचर्ययोः पर्यायत्वेपि भक्तिमार्गस्य बहुविधत्वात् कश्चिदुपाधिराश्रीयते इति न दोषः ।पादसेवनमप्यत्र, पादयोः सेवनं पूर्वं कृत्वा भगवत्सेवने कृते सति भवति । तदुक्तं चतुर्थस्कन्धे ‘पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां' समर्चताम् । हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थित’मिति ध्रुवचरिते ‘कारणं पादसेवन’मित्युपक्रम्य श्रवणकीर्तनस्मरणवन्दनभक्तयोऽत्र निविशन्त एव । सख्यं फलम् । आत्मनिवेदनं त्वतिकठिनं कृतं सत्, श्रुतं तु वर्तत एवात्मनिवेदनम् तथा चाविहितभक्तिपक्षे श्रवणादित्रिकेण जनितप्रेम्णा स्वतः क्रियमाणदास्यादिनवकमुक्तमिति सूत्रोक्तसामान्यपक्षोऽत्रोक्त इति भावः । नन्वपेक्षितसमर्पणं दास्यम्, ‘पुराणं हृदयं स्मृतम्’ इति हृदयेनोरसाऽप्रमाणेन प्रामाणिकीकरणमयुक्तमिति चेन्न । तत्र ‘हृदयं मानसोरसो’रिति विश्वादर्थद्वयम्, तत् प्रकृते विरुद्धम्, अतो हृन्मनः ‘अयः शुभावहो विधि’रिति कोशाद् द्वयोर्हृदययोरर्थाववधृत्य मनःशुभावहो विधिर्हृदयं पुराणं भगवन्मनः शुभावहविधिरूपेण पुराणेन प्रामाणिकीकृतं दास्यमपेक्षितसमर्पणात्मकं जातमेवेति । अथ सेवाप्रकरणे ‘यथादिष्टतम’ मिति वाक्यात् स्वापेक्षितसमर्पणं विवक्ष्यते तदपि साम्प्रतम्, वाक्यादेव । नन्वपेक्षितसमर्पणं दास्यम्, तदेकेनापीन्द्रियेण भवतीति दास्यरूपा सेवा न सर्वात्मभावरूपेति चेन्न । सर्वैरिन्द्रियैरपेक्षितसमर्पणे बाधकाभावात् सर्वात्मभावरूपा सेवा तथा च सर्वोप्यात्मनोऽन्तःकरणस्य भाव एकादशविधो मनसो वृत्तिरूपः षष्ठीगर्भितकर्मधारयेण सर्वात्मभावपदार्थोऽत्र । तथा च नवमस्कन्धे अम्बरीषप्रसङ्गे ‘एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे । सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह’ इति । एवं पूर्वोक्तपरामर्शेन पूर्वं तु ‘स वै मनः कृष्णपदारविन्दयो’रित्यादिवाक्यानि ।न च सर्वत्रात्मेति भावो भावना यस्मिन् क्रियाकलाप इति बहुव्रीहिरस्तु, किं षष्ठीगर्भितकर्मधारयेणेति शङ्क्यम् । ‘याहि सर्वात्मभावेने’ति वाक्ये बहुव्रीहेरसंभवात् । न चैतद्वाक्यानुरोधेन क्रियाकलापमध्याहृत्य योजनीयम्, सर्वात्मभावेन क्रियाकलापेन याहीति चेन्न । सर्वोप्यात्मनो भावो भगवत्येवाधिकृत इति ‘सर्वात्मभावोऽधिकृतो भवतीनामधोक्षज’ इत्यस्य सुबोधिन्यां क्रियाकलापानध्याहारात् । न च सर्वोपि सर्वत्र भगवत्स्फूर्तिलक्षणांशेनाप्यन्यून आत्मनो भाव इति सुबोधिन्या अर्थ इति शङ्क्यम् । सर्वपदस्य सर्वात्मभावघटकत्वेन भगवत्स्फूर्तिपर्यन्तं तस्यार्थाभावात् । ‘स वै मनः कृष्णपदारविन्दयो’ रित्यादिवाक्योक्तैकादशमनोवृत्तीनां सर्वपदार्थत्वात् । तथा च ‘लिङ्गभूयस्त्वा’दिति सूत्रभाष्यम् । ‘यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे’ति। ‘एतेन सर्वात्मभावस्वरूपमेवोक्तं भवती’ति । न च ‘सर्वभूतेषु मन्मति’रित्येकादश एकोनविंशाध्याये वाक्याच्च सर्वस्मिन्नात्मभावः सर्वात्मभाव इत्यर्थोस्त्विति वाच्यं, प्रकृतेऽसम्भवात् । तादृश्या मतेः ‘एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् । मयि सञ्जायते भक्ति’रिति वाक्ये प्रेमभक्तिकारणत्वेनोल्लेखात् पृथगेव कारणत्वम् । एवमनेकार्थेषु षष्ठीगर्भितकर्मधारयो गृह्यते । न च प्रकृते क्रियाकलापविशेषणत्वेन बहुव्रीहिर्गृह्यतामिति वाच्यम् ॥ स्वमते षष्ठीगर्भितकर्मधारयकस्य सर्वात्मभावस्यैव प्राधान्यात्सर्वात्मभावस्य क्रियाकलापमित्येव विशेषणमस्तु । क्रियाणां कलापः संहतं समूहो यत्रेति । ‘सर्वदा सर्वभावेन भजनीयो व्रजाधिप’ इति कारिका चतुःश्लोकीस्था तत्र

सर्वभावेन भजनं न सर्वात्मभावेनेति सेवा सर्वभावेन न सर्वात्मभावेनेति सर्वात्मभावरूपा सेवेति व्याहतमिति विचारयति न च तस्मादिति । न च 'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः । आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तये'दिति सिद्धान्तमुक्तावल्यामेतद्विचिन्तनमिति वाच्यम् । तत्र लघुस्वमार्गस्यैकादशैकोनत्रिंशाध्यायोक्तस्य ग्रहणात् । ननु 'मामेव सर्वभूतेषु बहिरन्तरपावृतम् । ईक्षेतात्मनि चात्मानं यथा खममलाशय' इति वाक्येन बहुव्रीहिरेवास्त्विति चेत्सत्यम् । 'सर्वदा सर्वभावेन भजनीय' इत्याचार्यकारिकायामपि तथात्वेपि श्रीमदाचार्यमतत्वात् । श्रीगोस्वामिनां मते तु 'सदा सर्वात्मभावेन भजनीय' इति कारिकायास्ते तु व्रजरत्नात्मका इति मन्मतिरिति ह्या'त्मानन्दसमुद्रस्थ'मित्यस्य टीकायाश्च सर्वात्मभावे गोस्वामिमताङ्गीकारात् । भाष्येपि सार्धाध्याये तत्प्रणीते प्रदानवत्सूत्रे लिङ्गभूयस्त्वाधिकरणे चैतद्विचारात् । तन्मते षष्ठीगर्भितकर्मधारयेण निर्वाहः, न तु बहुव्रीहिणा । न चाचार्यमतमस्तु गोस्वामिमतात्प्रबलत्वादिति वाच्यम् । सर्वात्मभावविषये ह्याचार्यभाष्याभावात् । भाष्यं तु 'यत्र नान्यत्पश्यती' त्याद्युक्तं षष्ठीगर्भितकर्मधारयं द्योतयति, न तु बहुव्रीहिमिति तेन भाष्येण सर्वं सुस्थम् । एतेन षष्ठीगर्भितकर्मधारयस्याचार्याङ्गीकृतस्य पुष्टिसर्वात्मभावविषयत्वम्, मर्यादायां तु बहुव्रीहिरिति कुचोद्यं निरस्तम् । नापि दास्यरूपा सेवा सर्वभावरूपेति वक्तुं शक्यते । लघुस्वमार्गात् पृथक् सर्वभाववचनाद् एकादशे 'मामेव सर्वभूतेष्वि'त्यादिवचनेभ्यः । तस्मात् सुष्ठु सर्वात्मभावरूपा सेवेति । न च 'आत्मानन्दसमुद्रस्थ' मित्यस्य सर्वभावानन्दसमुद्रस्थमित्यर्थोस्तु । अस्याक्षेपस्य ते त्विति टीकासम्बन्धित्वात् । तत्र ते तु व्रजरत्नात्मका इति मन्मतिरिति स्वमतित्वाच्च । उक्तार्थस्य ज्ञाने सन्निवेशाच्च । 'सर्वदा सर्वभावेने' त्यत्र करणे तृतीया नाभेदे 'प्रकृत्यादिभ्य उपसङ्ख्यानमि'ति वार्तिकेनाभेदासम्भवात् । न च सिद्धान्तमुक्तावल्या आचार्यकृतत्वेन सर्वभावानुरोधेन तनुजा सेवा व्याकर्तव्येति चेन्न । सर्वात्मभावरूपसेवायाः सर्वभावाविरुद्धत्वात् । आत्मनां बाह्याभ्यन्तरपरमात्मनां आत्मोपनिषदुक्तानां निवेदनमात्मनिवेदनम्, सर्वात्मभावस्तु आन्तरमात्रात्मनिवेदनमिति भेदः ।

अथ शरणमार्गः पृथगस्ति 'पृथक्शरणमार्गोपदेष्टे'ति सर्वोत्तमात् । स च विवेकधैर्याश्रय इत्याहुः स च निबन्धे सेवाप्रकरणे 'जगन्नाथे विट्ठले च श्रीरङ्गे वैङ्कटेथवा । यत्र पूजाप्रवाहः स्यात् तत्र तिष्ठेत तत्पर' इत्यनया कारिकयोक्तः । तत्र जगन्नाथः पुरुषोत्तमः, विट्ठलो महाविष्णुः श्रीरङ्गोपि; वैङ्कटस्तु वैकुण्ठनाथः, तन्माहात्म्येषु प्रसिद्धाः । पुष्टिमार्गीयक्रीडाविशिष्टा सन्निहिता श्रीयमुनाजित् उद्दिधीर्ष्वी 'सत्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुतिप्रतिपादिता पद्मपुराणात् तत्र'ऐहिके पारलोके चे'ति वक्ष्यमाणोपसंहाराच्छरणमार्गं वक्तुं 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्मे'ति सर्वोपनिषदुक्तब्रह्मणो भक्तिमुक्त्वा 'सत्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुत्युक्तब्रह्मणो भक्तिं 'तत्र तिष्ठेत तत्पर' इति निबन्धोक्ततत्परपदवाच्यामुपचक्रमिरे हरितुर्येति । तदर्थं'प्रवृत्तं च निवृत्तं चे'त्युक्तं लघुस्वमार्गस्वरूपमुक्तम्, अधुना तु ।

'यन्न योगेन साङ्ख्येन दानव्रततपोऽध्वरैः ।
व्याख्यास्वाध्यायसन्न्यासैः प्राप्नुयाद् यत्नवानपि ।
तस्मात् त्वमुद्धवोत्सृज्य नोदनां प्रतिनोदनाम् ।
प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ।
मामेकमेव शरणमात्मानं सर्वदेहिनाम् ।
याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयम् ।

१.–मनः । २. मया स्या अकुतोभयम् ।

इत्येकादशसर्वस्वं भगवान् स्वयमुक्तवान् ।
आत्मानं हि स्वयं वेद तस्मादन्यवचो मृषा'

इति सर्वनिर्णयोपान्त्ये प्रवृत्तनिवृत्तोत्सर्गेण भगवत्सङ्गजसर्वात्मभावेन 'मां याही'त्युक्ते सर्वात्मभावस्य प्रदानसाध्यत्वात् प्रवृत्तनिवृत्तोत्सर्गेण ।

'मत्सङ्गान्मामुपागता'इति श्लोकोक्तमत्सङ्गं निन्द्यत्वाभावार्थं गुरूणामाहुः वृन्देति ।

वृन्दारण्यगतं रासरसोन्मत्तमतं गजम् ।
बबन्ध गोपबालैका बहु शृङ्खलया निशि ॥ १ ॥

रासरसोन्मत्तमतं रासे रससमूहे भक्तिरसेनोन्मत्तमपि मतं पूजितं संमतम्, वा गोपालतापिनीये 'बल्लवीनयनाम्भोजमालिने नृत्यशालिने नम' इति ब्राह्मणस्य 'श्रीकृष्ण रूक्मिणीकान्त गोपीजनमनोहर । संसारसागरे मग्नं मामुद्धर जगद्गुरो'इति च ब्राह्मणस्य । गजं गजमिवात्तगजेन्द्रलीलम् । एका मुख्या । आत्मवशीकरणसमर्थभक्तिमत्या शृङ्खलया प्रेम्णा 'पराकाष्ठा प्रेम्णः पशुपतरुणीना'मिति परिवृढाष्टकात् । बहु यथा भवति तथा पुष्टिमार्गीयसर्वात्मभावेन बहुरूपम् । मध्ये विरहाङ्गीकारात् । बद्धा । बह्वी च शृङ्खला बहुशृङ्खला तया एकत्वमविवक्षितम् । बहुविलासेन प्रेम्णा ।

हरितुर्यप्रियाभक्तिमाहुः ।

हरितुर्यप्रिये कृष्णे प्रेम्णा भोज्यं मदर्पितम् ।
अङ्गीकुरुष्व कृपया सफलं जन्म मे कुरु ॥ २ ॥

एतस्या नाम कृष्णा, तस्याः सम्बोधने कृष्णे इति । भोज्यं खाद्यलेह्यचोष्यपेयरूपं वस्त्राभरणमालाधूपदीपजलपात्राचमनमुखवस्त्रताम्बूलयमुनाष्टकपाठानामुपलक्षकम् । भक्तिदानेन वैराग्यरूपफलेन सह वर्तमानं जन्म मम 'जनयत्याशु वैराग्य' मिति वाक्यात् ।

वन्दनं पूजायां न निविशत इत्यत्र भक्तावपि पृथगेवाहुः नम इति ।

नमस्ते सच्चिदानन्दरसरूपिणि सूरजे ।
कुमारीष्विव मे देहि श्रीकृष्णे भावमुत्तमम् ॥ ३ ॥

पूर्वार्धोक्तं रूपं पद्मपुराणयमुनामाहात्म्ये 'त्रयी रसमयी सौरी ब्रह्मविद्या सुधावहा । नारायणीश्वरी ब्राह्मी धर्ममूर्तिः कृपावती'ति वाक्यात् । सूरो मिहिरस्तज्जे, मे मह्यम्, यद्यप्युत्तमं भावं व्यसनात्मको भावः साधनप्रकरणे 'उत्तमः फलपर्यन्त' इत्यत्र कारिकायां विवृतः, तथापि स न सूर्यजायै दत्तोऽपि तु भवाय दत्तः, अतः सूर्यजादत्तो भावः उत्तमः कुमारीषु फलसहितो भाव उत्तमस्तद्वत् फलसाहित्यं भावे देहीति । यमुनायाः कालिन्दीत्वे तु कलिं द्यतीति व्युत्पत्त्यान्योन्यकलहखण्डनं भगवता सह कलहावखण्डनं कलिकालदोषावखण्डनं च भावं देहीति । तिष्ठेतेत्यात्मनेपदेन 'प्रकाशनस्थेयाख्ययोश्चे'ति सूत्रेण लकारार्थप्रक्रियास्थेन जातेन 'गोपी कृष्णं तिष्ठत' इत्युदाहरणवत् ।

स्वाशयं प्रकाशयांबभूवुः त्वदीयेति ।

त्वदीयमधुसूक्तिभिर्व्रजजनेशसङ्गाशया
मनोजशरपीडिताः कथमपि स्थिता मेऽसवः ।
अतः परमये यदि प्रियतमाङ्गसङ्गो भवेत्
तदैव मम जीवितं विरहितावशाह्लीकरम् ॥ १ ॥

---

१. सत्सङ्गान्मामित्येकादशीयपाठः ।

'अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभु'मिति वाक्यादेवं भावः । वस्तुतस्तु साधनप्रकरणे 'प्रसादरूपा शक्तिः स्त्री भवती'ति सुबोधिन्याः स्त्रीत्वं प्रसादमापिरे । भर्तारं धारकं पोषकं वा । कामाद्धारणमप्रच्युतं भवतीति । काम इच्छा प्रेमेच्छेति स्थितमिति सुधीभिराकलनीयम् । **कथमपि** हृदि प्रकटेनाकाशरूपानन्देन । आकाशवद्धृदिति प्रत्ययादाकाशरूपानन्दस्य प्रकारता । **अये** विषादे विरहात् । कथमपि स्थितानामसूनां स्थितिविचारस्त्वया कर्तव्य इति ।

श्रीयमुनाजिदुक्तावाहुः श्रीति ।

श्रीगोकुलनाथोऽस्माकमैहिकं पारलौकिकं च ।
स्वयमेव जातोस्तीति किमस्माकं विचारणीयमस्ति ॥ २ ॥

अत्र द्वितीयतुरीयपादयोर्व्यत्ययः, आर्यान्तरत्वात् । 'यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयकेपि । अष्टादश द्वितीये पञ्चदश चतुर्थके सार्ये'ति । अत्रा'स्माकमैहिकं पारलौकिकं च श्रीगोकुलनाथः स्वयमेव जातोऽस्ती'त्यन्वयात् सखण्डब्रह्मज्ञानं सर्वस्मिन्नात्मभावो यत्र स सर्वात्मभाव इति व्युत्पत्तिकसर्वात्मभावरूपम् ।

एवं च व्रजभक्तानां भ्रमरगीते उद्धवद्वारा ज्ञानोपदेशवदत्रापि स्वयमेव ज्ञानोपदेशं कारयिष्यतीति नास्माकं विचारणीयं किमप्यस्ति । तदुक्तं स्वप्नदर्शनाख्यग्रन्थे 'एवमुरुधास्रस्तं विलपन्ती मूर्च्छिताहमासं ततश्चिरेण श्रुतिपथागतप्रियवंशीनिनादैर्मन्त्रैरिव विगतमूर्च्छाहमभवमि'ति ।

तर्ह्यस्माभिः कथमपि स्थितानामसूनां स्थितिचिन्ता कार्येत्यत्र नेत्याहुः **चिन्तेति** ।

'चिन्ता कापि न कार्या, गोवर्धननाथोऽस्मत्कुल-
पतिरस्मद्धितमेव करिष्यति ॥ ३ ॥

'चिन्ता कापि न कार्या निवेदितात्मभिः कदापि । भगवानपि पुष्टिस्थो न करिष्यति लौकिकीं च गति' मिति नवरत्नात् ।

आशयान्तरं प्रकाशयन्ति स्म ।

किं ब्रुवाणि सखि प्रेष्ठविरहानलदाहिता ।
जीवामीत्येतदेवालं निरपत्रपतास्पदम् ॥ ४ ॥

हे सखि निरपत्रपतास्पदं यथा भवति तथा **जीवामीति** यत् **तत्** तस्मै जीवनायालं 'नमःस्वस्ती'ति सूत्रेण चतुर्थी तस्याः 'अव्ययादाप्सुप' इति सूत्रेण लुक् ।

वेदान्तिनां ज्ञाननिष्ठत्वेन क्रियाकृपाप्रश्नं चक्रुः **सखीति** ।

सख्येतल्लेखनीयं त्वयातियत्नेन राधिका (कान्तः) ।
किं कृपयिष्यत्यथवा मनोरथेनैव जन्मनिर्वाहः ॥ ५ ॥

हे सखि यमुनाजित् । **एतद्** वक्ष्यमाणं पत्रे **लेखनीयं** प्रश्नविषयम् । राधिका क्रिया 'क्रिया सा राधिका देवी'ति वचनात् **मनोरथेन इच्छया जन्म** आत्मतया शरीरस्वीकारो **निर्वाहः** निर्गतो वाहाद् वाञ्छाया एतादृशः । 'वाहस्तु मतभेदे वृषेहयो'रिति विश्वः । 'ईहा तूद्यमवाञ्छयो' रिति च विश्वः । **किमिति** प्रश्ने **मनोरथेनैव जन्मनिर्वाहः** किमिति प्रश्नः । **कृपयिष्यतीत्यत्र** कृपा कृपाभावाभावरूपापि सम्भवति अभावज्ञाने प्रतियोगिज्ञानं कारणमिति ।

प्रतियोगिनं कृपाभावं व्यक्तीकुर्वन्ति स्म मदिति ।

मदन्तःस्नेहवशतो मच्छरीरव्यवस्थितिम् ।
जानन्तोपि न जानन्ति तत्तूचिततरं हि वः ॥ ६ ॥

ममान्तःस्नेहो मनोजशरपीडाजन्यविविधभावोपशामकत्वेन आत्मविषयः। **मच्छरीरव्यवस्थितिः** पूर्वोक्ता विरहसामयिकी ताम्। **जानन्तः** 'शरीरेन्द्रियासुहीनानां वैकुण्ठपुरवासिनां' स्त्रीत्वं भगवत्सेवाननुकूलत्वलक्षणं न सम्भवतीति भगवत्सेवानुकूलत्वलक्षणपुंस्त्वविशिष्टास्ता इति पुंस्त्वेन निर्देशः। यूथाभिप्रायेण बहुवचनम्। **न जानन्ति** अग्निकुमारत्वेन भर्तृभावात् ताः प्रत्यज्ञानम्। भक्तेच्छयैतादृशलीलाप्राकट्याद**ुचिततरं वो** युष्माकं भगवता लीलाविशेषेऽङ्गीकृतानाम्।

अन्यथा कुतो न लीलायां प्रविष्टो येन कृपाभावो न भवेदिति चेत्, तत्राहुः **यथेति**।

यथा नर्तयति स्वामी वस्तुतस्त्वपराधिनम् ।
मां तथाहं तु नृत्यामि भृशं क्लिष्टोऽस्मि तेन हि ॥ ७ ॥

वेदान्तिनामस्माकं नन्दराजकुमारे नवजलदे वर्षति पूर्वोक्त इदं ब्रह्मेति सर्वात्मभावभवनादन्तर्यामिणश्च प्रत्यक्षाद् **यथा नर्तयति** गात्रविक्षेपं कारयति, **स्वामी**, 'अत एव चानन्याधिपति'रिति-सूत्रोक्तः श्रीपुरुषोत्तमः। **वस्तुतस्तु** श्रीमदाचार्याज्ञया निरुद्धोऽहं सर्वात्मभावुकः सर्वेन्द्रियादीनां ब्रह्मात्मकानामन्यत्रापकर्षेपि तदाज्ञेङ्गिताकरणा**दपराधिनं माम्**। **तेन** नृत्येन **भृशं क्लिष्टोऽस्मि** तेन 'तानि मृत्युः श्रमो भूत्वोपयेम'इति सप्तान्नब्राह्मणश्रुतेस्तानि वागादीनि, मृत्युः श्रमो भूत्वोपयेमे, राधिकाकृपायां त्वेवं न स्यात्। 'अनभ्यासाच्च वेदानामाचारस्य च लङ्घनान्मृत्युर्विप्रान् जिघांसती'ति। क्रियावेदयोर्गतप्रविवेकाभावात् पदार्थेऽपि। भगवांस्त्वक्लिष्टकर्मा, अयं तु क्लिष्टकर्मा मृत्युः।

तर्हि मृत्युकृतश्रमभयान् नात्रागन्तव्यमित्युक्तावाहुः **त्रपेति**।

त्रपावैराग्यराहित्याद् भवदार्तिजिहीर्षया ।
पुनस्तत्रागताविच्छां करोमि स्नेहयन्त्रितः ॥ ८ ॥

'सापत्रपाऽन्यतः' सा लज्जान्यतो भवतीभ्य इति, त्रपा विरहे जीवतो मे, तादृशी लज्जा **तद्राहित्यात्, वैराग्यं** विषयवैतृष्ण्यं तदभावात् 'कर्मेन्द्रियाणी'ति तृतीयाध्याये मिथ्याचारत्वं गीतोक्तं परास्तम्, भक्तिमार्गाधिकारश्च सूचितः। 'निर्विण्णानां ज्ञानयोगः कर्मयोगस्तु कामिनाम्। न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिद' इति वाक्यात्। **पुनस्तत्रागति**फलक**मिच्छा**करणं तत्कर्ताहम्। एतेन रतिमार्गे यत्र पूजाप्रवाहो यमुनादौ तत्राविच्छिन्नस्थितिनियमो निराकृतः। नन्वन्यादृशी लीलास्मत्सम्बन्धिनी तत्र विरुद्धाभिरस्माभिः संकुलितं स्थानं तस्मिन् आगतीच्छा कथं तत्राहुः **भवदिति**। भवतामार्तिर्विरहदुःखं तस्य हरणेच्छा तया प्रकारीभूतया। ननूक्तं विरुद्धा वयं कथमस्माकमार्तिहरणेच्छावान् भवान् इत्यत आहुः **स्नेहयन्त्रित** इति। विरुद्धा भगवदिच्छया क्रीडार्थं यूयं तत्र स्नेहयन्त्रणे किं ब्रुवे यतोहं प्रकृत्या विरुद्धेष्वपि स्नेहयन्त्रितः। गीतायां पञ्चमे 'इहैव तैर्जितः स्वर्गो येषां साम्ये स्थितं मनः। निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः। न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्। स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः' इति।

आशयविषयं वृत्तान्तं प्रकाशयति **परमिति**।

परं तु तदनुरूपं शरीरं नैव वर्तते ।
तथापि यदि पञ्चम्यां स्वास्थ्यं किञ्चिद्भविष्यति ॥ ९ ॥

तदा समागमिष्यामि दुःखं मा कुरुत प्रियाः ।

दुःखं विरहदुःखम् ।

वस्तुतस्तु विरहो नास्तीत्याहुः **सर्वेति** ।

सर्वेशो गोकुलाधीशो शरणा एव सर्वतः ॥ १० ॥

शरणा इत्यत्र 'शरणं गृहरक्षित्रो'रिति कोशः । 'भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् । आत्मत्वाद् भक्तवश्यत्वात् सत्यवाक्त्वात् स्वभावत' इति वाक्यात् । 'रक्षतीत्येव विश्वासः षड्विधा शरणागति'रिति पञ्चरत्ने ।

अत इति ।

अतश्चिन्ता न कर्तव्या भवद्भिः कृष्णसात्कृतैः ॥ ११ ॥

उक्ताद् दृश्यमानात् सन्दर्भाच् **चिन्ता** क्वेच्छा, ईश्वरः क्व, ययेश्वरं प्रादुर्भावित इति 'उत्कर्षश्चापि वैराग्ये' ममेश्वरोऽङ्गीकृतवान् किमुदासीनः क्लिष्टः किं व्यापको वा क्लिष्टः क्वाहम् क्वेश्वर इत्यादि **चिन्ता न कर्तव्या कृष्णसात्कृतैः** कृत्स्ना यूयं कृष्णाः संपद्यन्ते तथा कृताः कृष्णसात्कृताः यतः । अस्मिन्मार्गे 'सच्चिदानन्दता स्वत' इति निरोधलक्षणे । किञ्च ।

श्रीगोकुलजीवनः सर्वं भद्रमेव करिष्यति ।

श्रीगोकुलस्य निःसाधनस्य **जीवनो** जीवयिता, यूयं तु कृततपस्काः कुतः सन्देहो जीवनेपि। **किञ्च** ।

अहं यथा शीघ्रं दर्शनं प्राप्नोमि तथा विधेयं प्रत्यहम् ॥ १२ ॥

भवन्ती भगवांश्च विसदृशीः लीलाः परित्यज्य चित्तादोषजनकलीलाः कुर्वित्यधीष्टं चित्तदोषेषु भक्त्यभावाद् दर्शनं न प्राप्स्यामि । 'अदूरे विप्रकर्षे वा यथा चित्तं न दुष्यती'ति वाक्यात् । ततः स्वेषु चित्तदोषाजनकलीलारूपं विशेषणं विधेयमिति भावः, तदपि प्रत्यहम् ।

उपसंहरति शरणमार्गमैहिकेति ।

ऐहिके पारलोके च सर्वथा शरणं हरिः ।
संपत्स्वापत्स्वपि सदा शरणं हरिरेव हि ॥ १३ ॥

स्पष्टम् ।

एवं **तत्तद्रूपसन्निधानमेव** तत्तत्फलदानादिप्रयोजकमित्यर्थः **समासेन न तु व्यासेन** ।

अथ श्रीहरिरायप्रणीतं भावनात्रयम् ।

निवेदितात्मभिर्नित्यं स्वमार्गीया तु भावना ।
भाव्याभावप्रधानत्वात् तत्प्रकारो निरूप्यते ॥

स्वरूपभावनालीलाभावनाभावभावना इति त्रिविधा भावना, तत्र स्वरूपभावना प्रथमदशायामननुभूते स्वरूपे श्रुतमात्रे योगिवच्चिन्तनम् । विशेषस्तु प्रभुसंदर्शनाभावजनितार्तिसाहित्येन भक्तिमार्गीयत्वं यथाऽऽद्यमहिष्याः यथा वा भगवदाविर्भावात्पूर्वं व्रजवराणां प्रभ्वाविर्भावमभिकाङ्क्षमाणानां श्रुत्यादिरूपव्रजस्थानामेव ।

ततोऽनुभूते भगवति साक्षात्कारद्वारा वा लीलासहिते हृदि प्रविष्टे तद्विप्रयोगेण प्रागनुभूतलीलाभावना द्विविधा, सा च किंचित्स्वास्थ्यहेतुः लीलावेशे क्षणमात्रं तदभेदेनानन्दानुभवात् । स्वरूपभावनायां तु स्वरूपानुभवाविर्भाव एव यथा 'नन्दस्त्वात्मज उत्पन्ने' इति । यथा वा लीलादिभावनां विहाय संभूय गुणगाने 'जयति तेऽधिकम्' इत्यादिना स्वरूपाविर्भूतये तद्भावनया कृते स्वरूपाविर्भावः 'तासामाविरभूत्' इति लीलाभावनायां तु तद्रूपतापत्तिः यथा 'क्रीडामय्य एव जाताः' एतदर्थस्तु तदासक्त्या देहादिषु सर्वत्र क्रियासु ज्ञानेषु पदार्थेष्वखिलेषु चान्येषामन्यथात्वेन प्रतीतावपि ताः प्रभुलीलामेवासक्तिभ्रमन्यायेन सर्वत्र प्रतियन्ति इति तदात्मकत्वम् । यथा वा लोकेपि—

'परव्यसनिनी नारी व्यग्रापि गृहकर्मणि
तदेवास्वादयत्यन्तः परसङ्गरसायनम्' इति (पञ्चदशी ध्या. दी १४)

तेन तत्क्रियाभावनायां क्रियात्मकत्वमुक्तम् । यथा वा व्रजस्त्रीणामेव 'या दोहने' इत्यत्रोदितम् ।

भावभावना तु भावो हि भावयति नवीनतया रसपरवशं चेतः उत्पादयति स्ववासनया वासितं वा करोतीति भावः प्रेमाख्यो गूढः येन तत्स्वरूपे तल्लीलायां प्रवृत्तिः येन वा स्वरूपलीलादिसंबन्धिसुखानुभवः सर्वोपि क्षुधावत्स्वानुभव इव । स भावः स्वविषयं स्वरूपं लीलां वा प्राप्य तदानन्दं शीतलं जलमिवानुभूय किञ्चिच्छान्तो भवन् न देहेन्द्रियादिकं दाहयति तदभावे देहेन्द्रियादिनूतनताभावेन पूर्णविप्रयोगात्मककेवलभावानुभवो न भवतीति । यथा संयोगतारतम्येन तत्सुखानुभूतितारतम्यं तथा तापतारतम्येन केवलभावानुभवतारतम्यं तापश्च स्वास्थ्यलेशेपि ह्रसति । भगवत्संबन्धि तु सकलं ज्ञानगुणादि तापहारकम् यथा भगवति प्रविष्टानां मुक्तानां सदा तत्संबद्धानामेव संयोगानुभवस्तथा सदा तन्निष्ठानां तत्संबद्धानामेव विप्रयोगात्मककेवलभावानुभावः । ननु विप्रयोगाग्निना तीव्रेण देहादिदाहे कथं सर्वांशेन तदनुभव इति चेन्न विप्रयोगस्यापि स्वरूपात्मकत्वेन तेनैव तद्रक्षणात् । प्रकारस्तु पूर्वदेहान् स्वतापेन शुद्धान् विधाय तत्स्थितमलादि दूरीकृत्य वह्निसंबन्धेन काष्ठमिव, तेजोमयं विधाय यथा वियोगाग्निनाशो न भवति तदात्मकत्वात् मूर्तिवदधिष्ठानत्वेन तन्निर्माय तत्र भावात्मा बहिःप्रकटसमानाकारः सर्वलीलाविशिष्टः प्रविशतीति । स च विरहात्मा दुःखेनैवानुभूयते सर्वत्र फलानुभव इयमेव व्यवस्था । यत्फलं यथानुभूतियोग्यं तथैवानुभूयते यथा ब्रह्मानन्दः आत्मनैव, स्वर्गो देहाध्यासेन, भजनानन्दोऽलौकिकदेहेन्द्रियाद्यैरपि । लोकेपि नेन्द्रियान्तर्विषयं फलमिन्द्रियान्तरैर्गृह्यते तथा च विरहस्तदैवानुभूतो भवति केवलो यदा स्वरूपलीलाज्ञानगुणस्वास्थ्यवाक्यादिप्रतिबन्धकाप्रतिबद्धः केवलतापात्मको भावो भवति । स एव च कृष्णाख्यं पुष्टिभक्तिः स्वतन्त्रभक्तिर्वा यत्र भावातिरिक्ताखिलनैरपेक्ष्यम् । तस्य च सिद्धौ न प्रकारान्तरं भाति किं तु भावनैव 'भावो भावनया सिद्धः साधनम्' इति वाक्यात् । तस्यात्रेयं रीतिः । आदौ गुरुत्वेन स्वामिनीसमाश्रयः तत्रैव भावः सिद्धः तासामेव च स्वत्वं तद्दत्त एव प्राप्यते इति दानं च न साक्षात् किं तु भावनाद्वारैव । भावना तु पूर्वं ताः स्वसर्वस्वविरहतप्ताः वह्निरूपाः स्वमनसि समानीय तास्वपि यस्तापात्मको भावो भ्रमरगीतादौ प्रोक्तो यत्र सर्वनैरपेक्ष्यं तद्धृदि विधाय स्वास्थ्यहेतु निखिलं प्रभुसंबन्ध्यपि परित्यज्य केवलं तं भावमेव भावयति न स्वरूपं न वा लीलां न वा गुणांस्तदा तेन भावेन तापात्मकेन शोषणं ततस्तेनैव पल्लवता यथा वसन्ते घर्मेणैव वृक्षाणाम् । ततो भावस्य तस्य तस्मिन् नवीनदेहे स्थिरतया स्थितिः ततस्तस्य वैचित्र्यं विकलत्वमस्वास्थ्यं च तद्विधं यथा समुद्रनिमग्नस्य मज्जनोन्मज्जने तथा विरहभावरससमुद्रमग्नस्यापि विकलत्वमस्वास्थ्ये । ततश्चातिविगाढविप्रयोगे कृष्णास्ये आनन्दमात्रकरपादमुखोदरादिरूपवह्नौ प्रवेशस्ततस्तद्रूपता ततः कदाचित्प्रकटीकरणं तत्क्रियार्थम् । लोके तद्रूपेणैव तद्दानं संभवति ।

अथवा भक्त्यात्मकत्वात् सर्वत्र भावकहृदयदेशेषु तदेवास्यं प्रविष्टमस्ति तदाश्रयेणैव तद्भावनासिद्धिः इयं भावना मुख्यफलाप्तिसाधनं मुख्यं फलं तु विप्रयोगात्मकस्वरूपप्राप्तिः 'मयि ते तेषु चाप्यहम्' इतिवत् स्वस्य तद्रूपता तस्य च लीलाविशिष्टस्य स्वस्मिन् प्रवेशः यथा वह्निः काष्ठे काष्ठं वा वह्नौ तथा भावरूपेण भगवतस्तासु स्थितिस्तासां च भावात्मना भगवति स्थितिः तथा च भावरूपेणैवोतप्रोतपटवत्सततं यथासुखं स्थितिः लीलासृष्टौ भगवद्धृदये तदास्ये चैतस्य फलस्य साधनं तत्तापभावना, तस्य च सर्वत्यागः, तस्य च समर्पणम् । तेन कृतपुण्यपुञ्जानां समर्पितसर्वस्वानामाचार्यचरणाश्रितानां फलमुखभाग्यवतीनां सिद्धप्रेमभावानां परित्यक्ताखिलस्वास्थ्यहेतूनामेव सा सिद्ध्यतीत्यलमधिकनिरूपणेन ।

इति श्रीहरिदासविरचितं भावनात्रयम् ।

परिशिष्टविषयानुक्रमः ।

विषयः	श्लोकाङ्कः	पत्राङ्कः
प्रभुध्यानम्	१	१
दैवीभाग्याभिनन्दनम्	२	३
अलौकिकज्ञानादि	१	३
भावस्वरूपध्यानम्	१५-२१	४-१४
स्वरूपं प्रस्तोतुं मङ्गलम्	१	१४
तुरीयपुरुषार्थसाधनम्	२	१४
स्वरूपस्यानन्दत्वम्	३	१४
तत् सिद्ध्यर्थं सेवनम्	४	१४
भगवान् तद्गुणाश्च सेव्याः	५	१५
आचार्यसेवितानि स्वरूपाणि	६	१५
श्रीगोवर्द्धननाथधर्मिस्वरूपम् तत्पीठिकाभावना च	७	१६
श्रीनवनीतप्रिये ऐश्वर्यम्	८	१७
श्रीमथुरानाथे वीर्यम्	९	१९
श्रीविट्ठलेश्वरे यशः	१०	२१
श्रीद्वारकेश्वरे श्रीः	११	२१
श्रीगोकुलचन्द्रे ज्ञानम्	१२	२२
श्रीगोवर्द्धनधारिणि वैराग्यम्	१३	२२
श्रीमदनमोहने संयोगो धर्मात्मा रसः	१४	२३
औत्सङ्गिकेष्वनेकलीलानिर्देशः	१५	२४
शृङ्गारस्वरूपम्	१-१३	२५-३५
उत्सवानां भावना	३६	५९
प्राकट्यभावनम्	१-६	३६-४०
राधाष्टमी	२	४१
वामनाविर्भावः	१	४१
विजयदशमी	१-२	४१
दीपोत्सवः	१-२	४२
गोवर्द्धनपूजा	१-२	४३
अन्नकूटः	१-२	४३
प्रबोधिनी	१-२	४३ ४४
व्रतचर्या	१	४५
वसन्तः	१-२	४६
दोलोत्सवः	१-२	४६-४७
रामाविर्भावः	१-२	४७
श्रीमहाप्रभोरुत्सवः	१	४८
चन्दनयात्रा	१	४८
नृसिंहाविर्भावः	१	४८
ज्येष्ठाभिषेकः	१-३	४९
रथोत्सवः	१-३	५०-५१
हिन्दोलारोहणम्	१	५१
पवित्रोत्सवः	१-४	५१-५३
रक्षाभावना	५	५३
एवं प्रत्यक्षकरणे फलत्वं सेवायाः	६-९	५३-५५
सेवायां संयोगभावमुक्त्वा वियोगे विरहभावनम्	१-८	५५-५८
नित्यसेवाभावना	१०५	६०-९२
भगवन्मन्दिरप्रार्थना	१	६०
तन्मार्जनादि	२-३	६१
सिंहासनास्तरणम्	४	६१
जलपात्रभावनम्	५	६२
भोजनपात्राणां भावना	६	६२
प्रभोः प्रबोधनम्	७	६२
स्तवनम्	८-९	६३
नमनम्	१०	६३
शक्तिविज्ञापनम्	११	६४
श्रीमदाचार्यप्रार्थनम्	१२	६४
मङ्गलभोगविज्ञापनम्	१३-२२	६५-६८
उच्छिष्टदानप्रार्थना	२३-२४	६८
जलपात्रार्पणं तद्भावश्च	२५	६९
आचमनम्	२६	६९
मुखवस्त्रम्	२७	७०
ताम्बूलार्पणम्	२८	७१
स्नानार्थं विज्ञापनम्	२९-३०	७१
अभ्यङ्गम्	३१-३२	७२
उद्वर्तनम्	३३	७२
स्नानम्	३४	७२
प्रोञ्छनम्	३५	७३
शृङ्गारभावविचारः	३६-३८	७३-७४
अङ्गरागार्पणम्	३९	७४
वस्त्रार्पणम्	४०	७५
भूषणार्पणम्	४१	७५
गुञ्जामालार्पणम्	४२	७५
मयूरचन्द्रिकार्पणम्	४३	७५
अञ्जनम्	४४	७५
तिलकम्	४५	७६
पुष्पमालार्पणम्	४७	७६
वेणोः धारणम्	४८	७६
आदर्शदर्शनम्	४९	७६
गोपीवल्लभभोगः	५०	७७

विषयः	श्लोकाङ्कः	पत्राङ्कः
गोपार्पितपयःफेनं पयोर्पणञ्च	५१-५३	७७
आरात्रिकम्	५४	७८
श्रीनवनीतप्रियस्य प्रेङ्खान्दोलनम्	५५	७८
क्रीडनकादिनिवेदनम्	५६	७८
राजभोगार्पणे धूपः	५७	७९
दीपः	५८	७९
पात्रादिभावविचारः	५९-६२	७९
शङ्खोदकेन संस्करणम्	६३	८०
तुलसीप्रक्षेपः प्रार्थनं च	६४-६६	८१
महामन्त्रेण चरणयोस्तुलसीसमर्पणम्	६७-६८	८१
पादपीठार्पणम्	६९	८२
पुष्पमालार्पणम्	७०	८२
आरात्रिकम्	७१	८२
अनवसरभावनम्	७२-७७	८२-८४
द्वारपिधानभावनम्	७८	८४
अनन्तरकरणीयम्	७९	८४
उत्थापनेफलाद्यर्पणम्	८०-८१	८५
सन्ध्याभोगादिनिवेदनम्	८२-८४	८६
शृङ्गारोत्तारणम्	८५	८६
दुग्धं तत्फेनं चार्पणीयम्	८६	८६
तमोदीपनिवेदनम्	८७	८६
शयनभोगार्पणम्	८८	८७
शायनम्	८९	८७
कीर्तनेनानवसरभावनम्	९०-९५	८७-९०
फलनिष्कर्षः	९६	९०
श्रीमदाचार्यसेवनम्	९७-९९	९०-९१
पञ्चामृतभावना	१००-१०५	९१-९२
दैन्येन प्रार्थनम्	१	९२

नामसेवनम्

कृतसेवाचिन्तनम्	२ ७	९३-९६
शरणमार्गः	१	९७
श्रीयमुनाप्रार्थना	२-३	९८
त्रयोदशभिरन्तिमविज्ञप्तिः	१-१३	९८-१०१
